कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit. The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

3

९३

॥ भविष्य-पुराणम् ॥

A-389

3/93

॥ * ॥ अथ श्रीभविष्यमहापुराणं प्रारभ्यते ॥ * ॥

अस्य पुस्तकस्य पुनर्मुद्रणादयोऽधिकारा राजकीयनियमानुसारेण यन्त्रालयाध्यक्षेण स्वायत्तीकृताः सन्ति ।

सानन्दं धन्यवादः ।

अद्य वयं सानन्दं कृतज्ञतया तेभ्यो महाशयेभ्यो धन्यवादानाशास्महे, यैः परमोदारचरित्रैः स्वसंगृहीतप्राचीनपुस्तकालयेभ्य एतस्य श्रीमद्भविष्यमहापुराणस्य प्रतिपुस्तकानि मुद्रणार्थं साहाय्यकरणाय संप्रेषितानि । तेषां प्राचीनहस्तलिखितपुस्तकानां साहाय्येनास्माभिः श्रीमद्भविष्यपुराणं शोधयित्वा स्वकीये "श्रीवेंकटेश्वर" मुद्रणालये मुद्रयित्वा सकलविद्वज्जनानां पुरतः प्रकाशितम् । स एष तेषां महाशयानामेव महानुपकार इति यावन्तस्तेषामुपकाराः स्मर्तव्यास्ते तदीयोपकरणतो न्यूना एवेति ताञ्जगदुपकारकान्मन्यामहे । अथ येषां प्राचीनपुस्तकालयादस्य पुराणस्यादर्शपुस्तकानि लब्धानि तेषां नामान्यत्र प्रस्तूयन्ते–

१ श्रीमन्तमहाराजभोरसंस्थानाधीश्वराणां पंतसचिवशंकरायाभिधानां पुस्तकालयादेकं पुस्तकं समागतम्.

२ ब्रह्माणपुरनिवासिवेदशास्त्रसंपन्नगोपालकृष्णशास्त्रिसंवत्सरेत्येतेषां सकाशादेकं पुस्तकं समागतम्.

३ मुम्बईस्थश्रीमद्वल्लभसंप्रदायाचार्यवर्यगोस्वामि 'श्रीविठ्ठलेशमहाराजतनयश्रीपुरुषोत्तमलाल'महाराजानां पुस्तकालयादेकं पुस्तकं समागतम्.

४ औरंगाबादनगरनिवासिनां बृहज्ज्योतिषार्णवकर्तॄणां पण्डितवर्याणां 'श्रीहरिकृष्णवेंकटराम' इत्येतेषां पुस्तकालयादेकं पुस्तकं समागतम्.

५ नाशिकक्षेत्रस्थानां टकलेत्युपनामकानां वे० शा० सं० 'नानाशास्त्रिणां' पुस्तकालयादेकं पुस्तकं समागतम्.

६ अलीबागविषयांतर्गतनागांवग्रामस्थानां वे० शा० सं० 'दिनकरशास्त्रिपुराणिक' इत्येतेभ्य एकं पुस्तकं समागतम्.

७ नाशिकक्षेत्रनिवासिनां वे० शा० सं० 'धोंडशास्त्रिटकले' इत्येतेभ्य एकं पुस्तकं समागतम्.

८ अवधमण्डलान्तर्गतोन्नामप्रदेशान्तर्गततियरिनिवासितालुकदार 'श्रीमच्छ्रीकेशवसिंहजी' संगृहीतपुस्तकालयादेकं पुस्तकं समागतम्.

अन्यान्यपि खण्डितानि द्वित्राणि पुस्तकानि पूर्वमस्माकं परिश्रमेण लब्धान्यासन् ।

अस्तु । उपर्युक्तमहाशयैः स्वकीयपुस्तकालयाद्भविष्यपुराणप्रतिपुस्तकानि केवलं जगदुपकारबुद्ध्या मुद्रणसाहाय्यायास्माकं सविधे प्रेषितानि तेषामस्माकं, वाचकानां चोपरि महान्त उपकाराः सन्तीति नूनं मुद्रणार्थं पुस्तकसाहाय्यदातारो धन्या एवेति शतशो मन्यामहे ।

अस्य पुस्तकस्य प्रथमप्रतिपुस्तकोपार्जनप्रयत्नेन वैकुण्ठवासि वे० शा० सं० 'उद्धवाचार्य ऐनापुरे' इत्येतेषां साहाय्यमासीद्- अतस्तेषां बहूनुपकारान् स्मृत्वा विरम्यते ।

विद्वज्जनगुणग्राही–खेमराज श्रीकृष्णदास, "श्रीवेङ्कटेश्वर" मुद्रणालयाध्यक्षः–खेतवाड़ी–मुम्बई.

प्रस्तावना ।

अद्य समस्तविद्वज्जनानां पुरतोऽभिनवानन्दवृत्तान्तं निवेदयितुं समुत्सुकं चेतः । संसारसारपारावारपारीणश्रीमद्व्यासमहर्षिणा निःशेषजीवजातजीवातुभूतसद्धर्मप्रबोधैकहेतवे गम्भीरवेदसागरं निजमतिमन्थानेन विनिर्मथ्य विनिर्मितानि सभारतमहोपाख्यानानि सब्रह्मसूत्राणि किलाष्टादश महापुराणानीति सर्वतो विश्रुतमेव महानुभावानाम् । तत्रायं विशेषः—इमानि किलाष्टादश महापुराणानि क्वचित्क्वचित्पुस्तकरूपेण सन्ति क्वचित्क्वचित्तानि पुस्तकान्यप्यपूर्णानि खण्डितानि जीर्णपत्रतया हस्तेऽपि दुर्धार्याणि कीटोपदष्टानि मूषकचर्वितान्युपलभ्यन्ते । अहह ! केयमस्माकं धर्मपुस्तकानां शोच्यावस्था, येषामाधारेण वयं धर्मकर्माण्याचर्य परमं पदमारोढुमाशास्महे, तान्यस्माकं धर्मपुस्तकानि चरमामवस्थां प्रयातुं बद्धकटीनीति महदब्रह्मण्यम् ! ! !

अस्मिन्विषये भूयोभूयो विद्वज्जनैः प्रेरितोऽहं सर्वाणि महापुराणानि मुद्रयित्वा प्रकाशयितुं बद्धपरिकरतयोत्सुकोऽस्मि । कृतसंकल्पानुसारेण भूयांसं द्रव्यव्ययमारचय्यानेकदेशस्थितविद्वज्जनमहाशयसंग्रहालयेभ्यो बहुप्रतिकानि प्राचीनपुराणपुस्तकान्यानीय सहायकशास्त्रिमण्डलसहकृतसंशोधकशास्त्रिजनद्वारा सम्यक्संशोध्य प्रतिपुस्तकोपलब्धभिन्नभिन्नपाठभेदनिवेशनपुरःसरटिप्पणीप्रदानेन परिष्कार्य च सुन्दरसीसकाक्षरैः पुष्टचिक्कणपत्रेषु मया स्वकीये " श्रीवेङ्कटेश्वर " मुद्रणालये मुद्रयित्वा प्रकाशयितुमारब्धानि । तत्र च सर्वविद्वज्जननयनचकोरचन्द्रायमाणं सर्वतो विश्रुतमपि प्रायः प्रत्यक्षपदव्यामनुपलभ्यमानं भूत–वर्तमान–भविष्यत्कथानां प्रत्यक्षकल्पद्रुमवदतिस्पृहणीयकथानुसन्धानं भविष्यमहापुराणं मुद्रयितुं समुत्सुकेन मयाऽस्य महापुराणस्याष्ट प्रतिपुस्तकानि महता प्रयासेन देशदेशान्तरस्थितमहाराज–महाशय–विद्वज्जनानां संगृहीतप्राचीनपुस्तकालयसंग्रहेभ्यः संपाद्य खानदेशीयरावेरग्रामनिवासिपरशुरामभट्टतनयगोविन्दशास्त्रिणां समीपे दत्तानि, तैश्च प्रतिपुस्तकमेकैकं शास्त्रिणं पाठभेदाद्यवबोधनार्थं नियोज्य स्वयं संशोध्य पुस्तकान्तरोपलब्धपाठभेदान्स्थलविशेषावश्यकार्थयोजनां च टिप्पण्यां विनिवेश्य साधु सुपरिष्कृत्य मुद्रणार्थं समानीयत । तदेतन्मया संप्रति सुन्दराक्षरैः पुष्टचिक्कणपत्रेषु स्वकीये " श्रीवेङ्कटेश्वर " स्टीम्–मुद्रणालये मुद्रयित्वा प्रकाशितम् ।

अस्मिन्भविष्यमहापुराणे ब्रह्माण्डोत्पत्त्यादिविषयाः पुराणान्तरवदेव यथावस्थितपुराणलक्षणोपक्रान्ताः सन्तीति सर्वथा सम्मान्यमेव विदुषाम् । परं त्वितरपुराणापेक्षयास्मिन्महापुराणे प्रतिसर्गाख्ये पर्वणि भविष्यत्कथानां यदनुसंधानं दरीदृश्यते तत्सर्वथा श्रीमद्व्यासमहर्षीणां सत्यंसत्यं त्रिकालदर्शित्वं ख्यापयतीति महत्कौतुककरं विचारवताम् । यतः—धर्मराजराज्यसमयादारभ्याद्ययावद्भूतानां नानादेशनानावंशप्रसूतानामार्यदेशभूपालानां चरित्राणि तथा म्लेच्छ–यूरोपियन–रशियन–चीन–सिंहलादिप्रसूतानां भूपालानां चरित्राणि पातशाहादिपदानि च यथेतिहासमस्मिन्पुराणे दृश्यन्ते । किञ्चेतः परं भविष्यतां भविष्यभूपालानां वंश–वंश्यपुरुषचरित्र–धर्म–धर्मान्तरादिकथानुसन्धानं यावत्कलियुगावसानसत्ययुगारम्भपर्यन्तं कल्किप्रतापान्तं सुवर्णितं दरीदृश्यते । नानाविधधर्मार्थकाममोक्षसाधकव्रतदानादिमाहात्म्यानि चात्र पुराण सुवर्णितानि सान्ति । एतादृशं सुव्यवस्थितं सकलपरमार्थसाधनैकधुरीणमेतद्भविष्यमहापुराणं श्रमेण संगृह्य–मदीयं महापुराणमुद्रणप्रकाशनसाफल्यं प्रपुष्णन्तु विद्वांस इत्यभ्यर्थये ॥

संप्रति च द्वितीयावृत्तौ भूयोऽपि शास्त्रिमण्डलद्वारा संशोध्य पदच्छेदाऽऽवश्यकटिप्पण्यादि निवेशनपुरस्सरं संस्कार्य सुव्यवस्थया प्रकाश्यते । तदेतद्ग्रहणपारायणादिना कृतार्थयन्तु महानुभावा मामिति भृशमभ्यर्थयते ।

सकलविद्वज्जनकृपाभिलाषी—

क्षेमराज–श्रीकृष्णदास, "श्रीवेङ्कटेश्वर" मुद्रणालयेशः, मुम्बई.

अथ भविष्यमहापुराणविषयानुक्रमणिका।

अ०	प०	विषयाः
१	१	शतानीको व्यासं चातुर्वर्ण्यधर्मं चातुर्वर्ण्यश्रवणयोग्यधर्माद्याख्यानञ्च श्रोतुं पप्रच्छ स च त्वां सुमन्तुः श्रावयिष्यतीत्यवोचत् । ततः शतानीकेन पृष्टेन सुमन्तुना पुराणानां पापहारित्वमुपपाद्य विशेषतो भविष्यपुराणप्रशंसा परंपरया पुराणप्रवर्तनं तदीयपद्यसंख्यावर्णनञ्च श्लो० १०६
२	३	सृष्टिवणनं पुराणानां ब्रह्मपञ्चमास्यादुत्पतिवर्णनञ्च श्लो. १७३
३	७	गर्भाधानादारभ्य समासात्सर्वसंस्कारवर्णनमाचमनादीवीधिवर्णनञ्च श्लो. ९५
४	९	प्रणवार्थवर्णनसहितसावित्रीमाहात्म्यवर्णनपूर्वकोपनयनविधिवर्णनम् श्लो. ३२२
५	१३	स्त्रीणांशुभाशुभलक्षणवर्णनम् श्लो० १११
६	१५	स्त्रीशुभलक्षणसद्वृत्तकथनपूर्वकगृहस्थार्थोपार्जनधर्मकथनम् श्लो. ४४
७	१६	विवाहविधिवर्णनम् श्लो. ६८
८	१८	स्त्रीणां दुष्टादुष्टस्वभावपरीक्षणपूर्वकं तासु समुचितवर्त्तनकथनपूर्वकनरवृत्तवर्णनम् श्लो. ७२
९	१९	स्त्रीकरणीयपूर्वकागमप्रशंसाकथनम् श्लो. १७
१०	२०	स्त्रीदुर्वृत्तवर्णनम् श्लो. २२
११	२०	स्त्रीणां गृहधर्मविधिवर्णनम् श्लो. २१
१२	२१	स्त्रीभिर्विधेयानेकधान्यसंचयभृतकपोषणक्षीरादिसंग्रहः समयानुकूलस्वभर्तृसेवनादिप्रकारवर्णनम् श्लो. ५७
१३	२२	भर्तुः प्राग्जागरण–चुल्यादिमार्जन–पाकनिर्माण-तत्सम्बन्धिबान्धवाद्यादिधर्माधर्मविमर्शकरणपूर्वकस्वाचारप्रवर्तनस्य संरक्षणादिवर्णनम् । श्लो. ६६
१४	२३	प्रोषिते भर्तरि मंगलातिरिक्तमण्डनवर्जनादिवर्णनम् श्लो. ३२
१५	२४	स्त्रीधर्मवर्णनम् श्लो. ३२
१६	२५	प्रत्येकं तिथिषु क्षीराद्येकैकव्रतवर्णनपूर्वकप्रतिपन्माहात्म्यजन्यविश्वामित्रादिब्राह्मणत्वावाप्तिवर्णनम् श्लो. ६३
१७	२६	प्रतिपत्कल्पविषये ब्रह्मणोर्चनवर्णनम् श्लो. ११८
१८	२८	बलिराज्यप्रतिपद्वर्णनम् श्लो. २८
१९	२९	द्वितीयाकल्पे पुष्पद्वितीयामाहात्म्यवर्णने शर्यातिकर्तृकच्यवनोद्देश्यकसुकन्यानिवेदनोत्तरकुमारकर्तृकच्यवनसम्बन्धियुवत्वप्राप्त्युत्तरं दस्रयोश्च्यवनकल्पितयज्ञभागभुक्त्वेन क्रुद्धशक्रस्य तद्धननाय वज्रोद्यमनं तेन संजातकोपच्यवनकर्तृकेन्द्रभुजस्तंभवर्णनम् । पश्चाच्छक्रस्तुतिप्रसन्नच्यवनकर्तृकप्रसादेन शक्रस्य भुजस्तंभनाभाववर्णनञ्च श्लो. ९१
२०	३१	अशून्यशयनद्वितीयाव्रतमाहात्म्यम् श्लो. ३३
२१	३२	तृतीयाकल्पविधिवर्णनम् श्लो. ३३
२२	३३	चतुर्थीकल्पे कार्तिकेयकर्तृकविनायकविषाणविच्छेदवर्णनं तथा रुद्रकर्तृकब्रह्मशिरश्छेदनं तत्कोपेन ब्रह्मकृतरुद्रनाशार्थश्वेतकुण्डलिपुरुषोत्पत्तिवर्णनम् । तेन रुद्रहननायोद्यतने रुद्रनारायणोभयनिर्मितपुरुषयुद्धवर्णनं च. श्लो. ५१
२३	३३	चतुर्थीकल्पवर्णने भीमजस्य विघ्नाधिकारित्ववर्णनं. तदर्चाविधिवर्णनं. तदावरणपूजावर्णनं च श्लो. ३१
२४	३४	चतुर्थीकल्पे कार्तिकेयापूर्वप्रणीतसामुद्रिकशास्त्रस्य कुपितरुद्रकर्तृकार्णवप्रक्षेपवर्णनं पुनर्ब्रह्मकार्तिकेयसंवादेन तदुद्धारः श्लो. ४२

अ०	प०	विषयाः
२५	३५	चतुर्थीकल्पविषये लिङ्गादारभ्योदरपर्यन्तं पुरुषावयवशुभाशुभलक्षणवर्णनम् श्लो. ३९
	३६	चतुर्थीकल्पविषये नाभ्या आरभ्य पुरुषावयवशुभाशुभलक्षणवर्णनम् श्लो. ८५
२७	३८	चतुर्थीकल्पे नृपस्य शुभाशुभलक्षणवर्णनम् श्लो. २९
२८	३८	चतुर्थीकल्पे स्त्रीणां शुभाशुभविशिष्टलक्षणवर्णनम् श्लो. ४४
२९	३९	चतुर्थीकल्पे गणपतिकल्पवर्णनम् श्लो. ३४
३०	४०	चतुर्थीकल्पे विनायकपूजाविधिवर्णनम् श्लो. ९
३१	४१	भाद्रपदशुक्लचतुर्थी शिवा, माघशुक्लचतुर्थी शान्ता, भौमवारे शुक्लचतुर्थी सुखावहा, एतासां विधिवर्णनम् श्लो. ६०
३२	४२	पंचमीकल्पे नागानां मातृदत्तशापकारणं वर्णयित्वा आस्तीकेन तद्दुःखनिवारणं कृतमिति तज्जन्मदिनं पञ्चमीनागानामानन्दकरीति नागपंचमीव्रतवर्णनम् श्लो.५९
३३	४४	नागानामुत्पत्तिं वणायर्त्वा तद्दंष्ट्रावर्णनम् श्लो. ५१
३४	४५	कालदष्टसर्पलक्षणवर्णनम् श्लो. ३०
३५	४६	तत्तद्धातुगतविषलक्षणानि वर्णयित्वा तत्रतत्र देयानामौषधीनां वर्णनम् श्लो. ५९
३६	४७	सर्पाणां वर्णरूपादिवर्णनम् श्लो. ६४
३७	४८	भाद्रपदिकनागपञ्चमीव्रतवर्णनम् श्लो. ३
३८	४८	आश्विनमासपञ्चम्यां नागपूजाविधिकथनम् श्लो. ५
३९	४८	षष्ठीकल्पे कार्तिकषष्ठ्यां स्कन्दपूजावर्णनम् श्लो. १३
४०	४९	कार्त्तिकेयवर्णने विप्रादिजातिवर्णनम् श्लो. ४७
४१	५०	षष्ठीकल्पे ब्राह्मण्यविवेकवर्णनम् श्लो. ५७
४२	५१	ब्राह्मण्यसंस्कारविवेकवर्णनम् श्लो. ३२
४३	५२	वर्णव्यवस्थावर्णनम् श्लो. ५२
४४	५३	वर्णधर्मविभागव्यवस्थावर्णनम् श्लो. ३३
४५	५४	ब्रह्मदेवेन कार्तिकेयमाहात्म्यकथनम् श्लो. ६
४६	५४	भाद्रपदशुक्लपक्षीयकार्त्तिकेयषष्ठीव्रतमाहात्म्यवर्णनम् श्लो. १२
४७	५४	सप्तमीकल्पारम्भः, तत्र शाकसप्तमीव्रतकथावर्णनम् श्लो. ७२
४८	५६	सप्तमीकल्पवर्णने कृष्णसांबसंवादः, रुद्रब्रह्मसंवादः, आदित्यमाहात्म्यवर्णनम् श्लो. ४५
४९	५७	आदित्यस्य नित्याराधनविधिवर्णनम् सूर्यमाहात्म्यवर्णनं च श्लो. ३७
५०	५७	आदित्यस्य नैमित्तिकाराधनक्रमः, रथसप्तमीमाहात्म्यवर्णनम् श्लो. ४२
५१	५८	माघशुक्लसप्तम्यां महासप्तमीव्रतमाहात्म्यवर्णनम् श्लो. १६
५२	५९	रथयात्राविधिवर्णनम्, तत्र सूर्यरथस्थितसूर्यपूजाविधिवर्णनम् श्लो. ६१
५३	६०	सूर्यसारथिवर्णनम्, सूर्यमंडलवर्तिदेवतादिवर्णनम्, सूर्यगतिविवेकः, सूर्यस्य सर्वदेवपूज्यत्ववर्णनम् श्लो. ५१
५४	६१	आदित्यस्य सर्वश्रैष्ठ्यवर्णनम्, सर्वकालकारणत्ववर्णनं च श्लो. १६
५५	६१	आदित्यरथयात्रायां कर्तव्यकर्मवर्णनम् श्लो. ९८
५६	६३	रथपर्यटनविधिवर्णनम्, तत्र कर्तव्यकर्मवर्णनम् श्लो. ५२
५७	६४	सर्वदेवेभ्यो विविधबलिप्रदानप्रकारवर्णनम्, रथयात्रोत्तरकर्तव्यकर्मवर्णनम् श्लो. ३२
५८	६५	सूर्यरथयात्रामाहात्म्यवर्णनम् श्लो. ४८
५९	६६	माघशुक्लसप्तम्यां सूर्यसमाराधनाप्रकारकथनम् श्लो. २६
६०	६७	सूर्यपरिचर्यामाहात्म्यवर्णनम् श्लो. २२
६१	६७	सूर्ययोगमाहात्म्यवर्णनम् श्लो. २८
६२	६८	सूर्यदिण्डिसंवादः, सूर्येण दिण्डिने ज्ञानोपदेशकरणम् श्लो. ३९
६३	६८	ब्रह्मणः समीपे दिण्ड्यागमनम्, ब्रह्मदिण्डिसंवादः, ब्रह्मणा दिण्डिसमीपे दीक्षागुणकथनपूर्वकमादित्यक्रियायोगवर्णनम् श्लो. ४२

अ०	प०	विषयाः
६४	६९	उपवासमाहात्म्यवर्णने सप्तमीफलवर्णनम् श्लो. ६३
६५	७१	रहस्यानामसप्तमीव्रतमाहात्म्यवर्णनम् श्लो. ३४
६६	७१	ब्रह्मणोऽन्तर्धानम्, दिण्डिना सूर्याराधनम्, द्विजशंखसंवादः, शंखर्षिणा द्विजाय सप्तम्यां सूर्यार्चनविधिक्रमकथनम्, तत्र सांबाख्यानकथनम्, तत्र ब्रह्मयाज्ञवल्क्यसंवादः, ब्रह्मणा याज्ञवल्क्यायादित्यमाहात्म्यकथनम् श्लो. ८४
६७	७३	सूर्यस्वरूपमाहात्म्यवर्णनम् श्लो. ३२
६८	७४	सूर्यपूजायां सूर्यप्रियपुष्पवर्णनम्, सिद्धार्थसप्तमीव्रतमाहात्म्यवर्णनम् श्लो. ४२
६९	७५	सप्तमीव्रतकरस्य पुरुषस्य व्रतदिने दृष्टविविधस्वप्नफलवर्णनम् श्लो. २४
७०	७५	सर्षपसप्तमीव्रतमाहात्म्यवर्णनम् श्लो. २२
७१	७६	ब्रह्मप्रोक्तसूर्यनामवर्णनम् श्लो. १६
७२	७६	श्रीसूर्यस्याद्यदिव्यस्थानवर्णनम्, तत्र सांबकथा, सांबाय दुर्वाससा शापविसर्जनम् श्लो० २०
७३	७७	सांबसमीपे नारदागमनम्, नारदकर्मणा कृष्णशापेन सांबाय कुष्ठरोगप्राप्तिः, सांबरूपमोहिताभ्यः षोडशसहस्रस्त्रीभ्यः कृष्णेन चोरहार्यत्वरूपशापदानम्, सूर्याराधनेन सांबकुष्ठनाशः श्लो. ५०
७४	७८	चंद्रभागासरित्तटे सांबस्य सूर्याराधनकथाप्रक्रमे सूर्यस्य द्वादशदिव्यमूर्तिस्थानविभागवर्णनम्. श्लो. ३९
७५	७८	सांबेन स्वात्मरोगनाशार्थमभ्यर्थितस्य कृष्णस्य पितुराज्ञया नारदसमागमकरणवर्णनम्. श्लो. १९
७६	७९	नारदेन सांबाय सूर्यपरिवारकथनम् श्लो. २०
७७	७९	सूर्यस्य विराड्रूपवर्णनम् श्लो. ३१
७८	८०	सूर्यसृष्ट्यवतारमाहात्म्यकथनम् श्लो. ८३
७९	८१	नारदेन सूर्यस्य पत्नीपुत्रपरिवारादिकथनम् विश्वकर्मकृतसूर्यतेजःशातनम्, रेवंताद्युत्पत्तिः श्लो. ८२
८०	८३	सूर्येण दिण्डिने सप्तमीव्रतमाहात्म्यकथनम् श्लो. ३६
८१	८४	विजयाख्यसप्तमीव्रतमाहात्म्यवर्णनम् श्लो. १८
८२	८४	आदित्यवारमहात्म्यवर्णने नन्दाख्यादित्यवारव्रतकल्पमाहात्म्यवर्णनम् श्लो. २४
८३	८५	भद्राख्यादित्यवारमाहात्म्यवर्णनम् श्लो. ८
८४	८५	सौम्याख्यादित्यवारव्रतमाहात्म्यमर्णनम् श्लो. ५
८५	८५	कामदाख्यादित्यवारव्रतमाहात्म्यवर्णनम्. श्लो. ८
८६	८५	पुत्रदाख्यादित्यवारव्रतमाहात्म्यवर्णनम्, जयाख्यादित्यवारव्रतमाहात्म्यवर्णनं च श्लो. १७
८७	८६	जयन्ताख्यादित्यवारव्रतमाहात्म्यवर्णनम् श्लो. ६
८८	८६	विजयाख्यादित्यवारव्रतमाहात्म्यवर्णनम् श्लो. ६
८९	८६	आदित्याभिमुखाख्यादित्यवारव्रतमाहात्म्यवर्णनम् श्लो. ८
९०	८६	हृदयाख्यादित्यवारव्रतमाहात्म्यवर्णनम् श्लो. ६
९१	८६	रोगहराख्यादित्यवारव्रतमाहात्म्यवर्णनम् श्लो. ६
९२	८७	महाश्वेताख्यादित्यवारव्रतमाहात्म्यवर्णनम् श्लो. १८
९३	८७	सूर्यसमाराधनसूर्यमाहात्म्यवर्णनम् श्लो. ७६
९४	८९	पुराणश्रवणमाहात्म्यवर्णने कुमारेण सूर्यलोके दृष्टयोः पुरुषयोर्वृत्तान्तवर्णनम् श्लो. ६०
९५	९०	आदित्यालयमाहात्म्यवर्णनम् श्लो. १०
९६	९०	जयाख्यासप्तमीव्रतमाहात्म्यवर्णनम् श्लो. ३२
९७	९१	जयान्त्याख्यसप्तमीव्रतमाहात्म्यवर्णनम् श्लो. २८
९८	९१	अपराजिताख्यासप्तमीव्रतमाहात्म्यवर्णनम् श्लो. १९
९९	९२	महाजयाख्यसप्तमीव्रतमाहात्म्यवर्णनम् श्लो. ७
१००	९२	नन्दाख्यसप्तमीव्रतमाहात्म्यवर्णनम् श्लो. १६

अ०	प०	विषयाः
१०१	९२	भद्राख्यसप्तमीव्रतमाहात्म्यवर्णनम् श्लो. २५
१०२	९३	नक्षत्रपूजाविधिवर्णनम् श्लो. ७८
१०३	९४	सूर्यपूजासूर्यालयार्चनमाहात्म्यवर्णनम् श्लो. ५४
१०४	९६	काम्योपवासवर्णने त्रिवर्गसप्तमीव्रतमाहात्म्यवर्णनम् श्लो. २४
१०५	९६	कामदासप्तमीव्रतमाहात्म्यनिरूपणम् श्लो० २९
१०६	९७	पापनाशिनीसप्तमीव्रतमाहात्म्यवर्णनम् श्लो० १४
१०७	९७	भानुपादद्वयव्रतमाहात्म्यवर्णनम् श्लो. २५
१०८	९७	सर्वार्थावाप्तिसप्तमीव्रतमाहात्म्यवर्णनम् श्लो. १२
१०९	९८	मार्तण्डसप्तमीव्रतमाहात्म्यवर्णनम् श्लो. १४
११०	९८	अनंतसप्तमीव्रतमाहात्म्यवर्णनम् श्लो. ८
१११	९८	अभ्यंगसप्तमीव्रतमाहात्म्यवर्णनम् श्लो. ८
११२	९८	तृतीयपदव्रतमाहात्म्यवर्णनम् श्लो. १७
११३	९९	आदित्यालयबन्धनमार्जनादिफलवर्णनम् श्लो. ३२
११४	१००	स्थापितादित्यप्रतिमास्नापनयोगवर्णनम् श्लो. १३
११५	१००	गौतमीकौशल्यासंवादे कौशल्ययाऽऽदित्यमाहात्म्यपूर्वकमर्चनविधिकथनम् श्लो. ३७
११६	१०१	सत्राजितोपाख्यानम्, तत्र सूर्याराधनेन तस्यानंतैश्वर्यप्राप्तिवर्णनम्, सूर्यपूजायां भोजकश्रैष्ठ्यवर्णनम् श्लो. १२८
११७	१०३	भोजकोत्पत्तिभोजकमाहात्म्यवर्णनम्, सूर्यप्रतिमोल्लेपनस्नापनमाहात्म्यवर्णनम् श्लो. ८२
११८	१०५	आदित्यायतने दीपदानमाहात्म्यवर्णनम् श्लो. ५४
११९	१०६	दीपदानमाहात्म्यवर्णनम् श्लो. २६
१२०	१०६	विषाद्युपद्रवरोगविनाशार्थं सूर्यपूजामाहात्म्यवर्णनम् श्लो. ६७
१२१	१०८	विश्वकर्मकृतसूर्यशरीरतेजःशातनवृत्तान्तवर्णनम् श्लो. २८
१२२	१०८	ब्रह्मादिदेवकृतसूर्यस्तुतिवर्णनम् श्लो. ९
१२३	१०९	सूर्यमाहात्म्यवर्णने सूर्यतेजःशातनावसरे ब्रह्मविष्णवीशकृतसूर्यस्तुतिवर्णनम् श्लो. ८३
१२४	११०	सूर्यानुचरप्रवरणनामनिरुक्तिवर्णनम् श्लो. ४०
१२५	१११	व्योममाहात्म्यवर्णने भुवनकोशवर्णनम् श्लो. ७१
१२६	११३	व्योममाहात्म्ये भुवनकोशवर्णने लोकलोकपाललोकवर्णनम् श्लो. ३८
१२७	११४	विस्तरेण सांबोपाख्यानवर्णनारम्भः, पितुराज्ञया सांबेन सूर्यस्य स्तुतिकरणम् सांबोपरि सूर्यप्रसादवर्णनम् श्लो. ३६
१२८	११४	सांबेन सूर्यस्तवकरणम्, सूर्येण सांबाय वरप्रदानम् श्लो. १४
१२९	११५	सांबाय सूर्यप्रतिमालाभः प्रतिमया स्वस्थापनस्थानकथनम् श्लो. १८
१३०	११५	सांबेन चंद्रभागासरित्तीरे सूर्यप्रतिमास्थापनम्, नारदेन सांबाय सूर्यप्रासादनिर्माणविधिकथनम् श्लो. ६३
१३१	११६	सूर्यप्रतिमानिर्माणविधौ दारुपरीक्षाविधिवर्णनम् श्लो. ४३
१३२	११७	सर्वदेवप्रतिमालक्षणवर्णनम् श्लो. ३२
१३३	११८	प्रतिमाप्रतिष्ठाविधौ विश्वरूपवर्णनम् श्लो. २३
१३४	११९	प्रतिष्ठाकर्मोपयुक्तकालादिवर्णनम्, प्रतिष्ठामण्डलवर्णनं च. श्लो. २७
१३५	११९	सूर्यप्रतिमास्नानकर्मविधिवर्णनम्, स्नानकर्मोपयुक्तभोजकादिद्विजवर्णनम्, वर्ज्यद्विजवर्णनं च श्लो. ६७
१३६	१२०	सूर्यप्रतिमाधिवासनप्रकारवर्णनम् श्लो. ८०
१३७	१२२	सर्वदेवप्रासादप्रतिष्ठाप्रकारवर्णनम् श्लो. १३
१३८	१२३	ध्वजारोपणादिप्रकारवर्णनम् श्लो. ८४
१३९	१२४	देवपरिचर्यापालनार्थं गौरमुखं पुरोहितं प्रति सांबागमनम्, गौरमुखेन सांबाय सूर्यपरिचर्यापालनसमर्थमगभोजकब्राह्मणोत्पत्तिस्थितिवृत्तांतकथनम्, सांबेन शाकद्वीपान्मित्रवने मगभोजकानयनम्, सूर्यस्य सांबोपरि सुप्रसादवर्णनम् श्लो. ९४

अ०	प०	विषयाः
१४०	१२६	सांबेन चंद्रभागासरित्तीरे सांबपुरनिवेशनम्, भोजकेभ्यो यादवकन्यादानम्, कृष्णद्वैपायनेन सांब प्रति मगभोजकब्राह्मणचारित्रकथनम् श्लो. ५०
१४१	१२७	भोजकजातिवर्णनम् श्लो. १७
१४२	१२८	अव्यंगोत्पत्तिवर्णनम् श्लो. २९
१४३	१२८	नारदोक्तसूर्यधूपादिविविधविधिवर्णनम् श्लो. ५८
१४४	१२९	व्यासस्य द्वारकागमनोत्तरं श्रीकृष्णपृच्छायां व्यासेन भोजकोत्पत्तिवृत्तान्तवर्णनम् श्लो. २६
१४५	१३०	भोजकज्ञानोपलब्धिवृत्तान्तवर्णनम् श्लो. २८
१४६	१३१	भोज्याभोज्यान्नभोजकवृत्तान्तवर्णनम् श्लो. २८
१४७	१३१	सूर्यप्रियाप्रियभोजकलक्षणवर्णनम् श्लो. ३८
१४८	१३२	श्रीकृष्णस्य सुदर्शनकालचक्रप्राप्तिवृत्तान्तवर्णनम् श्लो. ३०
१४९	१३३	सूर्यचक्रसूर्यदीक्षाविधिवर्णनम् श्लो. ६१
१५०	१३४	स्थण्डिले सूर्यार्चनप्रकारवर्णनम् श्लो. २४
१५१	१३५	सौरधर्मप्रस्ताववर्णनम् श्लो. ३२
१५२	१३५	सूर्यार्चनीविजिज्ञासायामनेकप्रश्नवर्णनम् श्लो. १७
१५३	१३६	सूर्यतेजोवर्णने ब्रह्मविष्णवीशैः सूर्यस्तुतिकरणम्, सूर्यप्रसादवर्णनम् श्लो. ११०
१५४	१३८	सूर्येण ब्रह्मविष्णवीशेभ्यः स्वमूर्तित्रयीवर्णनम् श्लो. ४२
१५५	१३८	आदित्येन ब्रह्मणे स्वाराधनमाहात्म्यं वर्णयित्वा, वरं च प्रदाय गंधमादने शंकराय दर्शनं दत्त्वा वरदानम् श्लो. ६८
१५६	१४०	शालग्रामस्थलं प्रति गत्वा तपस्यते विष्णवे सूर्येण वरप्रदानम् श्लो. ३०
१५७	१४०	सूर्यावतारकथाप्रस्ताववर्णनम् श्लो. ५२
१५८	१४२	सूर्योत्पत्तिवृत्तान्तवर्णनम् श्लो. ४७
१५९	१४२	नानाविधसूर्यावतारकथावर्णनम् श्लो. २५
१६०	१४३	ब्रह्मादीनां सूर्यरूपदर्शनवर्णनम् श्लो. ५२
१६१	१४४	सूर्यपूजाफलप्रश्नवर्णनम् श्लो. ९
१६२	१४४	विविधप्रकारैः सूर्यपूजाफलवर्णनम् श्लो. ५५
१६३	१४५	भास्कराराधने विविधपुष्पपूजाफलमाहात्म्यकथनम् श्लो. ८७
१६४	१४७	सूर्यपूजामाहात्म्यवर्णनपुरःसरं सूर्यषष्ठीव्रतमाहात्म्यवर्णनम् श्लो. १०३
१६५	१४९	सर्वमासेषूभयपक्षसप्तमीव्रतमाहात्म्यवर्णनम् श्लो. ४५
१६६	१५०	निक्षुभार्कव्रतमाहात्म्यवर्णनम् श्लो. १८
१६७	१५०	निक्षुभार्कव्रतमाहात्म्यवर्णनम् श्लो. १७
१६८	१५१	कामप्रदस्त्रीकर्तव्यसूर्यव्रतमाहात्म्यवर्णनम् श्लो. ४०
१६९	१५१	सूर्यव्रतवर्णनम् श्लो. २०
१७०	१५२	सूर्यप्रीतये गोदानवर्णनम् श्लो. ६
१७१	१५२	मगधर्मवृत्तान्तवर्णनम्, भोजकभोजनानुष्ठानवर्णनं च. श्लो. ५०
१७२	१५३	दानपात्रापात्रविवेकवर्णने भोजकमाहात्म्यवर्णनम् श्लो. ५५
१७३	१५४	सौरधर्मवर्णनप्रस्तावे गरुडारुणसंवादारम्भः, सौरधर्ममाहात्म्यवर्णनम् श्लो. २४
१७४	१५४	सर्वदेवापेक्षया सूर्यस्य श्रैष्ठ्यवर्णनम्, ब्रह्मकृतसूर्यस्तुतिवर्णनम् श्लो. ४०
१७५	१५५	अरुणेन गरुडार्थं सूर्योद्देश्यकाग्नियज्ञकर्मकरणवर्णनम् श्लो. ५०
१७६	१५६	अरुणकृतगरुडशान्त्यभिषेकवर्णनम् श्लो. ८
१७७	१५६	अरुणकृतगरुडशान्त्याभिषेकवर्णनम् श्लो. २५
१७८	१५७	अरुणकृतगरुडशान्त्यभिषेकवर्णनम् श्लो. ४८
१७९	१५८	अरुणकृतगरुडशान्त्यभिषेकवर्णनम् श्लो. ४४
१८०	१५९	अरुणकृतगरुडशान्त्यभिषेकोत्तरं शांतिकाध्यायमाहात्म्यवर्णनम् श्लो. ६२
१८१	१६०	भास्करोक्तपञ्चविधधर्मवर्णनम्, तत्र धर्मविभागदेशविभागवर्णनम् श्लो. ४३
१८२	१६१	चतुर्णामाश्रमाणां पृथक्पृथग्धर्मवर्णने ब्रह्मचर्यधर्मविवाहविधिवर्णनम् श्लो. ७८
१८३	१६३	पञ्चमहायज्ञश्राद्धविधिवर्णनम् श्लो. ३१
१८४	१६३	श्राद्धकर्मणि ब्राह्मणधर्मवर्णनम् श्लो. ५९

अ०	प०	विषयाः
१८५	१६४	रात्रिश्राद्धनिषेधः, मातृश्राद्धवृद्धिश्राद्धप्रकारवर्णनम् श्लो. २८
१८६	१६५	प्रायश्चित्तशुद्धिप्रकरणवर्णनम् श्लो. ५३
१८७	१६६	खषोल्कमन्त्रमाहात्म्यवर्णनपुरःसरं धेनुदानमाहात्म्यवर्णनम् श्लो. ८८
१८८	१६८	भोजकसत्कारप्रकारवर्णनम् श्लो. २४
१८९	१६८	पात्रापात्रदानफलविपाकवर्णनम् श्लो. ६०
१९०	१७०	पातकोपपातकपरिपाकवर्णनम् श्लो. २१
१९१	१७०	पातकभेदेन त्रिविधगतिप्राप्तिवर्णनम् श्लो. २९
१९२	१७१	पातकिभिरनुभूयमानयमयातनाप्रकारवर्णनम् श्लो. ३३
१९३	१७१	आचारप्रशंसायां दंतकाष्ठविधिवर्णनम् श्लो. २१
१९४	१७२	सप्तमीदृष्टस्वप्नफलवर्णनम् श्लो. २०
१९५	१७२	सप्तम्यनुष्ठानविधिवर्णनम् श्लो. २५
१९६	१७३	सप्तमीव्रतनियमवर्णनम् श्लो. ५७
१९७	१७४	सूर्यतुष्टिकरपुष्पविशेषपूजाफलविशेषवर्णनपुरःसरं वराटिकाविधिवर्णनम् श्लो. २५
१९८	१७४	व्यासभीष्मसंवादः, व्यासोक्तसूर्यमाहात्म्यवर्णनम् श्लो. ३१
१९९	१७५	व्यासोक्तसूर्याराधनमन्त्रादिवर्णनम्, स्नानविधिवर्णनं च. श्लो. ३२
२००	१७६	सूर्यार्चनविधिवर्णनम् श्लो. २१
२०१	१७६	ब्रह्मदेवविष्णुसंवादः, ब्रह्मदेवोक्तसूर्यमन्त्रमाहात्म्यवर्णनम्, सूर्यमण्डलदेवतार्चन वर्णनम् श्लो. २७
२०२	१७७	ब्रह्मदेवोक्तादित्यपूजाविधिवर्णनम् श्लो. १७
२०३	१७७	व्योमपूजा, भास्कराराधनविधिवर्णनम् श्लो. १८
२०४	१७७	रत्नव्योमप्रतिष्ठायां भास्कराराधनविधिवर्णनम् श्लो. २९
२०५	१७८	सूर्यमण्डलदेवताराधनविधिवर्णनम् श्लो. २१
२०६	१७८	सूर्यपूजायां सूर्यमंत्रोद्धारवर्णनम् श्लो. ४७
२०७	१७९	सूर्यमहिमवर्णनपुरःसरं सूर्याराधनमाहात्म्यवर्णनम् श्लो. २६

अ०	प०	विषयाः
२०८	१८०	सप्तसप्तमीव्रतमाहात्म्यवर्णनम् श्लो. ३३
२०९	१८१	द्वादशमाससप्तमीव्रतमाहात्म्यवर्णनम् श्लो. १६
२१०	१८१	सूर्यपूजादिमाहात्म्यवर्णनम् श्लो. ८४
२११	१८३	अर्कसंपुटिकानामसप्तमीव्रतमाहात्म्यवर्णनम् श्लो० ४८
२१२	१८४	सौरार्चनविधिवर्णनम्, होमविधिवर्णनं च.श्लो.२९
२१३	१८४	मरीचिसप्तमीव्रतमाहात्म्यवर्णनम् श्लो. ४७
२१४	१८५	सूर्यमन्त्रोद्धारवर्णनम् श्लो. ६
२१५	१८६	सूर्यार्चाविधिवर्णनपुरःसरं सप्तमीव्रतमाहात्म्यंवर्णनम्, पुराणश्रवणमाहात्म्य वर्णनपुरःसरं ब्राह्मपर्वोक्तकथोपसंहारवर्णनम् श्लो. २१६

इति प्रथमं ब्राह्मपर्व समाप्तम् ॥ १ ॥

अथ द्वितीयं मध्यमपर्व ॥ २ ॥

प्रथमभागः ॥ १ ॥

अ०	प०	विषयाः
१	१९१	मंगलाचरणम्, भविष्यपुराणप्रशंसा, धर्मस्वरूपवर्णनम् श्लो. ३९
२	१९१	विराड्-ब्रह्माण्डोत्पत्तिविस्तारवर्णनम् श्लो. २७
३	१९२	स्वर्गपातालाद्यूर्ध्वाधोलोकवर्णनम् श्लो. २६
४	१९२	भूर्लोकविस्तारविनिर्णयपुरःसरं ज्योतिश्चक्रवर्णनम् श्लो. ४३
५	१९३	त्रैवर्णिकप्रशंसायां ब्राह्मणलक्षणब्राह्मणकर्तव्यवर्णनम्. श्लो. ९२
६	१९५	ब्राह्मणमाहात्म्यगुरुगुणवर्णनम्. श्लो. २६
७	१९६	पुराणेतिहासार्चनश्रवणमाहात्म्यवर्णनम् श्लो. २५
८	१९८	पुराणेतिहासविभागपूर्वकाङ्गमाहात्म्यवर्णनम् श्लो. ४६
९	१९९	अंतर्वेदिबहिर्वेदिप्रमाणादिवर्णनपूर्वकं पूर्तकर्मनिरूपणम् श्लो. ९०
१०	२०१	आरामकर्मविविधवृक्षारोपणविधिवर्णनम् श्लो. ९०

अ०	पृ०	विषयाः
११	२०३	कूपवापीतडागप्रतिष्ठासु विशेषविधिवर्णनम् श्लो. १०
१२	२०३	प्रतिदेवताप्रतिमालक्षणवर्णनम् श्लो. २८
१३	२०३	कर्मविशेषपरत्वेन विविधविधिकुण्डार्निर्णयवर्णनम् श्लो. ४१
१४	२०४	यज्ञविशेषपरत्वेनाहुतिहोमसंख्यामानवर्णनम् श्लो. २१
१५	२०५	कुण्डसंस्कारे शास्त्रमतवर्णनम्, अष्टादशकुण्डसंस्कारवर्णनं च श्लो. ३५
१६	२०५	नित्यनैमित्तिकहोमावसाने षोडशोपचारवर्णनम् श्लो. २४
१७	२०६	त्रिविधयज्ञभेदवर्णनपुरःसरं कर्मविशेषेषु वह्निनामवर्णनम् श्लो. १६
१८	२०६	होमार्थकद्रव्यप्रमाणवर्णनम् श्लो. २३
१९	२०७	स्रुवदर्वीपात्रनिर्माणनिर्णयवर्णनम् श्लो. १८
२०	२०७	पूर्णाहुतिहोमनिर्णयवर्णनम्, कर्मपरत्वेन ब्राह्मणसंख्यावर्णनम्, यथाविधिकृतयागफलवर्णनम् श्लो. ४३
२१	२०८	देवतापरत्वेन कर्मपरत्वेन च विविधविधिमण्डलनिर्माणवर्णनम् श्लो० ३४

(इति प्रथमभागः ॥ १ ॥)

(अथ द्वितीयभागः ॥ २ ॥)

अ०	पृ०	विषयाः
१	२०८	कर्मपरत्वेन मण्डलोद्धारवर्णनम् श्लो. २१
२	२०९	क्रौंचघ्राणादिविविधमण्डलनिर्माणप्रकारवर्णनम् श्लो. ११०
३	२११	अदक्षिणामानकर्मकरणे दोषवर्णनपुरःसरं कर्मविशेषपरत्वेन दक्षिणादिमूल्यपरिमाणवर्णनम् श्लो. ४०
४	२१२	पूर्णपात्रपरिमाणवर्णनपुरःसरं द्रव्यविशेषकर्मविशेषपरत्वेन दक्षिणादिमूल्यपरिमाणवर्णनम् श्लो. ४५
५	२१२	कर्मपरत्वेन कलशनिर्माणस्थापनादिप्रकारवर्णनम् श्लो. २६
६	२१३	मासाश्रयकर्मौपयिकतया चतुर्विधमासस्वरूपलक्षणनिर्णयवर्णनम् श्लो. ५६
७	२१४	दैवपैतृककर्मपरत्वेन कालविभागवर्णनम्, कर्मविशेषेषु तिथिनिर्णयवर्णनं च श्लो. ६०
८	२१५	मासविशेषस्थप्रतिपदाद्यमावास्यान्ततिथिविशेषकर्मफलादिवर्णनम् श्लो. १३७
९	२१८	गोत्रप्रवरसंतानवर्णनम् श्लो. २३
१०	२१८	बलिमण्डलपूर्वकवास्तुयागविधिवर्णनम् श्लो. ११२
११-१२	२२१	वास्तुदेवतापूजाक्रमवर्णने प्रतिदेवताध्यानवर्णनपुरःसरं मन्त्रच्छन्दऋषिदेवतावर्णनम् श्लो. १६४
१३	२२४	देवतार्घ्यदानविधिवर्णनम् श्लो. ३१
१४	२२४	स्वगृह्योक्ताग्निकर्मविधिवर्णनम् श्लो. ८४
१५	२२६	अग्निकर्मणि कुशकंडिकास्थालीपाकविधानवर्णनम् श्लो. २१
१६	२२६	अग्निजिह्वाध्यानवर्णनम् श्लो. ९
१७	२२७	प्रतिष्ठापूर्वदिनकर्तव्यकृत्यवर्णनम् श्लो. ३१
१८	२२७	यज्ञकर्मोपयुक्तब्राह्मणयोजनवर्णनम् श्लो. ४८
१९	२२८	प्रतिष्ठायोग्यकालनिर्णयपुरःसरं प्रतिष्ठाविधिवर्णनम् श्लो. १९
२०	२२९	गृहवास्तुप्रतिष्ठादेवतार्चनप्रकारवर्णनम् श्लो. २९७
२१	२३५	मध्यमप्रकारेण गृहवास्तुप्रतिष्ठाविधिवर्णनम् श्लो. १३८

(इति द्वितीयभागः ॥ २ ॥)

(अथ तृतीयभागः ॥ ३ ॥)

अ०	पृ०	विषयाः
१	२३८	आरामादिप्रतिष्ठासु विशेषविधिवर्णनम् श्लो. ७४
२	२३८	गोप्रचारोत्सर्गप्रतिष्ठाविधिवर्णनम् श्लो. ७४
३	२४०	क्षुद्रारामप्रतिष्ठाविधिवर्णनम् श्लो. १०
४	२४०	अश्वत्थप्रतिष्ठापुष्करिणीप्रतिष्ठाजलाशयप्रतिष्ठाविधिवर्णनम् श्लो. ३६
५	२४१	नलिनीवापीह्रदप्रतिष्ठाविधिवर्णनम्. श्लो. ३३

अ०	प०	विषयाः
६	२४२	क्षुद्रारामवृक्षप्रतिष्ठाविधिवर्णनम् श्लो. ७
७	२४२	एकादिवृक्षप्रतिष्ठाविधिवर्णनम् श्लो. ५
८	२४२	पुनरश्वत्थप्रतिष्ठाविशेषविधिवर्णनम् श्लो. १३
९	२४२	वटवृक्षप्रतिष्ठाविधिवर्णनम् श्लो. ४
१०	२४२	बिल्ववृक्षप्रतिष्ठाविधिवर्णनम् श्लो. २०
११	२४२	पूगाम्रादिफलयुक्तवास्तुप्रतिष्ठाविधिवर्णनम् श्लो. ४
१२	२४३	शैलदारुतृणमयमण्डपप्रतिष्ठाविधिवर्णनम् श्लो. १५
१३	२४३	महायूपप्रतिष्ठाविधिवर्णनम् श्लो. १७
१४	२४३	पुष्पारामप्रतिष्ठाविधिवर्णनम् श्लो. ६
१५	२४३	तुलस्यादिवृक्षप्रतिष्ठाविधिवर्णनम् श्लो. १८
१६	२४४	वृक्षादीनामुत्तममध्यमकनिष्ठप्रकारेण प्रतिष्ठाविधिवर्णनम् श्लो. २३
१७	२४४	प्रकारान्तरेण गोप्रचारप्रतिष्ठाविधिवर्णनम् श्लो. १८
१८	२४५	एकाहसाध्यप्रतिष्ठाविधिवर्णनम् श्लो. १०
१९	२४५	काल्यादिदेवताप्रतिष्ठाविधिवर्णनम् श्लो. २९
२०	२४५	दुर्निमित्तजनितारिष्टशान्तिप्रकारवर्णनम् श्लो. १७९

(इति तृतीयभागः ॥ ३ ॥)

इति मध्यमपर्वस्थविषयानुक्रमणिका ॥ ३ ॥

अथ प्रतिसर्गपर्वस्थविषयानुक्रमणिका ॥ ३ ॥

(प्रथमः खण्डः ॥ १ ॥)

अ०	प०	विषयाः
१	२५१	मंगलाचरणपूर्वकं मुनीनां प्रश्ने सूतेन कृतयुगीयभूपवृत्तान्तवर्णने वैवस्वतमनुमारभ्य सुदर्शनान्तनरपतिराज्यकालवृत्तांतवर्णनम् श्लो. ६१
२	२५२	त्रेतायुगीयभूपवृत्तान्तवर्णने सुदर्शननृपमारभ्य संवरणनरपालान्तभूपतिराज्यकाल वृत्तान्तवर्णनम् श्लो. ७२
३	२५३	द्वापरयुगीयभूपवृत्तान्तवर्णने संवरणमारभ्य म्लेच्छयज्ञकरप्रद्योतभूपान्तनरपतिवृत्तान्तवर्णनम् श्लो. ९७
४	२५५	म्लेच्छयज्ञवृत्तान्तवर्णनम्, कलिकृतविष्णुस्तुतिः, विष्णुनाकलये वरप्रदानम्, सूतशौनकादीनामार्यदेशक्षीणतामवेक्ष्य हिमवन्तं प्रति गमनम् व्यासमहर्षिणा स्वमनः प्रतिश्रोतृ विधाय भविष्यकथाकथनारम्भः, म्लेच्छभूम्युत्कर्षवर्णने आदम–श्वेत–अनुह–कीनाश–महल्लल–विरद–हनूक–मताच्छिल–होमक–न्यूह–सीम–शम–भाव–वृत्तान्तवर्णनम्, न्यूहस्य मुनिभिः सह नौकारोहणे भारतवर्षस्य वृष्टिजले निमज्जनम्, मुनिकृतदेवीस्तुतिः, न्यूहस्य भूविवासवर्णनम् श्लो. ६०
५	२५६	न्यूहवंशवर्णनम्, म्लेच्छभाषाविधानम्, सिम–हाम–याकूत–जुम्रमाजूज–मादी–यूनान–इलीश–तरलीश–कित्तींहूदादिप्रभृतिराज्यकरम्लेच्छवंशवर्णनम्, सूतस्य योगनिद्रोत्तरमुत्थानात्पश्चात् सिमम्लेच्छवंशवर्णनम्, संस्कृतभाषातोऽपभ्रष्टभाषास्वरूपवर्णनम्, व्रजभाषा–महाराष्ट्री–यावनी–गुरुण्डभाषाणां भेदवर्णनम्, यावन्यादिभाषास्थकतिपयशब्दापभ्रंशविवरणम् श्लो. ४१
६	२५७	आर्यावर्ते म्लेच्छानागमनकारणवर्णने काश्यपब्राह्मणवृत्तान्तवर्णनम्, काश्यपब्राह्मणकृतकाश्मीरमण्डलान्तर्गतसरस्वतीस्तुतिवर्णनम्, सरस्वतीलब्धवरेण काश्यपेन ब्रह्मावर्ते म्लेच्छाञ्छिष्यीकृत्यावस्थितिकरणम्, मागधराजवंशवर्णनम्, गौतमोत्पत्तिपूर्वकं पट्टणे बौद्धधर्मसंस्कारवर्णनम्, अर्बुदाचले कान्यकुब्जद्विजेन ब्रह्महोमकरणात्–प्रमर–सामवेदी–चपहानि–यजुर्विद–इत्येषां चतुर्णां क्षत्रियाणामुत्पत्तिवर्णनम् श्लो. ४९

अ०	प०	विषयाः
७	२५८	कालिंजरपुर–अजमरपुर–द्वारकानगरीषु प्रमरचपहानि–शुक्लानां स्थितिवर्णनम्, अग्निवंशविस्तारवर्णने प्रमरवंशवृत्तान्तवर्णनम्, प्रमरवंशे विक्रमादित्यावतारः, विक्रमादित्यसभायां वेतालस्य विप्ररूपेणागमनम्, वेतालविक्रमसंवादःश्लो. २६

(इति प्रथमः खण्डः ॥ १ ॥)

(अथ द्वितीयः खण्डः ॥ २ ॥)

अ०	प०	विषयाः
१	२५९	पद्मावतीकथावर्णनम् श्लो. ६५
२	२६०	मधुमतीवरनिर्णयकथावर्णनम् श्लो. ३७
३	२६१	वीरवरकथावर्णनम् श्लो. २५
४	२६१	चन्द्रवतीकथावर्णनम् श्लो. ६४
५	२६२	हरिदासकन्यामहादेवीकथावर्णनम श्लो. ३४
६	२६३	कामांगीकन्याकथावर्णनम् श्लो. २८
७	२६४	त्रिलोकसुंदरीकथावर्णनम् श्लो. १८
८	२६४	कुसुमदादेवीचिरंजीवकथावर्णनम् श्लो. ३०
९	२६५	कामालसाख्यवैश्यकन्याकथावर्णनम् श्लो. २८
१०	२६५	गुणशेखरराजपत्नीकथावर्णनम् श्लो. ३३
११	२६६	धर्मवल्लभभूपाल–बुद्धिप्रकाशमंत्रिकथावर्णनम् श्लो. ३३
१२	२६७	ब्राह्मणहत्याकथावर्णनम् श्लो. १९
१३	२६७	सुखभाविनीवैश्यकन्या–चोरकथावर्णनम् श्लो. ४३
१४	२६८	चन्द्रावलीकथावर्णनम् श्लो. ४८
१५	२६९	जीमूतवाहन–शंखचूड–गरुडकथावर्णनम् श्लो. ४४
१६	२७०	कामावरूथिन्याख्यवैश्यकन्याकथावर्णनम् श्लो. ३०
१७	२७०	गुणाकराख्यद्विजसुत–यक्षिणीकथावर्णनम् श्लो. २०
१८	२७१	मोहिनीनामकचोरविप्रपत्नी–चोरपिण्ड–कथावर्णनम् श्लो ३६
१९	२७१	विप्रपुत्रकथावर्णनम् श्लो० १५
२०	२७२	अनंगमञ्जरीकथावर्णनम् श्लो. १६
२१	२७२	विष्णुस्वामिचतुष्पुत्रकथावर्णनम् श्लो. २०
२२	२७२	क्षत्रसिंहनृपतिकथावर्णनम्, विक्रमाख्यानकालवर्णनम् श्लो. ३८
२३	२७३	विक्रमस्य यज्ञकरणम्, चंद्रलोकं प्रतिगमनम्, भर्तृहरिवृत्तान्तवर्णनम् श्लो. १८
२४	२७४	सत्यनारायणकथावर्णनम् तत्र नारायणेन नारदाय सत्यनारायणव्रतविधिवर्णनम् श्लो. ३८
२५	२७४	सत्यनारायणव्रतकरकाशीस्थशतानन्दब्राह्मणकथावर्णनम् श्लो. ४४
२६	२७५	सत्यनारायणव्रते चंद्रचूडनृपकथावर्णनम् श्लो. २२
२७	२७६	सत्यनारायणव्रते भिल्लकथावर्णनम् श्लो. २८
२८	२७६	सत्यनारायणव्रते साधुवणिक्कथावर्णनम्. सत्यनारायणव्रतविस्मृत्यपचारदोषेण साधुवणिजो जामात्रा सहासह्यकारागारवासप्राप्तिवृत्तान्तवर्णनम् श्लो. ४८
२९	२७७	साधुवणिग्भार्याकृतसत्यनारायणव्रतप्रभावात्साधुवणिजःकारागारान्मुक्तिः, सत्य, नारायणकृतसाधुजिज्ञासोत्तरं साधोः शठत्वम्, नारायणेन साधवे शापदानम्, साधुप्रार्थितनारायणेन तस्मै वरप्रदानम्, कन्याकृतव्रतापचारेण जामातुर्जले निमज्जनम्. सत्यनारायणप्रसादभोजनोत्तरं जामातुर्जलादुत्तरणम्, सत्यनारायणकृपया साधोः सद्गतिप्राप्तिवर्णनम् श्लो. ७०
३०	२७९	कलियुगप्रवृत्तिमालोच्य पितृशर्मब्राह्मणकृतशिवाभगवतीस्तुतिकरणम्, पितृशर्मणः सकाशाच्चतुर्वेदिब्राह्मणोत्पत्तिवृत्तान्तवर्णनम् श्लो. ३३
३१	२७९	पाणिनिमहर्षिवृत्तान्तवर्णनम्. श्लो. १५
३२	२८०	तोतादरीस्थबोपदेववृत्तान्तवर्णनम् श्लो. २२

अ०	प०	विषयाः
३३	२८०	व्याधकर्मब्राह्मणवृत्तान्तवर्णनम्. तस्यान्नपूर्णाप्रसादवृत्तान्तवर्णनम्. सप्तशतीप्रथमचरित्रमाहात्म्यवर्णनम् श्लो. ३५
३४	२८१	महानन्दिनृपतिवृत्तान्तवर्णने सप्तशतीमध्यमचरित्रमाहात्म्यवर्णनम् श्लो. १४
३५	२८१	व्याकरणमहाभाष्यकारपतञ्जलिवृत्तान्तवर्णने सप्तशत्युत्तमचारितमाहात्म्य वर्णनम् श्लो. १६

(इति द्वितीयः खण्डः ॥ २ ॥)

(अथ तृतीयः खण्डः ॥ ३ ॥)

अ०	प०	विषयाः
१	२८१	सूतेन शौनकादीन्प्रति विक्रमराज्यकालाद् द्वादशशताब्दीसमये जायमानैतिहासिकवृत्तान्तवर्णनम्. तत्र–पूर्वं भारतयुद्धे मृतानां कौरवाणां यादवानां पाण्डवानां श्रीकृष्णादीनां च पुनरवतारकथाप्रस्तावचर्णनम् श्लो. ३४
२	२८२	भरतखण्डस्थाष्टादशराज्यस्थानविभागादिवर्णनम्, शकराजैरार्यदेशविध्वंसे कृते सति विक्रमादित्यपौत्रेण शालिवाहनेन शकानां पराजयकरणम्. आर्यदेशम्लेच्छदेशयोर्मर्यादाकरणम्. ईशपुत्रेण सामसिंहस्य म्लेच्छदेशे स्थापनम्. शालिवाहनस्य षष्टिवर्षपर्यन्तं राज्यकरणोत्तरं स्वर्गमनम् श्लो. ३४
३	२८३	शालिवाहनवंशीयनृपतिराज्यवर्णनम्, शालिवाहनाद्दशमनृपतेर्भोजराजस्य दिग्विजययात्रावर्णनम्, वाहीकदेशस्थशिवेन सह भोजराजस्य संवादः, कालिदासेन चण्डीयागप्रभावेण वाहीकवधकरणम्, भोजराजस्थापितार्यधर्ममहम्मदीयधर्मशामसीहस्थलस्थितिवर्णनम्. भोजराजकालः श्लो. ३२
४	२८३	भोजराजवंश्यानेकभूपालराज्यवर्णनम्, कलिवृद्ध्यर्थं भगवदवतारप्रस्तावः, व्रतपानाम्न्याऽऽभीर्या भगवत्पुत्रत्वाकांक्षिण्या तपःकरणम्, व्रतपाभीर्या च सुमन्नृपेण सह विवाहः, तस्यां देशराज–वत्सराजपुत्रयोर्जन्मभ्यां सह तालनस्य वनरसाधिपस्य युद्धे पराजये सति मैत्रीकरणम्, जयचन्द्रपरीक्षार्थं तेषां गमनवर्णनम् श्लो. ३१
५	२८४	जयचन्द्रपृथ्वीराजयोरुत्पत्तिपूर्वकमार्यदेशसमद्विभागाधिपत्यवृत्तान्तवर्णनम्, परस्परवैरवृत्तान्तवर्णनं च. श्लो. ३८
६	२८५	जयचन्द्रसुतायाः संयोगिन्याः स्वयंवरे पृथ्वीराजस्य प्रतिमायाः संयोगिन्या वरणम्, संयोगिन्यर्थे पृथ्वीराजस्य राजसमूहैः सह महायुद्धवर्णनम्, ततः पृथ्वीराजस्य जयवर्णनम् श्लो. ६३
७	२८६	भीष्मराजस्य तपसा संतुष्टेनेंद्रेण तस्मै वडवादानम्, परिमलराजस्य तपसा संतुष्टेन शङ्करेण तस्मै तव गृहे भगवान्वत्स्यतीति वरप्रदानम्, लक्ष्मणराजस्य तपसा संतुष्टेन जगन्नाथेन तस्मै ऐरावतीदानम्–एवं वरसंपन्नैस्तैरितरराजसमूहैश्च सिद्धयुद्धसन्नाहैर्महावतीं प्रति गमनम्. तत्र तालनस्याज्ञायां तेषां स्थितिवर्णनम् श्लो. ४१
८	२८७	सहदेवांशावतारकथाप्रसंगेन जम्बुकराजादिराजमण्डलवृत्तान्तवर्णनम् श्लो. ३२
९	२८७	देशराजवत्सराजविवाहवृत्तान्तवर्णनम्, रामकृष्णधर्मादीनामंशावतारकथावर्णनम् श्लो. ४९
१०	२८८	कृष्णांशचरित्रवर्णनम्, राजकरदीकरणवृत्तान्तवर्णनम्, मल्लक्रीडादिवृत्तान्तवर्णनम्, मल्लक्रीडादिवृत्तान्तवर्णनम्, मृगयावृत्तान्तवर्णनम् श्लो. ६२
११	२९०	कृष्णांशकृतमहीराजपराजयादिवृत्तान्तवर्णनम् श्लो. ६१
१२	२९१	कृष्णांशसमीपे राजमण्डलागमनम्, स्वपितृघातकगुर्जरस्थजम्बुकभूपालशासनार्थं सेनया सह तस्य राज्ये गमनम्. तत्रविजयैषिणीतः शत्रुभेदविज्ञानम्, तत्र महाघोरयुद्धवृत्तान्तवर्णनम् श्लो. १३९
१३	२९४	तस्य युद्धस्य समयवर्णनम्, पृथ्वीराजेन करविनिमयेन बलखानिना गुर्जरराज्यग्रहणस्य वृत्तान्तवर्णनम्, धर्मांशबलखानिविवाहवृत्तान्तवर्णनम् श्लो. १३८
१४	२९६	जयंतावतारवृत्तांतवर्णनम्, तस्येंदुलनाम्ना ख्यातिः, इंदुलस्य चरित्रवर्णनम् श्लो. १८

अ०	पृ०	विषयाः
१५	२९७	चण्डिकादेवीवाक्यवर्णनम् श्लो १२
१६	२९७	कृष्णांशस्य सप्तदशाब्द् वयसि बलखानिविवाहवृत्तान्तवर्णनम्, तत्र बलखानिसंकट–तन्मोचनवृत्तान्तवर्णनम्, श्लो. ७४
१७	२९९	पृथ्वीराजस्य सप्तकौरवांशपुत्रप्राप्तिवृत्तांतवर्णनम्, ब्रह्मानन्दविवाहवृत्तान्तवर्णनम् श्लो. ६९
१८	३००	इंदुलंप्रति हंसैः पद्मिनीवृत्तांतकथनानन्तरं तदर्थं सिंहले गत्वा युद्धादिवृत्तांतवर्णनम्. तत्र बलखानिसैन्यपराभववर्णनम् श्लो. २९
१९	३०१	इंदुलस्य पद्मिन्या सह विवाहवृत्तान्तवर्णनम्, पद्मिनीजन्मवृत्तान्तवर्णनम् श्लो. ५८
२०	३०२	पांचालदेशस्थबलवर्द्धनभूपालपुत्रमयूरध्वजस्य स्कंदप्रसादवर्णनम् तद्बंधोर्लहरस्य च वरुणप्रसादवर्णनम्, सुखखानिविवाहवृत्तान्तवर्णनम् श्लो. ५२
२१	३०३	सिंधुदेशस्थमयूरध्वजराजपुत्र्या पुष्पवत्या सह कृष्णांशस्य विवाहवृत्तान्तवर्णनम् श्लो. १०५
२२	३०५	कृष्णांशपुष्पवत्योः संवादे पूर्वजन्मवृत्तांतवर्णनम् कृष्णांशस्य स्वभगिन्याश्चंद्रावल्याः सद्मनि गत्वा समागमवृत्तांतवर्णनम् तत्र धूर्तमहीपतिना पैशुन्ये कृते युद्धवृत्तान्तवर्णनम् श्लो. ७०
२३	३०७	चित्ररेखया सहेन्दुलस्य विवाहवृत्तान्तवर्णनम् श्लो. १४०
२४	३१०	पृथ्वीराजाग्रे चन्द्रभट्टेन भाषाग्रंथवर्णनम् पृथ्वीराजेन महावत्यां कुंदनमलस्य दौत्येन प्रेषणम् नृपाणां परस्परजयपराजयादिविविधवृत्तान्तवर्णनम् श्लो. १०६
२५	३१२	दाक्षिणात्यबिन्दुगढस्थशारदानन्दनभूपकन्यायाः स्वयंवरवृत्तान्तवर्णनम् श्लो. ६१
२६	३१३	महावत्यां युद्धवृत्तांतवर्णनम् श्लो. १०६
२७	३१५	कच्छदेशीययुद्धवृत्तान्तवर्णनम् . श्लो. ७९
२८	३१७	कृष्णांशस्य शोभानामवेश्यासमागमसंवादपूर्वकं पुराणाचार्यपुराणभेदवर्णनम् , शोभावेश्यापनीतकृष्णांशमोचनवृत्तान्तवर्णनम् श्लो ८०
२९	३१९	किंनरीकन्योत्पत्तिवृत्तान्तवर्णनम् बौद्धराज्य–चीनराज्य-श्यांमराजस्थैः सह युद्धवृत्तान्तवर्णनम् श्लो. ५९
३०	३२०	लक्षणपद्मिनीसमानयनयुद्धवृत्तान्तवर्णनम् श्लो. ९४
३१	३२२	कृष्णांशस्य श्यालयोषिद्भिः संकटानयनम् कृष्णांशश्यालयोषिद्विवाहादिवृत्तान्तवर्णनम् गुर्जरस्थमूलदेवनृपतिकन्याप्रभावतीतत्पतिपीडकयक्षविनिग्रहः,काश्मीरस्थकेकयभूपतितनयामदनावतीविवाहवृत्तान्तवर्णनम् पुण्ड्रदेशस्थनागवर्मभूपालतनयासुवेलाविवाहवृत्तान्तवर्णनम् मद्रकेशकन्याकान्तिमतीविवाहवृत्तान्तवर्णनम् देहलींप्रति म्लेच्छराजस्य सहोदस्यागमनवृत्तान्तवर्णनम् आर्यदेशे म्लेच्छागमनादिवृत्तान्तादिवर्णनम् श्लो. १८६
३२	३२६	चन्द्रवंशीयादिसर्वनृपाणामंतिममहाघोरसंग्रामः, तत्र प्रायः सर्वनृपाणां क्षयवृत्तान्तवर्णनम् पृथ्वीराजमृत्युविद्वन्मालाहरणवृत्तान्तवर्णनम् म्लेच्छेन सहोड्डीनेन देहल्यां स्वदूतस्य कुतुकोड्डीनस्य स्थापनवर्णनम् श्लो. ३४७

(इति तृतीयः खण्डः ॥ ३ ॥)

(अथ चतुर्थः खण्डः ॥ ४ ॥)

अ०	पृ०	विषयाः
१	३३१	व्यासमहर्षिणा स्वमनः प्रत्युद्दिश्य भविष्यत्कथावर्णनम् अग्निवंश्यनृपचरित्रवर्णनम् तत्र विक्रमवंश्यभूपालचरित्रवर्णनम् बुंदेलखण्डस्वस्थराष्ट्रवृत्तान्तः, कल्पसिंहांतप्रमरवंशसमाप्तिवर्णनञ्च श्लो. ४६
२	३३२	अजमेरपुरवृत्तान्तः, तोमरान्वयवृत्तान्तवर्णनम् म्लेच्छोपभुक्तचपहानिवंश्यक्षत्रियपत्नीभ्यो जट्ट–जाटय––मेहन––प्रभृतिक्षुद्रजातिक्षात्रियवृत्तान्तवर्णनम् श्लो. २८

अ०	प०	विषयाः
३	३३३	शुक्लनामकाग्निवंश्यभूपालवंश्यचरित्रवर्णनम्. शुक्लेन ब्राह्मणद्वारा बौद्धविजयकरणपूर्वकं द्वारकायां राज्यकरणम्, तद्वंश्यराजवृत्तान्तवर्णनम्. सिंधुदेशवृत्तान्तः, कच्छभुज–देशवृत्तान्तः, उदयपुरवृत्तांतः, कान्यकुब्जवृत्तान्तः, लक्षणांतशुक्लवंश्यसमाप्तिवर्णनम्. शेषक्षुद्रभूपालस्थितिवर्णनम् श्लो. ७९.
४	३३४	परिहरभूपतिवंश्यनृपतिवृत्तान्तवर्णनम् श्लो. ४०
५	३३५	ब्रह्मणो मध्याह्नकालप्राप्तौ भगवदवतारादिवृत्तान्तवर्णनम् श्लो. ३४
६	३३६	देहलीस्थम्लेच्छभूपवृत्तान्तवर्णनारम्भः, सहोज्जीनेन देवतातीर्थखण्डकरणम्, व्यासेन मनसे कल्पजातिधर्मस्थितिवर्णनम्, मोङ्गलतैमुरलङ्गराज्यवर्णनम्. इंद्राण्या सहेंद्रस्य भूमावागमनम्. तत्र बृहस्पतिनेंद्रादिभ्यः सूर्यमाहात्म्यवर्णनम् श्लो. ६५
७	३३७	सूर्यमाहात्म्यवर्णनम्. तत्र धातृशर्मद्विजेश्वरपुरीचारित्रवर्णनम्, मित्रशर्मद्विजचरित्रवर्णनम्, रामानन्दोत्पत्तिवृत्तान्तः, निम्बादित्योत्पत्तिवृत्तान्तः श्लो. ६७
८	३४०	मध्वाचार्योत्पत्तिवृत्तान्तवर्णनम्, श्रीधराचार्योत्पत्तिवृत्तान्तवर्णनम्, विष्णुस्वाम्युत्पत्तिवृत्तान्तः. वाणीभूषणोत्पत्तिवृत्तान्तः, भट्टोजिदीक्षितोत्पत्तिवृत्तान्तः, वराहमिहिराचार्योत्पत्तिवृत्तान्तः श्लो. १२५
९	३४१	धन्वन्तरिसमुत्पत्तिवृत्तान्तः, सुश्रुतोत्पत्तिवृत्तान्तः, जयदेवोत्पत्तिवृत्तान्तः श्लो.६६
१०	३४३	कृष्णचैतन्योत्पत्तिवृत्तान्तवर्णनम्. शङ्कराचार्यसमुत्पत्तिवृत्तान्तवर्णनम् श्लो. ८१
११	३४५	आनन्दगिरिसमुत्पत्तिवृत्तान्तवर्णनम्, वनशर्मसमुत्पत्तिवृत्तान्तवर्णनम्.पुरीशर्मसमुत्पत्तिवृत्तान्तवर्णनम् श्लो.७१
१२	३४६	भारतीशसमुत्पत्तिवृत्तान्तवर्णनम्. गोरखनाथसमुत्पत्तिवृत्तान्तवर्णनम् क्षेत्रशर्मोत्पत्तिवृत्तान्तवर्णनम्. ढुण्ढीराजसमुत्पत्तिवृत्तान्तवर्णनम् श्लो.१०४
१३	३४८	अघोरपंथिभैरवहनुमज्जन्म–रुद्रमाहात्म्य–बालशर्मसमुत्पत्तिवर्णनम् श्लो. ५३
१४	३४९	रुद्रमाहात्म्यवर्णनम्, रामानुजोत्पत्तिवर्णनम् श्लो. ११९
१५	३५२	वस्ववतारवृत्तान्तवर्णने कुबेरावतारत्रिलोचनवैश्योत्पत्तिसविस्तरवृत्तान्तवर्णनम् श्लो. ७३
१६	३५३	नामदेवसमुत्पत्तिवर्णनम्, रंकणवैश्यसमुत्पत्तिवृत्तान्तवर्णनम् श्लो. ८१
१७	३५५	कबीर–नरश्री–पीपा–नानक-नित्यानन्दसाधूनां समुत्पत्तिवृत्तान्तवर्णनम्. श्लो.८८
१८	३५७	अश्विनीकुमारावतारवर्णने सधन–रैदाससमुत्पत्तिवृत्तान्तवर्णनम् श्लो. ५६
१९	३५८	कृष्णचैतन्ययज्ञांशशिष्य–बलभद्र–विष्णुस्वामि–मध्वाचार्यादिचरित्रवृत्तान्तवर्णनम् श्लो. ६६
२०	३५९	कृष्णचैतन्यचरित्रवर्णने जगन्नाथमाहात्म्यवर्णनम् श्लो. ९१
२१	३६१	कण्वब्राह्मणस्यार्यावत्यामुपाध्यायदीक्षितपाठकशुक्लमिश्राग्निहोत्रिद्विवेदित्रिवेदिपाण्डचतुर्वेदीत्यन्वर्थदशपुत्रतद्वंश्योत्पत्तिवृत्तान्तवर्णनम्. कृष्णचैतंन्यादिकृतम्लेच्छमायानिरासवृत्तांतवर्णनम् श्लो. ८१
२२	३६३	तिमिरलिंगपुत्रसरुषादीनां देहल्यां राज्यवृत्तान्तवर्णनम्. अकब्बरराज्यवृत्तान्तवर्णनम् अकब्बरवंश्यसलोमाखुर्दकावरंगराज्यवृत्तान्तवर्णनम्. दाक्षिणात्यदेवपक्षवर्धकसेवाजीय (शिवाजी) राज्यवृत्तान्तः, मुकुल (मोंगल) वंशक्षयवर्णनम्,नादरादिराज्यवृत्तान्तः, रामदत्तवरवानरवंश्यगुरुण्डान्वयसंभूतानां वाणिज्यार्थमार्यदेशं प्रत्यागमनम्, कलिकातानगरीवृत्तान्तः, अष्टकौशल्य (पार्लमेन्ट) द्वाराऽत्र राज्यवृत्तान्तः, गुरुण्डराज्यसमाप्तिः, मौनराज्यवृत्तान्तवर्णनम् श्लो. ९७
२३	३६५	वैक्रमीयद्वाविंशशताब्द्यां किल्किलायां भूतं नंदिशिशुनन्द्युत्पातितद्वंश्योत्पत्तिवृत्तान्तवर्णनम्. वैक्रमीयसप्तविंशतिशताब्द्यां वैदिकधर्मप्रवर्तके तीर्थक्षेत्रोद्धारकपुष्यमित्रराजोत्पत्तिवृत्तान्तवर्णनम्. तदनंतरमेकात्रिंशच्छताब्द्यां भ्रष्टाचारवृत्तान्तवर्णनम्, गुर्जरदेशे संवहावर्त्तकसोमनाथराजोत्पत्तिवृत्तान्तः, राहुराज्ये महमदीयमतप्रचारवृत्तान्तः, सर्वभूमौ म्लेच्छमयत्ववृत्तान्तवर्णनम् श्लो. १३२

२

अ०	प०	विषयाः
२४	३६७	दैत्यानां हरिखण्डे गमनम्. विश्वकर्मणान्यखण्डमार्गावरोधनम्. बलिना वामनांतिके पृथ्वीभोगवृत्तान्तवर्णनम्. वर्णसंकरजीवोत्पत्तिवृत्तान्तवर्णनम्. द्विहस्तमनुष्योत्पत्तिवृत्तान्तवर्णनम्. वामनांशसमुद्भवभूपवृत्तान्तवर्णनम्. कलिद्वितीयतृतीयचरणवर्तमानकालजातजीवजातवृत्तान्तवर्णनम् श्लो. ८१
२५	३६९	कलिचतुर्थचरणारंभे नरकाजीर्णनिवारणार्थं ब्रह्मकृतभगवत्स्तुतिवर्णनम्, कल्क्यवतारकथावर्णनम्. अष्टादशकल्पवृत्तान्तवर्णनम्. कल्क्यर्चामाहात्म्यम्. सत्ययुगारंभदिनमाहात्म्यम् श्लो. २२३
२६	३७३	कल्किविजयवृत्तान्तवर्णनम्. ब्राह्मणादिवर्णव्यवस्थापूर्वकराज्यपदस्थापनवृत्तान्तवर्णनम्. प्रतिसर्गपर्वोपसंहारफलवर्णनम् श्लो. ३८

(इति चतुर्थः खण्डः॥ ४ ॥)

इति प्रतिसर्गपर्वस्थविषयानुक्रमणिका ॥ ३ ॥

अथोत्तरपर्वस्थविषयानुक्रमणिका ॥ ४ ॥

अ०	प०	विषयाः
१	३७६	मङ्गलाचरणम्, छत्राभिषिक्तयुधिष्ठिरमहाराजं:प्रति व्यासाद्यनेकमहर्षिसमागमनम्. युधिष्ठिरेण तान्प्रति स्वज्ञातिवधजन्यपापनिवृत्त्यर्थं नानाविधधर्मशुश्रूषया प्रश्नकरणम्. व्यासस्य श्रीकृष्णं प्रति प्रश्नोत्तरपूर्वकधर्मवर्णने निर्वर्ण्य प्रशंस्य च स्वाश्रमाय गमनम्. श्लो. ३०
२	३७६	श्रीकृष्णयुधिष्ठिरयोः संवादः, श्रीकृष्णेन युधिष्ठिरं प्रति सकलब्रह्माण्डोत्पत्तिवृत्तान्तकथनवर्णनम् श्लो. ५१
३	३७७	भगवन्मायास्वरूपदर्शनवृत्तान्तवर्णनम् श्लो. १०७
४	३७९	जन्मसंसारदोषाख्यापनवर्णनम् श्लो. १३५
५	३८२	अधर्मपापभेदवर्णनम् श्लो. ८५
६	३८४	शुभाशुभगतिफलप्राप्तिवर्णने यमयातनाप्रकारवर्णनम् श्लो. २०९
७	३८८	शकटव्रतमात्म्यवर्णनम् श्लो. ३१
८	३८९	तिलकव्रतमाहात्म्यवर्णनम् श्लो. २५
९	३९०	अशोकव्रतमाहात्म्यवर्णनम् श्लो. १७
१०	३९०	करवीरव्रतमाहात्म्यवर्णनम् श्लो. ९
११	३९०	कोकिलाव्रतमाहात्म्यवर्णनम् श्लो. २३
१२	३९१	बृहत्तपोव्रतमाहात्म्यवर्णनम् श्लो. ३८
१३	३९१	जातिस्मरत्वप्रदभद्रोपवासव्रतमाहांत्म्यवर्णनम् श्लो. १००
१४	३९३	यमद्वितीयाव्रतमाहात्म्यवर्णनम् श्लो. २७
१५	३९४	अशून्यशयनव्रतमाहात्म्यवर्णनम् श्लो. २३
१६	३९५	मधूकतृतीयाव्रतमाहात्म्यवर्णनम् श्लो. १६
१७	३९५	मेघपालीतृतीयाव्रतमाहात्म्यवर्णनम् श्लो. १४
१८	३९५	रंभातृतीयाव्रतमाहात्म्यवर्णनम् श्लो. ३६
१९	३९६	गोष्पदतृतीयाव्रतमाहात्म्यवर्णनम् श्लो. १६
२०	३९६	हरितालीतृतीयाव्रतमाहात्म्यवर्णनम् श्लो. २८
२१	३९७	ललितातृतीयाव्रतमाहात्म्यवर्णनम् श्लो. ४४
२२	३९८	अवियोगतृतीयाव्रतमाहात्म्यवर्णनम् श्लो. ३६
२३	३९९	उमामहेश्वरव्रतमाहात्म्यवर्णनम् श्लो. २८
२४	३९९	पुनः प्रकारान्तरेण रंभाव्रतमाहात्म्यवर्णनम् श्लो. ३६
२५	४००	सौभाग्याष्टकतृतीयाव्रतमाहात्म्यवर्णनम् श्लो. ४४
२६	४०१	रसकल्याणिनीव्रतमाहात्म्यवर्णनम् श्लो. ६८
२७	४०२	आर्द्रानन्दकरीतृतीयाव्रतमाहात्म्यवर्णनम् श्लो. २७
२८	४०३	चैत्र–भाद्रपद–माघ–तृतीयाव्रतमाहात्म्यवर्णनम् श्लो. ५८
२९	४०४	अनन्तरतृतीयांव्रतमाहात्म्यवर्णनम् श्लो. ७७

अ॰	प॰	विषयाः
३०	४०६	अक्षय्यतृतीयाव्रतमाहात्म्यवर्णनम् श्लो. १९
३१	४०६	अंगारकचतुर्थीव्रतमाहात्म्यवर्णनम् श्लो. ६२
३२	४०८	विनायकस्नपनचतुर्थीव्रतमाहात्म्यवर्णनम् श्लो. ३०
३३	४०९	विनायकचतुर्थीव्रतमाहात्म्यवर्णनम् श्लो. १३
३४	४०९	पंचमे व्रते शांतिव्रतमाहात्म्यवर्णनम् श्लो. १०
३५	४०९	सारस्वतव्रतमाहात्म्यवर्णनम् श्लो. २०
३६	४१०	नागपंचमीव्रतमाहात्म्यवर्णनम् श्लो. ६१
३७	४११	श्रीपञ्चमीव्रतमाहात्म्यवर्णनम् श्लो. ५८
३८	४१२	विशोकषष्ठीव्रतमाहात्म्यवर्णनम् श्लो. १७
३९	४१३	कमलषष्ठीव्रतमाहात्म्यवर्णनम् श्लो. १५
४०	४१३	मन्दारषष्ठीव्रतमाहात्म्यवर्णनम् श्लो. १५
४१	४१३	ललिताषष्ठीव्रतमाहात्म्यवर्णनम् श्लो. १८
४२	४१४	कार्त्तिकेयपूजाषष्ठीव्रतमाहात्म्यवर्णनम् श्लो. २९
४३	४१४	विजयसप्तमीव्रतमाहात्म्यवर्णनम् श्लो. ३०
४४	४१५	आदित्यमण्डलविधिवर्णनम् श्लो. ९
४५	४१५	त्रयोदशवर्ज्यसप्तमीव्रतमाहात्म्यवर्णनम् श्लो. ५
४६	४१५	कुक्कुटमर्कटीव्रतमाहात्म्यवर्णनम् श्लो. ४३
४७	४१६	उभयसप्तमीव्रतमाहात्म्यवर्णनम् श्लो. २५
४८	४१७	कल्याणसप्तमीव्रतमाहात्म्यवर्णनम् श्लो. १६
४९	४१७	शर्करासप्तमीव्रतमाहात्म्यवर्णनम् श्लो. १८
५०	४१७	कमलासप्तमीव्रतमाहात्म्यवर्णनम् श्लो. ११
५१	४१८	शुभसप्तमीव्रतमाहात्म्यवर्णनम् श्लो. १४
५२	४१८	स्नपनसप्तमीव्रतमाहात्म्यवर्णनम् श्लो. ४०
५३	४१९	अचलासप्तमीव्रतमाहात्म्यवर्णनम् श्लो. ४८
५४	४२०	बुधाष्टमीव्रतमाहात्म्यवर्णनम् श्लो ५९
५५	४२१	जन्माष्टमीव्रतमाहात्म्यवर्णनम् श्लो. ६९
५६	४२३	दूर्वाष्टमीव्रतमाहात्म्यवर्णनम् श्लो. २३
५७	४२३	कृष्णाष्टमीव्रतमाहात्म्यवर्णनम् श्लो. ३१
५८	४२४	अनघाष्टमीव्रतमाहात्म्यवर्णनम् श्लो. ७१
५९	४२५	सोमाष्टमीव्रतमाहात्म्यवर्णनम् श्लो. २३
६०	४२६	श्रीवृक्ष (बिल्व) नवमीव्रतमाहात्म्यवर्णनम्. श्लो. १०
६१	४२६	ध्वजनवमीव्रतमाहात्म्यवर्णनम् श्लो. ५७
६२	४२७	उल्कानवमीव्रतमाहात्म्यवर्णनम् श्लो. १७
६३	४२८	दशावतारचरित्रव्रतमाहात्म्यवर्णनम् श्लो. ३२
६४	४२८	आशादशमीव्रतमाहात्म्यवर्णनम् श्लो. ४६
६५	४२९	तारकद्वादशीव्रतमाहात्म्यवर्णनम् श्लो. ४९
६६	४३०	अरण्यद्वादशीव्रतमाहात्म्यवर्णनम् श्लो. २७
६७	४३१	रोहिणीचन्द्रव्रतमाहात्म्यवर्णनम् श्लो. १६
६८	४३१	हरिहरहिरण्यगर्भप्रभाकराणामवियोगव्रतमाहात्म्यवर्णनम् श्लो. २५
६९	४३२	गोवत्सद्वादशीव्रतमाहात्म्यवर्णनम् श्लो. ९०
७०	४३४	गोविन्दशयनोत्थापनद्वादशीव्रतमाहात्म्यवर्णनम् श्लो. ६६
७१	४३५	नीराजनद्वादशीव्रतमाहात्म्यवर्णनम् श्लो. ४६
७२	४३६	भीष्मपञ्चकव्रतमाहात्म्यवर्णनम् श्लो. ५२
७३	४३७	मल्लद्वादशीव्रतमाहात्म्यवर्णनम् श्लो. २१
७४	४३८	भीमद्वादशीव्रतमाहात्म्यवर्णनम् श्लो. ७२
७५	४३९	श्रवणद्वादशीव्रतमाहात्म्यवर्णनम् श्लो.७१

अ०	प०	विषयाः
७६	४४०	विजयश्रवणाद्वादशीव्रतमाहात्म्यवर्णनम् श्लो. ६७
७७	४४२	संप्राप्तिद्वादशीव्रतमाहात्म्यवर्णनम् श्लो. १२
७८	४४२	गोविंदद्वादशीव्रतमाहात्म्यवर्णनम् श्लो. १४
७९	४४३	अखण्डद्वादशीव्रतमाहात्म्यवर्णनम् श्लो. २५
८०	४४३	मनोरथद्वादशीव्रतमात्म्यवर्णनम् श्लो. ३०
८१	४४४	उल्काद्वादशीव्रतमाहात्म्यवर्णनम् श्लो. १३
८२	४४४	सुकृतद्वादशीव्रतमाहात्म्यवर्णनम् श्लो. ७१
८३	४४५	धरणीव्रतमाहात्म्यवर्णनम् श्लो. १४७
८४	४४९	विशोकद्वादशीव्रतमाहात्म्यवर्णनम् श्लो. ५६
८५	४५०	विभूतिद्वादशीव्रतमाहात्म्यवर्णनम् श्लो. ५४
८६	४५१	मदनद्वादशीव्रतमाहात्म्यवर्णनम् श्लो. ३७
८७	४५२	अबाधकव्रतमाहात्म्यवर्णनम् श्लो. १६
८८	४५२	मन्दारनिम्बार्ककरवीरमाहात्म्यवर्णनम् श्लो. ९
८९	४५२	यमदर्शनत्रयोदशीव्रतमाहात्म्यवर्णनम् श्लो. ५२
९०	४५३	अनङ्गत्रयोदशीव्रतमाहात्म्यवर्णनम् श्लो. ४९
९१	४५४	पालीव्रतमाहात्म्यवर्णनम् श्लो. १२
९२	४५५	रंभाव्रतमाहात्म्यवर्णनम् श्लो. १५
९३	४५५	आग्नेयीचतुर्दशीव्रतमाहात्म्यवर्णनम् श्लो. ७७
९४	४५७	अनन्तचतुर्दशीव्रतमाहात्म्यवर्णनम् श्लो. ७३
९५	४५८	श्रवणिकाव्रतमाहात्म्यवर्णनम् श्लो. ४६
९६	४५९	नक्तोपवासविधानवर्णनम् श्लो. १४
९७	४५९	शिवचतुर्दशीव्रतमाहात्म्यवर्णनम् श्लो. ३३
९८	४६०	फलत्यागचतुर्दशीव्रतमाहात्म्यवर्णनम् श्लो. २६
९९	४६१	विजयपौर्णमासीव्रतमाहात्म्यवर्णनम् श्लो. ६७
१००	४६२	वैशाखीकार्तिकीमाघीपौर्णमासीव्रतमाहात्म्यवर्णनम् श्लो. २२
१०१	४६३	युगादितिथिव्रतमाहात्म्यवर्णनम् श्लो. ३२
१०२	४६३	वटसावित्रीव्रतमाहात्म्यवर्णनम् श्लो. ९१
१०३	४६५	कार्तिक्यां कृत्तिकाव्रतमाहात्म्यवर्णनम् श्लो. ४६
१०४	४६६	पूर्णमनोरथव्रतमाहात्म्यवर्णनम् श्लो. २६
१०५	४६७	विशोकपूर्णिमाव्रतमाहात्म्यवर्णनम् श्लो. २३
१०६	४६७	अनन्तव्रतमाहात्म्यवर्णनम् श्लो. ६७
१०७	४६९	सांभरायणीव्रतमाहात्म्यवर्णनम् श्लो. ६९
१०८	४७०	नक्षत्रपुरुषव्रतमाहात्म्यवर्णनम् श्लो. ४२
१०९	४७१	शिवनक्षत्रपुरुषव्रतमाहात्म्यवर्णनम् श्लो. ३५
११०	४७२	संपूर्णव्रतमाहात्म्यवर्णनम् श्लो. ३५
१११	४७३	कामदानवेश्याव्रतमाहात्म्यवर्णनम् श्लो. ६२
११२	४७४	वृन्ताकव्रतविधिवर्णनम् गद्यम् १
११३	४७४	ग्रहनक्षत्रव्रतमाहात्म्यवर्णनम् श्लो. ४३
११४	४७५	शनैश्चरव्रतमाहात्म्यवर्णनम् श्लो. ५०
११५	४७६	आदित्यदिननक्तविधिवर्णनम् श्लो. २३
११६	४७७	संक्रान्त्युद्यापनवर्णनम् श्लो. १७
११७	४७७	विष्टिव्रतमाहात्म्यवर्णनम् श्लो. ४६
११८	४७८	अगस्त्यार्घ्यविधिव्रतमाहात्म्यवर्णनम् श्लो. ८३
११९	४८०	अभिनवचन्द्रार्घ्यव्रतमाहात्म्यवर्णनम् श्लो. १०
१२०	४८०	शुक्रबृहस्पत्यर्घपूजाविधिवर्णनम् श्लो. १५
१२१	४८०	व्रतपञ्चाशीतिमाहात्म्यवर्णनम् श्लो. १८७
१२२	४८४	माघस्नानविधिवर्णनम् श्लो. ३५

अ०	पृ०	विषयाः
१२३	४८५	नित्यस्नानविधिवर्णनम् श्लो. ३३
१२४	४८६	रुद्रस्नानविधिवर्णनम् श्लो. ३२
१२५	४८६	चन्द्रादित्यग्रहणस्नानविधिवर्णनम् श्लो. २०
१२६	४८७	अपरसांभरायणीयव्रतमाहात्म्यवर्णनम् श्लो. ४८
१२७	४८८	वापीकूपतडागोत्सर्गविधिवर्णनम् श्लो. ९१
१२८	४९०	वृक्षोद्यापनविधिवर्णनम् श्लो. ४५
१२९	४९०	देवपूजाफलव्रतवर्णनम् श्लो. १३
१३०	४९१	दीपदानविधिवर्णनम् श्लो. ६९
१३१	४९२	वृषोत्सर्गविधिवर्णनम् श्लो. २२
१३२	४९३	फाल्गुनपूर्णिमोत्सववर्णनम् श्लो. ५१
१३३	४९४	आन्दोलकविधिवर्णनम् श्लो. ५९
१३४	४९५	दमनकान्दोलकरथयात्रामहोत्सववर्णनम् श्लो. ७१
१३५	४९७	मदनमहोत्सवर्णनम् श्लो. ३६
१३६	४९७	भूतमात्रुत्सवविधिवर्णनम् श्लो. ४२
१३७	४९८	श्रावणपूर्णिमारक्षाबन्धनविधिवर्णनम् श्लो. २३
१३८	४९९	महानवमीव्रतमाहात्म्यवर्णनम् श्लो. ११५
१३९	५०१	महेन्द्रध्वजमहोत्सववर्णनम् श्लो. ४३
१४०	५०२	दीपालिकोत्सववर्णनम् श्लो. ७३
१४१	५०३	नवग्रहलक्षविधिवर्णनम् श्लो. १२१
१४२	५०६	कोटिहोमविधिवर्णनम् श्लो. ८०
१४३	५०८	महाशान्तिविधिवर्णनम् श्लो. ४६
१४४	५०९	गणनाथशान्तिविधिवर्णनम् श्लो. २७
१४५	५०९	नक्षत्रहोमविधिवर्णनम् श्लो. २३
१४६	५०९	अपराधशतव्रतवर्णनम् श्लो. ६०
१४७	५११	कांचनपुरीव्रतवर्णनम् श्लो. ८७
१४८	५१२	कन्याप्रदानमाहात्म्यवर्णनम् श्लो. ११
१४९	५१३	ब्राह्मणशुश्रूषाविधिवर्णनम् श्लो. ९
१५०	५१३	वृषदानविधिवर्णनम् श्लो. १७
१५१	५१३	प्रत्यक्षधेनुदानविधिवर्णनम् श्लो. ३९
१५२	५१४	तिलधेनुदानविधिवर्णनम् श्लो. ४२
१५३	५१५	जलधेनुदानविधिवर्णनम् श्लो. ७२
१५४	५१६	घृतधेनुदानविधिवर्णनम् श्लो. १९
१५५	५१७	लवणधेनुदानविधिवर्णनम् श्लो. २६
१५६	५१७	काञ्चनधेनुदानविधिवर्णनम् श्लो. २७
१५७	५१८	रत्नधेनुदानविधिवर्णनम् श्लो. १८
१५८	५१८	उभयमुखीगोदानविधिवर्णनम् श्लो. १४
१५९	५१९	गोसहस्रप्रदानविधिवर्णनम् श्लो. ४५
१६०	५२०	वृषभदानविधिवर्णनम् १६
१६१	५२०	कपिलादानमाहात्म्यवर्णनम् श्लो. ७९
१६२	५२२	महिषीदानविधिवर्णनम् श्लो. २१
१६३	५२२	अविदानविधिवर्णनम् श्लो. २२
१६४	५२३	भूमिदानविधिवर्णनम् श्लो. ४२
१६५	५२४	सौवर्णपृथिवीदानविधिवर्णनम् श्लो. ३३
१६६	५२४	हलपंक्तिदानविधिवर्णनम् श्लो. २९
१६७	५२५	आपाकदानविधिवर्णनम्. श्लो. ३८
१६८	५२६	गृहदानविधिवर्णनम् श्लो. ४५

अ०	प०	विषयाः
१६९	५२७	अन्नदानमाहात्म्यवर्णनम् श्लो. ७७
१७०	५२८	स्थालीदानविधिवर्णनम् श्लो. ३२
१७१	५२९	दासीदानविधिवर्णनम् श्लो. २३
१७२	५३०	प्रपादानविधिवर्णनम् श्लो. २६
१७३	५३०	अग्नीष्टिकादानविधिवर्णनम् श्लो. १२
१७४	५३१	विद्यादानविधिवर्णनम् श्लो. २९
१७५	५३१	तुलापुरुषदानविधिवर्णनम् श्लो. ९९
१७६	५३४	हिरण्यगर्भदानविधिवर्णनम् श्लो. ६९
१७७	५३५	ब्रह्माण्डदानविधिवर्णनम् श्लो. ४६
१७८	५३६	कल्पवृक्षदानविधिवर्णनम् श्लो. ४३
१७९	५३७	कल्पलतादानविधिवर्णनम् श्लो. १९
१८०	५३७	गजरथाश्वरथदानविधिवर्णनम् श्लो. ४९
१८१	५३८	कालपुरुषदानविधिवर्णनम् श्लो. २७
१८२	५३९	सप्तसागरदानविधिवर्णनम् श्लो. १९
१८३	५३९	महाभूतघटदानविधिवर्णनम् श्लो. १७
१८४	५४०	शय्यादानविधिवर्णनम् श्लो. २३
१८५	५४०	आत्मप्रतिकृतिदानविधिवर्णनम् श्लो. १७
१८६	५४१	हिरण्याश्वदानविधिवर्णनम् श्लो. १४
१८७	५४१	हिरण्याश्वरथदानविधिवर्णनम् श्लो. १४
१८८	५४१	कृष्णाजिनदानविधिवर्णनम् श्लो. २१
१८९	५४२	हेमहस्तिरथदानविधिवर्णनम् श्लो. १३
१९०	५४२	विश्वचक्रदानविधिवर्णनम् श्लो. २८
१९१	५४३	भुवनप्रतिष्ठामाहात्म्यवर्णनम् श्लो. ६८
१९२	५४४	नक्षत्रदानविधिवर्णनम् श्लो. ३९
१९३	५४५	तिथिदानमाहात्म्यवर्णनम् श्लो. ६६
१९४	५४६	वराहदानविधिवर्णनम् श्लो. २२
१९५	५४७	धान्यपर्वतदानविधिवर्णनम् श्लो. ४८
१९६	५४८	लवणपर्वतदानविधिवर्णनम् श्लो. ११
१९७	५४८	गुडाचलदानविधिवर्णनम् श्लो. २६
१९८	५४९	हेमाचलदानविधिवर्णनम् श्लो. ९
१९९	५४९	तिलाचलदानविधिवर्णनम् श्लो. २६
२००	५५०	कार्पासाचलदानविधिवर्णनम् श्लो. १०
२०१	५५०	घृताचलदानविधिवर्णनम् श्लो. १३
२०२	५५०	रत्नाचलदानविधिवर्णनम् श्लो. १३
२०३	५५०	रौप्याचलदानविधिवर्णनम् श्लो. ११
२०४	५५१	शर्कराचलदानविधिवर्णनम् श्लो. ३८
२०५	५५२	सदाचारधर्मवर्णनम्, श्लो. १५३
२०६	५५५	रोहिणीचन्द्रशयनव्रतमाहात्म्यवर्णनम् श्लो. ३०
२०७	५५५	कृष्णयुधिष्ठिरसंवादसमाप्तिः, श्रीकृष्णस्य द्वारकां प्रति गमनवर्णनम् श्लो. १५
२०८	५५६	उत्तरपर्वस्थसंक्षिप्तविषयानुक्रमणिकावर्णनम् , ग्रन्थसमाप्तिवर्णनम् श्लो. ३४

इति श्रीखानदेशीयरावेरग्रामनिवासिपरशुरामभट्टतनयगोविन्दशास्त्रिविरचिता भविष्यमहापुराणविषयानुक्रमणिका सम्पूर्णा ॥

श्रीभविष्यमहापुराणान्तर्गतप्रतिसर्गपर्वविषयकसूचना ।

अयि विचारचातुर्यचमत्कृतिशालिशेमुषीका दयोदयमहोदया विद्वांसः ! अत्रेदं विदांकुर्वन्तु तत्रभवन्तो भवन्तः, यत्किल श्रीभविष्यमहापुराणस्य तृतीयेऽस्मिन् प्रतिसर्गपर्वणि भविष्यदाख्यानवर्णनमाश्चर्यकारि वर्त्तत इति । तत्र यद्यपि महर्षीणां त्रिकालदर्शित्वान्नैतदसम्भवं, तथापि कतिपयप्रकारैरत्र जनाः शङ्कन्त इति विशेषसूचनावसरः,

एतन्महापुराणस्य पूर्वमुद्रणसमयेऽपरभागस्य बहून्यादर्शपुस्तकान्युपलब्धानि परं प्रतिसर्गपर्वण एकमेवेति, नारदीयपुराणे च पुराणानुक्रमणिकाप्रक्रमे भविष्यमहापुराणवर्णने “प्रतिसर्गाह्वयं त्वन्त्यं प्रोक्तं सर्वकथाचितम् । सभविष्यं विनिर्दिष्टं पर्व व्यासेन धीमता ॥” इत्युपलभ्यत एवेति यथोपलब्धमेवैतन्मुद्रितम्, अधुनाप्यन्याऽनुपलब्ध्या तथैव मुद्र्यते परं निखिलपरोपकारप्रवीणान् धर्मधुरीणान् महतः सप्रश्रयं प्रार्थये–येषामन्तिक इतो भिन्नं प्रतिसर्गपर्वपुस्तकं, सम्पूर्णं वा भविष्यमहापुराणपुस्तकं चेत्तेऽवश्यमनुकम्पया प्रेषयेयुः, यतोन्यसंस्करणे पुनः संशोध्य मुद्रणमाप्येतैतदिति ।

विद्वदनुग्रहाभिलाषी——क्षेमराज–श्रीकृष्णदास,
“श्रीवेङ्कटेश्वर” (स्टीम्) यन्त्रालयाध्यक्षो–मुम्बई-स्थः ।

॥ अथ श्रीभविष्यमहापुराणे प्रथमं ब्राह्मपर्व प्रारभ्यते ॥

ब्राह्मपर्व १.


सूत.
शौनकादिऋषि.
कृष्ण
सांब.
सांब.
नारद.
दिंडी.
ब्रह्मा.
बालक.
शंख
ऋ.
बा.
विप्र.
अरुण.
गरुड.
शतानीक.
सुमंतु.
ब्रम्हदेव.
रुद्र.
कृष्ण
कृष्णस्त्री
सा.
साव.
ब्रम्हदेव.
याज्ञवल्क्य.
भीष्म.
व्यास.
ब्रम्हदेव
ऋ.
सूर्य
दिंडी.
सांब.
सूर्य.
ब्रह्मा
विष्णु.

॥ ॥ श्रीगणेशाय नमः ॥ ॥ ॐ नमो भगवते वासुदेवाय ॥ ॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ॥ देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥ १ ॥ जयति पराशरसूनुः सत्यवतीहृदयनन्दनो व्यासः ॥ यस्यास्यकमलगलितं वाङ्मयममृतं जगत्पिबति ॥ २ ॥ मूकं करोति वाचालं पंगुं लंघयते गिरिम् ॥ यत्कृपा तमहं वन्दे परमानन्दमाधवम् ॥ ३ ॥ पाराशर्यवचःसरोजममलं गीतार्थगन्धोत्कटं नानाख्यानककेसरं हरिकथासंबोधनाबोधितम् ॥ लोके सज्जनषट्पदैरहरहः पेपीयमानं मुदा भूयाद्भारतपंकजं कलिमलप्रध्वंसि नः श्रेयसे ॥ ४ ॥ यो गोशतं कनकशृंगमयं ददाति विप्राय वेदविदुषे च बहुश्रुताय ॥ पुण्यां भविष्यसुकथां शृणुयात्समग्रां पुण्यं समं भवति तस्य च तस्य चैव ॥ ५ ॥ कृत्वा पुराणानि पराशरात्मजः सर्वाण्यनेकानि सुखावहानि ॥ तत्रात्मसौख्याय भविष्यधर्मान्कलौ युगे भावि लिलेख सर्वम् ॥ ६ ॥ तत्रापि सर्वर्षिवरप्रमुख्यैः पराशराद्यैर्मुनिभिः प्रणीतान् ॥ स्मृत्युक्तधर्मागमसंहितार्थान्व्यासः समासादवदद्भविष्यम् ॥ ७ ॥ अल्पायुषो लोकजनान्समीक्ष्य विद्याविहीनान्पशुवत्सुचेष्टान् ॥ तेषां सुखार्थं प्रतिबोधनाय व्यासः पुराणं प्रथितं चकार ॥ ८ ॥ ❀ जयति भुवनदीपो भास्करो लोककर्त्ता जयति च शितिदेहः शार्ङ्गधन्वा मुरारिः ॥ जयति च शशिमौली रुद्रनामाभिधेयो जयति च स तु देवो भानुमांश्चित्रभानुः ॥ १ ॥ श्रियावृतं तु राजानं शतानीकं महाबलम् ॥ अभिजग्मुर्महात्मानः सर्वे द्रष्टुं महर्षयः ॥ २ ॥ भृगुरत्रिर्वसिष्ठश्च पुलस्त्यः पुलहः क्रतुः ॥ पराशरस्तथा व्यासः सुमन्तुर्जैमिनिस्तथा ॥ ३ ॥ मुनिः पैलो याज्ञवल्क्यो गौतमस्तु महातपाः ॥ भारद्वाजो मुनिर्धीमांस्तथा नारदपर्वतौ ॥ ४ ॥ वैशंपायनो महात्मा शौनकश्च महातपाः ॥ दक्षोंगिरास्तथा गर्गो गालवश्च महातपाः ॥ ५ ॥ तानागतानृषीन्दृष्ट्वा शतानीको महीपतिः ॥ विधिवत्पूजयामास अभिगम्य महामतिः ॥ ६ ॥ पुरोहितं पुरस्कृत्य अर्घं गां स्वागतेन च ॥ पूजयित्वा ततः सर्वान्प्रणम्य शिरसा भृशम् ॥ ७ ॥ सुखासीनांस्ततो राजा निरातंकान्गतक्लमान् ॥ उवाच प्रणतो भूत्वा बाहुमुद्धृत्य दक्षिणम् ॥ ८ ॥ इदानीं सफलं जन्म मन्येऽहं भुवि सत्तमाः ॥ आत्मनो द्विजशार्दूलास्तथा कीर्तिर्यशो बलम् ॥ ९ ॥ धन्योऽहं पुण्यकर्मा च यतो मां द्रष्टुमागताः ॥ येषां स्मरणमात्रेण युष्माकं पूयते नरः ॥ १० ॥ श्रोतुमिच्छाम्यहं किंचिद्धर्मशास्त्रमनुत्तमम् ॥ आनृशंस्यं समाश्रित्य कथयध्वं महाबलाः ॥ ११ ॥ येनाहं धर्मशास्त्रं तु श्रुत्वा गच्छे परां गतिम् ॥ यथा गतो मम पिता श्रुत्वा वै भारतं पुरा ॥ १२ ॥ तथोक्तास्तेन राज्ञा वै ब्राह्मणास्ते समन्ततः ॥

समागम्य मिथस्ते तु विमृश्य च भृशं[1] तदा ॥ १३ ॥ पूजयित्वा ततो व्यासमिदं वचनमब्रुवन् ॥ व्यासं प्रसादय विभो एष ते कथयिष्यति ॥ १४ ॥ तिष्ठत्यस्मिन्महाबाहो वयं वक्तुं न शक्नुमः ॥ तिष्ठमाने गुरौ शिष्यः कथं वक्ति महामते ॥ १५ ॥ अयं[2] गुरुः सदास्माकं साक्षान्नारायणस्तथा ॥ कृपालुश्च तथा चायं तथा दिव्यविधानवित् ॥ १६ ॥ चतुर्णामपि वर्णानां पावनाय महात्मनाम् ॥ धर्मशास्त्रमनेनोक्तं धर्माद्यैः सुसमन्वितम् ॥ १७ ॥ बिभेति गहनाच्छास्त्राल्लोको व्याधिरिवौषधात् ॥ भारतस्य[3] च विस्तारो मुनिना व्याहृतः स्वयम् ॥ १८ ॥ यथा स्वादु च पथ्यं च दद्यात्स्वं भिषगौषधम् ॥ तथा रम्यं च शास्त्रं च भारतं कृतवान्मुनिः ॥ १९ ॥ आस्तिक्यारोहसोपानमेतद्भारतमुच्यते ॥ तच्छ्रुत्वा स्वर्गनरकौ लोकः साक्षादवेक्षते ॥ २० ॥ देवतातीर्थतपसां भारतादेव निश्चयः ॥ न जन्यते नास्तिकता तस्य मीमांसकैरपि ॥ २१ ॥ विष्णौ[4] देवेषु वेदेषु गुरुषु ब्राह्मणेषु च ॥ भक्तिर्भवति कल्याणी भारतादेव धीमताम् ॥ २२ ॥ धर्मार्थकाममोक्षाणां भारतात्सिद्धिरेवं[5] हि ॥ अजिह्मो भारतः पंथा निर्वाणपदगामिनाम् ॥ २३ ॥ मोक्षधर्मार्थकामानां प्रपञ्चो भारते कृतः ॥ अनित्यतापसंतप्ता भवंति तस्य मुक्तये ॥ २४ ॥ विपत्तिं भारताच्छ्रुत्वा वृष्णिपांडवसंपदाम् ॥ दुःखावसानाद्राजेन्द्र पुण्यं च संश्रयेद्बुधः ॥२५॥ एवंविधं[6] भारतं वै प्रोक्तं येन महात्मना ॥ सोऽयं नारायणः साक्षाद्व्यासरूपी महाँमुनिः[7] ॥ २६ ॥ स तेषां वचनं श्रुत्वा प्रतापी यो महीपतिः ॥ प्रसादयामास मुनिं व्यासं शास्त्रविशारदम् ॥२७॥ ॥ ॥ शतानीक उवाच ॥ ॥ अंजलिः शिरसा ब्रह्मन्कृतोऽयं पादयोस्तव ॥ ब्रूहि मे धर्मशास्त्रं[8] तु येनाहं पूततां व्रजे ॥ २८ ॥ समुद्धर भवादस्मात्कीर्तयित्वा कथां शुभाम् ॥ यथा मम पिता पूर्वं कीर्तयित्वा तु भारतम् ॥ २९ ॥ तस्यैतद्वचनं श्रुत्वा व्यासो वचनमब्रवीत् ॥ एष शिष्यः सुमंतुर्मे कथयिष्यति ते प्रभो ॥ ३० ॥ यदिच्छसि महाबाहो प्रीतिदं चाद्भुतं शुभम् ॥ श्रव्यं भरतशार्दूल सर्वपापभयापहम् ॥३१॥ यथा वैशंपायनेन पुरा प्रोक्तं पितुस्तव ॥ महाभारतव्याख्यानं ब्रह्महत्याव्यपोहनम् ॥ ३२ ॥ अथ तमृषयः सर्वे राजानमिदमब्रुवन् ॥ साधु प्रोक्तं महाबाहो व्यासेनामितबुद्धिना ॥ ३३ ॥ सुमंतुं पृच्छ राजर्षे सर्वशास्त्रविशारदम् ॥ अस्माकमपि राजेंद्र श्रवणे जायते मतिः ॥३४॥ अथ व्यासो महातेजा सुमंतुमृषिमब्रवीत् ॥ कथयास्मै कथास्तात याः श्रुत्वा मोदते नृपः ॥ भारतादिकथानां तु यत्रास्य रमते मनः ॥ ३५ ॥ असावपि महा

---

[1] भृगुम्–इति पाठः । [2] स्वयं गुरुः सदाध्यक्षो यथा नारायणस्तथा–इ० पा० । [3] भारतशास्त्रसारोऽयमतः काव्यात्मना कृतः–इ० पा० । [4] विद्वत्सु–इ० पा० । [5] सिद्धयसंशयः–इ० पा० । [6] भारतं वै पञ्चविधम्–इ० पा० । [7] महामतिः–इ० पा० । [8] सर्वशास्त्रं च–इ० पा० ।

तेजाः श्रुत्वा भावं महामतेः ॥ व्यासस्य द्विजशार्दूल ऋषीणां चापि सर्वशः ॥ ३६ ॥ चकार वक्तुं स मनस्तस्मै राज्ञे महामतिः ॥ व्यासस्य शासनाद्विप्र
ऋषीणां चैव सर्वशः ॥ ३७ ॥ अथ राजा महातेजा आजमीढो द्विजोत्तमम् ॥ प्रणम्य शिरसात्यर्थं प्रवक्तुमुपचक्रमे ॥ ३८ ॥ ॥ शतानीक
उवाच ॥ ॥ पुण्याख्यानं मम ब्रह्मन्पावनाय प्रकीर्तय ॥ श्रुत्वा यद्ब्राह्मणश्रेष्ठ मुच्येऽहं सर्वपातकात् ॥ ३९ ॥ ॥ सुमंतुरुवाच ॥ ॥ नानाविधानि
शास्त्राणि संति पुण्यानि भारत ॥ यानि श्रुत्वा नरो राजन्मुच्यते सर्वकिल्बिषैः ॥ ४० ॥ किमिच्छसि महाबाहो श्रोतुं यत्त्वां
ब्रवीमि वै ॥ भारतादिकथानां तु यासु धर्मादयः स्थिताः ॥ ४१ ॥ ॥ शतानीक उवाच ॥ ॥ मतानि कानि विप्रेंद्र[1] धर्मशास्त्राणि सुव्रत ॥
यानि श्रुत्वा नरो विप्र मुच्यते सर्वकिल्बिषैः ॥४२॥ ॥ सुमंतुरुवाच ॥ ॥ श्रूयंतां धर्मशास्त्राणि मनुर्विष्णुर्यमोंगिराः ॥ वशिष्ठदक्षसंवर्तशातातपपराशराः
॥ ४३ ॥ आपस्तंबो[2]ऽथ उशना कात्यायनबृहस्पती ॥ गौतमः शंखलिखितौ हारीतोऽत्रिरथापि वा ॥ ४४ ॥ एतानि धर्मशास्त्राणि श्रुत्वा
ज्ञात्वा च भारत ॥ वृंदारकपुरं गत्वा मोदते नात्र संशयः ॥४५॥ ॥ शतानीक उवाच ॥ ॥ यान्येतानि त्वयोक्तानि धर्मशास्त्राणि सुव्रत ॥ नेच्छामि
श्रोतुं विप्रेंद्र श्रुतान्येतानि[3] हि द्विज ॥ ४६ ॥ त्रयाणामपि वर्णानां प्रोक्तानामपि पंडितैः ॥ श्रेयसे न तु शूद्राणां तत्र मे वचनं शृणु ॥ ४७ ॥
चतुर्णामिह वर्णानां श्रेयसे यानि सुव्रत[4] ॥ भवंति द्विजशार्दूल श्रुतानि भुवनत्रये ॥ ४८ ॥ विशेषतश्चतुर्थस्य वर्णस्य द्विजसत्तम ॥४९॥ ब्राह्मणादिषु
वर्णेषु त्रिषु वेदाः प्रकल्पिताः ॥ मन्वादीनि च शास्त्राणि तथांगानि समंततः ॥ ५० ॥ शूद्राश्चैव भृशं दीनाः प्रतिभांति द्विजप्रभो ॥ धर्मार्थकाममोक्षस्य
शक्ताः स्युरवने कथम् ॥ ५१ ॥ आगमेन विहीना हि अहो कष्टं मतं मम ॥ कश्चैषामागमः प्रोक्तः पुरा द्विजमनीषिभिः ॥ त्रिवर्गप्राप्तये ब्रह्मञ्छ्रेयसे
च तथोभयोः[5] ॥ ५२ ॥ ॥ सुमंतुरुवाच ॥ ॥ साधुसाधु महाबाहो शृणु मे परमं वचः ॥ चतुर्णामपि वर्णानां यानि प्रोक्तानि
श्रेयसे ॥ ५३ ॥ धर्मशास्त्राणि[6] राजेंद्र शृणु तानि नृपोत्तम ॥ विशेषतश्च शूद्राणां पावनानि मनीषिभिः[7] ॥ ५४ ॥ अष्टादश पुराणानि चरितं राघवस्य
च ॥ रामस्य कुरुशार्दूल धर्मकामार्थसिद्धये ॥ ५५ ॥ तथोक्तं भारतं वीर पाराशर्येण धीमता ॥ वेदार्थं सकलं योज्य[8] धर्मशास्त्राणि च प्रभो ॥
॥ ५६ ॥ कृपालुना कृतं शास्त्रं चतुर्णामिह श्रेयसे ॥ वर्णानां भवमग्नानां कृतं पोतो ह्यनुत्तमम् ॥ ५७॥ अष्टादशपुराणानि अष्टौ व्याकरणानि च ॥

---

[1] ते विप्र–इ० पा० । [2] आपस्तंबोशना व्यासः–इ० पा० । [3] गुह्यानि–इ० पा० । [4] सर्वदा–इ० पा० । [5] इदंलोकपरलोकयोः । [6] कर्मशास्त्राणि–इ० पा० । [7] कथितानीति शेषः । [8] ल्यबार्थः ।

ज्ञात्वा सत्यवतीसूनुश्चक्रे भारतसंहिताम् ॥ ५८ ॥ यां श्रुत्वा पुरुषो राजन्मुच्यते ब्रह्महत्यया ॥ प्रथमं प्रोच्यते ब्राह्मं द्वितीयं चैंद्रमुच्यते ॥ ५९ ॥
याम्यं प्रोक्तं ततो रौद्रं वायव्यं वारुणं तथा ॥ सावित्रं च तथा प्रोक्तमष्टमं वैष्णवं तथा ॥ ६० ॥ एतानि व्याकरणानि. पुराणानि निबोध मे ॥
ब्राह्मं पाद्मं वैष्णवं च शैवं भागवतं तथा ॥ ६१ ॥ तथान्यन्नारदीयं च मार्कंडेयं च सप्तमम् ॥ आग्नेयमष्टमं वीर भविष्यं नवमं स्मृतम् ॥ ६२ ॥
दशमं ब्रह्मवैवर्तं लैंगमेकादशं स्मृतम् ॥ वाराहं द्वादशं प्रोक्तं स्कांदं चैव त्रयोदशम् ॥ ६३ ॥ चतुर्दशं वामनं च कौर्मं पंचदशं स्मृतम् ॥ मात्स्यं च
गारुडं चैव ब्रह्मांडं च ततः[1] परम् ॥ ६४ ॥ एतानि कुरुशार्दूल धर्मशास्त्राणि पंडितैः ॥ साधारणानि प्रोक्तानि वर्णानां श्रेयसे सदा[2] ॥ ६५ ॥
चतुर्णामिह राजेंद्र श्रोतुमर्हाणि सुव्रत ॥ किमिच्छसि महाबाहो श्रोतुमेषां नृपोत्तम ॥ ६६ ॥ ॥ शतानीक उवाच ॥ ॥ भारतं तु श्रुतं
विप्र तातस्यांकगतेन[3] तु ॥ रामस्य चरितं चापि श्रुतं ब्रह्मन्समंततः ॥ ६७ ॥ पुराणानि च विप्रेंद्र भविष्यं न तु सुव्रत ॥ पुराणं वद विप्रेंद्र भवि
ष्यं कौतुकं हि मे ॥ ६८ ॥ ॥ सुमंतुरुवाच ॥ ॥ साधुसाधु महाबाहो साधु पृष्टोऽस्मि[4] मानद ॥ शृणु मे वदतो राजन्पुराणं नवमं महत् ॥
॥ ६९ ॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते मानवो नृप ॥ अश्वमेधफलं प्राप्य गच्छेद्भानौ न संशयः ॥ ७० ॥ इदं तु ब्रह्मणा प्रोक्तं धर्मशास्त्रम
नुत्तमम् ॥ विदुषा ब्राह्मणेनेदमध्येतव्यं प्रयत्नतः[5] ॥ ७१ ॥ शिष्येभ्यश्चैव वक्तव्यं चातुर्वर्ण्येभ्य एव हि ॥ अध्येतव्यं न चान्येन ब्राह्मणं
क्षत्रियं विना ॥ श्रोतव्यमेव शूद्रेण नाध्येतव्यं कदाचन[6] ॥ ७२ ॥ देवार्चां पुरतः[7] कृत्वा ब्राह्मणैश्च नृपोत्तम ॥ श्रोत
व्यमेव शूद्रैश्च तथान्यैश्च द्विजातिभिः ॥ ७३ ॥ श्रौतं स्मार्तं हि वै धर्मं प्रोक्तमस्मिन्नृपोत्तम ॥ तस्माच्छूद्रैर्विना विप्रान्न श्रो
तव्यं कथंचन ॥७४ ॥ इदं शास्त्रमधीयानो ब्राह्मणः संशितव्रतः ॥ मनोवाग्देहजैर्नित्यं कर्मदोषैर्न लिप्यते ॥ ७५ ॥ शृण्वंति चापि ये राजन्भक्त्या
वै ब्राह्मणादयः ॥ मुच्यंते पातकैः सर्वैर्गच्छंति च दिवं प्रभो ॥ ७६ ॥ श्रावयेच्चापि यो विप्रः सर्वान्वर्णान्नृपोत्तम ॥ स गुरुः प्रोच्यते तात वर्णाना
मिह सर्वशः ॥ ७७ ॥ स पूज्यः सर्वकालेषु सर्वैर्वर्णैर्नराधिप ॥ पृथिवीं च तथैवेमां कृत्स्नामेकोपि सोऽर्हति ॥ ७८ ॥ इदं स्वस्त्ययनं श्रेष्ठमिदं बुद्धि
विवर्धनम् ॥ इदं यशस्यं सततमिदं निःश्रेयसं परम् ॥ ७९ ॥ अस्मिन्धर्मोऽखिलेनोक्तो गुणदोषौ च कर्मणाम् ॥ चतुर्णामपि वर्णानामाचारश्चा
पि शाश्वतः ॥ ८० ॥ आचारः प्रथमो धर्मः श्रुत्युक्तश्च नरोत्तम ॥ तस्मादस्मिन्समायुक्तो नित्यं स्यादात्मवान्द्विजः ॥ ८१ ॥ आचाराद्विच्युतो

नवम
पुराण
भविष्य

---

[1] वायुरेव च–इ० पा० । [2] तदा–इ० पा० । [3] आज्ञागतेन मे–इ० पा० । [4] पूज्योऽसि सुव्रत–इ० पा० । [5] विशेषतः–इ० पा० । [6] कथंचन–इ० पा० । [7] अग्रतः–इ० पा० ।

विप्रो न वेदफलमश्नुते ॥ आचारेण च संयुक्तः संपूर्णफलभाक्स्मृतः ॥८२॥ एवमाचारतो दृष्ट्वा धर्मस्य मुनयो गतिम् ॥ सर्वस्य तपसो मूलमाचारं
जगृहुः परम् ॥ ८३ ॥ अन्ये च मानवा राजन्नाचरं [1]संश्रिताः सदा ॥ एवमस्मिन्पुराणे तु आचारस्य तु कीर्तनम् ॥८४॥ वृत्तांतानि च राजेन्द्र तथा
चोक्तानि पंडितैः ॥ त्रिलोक्यास्तु समुत्पत्तिः संस्कारविधिरुत्तमः ॥ श्रवणं चेतिहासस्य विधानं कथ्यते नृप ॥ ८५ ॥ तथास्मिन्कथ्यते राज
न्माहात्म्यं वाचकस्य तु ॥ व्रतचर्याश्रमाचाराः स्नातकस्य परो विधिः ॥ ८६ ॥ दारादिगमनं चैव विवाहानां च लक्षणम् ॥ पुंसां च लक्षणं राज
न्योषितां चात्र कथ्यते ॥ ८७ ॥ महायज्ञविधानं च शास्त्रकल्पं च शाश्वतम् ॥ पृथिव्या लक्षणं तात देवार्चायाः सुलक्षणम् ॥ ८८ ॥ वृत्तीनां:लक्षणं
चैव स्नातकस्य व्रतानि च ॥ भक्ष्याभक्ष्यं च शौचं च द्रव्याणां शुद्धिरेव च ॥ ८९ ॥ स्त्रीधर्मयोगस्तापस्यं मोक्षः संन्यास एव च ॥ राज्ञश्च धर्मो ह्य
खिलः कार्याणां च विनिर्णयः ॥ ९० ॥ माहात्म्यं सवितुश्चात्र तीर्थानां च विशाम्पते ॥ नारायणस्य माहात्म्यं तथा रुद्रस्य कथ्यते ॥ ९१ ॥ महा
भाग्यं च विप्राणां माहात्म्यं पुस्तकस्य च ॥ दुर्गादेव्यास्तथा चोक्तं सत्यस्य च महामते ॥९२॥ संक्षिप्तं [2]संविधानं च धर्मं स्त्रीपुंसयोरपि ॥ विभागं
धर्मद्यूतं च कथकानां च शोधनम् ॥ ९३ ॥ वैश्यशूद्रोपचारं च संकीर्णानां च संभवम् ॥ आपद्धर्मं च वर्णानां प्रायश्चित्तविधिं तथा ॥ ९४ ॥
संध्याविधिं प्रेतशुद्धिं स्नानतर्पणयोर्विधिम् ॥ वैश्वदेवविधिं चापि तथा भोज्यविधिं नृप ॥ ९५ ॥ लक्षणं दंतकाष्ठस्य चरणव्यूहमुत्तमम् ॥ संसारगम
नं चैव त्रिविधं कर्मसंभवम् ॥ ९६ ॥ नैःश्रेयसं कर्मणां च गुणदोषपरीक्षणम् ॥ दाराणां लक्षणं प्रोक्तं तथा पात्रपरीक्षणम् ॥ ९७ ॥ प्रसूतिं चापि
गर्भस्य तथा कर्मफलं नृप ॥ जातिधर्मान्[3]कुलधर्मान्वेदधर्मांश्च पार्थिव ॥९८॥ वैतानव्रतिकानां च तथासौ प्रोक्तवान्विभुः ॥ ब्रह्मा कुरुकुलश्रेष्ठ शंक
राय महात्मने ॥ ९९ ॥ शंकरेण तथा विष्णोः कथितं कुरुनंदन ॥ विष्णुनापि पुनः प्रोक्तं नारदाय महीपते ॥१००॥ नारदात्प्राप्तवाञ्छक्रःशक्राद
पि पराशरः ॥ पराशरात्ततो व्यासो व्यासादपि मया विभो ॥ १०१ ॥ एवं परंपराप्राप्त पुराणमिदमुत्तमम् ॥ शृणु त्वमपि राजेन्द्र मत्सकाशात्परं हि
तम् ॥१०२॥ सर्वाण्येव पुराणानि संज्ञेयानि नरर्षभ ॥ द्वादशैव सहस्राणि प्रोक्तानिह मनीषिभिः॥१०३॥ पुनर्वृद्धिं गतानीह आख्यानैर्विविधैर्नृप ॥
यथा स्कांदं तथा चेदं भविष्यं कुरुनंदन ॥१०४॥ स्कांदं शतसहस्रं तु लोकानां ज्ञातमेव हि ॥ भविष्यमेतदृषिणा लक्षार्द्धं संख्यया [4]कृतम् ॥ १०५ ॥

---

[1] आचारं फलमाश्रिताः–इ०पा० । [2] इत आरभ्य यानि कर्माण्युक्तानि तानि ‘ तथासौ प्रोक्तवान्विभुः ’ इत्युत्तरेणानुयन्ति । [3] देशधर्मान्कुलधर्मांश्च वै नृप इ० पा० । [4] गतम्–इ० पा० ।

तच्छुत्वा पुरुषो भक्त्या इदं फलमवाप्नुयात् ॥ ऋद्धिर्वृद्धिस्तथा श्रीश्च भवंति[1] तस्य निश्चितम् ॥ १०६ ॥ इति श्रीभविष्ये महापुराणे [2]शतार्द्धसाह
स्र्यां संहितायां ब्राह्मे पर्वणि कथाप्रस्तावने प्रथमोऽध्यायः ॥ १ ॥ ॥ सुमंतुरुवाच ॥ ॥ शृणुष्वेदं महाबाहो पुराणं पंचलक्षणम् ॥ यच्छुत्वा मुच्यते
राजन्पुरुषो ब्रह्महत्यया ॥ १ ॥ पर्वाणि चात्र वै पंच कीर्तितानि स्वयंभुवा ॥ प्रथमं कथ्यते ब्राह्मं द्वितीयं वैष्णवं स्मृतम् ॥ २ ॥ तृतीयं शैवमाख्यातं
चतुर्थं त्वाष्ट्रमुच्यते ॥ पंचमं प्रतिसर्गाख्यं सर्वलोकैः सुपूजितम् ॥३॥ एतानि तात पर्वाणि लक्षणानि निबोध मे ॥ सर्गश्च प्रतिसर्गश्च वंशो मन्वंत
राणि च ॥ ४ ॥ वंशानुचरितं चैव पुराणं पंचलक्षणम् ॥ चतुर्दशभिर्विद्याभिर्भूषितं कुरुनंदन ॥ ५ ॥ अंगानि [3]चतुरो वेदा मीमांसा न्यायविस्तरः ॥
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥ ६ ॥ आयुर्वेदो धनुर्वेदो गांधर्वश्चैव ते त्रयः ॥ अर्थशास्त्रं चतुर्थं तु विद्या ह्यष्टादशैव ताः ॥ ७ ॥ प्रथमं
कथ्यते सर्गो भूतानामिह सर्वशः ॥ यच्छुत्वा पापनिर्मुक्तो याति शांतिमनुत्तमाम् ॥८॥ जगदासीत्पुरा तात तमोभूतमलक्षणम् ॥ अविज्ञेयमतर्क्यं च
प्रसुप्तमिव सर्वशः[4] ॥ ९ ॥ ततः स भगवानीशो ह्यव्यक्तो व्यंजयन्निदम् ॥ महाभूतानि वृत्तौजाः प्रोत्थितस्तमनाशनः[5] ॥१०॥ योसावतींद्रियोऽग्राह्यः
सूक्ष्मोऽव्यक्तः सनातनः ॥ सर्वभूतमयोऽचिंत्यः स एष स्वयमुत्थितः ॥ ११ ॥ योसौ षड्विंशको लोके तथा यः पुरुषोत्तमः ॥ भास्करश्च महा
बाहो परं ब्रह्म च कथ्यते ॥ १२ ॥ सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः ॥ अप एव ससर्जादौ तासु वीर्यमवासृजत् ॥ १३ ॥ यस्मादु
त्पद्यते सर्वं सदेवासुरमानुषम् ॥ बीजं शुक्रं तथा रेत उग्रं वीर्यं च कथ्यते ॥ १४ ॥ वीर्यस्यैतानि नामानि कथितानि स्वयंभुवा ॥ तदंडमभव
द्धैमं ज्वालामालाकुलं विभो ॥ १५ ॥ यस्मिञ्जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः ॥ सुरज्येष्ठश्चतुर्वक्त्रः परमेष्ठी पितामहः ॥ १६ ॥ क्षेत्रज्ञः
पुरुषो वेधाः शंभुर्नारायणस्तथा ॥ पर्यायवाचकैः शब्दैरेवं ब्रह्मा प्रकीर्त्यते ॥ १७ ॥ सदा मनीषिभिस्तात विरंचिः कंजजस्तथा[6] ॥ आपो नारा इति
प्रोक्ता आपो वै नरसूनवः ॥ १८ ॥ ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः ॥ अरमित्येव शीघ्राय नियताः कविभिः कृताः ॥ १९ ॥ आप[7]
एवार्णवीभूत्वा सुशीघ्रास्तेन ता नराः ॥ यत्तत्कारणमव्यक्तं नित्यं सदसदात्मकम् ॥ २० ॥ तद्विसृष्टः स पुरुषो लोके ब्रह्मेति कीर्त्यते ॥ एवं स
भगवानंडे तत्त्वमेव निरूप्य वै ॥ २१ ॥ ध्यानमास्थाय राजेंद्र तदंडमकरोद्द्विधा ॥ शकलाभ्यां च राजेंद्र दिवं भूमिं च निर्ममे ॥ २२ ॥ अंतर्व्योम

---

१ तस्य देहं स्तुवंति वै–इ०पा० । २ शतसाहस्रार्धसंहितायाम्–इ० पा० । ३ 'चतुरनडुहोः'–इत्यामभाव आर्षः । ४ सर्वतः–इ०पा० । ५ तमोनाशनः । ६ कर्दमस्तथा–इ० पा० । ७ आप एकार्णवीभूता अधिप्राप्ते न ता नराः–इ० पा० ।

दिशश्चाष्टौ वारुणं स्थानमेव हि ॥ ऊर्द्ध्वं महान्गतो राजन्समंताल्लोकभूतये ॥२३॥ महतश्चाप्यहंकारस्तस्माच्च त्रिगुणा अपि ॥ त्रिगुणा अतिसूक्ष्मास्तु बुद्धिगम्या हि भारत ॥ २४ ॥ उत्पत्तिहेतुभूता वै भूतानां महतां नृप ॥ तेषामेव गृहीतानि शनैः पंचेंद्रियाणि तु ॥ २५ ॥ तथैवावयवाः सूक्ष्माः षण्णामप्यमितौजसाम् ॥ २६ ॥ संनिवेश्यात्ममात्रासु स राजन्भगवान्विभुः ॥ भूतानि निर्ममे तात सर्वाणि विधिपूर्वकम् ॥ २७ ॥ यन्मूर्त्यवयवाः सूक्ष्मास्तस्येमान्याश्रयाणि षट् ॥ तस्माच्छरीरमित्याहुस्तस्य मूर्तिं मनीषिणः ॥ २८ ॥ महांति तानि भूतानि आविशंति ततो विभुम् ॥ कर्मणा सह राजेंद्र सगुणाश्चापि वै गुणाः ॥ २९ ॥ तेषामिदं तु सत्तानां पुरुषाणां महौजसाम् ॥ सूक्ष्माभ्यो मूर्तिमात्राभ्यः संभवत्यव्ययाद्वययम्[1] ॥ ३० ॥ भूतादिमहतस्तात येन व्याप्तमिदं जगत् ॥ तस्मादपि महाबाहो पुरुषाः पंच एव हि ॥ ३१ ॥ केचिदेवं परां तात सृष्टिमिच्छंति पंडिताः ॥ अन्येऽप्येवं महाबाहो प्रवदंति मनीषिणः ॥ ३२ ॥ योऽसावात्मा परस्तात कल्पादौ सृजते तनुम् ॥ प्रजनश्च महाबाहो सिसृक्षुर्विविधाः प्रजाः ॥ ३३ ॥ तेन सृष्टः पुद्गलस्तु प्रधानं विशते नृप ॥ प्रधानं क्षोभितं तेन विकारान्सृजते बहून् ॥ ३४ ॥ उत्पद्यते महांस्तस्मात्ततो भूतादिरेव हि ॥ उत्पद्यते विशालं च भूतादेः कुरुनंदन ॥ ३५ ॥ विशालाच्च हरिस्तात हरेश्चापि वृकास्तथा ॥ वृकैर्मुष्णंति च बुधास्तस्मात्सर्वं भवेन्नृप ॥ ३६ ॥ तथैषामेव राजेंद्र प्रादुर्भवति वेगतः ॥ मात्राणां कुरुशार्दूल विबोधस्तदनंतरम्[2] ॥ ३७ ॥ तस्मादपि हृषीकाणि विविधानि नृपोत्तम ॥ तथेयं सृष्टिराख्याताऽऽराध्यतः कुरुनंदन ॥ ३८ ॥ भूयो निबोध राजेन्द्र भूतानामिह विस्तरम् ॥ गुणाधिकानि सर्वाणि भूतानि पृथिवीपते ॥ ३९ ॥ आकाशमादितः कृत्वा उत्तरोत्तरमेव हि ॥ एकं द्वौ च तथा त्रीणि चत्वारश्चापि पंच च ॥ ४० ॥ ततः स भगवान्ब्रह्मा पद्मासनगतः प्रभुः ॥ सर्वेषां तु स नामानि कर्माणि च पृथक्पृथक् ॥४१॥ वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे ॥ कर्मोद्भवानां देवानां सोसृजद्देहिनां प्रभुः ॥ ४२ ॥ तुषितानां गणं राजन्यज्ञं चैव सनातनम् ॥ दत्त्वा[3] वीर समानेभ्यो गुह्यं ब्रह्म सनातनम् ॥४३॥ दुदोह यज्ञसिद्ध्यर्थमृग्यजुःसामलक्षणम् ॥ कालं कालविभक्तीश्च[4] ग्रहानृतूंस्तथा नृप ॥ ४४ ॥ सरितः सागराञ्छैलान्समानि विषमाणि च ॥ कामं क्रोधं तथा वाचं रतिं चापि कुरूद्वह ॥ ४५ ॥ सृष्टिं ससर्ज राजेंद्र सिसृक्षुर्विविधाः प्रजाः ॥ धर्माधर्मौ विवेकाय कर्मणां च तथासृजत् ॥ ४६ ॥ सुखदुःखादिभिर्द्वंद्वैः प्रजाश्चेमा न्ययोजयत् ॥ अण्व्यो मात्राविनाशिन्यो दशार्धानां तु याः स्मृताः ॥ ४७ ॥ ताभिः सर्वमिदं वीर संभवत्यनुपूर्वशः ॥ यत्कृतं

---

[1] द्वयम्-इ० पा० । [2] हृच्छयस्तदनंतरम्-इ० पा० । [3] दत्तवान्सर्वमानेभ्यः-इ० पा० । [4] कालविभूतिं च नक्षत्राणि ग्रहांस्तथा-इ० पा० ।

तु पुरा कर्म संनियुक्तेन वै नृप ॥ ४८ ॥ स तदेव स्वयं भेजे सृज्यमानं पुनःपुनः ॥ हिंस्राहिंस्रे मृदुक्रूरे धर्माधर्मे ऋतानृते ॥ ४९ ॥ यद्यथास्याभवत्सर्गे तत्तस्य स्वयमाविशत् ॥ यथा च लिंगान्यृतवः स्वयमेवानुपर्यये ॥५०॥ स्वानिस्वान्यभिपद्यंते तथा कर्माणि देहिनः ॥ लोकस्येह विवृद्ध्यर्थं मुखबाहूरुपादतः ॥५१॥ ब्रह्म क्षत्रं तथा चोभौ वैश्यशूद्रौ नृपोत्तम ॥ मुखानि यानि चत्वारि तेभ्यो वेदा विनिःसृताः ॥५२॥ ऋग्वेदसंहिता तात वसिष्ठेन महात्मना ॥ पूर्वान्मुखान्महाबाहो दक्षिणाच्चापि वै शृणु ॥ ८३ ॥ यजुर्वेदो महाराज याज्ञवल्क्येन वै सह ॥ सामानि पश्चिमात्तात गौतमश्च महानृषिः ॥ ५४ ॥ अथर्ववेदो राजेंद्र मुखाच्चाप्युत्तरान्नृप ॥ ऋषिश्चापि तथा राजञ्छौनको लोकपूजितः ॥ ५५ ॥ यत्तन्मुखं महाबाहो पञ्चमं लोकविश्रुतम् ॥ अष्टादश पुराणानि सेतिहासानि भारत ॥ ५६ ॥ निर्गतानि ततस्तस्मान्मुखात्कुरुकुलोद्वह ॥ तथान्याः स्मृतयश्चापि यमाद्या लोकपूजिताः ॥ ५७ ॥ ततः स भगवान्देवो द्विधा देहमकारयत् ॥ द्विधा कृत्वात्मनो देहमर्धेन पुरुषोभवत् ॥ ५८ ॥ अर्धेन नारी तस्यां च विराजमसृजत्प्रभुः ॥ तपस्तप्त्वासृजद्यं तु स स्वयं पुरुषो विराट् ॥ ५९ ॥ स चकार तपो राजन्सिसृक्षुर्विविधाः प्रजाः ॥ पतीन्प्रजानामसृजन्महर्षीनादितो दश ॥ ६० ॥ नारदं च भृगुं तात कं प्रचेतसमेव हि ॥ पुलहं क्रतुं पुलस्त्यं च अत्रिमंगिरसं तथा ॥ ६१ ॥ मरीचिं चापि राजेन्द्र योसावाद्यः प्रजापतिः ॥ एतांश्चान्यांश्च राजेन्द्र असृजद्भूरितेजसः ॥ ६२ ॥ अथ देवानृषीन्दैत्यान्सोऽसृजत्कुरुनन्दन ॥ यक्षरक्षःपिशाचांश्च गन्धर्वाप्सरसोऽसुरान् ॥ ६३ ॥ मनुष्याणां पितृणां च सर्पाणां चैव भारत ॥ नागानां च महाबाहो ससर्ज विविधान्गणान् ॥ ६४ ॥ क्षणरुचोऽशनिगणान्रोहितेन्द्रधनूंषि च ॥ धूमकेतूंस्तथा चोल्का निर्वाताञ्ज्योतिषां गणान् ॥ ६५ ॥ मनुष्यान्किन्नरान्मत्स्यान्वराहांश्च विहंगमान् ॥ गजानश्वानथ पशून्मृगान्व्यालांश्च भारत ॥ ६६ ॥ कृमिकीटपतंगांश्च यूकालिक्षकमत्कुणान् ॥ सर्वं च दंशमशकं स्थावरं[1] च पृथग्विधम् ॥ ६७ ॥ एवं स भास्करो देवः ससर्ज भुवनत्रयम् ॥ येषां तु यादृशं कर्म भूतानामिह कीर्तितम् ॥ ६८ ॥ कथयिष्यामि तत्सर्वं क्रमयोगं च जन्मनि[2] ॥ गजा व्याला मृगास्तात पशवश्च पृथग्विधाः ॥ ६९ ॥ पिशाचा मानुषास्तात रक्षांसि च जरायुजाः ॥ द्विजास्तु अडंजाः सर्पा नक्रा मत्स्याः सकच्छपाः ॥ ७० ॥ एवंविधानि यानीह स्थलजान्यौदकानि[3] च ॥ स्वेदजं दंशमशकं यूकालिक्षकमत्कुणाः ॥ ७१ ॥ ऊष्मणा चोपजायन्ते यच्चान्यत्किंचिदीदृशम् ॥ उद्भिज्जाः स्थावराः सर्वे बीजकांडप्ररोहिणः ॥ ७२ ॥ ओषध्यः फलपाकांता नानाविधफलोपगाः ॥

---

[1] स्थाविष्टं च नराधिप–इ० पा० । [2] कर्माणि–इ० पा० । [3] औषधीनि च–इ० पां० ।

अपुष्पाः फलवन्तो ये ते वनस्पतयः स्मृताः ॥ ७३ ॥ पुष्पिणः फलिनश्चैव वृक्षास्तूभयतः स्मृताः ॥ गुच्छगुल्मं तु विविधं तथैव तृणजातयः ॥
॥ ७४ ॥ बीजकांडरुहाण्येव [1]प्रताना वल्ल्यच एव च ॥ तमसा बहुरूपेण वेष्टिताः कर्महेतुना ॥ ७५ ॥ अन्तःसंज्ञा भवंत्येते सुखदुःखसमन्विताः ॥
एतावत्यस्तु गतयः प्रोद्भूताः कुरुनन्दन ॥७६॥ तस्माद्देवाद्दीप्तिमन्तो भास्कराच्च महात्मनः ॥ घोरेऽस्मिंस्तात संसारे नित्यं सततयायिनि ॥७७॥
एवं सर्वं स सृष्ट्वेदं राजँल्लोकगुरुं परम् ॥ तिरोभूतः स [2]भूतात्मा कालं कालेन पीडयन् ॥ ७८ ॥ यदा स देवो जागर्ति तदेदं चेष्टते जगत् ॥ यदा
स्वपिति शान्तात्मा तदा सर्वं निमीलति ॥ ७९ ॥ तस्मिन्स्वपिति राजेन्द्र जन्तवः कर्मबन्धनाः ॥ स्वकर्मभ्यो निवर्तन्ते मनश्च ग्लानि
मृच्छति ॥ ८० ॥ युगपत्तु प्रलीयंते यदा तस्मिन्महात्मनि ॥ [3]तदायं सर्वभूतात्मा सुखं स्वपिति भारत ॥ ८१ ॥ तमो यदा समाश्रित्य चिरं
तिष्ठति सेन्द्रियः ॥ न नवं कुरुते कर्म तदोत्क्रामति मूर्तितः ॥ ८२ ॥ यदाहंमात्रिको भूत्वा बीजं स्थास्नु चरिष्णु च ॥ समाविशति संसृष्टस्तदा
मूर्तिं विमुञ्चति ॥ ८३ ॥ एवं स जाग्रत्स्वप्नाभ्यामिदं सर्वं जगत्प्रभुः ॥ संजीवयति चाजस्रं प्रमापयति चाव्ययः ॥ ८४ ॥ कल्पादौ
सृजते तात अन्ते कल्पस्य संहरेत् ॥ दिनं तस्येह यत्तात कल्पांतमिति कथ्यते ॥ ८५ ॥ कालसंख्यां [4]ततस्तस्य कल्पस्य शृणु भारत ॥
निमेषा दश चाष्टौ च अक्ष्णः काष्ठा निगद्यते ॥ ८६ ॥ त्रिंशत्काष्ठाः कलामाहुः क्षणस्त्रिंशत्कलाः स्मृताः ॥ मुहूर्तमथ मौहूर्ता वदन्ति द्वादश
क्षणम् ॥ ८७ ॥ [5]त्रिंशन्मुहूर्तमुद्दिष्टमहोरात्रं मनीषिभिः ॥ मासस्त्रिंशदहोरात्रं द्वौद्वौ मासावृतुः स्मृतः ॥ ८८ ॥ ऋतुत्रयमप्ययनमयने द्वे तु
वत्सरः ॥ अहोरात्रे विभजते सूर्यो मानुषदैविके ॥ ८९ ॥ रात्रिः स्वप्नाय भूतानां चेष्टायै कर्मणामहः ॥ पित्र्ये रात्र्यहनी मासः प्रविभागस्तु
पक्षयोः ॥ ९० ॥ कर्म चेष्टास्वहः कृष्णः शुक्लः स्वप्नाय शर्वरी ॥ दैवे रात्र्यहनी वर्षं प्रविभागस्तयोः पुनः ॥ ९१ ॥ अहस्तत्रोदगयनं रात्रिः
स्याद्दक्षिणायनम् ॥ ब्राह्मस्य तु क्षपाहस्य यत्प्रमाणं महीपते ॥ ९२ ॥ एकैकशो युगानां तु क्रमशस्तन्निबोध मे ॥ चत्वार्याहुः सहस्राणि
वर्षाणां तत्कृतं युगम् ॥ ९३ ॥ तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः ॥ त्रेता त्रीणि [6]सहस्राणि वर्षाणि च विदुर्बुधाः ॥ ९४ ॥ शतानि
षट् च राजेन्द्र सन्ध्यासन्ध्यांशयोः पृथक् ॥ वर्षाणां द्वे सहस्रे तु द्वापरे परिकीर्तिते ॥ ९५ ॥ चत्वारि च शतान्याहुः सन्ध्यासन्ध्यां
शयोर्बुधः ॥ सहस्रं कथितं तिष्ये शतद्वयसमन्वितम् ॥ ९६ ॥ एषा चतुर्युगस्यापि संख्या प्रोक्ता नृपोत्तम ॥ यदेतत्परिसंख्या

---

[1] व्रतत्यः—इ० पा० । [2] पूतात्मा—इ० पा० । [3] सः—इ० पा० । [4] तात—इ० पा० । [5] त्रिंशत्कलो मुहूर्तस्तु अहोरात्रं मनीषिभिः—इ० पा० । [6] महाबाहो—इ० पा० ।

तमादावेव चतुर्युगम् ॥ ९७ ॥ एतद्द्वादशसाहस्रं देवानां युगमुच्यते ॥ दैविकानां युगानां तु सहस्रपरिसंख्यया ॥ ९८ ॥ ब्राह्ममेकमहर्ज्ञेयं
तावती रात्रिरुच्यते ॥ एतद्युगसहस्रांतं ब्राह्मं पुण्यमहर्विदुः ॥ ९९ ॥ रात्रिं च तावतीमेव तेहोरात्रविदो जनाः ॥ ततोऽसौ युगपर्यंते प्रसुप्तः प्रति
बुध्यते ॥ १०० ॥ प्रतिबुद्धस्तु सृजति मनः सदसदात्मकम् ॥ मनः सृष्टिं विकुरुते चोद्यमानं[1] सिसृक्षया ॥ १०१ ॥ विपुलं जायते तस्मात्तस्य शब्दं
गुणं विदुः ॥ विपुलात्तु विकुर्वाणात्सर्वगंधवहः शुचिः ॥ १०२ ॥ बलवाञ्जायते वायुः स वै स्पर्शगुणो मतः ॥ वायोरपि विकुर्वाणाद्विरोचिष्णु
तमोनुदम् ॥ १०३ ॥ उत्पद्यते विचित्रांशुस्तस्य रूपं गुणं विदुः ॥ तस्मादपि विकुर्वाणादापो जाताः स्मृता बुधैः ॥ १०४ ॥ तासां गुणो रसो
ज्ञेयः सर्वलोकस्य भावनः[2] ॥ अद्भ्यो गंधगुणा भूमिरित्येषा सृष्टिरादितः ॥ १०५ ॥ यत्प्राग्द्वादशसाहस्रमुक्तं सौमनसं युगम् ॥ तदेकसप्ततिगुणं
मन्वंतरमिहोच्यते ॥ १०६ ॥ मन्वंतराण्यसंख्यानि सर्गः संहार एव च ॥ तथाप्यहे सदा ब्राह्मे मनवस्तु चतुर्दश ॥ १०७ ॥ कथ्यंते कुरुशार्दू[3]
ल संख्यया पंडितैः सदा ॥ मनोः स्वायंभुवस्येह षड्वंश्या[4] मनवोऽपरे ॥ १०८ ॥ सृष्टवंतः प्रजाः स्वाःस्वाः महात्मानो महौजसः ॥ सावर्णेय
स्तथा पंचभौत्यो रौच्यस्तथापरः ॥ १०९ ॥ एते भविष्या मनवः सप्त प्रोक्ता नृपोत्तम ॥ स्वेस्वेंतरे सर्वमिदं पालयंति चराचरम् ॥ ११० ॥
एवंविधं दिनं तस्य विरिंचेस्तु महात्मनः ॥ तस्यांते कुरुते सर्गं यथेदं कथितं तव ॥ १११ ॥ क्रीडन्निवैतत्कुरुते परमेष्ठी नराधिप ॥ चतुष्पा
त्सकलो धर्मः सत्यं चैव कृते युगे ॥ ११२ ॥ नाधर्मेणागमः कश्चिन्मनुष्याणां प्रवर्तते ॥ इतरेष्वागमास्तात धर्मश्च कुरुनंदन ॥ ११३ ॥
यादृशाः परिहीयंते यथाह भगवान्मनुः[5] ॥ चौर्याच्चाप्यनृताद्राजन्मायाभिरमितद्युते ॥ ११४ ॥ पादेन हीयते धर्मस्त्रेतादिषु युगेषु वै ॥ अरोगाः
सर्वसिद्धार्थाश्चतुर्वर्षशतायुषः ॥ ११५ ॥ कृतत्रेतादिषु त्वेषां वयो ह्रसति पादशः ॥ वेदोक्तमायुराशीश्च मर्त्यानां कुरुनंदन ॥ ११६ ॥ कर्मणां
तु फलं तात फलत्यनुयुगं सदा ॥ प्रभावश्च तदा लोके फलत्येव शरीरिणाम् ॥ ११७ ॥ अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरे परे ॥ अन्ये कलियुगे
नृणां युगधर्मानुरूपतः ॥ ११८ ॥ तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते ॥ द्वापरे यज्ञमित्याहुर्दानमेकं[6] कलौ युगे ॥ ११९ ॥ सर्वस्य राजन्स
र्गस्य गुप्त्यर्थं च महाद्युते ॥ मुखबाहूरुपादानां पृथक्कर्माण्यकल्पयत् ॥ १२० ॥ अध्यापनमध्ययनं यजनं याजनं तथा ॥ दानं प्रतिग्रहं चैव
ब्राह्मणानामकल्पयत् ॥ १२१ ॥ प्रजानां पालनं राजन्दानमध्ययनं तथा ॥ विषयेषु प्रसक्तिं च तथेज्यां क्षत्रियस्य तु ॥ १२२ ॥ पशूनां रक्षणं

---

१ बोध्यमानम्–इ० पा० । २ पावनः–इ० पा० । ३ मुनिशार्दूल–इत्यपिपाठः । ४ एवं स्युर्मनवः परे–इ० पा० । ५ मुनिः–इ० पा० । ६ एव–इ० पा० ।

१ सतयुग में तप । २ त्रेता में ज्ञान । ३ द्वापर में यज्ञ । ४ कलयुग मे दान

दानमिज्याध्ययनमेव च ॥ [1]वणिक्पथं कुसीदं च वैश्यस्य कृषिरेव च ॥ १२३ ॥ एकमेव तु शूद्रस्य कर्म लोके [2]प्रकीर्तितम् ॥ एतेषामेव वर्णानां
शुश्रूषामनुपूर्वशः ॥ १२४ ॥ पुरुषस्य सदा श्रेष्ठं नाभेरूर्ध्वं नृपोत्तम ॥ तस्मादपि शुचितरं मुखं तात स्वयंभुवः ॥ १२५ ॥ तस्मान्मुखाद्द्विजो
जात इतीयं वैदिकी श्रुतिः ॥ सर्वस्यैवास्य धर्मस्य धर्मतो ब्राह्मणः प्रभुः ॥ १२६ ॥ [3]स सृष्टो ब्रह्मणा पूर्वं तपस्तप्त्वा कुरूद्वह ॥ हव्यानामिव
कव्यानां सर्वस्यापि च गुप्तये ॥ १२७ ॥ अश्नंति च मुखेनास्य हव्यानि त्रिदिवौकसः ॥ कव्यानि चैव पितरः किंभूतमधिकं ततः ॥ १२८॥
भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः ॥ बुद्धिमत्सु नराः श्रेष्ठा नरेषु ब्राह्मणाः स्मृताः ॥ १२९ ॥ ब्राह्मणेषु च विद्वांसो विद्वत्सु कृत
बुद्धयः ॥ कृतबुद्धिषु कर्तारः कर्तृषु ब्रह्मवेदिनः ॥ १३० ॥ जन्म विप्रस्य राजेंद्र धर्मार्थमिह कथ्यते ॥ उत्पन्नः सर्वसि[4]द्ध्यर्थं याति ब्रह्मसदो
नृप ॥ १३१ ॥ स चापि जायमानस्तु पृथिव्यामिह जायते ॥ भूतानां प्रभवायैव धर्मकोशस्य गुप्तये॥ १३२ ॥ सर्वं हि ब्राह्मणस्येदं यत्किंचि
त्पृथिवीगतम् ॥ जन्मना चोत्तमेनेदं सर्वं वै ब्राह्मणोऽर्हति ॥ १३३ ॥ स्वकीयं ब्राह्मणो भुंक्ते विदधाति च सुव्रत ॥ करुणां कुर्वतस्तस्य भुंजं
तीहेतरे जनाः ॥ १३४ ॥त्रयाणामिह वर्णानां भावाभावाय वै द्विजः ॥ भवेद्राजन्न संदेहस्तुष्टो भावाय वै द्विजः ॥ १३५ ॥ अभावाय भवेत्क्रु
द्धस्तस्मात्पूज्यतमो हि सः ॥ ब्राह्मणे सति नान्यस्य प्रभुत्वं विद्यते नृप ॥ १३६ ॥ कामात्करोत्यसौ कर्म कामगश्च नृपोत्तम ॥ तस्माद्वृंदारक
पुरी तस्मादपि महः पुनः ॥ १३७ ॥ महर्लोकाज्जनोलोकं ब्रह्मलोकं च गच्छति ॥ ब्रह्मत्वं च महाबाहो याति विप्रो न संशयः ॥ १३८ ॥
॥ शतानीक उवाच ॥ ॥ ब्रह्मत्वं नाम दुष्प्रापं ब्रह्मलोकेषु सुव्रत॥१३९॥ ब्रह्मत्वं कीदृशं विप्रो ब्रह्मलोकं च गच्छति ॥ नाममात्रोऽथ[7] किं विप्रो
ब्रह्मत्वं ब्रह्मणः सदा॥याति ब्रह्मन्गुणाः के स्युर्ब्रह्मप्राप्तौ ममोच्यताम्॥१४०॥सुमंतुरुवाच॥ ॥साधुसाधु महाबाहो शृणु मे परमं वचः॥१४१॥ये प्रोक्ता
वेदशास्त्रेषु संस्कारा ब्राह्मणस्य तु ॥ गर्भाधानादयो ये [5]च संस्कारा यस्य पार्थिव ॥१४२ ॥ चत्वारिंशत्तथाष्टौ च निर्वृत्ताः शास्त्रतो नृप॥ स याति ब्रह्मणः
स्थानं ब्राह्मणत्वं च [6]मानदं ॥ संस्काराः सर्वथा हेतुर्ब्रह्मत्वे नात्र संशयः ॥ १४३ ॥ ॥ शतानीक उवाच ॥ ॥ संस्काराः के मता ब्रह्मन्ब्रह्मत्वे
ब्राह्मणस्य तु ॥ शंस मे द्विजशार्दूल कौतुकं हि महन्मम ॥ १४४ ॥ ॥ सुमंतुरुवाच ॥ ॥ साधुसाधु महाबाहो शृणु मे परमं वचः ॥ ये प्रोक्ता
वेदशास्त्रेषु संस्कारा ब्राह्मणस्य तु ॥ मनीषिभिर्महाबाहो शृणु सर्वानशेषतः ॥ १४५ ॥ गर्भाधानं पुंसवनं सीमंतोन्नयनं तथा ॥ जातकर्मान्नाशनं

---

१ वाणिज्यं तु–इ० पा० । २ प्रतिष्ठितम्–इ०पा० । ३ ससृजे–इ०पा० । ४ सर्वधर्मार्थम्–इ०पा० । ५ चेह–इ०पा० । ६ मानत्र:–इ० पा० । ७ अयं श्लोकः पुनरुक्तोऽपि प्राकरणिकतया युक्त एव प्रातभाति ।

च चूडोपनयनं[१] नृप ॥ १४६ ॥ ब्रह्मव्रतानि चत्वारि स्नानं च तदनंतरम् ॥ सधर्मचारिणीयोगो यज्ञानां[२] कर्म मानद ॥ १४७ ॥ पंचानां कार्यमित्या
हुरात्मनः श्रेयसे नृप ॥ देवपितृमनुष्याणां भूतानां ब्रह्मणस्तथा ॥ १४८ ॥ एतेषां चाष्टकाकर्म पार्वणश्राद्धमेव हि ॥ श्रावणी चाग्रहायणी चैत्री
चाश्वयुजी तथा ॥ १४९ ॥ पाकयज्ञास्तथा सप्त अग्न्याधानं[३] च सत्क्रियाः ॥ अग्निहोत्रं तथा राजन्दर्शं च विधुसंक्षये ॥ १५० ॥ पौर्णमासं च
राजेंद्र चातुर्मास्यानि चापि हि ॥ निरूपणं[४] पशुवधं तथा सौत्रामणीति च ॥ १५१ ॥ हविर्यज्ञास्तथा सप्त तेषां चापि हि सत्क्रियाः ॥ अग्निष्टोमो[५]
त्यग्निष्टोमस्तथोक्थ्यः षोडशीं विदुः ॥ १५२ ॥ वाजपेयोतिरात्रश्च आप्तोर्यामेति वै स्मृतः[६] ॥ संस्कारेषु स्थिताः सप्त सोमाः[७] कुरुकुलोद्वह ॥
॥ १५३ ॥ इत्येते द्विजसंस्काराश्चत्वारिंशन्नृपोत्तम ॥ अष्टौ चात्मगुणास्तात शृणु तानपि भारत ॥ १५४ ॥ अनसूया दया क्षांतिरनायासं च
मंगलम् ॥ अकार्पण्यं तथा शौचमस्पृहा च कुरूद्वह ॥ १५५ ॥ य एतेष्टगुणास्तात कीर्त्यंते वै मनीषिभिः ॥ एतेषां लक्षणं वीर शृणु सर्वमशे
षतः ॥ १५६ ॥ न गुणान्गुणिनो हंति न स्तौत्यात्मगुणानपि ॥ प्रहृष्यते नान्यदोषैरनसूया प्रकीर्तिता ॥ १५७ ॥ अपरे बन्धुवर्गे वा मित्रे
द्वेष्टरि वा सदा ॥ आत्मवद्वर्तनं यत्स्यात्सा दया परिकीर्तिता ॥ १५८ ॥ वाचा मनसि काये च दुःखेनोत्पादितेन च ॥ न कुप्यपि न चाप्रीतिः
सा क्षमा परिकीर्तिता ॥ १५९ ॥ अभक्ष्यपरिहारश्च संसर्गश्चाप्यनिंदितैः ॥ आचारे च व्यवस्थानं शौचमेतत्प्रकीर्तितम् ॥ १६० ॥ शरीरं पीड्यते
येन शुभेनापि च कर्मणा ॥ अत्यंतं तन्न कुर्वीत अनायासः स उच्यते ॥ १६१ ॥ प्रशस्ताचरणं नित्यमप्रशस्तविवर्जनम् ॥ एतद्धि मंगलं प्रोक्तं
मुनिभिर्ब्रह्मवादिभिः ॥ १६२ ॥ स्तोकादपि प्रदातव्यमदीनेनांतरात्मना ॥ अहन्यहनि यत्किंचिदकार्पण्यं तदुच्यते ॥ १६३ ॥ यथोत्पन्नेन संतुष्टः
स्वल्पेनाप्यथ वस्तुना ॥ अहिंसया परस्वेषु[८] साऽस्पृहा परिकीर्तिता ॥ १६४ ॥ वपुर्यस्य तु इत्येतैः संस्कारैः संस्कृतं द्विजः[९] ॥ ब्रह्मत्वमिह संप्राप्य
ब्रह्मलोकं च गच्छति ॥ १६५ ॥ वैदिकैः कर्मभिः पुण्यैर्निषेकाद्यैर्द्विजन्मनाम् ॥ कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह च ॥ १६६ ॥ गर्भशुद्धिं
ततः प्राप्य धर्मं चाश्रमलक्षणम् ॥ याति मुक्तिं न संदेहः पुराणेस्मिन्नृपोत्तम ॥ १६७ ॥ उशंति[१०] कुरुशार्दूल ब्राह्मणा नात्र संशयः ॥ (आश्रितानां[११]

---

[१] चूडाकरणमेखलाः--इ० पा० ।
[२] जंतूनां कर्म मानद--इ० पा० ।
[३] अग्न्याधेयम्--इ० पा० ।
[४] निरूढपशुबंधं च--इ० पा० ।
[५] ज्योतिष्टोमो ह्यग्निष्टोमः--इ० पा० ।
[६] नृप--इ० पा० ।
[७] मासाः--इ० संस्थाः--इ० च पा० ।
[८] परार्थेषु--इ० पा० ।
[९] यस्येत्युक्त्वा स इत्याध्याह्रियते ।
[१०] आदादिकवशेरिच्छार्थस्य संप्रसारणे रूपम् ।
[११] एत ( ) चिह्नान्तर्गतोयं पाठः कस्मिंश्चिदेकस्मिन्पुस्तके दृश्यते । स च किंचित्प्रकरणादूरवर्तीति हेतोश्चिह्नं प्रवेशितम्--इति बोध्यम् ।

विशेषेण ये नित्यं स्वस्तिवादिनः ॥ १६८ ॥ निकटस्थान्द्विजान्हित्वा योऽन्यान्पूजयति द्विजान् ॥ सिद्धं पापं तदपमानात्तद्वक्तुं नैव शक्यते ॥
॥ १६९ ॥ तस्मात्सदा समीपस्थः संपूज्यो विधिवन्नृप ॥ पूजयेदतिथींस्तद्वदन्नपानादिदानतः ॥ १७० ॥ ब्राह्मणः सर्ववर्णानां ज्येष्ठः श्रेष्ठस्तथो
त्तमः ॥) एवमस्मिन्पुराणे तु संस्कारान्ब्राह्मणस्य तु ॥ १७१ ॥ शृणोति यश्च जानाति यश्चापि पठते सदा ॥ ऋद्धिं वृद्धिं तथा कीर्तिं प्राप्येह
श्रियमुत्तमाम् ॥ १७२ ॥ धनं धान्यं यशश्चापि पुत्रान्बन्धून्सुरूपताम् ॥ सावित्रं लोकमासाद्य ब्रह्मलोकमवाप्नुयात् ॥ १७३ ॥ इति श्रीभविष्ये
महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि द्वितीयोऽध्यायः ॥ २ ॥ ॥ छ ॥ ॥ शतानीक उवाच ॥ ॥ जातकर्मादिसंस्कारा
न्वर्णानामनुपूर्वशः ॥ आश्रमाणां च मे धर्मं कथयस्व द्विजोत्तम ॥ १ ॥ ॥ सुमंतुरुवाच ॥ ॥ गर्भाधानं पुंसवनं सीमंतोन्नयनं
तथा ॥ जातकर्मान्नप्राशश्च चूडा मौंजीनिबंधनम् ॥ २ ॥ बैजिकं गार्भिकं चैनो द्विजानामपमृज्यते ॥ स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्यया
श्रुतैः ॥ ३ ॥ महायज्ञैश्च ब्राह्मीयं यज्ञैश्च क्रियते तनुः ॥ शृणुष्वैकमना राजन्यथा सा क्रियते तनुः ॥ ४ ॥ प्राङ्नाभिकर्तनात्पुंसो जातकर्म
विधीयते ॥ मंत्रवत्प्राशनं चास्य हिरण्यमधुसर्पिषाम् ॥ ५ ॥ नामधेयं दशम्यां तु केचिदिच्छंति पार्थिव ॥ द्वादश्यामपरे राजन्मासि पूर्णे तथा
परे ॥ ६ ॥ अष्टादशेऽहनि तथाऽन्ये वदंति मनीषिणः ॥ पुण्ये तिथौ मुहूर्ते च नक्षत्रे च गुणान्विते ॥ ७ ॥ मंगल्यं तात विप्रस्य शिवशर्मे
तिपार्थिव ॥ राजन्यस्य विशिष्टं[1] तु इन्दुवर्मेति कथ्यते ॥ ८ ॥ वैश्यस्य धनसंयुक्तं शूद्रस्य च जुगुप्सितम् ॥ धनवर्धनेति वैश्यस्य सर्वदासेति
हीनजे ॥ ९ ॥ मनुना च तथा प्रोक्तं नाम्नो लक्षणमुत्तमम् ॥ शर्मवद्ब्राह्मणस्य स्याद्राज्ञो रक्षासमन्वितम् ॥ १० ॥ वैश्यस्य पुष्टिसंयुक्तं शूद्रस्य
प्रेष्यसंयुतम् ॥ स्त्रीणां सुखोद्यमक्रूरं विस्पष्टार्थमनोरमम् ॥ ११ ॥ मंगल्यं दीर्घवर्णान्तमाशीर्वादाभिधानवत् ॥ द्वादशेऽहनि राजेन्द्र शिशोर्नि
ष्क्रमणं गृहात् ॥ १२ ॥ चतुर्थे मासि कर्तव्यं तथान्येषां मतं विभो ॥ षष्ठेऽन्नप्राशनं मासि यथेष्टं मंगलं कुले ॥१३॥ चूडाकर्म द्विजातीनां सर्वे
षामनुपूर्वशः ॥ प्रथमेऽब्दे तृतीये[3] वा कर्तव्यं कुरुनन्दन ॥ १४ ॥ गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम् ॥ गर्भादेकादशे राजन्क्षत्रियस्य
विनिर्दिशेत् ॥१५॥ द्वादशेऽब्देपि गर्भात्तु वैश्यस्य व्रतमादिशेत् ॥ ब्रह्मवर्चसकामेन कार्यं विप्रस्य पञ्चमे ॥ १६ ॥ बलार्थिना तथा राज्ञः षष्ठेऽब्दे
कार्यमेव हि ॥ अर्थकामेन वैश्यस्य अष्टमे कुरुनन्दन ॥ १७ ॥ आषोडशाद्ब्राह्मणस्य सावित्री नातिवर्तते ॥ द्वाविंशतेः क्षत्रबन्धोराचतुर्विंशते

---

[1] बलिष्ठं तु—इ० पा०। [2] कीर्त्यंते—इ० पा०। [3] द्वितीये वा—इ० पा०।

विशः ॥ १८ ॥ अत ऊर्ध्वं तु ये रा[1]जन्यथाकालमसंस्कृताः ॥ सावित्रीपतिता व्रात्या व्रा[2]त्यस्तोमादृते क्रतोः ॥ १९ ॥ न चाप्येभिरपूतैस्तु आप
द्यपि हि कर्हिचित् ॥ ब्रा[3]ह्मं यौनं च संबन्धमाचरेद्ब्राह्मणः सह ॥ २० ॥ भवन्ति राजंश्चर्माणि व्रतिनां त्रिविधानि च ॥ कार्ष्णरौरवबास्तानि ब्रह्म
क्षत्रविशां नृप ॥ २१ ॥ वसीरंश्चानुपूर्व्येण वस्त्राणि विविधानि तु ॥ ब्रह्मक्षत्रविशो राजञ्छाणक्षौमादिकानि च ॥ २२ ॥ मौंजी त्रिवृत्समा श्लक्ष्णा
कार्या विप्रस्य मेखला ॥ क्षत्रियस्य च मौर्वीज्या वैश्यस्य शणतांतवी ॥ २३ ॥ मुञ्जालाभे तु कर्तव्या कुशाश्मन्तकबल्वजैः ॥ त्रिवृता ग्रंथिनैकेन
त्रिभिः पञ्चभिरेव च ॥ २४ ॥ कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृत् ॥ शणसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम् ॥ २५ ॥ पुष्कराणि
तथा चैषां भवंति त्रिविधानि तु ॥ ब्रह्मणो बैल्वपालाशौ तृतीयं प्लक्षजं नृप ॥ २६ ॥ वाटखादिरौ क्षत्रियस्तु तथान्यं वेतसोद्भवम् ॥ पैलवोदुंबरौ
वैश्यस्तथाश्वत्थजमेव हि ॥ २७ ॥ दंडानेतान्महाबाहो धर्मतोऽर्हति धा[4]रितुम् ॥ केशांतिको ब्राह्मणस्य दंडः कार्यः प्रमाणतः ॥ २८ ॥ ललाट
संमितो राज्ञः स्यात्तु नासांतिको विशः ॥ ऋजवस्ते तु सर्वे स्युर्ब्राह्मणाः सौम्यदर्शनाः ॥ २९ ॥ अनुद्वेगकरा नृणां सत्त्वचो नाग्निदूषिताः ॥
प्रगृह्य चेप्सितं दंडमुपस्थाय च भास्करम् ॥ ३० ॥ सम्यग्गुरुं तथापूज्य चरेद्भैक्ष्यं यथाविधि ॥ भवत्पूर्वं चरेद्भैक्ष्यमुपनीतो द्विजोत्तमः ॥ ३१ ॥
भवन्मध्यं तु राजन्यो वैश्यस्य भवदुत्तरम् ॥ मातरं वा स्वसारं वा मातुर्वा भगिनीं निजाम् ॥ ३२ ॥ भिक्षेत भैक्ष्यं प्रथमं या चैनं नावमानयेत् ॥
सुवर्णं रजतं चान्नं सा पात्रेऽस्य विनिर्दिशेत् ॥ ३३ ॥ समाहृत्य ततो भैक्ष्यं यावदर्थममायया ॥ निवेद्य गुरुवेऽश्नीयादाचम्य प्राङ्मुखः शुचिः ॥
॥३४॥ आयुष्यं प्राङ्मुखो भुंक्ते यशस्यं दक्षिणामुखः ॥ श्रियं प्रत्यङ्मुखो भुंक्ते ऋ[5]तं भुंक्ते उदयङ्मुखः ॥३५॥ उपस्पृश्य द्विजो राजन्नन्नमद्यात्समा
हितः ॥ भुक्त्वा चोपस्पृशेत्सम्यगद्भिः खानि च संस्पृशेत् ॥ ३६ ॥ तथान्नं पूजयेन्नित्यमद्याच्चैतदकुत्सयन् ॥ दर्शनात्तस्य हृष्येद्वै प्रसीदेच्चापि
भारत ॥ ३७ ॥ अभिनन्द्य ततोऽश्नीयादित्येवं मनुरब्रवीत् ॥ पूजितं त्वशनं नित्यं बलमोजश्च यच्छति ॥ ३८ ॥ अपूजितं तु तद्भुक्तमुभयं
नाशयेदि[6]दम् ॥ नोच्छिष्टं कस्यचिद्दद्यान्नाद्याच्चैतत्तथांतरा ॥ ३९ ॥ यस्त्वन्नमन्तरा कृत्वा लोभादत्ति नृपोत्तम ॥ विनाशं यति स नर इह
लोके परत्र च ॥ यथाभवत्पुरा वैश्यो धनवर्द्धन[7]संज्ञितः ॥ ४० ॥ ॥ शतानीक उवाच ॥ ॥ स कथमंतरं पूर्वमन्नस्य द्विजसत्तम ॥
किमन्तरं तथान्नस्य कथं वा तत्कृतं भवेत् ॥ ४१ ॥ ॥ सुमंतुरुवाच ॥ ॥ पुरा कृतयुगे राजन्वैश्यो वसति पुष्करे ॥ धनवर्धननामावै

---

[1] त्रयोऽप्येते-इ० पा० । [2] न ते संस्कारभागिनः-इ० पा० । [3] ब्राह्म वेदाध्ययनमित्यर्थः । [4] धारयितुमित्यर्थः । [5] सत्यम्-इ० पा० । [6] नृप-इ० पा० । [7] अभूत्पुण्यकर्मकृत्-इ० पा० ।

समृद्धो धनधान्यतः ॥ ४२ ॥ निदाघकाले राजेन्द्र स कृत्वा वैश्वदेविकम् ॥ सपुत्रभ्रातृभिः सार्धं तथा वै मित्रबन्धुभिः ॥ आहारं कुरुते
राजन्भक्ष्य[1]भोज्यसमन्वितम् ॥ ४३ ॥ अथ तद्भुञ्जत[2]स्तस्य अन्नं शब्दो महानभूत् ॥ करुणः कुरुशार्दूल अथ तं स प्रधावितः ॥ ४४ ॥
त्यक्त्वा स भोजनं यावन्निष्क्रान्तो गृहबाह्यतः ॥ अथ शब्दस्तिरोभूतः स भूयो गृहमागतः ॥ ४५ ॥ तमेव भाजनं गृह्य[3] आहारं कृतवान्नृप ॥ भुक्त
शेषं महाबाहो आहारं स तु भुक्तवान् ॥ ४६ ॥ भुक्त्वा स शतधा जातस्तस्मिन्नेव क्षणे नृप ॥ तस्मादन्नं न राजेन्द्र अश्नीयादंतरा क्वचित् ॥ ४७ ॥
न चैवात्यशनं कुर्यान्न चोच्छिष्टः क्वचिद्व्रजेत् ॥ रसो भवत्यत्यशनाद्रसाद्रोगः प्रवर्तते ॥४८॥ स्नानं दानं जपो होमः पितृदेवाभिपूजनम् ॥ न भवंति
रसे जाते नराणां भरतर्षभ ॥ ४९ ॥ अनारोग्यमनायुष्यमस्वर्ग्यं चातिभोजनम् ॥ अपुण्यं लोकविद्विष्टं तस्मात्तत्परिवर्जयेत् ॥ ५० ॥ यक्षभूत
पिशाचानां रक्षसां च नृपोत्तम ॥ गम्यो[4] भवति वै विप्र उच्छिष्टो नात्र संशयः ॥५१॥ शुचित्वमाश्रयेत्तस्माच्छुचित्वान्मोदते दिति ॥ सुखेन चेह
रमते इतीयं वैदिकी श्रुतिः ॥५२॥ ॥ शतानीक उवाच ॥ ॥ शुचितामियात्कथं विप्रः कथं चाशुचितामियात् ॥ एतन्मे ब्रूहि विप्रेंद्र कौतुकं परमं
मम ॥५३॥ सुमंतुरुवाच ॥ ॥ उपस्पृश्य शुचिर्विप्रो भवते भरतर्षभ ॥ विधिवत्कुरुशार्दूल भवेद्विधिपरो ह्यतः ॥५४॥ ॥ शतानीक उवाच ॥ ॥
उपस्पर्शविधिं विप्र कथय त्वं ममाखिलम् ॥ शुचित्वमाप्नुयाद्येन आचांतो ब्राह्मणो द्विज ॥ ५५ ॥ ॥ सुमंतुरुवाच ॥ ॥ साधु पृष्टोऽस्मि राजेंद्र
शृणु विप्रो यथा भवेत् ॥ शुचिर्भरतशार्दूल विधिना येन वा विभो ॥ ५६ ॥ प्रक्षाल्य हस्तौ पादौ च प्राङ्मुखोदङ्मुखोऽपि वा ॥ उपविश्य शुचौ
देशे बाहुं कृत्वा च दक्षिणम् ॥५७॥ जान्वंतरे महाबाहो ब्रह्म[5]सूत्रसमन्वितः ॥ सुसमौ चरणौ कृत्वा तथा बद्धशिखो नृप ॥५८॥ न तिष्ठन्न च संजल्पं
स्तथा चानवलोकयन् ॥ न त्वरन्कुपितो वापि त्यक्त्वा राजन्सुदूरतः ॥ ५९ ॥ प्रसन्नाभिस्तथाद्भिस्तु आचांतः शुचितामियात् ॥ नोष्णाभिर्न सफे
नाभिर्युक्ताभिः कलुषेण च ॥६०॥ वर्णेन रसगंधाभ्यां हीनाभिर्न च भारत ॥ सबुद्बुदाभिश्च तथा नाचामेत्पंडितो नृप ॥६१॥ पंचतीर्थानि विप्रस्य श्रूयंते
दक्षिणे करे ॥ देवतीर्थं पितृतीर्थं ब्रह्मतीर्थं च मान[illegible] ॥६२॥ प्राजापत्यं तथा चान्यत्तथान्यत्सौम्यमुच्यते ॥ अंगुष्ठमूलोत्तरतो येयं रेखा महीपते ॥६३॥
ब्राह्मं तीर्थं वदंत्येतद्वसिष्ठाद्या द्विजोत्तमाः ॥ कायं कनिष्ठिकामूले अंगुल्यग्रे तु दैवतम् ॥६४॥ तर्जन्यंगुष्ठयोरंतः पित्र्यं तीर्थमुदाहृतम् ॥ करमध्ये
स्थितं सौम्यं प्रशस्तं देवकर्मणि ॥ ६५ ॥ देवार्चाबलिहरणं प्रविक्षपणमेव च ॥ एतानि देवतीर्थेन कुर्यात्कुरुकुलोद्वह ॥६६॥ अन्ननिर्वपणं राजंस्त

---

[1] भक्ष्यपेयसमन्वितम्–इ० पा० । [2] भुञ्जानस्य । [3] गृहीत्वा । [4] भक्ष्यः–इ० पा० । [5] यज्ञसूत्रसमन्वितः–इ० पा० ।

था सपवनं[१] नृप ॥ लाजाहोमं तथा सौम्यं प्राजापत्येन कारयेत् ॥ ६७ ॥ कमंडलूपस्पर्शनं दधिप्राशनमेव च ॥ सौम्यतीर्थेन राजेंद्र सदा कुर्याद्विच
क्षणः ॥ ६८ ॥ पितॄणां तर्पणं कार्यं पितृतीर्थेन धीमता ॥ ब्राह्मेण चापि तीर्थेन सदोपस्पर्शनं परम् ॥ ६९ ॥ वेनांगुलिकरं[२] कृत्वा एकाग्रः सुमना
द्विजः ॥ त्रिः कृत्वा यः पिबेदापो[३] मुखशब्दविवर्जितः ॥ ७० ॥ शृणु[४] यत्फलमाप्नोति प्रीणाति च यथा सुरान् ॥ प्रथमं यत्पिबेदाप ऋग्वेदस्तेन
तृप्यति ॥ ७१ ॥ यद्द्वितीयं यजुर्वेदस्तेन प्रीणाति भारत ॥ यत्तृतीयं सामवेदस्तेन प्रीणाति भारत ॥ ७२ ॥ प्रथमं यन्मृजेदास्यं दक्षिणांगुष्ठमूलतः ॥
अथर्ववेदः प्रीणाति तेन राजन्नसंशयः ॥ ७३ ॥ इतिहासपुराणानि यद्द्वितायं प्रमार्जति ॥ यन्मूर्धानं हि राजेंद्र अभिषिंचति वै द्विजः ॥ ७४ ॥ तेन
प्रीणाति वै रुद्रं शिखामालभ्य वै ऋषीन् ॥ यदक्षिणी चालभते रविः प्रीणाति तेन वै ॥ ७५ ॥ नासिकालंभनाद्वायुं प्रीणात्येव न संशयः ॥ यच्छ्रो
त्रमालभेद्विप्रो दिशः प्रीणाति तेन वै ॥ ७६ ॥ यमं कुबेरं वरुणं वासवं चाग्निमेव च ॥ यद्बाहुमन्वालभते एतान्प्रीणाति तेन वै ॥ ७७ ॥ यन्नाभिम
न्वालभते प्राणानां ग्रंथिमेव च ॥ तेन प्रीणाति राजेंद्र इतीयं वैदिकी श्रुतिः ॥ ७८ ॥ अभिषिंचति यत्पादौ विष्णुं प्रीणाति तेन वै ॥ यद्भूम्याच्छा
दकं वारि विसर्जयति मानद ॥ ७९ ॥ वासुकिप्रमुखान्नागांस्तेन प्रीणाति भारत ॥ यद्बिंदवोंऽतरे भूमौ पततीह नराधिप ॥ ८० ॥ भूतग्रामं ततस्त
स्तु प्रीणंतीह चतुर्विधम् ॥ अंगुष्ठेन प्रदेशिन्या लभेत चाक्षिणी नृप ॥ ८१ ॥ अनामिकांगुष्ठिकाभ्यां नासिकामालभेन्नृप ॥ मध्यमांगुष्ठाभ्यां मुखं
संस्पृशेद्भरतर्षभ ॥ ८२ ॥ कनिष्ठिकांगुष्ठकाभ्यां कर्णमालभते नृपं[६] ॥ अंगुलीभिस्तथा बाहुमंगुष्ठेन तु मंडलम् ॥ ८३ ॥ नाभिं कुरुकुलश्रेष्ठ शिरः
सर्वाभिरेव[७] च ॥ अंगुष्ठोग्निर्महाबाहो प्रोक्तो वायुः प्रदेशिनी ॥ ८४ ॥ अनामिका तथा सूर्यः कानष्ठा मघवा विभो ॥ प्रजापतिर्मध्यमा ज्ञेया तस्मा
द्भरतसत्तम ॥ ८५ ॥ एवमाचम्य विप्रस्तु प्रीणाति सततं जगत् ॥ सर्वाश्च देवतास्तात लोकांश्चापि न संशयः ॥ ८६ ॥ तस्मात्पूज्यः सदा विप्रः
सर्वदेवमयो हि सः ॥ ब्राह्मेण विप्रतीर्थेन नित्यकालमुपस्पृशेत् ॥ ८७ ॥ कायत्रैदेशिकाभ्यां वा न पित्र्येण कदाचन ॥ हृद्गाभिः पूयते विप्रः कंठ
गाभिस्तु भूमिपः ॥ ८८ ॥ वैश्योद्भिः प्राशिताभिस्तु शूद्रः स्पृष्टाभिरंततः ॥ उद्धृते दक्षिणे पाणावुपवीत्युच्यते बुधः ॥ ८९ ॥ सव्येन प्राचीनावीती निवीती
कंठसंज्ञिते ॥ मेखलामजिनं दंडमुपवीतं कमंडलुम् ॥ ९० ॥ अप्सु प्रास्य विनष्टानि गृह्णीतान्यानि मंत्रवित् ॥ उपवीत्याचमेन्नित्यमंतर्जानु महीपते ॥
॥ ९१ ॥ एवं तु विप्रो ह्याचान्तः शुचितां याति भारत ॥ यास्त्वेताः करमध्ये तु रेखा विप्रस्य भारत ॥ ९२ ॥ गंगाद्याः सरितः सर्वा ज्ञेया भारतसत्तम ॥

---

१ संचयनम्–इ० पा० । २ युतांगुलिकरम्–इ० पा० । ३ अपः । ४ स सम्यक्फलमाप्नोति–इ० पा० । ५ भारत–इ० पा० । ६ नरः–इ० पा० ७ सर्ववेदमयः–इ० प्म० ।

यान्यंगुलिषु पर्वाणि गिरयस्तानि विद्धि वै ॥९३॥ सर्वदेवमयो राजन्करो विप्रस्य दक्षिणः॥ हस्तोपस्पर्शनविधिस्तवाख्यातो महीपते ॥९४ ॥ एषु
सर्वेषु लोकेषु येनाचांतो दिवं व्रजेत् ॥ ९५ ॥ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वण्युपस्पर्शनविधिवर्णनं नाम
तृतीयोऽध्यायः ॥ ३ ॥ ॥ सुमंतुरुवाच ॥ ॥ केशांतः षोडशे वर्षे ब्राह्मणस्य विधीयते ॥ राजन्यबंधोर्द्वाविंशे वैश्यस्य त्र्यधिके ततः ॥१॥
अमंत्रिका सदा कार्या स्त्रीणां चूडा महीपते ॥ संस्कारहेतोः कायस्य यथाकालं विभागशः ॥ २ ॥ वैवाहिको विधिः स्त्रीणां संस्कारो नैगमः
स्मृतः ॥ निवसेद्वा गुरोर्वापि गृहे वाग्निपरिक्रिया ॥ ३ ॥ एष ते कथितो राजन्नौपनायनिको विधिः ॥ द्विजातीनां महाबाहो उत्पत्तिव्यंजकः
परः ॥ ४ ॥ कर्मयोगमिदानीं ते कथयामि महाबल ॥ उपनीय गुरुः शिष्यं प्रथमं शौचमादिशेत् ॥ ५ ॥ आचारमाग्निकार्यं च संध्योपासनमेव
च ॥ अध्यापयेत्तु सच्छिष्यान्सदाचांत उदङ्मुखः ॥६॥ ब्रह्मांजलिकरो नित्यमध्याप्यो विजितेंद्रियः ॥ लघुवासास्तथैकाग्रः सुमना सुप्रतिष्ठितः
॥ ७ ॥ ब्रह्मारंभेऽवसाने च पादौ पूज्यौ गुरोः सदा ॥ संहत्य हस्तावध्येयं स हि ब्रह्मांजलिः स्मृतः ॥ ८ ॥ व्यत्यस्तपाणिना कार्यमुपसंग्रहणं
गुरोः ॥ सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन तु दक्षिणः ॥ ९ ॥ अध्येष्यमाणं तु गुरुर्नित्यकालमतंद्रितः ॥ अधीष्व भो इति ब्रूयाद्विरामोऽस्त्विति
वारयेत् ॥ १० ॥ ब्रह्मणः प्रणवं कुर्यादादावंते च सर्वदा ॥ स्रवत्यनोंकृतं पूर्वं परस्ताच्च विशीर्यते ॥ ११ ॥ श्रूयतां चापि राजेंद्र यथोंकारं
द्विजोऽर्हति ॥ प्राक्कूलान्पर्युपासीनः पवित्रैश्चैव पावितः ॥ १२ ॥ प्राणायामैस्त्रिभिः पूतस्ततस्त्वोंकारमर्हति ॥ ॐकारलक्षणं चापि शृणुष्व
कुरुनंदन ॥ १३ ॥ अकारं चाप्युकारं च मकारं च प्रजापतिः ॥ वेदत्रयात्तु निर्गृह्य भूर्भुवःस्वरितीति च ॥ १४ ॥ त्रिभ्य एव तु वेदेभ्यः
पादंपादमदूदुहत् ॥ तदित्यृचोऽस्याः सावित्र्याः परमेष्ठी प्रजापतिः ॥ १५ ॥ एतदक्षरमेतां च जपन्व्याहृतिपूर्विकाम् ॥ संध्ययोरुभयोर्विप्रो वेद
पुण्येन युज्यते ॥ १६ ॥ सहस्रकृत्वस्त्वभ्यस्य बहिरेतत्त्रिकं द्विजः ॥ महतोऽप्येनसो मासात्त्वचेवाहिर्विमुच्यते ॥ १७ ॥ एतयर्चा विसंयुक्तः
काले च क्रियया स्वया ॥ विप्रक्षत्रियविड्योनिर्गर्हणां याति साधुषु ॥ १८ ॥ शृणुष्वैकमनाराजन्परमं ब्रह्मणो मुखम् ॥ ॐकारपूर्विकास्तिस्रो
महाव्याहृतयोऽव्ययाः ॥ १९ ॥ त्रिपदा चैव सावित्री विज्ञेया ब्रह्मणो मुखम् ॥ योऽधीतेऽहन्यहन्येतां त्रीणि वर्षाण्यतंद्रितः ॥ २० ॥ स ब्रह्म
परमभ्येति वायुभूतः खमूर्तिमान् ॥ एकाक्षरं परं ब्रह्म प्राणायामः परंतपः ॥ २१ ॥ सावित्र्यास्तु परं नास्ति मौनात्सत्यं विशिष्यते ॥ तपः
क्रिया होमक्रिया तथा दानक्रिया नृप ॥ २२ ॥ अक्षयांताः सदा राजन्यथाह भगवान्मनुः ॥ अवरं त्वक्षरं ज्ञेयं ब्रह्मा चैव प्रजापतिः ॥ २३ ॥

विधियज्ञात्सदा राजञ्जपयज्ञो विशिष्यते ॥ नानाविधैर्गुणोद्देशैः सूक्ष्माख्यातैर्नृपोत्तम ॥ २४ ॥ उपांशुः स्याल्लक्षगुणः साहस्रो मानसः स्मृतः ॥
ये पाकयज्ञाश्चत्वारो विधियज्ञेन चान्विताः ॥ २५ ॥ सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोडशीम् ॥ जपादेव तु संसिध्येद्ब्राह्मणो नात्र संशयः
॥ २६ ॥ कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ॥ पूर्वां संध्यां जपंस्तिष्ठेत्सावित्रीमार्कदर्शनात् ॥ २७ ॥ पश्चिमां तु समासीनः सम्यगृक्षवि
भावनात् ॥ दिनस्यादौ भवेत्पूर्वा शर्वर्यादौ तथा परा ॥ २८ ॥ सनक्षत्रा परा ज्ञेया अपरा सदिवाकरा ॥ जपंस्तिष्ठन्परां संध्यां नैशमेनो व्य
पोहति ॥ २९ ॥ अपरां तु समासीनो मलं हंति दिवाकृतम् ॥ नोपतिष्ठति यः पूर्वां नोपास्ते पश्चिमां नृप ॥ ३० ॥ स शूद्रवद्बहिष्कार्यः सर्व
स्माद्द्विजकर्मणः ॥ अपां समीपे नियतो नैत्यकं विधिमास्थितः ॥ ३१ ॥ सावित्रीमप्यधीयीत गत्वाऽरण्यं समाहितः ॥ वेदोपकरणे राजन्स्वा
ध्याये चैव नैत्यके ॥ ३२ ॥ नात्र दोषोस्त्यनध्याये होममंत्रेषु वा विभो ॥ नैत्यके नास्त्यनध्यायो ब्रह्मसत्रं हि तत्स्मृतम् ॥ ३३ ॥ ब्रह्माहुति
हुतं पुण्यमनध्यायवषट्कृतम् ॥ ऋगेकां यस्त्वधीयीत विधिना नियतो द्विजः ॥ ३४ ॥ तस्य नित्यं क्षरत्येषा पयो मेध्यं घृतं मधु ॥ अग्निशु
श्रूषणं भैक्षमधः शय्यां गुरोर्हितम् ॥ ३५ ॥ आसमावर्तनात्कुर्यात्कृतोपनयनो द्विजः ॥ आचार्यपुत्रशुश्रूषां ज्ञानदो धार्मिकः शुचिः ॥ ३६ ॥
आप्तः शक्तोन्नदः साधुः स्वाध्याप्या दश धर्मतः ॥ नापृष्टः कस्यचिद्ब्रूयान्न चान्यायेन पृच्छतः ॥ ३७ ॥ जानन्नपि हि मेधावी जडवल्लोक
आचरेत् ॥ अधर्मेण च यः प्राह यश्चाधर्मेण पृच्छति ॥ ३८ ॥ तयोरन्यतरः प्रैति विद्वेषं.वा निगच्छति ॥ धर्मार्थौ यत्र न स्यातां शुश्रूषा चापि
तद्विधा ॥ न तत्र विद्या वक्तव्या शुभं बीजमिवोषरे ॥ ३९ ॥ विद्ययैव समं कामं मर्तव्यं ब्रह्मवादिना ॥ आपद्यपि हि घोरायां न त्वेनामीरिणे
वपेत् ॥ ४० ॥ विद्या ब्राह्मणमित्याह शेवधिस्तेऽस्मि रक्ष माम् ॥ असूयकाय मा प्रादास्तथा स्यां वीर्यवत्तमा ॥ ४१ ॥
शेवं सुखमुशन्तीह केचिज्ज्ञानं प्रचक्षते ॥ तौ धारयति वै यस्माच्छेवधिस्तेन सोच्यते ॥४२॥ यमेव तु शुचिं विद्यान्नियतं ब्रह्मचारिणम् ॥
तस्मै मां ब्रूहि विप्राय निधिपायाप्रमादिने ॥ ४३ ॥ ब्रह्म यस्त्वननुज्ञातमधीयानादवाप्नुयात् ॥ ४४ ॥ लौकिकं वैदिकं वापि तथाध्यत्मिकमेव च ॥
स याति नरकं घोरं रौरवं भीमदर्शनम् ॥ ४५ ॥ अणुमात्रात्मकं देहं षोडशार्धमिति स्मृतम् ॥ आददीत यतो ज्ञानं तं पूर्वमभिवादयेत् ॥४६॥
सावित्रीसारमात्रोपि वरो विप्रः सुयंत्रितः ॥ नायंत्रितस्त्रिवेदोऽपि सर्वाशी सर्वविक्रयी ॥४७॥ शय्यासनेध्याचरिते श्रेयसा न समाविशेत् ॥ शय्या
सनस्थश्चैवेनं प्रत्युत्थायाभिवादयेत् ॥ ४८ ॥ ऊर्ध्वं प्राणा ह्युत्क्रामंति यूनः स्थविर आगते ॥ प्रत्युत्थानाभिवादाभ्यां पुनस्तान्प्रतिपद्यते ॥४९॥

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ॥ चत्वारि सम्यग्वर्धंते आयुः प्रज्ञा यशो बलम् ॥ ५० ॥ अभिवादपरो विप्रो ज्यायांसमभिवाद
येत् ॥ असौ नामाहमस्मीति स्वनाम परिकीर्तयेत् ॥ ५१ ॥ नामधेयस्य ये केचिदभिवादं न जानते ॥ तान्प्राज्ञोऽहमिति ब्रूयात्स्त्रियः सर्वा
स्तथैव च ॥ ५२ ॥ भोः शब्दं कीर्तयेदंते स्वस्य नाम्नोभिवादने ॥ नाम्नः स्वरूपभावो हि भो भाव ऋषिभिः स्मृतः ॥ ५३ ॥ आयुष्मान्भव
सौम्येति वाच्यो विप्रोऽभिवादने ॥ अकारश्चास्य नाम्नोंऽते वाच्यः पूर्वाक्षरः प्लुतः ॥ ५४ ॥ यो न वेत्त्यभिवादस्य विप्रः प्रत्यभिवादनम् ॥ नाभि
वाद्यः स विदुषा यथा शूद्रस्तथैव सः ॥ ५५ ॥ अभिवादे कृते यस्तु न करोत्यभिवादनम् ॥ आशीर्वा कुरुशार्दूल स याति नरकं ध्रुवम् ॥ ५६ ॥
अभीति भगवान्विष्णुर्वादयामीति शंकरः ॥ द्वावेव पूजितौ तेन यः करोत्यभिवादनम् ॥ ५७ ॥ ब्राह्मणं कुशलं पृच्छेत्क्षत्रबंधुमनामयम् ॥ वैश्यं
क्षेमं समागम्य शूद्रमारोग्यमेव तु ॥ ५८ ॥ न वाच्यो दीक्षितो नाम्ना यवीयानपि यो भवेत् ॥ भो भवत्पूर्वकत्वेन इति स्वायंभुवोऽब्रवीत् ॥
॥ ५९ ॥ परपत्नी तु या राजन्नसंबद्धा तु योनितः ॥ वक्तव्या भवतीत्येवं सुभगे भगिनीति च ॥ ६० ॥ पितृव्यान्मातुलान्राजञ्छ्वशुरानृत्विजो
गुरून् ॥ असावहमिति ब्रूयात्प्रत्युत्थाय जघन्यजः ॥ ६१ ॥ [1]मातृष्वसा मातुलानी श्वश्रूरथ पितृष्वसा ॥ संपूज्या गुरुपत्नी च समास्ता गुरु
भार्यया ॥६२॥ ज्येष्ठस्य भ्रातुर्या भार्या सवर्णाहन्यहन्यपि ॥ पूजयन्प्रयतो विप्रो याति विष्णुसदो नृप॥६३॥प्रवासादेत्य संपूज्या ज्ञातिसंबंधि
योषितः ॥ पितुर्या भगिनी राजन्मातुश्चापि विशांपते ॥ ६४ ॥ आत्मनो भगिनी या च ज्येष्ठा कुरुकुलोद्वह ॥ सदा स्वमातृवद्वृत्तिमातिष्ठेद्भारतो
त्तम ॥ ६५ ॥ गरीयसी ततस्ताभ्यो माता ज्ञेया नराधिप ॥ पुत्रमित्रभागिनेया द्रष्टव्या ह्यात्मना समाः ॥ ६६ ॥ दशाब्दाख्यं पौरसंख्यं पंचा
ब्दाख्यं कलाभृताम् ॥ अब्दपूर्वं श्रोत्रियाणां स्वल्पेनापि स्वयोनिषु ॥ ६७ ॥ ब्राह्मणं दशवर्षं च शतवर्षं च भूमिपम् ॥ पितापुत्रौ विजानीयाद्ब्राह्म
णस्तु तयोः पिता ॥ ६८ ॥ इत्येवं क्षत्रियपिता वैश्यस्यापि पितामहः ॥ प्रपितामहश्च शूद्रस्य प्रोक्तो विप्रो मनीषिभिः ॥ ६९ ॥ वित्तं बंधुर्वयः
कर्म विद्या भवति पंचमी ॥ एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम् ॥ ७० ॥ पंचानां त्रिषु वर्गेषु भूयांसि गुणवंति च ॥ यस्य स्युः सोऽत्र
मानार्हः शूद्रोपि दशमीं गतः ॥ ७१ ॥ चक्रिणो दशमीस्थस्य रोगिणो [3]भारिणः स्त्रियाः ॥ स्नातकस्य तु राज्ञश्च पंथा देयो वरस्य च ॥ ७२ ॥
एषां समागमे तात पूज्यौ स्नातकपार्थिवौ ॥ आभ्यां समागमे राजन्स्नातको नृपमानभाक् ॥ ७३ ॥ अध्यापयेद्यस्तु शिष्यं कृत्वोपनयनं द्विजः ॥

---

[1] माता मातृष्वसा चैव—इ० पा० । [2] पुरुषोत्तम—इ० पा० । [3] भाविनः—इ० पा० ।

सरहस्यं सकल्पं च वेदं भरतसत्तम ॥ तमाचार्यं महाबाहो प्रवदंति मनीषिणः ॥७४॥ एकदेशं तु वेदस्य वेदांगान्यपि वा पुनः ॥ योध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते ॥ ७५ ॥ निषेकादीनि कार्याणि यः करोति नृपोत्तम ॥ अध्यापयति चान्येन स विप्रो गुरुरुच्यते ॥ ७६ ॥ अग्न्याधेयं पाकयज्ञानग्निष्टोमादिकान्मखान् ॥ यः करोति वृतो यस्य स तस्यर्त्विगिहोच्यते ॥ ७७ ॥ य आवृणोत्यवितथं ब्रह्मणा श्रवणावुभौ ॥ स माता स पिता ज्ञेयस्तं न द्रुह्येत्[1]कथंचन ॥ ७८ ॥ उपाध्याया दशाचार्य आचार्याणां शतं पिता ॥ सहस्रेण पितुर्माता गौरवेणातिरिच्यते ॥ ॥ ७९ ॥ उत्पादकब्रह्मदात्रोर्गरीयान्ब्रह्मदः पिता ॥ ब्रह्मजन्म हि विप्रस्य प्रेत्य चेह च शाश्वतम् ॥ ८० ॥ कामान्माता पिता चैनं यदुत्पादयतो मिथः ॥ संभूतिं तस्य तां विद्याद्यद्योनावभिजायते ॥ ८१ ॥ आचार्यस्तस्य तां जातिं विधिद्वेदपारगः ॥ उत्पादयति सावित्र्या सा सत्या साऽजरामरा ॥ ८२ ॥ उपाध्यायमादितः कृत्वा ये पूज्याः कथितास्तव ॥ महागुरुर्महाबाहो सर्वेषामधिकः स्मृतः ॥ ८३ ॥ सहस्रशतसंख्योऽसावाचार्याणामिदं मतम् ॥ चतुर्णामपि वर्णानां स महागुरुरुच्यते ॥ ८४ ॥ ॥ शतानीक उवाच ॥ ॥ य एते भवता प्रोक्ता उपाध्यायमुखा द्विजाः ॥ विदिता एव मे सर्वे न महागुरुरेव हि ॥ ८५ ॥ ॥ सुमंतुरुवाच ॥ ॥ जयोपजीवी यो विप्रः स महागुरुरुच्यते ॥ अष्टादशपुराणानि रामस्य चरितं तथा ॥ ८६ ॥ विष्णुधर्मादयो धर्माः शिवधर्माश्च भारत ॥ कार्ष्णं वेदं पंचमं तु यन्महाभारतं स्मृतम् ॥ ८७ ॥ [2]श्रौतां धर्माश्च राजेन्द्र नारदोक्ता महीपते ॥ जयेति नाम एतेषां प्रवदंति मनीषिणः ॥ ८८ ॥ एवं विप्रकदंबस्य [3]धारकः प्रवरः स्मृतः ॥ यस्त्वेतानि समस्तानि पुराणानीह विंदति ॥८९॥ भारतं च महाबाहो स सर्वज्ञो मतो नृणाम् ॥ तस्मात्स पूज्यो राजेंद्र वर्णैर्विप्रादिभिः सदा ॥ ९० ॥ किं त्वया न श्रुतं वाक्यं यदाह भगवान्विभुः ॥ अल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः ॥ तमपीह गुरुं विद्याच्छ्रुतोपक्रियया [4]तया ॥ ९१ ॥ ब्राह्मस्य जन्मनः कर्ता स्वधर्मस्य च शासिता ॥ बालोऽपि विप्रो वृद्धस्य पिता भवति [5]धर्मतः ॥ ९२ ॥ अध्यापयामास पितॄञ्छिशुरांगिरसः कविः ॥ पुत्रका इति होवाच ज्ञानेन परिगृह्य तान् ॥ ९३ ॥ ते तमर्थमपृच्छंत देवानागतमन्यवः ॥ देवाश्चैतान्समेत्योचुर्न्याय्यंवै शिशुरुक्तवान् ॥ ९४ ॥ अज्ञो भवति वै बालः पिता भवति मंत्रदः ॥ अज्ञं हि बालमित्याहुः पितेत्येव तु मंत्रदम् ॥ ९५ ॥ पितामहेति जयदमित्यूचुस्ते दिवौकसः ॥ जयो मंत्रास्तथा वेदा देहमेकं त्रिधा कृतम् ॥ ९६ ॥ नहायनैर्न पलितैर्न मित्रेण न बंधुभिः ॥ ऋषयश्चक्रिरे धर्मं योऽ

---

[1] कदाचन--इ० पा० । [2] सौराः--इ० पा० । [3] वाचकः--इ० पा० । [4] मिथः--इ० पा० । [5] धार्मिकः--इ० पा० ।

नूचानः स नो महान् ॥९७॥ ब्राह्मणक्षत्रियविशां शूद्राणां च विशांपते ॥ ज्येष्ठं वंदंति राजेंद्र संदेहं शृणु वै यथा ॥९८॥ ज्ञानतो वीर्यतो राजन्धन
तो जन्मतस्तथा ॥ शीलतस्तु प्रधाना ये ते प्रधाना मता मम ॥ ९९ ॥ न तेन स्थविरो भवति येनास्य पलितं शिरः ॥ यो वै युवाप्यधीयानस्तं
देवाः स्थविरं विदुः ॥ १०० ॥ यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः ॥ यश्च विप्रोनधीयानस्त्रयस्ते नाम[1] बिभ्रति ॥१०१॥ यथा योषाऽफला
स्त्रीषु यथा गौर्गवि चाफला ॥ यथा चाज्ञेऽफलं दानं यथा विप्रोऽनृचोऽफलः ॥ १०२ ॥ वैश्वदेवेन ये हीना आतिथ्येन विवर्जिताः ॥ सर्वे तु वृष
ला ज्ञेयाः प्राप्तवेदा अपि द्विजाः ॥ १०३ ॥ नानृग्ब्राह्मणो भवति न वणिङ्न कुशीलवः ॥ न शूद्रः प्रेषणं कुर्वन्नस्तेनो न चिकित्सकः ॥ १०४ ॥
अव्रता ह्यनधीयाना यत्र भैक्षचरा द्विजाः ॥ तं ग्रामं दंडयेद्राजा चोरभक्तप्रदो हि सः ॥ १०५ ॥ संतुष्टो यत्र वै विप्रः साग्निकः कुरुनन्दन ॥ याति
साफल्यतां वेदैर्देवैरेवं हि भाषितम् ॥१०६॥ वेदैरुक्तं यथा वीर सुरज्येष्ठमुपेत्य वै ॥ वेपंते ब्राह्मणा भूमावभ्यस्यंति ह्यनग्निकाः ॥ क्लिश्यंते ते किमर्थं
हि मूढा वै फलकांक्षया ॥१०७॥ अनुष्ठानविहीनानामस्मानभ्यसतां भुवि ॥ क्लेशो हि केवलं देव नास्मदभ्यसने फलम् ॥१०८॥ अनुष्ठानं परं देव
मस्मत्स्वभ्यसनात्सदा ॥ इत्येवं राजशार्दूल वेदा ऊचुर्हि वेधसम् ॥ तस्माच्च वेदाभ्यसनादनुष्ठानं परं मतम् ॥ १०९ ॥ चत्वारो वा त्रयो वापि यद्ब्रूयु
र्वेदपारगाः ॥ स धर्म इति विज्ञेयो नेतरेषां सहस्रशः ॥११०॥ यद्वदंति तमोमूढा मूर्खा धर्ममजानतः[2] ॥ तत्पापं शतधा भूत्वा वक्तॄनेवानुगच्छ
ति ॥ १११ ॥ शौचहीने व्रतभ्रष्टे विप्रे वेदविवर्जिते ॥ दीयमानं रुदत्यन्नं किं मया दुष्कृतं कृतम् ॥ ११२ ॥ जपोपजीविने दत्तं यदात्मानं प्रपश्य
ति ॥ नृत्यति स्म तदाराजन्करावुद्धृत्य भारत ॥११३॥ विद्यातपोभ्यां संपन्ने ब्राह्मणे गृहमागते ॥ क्रीडंत्यौषधयः सर्वा यास्यामः परमां गतिम् ॥
॥ ११४ ॥ अव्रतानाम[3]मंत्राणामजपानां च भारत ॥ प्रतिग्रहो न दातव्यो न शिलातारयेच्छिलाम् ॥ ११५ ॥ श्रोत्रियायैव देयानि हव्यकव्यानि
नित्यशः ॥ अश्रोत्रियाय दत्तानि न पितॄन्[4]नापि देवताः ॥ ११६ ॥ यस्य चैव गृहे मूर्खो दूरे चापि बहुश्रुतः ॥ बहुश्रुताय दातव्यं नास्ति मूर्खव्यति
क्रमः ॥ ११७ ॥ ब्राह्मणातिक्रमो नास्ति मूर्खे जपविवर्जिते ॥ ज्वलंतमग्निमुत्सृज्य न हि भस्मनि हूयते ॥ ११८ ॥ न चैतदेव मन्यंते पितरो देव
तास्तथा ॥ सगुणं निर्गुणं वापि ब्राह्मणं दैवतं परम् ॥ ११९ ॥ नातिक्रमेद्गृहासीनं ब्राह्मणं विप्रकर्मणि[5] ॥ अतिक्रमन्महाबाहो रौरवं याति भारत ॥
॥ १२० ॥ गायत्रीमात्रसारोपि ब्राह्मणः पूज्यतां गतः ॥ गृहासन्नो विशेषेण न भवेत्पतितस्तु सः ॥ १२१ ॥ धान्यशून्यो यथा ग्रामो यथा कूपश्च

---

[1] नामधारकाः–इ० पा० । [2] अजानानाः । [3] अधमानाम–इ०पा० । [4] तर्पयन्नीति शेषः । [5] हि विकर्मणि–इ०–पा० ।

निर्जलः ॥ ब्राह्मणश्चानधीयानस्त्रयस्ते नामधारकाः ॥ १२२ ॥ यस्त्वेकपंक्त्यां विषमं ददाति स्नेहाद्भयाद्वा यदि वार्थहेतोः ॥ वेदेषु दृष्टमृषिभिश्च
गीतं तां ब्रह्महत्यां मुनयो वदंति ॥ १२३ ॥ अहिंसयैव भूतानां कार्यं श्रेयोऽनुशासनम् ॥ वाक्चैव मधुरा श्लक्ष्णा प्रयोज्या धर्ममीप्सता ॥ १२४ ॥
यस्य वाङ्मनसी शुद्धे सत्यगुप्ते च भारत ॥ स वै सर्वमवाप्नोति वेदांतोपगतं फलम् ॥१२५॥ नारुंतुदः स्यादार्तोपि न परद्रोहकर्मधीः ॥ ययास्यो
द्विजते लोको न तां वाचमुदीरयेत् ॥१२६॥ यत्करोति शुभं वाचा[1] प्रोच्यमाना मनीषिभिः ॥ श्रूयतां कुरुशार्दूल सदा चापि तथोच्यताम् ॥१२७॥
न तथा शशी न सलिलं न चंदनरसो न शीतलच्छाया ॥ प्रह्लादयति च पुरुषं यथा मधुरभाषिणी वाणी ॥१२८॥ अर्हणाद्ब्राह्मणो नित्यमुद्विजेत
विषादिव॥अमृतस्येव चाकांक्षेदपमानस्य[2] सर्वदा॥१२९॥सुखं ह्यवमतः शेते सुखं च प्रतिबुध्यते॥ सुखं चरति लोकेस्मिन्नवमंता विनश्यति॥१३०॥
अनेन विधिना राजन्संस्कृतात्मा द्विजः शनैः ॥ गुरौ वसन्सेचिनुयाद्ब्रह्माधिगमिदं तपः॥१३१॥तपोविशेषैर्विविधैर्व्रतैश्चविविधोदितैः ॥ वेदः कृत्स्नो
धिगंतव्यः सरहस्यो द्विजन्मना ॥१३२॥ वेदमेवाभ्यसेन्नित्यं तपस्तप्यंद्विजोत्तमः ॥ वेदाभ्यासो हि विप्रस्य तपः परमिहोच्यते ॥ १३३ ॥ आहैव
स नखाग्रेभ्यः परमं तप्यते तपः ॥ यः सुप्तोपि द्विजोधीते स्वाध्यायं शक्तितोन्वहम् ॥ १३४ ॥ योनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् ॥ स
जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥१३५॥ न यस्य वेदो न जपो न विद्याश्च विशांपते ॥ स शूद्र एव मंतव्य इत्याह भगवान्विभुः ॥१३६॥
मातुरग्रे च जननं द्वितीयो मौंजिबन्धनम् ॥ तृतीयो यज्ञदीक्षायां द्विजस्य विधिरीरितः ॥ १३७ ॥ तत्र यद्ब्रह्म जन्मास्य मौंजीबन्धनचिह्नि
तम् ॥१३८॥ तत्रास्य माता सावित्री पिता त्वाचार्य उच्यते ॥ वेदप्रदानात्त्वाचार्यं पितरं मनुरब्रवीत् ॥ १३९ ॥ न ह्यस्य विद्यते कर्म किंचिदा
मौंजिबन्धनात् ॥ नाभिव्याहारयेद्ब्रह्म स्वधानिनयनादृते[3] ॥ १४० ॥ शूद्रेण तु समं तावद्यावद्वेदे न जायते ॥ कृतोपनयनस्यास्य व्रतादेशन
मिष्यते ॥ ब्रह्मणो ग्रहणं चैव क्रमेण विधिपूर्वकम् ॥ १४१ ॥ यत्सूत्रं चापि यच्चर्म याया चास्य च मेखला ॥ वसनं चापि यो दंडस्तद्वै तस्य
व्रतेष्वपि ॥ १४२ ॥ सेवेतेमांस्तु नियमान्ब्रह्मचारी[4] गुरौ वसन् ॥ सन्नियम्येन्द्रियग्रामं तपोवृद्ध्यर्थमात्मनः ॥ १४३ ॥ वृन्दारकर्षिपितृणां
कुर्यात्तर्पणमेव हि ॥ नराणां च महाबाहो नित्यं स्नात्वा प्रयत्नतः ॥ १४४ ॥ पुष्पं तोयं फलं चापि समिदाध[5]नमेव च ॥ नानाविधानि
काष्ठानि मृत्तिकां च तथा कुशान् ॥ १४५ ॥ वर्जयेन्मधु मांसं च गन्धमाल्यरथान्स्त्रियः ॥ शुक्तानि चैव सर्वाणि प्राणिनां[6] चैव हिंस

---

[1] भागुरिमते टाप्, अजादित्वाद्वा । [2] कर्मणः सम्बन्धविवक्षया षष्ठी । [3] विलयनादृते—इ० पा० । [4] गुरावधिवसन्सदा—इ० पा० । [5] संचिनुयादितिशेषः । [6] वंचनाम्—इ० पा० ।

नम् ॥१४६॥ अभ्यंगमंजनं चाक्ष्णोरुपानच्छत्रधारणम् ॥ संकल्पं कामजं क्रोधं लोभं गीतं च वादनम् ॥ १४७ ॥ नर्तनं च तथा द्यूतं जनवादं
तथानृतम् ॥ परिवादं चापि विभो दूरतः परिवर्जयेत् ॥ १४८ ॥ स्त्रीणां च प्रेक्षणालंबो रपंवीतं परस्य च ॥ पुंश्चलीभिस्तथा संगं न कुर्या
त्कुरुनन्दन ॥ १४९ ॥ एकः शयीत सर्वत्र न रेतः स्कन्दयेत्क्वचित् ॥ कामाद्धि स्कन्दयन्रेतो हिनस्ति व्रतमेव तु ॥ १५० ॥ सुप्तः क्षरन्ब्रह्मचारी
द्विजः शुक्रमकामतः ॥ स्नात्वार्कमर्चयित्वा तु पुनर्मामित्यृचं जपेत् ॥ १५१ ॥ मनोरपि तथा चात्र श्रूयते परमं वचः ॥ उदकुंभं सुमनसो
गोशकृन्मृत्तिकां कुशान् ॥ आहरेद्यावदर्थान्हि भैक्षं चापि हि नित्यशः ॥ १५२ ॥ गृहेषु येषां कर्तव्यं ताञ्छृणुष्व नृपोत्तम ॥ स्वकर्मसु रता
ये वै तथा वेदेषु ये रताः ॥ यज्ञेषु चापि राजेन्द्र ये च श्रद्धासमाश्रिताः ॥ १५३ ॥ ब्रह्मचार्याहरेद्भैक्षं गृहेभ्यः प्रयतोन्वहम् ॥ गुरोः कुले न
भिक्षेत स्वज्ञातिकुलबन्धुषु ॥ १५४ ॥ अलाभे त्वन्यगोत्राणां पूर्वं पूर्वं विवर्जयेत् ॥ सर्वं चापि चरेद्ग्रामं पूर्वोक्तानामसंभवे ॥ अंत्यवर्जं
महाबाहो इत्याह भगवान्विभुः ॥ १५५ ॥ वाचं नियम्य प्रयतस्त्वग्निं शस्त्रं च वर्जयेत् ॥ चातुर्वर्ण्यं चरेद्भैक्षमलाभे कुरुनन्दन ॥ १५६ ॥
आरादाहृत्य समिधः सन्निदध्याद्गृहोपरि ॥ सायंप्रातस्तु जुहुयात्ताभिरग्निमतंद्रितः ॥ १५७ ॥ भैक्षाचरणमकृत्वा न तमग्निं समिध्य वै ॥
अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेत् ॥ १५८ ॥ वर्तनं चास्य भैक्षेण प्रवदंति मनीषिणः ॥ तस्माद्भैक्षेण वै नित्यं नैकान्नादी भवेद्व्रती ॥ १५९ ॥
भैक्षेण व्रतिनो वृत्तिरुपवाससमा स्मृता ॥ दैवत्ये व्रतवद्राजन्पित्र्ये कर्मण्यथर्षिवत् ॥ काममभ्यर्थितोऽश्नीयाद्व्रतमस्य न लुप्यते ॥ १६० ॥
ब्राह्मणस्य महाबाहो कर्म यत्समुदाहृतम् ॥ राजन्यवैश्ययोर्नैतत्पंडितैः कुरुनन्दन ॥१६१॥ चोदितोऽचोदितो[2] वापि गुरुणा नित्यमेव हि ॥
कुर्यादध्ययने योगमाचार्यस्य हितेषु च ॥ १६२ ॥ बुद्धींद्रियाणि मनसा शरीरं वाचमेव हि ॥ नियम्य प्रांजलिस्तिष्ठेद्वीक्षमाणो गुरोर्मुखम् ॥
॥ १६३ ॥ नित्यमुद्धृतपाणिः स्यात्साध्वाचारस्तु संयतः ॥ आस्यतामिति चोक्तः सन्नासीताभिमुखं गुरोः ॥ १६४ ॥ वस्त्रवेषैस्तथान्नैस्तु
हीनः स्याद्गुरुसन्निधौ ॥ उत्तिष्ठेत्प्रथमं चास्य जघन्यं चापि संविशेत् ॥ १६५ ॥ प्रतिश्रवणसंभाषे तल्पस्थो न समाचरेत् ॥ न चासीनो
न भुञ्जानो न तिष्ठन्न पराङ्मुखः ॥ १६६ ॥ आसीनस्य स्थितः कुर्यादभिगच्छंश्च तिष्ठतः ॥ प्रत्युद्गन्ता तु व्रजतः पश्चाद्धावंश्च धावतः ॥ १६७ ॥
पराङ्मुखस्याभिमुखो दूरस्थस्यैत्य चान्तिकम् ॥ नमस्कृत्य शयानस्य निदेशे तिष्ठेत्सर्वदा ॥ १६८ ॥ नीचं शय्यासनं चास्य

---

१ उपरोधम्—इ० पा० । २ चोदितो वापि गुरुणा नित्यमेव हि पाथव—इ० पा० ।

सर्वदा गुरुसन्निधौ ॥ गुरोश्च चक्षुर्विषये न यथेष्टासनो भवेत् ॥ १६९ ॥ नामोच्चारणमेवास्य परोक्षमपि सुव्रत ॥ न चैनमनु
कुर्वीत गतिभाषणचेष्टितैः ॥ १७० ॥ परीवादस्तथा निन्दा गुरोर्यत्र प्रवर्तते ॥ कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः ॥ १७१ ॥
परीवादाद्रासभः स्यात्सारमेयस्तु निन्दकः ॥ परिभोक्ता कृमिर्भवति कीटो भवति मत्सरी ॥ १७२ ॥ दूरस्थो नार्चयेदेनं नक्रुद्धो
नान्तिके स्त्रियाः ॥ यानासनगतो राजन्नवरुह्याभिवादयेत् ॥ १७३ ॥ प्रतिकूले समाने तु नासीत गुरुणा सह ॥ अश्रृण्वति गुरौ
राजन्न किंचिदपि कीर्तयेत् ॥ १७४ ॥ गोश्वोष्ट्रयानप्रासादप्रस्तरेषु कटेषु च ॥ आसीत गुरुणा सार्धं शिलाफलकनौषु च ॥ १७५ ॥
गुरोर्गुरौ सन्निहिते गुरुवद्वृत्तिमाचरेत् ॥ गुरुपुत्रेषु चार्येषु गुरोश्चैव स्वबंधुषु ॥ १७६ ॥ बालः समानजन्मा वा विशिष्टो यज्ञकर्मणि ॥
अध्यापयन्गुरुसुतो गुरुवन्मानमर्हति ॥ १७७ ॥ उत्सादनमथांगानां स्नापनोच्छिष्टभोजने ॥ पादयोर्नेजनं राजन्गुरुपुत्रेषु वर्जयेत् ॥
॥ १७८ ॥ गुरुवत्प्रातिपूज्यास्तु सवर्णा गुरुयोषितः ॥ असवर्णास्तु संपूज्याः प्रत्युत्थानाभिवादनैः ॥ १७९ ॥ अभ्यंजनं च स्नपनं गात्रोत्सा
दनमेव च ॥ गुरुपत्न्या न कार्याणि केशानां च प्रसाधनम् ॥ १८० ॥ गुरुपत्नीं तु युवतीं नाभिवादेत पादयोः ॥ पूर्णविंशतिवर्षेण गुणदोषौ
विजानता ॥ १८१ ॥ स्वभाव एव नारीणां नराणामिह दूषणम् ॥ [2]अंतोर्थान्न प्रमाद्यंति प्रतिपाद्य विपाश्चितः ॥ १८२ ॥ अविद्वांसमलं लोके विद्वांसमपि
वा पुनः ॥ प्रमदा ह्युत्पथं नेतुं कामक्रोधवशानुगम् ॥ १८३ ॥ मात्रा स्वस्रा दुहित्रा वा न विविक्तासनो भवेत् ॥ बलवानिंद्रियग्रामो विद्वांस
मपि कर्षति ॥ १८४ ॥ राजेंद्र गुरुपत्नीनां युवतीनां युवा भुवि ॥ विधिवद्वंदनं कुर्यादसावहमिति ब्रुवन् ॥ १८५ ॥ विप्रोऽस्य पादग्रणमन्वहं
चाभिवादनम् ॥ गुरुदारेषु कुर्वीत सतां धर्ममनुस्मरन् ॥ १८६ ॥ यथा खनन्खनित्रेण [3]जलमाप्नोति मानवः ॥ तथा गुरुगतां विद्यां शुश्रूषुरधि
गच्छति ॥ १८७ ॥ मुंडो वा जटिलो वा स्यादथ वा स्याच्छिखी जटी ॥ नैनं ग्रामेऽभिनिम्लोचेदर्को नाभ्युदियात्क्वचित् ॥ १८८ ॥ तं
चेदभ्युदियात्सूर्यः शयानं कामकारतः ॥ निम्लोचेद्वाप्यभिज्ञानाज्जपन्नुपवसेद्दिनम् ॥ १८९ ॥ सूर्येण ह्यभिनिर्मुक्तः शयानोभ्युदितश्च यः ॥
प्रायश्चित्तमकुर्वाणो युक्तः स्यान्महतैनसा ॥ १९० ॥ उपस्पृश्य महाराज उभे संध्ये समाहितः ॥ शुचौ देशे जपञ्जप्यमुपासीत यथाविधि ॥
॥ १९१ ॥ यदि स्त्री यद्यवरजः श्रेयः किंचित्समाचरेत् ॥ तत्सर्वमाचरेद्युक्तो यत्र वा रमते मनः ॥ १९२ ॥ धर्मार्थावुच्यते श्रेयः कामार्थौ

---

[1] भार्यासु–इ० पा० । [2] अतोऽर्थान्न प्रमाद्यंति प्रमदासु विपश्चितः–इ० पा० । [3] अमृतम्–इ० पा० ।

धर्ममेव च ॥ अर्थ एवेह वा श्रेयस्त्रिवर्ग इति संस्थितिः ॥ १९३ ॥ पिता माता तथा भ्राता आचार्याः कुरुनंदन ॥ नार्तेनाप्यवमंतव्या ब्राह्मणे
न विशेषतः ॥ १९४ ॥ आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजापतेः ॥ माताप्यथादितेर्मूर्तिर्भ्राता स्यान्मूर्तिरात्मनः ॥ १९५ ॥ यन्माता
पितरौ क्लेशं सहेते संभवे नृणाम् ॥ न तस्य निष्कृतिः शक्या कर्तुं वर्षशतैरपि ॥ १९६ ॥ तयोर्नित्यं प्रियं कुर्यादाचार्यस्य च भारत ॥
तेषु हि त्रिषु तुष्टेषु तपः सर्वं समाप्यते ॥ १९७ ॥ तेषां त्रयाणां शुश्रूषा परमं तप उच्यते ॥ न तैरनभ्यनुज्ञातो धर्ममन्यं समाचरेत् ॥१९८॥
त एव हि त्रयो लोकास्त एव त्रय आ[1]श्रमाः ॥ त एव च त्रयो वेदास्त एवोक्तास्त्रयोऽग्नयः ॥ १९९ ॥ माता वै गार्हपत्याग्निः पिता वै दक्षिणः
स्मृतः ॥ गुरुराहवनीयश्च साग्नित्रेता गरीयसी ॥ २०० ॥ त्रिषु तुष्टेषु चैतेषु त्रीँल्लोकाञ्जयते गृही ॥ दीप्यमानः स्ववपुषा देववद्दिवि मोदते ॥
॥ २०१ ॥ इमं लोकं पितृभक्त्या मातृभक्त्या तु मध्यमम् ॥ गुरुशुश्रूषया चैव गच्छेच्छक्रसलोकताम् ॥ २०२ ॥ सर्वे तेनादृता धर्मा यस्यैते
त्रय आदृताः ॥ अनादृतास्तु येनैते सर्वास्तस्याफलाः क्रियाः ॥ २०३ ॥ यावत्त्रयस्ते जीवेयुस्तावन्नान्यत्समाचरेत् ॥ तेष्वेव नित्यं शुश्रूषां
कुर्यात्प्रियहिते रतः ॥ २०४ ॥ तेषामनुपरोधेन पार्थक्यं यद्यदाचरेत् ॥ तत्तन्निवेदयेत्तेभ्यो मनोवचनकर्मभिः ॥ २०५ ॥ त्रिष्वेतेष्विति कृत्यं
हि पुरुषस्य समाप्यते ॥ एष धर्मः परः साक्षादुपधर्मोऽन्य उच्यते ॥ २०६ ॥ श्रद्दधानः शुभां विद्यामाददीतावरादपि ॥ अंत्यादपि परं धर्मं
स्त्रीरत्नं दुष्कुलादपि ॥२०७॥ विषादप्यमृतं ग्राह्यं बालादपि सुभाषितम् ॥ अमित्रादपि सद्वृत्तममेध्यादपि कांचनम् ॥ २०८ ॥ स्त्रियो रत्नं
नयो विद्या धर्मः शौचं सुभाषितम् ॥ विविधानि च शिल्पानि समादेयानि सर्वशः ॥ २०९ ॥ अब्राह्मणादध्ययनमापत्काले विधीयते ॥
अनुव्रज्या च शुश्रूषा यावदध्ययनं गुरोः ॥२१०॥ नाब्राह्मणे गुरौ शिष्यो वासमात्यंतिकं वसेत् ॥ ब्राह्मणे चाननूचाने कांक्षन्गतिमनुत्तमाम् ॥
॥ २११ ॥ यदि त्वात्यंतिको वासो रोचते च गुरोः कुले ॥ युक्तः परिचरेदेनमाशरीरविमोक्षणात् ॥ २१२ ॥ आ समाप्तेः शरीरस्य यस्तु
शुश्रूषते गुरुम् ॥ स गच्छत्यंजसा विप्रो ब्रह्मणः सद्म शाश्वतम् ॥ २१३ ॥ न पूर्वं गुरवे किंचिदुपकुर्वीत धर्मवित् ॥
स्नानाय गुरुणाज्ञप्तः शक्त्या गुर्वर्थमाहरेत् ॥ २१४ ॥ क्षेत्रं हिरण्यं गामश्वं छत्रोपानहमेव च ॥ धान्यं वासांसि शाकं वा
गुरवे प्रीतमाहरेत् ॥ २१५ ॥ स्वर्गते गां पा[2]रित्यज्य गुरौ भरतसत्तम ॥ गुणान्विते गुरुसुते गुरुदारेऽथ वा नृप ॥ सपिंडे वा गुरोश्चापि गुरु

---

१ आगमाः—इ०पा० । २ पवित्रम्—इ०पा० ।

वद्वृत्तिमाचरेत् ॥ २१६ ॥ एतेष्वविद्यमानेषु स्थानासनविहारवान् ॥ प्रयुंजानोऽग्निशुश्रूषां साधयेद्देहमात्मनः ॥ वीरस्य कुर्वञ्छुश्रूषां याति वीरसलोकताम् ॥ २१७ ॥ चरत्येवं हि यो विप्रो ब्रह्मचर्यमविप्लुतः ॥ स गत्वा ब्रह्मसदनं ब्रह्मणा सह मोदते ॥ २१८ ॥ इत्येष कथितो धर्मः प्रथमं ब्रह्मचारिणः ॥ गृहस्थस्यापि राजेन्द्र शृणु धर्ममशेषतः ॥२१९॥ काले प्राप्य व्रतं विप्र ऋतुयोगेन भारत ॥ प्रपालयन्व्रतं याति ब्रह्मसालोक्यतां विभो ॥ २२० ॥ सदोपनयनं शस्तं वसंते ब्राह्मणस्य तु ॥ क्षत्रियस्य ततो ग्रीष्मे प्रशस्तं मनुरब्रवीत् ॥ २२१ ॥ प्राप्ते शरदि वैश्यस्य सदोपनयनं परम् ॥ इत्येष त्रिविधः कालः कथितो व्रतयोजने ॥ २२२ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि उपनयनविधिवर्णनं नाम चतुर्थोऽध्यायः ॥ ४ ॥ ॥ छ ॥ ॥ सुमंतुरुवाच ॥ ॥ षट्त्रिंशदाब्दिकं चर्यं गुरौ त्रैवेदिकं व्रतम् ॥ तदर्धिकं पादिकं वा ग्रहणांतिकमेव च ॥१॥ वेदानधीत्य वेदौ वा वेदं वापि नृपोत्तम ॥ अविप्लुतब्रह्मचर्यो गृहस्थाश्रममावसेत् ॥२॥ तं प्रतीतं स्वधर्मेण ब्रह्मदायहरं पितुः ॥ स्रग्विणं तल्पे[1] आसीनमर्हयेत्प्रथमं गवा ॥३॥ गुरुणा समनुज्ञातः समावृत्तो यथाविधि ॥ उद्वहेत द्विजो भार्यां सवर्णां लक्षणान्विताम् ॥४॥ ॥ शतानीक उवाच ॥ ॥ लक्षणं द्विजशार्दूल स्त्रीणां वद महामुने ॥ कीदृग्लक्षणसंयुक्ता कन्या[2] स्यात्सुखदा नृप ॥ ५ ॥ ॥ सुमंतुरुवाच ॥ ॥ यदुक्तं ब्रह्मणा पूर्वं स्त्रीलक्षणमनुत्तमम् ॥ श्रेयसे[3] सर्वलोकानां शुभाशुभफलप्रदम् ॥६॥ तत्ते वच्मि महाबाहो शृणुष्वैकमना नृप ॥ श्रुतेन येन जानीषे कन्यां शोभनलक्षणाम् ॥७॥ सुखासीनं सुरश्रेष्ठमभिगम्य महर्षयः ॥ पप्रच्छुर्लक्षणं स्त्रीणां यत्पृष्टोऽहं त्वयाधुना ॥ ८ ॥ प्रणम्य शिरसा देवमिदं वचनमब्रुवन् ॥ भगवन्ब्रूहि नः सर्वं स्त्रीणां लक्षणमुत्तमम् ॥ ९ ॥ श्रेयसे सर्वलोकानां शुभाशुभफलप्रदम् ॥ प्रशस्तामप्रशस्तां च जानीमो येन कन्यकाम् ॥ १० ॥ तेषां तद्वचनं श्रुत्वा विरिंचो वाक्यमब्रवीत् ॥ शृणुध्वं द्विजशार्दूला वच्मि युष्मास्वशेषतः ॥ ११ ॥ प्रतिष्ठिततलौ सम्यग्रक्तांभोजसमप्रभौ ॥ ईदृशौ चरणौ धन्यौ योषितां भोगवर्धनौ ॥ १२ ॥ करालैरतिनिर्मांसै रूक्षैरर्धशिरान्वितैः ॥ दारिद्र्यं दुर्भगत्वं च प्राप्नुवंति न संशयः ॥१३॥ अंगुल्यः संहता वृत्ताः स्निग्धाः सूक्ष्मनखास्तथा ॥ कुर्वंत्यत्यंतमैश्वर्यं राजभावं च योषितः ॥ १४ ॥ ह्रस्वाः सुजीवितं ह्रस्वा विरला वित्तहानये ॥ दारिद्र्यं मूलमग्नासु प्रेष्यं च पृथुलासु च ॥ १५ ॥ परस्परसमारूढैस्तनुभिर्वृत्तपर्वभिः ॥ बहूनपि पतीन्हत्वा दासी भवति वै द्विजाः ॥१६॥ अंगुष्ठोन्नतपर्वाणस्तुंगाग्राः कोमलान्विताः ॥ रत्नकांचनलाभाय

---

[1] तत्र–इ० पा० । [2] धन्या–इ० पा० । [3] ऋषीणां कुरुशार्दूल—इ० पा० ।

विपरीता विपत्तये॥१७॥ सुभगत्वं नखैः स्निग्धैराताम्रैश्च धनाढ्यता ॥ पुत्राः स्युरुन्नतैरेभिः सुसूक्ष्मैश्चापि राजता॥१८॥पांडुरैः स्फुटितै रूक्षैर्नीलै
र्धूम्रैस्तथा खरैः[1] ॥ निःस्वता भवति स्त्रीणां पीतैश्चाभक्ष्यभक्षणम् ॥१९॥ गुल्फाः स्निग्धाश्च वृत्ताश्च समारूढशिरास्तथा ॥ यदि स्युर्नूपुरान्दध्युर्बां
धवाद्यैः समाप्नुयुः ॥ २० ॥ अशिराः शरकांडाभाः सुवृत्तालपतनूरुहाः ॥ जंघाः कुर्वंति सौभाग्यं यानं च गजवाजिभिः ॥ २१ ॥ क्लिश्यते रोम
जंघा स्त्री भ्रमत्युद्धतपिंडिका ॥ काकजंघा पतिं हन्ति वाचाटा कपिला च या ॥ २२ ॥ जानुभिश्चैव मार्जारसिंहजान्वनुकारिभिः ॥ श्रियमाप्य
सुभाग्यत्वं प्राप्नुवंति सुतांस्तथा ॥ २३ ॥ घटाभैरध्वगा नार्यो निर्मांसैः कुलटाः स्त्रियः ॥ शिरालैरपि हिंस्राः स्युर्विश्लिष्टैर्धनवर्जिताः ॥ २४ ॥
अत्यंतकुटिलै रूक्षैः स्फुटिताग्रैर्गुडप्रभैः ॥ अनेकजैस्तथा रोमैः केशैश्चापि तथाविधैः ॥ २५ ॥ अत्यंतपिंगला नारी विषतुल्येति निश्चितम् ॥
सप्ताहाभ्यंतरे पापा पतिं हन्यान्न संशयः ॥ २६ ॥ हस्तिहस्तनिभैर्वृत्तै रंभाभैः करभोपमैः ॥ प्राप्नुवंत्यूरुभिः शश्वत्स्त्रियः सुखमनंगजम् ॥ २७॥
दौर्भाग्यं बद्धमांसैश्च बंधनं रोमशोरुभिः ॥ तनुभिर्वधमित्याहुर्मध्यच्छिद्रैष्वनीशता ॥२८॥ संध्यावर्णं समं चारु सूक्ष्मरोमान्वितं पृथु ॥ जघनं
शस्यते स्त्रीणां रतिसौख्यकरं द्विज ॥ २९ ॥ अरोमको भगो यस्याः समः सुश्लिष्टसंस्थितः ॥ अपि नीचकुलोत्पन्ना राजपत्नी भवत्यसौ॥३०॥
अश्वत्थपत्रसदृशः कूर्मपृष्ठोन्नतस्तथा ॥ शशिबिंबनिभश्चापि तथैव कलशाकृतिः ॥ भगः शस्ततमः स्त्रीणां रतिसौभाग्यवर्धनः ॥ ३१ ॥ तिल
पुष्पनिभो यश्च यद्यग्रे खुरसंनिभः ॥ द्वावप्येतौ परप्रेष्यं कुर्वाते च दरिद्रताम् ॥ ३२ ॥ उलूखलनिभैः शोकं मरणं विवृताननैः ॥ विरूपैः
पूतिनिर्मांसैर्गजसंनिभरोमभिः ॥ दौःशील्यं दुर्भगत्वं च दारिद्र्यमधिगच्छति ॥ ३३ ॥ कपित्थफलसंकाशः पीनो वलिविर्जितः ॥
स्फीतः प्रशस्यते स्त्रीणां निंदितश्चान्यथा द्विजाः ॥ ३४ ॥ पयोधरभरानम्रप्रचलत्रिवलीगुरुः ॥ मध्यः शुभावहः स्त्रीणां रोमरा
जीविभूषितः ॥ ३५ ॥ पणवाभैर्मृदंगाभैस्तथा मध्ये यवोपमैः ॥ प्राप्नुवंति भयावासक्लेशदौःशील्यमीदृशैः ॥३६॥ अवक्रानुल्बणं पृष्ठमरो
मशमगर्हितम् ॥ नानास्तरणपर्यंकरतिसौख्यकरं परम् ॥ ३७ ॥ कुब्जमद्रोणिकं पृष्ठं रोमशं यदि योषितः ॥ स्वप्नांतरे सुखं तस्या
नास्ति हन्यात्पतिं च सा ॥ ३८ ॥ विपुलैः सुकुमारैश्च कुक्षिभिः सुबहुप्रजाः ॥ मण्डूककुक्षिर्या नारी राजानं सा प्रसूयते ॥ ३९ ॥
उन्नतैर्बलिभिर्वंध्याः सुवृत्तैः कुलटाः स्त्रियः ॥ जारकर्म[3]रतास्ताः स्युः प्रव्रज्यां च समाप्नुयुः ॥ ४० ॥ उन्नता च नतैः क्षुद्रा विषमैर्विषमा

---

[1] आयतैः—इ० पा० । [2] कुसुमाकारैः—इ० पा० । [3] परकर्म—इ० पा० ।

शया ॥ आयुरैश्वर्यसंपन्ना वनिता हृदयैः समैः ॥ ४१ ॥ सुवृत्तमुन्नतं पीनमदूरोन्नतमायतम् ॥ स्तनयुग्ममिदं शस्तमतोऽन्यदसुखावहम् ॥ ४२ ॥ उन्न
तिः प्रथमे गर्भे द्वयोरेकस्य भूयसी ॥ वामे तु जायते कन्या दक्षिणे तु भवेत्सुतः ॥ ४३ ॥ दीर्घे तु चूंचुके यस्याः सा स्त्री धूर्ता रतिप्रिया ॥ सुवृत्ते
तु पुनर्यस्या द्वेष्टि सा पुरुषं सदा ॥४४॥ स्तनैः सर्पफणाकारैः श्वजिह्वाकृतिभिस्तथा ॥ दारिद्र्यमधिगच्छंति स्त्रियः पुरुषचेष्टिताः ॥ अवष्टब्धघटीतु
ल्या भवंति हि तथा द्विजाः ॥ ४५ ॥ सुसमं मांसलं चारु शिरो रोमविवर्जितम् ॥ वक्षो यस्या भवेन्नार्या भोगान्भुक्ते यथेप्सितान् ॥ ४६ ॥ हिंस्रा
भवति वक्रेण दौःशील्यं रोमशेन तु ॥ निर्मांसेन तु वैधव्यं विस्तीर्णे कलहप्रिया ॥४७॥ चतस्रो रक्तगंभीरा रेखाः स्निग्धाः करे स्त्रियाः ॥ यदि
स्युः सुखमाप्नोति विच्छिन्नाभिरनीशता ॥४८॥ रेखाः कनिष्ठिकामूलाद्यस्याः प्राप्ताः प्रदेशिनीम् ॥ शतमायुर्भवेत्तस्यास्त्रयाणामुन्नतौ क्रमात् ॥४९॥
संवृत्ताः समपर्वाणस्तीक्ष्णाग्राः कोमलत्वचः ॥ समा ह्यंगुलयो यस्याः सा नारी भोगवर्धिनी ॥ ५० ॥ बंधुजीवारुणैस्तुंगैर्नखैरैश्वर्यमाप्नुयात् ॥ खरै
र्वक्रैर्विवर्णाभैः श्वेतप्रीतैरनीशता ॥ ५१ ॥ रक्तैर्मृदुभिरैश्वर्यं निश्छिद्रांगुलिभिर्द्विजाः ॥ स्फुटितैर्विषमै रूक्षैः क्लेशं पाणिभिराप्नुयुः ॥५२॥ समरेखा
यवा यासामंगुष्ठांगुलिपर्वसु ॥ तासां हि विपुलं सौख्यं धनं धान्यं तथाऽक्षयम् ॥ ५३ ॥ मणिबंधोऽव्यवच्छिन्नो रेखात्रयविभूषितः ॥ ददाति न
चिरादेव भोगमायुस्तथाक्षयम् ॥ ५४ श्रीवत्सध्वजपद्माक्षगजवाजिनिवेशनैः ॥ चक्रस्वस्तिकवज्रासिपूर्णकुंभनिभांकुशैः ॥ ५५ ॥ प्रासादच्छत्रमुकु
टैर्हारकेयूरकुंडलैः ॥ शंखतोरणनिर्व्यूहैर्हस्तन्यस्तैर्नृपस्त्रियः ॥ ५६ ॥ यस्याः पाणितले रक्ता यूपकुंभाश्च कुंडिकाः ॥ दृश्यंते चरणे यस्या यज्ञपत्नी
भवत्यसौ ॥५७॥ वीथ्यापणतुलामानैस्तथा मुद्रादिभिः स्त्रियः ॥ भवंति वणिजां पत्न्यो रत्नकांचनशालिनाम् ॥५८॥ दात्रयोक्त्रयुगाबंधफलोलूखल
लांगलैः ॥ भवंति धनधान्याढ्याः कृषीवलजनांगनाः ॥५९॥ अनुन्नताशिरासंधि पीनं रोमविवर्जितम् ॥ गोपुच्छाकृति नारीणां भुजयोर्युगुलं शुभ
म् ॥ ६० ॥ निगूढग्रंथयो यस्याः कूर्परौ रोमवर्जितौ ॥ बाहू वै ललितौ यस्याः प्रशस्तौ वृत्तकोमलौ ॥ ६१ ॥ उन्नतावनतौ चैव नातिस्थूलौ न
रोमशौ ॥ सुखदौ तु सदा स्त्रीणां सौभाग्यारोग्यवर्धनौ ॥ ६२ ॥ स्थूले स्कंधे वहेद्भारं रोमशे व्याधिता भवेत् ॥ वक्रस्कंधे भवेद्वंध्या कुलटा चोन्न
तानने ॥ ६३ ॥ स्पष्टं रेखात्रयं यस्या ग्रीवायां चतुरंगुलम् ॥ मणिकांचनमुक्ताढ्यं सा दधाति विभूषणम् ॥ ६४ ॥ अधना स्त्री कृशग्रीवा दीर्घग्री
वा च बंधकी ॥ ह्रस्वग्रीवा मृतापत्या स्थूलग्रीवा च दुःखिता ॥६५॥ अनुन्नता समांसा च समा यस्याः कृकाटिका ॥ सुदीर्घमायुस्त्वस्यास्तु

---

१ चुबुके-इ० पा०।

चिरं भर्ता च जीवति ॥ ६६ ॥ निर्मांसा बहुमांसा च शिराला रोमशा तथा ॥ कुटिला विकटा चैव विस्तीर्णा न च शस्यते॥६७॥ न स्थूलो
न कृशोऽत्यर्थं न वक्रो न च रोमशः ॥ हनुरेवंविधः श्रेयांस्ततोन्यो न प्रशस्यते ॥६८॥ चतुरस्रमुखी धूर्ता मंडलास्या शिवा भवेत् ॥ अप्रजा
वाजिवक्त्रा स्त्री महावक्त्रा च दुर्भगा ॥ ६९ ॥ श्ववराहवृकोलूकमर्कटास्याश्च याः स्त्रियः ॥ क्रूरास्ताः पापकर्मिण्यः प्रजाबांधववर्जिताः ॥७० ॥
मालतीबकुलांभोजनीलोत्पलसुगंधि यत् ॥ वदनं मुच्यते नैतत्पानतांबूलभोजनैः ॥ ७१ ॥ ताम्राभः किंचिदालंभः स्थौल्यकार्श्यविवर्जितः ॥
अधरो यदि तुंगश्च नारीणां भोगदः सदा ॥७२॥ स्थूले कलहशीला स्याद्विवर्णे चातिदुःखिता ॥ उत्तरोष्ठेन तीक्ष्णेन वनिता चातिकोपना॥७३॥
जिह्वा तनुतरा वक्त्रा ताम्रा दीर्घा च शस्यते ॥ स्थूला ह्रस्वा विवर्णा या वक्त्रा भिन्ना च निंदिता ॥७४॥ शंखकुन्देंदुधवलैः स्निग्धैस्तुंगैरसंधिभिः ॥
मिष्टान्नपानमाप्नोति दंतैरेभिरनुन्नतैः॥७५॥सूक्ष्मैरतिकृशैर्ह्रस्वैः स्फुटितैर्विरलैस्तथा ॥ रूक्षैश्च दुःखिता नित्यं विकटैर्भामिनी भवेत्॥७६॥सुमृष्टदर्पणां
भोजपूर्णबिंबेंदुसंनिभम् ॥ वदनं वरनारीणामभीष्टफलदं स्मृतम् ॥ ७७ ॥ न स्थूला न कृशा वक्रा नातिदीर्घा समुन्नता ॥ [1]ईदृशी नासिका यस्याः
सा धन्या तु शुभंकरी ॥७८॥ उन्नता मृदुला या च रेखा शुद्धा न संगता ॥ भ्रूर्वक्रतुल्या सूक्ष्मा च योषितां सा सुखावहा॥७९॥ [2]धनुस्तुल्याभिः सौभाग्यं
वंध्या स्याद्दीर्घरोमभिः॥ पिंगलासंगता ह्रस्वा दारिद्र्याय न संशयः ॥८०॥ नीलोत्पलदलप्रख्यैराताम्रैश्चारुपक्ष्मभिः ॥ वनिता नयनैरेभिर्भोगसौभाग्य
भागिनी॥८१॥खञ्जनाक्षी मृगाक्षी च वराहाक्षी वरांगना ॥ यत्रयत्र समुत्पन्ना महांतं भोगमश्नुते ॥ ८२ ॥ अगंभीरैरसंश्लिष्टैर्बहुरेखाविभूषितैः ॥
राजपत्न्यो भवन्तीह नयनैर्मधुपिंगलैः ॥८३॥ वायसाकृतिनेत्राणि दीर्घापांगानि योषिताम् ॥ अनाविलानि चारूणि भवंति हि विभूतये ॥८४॥
गंभीरैः पिंगलैश्चैव दुःखिताः स्युश्चिरायुषः ॥ वयोमध्ये त्यजेत्प्राणानुन्नताक्षी [3]तु यांगना ॥८५॥ रक्ताक्षी विषमाक्षी च [4]धूम्राक्षी प्रेतलोचना॥ वर्ज
नीया सदा नारी श्वनेत्रा चैव दूरतः ॥ ८६ ॥ उद्भ्रान्तकैः करैश्चित्रैर्नयनैस्त्वंगनास्त्विह ॥ मद्यमांसप्रिया नित्यं चपलाश्चैव सर्वतः ॥ ८७ ॥
करालाकृतयः कर्णा नभःशब्दास्तु संस्थिताः ॥ वहंति विकसत्कांति हेमरत्नविभूषणम् ॥ ८८ ॥ खरोष्ट्रनकुलोलूककपिलश्रवणाः स्त्रियः ॥
प्राप्नुवंति महद्दुःखं प्रायशः प्रव्रजंति च ॥ ८९ ॥ ईषदापांडुगंडा या सुवृत्ता पर्वणि त्विह ॥ प्रशस्ता निन्दिता त्वन्या रोमकूपकदूषिता ॥ ९० ॥
अर्धेंदुप्रतिमाभोगमरोम तु समाहितम् ॥ भोगारोग्यकरं श्रेष्ठं ललाटं वरयोषिताम् ॥ ९१ ॥ द्विगुणं परिणाहेन ललाटं विहितं च यत् ॥ शिरः

---

१ अदृशा–इ०, अदशा–इ० च पा० । २ नेत्रतुल्याभिः–इ० पा० ! ३ रुजं गता–इ० पा० । ४ वृत्ताक्षी–इ० पा० ।

प्रशस्तं नारीणामधन्या हस्तिमस्तका ॥ ॥ ९२ ॥ सूक्ष्माः कृष्णा मृदुस्निग्धाः कुञ्चिताग्राः शिरोरुहाः ॥ भवंति श्रेयसे स्त्रीणामन्ये स्युः क्लेश
शोकदाः ॥ ९३ ॥ हंसकोकिलवीणालिशिखिवेणुस्वराः स्त्रियः ॥ प्राप्नुवंति बहून्भोगान्भृत्यानाज्ञापयन्ति च ॥ ९४ ॥ भिन्नकांस्यस्वरा नारी
खरकाकस्वरा च या ॥ रोगं व्याधिं भयं शोकं दारिद्र्यं चाधिगच्छति ॥ ९५ ॥ हंसगोवृषचक्राह्वमत्तमातंगगामिनी ॥ स्वकुलं द्योतयेन्नारी
महिषी पार्थिवस्य च ॥ ९६ ॥ श्वशृगालगतिर्निन्द्या या च वायसवद्व्रजेत् ॥ दासी मृगगतिर्नारी द्रुतगामी च बन्धकी ॥ ९७ ॥ फलिनी
रोचना हेमकुंकुमप्रभ एव च ॥ वर्णः शुभकरः स्त्रीणां यश्च दूर्वांकुरोपमः ॥ ९८ ॥ मृदूनि मृदुरोमाणि नात्यंतस्वेदकानि च ॥ सुरभीणि च
गात्राणि यासां ताः पूजिताः स्त्रियः ॥ ९९ ॥ नोद्वहेत्कपिलां कन्यां नाधिकांगीं न रोगिणीम् ॥ नालोमिकां नातिह्रस्वां न वाचाटां न
पिंगलाम् ॥ १०० ॥ नर्क्षवृक्षनदीनाम्नीं नांत्यपर्वतनामिकाम् ॥ न पक्ष्यहिप्रेष्यनाम्नीं न च भीषणनामिकाम् ॥ १०१ ॥ अव्यंगांगीं सौम्यनाम्नीं
हंसवारणगामिनीम् ॥ तनुलोमकेशदशनां मृद्वंगीमुद्वहेत्स्त्रियम् ॥ १०२ ॥ महांत्यपि समृद्धानि गोजाविधनधान्यतः ॥ स्त्रीसंबन्धे दशैतानि
कुलानि परिवर्जयेत् ॥ १०३ ॥ हीनक्रियं निष्पुरुषं निश्छन्दोरोमशार्शसम् ॥ क्षयामयाव्यपस्मारिश्वित्रकुष्ठिकुलानि च ॥ १०४ ॥ पादौ
सुगुल्फौ प्रथमं प्रतिष्ठौ जंघे द्वितीयं च सुजानुचक्रे ॥ मेढ्रोरुगुह्यं च ततस्तृतीयं नाभिः कटिश्चेति चतुर्थमाहुः ॥ १०५ ॥ उदरं कथयंति
पञ्चमं हृदयं षष्ठमथ स्तनान्वितम् ॥ अथ सप्तममंसजत्रुणी कथयंत्यष्टममोष्ठकन्धरे ॥ १०६ ॥ नवमं नयने च सभ्रुणी सललाटं
दशमं शिरस्तथा ॥ अशुभेष्वशुभं दशाफलं चरणं चरणाद्यशुभेषु शोभनम् ॥ १०७ ॥ इदं महात्मा स महानुभावः शचीनिमित्तं
गुरुरब्रवीद्द्विजाः ॥ शक्रेण पृष्टः सविशेषमुत्तमं संलक्ष्यमुक्तं वरयोषलक्षणम्[1] ॥ १०८ ॥ मत्सकाशात्पुनः श्रुत्वा लक्षणं पुरुषस्य च ॥
यथाधुना भवद्भिस्तु श्रुतं मत्तो द्विजोत्तमाः ॥ १०९ ॥ लक्षणेभ्यः प्रशस्तं तु स्त्रीणां सद्वृत्तमुच्यते ॥ सद्वृत्तमुक्ता या स्त्री सा प्रशस्ता न च
लक्षणैः ॥ ११० ॥ ईदृग्लक्षणसंपन्नां सुकन्यामुद्वहेत्तु यः ॥ ऋद्धिर्वृद्धिस्तथा कीर्तिस्तत्र तिष्ठति नित्यशः ॥ ॥ १११ ॥ ॥ इति श्रीभविष्ये
महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि स्त्रीलक्षणवर्णनं नाम पञ्चमोऽध्यायः ॥ ५ ॥ ॥ छ ॥ ॥ शतानीक उवाच ॥ ॥ सद्वृत्तं श्रोतु
मिच्छामि देवस्त्रीणां सुविस्तरात ॥ उत्तमाधममध्यं च संबन्धे स्त्रीकृते यथा ॥ १ ॥ ॥ सुमंतुरुवाच ॥ ॥ शतानीक महाबाहो ब्रह्मलोके

---

[1] वरयोषाचिह्नमित्यर्थः ।

पितामहः ॥ उक्त्वा स लक्षणं स्त्रीणां सद्वृत्तं चोक्तवान्[1]पुनः ॥ २ ॥ यथोक्तं ब्रह्मणां[2] तेषामृषीणां कुरुनन्दन ॥ स प्रेयो वचनं श्रुत्वा ब्रह्मा वचन
मब्रवीत् ॥ ३ ॥ शृणुध्वं द्विजशार्दूलाः स्त्रीणां सद्वृत्तमादितः ॥ वक्ष्ये युष्मानशेषं वै लोकानुग्रहकाम्यया ॥ ४ ॥ त्रिवर्गप्राप्तये वक्ष्ये
स्त्रीवृत्तं गृहमेधिनाम् ॥ प्राग्विद्यादीनुपादाय तैरर्थांश्च यथाक्रमम् ॥ विन्देत सदृशीं भार्यां शास्त्रदृष्टेन कर्मणा ॥ ५ ॥ गृहाश्रमो हि निः
स्वानां महत्येषा विडंबना ॥ तस्मात्पूर्वमुपादेयं वित्तमेव गृहैषिणा ॥ ६ ॥ वरं सोढा मनुष्येण तीव्रा नरकवेदना ॥ न त्वेव च गृहे
दृष्टं पुत्रदारक्षुधार्दितम् ॥ ७ ॥ असंभवे शिशुं दृष्ट्वा रुदंतं प्रार्थनापरम् ॥ वज्रसारमयं मन्ये हृदयं यन्न दीर्यते ॥ ८ साध्वीं भार्यां प्रियां दृष्ट्वा
कुचैलां क्षुत्कृशीकृताम् ॥ अस्य दुःखस्य तन्नास्ति सुखं यत्समतां व्रजेत् ॥ ९ ॥ रूक्षान्विवर्णान्क्षुधितान्भूमिप्रस्तरशायिनः ॥ पुत्रदारा
न्निजान्दृष्ट्वा किमकार्यं भवेन्नृणाम् ॥१०॥ बाहूत्तरीयं क्षुत्क्षामं दृष्ट्वा दीनमुखं सुतम् ॥ मृत्युरेवोत्सवः पुंसां व्यसनं जीवितं द्विजाः ॥११॥ परिसीद
त्स्वपत्येषु दृष्ट्वा दीनमुखीं प्रियाम् ॥ वज्रकार्यशरीरास्ते ये न यांति सहस्रधा ॥ १२ ॥ तस्मादर्थविहीनस्य पुंसो दारपरिग्रहात् ॥ कुतस्त्रिवर्ग
संसिद्धिर्यातनैव हि तस्य सा ॥ १३ ॥ अभार्यस्याधिकारोस्ति न द्वितीयाश्रमे यथा ॥ तद्वदर्थविहीनानां सर्वत्र नाधिकारिता ॥ १४ ॥ केचि
त्त्वपत्यमेवाहुस्त्रिवर्गावाप्तिसाधनम् ॥ पुंसामर्थः कलत्रं च येऽन्ये नीतिविदो विदुः ॥ १५ ॥ धर्मोपि द्विविधो यस्मादिष्टापूर्तक्रियात्मकः ॥
स च दारात्मकः सर्वं ज्ञेयमर्थैकसाधनम् ॥ १६ ॥ निजेना[3]पि दरिद्रेण लोको लज्जति बंधुना ॥ परोपि हि मनुष्याणामैश्वर्यात्स्वजनायते ॥
॥ १७ ॥ न दरिद्रं समीपेपि स्थितवंतं प्रपश्यति ॥ दूरस्थमपि वित्ताढ्यमादराद्भजते जनः ॥ १८ ॥ तस्मात्प्रयत्नतः पूर्वमर्थमेव प्रसाधयेत् ॥
स हि मूलं त्रिवर्गस्य गुणानां गौ[4]रवस्य च ॥ १९ ॥ सर्वेपि हि गुणा विद्याकुलशीलादयो नृणाम् ॥ संति तस्मिन्नसंतोपि संति संतोपि
नासति ॥ २० ॥ शास्त्रं शिल्पं कलाः कर्म यच्चान्यदपि चेष्टितम् ॥ साधनं सर्वमर्थानामर्था धर्मादिसाधनाः ॥ २१ ॥ साधनानां त्रिवर्गोस्ति
तं विना केवलं नृणाम् ॥ अजागलस्तनस्येव निधनायैव संभवः ॥ २२ ॥ प्राक्पुण्यैर्विपुला संपद्धर्मकामादिहेतुजा ॥ भूयो धर्मेण सामुत्र तया[5]
ता[6]विति च क्रमः ॥ २३ ॥ एकचक्रकमेतद्धि प्रोक्तमन्योन्यहेतुकम् ॥ पूर्वपश्चिमबाहुभ्यामुत्तराधरमध्यमाः ॥ २४ ॥ विज्ञाय मतिमानेवं यस्त्रिव
र्गं निषेवते ॥ संख्याशतसमायुक्तैरवाप्नोत्युत्तरोत्तरम् ॥ २५ ॥ नाभार्यस्याधिकारोस्ति त्रिवर्गे निर्धनस्य वा ॥ ना भार्यायामतः पूर्वमर्थमेव

---

१ स नः—इ० पा० । २ विप्राणाम् । ३ लोको निजोऽप्यपार्थस्य शत्रुर्भवति भूमिप—इति पाठान्तरम् । ४ रक्षणाय च—इ०पा० । ४ सम्पदा । ५ धर्मार्थौ ।

प्रसाधयेत् ॥ २६ ॥ तस्मात्क्रमागतैरर्थैः स्वयं वाधिगतैर्युतः ॥ क्रियायोग्यैः समर्थश्च कुर्याद्दारपरिग्रहम् ॥ २७ ॥ अनुरूपे कुले जातां श्रुतवित्तक्रियादिभिः ॥ लभेतानिंदितां कन्यां मनोज्ञां धर्मसाधनाम् ॥ २८ ॥ पुमानर्धपुमांस्तावद्यावद्भार्यां न विंदति ॥ तस्माद्यथाक्रमं काले कुर्याद्दारपरिग्रहम् ॥ २९ ॥ एकचक्रो रथो यद्वदेकपक्षो यथा खगः ॥ अभार्योपि नरस्तद्वद[1]योग्यः सर्वकर्मसु ॥ ३० ॥ पत्नीपरिग्रहाद्धर्मस्तथार्थो बहुलाभतः ॥ सत्प्रीतियोगात्कामोऽपि त्रयमस्यां विदुर्बुधाः ॥ ३१ ॥ त्रिधा विवाहसंबंधो हीनतुल्याधिकैः सह ॥ तुल्यैः सह समस्तेषामितरौ नीचमध्यमौ ॥ ३२ ॥ असमैर्निंद्यते सद्भिरुत्तमैः परिभूयते ॥ तुल्यैः प्रशस्यते यस्मात्तस्मात्साधुतमो मतः ॥ ३३ ॥ कृत्वैवाधिकसंबंधमपमानं समश्नुते ॥ न चैषामानतिं गच्छेन्नैव नीचैः सहे[2]ष्यते॥३४॥उत्तमोऽपि च संबंधो नीचैस्तत्समतां व्रजेत् ॥ अतस्तं वर्जयेद्धीमान्निंदितं सदृशोत्तमैः ॥ ३५ ॥ विजातीयैश्च संबंधं सहेच्छंति न सूरयः ॥ उभयोर्भ्रश्यते तेन यथा कोकिलया शुकः ॥ ३६ ॥ तद्भाति कुलबाह्यत्वादवश्यं चावमानतः ॥ प्रतिपत्तेरशक्यत्वाच्चोत्तमोपि न शस्यते ॥ ३७ ॥ एकेऽपि परिहर्तव्या अन्ये परिहरंत्युत ॥ तस्माद्द्वावपि नैवेष्टौ संबंधावधमोत्तमौ ॥ ३८ ॥ एकपात्रादिभिर्येषामुपचारैः परस्परम् ॥ प्रत्यहं वर्धते स्नेहः संबंधः सोभिधीयते ॥ ३९ ॥ यत्रावाहविवाहादावन्योन्याः प्रतिपत्तयः ॥ स्पर्धयैव प्रवर्धंते तं संबंधं विदुर्बुधाः ॥ ४० ॥ व्यसनेभ्युदये वापि येषां प्राणैर्धनैरपि ॥ सहैकप्रतिपत्तित्वं संबंधानां स उत्तमः ॥ ४१ ॥ स्नेहव्यक्तौ मनुष्याणां द्वावेव निकषोपलौ ॥ तथा कृतज्ञतायां च व्यसनाभ्युदयागमौ ॥ ४२ ॥ स च स्नेहो नृणां प्रायः [3]समेष्वेव हि दृश्यते ॥ साम्यं चाप्युपगंतव्यं वित्तशीलकुलादिभिः ॥ ४३ ॥ तस्माद्विवाहसंबंधं सख्यमेकान्तकारिणाम् ॥ सदृशैरेव कुर्वीत नोत्तमे नाप्य[4]नुत्तमैः ॥ ४४ ॥

॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि स्त्रीलक्षणसद्वृत्तवर्णनं नाम षष्ठोऽध्यायः ॥ ॥ ६ ॥ छ ॥

॥ ब्र[5]ह्मोवाच ॥

॥ असपिंडा च या मातुरसगोत्रा च या पितुः ॥ सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने ॥ १ ॥ सहजो न भवेद्यस्या न च विज्ञायते पिता ॥ नोप[6]यच्छेत तां प्राज्ञः पुत्रिकाधर्मशंकया ॥ २ ॥ ब्राह्मणानां प्रशस्ता स्यात्सवर्णा दारकर्मणि ॥ कामशस्तु प्रवृत्तानामिमाः स्युः क्रमशोऽवराः ॥ ३ ॥ क्षत्रस्यापि सवर्णा स्यात्प्रथमा द्विजसत्तमाः ॥ द्वे चावरे तथा प्रोक्ते कामतस्तु न धर्मतः ॥ ४ ॥

---

[1] त्याज्यः सर्वेषु कर्मसु—इ०पा०। [2] सम्बन्ध इति शेषः। [3] तस्मिन्काले हि दृश्यते—इ०पा०। [4] नापि चाधमैः—इ०पा०। [5] इतः प्रागेकस्मिन्पुस्तकेऽध्यायार्थकथानुसंधानार्थम्—“अथोत्रिविधसंबंधनिर्णयः”—इ०पा०। [6] उद्वहेदित्यर्थः—‘उपाद्यमः—’ इत्यात्मनेपदम्।

वैश्यस्यैका वरा प्रोक्ता सवर्णा चैव धर्मतः ॥ तथावरा कामतस्तु द्वितीया न तु धर्मतः ॥ ५ ॥ शूद्रैवं भार्या शूद्रस्य धर्मतो मनुरब्रवीत् ॥
चतुर्णामपि वर्णानां परिणेता द्विजोत्तमः ॥ ६ ॥ न ब्राह्मणक्षत्रिययोरापद्यपि हि तिष्ठतोः ॥ कस्मिंश्चिदपि वृत्तांते शूद्रा भार्योपदिश्यते ॥
॥ ७ ॥ हीनजातिस्त्रियं मोहादुद्वहंतो द्विजातयः ॥ कुलान्येव नयंत्याशु ससंतानानि शूद्रताम् ॥ ८ ॥ शूद्रमारोप्य वेद्यां[2] तु पतितोत्त्रिर्बभूव ह ॥ उतथ्यः पुत्रजननात्पतितत्वमवाप्तवान् ॥ ९ ॥ शूद्रस्य पुत्रमासाद्य शौनकः शूद्रतां गतः ॥ भृग्वादयोप्येवमेव पतितत्व
मवाप्नुयुः ॥ १० ॥ शूद्रां शयनमारोप्य ब्राह्मणो यात्यधोगतिम् ॥ जनयित्वा सुतं तस्यां ब्राह्मण्यादेव हीयते ॥ ११ ॥ दैवपित्र्यातिथेयानि
तत्प्रधानानि यस्य तु ॥ नादन्ति पितरो देवाः स च स्वर्गं न गच्छति ॥ १२ ॥ वृषलीफेनपीतस्य निःश्वासोपहतस्य च ॥
तस्यां चैव प्रसूतस्य निष्कृतिर्न विधीयते ॥ १३ ॥ चतुर्णामपि विप्रेन्द्राः प्रेत्येह च हिताहितम् ॥ समासतो ब्रवीम्येष विवाहाष्टकमुत्त
मम् ॥ १४ ॥ ब्राह्मो दैवस्तथा चार्षः प्राजापत्यस्तथासुरः ॥ गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः ॥ १५ ॥ ये यस्य धर्मा वर्णस्य
गुणदोषौ च यस्य यौ ॥ शृणुध्वं तद्द्विजश्रेष्ठाः प्रसवे च गुणागुणम् ॥ १६ ॥ विप्रस्य[3] चतुरः पूर्वान्क्षत्रस्य चतुरोऽवरान् ॥ विट्शूद्रयोस्तु
त्रीनेव विद्याद्धर्मानराक्षसान् ॥ १७ ॥ चतुरो ब्राह्मणस्याद्यान्प्रशस्तान्कवयोविदुः॥ राक्षसं क्षत्रियस्यैकमासुरं वैश्यशूद्रयोः ॥ १८ ॥ क्षत्रियाणां
त्रयो धर्म्या द्वाव[4]धर्म्यौ स्मृताविह ॥ पैशाचश्चासुरश्चैव न कर्त्तव्यौ कथंचन ॥ १९ ॥ पृथक्पृथग्वा मिश्रौ वा विवाहौ पूर्वचोदितौ ॥ गान्धर्वो
राक्षसश्चैव धर्म्यौ क्षत्रस्य तौ स्मृतौ ॥ २० ॥ आच्छाद्य चार्चयित्वा तु श्रुतशीलवते स्वयम् ॥ आहूय दानं कन्याया ब्राह्मो धर्मः प्रकीर्तितः ॥
॥ २१ ॥ वितते चापि यज्ञे तु कर्म कुर्वति चार्त्विजि ॥ अलंकृत्य सुतादानं दैवो धर्म उदाहृतः ॥ २२ ॥ एकं गोमिथुनं द्वे वा वरादादाय
धर्मतः ॥ कन्याप्रदानं विधिवदार्षीयो धर्म उच्यते ॥ २३ ॥ सहोभौ चरतं धर्ममिति वाचानुभाष्य तु ॥ कन्याप्रदानमभ्यर्च्य प्राजापत्यविधिः
स्मृतः ॥ २४ ॥ ज्ञातिभ्यो द्रविणं दत्त्वा कन्यायाश्चैव शक्तितः ॥ कन्याप्रदानं स्वच्छन्दादासुरो धर्म उच्यते ॥ २५ ॥ इच्छयान्योन्यसंयोगः
कन्यायाश्च वरस्य च ॥ गान्धर्वः स विधिर्ज्ञेयो मैथुन्यः कामसंभवः ॥ २६ ॥ हत्वा छित्त्वा च भित्त्वा च क्रोशन्तीं रुदतीं गृहात् ॥ प्रसह्य
कन्याहरणं राक्षसो विधिरुच्यते ॥ २७ ॥ सुप्तां मत्तां प्रमत्तां च रहो यत्रोपगच्छति ॥ स पापिष्ठो विवाहानां पैशाचः कथितोऽष्टमः ॥ २८ ॥

---

१ जातित्वाद्याप् । २ शय्यां तु–इ० पा० । ३ षडानुपूर्व्या विप्रस्य–इ० पा० । ४ द्वौ धर्म्यौ वैश्यशूद्रयोः–इ० षा० ।

जलपूर्वं द्विजाग्र्याणां कन्यादानं प्रशस्यते ॥ इतरेषां तु वर्णानामितरेतरकाम्यया ॥ २९ ॥ यो यस्यैषां विवाहानां विभूनां कीर्तितो गुणः ॥ तं निबोधत वै विप्राः सम्यक्कीर्तयतो मम ॥ ३० ॥ कुलानि दश पूर्वाणि तथान्यानि दशैव तु ॥ स हि तान्यात्मना चैव मोचयत्येनसो ध्रुवम् ॥ ३१ ॥ ब्राह्मीपुत्रः सुकृतकृद्दैवोढाजं सुतं शृणु ॥ दैवोढाजः सुतो विप्राः सप्त सप्त परावरान् ॥ आर्षोढाजः सुतः स्त्रीणां पुरुषांस्तारयेद्विजाः ॥ ३२ ॥ ब्राह्मादिषु विवाहेषु चतुर्ष्वेवानुपूर्वशः ॥ ब्रह्मवर्चस्विनः पुत्रा जायंते शिष्टसंमताः ॥ ३३ ॥ रूपसत्त्वगुणोपेता धनवन्तो यशस्विनः ॥ पुत्रवन्तोऽथ धर्मिष्ठा जीवन्ति च शतं समाः ॥ ३४ ॥ इतरेषु निबोधध्वं नृशंसानृतवादिनः ॥ जायन्ते दुर्विवाहेषु ब्रह्म[1]धर्मद्विषः सुताः ॥ ३५ ॥ अनिन्दितैः स्त्रीविवाहैरनिन्द्या भवति प्रजा ॥ निन्दितर्निंदिता नृणां तस्मान्निन्द्यान्विवर्जयेत् ॥ ३६ ॥ करग्रहणसंस्काराः सवर्णासु भवन्ति वै ॥ असवर्णास्वयं ज्ञेयो विधिरुद्वाहकर्मणि ॥ ३७ ॥ बाणः क्षत्रियया ग्राह्यः प्रतोदो वैश्यकन्यया ॥ वसनस्य दशा ग्राह्या शूद्रयोत्कृष्टवेदने ॥ ३८ ॥ न कन्यायाः पिता विद्वान्गृह्णीयाच्छुल्कमण्वपि ॥ गृह्णन्हि शुल्कं लोभेन स्यान्नरोऽपत्यविक्रयी ॥ ३९ ॥ स्त्रीधनानि तु ये मोहादुपजीवन्ति बान्धवाः ॥ नारीयानानि वस्त्रं वा ते पापा यान्त्यधोगतिम् ॥ ४० ॥ आर्षे गोमिथुनं शुल्कं केचिदाहुर्मृषैव[2] तत् ॥ अल्पो वापि महान्वापि विक्रयस्तावदेव सः ॥४१॥ यासां नाददते शुल्कं ज्ञातयो न स विक्रयः ॥ अर्हणं तत्कुमारीणामानृशंस्यं च केवलम् ॥ ४२ ॥ इत्थं दारान्समासाद्य देशमग्र्यं समावसेत् ॥ ब्राह्मणो द्विजशार्दूल य इच्छेद्विपुलं यशः ॥ ४३ ॥ ॥ ऋषय ऊचुः ॥ ॥ को देशः परमो ब्रह्मन्कश्च पुण्यो मतस्तव ॥ प्रवसन्यत्र विप्रेन्द्र यशः प्राप्नोति कंजज ॥ ४४ ॥ ॥ ब्रह्मोवाच ॥ ॥ न[3] हीयते यत्र धर्मश्चतुष्पात्स कलो द्विजाः ॥ स देशः परमो विप्राः स च पुण्यो मतो मम ॥ ४५ ॥ विद्वद्भिः सेवितो धर्मो यस्मिन्देशे प्रवर्तते ॥ शास्त्रोक्तश्चापि विप्रेन्द्राः स देशः परमो मतः ॥ ४६ ॥ ऋषय ऊचुः ॥ विद्वद्भिःसेवितं धर्मं शास्त्रोक्तं च सुरोत्तम ॥ वदास्मासु सुरश्रेष्ठ कौतुकं परमं हि नः ॥ ४७ ॥ ॥ ॥ ब्रह्मोवाच ॥ ॥ विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागिभिः ॥ हृदयेनाभ्यनुज्ञातो यो धर्मस्तं निबोधत ॥४८॥ कामात्मता न प्रशस्ता न वेहास्याप्यकामता ॥ काम्यो हि वेदाधिगमः कर्मयोगश्च वैदिकः ॥ ४९ ॥ संकल्पाज्जायते कामो यज्ञाद्यानि च सर्वशः ॥ व्रता नियमधर्माश्च सर्वे संकल्पजाः स्मृताः ॥ ५० ॥ कामाहृते क्रियाकारी दृश्यते नेह कर्हिचित् ॥ यद्यद्धि कुरुते कश्चित्तत्तत्कामस्य चेष्टितम् ॥५१॥ निगमो[4] धर्ममूलं स्यात्स्मृ

---

[1] परं ब्रह्मद्विषः—इ० पा० । [2] महर्षयः—इ० पा० । [3] महीयते—इ० पा० । [4] नियमा धर्ममूलं स्युः—इ० पा० ।

तिशीले तथैव च ॥ तथाचारश्च साधूनामात्मनस्तुष्टिरेव च ॥ ५२ ॥ सर्वं तु समवेक्षेत निश्चियं ज्ञानचक्षुषा ॥ श्रुतिप्राधान्यतो विद्वान्स्व
धर्मे निवसेत वै ॥ ५३ ॥ श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन्सदा नरः ॥ प्राप्य चेह परां कीर्तिं याति शक्रस[2]लोकताम् ॥५४॥ श्रुतिस्तु वे[3]दो विज्ञेयो
धर्मशास्त्रं तु वै स्मृतिः ॥ ते सर्वार्थेषु मीमांस्ये ताभ्यां धर्मो हि निर्बभौ ॥ ५५ ॥ योऽवमन्येत ते चोभे हेतुशास्त्राश्रयाद्द्विजः ॥ स साधुभि
र्बहिष्कार्यो नास्तिको वेदनिन्दकः ॥ ५६ ॥ वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ॥ एतच्चतुर्विधं विप्राः साक्षाद्धर्मस्य लक्षणम् ॥
॥ ५७ ॥ धर्मज्ञानं भवेद्विप्रा अर्थकामेष्वसज्जताम् ॥ धर्मं जिज्ञासमानानां प्रमाणान्नैगमं परम् ॥ ५८ ॥ निषेकादिश्मशानांतो मन्त्रैर्यस्योदितो
विधिः ॥ अधिकारो भवेत्तस्य वेदेषु च जपेषु च ॥ ५९ ॥ सरस्वतीदृषद्वत्योर्दे[4]वनद्योर्यदंतरम् ॥ तदेव निर्मितं देशं ब्रह्मावर्तं प्रचक्षते ॥ ६० ॥
यस्मिन्देशे य आचारः पारंपर्यक्रमागतः ॥ वर्णानां सांतरालानां स सदाचार उच्यते ॥ ६१ ॥ कुरुक्षेत्रं च मत्स्याश्च पंचालाः शूरसेनयः ॥
एष ब्रह्मर्षिदेशो वै ब्रह्मावर्तादनंतरम् ॥ ६२ ॥ एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ॥ स्वंस्वं चरित्रं शिक्षंति पृथिव्यां सर्वमानवाः ॥ ६३ ॥
हिमवद्विंध्ययोर्मध्ये यत्प्राग्विनशनादपि ॥ प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः ॥ ६४ ॥ आ समुद्रात्तु वै पूर्वादासमुद्रात्तु पश्चिमात ॥ तयोरे
वांतरं गिर्योरार्यावर्त्तं विदुर्बुधाः ॥६५॥ अटते यत्र कृष्णा गौर्मृगो नित्यं स्वभावतः ॥ स ज्ञेयो याज्ञिको देशो म्लेच्छदेशस्त्वतः परः ॥६६॥
एतान्नित्यं शुभान्देशान्संश्रयेत द्विजोत्तमः ॥ यस्मिन्कस्मिंश्च निवसेत्पा[5]दजो वृत्तिकर्शितः ॥ ६७ ॥ प्रकीर्तितेयं धर्मस्य बुधैर्योनिर्द्विजोत्तमाः ॥
संभवश्चास्य सर्वस्य समासान्न तु विस्तरात् ॥ ६८ ॥ ॥ इति श्रीभविष्ये महापुराणे शतार्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि विवाहधर्मवर्णनं
नाम सप्तमोऽध्यायः ॥ ७ ॥ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ कर्तव्यं यद्गृहस्थेन तदिदानीं निबोधत ॥ गदतो द्विजशार्दूल विस्तराच्छास्त्रतस्तथा ॥
॥ १ ॥ वैवाहिकेऽग्नौ कुर्वीत गृह्यं कर्म यथाविधि ॥ शुभदेशाश्रयश्चैव पत्नी वैवाहिकी गृहे ॥ २ ॥ स्वाश्रयेण विना शक्यं न यस्माद्रक्षणादिकम् ॥
वित्तानामिव दाराणामतस्तद्विधिरुच्यते ॥ ३ ॥ हेतवो हि त्रिवर्गस्य वि[6]परीतास्तु मानद ॥ अरक्षणाद्भवंत्यस्मादमीषां रक्षणं मतम् ॥ ४ ॥ निस
र्गात्पुंस्यसंतोषाद्गुणदोषविमर्षतः ॥ दुष्टानां चापि संसर्गाद्रक्ष्या एव च योषितः ॥ ५ ॥ पुरुषस्थानवेश्मानि त्रिविधं प्राहुराश्रयम् ॥ वित्तानां
रक्षणाद्यर्थमपूर्वाधिगमाय च ॥ ६ ॥ कुलीनो नीतिमान्प्राज्ञः सत्यसंधो दृढव्रतः ॥ विनीतो धार्मिकस्त्या[7]गी विज्ञेयः पुरुषाश्रयः ॥ ७ ॥ नगरे

---

[1] हि मानवः—इ०पा० । [2] ब्रह्मसलोकताम्—इ०पा० । [3] धर्मः—इ० पा० । [4] गिरिनद्योः—इ०पा० । [5] ब्राह्मणो वृत्तिकर्शितः—इ० पा० । [6] विपरीतार्थसाधकाः—इ० पा० । [7] स्वामी—इ०पा० ।

खर्वटे खेटे ग्रामे चापि क्रमागते ॥ यात्रावशाद्वा निवसेद्धार्मिकाद्यजनान्विते ॥ ८ ॥ गुरुणानुमतस्तत्र ग्रामण्यादिजनेन वा ॥ प्रतिवेशमाद्यबाधेन शुद्धं कुर्यान्निवेशनम् ॥ ९ ॥ द्वा[1]रचत्वरशालानां सर्वकारुकवेश्मनाम् ॥ द्यूतसूनासुरावेशनटराजानुजीविनाम् ॥ १० ॥ पाखंडदेववीथीनां राजमार्गकुलस्य च ॥ दूरात्सुगुप्तं कर्तव्या जीविका विभवोचिता ॥ ११ ॥ सापिधानैकनिष्काशं शुद्धपृष्टं समंततः ॥ सद्वृत्ताप्तजनाकीर्णमदुष्टप्रातिवेशिकम् ॥ १२ ॥ प्रागुदक्प्रवणे देशे वास्तुविद्याविधानतः ॥ प्रविभक्तक्रियाकांक्षं सर्वर्तुकमनोहरम् ॥ १३ ॥ अर्चास्नानोदकागारगोष्ठागारमहानसैः ॥ युक्तं गोवाजिशालाभिः सदासीभृत्यकाश्रयैः ॥ १४ ॥ बहिरंतःपुरस्त्रीकं सर्वोपकरणैर्युतम् ॥ विभक्तशयनोद्देशमाप्तवृद्धैरधिष्ठितम् ॥ १५ ॥ अरक्षणाद्धि दाराणां वर्णसंकरजादयः ॥ दृष्टा हि बहवो दोषास्तस्माद्रक्ष्याः सदा स्त्रियः ॥१६॥ न ह्यासां प्रमदं दद्यान्न स्वातंत्र्यं न विश्वसेत् ॥ विश्वस्तवच्च चेष्टेत न्याय्यं भर्त्सनमाचरेत् ॥१७॥ नाधिकारं क्वचिद्दद्यादृते पाकादिकर्मणः ॥ स्त्रीणां ग्रामीणवत्ता हि भोगायालं सुशासिता ॥ ॥ १८ ॥ नित्यं तत्कर्मयोगेन ताः कर्तव्या निरंतराः ॥ इत्येवं सर्वदा व्याप्तेः स्यादविघ्ननिराश्रया ॥ १९ ॥ दौ[2]र्गत्यमतिरूपं चाप्यसत्संगः स्वतंत्रता ॥ पाना[3]शनकथागोष्ठीप्रियत्वाकर्मशीलता ॥ २० ॥ कुहकेक्षणिकामुंडाभिक्षुकीसूतिकादिभिः ॥ गो[4]प्रसंगैस्तथासद्लिंगियाचकशिल्पिभिः ॥ २१ ॥ संवाहोद्यानयात्रासूद्यानेष्वामंत्रणादिषु ॥ प्रसंगस्तीर्थयात्रार्थं धर्मेषु प्रकटेषु च ॥ २२ ॥ विप्रयोगः सदा भर्त्रा तज्ज्ञातिकुलनिःस्वता ॥ अमाधुर्यकदर्यत्वे भृशं पुंसां च वाच्यता ॥ २३ ॥ अतिक्रौर्यमतिक्षांतिरत्यंताभीतिपातनम् ॥ स्त्रीभिर्जितत्वमत्यर्थं सत्यं तास्ताः सदोषताः ॥२४॥ [5]स्त्रीणां पत्युरधीनत्वात्पुमानेव हि निंद्यते ॥ भर्तुरेव हि तज्जाड्यं यद्भृत्यानामयोग्यता ॥२५॥ तस्माद्यथोदितास्त्वेता रक्ष्याः शासनताडनैः॥ ताडनैश्च यथाकालं यथावत्समुपाचरेत्॥२६॥ परिगृह्य बहून्दारानुपचारैः समो भवेत् ॥ यथाक्रमोचितैः कर्म दानसत्कारवासनैः ॥ २७ ॥ प्रथमोभिजनो धर्मो योग्यत्वं च सुपुत्रता ॥ पक्षे वित्तं विशेत्स्त्रीणां मानस्तत्कारणं तथा ॥२८॥ तस्मान्मानो न कर्तव्यो हेयश्चापि न तत्कृतः ॥ गुरुत्वे लाघवे वापि सतां कार्यं निबंधनम् ॥२९॥ आकस्मिके प्रयुंजानः प्रेक्षावान्मानलाघवे ॥ स यत्किंचनकारित्वाच्चायमेवैति लाघवम् ॥ ३० ॥ यथामानापमानौ हि प्रयुज्येतानिमित्ततः ॥ तन्निमित्ता जनत्यागे प्रयतंते तदाश्रिताः ॥ ३१ ॥ एत

---

[1] द्वारचत्वरनागानां शस्त्रकारकवेश्मनाम् ॥ अतिन्यूनावरावेशनटरंगानुजीविनाम् ॥ पाखंडदेवतीर्थानाम्—इ० पा० । [2] सौगन्ध्यमतिरूपत्वमुत्सृजेच्च पतिव्रता—इ० पा० । [3] पानगेयकथागोष्ठीप्रियत्वाकर्मशीलता—इ० पा० । [4] प्रसंगाद्यैस्तथासत्स्त्रीलिंगधारकशिल्पिभिः—इ० पा० । [5] स्त्रीणां पत्युरधीनत्वं प्रमाणैरधिगम्यते—इ० पा० ।

देव ह्यपत्यानां[1] ज्ञेयं माननकारणम् ॥ यत्स्वापत्यनिमित्तेषु[2] प्रधाने कुलयोग्यते ॥ ३२ ॥ तत्संयोगात्सुखं पुंसां महद्दुःखं वियोगतः ॥ तत्प्राप्तिः प्रति
हातव्या स्वार्थायैव प्रियाण्यपि ॥ ३३ ॥ अतः स्वार्थैकनिष्ठोऽयं लोकः सर्वोऽवसीयते ॥ तत्प्रसिद्धिर्भवेदस्तमानाद्भ्रांतिविधायकः ॥ :३४ ॥ ततो
दारादिका भृत्या नियंतव्यास्तथा द्विजाः ॥ यथेहामुत्र वा श्रेयः प्राप्नुयादुत्तरोत्तरम् ॥ ३५ ॥ स्त्रीणां धर्मार्थकामेषु नातिसंधानमाचरेत् ॥ तासां
तेष्वभिसंधानाद्भवेदात्माभिसंहितः ॥ ३६ ॥ जाया त्वर्धं शरीरस्य नृणां धर्मादिसाधने ॥ नातस्तासु व्यथां कांचित्प्रतिकूलं समाचरेत् ॥ ३७ ॥
यज्ञोत्सवादौ नाकस्मात्कांचिदासां विशेषयेत् ॥ वस्त्रतांबूलदानादौ प्रतिपत्तौ समो भवेत् ॥३८॥ ॥ प्रियाप्रियत्वं भेदो हि कामतस्तु रहोगतः ॥
उपचारैः पुनर्वाक्यैस्तुल्यवृत्तिः प्रशस्यते ॥३९॥ आर्तवे तु पुनः सर्वा उपगम्याः प्रिया इव ॥ ॥ पूर्वाभिजातधर्मार्था पुत्रिणी चोत्तरोत्तरम्॥४०॥
उदग्गच्छेदनेनैव विधिना नित्यमार्तवे ॥ तुल्यवृत्तिर्यथाकालं स्वंस्वं वासमखंडयन् ॥ ४१ ॥ नित्यपर्यायवासानामपादानमसून्विदुः ॥: ऋतुदुःखं
प्रमोदश्च तथा पूर्वं समागतः ॥ ४२ ॥ अन्यया सह यद्दुःखं सदसद्वा रहोगतम् ॥ उत्कंठितं वा यत्किंचित्सपत्नीषु न तद्वसेत् ॥४३ ॥ यत्किंचिदन्य
संबद्धमन्यथा कथितं मिथः ॥ तस्य कुर्यादनिर्वेदमात्मनैव विचिंतयेत्॥४४॥अन्योन्यमत्सराख्यानैर्नं तां वाचापि भर्त्सयेत्॥ गुणदोषौ च विज्ञाय
स्वयं कुर्यान्न निष्कलौ ॥ ४५ ॥ वस्त्रालंकारभोज्यादौ तदपत्येष्वनुक्रमात् ॥ मातृदोषाननादृत्य तुल्यदृष्टिः पिता भवेत् ॥ ४६ ॥ अन्यस्यान्यगतै
र्दोषैर्दूषणं न हि नीतिमत् ॥ यत्तु तेषामपत्यं तु तत्तुल्यमुभयोरपि ॥ ४७ ॥ प्रीतिं द्वेषमभिप्रायं शौचाशौचगतागमान् ॥ बहिरंतश्च जानीयाद्दास
गूढचरैः सदा ॥ ४८ ॥ आत्मानमपि विज्ञाय चित्तवृत्तेरनीश्वरम् ॥ विश्वसेत कथं स्त्रीषु सर्वाविनयधामसु ॥ ४९ ॥ कृद्धदास्यः क्रमायाता धात्र्यश्च
परिचारिकाः ॥ तन्मातृपितृकाद्याश्च षण्डवृद्धाश्चरा मताः ॥ ५० ॥ विविधैस्तत्कथाख्यानैस्तुल्य[3]शीलदयान्वितैः ॥ प्रविश्यांतरभिप्रायं विद्यात्काले
प्रयोजितैः॥५१॥ तेषुतेषु कथार्थेषु कथ्यमानेषु लक्षयेत्॥ मुखाकारादिभिर्लिंगैरभिप्रायं मनोगतम्॥५२॥सीतारुंधतिसंबंधैस्तथा शाकुंतलादिभिः॥
सदसच्चरिताख्यानैर्भावं विद्यात्प्रवृत्तितः ॥ ५३ ॥ तद्दुष्टानामदुष्टेषु साधूनामितरेषु च ॥ प्रीतिः कथाप्रबंधेषु स्यात्सख्यं पुरुषेष्वितः ॥ ५४ ॥
एवमागमदुष्टाभ्यामनुमित्या च तत्त्वतः ॥ स्त्रीणां विदित्वाभिप्रायं वर्तेताशु यथोचितम् ॥ ५५ ॥ स्त्रीभ्यो विप्रतिपन्नाभ्यः प्राणैरपि वियोज
नम् ॥ दृष्टं हि च यथा[4] राज्ञामतो रक्षेत्प्रयत्नतः ॥ ५६ ॥ वेण्या गूढेन शस्त्रेण हतो राजा शुभध्वजः ॥ मेखलामणिना देव्या सौवीरश्च नराधि

---

[1] हि पत्नीनाम्–इ० पा० । [2] समुत्पद्य निमित्तेषु प्रधाने गुणयोग्यता ॥ यत्सया ाश्रयं पुंसां महद्दुःखं वियोगवत्–इ० पा० । [3] भावं विद्यात्प्रवृत्तिभिः–इ० पा० । [4] तथा–इ० पा० ।

पः ॥५७॥ भ्रात्रा देवीप्रयुक्तेन भद्रसेनो निपातितः ॥ तथा पुत्रेण कारूषो घातितो दर्पणासिना॥५८॥द्वौ काशिराजौ वै वंद्यौ चानंदापुरयोषिता॥
विषं प्रयुज्य पंचत्वमानीतौ पूजितात्मकौ ॥ ५९ ॥ एवमादि महाभागा राजानो ब्राह्मणाश्च ह ॥ स्त्रीभिर्यत्र निपात्यंते तत्रान्येष्विह का कथा ॥
॥ ६० ॥ तस्मान्नित्याप्रमत्तेन जाया रक्ष्याश्च नित्यशः ॥ यथावदुपचर्याश्च गुणदोषानुरूपतः ॥ ६१ ॥ वैषम्यादुपचाराणां विकारैश्चा
निमित्तजैः ॥ विशेषेण सपत्नीकैरकस्माच्चापि वेदनैः ॥ ६२ ॥ असम्भागे च वाग्दंडपारुष्यादप्रसंगतः ॥ प्रद्वेषो भर्तरि स्त्रीणां प्रकोपश्चापि जा
यते ॥ ६३ ॥ ततश्चायाति वार्धक्यमुद्बोढुश्चापि शत्रुताम् ॥ तस्मान्न तान्प्रयुंजीत दोषान्दारविनाशकान् ॥ ६४ ॥ न चैताः स्वकुलाचार
मधर्मं वापि चांजसा ॥ न गुणांश्चाप्युपेक्षंते प्रकृत्या किमु पीडिताः ॥ ६५ ॥ सतीत्वे प्रायशः स्त्रीणां प्रहृष्टं कारणत्रयम् ॥ परपुंसामसंप्रीतिः प्रि
ये प्रीतिः स्वरक्षणे ॥ ६६ ॥ तस्मात्सुरक्षिता नित्यमुपचारैर्यथोचितैः ॥ सु[1]भृंता नित्यकर्माणः कर्तव्या योषितः सदा ॥६७॥ उत्तमां सामदानाभ्यां
मध्यमाभ्यां तु मध्यमाम् ॥ पश्चिमाभ्यामुभाभ्यां च अधमां संप्रसाधयेत् ॥६८॥ भेददंडौ प्रयुज्यापि प्रागपत्याद्यपेक्षया ॥ तच्छिष्टानां तदा पश्चा
त्सामदानप्रसाधने ॥ ६९ ॥ यास्तु विध्वस्तचारित्रा भर्तुश्चाहितकारिकाः ॥ त्याज्या एव स्त्रियः [2]सद्भिः कालकूटविषोपमाः ॥७०॥इष्टा[3]ः कुलोद्गताः
साध्व्यो विनीताभर्तृवत्सलाः ॥ सर्वदा साधनीयास्ताः सं[4]प्रदायोत्तरोत्तरैः ॥ ७१ ॥ एवमेव यथोद्दिष्टं स्त्रीवृत्तं योनुतिष्ठति ॥ प्राप्नोत्येव स संपूर्णं[5]
त्रिवर्गं लोकसंभवम् ॥ ७२ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि विवाहधर्मेषु स्त्रीविषये नरवृत्त वर्णनं नामाष्टमो
ऽध्यायः ॥ ८ ॥ ॥छ॥ ॥ ब्रह्मोवाच ॥ ॥ एवं स्त्रीषु मनुष्याणां वृत्तिरुक्ता समासतः ॥ सांप्रतं च मनुष्येषु स्त्रीणां समुपदिश्यते ॥१॥
सम्यगाराधनात्पुसां [6]रतिर्वृत्तिश्च योषितः ॥ पुत्राः स्वर्गाद्यदृष्टं च तस्मादिष्टो हि तद्विधिः ॥ २ ॥ कर्तव्यं नाम यत्किंचित्सर्वं वि[7]धिमपेक्षते ॥
व्यक्तिमायाति वैफल्यं तदेवारब्धमन्यथा ॥ ३ ॥ विध्यपेक्षीणि सर्वाणि कार्याण्य[8]विफलान्यपि ॥ हेतुभूतास्त्रिवर्गस्य महारंभा विशेषतः ॥ ४ ॥
सर्वसाध्याविधिज्ञानमागमैकनिबंधनम् ॥ साध्यं दृष्टमदृष्टं च द्वयं विधिनिषेधयोः ॥५ ॥ शास्त्राधिकारो न स्त्रीणां न ग्रन्थानां च धारणे ॥ तस्मा
दिहान्ये मन्यंते तच्छासनमनर्थकम् ॥ ६ ॥ आगमैकक्रियायोगे स्त्रीणामध्यधिकारिता ॥ मृते भर्तरि साध्वी स्यादित्यादौ स्मृतिभाषितम् ॥ ७ ॥

---

१ स्वाहृताः–इ० पा० । २ सर्वाः–इ० पा । ३ हृष्टाः कुलोद्भवाः–इ० पा० । ४ अप्रमादोत्तरैः–इ० पा० । ५ स्त्रीवर्गं लोकसंमतम्–इ० पा० । ६ रतिर्भवति योषिताम्–इ० पा० । ७ स्थिर–इ० पा० ।
८ अल्पफलानि च–इ० पा० ।

तस्मात्कार्यमकार्यं वा विज्ञाय प्रभुरागमात् ॥ गुणदोषेषु ताः सम्यक्छास्ति राजा प्रजा इव ॥ ८ ॥ सत्येव प्रमदाः काश्चिद्विशेषाधिगतागमाः ॥
यत्तु शास्त्राधिकारित्वं वचनं स्यान्निरर्थकम् ॥ ९ ॥ केचिद्वेदविदो विप्राः कृत्यैर्वैषक्रियापराः ॥ तथापि जातिमात्रेण त एवात्राधिकारिणः ॥ १० ॥
क्रियन्ते वेदशास्त्रज्ञैः प्रयोगाः शास्त्रलौकिकाः ॥ स्थितमेषामदूरेपि शास्त्रमेव निबन्धनम् ॥११॥ व्याधधीवरगोपालप्रभृतीनां च दृश्यते ॥ विष्टचं
गारकसौर्यादिदिनानां परिवर्जनम् ॥१२॥ गम्यागम्यादिकार्येयं नियताचारसंस्थितिः ॥ लोकानां शास्त्रवाक्यानां प्राणाः स्वेष्टनिबन्धनाः॥१३॥
तस्माच्चतुर्णां वर्णानामाश्रमाणां च सर्वशः ॥ मुख्यगौणादिभेदानां ज्ञेया शास्त्राधिकारिता ॥ १४ ॥ पौर्वापर्यं तु विज्ञातुमशक्यं लोकशास्त्रयोः ॥
तच्छास्त्रमेव मंतव्यं यथा कर्मशरीरवत् ॥१५॥ आगमे च पुराणे च द्विधैव नास्तिकग्रहम् ॥ मार्गं महद्भिराचीर्णं प्रपद्येताविकलपधीः ॥ १६ ॥
मूलं गृहस्थधर्माणां यस्मान्नार्यः पतिव्रताः ॥ तस्मादासां प्रवक्ष्यामि भर्तुराराधने विधिम् ॥१७॥ ॥ इति श्रीभविष्ये महापुराणे शतार्धसाहस्र्यां
संहितायां ब्राह्मे पर्वणि आगमनप्रशंसानाम नवमोऽध्यायः॥९॥ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ आराध्यानां हि सर्वेषामयमाराधने विधिः ॥ चित्त[2]
ज्ञानानुवृत्तिश्च हितैषित्वं च सर्वदा ॥ १ ॥ कन्या पुनर्भूर्वेश्या च त्रिविधा एव योषितः ॥ प्रिया मध्याप्रिया चैव योग्यामध्येतरा तथा ॥ २ ॥
समा श्रेष्ठा च नीचा च भूयोपि त्रिविधाः पुनः ॥ [3]पूर्ववत्परयोर्वृत्तिरिष्टानुत्तया प्रियाप्रिये ॥ ३ ॥ अधमाप्रिययोरत्र पतिपत्न्यादिका मता ॥
निषिद्धानां तु भक्ष्यादि तद्धि यत्नाद्विधीयते ॥ ४ ॥ [4]एकद्वित्वबहुत्वाद्या ये भेदाः समुदाहृताः ॥ ज्येष्ठादिवृत्ते वक्ष्यामस्तानशेषान्द्विजोत्तमाः ॥
॥ ५ ॥ वृत्तं च द्विविधं स्त्रीणां बाह्यमाभ्यंतरं तथा ॥ भर्तुरन्यजने बाह्यं तस्याः शारीरमांतरम् ॥ ६ ॥ ज्ञातीतरविभागेन तद्बाह्यं द्विविधं
पुनः ॥ पूज्यं तुल्यं कनिष्ठं च तत्प्रत्येकं पुनस्त्रिधा ॥ ७ ॥ रहोरतं प्रकाशं च शारीरमपि तत्त्रिधा ॥ भर्तुश्चित्तानुकूल्येन प्रयोक्तव्यं यथोचि
तम् ॥ ८ ॥ माता पिता स्वसा भ्राता पितृव्याचार्यमातुलाः ॥ [5]सभार्या भगिनी भर्ता भर्तृमातृपितृष्वसा ॥ ९ ॥ धात्री वृद्धांगनादिश्च यस्त
त्रात्तसमो जनः ॥ प्रथमोढा सपत्नी च स्त्रीणां मान्यतमो [6]गणः ॥ १० ॥ एषामेव त्वपत्यादिभगिनीभ्रातरस्तथा ॥ कनिष्ठा भर्तुरित्यादिभार्या
श्चात्तसमो मतः ॥ ११ ॥ हीनोऽन्यः शासनीयस्तु तत्र तावन्न विद्यते ॥ योग्यता सुतसौभाग्यैर्न यावत्स्यात्प्रतिष्ठिता ॥ १२ ॥ यत्रापि गुरु

---

१ तत्रापि–इ० पा० । २ वृत्तज्ञामानुवृत्तिश्च–इ० पा० । ३ पूर्ववत्परयोर्वृत्तिं विद्यान्मुक्त्वा प्रियागसम्–इ० पा० । ४ एका द्विर्बहुनारीणाम्–इ० पा० । ५ सभक्ता–इ० पा० । ६ गुणः–इ० पा० ।

भर्तॄणामानुकूल्येन सर्वदा ॥ वृत्तिः प्रशस्यते स्त्रीणां पूजाचाराविरोधिनी[1] ॥ १३ ॥ देवरैः पतिमित्रैश्च परिहासक्रियोचितैः ॥ विविक्त
देशावस्थानं वर्जयेदिति नर्म च ॥ १४ ॥ प्रायशो हि कुलस्त्रीणां शीलविध्वंसहेतवः ॥ दुष्टयोगो रहो नित्यं स्वातंत्र्यमतिनर्मता ॥ १५ ॥
दुष्टसंगे त्वरा स्त्रीणां युवभिर्नर्म नोचितम् ॥ निर्भेषता स्वतंत्राणां साफल्यं रहसि व्रजेत् ॥१६॥ पुंसो दुष्टेंगिताकारान्दुष्टभावप्रयोजितान् ॥ भ्रातृव
त्पितृवच्चैतान्पश्यती परिवर्जयेत् ॥ १७ ॥ पुंसोऽन्याग्रहमालापस्मितविप्रेक्षितानि च ॥ करांतरेण[2] द्रव्याणां निबंधं[3] ग्रहणार्पणम् ॥ १८॥ द्वारप्रदे
शावस्थानं राजमार्गावलोकनम् ॥ प्रेक्षोद्यानादिशीलत्वं निरुध्याद्देशमालयम् ॥ १९ ॥ बहूनां दर्शने स्थानं दृष्टिवाक्कायचापलम् ॥ ष्ठीवनत्वं ससी
त्कारमुच्चैर्हसितजल्पितम् ॥ २० ॥ सांगत्यं लिंगिदुष्टस्त्रीभिक्षुकीक्षणिकादिभिः ॥ मंत्रमंडलदीक्षायां सक्तिः संवसनेषु च ॥ २१ ॥ इत्येवमादिदु
र्वृत्तं प्रायो दुष्टजनोचितम् ॥ वर्जयेत्परिरक्षंती कुलत्रितयवाच्यताम् ॥ २२ ॥ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे
पर्वणि स्त्रीदुर्वृत्तवर्णनंनाम दशमोऽध्यायः ॥ १० ॥ ॥ ॥ ब्रह्मोवाच ॥ ॥ या पतिं दैवतं पश्येन्मनोवाक्कायकर्मभिः ॥ तच्छरीरार्धजातेव
सर्वदा हितमाचरेत्॥ १ ॥ तत्प्रियां प्रियवत्पश्येत्तद्द्वेष्यां द्वेष्यवत्सदा ॥ अधर्मानर्थयुक्तेभ्योऽयुक्ता चास्य निवर्तते ॥२॥ प्रियं किमस्य किं पथ्यं साम्यं
चास्य कथं भवेत् ॥ ज्ञात्वैवं सर्वभृत्येषु न प्रमाद्येत वै द्विजाः ॥ ३ ॥ देवतापितृकार्येषु भर्तुः स्नानाशनादिषु ॥ सत्कारेऽभ्यागतानां च यथौचित्यं
न हापयेत् ॥४ ॥ वेश्मात्मा च शरीरं हि गृहिणीनां द्विधा कृतम् ॥ ॥ संस्कर्तव्यं प्रयत्नेन प्रथमं पश्चिमादपि ॥ ५ ॥ कृत्वा वेश्म सुसंमृष्टं त्रिकाल
विहितार्चनम् ॥ वृत्तकर्मोपभोगानां संस्कर्तव्यं यथोचितम् ॥ ६ ॥ प्रातर्मध्यापराह्णेषु बहिर्मध्यांतरेषु च ॥ गृहसंमार्जनं कृत्वा निष्कारान्न निशि
क्षिपेत् ॥ ७ ॥ गोमहिष्यादिशालानां तत्पुरीषादिमात्रकम् ॥ व्यपनेयं तु यत्नेन संमार्जन्या प्रसाधनम् ॥ ८ ॥ दासकर्मकरादीनां बाह्याभ्यंतर
चारिणाम् ॥ पोषणादिविधिं विद्यादनुष्ठानं च कर्मसु ॥९॥ शाकमूलफलादीनां वल्लीनामौषधस्य च ॥ संग्रहः सर्वबीजानां यथाकालं यथाबलम् ॥
॥ १० ॥ ताम्रकांस्यायसादीनां काष्ठवेणुमयस्य[4] च ॥ मृन्मयानां च भांडानां विविधानां च संग्रहम् ॥ ११ ॥ कुंडकादिजलद्रोण्या कलशोदंचता
लुकाः ॥ शाकपात्राण्यनेकानि स्नेहानां गोरसस्य च ॥ १२ ॥ मुसलं कंडनीयं तु यंत्रकं चूर्णचालनी[5] ॥ दोहन्यो नेत्रकं मंथा मंडन्यः शृंखलानि
च ॥१३॥ संदंशः कुंडिका शूलाः पट्टपिप्पलको दृषत् ॥ डाविका हस्तको दर्वी भ्राष्टस्फुटलकानि च ॥ १४ ॥ तुलाप्रस्थादिमानानि मार्जन्यः

---

[1] पूज्यदाराविरोधिनी–इ० पा० । [2] कालान्तरेण–इ०पा० । [3] विरुद्धम्–इ०पा० । [4] अश्ममयस्य–इ०पा० । [5] शूर्पवर्धिनी–इ०पा० ।

पिटाकानि च ॥ सर्वमेतत्प्रकुर्वीत प्रयत्नेन च सर्वदा ॥१५॥ हिंग्वादिकमथो जाजी पिपल्यो मरिचानि च ॥ राजिका धान्यकं शुंठी त्रिचतुर्जातकानि च ॥ १६ ॥ लवणं क्षारवर्गाश्च सौवीरकपरूषकौ ॥ द्विदलामलकं चिंचा सर्वाश्च स्नेहजातयः ॥ १७ ॥ शुष्ककाष्ठानि वल्लूरमरिष्टा पिष्टमाषयोः ॥ विकाराः पयसश्चापि विविधाः कंदजातयः ॥ १८ ॥ नित्यनैमित्तिकानां हि कार्याणामुपयोगतः ॥ सर्वमित्यादि संग्राह्यं यथावद्विभवोचितम् ॥१९॥ यत्कार्याणां समुत्पत्तावुपाहर्तुं न दृश्यते ॥ तत्प्रागेव यथायोगं संगृह्णीयात्प्रयत्नतः ॥ २० ॥ धान्यानां घृष्टपिष्टानां क्षुण्णोपहतयोरपि ॥ भृशं शुष्कार्द्रसिद्धानां क्षयवृद्धी निरूपयेत् ॥ २१ ॥

॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि गृहधर्मवर्णनं नामैकादशोऽध्यायः ॥ ११ ॥

॥ ब्रह्मोवाच ॥

॥ व्रीहीणां कोद्रवाणां च सार[1]धर्ममुदारकः ॥ कंगुकोद्रवयोर्ज्ञेयो वरटः पंचभागकः ॥ १॥ पंचभागान्प्रियंगूनां शालीनां च त्रयोऽष्ट च ॥ चणकानां तृतीयांशः समक्षुण्णंत्रयं विदुः ॥ २ ॥ [2]पौनीययवगोधूमं पिष्टधान्यचतुष्टयम् ॥ तुल्यमेवावगंतव्यं मुद्गा माषास्तिला यवाः ॥३॥ पंचभागादिका घृष्टा गोधूमाः सक्तवस्तथा ॥ कुल्माषाः पिष्टमांसं च सम्यगर्धादिकं भवेत् ॥४॥ सिद्धं तदेव द्विगुणं पुन्नाको यावकस्तथा ॥ कंगुकोद्रवयोरन्नं [3]चणकोदारकस्य च ॥ ५ ॥ [4]द्विर्गुणं चीनकानां च व्रीहीणां च चतुर्गुणम् ॥ शालेः पंचगुणं विद्यात्पुराणे त्वतिरिच्यते ॥ ६ ॥ क्रियापाकविशेषास्तु वृद्धिरेवोपदिश्यते ॥ निमित्तस्य वरान्नस्य तद्वृद्धिर्द्विगुणा भवेत् ॥ ७ ॥ तस्माद्भूयो विरूढस्य चतुर्भागो विवर्धते ॥ लाजा धानाः कलायाश्च भृष्टाद्द्विगुणवृद्धयः ॥ ८ ॥ भ्रष्टव्यानामतोऽन्येषां पंचभागोऽधिको मतः ॥ चापकानां च पिष्टानां पादहीनाः कलायजाः ॥ ९ ॥ मुद्गमाषमसूराणामर्धपादावरोभवेत् ॥ क्लिन्नशुष्कवरान्नानां हानिर्वृद्धिर्विशिष्यते ॥ १० ॥ तथार्धेन तु शोध्यानामाढक्या मुद्गमाषयोः ॥ मसूराणां च जानीयात्क्षयं पंचमभागकम् ॥ ११ ॥ षड्भागेनातसीतैलं सिद्धार्थककपित्थयोः ॥ तथा निंब[5]कदंबादौ विद्यात्पंचमभागकम् ॥ १२ ॥ तिलेंगुदीम[6]धूकानां नक्तमालकुसुंभयोः ॥ जानीयात्पादकं तैलं खलमन्यत्प्रचक्षते ॥ १३ ॥ क्षेत्रकालक्रियादिभ्यः क्षयादेर्व्यभिचारतः ॥ प्रत्यक्षीकृत्य तान्सम्यगनुमित्यावधारयेत् ॥ १४ ॥ क्षीरदोषे ग[7]वां प्रस्थं महिषीणां च सर्पिषः ॥ पादाधिकमजावीनामुत्पादं तद्विदो विदुः ॥ १५ ॥ सुभूमितृणकालेभ्यो वृद्धिर्वा क्षीरसर्पिषाम् ॥ अतस्तेषां विधातव्यो ह्य[8]र्थादेव विनि

---

[1] सारमर्धमुदारकः—इ०पा० । [2] यमनीयवगोधूमम्—इ०पा० । [3] यवकोदारवस्य च—इ०पा० । [4] त्रिगुणम् इ०पा० । [5] कुसुंभादेः इ०पा० । [6] माषकाणाम् इ० पा० । [7] ब्रह्मन्—इ० पा० । [8] तत्तद्भागविनिश्चयः—इ० पा० ।

श्चयः ॥ १६ ॥ प्रत्यक्षीकृत्य यत्नेन पक्षमासान्तरे तथा ॥ पयोर्वृत्तैर्गवादीनां कुर्यात्संभवनिर्णयम् ॥ १७ ॥ कार्पासकृमिकोशौमौर्णक
क्षौमादिकर्तनम् ॥ कुणिपंग्वंधयोषाभिर्विधवाभिश्च कारयेत् ॥ १८ ॥ बालवृद्धान्धकार्पण्ये यत्कर्तव्यमवश्यतः ॥ विनियोगं नयेत्सर्वं प्रियोप
ग्रहपूर्वकम् ॥ १९ ॥ कर्मणामन्तरालेषु प्रोषिते चापि भर्तरि ॥ स्वयं वै तदनुष्ठेयं नित्यानां चाविरोधतः ॥ २० ॥ शूद्राणां स्थूलसूक्ष्मत्वं
बहुत्वं च व्ययाव्ययौ ॥ मत्वा विशेषं कुर्वीत चेतनप्रतिपत्तिषु ॥ २१ ॥ कारयेद्वस्त्रधान्यादि स्वाप्तवृद्धैरधिष्ठितम्[1] ॥ शूद्राणां क्षयवृद्ध्यादि
मन्तव्यं वेतनानि च ॥ २२ ॥ क्षौमकार्पासयोर्विद्यात्सूत्रं पञ्चमभागकम् ॥ देशकालादिभागात्तु प्रत्यक्षादेव निर्णयः ॥ २३ ॥ अवघातेन
तूलस्य क्षयो विंशतिभागकः ॥ छन्नां व्याप्तां तु वातेन तद्वदूर्णां प्रचक्षते ॥ २४ ॥ पञ्चाशद्भागिकीं हानिं सूत्रे कुर्वीत लक्षणात्[2] ॥ वृद्धिस्तु
मण्डसंपर्काद्दशैकादशिका भवेत् ॥ २५ ॥ श्लक्ष्णमध्यमसूत्राणामर्धाधिकसमं भवेत् ॥ स्थूलानां तु पुनर्मूल्यात्पादोनं वालचेतनम् ॥ २६ ॥
कर्मणो भूरिभेदत्वाद्देशकालप्रभेदतः[3] ॥ तद्विद्भ्य एव बोद्धव्यो वालचेतननिश्चयः ॥ २७ ॥ स्थूलं दिनत्रयं देयं मध्यमं च त्रिरात्रिकम् ॥ सूक्ष्म
मापक्षतो मृष्टं[4] मासात्तत्परिकर्मकम् ॥ यदत्र क्षयवृद्ध्यादि तदुत्सर्गात्प्रदर्शितम् ॥२८॥ कालकर्त्रादिभेदेन व्यभिचारोपि दृश्यते ॥ शय्यासनान्य
नेकानि कंबलाश्चतुराश्रिकाः ॥ २९ ॥ कंबुकाश्चावकोषाश्च मध्या रक्ताश्च भूरिशः ॥ गुरुबालादि वृद्धानामभ्यागतजनस्य च ॥ ३० ॥
भोगायानुगतो भर्त्ता कुर्याद्विविधमात्रकम् ॥ यदस्य श्वशुरादीनां कल्पितं शयनादिकम् ॥ ३१ ॥ भर्तुश्चैव विशेषेण तदन्येन न कारयेत् ॥
वस्त्रं माल्यमलंकारं विधृतं देवरादिभिः ॥ ३२ ॥ न धारयेन्न चैतेषामाक्रमेच्छयनानि वा ॥ पिण्याकनककुद्दांश्च[5] कालरूक्षाणि यानि च ॥ ३३ ॥
हेयं पर्युषिताद्यन्नं गोभक्तेनोपयोजयेत् ॥ कुलानां बहुधेनूनां गोध्यक्षव्रजजीविनाम् ॥ ३४ ॥ किलाटगविकादीनां भक्तार्थमुपयोजनम् ॥ दध्नः
समाहरेत्सर्पिर्दुहेद्वत्सान्न पीडयेत् ॥३५॥ वर्षाशरद्वसन्तेषु द्वौ कालावन्यदा सकृत् ॥ तक्रं वाप्युपयुञ्जीत श्ववराहादिपोषणे॥३६॥पिण्याकक्लेदनार्थं
वा विक्रेयं वा तदर्हयेत् ॥ वृत्तिं धान्यहिरण्येन गोपादीनां प्रकल्पयेत् ॥३७॥ ते हि क्षीरव्रता लोभादुपहन्युस्तदन्वयान् ॥ दोहकालं गवां दोग्धा
नातिवर्तेत वै द्विजाः ॥३८॥ प्रसरोदकयोर्गोपा मन्थकस्य च मन्थकाः ॥ मासमेकं यथा स्तन्यं मासमेकं स्तनद्वयम् ॥३९॥ सततं पाययेदूर्ध्वं
स्तनमेकं स्तनद्वयम्॥ तिलपिष्टाभिः पिण्डाभिस्तृणेन लवणेन च ॥ वारिणा च यथाकालं पुष्णीयादिति वत्सकान् ॥४०॥ जरद्गुर्गर्भिणी धेनुर्व

---

[1] आयुर्वृद्धैः–इ० पा० । [2] लेखनादिति पाठः । [3] देशकालप्रसिद्धितः–इ० पा० । [4] गृष्टम्–इ० पा० । [5] कोद्रावश्च–इ० पा० ।

त्सा वत्सतरी तथा ॥ पञ्चानां समभागेन घासं यूथे प्रकल्पयेत् ॥ ४१ ॥ एको गोपालकस्तस्य त्रयाणामथ वा द्वयम् ॥ पञ्चानां वत्सक
श्चैकःप्रवरास्तु पृथक्पृथक् ॥ ४२ ॥ गोचरस्यानयनार्थं व्यालानां [1]त्रासनाय च ॥ [2]घण्टाः कर्णेषु बध्नीयुः शोभारक्षार्थमेव च ॥ ४३ ॥ पशव्ये
व्यालनिर्मुक्ते देशे भूरितृणोदके ॥ अभूतदुष्टे वारण्ये सदा कुर्वीत गोकुलम् ॥ ४४ ॥ सगुप्तमटवीवासं नित्यं कुर्यादजाविकम् ॥ ऊर्णां वर्षे
द्विरा दद्याच्चैत्राश्वयुजमासयोः ॥ ४५ ॥ यूथे वृषा दशैतासां चत्वारः पञ्च वा गवाम् ॥ अश्वोष्ट्रमहिषाणां च यथा स्युः सुखसेविताः ॥
॥ ४६ ॥ विद्यात्कृषीवलादीनां योगं कृषिककर्मसु ॥ भक्तवेतनलाभं च कर्मकालानुरूपतः ॥ ४७ ॥ क्षेत्रकेदारवाटेषु भृत्यानां कर्म कुर्वताम् ॥
[3]खलेषु च विजानीयात्क्रियायोगं प्रतिक्षणम् ॥ ४८ ॥ योग्यतातिशयं मत्वा कर्मयोगेषु कस्यचित् ॥ ग्रासाच्छादशिरोभ्यंगैर्विशेषं तस्य कार
येत् ॥ ४९ ॥ पद्मशाकादिवापानां कन्दबीजादिजन्मनाम् ॥ संग्रहः सर्वबीजानां काले वापः सुभूमिषु ॥ ५० ॥ जातानां रक्षणं सम्यग्रक्षिता
नां च संग्रहः ॥ तेषां च संगृहीतानां यथावन्निवपक्रिया ॥ ५१ ॥ गृहमूलं स्त्रियश्चैव धान्यमूलो गृहाश्रमः ॥ तस्माद्धान्येषु भक्तेषु न कुर्यान्मुक्त
हस्तताम् ॥ ५२ ॥ धान्यं तु संचितं नित्यं मितो भक्तपरिव्ययः ॥ न चान्ने मुक्तहस्तत्वं गृहिणीनां प्रशस्यते ॥ ५३ ॥ अल्पमित्येव नावज्ञां चरे
दन्नेषु वै द्विजाः ॥ मधुवल्मीकयोर्वृद्धिं क्षयं दृष्ट्वांजनस्य च ॥ ५४ ॥ ये केचिदिह निर्दिष्टा व्यापाराः पुरुषोचिताः ॥ दंपत्योरैक्यमास्थाय तद्वि
दानप्रसंगतः ॥ ५५ ॥ संत्येव पुरुषा लोके स्त्रीप्रधानाः सहस्रशः ॥ तेषु तासां प्रयोक्तृत्वाददोष इति गृह्यताम् ॥ ५६ ॥ एवं योग्यतया युक्ता
सौभाग्येनोद्यमेन च ॥ सम्यगाराध्य भर्तारं तत्रैनं वशमानयेत् ॥ ५७ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि
स्त्रीधर्मवर्णनं नाम द्वादशोऽध्यायः ॥ १२ ॥ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ प्रथमं प्रतिबुध्येत प्रवर्तेत स्वकर्मसु ॥ पश्चाद्भृत्यजनस्यापि भुञ्जीत
च शयीत च ॥ १ ॥ भर्त्रा विरहिता स्त्री च श्वशुराभ्यां विशेषतः ॥ देहलीं नातिवर्तेत [4]प्रतीकारे महत्यपि ॥ २ ॥ उत्थाय प्रथमं भर्तुरविज्ञाता
न निष्क्रमेत् ॥ क्षपायां सावशेषायां रात्रौ वा वासरादिषु ॥३॥ तद्वासभवनस्यैव शनैराहूय कार्मिकान् ॥ स्वव्यापारेषु तान्सर्वांस्तत्रतत्र नियो
जयेत् ॥ ४ ॥ विबुद्धस्य ततो भर्तुर्निर्वर्त्यावश्यकं विधिम् ॥ गृहकार्याणि सर्वाणि विदधीताप्रमादतः ॥५॥ मुक्त्वावासकनेपथ्यं कर्मयोग्यं विधाय
च ॥ तत्कालोचितकर्तव्यमनुतिष्ठेद्यथाक्रमम् ॥ ६ ॥ महानसं सुसंमृष्टं चुल्ल्यादिविहितार्चनम् ॥ सर्वोपकरणोपेतमसंबाधमनाविलम् ॥७॥ न चा

---

[1] शासनाय च–इ० पा०। [2] घण्टाशब्दश्रवणेन गावो मेऽत्र सन्तीति ज्ञानं जायत इत्येतत्तात्पर्यम्। [3] स्थलेषु–इ० पा०। [4] प्रतीहासे–इ० पा०।

तिगुह्यं प्रकटं प्रविभक्तक्रियाश्रयम् ॥ भर्तुराप्तजनाकीर्णं गूढं कक्षादिवर्जितम् ॥ ८ ॥ तत्र पाकादिभांडानि बहिरंतश्च कारयेत् ॥ निर्णिक्तमलपंकानि
शुक्तिवल्कादिचूर्णकैः ॥ ९ ॥ निशि कुर्वीत धूमार्चिः शोधितानि दिवातपैः ॥ दधिपात्राणि कुर्वीत सदैवांतारितानि च ॥ १० ॥ साधुकारितदु
ग्धेषु शोधितेषु दिवातपे ॥ ईषद्दुह्योक्तपात्रेषु स्वच्छं येन भवेद्दधि ॥ ११ ॥ स्नेहगोरसपाकादि कृत्वा सुप्रत्यवेक्षितम् ॥ कुर्यात्स्वयमधिष्ठाय
भर्तुः पाकविधिक्रियाम् ॥१२॥ किं प्रियं च किमाग्नेयं षड्रसाभ्यंतरेषु च ॥ किं पथ्यं किमपथ्यं च स्वास्थ्यं[1] वास्य कथं भवेत् ॥ इति यत्नाद्द्विजा
नीयादनुष्ठेयं च तत्तथा ॥ १३ ॥ नित्यानुरागं सत्कारमाहारं सुपरीक्षितम् ॥ महानसादौ कुर्वीत जनमाप्तं क्रमागतम् ॥ १४ ॥ शत्रुं दायादसंबंधं
क्रुद्धभीतावमानितम् ॥ अवाच्योपगृहीतं वा नैवमादीनि योजयेत् ॥ १५ ॥ पुनःपुनः प्रतिष्ठाप्य गुप्तं स्वयमधिष्ठितम् ॥ भर्तुराहारपानादि विद
ध्यादप्रमादतः ॥१६ ॥ पाकं निर्वर्त्य मात्राणां कृत्वा स्वेदप्रमार्जनम् ॥ गन्धतांबूलमाल्यादि किंचिदादाय मात्रया ॥१७॥ यथौचित्यादितत्काले
भर्तुर्विनयसंभ्रमैः ॥ तत्कालानुगतात्यर्थमाहारमुपपादयेत् ॥ १८ ॥ स्वभावामयकालानां वैपरीत्येन सर्वदा ॥ सर्वमाहारपानादि प्रयोज्यं तद्विदो
जगुः ॥ १९ ॥ हीनतुल्याधिकत्वेन भर्ता पश्यति यं यथा ॥ तं तथैवाधिकं पश्येन्न्यायतः प्रतिपत्तिषु ॥२०॥ सापत्नकान्यपत्यानि पश्येत्स्वेभ्यो
विशेषतः ॥ भगिनीवत्सपत्नीश्च तद्वधून्निजबन्धुवत् ॥ २१ ॥ ग्रासाच्छादशिरोभ्यंगस्नानमंडनकादिकम् ॥ सपत्नीनामकृत्वा तु आत्मनोऽपि न
कारयेत् ॥ २२ ॥ व्याधितानां चिकित्सार्थमौषधादिकमादरात् ॥ विदध्यादात्मनस्तासां सर्वाश्रितजनस्य च ॥ २३ ॥ तच्छोके शुचमादद्यात्त
त्तुष्टौ मुदमावहेत् ॥ भृत्यबन्धुसपत्नीनां तुल्यदुःखसुखा भवेत् ॥ २४ ॥ लब्धावकाशा स्वप्याच्च निशि सुप्तोत्थिता क्रमात् ॥ अन्यत्र व्ययकर्तारं
पतिं रहसि बोधयेत् ॥ २५ ॥ यदवद्यं सपत्नीनां स्वयमस्मै न तद्वदेत् ॥ दौःशील्यादि तु सापायं गूढमस्मै निवेदयेत् ॥ २६ ॥ दुर्भगामनपत्यां
वा भर्त्रा चातितिरस्कृताम् ॥ [2]अदुष्टां सम्यमाश्वास्य तेनैतामनुकूलयेत् ॥ २७ ॥ तथा वाग्दण्डपारुष्यैर्जनं भर्त्रा विपीडितम् ॥ कुर्याद्विधेयमा
श्वास्य न चेद्दोषाय तद्भवेत् ॥ २८ ॥ मत्वात्मनोनपत्यत्वं कालं चापि गतं बहुम् ॥ संतानादिकमुद्दिश्य कार्यमात्मनिवेदनम् ॥ २९ ॥ यच्चान्य
दपि जानीयात्किंचिदस्य चिकीर्षितम् ॥ तत्किलाजानतीवास्य सिद्धमेव प्रदर्शयेत् ॥ ३० ॥ वैवाहिकं विधिं भर्तुः सर्वं कृत्वा ससंभ्रमम् ॥
परिणीतां च तां पश्येन्नित्यं भगिनिकामिव ॥ ३१ ॥ पूजां संबंधिवर्गस्य मंगलं मंडलानि च ॥ कुर्यादभिनवोढायाः सुप्रहृष्टेन चेतसा ॥ ३२ ॥

---

[1] सात्म्यं चास्य यथा भवेत्—इ० पा० ।
[2] अधस्तां सम्यगावास्य तस्यै चान्नं प्रकल्पयेत्—इ० पा० ।

मातृवच्छिक्षयेदेनां गृहकृत्येष्वमत्सरा ॥ प्रदेशिकविधिं वास्या विदध्याद्यत्नतः स्वयम् ॥ ३३ ॥ एवं भर्तुरभिप्राय सर्वमित्यादिकारयेत् ॥
सुखार्थं वापि संत्यज्य स्त्रीणां भर्ताधिदेवता ॥ ३४ ॥ भर्ताधिदेवता नार्या वर्णा ब्राह्मणदेवताः ॥ ब्राह्मणा ह्यग्निदेवास्तु प्रजा राजन्यदेवताः ॥३५॥
तासां त्रिवर्गसंसिद्धौ प्रदिष्टं कारणद्वयम् ॥ भर्तुर्यदनुकूलत्वं यच्च शीलमविप्लुतम् ॥ ३६ ॥ न तथा यौवनं लोके नापि रूपं न भूषणम् ॥ यथा
प्रियानुकूलत्वं सिद्धं शश्वदनौषधम् ॥ ३७ ॥ वयोरूपादिहारिण्यो दृश्यंते दुर्भगाः स्त्रियः ॥ वल्लभा मंदरूपाश्च बह्वचो गलितयौवनाः ॥ ३८ ॥
तस्मात्प्रियत्वं लोकानां निदानं [1]योग्यतापरम् ॥ तां विनान्ये गुणा वन्ध्याः सर्वेऽनर्थकृतोपि वा ॥ ३९ ॥ तस्मात्सर्वप्रयत्नेन विदध्यादात्मयोग्य
ताम् ॥ परचित्तज्ञता चास्या मूलं सर्वक्रियास्विह ॥ ४० ॥ बहिरागच्छतो ज्ञात्वा कालं संमृज्य भूमिकाम् ॥ सज्जीकृतासना तिष्ठेत्तस्याज्ञां प्रतित
त्परा ॥ ४१ ॥ स्वयं प्रक्षालयेत्पादावुत्थाप्य परिचारिकाम् ॥ तालवृंतादिकैः कुर्याच्छ्रमस्वेदापनोदनम् ॥४२॥ आहारस्नानपानादौ सस्पृहं यत्र ल
क्षयेत ॥ तदिंगितज्ञा तत्त्वेन सिद्धमस्मै निवेदयेत् ॥४३ ॥ सपत्नीपतिबंधूनां भर्तृचित्तानुकूल्यतः ॥ प्रतिपत्तिं प्रयुंजीत स्वबंधूनां न वै तथा ॥
॥ ४४ ॥ तेषु चात्मनि च ज्ञात्वा भर्तृचित्तं प्रसादयेत ॥ प्रतिपत्तिं तथाप्येषां नाद्रियेत स्वबंधुषु ॥ ४५ ॥ अपि भर्तुरभिप्रेतं नारी तत्कुलवा
सिनी ॥ सत्कारैर्निजबंधूनां तेन नोपैति वाच्यताम् ॥४६॥ पूज्य एव हि संबंधः सर्वावस्थासु योषिताम् ॥ कस्ततोऽप्युपकारांशं लिप्सेत कुलजः
पुमान् ॥ ४७ ॥ संपूज्य स्वसुतां तस्मै विधिवत्प्रतिपाद्यते ॥ ततोऽस्या लिप्सते नाम किमकार्यमतः परम् ॥ ४८ ॥ कन्यां प्रदाय यैर्वृत्तिरात्मनः
परिकल्प्यते ॥ दासभंडनटादीनां मार्गोयं न महात्मनाम् ॥४९॥ तस्मात्स्त्रीबांधवा नित्यं प्रीतिमात्रैकसाधिनीम् ॥ प्रतिपत्तिं समादद्युः संबंधिभ्यः
प्रसंगिनीम् ॥ ५० ॥ तस्या भर्तरि रक्षेत प्रीतिं लोके च वाच्यताम् ॥ आत्मनोऽसत्प्रवादं च चेष्टेरन्साधुवृत्तयः ॥ ५१ ॥ एवं विज्ञाय सद्वृत्तं स्त्री
वर्त्तेत तथा सदा ॥ येन तत्परिवर्गस्य भवेद्भर्तुश्च संमता ॥ ५२ ॥ प्रियापि साधुवृत्तापि विख्याताभिजनापि च ॥ जनापवादात्संप्राप सीतानर्थं
सुदारुणम् ॥५३॥ सर्वस्यामिषभूतत्वाद्गुणदोषानभिज्ञतः ॥ प्रायेणाविनयौचित्यात्स्त्रीणां वृत्तं हि दुष्करम् ॥ ५४ ॥ अगृह्यत्वान्मनोवृत्तेः प्रायः
कपटदर्शनात् ॥ निरंकुशत्वाल्लोकस्य निर्वाच्या विरलाः स्त्रियः ॥ ५५ ॥ दैवयोगादयोगत्वाद्व्यवहारानभिज्ञतः ॥ वाच्यतापत्तयो दृष्टाः स्त्रीणां
शुद्धेपि चेतसि ॥ ५६ ॥ तासां दैवप्रतीकारो नोपभोगादृते भवेत् ॥ चारित्रं लोकवृत्तं च एतयोर्विदुरौषधम् ॥५७॥ हिंदोलकादिक्रीडायां प्रसक्तां

---

[1] क्षमता परा–इ० पा० ।

तरुणीं निशि ॥ रममाणां विटैः सार्धं विधवां स्वैरचारिणीम् ॥५८॥ वृद्धादिभार्यां संज्ञायां[1] यानगेयादिसंगिनीम् ॥ कःश्रद्दध्यात्सतीत्येवं साध्वी
मपि हि योषितम् ॥ ५९ ॥ यौ चासामिंगिताकारौ संदिग्धार्थप्रसाधकौ ॥ तयोस्तत्त्वपरिज्ञानं विषयो योगिनां[2] यदि॥६०॥ तस्माद्यथोक्तमाचा
रमनुतिष्ठेत्सुसंयता ॥ मिथ्यालग्नोऽप्यसद्वादः कंपयत्येव तत्कुलम् ॥६१॥ त्रिकुल्या वाच्यता रक्ष्या प्रतिष्ठाप्यथ संततिः ॥ भर्तुस्त्रिवर्गसिद्धिश्चसा
ध्यं तत्कुलयोषिताम् ॥६२॥ पातयंत्येव दौःशील्यादात्मानं सकुलत्रयम् ॥ उद्धरंति तदैवैताः स्त्रियश्चारित्रभूषणाः॥६३॥भर्तृचित्तानुकूलत्वं यासां
शीलमविच्युतम्[3] ॥ तासां रत्नसुवर्णादि भार एव न मण्डनम् ॥ ६४ ॥ लोकज्ञाने परा कोटिः पत्यौ भक्तिश्च शाश्वती ॥ शुद्धान्वयानां नारीणां
विद्यादेतत्कुलव्रतम् ॥६५॥ तस्माल्लोकश्च भर्ता च सम्यगाराधितो यया ॥ धर्ममर्थं च कामं च सैवाप्नोति निरत्यया ॥६६॥ ॥ इति श्रीभविष्ये
महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि स्त्रीधर्मकथनं नाम त्रयोदशोऽध्यायः ॥१३॥ ॥छ॥ ॥ ब्रह्मोवाच ॥ ॥ प्रोषिते मंडनं स्त्रीणां
पत्यौ मंगलमात्रकम्॥निष्पादनं च यत्नेन तदारब्धस्य कर्मणः॥१॥शय्यागुरुसमीपे स्याद्देहसंस्कारवर्जनम् ॥ समुपार्जनमर्थानां व्ययानां परिहा
पणम् ॥ २ ॥ व्रतोपवासतात्पर्यं तद्वार्तापरिमार्गणम् ॥ दैवज्ञेक्षणिकप्रश्नो देवानामुपयाचनम् ॥३॥ नित्यं तस्यागमाशंसा क्षेमार्थं देवपूजनम् ॥
न चात्युज्ज्वलवेषत्वं न सदा तैलधारणम् ॥ ४ ॥ ज्ञातिवेश्म न गंतव्यं सकाम[4]गमनेन च ॥ गुरूणामाज्ञया यावद्भर्तुराप्तजनैः सह ॥ ५ ॥ तत्रापि
न चिरं तिष्ठेत्स्नानादीन्वापि नाचरेत् ॥ यावदर्थं क्षणं स्थित्वा ततः शीघ्रं समाचरेत् ॥ ६ ॥ आगते प्रकृतिस्थैव कृत्वा तात्कालिकं विधिम् ॥
मुक्तप्रवासने पथ्ये स्नाते भुक्तवति प्रिये ॥ ७ ॥ आत्मानं समलंकृत्य सविशेषं मुदान्विता ॥ देवपूजोपहारादीन्दद्यात्प्रागुपपादितान् ॥ ८ ॥
कनिष्ठामातृवज्ज्येष्ठां तदपत्यानि चात्मवत् ॥ पश्येत्तत्परिवर्गं तु नित्यं स्वपरिवर्गवत् ॥ ९ ॥ तत्पुरोनासने तिष्ठेत्पतिं नामंत्रयेत च ॥ तदभि
प्रायतः कुर्यात्प्रवृत्तिं सर्वकर्मसु ॥ १० ॥ न संसृजेत तद्विष्टैः सख्यं कुर्वीत तत्प्रियैः ॥ जनमाप्ततमं तस्य सदाभर्तुश्च मानयेत् ॥ ११॥ पैतृका
त्समुपानीतं वसुसौगंधिकादिकम् ॥ तस्मै निवेद्यात्मतया तदा तदुपयोजयेत् ॥ १२ ॥ सोपि तत्प्रीतये किंचिदादद्यादल्पमूल्यकम् ॥ संगोप्य
मातृवत्स्थेयं तत्तथैवोपयोजयेत् ॥ १३ ॥ तत्प्रीत्यर्थं गृहीतं यद्वैलक्ष्यादिनिवृत्तये ॥ सविशेषं प्रसंगेन तस्यै[5]तत्प्रतिपादयेत् ॥ १४ ॥ स्त्रीणां यदे

---

[1] सती चासौ जाया चेति कर्मधारयः । [2] यदि योगिनां स्याच्चर्हिं स्वान्नास्माकामित्यवान्तरवाक्यम् । [3] न विप्लुतम्–इ० पा० । [4] अवश्यं गमनेन च–इ०पा० । [5] तस्मै–इ० पा० ।

तत्सापत्न्यं परं मात्सर्यकारणम् ॥ तस्मात्तत्परिहर्तव्यं परमोदा[1]रचर्यया ॥ १५ ॥ तथा कल्पितनेपथ्या भर्तुः पर्यायवासरे ॥ ह्रियमा[2]दयमानेव
पतिं गच्छेद्विसर्जिता ॥ १६ ॥ गत्वा रहसि भर्तारं तत्कालोचितसंभ्रमैः ॥ तद्भावानुगतैस्तैस्तैः सविशेषमुपाचरेत् ॥ १७ ॥
प्रतिबुध्य ततः काले सविशेषं त्रपान्विता ॥ ज्येष्ठाय वसतिं गच्छेद्विशेषेण तथा पुनः ॥ १८ ॥ अप्रातिकूल्यं ज्येष्ठाया हित
मन्यत्र योषितः ॥ ततः शनैस्त्ववच्छिद्य पतिं स्ववशमानयेत् ॥ १९ ॥ बहिष्पाकादियोगेन चतुःषष्ट्या रहोगतम् ॥ ज्येष्ठामतिशया
नेव भर्तारमुपरंजयेत् ॥ २० ॥ प्रागल्भ्यं रहसि स्त्रीणां लज्जाधिक्यं ततोऽन्यदा ॥ चित्तज्ञानानुवृत्तिश्च पत्यौ संसेवनं परम् ॥ २१ ॥ एवमाराध्य
भर्तारं गृहमाक्रम्य च क्रमात् ॥ गौरवं प्रतिपत्तिं वा ज्येष्ठादिषु न हापयेत् ॥ २२ ॥ गृहव्यापारदानेषु पतिं गूढं तथा वदेत् ॥ अधिकुर्यादनिच्छंती
ज्येष्ठैवेनां यथा बलात् ॥ २३ ॥ सापि विज्ञाय भर्तारं कनिष्ठाकृष्टमानसम् ॥ विश्रामं प्रार्थयेदेनामधिकुर्यात्सुतामिव ॥ २४ ॥ मत्वा भर्तुरभिप्रेतं
रक्षंती निजगौरवम् ॥ कृतं भर्त्रनुकूलं स्यात्तदिष्टायानुमोदयेत् ॥ २५ ॥ स्वामिनो यदभिप्रेतं भृत्यैः किं क्रियतेऽन्यथा ॥ क्लिश्यते तत्र मूढात्मा
परतन्त्रो वृथा जनः ॥ २६ ॥ तस्मात्सर्वास्ववस्थासु मनोवाक्कायकर्मभिः ॥ हितं स्वाम्यनुकूलत्वं नारीणां तु विशेषतः ॥ २७ ॥ सापि ज्येष्ठा
पतिं चैव गृहतंत्रं च सर्वदा ॥ समा[3]वर्ज्य गुणैर्धीरा प्रागवस्थां न विस्मरेत् ॥ २८ ॥ न सौभाग्यमदं कुर्यान्न चौद्धत्यादिविक्रियाम् ॥ नितरामानतिं
गच्छेत्स[4]दानार्यभयादिव ॥२९॥ यथा योग्यतया पत्यौ सौभाग्यमभिवर्धते ॥ स्पर्धयेच्च कुलस्त्रीणां प्रश्रयोपाधिकं तथा ॥ ३० ॥ एवमाराध्य भर्तारं
तत्कार्येष्वप्रमादिनी ॥ पूज्यानां पूजने नित्यं भृत्यानां भरणेषु च ॥ ३१ ॥ गुणानामर्जने नित्यं शीलवत्परिरक्षणे ॥ प्रेत्य चेह च निर्द्वंद्वं सुखमाप्नो
त्यनुत्तमम् ॥ ३२ ॥ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि स्त्रीधर्मेषु सपत्नीकर्तव्यवर्णनं नाम चतु
र्दशोऽध्यायः ॥ १४ ॥ ॥ ब्रह्मोवाच ॥ ॥ दुर्भगा च पुनर्नित्यमुपवासादितत्परा ॥ बाह्येषुं पतिकृत्येषु स्याद्विशेषाभियोगिनी ॥ १ ॥
न प्रशंसां सपत्नीषु निंदां चापि तथात्मनि ॥ असूयां भर्तुरीर्ष्यां वा प्रणयं वापि दर्शयेत् ॥२॥ मद्विधा या हि बह्वेतत्तच्चात्यंतिकमश्नुते ॥ यदस्या
युष्मतो यायाद्भार्याशब्दाभिधेयताम् ॥ ३ ॥ न च निर्भूषणा तिष्ठेन्न चाप्युद्धतभूषणा ॥ नान्यदा गंधमाल्यादि ग्राह्यं पत्युपचारतः ॥ ४ ॥ तन्न्यूनं
सर्वशो ग्राह्यं वल्लभाया विशेषतः ॥ भूषणं गंधमाल्यं तु तावत्कालमलक्षितम् ॥ ५ ॥ संबाधानां प्रदेशानां नित्यं स्वेदादिमार्जनम् ॥ दंतनासादिपं

---

१ परमोदारकर्मणा–इ० पा० । २ दयतेः शानचि रूपम् । ३ विज्ञायाथ–इ० पा० । ४ खिन्ना कार्यभरादिषु–इ० पा० ।

कानां विगंधस्य च शोधनम् ॥ ६ ॥ निमित्तं भर्तुरेतासां यत्किंचिदभिलक्षयेत् ॥ नानेन वा तयोर्यत्नं विदध्यादंगमार्जने ॥ ७ ॥ सर्वासां च सपत्नीनां सर्वत्रानुगता भवेत् ॥ वैतसीं वृत्तिमास्थाय वल्लभाया विशेषतः ॥ ८ ॥ अन्यस्या यदनुष्ठेयं यन्न सीदेत्समर्पितम् ॥ भर्तुश्चाविदितं यत्नात्तत्कुर्यादविरोधि चेत् ॥ ९ ॥ कोशवस्त्रान्नतांबूलगंधपानौषधादिकम् ॥ तत्सर्वमनियुक्तानां दोषवत्वाद्विरुध्यते ॥ १० ॥ यत्तु मुक्तमनुष्ठेयं गृहसंमार्जनादिकम् ॥ स्त्रीणामनधिकारेऽपि प्रायस्तद्विधिरुच्यते ॥ ११ ॥ अभ्यंगोद्वर्तनं स्नानं भोजनं मंडनानि च॥ कुर्याद्भर्तुरपत्यानां धात्रीकर्माणि सादरम् ॥ १२ ॥ आत्मवत्तान्यपत्यानि साधयत्यनुयोगतः ॥ स्वेनाप्यमीषां वित्तेन विदध्यान्मंडनादिकम् ॥ १३ ॥ भोगः स्वयमपत्यैर्वा स्त्रीवित्तस्य पतिर्विधा ॥ पूर्वे वयस्यभिनंद्य पश्चिमे चोपयोजनम् ॥१४॥ उभयोगस्तु वा मा वा कर्मजः पृथगेव सः ॥ सद्वृत्ते त्वधिकां ख्यातिं कुर्वीत क्रियया पुनः ॥ १५ ॥ न कापि दुर्भगा नाम सुभगा नाम जातितः ॥ व्यवहाराद्भवत्येष निर्देशो रिपुमित्रवत् ॥ १६ ॥ भर्तृचित्तापरिज्ञानादननुष्ठानतोऽपि वा ॥ वृत्तैर्लोकविरुद्धैश्च यांति दुर्भगतां स्त्रियः ॥ १७ ॥ आनुकूल्यान्मनोवृत्तेः परोऽपि प्रियतां व्रजेत् ॥ प्रातिकूल्यान्निजोप्याशु प्रियः प्रद्वेषतामियात् ॥ १८ ॥ तस्मात्सर्वास्ववस्थासु मनोवाक्कायकर्मभिः ॥ प्रियं समाचरेन्नित्यं तच्चित्तानुविधायिनी ॥ १९ ॥ यामन्यां कामयेत्तासां तं तया संप्रयोजयेत् ॥ कुपितां च प्रियां कांचिद्यत्नादस्मै प्रसादयेत् ॥ २० ॥ तत्पादपरिचर्यायां [1]गात्रसंवाहने तथा ॥ पीडने शिरसश्चैव परं कौशलमभ्यसेत् ॥ २१ ॥ पीडनं मृदु मध्यं च गात्रावस्थाविशेषतः ॥ मुखगात्रादिभिर्लिंगैः प्रयोज्यं तत्सुखावहम् ॥ २२ ॥ बाहूरुकटिपृष्ठेषु स्कंधे शिरसि पादयोः ॥ गाढमर्दनमिच्छंति प्रायोन्यत्रापि मध्यमम् ॥ २३ ॥ निर्मांसेषु प्रदेशेषु नाभिमूलेषु मर्मसु ॥ हृद्गंडककपोलादाविच्छंति मृदु मर्दनम् ॥ २४ ॥ गाढं जाग्रदवस्थायामर्धसुप्तस्य मध्यमम् ॥ किंचित्सपरिघातं च मृदुसुप्तस्य नेति वा ॥ २५ ॥ विरुद्धं [2]सर्वगात्रेषु लोमवत्सु विशेषतः ॥ उत्कंडूयत्सु सोद्धर्षं स्नेहाक्तेषु च मर्दनम् ॥ २६ ॥ स्पर्शाद्रोमांचजननं सनखच्छुरितं शनैः ॥ पुलकोल्लेखनोपेतं शिरःकंडूश्च पार्श्वयोः ॥ ॥ २७ ॥ तेषुतेषु च गात्रेषु तत्प्रयोज्यं तथातथा ॥ निद्रागमाय तत्काले रागसंधुक्षणाय च ॥ २८॥ [3]तिष्ठतश्चोपविष्टस्य जाग्रतः स्वपतोऽपि वा॥ संवाहनं प्रशंसंति यदत्यर्थं सुखावहम् ॥ २९ ॥ नैष्पंद्यं पुलकोद्भेदो गात्राणामक्षिमीलनम् ॥ तत्प्रदेशार्पणं किंचिद्बोधेद्विकृतिदर्शनम् ॥ ३० ॥ ऊरुमूलादिदेशे च तत्पाणिप्रतिपीडनम् ॥ [4]लक्षयेन्निपुणा यत्र तत्रैवाधिकमाचरेत् ॥ ३१ ॥ एवमेव यथोद्दिष्टं स्त्रीवृत्तं यानुतिष्ठति ॥ पतिमाराध्य संपूर्णं त्रिवर्गं [5]साधिगच्छति ॥३२॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि स्त्रीधर्मवर्णनं नाम पंचदशोऽध्यायः ॥१५॥ छ ॥

---

१ पादसंवाहने तथा–इ० पा० । २ कटिगुह्येषु–इ० पा० । ३ संविष्टस्योपविष्टस्य–इ० पा० । ४ न क्षयंति व्रणा यत्र–इ० पा० । ५ अधितिष्ठति–इ० पा० ।

॥ ॥ सुमन्तुरुवाच ॥ ॥ इत्युक्त्वा भगवान्ब्रह्मा स्त्रीलक्षणमशेषतः ॥ सद्वृत्तं च तथा स्त्रीणां जगाम स निजालयम् ॥१॥ ऋषयश्च तथा जग्मुः
स्वानि धिष्ण्यान्यशेषतः ॥ स्त्रीलक्षणं तथा वृत्तं श्रुत्वा कृत्स्नं महीपते ॥ २ ॥ इत्थं लक्षणसंपन्नां भार्यां प्राप्य महीपते ॥ कर्तव्यं यद्गृहस्थेन
तदिदानीं निबोध मे॥३॥ वैवाहिकाग्नौ कुर्वीत गृह्यं कर्म यथाविधि ॥ पञ्चयज्ञविधानं तु पक्तिं कुर्यात्सदा गृही॥४॥ पञ्च सूना गृहस्थस्य तेन
स्वर्गं न गच्छति ॥ कण्डनी पेषणी चुल्ली उदकुंभीः प्रमार्जनी ॥ ५ ॥ आसां क्रमेण सर्वासां विशुद्ध्यर्थं[1] मनीषिभिः ॥ पञ्चोद्दिष्टा महायज्ञाः
प्रत्यहं गृहमेधिनाम् ॥ ६ ॥ अध्यापनं ब्रह्मयज्ञः पितृयज्ञश्च तर्पणम् ॥ होमो दैवो बलिर्भौमस्तथान्योऽतिथिपूजनम् ॥ ७ ॥ पञ्चैतान्यो
महायज्ञान्न हापयति शक्तितः ॥ स गृहेपि वसन्नित्यं सूनादोषैर्न लिप्यते ॥ ८ ॥ देवतातिथिभृत्यानां पितॄणामात्मनश्च यः ॥ न निर्वपति पञ्चाना
मुच्छ्वसन्न च जीवति ॥ ९ ॥ ॥ शतानीक उवाच ॥ ॥ यस्य नास्ति गृहे त्वग्निः स मृतो नात्र संशयः ॥ न स पूजयितुं शक्तो देवादी
न्ब्राह्मणोत्तमः ॥१०॥ निरग्निकस्य विप्रस्य कथं देवादयो द्विज ॥ प्रीताः स्युः शान्तये तस्य परं कौतूहलं मम ॥ ११ ॥ ॥ सुमंतुरुवाच ॥ ॥
साधु पृष्टोऽस्मि राजेन्द्र श्रूयतां परमं वचः ॥ अनग्नयस्तु ये विप्रास्तेषां श्रेयोऽभिधीयते ॥१२॥ व्रतोपवासनियमैर्नानादानैस्तथा[2] नृप ॥ देवादयो
भवन्त्येव प्रीतास्तेषां न संशयः ॥ १३ ॥ विशेषादुपवासेन तिथौ किल महीपते ॥ प्रीता देवादयस्तेषां भवन्ति कुरुनन्दन ॥ १४ ॥ ॥
॥ ॥ शतानीक उवाच ॥ ॥ भगवंस्त्वं तिथीन्ब्रूहि तिथीनां च विधिं हि मे ॥ प्राशनं गृह्यधर्मांश्च उपवासविधीनपि ॥ १५ ॥ मुच्येम येन
पापौघात्त्वत्प्रसादाद्द्विजोत्तम ॥ संसाराच्चापि विप्रेन्द्र श्रेयसे जगतस्तथा ॥ १६ ॥ ॥ सुमंतुरुवाच ॥ ॥ शृणु कौरव कर्माणि तिथिगुह्याश्रि
तानि तु ॥ श्रुतानि घ्नंति पापानि उपोषितफलानि च ॥ १७ ॥ प्रतिपदि क्षीरप्राशनं द्वितीयायां लवणवर्जनम् ॥ तृतीयायां तिलान्नं प्राश्नीया
च्चतुर्थ्यां क्षीराशनश्च पञ्चम्याम् ॥ फलाशनः सदा षष्ठ्यां शाकाशनः सप्तम्यां बिल्वाहारोऽष्टम्यां तु ॥ १८ ॥ पिष्टाशनो नवम्यामनग्निपाका
हारो दशम्यामेकादश्यां घृताहारो द्वादश्यां पायसाहारः ॥ त्रयोदश्यां गोमूत्राहारश्चतुर्दश्यां यवान्नाहारः ॥ १९ ॥ कुशोदकप्राशनः पौर्णमास्यां
हविष्याहारोऽमावास्यायाम् ॥ एष प्राशनविधिस्तिथीनामेव चानेन विधिना पक्षमेकं यो वर्तयति ॥ २० ॥ सोश्वमेधफलं दशगुणफलमवाप्नोति ॥
स्वर्गे मन्वन्तराणि यावत्प्रतिवसति ॥ २१ ॥ उपगीयमानोप्सरोगन्धर्वैर्मासत्रयचतुष्टयम् ॥ सोश्वमेधराजसूयानां शतगुणमवाप्नोति ॥ २२ ॥

---

[1] निष्कृत्यर्थम्—इ० पा० । [2] स्तुतिदानैः—इ० पा० ।

स्वर्गे उपगीयमानोप्सरोगन्धर्वैश्चतुर्युगानां दशशतीर्यावत्प्रतिवसति ॥ तथाष्टमासपारणे राजसूयाश्वमेधाभ्यां सहस्रगुणफलमवाप्नोति ॥ २३ ॥ स्वर्गे चतुर्दश मन्वन्तराणि यावत्प्रतिवसति ॥ उपगीयमानोप्सरोगन्धर्वैर्य एवं नियममास्थाय वर्षमेकं वर्तयति ॥ २४ ॥ स सवितुर्लोके कालं मन्वन्तरं प्रतिवसति ॥ २५ ॥ य एवं नियमान्राजन्नाश्वयुजनवम्यां माघमासस्य सप्तम्यां वैशाखतृतीयायां कार्तिकपौर्णमास्यां तिथिव्रतानि गृह्णाति ब्रह्मचारी गृहस्थो वनस्थो नारी नरो वा शूद्रः प्रयतमानसः दीर्घायुष्यं सवितुः सालोक्यं व्रजति ॥ २६ ॥ यैश्चापि पुरा राजन्ननेन विधिना एतासु तिथिष्वन्यजन्मान्तरे उपवासविधिः कृतः दानानि दत्तानि विविधप्रकाराणि ब्राह्मणानां तपस्विजनेषु वा ॥ २७ ॥ त्रिरात्रोपवासिनां तीर्थयात्रातपोगुरुमातापितृशुश्रूषानिरतानां तेषां स्वर्गादिभोगवासनादिहागतानां फलनिष्पत्तिचिह्नानि मनुष्यलोके प्रत्यक्षत एव दृश्यंते॥२८॥ हस्त्यश्वयानयुग्यधनरत्नकनकहिरण्यकटककेयूरग्रैवेयककटिसूत्रब्रह्मसूत्रकर्णालंकारमुकुटवरवस्त्रवरनारीवरविलेपनसुरूपगुणदीर्घायुषो विगताधिव्याधयो दानोपवासरतानां फलान्येतानि नृत्यगीतवादित्रमङ्गलपाठकशब्दैरिहाद्यापि पुण्यकृतो बोध्यमाना दृश्यन्त इति॥२९॥तथाकृतोपवासा अपि हि दृश्यंते॥ ॥ ३० ॥ तथा अदत्तदाना अकृतपुण्याश्च प्रत्यक्षत एव दृश्यंते ॥ ३१ ॥ तद्यथा काणकुष्ठिबधिरजडमूकव्यंगा रोगदारिद्र्योपसर्गव्याधिहतायुषश्च दृश्यंतेऽद्यापि मानवाः ॥ ३२ ॥ ॥ शतानीक उवाच ॥ ॥ द्विजेंद्र तिथयः प्रोक्ताः समासेन त्वया बुध ॥ विस्तरेणैव मे भूयः प्रब्रूहि द्विजसत्तम ॥ ॥३३॥ रहस्यं यत्तिथीनां तु देवानां च विचेष्टितम् ॥ यानीष्टानि च देवानां भोज्यानि नियमास्तथा॥३४॥तानि मे वद धर्मज्ञ येन पूतो भवेन्वहम्॥ निर्द्वंद्वो हि यथा विप्र लभे यागफलानि तु ॥३५॥ ॥ सुमंतुरुवाच ॥ ॥ रहस्यं यत्तिथीनां च भोजनं फलमेव तु ॥ यावच्च येन नियमो विशेषात्स्त्रीजनस्य च ॥ ३६ ॥ एतत्ते सर्वमाख्यामो रहस्यं तन्निबोध मे ॥ यन्मया नोक्तपूर्वं हि कस्यचित्सुप्रियस्य हि ॥ ३७ ॥ तत्तेहं संप्रवक्ष्यामि यस्य देवस्य या तिथिः ॥ देवतानां रहस्यानि व्रतानि नियमास्तथा ॥ ३८ ॥ ताञ्छृणुष्व महाबाहो गदतो मम नारद ॥ सृष्टिं पूर्वं वदिष्यामि संक्षेपेण तिथिं प्रति ॥ ३९ ॥ तमोभूतमिदं त्वासीदलक्ष्यमवितर्कितम् ॥ जगद्ब्रह्मा समागत्यासृजदात्मानमात्मना ॥ ४० ॥ संभूतात्मैव आत्मासावण्डमध्याद्विनिःसृतः ॥ आत्ममैवात्मनो ह्यण्डं सृष्ट्वा स विभुरादितः ॥४१॥ ब्रह्मा नारायणाख्योसौ सृष्टिं कर्तुं समुद्यतः ॥ ताभ्यां सोंडकपालाभ्यां दिवं भूमिं च निर्ममे ॥ ४२ ॥ दिशश्चोपदिशश्चैव देवादीन्दानवांस्तथा ॥ तिथिं पूर्वामिमां राजंश्चकाराथ विभुः स्वयम् ॥ ४३ ॥ तिथीनां प्रवरा यस्माद्ब्रह्मणा समुदाहृता ॥ प्रतिपादितापरे पूर्वे प्रतिपत्तेन तूच्यते ॥ ४४ ॥ अस्मात्पदात्तु तिथयो यस्मात्त्वन्याः प्रकीर्तिताः ॥ अस्यांते कथयिष्यामि

उपवासविधिं परम् ॥ ४५ ॥ कार्त्तिक्यां माघसप्तम्यां वैशाखस्य युगादिषु ॥ नियमोपवासं प्रथमं ग्राहयेत विधानवित्[1] ॥ ४६ ॥ यां तिथिं नियमं
कर्तुं भक्त्या समनुगच्छति ॥ तस्यां तिथौ विधानं यत्तन्निबोध जनाधिप ॥ ४७ ॥ यदा तु प्रतिपद्यां वै गृह्णीयान्नियमं नृप ॥ चतुर्दश्यां कृताहारः
संकल्पं परिकल्पयेत् ॥ ४८ ॥ अमावास्यां न भुञ्जीत त्रिकालं स्नानमाचरेत् ॥ पवित्रो हि जपेन्नित्यं गायत्रीं शिरसा सह ॥ ४९ ॥ अर्चयित्वा
प्रभाते तु गन्धमाल्यैर्द्विजोत्तमान् ॥ शक्त्या क्षीरं प्रदद्यात्तु ब्रह्मा मे प्रीयतां प्रभुः ॥ ५० ॥ ततो भुञ्जीत गोक्षीरमनेन विधिना नृप ॥ एष एव विधि
र्दृष्टः सर्वासु तिथिषु नृप ॥ ५१ ॥ संवत्सरगते काले व्रतमेतत्समाप्यते ॥ व्रतांते यत्फलं तस्य तन्निबोध नराधिप ॥ ५२ ॥ विमुक्तपापः शुद्धात्मा
दिव्यदेहस्य देहिनः ॥ ब्रह्मा ददाति संतुष्टो विमानमतितेजसम् ॥ अव्याहतगतिं दिव्यं किन्नराप्सरसैर्युतम् ॥ ५३ ॥ रमित्वा सुचिरं तत्र दैवतैः सह
देववत् ॥ इह चागत्य विप्रत्वं दश जन्मान्यसौ लभेत् ॥ ५४ ॥ वेदवेदांगविद्यश्च दीर्घायुश्चैव सुप्रभः ॥ भोगी धनपतिर्दाता जायतेऽसौ कृते युगे ॥
॥ ५५ ॥ विश्वामित्रस्तु राजेन्द्र ब्राह्मणत्वजिगीषया ॥ तपश्चचार विपुलं संतापाय दिवौकसाम् ॥ ब्राह्मणत्वं न लेभेऽसौ लेभे विघ्नाननेकशः ॥
॥ ५६ ॥ ततस्तु नियमात्तेषां तिथीनां प्रवरा तिथिः ॥ उपोषिता बहुविधा ज्ञात्वा ब्रह्मप्रियां तिथिम् ॥ ५७ ॥ ततो देवो ददौ ब्रह्मा विश्वामित्राय
धीमते ॥ इहैव तेन देहेन ब्राह्मणत्वं सुदुर्लभम् ॥ ५८ ॥ तिथीनां प्रवरा ह्येषा तिथीनामुत्तमा तिथिः ॥ क्षत्रियो वैश्यशूद्रौ वा ब्राह्मणत्वमवाप्नुयुः ॥
॥ ५९ ॥ एवं तिथिरियं राजन्कामदा कंजजाप्रिया ॥ सरहस्या मया प्रोक्ता या नोक्ता यस्य कस्यचित् ॥ ६० ॥ हैहयैस्तालजंघैश्च तुरुष्कैर्यवनैः
शकैः ॥ उपोषिता इहात्रैव ब्राह्मणत्वमभीप्सुभिः[2] ॥६१॥ इत्येषा परमा पुण्या शिवा पापहरा तथा ॥ पठितोपासिता राजञ्छ्रद्धया च श्रुतां[3] तथा ॥
॥ ६२ ॥ माहात्म्यं चापि योऽप्यस्याः शृणुयान्मानवो नृप ॥ ऋद्धिं वृद्धिं तथा कीर्तिं शिवं चाप्य दिवं व्रजेत् ॥ ६३ ॥ इति श्रीभविष्ये महापुराणे
शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि प्रतिपत्कल्पवर्णनं नाम षोडशोऽध्यायः ॥ १६ ॥ ॥ छ ॥ ॥ शतानीक उवाच ॥ ॥ ब्रूहि मे विस्त
राद्ब्रह्मन्प्रतिपत्कृत्यमादरात्[4] ॥ ब्रह्मपूजाविधानं च पूजने यच्च वै फलम्॥१॥ ॥ सुमंतुरुवाच ॥ ॥ शृणुष्वैकमना राजन्कथयाम्येष शांतिदम् ॥
पूर्वमेकार्णवे घोरे नष्टे स्थावरजंगमे ॥ २ ॥ स्वयंभूरभवद्देवः सुरज्येष्ठश्चतुर्मुखः ॥ ससर्ज लोकान्देवांश्च भूतानि विविधानि च ॥३॥ कायेन मनसा
वाचा जंगमस्थावराणि च॥ पिता यः सर्वदेवानां भूतानां च पितामहः ॥ ४ ॥ तस्मादेष सदा पूज्यो यतो लोकगुरुः परः ॥ सृजत्येष जगत्कृत्स्नं

---

१ विधानतः—इ० पा० । २ च लंभितम्—इ० पा० । ३ अत्र विशेषतः—इ० पा० । ४ प्रतिपत्कल्पम्—इ० पा० ।

पाति संहरते तथा ॥५॥ रुद्रोऽस्य मनसो जातो विष्णुर्जातोऽस्य[1] वक्षसः ॥ मुखेभ्यश्चतुरो[2] वेदा वेदांगानि च कृत्स्नशः ॥ ६ ॥ देवाप्सरसगंधर्वाः
सयक्षोरगराक्षसाः ॥ पूजयंति सदा वीर विरिंचिं सुरनायकम् ॥७॥ सर्वो ब्रह्ममयो लोकः सर्वं ब्रह्मणि संस्थितम्॥ तस्मात्समर्चयेद्ब्रह्मन्य इच्छेच्छ्रेय
आत्मनः ॥ ८ ॥ यो न पूजयते भक्त्या सुरज्येष्ठं[3] सुरेश्वरम् ॥ न स नाकस्य राज्यस्य न च मोक्षस्य भाजनम् ॥ ९ ॥ यस्तु पूजयते भक्त्या
विरिंचिं भुवनेश्वरम् ॥ स नाकराज्यमोक्षेषु क्षिप्रं भवति भाजनम् ॥ १० ॥ तस्मात्सौम्यमना भूत्वा यावज्जीवं प्रतिज्ञया ॥ अर्चयित्वा सदा
देवमापन्नोपि नरो नृप ॥ ११ ॥ वरं देहपरित्यागो वरं नरकसम्भवः ॥ न त्वेवापूज्य भुंजंति[4] देवं वै पद्मसंभवम् ॥ १२ ॥ सदा पूजयते यस्तु वीर
भक्त्या पितामहम् ॥ मनुष्यचर्मणा नद्धः स वेधा नात्र संशयः॥१३॥ न हि वेधोऽर्चनात्किंचित्पुण्यमभ्यधिकं भवेत् ॥ इति विज्ञाय यत्नेन पूजनी
यः सदा विधिः ॥ १४ ॥ यो ब्रह्माणं द्वेष्टि मोहात्सर्वदेवनमस्कृतम् ॥ नरो नरकगामी स्यात्तस्य संभाषणादपि ॥ १५ ॥ ब्रह्मणोर्चां प्रतिष्ठाप्य
सर्वयत्नैर्विधानतः ॥ यत्पुण्यं फलमाप्नोति तदेकाग्रमनाः शृणु ॥ १६ ॥ सर्वयज्ञतपोदानतीर्थवेदेषु यत्फलम् ॥ तत्फलं कोटिगुणितं लभेद्वेधः
प्रतिष्ठया ॥ १७ ॥ कञ्जजं स्थापयेद्यस्तु कृत्वा शालां मनोरमाम् ॥ सर्वागमोदित पुण्यं कोटिकोटिगुणं लभेत् ॥ १८ ॥ मातृजान्पितृजांश्चैव यां
चैवोद्वहते स्त्रियम् ॥ कुलैकविंशमुत्तार्य ब्रह्मलोके महीयते ॥ १९ ॥ भुक्त्वा तु विपुलान्भोगान्प्रलये समुपस्थिते ॥ ज्ञानयोगं समासाद्य स तत्रैव
विमुच्यते ॥ २० ॥ अथ वा राज्यमाकांक्षेज्जायते संभवांतरे ॥ सप्तद्वीपसमुद्रायाः क्षितेरधिपतिर्भवेत् ॥ २१ ॥ त्रिसंध्यं यो जपेद्ब्रह्म कृत्वाष्टदल
पंकजम् ॥ पौर्णमास्यां प्रतिपदि तस्य पुण्यफलं शृणु ॥ २२ ॥ अनेनैव स देहेन ब्रह्मा संतिष्ठते क्षितौ ॥ पापहा सर्वमर्त्यानां दर्शनात्स्पर्शनादपि ॥
॥ २३ ॥ उद्धृत्य दिवि संस्थाप्य कुलानामेकविंशतिम् ॥ तैः कुलैः सहितो नित्यं मोदते गोगतो[5] नृप ॥ २४ ॥ अप्येकवारं यो भक्त्या पूजयेत्पद्म[6]
संभवम् ॥ पद्मस्थं मूर्तिमंतं वा ब्रह्मलोकं स गच्छति ॥२५॥ पुण्यक्षयात्क्षितिं प्राप्य भवेत्क्षितिपतिर्महान् ॥ वेदवेदांगतत्त्वज्ञो ब्राह्मणश्चापि जायते॥
॥ २६ ॥ न तत्तपोभिरत्युग्रैर्न च सर्वैर्महामखैः ॥ गच्छेद्ब्रह्मपुरं दिव्यं मुक्त्त्वा भक्तिपरात्मकान् ॥२७॥ मृद्दार्वैष्टकशैलैर्वा यः कुर्याद्ब्रह्मणो गृहम् ॥
त्रिःसप्तकुलसंयुक्तो ब्रह्मलोके महीयते ॥ २८ ॥ मृन्मयात्कोटिगुणितं फलं दार्विष्टकामये ॥ इष्टकाद्द्विगुणं पुण्यं कृते शैलमये गृहे ॥ २९ ॥ क्रीडं[7]
मानोपि यः कुर्याच्छालां वै ब्रह्मणो नृप ॥ ब्रह्मलोके स लभते विमानं सर्वकामिकम् ॥ ३० ॥ पुष्पमालापरिक्षिप्तं किंकिणीजालभूषितम् ॥ दोला

---

[1] च इ० पा० । [2] चत्वारः । ६ विरिंचिं सर्वकामदम्–इ० पा० । [4] भुञ्जते । [5] गां भूमिं गतः–भूमिष्ठ एवेत्यर्थः । [6] सर्वकामदम्–इ० पा० । [7] क्रीडन् ।

विक्षेपसंपन्नं घंटाचामरभूषितम् ॥ ३१ ॥ मुक्तादामवितानेन शोभितं सूर्यसुप्रभम् ॥ अप्सरोगणसंकीर्णं सर्वकामसुखप्रदम् ॥ ३२ ॥ तत्रोषित्वा
महाभोगी क्रीडमानः सदा सुरैः ॥ पुनरागत्य लोकेस्मिन्राजा भवति धार्मिकः ॥ ३३ ॥ पश्यन्परिहरञ्जन्तून्मृदुपूर्वं महीपते ॥ शनैः संमार्जनं
कुर्वंश्चान्द्रायणफलं व्रजेत् ॥ ३४ ॥ वस्त्रपूतेन तोयेन यः कुर्यादुपलेपनम् ॥ पश्यन्परिहरञ्जतूंश्चाद्रायणफलं लभेत् ॥ ३५ ॥ नैरंतर्येण यः कुर्या
त्पक्षं संमार्जनार्चनम् ॥ युगकोटिशतं साग्रं ब्रह्मलोके महीयते ॥ ३६ ॥ तस्यांते स चतुर्वेदः सुरूपः प्रियदर्शनः ॥ आढ्यः सर्वगुणोपेतो राजा
भवति धार्मिकः ॥ ३७ ॥ कपटेनापि यः कुर्याद्ब्रह्मशालां सुमानद ॥ समार्जनादि वै कर्म सोऽपि प्राप्नोति तत्फलम् ॥ ३८ ॥ तावद्भ्रमंति संसारे
दुःखशोकभयप्लुताः ॥ न भवंति सुरश्रेष्ठे यावद्भक्ता महीपते ॥ ३९ ॥ समासक्तं यथा चित्तं जन्तोर्विषयगोचरे ॥ यद्येवं ब्रह्मणि न्यस्तं को न
मुच्येत बन्धनात् ॥ ४० ॥ खण्डस्फुटितसंस्कारं शालायां यः करोति वै ॥ अरामावसथाद्येषु लभते मौक्तिकं फलम् ॥ ४१ ॥ नास्ति ब्रह्मसमो
देवो[1] नास्ति ब्रह्मसमो गुरुः ॥ नास्ति ब्रह्मसमं ज्ञानं नास्ति वेधःसमं तपः ॥ ४२ ॥ प्रतिपद्यादिसर्वेषु दिवसेषूत्सवेषु च ॥ [2]पर्वकालेषु पुण्येषु
पौर्णमास्यां विशेषतः ॥ ४३ ॥ शंखभेर्यादिनिर्घोषैर्महद्भिर्गेयसंयुतैः ॥ कुर्यान्नीराजनं देवे [3]सुरज्येष्ठे चतुर्मुखे ॥ ४४ ॥ यावत्पर्वाणि विधिना कुर्या
न्नीराजनं नृप ॥ तावद्युगसहस्राणि ब्रह्मलोके महीयते ॥ ४५ ॥ स्नानकाले त्रिसंध्यं तु यः कुर्यान्नृत्यवादनम् ॥ गीतं वा मुखवाद्यं वा तस्य पुण्य
फलं शृणु ॥ ४६ ॥ यावन्त्यहानि कुरुते गेयनृत्यादिवादनम् ॥ तावद्युगसहस्राणि ब्रह्मलोके महीयते ॥ ४७ ॥ कपिलापञ्चगव्येन कुशवारियुतेन
च ॥ स्नापयेन्मंत्रपूतेन ब्राह्मं स्नानं हि तत्स्मृतम् ॥ ४८ ॥ कपिलापंचगव्येन दधिक्षीरघृतेन च ॥ स्नानं [4]शतगुणं ज्ञेयमितरेषां नराधिप ॥ ४९ ॥
देवाग्निकार्यमुद्दिश्य कपिलामाहरेत्सदा ॥ ब्रह्मक्षत्रविशश्चैव न शूद्रस्तु कदाचन ॥ ५० ॥ कापिलं यः पिबेच्छूद्रो देवकार्यार्थनिर्मितम् ॥ स पच्येत
महाघोरे सुचिरं नरकार्णवे ॥ ५१ ॥ वर्षकोटिसहस्रैस्तु यत्पापं समुपार्जितम् ॥ सुरज्येष्ठघृताभ्यंगाद्दहेत्सर्वं न संशयः ॥ ५२ ॥ कल्पकोटिसहस्रैस्तु
यत्पापं समुपार्जितम् ॥ पितामहघृतस्नानं दहत्यग्निरिवेंधनम् ॥ ५३ ॥ घृतस्नानं प्रतिपदि सकृत्कृत्वा तु कांजजम् ॥ कुलैकविंशमुत्तार्य विष्णुलोके मही
यते ॥ ५४ ॥ अयुतं यो गवां दद्याद्भक्त्यां[6] वै वेदपारगे ॥ वस्त्रहेमादियुक्तानां क्षीरस्नानेन यत्फलम् ॥ ५५ ॥ सकृदाज्येन पयसा विरिंचिं स्नपयेत्तु यः ॥
गांगेयेन स यानेन याति ब्रह्मसलोकताम् ॥ ५६ ॥ स्नाप्य दध्ना सकृद्वीर कञ्जजं विष्णुमाप्नुयात् ॥ मधुना स्नपयित्वा तु वीरलोके महीयते ॥ ५७ ॥

---

१ लोके–इ० पा० । २ सर्वकालेषु–इ० पा० । ३ भक्तिपूर्वम्–इ० पा० । ४ दशगुणम्–इ० पा० । ५ सहस्रे तु–इ० पा० । ६ विप्रे–इ० पा० ।

स्नानमिक्षुरसेनेह यो विरिंचेः समाचरेत् ॥ स याति लोकं सविस्तुतेजसा भासयन्नभः ॥ ५८ ॥ शुद्धोदकेन[1] यो भक्त्या स्नपयेत्पद्मसंभवम् ॥
उत्सृज्य पापकलिलं स यात्येव सलोकताम् ॥ ५९ ॥ वस्त्रपूतेन तोयेन स्नपयेद्यः सकृद्विभुम् ॥ स सर्वकालं तृप्तात्मा लोकवश्यत्वमा
प्नुयात् ॥ ६० ॥ सर्वौषधीभिर्यो भक्त्या स्नपयेत्पद्मसंभवम् ॥ कांचनेन विमानेन ब्रह्मलोके महीयते ॥ ६१ ॥ गन्धचन्दनतोयेन
स्नापयेद्योंबुजोद्भवम् ॥ रुद्रलोकमवाप्नोति तेजसा हेमसन्निभः ॥ ६२ ॥ पाटलोत्पलपद्मानि करवीराणि सर्वदा ॥ स्नानकाले प्रयोज्यानि स्थिराणि
सुरभीणि च ॥ ६३ ॥ एषामेकतमं स्नानं भक्त्या कृत्वा तु वेधसि ॥ विधूय पापकलिलं विधिर्लोके[2] महीयते ॥ ६४ ॥ कर्पूरागरुतोयेन स्नपयेद्यस्तु[3]
कञ्जजम् ॥ सर्वपापविशुद्धात्मा ब्रह्मलोके महीयते ॥ ६५ ॥ गायत्रीशतजप्तेन विमलेनांभसा विभुम् ॥ स्नपयित्वा सकृद्भक्त्या ब्रह्मलोकमवा
प्नुयात् ॥ ६६ ॥ विभुं शीतांबुना स्नाप्य धारोष्णपयसा ततः ॥ ततः पश्चाद् घृतस्नानं कृत्वा पापैर्विमुच्यते ॥ ६७ ॥ एतत्स्नानत्रयं कृत्वा
पूजयित्वा तु भक्तितः ॥ अश्वमेधसहस्रस्य फलं प्राप्नोति मानवः ॥ ६८ ॥ मृत्कुंभैस्ताम्रजैः कुंभैः स्नानं शतगुणं[4] भवेत् ॥ रौप्ये लक्षोत्तरं
प्रोक्तं हैमैः कोटिगुणं भवेत् ॥ ६९ ॥ ब्रह्मणो दर्शनं पुण्यं दर्शनात्स्पर्शनं परम् ॥ स्पर्शनादर्चनं श्रेष्ठं घृतस्नातमतः परम् ॥ ७० ॥ वाचिकं मानसं
पापं घृतस्नानेन देहिनाम् ॥ क्षिणुते पद्मजो यस्मात्तस्मात्स्नानं समाचरेत् ॥ ७१ ॥ स्नपयित्वार्चयेद्भक्त्या यथा तच्छृणु भारत ॥ शुचिवस्त्रधरः
स्नातः कृतन्यासश्च भारत ॥ ७२ ॥ चतुर्हस्तं लिखेत्पद्मं चतुर्भागविभागितम् ॥ मध्ये तस्य लिखेच्चक्रं दलैर्द्वादशभिश्चितम् ॥ ७३ ॥
सरोजानि ततोन्यस्य अक्षराणि समन्ततः ॥ अक्षरं विहितं चान्यत्पत्रभागे प्रकीर्तितम् ॥ ७४ ॥ नानावर्णकसंयोगाल्लिखेच्चैवानुपूर्वशः ॥
कृष्णोत्कटं तु मध्यं स्यात्पीतरक्तं तथा परम् ॥ ७५ ॥ सितं शुद्धं तु कर्त्तव्यं मध्यभागे तु वर्तुलम् ॥ प्रभाकुण्डलकैर्बाह्यैर्वेष्टयेच्चक्रनायकम् ॥७६॥
एवमालिख्य यत्नेन मूलमंन्त्रं ततो न्यसेत् ॥ मूर्ध्नः पादतलं यावत्प्रणवं विन्यसेद्बुधः ॥ ७७ ॥ नादरूपं न्यसेत्तावद्यावच्छब्दस्य शून्यता ॥
[5]तत्कारं विन्यसेन्मूर्ध्नि सकारं मुखमण्डले ॥ ७८ ॥ विकारं कण्ठदेशे तु तुकारं सर्वसंधिषु[6] ॥ वकारं हृदि मध्ये तु रेकारं पार्श्वयोर्द्वयोः ॥ ७९ ॥
णकारं दक्षिणे कुक्षौ यकारं वामसंज्ञके ॥ भकारं कटिनाभिस्थं गोंकारं जानुपर्वसु ॥ ८० ॥ देकारं जंघयोर्न्यस्य वकारं पादपद्मयोः ॥
स्यकारमंगुष्ठयोर्न्यस्य धीकारं चोरसि न्यसेत् ॥ ८१ ॥ मकारं जानुदेशे तु हिकारं गुह्यमाश्रितम् ॥ धिकारं हृदये न्यस्य योकारं चौष्ठयो

---

[1] फलोदकेन इ० पा० । [2] विधुलोकमवाप्नुयात्–इ० पा।० [3] पूजयेत्–इ० पा० । [4] दशगुणम्–इ० षा० । [5] इत आरभ्य गायत्रीप्रत्येकार्णन्यासः प्रोच्यते । [6] चांगसंधिषु–इ० पा० ।

र्न्यसेत् ॥ ८२ ॥ नकारं नासिकाग्रे तु प्रकारं नेत्रमाश्रितम् ॥ चोकारं तु भ्रुवोर्मध्ये दकारं प्राणमाश्रितम् ॥ ८३ ॥ याकारं विन्यसेन्मूर्ध्नि
तकारं केशमाश्रितम् ॥ न्यासं कृत्वात्मनो देहे देवे कुर्यात्तथा नृप ॥ सर्वोपचारसंपन्नं कृत्वा सम्यङ् निरीक्षयेत् ॥ ८४ ॥ कुंकुमागुरुकर्पूर
चन्दनेन विमिश्रितम् ॥ गन्धतोयमुपस्कृत्य गायत्र्या प्रणवेन च ॥ प्रोक्षयेत्सर्वद्रव्याणि पश्चादर्चनमाचरेत् ॥ ८५ ॥ चक्रग्रन्थिषु
सर्वासु प्रणवं विनिवेशयेत्[1] ॥ भूयः प्लुतं समुच्चार्य प्रणवं सर्वतोमुखम् ॥ ८६ ॥ विन्यसेत्पद्ममध्ये तु पीठनिष्पत्तिहेतवे ॥ आसने
पृथिवी ज्ञेया सर्वसत्त्वधरा मता ॥ ८७ ॥ ह्रस्वोंकारे मता सा तु दीर्घोंकारे तु देवराट् ॥ प्लुतस्तु व्यापयेद्भावं मोक्षदं चामृतात्मकम् ॥ ८८ ॥
यत्नस्थो न निवर्तेत योगी प्राणपरायणः ॥ आवाहनं ततः कुर्यादक्षरेण परेण[2] तु ॥ ८९ ॥ आवाह्य तेजोरूपं तु न्यसेन्मन्त्रवरांस्ततः ॥
ततो विभावयेद्देवं पद्मस्थं चतुराननम् ॥ ९० ॥ स्रष्टारं सर्वजगतां विष्णुरुद्रविधानगम् ॥ संभाव्य विधिवद्भक्त्या पश्चाच्चार्चनमाचरेत् ॥ ९१ ॥
गन्धपुष्पादिसंभारान्क्रमात्सर्वान्प्रकल्पयेत् ॥ गायत्रीमुच्चरन्मन्त्रं सर्वकर्माणि कारयेत् ॥ ९२ ॥ पुष्पं धूपं तथा दीपं नैवेद्यं सुमनोहरम् ॥
खंडलड्डुकश्रीवेष्टकासाराशोकवर्तिकाः ॥ ९३ ॥ स्वस्तिकोल्लोपिकादुग्धतिलावेष्टतिलाढिकाः ॥ फलानि चैव पक्कानि लग्नखण्डगुडानि
च ॥ ९४ ॥ अन्यांश्च विविधान्दद्यात्पूपानि विविधानि च ॥ एवमादीनि सर्वाणि दापयेच्छक्तितो नृप ॥ ९५ ॥ मूलमन्त्रेण देवस्य
ततो देहं विभावयेत् ॥ पूजयेच्चापि विधिना येन तं ते ब्रवीम्यहम् ॥ ९६ ॥ प्राणायामत्रयं कृत्वा देहसंशोधनाय वै ॥ आवाहयेत्ततोऽनन्तं
धारयन्तं वचः सदा ॥ ९७ ॥ ध्यात्वानन्तं ततो रुद्रं पद्मकिंजल्कमध्यगम् ॥ ध्यायेद्विष्णुं ततो देवं न्यसेत्पद्मोदरोद्भवम् ॥ ९८ ॥ एवं त्रिदेवता
रूढं पद्ममध्येंबुजोद्भवम् ॥ पूजयेन्मूलमन्त्रेण पद्मोदरभवं नृप ॥ ९९ ॥ ऋग्वेदं तु यजुर्वेदं सामवेदं च पूजयेत् ॥ ज्ञानवैराग्यमैश्वर्यं धर्मं
संपूजयेद्बुधः ॥ १०० ॥ ईशानादिक्रमाद्राजन्विदिशासु समंततः[3] ॥ शिक्षा कल्पो व्याकरणं निरुक्तं छन्द एव च ॥ १०१ ॥ ज्योतिषं च
महाबाहो उपवेदाश्च कृत्स्नशः ॥ इतिहासपुराणानि यथायोग्यं यथाक्रमम् ॥ १०२ ॥ शिक्षा कल्पो व्याकरणं देवस्य पुरतः सदा ॥
कल्पादयस्ततश्चान्ये दिशासु विदिशासु च ॥ १०३ ॥ महाव्याहृतयः सर्वाः प्रणवेन समन्विताः ॥ पूर्वादिक्रमयोगेन पूजयेद्विधिना नृप ॥
॥१०४॥ शक्तयो ब्रह्मणस्त्वेता लोकरूपा व्यवस्थिताः ॥ पूजनीयाः प्रयत्नेन मंत्ररूपाः स्थिताः स्वयम् ॥१०५॥ अरकांतरसंस्थांश्च[4] षट् समुद्रान्स

---

[1] विनिवेदयेत्–इ० पा० । [2] परन्तप–इ० पा० । [3] समाहितः–इ० पा० । [4] यन्त्रदलान्तर्वर्तिन इत्यर्थः ।

मर्चयेत् ॥ नक्षत्राणि ग्रहाश्चैव राशयश्च[1] विशेषतः ॥ पूज्याः सर्वे यथान्यायं सुराग्रेषु व्यवस्थिताः ॥ १०६ ॥ नागाश्च गरुडश्चैव पूजनीयस्तथा
ग्रतः ॥ देवता ऋषयश्चैव सहिताः कुलपर्वताः ॥ तत्तेजोनिलयाः सर्वे पूजनीयाः प्रयत्नतः ॥ १०७ ॥ आचम्य विधिवत्पूर्वं मंत्रपूतेन वारिणा ॥
हृदयादीन्न्यसेदंगान्हृदयादिषु कृत्स्नशः ॥ १०८ ॥ शिखा नेत्रं तथा चर्म अस्त्रं[2] च भरतर्षभ ॥ महेंद्रादिदिशश्चैताः पूजयेद्विधिवन्नृप ॥ १०९ ॥
हृदयं पुरतः पूज्यं शिरो देवस्य पृष्ठतः ॥ पूर्वं संपूजयेद्देवं मूलमंत्रेण कृत्स्नशः ॥ ११० ॥ विसर्जयेद्दर्शयित्वा मुद्रां तु भरतर्षभ ॥ अंकुशं[3] नरशा
र्दूल ह्याह्वाने कंजमादिशेत् ॥ १११ ॥ यस्त्वेवं पूजयेद्देवं प्रतिपन्नित्यमेव च ॥ उपोष्य पंचदश्यां तु स याति परमं[4] पदम् ॥ ११२ ॥ ॥ सुमंतु
रुवाच ॥ ॥ आपो हिष्ठेति मंत्रोऽयं हृदयं परिकीर्तितम् ॥ ऋतं सत्यं शिखा प्रोक्ता उदुत्यं नेत्रमादिशेत् ॥ ११३ ॥ चित्रं देवानां मस्तभिति
सर्वलोकेषु विश्रुतम् ॥ वर्मणा ते च्छादयामि कवचं समुदाहृतम् ॥ ११४ ॥ भूर्भुवः स्वरिति तथा शिरसे परिकीर्तितम् ॥ गायत्रीमूलतंत्रस्तु
साधकः सर्वकर्मणाम् ॥११५॥ गायत्र्या पूजयेद्देवमोंकारेणाभिमंत्रितम्॥प्रणवेनापरान्सर्वानृग्वेदादीन्प्रपूजयेत् ॥११६॥ आह्वाने पूजने वीर विसर्गे
ब्रह्मणस्तथा ॥ गायत्री परमो मंत्रो वेदमाता विभाविनी ॥ ११७ ॥ गायत्र्यक्षरतत्त्वैस्तु पूजयेद्यस्तु देवताम् ॥ स गच्छेद्ब्रह्मणः स्थानं दुर्लभं यद्दुरा
सदम् ॥ ११८ ॥ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि प्रतिपत्कल्पे ब्रह्मणोऽर्चनविधिवर्णनं नाम सप्त
दशोऽध्यायः ॥ १७ ॥ छ ॥ ॥ सुमंतुरुवाच ॥ ॥ पौर्णमास्युपवासं तु कृत्वा भक्त्या नराधिप ॥ अनेन विधिना यस्तु विरिंचिं पूजयेन्नरः ॥
॥ १ ॥ प्रतिपद्यां महाबाहो स गच्छेद्ब्रह्मणः पदम् ॥ ऋग्भिर्[5]विशेषतो देवी विरिंचेर्वास्तुदेवताः ॥ २ ॥ कार्त्तिके मासि देवस्य रथयात्रा प्रकीर्तिता ॥
यां कृत्वा मानवो भक्त्या याति ब्रह्मसलोकताम् ॥ ३ ॥ कार्तिके मासि राजेंद्र पौर्णमास्यां चतुर्मुखम् ॥ मार्गेण चर्मणा सार्धं सावित्र्या च परतंप ॥
॥ ४ ॥ भ्रामयेन्नगरं सर्वं नानावाद्यैः समन्वितम् ॥ स्थापयेद्भ्रामयित्वा तु सलोकं नगरं नृप ॥ ५ ॥ ब्राह्मणं भोजयित्वाग्रे शांडिलेयं प्रपूज्य च ॥
आरोपयेद्रथे देवं पुण्यवादित्रनिस्वनैः ॥ ६ ॥ रथाग्रे शांडिलीपुत्रं पूजयित्वा विधानतः ॥ ब्राह्मणान्वाचयित्वा च कृत्वा पुण्याहमंगलम् ॥ ७ ॥
देवमारोपयित्वा तु रथे कुर्यात्प्रजागरम् ॥ नानाविधैः प्रेक्षणकैर्ब्रह्मघोषैश्च पुष्कलैः ॥ ८ ॥ कृत्वा प्रजागरं ह्येवं प्रभाते ब्राह्मणं नृप ॥ भोजयित्वा
यथाशक्त्या भक्ष्यभोज्यैरनेकशः ॥ ९ ॥ पूजयित्वा जं[6]नं वीर वस्त्रेण विधिवन्नृप ॥ बीजेन च महाबाहो पयसा पायसेन च ॥ १० ॥ ब्राह्मणान्वा

---

[1] ऋषयश्च—इ० पा० । [2] अल्पभारं च भारत—इ० पा० । [3] मुकुलम्—इ० पा० । [4] परमां गतिम्—इ० पा० । [5] अग्निः—इ० पा० । [6] तु तं वीरं वस्त्रेण विधिवन्नृप—इ० पा० ।

चयित्वा च च्छांदेन विधिना नृप ॥ कृत्वा पुण्याहशब्दं च रथं च भ्रामयेत्पुरे॥ ११॥ चतुर्वेदविदैर्विप्रैर्भ्रामयेद्ब्रह्मणो रथम् ॥ बह्वृचाथर्वणोच्चारैश्छंदोगाध्वर्युभिस्तथा ॥ १२ ॥ भ्रामयेद्देवदेवस्य सुरज्येष्ठस्य तं रथम् ॥ प्रदक्षिणं पुरं सर्वं मार्गेण सुसमेन तु ॥१३॥ न वोढव्यो रथो वीर शूद्रेण शुभमिच्छता॥ नारुहेत रथं प्राज्ञो मुक्त्वैकं भोजकं नृप ॥१४॥ ब्रह्मणो दक्षिणे पार्श्वे सावित्रीं स्थापयेन्नृप ॥ भोजको वामपार्श्वे तु पुरतः कंजजं न्यसेत्॥१५॥ एवं तूर्यनिनादैस्तु शंखशब्दैश्च पुष्कलैः ॥ भ्रामयित्वा रथं राजन्पुरं सर्वं प्रदक्षिणम् ॥ स्वस्थाने स्थापयेद्भूयः कृत्वा नीराजनं बुधः ॥१६॥ य एवं कुरुते यात्रां भक्त्या यश्चापि पश्यति ॥ रथं चाकर्षते यस्तु स गच्छेद्ब्रह्मणः पदम् ॥१७॥ कार्त्तिके मास्यमावास्यां यस्तु दीपप्रदीपनम् ॥ शालायां ब्रह्मणः कुर्यात्स गच्छेद्ब्रह्मणः पदम्॥१८॥ प्रतिपदि ब्राह्मणांश्चापि गुडमिश्रैः प्रदीपकैः ॥ वासोभिरहतैश्चापि स गच्छेद्ब्रह्मणः पदम् ॥ १९॥ गंधैः पुष्पैर्[1]नैवैर्वस्त्रैरात्मानं पूजयेच्च यः ॥ तस्यां प्रतिपदायां तु स गच्छेद्ब्रह्मणः पदम् ॥२०॥ महापुण्या तिथिरियं बलिराज्यप्रवर्तिनी ॥ ब्रह्मणः सुप्रिया नित्यं बालेया परिकीर्तिता ॥२१॥ ब्राह्मणान्पूजयित्वास्यामात्मानं च विशेषतः ॥ स याति परमं स्थानं विष्णोरमिततेजसः॥२२॥ चैत्रे मासि महाबाहो पुण्या प्रतिपदा परा ॥ तस्यां यः श्वपचं स्पृष्ट्वा स्नानं कुर्यान्नरोत्तम ॥२३॥ न तस्य दुरितं किंचिन्नाधयो व्याधयो नृप ॥ भवंति कुरुशार्दूल तस्मात्स्नानं प्रवर्तयेत ॥ २४ ॥ दिव्यं नीराजनं तद्धि सर्वरोगविनाशनम् ॥ गोमहिष्यादि यत्किंचित्तत्सर्वं भूषयेन्नृप ॥२५॥ तैलशस्त्रादिभिर्वस्त्रैस्तोरणाधस्ततो नयेत ॥ ब्राह्मणानां तथा भोज्यं कुर्यात्कुरुकुलोद्वह ॥२६॥ तिस्रो ह्येताः पराः प्रोक्तास्तिथयः कुरुनंदन ॥ कार्त्तिकेश्वयुजे मासि चैत्रे मासे च भारत ॥ २७ ॥ स्नानं दानं शतगुणं कार्त्तिके या तिथिर्नृप ॥ बलिराज्याप्तिसुखदापांशुलाशुभनाशिनी ॥ २८ ॥ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि प्रतिपत्कल्पसमाप्तिवर्णनं नामाष्टादशोऽध्यायः ॥ १८ ॥ ॥ छ ॥ ॥ सुमंतुरुवाच ॥ ॥ द्वितीयायां तु राजेंद्र अश्विनौ सोमपीतिनौ ॥ च्यवनेन कृतौ यज्ञे मिषतो मघवं[2]स्य च ॥ १ ॥ ॥ शतानीक उवाच ॥ ॥ कथमिंद्रस्य मिषतः कृतौ तौ सोमपीतिनौ ॥ च्यवनेन हि देवानां पश्यतां तद्वदस्व मे ॥ २ ॥ अहो महत्तपस्तस्य च्यवनस्य महात्मनः ॥ यदिंद्रस्य बलादेव देवत्वं प्रापिता वुभौ ॥ ३ ॥ ॥ सुमंतुरुवाच ॥ ॥ पुरातनयुगे सन्धौ पश्चिमेऽथ नराधिप ॥ च्यवनो योगमास्थाय गंगाकूलेऽवसच्चिरम् ॥ ४ ॥ तत्र शर्यातिरायातः स्नातुमं[3]तःपुरैः सह ॥ स्नात्वाभ्यर्च्य पितॄ[4]न्देवान्गमनायोपचक्रमे ॥ ५ ॥ तत्र मूढं जनपदमपश्यत्पथि चेष्टनम् ॥ विण्मूत्रोत्सर्गसंरुद्धं

---

[1] श्र नैवेद्यैः—इ० पा० । [2] केवलमार्षोऽयं पाठः सर्वेषु पुस्तकेषु । [3] मंत्रिपुरःसरः—इ० पा० । [4] आतिथीन्—इ० पा० ।

ज्योतिराक्षिप्तनिष्क्रियम् ॥ भ्रमंतं तत्रतत्रैव समीक्ष्य स बलं नृपः ॥ ६ ॥ उवाच [1]दुर्मना राजा अमात्यान्स्वान्पुरोगमान् ॥ च्यवनस्याश्रमोयं हि नापराद्धं तु केनचित् ॥ ७ ॥ न चोवाच यदा कश्चित्तस्य राज्ञस्तु पृच्छतः ॥ तदा सुता सुकन्यास्य प्रोवाच पितरं वचः ॥ ८ ॥ मया दृष्टं तु यत्तात सखिभिः सह कौतुकम् ॥ तत्ते वच्मि निबोध त्वं शृणु तात महाद्भुतम् ॥ ९ ॥ शिंजितारावबहुलाः कांचीनूपुरमेखलाः ॥ गायन्त्यो विलपन्त्यश्च क्रीडन्त्यश्चात्र कानने ॥ १० ॥ कोकिलध्वनिमश्रौषं व्यक्ताव्यक्ताक्षरं कृशम् ॥ सुकन्ये ह्येहिह्येहीति वल्मीकाद्वाचमुद्गिरन् ॥ ११ ॥ तत्र गत्वाद्भुतं तात पश्यामः किल पावकौ ॥ दीपाविवाचलशिखौ भूयः कन्या उवाच ह ॥ १२ ॥ मया च कौतुकात्तात किमेतदित्यबुद्धितः ॥ सूदितौ दर्भसूच्यग्रैस्तत्तेजः समुपारमत् ॥ १३ ॥ तच्छ्रुत्वा नृपतिस्त्रस्तस्तूर्णं तद्वनमागमत् ॥ यत्रास्ते भार्गवः कष्टं वल्मीकांतर्गतो मुनिः ॥ १४ ॥ गत्वा स तत्र प्रोवाच प्रणिपत्य द्विजोत्तमम् ॥ अपराद्धं [2]मया देव तत्क्षमस्व नमोऽस्तु ते ॥ १५ ॥ स तं प्रोवाच नृपतिं मया ज्ञातं नराधिप ॥ सुकन्यां मे प्रयच्छस्व [3]निवेशार्थी ह्यहं नृप ॥ अनुक्रमन्सुकन्यां तु दत्त्वा राजन्सुखी भव ॥ १६ ॥ इत्युक्तः प्रददौ राजा सुकन्यामविचारयन् ॥ ततः स्वपुरमागम्य अवसत्सुचिरं सुखी ॥ १७ ॥ सुकन्यापि पतिं लब्ध्वा सुप्रीताराधयत्तदा ॥ राज्यश्रियं परित्यज्य वल्कलाजिनधारिणी ॥ १८ ॥ गते बहुतिथे काले वसंते समुपस्थिते ॥ तपोद्योतितसर्वांगीं रूपोदार्यगुणान्विताम् ॥ स्नातां स्वभार्यां च्यवन उवाच मधुराक्षरम् ॥ १९ ॥ एह्येहि भद्रे भद्रं ते शयनीयं समाश्रय ॥ अपत्यं जनयस्वाद्य कुलद्वयविवर्धनम् ॥ २० ॥ एवमुक्ता तु सा कन्या प्रांजलिः पतिमब्रवीत् ॥ [4]नार्हस्यद्य सुकल्याण संगमं स्थंडिलेऽसमे ॥ २१ ॥ मम प्रियं कुरुष्वाद्य ततो मामाह्वयस्व च ॥ पितृगेहे यथातिष्ठं शयनीये सुसंस्कृते ॥ २२ ॥ बहुगैरिकवर्णाद्यैः श्वेतपीतारुणाकुले ॥ वस्त्रालंकारगन्धाद्यैस्तथा त्वमपि तत्कुरु ॥ २३ ॥ आत्मानं वयसोपेतं रूपवन्तं सुवर्चसम् ॥ वस्त्रालंकारगन्धाढ्यं पश्येयं येन सादरम् ॥ २४ ॥ सुकन्याया वचः श्रुत्वा च्यवनः प्राह दुर्मनाः ॥ न मेऽस्ति वित्तं कल्याणि पितुस्तेऽस्ति यथा वने ॥ २५ ॥ स कथं भूषयाम्यद्य सुरूपश्च कथं वद ॥ प्रोवाच सा पतिं भूयः प्रहसंती कृतांजलिः ॥ वित्तं ददावैलविलो रूपं वैरोचनोददत् ॥ २६ ॥ च्यवनः प्राह भार्यां तां [4]न करिष्ये तपोव्ययम् ॥ एवमुक्त्वा तपश्चोग्रं ततापं सुचिरं तदा ॥ २७ ॥ अथ तत्रागतौ वीरावश्विनौ कालपर्ययात् ॥ दृष्टवन्तौ सुकन्यां

---

[1] धर्मेणामात्यान्पुरोहितपुरोगमान्—इ० पा० । [2] मयेति कन्यायां स्वत्वाभिमानात् । परिवारकृतस्यापि कर्मणः स्वामिन्यारोपेस्य सार्वत्रिकत्वात् । [3] निवेशं गच्छ वै नृप—इ० पा० । [4] नार्हति ह्यद्य कल्याण आह्वानं स्थंडिले मम—इ० पा० । [4] तत्करिष्ये तपोव्ययात्—इ० पा० ।

तौ दीप्त्या वै देवतामिव ॥ २८ ॥ उपगम्योचतुस्तां तौ का त्वं सुन्दरि रूपिणी ॥ किमर्थमिह एका त्वं तिष्ठसे कस्तवाश्रयः ॥ २९ ॥ सा ताबुवाच तन्वंगी[1] शर्यातिदुहिता ह्यहम् ॥ भर्ता च च्यवनो मह्यं कौ च वां मे तथोच्यताम् ॥ ३० ॥ ऊचतुश्चाश्विनौ देवावावां विद्धि नृपात्मजे ॥ किं करिष्यसि तेन त्वं जीर्णेन च कृशेन च ॥ आवयोर्वृणु भर्तारमेकमेव यमिच्छसि ॥ ३१ ॥ सा त्वब्रवीच्च मा मैवं वक्तुमर्हौ दिवौकसौ ॥ भर्तारमनुरक्तांगी यथा स्वाहा विभावसोः ॥३२॥ ॥ अश्विनावूचतुः ॥ ॥ आयातु च विशत्वद्य च्यवनो वैष्णवीजलम् ॥ ततो नौ मध्यगं ह्येकं वृणीष्वान्यं यमिच्छसि ॥ ३३ ॥ तावब्रूतां सुकन्यां तु गत्वा पृच्छ स्वकं पतिम् ॥ तं च पृष्ट्वा पुनश्चात्रागच्छ नौ संनिधौ पुनः ॥ ३४ ॥ आवामत्रैव तिष्ठावो यावदागमनं तव ॥ सा गत्वा प्राह भर्तारमश्विनावेवं[2]मूचतुः ॥ ३५ ॥ रूपवंतं च भर्तारं करिष्यावो यमिच्छसि ॥ अथ मध्यगतं ह्येकं भर्तृत्वेन वरिष्यसि ॥ ३६ ॥ एवमस्त्विवति तां प्राह स भार्यां च्यवनस्त्वरन् ॥ सा तं गृह्य जगामाशु यत्र तौ भिषजावुभौ ॥ ३७ ॥ स ताबुवाच च्यवनो यथोक्तं भवतोर्वचः ॥ कुरुतं ह्यश्विनौ क्षिप्रं सुकन्या चेप्सितं वृणोत्[3] ॥३८॥ तौ तं संगृह्य गंगायां प्रविष्टौ मुनिना सह ॥ मुहूर्तात्तु समुत्तिष्ठत्रूपतश्च श्रिया वृताः ॥ ३९ ॥ शोभंते स्म महाबाहो कमुद्धिद्य तपोयुताः ॥ कल्पादौ कलशे यद्वत्कंजाक्ष व्योम वेधसः ॥ उदकादुत्थितास्तस्मात्सर्वे ते समरूपकाः ॥ ४० ॥ सुकन्या तु ततो दृष्ट्वा भर्तारं देवरूपिणम् ॥ हर्षेण महताविष्टा न च तं वेद भारत ॥ ४१ ॥ समकायाः समवयः समरूपाः समश्रियः ॥ वस्त्रालंकारसदृशान्दृष्ट्वा चिंतां गता चिरम् ॥ ४२ ॥ सा चिंतयित्वा सुचिरं वैद्यदेवाबुवाच ह ॥ बीभत्सोपि मया भर्ता परित्यक्तो न कर्हिचित् ॥ ४३ ॥ भवद्भिरात्मसदृशं कथं[4] त्यक्त्वा वृणे परम् ॥ तस्मात्तमेव भर्तारं प्रयच्छध्वं दिवौकसः ॥ ४४ ॥ तया सबहुमानं तौ प्रांजल्या प्रार्थितौ तदा ॥ देवचिह्नानि स्वान्येव धारयन्तौ सुपूजितौ ॥ ४५ ॥ सुकन्या निपुणं तौ तु सुनिरीक्ष्य च विह्वला ॥ न रजो न निमेषो वै न स्पृशेते धरां पदे ॥ ४६ ॥ अयं च सरजा म्लानो भूमिमाश्रित्य तिष्ठति ॥ निमेषं चैव तस्यैवं ज्ञात्वा वै च्यवनो वृतः ॥४७॥ च्यवने वृते सुकन्यया पुष्पवृष्टिः पपात ह ॥ देवदुंदुभयश्चैव प्रावाद्यंत अनेकशः ॥४८॥ ततस्तु च्यवनस्तुष्टो दिव्यरूपधरस्तदा ॥ उवाच तौ तु सुप्रीत अश्विनौ किं करोमि वाम् ॥ ४९ ॥ भार्या दत्ता कृतं रूपं देवानामपि दुर्लभम् ॥ उपकारं वरिष्ठं यो न करोत्युपकारिणः ॥ ५० ॥ एकविंशत्सगच्छेच्च नरकाणि क्रमेण वै ॥ तस्मादहं वरिष्ठं वै करिष्येऽहममानुषम् ॥५१॥ उपकारं भवद्भ्यां तु प्रीतः कुर्यां सुनिश्चितम् ॥ यज्ञभाग फलं दद्यां

---

[1] तत्त्वज्ञा–इ० पा० । [2] इदम्–इ० पा० । [3] अडभाव आर्षः । [4] कृतम्–इ० पा० ।

यद्देवेष्वपि दुर्लभम् ॥ ५२ ॥ एवमुक्त्वा तु देवेशौ विससर्ज महामुनिः ॥ आजगामाश्रमं पुण्यं सहभार्यो मुदान्वितः ॥ ५३ ॥ अथ शुश्राव शर्यातिश्च्यवनं देवरूपिणम् ॥ जगाम च महातेजा द्रष्टुं मुनिवरं वशी ॥ ५४ ॥ तं दृष्ट्वा प्रणिपत्यादौ प्रतिपूज्य यथार्हतः ॥ सुकन्यां तु ततो दृष्ट्वा प्रणिपत्याभिनंद्य च ॥ ५५ ॥ सस्वजे मूर्ध्नि आघ्राय ततोत्संगं[1] समानयत् ॥ सा[2] तस्याः[3] सस्वजे प्रेम्णा आनन्दाश्रुपरिप्लुता ॥ संस्थाप्य तां मुदा युक्तो नृपतिः सह भार्यया ॥ ५६ ॥ भूयोब्रवीत्सुसंतुष्टं च्यवनस्तं नराधिपम् ॥ संभारं कुरु यज्ञार्थं याजयिष्ये नराधिप ॥ ५७ ॥ एवमुक्तः स नृपतिः प्रणिपत्य महामुनिम् ॥ जगाम स्वपुरं हृष्टो यज्ञार्थं यत्नमाचरत् ॥ ५८ ॥ सप्रेष्यान्प्रेषयन्क्षिप्रं यज्ञार्थे द्रव्यमाहरत् ॥ मंत्रिपुरोहिताचार्यानानयामास सत्वरम् ॥ ५९ ॥ समानीतेषु सर्वेषु तेषु द्रव्येषु भारत ॥ आजगाम विशुद्धात्मा च्यवनः सह भार्यया ॥ ६० ॥ संपूजितश्च शुश्राव महांतं त्यागमौजसम् ॥ अन्यैश्च बहुभिः सार्द्धमत्र्यंगिरसभार्गवैः ॥ ६१ ॥ प्रवर्तिते महायज्ञे यजमाने नृपोत्तमे ॥ ऋत्विक्त्वकर्मनिरते हूयमाने हुताशने ॥ आहूताः स्वागताः सर्वे भागार्थं त्रिदिवालयाः ॥ ६२ ॥ यज्ञभागे प्रवृत्ते तु शास्त्रोक्तेन विधानतः ॥ आगतावश्विनौ तत्र आहूतौ च्यवनेन तु ॥ ६३ ॥ आह्वाने क्रियमाणे तु अश्विभ्यां तु तदा नृप ॥ प्रोवाचेंद्रोऽथ च्यवनं नैतौ भागान्वितौ कुरु ॥ देवानां भिषजावेतौ न भागार्हौ न दैवतौ ॥ ६४ ॥ च्यवनस्त्विदमाहेदं देवौ ह्येतावुभावपि ॥ ममोपकारिणावेतौ दद्मि भागं न संशयः ॥ ६५ ॥ ततो ह्युवाच सक्रोधः स शक्रश्च्यवनं रुषा ॥ विप्रर्षे प्रहरिष्यामि यदि भागं प्रयच्छसि ॥ ६६ ॥ एवमुक्तस्तु विप्रर्षिर्न चोवाचापि किंचन ॥ भागौ ददौ च सोऽश्विभ्यां स्रुवमुद्यम्य मंत्रतः ॥ ६७ ॥ अथ उद्यम्य भिदुरं मोक्तुकामो दिवस्पतिः ॥ स्तंभितश्च्यवनेनाथ सवज्रः स नराधिप ॥ ६८ ॥ स स्तंभयित्वा त्विंद्रं तु भागं दत्त्वाश्विनोर्वशी ॥ समापयामास तदा यज्ञकर्म यथार्थवत् ॥ ६९ ॥ कंजजोऽथाजगामाशु आह च च्यवनं तदा ॥ उत्तंभ्यतामयं लेखो भागश्चास्त्वश्विनोरिह ॥ ७० ॥ तथेंद्रस्तमुवाचेदं च्यवनं प्रीतमानसः ॥ जानामि शक्तिं तपसश्च्यवनेह तवोत्तमाम् ॥ ७१ ॥ ख्यापनार्थं हि तपसस्तव एतत्कृतं मया ॥ अद्यप्रभृति भागोस्तु देवत्वं चाश्विनोस्तथा ॥ ७२ ॥ यस्त्विमां तपसः ख्यातिं त्वदीयां वै पठिष्यति ॥ शृणुयाद्वापि शुद्धात्मा तस्य पुण्यफलं शृणु ॥ ७३ ॥ विरोचनसदो गत्वा गत्वा पुष्पसदस्तथा ॥ कालेथ वामदेवस्य मुंजकेशसदस्तथा ॥ यौवनयुक्तः स क्रीडंस्तिष्ठतीति न संशयः ॥ ७४ ॥ एवमुक्त्वा जगामाशु देवः स्वभवनं वशी ॥ च्यवनोऽपि सभार्यो वै शर्यातिश्चाश्रमं

---

१ सन्धिरार्षः । २ सुकन्या । ३ मातुरित्यर्थः । तस्य इत्यस्य प्रेम्णेत्यनेन सम्बन्धः । स्वस्वजे इत्यनेन तामिति विभक्तिपरिणामः ।

गतः ॥ ७५ ॥ अथापश्यद्विमानाभं भवनं देवनिर्मितम् ॥ शय्यासनवरैर्जुष्टं सर्वकामसमृद्धिमत् ॥ ७६ ॥ उद्यानवा[1]पिभिर्जुष्टं देवेंद्रेण
समाहृतम् ॥ गो[2]खण्डसन्निभं रेजे गृहं तद्भुवि दुर्लभम् ॥ ७७ ॥ सुभूषणानि दिव्यानि रत्नवंति महांति च ॥ अरजांसि च वस्त्राणि दिव्यप्रावरणानि
च ॥ ७८ ॥ दृष्ट्वा तत्सर्वमखिलं सह पत्न्या महामुनिः ॥ मुदं परमिकां लेभे शक्रं च प्रशशंस ह ॥ ७९ ॥ एवमिष्टा तिथिरियं द्वितीया अश्विनो
र्नृप ॥ देवत्वं यज्ञभागं च संप्राप्ताविह भारत ॥ ८० ॥ उपोष्या विधिना येनतं शृणुष्व नराधिप ॥ रूपं सुरूपं यो वांछेद्द्वितीयायां नराधिप ॥८१॥
कार्तिके शुक्लपक्षस्य द्वितीयायां नराधिप ॥ पुष्पाहारो वर्षमेकं भवेत्स नियतात्मवान् ॥ ८२ ॥ कालप्राप्तानि यानि स्युर्हविष्यं कुसमानि तु ॥
भुञ्जीयात्तानि दत्त्वा तु ब्राह्मणेभ्यो नराधिप ॥८३॥ सौवर्णरौप्यपुष्पाणि अथ वा जल[3]जानि च ॥ व्रतांते तस्य संतुष्टौ देवौ त्रिभुवनेऽश्विनौ ॥८४॥
ददतुः कामगं दिव्यं विमानमतितेजसम् ॥ सुचिरं दिवि नारीभिर्लोकेऽसौ रमतेश्विनोः ॥ ८५ ॥ इह चागत्य कल्पांते जातो विप्रः पुरस्कृतः ॥
वेदवेदांगविदुषः सप्तजन्मांतराण्यसौ ॥ ८६ ॥ जातोजातो भवेद्विद्वान्ब्राह्मणोसौ कृते युगे ॥ दाता यज्ञपतिर्वाग्मी आधिव्याधिविवर्जितः ॥ ८७ ॥
पुत्रपौत्रैः परिवृतः सह पत्न्याऽवसच्चिरम् ॥ मध्यदेशे सु[4]नगरे धर्मिष्ठो राज्यभाग्भवेत् ॥ ८८ ॥ इत्येषा कथिता तुभ्यं द्वितीया पुष्पसंज्ञिता ॥ फल
संज्ञा तथान्या स्यात्सुते वै मुञ्जकेशिनि ॥ ८९ ॥ सुष्ठु पुण्या पापहरा विष्टरश्रवसः प्रिया ॥ अशून्यशयना लोके प्रख्याता कुरुनन्दन ॥ ९० ॥
तामुपोष्य नरो राजञ्छ्रद्धाभक्तिपुरस्कृतः ॥ ऋद्धिं वृद्धिं श्रियं वाथ भार्यया सह मोदते ॥ ९१ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहि
तायां ब्राह्मे पर्वणि द्वितीयाकल्पे शर्यात्याख्याने पुष्पद्वितीयावर्णनं नामैकोनविंशोऽध्यायः ॥१९॥छ॥ ॥ शतानीक उवाच ॥ ॥ ब्रूहि मे द्विजशा
र्दूल द्वितीयां फलसंज्ञिताम् ॥ यामुपोष्य नरो योषिद्वियोगं नेह गच्छति ॥१॥ पत्न्या नरो मुनिश्रेष्ठ भार्या च पतिना[5] सह ॥ तामहं श्रोतुमिच्छा
मि विधवा स्त्री न जायते ॥ उपोषितेन येनार्य पत्न्या च सहितो नरः ॥ २ ॥ तन्मे ब्रूहि द्विजश्रेष्ठ श्रेयोऽर्थं नरयोषिताम् ॥ येन मे कौतुकं ब्रह्म
ञ्छ्रुत्वापूर्वं प्रसर्पति ॥ ३ ॥ ॥ सुमन्तुरुवाच ॥ ॥ अशून्यशयनां नाम द्वितीयां शृणु भारत ॥ यामुपोष्य न वैधव्यं स्त्री प्रयाति नराधिप ॥
पत्नीवियुक्तश्च नरो न कदाचित्प्रजायते ॥ ४ ॥ शेते जगत्पतिः कृष्णः श्रिया सार्धं यदा नृप ॥ अशून्यनयना नाम तदा ग्राह्या हि सा
तिथिः ॥ ५ ॥ कृष्णपक्षे द्वितीयायां श्रावणे मासि भारत ॥ इदमुच्चारयेत्स्नातः प्रणम्य जगतः पतिम् ॥ श्रीवत्सधारिणं देवं भक्त्याभ्यर्च्य श्रिया

---

[1] वापीभिरित्यर्थः । [2] आदित्यकलापसमं वा स्वर्गसदृशम् । [3] कांचनानि तु—इ० पा० । [4] तु नगरे—इ० पा० । [5] पत्या ।

सह ॥ ६ ॥ श्रीवत्सधारिञ्छ्रीकांत श्रीवत्स श्रीपतेऽव्यय ॥ गार्हस्थ्यं मा प्रणाशं मे यातु धर्मार्थकामदम् ॥ ७ ॥ गावश्च मा प्रणश्यन्तु मा
प्रणश्यन्तु मे जनाः ॥ ८ ॥ जामयो मा प्रणश्यंतु मत्तो दांपत्यभेदतः ॥ लक्ष्म्या वियुज्येहं देव न कदाचिद्यथा भवान् ॥ ९ ॥ तथा कलत्रसंबन्धो
देव मा मे वियुज्यताम् ॥ लक्ष्म्या न शून्यं वरद यथा ते शयनं सदा ॥ १० ॥ शय्या ममाप्यशून्यास्तु तथा तु मधुसूदन ॥ एवं प्रमाद्य पूजां च
कृत्वा लक्ष्म्यास्तथा हरेः ॥ ११ ॥ फलानि दद्याच्छायायामभीष्टानि जगत्पतिम् ॥ नक्तं[1] प्रणम्यायतने हविर्भुञ्जीत वाग्यतः ॥ १२ ॥ ब्राह्मणाय
द्वितीयेऽह्नि शक्त्या दद्याच्च दक्षिणाम् ॥ १३ ॥ ॥ शतानीक उवाच ॥ ॥ कानि तानि अभीष्टानि केशवस्य फलानि तु ॥ योज्यानि शयने
विप्र देवदेवस्य कथ्यताम् ॥ १४ ॥ किं च दानं द्वितीयेऽह्नि दातव्यं ब्राह्मणस्य तु ॥ भक्तैर्नरैर्द्विजश्रेष्ठ देवदेवस्य शक्तितः ॥ १५ ॥ ॥ सुमन्तु
रुवाच ॥ ॥ यानि तत्र महाबाहो काले संति फलानि तु ॥ मधुराणि सुतीव्राणि न चापि कटुकानि तु ॥ १६ ॥ दातव्यानि नृपश्रेष्ठ स्वश
क्त्या शयने नृप ॥ मधुराणि प्रदत्तानि नरो वल्लभतां व्रजेत् ॥ १७ ॥ योषिच्च कुरुशार्दूल भर्तुर्वल्लभतामियात् ॥ तस्मात्कटुकतीव्राणि स्त्री
लिङ्गानि विवर्जयेत् ॥ १८ ॥ खर्जूरमातुलिङ्गानि श्वेतेन शिरसा सह ॥ फलानि शयने राजन्यज्ञभागहरस्य तु ॥ १९ ॥ देयानि कुरुशार्दूल
स्वशक्त्या मुञ्जकेशिने ॥ एतान्येव तु विप्रस्य गांगेयसहितानि तु ॥ २० ॥ द्वितीयेऽह्नि प्रदेयानि भक्त्या शक्त्या च भारत ॥ वासोदानं तथा
धान्यफलदानसमन्वितम् ॥ गांगेयस्य विशेषेण धान्यदानं प्रचक्षते ॥ २१ ॥ एवं करोति यः सम्यङ्नरो मासचतुष्टयम् ॥ ततो जन्मत्रयं वीर
गृहभङ्गो न जायते ॥ २२ ॥ अशून्यशयनश्चासौ धर्मकामार्थसाधनः ॥ भवत्यव्याहतैश्वर्यः पुरुषो नात्र संशयः ॥ २३ ॥ नारी[2] च राजन्ध
र्मज्ञा व्रतमेतद्यथाविधि ॥ या करोति न सा शोच्या बन्धुवर्गस्य जायते ॥ २४ ॥ वैधव्यं दुर्भगत्वं च भर्तृत्यागं च सत्तम ॥ नाप्नोति जन्म
त्रितयमेतच्चीर्त्वा[3] महाव्रतम् ॥ २५ ॥ अदत्त्वा कटुकानीह फलानि कुरुनन्दन ॥ खर्जूरमातुलिङ्गानि बृहत्फलशिरांसि च ॥ २६ ॥ दत्त्वा द्विजे
भ्यो राजेंद्र मधुराणि पराणि च ॥ तस्मात्स्वशक्त्या यत्तेन देयानि मधुराणि च ॥२७॥ इत्येषा कथिता कृष्णद्विभीया तिथिरुत्तमा ॥ यामुपोष्य
नरो राजन्नृद्धिं वृद्धिं तथा व्रजेत् ॥ २८ ॥ ॥ शतानीक उवाच ॥ ॥ भवता कथितेयं वै द्वितीया तिथिरुत्तमा ॥ अश्विभ्यां द्विजशार्दूल कथम
स्यांजनार्दनः ॥ २९ ॥ संपूज्यः फलसंज्ञायां कथितः पद्मया सह ॥ तदत्र कौतुकं मह्यं सुमहज्जायते द्विज ॥ ३० ॥ सुमंतुरुवाच ॥ ॥ एवमेतन्न

---

[1] नक्षत्रं च प्रणम्याशु—इ० पा० ।
[2] भवति—इ० पा० ।
[3] चरित्वा ।

सन्देहो तथा वदसि भारत ॥ अश्विनोर्वै तिथिरियं किं तु वाक्यं निबोध मे ॥ ३१ ॥ अशून्यशयना दत्ता विष्णोरमिततेजसः[1] ॥ अश्विभ्यां कुरुशार्दूल प्रीतये मुंजकेशिनः ॥ ३२ ॥ तावेव कुरुशार्दूल पूज्येतेऽत्र महीपते ॥ नासत्यौ भगवान्विष्णुर्दत्तश्च श्रीर्विभाव्यते ॥ ३३ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि द्वितीयाकल्पसमाप्तौ विंशोध्यायः ॥ २० ॥ छ ॥ ॥ सुमंतुरुवाच ॥ ॥ पतिव्रता पतिप्राणा पतिशुश्रूषणे रता ॥ एवंविधापि या प्रोक्ता शुचिः संशोभना सती ॥ १ ॥ सोपवासा तृतीयां तु लवणं[2] परिवर्जयेत् ॥ सा गृह्णाति च वै भक्त्या व्रतमामरणांतिकम् ॥ २ ॥ गौरी ददाति संतुष्टा रूपं सौभाग्यमेव च ॥ लावण्यं ललितं हृद्यं श्लाघ्यं पुसां मनोरमम् ॥ ३ ॥ पुंसो मनोरमा नारी भर्ता नार्या मनोरमः ॥ गौरीव्रतेन भवति राजँल्लवणवर्जनात् ॥ ४ ॥ इदं व्रतं प्रति विभो धर्मराजस्य शृण्वतः ॥ उमया च पुरा प्रोक्तं यद्वाक्यं तन्निबोध मे ॥ ५ ॥ मया व्रतमिदं सृष्टं सौभाग्यकरणं नृणाम् ॥ मर्त्ये तु नियता नारी व्रतमेतच्चरिष्यति ॥ सह भर्त्रा समोदेत यथा भर्ता हरो मम ॥ ६ ॥ याच कन्या न भर्तारं विंदते शोभना सती ॥ सा त्विदं व्रतमुद्दिश्य भवेदक्षारभोजना ॥ मच्चित्ता मन्मनाः कुर्यान्मद्भक्ता मत्परिग्रहा ॥ ७ ॥ गौरीं संस्थाप्य सौवर्णीं गंधालंकारभूषिताम् ॥ वस्त्रालंकारसंवीतां पुष्पमंडलमंडिताम् ॥ ८ ॥ लवणं गुडं घृतं तैलं देव्यै शक्त्या निवेदयेत् ॥ कटुखण्डं[3] जीरकं च पत्रशाकं च भारत ॥ ९ ॥ गुडघृष्टांस्तथापूपान्खडवेष्टांस्तथा नृप ॥ ब्राह्मणे व्रतसंपन्ने प्रदद्यात्सुबहुश्रुते ॥ १० ॥ शुक्लपक्षे सदा देया यथा शक्त्या हिरण्मयी ॥ धनहीने तु भक्त्या[4] च मधुवृक्षमयी नृप ॥ ११ ॥ अर्च्यां नित्यं संनिधानात्तत्र गौरी न संशयः ॥ अक्षारलवणं रात्रौ भुंक्ते चैव सुवाग्यता॥१२॥गौरी सन्निहिता नित्यं भूभौ प्रस्तरशायिनी[5] ॥ एवं नियमयुक्तस्य[6] देव्या यत्समुदाहृतम् ॥ १३ ॥ तच्छृणुष्व महाबाहो कथ्यमानं महाफलम् ॥ भर्तारं तु लभेत्कन्या यं वांछति मनोनुगम् ॥ १४ ॥ सुचिरं सह वै भर्त्रा क्रीडयित्वा[7] इहैव सा ॥ संततिं च प्रतिष्ठाप्य सह तेनैव गच्छति ॥ १५ ॥ हेलिलोकं चन्द्रलोकं लोकं चित्रशिखंडिनः ॥ गत्वा याति सदो राजन्वामदेवस्य भारत ॥ १६ ॥ विधवा तु यदा राजन्देव्या व्रतपरायणा[8] ॥ भर्तारं नियता नित्यं सदार्चनपरायणा ॥ १७ ॥ इह चोत्सृज्य देहं स्वं दृष्ट्वा हरिपुरे प्रियम् ॥ आक्षिप्य यमदूतेभ्यः सह भर्त्रा रमेद्दिवि ॥ १८ ॥ वर्षकोटिं दशगुणां रमित्वा सा इहागता ॥ भर्त्रा सहैव पूर्वोक्तं

---

१ अतुलतेजसः–इ० पा० । २ अशनम्–इ० पा० । ३ तथा खंडम्–क० पा० । ४ शक्त्या–इ० पा० । ५ स्वास्तरशायिनी–इ० पा० । ६ एवं नियमयुगिति विशेषणसामर्थ्याद्व्रतामित्यध्याहार्य्यम्, व्रतस्य देव्या यन्महाफलं सुमुदाहृतं तच्छृण्वित्यर्थः । एवं नियमयुक्तस्येत्येकं वा पदम्, अत्रापि पक्षे व्रतस्यैवेदं विशेषणम् । ७ क्रीडित्वा । ८ नीतिपरायणा–इ० पा० ।

लभते फलमीप्सितम् ॥ १९ ॥ इन्द्राण्यापि व्रतमिदं पुत्रार्थिन्या नराधिप ॥ लब्धः पुत्रो व्रतस्यांते जयंतो नाम नामतः ॥२०॥ अरुंधत्या तथा
चीर्णं वशिष्ठं प्रति कामतः ॥ दृश्यते दिवि चाद्यापि वशिष्ठस्य समीपतः ॥ २१ ॥ रोहिण्या लवणत्यागात्सपत्नीगणमर्दनम् ॥ लब्धं देव्याः
प्रसादेन सौभाग्यमचलं दिवि ॥ २२ ॥ इत्येषा तिथिरित्येव तृतीया लोकपूजिता ॥ सदा विशेषतः पुण्या वैशाखे मासि या भवेत् ॥ २३ ॥
पुण्या भाद्रपदे मासि माघेप्येवं न संशयः ॥ माघे भाद्रपदे चापि स्त्रीणां धन्यां[1] प्रचक्षते ॥ २४ ॥ साधारणी तु वैशाखे सर्वलोकस्य भारत ॥
माघमासे तृतीयायां गुडस्य लवणस्य च ॥ दानं श्रेयस्करं राजन्स्त्रीणां[2] च पुरुषस्य च ॥२५॥ गुडेन तुष्यते दत्तो लवणेन तु विश्वभूः ॥ गुडपूपा
स्तु दातव्या मासि भाद्रपदे तथा ॥ २६ ॥ तृतीयायां तु माघस्य वामदेवस्य[3] प्रीतये ॥ वारिदानं प्रशस्तं स्यान्मोदकानां च भारत ॥ २७ ॥
वैशाखे मासि राजेंद्र तृतीया चन्दनस्य च ॥ वारिणा तुष्यते वेधा मोदकैर्भीम एव हि ॥ दानात्तु चन्दनस्येह कंजजो नात्र संशयः ॥ २८ ॥ या
त्वेषा कुरुशार्दूल वैशाखे मासि वै तिथिः ॥ तृतीया साऽक्षया लोके गीर्वाणैरभिनंदिता ॥ २९ ॥ आगतेयं महाबाहो भूरि चंद्रं वसुव्रता ॥ कलधौतं
तथान्नं च घृतं चापि विशेषतः॥यद्यद्दत्तं[4] त्वक्षयं स्यात्तेनेयमक्षया स्मृता॥३०॥यत्किंचिद्दीयते दानं स्वल्पं वा यदि वा बहु॥तत्सर्वमक्षयं स्याद्वै तेनेय
मक्षया स्मृता॥३१॥योऽस्यां ददाति करकान्वारिबीजसमन्वितान् ॥ स याति पुरुषो वीर लोकं वै हेममालिनः॥३२॥इत्येषा कथिता वीर तृतीया
तिथिरुत्तमा॥यामुपोष्य नरो राजन्नृद्धिं वृद्धिं श्रियं भजेत्॥३३॥ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां ब्राह्मे पर्वणि तृतीयाकल्पविधिव
र्णनं नामैकविंशोऽध्यायः ॥२१॥ ॥ सुमंतुरुवाच॥ ॥ चतुर्थ्यां तु सदा राजन्निराहारव्रतान्वितः॥दत्त्वा तिलान्नं विप्रस्य स्वयं भुंक्ते तिलौदनम्॥१॥
वर्षद्वयेसमाप्तिर्हि व्रतस्य तु यदा भवेत्॥विनायकस्तस्य तुष्टो ददाति फलमीहितम्[5] ॥२॥ याति भाग्यनिवासं हि क्रीडते विभवैः सह॥ इह चागत्य
पुण्यांते दिव्यो दिव्यवपुर्यशाः ॥३॥ मतिमान्धृतिमान्वाग्मी भाग्यवान्कामकारवान्[6] ॥ असाध्यान्यपि साध्नोह क्षणादेव महांत्यपि ॥४॥ हस्त्यश्वर[7]
थसंपन्नः पत्नीपुत्रसहायवान् ॥ राजा भवति दीर्घायुः सप्तजन्मान्यसौ नृप ॥ एतद्ददाति संतुष्टो विघ्नहंर्ता[8] विनायकः ॥ ५ ॥ ॥ शतानीक उवाच ॥
विघ्नः कस्य कृतस्तेन येन विघ्नविनायकः ॥ एतद्वदस्व विघ्नेशविघ्नकारणमद्य मे ॥ ६ ॥ ॥ सुमंरुवाच ॥ ॥ कौमारे लक्षणे पुंसां स्त्रीणां च

---

१ धर्मम्–इ० पा० । २ सर्वकामफलप्रदम्–इ० पा० । ३ सर्वकामार्थसिद्धये–इ० पा० । ४ अस्यां दत्तम्–इ० पा० । ५ ईप्सितम्–इ० पा० । ६ लभते यशः–इ० पा० । ७ हस्त्यन्नस्वार्थसंपन्नः–इ० पा० ।
८ विघ्नहर्ता–इ० पा० ।

सुकृते कृते ॥ विघ्नं चकार विघ्नेशो गांगेयस्य विनायकः॥७॥ तं तु विघ्नं विदित्वासौ कार्त्तिकेयो रुषान्वितः ॥ उत्कृष्य दंतं तस्यास्याद्धंतुं तं च
समुद्यतः ॥ ८ ॥ निवार्यापृच्छद्देवेशो रोषः कार्यः कुतस्त्वया ॥ तं चाचख्यौ स पित्रे वै कृतं पूरुषलक्षणम् ॥ तत्र विघ्नकृते मह्यं योषिता न च
लक्षणम् ॥ ९ ॥ अथोवाच महादेवः प्रहसन्त्स्वसुतं किल ॥ मम किं लक्षणं पुत्र पश्यसे त्वं वदस्व मे ॥ १० ॥ स चोवाच करे तुभ्यं कपालं
द्विजलक्षितम् ॥ अविचारेण संस्थाप्यं कपाली तेन चोच्यसे ॥ स तल्लक्षणमादाय समुद्रे प्राक्षिपद्रुषा ॥ ११ ॥ अथ देवसमाजे वै प्रवृत्ते ब्रह्मरु
द्रयोः ॥ अहं ज्यायानहं ज्यायान्विवादोऽभूत्तयोर्द्वयोः ॥ तव संभूत्यभिज्ञोऽस्ति मां तु वेद न कश्चन ॥ १२ ॥ एवं शिवेऽति ब्रुवति ब्रह्मणः पंचमं
शिरः ॥ मुक्ताट्टहासं प्रोवाच त्वामहं वेदिता भव॥१३॥एवं ब्रुवत्तु रुद्रेण ब्राह्मं हयशिरो महत् ॥ नखाग्रेण निकृत्तं च तस्यैव च करे स्थितम्॥१४॥
करस्थेनैव तेनासावागच्छद्यत्र वै हरिः ॥ तपस्तेपे तदा मेरौ तत्रासौ भगवान्वशी ॥१५॥ कृत्ते हयशिरे तस्मिन्स्थानात्तस्मात्तु ब्रह्मणः॥ रोषाद्विनिः
सृतस्त्वन्यः पुरुषः श्वेतकुंडली ॥ १६ ॥ कवची सशिरस्कश्च सशरः सशरासनः ॥ अनिर्देश्यवपुः स्रग्वी किं करोमि स चाब्रवीत् ॥ १७ ॥ अथो
वाच रुषा ब्रह्मा हन्यतां स सुदुर्मतिः ॥ स तु मार्गेण रुद्रस्य आगच्छद्रोषतो द्रुतम् ॥ १८ ॥ रुद्रोपि विष्णुतेजोभिः प्रविष्टः स त्वधिष्ठितः ॥
स प्रविश्य तदापश्यत्तपंतं चोत्तमं तपः ॥ हरो नारायणं देवं वैकुंठमपराजितम् ॥ १९ ॥ हरं दृष्ट्वाथ संप्राप्तं कार्यं चास्य विचिंत्य च ॥ उवाच
शूलिनं देवो भिन्धि शूलेन मे भुजम् ॥२०॥ स बिभेद महातेजा भुजं शूलेन तं हरः ॥ २१ ॥ शूलभेदादसृक्चोर्ध्वं जगामावृत्य रोदसी ॥ विनि
वृत्य ततः पश्चात्कपाले निपपात ह ॥ २२ ॥ असृक्कपाले पतितं प्रदेशिन्या व्यवर्द्धयत् ॥ यदा हि विनिवृत्तिः स्याद्देवस्य रुधिरं प्रति ॥ २३ ॥
तदा तु व्यसृजत्तोयं स कृत्वा वारुणीं तनुम् ॥ तोये प्रवृत्तेऽसृग्भूते कपाले यत्र तच्छिरः ॥ २४ ॥ कपाले तु प्रदेशिन्या रुद्रोऽसौ रुधिरेऽसृजत्
आमुक्तकवचं रक्तं रक्तकुंडलिनं नरम् ॥ २५ ॥ अथोवाच भवं देवं किं करोमीति मानद ॥ असावपि ससर्जाथ श्वेतकुंडनिनं नरम् ॥ २६ ॥
तावुभौ समयुध्येतां धनुष्प्रवरधारिणौ ॥ यथा राजन्बलीयांसौ कुजकेतू युगात्यये ॥२७॥ तयोस्तु युध्यतोरेवं संवर्तश्चाधिको गतः ॥ न चादृश्यत
विजय एकस्यापि तदा तयोः ॥ २८ ॥ अथांतरिक्षे तौ दृष्ट्वा वागुवाचाशरीरिणी ॥ अवतारोऽथ भविता युवयोर्हि मया सह ॥ २९ ॥ भारापनोदः
कर्तव्यः पृथिव्यर्थे सुरैः सह ॥ तदाश्चर्यो हि भविता देवकार्यार्थसिद्धये ॥ ३० ॥ भूलोकभावं निर्धूय भूयो गंता सुरालयम् ॥ एवमुक्त्वा तु

वैकुंठो ददावेकं रवेस्तदा ॥ ३१ ॥ श्वेतकुंडलिनं हस्तं[1] तं जग्राह रविर्मुदा ॥ इंद्रस्यापि ततः पश्चाद्रक्तकुंडलिनं ददौ ॥३२॥ जग्राह च मुदा युक्त इंद्रः
स्वं च पुरं ययौ ॥ गतौ रवींद्रौ प्रगृह्य पुरुषौ क्रोधसंभवौ ॥३३॥ अथोवाच तदा रुद्रं देवः कमलसंस्थितः ॥ गच्छ त्वमपि कापाले कपालव्रत च
र्यया॥अवतारो व्रतस्यास्य मर्त्यलोके भविष्यति ॥ ३४ ॥ ये च व्रतं त्वदीयं वै धारयिष्यंति मानवाः ॥ न तेषां दुर्लभं किंचिद्भवितेह परत्र च॥
॥ ३५ ॥ एवं संलप्य बहुशः सुमुखं प्रतिनंद्य च ॥ आहूय च समुद्रं स प्रत्युवाचाविचारयन् ॥ ३६ ॥ कुरुष्वाभरणं[2] स्त्रीणां लक्षणं यद्विलक्षणम्॥
कार्त्तिकेयेन यत्प्रोक्तं तद्वदस्वाविचारयन् ॥३७॥ स चाह मम नाम्नेदं भवेत्पुरुषलक्षणम् ॥ देवेन तत्प्रतिज्ञातमेवमेतद्भविष्यति ॥३८॥ कार्त्तिकेयेन
यत्प्रोक्तं तद्वदस्वाविचारयन् ॥ ३९॥ प्रयच्छास्य विषाणं वै निष्कृष्टं यत्त्वयाऽधुना ॥ अवश्यमेव तद्भूतं भवितव्यं तु कस्यचित् ॥ ४० ॥
ऋते विनायकं तद्वै दैवयोगान्न कामतः ॥ गृहाण एतत्सामुद्रं यत्त्वया परिकीर्तितम् ॥ ४१ ॥ स्त्रीपुंसोर्लक्षणं श्रेष्ठं सामुद्रमिति विश्रुतम् ॥
इमं च सविषाणं वै कुरु देवविनायकम् ॥ ४२॥ अथोवाच च देवेशं बाहुलेयः समत्सरम् ॥ विषाणं दद्मि चास्याहं तव वाक्यान्न संशयः ॥ ४३ ॥
यदा त्वयं विषाणं च मुक्त्वा तु विचरिष्यति॥ तदा विषाणमुक्तः सन्भस्म एतं करिष्यति॥४४॥ एवमस्त्विति तं चोक्त्वा विषाणं तत्करे ददौ॥विना
यकस्य देवेशः कार्तिकेयमते स्थितः ॥ ४५ ॥ सविषाणकरोद्यापि दृश्यते प्रतिमा नृप ॥ भीमसूनोर्महाबाहोर्विघ्नं कर्तुं महात्मनः॥४६॥ एतद्रहस्यं
देवानां मया ते समुदाहृतम् ॥ यत्र देवो न वै वेद देवानां भुवि दुर्लभम् ॥४७॥ मया प्रसन्नेन तव गुह्यमेतदुदाहृतम् ॥ कथितं तिथिसंयोगे विनाय
ककथामृतम् ॥ ४८ ॥ य इदं श्रावयेद्विद्वान्ब्राह्मणान्वेदपारगान् ॥ क्षत्रियांश्च स्ववृत्तिस्थान्विट्शूद्रांश्च गुणान्वितान् ॥ ४९ ॥ न तस्य दुर्लभं किंचि
दिह चामुत्र विद्यते ॥ न च दुर्गतिमाप्नोति न च याति पराभवम् ॥५०॥ निर्विघ्नं सर्वकार्याणि साधयेन्नात्र संशयः॥ऋद्धिं वृद्धिं श्रियं चापि विंदेत
भरतोत्तम॥५१॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि चतुर्थीकल्पवर्णनं नाम द्वाविंशोऽध्यायः ॥२२॥छ॥ ॥ शता
नीक उवाच ॥ ॥ केनायं भीमजो विप्र प्रमथाधिपतिः कृतः ॥ भर्तृत्वे चापि विघ्नानामधिकारी कथं बभौ ॥ १ ॥ ॥ सुमंतुरुवाच ॥ ॥
साधु पृष्टोऽस्मि राजेन्द्र यदर्थं विघ्नकारकः ॥ यैर्वापि विघ्नकरणैर्नियुक्तोऽपि विनायकः ॥ तत्ते वच्मि महाबाहो शृणुष्वैकमनाधुना ॥२ ॥ आद्ये
कृतयुगे वीर प्रजासर्गमवाप ह ॥ दृष्ट्वा कर्माणि सिद्धानि विना विघ्नेन भारत ॥ ३ ॥ अगतक्लेशां प्रजां दृष्ट्वा गर्वितां कृत्स्नशो नृप ॥ बहुश

---

[1] दृष्ट्वा–इ० पा० । [2] स्त्रीणां च पुरुषाणां च–इ० पा० ।

श्चिंतयित्वा तु इदं कर्म महीपते ॥ ४ ॥ विनायकः समृद्ध्यर्थं प्रजानां विनियोजितः ॥ गणानां चाधिपत्ये च भीमः कंजजसात्त्वतैः ॥ ततोपसृष्टो यस्तस्य लक्षणानि निबोध मे ॥ ५ ॥ स्वप्नेवगाहतेऽत्यर्थं जलं मुडांश्च पश्यति ॥ काषायवाससश्चैव क्रव्यादांश्चाधिरोहति ॥ ६ ॥ अंत्यजैर्गर्दभैरुष्ट्रैः सहैकत्रावतिष्ठते ॥ व्रजमानस्तथात्मानं मन्यतेऽनुगतं परैः ॥७॥ विमना विफलारंभः संसीदत्यनिमित्ततः॥करदारूढमात्मानमंभसोंतरंगं तथा ॥ ८ ॥ पत्तिभिश्चावृतं यांतं संगमनांतिकं नृप ॥ पश्यते कुरुशार्दूल स्वप्नांते नात्र सशयः ॥ ९ ॥ चित्तं च विकृताकारं करवीरविभूषितम् ॥ तेनोपसृष्टो लभतेन राज्यं पौर्वसंभवम् ॥ १० ॥ कुमारी न च भर्तारमपत्यं गर्भिणी तथा ॥ आचार्यत्वं श्रोत्रियश्च शिष्याश्चाध्ययनं तथा ॥ वणिग्लाभं च नाप्नोति कृषिं चैव कृषीवलः ॥ ११ ॥ स्नपनं तस्य कर्तव्यं पुण्येऽहनि[1] महीपते ॥ गौरसर्षपकल्केन साज्येनोत्सादितेन तु ॥ १२ ॥ शुक्लपक्षे चतुर्थ्यां तु वासरे धिषणस्य च ॥ तिष्ये च वीरनक्षत्रे तस्यैव पुरतो नृप ॥ १३ ॥ सर्वौषधैः सर्वगन्धैर्विलिप्तशिरसस्तथा ॥ भद्रासनोपविष्टस्य स्वस्ति वाच्य द्विजाञ्छुभान् ॥ १४ ॥ व्योमकेशं तु संपूज्य पार्वतीं भीमजं तथा ॥ कृष्णं सपितरं तात पवमानं[2] सितं तथा ॥ १५ ॥ धिषणं चेन्दुपुत्रं च कौणं[3] केतुं च भारत ॥ विधुंतुदं बाहुलेयं नंदकस्य च धारिणम् ॥ १६ ॥ अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्ध्रदात् ॥ मृत्तिकां रोचनां गंधान्गुग्गुलं चाप्सु निक्षिपेत्॥१७॥ यदाहृतं ह्येकवर्णैश्चतुर्भिः कलशैर्ह्रदात् ॥ चर्मण्यानडुहे रक्ते स्थाप्यं भद्रासनं तथा॥ ॥१८॥ सहस्राक्षं शतधारमृषिभिः[4] पावनं कृतम् ॥ तेन त्वामभिषिंचामि पावमान्यः पुनंतु ते ॥१९॥ भगं ते वरुणो राजा भगं सूर्यो बृहस्पतिः॥ भगमिन्द्रश्च वायुश्च भगं सप्तर्षयो ददुः ॥ २० ॥ यत्ते केशेषु दौर्भाग्यं सीमंते यच्च मूर्धनि ॥ ललाटे कर्णयोरक्ष्णोरापस्तद्घ्नंतु ते सदा ॥ ॥ २१ ॥ स्नातस्य सार्षपं तैलं स्रुवेणौदुंबरेण तु ॥ जुहुयान्मूर्धनि कुशान्सव्येन परिगृह्य तु ॥२२॥ मितश्च संमितश्चैव तथा च शालकंटकः॥ कूष्मांण्डो राजश्रेष्ठास्तेऽग्नयः स्वाहासमन्विताः ॥२३॥ नामभिर्बलिमंत्रैश्च नमस्कारसमन्वितैः ॥ दद्याच्चतुष्पथे शूर्पे कुशानास्तीर्य सर्वतः ॥२४॥ कृताकृतांस्तंडुलांश्च पललौदनमेव च ॥ मत्स्यान्पक्वांस्तथैवामान्मांसमेतावदेव तु ॥ २५ ॥ पुष्पं चित्रं सगंधं च सुरां च त्रिविधामपि ॥ मूलकं पूरिकाः पूपांस्तथैवोंडेरिकास्रजम् ॥ दधिपायसमन्नं च गुडवेष्टान्समोदकान्॥२६॥ विनायकस्य जननीमुपतिष्ठेत्ततोंऽबिकाम् ॥ दूर्वासर्षपपुष्पाणां दत्त्वा पुष्पांजलित्रयम्॥२७॥ रूपं देहि यशो देहि भगं भगवति देहि मे॥ पुत्रान्देहि धनं देहि सर्वान्कामांश्च देहि मे॥ अचलां बुद्धिं मे देहि

---

[1] आह्नि विधिपूर्वकम्–इ० पा०। [2] अब्जमानम्–इ० पा०। [3] कोणलक्ष्यं च–इ० पा०। [4] सूरिभिः पावनं स्मृतम्–इ० पा०।

धरायां ख्यातिमेव च॥२८॥ततः शुक्लांबरधरः शुक्लमाल्यानुलेपनः॥भोजयेद्ब्राह्मणान्दद्याद्वस्त्रयुग्मं गुरोरपि॥२९॥एवं विनायकं पूज्य ग्रहांश्चैव विधान
तः ॥ कर्मणां फलमाप्नोति श्रियं प्राप्नोत्यनुत्तमाम्॥३०॥आदित्यस्य सदा पूजां तिलकं स्वामिनस्तथा ॥ विनायकपतेश्चैव सर्वसिद्धिमवाप्नुयात्॥
॥३१॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि चतुर्थीकल्पवर्णनं नाम त्रयोविंशोऽध्यायः॥२३॥ ॥शतानीक उवाच॥ ॥
नराणां योषितां चैव लक्षणानि महामते ॥ प्रोक्तानि यानि विप्रेन्द्र व्योमकेशस्य सूनुना ॥ १ ॥ क्रुद्धेन यानि क्षिप्तानि ईश्वरेण महोदधौ ॥ कृष्ण
स्य वचनाद्भूयः समुद्रेणार्पितानि वै ॥२॥ अर्पितानि ततस्तस्य तेन प्राप्तानि वै कथम् ॥ बाहुलेयेन विप्रेन्द्र तानि मे वद सुव्रत ॥ ३ ॥ ॥ सुमन्तु
रुवाच ॥ ॥ यथा गुहेन राजेन्द्र स्त्रीपुंसां लक्षणानि वै ॥ प्रोक्तानि कुरुशार्दूल तथा ते कथयामि वै ॥ ४ ॥ शक्तिपाताद्धते क्रौंचे व्योम
केशस्य सूनुना ॥ ब्रह्मा तुष्टोऽब्रवीदेनं वरं वरय मेऽनघ ॥ ५ ॥ असावपि महातेजाः प्रणम्य शिरसा विभुम् ॥ पितामहं बभाषेदं लक्षणं ब्रूहि मे
विभो ॥ ६ ॥ नराणां युवतीनां च कौतुकं परमं मम ॥ यन्मयोक्तं पुरा देव प्रक्षिप्तं लवणार्णवे ॥ ७ ॥ मत्पित्रा देवदेवेश सक्रोधेन पुरा तथा ॥
प्राप्तं च विस्मृतं भूयस्तन्मे ब्रूहि ह्यशेषतः ॥ ८ ॥ ॥ ब्रह्मोवाच ॥ ॥ साधु पृष्टोऽस्मि देवेश भीमस्यानन्दवर्धन ॥ लक्षणानि निबोध त्वं
पुरुषाणामशेषतः ॥ अधमोत्तममध्यानि यानि प्राप पयोनिधिः ॥ ९ ॥ शिवेहनि सुनक्षत्रे ग्रहे सौम्ये शुभे रवौ ॥ पूर्वाह्णे मङ्गलैर्युक्ते परीक्षेत
विचक्षणः ॥ १० ॥ प्रमाणं संहतिं छायां गतिं सर्वांगलक्षणम् ॥ दन्तकेशनखश्मश्रु एतत्सर्वं विचक्षणः ॥ ११ ॥ पूर्वमायुः परीक्षेत पश्चाल्लक्षण
मादिशेत् ॥ क्षीणे ह्यायुषि मर्त्यानां लक्षणैः किं प्रयोजनम् ॥ १२ ॥ जघन्यो नवतिः प्रोक्तो मध्यमस्तु शतांगुलः ॥ अष्टोत्तरशतं यस्य
उत्तमं तस्य लक्षणम् ॥ १३ ॥ प्रमाणलक्षणं प्रोक्तं समुद्रेण शुभाशुभम् ॥ यन्मे पुरा देववर मया वै कथितं तव ॥ अतः परं प्रवक्ष्यामि देहाव
यवलक्षणम् ॥ १४ ॥ पादैः [1]समांसकैः स्निग्धै रक्तैः सौम्यैः सुशोभनैः ॥ उन्नतैः स्वेदरहितैः शिराहीनैश्च पार्थिवः ॥ १५ ॥ यस्य पादतले रेखा
सांकुशेव प्रकाशते ॥ सततं हि सुखं तस्य पुरुषस्य न संशयः ॥ १६ ॥ अस्वेदनौ मृदुतलौ कमलोदरसन्निभौ ॥ [2]श्लिष्टांगुली ताम्रनखौ
सुपार्ष्णी[3] व्योमकेशज ॥ १७ ॥ उष्णौ शिराविरहितौ गूढगुल्फौ च भीमज ॥ कूर्मोन्नतौ च चरणौ प्रख्यातौ पार्थिवस्य तु ॥ १८ ॥ शूर्पाकृती
महाबाहो रूक्षौ श्वेतनखौ तथा ॥ वक्रौ शिरासन्ततौ च संशुष्कौ विरलांगुली ॥ १९ ॥ दारिद्र्यदुःखदौ ज्ञेयौ चरणौ भीमनन्दन ॥ ब्रह्मघ्नौ

---

[1] समांसलैः–इ० पा० । [2] स्निग्धांगुली–इ० पा० । [3] पादौ वै–इ० पा० ।

देव[1]शार्दूल पक्कमृत्सदृशौ पदौ ॥ २० ॥ पीतावगम्यानिरतौ कृष्णौ पानरतौ सदा ॥ अभक्ष्यभक्षणे श्वेतौ ज्ञेयौ सेनाधिपोत्तम ॥ ॥ २१ ॥ अंगुष्टौ पृथुलौ येषां ते नरा भाग्यवर्जिताः ॥ क्लिश्यन्ते विकृतांगुष्ठास्ते नराः पादगामिनः ॥ २२ ॥ चिपिटैर्विकृतैर्भग्नैरंगुष्ठै रतिनिन्दिताः ॥ वक्रैर्भग्नैस्तथा ह्रस्वैरंगुष्ठैः क्लेशभागिनः ॥ २३ ॥ शूर्पाकारैश्च विकृतैर्भग्नैर्वक्रैः शिराततैः ॥ सस्वेदैः पाण्डुरूक्षैश्च चरणैरतिनिन्दिताः ॥ २४ ॥ यस्य प्रदेशिनी दीर्घा अंगुष्ठं या अतिक्रमेत् ॥ स्त्रीभोगं लभते नित्यं पुरुषो नात्र संशयः ॥ कनिष्ठायां तु दीर्घायां सुवर्णस्य तु भागिनः ॥ २५ ॥ चिपिटा विरलाः शुष्का यस्यांगुल्यो [3]भवन्ति वै ॥ सभवेद्दुःखितो नित्यं धनहीनश्च वै[2] गुह ॥ २६ ॥ श्वेतैर्नखैर्विरूक्षैश्च पुरुषा दुःखजीविनः ॥ कुशीलाः कुनखैर्ज्ञेयाः कामभोगविवर्जिताः ॥ विकृतैः स्फुटितैरूक्षैर्नखैर्दारिद्र्यभागिनः ॥ २७ ॥ ब्रह्महत्यां च कुर्वन्ति पुरुषा हरितैर्नखैः ॥ बन्धुभिश्चवियुज्यन्ते कुलक्षयकराश्च ते ॥ २८ ॥ इन्द्रगोपकसंकाशैर्नखैर्नृपतयः स्मृताः ॥ शंखावर्तप्रतीकाशैर्नखैर्भवति पार्थिवः ॥ २९ ॥ ताम्रैर्नखैस्तथैश्वर्यं धन्याः पद्मनखा नराः ॥ रक्तैर्नखैस्तथैश्वर्यं पुष्पितैः सुभगो भवेत् ॥ सूक्ष्मैरुपचितैस्ताम्रैर्नखैर्नृपतयः स्मृताः ॥ ३० ॥ रोमशाभ्यां च जंघाभ्यां दुःखदारिद्र्यभागिनः ॥ बन्धनं ह्रस्वजंघानामैश्वर्यं चैव निर्दिशेत् ॥ ३१ ॥ मृगजंघाश्च राजानो जायन्ते नात्र संशयः ॥ दीर्घजंघाः स्थूलजंघा नित्यं भाग्यविवर्जिताः ॥ ३२ ॥ शृगालजंघाः पुरुषा नित्यं भाग्यविवर्जिताः ॥ काकजंघा नरा ये तु भवेयुर्दुःखभागिनः ॥ ३३ ॥ पीनं[4]जंघास्तथैश्वर्यं प्राप्नुवन्ति न संशयः ॥ सिंहव्याघ्रसमा जंघा धनिनः परिकीर्तिताः ॥ ३४ ॥ पार्थिवानां भवेद्रोम चैकैकं रोमकूपके ॥ पंडितश्रोत्रियाणां च द्वेद्वे ज्ञेये महामते ॥ ३५ ॥ त्रिभिस्त्रिभिस्तथा निःस्वा मानवा दुःखभागिनः ॥ केशाश्चैव महाबाहो निन्दिता पूजितास्तथा ॥ ३६ ॥ निर्मांसजानुर्म्रियते प्रवासे शिव[5]नन्दन ॥ ३७ ॥ सौभाग्यमल्पैः कथितं दारिद्र्यं विकटैस्तथा ॥ निम्नैः स्वस्त्रीजिता ज्ञेयाः समांसै राज्यभागिनः ॥ ३८ ॥ हंस[6]भासशुकानां च तुल्या यस्य गतिर्भवेत् ॥ स भवेत्पार्थिवः पूज्यः[7] समुद्रवचनं यथा ॥ ३९ ॥ अन्येषामपि शस्तानां पक्षिणां च शुभा गतिः ॥ वृषसिंहगजेन्द्राणां गति[8]र्भोगविवर्धिनी ॥ ४० ॥ जलोर्मिसदृशी या च काकोलूकसमा च या ॥ गतिर्द्रव्यविहीनानां दुःखशोकभयंकरा ॥ ४१ ॥ श्वानोष्ट्रमहिषाणां खर[9]सूकरयोस्तथा ॥ गतिर्मेषसमा

---

[1] नृपशार्दूल–इ० पा० । [2] नित्यशः–इ० पा० । [3] भवंति नृपसत्तम–इ० पा० ! [4] मीनजंघा–इ० पा० । [5] दांडनंदन–इ०, कुरुनंदन–इ० चपा० । [6] हंसभासशिखंडीनाम्–इ० पा० । [7] पृथ्व्याम्–इ० पा० । [8] भाग्यविवर्द्धिनी–इ० पा० । [9] खड्गशूकरयोस्तथा–इ० पा० ।

येषां ते नरा भाग्यवर्जिताः ॥ ४२ ॥

॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि चतुर्थीकल्पे पुरुषलक्षणवर्णनं नाम चतुर्विंशोध्यायः ॥ २४ ॥ छ ॥

॥ ब्रह्मोवाच ॥

॥ दक्षिणावर्तलिंगश्च नरो वै पुत्रमान्भवेत् ॥ वामावर्ते तथा लिंगे नरः कन्यां प्रसूयते ॥ १ ॥ स्थूलैः शिरालैर्विषमैर्लिंगैर्दारिद्र्यमादिशेत् ॥ ऋजुभिर्वर्तुलाकारैः पुरुषाः पुत्रभागिनः ॥ २ ॥ निम्नपादोपविष्टस्य भूमिं स्पृशति मेहनः ॥ दुःखितं तं विजानीयात्पुरुषं नात्र संशयः ॥ ३ ॥ भूमौ पादोपविष्टस्य गुल्फौ स्पृशति मेहनः ॥ ईश्वरं तं विजानीयात्प्रमदानां च वल्लभम्[1] ॥ ४ ॥ सिंहव्याघ्रसमो यस्य ह्रस्वो भवति मेहनः ॥ भोगवान्स तु विज्ञेयोऽशेषभोगसमन्वितः ॥ ५ ॥ रेखाकृतिर्मणिर्यस्य मेहने हि विराजते ॥ पार्थिवः स तु विज्ञेयः समुद्रवचनं यथा ॥ ६ ॥ सुवर्णरजतप्रख्यैर्मणिमुक्तासमप्रभैः ॥ प्रवालसदृशैः स्निग्धैर्मणिभिः पार्थिवो भवेत् ॥ ७ ॥ पांडुरैर्मलिनै रूक्षैर्दीर्घव्यासैर्दिशो व्रजेत् ॥ समैस्तथोन्नतैश्चापि सुस्निग्धैर्मणिभिर्गृही ॥ ८ ॥ धनरक्षास्तथा स्त्रीणां भोक्तारस्ते भवंतिहि ॥ मणिभिर्मध्यनिम्नैस्तु पितरस्ते भवंति हि ॥ ९ ॥ युवतीनां महाबाहो निःस्वाश्चापि भवंति ते॥ नोल्बणैश्चापि धनिनो नरा वीर भवंति हि ॥ १० ॥ मूत्रधारा पतेदेका वलिता दक्षिणा यदि ॥ स भवेत्पार्थिवः पृथ्व्याः समुद्रवचनं यथा ॥ ११ ॥ द्वे धारे च तथा स्निग्धे धनवान्भोगवान्स्मृतः ॥ बहुधारास्तथा रूक्षाः सशब्दाः पुरुषाधमाः ॥ १२ ॥ मीनगंधि भवेद्रेतो धनवान्पुत्रवान्भवेत् ॥ हविर्गंधि भवेद्यस्य धनाढ्यः श्रोत्रियः स्मृतः ॥१३॥ मूषगंधिर्भवेत्पुत्री[2] पद्मगंधिर्नृपः स्मृतः॥लाक्षागंधिर्भवेद्यश्च बहुकन्यः प्रजायते॥मद्यगंधिर्भवेद्योद्धा क्षारगंधिर्दरिद्रकः ॥१४॥ शीघ्रमैथुनगामी यः स दीर्घायुरतोऽन्यथा ॥ अल्पायुर्देवशार्दूल विज्ञेयो नात्र संशयः ॥ १५ ॥ तनुशुक्रः स्त्रीजनको मांसगन्धी च भोगवान् ॥ पद्मवर्णं भवेद्रक्तं स नरो धनवान्भवेत् ॥ १६ ॥ किंचिद्रक्तं तथा कृष्णं भवेद्यस्य तु शोणितम् ॥ अधमः स तु विज्ञेयः सदा दुःखैकभाजनम् ॥१७॥ प्रवालसदृशं स्निग्धं भवेद्यस्य च शोणितम् ॥ राजानं तं विजानीयात्सप्तद्वीपाधिपं गुह ॥ १८ ॥ विस्तीर्णा मांसला स्निग्धा बस्तिः पुंसां प्रशस्यते॥ निर्मांसा विकटा रूक्षा बस्तिर्येषां न ते शुभाः ॥ १९ ॥ गोमायुसदृशी यस्य श्वानोष्ट्रमहिषस्य च ॥ स भवेद्दुःखितो नित्यं पुरुषो नात्र संशयः ॥२०॥ यश्चैकवृषणस्तात जले प्राणान्विमुंचति ॥ स्त्रीचञ्चलस्तु विषमैः समै राज्यं प्रचक्षते ॥२१॥ ऊर्ध्वगैश्चापि ह्रस्वायुः शतंजीवी प्रलंबधृक् ॥ मानवाश्चापि रक्तैस्तु धनवंतो भवंति वै ॥२२॥ स्थूलस्फिग्भवति क्षेमी द्रव्ययुक्तः समांसधृक् ॥

---

[1] दुर्लभम्–इ० पा० । [2] मेषगंधिर्भवेत्पुत्री–इ० पा० ।

व्याघ्रस्फिङ्मंडलो राजा मंडूकस्फिङ्नराधिपः ॥ द्विमंडलो महाबाहो सिंहस्फिक्सार्वभौमता ॥२३॥ उष्ट्रवानरयोर्यस्तु धारयेत्स्फिङ्माहामते ॥
धनधान्यविहीनोऽसौ विज्ञेयो भीमनंदन ॥ २४ ॥ पुमान्मृगोदरो धन्यो मयूरोदर एव च ॥ व्याघ्रोदरो नरपती राजा सिंहोदरो भवेत् ॥ २५ ॥
मंडूकसदृशं यस्य पुरुषस्योदरं भवेत् ॥ स भवेत्पार्थिवः पृथ्व्यां समुद्रवचनं यथा ॥ २६ ॥ मांसलैर्ऋजुभिर्वृत्तैः पार्श्वैर्नृपतयः स्मृताः ॥ ईश्वरो
व्याघ्रपृष्ठस्तु सेनायाश्चैव नायकः ॥२७॥ सिंहपृष्ठो नरो यस्तु बंधनं तस्य निर्दिशेत् ॥ कूर्मपृष्ठास्तु राजानो धनसौभाग्यभागिनः ॥२८॥ विस्तीर्णं
हृदयं येषां मांसलोमचितं समम् ॥ शतायुषो विजानीयाद्भोगभाजो महाधनान् ॥ २९ ॥ विरलाः शुष्कास्तथा रूक्षा दृश्यंतेऽगुलयः करे ॥
स भवेद्दुःखितो नित्यं नरो दारिद्र्यभाजनम् ॥३० ॥ यस्य मीनसमा रेखा कर्मसिद्धिश्च तस्य तु ॥ धनवान्स तु विज्ञेयो बहुपुत्रश्च मानवः॥३१॥
तुला यस्य तु वेदी वा करमध्ये तु दृश्यते ॥ तस्य सिध्यति वाणिज्यं पुरुषस्य न संशयः ॥ ३२ ॥ सौम्ये पाणितले यस्य द्विजस्य तु विशेषतः॥
यज्ञयाजी भवेन्नित्यं बहुवित्तश्च मानवः ॥ ३३ ॥ शैलं वाप्यथ वा वृक्षः करमध्ये तु दृश्यते ॥ अचलां श्रियमाप्नोति बहुभृत्यसमन्वितः ॥ ३४ ॥
शक्तितोमरबांणासिरेखां[1] चापोपमा तथा ॥ यस्य हस्ते महाबाहो स जयेद्विग्रहे रिपून् ॥ ३५ ॥ ध्वजश्चाप्यथ वा शंखः करमध्ये तु दृश्यते ॥
समुद्रयायी स भवेद्धनी च सततं गृह ॥ ३६ ॥ श्रीवत्समथ वा पद्मं वज्रं वा चक्रमेव च ॥ रथो वाप्यथ वा कुंभो यस्य हस्ते प्रकाशते ॥ राजानं
तं विजानीयात्परसैन्यविदारणम् ॥ ३७ ॥ दक्षिणे तु करांगुष्ठे यवो यस्य तु दृश्यते ॥ सर्वविद्याप्रवक्ता च भवेद्धै नात्र संशयः ॥ ३८ ॥ यस्य
पाणितले रेखा कनिष्ठामूलमुत्थिता[2] ॥ गता मध्यं प्रदेशिन्याः स जीवेच्छरदः शतम् ॥ ३९ ॥ ॥ इति श्रीभविष्ये महापुराणे शतार्धसाहस्र्यां
संहितायां ब्राह्मे पर्वाणि चतुर्थीकल्पे पुरुषलक्षणवर्णनं नाम पंचविंशोऽध्यायः ॥ २५ ॥ ॥ ब्रह्मोवाच ॥ ॥ समकुक्षिर्भवेद्भोगी
निम्नकुक्षिर्धनापहः ॥ मायावी विषमा[3] कुक्षिस्तथा कुहकक्रुत्सदा ॥ १ ॥ राजा स्यान्निम्नकुक्षिस्तु सार्वभौमो महाबलः ॥ सर्पोदरा दरिद्राः स्युर्बहु
भक्षाश्च सुव्रत ॥ २ ॥ विस्तीर्णाभिर्मंडलाभिरुन्नताभिश्च नाभिभिः ॥ भवंति सुखिनो वीरा धनधान्यसमन्विताः ॥३॥ निम्नाभिरथ स्वल्पाभिः
क्लेशभाजो भवंति हि ॥ वलिर्मध्यंगता वीर विषमा च विशेषतः ॥ धनहानिं तथा शूलं नित्यं जनयते विभो ॥ ४ ॥ वामावर्ता सदा शान्ति
करोतीति विदुर्बुधाः ॥ करोति मेधां दक्षिणेन संप्रवृत्ता दिवस्पते ॥५॥ पार्श्वायता दीर्घमायुरैश्वर्यमूर्ध्वतः स्मृतम् ॥ गवाढ्यतामधस्तात्तु करोतीति

---

[1] पद्मनालोपमा भवेत्—इ० पा० । [2] उछ्रिता—इ० पा० । [3] यस्येति शेषः ।

विदुर्बुधाः ॥ ६॥ शतपत्रकर्णिकाभा नाभिर्यस्य महामते॥ भूपत्वं कुरुते सा तु पुरुषस्य न संशयः ॥७॥ समोदरो भवेद्भोगी निस्वः स्याद्विषमोदरः॥ सूक्ष्मोदरो भवेद्वाग्मी बहुसम्पत्समन्वितः ॥८॥ शस्त्रेणांतं व्रजेद्वीर स्त्रीभोगं चाप्नुयात्तथा ॥ आचार्यो बहुपुत्रश्च यथासंख्यं विनिर्दिशेत् ॥९॥ वलिभिर्देवशार्दूल इत्याह स पयोनिधिः॥अगम्यागामिनो ज्ञेया विषमाभिर्न संशयः॥१०॥ऋजुभिर्वसुभोगी स्यात्परदारविनिंदकः॥मांसलैर्मृदुभिः पार्श्वै राजा स्यान्नात्र संशयः ॥ ११ ॥ अनूर्ध्वचिबुका[1] ये तु सुभगास्ते भवंति वै ॥ निर्धना विषमैर्दीर्घैर्भवन्तीह सुवीरज ॥ १२ ॥ पीनैश्चोपचितैर्निम्नैः स्कंधैर्भीमांगसंभव ॥ राजानः सुखिनश्चापि भवंतीह न संशयः ॥ १३ ॥ समोन्नतं तु हृदयं समं च पृथु चैव हि ॥ अवेपनं मांसलं च पार्थिवानां न संशयः ॥ १४ ॥ खररोमचितं वीरशिरालं च विशेषतः ॥ अधनानां भवेदेव हृदयं ऋभवोत्तम ॥ समवक्षसोऽर्थयुताः पीनैः शूराः स्मृता बुधैः ॥ १५ ॥ तनुभिर्द्रव्यहीनाः स्युरसमैश्चाप्यकिंचनाः ॥ वध्यंते चापि शस्त्रेण नात्र कार्या विचारणा॥ १६ ॥ हनुभिर्विषमैर्वीर जन्महीनो भवेन्नरः ॥ यस्योन्नतो भवेद्धनुः स भोगी स्यान्न संशयः ॥ १७ ॥ निर्मांसैर्विषमैर्वीर निःस्वो निम्नैः प्रचक्ष्यते ॥ धनवांश्च भवेत्पीनैः सुखभोगसमन्वितः ॥ विषमैरर्थहीनः स्याद्दुःखभागी सदा नरः ॥ १८ ॥ चिपिटग्रीवको दुष्टो मतो लोके स वै गुह ॥ शूरः स्यान्महिषग्रीवो मृगग्रीवो भयातुरः ॥ १९ ॥ कंबुग्रीवो भवेद्राजा लंबकठोऽग्रलक्षणः ॥ ह्रस्वग्रीवस्तु धनवान्सुसुखी भोगवांस्तथा ॥ २० ॥ निर्मांसौ रोमशौ भग्नावल्पौ वापि विशेषतः ॥ निर्धनस्येदृशावंसौ प्रख्यातौ व्योमकेशज ॥ २१ ॥ भवेदरोमशं पृष्ठं धनिनां भीमसंभव ॥ सलोमशं तथा वक्रं निर्धनानां बलाधिप ॥ २२ ॥ अस्वेदनावुन्नतौ च तथा पीनौ षडानन ॥ समरोमसुगंधौ च कक्षौ ज्ञेयौ धनान्वितौ ॥ २३ ॥ अव्युच्छिन्नौ तथा श्लिष्टौ विपुलौ च सुराधिप ॥ शूराणामीदृशावंसौ नगजानंदवर्धन ॥ २४ ॥ उद्बद्धबाहुको यस्तु वधबंधनमाप्नुयात् ॥ दीर्घबाहुर्भवेद्राजा समुद्रवचनं यथा ॥ २५ ॥ प्रलंबबाहुर्विज्ञेयो नरः सर्वगुणान्वितः ॥ ह्रस्वबाहुर्भवेद्दासः परप्रेष्यकरोऽपि वा ॥ २६ ॥ वामावर्तभुजा ये तु दीर्घायत भुजाश्च ये ॥ संपूर्णबाहू राजा स्यादित्याह स पयोनिधिः ॥ २७ ॥ ग्रीवा च वर्तुलाकारा[2] कंबुरेखासमावृता ॥ स भवेत्पार्थिवो भूमौ सर्वदुष्टनिबर्हणः ॥ २८ ॥ दीर्घग्रीवा बकग्रीवा शुकग्रीवाश्च ये नराः ॥ उष्ट्रग्रीवाः करिग्रीवाः सर्वे ते निर्धनाः स्मृताः ॥ २९ ॥ इभांग[3]सदृशौ वृत्तौ समौ पीनौ च सुव्रत ॥ आजानुलंबिनौ बाहू पार्थिवानां न संशयः ॥ ३० ॥ दरिद्राणां लोमशौ ह्रस्वौ बाहू ज्ञेयौ सुरोत्तम ॥ तस्कराणां च विषमौ

---

[1] चिबुकैर्ऋभवोत्तम—इ० पा० । [2] बहुला यस्य—इ० पा० । [3] करिकरोपमावित्यर्थः ।

स्थूलौ सूक्ष्मौ च सुव्रत ॥ ३१ ॥ निम्नं करतलं यस्य पितृवित्तं न तस्य वै ॥ भवेदार्भवशार्दूल तथा भीरुश्च मानवः ॥ ३२ ॥ सुवृत्ततनुनिम्नेन धनवान्करतलेन तु ॥ उत्तानकरतलो दाता भवतीति न संशयः ॥ ३३ ॥ विषमा भवंति विषमैर्निम्नाश्चापि विशेषतः ॥ करतलैर्देवशार्दूल लाक्षाभैरीश्वराः स्मृताः॥३४॥ अगम्यागमनं पीतै रूक्षैर्निर्धनता स्मृता ॥ अपेयपानं कुर्वंति नीलकृष्णैः सदैव हि ॥ ३५ ॥ निम्नाः स्निग्धा भवेन्नृणां रेखा करतले गुह ॥ धनिनां न दरिद्राणामित्याह स पयोनिधिः ॥ ३६ ॥ विरलांगुलयो ये तु ते दरिद्राः प्रचक्षते ॥ धनिनस्तु महाबाहो ये घनांगुलयो नराः॥३७॥वदनं मंडलं यस्य धर्मशीलं तमादिशेत् ॥ शुंडवक्रा नरा ये तु दुर्भगास्ते न संशयः॥३८॥हरिवक्रा जिह्मवक्रा विकृतास्यास्तथा नराः ॥ भग्नवक्राः करालास्याः सर्वे ते तस्कराः स्मृताः ॥ ३९ ॥ संपूर्णवक्रा राजानो गजासिंहाननास्तथा ॥ छागवानरवक्राश्च धनिनः परिकीर्तिताः ॥ ४० ॥ यस्य गंडौ सुसंपूर्णौ पद्मपत्रसमप्रभौ ॥ कृषिभागी भवेन्नित्यं बहुवित्तश्च मानवः ॥ ४१ ॥ सिंहव्याघ्रगजेंद्राणां कपोलः सदृशो यदि ॥ महाभोगी स विज्ञेयः सेनायाश्चैव नायकः ॥ ४२ ॥ वदनं तु समं श्लक्ष्णं सौम्यं संवृतमेव हि ॥ पार्थिवानां महाबाहो विपरीतं तु दुःखदम् ॥ ४३ ॥ महामुखं तु देवेश दुर्भगत्वं प्रयच्छति ॥ स्त्रीमुखं पुत्रनाशाय मंडलं सुखितां व्रजेत् ॥ ४४ ॥ द्रव्यनाशाय वै दीर्घं पापदं भयदं तथा ॥ धूर्तानां चतुरस्रं स्यात्पुत्रहानिकरं शृणु ॥ ४५ ॥ निम्नवक्रं च देवेन्द्र पुत्रहानिकरं भवेत् ॥ ह्रस्वं भतति कीनाशे पूर्णकांतं च भोगिनाम् ॥ ४६ ॥ रक्ताधरो नरपतिर्धनवान्कमलाधरः ॥ स्थूलोष्ठा हनुमूलाश्च शुष्कैस्तीक्ष्णैश्च दुःखिताः ॥ ४७ ॥ अस्फोटिताग्रं स्निग्धं च नतं मृदु तथा गुह ॥ संपूर्णं च सदा शस्तं श्मश्रु भूमिपतेर्गुह ॥ ४८ ॥ रक्तैश्चाल्पैस्तथा रूक्षैः श्मश्रुभिर्भीमनन्दन ॥ नराश्चोरा भवंत्येव परदाररतास्तथा ॥ ४९ ॥ निर्मांसौ यस्य वै कर्णौ संग्रामान्नाशमृच्छति[1] ॥ चिपिटाभ्यां भवेद्भोगी ह्रस्वौ च कृपणस्य च ॥ ॥ ५० ॥ शंकुकर्णश्च भूनाथः सर्वशत्रुभयङ्करः ॥ दीर्घायू रोमशाभ्यां तु विपुलाभ्यां नराधिपः ॥ भोगी च स भवेन्नित्यं देवब्राह्मणपूजकः ॥५१॥ शिरावबद्धौ क्रूरस्य व्यालम्बौ च विशेषतः ॥ मांसलौ सुखदौ ज्ञेयौ श्रवणौ व्योमकेशज ॥ ५२ ॥ भोगी स्यान्निम्नगण्डो वै मन्त्री संपूर्णगंडकः ॥ शुभभाक्छुकनासस्तु चिरजीवी शुष्कनासिकः ॥ ५३ ॥ कुंदकुड्मलसङ्काशैः प्रकाशैर्दशनैर्नृपः ॥ ऋक्षवानरदंताश्च नित्यं क्षुत्परिपीडिताः ॥ ५४ ॥ हस्तिदंताः खरदंताः स्निग्धदंता गुणान्विताः ॥ करालैर्विरलै रूक्षैर्दशनैर्दुःखजीविनः ॥ ५५ ॥ द्वात्रिंशद्दंता राजान एकत्रिंशच्च भोगवान् ॥ त्रिंश

---

[1] न स गच्छति—इ० पा० ।

दंता नरा नित्यं सुखदुःखित्वभागिनः ॥ ऊनत्रिंशच्च दशनैः पुरुषा दुःखभागिनः॥५६॥ कृष्णजिह्वो भवेत्प्रेष्यः सबलया तु जिह्वया ॥ भवेत्को
पस्य कर्ता वै स्थूलरूक्षश्च जिह्वया ॥ ५७॥ श्वेतजिह्वा नरा ज्ञेयाः शौचाचारसमन्विताः ॥ पद्मपत्रसमा जिह्वा सूक्ष्मा दीर्घा सुशोभना॥स्थूला
च न च विस्तीर्णा येषां ते मनुजाधिपाः ॥ ५८ ॥ निम्ना स्निग्धा च ह्रस्वा च रक्ताग्रा रसना यदि ॥ सर्वविद्याप्रवक्तारस्ते भवंति न संशयः॥५९॥
कृष्णतालुर्नरो यस्तु स भवेत्कुलनाशनः ॥ सुखभागी दुःखभागी पीततालुर्नराधिपः ॥ ६० ॥ विकृतं स्फुटितं रूक्षं तालुकं न प्रशस्यते ॥ सिंह
तालुर्नरपतिर्गजतालुस्तथैव च ॥ पद्मतालुर्भवेद्राजा श्वेततालुर्धनेश्वरः ॥ ६१ ॥ हंसस्वरा नरा धन्या मेघगम्भीरनिःस्वनाः ॥ क्रौंचस्वनाश्च
राजानो भोगवंतो महाधनाः ॥ ६२ ॥ चक्रवाकस्वना धन्या राजानो धर्मवत्सलाः ॥ कुम्भस्वनो नरपतिर्दुंदुभिस्वन एव च ॥ रूक्षदीर्घस्वराः
क्रूराः पशूनां सदृशा न तु ॥ ६३ ॥ [2]गुर्गुरस्वरसंयुक्ताः पुरुषाः क्लेशभागिनः ॥ चाषस्वना भाग्ययुता भिन्नकांस्यस्वराश्च ये ॥ क्षीणभिन्नस्वरा ये
स्युरधमास्ते प्रकीर्तिताः ॥ ६४ ॥ पार्थिवास्तनुनासाश्च दीर्घनासाश्च भोगिनः ॥ ह्रस्वनासा नरा ये तु धर्मशीलास्तु ते मताः ॥ ६५ ॥ हस्त्य
श्वसिंहनासाश्च सूचीनासाश्च ये नराः ॥ तेषां सिध्यति वाणिज्यं हयानां चैव विक्रयः ॥ ६६ ॥ विकृता नासिका यस्य [3]स्थूलाग्रा रूपवर्जिता ॥
पापकर्मा स विज्ञेयः सामुद्रवचनं यथा ॥ ६७ ॥ दाडिमीपुष्पसंकाशे भवेतां यस्य लोचने ॥ [4]भूपतिः स तु विज्ञेयः सप्तद्वीपाधिपो गुह ॥ ६८ ॥
व्याघ्राक्षाः कोपना ज्ञेयाः [5]कर्कटाक्षाः कलिप्रियाः ॥ बिडालहंसनेत्राश्च भवंति पुरुषाधमाः ॥ ६९ ॥ मयूरनकुलाक्षाश्च नरास्ते मध्यमाः स्मृताः
न [6]श्रीस्त्यजति सर्वज्ञ पुरुषं मधुपिंगलम् ॥ ७० ॥ आपिंगलाक्षा राजानः सर्वभोगसमन्विताः ॥ रोचना हरितालाक्षा गुञ्जापिंगा धनेश्वराः ॥ बल
सत्त्वगुणोपेताः पृथिवीचक्रवर्तिनः ॥७१॥ द्विमात्रावीक्षणा नित्यं जीवंति परमाश्रिताः ॥ त्रिमात्रास्यंदिनो ज्ञेयाः पुरुषाः सुखभागिनः ॥७२॥
चतुर्मात्रानिमेषैश्च नयनैरीश्वराः स्मृताः ॥ दीर्घायुषोधर्मरताः पंचमात्रानिमेषिणः ॥ ७३ ॥ ह्रस्वकर्णा महाभागा महाकर्णाश्च ये नराः ॥ आवर्त
कर्णा धनिनः स्निग्धकर्णास्तथैव च ॥ ७४ ॥ दीर्घायुषः शुक्तिकर्णाः शंखकर्णा महाधनाः ॥ दीर्घायुषो दीर्घकर्णा लंबकर्णास्तपस्विनः ॥ ७५ ॥
ललाटेनार्धचन्द्रेण भवंति पृथिवीश्वराः ॥ विपुलेन ललाटेन महाधनपतिः स्मृतः ॥ स्वल्पेन तु ललाटेन नरो धर्मरतः स्मृतः ॥ ७६ ॥ रेखाः
पंच ललाटे तु स्त्रिया वा पुरुषस्य वा ॥ शतं जीवति वर्षाणामैश्वर्यं चाधिगच्छति ॥ ७७ ॥ चतूरेखामशीतिं तु त्रिभिः सप्ततिमेव च ॥ द्वाभ्यां

---

[1] दुःखी–इ० पा० । [2] दुर्वांच–इ० पा० । [3] मांसला–इ० पा० । [4] पुरुषः–इ० पा० । [5] कुक्कुटाक्षाः–इ० पा० । [6] न स्त्री त्यजति–इ०पा० ।

षष्टिं तु रेखाभ्यां चत्वारिंशत्तथैकया ॥ अरेखेन ललाटेन विज्ञेया पंचविंशतिः ॥ ७८ ॥ रेखाच्छेदैस्तु विज्ञेया हीनमध्योत्तमा नराः ॥ अल्पायुषस्तथाल्पाभिर्व्याधिभिः परिपीडिताः ॥ ७९ ॥ त्रिशूलं पट्टिशं वापि ललाटे यस्य दृश्यते ॥ ईश्वरं तं विजानीयाद्रोगिनं कीर्तिमाश्रितम् ॥ ॥ ८० ॥ उत्क्रांतनिम्नं तु शिरः स्वल्पोपहतमेव च ॥ चन्द्रांकारं नरेन्द्राणां गवाढचं मंगलं स्मृतम् ॥ ८१ ॥ विषमं तु दरिद्राणां शिरो दीर्घं तु दुःखिनाम् ॥ नागकुंभनिभं राज्ञः समं सर्वत्र भोगिनः ॥ ८२ ॥ कपिलैः स्फुटितै रूक्षैः स्थूलैश्च शिखरेशयैः ॥ दुःखिताः पुरुषा ज्ञेया रोमश्मश्रुभिरेव च ॥ ८३ ॥ रूक्षा विवर्णा निस्तेजाः खराः स्थूलाश्च मूर्धजाः ॥ नातिस्तोका न बहुशो मूर्धजा दुःखभागिनः ॥ ८४ ॥ विरलाश्च मृदुस्निग्धा भ्रमरांजनसप्रभाः ॥ कचा यस्य तु दृश्यंते स भवेत्पृथिवीपतिः ॥ ८५ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि चतुर्थीकल्पे पुरुषलक्षणवर्णनं नाम षड्विंशोऽध्यायः ॥ २६ ॥ ॥ कार्तिकेय उवाच ॥ ॥ संक्षेपतो मम विभो लक्षणानि नृपस्य तु ॥ शुभानि चांगजातानि ब्रूहि मे वदतां वर ॥ १ ॥ ॥ ब्रह्मोवाच ॥ ॥ शृणु वक्ष्येंगजातानि पार्थिवस्य शुभानि च ॥ पार्थिवो ज्ञायते यैस्तु नराणां मध्यभागतः ॥ २ ॥ त्रीणि यस्य महाबाहो विपुलानि नरस्य तु ॥ उन्नतानि तथा षड् वै गंभीराणि च त्रीणि वै ॥ ३ ॥ चत्वारि चापि ह्रस्वानि सप्त रक्तानि वा विभो ॥ दीर्घाणि चापि सूक्ष्माणि भवंति यस्य पंच वा ॥ ४ ॥ नाभिः संधिः स्वनश्चेति गंभीराणि च त्रीणि वै ॥ वदनं च ललाटं च दंतोत्तम उरस्तथा ॥ ५ ॥ विस्तीर्णमेतत्त्रितयं वीर यस्य नरस्य तु ॥ स राजा नात्र संदेहः शृणुष्वेवोन्नतानि च ॥ ६ ॥ कृकाटिका तथा चास्यं नखा वक्षोथ नासिका ॥ कक्षे चापि महाबाहो षडेतानि विदुर्बुधाः ॥ ७ ॥ लिंगं पृष्ठं तथा ग्रीवा जंघा ह्रस्वानि सुव्रत ॥ नेत्रांते हस्तपादौ तु ताल्वोष्ठौ च सुरोत्तम ॥ जिह्वा रक्ता नखाश्चैव सप्तैतानि महामते ॥ ८ ॥ त्वचः कररुहाः केशा दशना ऋभवोत्तम ॥ सूक्ष्माण्येतानि च गुह पंच चापि विदुर्बुधाः ॥ ९ ॥ नासिकालोचनं बाहू स्तनयोरंतरं हनुः ॥ इति दीर्घमिदं प्रोक्तं पंचकं भूभुजां नृप ॥ १० ॥ क्षुतं राज्ञां सकृद्द्विस्त्रिर्नादितं ह्रादितं तथा ॥ दीर्घायुषां प्रयुक्तं ते हसितं च विदुर्बुधाः ॥ ११ ॥ पद्मपत्रनिभे नेत्रे धनिनां शिवनंदन ॥ भार्गवीमाप्नुयात्सोपि रक्तांते यस्य लोचने ॥ १२ ॥ मधुपिंगैर्महात्मानो नरा ज्ञेयाः सुराधिप ॥ भीरवो हि कृशाक्षास्तु चौरा मंडलचक्रकैः ॥ १३ ॥ क्रूराः केकरमेत्रास्तु गंभीरैरर्थसंपदः ॥ नीलोत्पलाभैर्वेदविदो भृशं कृष्णैस्तथा

---

१ छत्राकारम्–इ०पा०। २ क्रोधनाःकोकनेत्रास्तु–इ० पा०।

र्थिता ॥ मंत्रित्वं स्थूलसुदृशो वदंति भुवि तद्विदः ॥ १४ ॥ श्यामाक्षाः सुभगा ज्ञेया दीनाक्षैश्च दरिद्रता ॥ विस्तीर्णैर्भोगिनो ज्ञेया विपुलैश्च तथा गुह ॥ १५ ॥ अभ्युन्नताभिर्ह्रस्वायुर्विशालाभिः सुखी भवेत् ॥ दारिद्रो विषमाभिस्तु ततो ज्ञेयः सुरोत्तम ॥ १६ ॥ भ्रुवो बालेंदुसदृशा धनिनामार्भवोत्तम ॥ दीर्घाभिर्निर्धनो ज्ञेयः संसक्ताभिस्तु सुव्रत ॥ १७ ॥ क्षीणाभिरर्थहीनाः स्युर्नरा ज्ञेयाःसुरोत्तम ॥ मध्ये नतभ्रुवो ये च परदाररतास्तु ते ॥ १८ ॥ विरलैरुन्नतैः शंखैर्धन्याः[1] स्युर्नात्र संशयः ॥ निम्नैः स्तुत्यर्थसंसक्ता[2] उन्नतैश्च जनाधिपाः ॥ १९ ॥ विषमललाटा विधनाः सदा स्युर्देवसत्तम ॥ आचार्याः शुक्तिसदृशैर्नराः स्युर्नात्र संशयः ॥ २० ॥ उन्नतशिरोभिराढ्या नरा ज्ञेयाः सदा गुह ॥ वधबंधभागिनो वीरा नरा निम्नललाटिनः ॥ ॥ भृशमुन्नतैश्च मूर्खाश्च कृपणाश्च तथा नतैः ॥ २१ ॥ शुभावहं मनुष्याणां वदनं स्याद्यथा शृणु ॥ अंदीनमाननं[3] स्निग्धं सस्मितं च विशेषतः ॥ २२ ॥ साश्रु दीनं तथा रूक्षमस्निग्धं निंदितं[4] गुह ॥ असंभाव्यं मुखं ज्ञेयं नराणां नगदारण ॥ २३ ॥ अकंपं शुभदं ज्ञेयं नराणां हसितं गुह ॥ निमीलिताक्षं पापस्य हसितं चार्भवोत्तम ॥ २४ ॥ आमंडलं शिरो यस्य स गवाढ्यो नरो भवेत् ॥ छत्राकृति शिरो यस्य स भवेन्नृपतिर्नरः ॥ २५ ॥ चिपिटाकारितशिरा हन्याद्वै पितरौ नरः ॥ घंटाकृति शिरोध्वानमसकृत्सेवते नरः ॥ निम्नं शिरोनर्थदं स्यान्नराणामार्भवोत्तम ॥ २६ ॥ गुडैः स्निग्धैस्तथा कृष्णैरभिन्नाग्रैस्तथैव हि ॥ केशैर्न चातिबहुलैर्मृदुभिः पार्थिवो भवेत् ॥ २७ ॥ बहुलाः कपिलाः स्थूला विषमाः स्फुटितास्तथा ॥ परुषा ह्रस्वातिकुटिला दरिद्राणां कचा घनाः ॥ २८ ॥ इत्युक्तं लक्षणं नृणां शुभं वाशुभमेव च ॥ योषितां तदिदानीं ते लक्षणं वच्मि भीमज ॥ २९ ॥ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि चतुर्थीकल्पे पुरुषलक्षणवर्णनं नाम सप्तविंशोऽध्यायः ॥ २७ ॥ ॥ ॥ ब्रह्मोवाच ॥ ॥ शृण्विदानीं महाबाहो स्त्रीलक्षणमनुत्तमम् ॥ यन्मयोक्तं पुरा वीर नारदस्य महात्मनः ॥ १ ॥ तत्त्वं विज्ञायते येन शुभाशुभमवस्थितम् ॥ निंदितं च प्रशस्तं च स्त्रीणां वक्ष्यामि लक्षणम् ॥ २ ॥ मातरं पितरं चैव भ्रातरं मातुलं तथा ॥ द्वौ तु बिंबौ परीक्षेत समुद्रस्य वचो यथा ॥ ३ ॥ मुहूर्तेतिथिसंपन्ने नक्षत्रे चाभिपूजिते ॥ द्विजैस्तु सह वागम्य कन्यां वीक्षेत शास्त्रवित् ॥ ४ ॥ हस्तौ पादौ परीक्षेत अंगुलीर्नखमेव च ॥ पांणिमेव[5] च जंघे च कटिनासोरु एव च ॥५॥ जघनोदरपृष्ठं च स्तनौ कर्णौ भुजौ तथा ॥ जिह्वां चौष्ठौ च दंताश्च कपोलं गलकं तथा ॥ ६ ॥ चक्षुर्नासा ललाटं च शिरः केशांस्तथैव च ॥ रोमराजिं[6] स्वरं वर्णमावर्तानि तु वा

---

१ धनाढ्याः–इ० पा० । २ सुतान्नसंसक्ताः–इ० पा० । ३ अदीनानश्रुस्निग्धं च–इ० पा० । ४ च तथा गुह–इ० पा० । ५ पाणिरेखा च—इ० पा० । ६ रोमराजिस्तथामध्यमावर्तांगानि–इ० पा० ।

पुनः ॥७॥ यस्यास्तु रेखाग्रीवायां या[1] च रक्तांतलोचना ॥ यस्य सा गृहमागच्छेत्तद्गृहं सुखमेधते ॥८॥ ललाटे दृश्यते यस्यास्त्रिशूलं देवनिर्मित
म्॥बहूनां स्त्रीसहस्राणां स्वामिनीं तां विनिर्दिशेत् ॥९॥ राजहंसगतिर्यस्या मृगाक्षी मृगवर्णिका ॥ समशुक्लाग्रदंता च कन्यां तामुत्तमां विदुः॥१०॥
मंडूककुक्षी या कन्या न्यग्रोधपरिमंडला॥एकं जनयते पुत्रं सोपि राजा भविष्यति॥११॥हंसस्वरा मृदुवचा या कन्या मधुपिंगला॥ अष्टौ जनयते पुत्रा
न्धनधान्यविवर्धिनी ॥ १२ ॥ आयतौ श्रवणौ यस्याः सुरूपा चापि नासिका ॥ भ्रुवौ चेन्द्रायुधाकारौ सात्यंतं सुखभागिनी ॥ १३ ॥ तन्वी श्यामा तथा
कृष्णा स्निग्धांगी मृदुभाषिणी ॥ शंखकुंदेंदुदशना भवेदैश्वर्यभागिनी ॥१४॥ विस्तीर्णं जघनं यस्या वेदिमध्या तु या भवेत् ॥ आयते विपुले नेत्रे राज
पत्नी तु सा भवेत ॥१५॥ यस्याः पयोधरे वामे हस्ते कर्णे गलेपि वा ॥ मशकं तिलकं वापि सा पूर्वं जनयेत्सुतम् ॥१६॥ गूढगुल्फांगुलिशिरा
अल्पपार्ष्णिः सुमध्यमा ॥ रक्ताक्षी रक्तचरणा सात्यंतं सुखभागिनी॥१७॥ कूर्मपृष्ठायतनखौ स्निग्धभावविवर्जितौ ॥ वक्रांगुलितलौ पादौ कन्यां
तां परिवर्जयेत् ॥१८॥ येन केनचिदंशेन मांसं यस्या विवर्धते ॥ रासभीं तादृशीं विद्यान्न सा कल्याणमर्हति ॥१९॥ पादे प्रदेशिनीयस्या अंगुष्ठं
समतिक्रमेत् ॥ दुःशीला दुर्भगा ज्ञेया कन्यां तां परिवर्जयेत् ॥ २० ॥ पादे मध्यमिका यस्याः क्षितिं न स्पृशते यदि ॥ रमते सा न कौमारे
स्वच्छंदा[2] कामचारिणी ॥ २१ ॥ पादे अनामिका यस्याः क्षितिं न स्पृशते यदि ॥ द्वितीयं पुरुषं हत्वा तृतीये सा प्रतिष्ठिता ॥ २२ ॥ पादे
कनिष्ठा यस्यास्तु क्षितिं न स्पृशते यदि ॥ द्वितीयं पुरुषं हत्वा तृतीये सा प्रतिष्ठिता ॥ २३ ॥ न देविका न धनिका न धान्यप्रतिनामिका ॥
गुल्मवृक्षसनाम्नी च कन्यां तां परिवर्जयेत् ॥२४॥ इंद्रचंद्रादिपुरुषसनाम्नी च यदा भवेत् ॥ नैताःपतिषु रज्यंते याश्च नक्षत्रनामिकाः ॥ २५ ॥
आवर्तः पृष्ठतो यस्या नाभिं समनुविंदति ॥ तदपत्यं भवेद्ध्रस्वं ह्रस्वायुश्च विनिर्दिशेत् ॥२६॥ पृष्ठावर्ता पतिं हंति नाभ्यावर्ता पतिव्रता ॥ कट्या
वर्ता तु स्वच्छंदा न कदाचिद्विरज्यते ॥ २७ ॥ यस्यास्तु हसमानाया गंडे जायेत कूपकम् ॥ रमते सा न कौमारे स्वच्छंदा कार्यकारिणी ॥
॥ २८ ॥ यस्यास्तु गच्छमानायाष्टिट्टीकायति जंघिका ॥ पुत्रं व्यवस्येत्सा कर्तुं पतित्वे नात्र संशयः ॥ २९ ॥ स्थूलपादा च या कन्या सर्वांगेषु
च लोमशा ॥ स्थूलहस्ता च या स्याद्वै दासीं तां निर्दिशेद्बुधः ॥ ३० ॥ यस्याश्चोत्कटकौ[3] पादौ मुखं च विकृतं भवेत् ॥ उत्तरोष्ठे च रोमाणि
सा क्षिप्रं भक्षयेत्पतिम् ॥ ३१ ॥ त्रीणि यस्याः प्रलंबंते ललाटमुदरं स्फिचौ ॥ त्रीणि भक्षयते सा तु देवरं श्वशुरं पतिम् ॥ ३२ ॥ समुद्धूषितचा

---

[1] यावद्वक्रानुलोमगा–इ० पा० । [2] दुःखदा कार्यनाशिनी—इ० पा० । [3] चोत्कंपकौ—इ० पा० ।

रित्रा गुरुभक्ता पतिव्रता ॥ देवब्राह्मणभक्ता च मानुषीं तां विनिर्दिशेत् ॥ ३३ ॥ नित्यं स्नाता सुगंधा च नित्यं च प्रियवादिनी ॥ अल्पाशिन्य
ल्परोषा च देवतां तां विनिर्दिशेत् ॥ ३४ ॥ प्रच्छन्नं कुरुते पापमपवादं च रक्षति ॥ हृदयं स्याच्च दुर्ग्राह्यं मार्जारीं तां विनिर्दिशेत् ॥ ३५ ॥ हसते
क्रीडते चैव क्रुद्धा चैव प्रसीदति ॥ नीचेषु रमते नित्यं रासभीं तां विनिर्दिशेत् ॥३६॥ प्रतिकूलकरी नित्यं बंधूनां भर्तुरेव च ॥ स्वच्छंदे ललितां
चैव आसुरीं तां विनिर्दिशेत् ॥ ३७ ॥ बह्वाशी[1] बहुवाक्या च नित्यं चाप्रियवादिनी ॥ हिनस्ति स्वपतिं या तु राक्षसीं तां विनिर्दिशेत् ॥३८॥
शौचाचारपरिभ्रष्टा रूपभ्रष्टा भयंकरा ॥ प्रस्वेदमलपंका च पिशाचीं तां विनिर्दिशेत् ॥ ३९ ॥ नित्यं स्नातां सुगंधां च मांसमद्यप्रियादिनीम् ॥ वृक्षो
द्यानप्रसक्तां च गान्धर्वीं तां विनिर्दिशेत् ॥४०॥ चपला चंचला चैव नित्यं पश्येद्दिशस्तथा ॥ चलस्वभावा लुब्धा[2] च वानरीं तां विनिर्दिशेत् ॥
॥ ४१ ॥ चंद्राननां शुभांगीं तु मत्तवारणगामिनीम् ॥ आरक्तनखहस्तां तु विद्याद्विद्याधरीं बुधः ॥ ४२ ॥ वीणावादित्रशब्देन वंशगीतरवेण च ॥
पुष्पधूपप्रसक्तां च गांधर्वीं तां विनिर्दिशेत् ॥ ४३ ॥ ॥ सुमंतुरुवाच ॥ ॥ इत्येवमुक्त्वा स महानुभावो जगाम वेधा निजमंदिरं वै ॥ स्त्रीणां
तथा पुंस्त्ववतां च वीर यल्लक्षणं पार्थिव लोकपूज्यम् ॥ ४४ ॥ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि चतुर्थी
कल्पे स्त्रीलक्षणवर्णनं नामाष्टाविंशोऽध्यायः ॥२८॥छ॥ ॥ शतानीक उवाच ॥ ॥ गकाराक्षरदेवस्य गणेशस्य महात्मनः ॥ आराधानविधिं ब्रूहि
सांगं मंत्रसमन्वितम् ॥ १ ॥ ॥ सुमंतुरुवाच ॥ ॥ न तिथिर्न च नक्षत्रं नोपपवासो विधीयते ॥ यथेष्टं चेष्टतः सिद्धिः सदा भवति का
मिका ॥ २ ॥ श्वेतार्कमूलं संगृह्य कुर्याद्गणपतिं बुधः ॥ अंगुष्ठपर्वमात्रं तु पद्मासनगतं तथा ॥ ३ ॥ चतुर्भुजं त्रिनेत्रं च सर्वाभरणभूषितम् ॥
नागयज्ञोपवीतांगं शशाङ्ककृतशेखरम् ॥ ४ ॥ दंतं सव्ये करे दद्याद्द्वितीये चाक्षसूत्रकम् ॥ तृतीये परशुं दद्याच्चतुर्थे मोदकं न्यसेत् ॥ ५ ॥
कुंकुमं चंदनं चापि समालंभनमुच्यते ॥ वासोभिर्भूषणै रक्तैर्माल्यैश्चाराधयेद्गणम् ॥ ६ ॥ धूपेन च सुगंधेन मोदकैश्चापि पूजयेत् ॥ एवं
पूज्याग्रतस्तस्य भोजयेद्ब्राह्मणं बुधः ॥ ७ ॥ वामनं कुब्जकं चापि भोजयेत्पुरतो द्विजम् ॥ आशीर्वादं ततस्तस्मात्प्राप्य सिद्धिमवाप्नुयात् ॥
॥ ८ ॥ भक्त्या कुरुकुलश्रेष्ठ शृणु[3]मंत्रपदानि वै ॥ गं स्वाहा मूलमंत्रोयं प्रणवेन समन्वितः ॥ ९ ॥ गां नमो हृदयं ज्ञेयं गीं शिरः परि
कीर्तितम् ॥ शिखा च गूं नमो ज्ञेयो गैं नमः कवचं स्मृतम् ॥ १० ॥ गौं नमो नेत्रमुद्दिष्टं गः फट् कामास्त्रमुच्यते ॥ आगच्छोल्कामुखा

---

[1] कर्मण्यण्, ततो ङीप्। [2] क्रुद्धा च—इ० पा०। [3] दद्यात्पाद्यानि तस्य वै—इ० पा०।

येति मंत्र आवाहने ह्ययम् ॥ ११ ॥ गं गणेशाय नमो गंधमंत्रः प्रकीर्तितः ॥ पुष्पोल्काय नमः पुष्पमंत्र एष प्रकीर्तितः ॥ १२ ॥ धूपोल्काय नमो धूपमंत्र एष प्रकीर्तितः ॥ दीपोल्काय नमो दीपमंत्र एष प्रकीर्तितः ॥ १३ ॥ ॐ गं महोल्काय नमो बलिमंत्रः प्रकीर्तितः ॥ ओं संसिद्धोल्काय नमोमंत्रश्चायं विसर्जने ॥ १४ ॥ ओं महाकर्णाय विद्महे वक्रतुण्डाय धीमहि ॥ तन्नो दन्तिः प्रचोदयात् गायत्री जपः पूर्वतः ॥ १५ ॥ महागणपतये वीरं[1] स्वाहा दक्षिणतः सदा ॥ महोल्काय पश्चिमतः कूश्मांडायोत्तरेण तु ॥ एकदंतत्रिपुरांतकाय आग्नेय्यां वीर निर्दिशेत् ॥ १६ ॥ ओं शिवदत्त विकटहरहास प्राणाय स्वाहा नैर्ऋत्याम् ॥ [2]तुलंबनात्यचलदन्तकाय स्वाहा वायव्याम् ॥ १७ ॥ पद्मदंष्ट्राय नरायेति ऐशान्यां होमयेद्बुधः ॥ हुं फट् हुं फट् हस्ततालध्वनिर्हसनकूर्दनः ॥ १८ ॥ मृदनर्तनगणपतिर्देवस्य मुद्रां ततो होमं समाचरेत् ॥ न यदा वश्या भवति ॥ कृष्णतिलाहुतिमष्टसहस्रं जुहुयात्त्रिरात्रेण राजा वश्यो भवति ॥ १९ ॥ तिलयवहोमेन सर्वे जनपदा वश्या भवंति ॥ अतिरूपवती कन्या गच्छंतमनुच्छति ॥ २० ॥ चणतंदुलहोमेनाजितो भवेत् ॥ निंबपत्रसमैस्तैलैर्विद्वेषणं करोति ॥ सोमग्रहणे उदकमध्ये अवतीर्य अष्टसहस्रं जपेत् ॥ संग्रामे अपराजितो भवति ॥ २१ ॥ (ॐ लंबराज्ञे नमः ।) आदित्याभिमुखो भूत्वा अष्टसहस्रं जपेत् ॥ आदित्यो वरदो भवति ॥ २२ ॥ शुक्लचतुर्थ्यामुपोष्य गंधपुष्पादिभिरर्चनं कृत्वा तिलतन्दुलान्जुहुयात् ॥ शिरसा धारयंस्तैरपराजितो भवति ॥ २३ ॥ अपामार्गसमिद्भिरग्निं प्रज्वाल्य एकविंशत्याहुतीर्यो जुहुयात् ॥ त्रिरात्राच्छत्रुं व्यापादयाति ॥ २४ ॥ अथोत्तरेण मन्त्रं व्याख्यास्ये ॥ वृक्षमूले कज्जलं संगृह्य सप्तभिर्मंत्रितं कृत्वा नेत्राण्यंजयेद्यं पश्यति स वशी भवति ॥ २५ ॥ पुष्पं फलं मूलं चाष्टसहस्राभिमंत्रितं कृत्वा यस्मै ददाति स वश्यो भवति ॥ २६ ॥ यत्किंचिन्मूलमंत्रेण करोति तत्सिध्यति ॥ सर्वे ग्रहाः सुप्रीता भवंति ॥ नगरद्वारं गत्वा अष्टसहस्रं द्वारं निरूपयेत् ॥ २७ ॥ पुरं द्वारेण गृह्यते प्राङ्मुखो यजति स उच्चाटयति ॥ संमुखो जपति चोरान्विद्रावयति ॥२८॥ तृणानि लूनयति ॥ काष्ठानि च्छेदयति ॥ २९ ॥ [3]गजराजेन युद्धयति ॥ जलमध्ये सप्तरात्रं जपेत् ॥ अकाले वर्षयति ॥ कूपतडागाञ्छोषयति ॥ प्रतिमां नृत्ययति ॥ आकर्षयति ॥ स्तंभयति ॥ योजनशतात्स्त्रीपुरुषानाकर्षयति ॥ ३० ॥ गोरोचनां च सहस्राभिमंत्रितां कृत्वा हस्ते बद्ध्वा योजनशतसहस्रं गत्वा पुनरागच्छति ॥३१॥ अथ मारयितुकामः खदिरकीलकं कृत्वा स्त्रीपुरुषं विचिंत्य हृदये निखनयेत् ॥ क्षणादेव म्रियते ॥३२॥ सर्वपातकविमुक्तो भवति ॥ अग्नितेजाः

---

[1] अयं वीरशब्दोऽन्यत्र नास्ति । [2] ओं उमचावनखकाय स्वाहा—इ० पा० । [3] गजं गजेन—इ० पा० ।

सर्वेभ्योऽपराजितो भवति ॥३३॥ ॐ वक्रतुंडाय स्वाहा ॥ ॐ एकदंष्ट्राय स्वाहा ॥ ॐ कृतकृष्णाय स्वाहा ॥ ॐ गजकर्णाय स्वाहा ॥ ॐ लम्बोदराय स्वाहा ॥ ॐ विकटाय स्वाहा ॥ ॐ धूम्रवर्णाय स्वाहा ॥ ॐ गगनकूजाय स्वाहा ॥ ॐविनायकाय स्वाहा ॥ ॐ गणपतये स्वाहा ॥ ॐहस्तिमुखाय स्वाहा ॥ ३४ ॥ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि चतुर्थीकल्पे गणपतिकल्पवर्णनं नामैकोनत्रिंशोऽध्यायः॥ २९ ॥ ॥ सुमंतुरुवाच ॥ ॥ निंबमयमंगुष्ठपर्वमात्रं गणपतिं कृत्वा नित्यधूपगंधादिभिरर्चयित्वा प्रच्छन्नं शिरसि बद्ध्वा गच्छेत् ॥ सर्वजनप्रियो भवति ॥ श्वेतार्कमूलांगुष्ठमात्रं गणपतिं कृत्वा धूपादिभिरर्चयित्वा सर्वान्वर्णान्वशमानयति ॥ श्वेतचंदनमंगुष्ठमात्रं गणपतिं कृत्वा पुष्पगंधादिभिरर्चयित्वा शुक्लचतुर्थ्यामष्टम्यां वा बलिं कुर्यादष्टसहस्रं जुहुयादध्ना पायसेन राजानं वशमानयति ॥ रक्तचंदनमयं गणपतिमंगुष्ठमात्रं कृत्वा भौतिकं बलिं दद्याद्दधिमधुघृताहुतीनां गणपतिमष्टसहस्रं जुहुयादात्मप्रापिकां प्रजां वशमानयति ॥ रक्तकरवीरमूलांगुष्ठपर्वमात्रं गणपतिं कारयेत् ॥ रक्तपुष्पगंधोपहारैर्बलिं दद्यात् ॥ तिललवणघृतेनाष्टसहस्रं जुहुयात् ॥ दशग्रामान्वशमानयति ॥ श्वेतकरवीरांगुष्ठपर्वमात्रं गणपतिं कृत्वा तिलपिष्टदधिघृतक्षीरहरिद्रामिश्रेणाष्टसहस्रं जुहुयाद्वेश्यां वशमानयति ॥ अश्वत्थमूलांगुष्ठपर्वमात्रं गणपतिं कृत्वा गंधपुष्पधूपबलिं दत्त्वा शतं जुहुयाच्छत्रुं वशमानयति ॥ अर्कमूलांगुष्ठपर्वमात्रं गणपतिं कृत्वा गंधपुष्पधूपबलीन् दद्यात् ॥ तिंदुकाष्टशतं जुहुयाच्छत्रुं वशमानयति ॥ बिल्वमूलमयमंगुष्ठपर्वमात्रं गणपतिं कृत्वा गंधपुष्पधूपार्चितं कृत्वा त्रिमध्वक्तानामष्टसहस्रं जुहुयाद्राजामात्यान्वशमानयति ॥ शिरसि धूपान्धृत्वा गच्छेद्राजद्वारं विग्रहे जयो भवति ॥ हस्तिदंतमृत्तिकामयमंगुष्ठपर्वमात्रं गणपतिं कारयेत् ॥ गंधपुष्पधूपार्चितं कृत्वा कृष्णचतुर्थ्यां नग्नो भूत्वाभ्यर्चयेत् ॥ सप्त [1]वाराञ्जपेन्नित्यं नारीणां सुभगो भवति ॥ वृषभश्रृंगमृत्तिकांगुष्ठमात्रं गणपतिं कारयेत् ॥ गंधपुष्पार्चितं कृत्वा गुग्गुलुधूपं दद्याद्घोषपतिं वशमानयति ॥ अथ वा वल्मीकमृत्तिकांगुष्ठपर्वमात्रं गणपतिं कारयेत् ॥ कटुकतैलेन प्रतिमां लेपयेत् ॥ उन्मत्तककाष्ठेनाग्निं प्रज्वाल्याहुतीनामष्टसहस्रं जुहुयात्तिलसर्षपमिश्रेण सर्वधूपं दद्यात्त्रिकटुकेन लेपयेत् ॥ अगरुधूपं दद्याद्राजानं वशमानयति ॥ परेषां च वल्लभो भवति ॥ रक्तचन्दनेनात्मानं धूपयेत्सुभगो भवति ॥ ॐ गणपतये वक्रतुण्डाय गजदन्ताय गुल[2]गुलेतिनिनादाय चतुर्भुजाय त्रिनेत्राय मुशलपाशवज्रहस्ताय सर्वभूतदमनाय सर्वलोकवशंकराय सर्वदुष्टोपघातजननाय सर्वशत्रुविमर्दनाय सर्वराज्यसमीह

---

१ सप्तरात्रम्—इ० पा० । २ गुग्गुलुचतुर्भुजाय—इ० पा० ।

नाय राजानमिह वशमानय हनहन पचपच वज्रांकुशेन गणेश फट् स्वाहा ॥ ॐ गां गीं गूं गैं गौं गः स्वाहा नमः हृदयं मूलमंत्रस्य ॥ ॐ कः शिरः, ॐ: खः शिखा, ॐ गः हृदयम्, ॐ गुः वक्रम्, ॐ गैं नेत्रम्, ॐ घः कवचम्, ॐ ङ आवाहनं हृदयस्य आवाहनांगानिभवंति ॐ नमः हृदयं मूलमंत्रस्य, ॐ गाः शिरः, ॐ गैः नमः शिखा ॐ गौः नमः कवचम्, ॐ गं नमः नेत्रे, ॐ गः फट् अस्त्रम् ॥ ॐ अंगुष्ठोल्काय स्वाहा आवाहनं हृदयस्य स्वाहा विसर्जनं हृदयस्य ॐ गन्धोल्काय स्वाहा ॥ गन्धमन्त्रः ॥ ॐ धर्मभूतोल्काय स्वाहा ॥ पुष्पमन्त्रः ॥ दुर्जयाय[1] पूर्वेण ॥ ॐ धूर्जटये दक्षिणेन ॥ ॐ लंबोदराय पश्चिमतः ॥ ॐ गणपतये उत्तरतः ॥ ॐ गणाधिपतये ऐशान्याम् ॥ ॐ महागणपतये आग्नेय्याम् ॥ ॐ कूश्मांडाय नैर्ऋत्याम् ॥ ॐ एकदन्तत्रिपुरघातिने[2] त्रिनेत्राय वायव्याम् ॥ ॐ महागणपतये विद्महे वक्रतुण्डाय धीमहि ॥ तन्नो दंतिः प्रचोदयात् ॥ गायत्री ॥ पद्मदंष्ट्रामालाप्रकर्षणीपरश्वंकुशपाशपटहमुद्रा अष्टौ मुद्रा दर्शयित्वा ततः कर्माणि कारयेत् ॥ कृष्णतिलाहुतीनामष्टसहस्रं जुहुयात् ॥ राजानं वशमानयेत् ॥ आवाहनाद्येकादशमुद्रा नैवेद्यांतं क्रमाद्दर्शयेत् ॥ आराधयेद्येन विधिना त्रिनेत्रं शूलिनं हरम् ॥ तेनैवाराधयेद्देवं विघ्नेशं गणपं नृप ॥ १ ॥ तदेव मण्डलं चास्य अंगन्यासस्तथैव च ॥ ऋते मन्त्रपदानीह समानं सर्वमेव हि ॥ २ ॥ पूजयेद्यस्तु विघ्नेशमेकदन्तमुमासुतम् ॥ नश्यंति तस्य विघ्नानि न चारिष्टं कदाचन ॥ ३ ॥ यश्चोपवासं कृत्वा तु चतुर्थ्यां पूजयेन्नरः ॥ सर्वे तस्य समारंभाः सिध्येयुर्नात्र संशयः ॥ ४ ॥ यस्यानुकूलो विघ्नेशः शिवयोः कुलनन्दन ॥ तस्यानुकूलं सर्वं स्याज्जगद्वै सर्वकर्मसु ॥५॥ तस्मादारा धयेदेनं भक्तिश्रद्धासमन्वितः ॥ कुंकुमागुरुधूपेन तथैवोंडीरकस्रजा ॥ पललोह्लापिकाभिश्च[3] जातिकोन्मत्तकैस्तथा ॥ ६ ॥ शुक्लपक्षे चतुर्थ्यां तु विधिनानेन पूजयेत् ॥ तस्य सिध्यति निर्विघ्नं सर्वकर्म न संशयः ॥ ७ ॥ एकदन्ते जगन्नाथे गणेशे तुष्टिमागते ॥ पितृदेवमनुष्याद्याः सर्वे तुष्यंति भारत ॥ ॥ ८ ॥ तस्मादाराधयेदेनं सदा भक्तिपुरःसरम् ॥ कर्णलेपैस्तुंडिकाभिर्मोदकैश्च[4] महीपते ॥ पूजयेत्सततं देवं विघ्नविनाशाय दंतिनम् ॥ ९ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि चतुर्थीकल्पे विनायकपूजाविधिनिरूपणं नाम त्रिंशोऽध्यायः ॥ ३० ॥ ॥छ॥

॥ ॥ सुमन्तुरुवाच ॥ ॥ शिवा शान्ता सुखा राजंश्चतुर्थी त्रिविधा स्मृता ॥ मासि भाद्रपदे शुक्ला शिवा लोकेषु पूजिता ॥ १ ॥ तस्यां स्नानं तथा दानमुपवासो जपस्तथा ॥ क्रियमाणं शतगुणं प्रसादाद्दन्तिनो नृप ॥ २ ॥ गुडलवणघृतानां तु दानं शुभकरं स्मृतम्[5] ॥ गुडापूपैस्तथा

---

[1] दुर्गायै पूर्वे—इ० पा०। परं चासाधीयानप्रकृतत्वात्। [2] एकदंतत्रिपुरान्तकाय—इ० पा०। [3] पललान्नविकारैश्च जातीकुरबकैस्तथा—इ० पा०। [4] पुण्डरीकैः—इ० पा०। [5] महत्—इ० पा०।

वीर पुण्यं ब्राह्मणभोजनम् ॥ ३ ॥ यास्तस्यां नरशार्दूल पूजयंति सदा स्त्रियः ॥ गुडलवणपूपैश्च श्वश्रूं श्वशुरमेव च ॥ ४ ॥ ताः सर्वाः सुभगाः स्युर्वै[1] विघ्नेशस्यानुमोदनात् ॥ कन्यका तु विशेषेण विधिनानेन पूजयेत् ॥ ५ ॥ (इति शिवाकल्पः) ॥ ॥ सुमन्तुरुवाच ॥ ॥ माघे मासि तथा शुक्ला या चतुर्थी महीपते ॥ सा शांता शांतिदा नित्यं शांतिं कुर्यात्सदैव हि ॥ ६ ॥ स्नानदानादिकं कर्म सर्वमस्यां कृतं विभो ॥ भवेत्सहस्रगुणितं प्रसादात्[2]तस्य दंतिनः ॥ ७ ॥ कृतोपवासो यस्तस्यां पूजयेद्विघ्ननायकम् ॥ तस्य होमादिकं कर्म भवेत्साहस्त्रिकं नृप ॥ ८ ॥ लवणं च गुडं शाकं गुडपूपांश्च भारत ॥ दत्त्वा भक्त्या तु विप्रेभ्यः फलं साहस्त्रिकं भंजेत्[3] ॥ ९ ॥ विशेषतः स्त्रियो राजन्पूजयन्त्यो गुरुं नृप ॥ गुडलवणघृतैर्वीर सदा स्युर्भाग्यैर्[4]संयुताः ॥ १० ॥ (इति शांताकल्पः) ॥ सुमन्तुरुवाच ॥ ॥ सुखावहा च सुसुखा सौभाग्यकरणी परम् ॥ ११ ॥ चतुर्थी कुरुशार्दूल रूपसौभाग्यदा शुभा ॥ सुखाव्रतं महापुण्यं रूपदं भाग्यदं तथा ॥ १२ ॥ सुसूक्ष्मं सुकरं धन्यमिह पुण्यसुखावहम् ॥ परत्र फलदं वीर दिव्यरूपप्रदायकम् ॥ १३ ॥ हसितं ललितं[5]चोक्तं चेष्टितं च सुखावहम् ॥ सविलासभुजक्षेपश्चंक्रमश्चेष्टितं शुभम् ॥ १४ ॥ सुखाव्रतेन सर्वेषां सुखं कुरुकुलोद्वह ॥ कृत्येन पूजिते चेशे विघ्नेशे शिवयोः सुते ॥ १५ ॥ यदा शुक्लचतुर्थ्यां तु वारो भौमस्य वै भवेत् ॥ तदा सा सुखदा ज्ञेया चतुर्थी वै सुखेति च ॥ १६ ॥ पुरा मैथुनमाश्रित्य स्थिताभ्यां तु हिमाचले ॥ भीमोमाभ्यां महाबाहो रक्तबिन्दुश्च्युतः क्षितौ ॥ १७ ॥ मेदिन्यां स प्रयत्नेन सुखेन विधृतोऽनया ॥ जातोस्याः स कुजो वीर रक्तो रक्तसमुद्भवः ॥ १८ ॥ ममांगतो यथोत्पन्नस्तस्मादंगारको ह्ययम् ॥ अङ्गदोंगोपकारश्च अंगानां तु प्रदो नृणाम् ॥ १९ ॥ सौभाग्यादिकरो यस्मात्तस्मादंगारको मतः ॥ भक्त्या चतुर्थ्यां नक्तेन यो वै श्रद्धासमन्वितः ॥२०॥ उपवत्स्यति ना राजन्नारी वा नान्यमानसा ॥ पूजयेच्च कुजं भक्त्या रक्तपुष्पविलेपनैः ॥ २१ ॥ गणेशं प्रथमं भक्त्या योर्चयेच्छ्रद्धयान्वितः ॥ यस्य तुष्टः प्रयच्छेत्स सौभाग्यं रूपसंपदम् ॥ २२ ॥ पूर्वं च कृतसंकल्पः स्नानं कृत्वा यथाविधि ॥ गृहीत्वा मृत्तिकां वंदेन्मंत्रेणानेन भारत ॥ २३ ॥ इह त्वं वंदिता पूर्वं कृष्णेनोद्धरता किल ॥ तस्मान्मे दह पाप्मानं यन्मया पूर्वसंचितम् ॥ २४ ॥ इमं मंत्रं पठन्वीर आदित्याय प्रदर्शयेत् ॥ आदित्यरश्मिसंपूतां गंगाजलकणोक्षिताम् ॥ २५ ॥ दत्त्वा मृदं शिरसि तां सर्वांगेषु च योजयेत् ॥ ततः स्नानं प्रकुर्वीत मंत्रयेत जलं पुनः ॥ २६ ॥ त्वमापो योनिः सर्वेषां दैत्यदानवद्यौकसाम् ॥ स्वेदांडजोद्भिदां चैव

---

[1] नित्यम्—इ० पा० । [2] दन्तिनो नृप—इ० पा० । [3] भवेत्—इ० पा० । [4] कुरुनंदन—इ० पा० । [5] मैत्रम्—इ० पा० ।

रसानां पतये नमः ॥ २७ ॥ स्नातोहं सर्वतीर्थेषु सर्वप्रस्रवणेषु च ॥ तडागेषु च सर्वेषु मानसादिसरःसु च ॥ २८ ॥ नदीषु देवखातेषु सुतीर्थेषु ह्रदेषु वै ॥ ध्यायन्पठन्निमं मंत्र ततः स्नानं समाचरेत् ॥२९ ॥ ततः स्नात्वा शुचिर्भूत्वा गृहमागत्य वै स्पृशेत् ॥ दूर्वाश्वत्थौ शमीं स्पृष्ट्वा गां च मंत्रेण मंत्रवित् ॥३०॥ दूर्वां नमस्य मंत्रेण शुचौ भूमौ समुत्थिताम् ॥ त्वं दूर्वेमृतनामासि सर्वदेवैस्तु वंदिता॥३१॥वन्दिता दह तत्सर्वं दुरितं यन्म[1]या कृतम् ॥ ३२ ॥ शमीमंत्रं प्रवक्ष्यामि तन्निबोध महीपते॥ पवित्राणां पवित्रा त्वं काश्यपी प्रथिता श्रुतौ ॥ शमी शमय मे पापं नूनं वेत्सि धराधरान् ॥ ३३ ॥ अश्वत्थालंभने वीर मंत्रमेतं निबोध मे ॥ नेत्रस्पंदादिजं दुःखं दुःस्वप्नं दुर्विचिन्तनम् ॥ शक्तानां च समुद्योगमश्वत्थ त्वं क्षमस्व मे ॥ ३४ ॥ इमं मंत्र पठन्वीर कुर्याद्वै स्पर्शनं बुधः ॥ ततो देव्यै तु गां दद्याद्वीरं कृत्वा प्रदक्षिणाम् ॥ समालभ्य तु हस्तेन ततो मंत्रमुदीरयेत् ॥ ३५ ॥ सर्वदेवमयी देवि मुनिभिस्तु सुपूजिता ॥ तस्मात्स्पृशामि वंदे त्वां वंदिता पापहा भव ॥ ३६ ॥ इमं मंत्रं पठन्वीर[2] भक्त्या श्रद्धासमन्वितः ॥ प्रदक्षिणं तु यः कुर्यादर्जुनं कुरुनंदन ॥ प्रदक्षिणीकृता तेन पृथिवी स्यान्न संशयः ॥ ३७ ॥ एवं मौनेन चागत्य ततो वह्निगृहं व्रजेत् ॥ प्रक्षाल्य च मृदा पादावाचांतोग्निगृहं विशेत् ॥ होमं तत्र प्रकुर्वीत [3]एभिर्मंत्रपदैर्वरैः ॥ ३८ ॥ शर्वाय शर्वपुत्राय क्षोण्युत्संगभवाय च ॥ कुजाय ललितांगाय लोहितांगाय वै तथा ॥३९॥ ॐकारपूर्वकैर्मंत्रैः स्वाहाकारसमन्वितैः ॥ अष्टोत्तरशतं वीर अर्धार्धमर्धमेव च ॥ ४० ॥ एतैर्मंत्रपदैर्भक्त्या शक्त्या वा कामतो नृप ॥ खादिरैः सुसमिद्भिस्तु चाज्यदुग्धैर्यवैस्तिलैः ॥ ४१ ॥ भक्ष्यैर्नानाविधैश्चान्यैः शक्त्या भक्त्या समन्वितः ॥ हुत्वा[4]हुतीस्ततो वीर देवं संस्थापयेत्क्षितौ ॥ ४२ ॥ सौवर्णं राजतं वापि शक्त्या दारुमयं नृप ॥ देवदारुमयं वापि श्रीखण्डचन्दनैरपि ॥ ४३ ॥ ताम्रे पात्रे रौप्यमये चाज्यकुंकुमकेसरैः ॥ अन्यैर्वा लोहितैर्वापि पुष्पैः पत्रैः फलैरपि ॥ रक्तैश्च विविधैर्वीर अथ वा [5]शक्तितोऽर्चयेत् ॥ ४४ ॥ यावद्विसृजते वित्तं वित्तवान्वीर भक्तितः ॥ तावद्विवर्धते पुण्यं दातुः शतसहस्रिकम् ॥ ४५ ॥ अन्ये ताम्रमये पात्रे वंशजे मृन्मयेपि वा ॥ पूजयंति नराः शक्त्या कृत्वा कुंकुमकेशरैः॥पुरुषाकृतिकृतं पात्र इमं मंत्रैः समर्चयेत् ॥४६॥ अग्निर्मूर्धेति मंत्रेण गंधपुष्पादिभिस्तथा॥ धूपैरभ्यर्च्य विधिवद्ब्राह्मणाय प्रदीयते ॥ ४७॥ गुडौदनं घृतं क्षीरं गोधूमाञ्छालितंडुलान् ॥ अवेक्ष्य शक्तिं दद्याद्वै दरिद्रो वित्तवांस्तथा ॥ ४८ ॥

---

[1] मध्यमणिन्यायेन मयेत्यस्योभयत्र सम्बन्धः, तथा चायर्थः, हे दूर्वे त्वं देवैर्वंदिता तु पुनः मया वन्दिता सती यन्मया दुरितं कृतम्, तत्सर्वं दह । इह वन्दितेतिद्विरुक्त्या शब्दावृत्तिदीपकोलङ्कारः । [2] नियम्–इ० पा० ।

[3] हरिब्रह्मशिवादिभिः–इ० पा० । [4] कृत्वा कृत्यम्—इ० पा० । [5] भक्तितः–इ० पा० ।

वित्तशाठ्यं न कर्तव्यं विद्यमाने धने नृप ॥ वित्तशाठ्यं हि कुर्वाणो नामुत्र बलभाग्भवेत् ॥ ४८ ॥ ॥ शतानीक उवाच ॥ ॥ अंगारकेण
संयुक्ता चतुर्थी नक्तभोजनैः ॥ उपोष्या कतिमात्रा तु उताहो सकृदेव तु[1] ॥ ४९ ॥ ॥ सुमंतुरुवाच ॥ ॥ चतुर्थी सा चतुर्थी तु यदांगारकसं
युता ॥ उपोष्या तत्र तत्रैव प्रदेयो विधिवद्गुडः॥५०॥ उपोष्य नक्तेन विभो चतस्रः कुजसंयुताः ॥ चतुर्थ्यां च चतुर्थ्यां च विधानं शृणु यादृशम्
॥ ५१ ॥ सौवर्णं तु कुजं कृत्वा सविनायकमादरात् ॥ दशसौवर्णिकं मुख्यं दशार्धमर्धमेव च ॥५२॥ सौवर्णपात्रे रौप्ये वा भक्त्या ताम्रमयेऽपि
वा ॥ विंशत्पलानि पात्राणि विंशत्यर्धपलानि वा ॥ ५३ ॥ विंशत्कर्षाणि वा वीर विंशदर्धार्धमेव वा ॥ रौप्यसंख्यं पलं कार्यं[2] पलार्धमर्धमेव
च ॥ ५४ ॥ शक्त्या वित्तैश्च भक्त्या च पात्रे ताम्रमयेऽपि तु ॥ प्रतिष्ठाप्य ग्रहेशं वै वस्त्रैः संपरिवेष्टितम् ॥ विविधैः साधकै रक्तैः पुष्पै रक्तैः
समन्वितम् ॥ ५५ ॥ ब्राह्मणाय सदा दद्याद्दक्षिणासहितं नृप ॥ वाचकाय महाबाहो गुणिने श्रेयसे नृप ॥ ५६ ॥ इति ते कथिता पुण्या तिथी
नामुत्तमा तिथिः ॥ यामुपोष्य नरो रूपं दिव्यमाप्नोति भारत ॥ ५७ ॥ कांत्यात्रेयसमं वीरं तेजसा रविसंनिभम् ॥ प्रभया रविकल्पं च
समीरबलसंश्रितम् ॥५८॥ ईदृग्रूपं समाप्येह याति भौमसदो नृप ॥ प्रसादाद्विघ्ननाथस्य तथा गणपतेर्नृप ॥५९॥ पठतां शृण्वतां राजन्कुर्वतां च
विशेषतः ॥ ब्रह्महत्यादिपापानि क्षीयंते नात्र संशयः ॥ ऋद्धिं वृद्धिं तथा लक्ष्मीं लभते नात्र संशयः ॥ ६० ॥ इति श्रीभविष्ये महापुराणे
शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि चतुर्थीकल्पे सुखावहांगारकचतुर्थीव्रतनिरूपणं नामैकत्रिंशोऽध्यायः ॥ ३१ ॥ ॥ (समाप्तश्चायं
चतुर्थीकल्पः) ॥ ४ ॥ ॥ छ ॥ ॥ सुमंतुरुवाच ॥ ॥ पंचमी दयिता राजन्नागानां नंदिवर्धिनी ॥ पञ्चम्यां किल नागानां भवतीत्यु
त्सवो महान् ॥ १ ॥ वासुकिस्तक्षकश्चैव कालियो मणिभद्रकः ॥ ऐरावतो धृतराष्ट्रः[3] कर्कोटकधनंजयौ ॥ एते प्रयच्छंत्यभयं प्राणिनां प्राणजीवि
ताम् ॥ २ ॥ पंचम्यां स्नपयन्तीह[4] नागान्क्षीरेण ये नराः ॥ तेषां कुले प्रयच्छंति तेऽभयप्राणदक्षिणाम् ॥ ३ ॥ शप्ता नागा यदा मात्रा दह्यमाना
दिवानिशम् ॥ निर्वापयंति स्नपनैर्[5]गवां क्षीरेण मिश्रितैः ॥ ४ ॥ ये स्नापयंति वै नागान्भक्त्या श्रद्धासमन्विताः ॥ तेषां कुले सर्पभयं न भवेदिति
निश्चयः ॥ ५ ॥ ॥ शतानीक उवाच ॥ ॥ मात्रा शप्ताः कथं नागाः किं समुद्दिश्य कारणम् ॥ कथं चानंदकरणं कस्य वा संप्रसादजम् ॥
॥ ६ ॥ ॥ सुमंतुरुवाच ॥ ॥ उच्चैःश्रवा अश्वरत्नं श्वेतो जातोऽमृतोद्भवः ॥ तं दृष्ट्वा चाब्रवीत्कद्रूर्नागानां जननी स्वसाम्[6] ॥ ७ ॥ अश्वरत्नमिदं

---

[1] हि–इ० पा० । [2] सार्धं कुर्याद्वै सर्वमेव वा–इ० पा० । [3] धृतशिरास्तथान्ये ये महोरगाः–इ० पा० । [4] पूजयंति–इ० पा० । [5] च जलैर्गवां क्षीरैरमिश्रितैः–इ० पा० । [6] स्वस्वामित्यार्षम्, विनताम् ।

श्वेतं संप्रेक्षेऽमृतसंभवम् ॥ कृष्णांश्च वीक्षसे बालान्सर्वं श्वेतमुतांबरे ॥ ८ ॥ ॥ विनतोवाच ॥ ॥ सर्वश्वेतो हयवरो नास्य कृष्णो न लोहितः ॥
कथं पश्यसि कृष्णं त्वं विनतोवाच तां स्वसाम् ॥ ९ ॥ ॥ कद्रूरुवाच ॥ ॥ वीक्षेऽहमेकनयना कृष्णबालसमन्वितम् ॥ द्विनेत्रा त्वं तु विनते न
पश्यसि पणं कुरु ॥ १० ॥ ॥ विनतोवाच ॥ ॥ अहं दासी भवित्री ते कृष्णे केशे प्रदर्शिते ॥ न चेद्दर्शयसे कद्रु मम दासी भविष्यसि ॥११॥
एवं ते विपणं कृत्वा गते क्रोधसमन्विते ॥ विनता शयने सुप्ता कद्रूर्जिह्ममचिंतयत् ॥ १२ ॥ आहूय पुत्रान्प्रोवाच बाला भूत्वा हयोत्तमे ॥ तिष्ठध्वं
विपणे जेष्ये विनतां जयगर्द्धिनीम् ॥१३॥ प्रोचुस्ते जिह्मबुद्धिं तां नागा मातां[1] विगृह्य तु ॥ अधर्म्यमेतन्मातस्ते न करिष्याम ते वचः ॥१४॥ तान्छ
शाप रुषा कद्रूः पावको वः प्रधक्ष्यति ॥ गते बहुतिथे काले पांडवो जनमेजयः ॥ १५ ॥ सर्पसत्रं स कर्ता वै भुवि ह्यन्यैः सुदुष्करम् ॥ तस्मिन्सत्रे
स तिग्मांशुः पावको वः प्रधक्ष्यति ॥ १६ ॥ एवं शप्त्वा रुषा कद्रूः किंचिन्नोक्तवती तु सा ॥ मात्रा शप्तास्तथा नागाः कर्तव्यं नान्वपत्सत ॥१७॥
वासुकिं दुःखितं ज्ञात्वा ब्रह्मा प्रोवाच सांत्वयन् ॥ मा शुचो वासुकेऽत्यर्थं शृणु मद्वचनं परम् ॥ १८ ॥ यायावरकुले जातो जरत्कारुरिति द्विजः॥
भविष्यति महातेजास्तस्मिन्काले तपोनिधिः ॥१९॥ भगिनीं च जरत्कारुं तस्मै त्वं प्रतिदास्यसि ॥ भविता तस्य पुत्रोऽसावास्तीक इति विश्रुतः
॥ २० ॥ स तत्सत्रं प्रवृद्धं वै नागानां भयदं महत् ॥ निषेधेत्सुमतिर्वाग्भिरग्र्याभिस्तं नविष्यति ॥ २१ ॥ तदिमां भगिनीं राजंस्तस्य त्वं प्रतिदा
स्यसि ॥ जरत्कारुं जरत्कारोः प्रदद्या अविचारयन् ॥ २२ ॥ यदासौ प्रार्थतेऽरण्ये यत्किंचिद्धि वदिष्यति ॥ तत्कर्तव्यमशंकेन यदीच्छेः श्रेय
आत्मनः ॥ २३ ॥ पितामहवचः श्रुत्वा वासुकिः प्रणिपत्य च ॥ तथाकरोद्यथा चोक्तं यत्नं च परमास्थितः ॥ २४ ॥ तच्छ्रुत्वा पन्नगाः सर्वे प्रह
र्षोत्फुल्ललोचनाः ॥ पुनर्जातमिवात्मानं मेनिरे भुजगोत्तमाः ॥ २५ ॥ तत्र सत्रं महा[2]बाहो तव पित्रा प्रवर्तितम् ॥ ऋत्विग्भिः स हि तेनेह [3]सर्व
लोकेषु दुष्करम् ॥ २६ ॥ प्रोक्तं च विष्णुना पूर्वं धर्मपुत्रस्य धीमतः ॥ अवश्यं तस्य भविता नागानां भयकारकम्[4] ॥ २७ ॥ तस्मात्कालांतरा
द्राजन्साग्रे वर्षशते गते ॥ तत्सत्रं भविता घोरं नागानां क्षयकारकम् ॥ २८ ॥ यास्यन्त्यधर्मभारिता दंदशूका विषोल्बणाः ॥ कोटिसंख्या महा
राज निपतिष्यंत्यहर्निशम् ॥ २९ ॥ अपूर्वे तु निमग्नानां घोरे रौद्राग्निसागरे ॥ आस्तीकस्तत्र भविता तेषां नौर्वह्निसागरे ॥ ३० ॥ श्रुत्वा स
चाग्निं राजानमृत्विजस्तदनंतरम् ॥ निवर्तयिष्यते यागं नागानां मोहनं परम् ॥ ३१ ॥ पंचम्यां तत्र भविता ब्रह्मा प्रोवाच लेलिहान् ॥

---

[1] मातामित्यार्षम् । [2] महाराज–इ० पा० । [3] सर्वलोकसुदुर्धरम्–इ० पा० । [4] क्षयकारकम् इ० पा० ।

तस्मादियं महाबाहो पंचमी दयिता सदा ॥ नागानामानंदकरी दत्ता वै ब्रह्मणा पुरा ॥ ३२ ॥ कृत्वा तु भोजनं पूर्वं ब्राह्मणानां तु कामतः ॥
विसृज्य नागाः प्रीयंतां ये केचित्पृथिवीतले ॥ ३३ ॥ ये च हेलिमरीचिस्था येन्तरे दिवि संस्थिताः ॥ ये नदीषु महानागा ये सरस्वतिगा
मिनः ॥ ये च वापीतडागेषु तेषु सर्वेषु वै नमः ॥ ३४ ॥ नागान्विप्रांश्च संपूज्य विसृज्य च यथार्थतः ॥ ततः पश्चात्तु भुञ्जीत सह भृत्यैर्नराधिप
॥ ३५ ॥ पूर्वं मधुरमश्नीयात्ततो भुञ्जीत कामतः ॥ एवं नियमयुक्तस्य यत्फलं तन्निबोध मे ॥ ३६ ॥ मृतो नागपुरं याति पूज्यमानोऽप्सरो
गणैः ॥ विमानवरमारूढो रमते कालमीप्सितम् ॥ ३७ ॥ इह चागत्य राजासाव[1]युतानां वरो भवेत् ॥ सर्वरत्नसमृद्धः स्याद्वाहनाढ्यश्च जायते ॥
॥ ३८ ॥ पंच जन्मान्यसौ राजा द्वापरे द्वापरे भवेत् ॥ आधिव्याधिविनिर्मुक्तः पत्नीपुत्रसहायवान् ॥ तस्मात्पूज्याश्च [2]पाल्यांश्च घृतपायसगुग्गुलैः
॥ ३९ ॥ ॥ शतानीक उवाच ॥ ॥ दशंति ये नरं विप्र नागाः क्रोधसमन्विताः ॥ भवेत्किं तस्य दष्टस्य विस्तराद्ब्रूहि मे द्विज ॥४०॥ ॥सुमं
तुरुवाच ॥ ॥ नागदष्टो नरो राजन्प्राप्य मृत्युं व्रजत्यधः ॥ अधो गत्वा भवेत्सर्पो निर्विषो नात्र संशयः ॥४१॥ ॥ शतानीक उवाच ॥ ॥ नाग
दष्टः पिता यस्य भ्राता वा दुहितापि वा ॥ माता पुत्रोथ वा भार्या किं कर्तव्यं वदस्व मे ॥ ४२ ॥ मोक्षाय तस्य विप्रेंद्र दानं व्रतमुपोषणम् ॥ ब्रूहि
तद्द्विजशार्दूल येन तद्वै करोम्यहम् ॥ ४३ ॥ ॥ सुमंतुरुवाच ॥ ॥ उपोष्या पंचमी राजन्नागनां पुष्टिवर्धिनी ॥ त्वमेवमेकं राजेंद्र विधानं शृणु
भारत ॥ ४४ ॥ मासि भाद्रपदे या तु [3]कृष्णपक्षे महीपते ॥ महापुण्या तु सा प्रोक्ता ग्राह्यापि च महीपते ॥ ४५ ॥ ज्ञेया द्वादश पंचम्यो
हायने भरतर्षभ ॥ चतुर्थ्यां त्वेकभक्तं तु तस्यां नक्तं प्रकीर्तितम् ॥ ४६ ॥ [4]भुवि चित्रमयान्नागानथ वा कलधौतकान् ॥ कृत्वा दारुमयान्वापि
अथ वा मृन्मयान्नृप ॥४७॥ पंचम्यामर्चयेद्भक्त्या नागानां पंचकं नृप ॥ करवीरैः शतपत्रैर्जातीपुष्पैश्च सुव्रत ॥४८॥ तथा गंधैश्च धूपैश्च पूज्य [5]पं
चकमुत्तमम् ॥ ब्राह्मणं भोजयेत्पश्चाद् घृतपायसमोदकैः ॥४९॥ अनंतो वासुकिः शंखः पद्मः कंबल एव च ॥ तथा कर्कोटको नागो नागो ह्यश्वतरो
नृप ॥५०॥ धृतराष्ट्रः शंखपालः कालियस्तक्षकस्तथा ॥ पिंगलश्च तथा नागो मासिमासि प्रकीर्तिताः ॥५१॥ [6]वत्सरांते पारणं स्याद्ब्राह्मणान्भोजयेद्ब
हून् ॥ इतिहासविदे नागं गैरिकेण कृतं नृप ॥ तथार्चना प्रदातव्या वाचकाय महीपते ॥५२॥ एष वै [7]नागपञ्चम्या विधिः प्रोक्तो बुधैर्नृप ॥ तव पित्रा

---

[1] वसुधायाः–इ० पा० । [2] मान्याश्च–इ० पा० । [3] शुक्लपक्षे–इ० पा० । [4] भूरि चन्द्रमयं नागम्–इ० पा० । पुस्तकांतरे च " भूरि चन्द्रमयं नागमथ बा कलधौतकम् ॥ कृत्वा दारुमयं वापि अथ वा मृन्मयं नृप ॥ पंचम्यामर्चयेद्भक्त्या नागं पंचफणं नृप ॥ करवीरैः शतपत्रैर्जातीपुष्पैश्च सुव्रत ॥ तथा गंधैश्च धूपैश्च पूज्य पन्नगमुत्तमम्–इ० पा० । [5] पन्नगम्–इ० पा० । [6] संवर्तांते पारणं स्यान्महाब्राह्मणभोजनम्–इ० पा० ।
[7] एत्र पारणके चापि—इ० पा० ।

कृतश्चैव पितुर्मोक्षाय भारत ॥५३॥ त्वमेकमेकं वै वीर पंचम्या भरतर्षभ ॥ सुवर्णभारनिष्पन्नं नागं दत्त्वा तथा च गाम् ॥५४॥ व्यासाय कुरुशार्दूल पितुरानृण्यमाप्नुयाः ॥ तव पित्रा कृता ह्येवं पंचम्युपासना नृप ॥ ५५ ॥ उत्सृज्य नागतां वीर तव पूर्वपितामहः ॥ पुष्पोत्तरं सदो गत्वा तथा पुष्पसदो नृप ॥ ५६ ॥ सुनासीरसदो गत्वा तदा भर्गसदो गतः ॥ स्वभूसदस्ततो गत्वा कंजजस्य सदो गतः ॥ ५७ ॥ अन्येपि ये करिष्यंति इदं व्रतमनुत्तमम् ॥ दष्टको मोक्ष्यते तेषां शुभं स्थानमवाप्स्यति ॥५८॥ यश्चेदं शृणुयान्नित्यं नरः[1] श्रद्धासमन्वितः ॥ कुले तस्य न नागेभ्यो भयं भवति कुत्रचित् ॥ ५९ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि पंचमीकल्पे नागपंचमीव्रतवर्णनं नाम द्वात्रिंशोऽध्यायः॥३२॥ ॥ शतानीक उवाच ॥ ॥ सर्पाणां कति रूपाणि के वर्णाः किं च लक्षणम् ॥ का जातिस्तु भवेत्तेषां केषु योनिकुलेषु वा ॥१॥ ॥ ॥ सुमंतुरुवाच ॥ ॥ पुरा मेरौ नगवरे कश्यपं तपसां निधिम् ॥ प्रणम्य शिरसा भक्त्या गौतमो वाक्यमब्रवीत् ॥ २ ॥ सर्पाणां कति रूपाणि किं चिह्नं किं च लक्षणम् ॥ जातिं कुलं तथा वर्णान्ब्रूहि सर्वं प्रजापते ॥३॥ कथं वा जायते सर्पः कथं मुंचेद्विषं प्रभो ॥ विषवेगाः कति प्रोक्ताः कत्येव विषनाडिकाः ॥ ४ ॥ दंष्ट्राः कतिविधाः प्रोक्ताः किं प्रमाणं विषागमे ॥ गृह्णीते तु कदा गर्भं कथं चेह प्रसूयते ॥ ५ ॥ कीदृशी स्त्री पुमांश्चैव कीदृशश्च नपुंसकः ॥ किं नाम दशनं चैव एतत्कथय सुव्रत ॥६॥ तस्य[2] तद्वचनं श्रुत्वा कश्यपः प्रत्यभाषत ॥ शृणु गौतम तत्त्वेन सर्पाणामिह लक्षणम् ॥ ७ ॥ मास्याषाढे तथा ज्येष्ठे प्रमाद्यंति भुजंगमाः ॥ ततो नागोऽथ नागी च मैथुने संप्रपद्यते ॥ ८ ॥ चतुरो वार्षिकान्मासान्नागी गर्भमधारयत् ॥ ततः कार्त्तिकमासे तु अंडकानि प्रसूयते ॥ ९ ॥ अंडकानां तु विज्ञेये द्वेशते द्वे च विंशती ॥ तान्येव भक्षयेत्सा तु भागैकं घृणया त्यजेत् ॥ १० ॥ स्वर्णार्कवर्णाद्वै तस्मात्पुमान्संजायतेंडकात् ॥ तान्येव खादते सर्प अहोरात्राणि विंशतिम् ॥ ११ ॥ स्वर्णकेतकवर्णाभाद्दीर्घराजीवसंनिभात् ॥ तस्मादुत्पद्यते स्त्री वै अंडाद्ब्राह्मणसत्तम ॥ १२ ॥ शिरीषपुष्पवर्णाभादंडकात्स्यान्नपुंसकः ॥ ततो भिनत्ति चांडानि षण्मासेन तु गौतम ॥ १३ ॥ ततस्ते प्रीतिसंबंधात्स्नेहं बध्नंति बालकाः ॥ ततोऽसौ सप्तरात्रेण कृष्णो भवति पन्नगः ॥ १४ ॥ आयुःप्रमाणं सर्पाणां शतं विंशोत्तरं स्मृतम् ॥ मृत्युश्चाष्टविधो ज्ञेयः शृणुष्वात्र यथाक्रमम् ॥ १५ ॥ मयूरान्मानु

---

[1] श्रद्धाभक्तिसमन्वितः–इ० पा०। [2] कस्मिंश्चित्पुस्तके पूर्वं प्रोक्तः–"सुमन्तुरुवाच" इत्यादिपाठो नास्ति परं त्वत्र–"तस्य तद्वचनं श्रुत्वा सुमंतुः प्राह तत्तदा ॥ इममर्थं पुरा पृष्टो गौतमेन च कश्यपः । प्रहृष्टवदनः सौम्यः कश्यपः प्रत्यभाषत ॥" इति पाठोऽस्ति।

षाद्वापि चकोराद्गोखुरा[1]त्तथा ॥ बिडालान्नकुलाच्चैव वराहाद्वृश्चिकात्तथा ॥ एतेषां यदि मुच्येत जीवेद्विंशोत्तरं शतम् ॥ १६ ॥ सप्ताहे तु ततः पूर्णे दंष्ट्राणां चाधिरोहणम् ॥ विषस्यागमनं तत्र निक्षिपेच्च पुनःपुनः ॥ १७ ॥ एवं ज्ञात्वा तु तत्त्वेन विषकर्म्मारभेत वै ॥ एकविंशतिरात्रेण विषदंष्ट्रा सुजायते ॥ नागीपार्श्वसमावर्ती बालसर्पः स उच्यते ॥१८॥ पंचविंशतिरात्रस्तु सद्यः प्राणहरो भवेत् ॥ षण्मासाज्जातमात्रस्तु कंचुकं वै प्रमुंचति ॥ १९ ॥ पादानां चापि विज्ञेये द्वे शते द्वे च विंशती ॥ गोलोमसदृशाः पादाः प्रविशंति क्रमंति च ॥ २० ॥ संधीनां चास्य विज्ञेये द्वे शते विंशती तथा ॥ अंगुल्यश्चापि विज्ञेया द्वे शते विंशती तथा ॥ २१ ॥ अकालजाता ये सर्पा निर्विषास्ते प्रकीर्तिताः ॥ पंचसप्ततिवर्षाणि आयुस्तेषां प्रकीर्तितम् ॥ २२ ॥ रक्तपीतशुक्लदंता अनीला मंदवेगिनः ॥ एते अल्पायुषो ज्ञेया अन्ये च भीरवः स्मृताः ॥ २३ ॥ एकं चास्य भवेद्वक्त्रं द्वे जिह्वे च प्रकीर्तिते ॥ द्वात्रिंशद्दशनाः प्रोक्ताः पन्नगानां न संशयः ॥ २४ ॥ तेषां मध्ये चतस्रस्तु दंष्ट्रा याः सुविषावहाः ॥ मकरी कराली कालरात्री यमदूती तथैव च ॥ २५ ॥ सर्वासां चैव दंष्ट्रणां देवताः परिकीर्तिताः ॥ प्रथमा ब्रह्मदेवत्या द्वितीया विष्णुदेवता ॥ तृतीया रुद्रदेवत्या चतुर्थी यमदेवता ॥ २६ ॥ हीना प्रमाणतः सा तु वामनेत्रं समाश्रिता ॥ नास्यां मंत्राः प्रयोक्तव्या नौषधं नैव भेषजम् ॥ २७ ॥ वैद्यः पराङ्मुखो याति मृत्युस्तस्या विलेखनात् ॥ चिकित्सा न बुधैः कार्या तदंतं तस्य जीवितम् ॥ २८ ॥ मकरीं मासिकां विद्यात्करालीं च द्विमासिका ॥ कालरात्री भवेत्त्रीणि चतुरो यमदूतिका ॥ २९ ॥ मकरीं गुडौदनं[2] दद्यात्कषायान्नं करालिकाम् ॥ कालरात्रीं कटुयुतं दूतीं वै सांनिपातिकम् ॥ ३० ॥ मकरी शस्त्रकं विद्यात्कराली काकपादिका ॥ कराकृतिः कालरात्रिर्याम्या कूर्माकृतिः स्मृता ॥ ३१ ॥ मकरी वातुला ज्ञेया कराली पैत्तिकी स्मृता ॥ कफात्मिका कालरात्री यमदूती सान्निपातकी ॥ ३२ ॥ शुक्ला तु मकरी ज्ञेया कराली रक्तसंनिभा ॥ कालरात्री भवेत्पीता कृष्णा च यमदूतिका ॥ ३३ ॥ वामा शुक्ला च कृष्णा च रक्ता पीता च दक्षिणा ॥ समासेन तु वक्ष्यामि यथैता वर्णतः स्मृताः ॥ ३४ ॥ शुक्ला तु ब्राह्मणी ज्ञेया रक्ता तु क्षत्रिया स्मृता ॥ वैश्या तु पीतिका ज्ञेया कृष्णा शूद्रा तु कथ्यते ॥ अतः परं प्रवक्ष्यामि दंष्ट्राणां विषलक्षणम्[3] ॥ ३५ ॥ दंष्ट्राणां तु विषं नास्ति नित्यमेव भुजंगमे ॥ दक्षिणं नेत्रमासाद्य विषं सर्पस्य तिष्ठति ॥ ३६ ॥ संक्रुद्धस्येह सर्पस्य विषं गच्छति मस्तके ॥ मस्तकाद्धमनीं याति ततो नाडीषु गच्छति ॥ ३७ ॥ नाडीभ्यः पद्यते दंष्ट्रां विषं तत्र प्रवर्तते ॥ तत्सर्वं कथयिष्यामि यथावदनुपूर्वशः ॥ ३८ ॥ अष्टभिः कारणैः सर्पो

---

[1] गोरखात्–इ० पा० । [2] शुभौदनम्–इ० पा० । [3] विषवर्धने–इ० पा० ।

दशते नात्र संशयः ॥ आक्रांतो दशते पूर्वं द्वितीयं पूर्ववैरिणम् ॥ ३९ ॥ तृतीयं दशते भीतश्चतुर्थं मददर्पितः ॥ पंचमं तु क्षुधाविष्टः षष्ठं चेह
विषोल्बणः ॥ सप्तमं पुत्ररक्षार्थमष्टमं कालचोदितः ॥ ४० ॥ यस्तु सर्पो दशिंत्वा[१] तु उदरं परिवर्तयेत् ॥ बलभुग्नाकृतिं दंष्ट्रामाक्रांतं तं विनिर्दि
शेत् ॥ ४१॥ यस्य सर्पेण ःदष्टस्य गभीरं दृश्यते व्रणम् ॥ वैरदष्टं विजानीयात्कश्यपस्य वचो यथा ॥ ४२ ॥ एकं दंष्ट्रापदं यस्य अव्यक्तं न च
कल्पितम् ॥ भीतदष्टं विजानीयाद्यथोवाच प्रजापतिः ॥ ४३ ॥ यस्य सर्पेण दष्टस्य रेखा दंतस्य जायते ॥ मददष्टं विजानीयात्कश्यपस्य वचो
यथा ॥ ४४ ॥ द्वे च दंष्ट्रापदे यस्य दृश्यंते च महाक्षतम् ॥ क्षुधाविष्टं विजानीयाद्यथोवाच प्रजापतिः ॥ ४५॥ द्वे दंष्ट्रे यस्य दृश्येते क्वचिद्रुधिर
संकुले ॥ विषोल्बणं विजानीयाद्दंशं तं नात्र संशयः ॥ ४६ ॥ अपत्यरक्षणार्थाय जानीयात्तं न संशयः ॥ यत्तु काकपदाकारं त्रिभिर्दंतैस्तु लक्षितम्
॥ ४७ ॥ महानाग इति प्रोक्तं कालदष्टं विनिर्दिशेत् ॥ त्रिविधं दष्टजातैस्तु लक्षणं समुदाहृतम् ॥ ४८ ॥ दष्टानुपीतं विज्ञेयं कश्यपस्य वचो
यथा ॥ विषभागात्तु सर्पस्य त्रिभागस्तत्र संक्रमेत्॥४९॥उदरं दर्शयेद्यस्तु उद्धतं तं विनिर्दिशेत् ॥ छर्दितं विषवेगेन निर्विषः पन्नगो भवेत्॥५०॥
असाध्यश्चापि विज्ञेयश्चतुर्दंष्ट्राभिपीडितः ॥ग्रीवाभंगो भवेत्किंचित्संदष्टो विषयोगतः॥ इतो दंशस्ततः शुद्धो व्यंतरः परिकीर्तितः॥५१॥ ॥ इति
श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि पंचमीकल्पे सर्पदंष्ट्रावर्णनं नाम त्रयस्त्रिंशोऽध्यायः॥३३॥छ॥ ॥कश्यप उवाच ॥ ॥
अतः परं प्रवक्ष्यामि कालदष्टस्य लक्षणम् ॥ शृणु गौतम तत्त्वेन यादृशो भवते नरः॥१॥ जिह्वाभंगोऽथ हृच्छूलं चक्षुर्भ्यां च न पश्यति ॥ दंशं च दग्ध
संकाशं पक्वजंबूफलोपमम् ॥ २ ॥ वैवर्ण्यं चैव दंतानां श्यावो भवति वर्णतः ॥ सर्वेष्वंगेषु शैथिल्यं पुरीषस्य च भेदनम् ॥ ३ ॥ भग्नस्कंधकटि
ग्रीव ऊर्ध्वदृष्टिरधोमुखः ॥ दह्यते वेपते चैव स्वपते च मुहुर्मुहुः ॥ ४ ॥ शस्त्रेण च्छिद्यमानस्य रुधिरं न प्रवर्तते ॥ दंडेन ताड्यमानस्य दंडराजी न
जायते ॥ ५ ॥ दंशे काकपदं सुनीलमसकृज्जम्बूफलाभं घनमुच्छूनं रुधिरार्द्रसेकबहुलं कृच्छ्रान्निरोधो भवेत् ॥ हिक्काश्वासगलग्रहश्च सुमहान्पांडु
स्त्वचा दृश्यते शुष्कांगं प्रवदंति शास्त्रनिपुणास्तत्कालदष्टं विदुः ॥ ६ ॥ दंशे यस्याथ शोथः प्रचलितवलितं मण्डलं वा सुनीलं प्रस्वेदो गात्र
भेदः स्रवति च रुधिरं सानुनासं च जल्पेत् ॥ दन्तोष्ठाभ्यां वियोगो भ्रमति च हृदयं सन्निरोधश्च तीव्रो दिव्यानामेष दंशः स्थलविपुलमयो
विद्धि तं कालदष्टम् ॥ ७ ॥ दन्तैर्दन्तान्स्पृशति बहुशो दृष्टिरायासखिन्ना स्थूलो दंशः स्रवति रुधिरं केकरं चक्षुरेकम् ॥ प्रत्यादिष्टः श्वसिति

---

[१] दष्ट्वा।

सततं सानुनासं च भाषेत्पापं ब्रूते सकलगदितं कालदष्टं तमाहुः ॥ ८ ॥ वेपते वेदना तीव्रा रक्तनेत्रश्च जायते ॥ ग्रीवाभंगश्चला नाभिः कालदष्टं
विनिर्दिशेत् ॥ ९ ॥ दर्पणे सलिले वापि आत्मच्छायां न पश्यति ॥ मन्दरश्मिं तथा तीव्रं तेजोहीनं दिवाकरम्[1] ॥ १० ॥ वेपते वेदनात्रस्तो
रक्तनेत्रश्च जायते ॥ स याति निधनं जन्तुः कालदष्टं विनिर्दिशेत् ॥ ११ ॥ अष्टम्यां च नवम्यां च कृष्णपक्षे चतुर्दशीम् ॥ नागपञ्चमीदष्टानां
जीवितस्य च संशयः ॥ १२ ॥ आर्द्राश्लेषामघाभरणीकृत्तिकासु विशेषतः ॥ विशाखां त्रिषु पूर्वासु मूलस्वातीशतात्मके ॥ सर्पदष्टा न जीवंति
विषं पीतं च यैस्तथा ॥ १३ ॥ शून्यागारे श्मशाने च शुष्कवृक्षे तथैव च ॥ न जीवंति नरा दष्टा नक्षत्रे तिथिसंयुते ॥ १४ ॥ अष्टोत्तरं मर्म
शतं प्राणिनां समुदाहृतम् ॥ तेषां मध्ये तु मर्माणि दश द्वे चापि कीर्तिते ॥ १५ ॥ शंखे नेत्रे भ्रुवोर्मध्ये बस्तिभ्यां वृषणोत्तरे ॥ कक्षे स्कन्धे
हृदि मध्ये तालुके चिबुके गुदे ॥ १६ ॥ एषु द्वादशमर्मेषु[2] दंशैः शस्त्रेण वा हतः ॥ न जीवति नरो लोके कालदष्टं विनिर्दिशेत् ॥ १७ ॥ अक
चटतपयशां वदंति प्रोक्ता जीवंति न तत्र हि ॥ गतं ब्रूयाद्यदि स्खलति शिरस्तस्य संप्राप्तकालः ॥ १८ ॥ भवति च यदि दूतो ह्युत्तमस्या
धमो वा यदि भवति च दूत उत्तमो वाधमस्य ॥ आदौ दष्टस्य नाम यदि वदति क्वचिद्वक्ति तस्याथ पश्चात्तं वर्णभेदो यदि भवति समः प्राप्त
कालस्य दूतः ॥ १९ ॥ दूतो वा दंडहस्तो भवति च युगलं पाशहस्तस्तथा वा रक्तं वस्त्रं च कृष्णं मुखशिरसि गतमेकवस्त्रश्च दूतः ॥ तैलाभ्य
क्तश्च तद्वद्यदि त्वरितगतिर्मुक्तकेशश्च याति यः कुर्याद्घोरशब्दं करचरणयुगैः प्राप्तकालस्य दूतः ॥ २० ॥ नागोदयं प्रवक्ष्यामि ईशानेन तु भाषि
तम् ॥ ब्रह्मणा तु पुरा सृष्टा ग्रहा नागास्त्वनेकशः ॥ २१ ॥ अनन्तं भास्करं विद्यात्सोमं विद्यात्तु वासुकिम् ॥ तक्षकं भूमिपुत्रं तु कर्कोटं च बुधं
विदुः ॥ २२ ॥ पद्मं बृहस्पतिं विद्यान्महापद्मं च भार्गवम् ॥ कुलिकः शंखपालश्च द्वावेतौ तु शनैश्चरः ॥ २३ ॥ पूर्वपादः शंखपालो द्वितीयः
कुलिकस्तथा ॥ नित्यं भागे यथोद्दिष्टे दिनरात्री तथैव च ॥ २४ ॥ शुक्रसोमौ च मध्याह्ने उदये तु क्षमासुतः ॥ शनिः प्रागष्टमे भागे दिवारात्रे
त्विहोच्यते ॥ २५ ॥ ग्रहाश्च भुञ्जते चैव शेषं भागस्य लक्षणम् ॥ रविवारे सदा ज्ञेयौ पादौ दश चतुर्दश ॥ २६ ॥ अष्ट द्वादश वै चन्द्रे दश षष्ठे
कुजे तथा ॥ बुधस्य नवमे पादे राहौ च दिवसस्य च ॥२७॥ गुरोर्द्वितीयः षष्ठश्च षोडशस्य तु वर्जयेत् ॥ भास्करस्य दिने प्रोक्ते चतुर्थे दशमेष्टमे ॥
॥२८॥शनैश्चरदिने पादं त्यजेच्चैव सुदारुणम् ॥ द्वितीयं द्वादशं चैव षोडशस्य तु वर्जयेत् ॥२९॥ मुहूर्तघटिकादूर्द्ध्वं घटिका चतुर्थं भागं विंशतिश्च ॥

---

[1] निशाकरम्–इ० पा० । [2] मर्मसु ।

कुहूसुतं बुद्बुदं निमेषमेतत्कालस्य लक्षणम् ॥३०॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि पञ्चमीकल्पे दंशदष्टकदूतलक्षणं नाम चतुस्त्रिंशोऽध्यायः ॥३४॥ ॥छ॥ ॥ कश्यप उवाच ॥ ॥ सविषा दंष्ट्र्योर्मध्ये यमदूती तु वै भवेत् ॥ न चिकित्सा बुधैः कार्या तं गतायुं विनिर्दिशेत् ॥ १ ॥ प्रहरार्धं दिवारात्रावेकैकं भुञ्जते बहिः ॥ एकस्य च समानं च द्वितीयं षोडशं तथा ॥ २ ॥ नागोदयो यमुद्दिश्य हतो विद्धो विदारितः ॥ कालदष्टं विजानीयात्कश्यपस्य वचो यथा ॥ ३ ॥ यन्मात्रं पतते बिंदुर्वालाग्रं सलिलोद्धृतम् ॥ तन्मात्रं स्रवते द्रंष्ट्रा विषं सर्पस्य दारुणम् ॥ ४ ॥ नाडीशते तु संपूर्णे देहे संक्रमते विषम् ॥ यावत्संक्रामयेद्बाहुं कुञ्चितं वा प्रसारयेत् ॥ ५ ॥ अनेन क्षणमात्रेण विषं गच्छति मस्तके ॥ वेपते विषवेगे तु शतशोऽथ सहस्रशः ॥ ६ ॥ वर्धते रक्तमासाद्य ततो वातैः शिखी यथा ॥ तैलबिंदुर्जलं प्राप्य यथा वेगेन वर्धते ॥७॥ शिखंडी आश्रयं प्राप्य मारुतेन समीरितः ॥ ततः स्थानशतं प्राप्य त्वचास्थानं विचेष्टितम् ॥८॥ त्वचासु द्विगुणं विद्याच्छोणितेषु चतुर्गुणम् ॥ पित्ते तु त्रिगुणं याति श्लेष्मे वै षोडशं भवेत् ॥ ९ ॥ वायौ त्रिंशद्गुणं चैव मज्जाषष्टिगुणं तथा ॥ प्राणे चैकार्णवीभूते सर्वगात्राणि संधयेत्॥१०॥ श्रोत्रे निरुध्यमाने च याति दष्टस्त्वसाध्यताम् ॥ ततोऽसौ म्रियते जंतुर्निःश्वासोच्छ्वासवर्जितः ॥११॥ निष्क्रांते तु ततो जीवे भूते पञ्चत्वमागते ॥ तानि भूतानि गच्छंति यस्ययस्य यथातथम् ॥ १२ ॥ पृथिव्यापस्तथा तेजो वायुराकाशमेव च ॥ इत्येषामेव संघातः शरीरमभिधीयते ॥ १३ ॥ पृथिवी पृथिवीं याति तोयं तोयेषु लीयते ॥ तेजो गच्छति चादित्यं मारुतो मारुतं व्रजेत् ॥ १४ ॥ आकाशं चैवमाकाशे सह तेनैव गच्छति ॥ स्वस्थानं ते प्रपद्यंते परस्परनियोजिताः ॥ १५ ॥ न जीवेदागतः कश्चिदिह जन्मनि सुव्रत ॥ विषार्तं न उपेक्षेत त्वरितं तु चिकित्सयेत् ॥ १६ ॥ एकमस्ति विषं लोके द्वितीयं चोपपद्यते ॥ यथा नानाविधं चैव स्थावरं तु तथैव च ॥ १७ ॥ प्रथमे विषवेगे तु रोमहर्षोऽभिजायते ॥ द्वितीये विषवेगे तु स्वेदो गात्रेषु जायते ॥ १८ ॥ तृतीये विषवेगे तु कंपो गात्रेषु जायते ॥ चतुर्थे विषवेगे तु श्रोत्रांतरनिरोधकृत् ॥ १९ ॥ पञ्चमे विषवेगे तु हिक्का गात्रेषु जायते ॥ षष्ठे च विषवेगे तु प्राणेभ्योऽपि प्रमुच्यते ॥ सप्तधातुवहा ह्येते वैनतेयेन भाषिताः ॥ २० ॥ त्वचः स्थाने विषे प्राप्ते तस्य रूपाणि मे शृणु ॥ अंगानि तिमिरायंते तपंते च मुहुर्मुहुः ॥ २१ ॥ एतानि यस्य चिह्नानि तस्य त्वचि गतं विषम् ॥ तस्यागदं प्रवक्ष्यामि येन संपद्यते सुखम् ॥ २२ ॥ अर्कमूलमपामार्गं प्रियंगुं तगरं तथा ॥ एतदालोड्य दातव्यं ततः संपद्यते सुखम् ॥ २३ ॥ ततस्तस्मिन्कृते

---

१. बर्धयेत्—इ० पा० । २ तैलकम्—इ० पा० ।

विप्र न निवर्तेत चेद्विषम् ॥ त्वचः स्थानं ततो भित्त्वा रक्तस्थानं प्रधावति ॥ २४ ॥ विषे च रक्तं संप्राप्ते तस्य रूपाणि मे शृणु ॥ दह्यते मुह्यते[१]
चैव शीतलं बहु मन्यते ॥ २५ ॥ एतानि यस्य रूपाणि तस्य रक्तगतं विषम् ॥ तत्रागदं प्रवक्ष्यामि येन संपद्यते सुखम् ॥ २६ ॥ उशीरं चन्दनं
कुष्ठमुत्पलं तगरं तथा ॥ महाकालस्य मूलानि सिंदुवारनगस्य च ॥ हिंगुलं मरिचं चैव पूर्ववेगे तु दापयेत् ॥ २७ ॥ बृहती वृश्चिका काली इंद्रवारुणिमूलकम्[२] ॥ सप्तगंधघृतं चैव द्वितीये परिकीर्तितम् ॥ २८ ॥ सिंदुवारं तथा हिंगु तृतीये कारयेद्बुधः ॥ तस्य पानं च कुर्वीत अंजनं लेपनं
तथा ॥ २९ ॥ एतेनैवोपचारेण ततः संपद्यते सुखम् ॥ रक्तस्थानं ततो गत्वा पित्तस्थानं प्रधावति ॥ ३० ॥ पित्तस्थानगते विप्र विषरूपाणि मे शृणु ॥
उत्तिष्ठते निपतते दह्यते मुह्यते तथा ॥ ३१ ॥ गात्रतः पीतकः स्याद्वै दिशः पश्यति पीतिकाः ॥ प्रबला च भवेन्मूर्च्छा न चात्मानं विजानते ॥ विषक्रियां तस्य कुर्याद्यया संपद्यते सुखम् ॥ ३२ ॥ पित्तस्थानमतिक्रम्य श्लेष्मस्थानं च गच्छति ॥ ३३ ॥ पिप्पल्यो मधुकं चैव मधु खंडं घृतं
तथा ॥ मधुसारमलाबूं च जातिं शंकरवालुकाम् ॥ इंद्रवारुणिकामूलं गवां मूत्रेण पेषयेत् ॥ ३४ ॥ नस्यं तस्य प्रयुंजीत पानमालेपनांजनम् ॥
एतेनैवोपचारेण ततः संपद्यते सुखम् ॥ ३५ ॥ श्लेष्मस्थानं ततः प्राप्ते तस्य रूपाणि मे शृणु ॥ गात्राणि[३] तस्य रुध्यंते निःश्वासश्च न जायते ॥
लाला च स्रवते तस्य कंठो घुरुघुरायते ॥ ३६ ॥ एतानि यस्य रूपाणि तस्य श्लेष्मगतं विषम् ॥ तस्यागदं प्रवक्ष्यामि येन संपद्यते सुखम्
॥ ३७ ॥ त्रिकटुकी श्लेष्मातको लोध्रश्च मधुसारकम् ॥ एतानि समभागानि गवां मूत्रेण पेषयेत् ॥ ३८ ॥ तस्य पानं च कुर्वीत अंजनं लेपनं
तथा ॥ एतेनैवोपचारेण ततः संपद्यते सुखम् ॥ ३९ ॥ श्लेष्मस्थानमतिक्रम्य वायुस्थानं च गच्छति ॥ तत्र रूपाणि वक्ष्यामि वायुस्थानगते विषे
॥ ४० ॥ आध्मायते च जठरं बांधवांश्च न पश्यति ॥ ईदृशं कुरुते रूपं दृष्टिभंगश्च जायते ॥ ४१ ॥ एतानि यस्य रूपाणि तस्य वायुगतं
विषम् ॥ तस्यागदं प्रक्ष्यामि येन संपद्यते सुखम् ॥ ४२ ॥ शोणामूलं प्रियालं च रक्तं च गजपिप्पलीम् ॥ भार्ङ्गीं वचां पिप्पलीं च देवदारुं मधूककम् ॥ ४३ ॥ मधूकसारं सहसिंदुवारं हिंगुं च पिष्ट्वा गुटिकां च कुर्यात् ॥ दद्याच्च तस्यांजनलेपनादि एषोऽगदः सर्पविषाणि हन्यात् ॥ ४४ ॥
अंजनं चैव नस्यं च क्षिप्रं दद्याद्विषान्विते ॥ वायुस्थानं ततो मुक्त्वा मज्जास्थानं प्रधावति ॥ ४५ ॥ विषे मज्जागते विप्र तस्य रूपाणि मे शृणु ॥
दृष्टिश्च हीयते तस्य भृशमंगानि मुंचति ॥ ४६ ॥ एतानि यस्य रूपाणि तस्य मज्जागतं विषम् ॥ तस्यागदं प्रवक्ष्यामि येन संपद्यते सुखम् ॥ ४७ ॥

---

१ चैव तद्देहम्-इ० पा० । २ इंद्रवारुकमूलकम्-इ० पा० । ३ श्रोत्राणि तस्य रुध्यंते-इ० पा० ।

घृतमधुशर्करान्वितमुशीरं चदनं तथा ॥ एतदालोड्य दातव्यं पानं नस्यं च सुव्रत ॥ ४८ ॥ ततः प्रणश्यते दुःखं ततः संपद्यते सुखम् ॥
अथ तस्मिन्कृते योगे विषं तस्य निवर्तते ॥४९॥ मज्जास्थानं ततो गत्वा मर्मस्थानं प्रधावति॥विषे तु मर्म संप्राप्ते शृणु रूपं यथा भवेत्॥५०॥
निश्चेष्टः पतते भूमौ कर्णाभ्यां बधिरो भवेत् ॥ वारिणा सिच्यमानस्य रोमहर्षो न जायते ॥५१॥ दंडेन हन्यमानस्य दंडराजी न जायते॥शस्त्रेण
च्छिद्यमानस्य रुधिरं न प्रवर्तते ॥ ५२ ॥ केशेषु लुच्यमानेषु नैव केशान्प्रवेदते ॥ यस्य कर्णौ च पार्श्वे च हस्तपादं च संधयः ॥ शिथिलानि
भवंतीह स गतासुरिति श्रुतिः ॥ ५३॥ एतानि यस्य रूपाणि विपरीतानि गौतम ॥ मृतं तु न विजानीयात्कश्यपस्य वचो यथा ॥५४॥ वैद्यास्त
स्य न पश्यंति ये भवंति कुशिक्षिताः ॥ विचक्षणास्तु पश्यंति मंत्रौषधिसमन्विताः ॥५५॥ तस्यागदं प्रवक्ष्यामि स्वयं रुद्रेण भाषितम् ॥ मयूरपित्तं
मार्जारपित्तं गन्धनां[२]डीमूलमेव च ॥ ५६ ॥ कुंकुमं तगरं कुष्ठं कासमर्दत्वचं तथा ॥ उत्पलस्य च किंजल्कं पद्मस्य कुमुदस्य च ॥ ५७ ॥ एतानि
समभागानि गोमूत्रेण तु पेषयेत् ॥ एषोऽगदो यस्य हस्ते दष्टो न म्रियते स वै ॥ कालाहिनापि दष्टेन क्षिप्रं भवति निर्विषः ॥५८॥ क्षिप्रमेव प्रदा
तव्यं मृतसंजीवनौषधम् ॥ अंजनं चैव नस्यं च क्षिप्रं दद्याद्विचक्षणः ॥ ५९ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्व
णि पंचमीकल्पे धातुगतविषक्रियावर्णनं नाम पंचत्रिंशोऽध्यायः ॥ ३५ ॥छ॥ ॥ गौतम उवाच ॥ ॥ कीदृशं सर्पदष्टस्य सर्पिण्याः कीदृशं भवेत् ॥
कुमारदष्टः कीदृक्स्यात्सूतिकादंशितस्य च ॥ १ ॥ रूपं नपुंसकेनेह व्यंतरेण च कीदृशम् ॥ एतदाख्याहि मे सर्वमेभिर्दष्टस्य लक्षणम् ॥ २ ॥
॥ ॥ कश्यप उवाच ॥ ॥ अतः परं प्रवक्ष्यामि नागानां रूपलक्षणम् ॥ सर्पदष्टस्य च तथा समासाद्द्विजपुंगव ॥ ३ ॥ अथ सर्पेण दष्टस्य ऊर्ध्वं
दृष्टिः प्रजायते ॥ सर्पीदष्टस्य च तथा अधोदृष्टिः प्रजायते ॥ ४ ॥ कन्यादष्टस्य वामा स्याद्दृष्टिर्द्विजवरोत्तम ॥ कुमारेणापि दष्टस्य दक्षिणा एव
जायते ॥५॥ गर्भिण्या वाथ दष्टस्य तथा स्वेदश्च जायते ॥ रोमांचः सूतिकायास्तु वेपथुश्चापि जायते ॥ नपुंसकेन दष्टस्य अंगमर्[२]दः प्रजायते ॥
॥६॥ पन्नग्यः प्रभवो रात्रौ दिवा सर्पो विषाधिकः॥ नपुंसकस्तु संध्यायां कश्यपेन तु भाषितम्॥७॥ अंधकारे तु दष्टो य उदके गहने वने ॥ सुप्तो
वा चेत्प्रमत्तो वा यदि सर्पं न पश्यति ॥ दष्टरूपाण्यजानन्वै कथं वैद्यचिकित्सितम्॥८॥चतुर्विधा इह प्रोक्ताः पन्नगास्तु महात्मना ॥ दर्वीकरा
मंडलिनो राजिला व्यंतरास्तथा ॥ ९ ॥ दर्वीकरा वातविषा मंडला पैत्तिकाः स्मृताः ॥ श्लेष्मला राजिला ज्ञेया व्यंतराः सान्निपातिकाः ॥ १० ॥

---

२ गंधनानालीमूल मेव च—इ० पा०। २ मुखशोषः—इ० पा०।

रक्तं परीक्षयेदेषां सर्पाणां तु पृथक्पृथक् ॥ कृष्णं दर्वीकराणां तु जायते नाल्पमुल्बणम् ॥ ११ ॥ रक्तं घनं च बहुशः शोणितं मंडलीकृतम् ॥ पिच्छिलं राजिले स्वल्पं तद्वद्व्यंतरके तथा ॥ १२ ॥ सर्पा ज्ञेयास्तु चत्वारः पंचमो नोपलभ्यते ॥ ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चैव चतुर्थकः ॥ १३ ॥ ब्राह्मणे मधुरं दद्यात्तिक्तं दद्यात्तथोत्तरे ॥ वैश्ये कर्षफलं दद्याच्छूद्रे [1]त्रिस्थूणमेव च ॥ १४ ॥ ब्राह्मणेन तु दष्टस्य दाहो गात्रेषु जायते ॥ मूर्च्छा च प्रबला स्याद्वै नात्मानमभिजानते ॥ १५ ॥ श्यामवर्णं मुखं च स्यान्मज्जास्तंभश्च जायते ॥ तस्य कुर्यात्प्रतीकारं येन संपद्यते सुखम् ॥ १६ ॥ अश्वगंधाप्यपामार्गः सिंदुवारं सुरामयम् ॥ एतत्सर्पिःसमायुक्तं पाने नस्ये च दापयेत् ॥ एतेनैवोपचारेण सुखी भवति मानवः ॥ १७ ॥ क्षत्रियेण तु दष्टस्य कंपो गात्रेषु जायते ॥ मूर्छा मोहस्तथा स्याद्वै नात्मानमभिवेत्ति सः ॥ १८ ॥ जायते वेदना तस्य ऊर्ध्वं चैव निरीक्षते ॥ तस्य कुर्यात्प्रतीकारं येन संपद्यते सुखम् ॥ १९ ॥ अर्कमूलमपामार्गं [2]प्रियंगुमिन्द्रवारुणीम् ॥ एतत्सर्पिःसमायुक्तं पानं नस्यं च दापयेत् ॥ एतेनैवोपचारेण सुखी भवति मानवः ॥ २० ॥ वैश्येनापि हि दष्टस्य शृणु रूपाणि यानि तु ॥ श्लेष्मप्रकोपो लाला च न चोद्वहति चेतनाम् ॥ २१ ॥ मूर्छा च प्रबला यस्य आत्मानं नाभिनंदति ॥ तस्य कुर्यात्प्रतीकारं येन संपद्यते सुखम् ॥ २२ ॥ अश्वगंधा सगोमूत्रा गृहधूमं सगुग्गुलम् ॥ शिरीषार्कपलाशेन श्वेता च गिरिकर्णिका ॥ २३ ॥ गोमूत्रेण समायुक्तं पानं नस्यं च दापयेत् ॥ एष वैश्येन दष्टानामगदः परिकीर्त्तितः ॥ २४ ॥ शूद्रेणापि हि दष्टस्य शृणु तत्त्वेन गौतम ॥ [3]कुंथ्यते वेपते चैव ज्वरः शीतं च जायते ॥ २५ ॥ अंगानि [4]चुंलुचुलायंते शूद्रदष्टस्य लक्षणम् ॥ तत्रागदं प्रवक्ष्यामि येन संपद्यते सुखम् ॥ २६ ॥ पद्मं च लोध्रकं चैव क्षौद्रं पद्मस्य केसरम् ॥ मधूकसारं मधु च श्वेतां च गिरिकर्णिकाम् ॥ २७ ॥ एतानि समभागानि पेषयेच्छीतवारिणा ॥ पानलेपांजनैर्नस्यैः सुखी भवति मानवः ॥ २८ ॥ पूर्वाह्णे चरते विप्रो मध्याह्ने क्षत्रियश्चरेत् ॥ अपराह्णे चरेद्वैश्यः शूद्रः संध्याचरो भवेत् ॥२९॥ आहारो [6]वायुपुष्पाणि ब्राह्मणानां विदुर्बुधाः ॥ मूषिका क्षत्रियाणां च आहारो द्विजसत्तम ॥ वैश्या मंडूकभक्षाश्च शूद्राः सर्वाशिनस्तथा ॥३०॥ अग्रतो दशते विप्रः क्षत्रियो दक्षिणेन तु ॥ वामपार्श्वे सदा वैश्यः पश्चाद्वै शूद्र आदशेत् ॥ ३१ ॥ मदकाले तु संप्राप्ते पीड्यमाना महाविषाः ॥ अवेलायां दशंते वै मैथुनार्ता भुजंगमाः ॥ ३२ ॥ पुष्पगंधाः

---

[1] कटुकमेव च–इ० पा० । [2] प्रियंगुमत्तवारुणीम्–इ० पा० । [3] क्रुध्यते––इ० पा० । [4] चिमिचिमायंते––इ० पा० । [5] चांतरे–इ० पा० । [6] आहारं चात्र पुष्पाणि–इ० पा० ।

स्मृता विप्राः क्षत्रियाश्चंदनावहाः ॥ वैश्याश्च घृतगंधा वै शूद्राः स्युर्मत्स्यगंधिनः ॥ ३३ ॥ वासं तेषां प्रवक्ष्यामि यथावदनुपूर्वशः ॥ वापीकूपतडागेषु[1]
गिरिप्रस्रवणेषु च ॥ वसंति[2] ब्राह्मणाः सर्पा ग्रामद्वारे चतुष्पथे ॥३४॥ आरामेषु पवित्रेषु शुचिष्वायतनेषु[3] च ॥ वसन्ति क्षत्रिया नित्यं तोरणेषु सरःसु
च ॥३५॥ श्मशाने भस्मशालासु पलालेषु तटेषु च ॥ गोष्ठेषु पथि वृक्षेषु विप्र वैश्या वसंति च ॥३६॥ अविविक्तेषु स्थानेषु निर्जनेषु वनेषु च ॥
शून्यागारे श्मशाने च शूद्रा विप्र वसंति च ॥ ३७॥ श्वेताश्च कपिलाश्चैव ये सर्पास्त्वनलप्रभाः ॥ मनस्विनः सात्त्विकाश्च ब्राह्मणास्ते बुधैः स्मृताः
॥३८॥ रक्तवर्णाः सुवर्णाभाः प्रवालमणिसंनिभाः ॥ सूर्यप्रभास्तथा विप्र क्षत्रियास्ते भुजंगमाः॥३९॥नानाविचित्रराजीभिरतसीवर्णसन्निभाः॥ बाण
पुष्पसवर्णाभा वैश्यास्ते वै भुजंगमाः ॥ ४० ॥ काकोदरनिभाः केचिद्ये च अंजनसन्निभाः ॥ काकवर्णा धूम्रवर्णास्ते शूद्राः परिकीर्तिताः ॥४१॥
यस्य सर्पेण दष्टस्य दंशमंगुष्ठमंतरम् ॥ बालदष्टं विजानीयात्कश्यपस्य वचो यथा॥ ४२ ॥ यस्य सर्पेण दष्टस्य दंशं द्व्यंगुलमंतरम् ॥ यौवनस्थेन
दष्टस्य एतद्भवति लक्षणम् ॥ ४३ ॥ यस्य सर्पेण दष्टस्य सार्धं द्व्यंगुलमंतरम् ॥ वृद्धदष्टं विजानीयात्कश्यपस्य वचो यथा ॥४४॥ अनंतः प्रेक्षते
पूर्वं वामपार्श्वे तु वासुकिः ॥ तक्षको दक्षिणेनेह कर्कोटः पृष्ठतस्तथा ॥ ४५ ॥ चलते भ्रमते पद्मो महापद्मो निमज्जति ॥ विसंज्ञस्तिष्ठते[4] चैव शंख
पालो मुहुर्मुहुः ॥ ४६ ॥ सर्वेषां कुरुते रूपं कुलिकः पन्नगोत्तमः ॥ अनंतस्य दिशा पूर्वा वासुकेस्तु हुताशनी ॥४७॥ दक्षिणा तक्षकस्योक्ता कर्को
टस्य तु नैर्ऋती ॥ पश्चिमा पद्मनाभस्य महापद्मस्य वायुजा ॥ उत्तरा शंखपालस्य ऐशानी कंबलस्य तु॥४८॥अनंतस्य भवेत्पद्मं वासुकेः स्यात्त
थोत्पलम् ॥ स्वस्तिकं तक्षकस्योक्तं कर्कोटस्य तु[5] पंकजम् ॥ ४९ ॥ पद्मस्य तु भवेत्पद्मं शूलं पद्मेतरस्य तु ॥ शंखपाले भवेच्छत्रं कुलिकस्या
र्धचन्द्रकम् ॥ ५० ॥ अनंतकपिलौ विप्रौ क्षत्रियौ शंखवासुकी ॥ महापद्मस्तक्षकश्च वैश्यौ विप्र प्रकीर्तितौ ॥ पद्मकर्कोटकौ शूद्रौ सदा ज्ञेयौ
मनीषिभिः[6] ॥ ५१ ॥ अनंतकुलिकौ शुक्लौ वर्णतो ब्रह्मसंभवौ ॥ वासुकिः शंखपालश्च रक्तौ ह्यग्निसमुद्भवौ ॥ ५२ ॥ तक्षकश्च महापद्म ईषत्पीतौ[7] बभू
वतुः ॥ पद्मकर्कोटकौ विप्र सर्पौ कृष्णौ बभूवतुः ॥ ५३ ॥ हयं यानं[8] वृषं छत्रं राजानमथ पावकम् ॥ धरणीमुत्पाद्य धृतानेतान्सिद्धिकरान्विदुः ॥
॥५४॥पूर्णकुम्भः पाताका च कांचनं मणयस्तथा ॥ शिरीषं[9] माणिकं कण्ठे जीवजीवेति सुव्रत ॥ एतेषां दर्शनं श्रेष्ठं कन्या चैकप्रसूयिका ॥५५॥

---

[1] नदीह्रदतडागेषु—इ० पा० । [2] विप्रो वै वसते नित्यं सदा ब्राह्मणसत्तम—इ० पा० । [3] विशुद्धायतनेषु च—इ० पा० । [4] विमज्जंस्तिष्ठते—इ० पा० । [5] त्रिरेखकम्—इ० पा० । [6] नृपोत्तम—इ० पा० । [7] प्रायः पीतौ—इ० पा० । [8] हयपालम्—इ० पा० । [9] शयनं मणिकं कंठे—इ,० शरसौमाणिकं कंठे—इ० च पा० ।

चतुःषष्टिः समाख्याता भोगिनो ये तु[1] पन्नगाः ॥ अदृश्यास्तेषु षट्त्रिंश[2]द्दृश्यास्त्रिंशन्महीचराः ॥ ५६ ॥ विंशच्च स्रग्विणः प्रोक्ताः सप्त मंडलिनस्तथा ॥ राजीवन्तो दश प्रोक्ता दर्व्यः षोडश पंच च ॥ ५७ ॥ दुंदुभो डुंडुभश्चैव चे[4]टभश्चेंद्रवाहनः ॥ नागपुष्पसवर्णाख्या निर्विषा ये च पन्नगाः ॥ एवमेवतुसर्पाणां शतद्विनवति स्मृतम् ॥ ५८ ॥ वराहकर्णीं गजपिप्पलीं च गांधारिकां पिप्पलदेवदारु ॥ मधूकसारं सहसिंदुवारं हिंगुं च पिष्ट्वा गुटिका च कार्या ॥५९॥ ॥ सुमंतुरुवाच ॥ ॥ इत्युक्तवान्पुरा वीर गौतमस्य प्रजापतिः ॥ लक्षणं सर्वनागानां रूपवर्णौ विषं तथा ॥ ॥ ६० ॥ तस्मात्संपूजयेन्नागान्सदा भक्त्या समन्वितः ॥ विशेषतस्तु पंचम्यां पयसा पायसेन च ॥ ६१ ॥ श्रावणे मासि पंचम्यां शुक्ल[5]पक्षे नराधिप ॥ द्वारस्योभयतो लेख्या गोमयेन विषोल्बणाः ॥ ६२ ॥ पूजयेद्विधिवद्द्वारं दधिदूर्वाक्षतैः कुशैः ॥ गंधपुष्पोपहारैश्च ब्राह्मणानां च तर्पणैः॥ ॥ ६३ ॥ ये त्वस्यां पूजयंतीह नागान्भक्तिपुरःसराः ॥ न तेषां सर्पतो वीर भयं भवति कर्हिचित् ॥ ६४ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि पञ्चमीकल्पे श्रावणिकनागपञ्चमीव्रतवर्णनं नाम षट्त्रिंशोऽध्यायः ॥ ३६ ॥ ॥ छ ॥ ॥ सुमंतुरुवाच ॥ ॥ तथा भाद्रपदे मासि पंचम्यां श्रद्धयान्वितः ॥ अथालेख्य नरो नागान्कृष्णवर्णादिवर्णकैः ॥ १ ॥ पूजयेद्गंधपुष्पैश्च सर्पिःपायसगुग्गुलैः ॥ तस्य तुष्टिं समायांति पन्नगास्तक्षकादयः ॥ २ ॥ आसप्तमात्कुलात्तस्य न भयं नागतो भवेत् ॥ तस्मात्सर्वप्रयत्नेन नागान्संपूजयेद्बुधः ॥ ३ ॥ इति श्रीभविष्ये महापुराणे शतर्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि पंचमीकल्पे भाद्रपदिकनागपञ्चमीव्रतवर्णनं नाम सप्तत्रिंशोऽध्यायः ॥३७॥ ॥ छ ॥ ॥ ॥ सुमंतुरुवाच ॥ ॥ तथा चाश्वयुजे मासि पञ्चम्यां कुरुनंदन ॥ कृत्वा कुशमयान्नागान्गंधा[6]द्यैः संप्रपूजयेत् ॥ १ ॥ घृतोदकाभ्यां पयसा स्नपयित्वा विशांपते ॥ गोधूमैः पयसा स्विन्नैर्भक्ष्यैश्च विविधैस्तथा ॥ २ ॥ यस्त्वस्यां विधिवन्नागाञ्छुचिर्भक्त्या समन्वितः ॥ पूजयेत्कुरुशार्दूल तस्य शेषादयो नृप ॥३॥ नागाः प्रीता भवंतीह शांतिमाप्नोति वा विभो ॥ स शांतिलोकमासाद्य मोदते शाश्वतीः समाः ॥ ४ ॥ इत्येष कथितो वीर पञ्चमीकल्प उत्तमः ॥ यत्रायमुच्यते मंत्रः सर्वसर्पनिषेधकः ॥ ५ ॥ (ॐ कुरुकुल्ले फट् स्वाहा ।) ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि पंचमीकल्पे समाप्तिकथनं नामाष्टत्रिंशोऽध्यायः ॥३८॥ ॥छ॥ ॥सुमंतुरुवाच॥ ॥ षष्ठ्यां फलाशनो राजन्विशेषात्कार्तिके नृप ॥ राज्यच्युतो विशेषेण स्वं राज्यं लभतेऽचिरात् ॥१॥ षष्ठी तिथिर्महाराज सर्वदा सर्वकामदा॥ उपोष्या तु प्रयत्नेन सर्वकालं जया

---

[1] मत्तपन्नगाः—इ० पा० । [2] अष्टत्रिंशन्महीचराः–इ० पा० । [3] मुकुलिनः–इ० पा० । [4] क्षेत्रभः क्षेत्रवाहनः–इ० पा० । [5] कृष्णपक्षे इ० पा० अप्रासंगिकः । [6] इंद्राण्या सह पूजयेत्–इ० पा० ।

र्थिना ॥ २ ॥ कार्त्तिकेयस्य दयिता एषा षष्ठी महातिथिः ॥ देवसेनाधिपत्यं हि प्राप्तं तस्यां महात्मना ॥३॥ अस्यां हि श्रेयसा युक्तो यस्मात्स्कंदो भवाग्रणीः ॥ तस्मात्षष्ठ्यां नक्तभोजी प्राप्नुयादीप्सितं सदा ॥ ४ ॥ दत्त्वार्घ्यं कार्त्तिकेयाय स्थित्वा वै दक्षिणामुखः ॥ दध्ना घृतोदकैः पुष्पैर्मंत्रेणानेन सुव्रत ॥ ५ ॥ सप्तर्षिदारज स्कन्द स्वाहापतिसमुद्भव ॥ रुद्रार्यमाग्निज विभो गंगागर्भ नमोऽस्तु ते ॥ प्रीयतां देवसेनानीः संपादयतु हृद्गतम् ॥ ॥ ६ ॥ दत्त्वा विप्राय चात्मान्नं यच्चान्यदपि विद्यते ॥ पश्चाद्भुङ्क्ते त्वसौ रात्रौ भूमिं कृत्वा तु भाजनम् ॥७॥ एवं षष्ठ्यां व्रतं स्नेहात्प्रोक्तं स्कन्देन यत्नतः ॥ तन्निबोध महाराज प्रोच्यमानं मयाखिलम् ॥ ८ ॥ षष्ठ्यां यस्तु फलाहारो नक्ताहारो भविष्यति ॥ शुक्लाकृष्णासु नियतो ब्रह्मचारी समाहितः ॥ ९ ॥ तस्य सिद्धिं धृतिं तुष्टिं राज्यमायुर्निरामयम् ॥ पारत्रिकं चैहिकं च दद्यात्स्कन्दो न संशयः ॥ १० ॥ यो हि नक्तोपवासः स्यात्स नक्तेन व्रती भवेत् ॥ इह वामुत्र सोत्यंतं लभते ख्यातिमुत्तमाम् ॥ स्वर्गे च नियतं वासं लभते नात्र संशयः ॥ ११ ॥ इह चागत्य कालांते यथोक्तफलभाग्भवेत् ॥ देवानामपि वंद्योऽसौ राज्ञां राजा भविष्यति ॥ १२ ॥ यश्चापि शृणुयात्कल्पं षष्ठ्याः कुरुकुलोद्वह ॥ तस्य सिद्धिस्तथा तुष्टिर्धृतिः स्यात्ख्यातिसंभवा ॥ १३ ॥ इति श्रीभविष्ये महापुराणे शतार्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि षष्ठीकल्पवर्णनं नाम एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥ ॥ छ ॥ ॥ शतानीक उवाच ॥ ॥ अहो व्रतं महत्कष्टं संशयो हृदि वर्तते ॥ कार्त्तिकेयस्य माहात्म्यं श्रुत्वा जन्म तथा द्विज ॥ १ ॥ अनेकजनितस्येह कार्त्तिकेयस्य सुव्रत ॥ माहात्म्यं सुमहद्विप्र कथमेतद्विभाव्यते ॥ २ ॥ जातिः श्रेष्ठा भवेद्वीर उत कर्म भवेद्वरम् ॥ संशयस्तु महानत्र दृष्ट्वा मे कृत्तिकासुतम् ॥ ३ ॥ एतद्वद विनिश्चित्य न यथा संशयो भवेत् ॥ जन्मतः कर्मणश्चैव यज्ज्यायस्तद्ब्रवीहि मे ॥ ४ ॥ ॥ ॥सुमंतुरुवाच ॥ ॥ इममर्थं पुरा पृष्टो ब्रह्मा शिष्यैर्मनीषिभिः ॥ यदुक्तं तेन तेषां च तत्ते वच्मि निबोध मे ॥५॥ सुरज्येष्ठं सुखासीनमभिगम्य महर्षयः ॥ प्रणम्य च महाबाहो विश्वामित्रस्य विप्रताम् ॥ ६ ॥ दृष्ट्वा विस्मयमागत्य कौतूहलसमन्विताः ॥ भक्तिं श्रद्धां पुरोधाय प्रणम्यानतकन्धराः ॥ ७ ॥ ॥ ऋषय ऊचुः ॥ ॥ भो ब्रह्मन्नादिकल्पे हि ब्राह्मण्यं ब्रूहि किं भवेत् ॥ जात्यध्ययनदेहात्मसंस्कारां[1]चारकर्मणाम् ॥ ८ ॥ बाह्याभ्यंतरसामान्यविशेषा यदि कृत्रिमाः ॥ मनोवाक्कर्मशारीरजातिद्रव्यगुणात्मकाः ॥ ९ ॥ संत्यक्तव्याः प्रसिद्धा ये जातिभेदविधायिनः ॥ वस्तुभूताः परोक्षैर्वा प्रमाणैर्न विनिश्चिताः ॥ १० ॥ अव्यक्तागमसिद्धश्चेज्जातिभेदविधिर्नृणाम् ॥ विकल्पोऽयं न पुष्णाति भवतः शेमुषीबलम् ॥ ११ ॥ ॥ ब्रह्मो

---

[1] संस्काराधानकर्मणाम्—इ० पा० ।

वाच ॥ ॥ एवमेतन्न संदेहो यथा यूयं वदंति[१] ह ॥ शृणुध्वं योगिनो वाक्यं सतर्कं शिष्यश्रेयसे ॥ १२ ॥ ॥ योगेश्वर उवाच ॥ ॥ प्रमाणे
हि प्रसिद्धे तु भिन्नार्थविषये यतः ॥ स्पष्टयोग्यार्थविषयं प्रत्यक्षं तावदीक्षते ॥ १३ ॥ सामान्यातींद्रियग्राही सिद्धांतोऽभ्युपगम्यते ॥ स एव भग
वानेकं प्रमाणमिति चेन्न तत् ॥ १४ ॥ यस्माद्द्विविधमेतत्ते संकटं भद्र वर्तते ॥ वेदस्य पौरुषेयत्वं नित्यजातिसमर्थकम् ॥ १५ ॥ कार्या विशेषा
वेदोक्ता न युक्तमकृतं वचः ॥ ताल्वादिकरणानां च व्यापारानंतरं श्रुतेः ॥ १६ ॥ व्यापारात्परतस्तस्य प्रागभावविशेषतः ॥ तद्भावानुविधायित्व
मन्वयव्यतिरेकतः ॥ १७ ॥ तस्माद्धूमाग्निवद्वार्थफलभावोऽवतिष्ठते ॥ न च व्यापारवचसोरन्यथानुपपत्तितः ॥ १८ ॥ पुरुषानुगता जातिर्ब्राह्मण
त्वादिकास्ति चेत् ॥ द्विवर्णजातिभेदेन प्रत्यक्षार्थोपलक्षणात् ॥ १९ ॥ गोवर्गमध्यं च गतो यथाश्वो निर्धार्यते ज्ञैः सुविचक्षणत्वात् ॥ मनुष्य
भावादविशिष्यमाणस्तद्वद्द्विजः शूद्रगणान्न भिन्नः ॥ २० ॥ मनुष्यजातेर्न परो विशेषो यः कल्प्यते सर्वनरानुयायी ॥ संस्कारयुक्ता हि क्रिया
विशिष्टा द्विजन्मनां शूद्रविवेकहेतुः ॥ २१ ॥ जीवोपि ब्राह्मणः प्रोक्तो यैरतत्त्वज्ञमानवैः ॥ प्रभ्रष्टब्राह्मणत्वास्ते जायंते विप्रसंगतः ॥ २२ ॥ जरा
जन्मांतरक्लेशदुष्टग्राहकुलाकुलम् ॥ नरतिर्यगसच्छूद्रयोनिदुःखोर्मिसंकटम् ॥ २३ ॥ दौःस्थित्यरोगशोकार्तिजनावर्तसमन्वितम् ॥ श्वानशूकरचां
डालकृमिकूर्मादिकायकम् ॥ २४॥ संसारसागरं घोरं मग्नः खलु परिप्लुवन् ॥ भूरिपापभराक्रांतः स जीवो ब्राह्मणः कथम् ॥ २५ ॥ ॥ ब्रह्मो
वाच ॥ ॥ सप्तव्याधकथा विप्रा मनुना परिकीर्तिता ॥ तां निशम्य यदुश्रेष्ठ नित्यं जातिपदं त्यजेत् ॥ २६ ॥ सप्तव्याधा दशार्णेषु[२] मृगाः कालं
जरे गिरौ ॥ चक्रवाकाः सरिद्वीपे हंसाः सरसि मानसे ॥ २७ ॥ तेऽपि जाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः ॥ प्रस्थिता दीर्घमध्वानं यूयं किम
वसीदथ ॥ २८ ॥ तस्मान्न जीवे ब्राह्मण्यं पश्यामो हि कथञ्चन ॥ २९ ॥ शस्त्रादिमद्भार्गवजातियुक्तो गजाश्वगोजोष्ट्रखरादिकानाम् ॥ शक्त्या
कृतो ह्यंगजवर्णधर्मैर्भेदः स्फुटं लक्षणतोऽत्र यद्वत् ॥ ३० ॥ तदुत्तरान्नैव विकर्तनीया ब्राह्मण्यजातिर्नृषु नास्ति काचित् ॥ नित्याकृ
तिर्नानुपभेदरूपा यथा हि भेदः परमोत्र सिध्येत् ॥ सिताद्यसाधारणतुल्यरूपाः सनातनोंगेषु न वर्णभेदः ॥ ३१ ॥ ब्राह्मण्यमध्रुवमिदं किल कृत्रिम
त्वादकृत्रिमं भवति सामयिकत्वयोगात् ॥ सांकेतिकं सुकृतलेशविशेषलब्धं वाणिज्यभेषजकृतामिव जातिभेदाः ॥ ३२ ॥ किं ब्राह्मणा ये सुकृतं
त्यजंति किं क्षत्रिया लोकमपालयंतः ॥ स्वधर्महीना हि तथैव वैश्याः शूद्राः स्वमुख्यक्रियया विहीनाः ॥ ३३ ॥ तस्मान्न गोश्ववत्कश्चिज्जातिभेदोऽ

---

[१] वदथ । [२] दशारण्ये–इ० पा० ।

स्ति देहिनाम् ॥ कार्यशक्तिनिमित्तस्तु संकेतः कृत्रिमो भवेत्॥३४॥ एवं प्रमाणैः प्रतिषिध्यमानां सांकेतिकीं याति नरो व्यवस्थाम्॥ स्वकीयसिद्धां स्वमतैर्निषिद्धां न बुध्यते मूढमना वराकः॥३५॥गोमहिष्यजवाज्युष्ट्रवानेयाविगजाधिपाः॥ प्रेष्यवार्धुषिकाकार्यकरणोद्यतमानसाः॥३६॥ [1]वणिक्कारुक्रियाविष्टा दिव्यास्तेऽपि च ये द्विजाः ॥ विनष्टास्ते तु विज्ञेयाः क्रव्यादाश्च कुशीलवाः ॥ ३७ ॥ पलांडुलशुनादाश्च मृग्यु[2]द्धीक्षीरपायिनः ॥ मांससर्वरसक्षीरक्रयविक्रयकारिणः ॥ ३८ ॥ पुनर्भूवृषलीवेश्याचांडालस्त्रीनिषेविणः ॥ शूद्रान्नरसपुष्टांगाः प्रेतवस्त्रान्नभोजनाः ॥ ३९ ॥ मृतसूतकलब्धान्नपानाद्यभ्यवहारिणः ॥ ब्रह्मदेवपितृभूतमनुष्येषु बहिष्कृताः ॥ ४० ॥ मात्सर्यमदविद्वेषतृष्णाकामतमोमयाः ॥ हीना[3]चारा हि ये केचिदपरे पिशुना द्विजाः ॥ प्रकारैर्बहुभिः सर्वे ते प्रणश्यंति नान्यथा ॥ ४१ ॥ एवं शास्त्रोदितन्यायमार्गभ्रष्टास्तु ये नराः ॥ विशिष्टगोत्रसंस्कारकलापसकलात्मकाः ॥ ४२ ॥ वेदानध्यापयंतोऽपि तेऽधीयानाः श्रुतिक्रमात् ॥ ब्राह्मणत्वाद्विहीयंते दुराचारविधायिनः ॥ ४३ ॥ तस्मान्न जातिरेकत्र भूतात्मास्त्यनपायिनी ॥ नाशित्वादत्र च श्लोकान्मानवाः समधीयते ॥ ४४ ॥ सद्यः पतति मांसेन लाक्षया लवणेन च ॥ त्र्यहेण शूद्रो भवति ब्राह्मणः क्षीरविक्रयी॥४५॥गोरक्षकान्वाणिजिकांस्तथा कारुकुशीलवान् ॥ प्रेष्यान्वार्धुषिकांश्चैव शूद्रांस्तान्मनुरब्रवीत् ॥४६॥ शूद्रो ब्राह्मणतामेति ब्राह्मणश्चैति शूद्रताम् ॥ क्षत्रियो याति विप्रत्वं विद्याद्वैश्यं तथैव च ॥ ४७ ॥ ॥ इति श्रीभविष्ये [महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि षष्ठीकल्पे कार्तिकेयवर्णने जातिवर्णनं नाम चत्वारिंशोऽध्यायः ॥४०॥ ॥ ब्रह्मोवाच ॥ ॥ वेदाध्ययनमप्येतद्ब्राह्मण्यं प्रतिपद्यते ॥ विप्रवद्वैश्यराजन्यौ राक्षसा रावणादयः ॥ १ ॥ श्वादचांडालदासाश्च लुब्धकाभीरधीवराः ॥ येन्येऽपि वृषलाः केचित्तेपि वेदानधीयते ॥ २ ॥ शूद्रा देशांतरं गत्वा ब्राह्मण्यं क्षत्रियं श्रिताः ॥ व्यापाराकारभाषाद्यैर्विप्रतुल्यैः प्रकल्पितैः ॥ ३ ॥ वेदानधीत्य वेदौ वा वेदं :वापि यथाक्रमम् ॥ प्रोद्वहंति शुभां कन्यां शुद्धब्राह्मणजां नराः ॥४॥ अथ वाधीत्य वेदांस्तु क्षत्रैर्वैश्यैस्तु वा नराः ॥ गौडपूर्वां कृतामेयुर्जातिं वा दाक्षिणात्यजाम् ॥ ५ ॥ अपरिज्ञातशूद्रत्वाद्ब्राह्मण्यं यांति कामतः ॥ तस्मान्न ज्ञायते भेदो वेदाध्यायक्रियाकृतः ॥ ६ ॥ शास्त्रकारैस्तथा चोक्तं न्यायमार्गानुसारिभिः ॥ ते साधुमतमाकर्ण्य संतः संति विमत्सराः ॥ ७ ॥ आचारहीनान्न पुनंति वेदा यद्यप्यधीताः सह षड्भिरंगैः ॥ शिल्पं हि वेदाध्ययनं द्विजानां वृत्तं स्मृतं ब्राह्मणलक्षणं तु ॥ ८ ॥ अधीत्य चतुरो वेदान्यदि वृत्ते न तिष्ठति ॥ न तेन क्रियते कार्यं स्त्रीरत्नेनेव षंढकः ॥ ९ ॥ शिखाप्रणवसंस्कारसंध्योपा

---

१ वाणिज्याविष्टहृदयाः—इ० पा० । २ मत्स्यादाः स्त्रीषु यायिनः–इ० पा० । ३ हीनवाचः–इ० पा० । ४ उद्वहन्ति द्विजस्त्रियः–इ० पा० । ५ न नैः क्रिया सतां कार्या वैश्यास्ते ब्राह्मणा मताः–इ० पा० ।

सनमेखलाः ॥ दंडाजिनपवित्राद्याः शूद्रेष्वपि निरंकुशाः ॥ १० ॥ प्रसंगोपि हि शूद्राणां न शक्यो विनिवारितुम् ॥ देवोत्तमत्रयेणापि निवर्तंते
नराः स्वयम् ॥ ११ ॥ तस्मान्नैतेऽपि लक्ष्यंते वि[1]लक्षणतया नृणाम् ॥ यज्ञोपवीतसंस्कारमेखलाचूलिकादयः ॥ १२ ॥ आभिचारिकमंत्राद्यैर्दुर्लभ
त्वादिभाषणैः ॥ ब्राह्मणस्यैव शक्तिश्चेत्[2]केनास्य विनिहन्यते ॥ १३ ॥ तपःसत्यादिमाहात्म्याद्देवतासमयस्मृतिः ॥ मंत्रशक्तिर्नृणामेषां सर्वेषामपि
विद्यते ॥ १४ ॥ वंचनं दुर्वचस्यापि क्रियते सर्वभानवैः ॥ शूद्रब्राह्मणयोस्तस्मान्नास्ति भेदः कथंचन ॥ १५ ॥ शापानुग्रहकारित्वं शक्तिभेदो न
विद्यते ॥ चौरचाटादिराजन्यदुर्जनाभिहते नृणाम् ॥ १६ ॥ आत्मदुःखोदयापायं स्वेषु जंतुषु रक्षणम् ॥ कर्तुं न प्रभवेच्छूद्रो ब्राह्मणस्तद्वदेव हि ॥
॥ १७ ॥ मा भूद्युगे कलावेतद्देशे चाकार्यकृद्द्विजे ॥ स्यादन्यदेशकालादौ द्विजानामतिशायिनाम् ॥ १८ ॥ शापानुग्रहसामर्थ्यमन्यद्वाध्यात्मगोच
रम् ॥ ब्रह्मसाधनमेतद्धि लिंगं केचित्प्रचक्षते ॥ १९ ॥ संसाराररक्तचेतस्का मोहांधतमसावृताः ॥ पतंत्युन्मार्गगर्तेषु प्रत्यग्नि शलभा यथा ॥ २० ॥
जातिधर्मः स्वयं किंचिद्विशेषः श्रुतिसंगमात् ॥ असिद्धः शूद्रजातीनां प्रसिद्धो विप्रजातिषु ॥ २१ ॥ संस्कारो योनिसाध्यो वा सामग्री
प्रभवोऽथ वा ॥ शूद्रेभ्योऽतिशयं धत्ते यः साधारणतागुणः ॥ २२ ॥ विप्राणां पंचधा भेदः कल्पनीयस्तु पंडितैः ॥ न जातिजस्त्र
यीजो वा विशेषो युक्तिबाधकात् ॥ क्रमाक्रमक्रियाः संति न सनातनवस्तुनः ॥ २३ ॥ नित्यो न हेतुर्विगतक्रियत्वाद्धेतुर्भवेद्भेदविशेषतः
सः ॥ स तत्समस्तत्प्रतिसान्निधानात्कालात्ययेक्षित्वमयुक्तमेव ॥ २४ ॥ स्वांतःशरीरवृत्तिस्थः श्रुतियोगादुदेति यः ॥ सोनन्यवेदविज्ञातस्वभावो
न्यैर्न गम्यते ॥ २५ ॥ विशिष्टाधीतिधर्मत्वे कृत्रिमा ब्रह्मसंगतिः ॥ यस्यास्त्यतिशयस्तस्य नान्यो नाश्रयते यदि ॥ २६ ॥ दृश्यस्वभावं किम
भीष्टमेतद्ब्राह्मण्यमाहोस्विददृष्टरूपम् ॥ सर्वैः प्रतीयेत हि दृश्यरूपं ततोन्यथावद्गतिरेव न स्यात् ॥ २७ ॥ सामग्र्यभावात्परमं विशेषं भूदेवगात्रस्थ
मभूमिदेवाः ॥ स्मरंति तेनात्मनि पुण्यपापं यथा तथेत्येतदयुक्तमुक्तम् ॥ २८ ॥ सामग्र्यनुष्ठानगुणैः समग्रा शूद्रा यतः संति समा द्विजानाम् ॥
तस्माद्विशेषो द्विजशूद्रनाम्नोर्नाध्यात्मिको बाह्यनिमित्तको वा ॥ २९ ॥ संस्कारतः सोऽतिशयो यदि स्यात्सर्वस्य पुंसोस्त्यतिसंस्कृतस्य ॥ यः
संस्कृतो विप्रगणप्रधानो व्यासादिकैस्तेन न तस्य सौ[3]म्यम् ॥ ३० ॥ हेतुत्वं घ[4]टंते नैषां जात्यादीनामसंभवात् ॥ जातेरकृतकत्वाच्च अधीते न
विशेषतः ॥ ३१ ॥ संस्कारातिशयाभावादंतरस्यागते परैः ॥ भौतिकत्वाच्छरीरस्य समस्तानामसंहतैः ॥ ३२ ॥ किं चान्यनास्तिकम्लेच्छ

---

१ विचक्षणतया—इ० पा० । २ केनान्यस्य विहन्यते—इ० पा० । ३ भाव्यम्—इ० पा० । ४ विद्यते—इ० पा० !

यवनादिजनेष्वलम्[1] ॥३३॥ वेदोदितबहिर्दुष्टचारितेषु दुरात्मसु ॥ धर्मादतिशयो[2] दृष्टः क्रूरसाहसिकादिषु ॥ तस्माद्विप्रेषु जात्यादिसामग्रीप्रभवो न सः॥
॥३४॥ तस्मान्न च विभेदोस्ति न बहिर्नांतरात्मनि ॥ न सुखादौ न चैश्वर्ये नाज्ञायां नाभयेष्वपि॥३५॥न वीर्ये नाकृतौ नाक्षे न व्यापारे न चायुषि ॥
नांगे पुष्टे न दौर्बल्ये न स्थैर्ये नापि चापले॥३६॥ न प्रज्ञायां न वैराग्ये न धर्मे न पराक्रमे ॥ न त्रिवर्गे न नैपुण्ये न रूपादौ न भेषजे॥३७॥ न
स्त्रीगर्भेन गमनं न देहमलसंप्लुवे ॥ नास्थिरन्ध्रे न च प्रेम्णि न प्रमाणे न लोमसु॥३८॥शूद्रब्राह्मणयोर्भेदो मृग्यमाणोऽपि यत्नतः॥ नेक्ष्यते सर्वधर्मेषु
संहतैस्त्रिदशैरपि ॥ ३९ ॥ उक्तमात्रा विसंभूतिर्विचारक्रमकारिभिः ॥ वृद्धवृन्दारकाधीशैरप्रधृष्यमिदं वचः ॥ ४० ॥ न ब्राह्मणाश्चन्दमरीचिशुभ्रा
न क्षत्रियाः किंशुकपुष्पवर्णाः ॥ न चेह वैश्या हरितालतुल्याः शूद्रा न चांगारसमानवर्णाः ॥ ४१ ॥ पादप्रचारैस्तनुवर्णकेशैः सुखेन दुःखेन
च शोणितेन ॥ त्वङ्मांसमेदोस्थिरसैः[3] समानाश्चतुष्प्रभेदा हि कथं भवंति ॥४२॥ वर्णप्रमाणाकृतिगर्भवासवाग्बुद्धिकर्मेन्द्रियजीवितेषु ॥ बलत्रिव
र्गामयभेषजेषु न विद्यते जातिकृतो विशेषः ॥ ४३ ॥ स एक एवात्र पतिः प्रजानां कथं पुनर्जातिकृतः प्रभेदः ॥ प्रमाणदृष्टांतनयप्रवादैः परीक्ष्य
माणो विघटत्वमेति ॥ ४४ ॥ चत्वार एकस्य पितुः सुताश्च तेषां सुतानां खलु जातिरेका ॥ एवं प्रजानां हि पितैक एव पित्रैकभावान्न च जाति
भेदः ॥ ४५ ॥ फलान्यथोदुंबरवृक्षजातेर्यथाग्रमध्यांतभवानि यानि ॥ वर्णाकृतिस्पर्शरसैः समानि तथैकतो जातिरतिप्रचिन्त्या ॥ ४६ ॥ ये
कौशिकाः काश्यपगौतमाश्च कौंडिन्यमांडव्यवशिष्ठगोत्राः ॥ आत्रेयकौत्सांगिरसः सगर्गा मौद्गल्यकात्यायनभार्गवाश्च ॥ ४७ ॥ गोत्राणि नाना
विधजातयश्च भ्रातृस्नुषामैथुनपुत्रभावाः ॥ वैवाहिकं कर्म न वर्णभेदाः सर्वाणि शिल्पानि भवंति तेषाम् ॥ ४८ ॥ ये चान्ये[4] पंडिताः प्राहुर्देहब्राह्म
णतां नराः ॥ तेषां दुर्दृष्टितिमिरमपनीयानुकंप्य च ॥ ४९ ॥ न्यायाञ्जनौषधैर्दिव्यैः परिणामसुखावहैः ॥ उपनीतैः प्रयत्नेन सुदृष्टिं संविदध्महे ॥
॥ ५० ॥ मूर्तिमत्त्वाच्च नाशित्वं नाशित्वाच्छेषभूतवत् ॥ देहाधारनिविष्टानां[5] ब्राह्मण्यं न प्रकल्प्यते ॥ ५१ ॥ एकैकोवयवस्तेषां न ब्राह्मण्यं
समश्नुते ॥ न चानेकसमूहेपि[6] सर्वथातिप्रसंगतः ॥ ५२ ॥ पृथिव्युदकवाय्वग्निपरिणामाविशेषतः ॥ देहतः सर्वभूतानां ब्राह्मणत्वप्रसंगतः ॥५३॥
देहस्य ब्राह्मणत्वं यैरतत्त्वज्ञैः प्रकल्प्यते ॥ संस्कर्तॄणां शरीरस्य तेषां न ब्रह्मता भवेत् ॥ ५४ ॥ मृग्यमाणे प्रयत्नेन देहे तन्नोपलभ्यते ॥ तस्मान्न

---

[1] अपि—इ० पा० । [2] योऽस्मात्—इ० पा० । [3] त्वङ्मांसकेशास्थिरसैः—इ० पा० । [4] ये चार्थम्—इ० पा० । [5] वेदाहारविनष्टानाम्—इ० पा० । [6] समस्तोऽपि हि देहोऽयं सर्वख्यातिप्रसङ्गतः—इ० पा० ।

देहे ब्राह्मण्यं नापि देहात्मकं भवेत् ॥ ५५ ॥ [1]वर्णापसदचांडालश्वादादीनां प्रसज्यते ॥ यदि देहस्य विप्रत्वं भवद्भिरुपगम्यते ॥ ५६ ॥ देहशक्ति
गुणैः क्षीणैः कायभस्मादिरूपवत् ॥ तस्माद्देहात्मकेनैतद्ब्राह्मण्यं नापि कमजम् ॥ ५७ ॥ ॥ इति श्रीभविष्ये महापुराणे शतार्धसाहस्र्यां
संहितायां ब्राह्मे पर्वणि षष्ठीकल्पे ब्राह्मण्यविवेकवर्णनं नामैकचत्वारिंशोऽध्यायः ॥ ४१ ॥ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ अपरैश्च
सदाचारयोगयुक्तैर्मनीषिभिः ॥ यदकारि महासत्त्वैः सुभाषितमिदं शृणु ॥ १ ॥ बहुवनस्पतिशंखपिपीलिकाभ्रमरवारणजातिमुदा
हरन् ॥ गतिषु कर्ममितो नटवत्सदा भ्रमति जंतुरलब्धसुदर्शनः ॥ २ ॥ रूपैश्वर्यज्ञानकुलैर्विभवैर्वार्मितो भूत्वा धर्मपथं चेद्विजहासि ॥ न वक्ष्ये
व्रजन्भुवनानि त्वमटिष्यंस्तस्मादभिभस्मीभूते मद आत्मनः ॥ ३ ॥ जातिकुलरूपवयोवर्णानेकश्रुतमदान्धाः क्लीबाः ॥ परत्र चेह च
हितमप्यर्थं न पश्यन्ति ॥ ४ ॥ ज्ञात्वा भवपरिवर्ते जातीनां कोटिशतसहस्रेषु ॥ हीनोत्तममध्यत्वं को जातिमदं बुधः कुर्यात् ॥ ५ ॥ नै
कान्ज्ञातिविशेषानिंद्रियनिवृत्तिपूर्वकान्सर्वान् ॥ कर्मवशाद्गच्छत्यत्र कस्यैका शाश्वती जातिः ॥६॥ विद्वत्सदसि योप्याह संस्काराद्ब्राह्मणो भवन्॥
[2]न्यायज्ञैः स निराकार्यो वाक्यैर्न्यायानुसारिभिः ॥ ७ ॥ गर्भाधानं पुंसवनं सीमंतोन्नयनं तथा ॥ जातकर्म नामकर्म तथान्नप्राशनं च वै ॥ ८ ॥
चूडोपनयनं चास्य व्रतादेशस्तथैव च ॥ समावर्तनमप्यन्यत्पाणिग्रहणमेव च ॥ ९ ॥ इत्येवमादिसंस्कारविधानैर्येतिसंस्कृताः ॥ त एव ब्राह्मणा
येषां [3]नैरंतर्येण कामनाः ॥ १० ॥ यस्माद्वै ब्राह्मणा जाता ब्राह्मणैः कृतसंस्कृतैः ॥ नायुःशक्तिर्हि कांत्यादिविशेषो विद्यते स्फुटः ॥ ११ ॥ तौ वा
ब्राह्मणगात्रोत्थौ संस्कृतासंस्कृतौ नरौ ॥ इष्टानिष्टाप्त्यनाप्तिभ्यां न भिद्येते परस्परम् ॥ १२ ॥ ज्ञानाध्ययनमीमांसानियमेंद्रियनिग्रहैः ॥ विना
संस्कारयोगेऽपि पुंसः शूद्रान्न भिन्नता ॥ १३ ॥ संस्कारः क्रियमाणश्च न शूद्रे च प्रवर्तते ॥ [4]संस्कृतांगश्च पापेभ्यो न पश्यति [5]निवर्तंते ॥ १४ ॥
विलासिनीभुजंगादिजनवन्मदविह्वलाः ॥ व्यामुह्यंति सदाचाराद्[6]ब्राह्मणंत्वात्पतंति च ॥ १५ ॥ संस्कृतोऽपि दुराचारो नरकं याति मानवः ॥
निःसंस्कारः सदाचारो भवेद्विप्रोत्तमः सदा ॥ १६ ॥ मंत्रपूतात्मसंस्कारयुक्तोपि प्लवते न तु ॥ ब्राह्मण्यादविकल्पं स पश्चाद्दुश्चारितो नरः ॥ १७ ॥
सामर्थ्यात्पतनं तस्माद्ब्राह्मण्यान्मुच्यते ध्रुवम् ॥ दुरनुष्ठानसक्तानां पुंसां पुरुषपुंगवैः ॥ १८ ॥ किं क्वचिद्दृष्टमेवैतात्किं वा स्पर्धाविदत्ययम् ॥ तुल्य

---

[1] वर्णापसदचाण्डालनिषादानां प्रसज्यते—इ० पा० । [2] न्यायज्ञैः सत्क्रियाः कार्याः—इ० पा० । [3] नेह ते हतकाधमाः—इ० पा० । [4] संस्कृताङ्गस्य पापेभ्यो लावण्यं विनिवर्तते—इ० पा० । [5] संस्कारेभ्यः । [6] ब्राह्मण्यं हापयन्ति च—इ० पा० ।

मुत्सहसे कर्तुमप्यदृष्टं तदा वद ॥ १९ ॥ आचारमनुतिष्ठंतो व्यासादिमुनिसत्तमाः ॥ गर्भाधानादिसंस्कारकलापरहिताः स्फुटम् ॥ २० ॥ विप्रो
त्तमाः श्रियं प्राप्ताः सर्वलोकनमस्कृताः ॥ बहवः कथ्यमाना ये कतिचित्तान्निबोधत ॥ २१ ॥ जातो व्यासस्तु कैवर्त्याः श्वपाक्याश्च पराशरः ॥
शुक्याः शुकः कणादाख्यस्तथोलूक्याः सुतोभवत् ॥ २२ ॥ मृगीजोर्थर्षश्रृंगोपि वशिष्ठो गणिकात्मजः ॥ मंदपालो[1] मुनिश्रेष्ठो नाविका[2]पत्यमु
च्यते ॥ २३ ॥ मांडव्यो मुनिराजस्तु मंडूकीगर्भसंभवः ॥ बहवोन्येऽपि विप्रत्वं प्राप्ता ये पूर्ववद्द्विजाः ॥ २४ ॥ यच्चैतच्चारुचरितैरचर्यमुच्चरितं
वचः ॥ तद्विचार्याचरन्नुच्चैराचारोपचितद्युतिः ॥ २५ ॥ हरिणीगर्भसंभूत ऋष्यश्रृंगो महामुनिः ॥ तपसा ब्राह्मणो जातः संस्कारस्तेन कार
णम् ॥ २६ ॥ श्वपाकीगर्भसंभूतः पिता व्यासस्य पार्थिव ॥ तपसा ब्राह्मणो जातः संस्कारस्तेन कारणम् ॥ २७ ॥ उलूकीगर्भसंभूतः कणादा
ख्यो महामुनिः ॥ तपसा ब्राह्मणो जातः संस्कारस्तेन कारणम् ॥ २८ ॥ गणिकागर्भसंभूतो वशिष्ठश्च महामुनिः ॥ तपसा ब्राह्मणो जातः संस्का
रस्तेन कारणम् ॥ २९ ॥ नाविकागर्भसंभूतो मंदपालो महामुनिः ॥ तपसा ब्राह्मणो जातः संस्कारस्तेन कारणम् ॥ ३० ॥ वेदतंत्रजसंस्कार
कलापनिपुणैरपि ॥ विद्यातपोधनबलादुत्कृष्टं लभ्यते फलम् ॥ ३१ ॥ लब्धसंस्कारदेहाश्च महापातकिनो नराः ॥ यस्मान्निवर्तते ब्रह्म तस्मात्सां
केतिकं विदुः॥३२॥ ॥ इति श्रीभविष्ये महापुराणे शतार्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि षष्ठीकल्पे ब्राह्मण्यसंस्कारविवेकवर्णनं नाम द्वाचत्वा
रिंशोऽध्यायः ॥ ४२ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ किं चान्यदपरं यूयं वेदमंत्रविदो जनाः ॥ प्रष्टव्या कस्य संस्कारे विशेषमुपगच्छत ॥ १ ॥ किं
देहस्योत येनासौ निसर्गमलिनः स्थितः ॥ शुक्रशोणितसंभूतः शमलोद्भवकीटवत् ॥ २ ॥ निषेकादिश्मशानांतैर्विविधैर्विधिविस्तरैः ॥ देहिनो
ऽतिशयं केचिदुपगच्छंति मानवाः ॥ ३ ॥ तेषां गूढमनःकायवाग्विदुष्टैः सुचेष्टितैः ॥ असंयतमनुष्याणां पक्षोऽयं दूष्यते मया ॥ ४ ॥ वैदिका
खिलसंस्कारसारभूता द्विजातयः ॥ सर्वकार्यकरान्सर्वान्वृषलानतिशेरते ॥ ५ ॥ चंडकर्मा विकर्मस्थो ब्रह्महा गुरुतल्पगः ॥ स्तेनो गोघ्नः सुरा
पाणः परस्त्रीरमणप्रियः ॥ ६ ॥ मिथ्यावादी मदोन्मत्तो नास्तिको वेदनिंदकः ॥ ग्रामयाजकनिर्ग्रंथौ बहुदोषो दुरासदः ॥७॥ नि[3]षिद्धाचारसंसेवी
चोरश्चाटो मदोद्धतः ॥ धूर्तो नटः शठः पापी सर्वाशी सर्वविक्रयी ॥ ८ ॥ वाङ्मनःकायजैर्दुष्टैर्हता ये ब्राह्मणाधमाः ॥ ते न शुद्धिं व्रजंतीह अपि यज्ञ[4]
शतैरपि ॥ ९ ॥ शूद्राणां यान्यनिष्टानि संपद्यंते स्वभावतः ॥ विप्राणामपि तान्येव निर्विघ्नानि भवंति न ॥ १० ॥ तस्मान्मंत्रोग्निहोत्रं वा वेद्यां

---

[1] मेदपालः–इ० पा० । [2] लाविकागर्भसंभवः–इ० पा० । [3] निषिद्धाचारसंवीतो यो रथ्यादौ मदोद्धतः–इ० पा० । [4] वर्षशतैः–इ० पा० ।

पशुवधोपि वा ॥ हेतवो न हि विप्रत्वे शूद्रैः शक्या क्रिया यथा ॥ ११ ॥ ये चापि कर्मबंधेन बद्धाः सीदन्ति जंतवः ॥ संसारानलसंतापविक्लवी
कृतमानसाः ॥ १२ ॥ ते जन्ममरणाटव्यां सुखामृतपिपासवः ॥ कृपणस्याश्रयेऽटन्तो लभन्ते नैव निर्वृतिम् ॥ १३ ॥ चतुर्वर्णा नरा ये तु तत्त
द्वीर्ये नराधमाः ॥ तेषां सर्वात्मना सर्वैर्धर्मैः सांकर्यमीक्ष्यते ॥ १४ ॥ शूद्रविप्रादयो योनौ न भिद्यंते परस्परम् ॥ सर्वधर्मसमानत्वात्संस्कारादि
निरर्थकम् ॥ १५ ॥ तदनुष्ठानवैधर्म्यवियोगमरणादिभिः ॥ असेव्यसेवनैरन्यैः शूद्रविप्रादयः समाः ॥ १६ ॥ बुद्ध्या शक्त्या स्वभावेन धर्मैर्जात्या
दिभिः श्रिया ॥ कर्तव्यैः पुण्यपापाभ्यां शनैः सर्वशरीरगैः ॥ १७ ॥ बंधनै रोधनैर्नानायातनोपायपीडनैः ॥ दण्डैरदण्डकरणैर्विषादपरिवेदनैः ॥ १८ ॥
सात्त्विकैः प्रीतिधर्माद्यै राजसैश्चित्रचेष्टितैः ॥ तामसैस्तापमोहाद्यैर्दूयमानाः पुनःपुनः ॥ १९ ॥ श्लेष्ममारुतपित्ताद्यैर्महाबीभत्सदर्शनैः ॥ क्वचि
द्वृत्तिनिवृत्तिभ्यामृतानृतहिताहितैः ॥ २० ॥ अलंकारोपयोगेन मन्मथाद्यैर्विचेष्टितैः ॥ धनलाभाशयानैकजंतुसंघातपातनैः ॥ २१ ॥ अधिसिद्धि
गतिं याति नानाविधमनोरथैः ॥ आत्मस्नेहपरद्वेषस्वीकृतद्रव्यरक्षणैः ॥ २२ ॥ अतिक्षीबत्वसंक्षोभक्षुतक्षामक्षमामयैः ॥ यातनोपायपैशुन्यशून्य
त्वोपशमैस्तथा ॥ २३ ॥ अप्रशस्तैरनुष्ठानैः समीपस्थापदः समाः ॥ हिंसकाः प्राणिनः पापवितथालापभाषिणः ॥ २४ ॥ साधूनां भाषकाः स्तेना
निर्दयाः पारदारिकाः ॥ नीचकर्मसमाचाराः सर्वभक्षाः पिशाचवत् ॥ २५ ॥ दुष्कुलीना दुराचारा नृपाणामुपजीविनः ॥ विप्रकार्या विकर्मस्था
धनिनो दुष्टचेतसः ॥ २६ ॥ लुब्धका हरिणान्हत्वा वासं कृत्वा यथा वने ॥ तथा खादंति पिशुना बहवश्श्वं[3] क्रियावशात् ॥ २७ ॥ वेदं[4]वादमधी
यानाः प्राणिघाताभिशंसिनः ॥ पुष्णंति कपटैरर्थान्वेदविक्रयिणोऽधमाः ॥ २८ ॥ मायिनो मत्सरग्रस्ता लुब्धा मुग्धा मदोद्धताः ॥ चाटाः कार्प
टिकाः क्रूराः कदर्याः कलहप्रियाः ॥ २९ ॥ वाचाटा दुष्टकुलटा अटन्तो भाटकैः सह ॥ भंडमान्या भटाटोपैः संक्रुद्धाः सुविलुंठकाः ॥ ३० ॥
पर्यटा भाटका जीवाः कण्ठकश्लोकभाषिणः ॥ विक्रीणते ह्यविक्रेयमभक्ष्यद्रव्यभक्षिणः ॥ ३१ ॥ शूद्रकर्मानुतिष्ठंतो निस्तपास्ते नराधमाः ॥ सेवा
ध्यापनवाणिज्यकृष्याद्यारंभलंभिताः ॥ गृह्णन्तः संपदो बाह्याद्द्रव्यधान्यधनादिकाः ॥ ३२ ॥ क्रोधादाभ्यंतरान्दोषांस्तथा दुष्टमनोरथान् ॥ अत्य
जंतो विशिष्टानां श्रेष्ठास्ते कचमर्दिनः ॥ ३३ ॥ नोपादेयानि वस्त्राणि नित्यमाददते द्विजाः ॥ हापयंति न हेयानि कथं ते गुरवः क्षितौ ॥ ३४ ॥
दंडिका दिण्डिका भंडाश्चंडाश्चंडालचेष्टिताः ॥ वैतंडकास्ते निघ्नंति यथा सिंहो मृगान्पशून् ॥ ३५ ॥ निर्ग्रंथं मुनिमालोक्य मन्यमानाः समुन्न

---

१ धर्मेणेज्यादिभिः–इ० पा० । २ मंत्रैः–इ० पा० । ३ हरयश्च–इ० पा० । ४ दयादममधीयानाः–इ० पा० ।

तम् ॥ परिभूयावतिष्ठन्ते धिक्तान्रिक्तान्स्ववैरिणः ॥ ३६ ॥ तस्मात्संसारिकाः सत्त्वाश्चित्तक्लेशकलंकिताः ॥ दौःशील्यदौर्मनस्याद्यैस्तुल्यजाती
यबन्धनात् ॥ ३७ ॥ शूद्रां प्ररोचते विप्रो रागिणीं मैथुनं प्रति ॥ सा कामदुःखविगमे गर्भं धत्ते समागमे ॥ ३८ ॥ कामंकामातुराभ्यस्तु रोचंते
शूद्रमानवाः ॥ मैथुनं प्रति ब्राह्मण्ये तेऽपि तासां सुखावहाः ॥३९॥ ये तु जात्यादिभिर्भिन्ना गवाश्वोष्ट्रमतंगजाः ॥ ते विजातिषु नो गर्भं कुर्वतेऽ
पि सुखार्थिनः ॥ ४० ॥ अनड्वानेव गोरेव कामं पुष्णाति संगमे ॥ घोटकाश्च रतिं सम्यक्कुर्वते वडवासु च॥४१॥ पतिं करभमेवाप्य करभी रमते
मुदा ॥ गजमेव पतिं लब्ध्वा सुखं तिष्ठति हस्तिनी ॥ ४२ ॥ तिर्यग्जातिः स्त्रिया साकं कुर्वाणाऽपि हि मैथुनम् ॥ न तस्याः कुरुते गर्भं नरो
नापि सुखासिकाम् ॥ ४३ ॥ तिरश्चा सह कुर्वाणा मैथुनं मनुजांगना ॥ नाधत्ते तत्कृतं गर्भं न युक्तं मैथुनं तयोः ॥४४॥ नैवं कश्चिद्विभागोस्ति
मैथुने स्त्रीमनुष्ययोः ॥ येन संक्षीयते भेदः प्रस्फुटं द्विजशूद्रयोः ॥ ४५ ॥ वेदपाठच्छलेनायं न क्रियाभिः प्रपद्यते ॥ बहुभिर्जडसंघातैरविशिष्टे
पदेऽहनि ॥ ४६ ॥ देहे देहिनि चामुष्मिन्नशुचावनवस्थिते ॥ रागद्वेषादिभिर्दोषैरधिकं परिपीडिते ॥४७॥ कुलालचक्रवद्भ्रांतमानसे विषयार्णवे ॥
घोरदुःखभयाक्रांते समाजेऽनीश्वरात्मनि ॥ ४८ ॥ जन्ममृत्युजराशोकानिष्टयोगाग्निपीडिते ॥ हीनसत्त्वशरीरादौ न विशेषो विभाव्यते ॥ ४९ ॥
तस्मान्मनुष्यभेदोऽयं संकेतबलनिर्मितः ॥ ब्राह्मण्यं ब्राह्मणासंगाद्ब्राह्मणी चोपसेवते ॥ ५० ॥ पतिं त्यक्त्वा मुखास्वादलालसैर्मदलालसैः ॥ आसे
व्यते विटं गत्वा बंधकी चेटकैरपि ॥५१॥ ब्राह्मण्यात्प्रच्यवंतेन्ये महापातकसेविताः ॥ व्यलीककल्पनैवैषा तस्माज्जात्यादिकल्पना ॥ ५२ ॥ इति
श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि षष्ठीकल्पे वर्णव्यस्थावर्णनं नाम त्रिचत्वारिंशोऽध्यायः ॥४३॥छ॥ ॥ब्रह्मोवाच॥ ॥
हेयोपादेयतत्त्वज्ञास्त्यक्तान्यायपथागमाः ॥ जितेंद्रियमनोवाचः सदाचारपरायणाः ॥ १ ॥ नियमाचारवृत्तस्था हितान्वेषणतत्पराः ॥ संसाररक्षणो
पायक्रियायुक्तमनोरथाः ॥२॥ सम्यग्दर्शनसंपन्नाः समाधिस्था हतक्रुधः ॥ स्वाध्यायभक्तहृदयास्त्यक्तसंगा विमत्सराः ॥ ३ ॥ विशोका विमदाः
शांताः सर्वप्राणिहितैषिणः ॥ सुखदुःखसमालोका विविक्तस्थानवासिनः ॥ ४ ॥ व्रतोपयुक्तसर्वांगा धार्मिकाः पापभीरवः ॥ निर्ममा निरहंकारा
दानशूरा दयापराः ॥ ५ ॥ सत्यब्रह्मविदः शांताः सर्वशास्त्रेषु निष्ठिताः ॥ सर्वलोकहितोपायप्रवृत्तेन स्वयंभुवा ॥ ६ ॥ वागीश्वरेण देवेन नाभेये
न भवच्छिदा ॥ ब्रह्मणा कृतमर्यादास्त एव ब्राह्मणाः स्मृताः ॥ ७ ॥ महातपोधनैरार्यैः सर्वसत्त्वाभयप्रदैः ॥ सर्वलोकहितार्थाय निपुणं सुप्रतिष्ठि
तम् ॥ ८ ॥ बृहत्त्वाद्भगवान्ब्रह्मा नाभेयस्तस्य ये जनाः॥भक्त्यासक्ताः प्रपन्नाश्च ब्राह्मणास्ते प्रकीर्तिताः ॥ ९ ॥ क्षत्रियास्तु क्षतत्राणाद्वैश्या

वार्ताप्रवेशनात् ॥ ये तु श्रुतेर्द्रुतिं प्राप्ताः शूद्रास्तेनेह कीर्तिताः ॥ १० ॥ ये चाचाररताः प्राहुर्ब्राह्मण्यं ब्रह्मवादिनः ॥ ते तु फलं प्रशंसंति यत्सदा
मनसेप्सितम् ॥ ११ ॥ क्षमा दमो दया दानं सत्यं शौचं धृतिर्घृणा ॥ मार्दवार्जवसंतोषानहंकारतपःशमाः ॥ १२ ॥ धर्मो ज्ञानमपैशुन्यं ब्रह्म
चर्यममूढता ॥ ध्यानमास्तिक्यमद्वेषो वैराग्यं च शमात्मता ॥ १३ ॥ पापभीरुत्वमस्तेयममात्सर्यमतृष्णता ॥ नैःसंग्यं गुरुशुश्रूषा मनोवाक्काय
संयमः ॥ १४ ॥ य एवंभूतमाचारमनुतिष्ठंति मानवाः ॥ ब्राह्मण्यं पुष्कलं तेषां नित्यमेव प्रवर्धते ॥ १५ ॥ ते स्वमतास्वादलब्धवर्णाचारा महौ
जसः ॥ सर्वशास्त्राविरोधेन पवित्रीकृतमानसाः ॥ १६ ॥ सज्जनाभिमताः प्राज्ञाः पुराणागमपंडिताः ॥ गीतगीतागमाचाराः स्मृतिकाराः पठंति
च ॥ १७ ॥ मन्वंतरेषु सर्वेषु चतुर्युगविभागशः ॥ वर्णाश्रमाचारकृतं कर्म सिद्ध्यत्यनुत्तमम् ॥ १८ ॥ संसिद्धायां तु वार्तायां ततस्तेषां स्वयं
प्रभुः ॥ मर्यादां स्थापयामास यथारब्धां परस्परम् ॥ १९ ॥ ये वै परिगृहीतारस्तेषां सत्त्वबलाधिकाः ॥ इतरेषां क्षतत्राणान्स्थापयामास क्षत्रि
यान् ॥ २० ॥ उपतिष्ठंति ये तान्वै याचंतो नर्मदाः सदा ॥ सत्यब्रह्म सदाभूतं वदंतो ब्राह्मणास्तु ते ॥ २१ ॥ ये चान्येप्यबलास्तेषां वैश्यकर्मणि
संस्थिताः ॥ कीलानि नाशयंति स्म पृथिव्यां प्रागतंद्रिताः ॥ वैश्यानेव तु तानाह कीनाशान्वृत्तिमाश्रितान् ॥ २२ ॥ शोचंतश्च द्रवंतश्च परि
चर्यासु ये नराः ॥ निस्तेजसोऽल्पवीर्याश्च शूद्रांस्तानब्रवीत्तु सः ॥ २३ ॥ ब्राह्मणक्षत्रियविशां शूद्राणां च परस्परम् ॥ कर्माणि प्रविभक्तानि स्व
भावप्रभवैर्गुणैः ॥ २४ ॥ शमस्तपो दमः शौचं क्षांतिरार्जवमेव च ॥ ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ॥ २५ ॥ शौर्यं तेजो धृतिर्दा
क्ष्यं युद्धे चाप्यपलायनम् ॥ दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ॥ २६ ॥ कृषिगोरक्षवाणिज्यं वैश्यकर्म स्वभावजम् ॥ परिचर्यात्मकं कर्म
शूद्रस्यापि स्वभावजम् ॥ २७ ॥ योगस्तपो दया दानं सत्यं धर्मश्रुतिर्घृणा ॥ ज्ञानं विज्ञानमास्तिक्यमेतद्ब्राह्मणलक्षणम् ॥ २८ ॥ शिखा ज्ञान
मयी यस्य पवित्रं च तपोमयम् ॥ ब्राह्मण्यं पुष्कलं तस्य मनुः स्वायंभुवोऽब्रवीत् ॥ २९ ॥ यत्र वा तत्र वा वर्णे उत्तमाधममध्यमाः ॥ निवृत्तः
पापकर्मभ्यो ब्राह्मणः स विधीयते ॥ ३० ॥ शूद्रोऽपि शीलसंपन्नो ब्राह्मणादधिको भवेत् ॥ ब्राह्मणो विगताचारः शूद्राद्धीनतरो भवेत् ॥ ३१ ॥
न सुरां संधयेद्यस्तु आपणेषु गृहेषु च ॥ न विक्रीणाति च तथा सच्छूद्रो हि स उच्यते ॥ ३२ ॥ यद्येका स्फुटमेव जातिरपरा कृत्यात्परं भे
दिनी यद्वा व्याहतिरेकतामधिगता यच्चान्यधर्मं ययौ ॥ एकैकाखिलभावभेदनिधनोत्पत्तिस्थितिव्यापिनी किं नासौ प्रतिपत्तिगोचरपथं यायाद्वि

भक्त्या नृणाम् ॥ ३३ ॥ ॥ इति श्रीभविष्ये महापुराणे शतार्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि षष्ठीकल्पे वर्णविभागविवेकवर्णनं नाम चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ इदं शृणु मयाख्यातं तर्कपूर्वमिदं वचः ॥ युष्माकं संशये जाते कृते वै जातिकर्मणोः ॥ ॥ १ ॥ पुनर्वच्मि निबोधध्वं समासान्न तु विस्तरात् ॥ संसिद्धिं यांति मनुजा जातिकर्मसमुच्चयात् ॥ २ ॥ सिद्धिं गच्छेद्यथा कार्यं दैवकर्मसमुच्चयात् ॥ एवं संसिद्धिमायाति पुरुषो जातिकर्मणोः ॥ ३ ॥ इत्येवमुक्तवान्पूर्वं शिष्याणां बोधने पुरा ॥ योगीश्वरो महातेजाः समासान्न तु विस्तरात् ॥ ४ ॥ ॥ सुमंतुरुवाच ॥ ॥ इति पृष्टः पुरा ब्रह्मा ऋषीन्प्रोवाच भारत ॥ सवितर्कमिदं वाक्यं विप्रर्षे जातिकर्मणोः ॥ ५ ॥ तस्मात्त्वया महाबाहो न कार्यो विस्मयो नृप ॥ कार्तिकेयं प्रति सदा देवानां दुर्विदा गतिः ॥ ६ ॥ ॥ इति श्रीभविष्ये महापुराणे शतार्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि षष्ठीकल्पे कार्तिकेयवर्णनं नाम पंचचत्वारिंशोऽध्यायः ॥ ४५ ॥ छ ॥ ॥ सुमंतुरुवाच ॥ ॥ येयं भाद्रपदे मासि षष्ठी च भरतर्षभ ॥ सुपुण्येयं पापहरा शिवा शांता गुहप्रिया ॥ १ ॥ स्नानदानादिकं सर्वं यस्यामक्षय्यमुच्यते ॥ येऽस्यां पश्यंति गांगेयं दक्षिणापथमाश्रितम् ॥ २ ॥ ब्रह्महत्यादिभिः पापैर्मुच्यंते नात्र संशयः ॥ तस्मादस्यां सदा पश्येत्कार्त्तिकेयं नृपोत्तम ॥ ३ ॥ पूजयंति गुहं येऽस्यां नरा भक्तिसमन्विताः ॥ प्राप्येह ते सुखान्कामान्गच्छंतींद्रसलोकताम् ॥ ४ ॥ यस्तु कारयते वेश्म सुदृढं सुप्रतिष्ठितम् ॥ दार्वं शैलमयं चापि भक्त्या श्रद्धासमन्वितः ॥ गांगेयं यानमारुह्य गच्छेद्गांगेयसद्म वै ॥ ५ ॥ संमार्जनादि यः कर्म कुर्याद्गुहगृहे नरः ॥ ध्वजस्यारोपणं राजन्स गच्छेद्रुद्रसद्म वै ॥ ६ ॥ चंदनागरुकर्पूरैर्यश्च पूजयते गुहम् ॥ गजाश्वरथयानाढ्यं सैनापत्यमवाप्नुते ॥७॥ राज्ञां पूज्यः सदा प्रोक्तः कार्तिकेयो महीपते ॥ कार्त्तिकेयमृते नान्यं राज्ञां पूज्यं प्रचक्षते ॥ ८ ॥ संग्रामं गच्छमानो यः पूजयेत्कृत्तिकासुतम् ॥ स शत्रुं जयते वीर यथेंद्रो दानवान्रणे ॥९॥ तस्मात्सर्वप्रयत्नेन पूजयेच्छंकरात्मजम् ॥ पूजमानस्तु तं भक्त्या चंपकैर्विविधैर्नृप ॥ मुच्यते सर्वपापेभ्यस्तदा गच्छेच्छिवालयम् ॥ १० ॥ तैलं षष्ठ्यां न भुंजीत न दिवा कुरुनंदन ॥ यस्तु षष्ठ्यां नरो नक्तं कुर्याद्धि भरतर्षभ ॥ सर्वपापैः स निर्मुक्तो गांगेयस्य सदो व्रजेत् ॥ ११ ॥ त्रिःकृत्वो दक्षिणामाशां गत्वा यः श्रद्धयान्वितः ॥ पूजयेद्देवदेवेशं स गच्छेच्छांतिमंदिरम् ॥ १२ ॥ इति श्रीभविष्ये महापुराणे शतार्धसाहस्र्यां संहितायां षष्ठीकल्पे कार्त्तिकेयमाहात्म्यवर्णनं नाम षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ ॥ इति षष्ठीकल्पः समाप्तः ॥ ॥ छ ॥ ॥ सुमंतुरुवाच ॥ ॥ सप्तम्यां सोपवासस्तु नक्ताहारोऽपि वा भवेत् ॥ सप्तम्यां देवदेवेन लब्धं स्वं रूपमादरात्॥१॥ अण्डेन सह जातो वै अण्डस्थो बुद्धिमाप्तवान् ॥

अण्डस्थस्यैव दक्षेण भार्यां दत्त्वा स्वकां सुताम् ॥२ ॥ नाम्ना रूपेति रूपेण नान्या नारी तथा[1] भवेत् ॥ अण्डस्थ एव सुचिरं स्थितो मार्तण्ड इत्यतः ॥ ३ ॥ दक्षाज्ञया विश्वकर्मा वपुरस्य प्रकाशयन् ॥ प्रकाशतस्ततो नाम तस्य जातं नराधिप॥ अंडस्थस्यैव सञ्जातो यमुना यम एव च ॥ ४ ॥ दाक्षायणी तस्य भार्या वैराग्यात्तनुमध्यमा ॥ चिंतयामास सा देवी दुःखान्निर्वेदमागता ॥ ५ ॥ अहो तेजोमयं रूपं कान्तं कान्तस्य कांतिमत् ॥ न चास्य किञ्चित्पश्यामि अंगं तेजोविमोहितम् ॥ ६ ॥ शुभं कनकतुल्यं मे रूपं कांतं सुकांतिमत् ॥ सांप्रतं श्यामतां यातं दग्धमेतस्य तेजसा ॥ ७ ॥ तस्मात्तप्स्ये तपश्चाहं गत्वा वै उत्तरान्कुरून् ॥ स्वां छायामत्र निक्षिप्य भयाच्छापस्य रूपिणी ॥ ८ ॥ निक्षिप्योवाच तां बालां मा चास्मै वै वदिष्यसि ॥ एवं सा निश्चयं कृत्वा गता वै उत्तरान्कुरून् ॥ ९ ॥ स्वरूपं तत्र निक्षिप्य वडवारूपधारिणी ॥ चचार सा मृगैः सार्धं बहून्वर्षगणान्नृप ॥ १० ॥ असावपि च मार्तंडश्छायां भार्याममन्यत ॥ शनिं च तपतीं चैव द्वे अपत्ये च जज्ञिवान् ॥११॥ अथ च्छायात्मापत्यानि स्नेहेन परिपालयेत् ॥ नातिस्नेहेन चापश्यद्यमुनां यममेव च ॥१२॥ अथ ताभ्यां विवादोऽभूदादित्यदुहित्रोर्द्वयोः ॥ ते उभे विवदंत्यौ तु परस्परमसंमतम् ॥ यमुना तपती चोभे निम्नगे संबभूवतुः ॥ १३ ॥ यमोपि यमुनाभ्राता छायया ताडितो भृशम् ॥ पादमुद्यम्य तस्या वै तस्थौ सम्मुख एव सः ॥ १४ ॥ छाया शशाप तं रोषाद्यस्मात्पादोद्यतो मम ॥ तस्मात्ते कर्म बीभत्सं प्राणिनां प्राणहिंसनम् ॥ १५ ॥ भविष्यति चिरं मूढ आचन्द्रार्कं न संशयः ॥ पादं च यदि भूमौ त्वमिमं संस्थापयिष्यसि ॥ १६ ॥ कृमयो भक्षयिष्यंति मच्छापकलुषीकृतम् ॥ १७ ॥ तेषां विवदमानानां मार्तंडोऽभ्यागमत्ततः ॥ यमोप्याह महात्मानं मार्तंडं लोकपावनम् ॥१८॥ तात नित्यमियं चापि क्रूरभावेन पश्यति॥न चास्याः सुसमा दृष्टिरस्मास्वस्तीति लक्ष्यते ॥१९॥ प्रोवाचाथ स तां छायां मार्तंडो भृशकोपनः ॥ [2]समे अपत्ये किं मूढे समत्वं नानुपश्यसि ॥ २० ॥ यमः प्रोवाच पितरं नेयं माता पितर्मम ॥ मातुश्छाया त्वियं पापा शप्तोऽहमनया पितः॥ यमुना तपती वृत्तं तत्सर्वं विन्यवेदयत् ॥ २१ ॥ अथ प्रोवाच मार्तंडो मा[3] ते पादो महीतले ॥ मांसं रुधिरमादाय कृमयो यांतु भूतलम् ॥ २२ ॥ यमुनायाश्च यत्तोयं गंगातुल्यं भविष्यति ॥ नर्मदायास्तपत्याश्च समं पुण्येन वै द्विज ॥ २३ ॥ विंध्यस्य दक्षिणेनेह तपती प्रवहिष्यति ॥ तत्सायुज्य तया सार्धं गंगा यास्यति शोभना ॥ २४ ॥ गंगामासाद्य यमुना गंगा सैव भविष्यति ॥ सौरसौम्ये उभे पुण्ये सर्वपापप्रणाशने ॥ २५ ॥ [4]सौरी

---

[1] तथाविधा—इ० पा० ।
[2] समेत्योवाच स च्छायां समत्वं नानुपश्यसि—इ० पा० ।
[3] मुंच पादं महीतले—इ० पा० ।
[4] गौरी च—इ० पा० ।

च वैष्णवी चोभे महापापभयापहे ॥ त्वं पुत्र लोकपालत्वं ब्रह्मणोऽज्ञां सभाजयन् ॥ अद्यप्रभृति च्छायेयं स्वदेहस्था भविष्यति ॥ २६ ॥ एवं
संस्थाप्य स्वां भार्यामपत्यानि तथैव च ॥ आजगाम सकाशं वै दक्षस्याह च कारणम्[1] ॥ दक्षो विज्ञाय तत्सर्वं मार्तंडमिदमाह वै ॥ २७ ॥
रूपं न पश्यती तुभ्यं सा भार्या उत्तरान्गता ॥ २८ ॥ रूपं ते प्रकटिष्यामि यदि शक्ष्यसि वेदनाम् ॥ असौ प्रोवाच शक्ष्येऽहं प्रकाशी कुरु मे
वपुः ॥ २९ ॥ अथ सस्मार तक्षाणं स्मृत एवाजगाम सः ॥ प्रोवाच दक्षस्तक्षाणं मार्तंडं वै प्रकाशय ॥ ३० ॥ तक्षा प्रोवाच मार्तण्डं वेदनां
विसहिष्यसे ॥ विसहिष्येथ प्रोवाच तक्षाणं दक्षचोदितः ॥ ३१ ॥ अथ तक्षा प्रकाशं वै तस्य रूपं विभावसोः ॥ मुखादारभ्य पादांतं ततक्ष
करणैः स्वकैः ॥ किरणैस्तुद्यमानेषु तस्यांगेषु पुनःपुनः ॥ क्षणेक्षणे मूर्छयति मार्तंडो वेदनातुरः ॥ ३२ ॥ तस्य शापभयात्तक्षा पादौ गुल्फा
दियावतः ॥ चकाराथो निराकारा अंगुल्यो न प्रकाशयत् ॥ ३३ ॥ पर्याप्तं तक्षकर्मेदं वेदना मम बाधते ॥ तक्षा प्रोवाच मार्तण्डं
वेदनां जहि गोपते ॥ ३४ ॥ करवीरस्य पुष्पाणि रक्तचन्दनमेव च ॥ करादारभ्य गात्राणि विलिम्पे देहजानि ते ॥ ३५ ॥ तत्त
त्कृतं तथा तेन स रुजं त्यक्तवान्रविः ॥ अतश्चेमानि चेष्टानि मार्तण्डस्येह भूपते ॥ ३६ ॥ करवीरस्य पुष्पाणि तथा वै रक्तचन्दनम् ॥
इदमाह पुरा देवो ह्यनूरोरग्रतो नृप ॥ ३७ ॥ करवीरस्य पुष्पाणि रक्तचन्दनमेव हि ॥ इतिहासपुराणाभ्यां सुपर्णगुग्गुलं तथा ॥३८॥ यः प्रय
च्छति मे भक्त्या स मे प्राणान्प्रयच्छति ॥ तस्मान्न देयमन्यन्मे भक्तियुक्तेन जानता ॥ ३९ ॥ मार्तण्डस्यांडजं तेजो गृहीत्वा किल
भारत ॥ चकार वज्रमंजरं[2] शत्रुलेखादिनाशनम् ॥ ४० ॥ मार्तंडः परितुष्टोऽभूल्लब्ध्वा रूपं गतव्यथः ॥ जगाम स कुरून्वेगात्स्वभार्यादर्शनो
त्सुकः ॥ ४१ ॥ मृगमध्यगतां दृष्ट्वा वडवारूपधारिणीम् ॥ अश्वरूपं ततः कृत्वा स्वभार्यामधिरुह्य सः ॥ अवासृजत्स्वकं तेजो वेगेनारुह्य सोऽश्व
वत् ॥ ४२ ॥ परपुरुषाशंकया सा स्थिता देवस्य संमुखी ॥ तेजोनासापुटाभ्यां तु युगपत्साक्षिपत्पुनः ॥ ४३ ॥ तत्र जातौ देवभिषजौ नास
त्यावश्विनाविति ॥ रेतसोंऽते तु रेवंतो विरोचनसुतो महान् ॥४४॥ तपती शनिश्च सावर्णिश्छायापत्यानि वै विदुः ॥ यमुना यमश्च पूर्वोक्तौ संज्ञा[3]
याश्च तथात्मजौ ॥ ४५ ॥ भार्या लब्धा वपुर्दिव्यं तथा पुत्राश्च भारत ॥ सप्तम्यां देवदेवस्य सर्वमेवमिदं यतः ॥ अनेन कारणेनेष्टा सदा
देवस्य सप्तमी ॥ ४६ ॥ सप्तम्यां सोपवासस्तु रात्रौ भुंजीत यो नरः ॥ कृत्वोपवासं षष्ठ्यां तु पंचम्यामेककालभुक् ॥ ४७ ॥ दत्त्वा सुसंस्कृतं

---

[1] श्रावणम्—इ० पा० । [2] चक्रमजरम्—इ० पा० । [3] सुवर्णायास्तथात्मजौ—इ० पा० ।

शाकं भक्ष्यभोज्यैः समन्वितम् ॥ देवाय ब्राह्मणेभ्यश्च रात्रौ भुंजीत वाग्यतः ॥ ४८ ॥ यावज्जीवं नरः कश्चिद्व्रतमेतच्चरेदिति ॥ तस्य श्रीर्विजयश्चैव
त्रिवर्गश्चापि वर्धते ॥४९॥ मृतश्च स्वर्गमायाति[1] विमानवरमास्थितः ॥ सूर्यलोके स रमते मन्वंतरगणान्बहून् ॥ इह चागत्य कालांते नृपः शांति
समन्वितः ॥ ५० ॥ पुत्रपौत्रैः परिवृतो दाता स्यान्नृपतिश्चिरम् ॥ भुनक्ति हि धरां राजन्विग्रहैश्चाजितः परैः ॥ ५१ ॥ ये नरा राजशार्दूल
शाकाहारेण सप्तमीम् ॥ उपोष्य लब्धं तत्तीर्थं पित्र्यं वै राजसंज्ञिकम्॥५२॥ कुरुणा तव पूर्वेण शाकाहारेण सप्तमीम् ॥ धर्मक्षेत्रं कुरुक्षेत्रं कृतं तस्य
विवस्वता ॥५३॥ सप्तमी नवमी षष्ठी तृतीया पंचमी नृप ॥ कामदास्तिथयो ह्येता इहैव नरयोषिताम् ॥५४॥ सप्तमी माघमासे तु नवम्याश्वयुजे
मता ॥ षष्ठीभाद्रपदे धन्या वैशाखे तु तृतीयिका ॥ ५५ ॥ पुण्या भाद्रपदे प्रोक्ता पंचमी नागपंचमी ॥ इत्येतास्तेषु मासेषु विशेषास्तिथयः स्मृताः
॥ ५६ ॥ शाकं सुसंस्कृतं कृत्वा यश्च[2] भक्त्या समन्वितः ॥ दत्त्वा विप्रे यथाशक्त्या पश्चाद्भुंक्ते निशि व्रती ॥ ५७ ॥ कार्तिके शुक्लपक्षस्य ग्राह्येयं
कुरुनंदन ॥ चतुर्भिर्वापि मासैस्तु पारणं प्रथमं स्मृतम् ॥ ५८ ॥ अगस्त्यकुसुमैश्चात्र पूजा कार्या विभावसोः ॥ विलेपनं कुंकुमं तु धूपश्चैवाप
राजितैः ॥ ५९ ॥ स्नानं च पंचगव्येन तमेव प्राशयेत्ततः ॥ नैवेद्यं पायसं चात्र देवदेवस्य कीर्तितम् ॥ ६० ॥ तदेव देयं विप्राणां शाकं भक्ष्यमथा
त्मना ॥ शुभशाकसमायुक्तं भक्ष्यपेयसमन्वितम् ॥ ६१ ॥ द्वितीये पारणे राजञ्छुभगंधानि यानि वै ॥ पुष्पाणि तानि देवस्य तथा श्वेतं च
चंदनम् ॥ ६२ ॥ अगुरुश्चापि धूपोऽत्र नैवेद्यं गुडपूपकाः ॥ स्नानं कुशोदकेनात्र प्राशनं गोमयस्य तु ॥ ६३ ॥ तृतीये करवीराणि तथा रक्तं च
चंदनम् ॥ धूपानां गुग्गुलश्चात्र प्रियो देवस्य सर्वदा ॥ ६४ ॥ शाल्योदनं तु नैवेद्यं दधिमिश्रं महामते ॥ तमेव ब्राह्मणानां च भक्ष्यलेह्यसम
न्वितम् ॥ कालशाकेन च विभो युक्तं दद्याद्विचक्षणः ॥ ६५ ॥ गौरसर्षपकल्केन स्नानं चात्र विदुर्बुधाः ॥ तस्यैव प्राशनं धन्यं सर्वपापहरं
शुभम् ॥ ६६ ॥ तृतीये पारणस्यांते महद्ब्राह्मणभोजनम् ॥ श्रवणं च पुराणस्य वाचनं चापि शस्यते ॥ ६७ ॥ देवस्य पुरतस्तात ब्राह्मणानां तथा
ग्रतः ॥ ब्राह्मणाद्वाचकाच्छ्राव्यं नान्यवर्णसमुद्भवात् ॥ अथ तान्ब्रह्मणान्सर्वान्भक्त्या शक्त्या च पूजयेत् ॥ ६८ ॥ वाचकस्यामले राजन्वाससी
संनिवेदयेत् ॥ वाचके पूजिते देवः सदा तुष्यति भास्करः ॥६९॥ करवीरं यथेष्टं तु तथा रक्तं च चंदनम् ॥ यथेष्टं गुग्गुलं तस्य यथेष्टं पायसंसदा
॥ ७० ॥ यथेष्टा मोदकास्तस्य यथा वै ताम्रभाजनम् ॥ यथेष्टं च घृतं तस्य यथेष्टो वाचकः सदा ॥ पुराणं च यथेष्टं वै सवितुः कुरुनंदन ॥७१॥

---

[1] आप्नोति–इ० पा० । [2] परभक्ष्यसमन्वितम्–इ० पा० ।

इत्येषा सप्तमी पुण्या शाकाह्वा गोपतेः सदा ॥ यामुपोष्य नरो भक्त्या भाग्यवांश्च[1] प्रजायते ॥ ७२ ॥ ॥ इति श्रीभविष्ये महापुराणे शतार्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि सप्तमीकल्पे शाकसप्तमीव्रतवर्णनंनाम सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥ छ ॥ ॥ शतानीक उवाच ॥ ॥ विस्तराद्वद विप्रेंद्र सप्तमीकल्पमुत्तमम् ॥ महाभाग्यं च देवस्य भास्करस्य महात्मनः ॥ १ ॥ ॥ सुमंतुरुवाच ॥ ॥ अत्रैवाहुर्महात्मानः संवादं पुण्यमुत्तमम् ॥ कृष्णेन सह सत्त्वेन स्वपुत्रेण महीपते ॥ २ ॥ भक्त्या प्रणम्य विधिवद्वासुदेवं जगद्गुरुम् ॥ इहामुत्र हितं शांबः[2] पप्रच्छ ज्ञानमुत्तमम् ॥ ३ ॥ जातो जंतुः कथं दुःखैर्जन्मनीह न बाध्यते ॥ प्राप्नोति विविधान्कामान्कथं च मधुसूदन ॥ ४ ॥ परत्र स्वर्गमाप्नोति सुखानि विविधानि च ॥ अनुभूयोचितं कालं कथं मुक्तिमवाप्नुते ॥ ५ ॥ दृष्ट्वैवं मम निर्वेदो जातो व्याधिर्जनार्दन ॥ दृष्ट्वेमं जीविताशापि रोचते न हि मे क्षणम् ॥ ६ ॥ किं त्वेवमकृतार्थोऽस्मि यन्मे प्राणा न यांति हि ॥ संसारे न पतिष्यामि जराव्याधिसमन्विते ॥ ७ ॥ येनोपायेन तन्मेऽद्य प्रसादं कुरु सुव्रत ॥ आधिव्याधिविनिर्मुक्तो यथाहं स्यां तथा वद ॥ ८ ॥ ॥ वासुदेव उवाच ॥ ॥ देवतायाः प्रसादोऽन्यः सर्वस्य परमो मतः ॥ उपायः शाश्वतो नित्य इति मे निश्चिता मतिः ॥ ९ ॥ अनुमानागमाद्यैश्च सम्यगुत्पादितामया ॥ कदाचिदन्यथा कर्तुं धीयते केनचित्क्वचित् ॥ १० ॥ प्रसादो जायते तस्य सम्यगाराधनक्रिया ॥ यदा तां च समुद्दिश्य कृता तद्वेदिना तथा ॥ ११ ॥ विशिष्टा देवता सम्यग्विशिष्टेनैव देहिना ॥ आराधिता विशिष्टं च ददाति फलमीहितम् ॥ १२ ॥ ॥ शांब उवाच ॥ ॥ अस्तित्वे न च संदेहः केषांचिद्देवतां प्रति ॥ नास्तीति निश्चयोऽन्येषां विशिष्टास्त्वं कथाः कुरु ॥ १३ ॥ ॥ वासुदेव उवाच ॥ ॥ सिद्धं तु देवतास्तित्वमागमेषु बहुष्वथ ॥ प्रमाणमागमो यस्य तस्यास्तित्वं च विद्यते ॥ १४ ॥ अनुमानेन वाप्यद्य तदस्तित्वं प्रसाध्यते ॥ प्रमाणमस्ति यस्येदं सिद्धा यस्येह चास्तिता ॥ १५ ॥ प्रत्यक्षेणापि चास्तित्वं देवतायां प्रसाध्यते ॥ तच्चावश्यं प्रमाणं च दृष्टं सर्वशरीरिणाम् ॥ १६ ॥ यदि नामाविविक्तास्तु तिर्यग्योनिगता अपि ॥ नोत्पद्यते तथा ह्यस्तित्व्यवहारो यथा स्थितः ॥ १७ ॥ ॥ शांब उवाच ॥ ॥ प्रत्येक्षेणोपलभ्यंते सम्यग्वै यदि देवताः ॥ अनुमानागमाभ्यां च तदर्थं न प्रयोजनम् ॥ १८ ॥ ॥ वासुदेव उवाच ॥ ॥ प्रत्यक्षेणोपलभ्यंते न सर्वा देवताः क्वचित् ॥ अनुमानागमैर्गम्याः संति चान्याः सहस्रशः ॥ १९ ॥ ॥ शांब उवाच ॥ ॥ या चाक्षगोचरा काचिद्विशिष्टेष्टफलप्रदा ॥ तामेवादौ ममा

---

[1] भार्गव्यां न विजायते–इ० पा० ।

[2] सर्वत्र शांबशब्दे सांब इति दंत्यादिरपिपाठः पुस्तकान्तरेषु ।

चक्ष्व कथयिष्यस्यथापराम् ॥ २० ॥ ॥ वासुदेव उवाच ॥ ॥ प्रत्यक्षं देवता सूर्यो जगच्चक्षुर्दिवाकरः ॥ तस्मादभ्यधिका काचिद्देवता नास्ति
शाश्वती ॥ २१ ॥ यस्मादिदं जगज्जातं लयं यास्यति यत्र च ॥ कृतादिलक्षणः कालः स्मृतः साक्षाद्दिवाकरः ॥ २२ ॥ ग्रहनक्षत्रयोगाश्च
राशयः[1] करणानि च ॥ अदित्या वसवो रुद्रा अश्विनौ वायवोऽनलः ॥ २३ ॥ शक्रः प्रजापतिः सर्वे भूर्भुवः स्वस्तथैव च ॥ लोकाः
सर्वे नगा नागाः सरितः सागरास्तथा ॥ भूतग्रामस्य सर्वस्य स्वयं हेतुर्दिवाकरः ॥ २४ ॥ अस्येच्छया जगत्सर्वमुत्पन्नं सचराचरम् ॥ स्थितं
प्रवर्तते चैव स्वार्थे चानुप्रवर्तते ॥ २५ ॥ प्रसादादस्य लोकोऽयं चेष्टमानः प्रदृश्यते ॥ अस्मिन्नभ्युदिते सर्वमुदेदस्तमिते सति ॥ अस्तं यातीत्य
दृश्येन किमेतत्कथ्यते मया ॥ २६ ॥ तस्मादतः परं नास्ति न भूतं न भविष्यति ॥ यो वै वेदेषु सर्वेषु परमात्मेति गीयते ॥ २७ ॥
इतिहासपुराणेषु अंतरात्मेति गीयते ॥ बाह्यात्मैति सुषुम्णास्थः स्वप्नस्थो जाग्रतः स्थितः ॥ २८ ॥ अस्तं यातीत्यदृष्टेन किमेतत्कथ्यते
मया ॥ तस्मादतः परं नास्ति न भूतं न भविष्यति ॥ २९ ॥ यन्न वाह इति ख्यातः प्रेरकः सर्वदेहिनाम् ॥ नानेन रहितं किंचिद्भूतमस्ति
चराचरम् ॥ ३० ॥ यो वेदैर्वेदविद्भिश्च विस्तरेणेह शक्यते ॥ वक्तुं वर्षशतैर्नासौ शक्यः संक्षेपतो मया ॥ ३१ ॥ तस्माद्गुणाकरः[2] ख्यातः
सर्वत्रायं दिवाकरः ॥ सर्वेशः सर्वकर्तायं सर्वभर्तायमव्ययः ॥ ३२ ॥ जाता मत्स्यादयः सम्यग्गतिमन्तो महेश्वरात् ॥ मंडलव्यतिरिक्तं च
जानामि परमार्थतः ॥ ३३ ॥ तथास्य मंडलं कृत्वा[3] यो ह्येनमुपतिष्ठते ॥ प्रातः सायं च मध्याह्ने स याति परमां गतिम् ॥ ३४ ॥ किं पुनर्मं
डलस्थं यो जपते परमार्थतः ॥ विविधाः सिद्धयस्तस्य भवंति न तदद्भुतम् ॥३५॥ मंडले च स्थितं देवं देहे चैनं व्यवस्थितम् ॥ स्वबुद्ध्यैवम
संमूढो यः पश्यति स पश्यति ॥ ३६ ॥ ध्यात्वैवं[4] पूजयेद्यस्तु जपेद्यो जुहुयाच्च यः ॥ स सर्वान्प्राप्नुयात्कामान्गच्छेद्धर्मध्वजं तथा ॥ ३७ ॥
तस्मात्त्वमिह दुःखानामंतं कर्तुं यदीच्छसि ॥ इहामुत्र च भोगानां भुक्तिं मुक्तिं च शाश्वतीम् ॥ ३८ ॥ आराधयार्कमर्कस्थो मंत्रैरिह तदा
त्मनि ॥ अंगैर्वृतं वृते चैव स्थाने शास्त्रेण शोधिते ॥ ३९ ॥ कवचेन च संगुप्ते सर्वतोऽस्त्रेण रक्षिते ॥ एवं प्राप्स्यसि यत्नेन सर्वदा फलमी
प्सितम् ॥ ४० ॥ दुःखमाध्यात्मिकं नेह तथा चैवाधिभौतिकम् ॥ आधिदैविकमत्युग्रं न भविष्यति ते सदा ॥४१॥ न भयं विद्यते तेषां
प्रपन्ना ये दिवाकरम् ॥ इहामुत्र सुखं तेषामच्छिद्रं जायते सुखम्[5] ॥ ४२ ॥ सूर्येणेदं ममोद्दिष्टं साक्षाद्यज्ज्ञानमुत्तमम् ॥ आराधितेन विधिवत्का

---

[1] यामदंडक्षणानि च—इ० पा० । [2] तस्मात्क्षयकरोयोऽसौ ।—इ० पा० । [3] दृष्ट्वा—इ० पा० । [4] तं देवम्—इ० पा० । [5] भुवम्—इ० पा० ।

लेन बहुना तथा ॥ ४३ ॥ प्राप्यते परमं स्थानं यत्र धर्मध्वजः स्थितः ॥ एतत्संक्षिप्तमुद्दिष्टं क्षिप्रसिद्धिकरं परम् ॥ यथा नान्यदतो
ऽस्तीति स्वयं सूर्येण भाषितम् ॥ ४४ ॥ उपायोयं समाख्यातस्तव संक्षेपतस्त्विह ॥ यस्मात्परतरो नास्ति हितोपायः शरीरिणाम् ॥
॥ ४५ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि सप्तमीकल्पे आदित्यमाहात्म्यवर्णनं नामाष्टचत्वारिंशो
ऽध्यायः ॥ ४८ ॥ ७ ॥ ॥ वासुदेव उवाच ॥ अथार्चनविधिं वक्ष्ये धर्मकेतोरनुत्तमम् ॥ सर्वकामप्रदं पुण्यं विघ्नघ्नं दुरितापहम् ॥ १ ॥
सूर्यमंत्रैः पुरः स्नातो यजेत्तेनैव भास्करम् ॥ यतस्ततः प्रवक्ष्यामि स्नानमादौ समासतः ॥ २ ॥ आचांतस्तमुपालभ्य मुद्रया शुचिशुद्धया ॥
कृत्वा नीराजनं पुत्र संशोध्य च जलं ततः ॥ ३ ॥ [1]स्नानाद्धृदयपूतेन मन्त्रेण मत्कुलोद्वह ॥ उत्थायाचम्य तेनैव वाससी परिधाय
च ॥ ४ ॥ द्विराचम्याथ संप्रोक्ष्य तनुं सप्ताक्षरेण च ॥ उत्थायाचम्य तेनैव रवेः कृत्वार्घ्यमेव च ॥ ५ ॥ दत्त्वा तेन जपित्वा
तं स्वकं ध्यात्वार्कवद्धृदि ॥ गत्वा चायतनं शुभ्रमार्कमार्कीं तनुं यजेत् ॥ ६ ॥ पूरकं कुंभकं कृत्वा रेचकं च समाहितः ॥ कृत्वोंकारेण
दोषांस्तु हन्यात्कायादिसंभवान् ॥ ७ ॥ वायव्याग्नेयमाहेन्द्रवारुणीभिर्यथाक्रमम् ॥ किल्बिषं वारुणाद्भिश्च हन्यात्सिद्धयर्थमात्मनः ॥ ८ ॥
शोषणं दहनं स्तंभं प्लावनं च यथाक्रमात् ॥ वाय्वग्नींद्रजनाख्याभिर्धारणाभिः कृते सति ॥ ९ ॥ ध्यात्वा विशुद्धमात्मानं प्रणमेदर्कमास्थि
तम् ॥ देहं तेनैव संचिन्त्य पंचभूतमयं परम् ॥ १० ॥ सूक्ष्मं स्थूलं तथाक्षाणि स्वस्थानेषु प्रकल्प्य च ॥ विन्यस्यांगानि खादीनि हृदाद्यानि
हृदादिषु ॥ ११ ॥ खस्वाहा हृदयं भानोः खमर्काय शिरस्तथा ॥ उल्का स्वाहा शिखार्कस्य यै च हुं कवचं परम् ॥ खां फडस्त्रं च संहारश्चादितः
प्रणवः कृतः ॥ १२ ॥ स पूर्वे प्रणवस्याथो मंत्रकर्मप्रसिद्धये ॥ एभिर्जलं त्रिधा जप्त्वा स्नानद्रव्याणि तेन च ॥ १३ ॥ संप्रोक्ष्य पूजयेत्सूर्यं गंधपु
ष्पादिभिः शुभैः ॥ ततो मूर्तिषु सर्वासु रात्रावग्नौ प्रपूजयेत् ॥ १४ ॥ प्राक्पश्चिमोदगभ्यग्रां प्रातः सायं निशासु वै ॥ सप्ताक्षरेण सन्मंत्रं ध्यात्वा
च पद्मकर्णिकाम् ॥ १५ ॥ आदित्यमंडलान्तस्थं तत्र देहं प्रकल्पयेत् ॥ प्रभामंडलमध्यस्थं ध्यात्वा देहं यथा पुरा ॥ सर्वलक्षणसंपूर्णं सहस्रकि
रणोज्ज्वलम् ॥ १६ ॥ रक्तैर्गंधैश्च पुष्पैश्च चरुभिर्बलिभिस्तथा ॥ रक्तचंदनमिश्रैर्वा वस्त्रैरावरणैः शुभैः ॥ १७ ॥ आवाहनादिकर्माणि रक्षां तु
हृदयेन च ॥ तच्चित्तश्च सदा कुर्याज्ज्ञात्वा कर्मक्रमं बुधः ॥ १८ ॥ कृत्वा चावाहनं मंत्रैरेकत्र स्थापनं ततः ॥ यावद्यागावसानं तु सान्निध्यं तत्र

---

[1] स्नानादुदयपूतेन मधुना मत्कुलोद्वह—इ० पा० ।

कल्प्य च ॥ १९ ॥ दत्त्वा पाद्यादिकां पूजां शक्त्या वार्घ्यं निवेद्य च ॥ जपित्वा विधिवद्ध्यात्वा ततो देवीं विसर्जयेत् ॥ २० ॥ एष कर्म क्रमः प्रोक्तः सर्वेषां यजनक्रमात् ॥ प्रवक्ष्यामि जपस्थानं पद्मेशावरणे तथा ॥ २१ ॥ आदित्यं कर्णिकासंस्थं दलेष्वंगानि पूर्वशः ॥ सोमादीन्राहुपर्यंतान्ग्रहांश्चैवोदगादितः ॥ २२ ॥ मूर्तिमल्लोकपालांश्च क्रमादावरणेष्वथ ॥ तदस्त्राणि च रक्षार्थं स्वमंत्रैः पूजयेत्क्रमात् ॥ २३ ॥ प्रणवैश्चाभिधानैश्च चतुर्थ्या ह्यभियोजितैः ॥ सर्वेषां कथिता मंत्रा मुद्राश्च कथयाम्यतः ॥ २४ ॥ व्योममुद्रा रतिः पद्मा महाश्वेतास्त्रमेव च ॥ पंचमुद्राः समाख्याताः सर्वकर्मप्रसिद्धये ॥ २५ ॥ उत्तानौ तु करौ कृत्वा अंगुल्यो ग्रंथिताः क्रमात् ॥ तर्जनीं यंति यावत्ताः समे वाधोमुखे स्थिते ॥ ॥ २६ ॥ तर्जन्यौ मध्यमस्यैव ज्येष्ठाग्रे वानुगोपरि ॥ मुद्रेयं सर्वमुद्राणांव्योम मुद्रेति कीर्तिता ॥ सर्वकर्मसु योगोयं तथा स्थानं प्रकल्पते ॥२७॥ पद्मवत्प्रसृताः सर्वा महाश्वेता रवेः स्मृता ॥ जवसंनिहितो नित्यं रथारूढो रविः स्मृतः ॥ २८ ॥ हस्तावूर्द्धमुखौ कृत्वा वामांगुष्ठेन योजितौ ॥ द्रव्याणां शोधने योज्या रक्षार्थं च विशेषतः ॥ २९ ॥ अनया मुद्रया सर्वं रक्षितं शोधितं भवेत् ॥ अर्घ्यं दत्वा प्रयोक्तव्या पूजांते च विशेषतः ॥ ॥ ३० ॥ जपध्यानावसाने च यदीच्छेत्सिद्धिमात्मनः ॥ अनेन विधिना नित्यं जपेदब्दमतंद्रितः ॥ ३१ ॥ स लभेतेप्सितान्कामानिहामुत्र न संशयः ॥ रोगार्तो मुच्यते रोगाद्धनहीनो धनं लभेत् ॥ ३२ ॥ राज्यभ्रष्टो लभेद्राज्यमपुत्रः पुत्रमाप्नुयात् ॥ प्रज्ञामेधासमृद्धीश्च चिरंजीवति मानवः ॥ सुरूपां लभते कन्यां कुलीनां पुरुषो ध्रुवम् ॥३३॥ सौभाग्यं स्त्री कुलीनापि कन्या च पुरुषोत्तमम् ॥ अविद्यो लभते विद्यामित्युक्तं भानुना पुरा ॥ ३४ ॥ नित्ययागः स्मृतो ह्येष धनधान्यसुखावहः ॥ प्रजापशुविवृद्धिश्च निष्कामस्यापि जायते ॥ ३५ ॥ तदैकः स्तूयते स्वर्गे शब्द्यते च नरोत्तमः ॥ भक्त्या तं पूजयेद्यस्तु नरः पुण्यतरः सदा ॥ ३६ ॥ इह वै कामिकं प्राप्य ततो गच्छेन्मनोः पदम् ॥ द्विजास्तस्य प्रसादेन तेजसा बुधसन्निभः ॥ ३७ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि सप्तमीकल्पे सूर्यमाहात्म्यवर्णनं नामैकोनपंचाशत्तमोऽध्यायः ॥ ४९ ॥ छ ॥ ॥ वासुदेवउवाच ॥ ॥ नैमित्तिकं ततो वक्ष्ये यज्ज्ञात्वा च समासतः ॥ सप्तम्यां ग्रहणे चैव संक्रांतिषु विशेषतः ॥ १ ॥ शुक्लपक्षस्य सप्तम्यां हविर्भुक्त्वैकदा दिवा ॥ सम्यगाचम्य संध्यायां वारुणं प्रणिपत्य च ॥ २ ॥ इंद्रियाणि च संयम्य कृतं ध्यात्वा स्वपेदधः ॥ दर्भशय्यागतो रात्रौ प्रातः स्नातः सुसंयतः ॥३॥ ततः संध्यामुपास्याथ पूर्वोक्तं च मनुं जपेत् ॥ जुहुयाच्च तदा वह्निं सूर्याग्नी परिकल्प्य च ॥ ४ ॥ सूर्याग्निकरणं वक्ष्ये तर्पणं च समासतः ॥ अर्चनागारमुल्लिख्य प्रविश्याचर्य जनैर्जनम् ॥ ५ ॥ प्रक्षिप्यास्तीर्य दर्भैश्च

पात्राद्यालभ्य च क्रमात् ॥ पवित्रं द्विकुशं कृत्वा साग्रं प्रादेशसंमितम् ॥ ६ ॥ तेन पात्राणि संप्रोक्ष्य संशोध्याथ विलोक्य च ॥ उदगग्रे
स्थिते पात्रे प्रज्वाल्याथोल्मुकेन च ॥ ७ ॥ पर्यग्निकरणं कृत्वा तथाज्योत्यवनं त्रिधा ॥ परिमृज्य स्रुवादींश्च दर्भैः संप्रोक्षयेत्ततः ॥
॥ ८ ॥ जुहुयात्प्रोक्ष्य तान्वह्नौ तत्रार्कं पूर्ववद्व्रजेत् ॥ अभूमौ स्थितपात्रेण विष्टरेण तु पाणिना ॥ दानेन यदुशार्दूल नान्तरिक्षे स्थले
क्वचित् ॥ ९ ॥ दक्षिणेन स्रुवं गृह्य जुहुयात्पावकं बुधः ॥ हृदयेन क्रियाः सर्वाः कर्तव्याः पूर्वचोदिताः ॥ १० ॥ अर्कादारभ्य संज्ञार्थं
दद्यात्तूष्णीं हुतिं स्थितः ॥ वरुणाय शतैर्माघे सप्तम्यां वरुणं यजेत् ॥ ११ ॥ यथाशक्त्या तु विप्रेभ्यः प्रदद्यात्खण्डवेष्टकान् ॥ दद्याच्च दक्षिणां
शक्त्या प्राप्नोति याचितं फलम् ॥ १२ ॥ एवं वै फाल्गुने सूर्यं चैत्रे वैशाख एव च ॥ वैशाखे मासि धातारमिंद्रं ज्येष्ठे यजेद्रविम् ॥ १३ ॥
आषाढे श्रावणे मासि नभं भाद्रपदे यमम् ॥ तथाश्वयुजि पर्जन्यं त्वष्टारं कार्तिके यजेत् ॥ १४ ॥ मार्गशीर्षे च मित्रं च पौषे विष्णुं यजेद्यदि ॥
संवत्सरेण यत्प्रोक्तं फलमिष्टं दिनेदिने ॥ तत्सर्वमाप्नुयात्क्षिप्रं भक्त्या श्रद्धान्वितो व्रती ॥ १५ ॥ एवं संवत्सरे पूर्णे कृत्वा वै कांचनं रथम् ॥
सप्तभिर्वाजिभिर्युक्तं नानारत्नोपशोभितम् ॥ १६ ॥ आदित्यप्रतिमां मध्ये शुद्धहेम्ना कृतां शुभाम् ॥ रत्नैरलंकृतां कृत्वा हेमपद्मोपरिस्थिताम् ॥
॥ १७ ॥ तस्मिन्नथवरे कृत्वा सारथिं चाग्रतः स्थितम् ॥ वृतं द्वादशभिर्विप्रैः क्रमान्मासाधिपात्मभिः ॥ १८ ॥ मध्ये कृत्वा स्वमाचार्यं पूज
यित्वा यथाश्रुति ॥ संचिन्त्यादित्यवर्णं वै वस्त्ररत्नादिनार्हयेत् ॥ १९ ॥ एवं मासाधिपान्विप्रान्संपूज्याथ निवेदयेत् ॥ आचार्याय रथं छत्रं ग्रामं
गाश्च महीं शुभाम् ॥ २० ॥ अश्वान्मासाधिपेभ्यस्तु द्वादशभ्यो निवेदयेत् ॥ एवं भक्त्या यथाशक्त्या हेमरत्नादिभूषणम् ॥ २१ ॥ दत्त्वा तस्य
नमस्कृत्य व्रतं पूर्णं निवेदयेत ॥ अत ऊर्ध्वं न दोषोऽत्र व्रतस्याकरणेष्वपि ॥ २२ ॥ एवमस्त्विति विप्रेन्द्रैः सहाचार्यः पुनःपुनः ॥ बह्वीश्चैवा
शिषो दत्त्वा प्रवदेत्प्रीयतामिति ॥ २३ ॥ आदित्यो येन कामेन त्वया आराधितो व्रतैः ॥ तुभ्यं ददातु तं कामं संपूर्णं भवतु व्रतम् ॥ २४ ॥
आचार्यान्विप्ररूपैस्तु प्रविष्टो भास्करः स्वयम् ॥ दास्यत्येव परं कर्तुमित्युक्तं भानुना स्वयम् ॥ २५ ॥ विप्रेभ्यो गुणवद्भ्यश्च निस्वेभ्यश्च विशे
षतः ॥ दीनान्धकृपणेभ्यश्च शक्त्या दत्त्वा च दक्षिणाम् ॥ ब्राह्मणान्भोजयित्वा च व्रतमेतत्समापयेत् ॥२६॥ कृत्वैवं सप्तमीमब्दं राजा भवति धार्मि
कः ॥ पुरुषः स्त्री भवेद्राज्ञां तादृशामथ वल्लभा ॥२७॥ शतयोजनविस्तीर्णं निःसपत्नमकंटकम् ॥ निष्पन्नमण्डलं भुंक्ते साग्रं वर्षशतं सुखी ॥२८॥

वित्तहीनोऽपि यो[1] भक्त्या कृत्वा ताम्रमयं रथम् ॥ दद्याद्व्रतावसाने तु कृत्वा सर्वं यथोदितम् ॥ सोऽशीतियोजनं भुंक्ते विस्तीर्णं मण्डलं नृपः ॥
॥ २९ ॥ एवं पिष्टमयं योऽपि वित्तहीनः करोति ना ॥ आषष्टियोजनं भुंक्ते दीर्घायुर्नीरुजः सुखी ॥ सूर्यलोके च कल्पांतं यावत्स्थित्वेदमा
प्नुयात् ॥ ३० ॥ मनसापि च यो भक्त्या यजेदर्कमतंद्रितः[3] ॥ सर्वावस्थासु सोऽप्यत्र व्याधिभिर्मुच्यते भृशम् ॥ ३१ ॥ आपदो न स्पृशंत्येनं
नीहारा इव भास्करम् ॥ किं पुनर्व्रतसंपन्नं भक्तं[2] मंत्रैश्च रक्षितम् ॥ ३२ ॥ यत एवं ततो ज्ञात्वा विधानं कल्पचोदितम् ॥ सुखेन फलसिद्ध्यर्थं कुर्या
त्सर्वमशेषतः ॥२३॥ इत्येतत्कथितं सांब पुरा सूर्येण मे शुभम् ॥ कल्पोयं प्रथमे कल्पे सर्वदा गोपितो मया ॥३४॥ अनेन विधिना वत्स विशुद्धे
नांतरात्मना ॥ भानुमाराधयेत्क्षिप्रं यदीच्छेत्फलमुत्तमम् ॥ ३५ ॥ मयास्यैव प्रसादेन प्राप्ताः पुत्राः सहस्रशः ॥ असुरा निर्जिताश्चैव सुराः सर्वे
वशीकृताः ॥ ३६ ॥ त्वयाप्ययं गोपितव्यः कल्पः सूर्यस्य संमतः ॥ प्रसादादस्य कल्पस्य सदा सन्निहितो रविः ॥ चक्रेऽस्मिन्निर्जिता येन सुरा
सुरनरोरगाः ॥ ३७ ॥ यदिनाधिष्ठितं चक्रमिदं सूर्यांशुभिः स्वयम् ॥ सततं स्यात्प्रभायुक्तं कथमध्याहतं भवेत् ॥ ३८ ॥ अहमेतं जपन्नित्यं
यजन्ध्यायंश्च शक्तितः ॥ जातोस्मि सर्वकामानां पूज्यः श्रेष्ठश्च तेजसा ॥ ३९ ॥ त्वमभ्यस्यैव मनसा वाचा वा कर्मणापि वा ॥ कुरुभक्तिमने
नैव विधिना फलसिद्धये ॥ ४० ॥ शृणुयाद्भक्तियुक्तो यो नरः श्रद्धासमन्वितः ॥ विधानमादितः पुत्र सप्तमीं कुरुते च यः ॥ ४१ ॥ सेहं[4] प्राप्या
खिलं काममारोग्यं च जयं तथा ॥ भार्गव्या परया युक्तो गच्छेद्वैरोचनं सदः ॥ ४२ ॥ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां
ब्राह्मे पर्वणि सप्तमीकल्पे सप्तमीमाहात्म्यवर्णनं नाम पञ्चाशत्तमोऽध्यायः ॥ ५० ॥ ॥ छ ॥ ॥ वासुदेव उवाच ॥ ॥ माघस्य शुक्लपक्षे तु
पञ्चम्यां मत्कुलोद्वह ॥ एकभक्तं सदाख्यातं षष्ठ्यां नक्तमुदाहृतम् ॥ १ ॥ सप्तम्यामुपवासं तु केचिदिच्छंति सुव्रत ॥ षष्ठ्यां केचिद्वदंतीह सप्तम्यां
पारणं किल ॥ २ ॥ कृतोपवासः षष्ठ्यां तु पूजयेद्भास्करं बुधः ॥ रक्तचन्दनमिश्रैस्तु करवीरैश्च सुव्रत ॥ ३ ॥ गुग्गुलेन महाबाहो संयावेन च
सुव्रत ॥ पूजयेद्देवदेवेशं शंकरं[5] भास्करं रविम् ॥ ४ ॥ एवं हि चतुरो मासान्माघादीन्पूजयेद्रविम् ॥ आत्मनश्चापि शुद्ध्यर्थं प्राशनं गोमयस्य च
॥ ५ ॥ स्नानं च गोमयेनेह कर्तव्यं चात्मशुद्धये ॥ ब्राह्मणान्दिव्यभौमांश्च भोजयेच्चापि शक्तितः ॥ ६ ॥ ज्येष्ठादिष्वथ मासेषु श्वेतचन्दन
मुच्यते ॥ श्वेतानि चापि पुष्पाणि शुभगन्धान्वितानि वै ॥ ७ ॥ कृष्णागरुस्तथा धूपो नैवेद्यं पायसं स्मृतम् ॥ तेनैव ब्राह्मणांस्तुष्टान्भोजयेच्च

---

१ यथाशक्त्या–इ० पा० । २ उक्तमंत्रैश्च रक्षितम्–इ० पा० । ३ अतंद्रितः–इ० पा० । ४ अत्र पादपूर्त्यर्थं स इत्यस्य सोर्लोपः । ५ ग्रहेशं शंकर रविम्–इ० पा० ।

महामते ॥ ८॥ प्राशयेत्पञ्चगव्यं तु स्नानं तेनैव पुत्रक ॥ कार्तिकादिषु मासेषु अगस्तिकुसुमैः स्मृतम् ॥ ९ ॥ पूजयेन्नरशार्दूल धूपैश्चैवापराजितैः॥ नैवेद्यं गूडपूपास्तु तथा चेक्षुरसं स्मृतम् ॥ १० ॥ तेनैव ब्राह्मणांस्तात भोजयस्व स्वशक्तितः ॥ कुशोदकं प्राशयेथाः स्नानं च कुरु शुद्धये ॥ ११ ॥ तृतीये पारणस्यांते माघे मासि महामते ॥ भोजनं तत्र दानं च द्विगुणं समुदाहृतम् ॥ १२ ॥ देवदेवस्य पूजा च कर्तव्या शक्तितो बुधैः ॥ रथस्य चापि दानं तु रथयात्रा तु सुव्रत ॥ १३ ॥ व्रतस्य प्राप्तिहेतोर्वै कर्तव्या विभवे सति ॥ दानं स्वर्णरथस्येह यथोक्तं विभवे सति ॥ इत्येषा कथिता पुत्र रथाह्वा सप्तमी शुभा ॥ १४ ॥ महासप्तमी विख्याता महापुण्या महोदया ॥ यामुपोष्य धनं पुत्रान्कीर्तिं विद्यामवाप्नुयात् ॥ १५ ॥ तथाखिलं कुवलयं चन्द्रेण च समोर्चिषा ॥ १६ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि सप्तमीकल्पे महासप्तमीव्रतवर्णनं नामैकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

॥ छ ॥ ॥ सुमंतुरुवाच ॥ ॥ इत्युक्त्वा भगवान्देवः शंखचक्रगदाधरः ॥ अन्तर्धानं गतो वीर शांबस्येह प्रपश्यतः ॥ १ ॥ शांबोऽपि कृत्वा विधिवत्सप्तमीं रथसप्तमीम् ॥ आदिभिर्व्याधिभिर्मुक्तो जगामाशु स्वमंदिरम् ॥ २ ॥ ॥ शतानीक उवाच ॥ ॥ रथयात्रा कथं कार्या रथः कार्यः कथं रवेः ॥ केनेह मर्त्यलोकेषु रथयात्रा प्रवर्तिता ॥ ३ ॥ ॥ सुमंतुरुवाच ॥ ॥ इममर्थं पुरा पृष्टः पद्मयोनिः प्रजापतिः ॥ रुद्रेण कुरु शार्दूल आसीनः कांचने गिरौ ॥ ४ ॥ पद्मासनं पद्मयोनिं सुखासीनं प्रजापतिम् ॥ प्रणम्य शिरसा देवो रुद्रोवाचमुदैरयत् ॥ ५ ॥ ॥ श्रीरुद्र उवाच ॥ ॥ य एष भगवान्देवो भास्करो लोकभास्करः ॥ कथमेष भ्रमेद्देवो रथस्थो विमलः सदा ॥ ६ ॥ ॥ ब्रह्मोवाच ॥ ॥ यथा दिवि भ्रमेत्तात रथारूढो रविः सदा ॥ तथा ते वर्तयिष्येऽहं रथं चास्य त्रिलोचन ॥ ७ ॥ रथेन ह्येकचक्रेण पञ्चारेण त्रिणाभिना ॥ हिरण्मयेन कांतेन अष्टबन्धैकनेमिना ॥८॥ चक्रेण भास्वता चैव दिवि सूर्यः प्रसर्पति॥ दशयोजनसाहस्रो विस्तारोप्यस्य कथ्यते॥९॥ त्रिगुणा च रथोपस्थादीषा दण्डप्रमाणतः ॥ युगमस्य तु विस्तीर्णमरुणो[1] यत्र सारथिः ॥ १० ॥ प्रासंगः कांचनो दिव्यो युक्तः पवनगैर्हयैः ॥ छन्दोभिर्वाजिरूपैस्तु यतश्चक्रं ततः स्थितैः ॥ ११ ॥ येनासौ पर्यटेद्व्योम्नि भास्वता तु दिवस्पतिः ॥ अथैतानि तु सूर्यस्य प्रत्यंगानि रथस्य तु ॥ १२ ॥ संवत्सरस्यावयवैः कल्पितानि यथाक्रमम् ॥ नाभ्य[2]स्तिस्रस्तु चक्रस्य त्रयः कालाः प्रकीर्तिताः ॥ १३ ॥ आराः पञ्चर्तवस्तस्य नेम्यः षड्तवः स्मृताः ॥ रथवेदी स्मृते तस्य अयने दक्षिणोत्तरे ॥ १४ ॥ मुहूर्ता[3] इषवस्तस्य शम्याश्चास्य कलाः स्मृताः ॥ तस्य काष्ठाः

---

[1] विंशोनमनूरुः—इ० पा० । [2] नेमयस्तस्य—इ० पा० । [3] अमर्तं बन्धनं तस्य सावाश्चास्य कलाः स्मृताः—इ०पा० ।

स्मृताः कोणा अक्षदंडः क्षणाः स्मृताः ॥ १५ ॥ निमेषाश्चास्य कर्षाः स्यादीषादंडो लवाः स्मृताः ॥ रात्रिर्वरूथो धर्मोऽस्य ध्वज ऊर्ध्वं प्रति
ष्ठितः॥ १६ ॥ युगाक्षिकोटी ते तस्य अर्थकामावुभौ स्मृतौ ॥ अश्वरूपाणि च्छंदासि वहंते वामतो धुरम् ॥१७॥ गायत्री चैव त्रिष्टुप् च जगत्यनुष्टु
बेव च ॥ पंक्तिश्च बृहती चैव उष्णिगेव तु सप्तमी ॥ १८ ॥ चक्रमक्षनिबद्धं तु ध्रुवे चाक्षः समर्पितः ॥ सहचक्रो भ्रमत्यक्षः स चाक्षो भ्रमति ध्रुवे ॥
॥ १९ ॥ अक्षः सहैव चक्रेण भ्रमतेऽसौ ध्रुवे स्थितः ॥ [1]एवमक्षवशात्तस्य संनिवेशो रथस्य तु ॥ २० ॥ तथा संयोगभावेन संसिद्धो भास्करो
रथः ॥ तेन चासौ रविर्देवो नभः संसर्पते सदा ॥ २१ ॥ युगाक्षकोटिसंबद्धे द्वे रश्मी स्यंदनस्य तु ॥ ध्रुवे ते भ्रमतो रश्मी न चक्रयुगयोस्तु वै ॥
॥ २२ ॥ भ्रमतो मंडलान्यस्य रवेरस्य रथस्य तु ॥ [2]कुलालचक्रवद्याति मण्डलं सर्वतोदिशम् ॥ २३ ॥ युगाक्षकोटी ते तस्य दक्षिणे स्यंदनस्य
तु ॥ ऋग्यजुर्भ्यां गृहीतेन विचक्राश्वेन वै ध्रुवे ॥ २४ ॥ ह्रसेते तस्य रश्मी तु मण्डलेषूत्तरायणे ॥ दक्षिणेऽथ समृद्धे तु भ्रमतो मण्डलानि तु ॥
॥ २५ ॥ युगाक्षकोटी ते तस्य भ्रमेते स्यंदनस्य तु ॥ सक्तासक्तं च भ्रमते मण्डलं सर्वतोदिशम् ॥ २६ ॥ आकृष्येते ध्रुवेणेह समं तिष्ठति
सुव्रत ॥ तदा साभ्यंतरं देवो भ्रमते मंडलानि तु ॥ २७ ॥ ध्रुवेण मुच्यमाने तु पुना रश्मियुगेन वै ॥ [3]तथैव बाह्यतः सूर्यो भ्रमते मंडलानि तु ॥
॥ २८ ॥ अशीतिमंडलशतं काष्ठयोरुभयोरपि ॥ सरथोऽधिष्ठितो देवैर्विभ्रमेद्दषिभिः सह ॥ २९ ॥ गंधर्वैरप्सरोभिश्च सर्पग्रामणिराक्षसैः ॥
एतैर्वसति वै सूर्ये मासौ द्वौ द्वौ क्रमेण तु ॥ ३० ॥ धातार्यमा पुलस्त्यश्च पुलहश्च प्रजापतिः ॥ खण्डको वासुकिश्चैव सकर्णो रश्मिरेव च ॥३१॥
तुंबुरुर्नारदश्चैव गंधर्वौ गायतां वरौ ॥ क्रतुस्थलाप्सरश्चैव या च सा पुंजिकस्थला ॥ ३२ ॥ ग्रामणीरथकृत्स्नश्च रथौजाश्वतरावुभौ ॥ रक्षोहेतिः
प्रहेतिश्च यातुधानौ च तावुभौ ॥ ३३ ॥ मधुमाधवयोरेष गणो वसति भास्करे ॥ तथा ग्रीष्मौ तु द्वौ मासौ मित्रश्च वरुणश्च ह ॥ ३४ ॥
ऋषिरत्रिर्वशिष्ठश्च तक्षकोऽनंत एव च ॥ मेनका सहजन्या च गंधर्वौ च हहा हूहूः ॥ ३५ ॥ रथस्वनश्च ग्रामण्यौ रथचित्रश्च तावुभौ ॥ पौरु
षेयो वधश्चैव यातुधानौ महाबलौ ॥ ३६ ॥ शुचिशुक्रौ तु द्वौ मासौ वसंत्येते दिवाकरे ॥ इंद्रश्चैवः विवस्वांश्च अंगिरा भृगुरेव च ॥ ३७ ॥
एलापर्णस्तथा सर्पः शंखपालश्च पन्नगाः ॥ प्रम्लोचा दुंदुकाश्चैव गंधर्वौ भानुदर्दुरौ ॥ ३८ ॥ यातुधानौ तथा :सर्पस्तथा ब्राह्मश्च तावुभौ ॥
एते नभो नभस्यौ च निवसंति दिवाकरे ॥३९॥ शरद्येते पुनः शुभ्रा निवसंति स्म देवताः ॥ पर्जन्यश्चैव पूषा च भारद्वाजः सगौतमः ॥४०॥

---

[1] चक्रमस्याब्जवंशं तु सन्धिदेशे रथस्य तु–इ० पा० । [2] कुलालचक्रवत्तस्य भ्रमंते मंडलानि तु–इ० पा० । [3] रथेनवाह्यतेसूर्यः–इ० पा० ।

च्चित्रसेनश्च गंधर्वस्तथा वसुरुचिश्चयः ॥ विश्वाची च घृताची च ते उभे पुण्यलक्षणे॥४१॥ नागस्त्वैरावतश्चैव विश्रुतश्च धनंजयः ॥ सेनजिच्च सुषेणश्च सेनानीर्ग्रामणीस्तथा ॥४२॥ आपो वातश्च द्वावेतौ यातुधानौ प्रकीर्तितौ ॥ वसंत्येते तु वै सूर्ये इषोर्जौ कालपर्ययात्॥४३॥ हैमंतिकौ तु द्वौ मासौ वसंत्येते दिवाकरे ॥ अंशो भगश्च द्वावेतौ कश्यपश्च ऋतुस्तथा॥४४॥ भुजंगश्च महापद्मः सर्पः कर्कोटकस्तथा ॥ आपो वातश्च द्वावेतौ यातुधानौ प्रकीर्तितौ ॥ ४५ ॥ चित्रांगदश्च गंधर्वोरुणायुश्चैव तावुभौ ॥ सहे चैव सहस्ये च वसंत्येते दिवाकरे ॥ ४६ ॥ पूषा जिष्णुर्जमदग्निर्विश्वामित्रस्तथैव च ॥ काद्रवेयौ महानागौ कंबलाश्वतरावुभौ॥४७॥ गन्धर्वौ धृतराष्ट्रश्च सूर्यवार्चाश्च तावुभौ ॥ तिलोत्तमा च रंभा च सर्वलोके च विश्रुते ॥ ४८ ॥ ग्रामणीः[1] सेनजिच्चैव सत्यजिच्च महातपाः ॥ ब्रह्मोपेतश्च वै रक्षो यज्ञो यज्ञस्तथैव च ॥ एते तपस्तपस्यै च निवसंति दिवाकरे ॥ ४९ ॥ अन्येऽपि ये मंदेहा राक्षसाधिपतयो देवदेवगुह्यतमस्य रक्षार्थं सकलदेवैरस्मदादिभिः संनियुक्तास्तान्भवते कथयामि ॥ ५० ॥ ॥ रुद्र उवाच ॥ ॥ वद ब्रह्मन्कथां दिव्यां यामाहं प्रष्टुमागतः ॥ तामेव विस्तरेणैव कथयाशु मम प्रभो ॥ ५१ ॥ दिविष्ठं भास्करं दृष्ट्वा नमेत्केन विधानतः ॥ किं फलं तस्य वा देव समाप्ते भवति कर्मणि ॥ ५२ ॥ ॥ ब्रह्मोवाच ॥ ॥ शृणु रुद्र समासेन भास्करस्य नतिक्रियाम् ॥ यां कृत्वा रोगदुःखार्ता मुच्यंते पापसंचयात् ॥ ५३ ॥ स्थंडिले मंडलं कृत्वा द्वादशांगुलमानतः ॥ सद्यो गोमयलिप्ते च तत्रैवावाहयेद्रविम् ॥ ५४ ॥ पूजयित्वा गणेशादीन्वासुदेवं च सात्यकिम् ॥ सत्यभामां तथा लक्ष्मीमुमां देवीं च शंकरम् ॥ ५५ ॥ मंडलस्य समीपस्थान्पूर्वोक्तान्वेदमंत्रवित् ॥ ततः प्रदक्षिणीकृत्य दंडवत्प्रणमेत्सकृत् ॥ ५६ ॥ शतं सहस्रमयुतं लक्षं वा निजपापतः ॥ दृष्ट्वा शाक्तिं प्रणम्याथ सदा संयतमानसः ॥ ५७ ॥ विप्राय दक्षिणां दद्यान्निरुच्छ्वासः समाहितः ॥ रक्तिके च हिरण्यस्य शतमात्रे सहस्रके ॥ ५८ ॥ माषकाणां चतुष्कं चायुतं दशगुणं दिशेत् ॥ दक्षे दशगुणं प्रोक्तं दद्याद्रोगविमुक्तये ॥ ५९ ॥ एवं कृते विरूपाक्ष सर्वरोगाद्विमुच्यते ॥ इदं रहस्यं परमं शृणुयाद्यो हि मानवः ॥ ६० ॥ तस्य रोगा विनश्यंति मार्तंडस्य प्रसादतः ॥ अन्यच्च ते प्रवक्ष्यामि यच्चापृष्टमुमापते ॥ तच्छृणुष्व मया प्रोक्तं रथयन्तृनियामकम् ॥ ६१ ॥ ॥

इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि सप्तमीकल्पे सूर्यपूजावर्णनं नाम द्विपंचाशत्तमोऽध्यायः ॥ ५२ ॥छ॥ ॥

ब्रह्मोवाच ॥ ॥ तत्रारुणो मया पूर्वं सारथ्ये सन्नियोजितः ॥ इंद्रेण माठरो नाम वायुना कल्मषेण तु ॥ १ ॥ वैनतेयेन ताक्ष्योंपरि विमलो

---

[1] ग्रामणीर्वांतजिच्चैव सत्यजिच्च महाबलौ—इ० पा० ।

नखतुंडप्रहरणः पुरोगामी नियुक्त इति ॥ कालेन दंडो महादंडायुधो भवता शेषा महागणाधिपाः ॥ २ ॥ वैशाखेन राज्ञा वसुभिदायुधांगारिकौ द्वौ अग्निना पिंगलः ॥ संयंता महादंडायुधो भवता शेषो महागणाधिपः ॥ ३ ॥ हस्तो यमेन पाशहस्तोंबुपतिना समिन्धनः ॥ अलकाधिपतिना विष्णुः ॥ ४ ॥ अश्विभ्यां कालोपकालौ वाक्षप्रधानकौ ॥ नरनारायणाभ्यां क्षारौ धारौ धिषणकृष्णौ ॥ ५ ॥ वैराजशंखपालपर्जन्यरजसां दिशासु विदिशासु दिशां पालनं विश्वेदेवा ददुः ॥ ६ ॥ सप्तैतालोकमातरः सर्वमरुतोऽददन् ॥ ओंकारो वषट्कारो वेदनिस्वनः पिनाकी विनायकः शेषोऽनन्तो वासुकिश्च नागसहस्रेणात्मतुल्येनादित्यस्य रथमनुयांति[1] ॥ ७ ॥ गायत्री सावित्री रथे स्थिते उभे संध्ये सदा सा देवता या रविमडलं नांपैति[2] ॥ भगवंतं सहस्रकिरणमवलंबितुम् ॥८॥ एतद्धै सर्वदैवत्यं मंडलं ब्रह्मवादिनं ब्रह्मयज्ञवादिनीं यज्ञः ॥ भगवद्भक्तानां परमादित्योयं विष्णुर्माहेश्वराणां महेश्वरः ॥ ९ ॥ स्थानाभिमानिनो ह्येते सदा वै वृषभध्वज ॥ सूर्यमाप्यायंत्येते तेजसां तेज उत्तमम् ॥ १० ॥ ग्रथितैः स्वैर्वचोभिस्तु स्तुवंते ऋषयो रविम् ॥ गंधर्वाप्सरसश्चैव गीतनृत्यैरुपासते ॥ ११ ॥ वियद्भ्रमणतो रक्षां कुर्वंति स्म इषुग्रहम् ॥ सर्पा वहंति वै सूर्यं यातुधानास्तु यांति च ॥ १२ ॥ वालखिल्या नमंत्येतं[3] परिचार्योदयाद्रविम् ॥ दिवस्पतिः स्वभूश्चोभौ अग्रगौ योजनस्य तु ॥ १३ ॥ भर्गोऽथ दक्षिणे पार्श्वे कंजजो वामतः स्थितः ॥ सर्वे ते पृष्ठगा ज्ञेया ग्रहा लोकेषु पूजिताः ॥ १४ ॥ उपरागशिखी चोभावग्रतो नात्र संशयः ॥ मनुष्यधर्मा दक्षिणत उत्तरेण प्रचेतसः ॥ १५ ॥ संभवंति तथा कृष्ण उभावेतौ सदाग्रगौ ॥ वामेन वीतिहोत्रस्तु पृष्ठतस्तु हरिः सदा॥१६॥ रथपीठे क्षमा ज्ञेया अंतराले नभस्तथा ॥ आश्रित्य रथजां कांतिं खं दिवः समयः स्थितः॥१७॥ ध्वजो दंडश्च विज्ञेयो ध्वजाग्रे वृष एव च ॥ ऋद्धिर्वृद्धिस्तथा श्रीश्च पताका पार्वतीप्रिय ॥१८॥ ध्वजदंडाग्रे गरुडस्तदग्रे वरुणालयः॥ मैनाकश्छत्रदंडस्तु हिमवांश्छत्रमुच्यते ॥ १९ ॥ केचिदेवं वदंतीह लोकेचान्ये महामते ॥ छत्रदंडस्तथा क्लेशः क्लृशं छत्रं विदुर्बुधाः ॥ २० ॥ एतेषामेव देवानां यथा वीर्यं तथा तपः ॥ यथायोगं तथा सत्त्वं यथा सत्त्वं तथा बलम् ॥२१ ॥ तथा तपत्यसौ सूर्यस्तेषां सिद्धः स्वतेजसा ॥ एते तपंति वर्षंति यांति विश्वं सृजंति च ॥ २२ ॥ भूतानामशुभं कर्म व्यपोहंति च कीर्तिताः ॥ एते सहैव सूर्येण भ्रमंते सानुगा दिवि ॥ २३ ॥ तपंतश्च जपंतश्च ह्लादयंतश्च वै द्विजाः ॥ गोपायंति स्म भूतानि इह ते ह्यनुकंपया ॥ २४ ॥ प्रीणाति देवानमृतेन सूर्यः सोमेन सूक्तेन विवर्धयित्वा ॥ शुक्लेन पूर्णां दिवसक्रमेण तं कृष्णपक्षे

---

१ उन्नयन्ति–इ० पा० । २ चोपैति–इ० पा० । ३ नयंत्यस्तम्—इ० पा० ।

विबुधाः पिबंति ॥ २५ ॥ पीतं हि सोमं द्विकलावशेषं कृष्णे तु पक्षे रुचिभिर्ज्वलंतम् ॥ सुधामृतं तत्पितरः पिबंति ऊर्जाश्च सौम्याश्च तथैव
कल्पाः ॥ २६ ॥ सूर्येण गोभिश्च समृद्धिताभिरद्भिः पुनश्चैव समुज्झिताभिः ॥ तथौषधीभिः सततं पिबंति अत्यंतपानेन क्षुधा जयंति ॥ २७ ॥
मासार्धतृप्तिस्तु मताभिरद्भिर्मासेन तृप्तिः स्वधया पितॄणाम् ॥ अन्नेन शश्वद्विदधाति मर्त्यं त्वयं जगच्चैव बिभर्ति गोभिः ॥ २८ ॥ अहोरात्रं रथेना
सावेकचक्रेण वै भ्रमन् ॥ सप्तद्वीपसमुद्रांतं सप्तभिश्च हयैः सह ॥ २९॥ छन्दोभिर्वाजिरूपैस्तैर्यतश्चक्रं ततः स्थितैः ॥ कामरूपैः सकृद्युक्तैरंतरस्थैर्म
नोजवैः ॥ ३० ॥ हरिभिरव्ययैर्वश्यैः क्षुधाश्रमविवर्जितैः ॥ द्व्यशीतिमंडलशतमीहंत्यब्देन वै हयाः ॥ ३१ ॥ बाह्यतोऽभ्यंतरं चैव मंडलं दिवस
क्रमात् ॥ कल्पादौ संप्रयुक्तास्ते वहंत्याभूतसंप्लवम् ॥३२॥ आवृता वालखिल्यैस्तैर्भ्रमंति तान्यहानि तु ॥ ग्रथितैः स्वैर्वचोभिस्तु स्तूयमानो मह
र्षिभिः ॥ ३३ ॥ सेव्यते नृत्यगीतैश्च गंधर्वैरप्सरोगणैः ॥ पतंगः पतगैरश्वैर्वसते भ्रमयन्दिवि ॥३४॥ वीथ्याग्र्यया विचरते नक्षत्राणि यथा शशी ॥
मध्यगश्चामरावत्यां यदा भवति भास्करः ॥ ३५ ॥ वैवस्वते संयमने उत्तिष्ठन्दृश्यते तदा ॥ सुखायामर्धरात्रं तु विभायामस्तमेति च ॥ ३६ ॥
वैवस्वते संयमने मध्यमस्तु रविर्यदा ॥ सुखायामथ वारुण्यामुत्तिष्ठन्दृश्यते तदा ॥ ३७ ॥ रात्र्यर्धं चामरावत्यामस्तमेति यमस्य वै ॥ सोमपुर्यां
विभायां तु मध्यगश्चार्यमा यदा ॥ ३८ ॥ माहेन्द्रस्यामरावत्यामुत्तिष्ठति दिवाकरः ॥ अर्धरात्रं संयमने वारुण्यामस्तमेति च ॥ ३९ ॥ एवं चतुर्षु
पार्श्वेषु मेरोः कुर्वन्प्रदक्षिणम् ॥ उदयास्तमने चासावुत्तिष्ठति पुनःपुनः ॥४०॥ पूर्वाह्णे चापराह्णे च द्वौ द्वौ देवालयौ पुनः ॥ तपत्येकं तु मध्याह्ने
ताभिरेव गभस्तिभिः ॥ ४१ ॥ उदितो वर्धमानाभिरामध्याह्नात्तपेद्रविः ॥ ततः परं ह्रसंतीभिर्गोभिरस्तं नियच्छति ॥ ४२ ॥ यत्रोद्यन्दृश्यते
सूर्यः स तेषामुदयः स्मृतः ॥ प्रणाशं गच्छते यत्र स तेषामस्तमुच्यते ॥ ४३ ॥ एवं पुष्करमध्येन तदा सर्पति भास्करः ॥ त्रिंशद्भागं तु मेदिन्या
मुहूर्तेन स गच्छति ॥ ४४ ॥ योजनाग्रेण संख्यां[1] तु मुहूर्तस्य निबोध मे ॥ पूर्णं शतसहस्राणां सहस्रं तु त्रिलोचन ॥ ४५ ॥ पंचाशच्च तथाल्पानि
सहस्राण्यधिकानि तु ॥ मौहूर्तिकी गतिर्ह्येषा सूर्यस्य तु विधीयते ॥ ४६ ॥ योजनानां सहस्रे द्वे द्वे शते द्वे च योजने ॥ निमेषांतरमात्रेण दिवि
सूर्यः प्रसर्पति ॥४७॥ स शीघ्रमेव पर्येति भास्करोऽलातचक्रवत् ॥ भ्रमन्वै भ्रममाणेषु ऋक्षेषु विचरत्यसौ ॥४८॥ इन्द्रः पूजयते सूर्यमुत्तिष्ठंतं दिने
दिने ॥ मध्याह्ने च यमः पश्चादस्तं यांतमपां पतिः ॥४९॥ सोमस्तथार्धरात्रे तु सदा पूजयते रविम् ॥ विष्णुर्भवानहं रुद्रः पूजयाम[3] निशाक्षये ॥५०॥

---

१ संरक्षाम्–इ० पा० । २ त्रिंशच्छतसहस्राणाम्–इ० पा० । ३ पूजयंति–इ०, पूजयामः–इ० च पा० ।

एवमग्निर्निर्ऋतिश्च वायुरीशान एव च ॥ पूजयंति क्रमेणैव भ्रममाणं दिवाकरम्॥श्रेयोर्थं देवशार्दूल सर्वे ब्रह्मादयः सुराः ॥५१॥ ॥ इति श्रीभविष्ये
महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि रथसप्तमीकल्पे सूर्यगतिवर्णनं नाम त्रिपंचाशत्तमोऽध्यायः ॥५३॥ ॥छ॥ ॥ रुद्र उवाच ॥ ॥
अहो हंसस्य माहात्म्यं वर्णितं भवतेदृशम् ॥ कथ्यतां पुनरेवेदं माहात्म्यं भास्करस्य तु ॥१॥ ॥ब्रह्मोवाच॥ ॥ आदित्यमंत्रमखिलं त्रैलोक्यं
सचराचरम् ॥ भवत्यस्माज्जगत्सर्वं सदेवासुरमानुषम् ॥२॥ रुद्रेंद्रोपेंद्रचंद्राणां विप्रेंद्रत्रिदिवौकसाम् ॥ महाद्युतिमतां कृत्स्नं तेजो यत्सार्वलौकिकम् ॥
॥३॥ सर्वात्मा सर्वलोकेशो देवदेवः प्रजापतिः ॥ सूर्य एष त्रिलोकस्य मूलं परमदैवतम् ॥ ४ ॥ अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठति ॥ आदि
त्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः॥५॥सूर्यात्प्रसूयते [1]सर्वं तत्र चैव प्रलीयते ॥ भावाभावौ हि लोकानामादित्यान्निःसृतौ पुरा ॥ ६ ॥ एतत्तु ध्या
निनां ध्यानं मोक्षं चाप्येष मोक्षिणाम् ॥ अत्र गच्छंति निर्वाणं जायंतेऽस्मात्पुनः प्रजाः॥७॥क्षणा मुहूर्ता दिवसा निशाः पक्षाश्च नित्यशः॥मासाः
संवत्सराश्चैव ऋतवोऽथ युगानि च॥८॥ सदादित्यादृते ह्येषा कालसंख्या न विद्यते ॥ कालादृते न नियमो [2]नाग्निर्न हवनक्रिया ॥ ९ ॥ [3]ऋतूनामवि
भागाच्च पुष्पमूलफलं कुतः ॥ कुतः सस्यविनिष्पत्तिस्[4]तृणौषधिगणाः कुतः ॥१०॥ अभावो व्यवहाराणां जंतूनां दिवि चेह च ॥ जगत्प्रतपनमृते
भास्करं वारितस्करम् ॥ ११ ॥ नावृष्ट्या तपते सूर्यो नावृष्ट्या परिविश्यते ॥ नावृष्ट्या विकृतिं धत्ते वारिणा दीप्यते रविः ॥ १२ ॥ वसंते कपि
लः सूर्यो ग्रीष्मे कांचनसप्रभः ॥ श्वेतो वर्णेन वर्षासु पांडुः शरदि भास्करः ॥ १३ ॥ हेमंते ताम्रवर्णस्तु शिशिरे लोहितो रविः॥ इति वर्णाः समा
ख्याताःशृणु वर्णफलं हर ॥१४॥ कृष्णो भयाय जगतस्ताम्रः सेनापतिं विनाशयति ॥ पीतो नरेंद्रपुत्रं श्वेतस्तु पुरोहितं हंति ॥ १५ ॥ चित्रोथ
वापि धूम्रो रवी रश्मिव्याकुलं करोत्युच्चैः ॥ तस्करशस्त्रनिपातैर्यदि न सलिलमाशु पातयति ॥ १६ ॥ ॥ इति श्रीभविष्ये महापुराणे शतार्द्ध
साहस्र्यां संहितायां ब्राह्मे पर्वणि रथसप्तमीकल्पे सूर्यमहिमवर्णनं नाम चतुष्पंचाशत्तमोऽध्यायः ॥५४ ॥ छ ॥ ॥ रुद्र उवाच ॥ ॥रथयात्रा कथं
कार्या भास्करस्येह मानवैः ॥ फलं च किं भवेत्तेषां यात्रां कुर्वंति ये [5]रवेः ॥ १ ॥ विधिना केन कर्तव्या कस्मिन्काले सुरोत्तम ॥ कथं च भ्रामयेद्देवं
[6]रथारूढं दिवाकरम् ॥ २ ॥ देवस्य ये रथं भक्त्या भ्रामयंति वहंति च ॥ तेषां च किं फलं प्रोक्तं ये च नृत्यकरा नराः ॥ ३ ॥ भ्रमन्ति ये च देवेन
नृत्यगीतपरायणाः ॥ प्रजागरं च कुर्वंति भक्त्या श्रद्धासमन्विताः ॥ ४ ॥ तेषां च किं फलं प्रोक्तं रथं [7]यच्छंति ये रवेः ॥ बालिं भक्तं च ये भक्त्या

---

[1] विश्वम्–इ० पा० । [2] नाग्नेर्विहरणक्रिया–इ० पा० ।। [3] ऋतुनामविभागश्च–इ० पा० । [4] स्वापजागरणाः कुतः–इ० पा० । [5] नराः–इ० पा० । [6] रविं च नभसि स्थितम्–इ० पा० । [7] गच्छंति–इ० पा० ।

दिशंत्याहिकभोजनम् ॥ ५ ॥ एतन्मे ब्रूहि निखिलं सुरज्येष्ठ सविस्तरम् ॥ लोकानां श्रेयसे देव परं कौतूहलं हि मे ॥ ६ ॥ ॥ ब्रह्मोवाच ॥ ॥
साधु पृष्टोऽस्मि भूतेश गणेशोसि त्रिलोचन ॥ शृणुष्वैकमना वच्मि यथाप्रश्नं सविस्तरम् ॥ ७ ॥ देवस्य रथयात्रेयं भास्करस्य महात्मनः ॥
इंद्रोत्सवस्तथा रुद्र मया ह्येतौ प्रकीर्तितौ ॥ ८ ॥ मर्त्यलोके शांतिहेतोर्लोकानां लोकपूजित ॥ प्रवर्तितावुभौ यस्मिन्देशे देवमहोत्सवौ ॥ ९ ॥
न तत्रोपद्रवाः संति राजतस्करसंभवाः ॥ तस्मात्कार्याविमौ भक्त्या दुर्भिक्षस्येह शांतये ॥ १० ॥ शुक्लपक्षे तु सप्तम्यां मासि भाद्रपदे हर ॥ घृतेना
भ्यंगयेद्देवं पंचपूतांगजेन वै ॥ ११ ॥ अभ्यंगयेद्ग्रहेशं यः सर्षपैः श्रद्धयान्वितः ॥ दिने दिने जगन्नाथं प्रविष्टं वर्णके रविम् ॥ १२ ॥ स गच्छेद्यानमा
रूढो गैरिकं किंकिणीकृतम् ॥ वैश्वानरपुरं दिव्यं गंधर्वाप्सरशोभितम् ॥ १३ ॥ शाल्योदनं खंडमिश्रं वज्रं वज्रसमन्वितम् ॥ वर्णभक्तं प्रयच्छेद्यो भास्क
राय दिनेदिने ॥ १४ ॥ आरूढः स विमानं तु ज्वालामालाकुलं शुभम् ॥ गच्छेन्मम पुरं देव स्तूयमानो महर्षिभिः ॥ १५ ॥ तस्मात्सर्वप्रयत्नेन
भास्कराय नरैः शिव ॥ वर्णभक्तं प्रदातव्यं प्रविष्टस्येह वर्णकम् ॥ १६ ॥ घृतपूर्णं खंडवेष्टं कासारं मोदकं पयः ॥ दध्योदनं पायसं च संयावं गुड
पूपकान् ॥ १७ ॥ ये प्रयच्छंति देवस्य भास्करस्येह वर्णकम् ॥ ते गच्छंति न संदेहो नरा वै मंदिरं मम ॥ १८ ॥ अहन्यहनि यो भक्त्या भास्क
राय प्रयच्छति ॥ अभ्यंगाय घृतं देयं स याति परमां गतिम् ॥ १९ ॥ तथा यो वर्णभक्तं च अहन्यहनि भक्तितः ॥ स प्राप्येह शुभान्कामान्ग
च्छेत्स भवसालयम् ॥ २० ॥ चूर्णमुद्वर्तनायेह यः प्रयच्छेच्छुभं रवेः ॥ स याति परमं स्थानं यत्र देवो दिवाकरः ॥ २१ ॥ ततस्तं स्नापयेद्देवं
पौषे मासि विधानतः ॥ सप्तम्यां शुक्लपक्षस्य शृणुष्वैकमनास्तथा ॥ २२ ॥ तीर्थोदकमुपानीय अन्यद्वाथ जलं शुभम् ॥ वेदोक्तेन विधानेन
प्रतिमां स्थापयेद्बुधः ॥ २३ ॥ यजेद्धि तीर्थनामानि मनसा संस्मरन्बुधः ॥ प्रयागं पुष्करं देवं कुरुक्षेत्रं च नैमिषम् ॥ २४ ॥ पृथूदकं चंद्रभागां
शोणं गोकर्णमेव च ॥ ब्रह्मावर्तं कुशावर्तं बिल्वकं नीलपर्वतम् ॥ २५ ॥ गंगाद्वारं तथा पुण्यं गंगासागरमेव च ॥ कालप्रियं मित्रवनं शुंडीरस्वामिनं
तथा॥२६॥ चक्रतीर्थं तथा पुण्यं रामतीर्थं तथा शिवम् ॥ वितस्ता हर्षपंथा वै तथा वै देविका स्मृता॥२७॥ गंगा सरस्वती सिंधुश्चंद्रभागा सन
र्मदा ॥ विपाशा यमुना तापी शिवा वेत्रवती तथा ॥ २८ ॥ गोदावरी पयोष्णी च कृष्णा वेण्या तथा नदी ॥ शतरुद्रा पुष्करिणी कौशिकी
सरयूस्तथा ॥ २९ ॥ तथान्ये सागराश्चैव सांनिध्यं कल्पयंतु वै ॥ तथाश्रमाः पुण्यतमा दिव्यान्यायतनानि च॥३०॥ एवं स्नानविधिं कृत्वा अर्च
यित्वा प्रणम्य च ॥ धूपमर्घ्यं प्रदत्त्वा तु प्रतिमामधिवासयेत् ॥ ३१ ॥ त्रिरात्रं सप्तरात्रं वा मासं मासार्धमेव च ॥ स्थितं स्नानगृहे देवं पूजयेद्भक्ति

तो नरः ॥ ३२ ॥ चत्वरे लेपयेद्वेदिं चतुरस्रां शुभे कृताम् ॥ चतुर्दिशं श्वेतकुंभैर्वितानवरशोभिताम् ॥३३॥ कृष्णपक्षे तु माघस्य सप्तम्यां त्रिपुरांतक ॥ कृत्वाग्निकार्यं विधिवत्कृत्वा ब्राह्मणभोजनम् ॥ ३४ ॥ शंखभेरीनिनादैस्तु ब्रह्मघोषैश्च पुष्कलैः ॥ पुण्याहघोषैर्विविधैर्ब्राह्मणान्स्वस्तिवाच्य च ॥ ३५ ॥ ततोऽस्य परया भक्त्या सूर्यस्य परमात्मनः ॥ रथेन दर्शनीयेन किंकिणीजालमालिना ॥ सूर्यश्च भ्रामयेद्देवं महोत्सवपुरःसरम् ॥ ३६ ॥ शुक्लपक्षे तु माघस्य रथमारोपयेद्रविम् ॥ कृत्वाग्निहोमं विधिवत्तथा ब्राह्मणभोजनम् ॥ ३७ ॥ प्रीणयित्वा जनं सर्वं दक्षिणाभोजनादिना ॥ प्रपूज्य ब्राह्मणान्दिव्यान्भौमांश्चापि सुवाचकान् ॥ ३८ ॥ इतिहासपुराणाभ्यां वाचको ब्राह्मणोत्तमः ॥ ततो देवश्च इष्टश्च संपूज्यो यत्नतस्तदा ॥ ३९ ॥ माघस्य शुक्लपक्षस्य पंचम्यामेकभक्तकम् ॥ अयाचितं चतुर्थ्यां तु षष्ठ्यां नक्तं प्रकीर्तितम् ॥ ४० ॥ सप्तम्यामुपवासं तु आश्रमाद्रोपयेद्रथम् ॥ अग्निकार्यं तु वै कृत्वा रथस्य पुरतः शिव ॥ ४१ ॥ षष्ठ्यां च रात्रौ भूतेश रथस्येहाधिवासनम् ॥ ब्राह्मणान्भोजयित्वा तु दिव्यान्भौमांश्च वाचकान् ॥ ४२ ॥ रथमारोपयेद्देवं सप्तम्यां भूतभावनम् ॥ सितायां माघमासे तु तस्य देवालयाग्रतः ॥ ४३ ॥ तत्रस्थस्यैव देवस्य कुर्याद्रात्रौ प्रजागरम् ॥ नानाविधैः प्रेक्षणकैर्दीपवृक्षोपशोभितैः ॥ ४४ ॥ शंखतूर्यनिनादैश्च ब्रह्मघोषैश्च पुष्कलैः ॥ कुर्यात्प्रजागरं भक्त्या देवस्य पुरतो निशि ॥ ४५ ॥ ततोष्टम्यां च यत्नेन देवं रथगतं नयेत् ॥ नगरस्योत्तरं द्वारं शंखभेरीनिनादितम् ॥ ४६ ॥ ततः पूर्वं दक्षिणं च द्वारं चापि तथापरम् ॥ एवं हि क्रियमाणायां यात्रायां वत्सरावधौ ॥ ४७ ॥ मानवाः सुखमेधंते राजा जयति चाहितान् ॥ नीरुजश्च जनाः सर्वे गवां शांतिर्भवेत्तथा ॥ ४८ ॥ कर्तारश्चापि यात्रायाः स्वर्गभाजो भवंति हि ॥ वोढारश्च तथा वत्स सूर्यलोकं व्रजंति वै ॥ ४९ ॥ ॥ रुद्र उवाच ॥ ॥ कथं संचाल्यते ब्रह्मन्स्थापिता प्रतिमा सकृत् ॥ एतन्मे वद देवेश सुमहान्संशयो हि मे ॥ ५० ॥ ॥ ब्रह्मोवाच ॥ ॥ पूर्वमेव सहस्रांशोर्यानहेतोर्महात्मनः ॥ संवत्सरस्यावयवैः कल्पितो[1]ऽस्य रथो मया ॥ ५१ सर्वेषां तु रथानां वै स रथः प्रथमः स्मृतः ॥ तं दृष्ट्वा तु ततस्त्वन्ये स्यंदना विश्वकर्मणा ॥५२॥ कल्पिताः सर्वदेवानां सोमादीनामनेकशः ॥ विश्वकर्मकृतं प्राप्य रथं देवेन पुत्रक ॥५३॥ पूजार्थमात्मनो दत्तं मनवे सत्कुलोद्वह ॥ मनुनेक्ष्वाकवे दत्तं मर्त्यैः संपूज्यतां रविः ॥ ५४ ॥ अतस्तु रथयानेन चालनं[2] विहितं रवेः ॥ तस्मान्न चालने दोषः सवितुश्चल एव सः ॥ ५५ ॥ यस्माद्रथेन पर्येति भास्करः पृथिवीमिमाम् ॥ गच्छन्न दृश्यते चैतन्मंडलं सवितुस्तथा ॥ ५६ ॥ अदृष्टं चलते यस्मात्तस्माद्वै पार्वतीप्रिय ॥ तदेवं रथयात्रासु दृष्टं

---

[1] कथितः–इ० पा० । [2] वाहनम्–इ० पा० ।

भानोर्मनीषिभिः ॥ ५७ ॥ अन्येषां चालनं नेष्टं देवानां पार्वतीप्रिय ॥ ब्रह्मविष्णुशिवादीनां स्थापितानां विधानतः ॥ ५८ ॥ तस्माद्रथेन देवस्य
यात्रा कार्या विधानतः ॥ प्रजानामिह शांत्यर्थं प्रतिसंवत्सरं सदा ॥ ५९ ॥ कांचनो वाथ रौप्यो वा दृढदारुमयोऽपि वा ॥ दृढाक्षयुगचक्रश्च रथः
कार्यः सुयंत्रितः ॥ ६० ॥ तस्मिन्नथवरे श्रेष्ठे कल्पिते सुमनोरमे ॥ आरोप्य प्रतिमां यत्नाद्योजयेद्वाजिनः शुभान् ॥ ६१ ॥ हरिल्लक्षणसंपन्नान्सुमु
खान्वशवर्तिनः॥कुंकुमेन समालब्धांश्चामरस्रग्विभूषितान् ॥ ६२ ॥ सदश्वान्योजयित्वा तु रथस्यार्घ्यं प्रदाय च ॥ विबुधान्पूजयित्वा तु धूपमाल्या
नुलेपनैः ॥ ६३ ॥ आहारैर्विविधैश्चापि भोजयित्वा द्विजोत्तमान् ॥ दीनांधकृपणादींश्च सर्वान्संतर्प्य शक्तितः[1] ॥ ६४ ॥ न कंचिद्विमुखं कुर्यादुत्त
माधममध्यमम् ॥ सूर्यक्रतौ तु वितते एवमाहुर्मनीषिणः ॥ ६५ ॥ यश्चिंतयति भग्नाशः क्षुधावातप्रपीडितः ॥ अदातुर्हि पितॄंस्तेन स्वर्गस्था
नपि पातयेत् ॥ ६६ ॥ यज्ञश्च दक्षिणाहीनः सवितुर्न प्रशस्यते ॥ तस्मान्नानाविधैः कामैर्भक्ष्यलेह्यसमन्वितैः ॥ ६७ ॥ पूजयित्वा जनं सर्वमि
ममुच्चारयेन्मनुम् ॥ बलिं गृह्णंतु मे देवा आदित्या वसवस्तथा ॥६८॥ मरुतोथाश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः ॥ असुरा यातुधानाश्च[3] रथ
स्था यास्तु देवताः ॥ ६९ ॥ दिग्पाला लोकपालाश्च ये च विघ्नविनायकाः ॥ जगतः स्वस्ति कुर्वंतु ये च दिव्या महर्षयः ॥ ७० ॥ मा विघ्नं मा
च मे पापं मा च मे परिपंथिनः ॥ सौम्या भवंतु तृप्ताश्च देवा भूतगणास्तथा ॥ ७१ ॥ वामदेव्यैः पवित्रैश्च मानस्तोकरथंतरैः ॥ आकृष्णेन रजसा
ऋचमेकामुदाहरेत् ॥ ७२ ॥ ततः पुण्याहशब्देन कृतवादित्रनिःस्वनैः ॥ रथक्रमणकं कुर्याद्वर्त्मना सुसमेन तु ॥ पुरुषैश्चापि वोढव्यः सूर्यभक्तिस
मन्वितैः ॥ ७३ ॥ सुकृतैः [4]प्रग्रहैर्दांतैर्बलीवर्दैरथापि वा ॥ यथा पर्यटनं च स्याद्विषमे पथि गच्छतः ॥ ७४ ॥ उपवासस्थितैर्विप्रैर्दिव्यैर्भौमैश्च
सुव्रतैः ॥ त्रिंशद्भिः षोडशैर्वापि प्रतिमां भास्करस्य तु॥७५॥ स्थानात्प्रचाल्य वै रुद्र रथमारोपयेच्छनैः॥ राज्ञी च निक्षुभा रुद्र भार्ये तस्य महात्मनः
॥ ७६ ॥ शनैरारोपयेद्रुद्र उभयोः पार्श्वयो रथे ॥ निक्षुभां दक्षिणे पार्श्वे राज्ञीं चाप्युत्तरे तथा ॥ ७७ ॥ द्वावेव ब्राह्मणौ तस्मिन्दिव्यो भौमश्च
पार्श्वयोः॥ब्रह्मकल्पस्तथा भौमः कूबरस्योपरि स्थितः॥७८॥ गरुडं पृष्ठतश्चास्य वल्गमानं प्रकल्पयेत्॥आतपत्रं तथा श्वेतं स्वर्णदंडमनौपमम्॥७९॥
सुवर्णबिंदुभिश्चित्रं मणिमुक्ताफलोज्ज्वलम् ॥ ततस्त्विन्द्रधनुःप्रख्यं स्वर्णदंडमथाव्रणम् ॥ ८० ॥ ध्वजं प्रकल्पयेत्तस्य पताकाभिरलंकृतम् ॥ भूतेश
नानावर्णाभिस्सप्तभिः कामनाशन॥८१॥ ध्वजोपरि[5]चरं व्योम अरुणाधिष्ठितं भवेत् ॥ रथतुंडगतान्विप्रान्नयेद्रथवरं रवेः ॥८२॥सारथ्यं रुद्र कुर्याद्वै

---

[1] यत्नतः–इ० पा० । [2] प्रीणयित्वा–इ० पा० । [3] यातुधानाद्याः–इ० पा० । [4] सुग्रहैः–इ० पा० । [5] परम्–इ० पा० ।

श्रेयोऽर्थमात्मनः सदा ॥ नारुहेत रथेऽश्रद्धो[1] यदीच्छेच्छ्रेय आत्मनः ॥८३॥ रथमारोहतस्तस्य क्षयं गच्छति संततिः ॥ स रथो देवदेवस्य वोढव्यो
ब्राह्मणैः सदा ॥८४॥ क्षत्रियैश्चापि वैश्यैश्च न तु शूद्रैः कदाचन ॥ ये त्वन्यदेवताभक्ता ये च मद्यप्रवर्तकाः॥८५॥नैतैः शूद्रैश्च वोढव्य इतरैस्तु सदो
ह्यते ॥ उपवासव्रतोपेतैर्वोढव्यः पार्वतीप्रिय ॥ ८६ ॥ स्वस्थानाच्चलितो रुद्र पूर्वद्वारं व्रजेत[2] वै ॥ दिनमेकं वसेत्तत्र पूज्यमानो नृपेण वै ॥ ८७ ॥
नानाविधैः प्रेक्षणकैः पुराणश्रवणेन च ॥ नानाविधैर्ब्रह्मघोषैर्ब्राह्मणानां च तर्पणैः ॥ ८८ ॥ स्थित्वा तु तत्राष्टम्यंतं नवम्यां चलते पुनः ॥ व्रजेत
दक्षिणं द्वारं नगरस्य त्रिलोचन ॥ ८९ ॥ तत्रापि दिनमेकं तु तिष्ठतेंधकसूदन ॥ स्थितेत्र तैः पूज्यमानो यथा राज्ञा तथा नृपैः ॥९०॥ तस्मादपि
चलेद्रुद्र द्वारं पश्चात्ततोत्तरम् ॥ तत्रापि पूज्यः शूद्रैस्तु विधिवत्प्रियदर्शन ॥९१॥ तस्माच्च चलते रुद्र व्रजेन्मध्यं पुरस्य तु ॥ तत्रस्थं पूजयंति स्म
ब्राह्मणाः श्रद्धयान्विताः ॥ ९२ ॥ शंखवादित्रनिनिर्घोषैस्तथा प्रेक्षणकैर्वरैः ॥ ब्रह्मघोषैश्च विविधैः समंताद्दीपकैः शुभैः ॥ ९३ ॥ नानाविधैर्वित्त
दानैर्ब्राह्मणानां च तर्पणैः ॥ दीनांधकृपणानां च तर्पणैस्त्रिपुरांतक ॥ ९४ ॥ पुरमध्याच्चु चलितस्तिष्ठेत्प्राप्य स्वमंदिरम् ॥ इत्थं प्राप्य स्थितो
देवः पुरतो मंदिरस्य तु ॥ ९५ ॥ तत्र स्थितः पूजनीयो भवेत्पौरेण कृत्स्नशः ॥ पूज्यमानस्त्वहोरात्रं रथारूढस्तु तिष्ठति ॥ ९६ ॥ अपरे दिने व्रजे
त्स्थानं तच्चिरंतनमादरात् ॥ त्रयोदश्यां व्यतीतायां चतुर्दश्यां त्रिलोचन ॥ ९७ ॥ सदैवं भ्रामयेद्देवं ग्रहेशं दुरितापहम् ॥ परिवारयुतं रुद्र सानुगं
परमेश्वरम् ॥ ९८ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि रथसप्तमीकल्पे रथयात्रावर्णनं नाम पंचपंशाशत्तमो
ध्यायः ॥ ५५ ॥ छ ॥ ॥ श्रीरुद्र उवाच ॥ ॥ कथं प्रचालयेद्ब्रह्मन्रथस्थं तमनाशनम् ॥ अनुगाश्च कथं चास्य के च ते अनुगाः क्रमात् ॥ १ ॥
भूयोभूयः सुरश्रेष्ठ विस्तरान्मम श्रेयसे ॥ वद[3] सर्वं जगन्नाथ परं कौतूहलं हि मे॥२॥ ॥ ब्रह्मोवाच ॥ ॥ शनैर्नयेद्रथं रुद्र वर्त्मना सु समेन तु ॥ यथा
पर्यटनं तु स्याद्विषमे पथि गच्छतः ॥ ३ ॥ प्रतीहाररथं पूर्वं नयेन्मार्गविशुद्धये ॥ तस्मादनंतरं रुद्र दंडनायकमादरात् ॥४॥ पिंगलं च ततस्तस्य
पृष्ठगं चादरान्नयेत् ॥ रक्षको द्वारको यस्माद्रथारूढौ तु पृष्ठतः ॥ ५ ॥ रथारूढस्तथा दिंडी देवस्य पुरतः स्थितः ॥ तस्मादपि तथा रुद्र लेखको
भास्करप्रियः ॥ ६ ॥ शनैःशनैर्नयेद्रुद्र रथं देवस्य यत्नतः ॥ युगाक्षचक्रभंगो वा यथा न स्यात्त्रिलोचन ॥ ७ ॥ ईषाभंगे द्विजभयं भग्नेऽक्षे
क्षत्रियक्षयः ॥ तुलाभंगे तु वैश्यानां शय्याशूद्रक्षयो भवेत् ॥ ८ ॥ युगभंगे त्वनावृष्टिः पीठभंगे प्रजाभयम् ॥ परचक्रागमं[4] विद्याच्चक्रभंगे रथस्य

---

१ शूद्रः–इ० पा० । २ व्रजेद्रवेः–इ० पा० । ३ वक्षि–इ० पा० । ४ भयम् इ० पा० ।

तु ॥ ९ ॥ ध्वजस्य पतने चापि नृपभंगं विनिर्दिशेत् ॥ व्यङ्गितप्रतिमायां[1] तु राज्ञो मरणमादिशेत् ॥ १० ॥ छत्रभंगाद्भयं रुद्र युवराज्ञो विनिर्दि
शेत् ॥ उत्पन्नेष्वेवमाद्येषु उत्पातेष्वशुभेषु च॥११॥ बलिकर्म पुनः कुर्याच्छांतिहोमं तथैव च ॥ ब्राह्मणान्वाचयेद्भूयो दद्याद्दानानि चैव हि॥१२॥
पूर्वोत्तरे च दिग्भागे रथस्याग्निं प्रकल्पयेत्॥ समिद्भिस्तु घृताक्ताभिर्होमयेज्जातवेदसम्॥१३॥स्वाहाकारान्वदन्सम्यग्दैवतेभ्यस्त्वनुक्रमात् ॥ ग्रहेभ्यश्च
प्रजाभ्यश्च नामान्युद्दिश्य होमयेत् ॥१४॥ प्रथमं चाग्नये स्वाहा स्वाहा सोमाय चैव हि॥स्वाहा प्रजापतये च देया आहुतयः क्रमात्॥१५॥स्वस्त्य
स्त्विह च विप्रेभ्यः स्वस्ति राज्ञे तथैव च ॥ गोभ्यः स्वस्ति प्रजाभ्यश्च जगतः शांतिरस्तु वै ॥१६॥ शं नोऽस्तु द्विपदे नित्यं शांतिरस्तु चतुष्पदे॥
शं प्रजाभ्यस्तथैवास्तु शं सदात्मनि चास्तु वै ॥ १७ ॥ भूः शांतिरस्तु देवेश भुवः शांतिस्तथैव च ॥ स्वश्चैवास्तु तथा शांतिः सर्वत्रास्तु तथा रवेः॥
॥ १८ ॥ त्वं देव जगतः स्रष्टा पोष्टा चैव त्वमेव हि ॥ प्रजापाल ग्रहेशान शांतिं कुरु दिवस्पते ॥ १९ ॥ इदमन्यच्च वक्ष्यामि शांत्याः परमकार
णम् ॥ यात्राकारणभूतस्य पुरुषस्य स्वजन्मनः ॥२०॥ दुःस्थान्ग्रहांश्च विज्ञाय ग्रहशांतिं समाचरेत्॥प्रादेशमात्राः कर्तव्याः समिधोऽथ प्रमाणतः॥
॥ २१ ॥ अर्कमय्यो रवेः कार्याः पालाश्यः शशिनः स्मृताः ॥ खादिर्यश्चैव भौमाय आपामार्ग्योऽब्जसूनवे ॥ २२ ॥ आश्वत्थ्यश्चाथ जीवाय औदुं
बर्यः सिताय च ॥ असिताय शमीमय्यो दूर्वा कार्यास्तु राहवे॥२३॥केतवे तु कुशाः कार्याः दक्षिणाश्चाप्यतः शृणु॥सूर्याय शोभनां धेनुं शंखं दद्या
दथेंदवे॥२४॥रक्तमनड्वाहं भौमाय कांचनं सोमसूनवे ॥ जीवाय वाससी देये शुक्रायाश्वं सितं हर॥२५॥ शनैश्चराय गां नीलां राहवे भांडपायसम् ॥
छागं तु केतवे दद्याच्छृण्वेषां भोजनान्यपि ॥ २६ ॥ गुडौदनं तु सूर्याय सोमाय घृतपायसम् ॥ हविष्यमन्नं भौमाय क्षीरान्नं सोमसूनवे ॥ २७ ॥
दध्योदनं तु जीवाय शुक्रायाथ घृताशनम् ॥ तिलपिष्टांश्च माषांश्च सूर्यपुत्राय दापयेत् ॥ २८ ॥ राहवे दापयेन्मांसं केतवे चित्रमोदनम् ॥ सौवी
रमारनालं च स्विन्नबीजं च कांजिकम् ॥ २९ ॥ यथा बाणप्रहाराणां वारणं कवचं स्मृतम् ॥ तथा दैवोपघातानां शांतिर्भवति वारणम् ॥ ३० ॥
अहिंसकस्य दान्तस्य धर्मार्जितधनस्य च ॥ नित्यं च नियमस्थस्य सदा सानुग्रहा ग्रहाः ॥३१॥ ग्रहाः पूज्याः सदा रुद्र इच्छता विपुलं यशः ॥
श्रीकामः शांतिकामो वा ग्रहयज्ञं समाचरेत् ॥ ३२ ॥ वृष्ट्यायुःपुष्टिकामो वा तथैवाभिचरन्पुनः ॥ यानपत्या भवेन्नारी दुष्प्रजाश्चापि या
भवेत् ॥ ३३ ॥ बाला यस्याः प्रम्रियंते या च कन्याप्रजा भवेत् ॥ राज्यभ्रष्टो नृपो यस्तु दीर्घरोगी च यो भवेत् ॥ ३४ ॥ ग्रहयज्ञः स्मृतस्तेषां

---

[1] प्रतिमायां व्यंगितायाम्–इ० पा० । [2] दुष्टा ग्रहाश्च विज्ञेयाः पूजाशांतिं समाचरेत्–इ० पा० ।

मानवानां मनीषिभिः ॥ तस्मादसौ सदा कार्यः श्रेयोऽर्थं जानता हर ॥ ३५ ॥ दत्तपुष्पः क्रूरदृक्च पुष्पजो धिषणस्तथा ॥ सितासितौ तथा रुद्र
उपरागः शिखी तथा ॥ ३६ ॥ एते ग्रहा महाबाहो विद्वद्भिः पूजिताः सदा ॥ ताम्रकात्स्फाटिकाद्रक्तचन्दनात्स्वर्णकादपि ॥ ३७ ॥ राजतादायसा
त्सीसाद्ग्रहाः कार्याः [१]प्रयत्नतः ॥ स्वर्णे वाथ पटे लेख्या यथाशास्त्रं [२]महेश्वर ॥ ३८ ॥ यथावर्णं प्रदेयानि वासांसि कुसुमानि च ॥ गंधाश्च बलयः
श्चैव धूपो देयश्च गुग्गुलः ॥ ३९ ॥ कर्तव्या [३]मंत्रवंतश्च चरवः प्रतिदैवतम् ॥ आकृष्णेन इमं देवा अग्निर्मूर्धा दिवः ककुत् ॥ ४० ॥ उद्बुध्यस्व
यथासंख्यमृच एताः प्रकीर्तिताः ॥ बृहस्पते अतियदर्यस्तथैवान्नात्परिस्रुतः ॥ ४१ ॥ शं नो देवी तथा कांडात्केतुं कृण्वन्निमाः क्रमात् ॥ पूर्वोक्ताः
समिधस्त्वत्र यथाशास्त्रं प्रहोमयेत् ॥ ४२ ॥ एकैकस्याष्टशतकमष्टाविंशतिरेव वा ॥ होतव्या मधुसर्पिर्भ्यां दध्ना चैव समन्विताः ॥ ४३ ॥ पूर्वोक्त
भोजनं यद्धि ब्राह्मणेभ्यो निवेदयेत् ॥ शक्तितो वा यथालाभं दक्षिणा [४]तु विधानतः ॥ ४४ ॥ यश्च यस्य यदा दुःस्थः स तं यत्नेन पूजयेत् ॥
[५]मयैषां हि वरो दत्तः पूजिताः पूजयिष्यथ ॥ ४५ ॥ ग्रहाधीना नरेंद्राणामुच्छ्रयाः पतनानि च ॥ भावाभावौ च जगतस्तस्मात्पूज्यतमा
ग्रहाः ॥ ४६ ॥ ग्रहा गावो नरेंद्राश्च गुरवो ब्राह्मणास्तथा ॥ पूजिताः पूजयंत्येते निर्दहंत्यपमानिताः ॥ ४७ ॥ यथा समुत्थितं यंत्रं यंत्रेणैव प्रह
न्यते ॥ तथा समुत्थितां पीडां ग्रह[६]शांत्या प्रशामयेत् ॥ ४८ ॥ यज्वनां सत्यवाक्यानां तथा [७]नित्योपवासिनाम् ॥ जपहोमपराणां च सर्वं दुष्टं
प्रशाम्यति॥ ४९ ॥ एवं कृत्वा प्रजाशांतिं कृत्वा च स्वस्तिवाचनम् ॥ पुनः सज्जं रथं कृत्वा कुर्यात्प्रक्रमणं हर ॥ ५० ॥ मार्गं शेषं नयित्वा तु
नयेद्देवालयं रविम् ॥ पूजयित्वा ततः [८]पूर्वा याः प्रोक्ता रथदेवताः ॥ ५१ ॥ यथा पूज्या ग्रहाः सर्वे उत्पातेषु त्रिलोचन ॥ [९]रथदेवास्तथा पूज्या
याः स्थिता रथमाश्रिताः ॥ ५२ ॥ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि सप्तमीकल्पे आदित्यमहिमवर्णनं
नाम षट्पंचाशत्तमोऽध्यायः ॥ ५६ ॥ ॥ छ॥ ॥ ब्रह्मोवाच ॥ ॥ क्षीरं यवागूर्ब्रह्मणे स्यात्परमान्नं त्रिलोचन ॥ फलानि कार्तिकेयस्य दद्याद्भूते
शप्रीतये ॥ विवस्वते मधु मांसं तथा मद्यं च सुव्रत ॥ १ ॥ पुरुहूताय भक्ष्याणि सानुगाय निवेदयेत् ॥ हविरन्नमग्नये स्यादग्रान्नं विष्णवे
तथा ॥ २ ॥ राक्षसेभ्यः समैरेयं दद्यान्मांसौदनं हर ॥ संस्कृतं पिशितान्नं च रेवताय निवेदयेत् ॥ ३ ॥ तिलान्नं पितृराजाय दद्यात्त्रिपुरसूदन ॥

---

[१] यथाक्रमम्–इ० पा० । [२] त्रिलोचन–इ० पा० । [३] मनुमं–इ० पा० । [४] च विशेषतः–इ० पा० । [५] अमीषाम्–इ० पा० । [६] शांतिः प्रशोधयेत्–इ० पा० । [७] सेविनाम्–इ० पा० ।
[८] सर्वाः–इ० पा० । [९] देवताः–इ० पा० ।

आश्विनाभ्यामपूपांस्तु वसुभ्यो मांसमोदनम् ॥ ४ ॥ पितृभ्यः पायसं दद्याद्घृताक्तं मधुना सह ॥ कात्यायन्यै यवागूं च श्रियै दद्यात्तथा दधि ॥ ५ ॥
सरस्वत्यै त्रिमधुरं वरुणायेक्षुरसौदनम् ॥ खांडवान्नं[1] धनपतावेवं मित्रे त्रिलोचन ॥ ६ ॥ सस्नेहेन तु तक्रेण मरुद्भ्यस्तर्पणं स्मृतम् ॥ मांसान्नभक्त
सूपांश्च मातृभ्यो वै निवेदयेत् ॥ ७ ॥ उल्लेपिकाश्च भूतेभ्यो जलं सूर्याय वै हर ॥ दद्याद्गणाधिपतये मोदकांस्त्रिपुरांतक ॥ ८ ॥ शष्कुल्यस्तु नैर्ऋताय
देयाः स्युर्गणनायक ॥ सर्वभक्ष्याणि विश्वेभ्यो दातव्यानि समंततः ॥ ९ ॥ क्षीरौदनमृषिभ्यस्तु क्षीरं नागेभ्य एव हि ॥ सूर्यरथाय बलिं दद्यात्कु
र्याद्वै सार्वभौतिकम् ॥ १० ॥ उद्वर्तनं सुरा मांसं तद्वाहेभ्यश्च भारत ॥ आज्यं च ब्रह्मणे दद्यात्त्र्यंबकाय तिलांस्तथा ॥ ११ ॥ स्वाहातनये वै लाजा
दातव्यास्त्रिपुरांतक ॥ भास्कराय सदा दद्यात्कोविदारं त्रिलोचन ॥ १२ ॥ राजवृक्षं तथेंद्राय हविष्यं पावकाय च ॥ चक्रिणे सप्तधान्यं च
गरुडे मत्स्यमोदनम् ॥१३॥ यक्षेभ्यो विविधान्नानि निर्यासं रेवते त्यजेत्॥ वैकंकतस्रजो रुद्र यमाय परिकीर्तिताः॥१४॥देयं स्यात्कर्णिकारं तु अश्वि
भ्यां वृषभध्वज ॥ श्रियै पद्मानि देयानि चंडिकायै सुचंदनम् ॥१५॥ नवनीतं सरस्वत्यै विनतायै तथामिषम् ॥ पुष्पाण्यप्सरसां रुद्र मालत्याः परिकी
र्तितम् ॥ १६ ॥ वरुणायाग्निमंथं तु फलं मूलं निर्ऋतये ॥ बिल्वं दद्यात्कुबेराय कपित्थं मरुतां तथा ॥१७॥ गंधर्वेभ्यस्त्वारग्वधं दद्यात्त्रिपुरसूदन ॥
वासवेभ्यस्तु कर्पूरं दद्याद्दारु गणाधिपे ॥१८॥ पितृभ्यः पिण्डमूलानि भूतेभ्यश्च विभीतकम् ॥ गोभ्यो यवान्प्रदद्याद्वै मातृभ्यश्चाक्षतान्हर॥१९॥
गुग्गुलं विघ्नपतये विश्वेभ्यो देयमोदनम् ॥ ऋषिभ्यो ब्रह्मवृक्षं तु नागेभ्यो विषमुत्तमम् ॥ २० ॥ भास्करस्येह देयानि सकलानि गणाधिप[2] ॥
मधुसर्पिस्तथोक्तानि गैरिकस्य त्रिलोचन ॥ २१ ॥ न्यग्रोधं तस्य वाहेभ्यो भक्त्या रुद्र निवेदयेत् ॥ सायं प्रातस्तु मध्याह्ने सदैकाग्रमना
हर ॥ २२ ॥ सर्वेषां शक्तितो भक्त्या दहेद्धूपं[3] विचक्षणः ॥ मंत्रतो देवशार्दूल यो यस्येह प्रकीर्तितः ॥ २३ ॥ शान्त्यर्थं ब्राह्मणेभ्यस्तु तिला
न्दद्याद्विचक्षणः ॥ वैश्वानरे वा जुहुयाद् घृतेन सहितान्हर ॥ २४ ॥ देवानाममृतं ह्येते पितॄणां हि स्वधामृतम् ॥ शरणं ब्राह्मणानां च सदा
ह्येतान्विदुर्बुधाः ॥ २५ ॥ कस्यपस्यांगजा ह्येते पवित्राश्च तथा हर ॥ स्नाने दाने तथा होमे तर्पणे ह्यशने पराः ॥ २६ ॥ इत्थं देवान्ग्रहांश्चैव
पूजयित्वा प्रयत्नतः ॥ अवतार्य रथाच्चैनं मण्डले स्थापयेत्पुनः ॥ २७ ॥ कृत्वा त्वारार्तिकं यत्नाद्दीपतोयर्यवाक्षतैः[4] ॥ कार्पासबीजलवणतुषैर्दुष्ट
ष्टिशांतये ॥ २८ ॥ वेदीमारोपयेत्पश्चात्पत्नीभ्यां सह सुव्रत ॥ तत्रस्थं पूजयेद्देवं दिनानि दश सुव्रत ॥ २९ ॥ दशाहिकेति विख्याता या पूजा

---

[1] खंडवान्नम्–इ० पा० । [2] यथाविधि–इ० पा० । [3] देयम्–इ० पा० । [4] तिलाक्षतैः इ० पा० ।

भूतले हर ॥ तया संपूजयेद्देवं चतुर्थेऽह्नि तथा हर ॥३०॥ चतुर्थेऽहनि कर्तव्यं यत्नाद्धि स्नपनं रवेः ॥ अभ्यंगभोजनाद्यैस्तु पूजासत्कारमंडलैः ॥
॥३१॥अनेन विधिनापूज्य दशाहानि दिवाकरम् ॥ ततो नयेत्परं स्थानं यत्तत्पूर्वमथालयम्॥ ३२ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां
संहितायां ब्राह्मे पर्वणि रथसत्तमीकल्प आदित्यमहिमवर्णनं नाम सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ अनेन
विधिना यस्तु कुर्याद्वा कारयेत वा ॥ यात्रां भगवतो भक्त्या भास्करस्यामितौजसः ॥ १ ॥ स परार्धं तु वर्षाणां सूर्यलोके महीयते ॥
कुले न जायते तस्य दरिद्रो व्याधितोऽपि वा ॥ २ ॥ अभ्यंगाय घृतं यस्तु भास्कराय प्रयच्छति ॥ कृते तु वर्णतिलके स गच्छेत्सुर[1]भी
पुरम् ॥ ३ ॥ तीर्थोदकं तु यो भक्त्या गंगायाश्च तथोदकम् ॥ स्नानार्थमानयेद्यस्तु भास्करस्य त्रिलोचन ॥ ४ ॥ भक्त्या वर्णत्रयं दद्याद्भा
स्करस्य त्रिलोचन ॥ समाप्येहाखिलान्कामान्प्राप्नुयाद्वरुणालयम् ॥ ५ ॥ रक्तवर्णं तु यो दद्याद्धविष्यान्नं गुडौदनम् ॥ स गच्छेद्दीप्तिमान्रुद्र
सूर्यलोकं पुरं वरम् ॥ ६ ॥ गच्छेत्पुरवरे रुद्र यत्र देवः प्रजापतिः ॥ स्नापयेद्यस्तु वा भक्त्या भास्करं पूजयेत्तथा ॥ ७ ॥ स गच्छेद्दीप्तिमान्रुद्र
सूर्यलोकं न संशयः ॥ रथमा[2]रोपयेद्यस्तु रथमार्गं प्रमार्जति ॥ ८ ॥ स याति वातसालोक्यं वाततुल्यपराक्रमः ॥ रथस्य गच्छतो यस्तु मार्गे
कुर्यात्सुमण्डलम् ॥ ९ ॥ स लोकं प्राप्नुयात्पुण्यं मारुतं नात्र संशयः ॥ सूर्यस्य गच्छतो यस्तु मार्गं कुर्यात्सुमण्डलम् ॥ १० ॥ स लोकं प्राप्नुया
त्पुण्यं यः कुर्यान्मार्गमादरात्॥ पुष्पप्रकरशोभाढ्यं शुभतो[3]रणमंडितम् ॥११॥ शंखतूर्यनिनादाढ्यं तथा[4] प्रेक्षणकान्वितम् ॥ स याति परमं स्थानं
यत्र देवो विभावसुः ॥ १२ ॥ देवेन सहितो यस्तु नृत्यन्गायंस्तथार्चयन् ॥ कुर्यान्महोत्सवं भक्त्या स याति परमं पदम् ॥ १३ ॥ प्रजागरं
यस्तु कुर्याद्देवे रथगते रवौ ॥ स सुखी पुण्यवान्नित्यं मोदते शाश्वतीः समाः॥१४॥ भक्त[5]दासादिकं सर्वं यो ददाति रवेर्नरः॥संप्राप्येहाखिलान्कामा
न्सूर्यलोकमवाप्नुयात् ॥ १५ ॥ रथारूढस्य सूर्यस्य भ्रमतो दर्शनं हर ॥ दुर्लभं देवशार्दूल विशेषात्पुरतो व्रजन् ॥ १६ ॥ उत्तराभिमुखं यांतं
तथा वै दक्षिणामुखम् ॥ धन्यः पश्यति देवेशं भास्करं भक्तवत्सलम् ॥ १७ ॥ अथ संवत्सरे प्राप्ते भानोर्यात्रादिने यदि ॥ रथप्रक्रमणं तत्र न
कथंचित्कृतं भवेत् ॥ १८ ॥ ततो वै द्वादशे वर्षे कर्तव्यं भूतिमिच्छता ॥ इन्द्रध्वजस्य चाप्येवं यदि नोत्थापनं कृतम् ॥ १९ ॥ ततो वै द्वादशे
वर्षे कर्तव्यं नान्तरा पुनः ॥ यात्रायाश्चापि ये भंगं कुर्वंति वृषभध्वज ॥ २० ॥ मन्देहा नाम ते ज्ञेया राक्षसा नात्र संशयः ॥ ये कुर्वन्ति

---

[1] सवितुः—इ० पा० । [2] स्नानार्थमानयेद्यस्तु—इ० पा० । [3] शुभास्तरणमाण्डितम्—इ० पा० । [4] दद्यात्—इ—पा० । [5] भक्त्या दशाहिकासंज्ञम्—इ० पा० ।

तथा यात्रां नरा धर्मध्वजस्य तु ॥ २१ ॥ इन्द्रादिदेवास्ते ज्ञेया गताश्च परमं पदम् ॥ पुनर्यात्राविधिं चेमं समासात्कथयामि ते ॥ २२ ॥ यं श्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ वर्तमाने तु वै माघे रथे [1]देवगणाश्रिते ॥ २३ ॥ स तस्मिन्नेव मनसा स्थापनीयो रथोपरि ॥ द्यौर्मही च द्विमूर्तिस्थे यथापूर्वं प्रतिष्ठिते ॥ २४ ॥ तथैव राज्ञी द्यौर्ज्ञेया निक्षुभा पृथिवी स्मृता ॥ एताभ्यामपि देवीभ्यां यथैव सवितुस्तथा ॥ २५ ॥ दिंडिनः पिंगलादीनां पृथुः कार्यो रथक्रमः ॥ मनसा चिन्तयेदन्यां यथास्थानेषु देवताम् ॥ २६ ॥ दिक्पालाँल्लोकपालांश्च कल्पयेन्मनसैव तु ॥ देवो वेदमयश्चायं सर्वदेवमयस्तथा ॥ २७ ॥ मंडलमृङ्मयं चैव छन्दांस्यास्यं प्रकीर्तितम् ॥ गायत्री चैव त्रिष्टुप्च जगत्यनुष्टुबेव च ॥ २८ ॥ पंक्तिश्च बृहती चैव उष्णिगेव च सप्तमी ॥ ततो देवमयत्वाच्च च्छन्दसां चैव कल्पनात् ॥ २९ ॥ ततो वेदमयत्वाच्च तरणिर्लोकपूजितः ॥ [2]रथप्रक्रमणात्सूर्यो वोढव्यो ब्रह्मवादिभिः ॥ ३० ॥ उपवासपरैर्युक्तैर्वेदवेदांगपारगैः ॥ रथं तु नारुहेच्छूद्रो भास्करस्य त्रिलोचन ॥ ३१ ॥ आरुह्य तरणेर्यानं व्रजेच्छूद्रो ह्यधोगतिम् ॥ यथोक्तकरणाद्रुद्र सदा शांतिर्भवेन्नृणाम् ॥ ३२ ॥ नायकश्चापि सर्वेषां देवानां [3]तु दिवाकरः ॥ विन्यसेत्तु रथानां तु देवतायतनेषु च ॥ ३३ ॥ ततो धूपोपहारैस्तु पूजयेत्प्रथमं रविम् ॥ दिग्देवानुचरांश्चैव पूजयेत्पूज्यते श्रिया ॥ ३४ ॥ अपूज्य प्रथमं सूर्यमपरान्यस्तु पूजयेत् ॥ [4]तत्तद्भूतकृतं पाद्यं न प्रगृह्णंति देवताः ॥ ३५ ॥ यात्राकाले तु संप्राप्ते [5]सवितुर्दीक्षितां तनुम् ॥ ये द्रक्ष्यंति नरा भक्त्या ते भविष्यंत्यकल्मषाः ॥ ३६॥ पौर्णमास्याममायां च दर्शनं पुण्यदं स्मृतम् ॥ सप्तम्यां च तथा षष्ठ्यां दिने तस्य रवेस्तथा ॥ ३७ ॥ आषाढी कार्त्तिकी माघी तिथ्यः पुण्यतमाः स्मृताः ॥ महाभाग्यं तिथेः पुण्यं यथा शास्त्रेषु गीयते ॥ ३८ ॥ कार्त्तिक्यां तु विशेषेण महाकार्तिक्युदाहृता ॥ एवं कालसमायोगाद्यात्राकालो विशिष्यते ॥ ३९ ॥ दर्शनं च महापुण्यं सर्वपापहरं भवेत् ॥ उपवासपरो यस्तु तस्मिन्काले यतव्रतः ॥ ४० ॥ [6]पूजयेत्तु रविं भक्त्या स गच्छेत्परमां गतिम् ॥ देवोऽयं यज्ञपुरुषो लोकानुग्रहकांक्षया ॥४१॥ प्रतिमावस्थितो भूत्वा पूजां गृह्णात्यनुग्रहात् ॥ स्नानाद्दानाज्जपाद्धोमात्संयोगाद्देवकर्मणः ॥ ४२ ॥ कूर्चानां वपनाच्चैव दीक्षितः पुरुषो भवेत् ॥ कचानां वापनं कार्यं सूर्यभक्तैः सदा नरैः ॥ ४३ ॥ सूर्यक्रतौ शुचिस्त्वेवं दीक्षितः पुरुषो भवेत् ॥ चतुर्णामपि वर्णानां भक्त्या सूर्यस्य नित्यदा ॥ ४४ ॥ एवं येऽत्र करिष्यंति ते नरा नित्यदीक्षिताः ॥ चीर्णव्रता महात्मानस्ते यास्यंति परां गतिम् ॥ ४५ ॥ इत्येषा कथिता रुद्र रथयात्रा दिवस्पतेः ॥ यां श्रुत्वा

---

[1] वा गगनाश्रिते–इ० पा० । [2] रथसंक्रमणे–इ० पा० । [3] हि–इ० पा० । [4] वे तद्भूतकृतं पाद्यं न प्रगृह्णान्ति देवताः–इ० पा० । [5] दक्षिणाम्—इ० पा० । [6] यः–इ० पा० ।

वाचयित्वा च सर्वरोगैर्विमुच्यते ॥ ४६ ॥ कृत्वा च विधिवद्भक्त्या याति सूर्यसदो नरः ॥ रथाह्वा कथिता रुद्र समासात्सप्तमी शुभा ॥ ४७ ॥
भूयोऽपि श्रूयतां रुद्र सप्तमीं गदतो मम ॥ ४८ ॥ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि सप्तमीकल्पे रथयात्रा
वर्णनं नामाष्टपंचाशत्तमोऽध्यायः ॥ ५८ ॥ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ माघे मासि तथा देव सिते पक्षे जितेंद्रियः ॥ षष्ठ्यामुपोषितो
भूत्वा गंधपुष्पोपहारतः ॥ १ ॥ पूजयित्वा दिनकरं रात्रौ तस्याग्रतः स्वपेत् ॥ विबुद्धस्त्वथ सप्तम्यां भक्त्या भानुं समर्चयेत् ॥ २ ॥ ब्राह्मणान्भोज
येत्[1]पश्चाद्वित्तशाठ्यं विवर्जयेत् ॥ खंडवेष्टैर्मोदकैश्च तथेक्षुगुडपूपकैः ॥ ३ ॥ अथ संवत्सरे पूर्णे सप्तम्यां कारयेद्बुधः ॥ देवदेवस्य वै यात्रां पूर्वोक्त वि
धिना हर ॥ ४ ॥ कृष्णपक्षे तु यः कृत्वा रथमारोहितं रविम् ॥ पश्येद्भक्त्या जगन्नाथं स याति परमां गतिम् ॥ ५ ॥ तृतीयायामेकभक्तं चतुर्थ्यां
नक्तमुच्यते ॥ पंचम्यामयाचितं स्यात्षष्ठ्यां चैवमुपोषणम् ॥ ६ ॥ सप्तम्यां पारणं कुर्याद्दृष्ट्वा देवं रथे स्थितम् ॥ पूजयित्वा च विधिना शक्त्या
भक्त्या त्रिलोचन ॥ ७ ॥ सौवर्णं तु रथं कृत्वा ताम्रपात्रोपरि स्थितम् ॥ रथमध्ये न्यसेद्व्योम पूजितं मणिभिर्हर ॥ ८ ॥ पद्मरागं न्यसेन्मध्ये
मौक्तिकं पूर्वतो न्यसेत् ॥ इंद्रनीलमथो याम्यां वारुण्यां मरकतं हर ॥ ९ ॥ प्रवालमुत्तरे रुद्र सवज्रं विन्यसेद् बुधः ॥ श्वेतं पीतासितं चापि
रक्तं चांधकसूदन ॥ १० ॥ एतानि तात वस्त्राणि दिक्षु सर्वासु विन्यसेत् ॥ पताकाकारसंस्थानं घंटाभरणभूषितम् ॥ ११ ॥ पुष्पैर्दामैरलंकृत्य
रथं रुद्र समंततः ॥ यथान्यायं पूजयित्वा भास्कराय निवेदयेत् ॥ १२ ॥ भोजयित्वाथ वा विप्रानाचार्याय निवेदयेत् ॥ योऽधीते सप्तमीकल्पं
सोपाख्यानं च भारत ॥ १३ ॥ आचार्यः स द्विजो ज्ञेयो वर्णानामनुपूर्वशः ॥ सौराणां वैष्णवानां तु शैवानां पार्वतीप्रिय ॥ १४ ॥ अलाभे तु
सुवर्णस्य रथं राजतमादिशेत् ॥ तदलाभे ताम्रमयं रथं व्योम च कारयेत् ॥ १५ ॥ अभावे चापि ताम्रस्य रथः पिष्टमयः स्मृतः ॥ सहिरण्यो [2]महा
देव ताम्रभाजनमाश्रितः ॥ १६ ॥ [3]कौशेययुग्मसहितं ब्राह्मणाय निवेदयेत् ॥ पूर्वोक्ताय महादेव वाचकाय महात्मने ॥ १७ ॥ पञ्चरत्नसमा
युक्तं शुभगन्धाधिवासितम् ॥ स्वशक्त्या तु विरूपाक्ष वित्तशाठ्यं विवर्जयेत् ॥ १८ ॥ एषा पुण्या पापहरा रथाह्वा सप्तमी हर ॥ कथिता ते
मया रुद्र महतीयं प्रकीर्तिता ॥ १९ ॥ स्नानं दानमथो होमः पूजा ग्रहपतेर्हर ॥ शतसाहस्रं भवेदस्यां कृतं भूधरविद्यते ॥ २० ॥ एवमेषा पुण्य
तमा माघे प्रोक्ता तु सप्तमी ॥ यामुपोष्य नरो भक्त्या सूर्यस्यानुचरो भवेत् ॥ २१ ॥ ब्राह्मणो याति देवत्वं क्षत्रियो विप्रतां व्रजेत् ॥ वैश्यः क्षत्रियतां

---

१ शक्त्या–इ० पा० । २ सपर्याह्वं देवताजनमाश्रितम्–इ० पा० । ३ काषाययुग्मसहितम्–इ० पा० ।

याति शूद्रो वैश्यत्वमेति च ॥ २२ ॥ विद्याविनयसंपन्नं भर्त्तारं कन्यका[१] लभेत् ॥ अपुत्रा स्त्री सुतं विंदेत्सौभाग्यं च गणाधिप ॥ २३ ॥ विधवा चाप्युपोष्येमां सप्तमीं त्रिपुरांतक ॥ नान्यजन्मसु वैधव्यं प्राप्नुयात्पार्वतीप्रिय ॥ २४ ॥ बहुपुत्रा बहुधना पत्युर्वल्लभतां व्रजेत् ॥ यावद्वै सप्त जन्मानि स्त्रियस्तु पुरुषास्तथा ॥ २५ ॥ एवंविधा सप्तमी ते कथिता वृषभध्वज ॥ यां श्रुत्वा मानवो भक्त्या मुच्यते ब्रह्महत्यया ॥ २६ ॥ इति श्रीभविष्ये महापुराणे शतार्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि सप्तमीकल्पे रथसप्तमीमाहात्म्यवर्णनं नामैकोनषष्टितमोऽध्यायः ॥ ५९ ॥ ॥छ॥

॥ सुमन्तुरुवाच ॥ ॥ इत्युक्त्वा स जगामाशु सुरज्येष्ठं त्रिलोचनम् ॥ रथयात्रा महाबाहो सूर्यस्येत्यमितौजसः ॥ १ ॥ ॥ शतानीक उवाच ॥ यमाराध्य जगन्नाथं मम पूर्वपितामहाः ॥ तुष्ट्यर्थं ब्राह्मणानां तु अन्नमापुश्चतुर्विधम् ॥ २ ॥ तस्य देवस्य माहात्म्यं श्रुतं च बहुशो मया ॥ देवर्षिसिद्धमनुजैः स्तुतस्य हि दिनेदिने ॥३॥ कः स्तोतुमीशस्तमजं[२] यस्यैतत्सचराचरम् ॥ अव्ययस्याप्रमेयस्य विबुध्येतोदयाज्जगत् ॥४॥ कराभ्यां यस्य देवेशौ कविष्णू लोकपूजितौ ॥ उत्पन्नौ द्विजशार्दूल ललाटात्त्रिपुरांतकः ॥ ५ ॥ तस्य देवस्य कैः शक्या वक्तुं सर्वा विभूतयः ॥ सोऽहमिच्छामि देवस्य तस्य सर्वात्मना द्विज ॥ ६ ॥ श्रोतुमाराधनं येन निस्तरेयं भवार्णवम् ॥ केनोपायेन मन्त्रैर्वा रहस्यैः परिचर्यया ॥ ७ ॥ दानैर्व्रतोपवासैर्वा होमैर्जाप्यैरथापि वा ॥ आराधितः समस्तानां क्लेशानां हानिदो भवेत्[३] ॥ ८ ॥ सैका विद्या हि विद्यानां यया तुष्यति सर्वकृत् ॥ श्रुतानामपि तत्पुण्यं यत्र भानोः प्रकीर्तनम् ॥ ९ ॥ रहस्यानां रहस्यं तद्येन हंसः प्रसीदति ॥ एकः श्रेष्ठतमो मंत्रस्तदेकं परमं व्रतम् ॥ १० ॥ उपोषितं च तच्छ्रेष्ठं येन भानुः प्रसीदति ॥ सा चैका रसना धन्या मार्तंडं स्तौति या सदा ॥ ११ ॥ तदेकं निर्मलं चित्तं यद्गतं[४] सततं रवौ ॥ श्लाघ्यानामपि तौ श्लाघ्याविह लोके परत्र च ॥ १२ ॥ यौ सदा द्विजशार्दूल भानोः पूजाकरौ करौ ॥ तदेकं केवलं धन्यं शरीरं सर्वजंतुषु ॥ १३ ॥ यदेव पुलकोद्भासि भानोर्नामानुकीर्तने ॥ सा जिह्वा कण्ठतालूकमथ वा प्रतिजिह्विका ॥ १४ ॥ अथ वा सापरो रोगो या न वक्ति रवेर्गुणम् ॥ नवद्वाराणि संत्यस्मिन्पुरे पुरुषसत्तम ॥ १५ ॥ प्राकारैस्त्वावृते विष्वग्वृथा तानि विदुर्बुधाः ॥ दत्त्वावधानं यच्छब्दे विनैव रविसंस्तुतिम् ॥ १६ ॥ श्रेयसां न हि संप्राप्तौ पुरुषाणां विचेष्टितम् ॥ जन्मन्यविफला सेवा कृता याश्रित्य भास्करम् ॥ १७ ॥ दुर्गसंसारकांतारमपारमभिधावताम् ॥ एको भानुनमस्कारः संसारार्णवतारकः ॥ १८ ॥ रत्नानामाकरो मेरुः सर्वाश्चर्यमयं नभः ॥ तीर्थानामाश्रयो गंगा देवानामाश्रयो रविः ॥ १९ ॥ एव

---

[१] कामुकी—इ० पा० । [२] तपनम्—इ० पा० । [३] यथा—इ० पा० । [४] यद्भूतम्—इ०, यद्दत्तम्—इ० च पा० ।

मादिगुणो भोगो भानोरमिततेजसः ॥ श्रुतो मे बहुशः सिद्धैर्गीयमानैस्तथामरैः ॥ २० ॥ सोऽहमिच्छामि तं देवं सप्तलोकपरायणम् ॥ दिवाकर
मशेषस्य जगतो हृद्यवस्थितम् ॥ २१ ॥ आराधयितुमीशेशं भास्करं चामितौजसम् ॥ मार्तंडं भुवनाधारं स्मृतमात्राघदारिणम् ॥ २२ ॥ इतिश्री
भविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि सप्तमीकल्पे सूर्यपरिचर्यावर्णनं नाम षष्टितमोऽध्यायः ॥ ६० ॥ ॥ छ ॥ ॥ सुमंतु
रुवाच ॥ ॥ तमेकमक्षरं धाम परं सदसतोर्महत्[1] ॥ भेदाभेदस्वरूपस्थं प्रणिपत्य रविं नृप ॥ १ ॥ प्रवक्ष्यामि यथापूर्वं विरिंचेन महात्मना ॥
ऋषीणां कथितं पूर्वं तं निबोध नराधिप ॥ २ ॥ आराधनाय सवितुर्महात्मा पद्मसंभवः ॥ योगं ब्रह्मपरं प्राह महर्षीणां यथा प्रभुः ॥ ३ ॥ सम
स्तवृत्तिसंरोधात्कैवल्यप्रतिपादकम् ॥ तदा जगत्पतिर्ब्रह्मा प्रणिपत्य महर्षिभिः ॥ ४ ॥ सर्वैः किलोक्तो भगवानात्मयोनिः प्रजाहितम् ॥ योयं
योगो भगवता प्रोक्तो वृत्तिनिरोधजः ॥ ५ ॥ प्राप्तुं शक्यः स त्वनेकैर्जन्मभिर्जगतः पते ॥ विषया दुर्जया नृणामिंद्रियाकर्षिणः प्रभो ॥ ६ ॥
वृत्तयश्चेतसश्चापि चञ्चलस्यापि दुर्धराः ॥ रागादयः कथं जेतुं शक्या वर्षशतैरपि ॥ ७ ॥ न योगयोग्यं भवति मन एभिरनिर्जितैः ॥ अल्पायु
षश्च पुरुषा ब्रह्मन्कृतयुगेप्यमी ॥ ८ ॥ त्रेतायां द्वापरे चैव किमु प्राप्ते कलौ युगे ॥ भगवंस्त्वामुपासीनान्प्रसन्नो वक्तुमर्हसि ॥ ९ ॥ अनायासेन
येनैव उत्तरेम भवार्णवम् ॥ दुःखांबुमग्नाः पुरुषाः प्राप्य ब्रह्मन्महाप्लवम् ॥ १० ॥ उत्तरेम भवांभोधिं तथा त्वमनुचिंतय ॥ एवमुक्तस्तदा ब्रह्मा
क्रियायोगं महात्मनाम् ॥ ११ ॥ तेषामृषीणामाचष्ट नराणां हितकाम्यया ॥ आराधयत विश्वेशं दिवाकरमतंद्रिताः ॥ १२ ॥ बाह्यालंबनसापेक्षा
स्तमजं जगतः पतिम् ॥ इज्यापूजानमस्कारशुश्रूषाभिरहर्निशम् ॥ १३ ॥ व्रतोपवासैर्विविधैर्ब्राह्मणानां च तर्पणैः ॥ तैस्तैश्चाभिमतैः कामैर्ये च
चेतसि तुष्टिदाः ॥ १४ ॥ अपरिच्छेद्यमाहात्म्यमाराधयत भास्करम् ॥ तन्निष्ठास्तद्गतधियस्तत्कर्माणस्तदाश्रयाः ॥ १५ ॥ तद्दृष्टयस्तन्मनसः
सर्वस्मिन्त्सं[1] इति स्थिताः ॥ समस्तान्यथ कर्माणि तत्र सर्वात्मनात्मनि ॥ १६ ॥ संन्यसध्वं स वः कर्ता समस्तावरणक्षयम् ॥ एतत्तदक्षरं ब्रह्म
प्रधानपुरुषावुभौ ॥ १७ ॥ यंतो[2] यस्मिन्यथा चोभौ सर्वव्यापिन्यवस्थितौ ॥ परः पराणां परमः सैकः सुमनसां परः ॥ १८ ॥ यस्माद्भिन्नमिदं
सर्वं यच्चेदं[3] यच्च नेंगति ॥ मोक्षकारणमव्यक्तमचिन्त्यमपरिग्रहम् ॥ समाराध्य जगन्नाथं क्रियायोगेन मुच्यते ॥ १९ ॥ इति ते ब्रह्मणः श्रुत्वा
रहस्यमृषिसत्तमाः ॥ २० ॥ नराणामुपकाराय योगशास्त्राणि चक्रिरे ॥ क्रियायोगपराणीह मुक्तिकारीण्यनेकशः ॥२१॥ आराध्यते जगन्नाथस्तद

---

१ महति–इ० पा० । २ धाता यस्मिन्यथा चोभौ सर्वथापि व्यवस्थिती–इ० पा० । ३ तं जाने सर्वतोगतिम्–इ०पा० ।

नुष्ठानतत्परैः ॥ परमात्मा स मार्तंडः सर्वेशः सर्वभावनः ॥ २२ ॥ यान्युक्तानि पुरा तेन ब्रह्मणा कुरुनंदन ॥ तानि ते कुरुशार्दूल सर्वपापहराण्य
हम् ॥ २३ ॥ वक्ष्यामि श्रूयतामद्य रहस्यमिदमुत्तमम् ॥ संसारार्णवमग्नानां विषयाक्रांतचेतसाम् ॥ २४ ॥ हंसपोतं विना नान्यत्किंचिदस्ति पराय
णम् ॥ उत्तिष्ठंश्चिंतय रविं व्रजंश्चिंतय गोपतिम् ॥ २५ ॥ भुंजंश्चिंतय मार्तंडं स्वपंश्चिंतय भास्करम् ॥ एवमेकाग्रचित्तस्त्वं संश्रितः सततं रविम् ॥
॥ २६ ॥ जन्ममृत्युमहाग्राहं संसारांभस्तरिष्यसि ॥ २७ ॥ ग्रहेशमीशं वरदं पुराणं जगद्विधातारमजं च नित्यम् ॥ समाश्रिता ये रविमीशितारं तेषां
भवो नास्ति विमुक्तिभाजाम् ॥ २८ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि सप्तमीकल्पे सूर्ययोगमहिमवर्णनं नामै
कषष्टितमोऽध्यायः ॥ ६१ ॥ ॥ सुमंतुरुवाच ॥ ॥ अथान्यं सरहस्यं तु संवादं वच्मि तेखिलम् ॥ सूर्यस्य दिंडिना सार्धं सर्वपापप्रणा
शनम् ॥ १ ॥ ब्रह्महत्याभिभूतस्तु पुरा दिंडिर्महातपाः ॥ आराधनाय देवस्य स्तोत्रं चक्रे महात्मनः ॥ २ ॥ श्रुत्वा तस्यार्थतः स्तोत्रं तुतोष भगवा
न्रविः ॥ उवाच देवदेवस्तं दिंडिनं गणनायकम् ॥ ३ ॥ ॥ आदित्य उवाच ॥ ॥ हंत दिंडे प्रसन्नोऽस्मि भक्त्या स्तोत्रेण तेऽ[1]नघ ॥ वरं वृणीष्व
[2]धर्मज्ञ यत्ते मनसि वर्तते ॥ ४ ॥ ॥ दिंडिरुवाच ॥ ॥ एष एव वरः श्लाघ्यो यत्प्राप्तोऽसि ममांतिकम् ॥ त्वद्दर्शनमपुण्यानां स्वप्नेष्वपि च दुर्लभम् ॥
॥ ५ ॥ यथैषा ब्रह्महत्या मे आगता लोकगर्हिता ॥ भवाञ्जानाति सर्वेशो हृदिस्थः सर्वदेहिनाम् ॥ ६ ॥ त्वत्प्रसादान्[3]ममेशान नाशमाशु प्रयातु वै ॥
तथा च दुरितं सर्वं यच्चान्यल्लोकगर्हितम् ॥ ७ ॥ यद्यदिच्छाम्यहं तत्तत्सर्वमस्तु दिवस्पते ॥ एतेनैवानुमानेन प्रसन्नो भगवन्निति ॥ ८ ॥ ज्ञातं मया
हि मार्तंडे नाप्रसन्ने विभूतयः ॥ एवं सर्वसुखाह्लादमध्यस्थोऽपि हि भानुमान् ॥ ९ ॥ त्वं मामगाधे संसारे मग्नमुद्धर्तुमर्हसि ॥ सुखानि तानि चैवांते
येषां दुःखं न तत्सुखम् ॥ १० ॥ यदा तु दुःखमागामि किं[4] वा कस्यैव भक्षणात् ॥ तत्प्रसादं कुरु विभो जगतां त्वं जगत्पते ॥ ११ ॥ ज्ञानदानेन
येनैवमुत्तरेयं भवार्णवम् ॥ इत्युक्तस्तेन[5]मार्तंडः कथयामास योगवित् ॥ १२ ॥ योगं निर्बीजमत्यंतं दुःखसंयोगभेषजम् ॥ श्रुत्वा योगं तु तं दिंडि
र्निर्बीजं निष्कलं बभौ ॥१३॥ प्रणिपत्य महातेजा इदं वचनमब्रवीत् ॥ देवदेव त्वया योगो यः प्रोक्तो ध्वान्तनाशन ॥ नैष प्राप्यो मया नान्यैर्मान
वैरजितेंद्रियैः ॥ १४ ॥ विषया दुर्जयाः पुंभिरिंद्रियाकर्षिणः सदा ॥ इद्रियाणां जयो युक्तः कः शक्तानां करिष्यति ॥ १५ ॥ अहंममेतिविख्याति
र्दुर्जयं चंचलं मनः ॥ रागादयस्तथा त्यक्तुं शक्या जन्मांन्तरैर्[6]यदि ॥ १६ ॥ सोऽहमिच्छामि देवेश त्वत्प्रसादादनिर्जितैः ॥ रागादिभिरमर्त्यत्वं

---

[1] वै तव--इ० पा० । [2] सर्वज्ञ--इ० पा० । [3] अशेषेण--इ० पा० । [4] पातकस्यैव लक्षणात्--इ० पा० । [5] जगन्नाथ--इ० पा० । [6] वद--इ० पा० ।

प्रापुः प्रक्षीणकल्मषाः ॥ १७ ॥ ॥ आदित्य उवाच ॥ ॥ यद्येवं मुक्तिकामस्त्वं गणनाथ शृणुष्व तम् ॥ क्रियायोगं समस्तानां क्लेशानां हा[1]नि
कारकम् ॥ १८ ॥ मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ॥ मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥ १९ ॥ मद्भावना मद्यजना मद्भक्ता
मत्परायणाः ॥ मम पूजाकराश्चैव मयि यांति लयं नराः ॥ २० ॥ सर्वभूतेषु मां पश्यन्सम[2]वस्थितमीश्वरम् ॥ कर्तासि केन चैव त्वमेवं दोषान्प्रहा[3]
स्यसि ॥ २१ ॥ जंगमाजंगमे ज्ञाते मय्यासक्ते समंततः ॥ रागलोभादिनाशेन भवित्री कृतकृत्यता ॥ २२ ॥ भक्त्यातिप्रणयस्यापि चंचलत्वा
न्मनो यदि ॥ मय्यावेशं दधद्भूयः कुरु मद्रूपिणीं तनुम् ॥ २३ ॥ सुवर्णरजताद्यैस्त्वं शैलमृद्दारुलेखनम्॥ पूजोपहारैर्विविधैः संपूजय त्रिलोचनम् ॥
॥ २४ ॥ तस्याश्रितं समाविश्य सर्वभावेन सर्वदा ॥ पूजिता सैव ते भक्त्या ध्याता चैवोपकारिणी ॥ २५ ॥ गच्छंस्तिष्ठन्स्वपन्भुंजंस्तामेवाग्रे
च पृष्ठतः ॥ उपर्यधस्तथा पार्श्वे चिंतयंस्तन्मयश्च वै ॥ २६ ॥ स्नानैस्तीर्थोदकैर्हृद्यैः पु[4]ष्पैर्गंधानुलेपनैः ॥ वासोभिर्भूषणैर्भक्ष्यैर्गीतवाद्यैर्मनोरमैः
॥ २७ ॥ यच्च यच्च तवेष्टं वै किंचिद्भोज्यादिकं तव ॥ भक्तिनम्रो गणश्रेष्ठ प्रीणयस्व कृ[5]तिं मम ॥ २८ ॥ रागेणाकृष्यते तात गंधर्वाभिमुखं यदि ॥
मयि बुद्धिं समावेश्य गायेथा याः कथा मम ॥ २९ ॥ कथया रमते चेतो यदि तद्भवतो मम ॥ श्रोतव्याः प्रीतियोगेन मत्स्वरूपोदयाः कथाः ॥
॥ ३० ॥ एवं समर्पितमनाश्चेतसो येऽथ आश्रयाः ॥ हेयांस्तान्निखिलान्दिण्डे परित्यज्य सुखी भव ॥ ३१ ॥ अक्षीणरागद्वेषोऽपि
मत्प्रियः परमः परम् ॥ पदमाप्नोषि मा भैषीर्मय्यर्पितमना भव ॥३२॥ मयि संन्यस्य सर्वं त्वमात्मानं यत्नवान्भव ॥ मदर्थं कुरु कर्माणि मा च धर्म
व्यतिक्रमम् ॥३३॥ एवं व्यपोह्य हत्यास्त्वं ब्रह्मण मोक्ष्यसे भवात् ॥ एतेनैवोपदेशेन व्याख्यातमखिलं तव॥३४॥[6]क्रियायोगं समास्थाय मदर्पितमना
भव ॥ ३५ ॥ ॥ दिंडिरुवाच ॥ ॥ मद्धिताय जगन्नाथ क्रियायोगामृतं मम ॥ विस्तरेण समाख्याहि प्रसन्नस्त्वं हि दुःखहा ॥ ३६ ॥ त्वामृते न
हि तद्वक्तुं समर्थोऽन्यो[7] जगद्गुरो ॥ गुह्यमेतत्पवित्रं च तदाचक्ष्व प्रसीद मे ॥ ३७ ॥ ॥ आदित्य उवाच ॥ ॥ आख्यास्यते तदखिलं निर्विकल्पं
गणाधिप ॥ इत्युक्त्वांतर्दधे देवः सर्वलोकप्रदीपकः ॥ ३८ ॥ स च दिंडिर्महातेजा जगामाशु नभोगतिम् ॥ ३९ ॥ ॥ इति श्रीभविष्ये महापुराणे
शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि दिंड्यादित्यसंवादवर्णनं नाम द्विषष्टितमोऽध्यायः ॥ ६२ ॥ छ ॥ ॥ सुमंतुरुवाच ॥ ॥ प्रणम्य शिरसा

---

[1] हानिकारणम्–इ० पा० । [2] सर्वत्र–इ० पा० । [3] प्रशाम्यसि–इ० पा० । [4] पुण्यैः–इ० पा० । [5] प्रतिकृतिमित्यर्थः । [6] मय्यर्पितमना भूत्वा सर्वान्कामानवाप्स्यसि–इ०पा० । [7] अस्ति–इ० पा० ।

देवं सुरज्येष्ठं चतुर्मुखम् ॥ उवाच स महातेजा दिंडिर्लोकेशमादरात् ॥ १ ॥ देवदेवेन भवतादिष्टोऽस्मि च महात्मना ॥ क्रिया[1]योगामृतं सर्वमा
ख्यास्यति भवान्किल ॥ २ ॥ स त्वां पृच्छाम्यहं ब्रह्मन्क्रियायोगं निरंतरम् ॥ संतोषयितुमीशेहं यथावद्वक्तुमर्हसि ॥ ३ ॥ ॥ ब्रह्मोवाच ॥ ॥
एह्येहि मत्सकाशं च मत्समीपे गणाधिप ॥ ब्रह्महत्या प्रणष्टा ते दर्शनादेव तस्य तु ॥ ४ ॥ अनुग्राह्योऽसि भूतेश भास्करस्यामितौजसः ॥ आरा
धनाय भूतेश यदीशे प्रवणं मनः ॥ ५ ॥ यदि देवपतिं भानुमाराधयितुमिच्छसि ॥ भगवंतमनाद्यंतं भव दीक्षागुणान्वितः ॥ ६ ॥ न ह्यदीक्षान्वि
तैर्भानुर्ज्ञातुं स्तोतुं च तत्त्वतः ॥ द्रष्टुं वा शक्यते मूढैः प्रवेष्टुं कुत एव हि ॥ ७ ॥ जन्मभिर्बहुभिः पूता नरास्तद्गतचेतसः ॥ भवंति भगवन्सौरास्तदा
दीक्षागुणान्विताः ॥ ८ ॥ अनेकजन्मसंसारचिते पापसमुच्चये ॥ नाक्षीणे जायते पुंसां मार्तंडाभिमुखी मतिः ॥९॥ प्रद्वेषं याति मार्तंडे द्विजान्वेदांश्च
निंदति ॥ यो नरस्तं विजानीयात्[2]पापबीजसमुद्भवम् ॥ १० ॥ पाखंडेषु रतिः पुंसां हेतुवादानुकूलता ॥ जायते विष्णुमायाम्भःपतितानां दुरात्म
नाम् ॥ ११ ॥ यदा पापक्षयः पुंसां तदा वेदद्विजादिषु ॥ रवौ च देवदेवेशे श्रद्धा भवति निश्चला ॥ १२ ॥ यदा स्वल्पावशेषस्तु नराणां पापसं
चयः ॥ तदा दीक्षागुणान्त्सर्वे भजंते नात्र संशयः ॥ १३ ॥ भ्रमतामत्र संसारे नराणां पाप[3]दुर्गमे ॥ हस्तावलंबदोप्येको भक्तिप्रीतो दिवाकरः ॥१४॥
सर्वभागवतो भूत्वा सर्वपापहरं रविम् ॥ आराधयेह तं भक्त्या प्रीतिमेष्यति भास्करः ॥१५॥ ॥ दिंडिरुवाच ॥ ॥ किं लक्षणा नरा दीक्षामर्हंति
पद्मसंभव ॥ यच्च दीक्षान्वितैः कार्यं तन्मे कथय पद्मज ॥ १६ ॥ ॥ ब्रह्मोवाच ॥ ॥ कर्मणा मनसा वाचा प्राणिनां यो न हिंसकः ॥ भावभ
क्तश्च मार्तंडे तस्य दीक्षा गुणान्विता ॥ १७ ॥ ब्राह्मणांश्चैव देवांश्च नित्यमेव नमस्यति ॥ न च द्रोग्धा[4] परं वादे स मार्तंडं समर्चति ॥१८॥ सर्वा
न्देवान्रविं वेत्ति सर्वलोकांश्च भास्करम् ॥ तेभ्यश्च नान्यमात्मानं स नरः सौरतां व्रजेत् ॥ १९ ॥ देवं मनुष्यमन्यं वा पशुपक्षिपिपीलिकान् ॥
तरुपाषाणकाष्ठानि भूम्यंभोगगनं दिशः ॥ २० ॥ आत्मानं चापि देवेशाद्व्यतिरिक्तं दिवाकरात् ॥ यो न जानाति यतिषु स वै दीक्षागुणान्भजेत् ॥
॥ २१ ॥ भावं न कुरुते यस्तु सर्वभूतेषु पापकम् ॥ कर्मणा मनसा वाचा स तु दीक्षां समर्हति ॥ २२ ॥ सुतप्तेनेह तपसा यज्ञैर्वा बहुदक्षिणैः ॥ तां
गतिं न नरा यांति यां गताः सूर्यमाश्रिताः ॥ २३ ॥ येन सर्वात्मना भानौ भक्त्या भावो निवेशितः ॥ गणेश्वर कृतार्थत्वाच्छ्लाघ्यः सौरः स मानवः
॥ २४ ॥ अपि नः स कुले धन्यो जायते कुलपावनः ॥ भगवान्भक्तिभावेन येन भानुरुपासितः ॥ २५ ॥ यः कारयति देवार्चां हृदयालंबनं

---

[1] क्रियायोगमश्रृणवमाख्यातं भगवन्किल–इ०पा०। [2] असुरांशसमुद्भवम्–इ० पा०। [3] कर्म–इ० पा०। [4] भोगी परस्वादेः–इ०पा०।

रवेः ॥ स नरो भानुसालोक्यमाप्नोति धुतकल्मषः ॥२६॥ यस्तु देवालयं भानोर्भक्त्या कारयति ध्रुवम् ॥ स सप्त पुरुषाँल्लोकं भानोर्नयति मानवः
॥ २७ ॥ यावंत्याब्दानि देवार्चा रवेस्तिष्ठति मंदिरे ॥ तावद्वर्षसहस्राणि सूर्यलोके महीयते ॥ २८ ॥ देवार्चा लक्षणोपेता तद्गृहे संततो विधिः ॥
निष्कामं च मनो यस्य स यात्यक्षरसाम्यताम् ॥२९॥ पुष्पाणि च सुगंधीनि मनोज्ञानि च यः पुमान् ॥ प्रयच्छति सहस्रांशोः सदा प्रयतमानसः ॥
॥३०॥धूपांश्च तांस्तान्विविधान्गन्धाढ्यं चानुलेपनम् ॥ नरः सोऽनुदिनं यज्ञं करोत्याराधनं रवेः॥३१॥यज्ञेशो भगवान्पूषा सदा क्रतुभिरिज्यते ॥
बहूपकरणा यज्ञा नानासंभारविस्तराः ॥ ३२ ॥ न ते दिंडिन्नवाप्यंते मनुष्यैरल्पसंचयैः ॥ भक्त्या तु पुरुषैः पूजा कृता दूर्वांकुरैरपि ॥ भानोर्ददाति
हि फलं सर्वयज्ञैः सुदुर्लभम् ॥ ३३ ॥ यानि पुष्पाणि हृद्यानि धूपगंधानुलेपनम् ॥ दयितं भूषणं यच्च प्रीतये चैव वाससी ॥ ३४ ॥ यानि
चाभ्यवहार्याणि भक्ष्याणि च फलानि वै ॥ प्रयच्छ तानि मार्तंडे भवेथाश्चैव तन्मनाः ॥ ३५ ॥ आद्यं तं भुवनाधारं यथाशक्त्या प्रसादय ॥
आराध्य याति तं देवं तस्मिन्नेव नरो लयम् ॥ ३६ ॥ पुष्पैस्तीर्थोदकैर्गंधैर्मधुना सर्पिषा तथा ॥ क्षीरेण स्नापयेद्भानुं ग्रहेशं गोपतिं खगम् ॥
॥ ३७ ॥ दधिक्षीरह्रदान्पुण्यांस्ततो लोकान्मधुच्युतः ॥ प्रयास्यति गणश्रेष्ठ निर्वृतिं च विलक्षणाम् ॥ ३८ ॥ स्तोत्रैर्गीतैस्तथा वाद्यैर्ब्राह्मणानां
च तर्पणैः ॥ मनसश्चैव योगेन आराधय दिवाकरम् ॥ ३९ ॥ आराध्य तं जगन्नाथं मया सर्गः प्रवर्तितः ॥ विष्णुश्च पालयेल्लोकांस्तमाराध्य दिवा
करम् ॥ ४० ॥ रुद्रश्च प्राप्तवान्देवीं भवानीं तत्प्रसादतः ॥ दीप्यंते ऋषयश्चापि तमाराध्य दिवाकरम् ॥ ४१ ॥ स त्वमेभिः प्रकारैस्तमुपवासैश्च
भास्करम् ॥ तोषयाब्दं हि तुष्टोऽसौ भानुर्द्वंद्वप्रशांतिदः॥४२॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि सप्तमीकल्पे ब्रह्म
दिंडिसंवादे आदित्यक्रियायोगवर्णनं नाम त्रिषष्टितमोऽध्यायः ॥ ६३ ॥छ ॥ ॥ दिंडिरुवाच ॥ ॥ उपवासैः सुरश्रेष्ठ कथं तुष्यति भास्करः ॥ परि
हारांस्तथाचक्ष्व ये त्याज्याश्चोपवासिभिः ॥१॥ यद्यत्कार्यं यथा चैव भास्कराराधने नरैः ॥ तत्सर्वं विस्तराद्ब्रह्मन्यथावद्वक्तुमर्हसि ॥ २ ॥ ॥ ब्रह्मो
वाच ॥ ॥ स्मृतः संपूजितो धूपपुष्पान्नैर्भानुरादरात् ॥ भोगिनामुपकाराय किं पुनश्चोपवासिनाम् ॥ ३ ॥ उपावृत्तस्य पापेभ्यो यस्तु वासो गुणैः
सह ॥ उपवासः स विज्ञेयः सर्वभोगविवर्जितः ॥४॥ एकरात्रं द्विरात्रं वा त्रिरात्रं नक्तमेव च ॥ उपवासी रविं यस्तु भक्त्या ध्यायति मानवः ॥५॥
तन्नामजापी तत्कर्मरतस्तद्गतमानसः ॥ निष्कामः पुरुषो दिंडे स ब्रह्म परमाप्नुयात् ॥ ६ ॥ यं च काममभिध्याय भास्करार्पितमानसः ॥ उपोषति

---

१ समोदते—इ० पा०।

तमाप्नोति प्रसन्ने खगमेऽखिलम् ॥ ७ ॥ ॥ दिंडिरुवाच ॥ ॥ ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैः स्त्रीभिश्च कंजज ॥ संसारगर्ते पंकस्थे सुगतिः प्राप्यते
कथम् ॥ ८ ॥ ॥ ब्रह्मोवाच ॥ ॥ अनाराध्य जगन्नाथं गोपतिं ध्वान्तनाशनम् ॥ निर्व्यलीकेन चित्तेन कः प्रयास्यति सद्गतिम् ॥ ९ ॥ विषयग्राहि वै
यस्य न चित्तं भास्करार्पितम् ॥ स कथं पापपंकाक्तो नरो यास्यति सद्गतिम् ॥ १० ॥ यदि संसारदुःखार्तः सुगतिं गंतुमिच्छसि ॥ तदाराधय सर्वेशं
भास्करं ज्योतिषां पतिम् ॥ ११ ॥ पुष्पैः सुगंधैर्हृद्यैश्च धूपैः सागरुचंदनैः ॥ वासोभिर्भूषणैर्भक्ष्यैरुपवासपरायणः ॥ १२ ॥ यदि संसारनिर्वेदाद
भिवांछसि सद्गतिम् ॥ तदाराधय मार्तंडं भक्तिप्रवणचेतसा ॥ १३ ॥ पुष्पाणि यदि ते न स्युः शस्तपादपपल्लवैः ॥ दूर्वांकुरैरपि दिंडे तदभावेऽर्च
यार्यमम् ॥ १४ ॥ पुष्पपत्रांबुभिर्धूपैर्यथाविभवमात्मनः ॥ पूजितस्तुष्टिमतुलां भक्त्या यात्येकचेतसा ॥ १५ ॥ यः सदायतने भानोः कुरुते मार्ज
नक्रियाम् ॥ स यात्युत्तमके स्थाने सर्वपापं व्यपोहति ॥ १६ ॥ यावत्यः पांसुकणिका मार्ज्यन्ते भास्करालये ॥ दिनानि दिवि तावंति तिष्ठत्यर्क
समो नरः ॥ १७ ॥ अहन्यहनि यत्पापं कुरुते गणनायक ॥ गोचर्ममात्रं संमार्ज्य हंति तद्भास्करालये ॥ १८ ॥ यश्चानुलेपनं कुर्याद्भानोरायतने
नरः ॥ सोऽपि लोकं समासाद्य हंसेन सह मोदते ॥ १९ ॥ मृदा धातुविकारैर्वा वर्णकैर्गोमयेन वा ॥ उपलेपनकृद्याति मत्पुरं यानमास्थितः ॥ २० ॥
उदकाभ्युक्षणं भानोर्यः करोति सदा गृहे ॥ सोऽपि गच्छति यत्रास्ते भगवान्यादसां पतिः ॥ २१ ॥ पुष्पप्रकरमत्यर्थं सुगंधं भास्करालये ॥ अनु लिप्ते
नरो दत्त्वा न दुर्गतिमवाप्नुयात् ॥ २२ ॥ विमानमतिशोभाढ्यं सर्वर्तुसुखभूषितम् ॥ समाप्नोति नरो दत्त्वा दीपकं भास्करालये ॥ २३ ॥ यस्तु
संवत्सरं पूर्णं तिलपात्रप्रदो नरः ॥ ध्वजं च भास्करे दद्यात्सममत्र फलं लभेत् ॥ २४ ॥ विधूतो हंति वातेन दातुरज्ञानतः कृतम् ॥ पापं कर्तु
र्गृहे भानोर्दिवा रात्रौ नराधिप ॥ २५ ॥ गीतवाद्यादिभिर्भानुं य उपास्ते तमोपहम् ॥ गंधर्वैर्नृत्यगीतैः स विमानस्थो निषेव्यते ॥ २६ ॥ जाति
स्मरत्वं मेधां च तथैवोपरमे स्मृतिम् ॥ प्राप्नोति गणशार्दूल कृत्वा पुस्तकवाचनम् ॥ २७ ॥ एवं खगेश्वरो भक्त्या येन भानुरुपासितः ॥ स
प्राप्नोति गतिं श्लाघ्यां यां यामिच्छति चेतसा ॥ २८ ॥ देवत्वं मनुजैः कैश्चिद्गंधर्वत्वं तथा परैः ॥ विद्याधरत्वमपरैः संराध्येह दिवाकरम् ॥ २९ ॥
[1]शंक्रः क्रतुशतेनेशमाराध्य ज्योतिषां पतिम् ॥ देवेंद्रत्वं गतस्तस्मा[2]न्नान्यः पूज्यतमः क्वचित् ॥ ३० ॥ ब्रह्मचारिगृहस्थानां वनस्थानां
गणाधिप ॥ नान्यः पूज्यस्तथा स्त्रीणामृते देवं दिवाकरम् ॥ ३१ ॥ मध्ये परिव्राजकानां सहस्रांशुं महात्मनाम् ॥ मोक्षद्वारं विशंतीह तं रविं विजि

---

[1] शक्रः क्रतुशतेनेह समाराध्य दिवस्पतिम्—इ० पा० । [2] यस्मिन्—इ० पा० ।

तात्मनाम् ॥ ३२ ॥ एवं सर्वाश्रमाणां हि सहस्रांशुः परायणम् ॥ सर्वेषां चैव वर्णानां ग्रहेशो वै गतिः परा ॥ ३३ ॥ शृणुष्व गदतः काम्यानुपवासांस्तथापरान्
॥ शृणु दिंडे महापुण्यफलकां सप्तमीं पराम् ॥ ३४ ॥ आदित्याराधनायैनां सर्वपापहरां शिवाम् ॥ यामुपोष्य नरो भक्त्या मुच्यते
सर्वपातकैः ॥३५॥ तथा लोकमवाप्नोति सूर्यस्यामिततेजसः ॥ अथ भाद्रपदे मासि शुक्लपक्षे समागते ॥३६॥ सोपोष्या प्रथमं तात विधानं शृणु
तत्र वै ॥ अयाचितं चतुर्थ्यां तु पंचम्यामेकभोजनम् ॥३७॥ उपवासपरः षष्ठ्यां जितक्रोधो जितेंद्रियः ॥ अर्चयित्वा दिनकरं गंध[1]धूपनिवेदनैः ॥
॥३८॥ पुरतः स्थंडिले रात्रौ स्वप्याद्देवस्य पुत्रक॥प्रध्यायन्मनसा देवं सर्वभूतार्तिनाशनम् ॥३९ ॥ सर्वदोषप्रशमनं सर्वपातकनाशनम् ॥ विबुद्ध
स्त्वथ सप्तम्यां कुर्याद्ब्राह्मणभोजनम्॥४०॥पूजयित्वा दिनकरं पुष्पधूपविलेपनैः॥नैवेद्यं तात देवस्य फलानि कथयंति[2] हि॥४१॥खर्जूरनालिकेराणि
तथा चाम्रफलानि तु ॥ मातुलिंगफलान्येव कथितानि मनीषिभिः॥४२॥एतैश्च भोजयेद्विप्रानात्मना च प्रभक्षयेत्॥ तथैषां चाप्यभावेन शृणु चान्यानि
सुव्रत ॥४३॥ शालिगोधूमपिष्टानि कारयेद्गणनायक॥ गुडगर्भकृतानीह घृतपाकेन पाचयेत्॥४४॥चातुर्यावकमिश्राणि आदित्याय निवेदयेत्
॥ अग्निकार्यमथो कृत्वा ब्राह्मणान्भोजयेत्ततः ॥४५॥ इत्थं द्वादश वै मासान्कार्यं व्रतमनुत्तमम् ॥ मासि मासि फलाहारः फलदायी फलार्चनः
॥४६॥ वर्षांते त्वथ कुर्वीत शक्त्या ब्राह्मणभोजनम् ॥ स्नानप्राशनयोश्चापि विधानं शृणु सुव्रत ॥४७॥ गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्॥
तिलसर्षपयोः कल्कं श्वेता मृच्चापि सुव्रत ॥ ४८ ॥ दूर्वाकल्कं घृतं चापि गोशृंगक्षालितं जलम् ॥ जातिगुल्मविनिर्यासः प्रशस्तः स्नानकर्मणि ॥
॥ ४९ ॥ प्राशने चाप्यथैतानि सर्वपापहराणि वै ॥ आदौ कृत्वा भाद्रपदं यथा संख्यं विदुर्बुधाः ॥ ५० ॥ इत्थं वर्षांतमासाद्य भोजयित्वा द्विजोत्तमान्
॥ दिव्यान्भोगान्माहादेव ततस्तेभ्यो निवेदयेत् ॥५१॥ फलानि तात[3] हैमानि यथा शक्त्या गणाधिप ॥ सवत्सामथ वा धेनुं भूमिं सस्यान्वितामथ
॥ ५२ ॥ प्रासादमथ वा भौमं सर्वधान्यसमन्वितम् ॥ दद्याच्छुं[4]क्लानि वस्त्राणि ताम्रपात्रं सं[5]विद्रुमम् ॥ ५३ ॥ शक्तियुक्तस्य चैतानि
दरिद्रस्य तु मे शृणु॥फलानि पिष्टकान्येषां तिलचूर्णान्वितानि तु ॥५४॥ भोजयित्वा द्विजान्दद्या[6]द्राजतानि फलानि तु॥धातुरक्तं वस्त्रयुग्ममाचार्याय
निवेदयेत् ॥ ५५ ॥ सहिरण्यं महादेव पंचरत्नसमन्वितम् ॥ इत्थं समाप्यते तात पारणं वार्षिकांतिकम् ॥ ५६ ॥ इत्येषा वै पुण्यतमा सप्तमी

---

१ पुष्पधूपविलेपनैः—इ० पा० । २ कथयाम्यहम्—इ० पा० । ३ तानि—इ० पा० । ४ भक्त्या च—इ०, रक्तानि—इ० च पा० । ५ च निर्मलम्—इ० पा० । ६ राजा तानि—इ० पा० ।

दुरितापहा ॥ यामुपोष्य नराः सर्वे यांति सूर्यसलोकताम् ॥ ५७ ॥ [1]पूंज्यमानः सदा देवैर्गंधर्वाप्सरसां गणैः ॥ अनया मानवो नित्यं पूजयेद्भास्करं सदा ॥ ५८ ॥ दारिद्र्यदुःखदुरितैर्मुक्तो याति दिवाकरम् ॥ ब्राह्मणो मोक्षमायाति क्षत्रियश्चैंद्रतां व्रजेत् ॥ ५९ ॥ वैश्यो धनदसालोक्यं शूद्रो विप्रत्वमाप्नुयात् ॥ अपुत्रो लभते पुत्रं दुर्भगा सुभगा भवेत्॥६०॥ यामुपोष्य च नारीमां सप्तमीं लोकपूजिताम् ॥ विधवा वा सती भक्त्या अनया पूजयेद्रविम् ॥ ६१ ॥ नान्यजन्मनि वैधव्यं नारी प्राप्नोति मानद ॥ चिंतामणिसमा ह्येषा विज्ञेया फलसप्तमी ॥ ६२ ॥ पठतां शृण्वतां दिंडे सर्वकामप्रदा स्मृता ॥ ६३ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि ब्रह्मदिंडिसंवादे सप्तमीकल्पे फलसप्तमीवर्णनं नाम चतुःषष्टितमोऽध्यायः ॥६४॥ ॥ ॥ ब्रह्मोवाच ॥ ॥ अतः परं प्रवक्ष्यामि रहस्यां नाम सप्तमीम् ॥ सप्तमी कृतमात्रेयं नरांस्तारयते भवात् ॥ ॥ १ ॥ सप्तापरान्सप्त पूर्वान्पितॄंश्चापि न संशयः ॥ रोगांश्छिनत्ति दुश्छेद्यान्दुर्जयाञ्जयते ह्यरीन् ॥ २ ॥ अर्थान्प्राप्नोति दुष्प्रापान्यः कुर्यान्नाम सप्तमीम् ॥ कन्यार्थी लभते कन्यां धनार्थी लभते धनम् ॥ ३ ॥ पुत्रार्थी लभते पुत्रान्धर्मार्थी धर्ममाप्नुयात् ॥ समयान्पालयन्सर्वान्कुर्याच्चेमां विचक्षणः ॥ ४ ॥ समयाञ्छृणु भूतेश श्रेयसे गदतो मम ॥ आदित्यभक्तः पुरुषः सप्तम्यां गणनायक ॥ ५ ॥ मैत्रीं सर्वत्र वै कुर्याद्भास्करं वापि चिंतयेत् ॥ सप्तम्यां न स्पृशेत्तैलं नीलं वस्त्रं न धारयेत् ॥ ६ ॥ न चाप्यामालकैः स्नानं न कुर्यात्कलहं क्वचित् ॥ ॥ दिंडिरुवाच ॥ ॥ किमर्थं न स्पृशेत्तैलं सप्तम्यां पद्मसंभव ॥ ७ ॥ कश्च दोषो भवेद्देव नीलवस्त्रस्य धारणात् ॥ ॥ ब्रह्मोवाच ॥ ॥ शृणु दिंडे महाबाहो नीलवस्त्रस्य धारणे ॥ ८ ॥ दूषणं गणशार्दूल गदतो मम कृत्स्नशः ॥ पालनं विक्रयश्चैव सद्वृत्तिरुपजीवनम्॥९॥ पतितस्तु भवेद्विप्रस्त्रिभिः कृच्छ्रैर्विशुद्ध्यति ॥ नीलीरक्तेन वस्त्रेण यत्कर्म कुरुते द्विजः ॥ १० ॥ स्नानं दानं जपो होमः स्वाध्यायः पितृतर्पणम् ॥ वृथा तस्य महायज्ञा नीलसूत्रस्य धारणात् ॥ ॥ ११ ॥ नीलीरक्तं यदा वस्त्रं विप्रस्त्वंगेषु धारयेत् ॥ अहोरात्रोषितो भूत्वा पंचगव्येन शुद्ध्यति ॥ १२ ॥ रोमकूपे यदा गच्छेद्रक्तं [2]नीलस्य कस्यचित् ॥ पतितस्तु भवेद्विप्रस्त्रिभिः कृच्छ्रैर्विशुद्ध्यति ॥ १३ ॥ नीलीमध्यं यदा गच्छेत्प्रमादाद्ब्राह्मणः क्वचित् ॥ [3]अहोरात्रोषितो भूत्वा पंचगव्येन शुद्ध्यति ॥ १४ ॥ नीलीदारु यदा भिंद्याद्ब्राह्मणानां शरीरके ॥ शोणितं दृश्यते यत्र द्विजश्चांद्रायणं चरेत् ॥ १५ ॥ कुर्यादज्ञानतो यस्तु नीलेर्वा दंतधावनम् ॥ कृत्वा कृच्छ्रद्वयं दिंडे विशुद्धः स्यान्न संशयः ॥ १६ ॥ वापयेद्यत्र नीलीं तु भवेत्तत्राशुचिर्मही ॥ प्रमाणद्वादशाब्दानि

---

[1] पूज्यो मान्यः सदा देवैर्गन्धर्वोरगराक्षसैः– इ० पा० । [2] वस्त्रस्य–इ० पा० । [3] त्रिरात्रोपोषितः–इ० पा० ।

तत उर्ध्वं शुचिर्भवेत्[1] ॥ १७ ॥ सप्तम्यां स्पृशतस्तैलमिष्टा भार्या विनश्यति ॥ इत्येष नीलीतैलस्य दोषस्ते कथितो मया ॥ १८ ॥ न चैव खादेन्मांसानि मद्यानि न पिबेद्बुधः ॥ न द्रोहं कस्यचित्कुर्यान्न पारुष्यं समाचरेत् ॥ १९ ॥ नावभाषेत चांडालं स्त्रियं नैव रजस्वलाम् ॥ न वापि संस्पृशेद्धीनं मृतकं नावलोकयेत् ॥ २० ॥ नास्फोटयेन्नातिहसेद्गायेच्चापि न गीतकम् ॥ न नृत्येदतिरागेण न च वाद्यानि वादयेत् ॥ २१ ॥ न शयीत स्त्रिया सार्धं न सेवेत दुरोदरम् ॥ न रुद्यादश्रुपातेन न च वाच्यं च शौकिकम् ॥ २२ ॥ आक्रुषेन्न शिरोयूका न वृथावादमाचरेत् ॥ परस्यानिष्टकथनमतिशोकं च वर्जयेत् ॥ २३ ॥ न कश्चित्ताडयेज्जन्तुं न कुर्यादतिभोजनम् ॥ न[2] चैव हि दिवा स्वप्नं दंभं शाठ्यं च वर्जयेत् ॥ २४ ॥ रथ्यायामटनं वापि यत्नतः परिवर्जयेत ॥ अथापरो विधिश्चात्र श्रूयतां त्रिपुरांतक ॥ ॥ २५ ॥ चैत्रात्प्रभृति कर्तव्या सर्वदा नाम सप्तमी ॥ धातेति चैत्रमासे तु पूजनीयो दिवाकरः ॥ २६ ॥ अर्यमेति च वैशाखे ज्येष्ठे मित्रः प्रकीर्तितः ॥ आषाढे वरुणो ज्ञेय इन्द्रो नभसि कथ्यते ॥ २७ ॥ विवस्वांश्च नभस्येऽथ पर्जन्योश्वयुजि स्मृतः ॥ पूषा कार्त्तिकमासे तु मार्गशीर्षेषुरुच्यते ॥ २८ ॥ भगः पौषे भवेत्पूज्यस्त्वष्टा माघे तु शस्यते ॥ विष्णुश्च फाल्गुने मासि पूज्यो वंद्यश्च भास्करः ॥ २९ ॥ सप्तम्यां चैव सप्तम्यां भोजयेद्भोजकान्बुधः[3] ॥ सघृतं भोजनं देयं भोजयित्वा विधानतः ॥ ३० ॥ भोजकायैव विप्राय दक्षिणां स्वर्णमाषकम् ॥ सघृतं भोजनं देयं रक्तवस्त्राणि चैव हि ॥ ३१ ॥ [4]अभावे भोजकानां तु दक्षिणीया द्विजोत्तमाः ॥ तथैव भोजनीयाश्च श्रद्धया परया विभो ॥ ३२ ॥ विशेषतो वाचकश्च ब्राह्मणः कल्पवित्सदा ॥ इत्येषा कथिता तुभ्यं सप्तमी गणनायक ॥ ३३ ॥ श्रुता सती पापहरा सूर्यलोकप्रदायिनी ॥ ३४ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि ब्रह्मदिंडिसंवादे सप्तमीकल्पे आदित्यमाहात्म्यवर्णने सप्तमीवर्णनं नाम पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

॥ छ ॥ ॥ सुमंतुरुवाच ॥ ॥ इत्युक्त्वा भगवान्ब्रह्मा जगामादर्शनं विभोः[5] ॥ सूर्य[6]माराधयद्दिंडी सूर्यस्यानुचरोऽभवत् ॥ ॥ १ ॥ ॥ शतानीक उवाच ॥ ॥ भूयः कथय विप्रेंद्र माहात्म्यं भास्करस्य मे ॥ शृण्वतो नास्ति मे तृप्तिरमृतस्येव सुव्रत ॥ २ ॥ ॥ सुमंतुरुवाच ॥ ॥ शृणुष्वावहितो राजन्संवादं द्विजशंखयोः ॥ यं श्रुत्वा सर्वपापेभ्यो मुच्यते मानवो[7] नृप ॥ ३ ॥ आसीनमाश्रमे शंखं द्विजो द्रष्टुं जगाम ह ॥ फलभारानतच्छाये वृक्षवृन्दसमाकुले ॥ ४ ॥ परस्परमृगशृंगकण्डूयितमृगावृते ॥ बर्हिर्वनांबरानीततीर्थकन्दोपभोगिनि ॥ ५ ॥ प्रभूत

---

[1] विशुध्यति–इ० पा० । [2] प्रयतश्च–इ० पा० । [3] ततः–इ० पा० । [4] अलाभे–इ० पा० । [5] विभो–इ० पा० । [6] सूर्यमाहात्म्यतो दिण्डिः–इ० पा० । [7] नात्र संशयः–इ० पा० ।

कुसुमामोदषट्पदोद्गीतशालिनि ॥ सिद्धदेवर्षिगंधर्वतीर्थसेवितवारिणि ॥६॥ मुण्डैश्च जटिलैश्चैव तापसैरुपशोभिते ॥ आश्रमे तं मुनिश्रेष्ठं शंखाह्वं
सुखमास्थितम् ॥ ७ ॥ स्तोत्रैः स्तोतुं सहस्रांशुं तद्भक्तं तत्परायणम् ॥ ततः संहत्य सहसा तं भोजककुमारकाः ॥ ८ ॥ विनीता उपसंगम्य यथावद्
अभिवाद्य च ॥ आसनेषूपविष्टास्त उपविष्टमथाब्रुवन् ॥ ९ ॥ भगवन्त्सर्ववेदेषु[1] च्छिंधि नः संशयो महान् ॥ विनयेनोपपन्नानां कुमाराणां ततो
मुनिः ॥ १० ॥ अनादींश्चतुरो वेदानुवाच प्रीतमानसः ॥ तेषां तु पठतामेव आश्रमं तु यदृच्छया ॥ ११ ॥ मुनिश्रेष्ठोऽथ तं देशमाजगाम द्विजो
नृप ॥ यथावदर्चितस्तेन शंखेनामिततेजसा ॥ १२ ॥ वंदितश्च कुमारैस्तैरभवत्प्रीतमानसः ॥ अथैतानब्रवीच्छंखस्तान्भोजककुमारकान् ॥ १३॥
शिष्टागमादनध्यायः स च जातो विरम्यताम् ॥ यथाज्ञापयसीत्याहुः कुमारास्ते ऋषिं ततः ॥ १४ ॥ पप्रच्छ सिद्धिदश्चैतान्के ह्येते किं पठंति
च ॥ शंखोवाच महाराज कुमारा भोजकात्मजाः ॥ १५ ॥ ससूत्रकल्पांश्चतुरो विप्र वेदानधीयते ॥ तथैव सप्तमीकल्पे परिचर्यां च भास्वतः ॥
॥ १६ ॥ अग्निकार्यविधानं च प्रतिष्ठाकल्पमादितः ॥ [2]अध्यंगलक्षणं ब्रह्मन्रथयात्राविधिं तथा ॥ १७ ॥ ॥ द्विज उवाच ॥ ॥ कथं क्रियेत
सप्तम्यां कश्चार्चनविधिक्रमः ॥ गंधपुष्पप्रदीपानां किं फलं रविमंदिरे ॥ १८ ॥ केन तुष्यति दानेन व्रतेन नियमेन च ॥ धूपपुष्पोपहारादि किं
च देयं विवस्वते ॥ १९ ॥ एतदिच्छाम्यहं श्रोतुं तन्मे ब्रूहि तपोधन ॥ विशेषतस्तु माहात्म्यं ब्रूहि मां भास्करस्य हि ॥ २० ॥ ॥ शंख
उवाच ॥ ॥ इममर्थं वशिष्ठेन पृष्टः सांबो यथा पुरा ॥ स[3] चोवाच वशिष्ठाय तदहं कथयामि ते ॥ २१ ॥ अत्राश्रमे पुण्यतमे तीर्थानामुत्तमे
प्रभुः ॥ ववन्दे नियतात्मानं वशिष्ठं मुनिसत्तमम् ॥ २२ ॥ विनयेनोपसंगम्य ववन्दे चरणौ मुनेः ॥ कृतप्रणामं सांबं तु भक्तिप्रह्वीकृताननम्॥
॥ २३ ॥ विलोक्य[4] परमप्रीतो मुनिः पप्रच्छ तं तदा ॥ सर्वतः स्फुटितं गात्रं कुष्ठेन महता तव ॥२४॥ घोररूपेण तीव्रेण कथं तद्विगतं तव[5] ॥
कथं च लक्ष्मीरधिका रूपं चातिमनोहरम् ॥ २५ ॥ तेजस्वितातिमहती तथैव[6] सुकुमारता ॥ २६ ॥ ॥ सांब उवाच ॥ ॥ स्तुतो नामसहस्रेण
लोकनाथो दिवाकरः ॥ दर्शनं च गतः साक्षाद्दत्तवांश्च वरान्मम ॥ २७ ॥ ॥ वशिष्ठ उवाच ॥ ॥ कथमाराधितः सूर्यस्त्वया यादवनंदन
॥ कैश्च व्रततपोदानैर्दर्शनं भगवान्गतः ॥ २८ ॥ ॥ सांब उवाच ॥ ॥ शृणुष्वावहितो ब्रह्मन्सर्वमेव मया यथा ॥ तोषितो भगवा

---

१ तंत्रेषु–इ० पा० । २ अभ्यंगलक्षणम्–इ० पा० । ३ अथाचष्टे–इ० पा० । ४ वाक्यं च–इ० पा० । ५ वद–इ० पा० । ६ तव सांब समागमत्–इ० पा० ।

न्सूर्यो विधिना येन सुव्रत ॥ २९ ॥ [1]मोहान्मयोपहसितो दुर्वासाः कोपनो मुनिः ॥ ततोऽहं तस्य शापेन महाकुष्ठमवाप्तवान् ॥ ३० ॥ ततोऽहं
पितरं गत्वा कुष्ठयोगाभिपीडितः ॥ लज्जमानोऽतिगर्वेण इदं वाक्यमथाब्रवम् ॥ ३१ ॥ तात सीदति मे गात्रं स्वरश्च परिहीयते ॥ घोररूपो
महाव्याधिर्वपुरेष जिघांसति ॥ ३२ ॥ अशेषव्याधिराज्ञाहं पीडितः क्रूरकर्मणा ॥ वैद्यैरोषधिभिश्चैव न शांतिर्मम विद्यते ॥ ३३ ॥ सोऽहं त्वया
ह्यनुज्ञातस्त्यक्तुमिच्छामि जीवितम् ॥ यदि वाहमनुग्राह्यस्ततोऽनुज्ञातुमर्हसि ॥ ३४ ॥ इत्युक्तवाक्यः स पिता पुत्रशोकाभिपीडितः ॥ पिता क्षणं
ततो ध्यात्वा मामेवं वाक्यमुक्तवान् ॥ ३५ ॥ [2]धैर्यमाश्रयतां पुत्र मा शोके च मनः कृथाः ॥ हंति शोकार्दितं व्याधिः शुष्कं तृणमिवानलः ॥
॥३६॥ देवताराधनपरो भव पुत्रक मा शुचः ॥ इत्युक्ते च मया प्रोक्तो देवमाराधयामि कम् ॥ ३७ ॥ कमाराध्य विमुच्येऽहं तात रोगैः समंततः ॥
इत्येवमुक्तो भगवान्मामुवाच पिता मम ॥ ३८ ॥ इममर्थं पुरा पृष्टः पद्मयोनिः सनातनः ॥ याज्ञवल्क्येन ऋषिणा योगीशेन [3]महात्मना ॥३९॥
यदुवाच महातेजास्तस्मै स यदुनंदन ॥ तच्छृणुष्व शुचिर्भूत्वा आत्मनः श्रेयसे सुत ॥ ४० ॥ सुरज्येष्ठं सुखासीनं पद्मयोनिं प्रजापतिम् ॥ याज्ञ
वल्क्यो महातेजाः पर्यपृच्छत्पितामहम् ॥ ४१ ॥ भगवञ्छ्रोतुमिच्छामि किंचिदात्ममनोगतम् ॥ समाराध्य विभो देवं नरो मुच्येत वै भवात् ॥
॥ ४२ ॥ गृहस्थो ब्रह्मचारी वा वानप्रस्थोऽथ भिक्षुकः ॥ य इच्छेन्मोक्षमास्थातुं देवतां कां यजेत सः ॥ ४३ ॥ कुतो ह्यस्य ध्रुवः स्वर्गः कुतो नैः
श्रेयसं सुखम् ॥ स्वर्गतश्चैव किं कुर्याद्येन न च्यवते पुनः ॥ ४४ ॥ देवतानां तु को देवः पितॄणां चैव कः पिता ॥ तस्मात्परतरं यच्च तन्मे ब्रूहि
पितामह ॥ ४५ ॥ केन सृष्टमिदं विश्वं ब्रह्मन्स्थावरजंगमम् ॥ प्रलये च कमभ्येति तन्मे त्वं वक्तुमर्हसि ॥ ४६ ॥ ॥ ब्रह्मोवाच ॥ ॥ साधु
पृष्टोऽस्मि भवता तुष्टश्चास्मि महामते ॥ प्रणम्य शिरसा देवं पुण्योत्तरमनुत्तमम् ॥ ४७ ॥ कथयिष्ये द्विजश्रेष्ठ शृणुष्वैकमनाधुना ॥ आत्मनः
श्रेयसे विप्र शुचिर्भूत्वा समाहितः ॥ ४८ ॥ उद्यन्य एष कुरुते जगद्वितिमिरं करैः ॥ नातः परतरो देवः किमन्यत्कथयामि ते ॥ ४९ ॥ अनादि
निधनो ह्येष पुरुषः शाश्वतोऽव्ययः ॥ दीपयत्येव लोकांस्त्रीन्रवी रश्मिभिरुल्बणैः ॥ ५० ॥ सर्वदेवात्मको ह्येष तपसा चांशुतापनः ॥ सर्वस्य जग
तो नाथः कर्मसाक्षी शुभाशुभे॥५१॥क्षपयत्येष भूतानि तथा विसृजते पुनः॥ एष भाति तपत्येष वर्धते च गभस्तिभिः ॥५२॥ एष धाता विधाता
च [4]पूषा प्रकृतिभावन ॥ न ह्येष क्षयमायाति नित्यमक्षयमंडलः ॥ ५३ ॥ पितॄणां हि पिता ह्येष देवतानां च देवता ॥ [5]ध्रुवं स्थानं स्मृतं ह्येष आधारो

---

[1] महानुभावो हि हरेर्दुर्वासाः कोपितो मुनिः—इ०पा० । [2] स्थैर्यमालंब्यताम्—इ० पा० । [3] ततः—इ० पा० व्याप्त—इत्यर्थः । [4] पूषापूताविभावनः—इ०पा० । [5] एवम्—इ०पा० ।

जगतस्तथा ॥ ५४ ॥ सर्वकाले जगत्कृत्स्नमादित्यात्संप्रसूयते ॥ प्रलये च तमभ्येति आदित्यं दीप्ततेजसम् ॥ ५५ ॥ योगिनश्चात्र संलीनास्त्यक्त्वा गृहकलेवरम् ॥ वायुभूता विशंत्यस्मिंस्तेजोराशौ दिवाकरे ॥ ५६ ॥ तस्य रश्मिसहस्राणि शाखा इव विहंगमाः ॥ वसंत्याश्रित्य मुनयः संसिद्धा दैवतैः सह ॥ ५७ ॥ जनकादयो गृहस्थास्तु राजानो योगधर्मिणः ॥ वालखिल्यादयश्चैव मुनयो ब्रह्मचारिणः ॥ ५८ ॥ व्यासादयो वनस्थाश्च भिक्षुः पंचशिखस्तथा ॥ सर्वे[१] ते योगमास्थाय प्रविष्टाः सूर्यमंडलम् ॥ ५९ ॥ शुको व्यासात्मजः श्रीमान्योगधर्ममवाप्य तु ॥ आदित्यकिरणान्पीत्वा न पुनर्भवमाप्तवान् ॥ ६० ॥ शब्दमात्राः श्रुतिसुखा ब्रह्मविष्णुशिवादयः ॥ प्रत्यक्षोऽयं स्मृतो देवः सूर्यस्तिमिरनाशनः ॥ ६१ ॥ तस्मादन्यव्रते भक्तिर्न कार्या शुभमिच्छता ॥ दृष्टेन साध्यते यस्माददृष्टं नित्यमेव हि ॥ त्वयातः सततं विप्र अर्चनीयो दिवाकरः ॥ ६२ ॥

॥ ॥ याज्ञवल्क्य उवाच ॥ ॥ अहो य एष कथितो भवता भास्करो मम ॥ देवता सर्वदेवानां नैतन्मिथ्या प्रजायते ॥ ६३ ॥ तस्य देवस्य माहात्म्यं श्रुतं सुबहुशो मया ॥ देवर्षिसिद्धमनुजैः स्तुतस्येह महात्मनः ॥ ६४ ॥ कः स्तौति दैवतमजं यस्यैतत्सचराचरम् ॥ अक्षयस्याप्रमेयस्य किरणोद्गमनाद्भवेत् ॥ ६५ ॥ दक्षिणात्किरणाद्यस्य संभूतो भगवान्हरिः ॥ वामाद्भवांस्तथा जातः किरणात्किल कंजज ॥ ६६ ॥ लालाटाद्यस्य रुद्रस्तु का तुल्या तेन देवता ॥ तस्य देवस्य कः शक्तः प्रवक्तुं गुणविस्तरम् ॥ ६७ ॥ सोऽहमिच्छामि देवस्य तस्य सर्वात्मनः प्रभोः ॥ श्रोतुमाराधनं येन निस्तरेयं भवार्णवम् ॥ ६८ ॥ केनोपायेन मंत्रैर्वा रहस्यैः परिचर्यया ॥ दानैर्व्रतोपवासैर्वा होमैर्जप्यैरथापि वा ॥ ६९ ॥ आराधितः समस्तानां क्लेशानां हानिदो रविः ॥ शक्यः समाराधयितुं कथं शंस प्रजापते ॥ ७० ॥ धर्मार्थकामसंप्राप्तौ पुरुषाणां विचेष्टताम्[२] ॥ जन्मन्यवितथा सैका क्रिया यार्कं समाश्रिता ॥ ७१ ॥ दुर्गसंसारकांतारमपारमभिधावताम् ॥ एकः सूर्यनमस्कारो मुक्तिमार्गस्य देशकः[३] ॥ ७२ ॥ सोऽहमिच्छामि तं देवं सप्तलोकपरायणम् ॥ कालायनमशेषस्य[४] जगतो ह्यवस्थितम् ॥ ७३ ॥ आराधयितुं गोपालं ग्रहेशममितौजसम्[५] ॥ शंकरं जगतो दीपं स्मृतमात्राघनाशनम् ॥ ७४ ॥ तमनाद्यं सुरश्रेष्ठं प्रसादयितुमिच्छतः ॥ उपदेशप्रदानेन प्रसादं कर्तुमर्हसि ॥ ॥ ७५ ॥ तस्यैतद्वचनं श्रुत्वा भक्तिमुद्वहतो रवौ ॥ जगाम परितोषं स पद्मयोनिर्महातपाः ॥ ७६ ॥

॥ ब्रह्मोवाच ॥ ॥ यत्पृच्छसि द्विजश्रेष्ठ सूर्यस्याराधनं प्रति ॥ व्रतोपवासजप्यादि तदिहैकमनाः शृणु ॥ ७७ ॥ अनादि यत्परं ब्रह्म सर्वहेयविवर्जितम् ॥ व्याप्य

---

[१] सवित्रे–इ० पा० । [२] विचेष्टितम्–इ० पा० । [३] दाता । [४] कालालयमतिश्रेष्ठम्–इ० पा० । [५] आश्रयंतं महौजसम्–इ० पा० ।

त्सर्वभूतेषु स्थितं सदसतः परम् ॥ ७८ ॥ प्रधानपुंसोरनयोर्यतः क्षोभः प्रवर्तते ॥ नित्ययोर्व्यापिनोश्चैव जगदादौ महात्मनोः ॥ ७९ ॥
त्क्षोभकत्वाद्ब्रह्मांडं सृष्टेर्हेतुर्निरंजनः ॥ अहेतुरपि सर्वात्मा जायते परमेश्वरः ॥ ८० ॥ प्रधानपुरुषत्वं च तथैवेश्वरलीलया ॥ समुपैति
तश्चैवं ब्रह्मत्वं छंदतः प्रभुः ॥ ८१ ॥ ततः स्थितौ पालयिता विष्णुत्वं जगतः क्षये ॥ रुद्रत्वं च जगन्नाथः स्वेच्छया कुरुते रविः ॥ ८२ ॥
मेकमक्षरं धाम सर्वदेवनमस्कृतम् ॥ भेदाभेदस्वरूपं तं प्रणिपत्य दिवाकरम् ॥ वर्णयिष्येऽखिलं विप्र तस्यैवाराधनं रवेः ॥ ८३ ॥ गुह्यं चापि
तथा तस्य भास्करस्य शृणुष्व वै ॥ तुष्टेन हि पुरा मह्यं कथितं भास्करेण तु ॥ ८४ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां
ब्राह्मे पर्वणि याज्ञवल्क्यब्रह्मसंवादे सप्तमीकल्पे आदित्यमाहात्म्यवर्णनं नाम षट्षष्टितमोऽध्यायः ॥ ६६ ॥छ॥ ॥ ब्रह्मोवाच ॥ ॥ प्रभाते संस्तुतो
देवो मूर्तिहेतोर्मया पुरा ॥ यजंतं चापरं देवं भक्तिनम्रं महामतिः ॥ १ ॥ प्रत्यक्षत्वमथो गत्वा रहस्यं प्रोक्तवान्मम ॥ अहं च कृतवान्प्रश्नं दृष्ट्वा
प्रत्यक्षतो रविम् ॥ २ ॥ वेदेषु[2] च पुराणेषु सांगोपांगेषु गीयसे ॥ त्वमजः शाश्वतो धाता महाभूतमनुत्तमम् ॥ ३ ॥ प्रतिष्ठितं भूतभव्यं त्वयि सर्व
मिदं जगत् ॥ चत्वारो ह्याश्रमा देव सर्वे गार्हस्थ्यमूलकाः ॥ ४ ॥ यजंते त्वामहरहर्नानामूर्तिंसमाश्रिताः ॥ पिता माता हि सर्वस्य दैवतं त्वं हि
शाश्वतम् ॥ ५ ॥ यजसे चैव कं देवमेवं चापि न विद्महे ॥ कथ्यतां मम देवेश परं कौतूहलं हि मे ॥ ६ ॥ इत्थं मयोक्तो भगवानिदं वचनमब्र
वीत् ॥ अवाच्यमेतद्वक्तव्यमात्मगुह्यं सनातनम् ॥७॥ तव भक्तिमतो ब्रह्मन्वक्ष्यामीह यथातथम् ॥ यतः सूक्ष्ममविज्ञेयमव्यक्तमचलं ध्रुवम् ॥ ८ ॥
इंद्रियैरिंद्रियार्थैश्च सर्वभूतैश्च वर्जितम् ॥ स ह्यंतरात्मा भूतानां क्षेत्रज्ञश्चेति कथ्यते॥९॥ त्रिगुणव्यतिरिक्तोऽसौ पुरुषश्चेति कथ्यते॥हिरण्यगर्भो भग
वान्सैव बुद्धिरिति स्मृतः ॥१०॥ महानिति च योगेषु प्रधानश्चेति कथ्यते ॥ सांख्ये[6] च पठ्यते शास्त्रे नामभिर्बहुभिः सदा ॥११॥ विश्वगो विश्व
भूतश्च विश्वात्मा विश्वसभवः ॥ धृतं चैवात्मकं येन इदं त्रैलोक्यमात्मना ॥ १२ ॥ अशरीरः शरीरेषु लिप्यते न च कर्मभिः ॥ ममांतरात्मा तव
च ये चान्ये देहसंज्ञकाः ॥ १३ ॥ सर्वेषां सांक्षिभूतोसौ न करोति न लिप्यते ॥ सगुणो निर्गुणो विष्णुर्ज्ञानगम्यो ह्यसौ स्मृतः ॥ १४ ॥ सर्वतः
पाणिपादोऽसौ सर्वतोऽक्षिशिरोमुखः ॥ सर्वतः श्रुतियुक्तोसौ सर्वमावृत्त्य तिष्ठति ॥ १५ ॥ विश्वमूर्धा विश्वभुजो विश्वपादाक्षिनासिकः ॥ एकश्च

---

१ वर्तयिष्ये–इ० पा० । २ इतिहासपुराणेषु––इ० पा० । ३ महारूपम्–इ० पा० । ४ नानावृत्तीरुपाश्रिताः–इ० पा० । ५ स च–इ० पा० । ६ स वेदे पठ्यते शास्त्रे मुनिभिर्बहुभिः सदा–इ०पा० ।
७ विश्वभावनः–इ० पा० । ८ शक्तिभूतः–इ० पा० । ९ विश्वः–इ०पा० । १० विश्वमूर्तिः–इ० पा० ।

रति क्षेत्रेषु स्वैरचारी यथासुखम् ॥ १६ ॥ क्षेत्राण्यस्य शरीराणि बीजं चापि शुभाशुभम् ॥ तानि वेत्ति स योगात्मा अतः क्षेत्रज्ञ उच्यते ॥ अव्यक्तके पुरे शेते तेनासौ पुरुषः स्मृतः ॥ १७ ॥ विश्वं बहुविधं ज्ञेयं स च सर्वत्र विद्यते ॥ तस्मात्स बहुरूपत्वाद्विश्वरूप इति स्मृतः ॥ १८ ॥ महापुरुषशब्दं हि बिभर्त्येष सनातनः[1] ॥ स तु वै विक्रियापन्नः सृजत्यात्मानमात्मना ॥ १९ ॥ आकाशात्पतितं तोयं याति स्वाद्वन्तरं यथा ॥ भूमे रसविशेषेण तथा गुणवशात्तु सः ॥२०॥ एक एव यथा वयुर्देहे तिष्ठति पंचधा ॥ एकत्वं च पृथक्त्वं च तथा तस्य न संशयः ॥२१॥ स्थानांतरविशेषेण यथाग्निर्लभते पराम् ॥ संज्ञां दावाग्निकाद्येषु तथा देवो[2] ह्यसौ स्मृतः ॥२२॥ यथा दीपसहस्राणि दीप एकः प्रसूयते ॥ तथा रूपसहस्राणि स एवैकः प्रसूयते ॥ २३ ॥ स यदा बुध्यतेत्मानं तदा भवति केवलः ॥ एकत्वं प्रलये चास्य बहुत्वं स्यात्प्रवर्तने ॥ २४ ॥ नित्यं हि नास्ति जगति भूतं स्थावरजंगमम् ॥ ऋते[3] तमेकमीशानं पुरुषं बीजसंज्ञितम् ॥ २५ ॥ अक्षयश्चाप्रमेयश्च सर्वगश्च स उच्यते ॥ तस्मादव्यक्तमुत्पन्नं त्रिगुणं सर्वकारणम् ॥ २६ ॥ अव्यक्ताव्यक्तभावस्था या सा प्रकृतिरुच्यते ॥ तां योनिं ब्रह्मणो विद्धि योसौ सदसदात्मकः ॥ २७ ॥ नास्ति तस्मात्परो ह्यन्यः स पिता स प्रजापतिः ॥ आत्मा मम स विज्ञेयस्ततस्तं पूजयाम्यहम् ॥ २८ ॥ स्वर्गताश्चापि ये केचित्तं नमस्यंति देहिनः ॥ ते तत्प्रसादाद्गच्छंति तेनादिष्टाः[4] परां गतिम् ॥२९॥ तं देवाश्चासुराश्चैव नानामतसमाश्रिताः[5] ॥ भक्त्या संपूजयंत्याद्यं गतिं चैषां ददाति सः ॥३०॥ स हि सर्वगतश्चैव निर्गुणश्चापि कथ्यते ॥ एवं ज्ञात्वा तमात्मानं पूजयामि सनातनम् ॥ भास्करं देवदेवेशं सर्वभूतेशमच्युतम् ॥३१॥ ॥ ब्रह्मोवाच ॥ ॥ इत्युक्तवान्पुरा पृष्टो मया देवो दिवाकरः॥पूजय त्वं महात्मानं तपंतं विपुलं तपः॥३२॥इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि ब्रह्मयाज्ञवल्क्यसंवादे सप्तमीकल्पे सूर्यमहिमवर्णनं नाम सप्तषष्टितमोऽध्यायः ॥ ६७ ॥ ॥ब्रह्मोवाच॥ ॥ वच्मि ते परमं देवं सर्वदेवैश्च पूजितम् ॥ आराधयंति यं देवं ब्रह्मविष्णुमहेश्वराः ॥ १ ॥ पद्माकृतिं सदा ब्रह्मा नलिनैर्गुग्गुलेन तु ॥ व्योमरूपं सदा देवं महादेवोर्चंते रविम् ॥ २ ॥ जातिपुष्पैर्द्विजश्रेष्ठ धूपेन विजयेन तु ॥ वृषणं सिह्लकं विप्र श्रीखण्डमगरुस्तथा ॥ ३ ॥ कर्पूरं च तथा मुस्ता शर्करा सत्वचा द्विज ॥ इत्येष विजयो धूपः स्वयं देवेन निर्मितः ॥ ४ ॥ केशवश्चक्ररूपं तु सदा संपूजयेद्रविम् ॥ नीलोत्पलदलश्यामो नीलोत्पलकदंबकैः॥ ५ ॥ धूपेनागुरुसंज्ञेन भक्तिश्रद्धासमन्वितः ॥ मया स पृष्टो देवेशस्तस्यैवाराधनाय वै ॥६॥ कानि पुष्पाणि चेष्टानि सदा भास्करपूजने ॥ तेन चोक्तानि

---

[1] एकं सनातनम्–इ० पा० । [2] देवेष्वसौ स्मृतः–इ० पा० । [3] तं विहायैकमीशानम्–इ० पा० । [4] आदिष्टाम्–इ० पा० । [5] नानामतमयस्थिताः–इ० पा० ।

पुष्पाणि स्वयं तानि निबोध मे ॥७॥ मल्लिकायास्तु कुसुमैर्भोगवाञ्जायते नरः ॥ सौभाग्यं पुंडरीकैश्च भजत्येव च शाश्वतम् ॥८॥ गन्ध[1]कुटजकैः
पुष्पैः परमैश्वर्यमश्नुते ॥ भवत्यक्षयमत्यन्तं नित्यमर्चयतो रविम् ॥९॥ मन्दारपुष्पैः पूजा तु सर्व[2]कुष्ठविनाशिनी ॥ बिल्वपत्रैश्च कुसुमैर्महतीं श्रियम
श्नुते ॥१०॥ अर्कस्रजा भवत्यर्थं सर्वकामफलप्रदः ॥ प्रदद्याद्रूपिणीं कन्यामर्चितो बकुलस्रजा ॥११॥ किंशुकैरर्चितो देवो न पीडयति भास्करः ॥
पूजितोऽगस्त्यकुसुमैःरानुकूल्यं प्रयच्छति ॥ १२ ॥ करवीरैस्तु विप्रेन्द्र सूर्यस्यानुचरो भवेत् ॥ तथा मु[3]द्गरपुष्पैश्च समभ्यर्च्य दिवाकरम् ॥ १३ ॥
हंसयुक्तेन यानेन रवेः सालोक्यतां व्रजेत् ॥ शतपुष्पसहस्रैस्तु पूषसालोक्यतां व्रजेत् ॥ बकपुष्पैर्द्विजश्रेष्ठ याति भानु[4]सलोकताम् ॥ १४ ॥ चतुः
समेन गन्धेन समभ्यर्च्य दिवाकरम् ॥ पञ्चभूतालयस्थानमाप्नुयान्नात्र संशयः ॥१५॥ देवागारं तु संमार्ज्य भक्त्या यस्तु प्रलेपयेत् ॥ स रोगान्मु
च्यते क्षिप्रं द्रव्यलाभं च विन्दति ॥ १६ ॥ तस्य चायतनं भक्त्या गैरिकेणोपलेपयेत् ॥ प्राप्नुयान्महतीं लक्ष्मीं रोगैश्चापि प्रमुच्यते ॥ १७ ॥
अष्टादशेह कुष्ठानि ये चान्ये व्याधयो नृणाम् ॥ प्रलयं यांति ते सर्वे मृदा यद्युपलेपयेत् ॥ १८॥ विलेपनानां सर्वेषां रक्तचन्दनमुत्तमम् ॥ पुष्पा
णां करवीराणि प्रशस्तानि प्रचक्षते ॥ १९ ॥ नातः परतरं किंचिद्भास्वतस्तुष्टिकारकम् ॥ किं तस्य न भवेल्लोके यस्त्वेभिः स्वर्चयेद्रविम् ॥ २० ॥
करवीरैः पूजयेद्यो भास्करं श्रद्धयान्वितः ॥ सर्वकामसमृद्धोऽसौ सूर्यकाममवाप्नुयात् ॥ २१ ॥ विले[5]प्यायतनं यस्तु कुर्यान्मण्डलकं शुभम् ॥ स
सूर्यलोकमासाद्य मोदते शाश्वतीः समाः ॥ २२ ॥ एकेनास्य भवेदर्थो द्वाभ्यामारोग्यमश्नुते ॥ त्रिभिः सन्तत्यविच्छिन्ना चतुर्भिर्भा[6]र्गवीं लभेत् ॥
॥ २३ ॥ पञ्चभिर्विपुलं धान्यं षड्भिरायुर्बलं यशः ॥ सप्तमंडलकारी स्यान्मडलाधिपतिर्नरः ॥ २४ ॥ आयुर्धनसुतैर्युक्तः सूर्यलोके महीयते ॥
घृतप्रदीपदानेन चक्षु[7]ष्माञ्जायते नरः ॥ २५ ॥ कटुतैलप्रदानेन स शत्रूञ्जयते नरः ॥ तिलतैलप्रदानेन सूयलोके महीयते ॥ २६ ॥ म[8]धूकतैल
दानेन सौभाग्यं परमं व्रजेत् ॥ संपूज्य विधिवद्देवं पुष्पधूपादिभिर्बुधः ॥ २७ ॥ यथाशक्त्या ततः पश्चान्नैवेद्यं भक्तितो न्यसेत् ॥ पुष्पाणां प्रवरा
जाती धूपानां विजयः परः ॥ २८ ॥ गन्धानां कुंकुमं श्रेष्ठं लेपानां रक्तचन्दनम् ॥ दीपदाने घृतं श्रेष्ठं नैवेद्ये मोदकः परः ॥ २९ ॥ एतैस्तु
ष्यति देवेशः सान्निध्यं चाधिगच्छति ॥ एवं संपूज्य विधिवत्कृत्वा चापि प्रदक्षिणम् ॥ ३० ॥ प्रणम्य शिरसा देवं देवदेवं दिवाकरम् ॥ सुखा

---

[1] सुगन्धकुब्जकैः—इ० पा० । [2] सर्वकष्टविनाशिनी—इ० पा० । [3] कुन्दुरपुष्पैश्च—इ० पा० । [4] भीमसलोकताम्—इ० पा० । [5] उपलेप्यालयं यस्तु—इ० पा० । [6] भार्गवीं जामदग्न्योपार्जितत्वात्पृथ्वीमित्यर्थः । वस्तुतस्तु—लक्ष्मीमित्यर्थ एव ज्यायान्, पुराणेषु तस्यां भृगोरुत्पत्तिवर्णनात् । [7] चायुष्मान्—इ० पा० । [8] मधूकतैलदीपेन भोगभाग्यपरं सुखम्—इ० पा० ।

सीनस्ततः पश्येद्रवेरभिमुखे स्थितः ॥ ३१ ॥ एकं सिद्धाथकं कृत्वा हस्ते पानीयसंयुतम् ॥ कामं यथेष्टं हृदये कृत्वा तं वांछितं नरः ॥ ३२ ॥ पिबेत्सतोयं तं विप्र अस्पृष्टं दशनैः सकृत् ॥ द्वितीयायां तु सप्तम्यां द्वौ गृहीत्वा तु सुव्रत ॥ ३३ ॥ तृतीयायां तु सप्तम्यां ग्रहीतव्यास्त्रयोऽपि च ॥ ज्ञेयाश्चतुर्थ्यां चत्वारः पञ्चम्यां पञ्च एव हि ॥ ३४ ॥ षट् पिबेच्चापि षष्ठ्यां तु इतीयं वैदिकी श्रुतिः ॥ सप्तम्यां सप्तमायां तु सप्त चैव पिबेन्नरः ॥ ३५ ॥ आदौ प्रभृति विज्ञेयो मन्त्रोऽयमभिमन्त्रणे ॥ सिद्धार्थकस्त्वं हि लोके सर्वत्र श्रूयसे यथा ॥ तथा मामपि सिद्धार्थमर्थतः कुरुतां रविः ॥ ३६ ॥ ततो हविरुपस्पृश्य जपं कुर्याद्यथेप्सितम् ॥ हुताशनं च जुहुयाद्विधिदृष्टेन कर्मणा ॥३७॥ एवमेव पराः कार्याः सप्तम्यः सप्त सर्वदा ॥ एकात्प्रभृति कार्या सा सर्वदोदकसप्तमी ॥ ३८ ॥ एकं तोयेन सहितं द्वौ चापि घृतसंयुतौ ॥ त्रींस्तथा मधुना सार्धं दध्ना चतुर एव च ॥ ३९ ॥ युक्तान्नपयसा पञ्च षट् च गोमयसंयुतान् ॥ पञ्चगव्येन वै सप्त पिबेत्सिद्धार्थकान्द्विज ॥ ४० ॥ अनेन विधिना यस्तु कुर्यात्सर्षपसप्तमीम् ॥ बहुपुत्रो बहुधनः सिद्धार्थश्चापि सर्वदा ॥ ४१ ॥ इह लोके नरो विप्र प्रेत्य याति विभावसुम् ॥ तस्मात्संपूजयेद्देवं विधिनानेन भास्करम् ॥ ४२ ॥ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि सप्तमीकल्पे सिद्धार्थसप्तमीव्रतवर्णनं नामाष्टषष्टितमोऽध्यायः ॥ ६८ ॥ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ सप्तम्यामुषितो विप्रः स्वप्नदर्शनमुच्यते ॥ स्वप्ने दृष्टे च सप्तम्यां पुरुषो नियतव्रतः ॥ १ ॥ समाप्य विधिवत्सर्वं जपहोमादिकं क्रमात् ॥ पूजयित्वा दिनेशं तु यथाविभवमात्मनः ॥ २ ॥ ततः शयीत शयने देवदेवं विचिंतयन् ॥ संप्रसुप्तो यदा पश्येदुदयंतं दिवाकरम् ॥ ३ ॥ शक्रध्वजं तथा चंद्रं तस्य सर्वाः समृद्धयः ॥ दृश्यं जनं तथा शंक्तिं स्रग्विगोवेणुनिस्वनाः ॥ ४ ॥ श्वेताब्जचामरादर्शकनकासिसुतोद्भवम् ॥ रुधिरस्य स्रुतिं सेकं पानं[1] चैश्वर्यकारम् ॥ ५ ॥ श्वेतायाः पंचपूताया दर्शनं वृद्धिकारकम् ॥ प्रजापतेर्घृताक्तस्य दर्शनं पुत्रदं स्मृतम् ॥ ६ ॥ शस्तवृक्षाभिरोहश्च क्षिप्रमैश्वर्यकारकः ॥ दोहनं महिषीसिंहीगोधेनूनां स्वके मुखे ॥ ७ ॥ धनुषां च शराणां च नाभौ च द्रुतनिर्गतिः ॥ अभिहन्यात्स्वयं खादेत्सिंहान्गा भुजगांस्तथा ॥ ८ ॥ [2]स्वांगशीर्षं हुतवहे तस्य श्रीरग्रतः स्थिता ॥ राजते हैमने पात्रे यो भुंक्ते पायसं द्विजः ॥ ९ ॥ पद्मपत्रे यथा विप्रस्[3]तस्य जंतोर्बलं भवेत् ॥ द्यूते वादेथ वा युद्धे विजयो हि सुखावहः ॥ १० ॥ अग्नेस्तु ग्रसनं विप्र आग्नेयं वृद्धिकारकम् ॥ गात्रस्य ज्वलनं विप्र शिरोवेधश्च भूतये॥११॥

---

[1] शक्तम्–इ० पा०। [2] आशु सीमागतश्चैव–इ० पा०। [3] ततश्चन्द्रोपमो भवेत्–इ० पा०।

माल्यांबराणां[1] शुक्लानां शस्तानां शुक्लपक्षिणाम् ॥ सदा लाभं प्रशंसंति तथा विष्ठानुलेपनम् ॥ १२ ॥ स्वांगस्य कर्तने क्षेपे रथयाने प्रजा
गमः ॥ नानाशिरोबाहुता च हस्तानां कुरुते श्रियम् ॥ १३ ॥ अगम्यागमनं चैव शोकमध्ययनं तथा ॥ देवद्विजजनाचार्यगुरुवृद्धतपस्विनः ॥
॥ १४ ॥ यद्यद्वदंति तत्सर्वं सत्यमेव हि निर्दिशेत् ॥ प्रशस्तदर्शनं चैव अभिषेको नृपश्रियाः ॥ १५ ॥ स्याद्राज्यं शिरश्छेदेन बहुधा स्फुटितेन
तु ॥ रुदितं हर्षसंप्राप्त्यै राज्यं निगडबंधने ॥ १६ ॥ तुरंगं वृषभं पद्मं राजानं श्वेतकुंजरम् ॥ महदैश्वर्यमाप्नोति योभीकश्चाधिरोहति ॥ १७ ॥ ग्रस
मानो ग्रहांस्तारा महीं च परिवर्तयन् ॥ उन्मूलयन्पर्वतांश्च राज्यलाभमवाप्नुयात् ॥ १८ ॥ देहान्निष्क्रांतिरंत्राणां तैर्वा वृक्षस्य वेष्टनम् ॥ पातः
समुद्रसरितामैश्वर्याणि सुखानि च ॥१९॥ उदधिं सरितं वापि तीर्त्वा पारं प्रयाति च ॥ अद्रिं लंघयतश्चापि भवंत्यर्थजयायुषः ॥२०॥ उज्ज्वला
स्त्री विशेदंकमाशीर्वादपराः स्त्रियः ॥ भवत्यर्थागमः शीघ्रं कृमिभिर्यदि भक्ष्यते ॥ २१ ॥ स्वप्ने स्वप्न इति ज्ञातं दृष्टप्रकथनं तथा ॥ मंगलानां
च सर्वेषां शुभं दर्शनमेव च ॥ २२ ॥ संयोगश्चैव मंगल्यैरारोग्यधनकारकः ॥ ऐश्वर्यराज्यलाभाय यस्मिन्स्वप्न उदाहृतः ॥ २३ ॥ तैर्दृष्टै रोगि
णो रोगान्मुच्यंते नात्र संशयः ॥ न स्वप्नं शोभनं दृष्ट्वा स्वप्यात्प्रातश्च कीर्तयेत् ॥ राजभोजकविप्रेभ्यः शुचिभ्यश्च शुचिर्नरः ॥ २४ ॥
इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि सप्तमीकल्पे स्वप्नदर्शनवर्णनं नामैकोनसप्ततितमोऽध्यायः ॥ ६९ ॥ छ ॥
॥ ब्रह्मोवाच ॥ ॥ ततो मध्याह्नसमये स्नातः प्रयतमानसः ॥ तथैव देवान्विधिवत्पूजयित्वा यथासुखम्[2] ॥ १ ॥ सम्यक्कृतजपो मौनी नरो हुत
हुताशनः ॥ निष्क्रम्य देवायतनाद्भोजकान्भोजयेत्ततः[3] ॥ २ ॥ तथा पुराणविदुष इतिहासविदो द्विजान् ॥ तथा वेदविदश्चैव दिव्यान्भौमांश्च
सुव्रत ॥ ३ ॥ रक्तानि वस्त्राणि तथा च गावः सुगंधमाल्यादि हविष्यमन्नम् ॥ पयस्विनी चाप्यथ भोजकाय देया तथान्यत्प्रियमात्मनो यत् ॥
॥ ४ ॥ भवेदलाभो यदि भोजकानां विप्रास्तदार्हंति जयोपजीविनः ॥ ये मंत्रविद्ब्राह्मणपाठकाश्च ये येऽपि सामाध्ययनेषु युक्ताः ॥ ५ ॥ प्रथमं
भोजका भोज्याः पुराणविदुषैः[4] सह ॥ तेषामृते मंत्रविदस्तथा वेदविदो द्विजाः ॥ ६ ॥ कृत्वैवं सप्तमीः सप्त नरो भक्त्या समन्वितः ॥ श्रद्धा
नोऽनसूयश्च अनंतं प्राप्नुयात्सुखम्[5] ॥७॥ दशानामश्वमेधानां कृतानां यत्फलं लभेत् ॥ तत्फलं सप्तमीः सप्त कृत्वा प्राप्नोति मानवः ॥८॥ दुष्प्रापं
नास्ति तल्लोके अनया यन्न लभ्यते ॥ न च रोगोस्त्यसौ लोके एनया यो न शाम्यति ॥ ९ ॥ कुष्ठानि चापि सर्वाणि दुरुच्छेद्यान्यपि ध्रुवम् ॥

---

[1] सुरावारणशल्यानां वस्त्राणां युक्तपक्षिणाम्–इ० पा० । [2] दिवाकरम्–इ० पा० । [3] नरः–इ० पा० । [4] आर्षोऽयं पाठः सर्वेषु पुस्तकेषूपलभ्यते । [5] फलम्—इ० पा० ।

अपयांति यथा नागा गरुडस्य भयार्दिताः ॥ १० ॥ व्रतनियमतपोभिः सप्तमीः सप्त एवं विधिवदिह हि कृत्वा मानवो धर्मशीलः ॥ श्रुतधनसुतभाग्यारोग्यपुण्यैरुपेतो व्रजति तदनुलोकं शाश्वतं तिग्मरश्मेः ॥ ११ ॥ इमं विधिं द्विजश्रेष्ठ श्रुत्वा कृत्वा च मानवः ॥ सहस्ररश्मिं स विशेन्नात्र कार्या विचारणा ॥ १२ ॥ सुरैर्वा मुनिभिर्वापि पुराणज्ञैरिदं श्रुतम् ॥ सर्वे ते परमात्मानं पूजयंति दिवाकरम् ॥ १३ ॥ इदमाख्यानमार्षेयं यन्मयाभिहितं तव ॥ सूर्यभक्ताय दातव्यं नेत[1]राय कदाचन ॥ १४ ॥ यश्चैतच्छ्रावयेन्नित्यं यश्चैतच्छृणुयान्नरः ॥ स सहस्रार्चिषं देवं प्रविशेन्नात्र संशयः ॥ १५ ॥ मुच्येदार्तस्तथा रोगाच्छ्रुत्वेमामादितः कथाम् ॥ जिज्ञासुर्लभते कामान्[2]भक्तः सूर्यगतिं लभेत् ॥ १६ ॥ क्षेमेण गच्छतेऽध्वानं यस्त्विदं पठतेध्वनि ॥ यो यं प्रार्थयते कामं स तं प्राप्नोति च ध्रुवम् ॥ १७ ॥ एकांतभावोपगत एकांते सुसमाहितः ॥ प्राप्यैतत्परमं गुह्यं भूत्वा सूर्यव्रतो नरः ॥१८॥ प्राप्नोति परमं स्थानं भास्करस्य महात्मनः ॥ लग्नगर्भा प्रमुच्येत गर्भिणी जनयेत्सुतम् ॥१९॥ वंध्या प्रसवमाप्नोति पुत्रपौत्रसमन्वितम् ॥ एवमेतन्ममाख्यातं भास्करेणामितौजसा ॥ मयापि तव माख्यातं भक्त्या भानोरिदं द्विज ॥ २० ॥ पूजनीयस्त्वया भानुः सर्वपापोपशांतये ॥ स हि धांता विधाता च सर्वस्य जगतो गुरुः ॥ २१ ॥ उद्यन्यः कुरुते नित्यं जगद्वितिमिरं करैः ॥ द्वादशात्मा स देवेशः प्रीयतां तेऽदितेः सुतः ॥ २२ ॥ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि सप्तमीकल्पे आदित्यमाहात्म्ये सर्षपसप्तमीव्रर्णनं नाम सप्ततितमोऽध्यायः ॥ ७० ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ नामभिः संस्तुतो देवो यैरर्कः परितुष्यति ॥ तानि ते कीर्तयाम्येष यथावदनुपूर्वशः ॥ १ ॥ नमः सूर्याय नित्याय रवये कार्यभानवे ॥ भास्कराय मतंगाय मार्तंडाय विवस्वते ॥ २ ॥ आदित्यायादिदेवाय नमस्ते रश्मिमालिने ॥ दिवाकराय दीप्ताय अग्नये मिहिराय च ॥ ३ ॥ प्रभाकराय मित्राय नमस्तेऽदितिसंभव ॥ नमो गोपतये नि[3]त्यं दिशां च पतये नमः ॥ ४ ॥ नमो धात्रे विधात्रे च अर्यम्णे वरुणाय च ॥ पूष्णे भगाय मित्राय पर्जन्यायांशवे नमः ॥ ५ ॥ नमो हितकृते नित्यं धर्माय तपनाय च ॥ ह[4]रये हरिताश्वाय विश्वस्य पतये नमः ॥ ६ ॥ विष्णवे ब्रह्मणे नित्यं त्र्यंबकाय तथात्मने ॥ नमस्ते सप्तलोकेश नमस्ते सप्तसप्तये ॥ ७ ॥ एकस्मै हि नमस्तुभ्यमेकचक्ररथाय च ॥ ज्योतिषां पतये नित्यं सर्वप्राणभृते नमः ॥८॥ हिताय सर्वभूतानां शिवायार्तिहराय च ॥ नमः पद्मप्रबोधाय नमो वेदां[5]दिमूर्तये ॥ ९ ॥ कां[6]धिजाय नमस्तुभ्यं नमस्तारासुताय च ॥ भीमजाय नमस्तुभ्यं पावकाय च वै नमः ॥ १० ॥ धि[7]षणाय नमो

---

१ नाभक्ताय-इ० पा० । २ भक्त्या स्वर्गगतिं लभेत्-इ० पा० । ३ तुभ्यम्-इ० पा० । ४ हराय-इ० पा० । ५ द्वादशमूर्तये-इ० पा० । ६ भीमजाय-इ०, कविजाय-इ० च पा० । ७ विकटाय—इ० पा० ।

नित्यं नमः कृष्णाय नित्यदा ॥ नमोऽस्त्वदितिपुत्राय नमो लक्ष्याय नित्यशः ॥११॥ एतान्यादित्यनामानि मया प्रोक्तानि वै पुरा ॥ आरा
धनाय देवस्य सर्वकामेन सुव्रत ॥ १२ ॥ सायं प्रातः शुचिर्भूत्वा यः पठेत्सुसमाहितः ॥ स प्राप्नोत्यखिलान्कामान्यथाहं प्राप्तवान्पुरा ॥ १३ ॥
प्रसादात्तस्य देवस्य भास्करस्य महात्मनः ॥ श्रीकामः श्रियमाप्नोति धर्मार्थी धर्ममाप्नुयात् ॥ १४ ॥ आतुरो मुच्यते रोगाद्बद्धो मुच्येत बन्ध
नात् ॥ राज्यार्थी राज्यमप्नोति कामार्थी काममाप्नुयात् ॥ १५ ॥ एतज्जप्यं रहस्यं च संध्योपासनमेव च ॥ एतेन जपमात्रेण नरः पापात्प्रमुच्यते ॥
॥ १६ ॥ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि सप्तमीकल्पे ब्रह्मप्रोक्तसूर्यनामवर्णनं नामैकसप्ततितमो
ऽध्यायः ॥ ७१ ॥ छ ॥ ॥ सुमंतुरुवाच ॥ ॥ इत्थं ब्रह्मवचो योगी श्रुत्वा राजन्दिवाकरम् ॥ व्योमरूपं समाराध्य गतः सूर्यसलोकताम् ॥१॥
तथा त्वमपि राजेंद्र पूजयित्वा विभावसुम् ॥ गमिष्यसि परं स्थानं देवानामपि दुर्लभम् ॥ २ ॥ ॥ शतानीक उवाच ॥ ॥ आद्यं स्थानं रवेः कुत्र
जंबूद्वीपे महामुने ॥ यत्र पूजां विधानोक्तां प्रतिगृह्णात्यसौ रविः ॥३॥ ॥ सुमंतुरुवाच॥ ॥स्थानानि त्रीणि देवस्य द्वीपेऽस्मिन्भास्क[1]रस्य तु ॥ पूर्वं
मिं[2]द्रवनं नाम तथा मुंडीरमुच्यते ॥ ४ ॥ का[3]लप्रियं तृतीयं तु त्रिषु लोकेषु विश्रुतम् ॥ तथान्यदपि ते वच्मि यत्पुरा ब्रह्मणोदितम् ॥५॥ चंद्रभागा
तटे नाम्ना पुरं यत्सां[4]बसंज्ञितम् ॥ द्वीपेस्मिञ्छाश्वतं स्थानं यत्र सूर्यस्य नित्यता ॥ ६ ॥ प्रीत्या सांबस्य तत्रार्को जनस्यानुग्रहाय च ॥ तत्र
द्वादशभागेन मित्रो मैत्रेण चक्षुषा ॥ ७ ॥ अवलोकञ्जगत्सर्वं श्रेयोऽर्थं तिष्ठ[5]ते सदा ॥ प्रयुक्तां विधिवत्पूजां गृह्णाति भगवान्स्वयम् ॥ ८ ॥
॥ शतानीक उवाच ॥ ॥ [6]कोयं सांबः सुतः कस्य कस्य प्रीतो दिवाकरः ॥ यस्य चायं सहस्रांशुर्वरदः पु[7]ण्यकर्मणः ॥ ९ ॥ ॥ सुमंतुरुवाच ॥ ॥
य एते द्वादशादित्या विराजंते महाबलाः ॥ तेषां यो विष्णुसंज्ञस्तु सर्वलोकेषु विश्रुतः ॥ १० ॥ इहासौ वासुदेवत्वमवाप भगवान्विभुः ॥ तस्मा
त्सांबः सुतो जज्ञे जांबवत्यां महाबलः ॥ ११ ॥ स तु पित्रा भृशं शप्तः कुष्ठरोगमवाप्तवान् ॥ तेनायं स्थापितः सूर्यः स्वनाम्ना च[8]पुरं कृतम् ॥
॥ १२ ॥ ॥ शतानीक उवाच ॥ ॥ शप्तः कस्मिन्निमित्तेऽसौ पित्रा चैवात्मसंभवः ॥ नाल्पं हि कारणं विप्र येनासौ शप्तवान्सुतम् ॥ १३ ॥
॥ सुमंतुरुवाच ॥ ॥ शृणुष्वावहितो राजंस्तस्य यच्छापकारणम् ॥ दुर्वासा नाम भगवान्रुद्रस्यांशसमुद्भवः ॥ १४ ॥ अटमानः स भगवांस्त्रीँल्लोका

---

[1] भारतस्य तु—इ० पा० । [2] मित्रबलम्—इ०, मित्रवनम्—इ० च० पा० । [3] कोलप्रियम्—इ० पा० । [4] सर्वत्र सांबशब्दे शांब इति तालव्यादिः पा० । [5] विद्यते—इ० पा० । [6] कोऽयं सांबः कुतस्तस्य यस्य नाम्ना रवेः पुरम्—इ० पा० । [7] पृथुकर्मणः—इ० पा० । [8] सांबः स्वयंभुवा—इ० पा० ।

न्प्रचचार ह ॥ अथ प्राप्तो द्वारवतीं मधुसंज्ञोचितां पुरा ॥ १५ ॥ तमागतमृषिं दृष्ट्वा सांबो रूपेण गर्वितः ॥ पिंगाक्षं क्षुधितं[१] रूक्षं विरूपं सुकृशं
तथा ॥ १६ ॥ अनुकारास्पदं चक्रे दर्शने गमने तथा ॥ दृष्ट्वा तस्य मुखं सांबो वक्रं चक्रे तथात्मनः ॥ १७ ॥ मुखं कुरुकुलश्रेष्ठ गर्वितो
यौवनेन तु ॥ अथ क्रुद्धो महातेजा दुर्वासा ऋषिसत्तमः ॥ १८ ॥ सांबं चोवाच भगवांन्विधुन्वन्मुखमात्मनः ॥ यस्माद्विरूपं मां दृष्ट्वा
स्वात्मरूपेण गर्वितः ॥ १९ ॥ गमने दर्शने मह्यमनुकारं समाचरः ॥ तस्मात्तु कुष्ठरोगित्वमचिरात्त्वं गमिष्यसि ॥ २० ॥ ॥ इति श्रीभविष्ये
महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि सप्तमीकल्पे सांबाय दुर्वाससा शापविसर्जनं नाम द्विसप्ततितमोऽध्यायः ॥ ७२ ॥ छ ॥
॥ ॥ सुमंतुरुवाच ॥ ॥ एतस्मिन्नेव काले तु नारदो भगवानृषिः ॥ ब्रह्मणो मानसः पुत्रस्त्रिषु लोकेषु विश्रुतः ॥ १ ॥ सर्वलोकचरः सोऽथ अट
मानः समंततः ॥ वासुदेवं स वै द्रष्टुं नित्यं द्वारवतीं पुरीम् ॥२॥ आयाति ऋषिभिः सार्धं क्रोधनो मुनिसत्तमः॥अथागच्छति तस्मिंस्तु सर्वे यदु
कुमारकाः ॥ ३ ॥ प्रद्युम्नप्रभृतयो ये प्रह्वाश्चावनताः स्थिताः ॥ अभिवाद्यार्घ्यपाद्याभ्यां पूजां चक्रुः समंततः ॥ ४ ॥ सांबस्त्ववश्यभावित्वात्तस्य
शापस्य कारणम् ॥ अवज्ञां कुरुते नित्यं नारदस्य महात्मनः ॥ ५ ॥ रतः क्रीडासु वै नित्यं रूपयौवनगर्वितः ॥ अविनीतं तु तं दृष्ट्वा चिंतयामास
नारदः ॥ ६ ॥ अस्याहमविनीतस्य करिष्ये विनयं शुभम् ॥ एवं संचिंतयित्वा तु वासुदेवमथाब्रवीत् ॥७॥ ॥ इमाः षोडश साहस्र्यः स्त्रियो याद
वसत्तम ॥ सर्वासां हि सदा सांबे भावो देव समाश्रितः ॥८॥ रूपेणाप्रतिमः सांबो लोकेस्मिन्सचराचरे॥सदा हीच्छंति तांस्तस्य[२] दर्शनं चापि हि
स्त्रियः ॥ ९ ॥ श्रुत्वैवं नारदाद्वाक्यं चिंतयामास केशवः ॥ यदेतन्नारदेनोक्तमन्यदत्र तु किं भवेत् ॥ १० ॥ वचनं श्रूयते लोके चापल्यं स्त्रीषु
विद्यते ॥ श्लोकौ चेमौ पुरा गीतौ चित्तज्ञैर्योषितां द्विजैः ॥ ११ ॥ पौंश्चल्याच्चलचित्तत्वान्नैःस्नेह्याच्च स्वभावतः ॥ रक्षिताः सर्वतो ह्येता विकुर्वन्ति
हि भर्तृषु ॥ १२ ॥ नैता रूपं परीक्षंते नासां वयसि निश्चयः ॥ सुरूपं वा विरूपं वा पुमानित्येव भुंजते ॥ १३ ॥ ॥ सुमंतुरुवाच ॥ ॥ मन
सा चिंतयन्नेव कृष्णो नारदमब्रवीत् ॥ न ह्यहं श्रद्दधाम्येतद्यदेतद्भाषितं त्वया ॥१४॥ ब्रुवाणमेवं देवं तु नारदो वाक्यमब्रवीत्[३]॥ तथाहं तत्करिष्यामि
यथा श्रद्धास्यते भवान् ॥ १५ ॥ एवमुक्त्वा ययौ[४] स्वर्गं नारदस्तु यथागतः ॥ ततः कतिपयाहोभिर्द्वारकां पुनरभ्यगात् ॥ ॥ १६ ॥ तस्मिन्न
हनि देवोऽपि सहान्तःपुरिकैर्जनैः ॥ अनुभूय जलक्रीडां पानमासेवते रहः ॥१७॥ रम्यरैवतकोद्याने[५] नानाद्रुमविभूषिते ॥ सर्वर्तुकुसुमैर्नित्यं वासिते

---

१ जटिलम्—इ० पा० । २ सांबस्य—इ० पा० । ३ प्रत्युवाच ह—इ० पा० । ४ भूयः—इ० पा० । ५ पुण्यरैवतकोद्याने नानारत्नविभूषिते—इ० पा० ।

सर्वकानने ॥१८॥ नानाजलजफुल्लाभिर्दीर्घिकाभिरलंकृते ॥ हंससारससंघुष्टे चक्रवाकोपशोभिते॥१९॥तस्मिन्स रमते देवः स्त्रीभिः परिवृतस्तदा॥
हारनूपुरकेयूररशनाद्यैर्विभूषणैः ॥ २० ॥ भूषितानां वरस्त्रीणां चार्वंगीनां विशेषतः ॥ ताभिः संपीयते पानं शुभगंधान्वितं शुभम् ॥ २१ ॥ एत
स्मिन्नंतरे बुद्धा मद्यपानात्ततः स्त्रियः ॥ उवाच नारदः सांब सांबोत्तिष्ठ कुमारक ॥ २२ ॥ त्वां समाह्वायते देवो न युक्तं स्थातुमत्र ते ॥ तद्वा
क्यार्थमबुद्ध्वैव नारदेनाथ चोदितः ॥ २३ ॥ गत्वा तु सत्वरं सांबः प्रणाममकरोत्[1]प्रभोः ॥ साष्टांगं च हरेः सांबो विधिवद्वल्लभस्य च ॥ २४ ॥
एतस्मिन्नंतरे तत्र यास्तु वै स्वल्पसात्त्विकाः ॥ तं दृष्ट्वा सुंदरं सांबं सर्वाश्चुक्षुभिरे स्त्रियः ॥ २५ ॥ न स दृष्टः पुरा याभिरंतःपुरनि[2]वासिभिः ॥
मद्यदोषात्ततस्तासां स्मृतिलोपात्तथा नृप ॥२६॥ स्वभावतोल्पसत्त्वानां जघनानि विसुस्रुवुः ॥ श्रूयते चाप्ययं श्लोकः पुराणप्रथितः क्षितौ॥२७॥
ब्रह्मचर्येऽपि वर्तन्त्याः साध्व्या ह्यपि च श्रूयते ॥ हृद्यं हि पुरुषं दृष्ट्वा योनिः संक्लिद्यते स्त्रियाः ॥ २८ ॥ लोकेपि दृश्यते ह्येतन्मद्यस्यात्यर्थसेव
नात् ॥ लज्जां मुंचंति निःशंका ह्रीमत्यो ह्यपि हि स्त्रियः ॥ २९ ॥ समांसैर्भोजनैः स्निग्धैः पानैः सीधुसुरासवैः ॥ गंधैर्म[3]नोज्ञैर्वस्त्रैश्च कामः स्त्रीषु
विजृंभते ॥ ३० ॥ [4]सीधुप्रयुक्तं शुक्रेण सततं साधु हीच्छता ॥ मद्यं न पेयमत्यर्थं पुरुषेण विपश्चिता ॥ ३१ ॥ नारदोप्यथ तं सांबं प्रेषयित्वा
त्वरान्वितः ॥ आजगामाथ तत्रैव सांबस्यानुपदेन तु ॥ ३२ ॥ आयांतं ताश्च तं दृष्ट्वा प्रियं सौमनसमृषिम् ॥ सहसैवोत्थिताः सर्वाः स्त्रियस्तं
मदविह्वलाः ३३ ॥ तासामथोत्थितानां तु वासुदेवस्य पश्यतः ॥ भित्त्वा वासांसि शुभ्राणि पत्रेषु पतितानि तु ॥ ३४ ॥ ता दृष्ट्वा तु हरिः
क्रुद्धः सर्वास्ता शप्तवान्स्त्रियः ॥ यस्माद्गतानि चेतांसि मां मुक्त्वान्यत्र च स्त्रियः ॥ ३५ ॥ [5]तस्मात्पतिकृताँल्लोकानायुषोंते न यास्यथ ॥ पति
लोकपरिभ्रष्टाः स्वर्गमार्गात्तथैव च ॥ ३६ ॥ [6]भूत्वा चाशरणा यूयं दस्युहस्तं गमिष्यथ ॥ ३७ ॥ ॥ सुमंतुरुवाच ॥ ॥ शापदोषात्ततस्तस्मात्ताः
स्त्रियः स्वर्गते हरौ ॥ हृताः पांचनदैश्चौरैरर्जुनस्य तु पश्यतः ॥ अल्पसत्त्वास्तु यास्त्वासन्गतास्ता दूषणं स्त्रियः ॥ ३८ ॥ रुक्मिणी सत्यभामा
च तथा जांबवती प्रिया ॥ नैता गता दस्युहस्तं स्वेन सत्त्वेन रक्षिताः ॥ ३९ ॥ शप्त्वैव ताः स्त्रियः कृष्णः सांबमप्यशपत्ततः ॥ यस्मादतीव ते
कांतं रूपं दृष्ट्वा इमाः स्त्रियः ॥४०॥ क्षुब्धाः सर्वा यतस्तस्मात्कुष्ठरोगमवाप्नुहि ॥ तस्य तद्वचनं श्रुत्वा सांबः कृष्णस्य भारत॥४१॥ उवाच प्रहस
न्राजन्संस्मरन्नृषिभाषितम् ॥ अनिमित्तमहं तात भावदोषविवर्जितः ॥ शप्तो न मेत्र वै क्रुद्धो दुर्वासा अन्यथा वदेत् ॥४२॥ ॥ सुमंतुरुवाच ॥ ॥

---

[1] पितुः—इ० पा० । [2] क्लीबभाव आर्षः । [3] माल्यैश्च—इ० पा० । [4] साधु प्रयुक्तम्—इ० पा० । [5] तस्मात्परिहताश्चांते न पेश्यत च मां पुनः—इ० पा० । [6] कृत्वा ह्यविनयं यूयं दस्युहस्तं गमिष्यथ—इ० पा० ।

अस्मिञ्छप्तेऽनिमित्तेऽसौ पित्रा जांबवतीसुतः ॥ प्राप्तवान्कुष्ठरोगित्वं विरूपत्वं च भारत ॥ ४३ ॥ सांबेन पुनरप्येव दुर्वासाः कोपितो मुनिः ॥ तच्छापान्मुसलं जातं कुलं येनास्य घातितम् ॥ ४४ ॥ श्रुत्वा ह्यविनयाद्दोषान्सांबेनाप्तान्क्षमाधिप ॥ नित्यं भाव्यं विनीतेन गुरुदेवद्विजातिषु ॥ ४५ ॥ प्रियं च वाक्यं वक्तव्यं सर्वप्रीतिकरं विभो ॥ किं त्वया न श्रुतौ श्लोकौ यावुक्तौ वेधसा पुरा ॥ [1]शृण्वतो देवदेवस्य व्योमकेशस्य भारत ॥ ४६ ॥ यो धर्मशीलो जितमानरोषो विद्याविनीतो न परोपतापी ॥ स्वदारतुष्टः परदारवर्जितो न तस्य लोके भयमस्ति किंचित् ॥ ४७ ॥ न तथा शीतलसलिलं न चंदनरसो न शीतला छाया ॥ प्रह्लादयति च पुरुषं यथा मधुरभाषिणी वाणी ॥ ४८ ॥ ततः शापाभिभूतेन सम्यगाराध्य भास्करम् ॥ सांबेनाप्तं तथारोग्यं [2]रूपं च परमं पुनः ॥ ४९ ॥ रूपमाप्य तथाऽऽरोग्यं भास्कराद्धरिसूनुना ॥ निवेशितो रविर्भक्त्या स्वनाम्ना क्ष्माधिपेश्वर ॥ ५० ॥ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि सप्तमीकल्पे सांबकृतसूर्याराधनवर्णनं नाम त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥ ॥छ॥ ॥ शतानीक उवाच ॥ ॥ स्थापितो यदि सांबेन सूर्यश्चंद्रसरित्तटे ॥ तस्मान्नाद्यमिदं स्थानं यथैतद्भाषते भवान् ॥१॥ ॥ सुमंतुरुवाच ॥ ॥ आद्यं स्थानमिदं भानोः पश्चात्सांबेन भारत ॥ विस्तरेणास्य चाद्यस्य कथ्यमानं निबोध मे ॥ २ ॥ अत्राद्यो लोकनाथोऽसौ रश्मिमाली जगत्पतिः ॥ मित्रत्वे च स्थितो देवस्तपस्तेपे पुरा नृप ॥ ३ ॥ अनादिनिधनो ब्रह्मा नित्यश्चाक्षय एव च ॥ सृष्ट्वा प्रजापतीन्ब्रह्मा सृष्ट्वा च विविधाः प्रजाः॥४॥ससर्ज मुखतो देवं पूर्वमंबुजसन्निभम् ॥ कंजजस्तं ततो देवं वक्षस्तो निर्ममे नृप ॥ ५ ॥ ललाटात्कुरुशार्दूल नीरजाक्षं दिगं[3]बरम् ॥ ऋभवः पादतः सर्वे सृष्टास्तेन महात्मना ॥६॥ ततः शतसहस्रांशुरव्यक्तः पुरुषः स्वयम् ॥ कृत्वा द्वादशधात्मानमदित्यामुदपद्यत ॥ ७ ॥ इन्द्रो धाता च पर्जन्यः पूषा त्वष्टार्यमा भगः ॥ विवस्वानंशुर्विष्णुश्च वरुणो मित्र एव च ॥ ८ ॥ एभिर्द्वादशभिस्तेन आदित्येन महात्मना ॥ कृत्स्नं जगदिदं व्याप्तं मूर्तिभिस्तु नराधिप ॥ ९ ॥ तस्य या प्रथमा मूर्तिरादित्यस्येन्द्रसंज्ञिता ॥ स्थिता सा देवराजत्वे दानवासुरनाशिनी ॥ १० ॥ द्वितीया चास्य या मूर्तिर्नाम्ना धातेति कीर्तिता ॥ स्थिता प्रजापतित्वे सा विधात्री सृजते प्रजाः ॥ ११ ॥ तृतीया तस्य या मूर्तिः पर्जन्य इति विश्रुता ॥ करेष्वेव स्थिता सा तु वर्षत्यमृतमेव हि ॥ १२ ॥ चतुर्थी तस्य या मूर्तिर्नाम्ना पूषेति विश्रु[4]ता ॥ मंत्रेष्ववस्थिता सा तु प्रजाः पुष्णाति भारत ॥ १३ ॥ मूर्तिर्या पंचमी तस्य नाम्ना त्वष्टेति विश्रुता ॥ वनस्पतिषु सा नित्यमोष

---

१ पुरतः—इ० पा० । २ यथाह मधुसूदनः—इ० पा० । ३ दिवाकरम्—इ० पा० । ४ भारत—इ० पा० । ५ नित्यशः—इ० पा० ।

धीषु च वै स्थिता ॥ १४ ॥ षष्ठी मूर्तिस्तु या तस्य अर्यमेति च विश्रुता ॥ प्रजासंवरणार्थं सा पुरेष्वेव स्थिता सदा ॥ १५ ॥ भानोर्या सप्तमी
मूर्तिर्नाम्ना भग इति स्मृता ॥ भूमौ व्यवस्थिता सा तु क्ष्माधरेषु च भारत ॥ १६ ॥ अष्टमी चास्य या मूर्तिर्विवस्वानिति संज्ञिता ॥ अग्नौ व्यव
स्थिता सा तु पंचते[1]ऽन्नं शरीरिणाम् ॥ १७ ॥ नवमी चित्रभानोर्या मूर्तिरंशुरिति स्मृता ॥ वीर चंद्रे स्थिता सा तु आप्याययति वै जगत् ॥१८॥
मूर्तिर्या दशमी तस्य विष्णुरित्यभिधीयते ॥ प्रादुर्भवति सा नित्यं गीर्वाणारिविनाशिनी ॥ १९ ॥ मूर्तिस्त्वेकादशी या तु भानोर्वरुणसंज्ञिता ॥
जीवाययति सा कृत्स्नं जगद्धि समुपाश्रिता ॥ २० ॥ अपां स्थानं समुद्रस्तु वरुणोऽत्र प्रतिष्ठितः ॥ तस्माद्वै प्रोच्यते वीर सागरो वरुणालयः ॥
॥ २१ ॥ मूर्तिर्या द्वादशी भानोर्नामतो मित्रसंज्ञिता ॥ लोकानां सा हितार्थं तु स्थिता चंद्रसरित्तटे ॥२२॥ वायुभक्षा तपस्तेपे युक्ता मैत्रेण चक्षु
षा ॥ अनुगृह्णन्सदा भक्तान्वरैर्नानाविधैः सदा ॥ २३ ॥ एवमाद्यमिदं स्थानं पुण्यं मित्रपदं स्मृतम् ॥ तत्र मित्रः स्थितो यस्मात्तस्मान्मित्रपदं
स्मृतम् ॥ २४ ॥ तयाराध्य महाबाहो सांबेनामिततेजसा ॥ तत्प्रसादात्तदादेशात्प्रतिष्ठा तस्य वै कृता ॥ २५ ॥ आभिर्द्वादशभिस्तेन भास्करेण
महात्मना ॥ कृत्स्नं जगदिदं व्याप्तं मूर्तिभिस्तु नराधिप ॥ २६ ॥ तस्माद्वंद्यो नमस्यश्च द्वादशस्वपि मूर्तिषु ॥ ये नमस्यंति चादित्यं नरा भक्ति
समन्विताः ॥२७॥ ते यास्यंति परं स्थानं[2] तिष्ठेद्यत्रांबुजेश्वरः ॥ इत्येवं द्वादशात्मानमादित्यं पूजयेत्तु यः ॥२८॥ स मुक्तः सर्वपापेभ्यो याति हेलिस
लोकताम्॥२९॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि सप्तमीकल्पे सूर्यद्वादशमूर्तिवर्णनं नाम चतुःसप्ततितमोऽध्यायः॥
॥७४॥ ॥छ॥ ॥ शतानीक उवाच ॥ ॥ कथं सांबः प्रपन्नोऽर्कं केन वा प्रतिपादितः ॥ उग्रं शापं च तं प्राप्य पितरं स किमुक्तवान् ॥ १ ॥ ॥ सुमंतु
रुवाच ॥ ॥ उक्तमेव पुरा वीर यथा शप्तः स यादवः ॥ पित्रा सांबो महाराज हरिणांबुजधारिणा ॥२॥ अथ शापाभिभूतस्तु सांबः पितरमब्रवीत् ॥
[3]विनयावनतो भूत्वा प्रांजलिः शिरसा गतः ॥ ३ ॥ किं मयापकृतं देव येन शप्तोस्म्यहं त्वया ॥ अहं त्वदाज्ञया देव त्वरमाणोत्र आगतः ॥४॥ कस्मान्नि
पातितः शापो मयि तेऽनपकारिणि ॥ न वै जानाम्यहं किंचित्प्रसीद जगतः पते ॥५॥ शापं नियच्छ मे देव प्रसादं कुरु मे प्रभो ॥ कश्मलेनाभिभूतोऽहं
येन मुच्येय किल्बिषात् ॥६॥ तमुवाच ततः कृष्णः सांबं बुद्ध्वा ह्यनागसम् ॥ नाहं पुत्र पुनः शक्तो रोगस्यास्य व्यपोहने ॥७॥ अस्या[4]यं जगतो
नाथो द्वादशात्मा दिवा[5]करः ॥ सहस्ररश्मिरादित्यः शक्तः पुत्र व्यपोहितुम् ॥८॥ ज्ञातं मयाधुना चैव यथा त्वं नारदेन तु॥रोषाद्विसर्जितः पुत्र मत्स

---

[1] देवेषु च–इ० पा० । [2] लोकम्–इ० पा० । [3] चिंतया विनतः–इ० पा० । [4] अहम्–इ० पा० । [5] दिवस्पतिः–इ०, जगत्पतिः–इ० च पा० ।

काशं महात्मना ॥ ९ ॥ तस्मात्तमेव पृच्छ त्वं प्रसाद्य ऋषिसत्तमम् ॥ आख्यास्यति स ते देवं शापं यस्तेऽपनेष्यति ॥१०॥ अथैतत्स पितुर्वाक्यं श्रुत्वा जांबवतीसुतः ॥ दीनः शोक[1]परीतात्मा ततः सञ्चिंत्य भारत ॥११॥ द्वारवत्यां स्थितं विष्णुं कदाचिद्द्रष्टुमागतम् ॥ विनयादुपसंगम्य सांबः पप्रच्छ नारदम् ॥ १२ ॥ भगवन्वेधसः पुत्र सर्वलोकज्ञ सुव्रत ॥ प्रसादं कुरु मे विप्र प्रणतस्य महामते ॥ १३ ॥ येन मे नीरुजं कायं कश्मलं च प्रणश्यति ॥ तं योगं ब्रूहि मे विप्र प्रणतस्यास्य सुव्रत ॥ १४ ॥ ॥ नारद उवाच ॥ ॥ यः स्तुत्यः सर्वदेवानां नमस्यः पूज्य एव च ॥ पूजयित्वाशु तं दे[2]वं ततो व्याधिं प्रहास्यसि ॥ १५ ॥ ॥ सांब उवाच ॥ ॥ कः स्तुत्यः सर्वदेवानां नमस्यः पूज्य एव च ॥ कः सर्वगश्च सर्वत्र शरणं यं व्रजाम्यहम् ॥ १६ ॥ पितृशापानलेनाहं दह्यमानो महामुने ॥ शांत्यर्थमस्य कं देवं श[3]रणं च व्रजाम्यहम् ॥ १७ ॥ एतच्छ्रुत्वा तु सांबस्य वचनं करुणावहम् ॥ हित्वा तु का[4]मजं वीर नारदो वाक्यमब्रवीत् ॥ १८ ॥ स्तुत्यो वंद्यश्च पूज्यश्च नमस्य ईड्य एव च ॥ भास्करो यदुशार्दूल ब्रह्मादीनां सदानघ ॥ १९ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि सांबोपाख्याने सांबं प्रति कृष्णशापे सांबस्य नारदोपसंगमनवर्णनं नाम पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ कदाचित्पर्यटँल्लोकान्सूर्यलोकमहं गतः ॥ तत्र दृष्टो मया सूर्यः सर्वदेवगणैर्वृतः ॥१॥ गंधर्वैरप्सरोभिश्च नागैर्यक्षैश्च राक्षसैः ॥ तत्र गायंति गंधर्वा नृत्यन्त्यप्सरसस्तथा॥२॥ रक्षंत्युद्यतशस्त्रास्तं यक्षराक्षसपन्नगाः ॥ ऋचो यजूंषि सामानि मूर्तिमंतीह सर्वशः ॥ तत्कृतैर्विविधैः स्तोत्रैः स्तुवंति ऋषयो रविम् ॥ ३ ॥ मूर्तिमत्यः स्थितास्तत्र तिस्रः संध्याः शुभाननाः ॥ गृहीतवज्रनाराचाः परिवार्य रविं स्थिताः ॥ ४ ॥ अरुणा वर्णतः पूर्वा मध्यमा चेन्दुसन्निभा ॥ तृतीयाक्ष्मांजसंकाशा[5] संध्या चैव प्रकीर्तिता ॥ ५ ॥ आदित्या वसवो रुद्रा मरुतोथाश्विनौ तथा ॥ त्रिसंध्यं पूजयंत्यर्कं तथान्ये च दिवौकसः ॥ ॥ ६ ॥ ईरयञ्जयशब्दं तु इंद्रस्तत्रैव तिष्ठति ॥ कविस्तु त्र्यंबको देवस्त्रिसंध्यं पूजयंति वै ॥ ७ ॥ दिना[6]दावंबुजाकारं पूजयेदंबुजासनम् ॥ चक्ररूपं तु मध्याह्ने घृतार्चिः पूजयेत्सदा ॥ ८ ॥ पूजयेत्सगणं रात्रौ विपुलाज्यस्वरूपिणम् ॥ रविं भक्त्या सदा देवं कँ[7]जार्धकृतशेखरः ॥ ९ ॥ सारथ्यं कुरुते तस्य पतगस्या[8]ग्रजः सदा ॥ वहमानो रथं दिव्यं कालावयवनिर्मितम् ॥१०॥ हरितैः सप्तभिर्युक्तं छन्दोभिर्वाजिरूपिभिः ॥११॥ द्वे भार्ये पार्श्वयोस्तस्य राज्ञीनिक्षुभसंज्ञिता ॥ तथान्यैर्नामभिर्देवाः परिवार्य रविं स्थिताः ॥ १२ ॥ पिंगलो लेखकस्तत्र तथान्यो दंडनायकः ॥

---

१ शापपरातात्मा–इ० पा० । २ देव–इ० पा० । ३ कतमाख्यम्–इ० पा० । ४ कामजं क्रोधमित्यर्थः–"कामात्क्रोधाऽभिजायते" इति भगवद्गीतासु वचनात् । ५ पद्मसंकाशा सामरा विप्रकीर्तिता–इ०पा० । ६ शब्दादावंबुजाधारम्–इ० पा० । ७ चन्द्रशेखर इति भावः । ८ वैनतेयाग्रजः सदा–इ० पा० ।

[1]राजाश्रोषौ च द्वौ द्वारे स्थितौ कल्माषपक्षिणौ ॥ १३ ॥ ततो व्योम चतुःशृंगं मेरोः सद्दशलक्षणम् ॥ दिंडिस्तथाग्रतस्तस्य दिक्षु चान्ये
स्थिताः सुराः ॥ १४ ॥ एवं सर्वगमं देवं प्रदीप्तं जगति द्विज ॥ ब्रह्माद्यैः संस्तुतं देवं गीर्वाणैर्ऋषभोत्तमम् ॥ ग्रहेशं भुवनेशानमादित्यं शरणं
व्रज॥१५॥ सांब उवाच ॥ ॥ तत्त्वतः श्रोतुमिच्छामि कथं सर्वगतो रविः॥१६॥ कति वा रश्मयस्तस्य मूर्तयश्च कति स्मृताः ॥ का राज्ञी निक्षुभा
का च कश्चायं दंडनायकः ॥ १७ ॥ पिंगलश्चापि कस्तत्र किं चासौ लिखते सदा ॥ राजाश्रोषौ च कौ तत्र कौ च कल्माषपक्षिणौ ॥ १८ ॥
किं दैवत्यं च तद्व्योम मेरोः सद्दशलक्षणम् ॥ को दिंडिरग्रतस्तत्र के देवा दिक्षु ये स्थिताः ॥ १९ ॥ तत्त्वतो निगमैश्चैव विस्तरेण वदस्व माम् ॥
येनाहं तत्त्वतो ज्ञात्वा व्रजामि शरणं द्विज ॥ २० ॥ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि सप्तमीकल्पे सांबो
पाख्याने नारदसांबसंवादे सूर्यपरिवारवर्णनं नाम षट्सप्ततितमोऽध्यायः ॥७६॥ ॥ नारद उवाच ॥ ॥ विस्तरेणानुपूर्व्या च सूर्यं निगदतः शृणु ॥
ततः शेषान्प्रवक्ष्येऽहं नमस्कृत्य विवस्वते ॥ १ ॥ अव्यक्तं कारणं यत्तन्नित्यं सदसदात्मकम् ॥ प्रधानं प्रकृतिश्चेति यमाहुस्तत्त्वचिंतकाः ॥ २ ॥
गंधैर्वर्णै रसैर्हीनं शब्दस्पर्शविवर्जितम् ॥ जगद्योनिं महद्भूतं परं ब्रह्म सनातनम्॥ ३॥ निग्रहं सर्वभूतानामव्यक्तमभवत्किल॥ अनाद्यंतमजं सूक्ष्मं त्रिगुणं
प्रभवाप्ययम् ॥ ४ ॥ अनाकारमविज्ञेयं तमाहुः पुरुषं परम् ॥ तस्यात्मना सर्वमिदं जगद्व्याप्तं महात्मनः ॥५॥ तस्येश्वरस्य प्रतिमा [3]ज्ञानवैराग्य
लक्षणा ॥ धर्मैश्वर्यकृता बुद्धिर्ब्राह्मी तस्याभिमानिनः ॥ ६ ॥ अव्यक्ताज्जायते तस्य मनसा यद्यदिच्छति ॥ चतुर्मुखस्य ब्रह्मत्वे कालत्वे चांतकृद्भ
वेत् ॥ ७ ॥ सहस्रमूर्धा पुरुषस्तिस्रोवस्थाः स्वयंभुवः ॥ सत्त्वं रजश्च ब्रह्मत्वे कालत्वे च रजस्तमः ॥८॥ सात्त्विकं पुरुषत्वे च गुणवृत्तं स्वयंभुवः ॥
ब्रह्मत्वे सृजते लोकान्कालत्वे चापि संक्षिपेत् ॥ ९ ॥ पुरुषत्वे उदासीनस्तिस्रोऽवस्थाः प्रजापतेः ॥ त्रिधा विभज्य चात्मानं त्रिकालं संप्रवर्तते ॥
॥१०॥ सृजते ग्रसते चैव वीक्षते च त्रिभिः स्वयम् ॥ अग्रे हिरण्यगर्भस्तु प्रादुर्भूतः स्वयंभुवः ॥११॥ आदित्यस्यादिदेवत्वादजातत्वादजः स्मृतः ॥
देवेषु समहान्देवो महादेवः स्मृतस्ततः ॥१२॥ सर्वेशत्वाच्च लोकस्य अधीशत्वाच्च ईश्वरः ॥ बृहत्त्वाच्च स्मृतो ब्रह्मा भवत्वाद्भव उच्यते ॥१३॥ पाति
यस्मात्प्रजाः सर्वाः प्रजापतिरतः स्मृतः ॥ पुरे शेते च वै यस्मात्तस्मात्पुरुष उच्यते ॥ १४ ॥ नोत्पाद्यत्वादपूर्वत्वात्स्वयंभूरिति विश्रुतः ॥ १५॥
हिरण्यांडगतो यस्माद्ग्रहेशो वै दिवस्पतिः ॥ तस्माद्धिरण्यगर्भोऽसौ देवदेवो दिवाकरः ॥ १६ ॥ आपो नारा इति प्रोक्ता ऋषिभिस्तत्त्वदर्शिभिः ॥

---

[1] दौवारिकौ च द्वौ द्वारे ततः कल्माषपक्षिणौ—इ० पा० । [2] असांप्रतम्—इ० पा० । [3] ज्ञानविज्ञानलक्षणा—इ० पा० ।

अयनं तस्य ता आपस्तेन नारायणः स्मृतः ॥१७॥ अर इत्येष शीघ्रार्थो निपातः कविभिः स्मृतः॥ आप एवार्णवा भूत्वा न शीघ्रास्तेन ता नराः ॥ १८ ॥ एकार्णवे पुरा[1]तस्मिन्नष्टे स्थावरजंगमे॥नारायणाख्यः पुरुषः सुष्वाप सलिले[2] तदा ॥ सहस्रशीर्षा सुमनाः[3] सहस्तस्राक्षः सहस्रपात्॥१९॥ सहस्रबाहुः प्रथमः प्रजापतिस्त्रयीपथे यः पुरुषो निगद्यते[5] ॥ आदित्यवर्णो भुवनस्य गोप्ता अपूर्व एकः पुरुषः पुराणः ॥ २० ॥ हिरण्यगर्भः पुरुषो महात्मा संपद्यते वै तमसः परस्तात् ॥ २१ ॥ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि सप्तमीकल्पे सांबोपाख्याने सूर्यवर्णनं नाम सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥ ॥ नारद उवाच ॥ ॥ तुल्यं युगसहस्रस्य नैशं कालमुपास्य सः ॥ शर्वर्यंते प्रकुरुते ब्रह्मत्वं सर्गकारणात् ॥१॥ सलिलेनाप्लुतां भूमिं दृष्ट्वा कार्यं विचिंत्य सः ॥ भूत्वा स तु वराहो वै अपः संविशते प्रभुः ॥ २ ॥ सञ्चिंत्यैवं स देवेशो भूमेरुद्धरणे क्षमः ॥ महीं महार्णवे मग्नामुद्धर्तुमुपचक्रमे ॥ ३ ॥ उत्तिष्ठतस्तस्य जलार्द्रकुक्षेर्महावराहस्य महीं विधार्य ॥ विधुन्वतो वेदमयं शरीरं रोमांतरस्था मुनयो जपंति[6] ॥ ४ ॥ उद्धृत्योर्वीं स सलिलात्प्रजासर्गमकल्पयत ॥ मनसा जनयामास पुत्रानात्मसमाञ्छुभान् ॥ ५ ॥ भृग्वंगिरसमत्रिं च पुलस्त्यं पुलहं क्रतुम् ॥ मरीचिमथ दक्षं च वशिष्ठं नवमं तथा ॥ ६ ॥ नव प्रजापतीन्सृष्ट्वा ततः स पुरुषोत्तमः ॥प्रादुर्भूतोऽदितेः पुत्रः प्रजानां हितकाम्यया ॥ ७ ॥ मरीचात्कश्यपं पुत्रं[7] यं वेधा जनयज्जले ॥ प्रजापतीनां दशमं तेजसा ब्रह्मणः समम् ॥ ८ ॥ वृक्षकन्याऽदितिर्नाम्ना पत्नी सा कश्यपस्य तु ॥ अंडं सा जनयामास भूर्भुवःस्वस्त्रिसंयुतम् ॥ ९ ॥ तत्रोत्पन्नः सहस्रांशुर्द्वादशात्मा दिवाकरः ॥ नवयोजनसाहस्रो विस्तारोऽस्य महात्मनः ॥ विस्तारात्त्रिगुणश्चास्य परिणाहो विभावसोः ॥ १० ॥ यथापुष्पं कदंबस्य समंतात्केशरैर्वृतम् ॥ तथैव तेजसां गोलं समंताद्रश्मिभिर्वृतम् ॥ ११ ॥ सहस्रशीर्षा पुरुषो ब्राह्मं योगमुदाहरन् ॥ तैजसस्य च गोलस्य स तु मध्ये व्यवस्थितः ॥ १२ ॥ आदत्ते स तु रश्मीनां सहस्रेण समंततः ॥ अपो नदीसमुद्रेभ्यो ह्रदकूपेभ्य एव च ॥ १३ ॥ सौरी प्रभा या देवस्य अस्तं याते दिवाकरे ॥ अग्निमाविशते रात्रौ तस्मा[8]द्दूरात्प्रकाशते ॥ १४ ॥ उदिते च ततः:सूर्ये तेज आग्नेयमाविशत् ॥ पादेन तेजसश्चाग्नेस्तस्मात्स तपते रविः ॥ १५ ॥ प्रकाशत्वं तथोष्णत्वं सूर्येऽग्नौ च प्रकीर्तिते ॥ परस्परानुप्रवेशादाप्यायेते दिवानिशम् ॥१६॥ व्यापकत्वं च रश्मीनां नामानि च निबोध मे ॥ हेतयः किरणा गावो रश्मयोऽथ गभस्तयः ॥ १७ ॥ अभीषवो घनं चोस्रा वसवोथ मरीचयः ॥ नाड्यो दीधितयः साध्या मयूखा भानवोंशवः ॥ १८ ॥ सप्तार्चयः सुपर्णाश्च कराः

---

[1] शकन्ध्वादित्वात्पररूपम् । [2] शयने–इ० । [3],[4] पुरुषः–इ० पा० । [5] स उच्यते–इ० पा० । [6] यजंति–इ० पा० । [7] आहुर्यम्–इ० पा० । [8] त्वग्भिः–इ० पा० ।

पादास्तथैव च ॥ एषां तु नाम्नां रश्मीनां पर्याया विंशतिः स्मृताः ॥ १९ ॥ चंदनादीनि वक्ष्यामि नामान्येषां पृथक्पृथक् ॥ सहस्रं तात कथितं
शीतवर्षोष्णनिःश्रवम् ॥२०॥ तेषां चतुःशतं नाड्यो वर्षंते चित्रमूर्तयः ॥ [1]चंदनाच्चैव मंदाश्च कोतनामानुमास्तथा ॥ अमृता नाम ते सर्वे रश्मयो वृष्टि
हेतवः ॥२१॥ हिमोद्वहास्तु तत्रान्ये रश्मयस्त्रिशतं स्मृताः ॥ चंद्रास्ते नामतः सर्वे पीतास्ते तु गभस्तयः ॥२२॥ सौम्[2]येशाश्चैव वामश्च ह्लादिनेनो हिमस
र्जनाः ॥ शुक्लाश्च ककुभश्चैव गावो विश्वभृतस्तथा॥२३॥ शुक्लास्ते नामतः सर्वे त्रिशतं धर्मसर्जनाः ॥ समं बिभ्रति ते सर्वे मनुष्या देवतास्तथा॥२४॥
मनुष्यानोषधीभिस्तु स्वधया च पितॄनपि ॥ अमृतेन सुरान्सर्वांस्त्रयस्त्रिभिरतर्पयन् ॥२५॥ वसंते चैव ग्रीष्मे च शतैः स तपते त्रिभिः ॥ वर्षाशरत्सु
चैवेशस्तपते संप्रवर्षते ॥ २६ ॥ हेमन्ते शिशिरं चैव हिमोत्सर्गं च स त्रिभिः ॥ ओषधीषु बलं धत्ते स्वधायां च स्वधां पुनः ॥ अमरेष्वमृतं सूर्य
स्त्रयं त्रिषु नियच्छति ॥ २७ ॥ कालोग्निर्वत्सरश्चैव द्वादशात्मा प्रजापतिः ॥ तपत्येषु सुरश्रेष्ठस्त्रींल्लोकान्त्सचराचरान् ॥ २८ ॥ एष ब्रह्मा तथा
विष्णुरेष एव महेश्वरः ॥ ऋचो यजूंषि सामानि एष एव न संशयः ॥ २९ ॥ ऋचाभिः स्तूयते पूर्वं मध्याह्ने यजुर्भिः सदा ॥ सामभिस्त्वपरा
ह्णेषु महेशानैः प्रपूज्यते ॥ ३० ॥ पूज्यमानस्तु नित्यं वै तपत्येष दिवस्पतिः ॥ सदैष तेजसां राशिर्दीप्तिमान्त्सर्वलोकगः ॥ ३१ ॥ पार्श्वतोर्ध्व
मधश्चैव तापयत्येष सर्वतः ॥ ब्रह्मविष्णुमहेशानैः पूज्यमानस्तु नित्यशः ॥ ३२ ॥ यथा सर्वगतो वायुर्वहमानस्तु तिष्ठति ॥ तद्वत्सहस्रकिरणो
ग्रहराजो दिवस्पतिः ॥ ३३ ॥ सूर्यो गोभिर्जगत्कृत्स्नमादीपयति सर्वशः ॥ त्रीणि रश्मिशतान्यस्य भूर्लोकं द्योतयन्ति वै ॥३४ ॥ त्रीणित्रीणि तथा
चान्यौ द्वौ लोकौ तापयंत्युत ॥ शतं चापि अधस्तात्तु पातालं तापयन्त्युत ॥ ३५ ॥ इत्येतन्मण्डलं शुक्लं भास्वरं हेलि[3]संज्ञितम् ॥ नक्षत्रग्रहसो
मानां प्रतिष्ठायोनिरेव च ॥ विधुर्ऋक्षग्रहाः सर्वे विज्ञेयाः सूर्यसंभवाः ॥ ३६ ॥ रवेः करसहस्रं यत्प्राङ्मया समुदाहृतम् ॥ तेषां श्रेष्ठाः पुनः
सप्त रश्मयो ग्रहसंज्ञिताः ॥ ३७ ॥ सुषुम्णो हरिकेशश्च विश्वकर्मा तथैव च ॥ सूर्यश्चैवापरो रश्मिर्नाम्ना वि[4]ष्णुरिति स्मृतः ॥ ३८ ॥ ससत्त्वः सर्व
बन्धुस्तु जीवायति च वै जगत् ॥ सप्तजः प्रथमस्तत्र कञ्जजश्च तथा परः ॥ ३९ ॥ तारेयश्चापरस्तत्र गुरुः सुमनसां तथा ॥ उग्राह्वः पंचमस्तेषां
पुत्रोन्यो वनमालिनः ॥ कः शेषः सप्तमस्तेषामेते वै सप्त रश्मयः ॥ ४० ॥ आदित्यमूलमखिलं त्रैलोक्यं सचराचरम् ॥ भवत्यस्माज्जगत्सर्वं स
देवासुरमानुषम् ॥ ४१ ॥ रुद्रेन्द्रोपेन्द्रचन्द्राणां विप्रेन्द्र त्रिदिवौकसाम् ॥ महद्युतिमतः कृत्स्नं तेजो यत्सार्वलौकिकम् ॥ ४२ ॥ सर्वात्मा सर्व

---

१ चन्दनाश्चैव चन्द्राश्च केन वा गौतमास्तथा--इ०, चन्द्रश्चैव सदाचक्रोरुनानौरुननास्तथा--इ० च पा० । २ सौम्याश्च वासवीयाश्च ह्लादिनो हिमसर्जनाः--इ० पा० । ३ गोलसंज्ञितम्--इ० पा० । ४ धृष्टव्रतः--इ० पा० ।

लोकेशो देवदेवः प्रजापतिः ॥ सूर्य एव त्रिलोकस्य मूलं परमदैवतम् ॥ ४३ ॥ अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ॥ आदित्याज्जायते वृष्टि
र्वृष्टेरन्नं ततः प्रजाः ॥ ४४ ॥ सूर्यात्प्रसूयते सर्वं तस्मिन्नेव प्रलीयते ॥ भावाभावौ तु लोकानामादित्यान्निःसृतौ पुरा ॥ ४५ ॥ एतत्तु ध्यानिनां
ध्यानं मोक्षश्चाप्येव मोक्षिणाम् ॥ अत्र गच्छन्ति निर्वाणं जायन्तेऽस्मात्पुनः प्रजाः ॥ ४६ ॥ क्षणा मुहूर्ता दिवसा निशाः पक्षास्तु नित्यशः ॥
मासाः संवत्सराश्चैव ऋतवोऽथ युगानि च ॥ अथादित्यमृते ह्येषां कालसंख्या न विद्यते ॥ ४७ ॥ कालादृते न नियमा नाग्नेर्विहरणक्रिया ॥ ऋतू
नामविभागाच्च पुष्पमूलफलं कुतः ॥ ४८ ॥ अभावो व्यवहाराणां जंतूनां दिवि चेह च ॥ जगत्प्रतापनमृते भास्करं वारितस्करम् ॥ ४९ ॥
नावृष्ट्या तपते सूर्यो नावृष्ट्या परिवेष्यते ॥ आदित्यस्य च नामानि सामान्यानीह द्वादश ॥५०॥ द्वादशैव पृथक्त्वेन तानि वक्ष्याम्यनेकशः ॥
आदित्यः सविता सूर्यो मिहिरोऽर्कः प्रतापनः ॥ ५१ ॥ मार्तंडो भास्करो भानुश्चित्रभानुर्दिवाकरः ॥ रविर्वै द्वादशश्चैव ज्ञेयः सामान्यना
मभिः ॥ ५२ ॥ विष्णुर्धाता भगः पूषा मित्रेन्द्रौ वरुणोऽर्यमा ॥ विवस्वानंशुमांस्त्वष्टा पजन्यो द्वादश स्मृताः ॥ ५३ ॥ इत्येते द्वादशादित्याः
पृथक्त्वेन प्रकीर्तिताः ॥ उत्तिष्ठंति सदा ह्येते मासैर्द्वादशभिः क्रमात् ॥ ५४ ॥ विष्णुस्तपति चैत्रे च वैशाखे चार्यमा तथा ॥ विवस्वाञ्ज्येष्ठमासे
तु आषाढे चांशुमांस्तथा ॥ ५५ ॥ पर्जन्यः श्रावणे मासि वरुणः प्रोष्ठसंज्ञके ॥ इन्द्रश्चाश्वयुजे मासि धाता तपति कार्तिके ॥ ५६ ॥ मार्गशीर्षे
तथा मित्रः पौषे पूषा दिवाकरः ॥ माघे भगस्तु विज्ञेयस्त्वष्टा तपति फाल्गुने ॥ ५७ ॥ तैश्च द्वादशभिर्विष्णू रश्मीनां दीप्यते सदा ॥ दीप्यते
गोसहस्रेण शतैश्च त्रिभिरर्यमा ॥ ५८ ॥ द्विसप्तकैर्विवस्वांस्तु अंशुमान्पंचकैस्त्रिभिः ॥ विवस्वानिव पर्जन्यो वरुणश्चार्यमा इव ॥ ५९ ॥
इन्द्रस्तु द्विगुणैः षड्भिर्धातैकादशभिः शतैः ॥ मित्रवद्भगवत्त्वष्टा सहस्रेण शतेन च ॥ ६० ॥ उत्तरोपक्रमेऽर्कस्य वर्धंते रश्मयः सदा ॥ दक्षिणो
पक्रमे भूयो ह्रसन्ते सूर्यरश्मयः ॥ ६१ ॥ एवं रश्मिसहस्रं तु सौर्यं लोकार्थसाधकम् ॥ भिद्यते ऋतुमासैस्तु सहस्रं बहुधा भृंशम् ॥ ६२ ॥ एवं
नाम्नां चतुर्विंशदेकस्यैषा प्रकीर्तिता ॥ विस्तरेण सहस्रं तु पुनरेवं प्रकीर्तितम् ॥ ६३ ॥ आसां परमयत्नेन ब्रुवते भिन्नदर्शनाः ॥ तामसा बुद्धि
मोहाच्च [2]दृष्टान्तानि ब्रुवंति हि ॥ ६४ ॥ ब्रह्माणं कारणं केचित्केचिदाहुर्दिवाकरम् ॥ केचिद्भवं परत्वेन आहुर्विष्णुं तथापरे ॥ ६५ ॥ कारणं तु
स्मृता ह्येते नानार्थेषु सुरोत्तमाः ॥ एकः स तु पृथक्त्वेन स्वयंभूरिति विश्रुतः ॥ ६६ ॥ वनमालिनमुग्रेशं दिवि चक्षुरिवांतकम् ॥ तं

---

[1] पुनः—इ० पा० । [2] दृष्ट्वा नातिक्रमंति हि—इ० पा० ।

स्वयंभूरिति प्रोक्तं स सौपार्णिमनौपमम् ॥ ६७ ॥ यथानुरज्यते वर्णैर्विविधैः स्फाटिको मणिः ॥ तथा गुणवशात्तस्य स्वयंभोरनु
रंजनम् ॥ ६८ ॥ एको भूत्वा यथा मेघः पृथक्त्वेन प्रतिष्ठितः ॥ वर्णतो रूपतश्चैव तथा गुणवशात्तु सः ॥ ६९ ॥ नभसः पतितं तोयं याति
स्वादांतरं यथा ॥ भूमे रसविशेषेण तथा गुणवशात्तु सः ॥ ७० ॥ यथेंधनवशादग्निरेकस्तु बहुधायते ॥ वर्णतो रूपतश्चैव तथा गुणवशात्तु सः ॥
॥ ७१ ॥ यथा द्रव्यविशेषाच्च वायुरेकः पृथग्भवेत् ॥ सुगंधिः पूतिगंधिर्वा तथा गुणवशात्तु सः ॥ ७२ ॥ यथा वा गार्हपत्योग्निरन्यत्संज्ञांतरं
व्रजेत् ॥ दक्षिणाहवनीयादिब्रह्मादिषु तथा ह्यसौ ॥ ७३ ॥ एकत्वे च पृथक्त्वे च प्रोक्तमेतन्निदर्शनम् ॥ तस्माद्भक्तिः सदा कार्या देवे ह्यस्मिन्दिवा
करे ॥ ७४ ॥ एषोंडजोऽधिगश्चैव एष एव भृगुस्तथा ॥ एष रजस्तमश्चैव एष सत्त्वगुणस्तथा ॥ ७५ ॥ एष वेदाश्च यज्ञाश्च सर्वश्चैव न संशयः ॥
सूर्यव्याप्तमिदं सर्वं जगत्स्थावरजंगमम् ॥ ७६ ॥ [1]ईज्यते पूज्यते चासावत्र यानात्मको रविः ॥ सर्वत्र सविता देवस्तनुभिर्नामभिश्च सः ॥ ७७ ॥
वसत्यग्नौ तथा वाते व्योम्नि तोये तथा विभो ॥ एवंविधो ह्ययं सूर्यः सदा पूज्यो विजानता ॥ ७८ ॥ आदित्यं वेत्ति यस्त्वेवं स तस्मिन्नेव लीयते ॥
अप्येकं वेत्ति यो नाम धात्वर्थनिगमै रवेः ॥ ७९ ॥ स रोगैर्वर्जितः सर्वैः सद्यः [2]पापात्प्रमुच्यते ॥ न हि पापकृतः सांब भक्तिर्भवति भास्करे ॥
॥ ८० ॥ तथा त्वं परया भक्त्या प्रपद्यस्व दिवाकरम् ॥ येन व्याधिविनिर्मुक्तः सर्वान्कामानवाप्स्यसि ॥ ८१ ॥ यथा तव पिता सांब यथा वेधा
यथा हरः ॥ यथा गुणवशात्तस्य स्वयंभोरनुरंजनम् ॥ ८२ ॥ एकीभूय यथा मेघः पृथक्त्वेन प्रतिष्ठते ॥ वर्णतो रूपतश्चैव तथा गुणवशात्तु सः ॥
॥ ८३ ॥ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि सप्तमीकल्पे सूर्यमहिमवर्णनं नामाष्टसप्ततितमोऽध्यायः ॥
॥ ७८ ॥ ॥ ॥ सुमंतुरुवाच ॥ ॥ एतच्छ्रुत्वा तु कात्स्न्र्येन हृष्टो जांबवतीसुतः ॥ जातकौतूहलो भूयः परिपप्रच्छ [3]नारदम् ॥ १ ॥ ॥ सांब
उवाच ॥ ॥ अहो सूर्यस्य माहात्म्यं वर्णितं हर्षवर्धनम् ॥ येन मे भक्तिरुत्पन्ना परा ह्यस्मिन्विभावसौ ॥ २ ॥ ततो राज्ञीं महाभागां निक्षुभां
च महामुने ॥ दिंडिनं पिंगलादींश्च सर्वान्कथय मे मुने ॥ ३ ॥ ॥ नारद उवाच ॥ ॥ प्रागुक्तेऽर्कस्य द्वे भार्ये राज्ञी निक्षुभसंज्ञिते ॥ तयोर्हि
राज्ञी द्यौर्ज्ञेया निक्षुभा पृथिवी स्मृता ॥ ४ ॥ [4]सौम्यमासस्य सप्तम्यां द्यावार्कः सह युज्यते ॥ माघकृष्णस्य सप्तम्यां मह्या सह भवेद्रविः ॥ भूरा
दित्यश्च भगवान्गच्छतः संगमं तथा ॥ ५ ॥ ऋतुस्नाता मही तत्र गर्भं गृह्णाति भास्करात् ॥ द्यौर्जलं सूयते गर्भं वर्षास्विह च भूतले ॥ ६ ॥

---

[1] इत्येते द्वादशादित्या जगत्पालात्मको रविः–इ० पा० । [2] पापैः–इ० पा० । [3] सादरम्–इ० पा० । [4] पौषस्य शुक्लसप्तम्यां राज्यार्कः सह युज्यते–इ० पा० ।

ततस्त्रै[1]लोक्यभूत्यर्थँ मही सस्यानि सूयते ॥ सस्योपयोगसंहृष्टा जुह्वत्याहुतयो द्विजाः ॥ ७ ॥ स्वाहाकारस्वधाकारैर्यजंति पितृदेवताः ॥ ८ ॥ निक्षुभा सूयते यस्मादन्नौषधिसुधामृतैः ॥ मत्यान्पितृंश्च देवांश्च तेन भूर्निक्षुभा स्मृता ॥ ९ ॥ यथा राज्ञी द्विधा भूता यस्य चेयं सुता मता ॥ अपत्यानि च यान्यस्यास्तानि वक्ष्याम्यशेषतः ॥ १० ॥ मरीचिर्ब्रह्मणः पुत्रो मरीचेः कश्यपः सुतः ॥ तस्माद्धिरण्यकशिपुः प्रह्लादस्तस्य चात्मजः ॥ ११ ॥ प्रह्लादस्य सुतो नाम्ना विरोचन इति श्रुतः ॥ विरोचनस्य भगिनी संज्ञाया जननी शुभा ॥ १२ ॥ हिरण्यकशिपोः पौत्री दितेः पुत्रस्य सा स्मृता ॥ सा विश्वकर्मणः पुत्री प्राह्लादी प्रोच्यते बुधैः ॥ १३ ॥ अथ नाम्ना सुरूपेति मरीचेर्दुहिता शुभा ॥ पुत्री ह्यंगिरसः सा तु जननी तु बृहस्पतेः ॥ १४ ॥ बृहस्पतेस्तु भगिनी विश्रुता ब्रह्मवादिनी ॥ प्रभासस्य तु सा पत्नी वसूनामष्टमस्य तु ॥ १५ ॥ प्रसूता विश्वकर्माणं सर्वशिल्पकरं वरम् ॥ स वै नाम्ना पुनस्त्वष्टा त्रिदशानां च वार्धकिः ॥ १६ ॥ देवाचार्यश्च तस्येयं दुहिता विश्वकर्मणः ॥ सुरेणुरिति विख्याता त्रिषु लोकेषु भामिनी ॥ १७ ॥ राज्ञी संज्ञा च द्यौस्त्वाष्ट्री प्रभा सैव विभाव्यते ॥ तस्यास्तु या तनुच्छाया निक्षुभा सा महीमयी ॥ १८ ॥ सा[2] तु भार्या भगवतो मार्तंडस्य महात्मनः ॥ साध्वी पतिव्रता देवी रूपयौवनशालिनी ॥ १९ ॥ न तु तां नररूपेण सूर्यो भजति वै पुरा ॥ आदित्यस्येह तद्रूपं महता स्वेन तेजसा ॥ २० ॥ गात्रेष्वप्रतिरूपेषु नातिकांतमिवाभवत् ॥ अनिष्पन्नेषु गात्रेषु गोलं दृष्ट्वा पितामहः ॥ २१ ॥ मार्तस्त्वं भव चांडस्तु मार्तंडस्तेन स स्मृतः ॥ देवानां च यतस्त्वादिस्तेनादित्य इति स्मृतः ॥ २२ ॥ अतः परं प्रवक्ष्यामि प्रजास्तस्य महात्मनः ॥ त्रीण्यपत्यानि संज्ञायां जनयामास वै रविः ॥ २३ ॥ वर्षाणां तु सहस्रं वै वसमाना पितुगृहे ॥ भर्तुः समीपं याहीति पित्रोक्ता सा पुनःपुनः ॥ २४ ॥ अगच्छद्वडवा भूत्वा त्यक्त्वा रूपं यशस्विनी ॥ उत्तरांश्च कुरून्गत्वा तृणान्यनुचचार ह ॥ ॥ २५ ॥ पितुः समीपं या भार्या संज्ञा या वचनेन सा ॥ संज्ञाया धारयद्रूपं छाया सूर्यमुपस्थिता ॥ २६ ॥ द्वितीयायां तु संज्ञायां संज्ञेयमिति चिंतयन् ॥ आदित्यो जनयामास पुत्रौ कन्यां च रूपिणीम् ॥ २७ ॥ पूर्वजस्य मनोस्तुल्यौ सादृश्येन च तावुभौ ॥ श्रुतश्रवाश्च धर्मज्ञः श्रुतकर्मा तथैव च ॥ २८ ॥ श्रुतश्रवा मनुस्ताभ्यां सावर्णियों भविष्यति ॥ श्रुतकर्मा तु विज्ञेयो ग्रहो यो वै शनैश्चरः ॥ २९ ॥ कन्या च तपती नाम रूपेणाप्रतिरूपिणी ॥ संज्ञा तु पार्थिवी तेषामात्मजानां यथाकरोत् ॥ ३० ॥ न

---

[1] त्रैलोक्यवार्तार्थम्—इ० पा० । [2] सा च भार्या मघवतो मार्तंडस्य महात्मनः । शची पतिव्रता देवी रूपयौवनशालिनी—इ० पुस्तकांतरस्थः पाठः अन्येषु पुस्तकेषु तु मूलस्थ एव ।

स्नेहं पूर्वजानां तु तथा कृतवती तु सा ॥ मनुस्तु क्षमते तस्या यमस्तस्या न चक्षमे ॥ ३१ ॥ बहुशो यात्यमानस्तु पितुः पत्न्या सुदुःखितः ॥
स वै कोपाच्च बाल्याच्च भाविनोऽर्थस्य वै बलात् ॥ ३२ ॥ पदा संतर्जयामास संज्ञां वैवस्वतो यमः ॥ तं शशाप ततः क्रोधात्संज्ञा सा पार्थिवी
भृशम् ॥ ३३ ॥ पदा तर्जयसे यन्मां पितुर्भार्यां गरीयसीम् ॥ तस्मात्तैवष चरणः पतिष्यति न संशयः ॥३४॥ यमस्तु तेन शापेन भृशं पीडि
तमानसः ॥ मनुना सह तन्मातुः पितुः सर्वं न्यवेदयत् ॥ ३५ ॥ स्नेहेन तुल्यमस्मासु माता देव न वर्तते ॥ निःस्नेहाञ्ज्यायसो ह्यस्मान्कनीयां
संबुभूषति ॥ ३६ ॥ तस्या मयोद्यतः पादो न तु देव निपातितः ॥ बाल्याद्वा यदि वा मोहात्तद्भवान्क्षंतुमर्हति ॥३७॥ शप्तोऽहमस्मिँल्लोकेश जन
न्या तपतां वर ॥ तव प्रसादाच्चरणस्त्रायतां महतो भयात् ॥ ३८ ॥ ॥ रविरुवाच ॥ ॥ असंशयं महत्पुत्र भविष्यत्यत्र कारणम् ॥ येन त्वामावि
शत्क्रोधो धर्मज्ञं धर्मशालिनम् ॥ ३९ ॥ सर्वेषामेव शापानां प्रतिघातस्तु विद्यते ॥ न तु मात्राभिशप्तानां क्वचिन्मोक्षो भवेदिह ॥ ४० ॥ न शक्य
मेतन्मिथ्या मे कर्तुं मातुर्वचस्तव ॥ किंचित्तेऽहं विधास्यामि पितृस्नेहादनुग्रहम् ॥ ४१ ॥ कृमयो मांसमादाय यास्यंति तु महीतले ॥ कृतं तस्या
वचः सत्यं त्वं च त्रातो भविष्यसि ॥ ४२ ॥ ॥ सुमंतुरुवाच ॥ ॥ आदित्यस्त्वब्रवीच्छायां किमर्थं तनयावुभौ ॥ तुल्येष्वभ्यधिकः स्नेह एकत्र
क्रियते त्वया ॥ ४३ ॥ सा[1] तत्पुराभवं तस्मै नाचचक्षे विवस्वते ॥ आत्मानं स समाधाय वक्तुं तस्यामपश्यत ॥ ४४ ॥ तां शप्तुकामो भगवानुद्यतः
कुपितस्ततः ॥ ततश्छाया यथावृत्तमाचचक्षे विवस्वते ॥ ४५ ॥ विवस्वांस्तु ततः क्रुद्धः श्रुत्वा श्वशुरमागतः ॥ स चापि तं यथान्यायमर्चयि
त्वा दिवाकरम् ॥ निर्दग्धुकामं रोषेण सांत्वयामास तं शनैः ॥ ४६ ॥ ॥ विश्वकर्मोवाच ॥ ॥ तवातितेजसाविष्टमिदं रूपं सुदुःसहम् ॥
असहंती तु संज्ञा च वने चरति शाद्वले ॥ ४७ ॥ द्रक्ष्यते तां भवानद्य स्वां भार्यां शुभचारिणीम् ॥ रूपार्थं भवतोरण्ये चरंतीं सुमहत्तपः ॥४८॥
रूपं ते ब्रह्मणो वाक्याद्यदि वै रोचते विभो ॥ प्रशातयामि देवेन्द्र श्रेयोऽर्थं जगतः प्रभो ॥ ४९ ॥ संतुष्टस्तस्य तद्वाक्यं बहु मेने महातपाः ॥
ततोऽन्वजानात्त्वष्टारं रूपनिर्वर्तनाय तु ॥ ५० ॥ विश्वकर्मा ह्यनुज्ञातः शाकद्वीपे विवस्वतः ॥ भ्रमिमारोप्य तत्तेजः शातयामास तस्य वै ॥५१॥
आजानुलिखितश्चासौ निपुणं विश्वकर्मणा ॥ लेखनं नाभ्यनंदत्तु ततस्तेन निवारितः ॥ ५२ ॥ तत्र तद्भासितं रूपं तेजसा प्रकृतेन तु ॥ कांता
त्कांततरं भूत्वा अधिकं शुशुभे ततः ॥ ५३ ॥ ददर्श योगमास्थाय स्वां भार्यां वडवां तथा ॥ अदृश्यां सर्वभूतानां तेजसा स्वेन संवृताम् ॥५४॥

---

[1] सा च संज्ञावचः स्मृत्वा–इ० पा० ।

अश्वरूपेण मार्तण्डस्तां मुखेन समासदत् ॥ मैथुनाय विचेष्टंतीं परपुंसो विशंकया ॥ ५५ ॥ सा तं विवस्वतः शुक्रं नासाभ्यां समधारयत् ॥ देवौ तस्यामजायेतामश्विनौ भिषजां वरौ ॥ ५६ ॥ नासत्यश्चैव दस्रश्च तौ स्मृतौ नामतोऽश्विनौ ॥ अतः परं स्वकं रूपं दर्शयामास भास्करः ॥ तद्दृष्ट्वा चापि संज्ञा तु तुतोष च मुमोह च ॥ ५७ ॥ ततस्तु जनयामास संज्ञा सूर्यसुतं शुभम् ॥ रूपेण चात्मनस्तुल्यं रेवतं नाम नामतः ॥ ५८ ॥ पितुर्गृह्याष्टमं सोऽश्वं जातमात्रः पलायत ॥ स तस्मिन्त्सकृदारूढस्तमश्वं नैव मुंचति ॥ ५९ ॥ ततोर्केण समादिष्टौ दंडनायकपिंगलौ ॥ अश्वं प्रत्यानयेथां मे मा बलाच्छिद्रतोऽस्य तु ॥६०॥ पार्श्वस्थौ तिष्ठतस्तस्य अश्वच्छिद्राभिकांक्षिणौ ॥ न च्छिद्रं तु लभेते तौ तस्याद्यापि महात्मनः ॥ ६१ ॥ प्लुवन्गच्छत्यसौ यस्मात्संज्ञायाः शांतिदः सुतः ॥ रेवृस्तु च गतौ धातू रेवंतस्तेन स स्मृतः ॥ ६२ ॥ मनुर्यमो यमी चैव सावर्णिः स शनैश्चरः ॥ तपती चाश्विनौ चैव रेवंतश्च रवेः सुताः ॥ ६३ ॥ एवमेषा पुरा संज्ञा द्वितीया पार्थिवी स्मृता ॥ या संज्ञा सा स्मृता राज्ञी छाया या सा तु निक्षुभा ॥ ६४ ॥ राजृदीप्तौ स्मृतो धातू राजा राजति यत्सदा ॥ अधिकः सर्वभूतेभ्यो राजते च दिवाकरः ॥६५॥ अधिकं राजते यस्मात्तस्माद्राजा स उच्यते ॥ राज्ञः पत्नी तु सा यस्मात्तस्माद्राज्ञी प्रकीर्तिता ॥ ६६ ॥ क्षुभ संचलने धातुर्निश्चला तेन निक्षुभा ॥ भवन्तीत्यथ वा यस्मात्स्वर्गीयाः[1] क्षुद्विवर्जिताः ॥ छायां तां विशते दिव्यां स्मृता सा तेन निक्षुभा ॥ ६७ ॥ दृष्ट्वा जनं सदा तात भृशं पीडितमानसम् ॥ धर्मेण रंजयामास धर्मराजस्ततः स्मृतः ॥ ६८ ॥ शुद्धेन कर्मणा तात शुभेन परमद्युतिः ॥ पितॄणामाधिपत्यं च लोकपालत्वमाप च ॥६९॥ सांप्रतं वर्तते योऽयं मनुर्लोके महामते ॥ यस्यान्ववाये जातस्तु शंखचक्रगदाधरः ॥ ७० ॥ यमस्य भगिनी यातु यमी कन्या यशस्विनी ॥ साभवत्सरितां श्रेष्ठा यमुना लोकपावनी॥७१॥ मनुः प्रजापतिस्त्वेष सावर्णिः स महायशाः ॥ भविष्यन्स मनुस्तात अष्टमः परिकीर्तितः ॥ ७२ ॥ मेरुपृष्ठे तपो दिव्यमद्यापि चरते प्रभुः ॥ भ्राता शनैश्चरस्तस्य ग्रहत्वं स तु लब्धवान् ॥७३॥ तपती नाम या नाम्ना तयोः कन्या गरीयसी ॥ सा बभूव शुभा पत्नी राज्ञः संवरणस्य तु ॥ ७४ ॥ तापी नाम नदी चेयं विंध्यमूलाद्विनिःसृता ॥ नित्यं पुण्यजला स्नाने पश्चिमोदधिगामिनी ॥ ७५ ॥ सौम्यया संगता सा तु सर्वपापभयापहा ॥ वैवस्वती यथा वीर संगता शिवकांतया ॥ ७६ ॥ अश्विनौ देववैद्यत्वं लब्धवंतौ यदूत्तम ॥ तयोः कर्मोपजीवंति लोकेस्मिन्भिषजः सदा ॥ ७७ ॥ रेवंतो नाम योऽर्कस्य रूपेणा

---

१ याज्ञियाः–इ० पा० । २ गंगया ।

कंसमः सुतः ॥ [१]अश्वानामाधिपत्ये तु योजितः स तु भानुना ॥ ७८ ॥ क्षेमेण गच्छतेऽध्वानं यस्तं पूजयते पथि ॥ सुखप्रसाद्यो मर्त्यानां सदा यदुकुलोद्वह ॥ ७९ ॥ त्वष्टापि तेजसा तेन मार्तंडस्यैव चाज्ञया ॥ भोजानुत्पादयामास पूजायै तस्य सुव्रत ॥ ८० ॥ य इदं जन्म देवस्य शृणुयाद्वा पठेत वा ॥ विवस्वतो हि पुत्राणां सर्वेषाममितौजसाम् ॥८१॥ सर्वपापविनिर्मुक्तो याति सूर्यसलोकताम् ॥ इह राजा भवत्येव पुनरेत्य न संशयः ॥८२॥ ॥ इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि सप्तमीकल्पे आदित्यमाहात्म्यवर्णनं नामैकोनाशीतितमोऽध्यायः ॥७९॥ छ ॥ ॥ सुमंतुरुवाच ॥ ॥ इत्थं श्रुत्वा कथां दिव्यां हेलिमाहात्म्यमाश्रिताम् ॥ सांबः पप्रच्छ भूयोऽपि नारदं मुनिसत्तमम् ॥१॥ ॥ सांब उवाच ॥ ॥ सूर्यपूजाफलं यच्च यच्च दानफलं महत् ॥ प्रणिपाते फलं यच्च गीतवाद्ये च यत् फलम् ॥२॥ भास्करस्य द्विजश्रेष्ठ तन्मे ब्रूहि समंततः ॥ येन संपूजयाम्येष भानुं देवै[२]ः सदार्चितम् ॥ ३ ॥ ॥नारद उवाच॥ ॥ इममर्थं पुरा पृष्टो ब्रह्मा लोकपितामहः ॥ दिंडिना यदुशार्दूल शृणुष्वैकाग्रमानसः ॥ ४ ॥ सुखासीनं तथा देवं सुरज्येष्ठं पितामहम् ॥ प्रणम्य शिरसा दिंडिरिदं वचनमब्रवीत् ॥ ५ ॥ ॥ ॥ दिंडिरुवाच ॥ ॥ सूर्यपूजाफलं ब्रूहि ब्रूहि दानफलं तथा ॥ प्रणामे यत्फलं देव यच्चोक्तं तौर्यकत्रये ॥ ६ ॥ इतिहासपुराणाभ्यां कारिते श्रवणे तथा ॥ पुरतो देवदेवस्य यत्फलं स्यात्तदुच्यताम् ॥ ७ ॥ मार्जने लेपने यच्च देवदेवस्य मंदिरे ॥ भास्करस्य कृते ब्रूहि मम लोकपितामह ॥ ८ ॥ ॥ ब्रह्मोवाच ॥ ॥ स्तुतिजप्योपहारेण पूजया च नरो रवेः ॥ उपवासेन षष्ठ्यां च सर्वपापैः प्रमुच्यते ॥ ९ ॥ प्रणिधाय शिरो भूमौ नमस्कारपरो रवेः ॥ तत्क्षणात्सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ १० ॥ भक्तियुक्तो नरो यस्तु रवेः कुर्यात्प्रदक्षिणाम् ॥ प्रदक्षिणी कृता तेन सप्तद्वीपा भ[३]वेन्मही ॥ ११ ॥ सूर्यलोकं व्रजेच्चापि इह रोगैश्च मुच्यते ॥ उपानहौ परित्यज्य अन्यथा नरकं व्रजेत् ॥ १२ ॥ सोपानत्को नरो यस्तु आरोहेत्सूर्यमंदिरम् ॥ स याति नरकं घोरमसिपत्रवनं विभो ॥१३॥ सूर्यं मनसि यः कृत्वा कुर्याद्व्योमप्रदक्षिणाम् ॥ प्रदक्षिणीकृतास्तेन सर्वे देवा भवंति हि ॥ १४ ॥ परितुष्टाश्च ते सर्वे प्रयच्छंति गतिं शुभाम् ॥ सर्वे देवा महाबाहो ह्यभीष्टं तु परंतप ॥ १५ ॥ एकाहारो नरो भूत्वा षष्ठ्यां योऽर्चयते रविम् ॥ सप्तम्यां वा महाबाहो सूर्यलोकं स गच्छति ॥ १६ ॥ अहोरात्रोपवासी च पूजयेद्यस्तु भास्करम् ॥ सप्तम्यां वाथ षष्ठ्यां वा स गच्छेत्परमां गतिम् ॥ १७ ॥ कृष्णपक्षस्य सप्तम्यां सोपवासो जितेंद्रियः ॥ सर्वरक्तोपहारेण पूजये

---

[१] अश्वाधिपत्ये पित्रा तु—इ० पा० । [२] केशैरिति पाठे ब्रह्मशंकरादिभिरित्यर्थः । [३] वसुन्धरा—इ० पा० ।

यस्तु भास्करम् ॥ १८ ॥ पंकजैः करवीरैर्वा कुंकुमोदकचंदनैः ॥ मोदकैश्च गणश्रेष्ठ सूर्यलोकं स गच्छति ॥ १९ ॥ शुक्लपक्षस्य सप्तम्या
मुपवासरतः सदा ॥ सर्वशुक्लोपहारेण पूजयेद्यस्तु भास्करम् ॥ २० ॥ जातीमुद्गरकैश्चैव श्वेतोत्पलकदंबकैः ॥ पायसेन तथा देवं सवत्रेणार्चयेद्र
विम् ॥ २१ ॥ सर्वपापविशुद्धात्मा विधुः कांत्या न संशयः ॥ हंसयुक्तेन यानेन हंसलोकमवाप्नुते ॥ २२ ॥ ॥ दिंडिरुवाच ॥ ॥ ब्रूहि मे विस्त
रादेव सप्तमीकल्पमुत्तमम् ॥ उपोष्य सप्तमीं येन गमिष्ये शरणं रवेः ॥ २३ ॥ ॥ ब्रह्मोवाच ॥ ॥ साधु पृष्टोऽस्मि भवता सप्तमीकल्पमुत्तम
म् ॥ यथा सहस्रकिरणः पुरा पृष्टोऽरुणेन वै ॥ २४ ॥ कथिताः सप्त सप्तम्यो भानुना श्रेयसे नृणाम् ॥ अरुणस्य गणश्रेष्ठ पृच्छतः कारणां
तरे ॥ २५ ॥ कस्यचित्त्वथ कालस्य देवदेवं दिवाकरम् ॥ ध्यानमाश्रित्य तिष्ठन्तमरुणो वाक्यमब्रवीत् ॥ २६ ॥ किमर्थं देवदेवेश ध्यानमा
श्रित्य तिष्ठसि ॥ दिनं न याति देवेश कारणं मम कथ्यताम् ॥ २७ ॥ कुरु चंक्रमणं देव वंहमानो दिवस्पते ॥ इत्येवं भगवान्पृष्ट इदं वचनम
ब्रवीत् ॥ २८ ॥ शृणु त्वं द्विजशार्दूल यदर्थं ध्यानमाश्रितः ॥ अर्वावसुर्द्विजश्रेष्ठः स चापुत्रः खगोत्तम ॥ २९ ॥ आराधयति मां
नित्यं गंधपुष्पोपहारकैः ॥ पुत्रकामः खगश्रेष्ठ न च जानात्ययं यथा ॥ ३० ॥ पुत्रदोऽहं भवे येन विधिना पूजितः खग ॥ श्रूयतां च
विधिः सर्वे येन प्रीतो भवे नृणाम् ॥ ३१ ॥ सप्तमीकल्पसंज्ञो वै विधीनामुत्तमो विधिः ॥ यस्तु मां पूजयेन्नित्यं तस्य पुत्रान्द
दाम्यहम् ॥ ३२ ॥ गृह्णीष्व सप्तमीकल्पं गत्वा ब्रूहि द्विजोत्तमम् ॥ येनाहं बहुपुत्रत्वं दद्यां तस्य तथा खग ॥ ३३ ॥ श्रुत्वा भानोः क्षणादेव
जगाम स खगोत्तमः ॥ कथयामास तत्सर्वं भानोर्वचनमादितः ॥ ३४ ॥ ब्राह्मणस्य खगश्रेष्ठ स च श्रुत्वा द्विजोत्तमः ॥ चकार सप्तमीकल्पं
यथाख्यातं खगेन तु ॥ ३५ ॥ ऋद्धिं वृद्धिं तथारोग्यं प्राप्य पुत्रांश्च पुष्कलान् ॥ गतोऽसौ सूर्यलोकं च तेजसा तत्समोभवत् ॥ ३६ ॥
इति श्रीभविष्ये महापुराणे शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्वणि सप्तमीकल्पमाहात्म्यवर्णनं नामाशीतितमोऽध्यायः ॥ ८० ॥ ॥ ब्रह्मोवाच ॥ ॥
जया च विजया चैव जयंती चापराजिता ॥ महाजया च नंदा च भद्रा चान्या प्रकीर्तिता ॥ १ ॥ शुक्लपक्षस्य सप्तम्यां सूर्यवारो भवेद्यदि ॥
सप्तमी विजया नाम तत्र दत्तं महाफलम् ॥ २ ॥ स्नानं दानं तथा होम उपवासस्तथैव च ॥ सर्वं विजयसप्तम्यां महापातकनाशनम् ॥ ३ ॥
पंचम्यामेकभक्तं स्यात्षष्ठ्यां नक्तं प्रचक्षते ॥ उपवासस्तु सप्तम्यामष्टम्यां पारणं भवेत् ॥ ४ ॥ केचिद्देवमुशंत्येव नेति चान्ये गणाधिप ॥

---

१ सदा–इ० पा० । २ ह्यर्च्यमानो दिवस्पते–इ०, चोक्ष्यमाणो दिवस्पते–इ० च पा० ।

अभिप्रेतस्तु मे[1] षष्ठयामुपवासो गणोत्तम ॥ ५ ॥ चतुर्थ्यामेकभक्तं तु पंचम्यां नक्तमादिशेत् ॥ उपवासस्तु षष्ठ्यां स्यात्सप्तम्यां पारणं
भवेत् ॥ ६ ॥ उपवासपरः षष्ठयामब्देशं पूजयेद्बुधः ॥ गंधपुष्पोपहारैश्च भक्त्या श्रद्धासमन्वितः ॥ ७ ॥ प्रकल्प्य पूजां भूमौ तु देवस्य पुरतः स्व
पेत् ॥ [2]जपमानस्तु गायत्रीं सौरसूक्तमथापि वा ॥ ८ ॥ अक्षरं वा महाश्वेतं षडक्षरमथापि वा ॥ विबुद्धस्त्वथ सप्तम्यां कृत्वा स्नानं गणाधिप ॥९॥
ग्रहेशं पूजयित्वा तु होमं कृत्वा विधानतः ॥ ब्राह्मणान्भोजयेद्भक्त्या शक्त्या च गणनायक॥१०॥ शाल्योदनमपूपांश्च खंडवेष्टांश्च शक्तितः॥ सघृतं
पायसं दद्यात्तथा विप्रेषु शक्तितः॥११॥ दत्त्वा च दक्षिणां भक्त्या[3] ततो विप्रान्विसर्जयेत् ॥ इत्येषा कथिता देव पुण्या विजयसप्तमी ॥१२॥ यामु
पोष्य नरो गच्छेत्पदं वैरोचनं परम् ॥ करवीराणि रक्तानि कुंकुमं च विलेपनम् ॥ १३ ॥ विजयं धूपमस्यां तु भानोस्तुष्टिकराणि वै ॥ एषा
पुण्या पापहरा महापातकनाशिनी ॥ १४ ॥ अत्र दत्तं हुतं चापि क्षीयते न गणाधिप ॥ स्नानं दानं तथा होमः पितृदेवाभिपूजनम् ॥ १५ ॥
[4]सर्वं विजयसप्तम्यां महापातकनाशनम् ॥ आदित्यवारेण युता स्मृता विजयसप्तमी ॥ १६ ॥ इत्येषा कथिता वीर सर्वकामप्रदायिनी ॥
धन्यं यशस्यमायुष्यं कीर्तितं श्रवणं तथा ॥ १७ ॥ स्मरणं तु तथास्यां तु पुण्यदं त्रिपुरांतक ॥ १८ ॥ ॥ इति श्रीभविष्ये महापुराणे शतार्द्ध
साहस्र्यां संहितायां ब्राह्मे पर्वणि सप्तमीकल्पे विजयसप्तमोवर्णनं नामैकाशीतितमोऽध्यायः ॥ ८१ ॥छ॥ ॥ दिंडिरुवाच ॥ ॥ ये त्वादित्य
दिने ब्रह्मन्पूजयंति दिवाकरम् ॥ स्नानदानादिकं तेषां किं फलं स्याद्ब्रवीतु मे ॥ १ ॥ पुण्या सा सप्तमी प्रोक्ता युक्ता तेन पितामह ॥ विजयेति
तथा नाम [5]वर्ण्यतामस्य पुण्यता ॥ २ ॥ ॥ ब्रह्मोवाच ॥ ॥ ये त्वादित्यदिने [6]ब्रह्मञ्छ्राद्धं कुर्वंति मानवाः ॥ सप्तजन्मसु ते जाताः संभवंति
विरोगिणः ॥ ३ ॥ नक्तं [7]कुर्वंति ये तत्र मानवाः स्थैर्यमाश्रिताः ॥ जपमानाः परं जाप्यमादित्यहृदयं परम् ॥ ४ ॥ आरोग्यमिह वै प्राप्य सूर्य
लोकं व्रजंति ते ॥ उपवासं च ये कुर्युरादित्यस्य दिने सदा ॥ ५ ॥ जपंति च महाश्वेतां ते लभंते यथेप्सितम् ॥ अहोरात्रेण नक्तेन त्रिरात्रनिय
मेन वा ॥ ६ ॥ जपमानो महाश्वेतामीप्सितं लभते फलम् ॥ विशेषतः सूर्यदिने जपमानो गणाधिप ॥ ७ ॥ षँडक्षरं तथा श्वेतां गच्छेद्वैरोचनं
पदम् ॥ द्वादशेह स्मृता वारा आदित्यस्य महात्मनः ॥ ८ ॥ नंदो भद्रस्तथा सौम्यः कामदः पुत्रदस्तथा ॥ जयो जयंतो विजय आदित्याभिमुख

---

१ यः–इ०:पा० । २ यजमानः–इ० पा० । ३ शक्त्या–इ० पा० । ४ शस्तम्–इ० पा० । ५ कथ्यतां मम शृण्वतः–इ० पा० । ६ प्राप्ते–इ० पा० । ७ शुभकर्मा–इ० पा० ।

स्थितः ॥ ९ ॥ हृदयो रोगहा चैव महाश्वेतप्रियोऽपरः ॥ शुक्लपक्षस्य षष्ठ्यां तु माघे मासि गणाधिप ॥ १० ॥ यः[1] कुर्यात्स भवेद्भूपः सर्वपा
पभयापहः ॥ अत्र नक्तं स्मृतं पुण्यं घृतेन स्नपनं रवेः ॥ ११ ॥ अगस्त्यकुसुमानीह भानोस्तुष्टिकराणि तु ॥ विलेपनं सुगंधस्तु श्वेतचंदनमुत्त
मम् ॥ १२ ॥ धूपस्तु गुग्गुलः श्रेष्ठो नैवेद्यं पूपमेव हि ॥ दत्त्वा पूपं तु विप्रस्य ततो भुञ्जीत वाग्यतः ॥ १३ ॥ नक्षत्रदर्शनान्नक्तं केचिदिच्छंति
मानद[2] ॥ मुहूर्तोनं दिनं केचित्प्रवदंति मनीषिणः ॥ १४ ॥ नक्षत्रदर्शनान्नक्तमहम्मन्ये गणाधिप ॥ प्रस्थमात्रं भवेत्पूपं गोधूममयमुत्तमम् ॥ १५ ॥
यवोद्भवं वा कुर्वीत सगुडं सर्पिषान्वितम् ॥ सहिरण्यं च दातव्यं ब्राह्मणे सेतिहासके[3] ॥ १६ ॥ भौमे दिव्येऽथ वा देयं न्यसेद्वा पुरतो रवेः ॥
दातव्यो मंत्रतश्चायं मंडको[4] ग्राह्य एव हि ॥ १७ ॥ भूत्वादित्येन वै भक्त्या आदित्यं तु नमस्य च ॥ आदित्यतेजसोत्पन्नं राज्ञीकरविनिर्मितम् ॥
श्रेयसे मम विप्र त्वं प्रतीच्छापूपमुत्तमम् ॥१८॥ कामदं सुखदं धर्म्यं धनदं पुत्रदं तथा ॥ सदास्तु ते प्रतीच्छामि मंडकं भास्करप्रियम् ॥१९॥
एतौ चैव महामंत्रौ दानादाने रविप्रियौ ॥ अपूपस्य गणश्रेष्ठ श्रेयसे नात्र संशयः ॥२०॥ एष नंदविधिः प्रोक्तो नराणां श्रेयसे विभो॥ अनेन विधि
ना यस्तु नरः[5] पूजयते रविम् ॥ सर्वपापविनिर्मुक्तः[6] सूर्यलोके महीयते ॥२१॥ न दारिद्र्यं न रोगश्च कुले तस्य महात्मनः ॥ योऽनेन पूजयेद्भानुं न
क्षयः संततेस्तथा ॥ २२ ॥ सूर्यलोकाच्च्युतश्चासौ राजा भवति भूतले ॥ बहुरत्नसमायुक्तस्[7]तेजसा द्विजसंनिभः[8] ॥ २३ ॥ पठतां शृण्वतां
चेदं विधानं त्रिपुरांतक ॥ कं[9] ददात्यचलं दिव्यमंबुजामचलां तथा ॥ २४ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि आदित्यवार
कल्पे नंदविधिवर्णनं नाम द्व्यशीतितमोऽध्यायः ॥ ८२ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ मासि भाद्रपदे वीर शुक्ले[10] पक्षे तु यो भवेत् ॥ षष्ठ्यां
गणकुलश्रेष्ठ स भद्रः परिकीर्तितः ॥ १ ॥ तत्र नक्तं तु यः कुर्यादुपवासमथापि वा ॥ हंसयानसमारूढो याति हंससलोकताम् ॥ २ ॥
मालतीकुसुमानीह तथा श्वेतं च चंदनम् ॥ विजयं च तथा धूपं नैवेद्यं पायसं परम् ॥ ३ ॥ पूजायां भास्करस्येह कुर्यात्त्रिपुरसूदन ॥ इत्थं सं
पूज्य देवेशं मध्याह्ने च दिनाधिपम् ॥ ४ ॥ दत्त्वा तु दक्षिणां शक्त्या ततो भुंजीत वाग्यतः ॥ पायसं गणशार्दूल सगुडं सर्पिषा सह ॥ ५ ॥ य
एवं पूजयेद्भक्त्या[11] मानवस्तिमिरापहम् ॥ सर्वकामानवाप्नोति पुत्रदारधनादिकान् ॥ ६ ॥ विमुक्तः सर्वपापेभ्यो व्रजेद्भानुसलोकताम् ॥ एष भद्रा

---

१ यो भवेत्स भवेन्नन्द—इ० पा० । २ मानवाः—इ० पा० । ३ दिव्यसंज्ञिके—इ० पा० । ४ अपूपः—इ० पा० । ५ नन्दम्—इ० पा० । ६ सर्वपापविमुक्तात्मा—इ० पा० । ७ ब्रह्मानन्दसमायुक्तः—इ०, बहुभर्तृसमायुक्तः—इ० च पा० । ८ द्विजसत्तम—इ० पा० । ९ सुखम् । १० कृष्णपक्षे—इ० पा० । ११ भाद्रे—इ०, भद्रम्—इ० च पा० ।

विधिः प्रोक्तो मया यस्ते गणाधिप ॥ ७ ॥ श्रुत्वा कृत्वा च यत्पापान्मुच्यते मानवो भुवि ॥ ८ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वण्यादित्यवारकल्पे भद्रविधिवर्णनं नाम त्र्यशीतितमोऽध्यायः ॥ ८३ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ नक्षत्रं रोहिणी बीर यदा वारेस्य वै भवेत् ॥ यात्यसौ सौम्यतां वीर[1] स सौम्यः परिकीर्तितः ॥ १ ॥ स्नानं दानं जपो होमः पितृदेवादितर्पणम् ॥ अक्षयं स्यान्न संदेहस्त्वत्र वारे महात्मनः ॥ २ ॥ नक्तं समाश्रितो योऽत्र पूजयेद्भास्करं नरः ॥ याति लोकं स देवस्य भास्करस्य न संशयः ॥ ३ ॥ रक्तोत्पलानि वै तत्र तथा रक्तं च चंदनम् ॥ सुगंधश्चापि धूपस्तु नैवेद्यं पांयसं तथा ॥ ब्राह्मणाय च दातव्यं भोक्तव्यं चात्मना तथा ॥ ४ ॥ य एवं पूजयेत्सौम्ये चित्रभानुं गवांपतिम् ॥ स विमुक्तस्तु पापेभ्यस्त्वाष्ट्रीं कांतिमवाप्नुयात् ॥ ५ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि आदित्यवारकल्पे सौम्यविधिवर्णनं नाम चतुरशीतितमोऽध्यायः ॥ ८४ ॥ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ प्राप्ते मार्गशिरे मासि शुक्लषष्ठ्यां तु यो भवेत् ॥ स ज्ञेयः कामदो वारः सदेष्टो भास्करस्य तु ॥ १ ॥ तत्र यः पूजयेद्भानुं भक्त्या श्रद्धासमन्वितः ॥ विमुक्तः सर्वपापैस्तु प्राप्नुते नंदनाधिपम्[2] ॥ २ ॥ रक्तचंदनमिश्राणि करवीराणि सुव्रत ॥ धूपं घृताहुतिं वीर भास्कराय प्रयोजयेत् ॥ ३ ॥ नैवेद्यं चापि कृशरं सुगंधं तीक्ष्णमेव च ॥ कृत्वोपवासमथ वा नक्तं त्रिपुरसूदन ॥४॥ इत्थं प्रपूजितो ह्यत्र[3] भास्करो लोकभास्करः ॥ कामान्ददाति सर्वान्वै अतोयं कामदः स्मृतः ॥५॥ स पुत्रं पुत्रकामस्य धनकामस्य वा धनम् ॥ विद्यार्थिने शुभां विद्यामारोग्यं रोगिणे विभो ॥ ६ ॥ अन्यांश्च विविधान्कान्मंत्रैः संपूजितो रविः ॥ ददाति गणशार्दूल अतोयं कामदः स्मृतः ॥ ७ ॥ दद्याद्यो मंडकं चात्र गोपतेर्गोत्रभूषणः ॥ गोत्रारि[4]तेजसा तुल्यो गोपतेर्गोपुरं व्रजेत् ॥ ८ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि आदित्यवारकल्पे कामदविधिवर्णनं नाम पंचाशीतितमोऽध्यायः ॥ ८५ ॥ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ पंचतारं भवेद्यत्र नक्षत्रं ते वृषध्वज ॥ वारे तु देवदेवस्य स वारः पुत्रदः स्मृतः ॥ १ ॥ उपवासो भवेत्तत्र श्राद्धं कार्यं तथा भवेत् ॥ प्राशनं चापि पिंडस्य मध्यमस्य प्रकीर्तितम् ॥ २ ॥ सोपवासस्तु यो भक्त्या पूजयेदत्र गोपतिम् ॥ धूपमाल्योपहारैस्तु दिव्यगंधसमन्वितैः ॥ ३ ॥ एवं पूज्य विवस्वंतं तस्यैव पुरतो निशि ॥ भूमौ स्वपिति वै वीर जपञ्छ्वेतां महामते ॥ ४ ॥ प्रातरुत्थाय च स्नानं कृत्वा दत्त्वार्घ्यमुत्तमम् ॥ रक्तचंदनसंमिश्रैः करवीरैर्गणाधिप ॥ ५ ॥ प्रपूज्य ग्रहभूतेशमंशुमंतं त्रिलोचन ॥ वीरं[5] च पूजयित्वा तु ततः श्राद्धं प्रकल्पयेत् ॥ ६ ॥ पंचभिर्ब्राह्मणैर्देव

---

[1] वारः—इ० पा० । [2] चन्दनाधिपम्—इ० पा० । [3] चात्र—इ० पा० । [4] शक्रतेजसेत्यर्थः । [5] दीपं च—इ० पा० ।

दिव्यैर्भौमैश्च[1] सुव्रत ॥ मगसंज्ञौ[2] तत्र दिव्यौ ब्राह्मणौ परिकल्पयेत् ॥ ७ ॥ त्रीनत्र ब्राह्मणान्भीमान्प्रकल्प्यांधकसूदन ॥ कुर्यादेवं ततः श्राद्धं पार्वणं भास्करप्रियम् ॥ ८ ॥ श्राद्धे त्वथ समाप्ते तु दद्यात्पिंडं तु मध्यमम् ॥ पुरतो देवदेवस्य स्थित्वा मंत्रेण सुव्रत ॥ ९ ॥ स एष पिंडो देवेश योऽभीष्टस्तव सर्वदा ॥ अश्नामि पश्यते तुभ्यं तेन मे संततिर्भवेत् ॥ १० ॥ प्रसादात्तव देवेश इति मे भावितं मनः ॥ इत्थं संपूजितो ह्यत्र भास्करः पुत्रदो भवेत् ॥ ११ ॥ अतोऽयं पुत्रदो वारो देवस्य परिकीर्तितः ॥ एवमत्र सदा यस्तु भास्करं पूजयेन्नरः ॥ १२ ॥ उपवासपरः श्राद्धे स पुत्रं लभते ध्रुवम् ॥ धनं धान्यं हिरण्यं च आरोग्यं सुखदं तथा ॥ सूर्यलोकं च संप्राप्य ततो राजा भवेन्नृषु ॥ १३ ॥ प्रभया द्विजसंकाशः कांत्या चांबुजसन्निभः ॥ वीर्येण गोपतेस्तुल्यो गांभीर्ये सागरोपमः ॥ १४ ॥ (इति पुत्रदविधिवर्णनम्) ॥ ॥ ब्रह्मोवाच ॥ ॥ दक्षिणे त्वयने यः स्यात्स जयः परिकीर्तितः ॥ १५ ॥ अत्रोपवासो नक्तं च स्नानं दानं जपस्तथा ॥ भवेच्छतगुणं देव भास्करप्रीतये कृतम् ॥ १६ ॥ तस्मान्नक्तादि कर्तव्यं यत्स्याच्छतगुणं विभोः ॥ १७ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि आदित्यवारकल्पे जयवारतिथिवर्णनं नाम षडशीतितमोऽध्यायः ॥ ८६ ॥ ॥ छ ॥

॥ ब्रह्मोवाच ॥ ॥ जयन्तो ह्युत्तरे ज्ञेयश्चायने गणनायक ॥ वारो देवस्य यः स्याद्वै तत्र पूज्यो दिवाकरः ॥ १ ॥ पूजितस्तत्र देवेशः सहस्रगुणितं फलम् ॥ ददाति देवशार्दूल स्नानदानादिकर्मणाम् ॥ २ ॥ घृतेन पयसा यत्र स्नानमिक्षुरसेन तु ॥ विलेपनं कुंकुमं तु प्रशस्तं भास्करे प्रियम् ॥ ३ ॥ धूपक्रिया गुग्गुलेन नैवेद्ये मोदकः स्मृतः ॥ इत्थं संपूज्य देवेशं कुर्याद्धोमं ततस्तिलैः ॥ ब्राह्मणान्भोजयेत्पश्चान्मोदकांस्तिलशष्कुलीः ॥ ४ ॥ इत्थं यः पूजयेद्भानुं मंत्रेणैव गणाधिप ॥ सहस्रगुणितं तस्य फलं देवो ददाति वै ॥ ५ ॥ स्नानदानजपादीनामुपवासस्य वै विभो ॥ ६ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वण्यादित्यवारकल्पे जयंतविधिवर्णनं नाम सप्ताशीतितमोऽध्यायः ॥ ८७ ॥ ॥ छ ॥

॥ ब्रह्मोवाच ॥ ॥ शुक्लपक्षस्य सप्तम्यां प्राजापत्यर्क्षसंयुतः ॥ स ज्ञेयो विजयो नाम सर्वपापभयापहः ॥ १ ॥ तत्र कोटिगुणं सर्वं फलं पुण्यस्य कर्मणः ॥ ददाति भगवान्देवः पूजितश्चंदनाधिपः ॥ २ ॥ स्नानं दानं जपो होमः पितृदेवादिपूजनम् ॥ नक्तं चाप्युपवासस्तु सर्वमत्र दिवाकरः ॥ ३ ॥ कुर्यात्कोटिगुणं सर्वं पूजितो ह्यत्र गोपतिः ॥ तस्मादत्र सदा देवं पूजयेद्भक्तिमान्नरः ॥ ४ ॥

---

[1] धूपैश्च–इ० पा० । [2] मघ–इ० पा० । [3] तत्र यां कुरुते पूजाम्–इ० पा० ।

सर्वेशं सप्तद्वीवेशं सप्तसैंधववाहनम् ॥ सप्तम्यां तु समाराध्य सप्तप्रकृतिसंभवम् ॥ ५ ॥ सप्तलोकाधिपत्यं तु प्राप्नुते सप्तरश्मिभिः ॥ ६ ॥
॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वण्यादित्यवारकल्पे विजयवारविधिवर्णनं नामाष्टाशीतितमोऽध्यायः ॥ ८८ ॥ ॥ छ ॥
॥ ॥ ब्रह्मोवाच ॥ ॥ कृष्णपक्षस्य सप्तम्यां माघमासे भवेत्तु यः ॥ सा[1]दित्याभिमुखो ज्ञेयः शृणु चास्य विधिं परम् ॥ १ ॥ कृत्वैकभक्तं
कृष्णस्य वारे त्रिपुर[2]सूदन ॥ प्रातः कृत्वा ततः स्नानं पूजयित्वा दिवाकरम् ॥ २ ॥ आदित्याभिमुखस्तिष्ठेद्यावदस्तमनं रवेः ॥ जपमानो महा
श्वेतां लाभमाश्रित्य सुव्रत ॥ ३ ॥ चतुर्हस्तमृजुं श्लक्ष्णमव्रणं सुसमं दृढम् ॥ रक्तचंदनवृक्षस्य स्तंभं कृत्वा गणाधिप ॥ ४ ॥ तमाश्रित्य महा
भक्त्या देवदेवं दिवाकरम् ॥ पश्यमानो जपञ्श्वेतां तिष्ठेदस्तमनाद्रवेः ॥ ५ ॥ गंधपुष्पोपहारैस्तु पूजयित्वा दिवाकरम् ॥ ब्राह्मणे दक्षिणां दत्त्वा
ततो भुञ्जीत वाग्यतः ॥ ६ ॥ इत्थमेतं तु यः कुर्यादादित्यप्रीतये नरः ॥ भानुमांस्तस्य प्रीतः स्यात्सर्वं प्रीतो ददाति हि ॥ ७ ॥ धनं धान्यं
तथा पुत्रमारोग्यं भार्गवीं यशः ॥ तस्मात्संपूजयेदत्र गीर्वाणाधिपतिं हर ॥ ८ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वण्या
दित्यवारकल्पे आदित्याभिमुखविधिवर्णनं नाम नवाशीतितमोऽध्यायः ॥ ८९ ॥ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ रविसंक्रमणे यः
स्याद्रवेर्वारो गणाधिप ॥ स ज्ञेयो हृदयो नाम आदित्यहृदयप्रियः ॥ १ ॥ तत्र नक्तं समाश्रित्य देवं संपूज्य भक्तितः ॥ गत्वा च सदने भानो
रादित्याभिमुखस्थितः ॥ २ ॥ जपेदादित्यहृदयं संख्ययाष्टशतं बुधः ॥ अथ वास्तमनं यावद्भास्करं चिंतयेद्धृदि ॥ ३ ॥ गृहमेत्य ततो विप्रा
न्भोजयेच्छक्तितः शिव ॥ भुक्त्वा तु पायसं वीर ततो भूमौ स्वपेद्बुधः ॥ ४ ॥ योत्र संपूजयेद्भानुं भक्त्या श्रद्धासमन्वितः ॥ स कामाँल्लभते
सर्वान्भास्कराद्धृदयस्थितान् ॥५॥ तेजसा यशसा तुल्यः प्रभयैषां महात्मनाम् ॥ शक्रगोपांडजानां तु गोपतेर्गोवृषेक्षण ॥६॥ ॥ इति श्रीभविष्ये
महापुराणे ब्राह्मे पर्वण्यादित्यवारकल्पे हृदयवारविधिवर्णनंनाम नवतितमोऽध्यायः ॥ ९० ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ पूष्णो भवेद्यदा
ऋक्षं भवेच्च भगदैवतम् ॥ वासरः स महान्प्रोक्तः सर्वरोगभयापहः ॥ १ ॥ योऽत्र पूजयते भानुं शुभगंधविलेपनैः ॥ सर्वरोगविनिर्मुक्तो याति
भानुसलोकताम् ॥२॥ अर्कपत्रपुटे कृत्वा पुष्पाण्यर्कस्य सुव्रत ॥ देवस्य पुरतो रात्रौ भक्त्या यः स्थापयेद्बुधः ॥ ३ ॥ पूजयित्वार्कपुष्पैस्तु अर्क
मर्कप्रियं सदा ॥ प्राशयित्वार्कपु[3]ष्पं तु दत्त्वा विप्राय दक्षिणाम् ॥४॥ भक्त्या च पायसं वीर रात्रौ स्वपिति भूतले ॥ अनेन विधिना यस्तु पूजये

---

१ 'सोचि लेपे ञ्चेत्' इति सुलोपः । २ च विधिना सदा–इ० पा० । ३ पत्रम्–इ० पा० ।

दत्र वै रविम्[1] ॥ ५ ॥ स मुक्तः सर्व[2]रोगैस्तु गच्छे[3]द्दिनकरालयम् ॥ तस्मादपि व्रजेल्लोकं फुंकाराखहेतिनः ॥ ६ ॥ ॥ इति श्रीभविष्ये महा
पुराणे ब्राह्मे पर्वण्यादित्यकल्पे रोगहरविधिवर्णनं नामैकनवतितमोऽध्यायः ॥ ९१ ॥ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ यस्त्वादित्यग्रहस्या
स्य वारो देवस्य सुव्रत ॥ शस्यः प्रोक्तः प्रियो लोके ख्यातो गोश्रुतिभूषणः ॥ १ ॥ यस्तु पूजयते तस्मिन्पतंगं पतगप्रियम् ॥ गन्धपुष्पो
पहारैस्तु सूर्यलोकं स गच्छति ॥ २ ॥ सोपवासो गणश्रेष्ठ आदित्यग्रहणे शुचिः ॥ जपमानो महाश्वेतां खपोषमथ वा शिवम् ॥ ३ ॥ पूजये
ज्जगतामीशं तमोनाशनमाशुगम् ॥ पूजयित्वा खपोषं तु महाश्वेतां ततो जपेत् ॥ ४ ॥ पूजयित्वा महाश्वेतां रविं देवं सम[4]र्च्चयेत् ॥ महाश्वेतां प्रति
ष्ठाप्य गन्धपुष्पैः सुपूजिताम् ॥ ५ ॥ तस्या एव [5]बहिः कार्यं स्थंडिलं सुसमाहितः ॥ शुचौ भूमिविभागे तु वीरं संस्थाप्य यत्नतः ॥ ६ ॥ कुर्या
द्धोमं तिलैः स्नातः सर्पिषा च विशेषतः ॥ आदित्यग्रहवेलायां जपेन्छ्वेतां महामते ॥ ७ ॥ मुक्ते दिनकरे पश्चात्स्नानं कृत्वा समाहितः ॥ पूजयित्वा
महाश्वेतां ख[6]गोल्कं च ग्रहाधिपम् ॥ ८ ॥ ब्राह्मणान्वाचयित्वा च ततो भुञ्जीत वाग्यतः ॥ आदित्यग्रहयुक्तेऽस्मिन्वारे त्रिपुरसूदन ॥ ९ ॥ यत्कर्म
क्रियते पुण्यं तत्सर्वं शुभदं भवेत् ॥ स्नानदानजपादीनां कर्मणां गोवृषध्वज ॥ १० ॥ अनन्तं हि फलं तेषां भवत्यस्मिन्न संशयः ॥ कृतानां तु गण
श्रेष्ठ भास्करस्य वचो यथा ॥ ११ ॥ तस्माद्द्विजगणैः कार्यं पुण्यकर्मविचक्षणैः ॥ एकभक्तं च नक्तं च उपवासं गणाधिप ॥ १२ ॥ ये वादित्यदिने
कुर्युस्ते यांति परमं पदम् ॥ धर्म्यं पुण्यं यशस्यं च पुत्रीयं कामदं तथा ॥ १३ ॥ तस्मिन्दानमपूपस्य गोदानेन समं भवेत् ॥ द्वादशैते महाबाहो
वीरभानोर्महात्मनः ॥ १४ ॥ तुष्टिदाः कथितास्तुभ्यं सर्वपापभयापहाः ॥ पठतां शृण्वतां तात कुर्वतां च विशेषतः ॥ १५ ॥ कृत्वैकमेषां विधि
वद्वारं वृषभवाहन ॥ वृषादित्रितयं प्राप्य चात्रिजामचलां तथा ॥ १६ ॥ ततो याति परं लोकं वृषकेतोर्महात्मनः ॥ तेजसांबुजसंकाशः प्रभयां
डजसन्निभः ॥ १७ ॥ पविहेतिसमो वीर्ये कान्त्या चन्द्रसमप्रभः ॥ १८ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वण्यादित्यवारकल्पे
महाश्वेतवारविधिवर्णनं नाम द्विनवतितमोऽध्यायः ॥ ९२ ॥ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ येषां धर्मक्रियाः सर्वाः सदैवोद्दिश्य भास्क
रम् ॥ न कुले जायते तेषां दरिद्रो व्याधितोऽपि वा ॥ १ ॥ देवायतनभूमेस्तु गोमयेनोपलेपनम् ॥ यः करोति नरो भक्त्या सद्यः
पापात्प्रमुच्यते ॥ २ ॥ श्वेतया रक्तयावापि पीतमृत्तिकयापि वा ॥ उपलेपनकर्ता वै चिन्तितं लभते फलम् ॥ ३ ॥ चित्रभानुं विर[7]ञ्चैव

---

१ द्विजम्–इ० पा० । २ सर्वपापैस्तु–इ० पा० । ३ स गच्छेद्भास्करम्–इ० पा० । ४ ततोऽर्चयेत्–इ० पा० । ५ पुरःकुर्याद्रविकार्यम्–इ० पा० । ६ रविं देवं समर्चयेत्–इ० पा० । ७ विचित्रैर्य–इ० पा० ।

कुसुमैर्यः सुगन्धिभिः ॥ पूजयेत्सोपवासस्तु स कामानीप्सिताँल्लभेत् ॥४॥ घृतेन दीपकं ज्वाल्य तिलतैलेन वा रवेः ॥ प्रयाति सूर्यलोकं स दीपकोटिशतैर्वृतः ॥ ५ ॥ दीपतैलप्रदानेन न याति नरकं नरः ॥ दीपतैलं [1]तिलाश्चैव महापातकनाशनाः ॥६॥ दीपं ददाति यो नित्यं [2]भास्कराय तनेषु च ॥ चतुष्पथेषु तीर्थेषु रूपौजस्वी ह जायते ॥ ७ ॥ यस्तु [3]कारयते दीपं रवेर्भक्तिसमन्वितः ॥ स कामानीप्सितान्प्राप्य वृन्दारकपुरं व्रजेत् ॥८॥ यः समालभते सूर्यं चन्दनागुरुकुंकुमैः ॥ कर्पूरेण विमिश्रैश्च तथा कस्तूरिकान्वितैः ॥ ९ ॥ शुभं कालं कोटिशतं [4]विहृत्य च भवालये ॥ पुनः सञ्जायते भूमौ राजराजो न संशयः ॥ सर्वकामसमृद्धात्मा सर्वलोकनमस्कृतः ॥ १० ॥ चन्दनोदकमिश्रैश्च दत्त्वार्घ्यं कुसुमै रवेः ॥ सपुत्रपौत्रपत्नीकः [5]स्वर्गलोके महीयते ॥ ११ ॥ सुगन्धोदकमिश्रैस्तु दत्त्वार्घ्यं कुसुमै रवेः ॥ देवलोके चिरं स्थित्वा राजा भवति भूतले ॥ १२ ॥ स हिरण्येन चार्घेण रक्तोदकयुतेन वा ॥ कोटीशतं तु वर्षाणां स्वर्गलोके महीयते ॥ १३ ॥ पद्मैरभ्यर्चनं कृत्वा रवेः स्वर्गगतो नरः ॥ पद्मे वसति वर्षाणां स्त्रीपद्मशतसंवृतः ॥ १४ ॥ गुग्गुलं सघृतं दत्त्वा [6]रवेर्भक्तिसमन्वितः ॥ तत्क्षणात्सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ १५ ॥ पक्षं तु गुग्गुलुं दत्त्वा मुच्यते ब्रह्महत्यया ॥ संवत्सरेण लभते अश्वमेधफलं शिव ॥१६॥ धूपेन लभते स्वर्गं तुरुष्केण सुगन्धिना ॥ कर्पूरागुरुधूपेन राजसूयफलं लभेत् ॥१७॥ पूर्वाह्णे मानवो भक्त्या श्रद्धया योऽर्चयेद्रविम् ॥ स तत्फलमवाप्नोति यद्दत्ते कपिलाशते ॥ १८ ॥ मध्याह्ने योऽर्चयेत्सूर्यं प्रयतात्मा जितेन्द्रियः ॥ लभते भूमिदानस्य गोशतस्य च तत्फलम् ॥ १९ ॥ पश्चिमायां तु सन्ध्यायां योऽर्चयेद्भास्करं नरः ॥ शुचिः शुक्लांबरोष्णीषो गोसहस्रफलं लभेत् ॥ २० ॥ अर्धरात्रे तु यो हेलिं भक्त्या संपूजयेन्नरः ॥ जातिस्मरत्वमाप्नोति कुले जातो वृषान्वितः ॥२१॥ प्रदोषरात्रिवेलायां यः पूजयति भास्करम् ॥ स गत्वा सहसा वीर क्रीडेत्[7]सौमनसं क्षयम् ॥२२॥ दण्डनायकवेलायां प्रभातसमये पुनः ॥ पूजयित्वा रविं भक्त्या व्रजेदनिमिषालयम् ॥२३॥ एवं वेलासु सर्वासु अवेलासु च मानवः ॥ भक्त्या पूजयते योऽर्कमर्कपुष्पैः समाहितः ॥ तेजसादित्यसंकाशो ह्यर्कलोके महीयते ॥ ॥२४॥ अयने तूत्तरे सूर्यमथ वा दक्षिणायने ॥ पूजयेद्यस्तु वै भक्त्या स गच्छेत्कञ्जजालयम् ॥२५॥ तत्रस्थः पूज्यते [8]केशैः सर्वैः सुमनसैस्तथा ॥ गोपतिः पूज्यते यद्वद्गोपतिप्रमुखैः सुरैः ॥ २६ ॥ विषुवेषूपरागेषु षडशीतिमुखेषु च ॥ पूजयित्वा रविं भक्त्या नात्मानं शोचते नरः ॥ २७ ॥ [9]विबुध्य वा

---

[1] दिनान्येव—इ० पा० । [2] देवतायतनेषु—इ० पा० । [3] धारयते—इ० पा० । [4] उषित्वा च—इ० पा० । [5] मम लोके—इ० पा० । [6] भक्त्या समाहितः—इ० पा० । [7] सागरसंक्षयम्—इ० पा० । [8] देवैः—इ० पा० । [9] बिंबमध्यगतं देवम्—इ० पा० ।

स्वयं वापि यो नमस्कुरुते रविम् ॥ संतुष्टो भास्करस्तस्मै गतिमिष्टां प्रयच्छति ॥ २८ ॥ कृशरापायसापूपपललोन्मिश्रमोदकैः ॥ बलिं कृत्वा तु सूर्याय सर्वकाममवाप्नुयात् ॥२९॥ मोदकानां प्रदानेन[1] पायसस्य च सुव्रत ॥ मधुमांसरसैश्चापि[2] प्रीयतेऽतीवभास्करः ॥३०॥ घृतेन तर्पणं कृत्वा सदा स्निग्धो भवेन्नरः ॥ तर्पयित्वा तु मांसेन सद्यः पापात्प्रमुच्यते ॥ ३१ ॥ घृतेन स्नपनं कृत्वा एकाहमुदये रवेः ॥ गवां शतसहस्रस्य दत्तस्य फलमश्नुते ॥ ३२ ॥ गवां क्षीरेण संतर्प्य पुंडरीकफलं लभेत् ॥ रसेन स्नापयेद्देवमश्वमेधफलं[3] लभेत् ॥ ३३ ॥ सूर्याय तरुणीं[4] धेनुं गामेकां यः प्रयच्छति ॥ कञ्जजामचलां प्राप्य पुनर्लेखपुरं व्रजेत् ॥ ३४ ॥ गोशरीरे तु रोमाणि यावन्ति त्रिपुरान्तक ॥ स तावद्वर्षकोटीस्तु लेखलोके महीयते ॥ ३५ ॥ गोशतं भानवे दत्त्वा राजसूयफलं लभेत् ॥ अश्वमेधफलं तस्य यः सहस्रं प्रयच्छति ॥३६॥ गुग्गुलुं देवदारुं च दहेन्नित्यं घृतस्रवम् ॥ आज्यधूमो[5] हि देवानां प्रकृत्यैव प्रियः सदा ॥३७॥ भेर्यादीनि च वाद्यानि शंखवेण्वादिकानि च ॥ ये प्रयच्छंति सूर्याय यांति ते हंसमंदिरम् ॥ ३८ ॥ वज्रमाहरते यस्तु रवेर्भक्तिसमन्वितः ॥ तीर्थोदकमथैवान्यः स याति विबुधालयम् ॥३९॥ विमानैः स्त्रीशताकीर्णैः क्रीडयित्वा चिरं नरः ॥ मानुषत्वमनुप्राप्य राजा भवति धार्मिकः ॥४०॥ छत्रं ध्वजं वितानं च पताकाश्चामराणि च ॥ हेमदंडानि वै दद्याद्रवेर्यो भक्तिमान्नरः ॥ ॥ ४१ ॥ विमानेन स दिव्येन किंकिणीजालमालिना ॥ सूर्यलोकमतो गत्वा भवत्यप्सरसां पतिः ॥ ४२ ॥ तत्रोष्य सुचिरं कालं स्वर्गात्प्रत्यागतः पुनः ॥ मानुष्ये जायते राजा सर्वराजनमस्कृतः ॥ ४३ ॥ दत्त्वा वासांसि सूर्याय अलंकारांस्तथैव च ॥ क्रीडते जनलोकस्थो यावदाभूतसंप्लवम् ॥४४॥ गीतवादित्रनृत्यैश्च कुर्याज्जागरणं रवेः ॥ गंधर्वाप्सरसां मध्ये क्रीडते सुचिरं नरः ॥ ४५ ॥ गंधैः पुष्पैस्तथा पत्रैः स्तोत्रैर्वा विविधैस्तथा ॥ ये स्तुवंति रविं भक्त्या ते यांति पतगालयम् ॥ ४६ ॥ उषः स्तुवंति ये सूर्यमुपगायंति ते सदा ॥ पाठकाश्चारणाश्चैव सर्वे ते स्वर्गगामिनः ॥ ४७ ॥ अश्वयुक्तं युगैर्युक्तं यो दद्याद्रवये रथम् ॥ कांचनं वापि रौप्यं वा मणिरत्नान्वितं शुभम् ॥ ४८ ॥ स यानेनार्कवर्णेन किंकिणीजालमालिना ॥ स्वर्गलोकमितो गत्वा क्रीडतेऽप्सरसा सह ॥ ४९ ॥ यस्तु दारुमयं कुर्याद्रवे रथमनुत्तमम् ॥ स यात्यर्कसवर्णेन[6] विमानेनार्कमंडलम् ॥ ५० ॥ यात्रां कुर्वंति ये भानोर्नराः संवत्सरादपि ॥ षण्मासाद्वा गणश्रेष्ठ तेषां पुण्यफलं शृणु ॥ ५१ ॥ (षण्मासान्वा[6] गणश्रेष्ठ तेषां कर्मफलं शृणु ॥) ध्यानिनो योगिनश्चैव प्राप्नुवंतीह यां गतिम् ॥ तां गतिं प्रतिपद्यंते सूर्यवर्त्मावगाहिनः ॥५२॥ रथं वहंति ये भानोर्नरा भक्ति

---

१ प्रयत्नेन—इ० पा० । २ मधुमांसातिवर्षेण—इ० पा० । ३ स्नपनं कृत्वा—इ० पा० । ४ तर्पणीम्—इ० पा० । ५ आज्यधूपः—इ० पा० । ६ अयमधिक इव भाति ।

समन्विताः ॥ अरोगाश्चादरिद्राश्च जातौ जातौ भवंति ते ॥ ५३ ॥ कर्तारो रथयात्राया ये नरा भास्करस्य तु ॥ ते भानुलोकमासाद्य विहरन्ति
यथासुखम् ॥ ५४ ॥ यात्राभंगं तु यो मोहात्क्रोधाद्वा कुरुते नरः ॥ मंदेहास्ते नरा ज्ञेया राक्षसाः पापकारिणः ॥ ५५ ॥ धनं धान्यं हिरण्यं वा
वासांसि विविधानि च ॥ ये प्रयच्छंति सूर्याय ते यांति परमां गतिम् ॥ ५६ ॥ गा वाथ महिषीर्वापि गजानश्वांश्च शोभनान् ॥ यः प्रयच्छति
सूर्याय तस्य पुण्यफलं शृणु ॥ ५७ ॥ अक्षयं सर्वकामीयमश्वमेधफलं लभेत् ॥ सहस्रगुणितं तच्च दानमस्योपतिष्ठति ॥ ५८ ॥ महीं ददाति
योऽर्काय कृष्टां फलवतीं शुभाम् ॥ स तारयति वै वंश्यान्दश पूर्वान्दशापरान् ॥५९॥ विमानेन च दिव्येन गोपुरं गोपतेर्व्रजेत् ॥ क्रीडत्यप्सरसां
मध्ये करीव करिणीगणे ॥ ६० ॥ ग्रामं ददाति यो भक्त्या सूर्याय मतिमान्नरः ॥ विमानेनार्कवर्णेन स याति परमां गतिम् ॥ ६१ ॥ आरा
मान्ये प्रयच्छंति पत्रपुष्पफलोपगान् ॥ भानवे भक्तियुक्तास्तु ते यांति परमां गतिम् ॥ ६२ ॥ मानसं वाचिकं वापि कर्मजं यच्च दुष्कृतम् ॥
सर्वं सूर्यप्रसादेन अशेषं च प्रणश्यति ॥६३॥ आर्तो वा व्याधितो वापि दरिद्रो दुःखितोऽपि वा ॥ आदित्यं शरणं गत्वा नात्मानं शोचते नरः ॥
॥ ६४ ॥ एकाहेनापि यद्भानोः पूजायाः प्राप्यते फलम् ॥ तद्वै क्रतुशतैरिष्टैः प्राप्यते फलमुत्तमम् ॥ ६५ ॥ कृत्वा प्रेक्षणकं भानोर्दिव्यमायतने
शुभम् ॥ अक्षयं सर्वकामीयं राजसूयफलं लभेत् ॥६६॥ वेश्याकदंबकं यस्तु दद्यात्सूर्याय भक्तितः ॥ स गच्छेत्परमं स्थानं यत्र तिष्ठति भानुमान् ॥
॥६७॥ पुस्तकं भानवे दद्याद्भारतस्य गणाधिप ॥ सर्वपापविमुक्तात्मा विष्णुलोके महीयते ॥ ६८ ॥ रामायणस्य दत्वा तु पुस्तकं त्रिपुरांतक ॥
वाजपेयफलं प्राप्य गोपतेः पुरमाव्रजेत् ॥६९॥ भविष्यं सांबसंज्ञं वा दत्त्वा सूर्याय पुस्तकम् ॥ राजसूयाश्वमेधाभ्यां फलं प्राप्नोति मानवः ॥७०॥
सर्वान्कामानवाप्नोति याति सूर्यसलोकताम् ॥ सूर्यलोके चिरं स्थित्वा ब्रह्मलोकं व्रजेत्पुनः ॥ स्थित्वा कल्पशतं तत्र राजा भवति भूतले॥७१॥
भानोरायतने यस्तु प्रपां कुर्याद्गणाधिप ॥ स याति परमं स्थानं दिव्यं सौमनसं नरः ॥ ७२ ॥ शीतकाले घनं दद्यान्नराणां शीतनाशनम् ॥
भानोरायतने देव अश्वमेधफलं लभेत् ॥७३॥ इतिहासपुराणभ्यां पुण्यं पुस्तकवाचनम् ॥ अश्वमेधसहस्रं यो नित्यं कर्तुं प्रवर्तते ॥ न तत्फलमवा
प्नोति यदाप्नोत्यस्य कर्मणः ॥७४॥ तस्मात्सर्वप्रयत्नेन कार्यं पुस्तकवाचनम् ॥ इतिहासपुराणाभ्यां भानोरायतने शुभम् ॥७५॥ नान्यत्पुष्टिकरं

---

१ शुभम्–इ० पा०। २ विनयं यत्र तिष्ठति–इ० पा०।

भानोस्तथा तुष्टिकरं परम् ॥ पुण्याख्यानकथा यास्तु यथा तुष्यतिभास्करः ॥ ७६ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमी
कल्पे भानुमहिमवर्णनं नाम त्रिनवतितमोऽध्यायः ॥ ९३ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ अत्राख्यानमुशंतीह संवादं गणपुंगव ॥ पितामहकुमा
राभ्यां पुण्यं पापहरं शिवम् ॥ १ ॥ स्रष्टारं सर्वलोकानां सुखासीनं पितामहम् ॥ प्रणम्य शिरसा देवं श्रद्धाभक्तिसमन्वितः ॥ २ ॥ कुमारो
देवशार्दूल इदं ःवचनमब्रवीत् ॥ गतोऽहमद्य भगवन्द्रष्टुं देवं दिवाकरम् ॥ ३ ॥ कृत्वा प्रदक्षिणं देवः स मया पूजितो रविः ॥ प्रणम्य
शिरसा भक्त्या परया श्रद्धया विभो ॥ ४ ॥ अनुज्ञातस्ततस्तेन सुखासीनो ह्यहं स्थितः ॥ आसीनेन मया तत्र दृष्टमाश्चर्यमद्भुतम् ॥ ५ ॥ काञ्च
नेन विमानेन किंकिणीजालमालिना ॥ मणिमुक्ताविचित्रेण वैदूर्यवरवेदिना ॥ ६ ॥ आगतं पुरुषं तत्र दृष्ट्वा देवो दिवाकरः[1] ॥ ससंभ्रमं समुत्थाय
आसनादेव सत्तम ॥ ७ ॥ गृहीत्वा[2] दक्षिणे पाणौ पुरतः प्राप्य तं नरम् ॥ शिरस्याघ्राय देवेश पूजयामास वै रविः ॥ ८ ॥ उपविष्टं तु तं भानु
रिदं वचनब्रवीत् ॥ सुस्वागतं भद्र सुखकृता प्रीतास्त्वया वयम् ॥ ९ ॥ समीपे मम तिष्ठ त्वं यावदाभूतसंप्लवम् ॥ पुनर्यास्यसि तत्स्थानं यत्र
ब्रह्मा स्वयं स्थितः ॥ १० ॥ एतस्मिन्नंतरे चान्यो विमानवरमास्थितः ॥ आगतः पुरुषो देवो यत्र तिष्ठति भास्करः ॥ ११ ॥ स चाप्येवं नरो
देव पूजितो भानुना तदा ॥ सामपूर्वं तथोक्तस्तु प्रश्रयावनतः स्थितः ॥ १२ ॥ तत्र मे कौतुकं जातं दृष्ट्वा पूजां कृतां तयोः ॥ भानुना देवशार्दूल
पृष्टो भानुर्मया ततः ॥ १३ ॥ किमनेन कृतं देव योऽयं पूर्वमिहागतः ॥ नरस्तव सकाशं वै यस्य तुष्टो भवान्भृशम् ॥ १४ ॥ यदस्य भवता पूजा
कृता हि स्वयमेव तु ॥ अत्र मे कौतुकं जातं विस्मयश्च विशेषतः ॥ १५ ॥ तथैवास्य कृता पूजा द्वितीयस्य नरस्य च ॥ सर्वथा पुण्यकर्माणाविमौ
नरवरोत्तमौ ॥ १६ ॥ ब्रह्मविष्णुशिवाद्यैस्तु पूज्यते भगवान्त्सदा ॥ यस्त्वमाभ्यां परं पूजां कृतवान्देवसत्तम ॥ १७ ॥ कथ्यतां मम देवेश किमेतौ
कर्म चक्रतुः ॥ यस्येदृक्परमं पुण्यं फलं दिव्यमवापतुः ॥ श्रुत्वा तद्वचनं देव इदं वचनमब्रवीत् ॥ १८ ॥ ॥ सूर्यउवाच ॥ ॥ साधु पृष्टोऽस्मि
भवता कर्मणो निर्णयं परम् ॥ १९ ॥ यदनेन कृतं कर्म नरेण मुनित्तम ॥ योऽसौ सूर्यमिहायातस्तच्छृणुष्व महामते ॥ २० ॥ येयं मदंशसंभूतैः
पार्थिवैः पालिता सदा ॥ अयोध्या नाम नगरी प्रख्याता पृथिवीतले ॥ २१ ॥ तत्रासौ वैश्यजातीयो धनपाल इति स्मृतः ॥ तस्यां पुर्यां द्विज
श्रेष्ठ दिव्यमायतनं व्यधात्[3] ॥ २२ ॥ तस्मिन्नायतने दिव्ये ह्याम्नायार्थं तथाश्रितः ॥ ब्राह्मणानां विशिष्टानां पूजयित्वा कदंबकम् ॥ २३ ॥ इतिहा

---

[1] विभावसुः—इ० पा० । [2] गृहीत्वा दक्षिणे पादे पुरतः स्थाप्य तं नरम्—इ० पा० । [3] मम—इ० पा० ।

सपुराणाभ्यां वाचकं च विशेषतः ॥ पूजयित्वा द्विजश्रेष्ठं मुनिश्रेष्ठं महामुनिम् ॥ २४ ॥ पुस्तकं चापि संपूज्य गंधपुष्पोपहारतः ॥ तस्य विप्रकदंबस्य व्यासस्य च यथाग्रतः ॥ २५ ॥ प्रकल्प्योक्तो द्विजोऽनेन पाठको[1] वाचकोत्तमः ॥ एष तिष्ठति देवेशः सहस्रकिरणो रविः ॥ २६ ॥ चातुर्वर्ण्यमिदं वापि श्रोतुकामं कदंबकम् ॥ तिष्ठ चेह द्विजश्रेष्ठ कुरु पुस्तकवाचनम् ॥ २७ ॥ येन मे वरदो भानुः[2] सप्त जन्मानि वै भवेत् ॥ यावत्संवत्सरं विप्र प्रगृह्य वृत्तिमुत्तमाम् ॥ २८ ॥ स्वर्णनिष्कशतं विप्र ततो दास्ये तथापरम् ॥ पूर्णे वर्षे द्विजश्रेष्ठ श्रेयोऽर्थमहमात्मनः ॥ २९ ॥ एवं प्रवर्तिते तस्मिन्पुण्ये पुस्तकवाचने ॥ षण्मासागतमात्रे तु काले सुरवरोत्तम ॥ तथैवान्तरतश्चायं कालधर्ममुपेयिवान् ॥ ३० ॥ मया चास्य विमानं तु प्रेषितं कुर्वतो व्रतम् ॥ इत्येषा कर्मणस्तुष्टिः पुण्याख्यानकजार्चिता ॥ ३१ ॥ गंधष्पोपहारैस्तु न तथा जायते मम ॥ प्रीतिर्देववर श्रेष्ठ पुराणश्रवणे यथा ॥ ३२ ॥ गोसुवर्णहिरण्यानां वस्त्राणां चापि कृत्स्नशः ॥ ग्रामाणां नगराणां च दानं प्रीतिकरं मम ॥ ३३ ॥ न तथा स्यात्सुरश्रेष्ठ यथ प्रीतिकरं गुह ॥ इतिहासपुराणाभ्यां श्रवणं सुरसैन्यप ॥ ३४ ॥ श्राद्धं कुर्वंति ये मह्यं भक्ष्यभोज्यैरनेकशः ॥ न करोति तथा प्रीतिर्यथा पुस्तकवाचनम् ॥ ३५ ॥ कर्णश्राद्धे यथा प्रीतिर्मम स्यात्सुरत्तम ॥ न तथा जायते प्रीतिर्भोज्यश्राद्धे तथैव च ॥ ३६ ॥ अथ किं बहुनोक्तेन नान्यत्प्रीतिकरं मम ॥ पुण्याख्यानादृते देव गुह्यमेतत्प्रकीर्त्तितम् ॥ ३७ ॥ यश्चायमपरो विप्र इहायतो नरोत्तमः ॥ अयमासीद्द्विजश्रेष्ठस्तस्मिन्नेव पुरोत्तमे ॥ ३८ ॥ एकदा तु गतश्चायं धर्मश्रवणमुत्तमम् ॥ श्रोतुं भक्त्या द्विजश्रेष्ठ श्रद्धया परया वृतः ॥ ३९ ॥ श्रुत्वा तत्र ततो भक्त्या पुण्याख्यानमनुत्तमम् ॥ कृत्वा प्रदक्षिणं तस्य वाचकस्य महात्मनः ॥ एष विप्रोमरश्रेष्ठ दत्तवान्स्वर्णमाषकम् ॥ ४० ॥ दत्त्वा तु दक्षिणां तस्मै वाचकायामितौजसे[3] ॥ आनंदमगमद्विप्रः प्राप्तवान्कांचनं यथा ॥ ४१ ॥ एतद्धि सफलं चास्य न चान्यत्कृतवानयम् ॥ यदनेन कृता पूजा वाचकस्य महात्मनः ॥ फलं हि कर्मणस्तस्य यन्मया पूजितः स्वयम् ॥ ४२ ॥ वाचकं पूजयेद्यस्तु श्रद्धाभक्तिसमन्वितः ॥ तेनाहं पूजितः स्यां वै को विष्णुः शंकरस्तथा ॥ ४३ ॥ वाचकं भोजयेद्यस्तु भक्त्या भोज्यैरनुत्तमैः ॥ तेनाहं पूजितः स्यां वै दश वर्षाणि पंच च ॥ ४४ ॥ न यमो न यमी चापि न मंदो न मनुस्तथा ॥ तपती न तथान्विष्टा यथेष्टो वाचको मम ॥ ४५ ॥ वाचके सत्कृते देव भोजिते सुरसैन्यप ॥ तृप्तिर्भवति मे देव संवत्सरशतद्वयम् ॥ ४६ ॥ न केवलं मम प्रीतिर्वाचके भोजिते भवेत् ॥ कृत्स्नशो देवतानां च इंद्रादीनां तथा भवेत् ॥ ४७ ॥

---

[1] याचकः—इ० पा० । [2] देवः—इ० पा० । [3] महात्मने—इ० पा० ।

ब्रह्मविष्णुशिवादीनां स चेष्टो वाचको मम ॥ प्रीते तस्मिन्देवताः स्युः सर्वाः प्रीता न संशयः ॥ ४८ ॥ इत्येतत्कथितं सर्वमाभ्यां कर्म महाबल ॥ ४९ ॥ न चान्यच्चक्रतुः कर्म किमन्यच्छ्रोतुमिच्छसि ॥ एतद्दृष्ट्वाहमाश्चर्यं तवाभ्याशमिहागतः ॥ किमत्र तथ्यं देवेश कथ्यतां कौतुकं मम ॥ ॥ ५० ॥ श्रुत्वा कुमारवचनं सर्वलोकपितामहः ॥ ५१ ॥ ॥ ब्रह्मोवाच ॥ ॥ हंत भोः साधु पुण्योऽसि नास्ति तुल्यस्त्वयापरः ॥ यद्दृष्टौ भवता तौ हि सुपुण्यौ पुण्यकारिणौ ॥ ५२ ॥ यदुक्तं भानुना वत्स तत्तथा नान्यथा भवेत् ॥ यदासीन्मे मुखं पुत्र प्रथमं लोकपूजितम् ॥ ५३ ॥ तस्मादेतानि सर्वाणि निर्गतानि समंततः ॥ इतिहासपुराणानि लोकानां हितकाम्यया ॥५४॥ यथैतानि ममेष्टानि पुराणानि महामते ॥ न तथा वै चतुर्वेदी न चांगानि महामते ॥ ५५ ॥ शृण्वंत्येतानि ये भक्त्या नित्यं श्रद्धासमन्विताः ॥ दत्त्वा तु वाचके वृत्तिं ते गच्छंति परं पदम् ॥ ॥ ५६ ॥ धर्मार्थकाममोक्षाणां स्पष्टीकरणमुत्तमम् ॥ इतिहासपुराणानि मया सृष्टानि सुव्रत ॥५७ ॥ चत्वारो य इमे वेदा गूढार्थाः सततं स्मृताः ॥ अतस्त्वेतानि सृष्टानि बोधायैषां महामते ॥ ५८ ॥ यस्तु कारयते नित्यं धर्मश्रवणमुत्तमम् ॥ आदित्याद्भास्करं प्राप्य याति तत्परमं पदम् ॥ ॥ ५९ ॥ दत्त्वा तु दक्षिणां तत्र आदित्यस्य पुरं व्रजेत् ॥ किमाश्चर्यं सुरश्रेष्ठ दानपात्रं हि तत्परम् ॥ ६० ॥ यथा देववरो लेखो यथा हेतिः परं पविः ॥ ब्राह्मणानां तथा श्रेष्ठो वाचको नात्र संशयः ॥ ६१ ॥ हेतिर्यथा तेजसां तु सरसां सागरो यथा ॥ तथा सर्वद्विजेभ्यस्तु वाचकः प्रवरः स्मृतः ॥ ॥ ६२ ॥ वाचकं पूजयेद्यस्तु नरो भक्तिपुरःसरम् ॥ पूजितं सकलं तेन जगत्स्यान्नात्र संशयः ॥ ६३ ॥ सत्यमुक्तं न संदेहो भानुना मत्कुलोद्वह ॥ वाचकेन समं पात्रं न जात्वन्यद्भवेत्क्वचित् ॥ ६४ ॥ तच्छ्रुत्वा ब्रह्मणो वाक्यं कुमारो वाक्यमब्रवीत् ॥ ६५ ॥ अहो हि धन्यता तस्य पुण्यश्रवणकारिणः ॥ दानं च ददतोऽत्यर्थं पुण्यता वाचकाय वै ॥ ६६ ॥ ॥ ब्रह्मोवाच ॥ ॥ इत्थं दिंडे सदा यस्तु देवदेवस्य मंदिरे ॥ कुर्यात्तु धर्मश्रवणं स याति परमां गतिम् ॥ ६७ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे पुण्यश्रवणमाहात्म्यवर्णनं नाम चतुर्नवतितमोऽध्यायः ॥ ९४ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ त्रिभिः प्रदक्षिणां कृत्वा यो नमस्कुरुते रविम् ॥ भूमौ गतेन शिरसा स याति परमां गतिम् ॥ १ ॥ सोपानत्को देवगृहमारोहेद्यस्तु मानवः ॥ स याति नरकं घोरं तामिस्रं नाम नामतः ॥ २ ॥ श्लेष्ममूत्रपुरीषाणि समुत्सृजति यस्तु वै ॥ देवस्यायतने भानोः स गच्छेन्नरकं क्रमात् ॥ ३ ॥ घृतं मधु पयस्तोयं तथेक्षुरसमुत्तमम् ॥ स्नपनार्थं तु देवस्य य ददतीह मानवाः ॥ सर्वकामानवाप्येह ते यांति हेलिमंडलम् ॥ ४ ॥ स्नाप्यमानं रविं भक्त्या ये पश्यंति वृषध्वज ॥ तेश्वमेधफलं प्राप्य लयं यांति वृष

ध्वजे ॥ ५ ॥ स्नपनं ये च कुर्वंति भानोर्भक्तिसमन्विताः ॥ लभंते तत्फलं भीम राजसूयाश्वमेधयोः ॥ ६ ॥ यथा न लंघयेत्कश्चित्स्नपनं भास्करस्य तु ॥ तथा कार्यं प्रयत्नेन लंघितं ह्यसुखावहम् ॥ ७ ॥ तामिस्रं नरकं याति लंघयेच्च स रौरवान् ॥ तस्मात्सर्वप्रयत्नेन कार्यं स्नपनमादितः ॥ ८ ॥ घृतेन स्नापयेद्देवं कंजमाप्नोति मानवः ॥ मधुना प्रियमायाति तोयेनापि घृतौकसम् ॥ ९ ॥ इक्षुरसेन संस्नाप्य पयसा कंजशध्वजम् ॥ एवमेभिः स्नापयेद्वै रविमीहितमाप्नुयात् ॥ १० ॥

॥ इति श्रीभविष्ये महापुराणे ब्राह्मेपर्वणि सप्तमीकल्प आदित्यालयमाहात्म्यवर्णनं नाम पंचनवतितमोऽध्यायः ॥ ९५ ॥ छ ॥

॥ दिंडिरुवाच ॥ ॥ यश्चैताः सप्त सप्तम्यो भवता कथिता मम ॥ तासां या प्रथमा देव कथिता सा सविस्तरा ॥ १ ॥ यास्त्वन्या देवशार्दूल ताः सर्वाः कथयस्व मे ॥ येनोपोष्य ततस्तास्तु व्रजेहं हेलिसद्म वै ॥ २ ॥ ॥ ब्रह्मोवाच ॥ ॥ शुक्लपक्षस्य सप्तम्यां नक्षत्रं पंचतारकम् ॥ यदा स्यात्सा तदा ज्ञेया जया नामेति सप्तमी ॥ ३ ॥ तस्यां दत्तं[1] हुतं जापस्तर्पणं देवपूजनम् ॥ सर्वं शतगुणं प्रोक्तं पूजा चापि दिवाकरे ॥ ४ ॥ भास्करस्य प्रिया ह्येषा सप्तमी पापनाशिनी ॥ धन्या यशस्या पुत्र्या च कामदा कंजजावहा ॥ ५ ॥ विधिनानेन कर्तव्या तिथिर्या मम विद्यते ॥ तं शृणुष्व विधिं मत्तो येन कृत्वार्थमश्नुते ॥ ६ ॥ हंसे हंससमारूढे शुक्लेयं सप्तमी पुरा ॥ समुपोष्य च कर्तव्या विधिनानेन शंकर ॥ ७ ॥ पारणा तृतीयाऽहे स्यात्कथितं गोवृषावहम् ॥ प्रथमं चतुरो मासान्पारणं कथितं बुधैः ॥ ८ ॥ कथितान्यत्र पुष्पाणि करवीरस्य सुव्रत ॥ चंदनं च तथा रक्तं धूपार्थं गुग्गुलं परम् ॥ ९ ॥ कांसारं तु सुपक्वं च नैवेद्यं भास्कराय वै ॥ अनेन विधिनापूज्य मार्तंडं विबुधाधिपम् ॥ १० ॥ पूजयेद्ब्राह्मणान्भीम भक्ष्यभोज्यैर्यथाविधि ॥ कांसारं भोजयेद्विप्रान्पारणेऽस्मिन्विचक्षणः ॥ स्वयमेव तथाश्नीयात्प्रयतो मौनमाश्रितः ॥ ११ ॥ पंचम्यामेकभक्तं तु षष्ठ्यां नक्तं प्रवर्तते ॥ कृत्वोपवासं सप्तम्यामष्टम्यां पारणं भवेत् ॥ १२ ॥ षष्ठ्या समेता कर्तव्या नाष्टम्येयं कदाचन ॥ यस्योपवासनायैव षष्ठ्यामाहुरुपोषितम् ॥ १३ ॥ यथैकादश्यां कुर्वंति उपवासं मनीषिणः ॥ उपवासनाय द्वादश्यां तथेयं परिकीर्तिता ॥ १४ ॥ सिद्धार्थकैः स्नानमंत्रः प्राशनं गोमयस्य तु ॥ भानुर्मे प्रीयतामत्र दंतकाष्ठं तथार्कजम् ॥ १५ ॥ इत्येष कथितस्तात प्रथमे पारणे विधिः ॥ द्वितीयं श्रूयतां भीम पारणं गदतो मम ॥ १६ ॥ मालतीकुसुमानीह श्रीखण्डं चंदनं तथा ॥ नैवेद्यं पायसं भानोर्धूपं विजयमादिशेत् ॥ १७ ॥ ब्राह्मणान्भोजयेद्वापि तथाश्नीयात्स्वयं विभो ॥ रविर्मे प्रीयतामत्र नाम देवस्य कीर्तयेत् ॥ १८ ॥ प्राशयेत्पंचगव्यं तु खदिरं दंत

---

[1] दानमित्यर्थः, अयं भावनिष्ठान्तः प्रयोगः । एवं हुतमित्यत्रापि हवनमित्यर्थो बोध्यः ।

धावने ॥ द्वितीये पारणे वीर विधिरुक्तो मयाधुना ॥ १९ ॥ तृतीयं पारणं चापि कथ्यमानं निबोध मे ॥ अगस्तिकुसुमैरत्र भास्करं पूजयेद्बुधः ॥ ॥ २० ॥ समालंभनमत्रोक्तं श्रीखंडं कुसुमं तथा ॥ सिह्लको धूप उद्दिष्टो भानोः प्रीतिकरः परः ॥ २१ ॥ शाल्योदनं तु नैवेद्यं रसालोपरिसंयुतम् ॥ ब्राह्मणानां तु दातव्यं भक्षयेत तथात्मना ॥ २२ ॥ कुशोदकप्राशनं तु बदर्या दंतधावनम् ॥ विकर्तनः प्रीयतां मे नाम देवस्य कीर्तयेत् ॥ ॥ २३ ॥ वर्षासु देवदेवस्य पूजा कार्या विधानतः ॥ गंधपुष्पोपहारैस्तु नानाप्रेक्षणकैस्तथा ॥ २४ ॥ गोदानैर्भूमिदानैर्वा ब्राह्मणानां च तर्पणैः ॥ इत्थं संपूज्य देवेशं देवस्य पुरतः स्थितः ॥ २५ ॥ कारयेत्परमं पुण्यं धन्यं पुस्तकवाचनम् ॥ वस्त्रैर्गंधैस्तथा धूपैर्वाचकं पूजयेत्ततः ॥ २६ ॥ देवस्य पुरतः स्थित्वा ततो मंत्रमुदीरयेत् ॥ देवदेव जगन्नाथ सर्वरोगार्तिनाशन ॥ ग्रहेश लोकनयन विकर्तनतमोऽपह ॥ २७ ॥ कृतेयं देवदेवेश जया नामेति सप्तमी ॥ मया तव प्रसादेन धन्या पापहरा शिवा ॥ २८ ॥ अनेन विधिना वीर यः कुर्यात्सप्तमीमिमाम् ॥ तस्य स्नानादिकं सर्वं भवेच्छतगुणं विभो ॥ २९ ॥ कृत्वेमां सप्तमीं वीर पुरुषः प्राप्नुयाद्यशः ॥ धनं धान्यं सुवर्णं च पुत्रमायुर्बलं श्रियम् ॥ ३० ॥ प्राप्येह देवशार्दूल सूर्यलोकं स गच्छति ॥ तस्मादेत्य पुनर्भूमौ राजराजो भवेद्बुधः ॥ ३१ ॥ इत्येषा कथिता वीर जया नामेति सप्तमी ॥ कृता स्मृता श्रुता सा तु हेलिलोकप्रदायिनी ॥ ३२ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे जयानामसप्तमीमाहात्म्यवर्णनं नाम षण्णवतितमोऽध्यायः ॥ ९६ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ माघस्य शुक्लपक्षे तु सप्तमी या त्रिलोचन ॥ जयंती नाम सा प्रोक्ता पुण्या पापहरा शिवा ॥ १ ॥ सोपोष्या येन विधिना शृणु तं पार्वतीप्रिय ॥ पारणानि तु चत्वारि कथितान्यत्र पंडितैः ॥ २ ॥ पंचम्यामेकभक्तं तु षष्ठ्यां नक्तं प्रकीर्तितम् ॥ उपवासस्तु सप्तम्यामष्टम्यां पारणं भवेत् ॥३॥ माघे च फाल्गुने मासि तथा चैत्रे च सुव्रत ॥ बकपुष्पाणि रम्याणि कुंकुमं च विलेपनम् ॥ ४ ॥ नैवेद्यं मोदकांश्चात्र धूप आज्यमुदाहृतः ॥ प्राशनं पंचगव्यं तु पवित्रीकरणं परम् ॥ ५ ॥ मोदकैर्भोजयेद्विप्रान्यथाशक्त्या गणाधिप ॥ शाल्योदनं च भूतेश दद्याच्छक्त्या द्विजेषु वै ॥ ६ ॥ इत्थं संपूजयेद्यस्तु भास्करं लोकपूजितम् ॥ सर्वस्मिन्पारणे वीर सोश्वमेधफलं लभेत् ॥ ७ ॥ द्वितीये पारणे पूज्य राजसूयफलं लभेत् ॥ वैशाखाषाढज्येष्ठेषु श्रावणे मासि सुव्रत ॥ पूजार्थमथ भानोर्वै शतपत्राणि सुव्रत ॥८॥ श्वेतं च चंदनं भीम धूपो गुग्गुलुरुच्यते ॥ नैवेद्यं गुडपूपास्तु प्राशनं गोमयस्य तु ॥ भोजने चापि विप्राणां गूडपूपाः प्रकीर्तिताः ॥ ९ ॥ द्वितीयमिदमाख्यातं पारणं पापनाशनम् ॥ राजसूयाश्वमेधाभ्यां फलद भास्करप्रियम् ॥१०॥ तृतीयं शृणु देवस्य पूजार्थे भास्करस्य तु ॥ मासि भाद्रपदे

वीर तथा चाश्वयुजे विभो ॥११॥ कार्त्तिके चापि मासे तु रक्तचंदनमादिशेत् ॥ मालतीकुसुमानीह धूपो विजय उच्यते ॥१२॥ नैवेद्यं घृतपूपास्तु
भोजनं च द्विजन्मनाम् ॥ कुशोदकप्राशनं तु कायशुद्धिकरं परम् ॥१३॥ तृतीयमपि चाख्यातं पारणं पापनाशनम् ॥ राजसूयाश्वमेधाभ्यां फलदं
भास्करप्रियम् ॥ १४ ॥ चतुर्थमपि ते वच्मि पारणं पापनाशनम् ॥ राजसूयाश्वमेधाभ्यां फलदं भस्करप्रियम् ॥ १५ ॥ तदद्य देवशार्दूल पारणं श्रेय
से शृणु ॥ मासि मार्गशिरे वीर पौषे मासि तथा शिव ॥ १६ ॥ माघे च देवशार्दूल शृणु पुण्यान्यशेषतः ॥ करवीराणि रक्तानि तथा रक्तं च चंद
नम् ॥ १७ ॥ अमृताख्यस्तथा धूपो नैवेद्यं पायसं परम् ॥ आर्जनीयं तथा तक्रं प्राशनं परमं स्मृतम् ॥ १८ ॥ अगरुं चंदनं मुस्तं सिह्लकं त्र्यूषणं
तथा ॥ समभागैस्तु कर्तव्यमिदं चामृतमुच्यते ॥१९॥ नामानि कथितान्यत्र भास्करस्य महात्मनः ॥ चित्रभानुस्तथा भानुरादित्यो भास्करस्तथा
॥२०॥ प्रीयतामिति सर्वस्मिन्पारणे विधिमादिशेत् ॥ अनेन विधिना यस्तु कुर्यात्पूजां विभावसोः॥२१॥ तस्यां तिथौ देवदेव स याति परमं पद
म् ॥ कृत्वैवं सप्तमीं भीम सर्वकामानवाप्नुते॥२२॥पुत्रार्थी लभते पुत्रान्धनार्थी लभते धनम् ॥ सरोगो मुच्यते रोगैः शुभमाप्नोति पुष्कलम् ॥२३॥
पूर्णे संवत्सरे भीम कार्या पूजा दिवाकरे ॥ गंधपुष्पोपहारैस्तु ब्राह्मणानां च तर्पणैः ॥ नानाविधैः प्रेक्षणकैः पूजया वाचकस्य तु ॥ २४ ॥ इत्थं
संपूज्य देवेशं ब्राह्मणांश्चाभिपूज्य च ॥ वाचकं च द्विजं पूज्य इदं वाक्यमुदीरयेत् ॥ २५ ॥ धर्मकार्येषु मे देव अर्थकायेषु नित्यशः ॥ कामकार्येषु
सर्वेषु जयो भवतु सर्वदा ॥ २६ ॥ ततो विसर्जयेद्विप्रान्वाचकं तु द्विजोत्तमम् ॥ इत्थं कुर्यादिदं यस्तु स जयं प्राप्नुयात्फलम् ॥ सर्वपापविशु
द्धात्मा सूर्य्यलोकं स गच्छति ॥ २७ ॥ विमानवरमारूढः कंजजोद्भवमुत्तमम् ॥ तेजसा रविसंकाशः प्रभया पतगोपमः ॥ २८ ॥ ॥ इति
श्रीभविष्ये माहपुराणे ब्राह्मे पर्वणि सप्तमीकल्पे जयंतीकल्पवर्णनं नाम सप्तनवतितमोऽध्यायः ॥ ९७ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ मासि
भाद्रपदे शुक्ला सप्तमी या गणाधिप ॥ अपराजितेति विख्याता महापातकनाशिनी ॥ १ ॥ चतुर्थ्यामेकभक्तं तु पंचम्यां नक्तमादिशेत् ॥ उपवासं
तथा षष्ठ्यां सप्तम्यां पारणं स्मृतम् ॥ २ ॥ पारणान्यत्र चत्वारि कथितानि मनीषिभिः ॥ पुष्पाणि करवीरस्य तथा रक्तं च चंदनम् ॥ ३ ॥
धूपक्रिया गुग्गुलेन नैवेद्यं गुडपूपकाः॥ भाद्रपदादिमासेषु विधिरेष प्रकीर्तितः॥४॥श्वेतानि भीम पुष्पाणि तथा श्वेतं च चंदनम् ॥ धूपमाज्यमि
हाख्यातं नैवद्यं पायसं रवेः॥५॥मार्गशीर्षादिमासेषु विधिरेष प्रकीर्तितः ॥ ततोऽगस्त्यस्य पुष्पाणि कुंकुमं च विलेपनम् ॥६॥ धूपार्थं सिह्लकं प्रो
क्तमथ वा रविवर्णकम् ॥ शाल्योदनं च नैवेद्यं सरसं फाल्गुनादिषु ॥७॥ रक्तोत्पलानि भूतेश सागुरुं चंदनं तथा ॥ अनंतो धूप उद्दिष्टो नैवेद्यं

खंडपूपकाः ॥८॥ श्रीखंडं ग्रंथिसहितमगुरुः सिह्लकं तथा ॥ मुस्ता तथेद्रं भूतेश शर्करा गृह्यते त्र्यहम् ॥ ९ ॥ इत्येष धूपोऽनंतस्तु कथितो देवसत्त
म ॥ ज्येष्ठादिमासेषु तथा विधिरुक्तो मनीषिभिः ॥१०॥ शृणु नामानि देवस्य प्राशनानि च सुव्रत ॥ सुधांशुरर्यमा चैव सविता त्रिपुरांतकः ॥११॥
पारणेष्वेव सर्वेषु प्रीयतामिति कीर्तयेत् ॥ गोमूत्रं पंचगव्यं तु घृतं चोष्णं पयो दधि ॥ १२ ॥ यस्त्वेतां सप्तमीं कुर्यादनेन विधिना नरः ॥ अप
राजितो भवेत्सोसौ सदा शत्रुभिराहवे ॥ १३ ॥ जित्वा शत्रुं लभेतापि त्रिवर्गं नात्र संशयः ॥ त्रिवर्गमथसंप्राप्य स्वर्भानोः पुरमश्नुते ॥ १४ ॥
ततः पूर्णेषु मासेषु पूजयेच्छक्तितः खगम् ॥ गंधपुष्पोपहारैस्तु पुराणश्रवणेन च ॥ १५ ॥ अश्वदानेन च विभोर्ब्राह्मणानां च तर्पणैः ॥ वाचकं पूज
यित्वा च भास्करस्य प्रियं सदा ॥ १६ ॥ भास्कराय ध्वजान्दद्यान्नानारत्नविभूषितान् ॥ य इत्थं कुरुते वीर सप्तमीं यत्नतः सदा ॥ १७ ॥ स
पराजित्य वै शत्रुं याति हंससलोकताम् ॥ १८ ॥ शुक्लाश्वोद्ववयानेन आपगेन पताकिना ॥ आपगाधिपसंकाश आपगानुचरोभवेत् ॥ १९ ॥ ॥
इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे अपराजितावर्णनं नामाष्टनवतितमोऽध्यायः ॥ ९८ ॥ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ शुक्लपक्षे
तु सप्तम्यां यदा संक्रमते रविः ॥ महाजया तदा सा वै सप्तमी भास्करप्रिया ॥ १ ॥ स्नानं दानं जपो होमः पितृदेवाभिपूजनम् ॥ सर्वं कोटिगुणं
प्रोक्तं भास्करस्य वचो यथा ॥ २ ॥ यस्तस्यां मानवो भक्त्या घृतेन स्नापयेद्रविम् ॥ सोऽश्वमेधफलं प्राप्य स्वर्गलोकमवाप्नुयात् ॥ ३ ॥ पयसा
स्नापयेद्यस्तु भास्करं भक्तिमान्नरः ॥ विमुक्तः सर्वपापेभ्यो याति सूर्यसलोकताम् ॥ ४ ॥ कार्पूरेण विमानेन किंकिणीजालमालिना ॥ तेजसा
हरिसंकाशः कांत्या सूर्यसमस्तथा ॥ ५ ॥ स्थित्वा तत्र चिरं कालं राजा भवति चांजसा ॥ महाजयैषा कथिता सप्तमी त्रिपुरांतक ॥ ६ ॥ यामु
पोष्य नरो भक्त्या भवते सूर्यलोकगः ॥ ततो याति परं ब्रह्म यत्र गत्वा न शोचति ॥ ७ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमी
कल्पे महाजयाकल्पवर्णनं नामैकोनशततमोऽध्यायः ॥ ९९ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ या तु मार्गशिरे मासि शुक्लपक्षे तु सप्तमी ॥ नंदा सा
कथिता वीर सर्वानंदकरी शुभा ॥ १ ॥ पंचम्यामेकभक्तं तु षष्ठ्यां नक्तं प्रकीर्तितम् ॥ सप्तम्यामुपवासं तु कीर्तयंति मनीषिणः ॥ २ ॥ पारणान्यत्र
वै त्रीणि शंसंतीह मनीषिणः ॥ मालतीकुसुमानीह सुगंधं चंदनं तथा ॥ ३ ॥ कर्पूरागरुसंमिश्रं धूपं चात्र विनिर्दिशेत् ॥ दध्योदनं सखंडं च नैवेद्यं
भास्करप्रियम् ॥ ४ ॥ तमेव दद्याद्विप्रेभ्योऽश्नीयाच्च तदनु स्वयम् ॥ धूपार्थं भास्करस्यैष प्रथमे पारणे विधिः ॥ ५ ॥ पलाशपुष्पाणि विभो
धूपो यः शक्य एव च ॥ कर्पूरं चंदनं कुष्ठमगुरुः सिह्लकं तथा ॥ ६ ॥ सग्रंथि वृषणं भीम कुंकुमं गृञ्जनं तथा ॥ हरीतकी तथा भीम एष पक्षक

उच्यते॥७॥धूपः प्रबोध आदिष्टो नैवेद्यं खंडमंडकाः ॥ कृष्णागरुः सितं कंजं बालकं वृषणं तथा ॥८॥ चंदनं तगरो मुस्ता प्रबोधशर्करान्विता ॥ भोजयेद्ब्राह्मणांश्चापि खंडखाद्यैर्गणाधिप ॥ निंबपत्रं तु संप्राश्य ततो भुंजीत वाग्यतः ॥९॥ पारणस्य द्वितीयस्य विधिरेष प्रकीर्तितः ॥ १० ॥ नीलोत्पलानि शुभ्राणि धूपं गौग्गुलमाहरेत् ॥ नैवेद्यं पायसं देयं प्रीतये भास्करस्य तु ॥ ११ ॥ विलेपनं चंदनं तु प्राशने विधिरुच्यते॥ तृतीयस्यापि ते वीर कथितो विधिरुत्तमः ॥ १२ ॥ शृणु नामानि देवस्य पावनानि नृणां सदा ॥ विष्णुर्भगस्तथा धाता प्रीयतामुद्गिरेच्च वै ॥१३॥ अनेन विधिना यस्तु कुर्यात्प्रयतमानसः ॥ सकामानिह संप्राप्य नंदते शाश्वतीः समाः ॥ १४ ॥ ततः सूर्यसदो गत्वा नंदते नंदवर्धन ॥ एषा तु नंदजननी तवाख्याता मया शिव ॥ १५ ॥ यामुपोष्य ततो भुक्त्वा नंदते हंसमाप्य वै ॥ १६ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे नंदानामसप्तमीवर्णनं नाम शततमोऽध्यायः ॥ १०० ॥ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ शुक्लपक्षे तु सप्तम्यां नक्षत्रं सवितुर्भवेत् ॥ यदा प्रथमता चैव तदा वै भद्रतां व्रजेत् ॥ १ ॥ स्नपनं तत्र देवस्य घृतेन कथितं बुधैः ॥ क्षीरेण च तथा वीर पुनरिक्षुरसेन च ॥ ॥ २ ॥ स्नापयित्वा तु देवेशं चंदनेन विलेपयेत् ॥ दग्ध्वा तु गुग्गुलं तस्य दद्याद्भद्रं तथाग्रतः ॥ ३॥ गोधूमचूर्णं निवपन्विमलं शशिसन्निभम् ॥ सवज्रं सगुडं चैव रक्तपुष्पोपशोभितम् ॥ ४ ॥ यदस्य शृंगमीशानं तत्र वै मौक्तिकं न्यसेत् ॥ यदाग्नेयं तत्र माणिक्यं न्यसेद्वा लोहितं मणिम् ॥ ॥ ५ ॥ नैर्ऋत्ये मकरं दद्याद्वायव्ये पद्मरागिणम् ॥ गांगेयमंततस्तस्य स्वशक्त्या विन्यसेद्बुधः ॥६॥ चतुर्थ्यामेकभक्तं तु पंचम्यां नक्तमादिशेत् ॥ षष्ठ्यामयाचितं प्रोक्तं उपवासो ह्यतः परः ॥ ७ ॥ पाषंडिनो विकर्मस्थान्बैडालव्रतिकांत्यजान् ॥ सप्तम्यां पालयेत्प्राज्ञो दिवा स्वापं विवर्जयेत् ॥ ८ ॥ अनेन विधिना यस्तु कुर्याद्वै भद्रसप्तमीम् ॥ तस्मै भद्राणि सर्वाणि यच्छंति ऋभवः सदा ॥ ९ ॥ भद्रं ददाति यस्त्वस्यां भद्रस्तस्य सुतो भवेत् ॥ भद्रमासाद्य भूतेश सदा भद्रेण तिष्ठति ॥ १० ॥ ॥ दिंडिरुवाच ॥ ॥ कोऽयं भद्र इति प्रोक्तः कथं कार्यं प्रभूषणम् ॥ दत्त्वा च किं फलं विद्याद्विधिना केन दीयते ॥ ११ ॥ ॥ ब्रह्मोवाच ॥ ॥ व्योम भद्रमिति प्रोक्तं देवचिह्नमनूपमम् ॥ यद्धृत्वेह नरः सूर्यं मुच्यते सर्वकिल्बिषैः ॥ १२ ॥ शालिपिंडमयं कार्यं चतुष्कोणमनूपमम् ॥ गव्येन सर्पिषा युक्तं खंडशर्करयान्वितम् ॥१३ ॥ चातुर्जातकपूर्णं तु द्राक्षाभिश्च विशेषतः ॥ नालिकेरफलैश्चैव सुगंधं च गणाधिप ॥ १४ ॥ मध्येंद्रनीलं भद्रस्य न्यसेत्प्राज्ञः स्वशक्तितः ॥ पुष्परागं मरकतं पद्मरागं तथैव

---

१ सुख्यम्–इ० पा० ।

च ॥ १५ ॥ अनौपम्यं च माणिक्यं क्रमात्कोणेषु विन्यसेत् ॥ वाचकायाथ वा दद्यादथ वा भोजके स्वयम् ॥ १६ ॥ अनेन विधिना यस्तु
कृत्वा भद्रं प्रयच्छति ॥ स हि भद्राणि संप्राप्य गच्छेद्गोपतिमंदिरम् ॥ १७ ॥ ब्रह्मलोकं ततो गच्छेद्यानारूढो न संशयः ॥ तेजसा गोजसंकाशः
कांत्या गोजसमस्तथा ॥ १८ ॥ प्रभया गोपतेस्तुल्य ऊर्जसा गोपरस्य च ॥ तस्मादेत्य पुनर्भूमौ गोपतिः स्यान्न संशयः ॥ प्रसादाद्गोपतेर्वीर
सर्वज्ञाधिपपूजितः ॥ १९ ॥ इत्येषा कथिता भीम भद्रा नामेति सप्तमी ॥ यामुपोष्य नरो भीम ब्रह्मलोकमवाप्नुयात् ॥ २० ॥ शृण्वंति ये पठं
तीह कुर्वंति च गणाधिप ॥ ते सर्वे भद्रमासाद्य यांति तद्ब्रह्म शाश्वतम् ॥ २१ ॥ ॥ सुमंतुरुवाच ॥ ॥ इत्युक्तवान्पुरा ब्रह्मा दिंडिने सप्तमी
व्रतम् ॥ २२ ॥ मयाप्युक्तं तव विभो यथाज्ञातं यथाश्रुतम् ॥ २२ ॥ गृहीत्वा सप्तमीकल्पं मानवो यस्तु भूतले ॥ त्यजेत्कामाद्भयाद्वापि स ज्ञेयः
पतितोऽबुधः ॥ २३ ॥ तस्माद्धारय तद्वीर न त्याज्यं सप्तमीव्रतम् ॥ त्यजमानो भवेद्वीर आरूढपतितो नरः ॥ २४ ॥ श्रावयेद्यस्तु भक्त्या च
सप्तमीकल्पमादितः ॥ सोऽश्वमेधफलं प्राप्य ततो याति परं पदम् ॥ २५ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि स
प्तमीकल्पे भद्राकल्पवर्णनं नामैकाधिकशततमोऽध्यायः ॥ १०१ ॥ छ ॥ ॥ सुमंतुरुवाच ॥ ॥ एवं या देवदेवस्य सप्तमी भास्करस्य तु ॥
यथा बहूनां भार्याणां भर्तुः काचित्प्रिया भवेत् ॥१॥ सर्वाश्च तिथयो ह्यस्य प्रियाः सूर्यस्य भारत ॥ तस्मादस्यां नरेणेह पूजनीयो दिवाकरः॥२॥
॥ ॥ शतानीक उवाच ॥ ॥ तिथीनामधिपः सूर्यः सर्वासां कथितो यदि ॥ सप्तम्यामेव यागोऽस्य किमर्थं क्रियते बुधैः ॥३॥ ॥ सुमंतुरुवाच ॥ ॥
इदमर्थं पुरा पृष्टः सुरज्येष्ठो दिवि स्थितः ॥ विष्णुना कुरुशार्दूल तेनोक्तं हरये यथा ॥ तथा ते सर्वमाख्यास्ये शृणुष्वैकमना विभो ॥४॥ सुखासीनं सुर
ज्येष्ठं पुरा देवं पितामहम् ॥ प्रणम्य शिरसा देव कृष्णो वचनमब्रवीत्॥५॥ यद्येष भानुमान्देवस्तिथीनामधिपः स्मृतः ॥ किमर्थं पूज्यते ब्रह्मन्सप्तम्यां
ब्रूहि मे विभो ॥६॥ एवमुक्तः सुरज्येष्ठो विष्णुना प्रभविष्णुना ॥ प्रहस्य भगवान्देव इदं वचनमब्रवीत् ॥ ७ ॥ ॥ ब्रह्मोवाच ॥ ॥ देवेभ्यस्तिथयो
दत्ता भास्करेण महात्मना ॥ मुक्त्वैकां सप्तमीं सर्वां सम्यगाराधनेन वै ॥ ८ ॥ यस्यैव यद्दिनं दत्तं स तस्यैवाधिपः स्मृतः ॥ स्वदिने पूजितस्त
स्मात्स्वमन्त्रैर्वरदो भवेत् ॥ ९ ॥ ॥ विष्णुरुवाच ॥ ॥ अर्केण कतरत्कस्मै दिनं दत्तं महात्मना ॥ स्वदिने पूजितेऽस्मिन्वै स्वमन्त्रैर्जायते
ध्रुवम् ॥ १० ॥ ॥ ब्रह्मोवाच ॥ ॥ अग्नये प्रतिपद्दत्ता द्वितीया ब्रह्मणे तथा ॥ तृतीया यक्षराजाय गणेशाय चतुर्थ्यपि ॥ ११ ॥ पञ्चमी नाग
राजाय कार्तिकेयाय षष्ठ्यपि ॥ सप्तमी स्थापितात्मार्थं दत्ता रुद्राय चाष्टमी ॥ १२ ॥ दुर्गायै नवमी दत्ता यमाय दशमी स्वयम् ॥ विश्वेभ्यश्चाथ

देवेभ्यो दत्ता चैकादशी सदा ॥ १३ ॥ द्वादशी विष्णवे दत्ता मदनाय त्रयोदशी ॥ चतुर्दशी शंकराय दत्ता सोमाय पूर्णिमा ॥ १४ ॥ पितॄणां भानुना दत्ता पुण्या पञ्चदशी सदा ॥ तिथ्यः पञ्चदशैतास्तु सोमस्य परिकीर्तिताः ॥ १५ ॥ पीयते कृष्णपक्षे तु सुरैरेभिर्यथोदितैः ॥ शुक्लपक्षे प्रपूर्यंते षोडश्या कलया सह ॥ १६ ॥ अक्षया सा सदैवैका तत्र साक्षात्स्थितो रविः ॥ क्षयवृद्धिकरो ह्येवं तेनासौ तत्पतिः स्मृतः ॥ १७ ॥ ददाति गतिमक्षीणां [1]ध्यानमात्रस्थितो रविः ॥ अन्येपीष्टान्यथाकामान्प्रयच्छंति सुखेन वै ॥ १८ ॥ तथा सर्वं प्रवक्ष्यामि कृष्ण संक्षेपतः शृणु ॥ अग्निमिष्ट्वा च हुत्वा च प्रतिपद्यमृतं घृतम् ॥ हविषा सर्वधान्यानि प्राप्नुयादमितं धनम् ॥ १९ ॥ ब्रह्माणं च द्वितीयायां संपूज्य ब्रह्मचारिणम् ॥ भोजयित्वा च विद्यानां सर्वासां पारगो भवेत् ॥ २० ॥ तृतीयायां च वित्तेशं वित्ताढ्यो जायते ध्रुवम् ॥ क्रयादिव्यवहोरषु लाभो बहुगुणो भवेत् ॥ २१ ॥ गणेशपूजनं कुर्याच्चतुर्थ्यां सर्वकर्मसु ॥ अविघ्नं विद्विषां विघ्नं कुर्याच्चास्य न संशयः ॥ २२ ॥ नागानिष्ट्वा च पञ्चम्यां न विषैरभिभूयते ॥ स्त्रियं च लभते पुत्रान्परां च श्रियमाप्नुयात् ॥ २३ ॥ संपूज्य कार्तिकेयं तु षष्ठ्यां श्रेष्ठः प्रजायते ॥ मेधावी रूपसंपन्नो दीर्घायुः कीर्तिवर्धनः ॥ २४ ॥ सप्तम्यां पूज्य रक्षेशं चित्रभानुं दिवाकरम् ॥ अष्टम्यां पूजितो देवो गोवृषाभरणो हरः ॥ २५ ॥ ज्ञानं ददाति विपुलं कांतिं च विपुलां तथा ॥ मृत्युहा ज्ञानदश्चैव पाशहा च प्रपूजितः ॥ २६ ॥ दुर्गां संपूज्य दुर्गाणि नवम्यां तरतीच्छया ॥ संग्रामे व्यवहारे च सदा विजयमश्नुते ॥ २७ ॥ दशम्यां यममातिष्ठेत्सर्वव्याधिहरो ध्रुवम् ॥ नरकादथ मृत्योश्च समुद्धरति मानवम् ॥ २८ ॥ एकादश्यां यथोद्दिष्टा विश्वेदेवाः प्रपूजिताः ॥ प्रजां पशुं धनं धान्यं प्रयच्छन्ति महीं तथा ॥ २९ ॥ द्वादश्यां ब्रिष्णुमिष्ट्वेह सर्वदा विजयी भवेत् ॥ पूज्यश्च सर्वलोकानां यथा गोपतिगोकरः ॥ ३० ॥ कामदेवं त्रयोदश्यां सुरूपो जायते ध्रुवम् ॥ इष्टां रूपवतीं भार्यां लभेत्कामांश्च पुष्कलान् ॥ ३१ ॥ इष्ट्वेश्वरं चतुर्दश्यां सर्वैश्वर्यसमन्वितः ॥ बहुपुत्रो बहुधनस्तथा स्यान्नात्र संशयः ॥ ३२ ॥ पौर्णमास्यां तु यः सोमं पूजयेद्भक्तिमान्नरः ॥ स्वाधिपत्यं भवेत्तस्य संपूर्णं न च हीयते ॥ ३३ ॥ पितरः स्वदिने दिंडे हृष्टाः कुर्वंति सर्वदा ॥ प्रजावृद्धिं धनं रक्षां चायुष्यं बलमेव च ॥ ३४ ॥ उपवासं विनाप्येते भवंत्युक्तफलप्रदाः ॥ पूजया जपहोमैश्च तोषिता भक्तितः सदा ॥ ३५ ॥ मूलमन्त्रैश्च संज्ञाभिरंशमन्त्रैश्च कीर्तिताः ॥ पूर्ववत्पद्ममध्यस्थाः कर्त्तव्याश्च तिथीश्वराः ॥ ३६ ॥ गन्धपुष्पोपहारैश्च यथा शक्त्या विधीयते ॥ पूजा बाह्येन विधिना

---

[1] व्योममात्रस्थितः--इ० पा० ।

कृतापि च फलप्रदा ॥ ३७ ॥ आज्यधारासमिद्भिश्च दधिक्षीरान्नमाक्षिकैः ॥ यथोक्तफलदो होमो जपः शांतेन चेतसा ॥ ३८ ॥ मूलमन्त्राश्च संज्ञाभिरंगमन्त्राश्च कीर्तिताः ॥ कृत्वा यज्ञान्दश द्वौ च फलान्येतानि भक्तितः ॥ ३९ ॥ यथोक्तानि तथोक्तानि लभेतेहाधिकान्यपि ॥ इह यस्माद्यथान्यस्मिन्यो वसेद्यः सुखी सदा ॥ ४० ॥ तेषां लोकेषु मन्त्रज्ञो यावत्तेषां तिथिः स्थिता ॥ दहेत्तस्मात्तथारिष्टं तद्रूपो जायते नरः ॥ ४१ ॥ सुरूपो धर्मसंपन्नो क्षपितारिर्महीपतिः ॥ स्त्री वा नपुंसको वापि जायते पुरुषोत्तमः ॥ ४२ ॥ इत्येताः कथिताः कृष्ण तिथयो या मया तव ॥ नक्षत्रदेवताः सर्वा नक्षत्रेषु व्यवस्थिताः ॥ ४३ ॥ इष्टान्कामान्प्रयच्छन्ति यास्ता वक्ष्ये महीधर ॥ चन्द्रमा यत्र नक्षत्रे महावृद्धया स्थितः सदा ॥ ४४ ॥ उक्तस्तु देवतायज्ञस्तदा सा फलदा भवेत् ॥ देवताश्च प्रवक्ष्यामि नक्षत्राणां यथाक्रमम् ॥ ४५ ॥ नक्षत्राणि च सर्वाणि यज्ञाश्चैव पृथक्पृथक् ॥ अश्विन्यामश्विनाविष्ट्वा दीर्घायुर्जायते नरः ॥ ४६ ॥ व्याधिभिर्मुच्यते क्षिप्रमत्यर्थं व्याधिपीडितः ॥ भरण्यां यम उद्दिष्टः कुसुमैरसितैः शुभैः ॥ ४७ ॥ तथा गन्धादिभिः शुभ्रैरपमृत्योर्विमोचयेत् ॥ ४८ ॥ अनलः कृत्तिकायां तु इह संपूजितः परः ॥ रक्तमाल्यादिभिर्दद्यात्फलं होमेन च ध्रुवम् ॥ ४९ ॥ पूज्यः प्रजापतिः प्रीत इष्टो दद्यात्पशूंस्तथा ॥ रोहिण्यां देवशार्दूल पूजनादिह गोपते ॥ मृगशीर्षे सदा सोमो ज्ञानमारोग्यमेव च ॥ ५० ॥ आर्द्रायां तु शिवं पूज्य पश्चाद्विजयमाप्नुयात् ॥ पद्मादिभिः स दिव्यैश्च पूजितः शं प्रयच्छति ॥ ५१ ॥ तथा पुनर्वस्वदितिः सदा संपूज्यते दिवि ॥ गुरुणा तर्पिता चैव मातेव परिरक्षति ॥ ५२ ॥ पुष्ये बृहस्पतिर्बुद्धिं ददाति विपुलां शुभाम् ॥ गीतैर्गंधादिभिर्नागा आश्लेषायां प्रपूजिताः ॥ ५३ ॥ तर्पिताश्च यथान्यायं भक्ष्याद्यैर्मधुरैः सितैः ॥ रक्षामिषादिभिस्तैस्तैः प्रीतिं कुर्वंति मानद ॥ ५४ ॥ मघासु पितरः सर्वे हव्यैः कव्यैश्च पूजिताः ॥ प्रयच्छंति धनं धान्यं भृत्यान्पुत्रान्पशूंस्तथा ॥ ५५ ॥ फाल्गुन्यामथ वै पूषा इष्टः पुष्पादिभिः शुभैः ॥ पूर्वायां विजयं दद्यादुत्तरायां भगं तथा ॥ ५६ ॥ भर्तारमीप्सितं दद्यात्कन्यायै पुरुषाय ताम् ॥ इह जन्मनि युज्येत रूपद्रविणसंपदा ॥ ५७ ॥ पूजितः सविता हस्ते विश्वतेजोनिधिः सदा ॥ गंधपुष्पादिभिः सर्वं ददाति विपुलं धनम् ॥ ५८ ॥ राज्यं तु त्वष्टा चित्रायां निःसपत्नं प्रयच्छति ॥ इष्टः संतर्पितः प्रीतः स्वात्यां वायुर्बलं परम् ॥ ॥ ५९ ॥ इद्राग्नी च विशाखायां जातरक्तैः प्रपूज्य च ॥ धनधान्यानि लब्ध्वेह तेजस्वी निवसेत्सदा ॥ ६० ॥ रक्तैर्मित्रमनूराधास्वेवं संपूज्य

भक्तितः ॥ श्रियो भजंति सर्वेषां चिरं जीवंति सर्वदा ॥ ६१ ॥ ज्येष्ठायां पूर्ववच्छक्रमिष्ट्वा पुष्टिमवाप्नुयात् ॥ गुणैर्ज्यै[1]ष्ठंश्च सर्वेषां कर्मणा च धनेन च ॥ ६२ ॥ मूले देवपितॄन्त्सर्वान्भक्त्यां[2] संपूज्य पूर्ववत् ॥ पूर्ववत्फलमाप्नोति स्वर्गस्थाने ध्रुवो भवेत् ॥ ६३ ॥ पूर्वाषाढे ह्यपः पूज्य हुत्वा तत्रैव पूर्ववत् ॥ संतापान्मुच्यते क्षिप्रं शारीरान्मानसात्तथा ॥ ६४ ॥ आषाढासु तथा विश्वानुत्तराषाढयोगतः ॥ विश्वेशं पूज्य [3]पुष्पाद्यैः सर्वमाप्नोति मानवः ॥ ६५ ॥ श्रवणे तु सितैर्विष्णुं पीतैर्नीलैश्च भक्तितः ॥ संपूज्य श्रियमाप्नोति परं विजयमेव च ॥ ६६ ॥ धनिष्ठासु वसूनिष्ट्वा न भयं भजते क्वचित् ॥ महतोऽपि भयात्त्वेतैर्गंधपुष्पादिभिः शुभैः ॥ ६७ ॥ इंद्रं शतभिषायां च व्याधिभिर्मुच्यते ध्रुवम् ॥ आतुरः पुष्टिमाप्नोति स्वास्थ्यमैश्वर्यमेव च ॥ ६८ ॥ अजं भाद्रपदायां तु शुद्धस्फटिकसन्निभम् ॥ संपूज्य भक्तिमाप्नोति [4]परं विजयमेव च ॥ ६९ ॥ उत्तरायामहिर्बुध्न्यं परां शांतिमवाप्नुयात् ॥ रेवत्यां पूजितः पूषा ददाति सततं शु[5]भम् ॥ सितैः पुष्पैः स्थितिं चैव धृतिं विजयमेव च ॥ ७० ॥ तवैवैते समाख्याता यज्ञाः संक्षेपतो मया ॥ नक्षत्रदेवतानां च साधकानां हिताय वै ॥ भक्त्या वित्तानुसारेण भवंति फलदाः सदा ॥ ७१ ॥ गंतुमिच्छेदनंत्यं वा क्रियां प्रारब्धमेव च ॥ नक्षत्रदेवतायज्ञं कृत्वा तत्सर्वमाचरेत् ॥ ७२ ॥ एवं कृते हि तत्सर्वं यात्राफलमवाप्नुयात् ॥ क्रियाफलं च संपूर्ण मित्युक्तं भानुना स्वयम् ॥ ७३ ॥ यज्ञात्स विजयं कुर्यात्क्रियां कुर्याद्यथेप्सिताम् ॥ कालचक्रेऽथ वा सूर्यं राशिचक्रे कलात्मना ॥ ॥ ७४ ॥ विश्वतेजोनिधिं ध्यात्वा सर्वं कुर्याद्यथेप्सितम् ॥ विभूतिरेषा चोद्दिष्टा क्रियाभिः साध्यते ध्रुवम् ॥ ७५ ॥ उद्दिष्टाभिः प्रयत्नेन मुक्तियोगेन साध्यते ॥ भानोराराधनाद्वापि प्राप्यते मुक्तिरेव हि ॥ तस्मादाराधय रविं भक्त्या त्वं मधुसूदन ॥ ७६ ॥ इज्या पूजा नमस्कारशुश्रूषाभिरहर्निशम् ॥ व्रतोपवासैर्विविधैर्ब्राह्मणानां च तर्पणैः ॥ ७७ ॥ यः कारयति देवार्चां हृदयालंबनं रवेः ॥ स नरो भानुसालोक्यमुपैति [6]गंतकल्मषः ॥ ७८ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे नक्षत्रपूजाविधिवर्णनं नाम द्व्यधिकशततमोऽध्यायः ॥ १०२ ॥ छ ॥

॥ ब्रह्मोवाच ॥ ॥ यश्च देवालयं भक्त्या भानोः कारयते स्थिरम् ॥ स सप्त पुरुषाँल्लोकान्भानोर्नयति मानवः ॥ १ ॥ यावंत्यब्दानि देवार्चा रवेस्तिष्ठति मंदिरे ॥ तावद्वर्षसहस्राणि सूर्यलोके स [7]मोदते ॥ २ ॥ देवार्चा लक्षणोपेता यद्गृहे संततो विधिः ॥ निष्कामं वा मनो यस्य स याति रविसाम्यताम् ॥ ३ ॥ पुष्पाण्यतिसुगंधीनि मनोज्ञानि च यः पुमान् ॥ प्रयच्छति हि देवेशं तद्वा

---

[1] गुडैः संपूज्य ज्येष्ठायां युज्यते मधुसूदन–इ० पा० । [2] शक्त्या–इ० पा० । [3] विभवैः–इ० पा० । [4] नात्र कार्या विचारणा–इ० पा० । [5] पशून्–इ० पा० । [6] धुतकल्मषः–इ० पा० । [7] महीयते–इ० पा० ।

वगतमानसः ॥ ४ ॥ धूपांश्च विविधांस्तांस्तान्गन्धाढ्यं चानुलेपनम् ॥ दीपबल्युपहारांश्च यच्चाभीष्टमथात्मनः ॥ ५ ॥ नरः सोऽनुदिनं यज्ञात्प्राप्नोत्याराधनाद्रवेः ॥ यज्ञेशोभगवान्भानुर्मखैरपि च तोष्यते ॥ ६ ॥ बहूपकरणा यज्ञा नानासंभारविस्तराः ॥ प्राप्यंते[1] तैर्धनयुतैर्मनुष्यैर्लोकसंचयैः ॥ ७ ॥ भक्त्या तु पुरुषैः पूजा कृता दूर्वांकुरैरपि ॥ रवेर्ददाति हि फलं सर्वयज्ञैः सुदुर्लभम् ॥ ८ ॥ यानि पुष्पाणि भक्ष्याणि धूपगंधानुलेपनम् ॥ दयितं भूषणं यच्च रक्तके चैव वाससी ॥ ९ ॥ यानि चाभ्युपहाराणि भक्ष्याणि च फलानि च ॥ प्रयच्छ तानि देवेश भवेथाश्चैव तन्मनाः ॥ १० ॥ आद्यं तं यज्ञपुरुषं यथा शक्त्या प्रसादय ॥ आराध्य स्थापितं देवं तस्मिन्नेव नरालये ॥ ११ ॥ पुण्यैस्तीर्थोदकैर्गंधैर्मधुना सर्पिषा तथा ॥ क्षीरेण स्नापयेद्देवं चित्रभानुं दिवाकरम्[2] ॥१२॥ दधिक्षीरह्रदान्याति स्वर्गलोकान्मधुच्युतान् ॥ प्रयास्यति यदुश्रेष्ठ निर्वृतिं वापि शाश्वतीम् ॥१३॥ स्तोत्रैर्गीतैस्तथा वाद्यैर्ब्राह्मणानां च तर्पणैः ॥ मनसश्चैकतायोगादाराधय विभावसुम् ॥१४॥ आराध्य तं विदेहानां पुरुषाः सप्तसप्ततिः ॥ हैहयानां च पंचाशदमृतत्वं समागताः ॥१५॥ स त्वमेभिः प्रकारैस्तमुपवासैस्तु भास्करम् ॥ संतोषय हि तुष्टोऽसौ भानुर्भवति शांतिदः ॥ १६ ॥ ॥ कृष्णउवाच[3] ॥ ॥ उपवासैश्चित्रभानुः कथं तुष्टः प्रजायते ॥ परिचर्या कथं कार्या या कार्या चोपवासिना ॥ १७ ॥ यद्यत्कार्यं यदा चैव भानोराराधनं नरैः ॥ तत्सर्वं विस्तराद्ब्रह्मन्यथावद्वक्तुमर्हसि ॥ १८ ॥ ॥ ब्रह्मोवाच ॥ ॥ स्मृतः संपूजितो धूपपुष्पाद्यैः स सदा रविः ॥ भोगिनामुपकाराय किं पुनश्चोपवासिनाम् ॥ १९ ॥ उपावृत्तस्तु पापेभ्यो यस्तु वासोगुणैः सह ॥ उपवासः स विज्ञेयः सर्वभोगविवर्जितः ॥ २० ॥ एकरात्रं द्विरात्रं वा त्रिरात्रमथ वा हरे ॥ उपवासी रविं यस्तु भक्त्या ध्यायति मानवः ॥ २१ ॥ तन्नामयाजी तत्कर्मरतस्तद्गतमानसः ॥ निष्कामः पूजयित्वा तं परं ब्रह्माधिगच्छति ॥२२॥ यश्च काममभिध्याय भास्करार्पितमानसः ॥ उपोषति तमाप्नोति प्रसन्ने तु वृषध्वजे ॥ २३ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैः स्त्रीभिस्तथा विभो ॥ संसारगर्तपंकस्थैः सुगतिः प्राप्यते कथम् ॥ २४ ॥ ॥ ब्रह्मोवाच ॥ ॥ अथाराध्य जगन्नाथं भास्करं तिमिरापहम् ॥ निर्व्यलीकेन चित्तेन प्रयास्यति च सद्गतिम् ॥ २५ ॥ विषयग्राहवैषम्यं न चित्तं भास्करार्पणम् ॥ स कथं पापकर्ता वै नरो यास्यति सद्गतिम् ॥ २६ ॥ यदि संसारदुःखार्तः सुगतिं गंतुमिच्छसि ॥ तदाराधय सर्वेशं[4] ग्रहेशं लोकपूजितम् ॥ २७ ॥ पुष्पैः सुगंधैर्हृद्यैश्च धूपैः सागुरुचन्दनैः ॥ वासोविभूषणैर्भक्ष्यैरुपवासपरायणः ॥ २८ ॥ यदि संसारनिर्वेदादभिवांछसि सद्गतिम् ॥ तदाराधय कालेशं यच्चेष्टं

---

[1] प्रथन्ते–इ० पा० । [2] जगत्पतिम्–इ० पा० । [3] श्रीविष्णुरुवाच–इति सर्वत्र कृष्ण उवाचेत्यस्य स्थाने पाठः । [4] भूतेशम्–इ० पा० ।

तव चेतसा ॥ २९ ॥ पुष्पाणि यदि तेन स्युः शस्तं पादपपल्लवैः ॥ दूर्वांकुरैरपि कृष्ण तदभावेऽर्चयेद्रविम् ॥ ३० ॥ पुष्पपत्रांबुभिर्धूपैर्यथाविभव
मात्मनः ॥ पूजितस्तुष्टिमतुलां भक्त्या यात्येकचेतसाम् ॥३१॥ यः सदायतने भानोः कुर्यात्संमार्जनं नरः ॥ स पांसुदेहसंयोगात्सर्वपापैः प्रमुच्यते
॥ ३२ ॥ यावत्यः पांसुकणिका मार्ज्यंते भास्करालये ॥ दिनानि दिवि दिव्यानि तावंति मोदते नरः ॥ ३३ ॥ सबाह्याभ्यंतरं वेश्म मार्जते भास्क
रस्य यः ॥ स बाह्याभ्यंतरस्तस्य कायो निष्कलमषो भवेत् ॥ ३४ ॥ यश्चानुलेपनं कुर्याद्भानोरायतने नरः ॥ स हेलिलोकमासाद्य मोदते गोगते
हरौ ॥ ३५ ॥ मृदा वा मृद्विकारैर्वा वर्णकैर्गोमयेन वा ॥ अनुलेपनकृद्भक्त्या नरो गोपतिमाप्नुयात् ॥ ३६ ॥ उदकाभ्युक्षणं भानोर्यः करोति तथा
क्षये ॥ स गच्छति नरः कृष्ण यत्रास्ते गोपतिः सदा॥३७॥पुष्पप्रकरमत्यर्थं सुगंधं भास्करालये ॥ अनुलिप्ते नरो दद्यात्पूषोत्तरगृहं व्रजेत् ॥३८॥
विमानवरमभ्येति सर्वरत्नमयं दिवि ॥ संप्राप्नोति नरो दत्त्वा दीपकं भास्करालये ॥ ३९ ॥ यस्तु संवत्सरं पूर्णं तिलपात्रप्रदो नरः ॥ ध्वजं च
भास्करे दद्यात्सममत्र फलं लभेत्[1] ॥ ४० ॥ विधुनोत्यतिवातेन दातुरज्ञानतः कृतम् ॥ पापं दातुर्गृहे भानुर्दिवारात्रौ न संशयः ॥ ४१ ॥ गीत
वाद्यादिभिर्देवं य उपास्ते विभावसुम् ॥ गंधर्वनृत्यैर्वाद्यैश्च विमानस्थो निषेव्यते ॥४२॥ जातिस्मरत्वं वृद्धिं च ततस्तु परमां गतिम् ॥ प्राप्नोति
हेलेरायतने पुण्याख्यानकथाकरः ॥ ४३ ॥ तस्मात्कुर्यात्प्रयत्नेन पूजयेद्वापि वाचकम् ॥ नान्यत्प्रीतिकरं भानोः पुण्याख्यानादृते क्वचित् ॥ ४४ ॥
एकोऽपि हेलेः सुकृतः प्रणामो दशाश्वमेधावभृथेन तुल्यः ॥ दशाश्वमेधी पुनरेति जन्म हेलिप्रणामी न पुनर्भवाय ॥ ४५ ॥ [2]एवं देवेश्वरो भक्त्या
येन भानुरुपासितः ॥ स प्राप्नोति गतिं श्लाघ्यां यामिच्छति च चेतसा ॥ ४६ ॥ तमाराध्य मया प्राप्तं ब्रह्मत्वं लोकपूजितम् ॥ सौरेर्यथेप्सितं
प्राप्तं त्वया तस्मात्पुरानघ ॥४७॥ ब्रह्महत्याभिभूतस्तु गोश्रुताभरणो हरः ॥ तमाराध्य रविं भक्त्या मुक्तोऽसौ ब्रह्महत्यया ॥ ४८ ॥ देवत्वं मनुजैः
कैश्चिद्गंधर्वत्वं तथा परैः ॥ विद्याधरत्वमपरैरेवाप्तं हि दिवाकरात् ॥ ४९ ॥ लेखः क्रतुशतेनेशमाराध्यैनं दिवाकरम् ॥ इन्द्रत्वमगमत्तस्मान्नान्यः
[3]पूज्यो दिवाकरात् ॥ ५० ॥ देवेभ्योऽप्यतिपूज्यस्तुस्वगुरुर्ब्रह्मचारिणा ॥ तस्मात्स यज्ञपुरुषो विवस्वान्पूज्य एव हि ॥ ५१ ॥ स्त्रियाश्च भर्तारमृते
पूज्योऽत्यंतं विभावसुः ॥ भर्तुर्गृहस्थस्य सतः पूज्यो गोपतिरंशुमान् ॥ ५२ ॥ वैश्यानामपि चाराध्यस्तपोभिस्तमनाशनः ॥ ध्येयः परिव्राज

---

[1] भुवि–इ० पा० । [2] देवदेवेश्वरः–इ० पा० । [3] पूज्यतमो रवेः–इ० पा० ।

कानां सदा देवो विभावसुः ॥ ९३॥ एवं सर्वाश्रमाणां हि चित्रभानुः परायणम् ॥ सर्वेषां चैव वर्णानां तमाराध्याप्नुयाद्गतिम् ॥ ९४ ॥ ॥ इति
श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सूर्यपूजामहिमवर्णनं नाम त्र्यधिकशततमोऽध्यायः ॥ १०३ ॥ छ ॥ ॥ श्रृणुष्व
संयतः काम्यानुपवासांस्तथापरान् ॥ तांस्तानाश्रित्य यान्कामान्कुरुतेप्सितमानसः ॥ १ ॥ सप्तम्यां शुक्लपक्षे तु फाल्गुनस्येह
मानवः ॥ जपन्हेलीति देवस्य नाम भक्त्या पुनःपुनः ॥ २ ॥ देवार्चने चाष्टशतं कृत्वैतच्च जपेच्छुचिः ॥ स्नातः प्रस्थान
काले तु उत्थाने स्खलिते क्षुते ॥ ३ ॥ पाखंडान्पतितांश्चैव तथैवान्यायशालिनः ॥ नालपेत तथा भानुमर्चयेच्छ्रद्धयान्वितः ॥ इदं चोदाहरे
द्भानौ मनः संधाय तत्परः ॥ ४ ॥ हंसहंस कृपालुस्त्वमगतीनां गतिर्भव ॥ संसारार्णवमग्नानां त्राता भव दिवाकर॥ ५ ॥ एवं प्रसाद्योपवासं कृत्वा
नियतमानसः ॥ पूर्वाह्ण एव च सकृत्प्राश्याच्चाचमनीयकम् ॥ ६ ॥ स्नात्वार्चयित्वा हंसेति पुनर्नाम प्रकीर्तयेत् ॥ वज्रधारात्रयं चैव क्षिपेत्त्रिर्देवपा
दयोः ॥ ७ ॥ चैत्रवैशाखयोश्चैव तद्वज्ज्येष्ठे तु पूजयन् ॥ मर्त्यलोके गतिं श्रेष्ठां कृष्ण प्राप्नोति वै नरः ॥ ८ ॥ उत्क्रांतस्तु व्रजेत्कृष्ण दिव्यं हंसा
लयं शुभम् ॥ वृषध्वजप्रसादाद्वै संक्रंदनश्रिया वृतः ॥ ९ ॥ आषाढे श्रावणे चैव मासि भाद्रपदे तथा ॥ तथैवाश्वयुजे चैव अनेन विधिना नरः ॥
॥ १० ॥ उपोष्य संपूज्य तथा मार्तंडेति च कीर्तयेत् ॥ गोमूत्रप्राशनात्पूतो धनी धनपुरं व्रजेत् ॥ ११ ॥ आराधितस्य जगतामीश्वरस्याव्यया
त्मनः ॥ उत्क्रांतिकाले स्मरणं भास्करस्य तथाप्नुयात् ॥१२॥ क्षीरस्य प्राशनं कृष्ण विधिं चैव यथोदितम् ॥ कार्त्तिकादि यथान्यायं कुर्यान्मास
चतुष्टयम् ॥ १३ ॥ तेनैव विधिना कृष्ण भास्करेति च कीर्तयेत् ॥ स याति भानुसालोक्यं भास्करं स्मरति क्षये ॥ १४ ॥ प्रतिमासं द्विजातिभ्यो
दद्याद्दानं यथेप्सितम् ॥ चातुर्मास्ये तु संपूर्णे कृत्वा पुस्तकवाचनम् ॥१५॥ कथां तु भास्करस्येह संगीतकमथापि वा ॥ धर्मश्रवणमभीष्टं सदा
धर्मध्वजस्य तु॥ १६ ॥ वाचकं पूजयित्वा तु तस्मात्कार्यं विपश्चिता ॥ श्राद्धमन्येन पक्वेन वाचकेन द्विजेन तु ॥ दिव्येन च यथायुक्तमभीष्टं
भास्करस्य हि ॥ १७ ॥ एवमेव गतिं श्रेष्ठां देवानामनुकीर्तनात् ॥ प्राप्नुयात्त्रिविधां कृष्ण त्रिलोकाख्यां नरः सदा ॥ १८ ॥ कथितं पारणं यत्ते
प्रथमं गोधराधनम् ॥ आधिपत्यं तथा भोगांस्ततः प्राप्नोति मानुषः ॥ १९ ॥ द्वितीयेन तथा भोगान्गोपतेः प्राप्नुयान्नरः ॥ सूर्यलोकं तृतीयेन
पारणे न तथाप्नुयात्॥२०॥ एवमेतत्समाख्यातं गतिप्रापकमुत्तमम्॥विधानं देवशार्दूल यदुक्तं सप्तमीव्रते ॥ २१ ॥ यः श्वेतां सप्तमीं कुर्यात्सुगतिं
श्रद्धया नरः ॥ तथा भक्त्या च वै नारी प्राप्नोति त्रिविधां गतिम् ॥२२॥ एषा धन्या पापहरा तिथिर्नित्यमुपासिता ॥ आराधनाय यस्तेषां यदा

भानोर्धराधर ॥ २३ ॥ पठतां शृण्वतां चापि सर्वपापभयापहा ॥ तथा धन्या च पुण्या च त्रिवर्गादीष्टदा सदा ॥ २४ ॥

॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे त्रिवर्गसप्तमीव्रतनिरूपणं नाम चतुरधिकशततमोऽध्यायः ॥ १०४ ॥ ॥ छ ॥

॥ ब्रह्मोवाच ॥ ॥ फाल्गुनामलपक्षस्य सप्तम्यां क्ष्माधराव्यय ॥ उपोषितो नरो नारी समभ्यर्च्य तमोऽपहम् ॥१ ॥ सूर्यनाम जपन्भक्त्या मितभोक्ता जितेंद्रियः ॥ उत्तिष्ठन्प्रस्वपंश्चैव सूर्यमेवाभिकीर्तयेत् ॥ २ ॥ ततोऽन्यदिवसे प्राप्ते त्वष्टम्यां प्रयतो रविम् ॥ स्नात्वा देवं समभ्यर्च्य दद्याद्विजाय दक्षिणाम् ॥ ३ ॥ रविमुद्दिश्य वै चाग्नौ घृतहोमकृतक्रियः ॥ प्रणिपत्य जगन्नाथमिति वाणीमुदीरयेत् ॥ ४ ॥ यमाराध्य पुरा देवी सावित्री कामनाय वै॥ स मे ददातु देवेशः सर्वान्कामान्विभावसुः ॥५॥ समभ्यर्च्य इति प्राप्तान्कृत्स्नान्कामान्यथेप्सितान् ॥ स ददात्यखिलान्कामान्प्रसन्नो मे दिवस्पतिः ॥ ६ ॥ भ्रष्टराज्यश्च देवेन्द्रो यमभ्यर्च्य दिवस्पतिः ॥ कामान्त्संप्राप्तवान्राज्यं स मे कामं प्रयच्छतु ॥ ७॥ एवमभ्यर्च्य पूजां च निष्पाद्येह विवस्वतः ॥ भुञ्जीत प्रयतः सम्यग्घविष्यं पतगध्वज ॥८॥ फाल्गुने चैत्रवैशाखज्येष्ठे यस्य समापनम् ॥ चतुर्भिः पारणं मासैरेभिर्निष्पादितं भवेत् ॥ ९ ॥ करवीरैश्चतुरो मासान्भक्त्या संपूजयेद्रविम् ॥ कृष्णागुरुं दहेद्धूपं प्राश्यं गोशृंगजं जलम् ॥ १० ॥ नैवेद्यं खंडवेष्टांस्तु दद्याद्विप्रेभ्य एव च ॥ ततश्च श्रूयतामन्या ह्याषाढादिषु या क्रिया ॥११॥ जातीपुष्पाणि शस्तानि धूपो गौग्गुल उच्यते ॥ कूपोदकं समश्नीयान्नैवेद्यं पायसं मतम् ॥ १२ ॥ स्वयं तदेव चाश्नीयाच्छेषं पूर्ववदाचरेत् ॥ कार्त्तिकादिषु मासेषु गोमूत्रं कायशोधनम् ॥१३॥ महांगो धूप उद्दिष्टः पूजा रक्तोत्पलैस्तथा ॥ कांसारं चात्र नैवेद्यं निवेद्यं भास्कराय वै ॥ १४ ॥ प्रतिमासं च विप्राय दातव्या दक्षिणा तथा ॥ कर्पूरं चंदनं मुस्तामगरुं तगरं तथा ॥ १५ ॥ ऊषणं शर्करा कृष्ण सुगंधं सिह्लकं तथा ॥ महांगोऽयं स्मृतो धूपः प्रियो देवस्य सर्वदा ॥ १६ ॥ प्रीणनं चेष्टया भानोः पारणेपारणे गते ॥ यथाशक्ति यथायोगं वित्तशाठ्यं विवर्जयेत् ॥ १७ ॥ सद्भावेनैव सप्ताश्वः पूजितः प्रीयते यतः ॥ पारणांते यथाशक्त्या पूजितः स्नापितो रविः ॥ १८ ॥ प्रीणितश्चेप्सितान्कामान्दद्यादव्याहतं हरे ॥ एषा पुण्या पापहरा सप्तमी सर्वकामदा ॥ १९ ॥ यथाभिलषितान्कामाँल्लभते गरुडध्वज ॥ उपोष्यैतां त्रिभुवनं प्राप्तमिंद्रेण वै पुरा ॥ २० ॥ पुत्रं प्रापच्च सावित्री पुत्रांस्तु अदितिस्तथा ॥ यदवः कामनां प्राप्ता धौम्यो वेदमवाप्तवान् ॥ २१ ॥ त्वयाप्ता भार्गवी कृष्ण शंकरः शुद्धिमाप्तवान् ॥ पितामहत्वं प्राप्तोऽहं तत्प्रसादाज्जनार्दन ॥ २२ ॥ अन्यैश्चाधिगताः कामास्तमाराध्य न संशयः ॥ ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैर्योषिद्भिरेव च ॥ २३ ॥ यंयं काममभिध्यायेत्तंतं प्राप्नोत्युपोषणात् ॥

जनः प्राप्नोत्यसंदिग्धं भानोराराधनाद्यतः ॥ २४ ॥ अपुत्रः पुत्रमाप्नोति गोगतश्चापि मोदते ॥ रोगाभिभूत आरोग्यं कन्या विंदति
सत्पतिम् ॥ २५ ॥ समागत्य प्रवसित उपोष्यैतदवाप्नुयात् ॥ सर्वान्कामानवाप्नोति गोगतश्चापि मोदते ॥ २६ ॥ नापुत्रो नाधनो वापि
न वानिष्टो न निर्घृणः ॥ उपोष्यैतद्व्रतं मर्त्यः स्त्रीजनो वपि जायते ॥ २७ ॥ गोहेलिलोकमासाद्य मोदते शाश्वतीः समाः ॥ गौरिकं यान
मारूढस्तेजसा रविसन्निभः ॥ २८ ॥ पुनरेत्य महीं कृष्ण घनाघनसमो नृपः ॥ क्ष्मातले स्यान्न संदेहः प्रसादाद्गोपतेर्नरः ॥ २९ ॥ ॥
इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे कामदासप्तमीव्रतनिरूपणं नाम पंचाधिकशततमोऽध्यायः ॥ १०५ ॥ ॥ छ ॥ ॥
॥ ॥ ब्रह्मोवाच ॥ ॥ पुनश्चैतन्महाभाग श्रूयतां गदतो मम ॥ प्रोक्तं खगेन देवानां तिथिमाहात्म्यमुत्तमम् ॥ १ ॥ ॥ विष्णुरुवाच ॥ ॥
विजयातिजया चैव जयंती च महातिथिः ॥ त्वत्तः श्रुता सुरश्रेष्ठ ब्रूहि मे पापनाशिनीम् ॥ २ ॥ तथोत्तरायणं ब्रूहि शस्तं यद्भास्करार्चने ॥
यत्र संपूजितो भानुर्भवेत्सर्वाघनाशनः ॥ तन्मे कथय यत्नेन भक्त्या पृष्टोऽक्षयं फलम् ॥ ३ ॥ ॥ ब्रह्मोवाच ॥ ॥ शुक्लपक्षे तु सप्तम्यां यदर्क्षं
तु रवेर्भवेत् ॥ तदा स्यात्सा महापुण्या सप्तमी पापनाशिनी ॥ ४ ॥ तस्यां संपूज्य देवेशं चित्रभानुं जगद्गुरुम् ॥ सप्तजन्मकृतात्पापान्मुच्यते नात्र
संशयः ॥ ५ ॥ यश्चोपवासं कुरुते तस्यां नियतमानसः ॥ सर्वपापविमुक्तात्मा सूर्यलोके महीयते ॥ ६ ॥ दानं यद्दीयते किंचित्तमुद्दिश्य दिवा
करम् ॥ होमो वा क्रियते तत्र तत्सर्वं चाक्षयं भवेत् ॥ ७ ॥ एक ऋग्वेदः पुरतो जप्तः श्रद्धापरेण तु ॥ ऋग्वेदस्य समस्तस्य यच्छते सत्फलं ध्रुवम् ॥
॥ ८ ॥ सामवेदफलं साम यजुर्वेदफलं यजुः ॥ अथर्वा अथर्वांगिरसो निखिलं यच्छते रविः ॥ ९ ॥ तारका इव राजंते द्योतमाना दिवानिशम् ॥
समभ्यर्च्य च सप्तम्यां देवदेवं दिवाकरम् ॥ १० ॥ यत्र पापमशेषं वै नाशयत्यत्र भास्करः ॥ कर्तव्या सप्तमी कृष्ण तेनोक्ता पापनाशिनी ॥
॥ ११ ॥ अस्यां समभ्यर्च्य रविं याति सौरपुरं नरः ॥ विमानवरमारुह्य कर्पूरोद्भवमुत्तमम् ॥ १२ ॥ तेजसा कविसंकाशः प्रभया सूर्यसन्निभः ॥
कांत्यात्रेयसमः कृष्ण शौर्ये हरिसमः सदा ॥ १३ ॥ मोदते तत्र सुचिरं वृंदारकगणैः सह ॥ पुनरेत्य भुवं कृष्ण भवेद्वै क्ष्माधिपाधिपः ॥ १४ ॥
इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे पापनाशिनीव्रतविधिवर्णनं नाम षडधिकशततमोऽध्यायः ॥ १०६ ॥ ॥ छ ॥ ॥
॥ ॥ ब्रह्मोवाच ॥ ॥ तथान्यदपि धर्मज्ञ शृणुष्व गदतो मम ॥ पदद्वयं जगद्धातुर्देवदेवस्य गोपतेः ॥ १ ॥ यदेकपादपीठं हि तत्र न्यस्तं पद
द्वयम् ॥ स्वयमंशुमता कृष्ण लोकानां हितकाम्यया ॥ २ ॥ वामनस्य पदं कृष्ण ज्ञेयं वै उत्तरायणम् ॥ देवाद्यैः सकलैर्वंद्यं दक्षिणं दक्षिणाय

नम् ॥३॥ अहं त्वं च सदा कृष्ण दक्षिणं पादमर्चतः ॥ श्रद्धान्वितौ भास्करस्य हरीशौ वाममर्चतः ॥४॥ तस्मिन्यः प्रत्यहं सम्यग्देवदेवस्य मानवः ॥
करोत्याराधनं तस्य तुष्टः स्याद्भानुमान्त्सदा ॥ ५ ॥ ॥ विष्णुरुवाच ॥ ॥ कथमाराधनं तस्य देवदेवस्य गोपतेः ॥ क्रियते देवशार्दूल तत्स
माख्यातुमर्हसि ॥६॥ ॥ ब्रह्मोवाच ॥ ॥ उत्तरे त्वयने कृष्ण स्नातो नियतमानसः ॥ घृतक्षीरादिभिर्देवं स्नापयेत्तिमिरापहम् ॥७॥ चारुवस्त्रोपहारैश्च
पुष्पधूपानुलेपनैः ॥ समभ्यर्च्य ततः सम्यग्ब्राह्मणानां च तर्पणैः ॥८॥ पदद्वयं व्रतं यस्य गृह्णीयाद्भानुतत्परः ॥ वन्देत्स्नातश्चित्रभानुं ततश्च गरु
डध्वज॥९॥ भुक्त्वान्नं चित्रभानुं तु चित्रभानुं व्रजंस्तथा ॥ स्वपन्विबुध्यन्प्रणमन्होमं कुर्वंस्तथार्चयन् ॥ १० ॥ चित्रभानोरनुदिनं करिष्ये नाम
कीर्तनम् ॥ यावदद्य दिनात्प्राप्तं क्रमशो दक्षिणायनम् ॥११॥ चलिते हुंकृते चैव वेदारंभेपि वा सदा ॥ तावद्वक्ष्ये चित्रभानुं यावदेवोत्तरायणम् ॥१२॥
यावज्जीवं च यत्किंचिज्ज्ञानतोऽज्ञानतोऽपि वा॥करिष्येऽहं तथा चैव कीर्तयिष्यामि तं प्रभुम्॥१३॥यदानृतं किंचिद्वक्ष्ये तदा वक्ष्यामि तद्वचः॥अज्ञा
नादथ वा ज्ञानात्कीर्तयिष्यामि तं प्रभुम् ॥१४॥ षण्मासमेकमनसा चित्रभानुमयं परम् ॥ तं स्मरन्मरणे याति यां गतिं सास्तु मे गतिः ॥१५॥ षण्मा
साभ्यंतरे मृत्युर्यदि तस्मिन्भवेन्मम ॥ तन्मया भास्करस्येह स्वयमात्मा निवेदितः ॥ १६ ॥ परमात्ममयं ब्रह्म चित्रभानुमयं परम् ॥ यमंते संस्म
रिष्यामि स मे भानुः परा गतिः॥१७॥ यदि प्रातस्तथा सायं मध्याह्ने वा जपाम्यहम् ॥ षण्मासाभ्यंतरे न्यासः कृतो व्रतमयो मया ॥ १८ ॥
तथा कुरु जगन्नाथ स्वर्गलोकपरायणः ॥ चित्रभानो यथा शक्त्या भवान्भवति मे गतिः॥१९॥एवमुच्चार्य षण्मासं चित्रभानुमयं व्रतम् ॥ तावन्नि
ष्पादयेद्यावत्संपूर्णं दक्षिणायनम् ॥२०॥ ततश्च प्रीणनं कुर्याद्यथाशक्त्या विभावसोः ॥ भोजयेद्ब्राह्मणान्दिव्यान्भौमांश्चापि सदक्षिणान् ॥ २१ ॥
पुण्याख्यानकथां कुर्यान्मार्तंडस्य तथाग्रतः ॥ पूजयेद्वाचकं भक्त्या यथांशक्त्या[1] च लेखकम्॥२२॥एवं व्रतमिदं कृष्ण यो धारयति मानवः॥ इहैव
देवशार्दूल मुच्यते सर्वकिल्बिषैः ॥ २३ ॥ षण्मासाभ्यंतरे चास्य मरणं यदि जायते ॥ प्राप्नोत्यनशनस्योक्तं यत्फलं तदसंशयम् ॥ २४॥ पदद्वयं
च देवस्य सम्यक्त्वेन सदार्चितम् ॥ भवत्येतज्जगौ भानुः पुरा चंद्राय पृच्छते ॥२५॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे
भानुपादद्वयव्रतवर्णनं नाम सप्ताधिकशततमोऽध्यायः ॥ १०७ ॥ ॥छ॥ ॥ ब्रह्मोवाच ॥ ॥ कृष्णपक्षे[2] तु माघस्य सर्वाप्तिं सप्तमीं शृणु ॥
यामुपोष्य समाप्नोति सर्वान्कामांस्तथा परान् ॥ १ ॥ पाखंडादिभिरालापं न कुर्याद्भानुतत्परः ॥ पूजयेत्प्रणतो देवमेकाग्रमनसा शुभम् ॥ २ ॥

---

[1] धराधरसमन्वितः–इ० पा० । [2] शुक्लपक्षे–इ० पा० ।

माघाद्यैः पारणं मासैः षड्भिः सांक्रान्तिकं स्मृतम्॥मार्तंडः प्रथमं नाम द्वितीयं कः प्रकीर्तितम् ॥३॥ तृतीयं चित्रभानुश्च विभावसुरतः परम् ॥
भगेति पंचमं ज्ञेयं षष्ठं हंसः स उच्यते ॥ ४ ॥ पूर्णेषु षट्सु मासेषु पंचगव्यमुदाहृतम् ॥ स्नाने च प्राशने चैव प्रशस्तं पापनाशनम् ॥ ५ ॥
प्रणामं देवदेवस्य कृत्वा पूजां यथाविधि ॥ विप्राय दक्षिणां दद्याच्छ्रद्दधानश्च शक्तितः ॥ ६ ॥ पारणांते च देवस्य प्रीणनं भक्तिपूर्वकम् ॥ कुर्वीत
भक्त्या विधिवद्रविभक्त्या तु गृह्यते ॥ ७ ॥ नक्तभोजी तथा विष्णो तैलक्षारविवर्जितः ॥ कृष्ण जागरणं रात्रौ सप्तम्यामथ वा दिने ॥ ८ ॥
एतामुषित्वा धर्मज्ञो हंसप्रीणनतत्परः ॥ सर्वान्कामानवाप्नोति सर्वपापैः प्रमुच्यते ॥ ९ ॥ यतः सर्वमवाप्नोति यद्यदिच्छति चेतसा ॥ अतो
लोकेषु विख्याता सर्वार्थावाप्तिसप्तमी ॥ १० ॥ कृताभिलषिता ह्येषा प्रारब्धा धर्मतत्परैः ॥ पूरयत्यखिलान्कामान्संश्रुता च दिनेदिने ॥११॥
तमाराधयस्व रविं तथाथ गरुडध्वज ॥ यथाराधितवान्भानुं भगणाधिपतिः पुरा ॥ १२ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमी
कल्पे सर्वार्थावाप्तिसप्तमीवर्णनं नामाष्टाधिकशततमोऽध्यायः ॥ १०८ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ मार्तंडसप्तमीं कृष्ण यथान्यां[1] वच्मि
तेनघ ॥ शृणुष्वैकमना वीर गदतो मे शुभप्रदाम् ॥ १ ॥ यस्याः सम्यगनुष्ठानात्प्राप्नोत्यभिमतं फलम् ॥ पौषे मासे सिते पक्षे सप्तम्यां
समुपोषितः ॥ २ ॥ सम्यक्संपूज्य मार्तंडं मार्तंड इति वै जपेत् ॥ पूजयेत्कुतपं भक्त्या श्रद्धया परयान्वितः ॥ ३ ॥ धूपपुष्पोपहाराद्यै
रुपवासैः समाहितः ॥ मार्तंडेति जपन्नाम पुनस्तद्गतमानसः ॥ ४ ॥ विप्राय दक्षिणां दद्याद्यथाशक्त्या खगध्वज ॥ स्वपन्विबोधन्स्वलितो
मार्तंडेति च कीर्तयेत् ॥ ५ ॥ पाषंडादिविकर्मस्थैरालापं च विवर्जयेत् ॥ गोमूत्रं गोपयो वापि दधि क्षीरमथापि वा ॥ ६ ॥ गोदेहतः समुद्भूतं
प्राश्नीयादात्मशुद्धये ॥ द्वितीयेऽह्नि पुनः स्नातस्तथैवाभ्यर्चनं रवेः ॥ ७ ॥ तेनैव नाम्ना संभूय दत्त्वा विप्राय दक्षिणाम् ॥ ततो भुञ्जीत
गोदोहसंभूतेन समन्वितम् ॥ ८ ॥ एवमेवाखिलान्मासानुपोष्य प्रयतः शुचिः ॥ दद्याद्गवादिकं विप्रान्प्रतिमासं स्वशक्तितः ॥ ९ ॥ धारिता
चेत्पुनर्वर्षे यथाशक्त्या गवादिकम् ॥ दत्त्वा परं रवेर्भूयः शृणु यत्फलमश्नुते ॥ १० ॥ स्वर्णशृंगीं च पंचम्यां षष्ठ्यां च वृषभं नरः ॥ प्रतिमासं
द्विजातिभ्यो यद्दत्त्वा फलमश्नुते ॥ ११ ॥ तत्प्राप्नोत्यखिलं सम्यग्व्रतमेतदुपोषितः ॥ तं च लोकमवाप्नोति मार्तंडो यत्र तिष्ठति ॥ १२ ॥
शांडिलेयसमः कृष्ण तेजसा नात्र संशयः ॥ मार्तंडसप्तमीमेतामुपोष्यैते गणा दिवि ॥ १३ ॥ विद्योतमाना दृश्यंते लोकैरद्यापि भूधर ॥

---

१ यथान्यायं च वच्मि ते—इ० पा० । २ विद्वान्—इ० पा० ।

तस्मात्त्वमादिदेवेशं ग्रहेशं भास्करं रविम् ॥ अनयार्चय गोविंद गोपतिं गोलसन्निभम् ॥ १४ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे
पर्वणि सप्तमीकल्पे मार्तंडसप्तमीवर्णनं नाम नवाधिकशततमोऽध्यायः ॥ १०९ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ शुक्लपक्षे तु सप्तम्यां मासि
भाद्रपदेऽच्युत ॥ प्रणम्य शिरसादित्यं पूजयेत्सप्तवाहनम् ॥ १ ॥ पुष्पधूपादिभिर्वीर कुतपानां च तर्पणैः ॥ पाषंडादिभिरालापमकुर्वन्नियतात्म
वान् ॥ २ ॥ विप्राय दक्षिणां दत्त्वा नक्तं भुञ्जीत वाग्यतः ॥ तिष्ठन्व्रजन्प्रस्थितश्च क्षुतप्रस्खलितादिषु ॥ ३ ॥ आदित्यनामस्मरणं कुर्वन्नुच्चा
रणं तथा ॥ अनेनैव विधानेन मासान्द्वादश वै क्रमात् ॥ ४ ॥ उपोष्य पारणे पूर्णे समभ्यर्च्य जगद्गुरुम् ॥ पुण्येन श्रावणेनेह प्रीणयन्पुष्टिम
श्नुते ॥ ५ ॥ अनंतं श्रावणेनेह यतः फलमुदाहृतम् ॥ तेनादित्यं समभ्यर्च्य तदेव लभते फलम् ॥ ६ ॥ एवं यः पुरुषः कुर्यादादित्याराधनं
शुचिः ॥ प्राप्येह विपुलं भोगं धर्ममर्थं तथाव्ययम् ॥ ७ ॥ अमुत्र लोकमायाति दिव्ये खे गीतसंयुते ॥ नारी वा स्वर्गमभ्येत्य ह्यनंतं फलम
श्नुते ॥ ८ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पेऽनंतरसप्तमीव्रतवर्णनं नाम दशाधिकशततमोऽध्यायः ॥ ११० ॥ ॥छ॥
॥ ॥ ब्रह्मोवाच ॥ ॥ श्रावणे मासि देवाग्र्यं सप्तम्यां सप्तवाहनम् ॥ शुक्लपक्षे समभ्यर्च्य पुष्पधूपादिभिः शुचिः ॥ १ ॥ पाखण्डा
दिभिरालापमकुर्वन्नियतात्मवान् ॥ विप्राय दक्षिणां दत्त्वा नक्तं भुञ्जीत वाग्यतः ॥ २ ॥ अभ्यंगं देवदेवस्य वर्षे वर्षे नियोजयेत् ॥
सप्तम्यामन्नमेवाग्र्यं शुभं शुक्लं नवं तथा ॥ ३ ॥ विभवेषु तथान्येषु वादित्राण्येव वै विदुः ॥ तथा देवस्य मासेऽस्मिन्नभ्यंगः परि
गीयते ॥ ४ ॥ यस्तु चाराधयेद्भक्त्या भास्करस्य नरोऽच्युत ॥ अभ्यंगं विधिवच्छक्त्या कृत्वा ब्राह्मणभोजनम् ॥ ५ ॥ शंखतूर्यनिनादैश्च
ब्रह्मघोषैश्च पुष्कलैः ॥ स दिव्यं यानमारूढो लोकमायाति हेलिनः ॥ ६ ॥ अनेनैव विधानेन मासान्द्वादश वै क्रमात् ॥ उपोष्य पारणे पूर्णे
दद्याद्विप्राय दक्षिणाम् ॥ ७ ॥ व्रतं यः पुरुषः कुर्यादादित्याराधनं शुचिः ॥ स गच्छेत्परमं लोकं दिव्यं वै वनमालिनः ॥ ८ ॥
इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पेऽभ्यंगसप्तमीवर्णनं नामैकादशोत्तरशततमोऽध्यायः ॥ १११ ॥ ॥ छ ॥ ॥
॥ ॥ ब्रह्मोवाच ॥ ॥ एवं कृष्ण सदा भानुर्नरैर्भक्त्या यथाविधि ॥ फलं ददात्यसुलभं सलिलेनापि पूजितः ॥ १ ॥ न भानुर्जीवदानेन न
पुष्पैर्न फलैस्तथा ॥ आराध्यते सुशुद्धेन हृदयेनैव केवलम् ॥ २ ॥ रागादपेतं हृदयं वाग्दुष्टा नानृतादिभिः ॥ हिंसाविरहितं कर्म भास्करारा
धनत्रयम् ॥ ३ ॥ रागादिदूषिते चित्ते नास्पन्दी तिमिरापहः ॥ बध्नाति तं नरं हंसः कदाचित्कर्दमांभसि ॥ ४ ॥ तमसो नाशनायालं चेन्दो

लेखा ह्यनारतम् ॥ हिंसादिदूषितं कर्म केशवाराधने कुतः ॥५॥ जनश्चित्ताप्रसादाद्वै न चाप तिमिरापहम् ॥ तस्मात्सत्यस्वभावेन सत्यवाक्येन चाच्युत ॥ ६ ॥ अहिंसकेन चादित्यो निसर्गादेव तोषितः ॥ सर्वस्वमपि देवाय यो दद्यात्कुटिलाशयः ॥ ७ ॥ सनैवाराधयेदेवं देवदेवं दिवाकरम् ॥ रागादपेतं हृदयं कुरु त्वं भास्करार्पणम् ॥ ततः प्रापयसि दुष्प्राप्यमयत्नेनैव भास्करम् ॥ ८ ॥ ॥ विष्णुरुवाच ॥ ॥ देवेशः कथितः सम्यक्काम्योऽयं भास्करो मयि ॥ आराधनविधिं सर्वं भूयः पृच्छामि तं वद ॥ ९ ॥ कुले जन्म तथारोग्यं धनवृद्धिश्च दुर्लभा ॥ त्रितयं प्राप्यते येन तन्मे वद जगत्पते ॥ १० ॥ ॥ ब्रह्मोवाच ॥ ॥ मासे तु माघे सितसप्तमेऽह्नि हस्तर्क्षयोगे जगतः प्रसूतिम् ॥ संपूज्य भानुं विधिनोपवासी सुगन्धधूपान्नवरोपहारैः ॥ ११ ॥ गृही तु पुष्पैः प्रतिपाद्य पूजां दानादियुक्तं व्रतमब्दमेकम् ॥ दद्याच्च दानं मुनिपुङ्गवेभ्यस्तत्कथ्यमानं विनिबोध धीर ॥ १२ ॥ वस्त्रं तिलान्व्रीहियवान्हिरण्यं यवान्नमंभः करकामुपानहम् ॥ छत्रोपपन्नं गुडफेणिताढ्यं दद्यात्क्रमाद्वस्तु अनुक्रमेण ॥ १३ ॥ [१]यद्येष वर्षे विधिनोदितेन यस्यां तिथौ लोकगुरुं प्रपूज्य ॥ अश्मंतनान्यात्मविशुद्धिहेतोः संप्राशनानीह निबोध तानि ॥ १४ ॥ गोमूत्रमंभश्च रसे नु शाकं दूर्वां दधिव्रीहितिलान्यवांश्च ॥ सूर्यांशुतप्तं जलमंबुजाक्ष क्षीरं च मासैः क्रमशः प्रयुज्यः ॥ १५ ॥ कुले प्रधाने धनधान्यपूर्णे पद्मावृते ह्यस्तसमस्तदुःखे ॥ प्राप्नोति जन्माऽविकलेन्द्रियश्च भवत्यरोगो मतिमान्सुखी च ॥ १६ ॥ तस्मात्त्वमप्येतदमोघवीर्यं दिवाकराराधनमप्रमत्तः ॥ कुरु प्रभावं भगवन्तमीशमाराध्य कामानखिलानुपेहि ॥ १७ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे तृतीयपदव्रतवर्णनं नाम द्वादशोत्तरशततमोऽध्यायः ॥ ११२ ॥ ॥ छ ॥ ॥ विष्णुरुवाच ॥ ॥ सुरज्येष्ठ पुनर्ब्रूहि यत्पृच्छाम्यहमादितः ॥ यत्फलं समवाप्नोति कारयित्वा रवेर्गृहम् ॥ १ ॥ देवार्चां कारयित्वा तु यत्पुण्यं पुरुषोऽश्नुते ॥ पूजयित्वा च विधिवदनुलिप्य च यत्फलम् ॥ २ ॥ कानि माल्यानि शस्तानि कानि नार्हति भास्करः ॥ के धूपा भानुदयिताः के वर्ज्यांश्च जगत्पतेः ॥ ३ ॥ उपचारफलं किं स्यात्किं फलं गीतवादिते ॥ घृतक्षीरादिना यत्तु स्नापिते भास्करे फलम् ॥ ४ ॥ यथोपलेपनादौ च फलमभ्युक्षितेन तु ॥ दिवाकरगृहे तात तदशेषं वदस्व मे ॥ ५ ॥ ॥ ब्रह्मोवाच ॥ ॥ साधु वत्स यदेतत्त्वं मार्तण्डस्येह पृच्छसि ॥ शुश्रूषणे विधिं पुण्यं तदिहैकमनाः शृणु ॥ ६ ॥ यस्तु देवालयं भानोर्दार्वं शैलमथापि वा ॥ कारयेन्मृन्मयं चापि तस्य पुण्यफलं शृणु ॥ ७ ॥ अहन्यहनि यज्ञेन यजतो

---

१ पठेच्च पाद्यम्–इ० पा० ।

यन्महत्फलम् ॥ प्राप्नोति तत्फलं भानोर्यः कारयति मन्दिरम् ॥ ८ ॥ कुलानां शतमागामि समतीतं कुलं शतम् ॥ कारयेद्भगवद्धाम स नयेदर्क
लोकताम् ॥ ९ ॥ सप्तजन्मकृतं पापं स्वल्पं वा यदि वा बहु ॥ भानोरालयविन्यासप्रारंभादेव नश्यति ॥ १० ॥ सप्तलोकमयो भानु
स्तस्य यः कुरुते गृहम्[1] ॥ प्रतिष्ठां समवाप्नोति स नरः साप्तलौकिकीम् ॥ ११ ॥ प्रशस्तदेशभूभागे प्रशस्तं भवनं रवेः ॥ कारयेदक्षयाँल्लोकान्स
नरः प्रतिपद्यते ॥ १२ ॥ इष्टकाचयविन्यासो यावद्वर्षाणि तिष्ठति ॥ तावद्वर्षसहस्राणि तत्कर्तुर्दिवि संस्थितिः ॥ १३ ॥ प्रतिमां लक्षणवतीं यः
कारयति मानवः ॥ दिवाकरस्य तल्लोकमक्षयं प्रतिपद्यते ॥ १४ ॥ षष्टिर्वर्षसहस्राणां सहस्राणि स मोदते ॥ लोके सुमनसां वीर प्रत्येकं
मधुसूदन ॥ १५ ॥ प्रतिष्ठाप्य रवेरर्चां सुप्रशस्ते निवेशने ॥ पुरुषः कृतकृत्योस्ति न दोषफलमश्नुते ॥ १६ ॥ ये भविष्यंति येऽतीता आकल्पं
पुरुषाः कुले ॥ तांस्तारयति संस्थाप्य देवस्य प्रतिमां रवेः ॥ १७ ॥ अनुशिष्टाः किल पुरा यमेन यमकिंकराः ॥ पाशदंडकराः कृष्ण प्रजा
संयमनोद्यताः ॥ १८ ॥ ॥ यम उवाच ॥ ॥ विहरंतु यथान्यायं नियोगो मेऽनुपालयताम् ॥ नाज्ञाभंगं करिष्यंति भवतां जंतवः क्वचित् ॥
॥ १९ ॥ केवलं ये जगन्मूलं विवस्वंतमुपाश्रिताः ॥ भवद्भिः परिहर्तव्यास्तेषां नैवेह संस्थितिः ॥ २० ॥ ये तु वैवस्वता लोके तच्चित्तास्तत्परा
यणाः ॥ पूजयंति सदा भानुं ते च त्याज्याः सुदूरतः ॥ २१ ॥ तिष्ठंश्च प्रस्वपन्गच्छन्नुत्तिष्ठन्स्खलिते क्षुते ॥ संकीर्तयति देवं यः स नस्त्याज्यः
सुदूरतः ॥ २२ ॥ नित्यनैमित्तिकैर्देवं ये यजंति तु भास्करम् ॥ न चालोक्या भवद्भिस्ते तद्ध्यानं हंति वो गतिम् ॥ २३ ॥ ये पुष्पधूपवासो
भिर्भूषणैश्चापि वल्लभैः ॥ अर्चयंति न ते ग्राह्या मत्पितुस्ते परिग्रहाः ॥ २४ ॥ उपलेपनकर्तारः कर्तारो मार्जनस्य ये ॥ अर्कालये परित्याज्यं
तेषां त्रिपुरुषं कुलम् ॥ २५ ॥ येन वायतनं भानोः कारितं तत्कुलोद्भवः ॥ पुमान्स नावलोक्यो वै भवद्भिर्दुष्टचक्षुषा ॥ २६ ॥ येनार्चा भगवद्भ
क्त्या मत्पितुः कारिता शुभा ॥ नराणां तत्कुलं वीराः सदा त्याज्यं सुदूरतः ॥ २७ ॥ भवतां भ्रमतां यत्र भानुसंश्रयमुद्रया ॥ न चाज्ञाभंगकृत्क
श्चिद्भविष्यति नरः क्वचित् ॥ २८ ॥ इत्युक्ताः किंकरास्तेन यमेन सुमहात्मना ॥ अनाश्रित्य वचः कृष्ण सत्राजितमथो गताः ॥ २९ ॥
तस्य ते तेजसा सर्वे भानोर्भक्तस्य सुव्रत ॥ मोहिताः पतिता भूमौ यथा च विहगा नगात् ॥ ३० ॥ एतां महाफलां योर्चां भानोः कारयते
नरः॥ तवाख्यानं महाबाहो गृहं कारयितुश्च यत् ॥ ३१ ॥ यज्ञा नराणां पापौघनाशकाः सर्वकामदाः ॥ तथैवेष्टो जगद्भानुः सर्वयज्ञमयो

---

१ क्षयम्—इ० पा० ।

रविः ॥ ३२ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे आदित्यालयवन्दनमार्जनादिवर्णनं नाम त्रयोदशोत्तरशततमोऽध्यायः ॥ ११३ ॥छ॥

॥ ब्रह्मोवाच ॥ ॥ स्थापितां प्रतिमां भानोः सम्यक्संपूज्य मानवः ॥ यंयं प्रार्थयते कामं तंतं प्राप्नोत्यसंशयम् ॥१॥ यः स्नापयति देवस्य घृतेन प्रतिमां रवेः ॥ प्रस्थेप्रस्थे द्विजाग्र्याणां स ददाति गवां शतम् ॥ २ ॥ गवां शतस्य विप्रेभ्यो यद्दत्तस्य भवेत्फलम् ॥ घृतप्रस्थेन तद्भानोर्भवेत्स्नातकयोगिनाम् ॥ ३ ॥ भूरिद्युम्नेन संप्राप्ता सप्तद्वीपा वसुंधरा ॥ घटोदकेन मार्तंडप्रतिमा स्नापिता किल ॥ ४ ॥ प्रतिमामसिताष्टम्यां घृतेन जगतीपतेः ॥ स्नापयित्वा समस्तेभ्यः पापेभ्यः कृष्ण मुच्यते ॥ ५ ॥ सप्तम्यामथ षष्ठ्यां वा गव्येन हविषा रवेः ॥ स्नपनं तु भवेच्छ्रेष्ठं महापातकनाशनम् ॥ ६ ॥ ज्ञानतोऽज्ञानतो वापि यत्पापं कुरुते नरः ॥ तत्क्षालयति संध्यायां घृतेन स्नपनं रवेः ॥ ७ ॥ सर्वयज्ञमयो भानुर्हव्यानां परमं घृतम् ॥ तयोरशेषपापानां क्षालकः संगमो भवेत् ॥ ८ ॥ येषु क्षीरवहा नद्यो ह्रदाः पायसकर्दमाः ॥ मोदते तेषु लोकेषु क्षीरस्नानकरो रवेः ॥ ९ ॥ आह्लादं निर्वृतिस्थानमारोग्यं चारुरूपताम् ॥ सप्तजन्मान्यवाप्नोति क्षीरस्नानपरो रवेः ॥ १० ॥ दध्यादीनां विकाराणां क्षीरतः संभवो यथा ॥ यथा च विमलं क्षीरं यथा निर्वृतिकारकम् ॥ तथा च निर्मलं ज्ञानं भवत्यपि न संशयः ॥ ११ ॥ ग्रहानुकूलतां पुष्टिं प्रियत्वमखिले जने ॥ करोति भगवान्भानुः क्षीरस्नपनतोषितः ॥ १२ ॥ सर्वस्य स्निग्धतामेति दृष्टमात्रे प्रसीदति ॥ घृतक्षीरेण देवेशे स्नापिते तिमिरापहे ॥ १३ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे आदित्यस्नापनयोगवर्णनं नाम चतुर्दशोत्तरशततमोऽध्यायः ॥ ११४ ॥

॥ ब्रह्मोवाच ॥ ॥ प्रशंसंति महात्मानः संवादं भास्कराश्रयम् ॥ गौतम्या सह कौशल्या सुमनायां सुरालये ॥१॥ स्वर्गेऽतिशोभनां दृष्ट्वा कौशल्यां पतिना सह ॥ ब्रह्माणी गौतमी नाम पर्यपृच्छत विस्मिता ॥ २ ॥ ॥ गौतम्युवाच ॥ शतशः संति कौशल्ये देवाः स्वर्गनिवासिनः ॥ देवपत्न्यस्तथैवैताः सिद्धाः सिद्धांगनास्तथा ॥ ३ ॥ न तेषामीदृशो गन्धो न कांतिर्न सुरूपता ॥ न वाससी शोभने ये यथा ते पतिना सह ॥ ४ ॥ नैवाभरणजातानि तेषां भ्राजंति वै तथा ॥ यथा तव यथा पत्युर्न च स्वर्गनिवासिनाम् ॥ ५ ॥ सुस्नातचैलतश्चैव युवयोरतिरिच्यते ॥ लेखाद्यानामपीशानां क्षयातिशयवर्जितः ॥ ६ ॥ तपःप्रभावो दानं वा होमो वा कर्मसंज्ञितः ॥ युवयोर्यत्समाचक्ष्व तत्सर्वं वरवर्णिनि ॥ येन मे विक्रमे बुद्धिर्मनुजा येन संगताः ॥७॥ ॥ कौशल्योवाच ॥ ॥ यज्ञो यज्ञेश्वरो भानुरावाभ्यां जातु तोषितः ॥ स्वर्गप्राप्तिरियं तस्य कर्मणः फलमुत्तमम् ॥ ८ ॥ सुरूपता ततः प्रीतिः पश्यतां चारुवेषिता ॥ यत्पृच्छसि महाभागे तदप्येषां वदामि ते ॥ ९ ॥

तीर्थोदकैस्तथा गन्धैः स्नापितो यद्दिवाकरः ॥ तेन कांतिरियं नित्यं देवांस्त्रिभुवनेश्वरान् ॥ १० ॥ मनःप्रसादः सौम्यत्वं शरीरे ये च निर्वृताः ॥
यत्प्रियत्वं च सर्वं स्यात्तद्घृतस्नापनात्फलम् ॥ ११ ॥ यान्यभीष्टानि वासांसि यच्चाभीष्टविभूषणम् ॥ रत्नानि यान्यभीष्टानि यत्प्रियं चानुलेप
नम् ॥ १२ ॥ ये धूपा यानि माल्यानि दयितान्यभवन्सदा ॥ मम भर्तुस्तदैवास्य तदा राज्यं प्रशासतः ॥ १३ ॥ तानि सर्वाणि सर्वज्ञ सर्वपातारि
भानुनि ॥ दत्तानि तत्समुत्थोऽयं गंधधूपात्मको गुणः ॥१४॥ आहारा दयिता ये च पवित्राश्च निवेदिताः ॥ त्रिलोककर्तुः सवितुस्तृप्तिस्तद्गुणसंभ
वा ॥ १५ ॥ स्वर्गकामेन मे भर्त्रा मया च शुभदर्शने ॥ कृतमेतत्कृतेनाभूदावयोर्भवसंक्षयः ॥१६॥ ये त्वकामा नराः सम्यक्तत्कुर्वंति च शोभने ॥
तेषां ददाति विश्वेशो भगवान्मुक्तिमीश्वरः ॥ १७ ॥ ॥ ब्रह्मोवाच ॥ ॥ एवमभ्यर्च्य मार्तंडमर्कं देवेश्वरं गुरुम् ॥ प्राप्तोस्म्यभिमतान्कामान्कृष्णा
हं शाश्वतीः समाः ॥१८॥ चंदनागुरुकर्पूरकुंकुमोशीरपद्मकैः ॥ अनुलिप्तो नरैर्भक्त्या [१]ददाति सागरोद्भवाम् ॥ १९ ॥ कालेयकं तुरुष्कं च रक्तचंदन
मेव च ॥ यान्यात्मनः सदेष्टानि तानि शस्यान्यपाकुरु ॥२०॥ गंधाश्चापि शुभा ये च धूपा ये विजयोदयाः ॥ दिवाकरस्य धर्मज्ञ निवेद्यास्सर्वदा
च्युत ॥ २१ ॥ न दद्यात्सल्लकीक्षारं नो मुखेन च संहृतम् ॥ दद्यादर्काय धर्मज्ञ धूपमाराधनोद्यतः ॥२२॥ मालती मल्लिका चैव यूथिका चातिमु
क्तिकः ॥ पाटलाः करवीरश्च जपा सेवंतिरेव च ॥ २३ ॥ कुंकुमस्तगरश्चैव कर्णिकारः सकेशरः ॥ चंपकः केतकः कुंदो बाणबर्बरमालिका ॥
॥ २४ ॥ अशोकस्तिलको लोध्रस्तथा चैवाटरूषकः ॥ शतपत्राणि धन्वानि बकाह्वानी विशेषतः ॥ २५ ॥ अगस्तिं किंशुकं तद्वत्पूजार्थं
भास्करस्य तु ॥ अमी पुष्पप्रकारास्तु शस्ता भास्करपूजने ॥ २६ ॥ बिल्वपत्रं शमीपत्रं पत्रं वा भृंगरस्य च ॥ तमालपत्रं च हरे सदैव भगव
त्प्रियम् ॥ २७ ॥ तुलसी कालतुलसी तथा रक्तं च चंदनम् ॥ केतकी पत्रपुष्पं तु सद्यस्तुष्टिकरं रवेः ॥ २८ ॥ पद्मोत्पलसमुत्थानि रक्तं नीलो
त्पलं तथा ॥ सितोत्पलं तु भानोस्तु दयितानि सदाच्युत ॥ २९ ॥ कृष्णलोकन्मत्तकं कांतं तथैव गिरिमल्लिका ॥ न कर्णिकारिकापुष्पं
भास्कराय निवेदयेत् ॥ ३० ॥ कुटजं शाल्मलीपुष्पं तथान्यद्गन्धवर्जितम् ॥ निवेदितं भयं रोगं निःस्वतां च प्रयच्छति ॥ ३१ ॥ येषां न
प्रतिषेधोस्ति गंधवर्णान्वितानि च ॥ तानि पुष्पाणि देयानि भानवे लोकभानवे ॥ ३२ ॥ सुगंधैश्च मुरामांसीकर्पूरागरुचंदनैः ॥ तथान्यैश्च शुभैर्द्र
व्यैरर्चयेद्घनमालिनम् ॥ ३३ ॥ दुकूलपट्टकौशेयवार्क्षकार्पासकादिभिः ॥ वासोभिः पूजयेद्भानुं यानि चात्मप्रियाणि तु ॥ ३४ ॥ भक्ष्याणि यान्य

---

[१] ददाति मनसेप्सितान्–इ० पा० ।

भीष्टानि भोज्यान्यभिमतानि च ॥ फलं च वल्लभं यत्स्यात्तत्ते देयं दिवाकरे ॥ ३५ ॥ सुवर्णमणिमुक्तानि रजतं च तथाच्युत ॥ दक्षिणा विविधा
चेह यच्चान्यदपि वल्लभम् ॥ तत्तु देवाधिदेवाय भास्कराय निवेदयेत् ॥ ३६ ॥ आत्मानं भास्करं मत्वा यज्ञं तस्मै निवेदयेत् ॥ तत्तदव्यक्तरूपाय
भास्कराय निवेदयेत् ॥ ३७ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्प आदित्यमाहात्म्ये सूर्यपूजाविधिवर्णनं नाम पञ्चदशो
त्तरशततमोऽध्यायः ॥ ११५ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ कृष्ण राजा महानासीद्ययातिकुलसंभवः ॥ सत्राजिदिति विख्यातश्चक्रवर्ती महा
बलः ॥ १ ॥ प्रभावैस्तेजसा कान्त्या क्षांत्या बलसमन्वितः ॥ धैर्यगांभीर्यसंपन्नो वदान्यो यशसान्वितः ॥२॥ बुद्ध्या विक्रमदक्षश्च संपन्नो ब्राह्मणा
यतः ॥ कृती कविस्तथा शूरः षट्पदाख्यैर्न निर्जितः ॥ ३ ॥ सदा पंचसु रक्तश्च वसुमद्भिर्न निर्जितः ॥ रुद्रता वसुभिर्जातैः सत्त्वश्रद्धासमन्वितः॥
॥ ४ ॥ अंबुजस्यांडजस्येव आत्रेयस्य तथाच्युत ॥ अंबुजायास्तथा कृष्ण वार्यपात्रं स वै विभो ॥ ५ ॥ गांगेयेन बले तुल्यः पौलस्त्याच्चाश्रमो
यथा ॥ गांगेयस्य तथा कृष्ण धिषणस्य हरेर्यथा ॥ ६ ॥ काम्यश्च द्विजभक्तस्तु तथा वाल्मीकिवत्सदा ॥ व्यासस्य देवशार्दूल जामदग्न्यस्य वा
विभोः ॥ ७ ॥ एषां नैकैर्गुणैर्युक्तः स राजा क्ष्मातले विभो ॥ शशास स महाबाहुः सप्तद्वीपां वसुंधराम् ॥ ८ ॥ यस्मिन्गाथां प्रगायंति ये
पुराणविदो जनाः ॥ सत्राजिते महाबाहौ कृष्ण धात्रीं समाश्रिते ॥ ९ ॥ यावत्सूर्य उदेति स्म यावच्च प्रतितिष्ठति ॥ सात्राजितं तु तत्सर्वं क्षेत्रमित्य
भिधीयते ॥ १० ॥ स सर्वरत्नसंयुक्तां सप्तद्वीपवतीं महीम् ॥ शशास धर्मेण पुरा चक्रवर्ती महाबलः ॥ ११ ॥ नान्यायकृन्न चाशक्तो वदान्यो
बलवत्तरः ॥ तस्याभूत्पुरुषा राज्ञः सम्यग्धर्मानुशासिनः ॥ १२ ॥ चत्वारः सचिवास्तस्य राज्ञः सत्राजितस्य तु ॥ बभूवुरप्रतिहताः सदा वाति
बलस्य वै ॥ १३ ॥ तस्य भक्तिरतीवासीन्निसर्गादेव भूपतेः ॥ दिवाकरे जगद्भानौ रक्तचन्दनमालिनि ॥ १४ ॥ तस्योर्ध्वमहिमानं च विलोक्य
पृथिवीपतेः ॥ न केवलं जनस्यापि ह्यभवत्तस्य विस्मयः ॥ १५ ॥ संचिन्तयामास नृपः समृद्ध्या विस्मितस्तथा ॥ कथं स्यात्संपदेषा मे पुनर
प्यन्यजन्मनि ॥ १६ ॥ एवं स बहुशो राजा तदा कृष्ण महायशाः ॥ चिंतयन्नपि तन्मूलं नासदन्निश्चयान्वितः ॥ १७ ॥ यदा न निश्चयं राजा
स ययौ भार्गवीप्रियः ॥ तदा पप्रच्छ धर्मज्ञान्स विप्रान्समुपागतान् ॥ १८ ॥ सर्वांश्च ससुखान्वीर विविक्तांतःपुरस्थितः ॥ प्रणिपत्य महा
बाहुर्गृहीतुं शासनक्रियाः ॥ १९ ॥ विश्वासानुग्रहा बुद्धिर्भवतां मयि सत्तमाः ॥ तदहं प्रष्टुमिच्छामि किंचित्तद्वक्तुमर्हथ ॥ २० ॥ सद्विद्याखि
लविज्ञानसम्यग्धौतांतरात्मभिः ॥ भवद्भिर्यद्यनुग्राह्यः स्यामहं वेदवित्तमाः ॥ २१ ॥ तद्यथावन्मया पृष्टा भवन्तो मत्प्रसादिनः ॥ वक्तुमर्हथ

विद्वांसः सर्वस्यैवोपकारिणः ॥ २२ ॥ ॥ ब्रह्मोवाच ॥ ॥ यस्ते मनसि संदेहस्तं पृच्छाद्य महीपते ॥ वदिष्यामो यथान्यायं [1]यत्ते मनसि वर्त्तते ॥ २३ ॥ वयं हि नृपशार्दूल भवता परितोषिताः ॥ सम्यक्प्रजां पालयित्रा ददता भोजनं सदा ॥ २४ ॥ संतुष्टो ब्राह्मणोऽश्नीयाच्छिंद्याद्वा धर्मसंशयम् ॥ हितं चोपदिशेद्वर्त्म अहिताद्वा निवर्तयेत् ॥ २५ ॥ विवक्षुमथ भूपालं भार्या तस्यैव धीमतः ॥ प्रणिपातेन चाहेदं विनयात्प्रणयान्वितम् ॥ २६ ॥ न स्त्रीणामवनीपाल वक्तुमीदृग्गिहेष्यते ॥ तथापि भूपते वक्ष्ये संपदीदृक्सुदुर्लभा ॥ २७ ॥ भूयोऽपि संशयान्प्रष्टुमलमीशो भवानृषीन् ॥ नन्वहं पुरुषव्याघ्र सदांतःपुरचारिणी ॥ २८ ॥ तत्प्रसादं यदि भवान्करोति मम पार्थिव ॥ तन्मदीयमृषीन्प्रष्टुं संदेहं पार्थिवार्हसि ॥ २९ ॥ ॥ सत्राजित उवाच ॥ ॥ ब्रूहि सुभ्रूर्मतं यत्ते प्रष्टव्या यन्मया द्विजाः ॥ भूयोऽहमात्मसंदेहं प्रक्ष्याम्येतद्विजोत्तमान् ॥ ३० ॥ ॥ विमलवत्युवाच ॥ ॥ श्रूयन्ते पृथिवीपाल नृपा ये तु चिरंतनाः ॥ येषां च संपद्भूपाल यथा तेद्य किलाभवत् ॥ ३१ ॥ तदीदृक्संपदो धाम तवाशेषं क्षितीश्वर ॥ येन कर्मविपाकेन तद्वदंतु महर्षयः ॥ ३२ ॥ अहं च भवतो भार्या सर्वसीमंतिनीवरा ॥ अतीव कर्मणा येन तद्विज्ञाने कुतूहलम् ॥ ३३ ॥ तथा संपत्समृद्धत्वमन्येष्वपि हि विद्यते ॥ निरस्तातिशयत्वेन नूनं नाल्पेन कर्मणा ॥ ३४ ॥ तदन्यजन्मचरितं नरनाथ निजं भवान् ॥ मुनीन्पृच्छ त्वया चाहं यन्मया च पुरा कृतम् ॥ ३५ ॥ ॥ ब्रह्मोवाच ॥ ॥ स तथोक्तस्तया राजा पत्न्या विस्मितमानसः ॥ मुनीनां पुरतो भार्यां प्रशंसन्वाक्यमब्रवीत् ॥ ३६ ॥ साधु देवि मतं यन्मे त्वया यदिदमीरितम् ॥ सत्यं मुनिवचः पुंसां स्वार्द्धं वै गृहिणी तथा ॥ ३७ ॥ सोऽहमेतन्महाभागे पृच्छाम्येतान्महामुनीन् ॥ तेषामविदितं किंचित्त्रिलोकेषु न विद्यते ॥ ३८ ॥ एवमुक्त्वा प्रियां राजा प्रणिपत्य च तानृषीन् ॥ यथावदेतदखिलं पप्रच्छ धरणीधरः ॥ ३९ ॥ ॥ राजोवाच ॥ ॥ भगवंतो ममाशेषं प्रसादाहृतचेतसः ॥ कथयंतु यथावृत्तं यन्मया सुकृतं कृतम् ॥ ४० ॥ कोऽहमासं पुरा विप्राः किंस्वित्कर्म मया कृतम् ॥ किं वानया तु चार्वंग्या मम पत्न्या कृतं द्विजाः ॥ ४१ ॥ येनावयोरियं लक्ष्मीर्मर्त्यलोके सुदुर्लभा ॥ चत्वारश्चाप्रतिहता अमात्या मम गच्छतः ॥ ४२ ॥ अशेषा भूभृतो वश्या धनस्यांतो न विद्यते ॥ बलं चैवाप्रतिहतं शरीरारोग्यमेव च ॥ ४३ ॥ प्रतिभाति च मे कांत्या भार्यायामखिलं जगत् ॥ ममापि वपुषस्तेजो न कश्चित्सहते द्विजाः ॥ ४४ ॥ सोऽहमिच्छामि तज्ज्ञातुं तथैवेयमनिंदिता ॥ निजानुष्ठानमखिलं यस्याशेषमिदं फलम् ॥ ४५ ॥ ॥ ब्रह्मोवाच ॥ ॥

---

[1] यत्ते सांशयिकं हृदि–इ० पा० ।

इति पृष्टा नरेंद्रेण समस्तास्ते तपोधनाः ॥ परावसुमथोचुस्ते कथ्यतामस्य भूभृतः ॥ ४६ ॥ चोदितः सोऽपि धर्मज्ञैर्महाशूरो महामतिः ॥ योग
मास्थाय सुचिरं यथावद्यतमानसः ॥ ४७ ॥ ज्ञातवान्नृपतेस्तस्य पूर्वदेहविचेष्टितम् ॥ स तमाह मुनिर्भूपं विज्ञानेच्छं महामतिम् ॥ ४८ ॥ सत्रा
जितं महात्मानं जितशत्रुं मनस्विनम् ॥ सपत्नीकं महाबुद्धिं ब्राह्मणान्सत्यवादिनः ॥ ४९ ॥ ॥ परावसुरुवाच ॥ ॥ शृणु भूपाल सकलं यस्ये
दं कर्मणः फलम् ॥ तव राज्यादिकं सुभ्रूर्येयं चासीन्महीपते ॥ ५० ॥ त्वमासीः शूद्रजातीयः परहिंसापरायणः ॥ कुष्ठार्तो दंडपारुष्ये निःस्नेहः
सर्वजंतुषु ॥ ५१ ॥ इयं च भवतो भार्या पूर्वमप्यायतेक्षणा ॥ नित्यं बभूव त्वच्चित्ता भवच्छुश्रूषणे रता ॥ ५२ ॥ पतिव्रता महाभागा भर्त्स्यमा
नापि निष्ठुरम् ॥ त्वद्वाक्येषु च सर्वेषु वीर कर्मसु चोद्यता ॥ ५३ ॥ नैश्वर्यादसहायस्य त्यज्यमानस्य बंधुभिः ॥ क्षयं जगाम योर्थोऽभूत्संचितः
प्रपितामहैः ॥ ५४ ॥ तस्मिन्क्षीणे कृषिपरस्त्वमासीः पृथिवीपते ॥ सापि कर्मविपाकेन कृषिर्विफलतां गता ॥ ५५ ॥ ततो निःस्वं परिक्षीणं
परेषां भृत्यतां गतम् ॥ तत्याज साध्वी नेयं त्वां त्यज्यमानापि पार्थिव ॥ ५६ ॥ अनया तु समं साध्व्या भानोरावसथे त्वया ॥ कृतं शुश्रूषणं
वृत्त्या भक्त्या सम्मार्जनादिकम् ॥ ५७ ॥ निःस्नेहः सर्वकामेभ्यस्तन्मयस्त्वं तदर्पणः ॥ अहन्यहनि विस्रंभात्तस्मिन्नावसथे रवेः ॥ ५८ ॥ कान्य
कुब्जपुरे वीर महाशुश्रूषितं त्वया ॥ दिवाकरालये नित्यं कृतं तन्मार्जनं त्वया ॥५९॥ तथैवाभ्युक्षणं भूप नित्यं चैवानुलेपनम् ॥ पत्न्यानया नृप
तथा युष्मच्चित्तानुवृत्तया ॥ ६० ॥ कारितं श्रवणं पुण्यमितिहासपुराणयोः ॥ दत्त्वांगुलीयकं राजन्पितृदत्तं तु वाचके ॥ ६१ ॥ अहन्यहनि यत्कर्म
युवयोर्नृप कुर्वतोः ॥ तत्रैव तन्मयत्वेन पापहानिरजायत ॥६२॥ भानोः कार्यं मया कार्यं परं शुश्रूषणं तथा ॥ नाप्रभातं प्रभातं वा चिंतेयमभव
न्निशि ॥ ६३ ॥ एवमायतनं रम्यमित्येवं च सुखावहम् ॥ सूर्यवच्चैवमेतत्स्यादित्यासीत्ते मनस्तदा ॥६४॥ योगिनां सुखदं कर्म तथैव सुखमित्यपि ॥
भवच्चित्तमभूत्तत्र योगकर्मण्यहर्निशम् ॥६५॥ एवं तन्मनसस्तत्र कृतोद्योगस्य पार्थिव ॥ भूतानुमानिनः सम्यग्यथोक्ताधिककारिणः॥६६॥ स्मरतो
गोपतिं नित्यं चित्तेनापि दृढात्मनः॥ निःशेषमुपशांतं ते पापं सूर्यनिषेवणात् ॥६७॥ ततोऽधिकं पुरस्तस्मादगारस्यानुलेपनम् ॥ संमार्जनं च बहु
शः सपत्नीकेन यत्कृतम् ॥ ६८ ॥ केवलं धर्ममाश्रित्य त्यक्त्वा वृत्तिमशेषतः ॥ अनया श्रवणं पुण्यं कारितं वाचकात्सदा ॥६९॥ नानाधातुविका
रैस्तु गोमयेन मृदा तथा ॥ उपलेपनं कृतं भक्त्या त्वया पूर्वं सुरालये ॥ ७० ॥ अथाजगाम वै तत्र कुवलाश्वो महीपतिः ॥ महासैन्यपरीवारः प्रभू
तगजवाहनः ॥ ७१ ॥ सर्वसंपदुपेतं तं सर्वाभरणभूषितम् ॥ वृतं भार्यासहस्रेण दृष्ट्वा संक्रंदनोद्भलम् ॥ स्पृहा कृता त्वया तत्र चारुमौलिनि पा

र्थिवे॥७२॥सर्वकामप्रदं कर्म क्रियते भास्कराश्रितम् ॥ तेनैतदखिलं राज्यमशेषं चाप्तवान्महीम्॥७३॥तेजश्चैवाधिकं यत्ते तथैव शृणु पार्थिव॥योग
प्रभावतो लब्धं कथयाम्यखिलं तव ॥ ७४ ॥ तत्रैवावसथे दीपः प्रशांतः स्नेहसंक्षयात् ॥ निजभोजनतैलेन पुनः प्रज्वालितस्त्वया ॥७५॥ अनया
चोत्तरीयेण वीर वर्त्योपबृंहितः ॥ तव पत्न्या स्वयं ज्वाल्य कांतिरस्यास्ततोऽधिका ॥७६॥ तवाप्यखिलभूपालमनःक्षोभकरं पुनः ॥तेजो नरेंद्र एत
स्मात्किमुताराध्य भास्करम् ॥ ७७ ॥ एवं नरेंद्रः शूद्रत्वाद्धातुकर्मपरायणः ॥ तन्मयत्वेन संप्राप्तो महिमानमनुत्तमम् ॥ ७८ ॥ किं पुनर्यो नरो
भक्त्या नित्यं शुश्रूषणादृतः ॥ करोति सततं पूजां निष्कामो नान्यमानसः ॥ ७९ ॥ सर्वामृद्धिमिमां लब्ध्वा सर्वलोकमहेश्वरः ॥ पूजयित्वार्कमी
शेशं तमाराध्य न सीदति ॥ ८० ॥ पुष्पैर्धूपैस्तथा वान्यैर्दीपैर्वस्त्रानुलेपनैः ॥ आराधयार्कं तद्वेश्म सदा सम्मार्जनादिना ॥ ८१ ॥ यद्यदिष्टतमं किं
चिद्यद्यदन्यत्तु दुर्लभम् ॥ तद्दत्वा च जगद्धात्रे भास्कराय न सीदति ॥८२॥ सुगंधागुरुकर्पूरचंदनागुरुकुंकुमैः ॥ वासोभिर्विविधैर्धूपैः पुष्पैः स्रक्चा
मरध्वजैः ॥ ८३ ॥ अन्योपहारैर्विविधैः कृतक्षीराभिषेचनैः ॥ गीतवादित्रनृत्याद्यैस्तोषयस्वार्कमादरात् ॥ ८४ ॥ पुण्यरात्रिषु मार्तंडं नृत्यगीतैरथो
ज्ज्वलम् ॥ भूप जागरणैर्भक्त्या होमः कार्यः सदा शुचिः ॥ ८५ ॥ इतिहासपुराणानां श्रवणेन विशेषतः ॥ तथा वेदस्वनैः पुण्यैर्ऋक्सामयजु
र्भिर्नृप ॥ ८६ ॥ एवं संतोष्यते भक्त्या भगवान्भवभंगकृत् ॥ भूयो वैवस्वतो भूत्वा भवद्भ्दास्करो नरैः ॥ ८७ ॥ तोषितो भगवान्भानुर्ददा
त्यभिमतं फलम् ॥ दैवकर्मसमर्थानां प्राणिनां स्मृतिसंभवैः ॥ ८८ ॥ तोषितो भगवान्कामान्प्रयच्छति दिवाकरः ॥ नैष वृत्तैर्न रत्नौघैः पुष्पैर्धूपा
नुलेपनैः ॥ सद्भावेनैव मार्तंडस्तोषमायाति संस्मृतः ॥ ८९ ॥ त्वयैकाग्रमनस्केन गृहसम्मार्जनादिकम् ॥ कृत्वाल्पमीदृशं प्राप्तं राज्यमन्येन दुर्ल
भम् ॥ ९० ॥ अनया श्रवणं पुण्यं कारयित्वा गृहे रवेः ॥ ईदृक्प्राप्ता संपदियं पूजां कृत्वा तु वाचके ॥ ९१ ॥ प्राप्तोपकरणैर्यस्तमेकाग्रमतिरं
डजम् ॥ संतोषयति नेंद्रोऽपि भवता वै समः क्वचित् ॥ ९२ ॥ तस्मात्त्वमनया देव्या सहात्यंतविनीतया ॥ भास्कराराधने यत्नं कुरु धर्मभृतां
वर ॥ ९३ ॥ ॥ ब्रह्मोवाच ॥ ॥ एतन्मुनेर्वचो वीर निशम्य स नराधिपः ॥ भार्यासहायः स तदा संप्रहृष्टतनूरुहः ॥९४॥ कृतकार्यमिवात्मानं
मन्यमानस्तदाभवत् ॥ उवाच प्रणतो भूत्वा राजा सत्राजितोऽच्युत ॥ ९५ ॥ ॥ सत्राजित उवाच ॥ ॥ यथामरत्वं संप्राप्य यथा वायुर्बलं
परम् ॥ परं निर्वाणमाप्नोति तथाहं वचसा तव ॥ ९६ ॥ कृतकृत्यः सुखासीनो निर्वृतिं परमां गतः ॥ अज्ञानतमसाच्छन्ने यत्प्रदीपस्त्वया धृतः ॥
॥ ९७ ॥ अहमेषा च तन्वंगी विभूतिभ्रंशभीरुकः ॥ द्रव्यमापादितं ब्रह्मन्निहाद्य वचसा तव ॥ ९८ ॥ संपदः कथितं बीजमावयोर्भवता मुने ॥

त्वद्वक्त्रादुद्यता वाचो विज्ञाता हि द्विजोत्तम ॥ ९९ ॥ न रत्नैर्न च वित्तौघैर्न च पुष्पानुलेपनैः ॥ आराध्यश्च जगन्नाथो भावशून्यैर्दिवाकरः ॥
॥ १०० ॥ बाह्यार्थनिरपेक्षैश्च मनसैव मनोगतिः ॥ निःस्वैराराध्यते देवो भानुः सर्वेश्वरेश्वरः ॥ १०१ ॥ सर्वमेतन्मया ज्ञातं यत्त्वमात्थ महा
मुने ॥ यच्च पृच्छामि तन्मे त्वं प्रसादसुमुखो वद ॥ १०२ ॥ कथमाराधितो देवो नरैः स्त्रीभिश्च भास्करः ॥ तोषमायाति विप्रेंद्र तद्वदस्व महा
मुने ॥ १०३ ॥ रहस्यानि च देवस्य प्रीतये या तिथिः सदा ॥ चान्यशेषाणि मे ब्रूहि अर्काराधनकांक्षिणः ॥ १०४ ॥ ॥ परावसुरुवाच ॥ ॥
शृणु भूपाल यैर्भानुर्गृहेष्वाराध्यते जनैः ॥ नारीभिश्चातिघोरेऽस्मिन्पतिताभिर्भवार्णवे ॥ १०५ ॥ समभ्यर्च्य जगन्नाथं देवमर्कं समाधिना ॥
एकमश्नाति यो भक्तं द्वितीयं ब्राह्मणार्पणम् ॥ १०६ ॥ करोति भास्करप्रीत्यै कार्त्तिकं मासमात्मना ॥ पूर्वे वयसि यत्नेन जानताऽजानतापि
वा ॥ १०७ ॥ पापमाचरितं तस्माद्भिद्यते नात्र संशयः ॥ अनेनैव विधानेन मासि मार्गशिरे पुनः ॥ १०८ ॥ समभ्यर्च्य मरकतं विप्रेभ्यो
यः प्रयच्छति ॥ भगवत्प्रीणनार्थाय फलं तस्य शृणुष्व मे ॥ १०९ ॥ मध्ये वयसि यत्पापं योषिता पुरुषेण वा ॥ कृतमस्माच्च तेनोक्तो विमोक्षः
परमात्मना ॥ ११० ॥ तथा चैवैकभक्तं तु यस्तु विप्राय यच्छति ॥ दिवाकरं समभ्यर्च्य पौषे मासि महीपते ॥ १११ ॥ तत्तच्च प्रीणयत्यर्कं
वार्धिकेनैव यत्कृतम् ॥ स तस्मान्मुच्यते राजन्पुमान्योषिदथापि वा ॥ ११२ ॥ त्रिमासिकं व्रतमिदं यः करोति नरेश्वर ॥ स भानुप्री
णनात्पापैर्लघुभिः परिमुच्यते ॥ ११३ ॥ द्वितीये वत्सरे राजन्मुच्यते चोपपातकैः ॥ तद्वत्तृतीयेऽपि कृतं महापातकनाशनम् ॥ ११४ ॥
व्रतमेतन्नरैः स्त्रीभिस्त्रिभिर्मासैरनुष्ठितम् ॥ त्रिभिः संवत्सरैश्चैव प्रददाति फलं नृणाम् ॥ ११५ ॥ त्रिभिर्मासैरनुष्ठानात्त्रिविधात्पातकान्नृप ॥ त्रीणि
नामानि देवस्य मोचयंति च वार्षिकैः ॥ ११६ ॥ यतस्ततो व्रतमिदं विविधं समुदाहृतम् ॥ सर्वपापप्रशमनं भास्कराराधने परम् ॥ ११७ ॥
॥ ॥ सत्राजित उवाच ॥ ॥ कतमाय तु विप्राय दातव्यं भक्तितो मुने ॥ द्वितीये द्विजशार्दूल कथयस्वाखिलं मम ॥ ११८ ॥ ॥ परावसुरुवाच ॥ ॥
देये पुराणविदुषे वस्त्रे विप्रोत्तमाय च ॥ श्रूयतां चापि वचनं यदुक्तं भास्करेण च ॥ अरुणाय महाबाहो पृच्छते यत्पुरा नृप ॥ ११९ ॥ उदयाचलमा
रूढं भास्करं तिमिरापहम् ॥ प्रणम्य शिरसा नूनमिदं वचनमब्रवीत् ॥ १२० ॥ कानि प्रियाणि ते देव पूजने संति सर्वदा ॥ पुष्पादीनां समस्ता
नामाराधनविधौ सदा ॥ उपरागादिवस्त्रादौ ब्राह्मणानां तथा रवे ॥ १२१ ॥ ॥ भास्कर उवाच ॥ ॥ पुष्पाणां करवीराणि तथा रक्तं च चंदनम् ॥
गुग्गुलश्चापि धूपानां नैवेद्ये मोदकाः प्रियाः ॥ १२२ ॥ पूजाकरो भोजकस्तु घृतदीपस्तथा प्रियः ॥ दानं प्रियं खगश्रेष्ठ वाचकाय प्रदीयते ॥ १२३ ॥

मामुद्दिश्य च यद्दानं दीयते मानवैर्भुवि ॥ [1]वाचकाय तु दातव्यं तन्मम प्रीतये खग ॥ १२४ ॥ इतिहासपुराणाभ्याममिज्ञो यस्तु वाचकः ॥ ब्राह्मणो
वै खगश्रेष्ठ संपूज्यः प्रीतये मम ॥ १२५ ॥ पूजितेऽस्मिन्त्सदा विप्रे पूजितोहं न संशयः ॥ भवामि खगशार्दूल यतस्त्विष्टः स मे सदा ॥ १२६ ॥
वेदवीणामृदंगैश्च नातिगंधविलेपनैः ॥ तथा मे जायते प्रीतिर्यथा श्रुत्वा खगोत्तम ॥१२७॥ इतिहासपुराणानि वाच्यमानानि वाचकैः ॥ अतः प्रियो
वाचको मे पूजाकर्ता च भोजकः ॥ १२८ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सत्राजितोपाख्याने रविपूजाविधिवर्णनं नाम
षोडशोत्तरशततमोऽध्यायः ॥ ११६ ॥छ॥ ॥ अरुण उवाच ॥ ॥ किमर्थं भोजकस्तुभ्यं प्रियो देवेश कथ्यताम् ॥ नान्ये विप्रादयो वर्णा देव
तायतनेषु वै ॥१॥ कश्चायं भोजको देव कस्य पुत्रः किमात्मकः ॥ वर्णतश्चास्य मे ब्रूहि कर्म चास्य समंततः ॥ २ ॥ ॥ आदित्य उवाच ॥ ॥
साधु पृष्टोस्मि भद्रं ते वैनतेय महामते ॥ शृणुष्वैकमनाः सर्वं गदतो मम खेचर ॥ ३ ॥ विप्रादयस्तु ये त्वन्ये वर्णाः कश्यपनंदन ॥ ते पूजयंति
मां नित्यं भक्तिश्रद्धासमन्विताः ॥ ४ ॥ देवालयेषु ये विप्राः प्रीत्या मां पूजयंति हि ॥ अन्याश्च देवतावृत्त्या ते स्युर्देवलकाः खग ॥ एतस्मात्कार
णान्मह्यं भोजको दयितः सदा ॥ ५ ॥ वर्णतो ब्राह्मणश्चायं स्वानुष्ठानपरो यदि ॥ अनुष्ठानविहीनो हि नरकं यात्यसंशयम् ॥ ६ ॥ न त्याज्यं
भोजकैस्तस्मात्स्वकं कर्म कदाचन ॥ मयासौ निर्मितः पूर्वं तेजसा स्वेन वै खग ॥ ७ ॥ पूजार्थमात्मनो नूनं कर्म चास्य प्रकीर्तितम् ॥ प्रियव्रत
सुतो राजा शाकद्वीपे महामतिः॥ ८ ॥ तेन मे कारितं दिव्यं विमानप्रतिमं गृहम् ॥ तस्मिन्द्वीपे तदात्मीये दिव्यं शिलामयं महत् ॥९॥ स मदर्चां
कारयित्वा कांचनीं लक्षणान्विताम् ॥ प्रतिष्ठापनाय वै तस्याश्चिंतयामास सुव्रतः ॥ १० ॥ कृतमायतनं श्रेष्ठं तेनेयं प्रतिमा कृता ॥ को वै प्रति
ष्ठापयिता देवमर्कं शुभालये ॥ ११ ॥ एवं संचिंतयित्वा तु जगाम शरणं मम ॥ भक्तिं तस्य च संचिंत्य खगाहं पार्थिवस्य तु ॥ १२ ॥ गतोऽहं
दर्शनं तस्य उक्तश्चापि मया खग ॥ किं चिन्तयसि राजेन्द्र कुतश्चिंता समागता ॥ १३ ॥ ब्रूहि यत्ते हृदि प्रौढं चिंताकारणमागतम् ॥ संपाद
यिष्ये तत्सर्वं विमना भव मा नृप ॥ १४ ॥ अत्यर्थं दुष्करमपि करिष्ये नात्र संशयः ॥ इत्युक्तः स मया राजा इदं वचनमब्रवीत् ॥ १५ ॥ द्वीपेऽ
स्मिन्देवदेवस्य कृतमायतनं तव ॥ मया भक्त्या जगन्नाथ तथेयं प्रतिमा कृता ॥१६॥ प्रतिष्ठां कारयेद्यस्तु तव देवालये खग ॥ यत्र संति त्रयो व
र्णा द्वीपेस्मिन्क्षत्रियादयः ॥ १७ ॥ ते मयोक्ता न कुर्वंति प्रतिष्ठां तव कृत्स्नशः ॥ न चाप्यर्चां जगन्नाथ ब्राह्मणश्चात्र विद्यते ॥ १८॥ तेनेयमागता

---

[1] लेखकाय—इ० पा०।

चिंता हृदि शल्यं तयार्पितम् ॥ ततो मयोक्तो राजाऽसौ वैनतेय वचः शुभम् ॥ १९ ॥ एवमेतन्न संदेहो यथात्थ त्वं नराधिप ॥ क्षत्रियादित्रयो वर्णा द्वीपेऽस्मिन्नात्र संशयः ॥ २० ॥ ते च नार्हंति मे पूजां न प्रतिष्ठां कदाचन ॥ तस्मात्ते श्रेयसे राजन्प्रतिष्ठामात्मनस्तथा ॥ २१ ॥ सृजामि प्रथमं वर्णं भगसंज्ञमनौपमम् ॥ इत्युक्त्वा तमहं वीर राजानं खगसत्तम ॥२२॥ जगाम परमां चिंतां तस्य कार्यस्य सिद्धये ॥ अथ मे चिंतयांनस्य[१] स्वशरीराद्विनिःसृताः ॥ २३ ॥ शशिकुंदेंदुसंकाशाः संख्ययाष्टौ महाबलाः ॥ पठंति चतुरो वेदान्त्सांगोपनिषदः खग ॥ २४ ॥ काषायवाससः सर्वे करंडांबुजधारिणः ॥ ललाटफलकाद्द्वौ तु द्वौ चान्यौ वक्षसस्तथा ॥ २५ ॥ चरणाभ्यां तथा द्वौ तु पादाभ्यां द्वौ तथा खग ॥ अथ ते च महात्मानः सर्वे प्रणतकंधराः ॥ २६ ॥ पितरं मन्यमाना मामिदं वचनमब्रुवन् ॥ तातताात महादेव लोकनाथ जगत्पते ॥ २७ ॥ किमर्थं भवता सृष्टा वयं देवस्य देहतः ॥ ब्रूहि सर्वं करिष्याम आदेशं भवतोऽखिलम् ॥ २८ ॥ पितास्माकं भवान्देवो वयं पुत्रा न संशयः ॥ इत्युक्तवंतस्ते सर्वे मयोक्ता देवसंभवाः ॥ २९ ॥ प्रियव्रतसुतो योयमस्य वाक्यं करिष्यथ ॥ स चाप्युक्तो मया राजा शाकद्वीपाधिपः खग ॥ ३० ॥ य एते मत्सुता राजन्नर्घ्या ब्राह्मणसत्तमाः ॥ कारयंतु प्रतिष्ठां मे सर्वैरेभिर्महीपते ॥ ३१ ॥ कारयित्वा प्रतिष्ठां तु ममार्चायां नराधिप ॥ पश्चादायतनं सर्वमेषामर्पय पूजने ॥ ३२ ॥ एते मत्पूजने योग्याः प्रतिष्ठासु च सर्वशः ॥ समाप्य न प्रहर्तव्यं भोजकेभ्यः कदाचन ॥ ३३ ॥ सर्वमायतनार्थं तु गृहक्षेत्रादिकं च यत् ॥ धनधान्यादिकं राजन्यन्ममायतने भवेत् ॥ ३४ ॥ तत्सर्वं भोजकेभ्यस्तु दातव्यं नात्र संशयः ॥ धनधान्यसुवर्णादिगृहक्षेत्रादिकं च यत् ॥ यन्मदीयं भवेत्किंचिद्ग्रामे वा नगरे क्वचित् ॥ ३५ ॥ तस्य सर्वस्य राजेन्द्र मदीयस्य समंततः ॥ अधिपा भोजकाः सर्वे नान्ये विप्रादयो नृप ॥ ३६ ॥ यथाधिकारी पुत्रस्तु पितृद्रव्यस्य वै भवेत् ॥ तथा मदीयवित्तस्य भोजकाः स्युर्न संशयः ॥ ३७ ॥ इत्युक्तेन मया राज्ञा तथा सर्वं प्रवर्तितम् ॥ कारयित्वा प्रतिष्ठां तु दत्त्वा सर्वस्वमेव हि ॥ भोजकेभ्यः खगश्रेष्ठ ततो हर्षमवाप्तवान् ॥ ३८ ॥ एवमेते मया सृष्टा भोजका गरुडाग्रज ॥ अहमात्मा ततो ह्येषां सर्वे सुमनसस्तथा ॥ ३९ ॥ मत्पुत्रेण समा ज्ञेयास्तथा मम हिताः सदा ॥ तस्मात्तेभ्यःप्रदातव्यं न हर्तव्यं कदाचन ॥ ४० ॥ भोजकस्य हरेद्यस्तु लोभाद्द्वेषात्तथापि वा ॥ स याति नरकं घोरं तामिस्रं शाश्वतीः समाः ॥ ४१ ॥ तस्माद्ग्रामादिकं द्रव्यं यत्किंचिन्मम विद्यते ॥ तत्सर्वं भोजकस्वं हि पितृपर्यागतं मम ॥ ४२ ॥ भोजकश्च भवेद्याहक्तत्ते वच्मि खगेश्वर ॥ ममाज्ञां

---

[१] चिन्तयमानस्य ।

पालयेद्यस्तु स्वानुष्ठानपरः सदा ॥ ४३ ॥ वेदाधिगमनं पूर्वं दारसंग्रहणं तथा ॥ अभ्यंगधारणं नित्यं तथा त्रिषवणं स्मृतम् ॥ ४४ ॥ पञ्च
कृत्वः सदा पूज्यो ह्यहं रात्रौ दिने तथा ॥ देवब्राह्मणवेदानां निन्दा कार्या न वै क्वचित ॥ ४५ ॥ नान्यदेवप्रतिष्ठा तु कार्या वै भोजकेन तु ॥
ममापि च न कर्तव्या तेन एकाकिना क्वचित् ॥४६॥ सर्वमेव निवेद्यान्नं नाश्नीयाद्भोजकः सदा ॥ न भुञ्जीत गृहं गत्वा शूद्रस्य गरुडाग्रज॥४७॥
शूद्रोच्छिष्टं प्रयत्नेन सदा त्याज्यं हि भोजकैः ॥ येऽश्नन्ति भोजका नित्यं शूद्रान्नं शूद्रवेश्मनि ॥ ४८ ॥ ते वै पूजाफलं चात्र कथं प्राप्स्यंति
खेचर ॥ गत्वा गृहं तु शूद्रस्य न भोक्तव्यं कदाचन ॥ ४९ ॥ गृहागतं च शूद्रान्नं तच्च त्याज्यं तथैव च ॥ आध्मातव्योम्बुजो नित्यं भोजकेना
ग्रतो मम ॥ ५० ॥ सकृत्प्रवादिते शंखे मम प्रीतिर्हि जायते ॥ षण्मासान्नात्र सन्देहः पुराणश्रवणं तथा ॥ ५१ ॥ तस्माच्छंखः सदा वाद्यो
भोजकेन प्रयत्नतः ॥ तस्येयं परमा वृत्तिर्नैवेद्यं यन्मदीयकम् ॥ ५२ ॥ नाभोज्यं भुञ्जते यस्मात्तेनैते भोजका मताः ॥ मगं ध्यायंति ते यस्मा
त्तेन ते मगधाः स्मृताः ॥ ५३ ॥ भोजयंति च मां नित्यं तेन ते भोजकाः स्मृताः ॥ अभ्यंगं च प्रयत्नेन धार्यं शुद्धिकरं परम् ॥ ५४ ॥ अभ्यं
गहीनो ह्यशुचिर्भोजकः स्यान्न संशयः ॥ यस्तु मां पूजयेद्वीर अभ्यंगेन विना खग ॥ ५५ ॥ न तस्य संततिः स्याद्वै न चाहं प्रीतिमान्भवे[1] ॥
मुण्डनं शिरसा कार्यं शिखा धार्या प्रयत्नतः ॥५६॥ नक्तं चादित्यदिवसे तथा षष्ठ्यां प्रवर्तयेत् ॥ सप्तम्यामुपवासस्तु मम संक्रमणे तथा ॥ ५७ ॥
कर्तव्यो भोजकेनैव मत्प्रीत्यै गरुडाग्रज॥त्रिकालं चापि गायत्रीं जपेद्वाचा पुरो मम॥५८॥मुखमावृत्य यत्नेन पूजनीयोऽहमादरात् ॥ मौनं चास्य
प्रयत्नेन त्यक्त्वा क्रोधं च दूरतः ॥५९॥ शूद्रेभ्यो यस्तु वैश्येभ्यो लोभात्कामात्प्रयच्छति ॥ निर्माल्यं मम वै वत्स स याति नरकं ध्रुवम् ॥६०॥
लोभाद्वै भोजको यस्तु मत्पुष्पाणि खगाधिप ॥ यच्छतेन्यस्य दुष्टात्मा मय्यनारोप्य खेचर ॥ ६१ ॥ स ज्ञेयो मे परः शत्रुः स मामर्हो न
चार्चितुम् ॥ निर्माल्यं मम देयं स्याद्ब्राह्मणादिषु वै नृषु ॥ ६२ ॥ नैवेद्यं यन्मदीयं तु तदश्नीयात्सदैव हि ॥ तेनासौ शुद्ध्यते नित्यं हविष्यान्न
समं तथा ॥ ६३ ॥ तत्क्षणादुत्क्षिपेद्यस्तु ममांगात्पुष्पमेव हि ॥ नान्यस्य देयं नैवेद्यं मदीयमुदके[2] क्षिपेत् ॥ ६४ ॥ पञ्चगव्यसमं तस्य मन्मतं
नात्र संशयः ॥ ममांगलग्नं यत्किंचिद्गन्धं पुष्पमथापि वा ॥ ६५ ॥ दातव्यं न च वैश्याय न शूद्राय कदाचन ॥ आत्मना तद्ग्रहीतव्यं न विक्रेयं
कथंचन ॥ ६६ ॥ यस्तु नारोप्य पुष्पाणि अव्यंगानि ममोपरि ॥ यः कश्चिदाहरेल्लोके स याति नरकं ध्रुवम् ॥ ६७ ॥ स्नपनं मम निर्माल्यं

---

[1] आर्षः उत्तमपुरुष आत्मनेपदी । [2] भोजकेनतु—इ० पा० ।

पावकं यस्तु लंघयेत् ॥ स नरो नरकं याति सरौद्रं रौरवं खग ॥ ६८ ॥ भोजकेन सदा कार्यं स्नपनं मे प्रयत्नतः ॥ यथा न लंघयेत्कश्चिद्यथा श्वा नापि भक्षयेत् ॥ ६९ ॥ यद्ययत्नपरः कुर्याद्भोजकः स्नपनं मम ॥ यथा वै लंघितमतिर्भक्ष्यतां च खगाधिप ॥ ७० ॥ स याति नरकं रौद्रं तामिश्रं नाम नामतः ॥ एकभक्तं सदा कार्यं स्नानं त्रैकालमेव हि ॥ ७१ ॥ त्रिचैलं परिवर्तेत भवितव्यं दिनेदिने ॥ पूजाकालेऽर्घकाले च क्रोधस्त्याज्यः प्रयत्नतः ॥ ७२ ॥ अमांगल्यं न वक्तव्यं वक्तव्यं च शुभं तदा ॥ ईदृग्भूतो भोजको मे प्रेयान् पूजाकरः सदा ॥ ७३ ॥ सन्मान्यः पूजनीयश्च विप्रादीनां यथास्म्यहम् ॥ यः करोत्यवमानं तु वृत्तिरूपं तु भोजके ॥ ७४ ॥ तस्याहं रोषमेत्याशु कुलं हन्मि समंततः ॥ प्रियो मे भोजको नित्यं यथा त्वं विनतासुत ॥ ७५ ॥ उपलेपनकर्ता च संमार्जनपरश्च यः ॥ ॥ परावसुरुवाच ॥ ॥ इत्युक्त्वा भगवान्भानुर्बभ्राम रथमास्थितः ॥ ७६ ॥ अरुणोऽपि तथा श्रुत्वा मुदया परया नृपः ॥ पूज्यस्तस्मान्महाराज भोजकस्तु महीपते ॥ ७७ ॥ तस्माद्देयं वाचकाय द्वितीयमशनं नरैः ॥ ७८ ॥ ॥ ब्रह्मोवाच ॥ ॥ इत्थं श्रुत्वा स राजा तु कर्मणः फलमात्मनः ॥ पुरातनं महाबाहुर्मुदमाप महीपतिः ॥ ७९ ॥ यद्यदायतनं भानोः पृथिव्यां पश्यते नृपः ॥ तस्मिंस्तस्मिन्कारयति उपलेपनमादरात् ॥ ॥ ८० ॥ भार्या तस्यापि सुश्रोणिः पुण्यश्रवणमादरात् ॥ वाचके वेतनं दत्त्वा भानोर्देवस्य मंदिरे ॥ ८१ ॥ इत्थं राजा सपत्नीकः पूज्य भक्त्या दिवाकरम् ॥ प्राप्तावुभौ परां प्रीतिं गतिं चानुत्तमां तथा ॥ ८२ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्प उपलेपनस्नापनमाहात्म्यवर्णनं नाम सप्तदशोत्तरशततमोऽध्यायः ॥ ११७ ॥ ॥ सत्राजितोपाख्यानं समाप्तम् ॥ ७ ॥ ॥ ब्रह्मोवाच ॥ ॥ दीपं प्रयच्छति नरो भानोरायतने तु यः ॥ तेजसा रविसंकाशः [1]सर्वयज्ञफलं लभेत् ॥ १ ॥ कार्त्तिके तु विशेषेण कौमारे मासि दीपकम् ॥ दत्वा फलमवाप्नोति यदन्येन न लभ्यते ॥ २ ॥ कृष्णकृष्णात्र ते वच्मि संवादं पापनाशनम् ॥ भ्रातृभिः सह भद्रस्य ब्राह्मणस्य महात्मनः ॥ ३ ॥ जगत्यस्मिन्पुरी रम्या नाम्ना माहिष्मती पुरा ॥ तस्यामासीद्द्विजः कृष्ण नागशर्मेति विश्रुतः ॥ ४ ॥ तस्य पुत्रशतं जातं प्रसादाद्भास्करस्य च ॥ तेषां कनिष्ठो भद्रस्तु तत्पुत्राणां विचक्षणः ॥ ५ ॥ स च नित्यं जगद्धातुर्देवदेवस्य भास्वतः ॥ दीपवर्तिपरस्तद्वत्तैलाद्याहरणोद्यतः ॥ ६ ॥ भानोरायतने तस्य सहस्रं भार्गवीप्रिय ॥ प्रदीपानां तु जज्वाल दिवारात्रमनिंदितम् ॥ ७ ॥ तस्य दीप्त्या पराभूतास्तस्य लावण्यधर्षिताः ॥ सर्वे ते भ्रातरो भद्रं पप्र

---

[1] सर्वज्ञत्वफलंलभेत्–इ० पा० ।

च्छुरिदमादरात् ॥ ८ ॥ भो भद्र वद वै भ्रातर्भद्रं तेस्तु सदा द्विज ॥ कौतूहलपराः सर्वे यत्पृच्छामस्तदुच्यताम् ॥ ९ ॥ तेषां तद्वचनं श्रुत्वा भद्रो
वचनमब्रवीत् ॥ विषये सति वक्तव्यं यन्मया तदिहोच्यताम् ॥१०॥ नाहं मत्सरयुक्तो वै न च रागादिदूषितः ॥ भवंतो मम सर्वे वै भ्रातरो गुरव
स्तथा ॥ ११ ॥ कथं न कथयाम्येष भवतां पुत्रसम्मितः ॥ तस्माद्ब्रुवंतु मां सर्वे भ्रातरो यद्विवक्षितम् ॥ १२ ॥ ॥ भ्रातर ऊचुः ॥ ॥ न तथा
पुष्पधूपेषु न तथा द्विजपूजने ॥ सुप्रयत्नं तु पश्यामो भानोरायतने परम् ॥ १३ ॥ यथाहनि तथा रत्रौ यथा रात्रौ तथाहनि ॥ तव दीपप्रदानाय
यथा भद्र सदोद्यमम् ॥ १४ ॥ तत्त्वं तत्कथायास्माकं हंत कौतूहलं परम् ॥ यन्नाम दीपदानस्य भवता विदितं फलम् ॥ १५ ॥ तदेत्कथयास्माकं
सविशेषं महाबल ॥ एवमुक्तस्ततस्तैस्तु भ्रातृभिश्चोदितो मुदा ॥ १६ ॥ व्याजहार स भ्रातॄणां न किञ्चिदपि सुव्रत ॥ पुनःपुनरसौ तैस्तु भ्रातृभि
श्चोदितो मुदा ॥ १७ ॥ दाक्षिण्यसारो भद्रस्तु कथयामास कृत्स्नशः ॥ भवतां कौतुकं चैतदतीवाल्पेऽपि वस्तुनि ॥ १८ ॥ तदेष कथयाम्यद्य
यद्वृतं मम सुव्रत ॥ इक्ष्वाकुराज्ञस्तु पुरा वशिष्ठोऽभूत्पुरोहितः ॥ १९ ॥ तेन चायतनं भानोः कारितं सरयूतटे ॥ अहन्यहनि शुश्रूषां पुष्पधूपानु
लेपनैः ॥ २० ॥ दीपदानादिभिश्चैव चक्रे तत्र स वै द्विजः ॥ कार्तिके दीपको भक्त्या प्रदत्तस्तेन वै सदा ॥ २१ ॥ आसीन्निर्वाण एवासौ देवार्चा
पुरतो निशि ॥ देवतायतने चाहमवसं व्यथितो भृशम् ॥ २२ ॥ पूयशोणितनिष्पंदं प्रावहन्कायतः सदा ॥ शीर्णघ्राणो ह्यर्वरवो दुर्गंधपतितस्तथा
॥ २३ ॥ दुष्टबुद्ध्या सदा युक्तः सप्ताश्वं प्रति सुव्रत ॥ यदृच्छया दीपदानं वर्त्यादीनां विभावसौ ॥ २४ ॥ तत्तद्बुक्त्वा सदा तुष्टिं व्रजामि द्विजस
त्तमाः ॥ एकदा तु ततस्तस्मिन्भानोरायतने गतः ॥ २५ ॥ रात्रौ दृष्टा मया तत्र भक्ता जागरणागताः ॥ प्रतिश्रयं प्रार्थिताश्च तैश्च दत्तो दया
न्वितैः ॥ २६ ॥ व्याधितोऽयं सुदीनश्च इति कृत्वा मतिं शुभाम् ॥ ततोऽहमग्निमाश्रित्य स्थितस्तेषां समीपतः ॥ २७ ॥ दुष्टां बुद्धिं समाश्रित्य
हर्तुकामो विवस्वतः ॥ दिव्यमाभरणं भानोश्छिद्रान्वेषी द्विजोत्तमाः ॥ २८ ॥ स्थितोऽहं भोजका ह्यत्र यदि निद्रां व्रजंति ते ॥ येनास्य वैरिव
द्भानोर्हराम्याभरणं शुभम् ॥ २९ ॥ अथ सुप्ता भोजकास्ते निद्रया मोहितास्तदा ॥ निर्वाणाश्चापि दीपास्तु ततोऽहमुत्थितस्त्वरन् ॥ ३० ॥
मुदा परमया युक्तो गतो वैश्वानरं प्रति ॥ प्रज्वाल्य पावकं यत्नाद्दीपवर्तिन्ततो मया ॥ ३१ ॥ योजयित्वा तु वै दीपे धृतो दीपोऽग्रतो रवेः ॥
हर्तुकामेनाभरणं भानोर्देवस्य सुव्रत ॥३२॥ अथ ते भोजकाः सर्वे वृद्धा देवस्य पुत्रकाः ॥ तैस्तु दृष्टो ह्यहं तत्र दीपहस्तो विभावसोः ॥ ३३ ॥
पुरः स्थितो द्विजश्रेष्ठा गृहीतश्चापि तैरिह ॥ ततोहं तेजसा मूढो भास्करस्य महात्मनः ॥ ३४ ॥ विलपन्करुणं तेषां पादयोरवनिं गतः ॥ तैश्चापि

करुणां कृत्वा मुक्तोऽहं भोजकैस्तदा ॥ ३५ ॥ गृहीतो राजपुरुषैः पृष्टश्चापि समततः ॥ किमिदं भवतारब्धं देवदेवस्य मंदिरे ॥ ३६ ॥ दीपं प्रज्वाल्य दुष्टात्मन्कथ्यतां मा चिरं कुरु ॥ इत्युक्त्वा तु ततस्तैस्तु शस्त्रहस्तैः समावृतः ॥ ३७ ॥ ततोऽहं व्याधिना क्लिष्टो भयेन च द्विजोत्तमाः॥ हित्वा प्राणान्गतो यत्र स्वयं देवो विभावसुः ॥३८॥ स्थित्वा कल्पं ततस्तत्र युष्माकं भ्रतृतां गतः ॥ एष प्रभावो दीपस्य कार्तिके मासि सुव्रताः ॥ ३९ ॥ दत्तस्यार्कस्य भवने यस्येयं व्युष्टिरुत्तमा ॥ दुष्टबुद्ध्या कृतं यत्तु मया दीपप्रवर्तनम् ॥ ४० ॥ भगायतनदीपस्य तस्येदं भुज्यते फलम् ॥ क्षुधाभिभूतेन मया देवदेवस्य भूषणम् ॥ ४१ ॥ दीपश्च देवपुरतो ज्वालितो भास्करस्य तु ॥ ततो जातिस्मृतिर्जन्म प्राप्तं ब्राह्मणवेश्मनि ॥ ४२ ॥ कुष्ठिना चापि शूद्रेण प्राप्तं ब्राह्मण्यमुत्तमम् ॥ नानाविधानि शास्त्राणि सांगं वेदं समाप्तवान् ॥ ४३ ॥ दुष्टबुद्ध्या धृताद्दीपात्फलमेतन्महाद्भुतम् ॥ प्राप्तं मया द्विजश्रेष्ठाः किं पुनर्दीपदायिनाम् ॥ ४४ ॥ एतस्मात्कारणाद्दीपानहमेवमहर्निशम् ॥ प्रयच्छामि रवेर्धाम्नि ज्ञातमस्य हि यत्फलम् ॥ ४५ ॥ युष्माकमिदमुक्तं वै स्नेहात्सत्यं न संशयः ॥ एष प्रभावो दीपस्य कार्तिके मासि सुव्रताः ॥ ४६ ॥ अर्कायतनदीपस्य भद्रोवोचद्यथा पुरा ॥ दिनेदिने जपन्नाम भास्करस्य समाहितः ॥ ४७ ॥ ददाति कार्तिके यस्तु :भगायतनदीपकम् ॥ जातिस्मरत्वं प्रज्ञां च प्राकाश्यं सर्वजंतुषु ॥ ४८ ॥ अव्याहतेंद्रियत्वं च समाप्नोति न संशयः ॥ सर्वकालं च चक्षुष्मान्मेधावी दीपदो नरः ॥ ५९ ॥ जायते नरकं चापि तमःसंज्ञं न पश्यति ॥ षष्ठीं वा सप्तमीं वापि प्रतिपक्षं च यो नरः ॥५० ॥ दीपं ददाति यत्नाद्यत्फलं तस्य निबोध मे ॥ कांचनं मणियुक्तं च मनोज्ञमतिशोभनम् ॥ ५१ ॥ दीपमालाकुलं दिव्यं विमानमधिरोहति ॥ तस्मादायतने भानोर्दीपान्दद्यात्सदाच्युत ॥ ५२ ॥ तांश्च दत्त्वा न हिंस्याच्च न च तैलवियोजितान् ॥ कुर्वीत दीपहर्ता तु मूषकोंधश्च जायते ॥ ५३ ॥ तस्माद्द्यान्नाहरेद्वै श्रेयोऽर्थी दीपकं नरः ॥ ५४ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे भद्रोपाख्यान आदित्यायतनदीपदानफलवर्णनं नामाष्टादशोत्तरशततमोऽध्यायः ॥ ११८ ॥ छ ॥ ॥

॥ ॥ ब्रह्मोवाच ॥ ॥ अंधे तमसि दुष्पारे नरके पतितान्किल ॥ संक्रोशमानान्संक्षुब्धानुवाच यमकिंकरः ॥ १ ॥ विलापैरलमत्रेति किं वो विलपिते फलम् ॥ यत्प्रमादादिभिः पूर्वमात्मायं समुपेक्षितः ॥ २ ॥ पूर्वमालोचितं नैतत्कथमंते भविष्यति ॥ इदानीं यातनां भुङ्ध्वं किं विलापं करिष्यथ ॥ ३ ॥ देहो दिनानि स्वल्पानि विषयाश्चातिदुर्बलाः ॥ एतत्को न विजानाति येन यूयं प्रमादिनः ॥ ४ ॥ जंतुर्जन्मसहस्रेभ्य एकस्मिन्मानुषो यदि ॥ स तत्राप्यतिमूढात्मा किं भोगानभिधावति ॥ ५ ॥ पुत्रदारगृहक्षेत्रहिताय सततोद्यताः ॥ न जानंति ततो मूढाःस्वल्पमप्यात्मनो हि

तम् ॥ ६ ॥ वंचितोऽहं मया लब्धमिदमस्मादुपागतम् ॥ न वेत्ति मोहितः कश्चित्प्रक्रांतनरको नरः ॥ ७ ॥ न वेत्ति सूर्यचंद्रादीन्कालमात्मानमेव
च ॥ साक्षिभूतानशेषस्य शुभस्येहाशुभस्य च ॥ ८ ॥ जन्मान्यन्यानि जायंते पुत्रदारादिदेहिनाम् ॥ यदर्थं यत्कृतं कर्म तस्य जन्मशतानि तु ॥
॥ ९ ॥ अहो मोहस्य माहात्म्यं ममत्वं नरकेष्वपि ॥ क्रंदते मातरं तातं पीड्यमानोऽपि यत्स्वयम् ॥ १० ॥ एवमाकृष्टचित्तानां विषयैः स्वादुत
र्पणैः ॥ नृणां न जायते बुद्धिः परमार्थविलोकिनी ॥ ११ ॥ तथा च विषयासंगे करोत्यविरतं मनः ॥ को हि भारो रवेर्नाम्नि जिह्वायाः परिकी
र्तने ॥ १२ ॥ वर्तितैलेऽल्पमूल्ये च यद्वर्त्तिर्लभ्यते सुधा ॥ अतो वै कतरो लाभः कातश्चिंता भवेत्तदा ॥ १३ ॥ येनायतेषु हस्तेषु स्वातंत्र्ये
सति दीपकः ॥ महाफलो भानुगृहे न दत्तो नरकापहः ॥ १४ ॥ नरो विलपते किंचिदिदानीं दृश्ये फलम् ॥ अस्वातंत्र्ये विलपतां स्वातंत्र्ये सति
मानिनाम् ॥ १५ ॥ अवश्यं पातिनः प्राणा भोक्ता जीवोऽप्यहर्निशम् ॥ दत्तं च लभते भोक्तुं कामयन्विषयानपि ॥ १६ ॥ एतत्स्थानं
दुष्कृतैर्वा युक्तं चाद्य मयेक्षितम् ॥ इदानीं किं विलापेन सहध्वं यदुपागतम् ॥ १७ ॥ यद्येतदनभीष्टं वो यद्दुःखं समुपस्थितम् ॥ तदद्भुतमतिः
पापे न कर्तव्या कदाचन ॥ १८ ॥ कृतेऽपि पापके कर्मण्यज्ञानादघनाशनम् ॥ कर्तव्यमनवच्छिन्नं पूजनं सवितुः सदा ॥ १९ ॥ ॥ ब्रह्मो
वाच ॥ ॥ नारकास्तद्वचः श्रुत्वा तमूचुरतिदुःखिताः ॥ क्षुत्क्षामकंठास्तृट्तापविसंस्फुटितताालुकाः ॥ २० ॥ भोभोः साधो कृतं कर्म यदस्मा
भिस्तदुच्यताम् ॥ नरकस्थैर्विपाकोऽयं भुज्यते यत्सुदारुणः ॥ २१ ॥ ॥ किंकर उवाच ॥ ॥ युष्माभिर्यौवनोन्मादान्मुदितैरविवेकिभिः ॥
घृतलोभेन मार्तंडगृहाद्दीपः पुरा हृतः ॥ २२ ॥ तेनास्मिन्नरके घोरे क्षुत्तृष्णापरिपीडिताः ॥ भवंतः पतितास्तीव्रे शीतवातविदारिताः ॥
॥ २३ ॥ ॥ ब्रह्मोवाच ॥ ॥ एतत्ते दीपदानस्य प्रदीपहरणस्य च ॥ पुण्यं पापं च कथितं भास्करायतनेऽच्युत ॥ २४ ॥ सर्वत्रैव हि
दीपस्य प्रदानं कृष्ण शस्यते ॥ विशेषेण जगद्धातुर्भास्करस्य निवेशने ॥ २५ ॥ येंधा मूका बधिरा निर्विवेका हीनास्तैस्तैर्दानसाधनैर्वृष्णि
वीर ॥ तैस्तैर्दीपाः साधुलोकप्रदत्ता देवागारादन्यतः कृष्ण नीताः ॥ २६ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे दीपदान
माहात्म्यवर्णनं नामैकोनविंशोत्तरशततमोऽध्यायः ॥ ११९ ॥ छ ॥ ॥ विष्णुरुवाच ॥ ॥ भगवन्प्राणिनः सर्वे विषरोगाद्युपद्रवैः ॥ दुष्टग्रहोप
घातैश्च सर्वकालमुपद्रुताः ॥ १ ॥ आभिचारिककृत्याभिः स्पर्शरोगैश्च दारुणैः ॥ सदा संपीड्यमानास्तु तिष्ठंत्यंबुजसंभव ॥ २ ॥ येन कर्मवि
पाकेन विषरोगाद्युपद्रवाः ॥ प्रभवंति नृणां तन्मे यथावद्वक्तुमर्हसि ॥ ३ ॥ ॥ ब्रह्मोवाच ॥ ॥ व्रतोपवासैर्यैर्भानुर्नान्यजन्मनि तोषितः ॥

ते नरा देवशार्दूल ग्रहरोगादिभागिनः ॥ ४ ॥ यैर्न तत्प्रवणं चित्तं सर्वदैव नरैः कृतम् ॥ विषग्रहज्वराणां ते मनुष्याः कृष्ण भागिनः ॥ ५ ॥
आरोग्यं परमां वृद्धिं मनसा यद्यदिच्छति ॥ तत्तदाप्नोत्यसंदिग्धं परत्रादित्यतोषणात् ॥ ६ ॥ नाधीन्प्राप्नोति न व्याधीन्न विषग्रहबंधनम् ॥
कृत्यास्पर्शभयं वापि तोषिते तिमिरापहे ॥ ७ ॥ सर्वे दुष्टाः समास्तस्य सौम्यास्तस्य सदा ग्रहाः ॥ देवानामपि पूज्योऽसौ तुष्टो यस्य दिवाकरः ॥
॥ ८ ॥ यः समः सर्वभूतेषु यथात्मनि तथा हिते ॥ उपवासादिना येन तोष्यते तिमिरापहः ॥ ९ ॥ तोषितेऽस्मिन्प्रजानाथे नराः पूर्णमनोरथाः ॥
अरोगाः सुखिनो नित्यं बहुधर्मसुखान्विताः ॥ १० ॥ न तेषां शत्रवो नैव शरीराद्यभिचारकम् ॥ ग्रहरोगादिकं चापि पापकार्युपजायते ॥
॥ ११ ॥ अव्याहतानि देवस्य धनजालानि तं नरम् ॥ रक्षंति सकलापत्सु येन श्वेताधिपोऽर्चितः ॥ १२ ॥ ॥ विष्णुरुवाच ॥ ॥ अनारा
धितमार्तंडा ये नराः दुःखभागिनः॥ ते कथं नीरुजः संतु विज्वरा गतकल्मषाः ॥ १३ ॥ ॥ ब्रह्मोवाच ॥ ॥ आराधयंतु देवेशं पुष्पेणैवमनौप
मम् ॥ भास्करं तु जगन्नाथं सर्वदेवगुरुं परम् ॥ १४ ॥ ॥ विष्णुरुवाच ॥ ॥ दोषाभिभूतदेहैस्तु कथमाराधनं रवेः ॥ कर्त्तव्यं वद देवेश भक्त्या
श्रेयोऽर्थमात्मनः ॥ १५ ॥ अनुग्राह्योऽस्मि यदि ते ममायं भक्तिमानिति ॥ तन्मयोपदिश त्वं च महदाराधनं रवेः ॥ १६॥ अनंतमजरं देवं दुष्ट
संदेहनाशनम् ॥ आराधयितुमिच्छामि भगवंस्त्वदनुज्ञया॥येनाहं त्वत्प्रसादेन भवेयमतिविक्रमः ॥ १७ ॥ ॥ ब्रह्मोवाच ॥ ॥ अनुग्राह्योऽसि देवस्य
नूनमव्यक्तजन्मनः ॥ आराधनाय ते विष्णो यदेतत्प्रवणं मनः ॥ १८ ॥ यदि देवपतिं भानुमाराधयितुमिच्छसि ॥ भगवंतमनाद्यं च भव वैवस्व
तोऽच्युत ॥ १९ ॥ न ह्यवैवस्वतैर्भानुर्ज्ञातुं स्तोतुं च शक्यते ॥ द्रष्टुं वा शक्यते मूढैः प्रवेष्टुं कुत एव तु ॥२०॥ तद्भक्तिप्रार्थिताः पूता नरास्तद्भक्तिचे
तसः ॥ वैवस्वता भवंत्येवं विवस्वंतं विशंति च ॥ २१ ॥ अनेकजन्मसंसारचिते पापसमुच्चये ॥ नाक्षीणे जायते पुंसां मार्तंडाभिमुखी मतिः॥२२॥
प्रद्वेषं याति मार्तंडे द्विजान्वेदांश्च निंदति ॥ यो नरस्तं विजानीयादसुरांशसमुद्भवम् ॥ २३ ॥ पाषंडेषु रतिः पुंसां हेतुवादानुकूलता ॥ जायते दंभ
मायांभःपतितानां दुरात्मनाम् ॥ २४ ॥ यदा पापक्षयः पुंसां तदा वेदद्विजातिषु ॥ भानौ च यज्ञपुरुषे श्रद्धा भवति नैष्ठिकी ॥ २५ ॥ यदा स्व
ल्पावशेषस्तु नराणां पापसंचयः ॥ तदा भोजकविप्रेषु भानौ पूजां प्रकुर्वते ॥ २६ ॥ भ्रमतामत्र संसारे नराणां कर्मदुर्गमे ॥ करावलंबनो ह्येको
भक्तिप्रीतो दिवाकरः ॥ २७ ॥ स त्वं वैवस्वतो भूत्वा सर्वपापहरं हरिम् ॥ आराधय समं भक्त्या प्रीतिमभ्येति भास्करः ॥ २८ ॥ ॥ विष्णु
रुवाच ॥ ॥ किंलक्षणा भवंत्येते नरा वैवस्वता गुणैः॥ यच्च वैवस्वतं कार्यं तन्मे कथय कंजज ॥ २९ ॥ ॥ ब्रह्मोवाच ॥ ॥ कर्मणा मनसा

वाचा प्राणिनां यो न हिंसकः ॥ भावभक्तश्च मार्तंडे कृष्ण वैवस्वतो हि सः ॥ ३० ॥ यो भोजकद्विजान्देवान्नित्यमेव नमस्यति ॥ न चभोक्ता पर
स्वादेर्विष्णो वैवस्वतो हि सः ॥ ३१ ॥ सर्वान्देवान्रविं वेत्ति सर्वाँल्लोकांश्च भास्करम् ॥ तेभ्यश्चानन्यमात्मानं कृष्ण वैवस्वतो हि सः ॥ ३२ ॥
देवं मनुष्यमन्यं वा पशुपक्षिपिपीलिकम् ॥ तरुपाषाणकाष्ठादिभूम्यंभोधिं दिवं तथा ॥ ३३ ॥ आत्मानं चापि देवेशाद्व्यतिरिक्तं दिवाकरात् ॥
यो न जानाति तं विद्यात्कृष्ण वैवस्वतं नरम् ॥ ३४ ॥ सर्वो वैवस्वतो भागो यद्भूतं यद्व्यवस्थितम् ॥ इति वै यो विजानाति स तु वैवस्वतो
नरः ॥ ३५ ॥ भवभीतिं हरत्येष भक्तिभावेन भावितः ॥ विवस्वानिति भावो यः स तु वैवस्वतो नरः ॥ ३६ ॥ भावं न कुरुते यस्तु सर्वभूतेषु
पापकम् ॥ कर्मणा मनसा वाचा स च वैवस्वतो नरः ॥३७॥ बाह्यार्थनिरपेक्षो यः क्रियां भक्त्या विवस्वतः॥भावेन निष्पादयति ज्ञेयो वैवस्वतो
हि सः ॥ ३८ ॥ नारयो यस्य न स्निग्धा न भेदाधीनवृत्तयः ॥ वीक्षते सर्वमेवेदं भानुं वैवस्वतो हि सः ॥ ३९ ॥ सुतप्तेनेह तपसा यज्ञैर्वा बहुद
क्षिणैः ॥ तां गतिं न नरा यांति यां तु वैवस्वतो गतः ॥ ४० ॥ येन सर्वात्मना भानौ भक्त्या भावो निवेशितः ॥ देवश्रेष्ठ कृतार्थत्वाच्छ्लाघ्यो
वैवस्वतो हि सः ॥ ४१ ॥ अपि नः स कुले धन्यो जायेत कुलपावनः ॥ भास्करं भक्तिभावेन यस्तु वै पूजयिष्यति ॥ ४२ ॥ यः कारयति
देवार्चां हृदयालंबिनीं रवेः ॥ स नरोऽर्कमवाप्नोति धर्मध्वजमनौपमम् ॥ ४३ ॥ यश्च देवालयं भक्त्या भानोः कारयते स्थिरम् ॥
स सप्त पुरुषाँल्लोकान्भानोर्नयति मानवः ॥ ४४ ॥ यावन्तोब्दान्हि देवार्चा रवेस्तिष्ठति मंदिरे ॥ तावद्वर्षसहस्राणि पुष्पोत्तर
गृहे वसेत् ॥ ४५ ॥ देवार्चालक्षणोपेतो यद्गृहे संततो विधिः ॥ निष्कामं च मनो यस्य स यात्यक्षरसाम्यताम् ॥ ४६ ॥ पुष्पाण्यतिसुगंधीनि
मनोज्ञानि च यः पुमान् ॥ प्रयच्छति जगन्नाथे सप्ताश्वे ज्योतिषां पतौ ॥ स याति परमं स्थानं यत्र ज्योतिः सनातनम् ॥ ४७ ॥
यस्ययस्य विहीनो यो देशो यद्वर्जितं च यत् ॥ धूपांश्च विविधांस्तांस्तान्गंधाढ्यं सुविलेपनम् ॥ ४८ ॥ दीपवर्त्युपहारांश्च यच्चाभीष्टमथा
त्मनः ॥ नरः सोनुदिनं यज्ञान्करोत्याराधनाद्रवेः ॥ ४९ ॥ यज्ञेशो भगवान्भानुर्मखैरपि स तोष्यते ॥ बहूपकरणा यज्ञा नानासंभारविस्तराः ॥
संप्राप्यंते धनयुतैर्मनुष्यैर्नाल्पसंचयैः ॥ ५० ॥ भक्त्या तु पुरुषैः पूजा कृता दूर्वांकुरैरपि ॥ रवेर्ददाति हि फलं सर्वयज्ञैः सुदुर्लभम् ॥ ५१ ॥ यानि
पुष्पाणि हृद्यानि धूपगंधानुलेपनम् ॥ दयितं भूषणं यच्च तथा रक्ते च वाससी ॥५२॥ यानि चाभ्यवहार्याणि भक्ष्याणि च फलानि च ॥ प्रयच्छ
तानि मार्तंडे भवेथाश्चैव तन्मनाः ॥ ५३ ॥ आद्यं तं यज्ञपुरुषं यथा भक्त्या प्रसादय ॥ आराध्य याति तं देवं यत्तद्ब्रह्म परं स्मृतम् ॥ ५४ ॥ पुण्यै

स्तीर्थोदकैः पुष्पैर्मधुना सर्पिषा तथा ॥ क्षीरेण स्नापयेद्देवमच्युतं जगतां पतिम् ॥ ५५ ॥ दधिक्षीरह्रदान्पुण्यांस्ततो लोकान्मधुच्युतः ॥ प्रयास्यसि यदुश्रेष्ठ निर्वृतिं चापि ऐश्वरीम् ॥ ५६ ॥ स्तोत्रैर्हृद्यैर्यथा वाद्यैर्ब्राह्मणानां च तर्पणैः ॥ मनसश्चैकतायोगादाराधय दिवाकरम् ॥ ५७ ॥ आराध्य तं महादेवो महच्छब्दमवाप्तवान् ॥ ५८ ॥ अहं चापि समस्तानां लोकानां सृष्टिकारकः ॥ तमाराध्य विवस्वंतं तत्प्रसादाज्जनार्दन ॥ ॥५९॥ त्वमप्येतं हृषीकेश तत्प्रसादान्न संशयः ॥ समर्थो देवशत्रूणां दैत्यानां नाशने सदा ॥६०॥ दक्षिणः किरणस्तस्य यो देवस्य विवस्वतः ॥ अहं तस्मात्समुत्पन्नो वेदवेदांगसम्मितः ॥ ६१ ॥ वामो यः किरणः कृष्ण रश्मिमालाकुलः सदा ॥ तस्मादीशः समुत्पन्नः पार्वतीदयितोऽच्युत ॥ ॥ ६२ ॥ वक्षसस्त्वं समुत्पन्नः शंखचक्रगदाधरः ॥ तथांबुजकरा देवी अंबुजाननवल्लभा ॥ ६३ ॥ तमाराध्य बलं कीर्तिं श्रियं चावाप्तवानहम् ॥ तथा त्वमपि राजेंद्र तमाराध्य दिवाकरम् ॥ यान्यानिच्छसि कामांस्त्वं तांस्तान्त्सर्वानवाप्स्यसि ॥ ६४ ॥ य इदं शृणुयान्नित्यं संवादं विधिकृष्णयोः ॥ सोऽपि कामानवाप्याग्र्यांस्ततो लोकमवाप्नुयात् ॥ ६५ ॥ गैरिकं यानमारूढो युक्तं कुञ्जरवाजिभिः ॥ तेजसांबुजसंकाशः प्रभयांडजसन्निभः ॥ ६६ ॥ कांत्या चंद्रसमो राजन्वृन्दारकगणैर्वृतः ॥ गंधर्वैर्गीयमानस्तु तथा चाप्सरसां गणैः ॥६७॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे आदित्यपूजावर्णनं नाम विंशोत्तरशततमोऽध्यायः ॥ १२० ॥ छ ॥ ॥ शतानीक उवाच ॥ ॥ [1]शरीरलेखनं भानोरुक्तं संक्षेपतस्त्वया ॥ विस्तराच्छ्रोतुमिच्छामि तन्ममाचक्ष्व सुव्रत ॥ १ ॥ ॥ सुमंतुरुवाच ॥ ॥ पितुर्गृहं तु यातायां संज्ञायां कुरुनंदन ॥ भास्करश्चिंतयामास संज्ञा मद्रूपकारिणी ॥ २ ॥ एतस्मिन्नंतरे ब्रह्मा तत्रागत्य दिवाकरम् ॥ अब्रवीन्मधुरां वाचं रवेः प्रीतिकरां शुभाम् ॥ ३ ॥ आदिदेवोसि देवानां व्याप्तमेतत्त्वया जगत् ॥ श्वशुरो विश्वकर्मा ते रूपं निर्वर्तयिष्यति ॥४॥ एवमुक्त्वा रविं ब्रह्मा विश्वकर्माणमब्रवीत् ॥ निवर्तस्व मार्तण्डंस्वरूपं तत्सुशोभनम् ॥ ५ ॥ ततो ब्रह्मसमादेशाद्भ्रमिमारोप्य भास्करम् ॥ रूपं निर्वर्तयामास विश्वकर्मा शनैःशनैः ॥ ६ ॥ ततस्तुष्टाव तं ब्रह्मा सर्वदेवगणैः सह॥गुह्यैर्नानाविधैः स्तोत्रैर्वेदवेदांगपारगैः॥७॥स्वस्ति तेऽस्तु जगन्नाथ धर्मवर्षहिमाकर ॥शांतिस्ते सर्वलोकानां देवदेव दिवाकर ॥८॥ ततो रुद्रश्च विष्णवाद्याः स्तुवंतस्तं दिवाकरम् ॥ तेजस्ते वर्धतां देव लिख्यतेऽपि दिवस्पते ॥९॥ इन्द्रश्चागत्य तं देवं लिख्यमानमथास्तुवत् ॥ जय देव जयस्वेति तत्त्वदोऽसि जगत्पते ॥१०॥ ऋषयस्तु ततः सप्त विश्वामित्रपुरोगमाः ॥ तुष्टुवुर्विविधैः स्तोत्रैः स्वस्तिस्वस्ती

---

[1] शरीरलेखनं सूर्ये कथं वै प्रतिपादितम् । दैवतैर्ऋषिभिर्वापि तन्ममाचक्ष्व सुव्रत—इ० मा० ।

तिवादिनः ॥११॥ वेदोक्ताभिरथाशीर्भिर्वालखिल्याश्च तुष्टुवुः ॥ त्वं नाथ मोक्षिणां मोक्षो ध्येयस्त्वं ध्यानिनामपि ॥१२॥ त्वं गतिः सर्वभूतानां
त्वयि सर्वं प्रतिष्ठितम् ॥ प्रजाभ्यश्चैव देवेश शं नोऽस्तु जगतः पते ॥१३॥ त्वत्तो भवति वै नित्यं जगत्संलीयते त्वयि ॥ त्वमेकस्त्वं द्विधा चैव
त्रिधा च त्वं न संशयः ॥ १४ ॥ त्वयैकेन जगत्सृष्टं त्वयैकेन प्रबोधितम् ॥ ततो विद्याधरगणा यक्षराक्षसपन्नगाः ॥ १५ ॥ कृतांजलिपुटाः सर्वे
शिरोभिः प्रणता रविम् ॥ ऊचुरेवंविधा वाचो मनःश्रोत्रसुखप्रदाः ॥१६॥ सह्यं भवतु ते तेजो भूतानां भूतभावन ॥ हाहा हूहूस्ततश्चैव तुंबुरुर्नारद
स्तथा ॥ १७ ॥ उपगातुं समारब्धा गामुच्चैः कुशला रविम् ॥ षड्जमध्यमगांधारग्रामत्रयविशारदाः ॥ १८ ॥ मूर्च्छनाभिस्ततश्चैव तथा धैव
तपंचमैः ॥ नानानुभावमंद्रैश्च अर्धमंद्रैस्तथैव च ॥ १९ ॥ त्रिसाधनैः प्रकारैस्तु वाद्यतालसमन्वितैः ॥ विश्वाची च घृताची च उर्वशी च तिलो
त्तमा ॥ २० ॥ मेनका सहजन्या च रंभा चाप्सरसां वरा ॥ हावभावविलासैश्च कुर्वत्योऽभिनयान्बहून् ॥२१॥ ततोऽतीव कलं गेयं मधुरं च प्रव
र्तते ॥ सर्वेषां देवसंघानां मनःश्रोत्रसुखप्रदम् ॥२२॥ प्रवाद्यं तु ततस्तत्र वीणावंशादि सुव्रत ॥ पणवाः पुष्कराश्चैव मृदंगाः पटहास्तथा ॥ २३ ॥
देवदुंदुभयः शंखाः शतशोऽथ सहस्रशः ॥ गायद्भिश्चैव गंधर्वैर्नृत्यद्भिश्चाप्सरोगणैः ॥२४॥ तूर्यवादित्रघोषैश्च सर्वं कोलाहलीकृतम् ॥ ततः कृतैः कर
पुटैः पद्मकुड्मलसन्निभैः ॥ २५ ॥ ललाटोपरि विन्यस्तैः प्रणेमुः सर्वदेवताः ॥ ततः कोलाहले तस्मिन्त्सर्वदेवसमागमे ॥ २६ ॥ तेजसः शातनं
चक्रे विश्वकर्मा शनैः शनैः ॥ २७ ॥ इति हिमजलघर्मकालहेतोर्हरकमलासनविष्णुसंस्तुतस्य ॥ तदुपरि लिखनं निशम्य भानोर्व्रजति दिवाकर
लोकमायुषोंते ॥२८॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे विश्वकर्मकृतसूर्यतेजःशातनं नामैकविंशोत्तरशततमोऽध्यायः॥१२१॥
॥ शतानीक उवाच ॥ ॥ तस्मिन्काले समारूढो लिख्यमानो दिवस्पतिः॥ब्रह्मादिभिः स्तुतो देवैर्यथा वै तद्वदस्व मे ॥१॥ ॥ सुमंतुरुवाच ॥ ॥
शृणुष्वैकमना राजन्यथा देवो दिवस्पतिः ॥ ब्रह्मादिभिः स्तुतो देवैर्ऋषिभिश्च पुरानघ ॥ २ ॥ प्रयत्नतः प्रणतहितानुकंपिने स्वरूपतो लोकवि
भाविने नमः ॥ दिवस्पते कमलकुलावबोधिने नमस्तमःपटलपटावपाटिने ॥ ३ ॥ पावनातिशयपुण्यकर्मणे नैककामविभवप्रदायिने ॥ भासुरा
मलमयूखमालिने सर्वलोकहितकारिणे नमः ॥ ४ ॥ अजाय लोकत्रयभावनाय भूतात्मने गोपतये प्रियाय ॥ नमो महाकारुणिकोत्तमाय सूर्याय
लोकत्रयभावनाय॥५॥विवस्वते ज्ञानकृतांतरात्मने जगत्प्रतिष्ठाय जगद्धितैषिणे॥स्वयंभुवे लोकसमस्तचक्षुषे सुरोत्तमायामिततेजसे नमः॥६॥निजो
दयाय सुरगणमौलिमणे जगता त्वं महितस्त्वमुरुमयूखसहस्रतपाः ॥ जगति विभो वतमसतुद वनतिमिरासवपावन मदाद्भवति विलोहितविग्रहताति

मिरविनाशिनमुग्रं सुतरां त्रिभुवनभाप्रकरैः ॥७॥ रथं[१]मारुह्य समामयं भ्रमसि सदा जगतो हितदः ॥८॥ इत्येवं संस्तुतो देवो भास्करो वेधसापुरा ॥
देवतैश्च महाबाहो शिवविष्ण्वादिभिर्नृप ॥९॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे आदित्यस्तवो नाम द्वाविंशोत्तरशततमो
ऽध्यायः ॥ १२२ ॥ छ ॥ ॥ शतानीक उवाच ॥ ॥ भूयोऽपि कथयस्वेमां कथां सूर्यसमाश्रिताम् ॥ न तृप्तिमधिगच्छामि शृण्वन्नेतां कथां
मुने ॥१॥ ॥ सुमंतुरुवाच ॥ ॥ भास्करस्य कथां पुण्यां सर्वपापप्रणाशिनीम् ॥ वक्ष्यामि कथितां पूर्वं ब्रह्मणा लोककर्तृणां[२] ॥ २ ॥ ऋषयः परिपृ
च्छंति ब्रह्मलोके पितामहम् ॥ तापिताः सूर्यकिरणैस्तेजसा संप्रमोहिताः ॥३॥ ॥ ऋषय ऊचुः ॥ ॥ कोऽयं दीप्तो महातेजा हवीराशिसमप्रभः ॥
एतद्वेदितुमिच्छामः प्रभावोऽस्य कुतः प्रभो ॥ ४ ॥ ॥ ब्रह्मोवाच ॥ ॥ तमोभूतेषु लोकेषु नष्टे स्थावरजंगमे ॥ प्रवृत्ते गुणहेतुत्वे पूर्वं बुद्धिरजायत
॥ ५ ॥ अहंकारस्ततो जातो महाभूतप्रवर्तकः ॥ वाय्वग्निरापः खं भूमिस्ततस्त्वंडमजायत ॥ ६ ॥ तस्मिन्नंड इमे लोकाः सप्त वै संप्रतिष्ठिताः ॥
पृथ्वी च सप्तभिर्द्वीपैः समुद्रैश्चापि सप्तभिः ॥७॥ तत्रैवावस्थितो ह्यासमहं विष्णुर्महेश्वरः ॥ प्रमूढास्तमसा सर्वे प्रध्याता ईश्वरं परम् ॥८॥ ततो भिद्य
महातेजः प्रादुर्भूतं तमोनुदम् ॥ ध्यानयोगेन चास्माभिर्विज्ञातं सवितुस्तथा ॥९॥ ज्ञात्वा च परमात्मानं सर्व एव पृथक्पृथक् ॥ दिव्याभिः स्तुतिभि
र्देवं संस्तोतुमुपचक्रमुः ॥१०॥ आदिदेवोऽसि देवानामीश्वराणां त्वमीश्वरः॥ आदिकर्तासि भूतानां देवदेव सनातन ॥११॥ जीवनं सर्वसत्त्वानां देव
गंधर्वरक्षसाम्॥मुनिकिन्नरसिद्धानां तथैवोरगपक्षिणाम् ॥१२॥ त्वं ब्रह्मा त्वं महादेवस्त्वं विष्णुस्त्वं प्रजापतिः॥वायुरिंद्रश्च सोमश्च विवस्वान्वरुणस्तथा
॥१३॥ त्वं कालः सृष्टिकर्ता च हर्ता त्राता प्रभुस्तथा ॥ सरितः सागराः शैला विद्युदिंद्रधनूंषि च ॥ प्रलयः प्रभवश्चैव व्यक्ताव्यक्तः सनातनः ॥१४॥
ईश्वरात्परतो विद्या विद्यायाः परतः शिवः ॥ शिवात्परतरो देवस्त्वमेव परमेश्वर ॥१५॥ सर्वतः पाणिपादस्त्वं सर्वतोऽक्षिशिरोमुखः ॥ सहस्रांशुस्त्वं
तु देव सहस्रकिरणस्तथा ॥ १६ ॥ भूरादिर्भूर्भुवःस्वश्च महर्जनस्तपस्तथा ॥ प्रदीप्तं दीप्तिमन्नित्यं सर्वलोकप्रकाशकम् ॥ दुर्निरीक्ष्यं सुरेंद्राणां यद्रूपं
तस्य ते नमः ॥ १७ ॥ सुरसिद्धगणैर्जुष्टं भृग्वत्रिपुलहादिभिः ॥ शुभं परममव्यग्रं यद्रूपं तस्य ते नमः ॥ १८ ॥ पंचातीतस्थितं तद्वै दशैकादश एव
च ॥ अर्धमासमतिक्रम्य स्थितं तत्सूर्यमंडले ॥ तस्मै रूपाय ते देव प्रणताः सर्वदेवताः ॥ १९ ॥ विश्वकृद्विश्वभूतं च विश्वानरसुरार्चितम् ॥ विश्व
स्थितमचिंत्यं च यद्रूपं तस्य ते नमः ॥ २० ॥ परं यज्ञात्परं देवात्परं लोकात्परं दिवः ॥ दुरतिक्रमेति यः ख्यातस्तस्मादपि परं परात् ॥ परमा

---

[१] अर्द्धमेवोपलभ्यते । [२] आर्षो नाभातः ।

त्मेति विख्यातं यद्रूपं तस्य ते नमः ॥ २१ ॥ अविज्ञेयमचिंत्यं च अध्यात्मगतमव्ययम् ॥ अनादिनिधनं देवं यद्रूपं तस्य ते नमः ॥२२॥ नमोनमः कारणकारणाय नमोनमः पापविनाशनाय ॥ नमोनमो वंदितवंदनाय नमोनमो रोगविनाशनाय ॥ २३ ॥ नमोनमः सर्ववरप्रदाय नमोनमः सर्वं बलप्रदाय ॥ नमोनमो ज्ञाननिधे सदैव नमोनमः पंचदशात्मकाय ॥ २४ ॥ स्तुतः स भगवानेवं तेजसां रूपमास्थितः ॥ उवाच वाचं कल्याणीं को वरो वः प्रदीयताम् ॥ २५ ॥ तवातितेजसा रूपं न कश्चित्सहते विभो ॥ सहनीयं भवत्वेतद्धिताय जगतः प्रभो ॥२६॥ एवमस्त्विति गामुक्त्वा भगवान्सर्वकृत्स्वयम् ॥ लोकानां कार्यसिद्ध्यर्थं घर्मवर्षाहिमप्रदः ॥२७॥ अतः सांख्याश्च योगाश्च ये चान्ये मोक्षकांक्षिणः ॥ ध्यायन्ति ध्यानिनो नित्यं हृदयस्थं दिवाकरम् ॥ २८ ॥ सर्वलक्षणहीनोऽपि युक्तो वा सर्वपातकैः ॥ सर्वं तरति वै पापं देवकर्मसमाश्रितः ॥ २९ ॥ अग्निहोत्रं च वेदाश्च यज्ञाश्च बहुदक्षिणाः ॥ भानोर्भक्त्या नमस्कारकलां नार्हंति षोडशीम् ॥ ३० ॥ तीर्थानां परमं तीर्थं मंगलानां च मंगलम् ॥ पवित्रं च पवित्राणां तं प्रपद्ये दिवाकरम् ॥ ३१ ॥ ब्रह्माद्यैः संस्तुतं देवैर्ये प्रपद्यन्ति[1] भाकस्करम् ॥ निर्मुक्ताः किल्बिषैः सर्वैस्ते यान्ति रविमन्दिरम् ॥ ३२ ॥ उपचर्यादिभिः साध्यो यथा वेदे दिवस्पतिः ॥ लोकानामिह सर्वेषां तथा देवो दिवाकरः ॥ ३३ ॥ ॥ शतानीक उवाच ॥ ॥ शरीरलेखनं सूर्ये कथं वै प्रतिपादितम् ॥ देवैः सऋषिभिर्वापि तन्ममाचक्ष्व सुव्रत ॥ ३४ ॥ ॥ सुमन्तुरुवाच ॥ ॥ ब्रह्मलोके सुखासीनं ब्रह्माणं ते सुरासुराः ॥ ऋषयः समुपागम्य[2] इदमूचुः समाहिताः ॥ ३५ ॥ भगवन्देवतापुत्रो य एष दिवि राजते ॥ तेनांधकारो निकृत्तः सोऽयं जाज्वलितीति हि ॥ ३६ ॥ अस्य तेजोभिरखिलं जगत्स्थावरजंगमम् ॥ नाशमायाति देवेश यथा क्लिष्टं नदीतटम् ॥ ३७ ॥ वयं च पीडिताः सर्वे तेजसा तस्य मोहिताः ॥ पद्मश्चायं यथा म्लानो योयं योनिस्तव प्रभो ॥ ३८ ॥ दिवि भुव्यंतरिक्षे च शर्म नोपलभामहे ॥ तथा कुरु सुरज्येष्ठ यथा तेजः प्रशाम्यति ॥ ३९ ॥ एवमुक्तः स भगवान्पद्मयोनिः प्रजापतिः ॥ उवाच भगवान्ब्रह्मा देवान्विष्णुपुरोगमान्[3] ॥ ४० ॥ महादेवेन सहिता इन्द्रेण च महात्मना ॥तमेव शरणं देवं गच्छामः सहिता वयम् ॥४१॥ ततस्ते सहिताः सर्वे ब्रह्मविष्ण्वादयः सुराः ॥ गत्वा ते शरणं सर्वे भास्करं लोकभास्करम् ॥ ४२ ॥ स्तोतुं प्रचक्रमुः सर्वे भक्तिनम्राः समंततः ॥ केशादिदेवताः सर्वा भक्तिभावसमन्विताः ॥ ४३ ॥ ॥ ब्रह्मविष्ण्वीशा ऊचुः ॥ ॥ नमोनमः सुरवर तिग्मतेजसे नमोनमः सुरवर संस्तुताय वै ॥ जडांधमूकान्बधिरान्सकुष्ठान्सश्वित्रिणोऽधान्विविधव्रणावृतान् ॥

---

[1] नमस्यंति—इ० पा० । [2] तम्—इ० पा० । [3] वैलक्ष्यमानसान्—इ० पा० ।

करोषि तानेव पुनर्नवान्त्सदा अतो महाकारुणिकाय ते नमः ॥ ४४ ॥ यदौदरं ज्योतिरतित्वरन्महद्यदल्पतेजो यदपीह चक्षुषाम् ॥ यदत्र यज्ञेष्वपनीतमाहितं तवैव तद्रूपमनेकतः स्थितम् ॥ ४५ ॥ सुरद्विषः सागरतोयवासिनः प्रचण्डपाशासिपरश्वधायुधाः ॥ समुच्छ्रितास्ते भुवि पापचेतसः प्रयांति नाशं तव देव दर्शनात् ॥ ४६ ॥ यतो भवांस्तीर्थफलं समस्तं यज्ञेषु नित्यं भगवानवस्थितः ॥ नमो भवन्नत्र विचारणास्ति सदा समः शांतिकरो नराणाम् ॥ यच्चापि लोके तप उच्यते बुधैस्तत्ते महातेज उशंति पण्डिताः ॥ ४७ ॥ स्तुतः स भगवानेवं प्रजापतिमुखैः सुरैः ॥ अवधानं ततश्चक्रे श्रवणाभ्यां महीपते ॥ ४८ ॥ स्तुवंति ते ततो भूयः शिवविष्णुपुरोगमाः ॥ कृत्वा मां पुरतः सर्वे भक्तिनम्राः समन्ततः ॥ ४९ ॥ नमोनमस्[१]त्रिभुवनभूतिदायिने क्रतुक्रियासत्फलसंप्रदायिने ॥ नमोनमः प्रतिदिनकर्मसाक्षिणे सहस्रसंदीधितये नमोनमः ॥ ५० ॥ प्रसक्तसप्ताश्वयुजे क्षयाय ध्रुवैकरश्मिग्रथिने नमोनमः ॥ सवालखिल्याप्सरकिन्नरोरगैः संसिद्धगन्धर्वपिशाचमानुषैः ॥ सयक्षरक्षोगणगुह्यकोत्तमैः स्तुतः सदा देव नमोनमस्ते ॥ ५१ ॥ यतो रसान्संक्षिपसे शरीरिणां गभस्तिभिर्हिमजलघर्मनिस्रवैः ॥ जगच्च संशोषयसे सदैव अतोसि लोके जगतो विशोषणम् ॥ ५२ ॥ ॥ ब्रह्मोवाच ॥ ॥ ज्ञात्वा तेषामभिप्रायमुवाच भगवा[२]न्वचः ॥ लब्ध्वानुज्ञां ततः सर्वे सुराः संहृष्टचेतसः ॥५३॥ त्वष्टारं पूजयामासुर्मनोवाक्कायकर्मभिः ॥ विश्वकर्मा तवादेशात्करोतु तव सौम्यताम् ॥ ५४ ॥ ततस्तु तेजसो राशिं सर्वकर्मविधानवित्॥भ्रमिमारोपयामास विश्वकर्मा विभावसुम् ॥५५॥ अमृतेनाभिषिक्तस्य तदा सूर्यस्य वै विभोः ॥ तेजसः शातनं चक्रे विश्वकर्मा शनैःशनैः ॥ ५६ ॥ आजानुलिखितश्चासौ ससुरासुरपूजितः ॥ नाभ्यनंदत्ततो देव उल्लेखनमतः परम् ॥५७॥ ततः प्रभृति देवस्य चरणौ नित्यसंवृतौ ॥ तापयन्ग्लापयंश्चैव युक्ततेजोऽभवत्तदा ॥५८॥ यच्चास्य शातितं तेजस्तेन चक्रं विनिर्मितम् ॥ येन विष्णुर्जघानोग्रान्सदा वै दैत्यदानवान् ॥५९॥ शूलशक्तिगदावज्रशरासनपरश्वधान् ॥ देवतानां ददौ कृत्वा विश्वकर्मा महामतिः॥६०॥त्रिदेवनिर्मितं स्तोत्रं सन्ध्ययोरुभयोर्जपन् ॥ कुलं पुनाति पुरुषो व्याधिभिर्न च पीड्यते ॥६१॥ प्रजावान्सिद्धकर्मा च जीवेत्साग्रं शरच्छतम् ॥ पुत्रवान्धनवांश्चैव सर्वत्र चापराजितः ॥ हित्वा पुरं भूतमयं गच्छेत्सूर्यमयं पुरम् ॥६२॥ भूयोऽपि तुष्टुवुर्देवास्तथा देवर्षयो रविम् ॥ वाग्भिरित्थमशेषस्य त्रैलोक्यस्य समागताः ॥६३॥ ॥ देवा ऊचुः ॥ ॥ [३]नमस्ते रविरूपाय सोमरूपाय ते नमः ॥ नमो यजुःस्वरूपायाथ[४]र्वायांगिरसे नमः ॥६४॥ [५]ज्ञानैकधामभूताय निर्धूततमसे नमः ॥ शुद्धज्योतिःस्वरू

---

[१] त्रिभुवनभूरिदायिने—इ० पा० । [२] वदतां वरः—इ० पा० । [३] नमस्ते रुद्ररूपाय सामरूपाय वै नमः—इ० पा० । [४] अथर्वशिरसे नमः—इ० पा० । [५] ज्ञानैकपादरूपाय—इ० पा० ।

पाय निस्तत्त्वायामलात्मने ॥६५॥ नमोऽखिलजगद्व्याप्तिस्वरूपायात्ममूर्तये ॥ सर्वकारणभूताय निष्ठायै ज्ञानचेतसाम् ॥६६॥ नमोऽस्तु ज्ञेयरू
पाय प्रकाशे लक्षरूपिणे ॥ भास्कराय नमस्तुभ्यं तथा शब्दकृते नमः ॥ ६७ ॥ [2]संसारहेतवे चैव संध्याज्योत्स्नाकृते नमः ॥ त्वं सर्वमेतद्भगवा
ञ्जगद्वै भ्रमति त्वया ॥ ६८ ॥ भ्रमत्वाविद्धमखिलं ब्रह्माण्डं सचराचरम् ॥ त्वदंशुभिरिदं सर्वं संस्पृष्टं जायते शुचि ॥ ६९ ॥ क्रियते त्वत्करस्पर्शा
ज्जलादीनां पवित्रता ॥ होमदानादिको धर्मो नोपकाराय जायते ॥ ७० ॥ तावद्यावन्न संयोगी जगत्यत्र भवाञ्छुचिः ॥ प्रातर्होमं प्रशस्तं हि
उदिते त्वयि जायते ॥ ७१ ॥ ऋचोऽथ सकला ह्येता यजूंषि त्वं जगत्पते ॥ सकलानि च सामानि तपत्येवं जगत्सदा ॥ ७२ ॥ ऋङ्मयस्त्वं
जगन्नाथ त्वमेव च यजुर्मयः ॥ तथा साममयश्चैव ततो नाथ त्रयीमयः ॥ ७३ ॥ त्वमेव ब्रह्मणो रूपं परं चापरमेव च ॥ मूर्तोऽमूर्तस्तथा सूक्ष्मः
स्थूलरूपतया स्थितः ॥ ७४ ॥ निमेषकाष्ठादिमयः कालरूपः क्षयात्मकः ॥ प्रसीद स्वेच्छया रूपं स्वतेजोमयमादिश ॥ ७५ ॥ इत्थं संस्तूय
मानस्तु देवै[3]र्देवर्षिभिस्तथा ॥ मुमोच स्वं तदा तेजस्तेजसां राशिरव्ययः ॥ ७६ ॥ यत्तस्य ऋङ्मयं तेजो भविता तेन मेदिनी ॥ यजुर्मयेनापि
[4]दिवं स्वयं साममयो रविः ॥ ७७ ॥ शातितास्तेजसो भागा ये च स्युर्दश पंच च ॥ तस्यैव तेन शर्वस्य कृतं शूलं महात्मना ॥ ७८ ॥ चक्रं
विष्णोर्वसूनां च शंकरस्य च दारुणम् ॥ षण्मुखस्य तथा शक्तिः शिबिका धनदस्य च ॥ ७९ ॥ अन्येषां चासुरारीणां शस्त्राण्युग्राणि यानि
वै ॥ यक्षविद्याधराणां च तानि चक्रे स विश्वकृत् ॥८०॥ ततश्च षोडशं भागं बिभर्ति भगवान्रविः ॥ तत्तेज[5]सः पंचदश शातिता विश्वकर्मणा ॥
॥ ८१ ॥ ततः सुरूपदृग्भानुरुत्तरानगमत्कुरून् ॥ ददर्श तत्र संज्ञां च वडवारूपधारिणीम् ॥ ८२ ॥ इत्येतन्निखिलं भानोः कथितं मुनिसत्तमाः॥
शृणुयाद्यो नरो भक्त्या अश्वमेधफलं लभेत् ॥ ८३ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे ब्रह्मर्षिसंवादे परिलेखवर्णनं नाम
त्रयोविंशत्युत्तरशततमोऽध्यायः ॥ १२३ ॥ छ॥ ॥ ब्रह्मोवाच ॥ ॥ वक्ष्याम्यहं ते पुनरेव दिंडे सूर्यस्य सर्वप्रवरप्रधानम् ॥ व्योम्नः परं तिष्ठति
यस्तु मग्नः स मुच्यते रुद्र इहापि दिंडी ॥ १ ॥ स्थित्वा पुरा ब्रह्मशिरः किलासौ प्रगृह्य तत्तस्य शिरःकपालम् ॥ ततो ह्यसावाश्रममुत्तमं शिवो
बहूदकैः पुष्पफलैः समृद्धम् ॥ २ ॥ नग्नो यदा दारुवने मुनीनां दृष्ट्वा च तं भैक्ष्यचरं सुरेशम् ॥ योषित्सुताः संक्षुभितास्तुसर्वे जग्मुर्हरं तं मुनयः
सुतुष्टाः ॥ ३ ॥ स हन्यमानो मुनिमुख्यसंघैर्गृहीतलोष्टैर्ऋषिदंडकाष्ठैः ॥ विहाय दिंडिः स तु तान्सुरर्षींस्ततो रवेर्लोकमथाजगाम ॥ ४ ॥ आग

---

१ सूर्यस्वरूपाय-इ० पा० । २ सर्वस्य हेतवे-इ० पा० । ३ अपि देवैर्दिवाकरः-इ० पा० । ४ त्रिदिवम् । ५ भागा इति शेषः ।

च्छमानं प्रमथास्तमूचुर्देवेश नित्यं भ्रमसे किमर्थम् ॥ स प्राह तान्पापविमोचनार्थमटामि तीर्थानि सुरालयांश्च ॥ ९ ॥ ते भूय ऊचुः प्रमथास्तमेवमत्रैव तिष्ठस्व रवेः पुरस्तात् ॥ शुद्धिं तवैष प्रकरिष्यतीति शुद्धस्ततो यास्यसि रुद्रलोकम् ॥ ६ ॥ इत्येवमुक्तः प्रमथैस्तु रुद्रस्तत्रैव तस्थौ रवितोषणाय ॥ नग्नो जटी मुष्टिकपालपाणी रूपेण चैवाप्रतिमस्त्रिलोके ॥ ७ ॥ उक्तः स तुष्टेन ततः सवित्रा प्रीतोस्मि देवागमनात्तवाहम् ॥ मद्दर्शनादेव भवान्विशुद्धो दिंडीति नाम्ना भवितासि लोके ॥ ८ ॥ अष्टादशैते प्रमथास्तु भानोश्चतुर्दशान्ये तु रवे रथस्थाः ॥ हे देवते द्वौ च ऋषिप्रधानौ गंधर्वसर्पावपि तावदेव ॥ ९ ॥ यक्षौ च सिद्धौ च निशाचरौ चादित्यात्मजावप्सरसां प्रधानौ ॥ वसंति ते ह्यस्तमुषश्च सूर्ये तेषामशीतिश्चतुरोत्तरा सा ॥ १० ॥ इत्यादिदेवप्रवरास्तु सर्वे धात्वर्थशब्दैश्च भवंति सिद्धाः ॥ ११ ॥ ॥ ऋषय ऊचुः ॥ ॥ विस्तराद्ब्रूहि मे ब्रह्मन्प्रवरान्धातुशब्दजान् ॥ यतश्च कौतुकं ब्रह्मन्नस्माकमिह जायते ॥ १२ ॥ ब्रह्मोवाच ॥ ॥ भूयस्तव प्रवक्ष्यामि दंडनायकपिंगलौ ॥ राज्ञस्त्रौषादयश्चान्ये दिग्देवा दिंडिना सह ॥ १३ ॥ मया सह समागम्य पुरा देवैर्विचारितम् ॥ एष कारुणिकः सूर्यो युध्यते दानवैः सह ॥ १४ ॥ ते तु लब्धवरा भूत्वा अमात्याद्या ह्यभीक्ष्णशः ॥ आदित्यं मन्यमानास्ते तपंतं हंतुमुद्यताः ॥ १५ ॥ तस्मात्तेषां विघातार्थं प्रवराश्च भवामहे ॥ अस्माभिः प्रतिरुद्धास्ते न द्रक्ष्यंति दिवाकरम् ॥ १६ ॥ संमंत्र्यैवं ततः स्कंदो वामपार्श्वे रवेः स्थितः ॥ दंडनायकसंज्ञस्तु सर्वलोकस्य स प्रभुः ॥ ॥ १७ ॥ उक्तश्च स तदार्केण त्वं प्रजादंडनायकः ॥ दंडनीतिकरो यस्मात्तस्मात्त्वं दंडनायकः ॥ १८ ॥ लिखते यः प्रजानां च सुकृतं यच्च दुष्कृतम् ॥ अग्निर्दक्षिणपार्श्वे तु पिंगलत्वात्स पिंगलः ॥ १९ ॥ आश्विनौ चापि सूर्यस्य पार्श्वयोरुभयोः स्थितौ ॥ अश्वरूपात्समुपन्नौ तेन तावश्विनौ सुरौ ॥ २० ॥ द्वारपालौ स्मृतौ तस्य राज्ञः श्रेष्ठौ महाबलौ ॥ कार्त्तिकेयः स्मृतो राज्ञः श्रेष्ठश्चापि हरः स्मृतः ॥ २१ ॥ राजदीप्तौ स्मृतो धातुर्नकारस्तस्य प्रत्ययः ॥ सुरसेनापतित्वेन स यस्माद्दीप्यते सदा ॥ तस्मात्स कार्तिकेयस्तु नाम्ना राज्ञ इति स्मृतः ॥ २२ ॥ स्रुगतौ च स्मृतो धातुर्यस्य स प्रत्ययः स्मृतः ॥ गच्छतीति रहस्तस्मात्पर्यायात्स्रोष उच्यते ॥ २३ ॥ प्रथमं यद्भवेद्द्वारं धर्मार्थाभ्यां समाश्रितम् ॥ तत्रैतौ संस्थितौ देवौ लोकपूज्यौ द्विजोत्तमाः ॥ २४ ॥ द्वितीयायां तु कक्षायामप्रधृष्टौ व्यवस्थितौ ॥ पक्षिप्रेताधिपौ नाम्ना स्मृतौ कल्माषपक्षिणौ ॥ २५ ॥ वर्णस्य शबलत्वाच्च यमः कल्माष उच्यते ॥ पक्षावस्येति यः पक्षी गरुडः परिकीर्तितः ॥ २६ ॥ स्थितो दक्षिणतस्तस्य दंडहस्तसमन्वितः ॥ उत्तरेण स्थितोऽर्कस्य कुबेरश्च विनायकः ॥ २७ ॥ कुबेरो धनदो ज्ञेयो हस्तिरूपो विनायकः ॥ कुत्सया कुप्यता

शप्तं कुशरीरमजायत ॥ कुबेरः कुशरीरत्वात्स नाम्ना धनदः स्मृतः ॥ २८ ॥ नायकः सर्वसत्त्वानां तेन नायक उच्यते ॥ विविधं नयते यस्मात्स
तु तस्माद्विनायकः ॥ २९ ॥ रैवतश्चैव दिंडिश्च तौ रवेः पूर्वतः स्थितौ ॥ ततो दिंडिः स्मृतो रुद्रो रेवतस्तनयो रवेः ॥ ३० ॥ प्लुतं गच्छत्यसौ
यस्मात्सर्वलोकनमस्कृतः ॥ रेवृप्लुवगतौ धातू रेवतस्तेन स स्मृतः ॥३१॥ [1]डीङ्गंतावस्य वै धातोर्दिंडिशब्दो निपात्यते ॥ [2]डयंतेऽसौ सदा दिंडी
तेन दिंडी प्रकीर्तितः ॥ ३२ ॥ इत्येते प्रवराः प्रोक्ता धात्वर्था नैगमैः शुभैः ॥ एषां संक्षेपतो भूयः संख्यां वो निगदामि वै ॥ ३३ ॥ अश्विनौ
तौ ततो ज्ञेयौ दंडनायकपिंगलौ ॥ तौ सूर्यद्वारपौ ज्ञेयौ राज्ञस्रौषौ ततः स्मृतौ ॥ ३४ ॥ रेवतश्चैव दिंडिश्च इत्येते प्रवरा मया ॥ अष्टादश समा
ख्याताः संक्षेपात्संख्यया मया ॥ ३५ ॥ इत्येभिर्नामभिस्त्वन्ये दानवानां जिघांसया ॥ परिवार्य स्थिताः सूर्यं नानाप्रहरणायुधाः ॥ ३६ ॥ सरू
पाश्चान्यरूपाश्च विरूपाः कामरूपिणः ॥ परिवार्य स्थिताः सूर्यं गरुडश्च महाबलः ॥ ३७ ॥ धातुर्दिविति वै प्रोक्तो क्रीडायां स तु उच्यते ॥
क्रीडंते दिवि वै यस्मात्तस्मात्ते देवताः स्मृताः ॥ ३८ ॥ ऋचो यजूंषि सामानि यान्युक्तानीह वै मया ॥ नानारूपैः स्थितान्येव रवेस्तानि सम
न्ततः ॥ ३९ ॥ ॥ सुमंतुरुवाच ॥ ॥ इत्येवमुक्तवान्ब्रह्मा ऋषीणां पृच्छतां पुरा ॥ ते श्रुत्वाराध्य देवेशं संसिद्धा दिवि संस्थिताः ॥ ४० ॥
इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे ब्रह्मर्षिसंवादे प्रवरवर्णनं नाम चतुर्विंशत्युत्तरशततमोऽध्यायः ॥ १२४ ॥ ॥ छ ॥
॥ ॥ शतानीक उवाच ॥ ॥ यदेतद्दृश्यते व्योम सूर्यस्य पुरतो द्विज ॥ तदुच्यते किमात्मा च कथंभूतश्च कथ्यताम् ॥ १ ॥ ॥ सुमंतुरुवाच ॥ ॥
हंत व्योम प्रवक्ष्यामि सूर्यप्रहरणं शुभम् ॥ यदात्मकं हि यत्प्रोक्तं यथा वसंति देवताः ॥ २ ॥ पुरस्ताच्च चतुःशृंगं तद्व्योमायतनं रवेः ॥ व्योमशब्दं
चतुःशृंगं सर्वदेवमयं च यं[3]त् ॥ ३ ॥ गैरिकार्णवसंभूतं यदंतर्गर्भमाश्रितम् ॥ तत्रोत्पन्नमिदं व्योम कलेर्व्योम मही स्मृता ॥ ४ ॥ वरुणस्य यथा
पाशो हुङ्कारो वेधसो यथा ॥ विष्णोश्चापि यथा चक्रं त्रिशूलं त्र्यंबकस्य च ॥५॥ इन्द्रस्य च यथा वज्रं तथा व्योम रवेः स्मृतम् ॥ तस्मिन्व्योम्नि
त्रयस्त्रिंशत्क्रीडन्तो यज्ञियाः सुराः ॥ ६ ॥ हरश्च वर्षशुद्धश्च त्र्यंबकश्चापराजितः ॥ वृषाकपिश्च शंभुश्च कपर्दी रैवतस्तथा ॥ ईश्वरो भुवनश्चैते रुद्रा
एकादश स्मृताः ॥ ७ ॥ आदित्यानां च नामानि विष्णोश्चक्रस्य दीयताम् ॥ अर्यमा च तथा मित्रो भगोऽथ वरुणस्तथा ॥ ८ ॥ विवस्वान्तस
विता चैव पूषा त्वष्टा तथैव च ॥ अंशो भगश्चातितेजा आदित्या द्वादश स्मृताः ॥ ९ ॥ ध्रुवो धरश्च सोमश्च आपश्चैवाऽनिलोनलः ॥ प्रत्यूषश्च

---

[1] ऋगतावस्य वै धातुः—इ० पा० । [2] ऋच्छतीति—इ० पा० । [3] तत्—इ० पा० ।

प्रभातश्च वसवोऽष्टौ प्रकीर्तिताः ॥ १० ॥ नासत्यश्चैव दस्रश्च स्मृतौ द्वावश्विनावुभौ ॥ विश्वेदेवान्प्रवक्ष्यामि नामतस्तान्निबोधत ॥ ११ ॥ क्रतु
र्दक्षो वसुः सत्यः कालकामौ धृतिः कुरुः ॥ शंकुमात्रो वामनश्च विश्वेदेवा दश स्मृताः ॥ १२ ॥ वर्तमाना इमे देवा भविष्यानंतरे शृणु ॥ यमश्च
तुषिताश्चैव[1] वसवो[2] वशवर्तिनः ॥ १३ ॥ सत्याश्च भूतरजसः साध्याश्च तदनंतराः ॥ षट्सु मन्वंतरेष्वेवं देवा द्वादशद्वादश[3] ॥ पारा
वतास्तथा चान्ये ते ह्यासंस्तुषितैः सह ॥ १४ ॥ साध्यान्देवान्प्रवक्ष्यामि नामतस्तान्निबोध मे ॥ मनोऽनुमंता प्राणश्च नरो नारा
यणस्तथा ॥ १५ ॥ वृत्तिलम्बो मनुश्चैव समो[4] धर्मश्च वीर्यवान् ॥ वित्तस्वामी प्रभुश्चैव साध्या द्वादश कीर्तिताः ॥ १६ ॥ एते
यज्ञभुजो देवाः सर्वलोकेषु पूजिताः ॥ अदित्यामेव ते धीर कश्यपस्यात्मजाः स्मृताः ॥ १७ ॥ विश्वे च वसवः साध्या विज्ञेया धर्मसूनवः ॥
एवं धर्मसुतः सोमस्तृतीयो वसुरिष्यते ॥ १८ ॥ धर्मोपि ब्रह्मणः पुत्रः पुराणे निश्चयं गतः ॥ अथ चेन्द्रान्वसूंश्चैव नामभिश्च निबोध मे ॥ १९ ॥
स्वायंभुवो मनुः पूर्वं ततः स्वारोचिषः स्मृतः ॥ उत्तमस्तामसश्चैव रैवतश्चाक्षुषस्तथा ॥ २० ॥ इत्येते षडतिक्रांताः सप्तमः सांप्रतो मनुः ॥
वैवस्वतेति विज्ञेयो भविष्याः सप्त चापरे ॥ २१ ॥ एषामाद्योर्कसावर्णिर्ब्रह्मसावर्णिरेव च ॥ तस्माच्च भवसावर्णिर्धर्मसावर्णिरित्युत ॥ २२ ॥
पंचमो दक्षसावर्णिः सावर्णिः[5] पंच कीर्तिताः ॥ रौच्यो भौव्यश्च द्वावन्यावित्येते मनवः स्मृताः ॥२३॥ इंद्रस्तु विष्णुभुग्ज्ञेयो विद्युतिस्तदनंतरम् ॥
विभुः प्रभुश्चैव शिखी तथैव च मनोजवः ॥ २४ ॥ ओजस्वी सांप्रतस्त्विंद्रो बलिर्भाव्यस्ततः परम् ॥ अद्भुतस्त्रिदिवश्चैव दशमस्त्विंद्र उच्यते ॥
॥ २५ ॥ सुसात्त्विकश्च[6] कीर्तिश्च शतधामा[7] दिवस्पतिः ॥ इति भूता भविष्याश्च इंद्रा ज्ञेयाश्चतुर्दश ॥ २६ ॥ कश्यपोऽत्रिर्वशिष्ठश्च भरद्वाजश्च
गौतमः ॥ विश्वामित्रो जमदग्निः सप्तैते ऋषयः स्मृताः ॥ २७ ॥ अतः परं प्रवक्ष्यामि मरुतोऽग्निपरिग्रहान् ॥ प्रवहोथावहश्चैव उद्वहः संवह
स्तथा ॥ २८ ॥ विवहो निवहश्चैव परिवाहस्तथैव च ॥ अंतरिक्षचरा[8] ह्येते पृथङ्मार्गविसारिणः ॥ २९ ॥ सूर्योऽग्निश्च शुचिर्नाम्ना वैद्युतः पाव
कः स्मृतः ॥ निर्मंथः पवमानोऽग्निस्त्रयः प्रोक्ता इमेग्नयः ॥ ३० ॥ अग्नीनां पुत्रपौत्रास्तु चत्वारिंशत्तथैव तु ॥ मरुतामपि सर्वेषां विज्ञेयाः सप्तस
प्तकाः ॥ ३१ ॥ ऋतुः संवत्सरोऽह्यग्निर्ऋतवस्तस्य जज्ञिरे ॥ ऋतुपुत्राश्च वै पंच इति सर्गः सनातनः ॥ ३२ ॥ संवत्सरस्तु प्रथमो द्वितीयः परि

---

[1] रुषितश्चैव—इ० पा० । [2] तथैव वशवर्तिनः—इ० पा० । [3] वै स्मृताः—इ० पा० । [4] हंसो धर्मश्च—इ० पा० । [5] एकवचनमार्षम् । [6] सुशांतिश्च सुकीर्तिश्च—इ० पा० । [7] यातुधानो—इ० पा० ।
[8] अन्तरिक्षवहाः—इ० पा० ।

वत्सरः ॥ इद्वत्सरस्तृतीयस्तु चतुर्थस्त्वनुवत्सरः ॥ ३३ ॥ पंचमो वत्सरस्तेषामित्येवं पंच ते स्मृताः ॥ तेषु संवत्सरो ह्यग्निः सूर्यस्तु परिवत्सरः ॥ ॥ ३४ ॥ सोम इद्वत्सरस्तेषां वायुश्चैवानुवत्सरः ॥ रुद्रस्तु वत्सरो ज्ञेयः पंचैतां[1] युगदेवताः ॥ ३५ ॥ आर्तवाः पितरो ज्ञेया ये जाताः ऋतुसूनवः॥ पितामहास्तु विज्ञेयाः पंचाब्दा ब्रह्मणः सुताः ॥ ३६॥ सौम्या बर्हिषदश्चैव अग्निष्वात्ताश्च ये त्रयः ॥ एते वै पितरस्तेषां ये जीवत्पितृका नराः॥ ॥ ३७ ॥ आदित्यश्चैव सोमश्च लोहितांगो बुधस्तथा ॥ बृहस्पतिश्च शुक्रश्च तथा हेलिसुतश्च यः ॥ ३८ ॥ उपरागः शिखी चोभौ नवैते तु ग्रहाः स्मृताः ॥ त्रैलोक्यस्य त्विमे नित्यं भावाभावनिवेदकाः ॥ ३९ ॥ आदित्यश्चैव सोमश्च द्वावेतौ मंडलग्रहौ ॥ राहुश्छायाग्रहस्तेषां शेषास्तारा ग्रहाः स्मृताः ॥ ४० ॥ नक्षत्राधिपतिः सोमो ग्रहराजो दिवाकरः ॥ पठ्यते चाग्निरादित्य उदकश्चंद्रमाः स्मृतः ॥ ४१ ॥ आदित्यः पठ्यते ब्रह्मा विष्णुस्तेषां तु चंद्रमाः ॥ महेश्वरस्तु विज्ञेयस्तृतीयस्तारकग्रहः ॥ ४२ ॥ कश्यपस्य सुतः सूर्यः सोमो धर्मसुतः स्मृतः ॥ देवासुरगुरू द्वौ तु नामतस्तौ महाग्रहौ ॥ ४३ ॥ प्रजापतिसुतावेतावुभौ शुक्रबृहस्पती ॥ बुधः सोमात्मजः श्रीमाञ्छनी रविसुतः स्मृतः ॥ ४४ ॥ सिंहिकायाः सुतो राहुः केतुस्तु ब्रह्मणः सुतः ॥ सर्वेषां च ग्रहाणां हि अधस्ताच्चरते रविः ॥ ४५ ॥ ततो दूरं स्मृतं तावद्विधोर्नक्षत्रमण्डलम् ॥ नक्षत्रेभ्यः कुजबुधौ श्वेताह्वस्तदनंतरम् ॥४६॥ तस्मान्माहेश्वरश्चोर्द्ध्वं धिषणस्तदनन्तरम् ॥ कृष्णश्चोर्ध्वं ततस्तस्मादथ चित्रशिखंडिजः ॥ ४७ ॥ एषामेव क्रमः प्रोक्तश्चासक्तं त्रिदिवं ध्रुवे ॥ आदित्यनिलयो राहुः कदाचित्सोममार्गगः ॥ ४८ ॥ सूर्य[2]मंडलसंस्थस्तु शिखी सर्पति सर्वदा ॥ नवयोजनसाहस्रो विस्तारो भार्गवस्य[3] तु ॥४९॥ द्विगुणः सूर्यविस्ताराद्विस्तारः शनिनः स्मृतः ॥ त्रिगुणं[4] मंडलं ज्ञेयं नाक्षत्रं विस्तराद्विधोः ॥५०॥ नक्षत्रमंडलात्तत्र पादहीनो बृहस्पतिः ॥ बृहस्पतेः पादहीनः शुक्रोंगारक एव हि ॥ ५१ ॥ विस्तारो मंडलानां तु पादहीनस्तयोर्बुधः ॥ बुधतुल्यानि ऋक्षाणि सर्वऋक्षाणि यानि तु ॥ ५२ ॥ योजनान्यर्धमात्राणि तेभ्यो ह्रस्वं न विद्यते ॥ राहुः सूर्यप्रमाणश्च कदाचित्सोमसंनिभः ॥ ५३ ॥ नक्षत्र[5]ग्रहमानस्तु केतुस्त्वनियतः स्मृतः ॥ अविज्ञातगतिश्चैव चंचलत्वान्नराधिप ॥ ५४ ॥ तथालक्षितरूपस्तु बहुरूपधरो हि सः ॥ भूर्लोकः पृथिवी प्रोक्ता अंतरिक्षं भुवः स्मृतम् ॥ ५५ ॥ स्वर्लोकस्त्रिदिवं ज्ञेयं शेषादूर्ध्वं यथाक्रमम् ॥ भूपतिस्तु सदा त्वग्निस्तेनासौ भूपतिः स्मृतः ॥ ५६ ॥ वायुर्नभस्पतिस्तेन तथा सूर्यो दिवस्पतिः ॥ गंधर्वाप्सरसश्चैव गुह्यकाः सिद्धराक्षसाः ॥ ५७ ॥ भूर्लोकवासिनः सर्वे अंतरिक्षचराञ्छृणु ॥ मरुतः

---

१ पंचाब्दा ये युगात्मकाः—इ० पा० । २ सोममंडल—इ० पा० । ३ ब्राह्मणस्य तु—इ० पा० । ४ द्विगुणम्—इ० पा० । ५ तस्माद्ग्रहणमात्र तु--इ० पा० ।

सप्तमस्कंधे रुद्रास्तत्रैव चाश्विनौ ॥ ५८ ॥ आदित्या वसवः सर्वे तथैव च गवां गणाः ॥ चतुर्थे तु महर्लोके वसंते कल्पवासिनः ॥ ॥ ५९ ॥ प्रजानां पतिभिः सर्वैः सहिताः कुरुनंदन ॥ जनलोके पंचमे च वसंते भूमिदाः सदा ॥ ६० ॥ ऋतुः सनत्कुमाराद्या वैराजश्च तथाश्रयाः ॥ सत्यस्तु सप्तमे लोके ह्यपुनर्मार्गगामिनाम् ॥ ६१ ॥ ब्रह्मलोकः समाख्यातो ह्यप्रतीघातलक्षणः ॥ इतिहासविदो यत्र क्रीडंते कुरुनंदन ॥ ६२ ॥ शृण्वंति च पुराणानि ये सदा भीमनंदन ॥ महीतलात्सहस्राणां शतादूर्ध्वं दिवाकरः ॥ ६३ ॥ [१]शतयोजनकोट्यस्तु भूमेरूर्ध्वं ध्रुवः स्थितः ॥ ततो विंशतिलक्षस्तु त्रैलोक्योत्सेध उच्यते ॥ ६४ ॥ द्विगुणैस्तु सहस्रैस्तु योजनानां शतेषु च ॥ लोकांतरमथो चैवं ध्रुवादूर्ध्वं विधीयते ॥ ६५ ॥ देवदानवगंधर्वा यक्षराक्षसपन्नगाः ॥ भूता विद्याधराश्चैव अष्टौ ते देवयोनयः ॥ ६६ ॥ यस्मिन्व्योम्नि त्विमे लोकाः सप्त वै संप्रतिष्ठिताः ॥ मरुतः पितरो ह्येते तस्मिन्नेवाग्नयो ग्रहाः ॥ ६७ ॥ यास्त्वप्येताः समाख्याता मयाष्टौ देवयोनयः ॥ मूर्ताश्चामूर्तयश्चैव सर्वास्ता व्योम्नि संस्थिताः ॥ ६८ ॥ एवंविधमिदं व्योम सर्वव्योममयं स्मृतम् ॥ सर्वदेवमयं चैव सर्वग्रहमयं तथा ॥ ६९ ॥ तस्माद्यो ह्यर्चयेद्व्योम तेन सर्वेऽर्चिताः सुराः ॥ तस्मात्सर्वप्रयत्नेन शुभार्थी व्योम चार्चयेत् ॥ ७० ॥ यस्त्वर्चते सदा व्योम भक्त्या श्रद्धासमन्वितः ॥ वृषध्वजसदो राजन्स गच्छेन्नात्र संशयः ॥ ७१ ॥

॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे व्योममाहात्म्ये भुवनकोशवर्णनं नाम पंचविंशत्युत्तरशततमोऽध्यायः ॥ १२५ ॥छ॥

॥ सुमंतुरुवाच ॥ ॥ आकाशं खं दिशो व्योम अन्तरिक्षं नभोंऽबरम् ॥ पुष्करं गगनं मेरुर्विपुलं च बिलं तथा ॥ १ ॥ आपोच्छिद्रं तथा शून्यं तमो वै रोदसी तथा ॥ नामान्येतानि ते व्योम्नः कीर्तितानि महीपते ॥ २ ॥ लवणक्षीरदध्यम्लघृतमध्विक्षवस्तथा ॥ स्वादूदकश्च सप्तैते समुद्राः परिकीर्तिताः ॥ ३ ॥ हिमवान्हेमकूटश्च निषधो नील एव च ॥ श्वेतश्च शृंगवांश्चैव षडेते वर्षपर्वताः ॥ ४ ॥ मध्यसंस्थस्तथैतेषां महाराजतपर्वतः ॥ माहेन्द्री चाप्यथाग्नेयी याम्या च नैर्ऋती तथा ॥ ५ ॥ वारुणी चाथ वायव्या सौम्यैशानी तथैव च ॥ एताः पुर्यस्तु देवानां तथोपरि समाश्रिताः ॥ ६ ॥ पृथिव्यां तु स्थितो वीर लोकालोकस्तु पर्वतः ॥ ततश्चंडकपालं तु तस्मात्तत्परतस्तु यः ॥ ७ ॥ ततोऽग्निर्वायुराकाशं ततो भूतादिरुच्यते ॥ ततो महानहंकारः प्रकृतिः पुरुषस्ततः ॥८॥ पुरुषादीश्वरो ज्ञेय ईश्वरेणावृतं जगत् ॥ ईश्वरो भगवान्भानुस्तेनेदं पूरितं जगत् ॥ ९ ॥ सहस्रांशुर्महातेजाश्चतुर्बाहुर्महाबलः ॥ ऊर्ध्वमप्यथ लोकास्तु प्राङ्मया ये प्रकीर्तिताः ॥ १० ॥

---

[१] सप्तयोजन—इ०पा०।

भूयस्तान्तसंप्रवक्ष्यामि अंडावरणकारकान् ॥ भूर्लोकस्तु भूवर्लोकस्तृतीयः परिकीर्तितः॥११॥महर्जनस्तपः सत्यः सप्त लोकाः प्रकीर्तिताः ॥ [1]तत
स्त्वंडकपालं तु तस्माच्च परस्तपः ॥ १२ ॥ ततोऽग्निर्वायुराकाशं ततो भूतादिरुच्यते ॥ ततो महान्प्रधानश्च प्रकृतिः पुरुषस्ततः ॥ १३ ॥ पुरुषा
दीश्वरो ज्ञेय ईश्वरेणावृतं जगत् ॥ भूमेरधस्तात्सप्तैव लोकानभिमताञ्छृणु ॥ १४ ॥ तलं सुतलपाताले तलातलं तथातलम् ॥ वितलं च कुरुश्रेष्ठ
सप्तमं च रसातलम् ॥१५॥ ततोऽग्निर्वायुराकाशं ततो भूतादिरुच्यते ॥ ततो महान्प्रधानश्च प्रकृतिः पुरुषस्ततः ॥१६॥ पुरुषादीश्वरो ज्ञेय ईश्वर
रेणावृतं जगत् ॥ एवं मेरोः प्रमाणं तु सर्वमेतत्प्रकीर्तितम् ॥ १७ ॥ चतुरस्रश्चतुःशृंगः स मेरुः कांचनः शुभः ॥ पृथिव्यां संस्थितो मध्ये सिद्ध
गंधर्वसेवितः ॥ १८ ॥ चतुर्भिः कांचनैः शृंगैर्दिव्यैर्दिवमिवोल्लिखन् ॥ योजनानां सहस्राणि चतुराशीतिरुच्छ्रितः ॥ १९ ॥ प्रविष्टः षोडशाध
स्तादष्टाविंशतिविस्तृतः ॥ विस्तारस्त्रिगुणश्चास्य परिणाहस्ततः स्मृतः ॥ २० ॥ तस्य सौमनसं नाम शृंगमेकं तु कांचनम् ॥ द्वितीयं पद्म
रागाभं ज्योतिष्कं नाम नामतः ॥ २१ ॥ तृतीयं नामतश्चित्रं सर्वदेवमयं शुभम् ॥ चतुर्थं राजतं शुक्लं चन्द्रौजस्कमिति स्मृतम् ॥ २२ ॥
यत्तु सौमनसं नाम शृंगं गांगेयमुच्यते ॥ तदेव चोदयो नाम्ना यत्रोद्यन्दृश्यते रविः ॥ २३ ॥ उत्तरेण परिक्रम्य जंबूद्वीपं दिवाकरः ॥ दृश्यो
भवति भूतानां शिखरं च समास्थितः ॥ २४ ॥ कांचनस्य च शैलस्य तेजसार्कस्य चाहृते ॥ उभे संध्ये प्रकाशेते आताम्रे पूर्वपश्चिमे ॥ २५ ॥
शृंगे सौमनसे सूर्य उत्तिष्ठत्युत्तरायणे ॥ ज्योतिषे दक्षिणे चापि विषुवे मध्यतस्तयोः ॥ २६ ॥ [2]ईशेंद्रोद्रिश्च ऐशान्यां तत्राग्निः पूर्वदक्षिणे ॥ नैर्ऋ
तेऽपि ततो ज्ञेयो वायव्ये मरुतस्तथा ॥ २७ ॥ मध्ये तु कंजजः साक्षाद्ब्रह्मा ज्योतींषि चैव हि ॥ आदित्यस्तेन रूपेण तस्मिन्व्योम्नि प्रतिष्ठितः ॥
॥ २८ ॥ इदं देवमयं व्योम तथा लोकमयं स्मृतम् ॥ पूर्वकोणस्थिते शृंगे स्थितः शुक्रो महीपते ॥ २९ ॥ हेलिजश्चापरे ज्ञेयो धननाथस्तथापरे ॥
सोमश्चापि चतुर्थे तु स्थितः शृंगे जनाधिप ॥ ३० ॥ मध्ये केशास्थितो राजन्हुंकारश्च पिनाकिनः ॥ शृंगे पूर्वोत्तरे राजन्स्थितो देवो [3]विधुक्षये ॥
॥ ३१ ॥ ततः स्थितो महादेवो गोपतिर्लोकपूजितः ॥ पूर्वाग्नेयीस्थिते शृंगे स्थितो वै शांडिलः सुतः ॥ ३२ ॥ ततः स्थितो महातेजाः
कीनाशो हेलिनंदनः ॥ स्थितो वै नैर्ऋते शृंगे विरूपाक्षो महाबलः ॥ ३३ ॥ तस्मादनंतरो देवः स्थितो वै यादसां पतिः ॥ ततः स्थितो महा
तेजा वीर मित्रो महाबलः ॥ ३४ ॥ वायव्यं शृंगमाश्रित्य सर्वदेवनमस्कृतम् ॥ ततः स्थितो दशबलो नरमारुह्य भारत ॥ ३५ ॥ ब्रह्मा मध्ये

---

१ अण्डकटाहं तु—इ० पा० । २ तस्मिन्सौमनसे शृंगे—इ० पा० । ३ विधुक्षयः—इ० पा० ।

स्थितो देवो ह्यनंतश्चाध एव हि ॥ उपेंद्रशंकरौ देवौ ब्रह्मणोंते समास्थितौ ॥ ३६ ॥ एष मेरुस्तथा व्योम एष धर्मश्च पठ्यते ॥ सर्वदेव
मयश्चायं मेरुर्व्योम इति स्मृतः ॥ ३७ ॥ तथा वेदमयश्चापि पठ्यते नात्र संशयः ॥ शृंगाणि वेदाश्चत्वारः पूर्वशृंगादयो विदुः ॥ ३८ ॥ ॥
इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे व्योममाहात्म्यवर्णनं नाम षड्विंशत्युत्तरशततमोऽध्यायः ॥ १२६ ॥ ॥ छ ॥
॥ ॥ शतानीक उवाच ॥ ॥ कथमाराधितः सूर्यः सांबेनामिततेजसा ॥ विमुक्तस्तु कथं रोगैर्ब्रूहि मां द्विजसत्तम ॥ १ ॥ ॥ सुमंतुरुवाच ॥ ॥
साधु पृष्टोऽस्मि राजेंद्र शृणु सांबकथां पुरा ॥ विस्तराद्वच्मि ते सर्वां कथां पापविमोचिनीम् ॥ २ ॥ पुरा संश्रुत्य माहात्म्यं भास्करस्य
स नारदात् ॥ विनयादुपसंगम्य वचः पितरमब्रवीत् ॥ ३ ॥ कश्मलेनाभिभूतोऽस्मि मलेन व्याधिनाच्युत ॥ वैद्यैरोषधिभिश्चापि न शांति
र्मम विद्यते ॥ ४ ॥ वनं गच्छामि भगवन्ननुज्ञां दातुमर्हसि ॥ शिवेन पुंडरीकाक्ष ध्याय मां पुरुषोत्तम ॥ ५ ॥ अनुज्ञातः स कृष्णेन सिंधो
रुत्तरकूलतः ॥ गत्वा संतारयामास चंद्रभागां महानदीम् ॥ ६ ॥ ततो मित्रवनं गत्वा तीर्थं त्रैलोक्यविश्रुतम् ॥ उपवासपरः सांबः शुष्को धमनि
संततः ॥ ७ ॥ आराधनार्थं सूर्यस्य गुह्यं स्तोत्रं[1] जजाप ह ॥ वेदैश्चतुर्भिः समितं पुराणाश्रयबृंहितम् ॥ ८ ॥ यदेतन्मंडलं शुक्लं दिव्यं ह्यजरमव्ययम् ॥
युक्तं मनोजवैरश्वैर्हरितैर्ब्रह्म[2]वादिभिः ॥ ९ ॥ [3]आदिरेष हि भूतानामादित्य इति संज्ञितः ॥ त्रैलोक्यचक्षुरेवात्र परमात्मा प्रजापतिः ॥ १० ॥ एष
वै मंडले ह्यस्मिन्पुरुषो दीप्यते महान् ॥ एष विष्णुरचिंत्यात्मा ब्रह्मा चैष पितामहः ॥ ११ ॥ रुद्रो महेंद्रो वरुण आकाशं पृथिवी जलम् ॥ वायुः
शशांकः पर्जन्यो धनाध्यक्षो विभावसुः ॥ १२ ॥ यष एष मंडले ह्यस्मिन्पुरुषो दीप्यते महान् ॥ एकः साक्षान्महादेवो वृत्रमंडनिभः सदा ॥ १३ ॥
कालो ह्येष महाबाहुर्निबोधोत्पत्तिलक्षणः ॥ य एष मंडले ह्यस्मिंस्तेजोभिः पूरयन्महीम् ॥ १४ ॥ भ्राम्यते ह्यव्यवच्छिन्नो वातैर्योऽमृतलक्षणः ॥
नातः परतरं किंचित्तेजसा विद्यते क्वचित् ॥ १५ ॥ पुष्णाति सर्वभूतानि एष एव सुधामृतैः ॥ अंतस्थान्म्लेच्छजातीयांस्तिर्यग्योनिगतानपि ॥ १६ ॥
कारुण्यात्सर्वभूतानि पासि त्वं च विभावसो ॥ श्वित्रकुष्ठ्यंधबधिरान्पंगूंश्चापि तथा विभो ॥ १७ ॥ प्रपन्नवत्सलो देव कुरुते नीरुजो भवान् ॥ पुनः
मंडलमग्नांश्च निर्धनाल्पायुषस्तथा ॥ १८ ॥ प्रत्यक्षदर्शी त्वं देव समुद्धरसि लीलया ॥ का मे शक्तिः स्तवैः स्तोतुमार्तोऽहं रोगपीडितः ॥ १९ ॥
स्तूयसे त्वं सदा देवैर्ब्रह्मविष्णुशिवादिभिः ॥ महेंद्रसिद्धगंधर्वैरप्सरोभिः सगुह्यकैः ॥ २० ॥ स्तुतिभिः किं पवित्रैर्वा तव देव समीरितैः ॥ यस्य ते

---

[1] मंत्रम्--इ पा० । [2] ब्राह्मणादिभिः--इ० पा० । [3] अनादिरेष भूतानामाद्योर्कं इति संज्ञितः--इ० पा० ।

ऋग्यजुःसाम्नां त्रितयं मंडलस्थितम् ॥ २१ ॥ ध्यानिनां त्वं परं ध्यानं मोक्षद्वारं च मोक्षिणाम् ॥ अनंततेजसाक्षोभ्यो ह्यचिंत्याव्यक्तनिष्कलः
॥ २२ ॥ यदयं व्याहृतः किंचित्स्तोत्रेस्मिञ्जगतः पतिः ॥ आर्तिं भक्तिं च विज्ञाय तत्सर्वं ज्ञातुमर्हसि ॥ २३ ॥ तमुवाच ततः सूर्यः प्रीत्यै जांब
वतीसुतम् ॥ प्रीतोऽस्मि तपसा वत्स ब्रूहि तन्मां यदिच्छसि ॥ २४ ॥ ॥ सांब उवाच ॥ ॥ यदि प्रसन्नो भगवानेष एव वरो मम ॥ भक्ति
र्भवतु मेऽत्यर्थं त्वयि देव सनातन ॥ २५ ॥ ॥ श्रीसूर्य उवाच ॥ ॥ भूयस्तुष्टोऽस्मि भद्रं ते वरं वरय सुव्रत ॥ स द्वितीयं वरं वव्रे तदैव वरदं
विभुम् ॥ २६ ॥ मलः शरीरसंस्थो मे त्वत्प्रसादात्प्रणश्यतु ॥ येन मे शुद्धमखिलं वपुर्भवतु गोपते ॥ २७ ॥ ॥ सुमंतुरुवाच ॥ ॥ स तथा
स्त्विति तेनोक्तो भास्करेण महात्मना ॥ तां मुमोच रुजं सांबो देहात्त्वचमिवोरगः ॥२८॥ ततो रूपेण दिव्येन रूपवानभवत्पुनः॥ प्रणम्य शिरसा
देवं पुरतोऽवस्थितोऽभवत् ॥ २९ ॥ ॥ श्रीसूर्य उवाच ॥ ॥ भूयश्च शृणु मे सांब तुष्टोहं यद्ब्रवीमि ते ॥ अद्य प्रभृति त्वन्नाम्ना मम स्थानानि सुव्रत॥
क्षितौ ये स्थापयिष्यंति तेषां लोकाः सनातनाः ॥ ३० ॥ स्थापयस्वैव मामस्मिंश्चंद्रभागातटे शुभे ॥ तव नाम्ना च सांबेदं परां ख्यातिं गमिष्यति
॥ ३१ ॥ कीर्तिस्तवाक्षया लोके ख्यातिं यास्यति सुव्रत ॥ भूयश्च ते प्रदास्यामि प्रत्यहं स्वप्नदर्शनम् ॥ ३२ ॥ ॥ सुमंतुरुवाच ॥ ॥ एवं
दत्त्वा वरं तस्मै वृष्णिसिंहाय चापरम् ॥ प्रत्यक्षदर्शनं दत्त्वा तत्रैवांतरधाद्धरिः ॥ ३३ ॥ य इदं पठते स्तोत्रं त्रिकालं भक्तिमान्नरः ॥ त्रिसप्तश
तमावर्त्य होमं वा सप्तरात्रकम् ॥ ३४ ॥ राज्यकामो लभेद्राज्यं धनकामो लभेद्धनम् ॥ रोगार्तो मुच्यते रोगाद्यथा सांबस्तथैव सः ॥ ३५ ॥ सूर्य
लोकं व्रजेच्चापि भक्त्यापूज्य दिवाकरम् ॥ रमते च तथा तस्मिन्देवैश्च परिवारितः ॥ ३६ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि
सप्तमीकल्पे सांबोपाख्याने सूर्यप्रसादवर्णनं नाम सप्तविंशत्युत्तरशततमोऽध्यायः ॥ १२७ ॥छ॥ ॥ सुमंतुरुवाच ॥ ॥ अस्तावीच्च ततः सांबः
कृशो धमनिसंततः ॥ राजन्नामसहस्रेण सहस्रांशुं दिवाकरम् ॥ १ ॥ खिद्यमानं ततो दृष्ट्वा सूर्यः कृष्णात्मजं तदा ॥ स्वप्नेस्मै दर्शनं दत्त्वा
पुनर्वचनमब्रवीत् ॥ २ ॥ ॥ श्रीसूर्य उवाच ॥ ॥ सांबसांब महाबाहो शृणु जांबवतीसुत ॥ अलं नामसहस्रेण पठ चेमं शुभं स्तवम् ॥ ३ ॥ यानि
गुह्यानि नामानि पवित्राणि शुभानि च ॥ तानि ते कीर्तयिष्यामि प्रयत्नादवधारय ॥ ४ ॥ वैकर्तनो विवस्वांश्च मार्तंडो भास्करो रविः ॥ लोकप्रका
शकः श्रीमाँल्लोकचक्षुर्ग्रहेश्वरः ॥ ५ ॥ लोकसाक्षी त्रिलोकेशः कर्ता हर्ता तमिस्रहा ॥ तपनस्तापनश्चैव शुचिः सप्ताश्ववाहनः ॥ ६ ॥ गभस्तिहस्तो
ब्रह्मा च सर्वदेवनमस्कृतः ॥ एकविंशतिरित्येष स्तव इष्टस्सदा मम ॥ ७ ॥ शरीरारोग्यदश्चैव धनवृद्धियशस्करः ॥ स्तवराज इति ख्यातस्त्रिषु

लोकेषु विश्रुतः ॥ ८ ॥ य एतेन महाबाहो द्वे संध्येऽस्तमनोदये ॥ स्तौति मां प्रणतो भूत्वा सर्वपापैः प्रमुच्यते ॥ ९ ॥ मानसं वाचिकं वापि
कायिकं यच्च दुष्कृतम् ॥ एकजाप्येन तत्सर्वं प्रणश्यति ममाग्रतः ॥ १० ॥ एष जप्यश्च होमश्च संध्योपासनमेव च ॥ बलिमंत्रोऽर्घ्यमंत्रोथ धूपमं
त्रस्तथैव च ॥ ११ ॥ अन्नप्रदाने स्नाने च प्रणिपाते प्रदक्षिणे ॥ पूजितोऽयं महामंत्रः सर्वपापहरः शुभः ॥ १२ ॥ एवमुक्त्वा स भगवान्भा
स्करो जगतां पतिः ॥ आमंत्र्य कृष्णतनयं तत्रैवांतर्हितोऽभवत् ॥ १३ ॥ सांबोपि स्तवराजेन स्तुत्वा सप्ताश्ववाहनम् ॥ प्रीतात्मा नीरुजः श्रीमांस्त
स्माद्रोगाद्विमुक्तवान् ॥ १४ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सांबस्तववर्णनं नामाष्टाविंशत्युत्तरशततमोऽध्यायः ॥
॥ १२८ ॥ ॥ सुमंतुरुवाच ॥ ॥ अथ लब्धवरः सांबो वरं प्राप्य पुरातनम् ॥ मन्यमानस्तदाश्चर्यं प्रहृष्टेनांतरात्मना ॥ १ ॥ पूर्वाभ्यासेन
तेनैव सार्धमन्यैस्तपस्विभिः ॥ स्नापनार्थं नातिदूरं चंद्रभागां नदीं ययौ ॥ २ ॥ कृत्वात्ममंडलाकारं श्रद्दधानो दिनेदिने ॥ सस्नौ संचिंतया
मास किं रूपं स्थापयाम्यहम् ॥ ३ ॥ स स्नातः सहसैवाथ प्रणम्य तु प्रभावतीम् ॥ उह्यमानां जलौघेन प्रतिमां संमुखीं रवेः ॥ ४ ॥ तां दृष्ट्वा
तस्य वीरस्य समुत्पन्नमिदं यथा ॥ देवेन यत्तदाज्ञप्तं तदिदं नात्र संशयः ॥ ५ ॥ स तामुत्तार्य सलिलादानीय च महीपते ॥ तस्मिन्मित्रवनोद्देशे
स्थापयामास तां तदा ॥ ६ ॥ निधाय प्रतिमाँल्लोके सांबस्तस्य महात्मनः ॥ मित्रं मित्रवने रम्ये स्थापयित्वा विधानतः ॥ ७ ॥ ततस्तामेव पप्र
च्छ प्रणम्य प्रतिमां रवेः ॥ केनेयं निर्मिता नाथ भवतो ह्याकृतिः शुभा ॥ ८ ॥ प्रतिमा तमुवाचाथ शृणु सांब ब्रुवे स्वयम् ॥ निर्मिता येन
चाप्येषा मदीया पुरुषाकृतिः ॥ ९ ॥ ममातितेजसाविष्टं रूपमासीत्पुरातनम् ॥ असह्यं सर्वभूतानां ततोऽस्म्यभ्यर्चितः सुरैः ॥ सह्यं भवतु ते रूपं
सर्वप्राणभृतामिति ॥ १० ॥ ततो मया समादिष्टो विश्वकर्मा महातपाः ॥ तेजसां शातनं कुर्वन्रूपं निर्वर्तयस्व मे ॥ ११ ॥ ततस्तु मत्समादेशात्ते
नैव निपुणं तदा ॥ शाकद्वीपे भ्रमिं कृत्वा रूपं निर्वर्तितं मम ॥ १२ ॥ प्रीत्या तेषां प्रपंचोऽयं स मया कारितः पुनः ॥ तेनेयं कल्पवृक्षात्तु निर्मि
ता विश्वकर्मणा ॥ १३ ॥ कृत्वा हिमवतः पृष्ठे पुरा सिद्धनिषेविते ॥ त्वदर्थं चंद्रभागायां ततस्तेनावतारिता ॥१४॥ भवतस्तारणार्थं हि ततः स्था
नमिदं शुभम् ॥ रुचिरं सर्वदा सांब सान्निध्यं मेत्र यास्यति ॥ १५ ॥ सान्निध्यं मम पूर्वाह्णे सुतीरे द्रक्ष्यते जनैः ॥ कालप्रिये च मध्याह्नेऽपराह्णे
चात्र नित्यशः ॥ १६ ॥ पूर्वाह्णे पूजयेद्ब्रह्मा मध्याह्ने चक्रधृत्स्वयम् ॥ शंकरश्चापराह्णे तु मां पूजयति सर्वदा ॥ १७ ॥ इत्युक्तोसौ भगवता भास्क

---

१ प्रापश्यत—इ० पा० ।

रेण स यादवः ॥ हर्षमाप महाबाहो भास्करोंतर्दधे ततः ॥ १८ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सांबोपाख्याने साम्बकृतादित्यमूर्तिस्थापनं नामैकोनत्रिंशदुत्तरशततमोऽध्यायः ॥ १२९ ॥ ॥ शतातीक उवाच ॥ ॥ कथं सांबेन विप्रेंद्र प्रतिष्ठा कारिता रवेः ॥ कस्य वा वचनात्तेन प्रासादः कारितो रवेः ॥ १ ॥ ॥ सुमंतुरुवाच ॥ ॥ अत्र ते वच्मि राजेंद्र यथा सांबेन धीमता ॥ प्रतिष्ठा कारिता भानोः प्रासादश्च महीपते ॥ २ ॥ सुलब्ध्वा प्रतिमां भानोश्चिंतयामास नारदम् ॥ स चापि चिंतितश्चागाद्यत्र जांबवतीसुतः ॥ ३ ॥ तमागतमभिप्रेक्ष्य नारदं मुनिसत्तमम् ॥ संपूज्य विधिवत्सांबो नारदं वाक्यमब्रवीत् ॥ ४ ॥ प्रासादं कारयेद्यस्तु भास्करस्य नरो द्विज ॥ किं फलं तस्य देवर्षे प्रतिष्ठां यश्च कारयेत् ॥ ५ ॥ ॥ नारद उवाच ॥ ॥ प्रासादं शोभने देशे यस्तु कारयते रवेः ॥ स याति नरशार्दूल सूर्यलोकं न संशयः ॥ ६ ॥ ॥ सांब उवाच ॥ ॥ कथं कुर्यादायतनं कस्मिन्देशे द्विजोत्तम ॥ कीदृक्कच्छस्तं चायतनं [1]देवंदेवस्य वै द्विज ॥ ७ ॥ ॥ ॥ नारद उवाच ॥ ॥ यत्र प्रभूतं सलिलमागमे च विनाशने ॥ देवतायतनं कुर्याद्यशोधर्मविवृद्धये ॥८॥ इष्टापूर्तेन लभते [2]लोकांस्तांश्च विभूषितान् ॥ देवानामालयं कार्यं द्वयं यत्र च दृश्यते ॥ ९ ॥ सलिलाद्यं च आरामः कृतेष्वायतनेषु च ॥ स्थानेष्वेतेषु सान्निध्यमुपगच्छंति देवताः ॥ ॥ १० ॥ सरःसु नलिनीच्छन्ननिरस्तरविरश्मिषु ॥ हंससंक्षिप्तकह्लारवीथीविमलवारिषु ॥ ११ ॥ हंसकारंडवक्रौंचचक्रवाकविराविषु ॥ पर्यन्तविमलच्छायाविश्रांतजनचारिषु ॥ १२ ॥ क्रौंचकांचीसुलापाश्च कलहंसकलस्वनाः ॥ नद्यस्तोयांशुका यत्र शफरीकृतमेखलाः ॥ १३ ॥ फुल्लद्रुमोत्तमावासाः संगमश्रोणिमंडलाः ॥ पुलिनाद्युन्नतोरस्का रसहासाश्च निम्नगाः ॥ १४ ॥ वनोपांतनदीशैलसंस्कारोपान्तभूमिषु ॥ रमते देवता नित्यं पुरेषूद्यानवत्सु च ॥ १५ ॥ भूमयो ब्राह्मणादीनां याः प्रोक्ता वास्तुकर्मणि ॥ ता एव तेषां शस्यंते देवतायतनेष्वपि ॥ १६ ॥ चतुःषष्टिपदं कुर्याद्देवतायतनं सदा ॥ द्वारं च मध्यमं तमिन्समदिक्संप्रशस्यते ॥ १७ ॥ यो विस्तारो भवेत्तस्य द्विगुणा तत्समुन्नतिः ॥ उच्छ्रायस्तु तृतीयोथ तेन तुल्या कटिर्भवेत् ॥ १८ ॥ विस्तारार्धो भवेद्गर्भो भिन्नयोन्याः समंततः ॥ गर्भपादोनविस्तीर्णं द्वारं द्विगुणमुच्छ्रितम् ॥ १९ ॥ उच्छ्रयात्पादविस्तीर्णा शाखा तद्वदुदुंबरी ॥ विस्तरात्पादप्रतिमाद्बाहुल्यं शेषयोः स्मृतम् ॥ २० ॥ नृपंचसप्तनवभिः शाखाभिस्तत्प्रशस्यते ॥ अथ शाखाचतुर्भागे प्रतिहारौ निवेशयेत् ॥ २१ ॥ शैलमंगल्यविहगः श्रीवृक्षः स्वस्तिकैर्घटैः ॥ [3]मानाष्टमेन भागेन प्रतिमा स्यात्स

---

१ कस्मिन्देशे द्विजोत्तमः–इ० पा० । २ लोकांस्तांस्तान्स्वभक्तितः–इ० पा० । ३ मिथुनैर्द्वारसारब्धे भागेन स्यात्सुपिण्डिका–इ० पा० ।

पिंडिका ॥ २२ ॥ द्विभागा प्रतिमा तत्र तृतीयो भागपिंडिका ॥ पूर्वे मेरुर्महाबाहो कैलासश्च तथापरे ॥ २३ ॥ भवंति चापरे वीर विमानच्छ
दनं तथा ॥ समुद्रपद्मगरुडनंदिवर्द्धनकुञ्जराः ॥२४॥ गृहराजो वृषो हंसः सर्वतोभद्रको घटः ॥ सिंहो वृषश्चतुष्कोणः षोडशाष्टाश्रयस्तथा ॥२५॥
इत्येते विंशतिः प्रोक्ताः प्रासादा यदुनंदन ॥ यथोक्तानुक्रमेणैव लक्षणानि [1]वदामि ते ॥ २६ ॥ नवत्रिंशदुच्छ्रितमेरुर्द्वादशभौमो विविधकुहरश्च ॥
द्वारैर्युतश्चतुर्भिर्द्वात्रिंशद्धस्तविस्तीर्णः ॥२७॥ त्रिंशद्धस्तायामो दशभौमः सप्त मंदरः ॥ शिखरयुतः कैलासोऽपि शिखरवानष्टाविंशोष्टभौमश्च ॥२८॥
जालगवाक्षैर्युक्तो विमानसंज्ञस्त्रिसप्तकायामः ॥ नन्दन इति वै भौमो द्वात्रिंशत्षोडशांगयुतः ॥२९॥ वृत्तः समुद्रनामा पद्माकृतिरयं चाष्टौ ॥ शृंगेणै
केन भवेदेकेन च भूमिका तस्य ॥ ३० ॥ गरुडाकृतिश्च गरुडो नंदी वै षष्टिविस्तीर्णः ॥ कायश्च सप्तभौमो विभूषितोंऽगैश्च सप्तविंशतिभिः॥ ३१॥
कुंजर इति गजपृष्ठः षोडशहस्तोच्छ्रितो मध्ये ॥ गृहराजः षोडशकस्त्रिचक्रशाला भवेद्वलभी ॥ ३२ ॥ वृष एव भूमिश्शृंगो द्वादशहस्तः समुन्नतो
वृत्तः ॥ हंसो हंसाकारो घटोऽष्टसहस्रकलशरूपः ॥ ३३ ॥ द्वारैर्युतश्चतुर्भिर्बहुशिखरो भवति सर्वतोभद्रः ॥ बहुरुचिरचन्द्रशालः षड्विंशद्भागभू
मिश्च ॥ ३४ ॥ सिंहः [2]सिंहाकारो द्वादशकोणोऽष्टहस्तश्च ॥ ३५ ॥ सहस्रत्रितयं चैव कथितं विश्वकर्मणा ॥ प्राहुः स्थापयतश्चात्र मतमेकं विप
श्चितः ॥ ३६ ॥ कपोतपालिनीयुक्तमतो गच्छति तुल्यताम् ॥ ३७ ॥ ॥ सांब उवाच ॥ ॥ य एते कथिता विप्र प्रासादा विंशतिस्त्वया ॥
तेषां सूर्यस्य कः कार्यः प्रासादो भास्करस्य तु ॥ ३८ ॥ स्थानानि यानि चोक्तानि प्रासादस्य द्विजोत्तम ॥ तेषां त्वयोक्तं हि पुरं
व्ययवद्भिर्नरैर्युतम् ॥ ३९ ॥ तस्मिन्प्रदेशे वै कार्यं भानोर्मंदिरमुत्तमम् ॥ दिशां भागे च कतमे ब्रूहि शेषं द्विजोत्तम ॥ ४० ॥ ॥ नारद उवाच ॥
पुरमध्यं समाश्रित्य कुर्यादायतनं रवेः ॥ दिशां भागेऽथ वा पूर्वे पूर्वद्वारसमीपतः ॥ ४१ ॥ भूमिं परीक्ष्य पूर्वं तु कुर्यादायतनं [3]ततः ॥
इष्टगंधरसोपेता [4]निम्ना भूमिः प्रशस्यते ॥ ४२ ॥ शर्करातुषकेशास्थिक्षारांगारविवर्जिता ॥ मेघदुंदुभिनिर्घोषा सर्वबीजप्ररोहिणी ॥ ४३ ॥
शुक्ला रक्ता तथा पीता कृष्णा च कथिता क्षितिः ॥ द्विजराजन्यवैश्यानां शूद्राणां च यथाक्रमम् ॥ ४४ ॥ परीक्षितायां तस्यां तु मध्ये
तस्याः प्रमाणतः ॥ उपलिप्य चतुर्हस्तं [5]चतुरस्रं समंततः ॥ ४५ ॥ हस्तमात्रमधः कृत्वा मध्ये तस्या दशांगुलम् ॥ गर्तमुत्कीर्य तेनैव
पांसुना [6]प्रतिपूरयेत् ॥ ४६ ॥ समे समगुणा ज्ञेया हीने हीनगुणा भवेत् ॥ वर्धमाने तु वै पांसौ भवेद्वृद्धिकरी क्षितिः ॥ ४७ ॥ नित्यं संमु

---

[1] निबोध मे—इ० पा० । [2] सिंहाक्रान्तः—इ० पा० । [3] महत्—इ० पा० । [4] त्रिधा—इ० पा० । [5] हस्तमात्रम्—इ० पा० । [6] परिपूरयेत्—इ० पा० ।

खमर्कस्य कदाचित्पश्चिमामुखम् ॥ स्थापनीयं गृहं सम्यक्प्राङ्मुखस्थानकल्पनात् ॥ ४८ ॥ भवनाद्दक्षिणे पार्श्वे रवेः स्नानगृहं भवेत् ॥ अग्निहोत्रगृहं कार्यं रवेरुत्तरतः [1]शुभम् ॥ उदङ्मुखं भवेच्छंभोर्मातॄणां गृहमेव च ॥ ४९ ॥ ब्रह्मा पश्चिमतः स्थाप्यो विष्णुरुत्तरतस्तथा ॥ [2]निंबस्तु दक्षिणे पार्श्वे वामे राज्ञी प्रकीर्तिता ॥ ५० ॥ पिंगलो पक्षिणे [3]भानोर्वामतो दंडनायकः ॥ श्रीमहाश्वेतयोः स्थानं पुरतस्त्वंशुमालिनः ॥ ५१ ॥ ततः स्थाप्याश्विनोः स्थानं पूर्वदेवगृहाद्बहिः ॥ द्वितीयायां तु कक्षायां राज्ञास्त्रौषौव्यवस्थितौ ॥ ५२ ॥ तृतीयायां तु कक्षायां स्थितौ कल्माषपक्षिणौ ॥ [4]जंडकामचरौ स्थाप्यौ दक्षिणां दिशमाश्रितौ ॥५३॥ उदीच्यां स्थापनीयस्तु कुबेरो लोकपूजितः ॥ उत्तरेण ततस्तस्य रेवतः सविनायकः॥५४॥ यत्र वा विद्यते स्थानं दिक्षु सर्वा गुहादयः ॥ द्वे मण्डलेऽर्घ्यदानार्थं कार्ये सव्यापसव्यतः ॥ ५५ ॥ दद्यादुदयवेलायाम[5]र्घ्यं सूर्याय दक्षिणे ॥ उत्तरे मण्डले दद्यादर्घ्यमस्तमने रवेः ॥ ५६ ॥ चक्राकृतां तथान्यस्मिन्देवस्य प्रतिमां रवेः ॥ स्थापयेद्विधिवद्वीर चतुर्भिः कलशैः शुभैः ॥५७॥ नानातूर्यनिनादैश्च [6]शंखशब्दैश्च पुष्कलैः ॥ तृतीये मंडले [7]ह्येवं पूजनीयो दिवाकरः ॥ ५८ ॥ चतुरस्रं चतुःशृंगं व्योम देवगृहाग्रतः ॥ प्रतिमायास्तु सूत्रेण कार्यं मध्येऽस्य मंडलम् ॥ ५९ ॥ दिंडी स्थाप्यः पुरस्तस्मादादित्याभिमुखः स्थितः ॥ यदेतत्कथितं व्योम सर्वदेवमयं मया॥६०॥मध्याह्ने तस्य दातव्यमर्घ्यमत्र यदूत्तम ॥ अथ वा मंडलं चान्यत्तृतीयं [8]चक्रसंमितम् ॥६१॥ स्थापयित्वा तु देवेशं दातव्योऽर्घः सुपण्डितैः ॥ देवस्य पुरतः कार्यं व्योमस्थानं समीपतः ॥ पुस्तकवाचनस्थानमथ वा यत्र रोचते ॥६२॥ एष स्थानविधिः प्रोक्तो देवतानां यथाक्रमम् ॥ गृहराज्ञोथ रुद्रस्तु द्वावेतौ भास्करप्रियौ ॥६३॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सांबोपाख्याने प्रासादलक्षणवर्णनं नाम त्रिंशदुत्तरशततमोऽध्यायः ॥१३०॥ ॥छ॥ ॥ नारद उवाच ॥ ॥ अथ ते संप्रवक्ष्यामि प्रतिमाविधिविस्तरम् ॥ सर्वेषामेव देवानामादित्यस्य विशेषतः ॥१॥ [9]अर्चा सप्तविधा प्रोक्ता भक्तानां शुभवृद्धये ॥ कांचनी राजती ताम्री पार्थिवी शैलजा स्मृता ॥ २ ॥ वार्क्षी चालेख्यका चेति मूर्तिस्थानानि सप्त वै ॥ वार्क्षीविधानं ते वीर वर्णयिष्याम्यशेषतः ॥ ३ ॥ कर्त्रनुकूले दिवसे संवत्सरविशोधिते ॥ शुभैर्निमित्तैः शकुनैः प्रस्थानैश्च वनं विशेत् ॥ ४ ॥ क्षीरिणो वर्जिताः सर्वे दुर्बलास्ते स्वभावतः ॥ चतुष्पथेषु न ग्राह्या ये च [10]पुत्रकवृक्षकाः ॥ ५ ॥ देवतायतनस्था ये तथा

---

[1] तथा—इ० पा० । [2] निम्बं श्रीपर्णवृक्षश्च वामे राज्ञो प्रवर्तिता—इ० पा० । [3] पार्श्वे—इ० पा० । [4] जानुकामाचरौ—इ० पा० । [5] सह—इ० पा० । [6] गीतशब्दैः—इ० पा० । [7] अत्र—इ० पा० । [8] चक्रसंज्ञितम्—इ० पा० । [9] प्रतिमा सप्तधा प्रोक्ता—इ० पा० । [10] पुत्रकवृक्षकाः—नवविरूढाः—बालवृक्षा इत्यर्थः ।

वल्मीकसंभवाः ॥ उत्कीर्णा देवता येषु चैत्यवृक्षाश्च ये स्मृताः ॥ ६ ॥ श्मशानभूमिजा ये च पक्षिणां निलयाश्च ये ॥ सकोटराश्च ये वृक्षाः शुष्काग्रा ये[1] च पादपाः ॥ ७ ॥ शस्त्रेण निहता ये च कुञ्जराशास्तथा कृताः ॥ सामाद्याः सरुजोऽधश्च व्याधिनश्च तथैव च ॥ ८ ॥ अकाले पुष्पिता ये च काले ते च विवर्जिताः ॥ शीर्णपर्णाश्च तरवो रक्षोध्वांक्षनिषेविताः ॥ एकशाखातिशाखाश्च त्रिशाखाश्च तथाधमाः ॥ ९ ॥ मधूको देवदारुश्च वृक्षराजश्च चन्दनः ॥ बिल्वश्चाम्रातकश्चैव खदिरोथाञ्जनस्तथा ॥ १० ॥ निम्बः श्रीपर्णवृक्षश्च पनसः सरलोर्ज्जुनः ॥ रक्तचन्दनपर्यन्ताः श्रेष्ठाः स्युः प्रतिमाद्रुमाः ॥ ११ ॥ वर्णानामानुपूर्व्येण द्वौ द्वौ वृक्षौ प्रकीर्तितौ ॥ निंबाद्याः सर्ववर्णानां वृक्षाः साधारणाः स्मृताः ॥ १२ ॥ कथ्यमानान्विशेषेण शृणु वीर तथापरान् ॥ सुरदारुः शमी चैव मधूकश्चन्दनस्तथा ॥ एते वै तरवस्तात ब्राह्मणानां शुभाः स्मृताः ॥ १३ ॥ क्षत्रस्य च तथारिष्टः खदिरस्तिंदुकस्तथा ॥ अश्वत्थश्च तथा सांब द्रुमः करकतः शुभः ॥ १४ ॥ वैश्यानां तद्वदेव स्युः खदिरश्चंदनस्तथा ॥ पुण्याश्च तरवश्चैते शुभदास्तु तथैव च ॥ १५ ॥ केसरः सर्जकश्चाम्रः शालवृक्षस्तथेतरः ॥ एते वै तरवः पुण्याः शूद्राणां शुभदायकाः ॥ १६ ॥ लिङ्गं च प्रतिमां चैवमवस्थाप्य यथाविधि ॥ वृक्षं चाभिमतं गत्वा पूजयेद्बलिपुष्पकैः ॥ १७ ॥ शुचौ देशे विविक्ते च केशांगारविवर्जिते ॥ प्रागुदक्सूचके देशे लोककष्टविवर्जिते ॥ १८ ॥ विस्तीर्णस्कन्धविटपः पत्रवानृजुवृद्धिगः ॥ आतंकहीनोविवशः सत्त्वक्पर्णः शुभस्तथा ॥ १९ ॥ स्वेनैव पतिता ये च हस्तिभिः पातितास्तथा ॥ शुष्काश्च वह्निदग्धाश्च पक्षिभिश्चापि वर्जिताः ॥ २० ॥ तरवो वर्जनीयाश्च ग्रहीतव्याः शुभा द्रुमाः ॥ स्निग्धरूपाः सपर्णाश्च सपुष्पाः सफलास्तथा ॥ २१ ॥ तेषां तु ग्रहणं चाष्टमासेषु कार्त्तिकादिषु ॥ भूत्वा शुभदिने चैव सोपवासोधिवासयेत् ॥ २२ ॥ समन्तादुपलिप्याथ तस्याधस्ताद्वसुन्धराम् ॥ गायत्र्या परिपूतेन परितः प्रोक्ष्य वारिणा ॥ २३ ॥ शुक्ले च परिधूते च परिधाय चं वाससी ॥ पूजयेद्गन्धमाल्यैश्च सधूपबलिकर्मभिः ॥ २४ ॥ ततः कुशैः परिस्तीर्णे हुत्वाग्नौ तस्य चांतिके ॥ देवदारुसमिद्भिश्च मन्त्रेणानेन तत्त्ववित् ॥ २५ ॥ ॐ भूर्भुवः सुवरिति ततो वृक्षं च पूजयेत् ॥ ॐ प्रजापतये सत्यसदाय नित्यं श्रेष्ठांतरात्मन्तसचराचरात्मन् ॥ सान्निध्यमस्मिन्कुरु देव वृक्षे सूर्यावृतं मण्डलमाविशेश्च नमः ॥ २६ ॥ ॥ नारद उवाच ॥ ॥ एवं संपूजयित्वा तु वाक्यैस्तं परिसांत्वयन् ॥ वृक्षलोकस्य शांत्यर्थं गच्छ देवालयं शुभम् ॥ २७ ॥ देव त्वं स्थास्यसे तत्र च्छेददाहविवर्जितः ॥ काले धूपप्रदानेन सपुष्पैर्बलिकर्म

---

१ चापरिभुक्ते च–इ० पा० ।

भिः ॥ २८ ॥ लोकास्त्वां पूजयिष्यंति ततो यास्यसि निर्वृतिम् ॥ वृक्षमूले कुठारं तु धूपमाल्यैः प्रपूज्य च ॥ २९ ॥ पूर्वतस्तु शिरः कृत्वा स्थापनीयः प्रयत्नतः ॥ परमान्नमोदकौदनपलपूपिकादिभिर्भक्ष्यैः ॥ ३० ॥ मद्यैः कुसुमैर्धूपैर्गन्धैश्च तरुं समभ्यर्च्य ॥ सुरपितृपिशाचराक्षसभुजङ्गसुरगणविनायकाद्यानाम् ॥ ३१ ॥ कृत्वा पूजां रात्रौ वृक्षं संस्पृश्य च ब्रूयात् ॥ ३२ ॥ अर्चासु देवदेव त्वं देवैश्च परिकल्पितः ॥ नमस्ते वृक्ष पूजेयं विधिवत्परिगृह्यताम् ॥३३॥ यानीह भूतानि वसंति तानि बलिं गृहीत्वा विधिवत्प्रयुक्तम् ॥ अन्यत्र वासं परिकल्पयंतु क्षमन्तु ते चाद्य नमोऽस्तु तेभ्यः ॥ ३४ ॥ प्रभातायां तु शर्वर्यां पुनः संपूज्य तं नगम् ॥ ब्राह्मणेभ्यस्ततो दत्त्वा भोजकेभ्यश्च दक्षिणाम् ॥ छिन्द्याद्वनस्पतींस्तज्ज्ञैस्तैः कृतस्वस्तिवाचनैः ॥ ३५ ॥ पूर्वस्यां दिशि पातोऽस्य ऐशान्यां चापि यो भवेत् ॥ अथ वा उत्तरस्यां तु तथा छिन्द्यांत्तु नान्यथा ॥ ३६ ॥ ऐन्द्र्यैशान्योरुदीच्यां च पातस्तिसृषु शस्यते ॥ नैर्ऋत्याग्नेययाम्यासु दिक्षु पातो न शोभनः ॥ वायव्यां चैव वारुण्यां तस्य पातस्तु मध्यमः ॥ ३७ ॥ यस्य बाह्यस्थिता शाखा दिक्षु नष्टा चतसृषु ॥ वास्तुपूर्वं ततः स्थित्वा ततः पश्चादवस्थिता ॥ ३८ ॥ अविलग्नमशब्दं तु पतनं तु प्रशस्यते ॥ उत्पद्येद्विदलं यस्य द्रावश्च मधुरो भवेत् ॥ ३९ ॥ सर्पिस्तैलं क्षरेद्यस्य पादपं तं विवर्जयेत् ॥ शुभदं यदुशार्दूल शृणु त्वं कथये शुचि ॥ ४० ॥ वृक्षं प्रभाते सलिलैर्निषिक्तं पूर्वोत्तरस्यां दिशि संनिकृत्य ॥ मध्वाज्यदिग्धेन कुठारकेण प्रदक्षिणं शोषमभिप्रहण्यात् ॥ ४१ ॥ पूर्वोत्तरेऽप्युत्तरदिग्विभागे पातो यदा वृद्धिकरस्तदा स्यात् ॥ आग्नेयकोणक्रमशोग्निदाह उग्रोग्ररोगाः सुधनक्षयश्च ॥४२॥ गारुडे दिशि पाषाणं कपोतो गृहगोधिका ॥ सितवर्णं जलं ज्ञेयमंगुष्ठाभं भवेत्कृमिः ॥ दोषैरेतैर्विनिर्मुक्तं मुदा कालं समुद्धरेत् ॥ ४३ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे दारुपरीक्षावर्णनं नामैकत्रिंशदुत्तरशततमोऽध्यायः ॥ १३१ ॥

नारद उवाच ॥ हंत ते सर्वदेवानां प्रतिमालक्षणं परम् ॥ वच्मि ते यदुशार्दूल आदित्यस्य विशेषतः ॥ १ ॥ एकहस्ता द्विहस्ता वा त्रिहस्ता वा प्रमाणतः ॥ तथा सार्द्धत्रिहस्ता च सवितुः प्रतिमा शुभा ॥ २ ॥ प्रासादाद्द्वारतो वापि प्रमाणं च प्रकल्पितम् ॥ तद्वत्प्रमाणं कर्तव्यं सततं शुभमिच्छता ॥ ३ ॥ एकहस्ता भवेत्सौम्या द्विहस्ता धनधान्यदा ॥ त्रिहस्ता प्रतिमा भानोः सर्वकामप्रदा स्मृता ॥ ४ ॥ सार्धत्रिहस्ता प्रतिमा सुभिक्षक्षेमकारिणी ॥ अग्रे मध्ये च मूले च प्रतिमा सर्वतः समा ॥ गांधर्वी सा तु विज्ञेया धनधान्यावहा स्मृता ॥ ५ ॥ देवागारस्य यद्द्वारं तस्मादष्टांशमुद्यता ॥ त्रिभागैः पिंडिका कार्या द्वौ

---

१ तुंगं यथा तथा--इ० पा० ।

भागौ प्रतिमा भवेत् ॥ ६ ॥ अंगुलैश्च तथा मूर्तिश्चतुरशीतिसंमितैः ॥ विस्तारायामतः कार्या वदनं द्वादशांगुलम् ॥ ७ ॥ मुखात्त्रिभागैश्चिबुकं ललाटं नासिका तथा ॥ कर्णौ नासिकया तुल्यौ पादौ चानियतौ तयोः ॥ ८ ॥ नयने द्व्यंगुले स्यातां त्रिभागा तारका भवेत् ॥ तृतीयतारकाभागात्कुर्याद्दृष्टिं विचक्षणः ॥ ९ ॥ ललाटमस्तकोत्सेधं कुर्यात्तत्सममेव च ॥ परिणाहस्तु शिरसो भवेद्द्वाविंशदंगुलः ॥ १० ॥ तुल्या नासिकया ग्रीवा मुखेन हृदयांतरम् ॥ मुखमात्रा भवेन्नाभिस्ततो मेढ्रमनन्तरम् ॥ मुखविस्तारणमुरस्ततोऽर्द्धं तु कटिः स्मृता ॥ ११ ॥ बाहू प्रवाहतुल्यौ तु ऊरू जंघे च तत्समे ॥ गुल्फाधस्तात्तु पादः स्यादुच्छ्रितश्चतुरंगुलः ॥ १२ ॥ षडंगुलसुविस्तारस्तस्यांगुष्ठांगुलत्रयम् ॥ प्रदेशिनी च तत्तुल्या हीना शेषा नखैर्युताः ॥१३॥ चतुर्दशांगुलः पाद आयामात्परिकीर्तितः ॥ एवंलक्षणसंयुक्ता प्रतिमार्च्या भवेत्सदा ॥१४॥ अंसौ हरेस्तथैवोरू ललाटं च सनासिकम् ॥ नियते नयने गंडौ मूर्तेः कुर्यात्समुन्नते ॥ १५ ॥ विशालधवलावामपक्ष्मलायतलोचने ॥ सस्मिताननपद्मस्य चारुबिंबाधरस्तथा ॥ १६ ॥ रत्नप्रोद्भासिमुकुटकटकांगदहारवान् ॥ अव्यंगपदमध्यादिसमायोगोऽपि शोभितः ॥१७॥ सुप्रभो मंडलश्चारुर्विचित्रमणिकुंडलः ॥ कराभ्यां कांचनीं मालां प्रोद्वहन्ससरोरुहाम् ॥ १८ ॥ एवं लक्षणसंयुक्तां कारयेदीहितप्रदाम् ॥ प्रजाभ्यश्च सदा भानुः शिवारोग्याभयप्रदः ॥ १९ ॥ अल्पांगायां नृपभयं हीनांगायामकल्पता ॥ खातोदर्यां च क्षुत्पीडा कृशायां तु दरिद्रता ॥ २० ॥ सक्षतायां भयं शस्त्रात्स्फुटिता मृत्युकारिणी ॥ दक्षिणावनतायां तु शश्वदायुःक्षयो भवेत् ॥ २१ ॥ उत्तरावनतायां तु वियोगो भवति ध्रुवम् ॥ नालोक्या नाप्यनालोक्या रक्ष्या मूर्तिः प्रशस्यते ॥ २२ ॥ तस्माद्भास्करभक्तेन लोकद्वयहितैषिणा ॥ तन्मूर्तेश्चादरः कार्यस्तदधीनास्तु संपदः ॥ २३ ॥ शिरोरुगंडवदनैः सर्वांगावयवैस्तथा ॥ एवंलक्षणसंपूर्णा प्रतिमा भवते शुभा ॥२४॥ नासाललाटजंघोरुदंडवक्षोभिरन्विता ॥ कुर्यादादित्यवेषं तु गूढपादोदरं तथा ॥ २५ ॥ कमलोदरकांतिनिभः कंचुकगुप्तः प्रसन्नमुखः ॥ रक्तोत्पलप्रभामंडलश्च कर्तुः शुभं करोत्यर्कः ॥२६॥ कुंडलभूषितवदनः प्रलंबहारोऽपि गृहवृत्तः ॥ नृपतिभयं व्यंगायां हीनांगायामकल्पना कर्तुः ॥ २७ ॥ खातोदर्यां क्षुद्भयमर्थविनाशः कृशांगायाम् ॥ मरणं तु सक्षतायां शस्त्रनिपातेन निर्दिशेत्कर्तुः ॥२८॥ वामोन्नता तु पत्नीं दक्षिणावनता हिनस्त्यायुः ॥ अंधत्वमूर्द्धदृष्टिः करोति चिंतामधोमुखी दृष्टिः ॥२९॥ सर्वप्रतिमास्वेवं शुभाशुभं भास्करेणोक्तम् ॥ ब्रह्मा कमंडलुकरश्चतुर्मुखः पंकजस्थश्च ॥ ३० ॥ स्कंदः कुमाररूपः शक्तिधरो बर्हिकेतुश्च ॥ शुक्लश्चतुर्विषाणो द्विपो महेंद्रस्य

वज्रपाणित्वम् ॥ ३१ ॥ तिर्यगूर्ध्वललाटसंस्थं तृतीयमपि लोचनं चिह्नम् ॥ ३२ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे
सांबोपाख्याने श्रीसूर्यप्रतिमालक्षणवर्णनं नाम द्वात्रिंशदुत्तरशततमोऽध्यायः ॥ १३२ ॥ छ ॥ ॥ ॥ नारद उवाच ॥ ॥ ततोधिवासनं कुर्या
द्विधिदृष्टेन कर्मणा ॥ ऐशान्यां दिशि वै कुर्यादधिवासनमंडपम् ॥ १ ॥ चतुस्तोरणसंपन्नं सर्वाभरणसंयुतम् ॥ दिशासु विदिशास्वेव पताका
भिस्तु भूषितम् ॥ २ ॥ आग्नेय्यां दिशि रक्ताः स्युः कृष्णाः स्युर्याम्यनैर्ऋते ॥ श्वेता दिश्यपरस्यां तु वायव्यामेव पांडुरा ॥ ३ ॥ चित्रा चोत्तर
पार्श्वे तु पीता पूर्वोत्तरे तथा ॥ श्रियमायुर्जयं चैव बलं यशो यदूत्तम ॥४॥ ददाति सा वीर कृता संपदर्थे न संशयः ॥ हिताय सर्वलोकानां मृन्मयी
प्रतिमा भवेत् ॥ ५ ॥ सुभिक्षक्षेमदा नित्यं सर्वा मणिमयी कृता ॥ गांगेयां[1] पुष्टिदा स्याद्वै रौप्या कीर्तिप्रवर्तिनी ॥ ६ ॥ प्रजावृद्धिं ताम्रमयी कुर्या
न्नित्यमसंशयः ॥ भूमेर्लाभं तु विपुलं कुर्यादश्ममयी सदा ॥ ७ ॥ प्रधानपुरुषं हंति त्रपुलोहमयी सदा ॥ सर्वदेवमयस्यैवमर्चां कुर्यात्प्रयत्नतः
॥ ८ ॥ ॥ सांब उवाच ॥ ॥ सर्वदेवमयत्वं हि ब्रूहि मे भास्करस्य तु ॥ सर्वदेवमयो ह्येष कथं नारद कथ्यते ॥ ९ ॥ ॥ नारद उवाच ॥ ॥
साधु सांब महाबाहो शृणु मे परमं वचः ॥ बुधसोमौ स्मृतौ नेत्रे ललाटे चेश्वरः स्थितः ॥ १० ॥ सुरज्येष्ठः शिरस्तस्य कपालेऽस्य बृहस्पतिः ॥
एकादश तथा रुद्राः कण्ठमस्य[2] समाश्रिताः ॥ ११ ॥ नक्षत्राणि ग्रहाश्चैव दशनेषु समाश्रिताः ॥ धर्माधर्मौ च देवस्य ओष्ठसंपुटके स्थितौ ॥१२॥
सर्वशास्त्रमयी देवी जिह्वायां च सरस्वती ॥ दिशश्च विदिशश्चैव सर्वाः श्रोत्रेषु संस्थिताः ॥ १३ ॥ ब्रह्मेन्द्रौ तालुदेशे तु स्थितौ देवैश्च पूजितौ ॥
आदित्या द्वादश विभोर्भ्रुवोर्मध्ये समाश्रिताः ॥ १४ ॥ ऋषयो रोमकूपेषु समुद्रा जठरे स्थिताः ॥ यक्षकिन्नरगन्धर्वाः पिशाचा दानवास्तथा ॥
॥ १५ ॥ राक्षसाश्च गणाः सर्वे हृदये स्युः स्थिता रवेः ॥ नद्यो बाहुगताश्चैव नगाः कक्षांतरे स्थिताः ॥ १६ ॥ पृष्ठमध्ये स्थितो मेरुः स्तन
योरंतरे कुजः ॥ तस्य पुत्रो धर्मराजः स्थितो वै नाभिमण्डले ॥ १७ ॥ कटिदेशे पृथिव्याद्या लिंगे सृष्टिः समाश्रिता ॥ जानुनी चाश्विनीदेवा
वूरू तस्याचलाः स्मृताः ॥ १८ ॥ सप्त पाताललोकास्तु नखमध्ये समाश्रिताः ॥ ससागरवना पृथ्वी पादमध्येस्य वर्तते ॥ १९ ॥ देवः काला
ग्निरुद्रो यो दन्तान्तेषु समाश्रितः ॥ सर्वदेवमयो भानुः सर्वदेवात्मकस्तथा ॥ २० ॥ व्यंगेषु वायवश्चैव लोकालोकं चराचरम् ॥ व्यात्तं कर्मश
रीरेण वायुना तस्य वै विभोः ॥ २१ ॥ स एष भगवानर्को भूतानुग्रहणे स्थितः ॥ एतत्ते परमं ज्ञानमेतत्ते परमं पदम् ॥ २२ ॥ तस्य स्थान

---

[1] काञ्चनी । [2] कण्ठमध्ये–इ० पा० ।

विभागेन प्रतिमास्थापनं यथा ॥ तत्ते सर्वं प्रवक्ष्यामि यथोक्तं ब्रह्मणा पुरा ॥ २३ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे
सांबोपाख्याने प्रतिमाप्रतिष्ठाकल्पे विश्वरूपवर्णनं नाम त्रयस्त्रिंशदुत्तरशततमोऽध्यायः ॥ १३३॥ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ प्रतिपच्च
द्वितीया च चतुर्थी पंचमी तथा ॥ दशमी त्रयोदशी चैव पौर्णमासी च कीर्तिता ॥ १ ॥ सोमो बृहस्पतिश्चैव शुक्रश्चैव बुधस्तथा ॥ एते सौम्या
ग्रहाः प्रोक्ताः प्रतिष्ठायज्ञकर्मणि ॥ २ ॥ त्रिषूत्तरासु रेवत्यामश्विन्यां ब्राह्मभे तथा ॥ पुनर्वस्वोस्तथा हस्ते वासवे[1] श्रवणेथवा ॥ भरण्यां चैव नक्षत्रे
भानोः[2] स्थापनमुत्तमम् ॥ ३ ॥ शोधयित्वा तु वै भूमिं तुषकेशविवर्जिताम् ॥ वालुकांगारपाषाणास्थिविहीनां विशोध्य तु ॥ ४ ॥ चतुर्हस्त
समायुक्ता वेदी विस्तरतो रवेः[3] ॥ ५ ॥ मंडपस्तु प्रमाणेन दशहस्तः समंततः ॥ मंडलं वृक्षशाखाभिः कारयेद्विधिपूर्वकम् ॥ ६ ॥ नदीसंगमती
रोत्थां मृत्तिकां[4] च समानयेत् ॥ उपलिप्य ततो भूमिं कारयेत्कुण्डमुत्तमम् ॥ ७ ॥ चतुरस्रं श्रिया युक्तं पूर्वं कुण्डं तु कारयेत् ॥ दक्षिणे चार्ध
चन्द्रं स्याद्वारुण्यां दिशि वर्तुलम् ॥ ८ ॥ पद्माकारं तु वै कुर्यादुत्तरे[5] च विचक्षणः ॥ तोरणानि ततः कुर्यात्पञ्चहस्तानि सुव्रत ॥ ९ ॥ न्यग्रोधो
दुम्बरौ चैव बिल्वपालाशमेव च ॥ अश्वत्थश्च शमी चैव चन्दनश्चेति कीर्तिताः ॥१०॥ शुक्लवस्त्रसमायुक्तश्चित्रपट्टसमन्वितः ॥ जपमालान्वितः
कुर्यात्तोरणानि विचक्षणः ॥ ११ ॥ अग्निमीळेति मंत्रेण यजेद्वै पूर्वतोरणम् ॥ इषेत्वोर्जेति मंत्रेण यजेद्दक्षिणतोरणम् ॥ १२ ॥ अग्न आयाहीति
मंत्रेण पश्चिमं तु समर्चयेत् ॥ शं नो देवीति मंत्रेण यजेदुत्तरतोरणम् ॥ १३ ॥ कलशांस्तु समादाय हेमगर्भसमन्वितान् ॥ श्वेतचन्दनपंकेन
कण्ठस्वस्तिकभूषणान् ॥ १४ ॥ यवशालिशरावान्नवस्त्रालंकारविग्रहान् ॥ आजिघ्रेति च मंत्रेण कलशांस्तु निवेशयेत् ॥ १५ ॥ दुकूलैश्चित्रप
ट्टैश्च वेष्टयेत्[6]स्तम्भमालिकाम् ॥ ध्वजादर्शपताकाभिश्चामरैस्तु वितानकैः ॥ १६ ॥ शंखघण्टानिनादैश्च गेयमंगलवाचनैः ॥ तूर्यभेरी
निनादैश्च वेदध्वनिसमन्वितैः ॥ १७ ॥ पुण्यैश्च जयशब्दैश्च कारयेत महोत्सवम् ॥ पताकाभिर्विचित्राभिः पूजामाल्योपशोभितम् ॥ १८ ॥
विचित्रस्रग्वितानाढ्यं प्रकीर्णकुसुमांकुरम् ॥ तन्मध्ये तु कुशास्तीर्णे देवार्चां स्थापयेद् बुधः ॥१९॥ पताकां पीतवर्णां तु पूर्वे शक्राय दापयेत् ॥
आग्नेय्यां रक्तवर्णाभां[7] यमांशायां[8] यमोपमाम्[9] ॥ २० ॥ नीलांजनसमप्रख्यां नैर्ऋत्यां च प्रदापयेत् ॥ वारुण्यां सितवर्णां च कृष्णां वायव्यगो

---

[1] पुष्येण--इ० पा० । [2] रवेः--इ० पा० । [3] भवेत्--इ० पा० । [4] वालुकां च--इ० पा० । [5] उत्तरेण--इ० पा० । [6] तान्सुमंगलम्--इ० पा० । [7] अग्नये इत्यर्थः । [8] याम्यायां यमसंनिभाम्--इ० पा० ।
[9] यमोपमां कृष्णाम् । यमायेति शेषः ।

चरे ॥ २१ ॥ हरितां यक्षराजाय ऐशान्यां सर्ववर्णिकाम् ॥ श्वेतरक्तकचूर्णेन पद्ममालेखयेत्ततः ॥ २२ ॥ वेद्या वेदीति मंत्रेण वेद्या आलभनं
भवेत् ॥ पूर्वाग्रानुत्तराग्रांश्च कुशानास्तीर्य यत्नतः ॥ २३ ॥ योगेयोगेति मंत्रेण कुशैश्चास्तरणं भवेत् ॥ शय्या तत्रैव कर्तव्या दिव्या
स्तरणसंयुता ॥ २४ ॥ गडुके द्वे विचित्रे तु तन्मध्ये स्थापयेद्बुधः ॥ विचित्रदीपमालाभिर्भक्ष्यभोज्यान्नपानकैः ॥ २५ ॥ पूपकान्सुविचित्रान्वै
मोदकांश्च प्रदापयेत् ॥ पायसं कृशरं चैव दध्योदनसमन्वितम् ॥ २६ ॥ दधि चन्द्रसमप्रख्यं शुभच्छत्रं च विन्यसेत् ॥ २७ ॥ इति श्री
भविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सांबोपाख्याने सूर्यप्रतिष्ठायां मंडलविधिवर्णनं नाम चतुस्त्रिंशदुत्तरशततमोऽध्यायः ॥१३४ ॥छ॥
॥ ॥ नारद उवाच ॥ ॥ अतः परं प्रवक्ष्यामि स्नानकर्मविधिं तव ॥ स्नापकस्तु महाप्राज्ञो ब्राह्मणो वेदपारगः ॥१॥ अभिज्ञः सौरशास्त्राणाम
रुणो यदुसत्तम[1] ॥ भोजको भोजकैश्चान्यैर्ब्राह्मणैश्च तथा वृतः ॥ २ ॥ दिशाभागे मंडलस्य ईशाने वै यथाक्रमम् ॥ हस्तमात्रप्रमाणं तु भद्रपीठं
तु विन्यसेत् ॥ ३ ॥ हस्तिना शकटेनापि भक्त्या ब्रह्मरथेन च ॥ मंगलैर्ब्रह्मघोषैश्च देवं प्रासादमानयेत् ॥ ४ ॥ भद्रपीठं समादाय भद्रं कर्णेति
मंत्रतः ॥ सूत्रधारस्तथा प्रोक्तः शुक्लांबरधरः शुचिः ॥ ५ ॥ स्नापयेत्कलशं गृह्य देवदेवं विभावसुम् ॥ सामुद्रं तोयमाहृत्य जाह्नवं यामुनं तथा ॥
॥ ६ ॥ सारस्वतं जलं पुण्यं चांद्रभागं ससैंधवम् ॥ पुष्करस्य जलं श्रेष्ठं गिरिप्रस्रवणोदकम् ॥ ७ ॥ अन्यद्वापि शुचि तोयं नदीनदतडागजम् ॥
यथाशक्त्या उपाहृत्य कलशैः कांचनादिभिः ॥ ८ ॥ भोजकाश्चाष्टभिः सूर्यं कलशैः स्नापयंति वै ॥ ततस्तु मणिरत्नानि सर्वबीजौषधीस्तथा
॥ ९ ॥ सुगंधीनि च माल्यानि स्थलजान्यंबुजानि च ॥ चंदनानि च मुख्यानि गंधाश्च विविधास्तथा ॥ १० ॥ ब्राह्मी सुवर्चला मुस्ता विष्णु
क्रान्ता शतावरी ॥ दूर्वा च शिबिपुष्पी च प्रियंगू रजनी वचा ॥ ११ ॥ संभृत्यैतांस्तु संभारान्स्नानकर्मविभागवित् ॥ बलाश्वत्थशिरीषाणां
पल्लवैः कुशसंयुतैः ॥ १२ ॥ कलशोपरि विन्यस्य दद्यादर्घ्यं रवेः सदा ॥ कांचनै राजतैस्ताम्रैर्मृन्मयैः कलशैस्तथा ॥ १३ ॥ साक्षतैः सहिर
ण्यैश्च सर्वौषधिसमन्वितैः॥गायत्र्या परिपूतैस्तु षोडशैः स्नापयेद्रविम् ॥१४॥ कुशोत्तरां[2] ततः कृत्वा वेदिं पक्वेष्टकामयीम्॥तस्यां वेद्यां समारोप्य
परिधाप्य च वाससी ॥ १५ ॥ प्रतिमामभिषिंचेच्च सोपवासः प्रयत्नतः ॥ मूर्ध्नि सर्वौषधीः कृत्वा तथैवामलकानि च ॥ १६ ॥ मंत्रेण मृत्तिकां
चापि मंत्रतश्च जलं तथा ॥ त्वं देवी वंदिता देवैः सकलैर्दैत्यदानवैः ॥ १७ ॥ तेन संस्थापिता मूर्ध्नि मया देवस्य शुद्धये ॥ आदिस्त्वं सर्वभूतानां

---

[1] यदि सुव्रतः—इ० पा० । [2] चतुरस्राम्—इ० पा० ।

देवतानां च सर्वथा ॥ १८ ॥ रसानां पतये तुभ्यमाह्वानं च कृतं मया ॥ इत्थं पौराणिकैर्मंत्रैर्वैदिकैश्च विशेषतः ॥ १९ ॥ कार्यं हि[1] वारुणं स्नानं
देवस्य यदुनंदन ॥ इत्थमुच्चारयेद्वाचं कुर्यात्स्नानं विचक्षणः ॥ २० ॥ देवास्त्वामभिषिंचंतु ब्रह्मविष्णुशिवादयः ॥ व्योमगंगा च पूर्णेन द्वितीयक
लशेन तु ॥ २१ ॥ सारस्वतस्य पूर्णेन कलशेन सुरोत्तम ॥ शक्रादयोभिषिंचंतु लोकपालाः सुरोत्तमाः ॥ २२ ॥ सागरोदकपूर्णेन चतुर्थकलशे
न तु ॥ वारिणा परिपूर्णेन पद्मपत्रसुगंधिना ॥ २३ ॥ पंचमेनाभिषिंचंतु नागाश्च कलशेन तु ॥ हिमवद्धेमकूटाद्याश्चाभिषिंचंतु वारिणा ॥ २४ ॥
नैर्ऋतोदकपूर्णेन षष्ठेन कलशेन तु ॥ सर्वतीर्थांबुपूर्णेन पद्मरेणुसुवासिना ॥ २५ ॥ सप्तमेनाभिंषिंचंतु ऋषयः सप्त ये वराः ॥ वसवश्चाभिषिंचंतु
कलशेनाष्टमेन वै ॥ २६ ॥ अष्टमंगलयुक्तेन देवदेव नमोऽस्तु ते ॥ ततो वै कलशैर्दिव्यैः स्नानकर्म समारभेत् ॥ २७ ॥ समुद्रं गच्छ यः
प्रोक्तो मंत्रमेतमुदीरयेत् ॥ हिरण्यगर्भेति च यो मन्त्रस्तं समुदीरयेत् ॥२८॥ समुद्रज्येष्ठेति मंत्रेण क्षालयेन्मृत्तिकान्वितम् ॥ सिनीवालीति मंत्रेण
दद्याद्वल्मीकमृत्तिकाम् ॥ २९ ॥ शम्युदुंबरमश्वत्थं न्यग्रोधं च पलाशकम् ॥ यज्ञं यज्ञेति मंत्रेण दद्यात्पंचकषायिकम् ॥ ३० ॥ पंचगव्यं पवित्रं च
आहरेत्ताम्रभाजने ॥ गायत्र्या चैव गोमूत्रं गंधद्वारेति गोमयम् ॥ ३१ ॥ आप्यायस्वेति च क्षीरं दधिक्राब्णेति वै दधि ॥ तेजोऽसीति घृतं तद्वद्दे
वस्य त्वा कुशोदकम् ॥ ३२ ॥ एवमादिविधियुतं पंचगव्यं प्रकीर्तितम् ॥ यां ओषधीति मंत्रेण स्नानमोषधिभिः क्रमात् ॥ ३३ ॥ द्रुपदाभिः
पुनस्तस्य कुर्याच्चोद्वर्तनं बुधः ॥ शिरःस्नानं ततो दद्यान्मानस्तोकाभिमंत्रितम् ॥ ३४ ॥ विष्णोरराटमंत्रेण दद्याद्गंधोदकं शुभम् ॥ ततो नद्युद्ध
वेनैव क्षालयेच्छुद्धवारिणा ॥ ३५ ॥ जातवेदसमुच्चार्य वस्त्रपूतेन वारिणा ॥ तत आवाहयेद्देवं रक्तमाल्यांबरं शुभम् ॥ ३६ ॥ एह्येहि भगवन्भानो
लोकानुग्रहकारक ॥ यज्ञभागं गृहाणार्घ्यमर्कदेव नमोऽस्तु ते ॥ ३७ ॥ हिरण्येन तु पात्रेण देवायार्घ्यं प्रदापयेत् ॥ इदं विष्णुर्विचक्रमे मंत्रेणार्घ्यं
समर्पयेत् ॥ ३८ ॥ पार्थिवैः प्रथमं कलशैः स्नापयेद्भास्करं बुधः ॥ ततस्त्वौदुंबरैर्वीर राजतैस्तदनंतरम् ॥३९॥ ततस्तु कांचनैर्देवं स्नापयेद्यदुनंदन ॥
सर्वतीर्थजलैर्युक्तं सर्वौषधिसमन्वितम् ॥ ४० ॥ शंख[2]मादाय देवस्य ततो मूर्धनि शंकर ॥ दत्त्वा पुष्पाणि देवस्य मूर्ध्नि यत्नाद्विचक्षणः ॥ ४१ ॥
तोयमुत्क्षिप्य यत्नेन ततः स्नपनमाचरेत् ॥ प्रथमं स्नापयेद्देवं वारिणा यदुनंदन ॥ ४२ ॥ ततस्तु पयसा राजन्पायसेन ततस्तु वै ॥ घृतेन मधुना
वापि तथा इक्षुरसेन च ॥ ४३ ॥ अग्निष्टोमस्य यज्ञस्य गोमेधस्य[3] च सुव्रत ॥ ज्योतिष्टोमस्य राजेन्द्र वाजपेयस्य वै विभो ॥ ४४ ॥ राजसूया

---

[1] आपो हिष्ठेति त्र्यृचा—इ० पा० । [2] चरणोपरि देवस्य—इ० पा० । [3] गोशतस्य—इ० पा० ।

श्वमेधाभ्यां घृताद्यैर्लभते फलम् ॥ यस्तु कारयते स्नानं यस्तु भक्त्या प्रपश्यति[1] ॥ क्रियमाणं तु देवस्य स्नानं यदुकुलोद्वह ॥ ४५ ॥ य एते
कथिता यज्ञा एतेषां क्रमशः फलम् ॥ अर्चां च कुरुशार्दूल दृष्ट्वा वै लभते फलम् ॥ ४६ ॥ स्नानं तु यत्नतः कार्यं देवदेवस्य सुव्रत ॥ यथा न
लंघयेत्कश्चिद्देवस्य स्नपनं विभोः ॥ ४७ ॥ न प्राश्नंति यथा काकास्तीर्थं लोकविगर्हिताः ॥ स्नानोदकं तु देवस्य अथ वा पय एव हि ॥ ४८ ॥
भूमौ गतं यथा चैव प्राश्नाति यदुनंदन ॥ रोगं प्राप्नोति कर्ता वै दुःखं कारयिता तथा ॥४९॥ तस्माद्यत्नेन कर्तव्यं देवस्य स्नपनं विभोः॥ ५० ॥
स्नापयित्वा क्रमेणेत्थं स्नानकर्म विधानवित् ॥ ततो वर्धनिकां गृह्य वारिधारां समुत्सृजेत् ॥ ५१ ॥ त्रिवारान्पुरतोऽर्कस्य आचमस्वेति च ब्रुवन्॥
वेदोसीति च मंत्रेण उपवीतं प्रदापयेत् ॥ ५२ ॥ बृहस्पतेति मंत्रेण वस्त्रयुग्मं प्रदापयेत् ॥ यत्नक्रमं प्रकुर्वाणः पुष्पमालां प्रदापयेत् ॥ ५३ ॥ धूर
सीति च मंत्रेण धूपं दद्यात्सगुग्गुलम् ॥ समिद्धोंजनमंत्रेण अंजनं तु प्रदापयेत् ॥ ५४ ॥ युंजानीति च मंत्रेण रोचनां तस्य दापयेत् ॥ आरा
र्तिकं च वै कुर्याद्दीर्घायुष्ट्वाय वर्चसे ॥ ५५ ॥ स्नानकर्म त्विदं प्रोक्तं भास्करस्य महात्मनः ॥ भोजका ब्राह्मणाश्चैव क्रियां कुर्युः प्रयत्नतः ॥५६॥
बह्वृचोऽथर्वणश्चैव छन्दोगोध्वर्युरेव च ॥ स्नापकस्य च चिह्नानि ये च मूर्तिधरास्तथा ॥ ५७ ॥ तेषां प्रवक्ष्यामि विभो शृणु चैकमनाः किल ॥
संपूर्णगात्रो मतिमाञ्छास्त्रज्ञः प्रियदर्शनः ॥५८॥ कुलीनः श्रद्दधानश्च आर्यदेशसमुद्भवः ॥ न स्थूलो न कृशो दीर्घः सौरशास्त्रविशारदः ॥ ५९ ॥
यश्च युक्तो जितात्मा च गुरुभक्तो जितेन्द्रियः ॥ पंचविंशतितत्त्वज्ञः स्थापकः समुदाहृतः ॥ ६० ॥ वर्जनीयांश्च वक्ष्यामि यैस्तु कर्म न कारयेत्॥
हीनांगश्चाधिकांगश्च वामनो विकटस्तथा ॥६१॥ नातिगौरो न कृष्णश्च स्नापनाय प्रयोजयेत् ॥ चार्वाको याजकश्चैव नित्यं गोमुखदंभकः ॥६२॥
अशुचिव्रतसंयुक्तः श्यामदंतोऽथ मत्सरी[3] ॥ [4]कोपनो दुष्टशीलश्च युवा वा वृद्ध एव च ॥ ६३ ॥ शिवत्री कुष्ठी च रोगी च काणो दुर्मतिरेव च ॥
संकीर्णो जातिहीनश्च तथा च वृषलीपतिः ॥ ६४ ॥ कुब्जश्चांधस्तथा व्यंगः खल्वाटो विकलेन्द्रियः ॥ अविनीतो दुरात्मा च विकलः पंगुरेव च ॥
॥ ६५ ॥ तिथिनक्षत्रयोगानां वाराणां च तथा विभो ॥ सूचको [5]जीविकार्थं हि यश्च मूल्येन पाठयेत् ॥ ६६ ॥ ईदृशान्स्नापकान्सर्वान्वर्जयेत
प्रयत्नतः ॥ तस्मात्सर्वप्रयत्नेन परीक्ष्याः स्नापका बुधैः ॥ ६७ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सांबोपाख्याने सूर्य
प्रतिष्ठास्नानविधिवर्णनं नाम पंचत्रिंशदुत्तरशततमोऽध्यायः ॥ १३५ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ अतः परं प्रवक्ष्यामि अधिवासनमुत्त

---

[1] प्रणम्यति–इ० पा० । [2] प्रयत्नतः–इ० पा० । [3] मन्युमान्–इ० पा० । [4] रोगयुक्तोऽथ वै बालः–इ० पा० । [5] भृतकोऽर्थी च दुष्टं तत्र न योजयेत्–इ० पा० ।

मम् ॥ सहस्रशीर्षा पुरुषो मंडपं यत्नतो विशेत् ॥ १ ॥ ततोन्ये च शुचौ देशे असंस्पृष्टोपलेपने ॥ मंडलं पंचवर्णैस्तु आलिखेच्चतुरस्रकम् ॥२॥
पताकातोरणच्छत्रध्वजमाल्याद्यलंकृतम् ॥ विचित्रसुवितानाढ्यं प्रकीर्णकुसुमोत्करैः ॥ ३ ॥ तस्य मध्ये कुशास्तीर्णे मूर्तिः स्थाप्या विवस्वतः ॥
तत्रास्यावाहनं कृत्वा दद्यादर्घ्यं विवस्वते ॥ ४ ॥ सुवर्णमधुपर्कादि कृत्वा[1] तत्र विधानतः ॥ देवस्य[2] दर्शयेद्गां च सवत्सां रोहिणीं शुभाम् ॥ ५ ॥
नमो गोपतये तुभ्यं सहस्रांशो प्रसीद मे ॥ एवमर्घ्येण संपूज्य परिधाय च वाससी ॥ ६ ॥ यज्ञोपवीतमातिथ्यं तथाभ्यंगं तथैव च ॥ वत्सरे
वत्सरे तस्य नवमव्यंगमाहरेत् ॥ ७ ॥ श्रावणे मासि राजेंद्र पवित्रं तस्य तद्धि वै ॥ ब्राह्मणान्भोजयित्वा तु वर्षेवर्षे प्रयोजयेत् ॥ ८ ॥ अव्यंगं
यदुशार्दूल श्रावणे मासि भास्करम् ॥ सर्वगंधैः समालभ्य चंदनागुरुकुंकुमैः ॥ ९ ॥ अलंकारैरलंकृत्य कुसुमैश्च सुगंधिभिः ॥ मालाभिश्च विचित्राभिराबद्धाभिरनेकशः ॥ १० ॥ ततो धूपं निवेद्याशु प्रतिमाग्रे प्रयत्नतः ॥ सहस्रशीर्षा पुरुषो मंडपं च प्रवेशयेत् ॥ ११ ॥ नमः शंभवेति
मंत्रेण शय्यायां विनिवेशयेत् ॥ विश्वतश्चक्षुरित्येव कुर्यात्कमलनिष्कलम् ॥ १२ ॥ पुनरेव च वक्ष्यामि संकलीकरणं शुभम् ॥ स्नापने तु यथा
कार्यः स्वदेहे न्यास उत्तमः ॥१३॥ प्रतिमायां तथा कार्यो यथा चालंभनं बुधः ॥ ॐ हुं खषोल्काय नमो मूलमंत्रः प्रकीर्तितः ॥१४॥ आदित्योऽयं स्वयं देवो ह्यक्षरेणोपबृंहितः ॥ ॐकारं विन्यसेन्मूर्ध्नि हुंकारं नासिकोपरि ॥ १५ ॥ खकारं च ललाटे तु षकारं वदने न्यसेत् ॥ लकारं चैव
कंठे तु ककारं हृदये न्यसेत् ॥ १६ ॥ यकारं तु भुजे वामे नकारं दक्षिणे भुजे ॥ मकारं वामकुक्षौ च विसर्गं दक्षिणे न्यसेत् ॥१७॥ ॐकारं तु
सदा ध्यायेज्ज्वालामालासमाकुलम् ॥ हुंकारं शुद्धवर्णाभं प्रसुवंतमलं शुभम् ॥ १८ ॥ खकारं चिंतयेत्प्राज्ञो भिन्नांजनसमप्रभम् ॥ तरुणादित्यवर्णाभं खकारं चिंतयेद्बुधः ॥ १९ ॥ षोकारं तु महाबाहो हेमवर्णं विचिंतयेत् ॥ शुक्लपद्मनिभाकारमकारं चिंतयेद्बुधः ॥२०॥ जातीकुसुमसंकाशं ह्रींकारं सर्ववर्णकम् ॥ क्षीरवर्णं सकारं तु चिंतयेत्सततं बुधः ॥ २१ ॥ नकारं हिमकुंदाभं मकारममृताक्षरम् ॥ ह्रींकारं विद्युत्संकाशं ह्रींकारं सर्ववर्णकम् ॥ २२ ॥ क्षीरवर्णं सकारं तु चिन्तयेत्सततं बुधः ॥ नकारं स्वर्णवर्णाभं मकारं कनकप्रभम् ॥ २३ ॥ ततो देवं महात्मानं सहस्रकिरणं रविम् ॥ प्रसादाभिमुखं देवं शयनीये निवेशयेत् ॥ २४ ॥ अग्निकार्यं ततः कुर्युरग्निकुंडेषु वै द्विजाः ॥ ततोऽरण्यां समुत्थाप्य अग्निं लौकिकमेव वा ॥ २५ ॥ प्रज्वाल्याग्निं विधानेन कुर्याद्धोमं विचक्षणः ॥ बह्वृचः पूर्वकांडेषु याम्यां मध्यंदिनस्तथा ॥ २६ ॥ पश्चिमे चैव च्छंदोग उत्तरेऽथर्वणो

---

[1] सुमनोधूपदीपकैः–इ० पा० । [2] दद्यात्तत्र प्रयत्नेन–इ० पा० ।

मतः ॥ मध्ये च भोजकः कुर्याद्धोमं यज्ञे यदूत्तम ॥ २७ ॥ शमीपालाशोदुंबराणि ह्यपामार्गस्तथैव च ॥ द्वादश तु सहस्राणि अष्टौ चत्वारि एव च ॥ २८ ॥ द्वे त्रीणि च सहस्राणि अथ वा एकमेव हि ॥ अग्निर्मूर्धेति मंत्रेण कुंडस्यालंभनं भवेत् ॥ २९ ॥ उल्लिख्याभ्युक्ष्य तेनैव अग्निं दूतमिति स्मृतः ॥ संबुध्यस्वाग्ने मंत्रेण गर्भाधानं तु कारयेत् ॥ ३० ॥ सीमंतेति पुनस्तत्र महामंत्रेण होमयेत् ॥ जातकर्म तथा प्रोक्तं प्राणायामं विदुर्बुधाः ॥ ३१ ॥ नमः स्वाहेति मंत्रेण नामकरणमेव च ॥ अन्नप्राशनमंत्रेण अन्नप्राशनमादिशेत् ॥ ३२ ॥ ज्येष्ठमग्रेति मंत्रेण तेन चूडोपकर्मणि ॥ व्रतबंधस्य मंत्रेण व्रतबंधं समादिशेत् ॥ ३३ ॥ समावर्तनमित्येव आकृष्णेति च होमयेत् ॥ पत्नीसंयोजनं चैव स्वयमेव प्रकल्पयेत् ॥ ३४ ॥ अग्निहोत्रादिकं कर्म यज्ञकर्माणि यानि च ॥ महाव्याहृतिमंत्रेण होतव्यानि समंततः ॥ ३५ ॥ मातृणां यज्ञभूतानां बलिकर्म प्रदापयेत् ॥ सर्वकामसमृद्ध्यर्थं कारयेदधिवासनम् ॥ ३६ ॥ त्रिरात्रं पंचरात्रं च अहोरात्रमथापि वा ॥ ततः स्वलंकृतां स्नातां मणिरत्नैर्विभूषिताम् ॥ ॥ ३७ ॥ कृतरक्षां प्रयत्नेन प्रतिमामधिवासयेत् ॥ देवागारादथैशाने दिग्भागे दिव्यमंदिरम् ॥३८॥ कृत्वा कुशपरिस्तीर्णे वरास्तरणसंवृते ॥ पूर्वशीर्षां तथा शय्यां शुक्लां शुक्लांबरोत्तराम् ॥३९॥ तस्यामावेशयेत्सम्यङ् महाश्वेतमुपाहरेत् ॥ निक्षुभां दक्षिणे पार्श्वे वामे राज्ञी च कीर्तिता ॥४०॥ दंडपिंगलकौ चास्य स्थितौ पादप्रवेशितौ ॥ तस्यां संवेशितायां तु शर्वर्यां प्रतिमां रवेः ॥ ४१ ॥ वसेत्तां रजनीं तत्र स्तूयमानश्चतुर्दिशम् ॥ ब्राह्मणैर्बंदिभिश्चापि गीतज्ञैश्चारणैस्तथा ॥ ४२ ॥ कुर्याज्जागरणं तत्र सूर्यभक्तिसमन्वितैः ॥ प्रभातायां तु शर्वर्यां बोधयेद्दृग्विधानतः ॥ ४३ ॥ हविष्यं भोक्तुकामांस्तु ब्राह्मणान्भोजकांस्तथा ॥ दक्षिणाभिश्च संपूज्य तैः कृतस्वस्तिवाचनः ॥ ४४ ॥ ततो गर्भगृहस्याथ मध्ये कृत्वा तु पिंडिकाम् ॥ विधिवत्तत्र सौवर्णं न्यसेत्सप्तहयं रथम् ॥ ४५ ॥ सर्वबीजौषधैश्चैव तत्र धृत्वा विधानवित् ॥ दत्त्वार्घ्यं स्थापयेत्तत्र यजमानः सहायवान् ॥४६॥ शंखदुंदुभिनिर्घोषैर्जलधारासहाक्षतैः ॥ कृत्वा पुण्याहशब्दं तु आलयस्य प्रदक्षिणाम् ॥ ४७ ॥ शुभलग्ने दिने ऋक्षे पूर्वाह्णे भानवे क्षणे ॥ मुहूर्ते च शुभे भानोः प्रतिमां स्थापयेद्बुधः ॥ ४८ ॥ नाधोमुखीं नोर्ध्वमुखीं न पार्श्वावनतां तथा ॥ समामभिमुखीं चेमां प्रतिमां तु निवेशयेत् ॥४९॥ पत्न्यौ चास्य ततः सम्यक्पार्श्वयोर्विनिवेशयेत् ॥ निक्षुभा दक्षिणे पार्श्वे रवे राज्ञी तु वामतः ॥ ५० ॥ ततस्तदुपहारार्थं संभारैः प्राक्समाहृतैः ॥ मोदकायूषिकापूपशष्कुलीभूतशीर्षकैः ॥ ५१ ॥ कृशरैः पायसोन्मिश्रैः सर्वदिक्षु क्षिपेद्बलिम् ॥ इन्द्राय देवपतये बलिने वज्रपाणये ॥ ५२ ॥ शत

---

१ निक्षुभी–इ० पा० ।

यज्ञाधिपतये तस्मै इन्द्राय ते नमः ॥ त्रातारमिंद्रमंत्रेण इंद्रस्यावाहनं भवेत् ॥ ५३ ॥ अग्नये रक्तनेत्राय ज्वालामालार्चिताय वै ॥ शक्तिहस्ताय
तीव्राय तथा चैवाजवाहिने ॥ आग्नेय्यामग्निमंत्रेण वह्नेरावाहनं स्मृतम् ॥ ५४ ॥ दंडहस्ताय कृष्णाय महिषोत्तमवाहिने ॥ सूर्यपुत्राय देवाय धर्म
राजाय वै नमः ॥ ५५ ॥ यमाय त्विति मंत्रेण मुद्रास्तस्यैव कीर्तिताः ॥ नैर्ऋते खड्गहस्ताय नीललोहितकाय च ॥ ५६ ॥ सर्वबाह्याधिपतये
विरूपाख्याय वै नमः ॥ आंयं गौरिति मंत्रेण नैर्ऋत्यां तु प्रकल्पयेत् ॥ ५७ ॥ वारुण्यां पाशहस्ताय वरुणायेति कल्पयेत् ॥ मंत्रेणावाहनं विद्या
त्पंचनद्यः सरस्वतीम् ॥ ५८ ॥ प्राणात्मकाय धूपाय अव्यंगायानिलाय च ॥ ध्वजहस्ताय भीमाय नमो गंधवहाय च ॥ ५९ ॥ तस्याप्या
वाहनं विद्याद्यद्देवादेवहेडनम् ॥ गदाहस्ताय सोमाय शुष्मिणे नृगताय च ॥ ६० ॥ गदापट्टिशहस्ताय सोमराजाय वै नमः ॥ ईशावास्यं च
गुह्या वै सोममंत्रः प्रकीर्तितः ॥ ६१ ॥ चतुर्मुखाय देवाय पद्मासनगताय च ॥ कृष्णाजिननिषण्णाय नमो लंबोदराय च ॥ ६२ ॥ गणाधिपतये
देव नीलकंठाय शूलिने ॥ विरूपाक्षाय रुद्राय त्रैलोक्याधिपते नमः ॥ अभि त्वा शूर नो मंत्र ईशानाय प्रकल्पयेत् ॥ ६३ ॥ सर्वनागाधिराजा
य श्वेतवर्णाय भोगिने ॥ सहस्रफणिने नित्यमनंताय नमोनमः ॥ ६४ ॥ नमोऽस्तु सर्पेभ्य इति मंत्रश्चैव प्रकीर्तितः ॥ पंचरात्रादिभिर्न्यासो ह्यं
गन्यासः प्रयुज्यते ॥ ६५ ॥ तथोपक्षीरपानैश्च स्तुतिस्तोत्रैश्च भास्करम् ॥ विप्रेभ्यो भोजकेभ्यश्च ततो दद्याच्च दक्षिणाम् ॥ ६६ ॥ सूर्यक्रतुं महा
पुण्यं नैव कुर्याददक्षिणम् ॥ स्थाप्यतेऽनेन विधिना तद्भक्तैः प्रतिमा च या ॥ ६७ ॥ सा तु वृद्धिकरा नित्यं सांनिध्याच्च सदा भवेत् ॥ सप्तजन्मसु
तेषां तु न रोगाः संभवंति हि ॥ ६८ ॥ उपासते त्रिरात्रं ये भानोर्यात्राभिवासने ॥ गंधमाल्योपहारैस्तु ते यांति भुवनं रवेः ॥ ६९ ॥ आत्मीयं
परकीयं वा प्रतिमास्थापनं रवेः ॥ यः पश्यति पुमान्भक्त्या स स्वर्लोकमवाप्नुयात् ॥ ७० ॥ दशानामश्वमेधानां वाजपेयशतस्य च ॥ फलं
प्राप्नोति पुरुषः प्रतिष्ठाप्य दिवाकरम् ॥ ७१ ॥ यावत्कीर्तिः पुण्यकृता भानोः स्थाने निवेशिते ॥ तावत्स तु यदुश्रेष्ठ सूर्यलोके महीयते ॥
॥ ७२ ॥ स्थापने चास्य वै मंत्रः प्रोक्तो लोकेषु पूजितः ॥ ध्रुवा द्यौश्च ध्रुवा पृथ्वी ध्रुवं विश्वमिदं जगत् ॥ श्रेयसे यजमानस्य तथा त्वं ध्रुवतां
व्रज ॥ ७३ ॥ स्थापयित्वा रविं भक्त्या विधिदृष्टेन कर्मणा ॥ मासेमासे क्रतुफलं लभंते नात्र संशयः ॥ ७४ ॥ एकाहेनापि यद्भानोः पूजया
प्राप्यते फलम् ॥ न तु क्रतुशतैर्वीर प्राप्यते मानवैर्भुवि ॥ ७५ ॥ कृत्वापि सुमहत्पापं यः पश्चात्सेवते रविम् ॥ स याति सूर्यलोकं तु नरो
विगतकल्मषः ॥ ७६ ॥ न भवेदिष्टकानां च द्रवणं भूमिसंमिति ॥ स्वर्गे महीयते तावत्कारको देववेश्मनः ॥ ७७ ॥ खंडस्फुटितसंस्कारं

कृत्वा यत्फलमाप्यते ॥ न तु क्रतुसहस्रैस्तु प्राप्यते फलमुत्तमम् ॥ ७८ ॥ सिकतायामपि गृहं यस्तु कुर्याद्विभावसोः ॥ गोपतेः स प्रियसदः प्रग
च्छेद्गोपतेर्वरम् ॥ ७९ ॥ इत्येवं सुरवरस्य तस्य भानोर्भूतानां स्थितिनिलयप्रसूतिहेतोः ॥ श्रीभागी भवति नरो निकेतकारी कल्पानां वसति शतं
स सूर्यलोके ॥ ८० ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सांबोपाख्याने सूर्यप्रतिष्ठावर्णनं नाम षट्त्रिंशदुत्तरशततमोऽध्यायः॥
॥ १३६ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ यः प्रासादं रचयति पुमान्देवतानां प्रयत्नात्तत्र प्रीत्या सपदि कुरुते स्थापनां भानुभक्तः ॥ दिव्या
न्भोगाँल्लभति च सदा कामतश्चाप्रमेयांस्तान्भुक्त्वासौ पुनरपि भवेच्चक्रवर्ती पृथिव्याम् ॥ १ ॥ ये मानवास्त्रिदशमूर्तिनिकेतनानि कुर्वंति साधुजन
दृष्टिमनोहराणि ॥ तेषां मृतेप्यपरमार्थमये शरीरे लोके परिभ्रमति कीर्तिमयं शरीरम् ॥ २ ॥ इति ते कथितमिदं देवपूज्यस्य सवितुः स्थाप
नमिवाधानम् ॥ साधारणं विधानं शृणु देवानां प्रतिष्ठापने वीर ॥ ३ ॥ स्नातो भुक्तो वस्त्रालंकृतकुसुमैर्गंधैः प्रतिमाया आस्तीर्णायां शय्यायां
स्थापनं कुर्यात् ॥ सुप्तायां तु स नृत्यगीतैर्जागरणैः सम्यगेवाधिवास्य दैवज्ञेन प्रतिदिष्टकाले संस्थापनं कुर्यात् ॥ अभ्यर्च्य कुसुमगंधानुलेपनैः
शंखतूर्यनिर्घोषैः प्रादक्षिण्येन नयेदायतनस्य प्रयत्नेन कृत्वा बलिं प्रतिमामभ्यर्च्य ब्राह्मणांश्च साधून्दत्त्वा हिरण्यकलशं विधिना निक्षिपेत्पिंडि
कामध्ये सुश्वभ्रे स्थापकदैवज्ञद्विजान्सम्यग्विशेषतोभ्यर्च्याकल्पान्तं भोगी भवतीह परत्र सुखी ॥ ४ ॥ विष्णोर्भागवता मताश्च सवितुः शंभोः
सभस्मद्विजा मातृणामपि मातृमण्डलविदो विप्रा विदुर्ब्राह्मणाः ॥ सर्वे यस्य विमुक्तशुक्लवसना बुद्धस्य रक्तांबरा ये यं देवमुपाश्रिताः सुविधिना
तैस्तस्य कार्या क्रिया ॥ ५ ॥ सामान्यमिदं देवानामधिवासनं भवति मया कथितम् ॥ क्रियमाणमिदं दृष्ट्वा देवानां प्रतिष्ठापनम् ॥ नरो भक्त्या
इह कामानवाप्य सर्वान्परत्र स्वर्गभाजनं भवति ॥ ६ ॥ इदं ते कथितं राजन्प्रतिष्ठापनमादितः ॥ यत्कृत्वा सवितुः स्नानं नरो याति मनो
गतिम् ॥ ७ ॥ इत्थं कुर्यान्नरो भक्त्या सवितुः स्थापनं बुधः ॥ कारयेत्पुरतो भक्त्या सवितुः स्थापनं बुधः ॥ ८ ॥ इतिहासपुराणस्य श्रवणं
पापनाशनम् ॥ ताभ्यां हि श्रवणाद्वीर सान्निध्यं याति भास्करः ॥ ९ ॥ कृते त्वायतने तस्मिन्ये चान्ये चापि देवताः ॥ तस्मात्कार्यं बुधैर्नित्यं
धर्मश्रवणमादितः ॥ १० ॥ वाचकं पूजयित्वा तु ब्राह्मणाननुपपूज्य च ॥ कारयेद्वाचनं वीर पुस्तकस्याग्रतो रवेः ॥ ११ ॥ सर्वस्वं स्थापके
दद्याद्यत्किंचिद्गृहमागतम् ॥ गोदानमथ वा दद्यात्तस्य चित्तं प्रसादयेत् ॥ १२ ॥ इत्येष कथितो वीर प्रतिष्ठाकल्प आदितः ॥ कृत्वा दृष्ट्वा च

श्रुत्वा च यं नरोऽर्कमवाप्नुयात् ॥ १३ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सांबोपाख्याने प्रतिष्ठापनविधिवर्णनं नाम सप्तत्रिंशदुत्तरशततमोऽध्यायः ॥ १३७ ॥ ॥ छ ॥

॥ नारद उवाच ॥ ॥ हंत ते कथयिष्यामि ध्वजारोपणमुत्तमम् ॥ यदुक्तं ब्रह्मणा पूर्वमृषभाधिपतेः पुरः ॥ १ ॥ पुरा देवासुरे युद्धे यानि देवैर्जयेप्सुभिः ॥ कृतान्युपरि चिह्नानि वाहनानि ध्वजानि तु ॥ २ ॥ लक्ष्मचिह्नध्वजं केतुरिति पर्यायनामभिः ॥ कीर्तितः स च तस्येह प्रमाणं गदतः शृणु ॥ ३ ॥ ध्वजो वंशस्य कर्तव्यस्त्वविद्ध ऋजुरव्रणः ॥ प्रासादव्यासतुल्यस्तु ध्वजवंशप्रमाणतः ॥ ४ ॥ देवागारस्य ये प्रोक्ता मञ्जरीकलशादयः ॥ अथ वा तत्प्रमाणस्तु ध्वजदंडः प्रकीर्तितः ॥ ५ ॥ अन्तर्गृहस्य या वेदी सूत्रतः परिकल्पिता ॥ तस्या व्यासो भवेद्वंशः प्रसादस्य यदूत्तम ॥ ६ ॥ अथ वा मूलसूत्रेण यो व्यासोऽन्तर्गृहस्य तु ॥ प्रासादव्यास इति स प्रोक्तश्चेह न संशयः ॥ ७ ॥ केतुर्भवेद्दृढो वंशो न निम्नो न ऋजुस्तथ। ॥ पत्रं ध्वजे युगं चैव नलिकापुरुषस्तथा ॥ ८ ॥ चतुर्हस्ता भवन्त्येते प्रशस्ताः कृष्णनन्दन ॥ अष्टहस्तप्रमाणस्तु विंशार्धस्य[1] प्रमाणतः ॥९॥ सामान्यो ध्वजदंडस्तु सर्वसाधारणो मतः ॥ दंडपाणिध्वजो यस्तु स्मृतः षोडशहस्तवान् ॥१०॥ विंशद्धस्तात्परो दंडो न कार्यः सर्वथा[2] रवेः ॥ युग्महस्तस्तु कर्तव्योः ध्वजदंडो मनीषिभिः ॥११॥ चतुरंगुलविस्तीर्णः सुवृत्तो ध्यंगुलोपरि ॥ नातिसूक्ष्मो न च स्थूलो न कार्यो नतपर्वकः॥१२॥समपर्वा तु कर्तव्यः सुदृढः सूक्ष्म एव हि॥वक्रः पुत्रविनाशाय सव्रणोऽर्थविनाशनः ॥ १३ ॥ रोगदो युग्महस्तस्तु भिन्नो दुःखमनंतकम् ॥ करोति हानिं धर्मस्य हीनो यस्तु प्रमाणतः ॥ १४ ॥ वैषम्यमसमपर्वा दद्यात्कृच्छ्रमधोन्नतः ॥ जयो जयंतो जैत्रेयः[4] शत्रुहंता जयावहः ॥ १५ ॥ नंदोपनंदनौ चैवेन्द्रोपेन्द्रौ गदितौ तथा ॥ दशैते कीर्तिता भेदा ध्वजस्यानन्दसंमिताः ॥ १६ ॥ द्विहस्तस्तु जयो दंडो जयंतो द्विगुणो मतः ॥ द्वादशहस्तस्तु जैत्रेयः शत्रुहंता कलान्वितः ॥ १७ ॥ जयावहस्तु विंशार्धो नन्द आदित्यसन्निभः ॥ चतुर्दशोपनन्दस्तु इन्द्रः षोडश उच्यते ॥ १८ ॥ उपेन्द्रोष्टादशः[5] प्रोक्तस्तथेन्द्रो विंशतिः स्मृतः ॥ भिन्नो वक्रोऽसाधितश्च न कार्यो दण्ड एव हि ॥ १९ ॥ मूलमंत्रेण कर्तव्यो व्यासतोऽन्तर्गृहस्य तु ॥ ध्वजदण्डो महाबाहो अथ वा वास्तुमानतः॥ २० ॥ मंजरीमानतो वापि तदर्धेनाथ वा विभो ॥ पताका वै शुभा कार्या ध्वजवंशावलंबिनी ॥ २१ ॥ देवागारस्य शिखरात्रिभागपरिमार्जनी ॥ सा प्रोक्ता दशधा वीर मानतोमानतस्तथा ॥ २२ ॥ अंकुरः पल्लवश्चैव स्कन्धः शाखा तथैव च ॥ पताका कदली वीर केतुर्लक्ष्म

---

[1] दण्डं कृत्वा तु यत्नतः—इ० पा० । [2] इन्द्रकेतुनः—इ० पा० । [3] रौद्रः—इ० पा० । [4] राजेन्द्रः—इ० पा० । [5] अष्टाधिकदशहस्त इत्यर्थः ।

जयस्तथा ॥ २३ ॥ ध्वजश्च दशमः प्रोक्तः सर्वदेवमयोऽव्ययः ॥ अंकुरो द्व्यङ्गुलः प्रोक्तः पल्लवश्चतुरंगुलः ॥ २४ ॥ स्कन्धः षडंगुलः प्रोक्तः शाखा चाष्टांगुला मता ॥ एकादशपताका तु कदली च चतुर्दश ॥ २५ ॥ केतुस्तु षोडशः प्रोक्तो लक्ष्माष्टादशमुच्यते ॥ जया विंशति वै प्रोक्ता एतावत्त्वंगुलानि तु ॥ २६ ॥ देवागारस्य कुम्भस्य प्रसन्ना सा प्रमार्जनी ॥ अंकुरेति पताका सा विज्ञेया यदुनन्दन ॥ २७ ॥ पल्लवेति द्वितीयस्य मार्जनी परिकीर्तिता ॥ त्रिभागमार्जनीस्कन्धः शाखा वै पञ्चमस्य तु ॥ २८ ॥ षष्ठस्योक्ता पताका तु कदली सप्तमस्य तु ॥ अष्टमस्य तथा केतुर्लक्ष्म च नवमस्य तु ॥ २९ ॥ ततस्तु दशमः प्रोक्तो जयंतो यदुनन्दन ॥ वृषस्थानावमार्गी तु ध्वजस्तु परिकीर्तितः ॥ ३० ॥ गजो मेषोऽथ महिषः कबन्धस्तु वृषस्तथा ॥ हरिणोऽथ नरश्चैव नरश्च नरसत्तम ॥३१॥ स्थानान्येतानि भूयोऽथ[1] प्रयुक्तस्य ध्वजस्य तु ॥ दिशाभागे तु पूर्वाच्चु क्रमेण परिकल्पयेत् ॥ ३२ ॥ एवं दशविधा प्रोक्ता पताका तत्त्वदर्शिभिः ॥ कर्तव्या सा यथापूर्वं तच्छृणु त्वं नराधिप ॥ ३३ ॥ शुक्लवस्त्रमयी चित्रा सवंटा सुमनोहरा ॥ नानाचामरसंपन्ना किंकिणीजालमंडिता ॥ ३४ ॥ ध्वजाग्रे चैव कर्तव्यो देवतालिंगसूचकः ॥ कांचनो वाथ रौप्यो वा मणिरत्नमयोऽपि वा ॥ ३५ ॥ रंगकैर्लिख्यते वापि तद्वाहनसमाकृतिः ॥ ध्वजदंडोऽत्र विन्यस्तः कर्तव्यो यदुनन्दन ॥३६॥ गरुत्मांस्तु ध्वजो विष्णोरीश्वरस्य ध्वजो वृषः ॥ ब्रह्मणः पंकजं कार्यं रवेर्धर्मः स्मृतो ध्वजः ॥ ३७ ॥ हंसो[2] जलाधिपस्योक्तः सोमस्य तु नरो ध्वजः ॥ बलदेवस्य कालस्तु कामस्य मकरध्वजः ॥ ३८ ॥ सिंहो ध्वजस्तु दुर्गायाः कीर्तितो यदुनन्दन ॥ गोधा चापि उमादेव्या रैवतस्य हयः स्मृतः ॥ ॥ ३९ ॥ कच्छपो वरुणस्योक्तो वातस्य हरिणो मतः ॥ पावकस्य तथा मेष आखुर्गणपतेर्मतः ॥ ४० ॥ ब्रह्मर्षीणां कुशः प्रोक्त इत्येषा ध्वजकल्पना ॥ यस्य यद्वाहनं प्रोक्तं तत्तस्य ध्वज उच्यते ॥ ४१ ॥ विष्णोर्ध्वजे तु सौवर्णं दंडं कुर्याद्विचक्षणः ॥ पताका चापि पीता स्याद्गरुडस्य समीपगा ॥ ४२ ॥ ईश्वरस्य ध्वजे दण्डो राजतो यदुनन्दनः ॥ पताका चापि शुक्ला स्याद्वृषभस्य समीपगा ॥ ४३ ॥ पितामहध्वजे दंडः स्मृतस्ताम्रमयो बुधैः ॥ पद्मवर्णा पताका स्यात्पङ्कजस्य समीपगा ॥ ४४ ॥ आदित्यस्य च सौवर्णो ध्वजे दण्डः प्रकीर्तितः ॥ पंचवर्णा पताका स्याद्धर्मस्याधोगता नृप ॥ ४५ ॥ किंकिणीजालसंपन्ना नानाबुद्बुदसन्निभा ॥ पुष्पमालोपसम्पन्ना नानावादिभिरावृता ॥ ४६ ॥ दण्ड इन्द्रध्वजस्योक्तः कांचनो यदुनन्दन ॥ पताका बहुवर्णा स्यात्कुञ्जरस्य समीपगा ॥ ४७ ॥ आयसश्चापि दण्डोक्तो यमचिह्नं विचक्षणैः ॥ पताका

---

[1] भूमौ तु–इ० पा० । [2] सिंहो जलाधिपस्य–इ०पा० ।

वर्णतः कृष्णा महिषस्य समीपगा ॥ ४८ ॥ जलाधिपध्वजो दण्डो राजतः परिकीर्तितः ॥ पताका सर्वतः श्वेता विचित्रा सा च कथ्यते ॥४९॥
ध्वजे चापि कुबेरस्य दण्डो मणिमयः स्मृतः ॥ पताका चापि रक्ता स्यान्नरपादसमीपगा ॥५०॥ बलदेवध्वजे दण्डो राजतो यदुनन्दन ॥ पताका
वर्णतः शुक्का तालस्याधोगता स्मृता ॥ ५१ ॥ कामध्वजे त्रिलोहः स्याद्दंडो यदुकुलोद्वह ॥ पताका रोहिणी तत्र मकरस्य समीपगा ॥ ५२ ॥
मायूरं कार्त्तिकेयस्य चिह्नं लोकेषु गीयते ॥ त्रिलोहदण्डमारूढं बहुरत्नविभूषितम् ॥ ५३ ॥ बहुवर्णकचित्रा तु पताका कथिता बुधैः ॥
हस्तिदंतभवं दण्डं कुर्याद्गणपतेर्नृप ॥ ५४ ॥ ताम्रदंडं समारूढं संशुद्धं संप्रतिष्ठितम् ॥ शुक्का पताका कर्तव्या सुप्रमाणा महीपते ॥५५॥ मातॄणां
चापि कर्तव्यो नैकरूपो ध्वजो बुधैः ॥ पताकाभिरनेकाभिबर्हुरत्नाभिरन्वितः ॥ ५६ ॥ रेवतस्यापि कर्तव्यो ध्वजो वाजी नराधिप ॥ रक्ता
पताका तत्रापि कर्तव्या यदुनंदन ॥ ५७ ॥ चामुंडामंदिरे कार्यः शिरोमालाकुलो ध्वजः ॥ नीला पताका कर्तव्या दंडो लोहमयस्तथा ॥५८॥
रीतीमयश्च मातॄणां रेवतस्य च कारयेत् ॥ गौर्या ध्वजस्ताम्रमयः पताका गोपसन्निभा ॥ ५९ ॥ स्वर्णदंडस्तु वीरस्य ध्वजो मेषसमन्वितः ॥
पताका बहु[1]रत्नाढ्या कर्तव्या यदुनंदन ॥ ६० ॥ अश्मसारमयो दंडो ध्वजो वातस्य उच्यते ॥ पताका कृष्णवर्णा तु हरिणस्य समीपगा ॥६१॥
भगवत्या ध्वजो दंडः सर्वरत्नमयः स्मृतः ॥ पताका तु त्रिवर्णा स्यात्सिंहस्याधोगता नृप ॥ ६२ ॥ एवंविधमिमं कृत्वा ध्वजं लक्षणलक्षितम् ॥
अधिवास्य ततो राजंस्तत आरोपयेद्बुधः ॥ ६३ ॥ ततः सर्वौषधीभिश्च स्नापयित्वा प्रयत्नतः ॥ समालभ्य च बध्नीयान्मध्ये प्रतिसरान्नृप॥६४॥
कल्पयित्वा शुभां वेदिं कलशैरुपशोभिताम् ॥तस्यां वेद्यां समारोप्य तां रात्रिमधिवासयेत् ॥ ६५ ॥ नानाकुसुमचित्रां च स्रजं तस्यानुलंबयेत्॥
समभ्यर्च्य प्रयत्नेन धूपमस्य निवेदयेत् ॥ ६६ ॥ बलिकर्म ततः कृत्वा कृशरापूपकादिभिः ॥ पलालापूपिकाभिश्च [2]दधिपायससूपकैः ॥ ६७ ॥
उद्दिश्य लोकपालेभ्यो बलिं दद्याच्च वायसैः ॥ ब्राह्मणान्स्वस्ति वाच्याथ कृत्वा पुण्याहमंगलम् ॥६८॥ वादित्रकृतनिर्घोषं ज[3]लं संस्कारसंयुतम्॥
नानाबुद्बुदसंपन्नं वेष्टितं नववाससा ॥ ६९ ॥ शुभे लग्ने दिने ऋक्षे ध्वजं चारोपयेद्बुधः ॥ विन्यस्य स्वर्णकलशं श्वभ्रराजं ध्वजस्य तु ॥ ७० ॥
एवमारोपयेद्यस्तु ध्वजं देवालयोपरि ॥ स श्रिया वर्धते नित्यं प्राप्नोति परमां गतिम् ॥ ७१ ॥ असुरा वासमिच्छंति ध्वजहीने सुरालये ॥ तस्मा
देवालयं प्राज्ञो ध्वजहीनं न कारयेत् ॥ ७२ ॥ मंत्रश्च स्थापने प्रोक्तो विधानज्ञैर्ध्वजस्य तु ॥ एह्येहि भगवन्देव देववाहन वै खग ॥ ७३ ॥

---

[1] बहुवर्णा च–इ० पा० । [2] दधिपायसपूर्वकैः–इ० पा० । [3] जनफूत्कारसंकुलम्–इ० पा० ।

श्रीकरः श्रीनिवासश्च जय जैत्रोपशोभित ॥ व्योमरूप महारूप धर्मात्मंस्त्वं च वै गतेः ॥७४॥ सान्निध्यं कुरु दंडेऽस्मिन्साक्षी च ध्रुवतां व्रज ॥ कुरु वृद्धिं सदा कर्तुः प्रासादस्यार्कवल्लभ ॥ ७५ ॥ ॐ एह्येहि भगवन्नीश्वरविनिर्मित उपरिचरवायुमार्गानुसारिञ्छ्रीनिवास रिपुध्वंस यक्षनिलय सर्वदेवप्रियं कुरु सान्निध्यं शांतिं स्वस्त्ययनं च मेभयं सर्वविघ्ना व्यपसरंतु ॥ ७६ ॥ मंत्रेणानेन राजेन्द्र श्वभ्रे दंडे निवेशयेत् ॥ पताकां पूर्वमंत्रेण स्थित्वा पूर्वमुखो नृप ॥ ७७ ॥ क्षिपेदूर्ध्वमथाकाशं प्रासादशिखराद्विभोः ॥ यजमानस्ततः पश्येत्पताकां यदुनंदन ॥ ७८ ॥ प्रासादपुरतो वीर पताकां पातयेद्यदि ॥ इंद्रलोकं तदा कर्ता विशेद्वै यदुनंदन ॥ ७९ ॥ आग्नेय्यामग्निलोकं तु याम्यां यमसदो भजेत् ॥ नैर्ऋत्यां नैर्ऋतं लोकं वारुण्यः वारुणं व्रजेत् ॥८०॥ यस्य देवस्य यद्वेश्म कृतं यदुकुलोद्वह ॥. तस्य लोकमवाप्नोति वृषस्थानगतो यदि ॥८१॥वायव्ये वायुमाप्नोति सौम्यायां सोममाप्नुयात् ॥ ऐशान्यामीशमाप्नोति कर्ता वै देववेश्मनः ॥८२॥ य एवं कारयेद्भक्त्या ध्वजस्यारोपणं रवेः ॥ स हि भुक्त्वा परान्भोगान्सूर्यलोके महीयते ॥ ८३ ॥ तेजसांबुजसंकाशः कांत्या चाम्बुजसन्निभः ॥ द्विजातितुल्यः प्रभया विक्रमेण च गोपतेः ॥ ८४ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सांबोपाख्याने ध्वजारोपणविधिवर्णनं नामाष्टात्रिंशदुत्तरशततमोऽध्यायः ॥१३८॥ छ॥

॥ सांब उवाच ॥ ॥ त्वत्प्रसादान्मया प्राप्तं रूपमेतत्पुरातनम् ॥ प्रत्यक्षदर्शनं चापि भास्करस्य महात्मनः ॥ १ ॥ सर्वमेतत्तु संप्राप्य पुनश्चिंताकुलं मनः ॥ देवस्य परिचर्यायाः पालनं कः करिष्यति ॥२॥ गुणयुक्तं द्विजं किंचित्समर्थं परिपालने ॥ ममैवानुग्रहाद्ब्रह्मन्द्विजं व्याख्यातुमर्हसि ॥ ३ ॥ एवमुक्तस्तु सांबेन नारदः प्रत्युवाच तम् ॥ न द्विजाः परिगृह्णंति देवस्य स्वीकृतं धनम् ॥ ४ ॥ विद्यते हि धनं ह्यत्र गुणश्चायं प्रतिग्रहः ॥ देवचर्यागतैर्द्रव्यैः क्रिया ब्राह्मी न विद्यते ॥५॥ अवज्ञया च कुर्वंति ये क्रियां लोभमोहिताः ॥ अपांक्तेया भवंतीह ते वै देवलका द्विजाः ॥६॥ देवस्वं ब्राह्मणस्वं च यो लोभादुपजीवति ॥ स पापात्मा नरो लोके गृध्रोच्छिष्टेन जीवति ॥ ततो न ब्राह्मणः कश्चिद्देवचर्यां करिष्यति ॥७॥ विधिज्ञं ज्ञानवंतं च परिचर्याक्षमं तथा ॥ देव एव तमाख्यातुं तस्मात्तं शरणं व्रज ॥८॥ अथ वा यदुशार्दूल उग्रसेनपुरोहितम् ॥ [1]गत्वा गौरमुखं पृच्छ स ते कामं विधास्यति ॥ ९ ॥ नारदेनैवमुक्तस्तु सांबो जांबवतीसुतः ॥ सुखासीनं गृहे वीर उग्रसेनपुरोहितम् ॥ १० ॥ कृतपूर्वाह्णिकं वीर विप्रं गौरमुखं नृप ॥ विनयेनोपसंगम्य सांबो वाक्यमथाब्रवीत् ॥ ११ ॥ मया भानोः प्रसादेन कारितं विपुलं गृहम् ॥ सपत्नीकं ससैन्यं

---

१ गत्वा ब्रूहि महाबाहो यद्यसौ कुरुतेऽनघ ॥ ततः स गत्वा सांबस्तु प्रणिपत्य महामुनिम्—इ० पा० ।

च पृथिव्यां सारवत्स्थितम् ॥ १२ ॥ सर्वं तस्मिन्मया दत्तं कृतं मूर्तेश्च मंडलम् ॥ तस्मादिष्ट्वा विशिष्टेभ्यो देयं दानं मनोगतम् ॥ १३ ॥ तत्सर्वं
मम संप्रीत्या गृहाण त्वं महामुने ॥ सांबवाक्यमिदं श्रुत्वा प्रत्युवाच महामुनिः ॥ १४ ॥ गौरमुख उवाच ॥ ॥ ब्रवीम्यहमशेषेण यथावदनु
पूर्वशः ॥ अहं विप्रो भवान्राजा स च देवपरिग्रहः ॥ अपरस्परमेवं तु ग्रहणं मे विरुध्यते ॥ १५ ॥ ब्रह्मविद्याप्रणीतानि स्वकर्माणि द्विजातयः ॥
कुर्वाणा न प्रहीयन्ते अन्यथा भिन्नवृत्तयः ॥ १६ ॥ क्षांतिरध्यापनं[1] जापः सत्यं च यदुनंदन ॥ एतानि विप्रकर्माणि न देवार्थपरिग्रहः[2] ॥ १७ ॥
यदि देवार्थदानं[3] स्यात्ततो देवलका द्विजाः ॥ देवद्रव्याभिलाषश्च ब्राह्मण्यं तु विमुंचति ॥ १८ ॥ देवद्वारे च यद्दानं ब्राह्मणाय प्रयच्छति ॥ द्वावेतौ
पापकर्तारावात्मदोषेण मानवौ ॥ १९ ॥ देवार्थदानं[4] वार्ष्णेय यद्गृहीत्वा च यो द्विजः ॥ श्राद्धे वा यदि वा सत्रे तज्जुहोति ददाति वा ॥ भिन्न
वृत्तो द्विजः पापो राक्षसः सोऽभिजायते ॥ २० ॥ द्विजो देवलको यत्र पंक्त्यां भुंक्ते महीपते ॥ अन्नान्युपस्पृशेन्नीचा सा पंक्तिः पापमाचरेत् ॥ २१ ॥
द्विजो देवलको यस्य संस्कारं संप्रयच्छति ॥ सोऽधोमुखान्पितॄन्त्सर्वानाक्रम्य विनिपातयेत् ॥ २२ ॥ आत्मानं पातयेद्यस्तु सोन्यानुद्धरते कथम् ॥
उद्धरिष्यति चात्मानमित्येषा कल्पनाधमा ॥ २३ ॥ यो हठाच्च[5] भयाच्चैव कुरुते रविवेश्मनः ॥ वृत्तिं विधत्ते विप्रत्वात्पतितस्स तु जायते ॥ २४ ॥
सप्रतिग्रहमंत्रेण द्विजोश्नाति परिग्रहम् ॥ देवप्रतिग्रहार्थेषु वेदवाक्यं न विद्यते ॥ २५ ॥ तस्माद्राजा न देवार्थं विप्रे दद्यात्कथंचन ॥ ब्रह्मसूत्रमहं
छित्त्वा गमिष्यामीति गम्यताम् ॥ २६ ॥ ॥ सांब उवाच ॥ ॥ अग्राह्यं चेद्द्विजातिभ्यः कस्मै देयमिदं मया ॥ श्रुतं वा दृष्टपूर्वं वा तन्मे
व्याख्यातुमर्हसि ॥ २७ ॥ ॥ गौरमुख उवाच ॥ ॥ मगाय संप्रयच्छ त्वं पुरमेतच्छुभं विभो ॥ तस्याधिकारो देवान्ने देवतानां च पूजने ॥ २८ ॥
॥ ॥ सांब उवाच ॥ ॥ कोयं मगेति ते प्रोक्तः क्व वासौ वसते विभो ॥ कस्य पुत्रो द्विजश्रेष्ठ किमाचारः किमाकृतिः ॥ २९ ॥ ॥ गौरमुख
उवाच ॥ ॥ योऽयं मगेति वै प्रोक्तो मगो दिव्यो द्विजोत्तमः ॥ निक्षुभायाः[6] सुतो वीर आदित्यात्मज उच्यते ॥ ३० ॥ ॥ सांब उवाच ॥ ॥
कथं स निक्षुभापुत्रः कथं वीरसुतस्तथा ॥ कथं चादित्यतनयो मगोऽसावुच्यतेनघ ॥ ३१ ॥ ॥ गौरमुख उवाच ॥ ॥ मानुषत्वं गता देवी
निक्षुभा किल यादव ॥ गता शापमवाप्येह भास्कराल्लोकपूजिता ॥ ३२ ॥ गोत्रं मिहिरमित्याहुस्तस्मै ब्राह्मण्यमुत्तमम् ॥ सुजिह्वा नाम धर्मात्मा
ऋषिपुत्रः पुरानघ ॥ ३३ ॥ तस्यात्मजा समुत्पन्ना निक्षुभा सा वरांगना ॥ रूपेणाप्रतिमा लोके हारलीला मता तु सा ॥ ३४ ॥ पितुर्नियोगात्सा

---

१ अध्ययनम्–इ० पा० । २ देवान्नपरिग्रहः–इ० पा० । ३ देवान्नदानम्–इ० पा० । ४ देवान्नदानम्–इ० पा० । ५ लोभाच्च—इ–पा० । ६ निक्षुभाग्निसुतः–इ० पा० ।

कन्या विहरेज्जातवेदसि ॥ ३५ ॥ विहरन्ती यथान्यायं समिद्धे पावके तथा ॥ अथ तां देवदेवेशो ह्यंशुमाली ददर्श ह ॥ ३६ ॥ रूपयौवनसं
पन्नां ततः कामवशं गतः ॥ चिंतयामास देवेशः कथं तां वै भजाम्यहम् ॥ ३७ ॥ अनयावहृतो योऽयं पावको देवपूजितः ॥ वनमाविश्य तन्वंगीं
भजेयं लोकपूजिताम् ॥ ३८ ॥ इति संचिंत्य देवेशः सहस्रांशुर्दिवस्पतिः ॥ विवेश पावकं वीर तत्पुत्रश्चाभवत्तदा ॥ ३९ ॥ ततो विलासलावण्य
रूपयौवनशालिनी ॥ समिद्धं लंघयित्वाग्निं जगामायतलोचना ॥ ४० ॥ क्रुद्धः स्वरूपमास्थाय दृष्ट्वा कन्यां स पीडितः ॥ करं करेण संगृह्य
ततस्तां हव्यवाहनः ॥:४१ ॥ उवाच यदुशार्दूल नोदितो भास्करेण तु ॥ वेदोक्तं विधिमुत्सृज्य यथाहं लंघितस्त्वया ॥ ४२ ॥ तस्मान्मत्तः स
मुत्पन्नो न च पुत्रो भविष्यति ॥ जरशब्द इति ख्यातो वंशकीर्तिविवर्धनः ॥ ४३ ॥ अग्निजात्या मगाः प्रोक्ताः सोमजात्या द्विजातयः ॥ भोज
कादित्यजात्या हि दिव्यास्ते परिकीर्तिताः॥४४॥तामेवमुक्त्वा भगवानादित्योऽन्तरतस्तदा॥अथोत्पन्नां प्रजां ज्ञात्वा ध्यानयोगेन वै ऋषिः॥४५॥
पतितः स्यान्महातेजा ऋग्जिह्वः सुमहामतिः ॥ शापमुद्यम्य तेजस्वी ऋग्जिह्वो वाक्यमब्रवीत् ॥ ४६ ॥ आत्मापराधात्कामिन्या यथा गर्भो
नलावृतः ॥ संभूतस्ते महाभागे अपूज्योऽयं भविष्यति ॥ ४७ ॥ पुत्रशोकाभिसंतप्ता बाला पर्याकुलेक्षणा ॥ चिंतयामास दुःखार्ता तमेकं ज्वलना
कृतिम् ॥ ४८ ॥ ततो देववरिष्ठस्य मम योनिसमुद्भवः ॥ अयं दत्तो महाशापः पूज्यतां कर्तुमर्हसि ॥ ४९ ॥ भवेत्पूज्यो हि मे पुत्रो देवेश्वर तथा
कुरु ॥ एवं चिंतयमानस्तु भगवानर्यमा किल ॥ ५० ॥ आग्नेयं रूपमाश्रित्य चेदं वचनमब्रवीत् ॥ स्निग्धो गंभीरनिर्घोषः शांतो ज्वरविवर्जितः॥
॥५१॥ ऋग्जिह्वः सुमहातेजा धर्मं चरति सुव्रत ॥ तेनोत्सृष्टं महाशापं नान्यथा कर्तुमुत्सहे ॥५२॥ किं तु कार्यगरीयस्त्वादात्मनो योग्यमुत्तमम्॥ तव
पुत्रं विधास्यामि चापूज्यं वेदपारगम् ॥५३॥ वंशश्च सुमहांस्तस्य निवसिष्यति भूतले ॥ ममांगानि महात्मानो वाशिष्ठा ब्रह्मवादिनः॥५४॥मद्गायना
मद्यजना मद्भक्ता मत्परायणाः ॥ मम शुश्रूषकाश्चैव मम च व्रतचारिणः ॥ ५५ ॥ त्वां च मां च यथान्यायं वेदं तत्त्वार्थदर्शिनः ॥ पूजयिष्यंति
निरताः सदा मद्भावभाविताः ॥ ५६ ॥ मत्कर्मणां मदंगानां मद्भावविनिवेशनात् ॥ विरजा मत्प्रसादेन मामेवैष्यंत्यसंशयम् ॥ ५७ ॥ जटाश्मश्रु
धरा नित्यं सदा मयि परायणाः ॥ पंचकालविधानज्ञा वीरकालस्य यज्विनः ॥ ५८ ॥ पूर्णैकदक्षिणे पाणौ वर्म वामेन धारयन् ॥ पतिदानेन
वदनं प्रच्छाद्य नियतः शुचिः ॥ ५९ ॥ प्राणं हि महतां कृत्वा ततो भुञ्जीत वाग्यतः ॥ अयमाज्ञाप्रसादाच्च व्याकुलेंद्रियचेतसा ॥ ६० ॥
विधिहीनं मंत्रहीनं ये वै यक्ष्यंति मामतः ॥ तेपि स्वर्गाच्च्युताः क्रांता रमंते सूर्यसन्निधौ ॥ ६१ ॥ एवंविधास्तव सुता भविष्यन्ति मही

तले ॥ मगवंशे महात्मानो वेदवेदांगपारगाः ॥ ६२ ॥ एवमाश्वास्य तां देवीं भास्करो वारितस्करः ॥ अंतर्दधे महातेजाः सा च हर्षमवाप ह ॥ ॥ ६३ ॥ एवमेते समुत्पन्ना भोजकाः कृष्णनंदन ॥ विष्णुभास्ते तथादित्या उत्पन्ना लोकपूजिताः ॥ ६४ ॥ तेषामेतत्पुरं देहि पर्याप्तास्ते प्रतिग्रहे ॥ त्वदीयस्यास्य मे वीर तथा भास्करपूजने ॥ ६५ ॥ तस्य गौरमुखस्येदं वाक्यं श्रुत्वा स यादवः ॥ सांबो जांबवतीपुत्रः प्रणम्य शिरसोक्तवान् ॥ ६६ ॥ क्व वसंते महात्मान एते भास्करपुत्रकाः ॥ भोजका द्विजशार्दूल येन तानानयाम्यहम् ॥ ६७ ॥ ॥ गौरमुख उवाच ॥ ॥ नाहं जाने महाबाहो वसंते यत्र वै मगाः ॥ जानीते तान्रविर्वीर तस्मात्तं शरणं व्रज ॥ ६८ ॥ ब्राह्मणेनैवमुक्तस्तु प्रणम्य शिरसा रविम् ॥ जगाद भास्करं सांबः कस्ते पूजां करिष्यति ॥ ६९ ॥ विज्ञप्तस्त्वेव सांबेन प्रतिमा तमुवाच ह ॥ न योग्याः परिचर्यायां जंबूद्वीपे ममानघ ॥ ७० ॥ मम पूजाकरं गत्वा शाकद्वीपादिहानय ॥ लवणोदात्परे पारे क्षीरोदेन समावृतः ॥ ७१ ॥ जंबूद्वीपात्परो यस्माच्छाकद्वीप इति स्मृतः ॥ तत्र पुण्या जनपदाश्चतुर्वर्णसमन्विताः ॥ ७२ ॥ मगाश्च मगगाश्चैव गानगा मंदगास्तथा ॥ मगा ब्राह्मणभूयिष्ठा मगगाः क्षत्रियाः स्मृताः ॥ ७३ ॥ वैश्यास्तु गानगा ज्ञेयाः शूद्रास्तेषां तु मंदगाः ॥ न तेषां संकरः कश्चिद्धर्माश्रयकृते क्वचित् ॥ ७४ ॥ धर्मस्यास्य विचारो वा ह्येकतः सुखिनः प्रजाः ॥ तेजसस्ते मदीयस्य निर्मिता विश्वकर्मणा ॥ ७५ ॥ तेभ्यो वेदास्तु चत्वारः सरहस्या मयोदिताः ॥ वेदोक्तैर्विविधैः स्तोत्रैः परैर्गुह्यैर्मया कृतैः ॥ ७६ ॥ ते च ध्यायन्ति मामेव यजंते मां च नित्यशः ॥ मन्मानसा मद्यजना मद्भक्ता मत्परायणाः ॥ ७७ ॥ मम शुश्रूषकाश्चैव मम च व्रतचारिणः ॥ अव्यंगधारिणश्चैव विधिदृष्टेन कर्मणा ॥ ७८ ॥ कुर्वंति ते सदा भद्रां मम पूजां ममानुगाः ॥ तथा देवाः सगंधर्वाः सिद्धाश्च सह चारणैः ॥ विहरंते रमंते च दृश्यमानाश्च तैः सह ॥७९॥ जंबूद्वीपे त्वहं विष्णुर्वेदवेदांगपूजितः ॥ शक्रोऽहं शाल्मलीद्वीपे क्रौंचद्वीपे ह्यहं [2]भंगः ॥ ८० ॥ प्लक्षद्वीपे त्वहं भानुः शाकद्वीपे दिवाकरः ॥ पुष्करे च स्मृतो ब्रह्मा ततश्चाहं महेश्वरः ॥ ८१ ॥ तान्मगान्मम पूजार्थं शाकद्वीपादिहानय ॥ आरुह्य गरुडं सांब शीघ्रं गत्वाविचारयन् ॥ ८२ ॥ तथेति गृह्य तामाज्ञां रवेर्जांबवती सुतः ॥ पुनर्द्वारवतीं गत्वा कान्त्यातीव समन्वितः ॥ ८३ ॥ आख्यातवान्पितुः सर्वं स्वकीयं देवदर्शनम् ॥ तस्माच्च गरुडं लब्ध्वा ययौ सांबोधिरुह्य तम् ॥ ८४ ॥ शाकद्वीपमनुप्राप्य संप्रहृष्टतनूरुहः ॥ तत्रापश्यद्यथोद्दिष्टान्सांबस्तेजस्विनो मगान् ॥ ८५ ॥ विवस्वंतं पूजयंतो धूपदीपादिभिः शुभैः ॥ सोऽभिवाद्य च तान्पूर्वं कृत्वा

---

[1] मानसाः—इ० पा० । [2] शिवः—इ० पा० ।

प्येषां प्रदक्षिणाम् ॥ ८६ ॥ पृष्ट्वा चानामयं तेषां प्रशंसासामपूर्वकम् ॥ यूयं हि पुण्यकर्माणो द्रष्टव्यार्थे शुभार्थिनः ॥ रता येऽर्कस्य पूजायां येषां
चैव वरप्रदः ॥ ८७ ॥ तनयं वित्त मां विष्णोः सांबं नाम्ना च विश्रुतम् ॥ चन्द्रभागातटे चापि मया सूर्यो निवेशितः ॥ ८८ ॥ तेनाहं प्रेषित
श्चात्र उत्तिष्ठध्वं व्रजामहे ॥ ते तमूचुस्ततः सांबमेवमेतन्न संशयः ॥ ८९ ॥ अस्माकमपि देवेन व्याख्यातं पूर्वमेव हि ॥ अष्टादश कुलानीह
मगानां वेदवादिनाम् ॥ यास्यंति ये त्वया सार्धं यथा देवेन भाषितम् ॥ ९० ॥ ततस्तानि दशाष्टौ च कुलानीह समंततः ॥ आरोप्य गरुडे
सांबस्त्वरितः पुनरभ्यगात् ॥९१॥ सोल्पेनैव तु कालेन प्राप्तो मित्रवनं ततः ॥ कृत्वाज्ञां तु रवेः सांबः कृत्स्नं त्वेवं न्यवेदयत् ॥९२॥ रविः शोभ
नमित्युक्त्वा प्रसन्नः सांबमब्रवीत् ॥ मम पूजाकरा ह्येते प्रजानां शांतिकारकाः ॥ ९३ ॥ मम पूजां करिष्यंति विधानोक्तां यदूत्तम ॥ तत्कृते न पुन
श्चिंता तव काचिद्भविष्यति ॥९४॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सांबोपाख्याने भोजकानयनं नामैकोनचत्वारिंशदु
त्तरशततमोऽध्यायः ॥ १३९ ॥ छ ॥ ॥ सुमंतुरुवाच ॥ ॥ एवं स आनयित्वा तु मगान्सांबो महीपते ॥ स महात्मा पुरा सांबश्चंद्रभागास
रित्तटे ॥ १ ॥ पुरं निवेशयामास स्थापयित्वा दिवाकरम् ॥ कृत्वा धनसमृद्धं तु भोजकानां समार्पयत् ॥ २ ॥ तत्पुरं सवितुः पुण्यं त्रिषु लोकेषु
विश्रुतम् ॥ सांबेन कारितं यस्मात्तस्मात्सांबपुरं स्मृतम् ॥ ३ ॥ तस्मिन्प्रतिष्ठितो देवः पुरमध्ये दिवाकरः ॥ सत्कृत्य स्थापिताः सर्वे आत्मनामां
किते पुरे ॥ ४ ॥ मगानां तु सदाचारो दृष्टाचारकुलोचितः ॥ देवशुश्रूषणं गीतं वेदप्रोक्तेन कर्मणा ॥ ५ ॥ कृतकृत्यस्तदा सांबो वरं लब्ध्वा पुन
र्युवा ॥ आदिदेवं सुरज्येष्ठमादित्यं प्रणिपत्य सः ॥ ६ ॥ अनंतरं मगान्सर्वान्प्रणिपत्याभिवाद्य च ॥ प्रस्थितो निर्मलः सांबः पुरीं द्वारवतीं
तदा ॥ ७ ॥ मगानां कारणार्थेन प्रार्थिता भोजवंशजाः ॥ वसुदेवस्य पौत्रेण गोत्रजेन महात्मना ॥ ८ ॥ कन्यादानं कृतं तेषां मगानां भोजको
त्तमैः ॥ सर्वास्ताः सहिताः कन्याः प्रवालमणिभूषिताः ॥ ९ ॥ अर्चयित्वा तु ताः सर्वाः प्रेषिताः सवितुर्गृहम् ॥ पुनर्गत्वा तु सांबेन पृष्टो देवो
दिवाकरः ॥ १० ॥ मगानां ज्ञानमाख्याहि वेदानव्यंगमेव च ॥ सांबस्य वचनं श्रुत्वा भास्करो वाक्यमब्रवीत् ॥११॥ पृच्छ त्वं नारदं गत्वा स ते
सर्वं वदिष्यति ॥ एवमुक्तोऽथ वै सांबो गतवान्नारदं प्रति ॥१२॥ गत्वा कृत्स्नमिदं सर्वं तस्मै तेन निवेदितम् ॥ स चाप्याह ततः सांबं न जाने ज्ञान
मुत्तमम् ॥ १३ ॥ भोजकानां यदुश्रेष्ठ ज्ञानं व्यासो महामुनिः ॥ तं गत्वा परिपृच्छ त्वं प्रणम्य शिरसा मुनिम् ॥ १४ ॥ कृष्णानुरोधात्ते सर्वं स

---

१ वेदसाध्यं हि–इ० पा०।

वक्ष्यति न संशयः ॥ नारदेनैवमुक्तस्तु सांबो जांबवतीसुतः ॥ १९ ॥ व्यासाश्रमं स गत्वा तु प्रणम्य शिरसा मुनिम् ॥ कृतांजलिपुटो भूत्वा इदं वचनमब्रवीत् ॥१६॥ शाकद्वीपं मया गत्वा आनीता मगपुंगवाः ॥ बाला यौवनसंपन्नाः संनिविष्टा मगोत्तमाः ॥१७॥ सत्कृत्य पूजयित्वा तु पुरं तेषां समर्पितम् ॥ संप्राप्य तु पुरं ते वै ज्येष्ठमध्यकनीयसः ॥ १८ ॥ भोजवंशसमुत्पन्नाः कन्यकाः समलंकृताः ॥ वरयित्वा कृतं तेषां विप्र प्रणयनं शुभम् ॥१९॥ अहो सभाग्याः श्लाघ्याश्च कृतपुण्याश्च ते सदा ॥ पूजायां ये रता भानोर्येषां चैव वरप्रदः ॥ २० ॥ पर्याप्तं सर्वमेतेषामिह चामुष्मिकं फलम् ॥ अनित्ये सति मानुष्ये देवपूजारता हि ये ॥ २१ ॥ किं तु चिन्तयतः सूर्यं चिंतयित्वा तु भोजकान् ॥ ज्ञानं प्रति तथा चैषां हृदये संशयो मम ॥ २२ ॥ कथं पूजाकरा ह्येते के मगाः के च भोजकाः ॥ ज्ञानं किं परमं तेषां ज्ञेयस्तेषां क एव तु ॥ २३ ॥ दिव्येति ते कथं प्रोक्ताः किमर्थं कूर्चधारणम् ॥ सौरव्रतं किमर्थं तु वाचकास्ते कथं स्मृताः ॥ २४ ॥ किमर्थं तेजसा वेदान्गायन्तश्चैव ते कथम् ॥ अथाहिकंचुकस्यांगं किं प्रमाणं च कस्य वै ॥ २५ ॥ कस्य वै का समाख्याता यदुत्पन्नं कथं स्मृतम् ॥ कथं देवांश्च गायंति यज्ञं कुर्वंति ते कथम् ॥२६॥ अग्निहोत्रं च किं तेषां पंच दोलाश्च काः स्मृताः ॥ एतत्सर्वं समाख्याहि भोजकानां विचेष्टितम् ॥ २७ ॥ सांबस्य वचनं श्रुत्वा कृष्णद्वैपायनो मुनिः ॥ कालीसुतो महातेजा उवाच परमं वचः ॥ २८ ॥ साधुसाधु यदुश्रेष्ठ साधु पृष्टोऽस्मि सुव्रत ॥ दुर्ज्ञेय चेष्टितं किंचिद्भोजकानां न संशयः ॥ २९ ॥ भास्करस्य प्रसादेन ममापि स्मृतिमागतम् ॥ यथाख्यातं वशिष्ठेन तथा ते वच्मि कृत्स्नशः ॥ ३० ॥ मगानां चरितं श्रेष्ठं शृणु त्वं कृष्णनंदन ॥ ज्ञानवेदिन एवैते कर्मयोगं समाश्रिताः ॥ ३१ ॥ श्रूयन्ते ऋषयः सर्वे मौनेन नियमस्थिताः ॥ भुंजते चापि मौनेन सर्वे वै परमर्षयः ॥३२॥ मुनिचर्याकृतस्तेपि शाकद्वीपनिवासिनः ॥ तस्मान्मौनेन भोक्तव्यमगुणत्वमनिच्छता ॥३३॥ वचः सूर्यसमाख्यातं कारणं च वरं तथा ॥अर्चायां ते च ते नित्यमर्चयन्तश्च ते स्मृताः ॥ ३४ ॥ भोजकन्यासुजातत्वाद्भोजकास्तेन ते स्मृताः ॥ ब्राह्मणानां यथा प्रोक्ता वेदाश्चत्वार एव तु ॥ ३५ ॥ ऋग्वेदोऽथ यजुर्वेदः सामवेदस्त्वथर्वणः ॥ ब्रह्मणोक्तास्तथा वेदा मगानामपि सुव्रत ॥३६॥ त एव विपरीतास्तु तेषां वेदाः प्रकीर्तिताः ॥ वेदो विश्वमदश्चैव विद्वद्विरसस्तथा ॥३७॥ वेदा ह्येते मगानां तु पुरोवाच प्रजापतिः ॥ मगा वेदमधीयन् ते वेदांगास्तेन ते स्मृताः ॥३८॥ शेषो न हि महाभागः सर्वसत्त्वसुखावहः ॥ ससूर्यरथमासाद्य रथिभिः सह वर्षति ॥ ३९ ॥ यस्तस्य तु पुनर्मोकं स रवेर्हि महानकः ॥ वंदितव्यो मगानां तु अस्त्रमंत्रेण नित्यशः ॥ ४० ॥ यथा स्रजो द्विजानां तु पूजाकाले प्रमीयते ॥ सर्वसंस्कारयज्ञेषु यथा दर्भा द्विजातिषु ॥४१॥ पवित्राः कीर्तितास्तेषां तथा धर्मो मगस्य

तु ॥ एभिर्जयन्ति भूयिष्ठं तस्मिन्द्वीपे मगाधिपाः ॥ ४२ ॥ विद्यावंतः कुलश्रेष्ठाः शौचाचारसमन्विताः ॥ [1]यज्ञावसक्ता भक्ताश्च जपंतो मंत्रमादितः ॥ ४३ ॥ प्रियास्तु यदुशार्दूल भोजका यदुनंदन ॥ अस्त्रमिव वै मंत्रो वेदस्य परिपव्यते ॥४४॥ सर्वेषां ब्राह्मणानां तु सावित्री परिकल्प्यते ॥ अस्माकं तु यदुश्रेष्ठ महाव्याहृतिपूर्विका ॥ ४५ ॥ अमोहकेनाथ विमानभुंजी मौनेन चैवापि यथा हि युक्तम् ॥ न चापि किंचित्स्मृतिकं स्पृशेच्च तच्चापि नात्रैव च संस्पृशेद्धि ॥४६॥ श्वसंत्यनिच्छंस्तु परिक्षिपेत्तु स्वाभीष्टसूर्यं तु नमेत्सदैव ॥ यथा यज्ञं हि मंत्रेण वेदप्रोक्तेन कर्मणा ॥४७॥ तत्त्वमन्यन्मगानां तु विधिमंत्रपुरस्कृतम्॥हविः संपद्यते यस्मात्तेन ते यज्विनः स्मृताः ॥४८॥ यथाग्निहोत्रं प्रथितं द्विजानां तथाध्वहोत्रं विहितं मगानाम्॥ अच्छं च नामेति तदध्वरस्य मुनेर्वचो नात्र विचारणास्ति ॥४९॥ पंचधूपाः प्रदातव्याः सिद्धिरस्येह सर्वदा ॥ दंडनायकवेले द्वे त्रिसंध्यं भास्करस्यतु ॥५०॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सांबोपाख्याने भोजकोत्पत्तिवर्णनं नाम चत्वारिंशदुत्तरशततमोऽध्यायः॥ १४०॥

॥ सांब उवाच ॥ भोजकानां यत्त्वयोक्तमव्यंगो देहशोधकः॥व्रतबंधस्त्वसौ प्रोक्तस्तेषां जातिश्च का स्मृता॥१॥ ॥व्यास उवाच ॥ ॥ ते पृष्टा भवता सर्वे भोजकानां कुमारकाः ॥ किमाख्यातं ततस्तैस्तु तदेवाचक्ष्व कृत्स्नशः ॥२॥ ॥ सांब उवाच ॥ ॥ संनिवेशा मया प्रोक्ता भोजकानां समंततः॥ ममैव ब्रूत तत्त्वं तद्वर्णः कोऽत्र कथं स्थितः ॥ ३ ॥ ततस्तु भगवान्प्राह वाक्यं वाक्यविशारदः ॥ ये त्वयोक्ताः श्रुताः सांब भोजकानां कुमारकाः ॥ ४ ॥ ममैवैते मगा ज्ञेया अष्टौ शूद्रा मदंगजाः ॥ एतद्बुद्ध्वा तु वचनं प्रणम्य शिरसा रविम् ॥५॥ दत्ता भोजकुलोत्पन्ना दशभ्यो दशकन्यकाः॥ ततस्तु मंदकेभ्योपि दत्ताश्चाष्टौ हि कन्यकाः ॥ ६ ॥ ततो निवेशितं तेषां मया सांब पुरं स्मर॥दासकन्यास्तु याश्चाष्टौ भोजकन्याश्च या दश॥ ॥ ७ ॥ एतास्तेषां कुमाराणां ज्ञेयास्ता दश चाष्ट च ॥ तत्र ते भोजकन्यासु द्विजैरुत्पादिताः सुताः ॥ ८ ॥ भोजकास्तान्गणान्प्राहुर्ब्राह्मणान्दिव्यसंज्ञितान् ॥ दासकन्यासु ये जाता मंदगैरन्त्यसंज्ञितैः ॥ ९ ॥ मंदगा नाम ते ज्ञेयाः सवितुः परिचारकाः ॥ ते च विप्रपुरे तस्मिन्पुत्रदारशुभैर्वृताः ॥ १० ॥ स्वधर्मैर्यष्टुमारब्धैः शाकद्वीपेर्चितो रविः ॥ नानाविधैर्वैदिकैस्तु मंत्रैर्मुनिवरोत्तमाः ॥ ११ ॥ अव्यंगधारिणो मर्त्याः पूजयंते दिवस्पतिम् ॥ दृष्ट्वा व्यंगं तु वै तेषां कौतूहलसमन्वितः ॥ १२ ॥ सांबः प्राह नमस्कृत्य भूयः सत्यवतीसुतम् ॥ कथं वरोऽयमव्यंगः कथितो मुनिसत्तम ॥ १३ ॥ कुत एष समुत्पन्नः कस्माच्च स शुचिः स्मृतः ॥ बंधनीयः कदा चायं किमर्थं चैव धार्यते ॥ किं प्रमाणं च भगवन्व्यंग

---

[1] भक्ता मंत्रं जपंते च आदितः पुरुषोत्तम–इ० पा० ।

श्चायं किमुच्युते ॥ १४ ॥ सुमंतुरुवाच ॥ ॥ श्रुत्वैवं वचनं व्यासो जांबवत्याः सुतस्य च ॥१५॥ उवाच कुरुशार्दूल साम्बं कालीसुतः स तु ॥
॥ ॥ व्यास उवाच ॥ · ॥ एतच्च मे यथोक्तस्त्वं जातिरेषां न संशयः ॥१६॥ अव्यंगस्यापि ते वच्मि लक्षणं गदतः शृणु ॥१७॥ इति श्रीभविष्ये
महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सांबोपाख्याने भोजकजातिवर्णनं नामैकचत्वारिंशदुत्तरशततमोऽध्यायः ॥ १४१ ॥छ॥ ॥व्यास उवाच ॥ ॥
देवता ऋषयो नागा गंधर्वाप्सरसां गणः ॥ यक्षरक्षांसि वै भानौ निवसंति ऋतुक्रमात् ॥ १ ॥ तत्र तु वासुकिर्ह्यब्दमुद्यत्सूर्यरथं जवात् ॥ स्व
स्थानमाजगामाशु नमस्कृत्य दिवाकरम् ॥ २ ॥ अव्यंगमेव सूर्याय प्रीत्यर्थं वै समर्पयत् ॥ गांगेयभूषितं दिव्यं नातिरक्तसितं शुभम् ॥ ३ ॥
बबंध तं च तत्प्रीत्यै मध्यभागे तमात्मनः ॥ नागराजांगसंभूतो धृतो यस्माच्च भानुना ॥ ४ ॥ तत्तस्माद्धार्यते सूर्यप्रीत्यै तद्भक्तिमिच्छता ॥ विधा
नेन च तत्त्वेन शुचिर्भवति भोजकः ॥ ५ ॥ नित्यं च धारणात्तस्य भवेत्प्रीतो दिवाकरः ॥ न धारयंति ये त्वेवं भोजकाः पूजका रवेः ॥ ६ ॥
सौरहीना न ते याज्या उच्छिष्टा नात्र संशयः ॥ स्मृत्याचारे ते हि भग्ना रविं नार्हंति पूजितुम् ॥ ७ ॥ पूजयंतो रविं ते हि नरकं यांति रौरवम्॥
न वै हसेन्न उत्तिष्ठेद्यावदर्चां लभंति ते ॥ ८ ॥ इत्थं ज्ञात्वा न संदेहो ह्यव्यंगेन विना रविः ॥ नागराजस्य संस्पृष्टो ह्यारसुस्तेन संस्मृतः ॥ ९ ॥
एकवर्णः स कर्तव्यः कार्यसिद्धिकरस्तथा ॥ प्रमाणेनांगुलानां तु शताद्धि शतमुत्तरम् ॥ १० ॥ उत्कृष्टोयं प्रमाणेन मध्यमो विंशदुत्तरः ॥ शतम
ष्टोत्तरं ह्रस्वो न तु ह्रस्वतरस्ततः ॥११॥ तदाकृतिः कृतश्चैष निर्मितो विश्वकर्मणा ॥ मध्यमे भोजकानां तु परः शत उदाहृतः ॥१२॥ संस्कृ
तोऽपि विना तेन शुचिर्नैव भवत्युत॥तेनास्य धारणाद्वीर शुचिरेव तदा भवेत् ॥१३॥ हविर्होमादिकाः सर्वा भवंत्यस्य क्रियाः शुभाः ॥ अव्यंगः
पतितांगश्च अव्यंगोऽथ महीपते ॥ १४ ॥ एष सारश्च सा रम्या वै ज्ञेया जयनामभिः ॥ अहेरंगात्समुत्पन्नो ह्यव्यंगस्तु ततः स्मृतः ॥ १५ ॥
यस्मादस्मादहेरंगमव्यंगस्तेन चोच्यते ॥ अर्हेति पूजायां धातोः प्रत्ययो ण्वुलततः स्मृतः ॥ १६ ॥ पूजितश्च पवित्रश्च यस्मात्तेनार्हकः स्मृतः ॥
सारसार्तः स्मृतं रूपं प्रधानं सार उच्यते ॥ १७ ॥ षण भक्तौ स्मृतो धातुस्तस्मात्सारसनः स्मृतः ॥ यस्मादर्चितमेवं तु सुवर्णमणिमौक्तिकैः
॥ १८ ॥ स ज्ञेयः पतितांगस्तु नित्ययज्ञैरुपाहृतः ॥ इत्येते कथिता वीर अव्यंगा व्यंगभोजकाः ॥ १९ ॥ ऋद्धिवृद्धिकरो नित्यं कायशुद्धिकर
स्तथा ॥ सर्ववेदमयश्चायं सर्वदेवमयस्तथा ॥ २० ॥ सर्वभूतमयः सांब सर्वलोकमयस्तथा ॥ मध्येऽस्य संस्थितो ब्रह्मा मूले विष्णुर्महामते ॥२१॥
शशांकमौलिरन्त्ये तु संस्थितो यदुनंदन॥ऋग्वेदोऽस्य स्थितो मूले यजुर्वेदोऽस्य मध्यगः॥२२॥अग्रे स्थितः सामवेदो ग्रंथिरांगिरसोनघ॥पृथिवी

मूलमाश्रित्य स्तिथा च यदुसत्तम॥२३॥मूलाशनास्त्वपः सांब मध्ये देवो विभावसुः॥तासामनंतरं वात आकाशोऽग्रे समास्थितः ॥२४॥ मूले स्थि
तस्तु भूर्लोको भुवर्लोकस्तु मध्यगः ॥ स्वर्लोकश्चाग्रमाश्रित्य स्थितो व्यंगस्य यावता ॥२५॥ एवं देवमयः सांब एवं लोकमयस्तथा॥धारणीयो
महान्भक्त्या पूजकैः प्रीतये रवेः ॥२६॥ पूजयंति रविं ये वै विनानेन यदूत्तम ॥ पूजाफलं न तेषां स्यान्नरकं च व्रजंति हि ॥२७॥ तथा तेषां भवे
न्नित्यमव्यङ्गो भोजकः सदा ॥ अन्यकाले यदुश्रेष्ठ इत्येतत्कथितं तव ॥२८॥ बन्धने कारणं वीर भूषणानि च सुव्रत ॥२९॥ ॥ इति श्रीभविष्ये
महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सांबोपाख्याने व्यंगोत्पत्तिर्नाम द्विचत्वारिंशदुत्तरशततमोऽध्यायः ॥ १४२ ॥ ॥छ॥ ॥ सुमन्तुरुवाच ॥ ॥
श्रुत्वैवमेव सांबेन व्यासात्सत्यवतीसुतात् ॥ अव्यंगस्य च उत्पात्तिं पुनरागान्महामतिः ॥१॥ अथागत्य महातेजाः सांबो गत्वाश्रमं पुनः ॥ २ ॥
नारदस्य महाबाहोर्नारदं वाक्यमब्रवीत् ॥ कथमुत्क्षिप्य वै धूपं भोजकैः सवितुर्मुने ॥ ३ ॥ स्नानमाचमनं चैवमर्घ्यदानं महात्मने ॥ सांबस्य
वचनं श्रुत्वा नारदो मुनिसत्तमः ॥ ४ ॥ उवाच कुरुशार्दूल सांबं जांबवतीसुतम् ॥ हंत ते कथयिष्यामि रवेर्धूपविधिक्रमम् ॥ ५ ॥ स्नानमा
चमनं चैव स्वर्णदानं तथैव च ॥ आचांतस्त्रिस्ततः स्नात्वा वाससी निर्मले शुभे ॥ ६ ॥ अनार्द्रे संवसीतैव पवित्रे परिधाय च ॥ उदङ्मुखः
प्राङ्मुखो वाप्याचामेच्च प्रयत्नतः ॥ ७ ॥ जले जलस्थो नाचामेज्जलादुत्तीर्य यत्नतः ॥ अप्सु[1] सूर्यस्तथाग्निश्च माता देवी सरस्वती ॥ ८ ॥
तस्मादुत्तीर्य चाचामेन्नाचामेत्तु जलाशये ॥ उपविश्य शुचौ देशे प्रयतः प्रागुदङ्मुखः ॥ ९ ॥ पादौ प्रक्षाल्य हस्तौ च अन्तर्जानुस्तथाच
मेत् ॥ प्रसन्नास्त्रिः पिबेत्त्वापः प्रयतः सुसमाहितः ॥ १० ॥ संमार्जनं तु द्विः कुर्यात्त्रिभिरभ्युक्षणं पुनः ॥ मूर्धानं खानि चात्मानमुपस्पृश्यानु
पूर्वशः ॥ ११ ॥ आचांतोऽर्कं नमस्कृत्य शौचेषु शुचितामियात् ॥ क्रियां यः कुरुते मोहादनाचम्येह नास्तिकः ॥ १२ ॥ भवंतीह क्रियाः सर्वा
वृथा तस्य न संशयः ॥ शुचिकामा हि वै देवा वेदैरेवमुदाहृताः ॥ १३ ॥ इनोपासाकृतश्चैव सर्वे देवाः प्रयत्नतः ॥ शौचमेव प्रशंसंति
शौचांगैर्हि विधीयते ॥ १४ ॥ आचान्तो मौनमास्थाय देवागारं ततो व्रजेत् ॥ श्वासरोधनिमित्तं तु प्राणमाच्छाद्य वाससा ॥ १५ ॥ शिरः
प्रावृत्य यत्नेन केशोदकनिवृत्तये ॥ ततः पूजां रवेः कुर्यात्पुष्पैर्नानाविधैः शुभैः ॥ १६ ॥ गायत्रीं सशिरस्कां च यजमानः प्रयत्नतः ॥ धूपं
ततोग्नये दद्यात्प्रथमं गुग्गुलाहुतिम् ॥ १७ ॥ पुष्पांजलिं ततो गृह्य तच्छिखायां प्रयत्नतः ॥ रवेर्मूर्धनि तं दद्याद्देवमन्त्रमुदाहरन् ॥ १८॥ ॐ व्रतेन

---

[1] जलमध्ये आचमननिषेधे हेतुमाह–'अप्सु'–इत्यादि ।

यद्व्रतिनो वर्जयंति देवा मनुष्याः पितरश्च सर्वे ॥ तस्यादित्यं प्रसरं च मनामहे यस्तेजसा प्रथमं नाविभाति ॥ १९ ॥ धूपवेलाः स्मृताः पञ्च धूपेष्वेव तु पञ्चसु ॥ हवनाद्याः क्रियाः पञ्च रक्षिष्येहं तथा पुनः ॥ २० ॥ दंडनायकवेला तु प्रत्यूक्षे ऋक्षदर्शनात् ॥ नाज्ञावेला प्रदोषस्तु तत्त्व कार्यं विजानता ॥ २१ ॥ त्रिकालं तु रवेः पूजा कर्तव्या सूर्यदर्शनात् ॥ अर्धोदितस्तु पूर्वाह्णे ततोर्द्धस्तु रविर्विभुः ॥ २२ ॥ हेलयेति च पूर्वाह्णे मध्याह्ने ज्वलनाय च ॥ तथैव मण्डले देयं नीचाह्ने ज्वलनाय च ॥ २३ ॥ चन्दनोदकमिश्राणि गन्धोदकयुतानि च ॥ पद्मानि करवीराणि तथा रक्तोत्पलानि च ॥ २४ ॥ कुसुमोदकमिश्राणि कुरुंटकुसुमं तथा ॥ गन्धादीनि च दिव्यानि कृत्वा वै ताम्रभाजने ॥ २५ ॥ धूपं दत्त्वाग्रये वीर प्रयत्नाद्गुग्गुलाहुतिम् ॥ अर्घ्यपात्रं तदा गृह्य कुर्यादावाहनं रवेः ॥२६॥ एहि सूर्य सहस्रांशो तेजोराशे जगत्पते॥अनुकंपय मां देव गृहाणार्घ्यं दिवाकर ॥ २७ ॥ अनेनावाहानं कृत्वा जानुभ्यामवनीं गतः ॥ रवेर्निवेदयेदर्घ्यमादित्यहृदये गतः ॥ २८ ॥ ॐ [1]नमोभगवते आदित्याय विश्वाय खेशाय ब्रह्मणे लोककर्तृणे ॥ ईशानाय पुराणाय सहस्राक्षाय ते नमः ॥ २९ ॥ सोमाय ऋग्यजुरथर्वाय ॥ ॐ भूर्भुवः स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं ब्रह्मणे मुण्डे मध्ये पुरतः ॥ आदित्याय नमः ॥ ३० ॥ ॥ नारद उवाच ॥ ॥ सावित्र्याश्च परे तन्त्रे त्रैलोक्यत्राण कारिणे ॥ परितः परिगृह्याथ धूपभाजनमुत्क्षिपेत् ॥ ३१ ॥ निवेदयेत्ततो धूपं वाचमेतामुदीरयेत् ॥ त्वमेक एव रुद्राणां वसूनां च पुरातनः ॥ ३२ ॥ देवानां गीर्भिरभितः संस्तुतः शाश्वतो दिवि ॥ पूर्वाह्णे च तथा तेन मध्याह्ने चापरेण तु ॥ ३३ ॥ ॐ नमो भगवते ज्ञानात्मने त्वां च ॥ विष्णोस्तत्परमं पदं सदा पश्यंति सूरयः ॥ ३४ ॥ दिवाकरस्तु सायाह्ने मन्त्रेणार्घ्यं निवेदयेत् ॥ ॐ नमो वरुणाय शंभवे ॥ ३५ ॥ ॐ अकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च ॥ हिरण्ययेन सविता रथेनादेवो याति भुवनानि पश्यन् ॥ ३६ ॥ अनेन विधिना दत्त्वा धूपं सूर्याय भोजकः॥ उत्क्षिपेच्चैव धूपेन विशेद्गर्भगृहं ततः ॥ ३७ ॥ ततः प्रविश्य धूपं तु प्रतिमायै निवेदयेत् ॥ मन्त्रेण मिहिरायेति निक्षुभायेति नित्यशः ॥ ३८ ॥ ततो राज्ञ्यै नमश्चेति निक्षुभायै ततो नमः ॥ दंडनायकसंज्ञाय पिङ्गलाय च वै नमः ॥ ३९ ॥ तथा राज्ञाय स्रौषाय तथेशाय गरुत्मते ॥ ततः प्रदक्षिणं कुर्वन्दिग्देवेभ्यो निवेदयेत् ॥ ४० ॥ दिंडिने तु ततो दद्याद्धेमंताय यदूत्तम ॥ महेश्वराय दद्यात्तु तथा व्योमाय यादव ॥ ४१ ॥ (विश्वेभ्यो देवेभ्यो नमः ॥ रुद्रेभ्यो नमः ॥) ॐ ब्रह्मणे मुण्डपतये आदित्याय पुरुषेश्वराय सूर्याय नमोनमः ॥ ४२ ॥

---

[1] ॐनमो भगवते आदित्याय विश्वाय खेशाय ब्राह्मणे लोककर्त्तृणे ईशानाय पुराणाय सहस्राक्षाय ते नमः ॐ सोमाय ऋग्यजुरथर्वाय ।

ॐ अनेककांतये नत्वा शेषाय वासुकितक्षककर्कोटकाय पद्मशंखकुलिकेभ्यो नागराजेभ्यो नमः ॥ ४३ ॥ तलसुतलपातालातलवितलरसातलादिवासिभ्यो दैत्यदानवपिशाचेभ्यो नमः ॥ ततः प्रदक्षिणं कुर्यान्मातृकाभ्यो नमोनमः ॥ (ॐ ग्रहेभ्यो नमः ॥ ४४ ॥ ॐ दण्डनायकाय नमः ॥ ॐ मार्तंडाय नमः ॥ ॐ विनायकाय नमः ॥ ४५ ॥) एवमुद्दिश्य नामानि धूपं दत्त्वा वरानन ॥ उत्क्षिप्तो यत्र वै धूपो मुक्त्वा तत्रैव तं पुनः ॥ ४६ ॥ सूर्यगुप्तैरभिष्टूय एवं विज्ञाय ते ततः ॥ अर्चितस्त्वं यथा शक्त्या मया भक्त्या विभावसो ॥ ऐहिकामुष्मिकीं नाथ कार्यसिद्धिं ददस्व मे ॥ ४७ ॥ एवं त्रिषवणं स्नात्वा योऽर्चयेत्प्रणतो रविम् ॥ विधिना तु यथोक्तेन सोऽश्वमेधफलं लभेत् ॥ ४८ ॥ यश्चैवं कुरुते नित्यं यथोक्तं धूपविस्तरम् ॥ स पुत्रवानरोगी च मृतः संलीयते रवौ ॥ ४९ ॥ विधिना तु यथोक्तेन क्रियमाणानि यत्नतः ॥ सर्वकार्याणि सिद्ध्यन्ति सफलानि भवंति च ॥ ५० ॥ पुष्पं श्रेष्ठं यदा न स्यात्पत्राणि समुपाहरेत् ॥ पत्रं न स्यात्ततो धूपं धूपो न स्यात्ततो जलम् ॥ ५१ ॥ सर्वं न स्याद्यदा चैव प्रणिपातेन पूजयेत् ॥ अशक्तः प्रणिपातस्य मनसा पूजयेद्रविम् ॥ ५२ ॥ असम्भवे तु द्रव्याणां विधिरेष प्रकीर्तितः ॥ द्रव्याणां संभवे चैव सर्वमेवोपहारयेत् ॥ ५३ ॥ मन्त्रैः कर्मयुतो यस्तु मित्रे धूपं निवेदयेत् ॥ उच्चारणाच्च वै तेषां धूपप्रीतो भवेद्रविः ॥ ५४ ॥ शिरो नासामुखं चैव भृशमावृत्य यत्नतः ॥ पूजयेद्भास्करं वीर शिथिलं तु न कारयेत् ॥ ५५ ॥ नलिनेन तु राजेंद्र नरो याति दिवाकरम् ॥ तस्माद्युक्तं सदा कार्यं पूज्यते च दिवाकरः ॥ ५६ ॥ तेऽश्वमेधफलं प्राप्य सूर्यलोकं व्रजंति हि ॥ धूपेन पूज्यमानं तु नराः पश्यंति यादव ॥ ५७ ॥ यांति ते परमं स्थानं यत्र पश्यंति सूरयः ॥ क्रियमाणं तथार्कं च भक्त्या पश्यंति ये नराः ॥ सर्वान्कामानिह प्राप्य ते यांति परमं पदम् ॥ ५८ ॥

इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सांबोपाख्याने धूपादिविविधविधिवर्णनं नाम त्रिचत्वारिंशदुत्तरशततमोऽध्यायः ॥ १४३ ॥

॥ ॥ सुमंतुरुवाच ॥ ॥ अथाजगाम भगवान्व्यासो द्वारवतीं पुरीम् ॥ द्रष्टुं नारायणं देवं शंखचक्रगदाधरम् ॥ १ ॥ तमागतमृषिं दृष्ट्वा वासुदेवो विशांपते ॥ अभ्युत्थाय महातेजाः पूजयामास भारत ॥ २ ॥ स्वयमेवासनं दत्त्वा पाद्यमर्घ्यं तथैव च ॥ पप्रच्छ प्रयतो भूत्वा व्यासं सत्यवतीसुतम् ॥ ३ ॥ य एते भोजका विप्रा आनीता मत्सुतेन वै ॥ शाकद्वीपमितो गत्वा ज्ञानिनो मोक्षगामिनः ॥ ४ ॥ तान्दृष्ट्वा रूपतो विप्र प्रवेशात्कर्मतस्तथा ॥ कौतूहलं समुत्पन्नं हर्षश्च परमो मम ॥ ५ ॥ कथमेते क्षणमपि तिष्ठंते पृथिवीतले ॥ येषां रविः सदा पूज्यस्तेषां मुक्तिः सदा

---

१ विवृतमिति पाठः ।

वसेत् ॥ ६ ॥ नागत्वा भोजकत्वं हि मोक्षमाप्नोति कश्चन ॥ इदं मे मनसो ब्रह्मन्सदा संप्रतिभाति वै ॥ ७ ॥ ॥ व्यास उवाच ॥ ॥ एवमेव
यथात्थ त्वं शंखचक्रगदाधर ॥ धन्या एते महात्मानो भोजका नात्र संशयः ॥ ८ ॥ ये पूजयंति सततं भानुमन्तं दिवाकरम् ॥ ज्ञानिनः कर्म
निष्ठाश्च सदा मोक्षगतिं गताः ॥ ९ ॥ यजंते सततं भानुं बलिपुष्पफलैस्तथा ॥ अन्नेनौषधिभिश्चैव आज्यहोमैश्च कृत्स्नशः ॥ १० ॥ होमं च
शाश्वतं कृत्वा परं होमं ततः श्रिताः ॥ परहोमस्य करणात्पूतात्मानो ह्यकल्मषाः ॥ ११ ॥ विशंति परमां दिव्यां भास्करीं तैजसीं कलाम् ॥
कर्मणः साधने चैका तत्र चाग्नौ प्रतिष्ठिता ॥ १२ ॥ वायुमार्गस्थिता व्योम्नि द्वितीयांतःप्रकाशिका ॥ ततः परं तृतीया तु तत्स्मृतं सूर्यमण्डले ॥
॥ १३ ॥ मंडलं तच्च सवितुर्दिव्यं ह्यजरमव्ययम् ॥ तस्याऽसौ पुरुषो मध्ये योऽसौ सदसदात्मकः ॥ १४ ॥ क्षराक्षरस्तु विज्ञेयो महासूर्यस्तथैव
च ॥ निष्कलः सकलश्चापि द्वौ च तस्य प्रकल्पितौ ॥ १५ ॥ अक्षरः सकलश्चैव सर्वभूतव्यवस्थितः ॥ सतत्त्वः सकलः प्रोक्तस्तत्त्वहीनस्तु
निष्कलः ॥ १६ ॥ तृणगुल्मलतावृक्षवृकसिंहद्विजाधिपान् ॥ सुरसिद्धमनुष्यांश्च स्थलजाञ्जलजान्हरेत् ॥ १७ ॥ व्यवस्थितः स सर्वत्र सर्वेषामंत
रात्मनि ॥ यदा कल्पात्मकश्चैव द्वितीयां तनुमाश्रितः ॥१८॥ निष्कलस्तु सदा ज्ञेयः संस्थितस्तैजसीं कलाम्॥ हिमं घर्मं च वर्षं च त्रैलोक्ये कुरुते
सदा ॥ १९ ॥ द्वितीया या तनुस्तस्य अक्षरं तत्परं पदम् ॥ देवयानं तु पंथानं कर्मयोगेन संस्थिता ॥ २० ॥ आदित्यसिद्धांतरिताः सांख्ययोग
विदश्च ये ॥ तेऽभिगच्छंति तत्स्थानं स मोक्षः परिकीर्तितः ॥ २१ ॥ निर्द्वन्द्वो निर्गमश्चैव तत्र गत्वा न शोचति ॥ वेदेषु ब्रह्म वदंति ध्यायंते तत्त्व
वेदिनः ॥ २२ ॥ ॐकारं तत्त्वतश्चापि ध्यायंते पुरुषोत्तम ॥ त्र्यक्षरं च तमोंकारं सार्धमात्रात्रये स्थितम् ॥ २३ ॥ वदंति चार्धमात्रस्थं मकारं
व्यंजनात्मकम् ॥ ध्यायंति ये मकारीयं ज्ञानं ते हि सदात्मकम् ॥ २४ ॥ मकारो भगवान्देवो भास्करः परिकीर्तितः ॥ मकारध्यानयोगाच्च मगा
ह्येते प्रकीर्तिताः ॥ २५ ॥ धूपमाल्यैर्यतश्चापि उपहारैस्तथैव च ॥ भोजयंति सहस्रांशुं तेन ते भोजकाः स्मृताः ॥ २६ ॥ इति श्रीभविष्ये
महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सांबोपाख्याने भोजकस्योत्पत्तिवर्णनं नाम चतुश्चत्वारिंशदुत्तरशततमोऽध्यायः ॥ १४४ ॥ ॥ छ ॥ ॥
॥ ॥ वासुदेव उवाच ॥ ॥ ज्ञानोपलब्धिं विप्रेंद्र भोजकानां महामुने ॥ ब्रूहि तत्त्वं द्विजश्रेष्ठ कौतुकं परमं मम ॥ १ ॥ ॥ व्यास उवाच ॥ ॥
इमां ज्ञानोपलब्धिं तु निबोध गदतो मम ॥ अस्थिस्थूलं स्नायुयुतं मांसशोणितलेपनम् ॥ चर्मावनद्धं दुर्गंधि पूर्णं मूत्रपुरीषयोः ॥ २ ॥ जराशोक
समाविष्टं रोगायतनमातुरम् ॥ रजस्वलमनित्यं च भूतावासमिमं त्यजेत् ॥ ३ ॥ कपालं वृक्षमूलानि कुचैलमसहायता ॥ समता सर्व भूतेषु एवं

मुक्तस्य लक्षणम् ॥ ४ ॥ तिले तैलं गवि क्षीरं काष्ठे पावकसंततिः ॥ उपायं चिंतयेदस्य धिया धीरः समाहितः ॥ ५ ॥ प्रमाथि च प्रयत्नेन मनः
संयम्य चंचलम् ॥ बुद्धींद्रियाणि संयम्य शकुनानिव पंजरे ॥ ६ ॥ इंद्रियैर्नियतैर्देही धाराभिरिव तृप्यते ॥ सततममृतस्यैव जनार्दन महामते ॥
॥ ७ ॥ प्राणायामैर्दहेद्दोषान्धारणाभिश्च[1] किल्बिषम् ॥ प्रत्याहारेण संसर्गान्ध्यानेनानीश्वरान्गुणान् ॥ ८ ॥ ध्यायमानस्य दह्यंते चांते दोषा यथा
ग्निना ॥ तथेंद्रियकृता दोषा दह्यंते प्राणनिग्रहात् ॥ ९ ॥ चित्तं चित्तेन संशोध्य भावं भावेन शोधयेत् ॥ मनस्तु मनसा शोध्य बुद्धिं बुद्ध्या तु
शोधयेत् ॥ १० ॥ चित्तस्यातिप्रसादेन भाति कर्म शुभाशुभम् ॥ शुभाशुभविनिर्मुक्तो निर्द्वंद्वो निष्परिग्रहः ॥ निर्ममो निरहंकारस्ततो याति
परां गतिम् ॥ ११ ॥ पर्वाह्णे लोहितं रूपं प्रथममृङ्मयं स्मृतम् ॥ यजुर्मयं द्वितीयं तु श्वेतं माध्याह्निकं स्मृतम् ॥ १२ ॥ कृष्णं तृतीयं सायाह्ने
साम्नो रूपं तु तत्स्मृतम् ॥ प्रथमं राजसं देव द्वितीयं सात्त्विकं स्मृतम् ॥ १३ ॥ तृतीयं तामसं रूपं त्रैगुण्यं तस्य कल्पितम् ॥ त्रयाणां व्यतिरे
केण चतुर्थं सूर्यमंडलम् ॥ १४ ॥ ज्योतिःप्रकाशकं सूक्ष्मं प्रोक्तं देवनिरंजनम् ॥ चतुर्थं तु वेदविदः सूर्यसिद्धांतवेदिनः ॥ १५ ॥ ॐ कारप्रणवै
र्युक्ता ध्याननिर्धूतकल्मषाः ॥ स्थिताः पद्मासने वीरा नाभिसंन्यस्तपाणयः ॥ १६ ॥ सुषुम्नानाडिकामार्गं कुंभरेचकपूरकैः ॥ त्रिभिः संशोध्य
तान्पंच मरुतो देहमध्यगान् ॥ १७ ॥ पदांगुष्ठान्वितः स्विन्नमूर्ध्वमुत्क्षेपयेत्क्रमात् ॥ नाभिदेशे तु तं दृष्ट्वा देवमग्निमनामयम् ॥ १८ ॥ सोमं च
हृदये दृष्ट्वा मूर्ध्नि वाग्निशिखां ततः ॥ वातरश्मिभिरासाद्य तं भित्त्वा मंडलं परम् ॥ १९ ॥ ततः परं तु यो गच्छेद्योगस्थः सूर्यमंडलम् ॥ यत्र
गत्वा न शोचंति तत्सौरं परमं पदम् ॥ २० ॥ देवार्चनं महाबाहो कीर्तितं केशिसूदन ॥ प्रथमं हृदयं स्थानं द्वितीयं चाग्निमाश्रितम् ॥ २१ ॥
तृतीयं नाभिसंस्थं च चतुर्थं सूर्यमंडलम् ॥२२॥ स्थानं परं वै परमात्मसंस्थं भानोः सुरेशस्य वदंति तज्ज्ञाः ॥ ज्ञेयः स मोक्षश्च नृणां स एव संसा
रविच्छित्तिकरं पदं ततः ॥ २३ ॥ इदममृतसमं परस्य वेद्यं किरणसहस्रमृतो हितं जनानाम् ॥ ऋषिचरितमवेत्य तत्त्वसारं व्यपगतमोहधियः
प्रयांति मोक्षम् ॥ २४ ॥ इदं मगानां चरितं मया ते प्रख्यापितं यानवरेण युक्तम् ॥ ज्ञात्वा त्विमं मोक्षविदो वदंति सिद्धाश्च तत्स्थानमवाप्नुवंति॥
॥ २५ ॥ यन्मयोक्तमिदं ज्ञानं देयं श्रद्धावतां नृणाम् ॥ नास्तिकानामबुद्धीनां न देयं भूतिमिच्छता ॥ २६ ॥ ॥ सुमंतुरुवाच ॥ ॥ इत्युक्त्वा
भगवान्व्यासो भोजकज्ञानमुत्तमम् ॥ नारायणं महाबाहो जगमायतनं हरेः ॥ २७ ॥ ख्यातो यस्त्रिषु लोकेषु गंगया परितोषितः ॥ बदर्यां मंडितो

---

[1] वायुना चापि किल्बिषम्–इ० पा० ।

वीर नरनारायणाश्रमः ॥ २८ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे भोजकज्ञानवर्णनं नाम पंचचत्वारिंशदुत्तरशततमोऽध्यायः ॥ १४५ ॥ ॥ छ ॥ ॥ शतानीक उवाच ॥ ॥ य एते भोजकाः प्रोक्ता देवदेवस्य पूजकाः ॥ नान्यं भोज्यमथैतेषां ब्राह्मणैश्च कदाचन ॥ १ ॥ भास्करस्य प्रिया ह्येते पूज्यत्वं च तथा गताः ॥ दिव्याश्चैते स्मृता विप्रा आदित्यांभःसमुद्भवाः ॥ २ ॥ अभोज्यत्वं कथं याता भोजकास्तद्वदस्व मे ॥ किं कुर्वाणास्तथा कर्म भोज्यतां यांति मे वद ॥३॥ ॥ सुमंतुरुवाच ॥ ॥ इममर्थं पुरा पृष्टो वासुदेवो महीपते ॥ कृतवर्मणा पुरा राजंस्तथा सांबो महाबलः॥४॥ गतौ सांबपुरीं वीर तथा नारद पर्वतौ॥ भुक्तवंतौ गृहे सर्वे भोजकस्य महात्मनः ॥५॥ आदित्यकर्मणो लोके देवान्ख्यातिमागताः ॥ तेन ते पूजिताः सर्वे भक्त्या भोज्यैरनेकशः ॥६॥ आगतास्ते पुरीं वीर पुण्यां द्वारवतीं विभोः ॥ तावृषी दिवमारूढौ राजन्नारदपर्वतौ ॥७॥ वासुदेवं महातेजा हार्दिक्यो वाक्यमब्रवीत् ॥ य एते भोजका विप्र पूजका भास्करस्य तु ॥ ८ ॥ अन्नमेषां कथं विप्रौ भुक्तवंतौ जनार्दन ॥ तावृषी दिव्यमाख्यातौ यौ तौ नारदपर्वतौ ॥ अभोज्याः किल एते वै ब्राह्मणानां जनार्दन ॥९॥ वासुदेव उवाच ॥ ॥ न ते भोज्या महाबाहो भोज्या भोजाश्च सर्वदा ॥ अभिवाद्यां प्रयत्नेन यथादित्यो महामते ॥१०॥ आचरंतश्च तत्कर्म भोज्यत्वं प्रव्रजंति ते ॥ तच्छ्रूयतां यदुश्रेष्ठ यत्कार्यं चापि तैर्विभो ॥ यतमानैर्महाबाहो तदिहैकमनाः शृणु ॥११॥ वृषली यस्य वै भार्या यश्चाव्यंगं न धारयेत् ॥ अभोज्यः स तु विज्ञेयो भोजको नात्र संशयः ॥१२॥ अस्नातः पूजयेद्यस्तु तथाभ्यंगविवर्जितः ॥ आदित्यं यदुशार्दूल तथा च विधिना विभो ॥१३॥ सेवको भोजको यस्तु शूद्रान्नं येन भुज्यते ॥ कृषिं च कुरुते यस्तु देवार्चामपि वर्जयेत्॥१४॥ जातकर्मादयो यस्य न संस्काराः कृता विभो ॥ आरुणेयैश्च मंत्रैश्च सावित्रीं न च वै पठेत् ॥ तस्य गेहे द्विजो भुक्त्वा कृच्छ्रपादेन शुध्यति ॥ १५ ॥ पितृदेवमनुष्याणां भूतानां भास्करस्य तु ॥ अकृत्वा विधिवत्पूजां यस्तु भुङ्क्ते स धर्महा ॥ १६ ॥ अभ्यंगेन विहीनो यः शंखहीनस्तथैव च ॥ शिरसा धारयेत्केशान्स ज्ञेयो भोजकाधमः ॥ १७ ॥ देवार्चनं तथा होमं स्नानं तर्पणमेव च ॥ दानं ब्राह्मणपूजां च कुर्वतो भोजकस्य तु ॥ अभ्यंगेन विहीनस्य सर्वं भवति निष्फलम् ॥ १८ ॥ सर्वदेवमयो ह्येष सर्ववेदमयस्तथा ॥ अभ्यंगो यदुशार्दूल पवित्रः परमः स्मृतः ॥ १९ ॥ भोजकानां यदुश्रेष्ठ तस्य मूले स्थितो हरिः ॥ मध्ये ब्रह्मा महातेजा अग्रे गोश्रुतिभूषणः ॥ २० ॥ ऋग्वेदो यस्य मूलस्थो मध्ये सामानि कृत्स्नशः ॥ यजुर्वेदस्तथा श्रेष्ठश्चाथर्वसहितः स्थितः ॥ २१ ॥ त्रयोऽग्नयस्तथा राजंस्त्रयो लोकाः स्थिताः क्रमात् ॥ एवमेष पवित्रस्तु अभ्यंगो भोजकस्य तु ॥ २२ ॥ यस्त्वनेन विहीनस्तु भोजको भोजकाधमः ॥ अभोज्यः स तु

विज्ञेयः सोऽशुचिर्नात्र संशयः ॥ २३ ॥ निर्माल्यमथ नैवेद्यं कुंकुमं देवहेलिनाम् ॥ ये प्रयच्छंति शूद्राणां विक्रीणंति च भोजकाः ॥ तेऽधमा
भोजका ज्ञेया ये च देवस्वहारिणः ॥ २४ ॥ न पूजयंति देवेशं देवस्वं क्षपयंति च ॥ न ते देवप्रियास्तात विज्ञेया भोजकाधमाः ॥ २५ ॥ यस्मि
न्न भुक्ते नैवेद्यं भोजकोऽश्नातिमानद ॥ तदन्नं भुंजतस्तस्य नरकाय न शांतये ॥ २६ ॥ नैवेद्यं भोजयेत्तस्माद्भास्करस्य नरः सदा ॥ प्रथमं यदु
शार्दूल तच्च देहविशोधनम् ॥ २७ ॥ ब्राह्मणानां पुरोडाशो यथा कायविशोधनः ॥ भोजकानां तथा वीर नैवेद्यं कायशोधनम् ॥ २८ ॥ ॥
इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सांबोपाख्याने भोजकवर्णनं नाम षट्चत्वारिंशदुत्तरशततमोऽध्यायः ॥ १४६ ॥ ॥ छ ॥
॥ ॥ वासुदेव उवाच ॥ ॥ अत्र पृष्टो यथा देवो भास्करो देवपूजितः ॥ अरुणेन महाबाहो के प्रिया भोजकास्तथा ॥ १ ॥ पूजायां
तव के योग्याः के न योग्या भवंति च ॥ इति पृष्टः स भगवानरुणेन दिवाकरः ॥ यदुवाच महाबाहो तदिहैकमनाः शृणु ॥ २ ॥
॥ ॥ भास्कर उवाच ॥ ॥ परदारान्परद्रव्यं ये न हिंसंति भोजकाः ॥ ते प्रिया मम वै नित्यं ये न निंदंति दैवतान् ॥ ३ ॥ वाणिज्यं
कृषिसेवां तु वेदानां निन्दनं च ये ॥ कुर्वंति भोजका ज्ञेयाः सर्वे ते मम वैरिणः ॥ ४ ॥ येषां भार्यासंग्रहणं कर्षणं ये प्रकुर्वंते ॥
नृपसेवां खगश्रेष्ठ विज्ञेयाः पतितास्तु ते ॥ भुंजते ये च शूद्रान्नं ज्ञेयास्ते शत्रवो मम ॥ ५ ॥ पूजा कृता तु या तैस्तु तथार्घ्यं च
खगोत्तम ॥ पूजां तामथ चाप्यर्घ्यं नाहं गृह्णामि खेचर ॥ ६ ॥ य एते कथिता वीर ये च शंखविवर्जिताः ॥ निर्माल्यं ये मदीयं तु नैवेद्यं कुंकुमं
तथा ॥ ७ ॥ शूद्राय ये प्रयच्छंति विक्रीणंति च ये खग ॥ यच्छन्ति य च वैश्याय भोजका मे न ते प्रियाः ॥ ८ ॥ यजंते ये च सावित्रीं महा
श्वेतां च गोपतेः ॥ ये न जानंति मे मुद्रां किंकराणां च नामतः ॥ ९ ॥ य एते कथिता वीर भोजकास्ते मया खग ॥ नैते पूजयितुं शक्ता ये
प्रिया मम भोजकाः ॥ ताञ्छृणुष्व खगश्रेष्ठ भूत्वा चैकाग्रमानसः ॥ १० ॥ देवद्विजमनुष्याणां पितॄणां चापि पूजकाः ॥ ते प्रिया मम वै
नित्यं शक्ताः पूजयितुं रविम् ॥ ११ ॥ येषां मुण्डं शिरो नित्यं ये चाभ्यंगसमन्विताः ॥ वादयंति च ये शंखं दिव्यास्ते भोजका मताः ॥ १२ ॥
त्रिकालं ये च मां नित्यं सुस्नाताः क्रोधवर्जिताः ॥ पूजयंति खगश्रेष्ठ ते प्रिया मम भोजकाः ॥ १३ ॥ वारे मदीये नक्तं तु षष्ठ्यां ये च प्रकुर्वंते ॥
सप्तम्यामुपवासं तु तथा संक्रमणे मम ॥ १४ ॥ दिव्यास्ते ब्राह्मणा ज्ञेया भोजका मम पूजकाः ॥ पूजयंति च ये विप्रान्मद्भक्ता मत्परायणाः ॥

---

[1] ये वाभ्यंगविहीनास्तु ये च सत्यविवर्जिताः–इ० पा० ।

ते प्रियाः सततं मह्यं भोजका गरुडाग्रज ॥ १५ ॥ मयि भक्तिं न कुर्वंति ब्राह्मणान्पूजयंति नो ॥ न ते पूज्या न वंद्याश्च ये द्विषंति च मां सदा ॥
॥ १६ ॥ ये कुर्वंति महायज्ञान्भोजका गरुडाग्रज ॥ पितृदेवमनुष्याणां पूजार्थं संततं खग ॥ १७ ॥ प्रियास्ते सततं वीर भोजकानां तथोत्तमाः॥
तस्मात्सर्वप्रयत्नेन पंचयज्ञान्प्रवर्तयेत् ॥ १८ ॥ एकभक्तेन ये नित्यं वर्तंते कश्यपात्मज ॥ भुंजते न च ये रात्रौ भोजकास्ते प्रिया मम ॥ १९ ॥
मम वारे च ये वीर तथा षष्ठ्यां च केशव ॥ न रात्रौ भुञ्जते प्राज्ञा मत्प्रियास्ते मगाः खग ॥ २० ॥ प्रतिसंवत्सरं ये तु भोजका गरुडा
ग्रज ॥ न यच्छंति पितुर्मातुर्दिवसे तेन मे प्रियाः ॥ २१ ॥ इत्थं भूता भोजका ये मावमासे च सप्तमी ॥ पुष्पाणां करवीराणि तथा रक्तं च
चंदनम् ॥ २२ ॥ वाचको ब्राह्मणानां तु नैवेद्यं मोदकास्तथा ॥ घृताहुत्यो गुग्गुलश्च क्षीरेण स्नपनं तथा ॥ २३ ॥ वाद्यानां शंखशब्दश्च नृत्यं
नाद्यं मतं मम ॥ पंचवर्णाः पताकास्तु श्वेतं छत्रं च मे प्रियम् ॥ २४ ॥ नान्यवर्णैः कृता पूजा तथा प्रीणाति मां खग ॥ यथा कृता भोज
केन पूजा प्रीणाति मां सदा ॥ नान्यदेवप्रतिष्ठा तु कर्तव्या भोजकेन तु ॥ २५ ॥ ॥ वासुदेव उवाच ॥ ॥ इत्युक्त्वा भगवान्देवश्चा
रुणाय पुरानघ ॥ लक्षणं भोजकानां तु ततो मेरुमथाक्रमत् ॥ २६ ॥ एवं भोज्या भोजकास्तु न चाभोज्याः कदाचन ॥ अनुष्ठानविहीना
ये न ते भोज्यास्तु भोजकाः ॥ २७ ॥ भौमास्तु ब्राह्मणा ये तु अनुष्ठानविवर्जिताः ॥ तेऽप्यभोज्या भवन्तीह विकर्मस्था विशेषतः ॥ २८ ॥
नास्ति पूज्यतमं किंचिन्मांगल्यं पावनं तथा ॥ चतुर्णामिह वर्णानां मुक्त्वा भोजकमुत्तमम् ॥ पूजिते भोजके वीर आदित्यः पूजितो भ
वेत् ॥ २९ ॥ भुञ्जते यस्य वै गेहे भोजका यदुनंदन ॥ तस्य भुंक्ते स्वयं भानुर्ब्रह्मा विष्णुस्तथा शिवः ॥३०॥ यथेह सर्वसत्त्वानां प्रधानत्वे स्थितो
रविः ॥ तथेह सर्वभूतानां भोजकः पूज्य उच्यते ॥ ३१ ॥ तीर्थानां तु कुरुक्षेत्रं सरसां सागरो यथा ॥ तथा पूज्यतमो ज्ञेयः पूज्यानां भोजको
विभो ॥३२॥ विशेषेण च सौराणां भोजकः पूज्य उच्यते॥ भर्ता पूज्यो यथा स्त्रीणां शिष्याणां च यथा गुरुः ॥ भोजकस्तु तथा पूज्यः सौराणां
हृदिका त्मज ॥३३॥ यस्य भुंक्ते भोजकस्तु गंधपुष्पादिनार्चितः ॥ तस्य भुंक्ते स्वयं भानुः पितरो देवतास्तथा ॥३४॥ एवं पूज्यास्तथा भोज्या
भोजका हृदिकात्मज ॥ ये सौरा भोजकस्यान्नं भुंजते निर्विकल्पतः ॥ ते सर्वे पापनिर्मुक्ता यांति सूर्यसलोकताम् ॥ ३५ ॥ कथितो यत्र
यो भोज्यो यथा भोज्यः स वर्जितः ॥ अथ किं बहुनोक्तेन श्रूयतां वचनं मम ॥ ३६ ॥ नास्ति वेदात्परं शास्त्रं नास्ति गंगासमा सरित् ॥

अश्वमेधसमं पुण्यं नास्ति पुत्रसमं सुखम् ॥ ३७ ॥ नास्ति भानुसमो देवो नास्ति मातृसमा गतिः ॥ यथैतानि समस्तानि उत्तमानि यदूत्तम ॥
तथोत्तमो भोजकस्तु संप्रोक्तो भास्करेण तु ॥ ३८ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सांबोपाख्याने भोजकलक्षणवर्णनं
नाम सप्तचत्वारिंशदुत्तरशततमोऽध्यायः ॥ १४७ ॥छ॥ ॥ सुमंतुरुवाच ॥ ॥ अथ सांबो महातेजा दृष्ट्वा चक्रं पितुः करे ॥ ज्वालामालाक
रालं तु महता तेजसान्वितम् ॥ १ ॥ पप्रच्छ पितरं सांबो भक्त्या श्रद्धासमन्वितः ॥ कुतस्तात त्वया प्राप्तं चक्रमादित्यसन्निभम ॥ २ ॥ किमर्थं
वहते देव दिव्यमायुधमुत्तमम् ॥ एतदाख्याहि मे सर्वं श्रोतुं[1]कामस्य कौतुकात् ॥ ३ ॥ ॥ वासुदेव उवाच ॥ ॥ साधुसाधु[2] महाबाहो साधु
पृष्टोऽस्म्यहं त्वया ॥ शृणुष्वैकमनाः पुत्र चक्रस्य विधिनिर्णयम् ॥ ४ ॥ दिव्यं वर्षसहस्रं तु भानुमाराध्य श्रद्धया ॥ प्राप्तं चक्रं मया तस्माद्भास्करा
ल्लोकपूजितात् ॥ ५ ॥ नभोगः पंचकारूढः स्थितः साक्षाद्दिवाकरः ॥ ग्रहाः सोमादयो यस्य संस्थिता नाभिमंडले ॥ ६ ॥ आदित्या द्वादश
समा अरेषु क्रमशस्तथा ॥ प्रोक्तं पथिषु तत्त्वानि पृथिव्यादीनि यानि वै ॥ ७ ॥ एतैस्तत्त्वैः परिव्याप्तं चक्रं कालात्मकं परम् ॥ संक्षेपात्ते मया
ख्यातं दत्तं चक्रमिवापरम् ॥ ८ ॥ ॥ सांब उवाच ॥ ॥ कथं कालमयं देव चक्रं कमलमुच्यते ॥ इदं तावन्ममाचक्ष्व ज्ञातुमिच्छामि तत्त्वतः
॥ ९ ॥ ॥ वासुदेव उवाच ॥ ॥ कमलं ह्यृतुभिः षड्भिः षड्दलं चाक्षयाश्रितम् ॥ पुरुषाधिष्ठितं तद्धि तत्र सांगो रविः स्थितः ॥ १० ॥
यच्च कालत्रयं लोके तन्नाभित्रयमुच्यते ॥ मासा अरा महाबाहो पक्षाश्च प्रधयः स्मृताः ॥ ११ ॥ नेमी चैव परे प्रोक्ते अयने[3] दक्षिणोत्तरे ॥ पथि
नाभिषु योगे च योगाख्यास्तपनादिभिः ॥ १२ ॥ नक्षत्राणि ग्रहाश्चैव सदा चात्र स्थिताः स्मृताः ॥ एतैर्व्याप्तमिदं चक्रं स्थूलसूक्ष्मप्रभेदतः ॥
॥ १३ ॥ अत्रोद्दिष्टेषु कालेषु ये नोद्दिष्टा मया तव ॥ युगादिकल्पपर्यंतास्तेऽपि चात्र स्थिताः क्रमात् ॥ १४ ॥ यत्ते कालात्मकं चक्रमिदं
संक्षेपतो मया ॥ कथितं तद्विनिष्क्रान्तं प्रदीप्तात्सूर्यमंडलात् ॥ १५ ॥ असुराणां वधायेदं मया लब्धं दिवाकरात् ॥ आराध्य तपसा सूर्यं पुरा
कल्पे जगद्गुरुम् ॥ अतः संपूजयाम्येनं ग्रहैस्तत्त्वैर्वृतं सदा ॥ १६ ॥ अर्कं भक्तो हि चक्रस्थं यः पूजयति भक्तिमान् ॥ तेजसा रविसंकाशः
पुष्पोत्तरपुरं व्रजेत् ॥ १७ ॥ तस्मात्तं मत्कुलानंदं मित्रं संपूजयाम्यहम् ॥ ग्रहैस्तत्त्वैर्वृतं भक्त्या स्वमंत्रैः सततं विभुम् ॥ १८ ॥ सप्तम्यां चक्रमा
लिख्य ये यजंति दिवाकरम् ॥ रक्तचंदनपूर्णेन कुंकुमेन सुगंधिना ॥ १९ ॥ पिष्टगंधादिभिर्वापि रक्तवर्णकमिश्रकैः ॥ रक्तैश्च कमलैः शुद्धैः कर

---

१ श्रोतुकामश्च ते मुखात्—इ० पा० । २ वत्स—इ० पा० । ३ अयनादि तथैव हि—इ० पा० ।

वीरैः सुगंधिभिः ॥ २० ॥ अन्यैर्वा कुसुमैर्वन्यैः प्रत्यग्रैर्जंतुवर्जितैः ॥ अपर्युषितनिश्छिद्रैः शुभधन्यैर्दलैरपि ॥ २१ ॥ फलैः पक्वैरोषधिभिस्तथा
दूर्वांकुरैः कुशैः ॥ धूपैश्च विविधैर्गंधैस्तथा वस्त्रैश्च भूषणैः ॥ २२ ॥ भक्ष्यैर्भोज्यैश्च पेयैश्च चोष्यैर्लेह्यैश्च शक्तितः ॥ वितानशोभासिकतैः पलाशै
रुपशोभितैः ॥ २३ ॥ छत्रचामरघंटाभिर्भूषणैर्दर्पणादिभिः ॥ नृत्यवादित्रगीतैश्च वेदैः पुण्यकथास्वनैः ॥ २४ ॥ सर्वत्र जयघोषैश्च संपूर्णे पूज
यंति ये ॥ संपूर्णान्विविधान्कामान्निर्विघ्नान्प्राप्नुवंति ते ॥ २५ ॥ स्वचक्रं चापि निर्विघ्नं वृद्धिमायाति सुव्रत ॥ हन्यते परचक्रं च यत्रेदं
पूज्यते सकृत् ॥ २६ ॥ संक्रांतौ ग्रहणे चापि लिखित्वा यो जपेदिदम् ॥ भवंति नियताः सांब तस्य सानुग्रहा ग्रहाः ॥ २७ ॥ सर्वरोगविही
नस्तु सर्वदुःखविवर्जितः ॥ चिरं जीवति धर्मात्मा सर्वैश्वर्यसमन्वितः ॥ २८ ॥ एष वै कथितो वत्स चक्रयोगो मया तव ॥ अर्कस्य सर्वयज्ञानां
श्रेष्ठः सिद्धिप्रदो भृशम् ॥ २९ ॥ पुण्यो धर्म्यस्तथा पुष्ट्यः शत्रुघ्नश्च विशेषतः ॥ श्वेतो रक्तोथ पीतश्च कृष्णश्चापि विभागशः ॥ ३० ॥ इति
श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सांबोपाख्याने कालचक्रवर्णनं नामाष्टचत्वारिंशदुत्तरशततमोऽध्यायः ॥ १४८ ॥ छ ॥ ॥
॥ सांब उवाच ॥ ॥ किंप्रमाणं लिखेच्चक्रं तत्र पद्मं च किं भवेत् ॥ नेमिप्रध्यारनाभीनां विभागः क्रियते कथम् ॥१॥ ॥ वासुदेव उवाच ॥ ॥
चतुःषष्ट्यंगुलं चक्रं कृत्वा वृत्तं प्रमाणतः ॥ अष्टांगुला भवेन्नेमिः सेयं विभवतः सदा ॥२॥ नाभिक्षेत्रं तथैव स्यात्पद्मं तत्त्रिगुणं भवेत् ॥ अरक्षेत्रं
च पद्मस्य कर्णिकाकेसराणि च ॥ ३ ॥ केसरस्य च पादेन शेषपत्राणि कल्पयेत् ॥ पत्रसंधिश्च पादांगं क्रमात्तत्रापि भिद्यते ॥ ४ ॥
उन्नतं कमलं तत्तु कुर्यान्नाभ्यां न संशयः ॥ आकीर्णाः संविभक्ताश्च कर्तव्याः प्रधयः क्रमात् ॥ ५ ॥ अंगुलस्थूलमूलं स्यादराग्रं त्रिगुणं
ततः ॥ भूमिः पीता बहिर्ज्ञेया कर्णिकाकेसराणि च ॥ ६ ॥ सितं नाभिस्थलं तत्र द्वाराणि परिकल्पयेत् ॥ हस्तमात्रं भवेत्तस्य तन्मानं
द्वारसंनिभम् ॥ ७ ॥ शेषं रक्तं समुद्दिष्टं संहताः पत्रसंधयः ॥ नाभिनेम्यंतरे लेखाः सिताश्चांगुलमानतः ॥ ८ ॥ सितरक्तसिताभिश्च
समंतादुपशोभितम् ॥ कपोलं द्वारपद्मं च द्वारकोणे प्रकल्पयेत् ॥ ९ ॥ चतुर्द्वारं भवेदेवमैन्द्रद्वारं प्रकल्पयेत् ॥ अपराह्णेऽथ पूर्वाह्णे वरुणमावा
हयेत्सदा ॥ १० ॥ द्वाराण्येतानि संवर्त्य यथोक्तविधिना यजेत् ॥ यथोक्ता देवताः सर्वाः स्वमंत्रैरेव भक्तितः ॥ ११ ॥ चक्रमेवं समुद्दिष्टं यजनार्थं
मया तव ॥ यज्ञेनानेन संबद्धो दीक्षितश्चार्कमंडले ॥ इत्थं मे भानुना पूर्वमिदमुक्तं वरानन ॥ १२ ॥ ॥ सांब उवाच ॥ ॥ के मंत्राश्चक्रयज्ञेऽस्मि
न्देवतानां प्रकीर्तिताः ॥ यज्ञक्रमश्च कः प्रोक्तो रूपं ।किं च पृथक्पृथक् ॥ १३ ॥ ॥ वासुदेव उवाच ॥ ॥ खषोल्कं हृदयाध्यक्षं पूर्वोक्ते कमले

यजेत् ॥ कर्णिकायां दलेष्वेवमंगानि हृदयादि च ॥ १४ ॥ नाममंत्राश्चतुर्थ्यंतास्तेषां पूर्वोक्तकोटयः ॥ १५ ॥ नमस्कारश्च सर्वत्र एष एव विधिः स्मृतः ॥ १५ ॥ स्वाहांता होमकाले च कर्मस्वन्येषु ते पुनः ॥ यथा कर्मावसानाश्च प्रयोक्तव्याः समासतः ॥ १६ ॥ ॐ खषोल्काय विद्महे दिवाकराय धीमहि ॥ तन्नः सूर्यः प्रचोदयात् ॥ १७ ॥ सावित्री च महाबाहो चतुर्विंशाक्षरा मता ॥ सर्वतत्त्वमयी पुण्या ब्रह्मगोत्रार्कवल्लभा ॥ १८ ॥ एवं मंत्राः प्रयोक्तव्याः सर्वकर्मस्वतंद्रितैः ॥ अन्यथा विफलं कर्म भवेदिह परत्र च ॥ १९ ॥ तस्मात्सर्वप्रयत्नेन मंत्राञ्ज्ञात्वा विधिं तथा ॥ यथावत्कर्म तत्कृत्वा साधयेदीप्सितं फलम् ॥ २० ॥ ॥ सांब उवाच ॥ ॥ आदित्यमंडले दीक्षा कस्य कार्या कथं च सा ॥ कदा केन किमर्थं च कथयेदं ममाखिलम् ॥२१॥ ॥ वासुदेव उवाच ॥ ॥ ब्राह्मणं क्षत्रियं वैश्यं कुलीनं शूद्रमेव च॥पुरुषं वा स्त्रिय वापि दीक्षयेत्सूर्यमंडले ॥२२॥ स्वयं भक्त्योपपन्नश्च प्रणिपत्य गुरुं तथा ॥ गुरुस्तं दीक्षयेद्विप्रः कल्पज्ञः सत्यवाक्छुचिः ॥ २३ ॥ षष्ठ्यामग्निं समाधाय पूर्वोक्तविधिना क्रमात् ॥ संपूज्यार्कं तथा वह्नौ हुत्वा वै हविषा रविम् ॥ २४ ॥ शिष्यं स्नातमथाचांतं खषोल्काकृतिविग्रहम् ॥ स्वांगैरालभ्य चांगेषु दर्भवद्भिस्तथाक्षतैः ॥२५॥ पुष्पैः संपूज्य चांगानि देयः कार्यो बलिस्तथा ॥ आदित्यो वरुणोऽर्कोऽग्निः साधितो हृदयेन च ॥ २६ ॥ भवेद्[1] घृतगुडक्षीरैस्तंदुलैश्च प्रमाणतः ॥ त्रिभिरंजलिभिर्हुत्वा देवायाग्नौ हुतं पुनः ॥ २७ ॥ दत्त्वा शिष्टाय मुक्त्वैवं दत्त्वांते दंतधावनम् ॥ क्षीरं वृक्षोद्भवं तस्मै द्वादशांगुलसन्निभम् ॥ २८ ॥ दंतश्लिष्टेऽपनीते च तेन प्राच्यां क्षिपेत्ततः ॥ दंतधावनमास्यं च तदा तस्योपरि क्षिपेत् ॥ २९ ॥ मैत्रावरुणमीशानं वक्रं सौम्यसमाश्रितम् ॥ प्रशस्तं दंतकाष्ठस्य मुखमन्यत्र निंदितम् ॥ ३० ॥ यां दिशं दंतकाष्ठस्य मुखं पश्यति तत्पतिम् ॥ अर्चयेत्तेन शांतिः स्यादित्युक्तं भानुना स्वयम् ॥३१॥ पुनस्तद्वचनं श्रुत्वा अंगैरालभ्य च क्रमात् ॥ संपूज्य लोचने तत्र संचिंत्य परिजप्य च ॥ ३२ ॥ कारयित्वा च संकल्पं तथा चेंद्रियसंयमम् ॥ स्वापयेत स्वयं चापि वरं श्रुत्वा समाहितः ॥ ३३ ॥ आचम्य कृतरक्षस्तु कृतद्रव्याधिवासनः ॥ हृदयेन नमेत्प्रातः स्नात्वा हुत्वा हुताशनम् ॥ ३४ ॥ स्वप्नं पृच्छेद्यथा दृष्टं शुभं संवादयेच्च तम् ॥ हृदयेनाशुभे दृष्टे शतहोमं समाचरेत् ॥ ३५ ॥ स्वप्ने पश्यति हर्म्याणि देवतानां हुताशनम् ॥ नदीयानानि रम्याणि उद्यानोपवनानि च ॥ ३६ ॥ पत्रपुष्पफलाढ्यानि कमलानि च राजतम् ॥ संपश्यति यदि स्वप्ने ब्राह्मणं वेदपारगम् ॥३७॥ राजानं शौर्य संपन्नं धनाढ्यं क्षत्रियोत्तमम् ॥ शुश्रूषणपरं शूद्रं यदि तत्त्वार्थमादिशेत् ॥३८॥ प्रशस्तं भाषणं चैव यथासंभवतो

---

[1] दधिघृतक्षीरैः–इ० पा० ।

मतम् ॥ एतैः स्पर्शनमेतेषां श्रेष्ठमारोहणं ततः ॥३९॥ वाहनानि प्रशस्तानि प्रासादं नावमेव च॥पर्वतं च समारुह्य विपुलां भार्गवीं भजेत्॥४०॥
पीत्वा सुरां समुद्रं च दध्याज्यं क्षीरमेव च ॥ सोमं मांसं हविर्भुक्त्वा काश्यपीं लभते नरः ॥४१॥ लब्ध्वा वस्त्राणि रत्नानि विविधाभरणानि च॥
वाहनानि महीं गाश्च धान्योपकरणानि च॥४२॥समृद्धिमाप्नुयात्किंचित्स्वप्नानां दर्शनं शुभम्॥ शुभकर्मानुगं यच्च तत्सर्वं शुभमुच्यते॥४३॥तस्मा
दन्यदनिष्टं स्यात्तस्माद्युक्ता प्रतिक्रिया॥क्रमादालिख्य सप्तम्यां तत्र संपूज्य भास्करम् ॥४४॥ तर्पयित्वा द्विजाञ्च्छिष्टानानम्य पूर्ववद्गुरुम् ॥ सृष्टि
क्रमेण भृत्यर्थं मुक्त्यर्थं नान्यथा भवेत् ॥ ४५ ॥ दिवाकरं समालभ्य पुरुषोथ यथाक्रमम् ॥ सर्वग्रहेषु तत्त्वेषु यथावत्तन्नियोजयेत् ॥ ४६ ॥ विशु
द्धेषु विशुद्धं तं ध्यात्वा चादित्यवत्क्रमात् ॥ नियोजयेत्पृथिव्याश्च ततः प्रभृति सर्वशः ॥ ४७ ॥ आदित्यमंडलं शुद्धं सर्वमुक्तं नियोजयेत् ॥
एवं तु मनसा ध्यात्वा जुहुयाच्चैव तं शतम् ॥ ४८ ॥ सर्वैर्मन्त्रैः क्रमादेवं दीक्षा प्रोक्ता वरापस ॥ कृत्वैव पुष्पपातं तु तस्मिन्नादित्यमण्डले ॥४९॥
बद्ध्वास्यमंजलौ पुष्पं कृत्वा दत्त्वा च मंत्रितम् ॥ क्षिपेद्वै कुलशुद्ध्यर्थं नामार्थं च विशेषतः ॥५०॥ यत्र तत्पतितं पुष्पं तस्य तत्कुलमादिशेत् ॥
नाम चादित्यसंयुक्तमित्युक्तं भानुना स्वयम् ॥ ५१ ॥ संपूज्य श्रावयेत्तत्र समयानर्कभाषितान् ॥ प्रातः सायं च मध्याह्ने रवेरभिमुखः स्थितः ॥
॥ ५२ ॥ उपस्थानं सदा कुर्यादर्चनं च सदा नरः ॥ अदृष्ट्वार्कं न भोक्तव्यं दिवा रात्रौ हुताशनम् ॥ ५३ ॥ दृष्ट्वा भोक्तव्यमर्काख्यं न भोक्तव्यं
कदाचन ॥ न च पद्भ्यां स्पृशेत्तद्वन्नासनं परिवर्जयेत् ॥ ५४ ॥ न लंघ्या प्रतिमाच्छाया न लंघ्यास्तिथयः क्वचित् ॥ नक्षत्राणि ग्रहा योगा
मासा मासाधिपाश्च ये ॥ ५५ ॥ अयने ऋतवः पक्षास्तथैव दिवसानि च ॥ कालः संवत्सरश्चापि यः कश्चित्काल उच्यते ॥ ५६ ॥ अभिवंद्यः
स सर्वोऽपि नमस्यः पूज्य एव च ॥ तस्मात्कालाधिपः सूर्यः स्वयं कालश्च पठ्यते ॥ ५७ ॥ ज्योतिर्गणस्य सर्वस्य स्थावरास्थावरस्य च ॥
चेतनाचेतनस्यापि सर्वात्मा यः प्रकीर्तितः ॥ ५८ ॥ स्तुत्यो वंद्यः सदा पूज्यस्त्वयायं सर्वथा नृप ॥ मनसा कर्मणा वाचा देवनिन्दां परित्य
जेत् ॥ ५९ ॥ प्रेषयित्वा[१] च निर्माल्यं तदश्वेभ्यो निवेदयेत् ॥ प्रक्षाल्य हस्तौ पादौ च नमस्कुर्याद्दिवाकरम् ॥ ६० ॥ इत्येषा परमा दीक्षा तव
संक्षेपतो मया ॥ भुक्तिमुक्तिकरी चापि कथिता प्रविभागतः ॥ ६१ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सांबोपाख्याने
सूर्यदीक्षावर्णनं नामैकोनपञ्चाशदुत्तरशततमोऽध्यायः ॥ १४९ ॥ ॥ छ ॥ ॥ वासुदेव उवाच ॥ ॥ अतः परं प्रवक्ष्यामि यथा पूज्यो

---

[१] लंघयित्वा च निर्माल्यं तदात्मान निवेदयेत्–इ० पा० ।

दिवाकरः ॥ स्थंडिले यदुशार्दूल निबोधेकाग्रमानसः ॥ १ ॥ मण्डलैरष्टभिः कार्यं चक्रं कालात्मकं शुभम् ॥ मध्ये पद्माकृतं चक्रमरैर्द्वादश
भिर्युतम् ॥ २ ॥ तन्मध्ये कमलं प्रोक्तं पत्राष्टकसमन्वितम् ॥ सर्वात्मा सकलो देवः खषोल्कः किरणोज्ज्वलः ॥ ३ ॥ पूजनीयः सदा मध्ये सहस्र
किरणायुधः ॥ प्रणवेन महाबाहो चतुर्बाहुसमन्वितः ॥ ४ ॥ अरुणं[1] पूजयेत्प्राज्ञः सदा देवाग्रजं[2] शुभम् ॥ दक्षिणे पूजयेद्देवीं निक्षुभां भास्करस्य तु
॥ ५ ॥ रेवतं दक्षिणे पार्श्वे उत्तरे पिंगलं सदा ॥ संज्ञां च यदुशार्दूल श्रेयसे सततं बुधः ॥ ६ ॥ आग्नेय्यां लेखकं वीर नैर्ऋत्यामश्विनौ तथा ॥
वायव्यां पूजयेद्देवं मनुं वैवस्वतं विभुम् ॥ ७ ॥ ऐशान्यां पूजयेद्देवीं यमुनां लोकपावनीम् ॥ द्वितीयावरणे वीर पूर्वतः पूजयेद्द्वियत् ॥ ८ ॥ दक्षिणे
च ततो देवीं पश्चिमे गरुडं तथा ॥ उत्तरे नागराजानं पुत्रमैरावतं शुभम् ॥ ९ ॥ आग्नेय्यां पूजयेद्धेलिं प्रहेलिं नैर्ऋते तथा ॥ वायव्यामुर्वशीं देवी
मीशाने विनतां तथा ॥ १० ॥ तृतीयावरणे पूर्वे पूजयेद्धरुमादरात् ॥ पश्चिमे त्वर्कपुत्रं तु उत्तरे धिषणं तथा ॥ ११ ॥ ऐशाने शशिपुत्रं तु
सोममाग्नेयमण्डले ॥ पूजयेद्दक्षिणे कोणे नैर्ऋते राहुमादरात ॥ १२ ॥ वायव्ये विकचं वीर पूजयेत्सततं बुधः ॥ चतुर्थावरणे देवं पूजयेल्लेख
मादरात् ॥ १३ ॥ आग्नेये शांडिलीपुत्रं दक्षिणे दक्षिणाधिपम् ॥ विरूपाक्षं नैर्ऋते देवं जलेशं पश्चिमे तथा ॥ १४ ॥ वायुपुत्रं[3] च वायव्यां सततं
पूजयेन्नरः ॥ ईशाने देवमीशानं पूजयेत्सततं बुधः ॥ १५ ॥ उत्तरे यक्षराजानं कुबेरं पूजयेद्बुधः ॥ पञ्चमे पूजयेद्वीर सदा स्वावरणे द्विजाः ॥ १६ ॥
पूर्वतः परमां देवीं महाश्वेतां महामतिः ॥ श्रियमृद्धिं विभूतिं च धृतिं चैवोन्नतिं तथा ॥ १७ ॥ पृथिवीं यदुशार्दूल महाकीर्तिं तथैव च ॥ इन्द्रं
विष्णुं चार्यमणं भगं पर्जन्यमेव च ॥ १८ ॥ विवस्वंतं तथार्कं च त्वष्टारं किरणोज्ज्वलम् ॥ पूजयेद्वरुणं षष्ठे चैवमेतान्दिवाकरान् ॥ १९ ॥
शिरो नेत्रे तथा वर्म अस्त्रं च यदुसत्तम ॥ अरुणं सरथं वीर सप्तमे पूजयेद्बुधः ॥ २० ॥ तथाश्वान्यदुशार्दूल सदा चावरणे बुधः ॥ यक्षरक्षांसि
गन्धर्वान्मासान्पक्षानहानि तु ॥ २१ ॥ संवत्सरं तथा पुत्र ह्येतान्त्संपूजयेत्पुरा ॥ य एवं पूजयेद्देवं भास्करं सततं नरः ॥ स गच्छे
त्परमं स्थानं यत्र गत्वा न शोचति ॥ २२ ॥ (ॐ खषोल्काय नमः) मूलमन्त्राक्षराणीह चांगानि परिचक्षते ॥ अनेन विधिना यस्तु पूजये
त्सततं रविम् ॥ २३ ॥ नित्यमुभयसप्तम्यां स गच्छेत्परमं पदम् ॥ इत्युक्त्वा भगवान्देवो जगामाशु गृहं रविः ॥ २४ ॥ ॥ इति श्रीभविष्ये
महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सांबोपाख्याने आदित्यपूजाविधिवर्णनं नाम पञ्चाशदुत्तरशततमोऽध्यायः ॥ १५० ॥ ॥ छ ॥ ॥

---

[1] वरुणम्—इ० पा० । [2] सदा वेदानुगं शुभम्--इ० पा० । [3] वासुदेवम्--इ० पा० ।

॥ ॥ सूत उवाच ॥ ॥ अथ राजा महातेजाः शतानीको द्विजोत्तमम् ॥ प्रणम्य शिरसा भक्त्या सुमंतुं वाक्यमब्रवीत् ॥ १ ॥
अहो देवस्य माहात्म्यं भास्करस्यामितौजसः ॥ कीर्तितं भवता मह्यं सर्वपापप्रणाशनम् ॥ २ ॥ तस्मान्नार्कसमं देवं लोके पश्यामि
सुव्रत ॥ न चाप्यस्य स्थिता विप्र गतिर्लोकेषु विद्यते ॥ ३ ॥ प्रवर्तते जगद्विप्र सर्गकाले दिवाकरात् ॥ स्थितौ पालयते चापी क
ल्पांते संहरेत्पुनः ॥ ४ ॥ श्रुत्वैवं देवमाहात्म्यं भास्करस्यामितौजसः ॥ कीर्तितं भवता मह्यमश्वमेधशताद्वरम् ॥ ५ ॥ किं तु मे संशयो
ब्रह्मन्सुमहान्हृदि वर्तते ॥ केनोपायेन विप्रेंद्र मुच्यते संभवार्णवात् ॥ ६ ॥ दिवाकरप्रसादाद्धै सुप्रसन्नाद्वृषध्वजात् ॥ कथं तुष्येत्सदा देवोध र्मेण
कतरेण तु ॥ ७ ॥ श्रुता मे बहवो धर्माः श्रुतिस्मृत्युदितास्तथा ॥ वैष्णवाः शैवधर्माश्च तथा पौराणिकाः श्रुताः ॥ ८ ॥ श्रोतुकामो ह्यहं विप्र सौरं
धर्मभनौपमम् ॥ भगवन्त्सर्वधन्यास्ते सौरधर्मपरायणाः ॥ ९ ॥ ब्रूहि मे देवदेवस्य भानोर्धर्ममनौपमम् ॥ शृण्वतो नास्ति मे तृप्तिरमृतस्यैवमेव
च ॥ १० ॥ अश्वमेधादयो यज्ञा बहुसंभारविस्तराः ॥ न शक्यास्ते यतः कर्तुमल्पवित्तैर्द्विजातिभिः ॥ ११ ॥ सुखोपायमतो ब्रूहि धर्मकामार्थ
साधकम् ॥ हिताय सर्वमर्त्यानां सर्वपापभयापहम् ॥ १२ ॥ सौरधर्मपरं पुण्यं पवित्रं पापनाशनम् ॥ श्रुत्वा तु वचनं राज्ञो व्यासशिष्यो महा
मुनिः ॥ प्रणम्य शिरसा व्यासमिदं वचनमब्रवीत् ॥ १३ ॥ ॥ सुमंतुरुवाच ॥ ॥ श्रूयतामभिधास्यामि सुखोपायं महाफलम् ॥ परमं सर्वध
र्माणां सर्वधर्ममनौपमम् ॥ १४ ॥ रविणा कथितं पूर्वमरुणस्य विशांपते ॥ कृष्णस्य ब्रह्मणो वीर शंकरस्य न विद्यते ॥ १५ ॥ संसारार्णवमग्नानां
सर्वेषां प्राणिनामयम् ॥ सौरधर्मतमः श्रीमान्हिताय जगतोदितः ॥ १६ ॥ यैरयं शांतहृदयैः सूर्यभक्तैर्भगार्थिभिः ॥ संसेव्यते परो धर्मस्ते सौरा
नात्र संशयः ॥ १७ ॥ एककालं द्विकालं वा त्रिकालं नित्यमेव च ॥ ये स्मरंति रविं भक्त्या सकृदेवापि भारत ॥ सर्वपापैर्विमुच्यंते सप्तजन्मकृ
तैरपि ॥ १८ ॥ स्तुवंति ये सदा भानुं न ते प्रकृतिमानुषाः ॥ स्वर्गलोकात्परिभ्रष्टास्ते ज्ञेया भास्करा भुवि ॥ १९ ॥ नानर्कः स्मरतेर्कं वै नान
र्कोर्कं समर्चयेत् ॥ नानर्कः कीर्तयेदर्कं नानर्कोर्कमवाप्नुयात् ॥ २० ॥ सौरधर्मस्य सारोयं सूर्यभक्तिः सुनिश्चला ॥ षोडशांगा च सा प्रोक्ता रवि
णेह दिवौकसाम् ॥ २१ ॥ प्रातःस्नानं जपो होमस्तथा देवार्चनं नृप ॥ द्विजानां पूजनं भक्त्या पूजा गोश्वत्थयोस्तथा ॥ २२ ॥ इतिहासपुराणे
भ्यो भक्तिश्रद्धापुरस्कृतम् ॥ श्रवणं राजशार्दूल वेदाभ्यासस्तथैव च ॥२३॥ मद्भक्त्या जनवात्सल्यं पूजायां चानुमोदनम् ॥ स्वयमभ्यर्चयेद्भक्त्या
ममाग्रे वाचकं परम् ॥ २४ ॥ पुस्तकस्य सदा श्रेष्ठ ममातीव प्रियं सुराः ॥ मत्कथाश्रवणं नित्यं स्वरनेत्रांगविक्रिया ॥ २५ ॥ ममानुस्मरणं नित्यं

भक्त्या श्रद्धापुरस्कृतम् ॥ षोडशांगा भक्तिरियं यस्मिन्म्लेच्छेपि वर्तते ॥ विप्रेंद्रः स मुनिः श्रीमान्स जात्यः स च पंडितः ॥२६॥ न मे पृथक्च
तुर्वेदा मद्भक्तः श्वपचोपि यः ॥ तस्मै देयं ततो ग्राह्यं स च पूज्यो यथा ह्यहम् ॥ २७ ॥ पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ॥ तस्याहं
न प्रणश्यामि स च मे न प्रणश्यति ॥ २८ ॥ यो मां सर्वगतं पश्येत्सर्वं च मयि संस्थितम् ॥ तस्याहमास्थितो नित्यं स च नित्यं मयि
स्थितः ॥ २९ ॥ अष्टादशार्धकक्षायाः परं चाष्टभिरुद्भवैः ॥ रोधयित्वा महाबाहो तथा ज्ञानतरेण तु ॥ ३० ॥ दुर्गपालं विजित्याशु भास्करार्धं तु
दुर्जयम् ॥ जित्वा च पुरराजानं महातेजमनौपमम् ॥ ३१ ॥ मनसाचलया भक्त्या यो मां ध्यायति मानवः ॥ अहं तमेव चिंतामि आत्मवत्सततं
नरम् ॥ ३२ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मवर्णनं नामैकपंचाशदुत्तरशततमोऽध्यायः ॥ १५१ ॥ छ॥ ॥ सुमंतु
रुवाच ॥ ॥ सूरे च दुर्लभा भक्तिर्दुर्लभं सूरपूजनम् ॥ सूराय दुर्लभं दानं सूरहोमश्च दुर्लभः ॥ १ ॥ सुदुर्लभं रवेर्ज्ञानं तदभ्यासोपि दुर्लभः ॥
सुदुर्लभतरं ज्ञेयं खषोल्कज्ञानमुत्तमम् ॥ २ ॥ सुदुर्लभतरं ज्ञानं सदा वै भास्करस्य तु ॥ प्रदक्षिणां चक्रतुर्वै पादौ भक्त्याऽर्कमंदिरे ॥ ३ ॥
तौ करौ श्लाघ्यतां प्राप्तौ यौ पूजां चक्रतू रवेः ॥ सैवैका रसना धन्या स्तोत्रं या कुरुते रवेः ॥ ४ ॥ तन्मनः पुण्यतां प्राप्तं यद्धित्वा विषयं
नृप ॥ निश्चला च रवेर्लीला निर्भीका क्रोधवर्जिता ॥ ५ ॥ ॥ शतानीक उवाच ॥ ॥ सूर्यार्चनविधिं कुर्वञ्छ्रोतुमिच्छामि तत्त्वतः ॥
त्वत्प्रसादाद्द्विजश्रेष्ठ कौतूहलमतीव मे ॥ ६ ॥ यत्पुण्यं स्थापिते सूर्ये कृते सूर्यालये च यत् ॥ सम्मार्जने च यत्पुण्यं यत्पुण्यमुपलेपने ॥
॥ ७ ॥ स्थाने कृते च यत्पुण्यं तथा नीराजने कृते ॥ नीलौषधिप्रवापेन नृत्यमंगलवादितैः ॥ ८ ॥ अर्घ्यदानेन यत्पुण्यं तोयस्नानेन यद्भ
वेत् ॥ पंचामृतमयस्नाने दधिस्नाने च यत्फलम् ॥ ९ ॥ चक्राभ्यंगे च यत्प्रोक्तं वस्त्रस्नाने च यत्फलम् ॥ मधुस्नाने पयःस्नाने स्नान इक्षुर
सस्य तु ॥ १० ॥ उद्वर्तनं शुचिस्थाने कुशपुष्पोदकेन तु ॥ सुवर्णरत्नतोयैश्च गंधचन्दनवारिभिः ॥ ११ ॥ कर्पूरागुरुतोयेन स्वच्छतो
येन यत्फलम् ॥ विलेपनैश्च गंधाढ्यैर्विलेपनफलं लभेत् ॥१२॥ तालपत्रप्रदाने तु प्रदाने चामरस्य तु ॥ रक्तपुष्पार्चने यच्च दामभिः पूजनेन च ॥
॥ १३ ॥ सुमानां मंडपे यच्च पुष्पमालावलंबनात् ॥ पूजाभक्तिविशेषैश्च गृहमालावलंबने ॥ १४ ॥ पुष्पदानविशेषेण धूपदीपैश्च यत्फलम् ॥
वस्त्रालंकारदाने तु पुण्यश्रवणकीर्तने ॥ १५ ॥ ब्रह्मश्रवस्य दाने तु अव्यंगस्य च गोपते ॥ मगानां मत्प्रसादेन अभिवादनपूजने ॥ १६ ॥ व्योम

पूजाफलं यच्च अरुणस्य च पूजनम् ॥ तथान्यदपि यत्प्रोक्तमज्ञानाद्ब्राह्मणोत्तम ॥ १७ ॥ तत्सव ब्रूहि मे ब्रह्मन्भक्तानामनुकंपया ॥१८॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सूरधर्मेषु प्रश्नवर्णनं नाम द्विपंचाशदुत्तरशततमोऽध्यायः ॥ १५२ ॥ ॥ छ ॥ ॥ सुमंतुरुवाच ॥ ॥ सुमतिश्च रवेर्भक्तः पांडवेय महामते ॥ अतस्ते निखिलं वच्मि शृणुष्वैकमना नृप ॥ १ ॥ कल्पादौ सृजतो वीर ब्रह्मणो विविधाः प्रजाः ॥ अहंकारो महानासीन्नास्ति लोके मदुत्तमः ॥ २ ॥ तथा पालयतो वीर केशवस्य धरापते ॥ तथा संहरतो जज्ञेऽहंकारस्त्र्यम्बकस्य च ॥ ३ ॥ चिंतयंतोऽथ ते देवाः केशवश्च नराधिप ॥ मिथस्ते स्पर्धया युक्ताः परस्परविरोधिनः ॥ ४ ॥ विवादस्तु महानासीत्कंजजांबुनगौकसाम् ॥ परस्परं महाबाहो मनसाश्रित्य केवलम् ॥ ५ ॥ अहं कर्ता विकर्ताऽहं पालकोऽहं जगत्प्रभुः ॥ इत्याह भगवान्ब्रह्मा कृष्णभीमौ समर्चितौ ॥ ६ ॥ तथैत्य शंकरः क्रुद्धः कः शक्तो मद्दते भुवि ॥ संहर्तुं जगदेतद्धि स्रष्टुं पालयितुं तथा ॥ ७ ॥ नारायणोऽप्येवमेव मनाक् क्रोधसमन्वितः ॥ न वा शक्तो जगत्स्रष्टुं संहर्तुं रक्षितुं तथा ॥८॥ एवं तेषां प्रवदतां क्रुद्धानां च परस्परम् ॥ समाविशत्तदाऽज्ञानं तमो मोहात्मकं विभो ॥९॥ तेन क्रांतधियः सर्वे न पश्यंति परस्परम् ॥ अत्यर्थं मोहमापन्ना न जानंतीह किंचन ॥ १० ॥ अपश्यंतो मिथस्ते तु निषण्णाः क्ष्मातले विभो ॥ आरमंति हि ये चान्ये ते दिवाकरमास्थिताः ॥ ११ ॥ तमसा मोहिताः सर्वे निद्रावत्क्रांतचेतसः ॥ मनाग्ज्ञानेन चाक्रांताः किं कुर्यामेति मोहिताः ॥ १२ ॥ अथ भूताधिपो देवो गोश्रुताभरणोज्ज्वलः ॥ चंद्रार्धकृतशोभस्तु शीतलांशुविशोधितः ॥ १३ ॥ आर्तिमेत्य परां वीर मोहितस्तमसा विभो ॥ अपश्यन्नब्रवीद्देवं माधवं भूधरं हरिम् ॥ १४ ॥ ॥ महादेव उवाच ॥ ॥ कृष्ण कृष्ण महाबाहो क्व गतस्त्वं महामते ॥ ब्रह्मा च क्व गतो वीर नाहं पश्यामि वां क्वचित् ॥ १५ ॥ मोहेन महताहं वै तमसा च विमोहितः ॥ किं करोमि क्व गच्छामि क्वचाहमधुना स्थितः ॥ १६ ॥ क्ष्माधरं पृथिवीं वृक्षान्देवगंधर्वदानवान् ॥ विपुलं सागरं सिन्धून्नाहं पश्यामि किंचन ॥ १७ ॥ केनोपायेन पश्येयं जगत्स्थावरजंगमम् ॥ ब्रूहि मे देवशार्दूल व्रीडा मेऽतीव जायते ॥ १८ ॥ शंकरस्य वचः श्रुत्वा हरिर्वचनमब्रवीत् ॥ शोकगद्गदया वाचा तमसा मोहितो नृप ॥ १९ ॥ ॥ विष्णुरुवाच ॥ ॥ भीमभीम न जानेऽहं क्व भवान्वर्ततेऽधुना ॥ ममापि मोहितं चेतस्तमसातीव शंकर ॥ २० ॥ क्व गच्छामि क्व तिष्ठामि कथं तत्स्वस्थतां व्रजेत् ॥ तमसा पूरितं सर्वं जगद्धि परमेश्वर ॥ २१ ॥ यद्यसौ दृश्यते देवः सुरज्येष्ठोंऽबुजोद्भवः ॥ पृच्छावस्तं महात्मानं यदि ते रोचते हर ॥ २२ ॥ हित्वा दर्पमहंकारं सममास्थाय केवलम् ॥ पद्माननं पद्मयोनिं पद्मपत्रनिभेक्षणम् ॥ २३ ॥ इत्येवं गदतो वाक्यं विष्णोरमिततेजसः ॥ श्रुत्वोवाच विभु

ब्रह्मा गंगाधरमहीधरौ ॥ २४ ॥ कृष्णकृष्ण महाबाहो भीमभीम महामते ॥ क्व भवंतौ ब्रूत किंच किं युवामूचथुर्मिथः॥ २५ ॥ ममातीव मनोबुद्धी
तमसा वशमागते ॥ न शृणोमि न पश्यामि निद्रामोहवशं गतः ॥ २६ ॥ अहो बत जगत्सर्वं सदेवासुरमानुषम् ॥ तमसा व्याप्टतं देवौ न जाने
क्व गतं महः ॥ २७ ॥ अथ तेषां प्रवदतां ब्रह्मादीनां दिवौकसाम् ॥ दर्पक्रोधभयार्तानां तमसाक्रांतचेतसाम् ॥ २८ ॥ तेषां दर्पापहाराय प्रबो
धार्थं च गोपतेः ॥ तेजोरूपं समुद्भूतमष्टशृंगमनौपमम् ॥ २९॥ अलक्ष्यं पापतमसा महद्व्योम नराधिप ॥ ज्वालामालावृतं वीर बहुरूपं च भासते
॥ ३० ॥ शतयोजनविस्तीर्णं गतमूर्ध्वं भ्रमत्तथा ॥ गोमध्यतो महाराज कर्णिकेवांबुजस्य तु ॥ ३१ ॥ प्रकाशं तेजसा तस्य जगत्सर्वमिदं नृप ॥
पुरेष्वंतर्यथा वीर अंबुजस्यार्चिभिः सदा ॥३२॥ दृष्ट्वा परस्परं सर्वे हुंकारादिविकारिणः॥ तेजसा मोहितास्तस्य जगत्सर्वमिदं नृप ॥३३॥ तेजसा
मोहितं तस्य महद्व्योम नराधिप॥ ततो विस्मयमासीना दृष्टगोपतयो नृप ॥ ३४ ॥ पश्यमाना महो व्योम्नि मिथो वचनमब्रुवन् ॥ अहो तेजः
समुद्भूतमस्माकं श्रेयसे नृप ॥ ३५ ॥ प्रकाशाय च लोकानां सर्वे पश्याम किं न्विदम् ॥ ज्ञानायोर्ध्वं गतो ब्रह्मा चाधस्तात्त्रिपुरांतकः ॥३६॥ तिर्य
ग्जगाम देवेशश्चक्रांबुजगदाधरः ॥ अलब्ध्वा तस्य ते सर्वे प्रमाणं गैरिकाधिपाः ॥३७॥ विस्मयोत्फुल्लनयनाः समागम्य परस्परम्॥सर्वे कंजादिका देवा
इदं वचनमब्रुवन् ॥३८॥ कोऽयं किमात्मकश्चायं किमिदं तेजसां निधिः ॥ अहोऽस्य दर्शनात्सर्वे संजाता ज्ञानिनो वयम् ॥३९॥ तस्मात्सर्वे प्रणम्यैनं
स्तुवीमोऽद्भुतदर्शनम् ॥ कृतांजलिपुटाः सर्वे चास्तुवंस्त्रिदिवौकसः ॥ ४० ॥ स्तुवतामप्यथैतेषां सहस्रकिरणो रविः ॥ आत्मानं दर्शयामास कृपया
परया वृतः ॥ ४१ ॥ ज्ञात्वा भक्तिं महाबाहो ब्रह्मादीनां महोपमाम् ॥ अथ ते व्योम्नि देवेशं ददृशुः परमेश्वरम् ॥४२॥ खषोल्कलोकनाथेशं सहस्र
किरणोज्ज्वलम् ॥ कृत्तिकाभिरसंस्पृष्टं यद्वा तत्कार्तिकास्थितम् ॥ ४३ ॥ दुर्जयं कृत्तिकानां तु तथैकेन विवर्जितम् ॥ तथा हस्तविहीनं च सप्त
र्षिरहितं तथा ॥४४॥ वर्षाब्दारहितं देवं सप्तस्वरविवर्जितम् ॥ सकलं निष्कलं चैव सदैकाकाररूपिणम् ॥४५॥ तद्दृष्ट्वानेकशिरसमनेकचरणं तथा ॥
अनेकोदरबाह्वंसमनेकाभरणान्वितम् ॥ ४६ ॥ अनेकाननमक्षीबं सहस्राक्षमनौपमम् ॥ अनेकवर्णरूपं च अनेकमुकुटोज्ज्वलम् ॥ ४७ ॥ दृष्ट्वैवं
देवदेवस्य रूपं भानोर्महात्मनः ॥ विस्मयोत्फुल्लनयनास्तुष्टुवुस्ते दिवाकरम् ॥ ४८ ॥ कृतांजलिपुटो भूत्वा ब्रह्मा स्तोतुं प्रचक्रमे ॥ प्रणम्य शिरसा
भानुमिदं वचनमब्रवीत् ॥४९॥ ॥ ब्रह्मोवाच ॥ ॥ नमस्ते देवदेवेश सहस्रकिरणोज्ज्वल ॥ लोकदीप नमस्तेऽस्तु नमस्ते कोणवल्लभ ॥५०॥
भास्कराय नमो नित्यं खषोल्काय नमोनमः ॥ विष्णवे कालचक्राय सोमायामिततेजसे ॥ ५१ ॥ नमस्ते पंचकालाय इन्द्राय वसुरेतसे ॥ खगा

य लोकनाथाय एकचक्ररथाय च ॥ ५२ ॥ जगद्धिताय देवाय शिवायामिततेजसे ॥ तमोघ्नाय सुरूपाय तेजसां निधये नमः ॥ ५३ ॥ अर्थाय
कामरूपाय धर्मायामिततेजसे ॥ मोक्षाय मोक्षरूपाय सूर्याय च नमोनमः ॥ ५४ ॥ क्रोधलोभविहीनाय लोकानां स्थितिहेतवे ॥ शुभाय शुभरू
पाय शुभदाय शुभात्मने ॥ ५५ ॥ शांताय शांतरूपाय शांतयेस्मासु वै नमः ॥ नमस्ते ब्रह्मरूपाय ब्राह्मणाय नमोनमः ॥ ५६ ॥ ब्रह्मदेवाय ब्रह्म
रूपाय ब्रह्मणे परमात्मने ॥ ब्रह्मणे च प्रसादं वै कुरु देव जगत्पते ॥ ५७ ॥ एवं स्तुत्वा रविं ब्रह्मा श्रद्धया परया विभो ॥ तूष्णीमासीन्महाभाग
प्रहृष्टेनांतरात्मना ॥५८॥ ब्रह्मणोऽनंतरं रुद्रः स्तोत्रं चक्रे विभावसोः ॥ त्रिपुरारिर्महातेजाः प्रणम्य शिरसा रविम् ॥ ५९ ॥ ॥ महादेव उवाच ॥ ॥
जय भाव जयाजेय जय हंस दिवाकर ॥ जय शंभो महाबाहो खग गोचर भूधर ॥ ६० ॥ जय लोकप्रदीपेन जय भानो जगत्पते ॥ जय काल
जयानंत संवत्सर शुभानन ॥६१॥ जय देवादितेः पुत्र कश्यपानंदवर्धन ॥ तमोघ्न जय सप्तेश जय सप्ताश्ववाहन ॥६२॥ ग्रहेश जय कांतीश जय
कालेश शंकर ॥ अर्थकामेश धर्मेश जय मोक्षेश शर्मद ॥ ६३ ॥ जय वेदांगरूपाय ग्रहरूपाय वै नमः ॥ सत्याय सत्यरूपाय सुरूपाय शुभाय
च ॥६४॥ क्रोधलोभविनाशाय कामनाशाय वै जय ॥ कल्माषपक्षिरूपाय यतिरूपाय शंभवे ॥६५॥ विश्वाय विश्वरूपाय विश्वकर्माय वै जय ॥
जयोंकार वषट्कार स्वाहाकार स्वधामय ॥६६॥ जयाश्वमेधरूपाय चाग्निरूपार्यमाय च ॥ संसारार्णवपीताय मोक्षद्वारप्रदाय च ॥ ६७ ॥ संसारा
र्णवमग्नस्य मम देव जगत्पते ॥ हस्तावलंबनो देव भव त्वं गोपतेद्भुत ॥ ६८ ॥ ईशोप्येवमहीनांगं स्तुत्वा भानुं प्रयत्नतः ॥ विरराम महाराज
प्रणम्य शिरसा रविम् ॥ ६९ ॥ अथविष्णुर्महातेजाः कृतांजलिपुटो रविम् ॥ उवाच राजशार्दूल भक्त्या श्रद्धासमन्वितः ॥ ७० ॥ ॥ विष्णुरु
वाच ॥ ॥ नमामि देवदेवेशं भूतभावनमव्ययम्॥दिवाकरं रविं भानुं मार्तंडं भास्करं भगम् ॥ ७१ ॥ इंद्रं विष्णुं हरिं हंसमर्कं लोकगुरुं विभुम्॥
त्रिनेत्रं त्र्यक्षरं त्र्यंगं त्रिमूर्तिं त्रिगतिं शुभम् ॥७२॥ षण्मुखाय नमो नित्यं त्रिनेत्राय नमोनमः॥चतुर्विंशतिपादाय नमो द्वादशपाणये॥७३॥नमस्ते
भूतपतये लोकानां पतये नमः॥देवानां पतये नित्यं वर्णानां पतये नमः ॥७४॥ त्वं ब्रह्मा त्वं जगन्नाथो रुद्रस्त्वं च प्रजापतिः ॥ त्वं सोमस्त्वं तथा
दित्यस्त्वमोंकारक एव हि ॥ ७५ ॥ बृहस्पतिर्बुधस्त्वं हि त्वं शुक्रस्त्वं विभावसुः ॥ यमस्त्वं वरुणस्त्वं हि नमस्ते कश्यपात्मज ॥ ७६ ॥ त्वया
ततमिदं सर्वं जगत्स्थावरजंगमम् ॥ त्वत्त एव समुत्पन्नं सदेवासुरमानुषम् ॥ ७७ ॥ ब्रह्मा चाहं च रुद्रश्च समुत्पन्ना जगत्पते ॥ कल्पादौ तु पुरा
देव स्थितये जगतोनघ ॥ ७८ ॥ नमस्ते वेदरूपाय अहोरूपाय वै नमः ॥ नमस्ते ज्ञानरूपाय यज्ञाय च नमोनमः ॥ ७९ ॥ प्रसीदास्मासु

देवेश भूतेश किरणोज्ज्वल ॥ संसारार्णवमग्नानां प्रसादं कुरु गोपते ॥ वेदांताय नमो नित्यं नमो यज्ञकलाय च ॥ ८० ॥ ॥ सुमंतुरुवाच ॥ ॥
स्तुत्वैवं भास्करं भक्त्या विष्णुर्भरतसत्तम ॥ प्रदध्यौ नृपशार्दूल रविं तद्गतमानसः ॥ ८१ ॥ एवं ते नरशार्दूल देवा ब्रह्मादयोऽनघ ॥ स्तुवंति तं
महात्मानं सहस्रकिरणं रविम् ॥८२॥ इत्येवं स्तुवतां तेषां रविं भक्त्या महात्मनाम् ॥ अथ तुष्टो रविस्तेषां ब्रह्मादीनां जगत्पतिः ॥८३॥ विज्ञाय
भक्तिं परमां श्रद्धां च परमां विभुः ॥ उवाच स महातेजाः प्रहृष्टेनांतरात्मना ॥८४॥ ग्रहेशो व्योम चारूढस्तेजसा प्रज्वलन्दिशः ॥ ब्रह्माणं विष्णुमी
शानमामंत्र्यैतान्विशांपते ॥८५॥ दृष्ट्वा तान्प्रणतान्त्सर्वाञ्छिरोभिरवनिं गतान् ॥ तुष्टोऽस्मि ते सुरज्येष्ठ चतुर्मुख जगत्पते ॥ वरं वरय भद्रं ते मनसा
त्वं यमिच्छसि ॥ ८६ ॥ श्रुत्वा तु वचनं भानोर्ब्रह्मा लोकगुरुर्नृप ॥ जगाम शिरसा भूमावुवाच स कृतांजलिः ॥८७॥ ब्रह्मोवाच ॥ कृतकृत्योऽस्मि
देवेश पूतश्चास्मि खगाधिप ॥ धन्योऽस्म्यनुगृहीतोऽस्मि गतोऽस्मि परमां गतिम् ॥ सहस्रकिरणैर्यन्मे भवान्दर्शनमागतः ॥ ८८ ॥ अपश्यतश्च
देवेश मूढमासीन्मनो मम ॥ भगवन्त्संप्रसीद त्वं ममोपरि विभावसो ॥९०॥ प्रयच्छ त्वं बलं भक्तिमात्मनो मम गोपते ॥ गत्वा शिरोभिरवनिम
ष्टांगैः पतितस्य च ॥ भक्त्या विज्ञप्तिमाकर्ण्य प्रसादं कुरु गोपते॥९१॥ब्रह्मणो वचनं श्रुत्वा पूषा देवो जगत्पतिः ॥ तथेत्याह महाराज विरिंचि प्रश्रया
न्वितम् ॥ ९२ ॥ ब्रह्मणे च वरं दत्त्वा राजन्देवो दिवाकरः ॥ उवाच त्र्यंबकं देवं शशांककृतशेखरम् ॥९३॥ वरं वरय भूतेश भूभृज्जादयितानघ ॥
यमिच्छसि महादेव ददेहं तदशेषतः ॥ ९४ ॥ भास्करस्य वचः श्रुत्वा ईश्वरस्त्रिपुरांतकः ॥ गत्वा तु शिरसा भूमौ प्रणम्योवाच भास्करम् ॥९५॥
॥ ॥ महादेव उवाच ॥ ॥ पुण्योऽहं पुण्यकर्माहं नास्ति धन्यतरो मम ॥ गतोऽहं परमां सिद्धिं गतश्च परमां गतिम् ॥ ९६ ॥ नाप्राप्यमस्ति
देवेश नासाध्यं मम किंचन ॥ यस्य मे भगवान्देवः प्रसादप्रवणः स्थितः ॥ ९७ ॥ त्वया ततमिदं सर्वं जगत्स्थावरजंगमम् ॥ त्वत्त एव समुत्पन्नं
लयं च त्वयि यास्यति ॥ ९८ ॥ यदि तुष्टो मम विभो अनुग्राह्योऽस्मि ते यदि ॥ अचलां देहि मे भक्तिमात्मनश्चरणं नय ॥ ९९ ॥ व्योमकेश
वचः श्रुत्वा पूषा देवो दिवाकरः ॥ तथेत्याह हरं वीर ततो हरिमुवाच ॥ १०० ॥ नारायण महाबाहो वरं वरय गोधर ॥ परितुष्टोऽस्मि ते देव
यमिच्छसि महाबल ॥ १०१ ॥ श्रुत्वा तु भास्करवचः कीलालजनको हरिः ॥ उवाच परया भक्त्या नत्वा च शिरसा रविम् ॥ १०२ ॥
॥ ॥ नारायण उवाच ॥ ॥ जय देव जगन्नाथ जय देव गुरो रवे ॥ प्रसीद मम देवेश भक्तिं यच्छात्मनो रवे ॥ १०३ ॥ येनाहं सर्वदेवाना
मुत्तमः स्यां जगत्पते ॥ अजेयश्च तथा देव दैत्यदानवरक्षसाम् ॥ १०४ ॥ त्वद्भक्त्या बृंहितबलस्तेजसा महतान्वितः ॥ ततो मया महत्कर्म कर्तव्यं

तव शासनात् ॥ १०५ ॥ प्रजानां पालनं देव देवानां च ग्रहाधिप ॥ वर्णानामाश्रमाणां च वर्णधर्मस्य वा विभो ॥ १०६ ॥ दुष्टदैत्यविनाशाय
लोकानां पालनाय च ॥ सृष्टोऽहं भवता पूर्वं कल्पादौ च कृतोऽनघ ॥ १०७ ॥ यस्य रुष्टो भवान्स्त्याद्वै कथंचित्पुरुषस्य तु ॥ व्याधिर्दुःख
मनारोग्यं दारिद्र्यं संततिक्षयः ॥ १०८ ॥ तस्यैतानि भवंतीह आधयो विविधास्तथा ॥ तस्मात्त्वं च ततो देव संस्तव्यः सततं बुधैः ॥ १०९ ॥
एवं त्वां गोपते देव भक्त्या श्रद्धासमन्वितः ॥ अहमर्चितुमिच्छामि तस्मान्मयि कृपां कुरु ॥ ११० ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि
सप्तमीकल्पे सौरधर्मे सूर्यतेजोवर्णनं नाम त्रिपञ्चाशदुत्तरशततमोऽध्यायः ॥ १५३ ॥छ॥ ॥ सुमंतुरुवाच ॥ ॥ श्रुत्वा तु वचनं भानुर्विष्णोरमि
ततेजसः ॥ उवाच कुरुशार्दूल आदित्यः कृपयान्वितः ॥१॥ ॥ आदित्य उवाच ॥ ॥ कृष्णकृष्ण महाबाहो शृणु मे परमं वचः ॥ यदर्थं प्रार्थितः
कृष्ण तत्सर्वं ते भविष्यति ॥२॥ देवदानवयक्षाणां गंधर्वोरगरक्षसाम् ॥ अजेयस्त्वं महाबाहो भविष्यसि न संशयः ॥३॥ जगत्पालयितुं सर्वं सम
र्थश्च भविष्यसि ॥ अचला तव भक्तिश्च भविष्यति ममोपरि ॥४॥ ब्रह्मापि सततं शक्तो जगत्स्रष्टुं भविष्यति ॥ संहर्तुं शंकरश्चापि मत्प्रसादाद्भवि
ष्यति ॥५॥ भवन्तो मत्प्रसादेन ज्ञानिनामुत्तमं पदम् ॥ गमिष्यंति न संदेहो मम पूजाप्रसादतः ॥६॥ रवेर्वचनमाकर्ण्य गोश्रुताभरणो विभो ॥
उचाच गोपतिर्गोगो गोपतिं गोवृषध्वजः ॥ ७ ॥ त्वामाराध्य भविष्यामो वयं सर्वे सुरोत्तमाः ॥ कथमाराधयामो हि भवन्तं श्रद्धयान्विताः ॥
श्रेयसे सततं देव ब्रूहि नस्तत्त्वमात्मनः ॥ ८ ॥ भवतो हि न पश्यामो मूर्तिं परमपूजिताम् ॥ पश्यामः केवलं तेजो ह्यब्धेस्तोयमिवोज्झितम् ॥
॥ ९ ॥ ज्वालामालाकुलं सर्वमनेकाकृति चाद्भुतम् ॥ न चाकारविहीनं तु चेतसो लंबनं भवेत् ॥१०॥ आलंबनादृते देव न चित्तरमणं क्वचित् ॥
चेतसोऽरमणे भक्तिर्न पुंसां जायते क्वचित् ॥ ११ ॥ भक्तिं विना पूजयितुं न शक्यंते दिवौकसः ॥ त्वत्पूजने हि प्राप्यंते देव धर्मादयो नरैः ॥
॥ १२ ॥ तस्माद्दर्शय तां मूर्तिमात्मनो या परा मता ॥ येन त्वां पूजयित्वा तु वयं सिद्धा भवामहे ॥ १३ ॥ ॥ सूर्य उवाच ॥ ॥ साधुसाधु
महादेव साधु पृष्टोऽस्मि सुव्रत ॥ शृणु चैकमनाः कृत्स्नं गदतो मम मानद ॥ १४ ॥ चतुर्मूर्तिरहं देव जगद्व्याप्य व्यवस्थितः ॥ श्रेयसे सर्वलोका
नामादिमध्यांतकृत्सदा ॥ १५ ॥ एका मे राजसी मूर्तिर्ब्रह्मेति परिकीर्तिता ॥ सृष्टिं करोति सा नित्यं कल्पादौ जगतां विभो ॥ १६ ॥ द्वितीया
सात्त्विकी प्रोक्ता या परा परिकीर्तिता ॥ जगत्सा पालयेन्नित्यं दुष्टदैत्यविनाशिनी ॥१७॥ तृतीया तामसी ज्ञेया ईशेति परिकीर्तिता ॥ त्रैलोक्यं
संहरेत्सा तु कल्पांते शूलपाणिनी ॥ १८ ॥ चतुर्थी तु गुणैर्हीना सत्यादिभिरनुत्तमा ॥ सा चाशक्या क्वचिद्द्रष्टुं स्थिता सा चाभवत्सदा ॥ १९ ॥

तया ततमिदं सर्वं यच्चोद्गीथं तु मे गतिः ॥ निष्कला सकला सा तु सुरूपा रूपवर्जिता ॥२०॥ अंतर्गता च लोकानां न च कर्मफलं गता ॥ तिष्ठमाना
प्यलिप्ता सा पद्मपत्रमिवांभसा ॥२१॥ अस्पृष्टा च सदा षड्भिः सप्तातीत्य व्यवस्थिता ॥ चतुस्तना च सा षड्भ्यस्तुरीयाख्या सुपूजिता ॥२२॥ न सा
स्प्रष्टुं त्वया शक्या हरिणा ब्रह्मणा न च ॥ मामनाराध्य भूतेश व्योमरूपं कदाचन ॥ २३ ॥ यदेतद्भवतां देव प्रबोधार्थमुपस्थितम् ॥ अहंकार
विमूढानां तमसा च त्रिलोचन ॥ २४ ॥ प्रकाशाय च लोकानां ज्वालामालासमाकुलम् ॥ कर्णिकेव स्थितं देवभूपद्मस्याखिलस्य च ॥ २५ ॥
यस्य संदर्शनादेव यूयं सर्वे प्रबोधिताः ॥ प्रकाशमभवद्वापि जगत्सर्वमथार्चिभिः ॥ २६ ॥ तस्मादाराधयस्वैनमस्पृष्टं गमनोपमम् ॥ मन्मूर्ति
येन तां दिव्यां द्रक्ष्यसि त्वं त्रिलोचन ॥ २७ ॥ यत्त्वाद्यमीश्वरं जज्ञे तद्व्योम परिकीर्तितम् ॥ कल्पांते ह्यत्र वै व्योम्नि लीयंते सर्वदेवताः ॥ २८ ॥
दक्षिणे लीयते ब्रह्मा वामे तस्य जनार्दनः ॥ त्वं सदा कचदेशे तु लीयसे त्रिपुरांतक ॥ २९ ॥ गायत्री लीयते तस्य हृदये लोकमातरः ॥ लीयंते
मूर्ध्नि वै वेदः सषडंगपदक्रमः ॥ ३० ॥ जठरे लीयते सर्वं जगत्स्थावजंगमम् ॥ पुनरुत्पद्यते ह्यस्माद्ब्रह्माद्यं सचराचरम् ॥ ३१ ॥ आकाशं व्योम
इत्याहुः पृथिवी निक्षुभा मता ॥ भूतश्रेयोहमाकाशो निक्षुभा दयिता मम ॥ ३२ ॥ मया निक्षुभया सर्वं जगद्व्याप्तं त्रिलोचन ॥ तस्मादाराधय
व्योम त्वं ब्रह्मा केशवस्तथा ॥ ३३ ॥ तन्मे रूपं महद्व्योम पूजयित्वा त्रिलोचन ॥ दिव्यं वर्षसहस्रं हि गिरौ त्वं गंधमादने ॥ ततो यास्यसि
संसिद्धिं षडंगां परमां शुभाम् ॥ ३४ ॥ कलापग्राममाश्रित्य शंखचक्रगदाधरः ॥ आराधयतु मां भक्त्या व्योमरूपं जनार्दनः ॥ ३५ ॥ अंत
रिक्षगतं तीर्थं पुष्करं लोकपावनम् ॥ तत्र गत्वा विरिंचो मे व्योमरूपं सदार्चतु ॥ ३६ ॥ एवं मां सततं यूयं समाराध्य जगत्पतिम् ॥ समानां
च सुदिव्यानां सहस्रत्रयमादरात् ॥ ३७ ॥ ततो द्रक्ष्यथ मे मूर्तिं परमां यां विदुर्बुधाः ॥ कदंबगोलकाकारां रश्मिमालाकुलां पराम् ॥ ३८ ॥
अथ नारायणो देवः प्रणम्य शिरसा रविम् ॥ कृतांजलिपुटो भूत्वा इदं वचनमब्रवीत् ॥ ३९ ॥ ॥ विष्णुरुवाच ॥ ॥ यदि ते परमं रूपं
मतं व्योम ह्यनौपमम् ॥ तमाराध्य वयं सर्वे यास्यामः सिद्धिमुत्तमाम् ॥ ४० ॥ कीदृग्व्योम त्वहं ब्रह्मा हरश्च त्रिपुरांकः ॥ आराधयामहे देव
भक्त्या श्रेयोर्थमात्मनः ॥ ४१ ॥ येन सिद्धिं गमिष्यामस्तमाराध्य दिवाकरम् ॥ तस्मान्नो लक्षणं ब्रूहि व्योम्नः परमपूजित ॥ ४२ ॥ ॥ इति
श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मे त्र्य्युपाख्याने चतुःपंचांशदुत्तरशततमोऽध्यायः ॥ १५४ ॥ ॥ छ ॥ ॥ आदित्य
उवाच ॥ ॥ साधुसाधु सुरश्रेष्ठ साधु पृष्टोऽस्मि भूधर ॥ शृणुष्वैकमनाः कृष्ण गदतो निखिलं मम ॥ १ ॥ आराधयत्वयं देवो मम

रूपमनौपमम् ॥ चतुष्कोणं परं व्योम अद्भुतं गैरिकोज्ज्वलम् ॥ २ ॥ त्वामाराध्य च चक्रांकं शंकरो वृत्तमादरात् ॥ शब्दादौ सततं ब्रह्म सग
रादौ त्रिलोचनः ॥ ३ ॥ मध्याह्ने त्वं सदा देव भक्त्या मामर्चयस्व वै ॥ यथेष्टमृभवः सर्वे भक्त्या मां पूजयंतु वै ॥ ४ ॥ ततो ब्रह्मादयो
देवाः श्रुत्वा वाक्यं विभावसोः ॥ प्रणम्य शिरसा सर्व इदं वचनमब्रुवन् ॥ ५ ॥ धन्या देव वयं सर्वे कृतकृत्यास्तथैव च ॥ अस्माभिर्भगवान्पृष्ट
स्तेजसा प्रज्वलंति च ॥ ६ ॥ संभूता ज्ञानिनः सर्वे भवतो दर्शनाद्वयम् ॥ तमोमोहात्तथा तंद्रा सर्वमेकपदे गतम् ॥ ७ ॥ वयं त्वन्मूर्तयः
सर्वे तेजसा तव संवृताः ॥ उत्पत्तिस्थितिनाशाय लोकानां तव शासनात् ॥ ८ ॥ स्थिताः सर्वे सुरज्येष्ठ लोकपालाश्च कृत्स्नशः ॥ अधुना साध
यामेह व्योम्नः पूजां व्रजामहे ॥ ९ ॥ इत्थं तेषां वचः श्रुत्वा भास्करो वारितस्करः ॥ उवाच ब्रह्मविष्णवीशान्सामपूर्वमिदं वचः ॥ १० ॥ ॥
॥ आदित्य उवाच ॥ ॥ एवमेतन्न संदेहो यदावदथ सुव्रताः ॥ यूयं मन्मूर्तयः सर्वे युष्माकमहमेव हि ॥ ११ ॥ यदेतद्दर्शनं देवाः प्रमाणं च यदुत्तमम् ॥
ज्वालामालाकुलं शुभ्रं शांडिलेयमिवोज्झितम् ॥ १२ ॥ युष्माकं देवशार्दूलास्तन्निबोधत कारणम् ॥ अहंकारविमूढानां मिथः कलहिनां तथा ॥
॥ १३ ॥ प्रबोधार्थं हि युष्माकं तमसो नाशनाय च ॥ प्रवर्तनाय सर्वेषां कर्मणां च प्रदर्शितम् ॥ १४ ॥ तस्मादेवं विदित्वा तु नाहंकारः कदाचन ॥
कर्तव्यो भूतिमिच्छद्भिः सततं देवसत्तमाः ॥ १५ ॥ मानं दर्पमहंकारं पूर्वं त्यक्त्वा सुदूरतः ॥ आराधयत मां भक्त्या सततं श्रद्धयान्विताः ॥ १६ ॥
ततो द्रक्ष्यथ मे रूपं सकलं निष्कलं च यत् ॥ यस्य संदर्शनादेव सर्वे सिद्धिमवाप्स्यथ ॥ १७ ॥ एवमुक्त्वा महाराज सहस्रकिरणो विभुः ॥ जगामा
दर्शनं तेषां पश्यतामेव भारत ॥ १८ ॥ अथ ते विस्मिताः सर्वे ब्रह्मविष्णुपिनाकिनः ॥ तेजसा तस्य देवस्य भास्करस्य महौजसः ॥ १९ ॥ परस्परम
थोचुस्ते विस्मयेन तदा नृप ॥ अहो महात्माऽयं देवोऽदितिपुत्रो दिवस्पतिः ॥ २० ॥ बृहद्भानुर्महातेजा लोकदीपो विभावसुः ॥ येन सर्वे वयं त्राता
निघ्नता विपुलं तमः ॥ २१ ॥ आराधयामस्तं सर्वे गत्वा स्थानानि कृत्स्नशः ॥ येन सर्वे वयं तस्य प्रसादात्सिद्धिमाप्नुमः ॥ २२ ॥ तद्व्योम पूजयित्वा
तु परया श्रद्धया विभोः ॥ आमंत्र्य ते मिथः सर्वे गताः पूजार्थमादरात् ॥ २३ ॥ जगाम पुष्करं ब्रह्मा शालग्रामं जनार्दनः ॥ वृषभध्वजो गतो वीर
पर्वतं गंधमादनम् ॥ २४ ॥ त्यक्त्वा मानमहंकारं कुर्वंतस्तप उत्तमम् ॥ आराधयंति तं देवं भास्करं वारितस्करम् ॥ २५ ॥ व्योम्नि कृत्वा चतुष्कोणं
ब्रह्मा नित्यमपूजयत् ॥ चक्रांकितं हरिर्नित्यं सम्यग्व्योम त्वपूजयत् ॥ २६ ॥ हरोऽपि सततं वीर तेजसा वह्निसन्निभम् ॥ अपूजयत्सदा वृत्तं
व्योम भक्त्या समन्वितः ॥ २७ ॥ दिव्यवर्षसहस्रांते पूजयंतो दिवाकरम् ॥ गंधमाल्योपहारैस्तु नृत्यगीतप्रवादितैः ॥ २८ ॥ अतोषयन्महात्मानं

कुर्वाणास्तप उत्तमम् ॥ भक्त्याचलेन मनसा विवस्वंतमनुत्तमम् ॥ २९ ॥ अथ तेषां महाराज प्रसन्नो भुवनाधिपः ॥ दर्शयामास लोकात्मा
युगपद्वै विभावसुः ॥ ३० ॥ कृष्णात्मा च महातेजाश्चतुर्धा योगतोनघ ॥ गत्वैकेन सुरश्रेष्ठं सोब्रवीत्परमं वचः ॥ ३१ ॥ अन्येन शंकरं मन्ये
अन्येन गरुडध्वजम् ॥ स तताप तथान्येन रथारूढो दिवं सदा ॥ ३२ ॥ एवं योगबलाद्भानुः कृतवान्महदद्भुतम् ॥ उग्रे तपसि वर्तंतं दृष्ट्वा चैनं
चतुर्मुखम् ॥ ३३ ॥ पूजयन्तं महद्व्योम भूगतैर्मुखपङ्कजैः ॥ उवाच तं महाराज भास्करश्चतुराननम् ॥ ३४ ॥ पश्यपश्य सुरज्येष्ठ वरदं
मामुपागतम् ॥ श्रुत्वैवं वचनं भानोर्विरिंचस्तमथैक्षत ॥ ३५ ॥ दृष्ट्वा जगाम प्रणतो ह्यवनिं मुखपंकजैः ॥ हर्षादुत्फुल्लनयनः पुनरुत्थाय
भास्करम् ॥ उवाच परमं वाक्यं कृतांजलिपुटः स्थितः ॥ ३६ ॥ ॥ ब्रह्मोवाच ॥ ॥ नमस्ते देवदेवेश नमस्ते तिमिरापह ॥ नमस्ते भूत
भव्येश भूतादे भूतभावन ॥ ३७ ॥ प्रसादं कुरु मे देव प्रसन्नोऽथ दिवाकरः ॥ गतिरन्या न मे देव विद्यते त्वदृते विभो ॥ ३८ ॥ ॥ आदित्य
उवाच ॥ ॥ एवमेव यथात्थ त्वं नास्ति तत्र विचारणा ॥ त्वं मे प्रथमजः पुत्रः संभूतः कारणात्पुरा ॥ ३९ ॥ वरं वरय भद्रं ते वरदोस्मि
तवाग्रतः ॥ यमिच्छसि सुरज्येष्ठ मा त्वं शंकां कुरु प्रभो ॥ ४० ॥ ॥ ब्रह्मोवाच ॥ ॥ यदि मे भगवांस्तुष्टो ददाति वरमुत्तमम् ॥ कर्तुं
शक्नोमि सृष्टिं च प्रसादात्तव गोपते ॥ कृताकृता हि मे देव सृष्टिर्नेह प्रसिध्यति ॥ ४१ ॥ ॥ आदित्य उवाच ॥ ॥ न पुत्रत्वमहं प्राप्तस्तव
देव चतुर्मुख ॥ तवान्वये गमिष्यामि पुत्रत्वं हि मरीचये ॥ ४२ ॥ ततो यास्यति ते सिद्धिं कृत्स्ना सृष्टिश्चतुर्मुख ॥ भवितैवं न सन्देहो मत्प्रसादा
ज्जगत्पते ॥ ४३ ॥ एवमुक्तो विरिंचिस्तु रविणा पृथिवीपते ॥ तं वै व्योढं विवस्वंतं लोकनाथं जगत्पतिम् ॥ ४४ ॥ पुनराह सुरज्येष्ठः प्रणम्य
शिरसा रविम् ॥ क्व मे वासो जगन्नाथ भविष्यति दिवस्पते ॥ ४५ ॥ ॥ आदित्य उवाच ॥ ॥ यन्मे रूपं महद्व्योम पृष्ठश्रृंगमनुत्तमम् ॥ तत्र
देवकदंबैस्तु भवान्नित्यं निवत्स्यति ॥ ४६ ॥ इन्द्रः पूर्वदिशो भागे आग्नेय्यां शांडिलीसुतः ॥ दक्षिणस्यां यमो नित्यं नैर्ऋंत्यामथ निर्ऋतिः ॥
॥ ४७ ॥ पश्चिमायां तु वरुणो वायव्यां तु सदागतिः ॥ उत्तरे तु दिशो भागे निवसेद्धनदस्ततः ॥ ४८ ॥ ऐशान्यां शंकरो देवो मध्ये त्वं
विष्णुना सह ॥ श्रुत्वैत्वं वचनं भानोर्वेधाः प्रीत्या तमब्रवीत् ॥ ४९ ॥ कृतकृत्यं तथात्मानं मन्यते च नराधिप ॥ चकार च तथा सर्वं भास्क
रोक्तमशेषतः ॥ ५० ॥ स च सिद्धिं गतो वीर प्रसादाद्भास्करस्य तु ॥ आदित्योपि वरं दत्त्वा ब्रह्मण्यो ब्रह्मणेऽनघ ॥ ५१ ॥ जगाम सह देवेन
पर्वतं गन्धमादनम् ॥ ददर्श तत्र भूतेशं तपस्तीव्रं समाश्रितम् ॥ ५२ ॥ कपर्दिनं शूलधरं चन्द्रार्ककृतशेखरम् ॥ पूजयंतं परं व्योम सुव्रतं तेज

सान्वितम् ॥ ५३ ॥ गन्धमाल्योपहारैश्च नृत्यगीतप्रवादितैः ॥ मुखवाद्यैश्च बहुभिः प्रणवस्तोत्रगीतिभिः ॥ संपूज्यैवं महद्व्योम जगाम शिरसा
महीम् ॥ ५४ ॥ दृष्ट्वैवं पूजयन्तं च भास्करस्त्रिपुरांतकम् ॥ तुष्टोवोचन्महातेजा गोश्रुताभरणं हरम् ॥ ५५ ॥ भीम तुष्टोऽस्मि ते वत्स वरं मत्तो
वृणुष्व वै ॥ तवांतिकमहं प्राप्तो वरदो भूभृदालय ॥ ५६ ॥ श्रुत्वैवं वचनं भानोर्महादेवो महीपते ॥ ददर्श लोकनाथं तं प्रज्वलंतमनुत्तमम् ॥
उवाच प्रणतो भूत्वा अष्टांगैर्भूतलं गतः ॥ ५७ ॥ नमोनमस्ते देवेश प्रभाकर दिवाकर ॥ शुभालय शुभाधार विकर्तन शुभानन ॥ ५८ ॥ प्रसादं
कुरु देवेश प्रसन्नस्त्वं विकर्तन ॥ संसारार्णवमग्नस्य भव पोतो जगत्पते ॥ ५९ ॥ तवांगसंभवो देव पुत्रोहं वल्लभस्तव ॥ यत्करोति महादेव पिता
पुत्रस्य तत्कुरु ॥ ६० ॥ ॥ आदित्य उवाच ॥ ॥ एवमेतन्न सन्देहो यथा वदसि शंकर ॥ ललाटात्त्वं समुत्पन्नः पुत्रः पुत्रवतां वर ॥ ६१ ॥
वरं वरय भद्रं ते मनसा त्वं यमिच्छसि ॥ दुर्देयं चापि ते दास्ये त्रिपुरान्तक सुन्दर ॥ ६२ ॥ ॥ महादेव उवाच ॥ ॥ यदि तुष्टोऽसि मे
देव अनुग्राह्योस्मि ते यदि ॥ प्रयच्छ मे वरं भानो देहि भक्तिं ममाचलाम् ॥ ६३ ॥ देवदानवगंधर्वयक्षरक्षोगणांस्तथा ॥ निर्जित्याहं यथा देव
युगान्ते संहरे प्रजाम् ॥ ६४ ॥ तथा प्रयच्छ मे देव स्थानं च परमं विभो ॥ येनाहं हेतिसर्वं च जये देव जगत्प्रभो ॥ ६५ ॥ ॥ आदित्य
उवाच ॥ ॥ देवदानवगन्धर्वयक्षराक्षसपन्नगान् ॥ हरिष्यसि जगच्चापि युगान्ते त्रिपुरान्तक ॥ ६६ ॥ यदेतत्पूजितं नित्यं मद्रूपं व्योम चोत्त
मम् ॥ एतत्त्रिशूलं परमं तव शस्त्रं भविष्यति ॥ ईशाने च तथा भागे व्योम्नो वासो भविष्यति ॥ ६७ ॥ ॥ महादेव उवाच ॥ ॥ एवं भवतु
मे देव यः प्रसादस्त्वया कृतः ॥ कृतकृत्योऽस्मि देवेश यन्मे देवो वरप्रदः ॥ ६८ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे
सौरधर्मनिरूपणं नाम पञ्चपञ्चाशदुत्तरशततमोऽध्यायः ॥ १५५ ॥ ॥ छ ॥ ॥ सुमन्तुरुवाच ॥ ॥ इत्थं दत्त्वा वरं भानुरीश्वराय विशां
पते ॥ शालग्रामं जगामाशु वरं दातुं हरेर्नृप ॥ १ ॥ ददर्श स हरिं तत्र तपन्तं परमं तपः ॥ कृष्णाजिनधरं शान्तं प्रज्वलन्तं स्वतेजसा ॥ २ ॥
पूजयन्तं महद्व्योम चक्राकारमनौपमम् ॥ गन्धमाल्योपहारैश्च नृत्यगीतप्रवादितैः ॥ ३ ॥ एवं संपूज्य तद्व्योम भक्त्या श्रद्धासमन्वितः ॥ जगाम
शिरसा भूमिं हृदि ध्यायन्दिवाकरम् ॥ ४ ॥ विष्णुं तं प्रणतं दृष्ट्वा तुष्टो देवो विभावसुः ॥ उवाच विष्णुमामंत्र्य :पश्य मामागतं
हरे ॥ ५ ॥ तद्वाक्यं केशवः श्रुत्वा शिरसा च महीं गतः ॥ नमस्ते सर्वदेवेश नमस्ते गगनेचर ॥ ६ ॥ जगत्पते नमस्तेऽस्तु ग्रहाणां पतये
नमः ॥ दारिद्र्यव्याधिदुःखघ्न नमस्ते भवनाशन ॥ ७ ॥ आदित्यार्क रवे भानो भग पूर्ण दिवाकर ॥ नमस्ते सर्वतत्त्वज्ञ सर्वपापवितर्जित ॥ ८ ॥

प्रसीद मे जगन्नाथ हंसानघ दिवस्पते ॥ संसारार्णवमग्नानां त्राहि देव वृषध्वज ॥ ९ ॥ पुत्रोऽहं तव देवेश द्वितीयो ब्राह्मणोऽनघ ॥ पितेव
पुत्रस्य रवे देहि कामाञ्जगत्पते ॥ १० ॥ विष्णोर्वचनमाकर्ण्य हर्षं प्राप्य दिवाकरः ॥ उवाच कुरुशार्दूल हर्षगद्गदया गिरा ॥ ११ ॥
साधु कृष्ण महाबाहो तुष्टोहं तव केशव ॥ निशम्य ते परां भक्तिं श्रद्धां च पुरुषोत्तम ॥ १२ ॥ वरं वरय तस्मात्त्वं वत्स यं मनसेच्छसि ॥ वरदोऽ
हमनुप्राप्तो भक्त्याक्रांतस्तवानघ ॥ १३ ॥ निशम्य वचनं भानोर्विष्णुर्भक्त्या समन्वितः ॥ कृतांजलिपुटो भूत्वा इदं वचनमब्रवीत् ॥ १४ ॥ कृत
कृत्योऽस्मि देवेश नास्ति धन्यतरो मम ॥ यस्य मे भगवंस्तुष्टो वरदस्त्वं गतः स्वयम् ॥ १५ ॥ यदि तुष्टो मम विभुर्भक्त्या क्रीतो मया यदि ॥
प्रयच्छत्वचलां भक्तिं यथा शत्रुं पराजये ॥ तथा मम वरं देहि सर्वाराति विनाशनम् ॥ १६ ॥ मम स्थानं च परमं सर्वलोकनमस्कृतम् ॥
लोकानां पालने युक्तिं बलं वीर्यं यशः सुखम् ॥ १७ ॥ एवमुक्तो रविर्भक्त्या विष्णुना वाक्यमुत्तमम् ॥ उवाच कुरुशार्दूल गजत्सन्नादयन्निव॥१८॥
साधु साधु महाबाहो ब्रह्मणस्त्वं जघन्यजः ॥ हरस्य अग्रजश्चापि सर्वदेवनमस्कृतः ॥ १९ ॥ भक्तश्चापि ममात्यंतं ब्रह्मण्यश्च सदानघ ॥ तस्मात्त
वाचला भक्तिर्भविष्यति ममोपरि ॥ २० ॥ एतदेव महद्व्योम चक्रं ते प्रभविष्यति ॥ सर्वायुधवरं वीर सर्वारातिविनाशनम् ॥ तथा स्थानं च परमं
सर्वलोकनमस्कृतम् ॥ २१ ॥ इत्थं भानोर्वरं प्राप्य हरिर्देवो जगत्पतिः ॥ महाप्रसादमित्युक्त्वा जगाम शिरसा महीम् ॥ २२ ॥ भास्करोऽपि
वरं दत्त्वा केशवायामितौजसे ॥ जगामाशु महाराज स्वपुरं विबुधाधिपः ॥२३ ॥ लोकानां पालने शक्तिं बलं वीर्यं यशः सुखम् ॥ दत्त्वा कृष्णाय
देवेशस्तथान्यदपि कांक्षितम् ॥ २४ ॥ एवं ब्रह्मादयो देवाः पूजयित्वा दिवाकरम् ॥ शक्तिमंतो बभूवुस्ते सर्गादीनां प्रवर्तने ॥ २५ ॥ इति ते
कथितं पुण्यमाख्यानं पापनाशनम् ॥ त्रिदैवत्यमुपाख्यानं त्रैसुरं लोकपूजितम् ॥२६॥ स्तोत्रत्रयसमायुक्तं धर्मकामार्थसाधनम् ॥ धर्म्यं स्वर्ग्यं तथा
पुण्यमारोग्यधनधान्यदम् ॥ २७ ॥ य इदं शृणुयान्नित्यं पठेत्स्तोत्रत्रयं च यः ॥ सोऽग्नेयं यानमारूढो याति भानोः परं पदम् ॥ २८ ॥ अपुत्रो
लभते पुत्रमधनो धनमश्नुते ॥ विद्यार्थी लभते विद्यां प्रसादाद्भास्करस्य तु ॥२९॥ तेजसा रविसंकाशः प्रभया पृश्निसन्निभः ॥ मोदते सुचिरं कालं
ज्ञानिनामुत्तमो भवेत् ॥ ३० ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मे त्रैसुरोपाख्यानवर्णनं नाम षट्पंचाशदुत्तरशत
तमोऽध्यायः ॥ १५६ ॥ छ ॥ ॥ शतानीक उवाच ॥ ॥ एतन्मे कौतुकं ब्रह्मन्यद्वरं ब्रह्मणे रविः ॥ दत्तवांस्तव पुत्रत्वमन्वये कश्यपस्य तु ॥
॥ १ ॥ यास्यामि द्विजशार्दूल प्रपन्नतिमिरापहः ॥ एतन्मे महदाश्चर्यं शंस भूमिं कथं व्रजेत् ॥ २ ॥ देवादीनां प्रणेता यो यो भुवि प्रसवो विभुः ॥

स कथं भूतले व्योम जन्मभावं गमिष्यति ॥ ३ ॥ किमर्थं दिव्यमात्मानं जन्मने स नियोक्ष्यति ॥ यश्चक्रं वर्तयत्येको ब्रह्मादीनां मनोरमम्॥४॥
स जन्मनि कथं पुण्यां बुद्धिं चक्रे विदांवर ॥ गोपायनं यत्कुरुते जगतः सर्वलौकिकम् ॥ ५ ॥ गोभिः पालयते कृत्स्नमात्मनो यः स्वयं रविः ॥
महाभूतानि भूतात्मा यश्चकार दधार च ॥ ६ ॥ अगर्भः स कथं गर्भमुदरे याचते विभुः ॥ येन गोभिः समाक्रांता विप्र लोकाश्चतुर्दश ॥ ७ ॥
स्थापिता जगतो मार्गास्त्रिवर्गप्रवरास्त्रयः ॥ योऽन्तकाले जगत्पीत्वा कृत्वा वज्रमयं वपुः ॥ ८ ॥ लोकमेकार्णवं चक्रे दृश्यते स्वेन कर्मणा ॥ यः
पुराणे पुराणात्मा तेजसां रूपमास्थितः ॥ ९ ॥ अपि सृष्ट्वा द्विजश्रेष्ठ यः ससर्ज वसुंधराम् ॥ चकार च पुरा यश्च त्रैलोक्यमिदमव्ययः ॥ १० ॥
ददौ कृत्वा वसुमतीं सुराणां सुरसत्तमः ॥ यः स्थितो ह्यनलं पीत्वा संवत्सरमयश्च यः ॥ पातालस्थोर्णवरसं मध्यतोयमयं हविः ॥ ११ ॥
सहस्रशिरसं देवं सहस्राक्षं सहस्रशः ॥ सहस्रचरणं ब्रह्मन्यमाहुर्वै युगे युगे ॥ १२ ॥ मुखाद्यस्य समुत्पन्नो वेधा लोकपितामहः ॥ हरिश्च वक्षसो
यस्य ललाटाद्यस्य शंकरः ॥ १३ ॥ येन ते निहता दैत्या मंदेहा नाम नामतः ॥ ब्रह्मादीनां दुराधर्षो यः सदा विघ्ननाशनः ॥१४॥ सर्वदेवमयं
कृत्वा सर्वायुधधरं वपुः ॥ एकचक्ररथारूढो गरुडाग्रजसारथिः ॥ १५ ॥ करांते यो जगत्सर्वं सह दानवराक्षसम् ॥ प्रकाशतममस्पृष्टं वपुर्यस्य
सदा द्विज ॥ १६ ॥ पूर्वां दिशं गतो नित्यमुदयाचलमक्रमम् ॥ नाशयेद्यस्तु सततं तमो लोकस्य शांतये ॥ १७ ॥ नाशयित्वा तमो यस्तु
क्रियाः सर्वाः प्रवर्तयेत् ॥ योक्राणि दक्षिणादीक्ष्य मुसलोलूखलानि च ॥ १८ ॥ गार्हपत्येन विधिना तद्वद्धार्येण कर्मणा ॥ अग्निमाह
वनीं चैव वेदिं चैव कुशं स्रुचम् ॥ प्रोक्षणीयव्रतं चैव अवभृथं तथैव च ॥ १९ ॥ सर्वानिमांश्च यश्चक्रे हव्यभागप्रदान्मुखे ॥ हव्यादांश्च सु
रान्यज्ञे कव्यादांश्च पितॄनपि ॥ २० ॥ भागार्थे मधुधानाय चक्रे यो यज्ञकर्मणि ॥ पूषणं च सुतं सोमं पवित्रामरणीमपि ॥ २१ ॥ यज्ञियानि च
द्रव्याणि यज्ञांश्चापि सऋत्विजः ॥ सदस्यान्यजमानांश्च मेधाविनस्तथोत्तमान् ॥ २२ ॥ विबभाज पुरा सर्वं पारमेष्ठ्येन कर्मणा ॥ युगानुरूपो
यः कृत्वा लोकाननुवरं क्रमात् ॥ २३ ॥ क्षणान्कलाश्च काष्ठाश्च कालवैकल्यमेव च ॥ मुहूर्तास्तिथयो मासाः पक्षाः संवत्सरास्तथा ॥२४॥ ऋत
वः कालयोगाश्च प्रमाणं विविधं नृषु ॥ आयुः क्षेत्राण्यपचयोपचयांश्चैव योऽकरोत् ॥ २५ ॥ सृष्टा लोकास्त्रयोनंता येन ज्ञानेन वर्त्मना ॥ सर्व
भूतगणाः सृष्टाः सर्वभूतात्मना सदा ॥ २६ ॥ प्रणामत्रयपूर्वेण योगेन रमते च यः ॥ यो गतागतिपोतेन त्रातास्ति जगदीश्वरः ॥ २७॥ यो गति
र्वृषयुक्तानां गतिर्योऽपापकर्मणाम् ॥ चातुर्वर्ण्यप्रभावश्च वपुर्होत्रस्य रक्षिता ॥ २८ ॥ धातुवैद्यस्य यो वेत्ता चतुराश्रमसंश्रयः ॥ दिगंबरानुभूतश्च

वायुर्वायुविभावनः ॥ २९ ॥ अग्नीषोमात्मकं ज्योतिर्योगीशः क्षणदांतकः ॥ यः परं श्रूयते ज्योतिर्यः परं श्रूयते तपः ॥ ३० ॥ यं परं परमं प्राहुः परमात्मानमच्युतम् ॥ ब्रह्मादिभिः स्तुतो देवो यश्च दैत्यांतकृद्विभुः ॥३१॥ युगांतेष्वंतको यस्तु यश्च लोकांतकोत्तमः ॥ सेतुर्यो लोकसेतूनां मध्ये यो मध्यकर्मणाम् ॥३२॥ वेत्ता यो वेदविदुषां प्रभुर्यः प्रभविष्णुनाम् ॥ सौम्यभूतस्तु सौम्यानामग्निभूतोग्निवर्चसाम् ॥ ३३ ॥ मानुषाणां मनोभूतस्तपोभूतस्तपस्विनाम् ॥ विनयो नयवृत्तीनां तेजस्तेजस्विनामपि ॥ ३४ ॥ विग्रहो विग्रहाणां च गतिर्गतिमतामपि ॥ आकाशप्रसवो वायुर्वायुः प्राणो हुताशनः ॥ देवाहुतिप्रदानोद्यत्प्राणाग्निस्तमनाशनः ॥ ३५ ॥ रसाद्धि शोणितं भवति शोणितान्मांसमुच्यते ॥ मांसान्मज्जावसोर्जन्म मज्जनोस्थीनि जन्मतः ॥ ३६ ॥ अस्थिमज्ज्ञः समभवत्ततो वै शुक्रमादिशेत् ॥ शुक्राद्गर्भः समभवद्रसमूलेन कर्मणा ॥ तत्रापः प्रथमो भागः स सौम्यो राशिरुच्यते ॥ ३७ ॥ ततः क्ष्मासंभवो ज्ञेयो द्वितीयो राशिरुच्यते ॥ शुक्रं सोमात्मकं विद्यादात्मरूपं यदात्मकम् ॥ ३८ ॥ भवो रसात्मकस्तेषां वीर्यं च शशिपावकम् ॥ कफवर्गें भवेच्छुक्रं पित्तवगे च शोणितम् ॥ ३९ ॥ कफस्य पृथिवी स्थानं पित्तं नाभौ प्रतिष्ठितम् ॥ देवस्य मध्यहृदयं स्थानं तु मनसः स्मृतम् ॥ नाभिकोष्ठांतरस्थं तु तत्र देवो दिवाकरः ॥४०॥ मनः प्रजापतिर्ज्ञेयः कफः सोमो विभाव्यते ॥ पित्तमग्निः स्मृतो यस्मादग्नीषोमात्मकं जगत् ॥ ४१ ॥ एवं प्रवर्तिते गर्भे वर्धितेंऽबुदसन्निभे ॥ वायुः प्रवेशं संचक्रे संगतः परमात्मना ॥ ४२ ॥ ततोऽगानि विसृजते बिभर्ति परिवर्तयन् ॥ प्राणोऽपानः समानश्च उदानो व्यान एव च ॥ ४३ ॥ प्राणोस्य प्रथमं स्थानं वर्धयन्परिवर्तते ॥ अपानं पश्चिमे काय उदानोर्ध्वं शरीरगः ॥ व्यानोऽथ व्यापको देहे समानः सन्निवर्तते ॥ ४४ ॥ भूतावाप्तिस्ततस्तस्य जायतींद्रियगोचरा ॥ पृथिवी वायुराकाश आपो ज्योतिश्च पंचमः ॥ ४५ ॥ तस्यैंद्रियाणि पिष्टानि स्वंस्वं योगं प्रचक्रमुः ॥ पार्थिवं देहमाहुस्तु प्राणात्मानं च मारुतम् ॥ ४६ ॥ निद्रा ह्याकाशयोनिश्च जलाश्रये प्रवर्तते ॥ ज्योतिश्चक्षुषि तज्जन्म तदंशस्तामसः स्मृतः ॥ ४७ ॥ ग्रामाश्च विषयाश्चैव यस्य वीर्यं प्रवर्तितम्॥ एवं यः सृजते लोकान्सदेवासुरमानवान् ॥ ४८ ॥ स कथं देवदेवेशो गर्भमेष्यति चांशुमान् ॥ यथोदरमदित्यास्तु यः स्वयं चाविशत्पुरा ॥४९॥ एवं मे संशयो ब्रह्मन्नेष मे विस्मयो महान् ॥ कथं रविर्ययौ गर्भभावं द्विजवरेति मे ॥ ५० ॥ आश्चर्यं परमं पृच्छे त्वामहं भास्करस्य वै ॥ भानोरुत्पत्तिमाश्चर्यं हृदि मे परिवर्तते ॥ ५१ ॥ एतदाश्चर्यमाख्यानं कथयस्व महामुने ॥ समाख्याहि बलं वीर्यं भानोरमिततेजसः ॥ ५२ ॥

इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मे सूर्यावतारकथाप्रस्ताववर्णनं नाम सप्तपंचाशदुत्तरशततमोऽध्यायः ॥ १५७ ॥छ॥

सुमंतुरुवाच ॥ ॥ प्रश्नभारो महांस्तात त्वयोक्तो रश्मिमालिनि ॥ यथाशक्ति तु वक्ष्यामि श्रूयतां भानवं यशः ॥ १ ॥ भानोः प्रभावश्रवणे यस्य
ते मतिरुत्थिता ॥ हंत भानोः प्रवृत्तिं च शृणु दिव्यां मयेरिताम् ॥ २ ॥ सहस्रास्यं[1] सहस्राक्षं सहस्रकिरणं च यम् ॥ सहस्रशिरसं देवं सहस्रकरम
व्ययम् ॥ ३ ॥ सहस्रजिह्वं भास्वंतं सहस्रमुकुटं प्रभुम् ॥ सहस्रदं सहस्रारिं सहस्रभुजमव्ययम् ॥ ४ ॥ सवनं भवनं चैव हव्यं होतारमेव च ॥
पात्राणि समतीतानि वेददीक्षी चरुं शुभम् ॥ ५ ॥ श्रोत्रियं शूर्पमुसलं प्रोक्षणं दक्षिणायनम् ॥ अध्वर्युं सामगं विप्रं सदस्यं सदनं तथा ॥ ६ ॥
यूपं समित्स्रुवं दर्वीं मुसलोलूखलानि च ॥ प्राग्वंशं जयभूतिं च होतारं चयनं च यत् ॥ ७ ॥ रहस्यानि प्रमाणानि स्थावराणि चराणि च ॥
प्रतिष्ठितानि दार्ढ्यं च स्थंडिलानि कुशांस्तथा ॥ ८ ॥ मंत्रयज्ञवहं वह्निभागं भार्गवमेव च ॥ अग्रेभुजी सोमभुजां यश्च त्रिषु उदाहृतः ॥ ९ ॥
आयुर्वेदविदो विप्रा यजंते शाश्वतं विभुम् ॥ तस्य भानोः सुरेशस्य वीर चंदनमालिनः ॥ १० ॥ प्रादुर्भावसहस्राणि समतीतान्यनेकशः ॥
भूयश्चैव भविष्यंति विनश्यंति दिनेदिने ॥ ११ ॥ यत्पृच्छसि महाराज पुण्यां दिव्यां कथां शुभाम् ॥ यदर्थं भगवान्भानुः कश्यपस्य
सुतोऽभवत् ॥ १२ ॥ तामहं त्वं प्रवक्ष्यामि शृणु सर्वमशेषतः ॥ हितार्थं सर्वमर्त्यानां लोकानां प्रभवाय च ॥ १३ ॥ बहुशः
सर्वभूतात्मा स्वयं समभिजायते ॥ तथा समभवद्देवः कश्यपस्यादितेः सुतः ॥ १४ ॥ तुष्टो दत्त्वा वरं वीर विरञ्चस्य महात्मनः ॥
यं यं जनयते पुत्रमदितिः कश्यपाद्विभोः ॥ १५ ॥ स स याति विनाशं वै तत्क्षणादेव भारत ॥ दृष्ट्वा सुतान्नश्यमानान्पुत्रशोकान्विता
ऽदितिः ॥ १६ ॥ जगाम कश्यपाभ्याशे शोकव्याकुलितेक्षणा ॥ सापश्यत्तं च मारीचं मुनिं दीप्तं तपोनिधिम् ॥ १७ ॥ आद्यं देवगुरुं
विप्रं दिव्यं त्रिषवणांबुभिः ॥ तेजसा वह्निसंकाशं सौरं वृकसमप्रभम् ॥ १८ ॥ न्यस्तदण्डश्रिया युक्तं बद्धकृष्णाजिनांबरम् ॥ वल्कलाजि
नसवीतं प्रदीप्तं ब्रह्मवर्चसम् ॥ १९ ॥ हुताशमिव दीव्यन्तं तपन्तमिव भास्करम् ॥ अथादितिश्च दृष्ट्वैवं भर्तारममितौजसम् ॥ २० ॥ शोकगद्गदया
वाचा इदं वचनमब्रवीत ॥ किमर्थं भगवान्देवो निरुद्योगस्तु तिष्ठति ॥ २१ ॥ जातोजातो हि मे पुत्रः सद्य एव विनश्यति ॥ श्रुत्वा तु वचनं
तस्याः कश्यपो मुनिसत्तमः ॥ २२ ॥ चकार गमने बुद्धिं ब्रह्मलोकं प्रति प्रभो ॥ स गत्वा ब्रह्मभवनं नानाभावसमन्वितम् ॥ २३ ॥ तद्वाक्य
मुक्तं तं सर्वं यदुक्तं तस्य जायया ॥ कश्यपस्य वचः श्रुत्वा कञ्जजो वाक्यमब्रवीत् ॥ २४ ॥ पुत्र गच्छाम सदनं भानोः परमदुर्लभम् ॥ इत्युक्त्वा

---

[1] वेदा विदन्तीति शेषः ।

यानमारुह्य आग्नेयं पद्मलोचनः ॥ २५ ॥ वेधा जगाम भवनमादित्यस्य महात्मनः ॥ अदितिः कश्यपो ब्रह्मा जग्मुर्विपुलमाश्रिताः ॥ २६ ॥ ते
मुहूर्तेन संप्राप्ताः सूर्यलोकं सुवर्चसम् ॥ दिव्यकामगमैर्यानैर्यथार्हं कुरुनन्दन ॥ २७ ॥ आदित्यं प्रष्टुमिच्छंति तेजसां राशिमुत्तमम् ॥ गच्छन्तस्ते
च विस्तीर्णामादित्यस्य परां सभाम् ॥ २८ ॥ षट्पदोद्गीतनिनदां सामगैस्तु समीरिताम् ॥ ऋतवो बहृचमुखाः प्रोक्ताः पुण्यवदक्षराः ॥ २९ ॥
तुष्टुवुः पुरुषव्याघ्रं विततेषु च कर्मसु ॥ यज्ञसन्धौ वेदविदां पदक्रमविदां तथा ॥ ३० ॥ घोषेण परमर्षीणां सर्वं तत्र निनादितम् ॥ यज्ञसंस्तववि
द्भिश्च शिक्षाविद्भिस्तथा द्विजैः ॥ ३१ ॥ अष्टादशपुराणज्ञैः सर्वविद्याविशारदैः ॥ मीमांसाहेतुवादज्ञैः सर्ववादविशारदैः ॥ ३२ ॥ लोकायतिकमु
ख्यैश्च तुष्टुवुः सूर्यमीरितम् ॥ तत्रतत्र च विप्रेन्द्रान् नियताञ्छंसितव्रतान् ॥३३॥ जपहोमपरान्योग्यान्ददृशुः कश्यपादयः ॥ तस्यां सभायामास्ते
स रश्मिमाली दिवाकरः ॥ ३४ ॥ सुरासुरगुरुः श्रीमाञ्छुशुभे वीर मायया ॥ उपासते च तत्रैव प्रजानां पतिमीश्वरम् ॥ ३५ ॥ दक्षः प्रचेताः पुलहो
मरीचिश्च द्विजोत्तमः ॥ भृगुरत्रिर्वशिष्ठश्च गौतमो नारदस्तथा ॥ ३६ ॥ दिव्या आत्मांतरिक्षं च वायुस्तेजोबलं मही ॥ शब्दः स्पर्शः स्वरूपं च
रसगन्धौ तथैव च ॥ ३७ ॥ प्रकृतिश्च विकाराश्च यच्चान्यत्कारणं महत् ॥ सांगोपांगाश्च चत्वारो वेदा लोकपते तथा ॥ ३८ ॥ लवाश्च ऋतवश्चैव
संकल्पप्रणवास्तथा ॥ एते चान्ये च बहवो भानुमंतमुपासते ॥ ३९ ॥ अर्थो धर्मश्च कामश्च मोक्षश्च सविशेषतः ॥ द्वेषो हर्षश्च मोहश्च मत्सरो मान
एव च ॥ ४० ॥ वृको विष्णुसुतः पुत्रः पुष्पजो धिषणस्तथा ॥ माहेश्वरस्तथा सौरो विटपो विकचस्तथा ॥ ४१ ॥ मारुतो विश्वकर्मा च अश्वि
नावन्यवाहनौ ॥ एवमुक्तः सुवचनैर्भानुना प्रभविष्णुना ॥ :४२ ॥ जगाम कश्यपो वीर सहादित्या स्वमाश्रमम् ॥ अदितिर्देवमाता च तं गर्भं
निदधे स्वयम् ॥ ४३ ॥ भूतात्मानं महात्मानं दिव्यं वर्षसहस्रकम् ॥ पूर्णे वर्षसहस्रे तु प्रवृत्तो गर्भ उत्तमः ॥ ४४ ॥ सुराणां शरणं देवश्चासुराणां
विनाशनः ॥ गर्भस्थेन तु तेनैव परित्रातः सुतस्तथा ॥ ४५ ॥ आददानस्तु तेजांसि त्रैलोक्यस्य नराधिप ॥ तस्मिञ्जाते तु देवेशे त्रैलोक्यस्य
सुखावहे ॥ ४६ ॥ प्रहत्य दैत्यसंघांश्च सुराणां नादवर्धने ॥ अभवत्परमानन्दः सर्वेषां तत्र तस्थुषाम् ॥ ४७ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे
पर्वणि सप्तमीकल्पे सौरधर्मेषु सूर्योत्पत्तिर्नामाष्टपञ्चाशदुत्तरशततमोऽध्यायः ॥ १५८ ॥ ॥ छ ॥ ॥ सुमंतुरुवाच ॥ ॥ दक्षः प्रजापतिश्चैव
नमस्कारं चकार ह ॥ विद्योतमानो वपुषा सर्वाभरणभूषितः ॥ १ ॥ उपातिष्ठत देवेशं भानुं चर्षिगणैः सह ॥ ततो गंधर्वमुख्येषु प्रणदत्सु विहा
यसि ॥ बहुभिः सह गंधर्वैः प्रगायत्सु महीपते ॥ २ ॥ एवं ते देवगंधर्वा उपागायंत भक्तितः ॥ उत्पन्नं द्वादशात्मानं भास्करं वारितस्करम् ॥ ३ ॥

इन्द्रो विवस्वान्पूषा च त्वष्टा च सविता तथा ॥ भर्गौंऽशुमानर्यमार्कः पृश्निर्मार्तंड एव च ॥ इत्येकादश एवैते द्वादशो विष्णुरुच्यते ॥ ४ ॥ एवं
द्वादशधा जातमंशुमंतं महाद्भुतम् ॥ स्तुवन्ति देवताः सर्वे गताश्च तरसा महीम् ॥ ५ ॥ मृगव्याधश्च शर्वश्च मृगांकांको महायशाः ॥ अजैकपादहि
र्बुध्न्यः पीतः काचः परंतपः ॥ ६ ॥ दमनश्चेश्वरश्चैव कपाली च विशांपते ॥ स्थाणुर्भगश्च भगवान्रुद्राश्चैतेऽवतस्थिरे ॥ ७ ॥ अश्विनौ वसवश्चाष्टौ
गरुडश्च महाबलः ॥ विश्वेदेवाश्च साध्याश्च तस्थुः प्रांजलयो नृप ॥ ८ ॥ नागराजो महाराज वासुकिः प्रांजलिः स्थितः ॥ अन्ये च बहवो नागा
राक्षसाश्च महाबलाः ॥ ९ ॥ तार्क्ष्यश्चारिष्टनेमिश्च गरुडश्च महाबलः ॥ अरुणश्चारुणिश्चैव तत्र प्रांजलयः स्थिताः ॥१०॥पितामहश्च भगवान्स्वय
मागम्य लोककृत् ॥ प्राह देवगुरुः श्रीमान्त्सुरैः सर्वैर्महर्षिभिः ॥११॥ यस्मात्प्रेक्षयते सर्वं प्रभविष्णुः सनातनः ॥ तस्माल्लोकेश्वरः श्रीमान्विवस्वांश्च
भवत्विति ॥ १२ ॥ देवदानवयक्षाणां गंधर्वोरगरक्षसाम् ॥ यस्मादयमादिदेवस्तस्मादादित्य एव हि ॥ १३ ॥ एवमुक्त्वा तु भगवान्सार्धं देवर्षिभिः
प्रभुः ॥ नमस्कृत्वा सुसंपूज्य ययौ तत्सदनं प्रति ॥ १४ ॥ या गतिर्यज्ञशीलानां या गतिः पुण्यकर्मिणाम् ॥ या गतिः सिद्धयोगानां या गतिश्च
महात्मनाम् ॥ १५ ॥ यस्याष्टगुणमैश्वर्यं समभूद्देवसत्तमम् ॥ यं प्राप्य शाश्वतं विप्रा नावर्तंते भवार्णवे ॥ १६ ॥ वालखिल्यादयो ये च सर्वाश्रम
निवासिनः ॥ सेवंते यं यतात्मानो दुश्चरं व्रतमास्थिताः॥१७॥योऽनंत इव नागेषु यस्य ते सर्वयोगिनः ॥ सहस्रमूर्धा रक्ताक्षः शेषादिभिरनुत्तमैः ॥
॥ १८ ॥ यो यज्ञ इति विप्रेंद्रैरर्च्यते सुखमीप्सुभिः ॥ सर्वे च यं यतप्राणा ध्यायन्ति ब्रह्मरूपिणम् ॥ १९ ॥ यं वेदविदो गायंति वेत्तारं यज्ञदायि
नम् ॥ तं पुत्रं द्वादशात्मानं कश्यपः प्राप्य सत्तमम् ॥ २० ॥ मुदं लेभे सहाऽदित्या सुखं च परमं विभो ॥ लोकश्च मुमुदे सर्वो राक्षसा भयमाप्नु
वन् ॥ २१ ॥ मधुपिंगलो महाबाहुः कंबुग्रीवो हसन्निव ॥ इंगुदीबद्धमुकुटो दिशः प्रज्वलयन्निव ॥ २२ ॥ स उवाच महातेजाः कश्यपं चर्षिसत्त
मम् ॥ एषोहं तव पुत्रत्वं गतो गर्भस्य सिद्धये ॥ २३ ॥ दत्त्वा वरं पुरा विप्र विरंचस्य महात्मनः ॥ तस्मात्त्वमृषिशार्दूल कुरु सृष्टिमनौपमाम् ॥
॥ २४ ॥ एवमाराध्य देवेशं ब्रह्मा सृष्टिमवाप्तवान् ॥ आराध्य कश्यपश्चापि भांस्करं सुतमाप्तवान् ॥ २५ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे
पर्वणि सप्तमीकल्पे उभयसप्तमीमहात्म्ये सूर्यावतारवर्णनं नामैकोनषष्ट्युत्तरशततमोऽध्यायः ॥ १५९ ॥ छ ॥ ॥ शतानीक उवाच ॥ ॥ अहो
देवस्य चरितं भास्करस्य त्वयोदितम् ॥ ब्रह्मादयोऽपि यं नित्यं पूजयंति विधानतः ॥ १ ॥ ब्रह्मा विष्णुः सुरा ब्रह्मंस्तमाराध्य दिवाकरम् ॥ दृष्ट
शुस्तस्य किंभूतं रूपं यत्तन्महाद्भुतम् ॥ २ ॥ ॥ सुमंतुरुवाच ॥ ॥आराध्य देवमीशानं भास्करं सूतिवाचकम् ॥ कविष्णू कुरुशार्दूल जग्मतुस्तौ

हिमाचलम् ॥३॥ गोपतेरंतिकं वीर प्रहृष्टौ विभुदर्शने ॥ कुदेंदुसंनिभं द्रष्टुं कंजजश्चाच्युतश्च तौ ॥४॥ ददृशतुर्महात्मानं चंद्रार्धकृतशेखरम् ॥ पूज
यंतं विवस्वंतं भास्करं वीरवन्नृप ॥ ५ ॥ आच्योंचतुर्महात्मानं कविष्णू तं त्रिलोचनम् ॥ भोभो भीम सुरज्येष्ठ पश्यावामिह चागतौ ॥ ६ ॥
श्रुत्वोवाच तयोर्वाक्यं कंजजस्याच्युतस्य च ॥ प्रणम्य शिरसा भूमौ कृत्वा पूजां विधानतः ॥७॥ उवाच मधुरं वाक्यं शिक्षाक्षरसमन्वितम् ॥ हर्ष
गद्गदया वाचा दिशः सन्नादयन्निव ॥ ८ ॥ किमाराध्य रविं प्राप्तौ सर्वदेववरं विभुम् ॥ कथ्यतां निखिलं देवौ परमं कौतुकं मम ॥ ९ ॥ दृष्टवंतौ
परं किंचिद्रूपं देवस्य शंकरम् ॥ अव्ययस्याप्रमेयस्य भानोरमिततेजसः ॥१०॥ निशम्य वचनं वीर शंकरस्य महात्मनः ॥ ऊचतुस्तौ महात्मानौ
कविष्णू देवसत्तमौ ॥११॥ न तत्पश्यावहे रूपं यत्तत्परममद्भुतम् ॥ आराधयितुमेवापि ह्यागतौ तेंतिकं च तम् ॥१२॥ तस्मादाराधयामो हि एकी
भूय विभावसुम्॥गत्वोदयगिरिं पुण्यं पर्वतं कनकोज्ज्वलम्॥१३॥श्रुत्वां तु वचनं वीर कंजजाच्युतयोर्हरः॥तथेत्याह महाबाहो हर्षादुत्फुल्ललोचनः॥
॥१४॥ अथ ते राजशार्दूल विविगोगतयो नृप ॥ जग्मुस्तं पर्वतश्रेष्ठमुदयाचलमाशु वै ॥१५॥ तमासाद्य नगं पुण्यं शृंगैस्त्रिभिरलंकृतम् ॥ नाना
धातुपिनद्धाङ्गं नानाधातुविभूषितम् ॥ १६ ॥ आराधनाय विधिवद्यत्नं चक्रुर्विभावसोः ॥ स्तुवन्तस्ते समर्चंतो ध्यायंतश्च विभावसुम् ॥ १७ ॥
दिव्यवर्षसहस्रांते तपंतः संस्थिता नगे ॥ पद्मासनगतो ब्रह्मा ध्यायमानो दिवाकरम् ॥१८॥ स्थाणुवत्संस्थितो भूमावूर्ध्वबाहुस्त्रिलोचनः ॥ पंचाग्निं
भजमानस्तु स्थितो विष्णुरवाक्छिराः ॥ १९ ॥ एवं वर्षसहस्रांते तपश्चक्रुः सुदारुणम् ॥ आराधयंतो विधिवद्गोपतिं पुत्रमालिनम् ॥ २० ॥ अथ
ब्रह्मेशविष्णूनां कुर्वतां तप उत्तमम् ॥ तुतोष भगवान्भानुरुवाच च महीपते ॥ २१ ॥ ब्रह्मञ्छंभो हरे ब्रूत मत्तः किमभिवांछथ ॥ तुष्टोहं भवतां दातु
मिहायातो वरं स्वयम् ॥ २२ ॥ ॥ सुमंतुरुवाच ॥ ॥ निशम्य वचनं भानोः शांतं हृद्यं मनोरमम् ॥ प्रणम्य शिरसा केशा इदं वचमब्रुवन्॥
॥ २३ ॥ कृतकृत्या वयं सर्वे प्रसादात्तव गोपते ॥ त्वामाराध्य पुरा देव त्वत्तः प्राप्य वरं शुभम् ॥ २४ ॥ उत्पत्तिस्थितिनाशानां वयं सर्वे दिवा
कर ॥ संभूयेह समर्था वै त्वत्प्रसादान्न संशयः ॥ २५ ॥ किं त्वेकं देवदेवेश वरमिच्छामहे विभो ॥ यत्ते परमकं रूपं दुर्लभं दुर्दृशं तथा ॥ २६ ॥
तस्मादस्माज्जगन्नाथ रूपं दर्शय तेऽच्युतम् ॥ सर्वदेवमयं यत्ते यत्त्वयोक्तं पुरानघ ॥२७॥ तेषां तद्वचनं श्रुत्वा ब्रह्मविष्ण्वीशभाषितम् ॥ दर्शयामास
तद्रूपमद्भुतं लोकपूजितम् ॥ २८ ॥ अनेकवक्त्रशिरसमनेकाद्भुतदर्शनम् ॥ सर्वदेवमयं दिव्यं सर्वलोकमयं तथा ॥ २९ ॥ भूः पादौ द्यौः शिरश्चापि
तत्राग्नी लोचने मते ॥ पादांगुल्यः पिशाचाश्च हस्तांगुल्यश्च गुह्यकाः ॥ ३० ॥ विश्वे देवाः स्मृतास्तस्य जंघासंघाः सुरोत्तमाः ॥ यक्षाः कुक्षिषु

संलीनाः केशाश्चाप्सरसां गणाः ॥३१॥ दृष्टिधृष्टयश्च विपुलाः केशा वीरांशवः स्मृताः ॥ तारका रोमरूपाणि रोमाणि च महर्षयः ॥३२॥ बाहवो
विदिशस्तस्य दिशः श्रोत्रे नराधिप ॥ अश्विनौ श्रवणे चास्य नासा वायुर्महाबलः ॥३३॥ प्रसादश्च क्षमा चैव मनो धर्मस्तथैव च ॥ सत्यमस्याभव
द्घ्राणी जिह्वा देवी सरस्वती ॥ ३४ ॥ ग्रीवादितिर्महादेवी तालू रुद्रश्च वीर्यवान् ॥ द्वारं स्वर्गस्य नाभिर्वै मित्रस्त्वष्टा पिचंडकः ॥ ३५ ॥ मुखं
वैश्वानरश्चास्य वृषणौ च भगस्तदा ॥ हृदयं भगवान्ब्रह्मा ह्युदरं कश्यपो मुनिः ॥ ३६ ॥ पृष्ठेऽस्य वसवो देवा मरुतः सर्वसंधिषु ॥ सर्वच्छंदांसि
दशना ज्योतींषि विमला प्रभा ॥ ३७ ॥ प्राणो रुद्रो महादेवः कुक्षौ चास्य महार्णवाः ॥ उदरे चास्य गंधर्वा भुजंगाश्च महाबलाः ॥ ३८ ॥
लक्ष्मीर्मेधा धृतिः कांतिः सर्वा विद्याश्च वै कटौ ॥ ललाटमस्य परमं वयःस्थानं परात्मनः ॥ ३९ ॥ सर्वज्योतींषि जानीहि तपश्चक्रश्च देव
राट् ॥ तदेतदादिदेवस्य तनौ ह्याहुर्माहात्मनः ॥ ४० ॥ स्तनौ कुक्षौ च वेदाश्च तेष्टौ चास्य मखाः स्मृताः ॥ यष्टव्यपशुबंधाश्च द्विजानां वेष्टि
तानि च ॥ ४१ ॥ सर्वदेवमयं दृष्ट्वा रूपमर्कस्य ते नृप ॥ ब्रह्मा हरो हरिर्देवाः परं विस्मयमागताः ॥ ४२ ॥ प्रणम्य शिरसा देवं वेपमाना धरां
गताः ॥ भयगद्गदया वाचा इदं वचनमब्रुवन् ॥ ४३ ॥ समीक्ष्य रूपं ते देव भीमं ज्वालासमाकुलम् ॥ अनेकमुखबाहूरुचरणं चकिता वयम् ॥४४॥
दिग्ज्ञानं हृतमस्माकं तत्प्रसीद जगत्पते ॥ उपसंहर विश्वात्मन्द्रष्टुं शक्ता न ते वयम् ॥ ४५ ॥ इति तेषां वचः श्रुत्वा देवदेवो दिवाकरः ॥
प्रसन्नो भगवाह वचस्तान्प्रहसन्निदम् ॥ ४६ ॥ ॥ आदित्य उवाच ॥ ॥ यदेतत्परमं पुण्यमद्भुतं लोकभावनम् ॥ दृष्टं भवद्भिर्देवेंद्रा मम सर्वजग
न्मयम् ॥ ४७ ॥ एतन्मया प्रसन्नेन युष्माकं श्रेयसेऽनघाः ॥ दर्शितं पूजितेनेह योगिनां यन्महालयम् ॥ ४८ ॥ ॥ ब्रह्मेशाच्युता ऊचुः ॥ ॥
एवमेतन्न संदेहो यथात्थ त्वं दिवस्पते ॥ योगिनामपि देवेश दर्शनं ह्यस्य दुर्लभम् ॥ ४९ ॥ त्वामाराध्य जगन्नाथं नाप्राप्यमिह विद्यते ॥ तस्मा
त्पूज्यतमो लोके नान्यो देवेषु विद्यते ॥ ५० ॥ एवमुक्त्वाऽदितेः पुत्रो जगामादर्शनं रविः ॥ ब्रह्मादयोपि ते हर्षं प्रापुर्देवस्य दर्शनात् ॥ ५१ ॥
एवं ब्रह्मादयो देवाः पूजयित्वा दिवाकरम् ॥ गतास्ते परमां सिद्धिं गंधर्वा ऋषयस्तथा ॥ ५२ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि
सप्तमीकल्पे सौरधर्मेषु ब्रह्मादीनां सूर्यरूपदर्शनवर्णनं नाम षष्ट्युत्तरशततमोऽध्यायः ॥ १६० ॥ ॥ छ ॥ ॥ शतानीक उवाच ॥ ॥ एव
मेतद्यथात्थ त्वं भास्करो दैवतं परम् ॥ नास्त्यादित्यसमो देवो नास्त्यादित्यसमा गतिः ॥ १ ॥ आदित्यमूलमखिलं त्रैलोक्यं नात्र संशयः ॥
भवत्यस्माज्जगत्सर्वं सदेवासुरमानुषम् ॥ २ ॥ रुद्रेंद्रोपेंद्रकेंद्राणां विप्रेंद्र त्रिदिवौकसाम् ॥ द्युतिर्द्युतिमतां कृत्स्ना तेजो यत्सार्वलौकिकम् ॥ ३ ॥

सर्वात्मा सर्वलोकेशो महादेवः प्रजापतिः ॥ सूर्य एव त्रिलोकस्य मूलं परमदैवतम् ॥ ४ ॥ ततः संजायते सर्वं तत्रैव प्रविलीयते ॥ भावाभावौ
हि लोकनामादित्यान्निःसृतौ पुरा ॥ ५ ॥ जगज्ज्येष्ठो ग्रहो विप्र प्रदीप्तः प्रभवो रविः ॥ तत्र गच्छंति निधनं जायंते च पुनः पुनः ॥ ६ ॥ क्षणा
मुहूर्ता दिवसा रात्रिपक्षाश्च कृत्स्नशः ॥ मासाः संवत्सराश्चैव ऋतवश्च युगानि च ॥ ७ ॥ स एष कालश्चाग्निश्च द्वादशात्मा प्रजापतिः ॥ प्रभास
यति विप्रेंद्र त्रैलोक्यं सचराचरम् ॥ ८ ॥ तस्मादस्य द्विजश्रेष्ठ पूजने यत्फलं भवेत् ॥ तन्मे ब्रूहि प्रयत्नेन प्रसादप्रवणो भव ॥ ९ ॥ ॥ इति
श्रीभविष्ये महापुराणे सप्तमीकल्पे ब्राह्मे पर्वणि सौरधर्मे सूर्यपूजाफलप्रश्नवर्णनं नामैकषष्ट्युत्तरशततमोऽध्यायः ॥१६१॥ ॥ छ ॥ ॥ सुमं
तुरुवाच ॥ ॥ भानुं प्रतिष्ठाप्य नरः सर्वदेवमयं विभुम् ॥ प्राप्नोत्यमरतां वीर तेजसा रविसन्निभः ॥ १ ॥ यो भानुं द्वेष्टि संमोहात्सर्वदेवनम
स्कृतम् ॥ नरो नरकगामी स्यात्तस्य संभाषणादपि ॥ २ ॥ भानुमिष्टं प्रतिष्ठाप्य सर्वयत्नैर्विधानतः ॥ यत्पुण्यफलमाप्नोति तदेकाग्रमनाः शृणु ॥
॥ ३ ॥ सर्वयज्ञतपोदानतीर्थदेवेषु यत्फलम् ॥ तत्फलं कोटिगुणितं स्थाप्य भानुं लभेन्नरः ॥ ४ ॥ यो भानुं स्थापयेद्भक्त्या विधिपूर्वं नराधिप ॥
सर्वांगमुदितं पुण्यं लभेत्कोटिगुणं नरः ॥ ५ ॥ मातृजान्पितृजांश्चैव यत्र चोद्वहते स्त्रियम् ॥ कुलत्रयं समुद्धृत्य शक्रलोके महीयते ॥६॥ भुक्त्वा
तु विपुलान्भोगान्प्रलये समुपस्थिते ॥ ज्ञानयोगं समासाद्य तत्रैव प्रविमुच्यते ॥ ७ ॥ अथ वा राज्यमाकांक्षेज्जायते संभवांतरे ॥ सप्तद्वीपसमुद्रायाः
क्षितेरधिपतिर्भवेत् ॥ ८ ॥ यत्कृत्वा पार्थिवं व्योम्नि अर्चयेत्सर्वदेवकम् ॥ समूलमखिलं तेन त्रैलोक्यं पूजितं भवेत् ॥ ९ ॥ इहैव धनवाञ्छ्रीमा
न्सोंतेऽर्कत्वमवाप्नुयात् ॥ त्रिसंध्यं कीर्तयेद्व्योम कृत्वा बिंबेन पार्थिवम् ॥ १० ॥ शतैकादशकं यावत्तस्य पुण्यफलं शृणु ॥ अनेन सह देहेन
भानुः संतिष्ठते क्षितौ ॥ ११ ॥ पापहा सर्वमर्त्यानां दर्शनात्स्पर्शनादपि ॥ उद्धारयेच्च संस्थाप्यकुलानामेकविंशतिम् ॥ १२ ॥ गीर्वाणैः सहितो
नित्यं मोदते दिवि सूरवत् ॥ योऽपि पिष्टमयं व्योम सर्वगंधोपशोभितम् ॥ १३ ॥ कुसुमैः सुसुगंधैश्च फलैश्च विविधैर्नृप ॥ भक्ष्यलेह्यरसैश्चैव
घृतदीपैरलंकृतैः ॥ १४ ॥ नानारत्नसमायुक्तं नानागंधसमन्वितम् ॥ तस्य दक्षिणपार्श्वे तु विन्यसेदगुरुं बुधः ॥ १५ ॥ दद्यादै पश्चिमे भागे
श्रीखंडं चंदनं शुभम् ॥ उत्तरे चंदनं दद्याद्रक्तं दद्याच्च पूर्वतः ॥ १६ ॥ एवं वित्तानुसारेण कृत्वा विभवविस्तरम् ॥ कृष्णपक्षे तु सप्तम्यां भास्क
रस्य निवेदयेत् ॥ १७ ॥ सकृदेव तु यः कुर्याद्व्योम भरतसत्तम ॥ यत्फलं हि भवेत्तस्य तन्मे निगदतः शृणु ॥ १८ ॥ सर्वपापविनिर्मुक्तः सर्व

दुःखविवर्जितः निष्कलः सर्वगो भूत्वा प्रविशेत्परमव्ययम् ॥ तेजसा रविसंकाशः प्रभयार्कसमप्रभः ॥ १९ ॥ पांसुना क्रीडमानो[1]
यः कुर्याद्व्योम ह्यकार्यतः ॥ स राजन्भवते राजा पर्वतेषु समंततः ॥ २० ॥ सर्वेषामेव पात्राणां परं पात्रं विभावसुः ॥ एतत्संतारयेद्यस्मादतीव
नरकार्णवात् ॥ २१ ॥ तस्य पात्रस्य माहात्म्यं ध्रुवमक्षयमादिशेत् ॥ तस्मात्तस्मै सदा देयमप्रमेयफलार्थिभिः ॥ २२ ॥ रवौ दत्तं हुतं जप्तं
बलिं पूजां निवेदयेत् ॥ अनंतफलमादिष्टं ब्रह्मादिसुरसत्तमैः ॥ २३ ॥ भक्त्या वित्तानुसारेण यः कुर्यादालयं रवेः ॥ सोऽग्र्येयं यानमारुह्य मोदते
सह भानुना ॥ २४ ॥ महाविभवसारोपि यः कुर्याद्भक्तिवर्जितम् ॥ अल्पे महति वा तुल्यं फलमाढ्यदरिद्रयोः ॥ २५ ॥ वित्तशाठ्येन यः कुर्या
द्वित्तवानपि मानवः ॥ न स फलमवाप्नोति प्रलोभाक्रांतमानसः ॥ २६ ॥ तस्मात्त्रिभागं वित्तस्य जीवनाय प्रकल्पयेत् ॥ भागद्वयं च धर्मार्थे
अनित्यं जीवनं यतः ॥ २७ ॥ भक्त्या प्रचोदितं कुर्यादल्पवित्तोऽपि यो नरः ॥ महाविभवसारोऽपि न कुर्याद्भक्तिवर्जितः ॥ २८ ॥ सर्वस्वमपि
यो दद्यादर्के भक्तिविवर्जितः ॥ न तेन धर्मभागी स्याद्भक्तिरेवात्र कारणम् ॥ २९ ॥ न तपोभिर्विभोरुग्रैर्न च सर्वैर्महामखैः ॥ गच्छेदेकं पुरं
दिव्यमर्के भक्तियुतो नृप ॥ ३० ॥ रुचिरं शुभशैलोत्थं कुर्याद्यस्तु रवेर्गृहम् ॥ त्रिसप्तकुलसंयुक्तः सूर्यलोकमवाप्नुयात् ॥ ३१ ॥ यन्मया कोटि
गुणितं कृतं स्यादिष्टकाम्यया ॥ द्विपरार्धगुणं पुण्यं शैलजेऽपि विदुर्बुधाः ॥ ३२ ॥ मृच्छैलेन समं ज्ञेयं पुण्यमाढ्यदरिद्रयोः ॥ यत्र तत्र गतः
कुर्याद्भक्त्या पुण्यं भगालयम् ॥ ३३ ॥ शैलोत्थमिष्टकाभिर्वा दृढं दारुमयं शुभम् ॥ स गच्छेत्परमं स्थानं भानोरमिततेजसः ॥ गैरिकं यानमा
रुह्य यः कुर्याद्धृतभूषणः ॥ ३४ ॥ क्रीडमानोऽपि यः कुर्याद्बालभावेऽर्कमंदिरम् ॥ सोऽर्कलोकमवाप्नोति विमानवरमास्थितः ॥ ३५ ॥ पुष्प
मालाकुलं दिव्यं धूपगंधादिवासितम् ॥ अप्सरोगणसंकीर्णं सर्वकामसुखप्रदम् ॥ ३६ ॥ तत्र रूढो महाराज वत्सरं वृन्दमुत्तमम् ॥ उषित्वा
भास्करपुरे पूज्यमानस्तु दैवतैः ॥ ३७ ॥ क्रमादागत्य लोकेऽस्मिन्राजा भवति धार्मिकः ॥ धर्मार्थकामसंपन्नो यशसा च नराधिप ॥ ३८ ॥ पश्य
न्परिहरञ्जंतून्मार्जन्या मृदुसूक्ष्मया ॥ शनैः संमार्जनं कुर्याच्चांद्रायणफलं भवेत् ॥ ३९ ॥ पुत्रार्थं देहजीर्णाया वन्ध्यायाश्च विशेषतः ॥ रोगार्तानां
च भूतानामारोग्यार्थं प्रपूजयेत् ॥ ४० ॥ गृहीत्वा गोमयं स्वच्छं स्थाने च पतितं शुभे ॥ उपर्युपरि संत्यज्य प्रत्यग्रं जन्तुवर्जितम् ॥ ४१ ॥
वस्त्रपूतगोमयेन यः कुर्यादुपलेपनम् ॥ पश्येत्तु सुखिताञ्जंतूंश्चांद्रायणशतं[2] लभेत् ॥ ४२ ॥ यः कुर्यात्सर्वकार्याणि वस्त्रपूतेन वारिणा ॥ स मुनिः

---

[1] 'क्रीडोनुसंपरिभ्यश्च' इति सूत्रे 'आङो दोऽनास्यावहरण' इत्याङोनुवर्तनादात्मनेपदम् । [2] कृतशतवारचान्द्रायणजं फलमित्यर्थः ।

स महासाधुः स गच्छेत्परमां गतिम् ॥ ४३ ॥ क्षरंति सर्वदानानि यज्ञहोमबलिक्रियाः ॥ अक्षरं तु महादानं सुखदं सर्वदेहिनाम् ॥ ४४ ॥ नैरं
तर्येण यः कुर्यात्पक्षं संमार्जनार्चनम् ॥ वर्षमेकं शतं दिव्यं सुरलोके महीयते ॥ ४५ ॥ तस्यांते च चतुर्वेदसुरूपः प्रियदर्शनः ॥ आद्यः सर्वगुणो
पेतो राजा भवति धार्मिकः ॥ ४६ ॥ संपर्केणापि यः कुर्यान्नरः कर्म भगालये ॥ सोपि सौमनसं गत्वा पुरं क्रीडति नित्यशः ॥४७॥ तावद्भ्र
मंति संसारे दुःखशोकपरिप्लुताः ॥ न भजंति रविं भक्त्या यावत्सर्वेऽपि देहिनः ॥ ४८ ॥ समासक्तं तथा चित्तं जन्तोर्विषयगोचरे ॥
यद्यर्के न भवद्देवः को मुच्येदेव बन्धनात् ॥ ४९ ॥ यः कुर्यात्कुट्टिमां भूमिं दर्पणोदरसन्निभाम् ॥ नानावर्णविचित्रां च विचित्र
कुसुमोज्ज्वलाम् ॥ ५० ॥ क्वचित्कलशविन्यस्तां पंकजैरुपशोभिताम् ॥ रम्यां मनोरमां सौम्यामर्कायतनसंसदि ॥ ५१ ॥ यावद्दंडा भवेद्भूमिः
समंताच्च सुशोभना ॥ तावद्युगसहस्राणि सूरलोके महीयते ॥ ५२ ॥ कारयेच्चित्रशास्त्रज्ञैश्चित्रकर्मार्कमंदिरे ॥ विचित्रं यानमारुह्य चित्रभानोर्गृहं
व्रजेत् ॥५३॥ यावत्स देवरूपाणि ग्रहरूपाणि लेखयेत् ॥ तावद्युगसहस्राणि स्वर्गलोके महीयते ॥ ५४ ॥ भवेद्भूमिः समंताच्च यः कुर्यादर्कमंदि
रम् ॥ आरामावसथादीनां लभेदामूल्यकं फलम् ॥ ५५ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मवर्णनंनाम द्विषष्ट्यु
त्तरशततमोऽध्यायः ॥ १६२ ॥छ॥ ॥ सुमन्तुरुवाच ॥ ॥ भास्करस्य महाबाहो भानोरमिततेजसः ॥ स्नानकाले प्रकुर्वीत जयशब्दादिमंग
लम् ॥ १ ॥ पद्मस्वस्तिकशंखं तु श्रीवत्सं द्विजसत्तम ॥ हेमरूपादिपात्रेषु कल्पितं गोमयादिभिः ॥ २ ॥ नानावर्णकसंयुक्तैरक्षतैस्तिलतंदुलैः ॥
स्वच्छैश्च दधिसंमिश्रैर्यथाशोभं प्रपूरितैः ॥ ३ ॥ द्रव्यपीठप्रदीपाश्च भूताश्वत्थादिपल्लवैः ॥ औषधीभिश्च मेध्याभिः सर्वबीजैर्यवादिभिः ॥
॥ ४ ॥ सप्तम्यादिषु सर्वेषु षष्ठ्यादिषु विशेषतः ॥ शंखभेर्यादिभिः कुर्याद्वाद्यघोषं सुशोभनम् ॥ ५ ॥ त्रिसन्ध्यं वेदनिर्घोषं कुर्वीत
फलमुत्तमम् ॥ कुर्यान्नीराजनं चैव शंखवादित्रमंगलैः ॥ ६ ॥ यावन्नीराजनं कुर्यात्पर्वाणि विधिवद्रवौ ॥ तावद्युगसस्राणि सूरलोके
महीयते ॥ ७ ॥ कपिलापञ्चगव्येन कुशवारियुतेन वै ॥ स्नापयेन्मन्त्रपूतेन ब्रह्मस्नानं हि तत्स्मृतम् ॥ ८ ॥ यस्त्वेकमपि सर्वेब्दे ब्रह्मस्नानं
प्रयच्छति ॥ स मुक्तः सर्वपापैस्तु सूर्यलोके महीयते ॥ ९ ॥ कपिलापञ्चगव्येन [1]दधिक्षीरयुतेन च ॥ स्नानं दशगुणं ज्ञेयं महत्पुण्यं नरा
धिप ॥ १० ॥ ऋभवो वीरमुद्दिश्य देहशुद्धिं च शाश्वतीम् ॥ कपिलामाहरेन्नित्यं मुनिदेवाग्निनिर्मिताम् ॥ ११ ॥ कापिलं यः पिबेच्छ्र

---

[1] कपिलेतरगवामिति शेषः ।

द्रोदेवकार्यार्थनिर्मितम् ॥ स पच्यते महाघोरे सुचिरं नरकार्णवे ॥ १२ ॥ वर्षकोटिसहस्रेण यत्पापं समुपार्जितम् ॥ घृताभ्यंगेन सूर्यस्य दहेत्सर्वं न संशयः ॥ १३ ॥ कल्पकोटिसहस्रैस्तु यत्पापं समुपार्जितम् ॥ वज्रस्नानेन तत्सर्वं दहत्यग्निरिवेंधनम् ॥ १४ ॥ सप्तम्यां च कृतस्नानो यजेत्सूर्यं सकृन्नरः ॥ कुलान्युद्धृत्य सप्तेह सूर्यलोके महीयते ॥ वसुहेमादियुक्तं च क्षीरस्नानस्य तत्समम् ॥ १५ ॥ सकृदाढकेन पयसा यो भानुं स्नापयेन्नरः ॥ राजतेन विमानेन सोऽर्कलोके महीयते ॥ १६ ॥ स्नाप्य दध्ना सकृद्भानुं स त्रिलोके महीयते ॥ मधुना स्नपयित्वा तं शुक्रलोके महीयते ॥ १७ ॥ उद्धृत्य शालिपिष्टेन वायुलोकेषु पूज्यते ॥ स्नानमिक्षुरसेनेह यः सूर्यें सकृदाचरेत् ॥ स गोपतिपुरं गच्छेत्सर्वकामसमन्वितः ॥ ॥ १८ ॥ फलोदकेन यो भानुं सकृत्स्नापयते नरः ॥ उत्सृज्य पापकलिलं पितृलोके महीयते ॥ १९ ॥ श्रीखंडवारिणा स्नाप्य सकृद्भानुं नराधिप ॥ चंद्रांशुनिर्मलः श्रीमांश्चरेदात्रेयमंदिरे ॥ २० ॥ वस्त्रपूतेन तोयेन यद्यर्कं स्नापयेत्सकृत् ॥ स सर्वकामतृप्तात्मा राकाधिपपुरं व्रजेत् ॥२१॥ आपो हिष्ठेति जप्येन गंगातोयेन भारत ॥ गैरिकेण विमानेन ब्रह्मलोके महीयते ॥ २२ ॥ कर्पूरागुरुतोयेन योऽर्कं स्नापयते सकृत् ॥ स्नाप्य भानुं सकृन्मन्त्रैः सप्तम्यां समुपोषितः ॥ स कुलानेकविंशतिमुत्तार्य रविमाव्रजेत् ॥ २३ ॥ पितॄनुद्दिश्य यो भानुं स्नापयेच्छीतवारिणा ॥ तृप्ताः स्वर्गं व्रजंत्याशु पितरो नरकादपि ॥ २४ ॥ भानुं शीतांबुनास्नाप्य धारोष्णपयसा सह ॥ स्नाप्य पश्चाद्घृतेनेशमग्निलोके महीयते ॥ २५ ॥ एतत्स्नानत्रयं कृत्वा पूजयित्वा तु भारत ॥ अश्वमेधसहस्रस्य फलं प्राप्नोति मानवः ॥ २६ ॥ मृत्कुम्भात्ताम्रकुम्भैस्तु स्नानं शतगुणं मतम् ॥ रौप्यैः पादोत्तरं पुण्यं दर्शनात्स्पर्शनं परम् ॥ स्पर्शनादर्चनं श्रेष्ठं घृतस्नानमतः परम् ॥ २७ ॥ इहामुत्र कृतं पापं घृतस्नानेन नश्यति ॥ सप्तजन्मकृतं पापं पुराणश्रवणेन तु ॥२८॥ दशापराधांस्तोयेन क्षीरेण तु शतं क्षमेत् ॥ सहस्रं क्षमते दध्ना घृतेनाप्ययुतं क्षमेत् ॥२९॥ नैरन्तर्येण यो मासं घृतस्नानं समाचरेत् ॥ दशैकादश कुलानीह नयेत्सूर्यस्य मंदिरम् ॥ ३० ॥ स्नानं पलशतं ज्ञेयमभ्यंगः पञ्चविंशतिः ॥ पलानां द्विसहस्रेण महास्नानमिति श्रुतिः ॥ ३१ ॥ घृताभ्यंगं घृतस्नान भानोः कुर्य्याद्द्विजोत्तम ॥ यश्च गोधूमचूर्णैस्तु कषायैर्दर्भसंमितैः ॥ ३२ ॥ दशधेनुसहस्राणि यद्दत्वा लभते फलम् ॥ तत्फलं लभते सर्वमर्कस्योद्वर्तने कृते ॥ ३३ ॥ अर्घ्यं पुष्पफलोपेतं यस्त्वर्काय निवेदयेत् ॥ स पूज्यः सर्वलोकेषु अर्कवन्मोदते दिवि ॥ ३४ ॥ गंधतोयेन संमिश्रमुदकाद्द्वादशोत्तरम् ॥ पञ्चगव्यसमायुक्तमर्घ्यं शतगुणं नृप ॥ ३५ ॥ योष्टांगगर्भमापूर्य भानोर्मूर्ध्नि

---

१ चन्द्रभवने ।

निवेदयेत् ॥ दशवर्षसहस्राणि रमते चार्कमंदिरे ॥ ३६ ॥ आपः क्षीरं कुशाग्राणि घृतं दधि तथा मधु ॥ रक्तानि करवीराणि तथा रक्तं च चन्दनम् ॥ ३७ ॥ अष्टांग एष अर्घो वै ब्रह्मणा परिकीर्तितः ॥ सततं प्रीतिजननो भास्करस्य नराधिप ॥ ३८ ॥ दातुर्वैणवपात्रेण दत्तेऽर्घ्ये यत्फलं भवेत् ॥ तस्माच्छतगुणं पुण्यं मृत्पात्रेण नराधिप ॥ ३९ ॥ ताम्रार्घ्यपात्रदानेन पुण्यं शतगुणं मतम् ॥ पालाशपद्मपत्राभ्यां ताम्रपात्रे फलं लभेत् ॥ ४० ॥ रौप्यपात्रेण विज्ञेयं लक्षार्घ्यं नात्र संशयः ॥ सुवर्णपात्रविन्यस्तमर्घ्यं कोटिगुणं भवेत् ॥ ४१ ॥ एवं स्नानार्घ्यनैवेद्यबलिधूपादिषु क्रमात् ॥ पात्रांतरविशेषेण तत्फलं तूत्तरोत्तरम् ॥ ४२ ॥ रौप्यपात्रप्रदानेन यत्पुण्यं वेदपारगे ॥ ताम्रपात्रप्रदानेन तस्माच्छतगुणं रवौ ॥ ॥ ४३ ॥ फलं कोटिसुवर्णस्य यो दद्याद्वेदपारगे ॥ सूर्याय रूप्यपात्रे तु भवेत्पुण्यं ततोऽधिकम् ॥४४॥ सुवर्णपात्रं यो दद्याद्भास्कराय महीपते ॥ न शक्यं तस्य तद्वक्तुं पुण्यं पात्रविशेषतः ॥ ४५ ॥ तुल्यमेव फलं प्रोक्तं सर्वमाढ्यदरिद्रयोः ॥ तयोरभ्यधिकं तस्य यस्त्वर्के भावनाधिकः ॥ ॥ ४६ ॥ विभवे सति यो मोहान्न कुर्याद्विधिविस्तरम् ॥ नैव तत्फलमाप्नोति प्रलोभाक्रांतमानसः ॥ ४७ ॥ तस्मान्मन्त्रैः फलैस्तोयैश्चन्दनाद्यैश्च यत्नतः ॥ तदनंतफलं ज्ञेयं भक्तिरेवात्र कारणम् ॥ ४८ ॥ वर्षकोटिशतं दिव्यं सूर्यलोके महीयते ॥ गंधानुलेपनं पुण्यं द्विगुणं चन्दनस्य तु ॥ ॥ ४९ ॥ गंधाच्चतुर्गुणं ज्ञेयं पुष्पमष्टगुणं नृप ॥ कृष्णागुरु विशेषेण द्विगुणं फलमादिशेत् ॥ तस्माच्छतगुणं पुण्यं कुंकुमस्य विधीयते ॥ ५० ॥ चंदनागुरुकर्पूरैः श्लक्ष्णपिष्टैः सकुंकुमैः ॥ भानुं पर्याप्तमालिप्य कल्पकोटिं वसेद्दिवि ॥ ५१ ॥ स दीव्येत्सुरवृन्देन पुण्यगंधैः प्रलेपितः ॥ दशवर्षसहस्राणि वीर मित्रपुरे वसेत् ॥ ५२ ॥ भक्त्या निवेद्य अर्काय तालवृंतं नराधिप ॥ दशवर्षसहस्राणि वीरलोके महीयते ॥ ५३ ॥ मायूरं व्यजनं दत्त्वा सूर्यायातीव शोभनम् ॥ वर्षकोटिशतं पूर्णं प्रभंजनपुरे वसेत् ॥ ५४ ॥ पुष्पैररण्यसंभूतैः पत्रैर्वा गिरिसम्भवैः ॥ अपर्युषितनिश्छिद्रैः प्रोषितैर्जंतुवर्जितैः ॥ ५५ ॥ आत्मारामभवैश्चैव पुष्पैः संपूजयेद्रविम् ॥ पुष्पजातिविशेषेण भवेत्पुण्यं ततोऽधिकम् ॥ ५६ ॥ तपःशीलगुणोपेत इतिहासविदि द्विजे ॥ दत्त्वा दश सुवर्णस्य निष्कान्यल्लभते फलम् ॥ ५७ ॥ करवीरस्य कुसुममर्काय विनिवेदयेत् ॥ लभते तत्फलं वीर यथाह भगवान्रविः ॥ एवं पुष्पविशेषेण फलं तदधिकं भवेत् ॥ ज्ञेयं पुण्यं रसज्ञेन यथा स्यात्तन्निबोध मे ॥ ५८ ॥ सदा पुष्पसहस्रेभ्यः करवीरं विशिष्यते ॥ बिल्वपत्रसहस्रेभ्यः पद्ममेकं नराधिप ॥ ५९ ॥ पद्मपुष्पसहस्रेभ्यो बकपुष्पं विशिष्यते ॥ बकपुष्पसहस्रेभ्यो मुद्गरं परमुच्यते ॥६०॥ कुशपुष्पसहस्रेभ्यः शमीपत्रं विशिष्यते ॥ शमीपुष्पसहस्रेभ्यो नृप नीलोत्पलं परम् ॥ सर्वासां पुष्पजातीनां प्रवरं नीलमुत्पलम् ॥ ६१ ॥ रक्तो

त्पलसहस्त्रेण नीलोत्पलशतेन च ॥ रक्तैश्च करवीरैश्च यस्तु पूजयते रविम् ॥ ६२ ॥ कल्पकोटिसहस्राणि कल्पकोटिशतानि च ॥ वसेदर्कपुरे श्रीमान्सूर्यतुल्यपराक्रमः ॥ ६३ ॥ शेषाणां पुष्पजातीनां यत्फलं परिकीर्तितम् ॥ तत्फलस्यानुसारेण सूर्यलोके महीयते ॥ ६४ ॥ शमीपुष्पं बृहत्याश्च कुसुमं तुल्यमुच्यते ॥ करवीरसमा ज्ञेया जातीविजयपाटलाः॥ ६५ ॥ श्वेतमंदारकुसुमं सितपुष्पं च तत्समम् ॥ नागचंपकपुन्नागमुद्गराणां समाः स्मृताः ॥ ६६ ॥ गंधवंत्यपवित्राणि कुसुमानि विवर्जयेत् ॥ गंधहीनमपि ग्राह्यं पवित्रं यत्कुश दिकम् ॥ ६७ ॥ सात्त्विकं तद्धि कुसुममपवित्रं च तामसम् ॥ मुद्गराणि कदंबानि रात्रौ देयानि सूरये ॥ ६८ ॥ दिवाशेषाणि पुष्पाणि त्यजेदुपहतानि च ॥ मुकुलैर्नार्चयेद्भानुमपक्कं न निवेदयेत् ॥ ६९ ॥ फलं क्कथितविद्धं च यत्नात्पक्कमपि त्यजेत् ॥ अलाभे बत पुष्पाणां पत्राण्यपि निवेदयेत् ॥ ७० ॥ पत्राणामप्यलाभे तु फलान्यपि निवेदयेत् ॥ फलानामप्यलाभेन तृणगुल्मौषधीरपि ॥ ७१ ॥ औषधीनामभावे तु भक्त्या भवति पूजितः ॥ प्रत्येकं मुक्तपुष्पेण दशसौवर्णिकं फलम् ॥ ७२ ॥ यः सुगन्धैर्मुक्तपुष्पैः सम्यग्भानुं प्रपूजयेत् ॥ माघासितेऽपि सुमनाः सोऽनंतफलमश्नुते ॥ ७३॥ करवीरैर्महाराज संयतो भानुमर्चयेत् ॥ सर्वपापविनिर्मुक्तः सूर्यलोके महीयते ॥ ७४ ॥ अगस्त्यकुसुमैर्भक्त्या यः सकृद्भानुमर्चयेत् ॥ गवां प्रयुतदानस्य फलं प्राप्य दिवं व्रजेत् ॥ ७५ ॥ मल्लिकोत्पलपद्मैश्च जातीपुन्नागचंपकैः ॥ अशोकश्वेतमंदारकर्णिकारांधुकैस्तथा ॥ ७६ ॥ करवीरार्ककह्लारशमीतगरकेशरैः ॥ अगस्तिबकपुष्पैस्तु शतपत्रैर्नराधिप ॥ ७७ ॥ पुष्पैरेतैर्यथालाभं यो नरः पूजयेद्रविम् ॥ स तत्फलमवाप्नोति तदेकाग्रमनाः शृणु ॥ ॥ ७८ ॥ सूर्यकोटिप्रतीकाशैर्विमानैः सर्वकामिभिः ॥ पुष्पमालापरिक्षिप्तैर्गीतवादित्रनादितैः ॥ ७९ ॥ तत्रीमधुरवाद्यैश्च स्वच्छंदगमनैर्नृप ॥ सूर्यकन्यासमाकीर्णैर्देवानां च सुदुर्लभैः ॥ ८० ॥ दोधूयमानश्चमरैः स्तूयमानः सुरासुरैः ॥ गच्छेदर्कपुरीं दिव्यां तत्र संपूजितो भवेत् ॥ ८१ ॥ यैस्तैश्च वापि कुसुमैर्जलजैः स्थलजैर्नृप ॥ संपूज्य श्रद्धया भानुमर्कलोके महीयते ॥ ८२ ॥ सूर्यस्योपरि यः कुर्याच्छोभनं पुष्पमंडलम् ॥ शोभितं पुष्पस्रग्दामैरापीठांतं प्रलंबितैः ॥ ८३ ॥ अत्याश्चर्यमहायानैर्दिव्यपुष्पोपशोभितः ॥ सर्वेषामुपरिष्टाच्च वसेदर्कपुरे सुखी ॥ ८४ ॥ अनेकरागविन्यस्तैः सुगन्धैः कुसुमैर्गृहम् ॥ यः कुर्यात्पर्वकाले तु विचित्रकुसुमोज्ज्वलम् ॥ ८५ ॥ स पुष्पकविमानेन पुष्पमालाकुलेन तु ॥ पुष्पेतरपुरं दिव्यं श्रयते नात्र संशयः ॥ ८६ ॥ अक्षयं मोदते कालमतिरस्कृतशासनः ॥ सौरादिसर्वलोकेषु यत्रेष्टं तत्र याति सः ॥ ८७ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मेषु पुष्पपूजावर्णनं नाम त्रिषष्ट्युत्तरशततमोऽध्यायः ॥ १६३ ॥ ॥ ७ ॥ शतानीक

उवाच ॥ ॥ पुनस्त्वं देवदेवस्य भास्करस्य महौजसः ॥ पूजने यत्फलं प्रोक्तं तन्मे ब्रूहि द्विजोत्तम ॥ १ ॥ सुमंतुरुवाच ॥ ॥ शृणु त्वं हि महाराज सर्वदं लोकपूजितम् ॥ ब्रह्मेशोपेंद्रदेवानां त्रयाणामपि भारत ॥ २ ॥ सुखासीनं सुरज्येष्ठं मनोवत्यां चतुर्मुखम् ॥ प्रणम्य शिरसा भूमौ विष्णवीशौ वाक्यमूचतुः ॥ ३ ॥ य एष भगवान्देवः सहस्रकिरणो रविः ॥ अस्य यत्पूजने पुण्यं प्राप्यते तद्वदस्व नौ ॥ ४ ॥ ॥ ब्रह्मोवाच ॥ ॥ साधु साधु जगन्नाथ साधु पृष्टोऽस्मि वामिह ॥ तस्माच्छृणुतमेकाग्रौ गदतो निखिलं मम ॥ ५ ॥ स्वयमुत्पाद्य पुष्णाणि यः सूर्यं पूजयेत्स्वयम् ॥ तानि साक्षात्प्रगृण्हाति तद्भक्त्या सततं रविः ॥ ६ ॥ यस्त्वारामं रवेः कुर्यादाम्रबिल्वादिशोभितम् ॥ जातीविजयराजार्ककरवीरैः सकुंकुमैः ॥७॥ पुन्नागनागबकुलैरशोकतिलचंपकैः ॥ अगस्तिकदलीखंडैस्तस्य पुण्यफलं शृणु ॥ ८ ॥ यावद्धि पत्रं कुसुमं बीजं सूतफलानि च ॥ तावद्वर्षसहस्राणि सूरलोके महीयते ॥ ९ ॥ सघृतं गुग्गुलं दद्याद्राजन्वा कंदुरुं तथा ॥ चतुर्वेदिगृहे जन्म प्राप्नोति सततं सुखी ॥ १० ॥ कृष्णागुरुं च कर्पूरधूपं दद्याद्दिवाकरे ॥ नैरंतर्येण यस्तस्य राजन्पुण्यफलं शृणु ॥ ११ ॥ कल्पकोटिसहस्राणि कल्पकोटिशतानि च ॥ भुक्त्वा सूर्यपुरे भोगांस्तस्यांते क्ष्माधिपो भवेत् ॥ १२ ॥ गुग्गुलुं घृतसंयुक्तं यक्षो गृह्णाति शब्दकृत् ॥ यक्षाह्वयस्य दानेन तस्य लोके महीयते ॥ १३ ॥ कृष्णांशौ कृष्णसप्तम्यां यः साज्यं गुग्गुलुं दहेत् ॥ स चासौ सौरमासाद्य वर्षाणां च दशार्बुदम् ॥ १४ ॥ देवदारुं नमेरुं च श्रीवासं कुंदुरुं तथा ॥ श्रीफलं चाज्यसंयुक्तं दग्ध्वाश्रयमवाप्नुयात् ॥ १५ ॥ एवं सौगंधिकं रूपं षट्सहस्रगुणोत्तरम् ॥ अगुरुं दशसाहस्रं सघृतं द्विगुणं भवेत् ॥१६॥ अनंतफलदं दैवं सदा कुंदुरुकामुकम् ॥ द्विसहस्रपलानां तु महिषाक्षस्य गुग्गुलोः ॥१७॥दग्ध्वार्धमविमिश्रस्य सूर्यतुल्यः प्रजायते ॥ शोधयेत्पापसंयुक्तं पुरुषं नात्र संशयः ॥ १८ ॥ कृष्णागुरुभवं धूपं तुषाग्निरिव कांचनम् ॥ योंतःपुरगृहं गन्धैः सुगन्धैः प्रविलेपयेत् ॥ १९ ॥ कपाटद्वारकुड्यादितिर्यगूर्ध्वं सवेदिकम् ॥ वासयेत्पुष्पमालाभिर्धूपैश्चापि सुगंधिभिः ॥ २० ॥ तस्य पुण्यं यथावत्तु युवयोर्वच्मि कृत्स्नशः ॥ आपूरयन्दिशः सर्वा नानागंधसमन्वितैः ॥ २१ ॥ कल्पकोटिशतं दिव्यं तेजसा वह्निसन्निभः ॥ शक्रवत्प्रज्वलन्देवः सूर्यलोके महीयते ॥ २२ ॥ तस्यांते धर्मशेषेण त्रैलोक्याधिपतिर्भवेत् ॥ शतावृतं तु यः कुर्याद्देवं गन्धैर्भगालयम् ॥ २३ ॥ स सर्वशर्मसंयुक्तः सूर्यतुल्यपराक्रमः ॥ सूर्यलोके वसेद्देवो युवाभ्यां संप्रपूजितः ॥ २४ ॥ तद्वच्छुक्लैश्च संवीतं पट्टसूत्रैर्विनिर्मितम् ॥ दत्त्वोपवीतं सूर्याय भवेद्वेदांगपारगः ॥ २५ ॥ वासांसि सुविचित्राणि सूरलोके महीयते ॥ त्रुटिमात्रं तु यो दद्यादूर्णावस्त्रं सपंकजम् ॥ २६ ॥ भास्करस्योत्तमांगेषु तस्य पुण्यं ब्रवीम्यहम् ॥ इन्द्रस्यार्धासने तिष्ठेद्यावदिन्द्राश्चतु

र्दश ॥ २७ ॥ एवं वित्तानुसारेण सर्वं ज्ञेयं समासतः ॥ सर्वेषां हेमपात्राणां मुकुटानां च सर्वशः ॥ २८ ॥ अर्कपत्रपुटं चूर्णं मधुपर्णसमन्वितम् ॥
यो निवेदयतेऽर्काय सोऽश्वमेधफलं लभेत् ॥२९॥ शालितंडुलप्रस्थस्य कुर्यादन्नं सुसंस्कृतम् ॥ सूर्याय च चरुं दत्त्वा सप्तम्यां तु विशेषतः ॥३०॥
संयावं कृशरं पूपं पायसं यावकं तथा ॥ दध्योदनरसालान्नमोदकान्गुडपूपकान् ॥ ३१ ॥ यावंतस्तण्डुलास्तस्मिन्नैवेद्ये परिसंख्यया ॥ तावद्वर्ष
सहस्राणि सूरलोके महीयते ॥ ३२ ॥ गुडखंडकृतानां च भक्ष्याणां विनिवेदने ॥ घृतेन प्लावितानां च फलं शतगुणं लभेत् ॥ ३३ ॥ रसाल
खाद्यकाद्यानां भक्ष्याणां फलमिष्यते ॥ तदर्धं सलिलस्यापि वासितस्य निवेदयेत् ॥ ३४ ॥ यथाकालोपलब्धानि भक्ष्याणि विविधानि च ॥
निवेद्यार्काय परमं स्थानं प्राप्नोति पूजनात् ॥ ३५ ॥ प्रज्वाल्य घृतदीपं तु भास्करस्यालये शुभम् ॥ आग्नेयं यानमारुह्य गच्छेत्सौमनसं
पुरम् ॥ ३६ ॥ यः कुर्यात्कार्तिके मासि शोभनां दीपमालिकाम् ॥ सप्तम्यामथ षष्ठ्यां वामावास्यायामथापि वा ॥ ३७ ॥ भास्करायुतसंकाश
स्तेजसा भासयन्दिशः ॥ दिव्याभरणसंपन्नः कुलमुद्धृत्य सर्वशः ॥ ३८ ॥ यावत्प्रदीपसंख्यानं घृतेनापूर्य बोधितम् ॥ तावद्वर्षसहस्राणि सूर्यलोके
महीयते ॥ ३९ ॥ दीपवृक्षमथोद्बोध्य पर्वस्वायतनेषु वै ॥ पूर्वस्माद्द्विगुणं पुण्यं लभते नात्र संशयः ॥ ४० ॥ दीपवृक्षं समुद्बोध्य भास्करायतनेषु
भोः ॥ सर्वलोहमयं वीर रविलोके महीयते ॥ ४१ ॥ शिरसा धारयेद्दीपं भास्करस्याग्रतो निशि ॥ ललाटे चैव हस्ताभ्यां समुद्युक्तस्तथो
रसि ॥ ४२ ॥ भास्करायुतसंकाशो विमानैरर्कसन्निभैः ॥ कल्पायुतशतं चैव सूर्यलोके महीयते ॥ ४३ ॥ अन्नदाता तु यो वीर वीरलोके मही
यते ॥ भास्करस्याग्रतो दत्त्वा दर्पणं निर्मलं शुभम् ॥ ४४ ॥ पर्यंके शोभितं कृत्वा श्वेतमाल्यैः सचन्दनैः ॥ वृकार्कनिर्मलः श्रीमान्दिव्याभरण
रूपधृक् ॥ कल्पायुतसहस्राणि सूरलोके महीयते ॥ ४५ ॥ कृत्वा प्रदक्षिणं भक्त्या श्रद्दधानो रवेर्नरः ॥ अश्वमेधसहस्रस्य सुखेन लभते फलम् ॥
॥ ४६ ॥ कृत्वा प्रदक्षिणं यस्तु नमस्कारं प्रयोजयेत् ॥ राजसूयाश्वमेधाभ्यां सकलं विन्दते फलम् ॥ ४७ ॥ नमस्कारः स्मृतो यज्ञः सर्वयज्ञो
त्तमोत्तमः ॥ नमस्कृत्वा सहस्रांशुमश्वमेधफलं लभेत् ॥ ४८ ॥ प्रणम्य दंडवद्भूमौ नमस्कारेण योऽर्चयेत् ॥ स यां गतिमवाप्नोति न तां क्रतु
शतैरपि ॥ ४९ ॥ सर्वयज्ञोपवासेषु सर्वतीर्थेषु यत्फलम् ॥ अभिज्ञाप्योपहारेण पूजया फलमश्नुते ॥ ५० ॥ श्वेतं महाध्वजं कृत्वा कृत्वा चापं
च रंगकम् ॥ किंकिणीजालनिर्घोषं मयूरच्छत्रभूषितम् ॥ यस्त्वर्यम्णे नरो दद्याच्छ्रद्धया परयान्वितः ॥ ५१ ॥ स शतेन विमानानां सर्वदेव
नमस्कृतः ॥ मन्वन्तरशतं देव मोदते दिवि देववत् ॥ ५२ ॥ ध्वजमालाकुलं कुर्याद्यः प्रांतेषु भगालयम् ॥ महाध्वजाष्टकं चापि दिग्विदिक्षु

निवेदयेत् ॥ ५३ ॥ स विमानसहस्रेण ध्वजमालाकुलेन तु ॥ कल्पायुतशतं दिव्यं मोदेते दिवि सूरवत् ॥ ५४ ॥ शतचन्द्रांशुविमलं मुक्तादामो
पशोभितम् ॥ मणिदंडमयं छत्रं दद्याद्वा कांचनादिकम् ॥ ५५ ॥ स धार्यमाणच्छत्रेण हेमदंडोपशोभिना ॥ मोदते सूर्यलोके तु विमानवरमा
स्थितः ॥ ५६ ॥ ततस्तस्माच्च्युतो लोकान्निसर्गाद्भुवमागतः ॥ भुङ्क्ते समुद्रपर्यंतामेकच्छत्रां वसुन्धराम् ॥ ५७ ॥ यः शृंखलासमायुक्तां
महाघण्टां महास्वनाम् ॥ कांस्यलोहमयीं वापि निबध्नीयाद्भगालये ॥ ५८ ॥ शोभनः स्यान्नरः श्रीमान्भगस्यातीव वल्लभः ॥ सूर्यतुल्यबलो
भूत्वा सूर्यलोके महीयते ॥ ५९ ॥ भेरीमृदंगपटहझर्झरीमर्दलादिकम् ॥ दंशकांस्यादिवादित्रं यो भगाय निवेदयेत् ॥ ६० ॥ स विमानै
महाभागैर्वंशवीणायुतस्वनैः ॥ युगान्तकशतं दिव्यं भगलोके महीयते ॥ ६१ ॥ सुसंगीतकदानेन सवाद्येन विशेषतः ॥ यथेष्टं भास्करे
लोके मोदते कालमक्षयम् ॥ ६२ ॥ महामहास्वनं दत्त्वा शंखयुग्मं भगालये ॥ युगकोटिशतं दिव्यं भगलोके महीयते ॥ ६३ ॥
विमानं बहु वर्णाभं मध्ये पंकजभूषितम् ॥ विचित्रमेकवर्णं वासनवस्त्रोपकल्पितम् ॥ ६४ ॥ किंकिणीजालसंपन्नं वर्णकैश्चोपशोभितम् ॥
पुष्पमालाप्रभं वापि घंटाचामरभूषितम् ॥ ६५ ॥ भगस्योपरि यो दद्यात्सर्वरत्नोपशोभितम् ॥ दुकूलपट्टदेवांगैर्वस्त्रैर्वा वर्णकान्वितैः ॥ ६६ ॥
पट्टादिवस्त्रतंतूनां परिसंख्या तु या भवेत् ॥ तावद्युगसहस्राणि सूरलोके महीयते ॥ ६७ ॥ भगाहुत्या जगत्सर्वं सृष्टिद्वारेण धार्यते ॥ अग्निवर्त्मा
वचस्युक्तो ह्यग्निरस्यात्मजः सदा ॥ ६८ ॥ यस्त्वग्निकाय विधिवत्कुर्यान्नित्यं भगालये ॥ भगमुद्दिश्य राजेंद्र स याति परमां गतिम् ॥ ६९ ॥
सर्वान्नं यावकोपेतं यस्तु नित्यविधिं हरेत् ॥ पुष्पधूपजलोपेतं कालेकाले विशेषतः ॥ ७० ॥ महाश्वेतादिमातॄणां त्रिकल्पानां च सर्वशः ॥ यः
कृत्वा सकृदप्येवं सर्वदिक्षु बलिं हरेत् ॥ स नरश्च सहस्राणि शांडिलेयपुरे वसेत् ॥ ७१ ॥ सौरसंध्याबलिं कृत्वा दिनांते सततं रवेः ॥ वर्षायु
तशतं साग्रं भगलोके महीयते ॥ ७२ ॥ दध्योदनपयोभिर्यः पूरितं पात्रमावृतम् ॥ पुष्पधूपार्चितं चैव वितानोपरि शोभितम् ॥ ७३ ॥ शिरसा
धारयेत्पात्रं शनैर्गच्छेत्प्रदक्षिणम् ॥ रव्यायतनपर्यंते शंखवीणादिनिस्वनैः ॥ ७४ ॥ दर्पणैर्धूपमालाभिर्गेयनृत्यादिशोभितम् ॥ भानोर्हि स्मृतिशी
लश्च तस्य पुण्यफलं शृणु ॥ ७५ ॥ दिव्यं वर्षसहस्रं तु दिव्यं वर्षशतं तथा ॥ तपस्ततं महत्तेन भवेदेवं न संशयः ॥ ७६ ॥ भगभक्तिप्रसन्नात्मा
यद्यपि स्यात्स पापकृत् ॥ भगलोके वसेन्नित्यं भगानुचरतां गतः ॥ ७७ ॥ कृष्णां तु षष्ठीं नक्तेन यश्च कृष्णां च सप्तमीम् ॥ इह भोगानवाप्नोति
परत्र च शुभां गतिम् ॥ ७८ ॥ योब्दमेकं तु कुर्वीत नक्तं भगदिने नरः ॥ ब्रह्मचारी जितक्रोधो भगार्चनपरो नरः ॥ अयाचितात्परं नक्तं तस्मान्ना

क्तेन वर्तयेत् ॥ ७९ ॥ देवैस्तु भुक्तं मध्याह्ने पूर्वाह्णे ऋषिभिस्तथा ॥ अपराह्णे तु पितृभिः संध्यायां गुह्यकादिभिः ॥ ८० ॥ सर्वा वेला ह्यतिक्रम्य सौराणां भोजनं परम् ॥ भुंजानो नक्तकाले तु सूर्यभक्तिपरायणः ॥ ८१ ॥ भगलोकमवाप्नोति सुमनाः सुमनोव्रतः ॥ भुक्त्वा सौमनसाँल्लोकान्राजा भवति भूतले ॥८२॥ हविष्यभोजनं स्नानमाहारस्य च लाघवम् ॥ अग्निकार्यमधःशय्यां नक्तभोजी समाचरेत् ॥ ८३ ॥ कृष्णषष्ठ्यां प्रयत्नेन कृत्वा नक्तं विधानतः ॥ नरो मार्गशिरे मासि अंशुमानिति पूजयेत् ॥८४॥ विधिवत्प्राश्य गोमूत्रमनाहारो निशि स्वपेत् ॥ अतिरात्रस्य यज्ञस्य फलमाप्नोति मानवः ॥ ८५ ॥ पुष्येप्येवं सहस्रांशुं भानुमंतमुशंति च ॥ वाजपेयफलं प्राप्य घृतं प्राश्य लभेन्नरः ॥ ८६ ॥ माघे दिवाकरं[1] नाम कृष्णषष्ठ्यां नरोत्तम ॥ निशि पीत्वा तु गोक्षीरं गोमेधफलमाप्नुयात् ॥ ८७ ॥ मार्तंडं फाल्गुने मासि पूजयित्वा गवां पयः ॥ पिबेत्ततः सूर्यलोके मोदते सोऽयुतायुतम् ॥८८॥ चैत्रे मासि विवस्वंतं पूजयित्वा सुभक्तिमान् ॥ हविष्याशी सूर्यलोकेऽप्सरोभिः सह मोदते ॥८९॥ वैशाखे चण्डकिरणं पूजयेच्च पयोव्रतः॥वर्षाणामयुतं साग्रं मोदते सूर्यसंनिधौ॥९०॥ज्येष्ठे दिवस्पतिं पूज्य गवां शृंगोदकं पिबेत्॥गवां कोटिप्रदानस्य निखिलं फलमाप्नुयात् ॥९१॥ आषाढे त्वर्कनामानमिष्ट्वा प्राश्य च गोमयम् ॥ प्रयात्यर्कसलोकं तु वर्षाणां च शतंशतम् ॥९२॥ श्रावणेऽर्यमनामानं पूजयित्वा पयः पिबेत् ॥ वर्षाणामयुतं साग्रं मोदते भास्करालये ॥ ९३ ॥ मासि भाद्रपदे षष्ठ्यां भास्करं नाम पूजयेत् ॥ भास्करं पंचगव्यस्य सर्वमेधफलं लभेत्॥९४॥ मासि चाश्वयुजे षष्ठ्यां भगाख्यं नाम पूजयेत् ॥ पलगोमूत्रभुक्चैव अश्वमेधफलं लभेत् ॥ ९५ ॥ मासे तु कार्तिके षष्ठ्यां शक्राख्यं नाम पूजयेत् ॥ दूर्वांकुरं सकृत्प्राश्य राजसूयफलं लभेत्॥९६॥वर्षांते भोजयेद्विप्रान्सूर्यभक्तिपरायणान्॥पायसं मधुसंयुक्तं वज्रेण च परिप्लुतम्॥९७॥ शक्त्या हिरण्यवासांसि भक्त्या तेभ्यो निवेदयेत् ॥ निवेदयेच्च सूर्याय कृष्णां गां च पयस्विनीम् ॥ ९८ ॥ वर्षमेकं च देवे वै नैरंतर्येण यो नयेत् ॥ कृष्णषष्ठीव्रतं भक्त्या तस्य पुण्यफलं शृणु ॥९९॥ सर्वपापविनिर्मुक्तः सर्वकामसमन्वितः ॥ मोदते सूर्यलोके तु स नरः शाश्वतीः समाः॥१००॥ पुण्येष्वहःसु सर्वेषु विषुवद्ग्रहणादिषु ॥ दानोपवासहोमाद्यैरक्षयं खग जायते ॥१०१॥ ॥ सुमंतुरुवाच ॥ ॥ इत्युक्तवान्पुरा भानुररुणाय विशांपते॥ कृष्णषष्ठीव्रतं पुण्यं सर्वपापभयापहम् ॥ १०२ ॥ कृत्वेदं पुरुषो भक्त्या भास्करस्य महात्मनः ॥ प्रयाति परमं स्थानं भानोरमिततेजसः ॥१०३॥

इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सूर्यषष्ठीव्रतवर्णनं नाम चतुःषष्ट्युत्तरशततमोध्यायः॥१६४॥छ॥ ॥ सुमंतुरुवाच ॥ ॥ अहं ते

---

[1] पूजयित्वेति शेषः ।

संप्रवक्ष्यामि सूर्यस्य व्रतमुत्तमम्॥ धर्मकामार्थमोक्षाणां प्रतिपादनमुत्तमम् ॥१॥ पौषमासे तु संप्राप्ते यः कुर्यान्नक्तभोजनम् ॥ जितेंद्रियः सत्यवादी शालिगोधूमगोरसैः ॥२॥ पक्षयोः सप्तमीं यत्नादुपवासेन यापयेत् ॥ त्रिसंध्यमर्चयेद्भानुं शांडिलेयं च सुव्रत ॥३॥ अधःशायीभवेन्नित्यं सर्वभोगविवर्जितः ॥ मासि पूर्णे तु सप्तम्यां घृतादिभिररिंदम ॥ ४ ॥ कृत्वा स्नानं महापूजां सूर्यदेवस्य भारत ॥ नैवेद्यं मोदकप्रस्थं क्षीरं सिद्धं निवेदयेत् ॥ ५ ॥ भोजयेच्च द्विजानष्टौ भगार्चां शुभलक्षणाम् ॥ गां च दत्त्वा महाराज कपिलां भास्कराय तु ॥६॥ य एवं कुरुते पुण्यं सूर्यस्य व्रतमुत्तमम्॥ तस्य पुण्यफलं वच्मि सर्वकामसमन्वितम् ॥७॥ सूर्यकोटिप्रतीकाशैर्विमानैः सार्वकामिकैः ॥ अप्सरोगणसंकीर्णैर्महाविभवसंयुतैः ॥८॥ संगीतनृत्यवाद्याद्यैर्गंधर्वगणशोभितैः ॥ दोधूयमानश्चमरैः स्तूयमानः सुरासुरैः ॥९॥ सहस्रकिरणाभासः सौरैः सूर्यसमन्वितैः ॥ स याति परमं स्थानं यत्रास्ते रविरंशुमान् ॥१०॥ रोमसंख्या तु या तस्यास्तत्प्रसूतिः कुलेषु च ॥ तावद्युगसहस्राणि सूरलोके महीयते ॥११॥ त्रिःसप्तकुलजैः सार्धं भोगान्भुक्त्वा यथेप्सितान् ॥ ज्ञानयोगं समासाद्य पुनरेव प्रमुच्यते ॥ १२ ॥ योगाद्दुःखांतमाप्नोति ज्ञानयोगं प्रवर्तते ॥ सौरधर्माद्भवेज्ज्ञानं सौरधर्मो भगार्चनात् ॥ ॥ १३ ॥ इत्येवं ते समाख्यातं भवार्णवव्यपोहनम् ॥ सौरमोक्षक्रमोपायं सूराश्रयनिषेवणम् ॥ १४ ॥ माघमासे तु संप्राप्ते यः कुर्यान्नक्तभोजनम् ॥ पिण्याकं घृतसंयुक्तं भुंजानः स जितेन्द्रियः ॥ १५ ॥ सोपवासश्च सप्तम्यां भवेदुभयपक्षयोः ॥ घृताभिषेकमष्टम्यां कुर्याद्भानोर्नराधिप ॥ गां च दद्याद्दिनेशाय तरुणीं नीलसंनिभाम् ॥ १६ ॥ इन्द्रनीलप्रतीकाशैर्विमानैः शिखिसंयुतैः ॥ गत्वादित्यपुरं रम्यं भोगान्भुंक्ते यथेप्सितान् ॥ १७ ॥ राजेंद्र फाल्गुने मासि यः कुर्यान्नक्तभोजनम् ॥ श्यामाकक्षीरनीवारैर्जितक्रोधो जितेन्द्रियः ॥ १८ ॥ षष्ठ्यां वाप्यथ सप्तम्यामुपवासपरो नरः ॥ अष्टम्यां तु महास्नानं पञ्चगव्यघृतादिभिः ॥१९॥ वल्मीकजादिमृद्भिश्च गोमूत्रशकृदादिभिः॥ त्वग्भिश्च क्षीरवृक्षाणां स्नापयित्वा प्रमार्जयेत् ॥२०॥ सौरभेयीं ततो दद्याद्रक्ताभां रक्तमालिने ॥ पद्मरागप्रतीकाशैर्विमानैर्हस्तिसंयुतैः ॥ गत्वादित्यपुरं रम्यं मोदते शाश्वतीः समाः ॥ २१ ॥ मासि चैत्रे तु संप्राप्ते यः कुर्यान्नक्तभोजनम् ॥ शाल्यन्नं पायसैर्युक्तं भुञ्जानश्च जितेन्द्रियः ॥ भानवे पाटलां दद्याद्वैष्णवीं तरुणीं नृप ॥ २२ ॥ पुष्परागप्रभैर्यानैर्नानाहंसादियायिभिः ॥ गच्छेत्सूर्यपुरं रम्यं मोदते शाश्वतीः समाः ॥२३॥ वैशाखे वीर मासे तु यः कुर्यान्नक्तभोजनम् ॥ सूर्ये खंडाज्यसंमिश्रं सकृद्दद्यान्निवेदनम् ॥ २४ ॥ गां च दद्यान्महाराज भास्कराय शुभानन ॥ सामान्यं च विधिं कुर्यात्प्रयुक्तो यो मया तव ॥ २५ ॥ शुद्धस्फटिकसंकाशैर्यानैर्बर्हिणवाहनैः ॥ अणिमादिगुणैर्युक्तः सूर्यवद्विचरेद्दिवि ॥ २६ ॥ संप्राप्ते श्रावणे मासि यः कुर्यान्नक्तभोजनम् ॥ क्षीरषष्टि

कभक्तेन सर्वसत्त्वहिते रतः ॥ २७ ॥ पीतवर्णां च गां दद्याद्भास्कराय महात्मने ॥ सामान्यमखिलं कुर्याद्विधानं यत्प्रकीर्तितम् ॥२८॥ स विचित्रैर्महायानैर्हंससारसगामिभिः ॥ गत्वादित्यपुरं श्रीमान्पूर्वोक्तं लभते फलम् ॥ २९ ॥ वीर भाद्रपदे मासि यः कुर्यान्नक्तभोजनम् ॥ हुतशेषहविष्याशी वृक्षमूलमुपाश्रितः ॥ ३० ॥ स्वप्यादायतने रात्रौ सर्वभूतानुकम्पकः ॥ दद्याद्गां रोहिणीं श्रेष्ठां भास्कराय महात्मने ॥ ३१ ॥ निशाकरकरप्रख्यैर्वज्रवैदूर्यसन्निभैः ॥ चक्रवाकसमायुक्तैर्विमानैः सार्वकामिकैः ॥ ३२ ॥ गत्वादित्यपुरं रम्यं सुरासुरसुवन्दितम् ॥ मोदते स महाभागो यावदाभूतसंप्लवम् ॥ ३३ ॥ श्रीमानाश्वयुजे मासि यः कुर्यान्नक्तभोजनम् ॥ मिताशनं प्रभुञ्जानो जितक्रोधो जितेन्द्रियः ॥ ३४ ॥ दद्याद्गां पद्मवर्णाभां भानवेऽमिततेजसे ॥ दिव्याभरणसंपन्नां तरुणीं च पयस्विनीम् ॥३५॥ स्वस्तिमौक्तिकसंकाशैरिंद्रनीलोपशोभितैः ॥ जीवो जीवकसंयुक्तविमानैः सार्वकामिकैः ॥ गच्छेद्भानुसलोकत्वं भुञ्जानः स जितेन्द्रियः ॥ ३६ ॥ दिवाकराय गां दद्याज्ज्वलनार्कसमप्रभाम् ॥ पूर्वोक्तं च विधिं कुर्यात्सूर्यतुल्यो भवेन्नरः ॥ ३७ ॥ कालानलशिखप्रख्यैर्महायानैर्नगोपमैः ॥ महासिंहकृतारोपैः सूर्यवन्मोदते सुखी ॥ ३८ ॥ मार्गशीर्षे शुभे मासि यः कुर्यान्नक्तभोजनम् ॥ यच्चान्नं पयसा युक्तं भुञ्जानः स जितेन्द्रियः ॥३९॥ प्रयच्छेद्गां तथा रक्तां नानालंकारभूषिताम् ॥ सूर्याय कुरुशार्दूल विधिं चापि समाचरेत् ॥ ४० ॥ सितपद्मनिभैर्यानैः श्वेताश्वरथसंयुतैः ॥ गत्वा तत्र पुरे रम्ये प्रभया परयान्वितः ॥ ४१ ॥ अहिंसासत्यवचनमस्तेयं क्षांतिरार्जवम् ॥ त्रिषवणाग्निहवनं भूशय्या नक्तभोजनम् ॥ ४२ ॥ पक्षयोरुभयोर्मार्गे सप्तम्यां कुरुनंदन ॥ एतान्गुणान्समाश्रित्य कुर्वाणो व्रतमुत्तमम् ॥ ४३ ॥ सप्तम्योभयविख्यातं सर्वपापभयापहम् ॥ सर्वरोगप्रशमनं सर्वकामफलप्रदम् ॥४४॥ इत्येवमादीन्नियमांश्चरेत्सूर्यव्रती सदा ॥ य इच्छेद्विपुल स्थानं भानोरमिततेजसः ॥४५॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्प उभयसप्तमीवर्णनं नाम पंचषष्ट्युत्तरशततमोऽध्यायः ॥ १६५ ॥ छ ॥

सुमंतुरुवाच ॥ सूर्यभक्ता तु या नारी ध्रुवं सा पुरुषो भवेत् ॥ स्त्री पुत्रमुत्तमं सा चेत्कांक्षते शृणु तद्व्रतम् ॥ १ ॥ निक्षुभार्काख्यमाख्यातं सदा प्रीतिविवर्धनम् ॥ अवियोगकरं वीर धर्मकामार्थसाधकम् ॥ २ ॥ सप्तम्यामथ षष्ठ्यां वा संक्रांतौ च रवेर्दिने ॥ हविषा हविर्होमं तु सोपवासः समाचरेत् ॥ ३ ॥ निक्षुभां कांस्यनिष्पन्नां कृत्वा स्वर्णमयीं शुभाम् ॥ राजतीं वाथ वा वर्षं स्नापयेच्च घृतादिभिः ॥४॥ गंधमाल्यैरलंकृत्य वस्त्रयुग्मैश्च शोभनैः ॥ भक्ष्यभोज्यैरशेषैश्च वितानध्वजचामरैः ॥ ५ ॥ भोजयेत्सूर्यभक्तांश्च शुक्लवस्त्रावगुण्ठितान् ॥ कृत्वायतनमध्ये तु प्रतिमामुपकल्पयेत् ॥ ६ ॥ कृत्वा शिरसि तत्पात्रं वितानच्छत्रशोभितम् ॥ ध्वजशंखादिविभवैर्भगस्यायतनं नयेत् ॥ ७ ॥ निक्षुभार्कदिनेशस्य व्रत

मेतन्निवेदयेत् ॥ तत्पिंडचां स्थापयेत्पात्रमुपशोभासमन्वितम् ॥ ८ ॥ प्रदक्षिणीकृत्य रविं प्रणिपत्य क्षमापयेत् ॥ समाप्य तद्व्रतं पुण्यं शृणुयात्फ
लमश्नुते ॥ ९ ॥ द्वादशादित्यसंकाशैर्महायानैर्नगोपमैः ॥ यथेष्टं भानवे लोके सौरैः सार्धं प्रमोदते ॥ १० ॥ वर्षकोटिसहस्राणि वर्षकोटिशतानि
च ॥ नंदतेऽसौ महाभाग विष्णुलोके महीयते ॥ ११ ॥ ततः कर्मविशेषेण सर्वकामसमन्वितम् ॥ ब्रह्मलोकं समासाद्य परं सुखमवाप्नुयात्॥ १२ ॥
ब्रह्मलोकात्परिभ्रष्टः श्रीमान्त्सुरसुपूजितः ॥ प्रजापतिमवाप्नोति सुरासुरनमस्कृतः ॥ १३ ॥ लोकानिह चिरं भुक्त्वा सोमलोके महीयते ॥ सोमादैं
द्रं पुनर्लोकमासाद्येंद्रपतिर्भवेत् ॥ १४ ॥ इंद्रलोकाच्च गंधर्वलोकं प्राप्य स मोदते ॥ ततस्तद्धर्मशेषेण भवत्यादित्यभावितः ॥ १५ ॥ स्वकर्मभा
वनोद्योगात्पुनः प्रारभते शुभम् ॥ शुभाच्च पुनरेत्येह स यात्यतिसहस्रशः ॥ १६ ॥ यावन्नाप्नोति मरणं तावद्भ्रमति कर्मणा ॥ सुनिर्वेदात्सुवैराग्यं
वैराग्याज्ज्ञानसंभवः ॥ १७ ॥ ज्ञानात्प्रवर्तते योगो योगाद्दुःखांतमाप्नुयात् ॥ १८ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरध
र्मेनिक्षुभाव्रतवर्णनं नाम षट्षष्ट्युत्तरशततमोऽध्यायः ॥ १६६ ॥ छ ॥ ॥ सुमंतुरुवाच ॥ ॥ षष्ठ्यां चाप्यथ सप्तम्यां नियता ब्रह्मचारिणी ॥
वर्षमेकं न भुंक्ते या महाभागजिगीषया ॥ १ ॥ वर्षांते प्रतिमां कृत्वा निक्षुभांकेति विश्रुताम् ॥ स्नानाद्यं च विधिं कृत्वा पूर्वोक्तं लभते गुणम् ॥२॥
जांबूनदमयैर्यानैश्चतुर्द्वारैरलंकृते ॥ गत्वादित्यपुरे रम्ये अशेषं विंदते फलम् ॥ ३ ॥ सौरादिसर्वलोकेषु भोगान्भुक्त्वा यथेप्सितान् ॥ क्रमादागत्य
लोकेऽस्मिन्राजानं पतिमाप्नुयात् ॥ ४ ॥ या नार्युपवसेदेवं कृष्णामेकां तु सप्तमीम् ॥ सा गच्छेत्परमं स्थानं भानोरमिततेजसः ॥ ५ ॥ वर्षांते
प्रतिमां कृत्वा शालिपिष्टमयीं शुभाम् ॥ पीतानुलेपनैर्माल्यैः पीतवस्त्रैश्च पूजयेत् ॥ पूर्वोक्तमखिलं कृत्वा भास्कराय निवेदयेत् ॥ ६ ॥ सप्तभीमैर्महा
यानैर्दंतिचामीकरप्रभैः ॥ वर्षकोटिशतं साग्रं सूर्यलोके महीयते ॥ ७ ॥ सौरलोकादिलोकेषु भुक्त्वा भोगान्नराधिप ॥ क्रमादागत्य लोकेऽस्मिन्य
थेष्टं विंदते पतिम् ॥ सर्वलक्षणसंपन्नं धनधान्यसमन्वितम् ॥ ८ ॥ कृष्णपक्षे तु सप्तम्यां या नारी तु दृढव्रता ॥ वर्षमेकमुपवसेत्सर्वभोगविवर्जिता
॥ ९ ॥ वर्षांते सर्वगंधाढ्यं निक्षुभार्कं निवेदयेत् ॥ सुवर्णमणिमुक्ताभ्यां भोजयित्वा मगांगनाम् ॥१०॥ सुविचित्रैर्महायानैर्दिव्यगंधर्वशोभितैः॥सा
वै युगसहस्राणि सूरलोके नराधिप ॥११॥ यथेष्टं भानवे लोके भोगान्भुक्त्वा तु कृत्स्नशः ॥ क्रमादागत्य लोकेस्मिन्राजानं विंदते पतिम् ॥१२॥
एवं या कुरुते राजन्व्रतं पापभयापहम् ॥ निक्षुभार्कमिदं पुण्यं सा याति परमं पदम् ॥ १३ ॥ वर्षमेकं महाबाहो श्रद्धया परयान्वितः ॥ वर्षांते
वै भोजयेद्वीर दांपत्यं भोजकेषु वै ॥१४॥ भोजयित्वा तु दांपत्यं भोगकानां महाबलैः ॥ पूजयेद्गंधमाल्यैस्तु वासोभिः कुरुनंदन ॥ १५ ॥ कृत्वा

ताम्रमये पात्रे वस्त्रपूर्णैरलंकृतम् ॥ निक्षुभार्कं तु सौवर्णं दत्त्वा ताभ्यां तु शक्तितः ॥ १६ ॥ निक्षुभा भोजिका ज्ञेया भोजकोऽर्कः प्रकीर्तितः ॥
तस्मात्तौ पूजयेत्सौरीश्वरवच्छ्रद्धयान्वितः ॥ १७ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मेषु निक्षुभार्कव्रतं नाम सप्तष
ष्ट्युत्तरशततमोऽध्यायः ॥ १६७ ॥ सुमंतुरुवाच ॥ ॥ एकभक्तेन या नारी कार्त्तिकं क्षपयेन्नृप ॥ क्षमाहिंसादिनियमैः संयता ब्रह्मचारिणी ॥१॥
गुडाज्यमिश्रं शाल्यन्नं भास्कराय निवेदयेत् ॥ पक्षयोरुभयोस्तात श्रद्धया परयान्विता ॥ २ ॥ पुष्पाणां करवीराणां गुग्गुलं साज्यमादिशेत् ॥
सप्तम्यां तात षष्ठ्यां वै उपवासरतिर्भवेत् ॥ ३ ॥ इंद्रनीलप्रतीकाशैर्विमानैः सार्वकामिकैः ॥ वर्षायुतशतं साग्रं सूरलोके महीयते ॥ ४ ॥ तथा च
सर्वलोकेषु भोगमासाद्य यत्नतः ॥ क्रमादागत्य लोकेऽस्मिन्यथेष्टं विंदते पतिम् ॥ ५ ॥ इत्येवं सर्वयज्ञेषु विधिस्तुल्यः प्रकीर्तितः ॥ एकभक्तोप
वासस्य फलं च सदृशं भवेत् ॥ ६ ॥ क्षमा सत्यं दया दानं शौचामिंद्रियनिग्रहः ॥ सूर्यपूजाग्निहवनं संतोषः स्तेयवर्जनम् ॥७॥ सर्वव्रतेष्वयं धर्मः
सामान्यो दशधा स्मृतः ॥ निःशेषमहं वक्ष्यामि मासान्मासव्रतं प्रवि ॥ ८ ॥ मार्गशीर्षे शुभे मासि व्योमपृष्ठे विनिर्मितम् ॥ गंधमाल्यैरलंकृत्य
शुभाननमनौपमम् ॥ ९ ॥ ताम्रपात्रादिकैश्चैवाप्यप्सरोगणसेवितैः ॥ सुमेरौ दशसाहस्रेसूर्यलोके महीयते ॥ १० ॥ सर्वदेवकदंबेषु संप्राप्य विमलां
श्रियम् ॥ क्रमादागत्य लोकेऽस्मिन्राजानं पतिमाप्नुयात् ॥ पुष्पैरसुमलंकृत्य भानवे विनिवेदयेत् ॥ ११ ॥ गंधमाल्यैरलंकृत्य शुभाननमनौप
मम् ॥ ताम्रपात्रादिकांस्यं वा कृत्वा तत्र निवेदयेत् ॥ १२ ॥ महापुष्पकयानेन दिव्यगंधप्रवाहिना ॥ सुमेरौ दशसाहस्रं सूर्यलोके महीयते ॥१३॥
भुक्त्वा तु विपुलान्भोगान्सर्वलोकेषु भारत ॥ संप्राप्यैतं क्रमाल्लोकं यथेष्टं विंदते पतिम्॥१४॥माघे रथमश्वयुजं दीपमाल्यविभूषितम्॥पिष्टसानुसमा
युक्तं कृत्वायतनमानयेत्॥१५॥महारथोपमैर्यानैः श्वेताश्ववरसंयुतैः॥वर्षायुतशतं साग्रं सूर्यलोके महीयते॥१६॥सर्वामराणां लोकेषु प्राप्य भोगान्यथे
प्सितान् ॥ क्रमादागत्य लोकेऽस्मिन्यथेष्टं पतिमाप्नुयात् ॥१७॥ प्रतिमां फाल्गुने मासि कृत्वा पिष्टमयीं रवेः ॥ गंधमाल्यैरलंकृत्य स्थापयेद्भास्करा
लये ॥१८॥ यानैरप्रतिमैर्दिव्यैर्गीतनादसमाकुलैः॥ सुमेरौ दशसाहस्रं सूर्यलोके महीयते ॥१९॥ सर्वाभिमतलोकेऽस्मिन्प्राप्य भोगान्यथेप्सितान्॥
पुनरेत्य इमं लोकं यथेष्टं विंदते पतिम् ॥२०॥ कृत्वारुणं तथा चैत्रे गंधमाल्योपशोभितम् ॥ स्थाप्य पात्रे यथोक्ते तु भास्कराय निवेदयेत् ॥२१॥
शरदिंदुप्रतीकाशैर्विमानैः सार्वकामिकैः ॥ वर्षायुतशतं साग्रं सूर्यलोके महीयते ॥ २२॥ कर्मक्षयादिहागत्य पुत्रपौत्रसमन्वितम् ॥ अभीष्टं पतिमा
साद्य लभेद्भोगान्सुदुर्लभान् ॥ २३ ॥ तंडुलाढकपिष्टेन कृत्वा वै मेरुपर्वतम् ॥ निक्षुभार्कसमायुक्तं सर्वधातुविभूषितम् ॥ २४ नानालंकार

संपन्नं नानामाल्यविभूषितम् ॥ सर्वरत्नसमायुक्तं स्थापयेद्भास्करालये ॥ २५ ॥ महद्व्योमव्रतं ह्येतद्वैशाखे यः समाचरेत् ॥ नानाविधैश्च यानैस्तु
सूर्यलोके महीयते ॥ २६ ॥ सौरादिसर्वलोकेषु भुक्त्वा भोगानशेषतः ॥ क्रमादागत्य लोकेऽस्मिन्राजानं पतिमाप्नुयात् ॥ २७ ॥ द्वितीयं च
तथा पद्ममाषाढे पिष्टमुत्तमम् ॥ सर्वबीजरसैः पूर्णं कृत्वा तु शुभलक्षणम् ॥ नानाकेशरगंधाढ्यं सर्वरत्नविभूषितम् ॥ २८ ॥ एतैर्वा हैमभिर्यानैः
सर्वभोगान्वितैर्नृप ॥ वर्षकोटिशतं साग्रं सूर्यलोके महीयते ॥२९॥ भुक्त्वा तु विपुलान्भोगान्सर्वलोकेष्वनुक्रमात् ॥ प्राप्ता तु सर्वभोगाढ्यं तरुणं
विंदते पतिम् ॥ ३० ॥ सर्वधातुसमाकीर्णं विचित्रध्वजशोभितम् ॥ निवेदयेत सूर्याय श्रावणे तिलपर्वतम् ॥ ३१ ॥ स्वच्छंदगामिभिर्यानैर्नाना
वर्णविभूषितैः ॥ वर्षकोटिशतं साग्रं सूर्यलोके महीयते ॥ ३२ ॥ संप्राप्य विविधान्भोगान्बह्वाश्चर्यसमन्वितान् ॥ क्रमाल्लोकमिमं प्राप्य राजानं
विंदते पतिम् ॥ ३३ ॥ कृत्वा भाद्रपदे मासि व्योम शालिमयं नृप ॥ वितानध्वजच्छत्राढ्यं नानामालाविभूषितम् ॥ ३४ ॥ तरुणार्ककरप्रख्यैर्महा
यानैः सुशोभनैः ॥ वर्षकोटिसहस्राणि सूर्यलोके महीयते ॥ ३५ ॥ संप्राप्य विविधान्भोगान्त्सर्वान्निमिषसंभवान् ॥ क्रमादागत्य लोकेऽस्मिन्रा
जानं विंदते पतिम् ॥ ३६ ॥ कृत्वा चाश्वयुजे मासि विपुलं धान्यपर्वतम् ॥ सुवर्णवस्त्रगंधाढ्यं भास्कराय निवेदयेत् ॥ ३७ ॥ सावित्रैश्च महा
यानैर्वरभोगसमन्वितैः ॥ वर्षकोटिसहस्राणि सूर्यलोके महीयते ॥ ३८ ॥ सूर्यलोकादिलोकेषु भुक्त्वा भोगान्यथेप्सितान् ॥ अस्मिँल्लोके चा
संप्राप्ता राजानं विंदते पतिम् ॥ चन्द्राग्निभास्कराणां तु कांतितेजःप्रभान्वितम् ॥ ३९ ॥ यंयं कामं समुद्दिश्य नरनारीनपुंसकाः ॥ पूजयंति
रविं भक्त्या तत्सर्वं प्राप्नुवंति हि ॥ ४० ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मेषु कामप्रदस्त्रीव्रतवर्णनं नामाष्ट
षष्ट्युत्तरशततमोऽध्यायः ॥ १६८ ॥ छ ॥ ॥ सुमंतुरुवाच ॥ ॥ मृन्मयं दारुजं शैलं पक्वेष्टकमथापि वा ॥ कृत्वा मठं गृहं वापि यथा विभ
वसंभवात् ॥ १ ॥ सर्वोपकरणोपेतं सर्वधान्यसमन्वितम् ॥ सूर्यायेत्थं गृहं दद्यात्सर्वान्कामानवाप्नुयात् ॥ २ ॥ कृत्वैकभक्तं हेमंते माघमासमतं
द्रितः ॥ मासांतेन रथं कुर्याच्चित्रवस्त्रोपशोभितम् ॥ ३ ॥ श्वेतैश्चतुर्भिः संयुक्तं तुरंगैः समलंकृतम् ॥ श्वेतध्वजपताकाभिश्छत्रचामरदर्पणैः ॥
॥ ४ ॥ तंडुलाढकपिष्टेन कृत्वा भानुं नराधिप ॥ विन्यस्य तं रथोपस्थे संज्ञया सह भूपते ॥ ५ ॥ तं रात्रौ राजमार्गेण शंखभेर्यादिनिस्वनैः ॥
भ्रमयित्वा शनैः पश्चात्सूर्यायतनमाविशेत् ॥ ६ ॥ तत्र जागरपूजाभिः प्रदीपावलिशोभितैः ॥ प्रेक्षणीयैः प्रदानैश्च क्षपयित्वा शनैः क्षपाम् ॥ ७ ॥

---

१ ऐसभावश्छान्दसः । २ इह लोक इति शेषः ।

प्रभाते स्नपनं कृत्वा मधुक्षीरघृतेन च ॥ दीनांधकृपणेभ्योऽन्नं यथाशक्त्या च दक्षिणाम् ॥ ८ ॥ रथं संवाहनोपेतं भास्कराय निवेदयेत् ॥ भुक्त्वा च
बांधवैः सार्धं प्रणम्यार्कगृहं व्रजेत् ॥९॥ सर्वव्रतानां प्रवरं मंत्रधर्मान्वितः सदा ॥ व्रतं सूर्यव्रतं नाम सर्वकामार्थसिद्धये ॥१०॥ सर्वव्रतेषु यत्पुण्यं
सर्वयज्ञेषु यत्फलम् ॥ सर्वं सूर्यरथेनेह तत्पुण्यं लभते नृप ॥ ११ ॥ सूर्यायुतप्रतीकाशैर्विमानैः सार्वकामिकैः ॥ त्रिसप्तकुलजैः सार्धं सूर्यलोके
महीयते ॥ १२ ॥ भुक्त्वा तु विपुलान्भोगान्सर्वलोकेष्वनुक्रमात् ॥ कल्पायुतशतं साग्रं ततो राजा भवेत्क्षितौ ॥ १३ ॥ पंचबलिसमायुक्तं मृदु
षड्वास्तुकल्पितम् ॥ सर्वोपकरणोपेतं सूर्यं संज्ञां प्रकल्पयेत् ॥ १४ ॥ संज्ञादेवीसमायुक्तं पैष्टांशाढ्यं निवेदयेत् ॥ सौरज्ञानार्थतत्त्वज्ञमाचार्यमुदयान्वितम् ॥ १५ ॥
संपूज्य गंधपुष्पाद्यैर्वस्त्रालंकारचामरैः ॥ भक्ष्य भोज्यैरशेषैश्च ततः शय्यां निवेदयेत् ॥ १६ ॥ तदूर्णातूलवस्त्राणां परिसंख्या
तु यावती ॥ तावद्वर्षसहस्राणि सूर्यलोके महीयते ॥ १७ ॥ सुरादिसर्वलोकेषु भुक्त्वा भोगानशेषतः ॥ कामादागत्य लोकेऽस्मिन्राजा भवति
धार्मिकः ॥ १८ ॥ दश गोभिः सह वृषं ता वृषैकादशाः स्मृताः ॥ सूर्याय विनिवेद्येह यत्फलं लभते शृणु ॥ १९ ॥ द्वादशादित्यतुल्यात्मा
अणिमादिगुणैर्युतः ॥ सर्वत्र मोदते राजन्सूर्यस्यानुचरो भवेत् ॥ २० ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सूर्यव्रत
वर्णनं नामैकोनसप्तत्युत्तरशततमोऽध्यायः ॥ १६९ ॥ ॥ छ ॥ ॥ सुमन्तुरुवाच ॥ ॥ सवृषं गोशतं दत्त्वा भास्कराय नराधिप ॥
त्रिःसप्तकुलजैः सार्धं शृणु यत्फलमाप्नुयात् ॥ १ ॥ वरकोटिप्रतीकाशैः सर्वकामसमन्वितैः ॥ महायानैरसंख्येयैरमरासुरपूजितैः ॥ २ ॥
द्वादशादित्यसंकाशो दिवाकर इवापरः ॥ गत्वादित्यपुरं रम्यं क्रीडते सूर्यमंडपे ॥ ३ ॥ भुक्त्वा तु विपुलान्भोगान्प्रलये सर्वदेहिनाम् ॥
मोहकंचुकमुत्सृज्य विशत्यादित्यमंडले ॥ ४ ॥ सर्वज्ञः सूरपरमः शुद्धः स्वात्मन्यवस्थितः ॥ सर्वगः परिपूर्णत्वात्सूर्यवद्दीप्तिमान्भवेत् ॥ ५ ॥
यो दद्यादुभयमुखीं सौरभेयीं दिवाकरे ॥ सप्तद्वीपां महीं दत्त्वा यत्फलं तदवाप्नुयात् ॥ पादद्वयं शिरोऽर्धं च सशैलवनकानना ॥ ६ ॥ इति
श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे गोदानवर्णनं नाम सप्तत्युत्तरशततमोध्यायः ॥ १७० ॥ छ ॥ ॥ शतानीक उवाच ॥ ॥
मगानां ब्रूहि मे धर्मं समासव्यासयोगतः ॥ फलं च किं भवेद्ब्रह्मन्मगधर्मनिषेवणात् ॥ १ ॥ ॥ सुमंतुरुवाच ॥ ॥ य एष धर्मः सूर्येति तवाख्यातो
मयानघ ॥ मगधर्मः स एवोक्तः सर्वपापभयापहः ॥ २ ॥ सर्वेषामेव वर्णानां मगधर्मनिषेवणम् ॥ मगधर्मश्च संप्रोक्त एतेषां भवमुक्तये ॥३॥
ब्राह्मणाः क्षत्रिया वैश्याः स्त्री शूद्रो वा मगाश्रमी ॥ यः पूजयति मार्तंडं स याति परमां गतिम् ॥ ४ ॥ त्रिसंध्यमर्चयेद्भानुमग्निकार्यं च शक्तितः ॥

कुर्यान्मगो महाबाहो मुखमावृत्य यत्नतः ॥५॥ त्रिसंध्यमेककालं वा पूजयेच्छ्रद्धया रविम् ॥ असंपूज्य रविं मोहान्न भुंजीत कदाचन ॥ ६ ॥ एष धर्मः परो ज्ञेयः शेषो भवति मानवः ॥ अपूजयित्वा भुंजानो विष्ठां भुङ्क्ते च वै मगः ॥ ७ ॥ देवं समाश्रितैः पूजा कर्तव्येयं त्रिभिः सदा ॥ मनसा पूजयेद्योगी पुष्पैश्चारण्यसंभवैः ॥ ८ ॥ देवार्थपुष्पहिंसायां न भवेत्तस्य हिंसकः ॥ यद्यल्पमपि चात्मार्थं निहन्याद्धिंसकस्तदा ॥ ९ ॥ मगश्चाग्निपरो नित्यं तद्भक्तोऽतिथिपूजकः ॥ मगी मैथुनवर्ज्यः स्याच्छ्रीमान्गृहमगाश्रमी ॥ १० ॥ देवाग्निस्वतिथौ भक्तं पचंते चात्मकारणात् ॥ आत्मार्थे यः पचेन्मोहात्स मगो नरकं व्रजेत् ॥ ११ ॥ देवार्थे पचनं येषां संतानार्थं तु मैथुनम् ॥ अर्थो दानार्थ उद्दिष्टो नरकं हि विपर्ययात्॥ ॥ १२ ॥ जीवतृतीयभागेपि न प्रकुर्वीत वार्चनम् ॥ वित्तार्जने तदर्धेन यतो नित्यं हि जीवितम् ॥ १३ ॥ न्यायोपार्जितवित्तः स्यादन्यायं परिवर्जयेत् ॥ अन्यायार्जितवित्तैस्तु कुर्वन्नरकमाप्नुयात् ॥ १४ ॥ वाचोर्थे ब्रह्मचारी यः सूर्यपूजाग्नितत्परः ॥ भवेज्जितेंद्रियः शांतो नैष्ठिको भौतिकोऽपि वा ॥ १५ ॥ सर्वगंधविनिर्मुक्तः कंदमूलफलाशनः ॥ मम वैखानसो ज्ञेयः सूर्यपूजाग्नितत्परः ॥ १६ ॥ निवृत्तः संगमेभ्यस्तु सूर्यध्यानरतः सदा ॥ ज्ञेयः सौरयतींद्राय पूजानिष्ठो जितेंद्रियः ॥ १७ ॥ मुंडोपनयनो व्यंगी शुक्लवासःसमन्वितः ॥ ज्ञेयं तदर्चनस्थानमेतत्कार्यं प्रयत्नतः ॥ १८ ॥ अथाव्यंगो महाराज धारयेद्यस्तु भोजकः ॥ अगम्यं सर्वसत्त्वानां सूर्यलोकं स गच्छति ॥ १९ ॥ ध्वंसनं सर्वदुष्टानां सर्वपापभयापहम् ॥ भावशुद्धेन सततमर्चनीयो दिवाकरः ॥ २० ॥ गंधलेपविहीनोऽपि भावशुद्धो न दुष्यति ॥ भावेषु च चरेच्छौचं वस्त्रपूतं जलं पिबेत् ॥ २१ ॥ दृष्टिपूतं न्यसेत्पादं सत्यपूतं वचो वदेत् ॥ सौरध्यानरताः शांताः सौरधर्मपरायणाः ॥ २२ ॥ सर्व एवाश्रमा ज्ञेया भस्करांगसमुद्भवाः ॥ भोजकाष्टव्रतं धार्यं रविणोक्तमनौपमम् ॥२३॥ सर्वव्रतानां परमं धर्मालयमनुत्तमम् ॥ सौरभक्ते सदा क्षांतिरहिंसा सर्वदा शमः ॥२४॥ संतोषः सत्यमस्तेयं ब्रह्मचर्यं तथाष्टमम् ॥ यथासंभवपूजाभिः कर्मणा मनसा गिरा ॥ २५ ॥ सौरभक्तिः सदा कार्या भोजकेषु विशेषतः ॥ स्वदेहान्निर्विशेषं हि भोजकान्पालयेद्बुधः ॥ २६ ॥ भयदारिद्र्यरोगेभ्यस्तेषां कुर्यात्प्रियाणि वै ॥ सूर्यस्य परिपूर्णस्य किं नाम क्रियते नरैः ॥ २७ ॥ यत्कृतं भोजकानां वै तत्कृतं स्याद्रवेर्नृप ॥ सुदूरमपि गंतव्यं मगानां यत्र वै गणः ॥ २८ ॥ स च प्रयत्नाद्द्रष्टव्यस्तत्र संनिहितो रविः ॥ भोजकस्य तु भक्तस्य सूर्यपूजारतस्य च ॥ २९ ॥ आज्ञां कृत्वा यथान्यायमश्वमेधफलं लभेत् ॥ देवाश्रमगतो भक्त्या देवार्चां पूजयेन्नृप ॥ ३० ॥ स्वागतासनपाद्यार्घ्यमधुपर्काद्यनुक्रमात् ॥ भोजयित्वा यथान्यायं सूर्यलोके महीयते ॥३१॥

प्रतिश्रयप्रदानेन राजा भवति भारत ॥ दत्त्वा स्थानं तथा शौचं वारुणं लोकमाप्नुयात् ॥ ३२ ॥ श्वेतबिंदुपरीतांगं ध्यानश्रमविकर्शितम् ॥ संवीज्य तालवृंत्तेन वायुलोके महीयते ॥ ३३ ॥ क्षुत्पिपासातुरं श्रांतं मलिनं रोगिणं तथा ॥ पालयित्वा यथाशक्त्या सर्वान्कामानवाप्नुयात् ॥ ३४ ॥ पतिताशस्तसंकीर्णचंडालादीनां पक्षिणाम् ॥ कारुण्यात्सर्वभूतानां देयमन्नं स्वशक्तितः ॥ ३५ ॥ अत्यल्पमपि कारुण्याद्दत्तं भवति चाक्षयम् ॥ तस्मात्सर्वेषु भूतेषु देव कारुण्यमुच्यते ॥३६॥ अभावे तृणभूम्यन्नं पत्रं धनफलानि च ॥ दत्त्वाऽऽगताय प्रणतः स्वर्गं याति प्रियेण वा ॥३७॥ न हीदृक्स्वर्गयानाय यथा लोके प्रियं वचः ॥ इहामुत्र सुखं तेषां वाग्येषां मधुरा भवेत् ॥३८॥ अमृतस्यंदिनीं वाचं चंदनस्पर्शशीतलाम् ॥ धर्माविरोधिनीमुक्त्वा सुखमक्षय्यमाप्नुयात् ॥ ३९ ॥ अलं दानेन राजेंद्र पूजयाध्यापनेन वा ॥ इदंस्वर्गस्य सोपानमचलं यत्प्रियं वचः ॥ ४० ॥ पूजाभिभाषणं दृष्टिः प्रत्येकं स्वर्गहेतवः ॥ संपृच्छेपागतं भक्त्या कुशलं प्रश्नमादरात् ॥ ४१ ॥ गमने तस्य वक्तव्यं पंथानः संतु ते शिवाः ॥ सुखं भवतु ते नित्यं सर्वकार्यकरं भृशम् ॥ ४२ ॥ आशीर्वादमिदं वाक्यं सर्वकालेषु सर्वदा ॥ नमस्कारादिवाक्येषु स्वस्ति मंगलवादने ॥ ४३ ॥ शिवं भवतु ते नित्यं तं ब्रूयात्सर्वकर्मसु ॥ एवमादि च वाचारमनुष्ठाय सदाश्रमी ॥ ४४ ॥ अशेषपापनिर्मुक्तः सूर्यलोके महीयते ॥ सूर्यभक्ते तु या भक्तिः सद्भक्तैः क्रियते नरैः ॥ सूर्ये भक्तिसमा नित्यं भक्ते भक्तिरनुष्ठिता ॥ ४५ ॥ आक्रुष्टे ताडिते वापि यो नाक्रोशेन्न ताडयेत् ॥ वाक्यादधिकृतः स्वस्थः स दुःखात्परिमुच्यते ॥ ४६ ॥ सर्वेषामेव तीर्थानां क्षांतिः परमपूजिता ॥ तस्मात्पूर्वं प्रयत्नेन क्षांतिः कार्या क्रियासु वै ॥ ४७ ॥ ज्ञानयोगतपो यस्य यज्ञदानानि सत्क्रिया ॥ क्रोधनस्य वृथा यस्मात्तस्मात्क्रोधं विवर्जयेत् ॥ ॥ ४८ ॥ मर्मास्थिप्राणहृदयं निर्दहेदप्रियं वचः ॥ न वचो ह्यप्रियं तस्माद्भोजकेषु विशेषतः ॥ ४९ ॥ क्षमा दानं त्विषः सत्यं क्षमाहिंसार्कसंभवाः ॥ न शक्या विस्तराद्वक्तुमपि वर्षशतैरपि ॥ ५० ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मे भोजकभोजनानुष्ठानवर्णनं नामैकसप्तत्युत्तरशततमोऽध्यायः ॥ १७१ ॥ ॥ छ॥ ॥ ॥ सुमंतुरुवाच ॥ ॥ पुनः शृणु महाराज धर्ममादित्यसंमतम् ॥ सौरप्रियं सदा सौरं पवित्रं पापनाशनम् ॥ १ ॥ क्वचिद्गच्छन्यदा पश्येत्सूर्यार्चासंप्रपूजनम् ॥ यत्र पूजा ततो गच्छन्त्स सूर्यो नात्र संशयः ॥२ ॥ स्नाननैवेद्यवस्त्रैश्च नानालंकारभूषणैः ॥ यथाविभवमाश्रित्य नमस्कारादिसंस्तवैः ॥ ३ ॥ दृष्ट्वायतनमाक्रम्य नमस्कृत्य रविं व्रजेत् ॥ क्वचित्पथि नदीं शैलं गच्छमानं च भोजकम् ॥ ४ ॥ उपश्रुत्यावनिं गत्वा भोजकं पूजयेद्बुधः ॥ रथाश्वगजयानेभ्यो ह्यवतीर्य मगान्नृप ॥ मगानां भोजनं

भक्त्या शक्त्या दानं प्रकल्पयेत् ॥ ५ ॥ दशपूर्वान्दश परानात्मना सह भारत ॥ समादाय व्रजेत्स्थानं रवेरमिततेजसः ॥ ६ ॥ दैवपर्वोत्सवे श्राद्धे
पुण्येषु दिवसेषु च ॥ भानुं संपूज्य विधिवद्भोजकान्भोजयेत्ततः ॥ ७ ॥ पितरः सर्वदेवानां सूर्यमाश्रित्य संस्थिताः ॥ प्रीते सूर्ये तु ते सर्वे प्रीताः
स्युर्नात्र संशयः ॥ ८ ॥ यदा च श्रद्धया युक्त प्रसक्त रविपूजनम् ॥ भोजयेद्भोजकं भक्त्या श्राद्धेषु विधिवन्नृप ॥ ९ ॥ भोजकस्य महाराज दिव
सेनापि यत्फलम् ॥ न तच्छक्यमिदं तेन प्राप्तुं वर्षशतैरपि ॥ १० ॥ यः पश्यति प्रसन्नात्मा यो न द्वेष्टि न कांक्षति ॥ शब्दादीनां तु संभोगं स
विज्ञेयो जितेंद्रियः ॥ ११ ॥ ज्ञानविज्ञानसम्पन्नः सूर्यभक्त्या समन्वितः ॥ पाषंडयोगमुक्तश्च स वै भोजक उच्यते ॥ १२ ॥ सूर्यधर्माद्भवेज्ज्ञानं
ज्ञानाद्वैराग्यसंभवः ॥ ज्ञानवैराग्ययुक्तस्य सूर्ययोगः प्रवर्तते ॥ १३ ॥ सूर्ययोगाच्च सर्वज्ञः परिपूर्णः सुनिर्वृतः ॥ आत्मन्यवस्थितः शुद्धः सूर्यवद्दि
वि मोदते ॥१४॥ सर्वेषामेव भूतानामुत्तमः पुरुषः स्मृतः ॥ पुरुषेभ्यो द्विजः श्रेष्ठो द्विजेभ्यो ग्रंथपारगः ॥ १५ ॥ ग्रन्थिभ्यो वेदविद्वांसस्तेभ्यस्त
त्त्वार्थचिंतकाः ॥ अर्थविद्भ्यश्च ज्ञानार्थप्रतिबुद्धो विशिष्यते ॥ १६ ॥ ज्ञानार्थकोटिकोटिभ्यो वरिष्ठा योगिनो मताः ॥ योगिनां कोटिकोटिभ्यो
भोजकश्चोत्तमो भवेत् ॥ १७ ॥ योगज्ञा योगनिष्ठाश्च पितरो योगसंभवाः ॥ भोजिते भोजके सर्वे प्रीताः स्युस्ते न संशयः ॥ १८ ॥ सर्वज्ञानत
पोदानैः कृतैर्दत्तैश्च यत्फलम् ॥ तत्फलं लभते सर्वं विधिवद्भोज्य भोजकम् ॥ १९ ॥ यश्च द्रव्यकलापात्मा दक्षिणा हविर्ऋत्विजः ॥ ऋग्यजुःसाम
योगैश्च देवयज्ञः प्रकीर्तितः ॥२०॥ ब्रह्मचर्यं तपो मौनं क्षांतिराहारलाघवम् ॥ इत्येतत्तपसां रूपं सुघोरं पंचलक्षणम् ॥२१॥ यच्च दिष्टं विशिष्टं च
न्यायप्राप्तं च यद्भवेत्॥तत्तद्गुणवते देयमित्येतद्दानलक्षणम्॥२२॥विवर्धनीं सहस्राणां सर्वसस्यप्ररोहिणीम्॥ दद्याद्भूमिं जलोपेतां भूमिदानं तदुच्यते
॥२३॥एकच्छत्रां महींकृत्वा द्विजेभ्यः प्रतिपादयेत् ॥ संपूर्णां पर्वतारण्यैर्भूमिदानं तदुच्यते॥२४॥ कन्यामलंकृतां दद्यादधनाय नराधिप॥ द्विजाय
वेदविदुषे कन्यादानं तदुच्यते ॥२५॥ सर्वदोषविनिर्मुक्तां कुलयोग्यामलंकृताम् ॥ मध्यमोत्तमवस्त्राणां यो दद्यादहतानि च ॥२६॥ एतत्समासतो
ज्ञेयं वस्त्रदानस्य लक्षणम्॥ब्रह्मविष्णुसमाधिक्यकांतिशीलपरायणः॥अहोरात्रं न भुञ्जीतह्युपवासस्य लक्षणम् ॥२७॥ चत्वारिंशत्समायुक्तं पिंडानां
हि शतद्वयम् ॥ मासे ह्यद्याद्यथाकाममिदं चांद्रायणं स्मृतम्॥२८॥ ऋषिभिः सर्वशास्त्रज्ञैस्तपोनिष्ठैर्जितेंद्रियैः ॥ देवैश्च सेवितं तोयं क्षितौ तत्तीर्थमु
च्यते ॥ २९ ॥ सूर्यावांतरस्थानानि पुण्यक्षेत्राणि निर्दिशेत् ॥ मृतानां तेषु सूर्यत्वं सौरक्षेत्रेषु देहिनाम् ॥ ३० ॥ दानान्यावसथं कुर्यादुद्यानं देव
तागृहम् ॥ तीर्थेष्वेतानि यः कुर्यात्सोऽक्षयं लभते फलम् ॥ ३१ ॥ क्षान्तिः स्पृहा तथा सत्यं दानं शीलं तपः श्रुतम् ॥ एतदष्टांगमुद्दिष्टं परं पात्र

स्य लक्षणम् ॥ ३२ ॥ यज्ञोपवासदानानि तपस्तीर्थफलानि च ॥ संपूर्णं लभते भक्त्या भोजयित्वा तु भोजकान् ॥ ३३ ॥
सूरे भक्तिः क्षमा सत्यं दशेंद्रियविनिग्रहः ॥ सुखितेषु च मैत्री च सूर्यधर्मस्य लक्षणम् ॥ ३४ ॥ सूर्यभक्तं द्विजं भक्त्या यः श्राद्धेषु
च भोजयेत् ॥ कुलसप्तकमुद्धृत्य सूर्यलोके महीयते ॥ ३५ ॥ बहुनात्र किमुक्तेन सूर्यभक्तं तु भोजयेत् ॥ सूर्यभक्तेन यद्भुक्तं
भानुनामाश्रयं नृप ॥ ३६ ॥ न वेदविदुषां कोट्या लभ्यते चेह तत्फलम् ॥ तत्फलं लभते राजन्भोजं भाज्य विधानतः ॥ ३७ ॥
तस्माच्छ्राद्धे विशेषेण पुण्येषु दिवसेषु च ॥ सूर्यमुद्दिश्य विप्रेंद्र भोज सभोजयेन्नृप ॥ ३८ ॥ असंयतः संयतो वा सर्वावस्थां गतो
पि वा ॥ यश्चासौ रविभक्तः स्यात्सूर्यवत्पूज्य एव हि ॥ ३९ ॥ संसर्गाद्वापि वा लोभाद्भोजकं यस्तु भोजयेत् ॥ सोऽपि यां गतिमाप्नोति न तां
यज्ञशतैरपि ॥ ४० ॥ तस्मान्मान्यश्च पूज्यश्च रक्षणीयश्च सर्वदा ॥ भोजकः कुरुशार्दूल सौरेण गतिमिच्छता ॥ ४१ ॥ नाममात्रप्रयत्नोऽपि
यदि स्याद्भोजको रवेः ॥ सूर्यवत्स हि द्रष्टव्यः पूजनीश्च भारत ॥ ४२ ॥ गृहे श्राद्धस्य यत्पुण्यमरण्ये तच्छताधिकम् ॥ सौराश्रमेषु विज्ञेयं
तत्पुण्यमयुताधिकम् ॥ ४३ ॥ दत्त्वा तु भोजके सौम्यं ह्यासनं सपरिच्छदम् ॥ धातुदंतमयं चापि राजा भवति भूतले ॥ ४४ ॥ विमले वाससी
दत्त्वा भोजकाय महीपते ॥ उद्धृत्य शतसाहस्रं सूर्यलोके महीयते ॥ ४५ ॥ दत्त्वा तु लोमशां राजन्भोजकाय शुभां बृहत् ॥ रोम्णिरोम्णि सुव
र्णस्य दत्तस्य फलमाप्नुयात् ॥ ४६ ॥ शंखं ददाति यो भक्त्या तथा दिव्ये च पादुके ॥ सूर्यलोकमवाप्नोति तेजसा रविसन्निभः ॥ ४७ ॥ लिखा
पयति यो भक्त्या पुराणेन तु पुस्तकम् ॥ युगकोटिशतं दिव्यं सूर्यलोके महीयते ॥ ४८ ॥ भवेदिहागतः श्रीमान्सुखाढ्यो वेदपारगः॥ यः करोति
गृहं भानोस्तत्स्थानं चोत्तमं भवेत् ॥ ४९ ॥ तत्सूर्यो भोजकः सोत्र भोजकः सूर्य एव हि ॥ तेन भोजकविप्रेषु दानमक्षय्यमित्यपि ॥ ५० ॥
यद्यद्यस्योपयुज्येत देयं तत्तस्य यत्नतः ॥ उपयोगपरो नित्यं सूर्यस्तदुभयोरपि ॥५१॥ व्याख्याने सौरधर्मस्य कृत्वा आमलकं महत् ॥ शोभितं
पुष्पपत्राद्यैर्न्यसेत्तत्रासने सुराः ॥ ५२ ॥ शोभितं माल्यगन्धैस्तु सूर्यस्य साधनं महत् ॥ पुरस्तात्तस्य संस्थाप्य आचार्यं पूजयेत्सदा ॥ सूर्यव
त्सौरधर्मे च तुल्यमेतद्द्वयं वचः ॥ ५३ ॥ य एवं न्यायतो वक्ति सौरधर्मं शृणोति च ॥ आयुर्विद्यां यशः कीर्तिमुपलभ्य रविं जपेत् ॥ वदंत्यन्ये
पिबन्त्यन्ये सर्वे ते फलभागिनः ॥ ५४ ॥ तस्मादेवंविधो धर्मो वाचकैश्च विदुर्बुधाः ॥ तस्यान्ते पूजयेद्भक्त्या य इच्छेद्विपुलं यशः ॥ ५५ ॥
इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मे द्विसप्तत्युत्तरशततमोऽध्यायः ॥ १७२ ॥ ॥ छ ॥ ॥ शतानीक उवाच ॥ ॥

पुनर्मे ब्रूहि विप्रेन्द्र सौरं धर्ममनुत्तमम् ॥ समासात्कथितं ब्रह्मन्विस्तरेण प्रकीर्तय ॥ १ ॥ ॥ सुमन्तुरुवाच ॥ ॥ साधुसाधु महाबाहो
साधु पृष्टोऽस्मि भारत ॥ त्वत्समो नास्ति लोकेऽस्मिन्सौरः पार्थिवसत्तम ॥ २ ॥ कीर्तयाम्यद्य तं पुण्यं संवादं पापनाशनम् ॥ गरुडारुणयो
राजन्पुरावृत्तं नराधिप ॥ ३ ॥ सुखासीनं पुरा राजन्नरुणं सूर्यसारथिम् ॥ उपगम्य महाबाहो गरुडो वाक्यमब्रवीत् ॥ ४ ॥ धर्माणामुत्तमं धर्मं
सर्वपापप्रणाशनम् ॥ सौरधर्मं खगश्रेष्ठ ब्रूहि मे कृत्स्नशोनघ ॥ ५ ॥ ॥ अरुण उवाच ॥ ॥ साधु वत्स महात्मासि धन्यस्त्वं पापवर्जितः ॥
श्रोतुकामोऽसि यत्पुत्र सौरधर्ममनुत्तमम् ॥ ६ ॥ शृणु त्वं कीर्तयाम्येष सुखोपायं महत्फलम् ॥ परमं सर्वधर्माणां सौरधर्ममनुत्तमम् ॥ ७ ॥
अज्ञानार्णवमग्नानां सर्वेषां प्राणिनामयम् ॥ सौरधर्मो ह्ययं श्रीमान्परतीरप्रदो यतः ॥ ८ ॥ ये स्मरंति रविं भक्त्या कीर्तयंति च ये खग ॥ पूज
यन्ति च ये नित्यं ते गताः परमं पदम् ॥ ९ ॥ आत्मद्रोहः कृतस्तेन जातेनेह खगाधिप ॥ नार्चितो येन देवेशः सहस्रकिरणो रविः ॥ १० ॥
सुचिरं संभ्रमत्यस्मिन्दुःखदे च भवार्णवे ॥ जराभूतमहाग्राहे तृष्णावेलाकुलापरे ॥ ११ ॥ मानुष्यं दुर्लभं प्राप्य येऽर्चयंति दिवाकरम् ॥ तेषां हि
सफलं जन्म कृतार्थास्ते नरोत्तमाः ॥ १२ ॥ सूर्यभक्तिपरा ये च ये च तद्गतमानसाः ॥ ये स्मरंति सदा सूर्यं न ते दुःखस्य भागिनः ॥ १३ ॥
विविधानि मनोज्ञानि विविधाभरणाः स्त्रियः ॥ धनं वा दृष्टपर्यंतं सूर्यपूजाविधेः फलम् ॥ १४ ॥ ये वांछन्ति महाभोगान्राज्यं वा त्रिदशा
लये ॥ सौभाग्यं कांतिमतुलां भोगं त्यागं यशः श्रियम् ॥ १५ ॥ सौन्दर्यं जगतः ख्यातिः कीर्तिर्धर्मादयः स्मृताः ॥ फलान्येतानि वै पुत्र सूर्य
भक्तिविधेर्बुध ॥ १६ ॥ तस्मात्संपूजयेत्सूर्यं सर्वदेवगणार्चितम् ॥ दुर्लभा भास्करे भक्तिर्दुर्लभं च तदर्चनम् ॥ १७ ॥ दानं च दुर्लभं तस्मै
तद्धोमश्च सुदुर्लभः ॥ दुर्लभं तस्य विज्ञानं तदभ्यासोऽपि दुर्लभः ॥ १८ ॥ सुदुर्लभतरं ज्ञेयं तदाराधनमुत्तमम् ॥ लोभस्तेषां मनुष्याणां ये रविं
शरणं गताः ॥ १९ ॥ येषामिहेश्वरे भानौ नित्यं सूर्ये गतं मनः ॥ नमस्कारादिसंयुक्तं रविरित्यक्षरद्वयम् ॥ २० ॥ जिह्वाग्रे वर्तते यस्य सफलं
तस्य जीवितम् ॥ य एवं पूजयेद्भानुं श्रद्धया परयान्वितः॥ मुच्यते सर्वपापेभ्यः स नरो नात्र संशयः ॥ २१ ॥ डाकिन्यो विविधाकारा राक्षसाः
सपिशाचकाः ॥ न तस्य पीडां कुर्वंति तथान्याश्च विभीषणाः ॥ २२ ॥ शत्रवो नाशमायांति संग्रामे जयमाप्नुयात् ॥ न रोगैः पीड्यते वीर
आपदो न स्पृशंति तम् ॥ २३ ॥ धनमायुर्यशो विद्या प्रभावोह्यतुलं तथा ॥ शुभेनोपचयं यांति नित्यं पूर्णमनोरथाः ॥ २४ ॥ ॥ इति
श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे गरुडारुणसंवादे सौरधर्मवर्णनं नाम त्रिसप्तत्युत्तरशततमोऽध्यायः ॥ १७३ ॥ ॥ छ ॥

॥ ॥ अरुण उवाच ॥ ॥ पूजयित्वा रविं भक्त्या ब्रह्मा ब्रह्मत्वमागतः ॥ विष्णुत्वं चापि देवेशो विष्णुराप तदर्चनात् ॥ १ ॥
शंकरोऽपि जगन्नाथः पूजयित्वा दिवाकरम् ॥ महादेवत्वमगमत्तत्प्रसादात्खगाधिप ॥ २ ॥ सहस्राक्षोपि देवेश इन्द्रो भानुं तमोपहम् ॥ इन्द्र
त्वमगमद्देवं पूजयित्वा दिवाकरम् ॥ ३ ॥ मातरो देवगंधर्वाः पिशाचोरगराक्षसाः ॥ पूजयंति सदा भानुमीशानं सुरनायकम् ॥ ४ ॥ सर्वमे
तज्जगन्नित्यं भानौ देवे प्रतिष्ठितम् ॥ तस्मात्संपूजयेद्भानुं य इच्छेत्स्वर्गमक्षयम् ॥ ५ ॥ यो न पूजयते सूर्यं भास्करं तमसूदनम् ॥ धर्मार्थ
काममोक्षाणां न नरो भाजनं भवेत् ॥ ६ ॥ तस्मात्कार्यं हि तद्ध्यानं यावज्जीवं प्रतिज्ञया ॥ अर्चयेत सदा भानुमापन्नोऽपि सदा खग ॥
॥ ७ ॥ यस्तु संतिष्ठते नित्यं विना सूर्यस्य पूजनात् ॥ वरं प्राणपरित्यागः शिरसो वाथ च्छेदनम् ॥ ८ ॥ सूर्यं संपूज्य भुञ्जीत त्रिदशेशं दिवाक
रम् ॥ इत्थं निर्वहते यस्य यावज्जीवं तदर्चनम् ॥ मनुष्यचर्मणा नद्धः स रविर्नात्र संशयः ॥ ९ ॥ न हि अर्कार्चनादन्यत्पुण्यमप्यधिकं भवेत् ॥
इति विज्ञाय यत्नेन पूजयस्व दिवाकरम् ॥ १० ॥ सूर्यभक्तागमाश्चैव सूर्यार्चनपरायणाः ॥ संयता धर्मसंपन्ना धर्मादीन्साधयन्ति ते ॥ ११ ॥
सर्वद्वन्द्वसहा वीरा नीतिविध्युक्तचेतसः ॥ परोपकारनिरता गुरुशुश्रूषणे रताः ॥ १२ ॥ अमानिनो बुद्धिमन्तोऽव्यक्तस्पर्धा गतस्पृहाः ॥ शांता
स्वांतगता भद्रा नित्यं स्वागतवादिनः ॥ १३ ॥ स्वल्पवाचः सुमनसः शूराः शास्त्रविशारदाः ॥ शौचाचारसुसंपन्ना दयादाक्षिण्यगोचराः ॥ १४ ॥
दंभमत्सरनिर्मुक्तास्तृष्णालोभविवर्जिताः ॥ संविभागपराः प्रोक्ता न शठाश्चाप्यकुत्सिताः ॥ १५ ॥ विषयेष्वपि निर्लेपाः पद्मपत्रमिवांभसा ॥ न
दीना मानिनश्चैव न च रोगवशानुगाः ॥ १६ ॥ भवंति भावितात्मानः सुस्निग्धाः साधुसेविताः ॥ न पाणिपादवाक्चक्षुःश्रोत्रशिश्नोदरे रताः
॥ १७ ॥ चपलानि न कुर्वंति सर्वव्यासंगवर्जिताः ॥ सूर्यासनरताः शांताः षडक्षरमनोगताः ॥ १८ ॥ इत्याचारसमायुक्ता भवंति भुवि मानवाः ॥
एकांतभक्तिमास्थाय धर्मकामार्थसिद्धये ॥ १९ ॥ पूजनीयो रविर्नित्यं गुणेष्वेतेषु वर्तते ॥ सर्वेषामेव पात्राणामतिपात्रं दिवाकरः ॥ पतन्तं त्रायते
यस्मादतीव नरकार्णवात् ॥ २० ॥ तस्य पात्रातिपात्रस्य माहात्म्यं दानमण्वपि ॥ अनेन फलमादिष्टमिहलोके परत्र च ॥ २१ ॥ द्रव्येणापि हि
यः कुर्यान्नरः कर्म तदालये ॥ सोऽपि देहक्षये ज्ञानं प्राप्य शांतिमवाप्नुयात् ॥२२॥ सर्वद्विजकदंबेषु कश्चिज्ज्ञानमवाप्नुयात् ॥ कश्चिदेतत्तु मे दिव्यं
लब्ध्वा ज्ञानं विमुञ्चति ॥ २३ ॥ तावद्भ्रमंति संसारे दुःखशोकपरिप्लुताः ॥ न भवंति रवेर्भक्ता यावत्सर्वेपि देहिनः ॥ २४ ॥ सूर्यस्यालेपनं
पुण्यं द्विगुणं चन्दनस्य तु ॥ चन्दनादगुरौ ज्ञेयं पुण्यमष्टगुणोत्तरम् ॥ २५ ॥ कृष्णागुरौ विशेषेण द्विगुणं फलमिष्यते ॥ तस्माच्छतगुणं पुण्यं

कुंकुमस्य विधीयते ॥ २६ ॥ सूर्ययज्ञोपकरणं कृत्वाल्पं यदि वा बहु ॥ भावाद्वित्तानुसारेण सूर्यलोके महीयते ॥ २७ ॥ यदपीष्टमनिष्टं च
न्यायेनोभयमागतम् ॥ तत्सूर्याय निवेद्यं सद्भक्त्यानन्तफलार्थिना ॥ २८ ॥ कर्मशाठ्येन यः कुर्याद्दुःखेनापि तदर्चनम् ॥ सोऽपि द्विजो दिवं
याति कर्मणा पापवर्जितः ॥ २९ ॥ सर्वमन्यत्परित्यज्य सूर्ये चैकमनाः सदा ॥ सूर्यपूजाविधिं कुर्याद्य इच्छेच्छ्रेय आत्मनः ॥ ३० ॥ त्वरितं
जीवितं याति त्वरितं यौवनं तथा ॥ त्वरितं व्याधिरप्येति तस्मान्नित्यं रविं व्रजेत् ॥ ३१ ॥ यावन्नाभ्येति मरणं यावन्नाक्रमते जरा ॥ यावन्नेंद्रिय
वैकल्यं तावदर्चेद्दिवाकरम् ॥ ३२ ॥ न सूर्यार्चनतुल्योऽपि न धर्मोन्यो जगत्त्रये ॥ इत्थं विज्ञाय देवेशं पूजयस्व दिवाकरम् ॥ ३३ ॥ ये भक्त्या
देवदेवेशं सूर्यं[1] शांतमजं प्रभुम् ॥ इह लोके सुखं प्राप्य ते गताः परमं पदम् ॥ ३४ ॥ गोपतिं पूजयित्वा तु प्रहृष्टेनांतरात्मना ॥ कृतांजलिपुटो
भूत्वा पुरा ब्रह्माब्रवीदिदम् ॥ ३५ ॥ ॥ ब्रह्मोवाच ॥ ॥ भगवन्तं भगकरं शांतचित्तमनुत्तमम् ॥ देवमार्गप्रणेतारं प्रणतोऽस्मि रविं सदा ॥
॥ ३६ ॥ शाश्वतं शोभनं शुद्धं चित्रभानुं दिवस्पतिम् ॥ देवदेवेशमीशेशं प्रणतोऽस्मि दिवाकरम् ॥ ३७ ॥ सर्वदुःखहरं देवं सर्वदुःखहरं रविम् ॥
वराननं वरांगं च वरस्थानं वरप्रदम् ॥ ३८ ॥ वरेण्यं वरदं नित्यं प्रणतोऽस्मि विभावसुम् ॥ अर्कमर्यमणं चेन्द्रं विष्णुमीशं दिवाकरम् ॥ ३९ ॥
देवेश्वरं देवरतं प्रणतोऽस्मि विभावसुम् ॥ य इदं शृणुयान्नित्यं ब्रह्मणोक्तं स्तवं परम् ॥ स हि कीर्तिं परां प्राप्य पुनः सूर्यपुरं व्रजेत् ॥ ४० ॥ इति
श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे गरुडारुणसंवादे सूर्यस्तुतिर्नाम चतुःसप्तत्युत्तरशततमोऽध्यायः ॥१७४॥ ॥छ॥ ॥ गरुड उवाच ॥ ॥
सर्वरोगहता ये तु आधिव्याधिसमन्विताः ॥ ग्रहोपघातैर्विविधैरर्दिता ये च मानवाः ॥ १ ॥ अरिभिः पीडिता ये च विनायकहताश्च ये ॥ कर्तव्यं
किं भवेत्तेषामात्मनः श्रेयसेऽनघ ॥ २ ॥ ॥ अरुण उवाच ॥ ॥ नानारोगहतानां तु अर्दितानां तथारिभिः ॥ आदित्याराधनं मुक्त्वा नान्यच्छ्रेय
स्करं परम् ॥ ३ ॥ तस्मादाराधयेन्नित्यं सर्वरोगविनाशनम् ॥ ग्रहोपघातहंतारं राजोपद्रवनाशनम् ॥ ४ ॥ ॥ गरुड उवाच ॥ ॥ सर्वपत्रवि
हीनं मे सर्वरोगविवर्जितम् ॥ शापेन ब्रह्मवादिन्याः पश्यांगं द्विजसत्तम ॥ ५ ॥ एवं मत्तस्य मे तात किं कार्यमवशिष्यते ॥ येनाहं कर्मणा कल्पो
भवेयं पत्रवान्पुनः ॥ ६ ॥ तन्मे ब्रूहि खगश्रेष्ठ प्रपन्नस्य खगाधिप ॥ यत्कृत्वा कल्पतां प्राप्य पूजयामि दिवाकरम् ॥७॥ ॥ अरुण उवाच ॥ ॥
पूजयस्व जगन्नाथं भास्करं तिमिरापहम् ॥ सूर्याग्निकार्यं सततं शुद्धचित्तः समाचर ॥ ८ ॥ महाशांतिकरं ख्यातं सर्वोपद्रवनाशनम् ॥ ग्रहोपघा

---

[1] अर्चयन्त इति शेषः ।

तहंतारं शुभकार्यकरं परम् ॥ ९ ॥ ॥ गरुड उवाच ॥ ॥ नाहं शक्तोस्मि वै कर्तुं पूजां दिनकरस्य च ॥ न चाग्निकार्यं शक्नोमि कर्तुं विकलतां गतः ॥१०॥ तस्मान्मे कुरु शांत्यर्थमग्निकार्यं खगाधिप ॥ महाशांतिरिति ख्यातं शांतये मम सुव्रत ॥ ११ ॥ ॥ अरुण उवाच ॥ ॥ एवमेव यदात्थ त्वं वैनतेय खगाधिप ॥ अकल्पस्त्वं न शक्नोषि महाव्याधिप्रपीडितः ॥ १२ ॥ अहं करोमि ते पुत्र शांतये पावकार्चनम् ॥ यत्कृतं मम चार्केण पुरा शांतिदमादरात् ॥१३॥ सर्वपापहरं पुण्यं महाविघ्नविनाशनम् ॥ महोदयं शांतिकरं लक्षहोमविधि[१] स्मृतम् ॥ १४ ॥ अपमृत्युहरं वीर सर्वव्याधिहरं परम् ॥ परचक्रप्रमथनं सदाविजयवर्धनम् ॥ १५ ॥ तृप्तिदं सर्वदेवानां भास्करप्रियमुत्तमम् ॥ आग्नेय्यां दिशि लिप्याथ स्थंडिलं गोमयेन तु ॥१६॥ देवालयस्य विधिवत्कुर्यादग्निप्रबोधनम् ॥ महाव्याहृतिभिर्वीर लक्षहोमं समाचरेत् ॥१७॥ भूर्भुवःस्वरिति स्वाहा प्रणवेन समन्वितम् ॥ आरक्तदेहरूपाय रक्ताक्षाय महात्मने॥१८॥ धराधराय शान्ताय सहस्राक्षिशिराय च॥१९॥अधोमुखाय श्वेताय स्वाहा पूर्वाहुतिं सृजेत् ॥ चतुर्मुखाय शांताय पद्मासनगताय च ॥२०॥ पद्मवर्णाय वेधाय कमण्डलुधराय च ॥ द्वितीयोर्ध्वमुखायेह स्वाहाकाराहुतिं सृजेत्॥२१॥ हेमवर्णाय देहाय ऐरावतगताय च ॥ सहस्राक्षशरीराय पूर्वदिश्युन्मुखाय च ॥ २२ ॥ देवाधिपाय चेन्द्राय विहस्ताय शुभाय च ॥ स्वाहाकारं चोत्सृजेदेव तृतीयवदनाय च ॥ २३ ॥ दीप्ताय व्यक्तदेहाय ज्वालामालाकुलाय च ॥ इन्द्रनीलाभदेहाय सर्वारोग्यकराय च॥ २४ ॥ यमाय धर्मराजाय दक्षिणाशामुखाय च ॥ कृष्णांबरधरायेह स्वाहाहुतिमनुत्सृजेत् ॥२५॥ नीलजीमूतवर्णाय रक्तांबरधराय च ॥ मुक्ताफलशरीराय पिंगाक्षाय महात्मने ॥ २६ ॥ शुक्लवस्त्राय पीताय दिव्यपाशधराय च ॥ स्वाहाकाराय च तथा पश्चिमाभिमुखाय च ॥ २७ ॥ कृष्णपिंगलनेत्राय वायव्याभिमुखाय च ॥ नीलध्वजाय वीराय तथा चेन्द्राय वेधसे ॥२८॥ स्वाहेति पवनायेह आहुतिं चोत्सृजेद्बुधः॥ गदाहस्ताय सूर्याय चित्रस्रग्भूषणाय च॥२९॥ महोदराय शांताय स्वाहाधिपतये तथा ॥ उत्तराभिमुखायेह महादेवप्रियाय च ॥ ३० ॥ श्वेताय श्वेतवर्णाय चित्राक्षाय महात्मने ॥ शांताय शांतरूपाय पिनाकवरधारिणे ॥ ३१ ॥ ईशानाभिमुखायेह दद्यादीशाय चाहुतिम् ॥ विसृजेत्खगशार्दूल विधिवच्छ्रेयसेनघ ॥ ३२ ॥ एवं देवं महात्मानं पावकं विधिवत्खग ॥ अर्हेदिति तु यत्कार्यं तत्सौरं खगसत्तम ॥ ३३ ॥ लक्षहोमं च विधिवत्कृत्वा शांतिकमाचरेत् ॥ भूर्भुःस्वरिति स्वाहा लक्षहोमविधिः स्मृतः ॥ ३४ ॥ महाहोमे च वै सौर एष एव विधिः परः ॥ कृत्वैवमग्निकार्यं तु भोजको भास्कराय वै ॥ ३५ ॥ शांत्यर्थं सर्व

---

[१] लक्षसंख्यापरिच्छिन्नो होमविधिर्यत्र तत्पावकार्चनमहं करोमीति त्रयोदशचतुर्दशपञ्चदशषोडशश्लोकानामेकत्रान्वयः ।

लोकानां ततः शांतिकमाचरेत् ॥ सिन्दूरासनरक्ताभः रक्तपद्माभलोचनः ॥ ३६ ॥ सहस्रकिरणो देवः सप्ताश्वरथवाहनः ॥ गभस्तिमाली भगवा
न्सर्वदेवनमस्कृतः ॥ ३७ ॥ करोतु ते महाशांतिं ग्रहपीडानिवारिणीम् ॥ त्रिचक्ररथमारूढ अपां सारमयं तु यः ॥३८॥ दशाश्ववाहनो देव आत्रेय
श्चामृतस्रवः ॥ शीतांशुरमृतात्मा च क्षयवृद्धिसमन्वितः ॥ सोमः सौम्येन भावेन ग्रहपीडां व्यपोहतु ॥ ३९ ॥ पद्मरागनिभो भौमो मधुपिंगल
लोचनः ॥ अंगारकोऽग्निसदृशो ग्रहपीडां व्यपोहतु ॥ ४० ॥ पुष्परागनिभेनेह देहेन परिपिंगलः ॥ पीतमाल्यांबरधरो बुधः पीडां व्यपोहतु ॥
॥ ४१ ॥ तप्तगैरिकसंकाशः सर्वशास्त्रविशारदः ॥ सर्वदेवगुरुर्विप्रो ह्यथर्वणवरो मुनिः ॥ ४२ ॥ बृहस्पतिरिति ख्यात अर्थशास्त्रपरश्च यः ॥ शांतेन
चेतसा सोपि परेण सुसमाहितः ॥ ४३ ॥ ग्रहपीडां विनिर्जित्य करोतु तव शांतिकम् ॥ सूर्यार्चनपरो नित्यं प्रसादाद्भास्करस्य तु ॥ ४४ ॥ हिम
कुंदेंदुवर्णाभो दैत्यदानवपूजितः ॥ महेश्वरस्ततो धीमान्महासौरो महामतिः ॥ ४५ ॥ सूर्यार्चनपरो नित्यं शुक्रः शुक्लनिभस्तदा ॥ नीतिशास्त्रपरो
नित्यं ग्रहपीडां व्यपोहतु ॥ ४६ ॥ नानारूपधरोऽव्यक्त अविज्ञातगतिश्च यः ॥ नोत्पत्तिर्जायते यस्य नोदयपीडितैरपि ॥ ४७ ॥ एकचूलो
द्विचूलश्च त्रिशिखः पंचचूलकः ॥ सहस्रशिररूपस्तु चन्द्रकेतुरिव स्थितः ॥४८॥ सूर्यपुत्रोऽग्निपुत्रस्तु ब्रह्मविष्णुशिवात्मकः ॥ अनेकशिखरः केतुः
स ते पीडां व्यपोहतु ॥ ४९ ॥ एते ग्रहा महात्मानः सूर्यार्चनपराः सदा ॥ शांतिं कुर्वंतु ते हृष्टाः सदा कालं हितेक्षणाः ॥ ५० ॥ इति श्रीभविष्ये
महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मेषु सूर्याग्निकर्मणि पंचसप्तत्युत्तरशततमोऽध्यायः ॥ १७५ ॥ छ ॥ ॥ समंतुरुवाच ॥ ॥ पद्मासनः
पद्मवर्णः पद्मपत्रनिभेक्षणः ॥ कमण्डलुधरः श्रीमान्देवगंधर्वपूजितः ॥ १ ॥ चतुर्मुखो देवपतिः सूर्यार्चनपरः सदा ॥ सुरज्येष्ठो महातेजाः सर्व
लोकप्रजापतिः ॥ ब्रह्मशब्देन दिव्येन ब्रह्मा शांतिं करोतु ते ॥ २ ॥ पीतांबरधरो देव आत्रेयीदयितः सदा ॥ शंखचक्रगदापाणिः
श्यामवर्णश्चतुर्भुजः ॥ ३ ॥ यज्ञदेहः क्रमो देव आत्रेयीदयितः सदा ॥ शंखचक्रगदापाणिर्माधवो मधुसूदनः ॥ ४ ॥ सूर्यभक्तान्वितो
नित्यं विगतिर्विगतत्रयः ॥ सूर्यध्यानपरो नित्यं विष्णुः शांतिं करोतु ते ॥ ५ ॥ शशिकुंदेंदुसंकाशो विश्रुताभरणैरिह ॥ चतुर्भुजो महा
तेजाः पुष्पार्धकृतशेखरः ॥ ६ ॥ चतुर्मुखो भस्मधरः स्मशाननिलयः सदा ॥ गोत्रारिर्विश्वनिलयस्तथा च क्रतुदूषणः ॥ ७ ॥ वरो वरेण्यो
वरदो देवदेवो महेश्वरः ॥ आदित्यदेहसंभूतः स ते शांति करोतु वै ॥ ८ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मेषु
षट्सप्तत्युत्तरशततमोऽध्यायः ॥ १७६ ॥ छ ॥ ॥ अरुण उवाच ॥ ॥ पद्मरागप्रभा देवी चतुर्वदनपंकजा ॥ अक्षमालार्पितकरा कमंड

लुधरा शुभा ॥ १ ॥ ब्रह्माणी सौम्यवदना आदित्याराधने रता ॥ शांतिं करोतु सुप्रीता आशीर्वादपरा खग ॥ २ ॥ महाश्वेतेति विख्याता आदि
त्यदयिता सदा ॥ हिमकुंदेंदुसदृशा महावृषभवाहिनी ॥ ३ ॥ त्रिशूलहस्तावरणा विश्रुताभरणा सती ॥ चतुर्भुजा चतुर्वक्त्रा त्रिनेत्रा पापनाशिनी॥
वृषध्वजार्चनरता रुद्राणी शांतिदा भवेत् ॥ ४ ॥ मयूरवाहना देवी सिंदूरारुणविग्रहा ॥ शक्तिहस्ता महाकाया सर्वालंकारभूषिता ॥५॥ सूर्यभक्ता
महावीर्या सूर्यार्चनरता सदा ॥ कौमारी वरदा देवी शांतिमाशु करोतु ते ॥ ६ ॥ गदाचक्रधरा श्यामा पीतांबरधरा खग ॥ चतुर्भुजा हि सा देवी
वैष्णवी सुरपूजिता ॥७॥ सूर्यार्चनपरा नित्यं सूर्यैकगतमानसा ॥ शांतिं करोतु ते नित्यं सर्वासुरविमर्दिनी ॥८॥ ऐरावतगजारूढा वज्रहस्ता महा
बला ॥ सर्वत्रलोचना देवी वर्णतः कर्बुरारुणा ॥ ९ ॥ सिद्धगंधर्वनमिता सर्वालंकारभूषिता ॥ इंद्राणी ते सदा देवी शांतिमाशु करोतु वै ॥ १० ॥
वराहघोणा विकटा वराहवरवाहिनी ॥ श्यामावदाता या देवी शंखचक्रगदाधरा ॥ ११ ॥ तेजयंतीति निमिषान्पूजयंती सदा रविम् ॥ वाराही
वरदा देवी तव शांतिं करोतु वै ॥ १२ ॥ अर्धकोशा कटीक्षामा निर्मांसा स्नायुबंधनात् ॥ करालवना घोरा खड्गघंटोद्धता सती ॥ १३ ॥ कपाल
मालिनी क्रूरा खट्वांगवरधारिणी ॥ आरक्ता पिंगनयना गजचर्मावगुंठिता ॥ १४ ॥ गोश्रुताभरणा देवी प्रेतस्थाननिवासिनी ॥ शिवारूपेण घोरेण
शिवरूपभयंकरी ॥ चामुंडा चंडरूपेण सदा शांतिं करोतु ते ॥ १५ ॥ चंडमुंडकरा देवी मुंडदेहगता सती ॥ कपालमालिनी क्रूरा खट्वांगवरधा
रिणी ॥ १६ ॥ आकाशमातरो देव्यस्तथान्या लोकमातरः ॥ भूतानां मातरः सर्वास्तथान्याः पितृमातरः ॥ १७ ॥ वृद्धिश्राद्धेषु पूज्यंते यास्तु
देव्यो मनीषिभिः ॥ मात्रे प्रमात्रे तन्मात्रे इति मातृमुखास्तथा ॥ १८ ॥ पितामही तु तन्माता वृद्धा या च पितामही ॥ इत्येतास्तु पितामह्यः
शांतिं ते पितृमातरः ॥ १९ ॥ सर्वा मातृमहादेव्यः स्वायुधाव्यग्रपाणयः ॥ जगद्व्याप्य प्रतिष्ठंत्यो बलिकामा महोदयाः ॥ २० ॥ शांतिं कुर्वंतु
ता नित्यमादित्याराधने रताः ॥ शांतेन चेतसा शांत्यः शांतये तव शांतिदा ॥ २१ ॥ सर्वावयवमुख्येन गात्रेण च सुमध्यमा ॥ पीतश्यामाति
सौम्येन स्निग्धवर्णेन शोभना ॥ २२ ॥ ललाटतिलकोपेताचंद्ररेखार्धधारिणी ॥ चित्रांबरधरा देवी सर्वाभरणभूषिता ॥ २३ ॥ वरा स्त्रीमयरूपाणां
शोभा गुणसुसम्पदा ॥ भावनामात्रसंतुष्टा उमा देवी वरप्रदा ॥२४॥ साक्षादागत्य रूपेण शांतेनामिततेजसा ॥ शांतिं करोतु ते प्रीता आदित्या
राधने रता ॥ २५ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मेषु दशमुखे अग्निकार्यविधौ सप्तसप्तत्युत्तरशततमोध्यायः ॥
॥ १७७ ॥ ॥ अरुण उवाच ॥ ॥ अबलो बालरूपेण खड्वांगशिखिवाहनः ॥ पूर्वेण वदनः श्रीमांस्त्रिशिखः शक्तिसंयुतः ॥ १ ॥ कृत्तिकायाश्च

रुद्रस्य चांगोद्भूतः सुरार्चितः ॥ कार्तिकेयो महातेजा आदित्यवरदर्पितः ॥ शांतिं करोतु ते नित्यं बलं सौख्यं च तेजसा ॥ २ ॥ आत्रेयीबल
वान्देव आरोग्यं च खगाधिप ॥ श्वेतवस्त्रपरीधानस्त्र्यक्षः कनकसुप्रभः ॥ ३ ॥ शूलहस्तो महाप्राज्ञो नंदीशो रविभावितः ॥ शांतिंकरो तु ते शान्तो
धर्मे च मतिमुत्तमाम् ॥ ४ ॥ धर्मेतरावुभौ नित्यमचलः संप्रयच्छतु ॥ महोदरो महाकायः स्निग्धांजनसमप्रभः ॥ ५ ॥ एकदंष्ट्रोत्कटो देवो गज
वक्रो महाबलः ॥ नागयज्ञोपवीतेन नानाभरणभूषितः ॥६॥ सर्वार्थसंपदोद्धारो गणाध्यक्षो वरप्रदः ॥ भीमस्य तनयो देवो नायकोथ विनायकः ॥
करोतु ते महाशांतिं भास्करार्चनतत्परः ॥ ७ ॥ इंद्रनीलनिभस्त्र्यक्षो दीप्तशूलायुधोद्यतः ॥ रक्तांबरधरः श्रीमान्कृष्णांगो नागभूषणः ॥ ८ ॥ पापा
पनोदमतुलमलक्ष्यो मलनाशनः ॥ करोतु ते महाशांतिं प्रीतः प्रीतेन चेतसा ॥ ९ ॥ वरांबरधरा कन्या नानालंकारभूषिता ॥ त्रिदशानां च
जननी पुण्या लोकनमस्कृता ॥ १० ॥ सर्वसिद्धिकरा देवी प्रसादपरमास्पदा ॥ शांतिं करोतु ते माता भुवनस्य खगाधिप ॥ ११ ॥ स्निग्धश्या
मेन वर्णेन महामहिषमर्दनी ॥ धनुश्चक्रप्रहरणा खड्गपट्टिशधारिणी ॥ १२ ॥ आतर्जन्यायतकरा सर्वोपद्रवनाशिनी ॥ शांतिं करोतु ते दुर्गा भवानी
च शिवा तथा ॥ १३ ॥ अतिसूक्ष्मो ह्यतिक्रोधस्त्र्यक्षो भृंगिरिटिर्महान् ॥ सूर्यात्मको महावीरः सूर्यैकगतमानसः ॥ सूर्यभक्तिकरो नित्यं शिवं
ते संप्रयच्छतु ॥ १४ ॥ प्रचंडगणसैन्येशो महाघंटाक्षधारकः ॥ अक्षमालार्पितकरश्चाक्षचंडेश्वरो वरः ॥ १५ ॥ चंडपापहरो नित्यं ब्रह्महत्या
विनाशनः ॥ शांतिं करोतु ते नित्यमादित्याराधने रतः ॥ करोति च महायोगी कल्याणानां परंपराम् ॥ १६ ॥ आकाशमातरो दिव्यास्तथान्या
देवमातरः ॥ सूर्यायणपरा देव्यो जगद्व्याप्य व्यवस्थिताः ॥ शांतिं कुर्वंतु मे नित्यं मातरः सुरपूजिताः ॥ १७ ॥ ये रुद्रा रौद्रकर्माणो रौद्र
स्थाननिवासिनः ॥ मातरो रुद्ररूपाश्च गणानामधिपाश्च ये ॥ १८ ॥ विघ्नभूतास्तथा चान्ये दिग्विदिक्षु समाश्रिताः ॥ सर्वे ते प्रीतमनसः
प्रतिगृह्णंतु मे बलिम् ॥ सिद्धिं कुर्वंतु ते नित्यं भयेभ्यः पांतु सर्वतः ॥ १९ ॥ ऐंद्रादयो गणा ये तु वज्रहस्ता महाबलाः ॥ हिमकुन्देंदुसदृशा
नीलकृष्णांगलोहिताः ॥ २० ॥ दिव्यांतरिक्षा भौमाश्च पातालतलवासिनः ॥ ऐंद्राः शांतिं प्रकुर्वंतु भद्राणि च पुनः पुनः ॥ २१ ॥ आग्नेय्यां
ये भूताः सर्वे ध्रुवहत्यानुषंगिणः ॥ सूर्यानुरक्ता रक्ताभा जपासुमनिभास्तथा ॥ २२ ॥ विरक्तलोहिता दिव्या आग्नेय्यां भास्करादयः ॥ आदि
त्याराधनपरा आदित्यगतमानसाः ॥ २३ ॥ शांतिं कुर्वंतु ते नित्यं प्रयच्छंतु बलिं मम ॥ भया[1]ऽऽदित्यसमा ये तु सततं दण्डपाणयः ॥

---

[1] प्रभयेत्यर्थः ।

आदित्याराधनपराः कं प्रयच्छंतु ते सदा ॥ २४ ॥ ऐशान्यां संस्थिता ये तु प्रशांताः शूलपाणयः ॥ भस्मोद्धूलितदेहाश्च नीलकण्ठा विलोहिताः ॥ २५ ॥ दिव्यांतरिक्षा भौमाश्च पातालतलवासिनः ॥ सूर्यपूजाकरा नित्यं पूजयित्वांशुमालिनम् ॥ २६ ॥ ततः सुप्रीतमनसो लोकपालैः समन्विताः ॥ शांतिं कुर्वंतु मे नित्यं कं प्रयच्छंतु पूजिताः ॥२७॥ अमरावती पुरी नाम पूर्वभागे व्यवस्थिता ॥ विद्याधरगणाकीर्णा सिद्धगन्धर्वसेविता ॥२८॥ रत्नप्राकाररुचिरा महारत्नोपशोभिता ॥ तत्र देवपतिः श्रीमान्वज्रपाणिर्महाबलः ॥ गोपतिर्गोसहस्रेण शोभमानेन शोभते ॥२९॥ ऐरावतगजारूढो गैरिकाभो महाद्युतिः॥देवेंद्रः सततं हृष्ट आदित्याराधने रतः ॥ ३० ॥ सूर्यज्ञानैकपरमः सूर्यभक्तिसमन्वितः ॥ सूर्यप्रणामः परमां शांतिं तेऽद्य प्रयच्छतु ॥ ३१ ॥ आग्नेयदिग्विभागे तु पुरी तेजस्वती शुभा ॥ नानादेवगणाकीर्णा नानारत्नोपशोभिता ॥ ३२ ॥ तत्र ज्वालासमाकीर्णो दीप्तांगारसमद्युतिः ॥ पुरगो दहनो देवो ज्वलनः पापनाशनः ॥ ३३ ॥ आदित्याराधनरत आदित्यगतमानसः ॥ शांतिं करोतु ते देवस्तथा पापपरिक्षयम् ॥ ३४ ॥ वैवस्वती पुरी रम्या दक्षिणेन महात्मनः ॥ सुरासुरशताकीर्णा नानारत्नोपशोभिता ॥३५॥ तत्र कुन्देंदुसंकाशो हरिपिंगललोचनः ॥ महामहिषमारूढः कृष्णस्रग्वस्त्रभूषणः ॥ ३६ ॥ अन्तकोऽथ महातेजाः सूर्यधर्मपरायणः ॥ आदित्याराधनपरः क्षेमारोग्ये ददातु ते ॥ ३७ ॥ नैर्ऋते दिग्विभागे तु पुरी कृष्णेति विश्रुता ॥ मोहरक्षोगणाशौचपिशाचप्रेतसंकुला ॥ ३८ ॥ तत्र कुन्दनिभो देवो रक्तस्रग्वस्त्रभूषणः ॥ खड्गपाणिर्महातेजाः करालवदनोज्ज्वलः ॥ ३९ ॥ रक्षेंद्रो वसते नित्यमादित्याराधने रतः ॥ करोतु मे सदा शांतिं धनं धान्यं प्रयच्छतु ॥ ४० ॥ पश्चिमे तु दिशो भागे पुरी शुद्धवती सदा ॥ नानाभोगिसमाकीर्णा नानाकिन्नरसेविता ॥ ४१ ॥ तत्र कुन्देंदुसंकाशो हरिपिंगललोचनः ॥ शांतिं करोतु मे प्रीतः शांतः शांतेन चेतसा ॥ ४२ ॥ यशोवती पुरी रम्या ऐशानीं दिशमाश्रिता ॥ नानागणसमाकीर्णा नानाकृतशुभालया ॥ तेजःप्राकारपर्यंता अनौपम्या सदोज्ज्वला ॥ ४३ ॥ तत्र कुंदेंदुसंकाशश्चांबुजाक्षो विभूषितः ॥ त्रिनेत्रः शांतरूपात्मा अक्षमालाधराधरः ॥ ईशानः परमो देवः सदा शांतिं प्रयच्छतु ॥ ४४ ॥ भूलोके तु भुवर्लोके निवसंति च ये सदा ॥ देवादेवाः शुभायुक्ताः शांतिं कुर्वंतु ते सदा ॥ ४५ ॥ महर्लोके जनोलोके परलोके गताश्च ये ॥ ते सर्वे मुदिता देवाः शांतिं कुर्वंतु ते सदा ॥ ४६ ॥ सरस्वती सूर्यभक्ता शांतिदा विदधातु मे ॥ चारुचामीकरस्था[1] या सरोजकरपल्लवा ॥ सूर्यभक्त्याश्रिता देवी विभूतिं ते प्रयच्छतु ॥ ४७ ॥ हरेण सुविचित्रेण भास्वत्कनक

---

[1] वरसुवर्णासनस्थेत्यर्थः ।

मेखला ॥ अपराजिता सूर्यभक्ता करोतु विजयं तव ॥ ४८ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मवर्णनं नामाष्टसप्तत्युत्तरशततमोऽध्यायः ॥ १७८ ॥ ॥ छ ॥ ॥ अरुण उवाच ॥ ॥ कृत्तिका परमा देवी रोहिणी च वरानना ॥ श्रीमन्मृगशिरो भद्रा आर्द्रा चाप्यपरोज्ज्वला ॥ १ ॥ पुनर्वसुस्तथा पुष्य आश्लेषा च तथाधिप ॥ सूर्यार्चनरता नित्यं सूर्यभावानुभाविताः ॥ २ ॥ अर्चयंति सदा देवमादित्यं सुरते सदा ॥ नक्षत्रमातरो ह्येताः प्रभामालाविभूषिताः ॥ ३ ॥ मघा सर्वगुणोपेता पूर्वा चैव तु फाल्गुनी ॥ स्वाती विशाखा वरदा दक्षिणां दिशमाश्रिताः ॥ ४ ॥ अर्चयंति सदा देवमादित्यं सुरपूजितम् ॥ तवापि शांतिकं द्योतं कुर्वंतु गगनोदिताः ॥ ५ ॥ अनुराधा तथा ज्येष्ठा मूलं सूर्यपुरःसरा ॥ पूर्वाषाढा महावीर्या आषाढा चोत्तरा तथा ॥ ६ ॥ अभिजिन्नाम नक्षत्रं श्रवणं च बहुश्रुतम् ॥ एताः पश्चिमतो दीप्ता राजंते चानुमूर्तयः ॥ ७ ॥ भास्करं पूजयंत्येताः सर्वकालं सुभाविताः ॥ शांतिं कुर्वंतु ते नित्यं विभूतिं च महर्द्धिकाम् ॥८॥ धनिष्ठा शतभिषा तु पूर्वभाद्रपदा तथा ॥ ९ ॥ उत्तरा भाद्ररेवत्यौ चाश्विनी च महामते ॥ भरणी च महादेवी नित्यमुत्तरतः स्थिताः ॥ १० ॥ सूर्यार्चनरता नित्यमादित्यगतमानसाः ॥ शांतिं कुर्वंतु ते नित्यं विभूतिं च महर्द्धिकाम् ॥ ११ ॥ मेषो मृगाधिपः सिंहो धनुर्दीप्तिमतां वरः ॥ पूर्वेण भासयंत्येते सूर्ययोगपराः शुभाः ॥ शांतिं कुर्वंतु ते नित्यं भक्त्या सूर्यपदांबुजे ॥ १२ ॥ वृषः कन्या च परमा मकरश्चापि बुद्धिमान् ॥ एते दक्षिणभागे तु पूजयंति रविं सदा ॥ भक्त्या परमया नित्यं शांतिं कुवतु ते सदा ॥१३॥ मिथुनं च तुला कुंभः पश्चिमे च व्यवस्थिताः ॥ जपंत्येते सदाकालमादित्यं ग्रहनायकम् ॥ १४ ॥ शांतिं कुर्वंतु ते नित्यं खखोल्काज्ञानतत्पराः ॥ सतपोदत्तपुष्पाभ्यां ये स्मृता सततं बुधैः ॥ १५ ॥ ऋषयः सप्त विख्याता ध्रुवांताः परमोज्ज्वलाः ॥ भानुप्रसादात्संपन्नाः शांतिं कुर्वंतु ते सदा ॥ १६ ॥ कश्यपो गालवो गार्ग्यो विश्वामित्रो महामुनिः ॥ मुनिर्दक्षो वशिष्ठश्च मार्कण्डः पुलहः क्रतुः ॥ १७ ॥ नारदो भृगुरात्रेयो भारद्वाजश्च वै मुनिः ॥ वाल्मीकिः कौशिको वात्स्यः शाकल्योऽथ पुनर्वसुः ॥ १८ ॥ शालंकायन इत्येते ऋषयोऽथ महातपाः ॥ सूर्यध्यानैकपरमाः शातिं कुर्वंतु ते सदा ॥ १९ ॥ मुनिकन्या महाभागा ऋषिकन्याः कुमारिकाः ॥ सूर्यार्चनरता नित्यं शांतिं कुर्वंतु ते सदा ॥ २० ॥ सिद्धाः समृद्धतपसो ये चान्ये वै महातपाः ॥ विद्याधरा महात्मानो गरुडश्च त्वया सह ॥ २१ ॥ आदित्यपरमा ह्येते आदित्याराधने रताः ॥ सिद्धिं ते संप्रयच्छंतु आशीर्वादपरायणाः ॥ २२ ॥ नमुचिर्दैत्यराजेंद्रः शंकुकर्णो महाबलः ॥ महानाथोऽथ विख्यातो दैत्यः परमवीर्यवान् ॥ २३ ॥ ग्रहाधिपस्य देवस्य नित्यं पूजापरायणाः ॥ बलं वीर्यं च ते ऋद्धिमारोग्यं च ब्रुवंतु ते ॥२४॥

महाढ्यो यो हयग्रीवः प्रह्लादः प्रभयान्वितः ॥ तानैकाग्निमुखो दैत्यः कालनेमिर्महाबलः ॥ २५ ॥ एते दैत्या महात्मानः सूर्यभावेन भाविताः ॥
तुष्टिं बलं तथाऽऽरोग्यं प्रयच्छंतु सुरारयः ॥ २६ ॥ वैरोचनो हिरण्याक्षस्तुर्वसुश्च सुलोचनः ॥ मुचकुंदो मुकुंदश्च दैत्यो रैवतकस्तथा ॥२७॥ भावेन
परमेणेमं यजंते सततं रविम् ॥ सततं च शुभात्मानः पुष्टिं कुर्वंतु ते सदा ॥ २८ ॥ दैत्यपत्न्यो महाभागा दैत्यानां कन्यकाः शुभाः ॥ कुमारा ये
च दैत्यानां शांतिं कुर्वंतु ते सदा ॥ २९ ॥ आरक्तेन शरीरेण रक्तांतायतलोचनाः ॥ महाभागाः कृताटोपाः शंखाद्याः कृतलक्षणाः ॥ ३० ॥
अनंतो नागराजेंद्र आदित्याराधने रतः ॥ महापापविषं हत्वा शांतिमाशु करोतु ते ॥ ३१ ॥ अतिपीतेन देहेन विस्फुरद्भोगसंपदा ॥ तेजसा
चातिदीप्तेन कृतस्वस्तिकलांछनः ॥ ३२ ॥ नागराट् तक्षकः श्रीमान्नामकोट्या समन्वितः ॥ करोतु ते महाशांतिं सर्वदोषविषापहाम् ॥ ३३ ॥
अतिकृष्णेन वर्णेन स्फुटाधिकटमस्तकः ॥ कंठरेखात्रयोपेतो घोरदंष्ट्रायुधोद्यतः ॥ ३४ ॥ कर्कोटको महानागो विषदर्पबलान्वितः ॥ विषशस्त्रा
ग्निसंतापं हत्वा शांतिं करोतु ते ॥ ३५ ॥ पद्मवर्णः पद्मकान्तिः फुल्लपद्मायतेक्षणः ॥ ख्यातः पद्मो महानागो नित्यं भास्करपूजकः ॥ ३६ ॥
स ते शांति शुभं शीघ्रमचलं संप्रयच्छतु ॥ श्यामेन देहभारेण श्रीमत्कमललोचनः ॥ ३७ ॥ विषदर्पबलोन्मत्तो ग्रीवायां रेखयान्वितः ॥ शंख
पालश्रिया दीप्तः सूर्यपादाब्जपूजकः ॥ ३८ ॥ महाविषं गरश्रेष्ठं हत्वा शांतिं करोतु ते ॥ अतिगौरेण देहेन चंद्रार्धकृतशेखरः ॥ ३९ ॥ दीपभागे
कृताटोपशुभलक्षणलक्षितः ॥ कुलिको नाम नागेन्द्रो नित्यं सूर्यपरायणः ॥ अपहृत्य विषं घोरं करोतु तव शांतिकम् ॥ ४० ॥ अंतरिक्षे च ये
नागा ये नागाः स्वर्गसंस्थिताः ॥ गिरिकंदरदुर्गेषु ये नागा भुवि संस्थिताः ॥ ४१ ॥ पाताले ये स्थिता नागाः सर्वे यत्र समाहिताः ॥ सूर्यपादा
र्चनासक्ताः शांतिं कुर्वंतु ते सदा ॥४२॥ नागिन्यो नागकन्याश्च तथा नागकुमारकाः ॥ सूर्यभक्ताः सुमनसः शांतिं कुर्वंतु ते सदा ॥४३॥ य इदं
नामसंस्थानं कीर्तयेच्छृणुयात्तथा ॥ न तं सर्पा विहिंसंति न विषं क्रमते सदा ॥ ४४ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौर
धर्मवर्णनं नामैकोनाशीत्युत्तरशततमोऽध्यायः ॥१७९॥ ॥ गंगा पुण्या महादेवी यमुना नर्मदा नदी ॥ गौतमी चापि कावेरी वरुणा देविका तथा ॥
॥१॥ सर्वग्रहपतिं देवं लोकेशं लोकनायकम् ॥ पूजयंति सदा नद्यः सूर्यसद्भावभाविताः ॥ शांतिं कुर्वंतु ते नित्यं सूर्यध्यानैकमानसाः ॥२॥ निरंजना
नाम नदी शोणश्चापि महानदः ॥ मंदाकिनी च परमा तथा सन्निहिता शुभा ॥३॥ एताश्चान्याश्च बहवो भुवि दिव्यंतरिक्षके ॥ सूर्यार्चनरता नद्यः कुर्वंतु
तव शांतिकम् ॥४॥ महावैश्रवणो देवो यक्षराजो महर्षिकः ॥ यक्षकोटिपरीवारो यक्षसंख्येयसंयुतः ॥५॥ महाविभवसंपन्नः सूर्यपादार्चने रतः ॥ सूर्य

ध्यानैकपरमः सूर्यभावेन भावितः॥६॥शांतिं करोतु ते प्रीतः पद्मपत्रायतेक्षणः ॥ माणिभद्रो महायक्षो मणिरत्नविभूषितः ॥७॥ मनोहरेण हारेण
कंठलग्नेन राजते ॥ यक्षिणीयक्षकन्याभिः परिवारितविग्रहः ॥ सूर्यार्चनसमासक्तः करोतु तव शांतिकम् ॥८॥ सुचिरो नाम यक्षेंद्रो मणिकुंडल
भूषितः ॥ ललाटे हेमपटलप्रबद्धेन विराजते ॥ ९ ॥ बहुयक्षसमाकीर्णो यक्षैर्नमितविग्रहः ॥ सूर्यपूजापरो युक्तः करोतु तव शांतिकम् ॥ १० ॥
पांचिको नाम यक्षेंद्रः कंठाभरणभूषितः ॥ कुक्कुटेन विचित्रेण बहुरत्नान्वितेन तु ॥ ११ ॥ यक्षवृन्दसमाकीर्णो यक्षकोटिसमन्वितः ॥ सूर्यार्चन
करः श्रीमान्करोतु तव शांतिकम् ॥ १२ ॥ धृतराष्ट्रो महातेजा नानायक्षाधिपः खग ॥ दिव्यपट्टः शुक्लच्छत्रो मणिकांचनभूषितः ॥ १३ ॥ सूर्य
भक्तः सूर्यरतः सूर्यपूजापरायणः ॥ सूर्यप्रसादसंपन्नः करोतु तव शांतिकम् ॥ १४ ॥ विरूपाक्षश्च यक्षेंद्रः श्वेतवासा महाद्युतिः ॥ नानाकांचनमा
लाभिरुपशोभितकंधरः ॥ १५ ॥ सूर्यपूजापरो भक्तः कंजाक्षः कंजसन्निभः ॥ तेजसादित्यसंकाशः करोतु तव शांतिकम् ॥ १६ ॥ अंतरिक्षगता
यक्षा ये यक्षाः स्वर्गगामिनः ॥ नानारूपधरा यक्षाः सूर्यभक्ता दृढव्रताः ॥ १७ ॥ तद्भक्तास्तद्गमनसः सूर्यपूजासमुत्सुकाः ॥ शांति कुर्वंतु ते हृष्टाः
शांताः शांतिपरायणाः ॥ १८ ॥ यक्षिण्यो विविधाकारास्तथा यक्षकुमारकाः ॥ यक्षकन्या महाभागाः सूर्याराधनतत्पराः ॥ १९ ॥ शांतिं स्व
स्त्ययनं क्षेमं बलं कल्याणमुत्तमम् ॥ सिद्धिं चाशु प्रयच्छंतु नित्यं च सुसमाहिताः ॥ २० ॥ पर्वताः सर्वतः सर्वे वृक्षाश्चैव महर्द्धिकाः ॥ सूर्यभ
क्ताः सदा सर्वे शांतिं कुर्वंतु ते सदा ॥ २१ ॥ सागराः सर्वतः सर्वे गृहारण्यानि कृत्स्नशः ॥ सूर्यस्याराधनपराः कुर्वंतु तव शांतिकम् ॥ २२ ॥
राक्षसाः सर्वतः सर्वे घोररूपा महाबलाः ॥ स्थलजा राक्षसा ये तु अंतरिक्षगताश्च ये ॥२३॥ पाताले राक्षसा ये तु नित्यं सूर्यार्चने रताः ॥ शांतिं
कुर्वंतु ते सर्वे तेजसा नित्यदीपिताः ॥ २४ ॥ प्रेताः प्रेतगणाः सर्वे ये प्रेताः सर्वतोमुखाः ॥ अतिदीप्ताश्च ये प्रेता ये प्रेता रुधिराशनाः ॥२५॥
अंतरिक्षे च ये प्रेतास्तथा ये स्वर्गवासिनः ॥ पाताले भूतले वापि ये प्रेताः कामरूपिणः ॥ २६ ॥ एकचक्रो रथो यस्य यस्तु देवो वृषध्वजः ॥
तेजसा तस्य देवस्य शांतिं कुर्वंतु ते सदा ॥२७॥ ये पिशाचा महावीर्या वृद्धिमंतो महाबलाः ॥ नानारूपधराः सर्वे सर्वे च गुणवत्तराः ॥२८॥
अंतरिक्षे पिशाचा ये स्वर्गे ये च महाबलाः ॥ पाताले भूतले ये च बहुरूपा मनोजवाः ॥ २९ ॥ यस्याहं सारथिर्वीर यस्य त्वं तुरगः सदा ॥ ते
जसा तस्य देवस्य शांतिं कुर्वंतु तेऽञ्जसा ॥ ३० ॥ अपस्मारग्रहाः सर्वे सर्वे चापि ज्वरग्रहाः ॥ ये च स्वर्गस्थिताः सर्वे भूमिगा ये ग्रहोत्तमाः ॥
॥ ३१ ॥ पाताले तु ग्रहा ये च ये ग्रहाः सर्वतो गताः ॥ दक्षिणे किरणे यस्य सूर्यस्य च स्थितो हरिः ॥ ३२ ॥ हरो यस्य सदा वामे ललाटे कंज

जः स्थितः ॥ तेजसा तस्य देवस्य शांतिं कुर्वंतु ते सदा ॥ ३३ ॥ इति देवादयः सर्वे सूर्ययज्ञविधायिनः ॥ कुर्वंतु जगतः शांतिं सूर्यभक्तेषु सर्वदा ॥ ३४ ॥ जयःसूर्याय देवाय तमोहंत्रे विवस्वते ॥ जयप्रदाय सूर्याय भास्कराय नमोस्तु ते ॥ ३५ ॥ ग्रहोत्तमाय देवाय जयः कल्याणकारिणे ॥ जयः पद्मविकाशाय बुधरूपाय ते नमः ॥ ३६ ॥ जयः दीप्तिविधानाय जयः शांतिविधायिने ॥ तमोघ्नाय जयायैव अजिताय नमोनमः ॥३७॥ जयार्क जयदीप्तीश सहस्रकिरणोज्ज्वल ॥ जय निर्मितलोकस्त्वमजिताय नमोनमः ॥ ३८ ॥ गायत्रीदेहरूपाय सावित्रीदयिताय च ॥ धराधराय सूर्याय मार्तंडाय नमोनमः ॥ ३९ ॥ सुमंतुरुवाच ॥ एवं हि कुर्वतः शांतिमरुणस्य महीपते ॥ श्रेयसे वैनतेयस्य गरुडस्य महात्मनः ॥ ४० ॥ एतस्मिन्नेव काले तु सुपर्णः पत्रवानभूत् ॥ तेजसा बुधसंकाशो बलेन हरिणा समः ॥ ४१ ॥ संपूर्णावयवो राजन्यथापूर्वं तथाभवत् ॥ प्रसादाद्देवदेवस्य भास्करस्य महात्मनः ॥ ४२ ॥ एवमन्येऽपि राजेंद्र मानवा ये च रोगिणः ॥ अस्मिन्कृतेऽग्निकार्यें तु विरुजास्ते भवंति हि ॥ तस्माद्यत्नेन कर्तव्यमग्निकार्यं विधानतः ॥ ४३ ॥ करणीयं च राजेंद्र मानवैश्च प्ररोगिभिः ॥ अस्मिन्कृते अग्निकाये विरुजास्ते भवंति हि ॥ ४४ ॥ ग्रहोपघाते दुर्भिक्ष उत्पातेषु च कृत्स्नशः ॥ अवर्षमाणे पर्जन्ये लक्षहोमसमन्वितः ॥ ४५ ॥ पूजयित्वा प्रसूक्तं तु ध्यात्वा वीरं प्रयत्नतः ॥ वारुणैश्च तथा सूक्तैर्होमं कुर्याद्विचक्षणः ॥ ४६ ॥ चेतसा सुप्रसन्नेन सर्पिषा मधुना सह ॥ तिलैर्यवैश्च सहितैः पायसं मधुना तथा ॥ ४७ ॥ इदं च शांतिकं कुर्याद्बलिं दद्यात्प्रयत्नतः ॥ एवं कृते श्रियं देवा वर्षंते कामना नृणाम् ॥ ४८ ॥ इत्येवं शांतिकाध्यायं यः पठेच्छुणुयादपि ॥ विधिना सर्वलोकस्तु ध्यायमानो दिवाकरम् ॥ ४९ ॥ स विजित्य रणे शत्रुं मानं च परमं लभेत् ॥ अक्षयं मोदते कालमतिरस्कृतशासनः ॥ ५० ॥ व्याधिभिर्नाभिभूयेत पुत्रपौत्रैः प्रतिष्ठितः ॥ भवेदादित्यसदृशस्तेजसा प्रभया तथा ॥ ५१ ॥ यानुद्दिश्य पठेद्वीर वाचको मानवो भुवि ॥ न पीडयते च तै रोगैर्वातपित्तकफात्मकैः ॥ ५२ ॥ नाकाले मरणं तस्य न सर्पैश्चापि दृश्यते ॥ न विषं क्रमते देहे न जडांध्यं न मूकता ॥ ५३ ॥ न चोत्पत्तिभयं तस्य नाभिचारकजं भवेत् ॥ ये रोगा ये महोत्पाता येऽहयश्च महाविषाः ॥ ते सर्वे प्रशमं यांति श्रवणादस्य भारत ॥ ५४ ॥ यत्पुण्यं सर्वतीर्थानां गंगादीनां विशेषतः ॥ तत्पुण्यं कोटिगुणितं प्राप्नोति श्रवणादिभिः ॥ ५५ ॥ दशानां राजसूयानामन्येषां च विशेषतः ॥ जीवेद्वर्षशतं साग्रं सर्वव्याधिविवर्जितः ॥ ५६ ॥ गोघ्नश्चैव कृतघ्नश्च ब्रह्महा गुरुतल्पगः ॥ शरणागतदीनार्तमित्रविश्रंभघातकः ॥ ५७ ॥ दुष्टः पापसमाचारः पितृहा मातृहा तथा ॥ श्रवणादस्य पापेभ्यो मुच्यते नात्र संशयः ॥ ५८ ॥ इतिहासमिमं पुण्यमग्निकार्यं

मनुत्तमम् ॥ न दद्यात्कस्यचिद्वीर मूर्खस्य कलुषात्मनः ॥ ५९ ॥ सूर्यभक्ते सदा देयं सूर्येण कथितं पुरा ॥ अरुणस्य महाबाहो गरुडस्यारुणेन
च ॥ ६० ॥ गरुडेन पुरा प्रोक्तं भोजकानां महात्मनाम् ॥ सूर्यशर्मसुखादीनां शाकद्वीपे महीपते ॥ ६१ ॥ तैश्चापि कथितं पुण्यं मुनेर्व्यासस्य
धीमतः ॥ तेनापि कथितं पुण्यं सर्वपापभयापहम् ॥ ६२ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे गरुडारुणसंवादे शांतिक
वर्णनं नामाशीत्युत्तरशततमोऽध्यायः ॥ १८० ॥ छ ॥ ॥ शतानीक उवाच ॥ ॥ पंचप्रकारं धर्मं मे वद स्मार्तं यथाक्रमम् ॥ कौतुकं[1] पृच्छ
ते ब्रह्मन्समासव्यासयोगतः ॥ १ ॥ ॥ सुमन्तरुवाच ॥ ॥ पंचधा वर्णितं धर्मं शृणु राजन्समासतः ॥ यथोक्तं भास्करेणेह अरुणस्य
महात्मनः ॥ २ ॥ सहस्रकिरणं भानुमुदयस्थं दिवाकरम् ॥ प्रणम्य शिरसा देवमुवाच गरुडाग्रजः ॥ ३ ॥ भगवन्देवदेवेश सहस्रकिरणोज्ज्वल ॥
स्मृतिधर्मान्यथातत्त्वं वक्तुमर्हसि पृच्छतः ॥ ४ ॥ एवं पृष्टस्तु भगवानरुणेन खगाधिपः[2] ॥ उवाच परया प्रीत्या पूजयित्वा महीपते ॥ ५ ॥
॥ ॥ भास्कर उवाच ॥ ॥ स्मृतिधर्मं वेदमूलं शृणु त्वं गरुडाग्रज ॥ पूर्वानुभूतं यद्ध्यानमथ तत्स्मरणं स्मृतिः ॥ ६ ॥ धर्मः क्रियात्मा निर्दिष्टः
श्रेयोभ्युदयलक्षणः ॥ स च पञ्चविधः प्रोक्तो वेदमूलः सनातनः ॥ ७ ॥ अस्य शब्द[3]स्यानुष्ठानात्स्वर्गो मोक्षश्च जायते ॥ इह लोके सुखैश्वर्यमलं
यच्च खगाधिप ॥ ८ ॥ ॥ अनूरुरुवाच ॥ ॥ कथं पंचविधो ह्येष प्रोक्तो धर्मः सनातनः ॥ कस्य भेदास्तु ते पंच ब्रूहि मे देवसत्तम ॥ ९ ॥
॥ ॥ भास्कर उवाच ॥ ॥ वेदधर्मः स्मृतस्त्वेक आश्रमाणां स तत्परः ॥ वर्णाश्रमस्तृतीयस्तु गुणनैमित्तिको यथा ॥ १० ॥ वर्णत्वमेकमाश्रित्य
अधिकारे प्रवर्तते ॥ सवर्णाश्रमदंडस्तु भिक्षा दंडादिको यथा ॥११॥ वर्णाश्रमाश्रमत्वं च योधिकृत्य प्रवर्तते ॥ स वर्णाश्रमधर्मस्तु दंडाद्या मेखला
यथा ॥१२॥ यो गुणेन प्रवर्तेत स गुणो धर्म उच्यते ॥ यथा मूर्धाभिषिक्तस्य प्रजानां पालनं परम् ॥१३॥ निमित्तमेकमाश्रित्य यो धर्मः संप्रवर्त
ते ॥ नैमित्तिकः स विज्ञेयो जातिद्रव्यगुणाश्रयः ॥१४॥ एष तु द्विविधः प्रोक्तः समासादविशेषतः ॥ नैमित्तिकः स विज्ञेयः प्रायश्चित्तविधिर्यथा
॥ १५ ॥ स चतुर्धा निरूप्यस्तु स्वरूपफलसाधनैः ॥ प्रमाणतस्तु प्रत्येकं समस्तैश्च यथाक्रमम् ॥ १६ ॥ श्रुत्या सह विरोधे तु बाध्यते विषयं
विना ॥ व्यवस्थया विरोधेन कार्यो यत्नः परीक्ष्यते ॥१७॥ स्मृत्या सह विरोधेन चार्थशास्त्रस्य साधनम् ॥ परस्परविरोधे तु अर्थशास्त्रस्य साध
नम् ॥१८॥ अदृष्टार्थे विकल्पस्तु व्यवस्थासंभवे सति ॥ स्मृतिशास्त्रविकल्पस्तु आकांक्षापूरणे सति ॥ १९ ॥ वेदमूले स्थितं त्वेतदनुष्ठानं क्रिया

---

[1] कौतुकं पृच्छते मह्यं संक्षेपविस्तारयोगात्कथयेत्यर्थः । पृच्छते इति चतुर्थ्येकवचनान्तम् । [2] ग्रहेशः इत्यर्थः । [3] धर्मशब्दवाच्यस्येत्यर्थः ।

सती ॥ एवं शक्यविधानं तु न्यायो ह्येवं व्यवस्थितः ॥ २० ॥ निषेधविधिरूपं तु द्विधा शास्त्रं खगाधिप ॥ एकरूपं वदंत्यन्ये बहुरूपमथापरे ॥ २१ ॥ पंचप्रकाराः स्मृतय एवं शिष्यव्यवस्थिताः ॥ त्रिधा चतुर्धा द्वेधा वा एकधा बहुधा खग ॥ २२ ॥ दृष्टार्था तु स्मृतिः काचिददृष्टार्था तथापरा ॥ अनुवादस्मृतिस्त्वन्या दृष्टादृष्टा तु पंचमी ॥ सर्वा एता वेदमूलाः स्मृता वै ऋषिभिः स्वयम् ॥ २३ ॥ ॥ ॥ अरुण उवाच ॥ ॥ या एता भवता प्रोक्ताः स्मृतयः पर्वगोपने ॥ एतासां लक्षणं ब्रूहि समासादेव सत्तम ॥ २४ ॥ दृष्टार्था का मता देव अदृष्टार्था च का भवेत् ॥ दृष्टादृष्टस्वरूपा का न्यायमूला च का भवेत् ॥ अनुवादस्मृतिः का स्याद्दृष्टादृष्टा तु का भवेत् ॥ २५ ॥ एवमुक्तो महातेजा भास्करो वारितस्करः ॥ उवाच तं खगं वीरं प्रणतं विनयान्वितम् ॥ २६ ॥ ॥ आदित्य उवाच ॥ ॥ षड्गुणस्य स्वरूपं तु प्रयोगात्कार्यगौरवात् ॥ समयानामुपायानां योगो व्याससमासतः ॥ २७ ॥ अध्यक्षाणां च निक्षेपः करणानां निरूपणम् ॥ दृष्टार्थेयं स्मृतिः प्रोक्ता ऋषिभिर्गरुडाग्रज ॥ २८ ॥ संध्योपास्तिस्तथा कार्या शुनो मांसं न भक्षयेत् ॥ अदृष्टार्था स्मृतिः प्रोक्ता मनुना विनतात्मज ॥ २९ ॥ पालाशं धारयेद्दंडमुभयार्थां विदुर्बुधाः ॥ विरोधे तु विकल्पः स्याद्यागो होमस्ततो यथा ॥ ३० ॥ श्रुतौ दृष्टं यथा कार्यं स्मृतौ तत्तादृशं यदि ॥ उक्तानुवादिनी सा तु पारिव्राज्यं तथा गृहात् ॥ ३१ ॥ उक्तो धर्मश्च संक्षेपात्परिभाषा च तद्गता ॥ तत्साधनं च देशादि इत्थमित्यब्रवीद्रविः ॥ ३२ ॥ ब्रह्मावर्तः परो देश ऋषिशस्तस्त्वनंतरः ॥ मध्यदेशस्ततोऽप्यन्य आर्यावर्तस्त्वनंतरः ॥ ३३ ॥ कृष्णसारस्तु विचरेन्मृगो यत्र स्वभावतः ॥ यज्ञियः स तु देशः स्यान्म्लेच्छदेशस्ततः परः ॥ ३४ ॥ ब्रह्मादीनां च देवानां ब्राह्मणादेस्तथैव च ॥ भूतग्रामस्य कृत्स्नस्य त्रयं कृत्स्नस्य खेचर ॥ ॥ ३५ ॥ साधनत्वं मनुः प्राह वेदमूलं सनातनम् ॥ प्रकाशयज्ञसंसिद्ध्यै यदशब्दस्य एव तु ॥ ३६ ॥ उपलभ्य यथातत्त्वं स च दर्शितवानृषिः ॥ सम्यक्संसाधनं धर्मः कर्तव्यस्त्वधिकारिणा ॥ ३७ ॥ निष्कामेन सदा वीर काम्यं रूपान्वितेन च ॥ आचारयुक्तः श्रद्धालुर्वेदज्ञोऽध्यात्मचिंतकः ॥ कर्मणां फलमाप्नोति न्यायार्जितधनश्च यः ॥ ३८ ॥ ॥ अरुण उवाच ॥ ॥ ब्रह्मावर्तादिदेशानां समस्तानां विभावसो ॥ विभागं ब्रूहि देवेंद्र संमानय ग्रहाधिप ॥ ३९ ॥ ॥ आदित्य उवाच ॥ ॥ सरस्वतीदृषद्वत्योर्देवनद्योर्यदंतरम् ॥ तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते ॥ ४० ॥ हिमवद्विंध्यधरयोर्यदंतरमुदाहृतम् ॥ प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः ॥ आसमुद्रात्तु वै पूर्वादासमुद्रात्तु पश्चिमात् ॥ ४१ ॥ तयोरेवांतरं गिर्योरार्यावर्तं विदुर्बुधाः ॥ एतान्विज्ञाय सद्देशान्त्संश्रयेत प्रयत्नतः ॥ ४२ ॥ शूद्रस्तु यस्मिंस्तस्मिन्वा निवसेद्वृत्तिकर्शितः ॥ एषा धर्मस्य वै

ज्योतिः समासात्कथिता तव ॥ ४३ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मेषु अरुणादित्यसंवादे स्मृतिभेदवर्णनं
नामैकाशीत्युत्तरशततमोऽध्यायः ॥ १८१ ॥ ॥छ॥ ॥ आदित्य उवाच ॥ ॥ उक्तं धर्मस्य रूपं तु साधिकारं सनातनम् ॥ अतः परं प्रवक्ष्यामि
धर्ममाश्रमिणां खग ॥ १ ॥ ब्रह्मचारी गृहस्थश्च वनस्थो भिक्षुरेव च ॥ चत्वार आश्रमाः प्रोक्ता एक एव चतुर्विधः ॥ २ ॥ गायत्रो ब्रह्मचारी
तु प्राजापत्यो द्वितीयकः ॥ देवव्रतस्तृतीयस्तु नैष्ठिकस्तु चतुर्थकः ॥ ३ ॥ चत्वार आश्रमाः प्रोक्ताः सवेदाः समधर्मकाः ॥ अतः परं प्रवक्ष्यामि
संस्कारं धर्मसिद्धये ॥ ४ ॥ गर्भाधानमृतौ कार्यं हृष्टयोस्तु समन्त्रकम् ॥ कार्यं पुंसवनं मातुस्तृतीये मासि संयुतैः ॥ ५ ॥ सीमन्तः सप्तमे गर्भे
षष्ठे वा सप्तमेऽपि वा ॥ पात्रसंस्कारका इष्टा गर्भाधानादयस्त्रयः ॥ ६ ॥ जातकर्मादयः सर्वे संस्काराः पुरुषस्य तु ॥ जातस्य प्राशनं यत्र स्वर्णा
दीनां समन्त्रकम् ॥ ७ ॥ जातकर्मेति तत्प्रोक्तं गुह्यं नाम तदैव तु ॥ प्रकाशो नाम कर्तव्यं [दिने त्वेकादशेऽर्थवत् ॥ ८ ॥ धर्मशास्त्रादिसंयुक्तं
षष्ठेऽन्नप्राशनं खग ॥ प्रथमेऽब्दे तृतीये वा चूडाकर्म विधीयते ॥ ९ ॥ अष्टमे दशमे वापि ब्राह्मणस्योपनायनम् ॥ पुरुषस्य तथा चान्यजातीयानां
विशेषतः ॥ १० ॥ एकादशे द्वादशे वा कार्यं क्षत्रियवैश्ययोः ॥ वेदसंस्कारकं वच्मि मन्यन्ते त्वौपनायनम् ॥ ११ ॥ पुरुषस्य तथा चान्य
उभयोश्च ब्रवीम्यहम् ॥ सावित्रं वैदिकं चैव महानाम्नीमहाव्रतम् ॥ १२ ॥ तथौपनिषदं चाब्दं गोदानं च सुवर्णकम् ॥ व्रतानि ग्रहणार्थानि
वेदस्येति मनोर्मतम् ॥ १३ ॥ वेदैकदेशपाठस्य उक्तं गृह्ये प्रपञ्चकम् ॥ उक्ता गुरोस्तु शुश्रूषा दृष्टादृष्टार्थसाधनम् ॥ १४ ॥ उभयोर्वा तथा चान्या
यथान्यायं यथाश्रुतम् ॥ गुरोरप्येव तं विद्यात्तद्व्यानं त्रिविधं स्मृतम् ॥ १५ ॥ तोषः परस्परस्येति एतावान्धर्मसंग्रहः ॥ कृत्स्नो वेदोऽधिगंतव्यः
स्वधर्ममनुतिष्ठता ॥ १६ ॥ ज्ञात्वा वेदं ब्रह्मचारी ग्रंथार्थान्यान्यथाविधि ॥ नैष्ठिकश्च विधानं तु यावज्जीवं विधीयते ॥ विद्यान्तेऽभीष्टदानं च
अनुज्ञातो गृही भवेत् ॥ १७ ॥ निष्कासनं गुरुगृहाद्गृहस्थस्य यथाभवेत् ॥ नैष्ठिकश्च तथा स्नानं कुर्यात्सम्यग्यथाविधि ॥ १८ ॥ उद्वहेद्वै ततो
भार्यां सवर्णां लक्षणान्विताम् ॥ अविप्लुतब्रह्मचर्यश्चाधिकारी खगोत्तम ॥ १९ ॥ स्वतन्त्रमन्ये चेच्छन्ति ह्यधिकारं द्विजोत्तमाः ॥ सप्तमीं
पञ्चमीं चैव कन्यकां पितृमातृतः ॥ २० ॥ उद्वहेत द्विजो भार्यामसमानार्षगोत्रजाम् ॥ संख्याविधिविवाहेषु गोत्रार्थं विधिवर्जितम् ॥ २१ ॥
विकल्पेनैव मन्तव्यमृषीणां विविधा श्रुतिः ॥ अष्टौ विवाहा वर्णानां संस्काराख्या इति श्रुतिः ॥ २२ ॥ यस्तु दोषवतीं कन्यामनाख्याय प्रय
च्छति ॥ तस्य कुर्यान्नृपो दंडं स्वयं षण्णवतिं पणान् ॥२३॥ पितुर्गृहे तु या कन्या रजः पश्यत्यसंस्कृता ॥ पतंति पितरस्तस्य कन्या च वृषली

भवेत् ॥ २४ ॥ यस्तु तां वरयेत्कन्यां ब्राह्मणो ज्ञानदुर्बलः ॥ अश्राद्धेयमपाङ्क्तेयं तं विद्याद्वृषलीपतिम् ॥ २५ ॥ सर्वदोषान्हि विख्याप्य स्त्रिया
वा पुरुषस्य वा ॥ उभयोरपि विख्याप्य ततः संबन्धमाचरेत् ॥ २६ ॥ गौरी कन्या प्रधाना वै मध्यमा कन्यका स्मृता ॥ रोहिणी तत्समा
ज्ञेया अधमा तु रजस्वला ॥ २७ ॥ ॥ अनूरुरुवाच ॥ ॥ गौरी तु का मता कन्या रोहिणी च जगत्पते ॥ रजस्वला नग्निका च देवकन्या च
का भवेत् ॥ २८ ॥ ॥ भास्कर उवाच ॥ ॥ असंप्राप्तरजा गौरी प्राप्ते रजसि रोहिणी ॥ अव्यञ्जनयुता कन्या कुचहीना च नग्निका ॥ २९ ॥
सप्तवर्षा भवेद्गौरी दशवर्षा तु नग्निका ॥ द्वादशे तु भवेत्कन्या अत ऊर्ध्वं रजस्वला ॥ ३० ॥ व्यञ्जनेन समोपेतां सोमो भुङ्क्ते हि कन्यकाम् ॥
पयोधरेषु गंधर्वा रजस्यग्निः प्रकीर्तितः ॥ ३१ ॥ हिनस्ति व्यञ्जनैः पुत्रान्कुलं हन्यात्पयोधरैः ॥ गतिमिष्टां तथा लोकान्हन्याच्च रजसा
पितुः ॥ ३२ ॥ तस्मादव्यञ्जनोपेतामरजस्कपयोधराम् ॥ नान्योपभुक्तां सोमाद्यैर्दद्याद्दुहितरं पिता ॥ ३३ ॥ अन्नं तस्य न भोक्तव्यं वृथा पाको
हि स स्मृतः ॥ वृथा पाकस्य भुक्त्वान्नं प्रायश्चित्तं समाचरेत् ॥३४॥ प्राणायामं त्रिरभ्यस्य घृतं प्राश्य विशुद्ध्यति ॥ विवाहयेदेकगोत्रां समानप्रवरां
खग ॥ कृत्वा तस्यां समुत्सर्गमतिकृच्छ्रो विशोधनम् ॥ ३५ ॥ उद्वाहयेत्सगोत्रां च तनयां मातुलस्य च ॥ ऋषिभिश्चैव तुल्यो यो द्विजश्चांद्रायणं
चरेत् ॥ ३६ ॥ असपिण्डा तु या मातुरसगोत्रा च या पितुः ॥ सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने ॥ ३७ ॥
॥ ॥ अरुण उवाच ॥ ॥ दारकर्म किमुक्तं वै यदुक्तं भवता इदम् ॥ सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने ॥ ३८ ॥ ॥ आदित्य उवाच ॥ ॥
अग्निहोत्रादि यत्कर्म वैदिकं विनतात्मज ॥ तदुक्तं दारकर्मेति द्वाभ्यां योगाच्च मैथुने ॥३९॥ नोद्वहेत्कपिलां कन्यां नाधिकांगीं न रोगिणीम् ॥ नालोमिकां
नातिलोमां न चाकूटां न पिङ्गलाम् ॥४०॥ ऋक्षवृक्षनदीनाम्नीं नान्यपर्वतनामिकाम् ॥ न यक्षाहिप्रेष्यनाम्नीं चातिभीषणनामिकाम्॥४१॥
यस्यास्तु न भवेद्भ्राता न विज्ञायेत वै पिता ॥ नोपगच्छेद्धि तां प्राज्ञः पुत्रिकाधर्मशंकया ॥४२॥ हंसस्वरामेकवर्णां मधुपिंगललोचनाम् ॥ तादृशीं
वरयेत्कन्यां गृहार्थी खगसत्तम ॥ ४३ ॥ दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते ॥ परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः ॥४४ ॥ परिवित्तिः
परिवेत्ता च यया स परिविद्यते ॥ सर्वे ते नरकं यांति दातृयाजकपंचमाः ॥ ४५ ॥ क्लीबे देशांतरस्थे वा पतिते व्रजिते तथा ॥ योगशास्त्राभियुक्ते
च न दोषः परिवेदने ॥४६॥ खंजवामनकुब्जेषु गद्गदेषु जडेषु च ॥ जात्यंधे बधिरे मूके न दोषः परिवेदने ॥ ४७ ॥ न श्राद्धं तु कनिष्ठस्य
विकुलाय च कन्यका ॥ वरश्च कुलशीलाभ्यां न शुद्ध्येत कदाचन ॥ न मंत्राः कारणं तत्र न च कन्या वृता भवेत् ॥ ४८ ॥ उद्वाहिता तु या

कन्या न च प्राप्ता तु मैथुनम् ॥ पुनरभ्येति भर्तारं यथा कन्या तथैव सा ॥ ४९ ॥ समाक्षिप्य मतां कन्यां पिता त्वक्षतयोनिकाम् ॥ कुलशी
लवते दद्यान्न स्याद्दोषः खगाधिप ॥ ५० ॥ ॥ अनूरुरुवाच ॥ ॥ एतेऽष्टौ प्रभवाः प्रोक्ता विवाहा ये जगत्पते ॥ लक्षणं ब्रूहि चैतेषां समासात्ति
मिरापह ॥ ५१ ॥ ॥ आदित्य उवाच ॥ ॥ शुभां लक्षणसंपन्नां कुलशीलगुणान्विताम् ॥ अलंकृत्यार्हते दानं विवाहो ब्राह्म उच्यते ॥ ५२ ॥ सह
धर्मक्रियाहेतोर्दानं समयबंधनात् ॥ अलंकृत्यैव कन्यायाः प्राजापत्यः स उच्यते ॥ ५३ ॥ प्रदानं यत्र कन्यायाः सहगोमिथुनेन तु ॥ सवर्णायाः
सगोत्रायास्तमार्षमृषयो विदुः॥ ५४ ॥ अंतर्वेद्यां समानीय कन्यां कनकमंडिताम् ॥ ऋत्विजे चैव यद्दानं विवाहो दैवसंज्ञकः ॥ ५५ ॥ एते विवा
हाश्चत्वारो धर्मकामार्थदायकाः ॥ अशुल्का ब्रह्मणा प्रोक्तास्तारयंति कुलद्वयम् ॥ ५६ ॥ चतुर्ष्वेतेषु दत्तायामुत्पन्नो यः सुतः स्त्रियाम् ॥ दातुः
प्रतिग्रहीतुश्च पुनात्यासप्तमान्पितॄन् ॥ ५७ ॥ विविक्ते स्वयमन्योऽन्यं स्त्रीपुंसोर्यः समागमः ॥ प्रीतिहेतुः स गांधर्वो विवाहः पंचमो मतः ॥५८॥
हत्वा च्छित्त्वा च भित्त्वा च क्रोशंतीं रुदतीं गृहात्॥प्रसह्य कन्याहरणं राक्षसोद्वाह उच्यते॥५९॥शुल्कं प्रदाय कन्याया हरणं व्यसनादपि॥प्रसाद
हेतुरुक्तोयमासुरः सप्तमस्तथा ॥ ६० ॥ सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति ॥ स पापिष्ठो विवाहानां पैशाचश्चाष्टमोधमः ॥ ६१ ॥ एतान्स
शुल्कान्सामान्यान्विवाहांश्चतुरो विदुः ॥ केवलं क्षत्रियस्यैव वीर्यं छित्त्वा हि राक्षसः ॥ ६२ ॥ प्राप्ते पूर्वविवाहे तु विधिर्वैवाहिकः शिवः ॥ कर्त
व्यस्तु त्रिभिर्वर्णैः समयेनाग्निसाक्षिकः ॥ ६३ ॥ दोषवत्याः प्रदाने तु दातुः षण्णवतिर्दमः ॥ स्याच्चु शुल्कप्रदाने च कन्यायाश्चापवर्जने ॥६४॥
मोक्षोपवर्तनं द्वेषः स्त्रीधनस्य निवर्तनम् ॥ आकांक्षा तीर्थसंरोधस्त्यागहेतुश्च वक्ष्यते ॥ ६५ ॥ परस्परस्य संबंधान्मोक्षः स्त्रीपुंसयोः स्मृतः ॥ न
स्यादन्यतरः प्रीतो रोषात्सांप्रतिकादपि ॥ ६६ ॥ बाधते चेत्पतिर्भार्यां स तु द्वेष इति स्मृतः ॥ वृत्तिराभरणं शुल्कं लाभश्च स्त्रीधनं भवेत्॥६७॥
भोक्तुस्तु स्वयमेवेदं प्रतिज्ञाहननं भवेत् ॥ वृथा मोक्षेण भोगेन स्त्रियै दद्यात्सवृद्धिकम् ॥६८॥ आपत्तिसमये जाते स्त्रीधनं भोक्तुमर्हति ॥ आकांक्षे
ताष्टवर्षाणि भर्तापि प्रसवं स्त्रियाः ॥ ६९ ॥ जायन्ते यदि नो पुत्रास्तस्यां यत्ने महत्यपि ॥ ततो विंदेत पुत्रार्थी धर्मतः कुलजां स्त्रियम् ॥ ७० ॥
पुत्रलाभात्परं लोके नास्ति हि प्रसवार्थिनः ॥ एतां शुल्कस्य तां भुक्त्वा अन्यां लब्धुं यदीच्छति ॥ समस्तास्तोषयित्वार्थैः सूर्योढां परमां वरेत्॥
॥ ७१ ॥ एका शूद्रस्य वैश्यस्य द्वे तिस्रः क्षत्रियस्य तु ॥ चतस्रो ब्राह्मणस्य स्युर्भार्या राज्ञो यथेष्टतः ॥ ७२ ॥ अतीर्थगमनात्पुंसस्तीर्थे संगाहना

त्स्त्रियाः ॥ उभयोर्धर्मलोपः स्यात्स्वे[1]ष्वेव तु विशेषतः ॥ ७३ ॥ यौगपद्ये तु तीर्थानां विवाहक्रमशो व्रजेत् ॥ तत्साम्यं जीवपुत्रा वा ग्रहणक्रमशोपि
वा॥७४॥ ब्राह्मादिभिर्विवाहैस्तु संस्कृतौ तौ खगाधिप ॥ अष्टौ विवाहा वर्णानां वैनतेय उशंति वै ॥ ७५॥ ब्राह्मो दैवस्तथार्षश्च प्राजापत्यः खगा
धिप ॥ गांधर्वश्चासुरो रक्षः पैशाचस्त्वष्टमोऽधमः ॥ ७६ ॥ प्रशस्ताः क्षत्रियादीनां विप्रादीनां तु मानतः ॥ प्रतिग्रहादयो बद्धा[2] विवाहा ब्राह्मणस्य
तु ॥७७॥ क्षत्रियस्यापि देया तु प्रतिग्रहविवर्जिता ॥ प्रवृत्तिं केचिदिच्छंति दानमित्यपरे स्त्रियाः ॥ पावनं पुरुषाणां तु विवाहं परिचक्षते ॥७८॥
इति श्रीभविष्ये महापुराणे सप्तमीकल्पे ब्राह्मे पर्वणि सूर्यारुणसंवादे विवाहविधिवर्णनं नाम द्व्यशीत्युत्तरशततमोऽध्यायः ॥ १८२ ॥छ॥ भास्कर
उवाच॥कुर्यात्पंचमहायज्ञानधिकारो द्विजस्य सः॥भूतपित्रमरब्रह्ममनुष्याणां यथाविधि॥१॥सदा सदान कृत्यानां फलार्थमपरे स्थिताः॥नित्यानित्य
मिति प्राहुरनुषंगात्फलं परे ॥२॥ अतिथेः परितोषाय परिचर्या विधीयते ॥ अदृष्टनियमादृष्टमारोग्यान्तं च वर्जनम् ॥३॥ तिस्रोष्टकास्तु कर्तव्या
मध्यावर्ता चतुर्थिका॥शाकपायसपूपैस्तु मांसेन तु चतुर्थिका॥४॥प्रतिपदि क्रियते यत्तु चतुष्पार्वणमुच्यते ॥ स्वगृह्योक्तविधानेन तत्तु पक्षादि की
र्त्यते॥५॥नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धं सपिंडनम्॥पार्वणं चेति विज्ञेयं गोष्ठशुद्ध्यर्थमुत्तमम्॥कर्मांगं नवमं प्रोक्तं वैदिकं दशमं स्मृतम् ॥६॥
॥ ॥ अनूरुरुवाच ॥ ॥ यदेतद्भवता प्रोक्तं श्राद्धं द्वादशधा विभो ॥ तस्य सर्वस्य मां ब्रूहि लक्षणं वै पृथक्पृथक् ॥ ७ ॥ नित्यं किमुच्यते श्राद्धं
किं वा नैमित्तिकं भवेत् ॥ काम्यादि देवदेवेश एतेषां लक्षणं वद ॥ ८ ॥ ॥ आदित्य उवाच ॥ ॥ अहन्यहनि यच्छ्राद्धं तन्नित्यं खग कीर्तितम् ॥
वैश्वदेवविहीनं तु अशक्तावुदकेन तु ॥ ९ ॥ एकोद्दिष्टं तु यच्छ्राद्धं तन्नैमित्तिकमुच्यते ॥ तत्सदैव प्रकर्तव्यमयुग्मान्भोजयेद्द्विजान् ॥ १० ॥ कामयुक्तं
हि तत्काम्यमभिप्रेतार्थसिद्धये ॥ पार्वणेन विधानेन तदप्युक्तं खगाधिप ॥ ११ ॥ वृद्धौ यत्क्रियते श्राद्धं वृद्धिश्राद्धं तदुच्यते ॥ सर्वं प्रदक्षिणं कार्यं
पूर्वाह्णे तूपवीतिना ॥१२॥ गंधोदकतिलैर्युक्तं कुर्यात्पात्रचतुष्टयम्॥ अर्घार्थं पितृपात्रेषु प्रेतपात्रं प्रमोचयेत् ॥१३॥ ये समाना इति द्वाभ्यामेतज्ज्ञेयं
सपिंडनम् ॥ नित्येन तुल्यं शेषं स्यादेकोद्दिष्टं स्त्रिया अपि॥१४॥ दर्शे वै क्रियते यत्तु तत्पार्वणमुदाहृतम् ॥ पर्वणि क्रियते यच्च तत्पार्वणमिति
स्थितिः ॥ गोभ्यश्च क्रियते श्राद्धं तद्गोष्ठश्राद्धमुच्यते ॥ १५ ॥ बहूनां विदुषां संपत्सुखार्थं पितृतृप्तये ॥ क्रियते शुद्धये यद्वै ब्राह्मणानां च भोज
नम् ॥ शुद्ध्यर्थमिति तत्प्रोक्तं वैनतेय मनीषिभिः ॥ १६ ॥ निषेककाले सोमे च सीमंतोन्नयने तथा ॥ ज्ञेयं पुंसवने श्राद्धं तच्च कर्मांगमेव च ॥
॥ १७ ॥ क्रियते देवमुद्दिश्य सप्तम्यादिषु यत्नतः ॥ गच्छेद्देशांतरे यस्तु श्राद्धं कुर्यात्तु सर्पिषा ॥ तद्यत्नार्थमिति प्रोक्तं प्रदिशेच्च न संशयः ॥१८॥

---

[1] द्रव्येषु सत्स्वेवेत्यर्थः । [2] मन्त्रबद्धा इत्यर्थः ।

शरीरोपचये श्राद्धमश्ववृद्धचर्थमेव च ॥ पुष्टचर्थमेतद्विज्ञेयमौपचारिकमुच्यते ॥ १९ ॥ सर्वेषामेव श्राद्धानां श्रेष्ठं सांवत्सरं मतम् ॥ क्रियते
यत्खगश्रेष्ठ मृतेहनि बुधैः सह ॥ २० ॥ मृतेऽहनि पुनर्यस्तु न कुर्याच्छ्राद्धमादरात् ॥ मातुश्च खगशार्दूल वत्सरांते मृतेऽहनि ॥ २१ ॥
नाहं तस्य खगश्रेष्ठ पूजां गृह्णामि नो हरिः ॥ न ब्रह्मा न च वै रुद्रो न चान्ये देवतागणाः ॥ २२ ॥ तस्माद्यत्नेन कर्तव्यं वर्षेवर्षे मृतेऽहनि ॥
नरेण खगशार्दूल भोजकेन विशेषतः ॥ २३ ॥ भोजको यस्तु वै श्राद्धं न करोति खगाधिप ॥ मातापितृभ्यां सततं वर्षेवर्षे मृतेऽहनि ॥२४॥
स याति नरकं घोरं तामिस्रं नाम नामतः ॥ ततो भवति दुष्टात्मा नगरे सूकरः खग ॥ २५ ॥ अनूरुरुवाच ॥ ॥ न जानाति दिनं यस्तु न
मासं विबुधाधिप ॥ मृतौ यत्र महाप्राज्ञ पितरौ स कथं नरः ॥ श्राद्धं करोतु वै ताभ्यां विधिवद्वत्सरात्मकम् ॥ २६ ॥ ॥ आदित्य उवाच ॥ ॥
न जानाति नरो यस्तु मृतानां विनतात्मज ॥ मासं दिनं मृतानां तु पितॄणां खगसत्तम ॥ २७ ॥ यथा कुर्यात्खगश्रेष्ठ शृणु कृत्स्नं समासतः ॥
मृताहं यो न जानाति मानवो विनतात्मज ॥ २८ ॥ तेन कार्यममायां च श्राद्धं सांवत्सरं खग ॥ मासे मार्गशिरे वीर माघे वा विधिवत्खग ॥
॥ २९ ॥ विशेषतो भोजनेन यो मां पूजयते सदा ॥ प्रीतये मम वै तेन संपूज्याः पितरः सदा ॥ ३० ॥ ममेष्टाः पितरो नित्यं गावो विप्राश्च
सुव्रत ॥ तस्माच्च ते सदा पूज्या मद्भक्तेन विशेषतः ॥ ३१ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे :पर्वणि सप्तमीकल्पे सौरधर्मे श्राद्धविधिकथनं
नाम त्र्यशीत्युत्तरशततमोऽध्यायः ॥१८३॥ ॥ प्रख्याते प्रत्यये नैव प्रश्नपूर्वं प्रतिग्रहः ॥ यजनेऽध्यापने वादे षड्विधो वेदविक्रयः ॥ १ ॥ वेद
विक्रयनिर्दिष्टं स्त्रिया चार्वर्जितं धनम् ॥ न देयं पितृदेवेभ्यो यच्च क्लीबात्खगाधिप ॥ २ ॥ अनुयोगेन यो दद्याद्ब्राह्मणाय प्रतिग्रहम् ॥ स पूर्वं
नरकं याति ब्राह्मणास्तदनंतरम् ॥ ३ ॥ वेदाक्षराणि यावंति नियुज्यन्तेर्थकारणात् ॥ तावत्यो भ्रूणहत्या वै वेदविक्रयमाप्नुयात् ॥ ४ ॥ वैश्वदेवेन
यो हीन आदित्यस्य च कर्मणः ॥ सर्वे ते वृषला ज्ञेयाः प्राप्तवेदाश्च ब्राह्मणाः ॥५॥ येषामध्ययनं नास्ति ये च केचिदनग्नयः॥कुलं वाऽश्रोत्रियं
येषां सर्वे ते शूद्रधर्मिणः ॥ ६ ॥ अकृत्वा वैश्वदेवं तु यो भुङ्क्ते सोऽबुधः खग ॥ वृथा तेनान्नपाकेन यमयोनिं व्रजेत्तु सः ॥ ७ ॥ प्रियो वा
यदि वा द्वेष्यो मूर्खः पंडित एव च ॥ वैश्वदेवे तु संप्राप्ते सोऽतिथिः स्वर्गसंक्रमः ॥ ८ ॥ नैकग्रामीणमतिथिं विप्रसांगतिकं तथा ॥ अचिंत्यो
भ्यागतो यस्मात्तस्मादतिथिरुच्यते ॥ ९ ॥ अचिंत्यः स तु वै नाम्ना वैश्वदेव उपागतः ॥ अतिथिं तं विजानीयान्न पुनः पूर्वमागतः ॥ १० ॥

यावच्च प्राप्नुयादन्नं कृताशीः स्नातको द्विजः ॥ तस्यान्नस्य चतुर्भागं हंतकारं विदुः खग॥११॥ ग्रासमात्रा भवेद्भिक्षा चतुष्कालं चतुर्गुणम् ॥ पुष्कलानि च चत्वारि हंतकारो विधीयते ॥ १२ ॥ आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते पुनः ॥ चांद्रायणं चरेन्मासमिति विद्धि खगाधिप ॥ १३ ॥ आरूढपतितापत्या ब्राह्मणो वृषलेन च ॥ द्वावेतौ विद्धि चांडालौ वेदित्राद्यश्च जायते ॥ १४ ॥ ब्राह्मणी कुलटा नित्यं स्वकं त्यक्त्वा पतिं खग ॥ अन्यस्य विशते गेहे ब्राह्मणस्य खगाधिप॥१५॥ उत्पद्यते तु यस्तस्या ब्राह्मणेन महामते॥ स चांडालो महान्प्रोक्तो महाचांडाल इत्युत॥१६॥यस्तु प्रव्रजितो भूत्वा पुनः सेवति मैथुनम्॥ षष्टिवर्षसहस्राणि विष्ठायां जायते क्रिमिः ॥ पंचगव्येन शुद्धिः स्यादित्याह मम देहकृत्॥१७॥अभोज्यं ब्राह्मणस्यान्नं वृषलेन निमंत्रितम् ॥ तथैव वृषलस्यान्नं ब्राह्मणेन निमंत्रितम् ॥१८॥ ब्राह्मणान्नं ददच्छूद्रः शूद्रान्नं ब्राह्मणो ददत् ॥ उभावेतावभोज्यान्नौ भुक्त्वा चांद्रायणं चरेत् ॥१९॥ उपनिक्षेपधर्मेण शूद्रान्नं च पचेद्द्विजः ॥ अभोज्यं तद्भवेदन्नं स च विप्रः पुरोहितः ॥२०॥ शूद्रान्नं शूद्रसंपर्कं शूद्रेण सह वासनम् ॥ शूद्राज्ज्ञानागमः कश्चिज्ज्वलंतमपि पातयेत् ॥२१॥ शूद्रान्नोपहता विप्रा विह्वला रतिलालसाः ॥ कुपिताः किं करिष्यंति निर्विषा इव पन्नगाः ॥ २२ ॥ हस्तदत्तास्तु ये स्नेहाल्लवणव्यंजनादयः ॥ दातारं नाधितिष्ठंति भोक्ता भुंक्ते तु किल्बिषम् ॥ २३ ॥ आयसेन तु पात्रेण यदन्नमुपदीयते ॥ भोक्ता विष्ठाशनं भुंक्ते दाता तु नरकं व्रजेत् ॥ २४ ॥ अंगुल्या दंतकाष्ठं यत्प्रत्यक्षलवणं च यत् ॥ मृत्तिकाभक्षणं चैव तुल्यं गोमांसभक्षणैः ॥ २५ ॥ मुखे पर्युषिते नित्यं भवत्यप्रयतो द्विजः ॥ तस्माच्छुष्कमथार्द्रं वा भक्षयेद्दंतधावनम् ॥ २६ ॥ पुष्पालंकारवस्त्राणि गंधमाल्यानुलेपनम्॥ उपवासे न दुष्यंति दंतधावनमंजनम् ॥२७॥ गृहांते वसते मूर्खो दूरे चास्य गुणान्वितः॥गुणान्विते च दातव्यं नास्ति मूर्खव्यतिक्रमः ॥ २८ ॥ ब्राह्मणातिक्रमो नास्ति विप्रे वेदविवर्जिते ॥ ज्वलंतमग्निमुत्सृज्य न हि भस्मनि हूयते ॥ २९ ॥ सन्निकृष्टमधीयानं ब्राह्मणं यो व्यतिक्रमेत् ॥ भोजनेनैव दानेन दहत्यासप्तमं कुलम् ॥ ३० ॥ ॥ अनूरुरुवाच ॥ ॥ एवमेव जगन्नाथ देवदेव जगत्पते ॥ किं तु यत्ते पुरा देव श्रुतं वाक्यं महात्मनः ॥ ३१ ॥ गदतो नारदस्यैव शृणु त्वं विबुधाधिप ॥ गदतो मे सुरश्रेष्ठ धर्म्यमर्थं सुखावहम् ॥ ३२ ॥ सत्यनिष्ठं द्विजं यस्तु शुक्लजातिं प्रियंवदम् ॥ मूर्खं पाखंडिनं वापि वृत्तिहीनमथापि वा ॥ ३३ ॥ अतिक्रम्य नरो घोरं नरकं पातयेत्खग ॥ सप्त परान्सप्त पूर्वान्पुरुषानात्मना सह ॥ ३४ ॥ तस्मान्नातिक्रमेद्राजा ब्राह्मणं प्रातिवेशिकम् ॥ संबन्धतस्तथासन्नं दौहित्रं विद्यते तथा ॥ ३५ ॥ भागिनेयं विशेषेण तथा बंधुं ग्रहाधिप ॥ नातिक्रमेन्नरस्त्वेतान्सुमूर्खानपि गोपते ॥ अतिक्रम्य महद्रौद्रं रौरवं नरकं व्रजेत् ॥ ३६ ॥ ॥ आदित्य उवाच ॥ ॥

एवमेतन्न संदेहो यथा वदसि खेचर ॥ ममाप्यवगतं वीर ब्राह्मणं न परीक्षयेत् ॥ ३७ ॥ सर्वदेवमयं विप्रं सर्वलोकमयं तथा ॥ तस्मात्संपूजयेदेनं
न गुणांस्तस्य चिंतयेत् ॥ ३८ ॥ केवलं चिंतयेज्जातिं न गुणान्विनतात्मज ॥ तस्मादामंत्रयेत्पूर्वमासन्नं ब्राह्मणं बुधः ॥ ३९ ॥ यस्त्वासन्नमति
क्रम्य ब्राह्मणं पतिताद्दते ॥ दूरस्थान्पूजयेन्मूढो गुणाढ्यान्नरकं व्रजेत् ॥ ४० ॥ देवकर्मविनाशेन ब्रह्मस्वहरणेन च ॥ देवद्रव्यं द्विजान्नं च ब्रह्मस्वं
ब्राह्मणार्जितम् ॥ वियोन्यां क्षिपते यस्तु वियोनिमधिगच्छति ॥ ४१ ॥ मा ददस्वेति यो ब्रूयाद्गवाग्निब्राह्मणेषु वै ॥ तिर्यग्योनिशतं गत्वा चांडा
लेष्वभिजायते ॥ ४२ ॥ यत्तु वाचा प्रतिज्ञातं कर्मणा नोपपादितम् ॥ तद्दणं धर्मसंयुक्तमिह लोके परत्र च ॥ ४३ ॥ वेदविद्याव्रतस्नाते श्रोत्रिये
गृहमागते ॥ क्रीडंत्योषधयः सर्वा यास्यामः परमां गतिम् ॥ ४४ ॥ मधु मांसं सुरां सोमं लाक्षाद्यं लवणं तथा ॥ विक्रीयान्यतमं तेषां
द्विजश्चांद्रायणं चरेत् ॥ ४५ ॥ गुडं तिलं तथा नीलं केशान्गोधूमकान्यवान् ॥ विक्रीय ब्राह्मणो गां च कृच्छ्रं सांतपनं चरेत् ॥ ४६ ॥ औष्ट्रमा
विकदुग्धं च अन्नं मृतकसूतके ॥ चौरस्यान्नं मृतश्राद्धे भुक्त्वा चांद्रायणं चरेत् ॥ ४७ ॥ गवां शृंगोदके स्नातो महानद्याश्च संगमे ॥ समुद्रदर्शना
द्वापि शुना दष्टः शुचिर्भवेत् ॥ ४८ ॥ वेदविद्याव्रतस्नातः शुना दष्टो द्विजः खग ॥ हिरण्योदकमिश्रं तु घृतं प्राश्य विशुद्ध्यति ॥ ४९ ॥ तिष्ठ
न्वाप्यथ वा गच्छञ्छुना दष्टो द्विजः खग ॥ वज्रं प्राश्य शुचिः स्याद्वै यथाह भगवान्मनुः ॥ ५० ॥ व्रतिनश्चापि दष्टस्य त्रिरात्रं क्षपणं
स्मृतम् ॥ सघृतं च ततो भुक्त्वा व्रतशेषं समाचरेत् ॥ ५१ ॥ ब्राह्मणी तु शुना दष्टा सोमे दृष्टं[1] समाचरेत् ॥ यदा न दृश्येते[2] सोमः प्रायश्चित्तं
कथं भवेत् ॥ ५२ ॥ यां दिशं व्रजते सोमस्तां दिशं चावलोकयेत् ॥ सोममार्गेण सा पूर्वा पञ्चपूतेन शुध्यति ॥ ५३ ॥ ब्राह्मणस्य ब्रह्मद्वारे पूय
शोणितसंभवे ॥ क्रिमिभिर्दश्यते यश्च निष्कृतिं तस्य वच्मि ते ॥ ५४ ॥ गवां तत्र पुरीषेण त्रिकालं स्नानमाचरेत् ॥ दधि क्षीरं घृतं पीत्वा
कृमिदष्टो विशुध्यति ॥ ५५ ॥ अथ नाभ्याः प्रदष्टस्य आपादाद्विनतात्मज ॥ एतद्विनिर्दिशेत्प्राज्ञः प्रायश्चित्तं खगाधिप ॥ ५६ ॥ नाभिकण्ठां
तरे वीर यदा चोत्पद्यते कृमिः ॥ षड्रात्रं तु तदा प्रोक्तं प्रायश्चित्तं मनीषिभिः ॥ ५७ ॥ यदा दशंति शिरसि कृमयो विनतात्मज ॥ कृच्छ्रं तदा
चरेत्प्राज्ञः शुद्धये कश्यपात्मज ॥ ५८ ॥ मृतान्नं मधु मांसं च यस्तु भुञ्जीत ब्राह्मणः ॥ स त्रीण्यहान्युपवसेदेकाहं चोदके वसेत् ॥ ५९ ॥ ॥
इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पेऽनूर्वादित्यसंवादे ब्राह्मणधर्मवर्णनं नाम चतुरशीत्युत्तरशततमोऽध्यायः ॥ १८४ ॥ ॥ छ ॥

---

[1] दर्शनमित्यर्थः, भावे निष्ठाविधानात् । [2] तयेति शेषः ।

॥ ॥ आदित्य उवाच ॥ ॥ रात्रौ श्राद्धं न कुर्वीत राक्षसी कीर्तिता हि सा ॥ सन्ध्ययोरुभयोर्वीर सूर्यें चैव तिरोहिते ॥१॥ अकृत्वा मातृयज्ञं तु
यः श्राद्धं परिवेषयेत् ॥ तातस्य क्रोधसंयुक्तां हिंसामिच्छंति दारुणाम् ॥२॥ ॥ अनूरुरुवाच ॥ ॥मातृश्राद्धं कथं कार्यं काश्च ता मातरः स्मृताः॥
नांदीमुखाश्च पितरः कथं पूजामवाप्नुयुः ॥ ३ ॥ ॥ आदित्य उवाच ॥ ॥ हन्त ते सम्प्रवक्ष्यामि मातृश्राद्धविधिं खग ॥ शृणु त्वं खगशार्दूल
गदतो मम कृत्स्नशः ॥४॥ पूर्वाह्णे भोजयेद्विप्रानष्टौ सर्वान्प्रदक्षिणान् ॥ तथान्यं नवमं विप्रं चतुरश्च खगाधिप ॥ ५ ॥ ऋजून्वै कुतपान्दत्त्वा
सत्येन विधिवत्खग ॥ कृत्वा यवैस्तिलार्थं तु दधिमिश्रं क्रमेण च ॥६॥ गन्धपुष्पादिकं सर्वं कुर्याद्विप्रप्रदक्षिणम् ॥ ब्राह्मणेभ्यस्ततो दद्यान्मधुरं
भोजनं खग ॥ ७ ॥ गुडमिश्रं खगश्रेष्ठ सवस्त्रमोदनं परम् ॥ रसानां मोदकांश्चैव न च तान्कटुकांस्तथा ॥ ८ ॥ एवं भुक्तेषु विप्रेषु दद्यात्पिंडा
न्त्समाहितः ॥ दध्यक्षतविमिश्रांस्तु बदरैश्च खगाधिप ॥ ९ ॥ कृत्वा तु मंडपं वीर चतुरस्त्रं प्रदक्षिणम् ॥ पूर्वाग्रांश्च कुशान्दत्त्वा पुष्पाणां प्रकरं
तथा ॥ १० ॥ सव्येन पाणिना वीर विधिवत्खगसत्तम ॥ मात्रे प्रमात्रे तन्मात्रे निर्वपेत्पूर्वतोमुखः ॥ ११ ॥ पितुर्मात्रे तु तन्मात्रे निर्वपेद्विधिव
त्खग ॥ वृद्धायै प्रपितामह्यै तथान्यं निर्वपेद्बुधः ॥ १२ ॥ एवमुद्दिश्य वै मातॄः षट् पिंडान्निर्वपेत्खग ॥ अष्टाशयेद्द्विजान्वीर मातृश्राद्धे खगा
धिप ॥ नवमं सर्वदैवत्यं भोजयेद्विधिवत्खग ॥ १३ ॥ नांदीमुखांस्तानुद्दिश्य पितॄन्पंच द्विजोत्तमान् ॥ भोजयेद्विधिवच्छ्राद्धे वृद्धिश्राद्धे
प्रदक्षिणम् ॥ १४ ॥ इत्थं श्राद्धद्वयं कुर्याद्वृद्धौ कश्यपनंदन ॥ तथान्यमपि ते वच्मि परं श्राद्धविधिं:तव ॥ १५ ॥ अथैवं भोजयेच्छ्राद्धे तत्पूर्वं तु
प्रवर्तयेत्॥अन्यथा तत्र लुंपंति सदेवासुरमानुषाः ॥१६॥ अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेत्॥यो ह्यग्निः स द्विजो वीन्द्रं मंत्रदर्शिभिरुच्यते॥
॥ १७ ॥ पूर्वं पात्रे यदन्नं च यच्चान्नमुपकल्पितम् ॥ तेनैव सह भोक्तव्यं पृथग्भावो न विद्यते ॥१८॥ द्वौ दैवेऽथर्वणौ विप्रौ प्राङ्मुखावुपवेशयेत्॥
पित्र्ये त्रीनुदगास्यांश्च वृद्धौ चाध्वर्युसंगमान् ॥ १९ ॥ त्रीणि श्राद्धे पवित्राणि दौहित्रः कुतुपास्तिलाः ॥ त्रीणि चात्र प्रशंसंति शौचमक्रोधमत्व
रम् ॥ २० ॥ दौहित्रं खंडमित्युक्तं ललाटाय प्रजापते ॥ तत्र शृंगस्य यत्पात्रं तद्दौहित्रमिति स्मृतम् ॥ २१ ॥ सव्यादंसात्परिभ्रष्टं नाभिदेशे व्यव
स्थितम् ॥ एकवस्त्रं तु तं विद्याद्दैवे पित्र्ये च वर्जयेत् ॥ २२ ॥ पितृदेवमनुष्याणां पूजनं भोजनं तथा ॥ नोत्तरीयं विना कार्यं कृतं स्यान्निष्फलं
यतः ॥ २३ ॥ परिधानकृते स्कंधे गृहस्थो योऽर्चयेत्पितॄन् ॥ न स तत्फलमाप्नोति यथा योगपटावृतः ॥ २४ ॥ वनस्थानां खगश्रेष्ठ यतीनां च

---

१ पक्षिराजत्वं न केवलं गरुडस्यैव, अरुणस्याप्यस्ति । अत एव ‘एवाद्विनिर्दिशेत्प्राज्ञः प्रायश्चित्तं खगाधिप,इति चतुरशीत्युत्तरशततमेऽध्याये चतुष्पञ्चाशत्तमे श्लोक उक्तं संगच्छते । तेन गरुड एव पक्षिराज इवि न भ्रमितव्यम्।

महामते ॥ सिद्धये कर्मणां वीर योगपट्टकमुच्यते ॥ २५ ॥ हस्तौ प्रक्षाल्य गंडूषं यः पिबेदविचक्षणः ॥ स तु दैवं च पित्र्यं च आत्मानं चोपघातयेत् ॥ २६ ॥ भोजनेष्वेव तिष्ठंति स्वस्ति कुर्वंति ये द्विजाः ॥ आसुरं तद्भवेच्छ्राद्धं पितॄणां नोपतिष्ठते ॥ २७ ॥ दातारो नोभिवर्धंतां वेदाः संततिरेव च॥ श्रद्धा च नो मा व्यगमद्बहुदेयं च नोऽस्त्विति ॥२८॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मे अरुणादित्यसंवादे मातृश्राद्धविधिवर्णनं नाम पंचाशीत्युत्तरशततमोऽध्यायः ॥ १८५ ॥ छ ॥

भास्कर उवाच ॥ ॥ श्रावण्यां तु बलिः कार्यः सर्पाणां मंत्रपूर्वकः ॥ शयनारोहणे चैव कार्ये सुखमभीप्सता ॥ १ ॥ कार्यः प्रत्यवरोहस्तु मार्गशीर्ष्यां न संशयः ॥ फलं विना त्वनुष्ठानं नित्यानामिष्यते स्फुटम् ॥ २ ॥ काम्यानां सफलार्थं तु दोषप्राप्त्यर्थमेव च ॥ नैमित्तिकानां करणं त्रिविधं कर्मणां फलम् ॥ ३ ॥ फलं केचिदुपात्तस्य दुरितस्य प्रचक्षते ॥ अनुत्पत्तिं तथा चान्ये प्रत्येत्याभ्युपमंत्र्य च ॥ ४ ॥ नित्यक्रियं तथा चान्ये अनुषंगात्फलं श्रुतिः ॥ अग्न्याधेयं तथा दर्शं पौर्णमासं द्वितीयकम् ॥ ५ ॥ चातुर्मास्यमग्निहोत्रं पशुबंधो निरूढकाः ॥ सौत्रामणी च संस्थाः स्युर्हविषः श्रुतिनोदिताः ॥ ६ ॥ अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः संषोडशी तथा ॥ वाजपेयातिरात्रश्च आप्तोर्यामः श्रुतौ श्रुतः ॥ ७ ॥ दया स्यात्सर्वभूतेषु अनसूयाथ मंगलम् ॥ क्षांतिर्दया त्वनायासः शौचमस्पृहता व्रतम् ॥ ८ ॥ सम्यगुक्तास्तु संस्कारा ब्रह्मप्राप्तिनिमित्तकाः ॥ अनंतरं प्रवक्ष्यामि विप्राणां वृत्तयः शुभाः ॥ ९ ॥ ऋतामृते च विप्राणामृतं प्रमृतमेव च ॥ प्रतिग्रहवणिज्यादि श्रेयसी नोत्तरोत्तरा ॥ १० ॥ आजीविकावृत्तयस्तु इत्याद्याः संप्रवर्तिताः ॥ तासां कयापि जीवेत्तु अनुतिष्ठेद्यथाविधि ॥ ११ ॥ नित्यं शुचिः सुगंधश्च स्नानशीलः प्रियंवदः ॥ पूज्यश्च पूजयेद्देवान्कार्याणि स्वयमाचरेत् ॥ १२ ॥ नेक्षेतार्कं न नग्नां स्त्रीं न च संस्पृष्टमैथुनम् ॥ नाप्सु मूत्रं पुरीषं वा नाशुची रात्रितारकाः ॥ १३ ॥ शास्त्रोक्ता यंत्रणा या तु नानुक्तानि व्रतानि च ॥ स्वर्गार्थं साधयेत्तैश्च शक्तिमान्मनसा तथा ॥१४॥ नित्यानि केचिदिच्छंति काम्यानि च तथापरे ॥ काम्याप्रवृत्तौ संगे च प्रायश्चित्तं विधीयते ॥१५॥ व्रतानि मनसा त्विष्टसंकल्प इति मानसः ॥ अंतरानुफलं यत्तद्दृषिवादाः प्रकीर्तिताः ॥१६॥ अनध्यायं स्वयं सम्यग्वर्जयेत्फलसाधनम् ॥ आत्मा शुद्धस्तथा देशो ह्यसुहारः प्रजापदः ॥ १७ ॥ अशुभानि निमित्तानि उत्पातो विकृतं तथा ॥ पर्वाणि मनसोऽशुद्धिरनध्याय इति स्मृतः ॥१८॥ अनध्यायाश्च दृष्टार्था अदृष्टार्थास्तथापरे ॥ वेदाध्ययनमेवेति त्रिधा मद्ध्यानदर्शनम् ॥१९॥ अभक्ष्यं सर्ववर्णानां शावाशौचं खगाधिप ॥ द्रव्यशुद्धिस्तथैव स्यादन्यथा त्वसमंजसम् ॥२०॥ जातिदुष्टं क्रियादुष्टं कालदुष्टं विभूषितम्॥संसर्गाश्रयदुष्टं च सहृल्लेखं स्वभावतः ॥२१॥ लशुनं गृंजनं

चैव पलांडुं कवकानि च ॥ वार्ताकं नालिकेरं तु मूलकं जातिदुष्टकम् ॥२२॥नो भुञ्जीत क्रियादुष्टं दुष्टं च पतितैः पृथक्॥कालदुष्टं तु विज्ञेयं हानिदं चिरसंस्थितम् ॥२३॥ दधिभक्ष्यविकाराश्च मधुवर्ज्यास्तदिष्यते ॥२४॥ सुरालशुनसंस्पृष्टं पेयूषादिसमन्वितम् ॥ संसर्गदुष्टमेतद्धि शुनोच्छिष्टं खगेश्वर॥२५॥ शूद्रसक्तं खंडसक्तं ज्ञेयमाश्रयदूषितम्॥विचिकित्सा तु हृदये भक्ष्ये यस्मिन्त्सुजायते॥२६॥सहृल्लेखं तु तज्ज्ञेयं पुरीषं तु स्वभावतः ॥ रसदुष्टे विकारोऽपि रसस्येति प्रदर्शितः॥२७॥पायसं क्षीरपाकादि तस्मिन्नेव दिने तथा॥यथाशास्त्रं खगश्रेष्ठ भक्ष्याभक्ष्ये निरूपयेत् ॥२८॥ प्राणात्यये प्रोक्षितं च श्राद्धे च द्विजकाम्यया ॥ पितॄन्देवांश्चार्पयित्वा भुंजन्मांसं न दोषभाक्॥२९॥ प्रेताशुद्धिः सपिंडानां तस्मिन्नेव मृते सति॥दशाहं द्वादशाहं वा पक्षं मासं त्वशुद्धता ॥ ३० ॥ दशाहादित्रिके भागे वर्णशो न भवंति हि ॥ दशाहेन तु भोज्याः स्युः सूतकाशौचयोस्तथा ॥ ३१॥ ऊर्ध्वं दशाहादेकाहश्रवणे सति जायते ॥ संवत्सरे व्यतीते तु स्नानादेव विशुध्यति ॥ ३२ ॥ समानोदकता प्रोक्ता जन्मनाम्नोरपर्यये ॥ सपिंडाः सप्त पुरुषाः श्रुतावेतन्निदर्शनम् ॥ ३३ ॥ आ दंतजन्मनः सद्य आचूडान्नैष्ठिकी स्मृता ॥ त्रिरात्रमाव्रतादेशात्सपिंडेषु मृतेषु च ॥ ३४ ॥ तेषामपि तदेकं स्याद्वयोवस्थाप्यपेक्ष्यते ॥ समानोदकास्त्रिरात्रेण शुध्येद्वै मृत्युजन्मनोः ॥ ३५ ॥ गर्भस्रावे त्रिरात्रेण उदक्या शुध्यते तथा ॥ अनंतजन्ममरणे तच्छेषेण विशुध्यति ॥ ३६ ॥ द्विजानां त्वेवमेव स्यात्पित्रर्थं मातुरेव वा ॥ अग्निहोत्रार्थं विज्ञेयं सद्यः शौचमिति स्थितिः ॥३७॥ असपिंडे तु निर्हारात्त्रिरात्रमपि मानवः ॥ तस्यैवानुगतौ ज्ञेयं सद्यः शौचं खगाधिप ॥ ३८ ॥ शुध्येद्द्विजो दशाहेन जन्महानौ द्वियोनिषु ॥ षड्भिस्त्रिभिरहैकेन क्षत्रविट्शूद्रयोनिषु ॥ ३९ ॥ उक्तशौचं यथान्यायं शारीरं तत्त्वदर्शिभिः ॥ द्रव्यशुद्धिविधानं तु यथावदभिधीयते ॥ ४० ॥ तैजसी मार्तिकी वीर वारिशुद्धिः स्मृता तथा ॥ निर्लेपक्षालने नैव स्पर्शे तु प्रोक्षणेन वै ॥ ४१ ॥ अशुद्धं नैव किंचिद्धि द्रव्यमस्तीति खेचर ॥ वचनाच्छुद्धयशुद्धी तु द्रव्याणामिह खेचर ॥ ४२ ॥ स्नानं शौचं च कर्तव्यं द्रव्यशौचादनंतरम् ॥ प्रातःस्नानं तु नित्यं स्याद्ग्रहणे काम्यमेव च ॥ ४३ ॥ नैमित्तिकं क्षुराशौचं तेन पापाद्विशुध्यति ॥ उक्तं तु शौचं विज्ञेयं दोषक्षयकरं खग ॥ ४४ ॥ कर्मांगं चेति विज्ञेयं षट्प्रकाराः समासतः ॥ एवमाचमनं विद्याद्विशिष्टं तु द्विजन्मनाम् ॥४५॥ तदा मृतानां तद्वत्स्यादन्येषां तु यथासुखम् ॥ कन्यानिवृत्तिं पुत्रैस्तु यथान्यायं समाचरेत् ॥ ४६ ॥ कलाशिल्पानि सर्वाणि गृह्णीयात्परितुष्टये ॥ ४७ ॥ शुश्रूषेत पतिं भार्या परितोषं यथा व्रजेत् ॥ गुरूणां परितोषश्च धर्मः स्त्रीणां सनातनः॥४८॥

वृद्धाऽपुत्रा यदि मृता तदभावे नृपस्य तु ॥ मृतापत्याप्यगर्भा च वृद्धापत्या पतिव्रता ॥ ४९ ॥ कुर्यादनिर्वृतं भर्तुर्गते सन्निहितेपि वा ॥ एतां धर्मं समां निष्ठां भर्तृलोकमवाप्नुयात् ॥५०॥ स्त्री धर्मचारिणी साध्वी मृता दाह्या तथाग्निभिः ॥ विपरीताददाह्या तु पुनर्दारक्रिया तथा ॥५१॥ स्त्रीणां नियोगो विहितो मरणाद्ब्रह्मचारकम् ॥ प्राप्तव्यश्च यथाधर्मो दृष्टादृष्टफलप्रदः ॥ ५२ ॥ तस्माद्धर्मं सदा कुर्यात्कुर्वती स्वर्गमाप्नुयात् ॥ ५३ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मेषु शुद्धिप्रकरणवर्णनं नाम षडशीत्युत्तरशततमोऽध्यायः ॥ १८६ ॥ छ ॥ ॥ अनूरुरुवाच ॥ ॥ कानि पुण्यानि कृत्वेह स्वर्गं गच्छंति मानवाः ॥ मनुष्यलोके संभूताः स्वर्लोके गामिनः परम् ॥१॥ कर्मयज्ञस्तपोयज्ञः स्वाध्यायो ध्याननिर्मितः ॥ ज्ञानयज्ञश्च पंचैते महायज्ञाः प्रकीर्तिताः ॥ २ ॥ एतेषामेव यज्ञानामुत्तमः कतमः स्मृतः ॥ एतद्यज्ञफलानां च किं फलं का गतिर्भवेत् ॥३॥ धर्माधर्मप्रभेदाश्च कियन्तः परिकीर्तिताः ॥ तत्साधनानि कतिधा गतयश्च यथा वद ॥४॥ खग नारकिणां पुंसामागतानां पुनः क्षितौ ॥ कानि चिह्नानि जायन्ते भुक्तशेषेण कर्मणा ॥ ५ ॥ महाभवार्णवाद्घोराद्धर्माधर्माभिसंकुलात् ॥ गर्भादिदुःखफेनाढ्यान्मुच्यंते देहिनः कथम् ॥ ॥ ६ ॥ इत्युक्तो भगवान्भानुः सर्वप्रश्नार्थमादरात् ॥ प्रत्युवाच महातेजाः समासव्यासयोगतः ॥ ७ ॥ ॥ आदित्य उवाच ॥ ॥ स्वर्गापवर्गफलदं नरकार्णवतारणम् ॥ धर्मं पापहरं पुण्यं शृणु शूर प्रभाषतः ॥ ८ ॥ श्रद्धापूर्वः सदा धर्मः श्रद्धामध्यांतसंस्थितः ॥ श्रद्धानिष्ठप्रतिष्ठश्च धर्मः श्रद्धा प्रकीर्तिता ॥ ९ ॥ श्रुतिमंत्ररसाः सूक्ष्माः प्रधानपुरुषेश्वरः ॥ श्रद्धामात्रेण गृह्यंते न परेण च चक्षुषा ॥ १० ॥ कायक्लेशैर्न बहुभिर्न चैवार्थस्य राशिभिः ॥ धर्मः संप्राप्यते सूक्ष्मः श्रद्धाहीनैः सुरैरपि ॥ ११ ॥ श्रद्धा धर्मः परः सूक्ष्मः श्रद्धा यज्ञाहुतं तपः ॥ श्रद्धा मोक्षश्च स्वर्गश्च श्रद्धा सर्वमिदं जगत् ॥ १२ ॥ सर्वस्वं जीवितं वापि दद्यादश्रद्धया च यः ॥ नाप्नुयात्स फलं किंचित्तस्माच्छ्रद्धापरो भवेत् ॥ १३ ॥ एवं श्रद्धामयाः सर्वे मम धर्माः प्रकीर्तिताः ॥ पूज्यस्तु श्रद्धया पुंसा ध्येयः पूज्यश्च श्रद्धया ॥ १४ ॥ अधिकारस्य प्राप्त्यर्थं महासारविमुक्तिदम् ॥ अज्ञादुक्तं ससंदिग्धं वाक्यमेतन्ममाद्भुतम् ॥ १५ ॥ नानासिद्धिकरं दिव्यं लोकचित्तानुरंजनम् ॥ सुनिश्चितार्थगंभीरं वाक्यं मम मनोरमम् ॥ १६ ॥ मन्मानससमुद्रो हि द्विपदोयं विदुर्बुधाः ॥ स खषोल्केति विख्यातः सशिवं मंडलं खग ॥ १७ ॥ देवत्रयगुणातीतः सर्वज्ञः सर्ववित्प्रभुः ॥ ओमित्येकाक्षरे मंत्रे स्थितः स परमो मम ॥१८॥ यथानादिप्रवृत्तोयं घोरः संसारसागरः ॥ खषोल्कोपि तथानादिः संसारार्णवशोधनः ॥१९॥ व्याधीनां भेषजं यद्वत्प्रतिपक्षस्वभावतः ॥ मोक्षिणां मुक्तिहेतुश्च सिद्धः सर्वार्थसाधकः ॥ २० ॥ ममाभिधानमन्त्रोयमभिधेयः सदा स्मृतः ॥ अभिधानाभिधेयोहं मन्त्र

सिद्धोऽस्मि खेचर ॥ २१ ॥ वेदो मनोगमे चात्र षडक्षरमंत्रस्थितः ॥ यद्वा मुक्तोऽक्षरैकेन लोके पञ्चाक्षरः स्मृतः ॥ २२ ॥ किं तस्य बहुभिर्मन्त्रैः शास्त्रैर्वा बहुविस्तरैः ॥ यस्यों नमः खषोल्केति मन्त्रोऽयं हृदि संस्थितः ॥ २३ ॥ तेनाधीतं श्रुतं तेन तेन सर्वमनुष्ठितम् ॥ येनों नमः खषोल्केति मम वाक्यं षडक्षरम् ॥ २४ ॥ विधिवाक्यमिदं सर्वं नार्थवादं वचो मम ॥ एतत्ते वक्ष्यतेऽशेषं मम वाक्यार्थमुत्तमम् ॥ पृच्छस्वेमं प्रणम्याशु वैनतेय महामते ॥ २५ ॥ ॥ सुमन्तुरुवाच ॥ ॥ श्रुत्वा तु वचनं भानो र्वैनतेयो महाबलः ॥ सप्ताश्वतिलकं भक्त्या प्रणम्योवाच भारत ॥ २६ ॥ ॥ अनूरुरुवाच ॥ ॥ ब्रूहि मां देवशार्दूल यत्पृच्छामि महामते ॥ कीदृग्वाक्यमिदं भानोर्वाक्यार्थं ब्रूहि च प्रभो ॥ २७ ॥ ॥ ॥ सप्ताश्वतिलक उवाच ॥ ॥ विमुक्ताशेषदोषेण सर्वज्ञेन भगेन यत् ॥ प्रणीतममलं वाक्यं तत्प्रमाणं न संशयः ॥ २८ ॥ यस्मान्मार्तंडनामासौ कथ्यते च मनीषिभिः ॥ यथार्थं पुण्यमाप्नोति पतत्यश्रद्धया त्वधः ॥ २९ ॥ सौरवाक्यप्रवक्तारं सूरवत्पूजयेद्गुरुम् ॥ संसारार्णवनिर्मग्नं यः समुद्धरते जनम् ॥ ३० ॥ सौरधर्माम्बुहस्तेन कस्तेन सदृशो गुरुः ॥ अज्ञानवह्निसंतप्तं निर्वापयति यः शनैः ॥ ज्ञानामृतेन वै भक्तान्कस्तं न प्रतिपूजयेत् ॥ ३१ ॥ नैव राज्येन महता न चैवार्थस्य राशिभिः ॥ प्राप्तमज्ञानशमनं परलोके सुखावहम् ॥ ३२ ॥ स्वर्गापवर्गसिद्ध्यर्थं भाषितं यत्तु शोभनम् ॥ वाक्यं ते देवदेवेन तद्विज्ञेयं सुभाषितम् ॥ ३३ ॥ रागद्वेषाक्षमाक्रोधकामतृष्णानुसारिणाम् ॥ वाक्यं निरयहेतुत्वात्तद्दुर्भाषितमुच्यते ॥ ३४ ॥ संस्कृतेनापि किं तेन मृदुलालापसंगिना ॥ अविद्यारामवाक्येन संसारक्लेशहेतुना ॥ ३५ ॥ यच्छ्रुत्वा जायते पुण्यं रागादीनां च संक्षयः ॥ विरूपमपि तद्वाक्यं विज्ञेयमतिशोभनम् ॥ ३६ ॥ स्मृतयो भारतं वेदाः शास्त्राणि सुमहांति च ॥ स्वायुषः क्षपणायैव धर्मोऽर्थसमग्रन्थितः ॥ ३७ ॥ पुत्रदारादिसंसारे नराणां मूढचेतसाम् ॥ संसारविदुषां शास्त्रमनादि मुखनिर्गतम् ॥ ३८ ॥ इदं श्रेष्ठमिदं ज्ञेयं सर्वं त्वं ज्ञातुमिच्छसि ॥ अपि वर्षसहस्रायुः शास्त्रान्तं नाधिगच्छति ॥ ३९ ॥ विज्ञायाक्षरतन्मात्रं जीवितं चातिवंचनम् ॥ विहाय सर्वशास्त्राणि परलोकं समाचरेत् ॥ ४० ॥ पण्डितेनापि किं तेन समर्थेन च देहिनाम् ॥ यः पुण्यभारमुद्वोढुमशक्तः पारलौकिकम् ॥ ४१ ॥ पण्डितोऽपि स मूर्खः स्याच्छक्तियुक्तोऽप्यशक्तिकः ॥ यः सौरज्ञानमाहात्म्यमुच्चारयितुमक्षमः ॥ ४२ ॥ तस्मात्स पंडितः शक्तः स तपस्वी जितेन्द्रियः ॥ यः सौरज्ञानसद्भावमालोचयितुमुद्यतः ॥ ४३ ॥ यः प्रदद्यान्नृपः कृत्स्नां क्ष्मां धनं कांचनं तथा ॥ सर्वमन्यायतः पृच्छेन्न तस्योपदिशेद्गुरुः ॥ ४४ ॥ यः शृणोति रवेर्धर्मं न्यायतः स च वक्ति च ॥ ततो गच्छति सुस्थानं नरकं तद्विपर्यये ॥ ४५ ॥ दत्तगोदोहसंभूतः षडक्षर

विधानतः ॥ रविः संपूजितः शीघ्रं नराणां तुल्यता भृशम् ॥ ४६ ॥ सुरासुरैर्मथ्यमानात्क्षीरोदात्सागरात्पुरा ॥ पञ्च गावः समुत्पन्नाः सर्वलो
कस्य मातरः ॥ ४७ ॥ नंदा सुभद्रा सुरभी सुमना शोभनावती ॥ गावः सूर्यसमा भासा उत्पन्नाः कृतिमागताः ॥ ४८ ॥ सर्वलोकोपकारार्थं
देवानां तर्पणाय च ॥ मामाश्रित्य स्थिता गावः स्नानार्थं भास्करस्य तु ॥ ४९ ॥ तासामंगानि पुण्यानि षड्रसाः खगसत्तम ;॥ खगादिषु च
सर्वेषु स्थिराणीत्युपधारय ॥ ५० ॥ गोमयं रोचनं मूत्रं क्षीरं दधि घृतं गवाम् ॥ षडंगानि पवित्राणि सर्वसिद्धिकराणि च ॥ ५१ ॥ गोमया
दुत्थितः श्रीमान्बिल्ववृक्षोऽर्कवल्लभः ॥ तत्रास्ते पद्महस्ता श्रीर्वृक्षस्तेन च स स्मृतः ॥ ५२ ॥ पंकान्युत्पलपद्मानि पुनर्जातानि गोमयात् ॥
गोरोचनं च मंगल्यं पवित्रं सर्वकामदम् ॥ ५३ ॥ गोमूत्राद्गुग्गुलुर्जातः सुगंधिः प्रियदर्शनः ॥ आहारः सर्वदेवानां भास्करस्य विशेषतः ॥ ५४ ॥
यद्बीजं जगतः किंचित्तज्ज्ञेयं क्षीरसंभवम् ॥ दध्नः सर्वाणि जातानि मांगल्यान्यर्थसिद्धये ॥ ५५ ॥ घृतादमृतमुत्पन्नममराणामतिप्रियम् ॥ तस्मा
द्घृतेन पयसा दध्ना यः स्नापयेद्रविम् ॥ ५६ ॥ तदंते चोष्णतोयेन कषायैश्च निरूपयेत् ॥ स्नाप्य शीतांबुना पश्चाद्भानुं रोचनयालभेत् ॥ ५७ ॥
पूजयेद्बिल्वपत्रैश्च पद्मैर्नीलोत्पलैस्तथा ॥ अर्घ्यं दद्यात्ततः पश्चात्सवज्रं गुग्गुलं खग ॥ ५८ ॥ पायसं दधिभक्तं च वज्रं च मधुना सह ॥ निवेदयेच्च
सद्भक्त्या भक्ष्याणि विविधानि च ॥ ५९ ॥ कृत्वा प्रदक्षिणं पश्चात्प्रणिपत्य क्षमापयेत् ॥ अनेन विधिना भानुं षडंगेन दिवस्पतिम् ॥ ६० ॥
इह लोके परे चैव सर्वान्कामान्त्स गच्छति ॥ षडंगविधिना तं चापूज्यैवं सुमना रविम् ॥ ६१ ॥ स्वर्गं नयेत्सधीमांस्तु कुलानामेकविंशतिम् ॥
स्वर्गे स्थाप्य स्वयं गच्छेज्ज्यौतिषं नाम तत्पदम् ॥ ६२ ॥ अंशेन भोजका वीर देवकार्ये नियोजिताः ॥ प्रयांति स्वामिना सार्धं श्रीमद्भानुं
परं महः ॥ ६३ ॥ भुक्त्वा भोगांस्तु विपुलान्भोजको भोगसंमितः ॥ कालात्पुनरिहायातः पृथिव्यामेकराड्भवेत् ॥ ६४ ॥ पुष्पं
पत्रं फलं तोयं यद्दत्तं भास्करार्चने ॥ सौरा गावश्च गच्छंति सूर्यलोकं न संशयः ॥ ६५ ॥ यः पिबेद्भोजने धेनोरदत्ताभानवे पयः ॥ स गच्छेन्न
रकं घोरमकुर्वंस्तर्पणं रवेः ॥ ६६ ॥ एककालं पिबेत्क्षीरं धेनूनां भास्करस्य तु ॥ अनेन स्नापयेद्देवं क्षीरेण खगसत्तम ॥ ६७ ॥ प्रत्यूषे
यद्भवेत्क्षीरं धेनूनां भास्करस्य तु ॥ स्नापयेत्तेन वै भानुं कृत्स्नेन गरुडाग्रज ॥ ६८ ॥ यस्तु लोको भजेत्सर्वं न देवाय निवेदयेत् ॥ यावन्तो
रोमकूपाश्च गवां देहे खगाधिप ॥ तावद्वर्षसहस्राणि नरके पच्यते खग ॥ ६९ ॥ पूजितं पूज्यमानं वा यः कश्चिच्छृणुयाद्रविम् ॥ श्रुत्वानुमोदते
यस्तु स यज्ञफलमश्नुते ॥ ७० ॥ भास्करं पूजितं दृष्ट्वा सर्वपापैः प्रमुच्यते ॥ हर्षात्प्रणम्य वै भानुं तस्य लोके महीयते ॥ ७१ ॥ पूज्यमानं रविं

भक्त्या यः पश्येन्मानवः खग ॥ सोऽपि यज्ञफलं कृत्स्नं प्राप्नुयान्नात्र संशयः ॥ ७२ ॥ श्रुत्वानुमोदते यस्तु पूज्यमानं दिवाकरम् ॥ तत्सर्वं फल
माप्नोति प्रसादाद्भास्करस्य तु ॥ ७३ ॥ एकजन्मानुगं दानं भक्त्या यच्च निवेदितम् ॥ जपयज्ञाद्वियुक्तेभ्यः सहस्रभविकं स्मृतम् ॥ आभूतसंप्लव
स्थायि प्रदानं जपजीविनाम् ॥ ७४ ॥ अत्यल्पमपि यद्दत्तं वाचकाय खगाधिप ॥ तन्महाप्रलयं यावद्दातुर्भोगाय कल्पते ॥ ७५ ॥ न दानमल्पं
बहुधा किंचिदस्ति विजानताम् ॥ देशकालविधिश्रद्धापात्रयुक्तं तदक्षयम् ॥ ७६ ॥ पात्रे देशे च काले च विधिना श्रद्धया च यत् ॥ दत्तं हुतं
कृतं चैव तदनंतफलं भवेत् ॥ ७७ ॥ तिलार्धमपि यद्वीर दीयते श्रद्धया द्विज ॥ सत्पात्रे विधिवद्भक्त्या तद्भवेत्सर्वकामिकम् ॥ ७८ ॥ यत्स्नातं
ज्ञानसलिलैः शीलभस्मप्रमार्जितम् ॥ तत्पात्रं सर्वपात्रेभ्य उत्तमं परिकीर्तितम् ॥ ७९ ॥ जपो दमो यमः पुंसां त्राता संसारसागरात् ॥ अज्ञानां
पापनेत्राणां तत्पात्रं परमं स्मृतम् ॥ ८० ॥ ज्ञानप्लवेन चोपेतं शास्त्रं पापमहार्णवात् ॥ अज्ञान्संतारयेन्नूनं किं शिला तारयेच्छिलाम् ॥ ८१ ॥
द्विजानां वेदविदुषां कटिसंभोगि यत्फलम् ॥ हंतकारप्रदानेन तत्फलं जपजीविने ॥ ८२ ॥ जीवो यस्यैत्य गृहे च भुङ्क्ते सत्कृतिसत्कृतः ॥ कुल
मुत्तारयेत्तस्य नरकार्णवसंस्थितम् ॥ ८३ ॥ यज्ञाग्निहोमतीर्थेषु यत्फलं परिकीर्तितम् ॥ जपिनामन्नदानेन तत्समग्रं फलं लभेत् ॥ ८४ ॥ भोजिने
शांतचित्ताय परिध्यानरताय च ॥ श्रद्धयान्नं सकृद्दत्त्वा सर्वपापैः प्रमुच्यते ॥ ८५ ॥ जपकाञ्छांतिसंयुक्तानादित्यार्पितचेतसः ॥ भोजयित्वा सकृ
द्भक्त्या सर्वान्कामानवाप्नुयात् ॥ ८६ ॥ ध्यायमानो रवेः सूक्तं भोजयेत्सततं च यः ॥ ततः साक्षादनेनैव तद्भुक्तमशनं भवेत् ॥ ८७ ॥ पितॄनु
दिश्य यः श्राद्धे भोजयेद्भोजकं नरः ॥ सः स्थानं समवाप्नोति भानवीयमसंशयः ॥ ८८ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे
सौरधर्मे धेनुमाहात्म्यवर्णनं नाम सप्ताशीत्यधिकशततमोऽध्यायः ॥ १८७ ॥ छ ॥ ॥ सप्ताश्व उवाच ॥ ॥ सूर्याय सर्वपाकान्नं निवेद्याग्नौ
च होमयेत् ॥ हुत्वाग्नौ प्रक्षिपेद्वीर बलिं दिक्षु समंततः ॥ १ ॥ सूर्याग्निगुरुविप्राणां सर्वपाकान्नमन्वहम् ॥ योऽनिवेद्य[1]ात्मना भुंक्ते स भुंक्ते किल्बिषं
नरः ॥ २ ॥ कृषिपाल्ये च वाणिज्ये क्रोधसत्यक्षयादिभिः ॥ पुंसां पापानि वर्धंते सूनादोषैश्च पंचभिः ॥ ३ ॥ कंडनी पेषणी चुल्ली उदकुंभः
प्रमार्जनी ॥ पंच सूना गृहस्थस्य तेन स्वर्गं न गच्छति ॥ ४ ॥ सूर्याग्निगुरुपूजाभिः पापैरेतैर्न लिप्यते ॥ अन्यैश्च पातकैर्घोरैस्तस्मात्संपूजये
त्सदा ॥ ५ ॥ सूर्याग्निगुरुनैवेद्यं यावत्स्यादन्नसंख्यया ॥ तावद्वर्षसहस्राणि दाता सूर्यपुरे वसेत् ॥ ६ ॥ घृतपूपयुतैः सिक्तैः पुण्यं दशगुणोत्तरम् ॥

---

[1] नञ्पूर्वेकाल्ल्यबार्षः ।

अवदंशगुणैर्युक्तं पुण्यं शतगुणं खग ॥ ७ ॥ षष्टिकौदननैवेद्यं सहस्रगुणितं फलम् ॥ सुगंधशालिनैवेद्यं विज्ञेयमयुतोत्तरम् ॥ ८ ॥ भक्ष्यान्नपानदा
नानि तत्फलानि तथातथा ॥ यद्वा तद्वा सदा देयं सूर्याग्निगुरुसाधुषु ॥ भक्ष्यं निवेद्य पूर्वोक्तमक्षयं लभते फलम् ॥ ९ ॥ एवं यः कुरुते भक्तिं देव
देवे दिवाकरे ॥ स पितॄन्त्सर्वपापेभ्यः समुद्धृत्य दिवं नयेत् ॥ १० ॥ गंगास्नानमिदं पुण्यं दर्शनात्प्राप्नुयाद्रवेः ॥ सर्वतीर्थाभिषेकं च प्रणामाद्विंदते
खग ॥ ११ ॥ मुच्यते सर्वपापेभ्यः प्रणम्य शिरसा रविम् ॥ शुश्रूषेत च संध्यायां सूर्यलोके महीयते ॥ १२ ॥ युगपत्पूजितास्तेन ब्रह्मविष्णु
महेश्वराः ॥ पितरः सर्वदेवाश्च भवेयुः पूजिता रवौ ॥ १३ ॥ तुष्यंति पितरस्तस्य सुकृष्टेनेव कर्षुकाः ॥ यः श्राद्धे भोजयेद्भक्त्या ब्राह्मणं जपजीवि
नम् ॥ १४ ॥ अपि नः स कुले कंचिदुद्धरेत्किं खगेश्वर ॥ यः संपूज्य रविं श्राद्धे भोजयेज्जपजीविनम् ॥ १५ ॥ तृप्यंति पितर
स्तस्य गायंति च पितामहाः ॥ अद्य नः स कुले प्राज्ञो वाचकं भोजयिष्यति ॥ १६ ॥ पुराणविदमायांतं दृष्ट्वैव सह संस्थिताः ॥ क्रीडं
त्योषधयः सर्वा यास्यामः स्वर्गमक्षयम् ॥ १७ ॥ अनुग्रहाय लोकानां श्रद्धायाश्च परीक्षणे ॥ चरंत्यतिथिरूपेण पितरो देवतास्तथा ॥
॥ १८ ॥ तस्मादतिथिमायांतमग्रे गच्छेत्कृतांजलिः ॥ स्वागतासनपाद्यार्घ्यस्नानान्नशयनादिभिः ॥ १९ ॥ रूपान्वितं विरूपं वा मलिनं
मलिनांबरम् ॥ वेलायामतिथिं प्राप्तं पंडितो न विचारयेत् ॥ २० ॥ भोजकानां शरीरेषु नित्यं सन्निहितो रविः ॥ ये भोजकास्त्यजंत्य
न्ये सर्वपापेष्ववस्थिताः ॥ अधोमुखोर्द्ध्वपादास्ते पतंति नरकाग्निषु ॥ २१ ॥ कृमिभिर्भिन्नवदनास्तप्यमानाश्च वह्निना ॥ पीड्यंते चायुधै
र्घोरैर्यावदिंद्राश्चतुर्दश ॥ २२ ॥ येचापवादं शृण्वंति विमूढा ब्राह्मणेषु वै ॥ ते विशेषेण पच्यंते नरकेषु मदिच्छया ॥ २३ ॥ सर्वे
षामेव पात्राणां सत्पात्रं जापकः परः ॥ तस्मात्सर्वप्रयत्नेन पूजयेत्सुसमाहितः ॥ २४ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमी
कल्पे सौरधर्मेषु भोजकसत्कारवर्णनं नामाष्टाशीत्यधिकशततमोऽध्यायः ॥ १८८ ॥ ॥ छ ॥ ॥ सप्ताश्वतिलक उवाच ॥ ॥ आमपात्ररसा
यद्वन्नश्यंते नश्यभाजने ॥ जपोपेक्षे तथा दानं सह पात्रेण नश्यति ॥ सद्बीजमूषरे यद्वत्समुप्तं निष्फलं भवेत् ॥१॥ भस्मनीव हुतं हव्यं यथा होतुश्च
निष्फलम् ॥ जपेन रहिते विप्रे तथा दानं निरर्थकम् ॥२॥ यथा षण्ढोऽफलः स्त्रीषु यथा गौर्गवि चाफला ॥ ब्राह्मणस्य तथा जन्म जपहीनस्य
निष्फलम् ॥३॥ लोहोडुपेन प्रतरन्निमज्जत्युदके यथा ॥ दाता दाता ग्रहीता च पतत्यंधे तमस्यथ ॥४॥ कारुण्यात्सर्वभूतेषु श्रद्धया यत्प्रदीयते ॥
दानं तद्वै खग ज्ञेयं सार्वकामिकमुत्तमम् ॥ ५ ॥ दीनांधकृपणानां च बालवृद्धातुरेषु च ॥ यद्दीयते खगश्रेष्ठ तस्यानन्तफलं भवेत् ॥ ६ ॥

न हि स्वार्थं समुद्दिश्य प्रतिगृह्णंति साधवः ॥ दातुरेवोपकाराय जगृह्णुः श्रावणादयः ॥ ७ ॥ दातुरेवोपकाराय वदत्यर्थी ददस्व मे ॥
यस्माद्दाता प्रयात्यूर्ध्वमधस्तिष्ठेत्प्रतिग्रही ॥ ८ ॥ देहीति सुवदन्नर्थी धनं बोधयतीव सः ॥ यन्मया कृतमर्थित्वं प्रगेऽदानफलं हि तत् ॥ ९ ॥
बोधयंति न याचन्ते देहीति कृपणा जनाः ॥ अवस्थेयमदानस्य यद्याचामो गृहेगृहे ॥ १० ॥ आयात्यर्थी गृहं यस्तु कस्तं न प्रतिपूजयेत् ॥
कोयमर्थी न पूज्यः स्याद्याचमानो दिनेदिने ॥ ११ ॥ यद्बलादप्यनिच्छंतं योजयंति नराश्रयान् ॥ अहन्यहनि याचंते दातुस्ते दर्शयंति हि ॥
॥ १२ ॥ एकस्तिष्ठति चाधस्तादन्यश्चोपरि तिष्ठति ॥ दातृयाचकयोर्भेदः कराभ्यामेव सूचितः ॥ १३ ॥ यः प्राप्तायार्थिने दानं त्यक्त्वा पात्र
मुदीक्षते ॥ सर्वकर्मसु युक्तत्वान्न दाता पारमार्थिकः ॥१४॥ यद्यर्थिनो नरा न स्युर्दानधर्मः कथं भवेत्॥तदर्थिषु भवेद्दानं स्वागतं स्वागतं प्रियम्॥
॥ १५ ॥ पादोदकमनुव्रज्यात्स्वर्गसोपानसप्तकम् ॥ चिंताचिंतानुरूपेण कदा कस्य विनष्यति ॥ १६ ॥ ग्रासादर्धमपि ग्रासं युक्तं दातुं सदा
र्थिनाम् ॥ दानं प्रियविनिर्मुक्तं नष्टमाहुर्मनीषिणः ॥ १७ ॥ तस्मात्सत्कृत्य दातव्यमनंतफलमिच्छता ॥ प्रेत्याख्यानमपि श्रेयः प्रियानुनयपेश
लम् ॥१८॥ न तद्दानमसत्कारपारुष्यमलिनीकृतम् ॥ वरं न दत्तमर्थिभ्यः संक्रुद्धेनांतरात्मना॥१९॥ न तद्धनं न च प्रीतिर्न धर्मः प्रियवर्जितः ॥
दानप्रदाननियमयज्ञध्यानं हुतं तपः ॥ यत्नेनापि कृतं सर्वंक्रोधोऽस्य निष्फलं खग ॥ २० ॥ यः श्रद्धयार्चितं दद्यात्प्रति गृह्णाति चार्चितम् ॥
तावुभौ गच्छतः स्वर्गं नरकं तद्विपर्ययात् ॥ २१ ॥ औदार्यं स्वागतं मैत्री ह्यनुकंपा च मत्सरः ॥ पंचभिस्तु गुरौ दानं दातुर्दाने महाफलम्॥२२॥
वाराणसी कुरुक्षेत्रं प्रयागं पुष्कराणि च ॥ गंगातटं समुद्रश्च नैमिषारण्यमेव च ॥ २३ ॥ मूलस्थानं:महापुण्यं पुंडीरस्वामिकं तथा ॥ कालप्रियं
खगश्रेष्ठ क्षीरिकावास एव च ॥ २४ ॥ इत्येते कीर्तिता देशाः सुरसिद्धनिषेविताः ॥ सर्वे सूर्याश्रमाः पुण्याः सर्वा नद्यः सपर्वताः ॥ गोसिद्धमुनि
वासाश्च देशाः पुण्याः प्रकीर्तिताः ॥ २५ ॥ सूर्यायतनसंस्थानां यद्यदल्पं तु दीयते ॥ तदनंतफलं ज्ञेयं वचः क्षेत्रानुभावतः॥ २६ ॥ ग्रहणं चंद्र
सूर्याभ्यामुत्तरायणमुत्तमम् ॥ विषुवं सव्यतीपातं षडशीतिमुखं तथा ॥ २७ ॥ दिनच्छिद्राणि संक्रांतिः पुण्यं विषुपदं खग ॥ इति कालः समा
ख्यातः पुंसां पुण्यविवर्धनः ॥ २८ ॥ भक्तिभावः परा प्रीतिर्धर्मो धर्मैकभावनः ॥ प्रतिपत्तिरिति ज्ञेयं श्रद्धापर्यायपंचकम् ॥ २९ ॥ श्रद्धया विधि
वत्पात्रे प्रतिपादितमुत्तमम् ॥ तस्माच्छ्रद्धां समास्थाय देयमक्षयमिच्छता ॥ ३० ॥ यद्दानं श्रद्धया पात्रे विधिवत्प्रतिपादितम् ॥ तदनंतफलं ज्ञेय
मपि वा भारमात्रकम् ॥ ३१ ॥ आर्तेषु दीनेषु गुणान्वितेषु यः श्रद्धया स्वल्पमपि प्रदद्यात् ॥ स सर्वकामान्समुपैति लोकाञ्छ्रद्धैव दानं प्रव

दंति तज्ज्ञाः ॥ ३२ ॥ श्रद्धा दानं परं ज्ञेयं श्रद्धा एव तपः परम् ॥ श्रद्धां यज्ञमुशन्तीह श्रद्धा परमुपोषितम् ॥ ३३ ॥ अथाहिंसा क्षमा सत्यं
ह्रीः श्रद्धेंद्रियसंयमः ॥ दानमिष्टं तपो ध्यानं दशकं धर्मसाधनम् ॥ ३४ ॥ हंत व्यस्तैः समस्तैर्वा सूर्यधर्मैरनुष्ठितैः ॥ सूर्यौकसां च संप्राप्तेर्गतिरेका
प्रकीर्तिता ॥ ३५ ॥ यथा भूः सर्वभूतानां शांतेरतिशयः स्मृतः ॥ कुर्यात्पुण्यं महत्तस्मान्मम लोकेप्सया सुधीः ॥ ३६ ॥ परस्त्रीद्रव्यसंकल्पं यः
सापेक्षं करोति च ॥ गुरुमार्तमशक्तं वा विदेशे प्रस्थितं तथा ॥ अरिभिः परिभूतं च संत्यजेच्चैव पापकृत् ॥ ३७ ॥ तद्भार्यामित्रपुत्रेषु यश्चावज्ञां
करोति च ॥ इत्येतत्पातकं ज्ञेयं गुरुनिंदासमं भवेत् ॥ ३८ ॥ ब्रह्मघ्नश्च सुरापश्च स्तेयी च गुरुतल्पगः ॥ महापातकिनस्त्वेते तत्संयोगी
च पश्चमः ॥ ३९ ॥ क्रोधाद्द्वेषाद्भयाल्लोभाद्ब्राह्मणस्य वदेत यः ॥ प्राणांतिकं महादोषं ब्रह्महा स उदाहृतः ॥ ४० ॥ ब्राह्मणं च समाहूय
याचमानमकिंचनम् ॥ यन्नास्तीति च यो ब्रूयात्स चाण्डाल उदाहृतः ॥ ४१ ॥ देवद्विजगवां भूमिं पूर्वदत्तां हरेत यः ॥ प्रनष्टामपि
काले तु तमाहुर्ब्रह्मघातकम् ॥ ४२ ॥ अधीत्य यो रवेर्ज्ञानं परित्यजति मंदधीः ॥ सुरापेन समं ज्ञेयं तस्य पापं च सुव्रत ॥ ४३ ॥
अग्निहोत्रपरित्यागः पंचयज्ञियकर्मणाम्[2] ॥ मातापितृपरित्यागः कूटसाक्ष्यं सुहृद्वधः ॥ ४४ ॥ अप्रियं सूर्यभक्तानामभक्ष्यस्य च भक्षणम्
॥ एवं निरपराधानां प्राणिनां च प्रमारणम् ॥ ४५ ॥ सर्वाधिपत्यमेतेषां नास्ति देवपुरोत्तमे ॥ आत्मलोकाधिपत्यं तु यच्छेत्सर्वजगत्पतिः
॥ ४६ ॥ केचिदत्रैव मुच्यन्ते ज्ञानयोगपरा नराः ॥ आवर्तंते पुनश्चान्ये संसारे भोगतत्पराः ॥ ४७ ॥ तस्माद्विमोक्षमन्विच्छन्भोगासक्तिं
विवर्जयेत् ॥ विरक्तः शांतचित्तात्मा सौरलोकमवाप्नुयात् ॥ ४८ ॥ यच्चाप्यसक्तहृदया जपन्तीमं प्रसंगतः ॥ तेषामपि वदत्येकः स्वानुभावानुरूपतः
॥ ४९ ॥ तन्नार्चयन्ति ये भानुं सकृदुच्छिष्टदेहिनः ॥ तेषां पिशाचलोके तु भोगान्भानुः प्रयच्छति ॥ ५० ॥ द्विर्जपंति च ये भानुं
क्रूराः संक्रुद्धलोचनाः ॥ रक्षोलोके रविस्तेषां महाभाग्यं प्रयच्छति ॥ ५१ ॥ त्रिरर्चयन्ति ये भानुं मद्यमांसरता नराः ॥ ऋषिलोके रविस्तेषां
भोगान्दिव्यान्प्रयच्छति ॥ ५२ ॥ ये नृत्यगीतं कुर्वंति त्रिश्चतुर्धा यदृच्छया ॥ सूर्यस्याग्रे तु ते यांति गंधर्वभवनं खग ॥ ५३ ॥ लोकाः ख्यातिं
समुद्दिश्य पूजयंति च गोपतिम् ॥ तेषां शक्रालये भानुः कामान्त्सर्वान्प्रयच्छति ॥ ५४ ॥ कामासक्तेन चित्तेन यः षडर्चयते रविम् ॥ प्राजापत्ये
रविस्तस्य लोके भोगान्प्रयच्छति ॥ ५५ ॥ नवकृत्वोर्चयेद्यस्तु चित्रभानुं खगाधिप ॥ स याति विष्णुसालोक्यं विष्णुना सह मोदते ॥ ५६ ॥

---

[1] 'नशेः षान्तस्य' इति णत्वानिषेधः । [2] 'यज्ञर्त्विग्भ्यां घखञौ' इति घः ।

तस्मादपि परं स्थानं यद्भूतानां मनोहरम् ॥ अप्रमेयगुणैर्दिव्यैर्विमानैः सार्वकामिकैः ॥ ५७ ॥ असंख्यैर्वस्तुभिर्व्याप्तं गैरिकै रक्तचित्रकैः ॥ नानागृहसमाकीर्णैः सूर्यकोटिसमप्रभम् ॥ ५८ ॥ तत्स्थानं ते प्रगच्छंति अर्चयन्ति च ये द्विजान् ॥ तत्र लोके खगश्रेष्ठ वसंति विहरंति च ॥ तस्मादपि परं स्थानं ज्योतिष्कं सौरमुच्यते ॥ ५९ ॥ एवं सूर्यानुभावेन निकृष्टेनापि कर्मणा ॥ नरैः स्थानान्यवाप्यन्ते श्रद्धाभावानुरूपतः ॥ ॥६०॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मेषु सप्ताश्वानूरुसंवादो नाम एकोननवत्यधिकशततमोऽध्यायः॥१८९॥ ॥छ॥

॥ ॥ सप्ताश्वतिलक उवाच ॥ ॥ तारारूपविमानानामिमाः संति च कोटयः ॥ यः कुर्यात्तु नमस्कारं तस्यैव च फलं भवेत् ॥ १ ॥ इत्येता गतयः प्रोक्ता महत्यः सौरधर्मिणाम् ॥ तस्मात्सौरः सदा धर्मः कर्तव्यः सुखमिच्छता ॥ २ ॥ इदानीं पापनिचयाः स्थूला नरकहेतवः ॥ ते समासेन कथ्यन्ते मनोवाक्कायसाधनैः ॥ ३ ॥ गवां मार्गे वने चाग्नेः पुरे ग्रामे समर्पणम् ॥ इत्येतानीह पापानि सुरापानसमानि च ॥ ४ ॥ वने सर्वस्य हरणं नरस्त्रीगजवाजिनाम् ॥ गोभूसमीपजातानामोषधीनां च खेचर[1] ॥ ५ ॥ चन्दनागुरुकर्पूरकस्तूरीपट्टवाससाम् ॥ हस्तन्यासापहरणं रुक्मस्तेयसमं स्मृतम् ॥ ६ ॥ कन्यानां वरयोग्यानामाकर्षणमसंगतः ॥ पुत्रमित्रकलत्रेषु गमनं भगिनीषु च ॥ ७ ॥ कुमारीसाहसं घोरमंत्यजस्त्रीनिषेवणम् ॥ सवर्णायाश्च गमनं गुरुतल्पसमं स्मृतम् ॥ ८ ॥ महापातकतुल्यानि पापान्युक्तानि यानि तु ॥ तानि पातकसंज्ञानि ब्रूमहे चोपपातकम् ॥ ९ ॥ द्विजायार्थं परिश्रुत्य न प्रयच्छति यो द्विजं ॥ सद्भार्याणां च संत्यागः साधुबन्धुतपस्विनाम् ॥ १० ॥ गोभूहिरण्यवस्त्राणामपहारः प्रयत्नतः ॥ ईश्वरार्पितबुद्धीनां पीडनं सुमहत्कृतम् ॥ ११ ॥ यः पीडामाश्रमस्थान आचरेदल्पिकामपि ॥ तद्भृत्युपरिभूतस्य पशुधान्यधनस्य च ॥ १२ ॥ कूपधान्यपशुस्तेयमयाज्यानां च याजनम् ॥ यज्ञारामतडागानां दारापत्यस्य विक्रयः ॥ १३ ॥ तीर्थयात्रोपवासानां व्रते च जपकर्मणि ॥ स्त्रीधनान्युपकर्षंति ये जनाः पापकर्मणा ॥ १४ ॥ अरक्षणं च नारीणां मद्यपस्त्रीनिषेवणम् ॥ ऋषीणामप्रदानं च धान्यवृद्ध्युपसेवनम् ॥ १५ ॥ देवाग्निसाधुसाध्वीनां निन्दा गोब्राह्मणस्य च ॥ प्रत्यक्षं वा परोक्षं वा राजमाण्डलिकान्[2]नपि ॥ १६ ॥ उत्सन्नपितृदेवाश्च स्वकर्मत्यागिनश्च ये ॥ दुःशीला नास्तिकाः पापाः सदसच्छून्यवादिनः ॥ १७ ॥ एवं कामे प्रवृत्ते तु वियोनौ पशुयोनिषु ॥ रजस्वलास्वयोनौ[3] तु मैथुनं यः समाचरेत् ॥ १८ ॥ स्त्रीपुत्रमित्रसंप्रीतेरारामोच्छेदकाश्च ये ॥ जनस्याप्रियवक्तारो जनाभिप्रायभेदिनः ॥ १९ ॥

---

[1] हेखगेत्यर्थः । [2] षष्ठ्यर्थे द्वितीया, माण्डलिकनृपाणामित्यर्थः । [3] स्वेतरस्यां वा योनीतरदेशे वा पुरुषसमागमाक्षमयोनौ ।

भेत्ता तडागवप्राणां संक्रमाणां रसस्य च ॥ एकपंक्तिस्थितानां च पंक्तिभेदं करोति यः ॥२०॥ इत्येतैस्तु नराः पापैरुपपातकिनः स्मृताः ॥२१॥
इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मेषु सूर्यानूरुसंवादे नवत्यधिकशततमोऽध्यायः ॥ १९० ॥ ॥ छ ॥ ॥ सप्ता
श्वतिलक उवाच ॥ ॥ ये गोब्राह्मणसस्यानां साधूनां तु तपस्विनाम् ॥ दूषकाश्चैव वर्तंते नरा नरकगामिनः ॥ १ ॥ परिश्रमेण तप्यन्ते
येऽपरे तस्य सूचकाः ॥ परदाररतानां च कन्याया दूषकाश्च ये ॥ २ ॥ गोष्ठाग्निजलरम्यासु तरुच्छायानगेषु च ॥ त्यजंति ये पुरीषाणि आरामा
यतनेषु च ॥ ३ ॥ मद्यपानरता नित्यं गीतवाद्यरता नराः ॥ कामक्रोधमदाविष्टा रंध्रान्वेषणतत्पराः ॥ ४ ॥ पाखण्डमतसंयुक्ता वृथा संलाप
कौतुकाः ॥ ये मार्गानुपरुंधंति परसीमां हरंति च ॥ ५ ॥ कूटशासनकर्तारः कूटकर्मकृतो नराः ॥ धनुषः शिल्पिशस्त्राणां यः कर्ता
यश्च विक्रयी ॥ ६ ॥ निर्दयोतीवभृत्येषु पशूनां दमकश्च यः ॥ मिथ्या प्रवदतो वाचमाकर्णयति यः शनैः ॥ स्वामिमित्रगुरुद्रोही मायावी
चपलः शठः ॥ ७ ॥ ये भार्यापुत्रमित्राणि बालवृद्धकृशातुरान् ॥ भृत्यानतिथिबन्धूंश्च त्यजंति च बुभुक्षितान् ॥ ८ ॥ यः स्वयं पक्वमश्नाति
विप्रायान्नं न यच्छति ॥ वृथा पाकः स विज्ञेयो ब्रह्मवादिषु गर्हितः ॥ ९ ॥ नियमं स्वयमादाय ये त्यजंत्यजितेंद्रियाः ॥ प्रव्रज्यावसिता ये
च रहस्यानां तु भेदकाः ॥ १० ॥ ये ताडयंति गां मूढास्त्रासयंति मुहुर्मुहुः ॥ दुर्बलं न च पुष्णंति प्रनष्टान्नान्विषंति च ॥ ११ ॥ पीड
यंत्यतिभारेण अक्षयं वाहयंति च ॥ वृषाणां वृषणानन्ये पापिष्ठा गालयंति हि ॥ वाहयंति च गां वंध्यां ते पापिष्ठा नराधमाः ॥ १२ ॥ अनर्थवि
कलं हीनं बालवृद्धकृशानुगम् ॥ नानुकंपंति ये मूढास्ते यांति नरकं नराः ॥ १३ ॥ अजाविका माहिषिकाः सवित्रीवृषलीपतिः ॥ क्षत्रविट्शूद्रवृ
द्धाश्च स्वधर्मविहताः सदा ॥ १४ ॥ शिल्पिनः कारुका वेश्याः क्षेमकारनृपध्वजाः ॥ नर्तक्यो ज्योतिषि हताः सर्वे नरकगामिनः ॥ १५ ॥ घृत
तैलानुपानानि मधुमांसरसासवम् ॥ गुडेक्षुक्षीरशाकान्हिदधिमूलफलानि च ॥ १६ ॥ तृणानि काष्ठं पुष्पाणि बीजौषधिमनुत्तमाम् ॥ उपानच्छत्र
शकटमासनं शयनं मृदः ॥ १७ ॥ ताम्रं सीसं त्रपुं कांस्यं शंखाद्यं च जलोद्भवम् ॥ वार्क्षं वा वैणवं वापि गृहोपकरणानि च ॥१८॥ और्णकार्पा
सकौशेयभंगपट्टोद्भवानि च ॥ स्थूलसूक्ष्माणि संमूढा ये च लोका हरंति वै ॥१९॥ एवमादीनि चान्यानि द्रव्याणि विविधानि च॥ नरकेषु ध्रुवं
गच्छेद्यो हरेत पुमान्बलात् ॥ २० ॥ यद्वा तद्वा तु पारोक्ष्यमपि सर्षपमात्रकम् ॥ अपहृत्य नरो याति नरकं नात्र संशयः ॥ २१ ॥ एवमाद्यैर्नरः
पापैरुत्क्रांतेः समनंतरम् ॥ शरीरयातनार्थं तत्पूर्वकायमवाप्नुयात् ॥ २२ ॥ यमलोके व्रजेदेवं शरीरेण यमाज्ञया ॥ यमदूतैर्महाघोरैर्नीयमानः

सुदुःखितः ॥ २३ ॥ देवमानुषजीवानामधर्मनिरतात्मनाम् ॥ धर्मराजः स्मृतः शास्ता सुघोरैर्विविधैर्वधैः ॥ २४ ॥ विनयाभावयुक्तानां प्रमादा
त्स्वलितात्मनाम् ॥ प्रायश्चित्तैर्बहुविधैः पातकं नष्टतामियात् ॥ २५ ॥ पारदारिकचोराणामन्यायव्यवहारिणाम् ॥ शास्ता क्षितिपतिः प्रोक्तः
प्रच्छन्नानां च धर्मराट् ॥ २६ ॥ तस्मात्कृतस्य पापस्य प्रायश्चित्तं समाचरेत् ॥ नाभुक्तस्यान्यथा नाशः कल्पकोटिशतैरपि ॥ २७ ॥ यः
करोति शुभं कर्म कारयेदनुमोदयेत् ॥ कायेन मननसा वाचा स विंदेतोत्तमं सुखम् ॥२८॥ इति संक्षेपतः प्रोक्ता पापभेदात्त्रिधा गतिः ॥ तथान्या
गतयश्चित्राः कथ्यंते कर्मभेदतः ॥ २९ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मे सप्ताश्वतिलकारुणसंवाद एकनव
त्यधिकशततमोऽध्यायः ॥ १९१ ॥॥ छ ॥ ॥ सप्ताश्वतिलक उवाच ॥ ॥ संत्रासजननं घोरं पापानां पापकारिणाम् ॥ गर्भस्थैर्जायमानैश्च
बालैस्तरुणमध्यमैः ॥ १ स्त्रीपुंनपुंसकैर्वृद्धैर्गंतव्यं सर्वजंतुषु ॥ शुभाशुभफलं तत्र भोक्तव्यं देहिभिस्तथा ॥ २ ॥ चित्रगुप्तादिभिः सर्वैर्धर्मस्थैः
सत्यवादिभिः ॥ प्रोक्तं वै धर्मराजस्य निकटे यच्छुभाशुभम् ॥ अवश्यं हि कृतं कर्म भोक्तव्यं तद्विचारितम् ॥ ३ ॥ तत्र ये शुभकर्माणः सौम्य
चित्ता दयान्विताः ॥ ते नरा यांति सौम्येन यथा यमनिकेतनम् ॥ ४ ॥ यः प्रदद्याद्द्विजेंद्राणामुपानत्काष्ठछत्रकम् ॥ स च धर्मेण महता सुखं
याति यमालयम् ॥ ५ ॥ सोपानत्को नरो यस्तु देवायतनमाविशेत् ॥ विशेषतो गर्भगृहं स संत्रासमुपाश्नुते ॥६॥ सोपानत्कानि दानानि तथान्नं
तु विशेषतः ॥ एवं दानविशेषेण धर्मराजपुरं नरः ॥ यस्माद्याति सुखेनैव तस्माद्धर्मं समाचरेत् ॥७॥ ये पुनः क्रूरकर्माणो नराः पापरताः खग ॥
ते घोरेण तथा यांति दक्षिणेन यमालयम् ॥ ८ ॥ षडशीतिसहस्राणि योजनानामशीति च ॥ वैवस्वतपुरं ज्ञेयं नानारूपमिति स्थितम् ॥ ९ ॥
समीपस्थमिवाभाति नराणां शुभचारिणाम् ॥ पापानामतिदूरस्थं तथा रौद्रेण गच्छताम् ॥ १० ॥ तीक्ष्णकंटकयुक्तेन शर्करानिचितेन च ॥
क्षुरधारातिनिस्त्रिंशैः पाषाणौश्चिंतितेन च ॥ ११ ॥ क्वचिदर्केण महता दुरंतैश्चैव खातकैः ॥ लोहशंकुभिराच्छिन्नास्तथा खड्गैः समन्विताः ॥
॥ १२ ॥ ततः पतद्भिर्विमलैः पर्वतैर्वृक्षसंकुलैः ॥ प्रेतप्राकारयुक्तेन यांति मार्गेण दुःखिताः ॥ १३ ॥ क्वचिद्विषमगर्ताभिः क्व चिल्लोष्टैः
सपिच्छलैः ॥ सुतप्तवालुकाभिश्च तथा तीक्ष्णैश्च शंकुभिः ॥ १४ ॥ अनेकशाखारचितैर्व्याप्तैर्वंशवनैः क्वचित् ॥ कष्टेन तमसः मार्ग अना
लंबे सुदारुणि ॥१५॥ अथ शृंगाटकैर्व्याप्तैः क्वचिद्दावाग्निना पुनः ॥ क्वचित्तप्तशिलाभिश्च क्वचिद्व्याप्तं हिमेन तु ॥ १६ ॥ क्वचिद्वालुकया व्याप्तमा

कंठांतं प्रवेशयेत् ॥ क्वचिदुष्टांबुना व्याप्तं क्वचिच्च कारिषाग्निना[1] ॥१७॥ क्वचित्सिंहैः क्वचिद्व्याघ्रैर्दंशैः कीटैश्च दारुणैः ॥ क्वचिन्महाजलौकाभिः क्वचि
द्वाजगरैः पुनः ॥१८॥ मक्षिकाभिश्च रौद्राभिः क्वचित्सर्पैर्विषोल्बणैः ॥ महागजेंद्रयूनैश्च बलोन्मत्तैः प्रमाथिभिः ॥१९॥ पंथानमुल्लिखद्भिश्च तीक्ष्ण
शृंगैर्महावृषैः ॥ महाशृंगैश्च महिषैरुष्ट्रैर्मत्तैर्मदातुरैः ॥२०॥ डाकिनीभिश्च रौद्राभिर्विकरालैश्च राक्षसैः ॥ व्याधिभिश्च महाघोरैः पीड्यमाना व्रजंति हि ॥
॥ २१ ॥ महापाशविमिश्रेण महाचंडेन वायुना ॥ महापाषाणवर्षेण हन्यमाना निराश्रयाः ॥ २२ ॥ क्वचिद्विद्युत्प्रपातेन दीर्यमाणा व्रजंति हि ॥
पतद्भिर्वज्रसंघातैरुल्कापातैश्च दारुणैः ॥ २३ ॥ प्रदीप्तांगारवर्षेण दह्यमाना व्रजंति हि ॥ महांधकारशुक्रेण पीड्यमाना व्रजंति हि ॥ २४ ॥ महा
मेघरवैर्घोरैर्वित्रास्यंते मुहुर्मुहुः ॥ तीक्ष्णपाषाणयुक्तेन पूर्यमाणाः समन्ततः ॥ २५ ॥ महाक्षुरांबुधाराभिः सेव्यमाना व्रजंति हि ॥ महामेघरवैर्घोरै
र्वित्रास्यन्ते मुहुर्मुहुः ॥२६॥ भृशं शीतेन तीक्ष्णेन रूक्षेण मारुतेन च ॥ इत्थं मार्गेण रौद्रेण पाथेयरहितेन च ॥२७॥ निरालंबेन दुर्गेण निर्जनेन
समंततः ॥ अविश्रामेण महता विगतापायदुर्धरैः ॥ २८ ॥ नीयंते देहिनः सर्वे ये मूढाः पापकारिणः ॥ इति ज्ञात्वा नरः कुर्यात्पुण्यं पापं च वर्ज
येत् ॥ पुण्येन याति देवत्वं पापेन नरकं व्रजेत् ॥ २९ ॥ यैर्मनागपि देवेशो मनसा पूजितो रविः ॥ ते कदापि न पश्यंति यमस्य वदनं खग ॥
॥ ३० ॥ किं तु पापैर्महाघोरैः किञ्चित्कालं तवाज्ञया ॥ भवंति प्रेतराजानस्ततो यांति रवेः पुरम् ॥ ३१ ॥ ये पुनः सर्वभावेन भजन्ते भुवि भास्क
रम् ॥ न ते लिम्पंति पापेन पद्मपत्रमिवांभसा ॥ ३२ ॥ तस्मात्प्रकुर्याद्भक्तिं वै भास्करे सततं नरः ॥ श्रद्धया पूजयेद्भानुं य इच्छेद्विपुलं धनम् ॥
॥ ३३ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मे सप्ताश्वतिलकानूरुसंवादे द्विनवत्यधिकशततमोऽध्यायः ॥१९२॥ ॥छ॥
॥ ॥ सप्ताश्वतिलक उवाच ॥ ॥ अयने विषुवे वारे संक्रांतौ ग्रहणे तथा ॥ पूजयेत्सततं भानुं सप्तम्यां तु विशेषतः ॥ १ ॥ वैनतेय निबोध त्वं
विधानं सप्तमीव्रते ॥ एतद्धि परमं गुह्यं रवेराराधनं परम् ॥ २ ॥ सिद्धार्थकैस्तु प्रथमा द्वितीया चार्कसंपुटैः ॥ तृतीया मरिचैः कार्या चतुर्थी तिल
सप्तमी ॥ ३ ॥ सप्तमी[2] चौदनैर्वीर सप्तमी परिकीर्तिता ॥ इत्येताः सप्त सप्तम्यः कर्तव्या भूतिमिच्छता ॥ ४ ॥ तथा चानुक्रमे तासां लक्षणं कथया
म्यहम् ॥ माघे वा मार्गशीर्षे वा कार्या शुक्ला तु सप्तमी ॥ ५ ॥ आर्तस्य तु न नियमः पक्षमासकृतो भवेत् ॥ अर्धप्रहरशेषे तु कुर्याद्वै दंतधाव
नम् ॥ ६ ॥ पञ्चम्यां तत्र ये वृक्षाः कामितास्तान्वदाम्यहम् ॥ मधूके पुत्रलाभः स्याद्दुःखहा मार्कवो भवेत् ॥ ७ ॥ बदर्यां च बृहत्या च क्षिप्रं

---

[1] ईकारह्रस्व आर्षः । [2] अत्रत्यः पाठः पञ्चमीषष्ठ्योः सप्तम्योः पारणानुक्तेस्त्रुटित इति प्रतिभाति ।

रोगात्प्रमुच्यते ॥ ऐश्वर्यं च भवेद्विल्वैः खदिरेण च संचयः ॥ ८ ॥ शत्रुक्षयः कदंबेषु अर्थलाभोतिमुक्तके ॥ गुरुतां याति सर्वत्र आटरूषकसंभवैः
॥ ९ ॥ ज्ञातिप्रधानतां याति अश्वत्थो यच्छते यशः ॥ करवीरात्परिज्ञानमचलं स्यान्न संशयः ॥ १० ॥ श्रियं प्राप्नोति विपुलां शिरीषस्य निवेशने
॥ प्रियंगुं सेव्यमानस्य सौभाग्यं परमं भवेत् ॥ ११ ॥ अभीप्सितार्थसिद्ध्यर्थं सुखासीनोथ वाग्यतः ॥ कामं यथेष्टं हृदये कृत्वा समभिमंत्र्य
च ॥ मंत्रेणानेन मतिमानश्नीयाद्दन्तधावनम् ॥ १२ ॥ वरं दत्त्वाभिजानासि कामदं च वनस्पते ॥ सिद्धिं प्रयच्छ मे नित्यं दंतकाष्ठ नमोऽस्तुते
॥ १३ ॥ त्रीन्वारान्परिजप्यैवं भक्षयेद्दंतधावनम् ॥ पश्चात्प्रक्षाल्य काष्ठं तु शुचौ देशे विनिक्षिपेत् ॥ १४ ॥ ऊर्ध्वे निपतिते सिद्धिस्तथा चाभिमुखे
स्थिते ॥ अतोन्यथा तु पतिते आनीय पुनरुत्सृजेत् ॥ १५ ॥ पराङ्मुखं यदि भवेत्त्रीन्वारान्दंतधावनम् ॥ असिद्धां तु विजानीयान्न ग्राह्या
सा तु सप्तमी ॥ १६ ॥ ब्रह्मचारी तु तां रात्रिं स्वप्यान्मंगलसेवया ॥ बिभ्रद्वासोनुपहतं शुचिराचारसंयुतः ॥ १७ ॥ तस्यां रात्र्यां व्यतीतायां प्रातरुत्थाय
वै खग ॥ प्रक्षालयेन्मुखं धीमानश्नीयाद्दन्तधावनम् ॥ १८ ॥ उपविश्य शुचिर्भूत्वा प्रणम्य शिरसा रविम् ॥ जपं यथेष्टं कृत्वा तु
जुहुयाच्च हुताशने ॥ १९ ॥ ततोपराह्णसमये स्नात्वा मृद्गोमयांबुभिः ॥ विधिवन्नियमं कृत्वा मौनी शुक्लांबरः शुचिः ॥ २० ॥ पूजयित्वा विधिंभक्त्या
देवदेवं दिवाकरम् ॥ स्वप्याद्देवस्य पुरतो गायत्रीजपतत्परः ॥ २१ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मेदन्तकाष्ठविधिवर्णनं
नाम त्रिनवत्यधिकशततमोऽध्यायः ॥ १९३ ॥ ॥ ७॥ ॥ सप्ताश्वतिलक उवाच ॥ ॥ अतः परं प्रवक्ष्यामि यैर्यैर्यत्फलमश्नुते
॥ स्वप्ने दृष्टे तु सप्तम्यां पुरुषो नियतव्रतः ॥ १ ॥ समाप्य विधिवत्सर्वां जपहोमादिकां क्रियाम् ॥ भूमौ शय्यां समास्थाय देवदेवंविचिन्तयेत्
॥ २ ॥ हन्त सुप्तो यदि नरः पश्येत्स्वप्ने दिवाकरम् ॥ शक्रध्वजं वा चन्द्रं वा तस्य सर्वाः समृद्धयः ॥ ३ ॥
भृंगारचमरादर्शकनकाभरणानि च ॥ रुधिरस्य स्रुतिः केशपात ऐश्वर्यकारकः ॥ स्वप्ने वृक्षाधिरोहे तु क्षिप्रमैश्वर्यमाहवे ॥ ४ ॥
दोहनं महिषीसिंहीगोधेनूनां करे स्वके ॥ बन्धश्चासां राज्यलाभो नाभेः स्पर्शे तु दुर्मतिः ॥ ५ ॥ अविं हत्वा स्वयं खादेत्सिंहमंबुजमेव च ॥
स्वांगमस्थि हुताशं च सुरापानं खगाधिप ॥ ६ ॥ हैमे वा राजते वापि यो भुंक्ते पायसं नरः ॥ पात्रे तु पद्मपत्रे वा तस्यैश्वर्यं समं भवेत् ॥
॥ ७ ॥ द्यूते च वाथ वा युद्धे विजयो हि सुखावहः ॥ गात्रस्य स्वस्य ज्वलनं शिरोबन्धश्च भूतये ॥ ८ ॥ माल्यांबराणां शुक्लानां हयानां

---

१ दर्शन इति शेषः ।

पशुपक्षिणाम् ॥ सदा लाभं प्रशंसंति विष्ठानां चानुलेपनम् ॥ ९ ॥ हययाने भवेत्क्षिप्रं रथयाने प्रजागमः ॥ नानाशिरोबाहुता च गृहस्थां कुरुते
श्रियम् ॥ १० ॥ अगम्यागमनं धन्यं वेदाध्ययनमुत्तमम् ॥ देवद्विजश्रेष्ठवीरगुरुवृद्धतपस्विनः ॥ ११ ॥ यद्वदंति नरं स्वप्ने सत्यमेवेति तद्विदुः ॥
प्रशस्तं दर्शनं चैषामाशीर्वादः खगाधिप ॥ १२ ॥ राज्यं स्यात्स्वशिरश्छेदे धनं बहुवधे भवेत् ॥ रुदिते भक्ष्यसंप्राप्ती राज्यं निगडबन्धने॥१३॥
पर्वतं तुरगं सिंहं वृषभं गजमेव हि ॥ महदैश्वर्यमाप्नोति यो विक्रम्याधिरोहति ॥ १४ ॥ आगृह्णानो ग्रहांस्तारा मरीचिं परिवर्तयन् ॥
उन्मूलयति पर्वतांश्च राजा भवति भूतले ॥ १५ ॥ देहान्निष्क्रांतिरंत्राणां सर्वेषां च खगाधिप ॥ पानं समुद्रसरितामैश्वर्यसुखकारकम् ॥ १६ ॥
बलं चांबुनिधिं वापि तीर्थपारं प्रयाति यः ॥ तस्यापत्यं भवेद्वीर अचलं च खगाधिप ॥ १७ ॥ भवत्यर्थागमः शीघ्रं कृमिर्वा यदि भक्षयेत् ॥
अंगानां च सुरूपाणां लाभो दर्शनमेव च ॥ संयोगश्चैव मांगल्यैरारोग्यं धनमेव च ॥ १८ ॥ ऐश्वर्यं राज्यलाभश्च यस्मिन्स्वप्न उदाहृतः ॥
सप्त स्यान्नात्र संदेहश्चतुर्भिः श्रुत उत्तमः ॥ १९ ॥ पंचभिः पुत्रबाहुल्यं[1] षड्भिरायुः सुतान्धनम् ॥ सप्तभिर्विविधान्कामानष्टभिर्विविधं यशः ॥
॥ २० ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सूर्यारुणसंवादे स्वप्नवर्णनं नाम चतुर्नवत्यधिकशततमोऽध्यायः ॥ १९४ ॥ छ ॥
॥ ॥ अनूरुरुवाच ॥ ॥ भगवञ्छ्रोतुमिच्छामि सप्तमीनां परं विधिम् ॥ सर्वासामनुरूपाणां कथयस्व महामुने ॥ १ ॥ ॥ सप्ताश्वतिलक
उवाच ॥ ॥ शृणु वीर खगश्रेष्ठ सप्तमीनां परं विधिम् ॥ कीर्तयिष्यामि ते सर्वं यथावत्परिपृच्छते ॥ २ ॥ तुल्यं किल खगश्रेष्ठ
यथाख्यातं विवस्वता ॥ शुक्लपक्षे रविदिने प्रवृत्ते चोत्तरायणे ॥ ३ ॥ पुत्रदारधनक्षेत्रे गृह्णीयात्सप्तमीव्रतम् ॥ ऋषिभिर्ज्ञानसंपन्नैः सर्वकामफलप्रदैः
॥ ४ ॥ सप्तम्यः सप्त आख्यातास्तासां नामानि मे शृणु ॥ अर्कसंपुटकैरेका द्वितीया मरिचैस्तथा ॥ ५ ॥ तृतीया निंबपत्रैश्च चतुर्थी फलसप्तमी
॥ सप्तमी कामिका नाम्ना विधिमासां निबोध मे ॥ ६ ॥ पंचम्यामेकभक्तं तु कुर्यान्नियतमानसः ॥ अल्पाहारं न कुर्वीत मैथुनं दूरतस्त्यजेत्
॥ ७ ॥ वर्जयेन्मधु मांसं च अत्यम्लं च खगाधिप ॥ प्रभाते चैव षष्ठ्यां तु एकैकपर्णसंपुटे ॥ ८ ॥ घृतशाल्योदनं कृत्वा भक्षयेत्तु विधानतः
अन्यदन्नमभुंजानः सप्तम्यां भोजनं भवेत् ॥ ९ ॥ एकैकवृद्ध्याभियुक्तैर्यो वसेत्तु खगेश्वर ॥ अन्यत्र मरिचं भक्षेन्निंबपत्राण्यतः परम् ॥ १० ॥ एवं
लब्धफलानीह पक्षयोरुभयोरपि ॥ अन्नाद्ये रहितो यत्नादनोदन इति स्मृतः ॥ ११ ॥ आचरेद्विधिवद्भक्त्या पूजयित्वा विभावसुम् ॥ अहोरात्रं

---

[1] लभेतेति शेषः, एवमायुरादीनि कर्मणि लाभक्रियायामन्वितानीत्यपि बोध्यम् ।

वायुभक्षः कुर्याद्विजयसप्तमीम् ॥ १२ ॥ एकैकं सप्त सप्तमीरत्रैवं विधिवच्चरेत् ॥ प्रालेख्य तासां नामानि पत्रकेषु पृथक्पृथक् ॥ १३ ॥ तानि सर्वाणि नामानि विलेख्य सुसमाहितः ॥ श्वेतचंदनदिग्धांगे माल्यदामोपशोभिते ॥ १४ ॥ सप्तधान्यहिरण्याढ्ये शशिकुन्देंदुसन्निभे ॥ अश्वत्थाशोकपत्राढ्ये दध्योदनसमन्विते ॥ १५ ॥ तदर्थं पूजयेद्भक्त्या तैस्तैर्दृष्टैर्न संशयः ॥ दृष्ट्वा तु शोभनं स्वप्नं न भूयः शयनं स्वपेत् ॥ १६ ॥ प्रातश्च कीर्तयेत्स्वप्नं यथादृष्टं खगाधिप ॥ प्राज्ञभोजकविप्रेभ्यः सुहृद्भ्यश्च खगाधिप ॥ १७ ॥ ततो मध्याह्नसमये स्नातः प्रयतमानसः ॥ तं चैव देवं विधिवत्पूजयित्वा दिवाकरम् ॥ १८ ॥ सम्यक्कृतजपो मौनी नरो हुतहुताशनः ॥ निष्क्रम्य देवायतनाद्भोजकाय निवेदयेत् ॥ १९ ॥ भवेदलाभो यदि भोजकानां विप्रास्तमर्हंति पुराणविज्ञाः ॥ ये मंत्रवेदावयवेषु निश्चिता विभुं समभ्यर्च्य दिवं व्रजेयुः ॥ २० ॥ कृत्वैवं सप्तमीः सप्त नरो भक्तिसमन्वितः ॥ श्रद्दधानोपि सूर्यस्य स कथं नाप्नुयात्फलम् ॥ २१ ॥ दशानामश्वमेधानां कृतानां यत्फलं भवेत् ॥ तत्फलं सप्तमी सप्त कृत्वा भक्त्या लभेत ना ॥ २२ ॥ दुष्पापं नास्ति तद्वीर सप्तम्यां यन्न दह्यते ॥ न च रोगोऽस्त्यसौ लोके य एताभिर्न शाम्यति ॥ २३ ॥ कुष्ठानि यानि रौद्राणि दुश्छेद्यानि भिषग्जनैः ॥ नीयन्ते तानि सर्वाणि गरुडेनेव पन्नगाः ॥ २४ ॥ सकलविबुधमान्यं स्वप्रकाशं जनानामभिमतफलदाने दीक्षितं तं सुपूज्यम् ॥ सुतधनकुलभोगैः सौख्यपुण्यैरुपेतो व्रजति च सुतनुं कां शाश्वतां तिग्मरश्मेः ॥ २५ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मे सूर्यारुणसंवादे स्वप्नवर्णनं नाम पंचनवत्यधिकशततमोऽध्यायः ॥ १९५ ॥ छ ॥ ॥ सप्ताश्वतिलक उवाच ॥ ॥ अतीत्य भुक्तं पुरुषः सप्तम्यां गरुडाग्रज ॥ मैत्रीं विदध्यात्सर्वत्र जीवहिंसां विवर्जयेत् ॥ १ ॥ सप्तम्यां न स्पृशेत्तैलं नीलं वस्त्रं न धारयेत् ॥ न शयीत स्त्रिया सार्धं न सेवेत दुरोदरम् ॥ २ ॥ न रुद्यादश्रुपातेन न वा ध्यायेत्पिशाचकान् ॥ नाकृषेच्छिरसो यूका न वृथावादमाचरेत् ॥ परस्यानिष्टकथनमतिवादं च वर्जयेत् ॥ ३ ॥ न कंचित्ताडयेज्जंतुं न विशेत[1] कदाचन ॥ ब्रह्महत्यामवाप्नोति विशमानो रवेर्गृहम् ॥ ४ ॥ इत्येते समयाः प्रोक्ताः सौराणां गरुडाग्रज ॥ भोजकानां विशेषेण पुरा मे भानुनानघ ॥ ५ ॥ भोजकः खगशार्दूल यो लोभाद्द्रव्यमुत्सृजेत् ॥ वृद्ध्यै तु सततं वीर स गच्छेन्नरकं ध्रुवम् ॥ ६ ॥ विशेषे चाल्पकशते कामयाने खगाधिप ॥ प्रयुज्यमानो भोजकस्तु पंचकेन शतेन वै ॥ ७ ॥ प्रायश्चित्ती भवेद्वीर न चार्हः पूजने रवेः ॥ कृत्वा सांतपनं कृच्छ्रं ततः संपूजयेद्रविम् ॥ ८ ॥ नान्यदेवप्रतिष्ठा तु कर्तव्या भोजकेन तु ॥ कृत्वा तु तां खगश्रेष्ठ

---

[1] रवेर्गृहमिति शेषः अत एवाग्रिमे–‘ब्रह्महत्यामवाप्नोति–’ इत्याद्युक्तं संगच्छते ।

प्रायश्चित्तीयते नरः ॥ ९ ॥ तस्मात्तु तां न कुर्यार्द्वै भोजकः खगसत्तम ॥ मुक्त्वा तु भास्करं देवं नान्यं देवं निवेदयेत् ॥ १० ॥
कृत्वाधिवेशं देवानां ब्रह्मादीनां खगाधिप ॥ भोजको न स्पृशेद्धातुं कुर्यात्कृच्छ्रं च शुद्धये ॥ ११ ॥ कृत्वा तु कृच्छ्रं विधि
वच्छुद्ध्यैहेतुं खगाधिप ॥ ततः पूजयितुं भानुमधिकारी भवेन्नरः ॥ १२ ॥ न विज्ञातं प्रदातव्यं न म्लानं न च दूषितम् ॥ न च पर्युषितं माल्यं
दातव्यमृद्धिमिच्छता ॥ १३ ॥ देवमुल्लोचयेद्यस्तु स खलः पुष्पलोभतः ॥ पुष्पाणि च सुगंधीनि भोजको नेतराणि च ॥ १४ ॥ ब्रह्महत्यामवा
प्नोति भोजको लोभमोहितः ॥ महारौरवमासाद्य पच्यते शाश्वतीः समाः ॥ १५ ॥ हंत ते कीर्तयिष्यामि धूपदानविधिं परम् ॥ प्रदाने देवदेवस्य
येन धूपेन यत्फलम् ॥ १६ ॥ सदा चंदनधूपेन सान्निध्यं कुरुते रविः ॥ प्रदद्यान्मानसे चैव यद्यदिच्छति मानवः ॥१७॥ तथैवागुरुधूपेन वरं दद्या
दभीप्सितम् ॥ आरोग्यं वा श्रियं प्रेप्सुर्नित्यदा गुग्गुलं दहेत् ॥ १८ ॥ मंगलं धूपदानेन सदा यच्छति भानुमान् ॥ आरोग्यं च श्रियं दद्या
त्सौख्यं च परमं भवेत् ॥ १९ ॥ सदा कुंकुमधूपेन सौभाग्यं लभते नरः ॥ श्रीवासकस्य धूपेन वाणिज्यं सफलं भवेत् ॥ २० ॥ रसं सर्वरसोपेतं
ददतोर्थागमो ध्रुवम् ॥ देवदारुं च दहतो भवत्यन्नमथाक्षयम् ॥ २१ ॥ विलेपनं कुंकुमेन सर्वकामफलप्रदम् ॥ इह लोके सुखी भूत्वा दाता स्वर्गम
वाप्नुयात् ॥ २२ ॥ चंदनस्य प्रदानेन श्रियमायुश्च विंदति ॥ रक्तचंदनदानेन सर्वं दद्याद्दिवाकरः ॥ २३ ॥ अपि रोगशतैर्ग्रस्तैः क्षिप्रारोग्यमवा
प्नुयात् ॥ वर्तिगंधैश्च सौगंध्यं परमं विंदते नरः ॥ २४ ॥ कस्तूरिकालेपनकैरैश्वर्यमतुलं लभेत् ॥ कर्पूरसंयुतैर्गंधैः क्ष्माधिपाधिपतिर्भवेत् ॥ २५ ॥
चतुः समेन गंधेन किं तुल्यं प्राप्नुयान्नरः ॥ देवागारं तु तन्मन्ये भक्त्या य उपलेपयेत् ॥ २६ ॥ स रोगान्मुच्यते क्षिप्रं पुरुषो भोगवान्भवेत् ॥
अष्टादशेह कुष्ठानि ये चान्ये व्याधयो नृणाम् ॥ प्रलयं यांति ते सर्वे मृदा यद्युपलेपयेत् ॥ २७ ॥ प्रलेपनानां सर्वेषां रक्तचंदनमुत्तमम् ॥ नातः पर
तरं किंचिद्भानोस्तुष्टिकरं परम् ॥ २८ ॥ किं तस्य न भवेल्लोको यो ह्यनेन प्रलेपयेत् ॥ सर्वकामसमृद्धोऽसौ सूर्यलोके महीयते ॥ २९ ॥ उप
लिप्य रवेर्गेहं कुर्याद्वै मंडलं पुनः ॥ एकेनाथ समाप्नोति भाग्यमारोग्यमुत्तमम् ॥ ३० ॥ त्रिभिः सप्तभिरच्छिन्ना बालो वान्योपि यो नरः ॥ तेन
प्रदापयेद्देवान्कुर्यात्तान्न निवारयेत् ॥ अनेन विधिना कुर्याद्यावतीः सप्त सप्तमीः ॥ ३१ ॥ एता वै सप्त सप्तम्यो यथाप्रोक्ता विवस्वता ॥ कुर्वीत यो
नरो भक्त्या सर्वपापैः प्रमुच्यते ॥३२॥ अर्कसंपुटकैर्वित्तं मरि चैः प्रियसंगमम् ॥ निंबपत्रै रोगनाशं फलैः पुत्रान्यथेप्सितान् ॥ धनं धान्यं सुवर्णं
च ततो दद्याद्विवस्वते ॥ ३३ ॥ जयं प्राप्नोति विपुलं कृत्वा सर्वत्र खेचर ॥ सर्वान्कामान्कामिकस्तु प्राप्नुयान्नात्र संशयः ॥ ३४ ॥ नरो वा यदि

वा नारी यथोक्तं सप्तमीव्रतम् ॥ यः करोति खगश्रेष्ठ स याति परमं पदम् ॥ ३५ ॥ न तेषां त्रिषु लोकेषु किंचिदस्तीति दुर्लभम् ॥ ये भक्त्या
लोकनाथस्य व्रतिनः संयतेन्द्रियाः ॥ ३६ ॥ सर्वयज्ञफलं तेषां यथा वेदोदितं भवेत् ॥ ब्रह्मेंद्रविष्णवस्तेन पूजिता नात्र संशयः ॥ ३७ ॥ नांधो
न कुष्ठी न क्लीबो न व्यंगो न च निर्धनः ॥ कदापि च भवेत्कश्चिद्यश्चरेत्सप्तमीव्रतम् ॥ ३८ ॥ पुत्रार्थी श्रुतिसंपन्नाँल्लभेत्पुत्रांश्चिरायुषः ॥ न तेषां
त्रिषु लोकेषु किंचिदस्तीति दुर्लभम् ॥ भोगार्थी लभते भोगान्व्रतेनानेन सुव्रत ॥ ३९ ॥ क्रोधात्प्रमादाल्लोभाच्च व्रतभंगो यदा भवेत् ॥ प्रायश्चित्त
मिदं कृत्वा पुनरेव व्रती भवेत् ॥४०॥ सप्तैव यावत्सप्तम्यः संप्राप्ता गुरुणा खग ॥ तासु भास्करमभ्यर्च्य माल्यधूपादिभिर्नरः ॥ भोजयित्वा द्विजा
ञ्छक्त्या प्राप्नुयात्स्वर्गमक्षयम् ॥ ४१ ॥ सप्तम्यां विप्रमुख्येभ्यो योऽन्नं दद्यात्खगेश्वर ॥ तदक्षयं भवेत्तस्य स च सूर्यगृहं व्रजेत् ॥ ४२ ॥ इति ते
कीर्तितं वीर सप्तमीव्रतमुत्तमम् ॥ भूय एवाभिधास्यामि शृणु मे वदतोनघ ॥ ४३ ॥ येन व्रतप्रभावेण कामिकं फलमश्नुते ॥ सप्तमीं खगशार्दूल
शुक्लां द्वादशनामिकाम् ॥ ४४ ॥ गोमूत्रगोमयाहारः षड्वृताहार एव च ॥ अथ वा यावकाहारः शीर्णपर्णाशनोपि वा ॥४५॥ क्षीराशी चैव भक्तं
वा सिक्थाहारोथ वा पुनः ॥ जलाहारोथ वा विद्वान्पूजयेत दिवाकरम् ॥ ४६ ॥ पुष्पोपहारैर्विविधैः पद्मसौगंधिकोत्पलैः ॥ नानाप्रकारैर्गंधैश्च
धूपैर्गुग्गुलुचंदनैः ॥ ४७ ॥ कृशरैः पायसान्नैर्वा विविधैश्च विभूषणैः ॥ अर्चयित्वा द्विजश्रेष्ठ भक्ष्यवस्त्रादिभूषणैः ॥ ४८ ॥ सर्वपक्षफलं प्राप्य
सूर्यलोकं ततो व्रजेत् ॥ तपसोंते ततो वीर कुले महति जायते ॥ ४९ ॥ यथाक्रमं प्रयत्नेन नामानि परिकीर्तयेत् ॥ माघे च फाल्गुने मासि
चैत्रे च गरुडाग्रज ॥ ५० ॥ वैशाखे त्वथ ज्येष्ठे तु आषाढे श्रावणे तथा ॥ मासि भाद्रपदे वीर तथा चाश्वयुजे खग ॥ ५१ ॥ मार्गशीर्षे तथा पौषे
पूजयेत्सततं रविम् ॥ विभावसुं विवस्वंतं भास्करं पक्षिसत्तम ॥ ५२ ॥ विकर्तनं पतंगं च सहस्रांशुं खगाधिप ॥ एतानि देवनामानि मासेष्वेतेषु
खेचर ॥ ५३ ॥ पूजयेद्देवदेवेशं देवानामपि दुर्लभम् ॥ एवं क्रमेण तीक्ष्णांशुं नामभिः परिपूजयेत् ॥ ५४ ॥ इत्येवं ते समाख्यातं मया
गुह्यमिदं खग ॥ अभक्ताय न दातव्यं नाशिष्याय कथंचन ॥ ५५ ॥ न च पापकृते वीर दातव्यं विनतात्मज ॥ व्याधेस्तु नाशनार्थाय
देयं विप्राय सुव्रत ॥ ५६ ॥ दत्त्वा स्वर्गमवाप्नोति श्रुत्वा च विधिवत्खग ॥ ५७ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सौरधर्मे
सप्तमीकल्पे नामपूजाविधिवर्णनं नाम षण्णवत्यधिकशततमोऽध्यायः ॥ १९६ ॥ छ ॥ ॥ सप्ताश्वतिलक उवाच ॥ ॥ अतः परं
प्रवक्ष्यामि पुष्पधूपादिकामिकम् ॥ येन येन तु दानेन तत्तत्फलमवाप्नुयात् ॥ १ ॥ मालतीकुसुमैः पूजा भवेत्सान्निध्यकारिका ॥ आरोग्यं करवी

रैस्तु भवत्यर्थश्च शाश्वतः ॥ २ ॥ ऐश्वर्यमतुलं चैव यशश्च विपुलं तथा ॥ मल्लिकायाश्च कुसुमैर्भगवत्सम्मुखो भवेत् ॥ ३ ॥ सौभाग्यं पुंडरीकैस्तु
परमैश्वर्यमाप्नुयात् ॥ कमलोत्पलकुंदैस्तु यशो विद्या बलं भवेत् ॥ ४ ॥ नानाविधैः सुकुसुमैः क्षिप्रं रोगात्प्रमुच्यते ॥ भवत्यक्षयमन्नं च नित्यम
र्चयतो रविम् ॥ ५ ॥ मंदारकुसुमैः पूजा सर्वकुष्ठनिवारिणी ॥ बिल्वस्य पत्रकुसुमैर्महतीं श्रियमाप्नुयात् ॥ ६ ॥ अर्कस्रजा भवत्यर्कः सर्वदा वरदः
प्रभुः ॥ प्रदद्याद्रूपिणीं कन्यामर्चितो बकुलस्रजा ॥७॥ किंशुकैः पूजितो देवो न पीडयति भास्करः ॥ अगस्त्यकुसुमैः सिद्धिं सानुकूल्यं प्रयच्छति
॥ ८ ॥ स्वयं रूपवतीं दद्यात्पूजितश्चंपकस्रजा ॥ निरुद्वेगो भवेन्नित्यं पूजितः पुष्पमालया ॥ ९ ॥ अशोककुसुमैर्देवमर्चयेद्यो दिवाकरम् ॥ आम्रा
तकस्य कुसुमं निर्माल्यमिव दृश्यते ॥ १० ॥ अप्रत्यग्रं बहिर्यस्मात्तस्मात्तत्परिवर्जयेत् ॥ नवभिस्त्वचलां कीर्तिं दशभिः सुखमुत्तमम् ॥ ११ ॥
भोगानेकादशेनेह प्राप्नुयान्नात्र संशयः ॥ द्वादशेनाचलं राज्यं द्वादशाख्यमवाप्नुयात् ॥ १२ ॥ प्रथमं पूजयेद्भक्त्या भूरूपं प्रणमेत्सदा ॥ भुवर्नमो
द्वितीयं च तृतीयं स्वर्नमेन्नरः ॥ १३ ॥ महर्नमश्चतुर्थं तु पंचमं तु जनोनमः ॥ तपो नमस्तथा षष्ठं नमः सत्यं तु सप्तमम् ॥ १४ ॥ अष्टमं भूर्भुव
श्चेति नवमं खगसत्तम ॥ दशमं षडतो वीर नमोल्काय तथा परम् ॥ १५ ॥ द्वादशं तु खषोल्केति ॐ नमः पूजयेत्खग ॥ एवंमंडलकारी तु
क्रमादेवं फलं लभेत् ॥१६॥ घृतदीपप्रदानेन चक्षुष्माञ्जायते नरः ॥ कटुतैलस्य दीपेन शत्रूणां संक्षयो भवेत् ॥ मधूकानां तु तैलेन सोभाग्यं परमं
लभेत् ॥ १७ ॥ संपूज्य विधिवद्देवं पुष्पधूपादिभिर्नरः ॥ यथाशक्त्या ततः पश्चान्नैवेद्यं तु प्रकल्पयेत् ॥ १८ ॥ पुष्पाणां प्रवरा जाती धूपानां चैव
चन्दनम् ॥ गंधानां कुंकुमं श्रेष्ठं मोदकाश्च निवेदने ॥ १९ ॥ एतैस्तुष्यति देवेशः सान्निध्यं चाधिगच्छति ॥ ददाति प्रवरानिष्टान्दातुश्च स्वर्गतिं
तथा ॥ २० ॥ एवं संपूज्य विधिवत्कृत्वा चापि प्रदक्षिणाम् ॥ प्रणम्य शिरसा देवं भास्करं तिमिरापहम् ॥ आरुह्य सुविमानं स याति भानोः
सलोकताम्॥२१॥पुनः संपूज्य देवेशं जपं कुर्याद्यथेष्टकम्॥ हुताशने च जुहुयाद्विधिदृष्टेन कर्मणा ॥ एवमेकैकशः कार्याः सप्तम्यः सप्त सर्वदा॥२२॥
उदकप्रसृतिं पीत्वा क्रियते या तु सप्तमी ॥ सा ज्ञेया सुखदा वीर सदैवोदकसप्तमी ॥ २३ ॥ या काचित्सप्तमी नोक्ता तां ते वक्ष्यामि सर्वदा॥ वरा
टिका क्रमेणाप्तं यत्किंचित्प्रतिभक्षयेत् ॥ २४ ॥ अनेन देयमूल्येन यल्लब्धं तत्प्रभक्षयेत् ॥ अभक्ष्यं चापि भक्ष्यं वा नात्र कार्या विचारणा॥ २५ ॥
इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मेषु वराटिकावर्णनं नाम सप्तनवत्यधिकशततमोऽध्यायः ॥ १९७ ॥ छ ॥ ॥ शता
नीक उवाच ॥ ॥ किमेकं दैवतं लोके किं वाप्येकं परायणम् ॥ स्तुवन्तः कं कमर्चंतः प्राप्नुयुर्मानवाः शुभम् ॥ १ ॥ को धर्मः सर्वधर्माणां कश्च

पूज्यो मतस्तव ॥ ब्रह्मादयः कमर्चंति कश्चादिस्त्रिदिवौकसाम् ॥ २ ॥ ॥ सुमन्तुरुवाच ॥ ॥ अत्राहं ते प्रवक्ष्यामि संवादं पापनाशनम् ॥ भीष्म
स्य नरशार्दूल व्यासस्य च महात्मनः ॥३॥ सुखासीनं महाव्यासं गंगाकूले द्विजोत्तम॥ तं दृष्ट्वा सुमहातेजा ज्वलंतमिव पावकम् ॥४॥ साक्षान्नारा
यणं देवं तेजसादित्यसन्निभम्॥प्रणम्य शिरसा वीर सर्वशास्त्रालयं परम् ॥५॥ महाभारतकर्तारं वेदार्थनिकषं परम् ॥ आचार्यं परमर्षीणां राजर्षीणां
च भारत ॥६॥ कर्तारं कुरुवंशस्य दैवतं परमं मम ॥ पप्रच्छ कुरुशार्दूलो द्विजभक्त्या समन्वितः ॥७॥ देवदेवस्य महात्म्यं चित्तस्थं भास्करस्य
तु ॥ स महात्मा महातेजा भीष्मः पूर्वं मुनिं तथा ॥ ८ ॥ ॥ भीष्म उवाच ॥ ॥ भगवन्द्विजशार्दूल पाराशर्य महामते ॥ ममाख्यातं त्वया
सर्वं वाङ्मयं सचराचरम् ॥ ९ ॥ भास्करस्य मुनिश्रेष्ठ संशयोद्यापि वर्तते ॥ आदौ तस्य नमस्कारमन्येषां तदनंतरम् ॥ १० ॥ ब्रह्मादीनां तु
रुद्राद्यैर्ब्रूहि तत्त्वेन हेतुना ॥ क एष भास्करो ब्रह्मन्कुतो जातः क उच्यते ॥ ११ ॥ कीर्तयस्व यथान्यायं कौतुकं हि परं मम ॥ कुशलो हि
भवाँल्लोके तस्मात्त्वं वक्तुमर्हसि ॥ १२ ॥ ॥ व्यास उवाच ॥ ॥ अहो तव महत्कष्टं प्रमूढोसि न संशयः ॥ स्तुवंतश्च तमर्चाभिः सिद्धा ब्रह्मादयः
सुराः ॥ १३ ॥ सर्वेषामेव देवानामादिरादित्य उच्यते ॥ स हंति तिमिरं सर्वं दिग्विदिक्षु व्यवस्थितम् ॥ १४ ॥ स धर्मः सर्वधर्माणां स च
पूज्यतमो मतः ॥ ब्रह्मादयस्तमर्चंति स चादिस्त्रिदिवौकसाम् ॥ १५ ॥ अदितिः कश्यपसती आदित्यस्तेन चोच्यते ॥ आदिकर्ताथ वा यस्मा
त्तस्मादादित्य उच्यते ॥ १६ ॥ तस्मादेतज्जगत्सर्वमादित्यात्संप्रवर्तते ॥ सदेवासुरगंधर्वं सयक्षोरगराक्षसम् ॥ १७ ॥ रुद्रोपेंद्रौ तथेंद्रश्च ब्रह्मा
दक्षोथ कश्यपः ॥ आदित्यदेवताः सर्वे तथान्ये देवदानवाः ॥ १८ ॥ मुखाद्भूतो विरिंचिस्तु रुद्रो वक्षस्थलात्ततः ॥ उपेंद्रो दक्षिणाद्धस्ताद्धाता
वामकरात्तथा ॥ १९ ॥ वामपादतलाद्दक्षो दक्षिणात्कश्यपस्तथा ॥ इत्युत्पन्नास्तथा चान्ये देवासुरनराः खगाः ॥ तेनासौ देव आदित्यः सर्वदेवेषु
पूजितः ॥२०॥ ॥ भीष्म उवाच ॥ ॥ यदीत्थं गीयते वीर दिग्विदिक्षु स भास्करः ॥ यदि तस्य प्रभावोयं पाराशर्य जगत्पतेः ॥२१॥ स किमर्थं
त्रिसंध्यं तु राक्षसैः परिभूयते ॥ द्विजैः संरक्ष्यते भूयश्चक्रवद्भ्रमते पुनः ॥ राहुणा गृह्यतेऽग्राह्यस्तत्किमर्थं द्विजोत्तम ॥२२॥ ॥व्यास उवाच ॥ ॥
पिशाचोरगरक्षांसि डाकिनीदानवांस्तथा ॥ दक्षिणाग्निर्दहेत्क्रोधात्तमाक्रामति भास्करः ॥ २३ ॥ त्रिसंध्यं तु त्रयो देवाः सान्निध्यं रविमंडले ॥
मुहूर्तस्य प्रभावोयमसाध्ये दृष्टके तथा ॥ २४ ॥ तमेकमेवमुद्दिश्य लोके धर्मः प्रवर्तते ॥ नमस्कृते स्तुते तस्मिन्सर्वे देवा नमस्कृताः ॥ २५ ॥
त्रिसन्ध्यं वसुधादेवैर्भास्करस्त्रिः प्रणम्यते ॥ राहुरादित्यबिंबस्य स्थितोधस्तान्न संशयः ॥ २६ ॥ अमृतार्थी विमानस्थो यावत्संस्रवतेऽमृतम् ॥

विमानांतरितं बिंबमादिशेद्ग्रहणं ततः ॥ २७ ॥ न कश्चिद्धर्षितुं शक्त आदित्यो दहते ध्रुवम् ॥ दिवारात्रिमुहूर्तानां ज्ञानायाक्रमते रविः॥२८॥ नादित्येन विना रात्रिर्न दिनं न च तर्पणम् ॥ नाधर्म्मो नाथ वा धर्म्मस्तेन दृष्टं चराचरम् ॥ २९ ॥ आदित्यः पाति वै सर्वमादित्यः सृजते सदा ॥ एतत्सर्वं समाख्यातं यत्पृष्टं भवता मम ॥ ३० ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मे व्यासभीष्मसंवादेऽष्टनवत्यधिकशततमोऽध्यायः ॥ १९८ ॥ छ ॥ ॥ भीष्म उवाच ॥ ॥ स आदित्यो भवेद्येन अचिरात्तु वरप्रदः ॥ तदहं श्रोतुमिच्छामि विप्र मां ब्रूहि तत्त्वतः ॥ १ ॥ ॥ व्यास उवाच ॥ ॥ पूजया जपहोमेन ध्यानधारणया सह ॥ सकलं मण्डलं कृत्वा तद्दीक्षां समयं तथा ॥ २ ॥ लब्ध्वाराधयते यस्तु भक्त्या तद्गतमानसः ॥ तस्य भानुर्भवेद्वीर अचिरात्तु वरप्रदः ॥ ३ ॥ बलसिद्धिं महद्वीर्यं प्रतापं च स्वकायनम् ॥ धनं धान्यं सुवर्णं च रूपं सौभाग्यसंपदम् ॥ ४ ॥ आरोग्यमायुः कीर्तिं च यशः पुत्रांश्च मानद ॥ ददते नात्र संदेहो यस्य तुष्टो दिवाकरः ॥ ५ ॥ धर्ममर्थं तथा कामं विद्यां मोक्षश्रियं तथा ॥ ददते भास्करस्तुष्टो नराणां नात्र संशयः ॥ ६ ॥ सौरेण विधिना तात पूजयित्वा दिवाकरम् ॥ सर्वान्कामानवाप्नोति तथादित्यालयं नृप ॥ ७ ॥ ॥ भीष्म उवाच ॥ ॥ सौरस्नानविधिं ब्रूहि सरहस्यं महामते ॥ येन स्नातोऽमलो याति नरः पूजयितुं रविम् ॥ ८ ॥ ॥ व्यास उवाच ॥ ॥ हंत ते संप्रवक्ष्यामि स्नानं पापप्रणाशनम् ॥ शुचौ मनोरमे स्थाने संगृह्यास्त्रेण मृत्तिकाम् ॥९॥ संधिसंघो हकारस्तु टरेफोफसमन्विते ॥ अनेनास्त्रेण संगृह्य ततः स्नानं समाचरेत् ॥ १०॥ मलस्नानं ततः पश्चाच्छेषार्धेन तु कारयेत् ॥ भागत्रयं तु सार्धं तु तृणपाषाणवर्जितम् ॥ ११ ॥ एकमस्त्रेण चालभ्य तथान्यं भास्करेण तु ॥ अंगं चैव तृतीयेन अभिमंत्र्य सकृत्सकृत् ॥ १२ ॥ जप्त्वास्त्रेण क्षिपेद्दिक्षु निर्विघ्नं तु जलं भवेत् ॥ सूर्यतीर्थे द्वितीयेन अभिमंत्र्य सकृत्सकृत् ॥ १३ ॥ गुण्डयित्वा ततः स्नायादिति तीर्थेषु मानवः ॥ तूर्यशंखनिनादेन ध्यात्वा देवं दिवाकरम् ॥ १४ ॥ स्नात्वा राजोपचारेण पुनराचम्य यत्नतः ॥ स्नानं कृत्वा ततो भीष्म मंत्रराजेन संयुतम् ॥ १५ ॥ हरेफौ बिंदुयुक्तश्च तथान्यो दीर्घया सह ॥ मात्रया रेफसंयुक्तो हकारो बिंदुना सह ॥ १६ ॥ सकारः सविसर्गस्तु मंत्रराजो यमुच्यते ॥ ततस्तु तर्पयेन्मंत्रान्सर्वांस्तांस्तु कराग्रजैः ॥ १७ ॥ पर्वणामूर्ध्वतो देवाः सव्येन मुनयस्तथा ॥ पितरश्चापसव्येन तद्बीजेन प्रतर्पयेत्॥ ॥ १८ ॥ यद्गीतं प्रवरं लोके अक्षराणां मनीषिभिः ॥ तद्बिंदुसहितं प्रोक्तं हृद्बीजं नात्र संशयः ॥ १९ ॥ कृत्वा वामकरे हस्ताद्ध्यात्वा प्राज्ञो विधानवित् ॥ एवं स्नात्वा विधानेन संध्यां वन्देद्विधानतः ॥ २० ॥ ततो विद्वान्क्षिपेत्पश्चाद्भास्करायोदकांजलिम् ॥ जपेच्च त्र्यक्षरं मंत्रं षण्मुखं

वा यदिच्छया ॥ २१ ॥ मंत्रराजेति यः पूर्वं तवाख्यातो मया नृप ॥ पश्चात्तीर्थे तु मंत्रांस्तु संहृत्य हृदयं न्यसेत् ॥ २२ ॥ मंत्रैरात्मानमेकत्र
कृत्वा ह्यर्घ्यं प्रदापयेत् ॥ रक्तचन्दनगंधैस्तु शुचिस्नातो महीतले ॥ २३ ॥ कृत्वा मण्डलकं वित्तमेकचित्तो व्यवस्थितः ॥ गृहीत्वा करवीराणि
संस्थाप्य ताम्रभाजने ॥ २४ ॥ तिलतंडुलसंयुक्तं कुशगन्धोदकेन तु ॥ रक्तचन्दनधूपेन युक्तमर्घ्यं प्रसाध्य तत् ॥ २५ ॥ कृत्वा शिरसि तत्पात्रं
जानुभ्यामवनिं गतः ॥ पूर्वमंत्रेण संयुक्तमर्घ्यं दद्यात्तु भानवे ॥२६॥ मुच्यते सर्वपापैस्तु यो ह्येवं विनिवेदयेत् ॥ यद्युगादिसहस्रेण व्यतीपातशतेन
च ॥ २७ ॥ अयनानां सहस्रेण चन्द्रस्य ग्रहणे तथा ॥ गवां शतसहस्रेण यत्फलं ज्येष्ठपुष्करे ॥ दत्ते कुरुकुलश्रेष्ठ तदर्घ्येण फलं लभेत् ॥२८॥
दीक्षामन्त्रविहीनोऽपि भक्त्या संवत्सरेण तु ॥ फलमर्घ्येण वै वीर लभते नात्र संशयः ॥ २९ ॥ यः पुनर्दीक्षितो विद्वान्विधिनार्घ्यं निवेदयेत् ॥
नासावुत्पद्यते भूमौ स लयं याति भास्करे॥३०॥ इह जन्मनि सौभाग्यमायुरारोग्यसंपदाम् ॥ अचिराद्भवते वीर स भार्यासुखभाजनम् ॥३१॥ एष
स्नानविधिः प्रोक्तो मया संक्षेपतस्तव ॥ हिताय मानवेंद्राणां सर्वपापप्रणाशनः ॥३२॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे
सौरधर्मेषु भीष्मव्याससंवाद एकोनद्विशततमोऽध्यायः ॥ १९९ ॥ ॥ छ ॥ ॥ भीष्म उवाच ॥ ॥ कथितस्ते स्नानविधिर्ब्रह्मन्वै पाप
हारकः ॥ सम्यग्ब्रह्मर्चनविधिं पूजयिष्यामि येन वै ॥ १ ॥ ॥ व्यास उवाच ॥ ॥ हंत ते संप्रवक्ष्यामि विधिमादित्यपूजने ॥ विविक्ते विजय
स्थाने सुप्रसन्ने शुशोभने ॥ २ ॥ पूजयेद्भास्करं मन्त्री सरलीकृतविग्रहः ॥ भद्रासनसमारूढः प्राङ्मुखः साधकोत्तमः ॥ ३ ॥ अस्त्रबीजेन
मंत्रेण नरः स्वांगानि विन्यसेत् ॥ अंगुष्ठमादितः कृत्वा कनिष्ठान्तं सुविन्यसेत् ॥४॥ हृदयादीन्फडन्तांस्तान्विन्यसेत्क्रमतः सदा ॥ नेत्रपाणितले
वीर न्यस्य अर्घ्यादि मंत्रवित् ॥ ५ ॥ यवर्गे यचतुर्थं तु कर्णबिंदुसमन्वितम् ॥ नेत्रबीजमिति प्रोक्तं ज्योतीरूपं न संशयः ॥६॥ पश्चात्तु त्र्यक्षरं
सूर्यं कवचं विन्यसेद्बुधः ॥ कथितं तन्मया वीर मंत्रराजेति पृच्छतः ॥ ७ ॥ प्राणायामं ततः कुर्यात्प्रथमं बीजमुद्गिरन् ॥ शेषक्रमेण हुत्वायं विरजे
भीष्मशक्तितः ॥ ८ ॥ त्रिभिरेव ततो घोरैरात्मशुद्धिः कृता भवेत् ॥ इति संशोध्य चात्मानं सूर्यं सर्वांतिकं न्यसेत् ॥ ९ ॥ हृदये हृदयं न्यस्य
शिरः शिरसि विन्यसेत् ॥ एकविंशतिमातृकाया अक्षरं यत्प्रकीर्तितम् ॥१०॥ हृद्बीजमिति विख्यातं ब्रह्मस्थानमनौपमम् ॥ शिरसार्कस्य पूजा तु
लोकेर्कः प्रतिकथ्यते ॥ ११ ॥ शिखायां तु शिखां न्यस्येच्छरीरे कवचं न्यसेत् ॥ नेत्रयोर्विन्यसेन्नेत्रं करयोरस्त्रमेव च ॥ १२ ॥ महाव्याहृतयो

राजंस्तथारज्वालिनी शिखा ॥ हकारश्च रकारश्च कुकारो बिंदुना सह ॥१३ ॥ एतेषां समयाश्चैव कवचं परिकथ्यते ॥ नेत्रयोर्विन्यसेन्नेत्रं करयोर
स्त्रमेव च ॥ १४ ॥ एवमंगानि विन्यस्य नासौ केनापि बाद्धयते ॥ शत्रवो मित्रतां यांति अलाभे लाभमाप्नुयात् ॥१५॥ आत्मानं भास्करं ज्ञात्वा
यथोक्तं तत्त्वदर्शिभिः ॥ ततस्तु पूजयेद्भानुं स्थंडिले विधिवत्पुनः ॥ १६ ॥ कृत्वा तु दक्षिणे पार्श्वे दिव्यपुष्पकरंडकम् ॥ कृत्वा सुशोभिते वामे
ताम्रपूर्णेन वारिणा ॥ १७ ॥ अस्त्रेण क्षालितां पूर्णां शेषं मंत्रैर्जलैस्तथा ॥ अभिमंत्र्य ततः स्थाप्य कवचेनावगुंठिताम् ॥ १८ ॥ स्थंडिले चैव
द्रव्याणि पूजार्थं कल्पितानि तु ॥ सर्वाणि प्रोक्षयेद्विद्वानर्घ्यपात्रं जलेन तु ॥ ततो मंत्रं जपेत्पश्चादेकचित्तेन मंत्रवित् ॥१९॥ ॥ भीष्म उवाच ॥ ॥
पुराणसहितैर्मंत्रैर्यो विधिः कथितो बुधैः ॥२०॥ स मया विदितः कृत्स्नः कथितो नैकशो द्विजैः ॥ वेदोक्तैर्विविधैर्मंत्रैर्यथा संपूज्यते रविः ॥ २१ ॥
तथा मे ब्रूहि सकलं वैदिकं विधिसत्तमम् ॥ २२ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मे द्विशततमोऽध्यायः ॥२००॥छ॥
॥ व्यास उवाच ॥ अथ त्वां कथयिष्येहं संवादं धर्मवर्द्धनम् ॥ सुरज्येष्ठस्य देवस्य केशवस्य च भारत ॥ १ ॥ मनोवत्यां सुरज्येष्ठं सुखासीनं चतुर्मु
खम् ॥ प्रणम्य शिरसा विष्णुरिदं वचनमब्रवीत् ॥ २ ॥ ॥ विष्णुरुवाच ॥ ॥ भगवन्देवदेवेश सुरज्येष्ठ चतुर्मुख ॥ आराधनविधिं ब्रूहि भास्करस्य
महात्मनः ॥ ३ ॥ कथमाराधयेद्भानुं मंडलस्थं दिवस्पतिम् ॥ ब्रूहि मेऽत्र गणं देवं येनाहं पूजये विभुम् ॥ ४ ॥ साधुसाधु महाबाहो साधु पृष्टोऽ
स्मि भूधर ॥ शृणु चैकमना देव भास्कराराधने विधिम् ॥५॥ खषोल्कं निर्मलं देवं पूजयित्वा विभावसुम् ॥ पूर्वे मध्ये तथाग्नेय्यां विरूपाक्षे प्रभं
जने ॥ ६ ॥ क्रमेण यावदीशानीं हृदि बीजेन विन्यसेत् ॥ खषोल्कासनमेतत्तु विन्यस्तं मानवोत्तमैः ॥ ७ ॥ ततस्तस्योपरिष्टात्तु हृदयेन तु कंचु
कम् ॥ सप्तावरणसंयुक्तमष्टपत्रं सकार्णिकम् ॥ ८ ॥ केसरालंबदेवत्वं पंचवर्णं महाद्भुतम् ॥ परीक्षाभूमिविधिवच्छास्त्रोक्तविधिना कृतम् ॥ ९ ॥
दीप्तादि पूर्वादारभ्य यावदीशानगोचरम् ॥ न्यसेच्छक्त्यष्टकं मंत्री मध्यतः सर्वतोमुखीम् ॥ १० ॥ दीप्ता सूक्ष्मा जया भद्रा विभूतिर्विमला तथा ॥
अमोघा विद्युता चैव नवमी सर्वतोमुखी ॥ ११ ॥ तत आवाहयेद्भानुं स्थापयेत्कर्णिकोपरि ॥ उपस्थानं तु वै कृत्वा मंत्रेणानेन सुव्रत ॥ १२ ॥
उदुत्यं जातवेदसमिति मंत्रः प्रकीर्तितः ॥ अग्निं दूतेन मंत्रेण अनेन विश्वसुव्रत ॥१३॥ आकृष्णेन रजसा मंत्रेणानेन चार्चयेत् ॥ हंसःशुचिषदिति
च मंत्रेणार्कं प्रपूजयेत् ॥ १४ ॥ अपत्येतारकं देवीदीप्तानेन प्रपूजयेत् ॥ अदृश्रमस्यकेतवः सूक्ष्मां देवीं समर्चयेत् ॥ १५ ॥ तरणिर्विश्वदर्शेति अनेन
सततं जयम् ॥ प्रत्यङ्देवानां विशेति भद्रां देवीं समर्चयेत् ॥ १६ ॥ विभूतिमर्चयेन्नित्यं येनापावकचक्षसा ॥ विद्यामेषीति मंत्रेण ह्यनेन विमलां

सदा ॥ १७ ॥ अमोघां पूजयेन्नित्यं मंत्रेणानेन सुव्रत ॥ नवमीं पूजयेद्देवीं सततं सर्वतोमुखीम् ॥ १८ ॥ मंत्रेणानेन कृष्णस्य उद्वयंतमितीह च ॥ उद्यनद्यमित्रहोमं प्रथममक्षरं व्रजेत् ॥ १९ ॥ द्वितीयं पूजयेत्कृष्णं शुक्रेषु हरिमाहवे ॥ उदगादयमादित्यो अनेनापि तृतीयकम् ॥ २० ॥ तत्सवितुर्वरेण्येति चतुर्थं परिकीर्तितम् ॥ महितोमहितोयेति पंचर्चं परिकीर्तयेत् ॥ २१ ॥ हिरण्यगर्भः समवर्तता षष्ठं बीजं प्रकीर्तितम् ॥ सविता पश्चातात्पुरस्तात्सप्तमं देवसत्तम ॥ २२ ॥ एवं बीजानि विन्यस्य आदित्यं स्थापयेद्द्विजः ॥ आदित्यं स्थापयेद्ध्याने सर्वेषां पूजयेद्बुधः ॥ २३ ॥ बाह्यतो देवशार्दूल इन्द्रादीनां समंततः ॥ रक्तवर्णं महातेजं सितपद्मोपरि स्थितम् ॥ २४ ॥ सर्वलक्षणसंयुक्तं सर्वाभरणभूषितम् ॥ द्विभुजं चैकचक्रं च सौम्यं पद्मधनुष्करम् ॥ २५ ॥ वर्तुलं तेन बिंबेन मध्यस्थमतितेजसम् ॥ आदित्यस्य त्विदं रूपं सर्वलोकेषु पूजितम् ॥२६॥ ध्यात्वा संपूजयेन्नित्यं स्थंडिलं मंडलाश्रितम् ॥ २७ ॥

॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मेषु सूर्यमण्डलदेवतार्चनविधिवर्णनं नामैकाधिकद्विशततमोऽध्यायः ॥ २०१ ॥ छ ॥

॥ विष्णुरुवाच ॥ ॥ मण्डलस्थं सुरश्रेष्ठ विधिना येन भास्करम् ॥ पूजयेन्मानवो भक्त्या स विधिः कथ्यतां मम ॥ १ ॥ पूजयेद्विधिना येन भास्करं पद्मसंभवम् ॥ मूर्तिस्थं सर्वगं देवं पूजितं ससुरासुरैः ॥२॥ ॥ ब्रह्मोवाच ॥ साधु कृष्ण महाबाहो साधु पृष्टोऽस्मि सुव्रत ॥ शृणु चैकमनाः पूर्वं मूर्तिस्थं येन पूजयेत् ॥ ३ ॥ इषे त्वेति च मन्त्रेण उत्तमांगं सदार्चयेत् ॥ अग्निमीळेति मन्त्रेण पूजयेद्दक्षिणे करे ॥४॥ अग्न आयाहि मन्त्रेण पादौ देवस्य पूजयेत् ॥ आजिघ्रेति च मंत्रेण पूजयेत्पुष्पमालया ॥५॥ योगयोगेति मंत्रेण मुक्तपुष्पांजलिं क्षिपेत् ॥ समुद्रं गच्छ यत्प्रोक्तमनेन स्नापयेद्रविम् ॥ ६ ॥ इमं मे गंगेति यत्प्रोक्तमनेनापि च भूधर ॥ समुद्रज्येति मन्त्रेण कषायैः परिरूषयेत् ॥ ७ ॥ स्नापयेत्पयसा कृष्ण आप्यायस्वेति मन्त्रतः ॥ दधिक्राव्णेति वै दध्ना स्नापयेद्दधिवद्रविम् ॥ ८ ॥ तेजोऽसि शुक्रमिति च घृतेन स्नपनं परम् ॥ या औषधीति मंत्रेण स्नानमोषधिभिः स्मृतम् ॥ ९ ॥ उद्वर्तयेत्ततो भानुं द्विपदाभिः सुराधिप ॥ मानस्तोकेति मन्त्रेण युगपत्स्नानमाचरेत् ॥ १० ॥ विष्णोरराटमन्त्रेण स्नापयेद्गन्धवारिणा ॥ सौवर्णेन तु मंत्रेण अर्घ्यं पाद्यं निवेदयेत् ॥ ११ ॥ इदं विष्णुर्विचक्रमे मंत्रेणार्घ्यं प्रदापयेत् ॥ वेदोऽसीति हि मंत्रेण उपवीतं प्रदापयेत् ॥ १२ ॥ बृहस्पतेति मन्त्रेण दद्याद्वस्त्राणि भानवे ॥ येन श्रियं प्रकुर्वाणां पुष्पमालां प्रयोजयेत् ॥ १३ ॥ धूरसीति च मन्त्रेण धूपं दद्यात्सगुग्गुलम् ॥ समिद्धोंऽजनमंत्रेण अंजनं तु प्रयच्छति ॥ १४ ॥ युञ्जानीति च मंत्रेण भानुं रोचनयार्चयेत् ॥ आरक्तकं च वै कुर्याद्दीर्घायुष्ट्वाय वै बुधः ॥ १५ ॥ सहस्रशीर्षा पुरुषो रविं सरसि पूजयेत् ॥ संभावयेति

मंत्रेण पद्मनेत्रे परामृशेत् ॥ १६ ॥ विश्वतश्चक्षुरित्येवं भानोर्देहं समालभेत् ॥ श्रीश्च ते लक्ष्मीश्चेति मंत्रेणानेन पूजयेत् ॥ १७ ॥ इति श्रीभविष्ये
महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मे आदित्यपूजाविधिवर्णनं नाम द्व्यधिकद्विशततमोऽध्यायः ॥ २०२ ॥ ॥ छ ॥ ॥ विष्णुरुवाच ॥
व्योमपूजाविधिं ब्रूहि समासाच्चतुरानन ॥ अष्टशृंगं कथं व्योम पूजयेद्भास्करस्य तु ॥ १ ॥ ॥ ब्रह्मोवाच ॥ ॥ व्योमपूजाविधिं कृष्ण निबोध
गदतो मम ॥ अष्टशृंगं यथा व्योम पूजयंति मनीषिणः ॥ २ ॥ सौवर्णं राजतं ताम्रं कृत्वा चाश्ममयं तथा ॥ अष्टशृंगं महाबाहो अनेन विधिनार्च
येत् ॥ ३ ॥ प्रथमं पूजयेद्भानुं मध्ये मंत्रेण सुव्रत ॥ महिषा वो महायेति नानापुष्पकदंबकैः ॥ ४ ॥ त्रातारमिंद्रं मंत्रेण सर्वशृंगं सदार्चयेत् ॥
उदीरतामवर इत्यथ वानेन पूजयेत् ॥ ५ ॥ आयं गौरिति मन्त्रेण नैर्ऋतं शृंगमर्चयेत् ॥ रक्षोहणं वाजिनं वा पूजयेदसुरांतकम् ॥ ६ ॥ इन्द्रसो
मांतपतये ह्यथ वानेन पूजयेत् ॥ अभित्वा शूर नो नुम ऐशानं शृंगमर्चयेत् ॥ ७ ॥ एवं भानुं च परितः पूजयंति सदाच्युत ॥ येनेदं भूतमिति
वै अथ वानेन पूजयेत् ॥ ८ ॥ नमोऽस्तु सर्वपापेभ्यो व्योमपीठं सदार्चयेत ॥ ते नराः सततं कामान्प्राप्नुवंति न संशयः ॥ ९ ॥ त्वमेको रुद्राणां
वसूनां पूर्वाह्णे तेन पूजयेत् ॥ तद्विष्णोः परमं पदं हंसः शुचिषदिति वै अपराह्णे सदार्चयेत् ॥ १० ॥ एवं भानुं ग्रहैः सार्धं पूजयंति सदस्पते ॥ ते
सर्वान्विविधान्कामान्प्राप्नुवंति न संशयः ॥ ११ ॥ विमले वाससी दत्त्वा गुरवे सपवित्रके ॥ उपानहौ तथा कृष्ण सौवर्णमंगुलीयकम् ॥ १२ ॥
गन्धपुष्पाणि चित्राणि भक्ष्यभोज्यान्यनेकशः ॥ अनेन विधिना यस्तु सोपवासोर्चयेद्रविम् ॥ बहुपुत्रो बहुधनः स नरो भव्यवान्भवेत् ॥ १३ ॥
उत्तरे चायने यस्तु सोपवासोर्चयेद्रविम् ॥ सोश्वमेधफलं विंद्याद्बहुपुत्रश्च जायते ॥ १४ ॥ कृत्वोपवासं विषुवे यस्तु पूजयते रविम् ॥ बहुपुत्रो
बहुधनो कीर्तिमांश्चापि जायते ॥ १५ ॥ कृत्वोपवासं ग्रहणे विधिवच्चंद्रसूर्ययोः ॥ पूजयेद्भास्करं भक्त्या ब्रह्मलोकं स गच्छति ॥ १६ ॥ इति ते
कथितो विष्णो भास्कराराधने विधिः ॥ यं श्रुत्वा पुरुषो भक्त्या मम लोके महीयते ॥ १७ ॥ पुनरेत्य महीं कृष्ण राजा भवति भूतले ॥ बहु
पुत्रो बहुधनः समरेष्वपराजितः ॥ १८ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मे भास्कराराधनविधिवर्णनं नाम त्र्यधि
कद्विशततमोऽध्यायः ॥ २०३ ॥ ॥ छ ॥ ॥ सुमन्तुरुवाच ॥ ॥ अतः परं प्रवक्ष्यामि विधिं परमपूजितम् ॥ रत्नव्योमप्रतिष्ठायां
यथा भानुं प्रपूजयेत् ॥ १ ॥ अर्चयित्वा तु प्रकृतिं गंधपुष्पाक्षतैर्विभो ॥ सहोदकेनांजलिना सहपुष्पाक्षतेन वा ॥ २ ॥ आवाहये
न्महादेवं खषोल्कं भास्करं विभुम् ॥ मन्त्रेण कुरुशार्दूल प्रत्यक्षकिरणाय वै ॥ ३ ॥ ॐ खषोल्कमावाहयामि ॐ भूर्भुवः स्वरों

आदित्याराधने मन्त्रः ॥ ४ ॥ अभिमन्त्र्य भुवे मात्रं सावित्र्या च ऋचाविभो ॥ आपो हिष्ठेति या प्रोक्ता पृथा सूर्यस्य सर्वदा ॥ ५ ॥ यथान्यायं तु संक्षाल्य पूरयेच्चान्यतो यतः ॥ हिरण्यगर्भः समवर्ततेत्यनया क्षालयेद् बुधः ॥ ६ ॥ सविता पश्चातात्सविता ह्यनया पूरयेद्बुधः ॥ इत्येवं पूरयित्वा तु वारि पुष्पाक्षतैर्बुधः ॥ ७ ॥ पात्रमौदुम्बरं गृह्य कृत्स्नं सूर्यस्य दर्शयेत् ॥ उदुत्यं जातवेदसमनया व्योम्नि निक्षिपेत् ॥ ८ ॥ हंसः शुचिषदिति पाद्यं दद्याद्विचक्षणः ॥ निर्वापयेच्च पयसा खषोल्कं स्नापयेत्ततः ॥ ९ ॥ अग्निस्तु सप्तभिर्वीर कीर्तिं तास्ताश्च कृत्स्नशः ॥ आपो हिष्ठेति च क्रमात्तिसृभिः कुरुनंदन ॥ १० ॥ हिरण्यवर्णेति क्रमांच्चतुर्भिश्च[1] नराधिप ॥ अभिमंत्र्योदकमृग्भिस्तिसृभिर्निक्षिपेन्नृप ॥ ११ ॥ भानोः प्रदक्षिणं कृत्वा कृणुष्वपाज इत्यपि ॥ इत्यमूषु वाजिनं गिरः प्रथमा परिकीर्तिता ॥ १२ ॥ पतिमिंद्रस्तवाचाम द्वितीया परिकीर्तिता ॥ पतिमिंद्रस्तु शुद्धो न आगहि तृतीया परिकीर्तिता ॥ १३ ॥ सिध्ये वृत्राणि जिघ्ने शगंधैर्भानुं प्रपूजयेत् ॥ अस्य वामस्येत्यनया अक्षतैः पूजयेद्रविम् ॥ १४ ॥ सप्त युंजंति रथमनया पूजयेद्रविम् ॥ पुष्पैर्भरतशार्दूल सततं तमनाशनम् ॥ १५ ॥ को ददर्श प्रथममनया धूपमादिशेत् ॥ पाकः पृच्छाम्यनया चंदनं प्रतिपादयेत् ॥ १६ ॥ उद्दीप्यस्येत्यनया दीपं दद्याद्विभावसोः ॥ अर्चित्वा कुंकुमं चैव शीर्षं क्षीरं तु मंडलम् ॥ १७ ॥ युक्ता मातासीत्यनया नैवेद्यं प्रतिपादयेत् ॥ गौरीर्मिमायेति दद्यात्तथा शुक्ले च वाससी ॥ १८ ॥ तस्याः समुद्रेत्यनया उपवीतं निवेदयेत् ॥ इति संपूज्य देवेशं ततः कुर्यात्परां स्तुतिम् ॥ १९ ॥ ऋग्भिर्वै पंचभिस्तात शृणु चैकमनादृतः ॥ उक्षाणं पृश्निरिति च प्रथमा परिकीर्तिता ॥ २० ॥ चत्वारि वागिति भवेद्द्वितीया परिकीर्तिता ॥ इंद्रं मित्रं तृतीया तु वराधिक्ये प्रकीर्तिता ॥ २१ ॥ कृष्णं नियानं हि तथा चतुर्थी परिकीर्तिता ॥ यो रत्नवाहीत्यनया किरीटं योजयेद्रवौ ॥ २२ ॥ गतेहनामित्यनया अव्यंगं भास्करं न्यसेत् ॥ इयमददाद्रभसमृणच्युतमिति ऋगादितः ॥ २३ ॥ कृत्वा पूजां ततश्चर्ग्भिरष्टाभिरिति चाच्युत ॥ देवस्य शक्तयोऽष्टौ च पूजयेद्विधिवत्क्रमात् ॥ २४ ॥ इत्येष ते मयाख्यातः प्रतिमापूजने विधिः ॥ यः पुरोक्तो महाबाहो ब्रह्मणा विष्णवे तथा ॥ २५ ॥ अनेन विधिना यस्तु सततं पूजयेद्रविम् ॥ स प्राप्नोत्यखिलान्कामानिह लोके परत्र च ॥ २६ ॥ पुत्रार्थी लभते पुत्रान्धनार्थी लभते धनम् ॥ कन्यार्थी लभते कन्यां वेदार्थी वेदविद्भवेत् ॥ २७ ॥ निष्कामः पूजयेद्यस्तु स मोक्षं प्राप्नुयान्नरः ॥ अनेन विधिनापूज्य गतः सिद्धिं स वैष्णवः ॥ २८ ॥ ब्रह्मादयस्तथा देवं पूजयित्वा विभावसुम् ॥ अनेन विधि

---

[1] चतस्रादेशामावश्छान्दसः ।

नापूज्य संतः सिद्धिं परां गताः ॥ २९ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे व्योमार्चनविधिवर्णनं नाम चतुरधिकद्विशततमोऽध्यायः ॥ २०४ ॥छ॥ ॥ व्यास उवाच ॥ ॥ पुनर्निबोध मे भीष्म गदतः परमं विधिम् ॥ येन पूजयते नित्यं महादेवं दिवाकरम् ॥ १ ॥ प्रभूतं निर्मलं तेज आराध्य परमं सुखम् ॥ पूर्वमंतस्तथाग्नेय्यां नैर्ऋत्यां पवनालये ॥ २ ॥ क्रमेण यावदीशानं हृदि बीजं च विन्यसेत् ॥ भास्करासनमेतत्तु न्यस्तव्यं तत्त्वदर्शिभिः ॥ ३ ॥ उपरिष्टात्ततस्तस्य हृदयेन तु पंकजम् ॥ अष्टपत्रं केशरालं पंचवर्णं सकेशरम् ॥ ४॥ दीप्तादि पूर्वमारभ्य आमहादेवगोचरम् ॥ शक्त्यष्टकं न्यसेन्मंत्रैरादितः सर्वतोमुखीम् ॥ ५ ॥ अबीजैः केसराग्रेषु क्रमेणैव च पूजयेत् ॥ ततस्त्वावाहयेद्भानुं स्थापयेत्कर्णिकोपरि ॥ ६ ॥ तस्योपहृत्य तं चान्यं वेदितव्यं खपुष्करम् ॥ तेनैवावाहनं चार्च्यं स्थापनं चार्घमेव च ॥ ७ ॥ पाद्यमाचमनं स्थानं वस्त्रगंधादिभूषणम् ॥ विधिना वीरपुष्पाणि नैवेद्यं धूपमेव च ॥ ८ ॥ कर्तव्यं श्रद्धया भक्त्या एवं तुष्यति भास्करः ॥ महापातकिनोऽप्याशु लभंते चिंतितं फलम् ॥ ९ ॥ आदित्यं पूजयित्वा तु पश्चादंगानि पूजयेत् ॥ दीप्तायां हृदयं न्यस्य भवान्यां शिरसो न्यसेत् ॥ १० ॥ दिग्विदिक्षु न्यसेदस्त्रमिंद्रादि दिशोत्तरांतिकम् ॥ कर्णिकायां न्यसेन्नेत्रं स्वबीजेन तु वार्चयेत ॥११॥ पुष्पैर्गंधैश्च धूपैश्च हृदयानि क्रमेण तु ॥ पूजयित्वा तु विधिवद्गर्भं पश्चात्तु मंत्रवित् ॥ १२ ॥ बाह्यतः पूर्वतो मंदं दक्षिणेन बुधं तथा ॥ विषाणं पश्चिमे पूज्य उत्तरेण तु भार्गवम् ॥ १३ ॥ आग्नेय्यां च कुजं पूज्य नैर्ऋत्यां भानुदेहजम् ॥ वायव्यां पूजयेत्कृष्णमैशान्यां विकचं नृप ॥ १४ ॥ इन्द्रादिलोकपालांश्च ततोऽष्टौ पूजयेद्बुधः ॥ सुगंधैर्विविधैः पुष्पैर्धूपैश्चैव मनोरमैः ॥ १५ ॥ क्रमेण पूजयेद्भानुं लोकपालैर्ग्रहैः सह ॥ मंत्रैः कुरुकुलश्रेष्ठ य इच्छेच्छ्रेय आत्मनः ॥ १६ ॥ अनेन विधिना यत्र देवः संपूज्यते रविः ॥ न चौराग्निभयं तत्र न चापि नरकाद्भयम् ॥ १७ ॥ वर्षोपलविषादिभ्यो भयं तत्र न विद्यते ॥ सुखमारोग्यमानंदं सुभिक्षमचलां श्रियम् ॥ १८ ॥ तेजोबिंबांतमध्यस्थ आदित्यः परमार्थतः ॥ यष्टव्यः साधकैर्नित्यं न रथो न च वाजिनः ॥ १९ ॥ इत्येष विधिराख्यातो मया भीष्म तवाखिलः ॥ येन पूजयते नित्यं महादेवो दिवाकरम् ॥ २० ॥ इत्थं पूज्य विवस्वन्तं हृद्बीजेन विसर्जयेत् ॥ य एवं पूजयेद्भानुं स याति परमां गतिम् ॥ २१ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मे भीष्मव्याससंवादे महादेवार्चनविधिवर्णनं नाम पंचाधिकद्विशततमोऽध्यायः ॥ २०५ ॥छ॥ ॥ भीष्म उवाच ॥ ॥ मंत्रोद्धारं परं ब्रूहि मुद्राशक्तिसमन्वितम् ॥ रूपवर्णसमं चैव पौराणिकमनुत्तमम् ॥ १ ॥ ॥ व्यास उवाच ॥ ॥ शृणु भीष्म महाबाहो यथा वक्ष्यामि तेनघ ॥ पौराणिकानां मंत्राणामुद्धारं वैदिका

हृते ॥२॥ वर्णरेफसमायुक्तं विद्रुमेणैव भूषितम् ॥ अंतस्थानां हि अंत्यं वै ब्रह्मदैवत्यमुच्यते ॥३॥ बिंदुरेफसमायुक्तं दीर्घया मात्रया तथा ॥ दीक्षाक्षरं समुद्दिष्टं द्वितीयं विष्णुदैवतम् ॥४॥ तृतीयं तु तथा प्रोक्तं सविसर्गं जनाधिप ॥ स तृतीयो बुधैः प्रोक्तो रुद्रदैवत एव हि ॥५॥ भास्करोयं महान्साक्षान्मंत्रमूर्तिस्त्रिरक्षरः॥दुर्लभः परमो गुह्यस्त्रिदेवो देवपूजितः ॥६॥ यस्त्विदं जपते भक्त्या स याति परमां गतिम् ॥ ततश्च मुद्रां वक्ष्यामि सान्निध्यकारणं परम् ॥७॥ पद्माकारौ करौ कृत्वा मध्ये श्लिष्टे तु मध्यमे॥अंगुलिं क्षारयेत्तस्मिन्विमुद्रेति च सोच्यते ॥८॥ अनया बद्धया राजन्भास्करस्यप्रियो भवेत् ॥ महाभयेषु सर्वेषु मातृवत्परिरक्षति ॥ ९ ॥ हृदयं तस्य विज्ञेयं यदक्षरवरं स्मृतम् ॥ विद्रुमोपरि संछन्नं हृद्गतं तद्गतं सदा ॥ १० ॥ शिरस्यर्कमिति प्रोक्तं देवदेवस्य भारत ॥ महाव्याहृतयस्तिस्रस्तथारज्वालिनी शिखा ॥ ११ ॥ अष्टाक्षरा तु विद्येयमादित्यस्य महात्मनः ॥ यः स्मरेत्साधकस्त्वेनं नासौ केनापि बाध्यते ॥ १२ ॥ अकारेण समायुक्तं बिंदुरेफसमन्वितम् ॥ हकारमग्निदैवत्यं कवचं भास्करप्रियम् ॥ १३ ॥ एकाक्षरमिदं प्रोक्तमभेद्यं यः स्मरेदिदम् ॥ दुष्टानां चैव विघ्नानां नाशनं नात्र संशयः ॥ १४ ॥ सविसर्गो रेफ इति अस्त्रमेकाक्षरं स्मृतम् ॥ नाशयेद्दुष्टकर्माणि साधकस्य न संशयः ॥ १५ ॥ संमुखौ तौ करौ कृत्वा श्लिष्टौ तु ग्रथितांगुली ॥ कनिष्ठेनामिके योज्ये तर्जन्यौ मध्यमे तथा ॥ ॥ १६ ॥ हृच्छिरः सशिखा चर्मा मुद्रेयं व्योमसंज्ञिता ॥ मुष्टिवक्रोच्छ्रितं कुर्यात्सव्यहस्तस्य तर्जनीम् ॥१७॥ मालशब्दकृतादिस्तु मुद्रा ह्यस्त्रस्य कीर्तिता ॥ त्रासनी नाम विख्याता सर्वविघ्नभयंकरी ॥ १८ ॥ कर्णबिंदुसमायुक्तं यं चतुर्थं महामते ॥ भास्करस्य त्विदं नेत्रमग्निदैवतमुच्यते ॥ ॥ १९ ॥ स्मरः स्यात्साधकेंद्राणां दुरंतो नाशने ध्रुवम् ॥ मध्यमा तर्जनी चैव सव्यहस्तस्य चोच्छ्रितम् ॥ २० ॥ कनिष्ठानामिके कुंच्य अंगुष्ठेन ततः क्रमेत् ॥ नेत्राभ्यां स्पर्शयेदेनां नेत्रमुद्रा प्रकीर्तिता ॥ २१ ॥ गोवृषा नाम विख्याता दर्शयेद्दिव्यगोचरम् ॥ रां दीप्तारिं ततः सूक्ष्मारीं जया भीष्म उच्यते ॥ २२ ॥ उभाह्वारूं विभूतिश्च विमला रैं प्रकीर्तिता ॥ अघहा च महाबाहो विद्युता रौं प्रकीर्तिता ॥ २३ ॥ गोवृषा नाम रं सर्ववीरभद्रकरी तथा ॥ इत्येता बीजरूपास्तु कथिताश्चैव शक्तयः ॥ २४ ॥ उत्तानौ तु करौ कृत्वा सव्याकुंच्य ततोंगुलीः ॥ कुर्यादुपरि चांगुष्ठौ चालयेत पुनःपुनः ॥ २५ ॥ सर्वासां चैव शक्तीनामेता मुद्राः प्रदर्शयेत् ॥ नाम्ना च विद्युता चैव नवमी सर्वतोमुखी ॥ २६ ॥ नामान्येतानि शक्तीनां समासात्कथितानि तु ॥ सबीजानि महाबाहो मया स्नेहेन भारत ॥ २७ ॥ ग्रहाणां शृणु बीजानि रूपं च गदतो मम ॥ सर्वत्र भं तथा खं च कंजकूतुहलोद्वह ॥ २८ ॥ ॐकारा दीपिताः सर्वे नमस्कारांतयोजिताः ॥ पूजाकाले प्रयोक्तव्या जपकाले तथैव च ॥ २९ ॥ होम

काले तु स्वाहांतं मंत्रं षट्कारसंयुतम् ॥ सर्वे बिंदुयुता भीष्म शिखा बिंदुविभूषिताः ॥ ३० ॥ सोमाद्याः केतुपर्यंता ग्रहा ह्येवं प्रकीर्तिताः ॥
एता मुद्राः प्रवक्ष्यामि सर्वसिद्धिप्रदायिकाः ॥ ३१ ॥ सुमुखौ तु करौ कृत्वा श्लिष्टौ चैव प्रसारितौ ॥ इयं मुद्रा नमस्कारे ग्रहसान्निध्यकारिका ॥
॥ ३२ ॥ मंत्रोद्धारस्तवाख्यातो रहस्यो दुर्लभो नृप ॥ शृणुष्व रूपं देवानां ध्यानकाले ह्युपस्थिते ॥ ३३ ॥ जपावर्णं महातेजं श्वेतपद्मोपरि स्थित
म् ॥ सर्वलक्षणसंपन्नं सर्वाभरणभूषितम् ॥ ३४ ॥ तथैकवक्त्रं द्विभुजं सोमपंकजकंधरम् ॥ मंडलेन च रूपं तु मध्यस्थं रक्तवाससम् ॥ ३५ ॥
मार्तंडस्य इदं रूपं शुचिः स्नातो जितेंद्रियः॥ त्रिकालं यः स्मरेद्धीम एकचित्तो व्यवस्थितः ॥ ३६ ॥ सोऽचिराद्भवते लोके वित्तेन धनदोपमः ॥
मुच्यते सर्वभोगैस्तु तेजस्वी बलवान्भवेत् ॥ ३७ ॥ हृदयं चोत्तमांगं च शिखा वै वक्त्रमेव च ॥ रक्तवर्णा इमे श्यामाः सर्वाभरणभूषिताः ॥ ३८॥
वरदाऽभयहस्ताश्च ध्यातव्याः साधकेन तु ॥ तडित्पुंजनिभं शस्त्रं रौद्रं चंद्रकरालिनम् ॥ ३९ ॥ विशेषः कथितो ह्येष कामरूपः स्वभावतः ॥
दीप्ता दीप्तशिखाकारा ध्यातव्या मम शक्तयः ॥ ४० ॥ श्वेतवर्णं स्मरेत्सोमं रक्तवर्णं कुजं स्मरेत् ॥ सौम्यमष्टापदाभं च गुरुं च पीतवर्णकम् ॥
॥ ४१ ॥ शंखक्षीरनिभं श्वेतं काणं चांजनसंनिभम् ॥ रजावर्तनिभं राहुं धूम्रं च विकचं स्मरेत् ॥ ४२ ॥ वामहस्तौ कटिन्यस्तौ दक्षिणौ चाभय
प्रदौ ॥ रक्तभ्रूरक्तनेत्रास्य अर्धकायकृतांजलिः ॥ ४३ ॥ इति भानुं ग्रहैः सार्धं ये ध्यायंति नृपोत्तम ॥ लभंते ते महासिद्धिमचिरान्नात्र संशयः ॥
॥ ४४ ॥ तवाख्यातमिदं वक्त्रं ग्रहाणां भीष्म कृत्स्नशः ॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यंते भुवि मानवाः ॥ ४५ ॥ अनेन विधिना भीष्म सदा देवं
दिवाकरम् ॥ त्रिकालं पूजयेद्भक्त्या वीर श्रद्धासमन्वितः ॥ ४६ ॥ इत्थं पूजयमानस्तु सर्वदेवं दिवाकरम् ॥ ब्रह्महत्याविनिर्मुक्तो महादेवत्वमाप्नु
यात् ॥ ४७ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मेषु सूर्यपूजामाहात्म्यवर्णनं नाम षडुत्तरद्विशततमोऽध्यायः ॥
॥ २०६ ॥ ॥ भीष्म उवाच ॥ ॥ अहो देवस्य माहात्म्यं भास्करस्य त्वयोदितम् ॥ पूजयंति सदा ह्येनं ब्रह्मविष्णुशिवादयः ॥ १ ॥
॥ ॥ व्यास उवाच ॥ ॥ एवमेतन्न संदेहो यथा वदसि भारत ॥ नास्ति सूर्यसमो देवो नास्ति सूर्यसमा गतिः ॥ २ ॥ नास्ति
सूर्यसमं ब्रह्म नास्ति सूर्यसमं हुतम् ॥ नास्ति सूर्यसमो धर्मो नास्ति सूर्यसमं धनम् ॥ ३ ॥ नास्ति सूर्यादृते कामो नास्ति
सूर्यादृते पदम् ॥ नास्ति सूर्यसमो बंधुर्नास्ति सूर्यसमः सुहृत् ॥ ४ ॥ नास्ति सूर्यसमा माता नास्तिसूर्यसमो गुरुः ॥ नास्ति
सूर्यसमं तीर्थं न पवित्रं ततः परम् ॥ ५ ॥ तमेकं दैवतं विद्यान्नैवाप्यर्कपरायणम् ॥ लोकानां देवतानां च पितॄणां चापि भारत ॥ ६ ॥

तमर्चंतः स्तुवंतश्च प्राप्नुवंति परां गतिम् ॥ ते प्रपन्नास्तु ये भक्त्या मुक्तास्ते भवसागरात् ॥ ७ ॥ राजा चोरा ग्रहाः सर्पा दारिद्र्यं दुःखसंपदः ॥
नैते पीडयितुं शक्ताः प्रसन्ने भास्करे सति ॥ ८ ॥ ॥ व्यास उवाच ॥ ॥ एवं तात महाबाहो देवो भास्करतत्परः ॥ स पूज्यः स नमस्कार्यः
स हि ध्यातव्य एव च ॥ ९ ॥ प्रत्यक्षदेवता ह्येषा देवदेवोयमादरात् ॥ अथ किं बहुनोक्तेन यद्वक्ष्यामि निबोध मे ॥ १० ॥ पूजयेत्तनयः पापी
तथादित्यदिनैरपि ॥ पूजयन्ति नरा ये वै ते यांति परमां गतिम् ॥ ११ ॥ प्राप्ते सूर्यदिने भक्त्या भानुं संपूज्य श्रद्धया ॥ नक्तं करोति पुरुषः
स यात्यमरलोकताम् ॥ १२ ॥ यस्तु पूर्वं रवेर्भक्त्या पञ्चरत्नसमन्वितम् ॥ निवेदयति मंत्रेण स यात्यमरलोकताम् ॥ १३ ॥ मार्तंडप्रीतये
यस्तु कुर्याच्छ्राद्धं विधानतः ॥ संक्रान्तावयने वीर सूर्यलोकं स गच्छति ॥ १४ ॥ कृत्वोपवासं षष्ठ्यां तु सप्तम्यां यस्तु मानवः ॥ करोति विधि
वच्छ्राद्धं भास्करः प्रीयतामिति ॥१५॥ सर्वदोषविनिर्मुक्तः सूर्यलोके महीयते ॥ मानवो यस्तु सप्तम्यां योषिद्वापि दिवाकरम् ॥१६॥ प्रपूज्य विधिव
द्भानुं सर्वान्कामानवाप्नुयात् ॥ विशेषतस्तस्य दिने ग्रहणे च नराधिप ॥ १७ ॥ इति भीष्म विजानीहि न देवो भास्करात्प्रियः ॥ आदित्यमेकं
परमं देवदेवेषु पूजितम् ॥ १८ ॥ रत्नपर्वतमारुह्य यथा भुवि नराधिपाः ॥ सत्त्वानुरूपं गच्छन्ति रत्नभागानशेषतः ॥ १९ ॥ तथा भानुं समा
राध्य प्राप्नुवंति नराः फलम् ॥ धनार्थी प्राप्नुयादर्थं पुत्रार्थी प्राप्नुयात्सुतम् ॥ २० ॥ मोक्षार्थी मोक्षमाप्नोति चाथ वाऽमरतां व्रजेत् ॥ अथ किं बहु
नोक्तेन शृणु त्वं वचनं मम ॥ २१ ॥ ब्रह्मादयो देवगणा भानुमाराध्य भारत ॥ मनोहराणि दिव्यानि दिवि स्थानान्यवाप्नुवन् ॥ २२ ॥ अच
लानि महाभागाः सर्वपापहराणि च ॥ २३ ॥ ॥ सुमन्तुरुवाच ॥ ॥ इत्युक्त्वा भगवान्व्यासस्तत्रैवांतरधीयत ॥ भीष्मोऽपि पूजयामास
भक्त्या भानुं विधानतः ॥२४॥ तथा त्वमपि राजेन्द्र पूजयेमं दिवाकरम् ॥ पूजयित्वा रविं भक्त्या स्थानं यास्यसि शाश्वतम् ॥२५॥ यथा गतः
स भगवान्व्यासो भीष्मश्च मानद ॥ सकृत्प्रपूज्य सप्तम्यां भक्त्या देवं दिवाकरम् ॥ २६ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे
व्यासभीष्मसंवादे आदित्यपूजामाहात्म्यवर्णनं नाम सप्ताधिकद्विशततमोऽध्यायः ॥ २०७ ॥ ॥ छ ॥ ॥ शतानीक उवाच ॥ ॥ पुनर्मे
ब्रूहि सप्तम्यां प्रीतये भास्करस्य तु ॥ उपोषितो भवतीह नरो यस्तु द्विजोत्तम ॥ १ ॥ ॥ सुमन्तुरुवाच ॥ ॥ कथिताः सप्त सप्तम्यः पुनरस्मिन्म
हामते ॥ बहवः कुरुशार्दूल भूयस्त्वेताः शृणुष्व मे ॥ २ ॥ स्वयं याः कथिताः पूर्वमादित्येन खगाधिप ॥ अरुणस्य महाबाहो सप्तम्यः सप्त
पूजिताः ॥ ३ ॥ अर्कसंपुटकैरेका द्वितीया मरिचैस्तथा ॥ तृतीया निंबपत्रैश्च चतुर्थी फलसप्तमी ॥ ४ ॥ अनोदना पञ्चमी स्यात्षष्ठी विजय

सप्तमी ॥ सप्तमी कामिका ज्ञेया विधिं तासां निबोध मे ॥ ५ ॥ शुक्लपक्षे रविदिने दक्षिणे चोत्तरायणे ॥ ग्रहणे सूर्यनक्षत्रे गृह्णीयात्सप्त
सप्तमीः ॥ ६ ॥ स तां सु ब्रह्मचारी स्याच्छौचयुक्तो जितेन्द्रियः ॥ सूर्यार्चनरतो दांतो जपहोमपरस्तथा ॥ ७ ॥ पञ्चम्यामेव पुरुषः कुर्यान्नित्य
मनात्मकम् ॥ षष्ठ्यां न मैथुनं गच्छेन्मधुमांसं च वर्जयेत् ॥ ८ ॥ अर्कसंपुटकैरेकां तथान्यां मरिचैर्नयेत् ॥ तथापरां निंबपत्रैः फलाख्यायां फलं
चरेत् ॥ ९ ॥ अनोदनामन्नरहित उपासीत यथाविधि ॥ अहोरात्रं वायुभक्षः कुर्याद्विजयसप्तमीम् ॥ १० ॥ तथैकां सप्तमीं कृत्वा प्रतिमासं
विचक्षणः ॥ कुर्याद्यथाविधि मुदा ततः कुर्वीत कामिकाम् ॥ ११ ॥ आसां लिखित्वा नामानि पत्रकेषु पृथक्पृथक् ॥ तानि सर्वाणि पत्राणि
क्षिपेदभिनवे घटे ॥ १२ ॥ तदर्थं यो न जानाति लोकवाह्योपि वा नरः ॥ तेन ह्युद्धारयेदेकं न कुर्याच्च विचारणाम् ॥१३॥ तेनैव विधिना यस्तु
प्रतिमासं च तत्तपः ॥ सप्तैव यावत्सप्तम्यो विज्ञेया सा तु कामिका ॥ १४ ॥ इत्येताः सप्त सप्तम्यः स्वयं प्रोक्ता विवस्वता ॥ कुर्वीत यो नरो
भक्त्या स यात्यर्कसदो नृप ॥ १५ ॥ अर्कसंपुटकैर्वित्तमचलं सप्तपौरुषम् ॥ मरिचैः संगमः स्याद्वै प्रियैः पुत्रादिभिः सदा ॥ १६ ॥ सर्वरोगाः
प्रणश्यंति निंबपत्रैर्न संशयः ॥ फलैस्तु पुत्रपौत्राश्च दौहित्रश्चापि पुष्कलः ॥ १७ ॥ अतो घनं धनं धान्यं सुवर्णं रजतं तथा ॥ तथा पशुर्हिरण्यं
च आरोग्यं सततं नृप ॥ १८ ॥ उपोष्य विजयां शत्रून्राजञ्जयति नित्यशः ॥ साधयेत्कामदा कामान्विधिवत्समुपासिता ॥ १९ ॥ पुत्र
कामो लभेत्पुत्रमर्थकामोर्थमक्षयम् ॥ विद्याकामो लभेद्विद्यां राज्यार्थी राज्यमाप्नुयात् ॥ कृत्स्नान्कामान्ददात्येषा कामदा कुरुनन्दन ॥ २० ॥
नरो वा यदि वा नारी यथोक्तं सप्तमीव्रतम् ॥ करोति नियतात्मा वै स याति परमां गतिम् ॥ २१ ॥ न तेषां त्रिषु लोकेषु
किंचिदस्तीति दुर्लभम् ॥ ये भक्त्या लोकनाथस्य व्रतिनः संशितव्रताः ॥ २२ ॥ व्रतैस्तु विविधैर्वीर तपोभिर्वा सुदुष्करैः ॥ न
तत्फलमवाप्नोति यज्ञैर्वा बहुदक्षिणैः ॥ २३ ॥ तीर्थाभिषेचनैर्वापि दानहोमार्चनैस्तथा ॥ यत्फलं च पूजयितुं सप्तम्यां प्राप्य मोक्षदम् ॥
मोक्षार्थी पार्थिवश्रेष्ठ यथाह भगवान्रविः ॥ २४ ॥ कृत्वादित्यदिने नक्तं भक्त्या संपूजयेद्रविम् ॥ अचलं स्थानमाप्नोति मानवः
श्रद्धयान्वितः ॥ सूर्यलोके च नियतं तस्य वासो न संशयः ॥ २५ ॥ यस्तु पूजयते भक्त्या सप्तम्यां भास्करं नरः ॥ ब्रह्मेंद्ररुद्रलोकेषु
तस्याप्रतिहता गतिः ॥ २६ ॥ नांधो न कुष्ठी न क्लीबो न व्यंगो न च निर्धनः ॥ कुले तस्य भवेद्वीर यश्चरेत्सप्तमीव्रतम् ॥ २७ ॥
विद्यार्थी लभते विद्यां धनार्थी धनमाप्नुयात् ॥ भार्यार्थी रूपसंपन्नां स्त्रियं पुत्रांश्च भारत ॥ २८ ॥ लोभात्प्रमादान्मोहाच्च व्रतभंगो यदा भवेत् ॥

तदा त्रिरात्रं नाश्नीयात्कुर्याद्वा केशमुंडनम् ॥२९॥ प्रायश्चित्तमिदं कृत्वा पुनरेव व्रती भवेत् ॥ सप्तैव यावत्सप्तम्यो भवंति च खगेश्वर ॥३०॥ अभ्यर्च्य
सूर्यसप्तम्यां माल्यधूपादिभिर्नरः ॥ भोजयित्वा द्विजाञ्छक्त्या प्राप्नुयात्स्वर्गमक्षयम्॥३१॥सप्तम्यां विप्रमुख्येभ्यो हिरण्यं यः प्रयच्छति॥स तदक्ष
य्यमाप्नोति सूर्यलोकं च गच्छति ॥३२॥ इतीदं कीर्तितं वीर सप्तमीव्रतमुत्तमम् ॥ भूय एवाभिधास्यामि शृणुष्वैकमना नृप ॥३३॥ इति श्रीभविष्ये महा
पुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मे सूर्यारुणसंवादे सप्तसप्तमीव्रतवर्णनं नामाष्टाधिकद्विशततमोऽध्यायः ॥ २०८ ॥छ॥ ॥ सुमन्तुरुवाच ॥ ॥
यः क्षिपेद्गोमयाहारः शुक्ला द्वादश सप्तमीः ॥ अथवा यावकाहारः शीर्णपर्णाशनोऽपि वा ॥ १ ॥ क्षीराशी चैकभक्तो वा भिक्षाहारोथ वा पुनः ॥
जलाहारोपि वा विद्वान्पूजयित्वा दिवाकरम् ॥ २ ॥ पुष्पोपहारैर्विविधैः पद्मसौगन्धिकोत्पलैः ॥ नानाप्रकारैर्गंधैश्च धूपैर्गुग्गुलुचंदनैः ॥ ३ ॥
कृष्णगंधपायसाद्यैर्विचित्रैः सुविभूषणैः ॥ अर्चयित्वा द्विजाञ्छ्रेष्ठान्हिरण्यान्नादिभिर्नरः ॥ ४ ॥ स तत्फलमवाप्नोति क्रतुभिर्भूरिदक्षिणैः ॥ यदेह
तप्यते वीर प्राप्यते केवलं रवेः ॥ ५ विमानवरमारूढः सूर्यलोके महीयते ॥ ततः पुण्यक्षयाद्राजन्कुले महति जायते ॥ ६ ॥ एवं भक्त्या विव
स्वंतं प्रतिमासं समाहितः ॥ पूजयेद्विधिवद्भक्त्या नामानि परिकीर्तयेत् ॥ ७ ॥ चैत्रिके मासि विष्णुश्च माधवे ह्यर्यमेति वै ॥ शुक्रे विवस्वा
न्मासे तु शुचौ मासे दिवाकरः ॥ ८ ॥ पर्जन्यः श्रावणे मासि नभस्ये वरुणस्तथा ॥ मार्तंडेति च विज्ञेयः कार्तिके भार्गवः पुनः ॥ ९ ॥ मार्ग
शीर्षेपि मित्रस्तु कीर्तितः सततं बुधैः ॥ पूषा पौषे तु वै मासे पूजनीयः प्रयत्नतः ॥ १० माघे भगेति विज्ञेयस्त्वष्टा चैवाथ फाल्गुने ॥ एवं क्रमेण
नामानि कीर्तयेत्प्रीतये रवेः ॥ ११ ॥ धूपार्चनविधिमिमं सप्तम्यां सुसमाहितः ॥ यः करोति नरो भक्त्या स याति परमां गतिम् ॥ १२ ॥ ततस्ते
सर्वमाख्यातं यथागुह्यतमं विभोः॥नैव देयमशिष्याय नाभक्ताय कदाचन ॥१३॥ न च पापकृते देयं न देयं नास्तिकाय वा॥कृतघ्ने नास्तिके वीर
न देयं क्रूरकर्मणि ॥ १४ ॥ य इदं शृणुयान्नित्यं सप्तमीव्रतमुत्तमम् ॥ पठेद्यश्चापि नियतः श्रद्धया परयान्वितः ॥ १५ ॥ इह लोके सुखं प्राप्य
सूर्यलोके महीयते ॥ पुण्यक्षयादिहागत्य राजा भवति भूतले ॥ १६ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सूर्यारुणसंवादे
प्रतिमाससप्तमीव्रतवर्णनं नाम नवाधिकद्विशततमोऽध्यायः ॥ २०९ ॥ ॥ सुमन्तुरुवाच ॥ ॥ इत्येष सप्तमीकल्पः समासात्कथितस्तव॥विस्त
रात्ते पुनर्वच्मि शृणु चैकमना विभो ॥ १ ॥ फाल्गुनामलपक्षस्य षष्ठ्यां च समुपोषितः ॥ पूजयेद्भास्करं स्नात्वा गंधपुष्पविलेपनैः ॥२॥ अर्कपु
ष्पैर्महाबाहो गुग्गुलेन सुगंधिना ॥ श्वेतेन करवीरेण चंदनेन दिवाकरम् ॥३॥ गुडोदकेन नैवेद्यं निवेद्य प्रीतये रवेः ॥ एवं पूज्य दिवा भानुं रात्रौ

तस्याग्रतः स्वपेत् ॥ जपन्भौमं परं जाप्यं विनिद्रः सततं बुधः ॥ ४ ॥ ॥ शतानीक उवाच ॥ ॥ किं तत्परं भगवतः प्रियं जाप्यमनुत्तमम् ॥
॥५॥ जप्तव्यो यत्परैर्भक्त्या भानुस्तस्याग्रतो नरैः ॥ तन्मे ब्रूहि तथा मंत्रान्धूपदीपान्विशेषतः ॥ येनाहं तं जपञ्जप्यं पूजयामि दिवाकरम् ॥६॥
॥ ॥ सुमंतुरुवाच ॥ ॥ वच्मि ते भरतश्रेष्ठ समासान्न तु विस्तरात् ॥ ७ ॥ षडक्षरेण मंत्रेण कुर्यात्सर्वं समाहितः ॥ जपं होमं तथा पूजां शतज
प्तेनसर्वदा ॥ ८ ॥ सावित्र्या च जपं पूर्वं कृत्वा शतसहस्रशः॥ पश्चात्सर्वं प्रकुर्वीत जपादिकमनाकुलम् ॥९॥ ॐ भोः सावित्रि भास्कराय सहस्रर
श्मि धीमहि ॥ तेन सूर्यः प्रचोदयात् ॥ १० ॥ जप एष परः प्रोक्तः सप्तम्यां भानुना स्वयम् ॥ जप्त्वा सकृद्भवेत्पूतो मानवो नात्र संशयः ॥ ११ ॥
प्रभाते त्वथ सप्तम्यां जपन्नियतमानसः॥पूजयेद्भास्करं भक्त्या पूर्वोक्तविधिना नृप ॥१२॥ श्रद्धया भोजयेच्चापि ब्राह्मणाञ्छक्तितो नृप ॥ दिव्यान्भो
गांश्च विधिवद्भक्ष्यभोज्यैरनेकशः ॥१३॥ वित्तशाठ्यं न कुर्वीत भोजकांश्च प्रभोजयेत् ॥ न भोजयेत्तथाऽसौरान्सौरान्यत्नेन भोजयेत् ॥ १४ ॥
॥ ॥शतानीक उवाच ॥ ॥ के भोज्या के न वा भोज्या ब्राह्मणा ब्रह्मवित्तम ॥ केषु चित्तेषु सप्तम्यां देवदेवो दिवाकरः॥१५॥ ॥ सुमंतुरुवाच ॥ ॥
घटीभोज्यो भवेद्विप्रः सप्तमीं कुरुते च यः॥ सौरभिन्नेष्वभोज्यो यो यश्च भुक्तो दिवाकरे ॥१६॥ एते भोज्या द्विजा राजन्नादित्येन समासतः॥प्रोक्ताः
कुरुकुलश्रेष्ठ तथाऽभोज्याञ्छृणुष्व वै ॥१७॥ सभार्यः सपतिर्यस्तु कुष्ठरोगैर्हतश्च यः॥ यश्चान्यदेवता भक्तस्तथा नक्षत्रसूचकः ॥१८॥ परापवादनिरतो
यश्च देवलकस्तथा ॥ एतेऽभोज्याः सवित्रा तु स्वयं देवेन चिंतिताः ॥ १९ ॥ ॥ शतानीक उवाच ॥ ॥ ये भोज्या ब्राह्मणाः प्रोक्ता ये चाभोज्या
द्विजोत्तमाः॥एतेषां लक्षणं ब्रूहि सर्वेषां वै समाहितः ॥२०॥ ॥ सुमंतुरुवाच ॥ ॥ साधु पृष्टोस्मि राजेंद्र कीर्तयाम्येष कृत्स्नशः ॥ पठतां तु त्रयी
विद्यां ब्राह्मणानां कदंबकः ॥२१॥ घटेत्युक्ता तुक्ता तु साराजन्स्वयं देवेन भानुना ॥ सा घटा विद्यते यस्य स घटीत्युच्यते द्विजः ॥ २२ ॥ ब्रह्मक्षत्र
विशांवीर शूद्राणां च कदंबकः ॥ शृण्वतां विधिवत्पुण्यं भक्त्या पुस्तकवाचनम् ॥ २३ ॥ इति मासे निबद्धस्य होमस्येति च भानुना ॥ कथितं
कुरुशार्दूल स्वयमाकाशगामिना ॥ २४ ॥ यस्याः कर्ता भवेद्यस्तु मम स्यात्करको मतः ॥ स विप्रो राजशार्दूल सदेष्टो भास्करस्य तु ॥ २५ ॥
जयोपजीवी व्यासश्च समः स्याज्जीवकस्तथा ॥ यान्येतानि पुराणानि सेतिहासानि भारत ॥ जयेति कथितानीह स्वयं देवेन भास्वता ॥२६॥
एकं निवासयन्यस्तु ब्राह्मणं तूपजीवति ॥ जयोपजीवी स ज्ञेयो वाचकश्च तथा नृप ॥ २७ ॥ आरुणेयादिशास्त्राणि सप्ताश्वतिलकं तथा ॥
यस्तु जानाति सौराणि विप्रः सौरस्स तत्त्ववित् ॥२८॥ पूजयेत्सततं यस्तुभास्करं नृपसत्तम ॥ भोजकांश्च तथा राजन्यथा देवं दिवाकरम्॥२९॥

स ज्ञेयो भास्करे भक्तो भोजनीयः प्रयत्नतः ॥ भोज्यानां लक्षणं ह्येतदभोज्यानां शृणुष्व मे ॥ ३० ॥ वृषली यस्य वै भार्या ब्राह्मणस्य
विशेषतः ॥ परभार्यापतिरसौ ब्राह्मणो ब्राह्मणाधमः ॥ ३१ ॥ दैवेन निहतः कुष्ठी ब्राह्मणो ब्रह्मघातकः ॥ भोजको विंदते यस्तु न च तं पूजयेत्तथा
॥ ३२ ॥ ज्ञेयोन्यदेवभक्तोसौ स विप्रः कुरुनंदन ॥ आदित्यं भोजकं विद्याद्भानोर्देहसमुद्भवम् ॥ ३३ ॥ नादित्यं पूजयेद्यस्तु स भोज्यो न
कदाचन ॥ मुण्डो व्यंगधरो गौरः शंखपुष्पधरस्तथा ॥३४॥ यस्य याति गृहे राजन्भोजको मानवस्य तु ॥ तस्य यांति गृहे देवाः पितरो भास्करस्य
तु ॥ ३५ ॥ रक्षोभूतपिशाचाश्च योगिन्योपि पलायिताः ॥ सकृद्भुङ्क्ते गृहे यस्य भोजको गृहधर्मिणः ॥ ३६ ॥ सप्तसंवत्सरं यावत्तृप्तो
भवति भास्करः ॥ तस्मात्तान्भोजयेद्दिव्यान्भोजकान्सततं बुधः ॥ यस्तु तान्निंदते विप्रः स न भोज्यः कदाचन ॥ ३७ ॥ निजं भर्तारमुत्सृज्य
स्वैरं यान्यत्र गच्छति ॥ स्वैरिणी सा तु वै प्रोक्ता पापिष्ठा कुलदूषिणी ॥ ३८ ॥ प्रच्छन्नं रोचते राजन्या नारी भवदोषतः ॥ ज्ञेया सा स्वैरिणी
राजन्कुले भवति नाशिनी ॥३९॥ योऽस्यां रतो भवेद्विप्रः स ज्ञेयः स्वैरिणीरतः ॥ रंगोपजीवी कथको यश्च प्राकृतनर्तकः ॥ ४० ॥ रंगोपजीवी
राजेंद्र तथा च बहुयाचकः ॥ द्वे एते नामनी राजन्कथकस्य प्रकीर्तिते ॥ कृतेनानेन यादृक्च उद्वृत्तः कुरुनंदन ॥ ४१ ॥ यःस्तुतिं गायते विप्रः
प्रोच्चैस्तु जनसंसदि ॥ रंगोपजीवी प्रोक्तोयं द्वितीयः परिकीर्तितः ॥ ४२ ॥ सूचनं कथनं प्रोक्तं सर्वशास्त्रेषु भारत ॥ सूचयेद्यस्तु ऋक्षाणि स वै
नक्षत्रसूचकः ॥ ४३ ॥ ॥ शतानीक उवाच ॥ ॥ अहो बत महत्कष्टं भवतो यद्द्विजान्प्रति ॥ वेदांगं ज्योतिःशास्त्रं तु षष्ठं प्रोक्तं मनीषिभिः
॥ ४४ ॥ षडंगो न भवेत्तेन रहितेन द्विजेन च ॥ अभोज्ये पठनात्तस्य यद्वत्स्याद्ब्राह्मणो द्विज ॥ ४५ ॥ भोज्योऽखण्डं ययौ विप्रोऽनर्थकेन त्वनर्थकम्
॥ विमृश्य कथ्यतां विप्र अत्र मे संशयो महान् ॥ ४६ ॥ ॥ सुमंतुरुवाच ॥ ॥ साधु पृष्टोस्मि भवता श्रूयतामत्र निर्णयः ॥ यस्य जीव्यमिदं
ज्ञेयमंगं विप्रस्य वै भवेत् ॥ ४७ ॥ सांवत्सरेण ज्योतिषा ज्ञाननक्षत्रसूचकः ॥ न स भोज्यो भवेद्राजन्यस्येयं जीविका भवेत् ॥ ४८॥ निष्कारणं
पराणां च परोक्षं दोषकीर्तनम् ॥ गुणानां च यथा गुप्तिः परिवादपरस्तु सः ॥ ४९ ॥ ब्राह्मणो यस्तु राजेंद्र वृत्त्या कर्म करोति वै ॥ देवतायतने
चेह देवानां पूजनं तथा ॥ ५० ॥ आधिपत्यं भक्षणं च नैवेद्यस्य परंतप ॥ स ज्ञेयो देवलो राजन्ब्राह्मणो ब्राह्मणाधमः ॥ ५१ ॥ नाधिकारस्तु
विप्राणां भौमानां देवपूजने ॥ वृत्त्या भरतशार्दूल आधिपत्ये विशेषतः ॥ ५२ ॥ यस्तु पूजयते देवीं ब्राह्मणो द्रव्यलोभतः ॥ वृत्त्यै
कुरुकुलश्रेष्ठ स याति नरकं ध्रुवम् ॥ ५३ ॥ देवालयेषु सर्वेषु अग्निकार्यं च सुव्रत ॥ यः कुर्याद्द्रव्यलोभेन अधोगतिमवाप्नुयात् ॥ ५४ ॥ देवाल

येषु सर्वेषु वर्जयित्वा शिवालयम् ॥ देवानां पूजनं राजन्नग्निकार्येषु वा विभो ॥ ५५ ॥ अधिकारः स्मृतो राजन्भोजकानां न संशयः ॥ पूजयंतस्तु ते देवान्प्राप्नुवंति परां गतिम् ॥ ५६ ॥ नैवेद्यं भुञ्जते यस्माद्भोजयंति च भास्करम् ॥ पूजयंति च देवानां दिव्यतन्त्रेण ते गताः ॥ ५७ ॥ पूजयित्वा तु वै देवान्नैवेद्यं भक्ष्य च प्रभोः ॥ यांति ते परमं स्थानं यत्र देवो दिवाकरः ॥ ५८ ॥ ब्राह्मणश्चापि तं ब्रूयात्तीक्ष्णे सति महामते ॥ एवं करिष्ये श्रेयोर्थं नात्मनस्तव वा विभो ॥ ५९ ॥ इत्यामंत्र्य ततो गच्छेत्स्वगृहं कुरुनन्दन ॥ तथा परेऽह्नि संपूज्य देवं भक्त्या दिवाकरम् ॥ ६० ॥ कृत्वा च पावकं राजन्ब्राह्मणान्भोजयेत्ततः ॥ शाल्योदनं तथा मुद्गं सुगन्धं मुद्गमेव हि ॥ ६१ ॥ अपूपान्गुडपूपांश्च पयो दधि तथा नृप ॥ एतैस्तु तृप्तिमायाति भास्करो नरसत्तम ॥ ६२ ॥ वर्ज्यानि भरतश्रेष्ठ शृणु त्वं गदतो मम ॥ कुलत्थकान्मसूरांश्च निष्पावादींस्तथैव च ॥ ६३ ॥ सिग्रुकं च तथान्यच्च राजमाषांस्तथैव च ॥ नैतानि भास्करे दद्याद्य इच्छेच्छ्रेय आत्मनः ॥ ६४ ॥ दुर्गंधं यच्च कटुकमत्यल्पं भास्करस्य तु ॥ विमिश्रांस्तंडुलांश्चापि न दद्याद्भास्कराय वै ॥ ६५ ॥ इत्थं भोज्य द्विजं राजन्प्राशयेदर्कसंपुटम् ॥ प्रणम्य शिरसा देवमुदकेन समन्वितम् ॥ ६६ ॥ गृहीत्वा केतनं यस्तु भजतेऽन्यत्र लोकतः ॥ नाश्नंति पितरस्तस्य न देवा न च मानवाः ॥ ६७ ॥ निष्क्रम्य नगराद्राजन्गत्वा पूर्वोत्तरां दिशम् ॥ नात्युच्चे नातिनीचे च शुचौ देशेऽर्कमुत्तमम् ॥ ६८ ॥ जातं दृष्ट्वा महाबाहो पूजयित्वा खगोत्तम ॥ पूर्वोत्तरगताश्चैव तस्य शाखा दिशन्नृप ॥ ६९ ॥ शाखाया अग्रतः पात्रे सुसूक्ष्मे पल्लवाश्रिते ॥ सुश्लिष्टे न पृथग्भूते संपूज्य गृहमाव्रजेत् ॥ ७० ॥ स्नातः पूज्य विवस्वंतमर्कपुष्पैः खगोत्तम ॥ ब्राह्मणान्भोजयित्वा तु अर्को मे प्रीयतामिति ॥ ७१ ॥ प्राश्य मंत्रेणार्कपुटं ततो भुंजीत वाग्यतः ॥ देवस्य पुरतो वीर त्वस्पृशन्दशनैः पुटम् ॥ ७२ ॥ ॐ अर्कसंपुट भद्रं ते भद्रं तेऽर्क सदास्तु वै ॥ ममापि कुरु भद्रं च प्रायश्चित्तप्रदो भव ॥ ७३ ॥ इमं मंत्रं जपन्राजन्स्मरन्नर्कं महामते ॥ स्थित्वा पूर्वमुखो ब्रह्म वारिणा सहितं नृप ॥ ७४ ॥ प्राश्य भुंक्ते च यो राजन्स याति परमां गतिम् ॥ दंतैरस्पृश्य हे वीर तत्पुटं चार्कसंज्ञितम् ॥ ७५ ॥ अनेन विधिना भक्त्या कर्तव्या सप्तमी सदा ॥ यावद्वर्षं महाबाहो प्रीतयेऽर्कस्य श्रद्धया ॥ ७६ ॥ यश्चेमां सप्तमीं कुर्याद्भास्करं प्रीणयन्नरः ॥ तस्याक्षयं भवेद्वित्तमचलं साप्तपौरुषम् ॥ ७७ ॥ सुवर्णं रजतं ताम्रं हिरण्यं च तथाक्षयम् ॥ कृत्वेमां सिद्धिमायातः कौथुमिः सहसा गतः ॥ ७८ ॥ कुष्ठरोगाच्च वै मुक्तो जयस्तोमो महीपतिः ॥ बृहद्बलध्वजः कोपी याज्ञवल्क्यो

---

१ कर्मणः शेषत्वविवक्षया षष्ठी ।

ऽथ कृष्णजः ॥ ७९ ॥ अर्कं चैव समाराध्य ततोऽगुस्तेऽर्कसाम्यताम् ॥ इयं धन्यतमा पुण्या सप्तमी पापनाशिनी ॥ ८० ॥ पठतां शृण्वतां राजन्कुर्वतां च विशेषतः ॥ तस्मादेषा सदा कार्या विधिवच्छ्रेयसेऽनघ ॥ ८१ ॥ ॥ शतानीक उवाच ॥ ॥ जनकादयो यथा सिद्धिं गता भानुं प्रपूज्य च ॥ श्रुतं मया तु बहुशो न श्रुतं कौथुमिर्यथा ॥ ८२ ॥ सिद्धिं गतोऽर्कमाराध्य कुष्ठान्मुक्तश्च सुव्रत ॥ कश्चासौ कौथुमिर्विप्रः कथं कुष्ठमवाप्तवान् ॥ ८३ ॥ कथमाराधयामास भानुं देवपतिं द्विज ॥ एतन्मे विप्र निखिलं कीर्तयस्व समासतः ॥ ८४ ॥

॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मेषु सूर्यपूजादिवर्णनं नाम दशाधिकद्विशततमोऽध्यायः ॥ २१० ॥ ॥छ॥

॥ सुमंतुरुवाच ॥ ॥ साधु पृष्टोऽस्मि राजेंद्र शृणुष्व गदतो मम ॥ आसीत्पुरा महाविद्वान्ब्राह्मणः स्थानगोत्तमः ॥ १ ॥ स गतः पुत्रसहितो जनकस्याश्रमं द्विजः ॥ तत्र वादोऽभवत्तेषां विप्रैरन्यैर्नृपोत्तम ॥ २ ॥ क्रोधाविष्टेन वै तत्र हतः कौथुमिना द्विजः ॥ तेन दृष्ट्वा हतं विप्रं त्यक्तः पित्रा स कौथुमिः ॥ ३ ॥ भ्रातृभिश्च महाबाहो तथा शिष्टैश्च कृत्स्नशः ॥ प्रत्युक्तः स च सर्वैस्तु शोकदुःखसमन्वितः ॥ ४ ॥ तीर्थानि स जगामाथ दिव्यान्यायतनानि च ॥ न च मुक्तस्त्वसौ विप्रः सहसा ब्रह्महत्यया ॥ ५ ॥ अमुक्तेऽथ तया विप्रे परो व्याधिरजायत ॥ कर्णनासाविहीनस्तु पूयशोणितविस्रवः ॥ ६ ॥ पृथिवीं पर्यटन्सर्वां पुनरागात्पितुर्गृहम् ॥ दुःखोपहतचित्तस्तु पितरं वाक्यमब्रवीत् ॥ ७ ॥ पितर्गतस्तु तीर्थानि पुण्यान्यायतनानि च ॥ मुक्तोऽस्मि नानया तात क्रूरया ब्रह्महत्यया ॥ ८ ॥ कृतेऽपि हि परे तात प्रायश्चित्ते तु मेऽनघ ॥ किं करोमि क्व गच्छामि तातातीव रुजो मम ॥ ९ ॥ कृतेन कर्मणा येन अल्पायासेन मे विभो ॥ नश्येत्तु ब्रह्महत्येयं व्याधिश्चायं परंतप ॥ १० ॥ कथ्यतां मा चिरं तात कुरु निःश्रेयसं मम ॥ हिरण्यनाभो विप्रस्तु श्रुत्वा वाक्यं सुतस्य तु ॥ शोकदुःखाभिभूतस्तु वाक्यं पुत्रमुवाच ह ॥ ११ ॥ ॥ हिरण्यनाभ उवाच ॥ ॥ ज्ञातः पुत्र तव क्लेशः प्राप्तो यस्त्वटता महीम् ॥ १२ ॥ तीर्थानि च त्वया वत्स प्रायश्चित्तानि कुर्वता ॥ न चापि ब्रह्महत्या त्वां मुंचते मत्कुलोद्वह ॥ १३ ॥ उपायमेकं वक्ष्यामि येन त्वं मोक्षमाप्स्यसि ॥ अल्पायासेन वै पुत्र शृणुष्व गदतो मम ॥ १४ ॥ ॥ कौथुमिरुवाच ॥ ॥ आराधयामि कं देवं ब्रह्मादीनां कथं विभो ॥ शरीरेण विहीनोऽस्मि हेतुना सर्वकर्मणाम् ॥ १५ ॥ ॥ हिरण्यनाभ उवाच ॥ ॥ सिद्धिसंततियुक्तेन कर्मणा तुष्टिमाप्नुयुः ॥ देवैरपि सुपूज्योऽयमुपलेपनमार्जनैः ॥ १६ ॥ भानुरेको द्विजश्रेष्ठ ऊचुरेवं मनीषिणः ॥ ब्रह्मा विष्णुर्महादेवो जलेशो धनदस्तथा ॥ ॥ १७ ॥ भानुमाश्रित्य सर्वे ते मोदंते दिवि पुत्रक ॥ तस्माद्भानोः समं देवं नाहं पश्यामि कंचन ॥ १८ ॥ एवं भानुं सर्वमान्यमधुना

खिलकामदम् ॥ पितरं मातरं तात नराणां नात्र संशयः ॥ १९ ॥ तमाराधय वै भक्त्या जपन्मंत्रमनुत्तमम् ॥ इतिहासपुराणानि शृणु श्रद्धा
समन्वितः ॥ २० ॥ आराधयन्रविं भक्त्या जपन्साम महामते ॥ पुराणानि ततो लोके मोक्षं प्राप्स्यसि पुत्रक ॥ २१ ॥ ॥ कौथुमि
रुवाच ॥ ॥ दिश सामानि वै तात प्रवराणि महामते॥ ॐकारप्रवरोद्गीथं प्रस्थानं च चतुष्टयम् ॥ २२ ॥ पंचमः परिहारोत्र षष्ठमाहुस्तमद्भुतम् ॥
निधनं सप्तमं साम्नां साप्तविध्यमिति स्मृतमम् ॥२३॥ साप्तविध्यमिति प्रोक्तं हिंकारप्रणवेषु च॥अष्टमं च तव शाठ्यं नवमं वामदेविकम् ॥२४॥
ज्येष्ठं तु दशमं साम वेधसे प्रियमुत्तयम् ॥ एतेषां तात साम्नां वै कंठे जाप्यं परं मतम् ॥ जपित्वा तु अहं शक्त्या गच्छामि परमं पदम् ॥ २५ ॥
॥ ॥ हिरण्यनाभ उवाच ॥ ॥ साधु पुत्र कुलं पूतं त्वत्पुत्रेण समेन च ॥ २६ ॥ एवं गतस्यापि हि ते जाता पुत्र विधेः स्मृतिः ॥ एवं तात न संदे
हः सामान्येतानि पुत्रक ॥ २७ ॥ प्रवराणि हि साम्ना वै ब्रह्मणा कथितानि ह ॥ एषामपि परं प्रोक्तं सामद्वयमनुत्तमम् ॥ तस्मादेकं परं जाप्यं सर्व
पापभयापहम् ॥२८॥ ॥ कौथुमिरुवाच ॥ ॥ कथ्यतां तात तच्छीघ्रं यत्तु सामद्वयं परम् ॥ एतेषां तात साम्नां तु नान्यज्जाप्यं च यद्भवेत् ॥२९॥
॥ ॥ हिरण्यनाभ उवाच ॥ ॥ ज्येष्ठसामपरं पूव द्वितीयं गदतः शृणु ॥३०॥ ततः श्राव्यं तृतीयं तु जप्तव्यं मुक्तिमिच्छता ॥ ततश्च परमं प्रोक्तं स्वयं
देवेन भानुना ॥ ३१ ॥ स्वयं दैवतमादिष्टं छंदसामुत्तमं व्रतम् ॥ प्रियं हिरण्यगर्भस्य प्रियं सूर्यस्य सर्वदा ॥ ३२ ॥ जपश्च विनियोगोपि लक्षणं च
निबोध मे ॥ सत्येन स्वरलीनस्तु शूकरादि स्मृतं बुधैः ॥ ३३ ॥ ऋतुर्भावस्तथा धर्मो विधर्मः सत्यकृत्तथा ॥ धर्माधर्मौ तथा कार्यौ धर्मवेदनमे
व च ॥ ३४ ॥ यदेभिर्गीयते शब्दै रुचिरं समयैर्द्विजैः ॥ जाप्यं तत्परमं प्रोक्तं स्वयं देवेन भानुना ॥ ३५ ॥ एतद्वै जपमानस्तु पुनरावर्तते न तु ॥
सर्वरोगविनिर्मुक्तो मुच्यते ब्रह्महत्यया ॥ ३६ ॥ एतज्जाप्यं तु संजप्य आराधय दिवाकरम् ॥ गायन्साम तव प्रोक्तं शृणु पौराणिकं सुत ॥ ३७ ॥
ज्येष्ठसाम्नोऽपि ते पुत्र लक्षणं कथयामि हि ॥ आद्यायादाज्यदोहेति ज्येष्ठसाम्नोपि लक्षणम् ॥ ३८ ॥ तव श्राव्यं जपं पुत्रज्येष्ठगाये रविः सदा ॥
समाराधय शृण्वन्वै पुत्राणामिव पुत्रक ॥ एवमाराध्य देवेशं ततो दुःखं प्रहास्यसि ॥ ३९ ॥ ॥ सुमंतुरुवाच ॥ ॥ ततः श्रुत्वा पितुर्वाक्यं सामगः
कौथुमिस्तथा ॥ ४० ॥ आराधयामास रविं भक्त्या श्रद्धासमन्वितः ॥ ततः श्राव्यं जपन्राजंस्त्रिकाले पुरतो रवेः ॥ ४१ ॥ शृण्वतस्तु पुराणानि
ब्रह्महत्या गता तदा ॥ व्याधिश्च कुरुशार्दूल फलमेतच्छ्रुतस्य वै ॥ ४२ ॥ जपता यत्फलं तेन देवं पूजयता नृप ॥ सोपि प्राप्तो रविं राजञ्छृणुष्वैक
मना नृप ॥ ४३ ॥ स गतो मूर्तिमान्विप्रः प्रसादाद्भास्करस्य तु ॥ प्रविश्य मंडलं भानोः पदं यत्परमं विभोः ॥ ४४ ॥ आवर्तते न चाद्यापि

गतोसौ परमं पदम् ॥ इति ते कथितं राजन्गतः सिद्धिं महाद्विजः ॥४५॥ उपोष्येमां भवेद्वीर सप्तमीं याति भास्करम् ॥ कौथुमिर्नरशार्दूल प्रसा
दाद्भास्करस्य तु ॥ ४६ ॥ जपमानस्तु वै सोपि पुराणश्रवणस्तथा ॥ इत्येषा कथिता राजन्प्रथमा सप्तमीतथा ॥ ४७ ॥ अर्कस्य पुटिका पुण्या
वित्तदा या प्रिया रवेः ॥ ४८ ॥ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मेऽर्कसंपुटिकानामसप्तमीव्रतवर्णनं नामैकादशा
धिकद्विशततमोऽध्यायः ॥ २११ ॥ ॥ सुमंतुरुवाच ॥ ॥ इत्येषा कथिता वीर अर्कसंपुटिका तव ॥ द्वितीया मरिचैर्या तु शृणुष्व गदतो
मम ॥ १ ॥ शुक्लपक्षे तु चैत्रस्य षष्ठ्यां सम्यगुपोषितः ॥ पूजयेद्भास्करं भक्त्या सौरधर्मविधानतः ॥ २ ॥ ॥ शतानीक उवाच ॥ ॥ ब्रूहि
सर्वान्मम ब्रह्मन्मंत्रान्पुण्यान्विशेषतः ॥ सूर्यादिहृदयं चापि शिरोन्यासयुतांस्तथा ॥ ३ ॥ ॥ सुमंतुरुवाच ॥ ॥ अहं ते कथयिष्यामि रहस्यं
परमं विभो ॥ यदुक्तं ब्रह्मणा पूर्वं भक्त्या भानोर्महात्मनः ॥ ४ ॥ सर्वपापक्षयार्थाय तच्छृणुष्व महामते ॥ सर्वपापहरं पुण्यमादित्यं लोकपूजि
तम् ॥ ५ ॥ शिखादामसमायुक्तं वकारामृतमुत्तमम् ॥ ॐ वं फट् ॥ ॐ एष सूर्यः स्वयं तात मंत्रमूर्तिर्महाबलः ॥ ६ ॥ अस्यानुस्मरणान्मंत्री नित्यं
मधुरभोजनः ॥ संवत्सरेण देवेशं साक्षाद्भानुं प्रपश्यति ॥ ७ ॥ व्याधिमृत्य्वोश्च निर्मुक्तः सूर्यलोकं स गच्छति ॥ सततं जपमानस्तु राजन्मंत्रविदां
वरः ॥ ८ ॥ मनसा कर्मणा वाचा शापानुग्रहतोपि वा ॥ क्षीराशी मौनमाश्रित्य विविक्ते नियतेंद्रियः ॥ ९ ॥ जपित्वा द्वादशलक्षं सशरीरो
दिवं व्रजेत् ॥ त्रैलोक्यं चरते राजंश्चिंतामणिरिवेच्छया ॥ १० ॥ अथेदं परमं वामं सूर्यस्य हृदयं शृणु ॥ स्मर्तव्यं शुचिना नित्यं सर्वपापभयाप
हम् ॥ ११ ॥ वियुक्तं चंद्रसंयुक्तमृकारेण च भारत ॥ ॐकारदीपितं चैव हृदयं परिकीर्तितम् ॥ १२ ॥ यकारबिंदुसंयुक्तं वैशाखः कथितो बुधैः ॥
यकारश्च वकारश्च मात्रा बिंदुस्तथा नृप ॥१३॥ इष्टं कवचमादिष्टमस्त्रं वक्ष्ये निबोध मे ॥ प्रणवादिं दुकारं च सानुस्वारं कटस्तथा ॥ १४ ॥ इदमस्त्रं
स्मृतं राजन्नमृतं च निबोध मे ॥ बिंदुचंद्रसमायुक्तं वकारममृतं स्मृतम् ॥१५॥ ॐ ब्रह्मन्नस्त्रममृतं गायत्रीं चापि तेरोरां धेनुर्वै परिकीर्तितम्॥यकारश्च
वकारश्च रिरोवेत्रमादिशेत् ॥१६॥ व्यनेत्र एतान्यंगानि सूर्यस्यामिततेजसः॥ आदित्यं मूर्ध्नि विन्यस्य हृदये हृदयं न्यसेत् ॥१७॥ सावित्रीं कंठदेशे
तु अशेषं मूर्ध्नि चिंतयेत् ॥ अर्कन्यासो मयाख्यातो विद्वान्न्यासं प्रकल्पयेत् ॥१८॥ एकाक्षरस्य सूर्यस्य शृण्वर्चनविधिं परम् ॥ प्रथमं किंकिणीमुद्रां
बद्ध्वा तु हृदये नृप ॥ १९ ॥ प्राणायामे च तथा परिवीरसमन्वितम् ॥ एकाक्षरं समावेत्ति आत्मशुद्ध्यर्थमादरात् ॥ २० ॥ पुनस्त्वामेव बध्यं तु
वकारेणात्मना लभेत् ॥ २१ ॥ एतत्कृत्वादित्यसमो भवतीति न संशयः ॥ कृत्वा च मुद्रां प्रासादे अस्त्रं योज्य महीपते ॥ २२ ॥ प्रासादशो

भनं स्यार्द्रे कृत्वा तद्भरतर्षभ ॥ कवचेनार्कवान्छत्त्रं क्षालयेद्वर्धनक्रियाम् ॥ २३ ॥ ततोर्घ्यपात्रं पुष्पैश्च पूजयेद्विधिवन्नृप ॥ हृदि ना स्नापयेद्देवं ततः
पूजां समाचरेत् ॥ २४ ॥ पद्ममुद्रा पुष्पगर्भा देवं शिरसि विन्यसेत् ॥ आवाहितो भवेद्देवं देवदेवो दिवाकरः ॥ २५ ॥ हृदयेनार्घ्यसंयुक्तां पूजां
बध्नीत भारत ॥ हृदयेन च नैवेद्यं दातव्यं शक्तितो विभोः ॥ २६ ॥ यथाशक्ति जपं कुर्यात्सुव्रती वाग्यतेन्द्रियः ॥ अनेन विधिना राजन्सर्वका
र्याणि साधयेत् ॥ २७ ॥ न क्वचित्प्रतिघातः स्यान्न चापि दुरितं भवेत् ॥ व्योममुद्रां परां बद्ध्वा कृत्वा चापि प्रदक्षिणम् ॥ २८ ॥ देवं विसर्जये
त्पश्चाद्धृदयेन महीपते ॥ २९ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मे सौरार्चनविधिवर्णनं नाम द्वादशाधिकद्विशततमोऽ
ध्यायः ॥ २१२ ॥ ॥ छ ॥ ॥ सुमंतुरुवाच ॥ ॥ दृष्ट्वा तु पावकं देवं पावकस्थं दिवाकरम् ॥ अव्यात्तु सपरीवारं घुकारं परिकीर्तयेत् ॥
॥ १ ॥ एवं कृते शोधनं स्यात्पावकस्य न संशयः ॥ पद्मगर्भे ततो वाथ हृदयाग्नौ समाक्षिपेत् ॥ २ ॥ आवाहितो भवेद्देवदेवः साक्षान्न संशयः ॥
ओंकारेणाहुतिशतं नेत्रांजनसमाधिना ॥ ३ ॥ पश्चाहुतीस्ततो दद्यादंगानां प्रीतये नृप ॥ विसर्जनं ततः कुर्याद्धृदयेन विचक्षणः ॥ ४ ॥ इति
श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरार्चनविधिवर्णनं नाम त्रयोदशाधिकद्विशततमोऽध्यायः ॥ २१३ ॥ ॥ छ ॥ ॥ सुमन्तु
रुवाच ॥ ॥ पद्मिनी च तथान्या तु मध्यमानामनी तथा ॥ अर्किणी ज्वालिनी चैव तेजनी च गभस्तिनी ॥ १ ॥ शंखमुद्रा च दशमी सूर्य
वक्त्रा तथापरा ॥ सहस्रकिरणा चैव मुद्रा द्वादश कीर्तिताः ॥ २ ॥ दद्यादर्घ्यं तु पद्मिन्या व्योम बद्ध्वा जपेद्बुधः ॥ उदयाश्रयः समाकर्षे मध्यमा
व्याधिनाशिनी ॥ ३ ॥ अर्किण्या पश्यते सूर्यं विधिस्थस्तु भवेद्यदि ॥ ज्वालिनीमुपसंगंतुं बद्ध्वा सूर्यमुखो जपेत् ॥ ४ ॥ सप्ताहाद्वीक्षते सूर्यं
सिध्यते च ततः स्वयम् ॥ अवतीर्य पद्मखंडं सूर्यादभिमुखो नरः ॥ ५ ॥ जपन्छतसहस्रं हि अक्षयं लभते निधिम् ॥ शंखमुद्रादिभिरिमं सूर्य
चक्रविधिं शृणु ॥ ६ ॥ अहोरात्रोषितो भूत्वा बद्ध्वा सूर्यमुखो नरः ॥ स्थितः पद्मासने राजञ्जपंश्चाप्ययुतं मनुम् ॥ ७ ॥ पश्यते तु त्र्यहात्सूर्यं भवे
त्सिद्धिश्च मानसी ॥ सहस्रकिरणं बद्ध्वा नाभिमात्रजले स्थितः ॥ ८ ॥ जपेदयुतमात्रं तु भवेत्तद्गतमानसः ॥ सहस्रकिरणं देवं परं रश्मिभिरावृतम् ॥
॥ ९ ॥ स पश्यति परं धाम भवेत्सिद्धिश्च पुष्कला ॥ शापानुग्रहकर्तासौ सर्वेषां प्राणिनां भवेत् ॥ १० ॥ सर्वतः कञ्चुकं मुक्त्वा भवेद्वै विगत
ज्वरः ॥ ११ ॥ परौ गुल्फौ करौ कृत्वा संलग्नौ च परस्परम् ॥ वामानामिकयाक्रम्य दक्षिणां तु कनीयसीम् ॥ १२ ॥ वामा दक्षिणया चैव
दक्षिणा वामया तथा ॥ मुद्रैषा हि महापुण्या व्योममुद्रा प्रकीर्तिता ॥ १३ ॥ बद्धया चानया सद्यो हीयंते व्याधयो नृणाम् ॥ नानया रहितः

कश्चित्सिद्धिं प्राप्नोति साधकः ॥ १४ ॥ सर्वत्रैवोत्तमा ह्येषा मंत्रमुष्टिरिति स्मृता ॥ सूर्यस्य हृदयं सेयमर्कमुद्रेति विश्रुता ॥ १५ ॥ बध्नीयात्सततं
मन्त्रैरायुरारोग्यवृद्धये ॥ सूर्यमंडल अभ्यग्रे मन्त्री सूर्योदये स्थितः ॥ १६ ॥ स सूर्याभिमुखो भूत्वा जपेन्मंत्रं तु साधकः ॥ दिनत्रयेण वीक्षेत
ध्यानी जपपरायणः ॥ १७ ॥ तं दृष्ट्वा नाश्नुते मृत्युं दुःखी न च न संशयः ॥ प्राप्नोति च परं स्थानं यत्र देवो दिवाकरः ॥ १८ ॥ उत्तानौ तु करौ
कृत्वा पृष्ठलग्नौ परस्परम् ॥ बद्ध्वा त्वंगुलयः सर्वाः सुप्रकीर्णा न संशयः ॥ १९ ॥ आक्रम्य चांगुलीमूलमंगुष्ठाभ्यां यथाक्रमम् ॥ उदया नाम
मुद्रैषा बध्नीयादुदये रवेः ॥ २० ॥ द्वादशाद्वीक्षते सूर्यं दिनात्स हि न संशयः ॥ सर्वपापहरा चैव सर्वपापविनाशिनी ॥ २१ ॥ उदया च
विना वामं मध्यतश्चैव तं क्षिपेत् ॥ मध्यमा नाम विख्याता मध्यसूर्ये तु चिन्तयेत् ॥ २२ ॥ मध्यमा विधिना तेन बद्ध्वा मुद्रां तु साधकः ॥
अंगुल्योः परमंगुष्ठौ विधिना तावुभौ ग्रथेत् ॥ २३ ॥ मुद्रा सास्तमनी ह्येषा सर्वतन्त्रेश्वरी शुभा ॥ सूर्यस्यास्तमने मुद्रां बद्ध्वा जप्तं समार
भेत् ॥ २४ ॥ सहस्रं हि शतं वापि मुद्रां बद्ध्वा जपेद्बुधः ॥ सर्वपातकसंमुक्तः सप्ताहादनुशोभनम् ॥ २५ ॥ करौ परस्परं लग्नावंगुष्ठौ चोर्ध्वसं
स्थितौ ॥ उभौ चांगुष्ठकौ चोर्ध्वौ संलग्नौ मूर्ध्नि संस्थितौ ॥ २६ ॥ मुद्रा तु मालिनी चैव निर्दहेत्पापपञ्जरम् ॥ ब्रह्महत्यादि यत्पापं योजिता सा
तु मूर्धनि ॥ २७ ॥ विदभ्यांगुलयः सर्वा ईषन्मध्यस्तथाग्रतः ॥ ऊर्ध्वस्थितौ तथांगुष्ठौ मुद्रेयं तर्जनी स्मृता ॥ २८ ॥ सर्वव्याधिहरा देवी सर्व
शत्रुविनाशिनी ॥ एतां बद्ध्वा महापुण्यां सर्वान्स्तम्भयते रिपून् ॥ २९ ॥ उभौ प्रसार्य वै हस्तौ मध्ये सार्धेन संस्थितौ ॥ शेषानाम्या ततश्चैव
अंगुष्ठाग्रं तथा क्रमात् ॥ ३० ॥ मुद्रा गभस्तिनी नाम सूर्यस्य हृदयं परम् ॥ मृत्युं नाशयते ह्येषा बद्ध्वा सूर्योदये शुभा ॥३१॥ अर्घ्यकाले तु बध्नी
यादर्चयाग्निं प्रपूजयेत् ॥ जपकाले च बध्नीयान्मंत्राणां नात्र संशयः ॥ ३२ ॥ विदक्षिणकनिष्ठिक्यां तर्जनीभ्यां तथा भवेत् ॥ तर्जनीभ्यां तथां
गुष्ठौ संलग्नौ तु परस्परम् ॥ जपं यः कुरुते नित्यं त्रिभिर्मासैर्विशुद्ध्यति ॥ ३३ ॥ करौ तु संपुटौ कृत्वा तर्जन्यौ द्वे च कुञ्चयेत् ॥३४॥ सहस्र
किरणा ह्येषा सर्वमुद्रेश्वरेश्वरी ॥ त्रिसंध्यमेतां बध्नीयात्साधको मंत्रमूर्धनि ॥ नाशयेत्सर्वपापानि तमोराशिमिवांशुमान् ॥ ३५ ॥ मुद्रा सुद्रककुंभे
ति बद्ध्वा पश्चात्तु मंत्रयेत् ॥ मासेन नाशयेत्कुष्ठं त्रिभिर्मासैर्न संशयः ॥ इति मुद्रांगसहितं सूर्यं पूजयते तु यः ॥ ३६ ॥ अनेन विधिना राजन्ब्रह्मा
पूजयते रविम् ॥ तस्मात्त्वमपि राजेंद्र पूजयानेन भास्करम् ॥ ३७ ॥ ततः सूर्यमवाप्येह सूर्यलोकं स गच्छति ॥ अनेन विधिना यस्तु पूजयेत्सत
तं रविम् ॥ ३८ ॥ स याति परमं स्थानं यत्र देवो दिवाकरः ॥ इत्थं पूज्य च देवेशमनेन विधिना नृप ॥ ३९ ॥ भोजयित्वा यथाशक्ति ब्राह्मणांश्च

विधानतः ॥ सप्तम्यां प्राशयेद्वापि मरिचं मंत्रतस्तथा ॥ ४० ॥ एकं गृहीत्वा मरिचमव्रणं च दृढं परम् ॥ सजलं प्राशयेद्राजन्मन्त्रेणानेन वा
स्मृतम् ॥ ४१ ॥ यथोक्तेन विधानेन पूजयित्वा दिवाकरम् ॥ इति संप्राश्य मरिचं ततो भुंजीत वाग्यतः ॥ ४२ ॥ प्रियसंगमवाप्नोति तत्क्षणादेव
नान्यथा ॥ इतीयं सप्तमी पुण्या प्रियसंगमदायिनी ॥ ४३ ॥ कुर्यादेकेन कामांस्तु वत्सरेण स गच्छति ॥ पुत्रादिभिर्नरश्रेष्ठ पुनः संगममृच्छति
॥ ४४ ॥ कुरु तस्मान्महाबाहो त्वमेव प्रियदायिनीम् ॥ उपोष्य इंद्रो विधिवत्सुरामरिच्सप्तमीम् ॥ ४५ ॥ संयोगं कृतवान्वीर सह शच्या
विधानतः ॥ उपोष्यैनां नलश्चापि दमयन्त्या महाबलः ॥ ४६ ॥ रामोऽगात्सीतया सार्धमुपोष्यैनां नराधिप ॥ ४७ ॥ इति श्रीभविष्ये महापुराणे
ब्राह्मे पर्वणि सप्तमीकल्पे मरिसप्तमीव्रतवर्णनं नाम चतुर्दशाधिकद्विशततमोऽध्यायः ॥ २१४ ॥ ॥छ॥ ॥ सुमंतुरुवाच ॥ ॥ तृतीयां सप्तमीं वीर
शृणुष्व गदतो मम ॥ निंबपत्रैः स्मृता यातु परमा रोगनाशिनी ॥ १ ॥ यथार्चनविधिर्वान्यो येन पूजयते रविम् ॥ देवदेवः शार्ङ्गपाणिः शंख
चक्रगदाधरः ॥ २ ॥ अथार्चनविधिं वच्मि मंत्रोद्धारं निबोध मे ॥ ३ ॥ ॐ खषोल्काय नमः ॥ मूलमंत्रः ॥ ॐ विटि २ शिरः ॥ ॐ सहस्ररश्म
ये अस्त्रम् ॥ ॐ सहस्रकिरणाय २०० ऊर्ध्वबंधः ॥ ॐ घनाय भूतभाविने नमः इति भूतबंधः ॥ ॐ ज्वल २ प्रज्वल २ अग्निप्रकर ॥ ४ ॥
ॐ आदित्याय विद्महे विश्वभागाय धीमहि ॥ तन्नः सूर्यः प्रचोदयात् ॥ ५ ॥ गायत्रीसंकलीकरणमिदम् ॥ ॐ धर्मात्मने नमः ॥ ऐशा
न्याम् ॥ ॐ दक्षिणाय नमः आग्नेय्याम् ॥ ॐ वज्रपाणयेऽनंताय नमः उत्तरतः ॥ ॐ श्यामपिंगलाय नमः ऐशान्याम् ॥ ॐ अमृताय नमः
आग्नेय्याम् ॥ ॐ बुधाय सोमसुताय नमो दक्षिणतः ॥ ॐ वागीश्वराय सर्वविद्याधिपतये नैर्ऋत्याम् ॥ ॐ शुक्राय महर्षये भूताय पश्चिमतः ॥
ॐ ईश्वराय सूर्यात्मने नमो वायव्याम् ॥ ॐ कृतवते नमः उत्तरतः ॥ ॐ राहवे नमः ऐशान्याम् ॥ ॐ अंतराय सूर्यात्मने नमः पूर्वतः ॥
ॐ ध्रुवाय नम ऐशान्याम् ॥ ॐ भगवते पूषन्मालिन्सकलजगत्पते सप्ताश्ववाहन भूभुज परमसिद्धिशिरसि गतं गृह्ण तेजोग्ररूप अनंतज्वाल
२ ॥ आवाहनमंत्रः ॥ ॐ नमो भगवते आदित्याय सहस्रकिरणाय यथासुखं पुनरागमनाय इति ॥ ६ ॥ ॥ इति श्रीभविष्ये महापुराणे
ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मे सूर्यमंत्रोद्धारवर्णनं नाम पञ्चदशाधिकद्विशततमोऽध्यायः ॥ २१५ ॥ ॥ छ ॥ ॥ सुमंतुरुवाच ॥ ॥
शृणुष्वर्चाविधिं राजन्मंत्रपूतेन वारिणा ॥ प्रोक्षणीयं प्रयत्नेन किमर्थं सुसमाहितः ॥ १ ॥ हृदयादिष्वथांगेषु मंत्रं विन्यस्य मंत्रवित् ॥
आत्मानं भास्करं ध्यात्वा परिचारसमन्वितः ॥ २ ॥ कुर्यात्संमार्जनीं मुद्रां दिशां च प्रतिबोधनम् ॥ पाताले भूशोधनं चैव नभसश्च

तथा मतम् ॥ ३ ॥ अर्चनस्य प्रकारोऽयं सर्वेषामीप्सितप्रदः ॥ सर्वैरपि बुधैर्वीर पद्ममेतत्प्रकीर्तितम् ॥ ४ ॥ अष्टपत्रं लिखेत्पद्मं शुचौ देशे सकर्णिकम् ॥ आवाहनीं ततो बद्ध्वा मुद्रामावाहयेद्रविम् ॥ ५ ॥ खषोल्कं स्नापयेत्तत्र स्वरूपं लोभदायकम् ॥ स्थापयेत्स्नापयेच्चैव मंत्रै मंत्रशरीरिणम् ॥ ६ ॥ आग्नेय्यां दिशि देवस्य हृदयं स्थापयेन्नरः ॥ ऐशान्यां तु शिरः स्थाप्य नैर्ऋत्यां विन्यसेच्छिखाम् ॥ ७ ॥ पौरंदर्यां न्यसेन्नेत्रे एकाग्रहृदयस्तु सः ॥ आवाह्य चैकं कवचं वारुण्यामस्त्रमेव च ॥ ८ ॥ ऐशान्यां स्थापयेत्सोमं पौरंदर्यां तु लोहितम् ॥ आग्नेय्यां सोमतपनं याम्यां चैवबृहस्पतिम् ॥ ९ ॥ नैर्ऋत्यां दानवं[१] शुक्रं वारुण्यां च शनैश्चरम् ॥ वायव्यां च तथा केतुं कौबेर्यां राहुमेव च ॥ १० ॥ द्वितीयायां तु कक्षायां देवतेजःसमुद्भवान् ॥ स्थापयेद्द्वादशादित्यान्काश्यपेयान्महाबलान् ॥ ११ ॥ भगः सूर्योर्यमश्चैव मित्रो वरुण एव च ॥ सविता चैव धाता च विवस्वांश्च महाबलः ॥ १२ ॥ त्वष्टा पूषा तथा चन्द्रो द्वादशो विष्णुरुच्यते ॥ पूर्वे चेन्द्राय दक्षिणे यमाय पश्चिमे वरुणाय उत्तरे कुबेराय ऐशान्यामीश्वराय आग्नेय्यामग्निदेवतायै नैर्ऋत्यां पितृदेवेभ्यो वायव्यां वायवे ॥ जया च विजया चैव जयंती चापराजिता ॥ शेषश्च वासुकिश्चैव रेवती च विनायकः ॥ महाश्वेता महादेवी राज्ञी चैव सुवर्चला ॥ १३ ॥ तथान्यो वापि देवानां समूहस्तत्रतत्र ह ॥ तथान्यो लोकविख्यातो योगः प्रोक्तश्च दक्षिणे ॥ १४ ॥ पुरस्ताद्भासुरस्थाने स्थापनीया विजानता ॥ सिद्धिर्वृद्धिः स्मृतिर्देवी श्रीश्चैवोत्पलमालिनी ॥ १५ ॥ स्थाप्या स्वदक्षिणे पार्श्वे लोकपूज्या समंततः ॥ प्राज्ञावती क्षुधा वीर हारीता बुद्धिरेव च ॥ १६ ॥ स्थाप्य बुद्धिमती नित्यं श्रीकामैर्वा विवस्वतः ॥ ऋद्धिश्चैव विसृष्टिश्च पौर्णमासी विभावरी ॥ स्थाप्याश्च स्वोत्तरे पार्श्वे इत्येता देवशक्तयः ॥१७॥ दीपश्चान्नमलंकारो वासः पुष्पाणि मन्त्रतः ॥ देयानि देवदेवाय सानुगाय समूर्तये ॥१८॥ विधिनानेन सततं सदा योर्चयति भास्करम् ॥ संप्राप्य परमान्कामांस्ततो भानुसदो व्रजेत् ॥ १९ ॥ अनेन विधिना यस्तु भोजयेद्भास्करं नृप ॥ त्वं निंब कटुकात्मासि आदित्यनिलयस्तथा ॥ सर्वरोगहरः शान्तो भव मे प्राशनं सदा ॥ २० ॥ इत्थं प्राश्य जपेद्भूमौ देवस्य पुरतो नृप ॥ ब्राह्मणान्भोजयित्वा तु शक्त्या दत्त्वा तु दक्षिणाम् ॥ २१ ॥ भुञ्जीत वाग्यतः पश्चान्मधुरं क्षारवर्जितम् ॥ इत्येषा वर्षपर्यन्तं कर्तव्या चैव सप्तमी ॥ २२ ॥ कुर्वाणः सप्तमीमेतां सर्वरोगैः प्रमुच्यते ॥ सर्वरोगविनिर्मुक्तः सूर्यलोकं स गच्छति ॥ २३ ॥ ॥ सुमन्तुरुवाच ॥ ॥ अथ भाद्रपदे मासि सिते पक्षे महीपते ॥ कृत्वोपवासं सप्तम्यां विधिव

---

[१] दानवास्सन्त्यस्येति दानवः, अर्शआद्यच् ।

त्पूजयेद्रविम् ॥ २४ ॥ माहेश्वरेण विधिना पूजयेदत्र भास्करम् ॥ अष्टम्यां तु पुनः स्नातः पूजयित्वा दिवाकरम् ॥ २५ ॥ दद्यात्फलानि
विप्रेभ्यो मार्तण्डः प्रीयतामिति ॥ खर्जूरं नालिकेरं च मातुलिङ्गफलानि च ॥ २६ ॥ देवस्य पुरतो दत्त्वा तथा चाम्रफलानि च ॥ इति ते
कथितं राजन्सप्तमीफलमादितः ॥ २७ ॥ महातपो महाश्रेष्ठं भास्करस्य विशाम्पते ॥ यच्छ्रुत्वा मानवो राजन्मुच्यते ब्रह्महत्यया ॥ २८ ॥
तथेदं परमं पर्व कथितं ब्रह्मसंज्ञितम् ॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यन्ते मानवा नृप ॥ २९ ॥ अश्वमेधसहस्रस्य वाजपेयशतस्य च ॥ सर्वतीर्थाभि
गमने वेदाभ्यासे च यत्फलम् ॥ यत्फलं पृथिवीदाने तत्सर्वं प्राप्नुयान्नरः ॥ ३० ॥ राजसूयसहस्रस्य वाजपेयशतस्य च ॥ सहस्रशतदानस्य फलं
विंदति मानवः ॥ ३१ ॥ लेखत्वं ब्राह्मणो गच्छेत्क्षत्रियो विप्रतां व्रजेत् ॥ वैश्योऽपि क्षत्रतां याति शूद्रो वैश्यत्वमेव च ॥ ३२ ॥ सूतमागध
बन्द्याद्या ये चान्ये संकरोद्भवाः ॥ तेऽपि यांत्युत्तमं स्थानं पुराणश्रवणाद्विभो ॥ ३३ ॥ इतिहासपुराणाभ्यां नत्वन्यत्पावनं नृणाम् ॥ येषां
श्रवणमात्रेण मुच्यते सर्वकिल्बिषैः ॥ ३४ ॥ विधिना राजशार्दूल शृण्वतां यत्फलं किल ॥ यथोक्तं नात्र संदेहः पठतां च विशांपते ॥ ३५ ॥
॥ ॥ शतानीक उवाच ॥ ॥ भगवन्केन विधिना श्रोतव्यं भारतं नरैः ॥ चरितं रामभद्रस्य पुराणानि विशेषतः ॥ ३६ ॥ कथं तु वैष्णवा
धर्माः शिवधर्मा अशेषतः ॥ सौराणां चापि विप्रेन्द्र उच्यतां श्रवणे विधिः ॥ ३७ ॥ वाचनीयं कथं चापि वाचको द्विजसत्तम ॥ लक्षणं
चास्य मे ब्रूहि वाचकस्य महात्मनः ॥ ३८ ॥ स्वरूपं चास्य मे ब्रूहि खषोल्कस्य महात्मनः ॥ फलं च पूजिते किं स्याद्वाचके विधिवद्द्विज ॥
॥ ३९ ॥ पारणेपारणे पूज्यो वाचकः श्रावकैः कथम् ॥ समाप्ते भगवन्किंकिं देयं पर्वणि वाचके ॥ ४० ॥ न च किं कार्यसिद्धं यत्सिद्धं पर्वणि
पर्वणि ॥ ॥ सुमन्तुरुवाच ॥ ॥ सम्यक्पृष्टोऽस्मि राजेन्द्र इतिहासपुराणयोः ॥ ४१ ॥ श्रवणे तु महाबाहो श्रूयतां यन्मया पुरा ॥ पृष्टो
वोचन्महातेजा विरिंचो भगवान्गुरुः ॥ ४२ ॥ हंत ते कथयाम्येष पुराणश्रवणे विधिम् ॥ इतिहासपुराणानि श्रुत्वा भक्त्या विशेषतः ॥ मुच्यते
सर्वपापेभ्यो ब्रह्महत्यादिभिर्विभो ॥ ४३ ॥ सायं प्रातस्तथा रात्रौ शुचिर्भूत्वा शृणोति यः ॥ तस्य विष्णुस्तथा ब्रह्मा तुष्यते शंकरस्तथा ॥ ४४ ॥
प्रत्यूषे भगवान्ब्रह्मा दिनांते तुष्यते हरिः ॥ महादेवस्तथा रात्रौ शृण्वतां तुष्यते विभुः ॥ पारणानि दशाहेषु एके कुर्वंति तानि भोः ॥ ४५ ॥ भवेद्वै
राजशार्दूल शृणु तेषां च यत्फलम्॥विधानं वाचकस्येह शृण्वतां च विशांपते॥४६॥शुद्धवासा गृहादेत्य स्थानं यत्समयान्वितम् ॥ प्रदक्षिणं ततो
गत्वा यस्तस्मिन्देव एव हि ॥ ४७ ॥ नात्युच्चं नातिनीचं च ह्यासनं भजते ततः ॥ आसनं तस्य वै राजन्बोधकस्य सदा भवेत् ॥ ४८ ॥ वन्द

नीयं प्रपूज्यं च श्रोतृभिः कुरुनन्दन ॥ व्यासपीठं तु तत्प्रोक्तं गुरोरासनमादिशेत् ॥ ४९ ॥ न स्थेयं श्रावकैस्तस्माद्वाचकस्यासने नृप ॥ राजासने यथा भृत्यैर्यथा पुत्रैः पितुर्नृप ॥ ५० ॥ यथा शिशुर्गुरोर्वीर स तेषां हि गुरुर्मतः ॥ देवार्चामग्रतः कृत्वा ब्राह्मणार्चां विशेषतः ॥ ५१ ॥ उपविश्य ततः पश्चाच्छ्रावकः शृणुयान्नृप ॥ समस्तानागतान्कृत्वा ततः पुस्तकमाददेत् ॥ ५२ ॥ प्रणम्य[1] शिरसा तस्य पुस्तकस्य विशांपते ॥ ग्रंथिं च शिथिलां कुर्याद्वाचकः कुरुनन्दन ॥ पुनर्बध्नीत तत्सूत्रं तन्मुक्त्वा वाचयेत्क्वचित् ॥ ५३ ॥ त्रिविधं पुस्तकं विद्यात्सूत्रं वासुकिरुच्यते ॥ पत्राणि भगवान्ब्रह्मा अक्षराणि जनार्दनः ॥५४॥ शंकरश्च तथा सूत्रं पंक्तयः सर्वदेवताः ॥ पावकश्च तथा सूत्रे मध्ये भानुः समाश्रितः ॥५५॥ अग्रे स्थिता ग्रहाः सर्वे दिशो वापि तथा विभो ॥ स्मृतो मेरुः सदा शंकुश्छिद्रमाकाशमुच्यते ॥५६॥ यंत्रद्वयं काष्ठमयमधोर्ध्वं यदुदाहृतम् ॥ द्यावापृथिव्योश्च शंखस्तथा चंद्र उदाहृतः ॥ ५७ ॥ इत्थं देवमयं ह्येतत्पुस्तकं देवपूजितम् ॥ नमस्यं पूजनीयञ्च गृहे स्थाप्यं विभूतये ॥ ५८ ॥ योऽस्य सूत्रं बृहत्कृत्वा प्रयच्छति नरोत्तमः ॥ स याति परमं स्थानं यत्र देवो दिवाकरः॥५९॥निरूप्य पात्रं राजेन्द्र कराभ्यां गृह्य वाचकः ॥ प्रणम्य शिरसा सर्वान्ब्रह्मादीन्व्यासमेव च ॥ वाल्मीकिं च तथा राजन्विधिं विष्णुं शिवं रविम् ॥६०॥ नमस्कारमथैषां तु पठित्वा कुरुनंदन ॥ ततोसौ व्याहरेद्विप्रान्वाचकः[2] श्रद्धयान्वितः ६१॥ अलंबितमतस्तब्धमद्भुतं वीरमूर्जितम् ॥ असंसक्ताक्षरपदं रसभावसमन्वितम् ॥ ६२ ॥ सप्तस्वरसमायुक्तं कालेकाले विशांपते ॥ प्रदर्शयन्रसान्त्सर्वान्वाचको व्याहरेन्नृप ॥ ६३ ॥ ईदृशाद्वाचकाद्विप्राच्छ्रुत्वा श्रद्धासमन्वितः ॥ इतिहासपुराणानि रामस्य चरितं तथा ॥ ६४॥ नियमस्थः शुचिः श्रोता शृणुयात्फलमश्नुते ॥ ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चापि विशेषतः ॥ ६५ ॥ अश्वमेधमवाप्नोति सर्वान्कामानवाप्नुते ॥ रोगैश्च मुच्यते सर्वैर्महत्पुण्यं च विंदति ॥ गच्छेद्वापि परं स्थानं देवस्याद्भुतमुत्तमम् ॥६६॥ स्नातैर्गृहं समागम्य श्रोतृभिर्वाचकस्य तु ॥ प्रणम्य शिरसा विप्रं वाचकं श्रद्धया नृप ॥६७॥ आसनं च समाश्रित्य स्थातव्यं[3] वाचकस्य तु॥संमुखं राजशार्दूल वाग्यतैः सुसमाहितैः॥६८॥वाचकेन नमस्कारे कृते व्यासस्य भूपते॥न वक्तव्यं महाबाहो श्रावकैः संशयादृते ॥६९॥ संशये सति प्रष्टव्यो वाचकः संप्रसाद्य तु ॥ यतश्च स गुरुस्तेषां धर्मतो बंधुरुच्यते॥७०॥ वाचकेनापि वक्तव्यं यत्स्यात्तेषां निबोधनम् ॥ अनुग्रहाय सर्वेषामशेषा गुरवो नृप ॥ ७१ ॥ नमस्कारादयः श्राव्याः शिवमस्त्विति वोद्यतैः ॥ वाग्यतैर्नृपशार्दूल वर्णैः सर्वैर्महीपते॥७२॥शूद्राणां पुरतो वैश्या वैश्यानां क्षत्रिणस्तथा ॥ मध्यस्थितोऽथ सर्वेषां वाचको व्याहरेन्नृप ॥ ये च संक

---

१ शिरसा पुस्तकं प्रणम्य तदा पुस्तकमाददद्यादित्यर्थः । इहेत्थं पदद्वयं पूर्वान्वयि । २ व्याङ्पूर्वस्य हरतेरिहान्यत्र च वचनमेवार्थः, अत्र प्रमाणममर एव तथा 'व्याहारउक्तिर्लपितं भाषितं वचनं वचः' इति । ३ इदं पूर्वान्वयि ।

रजा राजन्नरास्ते शूद्रपृष्ठतः ॥ ७३ ॥ ब्राह्मणं वाचकं विद्यान्नान्यवर्णजमादरेत् ॥ श्रुत्वान्यवर्णजाद्वाचं वाचकान्नरकं व्रजेत् ॥ ७४ ॥ इत्थं हि
शृण्वतां तेषां वर्णानामनुपूर्वशः ॥ मासिमासि भवेद्राजन्पारणं कुरुनन्दन ॥ ७५ ॥ श्रेयोऽर्थमात्मनो राजन्पूजयेद्वाचकं बुधः ॥ मासि पूर्णे द्विज
श्रेष्ठे दातव्यं स्वर्णमाषकम् ॥ ७६ ॥ ब्राह्मणेन महाबाहो द्वे देये क्षत्रियस्य तु ॥ वाचकाय द्विजश्रेष्ठ वैश्येनापि त्रयं तथा ॥ ७७ ॥ शूद्रेणैव च
चत्वारो दातव्याः स्वर्णमाषकाः ॥ मासिमासि द्विजश्रेष्ठ श्रद्धया वाचकाय तु ॥ ७८ ॥ प्रथमे पारणे राजन्वाचकं पूज्य शक्तितः ॥ अग्निष्टो
मस्य यज्ञस्य फलं विंदति मानवः ॥ ७९ ॥ कार्तिकादीन्समारभ्य यावत्कार्त्तिकमच्युत[1] ॥ अग्निष्टोमं गोसवं च ज्योतिष्टोमं तथा नृप ॥ ८० ॥
सौत्रामणिं वाजपेयं वैष्णवं च तथा विभो ॥ माहेश्वरं तथा ब्राह्मं पुंडरीकं यजेत यः ॥ ८१ ॥ आदित्ययज्ञस्य तथा राजसूयाश्वमेधयोः ॥ फलं
प्राप्नोति राजेंद्र मासैर्द्वादशभिः क्रमात् ॥ इत्थं यज्ञफलं प्राप्य याति लोकांस्तथोत्तमान् ॥ ८२ ॥ वज्रवेदिकसंपन्नं मणिरत्नविभूषितम् ॥
विमानमास्थितो राजन्मोदते शक्रमंदिरे ॥ ८३ ॥ ततश्चंद्रस्य भवने वारुणे भवने ततः ॥ शोचिष्केशगृहे गत्वा गच्छेच्चैलबिले गृहे ॥ ८४ ॥
धिषणस्य गृहं गत्वा ततश्चित्रशिखंडिनः ॥ वृद्धश्रवसमासाद्य गच्छेत्कंजजमंदिरे ॥ एवमेव नृपश्रेष्ठ नात्र कार्या विचारणा ॥ ८५ ॥ फलमेतत्स
मुद्दिष्टं शृण्वतां सततं नृणाम् ॥ एतत्फलं वत्सरेण शृण्वतो विधितो नृप ॥ ८६ ॥ एतानि परिमाणानि वत्सरेण भवंति वै ॥ शृण्वतां नृपशार्दूल
ददतां वाचकाय वै ॥ ८७ ॥ एकं च द्वे तथा त्रीणि चत्वारि च विशांपते ॥ देयानि वाचकायेह मासिमासि नराधिप ॥ ८८ ॥ ब्रह्मणाद्यैर्नृप
श्रेष्ठ सर्ववर्णविभागशः ॥ समाप्ते पर्वणि तथा वाचकं पूजयेत्पुनः ॥८९॥ वाचकं ब्राह्मणं चैव सर्वकामैः प्रपूजयेत् ॥ गन्धमाल्यादिभिर्दिव्यैर्वा
सोभिर्विविधैरपि ॥ ९० ॥ वाचकाय प्रदत्त्वा तु ततो विप्रान्प्रपूजयेत् ॥ हिरण्यं रजतं रुक्मं गाश्च कांस्योपदोहनाः ॥९१॥ दत्त्वा च वाचका
येह श्रुतस्य प्राप्यते फलम् ॥ यथा सदक्षिणं चान्नं श्राद्धकाले प्रकीर्तितम् ॥ तथा श्रुतं नृपश्रेष्ठ सदक्षिणमुदाहृतम् ॥ ९२ ॥ वाचकं पूजयेद्यस्मा
त्पश्चाल्लेखकपूजनम् ॥ समाप्ते पर्वणि विभो विशेषेणैव चार्चयेत् ॥ ९३ ॥ वाचकः पूजितो येन पूजितास्तेन देवताः ॥ वाचके परितुष्टे च मम
प्रीतिरनुत्तमा ॥९४॥ इति वेधाः सदा प्राह देवानां पुरतः पुरा ॥ तस्मिंस्तुष्टे जगत्सर्वं तुष्टं भवति नित्यशः॥९५॥ तस्मात्प्रपूजयेद्विप्रं वाचकं नृप
सत्तम ॥ न तुल्यं वाचकेनेह पात्रं दानस्य विद्यते॥९६॥तिष्ठंति यस्य शास्त्राणि जिह्वाग्रे पृथिवीपते॥दृष्टश्च गोचरस्तात कस्तेन सदृशो द्विजः९७॥

---

१ श्लोकद्वयमेकान्वयि । २ पुष्पस्य भवने ततः–इ० पा० । ३ ततो विष्णुगृहं व्रजेत्–इ० पा० ।

न तुल्यं विद्यते तेन भुवि पात्रं नरेषु वै ॥ तस्मादन्नं सदा पूर्वं तस्मै देयं विदुर्बुधाः ॥ श्राद्धे यस्य द्विजो भुंक्ते वाचकः श्रद्धयान्वितः ॥
भवंति पितरस्तस्य तृप्ता वर्षशतं नृप ॥९८॥ यथेह सर्वदेवानां भास्करः प्रवरः स्मृतः ॥ विस्पष्टमद्भुतं शांतं स्पष्टाक्षरपदं तथा ॥ कलस्वरसमा
युक्तं रसभावसमन्वितम् ॥ ९९ ॥ बुध्यमानः सदात्यर्थं ग्रंथार्थं कृत्स्नशो नृप ॥ ब्राह्मणादिषु वर्णेषु ग्रंथार्थं वाचयेन्नृप ॥ १०० ॥ य एवं वाचये
द्राजन्स विप्रो व्यास उच्यते ॥ अतोऽन्यथा कथयिता ज्ञेयोऽसौ वक्तृनामकः ॥ १०१ ॥ इत्थंभूतो वसेद्यस्मिन्वाचको व्याससन्निभः ॥ देशेऽथ
पत्तने राजन्स देशः प्रवरः स्मृतः ॥ १०२ ॥ ते धन्यास्ते महात्मानस्ते कृतार्था न संशयः ॥ वसंति यत्नतो यस्मिन्स देशः प्रवरः
स्मृतः ॥ १०३ ॥ न शोभते पुरं वीर व्यासहीनं कदाचन ॥ यथार्कहीनं हि दिनं चंद्रहीना यथा निशा ॥ १०४ ॥ न राजते सरो यद्वत्पद्मिनी
रहितं नृप ॥ तथा व्यासविहीनं तु राजते न पुरं क्वचित् ॥ १०५ ॥ प्रणम्य वाचकं भक्त्या यत्फलं प्राप्यते नरैः ॥ न तत्क्रतुसहस्रेण प्राप्यते
कुरुनंदन ॥ १०६ ॥ यथैकतो ग्रहाः सर्वे एकतस्तु दिवाकरः ॥ तथैकतो द्विजाः सर्वे एकतस्तु स वाचकः ॥ १०७ ॥ यथा वेदसमो नास्ति
आगमो भुवि कश्चन ॥ तथा व्याससमो नास्ति ब्राह्मणो भुवि कश्चन ॥ १०८ ॥ कुरुक्षेत्रसमं तीर्थं न द्वितीयं प्रचक्षते ॥ न नदी गंगया तुल्या न
देवो भास्कराद्वरः ॥१०९॥ नाश्वमेधसमं पुण्यं न पापं ब्रह्महत्यया ॥ पुत्रजन्मसुखैस्तुल्यं न सुखं विद्यते यथा ॥११०॥ तथा व्याससमो विप्रो
न क्वचित्प्राप्यते नृप ॥ दैवे कर्मणि पित्र्ये च पावनः परमो नृणाम् ॥ १११ ॥ नास्ति व्याससमः श्रेष्ठ इतीयं वैदिकी श्रुतिः ॥ अथ विप्रसहस्राणां
विप्रोऽयं श्रेष्ठ ईरितः ॥ उपविष्टो यदा भुंक्ते व्यासो वै विप्रमण्डले ॥११२॥ श्राद्धे तात पवित्राणि कथितानि पुरा मम॥ ब्रह्मणा राजशार्दूल शृणु
तानि यथाविधि ॥११३॥ मधु पायसं कालशाकस्तिलाश्च कुतपस्तथा ॥ राजतं चापि पात्रेषु ब्राह्मणेष्वथ वाचकः ॥११४॥ दैवे कर्मणि पित्र्ये
च स ज्ञेयः पंक्तिपावनः ॥ वाचकश्च यतिश्चैव तथा यश्च षडंगवित् ॥ ११५ ॥ एते सर्वे नृपश्रेष्ठ विज्ञेयाः पंक्तिपावनाः ॥ नामनी वाचकस्यैते
शृणुष्वार्थमथैतयोः ॥ ११६ ॥ इतिहासपुराणानि जयेति विदितानि वै ॥ उपजीवति यस्माद्वै वाचयानो द्विजो नृप ॥ जयोपजीवी तेनासौ
गतः ख्यातिं तु वाचकः ॥ ११७ ॥ विस्पष्टमद्भुतं शांतं स्पष्टाक्षरमिदं तथा ॥ कलस्वरसमायुक्तं रसभावसमन्वितम्॥११८॥बुध्यमानोथ वात्यर्थं
ग्रंथार्थं कृत्स्नशो नृप ॥ ब्राह्मणादिषु वर्णेषु ग्रंथार्थं चार्पयेत्तथा ॥ ११९ ॥ य एवं वाचयेद्राजन्स विप्रो व्यास उच्यते ॥ अतोऽन्यथा वाचयिता
न गच्छेद्व्यासतां क्वचित् ॥ १२० ॥ त्रिविधं वाचकं विद्यात्सदा गुणविभेदतः ॥ श्रावकं च महाबाहो त्रिविधं गुणभेदतः ॥ १२१ ॥ द्वावेतौ

कथ्यमानौ तु निबोध गदतो मम ॥ अभिद्रुतं तथास्पष्टं विस्तरं स्वरवर्जितम् ॥१२२॥ पदच्छेदविहीनं च तथा भावविवर्जितम् ॥ अबुध्यमानो ग्रंथार्थमभीष्टोत्साहवर्जितः ॥ १२३ ॥ ईदृशं वाचयेद्यस्तु वाचकः क्ष्माधिपेश्वर ॥ क्रोधनोऽप्रियवादी च अज्ञानाद्ग्रंथदूषकः ॥ १२४ ॥ बुध्यते न च कष्टाच्च स ज्ञेयो वाचकाधमः ॥ विस्पष्टमद्भुतं शांतं रसभावसमन्वितम् ॥ १२५ ॥ अबुध्यमानो ग्रंथार्थं वाचयेद्यस्तु वाचकः ॥ स ज्ञेयो राजसो राजन्निदानीं सात्त्विकं शृणु ॥ १२६ ॥ विस्पष्टमद्भुतं शांतं स्पष्टाक्षरपदं तथा ॥ कलस्वरसमायुक्तं रसभावसमन्वितम् ॥१२७॥ अत्त्यर्थं बुध्यमानस्तु ग्रंथार्थं कृत्स्नशो नृप ॥ ब्राह्मणादिषु वर्णेषु आचार्यो विधिवन्नृप ॥ १२८ ॥ य एवं वाचयेद्राजन्स ज्ञेयः सात्त्विको बुधैः ॥ श्रद्धाभक्तिविहीनो यो लोभिष्ठः कटुको यथा ॥ १२९ ॥ हेतुवादपरौ राजंस्तथासूयासमन्वितः ॥ नित्यां नैमित्तिकां काम्यामाददद्दक्षिणां नृप ॥ ॥ १३० ॥ वाचको यो महाबाहो शृणुयाद्यस्तु मानवः ॥ स ज्ञेयस्तामसो राजञ्छ्रावको मानवोऽपि सः ॥ १३१ ॥ न तस्य पुरतो वीर वाचयेत्प्राज्ञ एव हि ॥ प्रसंगाच्छृणुयाद्यस्तु श्रद्धाभक्तिविवर्जितः ॥१३२॥ राजन्कौतुकपात्रं तु स ज्ञेयो राजसो भवेत् ॥ संत्यज्य सर्वकार्याणि भक्त्या श्रद्धासमन्वितः ॥ १३३ ॥ सततं पूजयेद्यस्तु वाचकं श्रद्धया मुदा ॥ नित्ये नैमित्तिके काम्ये गुरून्वै देवतास्तथा ॥ १३४ ॥ य एवं शृणुयाद्वीर स ज्ञेयः सात्त्विको बुधैः ॥ व्यासः पूज्यः श्रावकाणां यथा व्यासवचो नृप ॥ १३५ ॥ तस्मात्पूज्यतमो नान्यः श्रावकाणां नृपोत्तम ॥ यतः स वै गुरुस्तेषां ज्ञानदाता सदा नृप ॥१३६॥ चतुर्णामिह वर्णानां नान्यो बन्धुः प्रचक्ष्यते ॥ व्यासादृते नृपश्रेष्ठ इतीयं वैदिकी श्रुतिः ॥१३७॥ तस्मात्सर्वप्रयत्नेन पूजयेद्वाचकं सदा ॥ स गुरुः स पिता माता स बंधुः स सुहृत्तथा ॥ १३८ ॥ वाचको नृपशार्दूल विप्रादीनामशेषतः ॥ इत्थं व्यासो गुरुर्ज्ञेयः पूज्यो मान्यो द्विजातिभिः ॥ १३९ ॥ शृण्वंति ये नरा राजन्स तेषां गुरुरुच्यते ॥ पूजार्थं तस्य समयः श्रावकाणामुदाहृतः ॥ ॥ १४० ॥ ये शृण्वंति नृपश्रेष्ठ मासि मासि ददंति ते ॥ स्वर्णमाषकमेकस्मै वाचकाय पृथक्पृथक् ॥१४१॥ द्वादश्यां चामावास्यायामथ वा रविसंक्रमे ॥ सा नित्या दक्षिणा तस्यां या च श्रेयोऽर्थमात्मनः ॥१४२॥ अयने विषुवे चैव चंद्रसूर्यग्रहे तथा ॥ प्राप्ते वापरपक्षे च दानं तस्मै स्वशक्तितः ॥ १४३ ॥ देयं स्याच्छ्रावकैस्तात तं मुक्त्वा नान्यतो नृप ॥ प्रथमं तस्य दातव्यं श्रेयोऽर्थं श्रावकैः सदा ॥१४४॥ अदत्त्वा तस्य येन्यस्मै संप्रयच्छंति श्रावकाः ॥ अवमानः कृतस्तैस्तु वाचकस्य भवेन्नृप ॥ १४५ ॥ कृत्वावमानमथ तैः प्राप्यते यत्फलं नृप ॥ ब्राह्मणाद्यैः समस्तैश्च तच्छृणुष्व वरानन ॥१४६॥ शूद्रत्वं ब्राह्मणो याति क्षत्रियो याति काकताम् ॥ जायते च तथा वैश्यः शूद्रश्चाण्डालतां व्रजेत् ॥१४७॥

तस्मात्पूज्यो नृपश्रेष्ठ प्रथमं वाचको बुधैः ॥ आपत्काले च वृद्धौ च यतश्चासौ गुरुः स्मृतः ॥ १४८ ॥ वैशाख्यामयने वीर तृतीयायां च सुव्रत ॥ कार्त्तिक्यामथ मार्ग्यां च संपूज्यः प्रथमं भवेत् ॥ १४९ ॥ पर्वस्वन्येषु च विभो संपूज्यो धर्मतः स्मृतः ॥ हिरण्यं च सुवर्णं च धनं धान्यं तथैव च ॥ १५० ॥ अन्नं चापि तथा पक्वं मांसं च कुरुनंदन ॥ दातव्यं प्रथमं तस्मै श्रावकैर्नृपसत्तम ॥ १५१ ॥ वाचकस्तु यथा नित्यं सुखमास्ते नराधिप ॥ न पीड्यते यथा द्वंद्वैस्तथा कार्यं वरानन ॥ १५२ ॥ हेमंते लोमशा देयाश्छत्रं प्रावृषि सत्तम ॥ उपानहौ कालयोग्ये काले चैवानुलोमशः ॥१५३॥ इत्थं द्वंद्वविनिर्मुक्तः स येषां वाचको नृप ॥ ते धन्याः श्रावका लोके ते गताः परमं पदम् ॥ १५४ ॥ आत्मना तु कथं वीर सुखमिच्छेद्विचक्षणः ॥ विषमस्थे गुरौ राजन्यतश्च स गुरुः स्मृतः ॥ १५५ ॥ वाचकश्रावकाणां च तस्माद्द्वंद्वं विघातयेत् ॥ यत्नः कार्यः श्रावकैश्च वाचकस्य जनाधिप ॥ १५६ ॥ इत्थं पूज्यः सदा व्यासः श्रेयोऽर्थं प्रथमं नृप ॥ भर्ता पूज्यो यथा स्त्रीणां सर्वासां वै महीपते ॥ १५७ ॥ श्रावकाणां तथा राजन्वाचकः पूज्य उच्यते ॥ उपाध्यायस्तु शिष्याणां यथा भागवतो हरिः ॥ १५८ ॥ सौराणां च यथा भानुः शैवानां शंकरो यथा ॥ वाचकस्तु तथा पूज्यः श्रावकाणां नराधिप ॥ १५९ ॥ दक्षिणां ददता नित्यं श्रोतव्यं भूतिमिच्छता ॥ पूर्वोक्तमाषकं तस्मै वाचकाय जनाधिप ॥ १६० ॥ यदा दातुं न शक्नोति माषकं कांचनस्य तु ॥ रजतस्य तदा देयं माषकं श्रेयसे नृप ॥ १६१ ॥ तदभावे हिरण्यं च वित्तशाठ्यविवर्जितः ॥ मृत्तिकापि हि दातव्या प्राप्नोति सत्फलं शुभम् ॥ १६२ ॥ इत्येषा दक्षिणा नित्या मासिमासि भवेन्नृप ॥ नैमित्तिका भवेद्राजन्ग्रहणादिषु पर्वसु ॥ १६३ ॥ अमले वाससी राजन्गंधमाल्यविभूषणे ॥ समाप्ते पर्वणि विभो दातव्ये भूतिमिच्छता ॥ ॥ १६४ ॥ ज्ञात्वा सर्वसमाप्तिं तु पूजयेच्छ्रावको ध्रुवम् ॥ आत्मानमपि विक्रीय य इच्छेत्सफलं श्रुतम् ॥ १६५ ॥ नैमित्तिकां च नित्यां च दशिणामप्रदाय च ॥ शृणोति च सदा यस्तु तस्य तन्निष्फलं श्रुतम् ॥ १६६ ॥ यथा च दक्षिणाहीनाद्यज्ञान्न फलमश्नुते ॥ तथा श्रुतं च राजेंद्र दक्षिणारहितं स्मृतम् ॥ १६७ ॥ चतुर्गुणा भवेद्राजन्या नित्या दक्षिणा विभो ॥ समाप्ते पर्वणि विभो इत्याह भगवाञ्छिवः ॥ १६८ ॥ इत्येष कथितो राजन्पुराणश्रवणे विधिः ॥ यतश्च विधिहीनं तु न कर्मफलमुद्यते ॥ १६९ ॥ स्नानं दानं जपो होमः पितृदेवाभिपूजनम् ॥ विधिपूर्वं स्मृतं ज्ञेयं यथेह कुरुनंदन ॥ १७० ॥ फलदं नृपशार्दूल पुराणश्रवणं तथा ॥ यथार्थं कथितं तुभ्यं विधिना श्रवणं मया ॥१७१॥ यथोक्तं तु यथा जीवं

यथोक्तं ब्रह्मवादिना ॥ स ब्राह्मणो महाराज सर्वलोकेषु पूजितः ॥ १७२ ॥ यथाश्रुतं महाबाहो तथेदं कथितं तव ॥ भास्करस्य तु माहात्म्यं माहात्म्यं वाचकस्य तु ॥ १७३ ॥ तथा च सप्तमीकल्पः सर्वपापभयापहः ॥ अनेन विधिना यस्तु पूजयेत्सततं नरः ॥ १७४ ॥ भगलोकं समासाद्य त्रिषु लोकेषु गीयते ॥ ततोऽर्कलोकमासाद्य गच्छेच्चित्रशिखंडिनः ॥ १७५ ॥ तस्मादपि महाबाहो गच्छेल्लोकं दिवाकरम् ॥ अर्कलोके ततो यात स्ततो गोलोकमश्नुते ॥ १७६ ॥ ऋतस्य च ततो गच्छेत्कंजजस्य ततः परम् ॥ दशानां राजसूयानामग्निष्टोमशतस्य च ॥ १७७ ॥ श्रवणात्फलमाप्नोति पितामहवचो यथा ॥ १७८ ॥ इति श्रीभविष्ये महापुराणे ब्राह्मे पर्वणि सप्तमीकल्पे सौरधर्मे आदित्यमाहात्म्यवाचकमाहात्म्यपुराणश्रवण विधिवर्णनं नाम षोडशाधिकद्विशततमोऽध्यायः ॥ २१६ ॥ ॥ पूर्वार्धः समाप्तोऽयम् ॥ ॥ छ ॥ ॥ श्रीनारायणार्पणमस्तु ॥ ॥

इति श्रीभविष्ये महापुराणे प्रथमं ब्राह्मपर्व समाप्तम् ॥ १ ॥

इदं पुस्तकं मुम्बय्यां श्रीकृष्णदासात्मजक्षेमराजश्रेष्ठिना
स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) मुद्रणालये मुद्रितम्।
संवत् १९६७ शके १८३२

॥ ❀ ॥ इति श्रीभविष्ये महापुराणे प्रथमं ब्राह्मपर्व समाप्तम् ॥ ❀ ॥

अथ श्रीभविष्यमहापुराणे द्वितीयं मध्यमपर्व प्रारभ्यते

मध्यमपर्व २.


सूतः
शौनकादि ऋषि.
यजमानः
कूप
यजमान
यजमानः
ऋत्विजः
वास्तु शांति.

॥ श्रीगणेशाय नमः ॥ ॐ नमः कमलदलनयनाभिरामाय ॥ श्रीरामचंद्राय ॥ स्वच्छं चंद्रावदातं कविकरमकरक्षोभसंजातफेनं ब्रह्मोद्भूतिप्रसू
क्तैर्व्रतनियमपरैः सेवितं विप्रमुख्यैः ॥ ॐकारालंकृतेन त्रिभुवनगुरुणा ब्रह्मणा दृष्टपूतं संभोगाभोगगम्यं जनकलुषहरं पौष्करं वः पुनातु ॥ १ ॥
जयति भुवनदीपो भास्करो लोककर्ता जयति च शितिदेहः शार्ङ्गधन्वा मुरारिः ॥ जयति च शशिमौली रुद्रनामाभिधेयो जयति सकलमौलिर्भानु
मांश्चित्रभानुः ॥ २ ॥ नमस्कृत्याप्रमेयाय देवाय[1] ब्रह्मरूपिणे ॥ पुराणं संप्रवक्ष्यामि यदुक्तं ब्रह्मयोगिना ॥ ३ ॥ पुराणसंहितां पुण्यां पप्रच्छू रौम
हर्षणिम् ॥ वक्तुमर्हसि चास्माकं पुराणार्थविशारद ॥४॥ मुनीनां वचनं श्रुत्वा सूतः पौराणिकोत्तमः ॥ प्रणम्य मनसा प्राह गुरुं सत्यवतीसुतम् ॥५॥
॥ सूत उवाच ॥ ॥ नमस्कृत्य जगद्योनिं ब्रह्मरूपधरं हरिम् ॥ वक्ष्ये पौराणिकीं दिव्यां कथां पापप्रणाशिनीम् ॥ ६ ॥ यच्छ्रुत्वा पापक
र्माणि[2] स गच्छेत्परमां गतिम् ॥ पुण्यं पवित्रमायुष्यमिदानीं शृणुत द्विजाः ॥ ७ ॥ भविष्यपुराणमखिलं यज्जगाद गदाधरः ॥ मध्यपर्व ह्यथो
वक्ष्ये प्रतिष्ठादिविनिर्णयम् ॥ ८ ॥ धर्मप्रशंसनं चात्र ब्राह्मणादिप्रशंसनम् ॥ आपद्धर्मस्य कथनं विद्यामाहात्म्यवर्धनम् ॥ ९ ॥ प्रतिमाकरणं
चैव स्थापनाचित्रलक्षणम् ॥ कालव्यवस्थासर्गादिप्रतिसर्गादिलक्षणम् ॥ १० ॥ पुराणलक्षणं चैव भूगोलस्य च निर्णयम् ॥ निरूपणं तिथी
नां च श्राद्धसंकल्पमन्तरम् ॥ ११ ॥ मुमूर्षोरपि यत्कर्म दानमाहात्म्यमेव च ॥ भूतं भव्यं भविष्यं च युगधर्मानुशासनम् ॥ १२ ॥ उच्चावचा
वधानं च प्रायश्चित्तादिकं च यत् ॥ षष्ट्याधिकाष्टसाहस्रनवश्लोकशतोद्भवम् ॥ १३ ॥ पंचतंत्रसमायुक्तं प्रतितंत्रे च विंशतिः ॥ पंचोत्तरं तथा
ध्यायाः पुराणेऽस्मिन्द्विजोत्तमाः ॥ १४ ॥ त्रयाणामाश्रमाणां च गृहस्थो योनिरुच्यते ॥ अन्येऽपि सूपजीवन्ति तस्माच्छ्रेष्ठो गृहाश्रमी ॥ १५ ॥
एकाश्रमं गृहस्थस्य त्रयाणां सूतिदर्शनम्[3] ॥ तस्माद्गार्हस्थ्यमेवैकं विज्ञेयं धर्मशासनम् ॥ १६ ॥ परित्यजेदर्थकामौ यौ स्यातां धर्मवर्जितौ ॥
सर्वलोकविरुद्धं च धर्ममप्याचरेन्न तु ॥१७॥ तडागस्य च सान्निध्ये तडागं परिवर्जयेत् ॥ प्रपास्थाने प्रपा वर्ज्या मठस्थाने मठं त्यजेत् ॥१८॥
धर्मात्संजायते ह्यर्थो धर्मात्कामोऽभिजायते ॥ धर्मादेवापवर्गोऽयं तस्माद्धर्मं समाश्रयेत् ॥ १९ ॥ धर्मश्चार्थश्च कामश्च त्रिवर्गस्त्रिगुणो मतः ॥
सत्त्वं रजस्तमश्चेति तस्माद्धर्मं समाश्रयेत् ॥ २० ॥ ऊर्ध्वं गच्छंति सत्त्वस्था मध्ये तिष्ठंति राजसाः ॥ जघन्यगुणवृत्तिस्था अधो गच्छंति तामसाः
॥ २१ ॥ यस्मिन्धर्मः समायुक्तो ह्यर्थकामौ व्यवस्थितौ ॥ इह लोके सुखी भूत्वा प्रेत्यानंत्याय कल्पते ॥ २२ ॥ तस्मादर्थं च कामं च युक्त्वा

---

[1] भक्ताय–इ० पा० ।
[2] अतिहायेति शेषः ।
[3] सूतिदर्शवत्–इ० पा० ।

धर्मं समाश्रयेत् ॥ धर्मात्संजायते कामो धर्मादर्थोभिजायते ॥२३॥ एवं धर्मस्य मध्येऽयं चतुर्वर्गः प्रदर्शितः ॥ एवं च धर्मकामार्थं मोक्षस्यापि च
मानवः ॥ माहात्म्यं वानुतिष्ठेच्च स चानंत्याय कल्पते ॥ २४ ॥ तस्मादर्थं च कामं च मुक्त्वा धर्मं समाचरेत् ॥ धर्मात्संजायते सर्वमित्याहु
र्ब्रह्मवादिनः ॥ २५ ॥ धर्मेण धार्यते सर्वं जगत्स्थावरजंगमम् ॥ अनादिनिधना शक्तिर्नैषा ब्राह्मी द्विजोत्तम ॥ २६ ॥ कर्मणा प्राप्यते धर्मो ज्ञा
नेन च न संशयः ॥ तस्माज्ज्ञानेन सहितं कर्मयोगं समाचरेत् ॥ २७ ॥ प्रवृत्तिश्च निवृत्तिश्च द्विविधं कर्म वैदिकम् ॥ ज्ञानपूर्वा निवृत्तिः स्यात्प्र
वृत्तिर्वर्ततेऽन्यथा ॥ २८ ॥ निवृत्तिं सेवमानस्तु याति तत्परमं पदम् ॥ तस्मान्निवृत्तं संसेव्यमन्यथा संसरेत्पुनः ॥ २९ ॥ शमो दमो दया दानम
लोभस्त्याग एव च ॥ आर्जवं चानसूया च तीर्थानुसरणं तथा ॥ ३० ॥ सत्यं संतोष आस्तिक्यं श्रद्धा चेन्द्रियनिग्रहः ॥ देवताभ्यर्चनं पूजा
ब्राह्मणानां विशेषतः ॥३१॥ अहिंसा सत्यवादित्वमपैशुन्यं सुकल्पता ॥ शौचाचारश्चानुकंपा सर्ववर्णेऽब्रवीन्मुनिः ॥३२॥ श्रद्धापूर्वाः स्मृता धर्माः
श्रद्धामध्ये तु संस्थिताः ॥ श्रद्धानिष्ठाः प्रतिष्ठाश्च धर्माः श्रद्धैव कीर्तिताः ॥ ३३ ॥ प्राजापत्यं ब्राह्मणानां श्रुतं स्थानं क्रियावताम् ॥ स्थानमैन्द्रं
क्षत्रियाणां संग्रामेष्वपलायिनाम् ॥३४॥ वैश्यानाममृतं स्थानं स्वधर्ममनुवर्तताम् ॥ गांधर्वं [1]शूद्रजीवानां परिचारेण वर्तताम् ॥ ३५ ॥ अष्टाशीति
सहस्राणां मुनीनामूर्ध्वरेतसाम् ॥ स्मृतं स्थानं तु यत्स्थानं तदेव गुरुवासिनाम् ॥ ३६ ॥ सप्तर्षीणां तु यत्स्थानं श्रुतं तद्वै वनौकसाम् ॥ प्राजा
पत्यं गृहस्थानां स्थानमुक्तं स्वयंभुवा ॥ ३७ ॥ यतीनां यतचित्तानां तदेव वनवासिनाम् ॥ हिरण्यगर्भं यत्स्थानं तस्मान्नावर्तते पुनः ॥ ३८ ॥
योगिनाममृतं स्थानं व्योमाख्यं परमाकरम् ॥ आनंदमैश्वरं नाम सा काष्ठा परमा गतिः ॥ ३९ ॥ ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि
प्रथमभागे प्रथमोऽध्यायः ॥ १ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ इदानीं विस्तरं चैव विभागं रूपमैश्वरम् ॥ वक्ष्ये कल्पानुसारेण मन्वंतरश
तानुगम् ॥ १ ॥ आसीत्तमोमयं सर्वमप्रज्ञातमलक्षणम् ॥ तत्र चैको महानासीद्बुद्धः परमकारणम् ॥ २ ॥ आत्मना स्वयमात्मानं सञ्चित्य भगवा
न्विभुः ॥ मनः संसृजते पूर्वमहंकारं च पृष्ठतः ॥ ३ ॥ अहंकारात्प्रजानाति महाभूतानि पञ्च च ॥ अष्टौ प्रकृतयः प्रोक्ता विकाराश्चैव षोडश
॥ ४ ॥ शब्दः स्पर्शश्च रूपं च रसो गंधस्तथैव च ॥ प्राणोऽपानः समानश्चोदानव्यानौ तथैव च ॥ ५ ॥ सत्त्वं रजस्तमश्चैव गुणाः प्रोक्तास्तु ते
त्रयः ॥ तस्माद्भागवतो ब्रह्मा तस्माद्विष्णुरजायत ॥६॥ ब्रह्मविष्णुमोहनार्थं ततः शंभुस्तु तेजसा ॥ अशरीरो वासुदेवो ह्यनुत्पत्तिरयोनिजः ॥७॥

---

[1] शुभ्रजीवानाम्-इ० पा० ।

व्यामोहयित्वा तत्सर्वं तेजसाऽमोहयज्जगत् ॥ तस्मात्परतरं नास्ति तस्मात्परतरं न हि ॥ ८ ॥ ब्रह्मा विष्णुश्च द्वावेताबुद्भूतौ भगवत्सुतौ ॥
कल्पेकल्पे तु तत्सर्वं सृजतेऽसौ जनं जगत् ॥ ९ ॥ उपसंहरते चैव नानाभूतानि सर्वशः ॥ द्वासप्ततियुगान्येव मन्वन्तर इति स्मृतः ॥ १० ॥
चतुर्दश तु तान्येवं कल्प इत्यभिधीयते ॥ दिनैकं ब्रह्मणः प्रोक्तं निशि कल्पस्तथोच्यते ॥ ११ ॥ एवं मासश्च वर्षश्च तथा चाष्टशतं
द्विजाः ॥ एवं बुद्धीन्द्रियस्यास्य विष्णोश्च निमिषः स्मृतः ॥ १२ ॥ ब्रह्मादिस्तंबपर्यंतं निमेषश्च ध्रुवस्य वै ॥ निमेषजीवनं सर्वं सर्वलोकचराच
रम् ॥ १३ ॥ भूर्लोकोऽथ भुवर्लोकः स्वर्लोकश्च प्रकीर्तितः ॥ जनस्तपश्च सत्यं च ब्रह्मलोकश्च सप्तमः ॥ १४ ॥ पातालं वितलं तद्धि अतलं तल
मेव च ॥ पञ्चमं विद्धि सुतलं सप्तमं च रसातलम् ॥ १५ ॥ एतेषु सप्त विख्याता अधःपातालवासिनः ॥ तेषामादौ च मध्ये च अंते रुद्रः प्रकी
र्तितः ॥ १६ ॥ ग्रसते जायते लोकान्क्रीडार्थं तु महेश्वरः ॥ ब्रह्मलोकपरीप्सूनां गतिरूर्ध्वं प्रकीर्तिता ॥ १७ ॥ पृथिवीं चांतरिक्षं च दिशश्च विदिश
स्तथा ॥ समुद्राणां गिरीणां च अधस्तिर्यक्प्रसंख्यया ॥ १८ ॥ समुद्राणां च विस्तारं प्रमाणं च ततः शृणु ॥ स्थावराणां च शैलानां देवानां च
दिवौकसाम् ॥ १९ ॥ चतुष्पदानां द्विपदां तथा धर्मैकभाषिणाम् ॥ सहस्रगुणमाख्यातं स्थावराणां प्रकीर्तितम् ॥ २० ॥ सहस्रगुणशीलाश्च
इत्याह भगवान्मुनिः ॥ ऋषिस्तु प्रथमं कुर्वन्प्रकृतिं नाम नामतः ॥ २१ ॥ तस्या ब्रह्मा प्रकृत्यास्तु उत्पन्नः सह विष्णुना ॥ तस्माद्बुद्ध्या प्रकुरुते
सृष्टिं नैमित्तिकीं द्विजाः ॥ २२ ॥ तस्मात्स्वयंभुवो ब्रह्मा ब्राह्मणान्समकल्पयत् ॥ पादहीनान्क्षत्रियांश्च तस्माद्धीनांस्तु वैश्यकान् ॥ २३ ॥ चतुर्थ
पादहीनांश्च आचारेषु बहिष्कृतान् ॥ पृथिवीं चांतरिक्षं च दिशश्चैवाप्यकल्पयत् ॥ २४ ॥ लोकालोकस्य संस्था च द्वीपानामुदधेस्तथा ॥ सरितां
सागराणां च तीर्थान्यायतनानि च ॥ २५ ॥ मेघस्तनितनिर्घोषरोहितेंद्रधनूंषि च ॥ उल्कानिर्घातकेतूंश्च ज्योतींष्यायतनानि च ॥ २६ ॥
उत्पन्नं तस्य देहेषु भूयः कालेन पीडयेत् ॥ २७ ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि प्रथमभागे द्वितीयोऽध्यायः ॥ २ ॥ ॥ छ ॥
॥ ॥ सूत उवाच ॥ ॥ ध्रुवादूर्ध्वं महर्लोकः कोटियोजनविस्तरः ॥ कल्पाभिकरणे तत्र संस्थिता द्विजपुङ्गवाः ॥ १ ॥ जनलोको महर्लोकात्तथा
कोटिद्वयात्मकः ॥ सनंदनादयस्तत्र संस्थिता ब्रह्मणः सुताः ॥ २ ॥ जनलोकात्तपोलोकः कोटित्रयसमन्वितः ॥ विराजंते तु देवा वै स्थिता दाह
विवर्जिताः ॥ ३ ॥ प्राजापत्यात्तु भूर्लोकः कोटिषट्केन संयुतः ॥ सनत्कुमारकस्तत्र ब्रह्मलोकस्तु स स्मृतः ॥ ४ ॥ तत्र लोके गुरुर्ब्रह्मा विश्वात्मा
विश्वतोमुखः ॥ आस्ते यद्योगिभिः पीत्वा योगं मृत्योः परं गतम् ॥ ५ ॥ गायंति यतयो गाथा ह्यास्तिका ब्रह्मवादिनः ॥ योगिनस्तापसाः

सिद्धा जापकाः परमेष्ठिनम् ॥ ६ ॥ द्वारं तु योगिनामेकं गच्छतां परमं पदम् ॥ तत्र गत्वा न शोचंति स विष्णुः स च शंकरः ॥ ७ ॥ सूर्य
कोटिप्रतीकाशं पुरं तस्य दुरासदम् ॥ न मे वर्णयितुं शक्यं ज्वालामालासमाकुलम् ॥ ८ ॥ तत्र नारायणस्यापि भवनं ब्रह्मणः पुरे ॥ शेषे तस्य
हरिः श्रीमान्मायासहचरः परः ॥ ९ ॥ स विष्णुर्लोककथितः पुनरावृत्तिवर्जितः ॥ प्रयांति च महात्मानो ये प्रपन्ना जनार्दनम् ॥ १० ॥ ऊर्ध्वं
ब्रह्मासनात्पूर्वं परं ज्योतिर्मयं शुभम् ॥ वह्निना उपरि क्षिप्तं तत्रास्ते भगवान्भवः ॥११॥ देव्या सह महादेवश्चिन्त्यमानो मनीषिभिः ॥ योगिभिः
शतसाहस्रैर्वृतैकत्वैश्च संवृतः ॥ १२ ॥ तत्र ते यांति नियता द्विजा वै ब्रह्मवादिनः ॥ महादेवपरेशानास्तापसा ब्रह्मवादिनः ॥ १३ ॥ निर्ममा
निरहंकाराः कामक्रोधविवर्जिताः ॥ द्रक्ष्यंति ब्रह्मणा युक्ता रुद्रलोकः स वै स्मृतः ॥ १४ ॥ एते सप्त महर्लोकाः पृथिव्यां परिकीर्तिताः ॥ महीत
लादयश्चाधः पातालाः संति वै द्विजाः ॥ १५ ॥ महातलं हैमतलं सर्ववर्णोपशोभितम् ॥ प्रासादैर्विविधैः शुभ्रैर्देवतायतनैर्युतम् ॥ १६ ॥ अनंतेन
समायुक्तं मुचुकुन्देन धीमता ॥ नृपेण बलिना चैव पातालं स्वर्गवासिना ॥ १७ ॥ शैलं रसातलं विप्राः शांकरं हि रसातलम् ॥ पीतं सुतल
मित्युक्तं वितलं विद्रुमप्रभम् ॥ १८ ॥ सितं हि वितलं प्रोक्तं तलं चैव सितेतरम् ॥ सुवर्णेन मुनिश्रेष्ठास्तथा वासुकिना शुभम् ॥ १९ ॥ रसातल
मिति ख्यातं सर्वशोभासमन्वितम् ॥ वैनतेयादिभिश्चैव कालनेमिपुरोगमैः ॥ २० ॥ शंकुकर्णेन संभिन्नं तथा नमुचिपूर्वकम् ॥ तथान्यैर्विवि
धैर्नागैस्तलं चैव सुशोभनम् ॥ २१ ॥ तेषामधस्तान्नरका रौरवाद्याश्च कोटयः ॥ पापिनस्तेषु पात्यंते न तेऽवनमितुं क्षमाः ॥ २२ ॥ पाताला
नामधश्चांते शेषाख्या वैष्णवी तनुः ॥ कालाग्निरुद्रयोगात्मा नारसिंहोऽपि माधवः ॥ २३ ॥ योऽनंतः पठ्यते देवो नागरूपी जनार्दनः ॥ तदाधार
मिदं सर्वं सकलाग्निमुपाश्रितम् ॥ २४ ॥ तमाविश्य महायोगी कालस्तद्वदनानलः ॥ विषज्वालासमोऽनंतो जगत्संहरति स्वयम् ॥२५॥ तामसी
शांभवी मूर्तिः कालात्मा परमेश्वरः॥स एव गर्भमाश्रित्य प्रकाशयति नित्यशः ॥२६॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि प्रथमभागे पाताल
वर्णनंनाम तृतीयोऽध्यायः ॥ ३ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ एतद्ब्रह्मांडमाख्यातं चतुर्विधमिदं महत् ॥ अतः परं प्रवक्ष्यामि भूर्लोकस्य
विनिर्णयम् ॥ १ ॥ तद्वीपप्रधानो जंबूः प्लक्षः शाल्मल एव च ॥ कुशः क्रौंचश्च शाकश्च पुष्करश्चैव सप्तमः ॥ २ ॥ एते सप्त महाद्वीपाः समुद्रैः
सप्तभिर्वृताः ॥ द्वीपाद्द्वीपो महानुक्तः सागरादपि सागरः ॥ ३ ॥ क्षीरोदेक्षुरसोदोऽथ क्षारोदश्च घृतोदकः ॥ दध्योदः क्षीरसलिलो जलोदश्चेति

सागराः ॥ ४ ॥ पंचाशत्कोटिविस्तीर्णा समुद्रवलया स्मृता ॥ द्वीपैश्च सप्तभिर्युक्ता योजनानां समानतः ॥ ५ ॥ जंबूद्वीपः समस्तानां द्वीपानां मध्यतः शुभः ॥ तस्य मध्ये महामेरुर्विश्रुतः कनकप्रभः ॥ ६ ॥ चतुराशीतिसाहस्रयोजनैरस्य चोच्छ्रयः ॥ प्रविष्टः षोडशाधस्ताद्द्वात्रिंशन्मूर्ध्नि विष्कृतः ॥ ७ ॥ मूले षोडशसाहस्रं विस्तारस्तस्य सर्वतः ॥ भूप्रमुख्यश्च शैलोऽसौ कलिकात्वेन संस्थितः ॥ ८ ॥ हिमवान्हिमकूटश्च निषधस्तस्य दक्षिणे ॥ नीलः श्वेतश्च शृंगी च उत्तरे वर्षपर्वतः॥९॥लक्षप्रमाणौ द्वौ मध्ये दशहीनास्तथापरे ॥ सहस्रद्वितयं दीर्घास्तावद्विस्तारिणश्च ते ॥ ॥१०॥ भारतं दक्षिणं वर्षं ततः किंपुरुषं स्मृतम् ॥ हरिवर्षं तथैवान्यन्मेरोर्दक्षिणतो द्विजाः ॥११॥ चंपकं चोत्तरं वर्षं तथैवाश्वहिरण्मयम् ॥ उत्तराः कुरवश्चैव यथैते भारतास्तथा ॥ १२ ॥ नवसाहस्रमेकैकमेतेषां द्विजसत्तमाः ॥ इलावृतश्च तन्मध्ये तन्ध्ये मेरुरुच्छ्रितः ॥१३॥ मेरोश्चतुर्दिशस्तत्र नवसाहस्रविष्कृतम् ॥ इलावृतं महाभागाश्चत्वारस्तत्र पर्वताः ॥१४॥ विष्कंभा रचिता मेरोर्योजनायुतमुच्छ्रिताः ॥ पूर्वेण मंदरो नाम दक्षिणे गंधमादनः ॥ १५ ॥ विपुलः पश्चिमे भागे सुपार्श्वश्चोत्तरे स्थितः ॥ कदंबेष्वेषु नद्यश्च पिप्पलो वट एव च ॥ १६ ॥ जंबूद्वीपस्य सा जंबूर्नामहेतोर्महर्षयः ॥ महागजप्रमाणानि जंबून्यस्य फलानि च ॥ १७ ॥ पतंति भूभृतः पृष्ठे शीर्यमाणानि सर्वशः ॥ रसेन चैव प्रख्याता तस्य जंबूनदी इति ॥१८॥ सरित्तु वर्तते सापि पीयते तत्र वासिभिः॥न खेदो न च दौर्गंध्यं न जरा नेंद्रियक्षयः ॥ उत्पन्नाः स्वच्छमनसो नरास्तत्र भवन्ति वै ॥१९॥ तीरसूत्रं समं प्राप्य वायुना च विशोषितम् ॥ जांबूनदाख्यं भवति सुवर्णं सिद्धभूषणम् ॥ २० ॥ भद्राश्वः पार्श्वतो मेरोः केतुमालश्च पश्चिमे ॥ वर्षे द्वे तु मुनिश्रेष्ठास्तयोर्मध्ये इलावृतम् ॥ २१ ॥ मेरोरुपरि विप्रेंद्रा ब्रह्मणः स्थानमुत्तमम् ॥ तदूर्ध्वे वासवस्थानं तदूर्ध्वे शंकरस्य च ॥ २२ ॥ तदूर्ध्वं वैष्णवो लोको दुर्गालोकस्तदूर्ध्वतः ॥ ज्योतिर्मयं परं स्थानं निराकारं हिरण्मयम् ॥ २३ ॥ भक्तस्थानं तदूर्ध्वं च देवो हि भगवान्रविः॥ ज्योतिश्चक्रस्थितः शुद्धो निश्चलः परमेश्वरः ॥ राशिचक्रे च भ्रमति मेरोरुपरि सत्तमाः ॥ २४ ॥ बिंबषट्केंद्रिनाभौ च रथचक्रं दिवानिशम् ॥ वातरज्जुनिबंधेन ध्रुवाधारे प्रतिष्ठितम् ॥ २५ ॥ दिक्पालाद्या ग्रहास्तत्र दक्षिणादुत्तरायणम् ॥ प्रतिमासं गतः पंथा ह्रासवृद्धिदिनक्षयः ॥ २६ ॥ रविणा लंघितो मासश्चांद्रः ख्यातो मलिम्लुचः ॥ द्वादशे भगवत्सूर्ये प्रत्यहं भक्तसेवके ॥ २७ ॥ कृत्वा त्रिषु त्वहोरात्रं तारामयगतं विभुम् ॥ यामेयामे चोदयश्च देशेदेशे च शर्वरी ॥ २८ ॥ दिवा चरति यः सूर्यो रात्रौ चरति चन्द्रमाः ॥ नक्षत्राणि दिवा रात्रौ सूर्यचक्रे प्रतिष्ठितम्॥२९॥

---

१ उपोद्घातेन भूमिं वर्णयति ।

देशान्नं चावगमनं यत्र तस्मादिवाभवत् ॥ यत्र चंद्रक्षयो भवति यत्र सूर्यः प्रवर्तते ॥ ३० ॥ रात्रिंदिवं विजानीयाज्ज्योतिश्चक्रे प्रतिष्ठितम् ॥ उदया
स्तमनं नास्ति नक्षत्राणां विशेषतः ॥ ३१ ॥ यन्नक्षत्रे च यो देशः स तेषामुदयः स्मृतः ॥ तत्रास्तो जीवशुक्राणां सूर्यादीनां च सर्वशः ॥ ३२ ॥
तदा काले नियोक्तव्या भार्गवास्तादिकी क्रिया ॥ सूर्यः सोमो बुधश्चंद्रो भार्गवश्चैव शीघ्रकः ॥ ३३ ॥ दक्षिणायनमास्थाय यदा चरति रश्मि
मान् ॥ तदा सर्वग्रहाणां ससूर्योधस्तात्प्रसर्पति ॥ ३४ ॥ विस्तीर्णमंडलं कृत्वा तस्योर्ध्वे चरते शशी ॥ नक्षत्रमंडलं कृत्स्नं सोमादूर्ध्वं प्रसर्पति ॥
॥ ३५ ॥ नक्षत्रेभ्यो बुधश्चोर्ध्वं बुधादूर्ध्वं तु भार्गवः ॥ चन्द्रस्तु भार्गवादूर्ध्वं चंद्रादूर्ध्वं शनैश्चरः ॥ ३६ ॥ तस्माच्छनैश्चरादूर्ध्वं ततः सप्तर्षिमं
डलम् ॥ ऋषीणां चैव सप्तानां ध्रुवश्चोर्ध्वं व्यवस्थितः ॥ ३७ ॥ कालचक्रमये चक्रे सूर्यो भवति सर्वदा ॥ राश्यर्द्धेषु गतिर्यत्र तिथीनां
च तिथौ स्मृता ॥ ३८ ॥ स्तंभते चरते शीघ्रं ह्रासे चापि दिनक्षयः ॥ पादास्तं चापि शुक्रस्य महास्तं तत्र दृश्यते ॥ ३९ ॥ पादास्ते
पक्षमात्रं स्यान्महास्ते याममात्रकम् ॥ चक्रे पक्षार्धमासः स्यादतिचारोऽष्टवासरान् ॥ ४० ॥ न गण्यते देशभेदे नक्षत्रेण च गण्यते ॥ बाल
वृद्धस्तु शुक्रस्य देशस्थे वा गणस्य च ॥ ४१ ॥ बाल्यवार्द्धक्ये क्षत्रियस्य न गण्येते सदा बुधैः ॥ पादादूर्ध्वं महास्तस्य वैश्यस्य द्विजस
त्तमाः ॥ ४२ ॥ शेषार्धं भार्गवास्तस्य शूद्राणामथ गर्हितम् ॥ अभिचारे च चक्रे च न शूद्रस्य विधीयते ॥ ४३ ॥ वर्जयेद्वासरान्सप्त
इति चाथर्वणी श्रुतिः ॥ ४४ ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि प्रथमभागे ज्योतिश्चक्रे चतुर्थोऽध्यायः ॥ ४ ॥ ॥ छ ॥ ॥
॥ ॥ सूत उवाच ॥ ॥ त्रयाणामेव वर्णानां जन्मतो ब्राह्मणः प्रभुः ॥ संसृष्टा ब्राह्मणाः पूर्वं तपस्तप्त्वा द्विजोत्तमाः ॥ १ ॥ हव्यानामिह
कव्यानां सर्वस्यापि च गुप्तये ॥ अश्नंति च मुखेनास्य हव्यानि त्रिदिवौकसः ॥ २ ॥ कव्यानि चैव पितरः किं भूतमधिकं ततः ॥ जन्मना
चोत्तमोऽयं च सर्वार्चा ब्राह्मणोऽर्हति ॥ ३ ॥ स्वकीयं ब्राह्मणो भुंक्ते विदधाति द्विजोत्तमाः ॥ त्रयाणामिह वर्णानां भावाभावाय वै द्विजः ॥ ४॥
भवेद्विप्रो न संदेहस्तुष्टो भावाय वै भवेत् ॥ अभावाय भवेत्क्रुद्धस्तस्मात्पूज्यः सदा हि सः ॥ ५ ॥ गर्भाधानादयश्चेह संस्कारा यस्य सत्तमाः ॥
चत्वारिंशत्तथा चाष्टौ निर्वृत्ताः शास्त्रतो द्विजाः ॥ स याति ब्रह्मणः स्थानं ब्राह्मणत्वेन संयुतः ॥ ६ ॥ संस्कारपूतः प्रथमो वेदपूतो द्विती
यकः ॥ विद्यापूतस्तृतीयः स्यात्तीर्थपूतस्त्वनंतरम् ॥ ७ ॥ क्षेत्रपूतं प्रविज्ञाय विपूतं पूजयेद्द्विजाः ॥ स्वर्गापवर्गफलदमन्यथा श्रमतामियात् ॥
॥ ८ ॥ पूतानां परमः पूतो गुरूणां परमो गुरुः ॥ सर्वसत्त्वान्वितो विप्रो निर्मितो ब्रह्मणा पुरा ॥ ९ ॥ पूजयित्वा द्विजान्देवाः स्वर्गं भुञ्जंति

चाक्षयम् ॥ मनुष्याश्चापि देवत्वं स्वंस्वं राज्यं गतेन सः ॥ १० ॥ यस्य विप्राः प्रसीदंति तस्य विष्णुः प्रसीदति ॥ तस्माद्ब्राह्मणपूजायां विष्णु
स्तुष्यति तत्क्षणात् ॥ ११ ॥ यस्माद्विष्णुमुखाद्विप्रः समुद्भूतः पुरा द्विजाः ॥ वेदास्तत्रैव संजाताः सृष्टिसंहारहेतवः ॥ १२ ॥ तस्माद्विप्रमुखे वेदा
श्चार्पिताः पुरुषेण हि ॥ पूजार्थं ब्रह्मलोकानां सर्वज्ञानार्थतो ध्रुवम् ॥ १३ ॥ पितृयज्ञविवाहेषु वह्निकार्येषु शांतिषु ॥ प्रशस्ता ब्राह्मणा नित्यं
सर्वस्वस्त्ययनेषु च ॥ १४ ॥ देवा भुञ्जंति हव्यानि बलिं प्रेतादयोऽसुराः ॥ पितरो हव्यकव्यानि विप्रस्यैव मुखाद् ध्रुवम् ॥ १५ ॥ देवेभ्यश्च
पितृभ्यश्च यो दद्याद्यज्ञकर्मसु ॥ दानं होमं बलिं चैव विना विप्रेण निष्फलम् ॥ १६ ॥ विना विप्रं च यो धर्मः प्रयासफलमात्रकः ॥ भुञ्जते
चासुरास्तत्र प्रेता भूताश्च राक्षसाः ॥ १७ ॥ तस्माद्ब्राह्मणमाहूय तस्य पूजां च कारयेत् ॥ काले देशे च पात्रे च लक्षकोटिगुणं भवेत् ॥ १८ ॥
श्रद्धया च द्विजं दृष्ट्वा प्रकुर्यादभिवादनम् ॥ दीर्घायुस्तस्य वाक्येन चिरंजीवी भवेन्नरः ॥ १९ ॥ अनभिवादिनां विप्रे द्वेषादश्रद्धयापि च ॥
आयुः क्षीणं भवेत्पुंसां भूमिनाशश्च दुर्गतिः ॥ २० ॥ आयुर्वृद्धिर्यशोवृद्धिर्वृद्धिर्विद्याधनस्य च ॥ पूजयित्वा द्विजश्रेष्ठान्भवेन्नास्त्यत्र संशयः ॥
॥ २१ ॥ न विप्रपादोदककर्दमानि न वेदशास्त्रप्रतिगर्जितानि ॥ स्वाहास्वधास्वस्तिविवर्जितानि श्मशानतुल्यानि गृहाणि तानि ॥ २२ ॥
षड्विंशतिदोषमाहुर्नरा नरकभीरवः ॥ विमुच्यैव वसेत्तीर्थे ग्रामे वा पत्तने वने ॥ २३ ॥ ते स्वर्गे पितृलोके च ब्रह्मलोकेष्ववस्थिताः ॥ २४ ॥
अन्यथा न वसेद्वासस्तस्मात्स्तेयी न पालयेत् ॥ अधमो विषमश्चैव पशुश्च पिशुनस्तथा ॥ २५ ॥ पापिष्ठो नष्टकष्टौ च रुष्टो दुष्टश्च पुष्टकः ॥
हृष्टः कुण्ठश्च[1] अन्धश्च काणश्चैव तथापरः ॥ २६ ॥ चण्डः खण्डश्च वक्ता च दत्तस्यापहरस्तथा ॥ नीचः खलश्च वाचालः कदर्यश्चपल
स्तथा ॥ २७ ॥ मलीमसश्च ते दोषाः षड्विंशतिरमी मताः ॥ एतेषां चापि विप्रेन्द्राः पञ्चाशीतिर्निगद्यते ॥ २८ ॥ शृणुध्वं द्विजशार्दूलाः शास्त्रे
स्मिन्ब्रुवतः क्रमात् ॥ अधमोऽत्र त्रिधा विद्याद्विषमः स्याद्द्विधोचितः ॥२९॥ पशुश्चतुर्विधश्चैव कृपणोपि हि वै द्विधा ॥ द्विधाथापि च पापिष्ठो
नष्टः सप्तविधः स्मृतः ॥ ३० ॥ कष्टः स्यात्पञ्चधा ज्ञेयो रुष्टोपि स्याद्द्विधा द्विजाः ॥ दुष्टः स्यात्षड्विधो ज्ञेयः पुष्टश्चैव भवेद्द्विधा ॥ ३१ ॥
हृष्टश्चाष्टविधः प्रोक्तः कुण्ठश्चैव त्रिधोदितः ॥ अन्धः काणश्च तौ द्वौ द्वौ स्याद्वै च सगुणोऽगुणः ॥ ३२ ॥ द्वौ चण्डौ चपलश्चैकावण्डचण्डौ
द्विगुर्भवेत् ॥ दण्डपण्डौ तथा ज्ञेयौ खलनीचौ चतुर्द्वयम् ॥ ३३ ॥ वाचालश्च कदर्यश्च क्रमात्त्रिभिरुदाहृतः ॥ कदर्यश्चपलश्चैव तथा ज्ञेयो मली

---

[1] कुब्जः–इ० पा० ।

मसः ॥ ३४ ॥ द्वावेकौ चतुरश्चैव स्तेयी चैकविधो भवेत् ॥ पृथग्लक्षणमेतेषां शृणुध्वं द्विजसत्तमाः ॥ ३५ ॥ सम्यग्यस्य परिज्ञानं नरो देवत्वमाप्नुयात् ॥ उपानच्छत्रधारी च गुरुदेवाग्रतश्चरन् ॥ ३६ ॥ उच्चासनं गुरोरग्रे तीर्थयात्रां करोति यः ॥ यानमारुह्य विप्रेन्द्राः सोप्येकत्राधमो मतः ॥ ३७ ॥ निमज्ज्य तीर्थे विधिवद्ग्राम्यधर्मेण वर्तयन् ॥ द्वितीयश्चाधमः प्रोक्तो निंदितः परिकीर्तितः ॥ ३८ ॥ वाक्चैव मधुरा श्लक्ष्णा हृदि हालाहलं विषम् ॥ वदत्यन्यत्करोत्यन्यद्द्वावेतौ विषमौ स्मृतौ ॥ ३९ ॥ मोक्षचिन्तामतिक्रम्य योऽन्यचिन्तापरिश्रमः ॥ हरिसेवाविहीनो यः स पशुर्योनितः पशुः ॥४०॥ प्रयागे विद्यमानेऽपि योऽन्यत्र स्नानमाचरेत् ॥ दृष्टं देवं परित्यज्य अदृष्टं भजते तु यः ॥४१॥ आयुषस्तु क्षयार्थाय शास्त्रेयमृषिसंमतः ॥ योगाभ्यासं ततो हित्वा तृतीयश्चाधमः पशुः ॥ ४२ ॥ बहूनि पुस्तकानीह शास्त्राणि विविधानि च ॥ तस्य सारं न जानाति स एव जंबुकः पशुः॥ ४३ ॥ बलेन च्छलछद्मेन उपायेन प्रबंधनम् ॥ सोऽपि स्यात्पिशुनः ख्यातः प्रणयाद्वा द्वितीयकः॥ ॥ ४४ ॥ मधुरान्नं प्रतिष्ठाप्य दैवे पित्र्ये च कर्मणि ॥ म्लानं चापि च तिक्तान्नं यः प्रयच्छति दुर्मतिः ॥ ४५ ॥ कृपणः स तु विज्ञेयो न स्वर्गी न च मोक्षभाक् ॥ कुदाता च मुदा हीनः सक्रोधस्तु यजेत यः ॥ ४६ ॥ स एव कृपणः ख्यातः सर्वधर्मबहिष्कृतः ॥ अदोषेण शुभत्यागी शुभकायोपविक्रयी ॥ ४७ ॥ पितृमातृगुरुत्यागी शौचाचारविवर्जितः ॥ पित्रोरग्रे समश्नाति स पापिष्ठतमः स्मृतः ॥ ४८ ॥ जीवत्पितृपरित्यक्तं सुतं सेवन्न वा क्वचित् ॥ द्वितीयस्तु स पापिष्ठो होमलोपी तृतीयकः ॥ ४९ ॥ साध्वाचारं च प्रच्छाद्य सेवनं चापि दर्शयेत् ॥ स नष्ट इति विज्ञेयः क्रयक्रीतं च मैथुनम् ॥ ५० ॥ जीवेद्देवलवृत्तिर्यः भार्याविपणजीवकः ॥ कन्याशुल्केन जीवेद्वा स्त्रीधनेन च वा क्वचित् ॥ ५१ ॥ षडेव नष्टाः शास्त्रे च न स्वर्गमोक्षभागिनः ॥ सदा क्रुद्धं मनो यस्य हीनं दृष्ट्वा प्रकोपवान् ॥ ५२ ॥ भ्रुकुटीकुटिलः क्रुद्धो रुष्टः पंचविधोदितः ॥ अकार्ये क्षमते नित्यं धर्मार्थे न व्यवस्थितः ॥ ५३ ॥ निद्रालुर्व्यसनासक्तो मद्यपः स्त्रीनिषेवकः ॥ दुष्टैः सह सदालापः स दुष्टः सप्तधा स्मृतः ॥ ५४ ॥ एकाकी मिष्टमश्नाति वंचकः साधुनिंदकः ॥ यथा सूकरः पुष्टः स्यात्तथा पुष्टः प्रकीर्तितः ॥ ५५ ॥ निगमागमतंत्राणि नाध्यापयति यो द्विजः॥ न शृणोति च पापात्मा स दुष्ट इति चोच्यते ॥ ५६ ॥ श्रुतिः स्मृतिश्च विप्राणां नयने द्वे विनिर्मिते ॥ एकेन विकलः काणो द्वाभ्यामंधः प्रकीर्तितः ॥ ५७ ॥ विवादः सोदरैः सार्द्धं पित्रोरप्रियकृद्वदेत् ॥ द्विजाधमः स विज्ञेयः स चंडः शास्त्रनिंदितः ॥५८॥ पिशुनो राजगामी च शूद्रसेवक

---

१ अदन्तत्वमार्षम् ।

एव च ॥ शूद्रांगनागमो विप्रः स चंडश्च द्विजाधमः ॥५९॥ पक्वान्नं शूद्रगेहे च यो भुंक्ते सकृदेव वा ॥ पंचरात्रं शूद्रगेहे निवासी चंड उच्यते ॥ ॥ ६० ॥ अष्टकुष्ठान्वितः कुष्ठी त्रिकुष्ठी शास्त्रनिंदितः ॥ एतैः सह सदालापः स भवेत्तत्समोऽधमः ॥ ६१ ॥ कीटवद्भ्रमणं यस्य कुव्यापारी कुपंडितः ॥ अज्ञानाच्च वदेद्धर्ममग्रवृत्तिः प्रधावति ॥ ६२ ॥ अविमुक्तं परित्यज्य योऽन्यदेशे वसेच्चिरम् ॥ स द्विधा शूकरपशुर्निंदितः सिद्धसंमतः॥ ॥ ६३ ॥ कपोलेन हि संयुक्तो भ्रुकुटीकुटिलाननः ॥ नृपवद्दंडयेद्यस्तु स दंडः समुदाहृतः ॥ ६४ ॥ ब्रह्मस्वहरणं कृत्वा नृपदेवस्वमेव च ॥ धनेन तेन इतरं देवं वा ब्राह्मणानपि ॥ ६५ ॥ संतर्पयति योऽश्नाति यः प्रयच्छति वा क्वचित् ॥ स खरश्च पशुश्रेष्ठः सर्ववेदेषु निंदितः ॥ ६६ ॥ अक्षराभ्यासनिरतः पठत्येव न बुध्यते ॥ पदशास्त्रपरित्यक्तः स पशुः स्यान्न संशयः ॥ ६७ ॥ वदत्यन्यत्करोत्यन्यद्गुरुदेवाग्रतो यतः ॥ स नीच इति विज्ञेयो ह्यनाचारस्तथापरः ॥ ६८ ॥ षड्गुणालंकृतेः साधोर्दोषान्मृगयते खलः ॥ वने पुष्पफलाकीर्णे शलभः कंटकानिव ॥ ६९ ॥ दैवेन च विहीनो यः कुसंभाषां वदेत्तु यः ॥ स वाचाल इति ख्यातो यो ह्यपत्रपतायुतः ॥ ७० ॥ चांडालैः सह आलापः पक्षिणां पोषणे रतः ॥ मार्जारैश्चापि संभुंक्ते यत्कृत्यं मर्कटोदितम् ॥ ७१ ॥ तृणच्छेदी लोष्टमर्दी वृथा मांसाशनश्च यः ॥ चपलः स तु विज्ञेयः परभार्यारतस्तथा ॥ ७२ ॥ स्नेहोद्वर्तनहीनो यो गंधचंदनवर्जितः ॥ नित्यक्रिया अकुर्वाणो नित्यं स च मलीमसः ॥ ७३ ॥ अन्यायेन गृहं विंदेदन्यायेन गृहान्[1]धनम् ॥ शास्त्रादन्यद्गृहं मंत्रं स स्तेयी ब्रह्मघातकः ॥ ७४ ॥ देवपुस्तकरत्नानि[2] मणिमुक्ताश्ममेव च ॥ गोभूमिस्वर्णहरणः स स्तेयीति निगद्यते ॥ ७५ ॥ देवोऽपि भावयेत्पश्चान्मानुषोऽपि न संशयः ॥ अन्योन्यभावना कार्या स स्तेयी यो न भावयेत् ॥ ७६ ॥ गुरोः प्रसादाज्जयति पित्रोश्चापि प्रसादतः ॥ करोति च यथार्हं च स च स्वर्गे महीयते ॥७७॥ न पोषयति दुष्टात्मा स स्तेयी चापरः स्मृतः ॥ ७८ ॥ उपकारिजनं प्राप्य न करोति परिष्क्रियाम् ॥ स तप्तनरके शेते शोणिते च पतत्यधः ॥ ७९ ॥ सर्वेषां च सवर्णानां धर्मतो ब्राह्मणः प्रभुः ॥ पृथिवीपालको राजा धर्मचक्षुरुदाहृतः ॥ ८० ॥ प्रजापतेर्मुखोद्भूतो होरातंत्रे यथोदितम् ॥ तद्विदो गणनाभिज्ञा अन्यविप्राः प्रचक्षते ॥ ८१ ॥ गंगाहीनो हतो देशो विप्रहीना यथा क्रिया ॥ होराज्ञप्तिविहीनो यो देशोऽसौ विप्लवप्लुवः ॥ ८२ ॥ अप्रदीपा यथा रात्रिरनादित्यं यथा नभः ॥ तथाऽसांवत्सरो राजा भ्रमत्यंध इवाध्वनि ॥ ८३ ॥ स्थापयेद्धर्मतो विप्रं भावयेत्कर्मवृद्धये ॥ श्मश्रुयुक्तो द्विजः पूज्यः सूर्यो विप्रस्तु श्मश्रुलः ॥ ८४ ॥ प्रत्यक्प्रदर्शनात्पुण्यं

---

[1] दारानित्यर्थः । [2] हरेदिति शेषः ।

त्रिदिनं कल्मषापहम् ॥ दर्शने व्रात्यविप्रस्य सूर्यं दृष्ट्वा विशुध्यति ॥ ८५ ॥ न व्रात्यत्वं सूर्यविप्रे पूजयेद्यज्ञसिद्धये ॥ ज्योतिर्वेदस्याधिकारः
सूर्यविप्रस्य वै द्विजाः ॥ ८६ ॥ जातिभेदाश्च चत्वारो भोजकः कथकस्तथा ॥ शिवविप्रः सूर्यविप्रश्चतुर्थः परिपठ्यते ॥ ८७ ॥ कथको मध्यम
स्तेषां सूर्यविप्रस्तथोत्तमः ॥ शिवलिंगार्चनरतः[1] शिवविप्रस्तु निंदितः ॥ ८८ ॥ सूर्यविप्रस्य[2] विप्रस्य वैद्यस्य च नृपस्य च ॥ प्रवासयेदक्षतेन
सपुत्रपशुबांधवः ॥ अवध्यः सर्वलोकेषु राजा राज्येन पालयेत् ॥ ८९ ॥ वसुभिर्वस्त्रगंधाद्यैर्माल्यैश्च विविधैरपि ॥ देशचक्रविदः
पूज्या होराचक्रविदः पराः ॥ ९० ॥ सूर्यचक्रविदः पूज्या नावमन्येत्कथंचन ॥ सिद्धवृद्धिं च धनर्द्धिं च य इच्छेदायुषा समम् ॥ गणविप्रसमः
पूज्यो दैवज्ञः समुदाहृतः ॥ ९१ ॥ जाते बाले निरूप्ये च लग्नग्रहनिरूपणम् ॥ संस्थानं सूर्यविप्रो यः सूर्यविप्रस्य सत्तमाः ॥ द्विमात्रिकां सम
भ्यस्य सर्ववेदफलं लभेत् ॥ ९२ ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि प्रथमभागे पंचमोऽध्यायः ॥ ५ ॥ छ ॥ ॥ सूत उवाच ॥ ॥
चतुर्णामपि वर्णानां नान्यो बंधुः प्रचक्षते ॥ ऋते पितुर्द्विजश्रेष्ठा इतीयं नैगमी स्मृतिः ॥ १ ॥ त्रयोऽपि गुरवः श्रेष्ठास्ताभ्यां माता परो गुरुः ॥
ये सोदरा ज्येष्ठश्रेष्ठा उत्तरोत्तरतो गुरुः ॥ २ ॥ द्वादश्यां तु आमवास्यामथ वा रविसंक्रमे ॥ वासांसि दक्षिणा देया मणिमुक्ता यथारुचि ॥ ३ ॥
अयने विषुवे चैव चंद्रसूर्यग्रहे तथा ॥ प्राप्ते चापरपक्षे तु भोजयेच्चापि शक्तितः ॥ ४ ॥ पश्चात्प्रवंदयेत्पादौ मंत्रेणानेन सत्तमाः ॥ विधिवद्वंदनादेव
सर्वतीर्थफलं लभेत् ॥ ५ ॥ स्वर्गापवर्गप्रदमेकमाद्यं ब्रह्मस्वरूपं पितरं नमामि ॥ यतो जगत्पश्यति चारुरूपं तं तर्पयामः सलिलैस्तिलैर्युतैः ॥
॥ ६ ॥ पितरो जनयंतीह पितरः पालयंति च ॥ पितरो ब्रह्मरूपा हि तेभ्यो नित्यं नमोनमः ॥ ७ ॥ यस्माद्द्विजयते लोकस्तस्माद्धर्मः प्रवर्तते ॥
नमस्तुभ्यं पितः साक्षाद्ब्रह्मरूप नमोऽस्तु ते ॥ ८ ॥ या कुक्षिविवरे कृत्वा स्वयं रक्षति सर्वतः ॥ नमामि जननीं देवीं परां प्रकृतिरूपिणीम् ॥९॥
कृच्छ्रेण महता देव्या धारितोऽहं यथोदरे ॥ त्वत्प्रसादाज्जगद्दृष्टं मातर्नित्यं नमोऽस्तु ते ॥ १० ॥ पृथिव्यां यानि तीर्थानि सागरादीनि सर्वशः ॥
वसंति यत्र तां नौमि मातरं भूतिहेतवे ॥ ११ ॥ गुरुदेवप्रसादेन लब्धा विद्या यशस्करी ॥ शिवरूप नमस्तस्मै संसारार्णवसेतवे ॥ १२ ॥ वेद
वेदांगशास्त्राणां तत्त्वं यत्र प्रतिष्ठितम् ॥ आधारः सर्वभूतानामग्रजन्मन्नमोऽस्तु ते ॥ १३ ॥ ब्राह्मणो जगतां तीर्थं पावनं परमं यतः ॥ भूदेव हर मे
पापं विष्णुरूपिन्नमोऽस्तु ते ॥ १४ ॥ पितामहं च प्रणमेत्सर्वादौ मातरं गुरुम् ॥ मातामहं च तदनु आचार्यमथ ऋत्विजम् ॥ १५ ॥ मातृमंत्रैश्च

---

[1] जीविकायै इति शेषः । [2] शेषषष्ठी ।

प्रथमं प्रणमेद्भक्तिभावतः ॥ यथाग्रजस्तथा ज्येष्ठः पितृव्योऽपि द्विजोत्तमाः ॥ १६ ॥ दृष्टादृष्टे च स गुरुर्गुरुर्माता तथा गुरुः ॥ दृष्टादृष्टस्तृतीयः
स्यात्सूर्योऽग्निश्चंद्र एव च ॥१७॥ मंत्रदाता गुरुः ख्यातस्सप्तमः परिकीर्तितः ॥ कभोजनगुरुः श्रेष्ठः स्वर्गापवर्गहेतुकः ॥१८॥ दृष्टदेवं च यो हित्वा
अदृष्टं च निषेवते ॥ पापात्मा परमः सैकस्तिर्यग्योनिं च गच्छति ॥१९॥ यथा पिता ज्येष्ठपिता कनीयांश्च तथा द्विजाः ॥ ज्येष्ठो भ्राता पितृतुल्यो
मान्यः सत्कारभाग्यतः ॥२०॥ आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजापतेः ॥ माता स्यात्पृथिवीमूर्तिर्भ्रातरो मूर्तिरात्मनः ॥ २१ ॥ पिता मेरुर्व
शिष्टः स्याद्धर्ममूर्तिः सनातनः ॥ स चापि दृष्टदेवः स्यात्तदाज्ञां परिपालयेत् ॥ २२ ॥ पितामहं च पित्रग्रे हव्यकव्यैश्च तर्पयेत् ॥ स याति ब्रह्मणः
स्थानं यस्मान्नावर्तते पुनः ॥ २३ ॥ तस्य पादोदकस्नानाद्गंगा नार्हति केवलम् ॥ तथावलोकनात्तस्य ज्योतिर्लिंगशतैश्च किम् ॥ २४ ॥ द्वात्रिं
शत्कुंडकशिलास्पर्शने यादृशं फलम् ॥ तादृशं कोटिगुणितं पितामहप्रदक्षिणे ॥ २५ ॥ शतमातृवरिष्ठाश्च पितामह्याश्च पोषणे ॥ गुणास्तद्दर्शने
विप्राः संसारे न पुनर्विशेत् ॥ २६ ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि प्रथमभागे गुरुगुणवर्णनं नाम षष्ठोध्यायः ॥ ६ ॥ ॥ सूत
उवाच ॥ ॥ समाख्यामीह विप्रेंद्रा इतिहासं पुरातनम् ॥ श्रवणेपि च धर्मात्मञ्छ्रूयतां यन्मया पुरा ॥ १ ॥ पृष्टोवोचन्महातेजा विरिंचो भगवा
न्प्रभुः ॥ हंत ते कथयाम्येष पुराणश्रवणे विधिम् ॥ २ ॥ इतिहासपुराणानि श्रुत्वा भक्त्या द्विजोत्तमाः ॥ मुच्यते सर्वपापेभ्यो ब्रह्महत्याशतं च
यत् ॥ ३ ॥ सायं प्रातस्तथा रात्रौ शुचिर्भूत्वा शृणोति यः ॥ तस्य विष्णुस्तथा ब्रह्मा तुष्यते शंकरस्तथा ॥ ४ ॥ प्रत्यूषे भगवान्ब्रह्मा दिनांते
तुष्यते हरिः ॥ महादेवस्तथा रात्रौ शृण्वतां पठतां नृणाम् ॥५॥ शुक्लवस्त्रधरश्चैव चैलाजिनकुशोत्तरः ॥ प्रदक्षिणत्रयं कुर्याद्या तस्मिन्देवता गुरौ ॥६॥
नात्युच्छ्रितं नातिनीचं स्वासनं भजते ततः ॥ दिक्पतिभ्यो नमस्कृत्य ॐकाराधिष्ठितानपि ॥ ७ ॥ पुस्तकं धर्मशास्त्रस्य धर्माधिष्ठानशाश्वतम् ॥
आगमानां शिवो देवस्तंत्रादीनां च शारदा ॥ ८ ॥ जामलानां गणपतिर्डामराणां शतक्रतुः ॥ नारायणो भारतस्य तथा रामायणस्य च ॥ ९ ॥
वासुदेवो भवेद्देवः सप्तानां शृणु सत्तम ॥ आदित्यो वासुदेवश्च माधवो रामकेशवौ ॥ १० ॥ वनमाली महादेवः सप्तानां सप्तपर्वसु ॥ विष्णुधर्मादि
कानां च शिवो ज्ञेयः सनातनः ॥ अथ चादिपुराणस्य विरिंचिः परिकीर्तितः ॥ ११ ॥ शुद्धौदनं यवक्षीरं पायसं कृशरं तथा ॥ कृशरान्नं च वा
द्यात्क्रमाद्बलिगणं विदुः ॥ १२ ॥ शालिभक्तं सगोधूमं तिलाक्षतविमिश्रितम् ॥ गव्यं च सफलं चैव देयश्चैभ्यस्त्वयं बलिः ॥१३॥ पृथक्पृथक्चैव
कांस्ये विन्यसेद्दिक्षु मध्यतः ॥ पठेच्चापि विधानेन स यागः षण्मयः परः ॥१४॥ शीतोदकं मधु क्षीरं सितेक्ष्वोश्च रसो गुडः ॥ सगर्भश्च परो ज्ञेयः

षण्मयश्चापरो बलिः ॥ १५ ॥ शालितंडुलप्रस्थं तु तदर्धं वा तदर्धकम् ॥ क्षीरेणापि च संभक्तं यवक्षीरमिदं स्मृतम् ॥ १६ ॥ क्षीरं भागाष्टकं ग्राह्यं
सप्तभागेन संस्थितम् ॥ हैमंतिकं सिताख्यं च तांडुलं प्रपचेच्चरुम् ॥ १७ ॥ अशीतिपलमानेन सिद्धमासादयेत्ततः ॥ भागार्धेन दद्देत्पश्चान्माक्षिकं
वा सितामपि ॥ १८ ॥ गुडमिश्रेण यो दद्यात्संपर्को जायते क्वचित् ॥ संपृक्तं माक्षिकेणापि दद्यादिक्षुरसं बुधः ॥ गृहीत्वा याचकः शुद्धः शृणुत
द्विजसत्तमाः ॥ १९ ॥ शृणुते वाधीयानो यो दद्याद्धस्ते च पुस्तकम् ॥ समुत्थाय च गृह्णीयात्प्रणम्य विनिवेदयेत् ॥ २० ॥ पूर्वस्थः श्रावको
विप्रो विख्यातस्तस्यदक्षिणे ॥ पश्चिमाशामुखेनैव तर्जन्यांगुष्ठया सह ॥२१॥ प्रस्तरेणापि हस्तेन विन्यासः पंडितैः सदा ॥ इतोन्यथा न कर्तव्यः
कृत्वा न्यासमथाप्नुयात् ॥२२॥ असकृद्विन्यसेद्विप्राः पावमानीं जले जपेत् ॥ वेदांतागमवेदांतविधिरेष स्मृतो बुधैः ॥२३॥ यमदिक्संमुखे श्रोता
वाचकश्चोत्तरामुखः ॥ पुराणभारताख्यान एष वै कथितो विधिः ॥२४॥ वैपरीत्येन विधिना विज्ञेयो द्विजसत्तमाः ॥ रामायणे धर्मशास्त्रे हरिवंशे
च सत्तमाः ॥ २५ ॥ इतोऽन्यथा यातुधानाः प्रलुंपंति फलं यतः ॥ तस्माद्विधिविधानेन शृणुयादथ वा पठेत् ॥ २६ ॥ श्रुत्वा प्रति पुण्यविद्यां
योऽश्नीयान्मांसमेव तु ॥ स याति गार्दभीं योनिं यदि मैथुनिनः क्वचित् ॥ २७ ॥ यदि देवालये तीर्थे वाचयेच्छृणुयादथ ॥ यस्य देवगृहे तस्य
तस्य तीर्थस्य वर्णनम् ॥२८॥ माहात्म्यश्रवणादेव गोदानस्य फलं लभेत्॥महागुरोश्च माहात्म्यं पित्रोरग्रे न च स्मरेत् ॥ पितुर्माहात्म्यं यत्पुत्रैर्वाच्यं
संसदि पर्वणि ॥ २९ ॥ वासुदेवाग्रतश्चापि रुद्रमाहात्म्यवर्णनम् ॥ रुद्राग्रे वासुदेवस्य कीर्तनं पुण्यवर्धनम् ॥ ३० ॥ दुर्गाग्रे शिवसूर्यस्य वैष्णवा
ख्यानमेव च ॥ यः करोति विमूढात्मा गार्दभीं योनिमाविशेत् ॥ ३१ ॥ गुरोरनुज्ञया पित्रोः प्रकुर्यादभिवादनम् ॥ अनुज्ञया तथा पित्रोर्हरेः
कुर्यात्प्रदक्षिणम् ॥ ३२ ॥ न विष्णुर्न च ब्रह्मा च न च रुद्रः शचीपतिः ॥ सर्ववेदेन तत्तुल्यं सर्वधर्मपरायणम् ॥ ३३ ॥ सर्वज्ञानमयं चैव सर्वज्ञेन
च तत्समम् ॥ तस्माद्द्विजन्मन्पित्रोर्हि सेवनाद्ब्रह्मशाश्वतम् ॥३४॥ गुरुभ्यो वंदनं व्यर्थं पितरं यो न तर्पयेत् ॥ जीवन्न तर्पयेन्मुख्यं गंगायां मरणेपि
च ॥ उभयोस्तर्पणं नास्ति जीवन्नपि न जीवति ॥ ३५ ॥ पुराणश्रवणं पुण्यं शून्यं भागवतं यदि ॥ व्यर्थं भागवतं विप्रा नारसिंहविहीनकम् ॥
॥ ३६ ॥ आदिपर्वणि हीने तु भारताख्यं न धारयेत् ॥ विनाश्वमेधिकं विप्रा विना यज्ञाननं विना ॥ ३७ ॥ दानकर्मविहीनं च मोक्षधर्मं न
धारयेत् ॥ भारतं च दिवारोहधारणादौ वरं व्रजेत् ॥ ३८ ॥ वायुपुराणमश्रुत्वा शास्त्रं च यौगिकं विना ॥ वायुहीनं देहिकुलं वृथा तस्य न धार
कम् ॥ ३९ ॥ तथा वायुपुराणं यद्विहीनं श्रव्यमन्यकम् ॥ यथा सुन्दरकांडेन आरण्यं च न धारयेत् ॥ ४० ॥ लंकां विना चादिकांडं तल्लिखित्वा

न धारयेत् ॥ पाराशरं विना व्यासं याज्ञवल्क्यं विना मखम् ॥ ४१ ॥ दक्षं विना न शंखं च शंखहीनं बृहस्पतिम् ॥ वह्नीयं श्रवणाद्येन न च
युक्तिमथापयेत् ॥ ४२ ॥ संस्थापनादेव विना न च किमपि राक्षसैः ॥ न ददेत्प्रार्थकादिभ्यो न विक्रीयेत्कथंचन ॥ ४३ ॥ न हरेत्पुस्तकं चापि
न हरेदक्षराणि षट् ॥ ब्रह्माक्षरस्य हरणाद्रौरवान्न निवर्तते ॥४४॥ आद्याक्षरस्य हरणात्ताम्रकुष्ठी भवेदिह ॥ मुखवृत्तस्य हरणाद्यावदाचंद्रतारकम्॥
॥४५॥ कुवले असिपत्रे च पततीह न संशयः ॥ स्वाक्षरस्य हरणे स्वमातृहरणेऽपि यत् ॥४६॥ तस्मात्पुस्तकमात्रं यो हरेन्नरकमाप्नुयात् ॥ यद्वा
रतं यत्पुराणं स्तोत्ररूपाणि तानि च ॥ ४७ ॥ तानि वेदागमादीनि पुस्तकेष्वपि वाचयेत् ॥ वेदानां पुस्तकं यच्च लिखित्वा तन्न वाचयेत् ॥
॥ ४८ ॥ तथा तन्त्रोदितान्मंत्राँल्लिखित्वा तन्न वाचयेत् ॥ पुस्तकं निगमानां च मन्त्रव्याख्यानसंग्रहम् ॥ ४९ ॥ स्फुटं कृत्वा पुरः स्थाप्य
यावत्कालं प्रवर्तते ॥ तावत्स नरके घोरे प्रेतत्वं जन्मजन्मनि ॥ ५० ॥ न वाचयेच्च व्याख्याता वाचकोऽपि प्रवाचयेत् ॥ पौष्करे च श्लोक
पादमाश्वमेधं पदेपदे ॥ ५१ ॥ वेदार्थं वाचयेद्यस्माद्विपरीतोऽपवाचकः ॥ तावुभौ पतितौ ज्ञेयौ पावमानीशतं जपेत् ॥ ५२ ॥ आदिमध्याव
साने च मन्त्रे च प्रणवं दिशेत् ॥ बलिभिर्गंधपुष्पैश्च पुस्तकं देवनिर्मितम् ॥ ५३ ॥ त्रिदेवं पुस्तकं विद्यात्सूत्रं वासुकिरुच्यते ॥ अमानकरणे
दोषस्तस्मात्तच्च न हापयेत् ॥ ५४ ॥ पत्राणि भगवान्ब्रह्मा ऊर्ध्वदीर्घाणि यानि च ॥ जनार्दनश्चाक्षराणि मात्रा प्रकृतिरव्यया ॥ ५५ ॥ लिपी
भंगी महेशः स्यात्तस्या मात्रा सरस्वती ॥ एकरेखा च एकात्मा पादाच्च पादविच्युतिः ॥ ५६ ॥ चतुष्पादांतरे युग्मं मध्यमोंऽते युगं युगम् ॥
विपत्करं युग्मपंक्तावयुग्मे स्वर्गसाधनम् ॥ ५७ ॥ भारते चेतिहासे च पुराणे द्विजसत्तमाः ॥ अयुग्मपंक्तौ स्वर्गः स्याद्युग्मे नरकमाविशेत् ॥
॥ ५८ ॥ वक्तृनामाक्षरैर्युक्तं पंक्तिभेदेन सत्तमाः ॥ उपन्यस्तस्य यन्नाम तत्कलौ मात्रया सह ॥ ५९ ॥ आत्मसंशुद्धिसंशुद्ध्या धारयेद्धर्म
संहिताम् ॥ इतोऽन्यथा भवेद्दोषस्तस्मात्तत्परिवर्जयेत् ॥ ६० ॥ रिपुः सूर्यस्तयारामो यक्षोऽनंतः सरस्वती ॥ ब्राह्मी च यक्षिणी चैव
गायत्री नवमी स्मृता ॥ ६१ ॥ विष्णवन्ते च भवेन्मुक्तिः सूर्यांऽते पादविच्युतिः ॥ रिपुंकरं भवेत्तस्य यक्षे दुर्गतिमादिशेत् ॥ ६२ ॥ अनंते
विपुला कीर्तिः सरस्वत्यां धनागमः ॥ ब्राह्म्या ब्रह्मत्वमाप्नोति यक्षिण्या यक्षमन्दिरम् ॥ ६३ ॥ मुक्तिमाप्नोति गायत्र्या इति पंक्तिफलोदयः ॥
चतुर्धा प्रतिभक्तिः स्यात्पुस्तकं धर्मनिर्मितम् ॥ ६४ ॥ ब्रह्मेन्द्रवैष्णवं शैवं शाक्तिकं च महेश्वरी ॥ ब्रह्मरूपं चेतिहासमैंद्रं रामायणात्मकम्॥६५॥
वैष्णवं परमं दैवं यच्चैवं तल्ललाटकम् ॥ पावकोऽस्य तथा मूले मध्ये भागे शतक्रतुः ॥ ६६ ॥ अग्रे स्थिता ग्रहाः सर्वे दिशामीशास्तथा

द्विजाः ॥ मेरुः सुमेरुरुद्दिष्टः संगवान्काम उच्यते ॥ ६७ ॥ द्यावापृथिव्यौ पातालं तस्यांतः समुदाहृतम् ॥ पौराणिककथायुक्तपुस्तको देवपू
जितः ॥ ६८ ॥ न शस्यः पूजनीयश्च गृहे स्थाप्येत मानवः ॥ यो यस्मै शूद्रो विप्राय वृत्तिं दद्याच्च मानवः ॥ ६९ ॥ स याति ब्रह्मसदनं मणि
वर्त्मादिकुट्टिमम् ॥ न शस्यः पूजनीयश्च गृहे स्थाप्येत मानवः ॥७०॥ पत्राणामग्रभागे तु वेधं कुर्यात्सुवर्तुलम् ॥ श्रवणात्तत्र मात्रेण तत्र पद्मं च
वर्तुलम् ॥ ७१ ॥ संहितागमतन्त्रेषु प्रतिवेधे च संकुलम् ॥ प्रकुर्याच्चित्ततापेन ततः शक्रपुरं व्रजेत् ॥ ७२ ॥ मध्यं तस्य हरेदायुः पार्श्ववेधः
शिवं हरेत् ॥ युग्मवेधे जयं दद्यादेकवेधे बलिर्भवेत् ॥७३॥ परमं प्रकृतेर्गुह्यं स्थानं देवैर्विनिर्मितम् ॥ पूरयेत्ताम्रलिंगेन अथ रैत्यमयेन वा ॥७४॥
अशक्तो बिल्वकाष्ठस्य तथा श्रीपर्णिकस्य च ॥ न काष्ठस्य नवं शस्यं न लौहं योजयेत्क्वचित् ॥ ७५ ॥ प्रागारंभश्लोकशतं धर्मशास्त्रस्य वै
लिखेत् ॥ संहितायां पुराणायां युग्मकल्पं तदर्धकम् ॥ ७६ ॥ ब्रह्मचर्येण विलिखेन्न मोहाद्ब्रह्मणः क्वचित् ॥ तथापि चाखिलव्यास लेखनात्संत
तिक्षयः ॥ ७७ ॥ अनामात्वे हेमयुतां बलाकं चित्तमेव च ॥ न लिखेत्खिलभागं च हरिवंशस्य सत्तमाः ॥ ७८ ॥ गारुडस्य च स्कान्दस्य न
लिखेन्मध्यतन्त्रकम् ॥ लेखनं हरिवंशस्य व्रतस्थो नियमैर्युतः ॥ ७९ ॥ गृहस्थो न लिखेद्ग्रंथं लिखेच्च मथुरां विना ॥ लेखने पारिजातस्य मत्स्य
मांसाशिनं लिखेत् ॥ ८० ॥ वाल्मीकिसंहितायाश्च लेखने च तथा क्वचित् ॥ स्तोत्रमात्रं लिखेद्विप्रा अव्रती न लिखेत्क्वचित् ॥ ८१ ॥ अब्रा
ह्मणेन लिखितं निष्फलं परिकीर्तितम् ॥ ८२ ॥ पतितैरपि पाखंडैर्न स्त्री विलिखति क्वचित् ॥ दुर्विचारो दुष्टभार्यो दुर्मतिश्चापि लेखकः ॥ न
लिखेद्धर्मशास्त्रं च पुराणं स्तोत्रसंहितम् ॥ ८३ ॥ तच्च प्राप्नुवन्कर्तव्यं सुवर्णरजतस्य च ॥ कज्जलैर्मलिनं कुर्यान्मन्त्री निर्यासमंत्रितैः ॥ ८४ ॥
जीवन्त्याश्च रसैर्युक्तैर्मणिकर्दमलोलुपैः ॥ वंगुन्यान्मुख्यायुतैर्वापि पीतयोगैरथापि वा ॥ ८५ ॥ कृष्णे वायुप्रदं विद्यात्पीते वायुक्षयो भवेत् ॥ रक्ते
पुष्टिमवाप्नोति कृष्णे च संपदागमः ॥८६॥ इतिहासपुराणानां विलिखेद्यन्मुखाच्छृणु ॥ वायव्यादिमुखेनैव काष्ठवेदं च संलिखेत् ॥ ८७ ॥ पूर्वामुखे
चार्थहानिरुत्तरे च मुखे श्रियः ॥ मरणं दक्षिणास्ये तु पश्चिमास्ये धनक्षयः ॥८८॥ पितृमेधे भुवः कंपे न लिखेज्जन्मवासरे ॥ अशौचे मृतके सूता
वमायां रविसंक्रमे ॥ ८९ ॥ अत्र लेखाद्दरिद्रः स्यात्तथा पुत्रविनाशनम् ॥ बलधर्मं क्षयं चैव तस्माद्यत्नेन वर्जयेत् ॥ ९० ॥ पितृश्राद्धदिने लेखः
कुलक्षयकरो भवेत् ॥ एकरात्रं भुवः कंपे तस्मिँल्लेखे धनक्षयः ॥९१॥ अशोचेऽपि दरिद्रः स्याज्जन्माहे चायुषः क्षयः ॥ लिपिच्छंदःपदज्ञश्च युवा
धीमाञ्जितासनः ॥९२॥ द्रुतलेखी च तेजस्वी यो लेखयति लेखकः ॥ असंवलितभावेन ऊर्ध्वोर्ध्वे स्यात्समाक्षरम् ॥९३॥ लिपियुक्तः समायुक्तः

एवागमलेखकः ॥ नांदीनागरकैर्वर्णैः शुद्धनागरकैरपि ॥ ९४ ॥ कामरूपाक्षरैर्वापि यावच्च संहितागणः ॥ अचेतनेन लिखितं यावत्कालं प्रवर्तते ॥
॥ ९५ ॥ यावदक्षरसंस्थानं तावत्स्वर्गे महीयते ॥ अनुक्तो वाचयेद्यस्तु धर्मशास्त्रस्य वेतनम् ॥ ९६ ॥ लिखित्वा यस्तु पापात्मा यावदक्षर
संख्यया ॥ तावत्कालं तु नरके पच्यते नात्र संशयः ॥ ९७ ॥ कुटुंबभरणार्थं तु गृह्णीयाद्वापि वेतनम् ॥ न जीवति सदुष्टात्मा धनवस्त्रफला
न्वितः ॥ ९८ ॥ पतितैरंत्यजैर्म्लेच्छै रोगी कुष्ठी क्षयी तथा ॥ रोगी शिलीपदैश्चैव मूकोऽपि धर्मसंहतः ॥ ९९ ॥ एतैर्विलिखितं यच्च धारयेन्न
गृहाश्रमी ॥ अनायुष्यकरं यस्मात्तस्मात्तत्परिवर्जयेत् ॥ १०० ॥ हीनांगा प्रतिमा चैव पुस्तकं मानहीनकम् ॥ न कलौ धारयेद्देह अनायुष्यकरं
भवेत् ॥ १०१ ॥ द्वात्रिंशदंगुलैर्युक्तं कर्तव्यं पुस्तकोत्तमम् ॥ स वै नारायणः ख्यातो धारणाच्च कुतोऽप्यलम् ॥ १०२ ॥ चतुर्विंशांगुलं यच्च
तद्वै स्वधनमुच्यते ॥ शंकरः स तु विज्ञेयो धर्मकामफलप्रदः ॥ १०३ ॥ अष्टांगुलं भवेद्यच्च तत्कनिष्ठमिहोच्यते ॥ तस्माद्ब्रह्ममयं ज्ञेयं त्रिवर्ग
फलदायकम् ॥ १०४ ॥ ताडिता जलपत्रे च अथ वा चागुरुत्वचि ॥ एत्याः पत्रकृते मानं भूर्जे मानं न विद्यते ॥ १०५ ॥ द्वादशांगुलकं
यच्च भूर्जतैडादिनिर्मितम् ॥ अंगुलानां प्रमाणं यत्तेनापि ज्ञानपुस्तकम् ॥ १०६ ॥ हस्तसंस्थापिते तस्य तेनायुष्यकरं भवेत् ॥ धर्मशास्त्रस्य
साहस्रे धर्मशास्त्रस्य वेतनम् ॥ १०७ ॥ स्वर्गमार्गस्य गमने भारते च तदर्धकम् ॥ हरिवंशे स्वर्णमाने कृते मूल्यसहस्रके ॥ १०८ ॥ युगेयुगे
पादहीनं धर्मं कुर्याद्यथारुचि ॥ प्रणम्य शिरसा सर्वान्व्यासादीन्संहिताश्रुतान् ॥ १०९ ॥ जैमिनिं च ततो व्यासं शंकरं च तथा हरिम् ॥
नमस्कारमथैषां तु आदिमध्यावसानके ॥ ११० ॥ ततः प्रवाचयेद्विप्रो धर्मशास्त्रार्थकोविदः ॥ अलक्षितमनास्तद्वद्यद्रूपं स्पष्टमुच्चरन् ॥ १११ ॥
असंयुक्ताक्षरपदं स्पष्टभागसमन्वितम् ॥ सप्तस्वरसमायुक्तं सप्तनादविभूषितम् ॥ ११२ ॥ सामगाथाः समाश्रित्य रागयुक्तांतरं पठेत् ॥ मणिवारो
धनं यत्स्याद्गौरांधांसंतिकस्तथा ॥ ११३ ॥ श्रीरागश्चैव हिल्लोलरागो वाजाविकस्तथा ॥ एवं प्रक्रममाणेन शृणुयाद्धर्मसंहिताः ॥ ११४ ॥ ब्राह्मणः
क्षत्रियो वैश्यः शूद्रश्चापि विशेषतः ॥ अश्वमेधमवाप्नोति सर्वान्कामानवाप्नुयात् ॥ पाषैः प्रमुच्यते सर्वैर्महापुण्यं च विंदति ॥ ११५ ॥ शूद्राणां
पुरतो वैश्यो वैश्यानां क्षत्रियः परः ॥ क्षत्रियांते तथा विप्राः शृणुयुश्चाग्रतः सदा ॥ ११६ ॥ न शूद्रः कथयेद्धर्मांस्तपअध्यापने तथा ॥ नैहिकत्वं
परत्वं च न शुभं न परां गतिम् ॥ ११७ ॥ शूद्रेणाधिगतं नास्तिविशेषाच्छब्दलक्षणम् ॥ यद्द्विजस्य कृतो दासो ब्रह्मणाऽव्यक्तयोनिना ॥११८॥
श्वशृगालखरीक्षीरमपेयं हि यथा भवेत् ॥ एवं शूद्रमुखाद्धर्मा न ग्राह्याः शब्दसंस्कृताः ॥११९॥ अमेध्यं शुध्यते तोयैः शूद्रः श्रोता हि शुध्यति ॥

एवं शूद्रोऽप्यशुचिः स्याद्यदि व्याकरणार्थवित् ॥१२०॥ यः शूद्र उद्दिशेद्धर्मं तथा चागमवैदिकम् ॥ स वै वध्यो नरेंद्रेण जिह्वां चक्रेण छेदयेत् ॥
॥ १२१ ॥ बुध्यमानः सदा ह्यर्थं ग्रंथार्थं कृत्स्नमेव च ॥ य एवं कथयेत्सम्यक्स विप्रो व्यास उच्यते ॥ १२२ ॥ वसेत्स पत्तने ग्रामे पुण्ये देश स
कीर्तितः ॥ ते धन्यास्ते कृतात्मानस्ते कृतार्था न संशयः ॥ वसंति पत्तने तस्मिन्व्याख्याता यत्र संवसेत् ॥ १२३ ॥ यथार्कहीनं दिवस चंद्र
हीना यथा निशा ॥ न रराज सभा तद्वद्व्यासेन रहिता द्विजाः॥१२४॥ यद्गृहे नैव शिशवो न रराज गृहं क्वचित् ॥ यथैकतो ग्रहाः सर्वे एकतस्तु
दिवाकरः ॥ तथैव सोदर गेहे दृष्ट्वा पुष्करदर्शनम् ॥ १२५ ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि प्रथमभागे सप्तमोऽध्यायः ॥ ७ ॥ छ ॥
॥ ॥सूत उवाच ॥ ॥ शृणुध्वं विप्रसंघाताः पुराणं देवसंमतम् ॥ यच्छ्रुत्वा मुच्यते पापात्पुरुषो ब्रह्महत्यया ॥१॥ तृतीयं शैवमाख्यातं ततो भागवतं
परम् ॥ पंचमं च तथा मात्स्यं भविष्यं षष्ठमुच्यते ॥२॥ असामर्थ्ये च मात्स्योक्तं वैष्णवं च भविष्यकम् ॥ भारते चापि पर्वं च शांतिभैष्मीयकं
तथा ॥ ३ ॥ परांशरमतं गृह्यं गोभिलोक्तानि यानि च ॥ कात्यायनोक्तमपरमभ्यसेन्निगमादितः ॥ ४ ॥ अंतरेणागते मर्त्ये शास्त्रं नाध्यापयेत्क्व
चित् ॥ एकरात्रं गते मर्त्ये त्रिरात्रमजमेषयोः ॥ ५ ॥ मंडूके पंचरात्रं तु सर्पे रात्रिचतुष्टयम् ॥ संवत्सरं तु तुरगे गजे द्वादशवत्सरान् ॥ ६ ॥ मास
मेकं खरे काके स्थानत्यागान्न कुत्रचित् ॥ केरवे वा रवे चैव अहोरात्रं प्रचक्षते ॥७॥ त्रिरात्रमपि मार्जारे नकुले मूषके खरे ॥ हंसे दिनमनध्यायं
क्षुद्रजंतौन दूषणम् ॥ ८ ॥ अध्यापयेद्गुरोः पुत्रं ज्ञानिनं धार्मिकं शुचिम् ॥ भक्तं शांतं वैष्णवं च जितक्रोधं जितेंद्रियम् ॥ ९ ॥ अध्यात्माध्याप
येदेभ्यः शठं पापहरं द्विषम् ॥ अन्यायेनैव यच्छ्रुतमभयं दांभिकं द्विषम्॥१०॥निरर्थकं मंथरं च विशुश्रूषुमयाजकम् ॥ षण्डं चैवानृजुं क्रुद्धं कृपणं
व्यसनार्थिनम् ॥ ११ ॥ निंदकं चाविधिज्ञं च दूरतः परिवर्जयेत् ॥ अप्रच्छन्ननतं ब्रूयात्पुत्रपौत्रादिकादृते ॥ १२ ॥ विद्यया सह मर्तव्यं न दद्याच्च
पृथग्जने ॥ अतो विद्या वदत्येवं पाठयंतं द्विजोत्तमम् ॥१३॥ मा दद्याद्भक्तिहीनाय दुर्जनाय दुरात्मने ॥ अप्रमादाय विप्राय शुचये ब्रह्मचारिणे ॥
॥ १४ ॥ सार्थकाय विधिज्ञाय साधवे देहि सत्तम ॥ दद्याद्यदि निषिद्धाय विद्याधनमनुत्तमम् ॥ १५ ॥ तयोरेकतरो गच्छेदचिरेण यमक्षयम् ॥
अन्यायेन ग्रहं विद्यामन्यं पाठयते सुखात् ॥ १६ ॥ स याति नरकं घोरं विद्यावर्ज्यः स उच्यते ॥ आध्यात्मिकं वैदिकं चालौकिकं वाथ यो
वदेत् ॥१७॥ मानमादौ प्रणम्याथ ततोऽधीयीत सुव्रतः ॥ कर्मकांडं ज्योतिषस्य तद्विना न समभ्यसेत् ॥ १८ ॥ चूतभोगसमभ्यासाद्दारिद्र्यश्चाभि

---

१ अदन्तत्वमार्षम् ।

जायते ॥ वादभागसमभ्यासाद्धननाशाय जायते ॥१९॥ निधिभागसमभ्यासाज्जायते नारके कुले॥ यान्यनुक्तानि शास्त्राणि माननीयानि यानि च ॥२०॥ म्लेच्छोक्तानि महिम्नानि नाभ्यसेद्दूरतस्त्यजेत् ॥ लोकानां ज्ञानवृद्ध्यर्थं यः कुर्याद्धर्मसंग्रहम् ॥ २१ ॥ प्रवर्तयित्वा स गुरुर्भवेज्ज्ञानप्रदः पिता ॥ ज्ञानदाता च लोकानां तेषु धर्मः प्रवर्तते ॥२२॥ निगमानां ज्योतिषाणां वेदानां नाटकस्य च ॥ व्याख्यानसंग्रहं कृत्वा कलौ नाशमवाप्नुयात् ॥२३॥ वेदानां धर्मशास्त्राणां पुराणानां तथैव च ॥ मीमांसाज्योतिषां चैव नाटकानां विरंचिनी॥२४॥भागावसाने कथितःपुराणाध्याय एव च ॥ पुष्पकश्च परिच्छेदः खंडश्च प्रतिखंडकः ॥२५॥ व्यवहारश्चार्थशास्त्रमश्वशास्त्रस्य चैव हि ॥ यस्य भागावसाने तु प्रयोक्तव्यः स एव हि॥ ॥२६॥ तत्संग्रहेपि कविना नियोक्तव्यः स एव हि॥ यस्य नाम्नोपदेशे तु प्रवर्तयति संग्रहः ॥२७॥ तत्तदक्षरसख्यानां ब्रह्मलोकान्न तच्च्युतिः ॥ न संग्रहस्तंत्रमंत्रे वेदमंत्रे च वर्जयेत् ॥२८॥ मोहात्कृत्वा होमधेनुं दत्त्वा शुद्धिर्भविष्यति ॥ कृत्वा चाख्यायिकाग्रंथस्वरूपान्स दिवं व्रजेत् ॥ २९ ॥ धर्मशास्त्रस्य गम्यस्य व्यवहारस्य चैव हि ॥ कलौ यः संग्रहं कुर्यात्प्रसुप्ते चैव केशवे ॥ ३० ॥ यावत्प्रवर्तते लोकस्तावत्स्वर्गे महीयते ॥ सिंहे पौषे च चैत्रे च न कुर्यात्संग्रहं क्वचित् ॥ ३१ ॥ प्रातःकाले न कुर्वीत तथा मध्यंदिने द्विजाः ॥ पक्षांते भूमिदाहे च भुवः कंपे दिनक्षये ॥ ३२ ॥ मलमासे विशेषेण सन्ध्ययोश्च विवर्जने ॥ अमेध्याक्तं च पत्रं च लिप्यक्षरविभूषितम् ॥ ३३ ॥ पूतं स्यात्तत्क्षणाद्विप्राश्चतुः पंचाक्षरेण वा ॥ नारसिंहस्य विन्यासे पूतो भवति तत्क्षणात् ॥ ३४ ॥ मायाविभवविन्यस्ते महापापकलेवरे ॥ मुहूर्तार्धेन पूतत्वं प्रभोर्याति परां गतिम् ॥ ३५ ॥ स्त्रियो वा निंदितो वापि म्लेच्छो याति परां गतिम् ॥ यो मूढो मन्यते दोषं तस्य शौचं समाचरेत् ॥ स गर्दभीं खरीं योनिं प्रविशेन्नात्र संशयः॥ ॥ ३६ ॥ एकमेवात्मकं ब्रह्म तत्प्रकृत्यात्मकं द्वयम् ॥ नवात्मको भैरवश्च दशमश्च जनार्दनः ॥ ३७ ॥ रुद्र एकादशश्चैव अर्कार्कश्चापि द्वादशः ॥ त्रयोविंशे च भूतात्मा षड्विंशे मनुरीरितः ॥ ३८ ॥ तिथ्यात्मकं पंचदशे षोडशाख्या कलापरा ॥ वातात्मकः सप्तदशो मंन्त्रः समनुवर्तते ॥३९॥ अष्टादशाक्षरो मंत्रः पुराणात्मक एव च ॥ ऊनविंशश्चंद्रमाः स्याद्विंशो नारायणो वपुः ॥४०॥ ज्योतिर्मयश्चैकविंशो द्वाविंशे केशवार्चनम् ॥ नक्षत्राणि त्रयोविंशे चतुर्विंशे च तानकम् ॥ ४१ ॥ पंचविंशे च तीर्थानि षड्विंशे च त्रियंबकः ॥ अष्टाविंशे धनेशश्च ऊनविंशे सरस्वती ॥ ४२ ॥ त्रिंशद्योगे शिवः प्रोक्तः पातालमेकत्रिंशके ॥ अहोरात्रश्च द्वात्रिंशे चतुस्त्रिंशे च जाह्नवी ॥ ४३ ॥ पंचत्रिंशे तदंतः स्याच्छते पूर्णे दिवाकरः ॥ सहस्रे च शिवो ज्ञेयश्चायुते मेरुरुच्यते ॥ ४४ ॥ लक्षे ब्रह्मा तथा कोट्यां देवो नारायणः परः ॥ पुंप्रकृत्यात्मकं चान्यच्छारदालिपिमातृका ॥४५॥

शुद्धब्रह्ममयं नित्यं ज्ञानरूपं परं महत् ॥ यस्मिन्नव्यसनादेन शुचौ चाप्यशुचिस्थले ॥ क्षणे ब्रह्ममयं याति इत्याह भगवान्मनुः ॥ ४६ ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि प्रथमभागेऽकमाहात्म्यकथनं नामाष्टमोऽध्यायः ॥ ८ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ अंतर्वेदिं प्रवक्ष्यामि ब्रह्मणोक्तं युगांतरे ॥ बहिर्वेदं तथैवोक्तं शस्तंस्याद्वापरे कलौ ॥ १ ॥ ज्ञानसाध्यं तु यत्कर्म अंतर्वेदीति कथ्यते ॥ देवतास्थापनं पूजा बहिर्वेदिरुदाहृता ॥ २ ॥ प्रपापूर्तादिकं चैव ब्राह्मणानां च तोषणम् ॥ गुरुभ्यः परिचर्या च बहिर्वेदी द्विधा मता ॥ ३ ॥ अकामेन कृतं कर्म कर्म च व्यसनादिकम् ॥ अंतर्वेदी तदेवोक्तं बहिर्वेदी विपर्ययः ॥ ४ ॥ धर्मस्य कारणं राजा धर्ममेतद्भवेन्नृपः ॥ तस्मान्नृपं समाश्रित्य बहिर्वेदी ततो भवेत ॥ ५ ॥ सप्ताशीतिर्बहिर्वेदी सारमेषां तृतीयकम् ॥ देवतास्थापनं चैव प्रासादकरणं तथा ॥ ६ ॥ तडागकरणं चैव तृतीयं न चतुर्थकम् ॥ पंचमं पितृपूजा च गुरुपूजापुरःसरा ॥ ७ ॥ अधिवासः प्रतिष्ठा च देवतानामविक्रिया ॥ प्रतिमाकरणं चैव वृक्षाणामथ रोपणम् ॥ ८ ॥ त्रिविधा सा विनिर्दिष्टा उत्तमा:चाथ मध्यमा ॥ कनिष्ठा शेषकल्पश्च सर्वकार्येष्वयं विधिः ॥ ९ ॥ त्रिधा भवति सर्वत्र प्रतिष्ठादिविधिर्मतः ॥ पूजाहोमादिभिर्दानैर्मानतश्च त्रिभागतः ॥ १० ॥ त्र्यहसाध्यविधानेन अष्टाविंशतिदेवताः ॥ त्रिधा भवति सर्वत्र प्रतिष्ठादिविधिर्मतः ॥ ११ ॥ प्रत्यहं पूजयेत्तत्र जापकास्तत्र षोडश ॥ उत्तमोऽसौ विधिः कृत्स्नो ह्यश्वमेधफलप्रदः ॥ १२ ॥ चत्वारो याजकास्तत्र त्रयोविंशतिदेवताः ॥ ग्रहदिक्पालवारुण्यं पृथिवी च शिवस्तथा ॥ १३ ॥ एकाहेनैव पूजा च मध्यमः कथितो विधिः ॥ गणेशग्रहदिक्पालान्वरुणं च शिवं तथा ॥ १४ ॥ संपूज्य पूज्यते यत्र कनिष्ठोऽसौ विधिः स्मृतः ॥ एकवृक्षश्चैकरूपैः प्रतिमाक्षुद्रदेवताः ॥ १५ ॥ नलिनीदीर्घिकागर्तवापीमलप्रपादिकम् ॥ एषां संस्कारकार्येषु प्रतिमानां परिष्क्रिया ॥ १६ ॥ अग्निकार्यं ततः कृत्वा न कुर्याद्विधिविस्तरम् ॥ गणेशग्रहदिक्पालान्पूजयेदुपचारतः ॥ १७ ॥ वाप्यादेः पुष्करिण्याश्च क्षिपेद्गंगाजलं ततः ॥ उलूखलद्वयेनापि जीर्णानां तु कदाचन ॥ १८ ॥ सेतुप्रासादवापीनां प्रतिष्ठां नैव कारयेत् ॥ प्रासादः सेतवश्चैव तडागाद्यास्तथैव च ॥ १९ ॥ त्रिभिर्वर्णैः प्रतिष्ठार्हां जीर्णानां तु समुद्धताः ॥ मुनयो मानमिच्छंति अमानं न हि दृश्यते ॥ २० ॥ तस्मान्मानं प्रवक्ष्यामि यन्मानं यादृशं फलम् ॥ षष्टिहस्तप्रमाणेन तदुक्तं वारणोदितम् ॥ २१ ॥ एकषष्टिहस्तमितं प्रासादं चोत्तमं विदुः ॥ मध्यं तदर्धं विज्ञेयं कनिष्ठं तत्परं स्मृतम् ॥ २२ ॥ अथ वा देवमानेन कर्तव्यं भूतिमिच्छता ॥ यस्तडागं नवं कृत्वा जीर्णं वा नवतां नयेत् ॥ ॥ २३ ॥ सर्वं कुलं समुद्धृत्य स्वर्गलोके महीयते ॥ वापीकूपतडागाश्च उद्यानप्रवहास्तथा ॥ २४ ॥ पुनः पुनश्च संस्कार्यो लभते मौक्तिकं

फलम् ॥ गुणानां च प्रमाणेन प्रतिमानं विभागतः ॥ २५ ॥ द्विशतेन शतेनापि प्रासादस्यैष निश्चयः ॥ सहस्रहस्तविस्तारं दैर्घ्येणाष्टाधिकं भवेत् ॥ २६ ॥ तडागं तं विजानीयात्प्रथमं मानमीरितम् ॥ मध्यं चतुःशतेनापि प्रस्तावे दशहीनकम् ॥ २७ ॥ कनिष्ठं त्रिशतं चैव प्रस्थे स्याद्विंशहीनकम् ॥ तदर्धेन कलौ ज्ञेयं तदर्धेन तदर्धकम् ॥ २८ ॥ तडागमानं विज्ञेयं त्रिवर्गफलदायकम् ॥ अथ पुष्करिणीपक्षे द्वे शते मानमुत्तमम् ॥ २९ ॥ तडागे द्विगुणा नेमी मानार्धे गर्तमीरितम् ॥ तत्क्षेत्रं वारुणं स्थानं ह्युदितं तद्बहिः स्मृतम् ॥ ३० ॥ चतुर्थं चैव गांधर्वं पैशाचं पंचमं विदुः ॥ यक्षस्थानमिता भागे एवं सर्वक्रमाणि हि ॥ ३१ ॥ अशीतिहस्तमानेन नलिन्या मणिरुच्यते ॥ पञ्चहीनं च प्रस्तावे एवं मानविदो विदुः ॥ ३२ ॥ षष्टिहस्तेन नलिनी प्रस्तावे तुर्यहीनकम् ॥ चतुःषष्टिहस्तमिता दीर्घिका च प्रकीर्तिता ॥ ३३ ॥ तुर्यहीनं च प्रस्तावे गर्ते मानं न विद्यते ॥ ३४ ॥ अग्नौ रोगो बंधुनाशश्च याम्यां मृत्युश्चोग्रः प्राप्यते राक्षसे च ॥ भीतिश्चोग्रा प्राप्यते वायवीये तस्मादेता वर्जनीयाः प्रयत्नात् ॥ ३५ ॥ विप्रादीनां देवतानां समाजे मेरुस्थाने यत्र तत्रैव कुर्यात् ॥ नद्यास्तीरे वर्जयेद्वा स्मशाने तडागाद्वै आश्रमादीञ्जनानाम् ॥ ३६ ॥ यदा प्रतिष्ठां न करोति मूढः प्रासादवाप्यादिषु पापचेताः ॥ भयं समाप्नोति च पापमुग्रं पदेऽहिना वै वधभागितां व्रजेत् ॥ ३७ ॥ यदा तु दीर्घासरसीतडागप्रासादकूपादिषु निर्मितानि ॥ कुर्वंति चान्यानि यदा मखानि भवंति नैवास्य फलप्रदानि ॥३८॥ यदप्रतिष्ठेषु निपानकेषु प्रासादकूपेषु वनादिकेषु ॥ प्रतिष्ठिते यत्फलमाप्नुवंति फलं तदाल्पाल्पकमाहुरस्य ॥३९॥ तस्मात्प्रतिष्ठां विधिना जलादेः कुर्याद्यथेष्टं प्रयतो मनुष्यः ॥ पुण्यार्जनेनैव धनेन काले स्ववित्तसाध्येन शुभाशयेन ॥ ४० ॥ प्रसादे मृन्मयं पुण्यं मयैतत्कथितं द्विजाः ॥ तस्माच्चतुर्गुणं प्रोक्तं तृणकाष्ठमये तथा ॥ ४१ ॥ तृणमये शतमयं तदर्धं नववल्कले ॥ तस्माद्दशगुणं प्रोक्तं कृते दारुमये भवेत् ॥ ४२ ॥ ततो दशगुणं प्रोक्तमिष्टिकारचिते शुभे ॥ तस्माच्छतगुणं शैले सहस्रं ताम्ररौप्यके ॥ ४३ ॥ ततश्च शतसाहस्रं सौवर्णे द्विजसत्तमाः ॥ अनंतफलमाप्नोति रत्नादिरचिते तथा ॥ ४४ ॥ यदतीतं भविष्यच्च कुलानामयुतं नरः ॥ विष्णुलोकं नयत्याशु कारयित्वा हरेर्गृहम् ॥ ४५ ॥ कनिष्ठं मध्यमं श्रेष्ठं कारयित्वा हरेर्गृहम् ॥ अर्धं च वैष्णवं लोकं मोक्षं च लभते क्रमात् ॥ ४६ ॥ हस्तानां षोडशैर्यावत्प्रस्थे स्यात्करहीनकम् ॥ तृणवंशमये मानं मध्यं चार्ककरं भवेत् ॥ ४७ ॥ कनिष्ठं तारहस्तं स्यादुत्तमं पचविंशतिः ॥ सर्वोत्तमं च द्वात्रिंशच्चतुष्कोणे महाफलम् ॥ ४८ ॥ पुरद्वारं च कर्तव्यं चतु

रस्रं समं भवेत् ॥ अष्टकोणं न कर्तव्यं त्रिपुरं च कलौ युगे ॥ ४९ ॥ सुरवेश्मनि यावंतो द्विजेंन्द्राः परमाणवः ॥ तावद्वर्षसहस्राणि स्वर्गलोके
महीयते ॥ ५० ॥ कर्तुर्दशगुणं प्रोक्तमापानपरिपालकः ॥ पतितान्युद्धरेद्यस्तु स सर्वं फलमश्नुते ॥ ५१ ॥ पतितं पतमानं च तथार्द्धस्फुटितं
तथा ॥ समुद्धृत्य हरेर्वेश्म द्विगुणं फलमाप्नुयात् ॥ ५२ ॥ पतितस्य तु यः कर्ता पतमानस्य रक्षिता ॥ विष्णोरधितलस्यैव मानवः स्वर्गभाग्भ
वेत् ॥ ५३ ॥ यः कुर्याद्विष्णुप्रासादं ज्योतिर्लिंगस्य वा क्वचित् ॥ सूर्यस्यापि विरिंचेश्च दुर्गायाः श्रीधरस्य च ॥ ५४ ॥ स्वयं स्वकुलमुद्धृत्य
कल्पकोटिं वसेद्दिवि ॥ स्वर्गाद्भ्रष्टो भवेद्राजा धनी पूज्यतमोपि वा ॥ ५५ ॥ देवीलिंगेषु योनौ वा कृत्वा देवकुलं नरः ॥ स्मरत्वं प्राप्नुयाल्लोके
पूजितो दिवि सर्वदा ॥ ५६ ॥ प्रावृट्काले स्थितं तोयमग्निष्टोमफलं लभेत् ॥ शरत्कालस्थितं तोयं यज्ञतोयाद्विशिष्यते ॥ ५७ ॥ निदाघकाले
पानीयं यस्य तिष्ठति वापिनः ॥ स्वर्गं गच्छेत्स नरकं न कदाचिदवाप्नुयात् ॥ ५८ ॥ एकाहं तु स्थितं तोयं पृथिव्यां द्विजसत्तमाः ॥ कुलानि
तारयेत्तस्य सप्त सप्त पराणि च ॥ ५९ ॥ पूर्वं पितृकुले सप्त तद्वन्मातृकुले द्विजाः ॥ चतुर्दशमिदं ज्ञेयं शतलेखं ततः शृणु ॥ ६० ॥ पितुरूर्ध्वं
कुलं विंशं मातुरूर्ध्वं कुलं तथा ॥ तद्वत्परं विजानीयाद्भार्यायाः पंच एव च ॥ ६१ ॥ पंच वै मातृतश्चास्य पितुर्मातामहे कुले ॥ पंच पंच विजा
नीयान्मातुर्मातामहस्य च ॥ ६२ ॥ गुरोः पितृकुले पंच तस्य मातृकुले तथा ॥ आचार्यस्य कुले द्वंद्वं दशराजकुलस्य च ॥ ६३ ॥ राज्ञो माता
महकुले पंच चैव प्रकीर्तिताः ॥ एकोत्तरं शतकुलं परिसंख्यातमेव च ॥६४॥ आत्मना सह विप्रेंद्रा उद्धारः संमतः स्मृतः ॥ कुर्याद्देवार्चनं तीर्थे
स्वविमुक्ते दशार्णवे ॥६५॥ समुद्धरेत्कुलशतं शृणु विंशकुलं द्विज ॥ पंच पंच च पित्रोश्च पितुर्मातामहस्य च ॥ ६६ ॥ मातुर्मातामहस्यैव जातिं
द्वंद्वमुदाहृतम्॥गुरोः संतानके द्वंद्वं तद्वद्यादवसात्त्वतौ ॥६७॥ परपक्षस्य चैकं स्यादेकविंशं कुलं क्रमात्॥पानीयमेतत्सकलं त्रैलोक्यं सचराचरम्॥
॥ ६८ ॥ पानीयेन विना वृत्तिर्लोके नास्तीति कर्हिचित्॥वारस्वस्थं पुष्पखंडं तोये पतति यावति ॥६९॥ तावत्कालं वसेत्स्वर्गे चान्ते ब्रह्मत्वमा
प्नुयात् ॥ तस्मात्तोयोपरि गृहं प्रसादोपरि वर्जयेत्॥७०॥ सूर्यरश्मियुतं यद्वै तत्तोयं तु विनिंदितम्॥चंद्ररश्मिविहीनं यन्नामृतत्वाय कल्पते ॥७१॥
तस्माद्दशगुणं कुंडे तस्माद्दशगुणं ह्रदे॥देवानां स्थापनं कुर्यादविमुक्तफलं शुभम् ॥७२॥ सुस्थितं दुःस्थितं वापि शिवलिंगं न चालयेत् ॥ चाल
नाद्रौरवं याति न स्वर्गं न च स्वर्गभाक् ॥७३॥ उच्छन्ननगरग्रामे स्थानत्यागे च विप्लवे ॥ पुनः संसारधर्मेण स्थापयेदविचारयन् ॥७४॥ बाहुदंता

---

१ हे द्विजेन्द्राः सुरवेश्मनि यावन्तः परमाणवः स्युस्तावद्वर्षसहस्राणि कर्त्ता स्वर्गे पूजितो भवतीत्यर्थः ।

दिप्रतिमा विष्णोश्चान्यस्य सत्तमाः॥न चालयेत्स्थापिते च विप्रवृक्षं न चालयेत् ॥७५॥ केशवं हरिवृक्षं च मधूकं किंशुकं तथा॥ नाकाले स्थाप
येज्जातु चालनाद्ब्रह्महा भवेत्॥७६॥देवालयस्य पुरतः कुर्यात्पुष्कारिणीं द्विजाः॥ब्राह्मणानां समाजे च राजद्वारे चतुष्पथे॥७७॥देवार्थे ब्राह्मणार्थे च
सुखं कुर्याच्च सर्वतः ॥ पश्चिमे पुष्टिकामं तु उत्तरे सर्वकामदम् ॥ ७८ ॥ याम्ये स्वार्थं न कुर्वीत कोणे तु नरकं भवेत् ॥ मुखं प्रकल्पयेन्मध्ये केचि
दुत्तरलंघनम् ॥ ७९ ॥ कुर्याद्दक्षिणपूर्वे तु अर्कहस्तप्रमाणतः ॥ तडागे तु फलाहस्तं हस्तिकं ह्रासयेत्क्रमात् ॥ ८० ॥ तृप्ये हस्तं नलिन्यादा
वतो हीनं न कारयेत् ॥ गर्ततृणं कलाहस्तं तडागेऽत्र प्रचक्ष्यते ॥ ८१ ॥ हीने हीनतरं कुर्याद्धस्तमानेन ह्रासयेत् ॥ यूपस्तथा खादिर एव
कार्यः श्रैपर्णिको धात्रिसमुद्भवश्च ॥ मानस्तथा षोडशहस्तसम्मितो रत्नात्सगण्डीयुगकामयोजितैः ॥ ८२ ॥ आनाहभग्ने च भवेच्च तस्य विंशां
गुलो द्विगुणो मध्यगश्च ॥ मध्येंऽगुलैश्च हीनः कार्यः शुभदः सर्वदा स्यात् ॥ ८३ ॥ एवंविधश्चैव तडागयूपो मध्ये तथा षोडशहस्तसंमितः ॥
कूपे च यूपोप्यथ हस्तमात्रस्ततश्चतुर्हस्तमितः प्रकीर्तितः ॥ ८४ ॥ आरामयोगेऽप्यथ मण्डपे च कार्यश्चतुर्हस्तमितोऽथ यूपः ॥ संपूर्णमाने
कथितं प्रमाणं हीने तु हीनं प्रवदंति तज्ज्ञाः ॥ हस्तद्वयं प्रापितव्यं तडागे हस्तः सार्धः पुष्करिण्यां प्ररोपः ॥८५॥ प्रादेशं वै हस्तमानं कूपयूपस्य
रोपतः ॥ न कुर्याज्जलमग्नं च यूपं सर्वत्र सत्तमाः ॥ ८६ ॥ तडागे चापि आरामे स्थापयेच्च जलोपरि ॥ हस्तमर्धं तदर्धं स्यान्मानेनानेन दाप
येत् ॥ वाप्यां गर्ते पुष्करिण्यां प्रकुर्याज्जलसंमितम् ॥ ८७ ॥ यावत्प्रतोलीगतरेणुसंगसंख्यागणो नो जरतामुपैति ॥ तावत्सुरेशः सुरलोकवासी
प्रासादकृज्जातु न जायते हि ॥८८॥ किं वा वाच्यः पुष्करिण्या प्रभावः कर्ता यः स्याद्वारुणो ब्रह्मलोकात् ॥ यावत्कालो बाहुमात्रोद्धता स्याद्द
ष्टिःप्रोक्ता न निवर्तेत्कदाचित् ॥ ८९ ॥ लक्षैकमाराममयोत्तमः स्यान्मध्यं तदर्धं च कनिष्ठमानम् ॥ तदर्धं वा प्रशस्तं तदनन्यं मुनयो वदंति ॥
विनार्जुनैर्बदरैः शैलुकैश्च हीनं कुयाच्छानलैः पातिलैश्च ॥ ९० ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि प्रथमभागे पूर्तनिर्णयो नाम नवमोऽ
ध्यायः ॥ ९ ॥ ॥छ॥ ॥ सूत उवाच ॥ ॥ शोधयेत्प्रथमं भूमिं मितां कृत्वा ततो द्विजाः ॥ दशहस्तेन दण्डेन पञ्चहस्तेन वा पुनः ॥ १ ॥
वाहयेत्सदा वृषभैस्तडागार्थेऽपि भूमिकाम् ॥ देवागारस्य या भूमिः श्वेतैश्च वृषभैरपि ॥ २ ॥ या भूमिर्ग्रहयागार्थे तत्र वाहैरपि स्पृशेत् ॥ आरा
मार्थे कृष्णवृषैः कूपार्थखननैरपि ॥ ३ ॥ वाहयेत्त्रिदिनं विप्राः पञ्चव्रीहींश्च वापयेत् ॥ देवपक्षे सप्तगुण आरामकरणे गुणः ॥ ४ ॥ मुद्गमाषौ धान्य
तिलाः श्यामाकश्चेति पञ्चमः ॥ मसूरश्च कलायश्च सप्तव्रीहिगणः स्मृतः ॥ ५ ॥ सर्षपश्च कलायश्च मुद्गो माषश्चतुर्थकः ॥ व्रीहित्रयं माषमुद्गौ

श्यामाको महिषो गणः ॥ ६ ॥ सुवर्णमृत्तिका ग्राह्या वर्णानामनुपूर्वशः ॥ बिल्ववृक्षैरियं कुर्याद्यूपशूनध्वजे दिने ॥७॥ अरत्निमात्रं विज्ञेयं प्रशस्तं
यष्टिहस्तकम् ॥ ऊर्णासूत्रमयीं मूर्तिं कृत्वा कुर्याच्चतुष्टयम् ॥ ८ ॥ क्षीरदारुगर्तयुतं द्वादशांगुलमेव च ॥ ज्वालयेत्तिलतैलेन तथा केशरजेन वा
॥ ९ ॥ पूर्वदिक्प्रणवे सिद्धिः पश्चिमाशागतिः शुभा ॥ मरणे दक्षिणायां च हानिः स्यादुत्तरे स्थिते ॥ १० ॥ कल्पे विपत्करं विद्यात्तथा चैव
च दिग्गते ॥ नारसिंहेन मनुना चाग्निं प्रज्वाल्य दापयेत् ॥ ११ ॥ मासे घटे तथा मासे कुर्याद्भूमिपरिग्रहम् ॥ सूत्रयेत्कीलयेत्पश्चान्महामाने
द्विजोत्तमाः ॥ १२ ॥ ततो वास्तुबलिं दद्यात्खनित्रं परिपूजयेत् ॥ आब्रह्मन्निति मन्त्रेण खनयेन्मध्यदेशतः ॥ १३ ॥ आज्येन मधुयुक्तेन गात्रमेकं
प्रलेपयेत् ॥ स्वर्णतोयैस्तथा रत्नतोयैः स्नात्वा प्रलेपयेत् ॥ १४ ॥ ईशानाभिमुखेनैव कूपपक्षे विदुर्बुधाः ॥ अकृत्वा वास्तुयागं च यस्तडागं समु
त्सृजेत् ॥ १५ ॥ तस्य वैवस्वतो राजा धर्मस्यार्धं निकृन्तति ॥ प्रासादे च तथारामे महाकूपे तथैव च ॥ १६ ॥ गृहारंभे च विप्रेंद्रा दद्याद्वास्तु
बलिं ततः ॥ शालैश्च खादिरैश्चैव पलाशैः केशरस्य च ॥१७॥ बिल्वस्य बकुलस्यैव कलौ यूपः प्रशस्यते ॥ शुना चक्रोदरकृतं तत्पार्श्वे तु ध्वज
द्वयम् ॥ १८ ॥ सर्पाकारस्तडागे च कूपे कुम्भाकृतिर्भवेत् ॥ आरामे पद्मपुष्पाभश्छत्रकारस्तु मंडले ॥१९॥ कुर्याच्छुनाकृतिं सेतौ विष्णुगेहे गदा
कृतिम् ॥ अश्वाकारं चाश्वमेधे नरमेधे नराकृतिम् ॥२०॥ गोयागे च वृषाकारं गृहयागे ध्वजाकृतिम् ॥ श्मशानगोप्रचारार्थं चैत्यवृक्षालयोत्तमाः
॥ २१ ॥ चक्राकारो लक्षहोमे कोटिहोमे हलाकृतिः ॥ नक्षत्राणि तथा मूलं शस्यते द्रुमरोपणे ॥ २२ ॥ एवं शस्योदितां भूमिं शुद्धां पूर्वप्लवा
न्विताम् ॥ परिगृह्य यजेद्देवं वनपालं शिखिध्वजम् ॥२३॥ सोमं च नागराजानं ततो बीजं सुशोधयेत् ॥ आनयेद्धारयेत्पश्चाद्रौद्रतापेन तापयेत् ॥
॥२४॥ दिनद्वयांतरे चैव मंत्रैश्च परिमंत्रयेत् ॥ गर्भाधानं ततः कुर्याद्विष्णुमंत्रं जपंस्त्रिधा ॥ २५ ॥ एवमस्येति मंत्रेण त्रिधा जप्त्वा विमार्जयेत् ॥
देहि मेति च मंत्रेण संप्रोक्ष्य दशवारिणा ॥२६॥ इत्यगृहीतमनुना पञ्चधा परिमंत्रितम् ॥ त्र्यंबकेनेति मंत्रेण बीजमारोपयेत्ततः ॥ २७ ॥ भार्या
मृतुमतीं स्नात्वा पञ्चमेऽहनि सत्तमाः ॥ उत्संगे स्थापयित्वा च चुम्बयेन्मंत्रयेत्ततः ॥ २८ ॥ एवं वृक्षस्य संस्कारमध्येऽपि त्वनुगच्छति ॥ तेन पुत्र
त्वमाप्नोति नात्र कार्या विचारणा ॥ २९ ॥ तुलस्या बीजमादाय वैष्णवर्क्षे द्विजोऽहनि ॥ खानयेदपि गोमूत्रबिंदुतोयैः प्रसेचयेत् ॥ ३० ॥ एतां
तु स्वर्गमाप्नोति सितकुंभे निपातयेत् ॥ एकरात्रं परिस्थाप्य तत आरोपयेद्भुवि ॥ ३१ ॥ अविधौ कूपवाप्यादौ खनने सूयते क्वचित् ॥ कुर्वंति
सहकारादिरोपणं ये नराधमाः ॥ लभंते न फलं तेषामिह चाभ्येत्यधोगतिम् ॥ ३२ ॥ नदीतीरे श्मशाने च स्वगृहस्य च दक्षिणे ॥ तुलसीरोपणं

कृत्वा याति कर्ता यमालयम् ॥ ३३ ॥ पत्रपुष्पफलानां च रजोरेणुसमागमाः ॥ पोषयंति च पितरं प्रत्यहं प्रतिकर्मणि ॥ ३४ ॥ यस्तु वृक्षं
प्रकुरुते छायापुष्पफलोपगम् ॥ पथि देवालये चापि पापात्तारयते पितॄन् ॥ कीर्तिश्च मानुषे लोके प्रत्यभ्येति शुभं फलम् ॥ ३५ ॥ अतीताना
गताश्चातः पितॄन्स स्वर्गतो द्विजाः॥ तारयेद्वृक्षरोपी च तस्माद्वृक्षं प्ररोपयेत् ॥३६॥ अपुत्रस्य हि पुत्रत्त्वं पादपा इह कुर्वते ॥ यत्नेनापि च विप्रेंद्रा
अश्वत्थारोपणं कुरु ॥ ३७ ॥ शतैः पुत्रसहस्राणामेक एव विशिष्यते ॥ कामेन रोपयेद्विप्रा एकद्वित्रिप्रसंख्यया ॥ ३८ ॥ मुक्तिहेतुः सहस्राणां
लक्षकोटीनि यानि च ॥ धनी चाश्वत्थवृक्षे च अशोकः शोकनाशनः ॥३९॥ प्लक्षो भार्याप्रदश्चैव बिल्व आयुष्यदः स्मृतः ॥ धनप्रदो जंबुवृक्षो ब्रह्मदः
प्लक्षवृक्षकः ॥ ४० ॥ तिंदुकात्कुलवृद्धिः स्याद्दाडिमी कामिनीप्रदः ॥ बकुलो वंजुलश्चैव पापहा बलबुद्धिदः ॥ ४१ ॥ स्वर्गप्रदा धातकी स्याद्वटो
मोक्षप्रदायकः ॥ सहकारः कामप्रदो गुवाकः सिद्धिमादिशेत् ॥ ४२ ॥ सर्वशस्यं बलवले मधुके चार्जुने तथा ॥ कदंबे विपुला कीर्तिस्तिंतिडी
धर्मदूषिकः ॥ ४३ ॥ जीवंत्या रोगशांतिः स्यात्केशरः शत्रुमर्दनः ॥ धनप्रदश्चैव वटो वटः श्वेतवटस्तथा ॥ ४४ ॥ पनसे मंदबुद्धिः स्यात्कलि
वृक्षः श्रियं हरेत् ॥ कलिवृक्षं च शाखोट उदरावर्तकं तथा ॥ ४५ ॥ तथा च [1]मर्कटीनीपरोपणात्संततिक्षयः ॥ शिंशपां चार्ज्जुनं[2] चैव जयंती हयं
मारकान् ॥ श्रीवृक्षं किंशुकं चैव रोपणात्स्वर्गमादिशेत् ॥ ४६ ॥ न पूर्वांरोपयेज्जातु समिधं कंटकीद्रुमम् ॥ कुशं पद्मं जलजानां रोपणाद्दुर्गतिं
व्रजेत् ॥ ४७ ॥ मंदारे कुलहानिः स्याच्छाल्मले शुक्रबुद्धिमान् ॥ निंबे पशुविनाशः स्याच्छत्राके कुलपांसलः ॥ ४८ ॥ उत्पन्ने कुलपातः स्या
त्पशोरेव क्षयो भवेत् ॥ शत्रुवृद्धिः काकनादे बलपूगे हतश्रियः ॥ ४९ ॥ विना क्रतौ विरुद्धश्च न सिंहं द्विजसत्तमाः ॥ क्रतौ हि स्याद्विरुद्धश्च
प्राप्नुयान्नरकाकृतिम् ॥ ५० ॥ सहकारसहस्रात्तु वरिष्ठं धातकीद्वयम् ॥ तस्माच्चैव सहस्राद्धि पाटलैका विशिष्यते ॥ ५१ ॥ पाटलानां शतात्प
श्चादेकरक्तवटो भवेत् ॥ वटानां द्विसहस्राच्च पंचकं नागकेशरम् ॥ ५२ ॥ तस्माद्वरिष्ठः श्रीवृक्षो जम्बूवृक्षः प्रशस्यते ॥ तस्माद्धिमवतो ज्ञेयः
श्रीपर्णीवृक्ष उत्तमः ॥ ५३ ॥ तिंदुकस्य त्रयश्चैव जंबूवृक्षस्य पंचकम् ॥ कदंबार्जुनवृक्षस्य नारिकेरस्य च त्रयम् ॥ एवमुक्त्वा स धर्मात्मा कारये
त्कीदृशं बलम् ॥ ५४ ॥ कल्पकोटिसहस्राणि कल्पकोटिशतानि च ॥ स्वर्गभोगं समश्नाति विधिवद्द्रुमरोपणे ॥ ५५ ॥ जन्मत्रयादिकं पापं
विनाश्य स्वर्गमादिशेत् ॥ शतरोपी च ब्रह्मत्वं विष्णुत्वं च सहस्रके ॥ ५६ ॥ तुलसीरोपणाच्चैत्र आधिव्याधियुतो भवेत् ॥ वैशाखे कीर्तिमाप्नोति

---

१ केवाँछ इत्युदीच्यभाषयोच्यते । २ करवीरान् । इह सर्वत्र शेषषष्ठीविषये कर्मत्वमार्षम् ।

ज्येष्ठे तु मरणं व्रजेत् ॥ ८७ ॥ आषाढे कीर्तिमाप्नोति श्रावणे परमां गतिम् ॥ भाद्रे धनागमश्चैव आश्विने कार्तिके क्षयः ॥ तुलसी त्रिविधा
लोके कृते श्वेता प्रशस्यते ॥ ८८ ॥ किंचिच्छेदं च यः कुर्यादश्वत्थस्य वटस्य च ॥ श्रीवृक्षस्य च विप्रेंद्राः स भवेद्ब्रह्मघातकः ॥ ८९ ॥ मूलच्छे
देन विप्रेंद्राः कुलपातो भवेदनु ॥ वृक्षच्छेदी भवेन्मूक आधिव्याधिशतं भजेत् ॥ सायं प्रातश्च घर्मांते शीतकाले दिनांतरे ॥ ९० ॥ फलमामकुल
त्थश्च माषो मुद्गास्तिला यवाः ॥ नृत्यगीतपयःकेशफलपुष्पप्रदो भवेत् ॥ ९१ ॥ अविकाकसकृच्चूर्णं यवचूर्णानि यानि च ॥ गोमांसमुदकं चैव
सप्तरात्रं निधापयेत् ॥ ९२ ॥ तमेकं सर्ववृक्षाणां फलपुष्पादिवृद्धिदम् ॥ रोहिमत्स्यस्य पित्तानि धान्याकं तत्र स्थापयेत् ॥ ९३ ॥ तेनोदकादिसे
कश्च कृतो वै वृद्धिमादिशेत् ॥ तित्तिडीबीजमादाय इक्षुदंडेन मर्दयेत् ॥९४॥ तेनाशोके प्रसेकः स्यात्सहकारस्य वृद्धिमान् ॥ नालिकेरोदकं चैव
माक्षिकैः सह सेचयेत् ॥ ९५ ॥ दोहदं सर्ववृक्षाणां पूगादीनां विशेषतः ॥ दशशिराबीजयुतादभिषेकाच्च जीवति ॥ ९६ ॥ प्राक्प्रसूतिर्गवादीनां
छागादिमहिषस्य च ॥ जरायु तोयं वृक्षाग्रे स्थापयेदविचारयन् ॥ ९७ ॥ परस्य सहकारस्य फलं स्यान्नात्र संशयः ॥ मेषस्य च वितालस्य
यवागूं च समाहरेत् ॥ ९८ ॥ तत्र मासैः सर्षपैश्च पूरयेन्मर्दयेत्ततः ॥ गुवाकवृक्षकं देव घर्षयेन्मर्दयेत्त्रिभिः ॥ ९९ ॥ मृतोऽपि जीवयेच्छीघ्रं
म्रियमाणोऽपि जीवति ॥ निंबपत्रं योगपत्रं शतावारिपुनर्नवाम् ॥ ७० ॥ क्षीरिकाताम्रकैः पत्रैर्धूमं दद्याद्दिनत्रयम् ॥ सहकारस्य मूलेन कीट
रोधो न जायते ॥ ७१ ॥ ततः प्राधान्यतो वक्ष्ये द्रुमाणां दोहदोऽन्यथा ॥ मत्स्योदकेन सिक्तेन आम्राणां वृद्धिरिष्यते ॥ ७२ ॥ पक्वाम्रं
रुधिरं चैव दाडिमानां प्रशस्यते ॥ यवोदकं सगोमांसं केतकीनां प्रशस्यते ॥ ७३ ॥ क्षीरके बलवृद्धिः स्यात्तिंदुकः करमर्दकः ॥
मांसपूति रसामज्जा शोकताले गुवाकके ॥ ७४ ॥ सपूतिमांसं सघृतं नालिकेरस्य रोहितम् ॥ मधुयष्ट्युदकैः सेकात्सामान्यं निहितं
भवेत् ॥ ७५ ॥ कपित्थबिल्वयोः सेकं गुडतोयेन सेचयेत् ॥ जातीनां मल्लिकानां च कुंदानां रंतिकस्य च ॥ ७६ ॥ गंधतोयसित
करं सर्पनिर्मोकधूपकम् ॥ कूर्ममांसमन्नरसं विडंगस्य च पुष्पकम् ॥ ७७ ॥ रथ्यावृक्षे प्रतिष्ठाप्य फलवाञ्जायते ततः ॥ वातसर्पस्य निर्मोकं तग
राजगवस्य च ॥ ७८ ॥ दद्याद्धूपं धान्यमध्ये धान्यवृद्धिश्च जायते ॥ मयूरपत्रमादायच्छागरोमाणि सप्त वै ॥ ७९ ॥ एरंडतैलयोगेन दद्याद्धूपं
निशागमे ॥ हिंगुकुसुमसंयोगान्मूषिकाणां परिन्यसेत् ॥ ८० ॥ करिविष्ठामृच्छविष्ठां कृत्तिकायां समाहरेत ॥ निशातोये प्रसेकः स्यात्तत्क्षात्र
मूलकं हरेत् ॥ ८१ ॥ अश्वत्थमूले दशहस्तमात्रं क्षेत्रं पवित्रं पुरुषोत्तमस्य ॥ अश्वत्थच्छायासलिलस्य मध्ये विशेषतो वै त्रिपथैव गंगा ॥ ८२ ॥

बाहुविंशांतरे रोपेत्सहकारं स धर्मवित् ॥ कलाहस्तांतरं धात्रीं बकुलं वंजुलं तथा ॥ ८३ ॥ श्रैपर्णिकं च पुन्नागं श्रीवृक्षं द्विगुणं तरौ ॥ हस्ते शैल
मये चैव उत्तमं मानमीरितम् ॥ ८४ ॥ शैलेष्टकादिरचिते चतुर्हस्ते तु संमिते ॥ वाप्यादीनां तु कूपानामेकवृक्षादिकस्य च ॥ ८५ ॥ श्रीविष्णो
र्वृक्षपक्षे च वरुणेष्टं च कूपके ॥ गणेशं पूजयेत्कुम्भं दिक्पालांश्च विशेषतः ॥ ८६ ॥ अग्निकार्यं विना कुर्यात्प्रकुर्याच्च सतां गतिम् ॥ श्रुत्वा
कृतिं विधानेन अन्येषां वा तथोद्भवम् ॥ ८७ ॥ अन्येषां चैव वृक्षे च तथा च तुलसीवने ॥ कुम्भे वनस्पतिः स्थाप्यः पूजयेद्धोमयेत्ततः॥ ८८ ॥
वृक्षान्वानेन संस्कृत्य वासोभिरभिवेष्टयेत् ॥ शुच्यमानमिदं ज्ञेयमन्येषां वा तथोद्भवम् ॥ ८९ ॥ तुलस्याः सहकारस्य ब्रह्मवृक्षस्य चैव हि ॥
अश्वत्थस्य वटस्यैव स्वर्णतामथ वेधयेत् ॥ ९० ॥ ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि प्रथमभागे दशमोऽध्यायः ॥ १० ॥ ॥छ॥
॥ ॥ सूत उवाच ॥ ॥ अथ तंत्रविधिं वक्ष्ये पुराणेष्वपि गीयते ॥ तन्त्रे चैव प्रतिष्ठां च कुर्यात्पुण्यतमेऽहनि॥१॥शतवृक्षक्षुद्रवृक्षे दशद्वादश
वृक्षके ॥ दृष्टिमात्रांतरे सेतौ कूपयागे समुत्सृजेत् ॥२॥ न कूपमुत्सृजेज्जातु वृक्षयागे कथंचन ॥ तुलसीवनयागे तु न चान्यं यागमाचरेत् ॥ ३ ॥
तडागयागे सेत्वादीन्न चारामे कदाचन ॥ न सेतुं देवयागे तु तडागं न समुत्सृजेत् ॥४॥ तंत्रे श्राद्धं पृथङ्नास्ति कर्तुर्भेदे पृथग्भवेत् ॥ शिवलिंग
स्थापनायां न चान्यद्देवस्थापनम् ॥५॥ स्वदेशे वर्जयेत्तं तं स्वतन्त्रेण विधीयते ॥ विपरीते कृते चापि आयुःक्षय इति स्मृतिः ॥६॥ तडागे पुष्क
रिण्यां वा आरामेऽपि द्विजोत्तमाः ॥ मानहीने मानपूर्णे दशहस्ते न दूषणम्॥७॥द्विसहस्राधिकं यत्र तत्प्रतिष्ठां समाचरेत्॥ दश द्वादशवृक्षे च आरा
मे पूर्ववद्द्विजाः ॥८॥ प्रतिष्ठां बिल्ववृक्षे च अन्यथा कर्णवेधनम् ॥ कुर्याद्दोहददानं च तत्र निर्मंथनादिकम् ॥९॥ अनंतरं प्रदातव्या लाजा मूर्धन्यं
क्षतादिकम् ॥ १० ॥ ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि पूर्वभागे एकादशोऽध्यायः ॥ ११ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ प्रति
मालक्षणं वक्ष्ये यथाशास्त्रमतं द्विजाः ॥ प्रतिमां लक्षणैर्हीनां गृहीतां नैव पूजयेत् ॥ १ ॥ शैलजा दारुजा ताम्री मृद्भवा सर्वकामदा ॥ एकहस्ता
द्विहस्ता वा सार्धहस्ता तथापि वा ॥ २ ॥ प्रासादमानमथवा अथवा सर्वलक्षणम् ॥ अष्टांगुलोत्सेधकं च न तु गेहेऽर्चयेत्कृती ॥ ३ ॥ देवागा
रस्य यद्द्वारं तस्मादष्टांगुलेन तु ॥ त्रिभागपिंडिका कार्या द्वौ भागौ प्रतिमा भवेत् ॥ ४ ॥ अंगुलं वै भवेद्वृद्धिरशीतिश्चतुरुत्तरा ॥ विस्तारमानतः
कार्यं वदनं द्वादशांगुलम् ॥ ५ ॥ मुखत्रिभागे चिबुकं ललाटं नासिकां तथा ॥ कर्णौ नासिकया ग्रीवातुल्यौ वा नियतौ तु यौ ॥ ६ ॥ नयने
द्व्यंगुले स्यातां त्रिभागा तारका भवेत् ॥ तृतीयतारकाभागे शुभदृष्टिं विचक्षणः ॥ ७ ॥ ललाटमस्तकग्रीवं कुर्यात्तत्सममेव तु ॥ परिणाहस्तु

शिरसो भवेद्द्वात्रिंशदंगुलः ॥ ८ ॥ तुल्यौ नासिकया ग्रीवा मुखेन हृदयांतरम् ॥ अथ विस्तारपंक्तिस्तु ततोऽर्धं तु कटिः सदा ॥ ९ ॥ बाहू च
बाहुतुल्यौ च ऊरू जंघे च जाघनम् ॥ गुल्फावस्थस्तु पादः स्याद्घाटितश्चतुरंगुलः ॥ षडंगुलस्तु विस्तारस्तुल्यांगुष्ठोंऽगुलत्रयम् ॥ १० ॥ प्रदे
शिनी च तत्तुल्या हीना शेषान्नखानखम् ॥ चतुर्दशांगुलः पादस्यायामः परिकीर्तितः ॥ ११ ॥ एवं लक्षणसंयुक्ता सा पूज्या प्रतिमा शुभा ॥ अध
रोष्ठस्तथैवोरुभ्रूललाटमनीषिकम् ॥ १२ ॥ गंडं च नियतं मूर्तौ कुर्यादंगसमुन्नतेः ॥ विशालनयनस्ताम्रपदो वायतलोचनः ॥ १३ ॥ सवितानल
पत्रस्य चारुविद्याधरस्तथा ॥ वत्सप्रोक्तोऽतिमुकुटः कटकांगदहारवान् ॥ १४ ॥ अभ्यंगपदबन्धादि सामान्येनोपशोभि च ॥ सुप्रभामंडला चारु
विचित्रमणिकुण्डला ॥ १५ ॥ कराभ्यां कांचनीं मालां प्रोद्वहंतीं शिरोरुहान् ॥ एवं लक्षणसंपन्नां कारयेद्द्विहितप्रदाम् ॥ १६ ॥ सुस्निग्धां
वरदां सौम्यां द्वितीयाश्रमिणामिमाम् ॥ नवतालो भवेद्विष्णुर्वासुदेवस्त्रितालकः ॥ १७ ॥ नृसिंहः पञ्चतालः स्याद्धयग्रीवस्तु पंचमः ॥ नारा
यणश्चाष्टतालो महेशः पञ्चतालकः ॥ १८ ॥ नवताला भवेद्दुर्गा लक्ष्मीश्चैव त्रितालिका ॥ वाणीं त्रितालिकां विद्यात्सविता सप्तता
लकः ॥ १९ ॥ दक्षिणे वासुदेवस्य करे चक्रं प्रतिष्ठितम् ॥ शंखो भवेच्च तदधो वामार्धे तस्य वै गदा ॥ २० ॥ तदधश्च भवेत्पद्मं
श्रीवत्सेनोपशोभितम् ॥ सव्येऽर्धे तारकास्यं च त्रिनेत्रमुभयात्मकम् ॥ २१ ॥ पार्श्वे नलिनसिंहौ द्वौ सुभद्रां दक्षिणे न्यसेत् ॥ रुक्मिणीं
वामभागे च तदधस्ताद्दिवींद्रकम् ॥ २२ ॥ कृतांजलिपुटस्थश्च नारदः कपिलस्तथा ॥ धर्माधर्मावुभौ पार्श्वे कर्तव्यौ स्रग्विणां वरौ ॥ २३ ॥
यदुग्रं वासुदेवस्य तथा नारायणस्य च ॥ वैपरीत्यं विजानीयान्माधवानां तथैव च ॥ २४ ॥ तीर्थे गिरौ तडागे च समीपे स्थापयेत्सुधीः ॥
नगरग्राममध्ये वा ब्राह्मणानां च संसदि ॥ २५ ॥ अविमुक्ते विशेषेण सिद्धक्षेत्रे दशार्णके ॥ त्रीण्युत्तरसहस्राणि पंचपंचोत्तराणि षट् ॥ २६ ॥
कुलानि पूर्वं विप्रेंद्राः समुद्धरति नान्यथा ॥ कलौ दारुमयः कार्यो ह्यशक्तौ मृन्मयोथ वा ॥ २७ ॥ चंदनागुरुभिः कुर्याद्बिल्वश्रीपर्णिकस्य
च ॥ पद्मकाष्ठमयश्चैव वाममस्य तथैव हि ॥ २८ ॥ ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि प्रथमभागे द्वादशोऽध्यायः ॥ १२ ॥ ॥ छ ॥
॥ ॥ सूत उवाच ॥ ॥ अतः परं प्रवक्ष्यामि कुंडानामथ निर्णयम् ॥ तस्योद्धारं च संस्कारं शृणुध्वं द्विजसत्तमाः ॥ १ ॥ चतुरस्रं च वृत्तं
च पादार्धं चार्धचंद्रकम् ॥ योन्याकारं चंद्रकं च अष्टार्धमथ पंचमम् ॥ २ ॥ सप्तार्धं च नवार्धं च कुंडं दशकमीरितम् ॥ भूमिं संशोध्य विधिव
त्तुषकेशादिवार्जिताम् ॥ ३ ॥ भ्रामयेच्चोर्ध्वतस्तस्या भस्मांगाराणि यत्नतः ॥ अंकुरार्पणकं कुर्यात्सप्ताहादेव बुद्धिमान् ॥ ४ ॥ स्थानं विमर्दितं

कुर्यात्खनित्वा सेचयेज्जलैः ॥ पुष्टिहस्तोच्छ्रायमितं प्रकुर्यात्परिसूत्रयेत् ॥ ५ ॥ अर्कांगुलमितं सूत्रं चतुरस्रं प्रकल्पयेत् ॥ अष्टादशांगके क्षेत्रे
न्यसेदेकं बहिस्ततः ॥ ६ ॥ मापयेत्तेन मानेन त्रिवृत्तं कुंडमुज्ज्वलम् ॥ पूर्ववद्विभजेत्क्षेत्रं भागैकं पुरतो न्यसेत् ॥ ७ ॥ वृत्तानि कालिकादीनि
बहिस्त्रीणि विवर्जयेत् ॥ पद्मकुंडमिदं प्रोक्तं विलोचनमनोहरम् ॥ ८ ॥ दशधा भेदयेत्क्षेत्रे उर्ध्वाधोर्ध्वांगुलद्वयम् ॥ संपरिपातयेत्सूत्रं पाटयेत्तत्प्र
माणतः ॥ ९ ॥ पंचधा भेदिते क्षेत्रे कामं वा विभजेत्सुधीः ॥ न्यसेत्पुरस्तादेवांगं कोणार्धार्धप्रमाणतः ॥ १० ॥ योनिस्थानं प्रतिष्ठाप्य अश्व
त्थस्य दलाकृति ॥ सूत्रद्वयं ततो दद्यात्कुंडं परिमितं भवेत् ॥ ११ ॥ चतुरस्रं समुद्धृत्य सूत्रं संकल्पयोगतः ॥ दिशं प्रति यथान्यायं पातयेच्च
द्विजोत्तमाः ॥ १२ ॥ शृंगाटकं युग्मपुट षडस्रं कुंडत्रयं बुधाः ॥ जलाशयारामकूपे नित्ये गृहमये यथा ॥ १३ ॥ चतुस्रं भवेत्कुंडं द्विजसंस्कारक
र्मणि ॥ देवप्रतिष्ठायागे च गृहवास्तौ चतुर्थकम् ॥ १४ ॥ वसुंधरायोगभेदे प्रपंचे वर्तमादिशेत् ॥ सोमेऽष्टौ पंकजं प्रोक्तं नरमेधाश्वमेधयोः ॥
॥ १५ ॥ अंकुरार्पणयागे च वैष्णवे यागकर्मणि ॥ शिवदेव्योश्च जन्मादावष्टम्यां चार्धचंद्रकम् ॥ १६ ॥ मार्जारपौष्टिके वैरं रम्ये च शांतिके
तथा ॥ शांतिप्रतिष्ठायागे तु शाक्तानां काम्यकर्मणि ॥ १७ ॥ पुरश्चरणकाम्येषु ज्वरादीनां विमोक्षणे ॥ एवंविधेषु कार्येषु योनिकुंडं प्रशस्यते ॥
॥ १८ ॥ देवतातीर्थयात्रादौ महायुद्धप्रवेशने ॥ सौरे शांते पौष्टिके च षट्पुरं कुंडमुत्तमम् ॥ १९॥ मारणोच्चाटने चैव तथा रोगोपशांतये ॥ वैष्ण
वानां कोटिहोमे नृपाणामतिशोचने ॥ २० ॥ अष्टास्रमब्जकुंडं च सप्तास्रं निधिसाधने ॥ राज्ञा साध्ये च पंचास्रं कन्याप्राप्तौ त्रिरस्रकम् ॥२१॥
यावन्निम्नं भवेदेव विस्तारस्तावदेव तु ॥ कुंडानुरूपतः कार्या मेखला सर्वतो बुधैः ॥ २२ ॥ अयुतादिषु होमेषु मेखलां योजयेत्सुधीः ॥ निम्न
प्रमाणे चात्रापि मूले सार्धांगुलं त्यजेत् ॥ २३ ॥ कोणवेदरसैर्मानं यथायोग्यमनुक्रमात् ॥ मुष्टिहस्ते समुत्सेधो सार्धांगुलपरिष्कृतः ॥ २४ ॥
अरत्निमात्रे कुंडे तु त्रिश्चैकांगुलतः क्रमात् ॥ एकहस्तमिते कुंडे वेदाग्निनयनांगुलाः ॥ २५ ॥ सप्तमेखलकं युक्तं लक्षहोमे न शस्यते ॥ पंचमे
खलकं वाथ लक्षकोट्यां च योजयेत् ॥ २६ ॥ एकांगुलादिमानेन नेमिं संवर्धयेत्सुधीः ॥ चतुर्हस्तमिते कुंडे तावदेव गुणांगुलाः ॥ २७ ॥
वसुहस्ते भानुपंक्तिर्युग्महीनेऽपि ताः क्रमात् ॥ सर्वाः समा ग्रहमखे मेखलाश्च सहस्रके ॥ २८ ॥ पार्श्वतो योजयेत्तत्र मेखलास्ता यथाक्रमम् ॥
सार्धांगुलादिमानेन नेमिं संवर्धयेत्सुधीः ॥ २९ ॥ एकमेखलयागेन योजयेच्छक्तिभावतः ॥ होमाधिक्ये बहुफलमन्यूनं नाधिकं भवेत् ॥३०॥
कुंडस्य रूपं जानीयात्परमं प्रकृतेर्वपुः ॥ ततो होमे शतगुणं स्थंडिले स्वल्पकं फलम् ॥ ३१॥ षट्चतुर्धा गुणायामविस्तारोन्नतिशालिनी ॥ एकां

गुलं तु योन्यग्रं कुर्यादीषदधोमुखम् ॥ ३२ ॥ एकैकांगुलतो योनिं कुंडशून्येषु वर्धयेत् ॥ सममध्ये मेखलायाः सपर्या या सुलक्षणा ॥ ३३ ॥ स्थापयेत्कुंडकोणेषु योनिं तां द्विजसत्तमाः ॥ कुंडानां कल्पयेन्नाभिं स्फुटमंबुजसन्निभाम् ॥ ३४ ॥ तत्तु कुंडानुरूपं वा सुव्यवतं सुमनोहरम् ॥ योनिकुंडे योनिमब्जं कुंडे नाभिं च वर्जयेत् ॥ ३५ ॥ यावद्द्वयप्रमाणेन अर्धांगुलक्रमाद्बहिः ॥ नाभिं प्रवर्धयेदेकं कुडानां रूपतो यथा ॥ ३६ ॥ तत्र तत्र भवेत्कुंडं बिंबशून्यं न होमयेत् ॥ शिवशक्तिसमायोगात्काम उत्पद्यते यतः ॥ ३७ ॥ अवटोपि उमादेवी बिंबः ख्यातः सदाशिवः ॥ न कुर्यादेकया हीनं मरणं च समुद्दिशेत् ॥३८॥ त्रयोदशांगुलं हित्वा वह्निहस्तमथापि वा ॥ महातीर्थे सिद्धक्षेत्रे यत्र शंभुगृहे कुले ॥ ३९ ॥ तस्य दक्षिणदिग्भागे अग्रतो मंडलं लिखेत् ॥ तत्र पूजा प्रकर्तव्या पूर्वमानेन चाश्रयेत् ॥४०॥ अर्कहस्तांतरे कुर्याच्छतो ध्वांते शतेन वा ॥ ४१ ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि प्रथमभागे त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ यस्य यज्ञस्य यन्मानं तत्तु तेनैव योजयेत् ॥ अमानेन हतो यज्ञस्तस्मान्मानं न हापयेत् ॥ १ ॥ शतार्धं प्रथमं मानं शतसाहस्रमेव च ॥ अयुतं च तथा लक्षं कोटिहोममतः परम् ॥२॥ अतः परं तु विभवे राजा वान्यो द्विजोतमाः ॥ न स सिद्धिमवाप्नोति अयागफलभाग्भवेत् ॥३॥ विपाकं कर्मणां सर्वं नरः प्राप्नोति सर्वदा ॥ शुभाशुभं ततो नित्यं प्राप्नोति मनुजः किल ॥ ४ ॥ युक्ताश्चापि ग्रहास्तत्र नित्यं शांतिकपौष्टिके ॥ तस्मात्प्रयत्नतो भक्त्या नित्यं पूजा यथाविधि ॥ ५ ॥ अद्भुते च तथा शांतिं कुर्याद्भक्तिसमन्वितः ॥ तस्माद्ग्रहाभिजनितं शुभाशुभफलं खलु ॥ ६ ॥ अद्भुतेषु च सर्वेषु अयुतं कारयेन्नरः ॥ होमं यथाभिरुचितं पौष्टिके काम्यकर्मणि ॥ ७ ॥ लक्षहोमं कोटिहोमं राजा कुर्याद्यथाविधि ॥ अन्यः शतादिकं कुर्यादयुतं विभवे सति ॥ ८ ॥ ग्रहाणां लक्षहोमस्तु कोटिहोमस्तथा कलौ ॥ निधिहोमं चाभिचारं तत्र कुर्याद्गृहाश्रमी ॥ ९ ॥ यत्र यत्र जपः कार्यो होमो वा यत्र कुत्रचित् ॥ मानं नैव च कर्तव्यं मानादौ चाष्टकं न्यसेत् ॥ १० ॥ युग्मसाध्यं न कर्तव्यं युग्मतो भयमादिशेत् ॥ लक्षे सप्ततालसंख्या कोटिहोमे च विंशतिः ॥ ११ ॥ एकत्रिंशद्दिनैर्वापि न कुर्याद्व्यत्ययं क्वचित् ॥ आरंभस्त्रिसहस्रः स्याद्द्वितीयेऽष्टसहस्रकः ॥ १२ ॥ तृतीये तु सहस्रं स्याद्ग्रहसाध्यः स्मृतो विधिः ॥ पञ्चाहे च समारंभे सहस्रं जुहुयाद्बुधः ॥ १३ ॥ द्वितीयेऽह्नि द्विसाहस्रं तृतीये तु सहस्रकम् ॥ गुणसाहस्रकं तुर्यें पञ्चाहे शेषमीरितम् ॥ १४ ॥ नवाहे कल्पयेल्लक्षमेकैकांगं दिने दिने ॥ पंचमे च तथा षष्ठे कुले भागद्वयाधिकम् ॥ १५ ॥ कोटिहोमे च तिथ्यंगे शतभागेन कल्पयेत् ॥ न न्यूनं नाधिकं कार्यमेतन्मानमुदाहृतम् ॥ १६ ॥ नित्यमेकं दिने दद्यात्पृथङ्नित्यं

न चाचरेत् ॥ स समाजे जपेन्नित्यं पञ्चतारेण स्विष्टकृत् ॥ १७ ॥ अयुते लक्षहोमे च कोटिहोमे च सर्वदा ॥ प्रथमे दिवसे कुर्याद्देवतानां च स्थापनम् ॥ १८ ॥ महोत्सवे द्वितीये तु बलिदानं तथैव च ॥ त्र्यहसाध्ये त्रिरात्रे च पूर्णं कृत्वा विसर्जयेत् ॥ १९ ॥ पञ्चाहे तु तृतीयेऽह्नि बलिदानं प्रशस्यते ॥ सप्ताहे चाष्टदिवसे नवाहे पंचमेऽहनि ॥ २० ॥ पञ्चाहे द्वादशाहे तु द्वात्रिंशत्षोडशेऽहनि ॥ इतोऽन्यथा न कुर्वीत नात्र यज्ञफलं लभेत् ॥ २१ ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि प्रथमभागे चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ छ ॥

॥ सूत उवाच ॥ ॥ कुण्डानामथ संस्कारे वक्ष्ये शास्त्रमतं यथा ॥ असंस्कृते चार्थहानिस्तस्मात्संस्कृत्य होमयेत् ॥ १ ॥ अष्टादश स्युः संस्काराः कुण्डानां तत्र दर्शिताः॥ तारेणावेक्षयेत्स्थानं कुशतोयैः प्रसेचयेत् ॥२॥ त्रिसूत्रीकरणं पश्चाद्वृत्तसूत्रं निपातयेत् ॥ वारेण कीलकं दद्यान्नारसिंहेन कुड्मलम् ॥३॥ जिह्वां प्रकल्पयेत्पश्चात्तस्मादग्निं समाहरेत् ॥ न च म्लेच्छगृहादग्निं न शूद्रनिलयात्क्वचित् ॥ ४ ॥ नदीपर्वतशालाभ्यः स्त्रीहस्तात्परिवर्जयेत् ॥ संस्कृत्य परिगृह्णीयात्त्रिधा कृत्वा समुद्धरेत् ॥ ५ ॥ तमग्निं प्रतिगृह्णीयादात्मनोऽभिमुखं यथा ॥ वह्निबीजेन मतिमाञ्छिवबीजेन प्रोक्षयेत् ॥ ६ ॥ वागीश्वरीमृतुस्नातां वागीश्वरसमागताम् ॥ ध्यात्वा समीरणं दद्यात्काममुत्पद्यते ततः ॥ ७ ॥ कालबीजेन चैशान्यां योनावग्निं विनिक्षिपेत् ॥ पश्चाद्देवस्य देव्याश्च दद्यादाचमनीयकम् ॥ ८ ॥ पितृपिङ्गल दहदह पचयुग्ममुदीर्य च ॥ सर्वज्ञाज्ञापय स्वाहा मन्त्रोयं वह्निपूजने ॥ ९ ॥ वह्निबर्हिषि संयुक्ताः सादियांताः सबिंदवः ॥ वह्निमन्त्राः समुद्दिष्टा द्विजानां मंत्र ईरितः ॥ १० ॥ जिह्वास्तास्त्रिविधाः प्रोक्ता यज्ञदत्तेन सत्तमाः ॥ हिरण्यामाज्यहोमेषु होमयेत्संयतात्मकः ॥ ११ ॥ त्रिमध्वक्तैर्यत्र होमं कर्णिकायां च होमयेत् ॥ कनकास्यात्तु कृष्णास्याद्धिरण्या शुभ्रता तथा ॥ १२ ॥ बहुरूपातिरूपा च सात्त्विका योगकर्मसु ॥ विश्वमूर्तिस्फुलिंगिन्यौ धूम्रवर्णा मनोजवा ॥१३॥ लोहितास्यात्करालास्यात्कालीभासस्य इत्यपि॥ एताः सप्त नियुंजीत विज्ञेयाः क्रूरकर्मसु ॥१४॥ समिद्धेदेषु या जिह्वास्तास्तु तेनैव योजयेत् ॥ हिरण्यामाज्यहोमेषु होमयेत्संयतात्मकः ॥१५॥ त्रिमध्वक्तैर्यथा होमं कर्णिकायां च होमयेत् ॥ शुद्धक्षीरेण रक्तायां नैत्यिकेषु प्रभा स्मृता ॥ १६ ॥ बहुरूपा पुष्पहोमे कृष्णा चान्नेन पायसैः ॥ इक्षुहोमे पद्मरागा सुवर्णा पद्महोमके ॥१७॥ लोहिता पद्महोमे च श्वेता वै बिल्वपत्रके ॥ धूमिनी तिलहोमे च काष्ठहोमे करालिका ॥ १८ ॥ लोहितास्या पितृहोमे ततो ज्ञेया मनोजवा ॥ वैश्वानरं स्थितं होमे समिद्धोमेषु सत्तमाः ॥ १९ ॥ समानमाज्यहोमे च निषण्णं शेषवस्तुषु ॥ आस्यात्तु जुहुयाद्वह्नौ पिपर्त्ति सर्वकर्मसु ॥ २० ॥ कर्णहोमे तु वै व्याधिर्नेत्रे तद्वयमीरितम् ॥ नासिकायां मनःपीडा मस्तकेऽध्वा

न संशयः ॥ २१ ॥ गुह्ये विपत्करं चैव तस्मात्तत्र न होमयेत् ॥ साधारणमथो वक्ष्ये वह्नेर्जिह्वाश्च कीर्तिताः ॥ २२ ॥ प्रवक्ष्यामि
विधिं कृत्स्नं यद्विशेषं पुनः शृणु ॥ घृताहुतौ हिरण्याख्या गगना पाणिहोमतः ॥ २३ ॥ वक्रा ख्याता महाहोमे कृष्णाभा सा क्रतौ
मता ॥ सुप्रभा मोदकविधौ बहुरूपातिरूपिकाः ॥ २४ ॥ पुष्पपत्रविधौ होमे वह्नेर्जिह्वाः प्रकीर्तिताः ॥ न वा संकल्पयेत्कुण्डे शूद्राकार
विभेदतः ॥ २५ ॥ इन्द्रकोष्ठं मस्तकं स्यादीशाग्नेये च मस्तके ॥ तत्काष्ठपार्श्वे द्वे नेत्रे द्वौ करौ च पदक्रमात् ॥ २६ ॥ अविशिष्टं भवेत्पुच्छं
मध्ये चोदरसम्भवम् ॥ उदरे होमयेत्पुष्टिमन्नं पायसकं च यत् ॥ २७ ॥ हुत्वा व्रीहिगणं तत्र कर्णे पुष्पाहुतिं हुनेत् ॥ वामकर्णे वामनेत्रे
हुनेदब्जादिकं बुधः ॥ २८ ॥ श्रवणे चैव नेत्रे च दक्षिणे चेक्षुखंडकम् ॥ वामपादे वामकरे अभिचारेषु शस्यते ॥ २९ ॥ मारणे पुष्पदेशे
तु न चान्यं होमयेत्क्वचित् ॥ विपत्करं विजानीयाद्ध्वनिः सर्वविनाशकृत् ॥ ३० ॥ चन्दनागरुकर्पूरपाटलायूथिकानिभः ॥ पावकस्य सुतो
गंधः समंतात्सुमहोदयः ॥ ३१ ॥ प्रदक्षिणस्त्यक्तकल्पा छत्राका शिथिला शिखा ॥ शुभदा यजमानस्य राज्यस्यापि विशेषतः ॥ ३२ ॥
छिन्नवृत्ताः शिखाः कुर्यान्मृत्युर्धनपरिक्षयः ॥ निर्वाप्यं मरणं विद्यान्महाधूमाकुलेऽपि च ॥ ३३ ॥ एवंविधेषु दोषेषु प्रायश्चित्तं समाचरेत् ॥
अष्टाविंशाहुतीस्त्यक्त्वा ब्राह्मणान्भोजयेत्ततः ॥ ३४ ॥ मूलेनाज्येन जुहुयाज्जुहुयात्पञ्चविंशतिम् ॥ महास्नानं प्रकर्तव्यं त्रिकालं हरिपूजनम् ॥
॥ ३५ ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि प्रथमभागे पञ्चदशोऽध्यायः ॥ १५ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ नित्यं नैमित्तिकं
चैव यागादौ च समाप्तके ॥ होमावसाने प्रजपेदुपचारांश्च षोडश ॥ १ ॥ दद्यात्समीरणं पश्चात्पीठपूजां समाचरेत् ॥ गृहीत्वा रक्तपुष्पं च ध्याये
द्वह्निं यथाविधि ॥ २ ॥ इष्टं शक्तिस्वस्तिकाभीतिमुच्चैर्दीर्घैर्दोर्भिर्धारयन्तं वरांतम् ॥ हेमाकल्पं पद्मसंस्थं त्रिनेत्रं ध्यायेद्वह्निं बद्धमौलिं जटाभिः ॥
॥ ३ ॥ पूर्वादिद्वारदेशेषु कामदेवं शतक्रतुम् ॥ वराहं षण्मुखं चैव गंधाद्यैः साधु पूजयेत् ॥ ४ ॥ आवाह्य स्थापयेत्पश्चादष्टौ मुद्राः प्रदर्शयेत् ॥
दत्त्वासनं स्वागतं च दद्यात्पाद्यादिकत्रयम् ॥ ५ ॥ अतः पूर्वादिपात्रेषु यावता च हुताशनम् ॥ सुवर्णवर्णममलं समिद्धं सर्वतोमुखम् ॥ ६ ॥
महोदरं महाजिह्वमाकाशत्वेन पूजयेत् ॥ तारकादीन्समाप्ते च गन्धैः पुष्पैः पृथग्विधैः ॥ ७ ॥ तत्रैव जिह्वास्त्रिविधा ध्यायेन्मंत्रपुरःसराः ॥
वक्ष्यमाणेन मंत्रेण उपचारैरनंतरम् ॥ ८ ॥ त्वमादिः सर्वभूतानां संसारार्णवतारकः ॥ परमज्योतीरूपस्त्वमासनं सफली कुरु ॥ ९ ॥ दद्या
दासनमेतेन पुष्पगुच्छत्रयेण तु ॥ पुटांजलिं ततो बद्ध्वा पृच्छेत्कुशलपूर्वकम् ॥ १० ॥ वैश्वानर नमस्तेऽस्तु नमस्ते हव्यवाहन ॥ स्वागतं तु सुर

श्रेष्ठ शांतिं कुरु नमोऽस्तु ते ॥ ११ ॥ नमस्ते भगवन्देव आपोनारायणात्मक ॥ सर्वलोकहितार्थाय पाद्यं च प्रतिगृह्यताम् ॥ १२ ॥ नारायणपरं
धाम ज्योतीरूप सनातन ॥ गृहाणार्घ्यं मया दत्तं विश्वरूप नमोऽस्तु ते ॥ १३ ॥ जगदादित्यरूपेण प्रकाशयति यः सदा ॥ तस्मै प्रकाशरूपाय
नमस्ते जातवेदसे ॥ १४ ॥ धनंजय नमस्तेऽस्तु सर्वपापप्रणाशन ॥ स्नानीयं ते मया दत्तं सर्वकामार्थसिद्धये ॥ १५ ॥ हुताशन महाबाहो
देवदेव सनातन ॥ शरणं ते प्रयच्छामि देहि मे परमं पदम् ॥ १६ ॥ ज्योतिषां ज्योतीरूपस्त्वमनादिनिधनाच्युत ॥ मया दत्तमलंकारमलंकुरु
नमोस्तु ते ॥ १७ ॥ देवीदेवा मुदं यांति यस्य सम्यक्समागमात् ॥ सर्वदोषोपशांत्यर्थं गन्धोऽयं प्रतिगृह्यताम् ॥ १८ ॥ त्वं विष्णुस्त्वं हि
ब्रह्मा च ज्योतिषां गतिरीश्वर ॥ गृहाण पुष्पं देवेश सानुलेपं जगद्भवेत् ॥ १९ ॥ देवतानां पितॄणां च सुखमेकं सनातनम् ॥ धूपोऽयं देवदेवेश
गृह्यतां मे धनंजय ॥ २० ॥ त्वमेकः सर्वभूतेषु स्थावरेषु चरेषु च ॥ परमात्मा पराकारः प्रदीपः प्रतिगृह्यताम् ॥ २१ ॥ नमोऽस्तु यज्ञपतये प्रभवे
जातवेदसे ॥ सर्वलोकहितार्थाय नैवेद्यं प्रतिगृह्यताम् ॥ २२ ॥ हुताशन नमस्तुभ्यं नमस्ते रुक्मवाहन ॥ लोकनाथ नमस्तेऽस्तु नमस्ते जातवेदसे
॥ २३ ॥ इत्यनेन तु मन्त्रेण दद्याद्दिव्येऽप्यधीतकम् ॥ सर्वस्वं यज्ञसूत्रं च परमान्नं समाक्षिकम् ॥२४॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि
प्रथमभागे षोडशोऽध्यायः ॥ १६ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ यज्ञभेदं त्रिभेदं च वक्ष्ये शास्त्रमतं यथा ॥ यथावेदानुसारेण यथाग्रहण
योजनम् ॥ १ ॥ शतार्धे वह्निरुद्दिष्टः शतार्धे काश्यपः स्मृतः ॥ घृतप्रदीपके विष्णुस्तिलयागे वनस्पतिः ॥ २ ॥ सहस्रे ब्राह्मणो नाम अयुते हरिरुच्यते
॥ लक्षहोमे तु वह्निः स्यात्कोटिहोमे हुताशनः ॥३॥ वरुणः शांतिके ज्ञेयो मारणे ह्यरुणः स्मृतः ॥ नित्यहोमेऽनलो नाम प्रायश्चित्ते हुताशनः
॥ ४ ॥ लोहितश्चान्नयज्ञे यो ग्रहाणां प्रत्यनुक्रमात् ॥ देवप्रतिष्ठायागे तु लोहितः परिकीर्तितः ॥ ५ ॥ प्रजापतिर्वास्तुयागे मंडपे चापि पद्मके ॥
प्रपायां चैव नागाख्यो महादाने हविर्भुजः ॥६॥ गोदाने च भवेद्रुद्रः कन्यादाने तु गोऽजकः ॥ तुलापुरुषदाने च धाताग्निः परिकीर्तितः ॥ ७ ॥
वृषोत्सर्गे भवेत्सूर्योऽवसानांते रविः स्मृतः ॥ पावको वैश्वदेवे च दीक्षापक्षे जनार्दनः ॥ ८ ॥ त्रासने च भवेत्कालः क्रव्यादः शरदाहने ॥ पर्णदाहे
यमो नाम ह्यस्थिदाहे शिखंडिकः ॥ ९ ॥ गर्भाधाने च मरुतः सीमंते पिंगलः स्मृतः ॥ पुंसवे त्विंद्र आख्यातः प्रशस्तो यागकर्मणि ॥ १० ॥
नामसंस्थापने चैवमुपन्यस्ते च पार्थिवः ॥ निष्क्रमे हाटकश्चैव प्राशने च शुचिस्तथा ॥ ११ ॥ षडाननश्च[1] चूडायां व्रतादेशे समुद्भवः ॥

---

[1] चूडाकर्मणि सभ्यः स्याद्व्रतादेशे च माधवः–इ० पा० ।

वीतिहोत्रश्चोपनये समावर्ते धनंजयः ॥ १२ ॥ उदरे जठराग्निश्च समुद्रे वडवानलः ॥ शिखायां च विभुर्ज्ञेयः स्वरस्याग्निः सरीसृपः ॥ १३ ॥
अश्वाग्निर्मंथरो नाम रथाग्निर्जातवेदसः ॥ गजाग्निर्मंदरश्चैव सूर्याग्निर्विंध्यसंज्ञकः ॥ १४ ॥ तोयाग्निर्वरुणोनाम ब्राह्मणाग्निर्हविर्भुजः ॥ पर्वताग्निः
क्रतुभुजो दावाग्निः सूर्य उच्यते ॥ १५ ॥ दीपाग्निः पावको नाम गृह्याग्निर्धरणीपतिः ॥ घृताग्निश्च नलो वायुः सूतिकाग्निश्च राक्षसः ॥ १६ ॥
इति श्रीभविष्ये महापुराणे मध्यमपर्वणि प्रथमभागेऽग्निनामवर्णनं नाम सप्तदशोऽध्यायः ॥ १७ ॥छ॥ ॥ सूत उवाच ॥ ॥ अथातो होमद्रव्याणां
प्रमाणमभिधीयते ॥ प्रमाणे चाप्रमाणे च निष्फलं भवति ध्रुवम् ॥१॥ कर्षमात्रं घृतं होमे शुक्तिमात्रं पयः स्मृतम् ॥ तत्समं पञ्चगव्यं च दधि दुग्धं
तथा मधु ॥ २ ॥ मुष्टिमानेन पृथुका लाजाः स्युर्मुष्टिसंमिताः ॥ शर्करा मुष्टिमात्रा च शर्करातोलकं विदुः ॥ ३ ॥ त्रितोलकं गुडं विद्यादिक्षुपर्ववि
धिर्भवेत् ॥ एकैकं पत्रपुष्पाणि शालूकस्य त्रिमुष्टिकम् ॥४॥ एकलग्ने न जुहुयान्न पृथग्जुहुयात्क्वचित् ॥ सवृंतकं जपापुष्पं केशरं तत्सवृंतकम् ॥
॥ ५ ॥ एकैकशश्च पद्मानां जलजानां तथैव च ॥ जीवंत्याः फलमानेन पिष्टकानां प्रसंख्यया ॥ ६ ॥ वसंतकं धात्रिमाने मोदकस्य प्रमाणतः ॥
एकैकशः फलानां च मातुलिंगत्रिखंडकम् ॥७॥ अष्टधा नालिकेरस्य पनसं दशधा भवेत् ॥ पद्मबीजप्रमाणेन कूष्मांडं चाष्टधा भवेत् ॥८॥ उर्वारुकं
चाष्टधा च गुडूची चतुरंगुलम् ॥ पूगमानं च मांसस्य सगुडं तत्र दृश्यते ॥९॥ अन्यत्र बदरीमानं तिंदुकं च त्रिधा कृतम् ॥ काष्ठं प्रादेशमात्रं स्याद्दूर्वा
याश्च त्रिपत्रकम् ॥ १० ॥ भूर्जपत्रं च गृह्णीयाच्छमीं प्रादेशमात्रिकाम् ॥ व्रीहयो मुष्टिमात्राः स्युः शुक्तिमानेन सर्षपाः ॥ ११ ॥ मरिचाः स्युर्विंमा
नेन मृणालं चाथ मूलकम् ॥ सप्तखंडं च वार्ताकं त्रिपुष्टं च त्रिधोदितम् ॥१२॥ चंदनागुरुकर्पूरकस्तूरीकुंकुमानि च ॥ तित्तिडीबीजमानेन समुद्दि
ष्टानि देशिकैः ॥ १३ ॥ समिदाप्लवने त्र्यंगतिलानामपि मध्यतः॥ दशकं प्लावनेनैव सहस्राणां शतं विना ॥ १४ ॥ एवं व्रीहिप्लावने च काष्ठवदि
क्षुदंडकम् ॥ प्रोक्षणं मृदुपुष्पाणां लतादीनां तथैव च ॥ १५ ॥ पायसान्ने तथान्ने च मोदके पिष्टकेऽपि च ॥ शाल्यासक्तेन जुहुयाद्व्यत्यये व्यत्ययं
फलम् ॥ १६ ॥ बिल्वपत्रस्य प्लवनं दंडं हित्वा च प्लावयेत् ॥ वृंतसंप्लावनादेव फलं हरति राक्षसः ॥ १७ ॥ बिल्वपत्रस्य पूर्वार्धप्राप्तमात्रेण योज
येत् ॥ पत्रत्रयं तथा होमे छिन्नेभिन्नेऽतिदूषणम् ॥ १८ ॥ न द्वित्रिप्लवनं कुर्यात्कृत्वा याति रसातलम् ॥ तस्माच्च पुत्रशिष्याद्यैर्ब्राह्मणैस्तत्त्वकोविदैः
॥ १९ ॥ पूर्वाशाभिमुखो भूत्वा पावयेच्च यथाक्रमात् ॥ न न्यूनं नाधिकं कुर्याच्छांतिपक्ष उदङ्मुखः ॥ २० ॥ पायसान्यन्यदेवेषु यत्नेन परिव
र्जयेत् ॥ न चाग्नौ दापयेद्यत्नादेतेभ्यः प्रतिपादयेत् ॥२१॥ कनिष्ठांगुलिमासाद्य प्रकुर्यात्पर्वभूषणम् ॥ गुणदोरकमानेन तावद्धोमगतिर्बुधाः ॥२२॥

अंगुलैर्द्वित्रिचतुरैः पत्रहोमाकृतिक्रमात् ॥ २३ ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि प्रथमभागेष्टादशोऽध्यायः ॥ १८ ॥ छ ॥

॥ सूत उवाच ॥ ॥ श्रीपर्णी शिंशपा क्षीरी बिल्वः खदिर एव च ॥ स्रुवे प्रशस्तास्तरवः सिद्धिदा यागकर्मणि ॥ १ ॥ प्रतिष्ठायां प्रशस्तास्तु धात्रीखदिरकेशराः ॥ संस्कारे शशिभिन्नौ च धात्री धात्रा विनिर्मिता ॥ २ ॥ संप्राशे यः स्रुवः प्रोक्तः संस्कारे यज्ञसाधने ॥ प्रतिष्ठायां तु कथितास्तदन्ये शास्त्रवेदिभिः ॥ ३ ॥ स्रुवं स्रुचमथो वक्ष्ये यदधीनश्च जायते ॥ यज्ञे न सर्वकं धार्यमक्षरेण च व्यत्ययः ॥ ४ ॥ तस्यादौ च स्रुवं वक्ष्ये यच्चमानं यदास्पदम् ॥ काष्ठं गृहीत्वा बिल्वस्य रिक्तादितिथिवर्जिते ॥ ५ ॥ समुपोष्य च रचयेदामिषाणि न च स्मरेत् ॥ वर्जयेद्ग्राम्यधर्मं च निर्माणे स्रुक्स्रुवस्य वै ॥ ६ ॥ काष्ठं गृहीत्वा विभजेद्भागांस्त्रिंशत्तथा पुनः ॥ विंशत्यंगुलमानं तु कुंडवेदिसमोदरम् ॥ ७ ॥ कटाहाकारनिम्नं च स्रुवं कुर्याद्विचक्षणः ॥ धात्रीफलसमाकारं स्वधानिम्नं सुशोभनम् ॥ ८ ॥ वेदीं शूर्पाकृतिं कुर्यात्कुंडानि परिकल्पयेत् ॥ हंसवत्रिगुणा वापि हस्तेनाऽनुमुखं लिखेत् ॥ ९ ॥ स्रुवं चतुर्विंशतिभिर्भागैश्च रचयेद्ध्रुवम् ॥ द्वित्रिंशं स्यात्कुंडमानमदैवे तस्य कीर्तितम् ॥ १० ॥ चतुर्भिरंगैरानाहं कर्षाद्यग्रं ततः स्रुवम् ॥ अंगद्वयेन विलिखेत्पंके मृगमदाकृतिम् ॥ ११ ॥ दंडमूलाश्रये दंडी भवेत्कंकणभूषितः ॥ सौवर्णस्य च ताम्रस्य कार्या दर्वी प्रमाणतः ॥ १२ ॥ श्रैवर्णिकोद्भवं यच्च इंदुवृक्षसमुद्भवम् ॥ क्षीरवृक्षसमुद्भूतं द्वादशांगुलसंमितम् ॥ १३ ॥ द्व्यंगुलं मंडलं तस्य दर्वी सा यज्ञसाधने ॥ चत्वारिंशत्तोलिकाभिरिति ताम्रमयस्य च ॥ १४ ॥ पंचांगुलं मंडलं च अष्टहस्तं च दंडकम् ॥ अन्नादिपायसविधौ दर्वी यज्ञस्य साधने ॥ १५ ॥ दशतोलकमानेन सा च दर्वी उदाहृता ॥ आज्यसंशोधनार्थं तु सा तु ताम्रमयस्य च ॥ १६ ॥ षोडशांगुलमानेन सर्वाभावे च पैप्पलीम् ॥ आज्यस्थालीं घृतमयीं मृन्मयीं च समाश्रयेत् ॥ १७ ॥ अथ ताम्रमयी कार्या न च तां तत्र योजयेत् ॥ १८ ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि प्रथमभागे स्रुवदर्वीनिर्णयो नामैकोनविंशोऽध्यायः ॥ १९ ॥ ॥ छ ॥

॥ सूत उवाच ॥ ॥ अथ पूर्णविधिं वक्ष्ये यथा चंद्रार्थवेदिनाम् ॥ यस्य सम्यगनुष्ठानात्संपूर्णं स्यादिति स्थितिः ॥ १ ॥ होमपूर्तौ मोक्षकल्पः पूजांतेऽर्घ्यं विधीयते ॥ अथ तस्यामपूर्णायां हतश्रीर्यज्ञभ्रंशता ॥ २ ॥ तस्मात्सर्वप्रयत्नेन स्रुवाधो विन्यसेच्चरुम् ॥ पूर्णं दत्त्वा सवित्रेऽर्घ्यं ब्राह्मणान्भोजयेत्ततः ॥ ३ ॥ गृहं प्रविश्य च ततः कुलपूजां समाचरेत् ॥ सप्तते देहि मे पूर्णां पुनात्विति ऋचा क्रमात् ॥ ४ ॥ नियोजयेत्प्रतिष्ठायां नित्यनैमित्तिके शृणु ॥ पुनात्विति ऋचा पूर्णा प्रथमा परिकीर्तिता ॥ ५ ॥ सप्ततेति द्वितीया स्याद्देहिमेति तृतीयिका ॥ पूर्णा दर्वी चतुर्थी स्यात्कुलेवस्थाप्य देशिकः ॥ ६ ॥ उत्थाय दद्यात्पूर्णां तु

नोपविश्य कदाचन ॥ कनकायां च जिह्वायां रक्तायां ग्रहयागके ॥ ७ ॥ ग्रहहोमे शतांते च पूर्णा एका विधीयते ॥ सहस्रांते युगं दद्यादयुतांते
युगद्वयम् ॥ ८ ॥ सहस्रांते ददेदेकं पुष्पहोमे च सत्तमाः ॥ पूर्णां त्वेकसहस्रं तु दद्याद्यज्ञफलेप्सया ॥ ९ ॥ मृदुपुष्पाकृतौ त्वेका केवले चेक्षुहोमके
शतं द्वे च शते चैव गर्भाधानान्नप्राशने ॥ १० ॥ सीमंतोन्नयने चैव प्रायश्चित्ताकृतीषु च ॥ वैश्वदेवे च नित्ये च पूर्णा त्वेका विधीयते ॥ ११ ॥
एवं स्रुचौ समौ कृत्वा उपर्युपरि विन्यसेत् ॥ यथा न व्ययते कृत्वा न कल्पयति यावता ॥ १२ ॥ ऋषिंछंदादिकं श्रुत्वा प्रतिमंत्रस्य सत्तमाः ॥
अन्यथाल्पाल्पकफलं तस्मात्संन्यस्य होमयेत् ॥१३॥ सप्ततेति ब्राह्मणस्य ऋषिः कौंडिन्य ईरितः ॥ जगती च भवेच्छंदो देवताग्निः प्रकीर्तितः ॥
॥ १४ ॥ देहि मेति च मंत्रस्य प्रजापतिर्ऋषिः स्मृतः ॥ अनुष्टुप् च भवेच्छंदो देवतास्य प्रजापतिः ॥ १५ ॥ पूर्णा दर्वीति मन्त्रस्य शतक्रतुर्ऋ
षिः स्मृतः ॥ छंदोनुष्टुप्समाख्यातं वह्निश्चैवात्र देवता ॥ १६ ॥ पुनात्विति च मन्त्रस्य ऋषिः स्यात्पवनः स्मृतः ॥ छंदोऽपि जगती ख्यातं
देवताग्निश्च कीर्तितः ॥ १७ ॥ तुर्यपूर्णा यज्ञमध्ये नकुले द्विजसत्तमाः ॥ न चाशिषं यज्ञमध्ये अभिषेकं च तर्पणम् ॥ १८ ॥ ऋत्विक्छंदः स्पृ
शन्सम्यग्दक्षिणांगमथापि वा ॥ यजमानः सपत्नीको महोत्सवपुरःसरम् ॥ १९ ॥ विश्वामित्रोऽयुतं तत्र होमं कुर्याद्विचक्षणः ॥ लवली बदरी
शस्तं पिचुमंदकच्छत्रकम् ॥ २० ॥ नागरंगं धातकीं च पूर्णायां च विवर्जयेत् ॥ जप्यहानिरसंख्याते होमभ्रंशश्च जायते ॥ २१ ॥ तस्मात्प्रागेव
सतिलान्गणित्वा स्थापयेत्पृथक् ॥ युगपद्गणयेद्वाथ न चांगेन कदाचन ॥२२॥ धातक्याश्च फलैः संख्या कर्तव्या फलमिच्छता ॥ बदर्याश्च लव
ल्याश्च फलैः सर्वार्थसिद्धये ॥ २३ ॥ नागरंगफलैरेव धातक्या बकुलैः फलैः ॥ यज्ञहानिकरं यस्मात्तस्मात्तत्परिवर्जयेत् ॥ २४ ॥ कर्पूरचंदनैः
कुर्याद्धोलिकां यज्ञसिद्धये ॥ गंगामृत्तिकया युक्तः शुनिकामथ वा द्विजाः ॥ २५ ॥ रक्तगुंजाफलैः संख्यां पुष्टिकामेषु योजयेत् ॥ वातार्धे च शते
चैव सहस्रे च तथैव हि ॥ २६ ॥ होता स्यादयुतेनापि एकाहे वेदसंख्यया ॥ ऋणसाध्ये भवेद्धोता त्रय एव द्विजोत्तमाः ॥ २७ ॥ लक्षहोमे तु
होतारः षडेव परिकीर्तिताः ॥ कोटिहोमे तु विप्राः स्युः प्रशस्ताः पंक्तिसंख्यया ॥ २८ ॥ नव पंच दशदशकं पंचविंशमथापि वा ॥ कामक्रोध
विहीनाः स्युर्ऋत्विजः शांतचेतसः ॥ २९ ॥ नवग्रहमखे विप्राश्चत्वारो वेदवेदिनः ॥ अथवा ऋत्विजौ शांतौ द्वावेव परिकीर्तितौ ॥३०॥ कार्याव
युतहोमे तु न प्रसज्येत विस्तरे ॥ तद्वत्सदशधा चाष्टौ नवहोमे तु ऋत्विजः ॥ ३१ ॥ कर्तव्याः शक्तितस्तद्वच्चत्वारोऽपि विमत्सराः ॥ तमेव पूज
येद्ब्रह्मा द्वौ वात्रीन्वा यथाविधि ॥ ३२ ॥ एकमप्यर्चयेद्ब्रह्मा सहस्रे त्वेकब्राह्मणम् ॥ दक्षिणाभिः प्रयत्नेन निर्वहेदल्पवित्तवान् ॥ ३३ ॥ लक्षहोम

स्तु कर्तव्यो यदा वित्तं भवेत्तदा ॥ यतः सर्वमवाप्नोति कुर्यात्कामविधानतः ॥ ३४ ॥ पूज्यते शिवलोके च वस्वादित्यमरुद्गणैः ॥ यावत्कल्पश
तान्यष्टावंते मोक्षमवाप्नुयात् ॥ ३५ ॥ अकामो यस्त्विमं कुर्याल्लक्षहोमं यथाविधि ॥ शतकाममवाप्नोति पदं चानंत्यमश्नुते ॥ ३६ ॥ पुत्रार्थी
लभते पुत्रं धनार्थी लभते धनम् ॥ भार्यार्थी लभते भार्यां कुमारी च शुभं पतिम् ॥ ३७ ॥ भ्रष्टराज्यस्तथा राज्यं श्रीकामः श्रियमाप्नुयात् ॥ यं
यं कामयते कामं सर्वं प्राप्नोति पुष्कलम् ॥ ३८ ॥ निष्कामः कुरुते यस्तु परं ब्रह्माधिगच्छति ॥ तस्माच्छतगुणः प्रोक्तः कोटिहोमः स्वयंभुवा
॥ ३९ ॥ आचार्य एव होता स्याद्ब्राह्मणानामसंभवे ॥ न योजयेदेकमेव चायुते होमकर्मणि ॥ ४० ॥ दर्भासनेऽतो न कुशे तृणे पत्रे त्वचेऽपि च॥
पाषाणे मृत्तिकायां च न च वस्त्रासने क्वचित् ॥ ४१ ॥ तत्र दारुमयं कुर्यादागमं भजते द्विजः ॥ दानं दद्याच्च होमांते पूर्णादौ
च यथा भवेत् ॥ ४२ ॥ द्विजसंस्कारकार्येषु पूर्णादौ चापि दक्षिणा ॥ मंत्रोपासनकार्येषु सोमयागाश्वमेधके ॥ ४३ ॥ ॥ इति
श्रीभविष्ये महापुराणे मध्यमपर्वणि प्रथमभागे विंशोऽध्यायः ॥ २० ॥ ॥ छ ॥ सूत उवाच ॥ ॥ अथातो मंडलं वक्ष्ये पुराणेषु यथो
दितम् ॥ यदधीना भवेत्सिद्धिस्तस्मात्कुर्यात्समाहितः ॥ १ ॥ देवाः पद्मासनस्थाश्च भविष्यंति वसंति च ॥ विनाब्जं नार्चयेद्दे
मर्चिते यक्षिणी हरेत् ॥ २ ॥ अतो मंडलविच्छेदं यस्माद्दशगुणं भवेत् ॥ रजःसाध्ये शतगुणं केवले द्विगुणं फलम् ॥ ३ ॥ त्रिशतं वंदने सांध्ये
सहस्रं च रजोऽष्टकम् ॥ रजोभिः षोडशैर्बिंबं शतंशतमनंतकम् ॥ ४ ॥ यन्त्रे मणौ शालग्रामे प्रतिमायां विशेषतः ॥ महालये महायोनौ रक्तलिंगे
च साधिकम् ॥ ५ ॥ रजोयुक्तं लिखेद्यस्तु पूजाकार्ये विभूतये ॥ करणादिफलं यस्मात्तस्मात्तत्परिवर्जयेत् ॥६॥ चतुरस्रं नवं व्यूहं क्रौंचप्राणं चतु
र्विधम् ॥ कामबीजं वज्रनाभं विघ्नराजं गजाह्वयम् ॥ ७ ॥ पारिजातं चंद्रबिंबं सूर्यकांतं च शेखरम् ॥ शतपत्रं सहस्रारं नवनाभं च मुष्टिकम् ॥
॥ ८ ॥ पंचाब्जं चैव मैनाकं कामराजं च पुष्करम् ॥ अष्टास्रं चैव श्रीबिंबं षडस्रं त्र्यस्रमेव तु ॥९॥ चत्वारिंशत्तथा पंचस्वाधिकं परिसंख्यया ॥
चतुरस्रं नवव्यूढं वैष्णवे यागकर्मणि ॥ १० ॥ प्रशस्तं चापि गोमेधे क्रौंचं प्राणं चतुर्विधम् ॥ सुभद्रं चाश्वमेधे च नरमेधे नरासनम् ॥ ११ ॥
सर्वत्र सर्वतोभद्रं चतुरस्रं सुभद्रकम् ॥ कामराजं तथा त्र्यस्रमष्टास्रं च षडस्रकम् ॥१२॥ शक्तानां कामपक्षे च पंचसिंहासनं महत् ॥ ध्यानाचले
मेरुपृष्ठं मणिमुक्ताचलेष्वपि ॥ १३ ॥ सहस्रं शतपत्रं च अन्नदाने तिलाचले ॥ हरिवल्लभं राजसूये सोमयागेषु शस्यते ॥ १४ ॥ प्रतिष्ठायां सुभद्रं च
सर्वतोभद्रमेव च ॥ जलाशयप्रतिष्ठायां विघ्नराजं प्रशस्यते ॥ १५ ॥ घटप्रस्थापने चैव गजाह्वं तुरगासनम् ॥ शतपत्रं लक्षहोमे अयुते चतुर

स्रकम् ॥ १६ ॥ यस्य यज्ञस्य यद्बिंबं तत्तु तेनैव योजयेत् ॥ इतोऽन्यथा भवेद्दोषो विपरीतेष्वधोगतिः ॥ १७ ॥ द्विहस्ता चतुरस्रा च वेदिका परिकीर्तिता ॥ चतुरंगुलोच्छ्रायमिता षडंगुला ह्यथापि वा ॥१८॥ षडंगुला नवव्यूहे वर्धयेद्यज्ञकोविदः ॥ एकांगुलसमुत्सेधः कर्तव्यस्सुसमाहितैः॥ ॥ १९ ॥ क्रौंचप्राणे तुर्यहस्तं मुष्टिहस्तं समुच्छ्रितम् ॥ मध्यद्वये हीनकरं कनिष्ठं त्र्यंगुलाधिकम् ॥ २० ॥ कुर्याद्द्वित्रिक्रमाद्धीनमुच्छ्राये द्विजसत्तमाः ॥ पारिजातं चंद्रबिंबं सूर्यकांतं च शेखरम् ॥ २१ ॥ ग्रहाणां पौष्टिके पक्षे बाह्यग्रामादिसाधने ॥ नियोजयेत्तत्रतत्र वेदिकाचक्रकत्रयम् ॥ २२ ॥ प्रथमे मुष्टिहस्तः स्यात्संपूर्णे शेषमानकैः ॥ नवलाभे च पंचाब्जं करत्रयमुदाहृतम् ॥ २३ ॥ शेषा चैव वरिष्ठा च लवली भित्तिवेदिका ॥ विज्ञेया द्विजशार्दूला यथाकाम्येषु योजयेत् ॥ २४ ॥ अयथाव्यत्यये दोषस्तस्माद्यत्नेन साधयेत् ॥ दशहस्ते चाष्टहस्ते अष्टहस्ते च षोडशम् ॥२५॥ मुष्टिबाहुश्च प्रादेशं वर्धयेत्षोडशांशके ॥ हस्तोत्सेधं च कर्तव्यं हीने हीनं च ह्रासयेत् ॥ २६ ॥ दर्पणाकारकं कुर्याद्यागके शांतिकर्मणि ॥ हीनं कुर्यात्प्रयत्नेन वप्राकारं परिस्तवे ॥ २७ ॥ निशारणैर्गोमयैश्च वेदिकां च प्रलेपयेत् ॥ स्वर्णरत्नमयैस्तोयैरभिषिच्य कुशोदकैः ॥ ॥ २८ ॥ हीनवीर्यगवानां च पुरीषं धैनुकं तथा ॥ कपिलायाश्च यत्नेन कुंडमंडललेपने ॥ २९ ॥ वर्जयेत्सर्वयागेषु स्थंडिलेषु प्रयत्नतः ॥ विना सूत्रैः कीलके न मंडले नैव सूत्रयेत् ॥ ३० ॥ तस्मात्प्रयत्नतः कार्यं यत्सूत्रं यच्च कीलकम् ॥ अर्कहस्तमितं सूत्रं मृदु लाक्षामयं तथा ॥ ३१ ॥ पीतकार्यस्रजं चैव कीलकं स्वर्णनिर्मितम् ॥ रौप्यताम्रमयं कुर्याद्वैष्णवे यागकर्मणि ॥ ३२ ॥ गणनायके सुप्रशस्तं शैषेपामार्गमेव च ॥ ग्रहपक्षे तथेशस्य कच्छपस्य द्विजोत्तमाः ॥ ३३ ॥ षोडशे चार्कहस्ते च तत्र नेमियुतं भवेत् ॥ ३४ ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि प्रथमभागे एकविंशतितमोऽध्यायः ॥ २१ ॥ ॥ छ ॥ ॥ ॥ इति मध्यमपर्वणि प्रथमभागः समाप्तः ॥ १ ॥ छ ॥ ॥ ॥

॥ ॥ सूत उवाच ॥ ॥ अथोद्धारं प्रवक्ष्यामि चतुरस्रादिकस्य च ॥ अर्कांगुलमितं क्षेत्रं चतुरस्रं प्रकल्पयेत्॥१॥गुणांगुलं प्रतिदिशं वर्धयेत्सुविचक्षणः ॥ चतुरस्रं समं कुर्यादिष्टेरष्टादशांगुलम् ॥ २ ॥ द्विहस्ते चैव सूत्राग्रे त्र्यंगुलानि समंततः ॥ चतुरस्रीकृते पश्चाद्द्विहस्तमपि जायते ॥ ३ ॥ एवं षोडशहस्तांतं वर्धयेत्क्रमतः स्वयम् ॥ हस्ते विनिर्णयं विप्रा रचयेन्मंडलं सुधीः ॥ ४ ॥ द्वादशांगुलकल्पाभ्यां मधुहस्ते च मंडले ॥ द्विहस्ते हस्तमात्रं स्याद्द्विहस्तं तु चतुष्करे ॥ ५ ॥ पद्ममानं चतुर्द्धा तु वृत्तं कुर्यात्समंततः ॥ प्रथमे कर्णिका कार्य्या केशराणि द्वितीयके ॥ ६ ॥ तृतीये दलसंधींश्च दलाग्राणि चतुर्थके ॥ कर्णिकां पीतवर्णेन शुक्लेन पंकजं लिखेत् ॥७॥ केशरास्त्रिविधाः प्रोक्ता मूलमध्याग्रदेशतः ॥ मूले शुक्लारुणा मध्ये

पीताश्चाग्रे प्रतिष्ठिताः ॥ ८ ॥ पात्रसंधिर्भवेच्छ्यामः कोणे रक्तेन रंजयेत् ॥ देवास्त्राणि लिखेद्बाह्ये पुरमध्ये च कोणके ॥ ९ ॥ अष्टांगुलप्रमाणं
यद्यथावर्णं विनादितः ॥ शंभुगौरी तथा ब्रह्मा रामकृष्णेत्यनुक्रमात् ॥ १० ॥ सीमरेखांगुलोच्छ्रायं तत्तदर्धेन योजयेत् ॥ शिवविष्णवोर्महायागे
शंभुमारभ्य दापयेत् ॥ ११ ॥ प्रतिष्ठायां च रामांतं कृष्णांतं च जलाशये ॥ दुर्गायागे च श्रीपक्षे ब्रह्मादीन्परिकल्पयेत् ॥ १२ ॥ ग्रहयागे च पीता
दीन्कुर्याच्च न तदन्यथा ॥ नवव्यूहमथो वक्ष्ये पुराणमतसम्मतम् ॥ १३ ॥ सर्वं च पूर्ववत्कार्यं पंकजं सुलिखेत्सुधीः ॥ तावत्संख्याहरणयोर्वेष्टये
त्प्रक्रमादपि ॥ १४ ॥ शुक्लारुणैस्तथा पीतैः पीतारुणसितैरपि ॥ पीतारुणसितैरेवं स्वभावे प्रतिभागके ॥ १५ ॥ कलायंत्रं तदंते च गुह्यपत्रा
ग्रकेण तु ॥ षोडशैर्विंशमाने तु सलिङ्गं चाष्टपत्रके ॥१६॥ एवं मंडलमंत्राणां वर्जयेत्परमार्थतः ॥ तद्वन्मूलेषु कोणेषु केशराणि प्रकल्पयेत् ॥१७॥
दशदंडसमाकारं त्रिवर्णं प्रतिरंजितम् ॥ अरं दद्याद्दशाग्रे तु सर्वांगुलप्रमाणतः ॥ १८ ॥ पीतेनारं च सर्वत्र तन्मध्ये शोणतुंडकम् ॥ नवव्यूहमिदं
प्रोक्तं धर्मकामार्थदायकम् ॥ १९ ॥ न शूद्रोमंडलं कुर्यान्न कुर्याद्ब्राह्मणब्रुवः ॥ कुर्याच्च संगमे तीर्थे देवतायतनेषु च ॥ २० ॥ लिखित्वा नार्चयेद्य
स्तुअग्निकार्यविहीनकः ॥ अविद्धो जायते सोऽपि यतोजन्मनिजन्मनि ॥ २१ ॥ ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि द्वितीयभागे प्रथ
मोऽध्यायः ॥ १ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ क्रौंचमानं प्रवक्ष्यामि यथावेदार्थवादिनाम् ॥ संमतं सर्वतंत्रेषु गोपनीयं प्रयत्नतः ॥ १ ॥ आत्म
नोऽरत्निमानेन द्विगुणं परिकल्पयेत् ॥ मध्ये वृद्ध्या तु तत्सूत्रं भ्रामयेत्कीलकोपरि ॥ २ ॥ चतुष्टयं न्यसेद्वृत्तं मध्यमाधमभावतः॥ कर्णिका प्रथमे
वृत्ते द्वितीये त्वथ केशरम् ॥ ३ ॥ तृतीये पद्मपत्राणि चतुर्थे षोडशच्छदाः ॥ शोभोपशोभे कुर्याच्च चतुरस्रे समे शुभे ॥ ४ ॥ तद्दक्षिणाग्रं सुलिखे
त्पार्श्वयोः पक्षकद्वयम् ॥ तत्र पद्मयुगं कुर्यान्मध्ये चांगुलमंतरम्॥५॥ शुक्लं पीतं तथा रक्तं कृष्णं लोहितसन्निभम् ॥ संख्यातं ताम्रपर्णं च श्यामलं
चाष्टकं रजः ॥ ६ ॥ शुक्लं तंडुलचूर्णोत्थं पीतं तु निशया[1] स्मृतम् ॥ रक्तं तु निशया योगाच्छंखचूर्णादिभावितम् ॥ ७ ॥ कृष्णं पुलकादिदग्धं
रक्तं पीतास्ययोगतः ॥ कुंकुमाभं पांडुरं च रक्तश्वेतैविनिर्मितम् ॥ ८ ॥ ताम्रवर्णं कुसुंभेन श्यामलं बिल्वपत्रजम् ॥ यवगोधूमचूर्णादियोगेन तु रजः
स्मृतम् ॥ ९ ॥ सर्वरेखासु विभजेच्छुक्लं मध्ये तु पीतकम् ॥ कर्णिकायां केशरेषु शुभ्रमेव निपातयेत् ॥ १० ॥ पूर्वादिक्रमयोगेन शुक्लादीनि प्रयोज
येत् ॥ पत्रसंधौ तु विभजेद्रजः सेकांतरक्रमात् ॥११॥ ततः षोडशपत्रेषु पूर्वादिक्रमतो भवेत् ॥ शुक्लं पीतं तथा ताम्रं ततः संख्यातमेव च ॥१२॥

---

[1] हरिद्रया ।

श्यामलं कुंकुमाभं च रक्तं शुक्लं च कृष्णकम् ॥ पीतं ताम्रं च संख्यातं श्यामं कुंकुमरक्तकम् ॥ १३॥ एवं दद्याद्द्विजः पूर्वे ईशानांतं विभावयेत् ॥
क्रौंचमूर्ध्नि भवेद्रक्तं चतुरंगुलमानतः॥१४॥ तुंडभागे भवेत्पीतं ग्रीवायां शुक्लमेवं च ॥ पुच्छे विंशतिपत्राणि आदौ पंच रजःक्रमात् ॥१५॥ षडंगुले
ष्वंडभागे पीतेन परिकल्पयेत् ॥ ग्रीवायां शुक्लरजसा भावितायां विशेषतः ॥१६॥ तत्र पीतादिकं लेख्यं पूर्वोक्तं च यथा भवेत् ॥ शुक्लादिकं प्रद
द्यात्तु पात्रेष्वेकैकशः पृथक् ॥ १७ ॥ चतुरंगुलके पादे जानोरूर्ध्वे तु पीतकम् ॥ अधस्तात्तु भवेद्रक्तं तदेव चतुरंगुलम् ॥१८॥ द्व्यंगुलेन भवेच्छ्या
ममंगुलीष्वपि विन्यसेत् ॥ एवं पक्षद्वयेनापि लिखेच्छुक्लं विभावयेत् ॥ १९ ॥ पदे शुक्लं चांगुलीषु रक्तं श्यामेन भावयेत् ॥ पूर्वपश्चिमदिग्भागे
शुक्लं स्याद्द्वारदेशतः ॥२०॥ दक्षिणोत्तरतश्चैव रक्तवर्णं विनिर्दिशेत् ॥ महाक्रौंचमिदं ज्ञेयं मध्यक्रौंचमिदं शृणु ॥ २१ ॥ कनिष्ठं सर्वयज्ञेषु विद्यानां
सततमुत्तमम् ॥ अथापरं प्रवक्ष्यामि सर्वतंत्रमतं क्रमात् ॥ २२ ॥ रक्तपीतं रक्तपीतैः कुर्यात्पुच्छचतुष्टयम् ॥ पूर्वादिक्रमयोगे तु पत्रांते धरणीतले ॥
॥२३॥सुलिखेन्मूलसंलग्नं बहिष्कोणचतुष्टयम् ॥ कनिष्ठेऽष्टकुलं कुर्यात्पुच्छं कुर्याच्चतुर्विधम् ॥२४॥ त्रिवृत्तं वेष्टयेत्पश्चात्सितरक्तासितैः क्रमात् ॥
दृष्टं जन्मशतोद्भूतं पापं नाशयते ध्रुवम् ॥२५॥ पीतं वा विलिखेद्विप्रा नश्यंति सकलापदः॥अंतश्चक्रं बहिश्चक्रं क्षेत्रे च प्रतिदर्शनम् ॥२६॥ तस्य
कल्पशतोद्भूतं पापं नाशयते ध्रुवम् ॥ मयूरं वृषभं चैव सिंहं क्रौंचं च वै कपिम् ॥२७॥ प्रमादाद्वा गृहे क्षेत्रे वृक्षाग्रे चापि भो द्विजाः ॥ उत्थाय
वंदनं कुर्याद्ब्रह्महत्याशतं दहेत् ॥ २८ ॥ पोषणात्कीर्तिमाप्नोति दर्शनात्पापविच्युतिः ॥ दर्शनाद्वर्धते लक्ष्मीरायुर्वृद्धिश्च जायते ॥ २९ ॥ मयूरो
ब्रह्मणो मूर्तिर्वृषभश्च सदाशिवः॥ सिंहे च संभवेद्दुर्गा वैष्णवो विधिरुच्यते ॥३०॥ क्रौंचो नारायणो देवो व्याघ्रस्त्रिपुरसुंदरी ॥ कालिका कृष्णव्या
घ्रश्चलक्ष्मीश्चित्रकपोतकः ॥३१॥ स्नातः पश्यति प्रत्यह्नि ग्रहदोषो न जायते ॥ तस्मात्प्रयत्नतो भूत्वा धारयेत्पोषयेद्गृहे ॥ ३२ ॥ अतः परं प्रव
क्ष्यामि मंडले मंडलेष्वपि ॥ रजोद्रव्यप्रमाणं च यथोक्तं यत्नवर्जनम् ॥ ३३ ॥ तंडुलोत्थं यवोत्थं वा वर्ज्यं मकररोपणम् ॥ यद्बाल्यश्रावणे जातं
हैंगुलं गंधकं तथा ॥३४॥ हरितालं सुभद्रं च सदा विघ्नं विवर्जयेत् ॥ हैमंतिकोद्भवं यच्च सितपाषाणमेव च ॥३५॥ कांचन्याश्च प्रभेदं यच्छस्तं
शुक्लगुणं द्विजाः ॥ शेफालिवृत्तं निशया अतसीकुसुमानि च ॥३६॥ किंशुकस्य च पुष्पाणि शस्तं पीतं गुणं भवेत् ॥ नागजं गैरिकं चैव कुसुंभ
कुसुमानि च ॥३७॥ कुशीतं गुडकं चैव मंजिष्ठां पंचरंगकम् ॥ विजयापत्रकं चैव बिल्वपत्रं तथैव च॥३८॥पुनर्नवायाः पत्रं च केशरस्य बकस्य
च॥कृष्णपाषाणकं चैव कृष्णाभ्रं समयूथकम्॥३९॥नागपाषाणकं चैव पुन्नागं दग्धपंचकम् ॥ शंखचूर्णं लोहविष्ठां नागविष्ठां च वर्जयेत्॥४०॥

कर्पूरं कुंकुमं चैव रोचनारोचनां श्रयेत् ॥ यवशालीयकैर्भिन्नं शुक्लं च कारयेत्सुधीः ॥४१॥ लाक्षां च यदि गृह्णीयात्तद्वर्जिंत्वा[1] प्रदापयेत् ॥ आकाशं पृथिवीं चैव भौमं रामं तथा शनी ॥४२॥ धरणीं सदनस्थाने पञ्चधा विभजेद्बहिः ॥ पद्ममुल्लिख्य प्रथमं कर्णिकां तदनन्तरम् ॥४३॥ तर्जन्यमध्यपूर्वोत्थं विभजेद्वा समाहितः ॥ तर्जन्यंगुष्ठयोर्गैर्वा तृणमारभ्य यद्भवेत् ॥ ४४ ॥ तृणमारभ्य सामान्ये शक्तो वा मध्यमादितः ॥ राक्षसादिप्रतिष्ठायां ग्रहपक्षेऽग्निमादितः ॥ ४५ ॥ अंगुल्यग्रे च विभजेत्सर्वकामार्थसिद्धये ॥ प्रतिष्ठायां ग्रहमखे काम्येषु परिवर्जयेत् ॥ ४६ ॥ सुभद्रं मण्डलं वक्ष्ये शुभदं शुभमादिशेत् ॥ अतः सुभद्रमुद्दिष्टं स्वर्गमोक्षप्रदायकम् ॥ ४७ ॥ सार्धहस्तेन मानेन कुर्यान्मण्डलमुत्तमम् ॥ चतुर्विंशांगुलैः पूर्णं सर्वत्र हस्तमादिशेत् ॥ ४८ ॥ कर्तुर्मध्यसहस्रस्य मध्यमा मध्यपर्वणि ॥ मध्यमा दीर्घमानेन मानांगुलमिति स्मृतम् ॥ ४९ ॥ रेखाद्वयांतरं यच्च मूलरेखां न चाश्रयेत् ॥ वृद्धांगुष्ठनखद्वंद्वं मानांगुलमथापि वा ॥५०॥ मध्ये निबध्य शंकुं च मुष्टिबाहुप्रमाणतः ॥ त्रिवृत्तं कारयेन्मध्ये ज्येष्ठोत्तरकनीयसम् ॥ ५१ ॥ प्रकल्प्य कर्णिकादीनि मध्ये चाष्टदलं लिखेत् ॥ बहिश्चार्कदलं कुर्याद्वर्णानां क्रमकेण तु ॥५२॥ पंचमं श्वेतवर्णेन बहिः कुर्यात्त्रिवेष्टनम् ॥ सितपीतारुणं कुर्यात्पश्चाद्वेदांगुलांतरे ॥ ५३ ॥ वेष्टयेच्छुक्लवर्णेन मध्ये कल्पलतां लिखेत् ॥ सुभद्रं मण्डलात्पूर्वं सर्वतोभद्रकं शृणु ॥ ॥ ५४ ॥ सर्वकार्येषु यज्ञेषु सर्वकल्याणमाप्नुयात् ॥ मंडलं सर्वतोभद्रं सर्वयज्ञेषु पुष्टिदम् ॥ ५५ ॥ साधकानां हितार्थाय ईश्वरेणैव भाषितम् ॥ चतुर्विंशत्यगुलेन हस्तः प्रथमतो भवेत् ॥ ५६ ॥ कोणे सूत्रद्वयं दद्यान्मध्ये सूत्रद्वयं पुनः ॥ ततो मत्स्यान्विरचयेत्कर्णे सूत्राणि साधकः ॥५७॥ चतुः सूत्रं पातयेच्च पूर्वापरविभागतः ॥ पुनर्दद्याच्चतुःसूत्रं कर्णसूत्रं पुनर्ददेत् ॥ ५८ ॥ शतद्वयपदं यावत्षट्पंचाशाधिकं तथा ॥ पातयेच्च तथा सूत्रमेवं सप्तदशं भवेत् ॥ ५९ ॥ ऊर्ध्वपंक्त्या पदयुगं चाद्ये पदचतुष्टयम् ॥ द्वारपार्श्वे भवेद्यावद्दंतपंक्त्या पदत्रयम् ॥ ६० ॥ रेखां सर्वत्र शुक्लेन रचयेद्यज्ञियोत्तमः ॥ पङ्कजं शुक्लवर्णेन वैष्णवो यागकर्मणि ॥ ६१ ॥ शक्तियोगे भवेद्रक्तं शैवे पीतं विनिर्दिशेत् ॥ प्रतिष्ठासु च सर्वासु शुक्लमेव प्रशस्यते ॥ ६२ ॥ पीतेन कर्णिका कार्या चतुर्भागेन मानतः ॥ शुभं चकोरावस्थाने तापयित्वा विचक्षणः ॥ ६३ ॥ कर्णिकामूलमारभ्य रेखाः षोडश कल्पयेत् ॥ रेखामूले भवेच्छुक्लं मध्ये रक्तं निपातयेत् ॥ ६४ ॥ अग्रे पीतं भवेदेवं कृत्वा पंकजवेष्टनम् ॥ शुभ्रवर्णेन तद्दद्यात्पीतवर्णेन सर्वतः ॥ ६५ ॥ मध्ये रक्तं भवेत्तच्च एवं षोडशकल्पयेत् ॥ कोणेषु रक्तं दद्याच्च पद्मं क्षेत्रेषु निर्दिशेत् ॥ ६६ ॥ शुक्लेन पीठगात्राणि पीठकोणे

---

[1] इडार्षः ।

पदत्रये ॥ पीतवर्णेन रचयेद्द्विधा पंक्तिद्वये तथा ॥ ६७ ॥ शुक्लेन रचयेत्पादौ पुनः पीतादिवर्णकैः॥ चित्रं सुशोभनं कार्यं तत्र कल्पलतां न्यसेत् ॥
॥६८॥ मानं कल्पलतायास्तु व्यङ्गुलं परिकीर्तितम् ॥ द्वेद्वे शस्तं च भ्रमणं शंखावर्तकमात्रयम् ॥६९॥ ग्रंथौग्रंथौ पुष्पफले नानावर्णेन भावयेत् ॥
नानापशुगणैर्युक्तं नानापक्षिगणैर्युतम् ॥ ७० ॥ वैष्णवे गारुडं शस्तं शैवे कीशवृषं लिखेत् ॥ शाक्ते व्याघ्रं तथैशे च शरभं हरिमालिखेत् ॥७१॥
शोभां पीतेन रचयेदुपशोभां च पीतकैः ॥ कोणेषु कृष्णवर्णेन बहिः स्याद्वेष्टनत्रयम् ॥ ७२ ॥ शुक्लपीतारुणैः कार्यं मण्डलं स्यान्मनोरमम् ॥
सर्वतोभद्रमपरं सर्वसिद्धिप्रदायकम् ॥ ७३ ॥ सर्वज्ञानमयं शुद्धं धर्मकामार्थदायकम् ॥ चतुरस्रं समं कृत्वा दिग्भ्यो द्वादशधा द्विजाः ॥ ७४ ॥
पातयेत्तत्र सूत्राणि कोष्ठानां दृश्यते शतम् ॥ चतुश्चत्वारिंशदाद्यं पश्चात्षट्त्रिंशदंबुजम् ॥ ७५ ॥ कोष्ठं प्रकल्पयेत्पीठं पंक्त्या चैवात्र वीथिकाम् ॥
द्वारशोभे यथापूर्वमुपशोभं च दृश्यते ॥ ७६ ॥ अवशिष्टैः पदैः कुर्यात्सद्भिस्तंत्राणि मन्त्रवित् ॥ विदध्यात्पूर्ववच्छेषमेवं वा मण्डलं भवेत् ॥ ७७॥
पूर्वोक्तमण्डले विद्वन्धरणीसदनं बहिः ॥ मध्ये कल्पलता कार्या बहिष्कोणेषु सत्तमाः ॥ ७८ ॥ गुलालीतूर्यवर्णेन महामत्त इति स्मृतः ॥ शोभोप
शोभे शोभाग्रां कुर्याद्वैमण्डलं भवेत् ॥ ७९ ॥ एतद्धि सर्वतोभद्रं राशियुक्तमतः परम् ॥ शतपत्रं वज्रनाभं बिंबनाभं सहस्रकम् ॥ ८० ॥ गजाह्वं
च गजाकारं मध्ये तु समलङ्कृतम् ॥ चतुश्चन्द्रे चन्द्रबिम्बश्चन्द्रकांतमुदाहृतम् ॥ ८१ ॥ बहिर्द्वादशभिः सूर्यैः सूर्याक्रांतं प्रकीर्तितम् ॥ शेखरी
त्रिपुटं चैव शतपत्रं च प्रक्रमात् ॥ ८२ ॥ सहस्रमेव विप्रेन्द्राः पद्मान्ते यस्य स्वस्तिकम् ॥ स्वस्तिकं तद्भवेद्विप्राः पुष्करं वज्रसंमतम् ॥ ८३ ॥
चिन्तामणिं कुंकुमांशं खातं च हरिवल्लभम् ॥ पञ्चसिंहासनस्थं च पञ्चसिंहासनं विदुः ॥ ८४ ॥ तद्वद्वृषासनं ज्ञेयं शिखिरूपं शिखिध्वजम् ॥
नारसिंहं पद्मगर्भं कपोतास्यं तथा भवेत् ॥ ८५ ॥ गारुडं मेरुगर्भं च नीलकण्ठं नराकृतिम् ॥ शतक्रतुगजारूढं श्रीबिंबनवसूत्रकम् ॥ ८६ ॥
अष्टास्रमष्टकोणाद्यं बहिः पद्मवनं कृतम् ॥ कामद्वयेन पुटितं सहस्रं पद्मवेष्टितम् ॥ ८७ ॥ त्र्यस्रगर्भं पङ्कजं च त्र्यस्रं तत्परिकीर्तितम् ॥ अष्ट
पत्राणि वै मेरुं सुमेरुं तद्विपर्यये ॥ ८८ ॥ महामहामेरुपृष्ठं शतत्रयच्छदैर्वृतम् ॥ छिद्रव्यक्तिं प्रवक्ष्यामि यथा मानेन भो द्विजाः ॥ ८९ ॥
वसु ८ दिग् १० विंशकैश्चैव २० चत्वारिंशत् ४० शतार्धकम् ५० ॥ दंडिश्रवणसंपन्न ६० माकाशं वसुसंमितम् ॥ ९० ॥
शतविंशाधिकं चैव १२० दलानि तदनन्तरम् ॥ शुक्लरक्तं चाष्टवर्णैर्बिंबोष्ठं परिपूरयेत् ॥ ९१ ॥ शुक्लेन पङ्कजं तत्र पश्चात्कुर्यात्त्रिवेष्ट
नम् ॥ शतपत्रमथो वक्ष्ये बिम्बराजेति कथ्यते ॥ ९२ ॥ स्थंडिले कुशहस्ते च पूर्ववद्वेष्टयेत्क्रमात् ॥ वसु ८ पञ्चकला १६ पञ्चविंशकं

२९ तन्नपत्रकात् ॥ ९३ ॥ चत्वारिंशत्ततः पश्चा ४० दष्टोत्तरशतं १०८ भवेत् ॥ शुक्लं शोणं तथा पीतं श्यामशुक्लैरनंतरम् ॥ ९४ ॥ विलोमे
दलसन्धीनि शाक्ते शैवे तु षट्पुरम् ॥ वेष्टयेत्पंचवर्णेन शुक्लादीनि समंततः ॥ ९५ ॥ रक्तपीतैः समास्तीर्य कोणाञ्छुक्लेन पूरयेत् ॥ स्थंडिले
तारहस्तेन अष्टहस्तं प्रकल्पयेत् ॥ ९६ ॥ मंडलं बिंबराजस्य अष्टोत्तरदलैर्वृतम् ॥ वसुपञ्चशक्तिविंशच्चत्वारिंशच्छतार्द्धकम् ॥ ९७ ॥
त्र्यृतुपत्रं सुवृत्तं स्याद्वृत्तयुक्तं सबिल्वकम् ॥ चत्वारिंशद्द्वयं चैव गगनेन समावृतम् ॥ ९८ ॥ शतं विंशाधिकशतं द्विशतं विंशमुत्तमम् ॥
वेष्टनांसे च त्रिशतं प्रक्रमादथ वर्धयेत् ॥ ९९ ॥ लवल्याभमथो वक्ष्ये सार्द्धहस्तप्रमाणतः ॥ नवविंशं कल्पयेत्तु चतुःसूत्राणि पातयेत् ॥ १०० ॥
दक्षिणोत्तरतश्चैव तद्वदेव विजानीहि ॥ पीतेन रेतपुःटिता मध्ये शुक्लं विभाव्यते ॥ १०१ ॥ ग्रहपक्षेन्नपीतेन मध्ये रक्तं प्रतिष्ठितम् ॥ सर्वा रेखाश्च
शुक्लेन पौष्टिके पीतमादिशेत् ॥ १०२ ॥ सशांतिके न योक्तव्यं कामे रक्तं विनिर्दिशेत् ॥ मध्ये तु पङ्कजं रक्तं युग्मे सोमस्य पङ्कजम् ॥ १०३ ॥
शुक्लवर्णेन तत्कुर्यात्पीतवर्णमुदस्य च ॥ ऐशान्यां चोत्तरे भागे गुरोः पीतं तु पङ्कजम् ॥ १०४ ॥ पूर्वस्यां दिशि शुक्रस्य पङ्कजं शुभ्रवर्णकम् ॥
वारुणे तु शनैः कृष्णं नैर्ऋत्यां धूम्रवर्णकम् ॥ १०५ ॥ राहोः प्रकल्पयेत्तच्च केतोरपि नियोजयेत् ॥ वायव्यां दिशि संयोज्य पङ्कजं विलिखेत्ततः ॥
॥ १०६ ॥ विलोमे दलसन्धीनि पूरयेत्सुविचक्षणः ॥ बहिः पञ्चरजैः कार्यं युवदुर्गविभूषितम् ॥ १०७ ॥ पूर्वपश्चिमदिग्भागे शुक्लं स्याद्वारदे
शतः ॥ दक्षिणोत्तरदिग्भागे रक्तमेव प्रशस्यते ॥ १०८ ॥ त्रिस्थाने सममध्ये च द्वादशांगुलप्रक्रमात् ॥ द्विहस्तादावंगुलेन वर्द्धयेत्तद्विभागतः ॥
॥ १०९ ॥ पञ्चाब्जमण्डलं ज्ञेयं चतुःस्वस्तिकभूषितम् ॥ ११० ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि द्वितीयभागे द्वितीयोऽध्यायः ॥२॥
॥ सूत उवाच ॥ ॥ न कुर्याद्दक्षिणाहीनं मानहीनं न कारयेत् ॥ अमानेन हतो यज्ञस्तस्मान्मानं प्रशस्यते ॥ १ ॥ यस्य यज्ञस्य यन्मानं
तत्तु तेनैव योजयेत् ॥ अमानेन कृते सर्वे व्रजेयुर्नरकं पुनः ॥ २ ॥ आचार्यहोतृब्रह्माणो विधिज्ञः सहकर्तृकः ॥ यस्य यज्ञे पापकश्च जातिहीनः
प्रवेशयेत् ॥ ३ ॥ अशीतिभिर्वराटैश्च पण इत्यभिधीयते ॥ तैस्तु षोडशभिर्ज्ञेयं पुराणं सप्तभिस्तु तैः ॥ ४ ॥ राजतैश्चाष्टभिः स्वर्णं यज्ञादौ
दक्षिणा स्मृता ॥ महारामे द्विसौवर्णं कूपे स्वर्णार्धमेव च ॥ ५ ॥ तुलस्यामलकीयागे सुवर्णैकं प्रचक्षते ॥ यक्कुह्लोके च सौवर्णं लक्षे स्वर्णचतु
ष्टयम् ॥ ६ ॥ नवमे कोटिहोमे च देवतानां च स्थापने ॥ प्रासादस्य समुत्सर्गे अष्टादश सुवर्णकाः ॥ ७ ॥ तडागे पुष्करिण्यां च अर्धार्धं पारि
कीर्तितम् ॥ महादाने च दीक्षायां वृषोत्सर्गे च सत्तमाः ॥ ८ ॥ जीवतश्च वृषोत्सर्गे गयाश्राद्धे तथैव च ॥ अवित्तसाध्यमानेन यज्ञं कुर्यात्कलौ

युगे ॥ ९ ॥ दंपत्योश्च वृषोत्सर्गे मानमेकमुदाहृतम् ॥ बहुभिः क्रियमाणोपि याग एको महोत्तमैः ॥ १० ॥ राज्ञः करग्रहे चैव दीक्षायां दान
कर्मणि ॥ अशीतिरत्तिकं स्वर्णं श्रवणे भारतस्य च ॥ ११ ॥ ग्रहयागे प्रतिष्ठायां सुवर्णशतरत्तिकः ॥ लक्षहोमे चायुते च कोट्यामेवं विधीयते ॥
॥ १२ ॥ देवानां ब्राह्मणानां च दानं यस्य प्रकल्पितम् ॥ तस्यैव देयं तद्दानं सांगोपांगं सदक्षिणम् ॥ १३ ॥ नानास्य किञ्चिद्दातव्यं संगभंगो
भवेद्यतः ॥ गृही तु कृत्वा यद्दानं तदा तस्य ऋणी भवेत् ॥ १४ ॥ यज्ञेषु होमे यद्द्रव्यं काष्ठमाज्यादिकं च यत् ॥ तन्नायकस्य
पूजायां द्रव्यमाहुर्विनिर्मितम् ॥ १५ ॥ अनादिदेवतार्चायां पूजास्नानादिकर्मणि ॥ यस्यार्हणादिकं द्रव्यं तस्य देवस्य तद्भवेत् ॥ १६ ॥
प्रत्यक्षं दक्षिणां दद्याद्यज्ञदानव्रतादिके ॥ अदक्षिणं नैव कार्यं प्रकुर्याद्भूरिदक्षिणम् ॥ १७ ॥ अतो दत्तं पुरा दत्तं दातव्यं चैव संप्रति ॥
परस्वोदारबुद्धीनां सासा हि दक्षिणा भवेत् ॥ १८ ॥ दत्तानि विधिवत्पुंसां देवदानानि यानि हि ॥ दासीदासगवादीनि मनसा यानि कर्हि
चित् ॥ १९ ॥ दातव्यान्यपि तान्येव कारयेत्परिवर्त्तनम् ॥ एकस्यानेकदानं च दद्देत्कश्चित्पृथक्पृथक् ॥ २० ॥ वरणं च कदा कुर्यात्तन्त्रे
कुर्याच्च दक्षिणाम् ॥ रत्नस्य दक्षिणा देया कांचनं समुदाहृतम् ॥ २१ ॥ कांचनस्य भवेद्रौप्यं रौप्ये कांचनमुद्दिशेत् ॥ भूमेर्भूमिर्द
क्षिणा स्याद्वस्त्रस्य वस्त्रदक्षिणा ॥ २२ ॥ पानीयस्य तु पानीयं व्रीहीणां व्रीहिदक्षिणा ॥ गजस्य दक्षिणा छागो ह्यश्वस्य मेष ईरितः ॥
॥२३॥ पशूनां च चतुष्पादा देवस्य देवदक्षिणा ॥ यज्ञो मानस्य षड्भागो द्विगुणः परिकीर्तितः ॥ २४ ॥ आचार्यस्यैव भागैकं यजमानः प्रदा
स्यति ॥ पापकैस्तु कलत्राणां भागैकं तदनंतरम् ॥ २५ ॥ पात्राणामृत्विगादीनां भागत्रयमुदाहृतम् ॥ सर्वसत्त्वस्य भागैकं स्वल्पं चेच्छिष्टगौर
वात् ॥२६॥ आचार्याद्यंशतः कश्चित्क्षीणवित्तं समाहरेत् ॥ अमूल्यं वर्गमूल्यं यद्भवेद्धै दक्षिणोत्तमा ॥ २७ ॥ मानाशक्तौ तु यज्ञानां यद्दे
यं यज्ञसिद्धये ॥ देवता पुस्तकं रत्नं गावो धान्यं तिलास्तथा ॥२८॥ नमेरुफलपुष्पाणि देयान्येतानि सर्वतः ॥ चतुश्चक्रांकितो यस्तु सांद्रो वृत्तो
जनार्दनः ॥२९॥ देवताप्रतिमाद्यं च शिरोनाभिस्तथैव च ॥ श्वेतलिंगं रत्नलिंगमिन्द्रनीलादिकं च यत् ॥३०॥ दक्षिणावर्तशंखं च हरिवंशस्तथा
खिलः ॥ कपिलो नीलवृषभः सोमधान्यं तथैव च ॥ ३१ ॥ अमूल्यान्याहुरेतानि दत्त्वानन्तफलानि च ॥ स्वर्णपादो भवेन्मूल्यं शालग्रामस्य
दक्षिणा ॥ ३२ ॥ क्षुद्रलिंगे स्वर्णमूल्यं पादार्धं श्रीधरेपि च ॥ अनन्तोनन्तमित्युक्तं पादार्धं बाणलिङ्गके ॥ ३३ ॥ यथा पुस्तकमात्रेण स्वर्ण
पादार्धमिष्यते ॥ ज्योतिषेर्धं सुवर्णस्य रजतार्धं वृषे तथा ॥ ३४ ॥ हरिवंशे श्लोकशते स्वर्णमेकं प्रकीर्तितम् ॥ धर्मशास्त्रस्य साहस्रे रजतत्रयमीरि

तम् ॥ ३५ ॥ कपिलायां सुवर्णार्धं धेनुमात्रे पुराणकम् ॥ प्रायश्चित्तविधौ ज्ञेयं धेनुमात्रं पुराणकम् ॥ ३६ ॥ पुराणत्रितयं चान्ये वीर्यहीने द्वयं भवेत् ॥ कृष्णे वृषे षट्पुराणं श्वेते नवपुराणकम् ॥३७॥ द्वात्रिंशच्च पुराणं स्याद्वृषे नीले तथैव च ॥ नमेरोः प्रतिचक्रे च द्वादश स्वर्णरत्तिकाः ॥ ॥ ३८ ॥ मूल्यं श्रीफलमात्रेऽपि पुराणत्रितयं भवेत् ॥ पङ्क्त्यापि तुर्यकं विद्यात्कलौ पणव्यवस्थया ॥ ३९ ॥ धात्रीफलस्य प्रत्येकं भवेद्रजतमाषकम् ॥ एतान्याहुः प्रशस्तानि मूलयोगे परं विदुः ॥ ४० ॥ ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि द्वितीयभागे मूल्यकथने तृतीयोऽध्यायः ॥ ३ ॥छ॥ ॥ सूत उवाच ॥ ॥ पूर्णपात्रमथो वक्ष्ये यज्ञे साधारणेऽपि च ॥ कामहोमे भवेन्मुष्टिर्मुष्टयोष्टौ तु कुञ्चिका ॥ १ ॥ एकैककुञ्चिमानेन कुर्यात्पात्राणि वै सदा ॥ पात्राणि च पृथक्कृत्वा स्थापयेद्द्वारदेशतः ॥ २ ॥ सिद्धानां खड्गधाराणां प्रत्येकस्य दिनक्रमात् ॥ तत्रैव दद्यान्नान्यत्र न कुर्याद्व्यत्ययं क्वचित् ॥ ३ ॥ कुण्डानां कुड्मलानां च वेदनं यादृशं शृणु ॥ चतुरस्रपदस्यापि रौप्यार्धं च कलौ युगे ॥ ४ ॥ द्वे रौप्ये सर्वतोभद्रे कौञ्चग्राणे चतुर्थकम् ॥ महासिंहासने पञ्च दशपात्रे तदर्धकम् ॥ ५ ॥ सहस्रारे मेरुपृष्ठे तुर्यरौप्यवृषाधिकम् ॥ वृषे गले च वृषभं शेषे रौप्यसहस्रकम् ॥ ६ ॥ चतुरस्रस्य निर्माणे स्वर्णपादः कलौ युगे ॥ महाकुण्डे तु द्विगुणं वृत्ते रौप्यं निवेदयेत् ॥ ७ ॥ पद्मकुण्डे तु वृषभमर्धचन्द्रे तु रौप्यकम् ॥ योनिकुण्डे ददेद्धेनुमष्टार्धस्वर्णमाषकम् ॥ ८ ॥ षडस्रे तु तदर्धं स्याद्यागे माषद्वयं भवेत् ॥ शैवे चोद्यापने चैव प्रत्यह्ना स्वर्णमाषकम् ॥ ९ ॥ दारणे हस्तमात्रं स्यात्स्वर्णकृष्णकलं भवेत् ॥ इष्टिकाकरणे चैव प्रत्यह्ना स्यात्पणद्वयम् ॥ १० ॥ खण्डे दशवराटं स्याद्दृहन्माने तु काकिणी ॥ तडागे पुष्करिण्यां च खनने प्रथमांगके ॥ ११ ॥ सप्तहस्तमिते कुण्डे निम्ने आबद्धमात्रकम् ॥ पुराणस्य च एकांशं वेतनं परिकीर्तितम् ॥ १२ ॥ वर्धयेत्पणमात्रेण निम्ने पत्रे च प्रक्रमात् ॥ बृहत्कूपस्य निर्माणे प्रत्यहं च पणद्वयम् ॥ १३ ॥ शैले ज्ञेयं काञ्चनस्य रत्तिका गृहकर्मणि॥ कोष्ठे ज्ञेयं सार्द्धपणं रंगादिरचिते पणम्॥ १४॥वृक्षाणां रोपणे दद्यात्प्रत्यह्ना सार्धमाषकम् ॥ सेतुबंधे च पंकिले च पणद्वयं च काकिणी ॥ १५ ॥ पणेपणे तु ताम्रस्य दद्यात्पणचतुष्टयम् ॥ घटने कांस्यसीसानां पणत्रयमुदाहृतम् ॥ १६ ॥ अथ वा दिनसंख्यानं पणैकं च सकाकिणि ॥ सुवर्णस्य पणैके तु पुराणं रत्नकुट्टिमे ॥ १७ ॥ रजते तु तदर्धं स्यात्स्फटिकस्य च दारणे ॥ दिनसंख्यापणद्वंद्वं रत्नानामथ कुड्मलम् ॥ १८ ॥ मणिवेधे मणौ ज्ञेयं काकिणी परिकीर्तिता ॥ चतुर्वराटमधिकं स्फाटिके मणिवेधने ॥ १९ ॥ कांस्यतालस्य निर्माणे धमने तु पणत्रयम् ॥ लाक्षानिर्माणके कार्ये तदर्धमपि कीर्तितम् ॥२०॥ गवां च दोहने चैव वराटे तुर्यवेतनम्॥वेतने वस्त्रनिर्माणे पत्रे हस्तपणत्रयम् ॥२१॥

अविवस्त्रस्य निर्माणे स्यंदनं दशकाकिणी ॥ पिधानवस्त्रनिर्माणे त्रिपणं परिकीर्तितम् ॥ २२ ॥ दश काकिणी ऊर्ध्वाधस्तद्द्वये पण्यवेतनम् ॥
वंशाजीवस्य प्रत्यह्ना पणस्यार्धे सकाकिणि ॥ २३ ॥ लोहकारस्य च तथा नापितस्य च वेतनम् ॥ शिरसा तस्य वपने विज्ञेया दश
काकिणी ॥ २४ ॥ सश्मश्रुनखमाने तु प्रदद्यात्काकिणीद्वयम् ॥ नारीणामथ संस्कारे नखचित्रादिरञ्जने ॥ २५ ॥ सकाकिणि पणं तच्च सवित्रे
च पयोधरे ॥ पणानां तुर्यकं दद्यात्सीमंतस्यालके तथा ॥ २६ ॥ पदचित्रे तु सार्द्धं स्याद्ग्रीवाणां गुह्यधारणे ॥ धान्यानां रोपणे चैव दिनैके पण
वेतनम् ॥ २७ ॥ लवणे तु तथा देया गुवाकानां च रोपणे ॥ दण्डपत्रस्य संस्कारे मरिचानां तथैव च ॥ २८ ॥ पणद्वयं वराटानामधिकं
दशमेव तु ॥ हलेहले पणैकं स्यात्काकिण्यधिकमेव च ॥ २९ ॥ पणत्रयं चक्रपणे महिषाणां पणाधिकम् ॥ नराणां वाहने चैव पणैकं दश
काकिणी ॥ ३० ॥ दासीनां गर्दभानां च अधिकं काकिणीद्वयात् ॥ क्षालने चापि वस्त्रस्य तैलक्षारविवर्जिते ॥ ३१ ॥ वस्त्रे प्रतिपणं
दद्याद्दीर्घे प्रस्थेऽपि वर्धयेत् ॥ सद्यः प्रक्षालनेऽप्यर्धं दिनादावधिकं भवेत् ॥ ३२ ॥ श्वेतवस्त्रे भवेन्न्यूनं पदे सूक्ष्मे च वर्द्धयेत् ॥
मृत्तिकानां समुद्धारे कुद्दाले चेक्षुपीडने ॥ ३३ ॥ वेतनं पुष्पसंस्कारे सहस्रे दशकाकिणी ॥ काकिणी स्रङ्निबद्धे च द्विगुणं कण्ठमालिका ॥
३४ ॥ अबद्धे द्व्यंगुलं यावन्मुण्डमाला प्रकीर्तिता ॥ हस्तत्रये कण्ठमाला आनाभि कमलावधि ॥ ३५ ॥ काकिणीकत्रयं
चैव निर्माणे द्विजसत्तमाः ॥ मालत्याश्च तुलस्याश्च जातियूथ्योश्च सत्तमाः ॥ ३६ ॥ तदर्धार्धं मारुतेन दमने बकुलस्य च ॥ वेतनं दीपतैले च
आज्यस्य परिवर्धयेत् ॥ ३७ ॥ यामेयामे रौप्यमाषं स्नेहे चैव तु काकिणी ॥ सार्धांगुलप्रमाणेन वस्त्रवर्तिं विदुर्बुधाः ॥ ३८ ॥ षडंगुलेन दैर्घ्यं च
न न्यूनं नाधिकं भवेत् ॥ पञ्चविंशतिभिः संख्या तंतुभिर्द्विजसत्तमाः ॥ ३९ ॥ पञ्चाङ्गुलेन मानेन कर्तव्यः सुसमाहितः ॥ हस्तोच्छ्राये प्रदद्यात्तु
मुष्टिहस्ते तु मध्यमम् ॥ ४० ॥ त्रिहस्ते चतुर्हस्ते वा उत्तमं मानमीरितम् ॥ स्वर्णधारे हतो राजा रजते सर्वकामदः ॥ ४१ ॥ ताम्रे चायुःक्षयकर
मायसे दुर्गतिप्रदः ॥ शस्तस्य करमर्दस्य प्रशस्तोत्तर उच्यते ॥ ४२ ॥ दीपाधारं कांस्यमयं तथारीतिमयस्य च ॥ अभावे मृन्मयस्यैव मृन्मये
मानवर्जितम् ॥ ४३ ॥ दशाङ्गधूपके मूल्यं विंशके तु पणत्रयम् ॥ द्वादशकांगुलेऽप्यर्धवर्तिं धूपाय वर्तयेत् ॥ ४४ ॥ हस्ते पंचप्रमाणं च वस्त्रैः कुर्याच्च
वर्तिकाम् ॥ पञ्चविंशतिभिर्वा यः स महावर्तिरुच्यते ॥४५॥ ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि द्वितीयभागे चतुर्थोऽध्यायः ॥४॥
॥ सूत उवाच ॥ अतः परं प्रवक्ष्यामि कलशानां विनिर्णयम् ॥ यस्यार्पिते च मांगल्ये यात्रासिद्धिश्च जायते ॥१॥ सप्ताङ्गं कलशे ज्ञेयं पञ्चाङ्गमथ

वा पुनः ॥ वारिमात्रेण संपूर्णे न सा सिद्धिः प्रजायते ॥२॥ अथ वाक्षतपुष्पेषु देवमावाह्य पूजयेत् ॥ न चान्यत्र यजेद्देवान्विफलं परिकीर्तितम्॥३॥ वटस्याश्वत्थवृक्षस्य धातकीबिल्वकस्य च ॥ पञ्चपल्लवमुद्दिष्टं विन्यसेत्कलशोपरि ॥ ४ ॥ सौवर्णा राजता वापि ताम्राद्या मृन्मयास्तथा ॥ कलशाः क्रमशः प्रोक्ता यथावित्तानुसारतः ॥ ५ ॥ अभेद्याः सुषमाः प्लक्षाः सर्वे आद्याः सुपूरिताः ॥ निश्छिद्रा ऋजवश्चैव सेचनान्येककर्षकः ॥ ६ ॥ एकत्रिंशाङ्गुलं कुर्यात्कालाहे द्विगुणं शतम् ॥ मुखं चाष्टांगुलं तस्य द्व्यंगुले च वरार्थिते ॥७॥ तैजसैः कारयेन्मानं मृन्मये मानमुच्यते ॥ कलशोदकनिर्माणे अमानं नैव योजयेत् ॥ ८ ॥ कलशस्थापनं वक्ष्ये यत्र सन्निहिताः सुराः ॥ व्युत्क्रमेण प्रविन्यासे यातुधानो हरेत्किल ॥ ९ ॥ यज्ञे साधारणं वक्ष्ये यद्विधानं यथामतम् ॥ स्वस्तिकोपरि विन्यासे संपूर्णस्यार्धमानके ॥ १० ॥ चतुरस्रोत्तरं भित्त्वा चोर्ध्वाधोमानतः समम् ॥ तुर्यसूत्राणि मतिमान्पञ्च पूर्वायतनानि च ॥ ११ ॥ मार्जयेत्स्वस्तिकाकारं तुर्यमात्रं यथा भवेत् ॥ स्वस्तिकं जायते तत्र कलशानां तथासनम् ॥ १२ ॥ स्योना पृथिवीति मंत्रेण कुर्याद्भूमिपरिग्रहम् ॥ मध्यमानानिकाभ्यां च न्यस्येत्पातालसंमुखम् ॥ ऋषिर्नारायणोऽस्य स्याद्गायत्री देवता रविः ॥ १३ ॥ विनियोगः स्थापने च तथा भूमिपरिग्रहः ॥ धान्यमसीति मन्त्रेण धान्यसूक्तं परिस्तवेत् ॥ १४ ॥ अस्य मन्त्रस्य च ऋषिर्गौतमः परिकीर्तितः ॥ अनुष्टुप्च भवेच्छन्दो देवतास्य गुरुः स्मृतः ॥ १५ ॥ आजिघ्रं कलशं मह्यां स्थापयेत्कलशं ततः ॥ कनिष्ठांगुष्ठकं त्यक्त्वा कुम्भाग्रे उदरेऽपि च ॥ १६ ॥ विन्यासश्चैव कर्तव्यस्त्र्यंगुले ब्रह्ममुद्रया ॥ आजिघ्रस्य च मन्त्रस्य ऋषिर्भर्ग उदाहृतः ॥ पंक्तिश्छन्दश्च उद्दिष्टो देवता विष्णुरव्ययः ॥ १७ ॥ कलशस्थापने चैव सोमयागे च योजयेत् ॥ पंचनद्येतिमन्त्रेण क्षिपेद्गङ्गाजलं ततः ॥ १८ ॥ देवता परमा त्रिष्टुब्देवता सोमभावितः ॥ विनियोगः पल्लवे च विन्यसेत्परिकीर्तितः ॥ १९ ॥ याः फलिनीति मंत्रेण प्रदद्यात्सफलाक्षतम् ॥ याः फलिनीति मंत्रस्य ऋषिः कमलसंज्ञकः ॥ त्रिष्टुप्छन्दो गणपतिर्देवता परिकीर्तिता ॥ २० ॥ बदरं नागरं चैव धात्री च पिचुमर्दकम् ॥ जीवंती पीवरं चैव फलान्येतानि वर्जयेत् ॥ २१ ॥ हिरण्यगर्भेति ऋचा पञ्चरत्नानि निक्षिपेत् ॥ ऋषिर्हिरण्यगर्भोस्य छन्दस्त्रिष्टुबुदाहृतम् ॥ सविता देवता चास्य रत्नन्यासेति योजयेत् ॥२२॥ अमृतीकरणं कुर्याद्दैवशुल्बनमेव च ॥ वरुणस्य त्वेति ऋषिर्वरुणांतरे योजयेत् ॥२३॥ श्रीश्च ते इति मन्त्रेण दद्यात्पुष्पं सचन्दनम् ॥ गन्धद्वारेति मंत्रेण दद्याद्गन्धं विलोडितम् ॥ २४ ॥ काण्डादिति च मन्त्रेण दद्याद्दूर्वाक्षतं पुनः ॥ व्रीहयश्चेति मन्त्रेण पञ्च व्रीहींश्च निक्षिपेत् ॥२५॥

---

१ छन्द इति शेषः ।

तिलाश्च माषा मुद्गाश्च श्यामाकाः शालयः स्मृताः ॥ पञ्च धान्यगणः प्रोक्तः सर्वारिष्टनिषूदनः ॥ २६ ॥ इति श्रीभविष्ये महापुराणे मध्यम
पर्वणि द्वितीयभागे पञ्चमोऽध्यायः॥ ५ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ अथ मासाश्रयं कर्म कर्तुं मासनिरूपणम् ॥ क्रियते तद्विधं संख्ये भवेन्मास
श्चतुर्विधः ॥ १ ॥ चान्द्रः सौरः सावनश्च नाक्षत्रश्च तथापरः ॥ शुक्लप्रतिपदं प्राप्य यावद्दर्शं च ऐन्दवः ॥ २ ॥ एकराशौ रविर्यावत्स मासः सौर
उच्यते ॥ त्रिंशता दिवसैर्मासः सावनः परिकीर्तितः ॥ ३ ॥ नाक्षत्रमासोऽश्विन्यादिरेवत्यन्तो हि विश्रुतः॥उदयादुदयं यस्तु सावनो दिवसो रवेः
॥ ४ ॥ तंत्रेणैकतिथेर्भागकालो दिवस ऐन्दवः ॥ राशेस्त्रिंशद्भागकालः कालस्त्वेकस्य भास्वतः ॥५॥ अहोरात्रं तु तज्ज्ञेयं सौरेऽपि भागमानतः॥
अहोरात्रं साधनस्य मुख्यवृत्त्यैव लभ्यते ॥ ६ ॥ सौरे चान्द्रे तूपगणौ त्रिंशद्भागे त्वदर्शनात् ॥ सावना दिवसा ग्राह्या ऋषीणां समये गृहे ॥ ७ ॥
अतिभागव्यवस्थायां प्रायश्चित्तक्रियासु च॥मन्त्रोपासनकार्ये च अन्नस्य प्राशने.शिशोः॥८॥ करस्य ग्रहणे राज्ञो व्यवहारेषु माःसु च॥यज्ञेषु दिनसं
ख्यायां ग्राह्यो मासस्तुसावनः ॥९॥ सौरमासो विवाहादौ यदाद्यैः सुप्रगृह्यते ॥ यज्ञेष्वपि व्रते वापि विहिते स्नानकर्मणि ॥१०॥ चान्द्रस्तु पार्वणे
ग्राह्यो वार्षिकेष्वष्टकासु च ॥ श्राद्धेषु तिथिकार्येषु तिथ्युक्तेषु व्रतेषु च ॥११॥ नाक्षत्रः सोमपादीनामार्यभागविचारणे ॥ करग्रहविधौ राज्ञां नायं
सर्वजनाकृतिः ॥ १२ ॥ तद्वच्चैत्रादिमासोक्तं तिथ्युक्तं कर्म दृश्यते ॥ तत्तु चान्द्रेण कर्तव्यं सा हि चैत्रादिनोच्यते ॥१३॥ राजोक्तौ सावनः प्रोक्ते
तिथिसंभागकर्मणि॥तत्र सौरो भवेद्वाच्यः सौरशब्दप्रवर्तनात् ॥१४॥ चित्रानक्षत्रयोगेन चैत्री सा पूर्णिमा स्मृता॥तयोपलक्षितो मासश्चैत्र इत्यभि
धीयते ॥ १५ ॥ स च तिथ्यात्मको मासश्चान्द्रः श्रवणभास्करः ॥ चान्द्रश्चैत्र्यंतिको मासो मुख्यश्चैत्रादिसंज्ञकः ॥ १६॥ गौणोऽप्यसौ युगाद्या
देरनुरोधेन वर्धनात् ॥ मुख्यः शुक्लादिदर्शांतो मासो लाक्षणिको मतः ॥ १७ ॥ चैत्राद्याश्चान्द्रमासा ये द्वादशापि तु योगतः ॥ पौर्णमासीयुता
भिस्तु न चर्क्षत्वं न रेभिरे ॥ १८ ॥ विशाखयाद्येषु या वा तथा भाद्रपदेन वा ॥ यत्र न पूर्णिमायोगो मासः स स्याद्विनाशकः ॥ १९ ॥ योऽसौ
यद्यपि चैत्रादौ नैष्ठिकोऽपि प्रलभ्यते ॥ यथा सौरेऽपि यातोऽसौ योगोऽयमतिदुर्घटः ॥ २० ॥ तथा च माससामान्ये योगेनायं भवेत्कचित् ॥
यदि वर्षसहस्रान्ते तदक्षेणैव पूर्णिमा ॥ २१ ॥ संयुक्ता लभ्यते यत्र भवेद्राज्यविनाशनम् ॥ सूर्याचन्द्रमसौ नित्यं कुर्वाते तिथिभोजनम् ॥ २२ ॥
दण्डद्वये भुक्तशेषे न भुञ्जीत कदाचन ॥ अतिक्रम्यापरां भोक्तुं तिथिं यत्र उभावपि ॥२३॥ यत्र विंशत्तिथिस्तस्मात्सञ्चितैका भवेदिति ॥ त्रिंशता
चान्द्रमासौ तु चन्द्रेणैको हि वर्द्धते ॥ २४॥ स चाधिको यतो मासस्ततः स्यादधिमासकः ॥ समरात्रिं दिवं कृत्वा वैवस्वतपुरीगतिम् ॥ २५ ॥

राशे राश्यंतरे सूर्यो यावद्गच्छति भानुमान् ॥ गच्छन्वर्धयति पूर्वं तिथयस्तास्तु संचिताः ॥ २६ ॥ वर्धंते तिथयो यावत्तुलां याति दिवा
करः ॥ तुलादिराशिषट्के तु न वर्द्धंते कदाचन ॥ २७ ॥ स्वभावात्समगत्या तु यतः संक्रमते रविः ॥ संचयमाना त्वेकैका प्रतिमासं विवर्द्धंते ॥
निशास्वपि तु सौरे ता एकस्मिंमस्तिस्र इत्यपि ॥ २८ ॥ संपूर्णत्रिंशत्तिथिभिर्मास्येकस्मिन्यदा भवेत् ॥ स चान्द्रो मलिनो मासः कोणपाद्यैः
समीहितः ॥ २९ ॥ भुक्तोच्छिष्टा तु तन्मासादसंस्पृष्टदिवाकरः ॥ यदा संक्रमते लंघ्य तदा ज्ञेयो मलिम्लुचः ॥ ३० ॥ सार्धवर्षद्वये पूर्णे पतत्येवं
निशाकरः ॥ परित्यक्ताश्च यावंत्यो व्युत्क्रमिण्यश्च याः पुनः ॥ तिथयस्ते नियोक्तव्या नरो न स्यात्स पूरणः ॥ ३१ ॥ नैर्ऋत्यांतं हितार्थाय
जलकेतुर्निगच्छति ॥ निर्ममं मलिनं मासं प्रेतानां च हिताय च ॥३२॥ अतः प्रेतक्रियाः सर्वाः कार्या मलिम्लुचेऽपि च ॥ यत्कर्तव्यं न कर्तव्यं
मलमासे द्विजोत्तमाः ॥३३॥ तदिदानीं प्रवक्ष्यामि कथितं च प्रसंगतः ॥ यच्छ्राद्धं प्रेतसंबंधि सपिंडीकरणावधि ॥ मलमासेऽपि तत्कार्यं विशि
नष्टि सपिंडनम् ॥ ३४ ॥ यदा तु द्वादशो मासो दैवान्मलिम्लुचो भवेत् ॥ तत्रैव यत्नात्कर्तव्या क्रिया प्रेतस्य वार्षिकी ॥ ३५ ॥ मासांतरे तु
पतिते तस्मिन्नेव मलिम्लुचे ॥ तदा त्रयोदशे मासि कर्तव्यं तत्सपिंडनम् ॥ ३६ ॥ वर्ज्यं मासिकया श्राद्धमेकं तस्मिंस्त्रयोदशे ॥ त्रिंशता घटिकैः
श्राद्धं वर्धतेऽद्यापि संमितम् ॥ ३७ ॥ कुर्यात्पत्याब्दिकं कर्म प्रयत्नेन मलिम्लुचे ॥ नैमित्तिकं च कुर्वीत नाधिकारस्तयोर्भवेत् ॥ ३८ ॥ तीर्थ
स्नानमलभ्यं तत्तदाद्यं देवदर्शनम् ॥ उपवासादिकं कर्म सीमन्तोन्नयनं तथा ॥ ३९ ॥ आर्तवजं पुंसवनं पुत्रादिमुखदर्शनम् ॥ मलमासेपि कुर्वीत
शुक्रे चास्तमुपागते ॥४०॥ मलमासेपि कुर्वीत नृपाणामभिषेचनम् ॥ व्रतारंभं प्रतिष्ठां च चूडाकर्म च मेखलाम्॥४१॥ मंत्रोपासां रहस्यं च महा
दानं सुमङ्गलम् ॥ विवाहं च गृहारंभं प्रवेशं नववेश्मनः ॥ ४२ ॥ उपग्रहं गवादीनामाश्रमांतरसंक्रमम् ॥ दीर्घमात्रासु नेज्यं वै तीर्थयात्रावसेच
नम् ॥ ४३ ॥ वर्षवृद्धिवृषोत्सर्गकन्याद्विर्नयनादि च ॥ यज्ञं च कामिकं विद्वान्मलमासे विवर्जयेत् ॥४४॥ एवमस्तं गते शुक्रे वृद्धबाल्ये च संत्य
जेत्॥पादास्तं च महास्तं च द्विविधं चास्तमस्य तु ॥ ४५ ॥ द्विसप्ततिर्दिनान्यस्य महास्तं पूर्वतो भवेत् ॥ पृथिव्यामेव पादास्तं भवेद्द्वादश
वत्सरान् ॥ ४६ ॥ ऊनपञ्चाशदधिकं दिवसानां शतद्वयम् ॥ प्रतीच्यामुदितः काव्यो दृश्यो भवति सर्वदा ॥ ४७ ॥ एकर्क्षे गुरुणा
युक्तो यावत्तिष्ठति भार्गवः ॥ मलमासवत्कर्माणि प्राहुस्त्याज्यानि सर्वशः ॥४८॥ ऋक्षभेदे त्वेकराशौ संपर्के यदि वानयोः ॥ गुरो राहोरपि
तथा त्यजेद्विद्वान्न संशयः ॥ ४९ ॥ सिंहे राशौ स्थिते सूर्ये जीवे चास्तमुपागते ॥ हेयानि यानि कर्माणि निषिद्धानि मलिम्लुचे ॥ ५० ॥

मिथुनस्थे यदा भानौ मलमासः पतत्यसौ ॥ द्विराषाढ इति ख्यातो गौणे शब्दविवर्तनात् ॥ ५१ ॥ फलं चात्र मृतस्यौर्ध्वदे
हिकं कर्म कुर्वता ॥ आषाढकीर्तनं कार्यमेवं वर्षांतरेऽपि च ॥ ५२ ॥ आषाढद्वयसंयुक्तपूर्णमासीद्वयं तथा ॥ युग्मकर्कटयो राश्यो
द्विराषाढस्तदा भवेत् ॥ ५३ ॥ भवेद्द्रौणो द्विराषाढो राशिस्तत्रैव संयुते ॥ पूर्वत्रिके तु पतिते तदेव भगवान्हरिः ॥ ५४ ॥ कर्कटे
शयनं कुर्यादागमिष्यं परत्रके ॥ कर्किण्यर्के सुप्तहरौ शक्रपूजाश्विने भवेत् ॥ ५५ ॥ दुर्गोत्थानं तुलायां तु विष्णुर्निद्रां जहात्यसौ ॥ ५६ ॥
इति श्रीभविष्ये महापुराणे मध्यमपर्वणि द्वितीयभागे षष्ठोऽध्यायः ॥ ६ ॥छ॥ ॥ सूत उवाच ॥ ॥ दैवं वा पैतृकं कर्म कालमाश्रित्य वर्तते ॥
काले तान्येव कर्माणि फलं यच्छंति कुर्वताम् ॥ १ ॥ मुहुर्बाल्ये कर्मफलं त्रिकालेऽपि न विद्यते ॥ व्ययो वा मुख्यभावेन फलदः कर्मशालि
नाम् ॥ २ ॥ कालस्तु गुणभावेन सर्वकालाश्रिता क्रिया ॥ न कालेन विना किञ्चित्त्रिषु लोकेषु जायते ॥ ३ ॥ अतः कालं प्रवक्ष्यामि निमित्तं
कर्मणामिह ॥ काले ह्यमूर्तिर्भगवानेक एव तु यद्यपि ॥ तथाप्युपाधिभेदेन भिद्यते कालभेदिभिः ॥४॥ तिथिनक्षत्रवारादौ रात्रियोगादयोपि ये ॥
तेऽपि कालाः पक्षमासराशिवर्षांतरेऽपि च ॥ साधनानि भवन्त्येते स्वातन्त्र्येण न कस्यचित् ॥५॥ धर्मस्य वाप्यधर्मस्य मुख्यो व्यापार एव सः ॥
तिथ्यादिकालभावेषु निषिद्धं निहितं हि तत् ॥ ६ ॥ पालयन्स्वर्गमाप्नोति हित्वा प्राप्नोत्यधोगतिम् ॥ साधयंत्यपि कर्माणि परस्परमवेक्ष्यते ॥
॥ ७ ॥ कालभागो निःसहायो येऽपि स्युः कर्मसाधनाः ॥ तिथौ पूर्वाह्णव्यापिन्यां कुर्वीत कर्म वैदिकम् ॥ ८ ॥ एकोद्दिष्टं तु मध्याह्नव्यापिन्यां
हि समाचरेत् ॥ पराह्णव्यापिनीं प्राप्यःतिथिं कुर्यात्तु पार्वणम् ॥ ९ ॥ न तु पूर्वाह्णमध्याह्नपराह्णेषु यथोचितम् ॥ अप्रधाने तु कुर्वीत कर्म दैवादिकं
च यत् ॥१०॥ एको हि कालः प्रातस्तु वृद्धिश्राद्धादिसाधने ॥ नापेक्षते साहाय्यं तत्तिथ्यादिविषुवादिषु ॥११॥ देवेभ्यो ब्रह्मणा दत्तः पूर्वाह्णस्ति
थिभिः सह ॥ पितृभ्यो ह्यपराह्णस्तु पार्वणं तु परं विना ॥ १२ ॥ पूर्वाह्णमात्रसंप्राप्तौ ततो देवान्प्रपूजयेत् ॥ पूर्वाह्णस्पर्शमात्रेऽपि तिथिखण्डेन चार्प
येत् ॥१३॥ खर्वा दर्पा तथा हिंस्रा तिथिश्च त्रिविधा भवेत ॥ खर्वादि लंघयेत्तुल्या दर्पा भवति वर्द्धिता ॥१४॥ हिंस्रा तु क्षयजा ज्ञेया कालभेदेन
गृह्यते ॥ खर्वा दर्पा परे ग्राह्या हिंस्रा ग्राह्या तु पूर्वतः ॥ १६॥ शुक्लपक्षे परा ग्राह्या कृष्णे पूर्वा प्रशस्यते ॥ स्नानदानव्रते चैव विषयोगो निदर्शितः
॥ १७ ॥ तिथौ चोदेति सविता कालमात्रं च वा यदि ॥ अन्यापि सैव विज्ञेया तिथिस्तस्मिन्नहर्निशम् ॥ १८ ॥ यथावास्ते रविर्भाति घटिका
दश वापि वा ॥ सा तिथिस्तदहोरात्रं व्यपदेश्या न चेतरा ॥१९॥ शुक्ले वा यदि वा कृष्णे खर्वा दर्पा तिथिश्च या ॥ ययास्तं सविता याति पितृकार्ये

च सा तिथिः ॥ २० ॥ दिनद्वयेऽपि कुतपे अस्तगां तिथिमाश्रयेत् ॥ श्राद्धकालादिकं यत्र तत्र श्राद्धं विधीयते ॥ व्रते च वृद्धिगामिन्यां यत्रोदयो
रवेर्भवेत् ॥२१॥ अमावास्यपार्वणे च सा तिथिः पितृपूजने ॥ अमावस्यामृतस्यैव पार्वणं यत्र कुत्रचित् ॥२२॥ अस्तगामितिथिर्यत्र सा तिथिः
पितृमंदिरम्॥एकोदिष्टं चरेत्तत्र नोदये च कदाचन॥२३॥शुक्लपक्षे च कृष्णे च यो योगः परपूर्वयोः॥पूर्वेद्युर्वा परेद्युर्वा त्रिसंध्यव्यापिनी तिथिः॥
सा पूज्या च स्वकृत्येषु पक्षयोरुभयोरपि ॥२४॥ पूज्या हि व्यस्तं संत्यज्य पूर्वं चैकादशीयुगम् ॥ द्वितीया वह्निना युक्ता चतुर्थी पंचमीयुता ॥
॥ २५ ॥ एता उपोष्यास्तिथयः पुण्याः स्युर्धर्मवेदिभिः ॥ एतद्व्यस्तास्तु पुण्यानि घ्नंति पूर्वकृतान्यपि ॥ २६ ॥ बाणेन विद्धा या षष्ठी मुनिविद्धा
तथाष्टमी ॥ दशम्येकादशीविद्धा त्रयोदश्या चतुर्दशी ॥ २७ ॥ अमावास्या भूतविद्धा नोपोष्या मुनिनापि च ॥ हंति पुत्रकलत्राणि धनानि
समुपोषिता ॥ २८ ॥ विद्धा ये नाभिनिन्द्याः स्युर्युक्तास्तेनाभिनन्दिताः ॥ व्यस्तस्य संभवे युग्मं विद्धा भवति सर्वशः ॥२९॥ तामस्तां तु तिथिं
प्राप्य युग्मान्यपूज्यतामियुः ॥ युग्मानि च दिवायोगे ग्राह्याणि व्यस्तनिंदनम् ॥ ३० ॥ नक्तादिव्रतयोगे तु दिवासंवर्द्धमर्करान् ॥ रात्रियोगश्च
तुर्थ्योस्तु विशिष्य परिगृह्यते ॥ ३१ ॥ रात्रियोगं विनापि स्यादेकादश्यादिकं व्रतम् ॥ नक्तं जागरणं चैव विनायोगेऽपि शस्यते ॥ ३२ ॥ एकादश्युपवासं तु द्वादशीयोगतश्चरेत् ॥ दिवायोगे तु संपूर्णां त्यजेदुभयपूर्वतः ॥ ३३ ॥ रात्रियोगे तु संपूर्णा सोपास्यैकादशी सदा ॥ सप्तमी शुक्लपक्षेऽपि पूज्या षष्ठ्या समन्विता ॥ ३४ ॥ निशि तु स्याद्यदा षष्ठी सप्तमी नवमी दिवा ॥ उपोष्य केवलां षष्ठीं तोषयेद्भास्करं नरः ॥ ३५ ॥ एवं
त्रयोदशीं कृष्णां विधिप्राप्तां विना द्विजाः ॥ उपोष्य पार्वतीनाथं तोषयेद्यश्च केवलम् ॥३६ ॥ दिवा त्रयोदशीयुक्ता कृष्णोपोष्या चतुर्दशी ॥ परेणापि चतुर्दश्या न तु कुर्यादमातिथौ ॥३७॥ त्रिसंध्यव्यापिनीं प्राप्य यदि कुर्यादुपोषणम् ॥ पारणं तु सिनीवाल्यां चतुर्दश्यामुपोषयेत्॥३८॥
चतुर्दशीमतिक्रम्य सिनीवाल्यां तु पारणात् ॥ व्रतानि तस्य नश्यंति प्राक्कृतानि चतुर्दशीम् ॥३९॥ सप्तमी ललिता भाद्रे शक्रोत्थानं च वारुणी ॥
पूज्याश्चैताः पराः कुर्यात्रिसंध्यव्यापिनीष्वपि ॥४०॥ त्रिसंध्याव्यापिनी पूर्वे परतो वर्द्धते यदि ॥ सऋक्षा ऋक्षयोगे तु ऋक्षाभावे परा युता॥४१॥
ऋक्षाभावे परा ग्राह्या त्रिसंध्यव्यापिनीष्वपि ॥ श्रावणे चाद्यपादे तु प्रशस्ता शक्रपूजने ॥४२॥ अभावे चोत्तराषाढा धनिष्ठा च विशिष्यते ॥ दण्डार्धं
दण्डमेकं वा तदर्धं पलमेव वा ॥४३॥ उदये संयुता ग्राह्या सा तिथिश्चोत्तमा भवेत् ॥ त्रिसंध्यव्यापिनीं हित्वा पूज्या शुक्लाष्टमी परा ॥४४॥ रविचक्रवता ग्राह्या रथे तिथ्यादेरपि च ॥ त्रिसंध्यव्यापिनी या तु पलमेकं परे दिने ॥४५॥ अपरेऽपि च सर्वत्र हलानां वाहनं त्यजेत्॥ शुक्लैकादश्य

मावास्यासंक्रान्त्यां श्राद्धवासरे ॥४६॥ नराश्वगोगजादीनां वाहनात्पातकी भवेत् ॥४७॥ कर्तुर्गोमहिषादीनां गर्दभोष्ट्रखरस्य च ॥ न वाहयेद्दास
दासीं वाहनेनास्ति दूषणम् ॥ ४८ ॥ बहुकालिकयज्ञे च यज्ञश्राद्धे तथैव च ॥ ग्रामांतरे न दोषः स्याद्दिवि नद्यंतरेऽपि च ॥ ४९ ॥ नित्यश्राद्धेऽ
प्यम्बुघटे यच्छ्राद्धं मासिकं भवेत् ॥ तत्र गोमहिषादीनां वाहने नास्ति दूषणम् ॥ ५० ॥ कुर्यादंबुघटश्राद्धं न कालनियमं क्वचित् ॥ न चात्र
नियमं कुर्यादश्मपात्रं च वर्जयेत् ॥ ५१ ॥ तैजसैर्निर्मितं कुम्भमथ वा वृक्षपत्रजम् ॥ न योजयेन्मृन्मयं च शूद्राणां मृन्मये विधिः ॥ ५२ ॥
निवेदयेच्च मासांते मृन्मयं वृक्षमूलके ॥ आस्फालयेत्परेणैव न वस्त्रं तु कथञ्चन ॥ पर्वश्राद्धे दैवलकं तथा रण्डाश्रमं त्यजेत् ॥ ५३ ॥ मातापितृ
परित्यागी तैलहव्यादिविक्रयी ॥ चत्वारिंशदुत्सवानां साष्टानां च चरेद्यदि ॥ ५४ ॥ स्त्रिया विमुच्यते कश्चित्स तु रण्डाश्रमी मतः ॥ अष्टंचत्वा
रिंशदब्दं वयो यावन्न पूर्य्यते ॥ ५५ ॥ पुत्रभार्य्यावियुक्तस्य नास्ति यज्ञाधिकारिता ॥ ५६ ॥ यां तिथिं समनुप्राप्य समुदेति दिवाकरः ॥ स्नाना
ध्ययनदानेषु सा तिथिः सकला स्मृता ॥ ५७ ॥ ययास्तं सविता याति कृष्णपक्षे तु सा तिथिः ॥ पितॄणां सकला ज्ञेया स्नानदानादिकर्मसु ॥
॥ ५८ ॥ सप्तमी शुक्लपक्षे या यावदिच्छेच्च खण्डिता ॥ आद्यभागे रवेः षष्ठ्यां परादौ याष्टमीयुता ॥ यद्यखण्डा भवेत्सैव तदा ज्ञेया भवात्मिका
॥ ५९ ॥ माघमासेन साप्येवं पूर्वेण रवितोषिणी ॥ मन्वंतरा परेणैव स्नानपानादिकर्मसु ॥ ६० ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि
द्वितीयभागे सप्तमोध्यायः ॥ ७ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ तिथीनां प्रवरा यस्माद्ब्रह्मणा समुदाहृता ॥ प्रतिपादिता परे पूर्वे प्रतिपाद्य
नवोद्यते ॥ १ ॥ कार्तिकाश्वयुजोश्चैत्रे माघे चापि विशेषतः ॥ स्नानं दानं दशगुणं शिवविष्ण्वोश्च पूजनम् ॥ २ ॥ अग्निमिष्ट्वा च कृत्वा च प्रति
पद्यामिति स्मृतम् ॥ हविषा सर्वधान्यानि प्राप्नुयादीप्सितं धनम् ॥ ३ ॥ बृहस्पतौ द्वितीयायां शुक्लायां विधिपूजनम् ॥ कृत्वा नक्तं समश्नीयाल्ल
भते भूतिमीप्सिताम् ॥४॥ मिथुने कर्कटे चैव गोविप्रदमनांतरम् ॥ द्वितीया यातु विप्रेंद्रास्तामुपोष्य हरिं यजेत् ॥ यामुपोष्य न वैधव्यं प्रयाति
स्त्री न संशयः ॥ ५ ॥ अमूल्यशयनं मासं दंपती प्रतिपूजयेत् ॥ वासोभिर्गन्धपुष्पैश्च नानाभक्ष्यैः पृथग्विधैः ॥ ६ ॥ वैशाखे शुक्लपक्षे तु
तृतीयायां तथैव च ॥ गंगातोये नरः स्नात्वा मुच्यते सर्वकिल्बिषैः ॥७॥ स्वातियुक्ततृतीयायां वैशाखे तु विशेषतः ॥ माघे तु रोहिणीयुक्ता वृषे
चाश्वयुजे तथा ॥ ८ ॥ तस्यां यद्दीयते किञ्चित्तदक्षयमुदाहृतम् ॥ विशेषतो हविष्यान्नं मोदकादिसमायुतम् ॥९॥ तोयदानं विशेषेण प्रशंसंतिमनी
षिणः ॥ गुडकर्पूरसंयुक्तं ब्रह्मलोके महीयते ॥ १० ॥ बुधश्रवणसंयुक्ता तृतीया यदि लभ्यते ॥ तस्यां स्नानोपवासाद्यमक्षयं परिकीर्तितम् ॥११॥

चतुर्थीभरणीयोगे भवेच्चरदिनं यदा ॥ तदाभ्यर्च्य यमं देवं मुच्यते सर्वकिल्बिषैः ॥ १२ ॥ शिवा शांता सुखा चैव चतुर्थी त्रिविधास्मृता ॥ सापि भाद्रपदे शुक्ला शिवलोके सुपूजिता ॥ १३ ॥ कार्त्तिके तु भवेच्छाया तथा माघे तु कीर्त्यते ॥ तस्यां स्नानं तपो दानमुपवासो जपस्तथा ॥ भवेत्सहस्रगुणितं श्राद्धं भवति चाक्षयम् ॥ १४ ॥ गणेशे कारयेत्पूजां मोदकादिभिरादरात् ॥ चतुर्थ्यां विघ्ननाशाय सर्वकामप्रसिद्धये ॥ १५ ॥ श्रावणे मासि पञ्चम्यां शुक्लपक्षे विशेषतः ॥ स्नापयेन्नवनागांश्च गंधतोयैः सुगंधिभिः ॥ १६ ॥ तेषां कुले प्रयच्छंति अभयं प्राणरक्षणम् ॥ १७ ॥ द्वादश्योभयलेखे च गोमयेन विशेषतः ॥ पूजयेद्दधिदुग्धाद्यैः सिंदूरैरपि भक्तितः ॥ १८ ॥ सुप्ते जनार्दने कृष्णपञ्चम्यां भवनांगणे ॥ पूजयेन्मनसा देवीं वामां स्नुहीति संश्रयाम् ॥ १९ ॥ पिचुमंदस्य पत्राणि स्थापयेद्भवनोदरे ॥ पूजयित्वा नरो देवीं न सर्पभयमाप्नुयात् ॥ २० ॥ येयं भाद्रपदे षष्ठी षष्ठी च द्विजसत्तम ॥ स्नानदानादिकं तस्यां सर्वमक्षयमुच्यते ॥ २१ ॥ षष्ठ्यां फलाशनो विप्रा विशेषान्माघकार्तिके ॥ इह चामुत्र मुख्यां च लभते ख्यातिमुत्तमाम् ॥ २२ ॥ शुक्ले पक्षे च सप्तम्यां यदा संक्रमते रविः ॥ महाजया तदा स्याद्वै सप्तमी भास्करप्रिया ॥ २३ ॥ अपराजिता तु भाद्रस्य महापातकनाशिनी ॥ ललिता केवला ज्ञेया पुत्रपौत्रविवर्द्धिनी ॥ २४ ॥ शुक्ला वा यदि वा कृष्णा षष्ठी वा सप्तमी तु वा ॥ रविवारेण संयुक्ता तिथिः पुण्यतमा स्मृता ॥ २५ ॥ आश्विनस्य सिताष्टम्यामष्टादशभुजां यजेत् ॥ कार्त्तिके शुक्लपक्षे वा महाविभवविस्तरैः ॥ २६ ॥ आषाढे श्रावणे मासि शुक्लाष्टम्यां च चंडिकाम् ॥ प्रातः स्नात्वार्चयेद्भक्त्या रात्रौ संस्नापयेद्द्विजाः ॥ २७ ॥ चैत्रमासि सिताष्टम्यामशोककुसुमैर्द्विजाः ॥ अर्चयेन्मृन्मयीं देवीमशोकार्थं च सर्वदा ॥ २८ ॥ सत्यष्टममुहूर्ते वा रोहिणीसहिताष्टमी ॥ श्रावणे मासि सिंहार्के क्वचित्सापि च शस्यते ॥ २९ ॥ एकादशीनां कोटीनां व्रतैश्च लभते फलम् ॥ अतो दशगुणं प्रोक्तं कृत्वैतत्फलमाप्नुयात् ॥ ३० ॥ अशक्तोऽन्यक्रियां कर्तुमुपवासं तु केवलम् ॥ कृत्वा विमुच्यते पापात्सप्तकृत्यकृतां वरः ॥३१॥ न कालनियमस्तत्र न वारनियमः क्वचित् ॥ नापि नक्षत्रदोषोऽस्ति वारदोषो न गण्यते ॥ ३२ ॥ त्रिकालं पूजये देवं दिवा रात्रौ विशेषतः ॥ अर्धरात्रे विशेषेण पुष्पैर्नानाविधैरपि ॥३३॥ दिवा तिथेरलाभे तु न कुर्याद्विधिवद्व्रतम् ॥ रात्रिस्पर्शे यदि परं रजन्यामपि चाष्टमी ॥३४॥ सप्तमी सार्धयामं च रोहिणी वा न संस्पृशेत्॥ व्रती संकल्पयेत्तत्र न च रात्रौ कदाचन॥३५॥प्रागारंभं प्रकुर्वीत अधिमात्राधिके व्रती ॥ विश्वनाथादिदेवानां दर्शनं प्राग्विवर्जयेत् ॥३६॥ यत्र तत्रोपवासी स्याद्यामाष्टकव्रतं चरेत् ॥ यामार्धं तत्परं यामे पारणं विचरेद्व्रती ॥३७॥

तत्परे चाऽन्नजन्यं वा न कुर्यात्पारणं गृही ॥ ३८ ॥ नक्षत्रयोगे ग्रहणे पूजयेत्परमेश्वरम् ॥ जपहोमादिकं कुर्याद्गृही नोपवसेत्क्वचित् ॥ ३९ ॥ दिवाष्टम्यां मुहूर्ते वा प्राजापत्येन संयुतम् ॥ तथापि च दिवाकृत्यं समाप्य च व्रतं चरेत् ॥ ४० ॥ मुहूर्तांते च मासांते अष्टम्यामपि रोहिणी ॥ उपवासे च यो दोषः पूजाहोमः प्रशस्यते ॥ ४१ ॥ नवम्यां च सदा पूज्याः प्रतिमासेऽयुतं द्विजाः ॥ गृह्णीयान्नियमं चैव यथा कर्म फलप्रदम् ॥ ॥ ४२ ॥ कार्तिकस्य तु मासस्य दशमी शुक्लपक्षिका ॥ तस्यां युक्ताशना विप्रा ब्रह्मलोकमवाप्नुयुः ॥ ४३ ॥ दशमी ज्येष्ठमासस्य सा चेद्दशहरा स्मृता ॥ आश्विनस्य महापुण्या कार्तिके विजया स्मृता ॥ ४४ ॥ एकादशी व्रतपरा सर्वपापप्रणाशिनी ॥ सर्वपापविनिर्मुक्ता यथा कुर्वंति मानवाः ॥ ४५ ॥ दशम्यामेकभक्तस्तु संयतः स्याज्जितेन्द्रियः ॥ एकादश्यामुपोष्याथ द्वादश्यां पारणं चरेत् ॥४६॥ द्वादश द्वादशीर्हन्ति तस्मात्तथाचरेद्बुधः ॥ पूर्वेद्युरेकादशी पूर्णा परेहनि च वर्धते ॥ ४७ ॥ न वर्धते द्वादशी तु तदा त्वेवं व्यवस्थितिः ॥ वनवासी परां कुर्यात्पूर्वां कुर्याद्गृहाश्रमी ॥४८॥ पूर्वैवैकादशी त्याज्या वर्धते चेत्तिथिद्वयम् ॥ एकादशी द्वादशी तु तदोपोष्या परा तिथिः ॥ ४९ ॥ यदा तु पारणायोग्या द्वादशी नोपतिष्ठते ॥ तदा पूर्वैव संग्राह्या त्याज्या वृद्धा परेऽहनि ॥ ५० ॥ एकादशी कलायुक्ता सकला द्वादशी यदि ॥ तत्र क्रतुसमं पुण्यं त्रयोदश्यां तु पारणम् ॥ ५१ ॥ एकादशी द्वादशी च परेऽहनि न लभ्यते ॥ नोपोष्या सा महादोषा पुत्रपौत्रधनक्षयात् ॥ ५२ ॥ एकादशी दशाविद्धा द्वादश्यां लिप्तिका यदा ॥ द्वादशी पारणायोग्या वर्धते चापरेऽहनि ॥ तदा दिनद्वये त्याज्या पारणं च नियोगतः ॥ ५३ ॥ षोडशीग्रहणं दृष्ट्वा द्वादशी लुप्तपारणा ॥ चण्डातिथौ व्रतं चैव हंति पुण्यं पुरा कृतम् ॥ ५४ ॥ त्रयोदश्यां यद्विहितं पारणं न तु पुण्यदम् ॥ गृहाश्रमी न कुर्याद्वा दशमीद्वादशीक्षयात् ॥ ५५ ॥ यदि रुद्रा दशमित्रा परेऽह्निरविसंक्रमः ॥ तथापि संपरित्यज्य द्वादश्यां समुपावसेत् ॥ ५६ ॥ वज्रालोकनमात्रं तु दशमी संविशेद्यदि ॥ एकादशी न भोक्तव्या परा ह्येकादशी तदा ॥ ५७ ॥ तदा चेद्दशमीविद्धा समुपोष्या न दूषणम् ॥ ५८ ॥ द्वादश्यामुपवासं तु यः करोति नरोत्तमः ॥ स याति परमं स्थानं यत्र विष्णुरनामयः ॥ ५९ ॥ उपोष्य दशमीमित्रां मोहादेकादशीं नरः ॥ निरयं याति स प्रेत्य धर्मसंततिसंक्षयात् ॥ ६० ॥ रविवारे शुक्रवारे संक्रान्त्यां तु दिनक्षये ॥ उपवासं प्रकुर्वीत पारणं तु विवर्जयेत् ॥ ६१ ॥ शुक्लां वा यदि वा कृष्णां पूर्वसंकल्पितामपि ॥ एकादशीं सदा कुर्यान्न वै कृष्णेत्तरां क्वचित् ॥६२॥ नक्तेन वर्तयेत्कृष्णामिति शास्त्रविनिश्चयः ॥ मासे चैकादशी यत्र लभ्यते शुक्लपक्षके ॥ तत्र कुर्यात्कृष्णपक्षे परा तिथिर्न गृह्यते ॥६३॥ श्रावणी द्वादशी शुक्ला चांद्रभद्रे यदा हरौ ॥ तत्रोपोष्य हृषीकेशं पूजयेद्वि

धिवन्नरः ॥ ६४ ॥ श्रावणे चाश्विने चैव लभ्यते द्वादशीदिने ॥ श्रवणेन समायुक्ता महती सा प्रकीर्तिता ॥ ६५ ॥ पुष्येण द्वादशीयुक्ता फाल्गुने
विजया स्मृता ॥ कार्तिके चेत्परित्याज्या माघे तु नारकी भवेत् ॥६६॥ या भाद्रे विजया प्रोक्ता श्रवणेन समायुता॥विशेषः कथ्यते तत्र यथावद्व्रत
माचरेत् ॥६७॥ एकादश्यामुत्तरतो द्वादशी च दिवान्विता ॥ निशि पूर्णा द्वादशी च श्रवणेनापि संयुता ॥६८॥ सफला द्वादशी ज्ञेया उपोष्यैषा
महाफला ॥ ६९ ॥ द्वादश्यां विष्णुविद्धायां वासुदेवं प्रपूजयेत् ॥ कृष्णायां तु व्रतं कुर्याद्बहुदुःखं समाचरेत् ॥ ७० ॥ द्वादशी कामविद्धा चेन्म
न्यते नाप्युपोषणम् ॥ हन्यात्पुराकृतं पुण्यं त्रयोदश्यामुपोषणम् ॥७१॥ प्रहरेप्रहरे स्नानं शर्वर्यां च विधीयते ॥ पूजनं चाग्निकार्यं च षट्सु कार्यं
व्रती चरेत् ॥७२॥ एकादशीं द्वादशीं च प्राप्नोति श्रवणे यदि ॥ एकादश्यामुपोष्याथ द्वादश्यामप्युपावसेत्॥७३॥पारणं तु त्रयोदश्यां द्वादशी चेन्न
लभ्यते ॥ आमिषान्नं न भुञ्जीत हविष्यान्नेन पारणम् ॥७४॥ यदा तु पारणायोग्या लभ्यते द्वादशी तदा ॥ तस्यां नातिक्रमो युक्तस्तदभावे त्रयो
दशी॥७५॥ एकादशी द्वादशी च श्रवणर्क्षेण संयुता ॥ विष्णुशृंखलको नाम बुधवारे विशिष्यते ॥७६॥ दशम्यां संयतो भूत्वा प्रातरेकादशीदिने ॥
कृत्वा तु सङ्गमे स्नानं प्रहरेप्रहरे द्विजाः ॥७७॥ अनेन विधिना कृत्वा विजयायां व्रतोत्तमम् ॥ सर्वपापं क्षयं नीत्वा विष्णुलोके वसेन्नरः ॥ ७८ ॥
चतुर्युगानां दिव्यानां यावत्स्याद्विष्णुरूपधृक् ॥ तावदेव हि सर्वत्र सार्वभौमो भवेन्नरः ॥ ७९ ॥ त्रेतायां दश जन्मानि मध्यदेशेषु भो द्विजाः ॥
ततश्च भारते वर्षे वेदवेदांतसारवित् ॥ पुत्रपौत्रधनैर्युक्तो लक्षदो नृपसन्निभः ॥ ८० ॥ जायते दश जन्मानि त्रेतायां ब्राह्मणोत्तमः ॥ सपत्नीकश्च
दीर्घायुर्धर्मकर्मसु पूजितः ॥ ८१ ॥ भाद्रे मासि सिते पक्षे द्वादश्यां पृथिवीपतिम् ॥ शत्रुमुत्थापयेत्प्राह्णे शुभलग्ने शुभक्षणे ॥ ८२ ॥ शल्यशा
ल्मलिकस्यापि सप्तपर्णीयकस्य च ॥ एषामन्यतमं वृक्षं चंपकस्यार्जुनस्य वा ॥ ८३ ॥ बृहत्कदंबवृक्षस्य द्विचत्वारिंशदंगुलैः ॥ द्वात्रिंशदंगुलैर्वापि
मानद्वयमथापि वा ॥ त्रिव्यायामं च प्रथमं द्वाविंशहस्तमेव वा ॥ ८४ ॥ हस्तः षोडशवारस्य गृहस्थस्य विशिष्यते ॥ हस्तत्रयेण विप्रस्य
द्वादश क्षत्रियस्य तु ॥ ८५ ॥ अष्टहस्तं तु वैश्यस्य शूद्रस्य पञ्चहस्तकम् ॥ अभ्रतः श्वेतच्छत्रं स्यात्पताका च पुरेपुरे ॥ ८६ ॥ घनसारसमायुक्तां
कर्पूरमंडनान्विताम् ॥ रक्तवस्त्रपरिच्छन्नां पुष्पमाल्यैरलंकृताम् ॥ ८७ ॥ मञ्चस्थां कारयेत्पूजां भक्त्या च सुदृढो नरः ॥ सप्तरात्रं चरेत्पूजा
मैन्द्रमन्त्रेण मन्त्रवित् ॥ ८८ ॥ काकादीन्न स्पृशेज्जातु वैरपक्षे विशेषतः ॥ पताकाया निपाते तु राष्ट्रहानिं समादिशेत् ॥ ८९ ॥ पताके निस्सृते
भग्ने महिषाणां विनाशनम् ॥ स्थूणापाते च भग्ने वा चाश्वहानिं समादिशेत् ॥ ९० ॥ तस्करश्च कुले तस्य प्रायश्चित्तं समाचरेत् ॥ तद्विष्णो

रिति मंत्रेण शतपञ्चसमन्वितम् ॥ ९१ ॥ विष्णुमुद्दिश्य जुहुयादयुतं पिप्पलस्य च ॥ ग्रहाणां च त्रिभागेन चायुतं जुहुयाद्बुधः ॥ ९२ ॥
आदित्यस्याद्भुतमिदं द्विजपाते तु भो द्विजाः ॥ कपोतपाते शुक्रस्य काकादौ भौममादिशेत् ॥ ९३ ॥ भूकंपे जायते विष्टं गुरोरद्भुतमादिशेत् ॥
कीटविद्धे कृते विप्राश्चन्द्रस्याद्भुतमादिशेत् ॥ ९४ ॥ पताके निस्सृते भग्ने राहोरद्भुतमादिशेत् ॥ ९५ ॥ शिवा रुवंति चान्द्रस्य वानरो वा
स्पृशेत्क्वचित् ॥ केतोरद्भुतमुद्दिष्टं भूमिकंपे तु ते द्विजाः ॥ ९६ ॥ त्रयोदशीं सितां प्राप्य पुष्पैर्नानाविधैरपि ॥ कामदेवं समभ्यर्चेद्गन्धाद्यैः
सुमनोहरैः ॥ ९७ ॥ चैत्रे मासि सिताष्टम्यां शनौ शतभिषा यदि ॥ गंगाया यदि लभ्येत सूर्यग्रहशतैः समा ॥ ९८ ॥ सेयं महावारुणीति
ख्याता कृष्णत्रयोदशी ॥ अस्यां स्नानं च दानं च श्राद्धं वाक्षयमुच्यते ॥ ९९ ॥ मधुमासे सिते पक्षे दम्भभञ्जी चतुर्दशी ॥ तस्यां मदनमूले
च अक्षरं काममर्चयेत् ॥ १०० ॥ स याति परमं स्थानं मदनस्य प्रभावतः ॥ जुगुप्सितवचोभिस्तु सम्यक्तुष्टो मनोभवः ॥ १०१ ॥ अनन्तस्य
व्रतं वक्ष्ये सर्वपापप्रणाशनम् ॥ अनन्तं सुखमाप्नोति यः कुर्याद्भक्तिमान्नरः ॥ १०२ ॥ द्वादश्यां पूजिते शक्रे ध्वजके वास्तुयष्टिषु ॥ ततः शुक्ल
चतुर्दश्यामनन्तं पूजयेद्धरिम् ॥ १०३ ॥ कृत्वा दर्भमयानन्तं वारिधान्यान्वितं तथा ॥ पूजयेच्चन्दनैर्गन्धैर्नैवेद्यैर्विविधैरपि ॥ १०४ ॥ चतुर्दश
फलैर्मूलैर्जलजैः कुसुमैरपि ॥ यवगोधूमशालीनां चूर्णैर्नैकतमस्य च ॥ १०५ ॥ कृत्वा पूपाह्वयं तस्मै दद्यादेकं श्रुतेक्षितम् ॥ स्वयमेकं तु
भुञ्जीत दद्यात्सूत्रस्य दोरकम् ॥ १०६ ॥ चतुर्दशग्रन्थियुतं कुंकुमेन विलेपितम् ॥ चतुर्दशसूत्रमयं सूत्रं कार्पासमेव च ॥ १०७ ॥ अतः प्रेत
चतुर्दश्यां भोजयित्वा तपोधनान् ॥ दानं दत्त्वा द्विजेभ्यश्च यमलोकं न गच्छति ॥ १०८ ॥ ततः प्रेतकथां श्रुत्वा शाकैर्नक्तं समाचरेत् ॥ चतु
र्दशं द्वादशं वा सप्तमं वापि पञ्चमम् ॥ १०९ ॥ मानमात्रादिकं कृत्वा सर्वपापैः प्रमुच्यते ॥ ११० ॥ माघे मासि वटापायः कस्य पापं
पुनीमहे ॥ स्नात्वा तत्र चतुर्दश्यां समये तारकामये ॥ १११ ॥ संभवेत्फाल्गुने मासि या च कृष्णा चतुर्दशी ॥ शिवरात्रिरिति ख्याता सा जग
त्सर्वकामदा ॥ ११२ ॥ दिवा तस्या अलाभे तु रात्रियोगे व्रतं चरेत् ॥ चतुर्दशी अमाविद्धा तद्व्रतं परिवर्जयेत् ॥ ११३ ॥ तिथियोगे च शर्वर्यां
संपूर्णे व्रतमाचरेत् ॥ कामविद्धा सा च पूज्या रात्रियोगे चरेद्व्रती ॥ ११४ ॥ प्रहरेप्रहरे स्नानं स्वयं स्नात्वा शिवस्य च ॥ कारयेद्विधिवद्भक्त्या
होमं कुर्याद्यथाविधि ॥ ११५ ॥ अथ वक्ष्यामि चैत्रादिमासे तु पूर्णिमा यथा ॥ चित्रानक्षत्रसंयुक्तो गुरुपूर्णो विधुर्यदि ॥ महाचैत्रीति सा ज्ञेया
पूर्णिमाक्षयपुण्यदा ॥ ११६ ॥ विशाखादिषु भेदेषु पूर्णचन्द्रो गुरुश्चरेत् ॥ महावैशाखिकाद्यास्तु पूर्णिमा द्वादश स्मृताः ॥ ११७ ॥ महाज्यैष्ठी

विशेषोऽयं प्राजापत्ये यथा रविः ॥ गुरुपूर्णचन्द्रो ज्येष्ठायां महाज्यैष्ठीति सा स्मृता ॥ ११८ ॥ विनापि गुरुणा चन्द्रः कृत्तिका पूर्णिमा तथा ॥ तथा महाकार्त्तिकी सा तिथिः पुण्यतमा भवेत् ॥ ११९ ॥ रोहिण्यां तु स्थितश्चन्द्रः पौर्णमास्यां तु कार्त्तिके ॥ महाकार्त्तिकी तथापि स्यात्स्वर्गलोकेऽपि दुर्लभा ॥ १२० ॥ चित्रा वा यदि वा पूर्णा यदा स्यात्पूर्णिमातिथिः ॥ महाचैत्री तथापि स्यादश्वमेधफलप्रदा ॥ १२१ ॥ रविणा कृत्तिकायोगाद्रविवारे च पूर्णिमा ॥ महाचैत्री तथापि स्याद्दत्तस्याक्षयकारिका ॥ १२२ ॥ एवं गुरौ गुरोर्योगे महाचैत्री प्रकीर्तिता ॥ तत्र स्नानं च दानं च जपो नियम एव च ॥ १२३ ॥ सर्वमक्षयतां याति फलं चैवाश्वमेधिकम् ॥ पितरस्तर्पिता यांति वैष्णवं लोकमक्षयम् ॥ १२४ ॥ भरण्यां कार्त्तिके मासि यदि स्यात्पूर्णिमा तिथिः ॥ गंगाद्वारे तु महती वैशाखी पुण्यदा स्मृता ॥ १२५ ॥ शालग्रामे महाचैत्री कृतपुण्या महातिथिः ॥ गंगाद्वारे तु महती वैशाखी पुण्यदा स्मृता ॥ १२६ ॥ पुरुषोत्तमे महाज्यैष्ठी महाषाढी तु शृंखले ॥ महाश्रावणी केदारे महापुण्यतमा मता ॥ १२७ ॥ महाभाद्री बदर्यां च कुजोऽपि स्यान्नरस्तथा ॥ महाकार्त्तिकी पुष्करे च कान्यकुब्जे तथोत्तरे ॥ १२८ ॥ महती मार्गशीर्षे स्यादयोध्यायां तथोत्तरे ॥ महापौषी पुण्यतमा महामाघी प्रयागतः ॥ ॥ १२९ ॥ महाफाल्गुनी नैमिषे च निर्दिष्टाः स्युर्महाफलाः ॥ १३० ॥ अत्र स्म विहितं कर्म शुभं वा यदि वाशुभम् ॥ सर्वमक्षयतां याति वर्द्धते चाधिकं फलम् ॥ १३१ ॥ आश्विने पौर्णमासी तु कौमुदीति प्रकीर्तिता ॥ अस्यां चन्द्रोदये लक्ष्मीं पूजयेद्विधिवन्नरः ॥ १३२ ॥ निर्वर्तयेन्न यः श्राद्धं प्रभाते पैतृकं द्विजः ॥ इन्दुक्षये मासिमासि प्रायश्चित्तीयते तु सः ॥ १३३ ॥ चन्द्राश्विने तु कृष्णायां पञ्चदश्यां यथाविधि ॥ कृत्वा स्नानादिकं कर्म सोपवासो दिनं नयेत् ॥१३४॥ प्रदोषसमये लक्ष्मीं पूजयित्वा यथाविधि ॥ दीपवृक्षान्यथा वृक्षाँल्लक्ष्मीप्रीत्यै समुत्सृजेत् ॥ ॥ १३५ ॥ नदीतीरे गिरौ गोष्ठे श्मशाने वृक्षमूलतः ॥ चतुष्पथे निजागारे चत्वरे तान्निधापयेत् ॥ १३६ ॥ द्विर्भोजनममावास्यां न कर्तव्यं कदाचन ॥ शर्वर्यां च विशेषेण माघफाल्गुनयोर्नरैः ॥१३७॥ ॥ इति श्रीभविष्ये महापुराणे मध्यम पर्वणि द्वितीयभागेऽष्टमोऽध्यायः ॥ ८ ॥

॥ ॥ सूत उवाच ॥ ॥ वक्ष्ये प्रवरसंतानं यथाक्रममिति द्विजाः ॥ यद्विना व्यत्ययो यस्मात्तस्माच्छास्त्रानुसारतः ॥ १ ॥ प्रवरत्रयं काश्यपस्य काश्यपाशावनैर्ध्रुवम् ॥ पञ्चाश्वगौतमस्याद्य गौतमश्चोय एव च ॥ २ ॥ च्यवनो जामदग्न्यश्च आप्लुवायनमेव च ॥ मोकुन्यांगिरसभास्याज्जामदग्न्याप्लुवायनम् ॥ ३ ॥ शांडिल्यासितदैवलाः प्रवरत्रयमेव च ॥ पराशरस्य च तथा स्वयं शांबवशिष्ठकम् ॥ ४ ॥ आत्रेयमाचार्यणस्याबाल

प्रवरमेव हि ॥ वात्स्यवास्यायनौ चैव उरुकंटक एव च ॥ ५ ॥ अर्थक्षीरमित्रावरुणं पञ्चमं परिकीर्तितम् ॥ औतथ्यस्य त्रयं विद्याद्वाल्मीकोऽवरमेव हि ॥ ६ ॥ औतथ्यस्य च वाशिष्ठमैन्द्रे चक्रं च क्रौञ्चायनं तथा ॥ औतथ्येति समाख्यातं माहिष्यं च्यवनं तथा ॥ ७ ॥ उरुकंटत्रयं विद्यात्कौशिकस्य त्रयं तथा ॥ यद्वालो देवराट् ख्यातः कुशिकाद्याश्च भो द्विजाः ॥८॥ विश्वामित्रो देवराट् च स्वयं चैव त्रयं मतम् ॥ घृतकौशिकस्य कुशिका विश्वामित्राघमर्षणम् ॥ ९ ॥ चण्डकौशिकस्य च तथा देवराट् देवरातकम् ॥ विश्वामित्रे तु विख्यातः सुमन्तोरेव एव हि ॥ १० ॥ तरुं कशाकटायनः स्वयमेव प्रवरत्रयम् ॥ भ्रमद्वयं जैमिनेश्च स्वयं वाशिष्ठमेव च ॥ ११ ॥ शंखमांगिरसच्च्यवनं शंखभस्य त्रयं मतम् ॥ वात्स्यस्य च्यवनो नाम आप्लुवायनकस्तथा ॥ १२ ॥ सावर्णस्य तु सावर्ण्यच्यवनजामदग्निभार्गवम् ॥ आप्लुवायनेति पाठीने एक एव तु सत्तमाः ॥ १३ ॥ कृष्णाजिनस्य कृष्णाजिनं विश्वामित्रस्य जैमिनम् ॥ कात्यायनस्य कात्यायनगार्ग्यायणत्रयं तथा ॥ १४ ॥ वात्स्यायनेति विख्यातं कुशिकस्य च पंचमम् ॥ अमुं च विश्वामित्रं च जामदग्न्याप्लुवायनम् ॥ १५ ॥ गार्ग्यस्य गार्ग्यसामुंच तथांगिरस एव च ॥ बार्हस्पत्यभरद्वाज इति पंच प्रकीर्तितम् ॥ १६ ॥ वशिष्ठस्य च वासिष्ठं च तथांगिरस एव च ॥ मित्रावरुणसंयुक्तं तावत्तस्य प्रकीर्तितम् ॥ १७ ॥ जाह्वकर्णभवकर्णौ प्रवरौ परिकीर्तितौ ॥ उपमन्युरुपमन्योस्तथेन्द्रः सह एव च ॥ १८ ॥ तदुत्तमेति त्रितयं मित्रावरुणस्य च त्रयम् ॥ आत्रेयगौतमांगिरसप्रवरत्रयमेव हि ॥ १९ ॥ कमंडलोत्पलमित्रामित्रावरुण एव च ॥ कमंडलुश्चेति त्रितयं प्रवरत्रयमेव च ॥ २० ॥ च्यवनस्य तथा ज्ञेयमूर्वच्यवनाप्लवायनम् ॥ अथ स कस्यांगिरसबार्हस्पत्य एव त्रयम् ॥ २१ ॥ आगस्त्यस्य अगस्तिश्च माहश्च च्यवनेति च ॥ विश्वामित्रे देवरात औतथ्येति तथैव च ॥ २२॥ ये नोक्ता ये ऽप्यविज्ञातास्ते प्रोक्ताः काश्यपाज्जगत् ॥ २३ ॥ इति श्रीभविष्ये महापुराणे मध्यम पर्वणि द्वितीयभागे नवमोऽध्यायः ॥ ९ ॥ छ ॥

॥ सूत उवाच ॥

॥ वास्तुयागमथो वक्ष्ये बलिमण्डलपूर्वकम् ॥ अंकुरार्पणकं कृत्वा मध्ये कुर्याच्च मंडलम् ॥ १ ॥ त्रिहस्ता पिंडिका कार्या चतुरस्रा उदक्प्लुवा ॥ प्रादेशमात्र उत्सेधो दर्पणांतर्निभो भवेत् ॥ २ ॥ मध्ये संमार्जयेद्विद्वान्पादान्नव यथाक्रमात् ॥ कोणे चतुष्पदं ज्ञेयं दिक्षु त्रिपदकं क्रमात् ॥ ३ ॥ पञ्चकं युग्मपादेन चतुर्दिक्षु ततः परम् ॥ कोणे चतुष्पदं स्थाप्यं चतुष्कोणे विभावयेत् ॥ ४ ॥ चतुष्कोणं बहिः कुर्यात्कोणे चापि चतुष्टयम् ॥ द्वात्रिंशच्च भवेद्बाह्ये चातश्चापि त्रयोदश ॥ ५ ॥ चत्वारिंशत्पञ्चयुता मिलित्वा वास्तुदेवताः ॥ शिखी चैवाथ पर्जन्यो जयंतः कुलिशायुधः ॥ ६ ॥ सूर्यः सत्यो वृषश्चैव आकाशं वायुरेव च ॥ पूषा च वितथश्चैव गुहान्यश्च यमस्तथा ॥७॥

गन्धर्वों मृगराजस्तु मृगाः पितृगणास्तथा ॥ दौवारिकोऽथ सुग्रीवः पुष्पदन्तो जलाधिपः ॥ ८ ॥ असुरः पशुपाशौ च रोगो हि मोक्ष एव च ॥ भल्लाटः सोमसर्पौ च अदितिश्च दितिस्तथा ॥ ९ ॥ बहिर्द्वादश इत्येतानीशानादीन्यथाक्रमम् ॥ ईशानादिचतुष्कोणं संस्थितान्पूजयेद्बुधः ॥ १० ॥ आपश्चैवाथ सावित्रो जयो रुद्रस्तथैव च ॥ अर्यमा सविता चैव विवस्वान्विबुधाधिपः ॥ ११ ॥ मित्रोऽथ राजयक्ष्मा च सप्तमः पृथिवीधरः ॥ अष्टमस्त्वापवत्सस्तु परिधौ ब्रह्मणः स्मृतः ॥ १२ ॥ पूर्वादिषु तथा पूज्या गन्धपुष्पैः पृथग्विधैः ॥ पंचचत्वारिंशदेतच्चरक्या च चतुर्थकम् ॥ १३ ॥ मिलित्वा ऊनपञ्चाशदुत्तमा वास्तुदेवताः ॥ नान्यत्र योजयेद्विप्राः प्रासादे च विशेषतः ॥ १४ ॥ बहिः कोणे चरक्यादि चरकं च विदारिकाम् ॥ पूतनां च ततः पश्चाद्वायव्ये पापराक्षसीम् ॥ १५ ॥ स्वैःस्वैर्मंत्रैश्च गंधाद्यैः पूजयेत्कुसुमादिना ॥ यथोक्तेन बलिं दद्यात्पायसान्नेन वा पुनः ॥ १६ ॥ रेखाः सर्वत्र शुक्लेन पद्मं रक्तेन भावयेत् ॥ रञ्जयेदेव वर्णेन बहिष्पञ्चरजेन तु ॥ १७ ॥ देववर्णानथो वक्ष्ये यथावदनुवर्णिताः ॥ रक्तो गौरस्तथा शोणः सितरक्तः सितस्तथा ॥ १८ ॥ पीतः शुक्लश्च धर्मश्च पूषा रक्तः प्रकीर्तितः ॥ श्यामः शुक्लश्च कृष्णश्च पीतः शुक्लो यथाक्रमम् ॥ १९ ॥ पीतो भृंगः पुनः शुक्लः कृष्णः शुक्लस्तथैव च ॥ रक्तः शुक्लश्च शोणश्च कृष्णरक्तस्तथैव च ॥ २० ॥ धूम्रपीतो रक्तपीतः शुक्लः कृष्णश्च श्यामकः ॥ रक्तवर्णेन द्वात्रिंशद्दश वर्णाः प्रकीर्तिताः ॥ २१ ॥ शुक्लशोणं पुनः श्वेतं सिंदूराभं प्रकीर्तितम् ॥ पांडुरं कुंकुमाभं च रक्तं ज्ञेयं च पीतकम् ॥ २२ ॥ शुक्लपीतं च श्वेतं च गौरं चेत्यष्टवर्णकम् ॥ पीतं रक्तं च श्यामं च गौरं चेति चतुष्टयम् ॥ २३ ॥ धरणीमदनं वाद्ये शंभुवर्णादिप्रक्रमात् ॥ शुक्लेन रञ्जयेद्द्वारान्पुरद्वारं च मध्यमे ॥ २४ ॥ मध्येंते ऊनपञ्चाशत्सर्वं च वास्तुकर्मणि ॥ चत्वारिंशद्द्वारयुतं गृहदेवकुलेऽपि च ॥ २५ ॥ महाकूपे तथा श्वेतो अन्यत्रापि[1] प्रशस्यते ॥ सुलिप्ते च शुचौ देशे सार्धहस्तप्रमाणतः ॥ २६ ॥ दश पूर्वायता रेखा दश चैवोत्तरायताः ॥ एकादशीपदं कुर्याद्रेखाभिः पदकेन तु ॥ २७ ॥ सर्ववास्तुविभागेन विज्ञेया नवका नव ॥ पदस्थान्पूजयेद्देवांस्त्रिंशत्पञ्चाशदेव तु ॥२८॥ द्वात्रिंशद्बाह्यतः पूज्याः पूज्यागारे त्रयोदश ॥ मध्ये नव पदे ब्रह्मा तस्याप्यष्टौ समीपगाः ॥२९॥ चतुर्दिक्षु षट्पदं तु त्रिपदं तु चतुष्पदम् ॥ पदैकं तु चतुष्कोणे एष वास्तुविनिर्णयः ॥ चरक्यादि ततो हित्वा चत्वारिंशच्च पंचकम्॥ ॥ ३० ॥ अपरं मण्डलं वक्ष्ये यथावदनुपूर्वशः ॥ नवरेखाप्रयोगेण नवकोष्ठान्प्रकल्पयेत् ॥ ३१ ॥ द्विचतुष्कोष्ठकैर्दिक्षु यजेतार्यमणं ततः ॥ विव

---

[1] 'प्रकृत्य. तः पादमव्यपरे' इति प्रकृतिभाः ।

स्वंतं ततो मित्रं महीधरमतः परम् ॥ ३२ ॥ कोणेषु कोष्ठद्वंद्वेषु बाह्यादिपरिकीर्तितम् ॥ सावित्रं सवितारं च शक्रमिन्द्रं जयं पुनः ॥ ३३ ॥ रुद्रं
रुद्रजयं चैव वायुं जृंभकमेव च ॥ पिलिपिच्छं च मेधावी विदारीं पूतनां तथा ॥ ३४ ॥ क्रमादीशानपर्यंतां जयंतः शक्रभास्करौ ॥ सत्योवृषां
तरिक्षौ च दिशि प्राच्यामवस्थिताः ॥ ३५ ॥ अग्निः पूषा च वितधो यमश्च गृहरक्षकः ॥ गंधर्वो भृंगराजश्च मृगो दक्षिणमाश्रिताः ॥ ३६ ॥
निर्ऋतिर्दौवारिकश्च सुग्रीववरुणौ ततः ॥ पुष्पदंतस्वरौ शोषरोगौ प्रत्यग्दिशि स्थिताः ॥ ३७ ॥ घ्राणवायुश्च नागश्च सोमो भल्लाट एव च ॥
मुद्गलाख्यो दित्यदिती कुबेरस्य दिशि स्थिताः ॥ ३८ ॥ मिलित्वा च त्रिपञ्चाशत्तेभ्यः पूर्वं बलिं हरेत् ॥ पिण्याकैः परमान्नैर्वा पूर्वोक्तैर्वा यथा
क्रमात् ॥ ३९ ॥ रक्तमर्यमणं ध्यायेच्चतुर्भिर्बहुभिर्वृतम् ॥ श्वेताश्ववाहनं दिव्यं किरीटैः स्वैर्विभूषितम् ॥ ४० ॥ आकृष्णेनेति मन्त्रस्य स्वर्ण
ऋषिर्जगतीछन्दः सवित्रर्यमप्रीतये विनियोगः ॥ ४१ ॥ विवस्वंतं पीतवर्णं पीताम्बरधरं शुभम् ॥ मेषस्थं च महाकायं देवगन्धर्वसेवितम् ॥४२॥
एतातविषंतीति मंत्रस्य कर्दम ऋषिः पंक्तिश्छन्दः कमला देवता विवस्वत्प्रीतये विनियोगः ॥ ४३ ॥ मित्रं ध्यायेच्छुक्लवर्णं श्वेतहंसोपरिस्थि
तम् ॥ त्रिनेत्रं त्रिभुजं चैव श्वेतांबरधरं शुभम् ॥ ४४ ॥ कयानश्चीति मंत्रस्य जयंत ऋषिर्गायत्री छन्दः शङ्करो देवता मित्रप्रीतये विनियोगः ॥
॥४५॥ प्रीतं महीधरं ध्यायेद्वृषभोपरि संस्थिम्॥ त्रिभुजं पद्महस्तं च व्यालयज्ञोपवीतिनम् ॥४६॥ त्र्यम्बकमिति मंत्रस्य गर्गऋषिस्त्रिष्टुप् छन्दो
हरो देवता महीधरप्रीतये विनयोगः ॥ ४७ ॥ सावित्रीं श्वेतवर्णां च सर्वलक्षणसंयुताम् ॥ द्विभुजां पीतवस्त्रां च श्वेतसिंहासने स्थिताम् ॥ ४८ ॥
रक्ताम्बरधरां रक्तां रक्तमालोपशोभिताम् ॥ ४९ ॥ तद्वर्ष इति मंत्रस्य गौतम ऋषिर्विराट् छन्दः सूर्यो देवता सवितृप्रीतये विनियोगः ॥ ५० ॥
शक्रं ध्यायेत्पीतवर्णं शुक्लकैरावतस्थितम् ॥ सर्वदेवैः स्तूयमानं द्विभुजं पीतवाससम् ॥५१॥ त्रातारमिति मंत्रस्य भार्गव ऋषिस्त्रिष्टुप्छन्दो नरसिं
हो देवता इन्द्रजयप्रीतये विनियोगः ॥ ५२ ॥ रुद्रं ध्यायेच्छ्वेतवर्णं वृषभारूढविग्रहम् ॥ नागयज्ञोपवीतं च सर्वलक्षणसंयुतम् ॥ ५३ ॥ नमस्ते
रुद्रेति मंत्रस्य गायत्री छदस्त्र्यंबको देवता रुद्रप्रीतये विनियोगः ॥ ५४ ॥ रक्तं रुद्रं जयं ध्यायेद्रक्तपद्मोपरि स्थितम् ॥ रक्तश्यामांबरधरं द्विभुजं
रक्तवाससम् ॥ ५५ ॥ त्र्यंबकमिति मन्त्रस्य गायत्रीच्छन्दो महेशो देवता रुद्रजयप्रीतये विनियोगः ॥ ५६ ॥ अपि श्वेतं ततो ध्यायेद्वराभय
करं परम् ॥ सर्वलक्षणसंपन्नं श्वेतपद्मोपरि स्थितम् ॥ ५७ ॥ ईशान इति मंत्रस्य मरीचिर्ऋषिः पंक्तिश्छन्दो वायुर्देवता अपां प्रीतये विनियोगः॥
आपवत्सं पीतवर्णं मेषारूढं चतुर्भुजम् ॥५८॥ पद्मशंखधरं वामे वराभयकरं परम् ॥ ५९ ॥ वरुणस्योत्तभनमसीति मन्त्रस्य नरोत्तम ऋषिर्विराट्

छन्दो वरुणो देवता आवयःप्रीतये विनियोगः ॥६०॥ कोणसूत्रस्योभयतः श्वेतकोष्ठद्वये पुनः॥शर्वं ध्यायेद्रक्तवर्णं वृषभोपरि संस्थितम् ॥६१॥
द्विभुजं च त्रिनेत्रं च जटाभारोपशोभितम् ॥६२॥ माला स्वाहेति मंत्रस्य भार्गव ऋषिर्गायत्री छन्दो महादेवो देवता शर्वप्रीतये विनियोगः॥६३॥
गुहं ध्यायेत्पीतवर्णं पीतपद्मासनस्थितम् ॥ नानाभरणशोभाढ्यं कुण्डलाद्यैरलङ्कृतम् ॥ ६४ ॥ स बोध इति मन्त्रस्य अगस्तिर्ऋषिर्गायत्री छन्दो
हरो देवता गुहप्रीतये विनियोगः ॥ ६५ ॥ अर्यम्णं द्विभुजं रक्तं रक्तमाल्योपशोभितम् ॥ रक्तपद्मासनस्थं च देवगन्धर्वसेवितम् ॥ ६६ ॥ वातो
वारेति मंत्रस्य काश्यप ऋषिरनुष्टुप्छन्दो वायुर्देवता अर्यमप्रीतये विनियोगः ॥ ६७ ॥ ध्यायेच्च जम्भकं श्वेतं द्विभुजं कुटिलाननम् ॥ करालव
दनं घोरं वराहोपरि संस्थितम् ॥ ६८ ॥ कुविदोगवय इति मन्त्रस्य विश्वामित्र ऋषिर्जगती छन्दः सोमो देवता जंभकप्रीतये विनियोगः ॥६९॥
पिलपिच्छं रक्तवर्णं रक्तमाल्यैरलङ्कृतम् ॥ रक्तपद्मासनस्थं च रक्ताभरणशोभितम् ॥ ७० ॥ देवस्य हेति मन्त्रस्य पंक्तिश्छंदः शची देवता पिल
पिच्छप्रीतये विनियोगः ॥ ७१ ॥ पीतां च चरकीं ध्यायेद्रक्तमाल्यैरलंकृताम् ॥ सुचारुवदनां भव्यां गुञ्जाहारोपशोभिताम् ॥ ७२ ॥ तद्रूष इति
मन्त्रस्य जटिल ऋषिर्बृहती छन्दो भवो देवता चरकीप्रीतये विनियोगः ॥ ७३ ॥ श्यामां विदारिकां ध्यायेत्त्रिनेत्रां च चतुर्भुजाम् ॥ नानागण
युतां देवीं पङ्कजद्वयधारिणीम् ॥ ७४ श्रीश्च ते इति मन्त्रस्य वरुण ऋषिर्नृसिंहो देवता विदारिकाप्रीतये विनियोगः ॥ ७५ ॥ रक्तां च पूतनां
ध्यायेत्पङ्कजस्थां सुशोभनाम् ॥ सर्वाभरणसंपन्नां सर्वालंकारशोभिताम् ॥ ७६ ॥ मयि गृह्णामीति मंत्रस्य विवस्वानृषिर्नारायणो देवता पूतनाप्री
तये विनियोगः ॥ ७७ ॥ पूर्वादिदिक्षु सर्वासु सार्धाद्यंतपदेषु च ॥ ईशानं जटिलं श्वेतं शूलहस्तं महाभुजम् ॥७८॥ त्रिनेत्रं वृषभारूढं नागहारो
पशोभितम् ॥ ७९ ॥ आयुःशीर्षाण इति मंत्रस्य वामदेव ऋषिर्बृहती छन्दो धरणीधरो देवता ईशानप्रीतये विनियोगः ॥ ८० ॥ रक्तं ध्यायेच्च
पर्जन्यं द्विभुजं पीतवाससम् ॥ दक्षिणे परशुं ध्यायेदोंकारं च तथापरे ॥ ८१ ॥ कयानश्चेति मन्त्रस्य धर्म ऋषिर्बृहती छन्दो भवोदेवता पर्जन्य
प्रीतये विनियोगः ॥ ८२ ॥ जयंतं श्वेतं श्वेतवृषभारूढं ध्यात्वा ॥ मानस्तोकेति मन्त्रस्य शक्त्यृषिस्त्रिष्टुप्छन्दः शङ्करो देवता जयंतप्रीतये विनि
योगः ॥ ८३ ॥ शुक्लं पीतं द्विभुजमैरावतस्थं वज्रधरं ध्यात्वा मूलबीजेन स्थापयेत् ॥ ८४ ॥ भास्करं रक्तं द्विभुजं रक्ताश्वस्थं ध्यात्वा मायाबी
जेन पूजयेत् ॥८५॥ सत्यं च द्विभुजं श्वेतं त्रिनेत्रं पीतवाससं मन्दकुंदबीजेन पूजयेत् ॥ वृषं पीतं वृषभारूढमाकाशबीजेन पूजयेत् ॥८६॥ ऋक्षं
नीलं चतुर्भुजं महिषारूढम् ॥ आच्छीम इति मन्त्रस्य होता यक्ष ऋषिस्त्रिष्टुप्छन्दः शंकरो देवता ऋक्षप्रीतये विनियोगः ॥ ८७ ॥ अग्निमारभ्य

पूजयेत् ॥ अग्निं रक्तं सप्तजिह्वं रक्तवाससं पिङ्गाक्षं ध्यात्वा ॥ अग्निं दूतमिति मंत्रस्य भरद्वाज ऋषिस्त्रिष्टुप्छन्दः शंकरो देवता अग्निप्रीतये विनियोगः ॥ ८८ ॥ वितथं रक्तमजवाहनं द्विभुजं ध्यात्वा गायत्र्या पूजयेत् ॥ ८९ ॥ गायत्र्या विश्वामित्र ऋषिर्गायत्री छन्दः सविता देवता वितथप्रीतये विनियोगः ॥९०॥ यमं कृष्णमहिषारूढं दण्डहस्तं ध्यायेत् ॥ अच्छिय इतिमन्त्रस्य त्रिष्टुप्छन्दो भवानी देवता यमप्रीतये विनियोगः ॥९१॥ गृहे क्षेत्रं रक्तमूर्ध्वकेशं महाभुजं रक्तवाससं ध्यात्वा वह्निबीजेन पूजयेत् ॥९२॥ गन्धर्वं श्वेतं द्विभुजं पद्मासनस्थं ध्यात्वा यमबीजेन पूजयेत् ॥९३॥ भृङ्गराजं रक्तसिंहासनारूढं दिव्ययज्ञोपवीतिनं ध्यायेत् ॥ ९४ ॥ होता यस्केति मन्त्रस्य भार्गव ऋषिर्गायत्री छन्दो यशो देवता भृंगराजप्रीतये विनियोगः ॥ ९५ ॥ मृगं पीतं मृगारूढं पीतवाससं ध्यात्वा ॥ कदाचनेति मन्त्रस्य वामदेव ऋषिर्बृहती छन्दो वामदेवो देवता मृगप्रीतये विनियोगः ॥९६॥ नैर्ऋतार्द्धपदेषु च ॥ निर्ऋतिं पीतं श्वेतं पद्मासनस्थं ध्यात्वा ॥ कैदाचनेतिमन्त्रस्य पंक्तिश्छन्दः सविता देवता निर्ऋतिप्रीतये विनियोगः ॥९७॥ नैऋतार्द्धपदेषु च दौवारिकं श्वेतशरमारूढं त्रिनेत्रं सर्वाभरणभूषितं ध्यात्वा ॥ होतस्वेति मन्त्रस्य नरसिंह ऋषिर्बृहती छन्दो गणेशो देवता दौवारिकप्रीतये विनियोगः ॥ ९८ ॥ श्यामं सुग्रीवं कृष्णमेषारूढं पीतवाससं ध्यात्वा ॥ स्वादित्येति मन्त्रस्य त्रिष्टुप्छंन्दो वामनो देवता सुग्रीवप्रीतये विनियोगः ॥ ९९ ॥ सुमित्रिया न इति मन्त्रस्य कन्दर्पऋषिः पङ्क्तिश्छन्दः सूर्यो देवता वरुणप्रीतये विनियोगः ॥ १०० ॥ पुष्पदंतं पीतं मेषारूढं पीतवाससं ध्यात्वा ॥ या ओषधीरिति मन्त्रस्य मन्मथ ऋषिर्जगती छन्दो वायुर्देवता पुष्पदंतप्रीतये विनियोगः ॥ १०१ ॥ असुरं कृष्णं कृष्णमाल्यैरलंकृतं कृत्वा ॥ आकृष्णेति मन्त्रस्य हिरण्यवर्ण ऋषिर्जगती छन्दः सविता देवता असुरप्रीतये विनियोगः ॥ ॥ १०२ ॥ असुरं कृष्णं नागहारान्वितं पद्मासनस्थं ध्यात्वा ॥ आब्रह्मन्निति मंत्रस्य नलिन ऋषिस्त्रिष्टुप्छन्दो भवानी देवता सोमप्रीतये विनियोगः ॥ १०३ ॥ रोगं कृष्णं नीलेन्दीवरधरं श्वेतवृषभारूढं ध्यात्वा ॥ नमस्ते रुद्र इति मन्त्रस्य नारद ऋषिः पंक्तिश्छन्दः श्रीर्देवता रोगप्रीतये विनियोगः ॥ १०४ ॥ वायुकोणादारभ्य पूजयेत् ॥ वायुं धूम्रवर्णं ध्वजहस्तं मृगारूढं ध्यात्वा ॥ देवा इति मन्त्रस्य बृहती छन्दो यमो देवता नागप्रीतये विनियोगः ॥ १०५ ॥ श्वेतं सोमं श्वेतवर्णासनस्थं ध्यात्वा भद्रबीजेन पूजयेत् ॥ ॥ १०६ ॥ रक्तं भल्लाटं पीतवाससं ध्यात्वा वह्निबीजेन पूजयेत् ॥ पीतवाससमजवाहनं हारकेयूरान्वितं वायुबीजेन मंदराद्यैः पूजयेत् ॥ ॥ १०७ ॥ रक्तां दितिं नागहारान्वितां रक्तपद्मासनस्थां ध्यात्वा ॥ मानार्य इति मन्त्रस्येति पूजयेत् ॥ १०८ ॥ मानो त्वा इति मंत्रस्य

भार्गव ऋषिः पक्तिश्छन्दः पृथिवी देवता दितिप्रीतये विनियोगः ॥ १०९ ॥ अदितिं पीतवर्णां सिंहारूढां पीतांबरधरां ध्यात्वा ॥ हिरण्यवर्ण इति
मंत्रस्य जनार्दन ऋषिर्बृहती छन्दः सोमो देवता अदितिप्रीतये विनियोगः ॥ ११० ॥ एवं यथा विधायाथ होमं कुर्याद्यथाविधि ॥ होमांते
दक्षिणां दद्यात्काञ्चनं हेमसंयुतम् ॥ १११ ॥ तडागयागपक्षे तु सुवर्णं चार्धमेव वा ॥ ११२ ॥ ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि द्विती
यभागे दशमोऽध्यायः ॥ १० ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ अथ पूजाक्रमं वक्ष्ये पुराणस्मृतिचोदितम् ॥ उत्तरे पश्चिमे वाथ पूर्वे चापि
समाचरेत् ॥ १ ॥ नदीतीरे नेमिप्रांते दशद्वादशसंख्यया ॥ मंडलं रचयेद्विप्राश्चरुकद्वयसंयुतम् ॥ २ ॥ त्रिभागं विभजेत्क्षेत्रं मध्यभागद्वयेन तु ॥
त्रिहस्तवेदिकां कुर्यात्तालोत्सेधामुदक्प्लवाम् ॥ ३ ॥ उत्तराशे दक्षिणे चारत्निहस्तांतरेऽपि च ॥ त्रिमेखलां हस्तमात्रां गुणवेदसमन्विताम् ॥ ४ ॥
मूले सार्धं च शुक्लां च मेखलां तु तथैव च ॥ चतुरंगुलिकां वेदिं मध्योन्नतां प्रकल्पयेत् ॥ ५ ॥ षट्सप्तांगुलिकां योनिं पश्चिमे मेखलोपरि ॥
विन्यसेन्नाभिसंयुक्तमेवं कुण्डं प्रकल्पयेत् ॥ ६ ॥ श्राद्धं वृद्ध्यात्मकं कुर्यात्संकल्पं मानसं चरेत् ॥ श्राद्धार्थं नैव संकल्पेत्तथा वै देवदर्शने ॥ ७ ॥
गयाश्राद्धार्थकं चाष्टतीर्थश्राद्धार्थमेव च ॥ ऐशान्यां कलशे देवं पूजयेद्गणनायकम् ॥ ८ ॥ मध्ये कुण्डे महांश्चैव विष्णुदेवं दिगीश्वरान् ॥ ब्रह्माणं
चाग्निकुण्डे तु स्वैः स्वैर्मन्त्रैः प्रपूजयेत् ॥ ९ ॥ प्राणायामं विधायाथ भूतशुद्धिं समाचरेत् ॥ ध्यायेद्वाटवीशपुरुषं सर्वलक्षणसंयुतम् ॥ १० ॥ श्वेतं
चतुर्भुजं शांतं कुण्डलाद्यैरलंकृतम् ॥ पुस्तकं चाक्षमालां च वराभयकरं परम् ॥ ११ ॥ पितृवैश्वानरोपेतं कुटिलभ्रूपशोभितम् ॥ करालवदनं चैव
आजानुकरलंबितम् ॥ १२ ॥ मूर्धन्यग्निं समाविश्य मुखे वायुः समाहितः ॥ पृथ्वीधरोर्यमा चैव तथाष्टवनेष्टितौ ॥ १३ ॥ वक्षस्थले ऽपरां संध्यां
यजेच्चैव यथाविधि ॥ नेत्रयोर्दितिपर्जन्यौ श्रोत्रे दितीज्यपुत्रकौ ॥ १४ ॥ सर्पेन्द्रावासनस्थौ च वामे दक्षं विभावयेत् ॥ सत्यसोमाग्नयस्तत्र राहोः
पंच च पंच च ॥ १५ ॥ रुद्रश्च राजयक्ष्मा च वामहस्ते व्यवस्थितौ ॥ पार्श्वे तु दक्षिणे तद्वद्विरथश्च महर्क्षकः ॥ १६ ॥ उभौ ज्ञेयौ तथा जान्वोरु
भौ गन्धर्वपुष्पकौ ॥ जंघयोर्भृंगसुग्रीवौ स्फिचोर्दौवारिको गणः ॥ १७ ॥ जयशक्रौ तथा मेढ्रे पदयोः पितरस्तथा ॥ एवं ध्यात्वा न्यसेत्पुष्पं
सोमे नैवं विचिंतयेत् ॥ १८ ॥ मन्दरं दीर्घयुक्तेन षडङ्गानि समाचरेत् ॥ तावद्वीर्यं ततः कृत्वा प्रणवं ब्रह्मणेति च ॥ १९ ॥ वास्त्वीशाय विद्महेति
तन्नो विष्णुः प्रचोदयात् ॥ अनेन स्नपनं कुर्यात्पूजाद्रव्याणि प्रोक्षयेत् ॥ २० ॥ आसनं पूजयेत्पूर्वं धर्मेणापि स्वशक्तितः ॥ आदौ तु भास्करं
सूर्यं शचीनाथं गणाधिपम् ॥ २१ ॥ आधारशक्तिं पृथिवीं पूजयेत्तत्र पङ्कजम् ॥ बंदीशासनमित्युक्तं पूजयेदासनं ततः ॥ २२ ॥ सितचन्दनयु

क्तेन श्वेतपुष्पं प्रगृह्य च ॥ हरेर्ध्यानं ततः कुर्यात्स्थापयेन्मध्यमण्डले ॥२३॥ आवाह्य चासनं दद्यात्ततः पाद्यादिकत्रयम् ॥ मधुपर्कं ततो दद्या
द्वास्तोष्पतिमथेश्वरम् ॥ २४ ॥ अस्य मन्त्रस्य च ऋषिश्छन्दो गायत्रमीरितम् ॥ देवता च भवेद्ब्रह्मा योजयेदश्वमेधकम् ॥ २५ ॥ मंदरं विजयं
सोमं महादेवं च माधवम् ॥ रुद्रं हरं जयं भं च पूर्वादिदलमूलके ॥ २६ ॥ जया च विजया चैव सत्या माया शिवांबिका ॥ हासिनी कामिनी
चैता दलमूलेषु भावयेत् ॥ २७ ॥ पुष्पाञ्जलित्रयं दद्याद्वास्तोष्पतय इत्यपि ॥ अर्घ्यमंत्रेण गंधाद्यैः पूजयेद्भूतिमिच्छता[1] ॥२८॥ वास्तोष्पते भव
मते इति ध्यात्वा ऋतं चेति मंत्रेण पूजयेत् ॥ ऋषिर्नारायणश्छन्दो गायत्री परिकीर्तितम् ॥ २९ ॥ सूर्यश्च देवता ख्यातः प्रीणितः कुलिशायुधः ॥
सूर्यं रक्तासनारूढं द्विभुजं रक्तवाससम् ॥ ३० ॥ रक्तपद्मद्वयधरं कुंडलाद्यैः सुशोभितम् ॥ एवं ध्यात्वा तु मतिमान्हंसं समंत्रमीश्वरम्॥३१॥हंसस्य
इति मंत्रस्य ऋषिरौतथ्य ईरितः ॥ पंक्तिश्छन्दः स्वयं देवो विनियोगस्तु प्रीतये ॥३२॥ नीलोत्पलद्वयधरं सत्यं मृत्यूपरि स्थितम्॥स्वच्छश्वेतांबर
धरं वरदं भक्तवत्सलम् ॥३३॥ स्वं मदात्वमिति मन्त्रेण श्वेतचन्दनपुष्पकैः ॥ पूजयेत्परया भक्त्या वस्त्रालंकारभूषणैः ॥३४॥ उद्धर्षण इति मंत्रेण
कृष्णपुष्पैरथार्चयेत् ॥ सत्यव्रत ऋषिश्चास्य त्रिष्टुप्छंदोऽस्य देवता ॥ सविता चैव विज्ञेयः प्रीतये च वृषस्य च ॥३५॥ शुल्कवर्णं तथाकाशमृषिसं
घैश्च संस्तुतम् ॥ घटस्थं द्विभुजं ध्यायेद्गदापद्मविधारिणम् ॥३६॥ शन्नो देवीति पठनाद्गन्धपुष्पादिभिर्यजेत् ॥ ऋषिः स्यात्कर्दमोविप्राश्छन्दो
जागतिका तथा ॥ देवता च भवेच्चाग्निराकाशप्रीतये न्यसेत् ॥३७॥ ध्वजहस्तं महाबाहुं मरुद्भिश्चोपसेवितम् ॥ द्विभुजं धूम्रवर्णं च वायुं ध्यात्वा
प्रपूजयेत्॥३८॥राजान इति मन्त्रेण पूजयेत्सिततंडुलैः॥ऋषिर्नारायणश्छन्दो गायत्री देवता द्विजाः॥३९॥ देवता च भवेद्वायुः प्रीतये तस्य योज
येत् ॥ पूषारक्तश्च द्विभुजो रक्तपद्मासनस्थितः ॥४०॥ राजान इति च ऋचा पूजयेद्गन्धचन्दनैः॥ गोभिलोस्यऋषिः पङ्क्तिश्छन्दोऽथ जगती स्मृत
म् ॥ देवता च भवेद्वायुः प्रीतये विनियोजयेत् ॥४१॥ वितथं श्यामवर्णं च चतुर्भिर्बाहुभिर्वृतम्॥ मृगाक्षपाशखड्गाङ्कशूलं च दधतं करैः ॥ मेषारूढं
विशालाक्षं राजानो मह्यमीरयन् ॥ ४२ ॥ गृहक्षतं तथा शुक्लं चतुर्भिर्गर्दभैर्वृतम् ॥ शूलं दंडं च खड्वांगं दधतं वृषवाहनम् ॥ ४३ ॥ पीतवस्त्रधरं
देवं जटामुकुटसंयुतम् ॥ आशुः शिशान इति मन्त्रेण पूजयेद्गन्धचन्दनैः ॥ ४४ ॥ पुष्पदंत ऋषिस्त्रिष्टुप्छन्दश्च परिकीर्तितम् ॥ ईश्वरस्य देव
तायाः प्रीतये विनियोजयेत् ॥ ४५ ॥ यमं ध्यायेत्कृष्णवर्णं महिषस्थं द्विबाहुकम् ॥ दण्डपाशधरं चैव केयूराद्यैर्विभूषितम् ॥ ४६ ॥ इशानेति

---

[1] प्रथमार्थे तृतीया।

च मन्त्रेण पूजयेत्कुसुमादिना ॥ वामदेव ऋषिः पंक्तिश्छन्दः कालोस्य देवता ॥ ४७ ॥ षडाननं च गन्धर्वं पीतं ध्यायेच्चतुर्भुजम् ॥ पीतांबरधरं चैव नानाभरणभूषितम् ॥ ४८ ॥ यद्देव इतिमन्त्रेण पूजयेत्कुसुमादिना ॥ हारीतोस्य ऋषिः प्रोक्तो जगतीछन्द ईरितम् ॥ हिरण्यगर्भो देवतास्य प्रीतये विनियोजयेत् ॥ ४९ ॥ भृङ्गराजं जटारूढं स्वच्छं पीतांबरं शुभम् ॥ चक्षुः पीतेति मन्त्रेण पूजयेद्गन्धचंदनैः ॥ ५० ॥ ऋषिश्चागस्तिराख्यातस्त्रिष्टुप्छन्दः प्रकीर्तितम् ॥ विश्वेदेवा देवता च भृङ्गराजस्य प्रीतये ॥ ५१ ॥ पीतं मृगं मृगारूढं जटामुकुटमंडितम् ॥ परो देवा इति मंत्रेण पूजयेद्बलिपायसैः ॥ ५२ ॥ कपिलश्च ऋषिः प्रोक्तो गायत्री छन्द ईरितम् ॥ वरुणो देवता चास्य प्रीतये विनियोजयेत् ॥ ५३ ॥ ध्यायेत्पितृगणं शुक्लं चतुर्भिर्बाहुभिर्वृतम् ॥ पितृभ्य इति मन्त्रेण पूजयेत्कुसुमादिना ॥ ५४ ॥ शुनः शेष ऋषिश्चास्य त्रिष्टुप्छन्दश्च देवता ॥ विश्वेदेवाः समाख्याताः पितृमेधेन पूजयेत् ॥ ५५ ॥ दौवारिकं चाष्टभुजं कृष्णवर्णं विचिन्तयेत् ॥ रक्तवस्त्रं:पिंगलाक्षं कृष्णव्याघ्रोपरि स्थितम् ॥ ५६ ॥ यो नः पितेति मन्त्रेण पूजयेद्भक्तितत्परः ॥ ५७ ॥ वैश्वानर ऋषिश्चास्य गायत्री छन्द ईरितम् ॥ देवता च भवेच्छक्तिर्विनियोगश्च पूजने ॥ ५८ ॥ शंखाभं चैव सुग्रीवं द्विभुजं चक्रधारिणम् ॥ हंसारूढं महाकायं बलिविज्ञानकारणम् ॥ ५९ ॥ शंखपद्मधरं चैव महिषस्थं विचिन्तयेत् ॥ स इषुहस्तेति मंत्रेण पूजयेद्रक्तभूषणैः ॥ ६० ॥ ऋषिः शंखस्तथाच्छन्दः पङ्क्तिः सोमोऽथ देवता ॥ श्वेतं जलाधिपं ध्यायेद्गन्धर्वाद्यैश्च वेष्टितम् ॥ ६१ ॥ ऋष्यासनगतं ध्यायेच्छ्वेतगन्धेन चर्चयेत् ॥ बृहस्पते परिदीया इति मंत्रेण भक्तितः ॥ ६२ ॥ त्र्यंबकोऽस्य ऋषिस्त्रिष्टुप्छन्दो देवो जलाधिपः ॥ ध्यायेच्च असुरं रक्तं करालं नरवाहनम् ॥ ६३ ॥ दशभिर्बाहुभिर्युक्तं कृष्णवस्त्रानुलेपनम् ॥ शन्नो देवीति मंत्रेण कृष्णपुष्पैः प्रपूजयेत् ॥ ६४ ॥ ऋषि वैश्वानरश्छन्दो विराडित्यभिधीयते ॥ वैश्वानरोत्तरो देवः प्रीतये तस्य योजयेत् ॥ ६५ ॥ शेषं षडाननं ध्यायेत्कृष्णं च मधुपिंगलम् ॥ मेषस्थं कुण्डलोपेतं नागयज्ञोपवीतिनम् ॥ उद्धर्ष इति मन्त्रेण पूजयेद्भूतिमिच्छता ॥ ६६ ॥ पापं रक्तं त्रिनेत्रं च रक्तं प्रांते विचिन्तयेत् ॥ रक्तश्मश्रुधरं चैव वरहस्तं :विचिन्तयेत् ॥ ६७ ॥ सिद्धो वीरेति मंत्रेण कृष्णपुष्पैरथार्चयेत् ॥ यमं च कृकराक्षं च आकुञ्चन्मूर्धजं द्विजाः ॥ ६८ ॥ कपिलोऽस्य ऋषिश्छन्दोऽनुष्टुप् चैव प्रकीर्तितम् ॥ देवता च यशः ख्यातं प्रीतये विनियोजयेत् ॥ ६९ ॥ यमं च कृकराक्षं च क्षमाकुञ्चितमूर्धजम् ॥ खरस्थं द्विभुजं ध्यायेदिमं मन्त्रमुदीरयेत् ॥ ७० ॥ वासुकिः स्यादृषिश्चास्य पंक्तिश्छन्दश्च देवता ॥ हिरण्यगर्भ इत्युक्तः प्रीतयेऽस्य नियोजयेत् ॥ ७१ ॥ अर्धपीतं च द्विभुजं रक्ताक्षं धूम्रमेव वा ॥ देवताभिश्च संपन्नं वातो वारेतिरेव च ॥ ७२ ॥ ऋषिर्वायुश्च गायत्री छन्दो वायुश्च

देवता ॥ ७३ ॥ मुग्धरक्तं शंखचक्रगदापद्मधरं तथा ॥ पीतवस्त्रं पन्नगस्थं हारकेयूरमंडितम् ॥ ७४ ॥ अवसृष्टा परापत इति मन्त्रेण पूजयेत् ॥
अग्निश्चास्य ऋषिः प्रोक्तश्छन्दः सोमश्च देवता ॥ ७५ ॥ पीतं भल्लाटकं ध्यायेत्पद्मस्थं रक्तभूषणम् ॥ द्विभुजं पद्महस्तं च देवमेवं विचिन्तयेत् ॥
यन्मातुरिति मन्त्रेण पूजयेत्सिततंडुलैः ॥ ७६ ॥ जम्भकोऽस्य ऋषिश्छन्दो गायत्री समुदाहृता ॥ देवता च भवेत्कुम्भः प्रीतये विनियोगतः ॥
॥ ७७ ॥ सोमं ध्यायेच्छ्यामरूपं पद्मासनगतं परम् ॥ नानाभरणसम्पन्नं किरीटवरधारिणम् ॥ मर्माणितेतिमन्त्रेण गन्धाद्यैरपि पूजयेत् ॥ ७८ ॥
ऋषिः स्वार्थो वेदश्छन्दो जगतीत्यभिधीयते ॥ देवता च भवेत्सोमः प्रीयते विनियोजयेत् ॥ ७९ ॥ दर्पं ध्यायेत्कृष्णवर्णं कृष्णांबरधरं तथा ॥
नागयज्ञोपवीतिं च शिखिस्तंभं द्विजोत्तमाः ॥ ८० ॥ पञ्चदीशेति मन्त्रेण गन्धाद्यैः परिपूजयेत् ॥ ८१ ॥ मन्त्रश्चास्य ऋषिश्चास्य पञ्चायत
नमीरितम् ॥ पंक्तिश्छन्दस्तथा प्रोक्तं देवः पञ्चाननः स्मृतः ॥ ८२ ॥ श्यामवर्णां दितिं ध्यायेद्द्विभुजां पीतविग्रहाम् ॥ सर्वलक्षणसंपन्नां सर्वालं
कारशोभिताम् ॥ ८३ ॥ सुपर्णोऽसीति मन्त्रेण पूजयेत्पीतचन्दनैः ॥ ८४ ॥ ऋषिर्नारायणश्छन्दो जगती परिकीर्त्यते ॥ भवेद्देवो भार्गवश्च
इष्टार्थे परिपूजयेत् ॥ ८५ ॥ रक्ताभामदितिं ध्यायेत्सर्वालंकारभूषिताम् ॥ शुक्रांभारितिमन्त्रेण गन्धाद्यैरभिपूजयेत् ॥ ८६ ॥ वामदेव ऋषि
श्चास्य गन्धाद्यैरभिपूजयेत् ॥ देवः शुक्रः समाख्यातः स्तुतौ च विनियोजयेत् ॥ ८७ ॥ ईशानादिकोणगतान्पूजयेत्सुसमाहितः ॥ आपं ध्याये
च्छुक्लवर्णं कुण्डलाद्यैर्विभूषितम् ॥ ८८ ॥ इदं विष्णुरिति मन्त्रेण त्रिगन्धेन समर्चयेत् ॥ ८९ ॥ ऋषिः स्यात्कर्दमश्छन्दो विराडित्यभिधी
यते ॥ ९० ॥ देवः सोमः समाख्यातः प्रीतये विनियोजयेत् ॥ सरितं द्विभुजं रक्तं रक्तश्वेतांबरान्वितम् ॥ ९१ ॥ हरिचन्दनलिप्तांगं वरदं तं विचि
न्तयेत् ॥ पयसा शुक्र इति मन्त्रेण पूजयेत्कमलादिना ॥ ९२ ॥ नारायण ऋषिश्चास्य पंक्तिश्छन्दः प्रकीर्त्यते ॥ नारायणः स्वयं देवः प्रीतये
विनियोजयेत् ॥ ९३ ॥ जयं ध्यायेत्पीतवर्णं द्विभुजं वरहस्तकम् ॥ देवं किरीटसम्पन्नं सर्वालंकारभूषितम् ॥ ९४ ॥ दृष्ट्वा परिश्रुत इति मन्त्रेणा
नेन पूजयेत् ॥ ऋषिर्नारायणश्छन्दः पंक्तिः सोमोऽथ देवता ॥९५॥ रुद्रं ध्यायेद्रक्तवर्णं शीतांशुकृतशेखरम्॥ द्विभुजं शूलहस्तं च डमरुं च पराभ
वेत् ॥९६॥ दिवो मूर्धन्निति मन्त्रेण ऋषयः समुदाहृताः॥ ऋषिः स्यात्काश्यपश्छन्दो विराडित्यभिधीयते ॥९७॥ स्वयं देवो विनियोगः स्तुतौ
च विनियोजयेत् ॥ द्विभुजं रक्तपद्मस्य पंकजद्वयधारिणम् ॥ ९८ ॥ अस्य किरीट इति मन्त्रेण रक्तस्रक्चन्दनादिभिः ॥ पूजयेत्परया भक्त्या
ऋषिर्नील उदाहृतः ॥ त्रिष्टुप्छन्दो देवता स्याद्रुद्रोपि परिकीर्तितः ॥ ९९ ॥ सवितारं तथाध्यायेत्पद्मस्थं द्विभुजं प्रभुम् ॥ नानाभरणशोभाढ्यं

सप्ताश्वरथमंडितम् ॥ १०० ॥ यद्देवा इति मन्त्रेण गन्धाद्यैः परिपूजयेत् ॥ ऋषिरौतथ्य आख्यातः प्रीतये विनियोजयेत् ॥ १०१ ॥ ध्यायेद्रक्तं
विवस्वन्तं द्विभुजं पद्मविग्रहम् ॥ अविद्या इति मन्त्रेण पूजयेद्गन्धचन्दनैः ॥ १०२ ॥ ऋषिर्गन्धः समाख्यातस्त्रिष्टुप्छन्दश्च ईरितम् ॥ देवता च
भवेत्सोमः स्तुतौ च विनियोजयेत् ॥ १०३ ॥ विबुधाधिपं ततो ध्यायेत्पीतं वृषभवाहनम् ॥ चतुर्भुजं यष्टिहस्तमक्षमालैकहस्तकम् ॥ त्रिनेत्रं
रक्तवस्त्रं च मुकुटाद्यैरलंकृतम् ॥ १०४ ॥ ऋषिर्हारीत इत्युक्तो जगतीच्छन्द ईरितम् ॥ देवता च भवेच्छक्तिः प्रीतये विनियोजयेत् ॥ १०५ ॥
मित्रं ध्यायेच्छुक्लवर्णं वराभयकरं परम् ॥ मेषस्थं च त्रिनेत्रं च किरीटवरमंडितम् ॥ १०६ ॥ धनाकरस्त्विवति मन्त्रेण पूजयेद्दधिपायसैः॥१०७॥
ऋषिरौतथ्य इत्युक्तो जगती छन्द ईरितम् ॥ देवता च भवेद्यक्ष्मा प्रीतये विनियोजयेत् ॥१०८॥ पीतास्यं राजयक्ष्माणं करालं च विचिंतयेत् ॥
यशो रूपमिति मन्त्रेण गन्धाद्यैः परिपूजयेत् ॥ १०९ ॥ दध्यङ्ङाथर्वण ऋषिर्गायत्री छन्द ईरितम् ॥ यक्ष्मा च देवता चैव स्तुतौ च विनियोज
येत् ॥११०॥ शुक्लांबरधरं ध्यायेद्द्विभुजं शिखिवाहनम् ॥ यमं विनेति मंत्रेण पूजयेद्भक्तितत्परः ॥१११॥ ऋषिः स्यान्नारदः प्रोक्तश्छन्दोनुष्टुप्प्रकी
र्तितम् ॥ विवस्वान्देवता चैव क्रतौ च विनियोजयेत् ॥११२॥ एवं ध्यात्वा विवस्वंतं महाकायं महोदरम् ॥ अभिन्नरूपमंत्रेण गन्धाद्यैः परिपूज
येत् ॥ ११३ ॥ काश्यपोस्य ऋषिश्छन्दस्त्रिष्टुब्देवः शचीपतिः ॥ ११४ ॥ बहिरीशानकोणेषु देवादीन्परिपूजयेत् ॥ कूष्माण्डैर्वरणापुष्पैः शौरकैर्वा
समर्चयेत् ॥ ११५ ॥ पीतां करालिकां ध्यायेच्चरकीं वरवर्णिनीम् ॥ स्वब्जस्थां द्विभुजां चैव गुञ्जाहारोपशोभिताम् ॥ ११६ ॥ पीतिन्यरूपम
न्त्रेण पूजयेद्भूतिमिच्छुकः ॥ बलदेव ऋषिश्चास्य छन्दो गौरी च देवता ॥ ११७ ॥ ध्यायेद्विदारिकां रक्तां नवयौवनसंयुताम् ॥ पवित्रेण पुनी
हीति मंत्रेणानेन पूजयेत् ॥ ११८ ॥ ऋषिर्गर्गः समाख्यातस्त्रिष्टुप्छन्दोस्य देवता ॥ रुद्रोऽपि च समाख्यातः स्तुतौ च विनियोजयेत् ॥ ११९ ॥
पापादिराक्षसीं ध्यायेत्सौरभेयोपरिस्थिताम् ॥ कया न इति मंत्रेण पूजयेद्गन्धचन्दनैः ॥ १२० ॥ ऋषिः सुवर्ण आख्यातः पंक्तिश्छन्दः प्रकीर्ति
तम् ॥ देवता च महादेव इष्टार्थे विनियोजयेत् ॥ १२१ ॥ कुण्डवेद्या अंतरे च स्थापयेद्विधिवद्बुधः ॥ पर्वताग्रमृदं चैव गजदंतमृद तथा ॥ १२२ ॥
वल्मीके संगमे चैव राजद्वारचतुष्पथात् ॥ कुशमूलमृदं चैव यज्ञियस्य वनस्पतेः ॥ १२३ ॥ इन्द्रवल्ली तथाक्रांत अमृती त्रपुषस्य च ॥ मालती
चंपकं चैव तथा उर्वारुकस्य च ॥ १२४ ॥ पारिभद्रस्य पत्रैश्च परितः परिवेष्टनम् ॥ पञ्चतुंगस्य परितो मुखे कुर्यात्फणान्वितम् ॥ १२५ ॥
श्रीफलं बीजपूरं च नालिकेरं च दाडिमम् ॥ धात्री जंबुफलं चैव अन्यथा दोषमादिशेत् ॥१२६॥ पञ्चरक्तं सुवर्णं च निक्षिपेद्वरुणं यजेत् ॥ पञ्चोप

चारैर्विधिवद्गन्धपुष्पादिभिर्यजेत्॥१२७॥ उद्वर्तंन इति मंत्रेग वरुणं च पुनर्यजेत् ॥१२८॥ अस्य मंत्रस्य च ऋषिर्विष्णुश्छन्द उदाहृतम् ॥ गायत्री
देवता पाशी प्रीतये विनियोजयेत् ॥ १२९ ॥ पञ्चगंधान्विनिक्षिप्य हस्तं दत्त्वा पठेत्ततः ॥ १३० ॥ सर्वे समुद्राः सरितः सरांसि च महाह्रदाः॥
आयांतु सर्वपापघ्नाः सर्वलोकसुखावहाः ॥ १३१ ॥ गंगाद्याः सरितः सर्वास्तीर्थानि जलदाः नदाः ॥ आयांतु यजमानस्य दुरितक्षयकारकाः ॥ १३२ ॥
अघोराज्यष्टककृता वास्तोष्पतय इत्यपि ॥ शतं वा चाष्टसंयुक्तं सहस्रं वा विशेषतः ॥ १३३ ॥ शतार्धं वा हुनेद्विप्रस्तिलैर्वा तंडुलैः सह ॥ पालाशैर्वा
पिप्पलैर्वौदुम्बरैर्वा समाचरेत् ॥१३४॥ पयोदध्यादिभिर्वापि मध्वाज्यैर्वा विशिष्यते ॥ अन्येषां च व्रतेनैव एकैकामथ वाहुतिम् ॥१३५॥ अष्टाविंशति
भिश्चान्यैरष्टाष्टौ पंचपंच वा ॥ १३६ ॥ चरक्यादींश्चासनैश्च पिष्टकैर्वटकेन वा ॥ रक्तपुष्पेण पत्रेण त्रिमध्वक्तेन यत्नतः ॥ १३७ ॥ वास्तोष्पते
दृढं जप्त्वा यजेद्वास्तुपतिं यदा ॥ पंचोपचारैर्विधिवत्सांगोपांगैरनंतरम् ॥१३८॥ बलिमासादयेत्पश्चाद्दद्यादेकैकशः क्रमात्॥ब्राह्मणैश्चैव दद्याच्च सदा
आज्यं समाक्षिकम् ॥ १३९ ॥ शाल्यन्नं शिखिने दद्यात्तथा नीलोत्पेलानि च ॥ ओदनं सोत्पलं दद्यात्पर्जन्याय विचक्षणः ॥ १४० ॥ जयाय
पिष्टकं कार्यमिन्द्राय घृतमोदकः ॥ सूर्याय पिष्टकान्नं च सत्याय यवपूलिकाम् ॥१४१॥ भ्रमाय मत्स्यमांसान्नं शष्कुलीमथ पिष्टकम् ॥ वायव्ये
च तथा सक्तून्पूष्णे चापूपमेव हि ॥ १४२ ॥ वितथाय कलायान्नं गृहर्क्षाय समाक्षिकम् ॥ पूष्णेथ कृशरान्नं च शाल्यन्नं च निवेदयेत् ॥ १४३ ॥
गन्धर्वाय कस्तूरिकान्नं कृशरं भृंगराजके ॥ मृगाय यावकान्नं च पितृभ्यो मुद्गपायसम् ॥१४४॥ दौवारिकाय कृशराननडुंहे च पूपकम् ॥ पायसं
पुष्पदंताय वरुणाय च पिष्टकम् ॥ १४५ ॥ असुराय मोदकांश्चैव दद्यादापिक्षये सुराम् ॥ घृतोदनं च सोमाय कणान्नं यक्ष्मणे ददेत् ॥ १४६ ॥
रोगाय घृतलड्डूकं सपायसगुडौदनम् ॥ अक्षाय विविधान्नं च भल्लाटाय तथैव च ॥ १४७ ॥ सोमाय मधुशाल्यन्नं नागाय गुडपिष्टकम् ॥
अदित्यै चापि गोधूमं घृतपक्वं निवेदयेत् ॥ १४८ ॥ दित्यै दद्यात्तथा क्षीरं सितशर्करया सह ॥ क्षीरान्नं चैव पूष्णे च आपवत्साय वै दधि ॥
॥ १४९ ॥ सावित्र्यै लड्डुकान्नं च सवित्रे च गुडौदनम् ॥ जयाय घृतमन्नं च मिष्टान्नं च विवस्वते ॥ १५० ॥ विरूपाय च तद्दद्याद्धरिद्रान्नं तथैव
च ॥ घृतौदनं च चित्राय रुद्राय घृतपायसम् ॥ १५१ ॥ मांसौदनं यक्ष्मणे च कृशरं वरुणाय च ॥ अर्यम्णे शर्करापूपं बहिर्दद्याच्चतुष्टयम् ॥
॥ १५२ ॥ चित्रौदनं समांसं च मत्स्यान्नं गुडपिष्टकम् ॥ प्रतिदेवोपरि [१]क्षीरं घृतक्षीरसमन्वितम् ॥ तीर्थतोयसमायुक्तं सुगन्धेन समन्वितम्॥१५३॥

---

[१] 'नीरक्षीराम्बुशम्बरम्' इत्यमराभिधानात्क्षीरशब्दोत्र जलपर्यायः, तेन 'घृतक्षीरसमन्वितम्' इत्युक्तेर्न्न विरोधः ।

पताका देववर्णेन दद्याद्ब्रह्मादिषु क्रमात् ॥ मंत्रं जपेत्स्वसामर्थ्यात्स्वसामर्थ्यात्स्तुतिं पठेत् ॥ १५४ ॥ पुरुषस्तवस्य सूर्य ऋषिर्जगती छन्दः ॥ सविता देवता सोमपाके स्तुतौ विनियोगः ॥ १५५ ॥ ॥ शंकर उवाच ॥ ॥ विष्णुर्जिष्णुर्विभुर्यज्ञो यज्ञियो[१] यज्ञपालकः ॥ नारायणो नरो हंसो विष्वक्सेनो हुताशनः ॥ १५६ ॥ यज्ञेशः पुण्डरीकाक्षः कृष्णः सूर्यः सुरार्चितः ॥ आदिदेवो जगत्कर्ता मण्डलेशो महीधरः ॥ १५७ ॥ पद्मनाभो हृषीकेशो दाता दामोदरो हरिः ॥ त्रिविक्रमस्त्रिलोकेशो ब्रह्मणः प्रीतिवर्द्धनः ॥ १५८ ॥ भक्तप्रियोऽच्युतः सत्यः सत्यवाक्यो ध्रुवः शुचिः ॥ संन्यासी शास्त्रतत्त्वज्ञस्त्रिपंचाशद्गुणात्मकः ॥ १५९ ॥ विदारी विनयः शांतस्तपस्वी वैद्युतप्रभः ॥ यज्ञस्त्वं हि वषट्कारस्त्वमोंकारस्त्वमग्नयः ॥ १६० ॥ त्वं स्वधा त्वं हि स्वाहा त्वं सुधा च पुरुषोत्तमः ॥ नमो देवादिदेवाय विष्णवे शास्वताय च ॥ अनंतायाप्रमेयाय नमस्ते गरुडध्वज ॥ १६१ ॥ ब्रह्मस्तवमिमं प्रोक्तं महादेवेन भाषितम् ॥ प्रयत्नाद्यः पठेन्नित्यममृतत्वं स गच्छति ॥ १६२ ॥ ध्यायंति ये नित्यमनंतमच्युतं हृत्पद्ममध्ये स्वयमाव्यवस्थितम् ॥ उपासकानां प्रभुमेकमीश्वरं ते यांति सिद्धिं परमां तु वैष्णवीम् ॥ १६३ ॥ इति श्रीभविष्येमहापुराणे मध्यमपर्वणि द्वितीयभागे द्वादशोध्यायः ॥ १२ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ ततो भेर्यादिघोषेण यजमान उदङ्मुखः ॥ कनकतोयेन गन्धेन मुद्गलाग्रेण लेपयेत् ॥ १ ॥ ऐशान्यां मध्यभागे वा यजेद्वा सुसमाहितः ॥ वर्तुलाकारयेद्यस्मान्मन इच्छति संजपन् ॥ २ ॥ ऋषिः कंठोथ गायत्री छन्द इत्यभिधीयते ॥ देवता पृथिवी चैव स्तुतौ च विनियोजयेत् ॥३॥ विवरे पूजयेत्कर्म ब्रह्माणं च धराधरम् ॥ पृथिवीं गन्धपुष्पाद्यैर्नैवेद्यैर्विविधैरपि ॥ ४ ॥ अग्रतोऽष्टदलं लेख्यं स्थापयेत्कलशं ततः॥ मुखे विधाय कनकं राजतेन विनिर्मितम् ॥ ५ ॥ शुक्तिशंखसमं वापि विश्वामित्रसमुद्भवम् ॥ पूजयेत्तीर्थतोयेन गन्धपुष्पाक्षतादिना ॥६॥ विष्णुक्रांतात्वचाकुष्ठचन्दनेन विलोडितम् ॥ क्षीरं च मातुलिंगं च सावित्रं च सदूर्वया ॥ ७ ॥ दध्यक्षतं मधुयुतमेवमर्घ्यं च साधयेत् ॥ सितचन्दनवस्त्राद्यैः शाल्यैश्च विविधैरपि ॥ ८ ॥ अव्रणं कलशं कृत्वा पञ्चवर्णसमन्वितम् ॥ आवाहये त्तोयनिधिं मंत्रेणानेन भक्तितः ॥ ९ ॥ आयाहि भगवन्देव तोयमूर्ते जलेश्वर ॥ हृद्वर्णार्घ्यं मया दत्तं परितोषाय ते नमः ॥ १० ॥ गृहेभ्यश्चैव सोमाय त्वष्ट्रे चैव च शूलिने ॥ इमं मे वरुणेत्यादि प्रत्येकं स्याद्धुतित्रयम् ॥ ११ ॥ ततोर्घ्यदानं विधिवत्क्षीरेण हविषा मधु[२] ॥ यजमानः सपत्नीकः कुंभं कुक्षौ निधाय च॥१२॥हिरण्यगर्भेति मंत्रस्य भरद्वाज ऋषिः स्मृतः ॥ छन्दश्च जगती ख्यातं देवता च जलाधिपः॥१३॥ वरुणस्योक्तं

---

[१] 'यज्ञर्त्विग्भ्यां घखञौ' इति घः ।

[२] मधुना ।

भनेति मंत्रस्य जलकुंभं निवेदयेत् ॥ अस्य मंत्रस्य च ऋषिर्नारदः परिकीर्तितः ॥ विराट्छन्दश्च ईशानो देवता समुदाहृता ॥१४॥ मोचयेन्मीन
युग्मं च मेषयुग्मं तथैव च ॥ संभवे पक्षियुग्मं च आडीं वा चक्रवाककम् ॥१५॥ मोचयेन्नागयुग्मं च आयुवृद्धेश्च हेतवे ॥ दिक्षु जीवंतिकां दद्याद्राक्ष
सेभ्यो बलिं हरेत् ॥ १६ ॥ निर्मितं माषभक्तेन रक्तपुष्पैरलंकृतम् ॥ क्षात्रको लक्ष्मणश्चैव मणिभद्रो गणेश्वरः ॥ सबिंदुकेन हंतेन दिक्षु मध्ये यथा
क्रमात् ॥ १७ ॥ ये भवा भाविनो भूता ये च तेषु मयासिनः ॥ आहरं तु बलिं तुष्ट्या प्रयच्छंतु शुभं मम ॥ १८ ॥ इत्युक्त्वा च बलिं दद्या
न्नमस्कुर्यादनंतरम् ॥ दद्यात्पयस्विनीं गां च आचार्याय विशेषतः ॥ १९ ॥ अन्येषां हि हिरण्यं च गां च दद्याद्विजन्मने ॥ व्याहृतिद्वितयं चैव
ततो वारुणपंचकम् ॥ २० ॥ प्राजापत्यं स्विष्टकृच्च जुहुयात्तदनंतरम् ॥ घृतैः स्विष्टकृतं नास्ति तथा रसविसारकैः ॥ २१ ॥ पद्मोत्पलैर्मातुलिंगैः
पनसैर्मातुलुंगकैः ॥ मधूकैर्विश्वपुष्पैश्च तथाम्रातककाशकैः ॥ २२ ॥ अभिषेकं ततः कुर्यात्सुवास्त्विवति च वै जपन् ॥ दद्यात्पूर्णां च विधिवत्सूर्या
याघ्यं निवेदयेत् ॥ २३ ॥ पश्चदोषं पुरस्कृत्य ब्राह्मणानुमतेन च ॥ गृहं प्रविश्य च ततो ब्राह्मणानथ भोजयेत् ॥ २४ ॥ दीनांधकृपणे चैव
दद्याद्वित्तानुसारतः ॥ ज्ञातिभिः सह भुञ्जीत दधिक्षीरामिषं विना ॥ २५ ॥ न क्षीरं च कषायं च भर्जितं शाकमेव च ॥ न काण्डं च न पुष्पं च
करीरं च कदाचन ॥ २६ ॥ शाल्यन्नं मूलकं चैव पनसाम्रफलनि च ॥ मस्तं मधुघृतगुडं मातुलिंगं ससैंधवम् ॥ २७ ॥ बदरं धातकिफलं कुन्द
पुष्पं तथा तिलम् ॥ एतत्प्रशस्तं जानीयान्मरीचानि विशेषतः ॥ २८ ॥ त्रिरात्रमथ सप्ताहं परित्यज्य खले ततः ॥ पश्चांगकं ततः कुर्यात्स्थाप
येन्नेति युग्मकम् ॥ २९ ॥ प्रथमा चार्कहस्तेन द्वितीया दशहस्तिका ॥ वितस्ते तु भवेच्छतं द्विगुणं तदनंतरम् ॥ ३० ॥ शतार्धं ततः पश्चात्षष्टि
हस्तमनंतरम् ॥ ३१ ॥ ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि द्वितीयभागेऽर्घ्यदानविधौ त्रयोदशोऽध्यायः ॥१३॥छ॥ ॥ सूतउवाच ॥ ॥
स्वगृह्याग्निविधिं वक्ष्ये योगभेदेषु सत्तमाः ॥ न परोक्तं विधानेन भयदं कीर्तिध्वंसनम् ॥ १ ॥ पुत्रा एव च कन्याश्च जनिष्याश्चापरे सुताः ॥ गृह्या
इति समाख्याता यजमानस्य दायदाः ॥ २ ॥ तेषां संस्कारयागेषु शान्तिकर्मक्रियासु च ॥ आचार्यविहितः कल्पस्तस्माच्चक्ष इति स्मृतः ॥
॥ ३ ॥ त्रिकुशं परिगृह्णाति ततश्च कुरुते दृढम् ॥ ऋषिर्दक्षश्च जगती छन्दो विष्णुश्च देवता ॥४॥ कश्यपस्तृप्यतामिति भूरसीति च शोधनम् ॥
ऋषिः सुवर्ण गायत्री जगती छन्द इष्यते ॥ देवता च भवेत्सूर्यः पृथिवीशोधने न्यसेत् ॥ ५ ॥ ऐशान्यादिक्रमेणैव प्रादक्षिण्येन यत्नतः ॥ यत्प
वित्रेति मंत्रेण तर्जन्यंगुष्ठयोरपि ॥ ६ ॥ कुशगर्भत्रयेणापि भ्रामयेद्वलयाकृति ॥ परिसमूहनमित्युक्तं स्नपनं शृणु सत्तम ॥ ७ ॥ ईशानादेश्च

संस्कारं कुर्यात्परिसमूहनम् ॥ प्रतिष्ठायां चरेत्यादिनैर्ऋत्यादिग्रहं मखे ॥ ८ ॥ परिसमूहनमैन्द्रस्य पर्वतोऽस्य ऋषिः स्मृतः ॥ पंक्तिश्छन्दः समु
द्दिष्टमिन्द्राणी चास्य देवता ॥ ९ ॥ गोमयं च त्रिगंधं च पंचमूर्तिकयापि च ॥ कनिष्ठं गुह्यकं त्यक्त्वा देवतार्थे न लेपयेत् ॥ १० ॥ मानस्तो
केनेति ऋचा विश्वेदेवश्च पूज्यताम् ॥ ऋषिः स्यात्काश्यपश्छन्दो विश्वेदेवः प्रकीर्तितः ॥ ११ ॥ योजयेल्लेपयेद्विद्वान्घटमाबद्ध्य सत्तमाः ॥
मध्यमातर्जनीभ्यां च कुशमारभ्य दक्षिणम् ॥ १२ ॥ चतुरस्रीकृतं क्षेत्रं हस्तमानं तथाननम् ॥ यज्वभिरिति मन्त्रेण सूर्यः प्रीणाति
सत्तमाः ॥ १३ ॥ दक्षे सार्धांगुलं त्यक्त्वा पश्चिमेन परित्यजेत् ॥ उत्तराग्रां लिखेद्रेखामन्यथाऽमंगलं भवेत् ॥ १४ ॥ आप्यायस्वेति मन्त्रस्य
धन्वंतरिऋषिः स्मृतः ॥ त्रिष्टुप्छन्दः समाख्यातं सविता चात्र देवता ॥ १५ ॥ तल्लग्नं दक्षिणे चैकं पूर्वार्द्धद्वादशाङ्गुलम् ॥ अन्यांगुलांतरं चैकं
ततः सप्तांगुलं भवेत् ॥ १६ ॥ कुशमूलेन स्वर्णेन प्रतिष्ठायां च राजते ॥ अंगुष्ठानामिकाभ्यां च संज्योतीति च संजपन् ॥ १७ ॥ संस्मरेन्मित्रा
वरुणौ ऋषिरौतथ्यसंज्ञकः ॥ पंक्तिश्छन्दः शिवो देवो रेखामथ च योजयेत् ॥ १८ ॥ तेनैवोर्द्ध्वकरौ कुर्याद्दक्षवामे सकृत्सकृत् ॥ भास्वराय
क्षिपेदग्नौ तत ऊर्ध्वं रणं स्मृतम् ॥ १९ ॥ सदसंपद्दृषिः कर्णौ विराडिति उदाहृतः ॥ छन्द इन्द्रो देवता च पृथिव्या देवता भवेत् ॥ २० ॥
कुशपुष्पोदकेनापि देवतीर्थेन सत्तमाः ॥ पंचगव्येन मतिमान्पञ्चरत्नोदकेन च ॥ पञ्चपल्लवतोयेन महायोगे विशेषतः ॥ २१ ॥ अथोनस्य च
मन्त्रस्य वशिष्ठः परिकीर्तितः ॥ छन्दोऽथ देवी गायत्री देवता गणनायकः ॥ २२ ॥ कीशादग्निं समादाय मे गृह्णामीति संपठन् ॥ मे गृह्णामीति
मंत्रस्य ऋषिर्गौतम ईरितः ॥ छन्दोनुष्टुप्समाख्यातं वामदेवोऽथ देवता ॥ २३ ॥ क्रव्यादग्निं परित्यज्य क्रव्यादमग्निमीरयन् ॥ मंन्त्रेणानेन मति
मान्दक्षिणस्यां विनिक्षिपेत् ॥ २४ ॥ अस्य मन्त्रस्य हारीत ऋषिः स्याच्छन्द इष्यते ॥ देवता वामदेवोऽपि दाहेपि विनियोजयेत् ॥ २५ ॥
आवाहनं ततः कुर्यात्संसरक्षेति संजपन् ॥ संसरक्षेति मंत्रस्य ऋषिर्नील उदाहृतः ॥ विराट् छन्दोऽथ विज्ञेयो देवता च शतक्रतुः ॥ २६ ॥ वैश्वा
नर इति ऋचा अग्निस्थापनमीरितम् ॥ मंत्रमाचाति प्रीणाति ऋषिः स्यात्काश्यपः स्मृतः ॥ अनुष्टुप् च भवेच्छन्दो देवता हव्यवाहनः ॥ २७ ॥
बध्नासीति च मंत्रेण अग्निं कुर्यात्प्रदक्षिणम् ॥ ऋषिः स्वयंभूराख्यातो विराट् छन्द उदाहृतम् ॥ देवता परमात्मा च नमस्कारेण योजयेत् ॥
॥ २८ ॥ ततोग्निदक्षिणे भागे प्रागग्रकुशकुब्जके ॥ द्विहस्ते भवतश्चैव हस्तपानासने अथ ॥ २९ ॥ ब्रह्मन्निहोपवेश्यतामिति ब्रह्माणं विनिवेशयेत् ॥
ब्रह्मयज्ञानृचा दोग्ध्री धेनुरिति त्वृचा ॥ ३० ॥ द्वाभ्यामिति च मन्त्राभ्यामिति ब्रह्मप्रवेशनम् ॥ शक्रोऽस्य त्रायतामेति शृणु ऋग्भ्यामृषीद्विजाः ॥ ३१ ॥

प्रजापतिर्ऋषिश्छन्दस्त्रिष्टुब्देवोऽथ शंकरः ॥ नारदश्च ऋषिश्छन्दस्त्रिष्टुब्देवः शचीपतिः ॥ ३२ ॥ अग्नेरुत्तरभागे च हस्तमानांतरेपि च ॥ प्रणीतास्थापनं कुर्यादिन एहीति संजपन् ॥ ३३ ॥ मन्त्रस्य च ऋषिश्छन्दो वामदेवः प्रकीर्तितः ॥ जगती च भवेच्छन्दो देवता च शतक्रतुः ॥ ३४ ॥ श्रीपर्णीसहकारोत्थं वरुणस्य विशेषतः ॥ षडंगुलेन विस्तारं विंशत्यंगुलकेन च ॥ ३५ ॥ दैर्घ्येण च चतुःख्यातकांगुलं च प्रमाणतः ॥ द्व्यंगुले चरकाकायामासासन्देवकर्मणि ॥ ३६ ॥ अभिचारे भवेत्कांस्यं ताम्रं स्याच्छांतिकर्मणि ॥ प्रतिष्ठायां मृन्मयं च अष्टांगुलमथापि वा ॥ ३७ ॥ द्वादशांगुलप्रस्तारं तैजसं मानवर्जितम् ॥ इमं मे वरुणेनर्चा प्रणीतामथ पूरयेत् ॥ ३८ ॥ सागरा अथ प्रीयंतामित्थमाध्यानमाचरेत् ॥ सकृदच्छिन्नदर्भेण दिग्विदिक्षु परिस्तरेत ॥ ३९ ॥ नैर्ऋते दिक्षु सीतः स्याद्वैश्वदेवे तथैव च ॥ कया नश्चित्र इत्यृचा नागः प्रीणाति सत्तमाः ॥ ४० ॥ अस्य मंत्रस्य च ऋषिर्भरद्वाज उदाहृतः ॥ छन्दोऽनुष्टुब्देवता च ईशानः परिकीर्तितः ॥ ४१ ॥ प्रयोजनादिकं द्रव्यं तत आसादयेत्क्रमात् ॥ दक्षिणादि उत्तरांतं ध्रुवास इत्यृचापि च ॥ ४२ ॥ ऋषिः स्यान्नारदश्छन्दोनुष्टुप्चैवाथ देवता ॥ शतक्रतुश्च प्रीणाति योजयेदथ सादरात् ॥ ४३ ॥ काष्ठं च पश्चिमे कुर्यात्प्रयच्छन्पश्चिमेन तु ॥ पुरतोऽन्नं पञ्चव्रीहीस्तिलाश्च शहसर्षपान् ॥ ४४ ॥ दक्षिणे चैव आपूपं भृंगराजं तथैव च ॥ फलपत्रे वामभागे पिष्टकं दधि दुग्धकम् ॥ ४५ ॥ पनसं नारिकेलं च मोदकं लड्डुकं तथा ॥ प्रणीतां च दिग्विदिक्षु स्थापयेदविचारयन् ॥ ४६ ॥ प्रणीतां न स्पृशेज्जातु होमकाले कथंचन ॥ स्नानकुंभं च भो विप्रा यावद्यागः प्रवर्तते ॥ ४७ ॥ उच्चीरकं मातुलिंगं दूर्वां धात्रीफलानि च ॥ तुलसीमालतीजाती जलजानि विशेषतः ॥ ४८ ॥ ऐशान्यां स्थापयेत्सर्वं यच्च वै कंकतीमयम् ॥ नैर्ऋत्येति विशेषोयं यच्च वैकंकती शमी ॥ ४९ ॥ यथायोगेन तत्सर्वं ग्राह्यं तत्पत्रमेव च ॥ क्षीरपाके तु क्षीरांते चरुस्थालीमथानयेत् ॥ ५० ॥ पवित्रच्छेदनकुशैशिंछद्यात्प्रादेशिकं पुनः ॥ छित्त्वा पवित्रं प्रोक्षण्यां स्थापयेद्दलभिदाम्रकम् ॥ ५१ ॥ विष्णो रराटमंत्रेण छेदयेदग्रभागतः ॥ पायसेन काठिनेन प्रमथ्नीयात्कदाचन ॥ ५२ ॥ न रसेन न कार्ष्णेन न दृढेन कदाचन ॥ ताम्रेण भस्मना चाथ शुक्तिशंखेन वाग्यतः ॥५३॥ छेदयेत्पिञ्जुलीं चापि पवित्रमथ देशिकः॥ विष्णो रराटमंत्रस्य हारीतश्च ऋषिः स्मृतः ॥ ५४ ॥ पंक्तिश्छंदो भवेद्देवः संस्कारे विनियोजयेत् ॥ प्रणीताभाजनं गृह्य प्रोक्षणीं पूरयेत्त्रिभिः ॥ ५५ ॥ कायतीर्थेन तत्कुर्याद्देवतीर्थेन चेत्यपि ॥ वामहस्ततले पश्चात्स्थापयेत्प्रोक्षणीयकम् ॥ ५६ ॥ मध्यमामध्यमांगुष्ठ अपामार्गेण मंत्रिभिः ॥ उत्तानं तत्पवित्रं च पवित्रं तेति संजपन् ॥ ५७ ॥ ऋषिः स्याद्गौतमश्छन्दो धर्मराजोऽथ देवता ॥ अथ स्थापितद्रव्याणि प्रोक्षयेत्स्थापयेत्क्रमात् ॥ ५८ ॥ सकृद्द्रव्ये

त्रिभिः काष्ठैस्त्रिवारं मंत्रपुष्पकैः ॥ स्थिरस्थाने तु संप्राप्तप्रणीतायाश्च दक्षिणे ॥ ५९ ॥ प्रादेशांतरतश्चैव आज्यस्थालीमथार्पयेत् ॥ अग्रतो मण्डलं कृत्वा वह्निं विप्रे तु स्थापयेत् ॥ ६० ॥ धूतं निःसारयेत्तत्तु निरूप्याशु क्रमेण तु ॥ ईशानेति च मंत्रेण अधिश्रपणमीरितम् ॥६१॥ ऋषिर्नारायणश्छन्दः पंक्तिरीशोऽथ देवता॥ पर्यग्निकरणं कुर्यादादराद्द्वयमप्यथ ॥ ६२ ॥ अवेक्ष्य ईशमारभ्य दक्षिणावर्तकेन तु॥ कुलायनीति मंत्रेण ऋषिच्छन्दादिकं स्मरन् ॥ ६३ ॥ परिवेष्याज्यस्थालीं च त्रिः सकृद्वा समाहितः ॥ पितरस्तृप्यंतामिति संस्कारे मातरः स्मृताः ॥ ६४ ॥ ऋषिः स्याज्जमदग्निश्च गायत्री छन्द ईरितम् ॥ देवता च पिनाकी स्यादग्निष्टोमे च योजयेत् ॥ ६५ ॥ घृतस्य च तथा त्वं नो ब्रह्मा वै तृप्यतामिति ॥ षडंगुलं स्रुवं पश्चाद्गृहीत्वाग्नौ प्रतप्य च ॥ ६६ ॥ त्रिरात्रं तु महायोगे सकृदन्यत्र सत्तमाः ॥ संमार्जयेत्कुशेनापि मूलादग्रं तु सेचयेत् ॥ ६७ ॥ अग्रान्मूलं पुनः कुर्यात्संपूज्य च पुनः पुनः ॥ त्रिभिस्त्रिभिः प्रणीतोदे प्रोक्षयेत्तदनंतरम् ॥ ६८ ॥ स्रुवं पुनः प्रतप्याथ प्रोक्षण्युत्तरतो न्यसेत् ॥ आज्यपात्रं पुरस्कृत्य पवित्रं च समाहरेत् ॥६९॥ अंगुष्ठे द्वे अनामे तु गृह्णीयात्तत्पवित्रकम् ॥ अष्टांगुलं मध्यकृत्वो घृतं त्रिः पवनं चरेत् ॥७०॥ पाताले त्रिस्तथाकाशे अवेक्ष्याज्यं ततस्त्रिभिः ॥ प्रोक्षण्यां च तथा कुर्यादधः संप्रोक्ष्य देशिकः ॥ ७१ ॥ ततः पायसमादाय उत्थाय च समन्त्रकम् ॥ तूष्णीं दद्यात्तथा चाग्नौ सन्निवेशेन तत्त्वतः ॥ ७२ ॥ सपवित्रं दक्षकरे गृहीत्वा प्रोक्षणीयकम् ॥ अष्टांगुले मूलभागे तज्जलेन ईशादितः ॥ ७३ ॥ अग्निं पर्युक्षयेत्पश्चाद्दक्षिणावर्तकेन च ॥ पवित्रं च प्रणीतायां निधाय प्रोक्षणीयकम् ॥ ७४ ॥ संयावार्थं च भो विप्रा अग्निवत्तत्र देशिकः ॥ ध्यायेदग्निं रक्तवर्णं स्रुवहस्तं त्रिबाहुकम् ॥ ७५ ॥ कमंडलुं परे हस्ते ततो दक्षकरेण तु ॥ स्रुवं गृहीत्वा जुहुजात्तूष्णीमेव समाहितः ॥ ७६ ॥ अंते च देवतोद्देशं प्राजापत्यं समीरयन् ॥ प्रणवांतेन जुहुयात्सर्वत्र द्विजसत्तमाः ॥ ७७ ॥ वायुकोणं समारभ्य वह्निकोणान्तकेन तु ॥ अच्छिन्नेन घृतेनैव इन्द्राय तदनंतरम् ॥ ७८ ॥ अग्नीषोमात्मकं चैव जुहुयाद्राक्षसादितः ॥ ऐशानकोणपर्यंतं ततो नैमित्तिकं चरेत् ॥ ७९ ॥ पश्चात्स्विष्टं ततो दद्याद्द्याच्च मतिभिस्तथा ॥ वारुणं पञ्चकं चैव कृत्वा पूर्णां ततो लभेत् ॥ ८० ॥ उद्वाह इति मंत्रस्य अथर्वण ऋषिः स्मृतः ॥ छंदो देवी च गायत्री देवतं चापि वारुणम् ॥ ८१ ॥ प्रकृते योजयेन्मन्त्री स्तुतौ चापि नियोजयेत् ॥ त्वन्नोग्न इति मंत्रस्य ऋषिर्वाशिष्ठसंज्ञकः ॥ छंदश्च बृहती ख्यातं तदेवाग्निः प्रकीर्तितः ॥ ८२ ॥ इडो गतमिति मन्त्रस्य ऋषिः को गुह्यसंज्ञकः ॥ छन्दश्च जगती ख्यातं देवो विष्णुः प्रकीर्तितः ॥ ८३ ॥ उद्वर्तन इति मंत्रस्य ऋषिः को तु प्रकीर्तितः ॥ छन्दो देवी च गायत्री वरुणश्चाधिदेवता ॥८४॥

इति श्रीभविष्ये महापुराणे मध्यमपर्वणि द्वितीयभागे चतुर्दशोऽध्यायः ॥ १४ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ मखे सर्वत्र ब्रह्माणमृत्विजं वरयेदथ ॥ कुशकण्डीं स्वगृह्येन कृत्वाग्निं चार्चयेत्ततः ॥ १ ॥ आघाराज्यभागौ तु महाव्याहृतयस्त्रयः ॥ सर्वं प्रायश्चित्तसंज्ञकं प्राजापत्यं च स्विष्टकृत् ॥ २ ॥ एतन्नित्यं हि सर्वत्र होमे कर्मणि निर्दिशेत् ॥ प्राजापत्ये च इन्द्राय एतावाघारसंज्ञकौ ॥ ३ ॥ अग्नये चैव सोमाय आज्यभागौ प्रकीर्तितौ॥ भूर्भुवःस्वस्त्रयश्चैव महाव्याहृतयः स्मृताः ॥४॥ अयाश्चाग्ने इति तथा ये ते शतमनुत्तमम् ॥ सर्वप्रायश्चित्तसंज्ञा एते वै पञ्च मंत्रकाः ॥ ५ ॥ प्राजापत्याहुतिश्चैका स्विष्टकृच्चापरा स्मृता ॥ चतुर्दशैताः कृतयो होतव्या नित्यसंज्ञकाः ॥ ६ ॥ कृत्वा सकृद्देवतोद्देशं होमं पश्चात्समाचरेत् ॥ सोमपा ये च गोयामे नरमेधाश्वमेधयोः ॥ ७ ॥ अन्यत्र विपरीतेन स्वाहांतेन हुनेद्बुधः ॥ नैमित्तिकं विना नित्यं विफलं याति नान्यथा ॥ ॥ ८ ॥ नित्यं वर्ज्यं शतार्धेन वैश्वदेवे तथैव च ॥ त्र्यहसाध्यादियागेषु यन्निदेशं शृणु द्विजाः ॥ ९ ॥ एकाहे वाघाराज्यौ कृत्वा नैमित्तिकीः कृतीः ॥ समा स्विष्टकृतं विद्यादाकृत्याद्यास्ततः परम् ॥ १० ॥ विशेषतस्त्र्यहादौ तु अघारावाज्यपूर्वकम् ॥ पश्चान्नैमित्तिकं कुर्यात्समाप्तिदिवसेप्यथ ॥ ११ ॥ आघाराराज्यपूर्वेण ततो नैमित्तिकं चरेत् ॥ स्विष्टकृद्व्याहृतिश्चैव वारुणाद्यास्तथा हि षट् ॥ १२ ॥ द्विजातिः पतितो यत्र द्वित्रिकं च चतुश्चतुः ॥ एकस्मिन्दिवसे कुर्यात्सोमयागे च शैशवे ॥ १३ ॥ द्विजातीनां विवाहे तु नैत्यिकं प्रथमं भवेत् ॥ एकस्मिन्दिवसे कुर्यादग्निकार्यं पृथक्पृक् ॥ १४ ॥ दद्यादेकं च नित्यं च पृथङ् नित्यं न चाचरेत् ॥ द्विजातिः पतितो यत्र द्वित्रिकं च चतुश्चतुः ॥ १५ ॥ एकस्मिन्दिवसे कुर्यात्तत्रापि नैत्तिकं त्यजेत् ॥ होमे ब्रह्मा स्तुते विष्णुः स्रुवे चैव महेश्वरः ॥ १६ ॥ अजस्यानियमे चेन्द्रोऽधिश्रयणं विवस्वतः ॥ पर्यग्निकरणे चैव उद्वाहे मातरः स्मृताः ॥ १७ ॥ चन्द्रादित्यौ चोत्पवने वीक्षणे च दिशस्तथा ॥ प्रोक्षण्यां स्थापने दुर्गा इमे लक्ष्मी प्रतिष्ठिता ॥ १८ ॥ होमं कुर्याद्द्विजश्रेष्ठा विधिं कुर्यात्समाहितः॥एतेषु देवताः प्रोक्ता द्विजातीनां हिताय च॥१९॥यजेत्सुपशुबद्धेषु संस्कारे चैव पर्वणि ॥ देवताः सर्वा ज्ञातव्या एता यज्ञे समाहितैः ॥२०॥ अधिदैवेन जानीयात्करवल्यां पंचफलं यतः॥तस्मात्सर्वप्रयत्नेन देवतामथ विन्यसेत् ॥२१॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि द्वितीयभागे पञ्चदशोऽध्यायः ॥ १५ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ अथ वक्ष्यामि सञ्चैषां देवानां ध्यानमुत्तमम् ॥ अस्य यज्ञे परिज्ञानाज्जिह्वा सम्यक्फलप्रदा ॥१॥ हिरण्यवर्णां प्रथमां वह्निजिह्वां महाद्युतिम् ॥ कनकाढ्यकरां देवीं हिरण्याख्येष्टसिद्धये ॥ २ ॥ कनकां

---

१ सुवर्णाभामित्यर्थः ।

द्विभुजां शुक्लां हस्ताभ्यां दर्भसंयुताम् ॥ कमंडलुं च बिभ्राणां नुमः साधकसिद्धिदाम् ॥ ३ ॥ उद्यदिन्दुनिभां रक्तां चतुर्भिर्भुजपल्लवैः ॥ शंखचक्राभयवरान्दधतीं प्रणमाम्यहम् ॥ ४ ॥ भिन्नांजनचयप्रख्यां स्वर्णकुंभं तु वामतः ॥ दक्षिणेन वरारक्तां धारयंतीं नमाम्यहम् ॥ ५ ॥ सुप्रभामण्डलाभा च कराभ्यां तत्कृताञ्जलिः ॥ पद्मासनस्था कौशेयवसना मे प्रसीदतु ॥ ६ ॥ जपाकुसुमसंकाशा बहुरूपा सखे मम ॥ शुभदा स्याद्भुजैः शुभ्रा सहस्रं दधती परान् ॥ ७ ॥ नीलोत्पलनिभे देवि वह्निवर्णपराभवे ॥ जपापुष्पधरे नित्यं सतीरूपे प्रसीद मे ॥ ८ ॥ मूलेन वीक्षयेत्स्थानं मंत्रेण खननं मतम् ॥ त्रिसूत्रीकरणं कुर्याच्चतुःसूत्रं निपातयेत् ॥ ९ ॥ ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि द्वितीयभागे षोडशोऽध्यायः ॥ १६ ॥

॥ सूत उवाच ॥

॥ प्रतिष्ठायाः पूर्वदिने कुर्याद्देवाधिवासनम् ॥ धान्यप्रतिष्ठां तस्यैव यूपं चापि यथाविधि ॥ १ ॥ रात्रौ मूलाग्रे च घटे स्थापयेद्गणनायकम् ॥ संपूज्य च विधानेन दिगीशांश्च तथा ग्रहान् ॥ २ ॥ ब्रह्माणं च तडागेषु वरुणं शान्तियागके ॥ सोमं च मंडले सूर्यं पादे विष्णुं तथैव च ॥ ३ ॥ शैवे शैवं तथा प्रोक्तं प्रपायामथ वारुणम् ॥ आरामे चैव ब्रह्माणं पाद्याद्यैरपि चार्चयेत् ॥ ४ ॥ द्रुपदादीति मन्त्रेण स्नापयेत्प्रथमं बुधः ॥ गायत्र्या च ततः पश्चाद्गन्धद्वारेति तैलकम् ॥ ५ ॥ सुनाभेति च मंत्रेण द्वाभ्यामेव विशिष्यते ॥ श्रीश्च ते इति कुसुमं फलिनीति च वै फलम् ॥ ६ ॥ कांडादिति च मंत्रेण दद्याद्दूर्वाशतं ततः ॥ सिंदोरिवेति सिंदूरं विश्वामिति च मार्जनम् ॥ ७ ॥ समिच्छेत्यञ्जनं दद्याद्दुःस्थं सुरासुरा जपन् ॥ चन्दनं यज्वभिर्जप्त्वा मानस्तोकेति चन्दनम् ॥ ८ ॥ यूपे चैव विशेषोयमुत्तराग्रं प्रविन्यसेत् ॥ अद्यैव तेन मंत्रेण स्थापयेदथ वारिणा ॥ ९ ॥ गायत्र्या प्रथमं चैव आपो हिष्ठेति वै जपन् ॥ शन्नो देवीति द्रुपदां स्नापयेत्तदनन्तरम् ॥ १० ॥ अभिमन्त्र्याथ ब्रह्मेति त्रिरात्रं मंत्रमीरयन् ॥ योगं योगदृढं जप्त्वा पवित्रं विन्यसेत्ततः ॥ ११ ॥ त्वं गन्धर्वेति मन्त्रेण तथा सुभाभ इत्यपि ॥ द्वाभ्यां तैलगंधयुतं श्रीसूक्तेनापि पुष्पकम् ॥ १२ ॥ धूरसीति च तथा धूपमास्रज्योतिर्भिर्दीपकम् ॥ अद्युमीमहताति दद्याद्दूर्वाक्षतं ततः ॥ १३ ॥ विश्वामीति च निम्न्यंतकांडादिति तथाक्षतम् ॥ सिंदोरिवेति सिन्दूरं समिधेति तथाञ्जनम् ॥ १४ ॥ पादोऽस्येत्यथ भुक्तं स्याद्याः फलिनीति पुनः फलम् ॥ रूपं नेति दहेद्रूपं न सोचिति च पूजनम् ॥ १५ ॥ युवा सुवासेति वस्त्रं नागगन्धेति चन्दनम् ॥ ततो यमगृहाद्वाह्ये मण्डपांतरमाश्रितः ॥१६॥ सुनातीति वचो दद्यात्ततश्चावाहयेत्प्रभुम् ॥ तत्राधिवासनं कुर्याद्रक्षयेच्च सुरक्षिभिः ॥१७॥ आचार्यो यजमानश्च ऋत्विग्भोजनमाचरेत् ॥ अक्षारलवणान्यासी दधि विश्वं तिलांस्त्यजेत् ॥१८॥ आधारणं

चाधिवासं वक्ष्ये तत्रानुसारतः ॥ सुनातेति वचो दद्यात्तैलं चैव शिवे त्रिभिः ॥ १९ ॥ पञ्चभिर्ब्राह्मणैः सार्धं गन्धर्वा इति विस्मरन् ॥ दद्याद्गन्धं
तैलयुतं गन्धद्वारेत्यृचा पुनः ॥ २० ॥ याः फलिनीति च फलं पूगतानामवर्जनम् ॥ कौशिकीरुत्तमोसीति दद्यात्खड्गं सुतीक्ष्णकम् ॥ २१ ॥
रूपेन वेति मन्त्रेण मुद्गरं च निवेदयेत् ॥ श्रीश्च ते इति कुसुमं विश्वानीति च संपठन् ॥ २२ ॥ निर्मंथनं ततः कार्यमिति साधारणो विधिः ॥
ततोधिवासकल्पे तु प्रदेशे तु समाचरेत् ॥ २३ ॥ विनाधिवासनं विप्राः प्रतिष्ठानं समाचरेत् ॥ न तत्फलमवाप्नोति विवाहे शरणं
दिशेत् ॥ २४ ॥ ततः प्रयत्नतः कार्यं पूर्वाह्णे रात्रियोगतः ॥ नित्ये नैमित्तिके काम्ये कारयेत्कुण्डमण्डपम् ॥ २५ ॥ स्थंडिले हस्त
मात्रेण वालुकानिर्मितेऽपि च ॥ त्रयोदशांगुले हस्ते द्विहस्ते चापि वर्द्धते ॥ २६ ॥ एकैकांगुलको विप्राः पीठे नास्ति विचारणा ॥ नवपञ्चक
कुण्डे च लक्षादावपि शंकया ॥ २७ ॥ ततो दशांगुले पक्षे दशांगं शृणुत द्विजाः ॥ काष्ठं पत्रं च पुष्पं च मोदकं पिष्टकं तथा ॥ २८ ॥ अन्नं
च परमान्नं च ह्यवेक्ष्यं तिलमेव च ॥ एतद्वै गृहपक्षे च विष्णुपक्षे तिलादितः॥२९॥शैवे यवादितः कार्या शाक्ते पुष्पादितो भवेत् ॥ सूर्ये पक्षे पिष्ट
कादि गोपाले कृशरादितः ॥ ३० ॥ कृष्णे च करवीरादि श्रीफलानि च त्रैपुरे ॥ सारस्वते च श्रीवृक्षे मोक्षकामे निगद्यते ॥ ३१ ॥ ॥ इति
श्रीभविष्ये महापुराणे मध्यमपर्वणि द्वितीयभागे सप्तदशोऽध्यायः ॥ १७ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ अष्टौ होतारो द्वारपालास्त
थाष्टौ अष्टौ कार्या ब्राह्मणा याजकाश्च ॥ सर्वे शुद्धा लक्षिता लक्षणाद्यैरेकः कार्यो जापकोस्मिन्महात्मा ॥ १ ॥ दिव्यैर्गंधै गंधमाल्यैः सुवर्णै
स्तैलं कार्यं ब्राह्मणाः पञ्चविंशाः ॥ आवाप्यैस्तु द्विगुणैर्वै बलीयो दिव्यैर्वस्त्रैरर्हणादक्षिणाभिः ॥ २ ॥ नार्हयित्वा यथोक्तेन कश्चित्पत्रं निवेश
येत् ॥ अनर्हितेषु विप्रेषु न सम्यक्फलमाप्नुयात् ॥ ३ ॥ प्रतिष्ठादिषु सर्वेषु सम्यग्विप्रानथार्हयेत् ॥ कुशद्विजं तु सर्वत्र अर्घ्यं विष्टरमा
त्रकम् ॥ ४ ॥ प्रदद्यादर्हणं सम्यक्पश्चात्पात्रं निवेदयेत् ॥ विनार्हणं कृते तस्मिन्नरके परिपच्यते ॥ ५ ॥ प्रत्येकं ब्राह्मणा यज्ञे वेदमन्त्रेषु
पारगाः ॥ आचार्यो यदि कार्येषु वरयेद्दश गोत्रजान् ॥ ६ ॥ विशिष्टानामभावेऽपि कुर्यात्कुशमयान्द्विजान् ॥ कुशप्रतिकृतौ चापि
स्वगोत्रं स्वं द्विजं विना ॥ ७ ॥ न कुर्याच्चरणोद्देशं तथा प्रहरसंहतिम् ॥ गोत्रादिकीर्तनांतेषु स्वनामोद्देशमीरयन् ॥ ८ ॥ तुलापुरुषदाने
च तथा च हाटकाचले ॥ कन्यादाने तथोत्सर्गे कीर्तयेत्प्रवरादिकम् ॥ ९ ॥ न पात्रं प्रतिकृत्यर्थं न चालं सोदरं तथा ॥ मृतभार्य्यो
ह्यभार्यश्च अपुत्रो मृतपुत्रकः ॥ १० ॥ शूद्रसंस्कारकश्चैव कृपणो गणयाजकः ॥ प्रायश्चित्तगृहीतश्च राजयाजकपैशुनौ ॥ ११ ॥ शूद्रगेह

निवासी च शूद्रप्रेरक एव च ॥ स्वल्पकण्ठो वामनश्च वृषलीपतिरेव च ॥ १२ ॥ बन्धुद्वेषी गुरुद्वेषी भार्याद्वेषी तथैव च ॥ हीनांगश्चैव वृद्धांगो भग्नदंतश्च दांभिकः ॥ १३ ॥ प्रतिग्राही च कुनखः पारदारिक एव च ॥ श्वित्री कुष्ठी कुलोद्भूतो निद्रालुर्व्यसनार्थकः ॥१४॥ अदीक्षितः कदर्यश्च चंडरोगी गलद्व्रणः ॥ महाव्रणी च उदरी यज्ञपात्रं न कारयेत् ॥ १५ ॥ वरणांते तु पात्राणां पूजामन्त्राञ्छृणु द्विज ॥ प्रतिमन्त्रेण गन्धाद्यैरर्चयेन्मन्त्रवित्तमः ॥ १६ ॥ ब्रह्ममूर्तिस्त्वमाचार्यः संसारात्पाहि मां विभो ॥ त्वत्प्रसादाद्गुरो यज्ञं प्राप्तोस्मि यन्मयेप्सितम् ॥ ॥ १७ ॥ चिरं मे शाश्वती कीर्तिर्यावल्लोकाश्चराचराः ॥ प्रसीद त्वं महेशान प्रतिष्ठाकर्मसिद्धये ॥ १८ ॥ त्वमादिः सर्वभूतानां संसारार्णवतारकः ॥ ज्ञानामृतप्रदाचार्यो यजुर्वेद नमोऽस्तु ते ॥ १९ ॥ ब्रह्मणैव समुद्भूत प्रकाशितदिगन्तर ॥ शुद्धजांबूनदप्रख्य यजुर्वेद नमोऽस्तु ते ॥ २० ॥ प्रतप्तकनकाभास भासितद्युतिभूतल ॥ मन्त्रप्रख्यानसंस्थान यजुर्वेद नमोऽस्तु ते ॥ २१ ॥ प्रफुल्लकनकाभास भास्वरासुरभूषित ॥ प्रकीर्णमन्त्रसंभारविधिज्ञ प्रणतोऽस्मि ते ॥ २२ ॥ षडंगवेदवेदज्ञ ऋत्विङ्मोक्षप्रदो भव ॥ प्रविश्य मण्डलं विप्राः स्वस्थाने स्थापयेत्क्रमात् ॥ २३ ॥ वेद्याः पश्चिमभागे तु आचार्यं स्थापयेद्बुधः ॥ कुण्डस्याग्रे तु ब्रह्माणं मण्डलस्यैव पश्चिमे ॥ २४ ॥ होतारं स्थापयेत्तत्र विधिज्ञमथ चोत्तरे ॥ द्वौद्वौ कृत्वा ज्ञापकौ च खड्गधारकमेव च ॥२५॥ द्वारिद्वारि प्रयत्नेन द्वारपालाननुक्रमात् ॥ वक्ष्यमाणेन मंत्रेण प्रत्येकमथ स्थापयेत् ॥२६॥ पूजयेद्गन्धपुष्पाद्यैर्वाससो युगलेन तु ॥ यज्ञे सवितते योऽसौ पूज्यते पुरुषः सदा॥२७॥नारायणस्वरूपेण यज्ञं मे सफलं कुरु ॥ यज्ञेषु साक्षी सर्वेषु यजुर्वेदार्थतत्त्ववित् ॥ २८ ॥ ऋग्वेदार्थस्य तत्त्वज्ञ इन्द्ररूप नमोऽस्तु ते ॥ मखश्रेष्ठेषु सर्वेषु येन मंत्राः सुविस्तृताः ॥ ॥ २९ ॥ यजुर्वेदार्थतत्त्वज्ञ ब्रह्मरूप नमोऽस्तु ते ॥ मखश्रेष्ठेषु सर्वेषु एष एव विधिः स्मृतः ॥ ३० ॥ मांगल्यं कर्मणां नित्यं सर्वज्ञं ज्ञानरूपिणम् ॥ सिद्धये मम यज्ञस्य नमामि शिवरूपिणम् ॥ ३१ ॥ पालय त्वं दिशः सर्वा विदिशश्च तथा इमम् ॥ दिक्पालरूपिणं विप्रं यज्ञसिद्धौ नमाम्यहम् ॥ न संकल्पं चरेद्यागं व्रतं देवार्चनं तथा ॥ ३२ ॥ संकल्पमूलः कामो वै यज्ञाः संकल्पसंभवाः ॥ संकल्पेन विना विप्रा यत्किञ्चित्कुरुते नरः ॥ ३३ ॥ फलं चाल्पाल्पकं तस्य धर्मस्यार्द्धक्षयो भवेत् ॥ तस्मात्सर्वप्रयत्नेन यागं संकल्पयेत्सुधीः ॥ ३४ ॥ कामात्परो नैव भजेन्निष्कामोऽपि न शोभनः ॥ तस्मात्काममयं धर्मं विना मोक्षं न चाचरेत् ॥ ३५ ॥ संकल्पेन विना यस्तु धर्मं चरति मानवः ॥ न तस्य फलमाप्नोति

---

१ विनेति शेषः ।

नित्यनैमित्तिकस्य च ॥ ३६ ॥ न कुर्यात्स्थापने चैव कुर्याद्वै मंडलांतरे ॥ गृहीत्वौदुंबरं पात्रं वारिपूर्णं गुणान्वितम् ॥ ३७ ॥ जलाशयारामकूपसंकल्पे पूर्वदिङ्मुखः ॥ साधारणे चोत्तरास्यो ग्रहयज्ञे तु संमुखः ॥३८॥ महाव्रते प्रतिष्ठायां पात्रं ताम्रं हिरण्मयम् ॥ राजताश्ममयं सांगं यद्यज्ञेषु प्रशस्यते ॥ ३९ ॥ यज्ञीयपात्रपुटकं हस्तस्थाने प्रकीर्तितम् ॥ ऐश्यान्यां निक्षिपेत्तोयं प्रतिष्ठायां च पूर्वतः ॥४०॥ आकाशे निक्षिपेद्यागे व्रते ईशेपि नित्यके ॥ पितृमेधे च गोयागे नरमेधे च दक्षिणे ॥४१॥ शुक्तिकांस्यादिहस्तैश्च ताम्ररौप्यादिभिस्तथा ॥ संकल्पो नैव कर्तव्यो मृन्मये च कदाचन ॥ ४२ ॥ प्रणवं पूर्वमुच्चार्य यजेद्यज्ञेश्वरं स्मरेत् ॥ गङ्गा चादित्यचंद्रौ च द्यौर्भूमी रात्रिवासरौ ॥४३॥ सूर्यः सोमो यमः कालो महाभूतानि पंच च ॥ एते शुभाशुभास्येह कर्मणो नव साक्षिणः ॥ ४४ ॥ इत्युच्चार्य न्यसेद्धर्मं ध्यात्वा पुष्पाञ्जलिं सृजेत् ॥ अमृतं कृत्यपात्रे च ॐ तत्सदिति निर्दिशेत् ॥ ४५ ॥ धर्मः शुभ्रवपुः सितांबरधरः कार्योर्ध्वदेशे वृषो हस्ताभ्यामभयं वरं च सततं रूपं परं यो दधत् ॥ सर्वप्राणिसुखावहः कृतधियां मोक्षैकहेतुः सदा सोयं पातु जगंति चैव सततं भूयात्सतां भूतये ॥ ४६ ॥ यज्ञसंबंधिविप्रांश्च एकाहेनैव योजयेत् ॥ हविर्द्रव्याणि यानि स्युरष्टयागांतरेपि च ॥ ४७ ॥ पुनःपुनर्नियोज्यानि ब्राह्मणा हविरग्नयः ॥ ४८ ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि द्वितीयभागेऽष्टादशोऽध्यायः ॥ १८ ॥ ॥ ॥ छ ॥

॥ सूत उवाच ॥ ॥ माघादिमासेष्वपि षट्सु कार्या योगप्रतिष्ठा ऋषिभिः प्रणीता ॥ देवादिसंस्थापनमाहुरत्र यावन्न सुप्तो मधुसूदनश्च ॥ १ ॥ वारे भृगोर्देवगुरोर्बुधस्य सोमस्य सर्वाः शुभदा भवंति ॥ लग्ने शुभस्थे शुभवीक्षिते वा कार्या प्रतिष्ठा च जलाशयानाम् ॥ २ ॥ शुद्धा द्वितीया च तथा तृतीया त्रयोदशी चापि तथैव विप्राः ॥ तथापि सप्तम्यपि पौर्णमासी दशम्यसौ चाप्यथ पंचमी च ॥ ३ ॥ प्राणप्रतिष्ठा[1] च जलाशयादेरेताः प्रशस्तास्तिथयो भवंति ॥ अप्राप्य चैतानि शुभानि यानि कार्या प्रतिष्ठा विषुवद्वये च ॥ ४ ॥ षडशीतिलोकाप्ययनद्वयेन युगादिके पुण्यादिने शुभे च ॥ कार्या तडागादिजलाशयस्य प्राच्यां प्रतिष्ठा अथ चोत्तरे वा ॥ ५ ॥ सुचारु ईषत्प्रवणे च देशे सुवर्तुलः षोडशहस्तमंडपः ॥ द्वारैश्चतुर्भिः प्रथितैरुपेतश्चतुर्मुखश्चापि भवेत्सुरेताः ॥ ६ ॥ पूर्वादिद्वारेषु चतुष्टयेषु प्लक्षादिभिस्तोरणकैः सुरेशः ॥ प्लक्षस्तथोदुंबरपिप्पलौ च न्यग्रोधकं चापि यथाक्रमेण ॥७॥ ऊर्ध्वे च हस्तानमितानि यानि विचित्रमाल्यांबरभूषितानि ॥ भूमौ यथाप्रीति च हस्तकानि भवंति चैतान्यपि तोरणानि ॥८॥ सर्वत्र यागेपि हि मंडपस्य कार्या ध्वजा दिक्षु विदिक्षु शुभ्राः ॥ दिक्पालवर्णाभपताकयुक्ता

---

[1] सप्तम्यर्थे प्रथमा।

मध्ये च वै नीलपताकयुक्ताः ॥ ९ ॥ ध्वजाश्च यस्मिन्दशहस्तसम्मितास्तस्मिन्पताका अपि पञ्चहस्ताः ॥ अरत्निमात्रा यदि मूलभागे पंचांगुलाग्रे विनिबद्धगूढाः ॥ १० ॥ द्वारे च तस्मिंश्च निरूपिता वा रंभा सुपुष्पा सुखशाड्वलाश्च ॥ वचाभिवृक्षोत्तरपंचहस्ताः सपंचशाखा अपि तोरणानि ॥११॥ मुंजोद्भवैर्बर्हिःसमुद्भवैर्वा सुरंजितश्चेत्रितपद्मपल्लवैः ॥ पुष्टद्वये सूत्रितं वेष्टयेच्च तथेक्षुकाण्डैरथ यागमण्डपम् ॥१२॥ वेदिस्तथा मंडमध्यभागे कार्या च कोणेस्थितुषादिहीना ॥ हस्तोच्छ्रिता रेखवती सुरेखपरिष्कृता हस्तचतुष्टयेन ॥ १३ ॥ वेद्यां परित्यज्य दशांगुलानि ऐशान्यतस्त्रीणि तथा पराणि ॥ कुंडाय दद्याच्चतुरस्रमेकमवस्थितं त्र्यंगुलमेखलोज्ज्वलम्॥१४॥प्रासादे च तडागे च महारामे तथैव च ॥ मंडलं सर्वतोभद्रं प्रयत्नेनैव कारयेत् ॥१५॥ कुंडं चापि प्रकुर्वीत यथाभ्यन्तरमेखलम् ॥ बहिर्योनिगतं श्वेतं निश्चित्रं समसूत्रकम् ॥१६॥ कुंडानि कुर्यान्नव कुंडपक्षे वेद्यास्तथोच्चैरविदिक्षु चैव ॥ सर्वाणि सर्वत्र च मेखलानि षडस्रपंचास्रसमेखलानि॥१७॥अष्टास्रजान्यब्जत्रिकोणकानि तथार्द्धचन्द्रं चतुरस्रकं च ॥ कुण्डस्य पूर्वोत्तरदिग्विभागे स्थाप्यो घटश्चन्दनचारुलिप्तः ॥ १८ ॥ माल्याम्बराच्छादितपूर्णपाथाः सवृत्तपत्रश्च सुवर्णगर्भः ॥ १९ ॥ ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि द्वितीयभागे एकोनविंशोऽध्यायः ॥ १९ ॥ छ ॥

॥ सूत उवाच ॥ ॥ गतो यागगृंहादन्यन्मण्डलांतरमाश्रितः ॥ यजमानस्तथा नित्यं कर्म कृत्वा यथाविधि ॥ १ ॥ पंच देवान्नमस्कृत्य तथा यज्ञेश्वरं हरिम् ॥ संकल्पं च ततः कृत्वा ब्राह्मणानामनुज्ञया ॥ २ ॥ एतस्मिन्पुण्यदेशे तु फलं गोत्रश्च वै यमः ॥ वेदव्यासादिप्रणीतं यथाशास्त्रनिदर्शनम् ॥ ३ ॥ यथायथा स्वतन्त्रोक्तं पुण्यारण्याभिधायकम् ॥ जलाशयप्रतिष्ठायां करिष्ये विधिवद्द्विजाः ॥ ४ ॥ यथायथा च कल्पोक्तं यथाकुण्डं विधानतः ॥साधिवासं यथैवैकः पुण्यारण्यविधायकः ॥ ५ ॥ जलाशयप्रतिष्ठां च करिष्ये विधिवद्द्विजाः ॥ संकल्पमेवं कृत्वा तु वृद्धिश्राद्धं समाचरेत् ॥ ६ ॥ मातृयागं पुरस्कृत्य वृद्धिश्राद्धं समापयेत् ॥७॥ भेर्यादिघोषेण सुमंगलेन पद्यं लिखेदत्र सषोडशाक्षरम् ॥ इन्द्रादिदिक्पालवरायुधानि समुल्लिखेदेव दिशि स्थितानि ॥ ॥ ८ ॥ ब्रह्मेशान्वरयेत्सर्वानाचार्यं तु विशेषतः ॥ स्वर्णकुंडलयुग्मेन तथा ताम्रादिभाजनैः ॥ ९ ॥ नानारत्नैश्च वस्त्रैश्च आचार्यं वरयेद्बुधः ॥ हेमालंकारयुग्मैश्च वासोभिर्विविधैरपि ॥ १० ॥ यथामानं यथाशक्ति यथाभिवृणुयाद्बुधः ॥ रचिता यजमानेन ध्रुवं स्वस्त्यस्तु ते इति ॥११॥ ततः सर्वौषधीभिश्च यजमानः सपत्निकः ॥ आपोहिष्ठेतिमन्त्रेण स्नापयामासुरप्रजाः ॥ १२ ॥ यवगोधूमनीवारतिलश्यामाकशालयः ॥ प्रियंगुव्रीहयश्चाष्टौ सर्वौषधिगणः स्मृतः ॥ १३ ॥ ततः शुक्लाम्बरधरः शुक्लमाल्यानुलेपनः ॥ सर्वौषध्युदकस्नातः स्नापितो वेदपुङ्गवैः ॥ १४ ॥ ब्राह्मणैरभ्य

नुज्ञातः पुरोहितपुरःसरः ॥ नानामंगलघोषेण भेरीपटहनिस्वनैः ॥ १५ ॥ यजमानः सपत्नीकः पुत्रपौत्रसमन्वितः ॥ पश्चिमं द्वारमासाद्य प्रविशेद्यागमण्डपम् ॥ १६ ॥ चरके पूजयेद्विघ्नं गंगां च यमुनां तथा ॥ पार्श्वयोश्चार्धतो लक्ष्मीं प्रतिहारमनुक्रमात् ॥ १७ ॥ वेदिं प्रदक्षिणीकृत्य नमस्कुर्याद्यथाविधि ॥ उपविश्य ततस्तस्मिन्ब्राह्मणानुमते स्थितः ॥ १८ ॥ स्वस्ति वाच्यं ततः कृत्वा पंच देवान्प्रपूजयेत् ॥ भूतोत्सादं ततः कृत्वा विकिरान्विकिरेद्भुवि ॥ १९ ॥ अपक्रामंतु ये भूता ये चास्मिन्विघ्नकारकाः ॥ यस्मान्नो नाम्नि वर्तंते यज्ञमात्रं प्रवर्तताम् ॥ २० ॥ पूजयेदासनं पश्चात्स्वकीयं पुष्पचंदनैः ॥ नमोनंतासनायेति तथा पद्मासनाय च ॥ २१ ॥ विमलासनाय च नमो नमः सारासनाय च ॥ योगासनाय च नमः पृथिव्यै नम इत्यपि ॥ २२ ॥ ततो भूमितले वामहस्तं दत्त्वा पठेन्नरः ॥ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ॥ २३ ॥ त्वं च धारय मां नित्यं पवित्रमासनं कुरु ॥ सूर्यायार्घ्यं ततो दत्त्वा गुरुं नत्वा कृताञ्जलिः ॥ २४ ॥ देवं हृत्पद्मके नीत्वा प्राणायामत्रयं चरेत् ॥ ततोऽर्चयेद्विघ्नराजमैशान्यां च घटोपरि ॥ २५ ॥ गन्धपुष्पैस्तथा वस्त्रैर्नैवेद्यैर्विविधैरपि ॥ गणानां त्वेति मंत्रेण ब्रह्माणं तदनंतरम् ॥ २६ ॥ आब्रह्मन्निति ऋचा तद्विष्णोरिति संस्मरन् ॥ वासुदेवं ततः पश्चाद्बलिभिर्गन्धचंदनैः ॥ २७ ॥ ततो देवशरीरं तु नवमासाद्य त्रिंशतम् ॥ वेद्याश्च परितः सर्वान्स्वेस्वे स्थाने यथाक्रमम् ॥ २८ ॥ ततो राजाधिराजेन भूतशुद्धिं समाचरेत् ॥ ततो बुद्बुदमध्ये तु श्वेतपद्मासनस्थितम् ॥ २९ ॥ शुद्धस्फटिकसंकाशं शंखकुन्देन्दुसप्रभम् ॥ किरीटकुण्डलयुतं सितं पंकजधारिणम् ॥ ३० ॥ शुक्लमाल्यांबरं शुक्लं शुक्लगंधानुलेपनम् ॥ अहितुण्डासनस्थं च पाशहस्तं महाबलम् ॥ ३१ ॥ स्तूयमानं सुरगणैः सिद्धगंधर्वसेवितम् ॥ सुचारुवदनं देवं पद्ममालोपशोभितम् ॥ ३२ ॥ राजीवलोचनं नित्यं नागलोकोपशोभितम् ॥ मकरग्राहकूर्माद्यैर्नानाजलचरैर्वृतम् ॥ ३३ ॥ जलाशयगतं देवं चिंतयेज्जलशायिनम् ॥ ततो न्यासं प्रकुर्वीत पंचांगत्वावशोभितम् ॥ ३४ ॥ अर्घ्यपात्रं ततः कृत्वा त्रिभागजलपूरितम् ॥ अष्टधा मूलमंत्रं च जप्त्वा तेनोदकेन च ॥ ३५ ॥ आसनं यागवस्तूनि प्रोक्षयेत्तेन वारिणा ॥ अरुणाय विद्महे तमोघ्नाय च धीमहि ॥ ३६ ॥ तन्नो अरुणः प्रचोदयादिति स्नानं समाचरेत् ॥ ततो गणेशमैशान्यामाग्नेय्यां गुरुपादुकाम् ॥ ३७ ॥ धर्माधर्मादिकान्सर्वान्त्सत्त्वादीनथ चार्चयेत् ॥ सूर्यसोमजलादीनां मण्डलानि यथाक्रमम् ॥३८॥ मध्ये शक्तिं च क्षीरोदमनंतं पृथिवीं तथा ॥ कूर्मं चाधारशक्तिं च सुमेरुं मन्दरं तथा ॥ ३९ ॥ पञ्चतत्त्वं समभ्यर्च्य सांगोपांगमनंतरम् ॥ ततः श्वेतं च कुसुमं साक्षतं योगमायया ॥ ४० ॥ गृहीत्वा पूर्ववद्देशे स्थापयेत्कलशोपरि ॥ आवाहनं ततः कृत्वा मन्त्रेणानेन मंत्रवित् ॥ ४१ ॥ एह्येहि

भगवन्वरुण एष यज्ञः प्रवर्तते ॥ यज्ञभागं गृहाणेदं त्वामेवावाहयाम्यहम् ॥ ४२ ॥ एवमावाह्य लोकेशमष्टौ मुद्राः प्रदर्शयेत् ॥ गायत्र्या स्नापयित्वा तु दद्यात्पाद्यादिकत्रयम् ॥ ४३ ॥ पुष्पाञ्जलिं ततो दत्त्वा मूलमंत्रेण देशिकः ॥ पूर्वादिपत्रमूलेषु धर्मादीन्पूजयेद्बुधः ॥ ४४ ॥ सत्त्वाद्याः पूजयेत्तत्र तेषानेव वरांगनाः ॥ ज्ञानं धर्मं च सोमं च रजः सत्त्वं तमस्तथा ॥ ४५ ॥ पूर्वादिपत्रमध्ये तु ग्रहानष्टौ प्रपूजयेत् ॥ पत्राग्रे लोकपालानामग्न्यादीनायुधांस्तथा ॥ ४६ ॥ कर्णिकादक्षिणे पूर्वं वामे चापि शचीपतिम् ॥ पूर्वपत्रे तु ब्रह्माणं पूजयेत्सितपङ्कजैः ॥ ४७ ॥ नैर्ऋत्ये वरुणस्याथ मध्येऽनंतं प्रपूजयेत् ॥ पीठमन्त्रेषु पूर्वादिब्रह्माणं च शिवं तथा ॥ ४८ ॥ विष्णुं चापि गणेशं च पृथिवीं गंधचन्दनैः ॥ जपेन्मन्त्रं साष्टशतं सहस्रं विजपेद्बुधः ॥ ४९ ॥ जानुभ्यामवनीं गत्वा विजयाख्यस्तवं पठेत् ॥ ईशानादिपीठकोणेषु कमलामंबिकां तथा ॥ ५० ॥ नैर्ऋत्यां विश्वकर्माणं वायव्ये तु सरस्वतीम् ॥ पूर्वादिद्वारदेशे तु मरुतं चावहादिकम् ॥ ५१ ॥ आवहं प्रवहं चैव तथैवोद्वहसंवहौ ॥ विन्यसेत्पश्चिमे द्वारि निवहं च परीवहम् ॥ ५२ ॥ विन्यसेदुत्तरद्वारि मरुतं च पराभवम् ॥ आग्नेयादिषु कोणेषु बहिष्पीठं ततो जयेत् ॥ ५३ ॥ पिशाचात्राक्षसान्भूतान्वेतालांश्च तथा क्रमात् ॥ क्षोभकः कामरूपश्च सौभद्रो मरुतस्तथा ॥ ५४ ॥ गोमुखो नन्दभद्रश्च द्विजिह्वो मलिनस्तथा ॥ हस्तिकर्णो विशालाख्यः सप्तरक्षोगणः स्मृतः ॥ ५५ ॥ भूमिदो वरदश्चैव जयंतः क्षोभकस्तथा ॥ विवस्वंतः सुदंतश्च एते भूतगणाः स्मृताः ॥ ५६ ॥ अंगदो नीलकर्णोऽसौ वसंतो यावकस्तथा ॥ घोररूपा महाकाया वेतालाश्च प्रकीर्तिताः ॥५७॥ गंधपुष्पाक्षतैर्भक्त्या सर्वे देवा ग्रहादयः ॥ ध्यानवर्णानुरूपेण पूजनीयाः प्रयत्नतः ॥ ५८ ॥ ध्यायेदादित्यमारक्तं रक्तपद्मासनस्थितम् ॥ रक्तांबरधरं रक्तं रक्तमाल्यानुलेपनम् ॥ ५९ ॥ यवविद्रुमसंकाशं सिंदूरारुणसप्रभम् ॥ आकृष्णेनेति मंत्रेण स्थापयेत्कलशोपरि ॥ ६० ॥ इहागच्छेति चावाह्य पाद्यार्घ्यैश्च पृथग्विधैः ॥ गंधपुष्पादिभिर्भक्त्या पूजयेत्तं यथाविधि ॥ ॥ ६१ ॥ बलिं च लोहितं दद्यात्पायसं दधिखंडकम् ॥ घृतलिप्तं च शाल्यन्नं पताकां रक्तवर्णिकाम् ॥ ६२ ॥ श्वेतांबरधरं श्वेतं शुक्लगंधानुलेपनम् ॥ द्विभुजं वरदं देवं गदाहस्तं महाबलम् ॥ ६३ ॥ नानाभरणसंपन्नं सिद्धगंधर्वसेवितम् ॥ शुक्लपद्मासनस्थं चाश्वं दद्याच्छ्वेतभूषितम् ॥ ॥ ६४ ॥ इमं देवा इति मंत्रेण स्थापयेत्पूर्वदिग्दले ॥ सितवस्त्रैश्च पुष्पैश्च शुक्लमाल्यानुलेपनैः ॥ ६५ ॥ पायसैः श्वेतबलिभिर्दधिभक्तं निवेदयेत् ॥ धूपैः श्वेतपताकाभिर्नैवेद्यैर्विविधैरपि ॥ ६६ ॥ रक्तमाल्यांबरं देवं रक्ताभरणभूषितम् ॥ सुचारुनयनं रक्तं रक्तपद्मासनस्थितम् ॥ ६७ ॥ किरीटकुंडलधरं मेषकंठं चतुर्भुजम् ॥ वरदं यज्ञनाशं च शूलशक्तिगदाधरम् ॥ ६८ ॥ सर्वकामप्रदं देवं सिद्धगंधर्वसेवितम् ॥ चिंतयेत्परया भक्त्या मंगलं

धरणीसुतम् ॥ ६९ ॥ अग्निमीळेति मंत्रेण स्थापयेदग्निदिग्दले ॥ पूजयेद्रक्तपुष्पैश्च रक्तमाल्यानुलेपनैः ॥ ७० ॥ धूपै रक्तपताकाभिर्गुडभक्तनिवे
दनैः ॥ अतसीपुष्पसंकाशं कर्णिकारसमप्रभम् ॥ ७१ ॥ रौहिणेयं महाकायं नीलनीरजलोचनम् ॥ प्रशांतवदनं देवं पीतवस्त्रं चतुर्भुजम् ॥७२॥
खड्गचर्मधरं तद्वद्गदापरशुधारिणम् ॥ पद्मासनगतं देवं पीतपद्मासनस्थितम् ॥ ७३॥ नानाभरणसंपूर्णं मृगेन्द्रवरवाहनम् ॥ उद्बुध्यस्वेति मंत्रेण या
म्यां तु स्थापयेद्बुधम् ॥ ७४ ॥ पूजयेद्गन्धपुष्पाद्यैः पीतगंधानुलेपनैः ॥ वस्त्रैः पीतपताकाभिर्बलिभिः कृशरान्वितैः ॥ ७५ ॥ पीतवर्णं गुरुं ध्याये
त्पीतपद्मासनस्थितम् ॥ पीताभरणसंपन्नं पीतवस्त्रं चतुर्भुजम् ॥ ७६ ॥ वरदं दंडहस्तं च साक्षसूत्रकमंडलुम् ॥ पूज्यमानं सुगंधर्वैः सेन्द्रैर्देवगणैरपि
॥७७॥ बृहस्पतय इति मंत्रेण नैर्ऋत्यां दिशि संस्थितम् ॥ पीतचन्दनगंधैश्च पीतवस्त्रादिभूषणैः ॥७८॥ धूपैः पीतपताकाभिः पीतोदकनिवेदनैः॥
पूजयेत्परया भक्त्या पुरंदरपुरोहितम् ॥ ७९ ॥ ध्यायेच्छुक्रं भृगुसुतं श्वेतपद्मासनस्थितम् ॥ चतुर्भुजं महाकायं वरदं दंडधारिणम् ॥ ८० ॥ महा
बाहुं विशालाक्षं साक्षसूत्रकमंडलुम् ॥ स्तूयमानं मुनिश्रेष्ठैः सेवितं दैत्यपुङ्गवैः ॥ ८१ ॥ सिंहासनगतं देवं नीलेन्दीवरलोचनम् ॥ विलसत्पुण्डरी
कस्य मालाभिरुपशोभितम् ॥ ८२ ॥ नानादैत्येन्द्रपुत्रांश्च पाठयन्तं मुहुर्मुहुः ॥ नानाशस्त्रास्त्रचतुरं नानाशास्त्रविशारदम् ॥ ८३ ॥ एवं ध्यात्वा
भृगुश्रेष्ठं जपन्नन्नात्परिस्रुतम् ॥ मनसा भक्तियुक्तेन स्थापयेत्पश्चिमे दले ॥ ८४ ॥ सितचंदनवस्त्रैश्च धूपमाल्यानुलेपनैः ॥ धूपैः श्वेतपताकाभिः सक्तु
भिः क्षीरसंयुतैः ॥ ८५ ॥ पूजयेत्परया भक्त्या पुंडरीकाक्षतैरपि ॥ ध्यायेत्सौरिं चतुर्बाहुं शूलहस्तं वरप्रदम् ॥ ८६ ॥ इन्द्रनीलनिभं श्यामं दिव्य
बाणधनुर्धरम् ॥ इन्दीवरासनस्थं च सरोजवरसप्रभम् ॥ ८७ ॥ नीलांबरधरं नीलपद्ममालोपशोभितम् ॥ घोररूपं महाकायं छायाहृदयनन्द
नम् ॥ ८८ ॥ शन्नो देवीति मंत्रेण वायव्यां दिशि विन्यसेत् ॥ कृष्णचंदनवस्त्रैश्च कृष्णमाल्यानुलेपनैः ॥ ८९ ॥ धूपैर्नीलपताकाभिर्बलि
भिर्माषमिश्रितैः ॥ धूम्रवर्णं सदा केतुं गदाहस्तं वरप्रदम् ॥ ९० ॥ द्विभुजं भीमकायं च धूम्राक्षं धूम्रवाससम् ॥ केतुं कृण्वन्निति मन्त्रेण ऐशा
न्यां स्थापयेद्दिशि ॥ ९१ ॥ धूम्रवर्णैश्च माल्यैश्च धूम्रगंधानुलेपनैः ॥ धूम्रधूम्रपताकाभिर्बलिभिर्माषमिश्रितैः ॥ ९२ ॥ पूजयेत्परया भक्त्या
केतुं सर्वार्थसिद्धिदम् ॥ लोकपालानहं वक्ष्ये सर्वसिद्धिप्रदायकान् ॥ ९३ ॥ येषु पूजितमात्रेषु नालभ्यं विद्यते क्वचित् ॥ देवराजं ततो
ध्यायेत्पुष्पबाणचयप्रभम् ॥ द्विभुजं पीतसंकाशं नीलेन्दीवरलोचनम् ॥ ९४ ॥ रक्तोत्पलधरं तद्वत्पीतवासःसमन्वितम् ॥ चामरासक्तहस्तैश्च
कन्यारत्नैश्च शोभितम् ॥ ९५ ॥ इन्द्राणीं चिंतयेद्वामे उत्पलद्वयधारिणीम् ॥ एवं संपूजयेद्भक्त्या सुरराजं जगत्प्रभुम् ॥ त्रातारमिति

मन्त्रेण स्थापयेत्कर्णिकोत्तरे ॥ ९६ ॥ पूजयेत्परया भक्त्या धूपगंधानुलेपनैः ॥ नानाविधोपहारैश्च पताकाभिर्ध्वजैरपि ॥ ९७ ॥ बलिं क्षीरान्वितं
दद्यान्मोदकं सितशर्कराम् ॥ उत्तप्तस्वर्णसंकाशं वीतिहोत्रं चतुर्भुजम् ॥ ९८ ॥ अर्धचन्द्रसमस्थं च अजवाहनमुत्तमम् ॥ ज्वालावितानसंरक्तं
मूर्ध्नि सप्तशिखान्वितम् ॥ ९९ ॥ वरदं विभयं मालां दक्षे सूत्रं कमण्डलुम् ॥ त्रिनेत्रं रक्तनयनं जटामुकुटमंडितम् ॥ १०० ॥ नानाभरणसंपन्नं
सिद्धगन्धर्वसेवितम् ॥ अग्निजिह्वेति मंत्रेण स्नापयेदग्निदिग्दले ॥ १०१ ॥ पूजयेद्रक्तपुष्पैश्च रक्तमाल्यानुलेपनैः ॥ धूपै रक्तपताकाभिर्बलिभिः
पायसैरपि ॥ १०२ ॥ नीलाञ्जनचयप्रख्यं नीलसिंहासनस्थितम् ॥ महामहिषमारूढं दंडपाशधरं विभुम् ॥ १०३ ॥ करालवदनं भीमं ज्वाला
घूर्णितलोचनम् ॥ घोरदंष्ट्राकरालैश्च किंकराणां गणैर्वृतम् ॥ महिषं चिंतयेद्वामे चित्रगुप्तं च दक्षिणे ॥ १०४ ॥ अच्छीयस इति मंत्रेण स्थापयेद्य
मदिग्दले ॥ पूजयेत्परया भक्त्या धर्मराजं जगद्गुरुम् ॥ राक्षसेन्द्रं महाकायं कृष्णवर्णं द्विबाहुकम् ॥ १०५ ॥ नानाभरणसंपन्नं खड्गहस्तं महाब
लम् ॥ वरमुक्ताविमानस्थं घोररूपं जलेश्वरम् ॥ १०६ ॥ एष त इति मंत्रेण नैर्ऋत्यां स्थापयेद्दिशि ॥ कृष्णचन्दनवस्त्रैश्च कृष्णमाल्यानुलेपनैः
॥ १०७ ॥ धूपैः कृष्णपताकाभिर्बलिभिर्माषमिश्रितैः ॥ शुद्धस्फटिकसंकाशं शंखकुन्देन्दुसप्रभम् ॥ १०८ ॥ द्विभुजं पाशहस्तं च सुन्दराङ्गं
वरप्रदम् ॥ वरुणस्येति मंत्रेण स्थापयेत्पश्चिमे दले ॥ १०९ ॥ सितचन्दनधूपैश्च पताकाभिर्ध्वजैरपि ॥ ११० ॥ समीरणं कुञ्जरवर्णसन्निभं मृगा
धिरूढं द्विभुजं द्विनेत्रम् ॥ ध्वजांबरं चापि दधानमेकं नीलांबरं मेघगणैर्वृतं च ॥ १११ ॥ नीलचन्दनवस्त्रैश्च नीलमाल्यानुलेपनैः ॥ पूजयेत्परया
भक्त्या पताकाभिर्ध्वजैरपि ॥ ११२ ॥ धूपैर्नीलपताकाभिर्बलिभिः पायसैरपि ॥ ११३ ॥ ध्यायेद्द्विनेत्रं द्विभुजं धनेशं पीतांबरं वै नरवाहनं च ॥
गदाधरं भक्तवरप्रदं च आवाहयेदुत्तरपद्मपत्रे ॥ ११४ ॥ गन्धचंदनवस्त्रैश्च पीतमाल्यानुलेपनैः ॥ ११५ ॥ धूपैः पीतपताकाभिर्बलिभिः पायसैरपि
॥ ११६ ॥ स्निग्धकर्पूरसंकाशं तुषारकिरणप्रभम् ॥ त्रिशूलतुम्बुरुधरं तथाभयवरप्रदम् ॥ ११७ ॥ उत्तुंगवृषभारूढं त्रिनेत्रं भस्मभूषितम् ॥ कपाल
मालिनं तद्वत्खण्डेंदुकृतशेखरम् ॥ ११८ ॥ एवं ध्यात्वा महेशानं स्थापयेदीशदिग्दले ॥ ११९ ॥ पूजयेत्परया भक्त्या भक्ष्यभोज्यैरनेकशः ॥
॥ १२० ॥ सितध्वजपताकाभिर्बलिभिः पायसादिभिः ॥ त्वमीशान इति मंत्रेण ऋषिं छन्दः समीरयन् ॥ १२१ ॥ ब्रह्माणं रक्तगौरांगं शोण
पद्मसमप्रभम् ॥ राजीवलोचनं तद्वत्पद्मगर्भसमप्रभम् ॥ १२२ ॥ पद्मासनस्थितं तद्वच्छ्वेतवस्त्रं चतुर्भुजम् ॥ चतुर्मुखं सुरश्रेष्ठं मेघगम्भीरनिस्व
नम् ॥ १२३ ॥ राजहंससमायुक्तं विमानवरसंस्थितम् ॥ स्रुक्स्रुवौ दक्षिणे हस्ते वामे दंडं कमण्डलुम् ॥१२४॥ कुर्वाणमिव लोकांस्त्रीन्सिद्धगन्धर्व

सेवितम् ॥ आज्यस्थालीं तथैवाग्रे कुशांश्च समिधं तथा ॥ १२५ ॥ वामपार्श्वे तु सावित्रीं दक्षिणे तु सरस्वतीम् ॥ आब्रह्मन्निति मंत्रेण स्थापयेत्पूर्व
दिग्दले ॥ १२६ ॥ नानाभक्ष्योपचारैश्च पूजयेद्गंधचन्दनैः ॥ धूपैः श्वेतपताकाभिर्बलिभिश्चाज्यपायसैः ॥ १२७ ॥ अनन्तं शुक्लवर्णाभं पीतवस्त्रं
चतुर्भुजम् ॥ शंखचक्रगदापद्मधारिणं जगदीश्वरम् ॥ १२८ ॥ आधारभूतं जगतां स्वर्णयज्ञोपवीतिनम् ॥ नानाभरणसम्पन्नं फणाशतसमन्वितम्॥
॥ १२९ ॥ ॐ नमोस्त्विवति मंत्रेण स्थापयेद्वरुणांतरे ॥ पूजयेद्भक्ष्यभोज्यैश्च दीपगन्धानुलेपनैः ॥ १३० ॥ धूपैः श्वेतपताकाभिर्बलिभिश्चैव
निर्मितैः ॥ ततो मण्डलपूर्वे तु ब्रह्माणं पीतवाससम् ॥१३१॥ चतुर्भुजं चतुर्वक्त्रं स्रुवहस्तं वरप्रदम् ॥ बिभ्रतं च श्रुतं तद्वत्तथादंडकमण्डलू ॥१३२॥
आब्रह्मन्निति मन्त्रेण पूजयेद्गन्धचन्दनैः ॥ दक्षिणे त्र्यंबकं ध्यायेच्छूलखट्वांगधारिणम् ॥ १३३ ॥ वरदं डमरुधरं नागयज्ञोपवीतिनम् ॥ निबद्ध
जूटचन्द्रार्धं शुद्धस्फटिकसन्निभम् ॥ १३४ ॥ कपालमालिनं देवं भुजंगाभरणान्वितम् ॥ त्रिनेत्रं कुन्दसंकाशं भूतप्रेतगणैर्वृतम् ॥ १३५ ॥ त्र्यंबकं
चेति मन्त्रेण पूजयेन्मधुपायसैः ॥ अतसीपुष्पसंकाशं हारकेयूरभूषितम् ॥ १३६ ॥ नानाभरणसम्पन्नं पीतवस्त्रं चतुर्भुजम् ॥ दक्षिणे च गदां चक्रं
वामे शंखं सपद्मकम् ॥ १३७ ॥ श्रिया दक्षिणतो वामे सरस्वत्या समन्वितम् ॥ तद्विष्णोरिति मंत्रेण स्थापयेत्पश्चिमे ततः ॥ १३८ ॥ पूजयेद्ग
न्धपुष्पाद्यैः पायसेन घृतेन च ॥ गणेशं तु चतुर्बाहुं व्यालयज्ञोपवीतिनम् ॥ १३९ ॥ गजेन्द्रवदनं देवं श्वेतवस्त्रं चतुर्भुजम् ॥ परशुं लगुडं वामे
दक्षिणे दंडमुत्पलम् ॥ १४० ॥ मूषकस्थं महाकायं शङ्खकुन्देंदुसप्रभम् ॥ युक्तं बुद्धिकुबुद्धिभ्यामेकदंतं भयापहम् ॥ १४१ ॥ नानाभरणसंपन्नं
सर्वापत्तिविनाशनम् ॥ गणानां त्विति मन्त्रेण विन्यसेदुत्तरे ध्रुवम् ॥ १४२ ॥ उत्तप्तजांबूनदहेमसन्निभां लक्ष्मीं सरोजासनसंस्थितां शुभाम् ॥
वामे सरोजं दधतीं तथैव हस्ते च दक्षे धृतचामरां च ॥ १४३ ॥ श्रीश्च तेति च मन्त्रेण ऐशान्यां मंडलाद्बहिः ॥ स्थापयेत्पूजयेद्भक्त्या सितचन्दन
पङ्कजैः ॥ १४४ ॥ मोदकं परमान्नं च यवक्षीरं निवेदयेत् ॥ १४५ ॥ ततो देवीमंबिकां दिव्यरूपां ब्रह्मेंद्राद्यैः स्तूयमानां त्रिनेत्राम् ॥ सिंहे
शस्थां तप्तजांबूनदाभां चन्द्रार्द्धेनाबद्धमौलिं जटाभिः ॥ १४६ ॥ दिव्यैर्वस्त्रैर्बाहुभिः साग्रलम्बैर्दिव्यैर्माल्यैर्भूषणैः स्वैरुपेताम् ॥ ब्रह्मेंद्राद्यैर्दुर्जयां
माहिषास्यं तीक्ष्णैरस्त्रैर्दानवं मर्दयंतीम् ॥ १४७ ॥ शूलं तीक्ष्णं बाणशक्ती च तीक्ष्णे खड्गं तीक्ष्णं बिभ्रतीं दक्षिणेन ॥ चापं पाशं खेटकं
चांकुशं च घण्टां वामे बिभ्रतीं वै कुठारम् ॥ १४८ ॥ शिरश्छेदादर्धजातं कबन्धं खड्गं तीक्ष्णं बिभ्रतीं दैत्यराजम् ॥ नागैः पाशैर्वेष्टयित्वा समं
ताच्छूलेनैनं निघ्नतीं देहमध्ये ॥ १४९ ॥ सेन्द्रैर्देवैः स्तूयमानां सुवेणीं गंधर्वाद्यैः सिद्धसंघैश्च सेव्याम् ॥ नानावस्त्रैर्भूषणैर्दीप्यमानां ध्यायेद्देवीमं

बिकामुज्ज्वलंतीम् ॥ १५० ॥ वस्त्रैर्माल्यैर्यक्षधूपैर्वितानैर्भक्ष्यैर्भोज्यैर्मोदकैः पायसैश्च ॥ मांसैः पिष्टैश्छागलाढ्यैरशेषैः पूज्या देवी चंडिकाऽभीष्टदा
च ॥ १५१ ॥ श्यामां च पृथिवीं ध्यायेत्पंकजद्वयधारिणीम् ॥ १५२ ॥ मण्डूकस्थां द्विभुजां स्योना पृथिवीति चार्चयेत् ॥ नैर्ऋत्यां विश्वकर्माणं
द्विभुजं टंकधारिणम् ॥ १५३ ॥ उत्पलं दक्षिणे हस्ते पद्मस्थं पीतवाससम् ॥ एवं ध्यात्वा ततो ब्रह्मन्निति मंत्रेण पूजयेत् ॥ १५४ ॥ स्वस्थां
सरस्वतीं ध्यायेद्वरदाभयदायिनीम् ॥ पीतवस्त्रां सुमुकुटां देवगन्धर्वसेविताम् ॥ १५५ ॥ यामधा इति मन्त्रेण पूजयेत्सितचंदनैः ॥ बलिं श्वेत
चरुं दद्यात्कृशरं यावकं तथा ॥ १५६ ॥ स्थापयेद्वामदिग्भागे कुंदपुष्पैः प्रपूजयेत् ॥ पूर्वादिद्वारदेशे तु पूजयेच्च मरुद्गणैः ॥ १५७ ॥ अग्न्यादिषु
च कोणेषु बहिर्भूतान्समाचरेत् ॥ पिशाचा राक्षसा भूता वेतालकपिजातयः ॥ १५८ ॥ निर्णासाश्चैव ते सर्वे रौद्रा विकृतरूपिणः ॥ ततो मण्डल
मध्ये तु वारुणं पूर्ववर्त्मना ॥ १५९ ॥ पूरयेत्कलशे तत्र सुवर्णादिविनिर्मितम् ॥ कूर्मं कूर्माकृतिं कुर्याच्छुद्धस्वर्णेन सत्तमाः ॥ १६० ॥ बृहत्पर्व
प्रमाणेन राजतस्य च दुर्लभम् ॥ पादं पादेन मानेन अंगुलं परिमण्डलम् ॥ १६१ ॥ प्रौष्ठीमत्स्यं तथा कुर्यात्कुलीरं ताम्रनिर्मितम् ॥ तेनैकस्य
विनिर्माणं द्व्यंगुलायामविस्तृतम् ॥ १६२ ॥ तथा मानेन मण्डूकं तां भूमिं मुनिसत्तमाः ॥ शिशुमारं च वै सम्यक्तोलकद्वयनिर्मितम् ॥ १६३ ॥
अंगुलत्रयदीर्घं च यथा तस्याकृतिर्भवेत् ॥ सितचन्दनवस्त्रैश्च पूजनीयाः समंततः ॥ १६४ ॥ यावकैश्च विशेषेण बहुमंत्रविशारदान् ॥ बह्वृचौ
पूर्वमत्स्यार्थे दक्षिणे तु यजुर्विदौ ॥ १६५ ॥ सासनौ पश्चिमे चाथ उत्तरेऽथर्वणौ स्मृतौ ॥ जयध्वमिति तान्ब्रूयाद्धोतृकान्पुनरेव हि ॥ १६६ ॥
स्थापयित्वा पृथक्सूत्रे सर्पं च मातरुद्दीपमेव च ॥ पञ्चांगं शिवसूक्तं च यथा विष्णोर्हरस्य च ॥ १६७ ॥ जयाग्रतः पुरुषसूक्तमद्भ्यः संभूतमेव
च ॥ आशुः शिशानमारभ्य वयं मोषांगरुद्रके ॥ १६८ ॥ यज्जाग्रतश्चाग्नेश्च विष्णोरराटमेव च ॥ समस्ताध्यायरुद्रेण शतरुद्राख्यमीरितम् ॥
॥ १६९ ॥ (पञ्चांगरुद्रस्य पुष्पदंत ऋषिर्गायत्री छन्दो वेदाहमेतद्बीजं श्रीश्च ते इति शक्तिर्नमस्ते रुद्र इति नायकः परमरुद्रो देवता परम
स्तुतौ विनियोगः ॥ सप्तांगरुद्रस्य पुष्पदंतऋषिः पंक्तिश्छंदः ॥ त्र्यंबकमिति अंगुष्ठाभ्यां नमः ॥ त्रिपादूर्ध्वमिति तर्जनीभ्यां स्वाहा ॥
वेदाहमिति मध्यमाभ्यां वषट् ॥ अमीषां चित्रमिति अनामिकाभ्यां हुम् ॥ यवागूं सोम इति कनिष्ठिकाभ्यां वौषट् ॥ परितो
धेनुमिति करतलकरपृष्ठाभ्याम् अस्त्राय फट् इति ॥ यज्जाग्रत इति हृदयाय नमः ॥ सहस्रशीर्षेति शिरसे स्वाहा ॥ अद्भ्यः संभूत इति

---

१ यक्षकर्दमधूपैरित्यर्थः ।

शिखायै वषट् ॥ आशुः शिशान इति कवचाभ्यां हुं ॥ नमस्ते रुद्र इति नेत्रत्रयाय वौषट् ॥ रूढं ब्रह्मन्निति अस्त्राय फट् ॥ चतुर्दिक्षु छोटिकादानम्[1] ॥ इति सर्वांगेषु ॥) होमे प्रवर्तमाने तु सूक्तानन्यांश्च वै जपेत् ॥ प्रजपेद्वारुणं सूक्तं तथा च पालसूक्तकम् ॥ १७० ॥ रात्रिसूक्तं च रौद्रं च पावमानं समुज्ज्वलम् ॥ जपेच्च पौरुषं सूक्तं सर्वतोवरतं पृथक् ॥ १७१ ॥ शाक्तं रौद्रं च सौम्यं च कूष्माण्डं जातवेदसम् ॥ सौरसूक्तं च यजतो दक्षिणेन यजुर्विदः ॥ १७२ ॥ वैराजं पौरुषं सूक्तं सौवर्णं रुद्रसंहिताम् ॥ शैशवं पञ्चनिरयं गायत्र्यं ज्येष्ठसाम च ॥ १७३ ॥ वामदेव्यं बृहत्साम तथा चैव रथंतरम् ॥ गोव्रतं च विकर्णं च रक्षोघ्नं पावनं स्मृतम् ॥ १७४ ॥ गायंतं ब्राह्मणा ये च पूर्वादिद्वारदेशतः ॥ अन्नात्परिस्रुत इति पञ्चपूर्वं सौरसूक्तकम् ॥ १७५ ॥ रुद्राध्यायं च पञ्चांगं रौद्र इत्यभिधीयते ॥ आप्यायस्वेति च चतुः सौम्यं सूक्तं प्रचक्षते ॥ १७६ ॥ ईशावेत्यादि स्वांगं च कौष्मांडं दशमं स्मृतम् ॥ अग्ने बृहन्निति नवसूक्तं वै जातवेदसम् ॥ १७७ ॥ षोडशं तु विभ्राड् बृहत्सौरं सूक्तं प्रकीर्तितम् ॥ सौरसूक्तं ध्रुवोसीति इषवो मंगलं स्मृतम् ॥ १७८ ॥ रात्रिसूक्तं हि यज्वाग्ने रक्षोघ्नं शैवसूक्तकम् ॥ गणानान्त्वेति पञ्च आपोहिष्ठेति च त्रयम् ॥ १७९ ॥ पवमानं तु तद्विद्धि पावमानं तु षोडश ॥ समस्तं देवयागेषु तद्रात्रौ तु तदूर्ध्वकम् ॥ तद्द्वार्द्धं च आरामे कूपे त्वेकऋचं जपेत् ॥ १८० ॥ स्वगृह्योक्तविधानेन प्रतिकुण्डेषु होमयेत् ॥ संस्कुर्यादीक्षणाद्यैश्च संपूज्य च परस्परम् ॥ १८१ ॥ प्रज्वाल्याग्निं च विधिवद्धोमं कुर्यादनन्तरम् ॥ वागीश्वरं समभ्यर्च्य वागीश्वर्या समन्वितम् ॥ १८२ ॥ यस्य देवस्य यो यागः प्रतिष्ठा यस्य कस्यचित् ॥ प्रागेव तस्य जुहुयात्सहस्रं च शतं तथा ॥ १८३ ॥ तिलाज्यैः पायसैर्वाथ पत्रपुष्पाक्षतेन च ॥ ग्रहेभ्यो विधिवत्सर्वं तथेन्द्रायेश्वराय च ॥ १८४ ॥ मरुद्भ्यो लोकपालेभ्यो विधिवद्विश्वकर्मणे ॥ ऊर्जेन समिधा कुर्यादष्टाष्टौ स्वगृहेष्वपि ॥ १८५ ॥ इन्द्रेश्वरमारुतानां तिलाज्येन घृतेन वा ॥ एकैकामाहुतिं दद्यात्स्वैःस्वैर्मंत्रैर्यथाक्रमात् ॥ १८६ ॥ दिगीशानां च प्रत्येकमष्टाष्टौ च विशेषतः ॥ विश्वकर्मन्निति मन्त्रेण कृत्वा आज्याहुतित्रयम् ॥ १८७ ॥ समित्त्रयं पलाशस्य अथवाश्वत्थसंभवम् ॥ एकैकामाहुतिं दद्यादाज्येन च विशेषतः ॥ १८८ ॥ शिवं प्रजापतिं विष्णुं दुर्गां च कमलामपि ॥ सरस्वतीं च विधिवत्पृथिव्या इति पावकैः ॥ १८९ ॥ भूतेभ्योऽप्याहुतिं दद्यादेवं मासद्वयं क्रमात् ॥ अन्येषां मधुराक्तेन तिललाजैर्यथाक्रमम् ॥ १९० ॥ विष्णुं चैवं तु वायव्ये दुर्गायाश्च तथोत्तरे ॥ कमलायाश्च ईशाने ईशानस्य सभूतकम् ॥ १९१ ॥ एक

---

[1] इयं मुद्रा ताराकल्पे मेरुतन्त्रे चान्यत्रापि बहुषु तन्त्रेषूक्ता तत एवावधारणा कर्त्तव्या ।

कुण्डे तु एकस्मिन्होमं कुर्याद्यथाविधि ॥ पक्षे वै पञ्चकुण्डे तु पूर्वादीनां क्रमेण तु ॥ १९२ ॥ एककुंडे ग्रहान्कृत्वा कृत्वा बलभिदा सह ॥ दक्षिणे क्रमतश्चैवं लोकेशं च तथैव च ॥ १९३ ॥ पश्चिमे यस्य यागस्य दुर्गायाश्चोत्तरे दिशि ॥ ईशाने भूतयक्ष्मा च जुहुयाद्देशिकोत्तमः ॥ ॥ १९४ ॥ विष्णवादिदेवतानां च अग्रकुंडे विधीयते ॥ प्रथमे दिवसे कुर्याद्देवतानां च स्थापनम् ॥ द्वितीये पूजनं कुर्याद्धोमं कुर्याद्यथाविधि ॥ ॥ १९५ ॥ बलिदानं तृतीये तु चतुर्थीकं चतुर्थके ॥ नीराजनं पञ्चमे तु पञ्चाहसाध्यको विधिः ॥ त्र्यहसाध्ये तृतीये तु नवाह्ने त्वथ पंचमे ॥ ॥ १९६ ॥ उदङ्मुखः प्राङ्मुखो वाप्यैशान्यादिक्रमेण तु ॥ प्रादक्षिण्येन यज्ञं तु मन्त्रैः परिसमूहनम् ॥ मन्त्रपूर्वं साग्निकानां निरग्नेस्तुष्टिकेन तु ॥ १९७ ॥ त्रिकुशेन महायागे विवाहादौ द्विपत्रकम् ॥ वैश्वदेवे त्वेकपत्रमिति साधारणो विधिः ॥ १९८ ॥ दिग्विदिक्षु परिस्तीर्य महायागेषु सर्वदा ॥ दिक्षु मात्रं नित्यके च विश्वदेवे तथैव च ॥ १९९ ॥ अकृत्वा कर्म नित्यं च वृथा नैमित्तिकं भवेत् ॥ तस्मात्फलाद्यैरपि तत्कृत्वा नैमित्तिकं चरेत् ॥ २०० ॥ प्रायश्चित्ते वैश्वदेवे सायंप्रातः प्रतीषु च ॥ २०१ ॥ मारणोच्चाटहोमेषु तथा संकल्पिताकृती ॥ प्रत्यवायकुले क्वापि तत्र नित्याकृतिं विना ॥ २०२ ॥ शतार्द्धं जुहुयाद्यत्र तत्र नित्यं विवर्जयेत् ॥ तूर्यहोमं ततः कृत्वा तूष्णीमेव जितेन्द्रियः ॥ २०३ ॥ प्रजपेदिन्द्रमाग्निं च सोमाय च यथाक्रमम् ॥ ततस्तु समिधाहोमं व्याहृतिस्तदनन्तरम् ॥ २०४ ॥ भूर्भुवः स्वाहेति तथा त्वन्न इत्यादिपंचकम् ॥ अन्ते स्विष्टकृतं दद्याद्विधानं तस्य भोः शृणु ॥ २०५ ॥ घृताहुतिं स्विष्टकृच्च द्विजसंस्कारकर्मसु ॥ घृतैः स्विष्टकृतं दद्याद्यागादौ परिवर्जयेत् ॥ २०६ ॥ सर्वौषध्युदकस्नानं करिदंतोत्थमुष्णया ॥ रथ्यावल्मीकगोष्ठस्य तथाश्वस्य खुरस्य च ॥ २०७ ॥ त्रिगन्धं च त्रिशीतं च कुशमूलस्य मृत्तिकाः ॥ निक्षिपेत्स्नानकुम्भेषु आचार्यादींस्तु स्थापयेत् ॥ २०८ ॥ यजमानः पुरः कृत्वा दंतकाष्ठपुरःसरम् ॥ रात्रौ च भक्ष्यभोज्याद्यैः परितोष्य यवाक्षतम् ॥ .२०९ ॥ कृत्वा यथोक्तकालेन पूजयेत्तैलधारया ॥ ततः प्रभाते विमले स्नानं कुर्याद्यथाविधि ॥ २१० ॥ स्नानमब्दैवतैर्मन्त्रैः सूक्तेन पुरुषेण तु ॥ वारुणेन च सूक्तेन सुरास्त्वादि यथाक्रमम् ॥ २११ ॥ सुरास्त्वामभिषिंचंतु ब्रह्मविष्णुमहेश्वराः ॥ वासुदेवो जगन्नाथस्तथा संकर्षणः प्रभुः ॥ २१२ ॥ आखंडलोग्निर्भगवान्यमो वै निर्ऋतिस्तथा ॥ वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ॥ २१३ ॥ ब्रह्मणा सहितः शेषो दिक्पालाः पांतु ते सदा ॥ कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः ॥ २१४ ॥ बुद्धिर्लज्जा वपुः शांतिस्तुष्टिः कांतिश्च मातरः ॥ एतास्त्वामभिषिंचंतु देवपत्न्यः समाहिताः ॥ २१५ ॥ आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः ॥

ग्रहास्त्वामभिषिंचंतु राहुः केतुश्च तर्पिताः ॥ २१६ ॥ देवदानवगंधर्वा यक्षराक्षसपन्नगाः ॥ ऋषयो मनवो देवा देवमातर एव च ॥ २१७ ॥ देव
पत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः ॥ अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च ॥ २१८ ॥ औषधानि च रत्नानि कालस्यावयवाश्च
ये ॥ सरितः सागराः शैलास्तीर्थानि जलदा नदाः ॥ २१९ ॥ एते त्वामभिषिंचंतु सर्वकामार्थसिद्धये ॥ स्नानं समाप्य विधिवत्स्वगणेनानु
लेपयेत् ॥ २२० ॥ गवामष्टोत्तरशतं तदर्धं चाथ विंशतिम् ॥ आचार्यायाभिरूपाय प्रदद्यादभिपूजयन् ॥ २२१ ॥ ततः प्रभाते विमले
जले समवतारयेत् ॥ शुद्धां च कपिलां दोग्ध्रीं घंटाचामरवर्जिताम् ॥ २२२ ॥ सामगाय ततो दद्यात्सुवर्णदक्षिणान्विताम् ॥ यूप
मादाय संस्थाप्य स्नापयेद्वारुणं जपन् ॥ २२३ ॥ अच्छेवतेन मन्त्रेण गायत्र्या तदनन्तरम् ॥ रोचनाभिस्त्रिरत्नेन तथा कुंभोदकेन च ॥ २२४ ॥
पर्वताग्रमृदा तोयनागवल्मीकजातया ॥ गजदंतमृदा चैव कूलमूलतमृदा तथात ॥२२५॥ पुष्पोदकेन शंखेन तथा रत्नोदकेन च ॥ दध्यक्षतेन
दुग्धेन घटेन शतधारया ॥ २२६ ॥ सुगंधेन त्रिशीतेन विलिप्य च समाहितः ॥ दापयेत्कांस्यमूलं च दद्याल्लोहमयं च वा ॥ २२७ ॥ माल्यवस्त्रै
रलंकृत्य पूजयेद्गन्धचन्दनैः ॥ ईशावा इति मंत्रेण दद्यात्पुष्पाञ्जलित्रयम् ॥ २२८ ॥ पुनस्त्वादिति मंत्रेण पुनः पुष्पं समुत्सृजेत् ॥ प्रादेशमात्रवि
स्तारं मध्ये वृत्तं षडंगुलम् ॥ २२९ ॥ कांस्यचक्रस्य मानं तु ऊर्ध्वं यद्वादशांगुलम् ॥ तदूर्ध्वे विलिखेच्छूलं चतुरंगुलमानतः ॥ २३० ॥ अंगुष्ठ
हीने लोहस्य तत्र शूलं न कारयेत् ॥ ततो मंगलपूर्वें तु द्विजातीनां मतेन च ॥ २३१ ॥ समुत्सृजेच्च प्रासादं तडागं च विशेषतः ॥ चतुर्दर्भं
गृहीत्वा तु ईशानाभिमुखेन तु ॥ समुत्सृजेत्ततः पश्चाद्वाक्यमेतदुदीरयेत् ॥ २३२ ॥ ओमित्यादिश्रीकृष्णद्वैपायनाभिधानवेदव्यासप्रणीतभविष्य
पुराणोक्तफलप्रप्तिकामश्चतुष्कोणाद्यवच्छिन्नमत्कारितपुष्करिणीजलमेतदूर्जितं गंधपुष्पाद्यर्चितं वरुणदैवतं सर्वसत्त्वेभ्यः स्नानावगाहनार्थमहमु
त्सृजे ॥ २३३ ॥ ततो वरुणसूक्तेन वरुणं नागसंयुतम् ॥ मकरं कच्छपं चैव तोयेषु परिनिक्षिपेत् ॥२३४॥ पूजयेद्वरुणं देवमर्घ्यं दद्याद्विशेषतः ॥
तेनोदकेन संस्नाप्य गजदंतोत्थमृत्स्नया ॥ २३५ ॥ श्वेताश्वसुरसंभूतं श्रीश्च तेति च संजपन् ॥ आप्यायस्वेति मंत्रेण मृदं चतुष्पथोद्भवाम् ॥
॥ २३६ ॥ तद्विष्णोरिति मंत्रेण कुशमूलेन स्थापयेत् ॥ तीर्थतोयेन गंधेन तथा पञ्चामृतेन च ॥ २३७ ॥ गायत्र्या स्नापद्देवं रत्नतोयेन
साधकः ॥ आप्यायस्वेति मंत्रेण क्षीरेण तदनंतरम् ॥ २३८ ॥ दधिक्राव्णेति दध्ना च मधुवातेति वै मधु ॥ सरस्वत्यांतेति जातीपुष्पतोयेन
स्नापयेत् ॥ २३९ ॥ (वरुणोत्तमिति मंत्रस्य नारायण ऋषिः गायत्री छंदो वरुणो देवता वरुणप्रीतये विनियोगः ॥ श्रीश्च ते इति मंत्रस्य कर्दम

ऋषिः पंक्तिश्छंदः सरिद्देवता अश्वखुरमृदा स्नाने विनियोगः ॥ आप्यायस्वेति मंत्रस्य पर्वत ऋषिः उष्णिक्छन्दः सरस्वती देवता वरुणप्रीतये चतुष्पथमृदा स्नाने विनियोगः ॥ तद्विष्णोरिति मंत्रस्य मैनाक ऋषिस्त्रिष्टुप्छन्दः सरस्वती देवता वरुणप्रीतये कुशमृदा स्नाने विनियोगः ॥ कया न इति मंत्रस्य वसिष्ठ ऋषिरनुष्टुप्छन्दः सोमो देवता वरुणप्रीतये नागगंधस्नाने विनियोगः ॥ तेजोसीति मंत्रस्य गर्ग ऋषिस्त्रिष्टुप्छन्दः वासवो देवता वरुणप्रीतये विनियोगः ॥ सरस्वत्यै भैषज्येनेति मंत्रस्य वामदेव ऋषिः पंक्तिश्छंदो विष्णुर्देवता वरुणप्रीतये विनियोगः ॥ पुष्पोदकस्नाने ॥ अग्न आयाहीति मंत्रस्य जनार्दन ऋषिः जगतीछन्द ऐन्द्री देवता वरुणप्रीतये विनियोगः ॥) प्रक्षिपेत्पञ्च व्रीहींश्च इयञ्चेति च संपठन् ॥ पश्चान्नीराजनं कुर्यात्पञ्चघोषपुरःसरम् ॥ २४० ॥ शिरीषपुष्पसंभूतं दर्पणं कांस्यसंभवम् ॥ गोपीचन्दनसंभूतं गंगामृत्तिकयाथ वा ॥ कृष्णां गां गोमयं वापि स्वस्तिकं शंखमेव च ॥ २४१ ॥ कारयेत्पदकं वापि यवगोधूमकस्य वा ॥ उत्पन्नस्वर्गसंभूतं कलशं माषसंभवम् ॥ श्रीरसंपुष्पसंभूतं दर्पणं कांस्यसंभवम् ॥ २४२ ॥ नन्द्यावर्तें मलयजे ततो निर्मलयेत्सुधीः ॥ एकैकं प्रतिमंत्रेण प्रत्येकं तु जलोपरि ॥ २४३:॥ ध्रुवप्रतिकृतैर्मंत्रैरष्टभिश्च यथाक्रमम् ॥ पूर्वाक्षतं माषभक्तबलिं दद्याद्विधानतः ॥ २४४ ॥ ततो नारायणसूक्तेन देवं नारायणं व्रजेत् ॥ अन्येषां चैव देवानां प्रदद्यात्त्रिंशतं बलिम् ॥ २४५ ॥ तत आचमनीयं च वस्त्रयुग्मं निवेदयेत् ॥ वक्ष्यमाणेन मंत्रेण क्रमेणापि विधानतः ॥ २४६ ॥ पृथक्पृथक्कृतो दद्यात्तावंत्येनापि भो द्विजाः ॥ वेदसूक्तसमायुक्ते यज्ञसूत्रसमन्विते ॥ सर्ववर्णप्रदे देव वाससी ते विनिर्मिते ॥२४७॥ शरीरं ते न जानामि चेष्टां नैव च नैव च ॥ मया निवेदितान्गन्धान्प्रगृह्य च विलिप्यताम् ॥२४८॥ अष्टोत्तरशतान्दीपान्परितः स्थापयेत्क्रमात् ॥ तदर्धं वा पञ्चविंशं मंत्रेण प्रयजेत्सुधीः ॥ २४९ ॥ त्वं सूर्यचन्द्रज्योतींषि विषादस्त्वं तथैव च॥त्वमेव सर्वज्योतींषि दीपोऽयं प्रतिगृह्यताम् ॥ २५० ॥ प्रदक्षिणं ततः कुर्यात्पञ्चधा सप्तधाथ वा ॥ वक्ष्यमाणेन मंत्रेण दद्याद्धूपं दशांगकम् ॥ २५१ ॥ वनस्पतिरसो दिव्यो गंधाढ्यः सुरभिः शुचिः ॥ मया निवेदितो भक्त्या धूपोऽयं प्रतिगृह्यताम् ॥ २५२ ॥ अलंकारैश्च गंधैश्च पीतवस्त्रैस्तथैव च ॥ दूर्वाक्षतेन माल्येन युक्तं पुष्पेण पूजयेत् ॥ दद्यात्पश्चाञ्जलिं पश्चाद्विष्णुसूक्तं पुनर्जपेत् ॥ २५३ ॥ ततः सुशोभने स्थाने वेदीं निर्माय देशिकः ॥ वरुणं विन्यसेत्तत्र तथा पुष्करिणीमपि ॥ २५४ ॥ विवाहोक्तेन विधिना कुर्यान्निर्मंछनादिकम् ॥ गंधपुष्पं ततो दद्याद्गां च दद्यात्सदक्षिणाम् ॥२५५॥ चामरं व्यजनं छत्रं कांस्यं लोहं तथैव च ॥ कुर्यात्पुष्करिणीं रम्यां राजतीं च त्रिपादिकाम् ॥ २५६ ॥ चतुष्कोणां च सुषमां द्व्यंगुष्ठपरिमंडलाम् ॥ सुवर्णप्रतिमां कुर्याद्वालेनैकेन भो द्विजाः ॥ २५७ ॥

अथ वा स्वर्णपत्रे च कुंकुमेन तले लिखेत् ॥ बाणशक्तिप्रमाणेन स्वर्णपत्रं तु द्व्यंगुलम् ॥२५८॥कारयेच्चतुरस्रं च पीठोपरि न्यसेद्बुधः ॥ नीराजनांते
विप्रेंद्राः संस्मरेदमृतं तरेत् ॥ २५९ ॥ अशक्तेन तथैवैककाष्ठे वा पिप्पलच्छदे ॥ ताम्रपट्टे लिखेद्वापि अलक्तेन यथाविधि ॥२६०॥ प्राणप्रतिष्ठां
कुर्यात्तु वरुणाय निवेदयेत् ॥ महं तु वत्सरं कुर्याद्विदवोषपुरःसरम् ॥ २६१ ॥ अशोकः खदिरः शालो ह्यश्वत्थो बिल्वकस्तथा ॥ धात्री कुरुबक
श्चैव बकुलो नागकेशरः ॥ २६२ ॥ एषामेव काष्ठयूपं यजमानप्रमाणकम् ॥ समादाय च संस्थाप्य वस्त्राद्यैः प्रतिगृह्य च ॥ २६३ ॥ यूपं रक्षेति
मंत्रेण खनित्वा च प्रदापयेत् ॥ स्थिरो भवेति मन्त्रेण हस्तं दत्त्वा पठेत्ततः ॥ २६४ ॥ तडागस्य तथैशान्यां तथा प्रासादकस्य च ॥ प्रापयेद्द
क्षिणे भागे आवासस्य च मध्यके ॥ २६५ ॥ नौकां गत्वा ततः पश्चाद्यूपमादाय वाग्यतः ॥ मध्यदेशे तडागस्य समुलंघ्य तथोत्तरम् ॥ २६६ ॥
गंतव्यं प्रकल्प्य तत्रैव आप्यायस्वेति वै ऋचा ॥ शिलायां होमयेत्तत्र हुनेन्नौकाहुतित्रयम् ॥ २६७ ॥ अंगदाय स्वाहेति भौमाय नम इत्यतः ॥
लाजाशक्तौ दधिमधौ वासने प्रतिहोमयेत् ॥ २६८ ॥ कूर्माय नम इत्युक्त्वा पृथिव्यै नम इत्युत ॥ स्वाहेत्यनंतमंत्रेण दद्यादर्घ्यमनंतरम्॥२६९॥
पञ्चरत्नेन गन्धेन शंखेनार्घ्यं प्रदापयेत् ॥ चतुरस्रं समाकीर्णं चतुर्दिक्ष्वधृतैर्जनैः ॥ २७० ॥ कल्पयेद्रोपयेत्तत्र हस्तं दत्त्वा पठेदिदम् ॥ स्थिरो
भवेति मंत्रेण गंधपुष्पैः प्रपूजयेत् ॥ २७१ ॥ चक्रं सदर्पणं दद्यान्नागदंडशिरो गतः ॥ विद्युदत्र च कर्तारं ग्रहदुःखहरिप्रियम् ॥ २७२ ॥ एवं
चक्रं पूजयित्वा शूलं नागांश्च पूजयेत् ॥ उच्चैर्ध्वजं ततः कृत्वा न नागेति च संपठेत् ॥ २७३ ॥ गायत्रस्वेति मंत्रेण पठेद्वारद्वयं ततः ॥ दिक्पा
लेभ्यो बलिं दद्यान्माषभक्तं गुडौदनम् ॥ २७४ ॥ रक्तपुष्पान्वितं कृत्वा प्रणिपत्य प्रसादयेत् ॥ सहस्रं वा धनं दद्याद्ब्राह्मणाय कुटुंबिने॥२७५॥
ततो भोज्यं ससर्पिश्च सहिरण्यं यथाविधि ॥ इक्षुस्वस्तीतिकां दद्याज्जले मातॄश्च पूजयेत् ॥२७६॥ मंथरां वसुतां कांतां राक्षसीं च पिशाचिकाम्॥
नागिनीर्नागपुत्रांश्च मध्ये संपूजयेत्ततः ॥ २७७ ॥ पूर्णांते च पृथग्दद्याल्लाजाद्यैर्गुडमिश्रितैः ॥ इन्द्रो बलवती स्वाहा यशो बलवतामपि ॥२७८॥
बृहत्पक्षाविशेषोऽयं मध्यमे च कनीयके ॥ बृहस्पते च इन्द्राय तव देवलतामिति ॥ २७९ ॥ स्वाहेति जुहुयात्पश्चात्प्रणीतां चालयेत्ततः॥ कनिष्ठ
पक्षे प्रासादे तथा चैव जलाशये ॥ २८० ॥ मन्दरे तोरणस्यैव विष्वक्सेनं प्रकल्पयेत् ॥ आरामे च तथा सेतौ विशेषः पञ्चमो द्विजाः ॥२८१॥
पूजांतरेण यः कस्य जपेन्मन्त्रसहस्रकम् ॥ स्तुतिं समाप्य विधिवदिमं मंत्रमुदाहरेत् ॥ २८२ ॥ सर्वसत्त्वेभ्य उच्छिष्टमपि तज्जलमुद्धृतम् ॥
इति पठित्वा पुष्करिणीजलं हस्ते गृहीत्वा जले क्षिपेत् ॥ २८३ ॥ ततो जलमातृभ्यो नम इति जलमातॄः प्रपूजयेत् ॥ त्रैलोक्ये यानि स्थानानि

स्थावराणि चराणि च ॥ २८४ ॥ तेषामाप्यायनायैतज्जलमुत्सृज्यते मया ॥ मात्रे तु कृतमेतत्ते जगदानंदकारकम् ॥ २८५ ॥ शिवाय सर्वभूतानां
सदा पाहि जलाशयम् ॥ पिबंतो ह्यवगाहंतः सुखिनः सर्वजंतवः ॥ २८६ ॥ जलं विश्वोपकाराय कृतमेतन्मया सदा ॥ कीर्तिस्तिष्ठतु मे देवा
श्चिराय धरणीतले ॥ २८७ ॥ त्वत्प्रसादान्महाभाग नागराज नमोऽस्तु ते ॥ येऽत्र केचिद्विपद्यंते स्वकर्मफलभोजनाः ॥ २८८ ॥ तेषां दोषैर्न
लिप्येऽहं स्वंस्वं गममवाप्नुयात् ॥ नारायणो जगत्प्राणः सर्वकामप्रदायकः ॥ २८९ ॥ आपेया मातरः संतु जगतां वृक्षयोनयः ॥ अपांपते रसा
यात्र यादसामीश्वर प्रभो ॥ २९० ॥ वरुणास्यासने कीर्तिं सनातन नमोस्तु ते ॥ तत्तोयं निधिवद्द्याद्दक्षिणार्थं द्विजन्मने ॥ २९१ ॥ सुवर्णं रजतं
दद्यादनड्वाहं पयस्विनीम् ॥ दद्याद्धेनुद्वयं पश्चात्कुर्याद्ब्राह्मणतर्पणम् ॥२९२॥ वह्निपूजां पुरस्कृत्य मन्त्रेण प्राशयेत्ततः ॥ पितॄणां दापयेदर्घ्यं ततो
देवं प्रसादयेत् ॥ २९३ ॥ बिंबमुद्रां पद्ममुद्रां नागमुद्रां प्रदर्शयेत् ॥ वैश्वानरा इति ऋचा पूजां कृत्वा विवर्जयेत् ॥२९४॥ यस्ते प्राणाञ्जपन्पश्चात्प्र
कुर्यादथ चन्दनम् ॥ प्रदक्षिणं ततः पश्चात्तडागस्य शृणु द्विजाः ॥२९५॥ ब्राह्मणान्पुरतः कृत्वा वेदघोषं समुच्चरन् ॥ महामङ्गलपूर्वेण प्रविशेद्भवनं
सुधीः ॥ २९६ ॥ ततो गृहार्चनं कुर्याद्ब्राह्मणानां च भोजनम् ॥ दीनानां कृपणानां च सवित्रेऽर्घ्यं निवेदयेत् ॥२९७॥ इति श्रीभविष्यं महापुराणे
मध्यमपर्वणि द्वितीयभागे विंशोऽध्यायः ॥ २० ॥ ॥ सूत उवाच ॥ ॥ सताग्निष्टोमको नाम ह्युत्तमः कथितो विधिः ॥ मध्यमे मध्यमफलं कनि
ष्ठे तु कनिष्ठकम् ॥ १ ॥ अधुना मध्यमं वक्ष्ये विधिं शास्त्रानुसारतः ॥ यथाविभवयागेन यत्कर्तव्यं नरेण वै ॥ २ ॥ सद्योधिवासकल्पेन
यूपादीनधिवास्य च ॥ पूर्वस्मिन्नेव दिवसे दैवज्ञकथिते शुभे ॥ ३ ॥ मुहूर्ते कलशं स्थाप्य संगृह्य गणनायकम् ॥ स्थापयेत्प्रथमं यूपमा
पोहिष्ठेतिमन्त्रकैः ॥ ४ ॥ शन्नो देव्यास्ततः पश्चाद्गन्धद्वारेति गंधकम् ॥ श्रीसूक्तेन ततो दद्यात्पुष्पं दूर्वाक्षतं ततः ॥ ५ ॥ काण्डादिति च
मन्त्रेण ततो धूपं निवेदयेत् ॥ ये गृह्णामीति च ऋचा पूजायां स्थापयेत्ततः ॥ ६ ॥ विवाहविधिना सर्वं कार्यं चैवाधिवासनम् ॥ ७ ॥ सर्वमेव प्रयुं
जीत तडागादिषु पण्डितः ॥ अधिवास्य तडागादीनाचार्यादींश्च सर्वशः ॥ ८ ॥ संगृह्य गंधपुष्पाद्यैर्धूपैर्दीपैः सुशोभनैः ॥ ततः प्रभातसम
ये नित्यं निर्वर्त्य शास्त्रतः ॥ ९ ॥ वृद्धिश्राद्धं ततः कुर्यान्मातृपूजापुरःसरम् ॥ अलंकृत्य यथाशक्ति आचार्यादींश्चरेद्बुधः ॥ १० ॥ शृणुयात्पश्चिमे
भागे मंडपस्य समीपतः ॥ मध्यदेशे समुद्भूतं यज्ञपात्रं प्रशस्यते ॥ ११ ॥ अथ वा तत्र देशीयं गुरुं वा श्रोत्रियोद्भवम् ॥ यज्ञे प्रधानद्वितीयमृ
त्विगाचार्यमेव हि ॥ १२ ॥ वैतानकल्पे सपन्नं शक्तिकल्पपरायणम् ॥ निगमज्ञानसंपन्नं यज्ञे पात्रं प्रशस्यते ॥ १३ ॥ पत्नीहीनमपुत्रं च श्याव

दंतमदंतकम् ॥ गणानां याजकं षंढं स्वगोत्रं परिवर्जयेत् ॥ १४ ॥ अप्रधानेषु यज्ञेषु दानयज्ञेषु सत्तमाः ॥ नियोजयेत्स्वगोत्रं च होमे नास्ति विचारणा ॥ १५ ॥ कुशप्रतिकृतौ चापि ततः स्वर्गं स गच्छति ॥ धनमादौ च सशोध्य ततो यज्ञं समाचरेत् ॥ १६ ॥ अयाज्ययाजनोद्भूतं पल्लवं व्यवहारके ॥ कूटसाक्ष्येण पल्लवे स्थाप्यहारकमेव च ॥ १७ ॥ देवस्वं ब्राह्मणस्वं च लोहविक्रयणं धनम् ॥ हविर्विक्रयणं कृत्वा पुत्रभार्यादिविक्रयी ॥ १८ ॥ निंदितानि पुराणेषु यत्कृतं तत्र तत्फलम् ॥ यज्ञसद्मनि विप्रांश्च न श्राद्धान्भोजयेत्क्वचित् ॥ न दद्यात्तस्य दानं च यावन्नैव समापयेत् ॥ १९ ॥ ब्रह्मन्नाचार्यमुख्योसि संसारात्त्राहि मां विभो ॥ त्वत्प्रसादाद्गुरो यज्ञे प्राप्नुयां मानसेप्सितम् ॥ २० ॥ चिरं मे शाश्वती कीर्तिर्यावल्लोकाश्चराचराः ॥ प्रसीद त्वं महेशान प्रतिष्ठाकर्मसिद्धये ॥ २१ ॥ त्वमादिः सर्वभूतानां संसारार्णवतारक ॥ ज्ञानामृतप्रदाचार्य विष्णुरूप नमोऽस्तु ते ॥ २२ ॥ ब्रह्मासनसमुद्भूतं प्रकाशितदिगंतरम् ॥ त्वं च जांबूनदप्रख्य यजुर्वेद नमोस्तु ते ॥२३॥ प्रफुल्लकमलोद्भासि भास्वरांबरभूषित ॥ प्रकीर्णशास्त्रसंभार विधिज्ञ प्रणतोस्मि ते ॥२४॥ ज्वलद्वैश्वानरप्रख्य धूमश्यामालितानन ॥ षडंगवेदतत्त्वज्ञ ऋत्विङ् मोक्षं समाचर ॥ २५ ॥ ततस्तूर्यादिघोषेण पुरस्कृत्य द्विजोत्तमान् ॥ यजमानः सपत्नीकः प्रविशेद्यागमण्डपम् ॥ २६ ॥ स्वस्थाने स्थापयेद्विप्रान्मखे धर्मैर्यथाक्रमम् ॥ पूजयेद्गन्धमाल्याद्यैर्गंधाद्यैः सुमनोहरैः ॥ २७ ॥ यज्ञे सुवितते योसौ पूज्यते पुरुषः सदा ॥ नारायणस्वरूपोसौ यज्ञं मे सफलं कुरु ॥२८॥ मखश्रेष्ठेषु सर्वेषु येन मंत्राः सुविस्तृताः ॥ यजुर्वेदार्थतत्त्वज्ञ ब्रह्मरूप नमोस्तु ते ॥२९॥ यज्ञेषु साक्षी सर्वेषु वेदवेर्थतत्त्ववित् ॥ ऋग्वेदज्ञ महाप्राज्ञ विश्वरूप नमोस्तु ते ॥ ३० ॥ मांगल्यं कर्मणां नित्यं शाश्वतं ब्रह्मरूपिणम् ॥ सिद्धये मम यज्ञस्य नमामि शिवरूपिणम् ॥ ३१ ॥ पालयंति दिशः सर्वा विदिशश्च तथा इमाः ॥ दिक्पालरूपिणं विप्रं यज्ञसिद्ध्यै नमाम्यहम् ॥ पातयेद्दक्षिणं जानु विकिरान्विकिरेत्ततः ॥ ३२ ॥ त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च ॥ ब्रह्मविष्णुशिवाः सर्वे रक्षां कुर्वंतु तानि वै॥३३॥ वेद्यावेदीति मंत्रेण पठेद्वेदिं प्रणम्य च॥संपूज्य गन्धपुष्पाद्यैरिमं मंत्रमुदाहरेत् ॥ ३४ ॥ याजनं यजमानश्च श्रेयसा तत्र याजकः ॥ इदमर्घ्यमिदं पाद्यं धूपोयं प्रतिगृह्यताम् ॥ ३५ ॥ ऐशान्यां कलशे देवं संपूज्य गणनायकम् ॥ ब्रह्माणं वासुदेवं च द्वितीयकलशे यजेत् ॥३६॥ मंडलं चैव विष्णुर्वै द्वारकारूपमास्थितः ॥ तेन त्वां पूजयाम्यद्य स्वर्गप्राप्तिं कुरुष्व मे ॥ ॥ ३७ ॥ पूर्वादिदिक्षु कलशान्संस्थाप्य च त्रयंत्रयम् ॥ अर्धपादसवर्णेन निर्मितं तारणं बुधः ॥ ३८ ॥ गंगामृत्तिकया युक्ते पल्लवे संनिवेदयेत् ॥ मंदरं कल्पयित्वा तु गोपीनां च कुलेन वा॥३९॥कलशोपरि संस्थाप्य मंदरं संप्रपूजयेत् ॥ स्योना पृथिवीति मंत्रेण गंधपुष्पैः पृथिग्विधैः ॥४०॥

(स्योना पृथिवीति मन्त्रस्य सुमंत ऋषिर्जगती छन्दो हरो देवता मंदरप्रीतये विनियोगः) ॥ एवं दक्षिणदिग्भागे नवतोलकनिर्मितम् ॥
प्रादेशमात्रलोहं तु रौप्येण गंधमादनम् ॥ मृदा संघटनैः पश्चात्कदाचन ऋचा यजेत् ॥ ४१ ॥ कदाचनेति मंत्रस्य सूर्य ऋषिस्त्रिष्टुप्छन्दः
सूर्यो देवता गंधमादनप्रीतये विनियोगः ॥) उत्तरे तोरणतोद्रेंगुष्टद्वयमानके ॥ तोलकद्वयमानेन यवानां पिष्टकोपरि ॥ ४२ ॥ (आप्याय
स्वेति मंत्रस्य कर्दम ऋषिर्जगती छन्दः शची देवता सुपार्श्वप्रीतये विनियोगः ॥) पूजयेत्यार्श्वकलशे धात्रादीन्पूर्वदिक्क्रमात् ॥ श्रीसूक्तेनैव
मन्त्रेण यजेद्विजयसप्तकम् ॥ पूजयेत्परया भक्त्या गंधपुष्पाक्षतादिना ॥ ४३ ॥ अंबाअंबिकेति मंत्रस्य नलिन ऋषिर्गायत्री छन्दः शंभुर्देवता जय
प्रीतये विनियोगः ॥ गायत्र्या पूजयेद्दक्षे पश्चिमं कलशद्वयम् ॥ ४४ ॥ (गायत्र्या विश्वामित्र ऋषिः सविता देवता विजयप्रीतये विनियोगः ॥)
भद्रं चैव सुभद्रं च प्रयतः संयजेद्बुधः ॥४५॥ (उत्तरे युग्मकलशे मनोन्ना इति मंत्रस्य अंतक ऋषिर्बृहती छंदो निर्ऋतिर्देवता भूतप्रीतये विनियोगः ॥)
भूतशुद्धिं ततः कृत्वा न्यासं कृत्वा विधानतः ॥ विधायार्घ्यादिकं चैव धर्मादिमंडले यजेत् ॥४६॥ मध्ये आधारशक्त्यादीन्वरुणं मध्यतो यजेत् ॥
पूर्वादिक्रमतश्चैव इन्द्रादीन्कुलदेवताः ॥४७॥ पार्श्वद्वये कर्णिकाया ब्रह्माणं चाप्यनन्तकम् ॥ स्वैःस्वैर्मंत्रैर्यथोक्तैश्च बलिभिर्गन्धपुष्पकैः ॥ ४८ ॥
इन्द्राभिषेकमंत्रस्य वाद्यं गांधाररागकम् ॥ अग्नेस्तेजोसीति वाद्यं रागं चैव वराटकम् ॥ ४९ ॥ घनकंटकमस्यापि वाच्यं रागं तु गुर्जरम् ॥ रक्षो
धिपस्य संग्रामं वैतालं वाद्यमुच्यते ॥ ५० ॥ नाटकाख्यं तथा रागं वरुणस्यापि मे शृणु ॥ वाद्यं राज्याभिषेकाख्यं रागो वसंतसंज्ञकः ॥ ५१ ॥
ईशस्य नंदिघोषाख्यं वाद्यं रागोथ कामदः ॥ सुवर्णं दुंदुभिर्वाद्यं ब्रह्मणः कथितो बुधैः ॥ ५२ ॥ रागो देवी वसंतश्च अनंतस्य निबोध मे ॥ वाद्यं
गांधारताराख्यं रागश्चाङ्गारवातकः ॥ ५३ ॥ सोमे घोषे भवेद्वाद्यं जलेशस्य महात्मनः ॥ मालवाख्यो भवेद्रागः पत्राग्रेषु महानपि ॥ ५४ ॥ स्वैः
स्वैर्धर्मैश्च संगृह्य दक्षिणे पृथिवीं यजेत् ॥ स्योना पृथिवीति मंत्रेण उपचारैः पृथग्विधैः ॥ ५५ ॥ मण्डपस्योत्तरे भागे महादेवं प्रपूजयेत् ॥ नमो
वृक्षेभ्य इत्यादि नैवेद्यैश्च पृथग्विधैः ॥ ५६ ॥ (महादेवं द्विभुजं डमरुशूलधरसुमासहितं ध्यात्वा ॥ नमो वृक्षेभ्य इति मन्त्रस्य ब्रह्मा ऋषिर्गा
यत्री छंदश्चन्द्रो देवता चन्द्रप्रीतये विनियोगः ॥) गंधपुष्पादिभिर्भक्त्या भूतानि परितो यजेत् ॥ ५७ ॥ वेतालाश्च पिशाचाश्च राक्षसाश्च सरी
सृपाः ॥ अस्मात्प्रयांतु मे स्थानाद्ये चान्ये विघ्नकारकाः ॥ ५८ ॥ मधुयुक्तं पायसान्नं वरुणाय निवेदयेत् ॥ पीतं चालोहितं कृष्णं शुक्लं कृष्णं
च धूम्रकम् ॥ ५९ ॥ पीतं शुक्लं तथा चित्रं श्वेतमन्नं यथाक्रमम् ॥ बलयस्तु दिगीशानां ग्रहाणामपि ताञ्छृणु ॥ ६० ॥ क्षीरौदनं ग्रहेशाय शुक्लान्नं

शशिने स्मृतम् ॥ लोहितान्नं च भौमाय बुधाय क्षीरषाष्टिकम् ॥ ६१ ॥ पीतमन्नं देवगुरोः शुक्रस्य सिततंदुलम् ॥ मांसौदनं शनेर्ज्ञेयं राहोश्च कृष्ण
भक्तकम् ॥ ६२ ॥ धूम्रवर्णं तु ताम्रं तु भौमस्य क्षीरषाष्टिकम् ॥ पिष्टकान्नं शिवस्योक्तं भूतानां माषभक्तकम् ॥ ६३ ॥ एवं बलिं विधायाथ अग्रे
कुंभं निवेशयेत् ॥ प्रदेशद्व्यङ्गुलं नाम अष्टोत्तरसहस्रकम् ॥६४॥ बह्वंगुलकं विन्यस्य विन्यस्य कलशोपरि ॥ निशावांछितसूत्रैश्च संवेष्टय पिहितं
तथा ॥ ६५ ॥ शरावं च पुनर्दद्याद्वर्धनीं प्रतिपूजयेत् ॥ अस्त्राय फडिति मंत्रेण ध्यात्वा देवं जलेश्वरम् ॥ ६६ ॥ सूक्तं यजेद्यथाशक्ति शतमष्टोत्तरं
जपेत् ॥ कुंडेषु विन्यसेन्नागानष्टौ पूर्वादिषु क्रमात् ॥ ६७ ॥ अनंतं पूजयेत्पूर्वं मानेनांगुलमात्रकम् ॥ निर्मितं कांचनेनैव सप्तवर्तिकया सुधीः
॥ ६८ ॥ राजतं वासुकिं नागं यजेत्पत्रांतरे पुनः ॥ पादमात्रेपि चांगुष्ठमात्रं ताम्रस्य भक्ष्यकम् ॥ ६९ ॥ पंचांगुलं तोलिकया लौहं कर्कोटकं
पुनः ॥ वर्तिकाभिः षोडशभिर्बृहत्पर्वप्रमाणकम् ॥ ७० ॥ शंखपालं कुशमयमर्धपादेन निर्मितम् ॥ अंगुष्ठमात्रं रक्तेन नागं तालकमात्रकम् ॥७१॥
अंगुष्ठे तोलकं पश्चात्पद्मनागं पुनर्यजेत् ॥ तोलकार्धप्रमाणेन अंगुलं परिमाणतः ॥ ७२ ॥ कुर्याच्छैलमयं सम्यग्यथावल्लक्षणान्वितम् ॥ महाप
द्मस्य वै तस्य पूर्वमानेन निर्मितम् ॥ ७३ ॥ ध्यात्वानंतं चतुर्बाहुं शुक्लसप्तफणान्वितम् ॥ दक्षिणोर्ध्वकरे शंखमधिचक्रं प्रतिष्ठितम् ॥ ७४ ॥ वामो
र्ध्वे तु गदापद्मं मध्यस्थाने व्यवस्थितम् ॥ सर्वालंकारसंयुक्तमेवं ध्यात्वा यथाविधि ॥७५॥ सहस्रशीर्षेति मंत्रेण पूजयित्वा बलिं हरेत् ॥ लाजै
श्चतिलसंमिश्रैः क्षीरयुक्तैः पृथग्विधैः ॥ ७६ ॥ चतुर्विधं तथा श्वेतं सर्वालंकारसंयुतम् ॥ स्वकीयं प्रजपेत्तत्र आप्यायस्वेति वै ऋचा ॥ ७७ ॥
पिण्याकं नागजिह्वां च तथा सर्जरसं दधि ॥ बलयस्तस्य निर्दिष्टास्तक्षकं लोहितं यजेत् ॥ ७८ ॥ पद्मं टंकं दधानं च भुजाभ्यां नागसत्तमम्॥
मनोज्ञा इति मंत्रेण आज्यं सोमो बलिं हरेत् ॥ ७९ ॥ कर्कोटकं च द्विभुजं पीतवस्त्रधरं यजेत् ॥ पश्च नद्य इति ऋचा विष्णुक्रांता बलिर्भवेत्
॥ ८० ॥ पीतवस्त्रं च कुलिशं याजयेत्तु चतुर्भुजम् ॥ भुजाभ्यामूर्ध्वभागे तु रक्तपद्मधरं हरिम् ॥ ८१ ॥ शर्करा कुष्ठकं चैव बलिस्तस्य प्रकी
र्तितः ॥द्विभुजं शंखपालं च शंखाभं शंखधारिणम् ॥ ८२ ॥ पद्मासनस्थं पद्माभ्यां हस्ताभ्यां च वरं विभुम् ॥ ध्रुवक्षितिध्रुवोसीति मंत्राभ्यां
पूजयेत्पृथक् ॥ ८३ ॥ घटौदनं भृंगराजं पद्मं च वलयस्तयोः ॥ स्वगृह्योक्तेन विधिना संस्थाप्याग्निं कुशंडिकाम् ॥ ८४ ॥ कृत्वा आज्यस्य
संस्कारं वारुणं श्रपयेच्चरुम् ॥ जुहुयादष्ट बिल्वानि दिगीशानां घृतेन वै ॥ ८५ ॥ एकैकामाहुतिं दद्याद्ग्रहाणां च त्रयंत्रयम् ॥ सुसमिद्भिर्घृतमधु
पयोभिर्मिश्रितैः पृथक् ॥ ८६ ॥ पलाशसमिधं पश्चात्प्रतिष्ठामाहुतित्रयम् ॥ शिवस्य परमान्नेन जुहुयादष्टसंख्यया ॥ ८७ ॥ मध्वाज्यगुडमिश्रा

भिर्लाजाभिर्जुहुयात्पृथक् ॥ लाजान्यथोक्तं वितरेदेकैकामाहुतिं क्रमात् ॥ ८८ ॥ स्थालीपाकस्य जुहुयादेकैकामाहुतिं पुनः ॥ वरुणं च समुद्दिश्य
रुद्रं सर्वं पृथक्पृथक् ॥ ८९ ॥ वास्तोष्पतय इति मंत्रेण पञ्चगव्यो भवेत्ततः ॥ स्योनापृथिवीतिमंत्रेण व्रीहिमृत्तिकया पुनः ॥ ९० ॥ वृषान्न इति
मंत्रेण कया न इति वै पुनः ॥ कुशमूलमृदा चैव चतुष्पथमृदा तथा ॥ ९१ ॥ इमा रुद्रेति मंत्रेण श्रीश्चेति ऋचा पुनः ॥ पद्मखण्डस्य च मृदा
स्नापयेत्सुसमाहितः ॥ ९२ ॥ तद्विष्णोरिति मंत्रेण तथा पुष्पोदकेन च ॥ तीर्थोदकेन कृष्णेन त्रिरक्तेन त्रिशीतकैः ॥ ९३ ॥ पञ्चरक्तेन रक्तानां
मृदा कैश्च कुशोदकैः ॥ स्वर्णतोयैश्च कलशैरष्टोत्तरशतेन तु ॥ ९४ ॥ तैजसैर्मार्त्तिकैश्चापि अष्टाविंशतिभिस्तथा ॥ यथाशक्ति तु संस्थाप्य
कुंकुमैश्चन्दनैरपि ॥ ९५ ॥ अन्नं लिप्य ततो मृद्भिर्दद्याच्चैव यथाक्रमम् ॥ सुरासुरेति च ऋचा वस्त्रयुग्मेन वेष्टयेत् ॥ ९६ ॥ ध्वजं च
धनुनागेति गंधद्वारेति गोमयम् ॥ धूरसीति ततो धूपं होत्रे चाहुतिदीपकम् ॥ ९७ ॥ सिंधोसीति च सिंदूरं स्वभावे रक्तकं तथा ॥ मालतीकु
सुमैः कृत्यैर्नागान्संस्थापयेत्ततः ॥ ९८ ॥ धाराभिः शतपुष्पाभिर्गन्धतोयादिभिस्तथा ॥ अथवाश्वत्थपत्रेषु वटपत्रेषु वा सुधीः ॥ ९९ ॥ रोचना
कुंकुमैर्वापि संलिख्य तत्र पूजयेत् ॥ प्रक्षिपेत्तत्र मुक्ता हि कलशेषु विनिक्षिपेत् ॥ १०० ॥ मंडपस्योत्तरे देशे शय्यां निर्माय शोभनाम् ॥ राजतं
वारुणं तस्यां पादमात्रेण निर्मिताम् ॥ १०१ ॥ अंगुष्ठमात्रं संस्थाप्य ततः पुष्करिणीमपि ॥ स्वर्णपादेन घटितां चतुरस्त्रां सुशोभनाम् ॥ १०२ ॥
अंगुष्ठमात्रं सम्पूज्य वरुणाय निवेदयेत् ॥ यथाशक्ति ततो गां च संभवे पञ्चविंशतिः ॥ १०३ ॥ सुवर्णं राजतं चैव धान्यं वासो वराटकम् ॥
॥ १०४ ॥ नागयष्टिं समादाय किंचिदुत्तरगां तथा ॥ १०५ ॥ ततोक्षताय भौमाय कृत्वा चाज्याहुतित्रयम् ॥ लाजान्दधिसमायुक्तं घृतं मधु
गुडं तथा ॥ १०६ ॥ क्षीरं च पिष्टकं चैव शष्कुलीगन्धपुष्पकम् ॥ पंचामृतं पञ्चरत्नं गर्भे दद्यात्समाहितः ॥ १०७ ॥ आचार्यो यजमानेन सुस
न्नद्धैश्च भृत्यकैः ॥ गंगाजलेशयोर्मध्ये पंचघोषपुरःसरम् ॥ १०८ ॥ अवाप्य च ततो यष्टिं स्थिरो भवति वैरिवा ॥ ध्रुवं ध्रुवेति मंत्रेण यष्टिमा
मंत्रयेत्ततः ॥ १०९ ॥ यज्ञप्रियासि देवि त्वं सर्वविघ्नविनाशिनी ॥ पाहि मां सर्वपापेभ्य आत्मना त्वं स्थिरीभव ॥ ११० ॥ इत्यामंत्र्य यजेच्चैव
गायत्रीं च पठेत्ततः ॥ वनस्पतेति विडवामिति मंत्रं जपेत्पुनः ॥ १११ ॥ पुनरागत्य तां वेदिं निर्मथ्य वरुणं प्रभुम् ॥ तथा पुष्करिणीं चैव
वर्धनीं कलशोदरैः ॥ ११२ ॥ अनिष्टं मार्जयेन्नागातुद्धृत्य कलशं तथा ॥ पाषाणाभ्यंतरं कृत्वा गोमयैः परिलिप्य च ॥ ११३ ॥ वरुणं पुष्क
रिण्यां च जलमध्ये विनिक्षिपेत् ॥ नमोस्त्विवति च मन्त्रेण बलिं दद्याच्च पायसम् ॥ ११४ ॥ निर्मन्थेत्तत्र यो नागः स्थापयेत्तु यथाविधि ॥

श्रावयेत्तमिमं मंत्रमत्र संनिहितो भव ॥ ११५ ॥ अत्र स्वामी भवान्नाग रक्षणीयस्त्वया जनः ॥ गायत्रेण त्वा छंदसामीमन्त्रं संश्रावयेत्पुनः ॥
॥ ११६ ॥ संपूज्य गंधपुष्पाद्यैः पुरतो निक्षिपेद्दिशि ॥ पिधाय नागराजानमृचाभ्यां परिसूत्रकैः ॥ ११७ ॥ सन्निरुद्धयाशु संस्थाप्य बलिं दद्या
द्विधानतः ॥ लाजौदनं मनस्तस्य यज्जाग्रत ऋचा जपेत् ॥ ११८ ॥ एवं भूरिति मंत्रैः स्वैःस्वैरेव तु पृथग्विधैः ॥ स्वासु दिक्षु च संस्थाप्य पूज
येच्च प्रयत्नतः ॥ ११९ ॥ पूर्वभागे पुष्करिण्यां हरिताभं सवज्रकम् ॥ हलग्रहीत मंत्रेण न्यस्य लाजाहुतिं कुले ॥ १२० ॥ त्रातारमिति मंत्रेण
अग्नौ विन्यस्य मौक्तिकम् ॥ मनःशिलां प्रवालं च अग्निमीडेति संपठेत् ॥१२१॥ वैश्वानरेण मन्त्रेण पठल्लाँजाहुतिं पुनः ॥ दद्याद्वे ते शतमन्त्रेण
पश्चिमे काटिकं न्यसेत् ॥१२२॥ शालिबीजेन सहितं कया न इति मंत्रकम् ॥ वरुणस्यो इति मंत्रेण दद्यादष्टादशाहुतीः ॥१२३॥ उत्तरे रोचनां
कन्यां तथैव गौरसर्षपम् ॥ कुंकुमेन समायुक्तं कुविदंडमृचा पठन् ॥ १२४ ॥ विन्यस्य तेन मंत्रेण प्रदद्यादाहुतिं पुनः ॥ ऐशान्यां मंद्रकं रंगमी
शावा इति संपठन् ॥ १२५ ॥ संस्थाप्याज्याहुतिं दद्यात्तमीशान ऋचा पुनः॥आसद्यैर्मंत्रसंयुक्तैर्देवं नारायणं यजेत् ॥ १२६ ॥ वरुणात्मकं ततो
ध्यात्वा ततो नीराजनं पठेत् ॥ जानुभ्यामवनिं गत्वा पठेज्ज्ञानामृतं स्तवम् ॥ १२७ ॥ धर्मो वंशं ततः कुर्यादुत्सर्गांते विधीयते ॥ ततो देवीं
पुनः कृत्वा दत्त्वा पुष्पाञ्जलित्रयम् ॥ १२८ ॥ सर्वसत्त्वोपकाराय समुत्सृजेत्तु वै जनम् ॥ उत्सृष्टं सर्वसत्त्वेभ्यो दृश्यते जलमूर्जितम् ॥ १२९ ॥
रमंतीं सर्वभूतानि स्नानपानावगाहनैः ॥ वरुणं च ततो देवं पुष्करिण्यां च निक्षिपेत् ॥ १३० ॥ जले वरुणमन्त्रेण मत्स्यादीन्प्रक्षिपेत्ततः ॥
पक्षिणश्च शुभांस्तत्र भेकं कूर्मं च कर्दमम् ॥१३१॥ शैवालं प्रक्षिपेच्चैव दक्षिणां तदनंतरम् ॥ सुवर्णं धान्यरत्नं च आचार्याय पृथग्ददेत्॥१३२॥
ऋत्विग्भ्यश्च पृथग्दद्याद्यथावित्तानुसारतः ॥ ब्राह्मणेभ्यो गायनेभ्यो वसुभ्यश्च पृथक्पृथक् ॥ १३३ ॥ नित्यं समाप्य विधिवद्दद्यात्पूर्णाहुतिं पुनः ॥
दद्यादर्घ्यं च सूर्याय हस्तास इति संजपन् ॥ १३४ ॥ ततः प्रदक्षिणावर्तं संवेष्टय क्षीरधारया ॥ प्रासादपक्षे प्रासादमारामे अथ मंडपम् ॥१३५॥
शताधिधारया शक्त्या त्रिवारं ब्राह्मणैः सह ॥ विकीर्य लाजकुसुमं व्रीहींश्चैव कपर्दकान् ॥ १३६ ॥ तूर्यघोषेण महता ततो विप्रपुरःसरम् ॥ यज
मानः सपत्नीकः प्रविशेत्स्वगृहं पुनः ॥ १३७ ॥ ततो गृहार्चनं कृत्वा ब्राह्मणानथ भोजयेत् ॥ कुमारीश्च कुमारांश्च दीनान्धकृपणानपि ॥१३८॥
नारायणं ततो दद्याद्विप्रमुद्दिश्य भक्तितः ॥ १३९ ॥ ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि द्वितीयभाग एकविंशोऽध्यायः॥ २१ ॥ छ॥
इति मध्यपर्वणि द्वितीयभागः समाप्तः ॥ २ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ ॥ सूत उवाच ॥ ॥ आरामादौ विशेषो यो वक्ष्यतेऽत्र मयाधुना ॥ मंडलं कारयित्वा तु चतुरस्रं समं शुभम् ॥१॥ ऐशान्यां कलशे देवं तत्र नाथं
प्रपूजयेत् ॥ मध्यमे कलशे पूजा ग्रहाणां च ततः परम् ॥ २ ॥ स्वदिक्षु द्वारदेशे तु पश्चिमद्वारदेशेशयोः ॥ ब्रह्माणं चाप्यनन्तं च मध्यतो वरुणं
यजेत् ॥३॥ वरुणं चोदकुम्भस्थं भूतशाखासु शोभनम् ॥ तेन चावाहयामि त्वां विभो स्वर्गाय वै भव ॥४॥ पूर्वगं मन्दरं स्थाप्य तोरणोपरि सत्त
माः ॥ विष्वक्सेनं समभ्यर्च्य अर्चनं स्वर्गसंयुतम् ॥५॥ कर्णिकायां वासुदेवं शुद्धस्फटिकसन्निभम् ॥ चतुर्भुजं शङ्खचक्रगदापद्मविभूषितम् ॥ ६ ॥
श्रीवत्सकौस्तुभोरस्कं मुकुटाद्यैरलंकृतम् ॥ दक्षिणे कमला तस्य वामे पुष्टिव्यवस्थितिः ॥ ७ ॥ सिद्धकिन्नरयक्षाद्यैः स्तूयमानं सुरासुरैः ॥ संपूज्य
विधिवद्भक्त्या विष्णोरराट इत्यृचा ॥ ८ ॥ दले संकर्षणादींश्च विमलाद्याश्च नायिकाः ॥ संपूज्य धूपदीपाद्यैरुपहारैरनुत्तमैः ॥ ९ ॥ घृतप्रदीपो
देवस्य गुग्गुलुः सरलस्तथा ॥ धूपो देवबलिः क्षीरं परमान्नं घृतप्लुतम् ॥ १० ॥ ध्यायेत्सोमं कर्णिकायां दक्षिणे पद्मसंस्थितम् ॥ शुक्लाभं द्विभुजं
शान्तं केयूराद्युपशोभितम् ॥ ११ ॥ प्रशस्यं देवयक्षाणां वरदाभयहस्तकम् ॥ इमं देवा इति ऋचा उपचारैः पृथग्विधैः ॥ १२ ॥ पूजयेच्च निशा
नाथं घृतभक्तं निवेदयेत् ॥ इन्द्रं जयन्तमाकाशं वरुणं चाग्निमेव च ॥ १३ ॥ ईशानं तत्पुरुषं चैव वायुं पूर्वादिदिक्ष्वपि ॥ कर्णिकाया वामभागे
वरदाभयहस्तकम् ॥१४॥ द्विभुजं शुक्लवर्णं च महादेवं प्रपूजयेत् ॥ त्र्यंबकेण च मंत्रेण दद्याच्च घृतपिष्टकम् ॥ १५ ॥ वासुदेवाय देवाय जुहुयादष्ट
आहुतीः ॥ परमान्नेन सौम्यस्य जुहुयादष्टविंशतिम् ॥ १६ ॥ शिवाय परमान्नेन जुहुयादाहुतिद्वयम् ॥ गणेशस्य तथाज्येन ददेदेकाहुतिं बुधः ॥
॥ १७ ॥ ब्रह्मणो वरुणस्याथ एकैकामाहुतिं तथा ॥ ग्रहाणां स्वोक्तसमिधा दिगीशानां पृथक्पृथक् ॥ १८ ॥ एकैकामाहुतिं दद्यादाज्येन च
यथाक्रमम् ॥ कराली धूमली श्वेता लोहिता कनकप्रभा ॥ १९ ॥ अतिरक्ता पद्मरागा वह्निजिह्वा प्रकीर्तिताः ॥ तासां मंत्राः क्रमेणैव सादिवासांत
बिन्दवः ॥ २० ॥ यकारस्थाश्च विज्ञेया अष्टस्वरविभूषिताः ॥ घृतमध्वाज्यसिक्ताभिर्होमयेच्च पृथक्पृथक् ॥ २१ ॥ एकैकामाहुतिं दद्याद्दत्त्वा चैव
समाहितः ॥ अग्नीषोमं तथेन्द्रं च पृथिवीमन्तरिक्षकम् ॥ २२ ॥ स्थालीपाकेन जुहुयान्मधुक्षीरयवान्वितम् ॥ एकैकामाहुतिं तेषां समुद्दिश्य
पृथक्पृथक् ॥ २३ ॥ यावकैर्गंधपुष्पाद्यैरर्चित्वा सपरावकम् ॥ जपस्व त्वं महाभाग श्रद्धया चैव वाग्यतः ॥ २४ ॥ जापको विधिनानेन प्रज
पेत्तत्र रुद्रकम् ॥ मङ्गलं परमान्नं च सौरसूक्तं तथा जपेत् ॥ २५ ॥ ततः संमृज्य विधिना स्नापयित्वा यथाविधि ॥ यूपं गर्भे विनिक्षिप्य तत्र
कुर्याद्विचक्षणः ॥२६॥ ध्वजानारोप्य प्रांतेषु दद्यात्सोमं वनस्पतिम् ॥ कोऽदादिति पठित्वा च वृक्षाणां कर्णवेधनम् ॥२७॥ सूच्या सुतीक्ष्णया कार्यं

द्विपात्रे वामदक्षिणे ॥ नवग्रहाणां तृप्त्यर्थं यावकं लड्डुकं तथा ॥ २८ ॥ पिष्टकं च पृथग्दद्यात्कुमारीबालकेषु च ॥ निशा[1]रंजितसूत्रेण संवेष्ट्य
च सचूर्णकम् ॥ २९ ॥ प्रदद्याद्दोहकं चैव वृक्षाणां विधिपूर्वकम् ॥ प्राशयेच्चैव तान्वृक्षानिमं मन्त्रमुदाहरेत् ॥ ३० ॥ वृक्षाग्रात्पतितस्यापि आरोहा
त्पतितस्य च॥मरणे वास्थिभङ्गे वा कर्ता पापैर्न लिप्यते ॥३१॥ धेनुं सुवर्णं धान्यं च आचार्याय प्रदक्षिणम्॥दत्त्वा च ऋत्विजे दद्यात्सुवर्णं रजतं
तथा ॥ ३२ ॥ धान्यं च ब्रह्मणे दद्याद्घृतभोज्यं सशर्करम् ॥ इष्टां च दक्षिणां दद्यात्सदस्याय तथैव च ॥ ३३ ॥ अधिकलशं समानीय स्नानं कुर्या
द्विधानतः ॥ कृत्वा चैवानिशं कुर्याद्दद्यात्पूर्णाहुतिं तथा ॥३४॥ सर्वौषध्युदकं प्रोक्ष्य त्रिवारं क्षीरधारया ॥ संवेष्ट्य त्रिश्चतुर्वारं ब्रह्मघोषपुरःसरम् ॥
॥ ३५ ॥ गृहं व्रजेत्ततो विप्रैः कुर्याच्चैव गृहार्चनम् ॥ तंतौ विशेषं वक्ष्यामि वरा एवेदमित्यृचा ॥ ३६ ॥ बलं कामं हयग्रीवं माधवं पुरुषोत्तमम् ॥
वासुदेवं धनाध्यक्षं ततोनारायणं यजेत्॥३७॥ दधिभक्तं बलिं दद्यात्पञ्चगव्यसमुद्भवम्॥ एवं संपूज्य विधिना दक्षिणे पृथिवीं यजेत्॥३८॥शुद्धकां
ञ्चनवर्णाभां वराभयकरां शुभाम् ॥ मंडूकस्थां च द्विभुजां सर्वालङ्कारसुन्दरीम् ॥३९॥ स्योना पृथिवीति मन्त्रेण पूजयित्वा यथाविधि ॥ पायसं
मधुसंयुक्तं बलिं दद्यात्सशर्करम् ॥ ४० ॥ वामतो विश्वकर्माणं शुद्धस्फटिकसंनिभम् ॥ शूलटंकधरं शांतं संयजेदुपचारकैः ॥ ४१ ॥ विश्वन्निति
ऋचा तं च बलिं च मधु पिष्टकम् ॥ दद्याज्जपेच्च कौष्माण्डं सूक्तं पौरुषमेव च ॥४२॥ मधुपायसयुक्तेन होमानष्टौ विधाय च॥एकैकं होमयेत्पश्चा
त्पृथिवीहोमकर्मणि ॥४३॥ समुत्सृज्य ततः सेतुमिमं मन्त्रं पठेत्ततः ॥ पिच्छिले पतितानां च उच्छ्रूतेनांगसंगतः ॥ ४४ ॥ प्रतिष्ठिते धर्मसेतौ
धर्मो मे स्यान्न पातकम् ॥ सेतोरस्य प्रबन्धस्य श्रद्धया परया तथा ॥ ४५ ॥ ये चात्र प्राणिनः संति रक्षां कुर्वंति सेतवः ॥ वेदागमेन यत्पुण्यं
यथैव हि समर्पितम् ॥ ४६ ॥ गर्तं कृत्वा पञ्चरत्नं संस्थाप्यं तदनन्तरम् ॥ संस्थाप्य च ततो यूपं संपूज्य च यथाविधि ॥ ४७ ॥ आचार्याय
ततो दद्यादिष्टां च वरदक्षिणाम् ॥ पूजयेद्द्विजदांपत्यं लाजाभिः परिपूजितम् ॥ ४८ ॥ पोटिकां च ततः शय्यां दद्यादिष्टार्थसिद्धये ॥ सेतौ वृक्ष
स्थिता ये स्यू रोपयेत्कदलीं शुभाम् ॥ ४९ ॥ तेषां पार्श्वद्वयेप्येवमारामे च पृथक्पृथक् ॥ ५० ॥ ॥ इति श्रीभविष्ये महापुराणे मध्य
मपर्वणि तृतीयभागे प्रथमोऽध्यायः ॥ १ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ गोप्रचारं पुनर्वक्ष्ये विशेषं तत्र मे शृणु ॥ यजेद्विष्णुं सल
क्ष्मीकमुपचारैः पृथग्विधैः ॥ १ ॥ उपचारैश्च ब्रह्माणं रुद्रं चैव करालिकाम् ॥ वराहं सोमसूर्यें च महादेवं यथाक्रमम् ॥ २ ॥ होमं चैव:यथा

---

[1] हारिद्रसूत्रेण ।

विष्णोः कमलायास्त्रयंत्रयम् ॥ आज्येन क्षेत्रपालानामन्येषां मधुमिश्रितैः ॥ ३ ॥ एकैकामाहुतिं दद्याल्लाजादिषु पृथक्पृथक् ॥ समुत्सृज्य विधा
नेन यूपं संस्थाप्य पूजयेत् ॥ ४ ॥ त्रिहस्तमात्रं रचितं कुर्यान्नागफणान्वितम् ॥ रोपयेदेकहस्तेन गर्भे होमं प्रयोजयेत् ॥५॥ लाजासंयुक्तविधिना
विश्वेषामिति सञ्जपन् ॥ नागाधिपतये तद्वदच्युताय तृतीयकम् ॥ ६ ॥ भौमायेति चतुर्थं च ततो यूपं निवेदयेत् ॥ मयि गृभ्णामीति सम्पूज्य
यूयं च रुद्रदैवतम् ॥ ७ ॥ संपूज्य रुद्रं पञ्चांगं धान्यं वस्त्रं च दक्षिणाम् ॥ आचार्याय तथा होत्रे अन्येषामिष्टदक्षिणाम् ॥ ८ ॥ गोप्रचारे च
शैलेयं यूपं हस्तद्वयान्वितम् ॥ पञ्चशीर्षान्वितं कुर्याद्धस्तमात्रं प्ररोपयेत् ॥ ९ ॥ यूपं च चैत्रवृक्षं च कुण्डलीमठपीठिकाम् ॥ संस्पृश्याचम्य वै
विप्राः प्राणायामेन शुध्यति ॥ १० ॥ चतुर्हस्तप्रमाणेन शतकुण्डेन संमितम् ॥ तदर्धं च कनिष्ठेन अष्टकाष्टाधिकं भवेत् ॥ ११ ॥ भूमौ रत्नं
च संस्थाप्य इमं मन्त्रमुदाहरेत् ॥ शिवलोकस्तथा गावः सर्वदेवसुपूजिताः ॥ १२ ॥ गोभ्य एषा मया भूमिः सम्प्रदत्ता शुभार्थिना ॥ एवं निवेद
येद्यस्तु गोप्रचारं समाहितः ॥ १३ ॥ स मुक्तः सर्वपापेभ्यो विष्णुलोके महीयते ॥ यावंति तृणगुल्मानि संति भूमौ शुभानि च ॥ १४ ॥ ताव
द्वर्षसहस्राणि स्वर्गलोके महीयते ॥ पूर्वे सीमां निबध्नीयात्कृत्वा वृक्षस्य रोपणम् ॥ १५ ॥ सेतुं कृत्वा दक्षिणतः पश्चिमेंगाररोपणम् ॥ उत्तरे खान
येत्कूपं तस्य सीमां न लंघयेत्॥१६॥ ततः सहस्रधारां च शस्येन परिपूरिताम् ॥ प्रदद्याद्वा ततो विप्राः सर्वपापैः प्रमुच्यते ॥१७॥ नगरग्रामपूर्वे
वा उत्तरे पश्चिमेपि वा ॥ न कुर्यादग्निदिग्भागे दक्षिणां वा ततः शुभाम् ॥ १८ ॥ गोप्रचारं खनेद्यस्तु वाहयेद्वा कथंचन ॥ कुलानि पातयत्याशु
ब्रह्महत्याश्च विंदति ॥ १९ ॥ स्वर्गं नयति गोचर्म सम्यग्दत्तं सदक्षिणम् ॥ यावत्तृणानि तद्भूमौ सप्तसंख्यानि संख्यया ॥ २० ॥ तावत्कालं वसे
त्स्वर्गे विष्णुलोकान्न तच्च्युतिः ॥ २१ ॥ महायागावसाने च यो न तर्पयति द्विजान् ॥ निरर्थकं तस्य कर्म प्रयासफलमात्रकम् ॥ २२ ॥ वृषोत्स
र्गावसाने तु प्रदद्याद्यो महीं द्विजाः ॥ न याति विप्राः प्रेतत्वं तस्माद्विप्रादमत्सराः ॥ २३ ॥ तत्र मानं पृथक्चैव शृणुतात्र समागताः ॥ अमानेन
ददेद्यस्तु नरकं याति रौरवम् ॥ २४ ॥ गवां शतं वृषश्चैको यत्र तिष्ठत्ययंत्रितः ॥ तद्गोचर्मेति विख्यातं दत्तं सर्वाघनाशनम् ॥ २५ ॥ गोप्रचारस्य
देवस्य ब्राह्मणस्य च भो द्विजाः ॥ यावत्कालावधेः सीमा अतीते नास्ति पातकम् ॥ २६ ॥ मण्डपं पूजयेत्सूर्यं वासुदेवसमन्वितम् ॥ होमस्तिल
गुडाभ्यां च अष्टावष्टौ पृथक्पृथक् ॥ २७ ॥ देहि मेति च मन्त्रेण विन्यसेन्मंडपोपरि ॥ यत्नसिद्धं ततः कृत्वा शुक्लंःघटचतुष्टयम् ॥ २८ ॥ समु
त्सृजेज्जपेत्पश्चासौरं सूक्तं च वैष्णवम् ॥ वटपत्रे तु संलिख्य चित्रं निर्माय वा पुनः ॥ २९ ॥ दिक्पालान्संन्यसेत्स्वासुस्वासु दिक्षु विचक्षणः ॥

बद्धाञ्जलिः पठेन्मंत्रानिंद्रादीनां यथाक्रमम् ॥ ३० ॥ धर्मसंस्थापनार्थाय आत्मनो विभवाय च ॥ वज्रहस्तो महेन्द्र त्वं धर्मतस्त्रातुमर्हसि ॥३१॥
भो वह्ने मेषवाहस्त्वं चतुःशृंगविराजित ॥ अनाथं मण्डपं त्वं हि धर्मतस्त्रातुमर्हसि ॥ ३२ ॥ यम त्वं दक्षिणाशेश महामहिषवाहन ॥ अनाथं
मण्डपं त्वं हि धर्मतस्त्रातुमर्हसि ॥ ३३ ॥ मञ्चस्थो राक्षसेन्द्रस्त्वं खड्गपाणिर्महाबलः ॥ अनाथं मण्डपं त्वं हि धर्मतस्त्रातुमर्हसि ॥ ३४ ॥ वारि
राट् ध्वजहस्तोऽसि पवनो मृगवाहनः ॥ अनाथं मण्डपं त्वं हि धर्मतस्त्रातुमर्हसि ॥ ३५ ॥ धनाध्यक्षो गदाहस्तः पिंगाक्षो नरवाहनः ॥ अनाथं
मण्डपं त्वं हि धर्मतस्त्रातुमर्हसि ॥ ३६ ॥ आदिदेवोसि देवानां कर्ता हर्ता महेश्वरः ॥ अनाथं मण्डपं त्वं हि धर्मतस्त्रातुमर्हसि ॥ ३७ ॥ अनंतो
नागराजो यो धरामुद्धृत्य तिष्ठति ॥ अनाथं मण्डपं त्वं हि धर्मतस्त्रातुमर्हसि ॥ ३८ ॥ चतुर्णामेव वर्णानां स्थित्यर्थं मृगपक्षिणाम् ॥ प्रीतये
वासुदेवस्य एवं मण्डपमुत्सृजेत् ॥ ३९ ॥ भग्ने स्तम्भे तृणे जीर्णे पुनस्तृणप्रदापने ॥ स्थापने च तथैवास्य प्रतिष्ठा स्याद्यथाक्षया ॥ ४० ॥
घातापायादिदोषेण म्रियंते यदि जन्तवः ॥ प्रतिष्ठायां कृतायां तु धर्मो मे स्यान्न पातकम् ॥ ४१ ॥ मानुषाः पशवो ये च निव
सन्तीह मण्डपे ॥ स्वस्ति चास्तु सदा तेषां त्वत्प्रसादात्किल प्रभो ॥ ४२ ॥ ततस्त्रिगुणसूत्रेण सुत्रामाणेति वै ऋचा ॥ सप्तधा
वेष्टयित्वा तु दक्षिणां संप्रकाश्य च ॥ ४३ ॥ उपानहौ तथा छत्रमाचार्याय निवेदयेत् ॥ मण्डपे भोजयेद्विप्रांस्तेषां दद्याद्यथेप्सितान् ॥
॥ ४४ ॥ दीनेभ्यश्च पृथग्दद्याद्गृहं विप्रपुरःसरम् ॥ प्रविशेत्तूर्यघोषेण प्रकुर्याच्च गृहार्चनम् ॥ ४५ ॥ एवं प्रपायां विज्ञेयो विशेषो वरुणं
यजेत् ॥ वासुदेवेन सहितं सांगोपांगं सदक्षिणम् ॥ ४६ ॥ स्थालीपाकविधानेन प्रकुर्याद्देशिकोत्तमः ॥ आचार्याय गृहं दद्यात्पारि
च्छदसमन्वितम् ॥ ४७ ॥ ऋत्विजे ताम्रपात्रं च जलपूर्णं च धान्यकम् ॥ दिक्पालान्द्वारदेशे तु कूपयागे विशेषतः ॥ ४८ ॥ ब्रह्माणं नाग
राजानं द्वारपालौ च पश्चिमे ॥ यजेन्मन्त्रैः पृथग्देवान्मन्त्रैरेभिर्यथाक्रमम् ॥ ४९ ॥ बलिदानं विधानेन कृत्वा दद्याद्यथाविधि ॥ पताकानाम
तस्तत्त्वं प्रवक्ष्यामि यथाक्रमम् ॥ ५० ॥ वज्री च धूमली कृष्णा पीता चैवाथ वारुणी ॥ शीघ्रा गौरी उमा चैव पीता शुक्ला प्रकीर्तिता ॥५१॥
कुंभेषु पूजयेद्देवान्महेशं प्रथमं बुधः ॥ ग्रहांश्च मध्यकलशे ब्रह्माणं च ततः परम् ॥ ५२ ॥ वेदिकापूर्वभागे तु उत्तरे कलशे शिवम् ॥ दक्षिणे कलशे
विष्णुं कर्णिकायां जलेश्वरम् ॥ ५३ ॥ कलशे विधिवद्भक्त्या उपचारैः पृथग्विधैः ॥ संपूज्य वटपत्रे च नागान्संलिख्य नागजैः ॥ ५४ ॥
येनागास्तान्प्रक्ष्यामि अनंतो वासुकिस्तथा ॥ तथा कर्कोटकश्चैव पद्मश्च कुलिकस्तथा ॥ पद्मश्चैव महापद्मो मन्त्रैरेभिः पृथक्पृथक् ॥ ५५ ॥

पुंडरीकदलाभास शुभकर्णांतलोचन ॥ फणासहस्रसंयुक्त शंखाब्जकृतलोचन ॥ ५६ ॥ अनंत नागराजेन्द्र इहागच्छ नमोऽस्तु ते ॥ सित
कुंदेन्दुवर्णाभ विस्फुरद्भोगमंडल ॥ ५७ ॥ सर्वनागस्य शूरस्य कृतस्वस्तिकलांछन ॥ नागेन्द्र तक्षक श्रीमन्निहागच्छ नमोस्तु ते ॥ ५८ ॥
नवीनजलदश्याम श्रीमन्कमललोचन ॥ विषदर्पबलोन्मत्त ग्रीवायामेकशेखर ॥ ५९ ॥ शंखपाल इति ख्यात जलाधारप्रतीक्षक ॥ अध्यक्षे
नागलोकानामिहागच्छ नमोऽस्तु ते ॥ ६० ॥ अतिपीत सुवर्णाभ चन्द्रार्धांकितमस्तक ॥ दीप्तभोगकृताटोप शुभलक्षणलक्षित ॥ ६१ ॥
कुलीर नागराजेंद्र सर्वसत्त्वहिते रत ॥ तिष्ठेह यज्ञसिद्ध्यर्थं कामरूप नमोस्तु ते ॥ ६२॥ यः सुवर्णेन वर्णेन पद्मपत्रायतेक्षणः ॥ पंच बिंदुकृताभो
गो ग्रीवायामेकशेखरः ॥ तस्मै ते पद्मनागेन्द्र तीव्ररूप नमोऽस्तु ते ॥ ६३ ॥ नागिन्यो नागकन्याश्च तथा नागकुमारकाः ॥ सर्वे ते प्रीतमनसः
पूजां गृह्णंतु मे सदा ॥ ६४ ॥ स्वगृह्योक्तेन विधिना कृत्वाग्निस्थापनं बुधः ॥ आज्यं संस्कृत्य जुहुयाद्दिगीशानां यथाक्रमम् ॥ ६५ ॥ आदित्या
दिग्रहांश्चैव ब्रह्माणं कृष्णमेव च ॥ मधुपिष्टेन च शिवं वरुणं जुहुयात्ततः ॥ ६६ ॥ प्रादेशमात्रं संप्रोक्ष्य यूपं चास्य प्रमाणकम् ॥ चतुरस्रं शूलयुक्तं
गणानानीय पूजयेत् ॥ ६७ ॥ कूपे निक्षिप्य तान्नागान्पञ्चरत्नं क्षिपेत्ततः ॥ सुत्रामाणेति मंत्रेण त्रिधा संवेष्टय सूत्रकैः ॥ ६८ ॥ रञ्जितैः
कदलीवृक्षं वरुणाय समुत्सृजेत् ॥ त्रातारमिति मंत्रेण वस्त्रमाल्येन भूषयेत् ॥ कर्णवेधं ततः कृत्वा उत्सृजेद्वाक्यमुच्चरन् ॥ ६९ ॥ (ॐ अद्येत्यादि
सर्वभूतेभ्यः फलपुष्पपत्रच्छायावृतमुख्यनानातरुविरचितमारामं वनस्पतिदैवतं सुपूजितं वेदव्यासाद्युक्तफलावाप्तये अमुकऋषिसगोत्रः श्र्यमुकदेव
शर्माहमुत्सृजे ॥) महोत्सवं ततः कुर्यात्कृत्वा बद्धाञ्जलिः पठेत् ॥ वृक्षाग्रात्पतितस्यापि आरोहात्पतितस्य वा ॥ ७० ॥ मरणे चास्थिभंगे वा
कर्ता पापैर्न लिप्यते ॥ वज्राघातादिदोषेण म्रियंते तरवो यदा ॥ ७१ ॥ तद्दोशमनार्थाय तस्याप्येतत्प्रतिष्ठितम् ॥ मध्ये यूपं समारोप्य चतुष्को
णेपि यत्नतः ॥ ७२ ॥ मधुलाजाक्षतं दद्यादञ्जनं माल्यमेव च ॥ निशासूत्रेण संवेष्टय कदलीविटपं न्यसेत् ॥ ७३ ॥ वेष्टयेत्क्षीरधारां च पातये
द्घृतधारया ॥ तोयान्वितं गुच्छयुक्तं वेष्टयेत्स्वगृहं व्रजेत् ॥ ७४ ॥ ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे द्वितीयोऽध्यायः॥
॥ २ ॥ ॥ ७ ॥ ॥ सूत उवाच ॥ ॥ क्षुद्रारामप्रतिष्ठां च वक्ष्ये वै द्विजसत्तमाः ॥ अमंडले शुभे स्थाने द्विहस्तेऽप्यथ स्थंडिले ॥ १ ॥
स्थापयेत्कलशं तत्र विष्णुं सोमं समर्चयेत् ॥ आचार्यमात्रं वरयेन्निशासूत्रैः प्रवेष्टयेत् ॥ २ ॥ वृक्षान्माल्यैरलंकृत्य भूषयेद्भूषणादिना ॥ दोहदं च
ततो दद्यात्स्थापयेच्छतधारया ॥ ३ ॥ भोजयेत्पञ्च विप्रान्हि पुरतस्तं विशेषयेत् ॥ कर्णवेधं ततः कृत्वा उत्सृजेद्वाक्यपूर्वकम् ॥ ४ ॥ दद्ययूपं

मध्यदेशे रोपयेत्कदलीं ततः ॥ रंभाश्च रोपयेद्दिक्षु स्थालीपाकविधानतः ॥ ५ ॥ अष्टावष्टौ च जुहुयादन्येषां च घृतेन तु ॥ एकैकामाहुतिं दद्यात्स्विष्टकृत्तदनंतरम् ॥ ६ ॥ दक्षिणां च ततो दद्यात्पूर्णां दत्त्वाहुतिं व्रजेत् ॥७॥ एकादिवृक्षं वृक्षाणां विधिं वक्ष्ये द्विजोत्तमाः ॥ समुत्सृज्य ततो यूपं कर्मणा सह धर्मवित् ॥ ८ ॥ वृक्षमूले यजेद्धर्मं पृथिवीं च विशं तथा ॥ दिगीशांश्च तथा यक्षानाचार्यं तोषयेत्ततः ॥ ९ ॥ धेनुं च दक्षिणां दद्यादोहदं वृक्षपूजनम् ॥ कृत्वा सम्यग्विधानेन सवित्रेऽर्घ्यं निवेदयेत् ॥ १० ॥ ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे तृतीयोऽध्यायः ॥३॥ ॥छ॥ ॥ सूत उवाच ॥ ॥ अथाश्वत्थप्रतिष्ठायां मूले बाहुप्रमाणके ॥ स्थंडिलं कारयेत्तत्र चंदनेनोक्षितं तथा ॥१॥ पद्मं प्रकल्पयेत्तत्र सामान्यार्घ्यं विधाय च ॥ पूर्वेद्यू रात्रिसमये तद्विष्णोरिति वै ऋचा ॥२॥ स्थापयेद्वारिणा पूर्णं कया नेति च गन्धकम् ॥ गंधद्वारेति तैलेन श्रीश्चतेति च चन्दनम् ॥ ३ ॥ दद्याद्दूर्वाक्षतं कल्पे ब्राह्मणत्रयभोजनम् ॥ कारयेत्सितसूत्रैश्च वेष्टयेच्चन्दनोक्षितैः ॥४॥ कुंभे विनायकं पूज्य ब्रह्माणं च परे घटे ॥ स्वदिक्षु दिक्पतींश्चैव वृक्षमूले नवग्रहान् ॥५॥ मंडले शिवमभ्यर्च्य पीठपूजापुरःसरम् ॥ अथ ध्यानं प्रवक्ष्यामि श्वेतं वृषभमेव च ॥ ६ ॥ द्विभुजं शूलहस्तं च सर्वाभरणसंयुतम्॥आरोपयेत्स्वसामर्थ्याद्भूतशुद्धिं समाचरेत् ॥७॥ ततोर्घ्यपात्रं कृत्वा तु पीठपूजां समाचरेत्॥गणेशं गुरुपादं च जयं भद्रं समाहितः॥८॥मध्ये आधारशक्तिं च कूर्मानंतौ सपद्मकौ॥चन्द्रसूर्याग्निकादीनां मंडलानि क्रमाद्यजेत्॥९॥पुनः पात्रांतरस्थं च गृहीत्वा कुसुमं बुधः ॥ पाणिकच्छपिकां कृत्वा ध्यायेद्वै वरुणं तथा ॥१०॥पूर्ववच्च विधानेन दद्यात्पात्रादिकं त्रयम् ॥ मधुपर्कं चासनं च पृच्छेच्च स्वागतं पुनः ॥ ११ ॥ मुद्रां प्रदर्श्य विधिवदंगपूजां समाचरेत् ॥ पूर्वादिपत्रे इन्द्रादीन्ब्रह्माणं मध्यतो यजेत् ॥ १२ ॥ अनंतं पुरतश्चैव तेषामस्त्राणि तद्बहिः ॥ मध्ये तोयाधिपं रुद्रं शांतं चैव प्रशांतकम् ॥ १३ ॥ भूस्तत्त्वं च भुवस्तत्वं स्वस्तत्त्वादि च तत्त्वकम् ॥ कामं धर्ममधर्मं च दिक्षु नारायणं शिवम् ॥ १४ ॥ ॥ नैर्ऋते च यजेद्दुर्गां पार्श्वयोश्च शतक्रतुम् ॥ विनायकं च विष्णुं च गङ्गां पृथिविषष्टिकम् ॥ १५ ॥ षोडशेनोपचारेण पूजयेच्च विशेषतः ॥ मंडलस्योत्तरे भागे नागरूपमनंतकम् ॥ १६ ॥ पंचकृष्णालकैः कुर्याद्बृहत्पर्वप्रमाणकम् ॥ आरोपयेच्चाक्षताद्यैः श्वेतचन्दनपुष्पकैः ॥ १७ ॥ पूजयेत्परया भक्त्या अग्निकार्यमथाचरेत् ॥ वरुणं जुहुयात्पूर्वं मधुना पायसेन वा ॥ १८ ॥ तिलाक्षतैर्वा आज्यैर्वा त्रिमध्वक्तैरथापि वा ॥ अष्टोत्तरशतं कुर्याद्दिगीशानां घृतेन तु ॥१९॥ एकैकामाहुतिं दद्यात्पुष्पैस्तिलघृतेन च ॥ नारायणं शिवं दुर्गां गणेशं च ग्रहान्निशि॥ ॥ २० ॥ अष्टावष्टौ च जुहुयाद्धृतैरेकाहुतिर्भवेत ॥ ब्रह्मयुध्वानमितिमंत्रेण ब्रह्माणं पायसेन तु ॥२१॥ एकाहुतिं ततो दद्यादापोहिष्ठेति वा त्रिभिः ॥

ततो वरुणमुद्दिश्य दद्यादाज्याहुतित्रयम् ॥ २२ ॥ इमं वरुण इति वा तद्धरोमा ऋचा पुनः ॥ वरुणस्योत्तंभनमसीति येनापावक एव च ॥ २३ ॥
वातस्ययमिति पुनः पञ्चवर्णं यथाक्रमात् ॥ ततो वरुणमुद्दिश्य घृतेन च गुडैः सह ॥ २४ ॥ ततः स्विष्टकृते दद्याद्बलिं दद्यादनुक्रमात् ॥ मध्वा
ज्यपायसं दद्याद्वरुणाय विशेषतः ॥२५॥ यवक्षीरं दिगीशेभ्यो ह्यन्येभ्यः पायसेन तु ॥ नागाय पिष्टकं दद्याल्लाजाहोमाष्टकं पुनः॥ २६ ॥ अनंत
स्योत्तरे तीरे पद्मपत्रं परिस्तरेत् ॥ अष्टाष्टापदमानेन वरुणं राजतेन तु ॥ २७ ॥ कुर्यात्पूर्वद्वयेनापि बाणरत्तिसुवर्णकैः ॥ कुर्यात्पुष्करिणीं तत्र
पूर्वार्धे चतुरस्रके ॥ २८ ॥ वरुणं विन्यसेत्तत्र तथा पुष्करिणीमपि ॥ विधिवद्वाक्यपूर्वेण उत्सृजेच्च जलेशयम् ॥ २९ ॥ ॐ अद्येत्यादि विष्णुरू
पाय वरुणाय श्रुतिस्मृत्याद्युक्तवेदव्यासप्रणीताग्निष्टोमफलप्राप्तये पुष्कारिणीप्रतिष्ठाकर्मणि इमां पुष्करिणीं सुवर्णराजतां स्वगृह्योदितां सालंकारां
सुपूजिताममुकगोत्रः श्यमुकदेवशर्मा तुभ्यमहं संप्रददे ॥ इत्युत्सर्गवाक्यम् ॥ ॐ अद्येत्यादि ब्राह्मणमुख्येभ्यः ममाग्निष्टोमाद्यनेकफलप्राप्तये इमं
जलाशयं वरुणदैवतं सुपूजितं चतुर्मुखसहितं चतुःसत्त्वावच्छिन्नस्नानपानाद्युपभोगाय अमुकसगोत्रः श्यमुकदेवशर्माहमुत्सृजे ॥) ततो नौकां
समादाय मध्यात्किंचित्तथोत्तरे ॥ जलाशयस्य मध्यं तु ऋत्विग्घोमं चरेत्ततः ॥ ३० ॥ पूर्वावस्थायिनीं यष्टिं समारोप्य विधानतः ॥ ततो वरुण
सूक्तेन वरुणं राजतोद्भवम् ॥ पुष्करिण्या समं तेन नागयष्ट्यंतरे क्षिपेत् ॥ ३१ ॥ तत्रैवानंतनागं:च मंत्रमेतदुदीरयेत् ॥ पुंडरीकदलाभास शुभर
क्तांतलोचन ॥ फणासहस्रसंयुक्त सुप्रतिष्ठ नमोऽस्तु ते ॥ ३२ ॥ दक्षिणां च ततो दद्यात्ततः पूर्णां विधाय च ॥ मोचयेन्मकरान्ग्राहान्मीनकूर्मांश्ज
लेचरान् ॥ ३३ ॥ पद्मोत्पलं च शैवालं मंत्रमेव प्रयत्नतः ॥ पुष्करिण्यां च त्रिः कुर्यात्खातं सर्वप्रदक्षिणाम् ॥ ३४ ॥ आदित्याध्यायकं जप्त्वा
क्षिपेल्लाजकपर्दकान् ॥ पातयेत्क्षीरधारां च सहस्रेण शतेन च ॥ ३५ ॥ सूत्रेण वेष्टयेत्प्राज्ञो रक्तेन च चतुष्क्रमात् ॥ पथि संतोषयेद्दीनान्संतोष्य
च गृहं व्रजेत् ॥ ३६ ॥ ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे चतुर्थोऽध्यायः ॥ ४ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ नलि
न्याश्च तथा वाप्या ह्रदस्य द्विजसत्तमाः ॥ विधिं वक्ष्ये सहाङ्गेन विधानं शृणुत द्विजाः ॥ १ ॥ स्वर्णपादेन मानेन पूर्वेद्युरधिवास
येत् ॥ आपोहिष्ठेति मन्त्रेण तथा अब्जैः शतैरपि ॥ २ ॥ स्वमण्डले शुभे स्थाने विशेत्पूर्वमुखेन तु ॥ गणेशं वरुणं चैव घटे संपूजयेच्छि
वम् ॥ ३ ॥ वागीशं च तथा विष्णुं सूर्यें कुंभे समर्चयेत् ॥ पायसेनाहुतिं दद्याद्वरुणाय घृतेन च ॥ ४ ॥ एकैकामाहुतिं दद्यादन्येषां
च स्रुवेण च ॥ बलिदानं पायसेन उत्सृजेत्तदनंतरम् ॥ ५ ॥ यूपं निवेशयेत्पश्चाद्दद्याद्धेनुं च दक्षिणाम् ॥ पूर्णं दद्यात्सवित्रेऽर्घ्यं दत्त्वा तु

स्वगृहं व्रजेत् ॥ ६ ॥ आरामस्य विधिं वक्ष्ये प्रतिष्ठाविधिविस्तरम् ॥ हीनारामस्य च तथा एक वृक्षस्य च द्विजाः ॥ ७ ॥ अरण्यमध्ये पाश्चात्त्ये उत्तरे वा विशेषतः ॥ मंडपं वर्तुलं कुर्यादर्घ्यहस्तप्रमाणकम् ॥ ८ ॥ तद्दक्षिणे भवेत्कुंडं चतुरस्रं समं शुभम् ॥ चतुर्मुखं च कर्तव्यं तोरणाद्यैरलंकृतम् ॥ ९ ॥ मंदरादिकमावाह्य ततः संपूजयेत्क्रमात् ॥ विष्वक्सेनं च तत्रैव पूजयेद्गन्धचन्दनैः ॥ १० ॥ भृगुं कर्णसमारूढं सर्वभूषणभूषितम् ॥ विष्वक्सेनस्य मंत्रोयं पूजायां चैव सर्वतः ॥ ११ ॥ द्वारपालं च संपूर्णं गौर्यादीन्कलशेषु च ॥ स्वासु दिक्षु दिगीशानां बलिपुष्पाक्षतादिना ॥ १२ ॥ नैर्ऋत्यवरुणयोर्मध्ये अनंतं प्रतिपूजयेत् ॥ इन्द्रेशानयोश्च मध्ये ब्रह्माणं च प्रकल्पयेत् ॥ १३ ॥ वेदिपार्श्वे ततो गत्वा वेदिमावाह्य पूजयेत् ॥ आसनं कल्पयित्वा तु सामान्यार्घ्यं विधाय च ॥ १४ ॥ ऐशाने कलशे विद्युद्ब्रह्माणं च तथा ग्रहान् ॥ स्वैःस्वैर्मंत्रैर्गंधपुष्पैर्नैवेद्यैश्च पृथग्विधैः ॥ १५ ॥ मंडलेशं वासुदेवं सासनं च बृहस्पतिम् ॥ पूजयेत्परया भक्त्या पायसान्नं बलिं हरेत् ॥ १६ ॥ द्विभुजं वासुदेवं च शंखचक्रधरं विभुम् ॥ पद्मासनगतं ध्यायेत्पीतवस्त्रं सुशोभनम् ॥ १७ ॥ नीलोत्पलदलाभासं हरिचंदनचर्चितम् ॥ देवर्षिसिद्धसहितं कलत्रद्वयसंयुतम् ॥ १८ ॥ ध्यात्वा आरोपयेदेवं बालादीनथ नायकान् ॥ विमलाद्या नायिकाश्च दिगीशांश्च यथाविधि ॥ १९ ॥ षोडशोच्चैः पृथग्रूपैः प्रतिपुष्पांजलिक्रमात् ॥ परितः पूजयेद्विष्णुं शिवं दुर्गां सरस्वतीम् ॥ २० ॥ शुद्धस्फटिकसंकाशं ध्यायेत्सोमं चतुर्मुखम् ॥ अश्वारूढं दिव्यरूपं पद्माक्षं धृतपुष्पकम् ॥ २१ ॥ वरदं देवगंधर्वैः सेवितं मुनिभिः स्तुतम् ॥ श्वेतं वनस्पतिं ध्यायेद्द्विभुजं पीतवाससम् ॥ २२ ॥ स्वरथस्थं महाबाहुं शंखांकुशसखेटकम् ॥ विद्यां च वामतो ध्यायेत्स्वमन्त्रेण च स्थापयेत् ॥ २३ ॥ दशस्वरान्वितं तोयं स्वभावं तमसान्वितम् ॥ मंत्रोऽयं देवदेवस्य पूजायां विनियोजयेत् ॥२४॥ नीलं जयं भृंगिणं च परितश्च यथाक्रमात् ॥ ततः कुशकंडिकां कृत्वा स्थालीपाकं विधानतः॥ ॥ २५ ॥ अष्टोत्तरशतं चैव सोमाय द्वादशाहुतीः ॥ वानस्पतेस्तथाष्टौ च आज्येन्येषां विधीयताम् ॥ २६ ॥ एकैकामाहुतिं दद्यात्सप्तजिह्वामनंतरम् ॥ वास्तोष्पतय इति मंत्रेण स्थालीपाकद्वयं नयेत् ॥ २७ ॥ वनस्पतिं समुद्दिश्य ततोयमीरयेदृचम् ॥ वृक्षादीन्स्थापयेत्पूर्वे गायत्र्या प्रथमं बुधः ॥ २८ ॥ अब्जैरग्रं कांस्यवस्त्रं रत्नं दिक्षु यथाक्रमम् ॥ व्रीहयश्चेति मंत्रेण तथा च सारितश्च मे ॥ २९ ॥ मित्रत्रयश्चेति तथा पूषा च म ऋचा तथा ॥ संस्थाप्य व्रीहीन्संवाप्य तत्रैव विधिपूर्वकम् ॥ ३० ॥ क्षिपेद्गङ्गाजलं तोये सर्वौषध्युदकेन च ॥ संस्थाप्य यजमानं च सुरास्त्वामिति मन्त्रकैः ॥ ३१ ॥ आचार्यमात्मने तत्र संस्थितं द्विजपुंगवैः ॥ समाप्य नित्यविधिनाचार्यायाथ च दक्षिणाम् ॥ ३२ ॥ धेनुं च लोह

पात्रं च दत्त्वा इष्टां च दक्षिणाम् ॥ ब्राह्मणेभ्यो यथाशक्ति दद्यात्पूर्णां गृहं व्रजेत् ॥ ३३ ॥ ॥ ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि
तृतीयभागे पंचमोऽध्यायः ॥ ५ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ क्षुद्रारामप्रतिष्ठां च वक्ष्ये च द्विजसत्तम ॥ अमंडले शुभे स्थाने द्विहस्तम
यस्थंडिले ॥ १ ॥ स्थापयेत्कलशं तत्र सोमं विष्णुं समर्चयेत् ॥ आचार्यमात्रं वरयेन्निशासूत्रैः प्रवेष्टयेत् ॥ २ ॥ वृक्षान्माल्यैरलंकृत्य भूषयेद्भूषणा
दिना ॥ दोहदं च ततो दद्यात्स्थापयेच्छितधारया ॥ ३ ॥ भोजयेत्पंच विप्रांश्च पुरतोंऽते विशेषतः ॥ कर्णवेधं ततः कृत्वा उत्सृजेद्वाक्यपूर्वकम्॥
॥ ४ ॥ दद्याद्यूपं मध्यदेशे रोपयेत्कदलीं ततः ॥ रंभां च रोपयेद्दिक्षु स्थालीपाकविधानतः ॥ ५ ॥ अष्टावष्टौ च जुहुयादन्येषां च घृतेन तु ॥
एकैकामाहुतिं दद्यात्स्विष्टकृत्तदनंतरम् ॥ ६ ॥ दक्षिणां च ततो दद्यात्पूर्णां दद्याद्गृहं व्रजेत ॥ ७ ॥ ॥ इति श्रीभविष्ये महापुराणे मध्यमप
र्वणि तृतीयभागेषष्ठोऽध्यायः ॥ ६ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ एकादिवरवृक्षाणां विधिं वक्ष्ये द्विजोत्तमाः ॥ वृक्षस्य पश्चिमे भागे
स्थापयेत्कलशं ततः ॥ १ ॥ वृक्षं संस्थापयेत्पूर्वं सूत्रेण परिवेष्टयेत् ॥ ब्रह्माणं कलशेभ्यश्च सोमं विष्णुं वनस्पतिम् ॥ २ ॥ ततस्तिलयवैर्होमान
ष्टाष्टौ विधिवच्चरेत् ॥ समुत्सृज्य ततो यूपं कदल्या सह धर्मवित् ॥ ३ ॥ वृक्षमूले यजेद्धर्मं पृथिवीं च विशं तथा ॥ दिगीशांश्च तथा यक्षान्नाचार्यं
तोषयेत्ततः ॥ ४ ॥ धेनुं च दक्षिणां दद्याद्दोहदं वृक्षपूजनम् ॥ कृत्वा सम्यग्विधानेन सवित्रेऽर्घ्यं निवेदयेत् ॥ ५ ॥ इति श्रीभविष्ये महापुराणे
मध्यमपर्वणि तृतीयभागे सप्तमोऽध्यायः ॥ ७ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ अथाश्वत्थप्रतिष्ठायां मूले बाहुप्रमाणकम् ॥ स्थंडिलं कारयेत्तत्र
चंदनेनाङ्कितं यथा ॥ १ ॥ पद्मं प्रकल्पयेत्तत्र सामान्यार्घ्यं विधाय च ॥ पूर्वेद्यू रात्रिसमये तद्विष्णोरिति वै ऋचा ॥ २ ॥ स्थापयेद्वारिणा पूर्णं
कया नेति च गंधकम् ॥ गंधद्वारेति तैलेन श्रीश्च तेति च चंदनम् ॥ ३ ॥ दद्याद्दूर्वाक्षतं कल्ये ब्राह्मणत्रयभोजनम् ॥ कारयेत्सितसूत्रैश्च वेष्टयेच्चं
दनस्य च ॥ ४ ॥ कुम्भे विनायकं पूज्य ब्रह्माणं च परे घटे ॥ स्वदिक्षु दिक्पतींश्चापि वृक्षमूले नवग्रहान् ॥ ५ ॥ मंडले शिवमभ्यर्च्य पीठपूजा
पुरःसरम् ॥ पूर्वे चंडं प्रचंडं च दक्षिणे नंदिभृंगिणौ ॥६॥ अनंतं पश्चिमे काममुत्तरे गणनायकम् ॥ कार्तिकेयं मध्यदेश आधारशक्तिपूर्वकम्॥७॥
अनंतं पृथिवीं चैव त्रिवृत्तं च त्रिमंडलम् ॥ अथ ध्यानं प्रवक्ष्यामि श्वेतं वृषभमेव च ॥ ८ ॥ द्विभुजं शूलहस्तं च सर्वाभरणसंयुतम् ॥ अरोपयेत्स्वतंत्रेण
मूले विष्णुं समर्चयेत् ॥ ९ ॥ शंकरं च तथा मध्ये अग्रे ब्रह्माणकं यजेत् ॥ बलिं च पिष्टकान्नं च दत्त्वा च श्रपयेच्चरुम् ॥ १० ॥ जुहुयाद्रुद्रमुद्दिश्य रुद्रसंख्याहु
तिं क्रमात् ॥ अन्येषां च स्रुवेणैव होमं दद्यात्प्रयत्नतः ॥ ११ ॥ रोपयेत्कदलीवृक्षमाचार्यं परितोषयेत् ॥ कृत्वा पूर्णां पंचधारां कृत्वा चापि प्रद

क्षिणाम् ॥ १२ ॥ क्षीरधारां च संपाद्य अर्घ्यं दत्त्वा गृहं व्रजेत् ॥ १३ ॥ ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागेऽष्टमोऽध्यायः ॥
॥ ८ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ वटस्थानमथो वक्ष्ये तस्य मूले तु दक्षिणे ॥ त्रिहस्तवेदिमुपरि स्थापयेत्कलशत्रयम् ॥ १ ॥ गणेशं च
शिवं विष्णुं पूजयित्वा हुनेच्चरुम् ॥ रक्तसूत्रैस्त्रिगुणितैः स्वर्णमेव पुरःसरम् ॥ २ ॥ यवक्षीरबलिं दद्यादुत्सृजेद्वाक्यमुच्चरन् ॥ यूपमारोपयेत्पश्चाद्वट
मूलैः समर्पयेत् ॥ ३ ॥ यक्षान्नागांश्च गंधर्वान्सिद्धांश्चैव मरुद्गणान् ॥ ४ ॥ ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे नवमोऽ
ध्यायः ॥ ९ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ वक्ष्ये बिल्वप्रतिष्ठां च पूर्वेद्युरधिवासयेत् ॥ त्र्यंबकं चेति मंत्रेण स्थापयेद्गंधवारिणा ॥ १ ॥
सुनाभेति च मंत्रेण मे गृह्णामीति चाक्षतम् ॥ कयानेति ततो धूपं वस्त्रं माल्यं निवेदयेत् ॥ २ ॥ यजेद्रुद्रं ततो देवं मध्ये दुर्गां धनेश्वरम् ॥ ततः
कल्ये समुत्थाय नित्यं निर्वर्त्य शास्त्रतः ॥ ३ ॥ स्वगृहे सप्त विप्रांश्च भोजयेद्द्विजदंपती ॥ मूले हस्तद्वयं दत्त्वा वर्तुला वेदिका भवेत् ॥
॥ ४ ॥ तत्र गैरिकयुक्तेन कुसुंभचूर्णके न वा ॥ निशारक्तेन वा कुर्यादष्टपत्रं सुशोभनम् ॥ ५ ॥ निवेष्टनं ततः कुर्याद्वृक्षस्य द्विजसत्तमाः ॥ रक्त
सूत्रैर्वेष्टयेच्च पंचसप्तनवभिस्तु ॥ ६ ॥ व्रीहींश्च वापयेत्तत्र उत्तराभिमुखस्तथा ॥ शिवं विष्णुं च ब्रह्माणं पूजयेद्भूतिमिच्छता ॥ ७ ॥ शिवं च नायकं
कुर्यादादित्यान्पत्रमूलके ॥ शेषं च तरुमूले तु मध्येऽनंतं शतक्रतुम् ॥ ८ ॥ वनपालं च सोमं च सूर्यं पृथ्वीमनुक्रमात् ॥ होमस्तिलाक्षतैः कार्यो
बलिं दद्याद्घृतौदनैः ॥ ९ ॥ यक्षेभ्यो माषभक्तं च वायनानि च द्वादश ॥ ग्रहाणां प्रीतये दद्यात्क्षीरेणावेष्टय दक्षिणाम् ॥ १० ॥ कांचनं कांस्य
पात्रं च तांबूलं ताम्रपात्रकम् ॥ यूपारोपं कर्णवेधं सवित्रेऽर्घ्यं निवेदयेत् ॥ ११ ॥ अथ रात्रिप्रतिष्ठां च वक्ष्ये शास्त्रानुसारतः ॥ यक्षैकवृक्षसंस्कारे
न पुनर्जायते भुवि ॥ १२ ॥ पूर्वेद्युरुपवाहे तु वृक्षमूले घटं न्यसेत् ॥ विष्णुं शिवं गणेशं च पूजयित्वा तु स्थापयेत् ॥ १३ ॥ कलशान्पञ्च वा
सप्त गंधतैलैरलंकृतान् ॥ दुग्धेन पंचगव्येन शंखतोयेन यत्नतः ॥१४॥ सूत्रैः संवेष्टनं कृत्वा वस्त्रमाल्यैरनंतरम् ॥ कांडादिति च मंत्रेण दद्याद्दूर्वा
क्षतं ततः ॥ १५ ॥ विष्णुसूक्तेन च पुनः सिंदूरांजनचंदनम् ॥ दद्यात्फलं च दीपं च स्वयं तत्र स्वपेत्ततः ॥ १६ ॥ ततः प्रभाते विमले ब्राह्मणा
न्सप्त भोजयेत् ॥ पूर्ववत्कलशं कृत्वा शिवं विष्णुं गणाधिपम् ॥ १७ ॥ सोमं वनस्पतिं चैव एककुम्भे समर्च्चयेत् ॥ हुनेत्पंचाहुतीस्तत्र यूपं
दद्यात्समुत्सृजेत् ॥ १८ ॥ बलिं च पायसेनैव प्रकुर्यात्कर्णवेधनम् ॥ वेष्टयेत्क्षीरतोयेन धान्यं धेनुं च दक्षिणाम् ॥१९॥ दद्यादर्घ्यं हुनेत्पूर्णं भोजये
द्द्विजदंपती ॥ २० ॥ ॥ इतिश्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे दशमोऽध्यायः ॥ १० ॥ छ ॥ ॥ सूत उवाच ॥ ॥ शत

हस्तमितां मुष्टिं नानातरुविभूषिताम् ॥ पूगाम्रादिफलैर्युक्तं वास्तुं कृत्वा यजेत्तु यः ॥ १ ॥ षष्टिवर्षसहस्राणि स्वर्गलोके वसेच्चिरम् ॥ तद्विधानं प्रवक्ष्यामि यथाशास्त्रानुसारतः ॥ २ ॥ नित्यं निर्वर्त्य विधिवत्पंच विप्रान्समर्चयेत् ॥ भोजयेत्पूजयेद्विष्णुं प्रजापतिसमन्वितम् ॥ ३ ॥ अग्निकार्यं ततः कृत्वा दद्याद्विप्राय दक्षिणाम् ॥ ४ ॥ ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभाग एकादशोऽध्यायः ॥ ११ ॥ छ ॥

॥ ॥ सूत उवाच ॥ ॥ प्रतिष्ठां मंडपस्यैव शैलदारुमयस्य च ॥ तृणकाष्ठस्य च विभो तृणवत्तस्य च द्विजाः ॥ १ ॥ अधिवासस्य पूर्वेद्युः शुभे लग्ने घटं न्यसेत् ॥ सूर्यं सोमं तथा विष्णुं कलशे तु समर्चयेत् ॥ २ ॥ प्रोक्षयेत्कुशतोयेन आपोहिष्ठेति वै ऋचा ॥ आप्यायस्वेति गंधेन गंधद्वारेति गंधकम् ॥ ३ ॥ आकृष्णेनेति तैलेन श्रीश्च ते इति चंदनम् ॥ सिंदूरालक्तकं दद्यादंजनं पूर्वया सह ॥ ४ ॥ ततः प्रभाते विमले श्राद्धं वृद्ध्यात्मकं चरेत् ॥ दिक्पालांश्चैव विन्यस्य मंडपे शुभलक्षणे ॥ ५ ॥ मध्ये वेद्यंतरे चैव राजभिर्मंडलं लिखेत् ॥ सूर्यमावाहयेत्तत्र सोमं विष्णुं च पार्श्वयोः ॥ ६ ॥ गणेशं च ग्रहांश्चैव दिक्पालांश्च घटेऽर्चयेत् ॥ पायसं जुहुयादग्नावष्टोत्तरशतं तथा ॥ ७ ॥ आदित्यस्य तथा विष्णोः सोमस्य द्वादशाहुतीः ॥ बलिं च पायसं दद्यात्तैलं क्षीरमथापि वा ॥ ८ ॥ तत उत्सृज्य विधिवद्वाक्यमेतदुदीरयेत् ॥ जानुभ्यामवनिं गत्वा शनैरोष्ठं न चालयेत् ॥ ९ ॥ वास्तोष्पतिं च तत्रैव पूजयेद्गन्धचन्दनैः ॥ अर्घ्यं दद्याच्च विधिवद्धूतेनैवाहुतिं हुनेत् ॥ १० ॥ (ॐ अद्येत्यादि ब्राह्मणादिसर्वसत्त्वेभ्यो विष्णुप्रीणनार्थमिमं मण्डपं सुपूजितं सूर्यदैवतं शैलेयेष्टकादिभिः सर्वसत्त्वेभ्यो रचितं श्रुतिस्मृत्युक्तफलप्राप्तिकामनया अमुकऋषिसगोत्रः श्यमुकदेवशर्माहमुत्सृजे ॥) ततः श्वेतघटं दद्यान्मंण्डपोपरि सत्तमाः ॥ त्रिगुणेन निशाक्तैर्वा वेष्टयेद्वारिधारया ॥ ॥ ११ ॥ दक्षिणां विधिवद्दद्यात्सूर्यायार्घ्यं निवेदयेत् ॥ तृणवेश्मनि वै सूर्यं वासुदेवसमन्वितम् ॥ १२ ॥ घटे गणेशं वरदं वरं कृत्वा समुत्सृजेत् ॥ ऐशान्यां दापयेद्यूपं ध्वजान्दिक्षु प्रकल्पयेत् ॥ १३ ॥ मण्डपोपरि कलशं संस्थाप्य मन्त्रमुच्चरेत् ॥ प्रपायां वरुणः पूज्यो विश्वकर्मा प्रयत्नतः ॥ १४ ॥ पृथिवीं च गणेशं च पूजयित्वा हुनेद्घृतम् ॥ सर्ववर्ज्यमिदं वाक्यं ध्वजमात्रं विधीयते ॥ १५ ॥ ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे द्वादशोऽध्यायः ॥ १२ ॥ ॥ छ ॥

॥ सूत उवाच ॥ ॥ चतुर्हस्तं महायूपं हस्तषोडशनिर्मितम् ॥ वक्ष्ये तं च प्रतिष्ठां च रात्रौ त्रैरात्रिकं यजेत् ॥ १ ॥ वरुणं सितकुंभे च प्रपाकूपस्य पश्चिमे ॥ गायत्र्या स्नापयेत्पूर्वमापोहिष्ठेति वै क्रमात् ॥ २ ॥ गंधद्वारेति गन्धं च अंशुना चेति तैलकम् ॥ मनोन्ना इति कुसुमं धूरसीति च धूपकम् ॥ ३ ॥ कयानेति

ददेद्वस्त्रं नैवेद्यं दीपचन्दनम् ॥ आदौ श्राद्धं न कर्तव्यं प्रतिष्ठांते विधीयते ॥ ४ ॥ दंपतीभोजनं कुर्याद्वरयेदेकब्राह्मणम् ॥ मंडपे चाष्टहस्ते च
कलशं तत्र विन्यसेत् ॥ ५ ॥ पूजयेद्वरुणं देवं नारायणसमन्वितम् ॥ शिवं च पृथिवीं चैव स्वैः स्वैर्मन्त्रैर्यथाक्रमात् ॥ ६ ॥ ततः कुशकंडिकां
कृत्वा स्थालीपाकविधानतः ॥ वरुणं च समभ्यर्च्य जुहुयादाहुतीर्दश ॥७॥ अन्येषां च स्रुवेणैव दद्यादेकाहुतिं क्रमात् ॥ वरुणस्योक्तवरुणं तत्त्वा
यामि ततः परम् ॥ ८ ॥ वरुणस्योत्तंभनमसीति च आभ्यां देवांस्तथैव च ॥ येनापावकचक्षसा पंचमं समुदाहृतम् ॥ ९ ॥ रात्रस्य यूपमित्यादि
परं च दशमस्तकम् ॥ ततः स्विष्टकृतं कृत्वा सप्तजिह्वं चरुं नयेत् ॥१०॥ इह वेत्यादिकं पंच ततः पंचाहुतिं हुनेत् ॥ शंभवे च पृथिव्यै च महा
राजाय च क्रमात् ॥११॥ चरुपाकेति नैवेद्यं बलिं चैवागुरूदनम् ॥ शंकराय च रुद्राय शर्वाय पशुपतये इति च ॥ उग्राय असनायेति भवाय तद
नंतरम् ॥ १२ ॥ महादेवाय च पुनरीशानायेति च क्रमात् ॥ चरुपाकेति नैवेद्यं बलिं चैवागुरूदनम् ॥ १३ ॥ वाक्यपूर्वं सृजेत्तोयं तत्र वाक्करणं
शृणु ॥ १४ ॥ (ॐ अद्येत्यादि ब्राह्मणादिसर्वसत्त्वेभ्यः अमुकगोत्रस्य मत्पितुरमुकदेवशर्मणः श्रुतिस्मृत्याद्युक्तं कूपप्रतिष्ठाजन्यफलप्राप्तये इमं सु
पूजितं सच्छादितं वरुणदैवतममुकसगोत्रः अमुकदेवशर्माहमुत्सृजे ॥) दक्षिणां विधिवद्दद्याद्गां च दद्यात्पयस्विनीम् ॥ १५ ॥ मंडपे क्षुद्रकूपे
च प्रतिष्ठां शृणुत द्विजाः ॥ गणेशं वरुणं कुंभे विधिवत्पूजयेत्सुधीः ॥ १६ ॥ वेष्टयेद्रक्तसूत्रैश्च दद्याद्यूपं समुत्सृजेत् ॥ दक्षिणां विधिवद्दद्याद्विप्रान्सं
पूजयेत्ततः ॥ १७ ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ सूत उवाच ॥ ॥ पुष्पारामप्रतिष्ठां
तु वक्ष्ये शृण्वंतु वै द्विजाः ॥ मध्ये वेदिं त्रिहस्तां च कृत्वा संस्थापयेद्घटम् ॥ १ ॥ अधिवासस्य पूर्वेद्युर्यथावद्विप्रभोजनम् ॥ कृत्वा घटे गणेशं च
सूर्यं सोमं हुताशनम् ॥ २ ॥ नारायणं स्थंडिले च जुहुयान्मधुपायसम् ॥ विधिवद्यूपमारोप्य गोधूमान्सेचयेद्गुरौ ॥ ३ ॥ वेष्टयेद्रक्तसूत्रैश्च प्रदद्या
च्चेति दक्षिणाम् ॥ एतद्धाराजलेनैव यवान्नं सगुडं पयः ॥ ४ ॥ ऐशान्यां यूपमारोप्य विधिवद्द्विजसत्तमाः ॥ कर्णवेधं समारोप्य स्नापयेत्कुशवा
रिणा ॥ ५ ॥ धान्यं यवं च गोधूमं दद्याद्विप्राय दक्षिणाम् ॥ शतधारजलेनैव वेष्टयेत्परितो द्विजाः ॥ ६ ॥ ॥ इति श्रीभविष्ये महापुराणे मध्यम
पर्वणि तृतीयभागे चतुर्दशोऽध्यायः ॥ १४ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ ज्येष्ठाषाढे तुलस्याश्च प्रतिष्ठां विधिवच्चरेत् ॥ यजमानः शुद्धदिने एका
दश्यामथापि वा ॥ १ ॥ ततो रात्रौ घटं स्थाप्य पूजयेत्परमेश्वरम् ॥ नारायणं शिवं सोमं ब्रह्माणं चेंद्रमेव ःच ॥ २ ॥ गायत्र्या स्नपनं कुर्यात्तथो
क्तैर्मंत्रकैरपि ॥ कयानेति च गंधेन अश्नुनेति च तैलकम् ॥ ३ ॥ त्वां गंधर्वेति च पुनः पुष्पं मंडंशनेति च ॥ मानस्तोकेति कुसुमं श्रीश्चतेति

च चंदनम् ॥ ४ ॥ वैश्वदेवीति च पुनर्मंत्रेणानेन चंदनम् ॥ दूर्वामंत्रेण दूर्वांश्च रूपेणेति च दर्प्पणम् ॥ ५ ॥ फलमंत्रेण च फलं समेधेति च अंजनम् ॥ सकुशैः पीतसूत्राद्यैर्वेष्टयेत्क्षीरधारया ॥ ६ ॥ शतधाराजलेनैव वेष्टयेत्स्वगृहं व्रजेत् ॥ वस्त्रेणावृत्य विधिवद्बुधः काले घटं न्यसेत् ॥ ७ ॥ सप्तपंचत्रिभिर्वाथ तद्विष्णोरिति वै ऋचा ॥ स्नापयेदथ साध्वीभिः कृतमंगलपूर्वकम् ॥ ८ ॥ ततः श्राद्धं समाप्यैव मातृपूजापुरःसरम् ॥ आचार्यं वरयेत्पूर्वं गंधाद्यैः कुसुमैरपि ॥ ९ ॥ आचार्य एव होता स्याद्ब्रह्माणं च सदस्यकम् ॥ मंडपे दशहस्तेऽपि वर्तुले स्थंडिलेषु च ॥ १० ॥ सहस्रं मंडलं कुर्यात्तत्र नारायणं यजेत् ॥ ग्रहाँल्लोकेश्वरान्मध्ये आदित्यांश्च मरुद्गणान् ॥ ११ ॥ रुद्रान्वसूंश्च कलशे परितश्च समर्चयेत् ॥ ततः कुशकांडिकां कृत्वा होमं तिलयवेन तु ॥ १२ ॥ अष्टोत्तरशतं कुर्यादन्येषां शक्तितो हुनेत ॥ नारायणं समुद्दिश्य दद्यादुत्सृज्य सत्तमाः ॥ १३ ॥ मध्ये यूपं समुद्दिश्य चरुपाकं बलिं ददेत् ॥ कदलीं दिक्षु संन्यस्य ध्वजान्दिक्षु प्ररोपयेत् ॥ १४ ॥ दक्षिणां कांचनं दद्यात्तिलं धान्यं सपुष्पकम् ॥ धेनुं पयस्विनीं दद्याद्वेष्टयेत्क्षीरधारया ॥ १५ ॥ जयंत्याः सोमवृक्षस्य तथा सोमवटस्य च ॥ पनसस्य कदंबस्य निंबस्य द्विजसत्तमाः ॥ १६ ॥ पाटलाकनकस्यैव शाल्मलीनिंबकस्य च ॥ बिंबाशोकवटस्यैव प्रतिष्ठां नैव कारयेत् ॥ १७ ॥ भद्रकस्य शमीकोणचंडातकबकस्य च ॥ खदिरस्यैव कर्तव्यं कर्णवेधं न कारयेत् ॥१८॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे पंचदशोऽध्यायः॥१५॥

॥ सूत उवाच ॥ ॥ वृक्षादीनां प्रतिष्ठां च उत्तमेषूत्तमं चरेत् ॥ मध्येमध्ये कनिष्ठा तु कनिष्ठं परिकीर्तितम् ॥१॥ वर्तुलं मंडलं कुर्यात्तत्तु शीर्षे तथान्त्यके ॥ मध्ये वा वेदिकां कुर्यात्तन्मध्ये कुंडमंडलम् ॥२॥ पूर्वेद्यू रात्रिसमये घटं संस्थाप्य पूजयेत् ॥ शेषं संपूज्य विधिवत्पृथिवीं च शिवं तथा ॥ ३ ॥ गंधतोयेन गायत्र्या सेतुं संपूज्य मोक्षयेत् ॥ कयानेति च मन्त्रेण आप्यायस्वेति वै ऋचा ॥ ४ ॥ दद्याद्गन्धादिकं श्रीश्च ते लक्ष्मीरिति चन्दनम् ॥ दूर्वामन्त्रेण दूर्वांश्च फलमन्त्रेण वै फलम् ॥ ५ ॥ शन्नोदेवीति मन्त्रेण दद्यात्कुशपवित्रकम् ॥ सुरासुरेति मन्त्रेण प्रदद्याद्वस्त्रयुग्मकम् ॥ ६ ॥ अञ्जनालक्तकं कुर्यान्मनोन्ना इति संपठन् ॥ कुर्याच्छ्राद्धं परदिने वसुधारापुरःसरम् ॥ ७ ॥ वरयेदथ आचार्यं होतारं नृवरश्चरेत् ॥ पात्रद्वयं विधातव्यं सदस्याचार्यमेव च ॥ ८ ॥ सेतुयागे विधातव्यं तथा धान्याचलेपि च ॥ सहस्रहोमे वैकं तु विवाहे ब्रह्मऋत्विजौ ॥ ९ ॥ यजेदेनं कृते मौलियागार्थं यागमण्डपम् ॥ वेदिमावाहयेत्पूर्वं मंडपं प्रतिपूजयेत् ॥ १० ॥ विघ्नग्रहाँल्लोकपालान्सर्वसिद्धिप्रदायकान् ॥ स्थंडिले सर्वतोभद्रे शेषं विष्णुं प्रदर्शयेत् ॥ ११ ॥ तत्रैव तु वराहाख्यं प्रतीतमृत्विगुत्तमम् ॥ स्थालीपाकेन जुहुयादष्टाविंशतिकत्रयम् ॥ १२ ॥ आज्येन तु वराहस्य होमपञ्चकमीरितम् ॥ ततस्तिलयवे

नैव एकैकामाहुतिं क्रमात् ॥ १३ ॥ बलिं दद्यात्पृथग्रूपं शेषयेद्विधिपूर्वकम् ॥ पिष्टकान्नं घृतान्नं च विस्तरे वा गुडौदनम् ॥ १४ ॥ माषभक्तं तु लोकाय पृथिव्यै परमान्नकम् ॥ वाक्यपूर्वं सृजेद्धीरो वाक्यप्रकरणं शृणु ॥ १५ ॥ (ॐ अद्येत्यादि एकविंशतिकुलस्य विशिष्टस्वर्गप्राप्तय इमं सेतुं संक्रमसमेतं विष्णुदैवतं सुरपूजितं विधिवद्वासुदेवस्य प्रीतयेऽहमुत्सृजे ॥) बद्धाञ्जलिः पठेन्मन्त्रं कुर्याच्च विधिवत्ततः ॥ पिच्छिले पतितानां च उद्गतेनाङ्गभङ्गतः ॥ प्रतिष्ठिते धर्मसेतौ धर्मो मे स्यान्न पातकम् ॥ १६ ॥ सेतोरस्य प्रबन्धस्य श्रद्धया परया युतः ॥ ये चात्र प्राणिनः सन्ति सर्वेषां प्राणधारकाः ॥ १७ ॥ वेदागमेन यत्पुण्यं कथितं सेतुबन्धने ॥ तत्पुण्यं तु मया देव पाथेये हि समर्पितम् ॥ १८॥ यूपं दद्यादिति मन्त्रेण अन्ते चापि तथा ध्वजान् ॥ विधिवद्दक्षिणां दद्यात्कुलानि नव पञ्च वा ॥ १९ ॥ पूर्णां दत्त्वा सवित्रेऽर्घ्यं दत्त्वा च स्वगृहं व्रजेत् ॥ अनातपे क्षुद्रसेतोः प्रतिष्ठां विधिवच्चरेत् ॥ २० ॥ पूर्वं च दधिवासं च प्रभाते विप्रभोजनम् ॥ सेतुमध्यं ततो गत्वा गन्धादीन्विधिवच्चरेत् ॥ २१ ॥ विष्णुं शिवं हुताशं च एककुण्डे समर्चयेत् ॥ वास्तोष्पतिं यजेत्तत्र होमं तिलयवेन तु ॥ २२ ॥ कुर्यादेकैकशो विप्रा अष्टाविंशतिसंख्यया ॥ उत्सृज्य दापयेद्रूपं ध्वजवर्ज्यं हि सत्तमाः ॥ ज्ञातिभिः सह भुञ्जीत कृतकृत्योऽभिधीयते ॥ २३ ॥ ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे षोडशोऽध्यायः ॥ १६ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ तत्र दंडे च विप्रेन्द्राश्चतुरस्रे समंततः ॥ षष्टिहस्तमितां भूमिं तस्य पूर्णां मनोरमाम् ॥ १ ॥ प्रचारार्थं गवां चैव यो दद्यात्सुसमाहितः ॥ षष्टिवर्षसहस्राणि रुद्रलोके महीयते ॥२॥ तदर्धं च तदर्धं च तदर्धं वा समुत्सृजेत् ॥ यो दद्यात्केवलां भूमिं कन्यां दासीं तथा वृषम् ॥ ३ ॥ अलंकारं विना धेनुं फलस्यार्धं प्रकीर्तितम् ॥ अमण्डपे शुभे स्थाने शर्करादिविवर्जिते ॥ ४ ॥ द्विहस्तवेदिकामध्ये प्रकुर्यात्सेतुमंडपम् ॥ तत्र संपूजयेद्रुद्रं ब्रह्माणं च शचीपतिम् ॥ ५ ॥ गणेशं क्षेत्रपालं च शेषं चैव दिगीश्वरान् ॥ पञ्चोपचारैर्विधिवत्पूजयेत्पायसादिना ॥ ६ ॥ स्थालीपाकेन जुहुयादन्ते वै विप्रभोजनम् ॥ अत्र यागे श्राद्धवर्ज्यं पूर्वेद्युरधिवासयेत् ॥ ७ ॥ त्र्यम्बकेनैव मंत्रेण भूमिं संस्थाप्य पूजयेत् ॥ तद्विष्णोरिति मंत्रेण गन्धतैलं सचन्दनम् ॥ ८ ॥ प्रदद्यादसुनीतेति पुनस्तु नैव स्थापयेत् ॥ पञ्चगव्येन च पुनः श्रीश्चतेति च पुष्पकम् ॥ ९ ॥ एवं यूपस्य च तथा अधिगृह्णाति मंत्रकम् ॥ गन्धद्वारेति गन्धेन अंशुनातेति तैलकम् ॥ १० ॥ सुरासुरेति कुसुमं दूर्वामन्त्रेण दूर्विकाम् ॥ प्रभाते पूजयेदेवान्रुद्रमुद्दिश्य होमयेत् ॥ ११ ॥ स्थालीपाकेन विधिना अन्येषां पूर्ववच्चरेत् ॥ उत्सृज्यारोपयेद्दीपं स्थिरो भवेति वै ऋचा ॥ १२ ॥ तंत्रेण निर्मितं कुर्यात्सफलं च त्रिहस्तैकम् ॥ हस्तैकं प्रापयेन्मध्ये

क्षेत्रे चैव विशेषतः ॥ १३ ॥ स्थापयेत्तत्र मन्त्रेण पञ्चगव्येन यत्नतः ॥ मधुवातेति मधुना आप्यायस्वेति वै दधि ॥ १४ ॥ तद्विष्णोरिति
मन्त्रेण घटतोयैरनन्तरम् ॥ पृथिवीं च वराहं च कूर्ममाधवशक्तिकान् ॥ १५ ॥ वास्तोष्पतिं च विष्णुं च यूपे संपूजयेत्क्रमात् ॥ दद्यादर्घ्यं च
विवरे गर्ते होमं विवर्जयेत् ॥ १६ ॥ अर्घ्यपाद्ये च दुष्टे च हस्तेनोत्सृज्य सत्तमाः ॥ (ॐ अद्येत्यादि गोब्राह्मणसर्वसत्त्वेभ्यः पर्यटनार्थाय इमां
भूमिं सुपूजितां विष्णुदैवतां गोप्रचाररूपिणीं श्रुतिस्मृत्याद्युक्तफलप्राप्तयेऽहमुत्सृजे ॥) शिवलोकस्थिता गावः सर्वदेवैः सुपूजिताः ॥ एवं निवे
दयेद्विप्रो गोप्रचारं समाहितः ॥ स मुक्तः सर्वपापेभ्यो विष्णुलोके महीयते ॥ १७ ॥ यावंति तृणगुल्मानि संति भूमौ शुभानि च ॥ तावद्वर्ष
सहस्राणि स्वर्गलोके महीयते ॥ १८ ॥ ॥ इति श्रीभविष्ये महापुराणे तृतीयभागे गोप्रचारविधौ सप्तदशोऽध्यायः ॥ १७ ॥ ॥ छ ॥
॥ ॥ सूत उवाच ॥ ॥ कलौ चैकाहसाध्येन प्रतिष्ठामल्पवित्तवान् ॥ सद्योधिवासमाज्येन प्रकुर्यात्तांत्रिकोत्तमः ॥ १ ॥ उत्तरं तु गते
हंसे अतीते चोत्तरायणे ॥ शरत्काले व्यतीते तु वसंते यज्ञमारभेत् ॥ २ ॥ नारायणादिमूर्तीनां द्वात्रिंशद्भेद एव तु ॥ प्रतिष्ठां[1] प्रतिमानां
च गजास्यादींश्च[2] सत्तमाः ॥ ३ ॥ नित्यं[3] निर्वर्त्य मतिमान्कुर्यादभ्युदयं ततः ॥ विप्रान्संभोजयेद्वाथ ततो यागगृहं व्रजेत् ॥ ४ ॥ गणेश
ग्रहदिक्पालान्प्रतिकुंभेषु पूजयेत् ॥ स्थंडिले पूजयेद्विष्णुं परिवारगणं यजेत् ॥ ५ ॥ स्नापयेत्प्रथमं देवं तोयैः पञ्चविधैरपि ॥ पञ्चामृतैः पञ्चगव्यैः
पंचमृत्पिण्डकैरपि ॥ ६ ॥ तिलतैलैश्च स्नेहैश्च कषायैरपि सत्तमाः ॥ पञ्चपुष्पोदकैर्वाथ त्रिपदैरपि सत्तमाः ॥ ७ ॥ तुलसीकुसुमापुष्पपत्राण्या
हुस्त्रिपत्रकम् ॥ पञ्चकाम्रशमीपद्मकरवीरं च पंचकम् ॥८॥ मृत्तिका करिदंतस्य तथाश्वखुरमृत्तिका ॥ गोमूत्रं गोमयं क्षीरं दधि सर्पिस्तु पंचमम् ॥
॥ ९ ॥ कुर्यात्प्राणप्रतिष्ठां च होमं कुर्याद्यथाविधि ॥ दक्षिणां विधिवद्दद्यात्पूर्णां तु तदनंतरम् ॥ १० ॥ इति श्रीभविष्ये महापुराणे मध्यम
पर्वणि तृतीयभागेऽष्टादशोऽध्यायः ॥ १८ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ अतः परं तु विप्रेन्द्राः काल्यादीनां तथैव च ॥ अधिवास्य च
पूर्वेद्युः श्राद्धमभ्युदयात्मकम् ॥ १ ॥ प्रथमे जलजैः स्नानं पञ्चगव्यैरनंतरम् ॥ पूर्ववच्च विधानेन कुंभे दुर्गां समर्चयेत् ॥ २ ॥ पञ्चामृतैः पञ्चगव्यैः
करीषशतधारया ॥ श्रीबिल्वे पूजयेद्देवीं दद्यात्प्राणमनंतरम् ॥ ३ ॥ बिल्वपत्रैः फलैर्वापि दद्याच्चापि शताहुतीः ॥ एकैकशस्तु सर्वेषां दद्यात्काञ्चन
दक्षिणाम् ॥ ४ ॥ प्रतिमां कालिकायाश्च तारायाश्च पृथक्पृथक् ॥ ग्राह्यं विनार्चयेद्विप्राः पञ्चपञ्चशतैरपि ॥ ५ ॥ भोजयेत्स्नापयेद्देवीं गंधतोयैर्दिन

---

[1] विदधातेति शेषः । [2] संपूज्येति क्षेपः । [3] तदेव व्यासेनाह–नित्यं निर्वर्त्येत्यादि ।

त्रयम् ॥ ताम्रकुंभेऽर्चयेद्देवीं त्रिदिनं प्रातरेव हि ॥ ६ ॥ समीरणं ततो दद्यात्पेटिकायां निवेशयेत् ॥ ततोऽपि गन्धतोयैश्च स्नापयेत्कन्यकादिभिः॥
॥ ७ ॥ ततो वै चाष्टमदिने रात्रावपि प्रपूजयेत् ॥ पशुदानं प्रकर्तव्यमग्निकार्यं च पायसैः ॥ ८ ॥ शिवलिङ्गप्रतिष्ठां च वक्ष्ये तंत्रमतं यथा ॥
त्रिविप्रं भोजयेद्विप्रा अधिवास्यं विशेषतः ॥ ९ ॥ नित्यं समाप्य च पुनः कुर्यादभ्युदयं ततः ॥ आचार्यं वरयेत्प्रातः स्नापयेत्पूर्ववर्त्मना ॥१०॥
परिवारगणैः सार्द्धमर्चयेत्तदनंतरम् ॥ दद्यात्समीरणं पश्चादग्निकार्यं समाचरेत् ॥ ११ ॥ तिलहेममयीं गां च दद्याद्गां च विधानतः ॥ न नाम न
च गोत्रं च होमकर्मणि सर्वदा ॥ १२ ॥ पूर्णिमायां विशेषेण नान्येषां च कथंचन ॥ होमांते वसुधारां च कुंभे दत्त्वा विधानतः ॥ १३ ॥ त्रिह
स्तचरकायं च हस्तैकं चतुर्हस्तके ॥ शालग्रामशिलायाश्च प्रतिष्ठां विधिवच्चरेत् ॥ १४ ॥ सद्योधिवासयेद्देवं द्वादश्यां स्नापयेदथ ॥ रत्नतोयैः
परिमलैस्त्रिगंधैः पंचपल्लवैः ॥ १५ ॥ कुंभे प्रजापतिं स्थाप्य श्वेताब्जं नवनाभके ॥ नवदुर्गोक्तमार्गेण पूजयेत्परमेश्वरम् ॥ १६ ॥ चक्रस्वरूपतो
ज्ञेयं प्रदद्याच्च समीरणम् ॥ आनीय ताम्रभांडे च त्रिकालं प्रतिपूजयेत् ॥१७॥ पायसान्नैरुत्पलैर्वा पङ्कजैर्वापि होमयेत् ॥ सकाञ्चनं वस्त्रयुग्मं प्रद
द्याद्भूरिदक्षिणम् ॥ १८ ॥ श्रीसूर्यस्य गणेशस्य विरिञ्चेश्चापि सत्तमाः ॥ वटवृक्षांतिकं गत्वा स्थापयेद्वरुणं ततः ॥ १९ ॥ रक्ताब्जे पूजयेत्सूर्यं
परिवारसमन्वितम् ॥ अष्टाविंशतिभिर्दत्त्वा दद्यात्प्राणमनंतरम् ॥ २० ॥ एकाहमथवाकाशे गुप्तं कृत्वा दिनत्रयम् ॥ त्र्यहादेव पुनः पूजां पुनर्होमं
समाचरेत् ॥ २१ ॥ पुनश्च भोजयेद्विप्रान्दद्यात्काञ्चनदक्षिणाम् ॥ वाराह्यास्त्रिपुरायाश्च नारिकेलोदकैरपि ॥२२॥ स्थापयेद्वा विधानेन सिन्दूराद्यैः
समर्चयेत् ॥ दद्यात्समीरणं पश्चात्पुनः पूजां च होमयेत् ॥ २३ ॥ पशुज्ञानं च कर्तव्यं षण्मासैः पञ्चमोदकैः ॥ कुमारीं भोजयेद्रात्रौ दद्यात्काञ्चन
दक्षिणाम् ॥ २४ ॥ प्रतिमां भुवनेशीं च महामायाम्बिकामपि ॥ कामाक्षीं च ततो देवीमिन्द्राक्षीं चापराजिताम् ॥ २५ ॥ पूर्वेद्यू रात्रिसमये पिष्ट
काष्टौ निवेदयेत् ॥ अष्टौ निर्माणयेत्पश्चाद्बलिं चाष्टौ विधानवित् ॥ २६ ॥ परिवारगणैः सार्द्धं पूजयेत्प्रयतः सुधीः ॥ समीरणं ततो दद्याच्छिवं
सूर्यं यजेत्पुनः ॥ २७ ॥ पायसान्नैश्च जुहुयात्त्रिदिनं लिपिपूजनम् ॥ कुमारीपूजनं कुर्यादग्निकार्यं दिनत्रयम् ॥ २८ ॥ पशुदानं च कर्तव्यं विभवे
सति सत्तमाः ॥ रात्रौ जागरणं कुर्यान्मठोत्सवपुरःसरम् ॥२९॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे एकोनविंशोऽध्यायः ॥१९॥
॥ ॥ सूत उवाच ॥ ॥ दुर्निमित्तान्यथो वक्ष्ये शृण्वंतु मुनिसत्तमाः ॥ यस्य ये ग्रहदोषाः स्युस्तेषां शांतिं यथाक्रमात् ॥ १ ॥ दिव्यंतरिक्षे
भौमे चेत्येवं त्रिः परिकीर्तितम् ॥ ग्रहर्क्षाद्यैः कृतं दिव्यमान्तरिक्षं निबोध मे ॥ २ ॥ उल्काहितो दिशो दाहः परिवेषस्तथैव च ॥ जलाशयानां वै

कृत्यं भौमं तदपि कीर्तितम् ॥ ३ ॥ भौमं चाल्पफलं ज्ञेयं दिव्यांतारिक्षमेव च ॥ सप्ताहमफलं दद्याद्दैवं चापि च तत्क्षणात् ॥ ४ ॥ देवानां हसनं
चैव कल्कनं रुधिरस्रवः ॥ अकस्माद्व्यसनं तत्र यत्र निर्घातनिर्दयः ॥ सर्पाद्यारोहणं चैव दैवं तदपि कीर्तितम् ॥ ५ ॥ ततो मेघात्समुत्पन्ना
यदि वृष्टिः शिलातले ॥ सप्ताहाभ्यंतरे जीवमुत्पन्नं निष्फलं भवेत् ॥ ६ ॥ एकराशिस्थिताः पापाः शनिभौमदिवाकराः ॥ पृथ्वी धूमाकुला तत्र
रुदंति बहवो जनाः ॥७॥ अभिचारं गते जीवे शनौ च तत्र नागते ॥ तत्र पश्यति राजेन्द्रः को धरां धारयिष्यति॥८॥ सूर्यमपश्यनो द्वंद्वं दिग्दा
हश्च तथैव च ॥ दर्शनं धूमकेतोश्च नक्षत्रे धूमदर्शनम् ॥ ९ ॥ भूकम्प एव मासे च एकमासे तथा दिने ॥ राज्ञो जन्मदिने वाथ शक्रचापं दिनां
तरे ॥ १० ॥ दर्शनं खरवातस्य ग्रहयुद्धस्य दर्शनम् ॥ मासत्रये तु ग्रहणमुल्कापातप्रपातनम् ॥ ११ ॥ आकाशेऽप्यथ भूमौ च तत्र मण्डूकमेव
च ॥ हरिद्रावृष्टिः पाषाणे सिंहबिल्वाकृतिर्यदि ॥ दर्शने राष्ट्रदुर्भिक्षमकरं नृपतिक्षयः ॥ १२ ॥ चैत्रे कुम्भे नदीवेगदर्शने विप्लवो भवेत् ॥ अर्के
स्याद्भुतमेतद्धि स्रुग्युक्तं श्रपयेच्चरुम् ॥ १३ ॥ आकृष्णेनेति मन्त्रेण अथ वार्केण यत्नतः ॥ प्रासादतोरणं तत्र द्वारं प्राकारवेश्म च ॥ १४ ॥
धान्यसारं गवां सारं कूपे कुम्भप्रदर्शनम् ॥ आदित्यस्याद्भुतं विद्यात्कमलं जुहुयात्ततः ॥१५॥ सहस्रं जुहुयाद्वाथ ततः शांतिर्भवेद्ध्रुवम् ॥ विकृताः
पक्षिणश्चैव पांडुकपोतकास्ततः ॥ १६ ॥ श्वेतोलूको बृहंश्चैव द्रोणकाकश्च कोकिलः ॥ क्रौंचश्च वर्द्धनी चैव निपतंति गृहे यदि ॥ १७ ॥ गृहे
तस्य महोत्पातो भविष्यति न संशयः ॥ स्थूलभङ्गप्रग्रहणं प्ररोहणमथापि वा ॥ १८ ॥ हाराः कटकटायंते जातस्य दंतसम्भवः ॥ हसता देव
तानां च गात्रे स्वेदश्च जायते ॥ सर्पमण्डूकप्रसवः कुंभे वापि क्वचिद्भवेत् ॥ १९ ॥ निमित्तान्येवमादीनि जायंते यस्य वेश्मनि ॥ षड्भिर्मासैश्च
म्रियते गृहिणी च शुभा च या ॥२०॥ अशनिः पतते यत्र गृहे वज्रं च पादपे ॥ शुक्ला वह्निस्फुलिंगाश्च तस्य विद्धि महद्भयम् ॥२१॥ खर्जूर उद
रावर्ते निकोचगरलेऽपि च ॥ फलिवृक्षे तिन्दुके च यत्र निर्जायते क्वचित् ॥२२॥ उद्याने देवगेहे च स्वगृहे चैत्यवृक्षके ॥ कुर्यादादित्यवारे वा अयुतं
तिलपायसम् ॥ ततः शांतिर्भवेदाशु धेनुं दद्याच्च दक्षिणाम् ॥ २३ ॥ पायसं तिलमुद्गौ च पुष्पं वा तालवृन्तकम् ॥ इक्षुमोदकपिण्याकाञ्जुहुयाद्द्र
विमुद्दिशन् ॥ २४ ॥ सिंहासनं रथश्छत्रं ध्वजश्चामरभूषिते ॥ अकस्माद्दृश्यते यत्र राज्ञो वान्यत्र कुत्रचित् ॥ २५ ॥ नदयंति च सत्यस्योज्ज्वलनं
स्त्रीपुरुषयोः ॥ आगमस्य च दृष्ट्वैव भंगः कटकटायनम् ॥ २६ ॥ उपरिष्टाद्भवेद्यस्य महोत्पातो भवेदयम् ॥ चलत्वं चाधरस्यापि तथा कटकटाय
नम् ॥ २७ ॥ रुदितं कोकिलस्यापि उलूकोप्यशुभं वदेत् ॥ राजामात्यविनाशाय महीं च तत्सुतोऽपि वा ॥ हस्तिनो मदयुक्ताश्च म्रियंते नात्र

संशयः ॥ २८ ॥ ताडीपूगादयो यत्र यमौ स्यातां प्रमादतः ॥ गेही तत्र विनश्येत सदारः पुत्रसंयुतः ॥ २९ ॥ बद्धपुष्पे यदा पुष्पं फलं वा यदि
दृश्यते ॥ अक्षतादर्शनात्तत्र सोमस्याद्भुतदर्शनम् ॥ दधि मधु घृतं चैव जुहुयादयुतं द्विजाः ॥३०॥ पालाशं सोममुद्दिश्य सोमस्य च भवेद्दिने ॥
इमंदेवा इति मंत्रेण सोमाय श्रपयेच्चरुम् ॥३१॥ उत्पतंति गृहे यस्य यवा माषाश्च पुष्कलाः ॥ दधिक्षीराज्यपाकेषु रुधिरं दृश्यते यदि ॥३२॥ अक
स्माद्गृहदाहस्तु अनग्निज्वलनं यथा ॥ मेघहीना भवेद्विद्युद्वृषस्योद्गमनं तथा ॥३३॥ व्याधिलीना विनश्यंति निखिलाः पशुमानुषाः ॥ एवं सर्वाणि
भूतानि भवंत्यकारके ध्रुवम् ॥ ३४ ॥ राजामात्यविनाशाय गेहे गेही विनश्यति ॥ प्राणनाशाय विप्रायाहुत्या च प्रभवंति हि ॥ ३५ ॥ दृष्ट्वा वाभ
द्रमत्युग्रं जुहुयादयुतं क्रमात् ॥ दधिमधुघृतैर्युक्तं खादिरोदुम्बरेऽपि च ॥ ३६ ॥ अग्निर्मूर्द्धेति मंत्रेण श्रपितं लोहितं चरुम् ॥ त्रिविप्रान्भोजयेद्द्या
दक्षिणां लोहितं ततः ॥ स्वर्णमंगारमुद्दिश्य ततः शांतिः प्रजायते ॥ ३७ ॥ पुष्पं वा पातयेद्यत्र फलं वापि तथैव च ॥ दध्यन्नं च घृतैर्मिश्रं रौप्यं
हिरण्यमेव च ॥३८॥ हस्त्यश्वमहिषा गावो दारापत्यधनानि च ॥ तुष्टेनांगारकेणैव सर्वमेतत्प्रदीयताम्॥ आंगारकेण मंत्रेण खादिरं चाक्षतैर्युतम्॥
॥ ३९ ॥ दक्षिणां च यथाशक्ति दद्याद्विप्राय वा पुनः ॥ लोहितं च बलिं दद्यात्ततः संपद्यते शुभम् ॥४०॥ धावंति चोर्ध्वपुच्छाश्च गृहे गावः स्वयं
यदि ॥ आरोहंति गृहं विप्राः सारमेयाश्च सूकराः॥ ४१ ॥ गृहे यस्य भवंत्येते तस्य भार्या विनश्यति ॥ सर्वेषां वा भवेन्मृत्युर्वंध्या गौर्वा प्रजायते
॥४२॥ मिथ्यावादेन गेही च राज्ञा वादैश्च तिष्ठति ॥ अथ वा यद्गृहे गावो नर्दयंति हसंति च ॥४३॥ धरणीहननं यत्र द्वयोरास्कंदनं तथा ॥ निमि
त्तान्येवमादीनि गोश्वजातानि सत्तमाः ॥४४॥ यस्य गेहे भवंत्येते नाशस्तस्य भवेद्ध्रुवम् ॥ मण्डूकसर्पकूष्मांडाः प्रसुवंति यथा स्त्रियः ॥४५॥ अक
स्माद्यदि चैतानि बुधस्योत्पातलक्षणम् ॥ शांतिं तत्र प्रवक्ष्यामि यथा संपद्यते सुखम् ॥ ४६ ॥ दधिमधुघृताक्तं च अपामार्गं तथा पुनः ॥ अयुतं
बुधवारे च जुहुयाच्छ्रद्धया युतः ॥ ४७ ॥ अंबकेति च मंत्रेण बुधाय श्रपयेच्चरुम् ॥ सुवर्णं बुधमुद्दिश्य गां च दद्यात्पयस्विनीम् ॥ ४८ ॥ सुवर्णं
पुष्पवृष्टिं च सुफलं चाक्षतं तथा ॥ गृहे प्रांगणके यस्य निपतंति कदाचन ॥४९॥ अलंकारयुतां वापि सर्वाभरणभूषिताम् ॥ गृहमध्ये तु यः पश्ये
त्क्षीणामंतर्हितां स्त्रियम् ॥ ५० ॥ अकस्मान्मालतीपुष्पं जातं स्यात्तस्य वा गृहे ॥ सोमाय न च संतुष्टः ःसर्वमेतत्प्रदृश्यते ॥ ५१ ॥ धनं धान्यं
तथा पुत्र ऐश्वर्यं च वरस्त्रियः ॥ सभृत्याश्च महिष्यश्च मरिष्यंति न संशयः ॥५२॥ श्रीश्चतेति च मन्त्रेण अपामार्गं तथा बुधः ॥ सहस्रं बुधवारे च
जुहुयाद् घृतसंयुतम् ॥ ५३ ॥ पयस्विनीं तथा गां च वासोयुगसमन्वितम् ॥ द्विजाय श्रद्धया दद्यात्ततः संपद्यते शुभम् ॥ ५४ ॥ रक्तस्रावो भवे

यत्र तत्र ऋत्विक्प्रसूयते ॥ सिंहव्याघ्रगवादीनां धनहानिविपत्करः ॥ ५५ ॥ एको वृषस्त्रयो गावः सप्ताष्ट नव दंतिनः ॥ संवत्सरेण तस्यैका
प्रसूतिर्विहता पुनः ॥ ५६ ॥ पुनःपुर्व्रतं चाशु अकाले मैथुनं तथा ॥ गावो यत्र प्रसूयंते यमौ दोषकराविमौ ॥ ५७ ॥ भञ्जीकृतानि धान्या
नि व्रीहयो यवतंडुलाः ॥ ग्राविमार्जारमंडूकाः स्थूणाभंगे च प्राङ्गणे ॥ ५८ ॥ विकिरंति नखैर्भूमिं प्ररोहंति ग्रहं तथा ॥ गृहे यस्य प्रजायंते तस्य
मृत्युर्न संशयः ॥ ५९ ॥ षण्मासाभ्यन्तरे यत्र श्मशानं यास्यति ध्रुवम् ॥ कलहं ज्ञातिवैरं च व्याधिपीडा भविष्यति ॥ ६० ॥ विप्रलापो मित्र
नाश इष्टेष्वनिष्टदर्शनम् ॥ भार्यापुत्रविनाशश्च भवेदेषु विनिश्चितम् ॥ ६१ ॥ क्रियावंतं यदा कुर्वन्कुर्वीत गृध्रबिल्वके ॥ तदा राज्ञां विभ्रमश्च तथा
गृहविनाशनम् ॥ ६२ ॥ अमात्यवर्गाश्च पुरे राज्ञां राज्यपराङ्मुखाः ॥ बृहस्पतिं समुद्दिश्य गां च दद्यात्पयस्विनीम् ॥ ६३ ॥ वारिमंडे च कूपे
च वाप्यां च मधुकांजिके ॥ क्षीरं दधिघृतं चैव जातं यदि भविष्यति ॥ ६४ ॥ अकस्मात्तत्र वृक्षश्च फलेन सह संयुतः ॥ गृहमध्ये प्रजायेत ततः
संपद्यते शुभम् ॥ ६५ ॥ बृहस्पतेस्तु तुष्टस्य सर्वमेतन्निदर्शनम् ॥ गौरं बृहस्पतेश्चैव प्रकुर्यात्प्रायदक्षिणाम् ॥ ६६ ॥ अशुभं हिशुभेनैव शांतिं होमं
च कारयेत् ॥ तत्रैव राक्षसं यत्र घटकं परिशोषणम् ॥ ६७ ॥ केसरी शर्करा तैलं राजतं तांडवं स्थितम् ॥ माषभक्तं तथा धान्यं सुवर्णं रजता
नि च ॥ ६८ ॥ ताम्रं कांस्यं तथा लोहं सीसकं पित्तलं तथा ॥ स्थापितानीव दृश्यंते गृहे चैतानि यस्य वै ॥ ६९ ॥ धननाशो भवेत्तस्य स्वर्ग
भंगो ह्यथापि वा ॥ व्याधिपीडे तथा घोरे राजोपद्रवबंधने ॥ गजाश्वपशुभृत्यानां विनाशो जायते ध्रुवम् ॥ ७० ॥ यस्यैतानि प्रदृश्यंते पर्वतः
कनकानि च ॥ संपत्तस्य प्रजायेत निश्चला सुखदा सदा ॥ ७१ ॥ दंतोत्तरेषु दंताश्च पंक्तिमाक्रम्य संस्थिताः ॥ तेऽपि दोषकराः सर्वे शला
काकृतिनस्तथा ॥ उपदंताश्च सर्वे ते न ते दोषकराः क्वचित् ॥ ७२ ॥ भांडे कुंभे यदा चैव श्रूयते घनगर्जितम् ॥ कंचुकानां गृहे चैव प्राकारः
श्रूयते यदि ॥ ७३ ॥ मूषिकानां मुखे चैव ज्वलंती यस्य पश्यति ॥ गेही तत्रैव नश्येत शुक्रस्याद्भुतदर्शनम् ॥७४॥ शांतिं तत्र प्रवक्ष्यामि यया
संपद्यते शुभम् ॥ शमीपत्रं निर्मितं च यवैर्युक्तं गृहिण्यपि ॥ दधिमधुघृताक्तं च जुहुयाद्भार्गवे दिने ॥ ७५ ॥ शुक्लवासोयुगं चैव गां च शुक्लां पय
स्विनीम् ॥ सुवर्णं श्रद्धया चैव दद्याद्विप्राय दक्षिणाम् ॥ ७६ ॥ देवागारे यदा भूमिर्लोहिता यस्य दृश्यते ॥ पुष्पिता दृश्यते लोके तत्र विद्धि
महद्भयम् ॥ ७७ ॥ राजा वा राजपुत्रो वा राज्यं वापि विनश्यति ॥ मंत्रिणो मंत्रिपुत्राश्च म्रियंते नात्र संशयः ॥७८॥ यत्र वा दृश्यते लोके गृहे
यस्य सुपूजिताः ॥ पुष्पिताश्च गृहस्तंभाः शरीरं च घटस्तथा ॥ ७९ ॥ हस्त्यश्वमहिषाश्चैव अजा गावस्तथैव च ॥ नित्यं स्वामिवधार्थाय पुष्पितां

प्रवहंति च ॥ ८० ॥ गृहे हंसो गृहे सम्यङ्मण्डूका जलचारिणः ॥ द्वारे प्रविश्य सर्पश्च प्रतिमायाः प्रकल्पनम् ॥ ८१ ॥ अकस्माद्धटशब्दोपि
यत्र कुत्रापि जायते ॥ स्रवंति प्रमदा यत्र भिन्नास्ते स्युर्नवांगिकाः ॥ ८२ ॥ गृही तत्र विनश्येत सपुत्रपशुबांधवः ॥ धनुःखड्गधरा रात्रौ मध्याह्ने
चान्द्रके तथा ॥ ८३ ॥ उदितो दृश्यते व्योम्नि ज्वलितः पावकस्तथा ॥ मनुष्याङ्गनानां मरणं तथा स्याद्राष्ट्रविप्लवः ॥ ८४ ॥ रससिद्धानि
वस्तूनि सुराद्याश्चापि वा पुनः ॥ हस्तिनो मदयुक्ताश्च अश्वा धीरिताहिंसकाः ॥ विनश्यंति सदा चैते शनेरद्भुतदर्शने ॥ ८५ ॥ नगरे वा तथा
ग्रामे जायन्ते तस्य वैरिणः ॥ दिवा वा यदि वा रात्रौ शनेरद्भुतदर्शनम् ॥ ८६ ॥ मृगव्याघ्रादिरक्षांसि तथा गोमहिषा अपि ॥ उत्पतंति यदा
चैते शनेरद्भुतमादिशेत् ॥ ८७ ॥ निधिमंत्रं प्रवक्ष्यामि येन संपद्यते शुभम् ॥ जुहुयादयुतं सम्यक्सस्यांश्च समिधं द्विजाः ॥ ८८ ॥ शन्नो देवीति
मंत्रेण शुभार्थं शनिवासरे ॥ चरुं च श्रपयेत्तत्र समुद्दिश्य शनैश्चरम् ॥ ८९ ॥ गां च नीलां ततो दद्याज्जीवद्वत्सां पयस्विनीम् ॥ वासोयुगं च विप्राय
सुवर्णं रजतं तथा ॥ ९० ॥ दत्त्वा तु श्रद्धया सम्यग्दक्षिणां शिरसि स्थिताम् ॥ विधिं होमावसाने तु ततः संपद्यते शुभम् ॥ ९१ ॥ यदा द्वारे
गोधिका च शंखिनी प्रविशेद्गृहम् ॥ तदाऽशुभं विजानीयाद्राजपीडा धनक्षयः ॥ अयतं जुहुयात्सम्यक्ततः संपद्यते शुभम् ॥ ९२ ॥ विना गर्जि
तमेघेन शिलावृष्टिः प्रजायते ॥ रक्तमिश्रा हि पांडुश्च पतन्ती यत्र दृश्यते ॥ ९३ ॥ तत्र संदृश्यते चाभ्रं वृक्षा वातविवर्जिताः ॥ शक्रध्वजस्तथा
चापं पतनं सुमनस्य च ॥ ९४ ॥ दिवा शिवा पुरा रौति उलूको वा निशाचरः ॥ निशि निपत्य काकुत्स्थे प्रदेशे रौति वा वृषः ॥ ९५ ॥
अधर्मप्रबला देशा राजा धर्मपराङ्मुखः ॥ अन्योन्यं च जिघांसंति गोब्राह्मणमथापि वा ॥ ९६ ॥ गृहे गृही विनश्येच्च सपुत्रपशुबांधवः ॥
उत्सानं द्वारदेशेऽस्य मरणं राष्ट्रविभ्रमः ॥ ९७ ॥ राज्यनाशो भवेद्राज्ञो मरणं वाहनस्य च ॥ विपरीतानि देशानि क्रमतः संभवंति हि ॥ ९८ ॥
राहुणा ग्रस्तसूर्योऽपि निशि चाथ यदा दिवा ॥ तारकागणवच्चैव राज्ञां निधनकारकः ॥ ९९ ॥ सहामात्या विनश्यंति स्वर्गे ये चसुदुर्जयाः ॥
परचक्रेण पात्यंते राजानो नात्र संशयः ॥ १०० ॥ छायाध्वजश्चगगने दृश्यते चेत्कदान ॥ दर्शनादेव राज्ञस्तु विनाशः सहराष्ट्रकैः ॥ १०१ ॥
ज्वलितो दृश्यते यत्र पावकश्च सकृज्जले ॥ वज्रे शिरसि गात्रे वा जीवितं तस्य दुर्लभम् ॥ १०२ ॥ द्वारोपांते तथा स्तंभे आग्निर्वा धूम एव वा ॥
पुरुषस्य तु तत्रैव मरणं जायते ध्रुवम् ॥ १०३ ॥ गगनेऽशनिघातश्च शक्तिहस्तेन वा पुनः ॥ अब्दस्याभ्यंतरे तस्य मरणं नात्र संशयः ॥१०४॥
शिखावलयमध्ये तु सधूमः पावकोद्गमः ॥ दृश्यते नगरे मध्ये तत्रैवाद्भुतदर्शनम् ॥ १०५ ॥ शवस्य नीयमानस्य उत्थानं वा प्रमादतः ॥ स्थापि

तस्य च लिंगस्य अन्यत्र गमनं तथा ॥ १०६ ॥ निर्घातश्चापि भूकंपो निवातोल्काप्रदर्शनम् ॥ अकाले पुष्पिता वृक्षाः फलं चाकालसंभवम् ॥
॥ १०७ ॥ अनिमित्तानि सर्वाणि दूरमागत्य निर्भरम् ॥ अनिमित्तस्य नाशो यः संहिकेयकृतस्य च ॥ १०८ ॥ नराणामासनं चैव गवां वा
मानुषीगिरा ॥ पक्षमात्रांतरे तस्य पुत्रस्य मरणं दिशेत् ॥ १०९ ॥ अयुतं जुहुयात्तत्र राहुमुद्दिश्य यत्नतः ॥ शांतिमत्र प्रवक्ष्यामि यया संपद्यते
शुभम् ॥ ११० ॥ दधिमधुघृताक्तं च कुर्याद्दूर्वाक्षतं तथा ॥ कलायु इति मन्त्रेण जुहुयाद्रविवासरे ॥ १११ ॥ चरुं च श्रपयेत्तत्र राहुमुदिश्य संश्र
यात् ॥ होमं कुर्यात्ततो गां च कपिलां च पयस्विनीम् ॥ ११२ ॥ अतसीं तिलशंखौ वा वासोयुगमथापि वा ॥ श्रद्धया राहुमुद्दिश्य दद्याद्विप्राय
दक्षिणाम् ॥ ११३ ॥ दुरितस्य विनाशाय तस्य संपद्यते शुभम् ॥ दधिमधुघृतक्षीरेण वारुणेन च वारुणे ॥ ११४ ॥ दृश्यते चाद्भुतं तेषु विशिष्टै
र्दोषदर्शिभिः ॥ गृही तत्र विनष्टश्च भवेत्सपशुबांधवः ॥११५॥ दृश्यंते तत्र क्रौंचाश्च जंबुका गृध्रवायसाः ॥ दारुणं भीषणं घोरं नृत्यंति च हंसति
च ॥११६॥ मैथुनानि च सर्वेषां यस्य वासे भवेद्यदि ॥ मृत्युस्तस्य भवेदाशु ईश्वरस्य च शासनात् ॥ ११७ ॥ धूमकेतुर्यदा व्योम्नि ज्वलत्पावक
सन्निभः ॥ स्थानात्स्थानांतरं याति भूमौ वा पतते भृशम् ॥ सबंधुरस्यते राजा परचक्रैः स पीडितः ॥ ११८ ॥ दुर्भिक्षं मरणं चैव चिरं राष्ट्रे भवि
ष्यति ॥ गावो मर्कटकुंभा व विशंते गृहवेश्मनि ॥ ११९ ॥ गावश्च तस्य नश्यंति दारापत्यधनानि च ॥ अन्यस्य दोषो भवति गृहे यांति
प्रमादतः ॥ १२० ॥ अब्दांतरे भवेन्मृत्युर्विरजा हि भविष्यति ॥ शांतिमत्र प्रवक्ष्यामि यया संपद्यते शुभम् ॥ १२१ ॥ सप्ताश्वरथसंयुक्तं हेम
च्छत्रविभूषितम् ॥ विप्राय मंडपं दद्याद्बिल्वपत्रमथापि वा ॥ १२२ ॥ ऐंद्रेणैव तु मन्त्रेण होमः कार्यो द्विजातिभिः ॥ अकस्माच्छालतालाक्षखदि
रोत्पलसेरकाः ॥ १२३ ॥ गृहमध्ये प्रजायेत केतोरद्भुतदर्शनम् ॥ हंसो वा द्रोणकाको वा मयूरो वा गृहोपरि ॥ १२४ ॥ गृहे तस्य महोत्पातः
केतोरद्भुतदर्शनम् ॥ शांतिमत्र प्रवक्ष्यामि यया संपद्यते शुभम्॥१२५॥ दधिमधुघृताक्तं च जुहुयादयुतं कुशम्॥त्र्यंबकं चेति मन्त्रेण केतवेभिवपे
च्चरुम् ॥ १२६ ॥ नीलां धेनुं सवत्सां च बहुक्षीरप्रदां तथा ॥ मृत्तिकां हेमवासश्च नानालंकारमेव च ॥ १२७ ॥ दक्षिणां च प्रवक्ष्यामि यस्य
नास्ति प्रतिक्रिया ॥ देवमुदिश्य दानेन होमेन चरुणा तथा ॥ १२८ ॥ दक्षिणस्यां दिशि च्छायां यः पश्येदात्मनः स्वयम् ॥ स्वच्छायां पादुक
स्यैव पश्येत्पञ्चशिरोद्वयम् ॥ १२९ ॥ एवमेवैव यच्छिन्नं शिनष्टि च ततो हितम् ॥ शीघ्रं नाशमवाप्नोति सप्ताहान्नात्र संशयः ॥ १३० ॥ उच्चा
वचान्प्रवक्ष्यामि यथा शास्त्रेण चोदितम् ॥ काकमार्जारशूकानां कपोतानां विशेषतः ॥ मैथुनं दृश्यते यत्र तच्च राहोर्महाद्भुतम् ॥ १३१ ॥ शनि

---

१ ददातीति शेषः ।

मुद्दिश्य जुहुयादयुतं शनिवासरे ॥ पूजयेदर्कपुष्पेण शतेन जुहुयाच्चरुम् ॥ १३२ ॥ कृत्वा तत्रैव पश्येतशनेरद्भुत दर्शनम् ॥ अष्टाविंशं चरुं कृत्वा
ततः शांतिर्भवेद्ध्रुवम् १३३ ॥ भुजपदोस्तथा चक्षुःस्पंदने मरणं दिशेत् ॥ तत्तु सोमाद्भुतं विद्याद्वामदक्षिणतः क्रमात् ॥ १३४ ॥ कृष्णपक्षे भवे
द्वामे विपरीतेऽद्भुतं दिशेत् ॥ अनिष्टसूचकं यस्मात्तस्माच्छांतिं प्रकल्पयेत् ॥१३५॥ शतार्द्धं रविमुद्दिश्य शान्त्यर्थें होममाचरेत् ॥ चरुपाकविधा
नेन यवैस्तिलसुसर्पिषा ॥ १३६ ॥ पुस्तके यज्ञसूत्रं च असत्पात्रे चरौ तु वा ॥ शक्रवज्रप्रदग्धे च सूर्यस्याद्भुतदर्शनम् ॥ १३७ ॥ हयमारं त्रिम
ध्वक्तं जुहुयादिष्टसिद्धये ॥ देवपुस्तकरत्नानि मणिकांचनमेव च ॥ १३८ ॥ लोहितस्याद्भुतं विद्यात्सहस्रं च विशोधनम् ॥ देवागारे तथा
गोधा शंखिनी प्रविशेत्क्वचित् ॥ १३९ ॥ द्रोणकाको बकश्चैव उलूकद्वयमेव च ॥ रक्तकंठः कपोतश्च व्याघ्र एणश्च वा विशेत् ॥ १४० ॥ यस्य
देवगृहं पश्येत्तस्य तस्यायुतं हुनेत् ॥ न चात्र गृहवैकृत्यं हसनं यदि दृश्यते ॥ संपत्तिसूचकं गेहे मरणं दुःखदर्शनम् ॥ १४१ ॥ क्रंदने
हतराज्येन गजाश्ववाहने क्वचित् ॥ सूर्यमुद्दिश्य जुहुयादयुतं सर्वसिद्धये ॥ १४२ ॥ प्रमादात्कंपने हानिः स्वेदे जाते विपद्भवेत् ॥
क्षीरस्रावे च रुधिरे तत्र राज्ये महद्भयम् ॥ १४३ ॥ गोच्छागौ वाथ गोमायुर्गृहोपरि प्रनृत्यति ॥ यदा रौति दिवा फेरुस्तदा
नाशो भवेद्ध्रुवम् ॥ १४४ ॥ श्वजंबुकावथ व्याघ्रो यथाशक्ति च धावति ॥ ईशाने महिषस्तद्वत्तदा देशे च विप्लवः ॥ १४५ ॥
राहोरद्भुतमुद्दिश्य सहस्रं जुहुयाच्चरुम् ॥ वृक्षाद्भुतं यदा पश्येत्तत्र तस्यां परित्यजेत् ॥ यद्गृहेषु हुतं याति देशविप्लवमादिशेत् ॥
॥ १४६ ॥ देशे वा नगरे ग्रामे आरण्यपशुबन्धनम् ॥ सर्पे वा विपरीतं च मांसपिंडमथापि वा ॥ तद्गृहे मरणं चैव देश
विप्लवमादिशेत् ॥ १४७ ॥ दिवाद्भुतेऽयुतं रात्रौ द्विगुणं च भवेद्ध्रुवम् ॥ द्विगुणं चापि संध्यायामर्धरात्रे चतुर्गुणम् ॥ १४८ ॥ अकाले तत्र
मरणमकाले गृहिणीमृतिः ॥ सौराद्भुतं विजानीयादशुभे वा विशोधनम् ॥ १४९ ॥ एकैकस्यायुतं यत्र कुर्यात्तत्रैव होमयेत् ॥ सांगोपांगेन सहित
मष्टावष्टौ हुतं च वा ॥ १५० ॥ अधिप्रत्यधिसहितं गृहपक्षेऽपि सत्तमाः ॥ तन्मानेन हुतं विप्रा कुर्यात्तत्रैव भूषणम् ॥ १५१ ॥ एकैकस्याहुतं विप्रा
अष्टावष्टौ हुतं च वा ॥ अधिप्रत्यधिदेवानां याश्चान्याश्चांगदेवताः ॥ १५२ ॥ मानांतं च ददेत्पूर्णां दत्त्वा पूर्णां न होमयेत् ॥ वक्ष्ये ग्रहमखे मानं
येन मानेन सिध्यति ॥ १५३ ॥ अमानकरणे दोषस्तस्मान्मानं न हापयेत् ॥ पंक्तिचत्वारिंशदाद्यैश्चतुर्धा विभजेन्नरः ॥ १५४ ॥ अनिष्टाय ततो
दद्याच्चरुहोमं विभागशः ॥ अधिप्रत्यधिदेवानामष्टावष्ट ह्युदाहृतम् ॥१५५॥ त्र्यंबकादिषु मंत्रेषु होमत्रयमुदाहृतम् ॥ धनंजये तथा दद्याच्चरुहोमं

विभागतः ॥ १५६ ॥ आदित्यायाष्टावष्टावधिकं कल्पयेत्सुधीः ॥ शतहोमे तु सर्वत्र दशांगं कल्पयेन्नरः ॥ १५७ ॥ अनिष्टाय युगांगं तु ग्रहेभ्यो ह्यंगनाय च ॥ अधिप्रत्यधिदेवानां तथैवांगं प्रकल्पयेत् ॥ १५८ ॥ द्वौ तु दद्यात्त्र्यंबकाय तथा धनंजयाय च ॥ तत्र होमो नायकाय सर्वत्रैव विचक्षणः ॥ १५९ ॥ सहस्रे चैव विंशांगे अनिष्टाय दशांशकम् ॥ पञ्चांशेन ग्रहाणां च पञ्चांशेन यवानपि ॥ १६० ॥ तत्रानिष्टे पंचशतं तस्यार्धं ग्रहवाग्यतः ॥ एकत्रिंशद्भवेन्मानम् (३१) अन्येषां तु चतुर्दश (१४) ॥१६१॥ ग्रहाधिकं होमयुगं तत्र भागे प्रकल्पयेत् ॥ अधातये च तिथ्यंगं पञ्चांगं यस्य चाद्भुतम् ॥ १६२ ॥ ग्रहेभ्यश्चैव पंचांगं तत्र वांगं परानपि ॥ एकैकांगे भवेन्मानं षट्शतं षष्टिरेव च ॥ १६३ ॥ अधिकं च भवेत्षष्टिर्दशमं भागशेषतः ॥ अनिष्टांशे त्रिसहस्रं त्रिशतं त्रिंशतं तथा ॥ १६४ ॥ चतुःशतं ग्रहाणां च तथा सप्तशताधिकम् ॥ उपग्रहेभ्यो दद्याच्च पंचाशीत्यधिकं शतम् ॥ १६५ ॥ तिथ्यंगभागः शेषेण ग्रहे सप्तशताधिकम् ॥ एकैकं तु ग्रहस्यैवमादित्याय युगं भवेत् ॥ १६६ ॥ ग्रहांगे यः स्थितो भागो युगलं भागशेषतः ॥ त्र्यंबकाय च तद्दद्यात्तथा धनंजयाय च ॥१६७॥ शांतिके पौष्टिके काम्ये यदीच्छेत्सुखमात्मनः॥ ग्रहाणां चायुतं होमं त्र्यहसाध्येन होमयेत् ॥ १६८ ॥ त्र्यहसाध्ये विधानं यत्पुरैवोदीरितं द्विजाः ॥ इदानीं प्रक्रमेणैव यो भागः स निगद्यते ॥ १६९ ॥ पूर्वस्मिन्दिवसेऽनिष्टे सहस्रं त्रिशतोत्तरम् (१३००) ॥ इतरेषां ग्रहाणां च प्रत्येकं तु शतं शतम् (१००) ॥ १७० ॥ अधिप्रत्यधिदेवानां पंचाशद्धोम उच्यते ॥ प्रथमेह्नि प्रदद्याच्च मिलित्वा त्रिसहस्रकम् (३०००) ॥ १७१ ॥ द्वितीयदिवसेऽनिष्टे द्विसहस्रमुदाहृतम् (२०००) ॥ प्रति ग्रहेभ्यस्त्रिशतं दद्यादष्ट शताधिकम् (१०८) ॥ १७२ ॥ उपग्रहेभ्यो दद्याच्च षोडशभ्यो यथाक्रमम् ॥ एकाशीतिं ददौ यत्नादशीतिं चांत्ययोर्द्वयोः ॥ १७३ ॥ एवं द्वितीयदिवसे मिलित्वा षट्सहस्रकम् (६०००) ॥ अनिष्टाय त्रिशतं तु तृतीयदिवसे मतम् ॥१७४॥ तत्प्रत्येकं ग्रहाणां च द्वाचत्वारिंशदुच्यते ॥ अधिप्रत्यधिदेवानां प्रत्येकं पंचत्रिंशकम् ॥ १७५ ॥ तृतीयदिवसे दद्यान्मिलित्वैकसहस्रकम् (१०००) ॥ आदित्याय युगं दद्यादेकं तु त्र्यंबकाय च ॥ १७६ ॥ धनंजयाय होमैकमेकं चायुतमुच्यते ॥ तदर्धकं ग्रहेभ्यश्च इतरेभ्यस्तदर्धकम् ॥ १७७ ॥ ग्रहाणां त्रिसहस्रं तु पंचानां च सहस्रकम् ॥ त्रिसहस्रं भागशेषमादित्याय सहस्रकम् ॥ १७८ ॥ त्र्यंबकाय तथादद्यात्तथा धनंजयाय च ॥ षट्पादाधिक षटषट्कसहस्रपरिसंख्यया ॥ नवश्लोकशतोद्भूतं संपूर्णं स्याद्भविष्यकम् ॥ १७९ ॥

॥ इति श्रीभविष्ये महापुराणे मध्यमपर्वणि तृतीयभागे विंशोऽध्यायः ॥ २० ॥ ॥ छ ॥ इति तृतीयभागः समाप्तः ॥ इति श्रीभविष्ये महापुराणे मध्यमपर्व समाप्तम् ॥ ॥ श्रीवेङ्कटेश्वरार्पणमस्तु ॥

॥ इति श्रीभविष्ये महापुराणे द्वितीयं मध्यमपर्व समाप्तम् ॥

अथ श्रीभविष्यमहापुराणे तृतीयं प्रतिसर्गपर्व प्रारभ्यते

प्रतिसर्गपर्व ३.


सूत.
शौनक.
कामगार.
सेवक
यवनराजा.
न्यूह.
तैमुर्लंग बादशाह.
भूतनंदीरा.
पुष्यमित्ररा.
ठेंगू लोक.
व्यास.
विक्रमराजा
वेताळ ब्राम्हणरूपी.
कबीर
दादूपंथी.
रामानंद.
नानक.
रामानुज.
शंकराचार्य.
मध्वाचार्य
निंबार्क
श्रीधराचार्य.
सोमनाथ राजा गुजराथेंतील
संवत करणारा.
कल्क्यवतार.
देशीराजे
रजवाडे.
देशी राजे
पृथ्वीराजा.
अकबर
औरंगजेब.
यवन.
हिं. पार्लमेंट.
रशियन राजा.
हिंदू
म्लेंछ
वगैरे.
ब्राम्हण
क्षत्रिय
शूद्र.
वैश्य

॥ ॥ श्रीगणेशाय नमः ॥ ॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ॥ देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥१॥ ॥ शौनक उवाच ॥ ॥
भविष्याख्ये महाकल्पे ब्रह्मायुषि परार्द्धके ॥प्रथमेऽब्देह्नि तृतीये प्राप्ते वैवस्वतेऽन्तरे ॥ १ ॥ अष्टाविंशे सत्ययुगे के राजानोऽभवन्मुने ॥ तेषां
राज्यस्य वर्षाणि तन्मे वद विचक्षण ॥ २ ॥ ॥ सूत उवाच ॥ ॥ कल्पाख्ये श्वेतवाराहे ब्रह्माब्दस्य दिनत्रये ॥ प्राप्ते सप्तमुहूर्ते च मनुर्वैवस्व
तोऽभवत् ॥ ३ ॥ स तप्त्वा सरयूतीरे तपो दिव्यं शतं समाः ॥ तच्छिक्कातोऽभवत्पुत्र इक्ष्वाकुः स महीपतिः ॥ ४ ॥ ब्रह्मणो वरदानेन दिव्यं यानं
स आप्तवान् ॥ नारायणं पूजयित्वा हरौ राज्यं निवेद्य च ॥ ५ ॥ षट्त्रिंशच्च सहस्राणामब्दं राज्यं तदाऽकरोत् ॥ तस्माज्जातो विकुक्षिश्च शतहीनं[2]
तदब्दकम् ॥६॥ राज्यं कृत्वा दिवं यातस्तस्माज्जातो रिपुंजयः॥शतहीनं कृतं राज्यं तत्ककुत्स्थसुतः स्मृतः॥७॥शतहीनं कृतं राज्यं ततोऽनेनास
आत्मजः ॥ शतहीनं कृतं राज्यं तस्माज्जातो नृपः पृथुः ॥ ८ ॥ शतहीनं कृतं राज्यं विष्वगश्वश्च तत्सुतः ॥ शतहीनं कृतं राज्यं तस्मादार्द्रो
नृपोऽभवत् ॥ ९ ॥ शतहीनं कृतं राज्यं भद्राश्वस्तत्सुतोऽभवत् ॥ शतहीनं कृतं राज्यं युवनाश्वस्तु तत्सुतः ॥ १० ॥ शतहीनं कृतं राज्यं श्रवस्थ
स्तत्सुतोऽभवत् ॥ सत्यपादश्च संजातः प्रथमो भारतेऽन्तरे ॥ ११ ॥ उदयादस्तपर्यंतं तैर्नृपैर्भूमिमंडलम् ॥ भुक्तं नीतिपरैर्देवैः श्रवस्थेन तु भूतले॥
शतहीनं कृतं राज्यं बृहदश्वस्ततोऽभवत् ॥ १२ ॥ शतहीनं कृतं राज्यं तस्मात्कुवलयाश्वकः ॥ शतहीनं कृतं राज्यं दृढाश्वस्तत्सुतोऽभवत्॥ १३॥
सहस्रहीनं राज्यं तत्तस्मात्पुत्रो निकुंभकः ॥ सहस्रहीनं राज्यं तत्संकटाश्वस्तु तत्सुतः ॥ १४ ॥ सहस्रहीनं राज्यं तत्तस्माज्जातः प्रसेनजित् ॥
सहस्रहीनं राज्यं तद्रवणाश्वस्तु तत्सुतः ॥ १५ ॥ सहस्रहीनं राज्यं तन्मांधाता तत्सुतोऽभवत् ॥ शतहीनं कृतं राज्यं पुरुकुत्सस्तु तत्सुतः ॥१६॥
शतहीनं कृतं राज्यं त्रिंशदश्वस्तु तत्सुतः ॥ रथे यस्य स्मृता वाहा वाजिनस्त्रिशतो वराः ॥ १७ ॥ अनरण्यस्ततो जातो ह्यष्टाविंशत्सहस्रकम् ॥
राज्यं द्वितीयचरणे स्मृतं सत्ययुगस्य वै ॥ १८ ॥ पृषदश्वस्ततो जातो राज्यं षष्ठसहस्रकम् ॥ तदब्दं भूतले कृत्वा पितृलोकमुपाययौ ॥ १९ ॥
हर्यश्वस्तु ततो जातो विष्णुभक्तकुले नृपः ॥ सहस्रहीनं राज्यं तत्तत्सुतो वसुमान्स्मृतः ॥ २० ॥ सहस्रहीनं राज्यं तत्त्रिधन्वा तनयस्ततः ॥ सह
स्रहीनं राज्यं तत्तेन राज्ञा च सत्कृतम् ॥ २१ ॥ सत्यपादः समाप्तोऽयं द्वितीयो भारतेऽन्तरे ॥ त्रिधन्वनश्च नृपतेस्त्रपारण्यस्तु वै सुतः ॥ २२ ॥
सहस्रहीनं राज्यं तत्कृत्वा स्वर्गमुपाययौ ॥ तस्माज्जातस्त्रिशंकुश्च राज्यं वर्षसहस्रकम् ॥ २३ ॥ छद्मना हीनतां जातो हरिश्चंद्रस्तु तत्सुतः ॥

---

१ चैव-इ० पा० । २ 'शतहीनम्, सहस्रहीनम्, इत्यनेन प्रतिस्थानतः 'षट्त्रिंशच्च सहस्राणाम्' इत्यारम्भानुक्रमेण हीनत्वं ज्ञेयम् ।

राज्यं विंशत्सहस्रं च रोहितो नाम-तत्सुतः ॥ २४ ॥ पितुस्तुल्यं कृतं राज्यं हारीतस्तनयोऽभवत् ॥ पितुस्तुल्यं कृतं राज्यं चंचुभूपश्च तत्सुतः ॥ २५ ॥ पितुस्तुल्यं हि राज्यं तद्विजयो नाम तत्सुतः ॥ पितुस्तुल्यं हि राज्यं तद्रुरूकस्तनयस्ततः ॥ २६ ॥ पितुस्तुल्यं कृतं राज्यं सगरस्तनयोऽभवत् ॥ भूपाश्च बाहुसेनान्ता वैष्णवाः परिकीर्तिताः॥२७॥ राज्यमानं कृतं सम्यग्भूपैर्वैवस्वतादिभिः ॥ मणिस्वर्णसमृद्धिश्च बह्वन्नं बहुदुग्धकम् ॥ २८ ॥ पूर्णो धर्मस्तदा भूम्यां मुने सत्ययुगस्य वै ॥ तृतीयचरणे मध्ये सगरो नाम भूपतिः ॥ २९ ॥ शिवभक्तः सदाचारस्तत्पुत्राः सागराः स्मृताः ॥ त्रिंशत्सहस्रवर्षं तद्राज्यं वै मुनिभिः स्मृतम् ॥ ३० ॥ नष्टेषु सागरेष्वेवमसमञ्जस आत्मजः ॥ शतहीनं कृतं राज्यमंशुमांस्तत्सुतोऽभवत् ॥३१॥ शतहीनं कृतं राज्यं दिलीपस्तत्सुतोऽभवत् ॥ शतहीनं कृतं राज्यं तस्माज्जातो भागीरथः ॥३२॥ शतहीनं कृतं राज्यं श्रुतसेनस्ततोऽभवत् ॥ शतहीनं कृतं राज्यं नाभागस्तनयस्ततः ॥३३॥ शतहीनं कृतं राज्यमम्बरीषस्ततोऽभवत् ॥ शैवाः षट् श्रुतसेनान्ता नाभागो वैष्णवो नृपः ॥ ३४ ॥ सत्यपादः समाप्तोऽयं तृतीयो भारतेंतरे ॥ अंबरीषेण भूपेन शतहीनं कृतं पदम् ॥ ३५ ॥ चतुर्थे चरणे तस्य चाष्टादशसहस्रकम् ॥ अब्दं राज्यं शुभं ज्ञातं कर्मभूम्यां च भारते ॥ ३६ ॥ एकोनत्रिंशद्वर्षाणि राज्यं तत्रिंशतानि च ॥ शतहीनं कृतं राज्यं सिंधुद्वीपोऽम्बरीषजः ॥ ३७ ॥ शतहीनं कृतं राज्यमयुताश्वस्ततोऽभवत् ॥ शतहीनं कृतं राज्यमृतुपर्णस्तु तत्सुतः ॥ ३८ ॥ शतहीनं कृतं राज्यं सर्वकामो नृपस्ततः ॥ शतहीनं कृतं राज्यं नृपः कल्माषपादकः ॥ ३९ ॥ शतहीनं कृतं राज्यं सुदासस्तनयोऽभवत् ॥ तस्मादशमकश्चैव मदयन्त्या वशिष्ठजः ॥ ४० ॥ शतहीनं कृतं राज्यं हरिवर्मा ततोऽभवत् ॥ सप्त भूपाः सुदासान्ता वैष्णवाः परिकीर्तिताः ॥४१॥ गुरुशापात्तु सौदासो राज्याङ्गं गुरवेऽर्पयत् ॥ गोकर्णलिंगभक्तश्च शैवः समय उच्यते ॥ ४२ ॥ हरिवर्मा शमकजो वैश्यवत्साधुपूजकः ॥ ऊनत्रिंशत्सहस्राणि तथा सप्तशतानि वै ॥ ४३ ॥ हरिवर्माऽकरोद्राज्यं तस्माद्दशरथोऽभवत् ॥ पितुस्तुल्यं कृतं राज्यं तस्माद्दिल्लीवयस्सुतः ॥ ४४ ॥ पितुस्तुल्यं कृतं राज्यं भूपो विश्वासहस्ततः ॥ राज्यं दशसहस्रं तन्नियज्ञः प्राकृतो नृपः ॥ ४५ ॥ तदधर्मप्रतापेन ह्यनावृष्टिस्तदाऽभवत् ॥ शतवर्षमनावृष्टिस्सर्वराज्यं व्यनाशयत् ॥ ४६ ॥ यज्ञं कृत्वा वशिष्ठस्तु राज्ञीवचनतत्परः ॥ यज्ञात्खट्वांग उत्पन्नः खट्वांगं शस्त्रमुद्वहन् ॥ ४७ ॥ इन्द्रसाहाय्यमगमद्राज्यं त्रिंशत्सहस्रकम् ॥ कृत्वा तत्र वरं लब्ध्वा देवेभ्यो मुक्तितां गतः ॥ ४८ ॥ खट्वांगाद्दीर्घबाहुश्च राज्यं विंशत्सहस्रकम् ॥ तस्मात्सुदर्शनो जातो देवीपूजनतत्परः ॥ ४९ ॥ वैष्णवा दाशरथ्यं तास्त्रयो विख्यातसद्बलाः ॥ खट्वांगो दीर्घबाहुश्च वैष्णवौ

परिकीर्तितौ ॥ ५० ॥ सुदर्शनो महाप्राज्ञः काशीराजसुतां नृपः ॥ उद्वह्य भूपतीञ्जित्वा देवीसेवाप्रसादतः ॥ ५१ ॥ राज्यं भरतखण्डान्त
मदधद्धर्मतो नृपः ॥ वर्षपञ्चसहस्राणि राज्यं चक्रे स भूपतिः ॥ ५२ ॥ स्वप्नमध्ये वचः प्रोक्तं महाकाल्या नृपाय वै ॥ वत्स त्वं प्रियया सार्द्धं
वशिष्ठादिभिरन्वितः ॥ ५३ ॥ हिमालयं गिरिं प्राप्य वासं कुरु महामते ॥ महावायुप्रभावेन क्षयो भरतखंडके ॥ ५४ ॥ रत्नाकरः पश्चिमोऽब्धि
स्तस्य द्वीपाः क्षयं गताः ॥ महोदधिः पूर्वतोऽब्धिस्तस्य द्वीपाः क्षयं गताः ॥ ५५ ॥ वाडवोऽब्धिर्दक्षिणे च तस्य द्वीपाः क्षयं गताः ॥ हिमाब्धिरु
त्तरे तस्य सगरैः खनितो हि सः ॥ ५६ ॥ ये द्वीपास्तु सुविख्यातास्तेऽपि सर्वे लयं गताः ॥ भारतो वर्ष एवासौ वत्सरे सप्तमेऽहनि ॥ ५७ ॥
सजीवः प्रलयं यायात्तस्मात्त्वं जीवितो भव ॥ तथेति मत्वा स नृपः पर्वतं वै हिमालयम् ॥ ५८ ॥ प्राप्तवान्मुख्यभूपैश्च मुख्यवैश्यैर्द्विजैः सह ॥
पञ्चवर्षप्रमाणेन वायुस्तेजःक्रमाज्जलम् ॥ ५९ ॥ शर्करा च महीं प्राप्तास्ततो जीवाः क्षयं गताः ॥ पंचवर्षमिते काले जलं जाता वसुंधरा ॥६०॥
शांतो भूत्वा पुनर्वायुर्जलं सर्वमशोषयत् ॥ दशवर्षान्तरे भूमिः स्थली भूत्वा प्रदृश्यते ॥ ६१ ॥ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि
चतुर्युगखंडापरपर्याये कृतयुगभूपाख्यानं नाम प्रथमोऽध्यायः ॥ १ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ वैशाखशुक्लपक्षे तु तृतीयागुरुवासरे ॥
सुदर्शनो जनैः सार्द्धमयोध्यामगमत्पुनः ॥ १ ॥ मायादेवीप्रभावेण पुरं सर्वं मनोहरम् ॥ महावृद्धियुतं प्राप्तं बह्वन्नं सर्वरत्नकम् ॥ २ ॥ दशवर्ष
सहस्राणि राज्यं कृत्वा सुदर्शनः ॥ प्राप्तवाञ्छाश्वतं लोकं दिलीपस्तत्सुतोऽभवत् ॥ ३ ॥ नन्दिनीवरदानेन तत्पुत्रो रघुरुत्तमः ॥ दशवर्षसहस्राणि
दिलीपो राज्यसत्कृतः ॥ ४ ॥ राज्यं कृतं च रघुणा दिलीपान्ते पितुस्समम् ॥ रघुवंशस्ततः ख्यातस्त्रेतायां भृगुनन्दन ॥ ५ ॥ विप्रस्य वर
दानेन तत्पुत्रोऽज इति स्मृतः ॥ पितुस्तुल्यं कृतं राज्यं तस्माद्दशरथोऽभवत् ॥ ६ ॥ पितुस्तुल्यं कृतं राज्यं तस्माद्रामो हरिः स्वयम् ॥ एकादश
सहस्राणि रामराज्यं प्रकीर्तितम् ॥ ७ ॥ तस्य पुत्रः कुशो नाम राज्यं दशसहस्रकम् ॥ अतिथिर्नाम तत्पुत्रः कृतं राज्यं पितुः समम् ॥ ८ ॥ निब
न्धो नाम तत्पुत्रः कृतं राज्यं पितुस्समम् ॥ तस्माज्जातो नलो नाम त्रेतायां शक्तिपूजकः ॥९॥ पितुस्तुल्यं कृतं राज्यं तस्मान्नाभः सुतोऽभवत् ॥
पितुस्तुल्यं कृतं राज्यं पुंडरीकः सुतोऽभवत् ॥ १० ॥ पितुस्तुल्यं कृतं राज्यं क्षेमधन्वा तु तत्सुतः ॥ पितुस्तुल्यं कृतं राज्यं द्वारको नाम तत्सुतः
॥ ११ ॥ पितुस्तुल्यं कृतं राज्यं तस्माज्जातो ह्यहीनजः ॥ पितुस्तुल्यं कृतं राज्यं कुरुर्नाम सुतस्ततः ॥१२॥ कुरुक्षेत्रं कृतं तेन त्रेतायां शतयो
जनम् ॥ त्रेतापादस्समाप्तोऽयं प्रथमो भारतेऽन्तरे ॥ १३ ॥ पितुस्तुल्यं कृतं राज्यं पारियात्रः सुतोऽभवत् ॥ पितुस्तुल्यं कृतं राज्यं दलवालस्सुत

स्ततः ॥ १४ ॥ पिस्तुल्यं कृतं राज्यं छद्मकारी तु तत्सुतः ॥ पितुस्तुल्यं कृतं राज्यं तस्मादुक्थः सुतोऽभवत् ॥ १५ ॥ पितुस्तुल्यं कृतं राज्यं
वज्रनाभिस्ततोऽभवत् ॥ पितुस्तुल्यं कृतं राज्यं शंखनाभिस्ततोऽभवत् ॥ १६ ॥ पितुस्तुल्यं कृतं राज्यं व्युत्थनाभिस्ततोऽभवत् ॥ पितुस्तुल्यं
कृतं राज्यं विश्वपालस्ततोऽभवत् ॥ १७ ॥ पितुस्तुल्यं कृतं राज्यं स्वर्णनाभिस्तु तत्सुतः ॥ पितुस्तुल्यं कृतं राज्यं पुष्पसेनस्तु तत्सुतः॥
॥ १८ ॥ पितुस्तुल्यं कृतं राज्यं ध्रुवसंधिस्तु तत्सुतः ॥ पितुस्तुल्यं कृतं राज्यमपवर्मा तु तत्सुतः ॥ १९ ॥ पितुस्तुल्यं कृतं राज्यं शीघ्रगन्ता
तु तत्सुतः ॥ पितुस्तुल्यं कृतं राज्यं मरुपालस्तु तत्सुतः ॥ २० ॥ पितुस्तुल्यं कृतं राज्यं प्रसूवश्रुत उच्यते ॥ पितुस्तुज्यं कृतं राज्यं सुसंधि
स्तनयोऽभवत् ॥ त्रेतापादः समाप्तोऽयं प्रथमो भारतेंतरे ॥ २१ ॥ उदयादुदयं यावद्राज्ञा तत्र सुसंधिना ॥ पितुस्तुल्यं कृतं राज्यं मामर्बस्तन
यस्ततः ॥ २२ ॥ पितुस्तुल्यं कृतं राज्यं महाऽश्वस्तनयोऽभवत् ॥ पितुस्तुल्यं कृतं राज्यं बृहद्बालः सुतस्ततः ॥ २३ ॥ पितुस्तुल्यं कृतं राज्यं
बृहदैशान एव तत् ॥ पितुस्तुल्यं कृतं राज्यं मुरुक्षेपस्ततोऽभवत्॥२४॥ पितुस्तुल्यं कृतं राज्यं वत्सपालस्तु तत्सुतः॥पितुस्तुल्यं कृतं राज्यं वत्स
व्यूहस्ततोऽभवत् ॥ २५ ॥ पितुस्तुल्यं कृतं राज्यं प्रतिव्योमा ततो नृपः ॥ पितुस्तुल्यं कृतं राज्यं सुतो देवकरस्ततः ॥ २६ ॥ पितुस्तुल्यं
कृतं राज्यं सहदेवस्ततोऽभवत् ॥ पितुस्तुल्यं कृतं राज्यं बृहदश्वस्ततो नृपः ॥ २७ ॥ पितुस्तुल्यं कृतं राज्यं भानुरत्नस्ततोऽभवत् ॥ पितुस्तुल्यं
कृतं राज्यं सुप्रतीकस्ततोऽभवत् ॥ २८ ॥ पितुस्तुल्यं कृतं राज्यं मरुदेवस्सुतस्ततः ॥ पितुस्तुल्यं कृतं राज्यं सुनक्षत्रस्ततोऽभवत् ॥ २९ ॥
पितुस्तुल्यं कृतं राज्यं सुतः केशीनरस्ततः ॥ पितुस्तुल्यं कृतं राज्यमन्तारिक्षस्ततो नृपः ॥ ३० ॥ पितुस्तुल्यं कृतं राज्यं सुवर्णांगो नृपो
ऽभवत् ॥ पितुस्तुल्यं कृतं राज्यं तस्य पुत्रो ह्यमित्रजित् ॥ ३१ ॥ पितुस्तुल्यं कृतं राज्यं बृहद्राजस्ततोऽभवत् ॥ ३२ ॥ पितुस्तुल्यं कृतं राज्यं
धर्मराजस्ततो नृपः ॥ पितुस्तुल्यं कृतं राज्यं तस्माज्जातः कृतञ्जयः ॥ ३३ ॥ पितुस्तुल्यं कृतं राज्यं तस्माज्जातो रणञ्जयः ॥ पितुस्तुल्यं
कृतं राज्यं सञ्जयस्तत्सुतः स्मृतः ॥ ३४ ॥ पितुस्तुल्यं कृतं राज्यं तत्पुत्रः शाक्यवर्धनः ॥ पितुस्तुल्यं कृतं राज्यं क्रोधदानस्तु तत्सुतः ॥
॥ ३५ ॥ पितुस्तुल्यं कृतं राज्यं तस्मादतुलविक्रमः ॥ पितुस्तुल्यं कृतं राज्यं स्तस्माज्जातः प्रसेनजित् ॥ ३६ ॥ पितुस्तुल्यं कृतं
राज्यं तत्पुत्रः शूद्रकः स्मृतः ॥ पितुस्तुल्यं कृतं राज्यं सुरथस्तत्सुतोऽभवत् ॥ :३७ ॥ पितुरर्द्धं कृतं राज्यं सर्वे तु रघुवंशजाः ॥ पञ्चषष्टि
मिता भूपा देवीपूजनतत्पराः ॥ ३८ ॥ हिंसायज्ञपराः सर्वे स्वर्गलोकमितो गताः ॥ बुद्धा जाताश्च ये पुत्रास्ते सर्वे वर्णसंकराः ॥ ३९ ॥ त्रेतातृती

यचरणप्रारम्भेन नवतां गताः ॥ इन्द्रेण प्रेषितो भूमौ चन्द्रमा रोहिणीपतिः ॥ ४० ॥ प्रयागनगरे रम्ये भूमिराज्यमचीकरत् ॥ विष्णुभक्तश्चन्द्रमाश्च शिवपूजनतत्परः ॥ ४१ ॥ मायादेवीप्रसन्नार्थे शतं यज्ञमचीकरत् ॥ अष्टादशसहस्राणि राज्यं कृत्वा दिवं गतः ॥ ४२ ॥ तस्य पुत्रो बुधो नाम मेरुदेवस्य वै सुतः ॥ इलामुद्वाह्य धर्मेण तस्माज्जातः पुरूरवाः ॥४३॥ चतुर्दशसहस्राणि भूमिराज्यमचीकरत्॥उर्वशीं सोऽपि स्वर्वेश्यां समये नैव भोग्यवान् ॥ ४४ ॥ आयुर्नाम सुतो जातो धर्मात्मा विष्णुतत्परः ॥ षट्त्रिंशच्च सहस्राणि राज्यं कृत्वा पुरूरवाः ॥ ४५ ॥ गंधर्वलोकं संप्राप्य मोदते दिवि देववत् ॥ पितुस्तुल्यं कृतं राज्यमायुषो नहुषस्सुतः ॥ ४६ ॥ पितुस्तुल्यं कृतं राज्यं ततः शक्रत्वमागतः ॥ त्रिलोकीं स्ववशं चक्रे वर्षमेकसहस्रकम् ॥ ४७ ॥ मुनेर्दुर्वाससः शापान्नृपोऽजगरतां गतः ॥ पञ्च पुत्रा ययातेश्च त्रयो म्लेच्छत्वमागताः ॥ ४८ ॥ द्वौ तथार्यत्वमापन्नौ यदुर्ज्येष्ठः पुरुर्लघुः ॥ तपोबलप्रभावेण राज्यं लक्षाब्दसंमितम् ॥ ४९ ॥ कृत्वा विष्णुप्रसादेन ततो वैकुण्ठमागतः ॥ यदोः पुत्रः स्मृतः क्रोष्टा राज्यं षष्टिसहस्रकम् ॥ ५० ॥ वृजिनघ्नस्सुतस्तस्माद्राज्यं विंशत्सहस्रकम् ॥ तस्मात्स्वाहार्चनः पुत्रः कृतं राज्यं पितुस्समम् ॥ ५१ ॥ तस्माच्चित्ररथः पुत्रः कृतं राज्यं पितुस्समम् ॥ अरविंदस्सुतस्तस्मात्कृतं राज्यं पितुः समम् ॥ ५२ ॥ अथ श्रवास्ततो जातस्तेजस्वी विष्णुतत्परः ॥ पितुरर्द्धं कृतं राज्यं तत्पुत्रस्तामसः स्मृतः ॥ ५३ ॥ पितुस्तुल्यं कृतं राज्यं तस्मादुशनस्सुतः ॥ पितुस्तुल्यं कृतं राज्यं शीतांशुकनृपोऽभवत् ॥ ॥ ५४ ॥ पितुस्तुल्यं कृतं राज्यं कमलांशुस्ततोऽभवत् ॥ ५५ ॥ पितुस्तुल्यं कृतं राज्यं पारावतसुतस्ततः ॥ पितुस्तुल्यं कृतं राज्यं जामघस्तत्सुतोऽभवत् ॥ ५६ ॥ पितुस्तुल्यं कृतं राज्यं विदर्भस्तत्सुतोऽभवत् ॥ पितुस्तुल्यं कृतं राज्यं क्राथो नाम सुतस्ततः ॥ ५७ ॥ पितुस्तुल्यं कृतं राज्यं कुन्तिभोजस्तु तत्सुतः ॥ पुरुर्दैत्यसुतापुत्रः पाताले वृषपर्वणः ॥ ५८ ॥ उषित्वा नगरे तस्मिन्मायाविद्यस्ततोऽभवत् ॥ प्रयागस्य प्रतिष्ठाने पुरे राज्यमथाकरोत् ॥ ५९ ॥ दशवर्षसहस्राणि राज्यं कृत्वा दिवं गतः ॥ देवीभक्तः स नृपतिस्तत्पुत्रो जनमेजयः ॥ ६० ॥ पितुस्तुल्यं कृतं राज्यं प्रचिन्वांस्तत्सुतोऽभवत् ॥ पितुस्तुल्यं कृतं राज्यं प्रवीरस्तनयोऽभवत् ॥ ६१ ॥ पितुस्तुल्यं कृतं राज्यं नभस्यस्तनयोऽभवत् ॥ पितुस्तुल्यं कृतं राज्यं भवदस्तत्सुतस्स्मृतः ॥ ६२ ॥ पितुस्तुल्यं कृतं राज्यं सुद्युम्नस्तनयोऽभवत् ॥ पितुस्तुल्यं कृतं राज्यं पुत्रो बाहुगरः स्मृतः ॥ ॥ ६३ ॥ पितुस्तुल्यं कृतं राज्यं संयातिस्तनयोऽभवत् ॥ पितुस्तुल्यं कृतं राज्यं धनयातिस्ततोऽभवत् ॥ ६४ ॥ पितुस्तुल्यं कृतं राज्यमैन्द्राश्वस्तनयोऽभवत् ॥ पितुस्तुल्यं कृतं राज्यं तस्माद्रंतिनरः सुतः ॥ ६५ ॥ पितुस्तुल्यं कृतं राज्यं तत्पुत्रः सुतपाः स्मृतः॥ पितुस्तुल्यं कृतं राज्यं सव

रणस्तनयस्ततः ॥ ६६ ॥ हिमालयगिरौ प्राप्ते तपः कर्तुं मनो दधत् ॥ शतवर्षं ततः सूर्यस्तपतीं नाम कन्यकाम् ॥ ६७ ॥ संवरणाय ददौ तुष्टो
रविलोकं नृपो गतः ॥ ततो मायाप्रभावेन युगं प्रलयमागतम् ॥ ६८ ॥ चत्वारः सागरा वृद्धा भारतं क्षयतां गतम् ॥ द्विवर्षे सागरे भूमिरुषित्वा
भूधरैस्सह ॥ ६९ ॥ महावायुप्रभावेन सागराः शुष्कतां गताः ॥ अगस्त्यतेजसा भूमिः स्थली भूत्वा प्रदृश्यते ॥ ७० ॥ पञ्चवर्षांतरे भूमिर्वृक्षदूर्वा
दिसंयुता ॥ सूर्याज्ञया च संवर्णस्तपत्या मुनिना सह ॥ ७१ ॥ वशिष्ठेन त्रिवर्णैश्च मुख्यैः सार्द्धं समागतः ॥ ७२ ॥ इति श्रीभविष्ये महापुराणे
प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये त्रेतायुगभूपाख्यानं नाम द्वितीयोध्यायः ॥ २ ॥ ॥ छ ॥ ॥ शौनक उवाच ॥ ॥ संवर्णश्च महीपालः
कस्मिन्काले समागतः ॥ लोमहर्षण मे ब्रूहि द्वापरस्य नृपांस्तथा ॥ १ ॥ ॥ सूत उवाच ॥ ॥ भाद्रस्य कृष्णपक्षे तु त्रयोदश्यां भृगौ दिने ॥
संवर्णो मुनिभिः सार्द्धं प्रतिष्ठाने समागतः ॥ २ ॥ प्रतिष्ठानं कृतं रम्यं पञ्चयोजनमायतम् ॥ अर्द्धक्रोशोन्नतं हर्म्यं रचितं विश्वकर्मणा ॥ ३ ॥
बुद्धिवंशे प्रसेनस्य सक्ताया भूपतिः कृतः ॥ यदुवंशे सात्वतश्च मधुराभूपतिः कृतः ॥ ४ ॥ म्लेच्छवंशे श्मश्रुपालो मरुदेशस्य भूपतिः ॥ क्रमेण
वर्द्धिता भूपाः प्रजाभिः सहिता भुवि ॥ ५ ॥ दशवर्षसहस्राणि संवर्णो भूपतिः स्मृतः ॥ तस्यात्मजोऽयमर्चाज्ञः कृतं राज्यं पितुस्समम् ॥ ६ ॥
तस्य पुत्रः सूरिजापी पितुरर्द्धं च राज्यकृत् ॥ सूर्ययज्ञस्तस्य पुत्रः सौरयज्ञपरायणः ॥ ७ ॥ शतहीनं कृतं राज्यं तस्मादातिथ्यवर्धनः ॥ शत
हीनं कृतं राज्यं द्वादशात्मा तु तत्सुतः ॥ ८ ॥ शतहीनं कृतं राज्यं तस्माज्जातो दिवाकरः ॥ शतहीनं कृतं राज्यं तस्माज्जातः प्रभाकरः ॥ ९ ॥
शतहीनं कृतं राज्यं भास्वदात्मा च तत्सुतः ॥ शतहीनं कृतं राज्यं विवस्वज्ज्ञस्तदात्मजः ॥ १० ॥ शतहीनं कृतं राज्यं हरिदश्वार्चनस्ततः ॥
शतहीनं कृतं राज्यं तस्माद्वैकर्तनः सुतः ॥ ११ ॥ शतहीनं कृतं राज्यं स्तस्मादर्केष्टिमान्सुतः ॥ शतहीनं कृतं राज्यं तस्मान्मार्तंडवत्सलः ॥
॥ १२ ॥ शतहीनं कृतं राज्यं मिहिरार्थस्तु तत्सुतः ॥ शतहीनं कृतं राज्यं तस्मादरुणपोषणः ॥ १३ ॥ शतहीनं कृतं राज्यं तस्माद्द्युमणिव
त्सलः ॥ शतहीनं कृतं राज्यं तस्मात्तरणियज्ञकः ॥ १४ ॥ शतहीनं कृतं राज्यं तस्मान्मैत्रेष्टिवर्धनः ॥ शतहीनं कृतं राज्यं चित्रभानूर्जकस्ततः ॥
॥ १५ ॥ शतहीनं कृतं राज्यं तस्माद्वैरोचनः स्मृतः ॥ शतहीनं कृतं राज्यं हंसन्यायी तु तत्सुतः ॥ १६ ॥ पितुस्तुल्यं कृतं राज्यं तस्माद्वेद
प्रवर्धनः ॥ शतहीनं कृतं राज्यं तस्मात्सावित्र उच्यते ॥ १७ ॥ शतहीनं कृतं राज्यं धनपालस्ततोऽभवत् ॥ शतहीनं कृतं राज्यं म्लेच्छहन्ता
सुतः स्मृतः ॥ १८ ॥ शतहीनं कृतं राज्यं तस्मादानंदवर्द्धनः ॥ शतहीनं कृतं राज्यं धर्मपालसुतस्ततः ॥ १९ ॥ शतहीनं कृतं राज्यं ब्रह्मभक्त

सुतस्ततः ॥ पितुस्तुल्यं कृतं राज्यं तस्माद्ब्रह्मेष्टिवर्द्धनः ॥ २० ॥ पितुस्तुल्यं कृतं राज्यं तस्मादात्मप्रपूजकः ॥ पितुस्तुल्यं कृतं राज्यं परमेष्ठी सुतस्ततः ॥ २१ ॥ पितुस्तुल्यं कृतं राज्यं तस्माद्धैरण्यवर्द्धनः ॥ शतहीनं कृतं राज्यं धातृयाजी तु तत्सुतः ॥ २२ ॥ पितुस्तुल्यं कृतं राज्यं तद्विधातृप्रपूजकः ॥ पितुस्तुल्यं कृतं राज्यं तस्माद्वै द्रुहिणः क्रतुः ॥ २३ ॥ पितुस्तुल्यं कृतं राज्यं तस्माद्वैरंच्य उच्यते ॥ शतहीनं कृतं राज्यं तत्पुत्रः कमलासनः ॥ २४ ॥ पितुस्तुल्यं कृतं राज्यं शमवर्ती तु तत्सुतः ॥ पितुस्तुल्यं कृतं राज्यं श्राद्धदेवस्तु तत्सुतः ॥२५॥ पितुस्तुल्यं कृतं राज्यं तस्माद्वै पितृवर्द्धनः ॥ पितुस्तुल्यं कृतं राज्यं सोमदत्तस्तु तत्सुतः ॥ २६ ॥ पितुस्तुल्यं कृतं राज्यं सौमदत्तिस्तदात्मजः ॥ पितुस्तुल्यं कृतं राज्यं तस्माद्वै सोमवर्द्धनः ॥ २७ ॥ पितुस्तुल्यं कृतं राज्यमवतंसः सुतस्ततः ॥ पितुस्तुल्यं कृतं राज्यं प्रतंसस्तनयस्ततः ॥ २८ ॥ पितुस्तुल्यं कृतं राज्यं परातंसस्तदात्मजः ॥ पितुस्तुल्यं कृतं राज्यमयतंसस्ततोऽभवत् ॥ २९ ॥ पितुस्तुल्यं कृतं राज्यं समातंसस्तु तत्सुतः ॥ पितुस्तुल्यं कृतं राज्यमनुतंसस्तदात्मजः ॥ ३० ॥ पितुस्तुल्यं कृतं राज्यमधितंसस्ततोऽभवत् ॥ पितुस्तुल्यं कृतं राज्यमभितंसस्तदात्मजः ॥ ॥ ३१ ॥ पितुस्तुल्यं कृतं राज्यं समुत्तंसस्ततोऽभवत् ॥ पितुस्तुल्यं कृतं राज्यं तंसोनाम सुतोऽभवत् ॥ ३२ ॥ पितुस्तुल्यं कृतं राज्यं दुष्यंतस्तनयस्ततः ॥ शकुंतलायां तस्माच्च भरतोनाम भूपतिः ॥ ३३ ॥ पितुस्तुल्यं कृतं राज्यं दुष्यंतः स्वर्गतिं गतः ॥ भरतोनाम तत्पुत्रो देवपूजनतत्परः ॥ ३४ ॥ महामायाप्रभावेन षट्त्रिंशद्वर्षजीवनम् ॥ षट्त्रिंशाब्दसहस्राणि नृपायुर्वर्द्धितं तथा ॥ ३५ ॥ तस्य नाम्ना स्मृतः खंडो भारतो नाम विश्रुतः ॥ तेन भूमेर्विभागश्च कृतं राज्यं पृथक् चिरम् ॥ ३६ ॥ दिव्यं वर्षशतं राज्यं तस्माज्जातो महाबलः ॥ दिव्यं वर्षशतं राज्यं भरद्वाजस्ततोऽभवत् ॥ ३७ ॥ दिव्यं वर्षशतं राज्यं तस्माद्भवनमन्युमान् ॥ अष्टादशसहस्राणि समा राज्यं प्रकीर्तितम् ॥ ३८ ॥ बृहत्क्षेत्रस्ततो ह्यासीत्पितुस्तुल्यं कृतं पदम् ॥ सुहोत्रस्तनयस्तस्य पितुस्तुल्यं कृतं पदम् ॥ ३९ ॥ वीतिहोत्रस्तस्य सुतो राज्यं दशसहस्रकम् ॥ यज्ञहोत्रस्ततोऽप्यासीत्पितुस्तुल्यं कृतं पदम् ॥ ४० ॥ शक्रहोत्रस्ततो जातः पितुस्तुल्यं कृतं पदम् ॥ प्रसन्नो भगवानिंद्रस्तं नृपं स्वर्गमाप्तवान् ॥ ४१ ॥ तदायोध्यापतिः श्रीमान्प्रतापेंद्रो महाबलः ॥ भारतं वर्षमदधद्वर्षं दशसहस्रकम् ॥ ४२ ॥ मंडलीकस्तस्य सुतः पितुस्तुल्यं कृतं पदम् ॥ विजयेंद्रस्तस्य सुतः पितुस्तुल्यं कृतं पदम् ॥ ४३ ॥ धनुर्दीप्तस्तस्य सुतः पितुस्तुल्यं कृतं पदम् ॥ इंद्राज्ञया शक्रहोत्रो घृताच्या सह भूतले ॥ ४४ ॥ प्राप्तावान्सधनुर्दीप्तं जित्वा राज्यमचीकरत् ॥ हस्तीनाम सुतो जात ऐरावतसुतं गजम् ॥ ४५ ॥ आरुह्य पश्चिमे देशे हस्तिनानगरी

कृता ॥ दशयोजनविस्तीर्णा स्वर्गंगायास्तटे शुभा ॥ ४६ ॥ राज्यं दशसहस्रं च तत्र वासं चकार सः ॥ तत्पुत्रस्त्वजमीढाख्यः पितुस्तुल्यं कृतं पदम् ॥ ४७ ॥ तस्माज्जातो रक्षपालः पितुस्तुल्यं कृतं पदम् ॥ सुशम्यर्णस्तस्य सुतः पितुस्तुल्यं कृतं पदम् ॥ ४८ ॥ तस्य पुत्रः कुरुर्नाम पितुरर्द्धं कृतं पदम् ॥ इंद्रस्य वरदानेन सदेहः स्वर्गमागतः ॥ ४९ ॥ तदा सात्त्वतवंशेऽस्मिन्वृष्णिर्नाम महाबलः ॥ मथुरायां स्थितो राज्यं सर्वं स्ववशमाप्तवान् ॥ ५० ॥ भगवतो वरदानेन हरेरद्भुतकर्मणः ॥ पंचवर्षसहस्रं च सर्वं राज्यं वशीकृतम् ॥ ५१ ॥ निरावृत्तिस्तस्य सुतः पिस्तुतुल्यं कृतं पदम् ॥ दशारी तस्य तनयः पितुस्तुल्यं कृतं पदम् ॥ ५२ ॥ वियामुनस्तस्य सुतः पितुस्तुल्यं कृतं पदम् ॥ जीमूतस्तस्य तनयः पितुस्तुल्यं कृतं पदम् ॥ ५३ ॥ विकृतिस्तस्य तनयः पितुस्तुल्यं कृतं पदम् ॥ तस्माज्जातो भीमरथः पितुस्तुल्यं कृतं पदम् ॥ ५४ ॥ तस्माज्जातो नवरथः पितुस्तुल्यं कृतं पदम् ॥ तस्माज्जातो दशरथः पितुस्तुल्यं कृतं पदम् ॥ ५५ ॥ तस्माज्जातश्च शकुनिः पितुस्तुल्यं कृतं पदम् ॥ तस्माज्जातः कुशुंभश्च पितुस्तुल्यं कृतं पदम् ॥ ५६ ॥ तस्माज्जातो देवरथः पितुस्तुल्यं कृतं पदम् ॥ देवक्षेत्रस्तस्य सुतः पितुस्तुल्यं कृतं पदम् ॥ ५७ ॥ तस्य पुत्रो मधुर्नाम पितुस्तुल्यं कृतं पदम् ॥ ततो नवरथः पुत्रः पितुस्तुल्यं कृतं पदम् ॥ ५८ ॥ कुरुवत्सस्तस्य सुतः पितुस्तुल्यं कृतं पदम् ॥ तस्मादनुरथः पुत्रः पितुस्तुल्यं कृतं पदम् ॥ ५९ ॥ पुरुहोत्रः सुतस्तस्य पितुस्तुल्यं कृतं पदम् ॥ विचित्राङ्गस्तस्य सुतः पितुस्तुल्यं कृतं पदम् ॥६०॥ तस्मात्सात्वतवान्पुत्रः पितुस्तुल्यं कृतं पदम् ॥ भजमानस्तस्यसुतः पितुस्तुल्यं कृतं पदम् ॥ ६१ ॥ विदूरथस्तस्य सुतः पितुस्तुल्यं कृतं पदम् ॥ सुरभक्तस्तस्य सुतः पितुस्तुल्यं कृतं पदम् ॥ ६२ ॥ तस्माच्च सुमनाः पुत्रः पितुस्तुल्यं कृतं पदम्॥ ततिक्षेत्रस्तस्य सुतः पितुस्तुल्यं कृतं पदम् ॥ ६३ ॥ स्वायंभुवस्तस्य सुतः पितुस्तुल्यं कृतं पदम् ॥ हरिदीपक एवासौ तस्य राज्यं पितुस्समम् ॥ ६४ ॥ देवमेधास्सुतस्तस्य पितुस्तुल्यं कृतं पदम् ॥ सुरपालस्तदा जातः पितुस्तुल्यं कृतं पदम् ॥ ६५ ॥ शक्राज्ञया कुरुश्चैव द्वापरत्रितये पदे ॥ व्यतीते च सुकेश्यास्स स्ववेंश्यायाः पतिः प्रभुः ॥ ६६ ॥ आगतो भारते खंडे कुरुक्षेत्रं तदा कृतम् ॥ विंशद्योजनविस्तीर्णं पुण्यक्षेत्रं स्मृतं बुधैः ॥ ६७ ॥ द्वादशाब्दसहस्रं च कुरुणा राज्यसात्कृतम् ॥ तस्माज्जह्नुस्सुतो जातः पितुस्तुल्यं कृतं पदम् ॥ ६८ ॥ तस्माच्च सुरथो जातः पितुस्तुल्यं कृतं पदम् ॥ विदूरथस्तस्य सुतः पितुस्तुल्यं कृतं पदम् ॥ ६९ ॥ सार्वभौमस्तस्य सुतः पितुस्तुल्यं कृतं पदम् ॥ जयसेनस्तस्य सुतः पितुस्तुल्यं कृतं पदम् ॥ ७० ॥ तस्मादर्णव एवासौ पितुस्तुल्यं कृतं पदम् ॥ चतुस्सागरगामी च पितुस्तुल्यं कृतं पदम् ॥ ७१ ॥ अयु

तायुस्तस्य सुतो राज्यं दशसहस्रकम् ॥ अक्रोधनस्तस्य सुतः पितुस्तुल्यं कृतं पदम् ॥ ७२ ॥ तस्मादृक्षस्सुतो जातः पितुस्तुल्यं कृतं पदम् ॥
भीमसेनस्तस्य सुतः पितुस्तुल्यं कृतं पदम् ॥ ७३ ॥ दिलीपस्तस्य तनयः पितुस्तुल्यं कृतं पदम् ॥ प्रतीपस्तस्य तनयो राज्यं पंचसहस्रकम् ॥
॥ ७४ ॥ शंतनुस्तस्य पुत्रश्च राज्यमेकसहस्रकम् ॥ विचित्रवीर्यस्तत्पुत्रो राज्यं वै द्विशतं समाः ॥ ७५ ॥ पांडुश्च तनयो यस्मिन्राज्यं
पंचशतं कृतम् ॥ युधिष्ठिरस्तस्य सुतो राज्यं पंचाशदब्दकम् ॥ ७६ ॥ सुयोधनेन षष्ट्यब्दं कृतं राज्यं ततः परम् ॥ युधिष्ठिरेण निधनं तस्य
प्राप्तं कुरुस्थले ॥ ७७ ॥ पूर्वं देवासुरे युद्धे ये दैत्याश्च सुरैर्हताः ॥ ते सर्वे शंतनो राज्ये जन्मवंतः प्रतस्थिरे ॥ ७८ ॥ लक्षमक्षौहिणी तेषां
तद्भारेण वसुन्धरा ॥ शक्रस्य शरणं प्राप्तावतारं च ततो हरेः ॥ ७९ ॥ स सौरेर्वसुदेवस्य देवक्यां जन्मनाविशत् ॥ एवं कृष्णो महावीर्यो
रोहिणीनिलयं गतः ॥ ८० ॥ पंचत्रिंशदुत्तरं च शतं वर्षं च भूतले ॥ उषित्वा कृष्णचन्द्रश्च ततो गोलोकमागतः ॥ ८१ ॥ चतुर्थ
चरणान्ते च हरेर्जन्म स्मृतं बुधैः ॥ हस्तिनापुरमध्यस्याभिमन्योस्तनयस्ततः ॥ ८२ ॥ राज्यमेकसहस्रं च ततोऽभूज्जनमेजयः ॥ त्रिसहस्रं
कृतं राज्यं शतानीकस्ततोऽभवत् ॥ ८३ ॥ पितुस्तुल्यं कृतं राज्यं यज्ञदत्तस्ततः सुतः ॥ राज्यं पंचसहस्रं च निश्चक्रस्तनयोऽभवत् ॥ ८४ ॥
सहस्रमेकं राज्यं तदुष्ट्रपालस्ततोऽभवत् ॥ पितुस्तुल्यं कृतं राज्यं तस्माच्चित्ररथस्सुतः ॥ ८५ ॥ पितुस्तुल्यं कृतं राज्यं धृतिमांस्तनय
स्नतः ॥ पितुस्तुल्यं कृतं राज्यं सुषेणस्तनयोऽभवत् ॥ ८६ ॥ पितुस्तुल्यं कृतं राज्यं सुनीथस्तनयोऽभवत् ॥ पितुस्तुल्यं कृतं राज्यं मखपालः
सुतोऽभवत् ॥ ८७ ॥ पितुस्तुल्यं कृतं राज्यं न चक्षुस्तनयस्ततः ॥ पितुस्तुल्यं कृतं राज्यं सुखवंतस्ततोऽभवत् ॥ ८८ ॥ पितुस्तुल्यं कृतं राज्यं
तस्मात्पारिप्लवस्सुतः ॥ पितुस्तुल्यं कृतं राज्यं सुनयस्तत्सुतोऽभवत् ॥ ८९ ॥ पितुस्तुल्यं कृतं राज्यं मेधावी तत्सुतोऽभवत् ॥ पितुस्तुल्यं कृतं
राज्यं तस्माज्जातो नृपंजयः ॥ ९० ॥ पितुस्तुल्यं कृतं राज्यं मृदुस्तत्तनयोऽभवत् ॥ पितुस्तुल्यं कृतं राज्यं तिग्मज्योतिस्तु तत्सुतः ॥ ९१ ॥
पितुस्तुल्यं कृतं राज्यं तस्माज्जातो बृहद्रथः ॥ पितुस्तुल्यं कृतं राज्यं वसुदानस्ततोऽभवत् ॥९२॥ पितुस्तुल्यं कृतं राज्यं शतानीकस्ततोऽभवत्॥
पितुस्तुल्यं कृतं राज्यं तस्मादुद्यान उच्यते ॥ ९३ ॥ पितुस्तुल्यं कृतं राज्यं तस्माज्जातो ह्यहीनरः ॥ पितुस्तुल्यं कृतं राज्यं
निर्मित्रस्तनयोऽभवत् ॥ ९४ ॥ पितुस्तुल्यं कृतं राज्यं क्षेमकस्तत्सुतोऽभवत् ॥ राज्यं त्यक्त्वा स मेधावी कलापग्राममाश्रितः ॥ ९५ ॥

म्लेच्छैश्च मरणं प्राप्तो यमलोकमतो गतः ॥ नारदस्योपदेशेन प्रद्योतस्तनयस्ततः ॥ ९६ ॥ म्लेच्छयज्ञः कृतस्तेन म्लेच्छा हननमागताः ॥
॥ ९७ ॥ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडापरपर्याये द्वापरनृपोपाख्याने तृतीयोऽध्यायः ॥ ३ ॥ छ ॥ ॥
॥ ॥ शौनक उवाच ॥ ॥ कथं यज्ञः कृतस्तेन प्रद्योतेन विचक्षण ॥ सर्वं कथय मे तात त्रिकालज्ञ महामुने ॥ १ ॥ ॥ सूत उवाच ॥ ॥ एकदा
हस्तिनगरे प्रद्योतः क्षेमकात्मजः ॥ आस्थितः स कथामध्ये नारदोऽभ्यागमत्तदा ॥ २ ॥ तं दृष्ट्वा हर्षितो राजा पूजयामास धर्मवित् ॥ सुखोप
विष्टः स मुनिः प्रद्योतं नृपमब्रवीत् ॥ ३ ॥ म्लेच्छैर्हतस्तव पिता यमलोकमतो गतः ॥ म्लेच्छयज्ञप्रभावेण स्वर्गतिर्भविता हि सः ॥४॥ तच्छ्रुत्वा
क्रोधताम्राक्षो ब्राह्मणान्वेदवित्तमान् ॥ आहूय स कुरुक्षेत्रे म्लेच्छयज्ञं समारभत ॥ ५ ॥ यज्ञकुंडं चतुष्कोणं योजनान्येव षोडश ॥ रचित्वा
देवता ध्यात्वा म्लेच्छांश्च जुहुयान्नृपः ॥ ६ ॥ हारहूणान्बर्बरांश्च गुरुंडांश्च शकान्खसान् ॥ यवनान्पल्लवांश्चैव रोमजान्खरसंभवान् ॥ ७ ॥ द्वीप
स्थितान्कामरूश्च चीनान्सागरमध्यगान् ॥ प्राहूय भस्मसात्कुर्वन्वेदमंत्रप्रभावतः ॥ ८ ॥ ब्राह्मणान्दक्षिणां दत्त्वा अभिषेकमकारयत् ॥ क्षेमको
नाम नृपतिः स्वर्गलोकं ततो गतः ॥ ९ ॥ म्लेच्छहंता नाम तस्य विख्यातं भुवि सर्वतः ॥ राज्यं दशसहस्राब्दं कृतं तेन महात्मना ॥ १० ॥
स्वर्गलोकं गतो राजा तत्पुत्रो वेदवान्स्मृतः॥ द्विसहस्रं [illegible] राज्यं तदा म्लेच्छः कलिः स्वयम् ॥ नारायणं पूजयित्वा दिव्यस्तुतिमथाकरोत् ॥
॥ ११ ॥ ॥ कलिरुवाच ॥ ॥ नमोऽनंताय महते सर्वकालप्रवर्तिने ॥ १२ ॥ चतुर्युगकृते तुभ्यं वासुदेवाय साक्षिणे ॥ दशावताराय हरे नमस्तुभ्यं
नमोनमः ॥१३॥ नमः शक्त्यवताराय रामकृष्णाय ते नमः ॥ नमो मत्स्यावताराय महते गौरवासिने ॥ १४ ॥ नमो भक्तावताराय कल्पक्षेत्रनि
वासिने ॥ राज्ञा वेदवता नाथ मम स्थानं विनाशितम् ॥ मम प्रियस्य म्लेच्छस्य तत्पित्रा वंशनाशनम् ॥ १५ ॥ ॥ सूत उवाच ॥ ॥ इति स्तुत
स्तु कलिना म्लेच्छस्य सह भार्यया ॥१६॥ प्राप्तवान्स हरिः साक्षाद्भगवान्भक्तवत्सलः ॥ कलिं प्रोवाच स हरिर्युष्मदर्थे युगोत्तमम् ॥ १७ ॥ बहु
रूपमहं कृत्वा तवेच्छां पूरयाम्यहम् ॥ आदमो नाम पुरुषः पत्नी हव्यवती तथा ॥ १८ ॥ विष्णुकर्दमतो जातौ म्लेच्छवंशप्रवर्धनौ ॥ हरिस्त्व
न्तर्दधे तत्र कलिरानंदसंकुलः ॥ १९ ॥ गिरिं नीलाचलं प्राप्य किंचित्कालमवासयत् ॥ पुत्रो वेदवतो जातः सुनंदो नाम भूपतिः ॥ २० ॥ पितु
स्तुल्यं कृतं राज्यमनपत्यो मृतिं गतः ॥ आर्यदेशाः क्षीणवंतो म्लेच्छवंशा बलान्विताः ॥ २१ ॥ भविष्यंति भृगुश्रेष्ठ तस्माच्च तुहिनाचलम् ॥
गत्वा विष्णुं समाराध्य गमिष्यामो हरेः पदम् ॥ २२ ॥ इति श्रुत्वा द्विजाः सर्वे नैमिषारण्यवासिनः ॥ अष्टाशीतिसहस्राणि गतास्ते तुहिनाच

लम् ॥ २३ ॥ ॥ विशालायां समासाद्य विष्णुगाथां प्रचक्षिरे ॥ इति व्यासेन कथितं वाक्यं कलिविशारदम् ॥ श्रोतारं स मनः कृत्वा भविष्यं समुदीरयत् ॥ २४ ॥ ॥ व्यास उवाच ॥ ॥ मनः शृणु ततो गाथां भावीं सूतेन वर्णिताम् ॥ कलेर्युगस्य पूर्णां तां तच्छ्रुत्वा तृप्तिमावह ॥ २५ ॥ ॥ ॥ सूत उवाच ॥ ॥ षोडशाब्दसहस्रे च शेषे तद्द्वापरे युगे ॥ बहुकीर्तिमती भूमिरार्यदेशस्य कीर्तिता ॥२६॥ क्वचिद्विप्राः स्मृता भूपाः क्वचिद्राजन्यवंशजाः ॥ क्वचिद्वैश्याः क्वचिच्छूद्राः कुत्रचिद्वर्णसंकराः॥२७॥ द्विशताष्टसहस्रे द्वे शेषे तु द्वापरे युगे ॥ म्लेच्छदेशस्य या भूमिर्भविता कीर्तिमालिनी ॥ २८ ॥ इंद्रियाणि दमित्वा यो ह्यात्मध्यानपरायणः ॥ तस्मादादमनामासौ पत्नी हव्यवती स्मृता ॥ २९ ॥ प्रदाननगरस्यैव पूर्वभागे महावनम् ॥ ईश्वरेण कृतं रम्यं चतुःक्रोशायतं स्मृतम् ॥ ३० ॥ पापवृक्षतले गत्वा पत्नीदर्शनतत्परः ॥ कलिस्तत्रागतस्तूर्णं सर्परूपं हि तत्कृतम्॥ ॥ ३१ ॥ वंचिता तेन धूर्तेन विष्णवाज्ञा भंगतां गता ॥ खादित्वा तत्फलं रम्यं लोकमार्गप्रदं पतिः ॥ ३२ ॥ उदुंबरस्य पत्रैश्च ताभ्यां वाय्वशनं कृतम् ॥ सुताः पुत्रास्ततो जाताः सर्वे म्लेच्छा बभूविरे ॥ ३३ ॥ त्रिंशोत्तरं नवशतं तस्यायुः परिकीर्तितम् ॥ फलानां हवनं कुर्वन्पत्न्या सह दिवं गतः ॥ ३४ ॥ तस्माज्जातः सुतः श्रेष्ठः श्वेतनामेति विश्रुतः ॥ द्वादशोत्तरवर्षं च तस्यायुः परिकीर्तितम् ॥ ३५ ॥ अनुहस्तस्य तनयः शतहीनं कृतं पदम् ॥ कीनाशस्तस्य तनयः पितामहसमं पदम् ॥ ३६ ॥ महल्ललस्तस्य सुतः पंचहीनं शतं नव ॥ तेन राज्यं कृतं तत्र तस्मान्नानपुरं स्मृतम् ॥ ३७ ॥ तस्माच्च विरदो जातो राज्यं षष्ट्युत्तरं समाः ॥ ज्ञेयं नवशतं तस्य स्वनाम्ना नगरं कृतम् ॥ ३८ ॥ हनूकस्तस्य तनयो विष्णुभक्तिपरायणः ॥ फलानां हवनं कुर्वंस्तत्त्वं ह्यसि जयन्सदा॥३९॥त्रिशतं पंचषष्टिश्च राज्यं वर्षाणि तत्स्मृतम् ॥ सदेहः स्वर्गमायातो म्लेच्छधर्मपरायणः॥४०॥आचारश्च विवेकश्च द्विजता देवपूजनम्॥ कृतान्येतानि तेनैव तस्मान्म्लेच्छः स्मृतो बुधैः ॥४१॥ विष्णुभक्त्यग्निपूजा च ह्यहिंसा च तपो दमः ॥ धर्माण्येतानि मुनिभिर्म्लेच्छानां हि स्मृतानि वै ॥ ४२ ॥ मतोच्छिलस्तस्य सुतो हनुकस्यैव भार्गव ॥ राज्यं नवशतं तस्य सप्ततिश्च स्मृताः समाः ॥४३॥ लोमकस्तस्य तनयो राज्यं सप्तशतं समाः ॥ सप्तसप्ततिरेवास्य तत्पश्चात्स्वर्गतिं गतः ॥४४॥ तस्माज्जातः सुतो न्यूहो निर्गतस्तूह एव सः ॥ तस्मान्न्यूहः स्मृतः प्राज्ञै राज्यं पचशतं कृतम् ॥ ४५ ॥ सीमः शमश्च भावश्च त्रयः पुत्रा बभूविरे ॥ न्यूहः स्मृतो विष्णुभक्तस्सोऽहं ध्यानपरायणः ॥ ४६ ॥ एकदा भगवान्विष्णुस्तत्स्वप्ने तु समागतः ॥ ४७ ॥ वत्स न्यूह शृणुष्वेदं प्रलयः सप्तमेऽहनि ॥ भविता त्वं जनैस्सार्धं नावमारुह्य सत्वरम् ॥ ४८ ॥ जीवनं कुरु भक्तेंद्र सर्वश्रेष्ठो भविष्यसि ॥ तथेति मत्वा स मुनिर्नावं कृत्वा सुपुष्टिताम् ॥ ४९ ॥ हस्तत्रिशतलम्बां

च पंचाशद्धस्तविस्तृताम् ॥ त्रिंशद्धस्तोच्छ्रितां रम्यां सर्वजीवसमन्विताम् ॥ ५० ॥ आरुह्य स्वकुलैस्साद्धं विष्णुध्यानपरोऽभवत् ॥ सांवर्तको
मेघगणो महेंद्रेण समन्वितः ॥ ५१ ॥ चत्वारिंशद्दिनान्येव महावृष्टिमकारयत् ॥ सर्वं तु भारतं वर्षं जलैःप्लाव्य तु सिंधवः ॥ ५२ ॥ चत्वारो
मिलिताः सर्वे विशालायां न चागताः ॥ अष्टाशीतिसहस्राणि मुनयो ब्रह्मवादिनः ॥ ५३ ॥ न्यूहश्च स्वकुलैस्सार्धं शेषास्सर्वे विनाशिताः ॥ तदा
च मुनयस्सर्वे विष्णुमायां प्रतुष्टुवुः ॥ ५४ ॥ ॥ मुनय ऊचुः ॥ ॥ नमो देव्यै महाकाल्यै देवक्यै च नमोनमः ॥ महालक्ष्म्यै विष्णुमात्रे राधा
देव्यै नमोनमः ॥ ५५ ॥ रेवत्यै पुष्पवत्यै च स्वर्णवत्यै नमोनमः ॥ कामाक्षायै च मायायै नमो मात्रे नमोनमः ॥ ५६ ॥ महावातप्रभावेन महा
मेघरवेण च ॥ जलधाराभिरुग्राभिर्भयं जातं हि दारुणम् ॥ ५७ ॥ तस्माद्भयाद्भैरवि त्वमस्मान्संरक्ष किंकरान् ॥ तदा प्रसन्ना सा देवी जलं शांतं
तया कृतम् ॥ ५८ ॥ अब्दांतरे मही सर्वा स्थली भूत्वा प्रदृश्यते ॥ आराच्च शिषिणा नाम हिमाद्रेस्तटभूमयः ॥ ५९ ॥ न्यूहस्तत्र स्थितो नाव
मारुह्य स्वकुलैस्सह ॥ जलांते भूमिमागत्य तत्र वासं करोति सः ॥ ६० ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये
द्वापरनृपोपाख्यानं नाम चतुर्थोऽध्यायः ॥ ४ ॥ छ ॥ ॥ शौनक उवाच ॥ ॥ सांप्रतं वर्तते यो वै प्रलयांते मुनीश्वर ॥ द्विव्यदृष्टिप्रभावेन ज्ञातं
ब्रूहि ततः परम् ॥ १ ॥ ॥ सूत उवाच ॥ ॥ न्यूहो नाम स्मृतो म्लेच्छो विष्णुमोहं तदाकरोत् ॥ तदा प्रसन्नो भगवांस्तस्य वंशः प्रवर्द्धितः ॥२॥
म्लेच्छभाषा कृता तेन वेदवाक्यपराङ्मुखा ॥ कलेश्च वृद्धये ब्राह्मीं भाषां कृत्वाऽपशब्दगाम् ॥ ३ ॥ न्यूहाय दत्तवान्देवो बुद्धीशो बुद्धिगः
स्वयम् ॥ विलोमं च कृतं नाम न्यूहेन त्रिसुतस्य वै ॥ ४ ॥ सिमश्च हामश्च तथा याकूतो नाम विश्रुतः ॥ याकूतः सप्तपुत्रश्च जुम्रो माजूज एव
सः ॥५॥ मादी तथा च यूनानस्तूवलोमसकस्तथा ॥ तीरासश्च तथा तेषां नामभिर्देश उच्यते ॥६॥ जुम्रा दश कनाब्जश्च रिफतश्च तजर्रुमः ॥
तन्नाम्ना च स्मृता देशा यूनाद्या ये सुताः स्मृताः ॥ ७ ॥ इलीशस्तरलीशश्च कित्तीहूदानिरुच्यते ॥ चतुर्भिर्नामभिर्देशास्तेषां तेषां प्रचक्रिरे ॥
॥ ८ ॥ द्वितीयतनयाद्धामात्सुताश्चत्वार एव ते ॥ कुशो मिश्रश्च कूजश्च कनआंस्तत्र नामभिः ॥ ९ ॥ देशाः प्रसिद्धा म्लेच्छानां कुशात्षट्त
नयाः स्मृताः ॥ स वा चैव हबीलश्च सर्वतोरगमस्तथा ॥ १० ॥ तथा सवतिका नाम निमरूहो महाबलः ॥ तेषां पुत्राश्च कलनः सिनारोरक
उच्यते ॥ ११ ॥ अक्कदो बाबुनश्चैव रसनादेशकाश्च ते ॥ श्रावयित्वा मुनीन्सूतो योगनिद्रावशं गतः ॥ १२ ॥ द्विसहस्रे शताब्दान्ते बुद्ध्वा
पुनरथाब्रवीत् ॥ सिमवंशं प्रवक्ष्यामि सिमो ज्येष्ठः स भूपतिः ॥ १३ ॥ राज्यं पंचशतं वर्षं तेन म्लेच्छेन सत्कृतम् ॥ अर्कन्सदस्तस्य सुतश्चतु

स्त्रिंशच्च राज्यकम् ॥ १४ ॥ चतुश्शतं पुनर्ज्ञेयं सिंहस्तत्तनयोऽभवत् ॥ राज्यं तस्य स्मृतं तत्र षष्ट्युत्तरचतुः शतम् ॥ १५ ॥ इन्द्रतस्य सुतो ज्ञेयः
पितुस्तुल्यं कृतं पदम् ॥ फलजस्तस्य तनयश्चत्वारिंशद्द्वयं शतम् ॥ १६ ॥ राज्यं कृतं तु तस्माच्च रऊ नाम सुतः स्मृतः ॥ सप्तत्रिंशच्च द्विशतं
तस्य राज्यं प्रकीर्तितम् ॥ १७ ॥ तस्माच्च जूज उत्पन्नः पितुस्तुल्यं कृतं पदम् ॥ नहूरस्तस्य तनयो वयः षष्ट्युत्तरं शतम् ॥ राज्यं चकार नृप
तिर्बहुशत्रून्विहिंसयन् ॥ १८ ॥ ताहरस्तस्य तनयः पितुस्तुल्यं कृतं पदम् ॥ तस्मात्पुत्रोऽविरामश्च नहूरो हारनस्त्रयः ॥ १९ ॥ एवं तेषां स्मृता
वंशा नाममात्रेण कीर्तिताः ॥ सरस्वत्याश्च शापेन म्लेच्छभाषा महाधमाः ॥ २० ॥ तेषां वृद्धिः कलौ चासीत्संक्षेपेण प्रकीर्तिता ॥ संस्कृतस्यैव
वाणी तु भारतं वर्षमूह्यताम् ॥ २१ ॥ अन्यखंडे गता सैव म्लेच्छा ह्यानंदिनोऽभवन् ॥ एवं ते विप्र कथितं विष्णुभक्तद्विजैस्सह ॥ २२ ॥
॥ ॥ व्यास उवाच ॥ ॥ तच्छ्रुत्वा मुनयस्सर्वे विशालायां निवासिनः ॥ नरं नारायणं देवं संपूज्य विनयान्विताः ॥२३॥ ध्यानं चक्रुर्मुदा युक्ता
द्विशतं परिवत्सरान् ॥ तत्पश्चाद्बोधितास्सर्वे शौनकाद्या मुनीश्वराः ॥ २४ ॥ संध्यातर्पणदेवार्चाः कृत्वा ध्यात्वा जनार्दनम् ॥ लोमहर्षणमा
सीनं पप्रच्छुर्विनयान्विताः ॥ २५ ॥ व्यासशिष्य महाभाग चिरं जीव महामते ॥ सांप्रतं वर्तते यो वै राजा तन्मे वद प्रभो ॥ २६ ॥ ॥ सूत
उवाच ॥ ॥ त्रिसहस्राब्दसंप्राप्ते कलौ भार्गवनंदन ॥ आवन्ते शंखनामाऽसौ सांप्रतं वर्तते नृपः ॥२७॥ म्लेच्छदेशे शकपतिरथ राज्यं करोति वै ॥
शृणु तत्कारणं सर्वे यथा यस्य विवर्धनम् ॥ २८ ॥ द्विसहस्रे कलौ प्राप्ते म्लेच्छवंशविवर्द्धिता ॥ भूमिर्म्लेच्छमयी सर्वा नानापथविवर्द्धिता ॥२९॥
ब्रह्मावर्तमृते तत्र सरस्वत्यास्तटं शुभम् ॥ म्लेच्छाचार्यश्च मूशाख्यस्तन्मतैः पूरितं जगत् ॥ ३० ॥ देवार्चनं वेदभाषा नष्टा प्राप्ते कलौ युगे ॥
तल्लक्षणं शृणु मुने म्लेच्छभाषाश्चतुर्विधाः ॥ ३१ ॥ व्रजभाषा महाराष्ट्री यावनी च गुरुंडिका ॥ तासां चतुर्लक्षविधा भाषाश्चान्यास्तथैव च ॥
॥३२॥ पानीयं च स्मृतं पानी बुभुक्षा भूख उच्यते ॥ पानीयं पापडीभाषा भोजनं कक्कनं स्मृतम् ॥३३॥ इष्टिशुद्धरवः प्रोक्त इस्तिनी मसपावनी
आहुतिर्वै आजु इति ददाति च दधाति च ॥ ३४ ॥ पितृपैतरभ्राता च बादरः पतिरेव च ॥ सेति सा यावनी भाषा ह्यश्वश्चास्पस्तथा पुनः ॥३५॥
जानुस्थाने जैनुशब्दः सप्तसिंधुस्तथैव च ॥ सप्तहिन्दुर्यावनी च पुनर्ज्ञेया गुरुंडिका ॥ ३६ ॥ रविवारे च संडे च फाल्गुने चैव फर्वरी ॥ षष्टिश्च
सिक्सटी ज्ञेया तदुदाहारमीदृशम् ॥ ३७ ॥ या पवित्रा सप्तपुरी तासु हिंसा प्रवर्तते ॥ दस्यवः शबरा भिल्ला मूर्खा आर्ये स्थिता नराः ॥ ३८ ॥
म्लेच्छदेशे बुद्धिमंतो नरा वै म्लेच्छधर्मिणः ॥ म्लेच्छाधीना गुणाः सर्वेऽवगुणा आर्यदेशके ॥ ३९ ॥ म्लेच्छराज्यं भारते च तद्द्वीपेषु स्मृतं

तथा ॥ एवं ज्ञात्वा मुनिश्रेष्ठ हरिं भज महामते ॥ ४० ॥ तच्छ्रुत्वा मुनयः सर्वे रोदनं चक्रिरे बहु ॥ ४१ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडापरपर्याये कलियुगभूपवर्णनं नाम पंचमोऽध्यायः ॥ ५ ॥ ७ ॥ ॥ शौनक उवाच ॥ ॥ ब्रह्मावर्ते कथं म्लेच्छा न प्राप्ताः कारणं वद ॥ सूतः प्राह शृणुष्वेदं सरस्वत्याः प्रभावतः ॥१॥ म्लेच्छाः प्राप्ता न तत्स्थाने काश्यपो नाम वै द्विजः ॥ कलौ प्राप्ते सहस्राब्दे स्वर्गात्प्राप्तः सुराज्ञया ॥ २ ॥ आर्यावती च तत्पत्नी दश पुत्रानकल्मषान् ॥ काश्यपात्सा लब्धवती तेषां नामानि मे शृणु ॥ ३ ॥ उपाध्यायो दीक्षितश्च पाठकः शुक्लमिश्रकौ ॥ अग्निहोत्री द्विवेदी च त्रिवेदी पाण्ड्य एव च ॥ ४ ॥ चतुर्वेदीति कथिता नामतुल्यगुणाः स्मृताः ॥ तेषां मध्ये काश्यपश्च सर्वज्ञानमसन्वितः ॥ ५ ॥ काश्मीरे प्राप्तवान्सोऽपि जगदम्बां सरस्वतीम् ॥ तुष्टाव पूजनं कृत्वा रक्तपुष्पैस्तथाक्षतैः ॥ ६ ॥ धूपैर्दीपैश्च नैवेद्यैः पुष्पांजलिसमन्वितः॥७॥ ॥ काश्यप उवाच ॥ ॥ मातः शंकरदयि ते मयि ते करुणा कुतो नास्ति ॥भो[1]ऽसि त्वं जगदंबा जगतः किं मां बहिर्नयसि ॥८॥ देवि त्वं सुरहेतोर्धर्मद्रोहिणमाशु हंसि मातः ॥ उत्तमसंस्कृतभाषां त्वं कुरु म्लेच्छांश्च मोहयेः शीघ्रम् ॥ ९ ॥ अंब त्वं बहुरूपा हुंकाराद्धूम्रलोचनं हंसि ॥ भीमं दुर्गा दैत्यं हत्वा जगतां सुखं नयसि ॥ १० ॥ दंभं मोहं घोरं गर्वं हत्वा सदा सुखं शेषे ॥ बोधय मातर्जगतो दुष्टान्नष्टान्कुरु त्वं वै ॥ तदा प्रसन्ना सा देवी भो मुनेस्तस्य मानसे ॥ ११ ॥ वासं कृत्वा ददौ ज्ञानं मिश्रदेशे मुनिर्गतः ॥ सर्वान्म्लेच्छान्मोहयित्वा कृत्वाथ तान्द्विजन्मनः ॥ १२ ॥ संख्यादशसहस्रं च नरवृन्दं द्विजन्मनाम् ॥ द्विसहस्रं स्मृता वैश्याः शेषाः शूद्रसुताः स्मृताः ॥ १३ ॥ तैः सार्द्धमार्यदेशे स सरस्वत्याः प्रसादतः ॥ अवसद्वै मुनिश्रेष्ठो मुनिकार्यरतः सदा ॥ १४ ॥ तेषामार्यसमूहानां देव्याश्च वरदानतः ॥ वृद्धिर्भवति बहुला चतुष्कोटिनराः स्त्रियः ॥ १५ ॥ तेषां पुत्राश्च पौत्राश्च तद्भूपः काश्यपो मुनिः ॥ विंशोत्तरशतं वर्षं तस्य राज्यं प्रकीर्तितम् ॥ १६ ॥ राज्यपुत्राख्यदेशे च शूद्राश्चाष्टसहस्रकाः ॥ तेषां भूपश्चार्यपृथुस्तस्माज्जातस्स मागधः ॥ १७ ॥ मागधं नाम तत्पुत्रमभिषिच्य ययौ मुनिः ॥ इति श्रुत्वा भृगुश्रेष्ठः शौनको हर्षमागतः ॥ १८ ॥ सूतं पौराणिकं नत्वा विष्णुध्यानपरोऽभवत् ॥ पुनश्च श्रुतिवर्षान्ते बोधिता मुनयस्तथा ॥ १९ ॥ नित्यनैमित्तिकं कृत्वा पप्रच्छुरिदमादरात् ॥ लोमहर्षण मे ब्रूहि के राजानश्च मागधात् ॥ कलौ राज्यं कृतं यैस्तु व्यासशिष्य वदस्व

---

[1] “भोऽसि” इत्यत्र “भो भगो अघो अपूर्वस्य योऽशि” इत्यनेन यादेशे कृते “ओतो गार्ग्यस्य” इत्यनेन यलोपे कृते “भो असि” इत्ययमेवसंधिः समीचीनः । अयमुपरिनिर्दिष्टः संधिस्त्वार्षः । केषां चिन्मतेन भवसि इति योजनीयमित्येव सुवचमिति परास्तम् ।

नः ॥२०॥ ॥ सूत उवाच ॥ ॥ मागधो मामधे देशे प्राप्तवान्काश्यपात्मजः ॥ २१ ॥ पितृराज्यं स्मृतं तेन त्वार्यदेशः पृथक्कृतः ॥ पांचाला
त्पूर्वतो देशो मागधः परिकीर्तितः ॥ २२ ॥ आग्नेय्यां च कलिंगश्च तथावन्तस्तु दक्षिणे ॥ आनर्तदेशो नैर्ऋत्यां सिंधुदेशस्तु पश्चिमे ॥ २३ ॥
वायव्यां कैकयो देशो मद्रदेशस्तथोत्तरे ॥ ईशाने चैव कोणिन्दश्चार्यदेशश्च तत्कृतः ॥२४॥ देशनाम्ना तस्य सुता मगधस्य महात्मनः ॥ तेभ्योंशानि
प्रदत्तानि तत्पश्चात्क्रतुमुद्वहन् ॥२५॥ बलभद्रस्तदा तुष्टो यज्ञभावेन भावितः ॥ शिशुनागः क्रतोर्ज्जातो बलभद्रांशसंभवः ॥२६॥ शतवर्षं कृतं राज्यं
काकवर्मा सुतोऽभवत् ॥ तद्राज्यं नवतिवर्षं क्षेमधर्मा ततोऽभवत् ॥ २७ ॥ अशीतिवर्षं राज्यं तत्क्षेत्रौजास्तत्सुतोऽभवत् ॥ दशहीनं कृतं राज्यं
वेदमिश्रस्ततोऽभवत् ॥ २८ ॥ दशहीनं कृतं राज्यं ततोऽजातीरपुस्सुतः ॥ दशहीनं कृतं राज्यं दर्भकस्तनयोऽभवत् ॥ २९ ॥ दशहीनं कृतं
राज्यमुदयाश्वस्ततोऽभवत् ॥ दशहीनं कृतं राज्यं नंदवर्धन एव तत् ॥ ३० ॥ दशहीनं कृतं राज्यं तस्मान्नंदसुतोऽभवत् ॥ पितुस्तुल्यं कृतं राज्यं
शूद्रीगर्भसमुद्भवः ॥ ३१ ॥ नन्दाज्जातः प्रनन्दश्च दशवर्षं कृतं पदम् ॥ तस्माज्जातः परानन्दः पितुस्तुल्यं कृतं पदम् ॥ ३२ ॥ तस्माज्जातस्समा
नंदो विंशद्वर्षं कृतं पदम् ॥ तस्माज्जातः प्रियानंदः पितुस्तुल्यं कृतं पदम् ॥ ३३ ॥ देवानंदस्तस्य सुतः पितुस्तुल्यं कृतं पदम् ॥ यज्ञभंगः सुत
स्तस्मात्पितुरर्द्धं कृतं पदम् ॥ ३४ ॥ मौर्यानंदस्तस्य सुतः पितुस्तुल्यं कृतं पदम् ॥ महानन्दस्ततो जातः पितुस्तुल्यं कृतं पदम् ॥ ३५ ॥
एतस्मिन्नेव काले तु कलिना संस्मृतो हरिः ॥ काश्यपादुद्भवो देवो गौतमो नाम विश्रुतः ॥ ३६ ॥ बौद्धधर्मं च संस्कृत्य पट्टणे प्राप्तवा
न्हरिः ॥ दशवर्षं कृतं राज्यं तस्माच्छाक्यमुनिः स्मृतः ॥ ३७ ॥ विंशद्वर्षं कृतं राज्यं तस्माच्छुद्धोदनोऽभवत् ॥ त्रिंशद्वर्षं कृतं राज्यं शाक्य
सिंहस्ततोऽभवत् ॥ ३८ ॥ शताद्ध्रौ द्विसहस्रेऽब्दे व्यतीते सोऽभवन्नृपः ॥ कलेः प्रथमचरणे वेदमार्गो विनाशितः ॥ ३९ ॥ षष्टिवर्षं कृतं राज्यं
सर्वबौद्धा नराः स्मृताः॥ नरेषु विष्णुर्नृपतिर्यथा राजा तथा प्रजाः॥४०॥विष्णोर्वीर्यानुसारेण जगद्धर्मः प्रवर्त्तते ॥ तस्मिन्हरौ ये शरणं प्राप्ता माया
पतौ नराः ॥ ४१ ॥ अपि पापसमाचारा मोक्षवंतः प्रकीर्तिताः ॥ शक्यासिंहाद्बुद्धसिंहः पितुरर्द्धं कृतं पदम् ॥ ४२ ॥ चंद्रगुप्तस्तस्य सुतः पौरसा
धिपतेः सुताम् ॥ सुलूवस्य तथोद्वाह्य यावनीबौद्धतत्परः ॥ ४३ ॥ षष्टिवर्षं कृतं राज्यं बिंदुसारस्ततोऽभवत् ॥ पितृस्तुल्यं कृतं राज्यमशोकस्त
नयोऽभवत् ॥४४॥ एतस्मिन्नेव काले तु कान्यकुब्जो द्विजोत्तमः ॥ अर्बुदं शिखरं प्राप्य ब्रह्महोममथाकरोत् ॥४५॥ वेदमंत्रप्रभावाच्च जाताश्चत्वारि
क्षत्रियाः ॥ प्रमरस्सामवेदी च चपहानिर्यजुर्विदः॥४६॥ त्रिवेदी च तथा शुक्लोथर्वा स परिहारकः ॥ ऐरावतकुले जातान्गजानारुह्यते पृथक् ॥४७॥

अशोकं स्ववश चक्रुस्सर्वे बौद्धा विनाशिताः ॥ चतुर्लक्षाः स्मृता बौद्धाः दिव्यशस्त्रैः प्रहारिताः ॥ ४८ ॥ अवन्ते प्रमरो भूपश्चतुर्योजनविस्तृताम् ॥ अम्बावतीं नाम पुरीमध्यास्य सुखितोऽभवत् ॥ ४९ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडापरपर्याये कलियुगभूपवर्णनोपाख्याने षष्ठोध्यायः ॥ ६ ॥ छ ॥

॥ सूत उवाच ॥ ॥ चित्रकूटगिरेर्देशे परिहारो महीपतिः ॥ कालिंजरपुरं रम्यमक्रोशायतनं स्मृतम् ॥ १ ॥ अध्यास्य बौद्धहंता स सुखितोभवदूर्जितः ॥ राजपुत्राख्यदेशे च चपहानिर्महीपतिः ॥ २ ॥ अजमेरपुरं रम्यं विधिशोभासमन्वितम् ॥ चातुर्वर्ण्ययुतं दिव्यमध्यास्य सुखितोऽभवत् ॥ ३ ॥ शुक्लो नाम महीपालो गत आनर्तऽमंडले ॥ द्वारकां नाम नगरीमध्यास्य सुखितोऽभवत् ॥ ४ ॥ ॥ शौनक उवाच ॥ तेषामग्न्युद्भवानां च ये भूपा राज्यसत्कृताः ॥ तान्मे ब्रूहि महाभाग सूतो वाक्यमथाब्रवीत् ॥ ५ ॥ गच्छध्वं ब्राह्मणाः सर्वे योगनिद्रावशो ह्यहम् ॥ तच्छ्रुत्वा मुनयः सर्वे विष्णोर्ध्यानं प्रचक्रिरे ॥ ६ ॥ पूर्णे द्वे च सहस्रान्ते सूतो वचनमब्रवीत् ॥ सप्तत्रिंशशते वर्षे दशाब्दे चाधिके कलौ ॥ ७ ॥ प्रमरो नाम भूपालः कृतं राज्यं च षट्समाः॥ महामदस्ततो जातः पितुरर्धं कृतं पदम् ॥८॥ देवापिस्तनयस्तस्य पितुस्तुल्यं कृतं पदम् ॥ देवदूतस्तस्य सुतः पितुस्तुल्यं स्मृतं पदम् ॥ ९ ॥ तस्माद्गंधर्वसेनश्च पंचाशदब्दभूपदम् ॥ कृत्वा च स्वसुतं शंखमभिषिच्य वनं गतः ॥ १० ॥ शंखेन तत्पदं प्राप्तं राज्यं त्रिंशत्समाः कृतम् ॥ देवांगना वीरमती शक्रेण प्रेषिता तदा ॥ ११ ॥ गंधर्वसेनं संप्राप्य पुत्ररत्नमजीजनत् ॥ सुतस्य जन्मकाले तु नभसः पुष्पवृष्टयः ॥ १२ ॥ पेतुर्दुंदुभयो नेदुर्वांति वाताः सुखप्रदाः ॥ शिवदृष्टिर्द्विजो नाम शिष्यैस्सार्द्धं वनं गतः ॥ १३ ॥ विंशद्भिः कर्मयोगं च समाराध्य शिवोऽभवत् ॥ पूर्णे त्रिंशच्छते वर्षे कलौ प्राप्ते भयंकरे ॥ १४ ॥ शकानां च विनाशार्थमार्यधर्मविवृद्धये ॥ जातश्शिवाज्ञया सोऽपि कैलासाद्गुह्यकालयात् ॥ १५ ॥ विक्रमादित्यनामानं पिता कृत्वा मुमोद ह ॥ स बालोऽपि महाप्राज्ञः पितृमातृप्रियंकरः ॥ १६ ॥ पञ्चवर्षे वयःप्राप्ते तपसोऽर्थे वनं गतः ॥ द्वादशाब्दं प्रयत्नेन विक्रमेण कृतं तपः ॥ १७ ॥ पश्चादम्बावतीं दिव्यां पुरीं यातः श्रियान्वितः ॥ दिव्यं सिंहासनं रम्यं द्वात्रिंशन्मूर्तिसंयुतम् ॥ १८ ॥ शिवेन प्रेषितं तस्मै सोपि तत्पदमग्रहीत् ॥ वैतालस्तस्य रक्षार्थं पार्वत्या निर्मितो गतः ॥ १९ ॥ एकदा स नृपो वीरो महाकालेश्वरस्थलम् ॥ गत्वा सम्पूजयामास देवदेवं पिनाकिनम् ॥ २० ॥ सभा धर्ममयी तत्र निर्मिता व्यूहविस्तरा ॥ नानाधातुकृतस्तम्भा नानामणिविभूषिता ॥२१॥ नानाद्रुमलताकीर्णा पुष्पवल्लीभिरन्विता ॥ तत्र सिंहासनं दिव्यं स्थापितं तेन शौनक ॥ २२ ॥ आहूय ब्राह्मणान्मुख्यान्वेदवेदांगपारगान् ॥ पूजयित्वा विधानेन धर्मगाथामथाऽश्रृणोत् ॥ २३ ॥ एतस्मिन्नन्तरे तत्र

वैतालो नाम देवता ॥ स कृत्वा ब्राह्मणं रूपं जयाशीर्भिः प्रशस्य तम् ॥ २४ ॥ उपविश्यासने विप्रो राजानमिदमब्रवीत् ॥ यदि ते श्रवणे श्रद्धा
विक्रमादित्यभूपते ॥ २५ ॥ वर्णयामि महाख्यानमितिहाससमुच्चयम् ॥ २६ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापर
पर्याये कलियुगसंभूतरविशशिवंशभूपवर्णनं नाम सप्तमोऽध्यायः ॥ ७ ॥ ॥ छ ॥ ॥ इति प्रथमखंडः संपूर्णः ॥ १ ॥ ॥ ॥
॥ ॥ श्रीगणेशाय नमः ॥ ॥ सूत उवाच ॥ ॥ इत्युक्तस्स तु वैतालो महाकालेश्वरस्थितः ॥ शिवं मनसि संस्थाप्य राजानमिदमब्रवीत् ॥ १ ॥
विक्रमादित्यभूपाल शृणु गाथां मनोरमाम् ॥ वाराणसी पुरी रम्या महेशो यत्र तिष्ठति ॥ २ ॥ चातुर्वर्ण्यप्रजा यत्र प्रतापमुकुटो नृपः ॥ महादेवी
च महिषी धर्मज्ञस्य महीपतेः ॥ ३ ॥ तत्पुत्रो वज्रमुकुटो मंत्रिणः सुतवल्लभाः ॥ षोडशाब्देऽथ संप्राप्ते हयारूढो वनं गतः ॥४॥ अमात्यतनयश्चैव
बुद्धिदक्ष इति श्रुतः ॥ हयारूढो गतः सार्धं समानवयसा वने ॥५॥ स दृष्ट्वा विपिनं रम्यं मृगपक्षिसमन्वितम् ॥ मुमोद वज्रमुकुटः कामाशयवशं
गतः ॥ ६ ॥ तत्र दिव्यं सरो रम्यं नानापक्षिनिनादितम् ॥ तस्य कूले शिवस्थानं मुनिवृंदैः प्रपूजितम् ॥ ७ ॥ दृष्ट्वा तत्र गतौ वीरौ परमानंदमा
पतुः ॥ एतस्मिन्नंतरे भूप करणाटकभूपतेः ॥ ८ ॥ दंतवक्रस्य तनया नाम्ना पद्मावती मता ॥ कामदेवं नमस्कृत्य कामिनी कामरूपिणी ॥९॥
चिक्रीड सखिभिः क्रीडां सरोमध्ये मनोहरा ॥ तदा तु वज्रमुकुटो मन्दिरादागतो बहिः ॥ १० ॥ दृष्ट्वा पद्मावतीं बालां तुल्यरूपगुणान्विताम् ॥
मूर्च्छितः पतितो भूमौ सा दृष्ट्वा तु मुमोह वै ॥ ११ ॥ प्रबुद्धो वज्रमुकुटो मां पाहि शिवशंकर ॥ इत्युक्त्वा भूपतनयः पुनर्बालां ददर्श ह ॥ १२ ॥
शिरसः पद्मकुसुमं सा गृहीत्वा तु कर्णयोः ॥ कृत्वा चखान दशनैः पादयोर्दधती पुनः ॥ १३ ॥ पुनर्गृहीत्वा तत्पुष्पं हृदये संप्रवेशितम् ॥
इति भावं च सा कृत्वाऽऽलिभिः सार्धं ययौ गृहम् ॥ १४ ॥ तीर्थार्थं च समं पित्रा संप्राप्ता गिरिजावने ॥ तस्यां गतायां स नृपो मारबाणेन
पीडितः ॥ १५ ॥ महतीं मानसीं पीडां प्राप्तवान्मोहमागतः ॥ उन्मादीव ततो भूत्वा खाद्यपानविवर्जितः ॥ १६ ॥ ध्यात्वा पद्मावतीं बालां
मौनव्रतमचीकरत् ॥ तदा कोलाहलो जातः प्रतापमुकुटांतिके ॥ १७ ॥ कुमारः कां दशां प्राप्त इति हाहेति सर्वतः ॥ त्रिदिनांते मंत्रिसुतो बुद्धि
दक्षो विशारदः ॥ १८ ॥ अब्रवीद्वज्रमुकुटं सत्यं कथय भूपते ॥ स आह कारणं सर्वं यथा जातं सरोवरे ॥ १९ ॥ तच्छ्रुत्वा बुद्धिदक्षश्च विह
स्याह महीपतिम् ॥ महाकष्टेन सा देवी मित्रत्वं हि गमिष्यति ॥ २० ॥ करणाटकभूपस्य दंतवक्रस्य सा सुता ॥ पद्मावतीति विख्याता दधती
त्वां स्वमानसे ॥ २१ ॥ पुष्पभावेन ज्ञात्वाहं त्वां नयामि तदंतिके ॥ इत्युक्त्वा तस्य पितरं प्रतापमुकुटं प्रति ॥ २२ ॥ आहाज्ञां देहि भूपाल

यास्येहं कारणाटके ॥ त्वत्सुतस्य चिकित्सार्थं स वज्रमुकुटोऽचिरम् ॥ २३ ॥ आयामि नाऽत्र सन्देहो यदि जीवयसे सुतम् ॥ तथेति मत्वा
स नृपः प्रादात्पुत्रं च मन्त्रिणे ॥ २४ ॥ हयारूढौ गतौ शीघ्रं दंतवक्रस्य पत्तने ॥ काचिद्वृद्धा स्थिता तत्र तस्या गेहं च तौ गतौ ॥ २५ ॥
बहुद्रव्यं ददौ तस्यै बुद्धिदक्षो विशारदः ॥ ऊषतुर्मंदिरे तस्मिन्रात्रिं घोरतमोवृताम् ॥ २६ ॥ प्रातःकाले तु सा वृद्धा गच्छंती राजमन्दिरम् ॥
तामाह मन्त्रितनयः शृणु मातर्वचो मम ॥ २७ ॥ पद्मावतीं च संप्राप्यैकांते मद्वचनं वद ॥ ज्येष्ठशुक्लस्य पञ्चम्यामिंदुवारे सरोवरे ॥ २८ ॥
यो दृष्टः पुरुषो रम्यस्त्वदर्थे समुपागतः॥ इति श्रुत्वा ययौ वृद्धा पद्मं तस्यै न्यवेदयत् ॥ २९ ॥ रुष्टा पद्मावती प्राह चन्दनार्द्रांगुलीयिका ॥ गच्छ
गच्छ महादुष्टे तलेनोरस्यताडयत् ॥ ३० ॥ अंगुलीभिः कपोलौ च तस्याः स्पृष्ट्वा ययौ गृहम् ॥ सा तु वृद्धा बुद्धिदक्षं सर्वं भावं न्यवेदयत् ॥
॥ ३१ ॥ समित्रं दुःखितं प्राह शृणु मित्र शुचं त्यज ॥ त्वामाह भूपतेः कन्या प्राणप्रिय वचः शृणु ॥ ३२ ॥ त्वदर्थे ताडितं वक्षः कदा मित्रं
भविष्यसि ॥ श्रुत्वा तन्मधुरं वाक्यं रजो देहे समागतम् ॥ ३३ ॥ रजस्वलांते भो मित्र तवास्यं चुंबितास्म्यहम् ॥ इति श्रुत्वा भूपसुतः परमा
नन्दमाययौ ॥ ३४ ॥ त्रिदिनांते तु सा वृद्धा पद्मावत्यै न्यवेदयेत् ॥ त्वामुत्सुकः स भूपालस्तव दर्शनलालसः ॥ ३५ ॥ तं भजस्वाद्य सुश्रोणि
सफलं जीवनं कुरु ॥ इति श्रुत्वा महाहृष्टा सा मस्याद्रांगुलीयकम् ॥ ३६ ॥ गवाक्षद्वारि निष्कास्य तले पृष्ठे च ताडिता ॥ तथैव वृद्धा तं
प्राप्य मन्त्रिणं चाब्रवीद्वचः ॥ ३७ ॥ प्रसन्नो बुद्धिदक्षश्च मित्रं प्राह शृणुष्व भोः ॥ पश्चिमे दिशि भोः स्वामिन्गवाक्षं तव निर्मितम् ॥ ३८ ॥
अर्द्धरात्रे तु संप्राप्य भज मां कामविह्वलाम् ॥ श्रुत्वा तद्वज्रमुकुटः प्रियादर्शनलालसः ॥ ३९ ॥ ययौ शीघ्रं महाकामी रमणीं तामरामयत् ॥
मासांते कामशिथिलो मित्रदर्शनलालसः ॥ ४० ॥ पद्मावतीं प्रियां प्राह शृणु वाक्यं वरानने ॥ येन प्राप्तवती मह्यं त्वं सुभ्रूः सुरदुर्लभा ॥ ४१ ॥
तन्मित्रं बुद्धिदक्षश्च किं नु तिष्ठति सांप्रतम् ॥ आज्ञां देहि प्रिये मह्यं दृष्ट्वायास्यामि तेंऽतिकम् ॥ ४२ ॥ इति श्रुत्वा वचस्तस्य निष्ठुरं कुलि
शोपमम् ॥ मिष्टान्नं सविषं कृत्वा मंत्रिणे सा न्यवेदयत् ॥ ४३ ॥ तदा तु बुद्धिदक्षश्च चित्रगुप्तप्रपूजकः ॥ ज्ञात्वा तत्कारणं सर्वं न तु भक्षित
वान्स्वयम् ॥ ४४ ॥ एतस्मिन्नन्तरे प्राप्तो भूपतिस्त्वरयान्वितः ॥ विवेकवन्तं मित्रं तं दृष्ट्वा प्राह रुषान्वितः ॥ ४५ ॥ कस्मान्न खादितं मित्र
भोजनं मत्प्रियाकृतम् ॥ विहस्य बुद्धिदक्षस्तु सारमेये ददौ हि तत् ॥ ४६ ॥ भुक्त्वा स मरणं प्राप्तः स दृष्ट्वा विस्मितो नृपः ॥ स्त्रीचारित्रं च
विज्ञाय स्नेहं त्यक्त्वाऽब्रवीत्तु तम् ॥४७॥ मित्र गच्छ गृहं शीघ्रं मया त्यक्ता च पापिनी ॥ स आह शृणु भूपाल गच्छ शीघ्रं प्रियांतिकम् ॥४८॥

तदलंकारमाहृत्य त्रिशूलं कुरु जानुनि ॥ प्रसुप्तां त्यज भो मित्र या हि त्वं मा विचारय ॥ ४९ ॥ इति श्रुत्वा ययौ भूपस्तथा कृत्वा समागतः ॥ स्वमित्रेण ययौ सार्धं स्मशामे रुद्रमण्डपे ॥ ५० ॥ शिष्यं कृत्वा नृपं तं स योगिरूपो हि भूषणम् ॥ विक्रयार्थं ददौ तस्मै स्वमित्राय स बुद्धिमान् ॥ ५१ ॥ स वज्रमुकुटो मत्वा तदाज्ञां नगरं गतः ॥ चोरोयमिति तं मत्वा बद्धा राज्ञो हि रक्षिणः ॥ ५२ ॥ शीघ्रं निवेदयामासुर्दन्तवक्त्रस्तमब्रवीत् ॥ क्व प्राप्तं भूषणं रम्यं सर्वं कथय पूरुष ॥ ५३ ॥ जटिलः प्राह भो राजन्स्मशाने मद्गुरुः स्थितः ॥ तेन दत्तं विक्रयार्थं भूषणं स्वर्णगुंठितम् ॥ ५४ ॥ इति श्रुत्वा स नृपतिस्तूर्णमाहूय तद्गुरुम् ॥ भूषणं पृष्टवान्राजा योगी प्राह शृणुष्व भोः ॥ ५५ ॥ स्मशाने संधितं मंत्रं मया योगिस्वरूपिणा ॥ पिशाची प्रापिता काचित्तस्याश्चिह्नं मया कृतम् ॥ ५६ ॥ वामजानुनि शूलेन तया दत्तं हि भूषणम् ॥ ज्ञात्वा तत्कारणं राजा सुता निष्कासिता गृहात् ॥ ५७ ॥ स वज्रमुकुटस्तां तु गृहीत्वा गृहमाययौ ॥ विहस्य प्राह वैतालः शृणु विक्रमभूपते ॥ ५८ ॥ कस्मै पापं महत्प्राप्तं चतुर्णां मे वदाधुना ॥ ॥ सूत उवाच ॥ ॥ इति श्रुत्वा वचस्तस्य विक्रमो नाम भूपतिः ॥ ५९ ॥ विहस्य भार्गवं प्राह प्राप्तं पापं हि भूपतेः ॥ मित्रकार्यममात्येन स्वामिकार्यं च रक्षिभिः ॥ ६० ॥ भूपपुत्रेणार्थसिद्धं कृतं तस्माच्च भूपतेः ॥ महत्पापं च संप्राप्तं तेनासौ नरकं गतः ॥ ६१ ॥ रजोवतीं सुतां दृष्ट्वा न विवाहेत यो नरः ॥ स पापी नरकं याति षष्टिवर्षसहस्रकम् ॥ ६२ ॥ गांधर्वं च विवाहं वै कामिन्या च कृतं यया ॥ तस्या विघ्नकरो यो वै स पापी यमपीडितः ॥ ६३ ॥ अदृष्टदोषां यः कन्यां विवेकेन विना त्यजेत् ॥ स पापी नरकं याति लक्षवर्षप्रमाणकम् ॥ ६४ ॥ इति श्रुत्वा स वैतालो धर्मगाथां नृपेरिताम् ॥ प्रसन्नहृदयः प्राह भूपतिं धर्मतत्परम् ॥ ६५ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चयवर्णनं नाम प्रथमोऽध्यायः ॥ १ ॥

॥ सूत उवाच ॥ ॥ प्रसन्नमनसं भूपं महासिंहासने स्थितम् ॥ द्विजवर्यः स वैतालो वचः प्राह प्रसन्नधीः ॥ १ ॥ एकदा यमुनातीरे धर्मस्थलपुरी शुभा ॥ धनधान्यसमायुक्ता चतुर्वर्णसमन्विता ॥ २ ॥ गुणाधिपो महीपालस्तत्र राज्यं चकार वै ॥ हरिशर्मा पुरोधास्तु स्नानपूजनतत्परः ॥ ३ ॥ तस्य पत्नी सुशीला च पतिव्रतपरायणा ॥ सत्यशीलः सुतो जातो विद्याध्ययनतत्परः ॥ ४ ॥ तस्यानुजा मधुमती शीलरूपगुणान्विता ॥ द्वादशाब्दवयःप्राप्ते विवाहार्थं पिता यदा ॥ ५ ॥ भ्राता बभ्राम तौ सर्वं चिनुतश्च सुतावरम् ॥ कदाचिद्राजपुत्रस्य विवाहे समतो द्विजः ॥ ६ ॥ पठनार्थे तु काश्यां वै सत्यशीलः स्वयं गतः ॥ एतस्मिन्नंतरे राजन्द्विजः कश्चित्समागतः ॥ ७ ॥ वामनो नाम

विख्यातो रूपशीलवयोवृतः ॥ सुता मधुमती तं च दृष्ट्वा कामातुराऽभवत् ॥ ८ ॥ भोजनं छादनं पानं स्वप्नं त्यक्त्वा च विह्वला ॥ चकोरीव
विना चंद्रं कामबाणप्रपीडिता ॥ ९ ॥ दृष्ट्वा सुशीला तं बाला वामनं ब्राह्मणं तथा ॥ वारयामास तांबूलैः स्वर्णद्रव्यसमन्वितैः ॥ १० ॥ हरिशर्मा
प्रयोगे च द्विजं दृष्ट्वा त्रिविक्रमम् ॥ वेदवेदांगतत्त्वज्ञं सुतार्थेऽवरयत्तदा ॥ ११ ॥ सत्यशीलस्तु काश्यां वै गुरुपुत्रं च केशवम् ॥ वरित्वा तं भगि
न्यर्थे ययौ गेहं मुदान्वितः ॥ १२ ॥ माघकृष्णत्रयोदश्यां भृगौ लग्नं शुभं स्मृतम् ॥ त्रयो विप्रास्तदा प्राप्ताः कन्यार्थे रूपमोहिताः ॥ १३ ॥
तस्मिन्काले तु सा कन्या भुजंगेनैव दंशिता ॥ मृता प्रेतत्वमापन्ना पूर्वकर्मप्रभावतः ॥ १४ ॥ तदा ते ब्राह्मणा यत्नं कारयामासुरुत्तमम् ॥ न जीव
नवती बाला गरलेन विमोहिता ॥ १५ ॥ हरिशर्मा तु तत्सर्वं कृत्वा वेदविधानतः ॥ आययौ मंदिरं राजन्सुतागुणविमोहितः ॥ १६ ॥ त्रिवि
क्रमस्तु बहुधा दुःखं कृत्वा स्मरानुगः ॥ कंथाधारी यतिर्भूत्वा देशाद्देशांतरं ययौ ॥ १७ ॥ केशवस्तु महादुःखी प्रियास्थीनि गृहीतवान् ॥ तीर्था
त्तीर्थांतरं प्राप्तः कामबाणेन पीडितः ॥ १८ ॥ भस्मग्राही वामनस्तु विरहाग्निप्रपीडितः ॥ तस्थौ चितायां कामार्तः पत्नीध्यानपरायणः ॥१९॥
एकदा सरयूतीरे लक्ष्मणाख्यपुरे शुभे ॥ त्रिविक्रमस्तु भिक्षार्थे संप्राप्तो द्विजमंदिरे ॥ २० ॥ तस्मिन्दिने रामशर्मा शिवध्यानपरायणः ॥ यतिनं
वरयामास भोजनार्थं स्वमंदिरे ॥ २१ ॥ तस्य पत्नी विशालाक्षी रचित्वा बहुभोजनम् ॥ आहूय यतिनं राजन्पात्रमालभमाकरोत् ॥ २२ ॥
तस्मिन्काले च तद्बालो मृतः पापवशं गतः ॥ अरोदीत्तस्य सैरंध्री विशलाक्ष्यपि भर्त्सिता ॥ २३ ॥ न रोदनं त्यक्तवती पुत्रशोकाग्नितापिता ॥
रामशर्मा तदा प्राप्तो मंत्रं संजीवनं शुभम् ॥ २४ ॥ जपित्वा मार्जनं कृत्वा जीवयामास बालकम् ॥ विनयावनतो विप्रस्तं च संन्यासिनं तदा॥
॥ २५ ॥ भोजनं कारयित्वा तु मंत्रं संजीवनं ददौ ॥ त्रिविक्रमस्तु तं मत्रं पठित्वा यमुनातटे ॥२६॥ प्राप्तवान्यत्र सा नारी दाहिता हरिशर्मणा ॥
एतस्मिन्नन्तरे तत्र राजपुत्रो मृतिं गतः ॥ २७ ॥ दाहितस्तनयः पित्रा शोककर्त्रा तदामुना ॥ जीवनं प्राप्तवान्बालस्तस्य मंत्रप्रभावतः ॥ २८ ॥
गुणाधिपस्य तनयो राज्ञो धर्मस्थलीपतेः ॥ त्रिविक्रमं वचः प्राह वीरबाहुर्महाबलः ॥२९॥ जीवनं दत्तवान्मह्यं वरयाद्य वरं मम ॥ स विप्रः प्राह भो
राजन्केशवो नाम यो द्विजः ॥ ३० ॥ गृहीत्वास्थि गतस्तीर्थे तमन्वेषय मा चिरम् ॥ वीरबाहुस्तथा मत्वा दूतमार्गेण तं प्रति ॥ ३१ ॥ प्राप्तस्तं
कथयामास यथा प्राप्तं हि जीवनम् ॥ इति श्रुत्वा वचस्तस्य केशवोऽस्थिससन्वितः ॥३२॥ प्रगत्यास्थीनि सर्वाणि ददौ तस्मै द्विजातये ॥ पुनः
संजीविता बाला केशवादीन्वचोऽब्रवीत् ॥३३॥ योग्या धर्मेण यस्याहं तस्मै प्रायामि धर्मिणे॥इति श्रुत्वा वचस्तस्या मौनवंतस्त्रयः स्थिताः॥३४॥

अतस्त्वं विक्रमादित्य धर्मज्ञ कथयस्व मे ॥ कस्मै योग्या च सा बाला नाम्ना मधुमती शुभा ॥ ३५ ॥ ॥ सूत उवाच ॥ ॥ विहस्य विक्रमादित्यो
वैतालं प्राह नम्रधीः॥योग्या मधुमती नारी वामनाय द्विजन्मने॥३६॥प्राणदाता तु यो विप्रः पितेव गुणतत्परः ॥ अस्थिदाता तु यो विप्रो भ्रातृतुल्यस्स
वेदवित् ॥ ३७ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये द्वितीयोऽध्यायः ॥ २ ॥ ॥छ॥
॥ सूत उवाच ॥ ॥ विप्रवर्य महाभाग शृणु गाथां मनोरमाम्॥वैतालो भूपतिश्रेष्ठं पुनर्विक्रममब्रवीत् ॥१॥ वर्द्धवन्नगरे रम्ये नानाजननिषेविते॥
तत्राभवन्महीपालो रूपसेनो महाबलः ॥ २ ॥ विद्वन्माला प्रिया तस्य पतिसेवापरायणा ॥ एकदा क्षत्रियः कश्चिन्नाम्ना वीरवरः स्मृतः ॥ ३ ॥
पुत्रकन्यासपत्नीको वृत्त्यर्थं समुपागतः ॥ विनयावनतो भूत्वा रूपसेनं महीपतिम् ॥ ४ ॥ किंचिच्छ्रुत्वा ददौ स्वर्णं सहस्रं प्रत्यहं नृप ॥ वीरसेनस्तु
तल्लब्ध्वा वह्नौ तीर्थे द्विजातिषु ॥५॥ व्ययं कृत्वा तु तच्छेषं स कुल्ये भुक्तवान्स्वयम् ॥ एवं वर्षे गते राजन्राजलक्ष्मीः शिवाज्ञया ॥६॥ परीक्षार्थं
स्मशाने च रोदनं बहु कुर्वती ॥ अर्धरात्रे तदा राजा बुद्ध्वा प्राह स्वसेवकम् ॥ ७ ॥ गच्छ वीरवर त्वं वै यतोऽसौ श्रूयते रवः ॥ ज्ञात्वा
तत्कारणं सर्वं मह्यं शीघ्रं निवेदय ॥ ८ ॥ इति श्रुत्वा वीरवरः शस्त्रास्त्रकुशलो बली ॥ स तत्र गत्वा यत्रास्ते राजलक्ष्मीः शुभानना ॥ ९ ॥
श्लक्ष्णं वचश्च तामाह किमर्थं रोदने स्थिता ॥ महत्कष्टं च किं प्राप्तं कारणं देवि मे वद ॥ १० ॥ इति श्रुत्वा राजलक्ष्मीर्वीरसेनं तमब्रवीत् ॥
राजलक्ष्मीं च मां विद्धि रूपसेनस्य भूपतेः ॥ ११ ॥ मासान्ते प्रलयं यास्ये तस्माच्छोचामि भो बलिन् ॥ स आह शृणु भो देवि त्वदल्पायुस्समीरितम्
॥ केन पुण्येन दीर्घायुस्त्वं भवेः कारणं वद ॥ १२ ॥ देव्युवाच ॥ महाबाहो महाप्राज्ञ यदि ते तनयस्य वै ॥ १३ ॥ ॥ कपालमर्पय
त्वं च चंडिकायै तदानघ ॥ दीर्घायुर्भविता चाहं स्वामिकार्यं प्रसाधय॥१४॥इति श्रुत्वा वीरवरो मंदिरं स्वयमागतः ॥ पत्नीं प्राह प्रसन्नात्मा सुतं
देव्यै निवेदय ॥ १५ ॥ तथेत्युक्त्वा तु सा साध्वी तनयं प्राह निर्भया ॥ राज्ञोऽर्थे तव देहं वै पुत्र पासि कुरुष्व तत् ॥ १६ ॥ तथा मत्वा तु
तत्पुत्रो भगिन्या मातृसंयुतः॥ चंडिकाभवनं प्राप्याब्रवीत्स्वपितरं तदा ॥ १७ ॥ भोस्तात मे कपालं च चंडिकायै समर्पय ॥ दीर्घायुर्येन यत्नेन
रंजलक्ष्मीश्च तत्कुरु ॥ १८ ॥ इति श्रुत्वा वीरसेनः शिरश्छित्त्वा समार्पयत् ॥ तस्यानुजा मृता तत्र तथा माता तथा पिता ॥ १९ ॥ दृष्ट्वा तद्रूपसेनस्तु
कारणं सर्वमादितः ॥ सेवकं सत्यसंधं च मत्वा तु स्वशिरोऽर्पयत् ॥ २० ॥ तदा प्रसन्ना सा देवी नृपमुज्जीव्य साब्रवीत् ॥ वरं वरय
भूपाल यथेष्टं शीघ्रमाप्नुयाः ॥ २१ ॥ स आह वीरसेनस्तु सकुलो जीवमाप्नुयात् ॥ तथेत्युक्त्वा तु सा देवी तत्रैवांतर्हिताभवत् ॥ २२ ॥ रूपसेनः

प्रसन्नात्मा स्वसुतां कामरूपिणीम् ॥ ददौ सुताय वैतालो नृपतिं प्राह विस्मितः॥मुख्यस्नेहं कृतं केन तेषां मध्ये वदस्व मे ॥२३॥ ॥ राजोवाच ॥ मुख्यस्नेहं कृतं राज्ञा दासार्थे स्वतनुं ददौ ॥ स्वर्णस्नेही वीरवरो धर्मप्रीतिः पतिव्रता ॥ बंधुप्रीतिश्च भगिनी पितृस्नेही तु पुत्रकः ॥ २४ ॥ महान्स्नेहः कृतो राज्ञा रूपसेनेन धीमता ॥ २५ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडापरपर्याये कलियुगीयेतिहाससमुच्चये तृतीयोऽध्यायः ॥ ३ ॥छ॥ ॥ सूत उवाच ॥ ॥ इति श्रुत्वा स वैतालो राजानमिदमब्रवीत् ॥ काचिद्भोगावती नाम्ना नगरी परमाद्भुता ॥१॥ रूपवर्मा च नृपतिस्तत्र राज्यं करोति वै ॥ चूडामणिरिति ख्यातः शुको बुद्धिविशारदः ॥२॥ तस्य भूपस्य गेहे च निवसन्च्छुभपंजरे ॥ कदाचिद्रूपवर्मा च त्रिंशदब्द उरूर्जितः ॥ ३ ॥ पप्रच्छ मम योग्या वै शुक काचिद्वरांगना ॥ चेदास्ते तर्हि मे ब्रूहि श्रुत्वा तं चाब्रवीच्छुकः ॥ ४ ॥ मगधेश्वरभूपस्य कन्या चन्द्रवती शुभा ॥ तव योग्या हि भो राजन्सांप्रतं तां गृहाण वै ॥ ५ ॥ इति श्रुत्वा स नृपतिर्गणेशं द्विजसत्तमम् ॥ प्रेषयित्वा ददौ द्रव्यं यथोद्वाह्या तथा कुरु ॥ ६ ॥ गणेशोपि गतस्तूर्णं देशे मागधके शुभे ॥ महादेवं च संपूज्य चकार स्तवनं मुदा ॥ ७ ॥ नमः शिवाय शांताय सर्वाभीष्टप्रदायिने ॥ भवाय शंकरायैव रुद्राय सततं नमः ॥ ८ ॥ मृडायानंदरूपाय सर्वदुःखहराय च ॥ ९ ॥ इत्युक्तवति विप्रे च तदा चन्द्रवती शुभा ॥ कामातुराब्रवीच्चैनां नाम्ना मदनमञ्जरीम् ॥ १० ॥ मम योग्यश्च पुरुषः कश्चिदस्ति महीतले ॥ साह भो रूपवर्मा च योग्यो भोगापुरीपतिः ॥ ११ ॥ इति श्रुत्वा तु सा देवी दुर्गां वाञ्छितदायिनीम् ॥ तुष्टाव मनसा सुभ्रूर्यया जातमिदं जगत् ॥ १२ ॥ नमोनमो जगन्मातर्मम कार्यप्रदायिनि ॥ त्रिलिंगजननी त्वं वै वर्णमूर्तिः सनातनी ॥१३॥ त्वं स्वाहा त्वं स्वधा संध्या नमस्तस्यै नमोनमः ॥ नृपतिं रूपवर्माणं मत्पतिं कुरु भोः शिवे॥१४॥इति स्तुत्या प्रसन्नाभूज्जगदंबा जगन्मयी॥ पितरं मगधेशं च मोहयित्वा च मातरम् ॥१५॥ विवाहं कारयामास मासान्ते सिद्धरूपिणी ॥ रूपवर्मा चंद्रवती बुभुजाते परं सुखम् ॥१६॥एकस्मिन्दिवसे राजन्मेनां मदनमंजरीम्॥ नृपः प्राह विवाहं त्वं सुशुकेन कुरुष्व भोः ॥ ॥१७॥मेनका प्राह भो राजन्विवाहाश्चेदृशो मताः ॥ उत्तमाधममध्याश्च पुरुषास्त्रिविधाः स्मृताः॥१८॥तथैव त्रिविधा नारी यथा योग्यो वरो भवेत्॥ उत्तमा या भवेन्नारी योग्याया चाधमाय वै ॥१९॥ शृणु तत्कारणं राजन्मया दृष्टं यथाऽभवत् ॥ इलापुरे वसत्येको वैश्यो लक्षपतिर्धनी ॥ २० ॥ अनपत्यो देवयाजी तस्य पत्नी पतिव्रता ॥ बहुयत्नेन तनयस्तस्य जातो महाधमः ॥ २१ ॥ द्यूतक्रीडापरो नित्यं सुरापाने रतस्सदा ॥ वेश्यागामी महाधूर्तो नित्यं मांसाशनः खलः ॥ २२ ॥ तस्य धर्मं च पितरौ समालोक्य वनं गतौ ॥ नरं नारायणं ध्यात्वा परमं पदमापतुः ॥ २३ ॥

मदपालस्तु तनयः कृत्वा सर्वधनव्ययम् ॥ अन्यदेशे च वृत्त्यर्थं जगाम धनवर्जितः ॥२४॥ प्राप्तश्चंद्रपुरे रम्ये यत्र हेमपतिः स्थितः॥वृत्तांतं कथया
मास वैश्यं हेमपतिं हि सः ॥ २५ ॥ देवयाजी सुतोऽहं वै स्वल्पं वै धनमाहृतम् ॥ देशान्तरे विक्रयार्थे सिन्धुमार्गेण प्राप्तवान् ॥ २६ ॥ महावायु
प्रभावेन द्रव्यं तन्मग्नमंभसि ॥ तल्लज्जया न यास्येऽहं पितरं प्रति मारिष ॥ २७ ॥ इति श्रुत्वा हेमपतिः स्वपत्नीं काममंजरीम् ॥ वचः प्राह
प्रसन्नात्मा संयोगो विधिना कृतः ॥ २८ ॥ चंद्रकांतिं सुतां दास्ये तद्वराय त्वदाज्ञया ॥ संमंत्र्य दंपती राजन्ददौ कन्यां विधानतः ॥ २९ ॥
स्वगृहे वासयामास मदपालं सुतापतिम् ॥ मासमेकमुषित्वा तं श्वशुरं प्राह नम्रधीः ॥ ३० ॥ आज्ञां देहि धनाध्यक्ष स्वगेहं यामि मा चिरम् ॥
इति श्रुत्वा हेमपतिः स्वसुतां स्वर्णभूषिताम् ॥३१॥ चंद्रकांतिं सदासीं च तस्मै दत्त्वा गृहं ययौ ॥ नरान्विसृज्य दुष्टात्मा शिबिकावाहकान्नृप ॥
॥ ३२ ॥ दासीं हत्वा तदा पत्नीं विसृज्य धनवर्जिताम् ॥ एकाकी प्राप्तवान्गेहं मदपालो महाधमः ॥ ३३ ॥ वर्षांतरे च तत्स्वर्णं व्ययं कृत्वा
कुमार्गके ॥ बुभुक्षितः पुनः शोकं चकार बहुधा नृप ॥ ३४ ॥ पुनश्च श्वशुरस्यैव गृहे संप्राप्तवान्खलः ॥ चंद्रकांतिस्तु तं दृष्ट्वा स्वपतिं प्राह
नम्रधीः ॥ ३५ ॥ मया निवेदितं पित्रे धनं चौरैश्च लुंठितम् ॥ अतस्त्वं त्यज संतापं चिरं वस गृहे मम ॥ ३६ ॥ तथेत्युक्त्वा महाधूर्त उवास
कतिचिद्दिनम् ॥ ज्ञात्वा विमोहितां पत्नीमर्द्धरात्रे तमोवृते ॥ ३७ ॥ हत्वा तां स ययौ गेहं गृहीत्वा बहुभूषणम् ॥ अयोग्योयमतो राजन्विवाहः
शुकमेनयोः ॥ ३८ ॥ इति श्रुत्वा शुकः प्राह भूपतिं करुणानिधिम् ॥ विवाहं न करिष्यामि नार्य्या चाधमया सह ॥ ३९ ॥ अधमा मेनका
नारी श्यामांगा च कुरूपिणी ॥ उत्तमोऽहं शुको राजन्पुरुषश्च हरेत्तनुम् ॥ ४० ॥ शृणु तत्कारणं भूप मया दृष्टं महोत्तमम् ॥ नगरे कांचनपुरे
वणिक्छंखपतिः श्रुतः ॥ ४१ ॥ तस्य पुत्रस्तु मेधावी सिन्धुगुप्तो गुणी धनी ॥ प्रभावती प्रिया तस्य श्रीदत्तस्तत्सुतः स्मृतः ॥ ४२ ॥ विवाहम
करोत्तस्य जयश्रीपत्तने शुभे ॥ सोमदत्तस्य सुतया जयलक्ष्म्या समन्वितम् ॥ ४३ ॥ श्रीदत्तस्तु गतो देशं वाणिज्यार्थं कुरुस्थलम् ॥ आयाति
द्वादशाब्दे तु सधनो गेहमागतः ॥ ४४ ॥ जयलक्ष्मीस्तु कामेन पीडिता पितृमंदिरे ॥ अमात्यतनयेनैव होमदत्तेन मोहिता ॥ ४५ ॥ दूती
मार्गेण तं प्राप्य व्ययं कृत्वा धनं बहु ॥ रमयामास सा नारी तेन सार्द्धं महाधमा ॥ ४६ ॥ त्रिमासान्ते च तत्स्वामी श्रीदत्तः श्वशुरालये ॥
संप्राप्तः सा तु तं दृष्ट्वा महद्दुःखमुपाययौ ॥ ४७ ॥ अर्धरात्रे तु तन्मात्रा प्रेषिता स्वपतिं प्रति ॥ जयलक्ष्मीश्च संप्राप्ता क्रोधेन स्फुरिताधरा॥४८॥
बहुमानेन स्वपतिस्नेहं कृत्वालयं ययौ ॥ तदा तु कुलटा सा च गता दूतीगृहं प्रति ॥ ४९ ॥ शून्यालये होमदत्तो दंशितो भुजगेन वै ॥ सुष्वाप

मरणं प्राप्य तदा बाला समागता ॥ ५० ॥ वेगेन रमयामास तं जारं विषमोहितम् ॥ पिप्पलस्थः पिशाचश्च दृष्ट्वा तां जारिणीं शुभाम् ॥ ५१ ॥
शवदेहं च संप्राप्य रमणीं तामरीरमत् ॥ खनित्वा दशनैर्नासां पिप्पलोपरि सोऽगमत् ॥ ५२ ॥ कफल्लो नाम चौरस्तु दृष्ट्वा तत्कारणं तदा ॥
कामिन्या अनुगो भूत्वा मंदिरं तत्प्रविष्टवान् ॥ ५३ ॥ तदा तु जयलक्ष्मीश्च स्वपतिं प्राप्य दुर्भगा ॥ चक्रे सा रोदनं गाढं सर्वे लोकाः प्रत
स्थिरे ॥ ५४ ॥ नासाहीनां सुतां दृष्ट्वा सोमदत्तो महाधनः ॥ बद्ध्वा जामातरं शीघ्रं राजांतिकमुपाययौ ॥ ५५ ॥ नृपाज्ञया राजदूतास्तमुद्बंधन
मादधुः ॥ तदा कफल्लः संप्राप्य सर्वं राज्ञे न्यवेदयत् ॥ ५६ ॥ मत्वा तस्य वचः सत्यं जयलक्ष्मीं महाधमाम् ॥ रासभोपरि संस्थाप्य कृत्वा
दुर्गतिरूपिणीम् ॥ ५७ ॥ नगरात्प्रेषयामास वनं शार्दूलसेवितम् ॥ अतस्त्वं शृणु भूपाल मेना मद्योग्यिका न हि ॥ ५८ ॥ इत्युक्त्वा स तु वै
तालो विक्रमं प्राह नम्रधीः ॥ नारी पापाधिका वाथ पुरुषस्तद्वदस्व मे ॥ ५९ ॥ ॥ विक्रम उवाच ॥ ॥ ब्रह्मणोऽगुणरूपस्य मायावर्णस्व
रूपिणी ॥ तमो न पुंसकं ज्ञेयं त्रिलिंगैकं तदव्ययम् ॥ ६० ॥ अव्ययं ब्रह्मणो धाम माया लिंगस्वरूपिणी ॥ तया जातमिदं विश्वं
तदंबायै नमोनमः ॥ ६१ ॥ क्लीबा स्त्री सर्वदा श्रेष्ठा स्त्रियास्तु पुरुषस्तथा ॥ अव्याधिकश्च पुरुषो नारी कर्माधिका मता ॥ ६२ ॥ क्लीब
मज्ञानमधिकं कथितं पूर्वकोविदैः ॥ कर्मैव बन्धनं पुंसां ज्ञानं निर्बंधनं स्मृतम् ॥ ६३ ॥ अतः पापाधिका नारी पुरुषो हीनकिल्बिषः ॥
॥ ६४ ॥ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डांपरपर्याये कलियुगीयेतिहाससमुच्चये चतुर्थोऽध्यायः ॥ ४ ॥ ॥ छ ॥
॥ ॥ सूत उवाच ॥ ॥ भृगुवर्य महाभाग श्रुत्वा वैताल एव सः ॥ प्रसन्नात्मा वचः प्राह भूपतिं ज्ञानसंपदम् ॥ १ ॥ उज्जयिन्यां महा
राज महाबल इति श्रुतः ॥ चंद्रवंशी नृपः प्राज्ञो वेदशास्त्रविशारदः ॥ २ ॥ तस्य दूतो हरेर्दासः स्वामिकार्यकरः सदा ॥ भक्तिमाला प्रिया
तस्य साधुसेवापरायणा ॥ ३ ॥ तस्यां जाता रूपवती कन्या कमललोचना ॥ महादेवीति विख्याता सर्वविद्याविशारदा ॥ ४ ॥ हरिदासं च
सा प्राह शृणु तात वचो मम ॥ मत्तोऽधिको नरो यो वै तस्मै मां तु ददस्व भोः ॥ ५ ॥ तथेत्युक्त्वा पिता राजन्राज्ञाहूतो गतः सभाम् ॥
नत्वा तं नृपतिः प्राह हरिदास शृणुष्व भोः ॥ ६ ॥ तैलंगाधिपतिं गच्छ हरिश्चंद्रं महीपतिम् ॥ तस्य क्षेमं तथा ज्ञात्वा मां निवेदय मा चिरम् ॥
॥ ७ ॥ इति श्रुत्वा द्विजः प्रागाद्धरिश्चंद्रं महामतिम् ॥ कुशलं वर्णयामास महाबलनृपस्य वै ॥ ८ ॥ श्रुत्वा प्रसन्नहृदयो हरिश्चंद्रो महीपतिः ॥
श्वशुरस्तस्य नृपतेः स भूयो हर्षमागतः ॥ ९ ॥ हरिदासं स पप्रच्छ कलेरागमनं कदा ॥ इत्युक्तः स तु तं प्राह म्यूहश्च भविताधिकम् ॥ १० ॥

यदा राज्यं कृतं तेन कलेरागममनं तदा ॥ ब्रह्मणोस्य मुखाज्जात ॐकारः सत्यपूजितः ॥११॥ द्वितीयास्याच्च विविधा भाषा लोक विमोहिनी ॥
जाता कलेर्हितार्थाय यमलोकहितैषिणी ॥ १२ ॥ यदा धर्मं च वेदोक्तं विपरीतं हि दृश्यते ॥ कलिराज्यं तदा ज्ञेयं म्लेच्छा यस्य प्रियाः स्मृताः॥
॥ १३ ॥ कलिनाऽधर्ममित्रेण सर्वे देवा निराकृताः ॥ पापस्यैव मृषा भार्या दुःखं तत्तनयः स्मृतः ॥ १४ ॥ दुर्गतिस्तस्य चार्धांगी गेहेगेहे तदा
भवेत् ॥ क्रोधवश्याः नृपाः सर्वे ब्राह्मणाः कामकिंकराः ॥ १५ ॥ लोभवश्यास्तु धनिनो महत्त्वं शूद्रका गताः ॥ नार्यो लज्जाविहीनाश्च किंकराः
स्वामिघातकाः ॥ १६ ॥ निष्फला तु मही जाता कलौ प्राप्ते हि दृश्यते ॥ ये हरेः शरणं प्राप्तास्ते सर्वे मुदिताः कलौ ॥ १७ ॥ इति श्रुत्वा
हरिश्चंद्रो दत्त्वा तस्मै सुदक्षिणाम् ॥ स्वगेहं प्राप्तवान्राजा विप्रस्तु शिबिरं ययौ ॥ १८ ॥ एतस्मिन्नंतरे तत्र ब्राह्मणो बुद्धिकोविदः ॥ स्वविद्यां
दर्शयामास हरिदासाय धीमते ॥ १९ ॥ विमानं शीघ्रगं नाम देव्या दत्तं महोत्तमम् ॥ मंत्रजापात्समुद्भूतं कामजं विस्मयप्रदम् ॥ २० ॥ तस्मि
न्ददर्श कन्यार्थे तदा विप्रो विमोहितः ॥ वरित्वा तं स्वकन्यार्थं ततः स्वपुरमागतः ॥ २१ ॥ हरिदासस्य तनयो मुकुंदो नाम कोविदः ॥
पठित्वा स्वगुरुं प्राह वृणीष्व गुरुदक्षिणाम् ॥ २२ ॥ गुरुराह च शिष्यं तं शृणु वाचं मुकुंद मे ॥ दापय स्वस्य भगिनीं मत्पुत्राय च धीमते ॥२३॥
तथेत्युक्त्वा मुकुंदस्तु स्वगेहं शीघ्रमाययौ ॥ तस्मिन्काले महादेवी द्रौणिशिष्यं द्विजं शुभम् ॥ २४ ॥ वामनं वरयामास तं विप्रं शब्दवेधिनम् ॥
दक्षिणादिभिरभ्यर्च्य तांबूलेन विधानतः ॥ २५ ॥ त्रयस्ते ब्राह्मणाः प्राप्ताः सुतार्थे गुणकोविदाः ॥ एतस्मिन्नन्तरे कामी राक्षसो दैवमोहितः ॥
॥ २६ ॥ महादेवीं जहाराशु प्राप्तो विंध्याचले गिरौ ॥ तदा ते दुःखिनो भूत्वा विलेपुः कामपीडिताः ॥ २७ ॥ धीमान्नाम द्विजो विद्वांस्तान्प्राह
गणकोत्तमः॥विंध्याचले गिरौ बाला चास्ते क्रव्यादवश्यगा ॥ २८ ॥ स्वविमाने समारोप्य तौ द्विजौ बुद्धिकोविदः ॥ विंध्याचले गिरौ प्राप्तः
शब्दवेधी तदा धंनुः ॥ २९ ॥ समारोप्य शरेणैव जघानाशु स राक्षसम् ॥ कन्यां गृहीत्वा ते जग्मुरुज्जयिन्यां विमानगाः ॥ ३० ॥ मिथो विवाद
वंतस्ते दृष्ट्वा कन्यां स्मरानुगाः ॥ कस्मै योग्या भवेत्कन्या भूप मे कृपया वद ॥ ३१ ॥ ॥ सूत उवाच ॥ ॥ इति श्रुत्वा वचस्तस्य विक्रमो
नाम भूपतिः ॥ प्रश्रयावनतः प्राह वैतालं रुद्रकिंकरम् ॥ ३२ ॥ विदित्वा योऽवदत्कन्यां पितृतुल्यो द्विजो हि सः ॥ येन प्राप्ता विमानेन स तु

---

१ श्लोकद्वयमेकान्वयि ।

तद्भ्रातृकः स्मृतः ॥ ३३ ॥ हत्वा यो राक्षसं वीरं कन्यायोग्यो हि सोऽभवत् ॥ ३४ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडापर
पर्याये कलियुगीयेतिहाससमुच्चये पंचमोऽध्यायः ॥ ५ ॥ ६॥ ॥ सूत उवाच ॥ ॥ पुनराह स वैतालः शृणु राजन्कथामिमाम् ॥ ग्रामे धर्मपुरे
रम्ये नानाजननिषेविते ॥ १ ॥ तत्राभवन्महीपालो धर्मशीलो महोत्तमः ॥ लज्जादेवी च महिषी तस्य भूपस्य भूपते ॥ २ ॥ अंधको नाम
तन्मंत्री न्यायशास्त्रविशारदः ॥ कियता चैव कालेन देवीमंदिरमुत्तमम् ॥ ३ ॥ धर्मशीलेन रचितं तत्र दुर्गा प्रतिष्ठिता ॥ अपत्यार्थे भूपतिना
कृतस्तत्र महोत्सवः ॥ ४ ॥ अर्द्धरात्रे महागौरी नृपं प्राह वृणीष्व भोः ॥ श्रुत्वामृतमयं वाक्यं धर्मशीलो नृपोत्तमः ॥ स्तुतिं चकार नम्रात्मा येन
दुर्गा प्रसीदति ॥ ५ ॥ ॥ धर्मशील उवाच ॥ ॥ एका तु प्रकृतिर्नित्या सर्ववर्णस्वरूपिणी ॥ ६ ॥ सा त्वं भगवती साक्षात्त्वया सर्वमिदं
ततम् ॥ त्वदाज्ञया सुरश्रेष्ठो रचित्वा लोकमुत्तमम् ॥७॥ महालक्ष्म्या त्वया सार्द्धं बुभुजे निर्मलं सुखम् ॥ त्वद्भक्त्या भगवान्विष्णुस्त्रैलोक्यं ब्रह्म
निर्मितम् ॥ ८ ॥ पालयंश्च महालक्ष्म्या त्वया सार्द्धं सनातनि ॥ त्वद्बलेन महादेवि त्रैलोक्यं विष्णुपालितम् ॥ ९ ॥ महाकाल्या त्वया सार्द्धं भस्म
कृत्वा विराजते ॥ सर्वे देवास्तथा दैत्याः पितरो मनुजाः खगाः ॥१०॥ त्वल्लीलया च ते जाता जगन्मातर्नमोस्तु ते ॥ इत्युक्तवंतं नृपतिं वागुवा
चाशरीरिणी॥११॥महाबलो महावीर्यस्तनयस्ते भविष्यति ॥ तव स्तुत्या प्रसन्नाहं दास्यामि विविधं फलम्॥१२॥इति श्रुत्वा स नृपतिः स्वगेहं
प्राप्य निर्भयः ॥ राज्ञ्यै निवेदयामास देवीवचनमुत्तमम्॥१३॥ततः प्रभृति राजेन्द्र मूर्तौ जाता स्वयं किल॥ एकस्मिन्दिवसे राजन्रजकः कलिभो
जनः॥१४॥काशीदासेन सहितो ग्रामं धर्मपुरं गतः ॥ तत्र दृष्ट्वा शुभां कन्यां कामांगीं नाम विश्रुताम् ॥ १५ ॥ पित्रान्वितां राजमार्गे गच्छंतीं
श्रमपीडिताम् ॥ मुमोह कामवेगेन रजकः कलिभोजनः ॥ १६ ॥ कामांधश्चंडिकां प्राह जगन्मातः सनातनि ॥ यदि मे भविता सुभ्रूस्तर्हि
दास्यामि ते शिरः ॥ १७ ॥ जातियोग्या ममैवास्ति रजकस्य सुता शुभा ॥ इति श्रुत्वा तु सा देवी वचनं रजकस्य वै ॥ १८ ॥ मोहयित्वा च
पितरं तस्याः पाणिग्रहः कृतः ॥ स सुतां कामिनीं प्राप्य प्रसन्नात्मा गृहं ययौ ॥ १९ ॥ भुक्त्वा स विविधं भोगं तया सार्द्धं सुखप्रदम् ॥ वर्षांतरे
शिरो देव्यै गत्वा शीघ्रं समार्पयत् ॥ २० ॥ काशिदासस्तु तच्छ्रुत्वा स्नेहेन त्वरितोऽगमत् ॥ स्वशिरो दत्तवान्देव्यै कामांगी पतिशोकतः॥ २१ ॥
अर्पयित्वा शिरो देव्यै देवीरूपत्वमागता ॥ तदा प्रसन्ना सा चण्डी त्रीनुज्जीव्याब्रवीच्च तान् ॥ २२ ॥ वरं वरयतामद्य यो यः कामो ह्यभीप्सितः ॥
काशिदासस्तु तां प्राह कामांगीं मां समर्पय॥२३॥कामांगी सा तु तां प्राह स्वपतिं मां समर्पय॥कलिभोजन एवासौ देवीं प्राहः प्रसन्नधीः॥२४॥

मित्रांगं सुन्दरं मह्यं देहि मातर्नमोनमः ॥ तेषां वाचस्तदा श्रुत्वा सा दुर्गा मौनमास्थिता ॥ यथाकामं दत्तवती वरं दारसुरूपिणी ॥
॥ २५ ॥ ॥ सूत उवाच ॥ ॥ इत्युक्त्वा स तु वैतालो नृपं प्राह विहस्य भोः ॥ २६ ॥ किं कृतं च तया देव्या तेषामर्थे वदस्व मे ॥ इत्युक्तः
स तु भूपालो वैतालमिदमब्रवीत् ॥ २७ ॥ कपालमुत्तमं देहे तया च्छिन्नं द्वयोस्तदा ॥ विपरीतं कृतं मात्रा वरं स्वंस्वं समाप्नुयुः ॥ २८ ॥
इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये षष्ठोऽध्यायः ॥ ६ ॥ ॥छ॥ ॥ सूत उवाच ॥ ॥
तस्मिन्काले स वैतालो भृगुवर्यः प्रसन्नधीः ॥ राजानमुत्तमां गाथां वर्णयामास विश्रुताम् ॥ १ ॥ चंपापुरी च विख्याता चम्पकेशो महीपतिः ॥
तत्रास्ते बलवान्धन्वी महिषी तत्सुलोचना ॥ २ ॥ त्रिलोकसुंदरी नाम कन्या तस्यामजायत ॥ वदनं चन्द्रवद्यस्या भ्रुवौ चापसमे स्मृते ॥ ३ ॥
मृगाक्षी कोकिलरवा कोमलांगी महोत्तमा ॥ देवैर्मनोवृता बाला किमन्यैर्मानुषैर्नृप ॥ ४ ॥ तस्याः स्वयंवरो जातो नृपा बहुविधास्तदा ॥ तस्या
योगेन संप्राप्ता ये भूपा भुवि विश्रुताः ॥ ५ ॥ इन्द्रो यमः कुबेरश्च वरुणो विबुधोत्तमः ॥ कृत्वा नरमयं रूपं तदर्थे समुपागताः ॥ ६ ॥ चंपकेश
मिदं प्राह शृणु राजन्वचो मम ॥ सर्वशास्त्रेषु निपुणं रूपवन्तं मनोरमम् ॥ इन्द्रदत्तं च मां विद्धि स्वसुतां मे समर्पय ॥ ७ ॥ द्वितीयस्तु तदा
प्राह धर्मदत्तं मनोरमम् ॥ धनुर्वेदेषु निपुणं स्वकन्यां दातुमर्हसि ॥ ८ ॥ तृतीयश्चाह भोराजन्धनपालाय शोभिने ॥ सर्वजीवस्य भाषाणां ज्ञायिने
गुणरूपिणे ॥ मह्यं च स्वसुतां शीघ्रं समर्पय सुखी भव ॥ ९ ॥ चतुर्थश्चाह भो राजन्सर्वकलासु कोविदः ॥ पञ्चरत्नसमुद्योगी प्रत्यहं भूपते ह्यहम् ॥
॥ १० ॥ पुण्यार्थमेकरत्नं च होमार्थं द्वितियं वसु ॥ आत्मार्थं तृतियं[1] रत्नं पत्न्यर्थे तुरियं वसु ॥ ११ ॥ शेषं सुभोजनार्थं च रत्नं नित्यं मयाहृ
तम् ॥ ईदृग्विधं मां पुरुषं स्वसुतां दातुमर्हसि ॥ १२ ॥ इति श्रुत्वा वचस्तेषां मोहितो नृपतिस्तदा ॥ स्वसुतां प्राह धर्मात्मा कस्मै दास्यामि
कन्यके ॥ १३ ॥ सा देवी तु वचः श्रुत्वा व्रीडिता दैवमोहिता ॥ नोत्तरं च ददौ तस्मै स्वपित्रे धर्मशालिनी ॥ १४ ॥ इत्युक्त्वा स तु वैतालो
विहस्योवाच भूपतिम् ॥ कस्मै योग्या भवेत्कन्या रूपयौवनशालिनी ॥ १५ ॥ ॥ सूत उवाच ॥ ॥ इत्युक्तः स तु भूपालो वचनं तं समब्रवीत् ॥
धर्मदत्ताय सा कन्या योग्या भवति रूपिणी ॥ १६ ॥ सर्वशास्त्रेषु निपुणः स द्विजो वर्णतः स्मृतः ॥ भाषावेत्ता तु वणिजो धनधान्य

---

[1] द्वितियं तृतीयं तुरियं वसु' इत्यादावीकारह्रस्व आर्षः ।

प्रसारकः ॥१७॥ कलाज्ञः स तु शूद्रो हि धनुर्वेदी स भूपतिः॥ सवर्णाय च वैताल सदा योग्या हि कन्यका ॥ अतो विवाहिता बाला धर्मदत्ताय शीलिने ॥ १८ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये सप्तमोऽध्यायः ॥ ७ ॥ ॥ छ ॥ ॥ ॥ सूत उवाच ॥ ॥ इति श्रुत्वा स वैतालो राजानमिदमब्रवीत् ॥ विदेहदेशे भूपाल नगरी मिथिलावती ॥ १ ॥ गुणाधिपस्तत्र राजा धनधान्यसमन्वितः ॥ चिरंदेव इति ख्यातो राजन्यः कश्चनागतः ॥ २ ॥ वृत्त्यर्थं मिथिलादेशे तत्र वासं चकार सः ॥ वर्षांते भूपतिः सोऽपि चतुरङ्गबलान्वितः ॥ ३ ॥ मृगयार्थे वनं प्राप्तस्तत्र शार्दूलमुत्तमम् ॥ दृष्ट्वा तं चावधीद्राजा क्रोधताम्रेक्षणो वने ॥ ४ ॥ व्याघ्रमार्गेण भूपालो वनान्तरमुपाययौ ॥ चिरंदेवस्तु तत्पश्चाद्गतः स गहने वने ॥ ५ ॥ क्षुत्क्षामकण्ठो नृपतिः श्रमसन्तापपीडितः ॥ चिरंदेवमुवाचाशु भोजनं देहि मेऽद्य भोः ॥ ६ ॥ इति श्रुत्वा स राजन्यो हत्वा हरिणमुत्तमम् ॥ संस्कृत्य प्रददौ राज्ञे तन्मांसं भूपतिप्रियम् ॥ ७ ॥ तुष्टो भूपस्तदा प्राह वरं वरय सत्तम ॥ वांछितं ते ददाम्याशु स होवाच महीपतिम् ॥ ८ ॥ त्वया सहस्रमुद्राश्च खादिता मम भूपते ॥ गृहमानीय भूपाल ताः समर्पय मा चिरम् ॥ ९ ॥ शतमुद्रास्तु मासान्ते मह्यं देहि कुटुंबिने ॥ तथेत्युक्त्वा स नृपतिः स्वगेहं शीघ्रमाययौ ॥ ॥ १० ॥ एकस्मिन्दिवसे राजन्स च राजा गुणाधिपः ॥ चिरंदेवं स्वभृत्यं च प्रेषयामास सागरे ॥ ११ ॥ स गत्वा सागरतटे देवीमूर्तिं ददर्श ह ॥ नाम्ना कुसुमदां देवीं मार्कण्डेयस्थलस्थिताम् ॥ १२ ॥ गन्धर्वतनयां सुभ्रूं पूजयित्वा प्रसन्नधीः ॥ प्रांजलिः पुरतस्तस्थौ तदा देवी समागता ॥ १३ ॥ वरं वरय तं प्राह चिरंदेवस्तु चाब्रवीत् ॥ पाणिं गृहाण मे सुभ्रूस्त्वद्रूपेण विमोहितः ॥१४॥ इति श्रुत्वा तु सा देवी विहस्योवाच कामिनम् ॥ अद्य स्नानं विधेहि त्वं मत्कुण्डे देवनिर्मिते ॥ १५ ॥ तथेत्युक्त्वा गतस्तोये प्लावितो मिथिलां ययौ ॥ स स्थितो भूपतिं प्राह कारणं विस्मयप्रदम् ॥१६॥ गुणाधिपस्तु तच्छ्रुत्वा स्वभृत्येन समन्वितः ॥ प्राप्तवान्मंदिरे देव्याः सा भूयः प्राह पुष्पदा ॥१७॥ गांधर्वेण विवाहेन मां गृहाण गुणाधिप ॥ इति श्रुत्वा नृपः प्राह यदि देवि वचो मम ॥१८॥ पुण्यदे त्वं गृहाणाद्य तर्हि त्वां संभजाम्यहम् ॥ तथेति मत्वा तं प्राह सत्वं कार्यं निवेदय ॥१९॥ स होवाच शृणु त्वं भो मम भृत्यं चिरं सुरम् ॥ भज त्वं चपलापांगि देवि सत्यं वचः कुरु ॥२०॥ व्रीडिता तु कथां कृत्वा भूपतिं प्राह कामिनी॥ मां भजस्व दयासिंधो कामिनीं शक्रचोदिताम् ॥ २१ ॥ चिरंदेवं तु संप्राप्य कामांधा त्वां समागता ॥ पुष्पदंतस्य तनया गन्धर्वस्य शुभानना ॥ शापिता देवदेवेन नरभोगकरी ह्यहम् ॥२२॥ इति श्रुत्वा स भूपालो धर्मात्मा शीलविग्रहः ॥ कथं भजाम्यहं सुभ्रूः स्नुषामिव सुधर्मि

णीम् ॥ २३ ॥ चिरंदेवस्तु राजन्यो मत्पुत्र इव वर्तते ॥ तस्य त्वं भोगिनी नारी शोभने भव सांप्रतम् ॥ २४ ॥ लज्जिता सा तदा देवी स्नुषेव
च ववर्त वै ॥ २५ ॥ इत्युक्त्वा भूपतिं प्राह वैतालो रुद्रकिंकरः ॥ सत्यं धर्मश्च कस्यैव जातस्तन्मे वदस्व भोः ॥ २६ ॥ ॥ सूत उवाच ॥ ॥
भूपतिस्तं विहस्याह चिरंदेवस्य जायते ॥ सत्यं धर्मश्च वैताल शृणु तत्कारणं शुभम् ॥ २७ ॥ नृपाणां परमो धर्मः सर्वोपकरणं स्मृतः ॥ कृतो
पकारभृत्यस्य तेन तत्किं हि सत्यता ॥ २८ ॥ भृत्येन च कृतं कर्म तच्छृणुष्व वदाम्यहम् ॥ विना वृत्तिं स्थितो गेहे भूपतेर्गुणशालिनः ॥ सेवा
वृत्तिः कृता सर्वा यथान्यैर्न नरैः कृता ॥ २९ ॥ पश्चाद्भूपतिना ज्ञातः संकटे बृहदागते ॥ चिरंदेवस्तु तस्माच्च कारणादधिको मतः ॥ ३० ॥
इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चयेऽष्टमोऽध्यायः ॥ ८ ॥ ॥ छ ॥ ॥ सूत
उवाच ॥ ॥ भो शौनक महाबुद्धे वैतालेन महीपतिः ॥ महाप्रवीणश्च मतस्तमाह स च भूपतिम् ॥ १ ॥ राजन्कामपुरे रम्ये वीरसिंहो मही
पतिः ॥ न्यायतो धर्मतश्चैव तत्र राज्यमचीकरत् ॥ २ ॥ हिरण्यदत्तस्तत्रैव वैश्यो धनमदान्वितः ॥ कामालसा तस्य सुता रूपयौवनशा
लिनी ॥ ३ ॥ अवसत्सुखतो नित्यं वसंते कुसुमप्रिया ॥ कदाचित्कुसुमार्थं वै वनं भ्रमरनादितम् ॥ ४ ॥ गच्छन्तीं तां समालोक्य धर्मदत्ता
त्मजो बली ॥ सोमदत्त इति ख्यातः पस्पर्श मदनालसाम् ॥ ५ ॥ सा तु तं निर्जने स्थाने प्रोवाच विनयान्विता ॥ कन्यकाहं महावीर त्यज
मां धर्मतोद्य भोः ॥ ६ ॥ विवाहे सति पूर्वं त्वां भजामि दशमेऽहनि ॥ अतो दशदिनस्यैवादेशं देहि दयानिधे ॥ ७ ॥ तथेति मत्वा तां
त्यक्त्वा निजगेहं समागतः ॥ कामालसा तु तद्ग्रामे पित्रा दत्ता वराय च ॥ ८ ॥ मदपालाय वैश्याय मणिग्रीवसुताय च ॥ श्वशुरस्य गृहं
गत्वा स्वमित्रं प्रत्यचिन्तयत् ॥ ९ ॥ नवमेऽहनि तत्स्वामी गृहीत्वा कामिनीं बलात् ॥ कामातुरः स पत्नीं तामालिलिंग मदान्वितः ॥ १० ॥
अरुदत्सा तु तत्पत्नी मित्रवाक्येन कर्षिता ॥ तामुवाच तदा वैश्यः शांतिपूर्वमिदं वचः ॥ ११ ॥ किं रोदिषि मदाघूर्णे सत्यं कथय शोभने ॥
सा तु सत्यवती प्राह यथाजातं हि कानने ॥ १२ ॥ यदि नायामि पार्श्वे त्वां सोमदत्त धनोत्तम ॥ तदा वैधव्यतां प्राप्य भजामि वृजिनं हि
तत् ॥ १३ ॥ इति वाक्येन बद्धाहं यास्याम्यद्य तदंतिके ॥ इति श्रुत्वा च तत्स्वामी तामाज्ञाप्य मुदान्वितः ॥ १४ ॥ सुष्वाप सा तु तत्पार्श्वे
ह्यगमत्कामविह्वला ॥ तदा चौरस्तु तां दृष्ट्वा सर्वाभरणभूषिताम् ॥ १५ ॥ वचश्चोवाच लोभात्मा कुत्र यासि च सुन्दरि ॥ केनैवापेक्षिता रात्रौ
सत्यं कथय भामिनि ॥ १६ ॥ कामालसा तु तं चौरमुवाच मदविह्वला ॥ रक्षिता कामबाणेन स्वमित्रं प्रति यामि भोः ॥ १७ ॥ चौरस्तामाह

भोः सुभ्रूर्भूषणं देहि मेऽबले ॥ चौरोऽहं ते धनग्राही सा श्रुत्वा वाक्यमब्रवीत् ॥ १८ ॥ आलिंग्योपपतिं मित्रं तुभ्यं दास्यामि भूषणम् ॥ तथेत्युक्ता तु तेनैव सोमदत्तं समागता ॥ १९ ॥ दृष्ट्वा तामब्रवीद्वैश्यः कथं याता स्मरालसे ॥ सत्यं कथय मे शीघ्रं तत्पश्चात्त्वां भजाम्यहम् ॥ २० ॥ कामालसा तु तच्छ्रुत्वा यथा जातं तथाऽब्रवीत् ॥ श्रुत्वा स ज्ञानहृदयो विष्णुदेवेन बोधितः ॥ २१ ॥ मत्वा पतिव्रतां नारीं परिक्रम्य व्यसर्जयत् ॥ चौरस्तु कारणं श्रुत्वा विष्णुदेवेन बोधितः ॥ २२ ॥ गेहे प्रवेशयामास तत्पतिर्यत्र तिष्ठति ॥ सा तु कामालसा देवी स्वपातिव्रत्यधर्मिणी ॥ २३ ॥ बुभुजे विषयान्दिव्यान्देवदेवेन चोदितान् ॥ इत्युक्त्वा स तु वैतालो नृपतिं प्राह कोविदम् ॥ कस्य सत्यं स्मृतं श्रेष्ठं तेषां मध्ये वदस्व मे ॥ २४ ॥ ॥ सूत उवाच ॥ ॥ इत्युक्तः स तु भूपालो वैतालमिदमब्रवीत् ॥ २५ ॥ चौरस्य सत्यता श्रेष्ठा यथा जाता तथा शृणु ॥ नृपभीत्या स वैश्यस्तु तां नारीं न तु भुक्तवान् ॥ २६ ॥ वैधव्यभीत्या सा देवी स्वमित्रं प्रति चागता ॥ धर्मभीत्या च तत्स्वामी स्वपत्नीं न तु भुक्तवान् ॥ २७ ॥ चौरस्तु सत्यभीत्या वै त्यक्त्वा तां मुदमागतः ॥ २८ ॥ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये नवमोऽध्यायः ॥ ९ ॥ ॥ छ ॥

॥ सूत उवाच ॥ ॥ वैतालस्तु महाभाग राजानमिदमब्रवीत् ॥ गौडदेशे महाराज वर्धनं नाम वै पुरम् ॥ १ ॥ गुणशेखर आख्यातो भूपालस्तत्र धर्मवान् ॥ तन्मन्त्री निर्भयानन्दो जैनधर्मपरायणः ॥ २ ॥ कदाचिद्भूपतिर्यातो मन्दिरे गिरिजापतेः ॥ पूजयामास तं देवं सर्वव्यापिनमीश्वरम् ॥ ३ ॥ वृश्चिकस्तत्र संप्राप्य ददंश नृपतिं रुषा ॥ तत्कष्टेन स भूपालो मूर्छितः पतितो भुवि ॥ ४ ॥ तदा तु निर्भयानन्दो विषमुत्तार्य तस्य वै ॥ भूपतिं वर्णयामास जैनधर्मपरायणः ॥ ५ ॥ शृणु राजन्महाभाग शत्रून्षण्मानसाधमान् ॥ कामः क्रोधस्तथा लोभो रतिर्हिंसा च तृष्णिका ॥ रजोगुणाच्च ते जातास्तेषां भेदाः पृथक्पृथक् ॥ ६ ॥ मोहो दंभो मदश्चैव ममताशा च गर्हणा ॥ तमोगुणाच्च ते जातास्तैरिदं पूरितं जगत् ॥ ७ ॥ कामी विष्णुस्तथा रुद्रः क्रोधी लोभी विधिस्तथा ॥ दंभी शक्रो यमो मोही मदी यक्षपतिः स्वयम् ॥ ८ ॥ माया वश्याश्च ते सर्वे तर्हि तत्पूजनेन किम् ॥ षट्शत्रुभिर्जितो यो वै स जिनो मुनिभिः स्मृतः ॥ ९ ॥ न जितः स जिनो ज्ञेयोऽद्वैतवादी निरंजनः ॥ तस्य ध्यानेम भावेन मोक्षवंतो नराः सदा ॥ १० ॥ तत्प्रसादाय यो धर्मः शृणु मे वसुधाधिप ॥ गोपूजनेन ते देवास्तुष्टिं यान्ति सदैव हि ॥ ११ ॥ अतो गोपूजनं शुद्धं हिंसा सर्वत्र वर्जिता ॥ मदपानेन सर्वात्मा जिनः क्लेशं समाप्नुयात् ॥ १२ ॥ तस्मान्मांसं च पानं च वर्जितं सर्वदैव हि ॥ न्यायेनोपार्जितं वित्तं भोज

येच्च बुभुक्षितान् ॥ १३ ॥ रविरात्मा जिनस्यैव तत्प्रकाशे हि भोजयेत् ॥ इत्येवं वर्णयित्वैनं मंत्री गेहमुपाययौ ॥ १४ ॥ तथैव मत्वा स नृपो जिनधर्मं गृहीतवान् ॥ कियता चैव कालेन वेदमार्गो हि लंघितः ॥ १५ ॥ तदा तु दुःखिता राज्ञी शिवस्य शरणं ययौ ॥ १६ ॥ वरदानेन रुद्रस्य पुत्रो जातो महोत्तमः ॥ धर्मराज इति ख्यातो वेदव्रतपरायणः ॥ १७ ॥ गुणशेखर एवासौ पंचत्वे निरयं ययौ ॥ धर्मराजस्तदा राज्यं कृतवान्धर्मतः स्वयम् ॥ १८ ॥ तस्य धर्मप्रभावेण तत्पिता स्वर्गमाप्तवान् ॥ त्रयः पत्न्योभवंस्तस्य गुणरूपा महोत्तमाः ॥ १९ ॥ वसंतसमये राजा ताभिः सह वनांतरे ॥ संयातो रमयामास पुष्पभ्रमरनादिते ॥ २० ॥ श्रमितः स तु भूपालो राज्ञीभिः सह मोदितः ॥ सरोवरे स्नापितवान्मदाघूर्णितलोचनः ॥ २१ गृहीत्वा कुसुमं पाद्मं करे राज्ञ्यै समार्पयत् ॥ पदि हीनत्वमायाता पतता कुसुमेन वै ॥ २२ ॥ दुःखितः स तु भूपालो राज्ञीं तामचिकित्सयत् ॥ रात्रौ प्राप्ते द्वितीया तु चन्द्रशीलेन मोहिता ॥ २३ ॥ अपतद्व्याकुलीभूत्वा शुद्धं पादमभूत्ततः ॥ पतितायाश्च शब्देन तृतीया ज्वरिताऽभवत् ॥ २४ ॥ तस्या मूर्च्छा तदा क्षीणा द्वितीयाया अजायत ॥ नृपस्पर्शेन सा सुभ्रूर्ज्वरतापं विहाय च ॥ २५ ॥ प्रभाते सुंदरे जाते स ताभिर्गृहमाययौ ॥ इत्युक्त्वा स तु वैतालो भूपतिं प्राह नम्रधीः ॥ आसां मध्ये महाराज का श्रेष्ठा सुकुमारिका ॥२६॥ ॥राजोवाच॥ ॥ तृतीया सुकुमारी च तासां मध्ये महोत्तमा॥वायुप्रकृतितश्चासौ पद्मपुष्पेण खंजिता॥२७॥ शीतांशुना द्वितीया तु मूर्च्छिता कफभावतः ॥ शब्दमात्रेण संतापो यस्यां जातो हि सोत्तमा ॥२८॥ विहस्याह पुनर्देवो भवभक्तं महीपतिम् ॥ जैनधर्मः प्रधानो हि वेदधर्मोथ वा वद ॥२९॥ सहोवाच प्रधानोऽसौ वेदधर्मः सनातनः॥अष्टौ श्रेण्यो हि तस्यैव ब्रह्मणोव्यक्तरूपिणः॥३०॥ शूद्रो वैश्यस्तथा क्षत्री ब्राह्मणो ब्रह्मचर्यकृत् ॥ गेही वन्यो यतिश्चैव क्रमाच्छ्रेष्ठाः प्रकीर्तिताः ॥ ३१ ॥ यः कृत्वा दारसंसर्गं यतिवद्वर्तते गृही ॥ स पापी नरकं याति यावदाभूतसंप्लवम् ॥ ३२ ॥ गृहेषु यतिवद्धर्मो जैनशास्त्रे प्रकीर्तितः ॥ पाखण्डः स स्मृतः प्राज्ञैर्वर्जनीयो हि सर्वदा ॥ ३३ ॥ इति श्रीभविष्ये महापुराणे चतुर्युगखंडापरपर्याये कलियुगीयेतिहाससमुच्चये दशमोऽध्यायः ॥१०॥

॥ सूत उवाच ॥ ॥ भोः शौनक महाभाग स वैतालो हि देवता ॥ राजानमब्रवीद्गाथां धर्मप्रश्नमयीं शुभाम् ॥१॥ राजन्पुण्यपुरे रम्ये नानाजननिषेविते ॥ धर्मवल्लभभूपालस्तत्र राज्यं पुराकरोत् ॥२॥ सत्यप्रकाशस्तन्मंत्री लक्ष्मीश्चामात्यकामिनी ॥ कदाचित्स तु भूपालो मंत्रिणं प्राह धर्मवित् ॥३॥ आनंदः कतिधा लोके तन्ममाचक्ष्व सत्तम ॥ स होवाच महाराज सुखं चैव चतुर्विधम् ॥४॥ ब्रह्मचर्याश्रमे यो वै ब्रह्मानंदो महोत्तमः ॥ गार्हस्थ्ये विषयानंदो मध्यमः कथितो बुधैः ॥५॥ वानप्रस्थे महाराज स धर्मानंदकोऽधमः ॥ कर्मकां

डेन चानंदः सत्यधर्मः स वै स्मृतः॥६॥संन्यस्ते तु शिवानंदस्स हि सर्वोत्तमोत्तमः॥विषयानंदको राजन्स्त्रीप्रधानः प्रकीर्तितः॥७॥ स्त्रियं विना
सुखं नास्ति गृहस्थाश्रमके नृप॥इति श्रुत्वा स भूपालो देशांतरमुपाययौ ॥८॥ पत्नीमन्वेषयामास स्वयोग्यां धर्मतत्पराम् ॥ प्राप्तवान्न तु वामांगीं
मनोवृत्त्यनुसारिणीम्॥९॥स भूपो मंत्रिणं प्राह नारीमन्वेषयाद्य भोः॥नो चेत्प्राणानहं त्यक्ष्ये सत्यं वाक्यं ब्रवीम्यहम्॥१०॥ इति श्रुत्वा ययौ मंत्री
देशाद्देशांतरं प्रति ॥ सिंधुदेशे च संप्राप्य समुद्रं प्रति सोऽगमत् ॥ तुष्टाव मनसा सिंधुं सर्वतीर्थपतिं शुभम्॥ ११ ॥ ॥ बुद्धिप्रकाश उवाच ॥ ॥
सिंधुदेव नमस्तुभ्यं सर्वरत्नालय प्रभो ॥१२॥ अहं ते शरणं प्राप्तः शरणागतवत्सल॥त्वां नमामि जलाधीशं गंगादिसरितां पतिम्॥१३॥स्त्रीरत्नं
देहि राज्ञोऽर्थे नो चेत्प्राणांस्त्यजाम्यहम् ॥ इति श्रुत्वा प्रसन्नात्मा सागरः सरितां पतिः ॥१४॥ जले वृक्षं सुवर्णांगं पत्रविद्रुमकं महत् ॥ मुक्ता
फलान्वितं दिव्यं मंत्रिणे समदर्शयत् ॥१५॥ तस्योपरि स्थिता बाला सुकुमारी मनोरमा ॥ तत्रैव सालये जाता वृक्षेण सह भूपते ॥१६॥ इति
दृष्ट्वा महाश्चर्यं नृपांतिकमुपाययौ ॥ वर्णयित्वा तु तत्सर्वं राज्ञा सार्धं समाप्तवान् ॥ १७ ॥ तथाविधं नृपो दृष्ट्वा सागरांतमुपाययौ ॥ बालया सह
पातालं प्राप्तवान्भूपतिः स्वयम् ॥ १८ ॥ तां नारीं प्राह नम्रात्मा त्वदर्थेऽहं समागतः ॥ गांधर्वेण विवाहेन मां प्रापय वरानने ॥ १९ ॥ विहस्य
साऽऽह तं भूपं कृष्णपक्षे चतुर्दशी ॥ तद्दिनेऽहं समागत्य त्वां भजाभि नृपोत्तम ॥२०॥ इति श्रुत्वा स नृपतिस्तद्दिने स्मरविह्वलः॥ खड्गहस्तो ययौ
तत्र यत्र देवीगृहोत्तमम् ॥ २१ ॥ एतस्मिन्नंतरे तत्र राक्षसो बकवाहनः ॥ तां बालां स च पस्पर्श नृपः क्रोधातुरोऽभवत् ॥ २२ ॥ कामांधो राक्षसं
हत्वा स्वपत्नीं प्राह निर्भयाम् ॥ कोऽयं तेऽत्र समायातः कारणं वद भामिनि ॥ २३ ॥ साह भोः शृणु भूपाल विद्याधरसुता ह्यहम् ॥ पितृप्रिया
मदवती कामार्ता वनमागता ॥ २४ ॥ नागता भोजने काले पितृमात्रोश्च मंदिरे ॥ ज्ञात्वा ध्यानेन मत्पित्रा शापिता तच्छृणुष्व भोः ॥ २५ ॥
अद्य कृष्णचतुर्दश्यां त्वां भजिष्यति राक्षसः ॥ कृष्णपक्षचतुर्दश्यां भुंक्ष्व त्वमपराधकम् ॥ २६ ॥ तदाहं रोदनं कृत्वा ब्रवीमि पितरं प्रति ॥ कदा
मुक्तिर्भवेद्देव तत्त्वं कथय सुव्रत ॥ २७ ॥ स होवाच कुमारि त्वं वीरभुक्ता भविष्यसि ॥ तदा शापस्य मुक्तिः स्यात्साहं तव विमोचिता ॥ २८ ॥
त्वदाज्ञयाहं यास्यामि भो राजन्पितृमंदिरे ॥ इति श्रुत्वा नृपः प्राह मम गेहं समाव्रज ॥ २९ ॥ त्वया सार्द्धं गमिष्यामि गृहं विद्याधरस्य तत् ॥
तथेत्युक्त्वा तु सा देवी नृपगेहं समाययौ ॥ ३० ॥ तदा तु नगरे तस्मिन्नृणां जातो महोत्सवः ॥ मंत्री दृष्ट्वा तु तं भूपं दिव्यपत्नीसमन्वितम् ॥
पञ्चत्वमगमत्तूर्णं कुतो हेतोर्हि तद्वद ॥ ३१ ॥ ॥ राजोवाच ॥ ॥ मन्त्री बुद्धिप्रकाशस्तु दृष्ट्वा देवीं समागताम् ॥३२॥ नृपं स हृदि संध्यात्वा

राज्यभंगभयातुरः ॥ त्यक्त्वा प्राणान्ययौ स्वर्गं शृणु यत्कारणं शुभम् ॥ ३३ ॥ विषयी यो हि भूपालस्तस्य राज्यविनाशनम् ॥ स्त्रीमदं प्राप्य
राज्यस्य सदा हानिमवाप्नुयात् ॥ ३४ ॥ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडापरपर्याये कलियुगीयेतिहाससमुच्चये एका
दशोऽध्यायः ॥ ११ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ विहस्य स तु वैतालो राजानमिदमब्रवीत् ॥ राजंश्चूडापुरे रम्ये भूपश्चूडामणिः स्मृतः ॥१॥
देवस्वामी गुरुस्तस्य वेदवेदांगपारगः ॥ तस्य पत्नी विशालाक्षी पतिधर्मपरायणा ॥ २ ॥ शिवमाराधयामास पुत्रार्थे वरवर्णिनी ॥ रुद्रस्य वरदा
नेन कामदेवसमः सुतः ॥ ३ ॥ हरिस्वामीति विख्यातो जातो देवांशवान्बली ॥ सर्वसंपत्समायुक्तो देवतुल्यसुखी क्षितौ ॥ ४ ॥ रूपलावण्यिका
नाम्ना तत्पत्नी हि सुरांगना ॥ जाता देवलशापेन तस्य नन्दनतो नृप ॥ ५ ॥ एकदा पतिना सार्द्धं वसन्ते कुसुमाकरे ॥ हर्म्ये सुष्वाप संप्रीत्या
शय्यामध्यास्य सुंदरी ॥६॥ सुकलो नाम गंधर्वस्तस्या रूपेण मोहितः ॥ तां जहार विमाने स्वे संस्थाप्य स्वपुरं ययौ ॥७॥ प्रबुद्धः स तु तां नारीं
मृगयामास विह्वलः ॥ अलब्ध्वा व्याकुलो भूत्वा देशं त्यक्त्वा वनं गतः ॥८॥ संन्यस्य विषयान्सर्वान्हरिध्यानपरायणः ॥ कदाचित्प्राप स स्नेही
विप्रगेहमुपागतः ॥ ९ ॥ प्रपच्य पायसमपि वटवृक्षमुपाश्रितः ॥ वृक्षोपरि निधायाशु नदीस्नानमथाकरोत् ॥ भोजनं च ततो राजन्सर्पेण गर
लीकृतम् ॥ १० ॥ ततो यतिः समायातो भुक्त्वा मदमुपाययौ ॥ विषेण पीडिततनुर्दृष्ट्वा ब्राह्मणमब्रवीत् ॥ ११ ॥ त्वया प्रदत्तं मूर्खेण पायसं
विषमिश्रितम् ॥ मरणं यामि भो दुष्ट ब्रह्महत्यामवाप्स्यसि ॥ १२ ॥ इत्युक्त्वा मरणं प्राप्य शिवलोकमुपाययौ ॥ रूपतेजोयुतां देवीं गृहीत्वा
सुखमाप्तवान् ॥ १३ ॥ इत्युक्त्वा स तु वैतालो राजानमिदब्रवीत् ॥ कस्मै प्राप्ता ब्रह्महत्या तेषां मध्ये वदस्व मे ॥ १४ ॥ ॥ राजोवाच ॥ ॥
स्वाभाविकविषो नागो ह्यज्ञानेन विषं कृतम् ॥ अतो दोषी हि भुजगो ब्रह्महत्यां न चाप्तवान् ॥ १५ ॥ बुभुक्षिते ददौ भिक्षां स द्विजो दैवमो
हितः ॥ ब्रह्महत्यामतो नायात्कुलधर्मपरायणम् ॥ १६ ॥ आत्मना च कृतं पापं भोक्तव्यं सर्वदा जनैः ॥ आत्मत्यागो ब्रह्महत्या चातिथेश्चा
वमाननम् ॥ १७ ॥ ब्रह्महत्या तदा ज्ञेया विषदत्तेन सा तथा ॥ आत्मत्यागः स्मृतो दैवात्तस्मात्सोपि न पापवान् ॥ १८ ॥ यैर्नरैः कथिता
वार्ता ब्रह्महत्या त्वया कृता ॥ तेषां ब्राह्मणहत्या सा न्यायभ्रष्टवतां नृणाम् ॥ १९ ॥ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युग
खण्डापरपर्याये कलियुगीयेतिहाससमुच्चये द्वादशोऽध्यायः ॥ १२ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ कृतकृत्यः प्रसन्नात्मा
वैतालो नृपमब्रवीत् ॥ नगरे चन्द्रहृदये रणधीरो नृपोऽभवत् ॥ १ ॥ तत्र वैश्योऽवसद्धर्मी नाम्ना धर्मध्वजो धनी ॥ तस्य पुत्री समायाता

सुन्दरी सुखभाविनी ॥ २ ॥ एकदा नगरे तस्मिन्यातुभक्तो नरोऽभवत् ॥ द्यूतविद्यापरो नित्यं मद्यमांसपरायणः ॥ ३ ॥ वाशरो नाम
तत्रासीद्राक्षसः पुरुषादनः ॥ तस्मै मद्यं च मांसं च प्रत्यहं स च दत्तवान् ॥ ४ ॥ प्रसन्नो राक्षसो भूत्वा यातुभक्तं तमब्रवीत् ॥ वरं वरय यो योग्यो
मत्तः सर्वमवाप्स्यसि ॥ ५ ॥ स होवाच वरो मह्यं देयस्ते पुरुषादक ॥ गुप्तगर्तं च भूमध्ये कुरु चौरनिरूपणम् ॥ ६ ॥ इति श्रुत्वाकरोद्गर्तं नर
बुद्धिविमोहनम् ॥ स्वयं तत्र स्थितो देवः स्वभक्तेन समन्वितः ॥ ७ ॥ तेन रात्रौ तु चौर्येण नृपदासी वरांगना ॥ हृता संस्थापिता गर्ते बहुद्रव्यं
तथा हृतम् ॥ ८ ॥ सप्तपत्न्योऽभवंस्तस्य चतुर्वर्णस्य योषितः ॥ तासां मध्ये भूपदासी तस्य चौरस्य वल्लभा ॥ ९ ॥ नृपदुर्गसमं गेहं रचितं
तेन रक्षसा ॥ भूतले गुप्तरूपं च नरबुद्धिविमोहनम् ॥ १० ॥ चोरितं बहुधा द्रव्यं गर्ते संस्थापितं बलात्॥ तदा ते व्याकुला राजञ्जना राजानमब्रु
वन् ॥ ११ ॥ त्यजाम नगरीं भूप चौरविघ्नकरीं तव ॥ इति श्रुत्वाय भूपेन रक्षिणः शस्त्रसंयुताः ॥ स्थापिता नगरे तस्मिंश्चौरहिंसापराय
णाः ॥ १२ ॥ आज्ञाप्य स ययौ गेहं तैस्तु श्रुत्वा तथा कृतम् ॥ १३ ॥ राक्षस्या मायया सर्वे मोहिता रक्षिणस्तदा ॥ चौरेण बहुधा द्रव्यं हृतं
च धनिनां बलात् ॥ १४ ॥ पुनस्ते प्रययुर्भूपं रणधीरं समेरयन् ॥ श्रुत्वा तु विस्मितो राजा स्वयं नगरमागतः ॥ १५ ॥ अर्धरात्रे तमोभूते स
चौरो नृपमागतम् ॥ ज्ञात्वाब्रवीच्च राजानं को भवानत्र चाप्तवान् ॥ १६ ॥ नृपोऽब्रवीदहं चौरश्चोदितार्थः समागतः ॥ यास्यामि धनिनां गेहे
भवान्मे वचनं कुरु ॥ १७ ॥ मया सार्द्धं च बहुधा द्रव्यं हर सुखी भव ॥ तथा मत्वा तु बहुधा चौरेण धनमाहृतम् ॥ १८ ॥ गर्तमध्ये गतो
रात्रौ स्थापयित्वा नृपं बहिः ॥ एतस्मिन्नेव तत्पत्नी नृपदासी वरांगना ॥ १९ ॥ भूपतिं प्राह भो राजन्गच्छ शीघ्रं स्वकं गृहम् ॥ चौरोऽसौ हि
त्वदर्थे च मृत्युं कुर्वन्गृहं गतः ॥ २० ॥ इत्युक्त्वा सा तु भूपाय मार्गभेदमदर्शयत् ॥ नृपोऽपि स्वगृहं प्राप्य प्रभाते विमले रवौ ॥ २१ ॥ आययौ
सेनया सार्द्धं यत्र चौरः स्वयं स्थितः ॥ चौरोऽपि भयमासाद्य वाशरं नाम राक्षसम् ॥ २२ ॥ संपूज्य वर्णयामास यथा जातं तथाविधि ॥ विह
स्याह च रक्षस्तं त्वया मे भोजनं कृतम् ॥ २३ ॥ अद्य भक्ष्याम्यहंःसर्वान्मानुषान्दैवचोदितान् ॥ इत्युक्त्वा स ययौ घोरो राक्षसो नृपतिं प्रति ॥
॥ २४ ॥ चखाद बहुलां सेनां तेपि याता दिशो दश ॥ आक्रांतः स च भूपालो रक्षसा विकलीकृतः ॥ २५ ॥ तदा चौरः स्वयं प्राप्य भूपतिं
प्राह रोषतः ॥ पलायनं न भूपस्य योग्यं धर्मजनस्य वै ॥ २६ ॥ इति श्रुत्वा नृपश्चैव तूर्णमागत्य तत्र ह ॥ ध्यात्वा देवीं महाकालीं लब्ध्वा मंत्रं
महोत्तमम् ॥ २७ ॥ रक्षसा सह तद्गर्तं भस्मसादभवत्क्षणात् ॥ निगडैस्तं बबंधाशु चौरं नगरलुंठकम् ॥ २८ ॥ तथा सर्वधनैः सार्धं स्त्रीभिस्ताभिः

समाययौ ॥ राज्यस्थानं समासाद्य दुर्गतिस्तस्य चाभवत् ॥ २९ ॥ पटहाताडितेनैव शब्देन च गृहेगृहे ॥ ज्ञापितं करणं सर्वं तच्चौरस्य वधस्य
तैः ॥ ३० ॥ तद्दिने नगरे तस्मिन्भ्रामितो गर्दभोपरि ॥ धर्मध्वजगृहद्वारे स चौरो हि समागतः ॥ ३१ ॥ तस्य रूपं समालोक्य मुमोह सुखभा
विनी ॥ पितरं प्राह दुःखार्ता चौरं मोचय सत्वरम् ॥ ३२ ॥ स गत्वा नृपतिं प्राह पंचलक्षधनं मम ॥ गृहाण चौरमोक्षार्थे म्रियते न हि मे सुता
॥ ३३ ॥ विहस्याह नृपस्तं वै चौरोऽयं धनलुंठकः ॥ कर्हिचिन्न मया त्याज्यो भुवि वै पुरुषाधमः ॥ ३४ ॥ इति श्रुत्वा निराशोऽभूत्स चौरो
मरणं गतः ॥ शल्यारोपणकाले तु प्राक्प्रहस्य ततोऽरुदत् ॥ ३५ ॥ एतस्मिन्नेव तत्पुत्री देवमायाविमोहिता ॥ गृहीत्वा चौरदेहं तु वह्निकुण्डे तु
सागमत् ॥ ३६ ॥ तदा प्रसन्ना सा दुर्गा तावुजीव्य प्रसादतः ॥ तस्यै दत्तो वरो दिव्यो भुक्तिमुक्तिफलप्रदः ॥ ३७ ॥ इत्युक्त्वा स तु भूपालं पुनः
प्राह विहस्य तम् ॥ किंकारणेन चौरोसौ प्राक्प्रहस्य ततोऽरुदत् ॥ ३८ ॥ ॥ राजोवाच ॥ ॥ मदर्थे सुन्दरी नारी स्वप्राणान्दातुमुद्यता ॥
तस्यै किं च प्रदातव्यं मया तत्स्नेहरूपिणा ॥ ३९ ॥ अतो रोदितवान्पश्चाद्धसने कारणं शृणु ॥ धन्योऽयं भगवान्कृष्णो यस्य लीलेयमीदृशी ॥
॥ ४० ॥ अधर्मिणे च नाकस्य फलं दातुं समर्हति ॥ धर्मिणो नरकस्यैव फलं तस्मै नमोनमः ॥ ४१ ॥ अतः स हसितः पूर्वं मोहितो हरिलील
या ॥ इति श्रुत्वाह वैतालो हरेः शरणमुत्तमम् ॥ ४२ ॥ वाक्यं तेन कृतं शूल्यामतो जीवितवाञ्छुचिः ॥ ४३ ॥ इति श्रीभविष्ये महापुराणे प्रति
सर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये त्रयोदशोऽध्यायः ॥ १३ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ भृगुवर्य महाभाग वैतालो
नृपमब्रवीत् ॥ राजन्पुष्पावती रम्या नगरी तत्र भूपतिः ॥ सुविचार इति ख्यातः प्रजापालनतत्परः ॥ १ ॥ चन्द्रप्रभा तस्य पत्नी रूपयौवन
शालिनी ॥ तस्यां जाता सुता देवी नाम्ना चन्द्रावली मता ॥ २ ॥ कदाचित्स्वालिभिः सार्द्धं विपिनं कुसुमाकरम् ॥ आययौ तत्र वै विप्रं सुदेवं
सा ददर्श ह ॥३॥ मोहिता चाभवद्देवी विप्रोपि पतितः क्षितौ ॥ कामबाणव्यथां प्राप्य गतप्राण इवाभवत् ॥ ४ ॥ तस्यां गतायां सदने द्वौ विप्रौ
तत्र चागतौ ॥ मूलदेवः शशी नाम्ना तत्र विद्याविशारदौ ॥५॥ तथागतं द्विजं दृष्ट्वा रूपयौवनशालिनम् ॥ पप्रच्छ कारणं सर्वं येन मोहत्वमागतः
॥ ६ ॥ स श्रुत्वा रोदनं कृत्वा सर्वं तस्मै न्यवेदयत् ॥ कृपालुर्मूलदेवस्तु तं स्वगेहमवाप्तवान् ॥ ७ ॥ गृहे जप्त्वा महामंत्रं चामुण्डाबीजसंयुतम् ॥
कृतवान्गुटिके चोभे सुदेवाय समार्पयत् ॥ ८ ॥ एकया सुंदरी कन्या द्वादशाब्दमयी शुभा ॥ द्वितीयया महावृद्धो मूलदेवस्तदाभवत् ॥ ९ ॥ द्वौ
गतौ राजसदने नृपमाशीर्भिरर्च्य तम् ॥ हेतुं निवेदयामास तच्छृणुष्व महामते ॥१०॥ नगरे तांत्रिके राजन्मद्गेहं सुन्दरोपमम् ॥ विलापध्वजनाम्ना

वै राज्ञा संलुठितं बलात्॥११॥पलायितौ सुतः पत्नी तावन्वेष्टुं समाययौ ॥ इयं वधूर्महाराज मम तत्पुत्रभाविनी॥१२॥यावदहं न गच्छामि स्वगेहे रक्ष
धर्मतः ॥ इति श्रुत्वा स नृपतिश्चाहूय स्वसुतां तदा ॥ तस्यै समर्प्य तां पश्चात्स द्विजो गेहमाययौ ॥ १३ ॥ सुदेवस्तु निशीथे वै रमणीं प्राह निर्भ
यः॥ कुतस्ते मन उद्विग्नं सत्यं कथय मे सखि ॥१४॥ साह मे हृदये नित्यं सुदेवो ब्राह्मणोत्तमः ॥ उषितस्तद्वियोगेन व्याकुलाहं सदा सखे ॥१५॥
सुदेवश्चाह भोः सुभ्रूर्यदि ते ब्राह्मणोत्तमम् ॥ समर्पयामि तत्त्वं मे किं ददासि वदस्व भोः ॥ साह ते सर्वदा दासी भवामि द्विजभामिनि ॥१६॥
इति श्रुत्वा सुदेवस्तु मुखान्निष्कृष्य यंत्रकम् ॥ पूर्वदेहत्वमापन्नस्तया सार्द्धं समारमत् ॥ १७ ॥ चतुर्मास्यो भवद्गर्भस्तस्मिन्काले तु भो नृप ॥
॥ १८ ॥ अमात्यतनयो विप्रस्त्रीरूपं प्रति मोहितः ॥ तदा मरणसम्पन्नं ज्ञात्वा तं मदनालसम् ॥ १९ ॥ मन्त्री स्नेहाच्च बहुधा सञ्चित्य हृदि
पंडितैः ॥ तस्मै समर्पयामास तां नारीं मन्त्रसम्भवाम् ॥ २० ॥ साह भोमात्यतनय त्रिमासं तीर्थमण्डले ॥ संस्नाहि तर्हि मे योग्यो भविष्यसि
तथा कुरु ॥ २१ ॥ तथा मत्वा मंत्रिसुतो नम्रात्मा मदनालसः ॥ तीर्थांतरं गतः सोऽपि सुदेवस्तस्य योषितम् ॥ २२ ॥ भूपकांतिं कामवशां
चालिलिंग स कामुकः ॥ सा तु गर्भं दधाराशु द्विमासस्य द्विजेन वै ॥ २३ ॥ सुदेवो मानुषो भूत्वा मूलदेवगृहं ययौ ॥ सर्वं निवेदया
मास यथाजातं नृपालये ॥ २४ ॥ मूलदेवः प्रसन्नात्मा शशिनं नाम मित्रकम् ॥ विंशद्वर्षतरं कृत्वा स्वयं वृद्धस्य रूपवान् ॥ २५ ॥ राज्ञे निवेद्य
तत्सर्वं वधूं मे देहि भूपते ॥ तदा तु स नृपो भीत्या तं प्राह श्लक्ष्णया गिरा ॥ २६ ॥ मन्त्री राजकरो नाम तत्पुत्रो मदनालसः ॥ दृष्ट्वा तव
वधूं रम्यां मुमोह मरणोन्मुखः ॥ २७ ॥ स्वपुत्रस्य वियोगेन स मन्त्री च तथेदृशः ॥ तथाहं ब्राह्मणान्वृद्धान्पृष्ट्वा तस्मै च तामदाम् ॥ २८ ॥
यथा प्रसन्नो हि भवान्कुरु त्वं च तथाविधम् ॥ मूलदेवस्तु नृपतिं प्रोवाच विषमुद्वमन् ॥ २९ ॥ देहि भूप सुतां मह्यं तत्पुत्रस्य सुखाय वै ॥ तथैव
मत्वा स नृपः सुतां चन्द्रावलीं शुभाम् ॥ ३० ॥ दत्त्वा च वेदविधिना बहुधा द्रव्यसंयुताम् ॥ स्वयं चकार राज्यं वै ब्रह्मदोषविवर्जितः ॥ ३१ ॥
शशी तु भूपतेः कन्यां गृहीत्वा स्वगृहं ययौ ॥ सुदेवस्तु तदा दुःखी मूलदेवमुवाच ह ॥ ३२ ॥ मदीयेयं नृपसुता भोगपत्नी महोत्तमा ॥ तच्छ्रुत्वा
मूलदेवस्तु विस्मितः स तथाकरोत् ॥ ३३ ॥ इत्युक्त्वा नृपतिं प्राह वैतालो रुद्रकिंकरः ॥ कस्मै प्राप्ता नृपसुता धर्मतस्तद्वदस्व मे ॥ ३४ ॥
॥ ॥ राजोवाच ॥ ॥ पितामात्राज्ञया पुत्री देवानां सन्मुखे स्थिता ॥ यस्मै निवेदिता तस्मै सा योग्या धर्मतः सदा ॥ ३५ ॥ शास्त्रेषु कथितं देव
स्त्रीरत्नं सर्वदैव हि ॥ यथाक्षेत्रं भुवि ख्यातं बीजमन्येन रोपितम् ॥ ३६ ॥ तत्क्षेत्रं कृषिकारस्य बीजदातुर्न चैव ह ॥ तस्माद्वै राजतनया शशिनं

वरयिष्यति ॥ ३७ ॥ सुदेवस्य वै तनयो योग्यत्वं हि गमिष्यति ॥ ३८ ॥ इति ते कथितं देव यथा शास्त्रेषु भाषितम् ॥ किं कृतं मन्त्रिपुत्रेण
तथैव कथयस्व मे ॥ ३९ ॥ इति श्रुत्वा स होवाच स पुत्रो मदनालसः ॥ वृन्दावनं शुभं प्राप्य राधाकुण्डे समागतः ॥ ४० ॥ स स्नात्वा बहुला
ष्टम्यां तत्पुण्येन नृपोत्तम ॥ भस्मसादभवत्पापं येन मोहत्वमागतः ॥ ४१ ॥ स्मृत्वा स हृदि गोविंदं तुष्टाव श्लक्ष्णया गिरा ॥ ४२ ॥ ॥ मद
नालस उवाच ॥ ॥ नमस्ते दयासिंधवे कृष्णदेव त्वयेदं ततं विश्वमम्भोधिरूपम् ॥ त्वयैकेन लीलार्थतो देवदेव प्रियाराधया सार्द्धमेतद्धि गुप्तम्॥
॥ ४३ ॥ जगत्यन्तकाले त्वया कालमूर्त्या जगत्संहृतं वै नमस्तेनमस्ते ॥ मदीया च बुद्धिर्हृषीकेश शुद्धा यथा स्यात्तथैवेश शीघ्रं कुरु त्वम् ॥
॥ ४४ ॥ इति स्तोत्रप्रभावेन देवदेवेन मोचिता ॥ कामपाशात्तस्य बुद्धिः स क्षत्रीगृहमाययौ ॥ ४५ ॥ रमणीं स्वां समालिंग्य ननन्द मुदितो
नृप ॥ विप्रदोषविनाशाय हृदि संचिन्त्य बुद्धिमान् ॥ सुदेवं स समाहूय स्वां स्वसारं ददौ मुदा ॥ ४६ ॥ सुदेवस्तस्य भगिनीं क्षत्रियस्य मदातु
राम् ॥ धर्मेणोद्वाह्य स्वं गेहं प्राप्तवान्कामकिंकरः ॥ ४७ ॥ इति ते कथितं भूप चरित्रं तस्य धीमतः ॥ मूलदेवस्य विप्रस्य तथान्यत्कथयाम्यहम्॥
॥ ४८ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ छ ॥
॥ सूत उवाच ॥ ॥ प्रशस्य भूपतिं शुद्धं वैतालो रुद्रकिंकरः ॥ पुनराख्यानकं विप्र वर्णयामास सुन्दरम् ॥ १ ॥ कान्यकुब्जे महाराज ब्राह्मणो
दानशीलकः ॥ बभूव सत्यसंधश्च देवीपूजनतत्परः ॥ प्रतिग्रहेण यद्द्रव्यं तेन दानमचीकरत् ॥ २ ॥ कदाचित्तु शरत्काले नवदुर्गाव्रतं ह्यभूत् ॥ न
प्राप्तं दानतो द्रव्यं तदा चिंतातुरोऽभवत् ॥३॥ किं कर्तव्यं मया चाद्य येन द्रव्ययुतो ह्यहम् ॥ कन्या निमंत्रिताश्चाद्य कथं ता भोजयाम्यहम् ॥४॥
इति शोकसमायुक्तस्तदा देवीप्रसादतः ॥ मुद्राः पञ्च तदा प्राप्तास्ताभिर्व्रतमचीकरत् ॥ ५ ॥ निराहारव्रतं तेन कृतं तु नवमाह्निकम् ॥ तेन व्रतप्रभा
वेन मृतो देवत्वमागतः ॥ ६ ॥ जीमूतकेतुरिति च सोभूद्विद्याधराधिपः ॥ हिमाचलगिरौ रम्ये पुरे विद्याधरे शुभे ॥७॥ उवास कतिचिद्वर्षान्दिव्य
भोगप्रभोगवान् ॥ तत्र कल्पद्रुमं नित्यं पूजयामास भक्तितः ॥ ८ ॥ तेन वृक्षप्रभावेन जातः पुत्रो महोत्तमः ॥ सर्वाकलासु निपुणो नाम्ना जीमूतवा
हनः ॥ ९ ॥ स वै पूर्वभवे राजन्मध्यदेशे महोत्तमे ॥ क्षत्रियः शूरसेनाख्यो बभूव वसुधाधिपः ॥ १० ॥ एकदा मृगयाकेलिलोलुपः स महीपतिः ॥
प्राप्तवानुत्पलारण्यं यत्र वाल्मीकिसंस्थितिः ॥ ११ ॥ चैत्रशुक्लनवम्यां तु न कृतं जीवघातनम् ॥ उत्सवं रामदिवसे चकार विधिवन्नृपः ॥ १२ ॥
वाल्मीकेश्च कुटीमध्ये रात्रौ जागरणं कृतम् ॥ १३ ॥ श्रुता राममयी गाथा तस्य पुण्यप्रभावतः ॥ विद्याधरत्वमापन्नो मुमुदे तत्र शक्रवत् ॥१४॥

कल्पवृक्षस्य वै पूजा कृता तेन महात्मना ॥ वर्षांतरे द्रुमः प्राह वरं वरय सत्तम ॥ १५ ॥ स तमाह महावृक्ष मदीयं नगरं शुभम् ॥ धनधान्यस
मायुक्तं यथैव स्यात्तथा कुरु ॥ १६ ॥ इत्युक्ते सति वृक्षेण नगरं भूपतेः समम् ॥ कृतं तदा न कोऽप्यासीद्यो मन्येत्पार्थिवाश्रयम् ॥ १७ ॥ सर्वे
ते राजतुल्याश्च कल्पवृक्षप्रसादतः ॥ तदा तौ तु पितापुत्रौ तपसोऽर्थे वनं गतौ ॥१८॥ मलयाद्रौ महारम्ये तेपतुर्बहुलं तपः॥एकस्मिन्दिवसे राज
न्मलयध्वजभूपतेः ॥ १९ ॥ कमलाक्षीति विख्याता कन्या च शिवमंदिरे ॥ स्वसख्या सहिता प्राप्ता शिवपूजनतत्परा ॥ २० ॥ जीमूतवाहनश्चैव
पूजार्थे मंदिरं ययौ ॥ बालां ददर्श दिव्यांगीं सर्वभूषासमन्विताम् ॥ २१ ॥ तस्या दर्शनमात्रेण कामबाणेन पीडितः ॥ मनसा कामदेवं तं
तुष्टाव श्लक्ष्णया गिरा ॥ २२ ॥ जीमूतवाहन उवाच ॥ ॥ मदनाय नमस्तुभ्यं कृष्णपुत्राय ते नमः ॥ शंबरप्राणहंत्रे च चतुर्व्यूहाय ते नमः ॥
॥ २३ ॥ पंचबाणाय कामाय प्रद्युम्नाय नमोनमः ॥ मद्योग्यां कुरु सुश्रोणीं कामिनीं कमलाननाम् ॥ २४ ॥ तदा प्रसन्नो भगवान्मकरध्वजदे
वता ॥ मोहयित्वा च पितरं तद्विवाहमकारयत् ॥ २५ ॥ विश्वावसुरिति ख्यातस्तस्य भूपस्य वै सुतः ॥ भगिनीपतिना सार्द्धं स ययौ गंधमाद
नम् ॥ २६ ॥ नरं नारायणं नत्वा गरुडोत्तुंगमाययौ ॥ तदा नागस्य वै माता शंखचूडस्य भो नृप ॥२७॥ रुरोद बहुधा तत्र यत्र जीमूतवाहनः॥
दुःखितः स जगामाशु दयालुर्दीनवत्सलः ॥ २८ ॥ वृद्धामाश्वास्य पप्रच्छ केनेदं दुःखमागतम् ॥ साह मे तनयो देव गरुडास्ये गमिष्यति ॥
॥ २९ ॥ तद्वियोगेन दुःखार्ता विलपामि महाकुला ॥ इति ज्ञात्वा स नृपतिर्गरुडोत्तुंगमाययौ ॥ ३० ॥ गरुडोऽपि गृहीत्वा तं नभोमार्गमुपाग
मत् ॥ तस्यांगदोऽसृजा लिप्तो न्यधात्तत्र भामिनी ॥ ३१ ॥ कमलाक्षी तु वियति स्थितं गरुडभक्षितम् ॥ विलोक्य चारुदद्गाढं पतिदुःखेन
दुःखिता ॥ ३२ ॥ तदा तु गरुडस्त्रस्तस्तत्रागत्य त्वरान्वितः ॥ जीमूतवाहनं प्राह कस्मात्त्वं मम भक्षितः ॥ ३३ ॥ सःहोवाच प्रभो मेद्य वचः
शृणु महामते ॥ शंखचूडस्य जननी महादुःखेन दुःखिता ॥ ३४ ॥ तस्याः पुत्रस्य रक्षार्थं संप्राप्तोऽहं तवांतिकम् ॥ इत्युक्ते सति भूपाल शंखचू
डश्च पन्नगः ॥ ३५ ॥ तद्वचालस्यैव दुःखेन दुःखितः शत्रुमाप्तवान् ॥ मां प्रभक्ष कृपासिंधो त्वदाहारार्थमागतम् ॥ ३६ ॥ संत्यज्य मानुषं दिव्यं
कुर्वाहारं महामते ॥ तदा प्रसन्नो गरुडो ददौ तस्मै वरत्रयम् ॥ ३७ ॥ जीमूतवाहनायैव विद्याधरसुताय च ॥ शंखचूडकुलं नाहं भक्षयिष्ये कदा
चन ॥ ३८ ॥ त्वं तु विद्याधरपुरे प्राप्य राज्यं महोत्तमम् ॥ सुभोजयित्वा लक्षाब्दं ततो वैकुण्ठमेष्यसि ॥ ३९ ॥ इत्युक्त्वान्तर्दधौ देवः स
पित्रा राज्यमाप्तवान् ॥ स्वपत्न्या सह राज्यांगं भुक्त्वा वैकुंठमाययौ ॥ ४० ॥ इत्युक्त्वा स तु वैतालो नृपतिं प्राह नम्रधीः ॥ तेषां मध्ये महा

राज कस्य प्राप्तं महाफलम् ॥ ४१ ॥ ॥ राजोवाच ॥ ॥ शंखचूडस्य संप्राप्तं जीवदानमहाफलम् ॥ नृपस्यैवोपकारं च स्वभावो विधिना कृतः ॥ ४२ ॥ पतिव्रताप्रभावेन जीवदानेन भूपतेः ॥ सन्तुष्टो गरुडो जातस्तस्य किं तर्हि तत्फलम् ॥ ४३ ॥ निर्भयः शंखचूडस्तु स्वशत्रुं प्रति चागमत् ॥ शरीरमर्पयित्वा तं ततः प्राप्तं महाफलम् ॥ ४४ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये पंचदशोऽध्यायः ॥ १५ ॥ छ ॥

॥ सूत उवाच ॥ ॥ पुनः प्राह स वैतालो भूपतिं ज्ञानकोविदम् ॥ चंद्रशेखरभूपस्य नगरी दक्षिणे स्थिता ॥ १ ॥ रत्नदत्तोवसद्वैश्यो धर्मज्ञो धनधान्यवान् ॥ कामावरूथिनी तस्य सुता जाता महोत्तमा ॥ २ ॥ तद्रूपमुत्तमं दृष्ट्वा स वैश्यो भूपतिं प्रति ॥ उवाच भो महाराज सुता मम सुरेप्सिता ॥ ३ ॥ तां गृहाण कृपासिंधो त्वद्योग्या विधिनिर्मिता ॥ इति श्रुत्वा तु वचनं भूपतिश्चंद्रशेखरः॥ ॥ ४ ॥ मन्त्रिणं विदुरं प्राह त्वं च गच्छ महामते ॥ यथायोग्यं हि तद्रूपं मां निवेदय सत्वरम् ॥ ५ ॥ इत्युक्त्वा स ययौ गेहं भूपतिश्चंद्रशेखरः॥ श्यामला नाम तत्पत्नी ज्ञात्वा राजानमागतम् ॥६॥ धूपदीपादिभिः पुष्पैर्यथायोग्यैः समार्चयत् ॥ एतस्मिन्नेव काले तु गौश्च शार्दूलपीडिता॥७॥ हंभाशब्देन महता विललाप भयातुरा ॥ तच्छ्रुत्वा स तु भूपालः खड्गहस्तः समभ्यगात् ॥ ८ ॥ शीघ्रं हत्वा तु शार्दूलं मुमोद नृपतिस्तदा ॥ मुकुलो दानवो नाम तद्देहाद्रूपमाप्तवान् ॥९॥ भूपतिं प्राह नम्रात्मा धर्मज्ञं चंद्रशेखरम् ॥ त्वया विमोचितो नाथ यास्यामि वरुणालयम् ॥१०॥ प्रह्लादस्यैव शापेन व्याघ्रदेहत्वमागतः ॥ परिक्रम्य ययौ दैत्यः प्रह्लादं प्रति सत्वरः ॥ ११ ॥ नृपतिर्गृहमागत्य सुष्वाप परया मुदा ॥ प्रभाते बोधितो राजा सभायां स्वयमागमत् ॥ १२ ॥ नृपोक्तः स ययौ तत्र यत्र कामावरूथिनी ॥ दिव्यमूर्तिमयीं दृष्ट्वाचिंतयत्स स्वमानसे ॥ १३ ॥ अस्या मूर्तिप्रभावेन राजासौ मोहमाप्स्यति॥इति ज्ञात्वा नृपं प्राह सैव त्वद्योग्यका न हि॥१४॥तथा मत्वा स नृपतिर्न विवाहमथाकरोत्॥रत्नदत्तस्य भूपस्य सेनायाः पतये ददौ ॥ १५ ॥ बलभद्रस्य सा पत्नी बभूव वरवर्णिनी ॥ एकदा नृपतिस्तां वै दृष्ट्वा कामावथरूथिनीम् ॥ १६ ॥ मोहितः कामबाणेन मूर्च्छितः पतितो भुवि ॥ तदा सेनापतिस्तूर्णं नृपमुत्थाप्य सत्वरम् ॥ १७ ॥ शिबिकां चैव संस्थाप्य सभायां च समैरयत् ॥ तदा प्रबुद्धो नृपतिः प्राह सेनापतिं मुदा ॥ १८ ॥ कस्येयं सुन्दरी भार्या कुतो जाता महोत्तमा ॥ बलभद्रस्तु तच्छ्रुत्वा नृपतिं प्राह नम्रधीः ॥ १९ ॥ ममेयं सुन्दरी नारी रत्नदत्तस्य सा सुता ॥ राज्यभंगभयान्मन्त्री न रूपं त्वयि वर्णिवान् ॥ २० ॥ मम दासस्य या पत्नी त्वद्योग्या भूपते सदा ॥ तवेच्छां पूरयिष्यामि तां गृहाण कृपानिधे ॥ २१ ॥ इत्युक्तः क्रोधताम्राक्षो भूपतिस्तमुवाच ह ॥ तवेयं धर्मतो भार्या प्राप्ता सुन्दररूपिणी ॥ २२ ॥

गृह्णामि यदि तां देवीं नरके यमकिंकराः ॥ पातयित्वा महादुःखं भजयिष्यन्ति तर्हि भोः ॥ २३ ॥ इत्युक्त्वा भूपतिस्तूर्णं विरहाग्निप्रपीडितः ॥ मरणं प्राप्तवान्राजा गतो धर्मपुरांतिके ॥ २४ ॥ इत्युक्त्वा स तु वैतालो नृपं प्राह शृणुष्व भोः ॥ मृते राजनि तत्पत्नी सती भूत्वा प्रदृश्यते ॥२५॥ सेनापतिस्तु तत्रैव भस्मसादभवत्क्षणात् ॥ कामावरूथिनी देवी भस्म कृत्वा कलेवरम् ॥२६॥ स्वर्गं गतास्तु ते सर्वे कस्य पुण्याधिकं मतम् ॥ स होवाच च वैतालं राजा धर्माधिको मतः ॥ २७ ॥ मरणं किंकरस्यैव योग्यं भूपतिहेतवे ॥ पतिव्रताया मरणं पतिसंगेन योग्यकम् ॥ २८ ॥ दत्ता यत्किंकरेणैव सुंदरी नृपहेतवे ॥ धर्मभीत्या न नृपतिस्तामगृह्णात्स कामुकः ॥ २९ ॥ जित्वा कामं तथा पाल्यं धर्मं तस्मान्नृपेऽधिकम् ॥ ३० ॥ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये षोडशोऽध्यायः ॥ १६ ॥ ॥ छ ॥

॥ सूत उवाच ॥ ॥ पुनः प्रोवाच वैतालस्तदा ब्राह्मणरूपवान् ॥ शृणु भूप महाभाग कथां तव मनोरमाम् ॥ १ ॥ उज्जयिन्यां महाभाग महासेनो नृपोऽभवेत् ॥ तस्य राज्येऽवसद्विप्रो देवशर्मेति विश्रुतः ॥ २ ॥ गुणाकरस्तस्य सुतो मद्यमांसपरायणः ॥ द्यूतेन संक्षयं वित्तं तस्य पापस्य चाभवत् ॥ ३ ॥ बांधवैः स परित्यक्तो बभ्राम वसुधातले ॥ कदाचिद्दैवयोगेन सिद्धाश्रममुपागमत् ॥ ४ ॥ कपर्दी नाम तं योगी कपालान्नैरपूजयत् ॥ ज्ञात्वा पैशाचमन्नं स बुभुक्षुर्न गृहीतवान् ॥ ५ ॥ तदातिथ्यं तदर्थं स यक्षिणीं समुपाह्वयत् ॥ तया रात्रौ महानन्दं प्राप्तवान्स द्विजः शयी ॥ ६ ॥ प्रातः काले तु संप्राप्ते कैलासं यक्षिणी गता ॥ स द्विजस्तद्वियोगेन योग्यंतिकमुपाययौ ॥ ७ ॥ कपर्दी प्रददौ तस्मै विद्यां यक्षिणिकर्षिणीम् ॥ चत्वारिंशद्दिनान्येव निशीथे जलमध्यगः ॥ ८ ॥ स जजाप शुभं मन्त्रं न प्राप्ता कामचारिणी ॥ तदा योग्याज्ञया विप्रः स्वयं तु ममतां त्यजन् ॥ ९ ॥ प्राप्तवान्पितरौ नत्वा स्वगेहे निवसन्निशि ॥ प्रातः संन्यासिवद्भूत्वा कुलैश्च रुदितैर्द्विजः ॥१०॥ प्रतिबोधिवनं प्राप्तस्तच्छिष्यत्वमुपाययौ ॥ पञ्चाग्निमध्ये स स्थित्वा तन्मंत्रमजपच्छुचिः ॥ ११ ॥ न प्राप्ता योगिनी देवी तदा चिन्तातुरोऽभवत् ॥ इत्युक्त्वा स तु वैतालो नृपतिं ज्ञानकोविदम् ॥ १२ ॥ पुनराह कथं देवी न प्राप्ता यक्षिणी प्रिया ॥ श्रुत्वाह नृपतिर्विप्र वैतालं रुद्रकिंकरम् ॥ १३ ॥ त्रिविधं कर्म भो विप्र सिद्ध्यर्थे साधकाय वै ॥ मनोवाग्विहितं कर्म परलोके सुखप्रदम् ॥ १४ ॥ सुन्दरांगकृतं ज्ञेयं पुनर्वाक्कायसंभवम् ॥ किञ्चित्सिद्धिप्रदं ज्ञेयमिह जन्मनि वीक्षितम् ॥ १५ ॥ परत्र च भुवर्लोके पिण्डदेहकृतं स्मृतम् ॥ मनःकायेन संभूतं परजन्मनि राज्यदम् ॥ १६ ॥ मनोवाक्कायसंभूतमिह जन्मनि सिद्धिदम् ॥ परत्र परमां सिद्धिं तत्कर्म प्रददाति हि ॥ १७ ॥ तस्मात्कर्तव्यमेवेह

त्रिविधं कर्म साधकैः ॥ अन्यवित्तेन स द्विजः कृतवान्कर्म मन्त्रजम् ॥ अतोऽन्यजन्मनि प्राप्तो यक्षत्वं तत्परो द्विजः ॥ १८ ॥ ॥ सूत उवाच ॥ इत्युक्त्वा स तु वैतालः प्रसन्नवदनोऽभवत् ॥ १९ ॥ साधु साध्विति तं प्रोच्य सद्वाक्यैः समपूजयत् ॥ इतिहासं पुनः प्राह परीक्षार्थे नृपाय सः ॥ २० ॥ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये सप्तदशोऽध्यायः ॥ १७ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ भोः शौनक महाप्राज्ञ वैतालस्तं हि सोऽब्रवीत् ॥ सुदक्षो नाम नृपतिर्वसन्कंबलके पुरे ॥ १ ॥ न्यायवान्धर्मवाञ्छूरो दाता शिवपरायणः ॥ तस्य राज्येऽवसद्वैश्यो धनाध्यक्ष इति श्रुतः ॥ २ ॥ तनया सुन्दरी तस्य नाम्ना धनवती शुभा ॥ गौरीदत्ताय वैश्याय पित्रा दत्ता वरांगना ॥ ३ ॥ कियता चैव कालेन मोहिनी तत्सुताभवत् ॥ द्वादशाब्दवयस्तस्याः पिता तु निधनं गतः ॥ ४ ॥ तदा धनवती रंडा निधना पितुरंतिके ॥ कन्यया सह संप्राप्ता निशि मार्गे तमोमये ॥ ५ ॥ न्यायशर्मा द्विजः कश्चिद्ब्रह्मस्वस्यापहारकः ॥ नामसत्यत्वभावेन शूल्यां न निधनं गतः ॥ ६ ॥ अकस्माद्वैश्यजा प्राप्ता तत्करं सा तदास्पृशत् ॥ तेन दुःखेन महता रुरोदोच्चैर्द्विजश्च सः ॥७॥ हा राम कृष्ण प्रद्युम्नानिरुद्धेति पुनःपुनः ॥ श्रुत्वा धनवती दीना को भवानिति साब्रवीत् ॥८॥ द्विज आह च विप्रोऽहं त्र्यहं शूल्यां निरूपितः ॥ यदि दास्यसि मे कन्यां कोटिस्वर्णं ददामि ते ॥ ९ ॥ श्रुत्वा धनवती तस्मा उद्वाह्य मोहिनीं सुताम् ॥ वटमूले स्थितं द्रव्यं खनित्वा गृहमाययौ ॥ १० ॥ मोहिन्यपि पतिं प्राह भवान्मृत्युवशं गतः ॥ कुतो जायेत तनयस्तन्मे ब्रूहि दयानिधे ॥ ११ ॥ द्विजः प्राह शृणु व्यंगे यदा ते हृच्छयो भवेत् ॥ दत्ता त्वं पंडितं प्राप्य पुत्रमुत्पादयाशु वै ॥१२॥ इत्युक्त्वा मरणं प्राप्य यमलोकं गतो द्विजः ॥ नारकीं यातनां नित्यं बुभुजे निंद्यकर्मजाम् ॥ १३ ॥ मातुर्गृहे तु सा नारी मोहिनी यौवनान्विता ॥ समयं हृदये कृत्वा तिष्ठंती च पुनःपुनः ॥ १४ ॥ के भोगाश्च किमाश्चर्यं को जागर्ति शयीत कः ॥ पापो व्याधिश्च दुःखं च कुतो जातं हृदि स्थितम् ॥ १५ ॥ इति श्लोकं द्विजानाह नोत्तरं च ददुर्द्विजाः ॥ मेधावी नाम काश्मीरे स्थितो विप्रः समागतः ॥ १६ ॥ तामुवाच प्रसन्नात्मा शृणु मोहिनि सुंदरि ॥ सुगंधि वनिता वस्त्रं गीतं पानं च भोजनम् ॥ शय्या च भूषणं ज्ञेयो भोगो ह्यष्टविधो बुधैः ॥ १७ ॥ अहन्यहनि भूतानि म्रियन्ते जनयन्ति[1] च ॥ ममतां यः करोत्येषां तदाश्चर्यं स्मृतं बुधैः ॥ १८ ॥ यो विवेकं समासाद्य कुरुते कर्मसंग्रहम् ॥ संसारे घोरतमसि स जागर्ति विवेकवान् ॥ १९ ॥ संसाराजगरं ज्ञात्वा वैराग्यं

---

[1] जायन्त इत्यर्थः ।

योऽकरोद्भुवि ॥ औदासीन्यं समाधिं च सुखं शेते हि मानवः ॥२०॥ संकल्पाज्जायते कामस्ततो लोभः प्रजायते॥लोभाज्जातश्च तृष्णायां स पापो निरयप्रदः ॥ २१ ॥ जलप्रकृत्यां यो जातो रसो रसविकारवान् ॥ रसाज्जातस्य देहेऽस्मिन्व्याधिः कर्ममयोऽशुभः ॥ २२ ॥ रुद्रात्काल्यां समुद्भूतो मोहो हृदि च लोकहा ॥ स तुष्टाव महादेवीं पत्न्यर्थें सुरपूजिताम् ॥ २३ ॥ मिथ्यादृष्टिस्ततो जाता मोहस्य दयिताभवत् ॥ तस्मात्स्नेहश्च तत्पत्न्यां जातश्च ममताप्रियः ॥ २४ ॥ तयोः सकाशात्संजातं दुःखं शोकसमन्वितम् ॥ इति श्रुत्वा तु सा नारी मुहोह वरवर्णिनी ॥ २५ ॥ मानी शूरश्च चतुरोऽधिकारी गुणवान्सखा ॥ स्त्रीरक्षकश्च पुरुषो वशं नारीं सदा नयेत् ॥ २६ ॥ तस्यै गर्भं च विप्रोऽसौ दत्त्वा स्वर्णं गृहीतवान् ॥ सापि नारी सुखं लेभे तेन गर्भेण प्रत्यहम् ॥ २७ ॥ कदाचिद्दशमासांते मोहिनीमब्रवीच्छिवः ॥ स्वप्नांतरे महाराज सापि ज्ञात्वा तथाकरोत् ॥ २८ ॥ दोलामध्ये सहस्रं च स्वर्णं चैव स्वबालकम् ॥ राजद्वारे स्थापयित्वा सुष्वाप जननी सुखम् ॥ २९ ॥ शिवेन बोधितो राजा सुतार्थी रुद्रपूजकः ॥ द्विजपुत्रं समालेभे मोहिन्यां जातमुत्तमम् ॥ ३० ॥ कारयित्वा जातकर्म विततार धनं बहु ॥ हरदत्तश्च नाम्नासीत्सर्वविद्याविशारदः ॥ ३१ ॥ पितुरन्ते च तद्राज्यं प्राप्य धर्मं प्रकाशयन् ॥ गयाश्राद्धं कृतं तेन फल्गूतीरे विधानतः ॥ ३२ ॥ त्रयो हस्तास्तदा जाताः स राजा विस्मितोऽभवत् ॥ ३३ ॥ इत्युक्त्वा स तु वैतालो नृपतिं प्राह भो नृप ॥ कस्मै योग्यो हि पिंडोऽसौ श्रुत्वा राजाब्रवीदिदम् ॥ ३४ ॥ द्रव्यार्थी पंडितो ज्ञेयो गुरुतुल्यश्च भूपतिः ॥ चौराय पिंड उचितो यस्य नारी च मोहिनी ॥ ३५ ॥ ॥ सूत उवाच ॥ ॥ तेन पिंडप्रभावेन स चौरो ब्रह्मद्रव्यहा ॥ निरयान्निःसृतो विप्र स्वर्गलोकं समागतः ॥ ३६ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडापरपर्याके कलियुगीयेतिहाससमुच्चयेऽष्टादशोऽध्यायः ॥१८॥ छ ॥ चित्रकूटे च नृपती रूपदत्त इति श्रुतः ॥ वने मृगप्रसंगेन वनान्तरमुपाययौ ॥१॥ मध्याह्ने सरस्तीरे मुनिपुत्रीं ददर्श सः ॥ चिन्वतीं पद्मकुसुमं रूपयौवनशालिनीम् ॥२॥ तस्या नेत्रे स्वयं नेत्रे चैकीभूते समागते॥एतस्मिन्नंतरे विप्रस्तत्र प्राप्तो ददर्श तौ ॥३॥ तस्य दर्शनमात्रेण नृपतेर्ज्ञानमागतम् ॥ विनयावनतो राजा धर्मं पप्रच्छ चोत्तमम् ॥४॥ तमुवाच मुनिर्द्धीमान्दयाधर्मप्रपोषणम् ॥ निर्भयस्य समं दानं न भूतं न भविष्यति ॥५॥ अनर्हान्दण्डमादद्यादर्हपूजाफलं भजेत् ॥ मित्रता गोद्विजे नित्यं समता दंडनिग्रहे ॥ ६ ॥ सत्यता सुरपूजायां दमता गुरुपूजने ॥ मृदुता दानसमये संतुष्टिर्निंद्यकर्मणि ॥७॥ इत्युक्त्वा स मुनिः पुत्रीं तस्मै दत्त्वा गृहं ययौ ॥ राजापि च तया सार्द्धं वटमूलेऽशयिष्ट वै ॥८॥ तदा तु राक्षसः कश्चित्तत्पत्नीभक्षणोत्सुकः ॥ बोधयामास नृपतिं बलिं तस्मै स भूपतिः ॥९॥ दानार्थं चैव क्रव्यादे सत्तव

र्षात्मकं द्विजम् ॥ समयं कृतवान्राजा सत्येन स्वगृहं ययौ ॥१०॥ अमात्यैः संमतं कृत्वा स्वर्णलक्षं ददौ द्विजे ॥ मध्यं बालं पुरस्कृत्य राक्षसाय बलिं ददौ ॥११॥ मृत्युकाले द्विजसुतो विहस्योच्चै रुरोद ह ॥ कथं हास्यं कृतं तेन तत्पश्चाद्रोदनं कथम् ॥१२॥ इति श्रुत्वा नृपः प्राह शृणु वैतालिक द्विज ॥ ज्येष्ठपुत्रं पितुर्द्रव्यं मातृद्रव्यमवर्यकम्॥१३॥ज्ञात्वा स मध्यमः पुत्रो राजानं शरणं ययौ ॥ निर्दयी रूपसेनश्च पत्नीकल्याणभिक्षुकः ॥१४॥ खड्गहस्तं नृपं ज्ञात्वा जहास शिवतत्परः ॥ राक्षसाय शरीरं मे प्राप्तमस्माद्रुरोद ह ॥१५॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडापरपर्याये कलियुगीयेतिहाससमुच्चय एकोनत्रिंशोऽध्यायः ॥१९॥छ॥

॥ सूत उवाच ॥ ॥इति श्रुत्वा स वैतालो नृपं प्राह पुनः कथाम् ॥ विशालनगरे रम्ये विपुलेशो महीपतिः ॥१॥ तस्य ग्रामेवसद्वैश्योर्थदत्तो विपणे रतः॥अनंगमंजरी कन्या तस्य जाता मनोरमा॥२॥सुवर्णनाम्ने वैश्याय पिता वै दत्तवान्स्वयम्॥कदाचित्कमलग्रामात्सुवर्णो द्वीपमागमत्॥द्रव्यलाभाय न्यवसच्चिरं कालं स लुब्धवान् ॥३॥ अनंगमंजरीगेहे दैवयोगाद्द्विजोत्तमः ॥ कमलाकरनामासौ कृत्ययोगात्समागतः ॥ ४ ॥ होमांते सुन्दरी नारी मार्जनार्थं सुता गता ॥ दृष्ट्वा तां कामकलिकां मुमोह द्विजसत्तमः ॥ ५ ॥ सुतापि मदघूर्णाक्षी विप्राय समयं ददौ ॥ निशीथे तमउद्भूते त्वं मां प्राप्य सुखी भव ॥ ६ ॥ इति श्रुत्वा द्विजो वाक्यं तस्या ध्यानं तदाकरोत् ॥ कामाग्निना चिरं तप्तः सुष्वाप परमासने ॥ ७ ॥ अर्द्धरात्रे तु सा नारी द्विजागमनतत्परा ॥ मार्गमन्वेषमाणा सा प्रियस्य स्मरपीडिता॥ ॥ ८ ॥ नागतः स द्विजो दैवात्तदा सा मरणं गता ॥ कमलाकर एवाशु समयान्ते समाययौ ॥ ९ ॥ दृष्ट्वा मृत्युवशां सुभ्रूं स्वयं मरणमागतः ॥ प्रभाते चार्थदत्तो वै दाहयामास तां शुचा ॥ १० ॥ सुवर्णश्च तदागत्य विललाप प्रियां प्रति ॥ चितायां भस्मसाद्भूत्वा स्वर्गलोके तु सा ययौ॥ ॥ ११ ॥ इत्युक्त्वा स तु वैतालो नृपतिं प्राह विक्रमम् ॥ कस्य स्नेहोऽधिकस्तेषां कुतः स्वर्गपुरं ययौ ॥ १२ ॥ ॥ राजोवाच ॥ ॥ पतिस्नेहोधिकस्तेषां मध्यमौ नारिविप्रकौ ॥ द्विजस्नेहेन सा नारी मृता स्वर्गपुरं ययौ ॥ १३ ॥ वैश्यवर्णैः सदा पूज्यो ब्राह्मणो ब्रह्ममूर्तिमान् ॥ ॥ १४ ॥ द्विजोऽपि नाप्तवान्नारीं तदा स्वर्गगतिं हरिम् ॥ हृदि कृत्वा च निधनं प्राप्तो ह्यस्मात्त्रिविष्टपम् ॥ १५ ॥ सुवर्णो हृदि संज्ञाय मत्प्रिया ब्रह्मवत्सला ॥ मां त्यक्त्वा तु दिवं याता वह्निदाहप्रभावतः ॥ १६ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये विंशोऽध्यायः ॥ २० ॥ ॥ छ ॥

॥ सूत उवाच ॥ ॥ इत्युक्त्वा स तु वैतालो राजानं प्राह नम्रधीः ॥ जयस्थलपुरे रम्ये वर्धमानो नृपोऽभवत् ॥ १ ॥ तस्य ग्रामेऽवसद्विप्रो वेदवेदांगपारगः ॥ विष्णुस्वामीति विख्यातो राधाकृष्णपरायणः ॥ २ ॥ चत्वारश्चात्मजा

स्तस्य चतुर्भागपरायणाः ॥ द्यूतकर्मा च कुलटो विषयी नास्तिकः श्रुतः ॥ ३ ॥ कदाचिद्दैवयोगेन निर्द्धनत्वं च ते गताः ॥ पितरं विष्णुशर्माणं
नेमुस्ते विनयान्विताः ॥ ४ ॥ ऊचू रमा कथं नष्टा तद्वदस्व पितः प्रिय ॥ पितोवाच तु तच्छ्रुत्वा द्यूतकर्मन्निशामय ॥ ५ ॥ द्यूतो धनव्ययकरः
पापमूलो महाखलः ॥ व्यभिचारस्तथा चौर्यं निर्दयत्वमतो भवेत् ॥ द्यूतकर्मप्रभावेण त्वदीयद्रव्यसंक्षयः ॥ ६ ॥ धनोपायेन भोः पित्रोर्वाक्यं
कुरु मतिं प्रति ॥ तीर्थव्रतप्रभावेण त्वत्पापं संक्षयं व्रजेत् ॥ ७ ॥ हे पुत्र कुलट त्वं वै वेश्यासंगं महाशुभम् ॥ त्यक्त्वा ब्रह्मपरो भूत्वा ब्रह्मचर्यें मतिं
कुरु ॥ ८ ॥ विषयिन्मांसमदिरे नित्यपापविवर्धिके ॥ अतः प्राप्स्यति चौर्यत्वमतो वै निरयस्तथा ॥ ९ ॥ तस्मात्त्वं प्रभुमीशानं विष्णुं जिष्णुं
जगत्पतिम् ॥ निवेद्य सर्वथा द्रव्यं भुञ्जीथा वाग्यतः स्वयम् ॥ १० ॥ नास्तिकत्वं देवनिंदां परित्यज्य मतिं कुरु ॥ आत्मा सर्वाभयो नित्यमा
त्मशक्तिश्च चंडिका ॥ ११ ॥ आत्मनोंगानि देवाश्च सर्वजीवगुहाशयाः ॥ ताञ्ज्ञात्वा पूजनं तेषां कुरु त्वं पापशान्तये ॥ १२ ॥ इति ते वचनं
श्रुत्वा गतास्तीर्थान्तरं प्रति ॥ शिवमाराधयामासुर्विद्यार्थें सर्वरूपिणम् ॥ १३ ॥ वर्षांते च महादेवो विद्यां संजीवनीं ददौ ॥ ते प्राप्य वनमा
गत्य परीक्षार्थें समुद्यताः ॥ १४ ॥ मृतव्याघ्रास्थिनि श्रेष्ठं मंत्रपूतांबु चाक्षिपत् ॥ तेन मंत्रप्रभावेण पंजरत्वमुपागतम् ॥ १५ ॥ तस्योपर्य्येव
कुलटो मंत्रपूतं पयोऽक्षिपत् ॥ घनमांसं च रुधिरं तेन मंत्रेण चाभवत् ॥ १६ ॥ विषयी चाक्षिपच्चैव तस्योपरि जलं शुभम् ॥ तेन मन्त्रप्रभावेण
त्वक्प्राणत्वमुपागतम् ॥ १७ ॥ सुप्तं व्याघ्रं च संज्ञाय नास्तिकस्तु जलं ददौ ॥ मंत्रेण बोधितो व्याघ्रस्तांश्च विप्रानखादयत् ॥१८॥ सूत उवाच ॥
इत्युक्त्वा स तु वैतालो राजानमिदमब्रवीत् ॥ राजन्मूर्खों हि कस्तेषां श्रुत्वा राजाब्रवीदिदम् ॥ १९ ॥ बोधितो येन स व्याघ्रः स मूर्खस्त्वधिको
मतः ॥ इति श्रुत्वा द्विजश्रेष्ठो वैतालः पुनरब्रवीत् ॥ २० ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहा
ससमुच्चय एकविंशोऽध्यायः ॥ २१ ॥छ॥ ॥ वैताल उवाच ॥ ॥ भोराजन्बिल्वतीग्रामे गंगायामुनमध्यगे ॥ अहं पूर्वभवे चासं क्षत्रसिंहो
महीपतिः ॥ १ ॥ तस्य ग्रामेवसद्विप्रो वेदवेदांगपारगः ॥ शंभुदत्त इति ख्यातो रुद्रभक्तिपरायणः ॥ २ ॥ उभकौ तनयौ तस्य सर्वविद्याविशा
रदौ ॥ विष्णुभक्तः स्मृतो ज्येष्ठो नाम्ना लीलाधरो बली ॥ शाक्तोऽभवत्तदनुजो मोहनो नाम विश्रुतः ॥ ३ ॥ कदाचित्क्षत्रसिंहस्तु यज्ञार्थी यज्ञहे
तवे ॥ शंभुदत्तं समाहूय ससुतं धर्मकोविदम् ॥ स्वयं च कारयामास च्छागमेधं सुरप्रियम् ॥ ४ ॥ शंभुदत्तस्तु वृद्धात्मा शिवभक्तिपरायणः ॥
चतुश्चक्रांश्च संस्थाप्य कलशं कार्यसिद्धिदम् ॥ ५ ॥ हव्यैः सुसंस्कृतै रम्यैश्चकार हवनं मुदा ॥ छागमाहूय विधिवत्पूजयामास भूपतिः ॥ ६ ॥

लीलाधरस्तु तं दृष्ट्वा छागं च मरणोन्मुखम् ॥ दयालुर्वैष्णवो धीमानब्रवीद्वचनं रुषा ॥ ७ ॥ दारुणं नरकं योग्यमनया जीवहिंसया ॥ सर्वेशो
भगवान्विष्णुर्हिंसायज्ञेन दुष्यति ॥ ८ ॥ इति श्रुत्वा वचस्तस्य ज्येष्ठबंधोश्च मोहनः ॥ मृदुपूर्वं जहासोच्चैर्वचनं प्राह नम्रधीः ॥ ९ ॥ पुरा
सत्ययुगे भ्रातर्ब्राह्मणा यज्ञतत्पराः ॥ अजेनैव हि यष्टव्यमिति ज्ञात्वा परां श्रुतिम् ॥१०॥ तिलाधिकमजं मत्वा हव्ये ते तु मनो दधुः ॥ तदा शक्रा
दयो देवा वह्निमध्ये समागताः ॥ ११ ॥ ऊचुस्ते मधुरं वाक्यं त्वन्मतं निष्फलप्रदम् ॥ अजश्छागः स्मृतो वेदैस्तेन यष्टव्यमन्तरम् ॥ १२ ॥
श्रुत्वेति वचनं तेषां विस्मिता मुनयोऽभवन् ॥ एतस्मिन्नंतरे तत्र पितृयोनिरमावसुः ॥ १३ ॥ विमानं परमारुह्य मुनीन्प्रोवाच निर्भयः ॥ छाग
मेधेन यष्टव्यं सुराणां तृप्तिहेतवे ॥ १४ ॥ इति श्रुत्वा वचस्तस्य तथा कृत्वा शिवं ययुः ॥ तस्मात्त्वं च मया सार्द्धं यज्ञं कुरु महामते ॥ १५ ॥
इति श्रुत्वा वचो घोरं लीलाधर उदारधीः ॥ मोहनं प्राह धर्मात्मा यज्ञस्त्रेतायुगेऽभवत् ॥ १६ ॥ रजोगुणमयो लोकस्त्रेतायां संबभूव ह ॥ हिंसा
सत्ययुगे नासीद्धर्मस्तत्र च तुष्पदः ॥१७॥ हव्येन तर्पिता देवा न मांसै रक्तसंभवैः॥ इति श्रुत्वा क्षत्रसिंहस्त्यक्त्वा छागं भयातुरम् ॥१८॥फलाद्यैः
कारयामास तदा पूर्णाहुतीर्नृप ॥ एतस्मिन्नन्तरे देवी तामसी क्रोधमूर्छिता ॥ नगरं दाहयामास नरनारीसमन्वितम् ॥ १९ ॥ महामायाप्रभावेण
शंभुदत्तः शिवप्रियः ॥ स भूत्वा च महोन्मादी त्यक्त्वा देहं दिवं ययौ ॥ २० ॥ तदा लीलाधरो विप्रो दशपुत्रोपजीवकः ॥ बालानध्यापयामास
ग्रामे पद्मपुरे शुभे ॥ २१ ॥ क्षत्रसिंहस्तु नृपतिर्मोहनान्तिकमाययौ ॥ प्रसादं कारयामास देवमातुरनुग्रहम् ॥ २२ ॥ ॥ मोहन उवाच ॥ ॥
बीजमन्त्रजपाद्ब्रह्मा ब्राह्मीं शक्तिमवाप्तवान् ॥ तदंबायै नमस्तुभ्यं महावीरायै नमोनमः ॥ २३ ॥ जप्त्वा सप्तशतीं विष्णुर्वैष्णवीं शक्तिमाप्तवान् ॥
तदंबायै नमस्तुभ्यं महालक्ष्म्यै नमोनमः ॥ २४ ॥ प्रणवास्तनया यस्यास्तुरीयपुरुषप्रिया ॥ तदंबायै नमस्तुभ्यं प्रणवायै नमोनमः ॥ २५ ॥
यया दृश्यमिदं जातं यया वै पाल्यते जगत् ॥ यस्या देहे स्थितं विश्वं तदंबायै नमोनमः ॥ २६ ॥ शची सिद्धिस्तथा मृत्युः प्रभा गीर्वाणसे
निकाः ॥ स्वाहा च निर्ऋती रात्रिर्ऋद्धिर्भुक्तिस्त्वदुद्भवा ॥ लोकपालप्रिया त्वं हि लोकमातर्नमोनमः ॥ २७ ॥ तृष्णा तृप्ती रतिर्नीतिर्हिंसा
क्षांतिर्मतिर्गतिः ॥ निंदा स्तुतिस्तथेर्ष्या च लज्जा त्वं हि नमोनमः ॥ २८ ॥ इत्यष्टकप्रभावेण क्षत्रसिंहो महीपतिः ॥ शिवलोकं गतः साधु
वैतालत्वमवाप्तवान् ॥ २९ ॥ तस्मात्त्वं विक्रमादित्य भज दुर्गां सनातनीम् ॥ शिवाज्ञया त्वहं प्राप्तस्त्वत्समीपे महीपते ॥ ३० ॥ प्रश्नोत्तरेण
भूपाल मया त्वं संपरीक्षितः ॥ भुजयोस्ते स्थितिर्मे स्याज्जहि सर्वारिपून्भुवि ॥ ३१ ॥ दस्युनष्टाः पुरीः सर्वाः क्षेत्राणि विविधानि च ॥

शास्त्रमानेन संस्थाप्य समयं कुरु भो नृप ॥ ३२ ॥ यो नृपः सर्वतीर्थानि पुनरुद्धारयिष्यति ॥ स हि मत्स्थापितं संवद्विपरीतं करिष्यति ॥
॥ ३३ ॥ विक्रमाख्यानकालोऽयं पुनर्धर्मं करोति हि ॥ द्वादशाब्दशतं वर्षं द्वापरो हि प्रवर्तते ॥ ३४ ॥ तदन्ते भुवि कृष्णांशो भविष्यति महा
बली ॥ कलेरुद्धरणार्थाय म्लेच्छवंशविवृद्धये ॥ ३५ ॥ सूताद्या मुनयः सर्वे नैमिषारण्यवासिनः ॥ विशालायां समागत्य चक्रतीर्थनिवासिनः ॥
भविष्यंति महाराज पुराणश्रवणे रताः ॥ ३६ ॥ इत्युक्त्वा स तु वैतालस्तत्रैवान्तरधीयत ॥ नृपतिर्विक्रमादित्यः परमानंदमाप्तवान् ॥३७॥ तस्मा
द्यूयं मुनिश्रेष्ठा ज्ञात्वा संध्यां समागताम् ॥ शिवं भजत सर्वेशं ध्याननिष्ठासमन्विताः ॥ ३८ ॥ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्ग
पर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये द्वाविंशोऽध्यायः ॥ २२ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ इति श्रुत्वा तु मुनयो
विशालानगरीस्थिताः ॥ स्नात्वा केदारकुण्डे ते मनसापूजयञ्छिवम् ॥ १ ॥ समाधिनिष्ठास्ते सर्वे वर्षमेकं व्यतीतयन् ॥ २ ॥ एतस्मिन्नंतरे राजा
विक्रमादित्यभूपतिः ॥ नत्वा मुनीन्समाधिस्थांस्तुष्टाव परया गिरा ॥ ३ ॥ उषित्वा ते तु मुनयः सूतं गत्वाऽब्रुवन्निदम् ॥ सोऽयं राजा समायातो
यस्यैवं वर्णिता कथा ॥ ४ ॥ वाजिमेधं च नृपतेः कारयामस्त्वदाज्ञया ॥ भवान्हि चक्रतीर्थे च स्थित्वा ध्यानपरो भवेत् ॥ ५ ॥ तथेत्युक्त्वा
तु सूतस्तैः सार्धं च पुनरागमत् ॥ विधिना कारयामास हयमेधं महामखम् ॥६॥ पूर्वे तु कपिलस्थानं दक्षिणे सेतुबन्धनम् ॥ पश्चिमे सिंधुनद्यन्तं
चोत्तरे बदरीवनम् ॥ ७ ॥ हयो जगाम तरसा ततः क्षिप्रां नदीं गतः ॥ त्यक्त्वा कलेवरं वह्नौ स्वर्गलोकमतो ययौ ॥ ८ ॥ नृपयज्ञे सुराः सर्वे
सपत्नीकाः समागताः ॥ चंद्रमास्तत्र नायातो भूपतिर्विमना अभूत् ॥९॥ यज्ञांते विविधं दानं दत्त्वा वैतालसंयुतः ॥ चंद्रलोकं गतो राजा चंद्रमाः
सुखितोऽभवत् ॥१०॥ भोभो राजन्महाभाग कलौ प्राप्ते भयंकरे ॥ मद्गतिर्भूतले नास्ति तस्मान्नायामि तेऽन्तिकम् ॥ ११ ॥ दत्त्वा सुधामयं तोयं
चंद्रश्चान्तर्दधे पुनः ॥ ज्ञात्वेन्द्रस्तत्र संप्राप्य द्विजरूपी ह्ययाचयत् ॥१२॥ दत्तं राज्ञा तदमृतं शक्रः स्वर्गमुमुपागतः ॥ तेन तस्य फलं जातमायुर्लक्ष
समं ह्यभूत् ॥१३॥ तस्मिन्काले द्विजः कश्चिज्जयन्तो नाम विश्रुतः ॥ तत्फलं तपसा प्राप्तः शक्रतः स्वर्गृहं ययौ ॥१४॥ जयन्तो भर्तृहरये लक्षस्वर्णेन
वर्णयन् ॥ भुक्त्वा भर्तृहरिस्तत्र योगारूढो वनं ययौ ॥१५॥ विक्रमादित्य एवास्य भुक्त्वा राज्यमकंटकम् ॥ शतवर्षं मुदा युक्तो जगाम मरणे दिवम् ॥
॥१६॥ शौनकाद्यास्तु ऋषयो ज्ञात्वा भूपस्य स्वर्गतिम् ॥ गत्वा सूतं प्रणम्योचुर्धर्मं मुख्यं वदाधुना ॥ १७ ॥ तेभ्यः सूतः पुराणानि श्रावयामास वै

पुनः ॥ शतवर्षं पञ्चलक्षश्लोकमध्यापयन्मुदा ॥ ते श्रुत्वा मुनयः सर्वे जग्मुर्हृष्टाः स्वमालयम् ॥ १८ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये त्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ एकदा नैमिषारण्ये ऋषयः शौनकादयः ॥ पृच्छन्ति विनयेनैव सूतं पौराणिकं खलु ॥ १ ॥ भगवन्ब्रूहि लोकानां हितार्थाय चतुर्युगे ॥ कः पूज्यः सेवितव्यश्च वांच्छितार्थप्रदायकः ॥२॥ विनायासेन वै कामं प्राप्नुयुर्मानवाः शुभम् ॥ सत्यं ब्रह्मन्वदोपायं नराणां कीर्तिकारकम् ॥३॥ ॥ सूत उवाच ॥ ॥ नवांभोजनेत्रं रमाकेलिपात्रं चतुर्बाहुचामीकराचारुगात्रम् ॥ जगत्त्राणहेतुं रिपौ धूम्रकेतुं सदा सत्यनारायणं स्तौमि देवम् ॥ ४ ॥ श्रीरामं सहलक्ष्मणं सकरुणं सीतान्वितं सात्त्विकं वैदेहीमुखपद्मलुब्धमधुपं पौलस्त्यसंहारकम् ॥ वन्दे वन्द्यपदांबुजं सुरवरं भक्तानुकम्पाकरं शत्रुघ्नेन हनूमता च भरतेनासेवितं राघवम् ॥ ५ ॥ कलिकलुषविनाशं कामसिद्धिप्रकाशं सुरवरमुखभासं भूसुरेण प्रकाशम् ॥ विबुधबुधविलासं साधुचर्याविशेषं नृपतिवरचरित्रं भोः शृणुष्वेतिहासम् ॥ ६ ॥ एकदा नारदो योगी परानुग्रहवांच्छया ॥ पर्यटन्विविधाँल्लोकान्मर्त्यलोकमुपागमत् ॥ ७ ॥ तत्र दृष्ट्वा जनान्सर्वान्नानाक्लेशसमन्वितान् ॥ आधिव्याधियुतानार्तान्पच्यमानान्स्वकर्मभिः ॥ ८ ॥ केनोपायेन चैतेषां दुःखनाशो भवेद्ध्रुवम् ॥ इति सञ्चिंत्य मनसा विष्णुलोकं गतस्तदा ॥ ९ ॥ तत्र नारायणं देवं शुक्लवर्णं चतुर्भुजम् ॥ शंखचक्रगदापद्मवनमालाविभूषितम् ॥ १० ॥ प्रसन्नवदनं शांतं सनकाद्यैरभिष्टुतम् ॥ दृष्ट्वा तं देवदेवेशं स्तोतुं समुपचक्रमे ॥ ११ ॥ ॥ नारद उवाच ॥ ॥ नमो वाङ्मनसातीतरूपायानंतशक्तये ॥ नादिमध्यान्तदेवाय निर्गुणाय महात्मने ॥ १२ ॥ सर्वेषामादिभूताय लोकानामुपकारिणे ॥ अपारपरिमाणाय तपोधाम्ने नमोनमः ॥ १३ ॥ ॥ सूत उवाच ॥ ॥ इति श्रुत्वा स्तुतिं विष्णुर्नारदं प्रत्यभाषत ॥ किमर्थमागतोऽसि त्वं किं ते मनसि वर्तते ॥१४॥ कथयस्व महाभाग तत्सर्वं कथयामि ते ॥ श्रुत्वा तु नारदो विष्णुमुक्तवान्सर्वकारणम् ॥ १५ ॥ नारदस्य वचः श्रुत्वा साधुसाध्वित्यपूजयत् ॥ शृणु नारद वक्ष्यामि व्रतमेकं सनातनम् ॥ १६ ॥ कृते त्रेतायुगे विष्णुर्द्वापरेऽनेकरूपधृक् ॥ कलौ प्रत्यक्षफलदः सत्यनारायणो विभुः ॥ १७ ॥ चतुष्पादो हि धर्मश्च तस्य सत्यं प्रसाधनम् ॥ सत्येन धार्यते लोकः सत्ये ब्रह्म प्रतिष्ठितम् ॥ १८ ॥ सत्यनारायणव्रतमतः श्रेष्ठतमं स्मृतम् ॥ इति श्रुत्वा हरेर्वाक्यं नारदः पुनरब्रवीत् ॥ १९ ॥ किं फलं किं विधानं च सत्यनारायणार्चने ॥ तत्सर्वं कृपया देव कथयस्व कृपानिधे ॥ २० ॥ ॥ भगवानुवाच ॥ ॥ नारायणार्चने वक्तुं फलं नालं चतुर्मुखः ॥ शृणु संक्षेपतो ह्येतत्कथयामि तवाग्रतः ॥ २१ ॥ निर्धनोपि धनाढ्यः स्यादपुत्रः पुत्रवान्भवेत् ॥ भ्रष्ट

राज्यो लभेद्राज्यमन्धोऽपि स्यात्सुलोचनः ॥ २२ ॥ मुच्यते बंधनाद्बद्धो निर्भयः स्याद्भयातुरः ॥ मनसा कामयेद्यंयं लभते तं विधानतः ॥२३॥
इह जन्मनि भो विप्र भक्त्या च विधिनार्चयेत् ॥ लभेत्कामं हि तच्छीघ्रं नात्र कार्या विचारणा ॥ २४ ॥ प्रातःस्नायी शुचिर्भूत्वा दंतधावनपूर्व
कम् ॥ तुलसीमञ्जरीं धृत्वा ध्यायेत्सत्यस्थितं हरिम् ॥ २५ ॥ नारायणंसांद्रघनावदातं चतुर्भुजं पीतमहार्हवाससम् ॥ प्रसन्नवक्त्रं नवकंजलोचनं
सनन्दनाद्यैरुपसेवितं भजे ॥ २६ ॥ करोमि ते व्रतं देव सायंकाले त्वदर्चनम् ॥ श्रुत्वा गाथां त्वदीयां हि प्रसादं ते भजाम्यहम् ॥ २७ ॥ इति
संकल्प्य मनसा सायंकाले प्रपूजयेत् ॥ पञ्चभिः कलशैर्जुष्टं कदलीतोरणान्वितम् ॥ २८ ॥ शालग्रामं स्वर्णयुक्तं पूजयेदात्मसूक्तकैः ॥ पञ्चामृतेन
संस्नाप्य चन्दनादिभिरर्चयेत् ॥ २९ ॥ ॐनमो भगवते नित्यं सत्यदेवाय धीमहि ॥ चतुःपदार्थदात्रे च नमस्तुभ्यं नमोनमः ॥ ३० ॥ जप्त्वेत्य
ष्टोत्तरशतं जुहुयात्तद्दशांशकम् ॥ तर्पणं मार्जनं कृत्वा कथां श्रुत्वा हरेरिमाम् ॥३१॥ षडध्यायीं सत्यमुख्यां तत्पश्चात्तत्प्रसादकम् ॥ सम्यग्विभज्य
तत्सर्वं दापयेच्छ्रोतृकाय च ॥ ३२ ॥ आचार्यायादिभागं च द्वितीयं स्वकुलाय सः ॥ श्रोतृभ्यश्च तृतीयं च चतुर्थं चात्महेतवे ॥ ३३ ॥ विप्रेभ्यो
भोजनं दद्यात्स्वयं भुञ्जीत वाग्यतः ॥ देवर्षेऽनेन विधिना सत्यनारायणार्चनम् ॥३४॥ कारयेद्यदि भक्त्या च श्रद्धया च समन्वितः ॥ व्रती कामा
नवाप्नोति वांछितानिह जन्मनि ॥ ३५ ॥ इह जन्मकृतं कर्म परजन्मनि पद्यते ॥ परजन्मकृतं कर्म भोक्तव्यं सर्वदा नरैः ॥ ३६ ॥ सत्यनारायण
व्रतमिह सर्वान्कामान्ददाति हि ॥ अद्यैव जगतीमध्ये स्थापयामि त्वदाज्ञया ॥ ३७ ॥ इत्युक्त्वांऽतर्दधे देवो नारदः स्वर्गतिं ययौ ॥ स्वयं नारा
यणो देवः काश्यां पुर्यां समागतः ॥३८॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडापरपर्याये कलियुगीयेतिहाससमुच्चये चतुर्विंशोऽ
ध्यायः ॥ २४ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ कृपया ब्राह्मणद्वारा प्रकटीकृतवान्स्वकम् ॥ इतिहासमिमं वक्ष्ये संवादं हरिविप्रयोः ॥ १ ॥
काशीपुरीति विख्याता तत्रासीद्ब्राह्मणो वरः ॥ दीनो गृहाश्रमी नित्यं भिक्षुः पुत्रकलत्रवान् ॥ २ ॥ शतानंद इति ख्यातो विष्णुव्रतपरायणः ॥
एकदा पथि भिक्षार्थं गच्छतस्तस्य श्रीपतिः ॥ ३ ॥ विनीतस्यातिशांतस्य स बभूवाक्षिगोचरः ॥ वृद्धब्राह्मणवेषेण पप्रच्छ ब्राह्मणं हरिः ॥
क्व यासीति द्विजश्रेष्ठ वृत्तिः कामेन कथ्यताम् ॥ ४ ॥ ॥ शतानन्द उवाच ॥ ॥ भिक्षावृत्तिरहं सौम्य कलत्रापत्यहेतवे ॥ याचितुं धनिनां
द्वारि व्रजामि धनमुत्तमम् ॥ ५ ॥ ॥ नारायण उवाच ॥ ॥ भिक्षावृत्तिस्त्वया दीर्घकालं द्विज सदा धृता ॥ तद्वारक उपायोयं विशेषेण

कलौ किल ॥ ६ ॥ ममोपदेशतो विप्र सत्यनारायणं भज ॥ दारिद्र्यशोकशमनं संतापहरणं हरेः ॥ चरणं शरणं याहि मोक्षदं पद्मलोचनम्[1] ॥
॥ ७ ॥ एवं संबोधितो विप्रो हरिणा करुणात्मना ॥ पुनः पप्रच्छ विप्रोसौ सत्यनारायणो हि कः ॥ ८ ॥ ॥ वृद्धब्राह्मण उवाच ॥ ॥ बहु
रूपः सत्यसंधः सर्वव्यापी निरञ्जनः ॥ इदानीं विप्ररूपेण तव प्रत्यक्षमागतः ॥ ९ ॥ दुःखोदधिनिमग्नानां तरणिश्चरणौ हरेः ॥ कुशलाः शरणं
यांति नेतरे विषयात्मिकाः ॥ १० ॥ आहृत्य पूजासंभारान्हिताय जगतां द्विज ॥ अर्चयंस्तमनुध्यायंस्त्वमेतत्प्रकटी कुरु ॥ ११ ॥ इति ब्रुवंतं
विप्रोसौ ददर्श पुरुषोत्तमम् ॥ जलदश्यामलं चारुचतुर्बाहुं गदादिभिः[2] ॥ १२ ॥ पीतांबरं नवांभोजलोचनं स्मितपूर्वकम् ॥ वनमालामधुव्रात
चुंबितांघ्रिसरोरुहम् ॥ १३ ॥ निशम्य पुलकांगोसौ प्रेमपूर्णसुलोचनः ॥ स्तुवन्गद्गदया वाचा दंडवत्पतितो भुवि ॥ १४ ॥ प्रणमामि जग
न्नाथं जगत्कारणकारकम् ॥ अनाथनाथं शिवदं शरण्यमनघं शुचिम् ॥ १५ ॥ अव्यक्तं व्यक्ततां यातं तापत्रयविमोचनम् ॥ १६ ॥ नमः सत्य
नारायणायास्य कर्त्रे नमः शुद्धसत्त्वाय विश्वस्य भर्त्रे ॥ करालाय कालाय विश्वस्य हर्त्रे नमस्ते जगन्मङ्गलायात्ममूर्ते ॥ १७ ॥ धन्योस्म्यद्य
कृती धन्यो भवोद्य सफलो मम ॥ वाङ्मनोगोचरो यस्त्वं मम प्रत्यक्षमागतः ॥ १८ ॥ दिष्टं किं वर्णयाम्याहो न जाने कस्य वा फलम् ॥
क्रियाहीनस्य मन्दस्य देहोऽयं फलवान्कृतः ॥ १९ ॥ पूजनं च प्रकर्तव्यं लोकनाथ रमापते ॥ विधिना केन कृपया तदाज्ञापय मां विभो ॥
॥ २० ॥ हरिस्तमाह मधुरं सस्मितं विश्वमोहनः ॥ पूजायां मम विप्रेन्द्र बहु नापेक्षितं धनम् ॥ २१ ॥ अनायासेन लब्धेन श्रद्धामात्रेण मां
यज ॥ ग्राहग्रस्तोजामिलो वा यथाऽभून्मुक्तसंकटः ॥ २२ ॥ विधानं शृणु विप्रेन्द्र मनसा कामयेत्फलम् ॥ पूजासंभृतसंभारः पूजां कुर्याद्यथा
विधि ॥२३॥ गोधूमचूर्णं पादार्द्धं सेटकादिप्रमाणतः ॥ दुग्धेन तावता युक्तं मिश्रितं शर्करादिभिः ॥२४॥ तच्चूर्णं हरये दद्याद् घृतयुक्तं हरिप्रियम्॥
गोदुग्धेनैव दधिना गोघृतेन समन्वितम् ॥ २५ ॥ गंगाजलेन मधुना युक्तं पञ्चामृतं प्रियम् ॥ पञ्चामृतेन संस्नाप्य शालग्रामोद्भवां शिलाम् ॥
॥ २६ ॥ गन्धपुष्पादिनैवेद्यैर्वेदवादैर्मनोहरैः ॥ धूपैर्दीपैश्च नैवेद्यैस्तांबूलादिभिरर्चयेत् ॥ २७ ॥ मिष्टान्नपानसन्मानैर्भक्ष्यैर्भोज्यैः फलैस्तथा ॥
ऋतुकालोद्भवैः पुष्पैः पूजयेद्भक्तितत्परः ॥ २८ ॥ ब्राह्मणैः स्वजनैश्चैव वेष्टितः श्रद्धयान्वितः ॥ त्वया सार्द्धं मम कथां शृणुयात्परमादरात् ॥
॥ २९ ॥ इतिहासं तथा राज्ञो भिल्लानां वणिजोऽस्य च ॥ कथांते प्रणमेद्भक्त्या प्रसादं विभजेत्ततः ॥ ३० ॥ लब्धं प्रसादं भुंजीत मानयन्न

---

[1] पद्मं लोचयति बोधयतीति 'कर्मण्यण्। पद्माधिकसुन्दरमित्यर्थः। [2] उपेतमित्यर्थः।

धिन

विचारयेत् ॥ द्रव्यादिभिर्न मे शांतिर्भक्त्या केवलया यथा ॥ ३१ ॥ विध्रीनानेन विप्रेन्द्र पूजयंति च ये नराः ॥ पुत्रपौत्रधनैर्युक्ता भुक्त्वा भोगाननुत्तमान् ॥ ३२ ॥ अन्ते सान्निध्यमासाद्य मोदन्ते ते मया सह ॥ यंयं कामयते कामं सुव्रती तंतमाप्नुयात् ॥ ३३ ॥ इत्युक्त्वान्तर्दधे विष्णुर्विप्रोपि सुखमाप्तवान् ॥ प्रणम्यागाद्यथादिष्टं मनसा कौतुकाकुलः ॥ ३४ ॥ अद्य भैक्ष्येण लभ्येन पूज्यो नारायणो मया ॥ इति निश्चित्य मनसा भिक्षार्थी नगरं गतः ॥ ३५ ॥ विना देहीति वचनं लब्ध्वा च विपुलं धनम् ॥ कौतुकायासमनसा जगाम निजमालयम् ॥ ३६॥ वृत्तांतं सर्वमाचख्यौ[1] ब्राह्मणी सान्वमोदत ॥ सादरं द्रव्यसंभारमाहृत्य भर्तुराज्ञया ॥ ३७ ॥ आहूय बन्धुमित्राणि तथा सान्निध्यवर्तिनः ॥ सत्यनारायणं देवं यजामि स्वगणैर्वृतः ॥ ३८ ॥ भक्त्या तुतोष भगवान्सत्यनारायणः स्वयम् ॥ कामं दित्सुः प्रादुरासीत्कथांते भक्तवत्सलः ॥ ३९ ॥ वव्रे विप्रोऽभिलषितमिहामुत्र सुखप्रदम् ॥ भक्तिं परां भगवति तथा तत्संगिनां व्रतम् ॥ ४० ॥ रथं कुञ्जरं मंजुलं मन्दिरं च हयं चारु चामी करालंकृतं च ॥ धनं दासदासीगणं गां महीं च लुलायाः सदुग्धा हरे देहि दास्यम् ॥४१॥ तथास्त्विति हरिः प्राह ततश्चांतर्दधे प्रभुः ॥ विप्रोऽपिकृतकृत्योऽभूत्सर्वे लोका विसिस्मिरे ॥४२॥ प्रणम्य भुवि कायेन प्रसादं प्रापुरादरात् ॥ स्वंस्वं धाम समाजग्मुर्धन्यधन्येति वादिनः ॥ ४३ ॥ प्रचचार ततो लोके सत्यनारायणार्चनम् ॥ कामसिद्धिप्रदं मुक्तिभुक्तिदं कलुषापहम् ॥४४॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडापरपर्याये कलियुगीयेतिहाससमुच्चये पञ्चविंशोऽध्यायः ॥२५॥ ॥छ॥

॥ सूत उवाच ॥ ॥ राजासीद्धार्मिकः कश्चित्केदारमणिपूरके ॥ चन्द्रचूड इति ख्यातः प्रजापालनतत्परः ॥१॥ शांतो मधुरवाग्धीरो नारायणपरायणः॥ बभूवुः शत्रवस्तस्य म्लेच्छा विंध्यनिवासिनः ॥२॥ तस्य तैरवभवद्युद्धमतिप्रबलदारुणैः॥भुशुंडीयुद्धनिपुणैः क्षेपणैः परिघायुधैः ॥३॥ चन्द्रचूडस्य महती सेना यमपुरे गता॥शतं रथास्तथा नागा सहस्रं तु हयास्तथा॥४॥ पत्तयः पंचसाहस्रा मृताः स्वर्गपुरं ययुः ॥ दस्यवः पंचसाहस्रा मृताः कैतवयोधिनः ॥ ५ ॥ आक्रांतः स महाभागस्तैर्म्लेच्छैर्दंभयोधिभिः ॥ त्यक्त्वा राष्ट्रं च नगरं सैकाकी वनमाययौ ॥ ६ ॥ तीर्थव्याजेन स नृपः पुरीं काशीं समागतः ॥ तत्र नारायणं देवं वंद्यं सर्वगृहेगृहे ॥ ७॥ ददर्श नगरीं चैव धनधान्यसमन्विताम् ॥ यथा द्वारावती ज्ञेया तथा सा च पुरी शुभा ॥ ८ ॥ विस्मितश्चंद्रचूडश्च दृष्ट्वाश्चर्यमनुत्तमम् ॥ सत्येन रोधितां लक्ष्मीं शीलधर्मसमन्विताम्॥ ९ ॥ दृष्ट्वा श्रुत्वा सदानंदं सत्यदेवप्रपूजकम् ॥ पतित्वा तच्चरणयोः प्रणनाम मुदा युतः ॥ १० ॥ द्विज

---

[1] ब्राह्मणीमिति शेषः ।

राज नमस्तुभ्यं सदानंद महामते ॥ भ्रष्टराज्यं च मां ज्ञात्वा कृपया मां समुद्धर ॥ ११ ॥ यथा प्रसन्नो भगवाँल्लक्ष्मीकान्तो जनार्दनः ॥ तथा तद्वद यद्योग्यं व्रतं पापप्रणाशनम् ॥ १२ ॥ ॥ सदानंद उवाच ॥ ॥ दुःखशोकादिशमनं धनधान्यप्रवर्धनम् ॥ सौभाग्यसंततिकरं सर्वत्र विजयप्रदम् ॥ १३ ॥ सत्यनारायणव्रतं श्रीपतेस्तुष्टिकारकम् ॥ यस्मिन्कस्मिन्दिने भूप यजेच्चैव निशामुखे ॥ १४ ॥ तोरणादि प्रकर्तव्यं कदलीस्तंभमंडितम् ॥ पंचभिः कलशैर्युक्तं ध्वजपंचसमन्वितम् ॥१५॥ तन्मध्ये वेदिकां रम्यां कारयेत्स व्रती द्विजैः ॥ तत्र स्थाप्य शिलारूपं कृष्णं स्वर्णसमन्वितम् ॥१६॥ कुर्याद्गंधादिभिः पूजां प्रेमभक्तिसमन्वितः॥ भूमिशायी हरिं ध्यायन्सप्तरात्रं व्यतीतयेत् ॥१७॥ इति श्रुत्वा स नृपतिः काश्यां देवमपूजयत् ॥ रात्रौ प्रसन्नो भगवान्ददौ राज्ञेऽसिमुत्तमम् ॥ १८ ॥ शत्रुपक्षक्षयकरं प्राप्य खड्गं नृपोत्तमः ॥ प्रणम्य च सदानन्दं केदारमणिमाययौ ॥ १९ ॥ हत्वा दस्यून्षष्टिशतांस्तेषां लब्ध्वा महद्धनम् ॥ हरिं प्रपूजयामास नर्मदायास्तटे शुभे ॥२०॥ पौर्णमास्यां विधानेन मासिमासि नृपोत्तमः॥अपूजयत्सत्यदेवं प्रेमभक्तिसमन्वितः॥२१॥तद्व्रतस्य प्रभावेन लक्षग्रामाधिपोऽभवत्॥राज्यं कृत्वा स षष्ट्यब्दमन्ते विष्णुपुरं ययौ॥२२॥

इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडापरपर्याये कलियुगीयेतिहाससमुच्चये चन्द्रचूडोद्धारोनाम षड्विंशोऽध्यायः ॥ २६ ॥ छ ॥

॥ ॥ सूत उवाच ॥ ॥ अथेतिहासं शृणुत यथा भिल्लाः कृतार्थिनः ॥ विचरंतो वने नित्यं निषादाः काष्ठवाहिनः ॥१॥ वनात्काष्ठानि विक्रेतुं पुरीं काशीं ययुः क्वचित्॥एकस्तृषाकुलो यातो विष्णुदासाश्रमं तदा ॥२॥ ददर्श विपुलैश्वर्यं सेवितं च द्विजैर्हरिम् ॥ जलं पीत्वा विस्मितोऽभूद्भिक्षुकस्य कुतो धनम्॥३॥यो दृष्टोऽकिंचनो विप्रो दृश्यतेऽद्य महाधनः॥इति संचिंत्य हृदये स पप्रच्छ द्विजोत्तमम्॥४॥ऐश्वर्यं ते कुतो ब्रह्मन्दुर्गतिस्ते कुतो गता ॥ आज्ञापय महाभाग श्रोतुमिच्छामि तत्त्वतः ॥ ५ ॥ ॥ सदानंद उवाच ॥ ॥ सत्यनारायणस्यांग सेवया किं न लभ्यते ॥ न किंचित्सुखमाप्नोति विना तस्यानुकंपया ॥ ६ ॥ ॥निषाद उवाच ॥ ॥ अहो किमिति माहात्म्यं सत्यनारायणार्चने ॥ विधानं सोपचारं च ह्युपदेष्टुं त्वमर्हसि ॥ ७ ॥ साधूनां समचित्तानामुपकारवतां सताम् ॥ न गोप्यं विद्यते किंचिदार्तानामार्तिनाशनम् ॥ ८ ॥ इति पृष्टो विधिं वक्तुमितिहासमथाब्रवीत् ॥ चन्द्रचूडो महीपालः केदारमणिपूरके ॥ ९ ॥ ममाश्रमं समायातः सत्यनारायणार्चने ॥ विधानं श्रोतुकामोऽसौ मामाह सादरं वचः ॥ १० ॥ मया यत्कथितं तस्मै तन्निबोध निषादज ॥ संकल्प्य मनसा कामं निष्कामो वा जनः क्वचित् ॥ ११ ॥ गोधूमचूर्णं पादार्धं सेटकाद्यैः सुचूर्णकम् ॥ संस्कृतं मधुगंधाज्यैर्नैवेद्यं विभवेऽर्पयेत् ॥ १२ ॥ पंचामृतेन संस्नाप्य चन्दनाद्यैश्च पूजयेत् ॥ पायसापूपसंयावदधिक्षीरमथो

हरेत् ॥ १३ ॥ उच्चावचैः फलैः पुष्पैर्धूपदीपैर्मनोरमैः ॥ पूजयेत्परया भक्त्या विभवे सति विस्तरैः ॥ १४ ॥ न तुष्येद्द्रव्यसंभारैर्भक्त्या :केवलया
यथा ॥ भगवान्परितः पूर्णो न मानं वृणुयात्क्वचित् ॥ १५ ॥ दुर्योधनकृतां त्यक्त्वा राजपूजां जनार्दनः ॥ विदुरस्याश्रमे वासमातिथ्यं जगृहे
विभुः ॥ १६ ॥ सुदाम्नस्तंडुलकणाञ्जग्ध्वा मानुष्यदुर्लभाः ॥ संपदोऽदाद्धरिः प्रीत्या भक्तिमात्रमपेक्ष्यते ॥ १७ ॥ गोपो गृध्रो वणिग्व्याधो हनुमा
न्सविभीषणः ॥ येऽन्ये पापात्मका दैत्या वृत्रकायाधवादयः ॥ १८ ॥ नारायणान्तिकं प्राप्य मोदंतेऽद्यापि यद्वशाः ॥ इति श्रुत्वा नरपतिः
पूजासंभारमादरात् ॥ १९ ॥ कृतवान्स धनं लब्ध्वा मोदते नर्मदातटे ॥ निषाद त्वमपि प्रीत्या सत्यनारायणं भज ॥ २० ॥ इह लोके सुखं
प्राप्य चान्ते सान्निध्यमाप्नुयाः ॥ कृतकृत्यो निषादोऽभूत्प्रणम्य द्विजपुंगवम् ॥ २१ ॥ स गत्वा स्वगणानाह माहात्म्यं हरिसेवने ॥ ते हृष्टम
नसः सर्वे समयं चक्रुरादृताः ॥ २२ ॥ सत्यनारायणे पूजां काष्ठलब्धेन यावता ॥ वयं कुलैः करिष्यामः पुण्यवृक्षविधानतः ॥ २३ ॥ इति
निश्चित्य मनसा काष्ठं विक्रीय लेभिरे ॥ चतुर्गुणं धनं हृष्टाः स्वंस्वं भवनमाययुः ॥२४॥ मुदा स्त्रीभ्यस्समाचख्युर्वृत्तांतं सर्वमादितः॥ ताः श्रुत्वा
हृष्टमनसः पूजनं चक्रुरादरात् ॥२५॥ कथान्ते प्रणमन्भक्त्या प्रसादं जगृहुस्ततः ॥ स्वजातिभ्यः परेभ्यश्च ददुस्तच्चूर्णमुत्तमम् ॥ २६ ॥ पूजाप्र
भावतो भिल्लाः पुत्रदारादिभिर्युताः ॥ लब्ध्वा भूमितले द्रव्यं ज्ञानचक्षुर्महोत्तमम् ॥ २७ ॥ भुक्त्वा भोगान्यथेष्टन्ते दरिद्रान्धा द्विजोत्तम ॥ जग्मु
स्ते वैष्णवं धाम योगिनामपि दुर्लभम् ॥ २८ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये
सप्तविंशोऽध्यायः ॥ २७ ॥ ॥ सूत उवाच ॥ ॥ अथ ते वर्णयिष्यामि कथां साधूपचारिताम् ॥ नृपोपदेशतः साधुः कृतार्थोऽभूद्वणिग्यथा॥
॥ १ ॥ मणिपूरपती राजा चन्द्रचूडो महायशाः ॥ सह प्रजाभिरानर्च सत्यनारायणं प्रभुम् ॥ २ ॥ अथ रत्नपुरस्थायी साधुर्लक्षपतिर्वणिक् ॥
धनैरापूर्य तरणीः सह गच्छन्नदीतटे ॥ ३ ॥ ददर्श बहुलं लोकं नानाग्रामविलासिनम् ॥ मणिमुक्ताविरचितैर्वितानैस्समलंकृतम् ॥ ४ ॥ वेदवादांश्च
शुश्राव गीतवादित्रसंगतान् ॥ रम्यं स्थानं समालोक्य कर्णधारं समादिशत् ॥ ५ ॥ विश्रामयात्र तरणीरिति पश्यामि कौतुकम् ॥ भर्त्रादिष्ट
स्तथा चक्रे कर्णधारः सभृत्यकैः ॥ ६ ॥ तटसीम्नः समुत्तीर्य मल्ललीलाविलासिनः ॥ कर्णधारा नगा वीरा युयुधुर्मल्ललीलया ॥ ७ ॥ स्वयमु
त्तीर्य सामात्यो लोकान्पप्रच्छ सादरम् ॥ यज्ञस्थानं समालोक्य प्रशस्तं समुदो ययौ ॥८॥ किमत्र क्रियते सभ्या भवद्भिर्लोकपूजितैः ॥ सभ्या
ऊचुश्च ते सर्वे सत्यनारायणो विभुः ॥ ९ ॥ पूज्यते बंधुभिः सार्धं राज्ञा लोकानुकंपिना ॥ प्राप्तं निष्कंटकं राज्यं सत्यनारायणार्चनात् ॥१०॥

धनार्थी लभते द्रव्यं पुत्रार्थी सुतमुत्तमम् ॥ ज्ञानार्थी लभते चक्षुर्निर्भयः स्याद्भयातुरः ॥ ११ ॥ सर्वान्कामानवाप्नोति नरः सत्यसुरार्चनात् ॥ विधानं तु ततः श्रुत्वा चैलं बद्ध्वा गलेऽसकृत् ॥ १२ ॥ दंडवत्प्रणिपत्याह कामं सभ्यानमोदयत् ॥ अनपत्योऽस्मि भगवन्वृथैश्वर्यो वृथोद्यमः ॥ १३ ॥ पुत्रं वा यदि वा कन्यां लभेयं त्वत्प्रसादतः ॥ पताकां कांचनीं कृत्वा पूजयिष्ये कृपानिधिम् ॥ १४ ॥ श्रुत्वा सभ्या अब्रुवंस्ते कामनासिद्धिरस्तु ते ॥ हरिं प्रणम्य सभ्यांश्च प्रसादं भुक्तवांस्तदा ॥ १५ ॥ जगाम स्वालयं साधुर्मनसा चिंतयन्हरिम् ॥ स्वगृहे ह्यागते तस्मिन्नार्यो मंगलपाणयः ॥ १६ ॥ मंगलानि विचित्राणि यथोचितमकारयन् ॥ विवेशांतःपुरे साधुर्महाकौतुकमंगलः ॥ १७ ॥ ऋतुस्नाता सती लीलावती पर्यचरत्पतिम् ॥ गर्भं धृतवती साध्वी समये सुषुवे तु सा ॥ १८ ॥ कन्यां कमललोलाक्षीं बांधवामोदकारिणीम् ॥ साधुः परां मुदंलेभे वितितार धनं बहु ॥ १९ ॥ विप्रानाहूय वेदज्ञान्कारयामास मंगलम् ॥ लेखयित्वा जन्मपत्रीं नाम चक्रे कलावतीम् ॥ २० ॥ कलानिधिकलेवासौ ववृधे सा कलावती ॥ अष्टवर्षा भवेद्गौरी नववर्षा च रोहिणी ॥ २१ ॥ दशवर्षा भवेत्कन्या ततः प्रौढा रजस्वला ॥ प्रौढां कालेन तां दृष्ट्वा विवाहार्थमचिन्तयत् ॥ २२ ॥ नगरे कांचनपुरे वणिक्छंखपतिः श्रुतः ॥ कुलीनो रूपसंपत्तिशीलौदार्यगुणान्वितः ॥ २३ ॥ वरयामास तं साधुर्दुहितुः सदृशं वरम् ॥ शुभे लग्ने बहुविधैर्मंगलैरग्निसन्निधौ ॥२४॥ वेदवादित्रनिनदैर्ददौ कन्यां यथाविधि ॥ मणिमुक्ताप्रवालानि वसनं भूषणानि च ॥ २५ ॥ महामोदमनाः साधुर्मंगलार्थं ददौ च ह ॥ प्रेम्णा निवासयामास गृहे जामातरं ततः ॥ २६ ॥ तं मेने पुत्रवत्साधुः स च तं पितृवत्सुधीः ॥ अतीते भूयसः काले सत्यनारायणार्चनम् ॥ २७ ॥ विस्मृत्य सह जामात्रा वाणिज्याय ययौ पुनः ॥ ॥ सूत उवाच ॥ ॥ अथ साधुः समादाय रत्नानि विविधानि च ॥ २८ ॥ नौकाः संस्थाप्य स ययौ देशाद्देशान्तरं प्रति ॥ नगरं नर्मदातीरे तत्र वासं चकार सः ॥२९॥ कुर्वन्क्रयं विक्रयं च चिरं तस्थौ महामनाः ॥ कर्मणा मनसा वाचा न कृतं सत्यसेवनम् ॥ ३० ॥ ततः कर्मविपाकेन तापमापाचिराद्वणिक् ॥ कस्मिंश्चिद्दिवसे रात्रौ राज्ञो गेहे तमोवृते ॥ ३१ ॥ ज्ञात्वा निद्रागतान्सर्वान्हृतं चौरैर्महाधनम् ॥ प्रभाते वाचितो राजा सूतमागधबंदिभिः ॥ ॥ ३२ ॥ प्रातःकृत्यं नृपः कृत्वा सदः संप्राविशच्च सः ॥ ततस्तत्र समायातः किंकरो राजवल्लभः ॥ ३३ ॥ उवाच स तदा वाक्यं शृणुष्व त्वं धरापते ॥ मुक्तामालाश्च बहुधा रत्नानि विविधानि च ॥ ३४ ॥ मुमुषुश्चौरा गतास्सर्वे न जानीमो वयं नृप ॥ इति विज्ञापितो राजा पुण्यश्लोकशिखामणिः ॥ ३५ ॥ उवाच क्रोधताम्राक्षो यूयं संयात मा चिरम् ॥ सचौरं द्रव्यमादाय मत्पार्श्वं त्वमुपानय ॥ ३६ ॥ नो चेद्धनिष्ये सगणा

निति दूतान्समादिशत् ॥ नृपवाक्यं समाकर्ण्य प्रजग्मुस्ते च किंकराः ॥ ३७ ॥ बहुयत्नैर्न संशोध्य द्रव्यं चौरसमन्वितम् ॥ एकीभूत्वा निशि
तदा महाचिंतातुरोऽभवत् ॥ ३८ ॥ हन्ता मां सगणं राजा किं करोमि कुतः सुखम् ॥ नृपदंडाच्च मे मृत्युः प्रेतत्वाय भवेदिह ॥ ३९ ॥ नर्मदायां
च मरणं शिवलोकप्रदायकम् ॥ इत्येवं संमतं कृत्वा नर्मदायास्तटं ययुः ॥ ४० ॥ विदेशिनोऽस्य वणिजो ददर्श विपुलं धनम् ॥ मुक्ताहारं गले
तस्य लुंठितं वणिजोऽस्य च ॥ ४१ ॥ चौरोऽयमिति निश्चित्य तौ बबंधात्मरक्षणात् ॥ सधनं सह जामात्रा नृपा
न्तिकमुपानयत् ॥ ४२ ॥ प्रतिकूले हरौ तस्मिन्नाज्ञापि न विचारितम् ॥ धनागारे धनं नीत्वा बध्नीत तौ सुदुर्मती ॥ ४३ ॥
कारागारे लोहमयैः शृंखलैरंगपादयोः ॥ इति राजाज्ञया दूतास्तथा चक्रुर्निबंधनम् ॥ ४४ ॥ जामात्रा सहितः साधुर्विललाप
भृशं मुहुः ॥ हा पुत्र तात तातेति जामातः क्व धनं गतम् ॥ ४५ ॥ क्व स्थिता च सुता भार्या पश्य धातुर्विपर्ययम् ॥ निमग्नौ दुःखज
लधौ को वां पास्यति संकटात् ॥ ४६ ॥ मया बहुतरं धातुर्विप्रियं हि पुरा कृतम् ॥ तत्कर्मणः प्रभावोऽयं न जाने कस्य वा फलम् ॥ ४७ ॥ समं
श्वशुरजामात्रौ द्वादशेषु विषादिनौ ॥ ४८ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडापरपर्याये कलियुगीयेतिहाससमुच्चयेऽष्टाविंशो
ऽध्यायः ॥ २८ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ तापत्रयहरं विष्णोश्चरितं तस्य ते शिवम् ॥ शृण्वंति सुधियो नित्यं ते वसंति हरेः पदम् ॥
॥ १ ॥ प्रतिकूले हरौ तस्मिन्यास्यन्ति निरयान्बहून् ॥ तत्प्रिया कमला देवी चत्वारस्तस्य चात्मजाः ॥ २ ॥ धर्मो यज्ञो नृपश्चौरः सर्वे
लक्ष्मीप्रियंकराः ॥ विप्रेभ्यश्चातिथिभ्यश्च यद्दानं धर्म उच्यते ॥ ३ ॥ मातृभ्यो देवताभ्यश्च स्वधा स्वाहेति वै मखः ॥ धर्मस्यैव मखस्यैव रक्षको
नृपतिः स्मृतः ॥ ४ ॥ द्वयोर्हन्ता हि चोरः स ते सर्वे धर्मकिंकराः ॥ यत्र सत्यं ततो धर्मस्तत्र लक्ष्मीः स्थिरा भवेत् ॥५॥ सत्यहीनस्य तत्साधो
र्धनं यत्तद्गृहे स्थितम् ॥ हृतवानवनीपालः चौरैर्भार्यातिदुःखिता ॥ ६ ॥ वासोलंकरणादीनि विक्रीय बुभुजे किल ॥ नास्ति तत्पच्यते किंचि
त्तदा कष्टमगाहत ॥ ७ ॥ अथैकस्मिन्दिने कन्या भोजनाच्छादनं विना ॥ गता विप्रगृहेऽपश्यत्सत्यनारायणार्चनम् ॥ ८ ॥ प्रार्थयंतं जग
न्नाथं दृष्ट्वा सा प्रार्थयद्धरिम् ॥ सत्यनारायण हरे पिता भर्ता च मे गृहम् ॥९॥ आगच्छत्वर्चयिष्यामि भवंतमिति याचये ॥ तथास्तु ब्राह्मणैरुक्ता
ततः सा त्वाश्रमं ययौ ॥ १० ॥ मात्रा निर्भर्त्सितेयंतं कालं कुत्र स्थिता शुभे ॥ वृत्तांतं कथयामास सत्यनारायणार्चने ॥ ११ ॥ कलौ प्रत्यक्ष
फलदः सर्वदा क्रियते नरैः ॥ कर्तुमिच्छाम्यहं मातरनुज्ञातुं त्वमर्हसि ॥ १२ ॥ देशमायातु जनकः स्वामी च मम कामना ॥ रात्रौ निश्चित्य

मनसा प्रभाते सा कलावती ॥ १३ ॥ शीलपालस्य गुप्तस्य गेहे प्राप्ता धनार्थिनी ॥ बंधो किंचिद्धनं देहि येन सत्यार्चनं भवेत् ॥ १४ ॥ इति
श्रुत्वा शीलपालः पंचनिष्कं धनं ददौ ॥ त्वत्पितुश्च ऋणं शेषं मयीत्येव कलावति ॥ १५ ॥ इत्युक्त्वा सोऽनृणो भूत्वा गयाश्राद्धाय संययौ ॥
सुतापि तेन द्रव्येण कृतं सत्यार्चनं शुभम् ॥ १६ ॥ लीलावती सह तया भक्त्याकार्षीत्प्रपूजनम् ॥ पूजनेन विशेषेण तुष्टो नारायणोऽभवत् ॥१७॥
नर्मदातीरनगरे नृपः सुष्वाप मंदिरे ॥ रात्रिशेषे सुपर्यंके निद्रां कुर्वति राजनि ॥ उवाच विप्ररूपेण बोधयञ्छ्लक्ष्णया गिरा ॥ १८ ॥ उत्तिष्ठोत्तिष्ठ
राजेंद्र तौ साधू परिमोचय ॥ अपराधं विना बद्धौ नो चेच्छं न भवेत्तव ॥ १९ ॥ इत्येवं भूपतिश्चैव विप्ररूपेण बोधितः ॥ तदा ह्यन्तर्दधे विष्णु
र्विनिद्रो नृपतिस्तदा ॥ २० ॥ विस्मितः सहसोत्थाय दध्यौ ब्रह्म सनातनम् ॥ सभायां मंत्रिणे राजा स्वप्नहेतुं न्यवेदयत् ॥ २१ ॥ महामन्त्री च
भूपालं प्राह सत्येन भो द्विज ॥ मयापि दर्शितं स्वप्नं वृद्धविप्रेण बोधितम् ॥ अतस्तौ हि समानीय संपृच्छ विधिवन्नृप ॥ २२ ॥ आनीय साधुं
पप्रच्छ सत्यमालंब्य भूपतिः॥ कुत्रत्यौ वां कुलं किं वा वसतिः कस्य वा पुरे ॥ २३ ॥ ॥ साधुरुवाच ॥ ॥ रम्ये रत्नपुरे वासो वणिग्जातौ
जनिर्मम ॥ वाणिज्यार्थं महाराज वाणिज्यं जीविकावयोः ॥ २४ ॥ मणिमुक्तादि विक्रेतुं क्रेतुं वा तव पत्तने ॥ प्राप्तौ दूतैश्च बद्धावां त्वत्समीप
मुपागतौ ॥ २५ ॥ प्रतिकूले विधौ को वा दशां नाप्नोति वै पुमान् ॥ विनापराधं राजेन्द्र मणिचौरानवादयन् ॥ २६ ॥ आवां न चौरौ राजेंद्र
तत्त्वतस्त्वं विचारय ॥ श्रुत्वा तन्निश्चयं ज्ञात्वा तयोर्बंधनकारणम् ॥ २७ ॥ छेदयित्वा दृढं पाशं लोमशातिमकारयत् ॥ कारयित्वा परिष्कारं
भोजयामास तौ नृपः ॥ २८ ॥ नगरे पूजयामास वस्त्राभूषणवाहनैः ॥ अब्रवीत्पूजितः साधुर्भूपतिं विनयान्वितः ॥ २९ ॥ कारागारे बहुविधं
प्राप्तं दुःखमतः परम् ॥ आज्ञापय महाराज देशं गंतुं कृपानिधे ॥ ३० ॥ श्रुत्वा साधुवचो राजा प्राह कोशाधिकारिणम् ॥ मुद्राभिस्तरणीः सद्यः
पूरयाशु मदाज्ञया ॥ ३१ ॥ जामात्रा सहितः साधुर्गीतवादित्रमंगलैः ॥ स्वदेशं चलितोऽद्यापि न चक्रे हरिसेवनम् ॥ ३२ ॥ सत्यनारायणो देवः
प्रत्यक्षफलदः कलौ ॥ स एव तापसो भूत्वा चक्रे साधुविडंबनम् ॥ ३३ ॥ ॥ तापस उवाच ॥ ॥ धर्मः किं नौषु ते साधो मामनादृत्य यासि
भोः ॥ प्रत्युत्तरमदात्साधुः क्षिप नौकाश्च सत्वरम् ॥ ३४ ॥ भोः स्वामिन्मे धनं नास्ति लतापत्रादिपूरितम् ॥ नौभिर्गच्छामि स्वस्थानं विरोधे
नात्र किं फलम् ॥ ३५ ॥ इत्युक्तस्तापसः प्राह तथास्त्विति वचः क्षणात् ॥ धनमंतर्दधे साधोर्लतापत्रावशेषितम् ॥ ३६ ॥ धनं नौकासु नास्ती
ति साधुश्चिंतातुरोऽभवत् ॥ किमिदं कस्य वा हेतोर्धनं कुत्र गतं मम ॥ ३७ ॥ वज्रपाताहत इव भृशं दुःखितमानसः ॥ क्व यास्यामि क्व तिष्ठा

मि किं करोमि धनं कुतः ॥ ३८ ॥ इति मूर्छांगतः साधुर्विललाप पुनःपुनः ॥ जामात्रा बोधितः पश्चात्तापसं तं जगाम ह ॥ ३९ ॥ गले वसन
मादाय प्रणनाम स तापसम् ॥ को भवानिति पप्रच्छ देवो गंधर्व ईश्वरः॥४०॥देवदेवोऽथ वा कोऽपि न जाने तव विक्रमम् ॥ आज्ञापय महाभाग
तद्विडम्बनकारणम् ॥ ४१ ॥ ॥ तापस उवाच ॥ ॥ आत्मा चैवात्मनः शत्रुस्तथात्र च प्रियोऽप्रियः ॥ त्यज मौढ्यमतिं साधो प्रवादं मा वृथा
कृथाः ॥४२॥ इति विज्ञापितः साधुर्न बुबोध महाधनः ॥ पुनः स तापसः प्राह कृपया पूर्वकर्मतः॥४३॥ चंद्रचूडो यदानर्च सत्यनारायणं नृपः ॥
अनपत्येन सुचिरं पुत्रकन्यार्थिना त्वया ॥ ४४ ॥ प्रार्थितं न स्मृतं ह्येव इदानीं तप्यसे वृथा ॥ सत्यनारायणो देवो विश्वव्यापी फलप्रदः ॥४५॥
तमनादृत्य दुर्बुद्धे कुतः सम्यग्भवेत्तव ॥ पुरा लब्धवरं स्मृत्वा सस्मार जगदीश्वरम् ॥ ४६ ॥ सत्यनारायणं देवं तापसं तं ददर्शह ॥ प्रणम्य भुवि
कायेन परिक्रम्य पुनःपुनः ॥ तुष्टाव तापसं तत्र साधुर्गद्गदयागिरा ॥ ४७ ॥ ॥ साधुरुवाच ॥ ॥ सत्यरूपं सत्यसंधं सत्यनारायणं हरिम् ॥
यत्सत्यत्वेन जगतस्तं सत्यं त्वां नमाम्यहम् ॥ ४८ ॥ त्वन्मायामोहितात्मानो न पश्यंत्यात्मनः शुभम् ॥ दुःखांभोधौ सदा मग्ना दुःखे च सुख
मानिनः ॥ ४९ ॥ मूढोहं धनगर्वेण मदांधीकृतलोचनः ॥ न जाने स्वात्मनः क्षेमं कथं पश्यामि मूढधीः ॥ ५० ॥ क्षमस्व मम दौरात्म्यं तपो
धाम्ने हरे नमः॥ आज्ञापयात्मदास्यं मे येन ते चरणौ स्मरे ॥ ५१ ॥ इति स्तुत्वा लक्षमुद्राः स्थापिताः स्वपुरोधसि ॥ गत्वावासं पूजयिष्ये सत्य
नारायणं प्रभुम् ॥५२॥ तुष्टो नारायणः प्राह वांछा पूर्णा भवेत्तु ते ॥ पुत्रपौत्रसमायुक्तो भुक्त्वा भोगांस्त्वनुत्तमान् ॥ अंते सांनिध्यमासाद्य मोदसे
त्वं मया सह ॥५३॥ इत्युक्त्वान्तर्दधे विष्णुः साधुश्च स्वाश्रमं ययौ ॥ सप्ताहेन गृहं प्राप्तः सत्यदेवेन रक्षितः ॥ ५४ ॥ आगत्य नगराभ्याशे प्राहि
णोद्द्रुतमाश्रमम् ॥ गृहमागत्य दूतोपि प्राह लीलावतीं प्रति ॥ ५५ ॥ जामात्रा सहितः साधुः कृतकृत्यः समागतः ॥ सत्यनारायणार्चायां स्थिता
साध्वी सकन्यका ॥ ५६ ॥ पूजाभारं सुतायै सा दत्त्वा नौकांतिकं ययौ ॥ सखीगणैः परिवृता कृतकौतुकमंगला ॥ ५७ ॥ कलावती त्ववज्ञाय
प्रसादं सत्वरा ययौ ॥ पातुं पतिमुखांभोजं चकोरीव दिनात्यये ॥ ५८ ॥ अवज्ञानात्प्रसादस्य नौकाशंखपतेरथ ॥ निमग्ना जलमध्ये तु जामात्रा
सह तत्क्षणात् ॥ ५९ ॥ मग्नं जामातरं पश्यन्विललाप स मूर्च्छितः ॥ लीलावती तु तद्दृष्ट्वा मूर्च्छिता विललाप ह ॥ ६० ॥ ततः कलावती दृष्ट्वा
पपात भुवि मूर्च्छिता ॥ रंभेव वातविहता कान्तकान्तेतिवादिनी ॥ ६१ ॥ हा नाथ प्रिय धर्मज्ञ करुणाकरकौशल ॥ त्वया विरहिता
पत्या निराशा विधिना कृता ॥ पत्युरर्द्धं गतं कस्मादर्द्धांगं जीवनं कथम् ॥ ६२ ॥ ॥ सूत उवाच ॥ ॥ कलावती चारुकलासु कौशला प्रवा

लरक्तांघ्रितलातिकोमला ॥ सरोजनेत्रांबुकणान्विमुंचती मुक्तावलीभिस्तनकुड्मलांचिता ॥ ६३ ॥ हा सत्यनारायण सत्यसिंधो मग्नं हि मामु
द्धर तद्वियोगे ॥ श्रुत्वार्तशब्दं भगवानुवाच वचस्तदाकाशसमुद्भवं च ॥ ६४ ॥ साधो कलावती क्षिप्रं मत्प्रसादं हि भोजयेत् ॥ तत्पश्चादिह
संप्राप्य पतिं प्राप्स्यति मा शुचः ॥ ६५ ॥ इत्याकाशे वचः श्रुत्वा विस्मिता तच्चकार सा ॥ नारायणस्य कृपया पतिं प्राप्ता कलावती ॥ ६६ ॥
तत्रैव साधुः साह्लादो भक्त्या परमया युतः ॥ पूजनं लक्षमुद्राभिः सत्यदेवस्य चाकरोत् ॥ ६७ ॥ तेन व्रतप्रभावेन पुत्रपौत्रसमन्वितः ॥ भुक्त्वा
भोगान्मुदा युक्तो मृतः स्वर्गपुरं ययौ ॥ ६८ ॥ इतिहासमिमं भक्त्या शृणुयाद्यो हि मानवः ॥ सोऽपि विष्णुप्रियतरः कामसिद्धिमवाप्नुयात् ॥
॥ ६९ ॥ इति ते कथितं विप्र व्रतानामुत्तमं व्रतम् ॥ कलिकाले परं पुण्यं ब्राह्मणस्य मुखोद्भवम् ॥ ७० ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्ग
पर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये सत्यनारायणव्रतमाहात्म्यवर्णनं नामैकोनत्रिंशोऽध्यायः॥२९॥छ॥ ॥ ऋषय ऊचुः॥ ॥
भगवन्गुह्यजं कर्म वृत्तं प्रोक्तं पुरातनैः ॥ व्रतानां चैव सर्वेषां श्रेष्ठं नारायणव्रतम् ॥ १ ॥ त्वन्मुखेन श्रुतं सूत तापत्रयविनाशनम् ॥ इदानीं श्रोतु
मिच्छामि लिंगजं कर्म चोत्तमम् ॥ २ ॥ सर्वेषां ब्रह्मचर्याणां ब्रह्मचर्यं हि किं परम् ॥ तन्मे वद महाप्राज्ञ सर्वज्ञोऽसि मतौ मम ॥ ३ ॥
॥ ॥ सूत उवाच ॥ ॥ आसीत्पुरा कलियुगे पितृशर्मा द्विजोत्तमः ॥ वेदवेदांगतत्त्वज्ञो यमलोकभयान्वितः ॥ ४ ॥ ज्ञात्वा घोरतमं कालं कलि
कालमधर्मजम् ॥ वार्धनं यमराष्ट्रस्य तदा चिंतातुरोऽभवत् ॥ ५ ॥ केनाश्रमेण वर्णेन मम श्रेयो भवेदिह ॥ कलौ संन्यासमार्गो हि दंभपाखंडखं
डितः ॥ ६ ॥ वानप्रस्थः कलौ नास्ति ब्रह्मचर्यं क्वचित्क्वचित् ॥ गार्हस्थ्यं कर्म सर्वेषां कर्मणां श्रेष्ठमुच्यते ॥ ७ ॥ अतः स्त्रीसं
ग्रहो ग्राह्यो मया घोरे कलौ युगे ॥ यदि मे च भवेन्नारी मनोवृत्त्यनुसारिणी ॥ तर्हि मे सफलं जन्म मम श्रेयो भवेदिह ॥ ८ ॥
इत्येवं संमतं कृत्वा शिवां मंगलदायिनीम् ॥ चंदनाद्यैश्च संपूज्य तुष्टाव मनसा पराम् ॥ विश्वेश्वरीं जगन्मूर्तिं सच्चिदानंदरूपिणीम् ॥ ९ ॥
॥ ॥ पितृशर्मोवाच ॥ ॥ नमः प्रकृत्यै सर्वायै कैवल्यायै नमोनमः ॥ त्रिगुणैक्यस्वरूपायै तुरीयायै नमोनमः ॥ १० ॥ महत्त
त्त्वजनन्यै च द्वंद्वकर्त्र्यै नमोनमः ॥ ब्रह्ममातर्नमस्तुभ्यं साहंकारपितामहि ॥ ११ ॥ पृथग्गुणायै शुद्धायै नमो मातर्नमोनमः ॥
विद्यायै शुद्धसत्त्वायै लक्ष्म्यै सत्त्वरजोमयि ॥१२॥ नमो मातरविद्यायै ततः शुद्धचै नमोनमः॥ काल्यै सत्त्वतमोभूत्यै नमो मातर्नमोनमः ॥१३॥
स्त्रियै शुद्धरजोमूर्त्यै नमस्त्रैलोक्यवासिनि ॥ नमो रजस्तमोमूर्त्यै दुर्गायै च नमोनमः ॥ १४ ॥ इति श्रुत्वा स्तवं देव्या प्रसादः स्थापितस्तया ॥

सुतायां विष्णुयशसो ब्राह्मणस्य तदा स्वयम् ॥ १५ ॥ तामुद्वाह्य द्विजो देवीं नाम्ना वै ब्रह्मचारिणीम् ॥ न्यवसन्मथुरायां स कृत्वा धर्मं स्वय
हृदि ॥ १६ ॥ प्रियायै स रजोवत्यै ऋतुदानं करोति हि ॥ चत्वारश्चात्मजाश्चासंश्चतुर्वेदैक्यधारिणः ॥ १७ ॥ ऋग्यजुश्च तथा साम तुर्यश्चासी
दथर्वणः ॥ ऋचश्च तनयो व्याडिर्न्यायशास्त्रविशारदः ॥ १८ ॥ यजुषस्तु सुतो जातो मीमांसो लोकविश्रुतः ॥ पाणिनिः सामनस्यैव सुतोऽभू
च्छब्दपारगः ॥ १९ ॥ पुत्रो वररुचिः श्रेष्ठोऽथर्वणस्य नृपप्रियः ॥ ते गता मागधेशस्य चन्द्रगुप्तस्य वै सभाम् २० ॥ नृपस्तान्पूजयामास
बहुमानपुरःसरम् ॥ अब्रवीत्तांस्ततो राजा ब्रह्मचर्यं हि किं परम् ॥ २१ ॥ व्याडिराह महाराज यः स्तुतौ तत्परः पुमान् ॥ न्यायतोऽखिल
देवानां ब्रह्मचारी हि मे मतः ॥ २२ ॥ मीमांसश्चाह भो राजन्यज्ञे यो हि पुमान्परः ॥ कर्मणा यजते देवान्रोचनादिभिरर्चयेत् ॥ २३ ॥ हवनं
तर्पणं कृत्वा ब्रह्मादिकसुरान्प्रति ॥ तत्प्रसादं हि गृह्णीयाद्ब्रह्मचारी च स स्मृतः ॥ २४ ॥ श्रुत्वेदं पाणिनिश्चाह चन्द्रगुप्त शृणुष्व भोः ॥ त्रिधा
स्वरैः परं ब्रह्म शुद्धशब्दमयैः परैः ॥ २५ ॥ तथैव सूत्रपाठैश्च लिंगधातुगणावृतैः ॥ यो यजेद्ब्रह्मचारी स परं ब्रह्माधिगच्छति ॥ २६ ॥ श्रुत्वा
वररुचिश्चाह शृणु मागधभूपते ॥ गृहीत्वा यज्ञसूत्रं यः प्राप्तो गुरुकुले वसन् ॥ २७ ॥ दंडलोमनखाधारी भिक्षार्थी वेदतत्परः ॥ आज्ञया च
गुरोर्वर्तेद्ब्रह्मचारी हि स स्मृतः ॥ २८ ॥ इति तेषां वचः श्रुत्वा पितृशर्माब्रवीदिदम् ॥ यो गृहस्थे वसन्विप्रः पितृदेवातिथिप्रियः ॥ २९ ॥ गामी
पाणिगृहीतायामृतुकाले यतेंद्रियः ॥ ब्रह्मचारी हि मुख्यस्स श्रुत्वा राजाब्रवीदिदम् ॥ ३० ॥ स्वामिन्यद्भवता चोक्तं धर्मज्ञेन यशस्विना ॥ कलौ
भयंकरे प्राप्ते स धर्मो हि मतो मम ॥३१॥ इत्युक्त्वा तस्य शिष्योऽभूद्गुरुवाक्यपरायणः ॥ तथान्ते मरणं प्राप्य स्वर्गलोकं नृपो ययौ ॥३२॥
पितृशर्मापि मनसा ध्यात्वा दामोदरं हरिम् ॥ हिमालयं गिरिं प्राप्य योगध्यानपरोऽभवत् ॥ ३३ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्ग
पर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये त्रिंशोऽध्यायः ॥ ३० ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ भगवन्सर्वतीर्थानां दानानां
किं परं स्मृतम् ॥ यत्कृत्वा च कलौ घोरे परां निर्वृतिमाप्नुयात् ॥ १ ॥ ॥ सूत उवाच ॥ ॥ सामनस्य सुतः श्रेष्ठः पाणिनिर्नाम विश्रुतः ॥ कण
भुग्वरशिष्यैश्च शास्त्रज्ञैः स पराजितः ॥ २ ॥ लज्जितः पाणिनिस्तत्र गतस्तीर्थान्तरं प्रति ॥ स्नात्वा सर्वाणि तीर्थानि संतर्प्य पितृदेवताः ॥३॥
केदारमुदकं पीत्वा शिवध्यानपरोऽभवत् ॥ पर्णाशी सप्तदिवसाञ्जलभक्षस्ततोऽभवत् ॥ ४ ॥ ततो दशदिनान्ते स वायुभक्षो दशाहनि ॥ अष्टा
विंशद्दिने रुद्रो वरं ब्रूहि वचोऽब्रवीत् ॥ ५ ॥ श्रुत्वामृतमयं वाक्यमस्तौद्गद्गदया गिरा ॥ सर्वेशं सर्वलिंगेशं गिरिजावल्लभं हरम् ॥ ६॥ ॥ पाणि

निरुवाच ॥ ॥ नमो रुद्राय महते सर्वेशाय हितैषिणे ॥ नन्दीसंस्थाय देवाय विद्याभयकराय च ॥ ७ ॥ पापान्तकाय भर्गाय नमोनन्ताय
वेधसे ॥ नमो मायाहरेशाय नमस्ते लोकशंकर ॥ ८ ॥ यदि प्रसन्नो देवेश विद्यामूलप्रदो भव ॥ परं तीर्थं हि मे देहि द्वैमातुरपितर्नमः ॥ ९ ॥
॥ ॥ सूत उवाच ॥ ॥ इति श्रुत्वा महादेवः सूत्राणि प्रददौ मुदा ॥ सर्ववर्णमयान्येव अइउणादिशुभानि वै ॥ १० ॥ ज्ञानह्रदे सत्यजले राग
द्वेषमलापहे ॥ यः प्राप्तो मानसे तीर्थे सर्वतीर्थफलं भजेत् ॥११॥ मानसं हि महत्तीर्थं ब्रह्मदर्शनकारकम् ॥ पाणिने ते ददौ विप्र कृतकृत्यो भवा
न्भव ॥ १२ ॥ इत्युक्त्वांतर्दधे रुद्रः पाणिनिः स्वगृहं ययौ ॥ सूत्रपाठं धातुपाठं गणपाठं तथैव च ॥ १३ ॥ लिंगसूत्रं तथा कृत्वा परं निर्वाणमाप्त
वान् ॥ तस्मात्त्वं भार्गवश्रेष्ठ मानसं तीर्थमाचर ॥ १४ ॥ यतो याता स्वयं गंगा सर्वतीर्थमयी शिवा ॥ गंगातीर्थात्परं तीर्थं न भूतं न भवि
ष्यति ॥ १५ ॥ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चय एकत्रिंशोऽध्यायः ॥ ३१ ॥
॥ ॥ सूत उवाच ॥ ॥ तोतादर्यां द्विजः कश्चिद्बोपदेव इति श्रुतः ॥ बभूव कृष्णभक्तश्च वेदवेदांगपारगः ॥ १ ॥ गत्वा वृन्दावनं रम्यं
गोपगोपीनिषेवितम् ॥ मनसा पूजयामास देवदेवं जनार्दनम् ॥ २ ॥ वर्षान्ते च हरिः साक्षाद्ददौ ज्ञानमनुत्तमम् ॥ तेन ज्ञानेन संप्राप्ता
हृदि भागवती कथा ॥ ३ ॥ शुकेन वर्णिता या वै विष्णुराताय धीमते ॥ तां कथां वर्णयामास मोक्षमूर्तिं सनातनीम् ॥ ४ ॥ कथान्ते भग
वान्विष्णुः प्रादुरासीज्जनार्दनः ॥ उवाच स्निग्धया वाचा वरं ब्रूहि महामते ॥ ५ ॥ ॥ बोपदेव उवाच ॥ ॥ नमस्ते भगवन्विष्णो लोका
नुग्रहकारक ॥ त्वया ततमिदं विश्वं देवतिर्यङ्नरादिकम् ॥ ६ ॥ त्वन्नाम्ना नरकार्ताश्च ते कृतार्थाः कलौ युगे ॥ त्वया दत्तं भागवतं श्रीम
द्व्यासेन निर्मितम् ॥ माहात्म्यं तस्य मे ब्रूहि यदि दत्तो वरस्त्वया ॥ ७ ॥ ॥ श्रीभगवानुवाच ॥ ॥ एकदा भगवान्रुद्रो भवान्या सह
शंकरः ॥ ८ ॥ बौद्धराज्ये जगत्प्राप्ते दंभपाखण्डनिर्मिते ॥ दृष्ट्वा काश्यां भूमितुंगं प्रणनाम मुदा युतः ॥ जय सच्चिदानन्द विभो जगदानं
कारक ॥ ९ ॥ इति श्रुत्वा शिवा प्राह को देवोऽस्ति तवोत्तमः ॥ स होवाच महादेवि यज्ञः सप्ताहमत्र वै ॥ १० ॥ तस्माद्भूमि पवित्रत्व
मिह प्राप्तं वरानने ॥ सर्वतीर्थाधिकत्वं च स्वयं ब्रह्म सनातनम् ॥ ११ ॥ इति श्रुत्वा शिवा देवी प्राप्तासीद्गुह्यकालयम् ॥ रुद्रेण सहिता तत्र
भूमिशुद्धिमकारयत् ॥ १२ ॥ चण्डीशश्च गणेशश्च नंदिनो गुह एव च ॥ रक्षार्थे स्थापितास्तत्र देवदेवेन भो द्विज ॥ १३ ॥ शृणु देवि कथां
रम्यां मम मानससंस्थिताम् ॥ इत्युक्त्वा ध्यानमास्थाय सप्ताहेन स्ववर्णयत् ॥ १४ ॥ अष्टाहे नेत्र उन्मील्य दृष्ट्वा निद्रागतां शिवाम् ॥ बोधया

मास भगवान्कथांते लोकशंकरः ॥ १५ ॥ कियती ते श्रुता गाथा श्रुत्वाह जगदंबिका ॥ सुधामंथनपर्यंतं चरित्रं शिवयेरितम् ॥ १६ ॥ कोट
रस्थः शुकः श्रुत्वा चिरंजीवत्वमागतः ॥ पार्वत्या रक्षितोसौ वै शुकः परमसुन्दरः ॥ १७ ॥ स्थित्वा शिवस्य सदने मम ध्यानपरोऽभवत् ॥ ममा
ज्ञया शुकः साक्षात्त्वदीयहृदयस्थितः ॥ १८ ॥ तेन प्राप्तं भागवतं माहात्म्यं चास्य दुर्लभम् ॥ त्वं वै गंधर्वसेनाय पित्रे विक्रमभूपतेः ॥ १९ ॥
नर्मदाकूलमासाद्य श्रावयस्वं कथां शुभाम् ॥ हरिमाहात्म्यदानं हि सर्वदानपरं स्मृतम् ॥ २० ॥ सत्पात्राय प्रदातव्यं विष्णुभक्ताय धीमते ॥
बुभुक्षितान्नदानं च तद्दानस्य समं न हि ॥ २१ ॥ इत्युक्त्वांतर्दधे देवो बोपदेवः प्रसन्नधीः ॥ २२ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि
चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये द्वात्रिंशत्तमोऽध्यायः ॥ ३२ ॥ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ वाग्जं कर्म स्मृतं सूत वेद
पाठः सनातनः ॥ बहुत्वात्सर्ववेदानां श्रोतुमिच्छामहे वयम् ॥ १ ॥ केन स्तोत्रेण वेदानां पाठस्य फलमाप्नुयात् ॥ पापानि विलयं यांति तन्मे
वद विचक्षण ॥ २ ॥ ॥ सूत उवाच ॥ ॥ विक्रमादित्यराज्ये तु द्विजः कश्चिदभूद्भुवि ॥ व्याधकर्मेति विख्यातो ब्राह्मण्यां शूद्रतोऽभवत् ॥
॥ ३ ॥ त्रिपाठिनो द्विजस्यैव भार्या नाम्ना हि कामिनी ॥ मैथुनेच्छावती नित्यं मदाघूर्णितलोचना ॥ ४ ॥ द्विजस्सप्तशतीपाठे वृत्त्यर्थी कर्हि
चिद्गतः ॥ ग्रामे देवलके रम्ये बहुवैश्यनिषेविते ॥ ५ ॥ तत्र मासो गतः कालो नाययौ स स्वमंदिरम् ॥ तदा तु कामिनी दुष्टा रूपयौवनसंयुता
॥ ६ ॥ दृष्ट्वा निषादं सबलं काष्ठभारोपजीविनम् ॥ तस्मै दत्त्वा पञ्च मुद्रा बुभुजे कामपीडिता ॥ ७ ॥ तदा गर्भं दधौ सा च व्याधिवीर्येण संचि
तम् ॥ पुत्रोऽभूद्दशमासांते जातकर्म पिताकरोत् ॥ ८ ॥ द्वादशाब्दे गते काले स धूर्तो वेदवर्जितः ॥ व्याधकर्मकरो नित्यं व्याधकर्मा ह्यतोभवत्॥
॥ ९ ॥ निष्कासितौ द्विजेनैव मातृपुत्रौ द्विजाधमौ ॥ त्रिपाठी ब्रह्मचर्यं तु कृतवान्धर्मतत्परः ॥ १० ॥ प्रत्यहं चंडिकापाठं कृत्वा विंध्यगिरौ
वसन् ॥ जीवन्मुक्तोभवच्छीघ्रं जगदंबाप्रसादतः ॥ ११ ॥ निषादस्य गृहे चोभौ वने गत्वोषतुर्मुदा ॥ प्रत्यहं जारभावेन बहुद्रव्यमुपार्जितम् ॥
॥ १२ ॥ व्याधकर्मा तु चौर्येण पितृमातृप्रियंकरः ॥ एकदा दैवयोगेन शिवामंदिरमाययौ ॥ १३ ॥ चौरवृत्तिपरो धूर्त्तः स्त्रिया भूषणमाहरत् ॥
कैश्चिज्ज्ञातः स नो धूर्तो बहुमायाविशारदः ॥ १४ ॥ कदाचित्प्राप्तवांस्तत्र द्विजवस्त्रसमुद्गतम् ॥ श्रुतमादिचरित्रं हि तेन शब्दप्रियेण वै ॥ १५ ॥
पाठपुण्यप्रभावेण धर्मबुद्धिस्ततोऽभवत् ॥ दत्त्वा चौर्यधनं सर्वं तस्मै विप्राय पाठिने ॥ १६ ॥ शिष्यत्वमगमत्तत्राक्षरमैशं जजाप ह ॥ बीजमंत्रप्रभा
वेण तदंगात्पापमुल्बणम् ॥ १७ ॥ निःसृतं कृमिरूपेण बहुवर्णेन तापितम् ॥ त्रिवर्षान्ते च निष्पापो बभूव द्विजसत्तमः ॥ १८ ॥ पठित्वाक्षर

मालां च जजापादिचरित्रकम् ॥ द्वादशाब्दमिते काले काश्यां गत्वा स तु द्विजः ॥ १९ ॥ अन्नपूर्णां महादेवीं तुष्टाव परया मुदा ॥ रोचनाद्यैश्च संपूज्यां मुनिदेवनिषेविताम् ॥ २० ॥ नित्यानंदकरी पराभयकरी सौंदर्यरत्नाकरी निर्धूताखिलपापपावनकरी काशीपुराधीश्वरी ॥ नानालोककरी महाभयहरी विश्वंभरी सुन्दरी विद्यां देहि कृपावलंबनकरी मातान्नपूर्णेश्वरी ॥ २१ ॥ स इत्यष्टोत्तरं जप्त्वा ध्यानस्तिमितलोचनः ॥ सुष्वाप तत्र मुदितः स्वप्ने प्रादुरभूच्छिवा ॥ २२ ॥ दत्त्वा तस्मै हि ऋग्विद्यां पुनरंतरधीयत ॥ उत्थाय स द्विजो धीमाँल्लब्ध्वा विद्यामनुत्तमाम् ॥ २३ ॥ विक्रमादित्यभूपस्य यज्ञाचार्यो बभूव ह ॥ यज्ञांते योगमास्थाय जगाम तु हिमालयम् ॥ २४ ॥ एतत्ते वर्णितं विप्र पुण्यमादिचरित्रकम् ॥ ब्रह्मीभूय यथा विप्रो लेभे सिद्धिमनुत्तमाम् ॥ २५ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडापरपर्याये कलियुगीयेतिहाससमुच्चये प्रथमचरित्रवर्णनं नाम त्रयस्त्रिंशोध्यायः ॥ ३३ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ उज्जयिन्यां पुरा विप्र राजन्यः सर्वहिंसकः ॥ बभूव मद्यमांसाशी भीमवर्मेति विश्रुतः ॥ १ ॥ मांसलोभेन स खलः सूकरान्ग्रामकुक्कुटान् ॥ हत्वा चाभक्षयत्पापी वेश्यासंगपरायणः ॥ ॥ २ ॥ नरमांसं स क्रव्यादस्त्यक्त्वान्यान्भक्षकोऽभवत् ॥ एवं बहुगते काले भीमवर्मा महाधमः ॥ विसूच्यग्निवशं यातो ममार च युवापि सः ॥ ३ ॥ कारितश्चंडिकापाठस्तेन दुष्टेन भीरुणा ॥ तस्य पुण्यप्रभावेन नागतो नरकान्प्रति ॥ ४ ॥ पुनः क्षत्रत्वमगमन्मागधे स महीपतिः ॥ महानन्दीति विख्यातो राजनीतिपरायणः ॥ ५ ॥ जातिस्मरो बभूवासौ वेदधर्मपरायणः ॥ कात्यायनस्य शिष्योऽभून्महाशाक्तस्य धीमतः ॥ ६ ॥ तस्मै नृपाय स मुनिर्दत्त्वा मध्यचरित्रकम् ॥ सबीजं पुनरागत्य विन्ध्ये शक्तिपरोऽभवत् ॥ ७ ॥ नृपोऽपि प्रत्यहं देवीं महालक्ष्मीं सनातनीम् ॥ रोचनाद्यैश्च संपूज्य जपन्मध्यचरित्रकम् ॥ ८ ॥ पुण्यक्षेत्रत्वमगमन्महामायाप्रसादतः ॥ शूद्रभावं परित्यज्य क्षत्रभावमुपागतः ॥ ९ ॥ द्वादशाब्दांतरे प्राप्तस्तद्गुरुः शक्तितत्परः ॥ लक्षचण्डीं नृपादेव कारयामास धर्मतः ॥ १० ॥ तदा प्रादुरभूद्देवी जगदंबा सनातनी ॥ नृपाय धर्ममर्थं च कामं मोक्षं हि चाददात् ॥ ११ ॥ महानन्दी महाभागो भुक्त्वा भोगं सुरेप्सितम् ॥ अन्ते जगाम परमं लोकं देवनमस्कृतम् ॥ १२ ॥ इति ते कथिता विप्र यत्प्रोक्तं यजुषो गतिः ॥ सा वै मध्यचरित्रेण प्राप्ता शूद्रनृपेण वै ॥ १३ ॥ इत्येवं वर्णितं विप्र माहात्म्यं मुनिवर्णितम् ॥ १४ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ चित्रकूटे गिरौ रम्ये नानाधातु

विचित्रिते ॥ तत्रावसन्महाप्राज्ञ उपाध्यायः पतञ्जलिः ॥ १ ॥ वेदवेदांगतत्त्वज्ञो गीताशास्त्रपरायणः ॥ विष्णुभक्तः सत्यसन्धो भाष्यशास्त्र
विशारदः ॥ २ ॥ कदाचित्स तु शुद्धात्मा गतस्तीर्थांतरं प्रति ॥ काश्यां कात्यायनेनैव तस्य वादो महानभूत् ॥ ३ ॥ वर्षान्ते च तदा विप्रो
देवीभक्तेन निर्जितः ॥ लज्जितः स तु धर्मात्मा संतुष्टाव सरस्वतीम् ॥ ४ ॥ ॥ पतञ्जलिरुवाच ॥ ॥ नमो देव्यै महामूर्त्यै सर्वमूर्त्यै नमो
नमः ॥ शिवायै सर्वमांगल्यै विष्णुमाये च ते नमः ॥ ५ ॥ त्वमेव श्रद्धा बुद्धिस्त्वं मेधा विद्या शिवंकरी ॥ शांतिर्वाणी त्वमेवासि नारायणि
नमोनमः ॥ ६ ॥ इत्युक्ते सति विप्रे तु वागुवाचाशरीरिणी ॥ विप्रोत्तम चरित्रं मे जप चैकाग्रमानसः ॥ ७ ॥ तच्चरित्रप्रभावेण सत्यं ज्ञानमवा
प्स्यसि ॥ कात्यायनस्य विप्रस्य राजसंज्ञानमुद्धतम् ॥ मद्भक्त्या तेन संप्राप्तं पराजय पतञ्जले ॥ ८ ॥ इति श्रुत्वा वचो देव्या विन्ध्यवासिनि
मन्दिरम् ॥ गत्वा तां पूजयामास तुष्टाव स्तोत्रपाठतः ॥ ९ ॥ ज्ञानं प्रसादजं विप्रः प्राप्य विष्णुपरायणम् ॥ कात्यायनं पराजित्य परां मुदमवाप
ह ॥ १० ॥ ऊर्द्ध्वपुंड्रं च तिलकं तुलसीकण्ठमालिकाम् ॥ कृष्णमन्त्रं च शिवदं स्थापयित्वा गृहेगृहे ॥ ११ ॥ जनेजने तथा कृत्वा महाभाष्य
मुदैरयत् ॥ चिरंजीवित्वमगमद्विष्णुमायाप्रसादतः ॥ १२ ॥ इति ते कथितो विप्र जाप्यानामुत्तमो जपः ॥ किमन्यच्छ्रोतुमिच्छंति शौनकाद्या
महर्षयः ॥ १३ ॥ सर्वे भद्राणि पश्यंतु मा कश्चिद्दुःखभाग्भवेत् ॥ १४ ॥ मंगलं भगवान्विष्णुर्मंगलं गरुडध्वजः ॥ मंगलं पुंडरीकाक्षो मंगला
यतनो हरिः ॥ १५ ॥ शुचिर्यो हि नरो नित्यमितिहाससमुच्चयम् ॥ शृणुयाद्धर्मकामार्थी स याति परमां गतिम् ॥ १६ ॥ इति श्रीभविष्ये महापु
राणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये उत्तमचरितमाहात्म्ये पंचत्रिंशोऽध्यायः ॥३५॥ समाप्तोऽयं द्वितीयःखंडः॥
॥ ॥ श्रीगणेशाय नमः ॥ ॥ ऋषयः ऊचुः ॥ ॥ भगवन्विक्रमाख्यानकालोऽयं भवतोदितः ॥ शतद्वादशमर्यादो द्वापरस्य समो भुवि ॥
॥ १ ॥ अस्मिन्काले महाभाग लीला भगवता कृता ॥ तामेतां कथयास्मान्वै सर्वज्ञोऽस्ति भवान्सदा ॥ २ ॥ ॥ सूत उवाच ॥ ॥ नारायणं
नमस्कृत्य नरं चैव नरोत्तमम् ॥ देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ ३ ॥ भविष्याख्ये महाकल्पे प्राप्ते वैवस्वतेन्तरे ॥ अष्टाविंशद्द्वाप
रान्ते कुरुक्षेत्रे रणोऽभवत् ॥ ४ ॥ पांडवैर्निर्जिताः सर्वे कौरवाःयुद्धदुर्मदाः ॥ अष्टादशे च दिवसे पांडवानां जयोऽभवत् ॥ ५ ॥ दिनान्ते भग
वान्कृष्णो ज्ञात्वा कालस्य दुर्गतिम् ॥ शिवं तुष्टाव मनसा योगरूपं सनातनम् ॥ ६ ॥ ॥ कृष्ण उवाच ॥ ॥ नमः शांताय रुद्राय भूते
शाय कपर्दिने ॥ कालकर्त्रे जगद्भर्त्रे पापहर्त्रे नमोनमः ॥ ७ ॥ पांडवान्रक्ष भगवन्मद्भक्तान्भूतभीरुकान् ॥ इति श्रुत्वा स्तवं रुद्रो नंदियानोपरि

स्थितः ॥ रक्षार्थं शिबिराणां च प्राप्तवाञ्छूलहस्तधृक् ॥ ८ ॥ तदा नृपाज्ञया कृष्णः स गतो गजसाह्वयम् ॥ पांडवाः पंच निर्गत्य सरस्वत्या
स्तटेऽवसन् ॥ ९ ॥ निशीथे द्रौणिभोजौ च कृपस्तत्र समाययुः ॥ तुष्टुवुर्मनसा रुद्रं तेभ्यो मार्गं शिवोददात् ॥ १० ॥ अश्वत्थामा तु बलवा
ञ्छिवदत्तमसिं तदा ॥ गृहीत्वा स जघानाशु धृष्टद्युम्नपुरःसरान् ॥ ११ ॥ हत्वा यथेष्टमगमद्द्रौणिस्ताभ्यां समन्वितः ॥ १२ ॥ पार्षतस्यैव
सूतश्च हतशेषो भयातुरः ॥ पांडवान्वर्णयामास यथा जातो जनक्षयः ॥ १३ ॥ आगस्कृतं शिवं ज्ञात्वा भीमाद्याः क्रोधमूर्च्छिताः ॥ स्वायुधैस्ता
डयामास देवदेवं पिनाकिनम् ॥ १४ ॥ अस्त्रशस्त्राणि तेषां तु शिवदेहे समाविशन् ॥ दृष्ट्वा ते विस्मिताः सर्वे प्रजघ्नुस्तलमुष्टिभिः ॥ १५॥ ताञ्छ
शाप तदा रुद्रो यूयं कृष्णप्रपूजकाः ॥ अतोऽस्माभी रक्षिणीया वधयोग्याश्च वै भुवि ॥ १६ ॥ पुनर्जन्म कलौ प्राप्य भोक्ष्यते चापराधकम् ॥
इत्युक्त्वान्तर्दधे देवः पांडवा दुःखितास्तदा ॥ १७ ॥ हरिं शरणमाजग्मुरपराधनिवृत्तये ॥ तदा कृष्णयुताः सर्वे पांडवाः शस्त्रवर्जिताः ॥ १८ ॥
तुष्टुवुर्मनसा रुद्रं तदा प्रादुरभूच्छिवः ॥ वरं वरयत प्राह कृष्णः श्रुत्वाब्रवीदिदम् ॥ १९ ॥ शस्त्राण्यस्त्राणि यान्येव त्वदंगे क्षपितानि वै ॥
पांडवेभ्यश्च देहि त्वं शापस्यानुग्रहं कुरु ॥ २० ॥ इति श्रुत्वा शिवः प्राह कृष्णदेव नमोऽस्तु ते ॥ अपराधो न मे स्वामिन्मोहितोऽहं
तवाजया ॥ २१ ॥ तद्वशेन मया स्वामिन्दत्तः शापो भयंकरः ॥ नान्यथा वचनं मे स्यादंशावतरणं भवेत् ॥ २२ ॥ वत्सराजस्य
पुत्रत्वं गमिष्यति युधिष्ठिरः ॥ बलखानिरिति ख्यातः शिरीषाख्यपुराधिपः ॥ २३ ॥ भीमो दुर्वचनाद्दुष्टो म्लेच्छयोनौ भविष्यति ॥
वीरणो नाम विख्यातः स वै वनरसाधिपः ॥ २४ ॥ अर्जुनांशश्च मद्भक्तो जनिष्यति महामतिः ॥ पुत्रः परिमलस्यैव ब्रह्मानन्द इति स्मृतः ॥२५॥
कान्यकुब्जे हि नकुलो भविष्यति महाबलः ॥रत्नभानुसुतो सौ वै लक्ष्मणो नाम विश्रुतः ॥२६॥ सहदेवस्तु बलवाञ्जनिष्यति महामतिः ॥भीष्मसिंह
सुतो जातो देवसिंह इति स्मृतः ॥२७॥ धृतराष्ट्रांशः एवासौ जनिष्यत्यजमेरके ॥ पृथिवीराज इति स द्रौपदी तत्सुता स्मृता ॥२८॥ वेला नाम्ना च
विख्याता तारकः कर्ण एव हि ॥ रक्तबीजस्तथा रुद्रो भविष्यति महीतले ॥२९॥ कौरवाश्च भविष्यन्ति मायायुद्धविशारदाः॥ पांडुपक्षाश्च ते सर्वे
धर्मिणो बलशालिनः ॥३०॥ ॥ सूत उवाच ॥ ॥ इति श्रुत्वा हरिः प्राह विहस्य परमेश्वरम् ॥ मया शक्त्यवतारेण रक्षणीया हि पांडवाः ॥३१॥
महावती पुरी रम्या मायादेवीविनिर्मिता ॥ देशराजसुतस्तत्र ममांशो हि जनिष्यते ॥ ३२ ॥ देवकीजठरे जन्मोदयसिंह इति स्मृतः ॥ आल्हादो

मम धामांशो जनिष्यति गुरुर्मम ॥ ३३ ॥ हत्वाग्निवंशजान्भूपान्स्थापयिष्यामि वै कलिम् ॥ इति श्रुत्वा शिवो देवस्तत्रैवांतरधीयत ॥ ३४ ॥
इतिं श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये विक्रमाख्यानकाले प्रथमोऽध्यायः ॥ १ ॥ छ ॥
॥ ॥ सूत उवाच ॥ ॥ प्रातः काले च संप्राप्ते पांडवाः पुत्रशोकिनः ॥ प्रेतकार्याणि ते कृत्वा भीष्मान्तिकमुपाययुः ॥ १ ॥ राजधर्मान्मोक्षधर्मा
न्दानधर्मान्विभागशः ॥ श्रुत्वायजन्नश्वमेधैस्त्रिभिरुत्तमकर्मभिः ॥२॥ षट्त्रिंशदब्दराज्यं हि कृत्वा स्वर्गपुरं ययुः ॥ जनिष्यन्ते तदंशा वै कलिधर्म
विवृद्धये ॥ ३ ॥ ॥ व्यास उवाच ॥ ॥ इत्युक्त्वा स मुनिः सर्वान्पुनः सूतो वदिष्यति ॥ गच्छध्वं मुनयः सर्वे योगनिद्रावशो ह्यहम् ॥ चक्र
तीर्थे समाधिस्थो ध्यायेऽहं त्रिगुणात्परम् ॥ ४ ॥ इति श्रुत्वा तु मुनयो नैमिषारण्यवासिनः ॥ योगसिद्धिं समास्थाय गमिष्यंत्यात्मनोन्तिके
॥ ५ ॥ द्वादशाब्दशते कालेऽतीते ते शौनकादयः ॥ ६ ॥ उत्थाय देवखाते च स्नानध्यादिकाः क्रियाः ॥ कृत्वा सूतान्तिकं गत्वा वदिष्यंति
पुनर्वचः ॥ ७ ॥ ॥ ऋषय ऊचुः ॥ ॥ विक्रमाख्यानकालोऽयं द्वापरे च शिवाज्ञया ॥ विनीतान्भगवन्भूमौ तदा तान्नृपतीन्वद ॥ ८ ॥
॥ ॥ सूत उवाच ॥ ॥ स्वर्गते विक्रमादित्ये राजानो बहुधाऽभवन् ॥ तथाष्टादश राज्यानि तेषां नामानि मे शृणु ॥ ९ ॥ पश्चिमे सिंधुन
द्यंते सेतुबन्धे हि दक्षिणे ॥ उत्तरे बदरीस्थाने पूर्वे च कपिलान्तिके ॥१०॥ अष्टादशैव राष्ट्राणि तेषां मध्ये बभूविरे ॥ इंद्रप्रस्थं च पांचालं कुरु
क्षेत्रं च कापिलम् ॥ ११ ॥ अन्तर्वेदी व्रजश्चैवाजमेरं मरुधन्व च ॥ गौर्ज्जरं च महाराष्ट्रं द्राविडं च कलिंगकम् ॥ १२ ॥ आवंत्यं चोडुपं वंगं गौडं
मागधमेव च ॥ कौशल्यं च तथा ज्ञेयं तेषां राजा पृथक्पृथक् ॥ १३ ॥ नानाभाषाः स्थितास्तत्र बहुधर्मप्रवर्तकाः ॥ एवमब्दशतं जातं ततस्ते वै
शकादयः ॥१४॥ श्रुत्वा धर्मविनाशं च बहुवृंदैः समन्विताः ॥ केचित्तीर्त्वा सिंधुनदीमार्य्यदेशं समागताः ॥ १५ ॥ हिमपर्वतमार्गेण सिंधुमार्गेण
चागमन् ॥ जित्वार्य्याँल्लुँठयित्वा तान्स्वदेशं पुनराययुः ॥ १६ ॥ गृहीत्वा योषितस्तेषां परं हर्षमुपाययुः ॥ एतस्मिन्नन्तरे तत्र शालिवाहनभूपतिः
॥ १७ ॥ विक्रमादित्यपौत्रश्च पितृराज्यं गृहीतवान् ॥ जित्वा शकान्दुराधर्षांश्चीनतैत्तिरिदेशजान् ॥ १८ ॥ बाह्लीकान्कामरूपांश्च रोमजान्खुरजा
न्छठान् ॥ तेषां कोशान्गृहीत्वा च दंडयोग्यानकारयत् ॥ १९ ॥ स्थापिता तेन मर्य्यादा म्लेच्छार्याणां पृथक्पृथक् ॥ सिंधुस्थानमिति ज्ञेयं राष्ट्र
मार्य्यस्य चोत्तमम् ॥२०॥ म्लेच्छस्थानं परं सिन्धोः कृतं तेन महात्मना ॥ एकदा तु शकाधीशो हिमतुंगं समाययौ ॥ २१ ॥ हूणदेशस्य मध्ये
वै गिरिस्थं पुरुषं शुभम् ॥ ददर्श बलवान्राजा गौरांगं श्वेतवस्त्रकम् ॥ २२ ॥ को भवानिति तं प्राह स होवाच मुदान्वितः ॥ ईशपुत्रं च मां

विद्धि कुमारीगर्भसंभवम् ॥ २३ ॥ म्लेच्छधर्मस्य वक्तारं सत्यव्रतपरायणम् ॥ इति श्रुत्वा नृपः प्राह धर्मः को भवतो मतः ॥ २४ ॥ श्रुत्वो
वाच महाराज प्राप्ते सत्यस्य संक्षये ॥ निर्मर्यादे म्लेच्छदेशे मसीहोऽहं समागतः ॥ २५ ॥ ईशामसी च दस्यूनां प्रादुर्भूता भयंकरी ॥ तामहं
म्लेच्छतः प्राप्य मसीहत्वमुपागतः ॥ २६ ॥ म्लेच्छेषु स्थापितो धर्मो मया तच्छृणु भूपते ॥ मानसं निर्मलं कृत्वा मलं देहे शुभाशुभम् ॥२७॥
नैगमं जपमास्थाय जपेत निर्मलं परम् ॥ न्यायेन सत्यवचसा मनसैक्येन मानवः ॥ २८ ॥ ध्यानेन पूजयेदीशं सूर्यमंडलसंस्थितम् ॥
अचलोऽयं प्रभुः साक्षात्तथा सूर्योचलः सदा ॥ २९ ॥ तत्त्वानां चलभूतानां कर्षणः स समंततः ॥ इति कृत्येन भूपाल मसीहा विलयं
गता ॥ ३० ॥ ईशमूर्तिर्हृदि प्राप्ता नित्यशुद्धा शिवंकरी ॥ ईशामसीह इति च मम नाम प्रतिष्ठितम् ॥ ३१ ॥ इति श्रुत्वा स भूपालो
नत्वा तं म्लेच्छपूजकम् ॥ स्थापयामास तं तत्र म्लेच्छस्थाने हि दारुणे ॥ ३२ ॥ स्वराज्यं प्राप्तवान्राजा हयमेधमचीकरत् ॥ राज्यं
कृत्वा स षष्ट्यब्दं स्वर्गलोकमुपाययौ ॥ ३३ ॥ स्वर्गते नृपतौ तस्मिन्यथा चासीत्तथा शृणु ॥ ३४ ॥ इति श्रीभविष्ये महापुराणे प्रति
सर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये शालिवाहनकाले द्वितीयोऽध्यायः ॥ २ ॥ छ ॥ ॥ श्रीसूत उवाच ॥ ॥ शालिवा
हनवंशे च राजानो दश चाभवन् ॥ राज्यं पंचशताब्दं च कृत्वा लोकान्तरं ययुः ॥ १ ॥ मर्य्यादा क्रमतो लीना जाता भूमंडले तदा ॥ भूपति
र्दशमो यो वै भोजराज इति स्मृतः ॥ दृष्ट्वा प्रक्षीणमर्य्यादां बली दिग्विजयं ययौ ॥ २ ॥ सेनया दशसाहस्र्या कालिदासेन संयुतः ॥ तथान्यै
र्ब्राह्मणैः सार्द्धं सिंधुपारमुपाययौ ॥ ३ ॥ जित्वा गांधारजान्म्लेच्छान्काश्मीरान्नारवाञ्छठान् ॥ तेषां प्राप्य महाकोशं दंडयोग्यानकारयत् ॥४॥
एतस्मिन्नन्तरे म्लेच्छ आचार्य्येण समन्वितः ॥ महामद इति ख्यातः शिष्यशाखासमन्वितः ॥ ५ ॥ नृपश्चैव महादेवं मरुस्थलनिवासिनम् ॥
गंगाजलैश्च संस्नाप्य पंचगव्यसमन्वितैः ॥ चंदनादिभिरभ्यर्च्य तुष्टाव मनसा हरम् ॥ ६ ॥ ॥ भोजराज उवाच ॥ ॥ नमस्ते गिरिजानाथ
मरुस्थलनिवासिने ॥ त्रिपुरासुरनाशाय बहुमायाप्रवर्त्तिने ॥ ७ ॥ म्लेच्छैर्गुप्ताय शुद्धाय सच्चिदानन्दरूपिणे ॥ त्वं मां हि किंकरं विद्धि शरणार्थ
मुपागतम् ॥ ८ ॥ ॥ सूत उवाच ॥ ॥ इति श्रुत्वा स्तवं देवः शब्दमाह नृपाय तम् ॥ गंतव्यं भोजराजेन महाकालेश्वरस्थले ॥ ९ ॥
म्लेच्छैस्सुदूषिता भूमिर्वाहीका नाम विश्रुता ॥ आर्य्यधर्मो हि नैवात्र वाहीके देशदारुणे ॥ १० ॥ बभूवात्र महामायी योऽसौ दग्धो मया पुरा ॥
त्रिपुरो बलिदैत्येन प्रेषितः पुनरागतः ॥ ११ ॥ अयोनिः स वरो मत्तः प्राप्तवान्दैत्यवर्द्धनः ॥ महामद इति ख्यातः पैशाचकृतितत्परः ॥ १२ ॥

नागन्तव्यं त्वया भूप पैशाचे देशधूर्तके ॥ मत्प्रसादेन भूपाल तव शुद्धिः प्रजायते ॥ १३ ॥ इति श्रुत्वा नृपश्चैव स्वदेशान्पुनरागमत् ॥ महामदश्च तैः सार्द्धं सिंधुतीरमुपाययौ ॥ १४ ॥ उवाच भूपतिं प्रेम्णा मायामदविशारदः ॥ तव देवो महाराज मम दासत्वमागतः ॥ १५ ॥ ममोच्छिष्टं सभुंजीयाद्यथा तत्पश्य भो नृप ॥ इति श्रुत्वा तथा दृष्ट्वा परं विस्मयमागतः ॥ १६ ॥ म्लेच्छधर्मे मतिश्चासीत्तस्य भूपस्य दारुणे॥१७॥ तच्छ्रुत्वा कालिदासस्तु रुषा प्राह महामदम् ॥ माया ते निर्मिता धूर्त नृपमोहनहेतवे ॥ १८ ॥ हनिष्यामि दुराचारं वाहीकं पुरुषाधमम् ॥ इत्युक्त्वा स द्विजः श्रीमान्नवार्णजपतत्परः ॥ १९ ॥ जप्त्वा दशसहस्रं च तद्दशांशं जुहाव सः ॥ भस्म भूत्वा स मायावी म्लेच्छदेवत्वमागतः॥२०॥ भयभीतास्तु तच्छिष्या देशं वाहीकमाययुः ॥ गृहीत्वा स्वगुरोर्भस्म मदहीनत्वमागतम् ॥ २१ ॥ स्थापितं तैश्च भूमध्ये तत्रोषुर्मदतत्पराः ॥ मदहीनं पुरं जातं तेषां तीर्थं समं स्मृतम् ॥ २२ ॥ रात्रौ स देवरूपश्च बहुमायाविशारदः ॥ पैशाचं देहमास्थाय भोजराजं हि सोऽब्रवीत्॥२३॥ आर्य्यधर्म्मो हि ते राजन्सर्वधर्मोत्तमः स्मृतः ॥ ईशाज्ञया करिष्यामि पैशाचं धर्मदारुणम् ॥ २४ ॥ लिंगच्छेदी शिखाहीनः श्मश्रुधारी स दूषकः ॥ उच्चालापी सर्वभक्षी भविष्यति जनो मम ॥ २५ ॥ विना कौलं च पशवस्तेषां भक्ष्या मता मम ॥ मुसलेनैव संस्कारः कुशैरिव भविष्यति ॥ २६ ॥ तस्मान्मुसलवन्तो हि जातयो धर्मदूषकाः ॥ इति पैशाचधर्मश्च भविष्यति मया कृतः ॥ २७ ॥ इत्युक्त्वा प्रययौ देवः स राजा गेहमाययौ ॥ त्रिवर्णे स्थापिता वाणी सांस्कृती स्वर्गदायिनी ॥ २८ ॥ शूद्रेषु प्राकृती भाषा स्थापिता तेन धीमता ॥ पंचाशदब्दकालं तु राज्यं कृत्वा दिवं गतः ॥ २९ ॥ स्थापिता तेन मर्य्यादा सर्वदेवोपमानिनी ॥ आर्य्यावर्तः पुण्यभूमिर्मध्यं विंध्यहिमालयोः ॥ ३० ॥ आर्य्यवर्णाः स्थितास्तत्र विंध्यान्ते वर्णसंकराः ॥ नरा मुसलवन्तश्च स्थापिताः सिंधुपारजाः ॥ ३१ ॥ बर्बरे तुषदेशे च द्वीपे नानाविधे तथा ॥ ईशामसीहधर्म्मांश्च सुरै राज्ञैव संस्थिताः ॥ ३२ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडापरपर्याये कलियुगीयेतिहाससमुच्चये तृतीयोऽध्यायः ॥ ३ ॥ छ ॥

॥ सूत उवाच ॥

॥ स्वर्गते भोजराजे तु सप्तभूपास्तदन्वये ॥ जाताश्चाल्पायुषो मन्दास्त्रिशताब्दान्तरे मृताः ॥ १ ॥ बहुभूपवती भूमिस्तेषां राज्ये बभूव ह ॥ वीरसिंहश्च यो भूपः सप्तमः संप्रकीर्तितः ॥ २ ॥ तदन्वये त्रिभूपाश्च द्विशताब्दान्तरे मृताः ॥ गंगासिंहश्च यो भूपो दशमः स प्रकीर्तितः ॥ ३ ॥ कल्पक्षेत्रे च राज्यं स्वं कृतवान्धर्मतो नृपः ॥ अन्तर्वेद्यां कान्यकुब्जे जयचन्द्रो महीपतिः ॥ ४ ॥ इंद्रप्रस्थेनंगपालस्तोमरान्वयसंभवः ॥ अन्ये च बहवो भूपा बभूवुर्ग्रामराष्ट्रपाः ॥ ५ ॥ अग्निवंशस्य विस्तारो बभूव बलवत्तरः ॥ पूर्वे तु कपिल

स्थाने वाहीकान्ते तु पश्चिमे ॥ ६ ॥ उत्तरे चीनदेशान्ते सेतुबंधे तु दक्षिणे ॥ षष्टिलक्षाश्च भूपाला ग्रामपा बलवत्तराः ॥ ७ ॥ अग्निहोत्रस्य
कर्तारो गोब्राह्मणहितैषिणः ॥ बभूवुर्द्वापरसमा धर्मकृत्यविशारदाः ॥८॥ द्वापराख्यसमः कालः सर्वत्र परिवर्तते ॥ गेहेगेहे स्थितं द्रव्यं धर्मश्चैव जनेजने
॥९॥ ग्रामेग्रामे स्थितो देवो देशेदेशे स्थितो मखः ॥ आर्यधर्मकरा म्लेच्छा बभूवुः सर्वतोमुखाः ॥१०॥ इति दृष्ट्वा कलिर्घोरो म्लेच्छया सह भीरुकः ॥
नीलाद्रौ प्राप्य मतिमान्हरिं शरणमाययौ ॥११॥ द्वादशाब्दमिते काले ध्यानयोगपरोऽभवत् ॥ ध्यानेन सच्चिदानंदं दृष्ट्वा कृष्णं सनातनम् ॥१२॥
तुष्टाव मनसा तत्र राधया सहितं हरिम् ॥ पुराणमजरं नित्यं वृंदावननिवासिनम् ॥१३॥ ॥ कलिरुवाच ॥ ॥ साष्टांगं दंडवत्स्वामिन्गृहाण मम
चेश्वर ॥ पाहि मां शरणं प्राप्तं चरणे ते कृपानिधे ॥ १४ ॥ सर्वपापहरस्त्वं वै सर्वकालकरो हरिः ॥ भवान्गौरः सत्ययुगे त्रेतायां रक्तरूपकः ॥
॥ १५ ॥ द्वापरे पीतरूपश्च कृष्णत्वं मम दिष्टके ॥ मत्पुत्राश्च स्मृता म्लेच्छा आर्य्यधर्मत्वमागताः ॥ १६ ॥ चतुर्गेहं च मे स्वामिन्द्यूतं मद्यं सुवर्ण
कम् ॥ स्त्री हास्यं चाग्निवंश्यैश्च क्षत्रियैश्च विनाशितम् ॥ १७ ॥ त्यक्तदेहस्त्यक्तकुलस्त्यक्तराष्ट्रो जनार्दन ॥ त्वत्पादांबुजमाधाय स्थितोऽहं शरणं
त्वयि ॥१८॥ इति श्रुत्वा स भगवान्कृष्णः प्राह विहस्य तम् ॥ भो कले तव रक्षार्थं जनिष्येहं महावतीम् ॥१९॥ ममांशो भूमिमासाद्य क्षयिष्यति
महाबलान् ॥ म्लेच्छवंशस्य भूपालान्स्थापयिष्यति भूतले ॥ २० ॥ इत्युक्त्वा भगवान्साक्षात्तत्रैवान्तरधीयत ॥ कलिस्तु म्लेच्छया सार्धं परमा
नंदमाप्तवान् ॥ २१ ॥ एतस्मिन्नन्तरे विप्र यथा जातं शृणुष्व तत् ॥ आभीरी वाक्सरे ग्रामे व्रतपा नाम विश्रुता ॥ २२ ॥ नवदुर्गाव्रतं श्रेष्ठं
नववर्षं चकार ह ॥ प्रसन्ना चंडिका प्राह परं वरय शोभने ॥ २३ ॥ साह तां यदि मे मातर्वरो देयस्त्वयेश्वरि ॥ रामकृष्णसमौ बालौ भवेयातां
ममान्वये ॥ २४ ॥ तथेत्युक्त्वा तु सा देवी तत्रैवान्तरधीयत ॥ वसुमान्नाम नृपतिस्तस्या रूपेण मोहितः ॥ २५ ॥ उद्वाह्य धर्मतो भूपः स्वगेहे
तामवासयत् ॥ तस्यां जातौ नृपात्पुत्रौ देशराजस्तु तद्वरः ॥ २६ ॥ आवार्यौ वत्सराजश्च शतहस्तिसमो बले ॥ जित्वा तौ मागधान्देशान्राज्य
वंतौ बभूवतुः ॥ २७ ॥ शतयत्तः स्मृतो म्लेच्छः शूरो वनरसाधिपः ॥ तत्पुत्रो भीमसेनांशो वीरणोभूच्छिवाज्ञया ॥ २८ ॥ तालवृक्षप्रमाणेन
चोर्ध्ववेगो हि तस्य वै ॥ तालनो नाम विख्यातः शतयत्तेन वै कृतः ॥ २९ ॥ ताभ्यां नृपाभ्यां तद्युद्धमभवल्लोमहर्षणम् ॥ युद्धेन हीनतां प्राप्त
स्तालनो बलवत्तरः ॥ ३० ॥ तदा मैत्री कृता ताभ्यां तालनेन समन्विता ॥ जयचंद्रपरीक्षार्थे त्रयः शूराः समाययुः ॥ ३१ ॥ इति श्रीभ
विष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडापरपर्याये कलियुगीयेतिहाससमुच्चये चतुर्थोऽध्यायः ॥ ४ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ इंद्रप्रस्थेऽ

नंगपालोनपत्यश्च महीपतिः ॥ पुत्रार्थं कारयामास शैवं यज्ञं विधानतः ॥ १ ॥ कन्यके च तदा जाते शिवभागप्रसादतः ॥ चंद्रकांतिश्च ज्येष्ठा वै
द्वितीया कीर्तिमालिनी ॥ २ ॥ कान्यकुब्जाधिपायैव चंद्रकान्ति पितादद्त् ॥ देवपालाय शुद्धाय राष्ट्रपालान्वयाय च ॥ ३ ॥ सोमेश्वराय
भूपाय चपहानिकुलाय तु ॥ अजमेराधिपायैव तथा वै कीर्तिमालिनीम् ॥ ४ ॥ जयशर्मा द्विजः कश्चित्समाधिस्थो हिमालये ॥ दृष्ट्वा भूपोत्सवं
रम्यं राज्यार्थे स्वमनोऽदधत् ॥ ५ ॥ त्यक्त्वा देहं स शुद्धात्मा चंद्रकांत्याः सुतोभवत् ॥ जयचंद्र इति ख्यातो बाहुशाली जितेन्द्रियः ॥ रत्न
भानुश्च संजज्ञे शूरस्तस्यानुजो बली ॥ ६ ॥ स जित्वा गौडवंगादीन्मरुदेशान्मदोत्कटान् ॥ दंड्यान्कृत्वा गृहं प्राप्य भ्रात्राज्ञातत्परोऽभवत् ॥७॥
गंगासिंहस्य भगिनी नाम्ना वीरवती शुभा ॥ रत्नभानोश्च महिषी बभूव वरवर्णिनी ॥ ८ ॥ नकुलांशस्तदा भूमौ तस्यां जातः शिवाज्ञया ॥
लक्षणो नाम बलवान्खड्गयुद्धविशारदः ॥ स सप्ताब्दान्तरे प्राप्ते पितुस्तुल्यो बभूव ह ॥ ९ ॥ त्रयश्च कीर्तिमालिन्यां पुत्रा जाता मदोत्कटाः ॥
धुंधकारश्च प्रथमस्ततः कृष्णकुमारकः ॥ पृथिवीराज एवासौ ततोनुज इति स्मृतः ॥ १० ॥ द्वादशाब्दवयः प्राप्तः सिंहखेलस्ततोऽभवत् ॥ श्रुत्वा
चानंगपालश्च तस्मै राज्यं स्वयं ददौ ॥ गत्वा हिमगिरिं रम्यं योगध्यानपरोभवत् ॥ ११ ॥ मथुरायां धुंधकारोऽजमेरे च ततोनुजः ॥ राजा बभूव
नीतिज्ञस्तौ सुतौ पितुराज्ञया ॥ १२ ॥ प्रद्योतश्चैव विद्योतः क्षत्रियौ चंद्रवंशजौ ॥ मंत्रिणौ तस्य भूपस्य बलवंतौ मदोत्कटौ ॥ १३ ॥ प्रद्योतत
नयो जातो नाम्ना परिमलो बली ॥ लक्षसेनाधिपः सो हि तेन राज्ञैव संस्कृतः ॥ १४ ॥ विद्योताद्भीष्मसिंहश्च गजसेनाधिपोऽभवत् ॥ स्वर्गतेऽनं
गपाले तु भूमिराजो महीपतिः ॥ १५ ॥ दृष्ट्वा तान्विप्रियान्सर्वान्निजराज्यान्निराकरोत् ॥ प्रद्योताद्याश्च चत्वारः स्वशूरैर्द्विशतैर्युताः ॥ १६ ॥
कान्यकुब्जपुरं प्राप्य जयचंद्रमवर्णयन् ॥ जयचंद्र महीपाल त्वन्मातृष्वसृजो नृपः ॥ १७ ॥ मातामहस्य ते राज्यं प्राप्तवान्निर्भयो बली ॥
न्यायेन कथितोऽस्माभिरर्द्धराज्यं हि ते स्मृतम् ॥ १८ ॥ सर्वराज्यं कथं भुंक्षे श्रुत्वा तेन निराकृताः ॥ भवन्तं शरणं प्राप्ता यथायोग्यं तथा
कुरु ॥ १९ ॥ इति श्रुत्वा महीपालो जयचंद्र उवाच तान् ॥ अश्वसैन्ये मदीये चाधिकारी ते सुतो भवेत् ॥ २० ॥ नाम्ना परिमलः शूरस्त्वं
मन्मंत्री भवाधुना ॥ विद्योतश्च तथा मंत्री गजसैन्ये हि भीष्मकः ॥ २१ ॥ वृत्त्यर्थे च मया वो वै पुरी दत्ता महावती ॥ महीपतेश्च भूपस्य
नगरी सा प्रियंकरी॥२२॥इति श्रुत्वा तु ते सर्वे तथा मत्वा मुमोदिरे ॥ महीपतिस्तु बलवान्दुःखात्संत्यज्य तां पुरीम् ॥२३॥ कृत्वौर्वीयां पुरीमन्यां
तत्र वासमकारयत् ॥ अगमा मलना चैव भगिन्यौ तस्य चोत्तमे ॥ २४ ॥ अगमा भूमिराजाय चान्या परिमलाय सा ॥ दत्ता भ्रात्रा विधानेन

परमानंदमापतुः ॥ २५ ॥ विवाहांते च भूराजा दुर्गमन्यमकारयत् ॥ कृत्वा च नगरीं रम्यां चतुर्वर्णनिवासिनीम् ॥ २६ ॥ देहली सुमूहूर्तेन दुर्ग
द्वारे सुरोपिता ॥ गता सा योजनान्ते वै वृद्धिरूपा सुकालतः ॥ २७ ॥ विस्मितः स नृपो भूत्वा देहली नाम चाकरोत् ॥ देहलीग्राम इति च
प्रसिद्धोऽभून्नृपाज्ञया ॥ २८ ॥ त्रिवर्षांते च भो विप्रा जयचन्द्रो महीपतिः ॥ लक्षषोडशसैन्याढ्यस्तत्र पत्रमचोदयत् ॥ २९ ॥ किमर्थं पृथिवी
राज मद्दायं मे न दत्तवान् ॥ मातामहस्य वै दायं चार्द्धं मे च समर्पय ॥ ३० ॥ नो चेन्मच्छस्त्रकठिनैः क्षयं यास्यंति सैनिकाः ॥ इति ज्ञात्वा
महीराजो विंशल्लक्षाधिपो बली ॥ ३१ ॥ दूतं वै प्रेषयामास राजराजो मदोत्कटः ॥ जयचंद्र महीपाल सावधानं शृणुष्व तत् ॥ ३२ ॥ यदा निरा
कृता धूर्ता मया ते चंद्रवंशिनः ॥ ततः प्रभृति सेनाङ्गं विंशल्लक्षं समाहृतम्॥३३॥ त्वया षोडशलक्षं च युद्धसैन्यं समाहृतम् ॥ सर्वे वै भारते भूपा
दंडयोग्याश्च मे सदा ॥३४॥ भवान्न दंड्यो बलवान्करं मे दातुमर्हति ॥ नो चेन्मत्कठिनैर्बाणैः क्षयं यास्यंति सैनिकाः ॥३५॥ इति ज्ञात्वा तयोर्घोरं
वैरं चासीन्महीतले ॥ भूमिराजश्च बलवाञ्जयचन्द्रभयार्दितः ॥३६॥ जयचंद्रश्च बलवान्पृथिवीराजभीरुकः ॥ जयचन्द्रश्चार्यदेशमर्द्धराष्ट्रमकल्पयत्॥
॥३७॥ पृथिवीराज एवासौ तथार्द्धं राष्ट्रमानयत् ॥ एवं जातं तयोर्वैरमग्निवंशप्रणाशनम् ॥३८॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युग
खंडापरपर्याये कलियुगीयेतिहाससमुच्चये पंचमोऽध्यायः ॥५॥ ॥छ॥ ॥ सूत उवाच ॥ ॥ एकदा रत्नभानुर्हि महीराजेन पालिताम् ॥ दिशं
याम्यां स वै जित्वा तेषां कोशानुपाहरत् ॥१॥ महीराजस्तु तच्छ्रुत्वा परं विस्मयमागतः ॥ रत्नभानोश्च तिलको बभूव बहुविस्तरः ॥२॥ तिलका
नाम विख्याता या तु वीरवती शुभा ॥ श्रेष्ठा द्वादशराज्ञीनां जननी लक्षणस्य वै ॥ ३ ॥ जयचंद्रस्य भूपस्य योषितः षोडशाभवन् ॥ तासां न
तनयो ह्यासीत्पूर्वकर्मविपाकतः ॥ ४ ॥ गौडभूपस्य दुहिता नाम्ना दिव्यविभावरी ॥ जयचंद्रस्य महिषी तद्दासी सुरभानवी ॥ ५ ॥ रूपयौवन
संयुक्ता रतिकेलिविशारदा ॥ दृष्ट्वा तां स नृपः कामी बुभुजे स्मरपीडितः ॥६॥ तस्यां जाता सुता देवी नाम्ना संयोगिनी शुभा ॥ द्वादशाब्दवयः
प्राप्ता सा बभूव वरांगना ॥ ७ ॥ तस्याः स्वयंवरे राजाह्वयद्भूपान्महाशुभान् ॥ भूमिराजस्तु बलवाञ्छ्रुत्वा तद्रूपमुत्तमम् ॥ ८ ॥ विवाहार्थे मन
श्चासीच्चंद्रभट्टमचोदयत् ॥ मंत्रिप्रवर भो मित्र चंद्रभट्ट मम प्रिय ॥ ९ ॥ कान्यकुब्जपुरीं प्राप्य मन्मूर्तिं स्वर्णनिर्मिताम् ॥ स्थापय त्वं सभामध्ये
यद्वृत्तांतं तु मे वद ॥ १० ॥ इति श्रुत्वा चंद्रभट्टो भवानीभक्तितत्परः ॥ गत्वा तत्र भृगुश्रेष्ठ यथा प्रोक्तस्तथाकरोत् ॥ ११ ॥ स्वयंवरे च भूपाश्च
नानादेश्याः समागताः ॥ त्यक्त्वा संयोगिनी तान्वै नृपमूर्तिविमोहिता ॥ १२ ॥ पितरं प्राह कामाक्षी यस्य मूर्तिरियं नृप ॥ भविष्यति स मे

भर्ता सर्वलक्षणलक्षितः ॥ १३ ॥ जयचंद्रस्तु तच्छ्रुत्वा चंद्रभट्टमुवाच तम् ॥ यदि ते भूपतिश्चैव सर्वसैन्यसमन्वितः ॥ १४ ॥ सञ्जयेद्योगिनीमेतां तर्हि मेऽतिप्रियो भवेत् ॥ चंद्रभट्टस्तु तच्छ्रुत्वा तत्तु सर्वमवर्णयत् ॥ १५ ॥ पृथिवीराज एवासौ श्रुत्वा सैन्यमचोदयत् ॥ एकलक्षा गजास्तस्य सप्तलक्षास्तुरंगमाः ॥ १६ ॥ रथाः पंचसहस्राश्च धनुर्बाणविशारदाः ॥ लक्षाः पदातयो ज्ञेया द्वादशैव महाबलाः ॥ १७ ॥ राजानस्त्रिशतान्येव महीराजपदानुगाः ॥ सार्द्धं द्वाभ्यां च बन्धुभ्यां कान्यकुब्जे नृपोऽगमत् ॥ १८ ॥ धुन्धुकारश्च तद्बन्धुर्गजानीकपतिस्सदा ॥ हयानीकपतिः कृष्णकुमारो बलवत्तरः ॥ १९ ॥ पदातीनां नृपतयः पतयस्तत्र चाभवन् ॥ महान्कोलाहलो जातः स्थलीं शून्यामकारयन् ॥ २० ॥ विंशत्कोशप्रमाणेन स्थितं तस्य महाबलम् ॥ जयचंद्रस्तु संज्ञाय महीराजस्य चागमम् ॥ २१ ॥ स्वसैन्यं कल्पयामास लक्षषोडशसंमितम् ॥ एकलक्षा गजास्तस्य सप्तलक्षाः पदातयः ॥ २२ ॥ वाजिनश्चाष्टलक्षाश्च सर्वयुद्धविशारदाः ॥ द्विशतान्येव राजानः प्राप्तास्तत्र समागमे ॥ २३ ॥ आगस्कृतं महीराजं मत्वा ते शुक्लवंशिनः ॥ युद्धार्थिनः स्थितास्तत्र पुरमागस्कृतं ह्यभूत् ॥ २४ ॥ ईशनद्याः परे कूले तद्दोला स्थापिता तदा ॥ नाना वाद्यानि रम्याणि तत्र चक्रुर्महारवम् ॥ २५ ॥ रत्नभानुर्गजानीके रूपानीके हि लक्षणः ॥ ताभ्यां सेनापतिभ्यां तौ संगुप्तौ बलवत्तरौ ॥ २६ ॥ प्रद्योतश्चैव विद्योतो रत्नभानुं ररक्षतुः ॥ भीष्मः परिमलश्चैव लक्षणं चंद्रवंशजः ॥ २७ ॥ भूपाः पदातिसैन्ये च संस्थिता मदविह्वलाः ॥ तयोश्चासीन्महद्युद्धं दारुणं सैन्यसंक्षयम् ॥ २८ ॥ हया हयैर्मृता जाता गजाश्चैव गजैस्तथा ॥ पदातयः पदातैश्च मृताश्चान्ये क्रमाद्रणे ॥ २९ ॥ भूपैश्च रक्षिताः सर्वे निर्भया रणमाययुः ॥ यावत्सूर्यः स्थितो व्योम्नि तावद्युद्धमवर्तत ॥ ३० ॥ एवं पंचदिनं जातं युद्धं वीरजनक्षयम् ॥ गजा दशसहस्राणि हया लक्षाणि संक्षिताः ॥ ३१ ॥ पंचलक्षं महीभर्तुर्हतास्तत्र पदातयः ॥ राजानो द्वे शते तत्र रथाश्च त्रिशतं तथा ॥ ३२ ॥ कान्यकुब्जाधिपस्यैव गजा नवसहस्रकाः ॥ सहस्रैकं रथा ज्ञेयास्त्रिलक्षं च पदातयः ॥ ३३ ॥ एकलक्षं हयास्तत्र मृताः स्वर्गपुरं ययुः ॥ षष्ठाहे समनुप्राप्ते पृथिवीराज एव सः ॥ ३४ ॥ दुःखितो मनसा देवं रुद्रं तुष्टाव भक्तिमान् ॥ संतुष्टस्तु महादेवो मोहयामास तद्बलम् ॥ ३५ ॥ प्रसन्नस्तु महीराजो गतः संयोगिनीं प्रति ॥ दृष्ट्वा तत्सुन्दरं रूपं मुमोह वसुधाधिपः ॥ ३६ ॥ संयोगिनी नृपं दृष्ट्वा मूर्च्छिता चाभवत्क्षणात् ॥ एतस्मिन्नंतरे राजा तद्दोलामनयद्बलात् ॥ ३७ ॥ जगाम देहलीं भूपः सर्वसैन्यसमन्वितः ॥ योजनान्ते गते तस्मिन्बोधितास्ते मदोद्भटाः ॥ ३८ ॥ दृष्ट्वा नैव तदा दोलां प्रजग्मुर्वेगवत्तराः ॥ श्रुत्वा कोलाहलं तेषां महीराजो नृपोत्तमः ॥ ३९ ॥ अर्द्धसैन्यं च संस्थाप्य स्वयं गेहमुपागमत् ॥ उभौ तद्द्रा

तरौ वीरौ चार्द्धसैन्यसमन्वितौ ॥ ४० ॥ सूकरक्षेत्रमासाद्य युद्धाय समुपस्थितौ ॥ एतस्मिन्नन्तरे सर्वे प्रद्योतादिमहाबलाः ॥४१॥ स्वसैन्यैः सह संप्राप्य महद्युद्धमकारयन् ॥ हया हयैश्च संजग्मुर्गजा अथ गजैः सह ॥ ४२ ॥ संकुलश्च महानासीद्दारुणो लोमहर्षणः ॥ दिनान्ते संक्षयं यातं तयोश्चैव महद्बलम् ॥ ४३ ॥ भयभीताः परे तत्र ज्ञात्वा रात्रिं तमोवृताम् ॥ प्रदुद्रुवुर्भयाद्वीरा हतशेषास्तु देहलीम् ॥ ४४ ॥ प्रद्योताद्याश्च ते वीरा देहलीं प्रति संययुः ॥ पुनस्तयोर्महद्युद्धं ह्यभवल्लोमहर्षणम् ॥ ४५ ॥ धुंधुकारश्च प्रद्योतं हृदि बाणैरताडयत् ॥ त्रिभिश्च विषनिर्धूतैर्मूर्छितः स ममार च ॥ ४६ ॥ भ्रातरं निहतं दृष्ट्वा विद्योतश्च महाबलः ॥ आजगाम गजारूढो धुंधुकारमताडयत् ॥ ४७ ॥ त्रिभिश्च तोमरैः सोऽपि मूर्छितो भूमिमागमत् ॥ मूर्छितं भ्रातरं दृष्ट्वा धुंधुकारं महाबलम् ॥ ४८ ॥ तदा कृष्णकुमारोऽसौ गजस्थस्त्वरितो ययौ ॥ रूपाविष्टश्च तं वीरं भल्लेनैवमताडयत् ॥ ॥ ४९ ॥ भल्लेन तेन संभिन्नो मृतः स्वर्गपुरं ययौ ॥ विद्योते निहते तस्मिन्सर्वसैन्यचमूपतौ ॥ ५० ॥ रत्नाभानुर्महावीरोऽयुध्यत्तेन समन्वितः ॥ एतस्मिन्नंतरे राजा सहस्रगजसंयुतः ॥ ५१ ॥ लक्षणं सहितं ताभ्यां क्रुद्धं तं समयुध्यत ॥ शिवदत्तवरो राजा भीष्मं परिमलं रुषा ॥ ॥ ५२ ॥ रुद्रास्त्रैर्मोहयामास लक्षणं बलवत्तरम ॥ मूर्छितांस्तान्समालोक्य रत्नभानुः शरैर्निजैः ॥ ५३ ॥ धुंधुकारं महीराजं वैष्णवैः सममोहयन् ॥ कृष्णको रत्नभानुश्च युयुधाते परस्परम् ॥ ५४ ॥ उभौ समबलौ वीरौ गजपृष्ठस्थितौ रणे ॥ अन्योन्यनिहतौ नागौ खड्गहस्तौ महीतले ॥ ५५ ॥ युयुधाते बहून्मार्गान्कृतवंतौ सुदुर्जयौ ॥ प्रहरान्तं रणं कृत्वा मरणायोपजग्मतुः ॥ ५६ ॥ हते तस्मिन्महावीर्ये कान्यकुब्जा भयातुराः ॥ मूर्छितांस्त्रीन्समादाय पंचलक्षबलैर्युताः ॥ ५७ ॥ रणं त्यक्त्वा गृहं जग्मुर्नृपशोकपरायणाः ॥ रत्नभानौ च निहते हतोत्साहाश्च भूमिपाः ॥ ५८ ॥ स्वंस्वं निवेशनं जग्मुर्महीराजभयातुराः ॥ देवानाराधयामासुर्यथेष्टं ते गृहे गृहे ॥ ५९ ॥ महीराजस्तु बलवान्सप्तलक्षबलान्वितः ॥ धुंधुकारेण सहितो बंधुकृत्योर्ध्वमाचरत् ॥ ६० ॥ तथा भीष्मः परिमलो लक्षणः पितरं स्वकम् ॥ गंगाकूले समागम्य चोर्ध्वदैहिकमाचरन् ॥ ६१ ॥ भूमिराजस्य विजयो जयचंदयशो रणे ॥ प्रसिद्धमभवद्भूमौ गेहेगेहे जनेजने ॥६२॥ जयचंद्रः कान्यकुब्जे देहल्यां पृथिवीपतिः ॥ उत्सवं कारयित्वा तु परमानन्दमाययौ ॥ ६३ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये षष्ठोऽध्यायः ॥ ६ ॥ छ ॥ ॥ सूत उवाच ॥ भीष्मः सिंहस्थिते गंगाकूले शक्रप्रपूजकः ॥ शक्रं सूर्यमयं ज्ञात्वा तपसा समतोषयत् ॥ १ ॥ मासांते भगवानिंद्रो ज्ञात्वा तद्भक्तिमुत्तमाम् ॥ वरं वरय च प्राह श्रुत्वा शूरोऽब्रवीदिदम् ॥ २ ॥ देहि मे वडवां दिव्यां यदि तुष्टो भवान्प्रभुः ॥ इति

श्रुत्वा तदा तस्मै वडवां हरिणीं शुभाम् ॥ ३ ॥ ददौ स भगवानिंद्रस्तत्रैवान्तर्हितोभवत् ॥ ४ ॥ तस्मिन्काले परिमलः पितृशोकपरायणः ॥
पार्थिवैः पूजयामास महादेवमुमापतिम् ॥ परीक्षार्थे शिवः साक्षात्सर्परोगेण तं ग्रसत् ॥ ५ ॥ व्यतीते पंचमे मासे नृपः शक्तिविवर्जितः ॥
न तत्याज महापूजां महाक्लेशसमन्वितः ॥ ६ ॥ मरणाय ययौ काशीं स्वपत्न्या सहितो नृपः ॥ उवास वटमूलांते रात्रौ रोगप्रपीडितः ॥ ७ ॥
एतस्मिन्नन्तरे कश्चित्पन्नगो मूलसंस्थितः ॥ शब्दं चकार मधुरं श्रुत्वा रुद्राहिराययौ ॥ ८ ॥ रुद्राहिं पन्नगः प्राह भवान्निर्दय मन्दधीः ॥
शिवभक्तं नृपमिमं पीडयेत्प्रत्यहं खलः ॥ ९ ॥ मूर्खोऽयं भूपतिः साक्षादारनालं पिबेन्नहि ॥ इति श्रुत्वा स रुद्राहिराह रे पन्नगाधम ॥ १० ॥
राज्ञो देहे परं हर्षं प्रत्यहं प्राप्तवानहम् ॥ स्वगेहं दुःखतस्त्याज्यं कथं त्याज्यं मया शठ ॥ ११ ॥ मूर्खोंत्र भूपतियों वै तैलोष्णं यन्न दत्तवान् ॥
इत्युक्त्वान्तर्गतो देहे श्रुत्वा सा मलना सती ॥ १२ ॥ चकार पन्नगोक्तं तद्गतरोगो नृपोऽभवत् ॥ तैलोष्णैर्बिलमापूर्य चखान च
सती स्वयम् ॥ १३ ॥ ततो जातं स्वयं लिंगमंगुष्ठाभं सनातनम् ॥ ज्योतीरूपं चिदानंदं सर्वलक्ष्मसमन्वितम् ॥ १४ ॥ निशीथे तम उद्भूते
दिक्षु सूर्यत्वमागतम् ॥ दृष्ट्वा स विस्मितो राजा पूजयामास शंकरम् ॥ १५ ॥ महिम्नस्तवपाठैश्च तुष्टाव गिरिजापतिम् ॥ तदा प्रसन्नो
भगवान्वरं ब्रूहि तमब्रवीत् ॥ १६ ॥ श्रुत्वाह नृपतिर्देवं यदि तुष्टो महेश्वर ॥ श्रीपतिर्मे गृहं प्राप्य वसेन्मत्प्रियकारकः ॥ १७ ॥
तथेत्युक्त्वा महादेवो लिंगरूपत्वमागतः ॥ प्रत्यहं भारमेकं च सुवर्णं सुषुवे तनोः ॥ १८ ॥ तदा मलस्तु संतुष्टः प्राप्तो गेहं महावतीम् ॥
भीष्मसिंहेन सहितः परमानंदमाययौ ॥ १९ ॥ ततःप्रभृति वर्षांते जयचंद्रपुरीं ययौ ॥ दृष्ट्वा परिमलं राजा कृतकृत्यत्वमागतः ॥ २० ॥
दिष्ट्या ते संक्षितो रोगो दिष्ट्या ते दर्शितं मुखम् ॥ भवान्निजपुरीं प्राप्य सुखी भवतु मा चिरम् ॥ २१ ॥ यदा मे विघ्न आभूयात्तदा
त्वं मां समाचर ॥ इति श्रुत्वा परिमलो गत्वा स्थानमवासयत् ॥ २२ ॥ तदा तु लक्षणो वीरो भगवन्तमुषापतिम् ॥ जगन्नाथमुपागम्य
समभ्यर्च्चापरोऽभवत् ॥ २३ ॥ पक्षमात्रांतरे विष्णुर्जगन्नाथ उषापतिः ॥ वरं ब्रूहि वचश्चेति लक्षणं प्राह हर्षतः ॥ २४ ॥ इत्युक्तः
स तु तं देवं नत्वोवाच विनम्रधीः ॥ देहि मे वाहनं दिव्यं सर्वशत्रुविनाशनम् ॥ २५ ॥ इति श्रुत्वा जगन्नाथः शक्तिमैरावताद्गजात् ॥ समुत्पाद्य
ददौ तस्मै दिव्यामैरावतीं मुदा ॥ २६ ॥ आरुह्यैरावतीं राजा लक्षणो गेहमाययौ ॥ स वै परिमलो राजा जगाम च महावतीम् ॥ २७ ॥ एत

---

१ अडभाव आर्षः ।

स्मिन्नंतरे वीरास्तालनाद्या मदोत्कटाः ॥ महावतीं पुरीं प्राप्य ददृशुस्तं महीपतिम् ॥ २८ ॥ तेन सार्द्धं च महतीं प्रीतिं कृत्वा न्यवासयन् ॥
मासान्ते च पुनस्ते वै राजानो विनयान्विताः ॥ २९ ॥ ऊचुस्तं शृणु भूपाल वयं गच्छामहे पुरीः ॥ तदा राजापि तान्प्राह सर्वान्क्षितिपती
नथ ॥ दत्त्वाधिकारं पुत्रेभ्यस्तदाऽऽयास्यामि वोऽन्तिकम् ॥ ३० ॥ तथेत्युक्तास्तु ते राज्ञा स्वगेहं पुनरराययुः ॥ सानुजो देशराजस्तु द्विजेभ्यः
स्वपुरं ददौ ॥ ३१ ॥ पुत्रेभ्यस्तालनो वीरो ददौ वाराणसीं पुरीम् ॥ अलिकोह्लामतिः कालः पत्रः पुष्पोदरी वरी ॥ ३२ ॥ करीनरी सुललित
स्तेषां नामानि वै क्रमात् ॥ द्वौ द्वौ पुत्रौ स्मृतौ तेषां पितुस्तुल्यपराक्रमौ ॥ ३३ ॥ स वै पुत्राज्ञया शूरस्तालनो राक्षसप्रियः ॥ यातुधानमयं
देवं तुष्टाव म्लेच्छपूजनैः ॥ ३४ ॥ तथा वसुमतः पुत्रौ भूपती देशवत्सजौ ॥ शक्रं सूर्य्यं समाराध्य कृतकृत्यौ बभूवतुः ॥ ३५ ॥ सिंहिनीं नाम
वडवां या तु दत्ता भयानका ॥ आरुह्य बलवाञ्छूरो गमनाय मनो दधौ ॥ ३६ ॥ पंचशब्दं महानागमिन्द्रदत्तं मनोरमम् ॥ देशराजस्तमारुह्य
गमनाय मनो दधे ॥ ३७ ॥ हयं पपीहकं नाम सूर्यदत्तं नरस्वरम् ॥ वत्सराजस्तमारुह्य गमनाय मनो दधे ॥ ३८ ॥ त्रयः शूराः समागम्य
नगरीं ते महावतीम् ॥ ऊषुस्तत्र महात्मानो बहुमानेन सत्कृताः ॥ ३९ ॥ सेनाषष्टिसहस्रं तत्तेषां स्वामी स तालनः ॥ मंत्रिणौ भ्रातरौ तौ च
नृपतेश्चन्द्रवंशिनः ॥ ४० ॥ तैर्वीरै रक्षितो राजा कृतकृत्यत्वमागतः ॥ ४१ ॥ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापर
पर्याये कलियुगीयेतिहाससमुच्चये सप्तमोऽध्यायः ॥ ७ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ जम्बुको नाम भूपालो महीराजो भयातुरः ॥ कालि
येन युतः प्राप्तो नर्मदायास्तटे शुभे ॥ १ ॥ पार्थिवैः पूजयामास देवदेवं पिनाकिनम् ॥ षण्मासान्ते महादेवो जम्बुकं प्राह भूपतिम् ॥ २ ॥ वरं
वरय तेऽभीष्टं भूप आह कृतांजलिः ॥ अजितत्वं नृपैः सर्वैर्देहि मे करुणानिधे ॥ ३ ॥ तथेत्युक्त्वा महादेवस्तत्रैवान्तर्हितोभवत् ॥ कालियस्त
त्सुतो लब्ध्वा वीरो माहेश्वरं वरम् ॥ ४ ॥ मोहनं सर्वसैन्यानां पितुरंतिकमाययौ ॥ पितरं प्राह नम्रात्मा देह्याज्ञां तात मत्प्रियाम् ॥ ५ ॥
गमिष्यामि बलैः सार्द्धं गंगां शुद्धजलां शुभाम् ॥ तथेत्युक्त्वा पिता तस्मै ययौ तु स्वं निवेशनम् ॥ ६ ॥ भगिनीं प्राह बलवान्विजयैषिणि
शोभने ॥ किमिच्छसि शुभं वस्तु तदाज्ञां देहि मा चिरम् ॥ ७ ॥ साह ग्रैवेयकं हारं मणिमुक्ताविभूषितम् ॥ मत्प्रियं देहि मे वीर तथेत्युक्त्वा
ययौ गृहात् ॥ ८ ॥ कालियो लक्षतुरगैः संयुतस्त्वरितोऽगमत् ॥ प्राप्य गंगां सागरगां कृत्वा स्नानं विधानतः ॥ ९ ॥ दत्त्वा दानानि विप्रेभ्यो
जयचन्द्रपुरीं ययौ ॥ निर्धनः समभूद्राजा बाहुशाली महाबलः ॥ १० ॥ कान्यकुब्जे महाहारो न प्राप्तो बहुमूल्यकः ॥ तदोर्वीयाधिपेनैव

महीशेन प्रबोधितः ॥११॥ ययौ महावतीं रम्यां शिवदत्तवरो बली ॥ रुरोध नगरीं सर्वां श्रुत्वा राजा भयातुरः ॥१२॥ रुद्रं कपर्दिनं शंभुं शरण्यं शरणं ययौ ॥ शिवाज्ञया नृपो धीमान्बलैः षष्टिसहस्रकैः ॥ १३ ॥ सार्द्धं पुराद्बहिर्यातस्त्रिभिः शूरैः सुरक्षितः ॥ तस्य नागाः सहस्रं च देशराजश्च तत्पतिः ॥ १४ ॥ हयाः षोडशसाहस्रा वत्सराजस्तु तत्पतिः ॥ शेषाः पदातयस्तस्य तालनेनैव रक्षिताः ॥ १५ ॥ अभवत्तुमुलं युद्धं तेषां वीरवरक्षयम् ॥ अहोरात्रप्रमाणेन महद्घोरमवर्तत ॥ १६ ॥ ते हत्वा शात्रवीं सेनां चक्रुर्जयरवान्मुहुः ॥ भयार्ता नार्मदेयाश्च माहिष्मति[1]निवासिनः ॥ १७ ॥ दुद्रुवुः सर्वतो विप्र दृष्ट्वा तान्कालियो नृपः ॥ आश्वास्य प्रययौ युद्धमर्द्धसैन्यसमन्वितः ॥ १८ ॥ हृदि कृत्वा महादेवं मोहनं बाणमादधत् ॥ सिद्धमन्त्रप्रभावेण मोहितास्ते बभूविरे ॥ १९ ॥ शेषास्ते शत्रवः सर्वे रिपुघाताय संययुः ॥ अलसांस्तान्कपालेषु जघ्नुस्तेः भयवर्जिताः ॥ २० ॥ भीष्मसिंहस्तथा दृष्ट्वा बोधयामास सैनिकान् ॥ सूर्यदत्तेन बाणेन संज्ञाख्यानेन तत्र वै ॥ ॥ २१ ॥ भैरवाख्येन भल्लेन शत्रुदेहमताडयत् ॥ मूर्च्छितः सोऽपतद्वीरो गजपृष्ठे शरार्दितः ॥ २२ ॥ तदा माहिष्मती सेना निर्ययौ सा दिशो दश ॥ मुहूर्तं कश्मलं प्राप्य पुनरुत्थाय कालियः ॥ २३ ॥ भल्लेन तच्छिरः कायादपाहरत भूमिपः ॥ हते तस्मिन्महावीर्ये तालनाद्या महाबलाः ॥ २४ ॥ कालियं ते पराजित्य तं शत्रुं प्रत्यषेधयन् ॥ महाकष्टान्वितो भूपो ध्यात्वा मनसि शंकरम् ॥ २५ ॥ मोहयित्वा रिपून्सर्वान्स ययौ स्वं निवेशनम् ॥ अर्द्धसैन्येन सहिता हतशेषास्त्रयस्तथा ॥ २६ ॥ तदा परिमलो राजा दृष्ट्वा शत्रुपराजयम् ॥ परिष्वज्य महावीरान्स्वगेहं पुनराययौ ॥ २७ ॥ जयचन्द्रस्तु तच्छ्रुत्वा परं विस्मयमागतः ॥ तालनं च समाहूय सेनाधीशमकारयत् ॥ २८ ॥ भीष्मसिंहे गते लोके पंचमासान्तरे नृपे ॥ तत्पत्नी जनयामास पुत्ररत्नं शुभाननम् ॥ २९ ॥ सा तु गुर्जरभूपस्य तनयाख्या मदालसा ॥ दिव्यं पुत्रं समालोक्य मुमुदे सगणा भृशम् ॥ ३० ॥ श्रुत्वा तज्जन्म नृपतिर्विततार धनं बहु ॥ आहूय गणकान्प्राज्ञाञ्जातकर्म ह्यकारयत् ॥ ३१ ॥ सहदेवांश एवासौ भुवि जातः शिवाज्ञया ॥ देवसिंहः कृतो नाम गणकैः शास्त्रचिंतकैः ॥ ३२ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चयेऽष्टमोऽध्यायः ॥ ८ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ कालियं तौ पराजित्य भ्रातरौ नृपसेवकौ ॥ गतौ गोपालके राष्ट्रे भूपतिर्दलवाहनः ॥ १ ॥ सहस्रचंडिकाहोमे नानाभूपसमागमे ॥ गृहीतौ महिषौ ताभ्यां भूपैरन्यैश्च दुर्जयौ ॥ २ ॥ पूर्वं हि नृपकन्याभ्यां प्रत्यहं

---

[1] ङीपोह्रस्व आर्षः ।

बंधनं गतौ ॥ तौ संपूज्य विधानेन ददौ ताभ्यां च कन्यके ॥ ३ ॥ देवकीं देशराजाय ब्राह्मीं तस्यानुजाय वै ॥ ददौ दुर्गाज्ञया राजा रूपयौवनशालिनीम् ॥ ४ ॥ लक्षावृत्तिं तथा वेश्यां गीतनृत्यविशारदाम् ॥ कन्ययोश्च सखीं रम्यां मेघमल्लाररागिणीम् ॥ ५ ॥ शतं गजान्रथान्पंच हयांश्चैव सहस्रकान् ॥ चत्वारिंशच्चशिबिकाः प्रददौ दलवाहनः ॥ ६ ॥ बहुद्रव्ययुतां कन्यां दासदासीसमन्विताम् ॥ उदूह्य वेदविधिना प्रापतुश्च महावतीम् ॥ ७ ॥ मलना तां वधूं दृष्ट्वा तस्यै ग्रैवेयकं ददौ ॥ ब्राह्म्यै षोडशशृंगारं तथा द्वादशभूषणम् ॥ ८ ॥ राजा च परमानन्दी देशराजाय शूरिणे ॥ ददौ दशपुरं रम्यं नानाजननिषेवितम् ॥ ९ ॥ ऊषतुस्तत्र तौ वीरौ राजमान्यौ महाबलौ ॥ एतस्मिन्नन्तरे जातो देवसिंहो हराज्ञया ॥ १० ॥ जाते तस्मिन्कुमारे तु देवकी गर्भमादधौ ॥ दासश्रुता पतेर्देवी सुषुवे पुत्रमूर्जितम् ॥ ११ ॥ गौरांगं कमलाक्षं च दीप्यमानं स्वतेजसा ॥ तदानंदमयो देवः शक्रः सुरगणैः सह ॥ १२ ॥ शंखशब्दं चकारोच्चैर्जयशब्दं पुनःपुनः ॥ दिशः प्रफुल्लिताश्चासन्ग्रहाः सर्वे तथा दिवि ॥ १३ ॥ आयाता बहवो विप्रा वेदशास्त्रपरायणाः ॥ चक्रुस्ते जातकर्मास्य नामकर्म तथाविधम् ॥ १४ ॥ रामांशं तं शिशुं ज्ञात्वा प्रसन्नवदनं शुभम् ॥ भाद्रकृष्णतिथौ षष्ठ्यां चन्द्रवारेऽरुणोदये ॥ १५ ॥ संजातः कृत्तिकाभे च पितृवंशयशस्करः ॥ आह्लादनाम्ना ह्यभवत्प्रथितश्च महीतले ॥ १६ ॥ मासान्ते च सुते जाते ब्राह्मी पुत्रमजीजनत् ॥ धर्मजांशं तथा गौरं महाबाहुं सुवक्षसम् ॥ १७ ॥ तदा च ब्राह्मणाः सर्वे दृष्ट्वा बालं शुभाननम् ॥ प्रसन्नवदनं चारु पद्मचिह्नपदस्थितम् ॥ १८ ॥ तैर्द्विजैश्च कृतो नाम्ना बलखानिर्महाबलः ॥ वर्षान्ते वत्सजे जाते मूलगंडान्तसंभवः ॥ १९ ॥ चामुण्डो देवकिसुतो निजवंशभयंकरः ॥ जनितारं ततस्त्याज्य इत्यूचुर्द्विजसत्तमाः ॥ न तत्याज सुतं राजा बालत्वेऽपि दयापरः ॥ २० ॥ त्रिवर्षांते गते तस्मिन्बलखानौ सुते शुभे ॥ शूद्र्यां जातः शिखण्डवंशो रूपणो नाम विश्रुतः ॥ २१ ॥ वत्सराजो ययौ देशे गुर्जरे च मदालसाम् ॥ स सुतां च स मादाय दिने तस्मिन्समागतः ॥ २२ ॥ प्राप्ते तस्मिन्वत्सराजे जम्बुकः स्वबलैर्वृतः ॥ सप्तलक्षैश्च संप्राप्तो बाहुशाली यतेंद्रियः ॥ २३ ॥ रुरोध नगरीं सर्वां राज्ञः परिमलस्य वै ॥ त्रिलक्षैश्च माहावत्यै सार्द्धं तौ जग्मतुः पुरात् ॥ २४ ॥ माहिष्मतैः सप्तलक्षैः सार्द्धं युद्धमभून्महत् ॥ त्रिरात्रं दारुणं घोरं यमराष्ट्रविवर्द्धनम् ॥ २५ ॥ शिवस्य वरदानेन भ्रात्रोर्जातः पराजयः ॥ बद्ध्वा तौ जम्बुको राजा लुंठयित्वा महावतीम् ॥ २६ ॥ वेश्यां लक्षारतिं तस्य तं हतं तद्गजं तथा ॥ ग्रैवेयकं तथा हारं मणिरत्नविभूषितम् ॥ २७ ॥ गृहीत्वा नगरीं सर्वां भस्मयित्वा गृहं ययौ ॥ ये गुप्ता भूतले शूरास्ते शेषाश्च तदाऽभवन् ॥ २८ ॥ दुर्गेषु यानि रत्नानि तानि प्राप्य मुदा ययौ ॥ लुंठिते नगरे तस्मि

न्देवकी गर्भमुत्तमम् ॥ २९ ॥ कृष्णांशं सप्तमास्यं हि चादधा[1]दैवतप्रिया ॥ ज्ञात्वा कुलाधमं पुत्रं चामुंडं देवकी सती ॥ ३० ॥ कल्पक्षेत्रं समागम्य कालिंद्यां तमपातयत् ॥ योजनान्ते गते तस्मिन्महीराजपुरोहितः ॥३१॥ सामन्तो नाम तं गृह्य श्वशुरालयमाययौ ॥ जातस्तु दशमासान्ते रात्रौ घोरतमोवृते ॥ ३२ ॥ भाद्रकृष्णाष्टमीसौम्ये ब्राह्मनक्षत्रसंयुते ॥ प्रादुरासीज्जगन्नाथो देवक्यां च महोत्तमः ॥ ३३ ॥ श्यामांगः स च पद्माक्ष इंद्रनीलमणिद्युतिः ॥ विमानानां सहस्राणां प्रकाशः समजायत ॥ ३४ ॥ विस्मिता जननी तत्र दृष्ट्वा बालं तमद्भुतम् ॥ नगरे च महाश्चर्यं जातं सर्वे समाययुः ॥ ३५ ॥ उदयः किमहो जातो देवानां सूर्यरूपकः ॥ इत्याश्चर्य्यजुजां तेषां वागुवाचाशरीरिणी ॥ ३६ ॥ कृष्णांशो भूतले जातः सर्वानन्दप्रदायकः ॥ स नाम्नोदयसिंहो हि सर्वशत्रुप्रकाशहा ॥ ३७ ॥ इत्याकाशवचः श्रुत्वा ते परं हर्षमाययुः ॥ यस्मिन्काले सुतो जातस्तदा च मलना सती ॥ ३८ ॥ श्यामांगं सुन्दरं बालं सर्वलक्षणलक्षितम् ॥ सुषुवे परमोदारं फाल्गुनांशं शिवाज्ञया ॥ ३९ ॥ तदा तु नगरी सर्वा हर्षभूता बभूव ह ॥ षष्ठाहनि सुते जाते ब्रह्मानन्दगुणाकरे ॥ ४० ॥ ब्राह्मी तु सुषुवे पुत्रं पार्षदांशं महाबलम् ॥ श्यामांगं कमलाक्षं च दृढस्कन्धं महाभुजम् ॥ ४१ ॥ ब्राह्मणाश्च तदागत्य जातकर्म ह्यकारयन् ॥ सुखखानिर्द्विजैर्नाम्ना कृतस्तु गणकोत्तमैः ॥ ४२ ॥ क्रमेण वर्द्धिता बालाः सर्वलोकशिवंकराः ॥ तेषां काली महच्छ्रेष्ठा पितृमातृप्रियंकरी ॥ ४३ ॥ तृतीयाब्दे वयः प्राप्ते कृष्णांशे बलवत्तरे ॥ शक्रस्तद्दर्शनकांक्षी हयारूढो जगाम ह ॥ ४४ ॥ क्रीडन्स चन्दनारण्ये कृष्णांशो भ्रातृभिः सह ॥ नभस्थं पुरुषं दृष्ट्वा सहस्राक्षं जहास वै ॥ ४५ ॥ अश्विनी हरिणी दिव्या उच्चैःश्रवसमन्तिके ॥ गत्वा गर्भमुपादाय स्वगेहं पुनराययौ ॥ ४६ ॥ वर्षांतरे च सुषुवे कपोतं तनयं शुभम् ॥ पञ्चाब्दे च समायाते विद्याध्ययनमास्थिताः ॥ ४७ ॥ ब्राह्मणं शिवशर्माणं सर्वविद्याविशारदम् ॥ स्वभक्त्या सेवनं कृत्वा ते चक्रुर्वेदपाठिकाम् ॥ ४८ ॥ अष्टाब्दे चैव कृष्णांशो नामपत्रादिकां क्रियाम् ॥ लिखतां बालकानां च कृष्णांशः श्रेष्ठतामगात् ॥ ४९ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये कृष्णांशावतारो नाम नवमोऽध्यायः ॥ ९ ॥ ॥ छ ॥

॥ सूत उवाच ॥ ॥ नवमाब्दं वयः प्राप्ते कृष्णांशो बलवत्तरः ॥ पठित्वान्वीक्षिकीं विद्यां चतुःषष्टिकलास्तथा ॥ १ ॥ धर्मशास्त्रं तथैवापि सर्वश्रेष्ठो बभूव ह ॥ तस्मिन्काले भृगुश्रेष्ठ महीराजो नृपोत्तमः ॥ २ ॥ करार्थं प्रेषयामास स्वसैन्यं च महावतीम् ॥ ते वै लक्षं महाशूराः सर्वशस्त्रास्त्र

---

[1] देवतानि प्रियाणि यस्या इति बहुव्रीहौ 'वा प्रियस्य' इति प्रियशब्दस्य परनिपातः ।

धारिणः ॥ ३ ॥ ऊचुः परिमलं भूपं शृणु चंद्रकुलोद्भव ॥ सर्वे च भारते वर्षे ये राजानो महाबलाः ॥ ४ ॥ षडंशं करमादायास्मद्राजाय ददंति वै ॥ भवान्करे हि तस्यैव योग्यो भवति सांप्रतम् ॥ ५॥ अद्यप्रभृति चेद्राज्ञे तस्मै दद्यात्करं न हि ॥ महीराजस्य रौद्रास्त्रैः क्षयं यास्यति सैनिकैः ॥ ६ ॥ ये भूपा जयचंद्रस्य पक्षगास्ते हि तद्भयात् ॥ ददंते भूमिराजाय दंडं तन्मानसत्कृताः ॥ ७ ॥ इति श्रुत्वा स नृपतिस्तस्मै राज्ञे महात्मने॥ करं षडंशमादाय ददौ प्रीतिसमन्वितः ॥ ८ ॥ दशलक्षमितं द्रव्यं गृहीत्वा ते समाययुः ॥ महीराजः प्रसन्नात्मा पूर्ववैरमपाहरत् ॥ ९ ॥ तदा ते लक्षशूराश्च कान्यकुब्जमुपाययुः ॥ जयचंद्रं तु नत्वोचुः शृणु लक्षणकोविद ॥ १० ॥ पृथ्वीराजो महाराजो दंडं त्वत्तः समिच्छति ॥ इत्युक्तस्तैर्वैष्णवास्त्री लक्षणस्तानुवाच ह ॥ ११ ॥ मद्देशे मंडलीकाश्च बहवः संति सांप्रतम् ॥ भूमिराजो मांडलिको मयि जीवति मा भवेत् ॥ १२ ॥ इत्युक्त्वा वैष्णवास्त्रं तान्क्रुद्धः स च समादधत् ॥ तदस्त्रज्वालतः सर्वे भयभीताः प्रदुद्रुवुः ॥ १३ ॥ महीराजस्तु तच्छ्रुत्वा महद्भयमुपागमत् ॥ दशाब्दं च वयः प्राप्ते कृष्णांशे मल्लकोविदे ॥ १४ ॥ नानामल्लाः समाजग्मुस्तेन राज्ञैव सत्कृताः ॥ तेषां मध्ये स कृष्णांशो बाहुशाली बभूव ह ॥ १५ ॥ उर्वीयाधिपतेः पुत्रः षोडशाब्दवया बली ॥ शतमल्लैश्च सहितः कदाचित्स समागतः ॥ १६ ॥ पितृष्वसृपतिं भूपं नत्वा नाम्नाऽभयो बली ॥ उवाच शृणु भूपाल कृष्णोऽयं मदमत्तरः ॥ १७ ॥ तेन सार्द्धं भवेन्मल्लयुद्धं मम नृपोत्तम ॥ इति वज्रसमं वाक्यं श्रुत्वा राजा भयातुरः ॥ १८ ॥ उवाच श्यालजं प्रेम्णा भवान्युद्धविशारदः ॥ अष्टाब्दोऽयं सुतः स्निग्धो मम प्राणसमो भुवि ॥ १९ ॥ क्व भवान्वज्रसदृशः क्व सुतोऽयं सुकोमलः ॥ अन्यैर्मल्लैर्मदीयैश्च सार्द्धं योग्यो भवान्रणे ॥२०॥ इति श्रुत्वा नृपः श्यालो महीपतिरिति स्मृतः ॥ स तमाह रुषाविष्टो बालोऽयं बलवत्तरः ॥ २१ ॥ शृणु तत्कारणं भूप यथा ज्ञातो मया शिशुः ॥ आगस्कृतं महीराजं मत्वा सतिलकः सुतम् ॥ २२ ॥ पंडितांश्च समाहूय मुहूर्तं पृष्टवान्मुदा ॥ गणेशो नाम मतिमाञ्ज्योतिश्शास्त्रविशारदः ॥ २३ ॥ लक्षणं वचनं प्राह महीराजमनुत्तमम् ॥ शिवदत्तवरो राजन्कुबेर इव सांप्रतम् ॥ २४ ॥ कृष्णांशस्तस्य योग्योऽयं देशराजसुतोऽवरः ॥ नान्योऽस्ति भूतले राजन्सत्यं सत्यं ब्रवीम्यहम् ॥ २५ ॥ तच्छ्रुत्वा लक्षणो वीरः पूर्वे बर्हिष्मतीं प्रति ॥ कलपक्षेत्रं दक्षिणे च भूमिग्रामं तु पश्चिमे ॥ २६ ॥ उत्तरे नैमिषारण्यं स्वकीयं राष्ट्रमादधत् ॥ अतः श्रेष्ठः कुमारोऽयं कान्यकुब्जे मया श्रुतः ॥ २७ ॥ नागोत्सवे च भूपाल पंचम्यां च नभस्सिते ॥ दृश्यमात्रं कुमारांगं तस्माद्योग्यो ह्ययं सुतः ॥ २८ ॥ इति श्रुत्वा स कृष्णांशो वाक्छरेण प्रपीडितः ॥ अभयं भुजयोः शीघ्रं गृहीत्वा सोऽयुधद्बली ॥ २९ ॥ क्षणमात्रं रणं कृत्वा भूमिमध्ये तमक्षिपत् ॥

अभयस्य भुजो भग्नस्तत्र जातो बलेन वै ॥ ३० ॥ मूर्च्छितं स्वसुतं ज्ञात्वा खड्गहस्तो महीपतिः ॥ प्रेषयामास तान्मल्लान्कृष्णांशस्य
प्रहारणे ॥ ३१ ॥ रुषाविष्टांश्च ताञ्ज्ञात्वा कृष्णांशो बलवत्तरः ॥ तानेकैकं समाक्षिप्य विजयी स बभूव ह ॥ ३२ ॥ पराजिते मल्लबले
खड्गहस्तो महीपतिः ॥ मरणाय मतिं चक्रे कृष्णांशस्य प्रभावतः ॥३३॥ ज्ञात्वा तमीदृशं भूपं वारयामास भूपतिः ॥ अभयं नीरुजं कृत्वा प्रेम्णा
गेहमवासयत् ॥ ३४ ॥ नवाब्दांगे च कृष्णांशे चाह्लादाद्याः कुमारकाः॥मृगयार्थे दधुश्चित्तं तमूचुर्भूपतिं प्रियम् ॥३५॥ नमस्ते तात भूपाग्र्य सर्वा
नंदप्रदायक ॥ अस्मभ्यं त्वं हयान्देहि मत्प्रियान्करुणाकर ॥ ३६ ॥ इति श्रुत्वा वचस्तेषां तथेत्युक्त्वा महीपतिः ॥ भूतले वासिनोऽश्वान्वै दिव्या
न्नाट् चतुरो वरान् ॥ ३७ ॥ ददौ तेभ्यो मुदा युक्तो हरिणीगर्भसंभवान् ॥ ऋषय ऊचुः ॥ त्वन्मुखेन श्रुतं सूत हरिणी वडवा यथा ॥ ३८ ॥ भीष्म
सिंहाय संप्राप्ता शक्राद्देवेशतो मुने ॥ इदानीं श्रोतुमिच्छामः कुतो जातास्तुरंगमाः ॥ ३९ ॥ दिव्यांगा भूषणापन्ना नभस्सलिलगामिनः ॥
॥ सूत उवाच ॥ देशराजेन भूपेन पुरा धर्मयुतेन वै ॥४०॥ सेवनं भास्करस्यैव कृतं च द्वादशाब्दिकम् ॥ सेवान्ते भगवान्सूर्यो वरं ब्रूहि तमब्रवीत्॥
॥ ४१ ॥ प्राह देव नमस्तुभ्यं यदि देयो वरस्त्वया ॥ हयं दिव्यमयं देहि नभस्थलजलातिगम् ॥ ४२ ॥ तथेत्युक्त्वा रविः साक्षाद्ददौ तस्मै पपि
हकम् ॥ लोकान्पाति पपीर्ज्ञेयस्तस्येदं नाम चोत्तमम् ॥ ४३ ॥ अतः पपीहको नाम लोकपालनकर्मवान् ॥ स हयो मदमत्तश्च हरिणीं दिव्यरूपि
णीम् ॥ ४४ ॥ बुभुजे स्मरवेगेन तस्यां जातास्तुरंगमाः ॥ मनोरथश्च पीतांगः करालः कृष्णरूपकः ॥ ४५ ॥ एकगर्भे समुद्भूतौ शैब्यसुग्रीवकां
शकौ ॥ यस्मिन्दिने समुद्भूतौ जिष्णुविष्णुकलांशतः ॥ ४६ ॥ तदा जातौ हरिण्याश्च मेघपुष्पबलाहकौ ॥ बिन्दुलश्च सुवर्णांगः श्वेतांगो हरि
नागरः ॥ ४७ ॥ दिव्यांगास्ते हि चत्वारः पूर्वं जाता महाबलाः ॥ पश्चाद्दंशावताराश्च जातास्तेषां महात्मनाम् ॥ ४८ ॥ इति ते कथितं विप्र
शृणु तत्र कथां शुभाम् ॥ भूतले ते हयाः सर्वे प्राप्ताश्चोपरिभूमिगाः ॥ ४९ ॥ देवसिंहाय बलिने ददौ चाश्वं मनोरथम् ॥ आह्लादाय करालं च कृष्णां
शायैव बिन्दुलम् ॥ ५० ॥ ब्रह्मानंदाय पुत्राय प्रददौ हरिनागरम् ॥ ते चत्वारो हयारूढा मृगयार्थं वनं ययुः ॥ ५१ ॥ हरिणीं वडवां शुभ्रां बल
खानिः समारुहत् ॥ तदनु प्रययौ वीरो वनं सिंहनिषेवितम् ॥ ५२ ॥ आह्लादेनैव शार्दूलो हतः प्राणिभयंकरः ॥ देवसिंहेन सिंहश्च सूकरो बल
खानिना ॥ ५३ ॥ ब्रह्मानंदेन हरिणो हतस्तत्र महावने ॥ मृगाः शतं हतास्तैश्च तान्गृहीत्वा गृहं ययुः ॥ ५४ ॥ एतस्मिन्नंतरे देवी शारदा च
शुभानना ॥ मृगी स्वर्णमयी भूत्वा तेषामग्रे प्रधाविता ॥५५॥ दृष्ट्वा तां मोहिताः सर्वे स्वैः स्वैर्बाणैरताडयन् ॥ शरास्तु संक्षयं जग्मुर्मृग्यंगे बलव

त्तराः ॥५६॥ आह्लादाद्याश्च ते शूरा विस्मिताश्च बभूविरे ॥ तस्मिन्काले स कृष्णांगो बाणेनैव ह्यताडयत् ॥५७॥ तदा च पीडिता देवी भयभीता
ययौ वनम् ॥ कृष्णांशः क्रोधताम्राक्षस्ततपश्चात्प्रययौ बली ॥५८॥ वनांतरं च संप्राप्य देवी धृत्वा स्वकं वपुः ॥ तमुवाच प्रसन्नाक्षी परीक्षा ते मया
कृता ॥ ५९ ॥ यदा ते च भयं भूयात्तदा त्वं मां सदा स्मर ॥ साधयिष्यामि ते कार्यं कृष्णांशो हि भवान्विभुः ॥ ६० ॥ इत्युक्त्वान्तर्हिता
देवी शारदा सर्वमंगला ॥ कृष्णांशस्तु ययौ गेहं तैश्च सार्द्धं मुदा युतः ॥ ६१ ॥ तदा पराक्रमं तेषां दृष्ट्वा राजा सुखोऽभवत् ॥ गृहे गृहे च सर्वेषां
लक्ष्मीर्देवी समाविशत् ॥ ६२ ॥ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये दशमोऽ
ध्यायः ॥ १० ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ दशाब्दे च वयः प्राप्ते विष्णोः शक्त्यवतारके ॥ वसंतसमये रम्ये ययुस्ते प्रमदावनम् ॥
॥ १ ॥ ऊषुस्तत्र व्रताचारे माधवे कृष्णवल्लभे ॥ स्नात्वा च सागरे प्रातः पूजयामासुरंबिकाम् ॥ २ ॥ ऋतुकालोद्भवैः पुष्पैर्धूपैर्दीपैर्विधानतः ॥
जप्त्वा सप्तशतीस्तोत्रं दध्युः सर्वकरीं शिवाम् ॥ ३ ॥ कंदमूलफलाहारा जीवहिंसाविवर्जिताः ॥ तेषां भक्तिं समालोक्य मासांते जगदंबिका ॥४ ॥
ददौ तेभ्यो वरं रम्यं तच्छृणुध्वं समाहिताः॥आह्लादाय सुरत्वं च बलत्वं बलखानये ॥ ५ ॥ कालज्ञत्वं च देवाय ब्रह्मज्ञत्वं नृपाय च॥ कृष्णांशायैव
योगत्वं दत्त्वा चांतर्दधे शिवा ॥ ६ ॥ कृतकृत्यास्तदा ते वै स्वगेहं पुनराययुः ॥ तेषां प्राप्ते वरे रम्ये मलना पुत्रमूर्जितम् ॥७॥ श्यामांगं सात्य
केरंशं सुषुवे शुभलक्षणम् ॥ स ज्ञेयो रणजिच्छूरो राजन्यप्रियकारकः ॥ ८ ॥ आषाढे मासि संप्राप्ते कृष्णांशो हयवाहनः ॥ उर्वीयां नगरीं प्राप्त
एकाकी निर्भयो बली ॥ ९ ॥ दृष्ट्वा स नगरीं रम्यां चतुर्वर्णनिषेविताम् ॥ द्विजशालां ययौ शूरो द्विजधेनुप्रपूजकः ॥ १० ॥ दत्त्वा स्वर्णं द्विजा
तिभ्यः संतर्प्य द्विजदेवताः ॥ महीपतिगृहं रम्यं जगाम बलवत्तरः ॥ ११ ॥ नत्वा स मातुलं धीमांस्तथान्याँश्च सभासदः ॥ १२ ॥
तदा नृपाज्ञया शूरा बंधनाय समुद्यताः ॥ खड्गहस्ताः समाजग्मुर्यथा सिंहं गजाः शशाः ॥ १३ ॥ मोहितं तं नृपं कृत्वा दुष्टबुद्धिर्महीप
तिः ॥ कृत्वा लोहमयं जालं तस्योपरि समादधे ॥ १४ ॥ एतस्मिन्नंतरे वीरो बोधितो देवमायया ॥ आगस्कृतान्रिपूञ्ज्ञात्वा खड्ग
हस्तः समावधीत् ॥ १५ ॥ हत्वा पंचशतं शूरो हयारूढो महाबली ॥ उर्वीयां नगरीं प्राप्य जलपाने मनो दधौ १६ ॥ कूपे दृष्ट्वा
शुभा नार्यो घटपूर्तिकरीस्तदा ॥ उवाच मधुरो वाक्यं देहि सुंदरि मे जलम् ॥ १७ ॥ दृष्ट्वा ताः सुंदरं रूपं मोहनायोपचक्रिरे ॥
भित्त्वा तासां तु वै कुम्भान्पाययित्वा हयं जलम् ॥ १८ ॥ वनं गत्वा रिपुं जित्वा बद्ध्वा तमुभयं बली ॥ चण्डिकापार्श्वमागम्य तद्दधाय मनो

दधे ॥ १९ ॥ श्रुत्वा स करुणं वाक्यं त्यक्त्वा स्वनगरं ययौ ॥ नृपांतिकमुपागम्य वर्णयामास कारणम् ॥ २० ॥ श्रुत्वा परिमलो राजा द्विजा
तिभ्यो ददौ धनम् ॥ समाघ्राय स कृष्णांशं कृतकृत्योऽभवन्नृपः ॥ २१ ॥ संप्राप्तैकादशाब्दे तु कृष्णांशे युद्धदुर्मदे ॥ महीपतिर्निरुत्साहः प्रययौ
देहलीं प्रति ॥ २२ ॥ बलिं यथोचितं दत्त्वा भगिन्यै भयकातरः ॥ रुरोद बहुधा दुःखं देशराजात्मजप्रजम् ॥ २३ ॥ अगमा भगिनी
तस्य दृष्ट्वा भ्रातरमातुरम् ॥ स्वपतिं वर्णयामास श्रुत्वा राजाब्रवीदिदम् ॥ २४ ॥ अद्याहं स्वबलैः सार्द्धं गत्वा तत्र महावतीम् ॥ हनि
ष्यामि महादुष्टं देशराजसुतं रिपुम् ॥ २५ ॥ इत्युक्त्वा धुंधुकारं च समाहूय महाबलम् ॥ सैन्यमाज्ञापयामास सप्तलक्षं तनुत्यजम् ॥ २६ ॥
केचिच्छूरा हयारूढा उष्ट्रारूढा महाबलाः ॥ गजारूढा रथारूढाः संययुश्च पदातयः ॥ २७ ॥ देवसिंहस्तु कालज्ञः श्रुत्वा चागमनं रिपोः ॥
नृपपार्श्वं समागम्य सर्वं राज्ञे न्यवेदयत् ॥ २८ ॥ श्रुत्वा परिमलो राजा विह्वलोऽभूद्भयातुरः ॥ बलखानिस्तमुत्थाय हर्षयुक्त इवाह च ॥
॥ २९ ॥ अद्याहं च महीराजं धुंधुकारं ससैन्यकम् ॥ जित्वा दंड्यं च भवतः करिष्यामि तवाज्ञया ॥ ३० ॥ इत्युक्त्वा तं नमस्कृत्य
सेनापतिरभून्मुने ॥ तदा तु निर्भया वीरा दृष्ट्वा राजानमातुरम् ॥ ३१ ॥ चतुर्लक्षबलैः सार्द्धं ते युद्धाय समाययुः ॥ शिंशपाख्यं वनं घोरं
छेदयित्वा रिपोस्तदा ॥ ३२ ॥ ऊषुस्तत्र रणे मत्ताः सर्वशत्रुभयंकराः ॥ एतस्मिन्नन्तरे तत्र धुंधुकारादयो बंलाः[1] ॥ ३३ ॥ कृत्वा कोलाहलं शब्दं
युद्धाय समुपाययुः ॥ पूर्वाह्णे तु भृगुश्रेष्ठ सन्नद्धास्ते शतघ्निपाः ॥ ३४ ॥ शतघ्नीभिस्त्रिसाहस्रैः पञ्चसाहस्रका ययुः ॥ द्विसहस्रशतघ्नीभिः सहिता
श्चन्द्रवंशिनः ॥ ३५ ॥ सैन्यं षष्टिसहस्रं च स्वर्गलोकमुपाययौ ॥ तदर्द्धं च तथा सैन्यं महीराजस्य संक्षितम् ॥ ३६ ॥ दुद्रुवुर्भीरुकाः शूरा बल
खानेर्दिशो दश ॥ रथा रथै रणे हन्युर्गजाश्चैव गजैस्तथा ॥ ३७ ॥ हया हयैस्तथा उष्ट्रा उष्ट्रैश्च समाहनन् ॥ एवं सुतुमुले जाते दारुणे रोम
हर्षणे ॥ ३८ ॥ हाहाभूतान्स्वकीयांश्च सैन्यान्दृष्ट्वा महाबलान् ॥ अपराह्णे भृगुश्रेष्ठ पञ्च शूराः समाययुः ॥ ३९ ॥ ब्रह्मानंदः शरैः शत्रूननयद्यम
सादनम् ॥ देवसिंहस्तथा भल्लैराह्लादस्तत्र तोमरैः ॥ ४० ॥ बलखानिः स्वखड्गेन कृष्णांशस्तु तथैव च ॥ द्विलक्षान्क्षत्रियाञ्जघ्नुः सर्वसैन्यैः समं
ततः ॥ ४१ ॥ दृष्ट्वा पराजितं सैन्यं धुंधुकारो महाबलः ॥ आह्लादं च स्वभल्लेन गजारूढः समावधीत् ॥ ४२ ॥ आह्लादे मूर्च्छिते तत्र देवसिंहो
महाबलः ॥ भल्लेन भ्रातरं तस्य दंशयामास वेगतः ॥ ४३ ॥ स तीक्ष्णव्रणमासाद्य गजस्थः संमुमोह वै ॥ आगताः शतराजानो नानादेश्या

---

[1] बलिन इत्यर्थः ।

महाबलाः ॥ ४४ ॥ शस्त्राण्यस्त्राणि तेषां तु छित्त्वा खड्गेन वत्सजः ॥ स्वखड्गेन शिरांस्येषां पातयामास भूतले ॥ ४५ ॥ हते शत्रुसमूहे तु तच्छेषास्तु प्रदुद्रुवुः ॥ महीराजस्तु बलवान्दृष्ट्वा भग्नं स्वसैन्यकम् ॥ ४६ ॥ आजगाम गजारूढः शिवदत्तवरो बली ॥ रौद्रेणास्त्रेण हृदये चावधीद्वत्सजं रिपुम् ॥ ४७ ॥ आह्लादं च तथा वीरं देवं परिमलात्मजम् ॥ मूर्च्छयित्वा महावीराञ्छत्रुसैन्यमुपागमत् ॥ ४८ ॥ पूजयित्वा शतघ्नीश्च महावधमकारयत् ॥ रोपणस्त्वरितो गत्वा राज्ञे सर्वमवर्णयत् ॥ ४९ ॥ एतस्मिन्नंतरे वीरः सुखखानिर्महाबलः ॥ कपोतं हयमारुह्य नभोमार्गेण चागमत् ॥ ५० ॥ मूर्च्छयित्वा महीराजं स्वबंधूंश्च सवाहनान् ॥ कृत्वा नृपांतमागम्य बंधनाय समुद्यतः ॥ ५१ ॥ तदोत्थाय महीराजो महादेवेन बोधितः ॥ पुनस्तान्स्वशरै रौद्रैर्मूर्च्छयामास कोपवान् ॥ ५२ ॥ सुखखान्यादिकाञ्छूरान्संबध्य निगडैर्दृढैः ॥ नृपं परिमलं प्राप्य पुनर्युद्धमचीकरत् ॥ ५३ ॥ हाहाभूतं स्वसैन्यं च दृष्ट्वा स उदयो हरिः ॥ नभोमार्गे हयं कृत्वा ताः शतघ्नीरनाशयत् ॥ ५४ ॥ महीराजगजं प्राप्य बद्ध्वा तं निगडैर्बली ॥ आह्लादपार्श्वमागम्य भ्रात्रे भूपं समर्पयत् ॥ ५५ ॥ तदा तु पृथिवीराजो लज्जितस्तेन निर्जितः ॥ पञ्चकोटिधनं दत्त्वा स्वगेहं पुनराययौ ॥ ५६ ॥ देवसिंहाज्ञया शूरो बलखानिर्हि वत्सजः ॥ तैर्द्रव्यैर्नगरीं रम्यां कारयामास सुन्दरीम् ॥ ५७ ॥ शिरीषाख्यं पुरं नाम तेन वीरेण वै कृतम् ॥ सर्ववर्णसमायुक्तं द्विक्रोशायामसंमितम् ॥ ५८ ॥ तत्रैव न्यवसद्वीरो वत्सजः स्वकुलैः सह ॥ त्रिंशत्क्रोशे कृतं राष्ट्रं तत्रैव बलखानिना ॥ ५९ ॥ श्रुत्वा परिमलो राजा तत्रागत्य मुदान्वितः ॥ आघ्राय वत्सजं शूरं देशराजसुतं तथा ॥ ६० ॥ ब्रह्मानंदेन सहितः स्वगेहं पुनराययौ ॥ ६१ ॥ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडापरपर्याये कलियुगीयेतिहाससमुच्चये एकादशोऽध्यायः ॥ ११ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ द्वादशाब्दे हि कृष्णांशे यथाजातं तथा शृणु ॥ इषशुक्लदशम्यां च राज्ञां जातः समागमः ॥ १ ॥ कान्यकुब्जे महारम्ये नानाभूपाः समाययुः ॥ श्रुत्वा पराजयं राज्ञो महीराजस्य लक्षणः ॥ २ ॥ कृष्णांशदर्शने वांछा तस्य चासीत्तदा मुने ॥ पितृव्यं भूपतिं प्राह द्रष्टुं यास्यामि तं शुभम् ॥ ३ ॥ जितो येन महीराजः सर्वलोकप्रपूजितः ॥ इति श्रुत्वा वचस्तस्य जयचंद्रो महीपतिः ॥ भ्रातृजं प्रणतं प्राह शृणु शुक्लयशस्कर ॥४॥ राजराजपदं ते हि कथं संहर्तुमिच्छसि॥ इत्युक्त्वा जयचंद्रस्तु तदाज्ञां नैव दत्तवान् ॥ ५ ॥ राजानस्ते च सहिताः स्वसैन्यैः परिवारिताः ॥ कृष्णांशं द्रष्टुमिच्छन्तः संययुश्च महीपतिम् ॥ ६ ॥ शिरीषाख्यपुरस्थं च ज्ञात्वा कृष्णांशमुत्तमम् ॥ महीपतिं पुरस्कृत्य समाजग्मुर्नृपास्तदा ॥ ७ ॥ ददृशुस्तं महात्मानं पुंडरीकनिभाननम् ॥ प्रसन्नवदनाः सर्वे प्रश

शंसुः समंततः ॥ ८ ॥ तदा महीपतिः क्रुद्धो वचनं प्राह भूपतीन् ॥ यस्येयं च कृता श्लाघा युष्माभिर्दूरवासिभिः ॥ पितरौ तस्य बलिनौ माहि
ष्मत्यां मृतिं गतौ ॥ ९ ॥ जम्बुको नाम भूपालो नार्मदीयैः समन्वितः ॥ बद्ध्वा तौ प्रययौ गेहं लुंठयित्वा धनं बहु ॥ शिलापत्रे समारोप्य तयो
र्गात्रमचूर्णयत् ॥ शिरसी च तयोश्छित्त्वा वटवृक्षे समारुहत् ॥ १० ॥ अद्यापि तौ स्थितौ वीरौ हा पुत्रेति प्रभाषिणौ ॥ प्रेतदेहे च पितरौ यस्य
प्राप्तौ महाबलौ ॥ तस्योदयो वृथा ज्ञेयो वृथाकीर्तिः प्रियंकरी ॥ ११ ॥ इति श्रुत्वा स कृष्णांशो भूपतीन्प्राह नम्रधीः ॥ गतौ मत्पितरौ सार्द्धं
गुर्जरे यत्र वै रणः ॥ १२ ॥ म्लेच्छैर्नराशनैः सार्द्धं तन्नृपेण रणोऽभवत् ॥ देशराजो वत्सराजो युद्धं कृत्वा भयंकरम् ॥ म्लेच्छैस्तैश्च हतौ तत्र
श्रुतेयं विश्रुता कथा ॥१३॥ मातुलेनाद्य कथितं नवीनं मरणं तयोः॥चेत्सत्यं वचनं तस्य पौरुषं मम पश्यत ॥१४॥ इत्युक्त्वा तान्स कृष्णांशो
मातरं प्राह सत्वरम् ॥ हेतुं च वर्णयामास भाषितं च महीपतेः ॥ १५ ॥ श्रुत्वा वज्रसमं वाक्यं रुरोद जननी तदा ॥ नोत्तरं प्रददौ माता पति
दुःखेन दुःखिता ॥१६॥ज्ञात्वा पितृवधं श्रुत्वा जम्बुकं शिवकिंकरम् ॥ मनसा स च कृष्णांशस्तुष्टाव परमेश्वरीम् ॥१७॥ जय जय जय जगदम्ब
भवानि ह्यखिललोकसुरपितृमुनिखानि ॥ त्वया ततं सचराचरमेव विश्वं पातमिदं हृतमेव ॥ १८ ॥ इति ध्वात्वा स कृष्णांशः सुष्वाप निजस
द्मनि ॥ तदा भगवती तुष्टा तालनं बलवत्तरम् ॥ मोहयित्वाशु तत्पार्श्वे प्रेषयामास सर्वगा ॥ १९ ॥ चतुर्लक्षबलैः सार्द्धं तालनः शीघ्रमागतः ॥
स्वसैन्यं चोदयामास चैकलक्षं महाबलम् ॥२०॥ बलखानिस्तदा प्राप्तश्चैकलक्षबलान्वितः ॥ अनुजं तत्र संस्थाप्य शिरीषाख्ये महाबलः ॥२१॥
सज्जीभूतान्समालोक्य तानुद्याने ससैन्यकान् ॥ भीतः परिमलो राजा कृष्णांशं प्रति चाययौ ॥ २२ ॥ विह्वलं नृपमालोक्य कृष्णांशोऽऽश्वासय
न्मुदा ॥ २३ ॥ लक्षसैन्यं तदीयं च गृहीत्वा चाधिपोऽभवत् ॥ शतघ्न्यः पंचसाहस्रा नानावर्णाः सुवाहनाः ॥ २४ ॥ पताकाः पञ्चसाहस्राः
साहस्रं काष्ठकारिणः ॥ गजा दशसहस्राश्च रथाः पंचसहस्रकाः ॥ २५ ॥ त्रिलक्षाश्च हयाः सर्वे उष्ट्रा दशसहस्रकाः ॥ शेषाः पदातयो ज्ञेयास्त
स्मिन्सैन्ये भयानके ॥ २६ ॥ तालनश्च समायातः सर्वसेनाधिपोऽभवत् ॥ देवसिंहो रथानां च सर्वेषामीश्वरोऽभवत् ॥ २७ ॥ बलखानिर्हयानां
च सर्वेषामधिपोऽभवत् ॥ आह्लादश्च गजानां च सर्वेषामधिपोऽभवत् ॥ पत्तीनां चैव सर्वेषां कृष्णांशश्चाधिपोऽभवत् ॥ २८ ॥ नत्वा ते मलनां
भूपो दत्त्वा दानान्यनेकशः ॥ समाययुश्च ते सर्वे दक्षिणाशां बलान्विताः ॥ २९ ॥ पक्षमात्रगतः कालो मार्गे तस्मिन्रणैषिणाम् ॥ छित्त्वा तत्र
वनं घोरं नानाकंटकसंयुतम् ॥ सेनां निवासयामासुर्निर्भयास्ते महाबलाः ॥ ३० ॥ देवसिंहमतेनैव योगिनस्ते तदाभवन् ॥ नर्तकश्चैव कृष्णांश

श्चाह्लादो डमरुप्रियः ॥ ३१ ॥ मड्डुधारी तदा देवो वीणाधारी च तालनः ॥ वत्सजः कांस्यधारी च बलखानिर्महाबलः ॥ ३२ ॥ मातुरग्रे स्थिता
स्ते वै ननृतुः प्रेमविह्वलाः॥मोहिता देवकी चासीन्न ज्ञातं तत्र कारणम् ॥ ३३॥ मोहितां मातरं दृष्ट्वा परं हर्षमुपाययुः ॥ तदा तां कथयामासुर्वयं ते
तनया हि भोः ॥ ३४ ॥ नत्वा तां प्रययुः सर्वे पुरीं माहिष्मतीं शुभाम् ॥ नगरं मोहयामासुर्वाद्यगानविशारदाः ॥ ३५ ॥ दूत्या सार्द्धं रिपोर्गेहं
ययुस्ते कार्यतत्पराः ॥ नृत्यगानसुवाद्यैश्च राज्ञस्ते मोहने रताः ॥ ३६ ॥ विसंज्ञां महिषीं कृत्वा कृष्णांशः सर्वमोहनः ॥ प्राप्तवांस्तत्र यत्रासौ
तत्सुता विजयैषिणी ॥ ३७ ॥ दृष्ट्वा सा सुंदरं रूपं श्यामांगं पुरुषोत्तमम् ॥ मुमोह वशमापन्ना मैथुनार्थं समुद्यता ॥ ३८ ॥ दृष्ट्वा तथा गतां नारीं
कृष्णांशः श्लक्ष्णया गिरा ॥ शत्रोर्भेदं च पप्रच्छ कामिनीं मदविह्वलाम् ॥३९॥ साह भो देवकीपुत्र यदि पाणिं ग्रहीष्यसि॥तर्हि ते कथयिष्यामि
पितुर्भेदं हि दारुणम् ॥ ४० ॥ तथेत्युक्त्वा स बलवाँस्तस्याः पाणिं गृहीतवान् ॥ ज्ञात्वा भेदं रिपोः सर्वं तामाश्वास्य ययौ मुदा ॥४१॥ एतस्मिन्
न्नन्तरे राज्ञी बाधिता प्राह योगिनम् ॥ देशराजप्रियाहारं नवलक्षस्य मूल्यकम् ॥ तुभ्यं दास्यामि संतुष्टा नृत्यगानविमोहिता ॥ ४२ ॥
इति श्रुत्वा वत्ससुतस्तां प्रशस्य गृहीतवान् ॥ प्रययौ बंधुभिः सार्द्धं जम्बुको यत्र तिष्ठति ॥ ४३ ॥ ननर्त तत्र कृष्णांशो बलखानिरगा
यत ॥ आह्लादस्तालनो देवो दध्मुर्वाद्यगतीर्मुदा ॥ ४४ ॥ मोहितोऽभून्नृपस्तत्र कालियः स्वजनैः सह ॥ कामं वरय कृष्णांग यच्च ते
हृदये स्थितम् ॥ ४५ ॥ इति श्रुत्वा वचः शत्रोर्बलखानिर्महाबलः ॥ तमाह भो महीपाल लक्षावर्तिर्वरांगना ॥ स्वविद्यां दर्शयेन्मह्यं तदा
तृप्तिं व्रजाम्यहम् ॥ ४६ ॥ इति श्रुत्वा तथा मत्वा लक्षावर्तिं नृपोत्तमः ॥ सभायां नर्तयामास देशराजप्रियां तथा ॥ ४७ ॥ सा वेश्या सुतमा
ह्लादं ज्ञात्वा योगित्वमागतम् ॥ रुरोद तत्र दुःखार्ता नेत्रादश्रूणि मुंचती ॥ ४८ ॥ रुदितां तां समालोक्य रुदन्नाह्लाद एव सः ॥ स्वभुजौ ताडया
मास तत्प्रियार्थे महाबलः ॥ ४९ ॥ कृष्णांशस्तत्र तं हारं तस्याः कंठे प्रदत्तवान् ॥ उवाच क्रोधताम्राक्षस्तामाश्वास्य पुनःपुनः ॥ ५० ॥ अहं
चोदयसिंहोऽयं पितुर्वैरार्थमागतः ॥ हनिष्यामि रिपुं भूपं सात्मजं सबलं तथा ॥ ५१ ॥ इति श्रुत्वा वचस्तस्य कालियो बलवत्तरः ॥ पितुराज्ञां
पुरस्कृत्य शतव्यूहसमन्वितः ॥ ५२ ॥ तेषां च बंधनायैव कपाटं समरुद्ध सः ॥ तान्छत्रून्समनुज्ञाय पाशहस्तान्सशस्त्रगान् ॥५३॥ स्वंस्वं खड्गं
समाकृष्य क्षत्रियास्ते समाघ्नत ॥ शतशूरे हते तैश्च कालियो भयकातरः ॥ ५४ ॥ त्यक्त्वा तातं प्रदुद्राव ते तु गेहाद्बहिर्ययुः ॥ स्वसैन्यं शीघ्रमा
साद्य युद्धाय समुपस्थितः ॥ शिबिराणि कृतान्येव नर्मदाकूलमास्थितैः ॥ ५५ ॥ कृत्वा तु नर्मदासेतुं नल्वमात्रं सुपुष्टिदम् ॥ स्वसैन्यं तारयामास

चतुरंगसमन्वितम् ॥ ५६ ॥ रुरोध नगरीं सर्वां बलखानिर्बलैर्युतः ॥ शतघ्नीरग्रतः कृत्वा महाशब्दकरीस्तदा ॥ माहिष्मत्याश्च हर्म्याणि पातयामास भूतले ॥ ५७ ॥ नराश्च स्वकुलैः सार्द्धं मुख्यद्रव्यसमन्विताः ॥ विंध्याद्रेश्च गुहां प्राप्य तत्रोषुर्भयकातराः ॥ ५८ ॥ कालियस्तु गजानीके पंचशब्दगजे स्थितः ॥ हस्तिपा दशसाहस्रा युद्धाय समुपाययुः ॥५९॥ तस्यानुजः सूर्यवर्मा त्रिलक्षैस्तुरगैर्युतः ॥ तुंदिलश्च रथैः सार्द्धं रथस्थश्च सहस्रकैः ॥ ६० ॥ रंकणो वंकणश्चोभौ चतुर्लक्षपदातिभिः ॥ जग्मतुस्तौ महाम्लेच्छौ म्लेच्छभूपसहस्रकैः ॥ दाक्षिणात्यग्रामपास्ते तौ पुरस्कृत्य संययुः ॥६१॥ उभे सेने समासाद्य युद्धाय समुपस्थिते ॥ तयोश्च तुमुलं युद्धमभवल्लोमहर्षणम् ॥६२॥ त्रियामे रुधिरैस्तेषां नदी प्रावर्तत द्रुतम् ॥ दृष्ट्वासृजां नदीं घोरां मांसकर्दमवाहिनीम् ॥ बलखानिरमेयात्मा खड्गपाणिर्नरोययौ ॥ ६३ ॥ भल्लहस्तस्तदा देवो मनोरथहये स्थितः ॥ बिंदुलस्थश्च कृष्णांशः खड्गेनैव रिपूनहन् ॥ ६४ ॥ आह्लादश्च गदाहस्तः पोथयामास वाहिनीम् ॥ रूपणो नाम शूद्रश्च शक्तिहस्तोन्यहन्रिपून् ॥ तालनोहस्तनिस्त्रिंशो माहिष्मत्यां हनन्ययौ ॥ ६५ ॥ एवं महाभये जाते रणे तस्मिन्महाबले ॥ दुद्रुवुः सर्वतो वीराः पाहिपाहीत्यथाब्रुवन् ॥ ६६ ॥ प्रभग्नं स्वबलं दृष्ट्वा कालियो बलखानिकम् ॥ गजस्थस्ताडयामास स्वबाणैस्तं महाबलः ॥ ६७ ॥ हरिणी वडवा तस्य ज्ञात्वा स्वामिनमातुरम् ॥ गजोपरि समास्थाय स्वपादैस्तमपातयत् ॥ ६८ ॥ पतिते कालिये वीरे पंचशब्दो महागजः ॥ शृंखलैस्ताडयामास शूरांस्तान्मदमत्तकान् ॥ ६९ ॥ मूर्च्छिते पंचशूरे तु रूपणो भयकातरः ॥ देवकीं वर्णयामास यथाजातं गजेन वै ॥७०॥ तदा तु दुःखिता देवी दोलामारुह्य सत्वरा ॥ तं गजं च समासाद्य वर्णयामास कारणम् ॥ ७१ ॥ गजराज नमस्तुभ्यं शक्रदत्त महाबल ॥ एते पुत्रास्तु ते वीर पालनीया यथा पितुः ॥७२॥ इति श्रुत्वा दिव्यगजो देवमायाविशारदः ॥ देवकीं शरणं प्राप्य क्षमस्वागस्कृतं मम ॥ ७३ ॥ इत्युक्ते गजराजे तु कृष्णांशो बलवत्तरः ॥ त्यक्त्वा मूर्च्छां ययौ तत्र यत्राह्लादश्च मूर्च्छितः ॥ ७४ ॥ तमुत्थाप्य करस्पर्शैर्बलखानिसमन्वितः ॥ पितुर्गजं महामत्तमाह्लादाय प्रदत्तवान् ॥ करालमश्वं दिव्यांगं रूपणाय तदा ददौ ॥ ७५ ॥ मूर्च्छितं कालियं शत्रुं बद्ध्वा स निगडैर्दृढैः ॥ सेनान्तं प्रेषयामास बलखानिर्महाबलः ॥ ७६ ॥ सूर्यवर्मा तदा ज्ञात्वा बद्धं बंधुं च कालियम् ॥ प्रययौ शत्रुसेनान्तं क्रोधेन स्फुरिताधरः ॥ ७७ ॥ तमायान्तं समालोक्य ते वीरा युद्धदुर्मदाः ॥ रथस्थं मंडलीकृत्य स्वंस्वमस्त्रं समाक्षिपन् ॥ ७८ ॥ कुंठितेऽस्त्रे तदा तेषां विस्मितास्तेऽभवन्मुने ॥ चिन्तां च महतीं प्राप्ताः कथं वध्यो भवेदयम् ॥ ७९ ॥ तस्यास्त्रैस्ते महावीरा व्रणार्तिभयपीडिताः ॥ त्यक्त्वा युद्धं पुनर्गत्वा रणं चक्रुः पुनःपुनः ॥ ८० ॥ एवं कति दिना

न्येव बभूव रण उत्तमः ॥ आह्लादो वत्सजो देवस्तालनो भयसंयुतः ॥ कृष्णांशं शरणं जग्मुस्तेन वीरेण मोहिताः ॥ ८१ ॥ कृष्णस्तु तं तथा दृष्ट्वा देवीं विश्वविमोहिनीम् ॥ तुष्टाव मनसा वीरो रात्रिसूक्तं पठन्हृदि ॥ ८२ ॥ तदा तुष्टा जगद्धात्री दुर्गा दुर्गार्तिनाशिनी ॥ मोहयित्वा तु तं वीरं तत्रैवांतरधीयतः ॥८३॥ निद्रया मोहितं दृष्ट्वा कृष्णांशस्तु महाबलः ॥ बबंध निगडैस्तं च देवक्यन्ते समागमत् ॥ ८४ ॥ तुंदिलश्च तथा ज्ञात्वाभ्रातृशोकपरिप्लुतः ॥ आजगाम हयारूढः खड्गहस्तो महाबलः ॥ रिपुसैन्यस्य मध्ये, तु बहुशूरानताडयत् ॥ ८५ ॥ माहिष्मत्याश्च ते शूरा रंकणेन समन्विताः ॥ तत्सैन्यं भञ्जयामासुस्तालनेन प्रपालितम् ॥ ८६ ॥ प्रद्रुतं स्वं बलं दृष्ट्वा तालनः परिघायुधः ॥ शिरांसि पोथयामास म्लेच्छानां च पृथक्पृथक् ॥ ८७ ॥ वंकणं च तथा हत्वा खड्गेनैव च रंकणम् ॥ तुंदिलं च तथा बद्ध्वा दिनान्ते शिबिरं ययौ ॥८८॥ कालिये च रिपौ बद्धे सुबद्धे सूर्यवर्मणि ॥ तुंदिले च तथा बद्धे रंकणे वंकणे हते ॥ ८९ ॥ सहस्रं म्लेच्छराजानो हतशेषा बलान्विताः ॥ पक्षमात्रमहोरात्रं युद्धं चक्रुः समंततः ॥ ९० ॥ प्रत्यहं तालनो वीरः सेनापतिरमर्षणः ॥ षष्टिं भूपाञ्जघानाशु शत्रुसैन्यभयंकरः ॥ ९१ ॥ भयभीता रिपोः शूरा हता भूपा हतौजसः ॥ हतशेषा ययुर्गेहमर्द्धसैन्या भयातुराः ॥ ९२ ॥ जम्बुकस्तु तथा श्रुत्वा दुःखितो गेहमाययौ ॥ व्रतं ह्यनशनं कृत्वा रात्रौ शोचन्नशेत सः ॥ ९३ ॥ निशीथे समनुप्राप्ते तत्सुता विजयैषिणी ॥ पूर्णा तु सा कला ज्ञेया राधाया व्रजवासिनी ॥९४॥ आश्वास्य पितरं तं च ययौ मायाविशारदा ॥ रक्षकाञ्छिबिराणां च मोहयित्वा समाययौ ॥ ९५ ॥ भ्रातरो तत्र गत्वासौ यत्र सर्वानबोधयत् ॥ कृत्वा सा राक्षसीं मायां पंचवीरानमोहयत् ॥ ९६ ॥ निरस्त्रकवचान्बंधून्प्रतिदोलां समारुहत् ॥ पितुरंतिकमासाद्य तस्मै भ्रातॄन्ददौ मुदा ॥९७॥ प्रभाते बोधिताः सर्वे स्नानध्यानादिकाः क्रियाः ॥ कृत्वा ययू रिपोः शालां दृष्टवन्तो न तांस्तदा ॥ ९८ ॥ बभूवुर्दुःखिताः सर्वे किमिदं कारणं कथम् ॥ तानुवाच तदा देवः प्राप्ता ह्यत्र रिपोः सुता ॥ ९९ ॥ कृत्वा सा राक्षसीं मायां हृत्वा तान्गेहमाययौ ॥ तस्माद्यूयं मया सार्द्धं गत्वा यत्रैव तद्गुरुः ॥ ॥ १०० ॥ विंध्योपरि महारण्ये नानासत्त्वनिषेविते ॥ कुटीरं तस्य तत्रैव नाम्नैवैलविली हि सः ॥ योगसिद्धियुतः कामी राक्षसेभ्यो हि निर्भयः ॥ १०१ ॥ जम्बुकस्य सुता तत्र प्रत्यहं स्वजनैर्युता ॥ एकाकिनी च सा रात्रौ स्वं गुरुं तमरीरमत् ॥ १०२ ॥ कृतेयं चैलविलिना माया मनुजमोहिनी ॥ कार्यसिद्धिं गमिष्यामो गत्वा तं पुरुषाधमम् ॥ इति श्रुत्वा तु चत्वारो विनाह्लादं ययुर्वनम् ॥ १०३ ॥ गीतनृत्यप्रवाद्यैश्च मोहयित्वा च तं दिने ॥ वासं चक्रुश्च तत्रैव धूर्तं मायाविशारदम् ॥ १०४ ॥ स तु पूर्वभवे दैत्यश्चित्रो नाम महासुरः ॥

बाणकन्यासुषां नित्यमवाञ्छच्छिव पूजकः ॥ जात ऐलविली नाम पक्षपूजी स वेगवान् ॥१०८॥ तयोर्मध्ये प्रमाणोऽयं विवाहो मे यदा भवे
त् ॥ तदाहं त्वां भजिष्यामि संत्यक्त्वोद्वाहितं पतिम् ॥ १०६ ॥ हते तस्मिन्महाधूर्ते गत्वा संग्राममूर्द्धनि ॥ जम्बुकस्य ययुर्दुर्गं दृष्ट्वा
ते तं समारुहन् ॥ हत्वा तत्र स्थितान्वीराञ्छतघ्न्यः परिखाकृताः ॥ १०७ ॥ तदा तु जम्बुको राजा शिवदत्तवरो बली ॥ जित्वा
पञ्च महावीरान्बद्ध्वा तान्निगडैर्दृढैः ॥ शैवं यज्ञं च कृतवांस्तेषां नाम्नोपबृंहितम् ॥ १०८ ॥ रूपणस्तु तथा ज्ञात्वा देवकीं प्रत्यवर्णयत् ॥ तदा
तु दुःखिता देवी भवानीं भयहारिणीम् ॥ मनसा च जगामाशु शरण्यां शरणं सती ॥ १०९ ॥ तदा तुष्टा जगद्धात्री स्वप्नांते तामवर्णयत् ॥
अहो देवकि कल्याणि पुत्रशोकं त्यजाधुना ॥ ११० ॥ यदा तु जम्बुको राजा शिवदत्तवरो बली ॥ होमं कर्ता स मंदात्मा तेषां च
बलिहे तवे ॥ १११ ॥ मोहयित्वा तदाहं तं मोचयित्वा च ते सुतान् ॥ विजयं ते प्रदास्यामि मा च शोके मनः कृथाः ॥ ११२ ॥
इति श्रुत्वा सती देवी नमस्कृत्य महेश्वरीम् ॥ पूजयामास विधिवद्धूपदीपोपहारकैः ॥ ११३ ॥ एतस्मिन्नंतरे राजा देवमायाविमोहितः ॥
सुष्वाप तत्र होमान्ते ते च जाता ह्यबंधनाः ॥ ११४ ॥ तैर्बद्धो जम्बुको राजा निगडैरायसैर्दृढैः ॥ ते तं बद्ध्वा ययुः शीघ्रं देवकीं प्रति निर्भ
याः ॥ ११५ ॥ एतस्मिन्नंतरे तत्र कालियाद्यास्त्रयः सुताः ॥ त्रिलक्षं सैन्यमादाय युद्धाय समुपाययुः ॥ ११६ ॥ पुनर्युद्धमभूद्घोरं सेनयोरु
भयोस्तदा ॥ तालनाद्याश्च चत्वारो हत्वा तां रिपुवाहिनीम् ॥ ११७ ॥ त्रीञ्छत्रून्कोष्ठकीकृत्य स्वशस्त्रैर्जघ्नुरूर्जिताः ॥ एवं दिनानि कति
चित्तत्र जातो महारणः ॥ ११८ ॥ कालियो दुःखितो भूत्वा सस्मार मनसा हरम् ॥ मोहनं मंत्रमासाद्य मोहयामास तान्रिपून् ॥ ११९ ॥ एत
स्मिन्नंतरे देवी देवकी पतिदेवता ॥ पातिव्रत्यस्य पुण्येन सुतांतिकमुपागता ॥ १२० ॥ बोधयित्वा तु कृष्णांशं पञ्चशब्दगजस्थितम् ॥ पुनस्तु
ष्टाव जननीं सर्वविश्वविमोहिनीम् ॥ तदा तुष्टा स्वयं देवी बोधयामास तान्मुदा ॥ १२१ ॥ आह्लादः सूर्यवर्माणं कालियं च ततोऽनुजः ॥ जघान
बलखानिस्तं तुन्दिलं जम्बुकात्मजम् ॥१२२॥ ते तु पूर्वभवे विप्र जरासंधः सकालियः॥द्विविदो वानरः शूरः सूर्य्यवर्मेह चाभवत् ॥१२३॥ त्रिशि
रास्तुंदिलो जातः शृगालः स च जम्बुकः ॥ नित्यवैरकराः सर्वे भूपाश्चासन्महीतले ॥१२४॥ हतेषु शत्रुपुत्रेषु देवकी जम्बुकं रिपुम् ॥ खड्गेन तर्ज
यामास पतिशोकपरायणा ॥ १२५ ॥ कृष्णांशः शिरसी पित्रोर्गृहीत्वा स्नेहकातरः ॥ जम्बुकस्यैव हृदये स्थापयामास विह्वलः ॥१२६॥ विहस्य
तौ तदा तत्र प्रोचतुर्वचनं प्रियम् ॥ चिरं जीव हि कृष्णांश गयां कुरु महामते ॥ इति वाणी तयोर्जाता बलिनोः प्रेतदेहयोः ॥१२७॥ खड्गहस्ता

च सा देवी शिलायंत्रे तु तं रिपुम् ॥ संस्थाप्य चोदयामास स्वपुत्रान्हर्षसंयुता ॥१२८॥ हे पुत्राः स्वपितुः शत्रुं जम्बुकं पुरुषाधमम् ॥ खण्डंखण्डं
च तिलशः कृत्वानन्दसमन्विताः ॥ १२९ ॥ संचूर्णयत तद्गात्रं तत्तैलैर्मदनिर्मितैः ॥ स्नास्याम्यहं तथेत्युक्त्वा रुरोद जननी भृशम् ॥ १३० ॥
तथा कृत्वा तु ते पुत्रा महिषीं ससुतां तदा ॥ बलखानियुतास्तत्राहूय चक्रुश्च तत्क्रियाम् ॥ १३१ ॥ तदा परिमलं राज्ञी दृष्ट्वा स्वामिनमातुरम् ॥
मरणायोन्मुखं विप्र पंचत्वमगमन्मुने ॥ १३२ ॥ तत्सुता खड्गमानीय बलखानिभुजं प्रति ॥ कृतित्वा मूर्छयित्वा तं तत्पक्षानन्वधावत ॥१३३॥
तालनं देवसिंहं च रामाशं च तथाविधम् ॥ कृत्त्वान्यांश्च तथा शत्रूनगच्छत्कुलकातरा॥१३४॥कृष्णांशं मोहयित्वाशु मायया च समाहरत् ॥ हते
तत्र शते शूरे बलखानिरमर्षितः ॥ तच्छिरश्च समाहृत्य चितायां च समाक्षिपत् ॥ १३५ ॥ तदा वाणी समुत्पन्ना बलखाने शृणुष्व भोः ॥
अवध्या च सदा नारी त्वया वध्या ह्यधर्मिणः ॥ १३६ ॥ फलमस्य विवाहे स्वे भोक्तव्यं पापकर्मणः ॥ इति श्रुत्वा तदा दुःखी बलखानिर्ययौ
पुरम् ॥ १३७ ॥ ततस्तु सैनिकाः सर्वे महाहर्षसमन्विताः ॥ शतोष्ट्रभारवाह्यानि लुंठयित्वा धनानि च ॥ १३८ ॥ महावतीं समाजग्मुः कृतकृ
त्यत्वमागताः ॥ हतशेषैश्चार्द्धसैन्यैः सहिता गेहमाययुः ॥ १३९ ॥ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडापरपर्याये कलि
युगीयेतिहाससमुच्चये द्वादशोऽध्यायः ॥ १२ ॥ छ ॥ ॥ ऋषय ऊचुः ॥ ॥ कस्मिन्मास्यभवद्युद्धं तयोः कतिदिनानि च ॥ तत्पश्चात्स्व
पुरीं प्राप्य तदा किमभवन्मुने ॥ १ ॥ ॥ सूत उवाच ॥ ॥ पौषमास्यभवद्युद्धं तयोः शतदिनानि च ॥ ज्येष्ठे मासि गृहं प्राप्ता दध्मुर्वाद्यान्यने
कशः ॥ २ ॥ श्रुत्वा परिमलो राजा स्वसुताञ्जयिनो बलीन् ॥ ददौ दानानि विप्रेभ्यः सुखं जातं गृहेगृहे ॥ ३ ॥ इति श्रुत्वा महीराजो बलखानिं
महाबलम् ॥ तत्रागत्य नमस्कृत्य वचनं प्राह नम्रधीः ॥ ४ ॥ अर्द्धकोटिमितं द्रव्यं मत्तः प्राप्य सुखी भव ॥ माहिष्मत्याश्च राष्ट्रं मे देहि वीर
नमोस्तु ते ॥ ५ ॥ वर्षे वर्षे च तद्द्रव्यं गृहाण बलवन्प्रभो ॥ इति श्रुत्वा तथा मत्वा बलखानिर्गृहं ययौ ॥६॥ वयस्त्रयोदशाब्दे च कृष्णांशे बलव
त्तरे ॥ यथा जाता हरेर्लीला भृगुश्रेष्ठ तथा शृणु ॥ ७ ॥ भाद्रे शुक्ले त्रयोदश्यां चाह्लादः सानुजो ययौ ॥ गयार्थे धनमादाय हस्त्यश्वरथसंकुलम् ॥
॥ ८ ॥ कृष्णांशो बिन्दुलारूढो वत्सजो हरिणीस्थितः ॥ देवः पपीहकारूढः सुखखानिः करालके ॥ ९ ॥ चत्वारो द्विदिनान्ते च गयाक्षेत्रं
समाययुः ॥ पूर्णिमांते पुरस्कृत्य षोडशश्राद्धकारिणः ॥ १० ॥ शतं शतं गजांश्चैव भूषितांश्च रथांस्तथा ॥ ददुर्हयान्सहस्रं च हेममालाविभूषि
तान् ॥ ११ ॥ धेनूर्हिरण्यरत्नानि वासांसि विविधानि च ॥ दत्त्वा ते सुफलीभूय स्वगेहाय दधुर्मनः ॥ १२ ॥ लक्षावर्तिस्तु या वेश्या ययौ

बदरिकाश्रमम् ॥ प्राणांस्तत्र परित्यज्य साप्सरस्त्वमुपागता ॥ १३ ॥ राकां चंद्रे तु संप्राप्ते राहुग्रस्ते तमोमये ॥ काश्यां समागता भूपा नानादेश्याः कुलैः सह ॥ १४ ॥ हिमालयगिरौ रम्ये नानाधातुविचित्रिते ॥ तत्र शार्दूलवंशीयोनेत्रसिंहो महीपतिः ॥ १५ ॥ रत्नभानौ हते शूरे नेत्रसिंहो भयातुरः ॥ नवतुंगे समासाद्य तोषयामास वासवम् ॥ १६ ॥ द्वादशाब्दान्तरे देवो ददौ ढक्कामृतं मुदा ॥ पार्वत्या निर्मितं यत्तु वासवायस्त्रसेविने ॥ १७ ॥ ददौ ढक्कामृतं राज्ञे पुनः प्राह शुभं वचः ॥ अस्य शब्देन भूपाल त्वं सैन्यं जीवयिष्यसि ॥ १८ ॥ क्षयं शीघ्रं गमिष्यंति शत्रवस्ते महाभटाः॥प्राप्ते ढक्कामृते तस्मिन्नेत्रसिंहो महाबलः ॥ १९ ॥ नगरं कारयामास तत्र सर्वजनैर्युतम् ॥ योजनान्तं चतुर्द्वारं दुराधर्षं परैः सदा ॥ २० ॥ नेत्रसिंहगढं नाम्ना विख्यातं भारते भुवि ॥ काश्मीरान्ते कृतं राज्ये तेन शृंगसमं ततः ॥ २१ ॥ पालितं नेत्रसिंहेन तत्पुरं पुत्रवन्मुने ॥ नेत्रपाल इति ख्यातो ग्रामोऽसौ दुर्गमः परैः ॥ २२ ॥ सोऽपि राजा समायातो नेत्रसिंहो महाबलः ॥ कन्या स्वर्णवती तस्य रेवत्यंशसमन्विता ॥ कामाक्ष्या वरदानेन सर्वमायाविशारदा ॥ २३ ॥ दृष्ट्वा तां सुंदरीं कन्यां बालेन्दुसदृशाननाम् ॥ मूर्च्छिताश्चाभवन्भूपा रूपयौवनमोहिताः ॥ २४ ॥ दृष्ट्वा तां च तथाह्लादः सर्वरत्नविभूषिताम् ॥ षोडशाब्दवयोयुक्तां कामिनीं रतिरूपिणीम् ॥ मूर्च्छितश्चापतद्भूमौ सा तं दृष्ट्वा मुमोह वै ॥ २५ ॥ दोलामारुह्य तत्सख्यौ नृपान्तिकमुपाययुः ॥ आह्लादस्तु समुत्थाय महामोहत्वमागतः ॥ २६ ॥ दृष्ट्वा तथाविधं बंधुं कृष्णांशः प्राह दुःखितः ॥ किमर्थं मोहमायातो भवाँस्तत्वविशारदः ॥ २७ ॥ रजो रागात्मकं विद्धि प्रमादं मोहजं तथा ॥ ज्ञानासिना शिरस्तस्य छिंधि त्वमजितः सदा ॥ २८ ॥ इति श्रुत्वा वचो भ्रातुस्त्यक्त्वा मोहं ययौ गृहम् ॥ भोजयित्वा द्विजश्रेष्ठान्सहस्रं वेदतत्परान् ॥ २९ ॥ दुर्गामाराधयामास जप्त्वा मध्यचारित्रकम् ॥ मासान्ते च तदा देवी दत्त्वाभीष्टं हृदि स्थितम् ॥ ३० ॥ मोहयामास तां कन्यां विवाहार्थमनिन्दिता ॥ स्वप्ने ददर्श सा बाला रामांशं देवकीसुतम् ॥ ३१ ॥ प्रातर्बुद्ध्वा तु संचिंत्य महामोहमुपाययौ ॥ तदा ध्यात्वा च कामाक्षीं सर्वाभीष्टप्रदायिनीम् ॥ ॥ ३२ ॥ पौषमासे तु संप्राप्ते शुककंठे सुपत्रिकाम् ॥ बद्ध्वा तं प्रेषयामास शुकं पत्रस्थितं प्रियम् ॥ ३३ ॥ स गत्वा पुष्पविपिनं महावतिपुरीस्थितम् ॥ नरशब्देन वचनं कृष्णांशाय शुकोब्रवीत ॥ ३४ ॥ वीर तेऽवरजो बंधुर्नाम्नाल्हादो महाबलः ॥ तस्मै हि प्रेषिता पत्री स्वर्णवत्या हितप्रदा ॥ ३५ ॥ तां ज्ञात्वा च पुनस्तस्या उत्तरं देहि मत्प्रियम् ॥ अथ वा पत्रमालिख्य तत्त्वं मे कुरु कंठके ॥ ३६ ॥ इति श्रुत्वोदयो वीरो गृहीत्वा पत्रमुत्तमम् ॥ ज्ञातवांस्तत्र वृत्तांतमाल्हादाय पुनर्ददौ ॥ ३७ ॥ जम्बुकश्च नृपो वीरो रुद्रदत्तवरो बली ॥

अजेयोन्यनृपैर्वीर त्वया युधि निपातितः ॥ ३८ ॥ तथाविधं मत्पितरमिंद्रदत्तवरं रिपुम् ॥ तमेवं जहि संग्रामे मम पाणिग्रहं कुरु ॥
॥ ३९ ॥ इति ज्ञात्वा स आह्लादस्तामाश्वास्य हृदि स्थिताम् ॥ शुककंठे बबंधाशु लिखित्वा पत्रमुत्तमम् ॥ ४० ॥ स शुकः पन्नगः पूर्वं
पुंडरीकेन शापितः ॥ रेवत्यंशस्य कार्यं च कृत्वा मोक्षत्वमागतः ॥ ४१ ॥ मृते तस्मिञ्छुके रम्ये देवी स्वर्णवती तदा ॥ दाहयित्वा ददौ
दानं विप्रेभ्यस्तस्य तृप्तये ॥ ४२ ॥ माघमासि च संप्राप्ते पंचम्यां कृष्णपक्षके ॥ आह्लादः सप्तलक्षैश्च सैन्यैः सार्द्धं ययौ मुदा ॥ ४३ ॥
तालनाद्याश्च ते शूराः स्वंस्वं वाहनमाश्रिताः ॥ आह्लादं रक्षयन्तस्ते ययुः पंचदशाहकम् ॥ ४४ ॥ वंगदेशं समुल्लंघ्य शीघ्रं प्राप्ता हिमालयम् ॥
रूपणं पत्रकर्त्तारं बलखानिरुवाच तम् ॥ ४५ ॥ गच्छ त्वं वीर कवची करालाश्वं समास्थितः ॥ पंचशस्त्रसमायुक्तो राजानं शीघ्रमावह ॥ ४६ ॥
युद्धचिह्नं तनौ कृत्वा मामागच्छ त्वरान्वितः ॥ तथा मत्वा शिखंडयंशो ययौ शीघ्रं स रूपणः ॥४७॥ स ददर्श सभां राज्ञो बहुशूरसमन्विताम् ॥
पार्वतीयैर्नृपैः सार्द्धं सहस्रैर्बलवत्तरैः ॥ ४८ ॥ स उवाच नृपश्रेष्ठं नेत्रसिंहं महाबलम् ॥ त्वत्सुताया विवाहाय बलखानिर्महाबलः ॥ सप्तलक्षबलै
र्गुप्तः संप्राप्रस्तव राष्ट्रके ॥ ४९ ॥ तस्मात्त्वं स्वसुतां शीघ्रमाह्लादाय समर्पय ॥ शुल्कं मे देहि नृपते युद्धरूपं सुदारुणम् ॥ ५० ॥ इति श्रुत्वा वच
स्तस्य स राजा क्रोधमूर्च्छितः ॥ पट्टनाधिपमाज्ञाय भूपं पूर्णबलं रुषा ॥ अरुधत्स कपाटं च तस्य बंधनहेतवे ॥ ५१ ॥ पाशहस्ताञ्छूरशतं पट्ट
नाधिपरक्षितान् ॥ दृष्ट्वा स रूपणो वीरः खड्गयुद्धमचीकरत् ॥ ५२ ॥ हत्वा तन्मुकुटं राज्ञो गृहीत्वाकाशगो बली ॥ बलखानिं तु संप्राप्य चिह्नं
तस्मै न्यवेदयत् ॥ ५३ ॥ इति श्रुत्वा प्रसन्नात्मा सप्त लक्षदलैर्युतः ॥ अरुधन्नगरीं सर्वां नेत्रसिंहेन रक्षिताम् ॥ ५४ ॥ नेत्रसिंहस्तु बलवान्पार्वती
यैर्नृपैः सह ॥ हिमतुंगतलं प्राप्य युद्धार्थी तान्समाह्वयत् ॥ ५५ ॥ सहस्रं च गजास्तस्य हया लक्षं महाबलाः ॥ सहस्रं च नृपाः शूराश्चतुर्लक्ष
पदातिभिः ॥ ५६ ॥ योगसिंहो गजैः सार्द्धं बलखानिं समाह्वयत् ॥ भोगसिंहो हयैः सार्द्धं कृष्णांशं च समाह्वयत् ॥ ५७ ॥ विजयो नृपपुत्रश्च
सर्वभूपतिभिः सह ॥ देवसिंहस्तथा म्लेच्छै रूपणं च समाह्वयत् ॥ ५८ ॥ तयोश्चासीन्महद्युद्धं सेनयोस्तत्र दारुणम् ॥ निर्भयाश्चैव ते शूराः
पार्वतीयाः समंततः ॥ जघ्नुस्ते शात्रवीं सेनां द्विलक्षां वीरपालिताम् ॥ ५९ ॥ प्रभग्नं स्वबलं दृष्ट्वा चत्वारो मदमत्तकाः ॥ दिव्यानश्वान्समारुह्य
चक्रुः शत्रोर्महावधम् ॥ पुनरुज्जीवितं सर्वं ढक्कामृतरवाद्बलम् ॥ ६० ॥ युद्धाय संमुखं प्राप भृगुश्रेष्ठ पुनः पुनः ॥ अहोरात्रं रणश्चासीत्तेषां
तत्रैव दारुणः ॥ ६१ ॥ एवं सप्ताह्नि संजाते युद्धे भीरुभयंकरे ॥ उपायैर्बहुभिर्वीराश्चक्रुश्चैव रणं बहुम् ॥ ६२ ॥ पुनस्ते जीवमापन्ना जघ्नुस्ते।त्रि

पुसैन्यपान् ॥ तालनाद्यास्तु ते शूरा दुःखितास्तत्र चाभवन् ॥ निराशां विजये प्राप्य कृष्णांशं शरणं ययुः ॥ ६३ ॥ तानाश्वास्य स कृष्णां
शस्तत्र दिव्यहये स्थितः ॥ नभोमार्गेण बलवान्स्वर्णवत्यंतिकं ययौ ॥ ६४ ॥ हर्म्योपरि स्थितां देवीं सर्वशोभासमन्विताम् ॥ नत्वोवाच वचः
श्लक्ष्णं किंकरोहमिहोदयः ॥ शरण्यां त्वामुपागच्छं कामाक्षीमिव भामिनि ॥ ६५ ॥ वृत्तान्तं कथयामास यथासीच्च महारणः ॥ श्रमेण कर्शिता
वीरा निराशां जीवनेऽगमन् ॥ ६६ ॥ साह चोदयसिंह त्वं कामाक्ष्या मंदिरं व्रज ॥ अहं च स्वालिभिः सार्धं नवम्यां पूजने रता ॥ ६७ ॥ ढक्का
मृतस्य वाद्येन पूजये सर्वकामदाम् ॥ इति श्रुत्वा स बलवान्स्वसैन्यं प्रति चागमत् ॥ ६८ ॥ अर्धशेषां रणात्सेनां पराजाप्य च दुद्रुवुः ॥ पट्ट
नाख्यपुरे प्राप्ता जयं प्राप्य महाबलाः ॥ ६९ ॥ पराजिते रिपौ तस्मिन्नेत्रसिंहसुतैः सह ॥ गृहमागत्य बलवान्विप्रेभ्यो गोधनं ददौ ॥ ७० ॥
नवम्यां पितरं प्राह देवी स्वर्णवती तदा ॥ कामाक्षीसेवनेनाशु कुरु यागोत्सवं मम ॥ यत्प्रसादाच्च विजयी दुर्जयेभ्योऽभवद्भवान् ॥ ७१ ॥ इति
श्रुत्वा पिता प्राह स्वप्नो दृष्टस्तथा मया ॥ पूजनान्मंगलं राज्ञां नो चेद्विघ्नो हि शोभने ॥ ७२ ॥ पित्रोक्तैवं निशायां तु सा सुता पितुराज्ञया ॥
ढक्कामृतस्य वाद्येन कामाक्षीमंदिरं ययौ ॥ ७३ ॥ कृष्णांशो माल्यकारस्य वधूर्भूत्वा समागतः ॥ ढक्कामृतं च नारीभ्यो गृहीत्वा त्वरितो ययौ ॥
॥७४॥ एतस्मिन्नन्तरे वीराः षष्टिर्वाहनसंयुताः ॥ ढक्कार्थं प्रययुः शीघ्रं सर्वशस्त्रैः समुद्यताः ॥७५॥ तानागतान्स बलवान्दृष्ट्वा खड्गं गृहीतवान् ॥
पंचपंचाशतः शूराननयद्यमसादनम् ॥ ७६ ॥ कृष्णांशस्त्वरितो गत्वा रूपणो यत्र तिष्ठति ॥ ढक्कामृतं च संप्राप्य हयारूढो ययौ सभाम् ॥७७॥
हृते ढक्कामृते दिव्ये नेत्रसिंहो भयातुरः ॥ ऐन्द्रं यज्ञं तथा कृत्वा हवनाय परोऽभवत् ॥ ७८ ॥ प्रभाते समनुप्राप्ते ते वीराः स्वबलैः सह ॥ तरसा
प्रययुः सर्वे गजोष्ट्रहयसंस्थिताः ॥ दिनान्ते प्राप्तवंतश्च यत्राभूत्समहारणः ॥ ७९ ॥ कृष्णांशः पूजयित्वा तं दध्मौ ढक्कामृतं बली ॥ तच्छब्देन
मृता वीराः पुनरुज्जीवितास्तदा ॥ ८० ॥ सप्तलक्षबलं तस्य पुनः प्राप्तं मदातुरम् ॥ रुरोध नगरीं सर्वां दध्मौ वाद्यान्यनेकशः ॥ ८१ ॥
रुद्धे तु नगरे तस्मिन्नेत्रसिंहो भयातुरः ॥ स्वात्मानमर्पयामास वह्नौ शक्राय धीमते ॥ ८२ ॥ तदा प्रसन्नो भगवानुवाच नृपतिं प्रति ॥ रामांशोयं
च कृष्णांशो भुवि जातौ कलैकया ॥ ८३ ॥ तस्मै योग्याय सा कन्या रामांशाय यशस्विने ॥ योगिनीयं स्वर्णवती रेवत्यंशावतारिणी ॥८४॥
इत्युक्त्वा च स्वयं देवो ढक्कामृतमुमाप्रियम् ॥ हृत्वा वह्नौ समाक्षिप्य दुर्गायै संन्यवेदयत् ॥ ८५ ॥ गते तस्मिन्सुरपतौ स राजा ब्राह्मणैः सह ॥
महीपतिं प्रति ययौ मेलनार्थं समुद्यतः ॥ ८६ ॥ तथागतं नृपं दृष्ट्वा कृष्णांशश्च महीपतिः ॥ आह्लादमातुलः प्राह मान्यः सर्वबलैः सदा ॥८७॥

राजन्नयं स बलवानाह्लादः सानुजैः सह ॥ मत्पंक्तौ न स्थितो वीरः कुले हीनत्वमागतः ॥ ८८ ॥ आर्याभीरी स्मृता तेषां किं त्वया विदितं न हि ॥ यदि देया त्वया कन्या तर्हि त्वं हीनतां व्रज ॥ ८९ ॥ अतस्त्वं वचनं चेदं कुलयोग्यं शृणुष्व भोः ॥ चतुरो बालकान्नीचांस्तालनेन समन्वितान् ॥ ९० ॥ वञ्चयित्वा विवाहार्थे शिरांस्येषां समाहर ॥ मंडपांते मखं कृत्वा चामुण्डायै समर्पय ॥ ९१ ॥ त्वत्कन्यया समाहूता वीरा वै रेवती हि सा ॥ पश्चात्कन्यां स्वयं हत्वा कुलकल्याणमावह ॥ ९२ ॥ नो चेद्भवान्क्षयं यायात्सकुलो जंबुको यथा ॥ इत्युक्त्वा स ययौ सार्द्धं यत्राह्लादस्य बांधवः ॥ ९३ ॥ इति श्रुत्वा स शल्यांशः सुयोधनमुखेरितम् ॥ तथेत्युक्त्वोत्सवं कृत्वा मंडपांते विधानतः ॥ आह्लादस्य समीपं स गत्वैतद्वंचनाय हि ॥ तमाह दंडवत्पादौ गृहीत्वा नृपतिस्स्वयम् ॥ ९४ ॥ भवन्तोंशावताराश्च मया ज्ञाताः सुरोत्तमात् ॥ निरस्त्रान्पञ्च युष्मांश्च पूजयित्वा यथाविधि ॥ रामांशाय स्वकन्यां चदास्यामि कुलरीतितः ॥ ९५ ॥ इत्याह्लादं समादिश्य स नृपश्छलमाश्रितः ॥ दुर्गोत्सवे ययौ गेहं तद्वधाय समुद्यतः ॥ ९६ ॥ सहस्रं मंडपे भूपान्संस्थाप्य स्वबलैः सह ॥ तालनाद्यांश्च षट् शूरान्मंडपांते समाह्वयत् ॥ ९७ ॥ विवाहप्रथमावर्ते योगसिंहोऽसिमुत्तमम् ॥ वरमाहत्य शिरसि जगर्ज बलवान्रुषा ॥ ९८ ॥ तमाह तालनो धीमान्न योग्यं भवता कृतम् ॥ श्रुत्वाह नेत्रसिंहस्तं कुलरीतिरियं बलिन् ॥ निरायुधैः परैः सार्द्धं शस्त्रिणां संगरो हि नः ॥ ९९ ॥ इति श्रुत्वा योगसिंहं कृष्णांशस्तं समारुधत् ॥ भोगसिंहं तथा कृष्य बलखानिर्गृहीतवान् ॥ १०० ॥ विजयं तृतीयावर्ते सुखखानिर्न्यरुंद्ध वै ॥ चतुर्थावर्तके शत्रुं नृपं पूर्णबलं शठम् ॥ रूपणस्तं गृहीत्वाशु युयुधे तद्बलैः सह ॥ १०१ ॥ पंचमे बहुराजानं तालनश्च समारुधत् ॥ षष्ठावर्त्ते नेत्रसिंहं तथाह्लादो गृहीतवान् ॥ १०२ ॥ संप्राप्ते तुमले युद्धे बहुशूराः क्षयं गताः ॥ निरायुधाः षड् बलिनः संक्षम्य व्रणमुत्तमम् ॥ निरायुधान्रिपून्स्वान्स्वांश्चक्रुः शक्तिप्रपूजकाः ॥१०३॥ एतस्मिन्नन्तरे देवः कालदर्शी समागतः ॥ नभोमार्गेण तानश्वांस्तेभ्य आगत्य संददौ ॥ १०४ ॥ बिन्दुलं चैव कृष्णांशो देवस्तत्र मनोरथम् ॥ रूपणश्च करालाश्वं चाह्लादस्तु पपीहकम् ॥ १०५ ॥ हरिणीं बलखानिश्च तद्भ्राता हरिनागरम् ॥ सिंहिनीं तालनः शूरः समारुह्य रणोद्यतः ॥ १०६ ॥ रात्रौ तन्नृपतेः सेनां हत्वा बद्ध्वा च तत्पतिम् ॥ दोलां गेहाच्च निष्काश्य सप्तभ्रमरकारिताम् ॥ १०७ ॥ स्वसैन्यं ते समाजग्मुर्निर्भया बलवत्तराः ॥ तान्सर्वान्नेत्रसिंहादीन्दृष्ट्वा पाहीति जल्पतः ॥ १०८ ॥ निगडैरेकतः कृत्वा पञ्च भूपान्हि वंचकान् ॥ कारागारे महाघोरे तत्र तान्संन्यवासयन् ॥ ॥ १०९ ॥ नेत्रसिंहो वरो भ्राता सुन्दरारण्यभूमिपः ॥ हेतुं ज्ञात्वाययौ शीघ्रं मायावी लक्षसैन्यकः ॥ ११० ॥ तत्रागत्य हरानन्दो नाम्ना तान

युधद्बली ॥ नेत्रसिंहस्य सैन्यं च चतुर्लक्षं तदागमत् ॥१११॥ पञ्चलक्षै रणो घोरः सप्तलक्षयुतैरभूत् ॥ पञ्चाहोरात्रमात्रं च तयोश्चासीत्स संकुलः॥ अर्द्धसैन्यं रिपोस्तत्र हतशेषमदुद्रुवत् ॥ ११२ ॥ विस्मितः स हरानन्दो रुद्रमायाविशारदः ॥ बलाधिक्ययुताञ्ज्ञात्वा शिवध्यानपरोऽभवत् ॥ ॥ ११३ ॥ रचित्वा शाबरीं मायां नानारूपविधारिणीम् ॥ पाषाणभूतान्सकलान्कृत्वा भूपान्समाययौ ॥११४॥ ससुतं भ्रातरं ज्येष्ठं नृपं पूर्णबलं ततः ॥ मोचयित्वा ययौ गेहं कृतकृत्यो महाबली ॥ ११५॥ आह्लादं निगडैर्बद्धा मायया जडतां गतम्॥ नेत्रसिंहः स बलवान्ययौ स्वं दुर्गमुद्यतः॥ तं प्रशंस्यानुजं वीरो विप्रेभ्यश्चददौ धनम् ॥११६॥ तदा स्वर्णवती दीना बद्धं ज्ञात्वा पतिं निजम् ॥ कृष्णांशाद्यान्मोहितांश्च शंभुमायावशानुगान् ॥ ॥११७॥ रुरोदोच्चैस्तदा देवीं ध्यायंती कामरूपिणीम् ॥ तदा तुष्टा जगद्धात्री मूर्च्छितांस्तानबोधयत् ॥११८॥ ते सर्वे चेतनां प्राप्ताः प्राहुः स्वर्णवतीं मुदा॥ क्वास्थितो बंधुराह्लादो देवि त्वं कारणं वद॥११९॥यथा बद्धः स्वयं स्वामी कथयामास सा तथा॥ अहं शुकी भवाम्यद्य भवान्बिदुलसंस्थितः ॥१२०॥ इत्युक्त्वा सा शुकी भूत्वा कृष्णांशेन समन्विता॥ यत्रास्ते तत्पतिर्बद्धस्तत्र सा कामिनी ययौ ॥१२१॥ कृष्णांशोऽपि हयारूढो नभोमार्गेण चाप्तवान्॥ अभीरीं मूर्तिमासाद्य स्वामिनं प्रति सा ययौ ॥१२२॥ आश्वास्य तं यथायोग्यं कृष्णांशं प्रत्यवर्णयत् ॥ कृष्णांशस्तत्र बलवान्हत्वा दुर्गं निवासिनः ॥१२३॥ रक्षकाञ्छतसाहस्रान्हत्वा भ्रातरमाययौ ॥ पौर्णिमां मधुयुक्तां च ज्ञात्वा सर्वे त्वरान्विताः ॥१२४॥ अयोध्यां शीघ्रमागम्य स्नात्वा वै सरयूं नदीम् ॥ होलिकादाहसमये शीघ्रं वेण्यां समागताः ॥१२५॥ स्नानध्यानादिका निष्ठाः कृत्वा गेहमुपाययुः ॥ सागरस्य तटं प्राप्य कृत्वा ते च महोत्सवम् ॥ चैत्रस्य कृष्णपञ्चम्यां स्वगेहं पुनराययुः ॥ १२६ ॥ दूता उष्ट्रसमारूढास्तत्क्षेमकरणोत्सुकाः ॥ वैशाखे शुक्लपंचम्यां स्वगेहं पुनराययुः ॥ १२७ ॥ मलना भूपतिश्चैव गेहेगेहे महोत्सवम् ॥ कारयित्वा विधानेन ब्राह्मणेभ्यो ददौ धनम् ॥ १२८ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ चतुर्दशाब्दे कृष्णांशे यथा जातं तथा शृणु ॥ जयन्तः शक्रपुत्रश्च जानकीशापमोहितः ॥ कलौ जन्मत्वमापन्नः स्वर्णवत्युदरेऽवसत् ॥ १ ॥ चैत्रशुक्लनवम्यां च मध्याह्ने गुरुवासरे ॥ स जातश्चन्द्रवदनो राजलक्षणलक्षितः ॥ २ ॥ जाते तस्मिन्सुतश्रेष्ठे देवाः सर्षिगणास्तदा ॥ इन्दुलोयं महीं जातो जयन्तो वासवात्मजः ॥ इत्यूचुर्वचनं तस्मादिन्दुलो नाम चाभवत् ॥ ३ ॥ आह्लादो जातकर्मादीन्कारयित्वा शिशोर्मुदा ॥ ब्राह्मणेभ्यो

---

१ सप्तम्यर्थे द्वितीया ।

ददौ स्वर्णधेनुवृन्दं हयान्गजान् ॥ ४ ॥ इन्दुले तनये जाते द्विमासांते महीतले ॥ योगसिंहस्तदागत्य स्वर्णवत्यै ददौ धनम् ॥ ५ ॥ नेत्रसिंह सुतं दृष्ट्वा मलनास्नेहसंयुता ॥ पप्रच्छ कुशलप्रश्नं भोजयित्वा विधानतः ॥ ६ ॥ शतवृन्दाश्च नर्तक्यो नानारागेण संयुताः ॥ तत्रागत्यैव ननृतुर्यत्र भूपसुतः स्थितः ॥ ७ ॥ सप्तरात्रमुषित्वा स योगसिंहो ययौ गृहम् ॥ षण्मासे च सुते जाते देवेन्द्रः स्नेहकातरः ॥ ८ ॥ पुत्रस्नेहेन तं पुत्रं स जहार स्वमायया ॥ संहृत्य बालकं श्रेष्ठमिन्द्राण्यै च समर्पयत् ॥ ९ ॥ स्नेहप्लुता शची देवी स्वस्तनौ तमपाययत् ॥ देव्या दुग्धं स वै पीत्वा षोडशाब्दसमोभवत् ॥ १० ॥ इन्दुं पीयूषभवनं गृह्णाति वपुषा स्वयम् ॥ अतः स इन्दुलो नाम जयन्तश्च प्रकीर्तितः ॥ स बालः स्वपितुर्विद्यां पठित्वा श्रेष्ठतामगात् ॥ ११ ॥ विनष्टे बालके तस्मिन्देवी स्वर्णवती तदा ॥ रुरोदोच्चैस्तदा दीना हा पुत्र क्व गतोऽसि भोः ॥ १२ ॥ ज्ञात्वाह्लादं तथा भूतं दशग्रामे तथाविधे ॥ रौद्रः कोलाहलो जातो रुदतां च नृणां मुने ॥ १३ ॥ आह्लादः स्वकुलैः सार्द्धं निराहारो यतेंद्रियः ॥ शारदां शरणं प्राप्तस्त्रिरात्रं तत्र चावसत् ॥ १४ ॥ तदा तुष्टा स्वयं देवी वागुवाचाशरीरिणी ॥ हे पुत्र स्वकुलैः सार्द्धं मा शुचस्त्वं सुतं प्रति ॥ ॥ १५ ॥ इन्द्रपुत्रो जयन्तश्च स्वर्गलोकमुपागतः ॥ दिव्यविद्यां पठित्वा स त्रिवर्षांते गमिष्यति[1] ॥ १६ ॥ यावत्त्वं भूतलेऽवात्सीस्तावत्स[2] भूतले वसेत् ॥ तत्पश्चात्स्वर्गतिं प्राप्य जयन्तो हि भविष्यति ॥ १७ ॥ इत्युक्ते वचने देव्या निश्शोकास्ते तदाभवन् ॥ दशग्रामपुरं प्राप्य समूषुर्ज्ञानतत्पराः ॥ १८ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडापरपर्याये कलियुगीयेतिहाससमुच्चये चतुर्दशोऽध्यायः ॥ १४ ॥ ॥छ॥

॥ ॥ सूत उवाच ॥ ॥ इन्दुले स्वर्गसंप्राप्ते ते वीराः शोककातराः ॥ शारदां पूजयामासुः सर्वलोकनिवासिनीम् ॥ १ ॥ जप्त्वा सप्तशती स्तोत्रं त्रिसन्ध्यं प्रेमभक्तितः ॥ ध्यानेनानन्दमापन्नास्तदा सप्तशतेहनि ॥ २ ॥ सामन्तद्विजपुत्रश्च चामुण्डो नाम विश्रुतः ॥ सोऽष्टवर्षवया भूत्वा पूजयामास चण्डिकाम् ॥ ३ ॥ द्वादशाब्दे ततो जाते त्रिचरित्रस्य पाठतः ॥ परीक्षार्थं तु भक्तानां साक्षान्मूर्तित्वमागता ॥ ४ ॥ कुंडिकेयं च भो भक्ताः पूरयामि च तामहम् ॥ यूयं तु मनसोपायैः कुरुध्वं पूरणे मतिम् ॥ ५ ॥ सुखखानिस्तु बलवान्मधुपुष्पैस्तथा फलैः ॥ कुण्डिकां पूरयामास न पूर्णत्वमुपागता ॥ बलखानिस्तथा मांसैर्मूलशर्मा तु रक्तकैः ॥ ६ ॥ देवकी च तदा हव्यैश्चन्दनादिभिरर्चनैः ॥ कुण्डिकां पूरयामास न पूर्णत्वमुपागता ॥ ७ ॥ आह्लादश्चैव सर्वांगैरुदयः शिरसा स्वयम् ॥ कुण्डिकां पूरयामास तदा पूर्णत्वमागता ॥ ८ ॥ उवाच वचनं देवी स्वभक्ता

---

[1] आगमिष्यतीत्यर्थः । [2] वत्स्यसीत्यर्थः ।

न्भक्तवत्सला ॥ सुखाखाने भवान्वीरो भविष्यति सुरप्रियः ॥ ९ ॥ बलखानिर्महावीरो दीर्घे काले स मृत्युभाक् ॥ मूलशर्मा तु बलवान्रक्त
बीजो भविष्यति ॥ १० ॥ देवकी च भवेद्देवी चिरकालं स्वलोकगा ॥ आह्लादश्चैव कृष्णांशस्तयोर्मध्ये द्वयं वरम् ॥ एकस्तुदे ववत्प्रोक्तोबला
धिक्यो द्वितीयकः ॥ ११ ॥ निष्कामोऽयं देवसिंहो मृतो मोक्षत्वमाप्नुयात् ॥ इत्युक्त्वान्तर्दधे माता ते सर्वे तृप्तिमागताः ॥ १२ ॥ इति श्रीभविष्ये
महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडापरपर्याये कलियुगीयेतिहाससमुच्चये पञ्चदशोऽध्यायः ॥ १५ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ प्राप्ते
सप्तदशाब्दे च कृष्णांशे तत्र चाभवत् ॥ शृणु त्वं मुनिशार्दूल दृष्टं यद्योगदर्शनात् ॥ १ ॥ रत्नभानौ मृते राज्ञि मरुधन्वमहीपतिः ॥ गजसेन
स्तदा विप्र पृथ्वीराजभयातुरः ॥ २ ॥ आराध्य पावकं देवं यज्ञध्यानव्रतार्चनैः ॥ द्वादशाब्दं सदाचारः प्रेमभक्त्या ह्यतोषयत् ॥ ३ ॥ तदा
प्रसन्नो भगवान्पावकीयं हयं शुभम् ॥ ददौ तस्मै सुतौ चोभौ कन्यां च गजमुक्तिकाम् ॥ ४ ॥ पावकास्ते हि चत्वारः समुद्भूता महीतले ॥
अग्निवर्णा महावीराः सर्वलक्षणलक्षिताः ॥ ५ ॥ अष्टादशवयोभूताः सर्वे ते मुनिपुंगव ॥ जातमात्रा देवसमाः सर्वविद्याविशारदाः ॥ ६ ॥
अष्टादशाब्दवयसा सा कन्या वरवर्णिनी ॥ दुर्गायाश्च वरं प्राप्ता धर्मांशस्त्वां वरिष्यति ॥ ७ ॥ शार्दूलवंशी स नृपः कृतवान्वै स्वयंवरम् ॥
नानादेश्या नृपाः प्राप्ताः सुताया रूपमोहिताः ॥ ८ ॥ मार्गशीर्षे सिते पक्षे चाष्टम्यां चंद्रवासरे ॥ तस्याः स्वयंवरश्चासीत्सान्नृपान्प्रति
चाययौ ॥ ९ ॥ विद्युद्वर्णं मुखं तस्याश्चंचलायास्तथागतम् ॥ दृष्ट्वा मुमोह धर्मांशो बलखानिर्महीपतिः ॥ १० ॥ सापि दृष्ट्वा च तं
वीरं मुमोह गजमुक्तिका ॥ बुद्ध्वा तस्मै ददौ मालां वैजयंतीं शुभानना ॥ ११ ॥ तारकाद्याश्च भूपालाः सर्वशस्त्रास्त्रसंयुताः ॥ रुरुधुः
सर्वतो वीरं ते बलात्कन्यकार्थिनः ॥ १२ ॥ तथाविधान्नृपान्दृष्ट्वा भूपान्पंचशतान्बली ॥ स शीघ्रं खड्गमुत्सृज्य शतभूपशिरांस्यहन् ॥
॥ १३ ॥ सर्वतो वध्यमानं तं बलखानिं स तारकः ॥ तद्भुजाभ्यां ददौ खड्गं स तदंगे द्विधाभवत् ॥ १४ ॥ महीराजसुतो ज्येष्ठो दृष्ट्वा खड्गं
तथा गतम् ॥ अपोवाह रणाच्छूरस्ततपश्चात्ते नृपा ययुः ॥ १५ ॥ पराजिते नृपबले बलखानिर्महाबलः ॥ तां कन्यां शिबिकारूढां स्वगेहं
सोऽनयद्बली ॥ १६ ॥ तां गच्छंतीं सुतां दृष्ट्वा गजसेनो महीपतिः ॥ महीपत्याज्ञया प्राप्तो ज्ञात्वा तं क्षत्रियाधमम् ॥ १७ ॥ जंबुकघ्नं महावीरं
मायया तममोहयत् ॥ जाते निद्रातुरे वीरे दुर्गायाः शापमोहिते ॥ १८ ॥ निगडैस्तं बबंधाशु दृढैर्लोहमयै रुषा ॥ लोहदुर्गं च संप्राप्य ग्रामरूपं
महीपतिः ॥ १९ ॥ चांडालांश्च समाहूय कठिनांस्तत्रवासिनः ॥ वधायाज्ञापयामास तस्य दंडैरनेकशः ॥ २० ॥ ते रौद्रास्तं समाबध्य ताडया

मासुरूर्जिताः ॥ तत्ताडनात्तदा निद्रा तत्रैव विलयं गता ॥ २१ ॥ दृष्ट्वा ततस्तु चंडालान्बलखानिरताडयत् ॥ तलमुष्टिप्रहारेण चांडाला मरणं
गताः ॥ २२ ॥ मृते पंचशते रौद्रे तच्छेषा दुद्रुवुर्भयात् ॥ कपाटं सुदृढं कृत्वा नृपांतिकमुपाययुः ॥ २३ ॥ स नृपः कारणं ज्ञात्वा हस्तबद्धो महा
बली ॥ उवाच तत्र गत्वासौ वचनं कार्यतत्परः ॥२४॥ भवान्महाबलो वीर चांडालैर्बंधनं गतः ॥ दस्युभिर्लुंठितस्तत्र निद्रावश्यो वनं गतः॥२५॥
मत्सुता भवने प्राप्ता दिष्ट्या त्वं जीवितं गतः ॥ उद्वाह्य मत्सुतां शीघ्रं स्वगेहं यातुमर्हसि ॥ इति श्रुत्वा प्रियं वाक्यं तं प्रशस्य तथाकरोत्॥२६॥
मंडपे वेदकर्माणि विवाहार्थं चकार सः ॥ जातायां मंडपार्चायां पत्रमाह्लादहेतवे ॥ २७ ॥ तदाज्ञया लिखित्वासौ गजसेनोऽग्निसेवकः ॥ उष्ट्रा
रूढं समाहूय शीघ्रं पत्रमचोदयत् ॥ २८ ॥ बलखानेर्विवाहोऽत्र भवान्सैन्यसमन्वितः ॥ संप्राप्य योग्यद्रव्याणि भुक्त्वा त्वं तृप्तिमावह ॥ २९ ॥
इत्युक्ते निशि जातायां बलखानिर्महाबलः ॥ भोजनं कृतवांस्तत्र विषजुष्टं नृपार्पितम् ॥ ३० ॥ गरलं तेन संभुक्तं न ममार वराच्छुभात् ॥ ततः
काले च संप्राप्ते दृष्ट्वा मोहत्वमागतम् ॥ पुनर्बबंध निगडैस्ताडयामास वेतसैः ॥ ३१ ॥ विषदोषं[1]मसृक्द्वारान्निस्सृतं सर्वदेहतः ॥ तदा बुबोध
बलवान्भूपतिं प्राह नम्रधीः ॥ ३२ ॥ राजन्किमीदृशं जातं त्वत्सैन्यं ताडने रतम् ॥ स आह भो महावीर मत्कुले रीतिरीदृशी ॥ यातनां प्रथमं
प्राप्य तदनूद्वाहितो भवेत् ॥ ३३ ॥ इत्युक्ते सति भूपाले गजमुक्ता समागता ॥ पितरं प्राह वचनं कोऽयं तत्ताडने गतः ॥ ३४ ॥ नृपः प्राह सुते
शीघ्रं याहि त्वं निजमंदिरे ॥ कृषिकरोयमायातो द्रव्यार्थं ताडने गतः ॥ ३५ ॥ इति श्रुत्वा वचो घोरं बलखानिर्महाबलः ॥ छित्त्वा तद्बंधनं
घोरं खड्गहस्तः समाययौ ॥ ३६ ॥ शूरान्पंचशतं तं च रुद्ध्वा शस्त्रैः समंततः ॥ प्रजघ्नतस्तु तान्सर्वान्बलखानिर्व्यनाशयत् ॥ ३७ ॥ गजसेन
सुतो ज्येष्ठः सूर्यद्युतिरुपागतः ॥ बद्ध्वा पुनस्तं बलिनं गर्तमध्ये समाक्षिपत् ॥ ३८ ॥ तथा गतं पतिं दृष्ट्वा गजमुक्ता सुदुःखिता ॥ निशि तत्र गता
देवी दत्त्वा द्रव्यं तु रक्षकान्[2] ॥ ३९ ॥ पतिं निष्काश्य रुदती व्यजनं पतये ददौ ॥ रात्रौरात्रौ तथा प्राप्ता व्यतीतं पक्षमात्रकम् ॥ ४० ॥ एतस्मि
न्नंतरे वीरश्चाह्लादः सप्तलक्षकैः ॥ सैन्यैः सहाययौ क्षीघ्रं श्रुत्वा तत्रैव कारणम् ॥ ४१ ॥ बलखानिर्गतो गर्तें रुरोध नगरीं तदा ॥ गजैः षोडशसाह
स्रैर्गजसेनो रणं ययौ ॥ ४२ ॥ त्रिलक्षैश्च हयैः सार्द्धं सूर्यद्युतिरुपाययौ ॥ कांतामलस्तदा प्राप्तस्त्रिलक्षैश्च पदातिभिः ॥ ४३ ॥ तयोश्चासीन्महद्यु
द्धमहोरात्रं हि सैन्ययोः ॥ रक्षिते तालनाद्ये च गजसेनाद्यके तदा ॥ ४४ ॥ द्वितीयेऽह्नि समायाते गजसेनो महाबलः ॥ प्रभग्नं स्वबलं दृष्ट्वा पाव

---

[1] सम्बन्धमनुवर्तिष्यत इतिवदिहापि नपुंसकत्वम् । [2] रक्षकेभ्य इत्यर्थः ।

कीऽयं समारुहत् ॥ दाहयामास तत्सैन्यं तालनाद्यैश्च पालितम् ॥ ४५ ॥ भस्मीभूतं बलं दृष्ट्वा तालनः शत्रुसम्मुखे ॥ गत्वा भल्लेन भूपालं ताडयामास वेगतः ॥ ४६ ॥ मूर्छितं नृपमाज्ञाय सूर्यद्युतिरुपाययौ ॥ पावकीयं समारुह्य दाहयामास तालनम् ॥ ४७ ॥ एतस्मिन्नंतरे शूरौ देवौ चाह्लादकृष्णकौ ॥ बबन्धतू रुषाविष्टौ सूर्यद्युतिमरिंदमम् ॥ ४८ ॥ सुबद्धं भ्रांतरं ज्ञात्वा हयं कांतामलोऽरुहत् ॥ देवसिंहं च संमोह्य कृष्णांशं प्रति सोऽगमत् ॥ गृहीत्वा तं स कृष्णांशं तस्य तेजः समाहरत् ॥ ४९ ॥ सप्तलक्षबलं सर्वं वह्निभूतमभूत्तदा ॥ अमरत्वात्स आह्लादस्तदा तु समजीवयत् ॥ ५० ॥ गजसेनस्यार्द्धसैन्यं तैश्च सर्वैर्विनाशितम् ॥ विजयं नृपतिः प्राप्य हर्षितो गेहमाययौ ॥ ॥ ५१ ॥ वह्निभूतं च कृष्णांशं दृष्ट्वाह्लादः सुदुःखितः ॥ दुर्गां देवीं स तुष्टाव मनसा रणमूर्द्धनि ॥ ५२ ॥ तदा देवी वचः प्राह वत्स ते पुत्र एव च ॥ स्वर्गादागत्य सर्वाणि पुनरुज्जीवयिष्यति ॥ ५३ ॥ इत्युक्ते वचने देव्या इन्दुलो वासवाज्ञया ॥ द्वादशाब्दसमं रूपं धृत्वा विद्याविशारदः ॥ वडवामृतमारुह्य[१] हयं तत्र समागतः ॥ ५४ ॥ तदङ्गादुद्धृता वाहा मेघा इव समन्ततः ॥ पावकं शमयामासुस्त्रयस्ते देवतोपमाः ॥ ५५ ॥ शमीभूते तदा वह्नौ स्वमुखात्सहयो मुदा ॥ लालामुद्धाहयामास तया ते जीवितास्ततः ॥ ५६ ॥ जीविते सप्तलक्षे तु शमीभूते हि पावके ॥ गजसेनः सुताभ्यां च प्रयातः सर्वतोदिशम् ॥ ५७ ॥ लक्षं सैन्यं तु ये शिष्टास्ते सर्वेऽपि भयातुराः ॥ दुद्रुवुर्भार्गवश्रेष्ठ दिव्यरूपत्वधारिणः ॥ ५८ ॥ केचित्संन्यासिनो भूत्वा केचिद्वै ब्रह्मचारिणः ॥ जीवत्वं प्राप्तवन्तस्ते तथान्ये संक्षयं गताः ॥ ५९ ॥ बद्ध्वा तान्गजसेनादींस्त्रीञ्छूरान्स च तालनः ॥ कृष्णांशेन समायुक्त इंद्रदुर्गं समाययौ ॥ ६० ॥ बलखानिं च निष्काश्य तालनस्तदनंतरम् ॥ पृष्टवान्कारणं सर्वं श्रुत्वा तन्मुखतो वचः ॥ तान्वीरांस्ताडयामास वेतसैः स्तंभबधनैः ॥ ६१ ॥ गजमुक्ताज्ञया विप्र सेनापतिरुदारधीः ॥ तालनस्तान्समुत्सृज्य विवाहार्थं समाययौ ॥ बलखानिर्हयारूढो गजमुक्ताच मंडपे ॥ ६२ ॥ गजसेनस्तदादिव्यैर्भोजनैस्तानभोजयत् ॥ निवास्य लोहदुर्गे तान्कपाटः[२] सुदृढीकृतः ॥ लक्षशूरान्स संस्थाप्य स्वयं रुद्धपुरं ययौ ॥६३॥ ते रात्रौ लोहदुर्गेषु ह्युषित्वा यत्नतोबलात् ॥ प्रभाते च कपाटे न द्वारं दृष्ट्वा तदाब्रवीत् ॥ द्वारमुद्धाटयाशु त्वं नो चेप्राणांस्त्यजिष्यसि ॥ ६४ ॥ इति सेनापतिः श्रुत्वा लक्षशूरान्समादिशत् ॥ नानायत्नैश्च हंतव्याः शत्रवो भयकारिणः ॥ ६५ ॥ इति श्रुत्वा तु ते शूराः शतघ्न्यस्तैः सुरोपिताः ॥ एकैकं क्रमशो जघ्नुर्वृंदं ते वैरतत्पराः ॥ ६६ ॥ हते दशसहस्रे तु

---

[१] वडवामृत इति तदीयाश्वस्य नाम, तेन हयशब्देन न पौनरुक्त्यम् । [२] गजसेनेनेतिभावः ।

कृष्णांशो बिंदुलं हयम् ॥ समारुह्य जघानाशु स्वखड्गेन महद्बलम् ॥ ६७ ॥ हतशेषा भयार्तांश्च सहस्राशीतिसम्मिताः ॥ इंद्रदुर्गं प्रति प्राहुर्यथा
जातो बलक्षयः ॥ ६८ ॥ श्रुत्वा भयातुरो राजा स्वसुताभ्यां समन्वितः ॥ गजमुक्तां पुरस्कृत्य बहुद्रव्यसमन्विताम् ॥ स्वपापं क्षालयामास दत्त्वा
कन्यां विधानतः ॥ ६९ ॥ षोडशोष्ट्राणि स्वर्णानि गृहीत्वाह्लाद एव सः ॥ ययौ स्वगेहं महितः पुत्रभ्रातृसमन्वितः ॥ ७० ॥ संप्राप्ते गेहमाह्लादे
देवी स्वर्णवती स्वयम् ॥ इन्दुलं स्वांकमारोप्य ललाप[1] करुणं बहु ॥ ७१ ॥ मृताहं च त्वया पुत्रपुनरुज्जीविता खलु ॥ धन्याहं कृतकृत्यास्मि
जयन्त तव दर्शनात् ॥७२॥ इति श्रुत्वेन्दुलो वीरो नत्वाह जननीं मुदा ॥ अनृणं नाधिगच्छामि त्वत्तो मातः कदाचन ॥ ७३ ॥ संप्राप्ते गेहमाह्लादे
राजा परिमलः सुधीः ॥ वाद्यानि वादयामास विप्रेभ्यश्च ददौ धनम् ॥ ७४ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडापरपर्याये
कलियुगीयेतिहाससमुच्चये षोडशोऽध्यायः ॥ १६ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ कृष्णांशेऽष्टादशाब्दे तु यथाजातं तथा शृणु ॥ मृते
कृष्णकुमारे तु भूपतौ रत्नभानुना ॥ १ ॥ महीराजः सुदुःखार्तो लक्षचंडीमकारयत् ॥ होमान्ते तु तदा देवी वागुवाच नृपं प्रति ॥ २ ॥ वर्षेवर्षे तु
ते सप्त भविष्यंत्यगसम्भवाः ॥ कुमाराः कौरवांशाश्च द्रौपद्यंशा सुता नृप ॥ ३ ॥ इत्युक्ते वचने तस्मिन्राज्ञी गर्भमथो दधौ ॥ कर्णांशश्च सुतो
जातस्तारको बलवत्तरः ॥ ४ ॥ द्वितीयाब्दे तथा जाते दुश्शासनशुभांशतः ॥ नृहरिरिति विख्यातस्तृतीयाब्दे तु चाभवत् ॥ ५ ॥ उद्धर्षांशः
सरदनो दुर्मुखांशस्तु मर्दनः ॥ विकर्णांशः सूर्य्यकर्मा भीमश्चांशो विविंशतेः ॥ ६ ॥ वर्द्धनश्चित्रबाणांशो वेला तदनु चाभवत् ॥ यथा कृष्णा तथा
सैव रूपचेष्टागुणैर्मुने ॥ ७ ॥ भुवि तस्यां च जातायां भूकम्पो दारुणोऽभवत् ॥ अट्टाट्टहासमशिवं चामुंडा खे चकार ह ॥ रक्तवृष्टिः पुरे चासीद
स्थिशर्करया युता ॥ ८ ॥ ब्राह्मणाश्च समागत्य जातकर्मादिकां क्रियाम् ॥ कृत्वा नाम तथा चक्रे शृणु भूमिप साक्षरम् ॥ ९ ॥ इला च शशि
नो माता विकल्पेनाऽभवद्भुवि ॥ तस्माद्वेलेति विख्याता कन्येयं रूपशालिनी ॥ १० ॥ जातायां च सुतायां स पिता विप्रेभ्य उत्तमम् ॥ ददौ दानं
मुदा युक्तो वासांसि विविधानि च ॥ ११ ॥ द्वादशाब्दवयः प्राप्ते सा सुता वरवर्णिनी ॥ उवाच पितरं नम्रा शृणु त्वं पृथिवीपते ॥ १२ ॥ मंडपे
रक्तधाराभिर्यो मां संस्नापयिष्यति ॥ द्रौपद्या भूषणं दाता स मे भर्ता भविष्यति ॥१३॥ स्वर्णपत्रे तदा राजा पद्यं वेलामखोद्भवम् ॥ लिखित्वा
तारकं प्राह त्वमन्वेषय तत्पतिम् ॥ १४ ॥ सार्द्धं लक्षत्रयं द्रव्यं गृहीत्वा लक्षसैन्यकः ॥ नृपान्तरं ययौ शीघ्रं तारकः पितुराज्ञया ॥ १५ ॥

---

[1] विलापमकरोदित्यर्थः ।

सिंधुस्थाने चार्यदेशे भूपं भूपं ययौ बली ॥ न गृहीतं नृपैः कैश्चित्तद्वाक्यं घोरमुल्बणम् ॥ महीपतिं स संप्राप्य मातुलं तद्व
चोऽब्रवीत् ॥ १६ ॥ श्रुत्वा स आह भो वीर ब्रह्मानन्दो महाबलः ॥ स च वाक्यं प्रगृह्णीयादाह्लादाद्यैः सुरक्षितः ॥ १७ ॥ किं त्वया
विदितं नैव चरितं तस्य विश्रुतम् ॥ भवान्षड्बंधुसहितः कृष्णांशाद्यैर्विवाहितः ॥ १८ ॥ ते सर्वे वशगास्तस्य ब्रह्मानंदस्य धीमतः ॥ नास्ति
भूमंडले कश्चित्तद्बलेन समो नृपः ॥ १९ ॥ इति श्रुत्वा ययौ तूर्णं तारकः स्वबलैः सह ॥ तत्पद्यं कथयित्वाग्रे हस्तबद्धस्तदाभवत् ॥ २० ॥
कृष्णांशस्तु गृहीत्वाशु पद्यं वाक्यमुवाच ह ॥ अहं विवाहयिष्यामि ब्रह्मानंदं नृपोत्तमम् ॥ २१ ॥ तूष्णीं भूतास्तदा सर्वे तारकः स द्विजैः सह ॥
अभिषेकं तदा कृत्वा स्वगेहं पुनराययौ ॥ २२ ॥ माघमासे सिते पक्षे त्रयोदश्यां सुवासरे ॥ विवाहलग्नं शुभदं वरकन्यार्थयोस्तदा ॥ २३ ॥
सप्तलक्षबलैः सार्द्धं लक्षणश्च सतालनः ॥ महावतीं पुरीं प्राप्तो बली परिमलादिभिः ॥ २४ ॥ आह्लादो लक्षसैन्याढ्यः कृष्णांशेन समन्वितः ॥
बलखानिर्लक्षसैन्यः संयुतः सुखखानिना ॥ २५ ॥ नेत्रसिंहो लक्षसैन्यो योगभोगसमन्वितः ॥ रणजिच्च बली बालो द्विलक्षबलसंयुतः ॥ २६ ॥
एवं द्वादशलक्षाणां सैन्यानामधिपो बली ॥ तालनः सिंहिनीसंस्थो वडवां प्रययौ सह ॥ २७ ॥ सैन्यैर्द्वादशलक्षैश्च सहितस्तालनो बली ॥
आययौ देहलीग्रामे महीराजानुपालिते ॥ २८ ॥ देवो मनोरथारूढो बिंदुलस्थः स कृष्णकः ॥ वडवामृतमासाद्य स्वर्णवत्याः सुतो गतः ॥
॥ २९ ॥ रूपणश्च करालस्थ आह्लादश्च पपीहके ॥ बलखानिः कपोतस्थो हरिणस्थोऽनुजस्ततः ॥ ३० ॥ रणजिन्मलनापुत्रः संस्थितो हरिना
गरे ॥ पञ्चशब्दगजारूढो महावत्यधिपो गतः ॥ ३१ ॥ विमानवरमारुह्य धीवरैः शतवाहिकैः ॥ मणिमुक्तास्वर्णमयं सहस्रैर्वाद्यकैर्युतम् ॥ ३२ ॥
अयुतैश्च पताकैश्च[1] वेत्रपाणिसहस्रकैः ॥ सहस्रैः शिबिकाभिश्च पञ्चसाहस्रकै रथैः ॥ ३३ ॥ शकटैर्महिषोढैस्तु तथा पञ्चसहस्रकैः ॥ सर्वतोपस्कृतं[2]
रम्यं ब्रह्मानंदं समागतः ॥ ३४ ॥ श्रुत्वा कोलाहलं तेषां महीराजो नृपोत्तमः ॥ विस्मितः स बभूवात्र शिबिराणि मुदा ददौ ॥ ३५ ॥ दुर्गद्वारि
क्रियां रम्यां कृत्वा विधिविधानतः ॥ द्रौपद्या भूषणं देहि वेलायै स तमब्रवीत् ॥ ३६ ॥ इन्दुलस्तु ययौ स्वर्गं वासवं प्रति चाब्रवीत् ॥ द्रौपद्या
भूषणं सर्वं देहि मह्यं सुरोत्तम ॥ ३७ ॥ कुबेरात्स समानीय दिव्यमाभूषणं ददौ ॥ इन्दुलः प्रहरान्ते च प्रातः पित्रे न्यवेदयत् ॥ ३८ ॥ आह्ला
दस्तु स्वयं गत्वा वेलायै भूषणं ददौ ॥ प्राप्ते ब्राह्मे मुहूर्ते तु विवाहस्तत्र चाभवत् ॥ ३९ ॥ संप्राप्ते प्रथमावर्ते तारकः खड्गमाददौ ॥ आह्लादस्तं

---

[1] पताकावद्भिः—इत्यर्थः । 'कुन्ता विशन्ति' इतिवन्मत्वर्थीयोऽच्, तद्वत्तु लक्षणा बा, परन्तु—लक्षणापक्षेऽजहल्लिंगत्वात्पताकाभिरित्येव सुसाधु स्यात् । [2] सन्धिरार्षः ।

समासाद्य युयुधे बहुलीलया ॥ ४० ॥ नृहरिस्तु द्वितीये च कृष्णांशं प्रति चारुधत् ॥ तथा सरदनं वीरं बलखानिरुपाययौ ॥ ४१ ॥ मर्दनं सुखखानिस्तु चतुर्थावर्तकेऽरुधत् ॥ रणजित्सूर्यवर्माणं स भीमं रूपणो बली ॥ देवस्तु वर्धनं वीरं सप्तावर्ते क्रमाद्ययौ ॥ ४२ ॥ शतभूपान्खड्गधरान्गजसेनादिकांस्तदा ॥ लक्षणाद्याः समाजग्मुर्मंडपे बहुविस्तृते ॥ ४३ ॥ भग्नभूतं नृपबलं दृष्ट्वा राजा रुषान्वितः ॥ महीराजो ययौ रूढो गजं चारिभयंकरम् ॥ ४४ ॥ जित्वा तान्नेत्रसिंहादीञ्छब्दवेधी नृपोत्तमः ॥ लक्षणं प्रययौ शीघ्रं बौद्धिनीं हस्तिनीं[1] स्थितम् ॥ ४५ ॥ शिवं मनसि संस्थाप्य जित्वा बद्ध्वा रुषान्वितः ॥ अगमत्तमुपगृह्य दर्शयामास तं नृपम् ॥ ४६ ॥ श्रुत्वा परिमलो राजा कृष्णांशं भीरुको ययौ ॥ वृत्तान्तं कथयामास चाह्लादादिपराजयम् ॥ ४७ ॥ अजितः स च कृष्णांशो नभोमार्गेण मंदिरम् ॥ गत्वा जगर्ज बलवान्योगिन्यानंददायकः ॥ ४८ ॥ तदा स लक्षणो वीरस्त्यक्त्वा बंधनमुत्तमम् ॥ विष्णुं मनसि संस्थाप्य महीराजं समाययौ ॥ ४९ ॥ गृहीत्वा चागमां दोलां स्वयं शिबिरमाप्तवान् ॥ ५० ॥ एतस्मिन्नंतरे सर्वे त्यक्त्वा मूर्च्छां समंततः ॥ खड्गयुद्धेन ताञ्जित्वा बद्ध्वा तान्निगडैर्दृढैः ॥ ५१ ॥ सान्वयाञ्छतभूपांश्च हत्वा तद्रुधिरावहैः ॥ द्रौपदीं स्नापयामासुर्वेलारूपां कलोत्तमाम् ॥ ५२ ॥ विवाहान्ते च ते सर्वे शिबिराणि समाययुः ॥ समुत्सृज्य सुतान्सप्त सुभोज्यैस्ते ह्यभोजयन् ॥ ५३ ॥ भुक्तवत्सु सुवीरेषु साहस्रास्तैः सुतैः सह ॥ रुरुधुः सर्वतो जघ्नुरस्त्रशस्त्रैः समंततः ॥ ५४ ॥ सहस्रशूरांस्तान्हत्वा पुनर्बद्ध्वा महाबलान् ॥ शिबिराणि समाजग्मुस्तेषां हास्यविशारदाः ॥ ५५ ॥ दशलक्षसुवर्णानि गृहीत्वा नृपतिर्बली ॥ वेलां नवोढामादाय गत्वा नत्वा तमब्रवीत् ॥ ५६ ॥ प्रद्योतसुत हे राजँल्लक्षणोऽसौ महाबलः ॥ मम पत्नीं समादाय दासीं कर्तुं समिच्छति ॥ ५७ ॥ इति श्रुत्वा परिमलः सर्वभूपसमन्वितः ॥ बहुधा बोधितश्चैव न बुबोध तदा नृपः ॥ ५८ ॥ तदा महासती वेला विललाप भृशं मुहुः ॥ तच्छ्रुत्वा स च कृष्णांशः सहितो बलखानिना ॥ तामाश्वास्य तदा वेलां नभोमार्गेण चाययौ ॥५९॥ लक्षणं तर्जयित्वासौ गृहीत्वा चागमन्मुदा॥नभोमार्गेण गेहे तं कृष्णांशः समपेषयत् ॥ ६० ॥ पुनस्त्यक्त्वा सप्त सुतान्सहितान्नृपतेस्तु ते ॥ शपथं कारयामासुर्दंभं प्रति महाबलाः ॥ उषित्वा दशरात्रांते दध्युर्गंतुमनो मुने ॥६१॥ महीराजस्तु बलवान्गृहीत्वा भूपतेः पदौ ॥ स उवाचाश्रुपूर्णाक्षस्तदा परिमलं नृपम् ॥ ६२ ॥ महाराज वधूस्ते च वेलेयं द्वादशाब्दिका ॥ पितृमातृवियोगं च न क्षमंती तु बालिका ॥ ६३ ॥ तस्मात्तां त्वं परित्यज्य गच्छ गेहं सुखी भव ॥ पतियोग्या यदा भूयात्तदा त्वां पुनरे

---

[1] सकर्मताषीं ।

ष्यति ॥ ६४ ॥ इत्युक्त्वा च वचो राजा स स्नेहादंकमस्पृशत् ॥ चूर्णीभूते परिमले चाह्लादस्तत्र दुःखितः ॥ महीराजं स पस्पर्श स राजा चूर्णतां
गतः ॥६५॥ भग्नास्थी भूपती चोभौ पावकीयैश्चिकित्सकैः ॥ सुखवंतौ गृहं प्राप्य कृतकृत्यत्वमागतौ ॥६६॥ मलना स्वसुतं दृष्ट्वा प्राप्तमुद्राहितं
गृहे ॥ कृत्वोत्सवं बहुविधं विप्रेभ्यश्च ददौ धनम् ॥ होमं वै कारयामास चंडिकायाः प्रसादतः ॥ ६७ ॥ सभायां लक्षणो वीरो यात्राकाले तमब्र
वीत् ॥ अगमां जयचन्द्राय मत्वा जित्वा हृतां तु ताम् ॥ नभोमार्गेण संप्राप्तौ योगिनौ च शिवाज्ञया ॥६८॥ जहतुस्तौ च मां जित्वा तत्तीक्ष्णभय
मोहितम् ॥ अद्याहं धाम गच्छामि चिरं जीव नृपोत्तम ॥ इत्युक्तवंतं तं नत्वा ययुर्भूपाः स्वमालयम् ॥ ६९ ॥ इति श्रीभविष्ये महापुराणे प्रतिस
र्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये सप्तदशोऽध्यायः ॥ १७ ॥ ॥छ॥ ॥ सूत उवाच ॥ ॥ विंशाब्दे चैव कृष्णांशेयथा
जातं तथा शृणु ॥ सागराख्यसरस्तीरे कदाचिदिंदुलो बली ॥ जप्त्वा सप्तशतीस्तोत्रं तत्र ध्यानान्वितोऽभवत् ॥१॥ एतस्मिन्नंतरे हंसा आकाशाद्भू
मिमागताः ॥ तेषां च रुतशब्दैश्च स ध्यानादुत्थितोऽभवत् ॥ २ ॥ वक्ष्यमाणं वचः प्राहुर्धन्योऽयं दिव्यविग्रहः ॥ पर्वतानां हिमगिरिर्वनं वृंदावनं
तथा ॥ ३ ॥ महावती पुरीणां च सागरः सरसामपि ॥ नारीणां पद्मिनी नारी नृणां श्रेष्ठस्त्वमिंदुलः ॥ ४ ॥ भो इन्दुल महाप्राज्ञ मानसे सरसि
स्थिताः ॥ वयं श्रुत्वा श्रियो वाक्यं नलिनी सागरं गताः ॥ ५ ॥ दृष्ट्वा तत्र शुभां नारीं सर्वाभरणभूषिताम् ॥ सप्तालिभिर्युतां रम्यां गीतनाट्य
विशारदाम् ॥ ६ ॥ दृष्ट्वा मोहत्वमापन्ना वयं देशान्तरं गताः ॥ विलोकिता नराः सर्वेऽत्रास्माभिर्जगतीतले ॥ त्वत्समो न हि कोऽप्यत्र पद्मिनी
सदृशो वरः ॥ ७ ॥ तस्मात्त्वं नः समारुह्य तां देवीं द्रष्टुमर्हसि ॥ तथेत्युक्त्वा शक्रसुतो हंसराजं समारुहत् ॥ ८ ॥ सिंहलद्वीपके रम्ये ह्यार्य
सिंहो नृपः स्थितः ॥ तत्सुता पद्मिनी नाम्ना रूपयौवनशालिनी ॥ रागिण्यः सप्त विख्यातास्तत्सख्यः प्रमदोत्तमाः ॥ ९ ॥ नलिनीसागरे रम्ये
गिरिजामंदिरं शुभम् ॥ तत्र स्थितां च तां देवीमिन्दुलः स ददर्श ह ॥ १० ॥ सापि तं सुन्दरं दृष्ट्वा हंसदेहे समास्थितम् ॥ संमोह्याहूय तं देवं
तेन सार्द्धमरीरमत् ॥११॥ वर्षमेकं ययौ तत्र नानालीलासु मोहितः ॥ नक्तं दिवं न बुबुधे रममाणस्तया सह ॥१२॥ भक्तिगर्वत्वमापन्ने चाह्लादे
जगदंबिका ॥ दृष्ट्वा चान्तर्दधे देवी गर्वाचरणकुंठिता ॥ १३ ॥ तस्य प्राप्तं महद्दुःखमाह्लादस्य जयैषिणः ॥ स कैश्चित्पुरुषैर्वीरः कथितोऽभूत्स्व
मंदिरे ॥ १४ ॥ इन्दुलं रूपसम्पन्नं लंकापुरनिवासिनः ॥ राक्षसास्तं समाहृत्य स्वगेहं शीघ्रमाययुः ॥ १५ ॥ इति श्रुत्वा वचो घोरं सकुलो
विललाप ह ॥ हाहाशब्दो महांश्चासीत्तेषां तु रुदतां मुने ॥ १६ ॥ कृष्णांशो रुदितं प्राहाह्लादं ज्येष्ठं शृणुष्व भोः ॥ जित्वाहं राक्षसान्सर्वांस्ताल

नाद्यैः समन्वितः ॥ इंदुलं त्वां समेष्यामि भवान्धैर्यपरो भवेत् ॥१७॥ बलखानिश्च कृष्णांशो देवसिंहश्च तालनः ॥ सप्तलक्षबलैः सार्द्धं लंकां प्रति
ययुर्मुदा ॥ १८ ॥ मार्गप्राप्ताश्च ये भूपा ग्रामपा राष्ट्रपास्तथा ॥ यथायोग्यं बलिं रम्यं प्राप्य तस्मै न्यवेदयन् ॥१९॥ ये भूपा मदमत्ताश्च जित्वा
तांस्तालनो बली ॥ बद्ध्वा तैश्च समागच्छत्सेतुबंधं शिवस्थलम् ॥२०॥ पूजयित्वा च रामेशं रामेण स्थापितं शिवम् ॥ सिंहलद्वीपमगमन्षण्मासा
भ्यंतरे तदा ॥२१॥ नलिनीसागरं प्राप्य तत्र वासमकारयन् ॥ पत्रं संप्रेषयामास बलखानिर्नृपाय च ॥२२॥ आर्य्यसिंह महाभाग स्वपोतान् देहि
तीर्णकान् ॥ भवाँश्च स्वबलैः सार्द्धं लंकां प्रति व्रजाधुना ॥ नो चेत्त्वां सबलं जित्वा राष्ट्रभंगं करोम्यहम् ॥२३॥ इति श्रुत्वा पत्रवचो भूपतिर्बलव
त्तरः ॥ रक्षितः शक्रपुत्रेण युद्धाय समुपाययौ ॥२४॥ इन्दुलः स्तंभनं मंत्रं संस्थाप्य शर उत्तमे ॥ स्तंभयामास तत्सैन्यं तालनाद्यैः सुरक्षितम् ॥
॥२५॥ दिवसे सुखशर्मा च त्रिलक्षैः स्वदलैः सह ॥ आर्य्यसिंहस्य तनयो महद्युद्धमचीकरत् ॥ २६ ॥ निशामुखे च संप्राप्ते शक्रपुत्रो महाबलः॥
शतपुत्रैः क्षत्रियाणां सार्द्धं युद्धाय चाययौ ॥२७॥ तेषां हया हरिद्वर्णा योगिवेषधरा बलात् ॥ महतीं ते सहस्रं च रिपोः सेनां व्यनाशयन् ॥ तत्प
श्चाद्देहमासाद्य तदा तैः सुखितोऽवसत् ॥ २८ ॥ एवं जाताश्च षण्मासास्तयोर्युद्धं हि सेनयोः ॥ क्रमेण संक्षयं प्राप्तं बलखानेर्महद्बलम् ॥ २९ ॥
इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडापरपर्याये कलियुगीयेतिहाससमुच्चयेऽष्टादशोऽध्यायः ॥ १८ ॥छ॥ ॥ सूत उवाच ॥ ॥
दृष्ट्वा सैन्यनिपातं च बलखानिर्महाबलः ॥ संप्राप्य मानसीं पीडां युद्धार्थं विमुखोऽभवत् ॥१॥ देवसिंहं समाहूय त्रिकालज्ञं महामतिम् ॥ तं मंत्रं
मंत्रयामास कार्यसिद्धिर्यथा भवेत् ॥ श्रुत्वोवाच महायोगी देवसिंहो महाबलः ॥२॥ महेंद्रतनयः कश्चित्सर्वशस्त्रास्त्रकोविदः ॥ त्वत्सैन्यं रोधयित्वा
वै दिव्यास्त्रेण दिवामुखे ॥ रात्रौ स्वयं समागम्य करोति बलसंक्षयम् ॥३॥ अतस्त्वं मत्सहायेन तालनेन समन्वितः ॥ कृष्णांशेन समागम्य शक्र
पुत्रं शुभाननम् ॥ विजयी भव शीघ्रं हि नो चेद्यायां यमक्षयम् ॥४॥ इति श्रुत्वा वचस्तस्य देवसिंहस्य भाषितम् ॥ यत्नं चकार बलवान्भ्रातृमि
त्रसमन्वितः ॥५॥ एकविंशाब्दकृष्णांशे संप्राप्ते युद्धकोविदे ॥ सेनां निवेशयामास पोतेषु हयवाहनः ॥६॥ अर्द्धं सैन्यं च तत्रैव स्थापयित्वा महाबलः ॥
अर्द्धसैन्येन कृष्णांशो दक्षिणां दिशमागमत् ॥ ७ ॥ हयारूढाश्च ते शूराः सर्वे युद्धसमन्विताः ॥ कपाटं दृढमुद्धाट्य नगरान्तमुपाययुः ॥८॥ हत्वा
ते रक्षिणः सर्वाँल्लुंठयित्वा पुरं शुभम् ॥ रिपोर्दुर्गं समासाद्य चक्रुः शत्रोर्महाक्षयम् ॥ ९ ॥ राज्ञोऽन्तः पुरमागत्य कृष्णांशो बलवत्तरः ॥ ददर्श
सुन्दरीं बालां पद्मिनीं पद्मलोचनाम् ॥ सप्तालिभिर्युतां रम्यां गीतनृत्यविशारदाम् ॥ १० ॥ बलाद्दोलां समारोप्य लुंठयित्वा रिपोर्गृहम् ॥ जगाम

शिबिरे तस्मिन्यत्र जातो महारणः ॥ ११ ॥ बलखानिस्तु बलवान्देवतालनसंयुतः ॥ जघान शात्रवीं सेनामिन्दुलास्त्रेण पालिताम् ॥ १२ ॥
सुखवर्माणमागत्य सेनाध्यक्षं रिपोः सुतम् ॥ सर्वतस्तं स्वकीयास्त्रैर्जघ्नुस्ते मदविह्वलाः ॥ १३ ॥ हते तस्मिन्महावीर्ये जयन्तः क्रोधमूर्च्छितः ॥
सेनामुज्जीवयांचक्रे शक्रपुत्रः प्रतापवान् ॥ १४ ॥ श्यालं च सुखवर्माणं संजीव्य स्वगृहं ययौ ॥ तत्र दृष्ट्वा जनान्सर्वान्बहुरोदनतत्परान् ॥ १५ ॥
विस्मितः स ययौ गेहं यथा पूर्वं तथाविधः ॥ न ददर्श प्रियां तत्र सखीभिः सहितां मुने ॥ १६ ॥ आर्य्यसिंहगृहं गत्वा पृष्टवान्सर्वकारणम् ॥
ज्ञात्वा संलुठितं गेहं शत्रुभिः शस्त्रकोविदैः ॥ १७ ॥ रुरोद सुभृशं वीरो हा प्रिये मदविह्वले ॥ दर्शयाद्य मुखं रम्यं त्वत्पतिस्त्वां समुत्सुकः ॥१८॥
इत्येवं रोदनं कृत्वा वडवोपरि संस्थितः ॥ धनुस्तूणीरमादाय खड्गं शत्रुविमोहनम् ॥ एकाकी स ययौ क्रुद्धो निशि यत्र स्थितो रिपुः ॥ १९ ॥
एतस्मिन्समये वीरो बलखानिर्महाबलः ॥ दृष्ट्वा तां सुन्दरीं बालां विललाप भृशं मुहुः ॥ २० ॥ हा इन्दुल महावीर हा मद्बंधो प्रियंकर ॥ त्वद्यो
ग्येयं शुभा नारी रूपयौवनशालिनी॥२१॥दर्शनं देहि मे शीघ्रं गृहाणाद्य शुभाननाम् ॥ इत्युक्त्वा मूर्च्छितो भूत्वा मानसे पूजयञ्छिवाम् ॥२२॥
तस्मिन्काले च संप्राप्तः शक्रपुत्रो महाबलः॥ जघान शात्रवीं सेनां कृष्णांशेनैव पालिताम् ॥ २३ ॥ दृष्ट्वा सैन्यनिपातं च तालनो वाहिनीपतिः॥
सिंहनादं ननादोच्चैः सिंहिन्युपरि संस्थितः ॥ २४ ॥ न जयः सैन्यनाशेन तव वीर भविष्यति ॥ मां हत्वा जहि मत्सैन्यं योगिन्बालस्वरूपक ॥
॥२५॥ इति श्रुत्वा वचस्तस्य शक्रपुत्रो भयंकरः ॥ जघान हृदये बाणान्स तु खड्गेन चाच्छिनत् ॥ स्वभल्लेन पुनर्वीरो दंशयामास वक्षसि ॥२६॥
इंदुले मूर्च्छिते तस्मिन्वडवा दिव्यरूपिणी ॥ आकाशोपरि संप्राप्य जयन्तं समबोधयत् ॥२७॥ तदा स बालस्त्वरितः कालास्त्रं चाप आदधे॥तेन
जातो महाञ्छब्दस्तालनः स ममार ह ॥ २८ ॥ मृते सेनापतौ तस्मिन्कृष्णांशो मदविह्वलः ॥ नभोमार्गेण संप्राप्य जगर्ज्ज च मुहुर्मुहुः ॥ २९ ॥
इन्दुलः क्रोधताम्राक्षस्त्वाग्नेयं शरमाददे ॥ वह्निभूतं नभस्तत्र स्वयोगेन महाबलः ॥ कृत्वा शीघ्रं ययौ शत्रुं स तु वायव्यमादधे ॥ ३० ॥ स्वयो
गेनैव कृष्णांशः पीत्वा वायव्यमुत्तमम् ॥ पुनर्जगाम तत्पार्श्वं कलैकः[१] स हरेः स्वयम् ॥३१॥ तथाविधं रिपुं दृष्ट्वा शक्रपुत्रो महाबलः ॥ गंधर्वास्त्रं
समादाय मोहनायोपचक्रमे ॥ ३२ ॥ पुनर्योगबलेनैव तदस्त्रं संक्षयं गतम् ॥ वारुणं शरमादाय तस्योपरि समाक्षिपत् ॥ ३३ ॥ स्वयोगेनैव
कृष्णांशो जलं सर्वं मुखेऽकरोत् ॥ एवं सर्वाणि चास्त्राणि पीत्वा पीत्वा पुनःपुनः ॥३४॥ ययौ शीघ्रं प्रसन्नात्मा बाहुशाली यतेन्द्रियः ॥ इंदुलस्तु

---

[१] एका कला यस्मिन्स इति विग्रहः ।

तदा क्रुद्धोऽश्विनीं त्यक्त्वा भुवि स्थितः ॥ चर्म खड्गं गृहीत्वाशु खड्गयुद्धमचीकरत् ॥३५॥एतस्मिन्नंतरे प्राप्ता देवाद्याः सर्वभूमिपाः ॥ ददृशुस्तन्महद्
युद्धं सर्वविस्मयकारणम् ॥ ३६ ॥ प्रातःकाले च संप्राप्ते बलखानिर्महाबलः ॥ ददर्श बालकं रम्यं जटाजिनसमन्वितम् ॥ ३७ ॥ श्रमेण कर्शितो
वीरः शक्रपुत्रः प्रतापवान् ॥ बलखानेः पितुर्बन्धोः शपथं कृतवान्स्वयम् ॥ ३८ ॥ स्वखड्गेनैव कृष्णांश शिरस्तव हराम्यहम् ॥ नो चेन्मे दूषिता
माता नाम्ना स्वर्णवती सती ॥ इत्युक्त्वा खड्गमादाय ययौ शीघ्रं रुषान्वितः ॥ ३९ ॥ बलखानिस्तु तं ज्ञात्वा त्यक्त्वास्त्रं प्रेमकातरः ॥ पुत्रांतिक
मुपागम्य वचनं चेदमब्रवीत् ॥ ४० ॥ हे इन्दुल महाभाग पितृमातृयशस्कर ॥ आह्लादप्राणसदृश स्वर्णवत्यंगमानस ॥ ४१ ॥ पूर्वं हत्वा च
मां वीर स्वपितृव्यं ततः पुनः ॥ तथैवोदयसिंहं च देवसिंहं तथा कुलम् ॥ सुखी भव महावीर गेहे वै सुखवर्मणः ॥ ४२ ॥ इति श्रुत्वा वच
स्तस्य ज्ञात्वा च स्वकुलं शिशुः ॥ त्यक्त्वा खड्गं पतित्वा च स्वपितृव्यस्य पादयोः ॥ कृतवान्रोदनं गाढमपराधनिवृत्तये ॥ ४३ ॥ उवाच मधुरं
वाक्यं शृणु तात मम प्रिय ॥ नारीयं दूषिता वेदैर्नृणां मोहप्रदायिनी ॥ ४४ ॥ देवो वा मानुषो वापि पन्नगो वापि दानवः ॥ आर्य्य नारीमयै
र्जालैर्बन्धनाय समुद्यतः ॥४५॥ सोहमाजन्मशुद्धस्य पितुराह्लादकस्य च ॥ गेहे जातो जयन्तश्च शक्रपुत्रः स्वयं विभो ॥ ४६ ॥ पद्मिन्या जनितं
मोहं गृहीत्वा ज्ञातवान्न हि ॥ क्षमस्व मम मन्दस्य शेषमज्ञानजं पितुः ॥ ४७ ॥ इत्युक्त्वा स पुनर्बालो रुरोद स्नेहकातरः ॥ सेनामुज्जीवयामास
तालनं च महाबलम् ॥४८॥ इति श्रुत्वा वचस्तस्य कृष्णांशो वचनं शिशोः ॥ परमानन्दमागम्य हृदये तमरोपयत् ॥उत्सवं कारयामास तत्र देशे
जनेजने ॥४९॥ आर्य्यसिंहस्तु तच्छ्रुत्वा नानाद्रव्यसमन्वितः ॥ ददौ कन्यां विधानेन पद्मिनीमिंदुलाय वै ॥५०॥ शतं हयांस्तथा नागान्मुक्तामणि
विभूषितान् ॥ कन्यार्थे तान्ददौ राजा जामात्रे बहुभूषणम् ॥५१॥ प्रस्थानमकरोत्तेषां स प्रेम्णा वाक्यगद्गदः ॥ ते तु सर्वे मुदा युक्ताः स्वगेहं शीघ्र
माययुः ॥ ५२ ॥ उषित्वा मासमेकं तु तस्मिन्मार्गे भयानके ॥ कीर्तिसागरमासाद्य चक्रुस्ते बहुधोत्सवम् ॥५३॥ आह्लादस्तु प्रसन्नात्मा सुतं पत्नी
समन्वितम् ॥ दृष्ट्वा विप्रान्समाहूय ददौ दानान्यनेकशः ॥५४ ॥ दशहाराख्यनगरं संप्राप्तः स्वकुलैस्सह ॥ कृष्णांशस्य महाकीर्तिर्जाता लोके जने
जने ॥५५॥ पृथ्वीराजस्तु तच्छ्रुत्वा विस्मयं परमं ययौ ॥ सा तु वै पद्मिनी नारी दुर्वासःशापमोहिता ॥ ५६ ॥ अप्सरस्त्वं स्वयं त्यक्त्वा भूमौ
नारीत्वमागता ॥ द्वादशाब्दप्रमाणेन सोषित्वा जगतीतले ॥५७॥ यक्ष्मणा मरणं प्राप्य स्वर्गलोकमुपाययौ ॥ नव मासान्कृतो वासस्तयाचाह्ला
दमंदिरे ॥५८॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडापरपर्याये कलियुगीयेतिहाससमुच्चये एकोनविंशोऽध्यायः ॥१९॥ ॥छ॥

॥ ॥ सूत उवाच ॥ ॥ मुने पांचालदेशे तु राजासीद्बलवर्द्धनः ॥ तस्य पत्नी विशालाक्षी जलदेवीति विश्रुता ॥ १ ॥ बिसेनवंशभूपालो वेदतत्त्वविशारदः ॥ सस्त्रीकः पूजयामास वरुणं यादसां पतिम् ॥ २ ॥ तस्य पुत्रावुभौ जातौ क्षत्रधर्मपरायणौ ॥ लहरो ज्येष्ठतनयो मयूरध्वज एव हि ॥ ३ ॥ द्वादशाब्दवया भूत्वा मयूरध्वज एव सः ॥ आज्ञया ज्येष्ठबंधोश्च स्कंददेवमतोषयत् ॥ ४ ॥ यतेंद्रियस्तथा मौनी वानप्रस्थपरायणः ॥ पंचाब्दं तद्व्रती भूत्वा जपध्यानपरोभवत् ॥ ५ ॥ तदा प्रसन्नो भगवान्सेनानीरग्निभूः स्वयम् ॥ स्वरूपं दर्शयामास सर्वाश्चर्यसमन्वितम् ॥ ६ ॥ मयूरध्वज एवापि दृष्ट्वा सर्वमयं शिशुम् ॥ देवसेनासहायं च तुष्टाव श्लक्ष्णया गिरा ॥ ७॥ मयूरध्वज उवाच ॥ जयति ते वपुर्दिव्यविग्रहं नयति सर्वदा देवतागणान् ॥ पिबति मात्रियं दुग्धमुत्तमं वधति सर्वदा दैत्यदानवान् ॥ ८ ॥ नमस्ते देवसेनेश महिषासुरमर्दन ॥ षडानन महाबाहो तारकप्राणनाशक ॥ ९ ॥ प्रसन्नो भव सर्वात्मन्गुहशक्तिधराव्यय ॥ किंकरं पाहि मां नित्यं शरणागतवत्सल ॥ १० ॥ इति श्रुत्वा स्तुतिं तस्य सेनानीस्तमुवाच वै ॥ किं तेऽभीष्टं नृपश्रेष्ठ मत्तः सर्वमवाप्स्यसि ॥ ११ ॥ इत्युक्तस्तेन देवेन भूपतिः प्राह नम्रधीः ॥ बलं मे देहि भगवन्सहायं कुरु सर्वदा ॥ १२ ॥ तथेत्युक्त्वा तु तं स्कंदस्तत्रैवान्तर्दधे पुनः ॥ स नृपस्तु प्रसन्नात्मा कारयामास वै पुरम् ॥ १३ ॥ नाम्ना मयूरनगरं नरवृंदसमन्वितम् ॥ द्वियोजनायामयुतं स्कंददेवेन रक्षितम् ॥ १४ ॥ लहरो नामा तद्बंधुर्द्विदशाब्दप्रयत्नतः ॥ वरुणं पूजयामास नदीनदसमन्वितम् ॥ १५ ॥ तदा प्रसन्नो भगवान्वरुणो यादसां पतिः ॥ वरं ब्रूहीति वचनं प्रेम्णोवाच महीपतिम् ॥ १६ ॥ इति श्रुत्वाऽमृतमयं वचनं लहरो नृपः ॥ तुष्टाव श्लक्ष्णया वाचा पाशिनं पयसां पतिम् ॥ १७ ॥ ॥ लहर उवाच ॥ ॥ यस्य चित्तं महज्ज्ञेयं तपोबलसमन्वितम् ॥ अतः प्रचेतास्ते नाम नमस्तुभ्यं प्रचेतसे ॥ १८ ॥ रुणद्धि पयसां वेगं न केनाप्यवरोधितः ॥ अतस्त्वं वरुणो नाम नमस्ते वरुणाय वै ॥ १९ ॥ दैत्यानां बंधनार्थाय देवानां जयहेतवे ॥ दिव्यः पाशस्त्वयानीतः पाशिने ते नमोनमः ॥ २० ॥ इति स्तुतस्तदा देवो राज्ञा तेनैव धीमता ॥ नगरीं कारयामास लाहरीमथ चोत्तमाम् ॥२१॥ त्रियोजनायामयुतां चतुर्वर्णसमन्विताम् ॥ स्वयं च ग्रामरक्षार्थे तत्रोवास जलाधिपः ॥ २२ ॥ भूपस्तु तत्प्रसादेन प्राप राज्ञीं शुभाननाम् ॥ रावी नाम महाश्रेष्ठा ज्ञेया देवांगनोपमा ॥ २३ ॥ तस्यां स जनयामास सुतान्षोडशसंमितान् ॥ धार्तराष्ट्रांशजान्मुख्यान्गजतुल्यबलान्वितान् ॥२४॥ तत्पश्चात्कन्यका जाता नाम्ना मदनमंजरी ॥ द्वादशाब्दवयःप्राप्ते सुतायाः स तु भूपतिः ॥ २५॥ देवसिंहं वरं मत्वा चंद्रवंशिनमुत्तमम् ॥ प्राहूय ज्येष्ठतनयं प्रेषयामास भूपतिः ॥ २६ ॥ रणधीरस्तु तनयो लक्षमुद्रा

न्वितो बली ॥ सहस्रशूरसहितः प्राप्तवान्स महावतीम् ॥ २७ ॥ नत्वा परिमलं भूपं तदीयान्कुलशालिनः ॥ स्वहेतुं वर्णयामास विवाहार्थे स्वसुः स्वयम् ॥२८॥ श्रुत्वा परिमलो भूपो देवसिंहं महामतिम् ॥ आहूय वचनं प्राह विवाहार्थे मनः कुरु ॥ २९ ॥ देवसिंहस्तु बलवान्पितृव्यं प्राह नम्रधीः ॥ विवाहं न करिष्यामि ब्रह्मचर्यं व्रतं मम ॥ ३० ॥ बहुधा प्रार्थितस्सर्वैर्द्विजवृंदसमन्वितैः ॥ न तत्याज व्रतं श्रेष्ठं देवसिंहो महामतिः ॥ ॥ ३१ ॥ तदा परिमलो भूपो रणधीरं वचोऽब्रवीत् ॥ सुखखानिरयं बालो विवाहार्थे वदाम्यहम् ॥ ३२ ॥ तथेति मत्वा स नृपो रणधीरो गृहं ययौ ॥ पितरं कथयामास सुखखानिर्महाव्रतः ॥ ३३ ॥ एतस्मिन्नन्तरे धूर्तो महीपतिरुवाच तम् ॥ अयोग्योऽयं विवाहोऽत्र पावकीये कुलोत्तमे ॥ ३४ ॥ शूद्रीयोऽत्र वरो राजन्वर्णसंकरकारकः ॥ तस्मात्त्वं सैन्यसहितो जेतुं तान्गंतुमर्हसि ॥ ३५ ॥ कारागारे लोहमये बंधनं कुरु भूपतेः ॥ मत्कीर्तिः स्वर्गगा नित्यं जगत्यंते भविष्यति ॥ ३६ ॥ जितस्तैर्जम्बुको राजा नेत्रसिंहस्तु यो नृपः ॥ तथा गजपतिर्भूपः पृथ्वीराजो महाबलः ॥ ३७ ॥ आर्यसिंहस्तथान्ये च जितास्ते बलवत्तराः ॥ इति श्रुत्वा वचो रम्यं लहरो नृपसत्तमः ॥ ३८ ॥ सेनां संस्थापयामास चतुरंगबलान्विताम् ॥ चतुर्लक्षमितां श्रेष्ठां पालितां षोडशात्मजैः ॥ ३९ ॥ माघशुक्लदशम्यां च बलखानिं महाबलः ॥ संप्राप्तः स्वकुलैस्सार्द्धं चतुर्लक्षबलान्वितम् ॥४०॥ देशे पांचालके रम्ये लहरीनगरे स्थितः ॥ द्वादशाब्दे च कृष्णांशे तत्र वासमकारयत् ॥ ४१ ॥ नृपतेराज्ञया शूरा युद्धाय समुपाययुः ॥ बलखानिस्तु धर्मात्मा दृष्ट्वा शूरांस्तथागतान् ॥ वीरानाज्ञापयामास स्वकीयान्संगरे पुनः ॥ ४२ ॥ तयोर्युद्धमभूद्धोरं सेनयोर्लोमहर्षणम् ॥ पंचमेऽह्नि दिवा प्राप्ते बलखानिर्महाबलः ॥ कृष्णांशेनैव सहितो रिपोर्वधमकारयत् ॥ ४३ ॥ पराजिताश्च ते शूरा हतशेषा भयातुराः ॥ तान्दृष्ट्वा षोडशसुता रथं स्वंस्वं समास्थिताः ॥ युद्धायाभिमुखं जग्मुर्धनुर्बाणविशारदाः ॥ ४४ ॥ कृष्णांशस्तांस्तथा दृष्ट्वा शरवर्षसमन्वितान् ॥ एकाकी प्रययौ शीघ्रं खड्गचर्मधरो बली ॥ ४५ ॥ तेषां धनूंषि संछिद्य बद्धा:तान्युद्धदुर्मदान् ॥ आह्लादाय ददौ वीरः कृष्णांशो रणकोविदः ॥ ४६ ॥ पुत्राणां बन्धनं श्रुत्वा लहरो नृपसत्तमः ॥ प्लावयामास तत्सैन्यं बलखानेर्महात्मनः ॥ ४७ ॥ जलीभूते तथा सैन्ये जयन्तो बलवत्तरः ॥ वायव्यास्त्रेण समरे शुशोष सकलं जलम् ॥ लहरस्य ततः सेनामुवाह बहुयोजनम् ॥ ४८ ॥ तदा तु भगवान्देवो वरुणो यादसां पतिः ॥ सुतामुद्वाहयामास लहरस्य महीपतेः ॥ ४९ ॥ लहरोऽपि प्रसन्नात्मा ज्ञात्वांशंजगतीतले ॥ भक्तिं चकार शुद्धानामं

शानां परया मुदा ॥ ९० ॥ दत्त्वा च बहुधा द्रव्यं परिक्रम्य पुनःपुनः ॥ स्वान्ते[1] निवेशयामास मासमात्रं प्रसन्नधीः ॥ ९१ ॥ अंशास्तेऽपि महापूजां गृहीत्वा लहरप्रदाम् ॥ दोलामारोप्य तां देवीं स्वगेहाय ययुर्मुदा ॥ ९२ ॥ इति ते कथितं विप्र कृष्णांशचरितं शुभम् ॥ सुखखानेर्विवाहं च श्रुत्वानंदमवाप्नुयात् ॥९३॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडापरपर्याये कलियुगीयेतिहाससमुच्चये विंशोऽध्यायः ॥२०॥

॥ ॥ ऋषिरुवाच ॥ ॥ गृहं गत्वा च ते वीराः किं चक्रुश्चरितं शुभम् ॥ तत्त्वं कथय विप्रेन्द्र सर्वज्ञोऽसि मतो हि नः॥ १ ॥ ॥ सूत उवाच ॥ ॥ गृहमागत्य ते सर्वे परितो भूपतेः सभाम् ॥ गत्वा वार्तां तथा चक्रुर्यथा जातो महारणः ॥ २ ॥ श्रुत्वा परिमलो भूपो वाजिवृंदं क्षयं गतम् ॥ आहूय स च कृष्णांशं वचनं प्राह नम्रधीः ॥ ३ ॥ सिंधुदेशे च गंतव्यं त्वया च बलशालिना ॥ पञ्चलक्षान्हयान्कृत्वा पुनरागच्छ वै गृहम् ॥४॥ इति श्रुत्वा तु कृष्णांशो देवसिंहेन संयुतः ॥ स्वर्णभारसहस्रोष्ट्रान्गृहीत्वा तरसा ययौ ॥ ५ ॥ शूरैश्च दशसाहस्रैस्सार्द्धं तत्र समागतः ॥ मयूरनगरी यत्र चतुर्वर्णसमन्विता ॥ ६ ॥ प्रातःकाले तु संप्राप्ते मालाकारस्य वै सुता॥ पुष्पानाम समासन्ना चारंभे कुसुमार्थिनी ॥ ७ ॥ कृष्णांशस्तु तदा पूजां कृत्वा देवमयो मुदा ॥ जगाम विपिनं रम्यं वसंते पुष्पनालिके ॥ ८ ॥ बह्वाश्चर्ययुतं पुष्प मत्तभ्रमरनादितम् ॥ दृष्ट्वा मुमोह कृष्णांशस्तदर्थे स्वयमुद्यतः ॥ ९ ॥ एतस्मिन्नंतरे पुष्पा पुष्पार्थे समुपागता ॥ ददर्श देवसदृशं षोडशाब्दमयं नरम् ॥ प्रसन्नवदनं शान्तमिंद्रनीलमणिद्युतिम् ॥१०॥ कृष्णांशस्तु शुभां नारीं दृष्ट्वाश्चर्यमुपागतः ॥ पप्रच्छ वचसा तां वै कस्येयं सुरसुंदरी ॥ स्वर्गलोकादिहायाता यदि वा पन्नगी स्वयम् ॥ ११ ॥ इति श्रुत्वा च सा प्राह मालाकारस्य वै सुता ॥ अहं शूद्री महाबाहो पुष्पार्थे समुपागता ॥ १२ ॥ पुष्पेणानेन भूपाल तुलिता भूपतेः सुता ॥ नाम्ना पुष्पवती देवी राधेव सगुणावली ॥ १३ ॥ देवैश्च प्रार्थिता बाला रूपयौवनशालिनी ॥ मकरंदभयाद्देवास्तस्या योग्या न वै बलात् ॥ १४ ॥ शृणु तत्कारणं भूप मकरंदो यथा भवेत् ॥ मयूरध्वजभूपेन संप्राप्तो गुहतो वरः ॥ १५ ॥ अजेयोऽन्यैश्च कृष्णांशादृते त्वं जगतीतले ॥ तन्मित्रं पृथिवीराजो राजराजः शिवप्रियः ॥ १६ ॥ स राज्यं कारयामास धर्ममेधं हरिप्रियम् ॥ तदा प्रसन्नो भगवान्यज्ञेशो यज्ञमूर्तिमान् ॥१७॥ मिथुनं जनयामास पावकात्सुंदराननम् ॥ मकरंदः सुतो ज्ञेयः कन्या पुष्पवती मता ॥ १८ ॥ पञ्चमाब्दवया भूत्वा मकरंदो महाबलः ॥ तुष्टाव तपसा धर्मं वेदधर्मपरायणः ॥ १९ ॥ द्वादशाब्दवयः प्राप्ते मकरंदे नृपप्रिये ॥ प्रसन्नो भगवान्धर्मो ददौ तस्मै महाहयम् ॥ २० ॥ शिलामयं महा

---

[1] स्वसमीप इत्यर्थः ।

वेगं शत्रुसेनाक्षयंकरम् ॥ तमश्वं स्वयमारुह्य सर्वपूज्यो ह्यभूत्सुखी ॥२१॥ तस्येदं सुंदरं दिव्यं विपिनं सुरपूजितम् ॥ भवानर्हति वै श्रेष्ठः पुष्पवत्याः कलेवरम् ॥ २२ ॥ इति श्रुत्वा तु वचनं कृष्णांशः स्मरपीडितः ॥ ददौ बहुधनं तस्यै मालिन्या गेहमागतः ॥ २३ ॥ देवसिंहस्तु कालज्ञो ज्ञात्वा मोहत्वमागतम् ॥ कृष्णांशं बोधयामास पद्यैः सांख्यसमुद्भवैः ॥ २४ ॥ कृष्णांशस्तु ततस्सार्द्धं देवसिंहेन तन्मयः ॥ सिंधुदेशं समागत्य क्रीत्वा सर्वहयांस्तदा ॥ २५ ॥ मासान्ते गृहमागत्य राज्ञे सर्वान्न्यवेदयत् ॥ पुष्पवत्याः शुभं रूपं ध्यात्वा पुष्पेरितं बली ॥ कृष्णांशो मोहमागत्य तुष्टाव जगदंबिकाम् ॥२६॥ कृष्णांश उवाच ॥ देवमाये महामाये नित्यशुद्धस्वरूपिणि ॥ पाहि मां कामदेवार्तं पुष्पवत्यै प्रबोधय ॥२७॥ मधुकैटभसंमोहे महिषासुरघातिनि ॥ पाहि मां कामदेवार्तं पुष्पवत्य प्रबोधय ॥ २८ ॥ धूम्रलोचनसंदाहे चंडमुंडविनाशिनि ॥ पाहि मां कामदेवार्त्तं पुष्पवत्यै प्रबोधय ॥ २९ ॥ रक्तबीजासृक्पीते सर्वदैत्यभयंकरे ॥ पाहि मां कामदेवार्त्तं पुष्पवत्यै प्रबोधय ॥ ३० ॥ निशुंभदैत्यसंहारे शुंभदैत्यविनाशिनि ॥ पाहि मां कामदेवार्त्तं पुष्पवत्यै प्रबोधय ॥ ३१ ॥ इति स्तुत्वा च सुष्वाप स वीरः परमासने ॥ तदा तु शारदा देवी तस्याः स्वप्नप्रदर्शनम् ॥ चकार प्रत्यहं देवी वरदाभयकारिणी ॥ ३२ ॥ एवं गते चतुर्मासे जलवृष्टिकरे मुने ॥ त्रिविंशाब्दवयश्चासीत्कृष्णांशस्य यशस्करम् ॥ ३३ ॥ कार्तिके कृष्णपक्षे तु गतोऽसौ देवसंयुतः ॥ मयूरनगरे रम्ये मकरंदेन रक्षिते ॥ ३४ ॥ पुष्पागृहमुपागम्य तत्र वासमचीकरत् ॥ ३५ ॥ एकदा सुंदरं हार कृष्णांशेनैव गुंठितम् ॥ मणिमुक्तायुतं रम्यं नानापुष्पसमन्वितम् ॥ गृहीत्वा प्रययौ पुष्पा पुष्पवत्याश्रमदिरे ॥ ३६ ॥ सा तु ग्रैवेययकं दृष्ट्वा त्वष्ट्रेव रचितं प्रियम् ॥ हृदि कृत्वा मुमोहाशु कामिनी रतिरूपिणि ॥ ३७ ॥ अये सखि महामाये सत्यं कथय मेऽग्रतः ॥ ग्रैवेयकमिदं रम्यं कुतः प्राप्तं मम प्रियम् ॥ ३८ ॥ इति श्रुत्वा वचस्तस्या मकरंदभयातुरा ॥ पुष्पा पुष्पांजलिं कृत्वा वचनं प्राह तां प्रति ॥ ३९ ॥ जीवदानं च मे देहि तर्हि ते कथयाम्यहम् ॥ तथेत्युक्तवतीं कन्यां साह मे भगिनी शुभे ॥ ४० ॥ कृष्णा नाम महारम्या सर्वलोकविमोहिनी ॥ महावत्यां गृहं तस्या मद्गृहे सा समागता ॥ तया विरचितं सुभ्रूर्ग्रैवेयकमनुत्तमम् ॥ ४१ ॥ इति श्रुत्वा तु वचनं देवी पुष्पवती स्वयम् ॥ उवाच मालिनीं वाक्यं शीघ्रं दर्शय तां मम ॥ ४२ ॥ मकरंदभयाद्देवास्तथान्ये पुरुषा भुवि ॥ मत्समीपे गतिर्नास्ति तेषां सत्यं ब्रवीम्यहम् ॥ ४३ ॥ इति श्रुत्वा वचो घोरं पुष्पा तु भयकातरा ॥ नोवाच वचनं किञ्चित्पृच्छयमाना पुनः पुनः ॥ ४४ ॥ तदा पुष्पवती

---

१ ग्रैवेष्ठी ।

प्राह किं ते भयमुपागतम् ॥ साह मे भगिनी रम्या यदि त्वद्गेहमागता ॥ ४५ ॥ मोहितः पुरुषः कश्चिद्बलात्तां हि भजिष्यति ॥ तर्हि मे मरणं
ज्ञेयं कुलधर्मपरायणे ॥ ४६ ॥ इति श्रुत्वा पुष्पवती पुनः प्रोवाच धर्मिणी ॥ मयूरध्वज एवापि मत्पिता नीतितत्परः ॥ अयोग्यं ये करिष्यंति
ते यास्यंति यमालयम् ॥ ४७ ॥ अतस्त्वं शीघ्रमादाय तद्दोलां च मदंतिके ॥ दर्शयित्वा च तां रम्यां पुनर्गच्छ गृहं स्वकम् ॥ ४८ ॥ तथेति
मत्वा सा शूद्री गृहमागत्य भामिनी ॥ कृष्णांशं वर्णयामास यथा प्रोक्तं तया मुने ॥ ४९ ॥ इति श्रुत्वा वचो रम्यं कृष्णांशो बलवत्तरः ॥ नासा
वेधं स्वयं कृत्वा पुनर्नारीमयं वपुः ॥ जगाम पुष्पया सार्द्धं दोलामारुह्य वीर्यवान् ॥ ५० ॥ तदा पुष्पवती देवी दृष्ट्वा कृष्णां मनोरमाम् ॥ उवाच
वचनं पुष्पां शृणु मे वचनं सखि ॥ ५१ ॥ यादृशीयं शुभा नारी तादृशः पुरुषो मया ॥ स्वप्नांते प्रत्यहं दृष्टो रममाणो मया सह ॥ ५२ ॥ कृष्णां
शश्च स तामाह देशराजसुतो वरः ॥ उदयो नाम विख्यातस्तस्याहं ललिता सखी ॥ ५३ ॥ प्रत्यहं रचितं हारमथ पूजनहेतवे ॥ स वीरस्तु गृहीत्वा
तं देवीं पूज्य[1] न्यवेदयत् ॥ ५४ ॥ एकदा प्रस्थितं वीरं पुष्पमध्ये शनैःशनैः ॥ उदासीनं च तं दृष्ट्वा प्रोवाचाहं समागता ॥ ५५ ॥ मोहोऽयं ते
कुतः प्राप्तः स त्वं कथय मा चिरम् ॥ इत्युक्तः स तु मामाह स्वप्नांते प्रत्यहं सखि ॥ ५६ ॥ मया दृष्टा शुभा नारी रूपयौवनशालिनी ॥ तद्वि
योगेन दुःखार्तं मुखं म्लानत्वमागतम् ॥ ५७ ॥ इति श्रुत्वा पुष्पवती तामाह रुचिराननाम् ॥ विवाहो मे यदा तेन सार्द्धं रम्यो भविष्यति ॥
॥ ५८ ॥ तदा त्वां तर्पयिष्यामि बहुद्रव्यैः शुभानने ॥ अतस्त्वं गच्छ तत्पार्श्वं शीघ्रं तस्मै निवेदय ॥ ५९ ॥ इति श्रुत्वा तु तद्वाचं पुष्पा प्रेमसम
न्विता ॥ दोलामारोप्य तां कृष्णां स्वगेहं गंतुमुद्यता ॥ ६० ॥ दुर्गद्वारे तु प्राप्तायां तद्दोलायां च भार्गव ॥ मकरंदो महावीर्य्यो द्वादशाब्दवया
बली ॥ ६१ ॥ दोलासमीपमागत्य ददर्श रुचिराननाम् ॥ कृष्णामिन्दीवरश्यामां चारुनेत्रां मनोहराम् ॥ ६२ ॥ मुमोह बलवान्वीरो गोवर्द्धन
कलांशकः ॥ प्रेम्णोवाच स चार्वंगि शृणु मे वचनं प्रिये ॥ ६३ ॥ मद्गृहं शीघ्रमागच्छ पत्नी मम भवाधुना ॥ इति श्रुत्वा तु सा कृष्णा विहस्यो
वाच भूपतिम् ॥ ६४ ॥ कुलीनस्त्वं महावीर वह्निकुण्डात्समुद्भवः ॥ षोडशाब्दवयास्तूणी [2]शनिभल्लसमन्वितः ॥ ६५ ॥ त्वद्योग्या भूपतेः कन्या
चंद्रसूर्य्यान्वयस्य वै ॥ अहं शूद्री हीनतमा कथं योग्या तवेह वै ॥ ६६ ॥ कन्याहं शूद्रजातेश्च ब्रह्मचर्य्यव्रते स्थिता ॥ इति श्रुत्वा तु वचनं मक
रन्दो नृपात्मजः ॥ ६७ ॥ बलाद्गृहीत्वा तां नारीं पस्पर्श हृदये स्वयम् ॥ कृष्णांशस्तु तदा तस्मै दत्त्वा हृदयवेदनाम् ॥ मोहयित्वा नृपसुतं स

---

१ ल्यबार्षः । २ शनिदत्तभल्लसमन्वित इत्यर्थः । अत एव—एकोननवतितमेपद्ये 'शनिभल्लकरं ग्राही'—इत्युक्तं संगच्छते ।

देवः स्वगृहं ययौ ॥ ६८ ॥ मकरन्दस्तु संबुद्धो मदनाग्निप्रपीडितः ॥ गेहमागत्य पुष्पायाः सर्वं तस्यै न्यवेदयत् ॥ ६९ ॥ तत्स्नेहकातरं भूपं
मकरंदं महाबलम् ॥ पुष्पाह श्लक्ष्णया वाचा शृणु पार्थिवसत्तम ॥ ७० ॥ महावती पुरी रम्या तत्र कृष्णागृहं शुभम् ॥ त्वद्भयाच्च गता गेहं
कृष्णांशस्य च सा सखी ॥ ७१ ॥ रोदनं कुर्वती गाढं तव निन्दनतत्परा ॥ ७२ ॥ आगमिष्यति वै वीरो बलैस्सार्द्धं महा
बलः ॥ अतस्त्वं सर्वसैन्यानि सज्जीभूतानि वै कुरु ॥ ७३ ॥ जितो येन महावीरः पितृव्यो लहरस्तव ॥ विवाहं कारयामास
तद्बन्धोः सुतया सह ॥ ७४ ॥ इति श्रुत्वा वचो घोरं मकरन्दो महीपतिः ॥ शतघ्नीः स्थापयामास दुर्गकूटेषु दारुणाः ॥ ७५ ॥
स्वसैन्यं च समाहूय त्रिलक्षं खड्गसंयुतम् ॥ तत्रैव स्थापयामास राष्ट्ररक्षार्थमुद्यतः ॥ ७६ ॥ कृष्णांशस्तु गृहं प्राप्य बलखानिमुवाच
तत् ॥ श्रुत्वा स च महावीरो भ्रातृमित्रसमन्वितः ॥ पञ्चलक्षबलैस्सार्द्धं मयूरनगरं ययौ ॥ ७७ ॥ शतघ्न्यः पञ्चसाहस्रा गजा दश
सहस्रकाः ॥ एकलक्षं हयाः सर्वे शेषा ज्ञेयाः पदातयः ॥ उषित्वा पक्षमात्रं तु मार्गे पांचालके तदा ॥ ७८ ॥ मकरंदस्तु तच्छ्रुत्वा शनिभल्लकरः
स्थितः ॥ सेनामाज्ञापयामास जहि शत्रून्महाबलान् ॥ ७९ ॥ श्रुत्वा पदातयो लक्षं शतघ्नीवह्निमाददन् ॥ ते तु वै सप्तसाहस्राश्चक्रुः शत्रुबलक्ष
यम् ॥ ८० ॥ ग्रामस्य दक्षिणद्वारे हयारूढास्तदा ययुः ॥ भुशुंडीक्षेपणीशक्तिखड्गयुद्धविशारदाः ॥ ८१ ॥ एकलक्षं हयास्सर्वे मकरंदस्य भूपतेः ॥
तयोश्चासीन्महद्युद्धं तुमुलं हयसेनयोः ॥ ८२ ॥ तदा तु पश्चिमद्वारे गजा विंशत्[1]सहस्रकाः ॥ तथा दशसहस्रैश्च शत्रुभिः सह संययुः ॥ ८३ ॥ उष्ट्र
रक्षा महावीराश्चत्वारिंशत्सहस्रकाः ॥ बलखान्यादिभिः सार्द्धं युयुधु[2]र्दिशिचोत्तरे ॥ ८४ ॥ अहोरात्रमभूद्युद्धं तुमुलं लोमहर्षणम् ॥ ततः पराजि
तास्सर्वे बलखानेर्महाबलाः ॥ ८५ ॥ त्यक्त्वा युद्धं तु ते सर्वे दुद्रुवुश्च दिशो दश ॥ कृष्णांशो बिंदुलारूढो बलखानिः कपोतगः ॥ ८६ ॥ मनोर
थस्थितो देवश्चाह्लादस्तु गजस्थितः ॥ पूर्वादिक्क्रमतो द्वारि गतास्ते रणदुर्मदाः ॥ ८७ ॥ सत्सरुं खड्गमुत्सृज्य चक्रुः शत्रुमहावधम् ॥ पराजिताश्च
ते शूरा मकरंदमुपाययुः ॥ ८८ ॥ वह्निपुत्रस्तुबलवान्वाजिनं च शिलामयम् ॥ शनिभल्लकरग्राही तमारुह्य रणं ययौ ॥ ८९ ॥ कृष्णांशाद्याश्च ते
शूरा रुरुधुस्सर्वतोदिशम् ॥ तं च कंठे ददौ खड्गं बलखानिर्महाबलः ॥ ९० ॥ स्वभल्लं देवसिंहश्च तमंके च समाहनत् ॥ आह्लादो वक्षसि शरं
कृष्णांशः खड्गमुत्तमम् ॥ ९१ ॥ शिलावाजिप्रभावेण कश्मलं न जगाम ह ॥ स दृष्ट्वा निष्फलान्वीराञ्जगर्ज भैरवं ध्वनिम् ॥ ९२ ॥ शनिभल्लेन

---

[1] इकारलोपश्छान्दसः । [2] अनुदात्तेल्लक्षणस्यानित्यत्वाच्छान्दसत्वाद्वा परस्मैपदम् ।

ते सर्वे बभूवुर्मूर्छिता रणे ॥ तेऽश्वाः शिलाश्ववेगेन मूर्छिताश्चाभवन्क्षणात् ॥ ९३ ॥ मकरंदस्तु बलवान्बद्ध्वा तान्युद्धदुर्मदान् ॥ प्रसन्नात्मा ययौ गेहं स्वपित्रे तान्न्यवेदयत् ॥ ९४ ॥ दृष्ट्वा पराजितान्वीरान्रूपणो भयकातरः ॥ महावतीं पुरीं प्राप्य भूपतिं समवर्णयत् ॥ ९५ ॥ ब्रह्मानंदस्तु तच्छ्रुत्वा लक्षसैन्यसमन्वितः ॥ इंदुलेन सहायेन मयूरनगरं ययौ ॥ ९६ ॥ लिखित्वा निर्मलं पत्रं तद्राज्ञे त्वरितो ददौ ॥ भूमिराजसुताकांतं विद्धि मां मनुजर्षभ ॥ ९७ ॥ कृष्णांशाय सुतां देहि नाम्ना पुष्पवतीं शुभाम् ॥ नो चेन्मत्कठिनैर्बाणैः क्षयं यास्यंति सैनिकाः ॥ ९८ ॥ निशम्येति नृपश्रेष्ठो मयूरध्वज एव सः ॥ मकरंदेन सहितो द्विलक्षबलसंयुतः ॥ अहोरात्रं कृतं युद्धं तेन सार्द्धं भयप्रदम् ॥ ९९ ॥ ब्रह्मानंदस्तु बलवान्बाणयुद्धमचीकरत् ॥ मकरंदस्य भल्लेन मूर्छितः सोऽपतद्भुवि ॥ १०० ॥ तदा स्वर्णवतीपुत्रो जयन्तः शक्रसंभवः ॥ स्वविद्यां दर्शयामास मकरंदाय धीमते ॥ १०१ ॥ वैष्णवास्त्रप्रभावेन शिलाश्वो भस्म चाभवत् ॥ ब्रह्मास्त्रेण भृगुश्रेष्ठ शनिभल्लोऽपतद्भुवि ॥१०२॥ नागपाशेन तं बद्ध्वा मकरंदं महाबलम् ॥ विवाहं कारयामास कृष्णांशस्य महात्मनः ॥१०३॥ सेनामुज्जीवयामास स्वकीयामिंदुलो बली ॥ मंगलं कारयामास मकरंदो गृहेगृहे ॥ ददौ कन्यां विधानेन बहुद्रव्यसमन्विताम् ॥१०४॥ मयूरध्वजभूपालो महास्नेहमचीकरत्॥नृपाज्ञां ते पुरस्कृत्य ययुः सार्द्धं महावतीम् ॥ ॥१०५॥

इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये कृष्णांशविवाहोनामैकविंशोऽध्यायः॥२१॥

सूत उवाच ॥ महावत्यां तु संप्राप्ते कृष्णांशे बलवत्तरे ॥ मंगलं कृतवान्राजा तदा परिमलो बली ॥ १ ॥ पुष्पवत्या तया सार्द्धं गीतनृत्यविशारदः ॥ कृष्णांशः प्रत्यहं गेहे मुमोह सखिभिः सह ॥ २ ॥ हेमंतशिशिरे वीरो रहः क्रीडां करोति वै ॥ यथा शक्रोऽप्सरोभिश्च तथैव ह्युदयो बली ॥ ३ ॥ ग्राम्यधर्मं न कृतवान्सर्वस्पर्शविशारदः ॥ एकदा नृत्यक्रीडायां देवी पुष्पवती स्वयम् ॥ ४ ॥ कृष्णांशं वचनं प्राह पूर्वजन्मनि को भवान् ॥ इति श्रुत्वोदयो वीरो विहस्योवाच वै वचः ॥ ५ ॥ नृपो हं चंद्रदासश्च पूर्वजन्मनि हे प्रिये ॥ बाल्यात्प्रभृति मे दुःखं प्राप्तं देवविनिर्मितम्॥६॥शालग्रामशिलापूजा प्रत्यहं वै मया कृता ॥ तेन पुण्यप्रभावेन सार्वभौमो बभूव ह ॥७॥ मृतेऽहनि तु संप्राप्ते शालग्रामे मनो दधौ ॥ सायुज्यं मे हरेश्चासीत्स्वयं ब्रह्मप्रसादतः॥८॥कलिना प्रार्थितो विष्णुः कालात्मा परमेश्वरः ॥ स्वदेहान्मां तु निष्कास्य भूमौ जनिमचीकरत् ॥९॥ यदा यदा हि धर्मस्य ग्लानिर्भवति वै प्रिये॥युगधर्मस्य मर्यादास्थापनाय भवाम्यहम्॥१०॥सत्ये तु मानसी पूजा देवानां तृप्तिहेतवे ॥ त्रेतायां वह्नि

---

१ मयूरध्वजेनेति शेषः।

पूजा च यज्ञदानादिका क्रिया ॥११॥द्वापरे मूर्तिपूजा च देवानां वै प्रियंकरी ॥ कलौ तु दारुणे प्राप्ते ब्रह्मपूजनमुत्तमम्॥१२॥अहं हंसः सत्ययुगे त्रेतायां यज्ञपूरुषः ॥ हिरण्यगर्भश्च प्रिये द्वापरेऽहं सुखप्रदः ॥ शालग्रामः कलौ प्राप्ते देवानां तृप्तये ह्यहम् ॥ १३ ॥ मुनयो देवतास्सर्वास्तथा पितृगणाः प्रिये ॥ सर्वे ते तृप्तिमायांति शालग्रामस्य पूजनात् ॥ १४ ॥ द्विजातिभिस्त्रिवर्णैश्च पूजनं चंदनादिकैः ॥ शूद्रैश्च स्नानमात्रेण भक्तिभावेन पूजनम् ॥१५॥ म्लेच्छैश्च दर्शनं पुण्यं विनयाद्भक्तिभावतः ॥ शालग्रामः स्वयं ब्रह्म सच्चिदानंदविग्रहः ॥ तस्य दर्शनमात्रेण क्षयं यास्यंति वै मलाः ॥१६॥ इति ते कथितं देवि युगमर्यादमुत्तमम्[1] ॥ पुरा त्वं कस्य तनया सत्यं कथय मेऽचिरम्॥१७॥पुष्पवत्युवाच ॥ पूर्वजन्मनि वेश्याहं चंद्रकांतिरिति श्रुता ॥ गाननृत्यादिकं वाद्यं देवस्याग्रे मया कृतम् ॥ १८ ॥ तेन पुण्यप्रभावेण स्वर्गलोकमुपागता ॥ देवैश्च प्रार्थिता तत्र रूपयौवनशालिनी ॥ १९ ॥ ब्रह्मचर्यं न तत्याज स्वर्गलोकेऽपि वै ह्यहम् ॥ तेन पुण्यप्रभावेण चोषा बाणसुताऽभवम् ॥ अनिरुद्धः स्वयं ब्रह्म मम पाणिं गृहीतवान् ॥ २० ॥ कलिना प्रार्थितो देवो मम स्वामी स्वहेतवे ॥ अर्चावतारमासाद्य मार्कंडेयस्थलं गतः ॥ २१ ॥ स्वप्रसादस्य महिमा दर्शितस्तेन तत्र वै ॥ अत्रैव स्थितिमर्यादो दारुरूपस्य मे पंतेः[2] ॥ २२ ॥ अहं तस्याज्ञया स्वामिञ्जम्बुकस्य सुताभवम् ॥ दिव्यरूपसमायुक्ता नाम्नाहं विजयैषिणी ॥ २३ ॥ कृतं ममैव मरणं त्वद्भ्रात्रा बलखानिना ॥ मकरंदस्य भगिनी भूत्वा त्वां पतिमागता ॥२४॥ तेन दोषेण त्वद्भ्राता यातनां तीव्रम्[3]आगतः ॥ राज्ञ इन्नगठस्यैव गेहे गजपतेः स्वयम् ॥ इत्युक्त्वा मौनमास्थाय रेमे पत्या समं मुदा ॥ २५ ॥ होलिकासमये प्राप्ते मलना स्नेहदुःखिता ॥ सुतां चंद्रावलीं रम्यां स्वप्नांते सा ददर्श ह ॥ रुरोद निशि दुःखेन स्वसुतास्नेहकातरा ॥ २६ ॥ तदोदयो महावीरो ज्ञात्वा रोदनकारणम् ॥ शूरैश्च दशसाहस्रैस्सार्द्धं बहुधनैर्युतः ॥ एकाकी प्रययौ वीरो यत्र चंद्रावलीगृहम् ॥ २७ ॥ महीपतिस्तु तच्छ्त्रुर्ज्ञात्वा कारणमुत्तमम् ॥ पश्चाज्जगाम कार्यार्थी स तु दुर्योधनांशकः ॥ बलीठाठमिति ख्यातं ग्रामं यादवपालितम् ॥ २८ ॥ वीरसेनो नृपस्तत्र त्रिलक्षबलसंयुतः ॥ अष्टौ सुताश्च तस्यासन्रूपयौवनशालिनः ॥ २९ ॥ कामसेनः प्रसेनश्च महासेनस्तथैव च ॥ सुखसेनो रूपसेनो विष्वक्सेनो मधुव्रतः ॥ मधुपश्च क्रमाज्जाता यादवांशाश्च यादवाः ॥ ३० ॥ तत्र गत्वा च कृष्णांशस्सभायां नरकेसरी ॥ दंडवत्प्रणतो भूत्वा वीरसेनं महीपतिम् ॥ ३१ ॥ मलनालिखितं पत्रं दत्त्वा राज्ञे महामनाः ॥ दशभारं सुवर्णस्य पुनर्वासमचीकरत् ॥ ३२ ॥ व्यंजनानि विचित्राणि भुक्त्वा यादवसंयुतः ॥ चंद्रा

---

[1] नपुंसकत्वमार्षम्। [2] पत्युः। [3] क्रियाविशेषणम्।

वलीं समागत्य कुशलं च न्यवेदयत् ॥ ३३ ॥ प्रेमोत्सुका च भगिनी कृष्णांशं प्राह दुःखिता ॥ भवान्द्व्यब्दवया वीर तदाहं च विवाहिता ॥३४॥
विंशदब्दस्ततो जातो विस्मृता पितृमातृभिः ॥ समर्थेन त्वया वीर संस्मृता भगिनी स्वयम् ॥ ३५ ॥ अद्य मे सफलं जन्म जीवितं सफलं च मे
बंधुदर्शनमात्रेण सर्वं च सफलं मम ॥ ३६ ॥ प्रसन्नात्मोदयस्तत्र भगिनीं प्राह नम्रधीः ॥ जम्बुकेन गृहं सर्वं लुण्ठितं बलशालिना ॥ ३७ ॥
तस्य दुःखेन भूपालो भयभीतो दिनेदिने ॥ महाकष्टेन विजयो जम्बुकाच्चाभयोऽभवत् ॥ ३८ ॥ महीराजस्तु बलवान्रुरोध नगरीं मम ॥ मया
विवाहितो भ्राता ब्रह्मा तत्सुतया सह ॥ ३९ ॥ पुनश्च सिंहलद्वीपे जयंतार्थे वयं गताः ॥ एवं विधानि दुःखानि बहूनि ह्यभवन्पितुः ॥ ४० ॥
अतस्त्वां प्रति सुप्रीता वयं भगिनिकिंकराः ॥ मृदुवाक्यमिति श्रुत्वा तदा चंद्रावली मुदा ॥ ४१ ॥ गेहं निवासयामास स्वकीयं प्रेमविह्वला ॥
एतस्मिन्नन्तरे धूर्तौ महीपतिरुपाययौ ॥ ४२ ॥ सभायां वीरसेनस्य राज्ञा तेनैव सत्कृतः ॥ वार्तांतरं समासाद्य तमुवाच महीपतिः ॥ ४३ ॥
निष्कासिताश्च ते सर्वे राज्ञाह्लादादयः खलाः ॥ चौरितो नृपतेः कोशो हीनजात्यैर्महाबलैः ॥४४॥ तदा तु कुंठिताः सर्वे शिरीषाख्यपुरेऽवसन् ॥
छिद्रदर्शी तु कृष्णांशो गेहं तव समागतः ॥ ४५ ॥ चंद्रावल्याश्च वै दोलां गृहीत्वा स गमिष्यति ॥ सत्यं ब्रवीमि भूपाल नान्यथा वचनं मम ॥
॥ ४६ ॥ इति श्रुत्वा वीरसेनो ज्ञात्वा तत्सत्यकारणम् ॥ कामसेनं समाहूय चंद्रावल्याः पतिं सुतम् ॥४७॥ वचनं प्राह भोः पुत्र बंधनं कुरु तस्य
वै ॥ इति श्रुत्वा कामसेनो विषमादाय दारुणम् ॥ ४८ ॥ भोजनाय ददौ तस्यै ज्ञात्वा चन्द्रावली तदा ॥ भ्रातुरंतिकमासाद्य पात्रमादाय सा
ययौ ॥ ४९ ॥ कामसेनश्च कुपितो गृहीत्वा दंडवेतसम् ॥ स्वप्रियां ताडयामास स दृष्ट्वा तं तदाकुपत् ॥ ५० ॥ गृहीत्वा भुजयोस्तं वै बंधनाय
समुद्यतः ॥ बंधनत्वं गते पुत्रे वीरसेनो महाबलः ॥ ५१ ॥ पुत्रानाज्ञापयामास तस्य बंधनहेतवे ॥ एतस्मिन्नंतरे वीरो दोलामादाय सत्वरम् ॥
॥ ५२ ॥ सेनामध्ये समागम्य महद्युद्धमचीकरत् ॥ एकतो दशसाहस्त्रास्त्रिलक्षास्तु तथैकतः ॥ अहोरात्रमभूद्युद्धं दारुणं रोमहर्षणम् ॥ ५३ ॥
हता लक्षं महाशूरा उदयेन महाबलाः ॥ शेषाः प्रदुद्रुवुस्सर्वे यादवा भयकातराः ॥ ५४ ॥ दृष्ट्वा पराजितं सैन्यं सप्त पुत्रा महाबलाः ॥ स्वान्ग
जांश्च समारुह्य कृष्णांशं रुरुधू रुषा ॥ ५५ ॥ स वीरो बिंदुलारूढो भूमौ कृत्वा गजासनान् ॥ तेषामस्त्राणि संच्छिद्य बध्नाति बलदर्पितः॥५६॥
इति श्रुत्वा वीरसेनः सूर्यभक्तिपरायणः ॥ सौरमस्त्रं समादाय तस्य सैन्यमदाहयत् ॥ तेनास्त्रेणैव कृष्णांशः सहयो मूर्च्छितो भुवि ॥ ५७ ॥
वीरसेनस्तु तं बद्ध्वा मोचयित्वा सुतान्वधूम् ॥ स्वगेहमागतस्तूर्णं नानावाद्यान्यवादयत् ॥ ५८ ॥ हतशेषास्तदा वीराः कृष्णांशस्य ययुर्दिशः ॥

हेतुं परिमलस्याग्रे सर्वमूचुस्तदादितः ॥ ५९ ॥ महीपतिं महाधूर्तं मत्वा राजाब्रवीदिदम् ॥ गच्छ त्वं मलनापुत्र लक्षसैन्यसमन्वितः ॥ ६० ॥ बद्ध्वा स्वभगिनीकांतं स्वबंधुं मोचयाशु वै ॥ इति श्रुत्वा च स सुतो लक्षसेनासमन्वितः ॥६१॥ शीघ्रं गत्वा च नगरीं रुरोध बलवान्रुषा ॥ युद्धीभूते बले तस्मिन्वीरसेनो नृपोत्तमः ॥ सौरमस्त्रमुपादाय दाहनार्थं समुद्यतः ॥ ६२ ॥ सज्जीभूते तदस्त्रे तु ब्रह्मानंदो महाबलः ॥ ब्रह्मास्त्रेणैव स शरं वारयामास वै रुषा ॥ ६३ ॥ दृष्ट्वा भयान्वितो भूपस्तमेव शरणं ययौ ॥ ब्रह्मानंदस्तु तं भूपं वचनं प्राह निर्भयः ॥ ६४ ॥ धूर्तवाक्येन हे भूप मद्बंधुर्बाधितस्त्वया ॥ अवध्या च सदा नारी त्वत्सुतस्तामताडयत् ॥ अतस्त्वं भगिनीयुक्तं स्वसुतं देहि मे नृप ॥ ६५ ॥ इति श्रुत्वा च नृपतिर्वचनं प्राह नम्रधीः ॥ मत्सुता च गृहे नास्ति कामसेनं गृहाण भोः ॥ ६६ ॥ इत्युक्त्वा वीरसेनश्च सुतं चंद्रावलीं तथा ॥ दत्त्वा तस्मै प्रसन्नात्मा तत्प्रस्थानमकारयत् ॥ ६७ ॥ ब्रह्मानन्दोऽपि बलवान्कृष्णांशेन समन्वितः ॥ सेनयाशीतिसाहस्र्या ययौ सार्द्धं महावतीम् ॥ ६८ ॥ मलना स्वसुतं दृष्ट्वा प्रेमविह्वलकंपिता ॥ स्नापयित्वाश्रुधाराभिर्द्विजातिभ्यो ददौ धनम् ॥ ६९ ॥ इति ते कथितं विप्र कृष्णांशचरितं शुभम् ॥ शृण्वतां कलिपापघ्नं कथयिष्यामि वै पुनः ॥ ७० ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडापरपर्याये कलियुगीयेतिहाससमुच्चये द्वाविंशोऽध्यायः ॥ २२ ॥ ॥ छ ॥

॥ सूत उवाच ॥

॥ चतुर्विंशाब्दकं प्राप्ते कृष्णांशे बलशालिनि ॥ इषशुक्लदशम्यां च कृतो राज्ञा महोत्सवः ॥ १ ॥ भोजयित्वा द्विजश्रेष्ठान्दत्त्वा तेभ्यो हि दक्षिणाः ॥ स्वभृत्येभ्यस्तथा वित्तं यथायोग्यं क्रमाद्ददौ ॥ २ ॥ कार्तिक्यां शुभयुक्तायां कृष्णांशो बलसंयुतः ॥ इन्दुलेन च संयुक्तो देवसिंहेन संयुतः ॥ ३ ॥ अयुतैः स्वर्णद्रव्यैश्च शूरैर्दशसहस्रकैः ॥ ययौ बर्हिष्मतीस्थाने नानाभूपसमन्विते ॥ ४ ॥ एतस्मिन्नंतरे तत्र चित्ररेखा समागता ॥ वृता सप्तालिभिर्देवी चित्रगुप्तप्रपूजिनी ॥ ५ ॥ गंगामध्ये महारम्यं यानं मायामयं तया ॥ कृतं कौतूहलयुतं बहुसंपत्समन्वितम् ॥ ६ ॥ आगतास्तत्र राजानो नाना तद्दर्शनोत्सुकाः ॥ तदोदयो देवयुतो जयंतेन समन्वितः ॥ शतशूरैश्च सहितो दर्शनार्थमुपाययौ ॥ ७ ॥ चित्ररेखा महारम्या वाह्लीकनृपतेः सुता ॥ ददर्श सुंदरं कान्तमिंदुलं शशिवन्मुखम् ॥ येन स्वप्नांतरे रम्यं सार्द्धं भुक्तं तया सुखम् ॥ ८ ॥ तमाह्लादसुतं ज्ञात्वा साभिनंदनदेहजा ॥ कृत्वा मोहमयं जालं शुकभूतं तदेंदुलम् ॥ ९ ॥ हृत्वा स्वयंवरे रम्ये परमानन्दमाययौ ॥ पुनराहृत्य तां मायां स्वगेहाय ययौ मुदा ॥ १० ॥ कृष्णांशस्तु तदा बुद्ध्वा न ददर्श स्वकं शिशुम् ॥ देवसिंहं बोधयित्वा पप्रच्छ क्व गतः शिशुः ॥ ११ ॥ कालज्ञो देवसिंहोऽपि मोहितश्चित्रमायया ॥ न ज्ञातस्तेन वै बालः क्व गतः केन वा हृतः ॥ १२ ॥ विस्मितं

देवसिंहं च दृष्ट्वा कृष्णांशको बली ॥ रुरोदोच्चैस्तदा गाढं चित्रमायाविमोहितः ॥ १३ ॥ श्रुत्वा तु रोदनं तस्य खलस्तत्र महीपतिः ॥ ययौ शीघ्रं
प्रसन्नात्मा यत्राह्लादः स्वयं स्थितः ॥ रुदित्वा तत्र वै गाढं वचनं प्राह नम्रधीः ॥ १४ ॥ उदयो नाम ते भ्राता मोहयित्वा मदेन[1] तौ ॥ देवमि
न्दुलमेवासौ हत्वा धारास्वरोपयत् ॥ १५ ॥ प्रत्यक्षं च मया दृष्टं तेन वीरेण वै कृतम् ॥ शतं स्वर्णं च मे दत्त्वा विनयेनावरोधितः ॥ १६ ॥
देवसिंहस्ततो बुद्ध्या न ज्ञातं तेन यत्कृतम् ॥ इति श्रुत्वा तु वचनं निश्चयं नाधिगच्छति ॥ १७ ॥ एतस्मिन्नंतरे प्राप्तौ तौ वीरौ रोदने रतौ ॥
तद्वियोगेन कृष्णांशः स्वदेहं त्यक्तुमुद्यतः ॥ १८ ॥ आह्लादो निश्चयं[2] ज्ञात्वा भाषितं च महीपतेः ॥ कृष्णांशं ताडयामास वैतसैश्चर्मकर्तनैः॥१९॥
तस्य माता तथा पत्नी भगिनी प्रेमदुःखिताः ॥ आह्लादं बोधयामासुर्धूर्तमायाविमोहितम् ॥ न बोधितस्तदा वीरश्चित्रमायाविमोहितः ॥ २० ॥
तदा पुष्पवती देवी स्वपतिं भ्रातृपीडितम् ॥ दृष्ट्वा तत्र गता शीघ्रं पतिदुःखेन दुःखिता ॥२१॥ विनापराधं कृष्णांशो महानिंदामवाप्तवान् ॥ तदा
वेदविदो विप्रा आह्लादं प्राहुरूर्जितम् ॥ २२ ॥ वधस्त्यागः समो ज्ञेयो योग्यं बुद्ध्या विचारय ॥ इत्युक्तः स तुरीयात्मा पुत्रशोकेन दुःखितः ॥
॥ २३ ॥ चांडालांश्च समाहूय बद्ध्वा तं पुत्रघातिनम् ॥ दत्त्वा तेभ्यः सपत्नीकं वधं कुरुत मा चिरम् ॥ २४ ॥ अस्य नेत्रे समुत्पाट्य मां दर्श
यत संयुताः ॥ इति श्रुत्वा गतास्ते वै गहनं व्याघ्रसेवितम् ॥ २५ ॥ देवसिंहस्ततो गत्वा दत्त्वा तेभ्यो महद्धनम् ॥ संप्राप्य दंपती वीरश्चांडाले
भ्यो वनं ययौ ॥ २६ ॥ बलखानेस्तु या पत्नी गजमुक्ता पतिव्रता ॥ दंपती पालयामास गुह्यगेहे मुदा युता ॥ २७ ॥ चांडालास्ते तु संगत्य
मृगनेत्रे च तं[3] ददुः ॥ देवसिंहस्तदागत्य क्रोधात्मा च तमब्रवीत् ॥ धिक्त्वां पापं दुराचारं त्वया मे हिंसितः सखा ॥ २८ ॥ जीवि
तस्त्वत्सुतो भूमौ तदन्वेषणहेतवे ॥ यास्यामि विविधान्राष्ट्रान्सत्यंसत्यं ब्रवीम्यहम् ॥ इत्युक्त्वा प्रययौ वीरः शिरीषाख्यपुरं
शुभम् ॥ २९ ॥ गजमुक्तामनुज्ञाप्य दंपती प्राप्य निर्भयः ॥ मयूरनगरं रम्यं निशि घोरं समाययौ ॥ ३० ॥ मकरंदस्तु
बलवाञ्ज्ञात्वा तत्सर्वकारणम् ॥ स्वसुः पतिं च भगिनीं स्वांते प्रेम्णा न्यवासयत् ॥ ३१ ॥ धर्ममाराधयामास यज्ञैर्नानाविधैः स्तवैः ॥ प्रसन्नो
धर्मराजश्च मकरन्दमुवाच ह ॥ ३२ ॥ अभिनंदनभूपस्य सुता चित्रप्रपूजिनी ॥ नाव्यात्मजा केसरिणी तत्सखी दंभकोविदा ॥ ३३ ॥ केसरि
ण्या गुरुर्ज्ञेयः कुतुको योगरूपधृक् ॥ तेन प्रसारिता माया शतयोजनमन्तरा ॥ ३४ ॥ शत्रुभिर्दुर्गमा भूमिः शत्रुपाषाणकारिणी ॥

---

[1] मादकद्रव्येणेत्यर्थः । [2] अहमिति शेषः । [3] तस्मा इत्यर्थः ।

चित्रगुप्तप्रभावेण निर्भयो भूपतिः स्वयम् ॥ ३५ ॥ चित्ररेखा भूपसुता जयंतस्तु तया हृतः ॥ नररूपधरो रात्रौ शुकरूपधरो दिने ॥ इन्दुलश्च
स्थितो दुःखी चित्रमायाविमोहितः ॥ ३६ ॥ कृष्णांशश्च भवान्देवः सहितः सूर्यवर्मणा ॥ मया दत्तानि यंत्राणि गृहीत्वा ते मुदा युताः ॥
चित्ररेखां समागत्य नृत्यादींस्तैः समं कुरु ॥ ३७ ॥ मोहयित्वा च तां देवीं पठित्वा तन्मतं शुभम् ॥ पुनरागच्छ वै शीघ्रं सैन्ययोगं पुनः कुरु ॥
॥ ३८ ॥ इत्युक्त्वान्तर्दधे देवस्स राजा विस्मयान्वितः ॥ कृष्णांशं वर्णयामास यथा धर्मेण भाषितम् ॥ ३९ ॥ फाल्गुने मासि संप्राप्ते त्रयस्ते
योगिरूपिणः ॥ ययुरिन्नगरं रम्यं नृत्यगीतविशारदाः ॥ ४० ॥ मृदंगांकस्तदा देवो मकरंदो विपंचिमान् ॥ नृत्यगानकरो वीरः कृष्णांशः
सर्वमोहनः ॥ ४१ ॥ मोहयित्वा च नगरं तथा गजपतिं नृपम् ॥ सकुलं च ससैन्यं च तुष्टो राजाब्रवीदिदिदम् ॥ ४२ ॥ वांछितं ब्रूहि मे योगिन्स
श्रुत्वा प्राह नम्रधीः ॥ देहि मे सूर्यवर्माणं स्वसुतं कार्यहेतवे ॥४३॥ कृत्वा कार्यमहं शीघ्रं पुनर्दास्यमि ते सुतम् ॥ विधिना निर्मितो धर्मो
राजभिर्विश्वरक्षणम् ॥४४॥ इति श्रुत्वा गजपतिर्दत्त्वा तेभ्यः स्वकं सुतम् ॥ स्वराज्ञीमाययौ राजा गतास्ते कार्यतत्पराः ॥४५॥ पक्षमात्रेण बाह्लीकं नगरं
प्रययुर्मुदा ॥ धर्मदत्तानि यंत्राणि गृहीत्वा शत्रुमंदिरम् ॥ ४६ ॥ आययुर्लास्यतत्त्वज्ञा नृपमोहनतत्पराः ॥ सर्वे च नागराः प्राप्तास्तत्र
क्षत्रगणामुदा ॥४७॥ मोहितास्तैश्च ते सर्वे गीतनृत्यविशारदैः ॥ महद्धनं ददौ तेभ्यस्तोमरान्वयसंभवाः ॥४८॥ तानादाय पुनर्भूपः स्वगेहमभिनंदनः ॥
आययौ गेहनृत्यार्थी कारयामास वै पुनः ॥४९॥ मकरंदस्तदा वीणां मृदंगं भीष्मजो बली॥मंजीरं सूर्यवर्मा च कृष्णांशो गाननृत्यकम् ॥५०॥
गृहीत्वा मोदयामासुर्नारीवृन्दा महोत्तमम् ॥ चित्ररेखा स्वयं दृष्ट्वा तेषां मोहनहेतवे ॥ ५१ ॥ मायां निर्वापयामास निष्फला साऽभवत्क्षणात् ॥
मोहिता तैश्च सा देवी तानुवाच मुदान्विता ॥ ५२ ॥ वांछितं ब्रूहि मे वीर कृष्णांशश्चाह तां वधूम् ॥ शुकं देहि च मे देहि नो चेच्छापं
ददाम्यहम् ॥ ५३ ॥ इति श्रुत्वा चित्ररेखा शोकव्याकुलचेतना ॥ कृष्णांशं योगिनं प्राह सत्यं कथय को भवान् ॥ ५४ ॥ इंद्राद्या देवतास्सर्वे मया
निर्मितया यया ॥ मोहिताः क्षणमात्रेण न भवान्मोहितो मया ॥५५॥ देवो नारायणो वापि धर्मो वापि शिवः स्वयम् ॥ इत्युक्तस्स तु कृष्णांशो
वचनं प्राह निर्भयः ॥५६॥ उदयो नाम मे राज्ञि देवसिंहोऽयमुत्तमः ॥ मच्छचालो मकरंदोऽयं सूर्यवर्मा तथाविधः ॥ ५७ ॥ इन्दुलस्य वियोगेन
वयं योगित्वमागताः ॥ मद्गुरुश्च तथोन्मादी संकुलस्तद्वियोगतः ॥ ५८ ॥ शुकं देहि महामाये इंदुलं देहि वा यदि ॥ इत्युक्त्वाशु रुरोदोच्चैर्हा
इन्दुल महाबल ॥ ५९ ॥ दर्शनं देहि मे शीघ्रं नो चेत्प्राणांस्त्यजाम्यहम् ॥ इत्येवं वादिनं वीरं चित्ररेखा महोत्तमा ॥ ६० ॥ कृत्वा लज्जां पुनः

प्राह मां च पुत्रं गृहाण भोः ॥ कृत्वा नरमयं रूपं स्वकान्तं सर्वसुंदरम् ॥ ६१ ॥ पतित्वा तच्चरणयो रुरोदोच्चैश्च दंपती ॥ तथाविधौ च तौ
दृष्ट्वा कृष्णांशो हर्षसंयुतः ॥ ६२ ॥ इंदुलेनैव लिखितं गृहीत्वा पत्रमुत्तमम् ॥ धर्मयंत्रप्रभावेण मयूरनगरं ययौ ॥ ६३ ॥ सूर्यवर्मा गतो गेहं मक
रंदेन मानितः ॥ देवसिंहस्तु बलवान्गृहीत्वा पत्रमुत्तमम् ॥६४॥ ययौ मनोरथारूढो यत्राह्लादः शुचान्वितः ॥ को भवानिति तं प्राह महोन्मादीव
दृश्यते ॥ ६५ ॥ देवसिंहं च मां विद्धि त्वपुत्रान्वेषणे रतम् ॥ पत्रं गृहाण भो वीर लिखितं त्वत्सुतेन वै ॥ ६६ ॥ इति श्रुत्वा स आह्लादश्चा
ह्लादं परमाप्तवान् ॥ ज्ञात्वा तत्कारणं सर्वं यथाविधि सुतो हृतः ॥६७॥ महीपतिं समाहूय वचनं प्राह नम्रधीः ॥ सत्यं कथय मे भूप कृष्णांशेन हत
स्सुतः ॥ ६८ ॥ सहोवाच श्रुतं वीर कृष्णांशेन यथा हतः ॥ इत्युक्त्वा तु विहस्याशु कार्यसिद्धिमुपागतः ॥ ६९ ॥ अह्लादः क्रोधताम्राक्षः केशाना
कृष्य तं मुदा ॥ वेतसैस्ताडयामास स्वहस्तेन पुनः पुनः ॥ ७० ॥ श्रुत्वा परिमलो राजा सपत्नीकस्समागतः ॥ बहुधा मोदयामास रामांशं बहु
रूपिणम् ॥ ७१ ॥ अरे धूर्त महापापिन्मद्बंधुर्घातितस्त्वया ॥ गतो यत्र मम प्राणस्सकुलं त्वां नयाम्यहम् ॥ ७२ ॥ तदा महीपतिर्दुःखी
निःश्वासो मौनमास्थितः ॥ तदघं हृदि संस्थाप्य महापीडामवाप्तवान् ॥ ७३ ॥ एतस्मिन्नंतरे वीरो बलखानिः समागतः ॥ विमुच्य मातुलं
धूर्तं ज्येष्ठबन्धुमसान्त्वयत् ॥ ७४ ॥ स चकार विवाहार्थमुद्योगं भ्रातृजस्य वै ॥ नेत्रसिंहो नृपः प्राप्तो लक्षसैन्यसमन्वितः ॥ ७५ ॥
तारकश्च तमायातस्सार्द्धं शूरसहस्रकैः ॥ वीरसेनः स्वयं प्राप्तः शूरैः सार्द्धं नवाऽयुतैः ॥ ७६ ॥ तालनश्च ततः प्राप्तो लक्षसैन्यसम
न्वितः ॥ सूर्यवर्मा तथा प्राप्तो लक्षसैन्यसमन्वितः ॥ ७७ ॥ ब्रह्मानंदः स्वयं प्राप्तस्त्रिलक्षबलसंयुतः ॥ आह्लादश्च शुचाविष्टो लक्षसैन्य
समन्वितः ॥ ७८ ॥ हा बंधो क्व गतस्त्वं वै मां त्यक्त्वा पुरुषाधमम् ॥ इत्युक्त्वा प्रययौ वीरः शोकव्याकुलचेतनः ॥ ७९ ॥
बलखानिस्तु बलवाल्लँक्षसैन्यसमन्वितः ॥ देवसिंहेन सहितो बाह्लीकं प्रति सोगमत् ॥ ८० ॥ अहोरात्रप्रमाणेन मासैकः पथि
वै गतः ॥ ज्येष्ठकृष्णस्य पंचम्यां बाह्लीकग्राममाप्तवान् ॥ व्यूहः स्वकीयसैन्यानां रचितो बलखानिना ॥ ८१ ॥ एको रथः स्थितो
युद्धे तत्पश्चात्संस्थिता गजाः ॥ पञ्चाशच्च क्रमात्तेषां वाजिनश्च शतंशतम् ॥ ८२ ॥ तेषां पश्चात्क्रमाज्ज्ञेयाः पत्तयो दश संस्थिताः ॥ एका सेना
च सा ज्ञेया तत्प्रमाणं ब्रवीम्यहम् ॥ ८३ ॥ एको रथो गजास्सर्वे शतार्द्धं तु हयास्तु ये ॥ सेनायां पञ्चसाहस्राः शतघ्न्यस्तु तथा स्मृताः॥ ८४ ॥
पञ्चायुतानि सेनायां सर्वे पदचराः स्मृताः ॥ एवंविधाश्च ताः सेना बलखानेश्च षोडश ॥ ८५ ॥ गजास्तु दशसाहस्रा मदमत्ताः पृथग्ययुः ॥ युद्धे

ऽस्मिन्गणितं ह्येवं शूराः शत्रुप्रहारिणः ॥ ८६ ॥ अभिनन्दनभूपस्य म्लेच्छाः पैशाचधर्मिणः ॥ त्रिलक्षाश्च हयारूढा एकलक्षाः शतघ्निपाः ॥
॥ ८७ ॥ एकलक्षः पदचरा भुशुण्डीपरिघायुधाः ॥ तोमरान्वयसंयुक्ताः क्षत्रियाः प्रयुतानि वै ॥ गजस्थास्तत्र संप्राप्ता यत्राह्लादमहा
चमूः ॥ ८८ ॥ तयोश्चासीन्महद्युद्धं तुमुलं रोमहर्षणम् ॥ मदमत्ताश्च ते सर्वे निर्भया रणमाययुः ॥ ८९ ॥ सप्ताहोरात्रमभवद्युद्धं समरशालि
नाम् ॥ बाह्लीकस्यार्द्धसेना च क्षयं नीता च तैर्नृपैः ॥ ९० ॥ एकलक्षं हताः सर्वे बलखानेश्च सैन्यपैः ॥ हाहाभूते शत्रुसैन्ये भयभीते दिशो गते ॥
हर्षिता बलखान्याद्या जय दुर्गे वचोऽब्रुवन्॥९१॥ दृष्ट्वा सैन्यविनाशं च राज्ञः सप्तकुमारकाः ॥ कौरवांशाश्च ते जग्मुर्यत्र जातो महारणः॥९२॥
महानन्दश्च नन्दश्च परानन्दोपनन्दकौ ॥ सुनन्दश्च सुरानन्दः प्रनन्दः क्रमतोभवाः[1] ॥ ९३ ॥ गजस्थास्ते महावीरास्तोमरान्वयसंभवाः ॥ सेनां
जघ्नुः शरैस्तीक्ष्णैर्बलखानेर्महात्मनः ॥ ९४ ॥ भयभीताश्च ते सर्वे बलखानिमुपाययु ॥ दृष्ट्वा सैन्यं पराभूतं बलखानिस्तदा रुषा ॥ ९५ ॥
अभ्यधावत[2] वेगेन कपोतस्थो महाबलः ॥ नंदं प्रति तथा देवः परानंदं च तालनः ॥ ९६ ॥ उपनन्दं सूर्यवर्मा सुनन्दं प्रति तारकः ॥ नेत्रसिंहः
सुरानन्दं प्रनन्दं प्रति यादवः ॥ ९७ ॥ युध्यमानास्तु ते सर्वे परस्परवधैषिणः ॥ दिनार्द्धमभवद्युद्धं बहुवीरप्रणाशनम् ॥ ९८ ॥ पराजितास्तु ते
पुत्रा बाह्लीकस्य महाबलाः ॥ त्यक्त्वा युद्धं ययुर्गेहं भीरुका बलखानिना ॥ ९९ ॥ दृष्ट्वा तेषां बलं घोरमभिनन्दनभूमिपः ॥ कुतुकं च समाहूय
नाट्यां केसरिणीं तथा ॥ कथितं कारणं राज्ञा यथा जातः पराजयः ॥ १०० ॥ इति श्रुत्वा तु कुतुकस्तमाश्वास्य महीपतिम् ॥ स ध्यात्वा
शांबरीं मायां महादेवेन निर्मिताम् ॥ तत्सैन्यं मोहयामास शिलाभूतमचेतनम् ॥ १०१ ॥ तदा केसरिणी नाट्या अष्टौ बद्ध्वा महाबलान् ॥ राज्ञः
पार्श्वमुपागम्य दत्त्वा तान्गेहमाययौ ॥१०२॥ बाह्लीकश्च प्रसन्नात्मा बद्ध्वा तान्निगडैर्दृढैः ॥ लुंठित्वा द्रविणं तेषां कोशमध्ये समाक्षिपत् ॥ १०३ ॥
देव्याश्च वरदानेन देवसिंहो भयातुरः ॥ महावतीं समागम्य स्वर्णवत्यै न्यवेदयत् ॥ १०४ ॥ ज्ञात्वा स्वर्णवती देवी सर्वविद्याविशारदा ॥
श्येनीं मूर्तिं समास्थाय ययौ पुष्पवतीं प्रति ॥ १०५ ॥ दृष्ट्वा तु दंपती तत्र मकरंदं गृहे स्थितौ ॥ रुदित्वा कथयामास यथा प्राप्तः पराजयः ॥
॥ १०६ ॥ कृष्णांशस्तु तदा दुःखी मकरन्दं वचोऽब्रवीत् ॥ गच्छ वीर मया सार्द्धं मद्गुरुबंधनं गतः ॥ १०७ ॥ कुलक्षये महत्पापं सुप्रोक्तं पूर्व
सूरिभिः ॥ निमग्नान्दुःखजलधौ समुद्धर मम प्रिय ॥ १०८ ॥ इति श्रुत्वा तु तच्चचालः शूरायुतसमन्वितः ॥ संन्यस्तवेषमास्थाय खड्ग

---

[1] क्रमतो भवा येषां ते । [2] धावु गतिशुद्ध्योरित्यात्मनेपदिनो रूपमेतत् ।

चर्मसमन्वितः ॥ कृष्णांशेन हयारूढो बाह्लीकं त्वरितो ययौ ॥ १०९ ॥ तदा स्वर्णवती देवी पुष्पवत्या समन्विता ॥ श्येनीरूपमुपास्थाय ययौ
यत्र महारणः ॥ ११० ॥ स छित्त्वा शांबरीं मायां बोधयित्वा स्वसैनिकान् ॥ रुरोध नगरीं तस्य बाह्लीकस्य महात्मनः ॥ १११ ॥ दृष्ट्वा ताञ्छ
त्रुसंयुक्तान्कुतुकस्तु तया सह ॥ पुनश्च शांबरीं मायां प्रेषयामास तान्प्रति ॥ ११२ ॥ छित्त्वा सा सकलां मायां बद्ध्वा तौ दैत्यसन्निभौ ॥ नगरं
दाहयामास तस्य भूपस्य मायया ॥ ११३ ॥ न दाहो दाहमापन्नो न भस्मी भस्मवान्खलु ॥ स्वर्णवत्या कृतं चित्रं स्वयं देव्या च मायया ॥
॥ ११४ ॥ तदा पुष्पवती देवी हत्वा केसरिणीं रुषा ॥ तन्मांसैस्तर्पयामास गृध्रगोमायुवायसान् ॥ ११५ ॥ कुतुकं च तथाभूतं हत्वा स्वर्ण
वती स्वयम् ॥ कारागारे लोहमये स्थितान्वीरानमोचयत् ॥ ११६ ॥ पुनरागम्य सा देवी तया सार्द्धं शुभानना ॥ मकरन्दः स्थितो यत्र
कृष्णांशेन समन्वितः ॥ ११७ ॥ ते सर्वे विस्मिताश्चासञ्ज्ञात्वा देव्या विमोहिताः ॥ क्रोधवन्तो महावीरा युद्धाय समुपाययुः ॥ ११८ ॥
पुनश्चासीत्तयोर्युद्धं सेनयोरुभयोर्मृधे ॥ बलखानिं महानन्दो नन्दश्चाह्लादमाययौ ॥ ११९ ॥ परानंदस्तथा देवं तारकं चोपनंदनः ॥ सुनन्दो नेत्र
सिंहं च सुरानंदश्च तालनम् ॥ १२० ॥ प्रनन्दो वीरसेनं च ब्रह्मानन्दं स भूपतिः ॥ गजस्थिताश्च ते सर्वे धनुर्युद्धपरायणाः ॥ अहोरात्रमभूद्युद्धं
तेषां च तुमुलं क्रमात् ॥ १२१ ॥ एतस्मिन्नन्तरे रात्रौ चित्ररेखा समागता ॥ स्वकीयान्व्याकुलीभूतांस्तादृशांश्च विलोक्य वै ॥ १२२ ॥ चित्र
गुप्तं तदा ध्यात्वा चित्रमायामचीकरत् ॥ तदा तद्बांधवाश्चासन्बहुधा चाभिनंदनाः ॥ १२३ ॥ तान् दृष्ट्वा विस्मिताः सर्वे भयभीताश्च दुद्रुवुः ॥
त्यक्त्वा युद्धमयीं भूमिं शोकव्याकुलचेतनाः ॥ १२४ ॥ पंचयोजनमागत्य ततो वासमकारयन् ॥ संध्याकाले तमोभूते निरुत्साहा महाबलाः ॥
१२५॥ हा कृष्णांश महाबाहो शरणागतवत्सल ॥ इन्दुलस्ते कुमारोऽयं संहृतश्चित्ररेखया ॥ १२६ ॥ तया विमोहिता वीरा वयं ते शरणं गताः ॥
इत्युक्त्वा रोदनं चक्रुः क्व गतोऽसि महामते ॥१२७॥ तदा कोलाहलश्चासीद्रुदतां बलशालिनाम् ॥ आह्लादं गर्हयित्वा ते मूर्छिता भुवि विह्वलाः
॥ १२८ ॥ आह्लादस्तु तथा श्रुत्वा वज्रपाताहतः स्वयम् ॥ उन्मादिवत्तदा भूत्वा ताडयामास वक्षसि ॥ १२९ ॥ एतस्मिन्नंतरे योगी कृष्णांशो
भगवत्कला ॥ चंद्रोदये स्वयं प्राप्तश्चाष्टम्यां भृगुवासरे ॥ १३० ॥ शूरश्च दशसाहस्रैर्मकरंदेन संयुतः ॥ तत्सेनां बोधयामास पालितां बलखा
निना ॥ १३१ ॥ जित्वा तान्सर्वभूपालान्गृहीत्वा विपुलं धनम् ॥ पञ्चशब्दस्थितं बंधुं प्रत्यागत्य जगर्ज वै ॥ १३२ ॥ तस्य शब्देन शेषांशो
बोधितो बलशालिना ॥ शकुनं शुभमालोक्य भुजावुत्थाप्य वीर्यवान् ॥ स्वांके निवेशयामास कृष्णांशं योगिरूपिणम् ॥ १३३ ॥ स्नापयित्वा

श्रुधाराभिः कृष्णांशं प्रेमविह्वलः ॥ दत्त्वा द्विजातिमुख्येभ्यो वर्णयामास कारणम् ॥ १३४ ॥ कृष्णांशोऽपि प्रसन्नात्मा स्वकीयां सकलां कथाम्॥
वर्णयित्वा यथाभूतां पुनर्बाह्लीकमाययौ ॥१३५॥ चित्रविद्यां स्वयं कृत्वा पाठितां चित्ररेखया ॥ बद्धाभिनंदनं भूपं ससुतं च समंत्रिणम् ॥ विवाहं
कारयामास जयंतस्य तया सह ॥ १३६ ॥ बाह्लीकस्तु प्रसन्नात्मा दत्त्वा च विपुलं धनम् ॥ स्वसुतां चित्ररेखां च जयन्ताय मुदा ददौ ॥१३७॥
शतं गजान्हयांस्तत्र सहस्राणि धनैर्युतान् ॥ शतं दासांस्तथा दासीर्जयंताय स्वयं ददौ ॥ १३८ ॥ प्रस्थानं कारयामास बलखानेर्महात्मनः ॥
श्रावणे मासि संप्राप्तास्ते सर्वे च महावतीम् ॥ १३९ ॥ स्वंस्वं गेहं ययुस्सर्वे भूपाश्चाह्लादमानिताः ॥ इति ते कथितं विप्र चरित्रं कलिनाश
नम् ॥ शृण्वतां सर्वपापघ्नं कथयिष्यामि वै पुनः ॥ १४० ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहा
ससमुच्चये त्रयोविंशोऽध्यायः ॥ २३ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ कृष्णांशे च गृहं प्राप्ते चेन्दुले च विवाहिते ॥ महीपतिस्सदा दुःखी देहलीं
प्रति चागमत् ॥ १ ॥ वृत्तांतं च नृपस्याग्रे कथयित्वा स तारकः ॥ परं विस्मयमापन्नः कृष्णांशचरितं प्रति ॥ २ ॥ एतस्मिन्नंतरे मंत्री चंद्रभट्ट
उदारधीः ॥ भूमिराजं वचः प्राह शृणु पार्थिवसत्तम ॥३॥ मया चाराधिता देवी वैष्णवी विश्वकारिणी ॥ त्रिवर्षांते च तुष्टाभूद्वरदा भयहारिणी॥४॥
तया दत्तं शुभं ज्ञानं कुमतिध्वंसकारकम् ॥ ततोऽहं ज्ञानवान्भूत्वा कृष्णांशं प्रति भूपते ॥ चरित्रं वर्णयामास तस्य कल्मषनाशनम् ॥ ५ ॥
इत्युक्त्वा स च शुद्धात्मा ग्रंथं भाषामयं शुभम् ॥ माहात्म्यं देविभक्तानां श्रावयामास वै सभाम् ॥६॥ तच्छ्रुत्वा भूमिराजस्तु विस्मितश्चाभवत्क्ष
णात् ॥ महीपतिस्तदा प्राह दिव्याश्वबलदर्पितः ॥ उदयो नाम बलवान्यस्यैवं वर्णिता कथा ॥७॥ चत्वारो वाजिनो दिव्या जलस्थलखगाश्च
ते ॥ शीघ्रं तांश्च समाहृत्य स्वयं भूप बली भव ॥ ८ ॥ इति श्रुत्वा स नृपतिः श्रुतवाक्यविशारदम् ॥ आहूय कुंदनमलं प्रेषयामास सत्वरम्
॥ ९ ॥ महावतीं समागत्य स दूतो भूपतिं प्रति ॥ उवाच वचनं प्रेम्णा महीराजस्य भूपतेः ॥ १० ॥ वाजिनस्ते हि चत्वारो दिव्यरूपाः शुभ
प्रभाः ॥ दर्शनार्थे तव वधूर्वेला नाम ममात्मजा ॥ ११ ॥ तयाहूतान्हयान्भूप देहि मे विस्मयं त्यज ॥ नो चेद्वेलाग्निना सर्वे क्षयं यास्यंति सैन्यपाः
॥ १२ ॥ इति श्रुत्वा वचो घोरं स भूपो भयकातरः ॥ आह्लादादीन्समाहूय वचनं प्राह नम्रधीः ॥ हयान्स्वान्स्वान्मुदा देहि मदीयं वचनं कुरु ॥
॥१३॥ इति श्रुत्वा स आह्लादो ध्यात्वा सर्वमयीं शिवाम् ॥ उवाच मधुरं वाक्यं शृणु भूप शिवप्रिय ॥१४॥ यत्र नः संस्थिताः प्राणास्तत्र ते वा
जिनः स्थिताः ॥ न दास्यामो वयं राजन्सत्यंसत्यं न चान्यथा ॥ १५ ॥ इति श्रुत्वा वचस्तस्य राजा परिमलो बली ॥१६॥ शपथं कृतवान्घोरं

शृण्वतां बलशालिनाम् ॥ भोजनं ब्रह्ममांसस्य पानीयं गोऽसृजोपमम् ॥१७॥ शय्या स्वमातृसदृशी ब्रह्महत्योपमा सभा ॥ मम राष्ट्रे च युष्माभिर्वासः पापमयो महान् ॥१८॥ इति श्रुत्वा तु शपथं देवकी शोकतत्परा ॥ चकार रोदनं गाढं सगेहजनविग्रहा ॥१९॥ पंचविंशाब्दके प्राप्ते कृष्णांशे योगतत्परे ॥ भाद्रशुक्लचतुर्दश्यां तद्गेहाद्धर्मतत्पराः ॥ २० ॥ निर्ययुः कान्यकुब्जं ते जयचंद्रेण पालितम् ॥ स्वर्णवत्या पुष्पवत्या सहिताश्चित्ररेखया ॥२१॥ इन्दुलः प्रययौ शीघ्रमयुताश्वबलैस्सह ॥ करालं हयमारुह्य पंचशब्दं च तत्पिता ॥ कृष्णांशो बिंदुलारूढो देवकीमनुसंययौ ॥२२॥ त्यक्त्वा ते भूपतेर्ग्रामं सर्वसंपत्समन्वितम् ॥ पथि त्र्यहमुषित्वा ते जयचंद्रमुपाययुः ॥२३॥ नत्वा तं भूपतिं प्रेम्णा गदित्वा सर्वकारणम् ॥ उषित्वा शीतलास्थाने पूजयामासुरम्बिकाम् ॥२४॥ जयचंद्रस्तु भूपालो देवसिंहेन वर्णितः ॥ तेभ्यश्च न ददौ वृत्तिं भूमा परिमलाज्ञया ॥२५॥ कुंठितो देवसिंहस्तु गत्वा कृष्णांशमुत्तमम् ॥ उदित्वा कारणं सर्वं स श्रुत्वा रोषमादधौ ॥ २६॥ त्वरितं बिंदुलारूढो हयपंचशतावृतः ॥ लुंठयामास नगरं पालितं लक्षणेन तत् ॥ २७ ॥ दृष्ट्वा तं लक्षणो वीरो हस्तिनः पृष्ठमास्थितः ॥ शरेण ताडयामासकृष्णांशहृदयं दृढम् ॥२८॥ निष्फलत्वं गतो बाणो विष्णुमंत्रेण प्रेरितः ॥ विस्मितः स तु भूपालो वाहनाद्भूमिमागतः ॥ २९ ॥ नत्वा तच्चरणौ दिव्यौ कुलिशादिभिरन्वितौ ॥ तुष्टाव दंडवद्भूत्वा लक्षणो गद्गदं[1] गिरा ॥ ३० ॥ ॥ लक्षण उवाच ॥ ॥ वैष्णवं विद्धि मां स्वामिन्विष्णुपूजनतत्परम् ॥ जानेऽहं त्वां महाबाहो कृष्णशक्त्यवतारकम् ॥३१॥ त्वदृते को हि मे बाणं निष्फलं कुरुते भुवि ॥ क्षमस्व मम दौरात्म्यं नाथ ते मायया कृतम् ॥३२॥ इत्युक्त्वा तेन सहितो जयचन्द्रं महीपतिम् ॥ गत्वा तं कथयामास यथा प्राप्तः पराजयम् ॥३३॥ नृपस्तयोः परीक्षार्थं यौ तु छायाविमोहितौ ॥ गजौ कुवलयापीडौ त्यक्तवाञ्छीतलास्थले ॥३४॥ तदाह्लादोदयौ वीरौ गृहीत्वा तौ स्वलीलया ॥ चकृषतुर्बलात्पुच्छे क्रोशमात्रं पुनःपुनः ॥ ३५ ॥ मृतौ कुवलयापीडौ दृष्ट्वा राजा भयातुरः ॥ ददौ राजगृहं ग्रामं तयोरर्थे प्रसन्नधीः ॥ ३६ ॥ इषशुक्ले तु संप्राप्ते लक्षणो नाम वै बली ॥ नृपाज्ञया ययौ शीघ्रं तैश्च[2] दिग्विजयं प्रति ॥ ३७ ॥ सप्तलक्षबलैस्सार्द्धं तालनाद्यैश्च संयुतः ॥ वाराणसीं पुरीं प्राप्य रुरोध नगरीं तदा ॥ ३८ ॥ रुद्रवर्मा च भूपालो गौडवंशयशस्करः ॥ पंचायुतैः स्वसैन्यैश्च सार्द्धं युद्धार्थमात्तवान् ॥ ३९ ॥ याममात्रेण तं जित्वा षोडशाब्दस्य वै करम् ॥ कोटिमुद्रामयं प्राप्य जयचंद्राय चार्पयत् ॥ ४० ॥ मागधेशं पुनर्जित्वा नाम्ना विजयकारिणम ॥ विंशत्यब्दकरं प्राप्य स्वभूपाय समर्पयत् ॥ ४१ ॥ पंचकोटीश्च वै मुद्रा राजतस्य पुनर्ययौ ॥ अंग

---

[1] गद्गदं यथा स्यात्तथा गिरा तुष्टावेत्यन्वयः । [2] विनापि सहशब्दयोगं सहार्थे गम्यमाने तृतीया, 'वृद्धो यूना' इत्यादिनिर्देशात् ।

देशपतिं भूपं मायावर्माणमुत्तमम् ॥ ४२ ॥ सैन्यायुतयुतं जित्वा विंशत्यब्दस्य वै करम् ॥ कोटिमुद्राश्च संप्राप्य स्वभूपाय समार्पयत् ॥ ४३ ॥
वंगदेशपतिं वीरो लक्षणो वै युतश्च तैः ॥ लक्षसैन्ययुतं भूपं कालीवर्माणमुत्तमम् ॥ अहोरात्रेण तं जित्वा महायुद्धेन लक्षणः ॥ ४४ ॥ विंशत्यब्द
करं प्राप्य कोटिं स्वर्णमयं तदा ॥ प्रेषयामास भूपाय जयचंद्राय वै मुदा ॥ ४५ ॥ उष्ट्रदेशं[1] ययौ वीरः पालितं तैर्महाबलैः ॥ धोयीकविस्तत्रनृपो
लक्षसैन्यसमन्वितः ॥ ४६ ॥ जगन्नाथाज्ञया प्राप्तस्तैश्च सार्द्धं रणोन्मुखे ॥ तयोश्चासीन्महद्युद्धं तुमुलं रोमहर्षणम् ॥ अहोरात्रप्रमाणेन कृष्णांशेन
जितो नृपः ॥ ४७ ॥ विंशत्यब्दकरं सर्वं कोटिस्वर्णसमन्वितम् ॥ संप्राप्य प्रेषयामास कान्यकुब्जाधिपाय वै ॥ ४८ ॥ पुंड्रदेशं ययौ वीरो
लक्षणो बलवत्तरः ॥ नृपं नागपतिं नाम पंचायुतबलैर्युतम् ॥ दिनमात्रेण तं जित्वा कोटिमुद्रा गृहीतवान् ॥ ४९ ॥ महेंद्रगिरिमागत्य नत्वा तं
भार्गवं मुनिम् ॥ नतो निवृत्य ते सर्वे नेत्रपालपुरं ययुः ॥ ५० ॥ योगसिंहस्तदागत्य कृष्णांशं प्रति भार्गव[2] ॥ कोटिमुद्रा ददौ तस्मै सप्तरात्रम
वासयत् ॥ ५१ ॥ वीरसिंहपुरं जग्मुस्ते वीरा मदवत्तराः ॥ रुरुधुर्नगरीं सर्वां हिमतुंगोपरि स्थिताम् ॥ पालितां गोरखाख्येन योगिना भक्तकार
णात् ॥ ५२ ॥ भूपानुजः प्रवीरश्च सैन्यायुतसमन्वितः ॥ कृतवान्दारुणं युद्धं लक्षणस्यैव सेनया ॥ ५३ ॥ प्रत्यहं बलवाञ्छूरो हत्वा शूरसहस्र
कम् ॥ सायंकाले गृहं प्राप्य योगिनं तमपूजयत् ॥ ५४ ॥ पूजनात्स प्रसन्नात्मा सैन्यमुज्जीव्य भूपतेः ॥ दत्त्वा गजबलं तेभ्यः पुनर्योगं करोति
वै ॥ ५५ ॥ सार्द्धमासो गतस्तत्र युद्ध्यतां बलशालिनाम् ॥ तदा ते तु निरुत्साहा देवसिंहं तमब्रुवन् ॥ ५६ ॥ विजयो नः कथं भूप ब्रूहि
नस्तत्त्वमग्रतः॥ इति श्रुत्वा स होवाच शृणु कृष्णांश मे वचः ॥५७॥ योगिनं गोरखं नाम पराजित्य स्वनृत्यतः ॥ पुनर्युद्धं कुरु त्वं वै ततो जय
मवाप्स्यसि ॥ ५८ ॥ इत्युक्तास्ते हि कृष्णाद्याः कृत्वा योगमयं वपुः ॥ स्थापयित्वा रणे सेनां पालितां लक्षणेन वै ॥ ५९ ॥ प्रातः काले ययुस्ते
वै मंदिरं तस्य योगिनः ॥ कृष्णांशो नर्तकश्चासीद्वेणुवाद्यविशारदः ॥ ६० ॥ देवसिंहो मृदंगाढ्यो वीणाधारी च तालनः ॥ कांस्यधारी तदाह्लादो
जगौ गीतां सनातनीम् ॥ ६१ ॥ तदर्थं हृदये कृत्वा गोरखस्सर्वयोगवान् ॥ वरं वृणुत तानाह ते तच्छ्रुत्वाऽब्रुवन्वचः ॥ ६२ ॥ नमस्यामो वयं
तुभ्यं यदि देयो वरस्त्वया ॥ देहि संजीविनीं विद्यामाह्लादाय महात्मने ॥६३॥ इति श्रुत्वा हृदि ध्यात्वा तानुवाच प्रसन्नधीः ॥ विद्या संजीविनी
तुभ्यं वर्षमात्रं भविष्यति ॥ तत्पश्चान्निष्फलीभूयागमिष्यति मदंतिकम् ॥६४॥ अद्यप्रभृति भो वीर मया त्यक्तमिदं जगत् ॥ यत्र भर्तृहरिः शिष्य

---

[1] अन्ध्रामिति केचिद्वदंति, औण्ड्रमित्यन्ये, उत्कलमित्यपरे । [2] शौनकसंबोधनम् ।

स्तत्र गत्वा शये ह्यहम् ॥ ६५ ॥ इत्युक्त्वान्तर्हितो योगी जग्मुस्ते रणमूर्द्धनि ॥ जित्वा प्रवीरसिंहं च वीरसिंहं तथैव च ॥ ६६ ॥ हत्वा तस्यायुतं
सैन्यं लुण्ठयित्वा च तद्गृहम् ॥ कृत्वा दासमयं भूपं लक्षणः प्रययौ मुदा ॥ ६७ ॥ कोशलं देशमागत्य जित्वा तस्य महीपतिम् ॥ सैन्यायुतं
सूर्यधरं करयोग्यमचीकरत् ॥ ६८ ॥ षोडशाब्दकरं प्राप्य मुद्राकोटचयुतं मुदा ॥ नैमिषारण्यमागम्य तत्रोषुः स्नानतत्पराः ॥ ६९ ॥ होलि
काया दिने रम्ये लक्षणो बलवत्तरः ॥ दत्त्वा दानानि विप्रेभ्यो महोत्सवमकारयत् ॥ ७० ॥ तदा वयं च मुनयः समाधिस्थाश्च भूपतिः ॥ यदा
स लक्षणः प्राप्तो नैमिषारण्यमुत्तमम् ॥ ७१ ॥ स्नात्वा सर्वाणि तीर्थानि संतर्प्य द्विजदेवताः ॥ कान्यकुब्जपुरं जग्मुश्चैत्रकृष्णाष्टमीदिने ॥ ७२ ॥
इति ते कथितं विप्र यथा दिग्विजयोभवत् ॥ शृणु विप्र कथां रम्यां बलखानिर्यथा मृतः ॥ ७३ ॥ मार्गकृष्णस्य सप्तम्यां भूमिराजो महाबलः ॥
महीपतेश्च वाक्येन सामंतं प्राह निर्भयः ॥ ७४ ॥ मया श्रुतस्ते तनयः शारदावरदर्पितः ॥ रक्तबीजत्वमापन्नस्तं मे देहि कृपां कुरु ॥ ७५ ॥ इत्यु
क्तस्स तु सामन्तस्तेन राज्ञेव सत्कृतः ॥ चामुंडं नाम तनयं समाहूयाब्रवीदिदम् ॥ ७६ ॥ पुत्र त्वं नृपतेः कार्यं सदा कुरु रणप्रिय ॥ इति श्रुत्वा
पितुर्वाक्यं स वै राजानमब्रवीत् ॥ ७७ ॥ देह्याज्ञां भूपते मह्यं शीघ्रं जयमवाप्स्यसि ॥ इति श्रुत्वा स होवाच बलखानिर्महाबलः ॥ ७८ ॥
मच्छिरीषवनं छित्वा गृहीत्त्वा राष्ट्रमुत्तमम् ॥ सुस्थितो निर्भयो गेहे बाहुशाली यतेंद्रियः ॥७९॥ यदि त्वं बलखानिं च जित्वा मे ह्यर्पयिष्यसि ॥
हत्वा वा तस्य सकलं राष्ट्रं त्वयि भविष्यति ॥ ८० ॥ इत्युक्त्वा रक्तबीजं तं समाहूय स्वकं बलम् ॥ सप्तलक्षं ददौ तस्मै स तत्प्राप्य मुदा ययौ ॥
॥ ८१ ॥ उषित्वा त्रिदिनं मार्गे शिरीषाख्यमुपागतः ॥ रुरोध नगरीं सर्वां बलखानेर्महात्मनः ॥ ८२ ॥ चामुंडागमनं श्रुत्वा बलखानिर्महाबलः ॥
पूजयित्वा महमायां दत्त्वा दानान्यनेकशः ॥ लक्षसैन्येन सहितः प्रययौ नगराद्बहिः ॥ ८३ ॥ तस्यानुजो महावीरस्सुखखानिर्बलैः सह ॥
हरिणीं तां समारुह्य शत्रुसैन्यमचिक्षपत् ॥ ८४ ॥ बलखानिः कपोतस्थो नाशयित्वा रिपोर्बलम् ॥ लक्षसैन्यं मुदा युक्तश्चामुंडं प्रति चागमत् ॥
॥ ८५ ॥ तयोश्चासीन्महद्युद्धं स्वस्वसैन्यक्षयंकरम् ॥ अहोरात्रप्रमाणेन निहताः क्षत्रिया रणे ॥ ८६ ॥ प्रातःकाले तु संप्राप्ते कृत्वा स्नानादिकाः
क्रियाः ॥ जग्मतुस्तौ रणे वीरौ धनुर्बाणविशारदौ ॥ ८७ ॥ रथस्थो बलखानिश्च चामुण्डो गजपृष्ठगः ॥ चक्रतुस्तुमुलं घोरं नरविस्मयकारकम्
॥ ८८ ॥बाणैर्बाणांश्च संछिद्य देवीभक्तौ च तौ मुदा ॥ अन्योन्यं वाहने हत्वा भूतलत्वमुपागतौ ॥ खड्गचर्मधरौ वीरौ युयुधाते परस्परम् ॥८९॥
यावन्तो रक्तबीजांगात्संजाता रक्तबिंदवः ॥ तावन्तः पुरुषा जाता रक्तबीजपराक्रमाः ॥ ९० ॥ तैश्च वीरैर्मदोन्मत्तैर्बलखानिस्समंततः ॥ संरु

द्धोऽभूद् भृगुश्रेष्ठ शारदां शरणं ययौ॥९१॥एतस्मिन्नंतरे वीरः सुखखानिस्ततोऽनुजः॥आग्नेयं शरमादाय रक्तबीजानदाहयत्॥९२॥ पुरा तु सुखखा
निश्च हव्यैर्देवं च पावकम् ॥ पंचाब्दान्पूजयामास तदा तुष्टस्स्वयं प्रभुः ॥ ९३ ॥ पावकीयं शरं रम्यं शत्रुसंहारकारकम् ॥ ददौ तस्मै प्रसन्नात्मा
तेनासावभवज्जयी ॥ ९४ ॥ बलखानिस्तु बलवान्दृष्ट्वा शत्रुविनाशनम् ॥ पराजितं च चामुंडं बद्ध्वा गेहमुपागतम् ॥ ९५ ॥ कृत्वा नारीमयं वेषं
स भीतो ब्रह्महत्यया ॥ दोलामारोप्य बलवान्प्रेषयामास शत्रवे ॥ ९६ ॥ हतशेषं पंचलक्षं सैन्यं गत्वा च देहलीम् ॥ वृत्तान्तं कथयामास यथा
जातो महारणः ॥ ९७ ॥ नारीवेषं च चामुंडं स दृष्ट्वा पृथिवीपतिः ॥ क्रोधाविष्टश्च बलवान्महीपतिमुवाच ह ॥ ९८ ॥ कथं जयो मे भविता सुख
खानौ च जीविते ॥ श्रुत्वा महीपतिः प्राह च्छद्मना कार्यमाकुरु ॥ ९९ ॥ ब्राह्मी माता तयोर्ज्ञेया शुद्धा सैव पतिव्रता ॥ दूतीभिः कारणं ज्ञात्वा
पुनर्युद्धं कुरुष्व भोः ॥ १०० ॥ इति श्रुत्वा महीराजो दूतीस्ताश्छलकोविदाः ॥ आहूय प्रेषयामास बलखानिगृहं प्रति ॥१०१॥ ब्राह्मण्यस्तास्तदा
भूत्वा बलखानिगृहं ययुः ॥ ससुतां तां प्रशस्याशु पप्रच्छुर्विनयान्विताः ॥ १०२ ॥ तव पुत्रौ महावीरौ दिष्ट्या शत्रुक्षयंकरौ ॥ तयोर्मृत्युः कथं
भूयाज्जीवतां शरदां शतम् ॥ १०३ ॥ तदा ब्राह्मी वचः प्राह पावकीयः शरः शुभः ॥ सुखखानेर्जीवकरो बलखानेः पदाह्वकः ॥ १०४ ॥ इति
ज्ञात्वा तु ता दूत्यः प्रययुर्देहलीं प्रति ॥ कथयित्वा नृपस्याग्रे धनं प्राप्यं गृहं ययुः ॥१०५॥ महीराजस्तु तच्छ्रुत्वा महादेवमुमापतिम् ॥ पार्थिवैः
पूजनं चक्रे सहस्रदिवसान्मुदा ॥१०६॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये चतुर्विंशोऽ
ध्यायः ॥ २४ ॥छ॥ सूत उवाच ॥ षड्विंशाब्दे च कृष्णांशे यथा जातं तथा शृणु ॥ मुने बिंदुसरो नाम दक्षिणस्यां दिशि स्थितम् ॥१॥ तस्य
तीरेऽवसद्ग्रामो योजनायामसंयुतः ॥ नाम्ना बिंदुगढो दुर्गो वर्णधर्मप्रवर्तकः ॥ २ ॥ तस्मिन्ग्रामेऽवसद्भूपो विष्वक्सेनान्वयोद्भवः ॥ शारदानन्दनो
नाम ब्रह्मध्यानपरायणः॥३॥ब्रह्मचर्यप्रभावेण तद्वीर्य्यं शिरसि स्थितम् ॥ अतस्स कामपालाख्यः प्रथितोऽभून्महीतले॥४॥ यज्ञैः संपूजयामास सुर
ज्येष्ठं प्रजापतिम् ॥ यज्ञांशभुक्तमात्रेण राज्ञी गर्भमुपादधौ॥५॥ दशमासान्तरे जाता कन्या सर्वगुणालया ॥ पद्मिनी नाम विख्याता सर्वशोभासम
न्विता ॥ ६ ॥ द्वादशाब्दवयःप्राप्तौ बभूव वरवर्णिनी ॥ पद्माकरो भूपसुतो महीराजपदानुगः ॥७॥ पितुराज्ञानुसारेण भूपानाहूय सत्वरम् ॥ स्वयं
वरं भगिन्याश्च कारयामास वै मुदा ॥ ८ ॥ नानादेश्या ययुर्भूपा मुख्यशूरसमन्विताः ॥ सहाह्लादैश्चतुर्वीरैर्लक्षणः पितुराज्ञया ॥ ९ ॥ ययौ
बिंदुगढं ग्रामं स्थितो यत्र महोत्सवः ॥ महीराजस्तु बलवान्दृष्ट्वा लक्षणमागतम् ॥ १० ॥ स्वसेनां स्थापयामास रक्षार्थं सर्वभूभुजाम् ॥ एतस्मि

न्नंतरे देवी सखीभिः सह पद्मिनी ॥ ११ ॥ सर्वभूपान्विलोक्याशु लक्षणांतमुपाययौ ॥ श्यामांगं च युवानं च सर्वलक्षण
लक्षितम् ॥ १२ ॥ चत्वारिंशत्तथा पंचाशन्मानाब्दवयोवृतम् ॥ व्यूढोरस्कं दृढस्कधं निर्जरं रोगवर्जितम् ॥ १३ ॥ दृष्ट्वा तमात्मसदृशमाह्ला
दाद्यैश्च रक्षितम् ॥ जयमालां ददौ तस्मै पद्मिनी लक्षणाय च ॥ १४ ॥ तदा स लक्षणो वीरो गृहीत्वा पाणिमुत्तमम् ॥ स्वरथं च समारुह्य राज्ञां
मध्ये ययौ मुदा ॥ १५ ॥ पृथ्वीराजस्तथा सर्वे भूमिपा बलसंयुताः ॥ रुरुधुः सर्वतो वीरं लक्षणं बलवत्तरम् ॥ १६ ॥ तालनः सिंहिनीसंस्थो
गृहीत्वा परिघं मुदा ॥ सैन्यानि योधयामास भीमसेनांशसंभवः ॥ १७ ॥ पंचशब्दगजारूढश्चाह्लादस्तोमरायुधः ॥ रिपून्विदारयामास बलभद्रां
शसंभवः ॥ १८ ॥ कृष्णांशो बिन्दुलारूढो गृहीत्वा खड्गमुत्तमम् ॥ भूपतीन्बहुधा छित्त्वा महावधमकारयत् ॥ १९ ॥ देवो मनोरथारूढो भैरवं
भल्लमादधौ ॥ हत्वा च बहुधा सैन्यं ननर्द च पुनःपुनः ॥ २० ॥ लक्षणो धनुरादाय वैष्णवास्त्राणि वै पुनः ॥ संधाय च जघानाशु महीराजस्य
सैन्यपान् ॥ २१ ॥ याममात्रमभूद्युद्धं तेषां तैश्च समन्वितम् ॥ त्यक्त्वा युद्धं महीराजः सर्वभूपसमन्वितः ॥ २२ ॥ ययौ स देहलीग्रामे शारदानं
दनस्तदा ॥ संस्थाप्य मण्डपशुभं कृत्वा वैवाहिकीः क्रियाः ॥ ददौ कन्यां विधानेन धनधान्यादिसंवृताम् ॥ २३ ॥ एतस्मिन्नन्तरे प्राप्तो महीप
तिरुवाच तम् ॥ पद्माकरं भूपसुतं लक्षसैन्यसमन्वितम् ॥ २४ ॥ अहो मित्र महावीर कीदृशी ते मतिः स्थिता ॥ विष्वक्सेनान्वये त्वं वै संजातः
क्षत्रियोत्तमः ॥ २५ ॥ लक्षणो धर्मरहितो वर्णसंकरसंयुतः ॥ आह्लादाद्याश्च ते शूरा आभीरमातृसंभवाः ॥ तैर्युतश्च निवासो वै संत्याज्यो धर्मको
विदैः ॥ २६ ॥ इति पद्माकरः श्रुत्वा सर्वमायाविशारदः ॥ स कृत्वा शाम्बरीं मायां बद्ध्वा तानेव दुर्जयान् ॥ स्वगेहे स्थापयामास कारागारे
शिलामये ॥ २७ ॥ देव्याश्च वरदानेन देवसिंहस्तदा निशि ॥ त्यक्त्वा मायां मोहमयीं कान्यकुब्जमुपाययौ ॥ २८ ॥ इंदुलाग्रे च तत्सर्वे
गदित्वा तेन संयुतः ॥ प्राप्तो बिंदुगढं शीघ्रं दिव्यमायाविशारदः ॥ २९ ॥ पद्माकरस्तु तच्छ्रुत्वा कृत्वा मायां च शाम्बरीम् ॥ मोहनायोद्यतस्तत्र
यथा मेघो रविं दिवि ॥ ३० ॥ इंदुलश्च तदा चापे संधाय शरमुत्तमम् ॥ कामास्त्रेण तु तन्माया भस्मीभूताभवत्क्षणात् ॥ ३१ ॥ तदा ते
बोधिताः सर्वे कामास्त्रेण महाबलाः ॥ भित्त्वा लोहमयं जालं कपाटं च तथा दृढम् ॥ ३२ ॥ बहिर्भूताः समाजग्मुः शत्रुसैन्यान्यनाशयन् ॥
क्षत्रियाः पंचसाहस्रा मृता यमपुरं ययुः ॥ ३३ ॥ शारदानंदनो भूपस्तत्रागत्य विनम्य तान् ॥ स्वसुतां च ददौ तस्मै लक्षणाय महात्मने ॥३४॥
नानाविधानि भोज्यानि प्रशस्याभरणानि च ॥ सर्वेभ्यश्च ददौ राजा सहस्रेभ्यस्तदा मुदा ॥ ३५ ॥ कुमारिकां स्वकीयां च बहुरोदनतत्पराम्॥

स मत्वा कामपालो वै स्वगेहात्तं न्यवासयत् ॥ आगतो लक्षणो गेहं माघकृष्णाष्टमीदिने ॥ ३६ ॥ जयचंद्रस्तु तं दृष्ट्वा लक्षणं प्रेमविह्वलः ॥
शतग्रामान्ददौ तेभ्यस्तालनादिभ्य एव च ॥३७॥ दत्त्वा ततोऽन्यदानानि गोवस्त्राभरणानि च ॥ प्रददौ ब्राह्मणेभ्यश्च स चकार महोत्सवम् ॥३८॥
॥ ॥ सूत उवाच ॥ ॥ महीराजो वरं प्राप्तः शंकरात्पार्थिवार्चनात् ॥ संयोज्य फाल्गुने मासि सेनां शत्रुभयंकराम् ॥ ३९ ॥ सप्तलक्षैश्च सहितः
शिरीषाख्यपुरं ययौ ॥ नृपाज्ञया च चांमुडो रुरोध नगरं पुनः ॥ ४० ॥ सुखखानिस्तदा क्रुद्धो लक्षसैन्यसमन्वितः ॥ नगराद्बहिरागत्य महाव
धमकारयत् ॥ ४१ ॥ पावकास्त्रेण बलवान्हत्वा दशसहस्रकम् ॥ महीराजमुपागम्य वचनं प्राह निर्भयः ॥ ४२ ॥ अद्य त्वां च हनिष्यामि त्वं
वा हन्ता रणे मम ॥ स्वविद्यां कुरु भूप त्वं नो चेद्यास्यसि वैशसम् ॥ ४३ ॥ इति श्रुत्वा महीराजो रौद्रास्त्रं चाप आदधे ॥ तदस्त्राच्च महावह्निः
प्रादुर्भूतो भयंकरः ॥ ४४ ॥ सुखखानिस्तदाग्नेयं संदधौ तस्य शांतये ॥ रौद्राग्निना च सशरः सुखखानिर्लयं गतः ॥ ४५ ॥ तदस्त्रं शिवतूणीरे
गतं कार्यं विधाय तत् ॥ बलखानिस्तु तच्छ्रुत्वा भयभीतः समागतः ॥ ४६ ॥ भ्रातुर्वैरमुपादाय जघान च रिपोर्बलम् ॥ ध्यात्वा च शारदां देवीं
भूमिराजमुपागमत् ॥ ४७ ॥ भूमिराजस्तु तं दृष्ट्वा तद्बलाधिक्यमोहितः ॥ उवाच वचनं प्रेम्णा बलखाने शृणुष्व भोः ॥ ४८ ॥ क्रोशमात्रान्तरे
गर्ता द्वादशैव मया कृताः ॥ रक्षिता द्वादशशतैः शूरैर्युद्धविशारदैः ॥ ४९ ॥ शूराञ्जित्वा समुल्लंघ्य गर्तान्द्वादशसम्मितान् ॥ ममार्द्धं सकलं राष्ट्रं
गृहाण बलिसत्तम ॥ ५० ॥ इति श्रुत्वा प्रियं वाक्यं तद्राज्ञा सत्यभाषितम् ॥ कपोतं हयमारुह्य खड्गहस्तो वनं ययौ ॥ ५१ ॥ दृष्ट्वा गर्तान्महा
वीरो हत्वा शूराञ्छतञ्छतम् ॥ ययौ स द्वादशान्गर्त्तान्बाहुशाली जितेंद्रियः ॥ ५२ ॥ चामुंडस्तु तदागत्य शूरायुतसमन्वितः ॥ रुरोध सर्वतो
वीरं छद्मकारी द्विजाधमः ॥ ५३ ॥ बलखानिश्च महतीं सेनां तस्य जघान ह ॥ चामुंडं तमुपागम्य ननर्द च पुनःपुनः ॥ ५४ ॥ त्रयोदशं
गुप्तगर्तं तृणैराच्छादितं मृदा ॥ विषधौतैर्महाभल्लैस्संरुद्धं विवरप्रभम् ॥ ५५ ॥ पतितः सकपोतश्च स वीरो दैवमोहितः ॥ अंधकारे महाघोरं
गंभीरं क्रोशमात्रकम् ॥ ५६ ॥ विदीर्णस्तत्र चरणस्सपद्मो वत्सजस्य वै ॥ महाकष्टेन तद्वाजी गर्तादागत्य वै बहिः ॥ स्वपदैस्ताडयामास
महीराजस्य तद्बलम् ॥ ५७ ॥ चामुंडस्तु तदागत्य बलखानेश्च वै शिरः ॥ छित्त्वा जघान तत्सैन्यं हाहाभूतं विनेश्वरम् ॥ ५८ ॥ गजमुक्ता
च तच्छ्रुत्वा चितामारोप्य वै पतिम् ॥ दाहयामास चांगानि सा पत्या सह वै सती ॥ ५९ ॥ तदा ब्रह्मा स्ववध्वा च सार्द्धमागत्य तत्र वै ॥

---

१ बहिरिति शेषः ।

सुखखानिं च संहूय ददाह तत्कलेवरम्[1] ॥ ६० ॥ शून्यभूतं च नगरं भस्म कृत्वा स वै नृपः ॥ जगाम देहलीं शीघ्रं महोत्साहसमन्वितः ॥ ६१ ॥
इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडापरपर्याये कलियुगीयेतिहाससमुच्चये विक्रमाख्यानकाले पंचविंशोऽध्यायः ॥ २५ ॥ छ ॥
॥ ॥ सूत उवाच ॥ ॥ श्रावणे मासि संप्राप्ते देहलीं च महीपतिः ॥ नागोत्सवाय प्रययौ सदैव कलहप्रियः ॥ १ ॥ दृष्ट्वा नागोत्सवं तत्र गीतनृत्यसमन्वितम् ॥ महीराजं नमस्कृत्य वचनं प्राह नम्रधीः ॥ २ ॥ राजन्महावतीग्रामे कीर्तिसागरमध्यगे ॥ वामनोत्सवमत्यं तं यवव्रीहिसमन्वितः ॥ पश्य त्वं तत्र गत्वा च ममैव वचनं कुरु ॥ ३ ॥ इति श्रुत्वा महीराजो धुंधुकारेण संयुतः ॥ सप्तलक्षबलैर्युक्तश्चामुण्डेन समन्वितः ॥ प्राप्तः शिरीषविपिने तत्र वासमकारयत् ॥ ४ ॥ महीपतिस्तु नृपतिं नत्वा वै चन्द्रवंशिनम् ॥ उवाच वचनं दुःखी धूर्तो मायाविशारदः ॥ ५ ॥ राजन्प्राप्तो महीराजो युद्धार्थी त्वामुपस्थितः ॥ चन्द्रावलीं च तनयां ब्रह्मानंदं तवात्मजम् ॥ दिव्यलिंगं स संपूज्य बलात्काराद्ग्रहीष्यति ॥ ६ ॥ तस्मात्त्वं स्वबलैः सार्द्धं मया सह महामते ॥ छद्मना तं पराजित्य नगरेऽस्मिन्सुखी भव ॥ ७ ॥ इति श्रुत्वा देववशो राजा परिमलो बली ॥ चतुर्लक्षबलैस्सार्द्धं निशीथे च समागतः ॥ ८ ॥ शयितान्क्षत्रियाञ्छूरान्हत्वा पंचसहस्रकान् ॥ शतघ्नीं रोषणीं चक्रे बहुशूरविनाशिनीम् ॥ ९ ॥ तदोत्थाय महीराजः कटिमाबध्य संभ्रमात् ॥ वैरिणं परमं मत्वा महद्युद्धमचीकरत् ॥ १० ॥ युद्ध्यंत्योः सेनयोस्तत्र मलना पुत्रगृद्धिनी ॥ शारदामादराद्गत्वा पूजयामास भक्तितः ॥ ११ ॥ देविदेवि महादेवि सर्वदुःखविनाशिनि ॥ हर मे सकलां बाधां कृष्णांशं बोधयाशु च ॥ १२ ॥ जप्त्वायुतमिमं मंत्रं हुत्वा तर्पणमार्जने ॥ कृत्वा सुष्वाप तद्वेश्मंस्तदा[2] तुष्टा स्वयं शिवा ॥ १३ ॥ मलने महती बाधा क्षयं यास्यति मा शुचः ॥ १४ ॥ इत्युक्त्वा शारदा देवी कृष्णांशं प्रति चागमत् ॥ पुत्र ते जननी भूमिर्महीराजेन पीडिता॥ क्षयं यास्यति शीघ्रं च तस्मात्त्वं तां समुद्धर ॥ १५ ॥ इति श्रुत्वा वचो देव्यास्स वीरो विस्मयान्वितः ॥ देवकीं प्रति संप्राप्तः कथयामास कारणम् ॥ १६ ॥ सा तु श्रुत्वा वचो घोरं स्वर्णवत्या समन्विता ॥ रुरोद भृशमुद्विग्ना विलप्य बहुधा सती ॥ १७ ॥ कृष्णांशस्तु तदा दुःखी देवसिंहमुवाच ह ॥ किं कर्तव्यं मया वीर देह्याज्ञां दारुणे भये ॥ १८ ॥ तच्छ्रुत्वा तेन सहितो लक्षणेन समन्वितः ॥ ययौ दिग्विजयार्थेन व्याजेन च महावतीम् ॥ ॥ १९ ॥ तालनो भीमसेनांशः सेनापतिरुदारधीः ॥ सप्तलक्षबलैस्सार्द्धं विनाह्लादेन संययौ ॥ २० ॥ कल्पक्षेत्रमुपागम्य योगिनस्ते तदाभवन् ॥

---

[1] स्वं कलेवरमिति पाठस्तूत्तरग्रंथविरोधादुपेक्ष्य एव । [2] वेश्मनीत्यर्थः । 'ङाबुत्तरपदे'—इति लोपाभावः 'नश्छवि'—इति रुत्वम् ।

सेनां निवेशयामास विपिने तत्र दारुणे ॥ २१ ॥ कृष्णांशस्तालनो देवो लक्षणो बलवत्तरः ॥ गृहीत्वा लास्यवस्तूनि युद्धभूमिमुपागमन् ॥२२॥
सप्ताहं च तयोर्युद्धं जातं मृत्युविवर्द्धनम् ॥ सप्तमेऽहनि ते वीरास्संप्राप्ता रणमूर्द्धनि ॥२३॥ तस्मिन्दिने महाभाग महद्युद्धमवर्तत ॥ २४ ॥ दृष्ट्वा
पराजितं सैन्यं राजा परिमलो बली ॥ रथस्थश्चापमादाय महीराजमुपाययौ ॥ २५ ॥ यादवश्च गजारूढस्तदा चंद्रावलीपतिः ॥ धुन्धुकारं समा
हूय धनुर्युद्धमचीकरत् ॥ २६ ॥ हरिनागरमारुह्य ब्रह्मानंदो महाबलः ॥ तारकं शत्रुमाहूय धनुर्युद्धं चकार ह ॥ २७ ॥ मर्दनं राजपुत्रं च रणजिद्ग
जसंस्थितः ॥ स्वशरैस्ताडयामास तत्सुतं च जघान ह ॥ २८ ॥ रूपणो वै सरदनं हयारूढो जगाम ह ॥ आभीरीतनयो जातो मदनो नाम वै
बली ॥ नृहरं राजपुत्रं च शंखांशश्च जगाम ह ॥ २९ ॥ तेषु संग्राममेतेषु[1] चामुण्डोऽयुतसैन्यपः ॥ महीपतेश्च वचनं मत्वा नगरमाययौ ॥ ३० ॥
ददर्श नगरीं रम्यां चतुर्वर्णसमन्विताम् ॥ धनधान्ययुतां वीरो देवीभक्तिपरायणः ॥ ३१ ॥ महीपतिस्तु वै धूर्तो दुर्गद्वारि समागतः ॥ चामुंडेन
युतः पापी राजगेहमुपाययौ ॥३२॥ मलना भ्रातरं दृष्ट्वा वचनं प्राह दुःखिता ॥ भाद्रकृष्णाष्टमी चाद्य यवव्रीहि[2] गृहे स्थितम् ॥३३॥ न प्राप्तं जल
संस्थाने सुपुण्ये कीर्तिसागरे ॥ महीराजो महापापी वामनोत्सवमागतः ॥३४॥ विनाह्लादं च कृष्णांशं महद्दुःखमुपागतम् ॥ इत्युक्तस्स विहस्याह
ब्राह्मणोऽयं महाबली ॥ कान्यकुब्जात्समायातः कृष्णांशेन प्रयोजितः ॥३५॥ देवीदत्तश्च नाम्नाऽयं स ते कार्यं करिष्यति ॥ श्रुत्वा चंद्रावली देवी
सर्वभूषणसंयुता ॥३६॥ कामाग्निपीडितं विप्रं चामुंडं च ददर्श ह॥मातरं प्रति चागम्य वचनं प्राह निर्भरम्॥३७॥धूर्तोऽयं ब्राह्मणो मातर्निश्चयं मां
हरिष्यति ॥ कोऽयं वीरो न जानामि कथं यामि पतिव्रता ॥३८॥ इति श्रुत्वा वचस्तस्या लज्जितस्स महीपतिः॥चामुंडेन युतः प्राप्तो यत्रा भूत्स
महारणः॥३९॥एतस्मिन्नंतरे ते वै ब्रह्माद्यास्तैः पराजिताः॥त्यक्त्वा युद्धं गृहं प्राप्तास्त्रिलक्षबलसंयुताः ॥४०॥ कपाटं सुदृढं कृत्वा महाचिंतामुपाययुः ॥
महीराजस्तु बलवान्महीपत्यनुमोदितः॥४१॥प्रमदावनमागत्य षष्टिलक्षबलान्वितः॥जुगोप तत्र बलवान्माननोत्सवहेतवे॥४२॥तालनाद्याश्च,चत्वारः
शिरीषाख्यपुरं ययुः॥ स्थलीभूतं च तं ग्रामं दृष्ट्वा ते विस्मयान्विताः॥ प्रययुस्ते सुखभ्रष्टा ददृशुर्हिमदं मुनिम्॥४३॥ प्रणम्योचुः शुचाविष्टा बलखा
निर्मुने बली ॥ क्व गतः समरश्लाघी स च कुनागरैर्युतः ॥४४॥ श्रुत्वाह हिमदो योगी महीराजेन नाशितः ॥ छद्मना बलखानिश्च तस्येयं सुन्दरी
चिता ॥४५॥ इति श्रुत्वा वचो घोरं कृष्णांशः शोकतत्परः ॥४६॥ विललाप भृशं तत्र हा बन्धो धर्मजांशक ॥ त्वद्दृते भूतले वासो ममातीव भयं

---

१ आगतेषु । २ यवाश्च व्रीहयश्चेति समाहारद्वन्द्वः ।

करः ॥ ४७ ॥ दर्शनं देहि मे क्षिप्रं नो चेत्प्राणांस्त्यजाम्यहम् ॥ ४८ ॥ इत्युक्तः स तु तद्भ्राता बलखानिः पिशाचगः ॥ सपत्नीकस्समायातो
रोदनं कृतवान्बहु ॥ कथित्वा[१] सर्ववृत्तान्तं यथाजातं स्ववैशसम् ॥ ४९ ॥ दिव्यं विमानमारुह्य गतो नाकं मनोरमम् ॥ युधिष्ठिरे तस्य कला
बलखानेर्लयं गता ॥ ५० ॥ तदा दुःखी स कृष्णांशः कृत्वा भ्रातुस्तिलांजलिम् ॥ महावतीं समागत्य राजगेहमुपाययौ ॥ ५१ ॥ वेणुशब्देन
कृष्णांशो ननर्त जनमोहनः ॥ वीणाप्रवाद्यं च जगौ तालनो योगिरूपधृक् ॥ ५२ ॥ मृदंगध्वनिना देवो लक्षणः कांस्यवाद्यकः ॥ सुस्वरं च
जगौ तत्र श्रुत्वा राजा विमोहितः ॥ ५३ ॥ तदा तु मलना राज्ञी दृष्ट्वा तद्ग्रामनोत्सवम् ॥ रुदित्वा वचनं प्राह क्व गतो मे प्रियंकरः ॥ ५४ ॥
कृष्णांशो बन्धुसहितस्त्यक्त्वा मां मन्दभागिनीम् ॥ त्वया विरहितो देशो महीराजेन लुंठितः ॥ ५५ ॥ इत्युक्तां मलनां दृष्ट्वा कृष्णांशः स्नेह
कातरः ॥ वचनं प्राह नम्रात्मा देवि त्वं वचनं कुरु ॥ ५६ ॥ योगिनश्च वयं राज्ञि सर्वयुद्धविशारदाः ॥ तवेदं सकलं कार्यं कृत्वा यामो हि
नैमिषम् ॥ ५७ ॥ ये यवव्रीहयश्चैव तव सद्मनि संस्थिताः ॥ गृहीत्वा योषितस्सर्वा गच्छन्तु सागरान्तिकम् ॥ वयं तु योगसैन्येन तव रक्षां
च कुर्महे ॥ ५८ ॥ इति श्रुत्वा वचस्तस्य तत्सुता च पतिव्रता ॥ मातरं वचनं प्राह कृष्णांशोऽयं न नर्तकः ॥ ५९ ॥ पुण्डरीकनिभे नेत्रे
श्यामांगं तस्य सुन्दरम् ॥ कृष्णांशेन विना मातः को रक्षार्थं क्षमो भुवि ॥ दुर्जयश्च महीराजः कृष्णांशेन विनिर्जितः ॥ ६० ॥ इति तद्वचनं
श्रुत्वा मलना प्रेमविह्वला ॥ यवव्रीहयो निष्कास्य योषितां स्थापिताः करे ॥ ६१ ॥ जगुस्ता योषितस्सर्वाः कृष्णांशचरितं शुभम् ॥
लक्षणः शीघ्रमागम्य योगिवेषान्स्वसैनिकान् ॥ सज्जीकृत्य स्थितस्तत्र तालनाद्यैः सुरक्षितः ॥ ६२ ॥ कीर्तिसागरमागम्य ते वीरा बल
दर्पिताः ॥ रुरुधुः सर्वतो नारीर्दोलायुतमितस्थिताः ॥ ६३ ॥ महीपतिस्तु कुलहा ज्ञात्वा कृष्णांशमागतम् ॥ चंद्रवंशिनमागम्य सपुत्रश्च रुरोद
ह ॥ ६४ ॥ योगिभिस्तैर्महाराज लुंठिताः सर्वयोषितः ॥ मलना संहृता तत्र तथा चंद्रावली सुता ॥ ६५ ॥ महीराजस्य ते सैन्या[२] योगिवेषा
स्समागताः ॥ तारकाय सुतां प्रादान्महीराजाय मत्स्वसाम्[३] ॥ ६६ ॥ इति श्रुत्वा वचो घोरं ब्रह्मानन्दो महाबलः ॥ लक्षसैन्यान्वितस्तत्र ययौ
रोषसमन्वितः ॥ ६७ ॥ महीराजस्तु कलही सैन्यायुतमहात्मजः ॥ रक्षितः कामसेनेन तथा रणजिता ययौ ॥ ६८ ॥ तयोश्चासीन्महद्युद्धं
सेनयोरुभयोर्भुवि ॥ तालनो योगिवेषश्च ब्रह्मानंदमुपाययौ ॥ ६९ ॥ लक्षणश्चाभयं शूरं देवसिंहो महीपतिम् ॥ जित्वा बद्ध्वा च मुदितौ काम

---

[१] णिलोप आर्षः । [२] पुंस्त्वमार्षम् । [३] स्वसारमित्यर्थः ।

सेनस्समागतः ॥ ७० ॥ लक्षणः कामसेनं च देवो रणजितं तदा ॥ बद्ध्वा तत्र स्थितौ वीरौ शत्रुसैन्यक्षयंकरौ ॥ ७१ ॥ एतस्मिन्नंतरे ब्रह्मा बद्ध्वा
वै तालनं बली ॥ लक्षणान्तमुपागम्य धनुर्युद्धमचीकरत् ॥ ७२ ॥ लक्षणं छिन्नधन्वानं पुनर्बद्ध्वा महाबलः ॥ देवसिंहमुपागम्य मूर्छितं तं चकार
ह ॥ ७३ ॥ हाहाभूते योगिसैन्ये प्रद्रुते सर्वतो दिशम् ॥ कृष्णांशो योषितस्सर्वा वचनं प्राह नम्रधीः ॥ ७४ ॥ ब्रह्मानन्दोऽयमायातो मम सैन्य
क्षयंकरः ॥ तस्माद्यूयं मया सार्द्धं गच्छताशु च तं प्रति ॥ ७५ ॥ इत्युक्त्वा तास्समादाय ब्रह्मानन्दमुपाययौ ॥ तयोश्चासीन्महद्युद्धं नरनारायणां
शयोः ॥ ७६ ॥ कृष्णांशस्तत्र बलवान्नभोमार्गेण तं प्रति ॥ रथस्थं च समागम्य मोहयामास सोऽसिना ॥ ७७ ॥ तदा तु मूर्छिते तस्मिन्मोच
यित्वा च ता मुदा ॥ योगी सैन्यान्वितो युद्धात्पलायनपरोऽभवत् ॥ ७८ ॥ पराजिते योगिसैन्ये ब्रह्मानंदो महाबलः ॥ योषितस्ताः समादाय
स्वगेहाय दधौ मनः ॥ ७९ ॥ महीराजस्तु संप्राप्तो महीपत्यनुमोदितः ॥ रुरोध सर्वतो नारीः शिवदत्तवरो बली ॥ ८० ॥ नृहरश्चाभयं शूरं
मर्दनश्चैव रूपणम् ॥ मदनं वै सरदनो ब्रह्मानंदं च तारकः ॥ ८१ ॥ चामुण्डः कामसेनं च धनुर्युद्धमचीकरत् ॥ तदाभयो महावीरो धुन्वंतं नृहरं
रिपुम् ॥ ८२ ॥ छित्त्वा धनुस्तमागत्य खड्गयुद्धमचीकरत् ॥ नृहरः खड्गरहितोऽभवद्युद्धपराङ्मुखः ॥ तमाह वचनं क्रुद्धोऽभयो युद्धार्थमुद्यतः ॥
॥ ८३ ॥ भवान्वै मातृष्वस्रीयो महीराजस्य चात्मजः ॥ ८४ ॥ क्षत्रियाणां परं धर्मं कथं संहर्तुमिच्छति ॥ इति श्रुत्वा तु नृहरो गृहीत्वा परिघं
रुषा ॥ ८५ ॥ जघान तं च शिरसि स हतः स्वर्गमाययौ ॥ स च वै कृतवर्मांशो विलीनः कृतवर्मणि ॥ ८६ ॥ मदनं गोपजातं च हत्वा सरदनो
बली ॥ जयशब्दं चकारोच्चैर्पुनर्हत्वा रिपोर्बलम् ॥ उत्तरांशश्च स ज्ञेयो मदनश्चोत्तरे लयः ॥ ८७ ॥ रूपणश्च समागत्य मूर्छयित्वा च मर्दनम् ॥
पुनस्सरदनं प्राप्य खड्गयुद्धं चकार ह ॥ ८८ ॥ ब्रह्मानंदश्च बलवान्स बद्ध्वा तारकं रुषा ॥ महीराजान्तमागम्य धनुर्युद्धं चकार ह ॥ ८९ ॥ नृहरं
रणजित्प्राप्य स्वभल्लेन तदा रुषा ॥ जघान समरश्लाघी महीराजसुतं शुभम् ॥ ९० ॥ स वै दुश्शासनांशश्च मृतस्तस्मिन्समागतः ॥ ९१ ॥ निहते
नृहरे बंधौ मर्दनः क्रोधतत्परः ॥ स्वशरैस्ताडयामास सात्यकेरंशमुत्तमम् ॥ ९२ ॥ छित्त्वा तान्रणजिच्छूरस्स वै परिमलोद्भवः ॥ स्वभल्लेन
शिरः कायान्मर्दनस्य स चाहरत् ॥ ९३ ॥ मृतेऽस्मिन्मर्दने वीरे तदा सरदनो बली ॥ ताडयामास तं वीरं स्वभल्लेनैव वक्षसि ॥ ९४ ॥ महत्क
ष्टमुपागम्य रणजिन्मलनोद्भवः ॥ स्वखड्गेन शिरः कायादपाहरत वैरिणः ॥ ९५ ॥ त्रिबंधौ[१] निहते युद्धे तारकः क्रोधमूर्छितः ॥ रथस्थश्च रथस्थं

---

[१] समाहारे पुंस्त्वमार्षम् ।

च ताडयामास वै शरैः ॥ ९६ ॥ छित्त्वा बाणं च रणजित्तथैव च रिपोर्द्धनुः ॥ त्रिशरैस्ताडयामास कर्णांशं तारकं हृदि ॥ ९७ ॥ अमर्षवश
मापन्नो यथा दंडैर्भुजंगमः ॥ ध्यात्वा च शंकरं देवं विषधौतं शरं पुनः ॥ ९८ ॥ संधाय तर्जयित्वा च शत्रुकंठमताडयत् ॥ तेन बाणेन रण
जित्त्यक्त्वा देहं दिवं गतः ॥ ९९ ॥ हते तस्मिन्महावीर्ये ब्रह्मानंदश्च दुःखितः ॥ महीराजभयाद्ब्रह्मा पुरस्कृत्य च योषितः ॥ संध्याकाले तु
संप्राप्ते भाद्रकृष्णाष्टमीदिने ॥ १०० ॥ कपाटं सुदृढं कृत्वा सैन्यैः षष्टिसहस्रकैः ॥ सार्द्धं गेहमुपागम्य शारदां शरणं ययौ ॥ १०१ ॥ महीरा
जस्तु बलवान्पुत्रशोकेन दुःखितः ॥ संकल्पं कृतवान्घोरं शृण्वतां सर्वभूभृताम् ॥ १०२ ॥ शिरीषाख्यपुरं रम्यं यथा शून्यं मया कृतम् ॥ तथा
महावती सर्वा ब्रह्मानंदादिभिस्सह ॥ क्षयं यास्यंति मद्बाणैः सर्वे ते चंद्रवंशिनः ॥ १०३ ॥ इत्युक्त्वा धुंधुकारं वै चाह्वयामास भूपतिः ॥ पंचल
क्षबलैस्सार्द्धं शीघ्रमागम्यतां प्रिय ॥ १०४ ॥ इति श्रुत्वा धुंधुकारो गत्वा शीघ्रं च देहलीम् ॥ उषित्वा सप्त दिवसान्युद्धभूमिमुपागमत् ॥ १०५ ॥
तदाष्टलक्षसहितो महीराजो महाबलः ॥ तारकेण च संयुक्तो युद्धाय समुपाययौ ॥ १०६ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युग
खण्डापरपर्याये कलियुगीयेतिहाससमुच्चयेषड्विंशोऽध्यायः ॥ २६ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ सप्तविंशाब्दके प्राप्ते कृष्णांशे सर्वमंगले ॥
भाद्रकृष्णदशम्यां च मलना शोककातरा ॥ जननायकमाहूय वचनं प्राह दुःखिता ॥ १ ॥ अये कच्छपेदशीय गोतमान्वयसंभव ॥ हरिनागर
मारुह्य कान्यकुब्जं व्रजाधुना ॥ २ ॥ पुत्रमाह्लादमाहूय सानुजं मत्प्रियंकरम् ॥ इति श्रुत्वा तु वचनं हृदि संचिंत्य वै पुनः ॥ ३ ॥ मलनां दुःखि
तां प्राह न त्वायास्यति स प्रभुः ॥ राज्ञः परिमलस्यैव वाक्यं मत्वा सुदुःखदम् ॥ ४ ॥ इति श्रुत्वा तु वचनं रुरोद मलना सती ॥ पुनर्मूर्च्छां
गता भूमौ जीवनं त्यक्तुमुद्यता ॥ ५ ॥ हा रामांश महाबाहो वत्स कृष्णांश सुन्दर ॥ क्व गतौ सह देवक्या त्यक्त्वा मां मंदभागिनीम् ॥६॥ तदा
परिमलापुत्रो दृष्ट्वा राज्ञीं तथा गताम् ॥ बहुधाश्वास्य बलवान्कान्यकुब्जपुरं ययौ ॥ ७ ॥ ॥ ऋषय ऊचुः ॥ ॥ त्वया परिमलापुत्रस्संप्रोक्तो
जननायकः ॥ रोमहर्षण नो ब्रूहि सोऽयं कस्तेन किं कृतम् ॥ ८ ॥ ॥ सूत उवाच ॥ ॥ इंद्रप्रस्थपुरेवात्सीत्प्रद्योतः कथितो मया ॥ पिता
परिमलस्यैवामात्योऽनंगमहीपतेः ॥ ९ ॥ तस्य कन्या समाजाता नाम्ना परिमला मुने ॥ दुःशलांशसमुद्भूता रंभेव सुकुमारिका ॥ १० ॥ तद्वि
वाहार्थमुद्योगः कृतः पित्रा स्वयंवरः ॥ पुत्रः कच्छपभूपस्य स नाम्ना कमलापतिः ॥ तामुद्वाह्य विधानेन स्वगेहाय ययौ मुदा ॥ ११ ॥ तयोस्स
मागमो जातः पुत्रोऽयं जननायकः ॥ शस्त्रविद्यापरः शूरः खड्गयुद्धविशारदः ॥१२॥ जित्वा भूपान्बलाद्वीरः सिंधुतीरनिवासिनः ॥ षडंशकरमा

दाय पितृराज्यमुपस्थितः ॥१३॥ एकदा तु महीराजः स्वसैन्यपरिवारितः ॥ कच्छदेशमुपागम्य करार्थं समुपस्थितः ॥१४॥ तयोश्चासीन्महद्युद्धं
जननायकभूपयोः ॥ मासान्ते सूर्यवंशीयो महीराजेन निर्जितः ॥ १५ ॥ त्यक्त्वा राष्ट्रं च सकुलः संप्राप्तश्च महावतीम् ॥ परिमलस्तु तदा राजा
तस्मै ग्रामं शुभं ददौ ॥ १६ ॥ निवासं कृतवांस्तत्र स्वनाम्ना प्रथितं भुवि ॥ स वै कच्छपदेशीयो ययौ परिमलाज्ञया ॥ १७ ॥ तदासौ च महीराजो
महीपत्यनुमोदितः ॥ चामुंडं शीघ्रमाहूय लक्षसैन्यसमन्वितम् ॥ आदेशं कृतवान्राजा तस्य बंधनहेतवे ॥ १८ ॥ स च नेत्रवतीकूले संप्राप्ते लक्ष
सैन्यपः ॥ रुरोध सूर्यवंशीयं जननायकमुत्तमम् ॥१९॥ स तदा खड्गमादाय बाहुशाली यतेंद्रियः ॥ तत्र शूरशतं हत्वा नभोमार्गमुपाययौ ॥२०॥
सेनापतेश्च मुकुटं गजस्थस्य गृहीतवान् ॥ लज्जितः स तु चामुंडो वचनं प्राह नम्रधीः ॥२१॥ भवान्वृत्तिकरो मह्यं क्षत्रियो ब्राह्मणस्य वै ॥ देहि
मे मुकुटं वीर चिरं जीव सुखी भव॥२२॥ इति श्रुत्वा स विनयं दत्त्वा तस्मै शुभं वसु ॥ कुठारनगरे प्राप्तो वामनेन सुरक्षितः ॥२३॥ दृष्ट्वा तत्र
वटच्छायां श्रमेणातीव कर्षितः ॥ सुष्वाप निर्भयो वीरस्तत्र स्थाने सुखप्रदे ॥ २४ ॥ तदा तु वामनो ज्ञात्वा स्वदूतैस्तत्र कारणम् ॥ वस्त्राण्या
च्छाद्य चागम्य चाहरद्धरिनागरम् ॥ २५ ॥ हृते तस्मिंश्च दिव्याश्वे प्रबुद्धो जननायकः ॥ चिंतामवाप्य महतीं रोदनं कृतवान्बहु ॥ २६ ॥
अश्वांघ्रिचिह्नमालोक्य वामनं प्राप्य निर्भयः ॥ वचनं प्राह नम्रात्मा नृपं गौरान्वयोद्भवम् ॥ २७ ॥ क्षत्रियाणां हि संहास्यो भयदो भुवि सर्वदा ॥
स भवान्राजनीतिज्ञो देहि मेऽश्वं सुखी भव ॥२८॥ नो चेत्त्वां वै सनगरं कृष्णांशः क्षपयिष्यति ॥ इति श्रुत्वा तु वचनं वामनो गौरवंशजः॥२९॥
भयभीतो विनिश्चित्य प्रददौ हरिनागरम् ॥ ३० ॥ प्रतोदं स्वर्णरचितं नानारत्नसमन्वितम् ॥ लोभाच्च न ददौ राजा मृषा शपथकारकः ॥३१ ॥
तदा परिमलापुत्रः कुंठितः प्राह भूपतिम् ॥ प्रतोदलोभात्ते राजन्क्षयं दुर्गो गमिष्यति ॥ ३२ ॥ इत्युक्त्वा प्रययौ वीरः कान्यकुब्जं महोत्तमम् ॥
लक्षणो हस्तिनीसंस्थो वचनं प्राह गर्वितः ॥ कस्त्वं प्राप्तो हयारूढो निर्भयः क्षत्रियोत्तमः ॥ ३३ ॥ स होवाच महाराज प्रेषितश्चंद्रवंशिना ॥
तवान्तिकं समायातः शरणागतवत्सल ॥ ३४ ॥ महीराजश्च बलवान्सकुलं चंद्रवंशिनम् ॥ हनिष्यति च रौद्रास्त्रैर्महीपत्यनुमोदितः ॥ ३५ ॥
अतस्त्वं स्वबलैस्सार्द्धं सहाह्लादादिभिर्युतः ॥ गच्छगच्छ महाराज मृतानुज्जीवयाधुना ॥ ३६ ॥ इत्युक्तो लक्षणस्तेन जयचंद्रं प्रणम्य सः ॥ सर्वं
वै कथयामास महीराजो यथागतः ॥ ३७ ॥ जयचंद्रस्तु तच्छ्रुत्वा चाहूय जननायकम् ॥ वचनं प्राह क्रुद्धात्मा शृणु गौतमवंशज ॥ ३८ ॥ राजा
परिमलः क्रूरस्त्यक्त्वा मां निजभूपतिम् ॥ प्रीतिं च कृतवांस्तेन मच्छत्रोर्देहलीपतेः ॥ ३९ ॥ प्रियं संबंधिनं मत्वा संत्यक्तास्तेन रक्षकाः ॥ यथा

कृतं फलं तेन भोक्तव्यं च तथा भुवि ॥ ४० ॥ इति श्रुत्वा तु वचनं कृष्णांशः प्राह नम्रधीः ॥ राजन्क्रुद्धः परिमलो महीपत्यनुवाचकः ॥ अतो
वै त्वां समुत्सृज्य भूमिराजवशं गतः ॥४१॥ भवान्वै सर्वधर्मज्ञस्तत्क्षमस्वापराधकम् ॥ आज्ञां देहि महाराज निवत्स्यामस्तदंतिकम् ॥ ४२ ॥ इति
श्रुत्वा तु वचनं जयचंद्रो महीपतिः ॥ कृष्णांशं प्राह भो वीर देहि मे भुक्तिमूल्यकम् ॥ शीघ्रं व्रज त्वं सकुलो नो चेन्नो गंतुमर्हसि ॥ ४३ ॥ इति
श्रुत्वा विहस्याह कृष्णांशस्सर्वमोहनः ॥ मया दिग्विजयः सर्वः कृतो भीरुभयंकरः ॥ तद्देयं देहि मे राजन्गृहाण भुक्तिमूल्यकम् ॥४४॥ इत्युक्तस्स
तु भूपालः कृष्णांशेन विलज्जितः ॥ सैन्यमाज्ञापयामास सप्तलक्षं महाबलम् ॥ ४५ ॥ तदा वै सकुलो वीरश्चाह्लादो लक्षणान्वितः ॥ नृपस्याग्रे
समास्थाय नमस्कृत्य ययौ मुदा ॥ ४६ ॥ कुठारनगरं प्राप्य नृपदुर्गं रुरोध ह ॥ ज्ञात्वा स वामनो भूपः प्रतोदं च ददौ मुदा ॥ ४७ ॥ सैन्यायुत
युतं भूपं वामनं लक्षणो बली ॥ पश्चात्कृत्य ययौ शीघ्रं यमुनातटमुत्तमम् ॥ ४८ ॥ यमुनाजलमुत्तीर्य कल्पक्षेत्रमवाप्तवान् ॥ गंगासिंहं च नृपतिं
षष्टिसाहस्रसंयुतम् ॥ पुरस्कृत्य ययौ वीरो लक्षणो बलवत्तरः ॥ ४९ ॥ नदीं वेत्रवतीं रम्यां समागम्य बलैस्सह ॥ तत्रोषुः क्षत्रियाः शूरास्सर्वे
शस्त्रास्त्रसंयुताः ॥ ५० ॥ एतस्मिन्नंतरे वीरश्चामुंडो लक्षसैन्यपः ॥ शतघ्नीः स्थापयामास भैरवीः शत्रुनाशिनीः ॥ ५१ ॥ तयोश्चासीन्महद्युद्धं
शतघ्नीरणसंस्थयोः ॥ प्रहरान्ते च तत्सैन्यं दृष्ट्वा शूरः पराजितम् ॥ ५२ ॥ रक्तबीजः समागम्य गजस्थस्त्वरितो बली॥ स्वबाणैस्ताडयामास
सैन्यं तालनपालितम् ॥ ५३ ॥ केचिच्छूरा हता युद्धे केचित्तत्र पराजिताः ॥ दुद्रुवुर्भयभीताश्च चामुंडेन च पीडिताः ॥ ५४ ॥ प्रभग्नं स्वबलं
दृष्ट्वा तालनः परिघायुधः ॥ जघान तेन स गजं चामुंडो भूमिमागतः ५५ ॥ खड्गयुद्धपरो वीरस्तालनं परिघायुधम् ॥ पराजित्य ययौ पश्चाच्छत्रु
सैन्यक्षयंकरः ॥५६॥ लक्षणस्त्वरितो गत्वा स्वभल्लेन च तं रिपुम् ॥ भुजयोस्ताडयामास तदा ते बहुधाऽभवन् ॥ ५७ ॥ सहस्रं रक्तबीजाश्च खड्ग
शक्त्यृष्टिपाणयः ॥ तिष्ठतिष्ठेति भाषन्तः क्षत्रियान्युद्धदुर्मदान् ॥ ५८ ॥ आह्लादाद्याश्च ते शूरा रक्तबीजभयातुराः ॥ त्यक्त्वा युद्धं ययुस्सर्वे
ब्रह्मानंदं महाबलम् ॥ ५९ ॥ ब्रह्मानंदस्तु तान्दृष्ट्वा गत्वा स्वपितरं प्रति ॥ वृत्तांतं कथयामास लक्षणागमनं मुने ॥ ६० ॥ श्रुत्वा परिमलो राजा
प्रेमविह्वलगद्गदः ॥ आह्लादपार्श्वमागम्य रुरोद भृशमातुरः ॥ ६१ ॥ तदा तु देवकी देवी नृपतिं प्रेमतत्परम् ॥ उवाच सुमुखी दीना वयं ते भक्ति
तत्पराः ॥ ६२ ॥ भवता संपरित्यक्ता विचरामोऽन्यभूपतिम् ॥ क्षमस्व मम दौरात्म्यं पूर्वजन्मविपाकजम् ॥ ६३ ॥ इति श्रुत्वा च नृपतिः परमा
नंदनिर्भरः ॥ मंत्रिणश्चाधिकारं च रामांशाय ददौ मुदा ॥ स्वकीयं लक्षसैन्यं च तत्पतिश्चोदयः कृतः ॥ ६४ ॥ ततः पंचदिनान्ते तु महीराज

स्समागतः ॥ रुरोध नगरीं सर्वां चामुंडबलदर्पितः ॥ तयोश्चासीन्महद्युद्धं मासमात्रं भयानकम् ॥६५॥ प्रभाते विमले जाते कृष्णांशो लक्षसैन्यपः ॥ चामुंडान्तमुपागम्य सहस्रं स्वांगसंभवम् ॥ चिच्छेद च शिरस्तेषां चामुंडानां पृथक्पृथक् ॥ ६६ ॥ छिन्ने शिरसि ते सर्वे लक्षवीरा बभूविरे ॥ तदा तद्व्याकुलं सैन्यं चामुण्डैस्तैः प्रपीडितम् ॥६७॥ विस्मितश्चैव कृष्णांशो भयभीतस्तदा मुने ॥ तुष्टाव शारदां देवीं सर्वमंगलकारिणीम् ॥ ६८ ॥ ॥ कृष्णांश उवाच ॥ ॥ नमस्ते शारदे मातर्ब्रह्मलोकनिवासिनि ॥ त्वया ततमिदं विश्वं शब्दमात्रनिरंतरम् ॥६९॥ रक्तबीजविनाशाय चामुंडारूपधारिणि ॥ नमस्ते दिव्यचामुण्डे पाहि मां शरणागतम् ॥ ७० ॥ इति श्रुत्वा स्तवं देवी वरदा सर्वकारिणी ॥ तस्य खड्गमुपागम्य रक्तबीजं ददाह वै ॥ ७१ ॥ भस्मीभूते लक्षरिपौ चामुण्डो भूमिमागतः ॥ बबंध तं स कृष्णांशो ब्रह्मानंदांतिकं ययौ ॥ ७२ ॥ भूमिराजस्तु तच्छ्रुत्वा भयभीतः समागतः ॥ तदा परिमलं भूपं दयालुं प्रेमविह्वलम् ॥ उवाच वचनं राजा क्षमस्व मम दुष्कृतम् ॥ ७३ ॥ महीपतेश्च वचनान्महद्भयमुपागतम् ॥ अद्यप्रभृति भो वीर संत्यक्तः कलहः प्रियः ॥ भवांश्च मम संबन्धी वयं वै तव किंकराः ॥ ७४ ॥ इति श्रुत्वा परिमलो राजानमिदमब्रवीत् ॥ रत्नभानोश्च तनयं लक्षणं नाम विश्रुतम् ॥ शरण्यं शरणं याहि विष्णुभक्तं दयापरम् ॥ ७५ ॥ इति श्रुत्वा भूमिराजो द्विजरूपधरो बली ॥ साष्टांगं दंडवद्भूमौ लक्षणस्य चकार ह ॥ ७६ ॥ तदा तु लक्षणो वीरः कृत्वा स्नेहं नृपोपरि ॥ सप्तलक्षबलैः सार्द्धं कान्यकुब्जमुपाययौ ॥ ७७ ॥ फाल्गुने मासि संप्राप्ते सर्वे स्वंस्वं गृहं ययुः ॥ ७८ ॥ बलखानेर्गयाश्राद्धमचीकरदविप्लुतः ॥ चैत्रमासि सिते पक्षे संप्राप्य निजमंदिरे ॥ ब्राह्मणान्भोजयामास सहस्रं वेदतत्परान् ॥ ७९ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये सप्तविंशोऽध्यायः ॥ २७ ॥

॥ छ ॥

॥ सूत उवाच ॥ ॥ अष्टाविंशाब्दके प्राप्ते कृष्णांशे बलवत्तरे ॥ कार्तिक्यामिंदुवारे च कृत्तिकाव्यतिपातभे ॥ १ ॥ कृष्णांशोऽयुतसेनाढ्यः स्वर्णवत्या समन्वितः ॥ विवाहमुकुटस्यैव संत्यागाय ययौ मुदा ॥ २ ॥ पवित्रमुत्पलारण्यं वाल्मीकिमुनिसेवितम् ॥ गंगाकूले ब्रह्ममयं लोहकीलकमुत्तमम् ॥ ३ ॥ तत्र गत्वा स शुद्धात्मा पुष्पवत्या समन्वितः ॥ गोसहस्रं च विप्रेभ्यो ददौ स्नाने प्रसन्नधीः ॥ ४ ॥ एतस्मिन्नंतरे प्राप्ता म्लेच्छजातिसमुद्भवा ॥ शोभा नाम महारम्या वेश्या परमसुन्दरी ॥ ५ ॥ सा ददर्श परं रम्यं कृष्णांशं पुरुषोत्तमम् ॥ तद्दृष्टिमोहमापन्ना व्याकुला चाभवत्क्षणात् ॥ ६ ॥ मूर्च्छितां तां समालोक्य कृष्णांशः सर्वमोहनः ॥ स्वनिवासमुपागम्य विप्रानाहूय पृष्टवान् ॥ ७ ॥ अष्टादश पुराणानि केन प्रोक्तानि किं फलम् ॥ ब्रूत मे विदुषां श्रेष्ठा वेदशास्त्रपरायणाः ॥ ८ ॥ इति श्रुत्वा वचो रम्यं विद्वांसः

शास्त्रकोविदाः ॥ अब्रुवन्वचनं रम्यं कृष्णांशं सर्वधर्मगम् ॥ ९ ॥ पराशरेण रचितं पुराणं विष्णुदैवतम् ॥ शिवेन रचितं स्कांदं पाद्मं ब्रह्ममुखोद्भ
वम् ॥ १० ॥ शुकप्रोक्तं भागवतं ब्राह्मं वै ब्रह्मणा कृतम् ॥ गारुडं हरिणा प्रोक्तं षड् वै सात्त्विकसंभवाः ॥ ११ ॥ मत्स्यः कूर्मो नृसिंहश्च वामनः
शिव एव च ॥ वायुरेतत्पुराणानि व्यासेन रचितानि वै ॥ १२ ॥ राजसाः षट् स्मृता वीर कर्मकांडमया भुवि ॥ मार्कंडेयं च वाराहं मार्कंडेयेन
निर्मितम् ॥ १३ ॥ आग्नेयमंगिराश्चैव जनयामास चोत्तमम् ॥ लिंगब्रह्मांडके चापि तंडिना रचिते शुभे ॥ महादेवेन लोकार्थे भविष्यं रचितं
शुभम् ॥ १४ ॥ तामसाः षट् स्मृताः प्राज्ञैः शक्तिधर्मपरायणाः ॥ सर्वेषां च पुराणानां श्रेष्ठं भागवतं स्मृतम् ॥ १५ ॥ घोरे भुवि कलौ प्राप्ते
विक्रमो नाम भूपतिः ॥ कैलासाद्भुवमागत्य मुनीन्सर्वान्समाह्वयत् ॥ १६ ॥ तदा ते मुनयस्सर्वे नैमिषारण्यवासिनः ॥ सूतं सञ्चोदयामासुस्तेषां
तच्छ्रवणाय च ॥ प्रोक्तान्युपपुराणानि सूतेनाष्टादशैव च ॥ १७ ॥ इति श्रुत्वा तु वचनं कृष्णांशो धर्मतत्परः ॥ श्रुत्वा भागवतं शास्त्रं सत्तमेऽह्नि
महोत्तमम् ॥ १८ ॥ ददौ दानानि विप्रेभ्यो गोसुवर्णमयानि च ॥ ब्राह्मणान्भोजयामास सहस्रं वेदतत्परान् ॥१९॥ तदा तु भिक्षुकी भूत्वा शोभा
नाम मदातुरा ॥ मायां कृतवती प्राप्य कृष्णांशो यत्र वै स्थितः ॥ २० ॥ ध्यात्वा महामदं वीरं पैशाचं रुद्रकिंकरम् ॥ मायां सा जनया
मास सर्वपाषाणकारिणीम् ॥ २१ ॥ दृष्ट्वा स्वर्णवती देवी तां मायां शोभयोद्भवाम् ॥ छित्त्वा चाह्लाद्य वामांगीं स्वगेहं गंतुमुद्यता ॥ २२ ॥
सा वेश्या तु शुचाविष्टा तस्याः शृंगारमुत्तमम् ॥ स्वर्णयंत्रस्थितं रम्यं लक्षद्रव्योपमूल्यकम् ॥ संहृत्य मायया धूर्ता देशं बाह्लीकमा
ययौ ॥ २३ ॥ कल्पक्षेत्रमुपागम्य नेत्रसिंहसमुद्भवा ॥ वेश्यया मम शृंगारं हृतं ज्ञात्वा सुदुःखिता ॥ २४ ॥ कृष्णांशं वचनं
प्राह गच्छगच्छ महाबल ॥ गृहीत्वा मम शृंगारं शीघ्रमागच्छ मां प्रति ॥ २५ ॥ गुटिकेयं मया वीर रचिता तां मुखेन च ॥
धूर्तमायाविनाशाय तव मंगलहेतवे ॥ २६ ॥ इति श्रुत्वा तथा कृत्वा कृष्णांशस्सर्वमोहनः ॥ शूकरक्षेत्रमागम्य तत्र वेश्यां ददर्श
ह ॥ २७ ॥ सा तु वेश्या च तं वीरं दृष्ट्वा कन्दर्पकारिणम् ॥ रचयित्वा पुनर्मायां तदंतिकमुपागता ॥ २८ ॥ तदा सा निष्फली
भूय रुरोद करुणं बहु ॥ रुदतीं तां समालोक्य दयालुस्स प्रसन्नधीः ॥ २९ ॥ गृहीत्वा सर्वशृंगारं वचनं प्राह निर्भयः ॥ किं रोदिषि महाभागे
सत्यं कथय मा चिरम् ॥ ३० ॥ साह मे सहरो नाम भ्राता प्राणसमप्रियः ॥ नाट्यैश्च पञ्चसाहस्रैः सहितो मरणं गतः ॥३१॥ अतो रौमि महा
भागसंप्राप्ता शरणं त्वयि ॥ इत्युक्त्वा मायया धूर्ता कृत्वा शवमयान्त्यजान् ॥ ३२ ॥ तस्मै प्रदर्शयामास निजकार्यपरायणा ॥ रुदित्वा च पुन

स्तत्र प्राणांस्त्यक्तुं समुद्यता ॥ ३३ ॥ दयालुस्स च कृष्णांशस्तामाह करुणं वचः ॥ कथं ते जीवयिष्यंन्ति शोभने कथयाशु मे ॥ ३४ ॥ साह
वीर तवास्ये तु संस्थिता गुटिका शुभा ॥ देहि मे कृपया वीर जीवयिष्यंन्ति ते तया ॥ ३५ ॥ इत्युक्तस्तु तया वीरो ददौ तस्यै च तद्वसु ॥ तदा
प्रसन्ना सा धूर्ता कृत्वा शुकमयं वपुः ॥ पंजरस्थमुपादाय कृष्णांशं कामविह्वला ॥ ३६ ॥ वाह्लीकदेशमागम्य सारट्टनगरं शुभम् ॥ उवास च स्वयं
गेहे कृत्वा दिव्यमयं वपुः ॥ ३७ ॥ निशीथे समनुप्राप्ते कृत्वा तं नररूपिणम् ॥ आलिलिंग हि कामार्ता कृष्णांशं धर्मकोविदम् ॥ ३८ ॥ दृष्ट्वातां
स तथाभूतां कृष्णांशो जगदंबिकाम् ॥ तुष्टाव मनसा धीरो रात्रिसूक्तेन नम्रधीः ॥३९॥ तदा सा स्वेडिनी भूत्वा त्यक्त्वा कृष्णांशमुत्तमम् ॥ पुनः
शुकमयं कृत्वा चिंचिणीवृक्षमारुहत् ॥ ४० ॥ तदा स्वर्णवती देवी बोधिता विष्णुमायया ॥ कृत्वा श्येनीमयं रूपं तत्र गत्वा मुदान्विता ॥ ददर्श
शुकभूतं च कृष्णांशं योगतत्परम् ॥ ४१ ॥ एतस्मिन्नंतरे वेश्या पुनः कृत्वा शुभं वपुः ॥ नरभूतं च कृष्णांशं वचनं प्राह नम्रधीः ॥ ४२ ॥ अये
प्राणप्रिय स्वामिन्भज मां कामविह्वलाम् ॥ पाहि मां रतिदानेन धर्मज्ञोसि भवान्सदा ॥ ४३ ॥ इत्युक्तस्स तु तामाह वचनं शृणु शोभने ते
आर्यवर्त्मस्थितोहं वै वेदमार्गपरायणः ॥ ४४ ॥ विवाहितां शुभां नारीं यो भजेत ऋतौ न हि ॥ स पापी नरकं याति तिर्य्यग्योनिमयं[1] स्मृतम् ॥
अतः परस्त्रिया भोगो ज्ञेयो वै निरयप्रदः ॥ ४५ ॥ इति श्रुत्वा तु सा प्राह विश्वामित्रेण धीमता ॥ शृंगिणा च महाप्राज्ञ वेश्यासंगः कृतः पुरा ॥
न कोऽपि नरकं प्राप्तस्तस्मान्मां भज कामिनीम् ॥ ४६ ॥ पुनश्चाह स कृष्णांशः कृत्तं पापं तपोबलात् ॥ ताभ्यां च मुनियुग्माभ्यामसमर्थोहिसां
प्रतम् ॥ ४७ ॥ अर्द्धांगं पुरुषस्य स्त्री मैथुने च विशेषतः ॥ अहमार्यश्च भवती वेश्या च बहुभोगिनी ॥ ४८ ॥ ऋचि शब्दश्च पूर्वास्याज्जात
ऋग्जस्सनातनः ॥ योगजश्चैव यः शब्दो दक्षिणास्याद्यजुर्भवः ॥४९॥ तद्धितान्तश्च यश्शब्दः पश्चिमास्याच्च सामजः ॥ छन्दोभूताश्च ये शब्दास॥
सर्वे ब्राह्मणप्रियाः ॥ केवलो वर्णमात्रश्च स शब्दोऽथर्वजःस्मृतः ॥ ५० ॥ पश्चमास्याच्च ये जाताः शब्दाः संसारकारिणः ॥ ते सर्वे प्राकृता ज्ञेया
श्चतुर्लक्षविभेदिनः ॥ ५१ ॥ हित्वा तान्यो हि शुद्धात्मा चतुर्वेदपरायणः ॥ स वै भवाटवीं त्यक्त्वा पदं गच्छत्यनामयम् ॥ ५२ ॥ न वदेद्यावनीं
भाषां प्राणैः कंठगतैरपि ॥ गजैरापीडचमानोऽपि न गच्छेज्जैनमंदिरम् ॥ ५३ ॥ इत्येवं स्मृतिवाक्यानि मुनिना पठितानि वै ॥ कथं त्याज्यो
मया धर्मस्सर्वलोकसुखप्रदः ॥ ५४ ॥ इति श्रुत्वा तु सा वेश्या म्लेच्छायाश्चांशसंभवा ॥ शोभना नाम रंभोरूर्महाक्रोधमुपाययौ ॥ ५५ ॥

---

[1] दशगणीपाठो बहुलमिति णिच् ।

वेतसैस्ताडयित्वा तं पुनः कृत्वा शुकं स्वयम् ॥ न ददौ भोजनं तस्मै फलाहारं शुकाय वै ॥ ५६ ॥ तदा स्वर्णवती देवी कृत्वा नारीमयं वपुः ॥
मशकीकृत्य तं वीरं तत्रैवान्तर्दधे तु सा ॥ ५७ ॥ पुनः श्येनीवपुः कृत्वा तद्देशाद्यातुमुद्यता ॥ पृष्ठमारोप्य मशकं मयूरनगरं ययौ ॥ ५८ ॥
मकरंदस्तु तां दृष्ट्वा कृष्णांशेन समन्विताम् ॥ नेत्रपालस्य तनयां नाम्ना स्वर्णवतीं बली ॥ चरणावुपसंगृह्य स्वगेहे तामवासयत् ॥ ५९ ॥
शोभनापि च संबुध्य पञ्जरान्तमुपस्थिता ॥ न ददर्श शुकं रम्यं मूर्छिता चापतद्भुवि ॥ ६० ॥ किंकरोमि क्व गच्छामि विना तं रमणं परम् ॥
इत्येव बहुधालप्य मदहीनपुरं ययौ ॥ ६१ ॥ तत्र स्थितं च पैशाचं मायामदविशारदम् ॥ महामदं च संपूज्य स्वदेहं त्यक्तुमुद्यता ॥ ६२ ॥
महामदस्तु संतुष्टो गत्वा वै शिवमंदिरम् ॥ मरुस्थलेश्वरं लिंगं तुष्टावार्षभभाषया ॥ ६३ ॥ तदा प्रसन्नो भगवान्वचनं प्राह सेवकम् ॥ स्वर्णवत्या
ह्रतो वीरः कृष्णांशश्चार्यधर्मगः ॥ मया सह समागच्छ मयूरनगरं प्रति ॥ ६४ ॥ इत्युक्तस्तेन पैशाचो नटैः पंचसहस्रकैः ॥ तया सह ययौ तूर्णं
सद्गुरेणं समन्वितः ॥ ६५ ॥ इन्दुलश्च तथाह्लादो बोधितो विष्णुमायया ॥ त्रिलक्षबलसंयुक्तोदेवसिंहेन संयुतः ॥ मयूरनगरं प्राप्य मकरंदमुपा
ययौ ॥६६॥ तदा तु शोभना वेश्या सद्गुरेण बलैस्सह ॥ चकार भैरवीं मायां सर्वशत्रुभयंकरीम् ॥६७॥ सर्वतश्चोत्थितो वातो महामेघसमन्वितः॥
पतंति बहुधा चोल्काः शर्करावर्षणे रताः ॥ ६८ दृष्ट्वा तां भैरवीं मायां तमोभूतां समन्ततः ॥ मकरन्दश्च बलवान्रथस्थः स्वयमाययौ ॥ ६९ ॥
शनिभल्लेन तां मायां भस्म कृत्वा महाबलः ॥ गृहीत्वा सद्गुरं धूर्तं सबलं गेहमाप्तवान् ॥ ७० ॥ तदा तु शोभना नारी काममायां चकार ह ॥
बहुलास्संस्थिता वेश्या गीतनृत्यविशारदाः ॥ ७१ ॥ मोहिताः क्षत्रियाः सर्वे मुमुहुर्लास्यदर्शनात् ॥ देवसिंहाच्च कृष्णांशाद्दृते ते जडतां गताः ॥
॥७२॥ तदा स्वर्णवती देवी कामाक्षी ध्यानतत्परा ॥ पुनरुत्थाप्यतान्सर्वान्गृहीत्वा शोभनां पुनः ॥ मयूरध्वजमागम्य निगडैस्तान्बबंध ह ॥७३॥
महामदस्तु तज्ज्ञात्वा रुद्रध्यानपरायणः ॥ चकार शाम्बरीं मायां नानासत्त्वविधायिनीम् ॥७४॥ व्याघ्राः सिंहा वराहाश्च वानरा दंशका नराः ॥
सर्पा गृध्रास्तथा काका भक्षयंति समंततः ॥ ७५ ॥ तदा स्वर्णवती देवी कामाक्षीध्यानतत्परा ॥ ससर्ज स्मरजां मायां तन्मायाध्वंसिनीं रणे ॥
॥७६॥ तया तार्क्ष्यास्समुत्पन्नाः शरभाश्च महाबलाः ॥ सिंहादीन्भक्षयामासुर्जघ्नुश्चैव सहस्रशः ॥७७॥ हाहाभूते च तत्सैन्येदिक्षु विद्राविते सति ॥
शोभना चाभवद्दासी स्वर्णवत्याश्च मायिनी ॥ ७८॥ सद्गुरस्तैर्नटैस्सार्द्धं चाह्लादेनैव चूर्णितः ॥ तेषां रुधिरकभाश्च भूमिमध्ये समारुहन् ॥ ७९ ॥

एवं च मुनिशार्दूल चतुर्मास्स्वभवद्रणः ॥ वैशाखे मासि संप्राप्ते ते वीरा गेहमाययुः ॥ इति ते कथितं विप्र चान्यत्किं श्रोतुमिच्छसि ॥ ८० ॥
इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडापरपर्याये कलियुगीयेतिहाससमुच्चयेऽष्टाविंशोऽध्यायः ॥ २८ ॥छ॥ ॥ ऋषय ऊचुः ॥ ॥
किन्नरी नाम या कन्या त्वया प्रोक्ता महामुने ॥ कुत्र स्थाने कथं जाता तत्सर्वं कृपया वद ॥ १ ॥ ॥ सूत उवाच ॥ ॥ पुरा चैत्ररथे देशे
नानाजननिषेविते ॥ वसंतसमये प्राप्ते क्रीडंत्यत्र दिवौकसः ॥ २ ॥ मंजुघोषा च स्वर्वेश्या शुकस्थाने समागता ॥ दृष्ट्वा तं सुन्दरं बालं मोहनाय
समुद्यता ॥ ३ ॥ गीतनृत्यादिरागांश्च कृत्वा सा कामविह्वला ॥ प्रांजलिं प्रणता बद्ध्वा पुनस्तुष्टाव तं मुनिम् ॥४॥ तदा शुकस्तु भगवान्पद्यं स्तुति
मयं शुभम् ॥ श्रुत्वा प्रसन्नहृदयो वरं ब्रूहीति सोऽब्रवीत् ॥ ५ ॥ सा तु श्रुत्वा शुभं वाक्यं प्रोवाच श्लक्ष्णया गिरा ॥ पतिर्मे भव हे नाथ शरणा
गतवत्सल ॥ ६ ॥ इति श्रुत्वा तु वचनं तथा कृत्वा तया सह ॥ स रेमे मुनिशार्दूलः शुको विज्ञानकोविदः ॥ ७ ॥ तयोस्सकाशात्संजज्ञे मुनि
र्नाम सुतोऽनयोः ॥ तपश्चकार बलवान्द्वादशाब्दं प्रयत्नतः ॥ ८ ॥ तस्मै ददौ तदा पत्नीं स्वर्णदेवस्य वै सुताम् ॥ कुबेरो रुद्रसहितः स मुनिस्तु
मुदान्वितः ॥ ९ ॥ तया रेमे प्रसन्नात्मा तयोर्जाता सुतोत्तमा ॥ किन्नरी नाम विख्याता हिमतुंगे समुद्भवा ॥ तपश्चचार सा देवी रूपयौवन
शालिनी ॥ १० ॥ तदा प्रसन्नो भगवाञ्छंकरो लोकशंकरः ॥ मकरंदाय धीराय ददौ तां रुचिराननाम् ॥ ११ ॥ मुनिस्तु शंकरं प्राह देवदेव
नमोऽस्तुते ॥ मत्सुतायै वरं देहि राष्ट्रवर्धनमुत्तमम् ॥ १२ ॥ इति श्रुत्वा शिवः प्राह गुरुंडान्ते च भूतले ॥ मध्यदेशे च ते राष्ट्रं भविष्यति सुख
प्रदम् ॥ त्रिंशदब्दप्रमाणेन तत्पश्चात्क्षयमेष्यति ॥ १३ ॥ इति श्रुत्वा तु स मुनिर्हिमतुंगनिवासकः ॥ मकरंदेन सहितस्तत्र वासमकारयत् ॥१४॥
इति ते कथितं विप्र पुनः शृणु कथां शुभाम् ॥ ऊनत्रिंशाब्दकं प्राप्ते कृष्णांशे रणकारणम् ॥ १५ ॥ नेत्रपालस्य नगरं नानाधातुविचित्रितम् ॥
मत्वा न्यूनपतिर्बौद्धो रुरोध नगरं शुभम् ॥ १६ ॥ सप्तलक्षयुतो राजा बौद्धसिंहो महाबलः ॥ त्रिलक्षबलसंयुक्तैस्सार्द्धं युद्धमचीकरत् ॥ १७ ॥
सप्ताहोरात्रमभवत्सेनायुद्धं भयानकम् ॥ योगसिंहो भोगसिंहो विजयश्च महाबलः ॥ १८ ॥ जघान शात्रवीं सेनां बौद्धसिंहेन पालिताम् ॥
एतस्मिन्नंतरे प्राप्ताः श्यामजापकदेशगाः ॥ १९ ॥ बौद्धा मायाविनस्सर्वे लोकमान्यप्रपूजकाः ॥ पुनर्जातं महद्युद्धं मासमेकं तयोस्तदा ॥ २० ॥
नेत्रपालाज्ञया सर्वे कृष्णांशाद्याः समागताः ॥ कृष्णांशो बिंदुलारूढो देवः स्वहयसंस्थितः ॥२१॥ इंदुलश्च करालाश्वे मंडलीको गजे स्थितः ॥
गौतमश्च समायातो हरिनागरसंस्थितः ॥२२॥ तालनश्च समायातः सिंहिन्युपरि संस्थितः ॥ धान्यपालस्तैल्यकारो युयुत्सोरंशसंभवः ॥२३॥

लह्लसिंहश्च बलवान्कुंतिभोजांशसंभवः ॥ ताम्बूलीयकजातीयो लक्षणानुज्ञया ययौ ॥ २४ ॥ तदा तु नेत्रसिंहश्च सप्तलक्षबलैर्वृतः ॥ पालितश्चाष्टभिर्वीरैस्तेषां नाशाय चाययौ ॥ २५ ॥ भयभीताश्च ते बौद्धास्त्यक्त्वा देशं समन्ततः ॥ चीनदेशमुपागम्य युद्धभूमिमकारयन् ॥ २६ ॥ तदनुप्रययुस्ते वै हूहानदमुपस्थिताः ॥ माघमासे तु संप्राप्ते पुनर्युद्धमवर्तत ॥ २७ ॥ श्यामदेशोद्भवा लक्षं तथा लक्षं च जापकाः ॥ दश लक्षाश्चीनदेश्या युद्धाय समुपस्थिताः ॥ २८ ॥ कृष्णांशो लक्षसेनाढ्यो देवो लक्षसमन्वितः ॥ नेत्रपालश्च लक्षाढ्यो योगभोगसमन्वितः ॥ २९ ॥ मंडलीकश्चेन्दुलेन लक्षसैन्यसमन्वितः ॥ ध्यानपालो लह्लसिंहो लक्षसैन्यान्वितः स्थितः ॥ ३० ॥ जननायक एवापि लक्षसैन्ययुतः स्थितः ॥ तालनो लक्षसेनाढ्यो युद्धाय समुपागतः ॥ ३१ ॥ तत्र युद्धमभूद्घोरं बौद्धानामार्यकैस्सह ॥ पक्षमात्रं मुनिश्रेष्ठ यमलोकविवर्द्धनम् ॥ ३२ ॥ सप्त लक्षं हता बौद्धा द्विलक्षं चार्यदेशजाः ॥ ततस्ते भयभीताश्च त्यक्त्वा युद्धं गृहं ययुः ॥ ३३ ॥ कृत्वा दारुमयीं सेनां कलयंत्रप्रभावतः ॥ गजाश्च दशसाहस्राः सशूराः काष्ठनिर्मिताः ॥ ३४ ॥ एकलक्षं हयारूढा दारुपाश्च रणोन्मुखाः ॥ सहस्रं महिषारूढास्सहस्रं कोलपृष्ठगाः॥ ३५ ॥ सिंहारूढास्सहस्रं च सहस्रं हंसवाहनाः॥कंकगोमायुगृध्राणां श्यामारूढाः पृथक्तथा ॥ ३६ ॥ उष्ट्राः सप्तसहस्राणि सशूराश्च रणोन्मुखाः ॥ एवं सपादलक्षैश्च काष्ठसैन्यैश्च मानुषाः ॥ ३७ ॥ द्विलक्षाणि क्षयं जग्मुः कृष्णांशाद्यैः सुरक्षिताः ॥ ततो हाहाकृतं सैन्यं चार्य्याणां च ननाश तत् ॥ ॥ ३८ ॥ दृष्ट्वा तत्कौतुकं रम्यं जयन्तो युद्धकोविदः ॥ आग्नेयं शरमादाय काष्ठसैन्येषु चाक्षिपत् ॥ ३९ ॥ भस्मीभूताश्च ते सर्वे तत्रैव विलयं गताः ॥ त्रिलक्षं क्षत्रियाः शेषा जयंतं रणकोविदम् ॥ चक्रुर्जयरवं तत्र तुष्टुवुश्च पुनः पुनः ॥ ४० ॥ तदा तु चीनजा बौद्धाः कृत्वा विंशत्सहस्रकान् ॥ हयारूढाँल्लोहमयान्प्रेषयामासुरूर्जितान् ॥ ४१ ॥ योगसिंहो गजारूढो धनुर्बाणधरो बली ॥ कंठेषु लोहजान्वीरांस्ताडयामास वै तदा ॥ ॥ ४२ ॥ मृतास्ते पंचसाहस्रा योगसिंहशरार्दिताः ॥ बौद्धसिंहस्तदा शूरो दृष्ट्वा तस्य पराक्रमम् ॥ कृत्वालोहमयं सिंहं योगसिंहमपेषयत् ॥४३॥ पातेन तस्य सिंहस्य स वीरो मरणं गतः ॥ तदा तु भोगसिंहश्च हयारूढो जगाम ह ॥ स्वभल्लेन च तं सिंहं हत्वा तत्र जगर्ज्ज वै ॥ ४४ ॥ तदा तु बौद्धसिंहेन शार्दूलस्तत्र चोदितः ॥ सहयो भोगसिंहश्च तेनैव मरणं गतः ॥ ४५ ॥ मातुलौ मृत्युवशगौ दृष्ट्वा स्वर्णवतीसुतः ॥ करालं हयमारुह्य बौद्धसिंहमुपाययौ ॥ ४६ ॥ शरमादाय वै शीघ्रं नाम्ना संमोहनं शुभम् ॥ मोहयित्वा रिपुबलं बौद्धसिंहसमन्वितम् ॥ ४७ ॥ बद्ध्वा तान्बौद्धसिंहादीन्नृपान्दशसहस्रकम् ॥ कलयंत्रं च संचूर्ण्य कृष्णांशांतिकमाययौ ॥ ४८ ॥ तदा ते हर्षितास्सर्वे प्रपेष्य नगरं ययुः ॥ तद्देशम योजना

यामं सर्वसंपत्समन्वितम् ॥ लुण्ठयित्वा बलात्सर्वे नृपदुर्गमुपाययुः ॥ ४९ ॥ बौद्धसिंहस्तदागत्य जयन्तेन विमोचितः ॥ सुतां स्वां पद्मजां नाम्ना
जयन्ताय ददौ मुदा ॥ ५० ॥ दशकोटीः सुवर्णस्य चाह्लादाय तदा धनम् ॥ सर्वैश्च बौद्धवृन्दैश्च तत्रैव शपथः कृतः ॥ ५१ ॥ आर्यदेशं न यास्यामः
कदाचिद्राष्ट्रहेतवे ॥ इत्युक्त्वा तान्प्रणम्याशु संप्रस्थानमकारयन् ॥ त्रिलक्षैश्च युतास्ते वै नेत्रपालगृहं गताः ॥ ५२ ॥ ॥ ऋषय ऊचुः ॥ ॥
इन्दुलेन कथं सूत तत्र प्राणीकृता न हि ॥ सुप्रिया योगसिंहाद्यास्तन्नो वद विचक्षण ॥ ५३ ॥ ॥ सूत उवाच ॥ ॥ आगता यमलोकाद्वै
कतिचित्प्राणिनो भुवि ॥ तदा तु दुःखितो देवो महेंद्रान्तमुपाययौ ॥ ५४ ॥ देवराज नमस्तुभ्यं सर्वदेवप्रियंकर ॥ जयंतो जगतीं प्राप्य मृताञ्जी
वयति स्वयम् ॥ अतो वै लोकमर्यादा विरुद्धा दृश्यते भुवि ॥ ५५ ॥ इति श्रुत्वा तु वचनं महेन्द्रो देवमायया ॥ वडवामृतमाहृत्य तथा वै
स्वर्गगां गतिम् ॥ जयंतस्य स्वपुत्रस्य मुमोद स सुरैः सह ॥ ५६ ॥ इन्दुलश्च तदा दुःखी शारदां सर्वमंगलाम् ॥ पूजयित्वा विधानेन योगध्यान
परोऽभवत् ॥ ५७ ॥ इति ते कथितं विप्र पुनः शृणु कथां शुभाम् ॥ नेत्रपालश्च बलवान्बहुपुत्रः शुचान्वितः ॥ दशकोटिमितं स्वर्णं तेभ्यो दत्त्वा
समं समम् ॥ ५८ ॥ प्रस्थानं कारयामास चाष्टानां बलशालिनाम् ॥ ते वै द्विलक्षसैन्याढ्याः स्वगेहाय ययुर्मुदा ॥ ५९ ॥ ॥ इति श्रीभविष्ये
महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये एकोनत्रिंशोऽध्यायः ॥ २९ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ यदा
ते चीनदेशस्थास्तदाहूतो नृपेण वै ॥ कामपालेन भो विप्र लक्षणो नकुलांशकः ॥ १ ॥ जयचंद्र महाभाग सावधानं वचः शृणु ॥ वैशाखशुक्ल
सप्तम्यां मुहूर्तोऽयं दिनागमे ॥ २ ॥ अतो वै लक्षणो वीरश्चैकाकी मां समाप्नुयात् ॥ गृहीत्वा मत्सुतां दोलां गमिष्यति तवांतिकम् ॥ ३ ॥ सेना
न्वितं च तं ज्ञात्वा महीराजो महाबलः ॥ ग्रहीष्यति पराजित्य तस्माद्योग्यं वचो मम ॥ ४ ॥ इति तत्रत्यवचनं मत्वा राजा प्रसन्नधीः ॥ लक्षणं
हस्तिनीसंस्थं शतशूरसमन्वितम् ॥ ५ ॥ आहूय प्रेषयामास कामपालाय धीमते ॥ मार्गे पंचदिनं वीर उषित्वा तद्गृहं ययौ ॥ ६ ॥ तदा पद्मा
करः श्यालो ज्ञात्वा लक्षणमागतम् ॥ भूमिराजं समाहूय तेन युद्धमचीकरत् ॥ ७ ॥ लक्षणो नकुलांशश्च दृष्ट्वा शत्रुमुपस्थितम् ॥ स्वशरैस्तर्पया
मास राजराजं महाबलम् ॥ ८ ॥ मूर्च्छयित्वा महीराजं हत्वा पंचशतं बली ॥ कामपालं समागम्य नत्वा वासमकारयत् ॥ ९ ॥ उत्थितश्च
महीराजो गत्वा पद्माकरं प्रति ॥ वचनं प्राह कार्यार्थी शृणु मित्र वचो मम ॥ १० ॥ लक्षणो मे महाञ्छत्रुस्स च त्वद्गेहमागतः ॥ यदि दास्यसि
तं बद्ध्वा त्वां मदंगं करोम्यहम् ॥ ११ ॥ इति श्रुत्वा स लोभात्मा दत्त्वा हालाहलं विषम् ॥ बद्ध्वा तं लक्षणं वीरं महीराजाय चार्पयत् ॥ हत्वा

ताञ्छतशूरांश्च गुप्तवार्तामकारयन् ॥ १२ ॥ ज्ञात्वा तत्पद्मिनी नारी दुःखितालप्य वै भृशम् ॥ चंडिकां पूजयामास पतिमंगलहेतवे ॥ १३ ॥
तदा प्रसन्ना सा देवी वरदा सर्वमंगला ॥ आश्वास्य पद्मिनीं नारीं लक्षणांतमुपाययौ ॥ १४ ॥ स्वप्ने तमाह सा देवी ह्रीं फट् घेघे जपं कुरु ॥
अस्य मंत्रप्रभावाच्च सर्वविघ्नः प्रणश्यति ॥ १५ ॥ स बुद्ध्वा लक्षणो वीरस्तं मंत्रं च जजाप ह ॥ आषाढे मासि संप्राप्ते कृष्णांशाद्या गृहं
ययुः ॥ १६ ॥ तालनश्च युतस्ताभ्यां कान्यकुब्जमुपाययौ ॥ न दृष्टो लक्षणो वीरो जयचंद्रप्रियंकरः ॥ ज्ञात्वा तत्कारणं तैश्च कृतं योग
मयं वपुः ॥ १७ ॥ धान्यपालः कांस्यधारी वीणाधारी च तालनः ॥ लह्लसिंहो मृदंगांको ययुस्ते वै महावतीम् ॥ १८ ॥ सभां परिमलस्यैव
गत्वा ते योगरूपिणः ॥ चक्रुर्गानं मुदा युक्ताः सर्वे ते मोहमागताः ॥ १९ ॥ प्रसन्नश्च तदा राजा मुक्तामालां स्वकण्ठगाम् ॥ तालनाय ददौ
प्रीत्या ताभ्यां स्वर्णांगुलीयके ॥ २० ॥ तदा ते हर्षिताः सर्वे कृष्णांशं प्रति चाययुः ॥ ज्ञात्वा कृष्णांश एवापि धृत्वा योगमयं वपुः ॥
ययौ बिंदुगढं वीरस्तालनाद्यैस्समन्वितः ॥ २१ ॥ हट्टमध्ये समागम्य कृत्वा रासोत्सवं शुभम् ॥ गेहं पद्माकरस्यैव गत्वा ते ननृतुर्मुदा ॥
॥ २२ ॥ एतस्मिन्नंतरे सर्वा योषितस्तत्र चागताः ॥ वेणुवाद्यवृतं वीरं कृष्णांशं ददृशुर्मुहुः ॥ मोहितास्तस्य गानेन जडीभूता धनं ददुः ॥
॥ २३ ॥ तदा तु पद्मिनी नारी सर्वलक्षणसंयुता ॥ ज्ञात्वा कृष्णांशमेवापि रुरोद चिरमातुरा ॥ २४ ॥ उवाच च विलप्याशु मत्पतिर्ल
क्षणो बली ॥ महीराजेन शूरेण कारागारे बलात्कृतः ॥ अहं योषा भवान्योगी कथं कार्यं भविष्यति ॥ २५ ॥ इति श्रुत्वा तु स नृपो
भुजमुत्थाप्य सत्वरम् ॥ आश्वास्य पद्मिनीं नारीं ययुस्ते देहलीं प्रति ॥ राजद्वारमुपागम्य कृष्णांशस्स ननर्त ह ॥ २६ ॥ महीराजस्तु
बलवान्प्रसन्नस्तस्य लीलया ॥ वांछितं ब्रूहि कृष्णांश सर्वं योगिन्ददाम्यहम् ॥ २७ ॥ इति श्रुत्वा भूपवचो विहस्योवाच तं प्रति ॥ कारा
गारं लोहमयं नृपयोग्यं च मे नृप ॥ दर्शयाशु स्वकीयं वै भवान्भूपशिरोमणिः ॥ २८ ॥ इति श्रुत्वा स नृपतिर्मोहितः कृष्णलीलया ॥ दर्श
यित्वा च वै शीघ्रं पुनस्तेभ्यो ददौ धनम् ॥ २९ ॥ ततस्ते योगिनस्सर्वे संप्राप्य च महावतीम् ॥ नत्वा परिमलं भूपं गदित्वा सर्वकारणम् ॥
॥ ३० ॥ स्वसेनां सज्जयामास चाह्लादश्च नृपाज्ञया ॥ पञ्चलक्षं महावत्या हयारूढास्समास्थिताः ॥ ३१ ॥ तालनस्सप्त लक्षाणि सैन्यान्याहूय
चागतः ॥ एवं द्वादशलक्षाणि क्षत्रिया रणदुर्मदाः ॥ देहलीं च समाजग्मुस्सर्वशस्त्रसमन्विताः ॥ ३२ ॥ एतस्मिन्नंतरे मन्त्री चंद्रभट्टो विशारदः ॥

---

१ धान्यपाललह्लसिंहाभ्यामित्यर्थः ।

सर्वशास्त्रार्थकुशलो वैष्णवीशक्तिपूजकः ॥३३॥ महीराजं समागम्य वचः प्राह शृणुष्व भोः ॥ मया वै च रहः क्रीडा दृष्टा देवीप्रसादतः ॥३४॥ तत्रोदयश्च कृष्णांशः पूर्णब्रह्माणमागमत् ॥ वचः प्राह प्रसन्नात्मा शृणु त्वं सत्त्वविग्रह ॥ ३५ ॥ अग्निवंशविनाशाय चाद्य यास्यामि देहलीम् ॥ हत्वाहं कौरवांशांश्च स्थापयित्वा कलिं भुवि ॥ ३६ ॥ पुनस्तवान्तिकं प्राप्य रहः क्रीडां करोम्यहम् ॥ इत्युक्त्वा बिंदुलारूढः स वीरस्त्वामुपस्थितः ॥ इत्यहं दृष्टवान्भूप कृष्णांशं योगनिद्रया ॥ ३७ ॥ इति तस्य वचः श्रुत्वा स भूपो विस्मयान्वितः ॥ भयभीतः सहस्राणि शूरानाहूय सत्वरम् ॥ तेभ्यश्च लक्षणं दत्त्वा वचनं प्राह तान्प्रति ॥ ३८ ॥ पद्माकराय भूपाय गत्वा दत्त्वाशु लक्षणम् ॥ ममान्तिकमुपागम्य कारणं वद ताशु तत् ॥ ३९ ॥ इति श्रुत्वा तु ते सर्वे वह्निवंश्या महाबलाः ॥ गत्वा तत्र तथा कृत्वा महीराजमुपागमन् ॥ ४० ॥ भगदंतश्च तेषां तु सहस्राणां च नायकः ॥ महीराजं वचः प्राह शृणु तन्नृपभाषितम् ॥४१॥ पद्मिनी मे स्वसा राजन् गुप्तविद्याविशारदा ॥ तया यज्ञपतिर्देवः सम्यगाराधितः पुरा ॥ ४२ ॥ दत्तस्तेन वरो रम्यो ह्यन्तर्धानमयः परः ॥ सा तु तं लक्षणं कांतमंतर्धानं करिष्यति ॥ इति श्रुत्वा स नृपतिः परमानन्दमाप्तवान् ॥ ४३ ॥ एतस्मिन्नंतरे प्राप्ताः कृष्णांशाद्या महाबलाः ॥ रुरुधुर्देहलीं सर्वां महीराजेन पालिताम् ॥ ४४ ॥ स तदा पृथिवीराजो गृहीत्वा बहुभूषणम् ॥ सर्वेभ्यश्च ददौ प्रेम्णा वचनं प्राह नम्रधीः ॥ ४५ ॥ लक्षणो नाम ते राजा कारागारे न वै मम ॥ यदि मन्नगरे चास्ति तर्हि ते रोष ईदृशः ॥ ४६ ॥ इत्युक्त्वा तं च कृष्णांशं दर्शयामास वै गृहम् ॥ महादेवस्य शपथं कृतवान्भूपतिर्भयात् ॥ ४७ ॥ तदोदयो भूपवचः सत्यं मत्वा सुदुःखितः ॥ स्वकीयैः सह संप्राप्तो ग्रामं बिंदुगढं शुभम् ॥ ४८ ॥ कामपालस्तु तच्छ्रुत्वा कृष्णांशागमनं बली ॥ बलिं बहुं गृहीत्वाशु कृष्णाशं शरणं ययौ ॥ प्रांजलिः प्रणतो भूत्वा वचनं प्राह भीरुकः ॥ ४९ ॥ सुता मे पद्मिनी नारी लक्षणेन समन्विता ॥ न ज्ञात्वा क्व गताऽस्माभिस्सत्यं सत्यं ब्रवीम्यहम् ॥५०॥ इति तद्वचनं श्रुत्वा कृष्णांशः स्वबलैस्सह ॥ कान्यकुब्जं समागत्य जयचन्द्रमुवाच ह ॥ ५१ ॥ भ्रातृजस्तव भूपाल पद्मिन्या लक्षणोऽन्वितः ॥ कामपालगृहे नास्ति निश्चितो बहुधा मया ॥ ५२ ॥ न जाने क्व गतो राजा मम प्राणसमो भुवि ॥ यदि भूप न पश्यामि सत्यं प्राणांस्त्यजाम्यहम् ॥ ५३ ॥ हा रत्नभानुतनय विष्णुभक्त शुभंकर ॥ स्वमित्रं मां परित्यज्य कां दिशं गतवान्भवान् ॥ इत्युक्त्वा मूर्छितश्चासीत्कृष्णांशो वैष्णवप्रियः ॥ ५४ ॥ तदा स्वर्णवती देवी स्वदास्या शोभया सह ॥ धृत्वा शुकमयं रूपं तत्रागत्य स्वमूर्तिगा ॥ ५५ ॥ तया संप्रेषिता शोभा म्लेच्छमायाविशारदा ॥ जयचंद्रमुपागम्य धृत्वा दिव्यमयं

वपुः ॥ ५६ ॥ उवाच वचनं तत्र शृणु भूपशिरोमणे ॥ मायाविनीं च मां विद्धि शोभनां नाम विश्रुताम् ॥ ५७ ॥ दंपती तव भूपाल संहृतौ येन
यत्र वै ॥ तत्राहं च गमिष्यामि महामदसमन्विता ॥ ५८ ॥ आह्लादश्चेन्दुलो वीरो देवो वै तालनो बली ॥ कृष्णांशपालितास्सर्वे यास्यामो भूपते
वयम् ॥ ५९॥ इत्युक्त्वा शोभना वेश्या कृत्वा योगमयं वपुः ॥ महामदं समारुह्य पैशाचं रुद्रकिंकरम् ॥ प्रययौ तान्पुरस्कृत्य योगिवेषान्महाब
लान् ॥ ६० ॥ आह्लादो गजसंस्थो वै करालारूढ इन्दुलः ॥ तालनः सिंहिनीसंस्थो देवसिंहो मनोरथे ॥ कृष्णांशो बिन्दुलारूढो नर्तयामास तं
हयम् ॥ ६१ ॥ कामरूपमयं देशं शतयोजनगामिनः ॥ बलवंतश्च संप्राप्ता गेहेगेहे जनेजने ॥ लक्षणं शोधयामासुर्न प्राप्तास्तत्र तं नृपम् ॥ ६२ ॥
पुनर्मयूरनगरं शोभना तैः समन्विता ॥ चिन्वती तं मनुष्येषु न प्राप्ता तत्र वै नृपम् ॥ ६३ ॥ पुनरिन्नगढग्रामं शोभना च जनेजने ॥ लक्षणं
मृगयामास न प्राप तत्र लक्षणम् ॥ ६४ ॥ गत्वा बाह्लीकनगरं शोभना तैस्समन्विता ॥ लक्षणं च नृपश्रेष्ठं नापश्यत्तत्र दुःखिता ॥ ६५ ॥ पुनः
स्वदेशमागम्य बाह्लीकं म्लेच्छवासिनम् ॥ मर्कटेश्वरमीशानं तत्राह वनवासिनम् ॥ पूजयित्वा च सा वेश्या गाननृत्यपराभवत् ॥ ६६ ॥ स देवो
भूमिमध्यात्तु समागम्य मुदान्वितः ॥ कृष्णांशं प्रणतो भूत्वाऽब्रवीन्म्लेच्छप्रपूजितः ॥ ६७ ॥ अहं कालाग्निरुद्रेण भूमिगर्ते सुरोपितः ॥
असमर्थं च मां विद्धि गच्छ वीर यथासुखम् ॥ ६८ ॥ इति श्रुत्वा च सा शोभा निराशाभूत्तदा स्वयम् ॥ ६९ ॥ पुनः स्वर्णवतीं प्राप्य सर्वमेवा
दितोऽब्रवीत् ॥ त्रिंशदब्देश्च कृष्णांशे चैत्रशुक्ले समागते ॥ ७० ॥ तानाश्वास्य सुवर्णांगी पूजयामास चंडिकाम् ॥ नवरात्रं गतं तस्या भोजना
च्छादनं विना ॥ निशीथान्ते तमःप्राप्ते गत्वाह जगदम्बिका ॥ ७१ ॥ पद्मिनी नाम या नारी मणिदेवस्य वै प्रिया ॥ जाता सा कामपालस्य
गृहे यज्ञावमानिता ॥ ७२ ॥ सेनापतिः कुबेरस्य मणिदेवो हि स स्मृतः ॥ पूर्वं हि भीमसेनेन यक्षयुद्धेषु घातितः ॥ ७३ ॥ तदा तत्पद्मिनी नारी
देवदेवमुमापतिम् ॥ तुष्टाव च निराहारा मत्पतिं देहि शंकर ॥ ७४ ॥ शतवर्षांतरे देवो महादेव उवाच ताम् ॥ कलौ विक्रमकाले हि
शतद्वादशकेऽन्तिके ॥ ७५ ॥ नकुलांशं च संप्राप्य भुक्त्वा तेन महत्सुखम् ॥ तद्वियोगेन संत्यज्य देहं पद्मानुवासितम् ॥ स्वपतिं च तदा प्राप्य
कैलासं पुनरेष्यसि ॥ ७६ ॥ महावतीं पुरीं रम्यां राष्ट्रपालाय शारदा ॥ करिष्यति तदा देवी मणिदेवस्तु त्वत्पतिः ॥ ७७ ॥ तया विरचितो
भूमौ ग्रामरक्षार्थमुद्यतः ॥ प्राप्तस्त्वां पद्मिनीं नारीं कैलासं पुनरेष्यति ॥ ७८ ॥ अतः स्वर्णवति त्वं वै कैलासं गुह्यकालयम् ॥ गत्वाशु पद्मिनीं
तत्र बोधयाशु वचः कुरु ॥ ७९ ॥ इति श्रुत्वा स्वर्णवती पद्मिनीं प्रति चागमत् ॥ वृत्तांतं कथयित्वाग्रे पद्मिनी तु दयातुरा ॥ ८० ॥ कामपाल

गृहं प्राप्य तत्र वासमकारयत् ॥ स्वर्णवत्यपि संप्राप्ता तदा शीघ्रं महावतीम् ॥ ८१ ॥ तस्यां गतायां गेहे वै पद्मिन्या लिखितं शुभम् ॥ पत्रं परि
मलो राजा वर्तयामास हर्षितः ॥८३॥ आगच्छ सेनया सार्द्धं कृष्णांश बलवत्तर ॥ जित्वा पद्माकरं बंधुं मत्पतिं मोचयाशु वै॥भूतले लक्षणो राजा
स्थितः पद्माकरार्तिगः ॥ ८३ ॥ इति ज्ञात्वा च कृष्णांशो लक्षद्वादशसेनया ॥ रुरोध नगरीं सर्वां कामपालेन रक्षिताम् ॥ ८४ ॥ कामपालस्तु
बलवांस्त्रिलक्षबलसंयुतः ॥ सुताज्ञया ययौ युद्धं सार्द्धं पद्माकरेण वै ॥ ८५ ॥ तयोश्चासीन्महद्युद्धं सेनयोरुभयोस्तदा ॥ अहोरात्रप्रमाणेन भूपसेना
पराजिता ॥ ८६ ॥ पद्मिनीं शरणं प्राप्य तदा भ्राता पिता स्थितः ॥ तयोर्विजयमेवाशु यथाप्राप्तं चकार सा ॥ अन्तर्द्धानमयं पत्रं तयोरर्थे च सा
ददौ ॥ ८७ ॥ तौ तत्रान्तर्हितौ भूत्वा स्वखड्गेन रिपोर्बलम् ॥ अयुतं जघ्नतुर्मत्तौ तदा ते विस्मयं गताः ॥८८॥ तालनाद्या रणं त्यक्त्वा कृष्णांशं
शरणं ययुः ॥ कृष्णांशोऽपि तदा दुःखी ध्यात्वा सर्वमयीं शिवाम् ॥ ८९ ॥ दिव्यदृष्टिस्ततो जातः संप्राप्य तमयुध्यत ॥ नभोगतं कामपालं तथा
पद्माकरं नृपम् ॥ ९० ॥ बद्ध्वा तत्र मुदाविष्टो लक्षणं प्राप्य निर्भयः ॥ दोलामारोप्य तां देवीं स्वगेहाय मुदा ययौ ॥ ९१ ॥ जयचंद्राय भूपाय
दत्त्वा वै तौ च दंपती ॥ लक्षणं पद्मिनीं चैव कृतकृत्यस्तदा भवत् ॥ ९२ ॥ जयचंद्रोऽपि बलवान्दृष्ट्वा गेहे स्वदंपती ॥ ददौ दानं द्विजातिभ्यो
भूपतिं सममोचयत् ॥ ज्येष्ठे मासि सिते पक्षे कृष्णांशो गेहमागतः ॥ ९३ ॥ इति ते कथितं विप्र कृष्णांशचरितं शुभम् ॥ पुनस्ते कथयिष्यामि
दृष्टं योगबलेन वै ॥९४॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडापरपर्याये कलियुगीयेतिहाससमुच्चये त्रिंशोऽध्यायः ॥३०॥ ॥छ॥
॥ ॥ सूत उवाच ॥ ॥ शृणु विप्र महाभाग चंद्रभट्टस्तदा स्वयम् ॥ महीराजं सदःस्थं तं चन्द्रतुल्यस्समागतः ॥ १ ॥ तमागतं समालोक्य
स राजा शोकतत्परः ॥ उवाच वचनं रम्यं शृणु मंत्रिवर प्रभो ॥ २ ॥ कृष्णांशाद्यैर्महाशूरैर्मद्ग्रामे भयमागतम् ॥ कदा ते च मरिष्यंति कंटका
मम दारुणाः ॥ ३ ॥ इत्युक्तस्सतु शुद्धात्मा ध्यात्वा सर्वमयीं शिवाम् ॥ वचनं प्राह राजानं शृणु भूपशिरोमणे ॥ ४ ॥ जिष्णोरं
शात्समुद्भूतो ब्रह्मानंदो महावतीम् ॥ स कृष्णांशसखः श्रेष्ठः सर्वदा तत्प्रिये रतः ॥ ५ ॥ यदा च मलनापुत्रो देहं त्यक्त्वा गमिष्यति ॥ तदा
ते सर्वदेवांशा गमिष्यंति यतो गताः ॥ ६ ॥ इत्येवंवादिनं धीरममात्यं च महीपतिः ॥ वचनं प्राह नम्रात्मा कोऽप्यर्थश्चिंतितो मया ॥ ७ ॥
एकाकिनं महाशूरं ब्रह्मानंदं नृपोत्तमम् ॥ समाहूय महीराजो द्विरागमनहेतवे ॥ छद्मना घातयित्वा तं कृतकृत्यो भविष्यति ॥ ८ ॥ इत्युक्तं
नृपतिं प्राह महीराजः प्रसन्नधीः ॥ वचनं शृणु भो मित्र गच्छ शीघ्रं महावतीम् ॥ ९ ॥ मलनां च समागत्य बोधयित्वा तु तां स्वयम् ॥ ममा

न्तिकमुपागम्य चिरं जीव सुखी भव ॥ १० ॥ इति श्रुत्वा तु वचनं नत्वा तं च महीपतिः ॥ रात्रौ घोरं मुनिश्रेष्ठ मलनां प्राह निर्भयः ॥११॥
वधूस्तव महाराज्ञि वेला नाम सुरूपिणी ॥ संप्राप्ता यौवनवती पतियोग्या शुभानना ॥ १२ ॥ कुजातिश्चैव कृष्णांशः श्रुतो राज्ञा महात्मना ॥
अतो न प्रेषिता पुत्री तव पुत्राय धीमते ॥ अतो मद्वचनं मत्वा कुरु कार्यं तव प्रियम् ॥ १३ ॥ मया सार्द्धं तव सुतो ब्रह्मानंदो महाबलः ॥
उर्वीयां नगरीं प्राप्य तदा मत्सैन्यसंयुतः ॥ १४ ॥ महीराजमुपागम्य पत्नीं शीघ्रमवाप्स्यति ॥ नो चेन्ममाज्ञया वेला त्यक्त्वा कान्तं
मरिष्यति ॥ १५ ॥ इति श्रुत्वा तु सा राज्ञी मोहिता देवमायया ॥ राजानं समुपागम्य भ्रातुर्वचनमुत्तमम् ॥ कथयामास वै सर्वं श्रुत्वा
भूपोऽब्रवीदिदम् ॥ १६ ॥ महीपतिर्महाधूर्तो मद्विनाशाय चोद्यतः ॥ तस्य वार्ता न मे रम्या कपटस्तेन निर्मितः ॥ १७ ॥ इति श्रुत्वा च मलना
राजानं कोपसंयुतम् ॥ वचनं प्राह भो राजन्यथा बंधुस्तथा ह्यहम्॥वचनं कुरु मे राजन्नो चेत्प्राणांस्त्यजाम्यहम् ॥१८॥ इत्युक्तवादिनीं रात्रौ तदा
परिमलो नृपः ॥ ब्रह्मानंदं ददौ तस्मै स सुतो मातृवत्सलः ॥ १९ ॥ मातुराज्ञां पुरस्कृत्य मातुलेन समन्वितः ॥ रात्रौ च मातुलग्रामं संप्राप्य
मुदितोऽभवत् ॥२०॥ प्रातःकाले च संप्राप्ते हरिनागरमास्थितः ॥ एकाकी देहलीं रम्यां प्रययौ दैवमोहितः ॥ २१ ॥ सायंकाले तु संप्राप्ते महीरा
जस्य मंदिरे ॥ अगमां दर्शयामास सुरूपां दिव्यविग्रहाम् ॥ २२ ॥ अगमा च समालोक्य परं हर्षमुपाययौ ॥ माघशुक्लस्य चाष्टम्यां ब्रह्मानंदश्च
निर्भयः ॥ श्यालानां योषितः सप्त ददर्श रुचिराननाः ॥ २३ ॥ तिस्रो नार्यश्च विधवाश्चतस्रो धवसंयुताः ॥ ब्रह्मानंदं शरुमयं वाक्यमूचुर्मुदा
न्विताः ॥ २४ ॥ ब्रह्मानंद महाभाग सावधानं वचः शृणु ॥ तव पत्नी स्वयं काली वेला कलहरूपिणी ॥ संजहार धवानेव नो वयं तु सुदुः
खिता ॥ २५ ॥ सापत्न्यमस्तु तत्तस्या गृहाणास्मान्मनोहर ॥ धवान्विदेहि नो वीर पतिर्भव मुदान्वितः ॥ २६ ॥ इति श्रुत्वा वचस्तासां ब्रह्मा
नंदो महाबलः ॥ उवाच मधुरं वाक्यं श्रुतिस्मृतिसमन्वितम् ॥ २७ ॥ पुरा सत्ययुगे नारी चोत्तमा च पतिव्रता ॥ त्रेतायां मध्यमा जाता निकृष्टा
द्वापरे पुनः ॥ २८ ॥ अधमा हि कलौ नारी परपुंसोपभोगिनी ॥ अतस्तु कलिकाले वै विहाहो विधवास्त्रियाः ॥ देवलेन शुभः प्रोक्तश्चासितेन
स्वयं स्मृतौ ॥२९॥ सती सत्ये तु सा प्रोक्ता त्रेतायां पतिभस्मगा ॥३०॥ सती सा मध्यमा प्रोक्ता द्वापरे विधवा सती ॥ ब्रह्मचर्यपरा ज्ञेयाकलौ
नास्ति सतीव्रतम् ॥ ३१ ॥ अतो यूयं मया सार्द्धं भुंक्षध्वममलं सुखम् ॥ इति श्रुत्वा प्रियं वाक्यं तिस्रस्ता विधवाः स्त्रियः ॥ ३२ ॥ कृत्वा शृंगार
रूपाणि भूषणानि च सर्वशः ॥ ब्रह्मानंदमुपागम्य समालिंगनतत्पराः ॥३३॥ ता दृष्ट्वा मलनापुत्रो वचनं प्राह निर्भयः ॥३४॥ युष्माभिः पतयो

मुक्ता ये च मद्बंधुना हताः ॥ ३५ ॥ युष्मानतो न गृह्णीयां सत्यंसत्यं ब्रवीम्यहम् ॥ इति श्रुत्वा वचो घोरं हास्ययुक्तं च योषितः ॥३६॥ महीराजान्तमागम्य रुरुदुर्भृशदुःखिताः॥ राजन्वेलापतिर्धूर्तो मम धर्मं जहाति वै ॥ दंडं देहि च धूर्ताय नो चेत्प्राणांस्त्यजाम्यहम् ॥ ३७ ॥ इति श्रुत्वा महीराजो ब्रह्मानन्दं महाबलम् ॥ समाहूय वचः प्राह भवान्भूपकुलाधमः ॥ ३८ ॥ परस्त्रियं च यो भुंक्ते स याति यममंदिरम् ॥ अद्यैव त्वं सुताकान्त कारागृहमवाप्नुयाः ॥ ३९ ॥ इति श्रुत्वा वचो घोरं ब्रह्मानंदो महाबलः ॥ सत्सरोः खड्गमुत्सृज्य महीराजमधावत ॥ ४० ॥ दृष्ट्वा भयातुरो राजा चामुंडान्तमुपाययौ ॥ कपाटं दृढमाच्छाद्य तत्र वासमकारयत् ॥ ४१ ॥ ॥ ऋषय ऊचुः ॥ ॥ तासां कथं विवाहाः स्युस्तत्त्वं नो ब्रूहि विस्तरात् ॥ कुत्रत्यास्ताः किमंशाश्च दृष्टा योगेन वै त्वया ॥ ४२ ॥ ॥ सूत उवाच ॥ ॥ अंगदेशे मुनिश्रेष्ठ मायावर्मनृपोऽभवत् ॥ तामसीं पूजयित्वा वै शक्तिं सर्वविमोहिनीम् ॥ ४३ ॥ वर्मोत्तमं तया दत्तं सर्वसत्त्वभयंकरम् ॥ गृहीत्वा स तु भूपालः प्रस्थितोऽभून्महीतले ॥४४॥ प्रमदा नाम तत्पत्नी दश पुत्रानसूषुवत् ॥ कौरवांशान्महाभाग वर्षान्ते नाम मे शृणु ॥ ४५ ॥ मत्तः प्रमत्त उन्मत्त सुमत्तो दुर्मदस्तथा ॥ दुर्मुखो दुर्धरो बाहुः सुरथो विरथः क्रमात्॥तेषां स्वसानुजा चासीत्सुनाम्ना मदिरेक्षणा ॥४६॥ तस्या वै सुंदरं रूपं मदाघूर्णितलोचनम् ॥ कितवो नाम वै दैत्यो दृष्ट्वा मोहमुपागतः ॥ ४७ ॥ मायावर्माणमागत्य वचनं प्राह नम्रधीः ॥ यदि त्वं मे स्वतनयां देहि कामातुराय च ॥४८॥ तर्हि ते सकलं कार्यं करिष्यामि न संशयः ॥ इति श्रुत्वा तदा भूपो ददौ तस्मै स्वकन्यकाम् ॥४९॥ कितवो गह्वरावासी रात्रौ घोरे तमोवृते ॥ नृपगेहमुपागम्य बुभुजे स्मरविह्वलः ॥ प्रातःकाले तु तां त्युक्त्वा कन्दरान्तमुपाययौ॥५०॥वर्मदेवमते जाते ततो राजा मदातुरः॥पुरोहितं समाहूय लक्षद्रव्यसमन्वितम् ॥ महीराजाय संप्रेष्य तारकं स समावृणोत् ॥५१॥ महीराजस्तु बलवाँल्लक्षषोडशसैन्यपः ॥ संयुतः शतभूपालैर्मासान्ते समुपागमत् ॥५२॥कृष्णांशे पंचदशके संप्राप्ते व्रततत्परे ॥ तारकश्च विवाहाय बहुभूपोंऽगमानयत् ॥५३॥ मायावर्मा च तं दृष्ट्वा तारकं भूपसंयुतम् ॥ वचनं प्राह बलवान्राजराज वचः शृणु ॥ ५४॥ कितवो नाम मेधावी दैत्यवंशयशस्करः ॥ तेन मे पीडिता बाला रात्रौ घोरतमोवृते ॥५५॥ हता भूपकुमाराश्च मत्सुतार्थं समागताः ॥ भक्षितास्तेन दैत्येन संययुस्ते यमालयम् ॥ ५६ ॥ तेषां च बहुधा द्रव्यं लुंठयित्वा मदातुरः ॥ मत्सुतायै ददौ सर्वं तस्मात्त्वं दितिजं जहि ॥५७॥ इति श्रुत्वा महीराजस्सर्वसैन्यसमन्वितः ॥ कितवं च समाहूय महद्युद्धमचीकरत् ॥५८॥ कितवस्स तु मायावी जित्वा सर्वान्महाबलान् ॥ तारकं च समाहृत्य गुहायां समुपागमत् ॥ ५९ ॥ तारकश्च तदा दुःखी ध्यात्वा शंकरमुत्तमम् ॥ पाषाणभूतो ह्यगमन्महादेवप्रसादतः ॥ ६० ॥

एतस्मिन्नंतरे प्राप्ता महावतीनिवासिनः ॥ क्षत्रिया दशसाहस्राः कृष्णांशाद्यैश्च पालिताः ॥ ६१ ॥ महीराजस्तु तान्दृष्ट्वा बलखानिं महाबलम् ॥
उवाच वचनं प्रेम्णा पुत्रशोकेन दुःखितः ॥ ६२ ॥ तारकः कितवेनैव संहतो दितिजेन वै ॥ यदि त्वं मे सुतं देहि कोटिस्वर्णं ददामि तत् ॥६३॥
इति श्रुत्वा तु ते धीराः कृष्णांशो देवसिंहकः ॥ वत्सजौ च तथागम्य कितवं रुरुधुर्बलात् ॥६४॥ अहोरात्रमभूद्युद्धं तेषां तेन समन्वितम् ॥ कितवस्तु
रुषाविष्टः कृष्णांशं देवसिंहकम् ॥ बलखानिं मोहयित्वा जगर्ज च पुनःपुनः ॥ ६५ ॥ सुखखानिस्तदा शूरः कितवं बलवत्तरम् ॥ स्वखड्गेन
शिरस्तस्य छित्त्वा राजानमागमत् ॥ ६६ ॥ त्रयस्ते सुखिनो भूत्वा सुखखानिं प्रशस्य च ॥ महीराजाय च ददौ तारकं कैतवं शिरः ॥
॥ ६७ ॥ तदा भूपसुता देवी सुखखानिं समावृणोत् ॥ महीपतिस्तदागत्य तत्सुतां मदिरेक्षणाम् ॥ ६८ ॥ संबोध्य विविधैर्वाक्यैर्भूमिराजांतमागमत्
॥ तारकस्य तया सार्द्धं विवाहो मुदितोऽभवत् ॥ ६९ ॥ कोटिस्वर्णं नृपात्प्राप्य बलखानिर्महाबलः ॥ प्रययौ बंधुभिस्सार्द्धं शिरीषाख्यपुरं
शुभम् ॥ ७० ॥ ॥ सूत उवाच ॥ ॥ गुर्जरे नृपतिश्चासीन्मूलवर्मा महाबलः ॥ प्रभावती तस्य सुता दशपुत्रानुजाभवत् ॥ ७१ ॥ बलश्च प्रबलश्चैव
सुबलो बलवान्बली ॥ सुमूलश्च महामूलो दुर्गो भीमो भयंकरः ॥ ७२ ॥ करभो नाम वै यक्षो लह्लराजस्य सेवकः ॥ प्रभावतीं समालोक्य
मुमोह मदविह्वलः ॥ पञ्चवर्षांतरे जाते तेन भुक्ता कुमारिका ॥ ७३ ॥ मूलवर्मा महीराजं समाहूय ससैन्यकम् ॥ वचनं प्राह नम्रात्मा राजराज
वचः कुरु ॥ ७४ ॥ प्रभावतीं शुभां कन्यां नृहराय ददाम्यहम् ॥ इत्युक्त्वा नृहरं पुत्रं समाहूय स्वमंदिरे ॥ ददौ वेदविधानेन सुतां च नृहराय वै ॥
॥ ७५ ॥ पक्षमात्रांतरे यक्षः करभस्तत्र चागतः ॥ दंपती पीडयामास जित्वा सर्वमहीपतीन् ॥ ७६ ॥ महीराजस्तदा दुःखी वत्सजौ बलवत्तरौ
समाहूय कथित्वाग्रे रुरोद बलवान्बली[2] ॥ ७७ ॥ दयालू वत्सजौ वीरौ करभांतमुपेयतुः ॥ करभस्तौ समालोक्य तत्रैवांतर्धिमागमत् ॥ नागपाशेन
तौ बद्ध्वा पीडयामास दंपती ॥ ७८ ॥ इति श्रुत्वा स कृष्णांशः करभं यक्षकिंकरम् ॥ बद्ध्वा योगबलेनैव मोचयामास दम्पती ॥ ७९ ॥
भ्रातरौ तौ समागम्य नागपाशं तु चासिना ॥ छित्त्वा मुमोद बलवान्कोटिस्वर्णं गृहीतवान् ॥ भूमिराजः प्रसन्नात्मा देहलीं मुदितोऽगमत् ॥ ८० ॥
॥ ॥ सूत उवाच ॥ ॥ काश्मीरे च नृपश्चासीत्कैकयो नाम विश्रुतः ॥ दश पुत्राश्च तस्यैव कन्या च मदनावती ॥ ८१ ॥ कामः प्रकामः संकामो
निष्कामो निरपत्रपः ॥ जयश्च विजयश्चैव जयन्तो जयवाञ्जयः ॥ ८२ ॥ स भूपो भूमिराजं च समाहूय वचोऽब्रवीत् ॥ पुत्रस्ते वै सरदनो

---

१ सेनावान् । २ दैहिकसामर्थ्यवान् ।

मत्कन्यां प्राप्तुमर्हति ॥ ८३ ॥ गंधर्वस्सुकलो नाम मत्कन्यां च शुभाननाम् ॥ ज्योत्स्नायां निशि संहृत्य तया सार्द्धं हि दीव्यति ॥ ८४ ॥ पूर्णिमायां च संप्राप्तः स वै चित्ररथप्रियः ॥ वैशाखस्यासिते पक्षे चाष्टमी चाद्य मंगला ॥ वधं कुरुनृपश्रेष्ठ देहलीं गंतुमर्हसि ॥ ८५ ॥ इति श्रुत्वा महीराजो लक्षसैन्यसमन्वितः ॥ गृहीत्वा दंपती शीघ्रं देहलीनगरं ययौ ॥ ८६ ॥ वैशाख्यां सुखजातायां सुकलो नाम वीर्यवान् ॥ गंधर्वो दशसाहस्रैरुरोध नगरं रुषा ॥ ८७ ॥ नगराच्च बहिर्जाता ये शूरा मदविह्वलाः ॥ हत्वा तान्सुकलः शीघ्रं राज्ञे दुःखं चकार ह ॥ ८८ ॥ भयभीतो महीराजो ध्यात्वा सर्वमयीं शिवाम् ॥ सुष्वाप निशि शुद्धात्मा तुष्टाभूज्जगदंबिका ॥ ८९ ॥ कृष्णांशादीन्बोधयित्वा तैश्च सार्धं समागमत् ॥ तेषां चासीन्महद्युद्धं गंधर्वेण तदाह्निकम् ॥ ९० ॥ बलखानिश्च बलवाञ्छतगंधर्वमुत्तमम् ॥ त्रिदिनांते च संहृत्य सुखखानिस्तथैव च ॥ ९१ ॥ सुकलश्च तदा क्रुद्धो गांधर्वीं च ससर्ज ह ॥ बहुधा ते हि गंधर्वास्तैश्च सार्द्धं समारुधन् ॥ ९२ ॥ भयभीतास्तदा सर्वे रामांशं शरणं ययुः ॥ आह्लादश्च प्रसन्नात्मा शारदां सर्वमंगलाम् ॥ ९३ ॥ दिवासूक्तेन तुष्टाव तदा प्रादुरभूच्छिवा ॥ गंधर्वान्मोहयित्वाशु द्रावयामास शारदा ॥ ९४ ॥ पराजिते च गंधर्वे कृष्णांशो जनमोहनः ॥ महीराजमुपागम्य कोटिस्वर्णं गृहीतवान् ॥ ९५ ॥ षोडशाब्दे च कृष्णांशे संप्राप्ते देविपूजके ॥ मार्गमासं तु संप्राप्ते मर्दनश्च विवाहितः ॥ ९६ ॥ ॥ सूत उवाच ॥ ॥ पुंड्रदेशे महाराजो नागवर्मा महाबलः ॥ बभूव तक्षकपरो धर्मवाञ्जगतीतले ॥ ॥ ९७ ॥ पत्नी नागवती तस्य तक्षकस्य सुता शुभा ॥ पितुः शापेन सञ्जाता कलिंगाधिपतेः सुता ॥ ९८ ॥ दशैव तनयाश्चासन्कन्या तस्य शुभानना ॥ सुवेला नाम विख्याता रूपयौवनशालिनी ॥ ९९ ॥ पुरोहितं समाहूय महीराजाय प्रैषयत् ॥ स गत्वा कथयित्वाग्रे मर्दनो वरितो मया ॥ १०० ॥ महीराजस्तु तच्छ्रुत्वा त्रिलक्षबलसंयुतः ॥ मंगलं कारयामास गत्वा नागपुरे शुभे ॥ १०१ ॥ सुवेला पितरं प्राह देहि मे नागभूषणम् ॥ विवाहं हि करिष्यामि नो चेत्प्राणांस्त्यजाम्यहम् ॥ १०२ ॥ इति श्रुत्वा नागवर्मा महीराजान्तमाययौ ॥ सुवेलाया अभिप्रायं वर्णयामास विस्तरात् ॥ १०३ ॥ इत्युक्तः स महीराजो विस्मितोभूत्सुदुःखितः ॥ प्रेषयामास वै पत्रं यत्राह्लादादयः स्थिताः ॥ १०४ ॥ इति ज्ञात्वा तदाऽऽह्लादः शूरपंचशतावृतः ॥ कृष्णांशवत्सजैस्सार्द्धं दिनांते च समागमत् ॥ १०५ ॥ शतयोजनगामिन्यो वाजिन्यश्च द्वियामके ॥ सहस्रयोजनं वीर्यं तासां चैव दिने निशि ॥ १०६ ॥ कलांशादुद्भवा अश्वा वाजिनां च हरेः स्वयम् ॥ रत्नाश्वस्य कलांशश्च कपोतो हरणीभवः ॥ १०७ ॥

---

१ मत्वर्थीयोच् । तद्वत्यां लक्षणा वा ।

गायत्रो योभवद्राजी कालचक्रप्रवर्तकः ॥ तत्कलांशात्समुद्भूतो रविदत्तः पपीहकः ॥ हरिणी नाम तच्छक्तिः कलांशाद्भूमिमागता ॥ १०८ ॥
सुखखानिः पपीहस्थो बलखानिः कपोतगः॥ आह्लदश्च करालस्थो बिंदुलस्थो हरेः कला ॥१०९॥ गत्वा ते तु महीराजं नत्वा तुंगासनां ययुः ॥
प्रसन्नः स महीराजो वचनं प्राह नम्रधीः ॥ ११० ॥ मम पुत्राश्च युष्माभिस्त्रयः शूरा विवाहिताः ॥ तथैव मर्दनं वीरं समुद्वाह्य सुखी भव ॥१११॥
इति श्रुत्वा स आह्लादो गत्वा भूतलमुत्तमम् ॥ रसातलं च विख्यातं नागिनीं प्राह निर्भयः ॥ ११२ ॥ सुप्तो हि तव भर्ता च पुंडरीकः शुभाननः
बोधयाशु महाराज्ञि नागानां नो दयां कुरु ॥११३॥ इत्युक्ता साह तं वीरं पुंडरीकश्च मत्पतिः॥ रुषाविष्टश्च बलवान्दाहयेच्च वपुस्तव ॥ ११४ ॥
इति श्रुत्वा विहस्याह तव भर्तुर्न नो भयम् ॥ इत्येवं वचनं कृत्वा पद्भ्यां पुच्छमताडयत् ॥ ११५ ॥ प्रबुद्धश्च तदा राजा नागानां च महाबलः॥
ज्वालामालां स्वदेहाच्च जनयामास वीर्यवान्॥११६॥दृष्ट्वा तद्विषमुज्ज्वालं स ध्यात्वा सर्वमंगलाम्॥शमयामास बलवान्देवीपूजनतत्परः ॥११७॥
पुंडरीकः प्रसन्नात्मा नागभूषणमुत्तमम् ॥ आह्लादाय ददौ शीघ्रं सर्वशृङ्गारसंयुतम् ॥ ११८ ॥ आह्लादस्तु हयारूढो महीराजाय दत्तवान् ॥
विवाहं कारयामास वैवाहिकविधानतः ॥ कोटिस्वर्णं नृपात्प्राप्तं गृहीत्वा शीघ्रमाययौ ॥ ११९ ॥ हयविद्यासमारूढास्ते हया गेहमागताः ॥
ज्ञेयाः पंचशतं सर्वे सशूरा गृहमाययुः ॥ १२० ॥ सूत उवाच ॥ मद्रदेशेषु यश्चासीन्मद्रकेशो महाबलः॥पञ्चाब्दं पूजयामास स्वर्गवैद्यौ सुरोत्तमौ
॥ १२१ ॥ तयोश्च वरदानेन दश पुत्रा बभूविरे ॥ सुता कान्तिमती जाता रूपयौवनशालिनी ॥१२२॥ स महीराजमाहूय त्रिलक्षबलसंयुतम् ॥
ददौ कन्यां विधानेन मद्रेशः सूर्यवर्मणे ॥१२३॥ नवोढां तु तदा पत्नीं सूर्यवर्मा गृहीतवान् ॥ स्वगेहाय ययौ शीघ्रं महीराजो बलैस्सह ॥ १२४॥
कर्बुरो नाम मायावी विभीषणसुतो बली ॥ राक्षसस्तत्र संप्राप्तो दृष्ट्वा कांतिमतीं शुभाम् ॥ १२५ ॥ मद्रकेशस्य तनयां दिव्यशोभासमन्वि
ताम् ॥ जहार पश्यतां तेषां सह्याद्रिगिरिमाययौ ॥ १२६ ॥ महीराजस्तदा दुःखी विललाप भृशं मुहुः ॥ देहलीगेहमागम्य दूतमाहूय सत्व
रम् ॥ १२७ ॥ कृष्णांशं प्रेषयामास स गत्वा समवर्णयत् ॥ ज्ञात्वा ते तु हयारूढाः शूराः पंचशतावृताः ॥ १२८ ॥ सह्याद्रिगिरिमागम्य कृष्णां
शः कर्बुरं प्रति ॥ निर्भयो वचनं प्राह शृणु राक्षससत्तम ॥ १२९ ॥ बिभीषणो भक्तराजस्तस्य त्वं दयितः सुतः ॥ तस्मत्त्वया न कर्तव्यं पापं वंश
विनाशनम् ॥ रावणेन पुरा सीता संहृता विदितं तव ॥ १३० ॥ इति श्रुत्वा स होवाच पुरेयं दयिता प्रिया ॥ मम गंधर्वतनया मुनिशापा
न्महीं गता ॥ १३१ ॥ अतोऽहं तद्वियोगेन त्यक्त्वा लंकां महापुरीम् ॥ मद्रकेशमहं प्राप्य मद्रकेशभयादहम् ॥ न जहार प्रियां रम्यां तत्रोषित्वा

दिनं बहु ॥ १३२ ॥ अद्य मे वशगा साभून्नाम्ना कांतिमती शुभा ॥ जित्वा मां च गृहाणाशु समर्थाश्च वयं सदा ॥ १३३ ॥ इति श्रुत्वा स कृष्णांशः खड्गयुद्धमचीकरत् ॥ सप्तरात्रेण तं जित्वा लब्ध्वा कांतिमतीं शुभाम् ॥ तदा च देहलीं प्राप्य महीराजान्तमाययौ ॥१३४॥ कोटिस्वर्णं ददौ राजा कृष्णांशाय महात्मने ॥ स वीरो बंधुभिः सार्धं प्रमदावनमाययौ ॥१३५॥ ॥ सूत उवाच ॥ ॥ पट्टनाख्यपुरे राजा नाम्ना पूर्णामलो बली ॥ वसूनाराधायामास पंचवर्षान्तरे मुदा ॥ तदा प्रसन्नास्ते देवा ददुस्तस्मै वरं शुभम् ॥ १३६ ॥ वरदानाच्च सञ्जाता दश पुत्रा महीपतेः ॥ विद्युन्माला सुता जाता रूपयौवनशालिनी ॥ १३७ तद्विवाहार्थमाहूय महीराजं महाबलम् ॥ सप्तलक्षबलैः सार्द्धं तत्पुत्राय सुतां ददौ ॥ १३८ ॥ महीराजसुतो भीमः पत्नीं प्राप्य मनोरमाम् ॥ गेहमागम्य तैः सार्द्धं देहलीं हर्षमाप्तवान् ॥ १३९ ॥ तदा पैशाचदेशस्थः सहोदश्च महीपतिः ॥ म्लेच्छैश्च दशसाहस्रैर्विद्युन्मालार्थमुद्यतः ॥१४०॥ बलिदैत्याज्ञया प्राप्तः कुरुक्षेत्रं शुभस्थलम् ॥ भित्त्वा मूर्तीः सुराणां गोरक्तैस्तीर्थजलं कृतम् ॥ ॥ १४१ ॥ पत्रमालिख्य बलवान्महीराजाय धर्मिणे ॥ स्वदूतः प्रेषितस्तेन श्रुत्वा भूपोऽब्रवीदिदम् ॥ १४२ ॥ भवान्म्लेच्छपती राजा विद्युन्मालार्थमुद्यतः ॥ मां शब्दवेधिनं विद्धि चौर्यदेशधुरंधरम् ॥ १४३ ॥ इत्युक्त्वा स त्रिलक्षैश्च कुरुक्षेत्रमुपागतः ॥ तयोश्चासीन्महद्युद्धमहोरात्रं भयानकम् ॥ १४४ ॥ निशीथे समनुप्राप्ते ज्येष्ठे मासि तमोमये ॥ पातालाद्बलिरागत्य दैत्यायुतसमन्वितः ॥ १४५ ॥ नृपसैन्यं जघानाशु भक्षयित्वा पुनः पुनः ॥ भयभीतस्तदा राजा शारदां शरणं ययौ ॥ १४६ ॥ एतस्मिन्नंतरे देवाः कृष्णांशाद्या महाबलाः ॥ क्षणमात्रेण संप्राप्तास्तदा पदचरा मुने ॥ १४७ ॥ हत्वा दैत्यसहस्राणि बलिदैत्यमुपाययुः ॥ देशजौ वत्सजौ वीरौ देवसिंहस्तथैव च ॥ स्वखड्गैस्तर्पयामास दैत्यराजं महाबलम् ॥ १४८ ॥ तदा प्रसन्नो बलवान्दैत्यराजो बलिः स्वयम् ॥ वरं वृणुत तानाह ते तु श्रुत्वाब्रुवन्वचः ॥१४९॥ आर्यदेशं च ते दैत्यानागच्छन्तु त्वया सह॥म्लेच्छदेशं सदा प्राप्य भक्षध्वं म्लेच्छधर्मगान् ॥ १५० ॥ इति श्रुत्वा वचो घोरं विप्रियं च बलिः स्वयम् ॥ कृष्णांशमुदयं गत्वा तुष्टाव परया गिरा ॥ १५१ ॥ तदा प्रसन्नः कृष्णांशो वचनं प्राह निर्भयः ॥ यावदहं भूमिवासी तावत्त्वं गेहमावस ॥ तत्पश्चाद्भूमिमागत्य यथायोग्यं कुरुष्व भोः ॥ १५२ ॥ इति तद्वचनं श्रुत्वा सहोदो नीलसंयुतः ॥ पैशाचं देशमगमत्पुनः प्राप्तो रसातलम् ॥ १५३ ॥ भूमिराजः प्रसन्नात्मा कोटिस्वर्णं ददौ तदा ॥ गजारूढाश्च ते पंच संययुश्च महावतीम् ॥ १५४ ॥ ॥ सूत उवाच ॥ ॥ वर्द्धनो भूमिराजस्य सुतः सर्वेभ्य उत्तमः॥पंचमाब्दवया भूत्वा श्रीदं तुष्टाव भक्तितः॥ वर्षांतरे च भगवान्ददौ सर्वं शुभं निधिम् ॥१५५॥ तत्सर्वनिधिभावेन नृपकोशः सम

न्ततः ॥ पूर्णो बभूव कनकै राजराजप्रभावतः ॥१५६॥ किंनरी नाम या कन्या मंकणस्य प्रकीर्तिता ॥ कुबेरश्च ददौ तस्मै वर्द्धनाय प्रियाय च ॥
इति ते कथितं सर्वं विवाहचरितं मुने ॥ १५७ ॥ धुन्धुकारो महाशूरो लक्षसैन्यसमन्वितः ॥ ब्रह्मानंदमुपागम्य युद्धार्थाय तमाह्वयत् ॥ १५८ ॥
एकत्रिंशाब्दके प्राप्ते कृष्णांशे बलवत्तरे ॥ एकाकी मलनापुत्रो दृष्ट्वा सैन्यमुपस्थितम् ॥ ब्रह्मास्त्रं चाप आधाय चार्धसैन्यमदाहयत् ॥ १५९ ॥
पंचायुताश्च ते शूरा भयभीता दिशो गताः ॥ धुन्धुकारो रणं त्यक्त्वा भूमिराजमुपागमत् ॥ १६० ॥ महीराजस्तदा दुःखी भयभीतः समंततः ॥
महीपतिं समाहूय चन्द्रभट्टं च सोऽब्रवीत् ॥ १६१ ॥ कथं जयो मे भविता तत्सर्वं मंत्रयाशु वै ॥ महीपतिस्तदा प्राह शृणु भूपशिरोमणे ॥
॥ १६२ ॥ कृत्वा नारीमयं वेषं चामुण्डं बलशालिनम् ॥ वेलां मत्वा च तद्दोलां ब्रह्मानंदाय चार्पय ॥ १६३ ॥ चत्वारस्ते सुताः शूरा धुंधुका
रेण संयुताः ॥ छद्मना च स्वशस्त्रैश्च घातयेयुस्तमूर्जिताः ॥ १६४ ॥ इति श्रुत्वा महीराजो ब्रह्मानंदाय हर्षितः ॥ तथा कृत्वा ददौ दोलां पंचशू
रैश्च पालिताम् ॥ १६५ ॥ सायंकाले तु संप्राप्ते माघशुक्लाष्टमीदिने ॥ वेलावंशश्च चामुण्डो ब्रह्मानंदमुपाययौ ॥ १६६ ॥ छद्मना च त्रिशूलं च
बलात्कृत्वा रिपूदरे ॥ रुरोद बलवाञ्छूरस्ते तु शूराः समागताः ॥ १६७ ॥ तारको हृदि तं बाणैः सूर्यवर्मा च तोमरैः ॥ भीमश्च गदया चात्र
वर्द्धनश्च तदासिना ॥ धुंधुकारश्च भल्लेन जघान रिपुमूर्द्धनि ॥ १६८ ॥ मूर्छितः पतितो भूमौ ब्रह्मानंदो महाबलः ॥ महद्व्रणयुतस्तत्र स्वखड्गं च
समाददत् ॥ १६९ ॥ भीमस्य च शिरः कायाद्वर्द्धनस्य तथैव च ॥ छित्त्वा तथैव भूमध्ये सूर्यवर्माणमागतः ॥ १७० ॥ तारको धुंधुकारश्च चामु
ण्डश्च तथैव च ॥ ब्रह्मानंदं तदा त्यक्त्वा महीराजान्तमाययौ ॥ १७१ ॥ हतेषु तेषु पुत्रेषु महीराजो भयातुरः ॥ वेलापार्श्वमुपागम्य रुरोद बहु
दुःखितः ॥ १७२ ॥ इति श्रुत्वा तदा वेला दोलामारुह्य सत्वरम् ॥ ब्रह्मानंदं ययौ शीघ्रं मूर्च्छितं तं ददर्श ह ॥ १७३ ॥ कनिष्ठामृतभावेन
वेलाया बलवांस्तदा ॥ उत्थाय रुदतीं नारीं ददर्श रुचिरान्विताम् ॥ १७४ ॥ का त्वं कस्य सुता रम्या संग्रामे मामुपस्थिता ॥ जलं देहि महा
सुभ्रूर्वचनं कुरु सुप्रियम् ॥ १७५ ॥ इति श्रुत्वा तदा वेला जलं दत्त्वा शुचान्विता ॥ वचनं प्राह वै रात्रौ शृणु त्वं मलनासुत ॥ १७६ ॥
वेला नाम महीभर्तुः सुताहं त्वामुपस्थिता ॥ मत्पतिश्च भवान्धीरश्छद्मना वंचकैर्हतः ॥ जीवनं कुरु राजेंद्र भुंक्ष्व भोगान्मया सह ॥ १७७ ॥
इत्युक्तः स तु तामाह कलिकाले समागते ॥ जीवनान्मरणं श्रेष्ठं तस्मान्मद्वचनं कुरु ॥ १७८ ॥ हरिनागरमारुह्य मया सार्द्धं शुभानने ॥ गत्वाती
र्थानि रम्याणि संत्यजामि कलेवरम् ॥ १७९ ॥ इत्युक्त्वा तौ समारुह्य पूर्वे च कपिलान्तिकम् ॥ गत्वा स्नात्वा च विधिवत्ततोऽग्रे जग्मतुर्मुदा ॥ १८० ॥

पृथक्पृथक्सुतार्थानि स्नात्वा दत्त्वा च जग्मतुः ॥ दक्षिणे सेतुबंधान्ते पश्चिमे द्वारिकामनु ॥ १८१ ॥ उत्तरे बदरीस्थाने स्नात्वा तीर्थानि
जग्मतुः ॥ गंधमादनमागत्य ब्रह्मानंदो महाबलः ॥ १८२ ॥ वेलामुवाच वचनं भाद्रशुक्लाष्टमीदिने ॥ देहं त्यजामि भो राज्ञि तारकं जहि
भूतले ॥१८३॥ इति श्रुत्वा तु सा प्राह स्वामिन्मद्वचनं कुरु ॥ कुरुक्षेत्रं मया सार्द्धं भवान्वै गंतुमर्हति ॥१८४॥ स्थित्वा तत्र समस्वान्तो भज
त्वं सर्वमंगलाम् ॥ अहं महावतीं प्राप्य पुनर्वै देहलीं प्रति ॥ १८५ ॥ तारकं च तथा हत्वा त्वत्समीपं व्रजाम्यहम् ॥ इत्युक्तः स तथेत्युक्त्वा
ब्रह्मध्यानपरोऽभवत् ॥ १८६ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडापरपर्याये कलियुगीयेतिहाससमुच्चये एकत्रिं
शोऽध्यायः ॥ ३१ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ द्वात्रिंशाब्दे च कृष्णांशे संप्राप्ते योगरूपिणी ॥ वेला नाम शुभा नारी हरिनागरसंस्थिता ॥
महावतीं समागम्य सभायां तत्र चाविशत् ॥ १ ॥ एतस्मिन्नंतरे प्राप्ताः कृष्णांशाद्या महाबलाः ॥ नत्वा परिमलं भूपं वेला वचनमब्रवीत् ॥ २ ॥
महीपतिं प्रियं मत्वा कृष्णांशं नृप दुष्प्रियम् ॥ त्वया मे घातितो भर्ता ब्रह्मानंदो महाबलः ॥ ३ ॥ महीराजसुतैर्धूर्तैस्तारकाद्यैर्महाबलैः ॥
नारीवेषं च चामुण्डो धुंधुकारेण कारितः ॥ ४ ॥ स्वामिनं प्रति चागम्य ते जग्मुश्छद्मना प्रियम् ॥ कुरुक्षेत्रं स्थितः स्वामी
महत्या मूर्छयान्वितः ॥ तस्माद्यूयं मया सार्द्धं गंतुमर्हथ तं प्रति ॥ ५ ॥ इति घोरतमं वाक्यं श्रुत्वा सर्वे शुचान्विताः ॥ धिग्भूपतिं
च मलनां ताभ्यां नो घातितः सखा ॥ ६ ॥ इत्युक्त्वोच्चैश्च रुरुदुः कृष्णांशाद्या महाबलाः ॥ पत्राणि प्रेषयामासुः स्वकीयान्भूपती
न्प्रति ॥ ७ ॥ क्रोधयुक्ता तदा वेला लिखित्वा पत्रमुल्बणम् ॥ महीराजाय संप्रेष्य मलनागेहमागमत् ॥ ८ ॥ तत्पत्रं च महीराजो वाचयि
त्वा विधानतः ॥ ज्ञात्वा तत्कारणं सर्वं तन्निशम्य विशाम्पतिः ॥ ९ ॥ चिन्ताकलेवरं प्राप्य सुखनिद्रां व्यनाशयत् ॥ आहूय भूपती
न्सर्वान्घोरयुद्धोन्मुखोऽभवत् ॥ १० ॥ चतुर्विंशतिलक्षैश्च शूरैर्भूपसमन्वितैः ॥ कुरुक्षेत्रं ययौ शीघ्रं धृतराष्ट्रांशसंभवः ॥ ११ ॥ तथा
परिमलो भूपो लक्षषोडशसैन्यपः ॥ द्रुपदांशो ययौ शीघ्रं वेलया स्वकुलैः सह ॥ १२ ॥ स्यमन्तपंचके तीर्थे शिबिराणि चकार ह ॥ ब्रह्मा
नंदः स्थितो यत्र समाधिध्यानतत्परः ॥ १३ ॥ गंगाकूले च ते सर्वे कौरवांशा महाबलाः ॥ शिबिराणि विचित्राणि चक्रुस्ते विजयैषिणः ॥१४॥
कृत्वा ते कार्तिकीस्नानं दत्त्वा दानान्यनेकशः ॥ मार्गकृष्णद्वितीयायां युद्धभूमिमुपाययुः ॥ १५ ॥ विष्वक्सेनीयभूपालो लहरस्तत्र चागतः ॥
कौरवांशाश्च तत्पुत्राः षोडशैव महाबलाः ॥ पूर्वजन्मनि यन्नाम तन्नाम्ना प्रश्रिता इह ॥ १६ ॥ दुस्सहो दुश्शलश्चैव जलसंधः समः सहः ॥ विंद

स्तथानुविंदश्च सुबाहुर्दुष्प्रधर्षणः ॥ १७ ॥ दुर्मर्षणश्च दुष्कर्णः सोमकीर्तिरनूदरः ॥ शलः सत्त्वो विवित्सुश्च क्रमाज्ज्ञेया महाबलाः ॥ १८ ॥ तोम
रान्वयभूपालो बाह्लीकपतिरागतः ॥ त्रिलक्षैश्च तथा सैन्यैः सप्तपुत्रैश्च भूपतिः ॥ १९ ॥ चित्रोपचित्रौ चित्राक्षश्चारुश्चित्रः शरासनः ॥ सुलोचनः
सवर्णश्च पूर्वजन्मनि कौरवाः ॥ २० ॥ तेषामंशाः क्रमाज्जाता अभिनंदनदेहजाः ॥ महानंदश्च नंदश्च परानंदोपनंदोकौ ॥ सुनंदश्च सुरानन्दः
प्रनंदः कौरवांशकः ॥ २१ ॥ नृपः परिहरवंशीयो मायावर्मा महाबली ॥ लक्ष सैन्ययुतः प्राप्तो दशपुत्रसमन्वितः ॥ २२ ॥ दुर्मदो दुर्विगाहश्च
नंदश्च विकटाननः ॥ चित्रवर्मा सुवर्मा च सुदुर्मोचन एव च ॥ २३ ॥ ऊर्णनाभः सुनाभश्च चोपनंदश्च कौरवाः ॥ तेषामंशाः क्रमाज्जाताः सुता
अंगपतेः स्मृताः २४ ॥ मत्तः प्रमत्त उन्मत्तः सुमत्तो दुर्मदस्तथा ॥ दुर्मुखो दुर्द्धरो वायुः सुरथो विरथः क्रमात् ॥ २५ ॥ शुक्लवंशीयभूपालो
मूलवर्मा समागतः ॥ लक्षसैन्यैश्च बलवान्दशपुत्रसमन्वितः ॥ २६ ॥ अयोबाहुर्महाबाहुश्चित्रांगश्चित्रकुण्डलः ॥ चित्रायुधो निषंगी च पाशी
वृन्दारकस्तथा ॥ २७ ॥ दृढवर्मा दृढक्षत्रः पूर्वजन्मनि कौरवाः ॥ तेषामंशा महीं जाता गृहे ते मूलवर्मणः ॥ २८ ॥ बलश्च प्रबलश्चैव सुबलो
बलवान्बली ॥ सुमूलश्च महामूलो दुर्गो भीमो भयंकरः ॥ २९ ॥ कैकयश्चंद्रवंशीयो लक्षसैन्यसमन्वितः ॥ दशपुत्रान्वितः प्राप्तः कुरुक्षेत्रे महा
रणे ॥ ३० ॥ भीमवेगो भीमबलो बलाकी बलवर्द्धनः ॥ उग्रायुधो दंडधरो दृढसंधो महीधरः ॥३१॥ जरासंधः सत्यसंधः पूर्वजन्मनि कौरवाः ॥
तेषामंशाः समुद्भूताः कैकयस्य गृहे शुभे ॥ ३२ ॥ कामः प्रकामः संकामो निष्कामो निरपत्रपः ॥ जयश्च विजयश्चैव जयंतो जयवाञ्जयः ॥ ३३ ॥
नागवंशीयभूपालो नागवर्मा समागतः ॥ लक्षसेनान्वितः प्राप्तो दशपुत्रसमन्वितः ॥३४॥ पूर्वजन्मनि यन्नाम्ना तन्नाम्ना कौरवा भुवि ॥ पुंड्रदेशपतेः
पुत्रा जाता दश शिवाज्ञया ॥३५॥ उग्रश्रवा उग्रसेनः सेनानीर्दुष्परायणः॥ अपराजितः कुण्डशायी विशालाक्षो दुराधरः॥३६॥दृढहस्तः सुहस्तश्च
सुतास्ते नागवर्मणः ॥ ३७ ॥ मद्रकेशः समायातस्तोमरान्वयसंभवः ॥ लक्षसैन्यैर्युतो राजा दशपुत्रसमन्वितः ॥ ३८ ॥ वातवेगः सुवर्चाश्च नाग
दंतोग्रयाजकः ॥ आदिकेतुश्च वक्रशी च कवची क्राथ एव च ॥ ३९ ॥ कुण्डश्च कुण्डधारश्च कौरवाः पूर्वजन्मनि ॥ तन्नाम्ना भुवि वै जाता मद्र
केशस्य मंदिरे ॥ ४० ॥ नृपः शार्दूलवंशीयो लक्षसैन्यसमन्वितः ॥ पूर्णामलो मागधेशो दशपुत्रान्वितो ययौ ॥ ४१ ॥ वीरबाहुर्भीं रथश्चोग्रश्चैव
धनुर्धरः॥ रौद्रकर्मा दृढरथोऽलोलुपश्चाभयस्तथा॥४२॥अनाधृष्टः कुण्डभेदी कौरवाः पूर्वजन्मनि ॥ पूर्णामलस्य वै गेहे तन्नाम्ना भुवि [1]संभवः॥४३॥

---

[1] तेषामिते शेषः ।

मंकणः किंनरो नाम रूपदेशे महीपतिः ॥ चीनदेशात्परे पारे रूमदेशःस्मृतो बुधैः ॥ नरः किन्नरजातीयो वसति प्रियदर्शनः ॥ ४४ ॥ मंकणश्च
तदा प्राप्तः किन्नरायुतसंयुतः ॥ अष्टपुत्रान्वितः प्राप्तो यत्र सर्वनृपाः स्थिताः ॥ ४५ ॥ विरावी प्रथमश्चैव प्रमाथी दीर्घरोमकः ॥ दीर्घबाहु
र्महाबाहुर्व्यूढोराः कनकध्वजः ॥ ४६ ॥ पूर्वजन्मनि यन्ना[1]म्ना तन्नाम्ना किन्नरा भुवि ॥ विरजोंशश्च यो जातो मंकणो नाम किन्नरः ॥४७॥ नेत्रसिंहः
समायातो लक्षसैन्यसमन्वितः ॥ शल्यांशः स तु विज्ञेयः शार्दूलान्वयसंभवः ॥ ४८ ॥ तदा गजपती राजा लक्षसैन्यसमन्वितः ॥ संप्राप्तः शकुने
रंशस्त्यक्त्वा गेहे स्वपुत्रकान् ॥४९॥ मयूरध्वज एवापि लक्षसैन्यसमन्वितः ॥ मकरंदं गृहे त्यक्त्वा विराटांशः समागतः ॥ ५० ॥ वीरसेनः समा
यातः कामसेनसमन्वितः ॥ लक्षसेनान्वितस्तत्र चोग्रसेनांशसंभवः ॥५१॥ लक्षणश्च समायातः सप्तलक्षबलैर्युतः ॥ संत्यज्य पद्मिनीं नारीं महा
कष्टेन भूपतिः ॥५२॥ तालनो धान्यपालश्च लह्लसिंहस्तथैव च ॥ भीमस्यांशो युयुत्सोश्च कुंतिभोजस्य वै क्रमात् ॥५३॥ आह्ला[2]दश्च समायातः
कृष्णांशेन समन्वितः ॥ जयन्तेन च वै वीरो लक्षसैन्यान्वितो बली ॥ ५४ ॥ जगन्नायक एवापि शूरायुतसमन्वितः ॥ संप्राप्तो भगदत्तांशो
गौतमान्वयसंभवः ॥ ५५ ॥ अन्ये च क्षुद्रभूपाश्च सहस्राढ्याः पृथक्पृथक् ॥ कुरुक्षेत्रं परं स्थानं संययुर्मदविह्वलाः ॥ ५६ ॥ मूलवर्मा च नृपतिः
सपुत्रो लक्षसैन्यपः ॥ नृपं परिमलं प्राप्य संयु[3]क्तो देहलीपतेः ॥ ५७ ॥ कैकयो लक्षसेनाढ्यः सपुत्रो नृपतिः स्वयम् ॥ नृपं परिमलं प्राप्य स
युद्धार्थमुपस्थितः ॥ ५८ ॥ नेत्रसिंहश्च नृपतिः स वीरो लक्षसैन्यपः ॥ मयूरध्वज एवापि लक्षपः शशिवंशिनम् ॥ ५९ ॥ वीरसेनश्च लक्षाढ्यः
सपुत्रश्चांद्रिपक्षगः ॥ लक्षणः सप्तलक्षाढ्यो युद्धार्थं समुपस्थितः ॥ ६० ॥ आ[4]ह्लादो लक्षसैन्याढ्यः पक्षगश्चंद्रवंशिनः ॥ द्विलक्षसंयुतो राजा चन्द्र[5]
वंशो रणोन्मुखः ॥ एवं षोडशलक्षाढ्यः स्थितः परिम[6]लो रणे ॥ ६१ ॥ लह[7]रो भूपतिश्रेष्ठो लक्षपः पुत्रसंयुतः ॥ महीराजमुपागम्य युद्धार्थं समु
पस्थितः ॥ ६२ ॥ अभिनन्दन एवापि सपुत्रो लक्षसैन्यपः ॥ मायावर्मा च नृपतिः सपुत्रो लक्षसैन्यपः ॥ ६३ ॥ नागवर्मा समायातः सपुत्रो
लक्षसैन्यपः ॥ मद्रकेशः सपुत्रश्च लक्षसैन्यो रणोन्मुखः ॥ ६४ ॥ पूर्णामलः सपुत्रश्च लक्षपश्चैव पक्षगः ॥ मंकणः किन्नरो नाम सपुत्रस्तत्र

---

[1] यन्नाम्ना पूर्वजन्मनि ख्यातास्तन्नाम्नैहिकजन्मन्यपीत्यर्थः । [2] महीराजपक्षपातिराजागमनवृत्तांतमुक्त्वेदानीं परिमलपक्षपातिभूपागमनवृत्तांतं वर्णयन्नाह—आह्लादश्चेति । [3] युद्धायेति शेषः । [4] 'आह्लादश्च समायातः'—इति चतुष्पञ्चाशत्संख्यापूरकपद्ये वर्णयित्वापि पुनरिह तद्वर्णनं तत्पक्षपातिषु तस्य प्राधान्यद्योतनायेतिबोध्यम् । [5] अर्द्धेन परिमलं वर्णयति, तस्यैव चन्द्रवंश इति :विशेषणम्—नोह्लादस्य, तस्यान्यवंशजातत्वात् :। [6] 'द्विलक्षसंयुतत्वमुक्त्वापि पुनः 'षोडशलक्षाढ्यः'—इति कथनं स्वीयपूर्वोक्तपरकीयसैन्यभयवर्णनद्योतनाय । [7] इदानीं लहरादीनां महीराजपक्षपातिनां भूपानां सैन्यपरिमाणं कथयति । तेषामागमनं तु पूर्वं वर्णितमेव ।

संस्थितः ॥ ६५ ॥ गजराजः समायातो महीराजं हि लक्षपः ॥ धुंधुकारः समायातः पञ्चलक्षपतिः स्वयम् ॥ ६६ ॥ पुत्रः कृष्णकुमारस्य भग
दत्तः समागतः ॥ त्रिलक्षबलसंयुक्तो महीराजं महीपतिम् ॥ ६७ ॥ दलवाहनपुत्रश्च देशगोपालसंस्थितः ॥ अंगदस्तत्र संप्राप्तः सायुतो देवकी
प्रियः ॥ महीराजमुपागम्य युद्धार्थं समुपस्थितः ॥६८॥ कलिंगश्च नृपः प्राप्तस्त्रिकोणश्च तथैव च ॥ श्रीपतिश्च तथा राजा श्रीतारश्च तथा गतः ॥
॥ ६९ ॥ मुकुन्दश्च सुकेतुश्च रुहिलो गुहिलस्तथा ॥ इन्दुवारश्च बलवाञ्जयंतश्च तथाविधः ॥ सर्वे दशसहस्राढ्या महीराजमुपस्थिताः ॥ ७० ॥
महीराजस्य पक्षे तु सहस्रं क्षुद्रभूमिपाः ॥ ते तु साहस्रसेनाढ्या महीराजमुपस्थिताः ॥ ७१ ॥ तेषां मध्ये च वै भूपान्द्विशतान्देहलीं प्रति ॥ ससै
न्यान्प्रेषयामास राष्ट्ररक्षणहेतवे ॥ एवं स देहलीराजश्चतुर्विंशतिलक्षपः ॥ ७२ ॥ युद्धमष्टादशाहानि सञ्जातं सर्वसंक्षयम् ॥ शृणु युद्धकथां रम्यां
भृगुवर्य्य सुविस्तरात् ॥ ७३ ॥ मार्गकृष्णद्वितीयायां महीराजो महाबलः ॥ आहूय लहरं भूपं वचनं प्राह निर्भयः ॥७४॥ भवान्सपुत्रः सेनाढ्यो
धुंधुकारेण रक्षितः ॥ चामुण्डेन युतो युद्धे गन्तुमर्हति सत्तम ॥ इति श्रुत्वा ययौ शीघ्रं कुरुक्षेत्रे महारणे ॥ ७५ ॥ तदा परिमलो राजा मयूरध्वज
मेव हि ॥ समाहूय वचः प्राह शृणु पार्थिवसत्तम ॥ ७६ ॥ कृष्णांशेन जयंतेन देवसिंहेन रक्षितः ॥ स भवाल्लँक्षसैन्याढ्यो गंतुमर्हति वै रणे ॥
॥ ७७ ॥ इति श्रुत्वा तु वचनं मयूरध्वज एव हि ॥ लक्षसैन्यान्वितः प्राप्तो लहरं नृपतिं प्रति ॥ ७८ ॥ तयोश्चासीन्महद्युद्धं सेनयोरुभयो रणे ॥
सेना तु लक्षवीरस्य तत्र युद्धे प्रकीर्तिता ॥ ७९ ॥ एको रथो गजास्तत्र ज्ञेयाः पञ्चशतं रणे ॥ हयाश्च पञ्चसाहस्रा पत्तयस्तद्गुणा दश ॥ एते सैन्या
नरा ज्ञेया सैन्यपांश्च[1]शृणुष्व भोः ॥८०॥ दशानां पच्चराणां च पतिर्नाम्ना स पत्तिपः ॥ पंचानां च हयानां च पतिर्नाम्ना स गुल्मपः॥८१॥ पंचानां
च गजानां च पतिर्नाम्ना गजाधिपः ॥ एतैः सार्द्धं रथी ज्ञेयो रणेऽस्मिन्दारुणे कलौ ॥८२॥ उष्ट्रारूढाः स्मृता दूताश्चत्वारिंशच्च तद्बले ॥ शतघ्न्य
स्तत्र साहस्रास्तेषां मध्ये पृथक्पृथक् ॥ षट्त्रिंशद्वै पदचरास्तेषां कर्माणि मे शृणु ॥ ८३ ॥ दश गोलकदातारो दशतत्पुष्टिकारकाः ॥ दश
चार्द्रकरास्तां[1] वै त्रयस्ते वह्निदायिनः ॥ त्रयो दृष्टिकरा ज्ञेयास्त्रियामेषु पृथक्पृथक् ॥ ८४ ॥ शेषाः शूद्रास्तु सेनानां शूरकृत्यपरायणाः ॥ एवं च
लक्षवीराणां सेना तत्र प्रकीर्तिता ॥ ८५ ॥ तत्रासीत्तुमुलं युद्धं धर्मेण च समन्ततः ॥ प्रातःकालात्समारभ्य मध्याह्नं सैन्ययोर्द्वयोः ॥ ८६ ॥
तत्पश्चाद्यामममात्रेण सैन्यपा युद्धमागताः ॥ तत्पश्चाच्च महाशूरा धुंधुकारादयो बलाः[2] ॥८७॥ याममात्रं च युद्धाय संस्थिता रणमूर्धनि ॥ चामुण्डेन

---

[1] शतघ्नीरित्यर्थः, प्रतीति शेषः । [2] बलिन इत्यर्थः ।

च कृष्णांशो धुंधुकारेण चेन्दुलः ॥ ८८ ॥ भगदत्तेन वै देवः कृतवान्युद्धमुत्तमम् ॥ सायंकाले तु संप्राप्ते सर्वे शूराः क्षयं[1] गताः ॥ ८९ ॥ कृष्णां
शस्तत्र चामुण्डं जित्वा तु लहरात्मजान् ॥ षोडशैव जघानाशु घटीमात्रेण वीर्यवान् ॥ दध्मौ शंखं प्रसन्नात्मा लक्षणान्तमुपाययौ ॥९०॥ चामुंडो
धुंधुकारश्च भगदत्तो युतः शतैः ॥ महीराजमुपागम्य सुषुपुर्निशि निर्भयाः ॥ ९१ ॥ इंदुलो देवसिंहश्च सहस्रैः संयुतौ मुदा ॥ गत्वा परिमलं भूपं
रात्रौ सुषुपतुस्तदा ॥ ९२ ॥ प्रातःकाले तु संप्राप्ते तृतीयायां भयंकरे ॥ महीराजस्तदाहूय नृपं गजपतिं बली ॥ ९३ ॥ वचनं प्राह भो राजँस्त्वं
त्रिवीरैः सुरक्षितः ॥ स्वकीयैर्लक्षसैन्यैश्च गंतुमर्हसि वै रणे ॥९४॥ तदा परिमलो भूपो नेत्रसिंहं महीपतिम् ॥ युद्धायाज्ञापयामास कृष्णांशाद्यैः
सुरक्षितम् ॥ ९५ ॥ तयोश्चासीन्महद्युद्धं सेनयोरुभयोः क्रमात् ॥ हया हयैः क्षयं जग्मुर्गजाश्चैव तथा गजैः ॥ पत्त्वराः पत्त्वरैः सार्द्धं शतघ्न्यश्च शत
घ्निभिः ॥९६॥ अपराह्णे मुनिश्रेष्ठ नेत्रसिंहो महाबलः ॥ महागजं गजपतिं गत्वा युद्धमचीकरत् ॥९७॥ परस्परं च विरथौ संछिन्नधनुषौ तदा ॥
खड्गहस्तौ महीं प्राप्य चक्रतू रणमुल्बणम् ॥ अन्योन्येन वधं कृत्वा स्वर्गलोकमुपागतौ ॥ ९८ ॥ इन्दुलस्तं तु चामुंडं देवो वै धुंधुकं तथा ॥
कृष्णांशो भगदत्तं च जित्वा राजानमाययुः ॥ ९९ ॥ शेषैः पंचशतैः शूरैस्तैः सार्द्धं लक्षणं प्रति ॥ पराजिताश्च ते सर्वे सहस्रैः सहिता ययुः
॥ १०० ॥ प्रातःकाले तु संप्राप्ते महीराजो महाबलः ॥ मायावर्माणमाहूय वचनं प्राह निर्भयः ॥ १०१ ॥ भवान्दशसुतैर्वीरैर्लक्षसैन्यैश्च संयुतः ॥
सर्वशत्रुविनाशाय गंतुमर्हति सत्तम ॥ इति श्रुत्वा स नृपतिर्वाद्यान्संवाद्य चाययौ ॥ १०२ ॥ दृष्ट्वा परिमलो भूपो मायावर्माणमागतम् ॥ जग
न्नायकमाहूय वचनं प्राह निर्भयः ॥ १०३ ॥ भवान्दशसहस्रैश्च सार्द्धं तैस्त्रिभिरन्वितः ॥ गन्तुमर्हति युद्धाय शीघ्रं मद्विजयं कुरु ॥ १०४ ॥ इति
श्रुत्वा ययौ शीघ्रं सेनयोरुभयोर्महत् ॥ युद्धं चासीन्मुनिश्रेष्ठ याममात्रं भयानकम् ॥ १०५ ॥ हतास्ते दशसाहस्राः कृष्णांशाद्यैः सुरक्षिताः ॥
शंखान्दध्मुश्च ते सर्वे चांगदेशनिवासिनः ॥ १०६ ॥ एतस्मिन्नंतरे धीराः कृष्णांशाद्यास्तुरीयकाः[2] ॥ याममात्रेण संजघ्नुर्लक्षसैन्यं रिपोस्तदा
॥ १०७ ॥ अपराह्णे महाराजो मायावर्मा सुतैः सह ॥ कृष्णांशं देवसिंहं च संप्राप्तो जगनायकम् ॥१०८॥ अथाङ्गभूपं दशपुत्रयुक्तंःकृष्णांश एवाशु
जगाम शीघ्रम् ॥ हयस्थितो वीरवरः प्रमाथी कलैकजातो मधुसूदनस्य ॥१०९॥ ततोंगभूपस्त्रिभिरेव बाणैरताडयन्मूर्ध्नि च पार्श्वयोर्वै ॥ अमर्ष
माणो बलवान्महीपतिर्दंडैर्हतः काल इवाशु सर्पः ॥ ११० ॥ हयं समुड्डीय स पुष्करान्तं ततोभ्यगात्तं नृपतिं रथस्थम् ॥ हयस्य पातैर्विरथीच

---

[1] निवासम् । [2] चत्वार इत्यर्थः ।

कार स एव भूपोऽसिमुपाददधानः ॥ १११ ॥ स्वेनासिना बिंदुलमंगशल्यं कृत्वा स कृष्णांशमुवाच वाक्यम् ॥ कल्लोलमायात्तव नाशनाय त्वया
जिता भूपतयः प्रधानाः ॥११२॥ तदैव कीर्तिर्भविता ममाशु हत्वा भवंतं च सुखी भवामि ॥ इत्युक्तवन्तं नृपतिं महान्तं स्वेनासिना तस्य शिरो
जहार ॥ ११३ ॥ हतेऽङ्गभूपे दश तस्य पुत्रास्तमेव जग्मुर्युधि कौरवांशाः ॥ तानागतानिंदुल एव पंच जघान बाणैस्तु तदा समन्युः ॥ ११४ ॥
उभौ च देवस्तु जघान तत्र भल्लेन सिद्धेन नृपात्मजौ च ॥ ज्येष्ठं सुतं गौतम एव हत्वा द्वौ यौ स कृष्णांश उपाजघान॥११५॥शंखान्प्रदध्मू रुचि
राननास्ते प्रदोषकाले शिबिराणि जग्मुः ॥ श्रमान्वितास्ते सुषुपुर्निशायां प्रातः समुत्थाय स्वकर्म कृत्वा ॥ ११६ ॥ गत्वा सभायां नृपतिं प्रणम्य
वाक्यं समूचुः शृणु चंद्रवंशिन् ॥ अद्यैव सेनापतिरस्ति को वै चाज्ञापयास्मान्नृप तस्य गुप्त्यै ॥११७॥ श्रुत्वाह भूपोद्य तु वीरसेनः सकामसेनः
स्वबलैः समेतः ॥ रणं करिष्यत्यचिरेण वीरास्तस्मात्सुरक्षध्वमरिभ्य एव ॥ ११८ ॥ स वीरसेनो नृपतिं प्रणम्य लक्षैः स्वसैन्यैर्युधि संज
गाम ॥ तदा महीराजनृपः प्रतापी स नागवर्माणमुवाच तापी ॥ ११९ ॥ रणाय गच्छाशु सुतैः समेतो लक्षैः स्वसैन्यैरुत भूपवर्य ॥ हत्वा रिपुं
घोरतमं हि वीरं पतिं महान्तं युधि वीरसेनम् ॥ १२० ॥ इत्युक्तवंतं नृपतिं प्रणम्य सुवादयामास तदा हि वीरः ॥ तयोर्बभूवाशु रणो महान्वै
सुसेनयोः संकुलयुद्धकर्त्रोः ॥ १२१ ॥ त्रियाममात्रेण हताश्च सर्वे विमानमारुह्य ययुश्च नाकम् ॥ हतेषु सर्वेषु च नागवर्मा सुतेषु वै यादवभूप
माह ॥ १२२ ॥ भवान्विसैन्यश्च तथैव चाहं भवान्सपुत्रश्च तथाहमेव ॥ संस्मृत्य धर्मं कुरु युद्धमाशु ततो रथस्थः सुधनुर्गृहीत्वा ॥ १२३ ॥
बाणैश्च बाणान्भुवि तौ च छित्त्वा बभूवस्तुस्तौ विरथौ नृपाग्र्यौ ॥ खड्गेन खड्गं च तथैव छित्त्वा विमानमारुह्य गतौ हि नाकम् ॥ १२४ ॥ स
कामसेनः स्वारिपोश्च पुत्राञ्जघान बाणैश्च तदाष्टसंख्यान् ॥ ज्येष्ठौ तदा कोपसमन्वितौ तं गृहीतखड्गौ च समीयतुश्च ॥ १२५ ॥ रिपोः शिरो
जह्रतुरुग्रवेगौ सकामसेनश्च कबंध एव ॥ हत्वा रिपू तौ च तदा मिलित्वा स्वर्गं ययुस्ते च विमानरूढाः ॥ १२६ ॥ हतेषु सर्वेषु तदा त्रयस्ते
चामुंडकाद्या जगनायकं ते ॥ रुद्ध्वा समेताः स्वशरैः कठोरैर्जघ्नुस्तमश्वं हरिनागरं च ॥ १२७ ॥ स दिव्यवाजी च तदा स्वपक्षौ प्रसार्य्य खेनाशु
रिपुं जगाम ॥ स धुंधुकारस्य गजं विहत्य चामुंडकस्यैव गजं विमर्द्य ॥१२८॥ रथं च भूमौ भगदत्तकस्य विचूर्ण्य शीघ्रं च नभो जगाम ॥ प्रवाद्य
शंखं जगनायकश्च कृष्णांशमागम्य कथां चकार ॥१२९॥ निशामुषित्वा जगनायकाद्याः प्रातः समुत्थाय रणं प्रजग्मुः ॥ तदा महीराज उताशुका
री स किन्नरेशं कणकं सपुत्रम् ॥१३०॥ उवाच राजञ्छृणु किन्नराणां महाबलास्ते रिपवो ममैते ॥ विनाशयाशु प्रबलारिघातान्देवैर्न सार्द्धं युधि वै

मनुष्याः[1] ॥ १३१ ॥ इत्युक्तवान्मंकणभूपतिस्तु ययौ सपुत्रोऽयुतसैन्यपश्च ॥ तमन्गतं तत्र विलोक्य राजा वीरान्स्वकीयांश्च समादिदेश ॥१३२॥
मनोरथस्थो जगनायकश्च स तालनो वै वडवां विगृह्य ॥ करालसंस्थश्च तदा जयन्तो विगृह्य चापं तरसा जगाम॥१३३॥ पर्पीहकस्थश्च स रूपणो
वै जगाम कृष्णांशसमन्वितश्च ॥ स लल्हसिंहो गजमत्तसंस्थः स धान्यपालो हयमारुरोह ॥ १३४ ॥ समंततः किन्नरसैन्यघोरं विनाशयामासुरु
पांशुखड्गैः॥ विनश्यमाने त्रिसहस्रसैन्ये स किन्नरेशस्तरसा जगाम ॥१३५॥ ध्यात्वा कुबेरं च गृहीतचापो नभोगतस्तत्र बभूव सूक्ष्मः॥१३६॥अदृ
श्यमानः स्वशरैः कठोरैर्विनर्द्य सर्वान्हि ननर्द घोरम् ॥ विलप्यमाने च समस्तशूरे जयन्त एवाशु जगाम शत्रुम् ॥ १३७ ॥ ध्यात्वा महेंद्रं कणकं
च बद्ध्वा कृष्णांशमागम्य पदौ ननाम ॥ तदा तु ते शत्रुसहस्रसैन्ये निशम्य बद्धं कणकं निजेंद्रम् ॥ १३८ ॥ विनर्घ घोरं रुरुधुश्च सर्वान्माया
विनो गुह्यकमस्त्रमूहुः ॥ दिनेषु सप्तेषु[2] तथा निशासु बभूव युद्धं च समंततस्तैः ॥ १३९ ॥ श्रमान्विताः सप्त महाप्रवीरा हतेषु सर्वेषु सुषुपुश्च वै यदा[3]॥
तदा कुबेरं कणकश्च ध्यात्वा लब्ध्वा वरं बंधनमाशु छित्त्वा ॥ १४० ॥ सुप्तान्समुत्थाय च सप्त शूरान्निशीथकाले स चकार युद्धम् ॥ जित्वा च
तान्षट् स वरप्रभावात्तदेंदुलेनैव रणं चकार ॥ १४१ ॥ गृहीतखड्गौ रणघोरमत्तौ हत्वा ततो वै भुवि चेयतुश्च ॥ प्रजग्मतुर्नाकमुपान्तदेवौ
संस्तूयमानौ सुरसत्तमैश्च ॥ १४२ ॥ ततः प्रभाते विमले विजाते रुरोद रामांश उताललाप ॥ पापैः कलापैः परीपीडचमानः कुलान्वितः सर्व
युतो मुनींद्र ॥ १४३ ॥ स पंचशब्दं गजमारुरोह त्रिलक्षसैन्यैस्तरसा जगाम ॥ तदा महीराज उताह शृण्वन्गच्छध्वमद्यैव मया समेताः ॥
॥ १४४ ॥ स्वपंचलक्षैः प्रबलैश्च शूरैः सार्द्धं रुरोधाशु रिपोश्च सेनाम् ॥ तयोर्बभूवाशु रणः प्रघोरो विनर्दतोर्युद्धनिमित्तमाशु ॥ १४५ ॥ त्रियाम
मात्रेण हताश्च सर्वे द्वयोश्च पक्षा बलशालिनश्च ॥ तदा महीराज उतायया वै समंडलीकश्च धनुर्विगृह्य ॥ १४६ ॥ स धुंधुकारश्च तदा जगाम रथ
स्थितं लक्षणमुग्रवीरम् ॥ तदोदयो वै भगदत्तमेव चामुंडकं भीष्मकराजसूनुः ॥ १४७ ॥ स पंचशब्दं गजमास्थितो वै गतः स एवाशु जगाम भूप
म् ॥ धनुर्विगृह्याशुगमुल्बणं च नृपस्थितश्चाथ भयंकरं च ॥ १४८ ॥ गजं प्रमत्तं शिवदत्तमुग्रमाह्लादहन्तारमुवाच वाक्यम् ॥ अये प्रमत्ताग्रगजेंद्र
शूर जयं च मे देहि शिवप्रदत्त ॥ १४९ ॥ स मंडलीको रणदुर्मदश्च रामांश आह्लाद इति प्रसिद्धः॥ तस्माच्च मां रक्ष जवेन हस्तिन्महाबलात्काल
रसाच्च वीरात् ॥ १५० ॥ इत्येवमुक्तो नृपतिं स हस्ती वचस्तमाहाशु शृणुष्व राजन् ॥ यावदहं वै तनु जीवधारी तावद्भवाञ्छत्रुभयंकरश्च॥१५१॥

---

१ समर्था इति शेषः । २ अदन्तत्वमार्षम् । ३ छन्दोवैषम्यमार्षम् ।

इत्युक्तवंतं च गजं प्रमत्तं स पंचशब्दश्च तदा स्वदंतैः ॥ मुखं चतुर्भिश्च विदार्य शत्रोर्ननर्द घोरं स महेंद्रदत्तः ॥ १६२ ॥ स रुद्रदत्तश्च गजः
प्रमत्तो रुषान्वधावत्तरसा गजेंद्रम् ॥ रिपुं स्वपद्भ्यां च चखान कुंभैः स्वतुंडदंडेन तुदं प्रकुर्वन् ॥ १६३ ॥ अवाप मूर्छां च स पंचशब्दस्तदाशु
भूपं प्रति मंडलीकः ॥ स्वतोमरेणांगव्रणं प्रदाय खड्गेन हत्वा गजराजमुग्रम् ॥ जगाम पद्भ्यां स रिपुप्रमाथी यत्र स्थितश्चेन्दुल उग्रधन्वा ॥
॥ १६४ ॥ उत्थाप्य पुत्रं च विलप्यमानां पत्नीं स्वकीयां प्रति चाजगाम ॥ तदा प्रमत्तौ च गजौ सुमूर्छां त्यक्त्वा पुनश्चक्रतुरेव युद्धम् ॥
॥ १६५ ॥ स लक्षणः खड्गवरेण बाणान्त्रिपोश्च छित्त्वा निजवैष्णवास्त्रम् ॥ दधार चापे च सुमंत्रयित्वा सधुंधुकारं च गजं ददाह ॥ १६६ ॥
हते च तस्मिन्निजमुख्यबंधौ सभूमिराजश्च गृहीतचापः ॥ शरेण रौद्रेण च लक्षणं तं जघान तत्रादिभयंकरस्थः ॥ १६७ ॥ स मूर्छितः शुक्ल
कुलेषु सूर्यस्तदोदयो वै भगदत्तमेव ॥ सुमूर्छयित्वा च जगाम शीघ्रं यत्रःस्थितो लक्षण एकवीरः ॥ १६८ ॥ भयान्वितस्तं च विलोक्य राजा
जवेन दुद्राव च रक्तबीजम् ॥ तदा सुदेवं च स रक्तबीजो जित्वा तु कृष्णांशयुतं जगाम ॥ १६९ ॥ बाणेन शीघ्रं स च मूर्च्छयित्वा पुनश्च देवं
च स मूर्छयित्वा ॥ तद्बंधनायोद्यत आशुकारी स लक्षणस्तत्र तदा जगाम ॥ १६० ॥ प्रधाय चापे च स वैष्णवास्त्रं प्रचोदयामास च रक्तबीजे ॥
तदा स सामन्तसुतो बलीयान्व्रणं विहायाशु विलोक्य संध्याम् ॥ भयान्वितः स्वैश्च युतो ययौ वै यत्र स्थिता भूपतयः सकोपाः ॥ १६१ ॥
विलोक्य शत्रुं च स रत्नभानोः सुतो ययौ वै शिबिराणि युक्तः ॥ निशाम्य भूपः स च चंद्रवंशी जयं स्वकीयं सुषुपुस्तु ते वै ॥ प्रातश्च काले स
च चंद्रवंशी विलोक्य शुक्लान्वयमाह भूपम् ॥ १६२ ॥ अये गुर्जरदेशीय मूलवर्मन्सुतैः सह ॥ लक्षसैन्यान्वितो भूत्वा गन्तुमर्हतु वै भवान् ॥
॥ १६३ ॥ इत्युक्तः स तु भूपालो युद्धभूमिमुपाययौ ॥ महीराजाज्ञया प्राप्तो नाम्ना पूर्णामलो बली ॥ १६४ ॥ दशपुत्रान्वितो युद्धे सैन्य
लक्षेण संयुतः ॥ तयोश्चासीन्महद्युद्धं यामद्वयमुपस्थितम् ॥ १६५ ॥ हतेषु तेषु सर्वेषु तौ नृपौ ससुतैर्बलौ ॥ अनोन्येन रणं कृत्वा यमलोक
मुपागतौ ॥ १६६ ॥ मार्गकृष्णचतुर्दश्यां प्रभाते विमले रवौ ॥ कैकयो लक्षसेनाढ्यो दयापुत्रसमन्वितः ॥ लक्षणानुज्ञया प्राप्तस्तस्मिन्युधि
भयानके ॥ १६७ ॥ मद्रकेशस्तदा राजा दशपुत्रसमन्वितः ॥ लक्षसैन्यान्वितस्तत्र यत्र युद्धं समन्वभूत् ॥ परस्परं हताः सर्वे दिनान्ते क्षत्रिया
रणे ॥ १६८ ॥ पुनः प्रभाते विमले भगदत्तो महाबली ॥ त्रिलक्षबलसंयुक्तो जगर्ज्ज रणमूर्द्धनि ॥ १६९ ॥ दृष्ट्वा तं लक्षणो वीरस्त्रिलक्ष

---

१ घवज्रथें कः ।

बलसंयुतः ॥ चकार तुमुलं घोरं सेनया च स्वकीयया ॥ १७० ॥ अपराह्णे हताः सर्वे सैनिका नृपयोस्तदा ॥ भगदत्तः स्वयं क्रुद्धो रथस्थो
लक्षणं ययौ ॥ १७१ ॥ लक्षणो रथमारुह्य स्वपितुः शत्रुजं नृपम् ॥ त्रिभिर्बाणैश्च संतोद्य भल्लेन समताडयत् ॥ १७२ ॥ भगदत्तस्तदा
क्रुद्धो विरथं तं चकार ह ॥ क्रुद्धवंतं रिपुं घोरं लक्षणः खड्गपाणिकः ॥ हत्वा हयांस्तथा सूतं भगदत्तमुपाययौ ॥ १७३ ॥ मर्दयित्वा च
तच्चर्म च्छित्त्वा वर्म तदुद्भवम् ॥ त्रिधा चकार बलवान्भगदत्तं रिपोस्सुतम् ॥ १७४ ॥ संध्याकाले हते तस्मिल्लँक्षणस्त्वरयान्वितः ॥ एकाकी
शिबिरं प्राप्तो हस्तिन्युपरि संस्थितः ॥ १७५ ॥ भगदत्ते हते तस्मिन्स राजा क्रोधमूर्छितः ॥ स्वकीयान्सर्वभूपांश्च चामुंडेन समन्वितान् ॥ प्रेष
यामास युद्धाय मार्गे च प्रतिपद्दिने ॥ १७६ ॥ अंगदश्च कलिंगश्च त्रिकोणः श्रीपतिस्तथा ॥ श्रीतारश्च मुकुंदश्च रुहिलो गुहिलस्तथा ॥ १७७ ॥
सुकेतुर्नव भूपास्ते नवायुतबलैर्युताः ॥ वाद्यानि वादयामासुस्तस्मिन्युद्धमहोत्सवे ॥ १७८ ॥ दृष्ट्वा ताल्लँक्षणो वीरो राजभिश्च स्वकीयकैः ॥
सार्द्धं जगाम युद्धाय तथा व्यूह्यायुधद्रिपून् ॥ १७९ ॥ रुद्रवर्मा च नृपतिः शूरैर्दशसहस्रकैः ॥ अंगदं वैरिणं मत्वा तेन सार्द्धमयुध्यत ॥ १८० ॥
कालीवर्माऽयुतैस्सार्धं कलिंगं प्रत्ययुध्यत ॥ वीरसिंहोऽयुतैस्सार्द्धं त्रिकोणं प्रत्ययुध्यत ॥ १८१ ॥ ततोनुजः प्रवीरश्च श्रीपतिं सोऽयुतैस्सह ॥
नृपः सूर्यो धरो वीरोऽयुताढ्यो बलवान्रणे ॥ श्रीतारं नृपमासाद्य महद्युद्धमचीकरत् ॥१८२॥ वामनोयुतसंयुक्तो मुकुंदं प्रति सोऽगमत् ॥ गंगासिं
हश्च बलवान्महिलं प्रति सायुतः ॥१८३॥ लह्लासिंहोयुतैस्सार्द्धं गुहिलं प्रति सोऽगमत् ॥ त्रिशतानि ततो भूपाः सहस्राढ्याः पृथक्पृथक् ॥१८४॥
क्षुद्रभूपाः क्षुद्रभूपांस्त्रिशतानि समाययुः ॥ अन्योन्येन हताः सर्वे कृत्वा युद्धं भयानकम् ॥ १८५ ॥ चामुंडस्तु तदा दृष्ट्वा मृतकान्सर्वभूपतीन् ॥
लक्षणान्तमुपागम्य महद्युद्धं चकार ह ॥ १८६ ॥ लक्षणो रक्तबीजं तं ज्ञात्वा ब्राह्मणसंमतम् ॥ वैष्णवास्त्रं तदा तस्मै न ददौ तेन पीडितः ॥१८७॥
सायंकाले तु संप्राप्ते लक्षणो हस्तिनीस्थितः ॥ एकाकी शिबिरं प्राप्तश्चामुंडं नृपमाययौ ॥ १८८ ॥ द्वितीयायां प्रभाते च कृष्णांशो देवसंयुतः ॥
शूरैर्दशसहस्रैश्च युद्धभूमिमुपाययौ ॥ १८९ ॥ तारकश्च सचामुंडो द्विलक्षबलसंयुतः ॥ द्विशतैश्च तथा भूपैः सार्द्धं युद्धमुपस्थितौ॥१९०॥पुरस्कृत्य
नृपान्सर्वान्ससैन्यौ बलवत्तरौ ॥ तेषामनुःस्थितौ युद्धे तत्र जातो महारणः ॥ १९१ ॥ याममात्रेण तौ वीरौ हत्वा सर्वमहीपतीन् ॥ लक्षसैन्यां
स्तथा हत्वा संस्थितौ श्रमकर्षितौ॥१९२॥चामुंडस्तारको धूर्तः संप्राप्तौ छिद्रदर्शिनौ ॥ ताभ्यां श्रमान्विताभ्यां च चक्रतुस्तौ समं रणम्॥१९३॥
तेषां त्रियाममात्रेण संभूव महान्रणः ॥ सायंकाले तु संप्राप्ते कृष्णांशश्च निरायुधः ॥ तलप्रहारेण रिपुं मूर्च्छयामास वीर्यवान् ॥१९४॥ एतस्मिन्नंत

रे वीरस्तारको देवासिंहकम् ॥ हयं मनोरथं हत्वा शंखशब्दमथाकरोत् ॥ १९५ ॥ तच्छब्दात्स च चामुंडस्त्यक्त्वा मूर्छां महाबलः ॥ कृष्णांशस्य
शिरः कायादपहृत्य च वेगवान् ॥ तयोर्गृहीत्वा शिरसी महीराजमुपाययौ ॥ १९६ ॥ महीराजस्तु ते दृष्ट्वा परमानंदनिर्भरः ॥ दत्त्वा
दानं द्विजातिभ्यो महोत्सवमकारयत् ॥ १९७ ॥ लक्षणस्य तदा सैन्ये हाहाशब्दो महानभूत् ॥ श्रुत्वा कोलाहलं तेषां ज्ञात्वा तौ च हतौ
नृपः ॥ ब्रह्मानंदस्तदा मूर्च्छां त्यक्त्वा वेलामुवाच ह ॥ १९८ ॥ प्रिये गच्छ रणं शीघ्रं हरिनागरमास्थिता ॥ मम वेषं शुभं कृत्वा तारकं जहि मा
चिरम् ॥ १९९ ॥ इति श्रुत्वा तु सा वेला रामांशेन समन्विता ॥ सहस्रशूरसहिता युद्धभूमिमुपाययौ ॥ २०० ॥ श्रुत्वा स लक्षणो वीरस्ता
लनेन समन्वितः ॥ सैन्यैश्च दशसाहस्रैर्महीराजमुपाययौ ॥२०१॥ तृतीयायां प्रभाते च तारको बलवत्तरः ॥ ब्रह्मानंदं च तं मत्वा महयुद्धमचीर
करत् ॥ २०२ ॥ रक्तबीजश्च चामुंडो रामांशो बलवत्तरः ॥ चकार दारुणं युद्धं तस्मिन्वीरसमागमे ॥ २०३ ॥ याममात्रेण रामांशो हत्वा तस्य
महागजम् ॥ तच्छस्त्राणि तथा च्छित्त्वा मल्लयुद्धमचीकरत् ॥ २०४ ॥ त्रियाममात्रेण तदा सायंकाले समागते ॥ ममंथ भ्रातृहन्तारं स च वीरो
ममार ह ॥ २०५ ॥ तदा वेला महाशत्रुं तारकं बलवत्तरम् ॥ छित्त्वास्त्राणि स्वखड्गेन शिरः कायादपाहरत् ॥ २०६ ॥ चितां कृत्वा विधानेन
सा देवी द्रुपदात्मजा ॥ ब्रह्मानंदं नमस्कृत्य तच्चितायां समारुहत् ॥ २०७ ॥ तेन सार्द्धं च सा शुद्धा श्वशुरस्याज्ञया मुदा ॥ सप्तजन्मकथां कृत्वा
स्वपतेस्तु ददाह वै ॥ २०८ ॥ तच्चितायां च भर्तारमिंदुलं बलवत्तरम् ॥ संस्थाप्य दाहयामास तेन सार्द्धं कलेवरम् ॥ २०९ ॥ रात्रौ परिमलो
राजा लक्षणेन समन्वितः ॥ महीराजमुपागम्य महद्युद्धमकारयत् ॥ २१० ॥ सपादलक्षाश्च तदा हतशेषा महाबलाः ॥ त्रिलक्षैर्हतशेषैश्च सार्द्धं
योद्धुमुपस्थिताः ॥ २११ ॥ धान्यपालः शतं भूपाँल्लक्षणश्च तथा शतम् ॥ तालनश्च शतं भूपान्हत्वा राजानमाययौ ॥ २१२ ॥ महीराजस्तदा
दुःखी ध्यात्वा रुद्रं महेश्वरम् ॥ निशीथे समनुप्राप्ते हतशेषैस्समागतः॥एकाकी गजमारुह्य ययौ चादिभयंकरम् ॥२१३॥ रुद्रदत्तेन बाणेन हत्वा
परिमलं नृपम् ॥ धान्यपालं तथा हत्वा तालनं बलवत्तरम् ॥ लक्षणान्तमुपागम्य महद्युद्धमचीकरत् ॥ २१४ ॥ महीराजस्य रौद्रास्त्रैस्सैन्या
स्सर्वे क्षयं गताः ॥ लक्षणं प्रति रौद्रास्त्रं महीराजः समादधे ॥ २१५ ॥ तदा तु लक्षणो वीरो वैष्णवास्त्रं समादधे ॥ तेनास्त्रेण क्षयं जातो
महीराजस्य सायकः ॥ तेनास्त्रतेजसा राजा महासंतापमाप्तवान् ॥ २१६ ॥ ध्यात्वा रुद्रं महादेवं त्यक्त्वा विद्यां च वैष्णवीम् ॥ स्वभल्लेन
शिरः कायादपाहरत भूमिपः ॥ २१७ ॥ हस्तिनी च तदा रुष्टा गजमादिभयंकरम् ॥ गत्वा युद्धं मुहूर्त्तेन कृत्वा स्वर्गमुपाययौ ॥ २१८ ॥

उषःकाले च संप्राप्ते मलना पतिमुत्तमम् ॥ तच्चितायां समारोप्य ददाह स्वं कलेवरम् ॥ २१९ ॥ तदा तु देवकी शुद्धं लक्षणं बलवत्तरम् ॥ तालनादींस्तथा हुत्वा ददाह स्वं कलेवरम् ॥ २२० ॥ प्रभाते विमले जाते चतुर्थे भौमवासरे ॥ तथा हुत्वा स्वर्णवतीं कृत्वा तेषां तिलांजलिम् ॥ ध्यात्वा सर्वमयीं देवीं स्थिरीभूय स्वयं स्थितः ॥ २२१ ॥ एतस्मिन्नंतरे तत्र कलिर्भार्यासमन्वितः ॥ वांछितं फलमागम्य तुष्टाव श्लक्ष्णया गिरा ॥ २२२ ॥ ॥ कलिरुवाच ॥ ॥ नम आह्लाद महते सर्वानंदप्रदायिने ॥ योगेश्वराय शुद्धाय महावतीनिवासिने ॥ २२३ ॥ रामांशस्त्वं महाबाहो मम पालनतत्परः ॥ कलैकया समागम्य भुवो भारस्त्वया हृतः ॥ २२४ ॥ राजानः पावकीयाश्च तपोबलसमन्विताः ॥ हत्वा तान्पञ्चसाहस्रान्क्षुद्रभूपाननेकशः ॥ योगमध्ये समासीनो नमस्तस्मै महात्मने ॥ २२५ ॥ तेषां सैन्याः षष्टिलक्षाः क्रमाद्वीर त्वया हताः ॥ वरं ब्रूहि महाभाग यत्ते मनसि वर्तते ॥ २२६ ॥ इति श्रुत्वा स आह्लादो वचनं प्राह निर्भयः ॥ मम कीर्तिस्त्वया देव कर्तव्या च जनेजने ॥ २२७ ॥ पुनस्ते कार्यमतुलं करिष्यामि शृणुष्व भोः ॥ महीराजश्च धर्मात्मा शिवभक्तिपरायणः ॥ तस्य नेत्रे मया शुद्धे कर्तव्ये नीलरूपके ॥ २२८ ॥ तव प्रियः सदा नीलस्तथैव च मम प्रियः ॥ देवानां दुःखदो देव दैत्यानां हर्षवर्द्धनः ॥ २२९ ॥ इत्युक्त्वा स तु रामांशो गजमारुह्य वेगतः ॥ महीराजमुपागम्य महद्युद्धं चकार ह ॥ २३० ॥ रुद्रदत्तो गजस्तूर्णं पंचशब्दमुपस्थितः ॥ पद्मदंतान्समारुह्य युयुधाते परस्परम् ॥ २३१ ॥ अन्योन्येन तथा हत्वा गजौ स्वर्गमुपेयतुः ॥ २३२ ॥ तदा भयातुरो राजा त्यक्त्वा युद्धं भयंकरम् ॥ स तु दुद्राव वेगेन रामांशोऽनुययौ ततः ॥ २३३ ॥ केशेषु च महीराजं गृहीत्वा तरसा बली ॥ कलिदत्तं महानीलं नेत्रयोस्तेन तत्कृतम् ॥ २३४ ॥ तदाप्रभृति वै शम्भुरशुद्धं नृपतिं प्रियम् ॥ मत्वा त्यक्त्वा ययौ स्थाने कैलासे गुह्यकालये ॥ २३५ ॥ आह्लादः कलिना सार्द्धं कदलीवनमुत्तमम् ॥ गत्वा योगं चकाराशु पर्वते गंधमादने ॥ २३६ ॥ तथा भूतं च रामांशं कलिर्दृष्ट्वा मुदान्वितः ॥ बलिपार्श्वमुपागम्य वर्णयामास सर्वशः ॥ २३७ ॥ स वै बलिर्दैत्यराजोऽयुतैः सह विनिर्गतः ॥ गौरदेशमुपागम्य सहोड्डीनमुवाच ह ॥ २३८ ॥ गच्छ वीर बलैस्सार्द्धं निशायां रक्षितो मया ॥ हत्वा भूपं महीराजं विद्युन्मालां गृहाण भोः ॥२३९॥ इति श्रुत्वा वचस्तस्य षोडशाब्दांतरे गते ॥ सपादलक्षैश्च बलैः कुरुक्षेत्रमुपाययौ ॥ २४० ॥ महीराजसुताञ्जित्वा समाहूय महावतीम् ॥ महीपतिं प्रेषयित्वा लुण्ठयित्वा च तद्वसु ॥ २४१ ॥ लिंगार्थं कृतवान्यत्नं स नृपः कीर्तिसागरे ॥ न प्राप्तस्सनृपस्तं वै स्वगेहाय तदा ययौ ॥२४२॥ लक्षचंडीं कारयित्वा परमानंदमाप्तवान् ॥ जयचंद्रस्तु तच्छ्रुत्वा पुत्रशोकसमन्वितः ॥ २४३ ॥ निराहारो यतिर्भूत्वा मृतः स्वर्गपुरं ययौ ॥ सहोड्डी

नेन स नृपः कृत्वा युद्धं भयंकरम् ॥ २४४ ॥ सप्ताहोरात्रमात्रेण म्लेच्छराजवशं गतः ॥ मारितो बहुयत्नेन महीराजो न वै मृतः ॥ २४५ ॥ तदा
म्लेच्छस्सहोड्डीनो निर्बंधनमथाकरोत् ॥ ज्योतिरूपस्थितं तत्र चंद्रभट्टो नृपाज्ञया ॥ क्षुरप्रेण च बाणेन हत्वा वह्नौ ददाह वै ॥ २४६ ॥ विद्यु
न्मालां स च म्लेच्छो गृहीत्वा च धनं बहु ॥ तत्रास्थाप्य स्वदासं च कुतुकोड्डीनमागतः ॥ २४७ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि
चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये द्वात्रिंशोऽध्यायः ॥ ३२ ॥ ॥ छ ॥ ॥ इति तृतीयखण्डं समाप्तम् ॥ ॥ छ ॥ ॥
॥ ॥ श्रीगणेशाय नमः ॥ ॥ श्रीराधावल्लभो जयति ॥ ॥ वेदव्यास उवाच ॥ ॥ एवं द्वापरसंध्याया अन्ते सूतेन वर्णितम् ॥ सूर्यचंद्रान्वया
ख्यानं तन्मया कथितं तव ॥१॥ विशालायां पुनर्गत्वा वैतालेन विनिर्मितम् ॥ कथयिष्यति सूतस्तमितिहाससमुच्चयम् ॥२॥ तन्मया कथितं सर्वं
हृषीकोत्तमपुण्यदम् ॥ पुनर्विक्रमभूपेन भविष्यति समाह्वयः ॥ ३ ॥ नैमिषारण्यमासाद्य श्रावयिष्यति वै कथाम् ॥ पुनरुक्तानि यान्येव पुराणाष्टा
दशानि वै ॥ ४ ॥ तानि चोपपुराणानि भविष्यंति कलौ युगे ॥ तेषां चोपपुराणानां द्वादशाध्यायमुत्तमम् ॥ ५ ॥ सारभूतश्च कथित इतिहाससमु
च्चयः ॥ यस्ते मया च कथितो हृषीकोत्तम ते मुदा ॥ ६ ॥ विक्रमाख्यानकालांतेऽवतारः कलया हरेः ॥ स च शक्त्यावतारो हि राधाकृष्णस्य
भूतले ॥ ७ ॥ तत्कथां भगवान्सूतो नैमिषारण्यमास्थितः ॥ अष्टाशीतिसहस्राणि श्रावयिष्यति वै मुनीन् ॥ ८ ॥ यत्तन्मया च कथितं हृषीको
त्तम ते मुदा ॥ पुनस्ते शौनकाद्याश्च कृत्वा स्नानादिकाः क्रियाः ॥ ९ ॥ सूतपार्श्वं गमिष्यंति नैमिषारण्यवासिनः ॥ तत्पृष्टेनैव सूतेन यदुक्तं तच्छृ
णुष्व भोः ॥ १० ॥ ॥ ऋषय ऊचुः ॥ ॥ श्रुतं कृष्णस्य चरितं भगवन्भवतोदितम् ॥ इदानीं श्रोतुमिच्छामि राज्ञां तेषां क्रमात्कुलम् ॥
॥ ११ ॥ चतुर्णां वह्निजातानां परं कौतूहलं हि नः ॥ स हरिस्त्रियुगी प्रोक्तः कथं जातः कलौ युगे ॥ १२ ॥ ॥ सूत उवाच ॥ ॥ कथयामि
मुनिश्रेष्ठा युष्माकं प्रश्नमुत्तमम् ॥ अग्निवंशनृपाणां च चरित्रं शृणु विस्तरात् ॥ १३ ॥ प्रमरश्च महीपालो दक्षिणां दिशमास्थितः ॥ [1]अम्बया
रचितां दिव्यां प्रमराय पुरीं शुभाम् ॥ १४ ॥ निवासं कृतवान्राजा सामवेदपरो बली ॥ षड्वर्षाणि [2]कृतं राज्यं तस्माज्जातो महामरः ॥ १५ ॥
त्रिवर्षं च कृतं राज्यं देवापिस्तनयोऽभवत् ॥ पितुस्तुल्यं कृतं राज्यं देवदूतस्ततोऽभवत् ॥ पितुस्तुल्यं कृतं राज्यं शृणु तत्कारणं मुने ॥ १६ ॥
अशोके निहते तस्मिन्बौद्धभूपे महाबले ॥ कलिर्भास्करमाराध्य तपसा ध्यानतत्परः ॥ १७ ॥ पंचवर्षान्तरे सूर्यस्तस्मै च कलये मुदा ॥

---

१ अर्द्धमुत्तरान्वयि । २ तेनेति शेष, एवमग्रेपि ।

शकाख्यं नाम पुरुषं ददौ तद्भक्तितोषितः ॥ १८ ॥ तदा प्रसन्नः स कलिः शकाय च महात्मने ॥ तैत्तिरं नगरं प्रेम्णा ददौ हर्षितमानसः ॥१९॥
तत्र गोपान्दस्युगणान्वशीकृत्य महाबली ॥ आर्यदेशविनाशाय कृत्वोद्योगं पुनःपुनः ॥ हतवान्भूपतीन्बाणैस्तस्मात्ते स्वल्पजीविनः ॥ २० ॥
गंधर्वसेनश्च नृपो देवदूतात्मजो बली ॥ शतार्द्धाब्दं पदं कृत्वा तपसे पुनरागतः ॥ २१ ॥ शिवाज्ञया च नृपतिर्विक्रमस्तनयस्ततः ॥ शतवर्षं कृतं
राज्यं देवभक्तस्ततोऽभवत् ॥ दशवर्षं कृतं राज्यं शकैर्दुष्टैर्लयं गतः ॥ २२ ॥ शालिवाहन एवापि देवभक्तस्य चात्मजः ॥ जित्वा शकान्स
षष्ट्यब्दं राज्यं कृत्वा दिवं गतः ॥ २३ ॥ शालिहोत्रस्तस्य सुतो राज्यं कृत्वा शतार्द्धकम् ॥ स्वर्गलोकं ततः प्राप्तस्तत्सुतः शालिवर्द्धनः ॥२४॥
पितुस्तुल्यं कृतं राज्यं शकहन्ता ततोऽभवत् ॥ पितुस्तुल्यं कृतं राज्यं सुहोत्रस्तनयोऽभवत् ॥ २५ ॥ पितुस्तुल्यं कृतं राज्यं हविर्होत्रस्ततोऽ
भवत् ॥ पितुस्तुल्यं कृतं राज्यमिंद्रपालस्ततोऽभवत् ॥ २६ ॥ पुरीमिंद्रावतीं कृत्वा तत्र राज्यमकारयत् ॥ पितुस्तुल्यं कृतं राज्यं माल्यवान्नाम
तत्सुतः ॥ पुरीं माल्यवतीं कृत्वा पितुस्तुल्यं कृतं पदम् ॥ २७ ॥ अनावृष्टिस्ततश्चासीन्महती चतुरब्दिका ॥ ततः क्षुधातुरो राजा श्वविष्ठाधा
न्यगर्हितम् ॥ २८ ॥ संस्कृत्य मंदिरे राजा शालग्रामाय चार्पयत् ॥ तदा प्रसन्नो भगवान्वचनं नभसेरितम् ॥ २९ ॥ कृत्वा ददौ वरं तस्मै शृणु
तन्मुनिसत्तम ॥ कुले यावन्नृपा भाव्यास्तव भूपतिसत्तम ॥ अनावृष्टिर्न भविता तावत्ते राष्ट्र उत्तमे ॥ ३० ॥ सुतो माल्यवतश्चासीच्छंभुदत्तो हर
प्रियः ॥ पितुस्तुल्यं कृतं राज्यं भौमराजस्ततोऽभवत् ॥ ३१ ॥ पितुस्तुल्यं कृतं राज्यं वत्सराजस्ततोऽभवत् ॥ पितुस्तुल्यं कृतं राज्यं भोजरा
जस्ततो भवत् ॥ ३२ ॥ पितुस्तुल्यं कृतं राज्यं शंभुदत्तस्ततोऽभवत् ॥ दशहीनं कृतं राज्यं भोजराजपितुस्समम् ॥ ३३ ॥ शंभुदत्तस्य तनयो
बिंदुपालस्ततोऽभवत् ॥ बिंदुखण्डं च राष्ट्रं वै कृत्वा स सुखितोऽभवत् ॥ तेन राज्यं पितुस्तुल्यं कृतं वेदविदा मुने ॥ ३४ ॥ बिंदुपालस्य तनयो
राजपालस्ततोऽभवत् ॥ पितुस्तुल्यं कृतं राज्यं तस्माज्जातो महीनरः ॥ ३५ ॥ पितुस्तुल्यं कृतं राज्यं सोमवर्मा नृपोऽभवत् ॥ पितुस्तुल्यं कृतं
राज्यं कामवर्मा सुतोऽभवत् ॥ ३६ ॥ पितुस्तुल्यं कृतं राज्यं भूमिपालस्ततोऽभवत् ॥ भूसरस्तेन खनितं पुरं तत्र शुभं कृतम् ॥ ३७ ॥ पितुस्तुल्यं
कृतं राज्यं रंगपालस्ततोऽभवत् ॥ भूमिपालस्तु नृपतिर्जित्वा भूपाननेकशः ॥ ३८ ॥ वीरसिंहस्ततो नाम्ना विख्यातोऽभून्महीतले ॥ स्वराज्ये
रंगपालं स चाभिषिच्य वनं ययौ ॥ तपः कृत्वा दिवं यातो देवदेवप्रसादतः ॥ ३९ ॥ कल्पसिंहस्ततो जातो रंगपालान्नृपोत्तमात् ॥ अनपत्यो
हि नृपतिः पितुस्तुल्यं कृतं पदम् ॥ ४० ॥ एकदा जाह्नवीतोये स्नानार्थं मुदितो ययौ ॥ दानं दत्त्वा द्विजातिभ्यः कल्पक्षेत्रमवाप्तवान् ॥ ४१ ॥

पुण्यभूमिं समालोक्य शून्यभूतां स्थलीमपि ॥ नगरं कारयामास तत्र स्थाने मुदान्वितः ॥ ४२ ॥ कलापनगरं नाम्ना प्रसिद्धमभवद्भुवि ॥ तत्र
राज्यं कृतं तेन गंगासिंहस्ततोऽभवत् ॥ ४३ ॥ नवत्यब्दवपुर्भूत्वा सोऽनपत्यो रणं गतः ॥ त्यक्त्वा प्राणान्कुरुक्षेत्रे स्वर्गलोकमवाप्तवान् ॥ समा
प्तिमगमद्विप्र प्रमरस्य कुलं शुभम् ॥ ४४ ॥ तदन्वये च ये शेषाः क्षत्रियास्तदनंतरम् ॥ तन्नारीष्वमितो विप्र बभूव वर्णसंकरः ॥ ४५ ॥ वैश्यवृ
त्तिकराः सर्वे म्लेच्छतुल्या महीतले ॥ इति ते कथितं विप्र कुलं दक्षिणभूपतेः ॥ ४६ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगख
ण्डापरपर्याये कलियुगीयेतिहाससमुच्चये प्रमरवंशवर्णनं नाम प्रथमोऽध्यायः ॥ १ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ वयहानिर्महीपालो मध्यदेशे
स्वकं पदम् ॥ गृहीत्वा ब्रह्मरचितमजमेरमवासयत् ॥ १ ॥ अजस्य ब्रह्मणो मा च लक्ष्मीस्तत्र रमा गता ॥ तया च नगरं रम्य
मजमेरमजं स्मृतम् ॥ २ ॥ दशवर्षं कृतं राज्यं तोमरस्तत्सुतोऽभवत् ॥ पार्थिवैः पूजयामास वर्षमात्रं महेश्वरम् ॥ ३ ॥ इंद्रप्रस्थं
ददौ तस्मै प्रसन्नो नगरं शिवः ॥ तदन्वये च ये जातास्तोमराः क्षत्रियाः स्मृताः ॥ ४ ॥ तोमरावरजश्चैव चयहानिसुतः शुभः ॥
नाम्ना सामलदेवश्च प्रश्रितोऽभून्महीतले ॥ ५ ॥ सप्तवर्षं कृतं राज्यं महादेवस्ततोऽभवत् ॥ पितुस्तुल्यं कृतं राज्यमंजयश्च ततो
भवत् ॥ ६ ॥ पितुस्तुल्यं कृतं राज्यं वीरसिंहस्ततोऽभवत् ॥ शतार्द्धाब्दं कृतं राज्यं ततोबिंदुसुरोऽभवत् ॥ ७ ॥ पितुरर्द्धं
कृतं राज्यं मध्यदेशे महात्मना ॥ तस्माच्च मिथुनं जातं वीरा वीरविहात्तकः ॥ ८ ॥ विक्रमाय ददौ वीरां पिता वेदविधानतः ॥ स्वपुत्राय
स्वकं राज्यं मध्यदेशान्तरं मुदा ॥ ९ ॥ पितुस्तुल्यं कृतं राज्यं माणिक्यस्तत्सुतोभवत् ॥ शतार्द्धाब्दं कृतं राज्यं महासिंहस्ततोऽभवत् ॥ १० ॥
पितुस्तुल्यं कृतं राज्यं चंद्रगुप्तस्ततोऽभवत् ॥ पितुरर्द्धं कृतं राज्यं तत्सुतश्च प्रतापवान् ॥ ११ ॥ पितुस्तुल्यं कृतं राज्यं मोहनस्तत्सुतोऽभवत् ॥
त्रिंशदब्दं कृतं राज्यं श्वेतरायस्ततोऽभवत् ॥१२॥ पितुस्तुल्यं कृतं राज्यं नागवाहस्ततोऽभवत् ॥ पितुस्तुल्यं कृतं राज्यं लोहधारऽस्ततोभवत् ॥
॥ १३ ॥ पितुस्तुल्यं कृतं राज्यं वीरसिंहस्ततोऽभवत् ॥ पितुस्तुल्यं कृतं राज्यं विबुधस्तत्सुतोऽभवत् ॥ १४ ॥ शतार्द्धाब्दं कृतं राज्यं चंद्रराय
स्ततोभवत् ॥ पितुस्तुल्यं कृतं राज्यं ततो हरिहरोऽभवत् ॥१५॥ पितुस्तुल्यं कृतं राज्यं वसंतस्तस्य चात्मजः ॥ पितुस्तुल्यं कृतं राज्यं बलांग
स्तनयोऽभवत् ॥ १६ ॥ पितुस्तुल्यं कृतं राज्यं प्रमथस्तत्सुतोऽभवत् ॥ पितुस्तुल्यं कृतं राज्यमंगरायस्ततोऽभवत् ॥ १७ ॥ पितुस्तुल्यं कृतं
राज्यं विशालस्तस्य चात्मजः ॥ पितुस्तुल्यं कृतं राज्यं शार्ङ्गदेवस्ततोऽभवत् ॥ १८ ॥ पितुस्तुल्यं कृतं राज्यं मंत्रदेवस्ततोऽभवत् ॥ पितुस्तुल्यं

कृतं राज्यं जयसिंहस्ततोऽभवत् ॥१९॥ आर्यदेशाश्च सकला जितास्तेन महात्मना ॥ तद्धनैः कारयामास यज्ञं बहुफलप्रदम् ॥ २० ॥ ततश्चानंद
देवो हि जातः पुत्रः शुभाननः ॥ शतार्द्धाब्दं कृतं राज्यं जयसिंहेन धीमता ॥ २१ ॥ तत्सुतेन पितुस्तुल्यं कृतं राज्यं महीतले ॥ सोमेश्वरस्तस्य
सुतो महाशूरो बभूव ह ॥ २२ ॥ अनंगपालस्य सुतो ज्येष्ठां वै कीर्तिमालिनीम् ॥ तामुद्वाह्य विधानेन तस्यां पुत्रानजीजनत् ॥ २३ ॥ धुंधुका
रश्च वै ज्येष्ठो मथुराराष्ट्रसंस्थितः ॥ मध्यः कुमाराख्यसुतः पितुः पदसमास्थितः ॥२४॥ महीराजस्तु बलवांस्तृतीयो देहलीपतिः ॥ सहोद्दीनस्य
नृपतेर्वंशमाप्य मृतिं गतः ॥ २५ ॥ चपहानेश्च स कुलं छाययित्वा दिवं ययौ ॥ तस्य वंशे तु राजन्यास्तेषां पत्न्यः पिशाचकैः ॥२६॥ म्लेच्छैश्च
भुक्तवत्यस्ता बभूवुर्वर्णसंकराः ॥ न वै आर्या न वै म्लेच्छा जट्टा जात्या च मेहनाः ॥ २७ ॥ मेहना म्लेच्छजातीया जट्टा आर्यमयाः स्मृताः ॥
क्वचित्क्वचिच्च ये शेषाः क्षत्रियाश्चपहानिजाः ॥ २८ ॥ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहास
समुच्चये प्रमरवंशवर्णनं नाम द्वितीयोऽध्यायः ॥ २ ॥ ७ ॥ ॥ सूत उवाच ॥ ॥ शुक्लवंशं प्रवक्ष्यामि शृणु विप्रवरादितः ॥ यदा कृष्णः
स्वयं ब्रह्म त्यक्त्वा भूमिं स्वकं पदम् ॥ १ ॥ दिव्यं वृन्दावनं रम्यं प्रययौ भूतले तदा ॥ कलेरागमनं ज्ञात्वा म्लेच्छपा द्वीपमध्यगे ॥ २ ॥ स्थिता
द्वीपेषु वै नाना मनुजा वेदतत्पराः ॥ कलिनामित्रधर्मेण दूषितास्ते बभूविरे ॥ ३ ॥ अष्टषष्टिसहस्राणां वर्षाणां मुनिसत्तम ॥ अद्य प्रभृति वै
जातः कालः कलिसमागमे ॥ ४ ॥ षष्टिवर्षसहस्राणि द्वीपराज्यमचीकरत् ॥ स कलिर्म्लेच्छया सार्धं सूर्यपूजनतत्परः ॥ ५ ॥ तत्पश्चाद्भारते वर्षे
म्लेच्छया कलिराययौ ॥ दृष्ट्वा तद्भारतं वर्षं लोकपालैश्च पालितम् ॥ ६ ॥ भयभीतस्त्वराविष्टो गन्धर्वाणां यशस्करः ॥ स कलिः सूर्यमाराध्य
समाधिस्थो बभूव ह ॥७॥ ततो वर्षशताब्दांते संतुष्टो रविरागतः ॥ सोंऽशुभिर्लोकमातप्य महावृष्टिमकारयत् ॥ ८ ॥ चतुर्वर्षसहस्राणि चतुर्वर्षश
तानि च ॥ व्यतीतानि मुनिश्रेष्ठ चाद्य प्रभृति संलपे ॥९॥ संपन्नं भारतं वर्षं तदा जातं समंततः ॥ न्यूहाख्यो यवनो नाम तेन वै पूरितं जगत् ॥
॥ १० ॥ सहस्राब्दकलौ प्राप्ते महेन्द्रो देवराट् स्वयम् ॥ काश्यपं प्रेषयामास ब्रह्मावर्ते महोत्तमे ॥ ११ ॥ आर्यावती देवशक्तिस्तत्करं चाग्रही
न्मुदा ॥ दशपुत्रान्समुत्पाद्य स द्विजो मिश्रमागमत् ॥ १२ ॥ मिश्रदेशोद्भवान्म्लेच्छान्वशीकृत्यायुतं मुदा ॥ स्वदेशं पुनरागत्य शिष्यांस्तान्स
चकार ह ॥ १३ ॥ नष्टायां सप्तपुर्यां च ब्रह्मावर्तं महोत्तमम् ॥ सरस्वतीदृषद्वत्योर्मध्यगं तत्र चावसत् ॥ १४ ॥ स्वपुत्रं शुक्लमाहूय द्विजश्रेष्ठं
तपोधनम् ॥ आज्ञाप्य रैवतं शृंगं तपसे तु पुनः स्वयम् ॥ १५ ॥ नवपुत्राँस्तथा शिष्यान्मनुधर्मं सनातनम् ॥ श्रावयामास धर्मात्मा स

राजा मनुधर्मगः ॥ १६ ॥ शुक्लोपि रैवतं प्राप्य सच्चिदानंदविग्रहम् ॥ वासुदेवं जगन्नाथं तपसा समतोषयत् ॥ १७ ॥ तदा प्रसन्नोभगवान्द्वार
कानायको बली ॥ करे गृहीत्वा तं विप्रं समुद्रांतमुपाययौ ॥ १८ ॥ द्वारकां दर्शयामास दिव्यशोभासमन्विताम् ॥ व्यतीते द्विसहस्राब्दे किञ्चि
ज्जाते भृगूत्तम ॥ १९ ॥ अग्निद्वारेण प्रययौ स शुक्लोऽर्बुदपर्वते ॥ जित्वा बौद्धान्द्विजैः सार्धं त्रिभिरन्यैश्च बंधुभिः ॥ २० ॥ द्वारकां कारया
मास हरेश्च कृपया हि सः ॥ तत्रोष्य मुदितो राजा कृष्णध्यानपरोभवत् ॥ २१ ॥ पश्चिमे भारते वर्षे दशाब्दं कृतवान्पदम् ॥ नारायण
स्य कृपया विष्वक्सेनः सुतोऽभवत् ॥ २२ ॥ विंशदब्दं कृतं राज्यं जयसेनस्ततोऽभवत् ॥ त्रिंशदब्दं कृतं राज्यं विसेनस्तस्य चात्मजः ॥
॥ २३ ॥ शतार्धाब्दं कृतं राज्यं मिथुनं तस्य चाभवत् ॥ प्रमोदो मोदसिंहश्च विक्रमाय निजां सुताम् ॥ २४ ॥ विसेनश्च ददौ प्रीत्या राष्ट्रं
पुत्राय चोत्तमम् ॥ पितुस्तुल्यं कृतं राज्यं सिंधुवर्मा सुतोऽभवत् ॥ २५ ॥ सिंधुकूले कृतं राज्यं त्यक्त्वा तत्पैतृकं पदम् ॥ सिंधुदेशस्ततो
नाम्ना प्रसिद्धोभून्महीतले ॥ २६ ॥ पितुस्तुल्यं कृतं राज्यं राज्ञा वै सिंधुवर्मणा ॥ सिंधुद्वीपस्तस्य सुतः पितुस्तुल्यं कृतं पदम् ॥ २७ ॥
श्रीपतिस्तस्य तनयो गौतमान्वयसंभवाम् ॥ काच्छपीं महिषीं प्राप्य कच्छदेशमुपाययौ ॥ २८ ॥ पुलिन्दान्यवनाञ्जित्वा तत्र देशमकारयत् ॥
देशो वै श्रीपतिर्नाम्ना सिंधुकूले बभूव ह ॥ २९ ॥ पितुस्तुल्यं कृतं राज्यं भुजवर्मा ततोऽभवत् ॥ जित्वा स शबरान्भिल्लांस्तत्र राष्ट्रमकारयत् ॥
॥ ३० ॥ भुजदेशस्ततो जातः प्रसिद्धोऽभून्महीतले ॥ पितुस्तुल्यं कृतं राज्यं रणवर्मा सुतोऽभवत् ॥ ३१ ॥ पितुस्तुल्यं कृतं राज्यं चित्रवर्मा
सुतोऽभवत् ॥ कृत्वा स चित्रनगरीं वनमध्ये नृपोत्तमः ॥ ३२ ॥ पितुस्तुल्यं कृतं राज्यं धर्मवर्मा सुतोऽभवत् ॥ पितुस्तुल्यं कृतं राज्यं कृष्ण
वर्मा सुतोऽभवत् ॥ ३३ ॥ पितुस्तुल्यं कृतं राज्यमुदयस्तत्सुतोऽभवत् ॥ कृत्वोदयपुरं रम्यं वनमध्ये नृपोत्तमः ॥ ३४ ॥ पितुस्तुल्यं कृतं राज्यं
वाप्यकर्मा सुतोऽभवत् ॥ वापीकूपतडागानि नानाहर्म्याणि तेन वै ॥ ३५ ॥ धर्मार्थे कारयामास धर्मात्मा स च वै पुरम् ॥ एतस्मिन्नन्तरे प्राप्तो
बलदो नाम भूपतिः ॥ ३६ ॥ लक्षसैन्ययुतो वीरो महामदमते स्थितः ॥ तेन सार्धमभूद्युद्धं राज्ञो वै वाप्यकर्मणः ॥ ३७ ॥ जित्वा पैशाचका
न्म्लेच्छान्कृष्णोत्सवमकारयत् ॥ पितुस्तुल्यं कृतं राज्यं गुहिलस्तत्सुतोऽभवत् ॥ ३८ ॥ पितुस्तुल्यं कृतं राज्यं कालभोजः सुतोऽभवत् ॥ पितु
स्तुल्यं कृतं राज्यं राष्ट्रपालस्ततोऽभवत् ॥ ३९ ॥ स त्यक्त्वा पैतृकं स्थानं वैष्णवीं शक्तिमागमत् ॥ तपसाराधयामास शारदां सर्वमंगलाम् ॥
॥ ४० ॥ प्रसन्ना सा तदा देवी कारयामास वै पुरीम् ॥ महावतीं महारम्यां मणिदेवेन रक्षिताम् ॥ ४१ ॥ तत्रोष्य नृपतिर्धीमान्दशाब्दं राज्य

माप्तवान् ॥ तस्योभौ तनयौ जातौ विजयः प्रजयस्तथा ॥ ४२ ॥ प्रजयः पितरौ त्यक्त्वा गंगाकूलमुपाययौ ॥ द्वादशाब्दं च तपसा पूजयामास
शारदाम् ॥ ४३ ॥ कन्यामूर्तिमयी देवी वेणुवादनतत्परा ॥ हयमारुह्य संप्राप्ता विहस्याह महीपतिम् ॥ ४४ ॥ किन्निमित्तं भूपसुत त्वया चारा
धिता शिवा ॥ तत्फलं त्वं हि तपसा मत्तः शीघ्रमवाप्स्यसि ॥ ४५ ॥ इति श्रुत्वा स होवाच कुमारि मधुरस्वरे ॥ नवीनं नगरं मह्यं कुरु देवि
नमोस्तु ते ॥ ४६ ॥ इति श्रुत्वा तु सा देवी ददौ तस्मै हयं शुभम् ॥ पुरो भूत्वा वाद्यकरी दक्षिणां दिशमागता ॥ ४७ ॥ स भूपो हयमारुह्य नेत्र
आच्छाद्य चाययौ ॥ पुनः स भूपतिः पश्चात्पश्चिमां दिशमागता ॥ ४८ ॥ ततोनुप्रययौ पूर्वमर्कणो यत्र पक्षिराट् ॥ भयभीतो नृपस्तेन समु
न्मील्य स चक्षुषी ॥ ४९ ॥ ददर्श नगरं रम्यं कन्याया रचितं शुभम् ॥ उत्तरे तस्य वै गंगा दक्षिणेनास पाण्डुरा ॥ ५० ॥ पश्चिमे ईशसरिता
पूर्वे पक्षी स मर्कणः ॥ कुब्जभूतमभूद्ग्रामं कान्यकुब्ज इति स्मृतः ॥ ५१ ॥ दशवर्षं च तेनैव जयपालेन वै पदम् ॥ कृतं तस्य सुतो जातो
वेणुवाद्याच्च वेणुकः ॥ ५२ ॥ स वेणुश्च महीपालो देवीदत्तां मनोहराम् ॥ पत्नीं कन्यावतीं नाम्ना समुद्वाह्य रराज ह ॥ ५३ ॥ तस्यां सप्त सुता
जाता मातॄणां मंगलाः कलाः ॥ शीतला पार्वती कन्या तथा पुष्पवती स्मृता ॥ ५४ ॥ गोवर्धनी च सिंदूरा काली नाम्ना प्रकीर्तिता ॥ ब्राह्मी
माहेश्वरी चैव कौमारी वैष्णवी तथा ॥ ५५ ॥ वाराही च तथेन्द्राणी चामुण्डाः क्रमतोऽभवन् ॥ एकदा भूपतेः पत्नी तंतुना मृत्तिकाघटं ॥
॥ ५६ ॥ कूपे कृतवती प्रेम्णा यथा पूर्वं तथाद्य सा ॥ ददर्श बहुला नारीर्नानाभूषणभूषिताः ॥ ५७ ॥ स्वयमेकैव वसना मनोग्लानिमुपा
ययौ ॥ तदैव स घटो भूमौ न प्राप्तः सप्रवृत्तिकाम् ॥ ५८ ॥ दृष्ट्वा कन्यावती देवी घटहीना गृहं ययौ ॥ तदा तु सप्त कन्याश्च शिलाभूता गृहे
स्थिताः ॥ ५९ ॥ श्रुत्वा वेणुस्तदागत्य भर्त्सयित्वा स्वकां प्रियाम् ॥ ब्रह्मचर्यव्रतं त्यक्त्वा रमयामास योषितम् ॥ ६० ॥ नृपाद्वै वीरवत्यां च
यशोविग्रह आत्मजः ॥ बभूव बलवान्धर्मी चार्यदेशपतिः स्वयम् ॥ ६१ ॥ विंशद्वर्षं कृतं राज्यं तेन राज्ञा महीतले ॥ महीचंद्रस्तस्य सुतः
पितुस्तुल्यं कृतं पदम् ॥ ६२ ॥ चंद्रदेवस्तस्य सुतो राज्यं तेन पितुः समम् ॥ कृतं तस्मात्सुतो जातो मंदपालो महीपतिः ॥ ६३ ॥
तस्य भूपस्य समये सर्वे भूपाः समन्ततः ॥ त्यक्त्वा तं मंदपालं च तद्दत्ते संस्थिता गृहे ॥ ६४ ॥ पितुरर्द्धं कृतं राज्यं कुम्भपालस्ततो
ऽभवत् ॥ राजनीया च नगरी पिशाचविषये स्थिता ॥ ६५ ॥ तत्पतिश्च महामोदो म्लेच्छपैशाचधर्मगः ॥ स जित्वा बहुधा देशाँल्लुंठयित्वा
धनं बहु ॥ ६६ ॥ म्लेच्छधर्मकरः प्राप्तः कुम्भपालो यतः स्थितः ॥ कुम्भपालस्तु तं दृष्ट्वा कलिना निर्मितं नृप ॥ ६७ ॥ महामोदं समा

गम्य प्रणनाम स बुद्धिमान् ॥ तदा म्लेच्छपतिः शूरो दत्त्वा तस्मै धनं बहु ॥ ६८ ॥ राजनीयां च नगरीं प्राप्तवान्मूर्तिखंडकम् ॥ विंश
दब्दं कृतं राज्यं कुंभपालेन धीमता ॥ ६९ ॥ तत्पुत्रो देवपालश्चानंगभूपस्य कन्यकाम् ॥ समुद्वाह्य विधानेन चंद्रकांतिं तया सह ॥ ७० ॥
कान्यकुब्जगृहं प्राप्य जित्वा भूपाननेकशः ॥ पितुस्तुल्यं कृतं राज्यं तस्योभौ तनयौ स्मृतौ ॥ ७१॥ जयचंद्रो रत्नभानुर्दिशं पूर्वां तथोत्तराम् ॥
आर्यदेशस्य वै जित्वा वैष्णवो राज्यमाप्तवान्॥७२॥रत्नभानोश्च तनयो लक्षणो नाम विश्रुतः ॥ कुरुक्षेत्रे रणं प्राप्य त्यक्त्वा प्राणान्दिवं गतः॥७३॥
समाप्तिमगमद्वंशो वैश्यपालस्य धीमतः ॥ कुंभपालस्य शौक्लस्य वैश्यानां रक्षकस्य च ॥७४॥ विष्वक्सेनान्वये जाता विष्वक्सेना नृपाः स्मृताः॥
विसेनस्य कुले जाता विसेनाः क्षत्रियाः स्मृताः ॥ ७५ ॥ गुहिलस्य कुले जाता गौहिलाः क्षत्रिया हि ते ॥ राष्ट्रपालान्वये जाता राष्ट्रपाला
नृपाः स्मृताः ॥ ७६ ॥ वैश्यपालस्य वै वंशे कुंभपालस्य धीमतः ॥ वैश्यपालाश्च राजन्या बभूवुर्बहुधा हि ते ॥ ७७ ॥ लक्षणे मरणं प्राप्ते शुक्ल
वंशधुरंधुरे ॥ सर्वे ते क्षत्रिया मुख्याः कुरुक्षेत्रे लयं गताः ॥ ७८ ॥ शेषास्तु क्षुद्रभूपाला वर्णसंकरसंभवाः ॥ म्लेच्छैश्च दूषिता जाता म्लेच्छराज्ये
भयानके ॥ ७९ ॥ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडापरपर्याये कलियुगीयेतिहाससमुच्चये प्रमरवंशवर्णनं नाम तृतीयोऽ
ध्यायः ॥ ३ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ भृगुवर्य शृणु त्वं वै वंशं परिहरस्य च ॥ जित्वा बौद्धान्परिहरोऽथर्ववेदपरायणः ॥ १ ॥
शक्तिं सर्वमयीं नित्यां ध्यात्वा प्रेमपरोऽभवत् ॥ प्रसन्ना सा तदा देवी सार्धयोजनमायतम् ॥ २ ॥ नगरं चित्रकूटाद्रौ चकार कलिनिर्जरम् ॥
कलिर्यत्र भवेद्वद्धो नगरेऽस्मिन्सुरप्रिये ॥ ३ ॥ अतः कलिंजरो नाम्ना प्रसिद्धोऽभून्महीतले ॥ द्वादशाब्दं कृतं राज्यं तेन पूर्वप्रदेशके ॥ ४ ॥
गौरवर्मा तस्य सुतः कृतं राज्यं पितुः समम् ॥ स्वानुजं घोरवर्माणं तत्रास्थाप्य मुदान्वितः ॥ ५ ॥ गौडदेशं समागम्य तत्र राज्यमकारयत् ॥
सुपर्णो नाम नृपतिस्ततोऽभूद्गौरवर्मणः ॥ ६ ॥ पितुस्तुल्यं कृतं राज्यं रूपणस्तत्सुतोऽभवत् ॥ पितुस्तुल्यं कृतं राज्यं कारवर्मा सुतोऽभवत् ॥७॥
शको नाम ततो राजा महालक्ष्मीं[1] सनातनीम् ॥ त्रिवर्षांते च सा देवी कामाक्षीरूपधारिणी ॥ ८ ॥ स्वभक्तपालना चैव तत्र वासमकारयत् ॥
शतार्द्धाब्दं कृतं राज्यं तेन वै कामवर्मणा ॥ ९ ॥ मिथुनं जनयामास भोगो भोगवती हि सा ॥ विक्रमायैव नृपतिः सुतां भोगवतीं ददौ ॥
॥ १० ॥ स्वराज्यं च स्वपुत्राय प्रददौ भोगवर्मणे ॥ पिस्तुल्यं कृतं राज्यं कालिवर्मा सुतोऽभवत् ॥ ११ ॥ महोत्सवं महाकाल्याः कृतवान्स च

---

[1] सिषेवे इति शेषः ।

भूपतिः ॥ तस्मै प्रसन्ना वरदा काली भूत्वा स्वयं स्थिता ॥ १२ ॥ कलिका बहुपुष्पाणां सा चकार स्वहर्षतः ॥ ताभिर्भवं च नगरं संजातं च मनोहरम् ॥ १३ ॥ कलिकाता पुरी नाम्ना प्रसिद्धाभून्महीतले ॥ कौशिकस्तस्य तनयः पितुस्तुल्यं कृतं पदम् ॥ १४ ॥ कात्यायनस्तस्य सुतः पितुस्तुल्यं कृतं पदम् ॥ तस्य पुत्रो हेमवतः पितुस्तुल्यं कृतं पदम् ॥ १५ ॥ शिववर्मा च तत्पुत्रः पितुस्तुल्यं कृतं पदम् ॥ भववर्मा च तत्पुत्रः पितुस्तुल्यं कृतं पदम् ॥ १६ ॥ रुद्रवर्मा च तत्पुत्रः कृतं राज्यं पितुः समम् ॥ भोजवर्मा च तत्पुत्रस्त्यक्त्वा वै पैतृकं पदम् ॥ १७ ॥ भोजराष्ट्रं वनोद्देशे कारयामास वीर्यवान् ॥ पितुस्तुल्यं कृतं राज्यं गववर्मा नृपोभवत् ॥१८॥ पितुस्तुल्यं कृतं राज्यं विंध्यवर्मा नृपोऽभवत् ॥ स्वानुजाय स्वकं राज्यं दत्त्वा वंगमुपाययौ ॥ १९ ॥ पितुस्तुल्यं कृतं राज्यं सुखसेनस्ततोऽभवत् ॥ पितुस्तुल्यं कृतं राज्यं बलाकस्तस्य चात्मजः ॥ २० ॥ दशवर्षं कृतं राज्यं लक्ष्मणस्तत्सुतोऽभवत् ॥ पितुस्तुल्यं कृतं राज्यं माधवस्तत्सुतोऽभवत् ॥ २१ ॥ पितुस्तुल्यं कृतं राज्यं वेशवस्तत्सुतोऽभवत् ॥ पितुस्तुल्यं कृतं राज्यं सुरसेनस्ततोऽभवत् ॥ २२ ॥ पितुस्तुल्यं कृतं राज्यं ततो नारायणोऽभवत् ॥ पितुस्तुल्यं कृतं राज्यं शांतिवर्मा सुतोभवत् ॥ २३ ॥ गंगाकूले शांतिपुरं रचितं तेन धीमता ॥ निवासं कृतवान्भूपः पितुस्तुल्यं कृतं पदम् ॥ २४ ॥ नदीवर्मा तस्य सुतो गंगादत्तवरो बली ॥ चकार नगरीं रम्यां नदीहां गौडराष्ट्रगाम् ॥ २५ ॥ गंगया च तदाहूतोभिज्ञो विद्याधरः स्वयम् ॥ तेनैव रक्षिता चासीत्पुरी वेदपरायणा ॥ २६ ॥ विंशद्वर्षं कृतं राज्यं तेन राज्ञा महात्मना ॥ गंगावंशस्ततो जातो विश्रुतोऽभून्महीतले ॥ २७ ॥ शार्ङ्गदेवस्तस्य सुतो बलवान्हरिपूजकः ॥ गौडदेशमुपागम्य हरिध्यानपरोभवत् ॥ २८ ॥ दशवर्षं कृतं राज्यं गंगादेवस्तु तत्सुतः ॥ विंशद्वर्षं कृतं राज्यं चानंगस्तस्य भूपतिः ॥ २९ ॥ तनयो बलवांश्चासीद्गौडदेशमहीपतिः ॥ पितुस्तुल्यं कृतं राज्यं ततो राजेश्वरोऽभवत् ॥ ३० ॥ पितुस्तुल्यं कृतं राज्यं नृसिंहस्तनयोऽभवत् ॥ पितुस्तुल्यं कृतं राज्यं कलिवर्मा सुतोऽभवत् ॥ ३१ ॥ राष्ट्रदेशमुपागम्य जित्वा तस्य नृपं बली ॥ महावतीं पुरीं रम्यामध्यास्य सुखितोऽभवत् ॥ ३२ ॥ पितुस्तुल्यं कृतं राज्यं धृतिवर्मा सुतोऽभवत् ॥ पितुस्तुल्यं कृतं राज्यं तस्य पुत्रो महीपतिः ॥ ३३ ॥ जयचंद्राज्ञया भूप उर्वीमायामिति स्मृताम् ॥ नगरीं कारयामास तत्र वासमकारयत् ॥ ३४ ॥ कुरुक्षेत्रे हताः सर्वे क्षत्रियाश्चंद्रवंशिनः ॥ तदा महीपती राजा महावत्यधिपोऽभवत् ॥ ३५ ॥ विंशद्वर्षं कृतं राज्यं सहोद्दीनेन वै ततः ॥ कुरुक्षेत्रे मृतिं प्राप्ताः सुयोधनकलांशकाः ॥ ३६ ॥ घोरवर्मा तु नृपतिः सुतः परिहरस्य वै ॥ कलिंजरे कृतं राज्यं शार्दूलस्तत्सुतोऽभवत् ॥ ३७ ॥ तदन्वये च ये भूपाः शार्दूलीयाः प्रकीर्तिताः ॥ भूपानां बहुधा राष्ट्रं शार्दूला

न्वयसंभवम् ॥३८॥ बभूव सर्वंतो भूमौ महामायाप्रसादतः ॥ इति ते कथितं विप्र पावकीयमहीभुजाम् ॥३९॥ कुलं सकलपापघ्नं यथैव शशिसूर्ययोः ॥ पुनरन्यत्प्रवक्ष्यामि यथा जातः स्वयं हरिः ॥४०॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये चतुर्थोऽध्यायः ॥ ४ ॥ छ ॥

॥ सूत उवाच ॥ ॥ मध्याह्नकाले संप्राप्ते ब्रह्मणोऽव्यक्तजन्मनः ॥ चाक्षुषांतरमेवापि महावायुर्बभूव ह ॥ १ ॥ तत्प्रभावेन हेमाद्रिः कंपमानः पुनःपुनः ॥ यथा वृक्षस्तथैवासौ तत्कंपादेव मंडलः ॥२॥ नभसो भूतले प्राप्तस्तदा भूमिः प्रकंपिता ॥ बभूव मुनिशार्दूल सर्वलोकविनाशिनी ॥ ३ ॥ सप्तद्वीपाः समुद्राश्च जलभूता बभूविरे ॥ लोकालोकस्तदा शेषोऽभवत्सोत्तरपर्वतः ॥ ४ ॥ शेषा भूमिर्लयं प्राप्ता मुने मन्वंतरे लये ॥ सहस्राब्दांतरे भूमिर्बभूव जलमध्यगा ॥ ५ ॥ तदा स भवान्विष्णुर्भवेन विधिना सह ॥ शैशुमारं शुभं चक्रं चकार नभसि स्थितम् ॥ ६ ॥ गृहीत्वा सकलास्तारा ग्रहान्सर्वान्यथाविधि ॥ स्थापयामास भगवान्यथायोग्यं पितामहः ॥७॥ पुनर्वै ज्योतिषां चक्रैः शोषिता सकला मही ॥ स्थलीभूयायुताब्दान्ते दृश्यमाना बभूव ह ॥ ८ ॥ तदा स भगवान्ब्रह्मा मुखात्सोमं चकार ह ॥ द्विजराजं महाप्राज्ञं सर्ववेदविशारदम् ॥ ९ ॥ भुजाभ्यां भगवान्ब्रह्मा क्षत्रराजं महाबलम् ॥ सूर्यं च जनयामास राजनीतिपरायणम् ॥ १० ॥ ऊरुभ्यां वैश्यराजं च समुद्रं सरितां पतिम् ॥ रत्नाकरं च कृतवान्परमेष्ठी पितामहः ॥११॥ पद्भ्यां च जनयामास विश्वकर्माणमुत्तमम् ॥ दक्षं नाम कलाभिज्ञं शूद्रराजं सुकृत्यकम् ॥१२॥ सोमाद्वै ब्राह्मणा जाताः सूर्याद्राजन्यवंशजाः ॥ समुद्रात्सकला वैश्या दक्षाच्छूद्रा बभूविरे ॥१३॥ सूर्यमंडलतो जातो मनुर्वैवस्वतः स्वयम् ॥ तस्य राज्यमभूत्सर्वं प्राणिनां लोकवासिनाम् ॥१४॥ दिव्यानां च युगानां च तज्ज्ञेयं चैकसप्ततिः ॥ तदा स भगवान्विष्णुर्विश्वरूपाऽवतारकः ॥ १५ ॥ विष्णुः पूर्वार्द्धतो जातः परार्द्धाद्वामनः स्वयम् ॥ बालः सत्ययुगे देवो विश्वरूपः सनातनः ॥१६॥ चतुश्शतानि वर्षाणि परमायुर्नृणां तदा ॥ त्रेतायां यौवनं प्राप्तः पूर्वार्द्धात्संभवो हरेः ॥ १७ ॥ वर्षाणां त्रिशतानां च नृणामायुः प्रकीर्तितम् ॥ द्वापरे वार्द्धिको देवो नृणामायुः शतद्वयम् ॥ १८ ॥ कलौ तु मरणं प्राप्तो विश्वरूपो हरिः स्वयम् ॥ नृणामायुः शताब्दं च केषांचिद्धर्मशालिनाम् ॥ १९ ॥ परार्द्धाद्वामनो देवो महेन्द्रावरजो हरिः ॥ चतुर्भुजो महाश्यामो गरुडोपरि संस्थितः ॥ २० ॥ विश्वरूपहितार्थाय त्रियुगी संबभूव ह ॥ वामनार्द्धाच्च त्रियुगी जातो नारायणः स्वयम् ॥२१॥ श्वेतरूपो हरिः सत्ये हंसाख्यो भगवान्स्वयम् ॥ त्रेतायां रक्तरूपश्च यज्ञाख्यो भगवान्स्वयम् ॥ द्वापरे पीतरूपश्च स्वर्णगर्भो हरिः स्वयम् ॥२२॥ कलिकाले तु संप्राप्ते संध्यायां द्वापरे युगे ॥ कला तु सकला विष्णोर्वामनस्य तथा कला ॥ एकीभूता च देवक्यां जातो विष्णु

स्तदा स्वयम् ॥ २३ ॥ वसुदेवगृहे रम्ये मथुरायां च देवताः ॥ ब्रह्माद्यास्तुष्टुवुर्देवं परं ब्रह्म सनातनम् ॥ २४ ॥ तदा प्रसन्नो भगवान्देवानाह शुभं
वचः ॥ देवानां च हितार्थाय दैत्यानां निधनाय च ॥ अहं कलौ च बहुधा भवामि सुरसत्तमाः ॥ २५ ॥ दिव्यं वृंदावनं रम्यं सूक्ष्मं भूतलसं
स्थितम् ॥ तत्राहं च रहःक्रीडां करिष्यामि कलौ युगे ॥ २६ ॥ सर्वे वेदाः कलौ घोरे गोपीभूताः समंततः ॥ रंस्यन्ते हि मया सार्द्धं त्यक्त्वा
भूमंडलं तदा ॥ २७ ॥ राधया प्रार्थितोऽहं वै यदा कलियुगांतके ॥ समाप्य च रहःक्रीडां कल्की च भवितास्म्यहम् ॥ २८ ॥ युगांतप्रलयं कृत्वा
पुनर्भूत्वा द्विधातनुः ॥ सत्यधर्मं करिष्यामि सत्ये प्राप्ते सुरोत्तमाः ॥ २९ ॥ इति श्रुत्वा तु ते देवास्तत्रैवान्तर्लयं गताः ॥ एवं युगेयुगे क्रीडा
हरेरद्भुतकर्मणः ॥ ३० ॥ ये तु वै विष्णुभक्ताश्च ते हि जानंति विश्वगम् ॥ यथैव नृपतेर्दासाः स्वराज्ञः कार्यगौरवम् ॥ जानंति नापरे विप्र तथा
दासा हरेः स्वयम् ॥३१॥ विष्णुवांछानुसारेण विष्णुमाया सनातनी ॥ रचित्वा विविधाँल्लोकान्महाकाली बभूव ह ॥३२॥ कृत्वा कालमयं सर्वं
जगदेतच्चराचरम् ॥ पश्चात्तु भक्षयित्वा तान्महागौरी भविष्यति ॥३३॥ नमस्तस्यै महाकाल्यै विष्णुमाये नमोनमः ॥ महागौरि नमस्तुभ्यमस्मा
न्पाहि भयान्वितान् ॥३४॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये पंचमोऽध्यायः ॥ ५ ॥
॥ ॥ ऋषिरुवाच ॥ ॥ महीराजान्मुनिश्रेष्ठ के राजानो बभूविरे ॥ तान्नो वद महाभाग सर्वज्ञोऽस्ति भवान्सदा ॥१॥ ॥ सूत उवाच ॥ ॥ पैशाचः
कुतुकोद्दीनो देहलीराज्यमास्थितः ॥ वलीगढं महारम्यं यादवै रक्षितं पुरम् ॥ ययौ तत्र स पैशाचः शूरायुतसमन्वितः ॥२॥ वीरसेनस्य वै पौत्रं
भूपसेनं नृपोत्तमम् ॥ स जित्वा कुतुकोद्दीनो देहलीग्रामसंस्थितः ॥ ३ ॥ एतस्मिन्नंतरे भूपा नानादेश्याः समागताः ॥ जित्वा स कुतुकोद्दीनः
स्वदेशात्तैर्निराकृतः ॥ ४ ॥ सहोद्दीनस्तु तच्छ्रुत्वा पुनरागत्य देहलीम् ॥ जित्वा भूपान्दैत्यवरो मूर्तिखंडमथाकरोत् ॥ ५ ॥ तत्पश्चाद्बहुधा म्लेच्छा
इहागत्य समन्ततः ॥ पंचषट्सप्तवर्षाणि कृत्वा राज्यं लयं गताः ॥ ६ ॥ अद्यप्रभृति देशेऽस्मिञ्छतवर्षान्तरे हि ते ॥ भूत्वा चाल्पायुषो
मन्दा देवतीर्थविनाशकाः ॥ ७ ॥ म्लेच्छभूपा मुनिश्रेष्ठास्तस्माद्यूयं मया सह ॥ गंतुमर्हथ वै शीघ्रं विशालां नगरीं शुभाम् ॥ ८ ॥ इति श्रुत्वा
तु वचनं दुःखात्संत्यज्य नैमिषम् ॥ ययुः सर्वे विशालायां हिमाद्रौ गिरिसत्तमे ॥ ९ ॥ तत्र सर्वे समाधिस्था ध्यात्वा सर्वमयं हरिम् ॥ शतवर्षान्तरे
सर्वे ध्यानाद्ब्रह्मगृहं ययुः ॥१०॥ व्यास उवाच ॥ इत्येवं सकलं भाव्यं योगाभ्यासवशाद्भुतम् ॥ वर्णितं च मया तुभ्यं किमन्यच्छ्रोतुमिच्छसि
॥ ११ ॥ ॥ मनुरुवाच ॥ ॥ भगवन्वेदतत्त्वज्ञ सर्वलोकशिवंकर ॥ अहं मायाभवो जातो भवान्वेदभवो भुवि ॥ १२ ॥ अविद्यया च सकलं मम

ज्ञानं समाहृतम् ॥ अतोऽहं विविधा योनीर्गृहीत्वा लोकमागतः ॥१३॥ परं ब्रह्मैव कृपया दृष्ट्वा मां मंदभागिनम् ॥ व्यासरूपं स्वयं कृत्वा समुद्धर्तु
मुपागतः ॥ १४ ॥ नमस्तस्मै मुनींद्राय वेदव्यासाय साक्षिणे ॥ अविद्यामोहभावेभ्यो रक्षणाय नमोनमः ॥ १५ ॥ पुनरन्यच्च मे ब्रूहि सूताद्यैः
किं कृतं मुने ॥ तत्सर्वं कृपया स्वामिन्वक्तुमर्हसि सांप्रतम् ॥ १६ ॥ ॥ व्यास उवाच ॥ ॥ ब्रह्मांडे ये स्थिता लोकास्ते सर्वेंस्मिन्कलेवरे ॥
अहंकारो हि जीवात्मा सर्वः स्यात्कोटिहीनकः ॥ १७ ॥ पुराणोऽणोरणीयांश्च षोडशात्मा सनातनः ॥ इन्द्रियाणि मनश्चैव पञ्च चेन्द्रियगोचराः
॥ १८ ॥ ज्ञेयो जीवः शरीरेऽस्मिन्स ईशगुणबंधितः ॥ ईशो ह्यष्टादशात्मा वै शंकरो जीवशंकरः ॥ १९ ॥ बुद्धिर्मनश्च विषया इंद्रियाणि तथैव
च ॥ अहंकारस्स चेशो वै महादेवः सनातनः ॥ २० ॥ जीवो नारायणस्साक्षाच्छंकरेण विमोहितः ॥ स बद्धस्त्रिगुणैः पाशैरेकश्च बहुधाभवत् ॥
॥ २१ ॥ कालात्मा भगवानीशो महाकल्पस्वरूपकः ॥ शिवकल्पो ब्रह्मकल्पो विष्णुकल्पस्तृतीयकः ॥ ईशनेत्राणि तान्येव बन्धकल्पश्चतुर्थकः
॥ २२ ॥ वायुकल्पो वह्निकल्पो ब्रह्मांडो लिंगकल्पकः ॥ ईशवक्त्राणि पञ्चैव तत्त्वज्ञैः कथितानि वैं ॥ २३ ॥ भविष्यकल्पश्च तथा तथा गरुडक
ल्पकः ॥ कल्पो भागवतश्चैव मार्कण्डेयश्च कल्पकः ॥२४॥ वामनश्च नृसिंहश्च वराहो मत्स्यकूर्मकौ ॥ ज्ञानात्मनो महेशस्य ज्ञेया दश भुजा बुधैः
॥ २५ ॥ अष्टादशदिनेष्वेव ब्रह्मणोऽव्यक्तजन्मनः ॥ कल्पाश्चाष्टादशास्सर्वें बुधैर्ज्ञेया विलोमतः ॥ २६ ॥ कूर्मकल्पश्च तत्राद्यो मत्स्यकल्पो द्विती
यकः ॥ तृतीयः श्वेतवाराहः कल्पो ज्ञेयः पुरातनैः ॥ २७ ॥ द्विधा च भगवान्ब्रह्मा सूक्ष्मः स्थूलोऽगुणो गुणी ॥ सगुणः स विराण्नाम्ना विष्णु
नाभिसमुद्भवः ॥ २८ ॥ निर्गुणोऽव्ययरूपश्चाव्यक्तजन्मा स्वभूः स्वयम् ॥ ब्रह्मणः सगुणस्यैव शतायुः कालनिर्मितम् ॥ २९ ॥ ऊनविंशसहस्राणि
लक्षैको मानुषाब्दकैः ॥ एभिर्वर्षैर्दिनं ज्ञेयं विराजो ब्रह्मणः स्वयम् ॥ ३० ॥ निर्गुणोऽव्यक्तजन्मा च कालात्सर्वेंश्वरः परः ॥ अव्यक्तं प्रकृतिर्ज्ञेया
द्वादशांगानि वै ततः ॥ ३१ ॥ इन्द्रियाणि मनो बुद्धिरव्यक्तस्य स्मृतानि वै ॥ अव्यक्ताच्च परं ब्रह्म सूक्ष्मज्योतिस्तदव्ययम् ॥ ३२ ॥ यदा व्यक्ते
स्वयं प्राप्तोऽव्यक्तजन्मा हि संस्मृतः ॥ शतवर्षसमाधिस्थो यस्तिष्ठेच्च निरंतरम् ॥ ३३ ॥ सूक्ष्मो मनोनिलो भूत्वा गच्छेद्वै ब्रह्मणः पदम् ॥ सत्य
लोकमिति ज्ञेयं योगगम्यं सनातनम् ॥३४॥ तत्र स्थाने तु मुनयो गताः सर्वें समाधिना ॥ तत्रोषित्वा च लक्षाब्दं भूर्लोंकात्क्षणमात्रकम् ॥३५॥
सच्चिदानंदघनकं ततः प्राप्ताः कलेवरे ॥ नेत्राणि च समुन्मील्य संप्राप्ते द्वितयाह्निके ॥ ३६ ॥ ददृशुर्मनुजान्सर्वांन्पशुतुल्यान्हि सूक्ष्मकान् ॥ षष्ट्य
ब्दायुर्युतान्घोरान्सार्द्धकिष्कुद्वयोन्नतान् ॥३७॥ क्वचित्क्वचित्स्थिता वर्णा वर्णसंकरसन्निभाः ॥ सर्वें म्लेच्छाश्च पाषंडा बहुरूपमतो स्थिताः ॥३८॥

तीर्थानि सकला वेदास्त्यक्त्वा भूमंडलं तदा ॥ गोप्यो भूत्वा च हरिणा सार्द्धं चक्रुर्महोत्सवम् ॥ ३९ ॥ पाषंडा बहुजातीया नानामार्गप्रदर्शकाः ॥ कलिना निर्मितान्वर्णान्वंचयित्वा स्थिता भुवि ॥ ४० ॥ इति दृष्ट्वा तु मुनयो रोमहर्षणमंतिके ॥ गत्वा तत्र भविष्यंति ततः प्रांजलयो हि ते ॥ ४१ ॥ तैश्च तत्र स्तुतः सूतो योगनिद्रां सनातनीम् ॥ कथयिष्यति संत्यज्य कल्पाख्यानं मुनीन्प्रति ॥ तच्छृणुष्व नृपश्रेष्ठ यथा सूतेन वर्णितम् ॥ ४२ ॥ ॥ सूत उवाच ॥ ॥ कल्पाख्यानं प्रवक्ष्यामि यद्दृष्टं योगनिद्रया ॥ तच्छृणुध्वं मुनिश्रेष्ठा लक्षाब्दांते यथाभवत् ॥४३॥ मुकुलान्वयसंभूतो म्लेच्छभूपः पिशाचकः ॥ नाम्ना तिमिरलिंगश्च मध्यदेशमुपाययौ ॥ ४४ ॥ आर्यान्म्लेच्छांस्तदा भूपाञ्जित्वा कालस्वरूपकः ॥ देहलीनगरीमध्ये महावधमकारयत् ॥ ४५ ॥ आहूय सकलान्विप्रानार्यदेशनिवासिनः ॥ उवाच वचनं धीमान्यूयं मूर्तिप्रपूजकाः ॥ ४६ ॥ निर्मिता येन या मूर्तिस्तस्य पुत्रीसमा स्मृता ॥ तस्याः किं पूजनं शुद्धं शालग्रामशिलामयम् ॥ विष्णुदेवश्च युष्माभिः प्रोक्तः स तु न वै हरिः ॥ ४७ ॥ अतो वः सकला वेदाः शास्त्राणि विविधानि च ॥ वृथा कृतानि मुनिभिर्लोकवञ्चनहेतवे ॥ इत्युक्त्वा तान्बलाद्धृत्य ज्वलदग्नौ समाक्षिपत् ॥४८॥ शालग्रामशिलाः सर्वा बलात्तेषां सुपूज्यकाः ॥ गृहीत्वा चोष्ट्रपृष्ठेषु समारोप्य गृहं ययौ ॥४९॥ तैत्तिरं देशमागम्य दुर्गं तत्र चकार सः ॥ शालग्रामशिलानां च स्वासनारोहणं कृतम् ॥ ५० ॥ तदा तु सकला देवा दुःखिता वासवं प्रभुम् ॥ समूचुर्बहुधालप्य देवदेवं शचीपतिम् ॥५१॥ वयं तु भगवन्सर्वे शालग्रामशिलास्थिताः ॥ त्यक्त्वा मूर्तींश्च सकलाः कृष्णांशेन प्रबोधिताः ॥ शालग्रामशिलामध्ये वसामो मुदिता वयम् ॥५२॥ शिलास्सर्वाश्च नो देव शालदेशसमुद्भवाः ॥ ताश्च वै म्लेच्छराजेन स्वपदारोहणीकृताः ॥५३॥ इति श्रुत्वा तु वचनं देवानां भगवान्स्वराट् ॥ ज्ञात्वा बलिकृतं सर्वं देवपूजानिराकृतम् ॥ ५४ ॥ चुकोप भगवानिन्द्रो दैत्यान्प्रत्यभ्रवाहनः ॥ गृहीत्वा वज्रमतुलं स्वायुधं दैत्यनाशनम् ॥ तैत्तिरे प्रेषयामास देशे म्लेच्छनिवासके ॥ ५५ ॥ तस्य शब्देन सकला देशाश्च बहुभिन्नकाः ॥ स म्लेच्छो मरणं प्राप्तस्तदा सर्वसभाजनैः ॥५६॥ शालग्रामशिलाः सर्वा गृहीत्वा विबुधास्तदा ॥ गंडक्यां च समाक्षिप्य स्वर्गलोकमुपाययुः ॥५७॥ महेन्द्रस्तु सुरैः सार्द्धं देवपूज्यमुवाच ह ॥ महीतले कलौ प्राप्ते भगवन्दानवोत्तमाः ॥५८॥ वेदधर्मं समुल्लंघ्य मम नाशनतत्पराः ॥ अतो मां रक्ष भगवन्देवैः सार्द्धं कलौ युगे ॥५९॥ ॥ जीव उवाच ॥ ॥ महेन्द्र तव या पत्नी शची नाम्ना महोत्तमा ॥ ददौ तस्यै वरं विष्णुर्भवितास्मि सुतः कलौ ॥६०॥ त्वदाज्ञया च सा देवीं पुरीं शांतिमयीं शुभाम् ॥ गौडदेशे च गंगायाः कूले लोकनिवासिनीम् ॥६१॥ प्रत्यागत्य द्विजो भूत्वा कार्यसिद्धिं करिष्यति ॥ भवान्वै ब्राह्मणो भूत्वा देवकार्यं प्रसाधय ॥ ॥ ६२ ॥ इति श्रुत्वा गुरोर्वाक्यं रुद्रैरेकादशैः सह ॥ अष्टभिर्वसुभिः सार्धमश्विभ्यां स च वासवः ॥ ६३ ॥ तीर्थराजमुपागम्य प्रयागं च रविप्रि

यम् ॥ माघे तु मकरे सूर्ये सूर्यदेवमतोषयत् ॥ ६४ ॥ बृहस्पतिस्तदागत्य सूर्यमाहात्म्यमुत्तमम् ॥ इन्द्रादीन्कथयामास द्वादशाध्यायमापठन्॥६५॥
इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडापरपर्याये कलियुगीयेतिहाससमुच्चये प्रमरवंशवर्णनो नाम षष्ठोऽध्यायः ॥ ६ ॥ छ ॥ ॥
ऋषय उचुः ॥ ॥ बृहस्पतिस्तु भगवान्मुनिर्देवान्समास्थितान् ॥ किं प्रोवाच च माहात्म्यं मंडलस्थस्य वै रवेः ॥१॥ तत्सर्वं कृपया ब्रह्मन्ब्रूहि
नस्तत्समुत्सुकान् ॥ इति श्रुत्वा वचस्तेषां सूतो वचनमब्रवीत् ॥२॥ बृहस्पतिं समासीनं जीवरूपं गुणालयम् ॥ प्रयागस्थो महेन्द्रश्च सुरैः सार्द्ध
मुवाच ह ॥ ३ ॥ कथयस्व महाभाग सूर्यमाहात्म्यमुत्तमम् ॥ यच्छ्रुतेन रविः साक्षात्प्रसन्नोद्य भवेत्प्रभुः ॥ ४ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ धातृ
शर्मा द्विजः कश्चिदपत्यार्थे प्रजापतिम् ॥ तपसा तोषयामास बर्हिष्मतिपुरे स्थितः ॥५॥ पंचमाब्दे तु भगवान्संतुष्टश्च प्रजापतिः ॥ सुतं कन्यां
पुनः पुत्रं त्रीण्यपत्यानि संददौ ॥६॥ वर्षांतरे जनयित्वा त्र्यपत्यं स द्विजोत्तमः ॥ धातृशर्मा परं हर्षमाप्तवान्पुत्रलालनैः ॥ ७ ॥ विवाहाश्च
कथं तेषां भवितव्या महोत्तमाः ॥ इति चिन्तान्वितो विप्रो गंधर्वेशं च तुम्बुरुम् ॥ ८ ॥ हवनैस्तोषयामास वर्षमात्रविधानतः ॥ तुम्बुरुश्च तदा
गत्य तं चकार मनोरथम् ॥ ९ ॥ प्रसन्नस्तु तदा विप्रो वधूर्जामातरं मुदा ॥ दृष्ट्वा तेषां विहारं च पुनश्चिंतां चकार ह ॥ १० ॥ भूषणानि च
वासांसि धनानि विविधानि च ॥ तेषां कथं भविष्यंति निर्धनानां ममाशुच ॥ ११ ॥ षष्टिवर्षमयो भूत्वा चंदनाद्यैर्धनाधिपम् ॥ विधिव
त्पूजयामास वर्षमात्रं तु तत्परः ॥ १२ ॥ तदा प्रसन्नो भगवान्ददौ तस्मै धनं बहु ॥ विद्यां यक्षमयीं रम्यां पंचस्वर्णप्रदां मुदा ॥ १३ ॥ सह
स्रजापी संपूज्य हवनं तद्दशांशकम् ॥ तर्पणं मार्जनं चैव कृत्वा वांछामवाप्तवान् ॥१४॥ इत्येवं वर्तमानस्य गतः कालो महान्स्वयम् ॥ मृत्यो
रागमनं तस्य जातं रोगसमन्वितम् ॥ १५ ॥ पीडितस्तु रुजा विप्रः शंकरं लोकशंकरम् ॥ स्तुतिभिः श्रुतिरूपाभिस्तुष्टाव बलवर्जितः ॥ मास
मात्रेण भगवान्ददौ ज्ञानं स्वयं हरः ॥ १६ ॥ धातृशर्मा तु तत्प्राप्य भास्करं मोहनाशनम् ॥ सूर्यवारव्रतैस्तत्र तोषयामास नम्रधीः ॥ १७ ॥
पंचाब्दे भगवान्सूर्यो भक्तिभावेन वत्सलः ॥ चैत्र्यां तमाह वचनं वरं ब्रूहि पुनः पुनः ॥ १८ ॥ धातृशर्मा तु तच्छ्रुत्वा भास्करं मोहनाशनम् ॥
प्रश्रयावनतो भूत्वा तुष्टाव परया गिरा ॥ १९ ॥ ॥ धातृशर्मोवाच ॥ ॥ प्रवृत्तिश्च निवृत्तिश्च मनसोस्य तनौ प्रिया ॥ रात्रिरूपा प्रवृत्तिश्च
निवृत्तिर्दिनरूपिणी ॥ भवतस्तेजसा जाते लोकबंधनहेतवे ॥ २० ॥ अव्यक्ते तु स्थितं तेजो भवतो दिव्यसूक्ष्मकम् ॥ त्रिधाभूतं तु विश्वाय तस्मै
तेजात्मने नमः ॥ २१ ॥ राजसी या स्मृता बुद्धिस्तत्पतिर्भगवान्विधिः ॥ भवतस्तेजसा जातस्तस्मै ते विधये नमः ॥ २२ ॥ सात्त्विकी या तनौ
बुद्धिस्तत्पतिर्भगवान्हरिः ॥ भवता निर्मितस्सत्त्वात्तस्मै ते हरये नमः ॥ २३ ॥ तामसी मोहना बुद्धिस्तत्पतिश्च स्वयं शिवः ॥ तमोभूतेन भवता

जातस्तस्मै नमोनमः ॥ देहि मे भगवन्मोक्षं संज्ञाकांत नमोनमः ॥ २४ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ इत्येवं संस्तुतस्तेन भगवान्धातृशर्मणा ॥ महेन्द्रवचनं प्राह तं द्विजं ज्ञानकोविदम् ॥ २५ ॥ मोक्षश्चतुर्विधो विप्र सालोक्यं तपसोद्भवम् ॥ सामीप्यं भक्तितो जातं सारूप्यं ध्यानसंभवम् ॥ ॥ २६ ॥ सायुज्यं ज्ञानतो ज्ञेयं तेषां स्वामी परः पुमान् ॥ सगुणो विगुणो ज्ञेय आनन्दो मोक्षिणां क्रमात् ॥ २७ ॥ देवानां चैव देहेषु ये मोक्षाः पुनरागताः ॥ यद्गत्वा न निवर्तंते तद्विष्णोः परमं पदम् ॥ २८ ॥ यत्प्रसन्नेन विप्रेन्द्र सायुज्यं मे भवेत्तव ॥ मनुमात्रश्च यः कालस्तावत्ते मोक्ष आस्थितः ॥ इत्युक्त्वांतर्दधे देवस्तेन मोक्षीकृतो द्विजः ॥ २९ ॥ ॥ सूत उवाच ॥ ॥ इत्युक्तवंतं वागीशं चैत्रमासे दिवाकरः ॥ स्वरूपं दर्शयामास देवदेवः सनातनः ॥ ३० ॥ शृणुध्वं सकला देवा यन्निमिताः समागताः ॥ वंगीये स्वांशमुत्पाद्य देवकार्यं करोम्यहम् ॥ ३१ ॥ इत्युक्त्वा स्वमुखात्तेजः समुत्पाद्य दिवाकरः ॥ स्वभक्तायै सुकन्यायै द्विजपत्न्यै ददौ हि तत् ॥ ३२ ॥ धातृशर्मा द्विजो यो वै सूर्ये मोक्षमुपागतः ॥ स वै तत्तेजसा जातः काव्यकारस्य मंदिरे ॥ ३३ ॥ ईश्वरो नाम विख्यातः पुरीशद्धान्त आत्मवान् ॥ जित्वा विप्रान्वेदपरान्महतीं कीर्तिमाप्तवान् ॥३४॥ इति ते कथितं विप्र यथा जीवनभाषितम् ॥ पुनः शृणु कथां रम्यां देवभ्यो जीवनिर्मिताम् ॥ ३५ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ मायावत्यां द्विजः कश्चिन्मित्रशर्मेति विश्रुतः ॥ काव्यविद्यापरो नित्यं रसिकः कामिनीप्रियः ॥ ३६ ॥ कुंभराशिं मयि प्राप्ते गंगाद्वारे महोत्सवः ॥ बभूव बहुलैर्भूपैः कारितस्तीर्थतत्परैः ॥ ३७ ॥ तत्रोत्सवे नरा नार्य्यो बहुभूषणभूषिताः ॥ समाययुर्दर्शनार्थे परमानन्दनिर्भराः ॥ ३८ ॥ मित्रशर्मा तु संप्राप्य कामसेनस्य वै सुताम् ॥ काव्यकेलिकलायुक्तां द्वादशाब्दमयीं शुभाम् ॥ ३९ ॥ दाक्षिणात्यस्य भूपस्य तनयां मधुराननाम् ॥ दृष्ट्वा तां मृगशावाक्षीं तद्वशित्वमुपागतः ॥ ४० ॥ सा तु तं चित्रिणी नाम्ना मित्रशर्माणमुत्तमम् ॥ दृष्ट्वा तु मूर्च्छिता चासीद्विप्रमूर्तिर्हृदि स्थिता ॥ ४१ ॥ स्वगेहं पुनरागत्य चित्रिणी भास्करं प्रभुम् ॥ प्रत्यहं पूजयामास बहुमानपुरस्सरा ॥ ४२ ॥ मित्रशर्मा तु तत्स्थाने गंगाकूले मनोहरे ॥ प्रातः स्नात्वा शुचिर्भूत्वा वैशाखे जलमध्यगः ॥ ४३ ॥ स्तोत्रमादित्यहृदयमजपत्सूर्यतत्परः ॥ प्रत्यहं द्वादशावर्तैस्तोषयामास भास्करम् ॥ ४४ ॥ मासान्ते भगवान्सूर्यो ददौ तस्मै हि तं वरम् ॥ स तु लब्धवरो विप्रः स्वगेहं पुनरागतः ॥ ४५ ॥ चित्रिणी तु वरं प्राप्ता वांछितं लोकभास्करात् ॥ पुनस्तौ पितरौ स्वप्ने भास्करेण प्रबोधितौ ॥ ४६ ॥ मित्रशर्माणमाहूय वरयामासतुः सुताम् ॥ स्वान्ते निवासयामास कामसेनश्च दंपती॥४७॥ तौ तु चक्रं मुदाविष्टौ प्रत्यहं सूर्यदैवतम् ॥ ताम्रपात्रे च तद्यंत्रं लेखयित्वा विधानतः ॥ ४८ ॥ ईजतू रक्तकुसुमैर्व्रतं कृत्वा रविप्रियम् ॥ ४९ ॥ शताब्दवपुषौ चोभौ निर्जरौ श्रमवर्जितौ ॥ आरोग्यौ मरणं प्राप्य सामीप्यं च रवेर्गतौ ॥ ५० ॥ इति श्रुत्वा रवेर्गाथां वैशाख्यां देवराट् स्वय

म् ॥ प्रत्यक्षं भास्करं देवं ददर्श सहितं सुरैः ॥ ५१ ॥ भक्तिनम्रान्सुरान्दृष्ट्वा भगवांस्तिमिरापहः ॥ उवाच वचनं रम्यं देवकार्यपरं शुभम् ॥ ममांशात्तनयो भूमौ भविष्यति सुरोत्तम ॥ ५२ ॥ ॥ सूत उवाच ॥ ॥ इत्युक्त्वा स्वस्य बिंबस्य तेजोराशिं समन्ततः ॥ समुत्पाद्य कृतः काश्यां रामानंदस्ततोभवत् ॥ ५३ ॥ देवलस्य च विप्रस्य कान्यकुब्जस्य वै सुतः ॥ बाल्यात्प्रभृति स ज्ञानी रामनामपरायणः ॥ पित्रा मात्रा परित्यक्तो राघवं शरणं गतः ॥ ५४ ॥ तदा तु भगवान्साक्षाच्चतुर्दशकलो हरिः ॥ सीतापतिस्तद्धृदये निवासं कृतवान्मुदा ॥ ५५ ॥ इति ते कथितं विप्र मित्रदेवांशतो यथा ॥ रामानंदस्तु बलवान्हरिभक्तेश्च संभवः ॥ ५६ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ शृणु शक्र कथां रम्यां ज्येष्ठमासस्य वै रवेः॥ अर्यमा नाम वै विप्रः पुरा सत्ययुगे ह्यभूत् ॥ वेदवेदांगतत्त्वज्ञो धर्मशास्त्रपरायणः ॥ ५७ ॥ तस्य पत्नी पितृमती श्राद्धयज्ञस्य भूपतेः ॥ तनया च महासाध्वी सप्त पुत्रानकल्मषान् ॥ अर्यम्णो जनयामास धर्मशास्त्रपरायणान् ॥ ५८ ॥ एकदा स द्विजो धीमान्विचार्य्य बहुधा हृदि ॥ धनार्थी भास्करं देवं तुष्टाव बहुपूजनैः ॥ ५९ ॥ प्रभाते श्वेतकुसुमैश्चन्दनादिभिरर्चनैः ॥ मध्याह्ने रक्तकुसुमैः पीतपुष्पैः पितृंप्रसौ ॥ ६० ॥ मासमात्रं तु विधिना पूजयामास भास्करम् ॥ ज्येष्ठे वै भगवान्सूर्यो ददौ तस्मै मणिं शुभम् ॥ ६१ ॥ तन्मणेश्च प्रभावेण प्रस्थमात्रं च कांचनम् ॥ प्रत्यहं जनयामास तेन धर्मः समर्जितः ॥ ६२ ॥ वापीकूपतडागान्हि तथा हर्म्याणि भूतले ॥ कारयामास धर्मार्थी सूर्यदेवप्रसादतः ॥ ६३ ॥ सहस्राब्दवपुर्भूत्वा निर्जरो निरुपद्रवः ॥ त्यक्त्वा कलेवरं रम्यं सूर्यलोकमुपाययौ ॥ उषित्वा तत्र लक्षाब्दं सूर्यरूपो बभूव ह ॥ ६४ ॥ इत्येवं भास्करस्यैवमाहात्म्यं कथितं मया ॥ तस्माच्छक्र सुरैः सार्द्धं भज मंडलगं रविम् ॥ ६५ ॥ इति श्रुत्वा तु ते देवाः पद्यैः सूर्यकथामयैः ॥ तोषयांचक्रिरे प्रेम्णा ज्येष्ठमासि रविस्त्वसौ ॥ प्रत्यक्षमभवत्तत्र देवानाह प्रसन्नधीः ॥ ६६ ॥ सुदर्शनो द्वापरान्ते कृष्णाज्ञप्तो जनिष्यति ॥ ६७ ॥ निम्बादित्य इति ख्यातो धर्मग्लानिं हरिष्यति ॥ ॥ सूत उवाच ॥ ॥ शृणुष्व चरितं तस्य निम्बार्कस्य महात्मनः ॥ ६८ ॥ यमाह भगवान्कृष्णः कुरु कार्यं ममाज्ञया ॥ मेरोश्च दक्षिणे पार्श्वे नर्मदायास्तटे शुभे ॥ ६९ ॥ देशे तैलंगके रम्ये देवर्षिवरसेविते ॥ तत्रावतीर्य सद्धर्मान्नारदादेवदर्शनात् ॥ ७० ॥ लब्ध्वा भूमौ वर्तयस्व नष्टप्रायान्ममाज्ञया ॥ माथुरे नैमिषारण्ये द्वारवत्यां ममाश्रमे ॥ ७१ ॥ सुदर्शनाश्रमादौ च स्थितिः कार्या त्वयानघ ॥ ओमित्यादेशमादाय भगवाञ्श्रीसुदर्शनः ॥ ७२ ॥ भक्ताभीष्टप्रदः साक्षादवतीर्णो महीतले ॥ देशे तैलंगके पुण्ये द्विजवर्यो महामनाः ॥ ७३ ॥ सुदर्शनाश्रमे पुण्ये भृगुवंशसमुद्भवः ॥ नाम्नाऽऽरुण इति ख्यातो वेदवेदांगपारगः ॥ ७४ ॥ ऋषिरूपधरश्चासीज्जयंत्या भार्यया सह ॥ समाहितं तेन तेजो विष्णुचक्रसमुद्भवम् ॥ ७५ ॥ दधार मनसा देवी जयन्ती पतिदेवता ॥ तेजसा शुशुभे तेन चन्द्रेणेव दिशा

---

१ ह्रस्व आर्षः ।

मला ॥ ७६ ॥ अथ सर्वगुणोपेते काले परमशोभने ॥ कार्त्तिकस्य सिते पक्षे पूर्णिमायां वृषे विधौ ॥ ७७ ॥ कृत्तिकाभे महारम्ये उच्चस्थे ग्रहपं
चक्रे ॥ सूर्यावसानसमये मेषलग्ने निशामुखे ॥ ७८ ॥ जयन्त्यां जयरूपिण्यां जजान जगदीश्वरः ॥ येन सर्वमिदं विश्वं वेदधर्मे नियोजितम् ॥
॥ ७९ ॥ विरिञ्चिरेकदा तस्मिन्निम्बार्कस्याश्रमे शुभे ॥ समागत्याह भो ब्रह्मन्प्राप्तोऽहं क्षुधयान्वितः ॥ ८० ॥ यावत्सूर्यः स्थितो व्योम्नि तावन्मां
भोजय द्विज ॥ इति श्रुत्वा तथेत्युक्त्वा ददौ तस्मै च भोजनम् ॥ ८१ ॥ तदा तु भगवान्सूर्यो ह्यस्ताचलमुपागतः ॥ मुनिना ऋषिणा तेन निम्ब
वृक्षे तदा शुभे ॥ ८२ ॥ स्थापितं तेजसा स्वेन तेजस्तत्त्वं सुदर्शनम् ॥ तत्तेजः सूर्यसंकाशं दृष्ट्वा वेधाः स्मयान्वितः ॥ ८३ ॥ भिक्षुवेषधरं बालं
मुनिं सूर्यमिवापरम् ॥ ननाम दंडवद्भूमौ तपसा तस्य तोषितः ॥ ८४ ॥ उवाच वचनं रम्यं साधु साध्विति पूजयन् ॥ निम्बादित्य इति ख्यातो
वसुधायां भविष्यसि ॥ ८५ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये रामानंदनिंबार्कसमु
त्पत्तिवर्णनं नाम सप्तमोऽध्यायः ॥ ७ ॥ ॥ छ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ पुरा त्रेतायुगे शक्र शक्रशर्मा द्विजो ह्यभूत् ॥ अयोध्यायां
महाभागो देवपूजनतत्परः ॥ १ ॥ अश्विनौ च तथा रुद्रान्वसून्सूर्यान्पृथक्पृथक् ॥ यजुर्वेदमयैर्मंत्रैरर्चयित्वा प्रसन्नधीः ॥ हव्यैश्च तर्पयामास
देवाँस्तान्प्रत्यहं द्विजः ॥ २ ॥ तद्भावतस्त्रयस्त्रिंशद्देवाः क्षुद्रगणैर्युताः ॥ ददुर्मनोरथं तस्मै दुर्लभं सुलभीकृतम् ॥ ३ ॥ दशवर्षसहस्राणि निर्जरो
निरुपद्रवः ॥ पश्चात्कलेवरं त्यक्त्वा पश्चात्सूर्यो बभूव सः ॥ ४ ॥ लक्षाब्दं मण्डले तस्मिन्नधिकारः कृतस्ततः ॥ ब्रह्मलोकं ययौ विप्रः सर्वदेवप्र
सादतः ॥ ५ ॥ अष्टवर्षसहस्राणि दिव्यानि पदमुत्तमम् ॥ विलोक्य मंडले प्राप्तं तं सूर्यं जपपूजनैः ॥ ६ ॥ इति श्रुत्वा तु वचनं महेन्द्रः सुरसं
युतः ॥ आषाढे भास्करं देवं पूजयामास नम्रधीः ॥ ७ ॥ आषाढपूर्णिमायां च स देवो जगतीतले ॥ प्रत्यक्षमगमत्तत्र सुरानाह शृणुष्व तत् ॥ ८ ॥
वृन्दावने महारम्ये जनयिष्ये कलौ भये ॥ स द्विजः सूर्यरूपश्च देवकार्यं करिष्यति ॥ ९ ॥ माधवस्य द्विजस्यैव तनयः स भविष्यति ॥ मधुर्नाम
महाभागो वेदमार्गपरायणः ॥ १० ॥ ॥ सूत उवाच ॥ ॥ इत्युक्त्वा भगवान्सूर्यो देवकार्यार्थमुद्यतः ॥ स्वांगात्तु तेज उत्पाद्य वृंदावनमपेषयत
॥ ११ ॥ विमुखान्मधुरालापैर्वशीकृत्य समन्ततः ॥ तेभ्यश्च वैष्णवीं शक्तिं प्रददौ भुक्तिमुक्तिदाम् ॥ मध्वाचार्य इति ख्यातः प्रसिद्धोऽभून्महीतले
॥ १२ ॥ ॥ जीव उवाच ॥ ॥ द्वापरे च द्विजश्रेष्ठो मेघशर्मा बभूव ह ॥ ज्ञानवान्मतिमान्धर्मी वेदमार्गपरायणः ॥ १३ ॥ कृषिकृत्यपरो नित्यं
तद्धनैश्च दशांशकैः ॥ प्रत्यहं सकलान्देवानर्चयामास भक्तिमान् ॥ १४ ॥ एकदा पञ्चवर्षाब्दे शन्तनौ च महीपतौ ॥ संप्राप्ते तस्य वै देशे ह्यनावृष्टिर्ब
भूव ह ॥ १५ ॥ क्रोशमात्रं हि तत्क्षेत्रं पर्जन्येनैव सेचितम् ॥ धान्यानां द्रोणमानश्च भावोऽभूदेकमुद्रया ॥ १६ ॥ मेघशर्मा तदा तत्र धनधान्ययुतोऽभवत् ॥

अन्ये तु पीडिता लोका राजानं शरणं ययुः ॥१७॥ तदा तु दुःखितो राजा मेघशर्माणमाह्वयत् ॥ द्विजश्रेष्ठ नमस्तुभ्यं गुरुर्भव मम प्रियः ॥ १८ ॥ अनावृष्टिर्यथा न स्यात्तथा विप्र समादिश ॥१९॥ इत्येवंवादिनं भूपं मेघशर्मा वचोऽब्रवीत् ॥ श्रावणे मासि संप्राप्ते विप्रान्वेदपरायणान् ॥ २०॥ द्वादशैव समाहूय लक्षमात्रं रवेः स्वयम् ॥ जापयित्वा सुमनसा पूर्णिमायां तु तद्व्रती ॥ सूर्यमन्त्राहुतीर्वह्नौ तद्दशांशं हि तद्द्विजैः ॥ २१ ॥ कारयित्वा विधानेन कृतकृत्यः सुखीभव ॥ इति श्रुत्वा तथा कृत्वा भोजयामास वेदगान् ॥२२॥ प्रसन्नस्तु तदा सूर्यः पर्जन्यात्मा समन्ततः ॥ भूमिमाच्छाद्य स दिशं प्रभुर्वृष्टिमकारयत् ॥२३॥ शन्तनुस्तु तदा राजा सूर्यव्रतपरायणः ॥ तद्व्रतेन महापुण्यो बभूव नृपसत्तमः ॥ २४ ॥ यं यं करेण स्पृशति वृद्धो भवति वै युवा ॥ सूर्यदेवप्रभावेन मेघशर्मा तथा ह्यभूत् ॥ २५ ॥ स वै पंचशतायुश्च निर्जरो निरुपद्रवः ॥ त्यक्त्वा प्राणान्रविर्भूत्वा सूर्यलोकमुपागमत् ॥ लक्षाब्दभुवमासाद्य ब्रह्मलोकं गमिष्यति ॥२६॥ इत्येवंवादिनं जीवं पर्जन्यो भगवान्रविः ॥ स्वरूपं दर्शयामास प्रयागं प्रति चागतः ॥ २७ ॥ सुरानाह प्रसन्नात्मा म्लेच्छराज्ये कलौ युगे ॥ वृन्दावने समागम्य देवकार्यं करोम्यहम् ॥ २८ ॥ ॥ सूत उवाच ॥ ॥ इत्युक्त्वा भगवान्सूर्यो गत्वा वृन्दावनं शुभम् ॥ श्रीधरो नाम विख्यातः पुत्रोभूद्वेदशर्मणः ॥ २९ ॥ श्रीमद्भागवतं शास्त्रं समालोक्य विशारदः ॥ चकार विदुषामर्थे प्रदीप्तं श्रीधरः शुभम् ॥ श्रीमद्भागवतं शास्त्रं पुराणोपरि तत्कृतम् ॥ ३० ॥ ॥ जीव उवाच ॥ ॥ पुरा कलौ युगे प्राप्ते प्रांशुशर्मा द्विजोऽभवत् ॥ वेदशास्त्रपरो नित्यं देवतातिथिपूजकः ॥ ३१ ॥ सत्यवादी महासाधुः स्तेयहिंसाविवर्जितः ॥ ।भिक्षावृत्तिपरो नित्यं पुत्रदारप्रपोषकः ॥ ३२ ॥ एकदा पथि भिक्षार्थं गच्छतस्तस्य भूपतेः ॥ मायाकृंत्यकरो धूर्तः कलिस्तत्राक्षिगोचरः ॥ ३३ ॥ बभूव वाटिकां कृत्वा कलिर्दानमनोहराम् ॥ तमुवाच द्विजो भूत्वा प्रांशुशर्मन्वचः शृणु ॥ ३४ ॥ ममेयं वाटिका रम्या तत्र गच्छ सुखी भव ॥ इति विप्रवचः श्रुत्वा वाटिकां तां समागतः ॥ ३५ ॥ कलिस्तु वाटिकामध्ये गत्वा रम्यफलानि च ॥ त्रोटयित्वा ददौ तस्मै भोजनार्थं महाखलः ॥ ३६ ॥ प्रांजलिः प्रणतो भूत्वा प्रांशुशर्माणमब्रवीत् ॥ भुंक्ष्व विप्र मया सार्द्धं कलिंदस्य फलं शुभम् ॥ ३७ ॥ इत्युक्तः स तु तं प्राह विहस्य मधुरस्वरम् ॥ वृक्षे बिभीतके चैव कलिंदस्य फले तथा ॥ कलिः प्राप्तः स्मृतः प्राज्ञैस्तस्माद्गृह्णाम्यहं न हि ॥ ३८ ॥ यदि दत्तं फलं भक्त्या त्वयाद्य द्विजसेविना ॥ शालग्रामाय वै दत्त्वा प्रसादं तद्व्रजाम्यहम् ॥ शालग्रामः स्वयं ब्रह्म सच्चिदानन्दविग्रहः ॥ ३९ ॥ दर्शनात्तस्य चाभक्ष्यो भक्ष्यो भवति निश्चितः ॥ इति श्रुत्वा कलिस्तत्र लज्जितोऽभून्निराशकः ॥ द्विजस्तु तत्फलं गृह्य भूमिग्राममुपाययौ ॥४०॥ नृपतिस्तत्र

चागत्य द्विजमाह प्रसन्नधीः ॥ किं गृहीतं त्वया विप्र दर्शयाशु प्रियं कुरु ॥ ४१ ॥ इति श्रुत्वा प्रांशुशर्मा तत्फलं वत्समुंडवत् ॥ गृहीत्वा प्रददौ
राज्ञे विस्मितो द्विजसत्तमः ॥ ४२ ॥ तदा तु स कलिर्भूपस्तं विप्रं ताड्य वेतसैः ॥ कारागारे लोहमये कृतवान्न्यायमित्रकः ॥
॥ ४३ ॥ प्रातःकाले रवौ प्राप्ते प्रांशुशर्मा सुदुःखितः ॥ तुष्टाव भास्करं देवं स्तोत्रैर्ऋग्वेदसंभवैः ॥ ४४ ॥ तदा प्रसन्नो भगवा
न्रविः साक्षात्सनातनः ॥ विप्रस्य कर्णयोर्वाक्यमुवाच नभसेरितम् ॥ ४५ ॥ शृणु विप्र महाभाग कालरूपो हरिः स्वयम् ॥
चतुर्युगं तेन कृतं विश्वपालादिहेतवे ॥ ४६ ॥ कलिर्विश्वसमूहानां मृत्यवे रचितस्तथा ॥ अतो घोरे कलौ प्राप्ते विष्णुमायाविनिर्मितम् ॥
कलिञ्जरं च नगरं तत्रोष्य मुदितो भव ॥ ४७ ॥ इत्युक्त्वा रक्षणं कृत्वा तस्य विप्रस्य भास्करः ॥ कलिञ्जरे च नगरे प्रेषयामास तं द्विजम् ॥
॥ ४८ ॥ सपादशतवर्षं च द्विजस्तत्र वसन्नविम् ॥ आराध्य पुत्रपत्नीको रविलोकमुपाययौ ॥ ४९ ॥ स वै भाद्रपदे मासि सूर्यो भूत्वायुताब्द
कम् ॥ पश्चाद्ब्रह्मपुरं प्राप्य परमानन्दमाप्तवान् ॥ इति ते कथितं विप्र यथा जीवस्तमब्रवीत् ॥ ५० ॥ आगत्य भास्करो देवः पूर्णिमायां तु
भाद्रके ॥ अष्टाविंशे कलौ प्राप्ते स्वयं जातः कलिञ्जरे ॥ ५१ ॥ शिवदत्तस्य तनयो विष्णुशर्मेति विश्रुतः ॥ वेदशास्त्रकलाभिज्ञो वैष्णवो देव
पूजकः ॥ ५२ ॥ चतुर्वर्णान्नरान्विप्र समाहूय हरेर्गृहे ॥ वचनं प्राह धर्मात्मा विष्णुः सर्वेश्वरो हरिः ॥ ५३ ॥ शृणु तत्कारणं शिष्य विश्वकारण
कारकः ॥ भगवान्सच्चिदानन्दश्चतुर्विंशतितत्त्ववान् ॥ देवान्ससर्ज लोकार्थे तस्मात्सर्वेश्वरोऽभवत् ॥ ५४ ॥ पूर्वं हि सकलान्देवान्पूजयित्वा
नरः शुचिः ॥ पश्चाच्च पूजयेद्विष्णुं यथा भृत्या नृपं पुनः ॥ ५५ ॥ इति श्रुत्वा तु ते सर्वे प्रशस्य बहुधा हि तम् ॥ विष्णुस्वामीति तं नाम्ना कथां
चक्रुश्च हर्षिताः ॥५६॥ इति ते कथितं विप्र विष्णुस्वामी यथाभवत् ॥ पुनः शृणु कथां रम्यां बृहस्पतिमुखेरिताम् ॥५७॥ ॥ जीव उवाच ॥ ॥
पुरा चैत्ररथे देशे भगशर्मा द्विजोऽभवत् ॥ स्ववेश्यामंजुघोषायां मुनिमेधाविना भुवि ॥ ५८ ॥ पितृमातृपरित्यक्तः स बालः श्रद्धयान्वितः ॥
सूर्यमाराधयामास तपसा शतवार्षिकम् ॥ ५९ ॥ सूर्यमण्डलमध्यस्था सावित्री नाम देवता ॥ सर्वसूर्यस्य जननी कन्या तन्मण्डलस्य
वै ॥ ६० ॥ प्रसन्ना तपसा तस्य प्रादुर्भूता सनातनी ॥ आश्विने मासि राजानं द्विजं चक्रे च मण्डले ॥ ६१ ॥ लक्षवर्षसहस्राणि मासि मासि
तथाश्विने ॥ प्रकाशं कृतवान्विप्रः पूजितो लोकवासिभिः ॥ ६२ ॥ त्वं सूर्यं भज देवेन्द्र स ते कार्यं करिष्यति ॥ इति श्रुत्वाश्विने मासि स रवि
र्देवपूजनात् ॥ ६३ ॥ प्रत्यक्षमगमत्तत्र वचः प्राह सुरान्प्रति ॥ कान्यकुब्जे शुभे देशे वाणीभूषण इत्यहम् ॥ भवामि सत्यदेवस्य विप्रस्य तनयः

शुभः ॥ ६४ ॥ ॥ सूत उवाच ॥ ॥ इत्युक्त्वा भगवान्सूर्यो जातः कान्यपुरे शुभे ॥ जित्वा पाखंडिनो विप्रान्मांसभक्षणतत्परान् ॥ छंदो
ग्रंथं स्वनाम्ना वै कृतवान्दैवतप्रियः ॥ ६५ ॥ मत्स्यमांसाशना विप्रा मृगमेषाजकाशनाः ॥ एकीभूय समागम्य चक्रुः शास्त्रार्थमुल्बणम् ॥६६॥
कलिनाऽधर्ममित्रेण रक्षितास्ते द्विजातयः ॥ तं द्विजं च पराजित्य मत्स्यकेतुं च तद्गृहे ॥ ६७ ॥ बलाच्च स्तंभनं चक्रुस्तदा विष्णुप्रियो द्विजः ॥
वैष्णवीं शक्तिमागम्य स्वमुखान्मीनखादितान् ॥ ६८ ॥ संजीव्य दर्शयामास ते दृष्ट्वा विस्मितास्तदा ॥ शिष्यभूताश्च ते तस्य वैष्णवं मतमा
गमन् ॥ ६९ ॥ ॥ जीव उवाच ॥ ॥ कदाचित्सरयूतीरे देवयाजी द्विजोऽभवत् ॥ सर्वदेवपरो नित्यं वेदपाठपरायणः ॥ ७० ॥ तत्सुतस्तु
मृतिं प्राप्तो जन्ममात्रे हि दारुणे ॥ तदा तु स द्विजः श्रुत्वा सूर्यदेवमतोषयत् ॥ ७१ ॥ जिजीव तत्प्रसादेन विवस्वान्नाम चाभवत् ॥ षोडशाब्द
वपुर्भूत्वा सर्वविद्याविशारदः ॥ ७२ ॥ अपत्यवान्धर्मपरः सूर्यव्रतपरायणः ॥ शिवरात्रिदिने प्राप्ते तत्पत्नी भूषणप्रिया ॥ ७३ ॥ सुशीला नाम
विख्याता पतिसेवार्थमागता ॥ स व्रती रुद्रदेवस्य दृष्ट्वा तां मधुराननाम् ॥ ७४ ॥ बलाद्गृहीत्वा तु निशि बुभुजे स्मरविह्वलः ॥ मैथुनस्यैव
दोषेण तस्य कुष्ठो महानभूत् ॥ ७५ ॥ लिंगेंद्रियं च पतितं गुदभ्रष्टो महांगरुक् ॥ केन चिदुपदेशेन रविवारस्य वै व्रतम् ॥ ७६ ॥ स चक्रे
द्वादशं प्रेम्णा निराहारो यतेन्द्रियः ॥ तेन व्रतप्रभावेण सर्वपीडा लयं गताः ॥ ७७ ॥ तदा श्रद्धा रवौ प्राप्ता प्रत्यहं स द्विजोत्तमः ॥ आदित्य
हृदयं जप्त्वा कामरूपो द्विजोऽभवत् ॥ ७८ ॥ नारीभिर्भर्त्सितः पूर्वं सोथ कामिनीयाचितः ॥ ब्रह्मचर्यव्रतं कृत्वा ब्रह्मध्यानपरोऽभवत् ॥ ७९ ॥
शतायुर्ब्राह्मणो भूत्वा ज्ञानवान्रोगवर्जितः ॥ त्यक्त्वा प्राणान्नविर्भूत्वा सूर्यमण्डलमध्यगात् ॥ ८० ॥ कार्तिके मासि लक्षाब्दं प्रकाशं कृतवा
न्नभः ॥ तं च सूर्यं महेन्द्रस्त्वं पूजयाशु सुरैः सह ॥ ८१ ॥ ॥ सूत उवाच ॥ ॥ इति श्रुत्वा महेन्द्रस्तु मासमात्रं हि भास्करम् ॥ पूजयित्वा
विधानेन पूर्णिमायां ददर्श ह ॥ ८२ ॥ उवाच शक्रं स रविर्देवकार्यं करोम्यहम् ॥ भट्टैर्विद्यामयैर्धूर्तैः सूत्रपाठश्च खंडितः ॥ ८३ ॥ धातुपाठो
न्यपठितो भ्रंशार्थः स्वरवर्णकः ॥ जित्वा तान्भट्टपाषंडान्वेदमुद्धारयामि भोः ॥ ८४ ॥ इत्युक्त्वा स गतः काश्यां गेहे वै वेदशर्मणः ॥ दीक्षिता
न्वयभूतस्य नाम्ना कार्यगुणोऽभवत् ॥ ८५ ॥ द्वादशाब्दवपुर्भूत्वा सर्वशास्त्रविशारदः ॥ शिवमाराधयामास विश्वनाथं शिवाप्रियम् ॥ ८६ ॥ त्रिव
र्षान्ते च भगवांस्तस्मै ज्ञानं महद्ददौ ॥ तस्य ज्ञानप्रभावेण व्यक्तमव्यक्तमुत्तमम् ॥ ८७ ॥ ज्ञातं कार्यगुणेनैव दीक्षितेन तदा हृदि ॥ अव्यक्ते
तु यदा बुद्धिः सा विद्या द्वादशांगिनी ॥ ८८ ॥ व्यक्तेऽहंकारभूते च बुद्धिर्ज्ञेया बुधैरजा ॥ अविद्या नाम विख्याता षोडशांगस्वरूपिणी ॥ ८९ ॥

अव्यक्तं तु परं ब्रह्म व्यक्तं शब्दमयं स्मृतम् ॥ अहंकारो लोककरो हि व्यक्तोऽष्टदशांगकः ॥९०॥ वृषरूपधरो मुख्यो नन्दियानः स्मृतो बुधैः ॥
शृङ्गाणि तस्य चत्वारि त्रिपादो द्विशिरा वृषः॥९१॥सप्तहस्तस्त्रिधा बद्धो नित्यशुद्धो मुखे स्थितः॥सुबन्तश्च तिङन्तश्च कृदंतश्चाव्ययस्तथा॥९२॥
द्वौद्वौ शृंगौ च शिरसोर्नंदियानस्य वै स्मृतौ ॥ भूतं भव्यं भवच्चैव त्रयः पादा हि तस्य वै ॥ ९३ ॥ रूढिश्च योगरूढिश्च शब्दौ तस्य शिरोद्वयम् ॥
कर्ता कर्म च करणं संप्रदानं विभागतः ॥ ९४ ॥ संबंधश्चाधिकारश्च भुजास्तस्य वृषस्य वै ॥ वाक्यं स्वरान्वितं ज्ञेयं विभक्त्यंतं पदं
स्मृतम् ॥ ९५ ॥ ताभ्यां बद्धश्च स वृषो नन्दियानाय ते नमः ॥ तस्योपरि स्थितं नित्यमव्यक्तं लिंगरूपि यत् ॥ ९६ ॥ जातश्च वृषलिंगाभ्यां
सोऽहंकारो हरिः स्वयम् ॥ नारायणः षोडशात्मा बहुमूर्तिरमूर्तिकः ॥ ९७ ॥ इति ज्ञानं हृदि प्राप्य तदा सिद्धान्तकौमुदीम् ॥ जित्वा भट्टांश्चकाराशु
भट्टोजिः प्रश्रुतोऽभवत् ॥९८॥ ॥ जीव उवाच ॥ ॥ पुरा कांचीपुरे रम्ये गणको ब्राह्मणोत्तमः॥ पुरोधाः सत्यदत्तस्य राज्ञो वेदपरस्य वै
॥ ९९ ॥ एकदा गणको धीमान्सत्यदत्तमुवाच ह ॥ मुहूर्तोऽभिजिदाख्योयं पुष्यनक्षत्रसंयुतः ॥ हाटं कुरु महाराज सांप्रतं बहुवृत्तिदम् ॥ १०० ॥
इति श्रुत्वा तथा कृत्वा डिंडिमध्वनिना पुरे ॥ नरानाज्ञापयामास तच्छृणुष्व सुरोत्तम ॥ १०१ ॥ अक्रीतं यस्य वै वस्तु हाटेऽस्मिन्वैश्यको
विदैः ॥ मया क्रीतं च तज्ज्ञेयं सत्यमेतद्वचो मम ॥ १०२ ॥ इति श्रुत्वा शूद्रजनाश्चक्रुर्नानाविधं वसु ॥ वैश्यैस्सर्वं तदा क्रीतं महान्हाटो हि
सोऽभवत् ॥ १०३ ॥ एकदा लोहकारश्च दारिद्रं लोहरूपिणम् ॥ कृत्वा हाटमुपागम्य शतमुद्रामयाचत ॥ १०४ ॥ अक्रीतं पुरुषं राजा ज्ञात्वा
लोहदारिद्रकम् ॥ क्रीतं तं शतमुद्राभिर्गृहीत्वा गेहमागमत् ॥ कोशागारे तदा राज्ञा स्थापितोभूद्दरिद्रकः ॥ १०५ ॥ निशीथे तम उद्भूते कर्म धर्मश्च
मा तथा ॥ भूपगेहात्समागत्य पश्यतस्तस्य निर्गताः ॥ १०६ ॥ तत्पश्चात्सत्यपुरुषो राजानमिदमब्रवीत् ॥ दारिद्रो यत्र भूपाल तत्र कर्मपरो
न हि ॥ कर्मणा रहितो धर्मो भूतले न स्थिरो भवेत् ॥ १०७ ॥ धर्मेण रहिता लक्ष्मीर्न शोभेत कदाचन ॥ अहं लक्ष्म्या विहीनश्च न तिष्ठामि
कदाचन ॥ १०८ ॥ इत्युक्त्वा गन्तुमिच्छंतं गृहीत्वा करयोर्नृपः ॥ नम्रीभूतो वचः प्राह शृणु सत्यं मम प्रियम् ॥ १०९ ॥ न त्याज्यो हि मया
देव भवान्किङ्गन्तुमर्हति ॥ इति श्रुत्वा तु वचनं सत्यदेवो गृहेगमत् ॥ ११० ॥ तत्पश्चाच्च स्वयं लक्ष्मीस्तद्गेहे गंतुमुद्यता ॥ तामाह भूपतिर्धीरो
देवि त्वं चंचला सदा ॥ १११ ॥ अचला भव भो मातस्तर्हि मन्मंदिरं व्रज ॥ इति श्रुत्वा वरं दत्त्वा नृपगेहं ययौ तदा ॥ ११२ ॥ पुरोधसं तं
गणकं समाहूय नृपोत्तमः ॥ लक्षस्वर्णं ददौ तस्मै कथित्वा सर्वकारणम् ॥ ११३ ॥ पुत्रजन्मनि काले तु संप्राप्तं तेन वै धनम् ॥ व्ययं कृत्वा

धनं सर्वं पोषयामास बालकम् ॥ ११४ ॥ पूषा नाम ततो जातं मार्गशीर्षे शुभे दिने ॥ स तु सूर्यं समाराध्य ज्योतिःशास्त्रपरः सुतः ॥ ११५ ॥
सूर्ये तु मोक्षमगमद्देवदेवप्रसादतः ॥ तस्मात्त्वं मार्गमासे वै रविं देवेन्द्र पूजय ॥११६॥ ॥ सूत उवाच ॥ ॥ देवेन्द्रपूजनात्सूर्यस्समागम्य तदा स्व
यम् ॥ पूषा नाम वचो देवानुवाच मधुरस्वरम् ॥११७॥ उज्जयिन्यामहं देवा यास्ये रुद्रपशोर्गृहे ॥ नाम्ना च मिहिराचार्यो ज्योतिश्शास्त्रप्रवर्त्तकः
॥ ११८ ॥ इत्युक्त्वा भगवान्पूषा पुत्रो जातो द्विजस्य वै ॥ मूलगंडान्तविषयेऽभिजिद्योगे शुभंकरे ॥ ११९ ॥ जातमात्रं च तं पुत्रं पिता काष्ठक
टाहके ॥ धृत्वा क्षिप्त्वा नदीमध्ये निशीथे समवाहयत् ॥ १२० ॥ समुद्रमगमत्पुत्रो राक्षसीभिश्च रक्षितः ॥ लंकामागम्य तत्रैव ज्योतिःशास्त्रमधीत
वान् ॥ १२१ ॥ जातकं फलितं चैव मूकप्रश्नं तथादितः ॥ पठित्वा राक्षसेंद्रं च विभीषणमुपागतम् ॥ १२२ ॥ भक्तराज नमस्तुभ्यं बिभीषण हरि
प्रिय ॥ आहूतो राक्षसीभिश्च त्वामहं शरणं गतः ॥ १२३ ॥ इति श्रुत्वा च स नृपो वैष्णवं द्विजमुत्तमम् ॥ मत्वा संप्रेषयामस यत्र तज्जन्मभू
मिका ॥ १२४ ॥ म्लेच्छैर्विनाशितं यत्तु वेदांगं ज्योतिषां गतिः ॥ पुनरुद्धारितं तेन त्रिधाभूतं सनातनम् ॥ १२५ ॥ इति श्रीभविष्ये महापुराणे
प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये मध्वाचार्यश्रीधराचार्यविष्णुस्वामिवाणीभूषणभट्टोजिदीक्षितवराहमिहिराचार्यो
त्पत्तिवर्णनो नामाऽष्टमोऽध्यायः ॥८॥ सूत उवाच ॥ इत्युत्क्वा भगवाञ्जीवस्सूर्यमाहात्म्यमुत्तमम् ॥ प्रयागे तु पुनर्देवानुवाच वचसां पतिः ॥१॥
प्रतिष्ठानपुरे रम्ये सूर्यो जातो हराज्ञया ॥ पुरा त्रेतायुगांते च तच्छृणुष्व सुरोत्तम ॥ २ ॥ त्रेतान्ते सिंहलद्वीपे परीक्षितनृपोऽभवत् ॥ वेदधर्मपरो
नित्यं देवतातिथिपूजकः ॥३॥ कन्या भानुमती तस्य सूर्यव्रतपरायणा ॥ भक्तिभावेन सविता प्रत्यहं तद्गृहे स्वयम् ॥ ४ ॥ तया कृतं शुभं भक्ष्यं
मध्याह्ने भुक्तवान्प्रभुः॥रविवारे कदाचित्सा नलिनी सागरं प्रति ॥५॥ स्नानार्थमागता कन्या तदा नारद आगतः॥ दृष्ट्वा मनोरमां बालामेकाकीं
जलमध्यगाम्॥६॥ गृहीत्वा वसनं तस्या वचनं प्राह निर्भयः॥पाणिं गृहाण मे सुभ्रूस्त्वद्दृष्ट्या वशमागतः ॥ ७ ॥ इत्युक्तवंतं तु मुनिं कुमारी न
म्रकन्धरा ॥ उवाच शृणु देवर्षे कन्याहं त्वं सुतप्रदः॥८॥भवान्देवाङ्गनाभिश्च प्रार्थितः स्वर्गमण्डले ॥ क्व च वै मेनका रंभा क्वाहं मनुजयोनिजा ॥
॥९॥नवद्वारेषु देहेस्मिन्दुर्गन्धाः संस्थिताः सदा ॥ नैव देवाङ्गनाङ्गे वै तस्मात्तुभ्यं नमोनमः॥१०॥इति श्रुत्वा वचस्तस्या लज्जितो नारदस्तदा॥
महादेवमुपागम्य चोक्तवान्सर्वकारणम् ॥ ११ ॥ कुष्ठीभूतं मुनिं दृष्ट्वा शंकरो लोकशंकरः ॥ तुष्टाव भास्करं देवं तदा प्रादुरभूत्प्रभुः ॥ १२ ॥
नारदस्य शुभं देहं कृत्वा शिवमुवाच ह ॥ आज्ञां देहि महादेव तवाशां पूरयाम्यहम् ॥ १३ ॥ इत्युक्तं तं शिवः प्राह द्विजो भूत्वा भवान्भुवि ॥

गृहाण नृपतेः कन्यां रविणा तु तथा कृतम् ॥ १४ ॥ सविता भानुमत्या च सार्द्धं कृत्वा तपोन्वहम् ॥ सूर्यलोकं पुनः प्राप्तस्स पौषे च प्रकाश
कृत्॥तं भजाशु महेन्द्र त्वं देवकार्यं प्रसाधय॥१५॥ ॥ सूत उवाच ॥ ॥ इति श्रुत्वा गुरोर्वाक्यं महेन्द्रश्च सुरैस्सह ॥ सवितारं पौषमासे तुष्टाव शुभ
पूजनैः ॥ १६ ॥ तदा प्रसन्नो भगवान्देवानाह शुभं वचः ॥ अहं काश्यां भवाम्यद्य नाम्ना धन्वंतरिः स्वयम् ॥ १७ ॥ रोगैश्च पीडिताँल्लोका
न्कलिना निर्मितैर्भुवि ॥ शमयिष्यामि तत्रोष्य देवकार्यं भवष्यति ॥ १८ ॥ इत्युक्त्वा भगवान्सूर्यः काशीनगरमागतः ॥ कल्पदत्तस्य विप्रस्य
पुत्रो भूत्वा महीतले ॥ १९ ॥ सुश्रुतं राजपुत्रं च विप्रवृद्धसमन्वितम् ॥ शिष्यं कृत्वा प्रसन्नात्मा कल्पवेदमचीकरत् ॥ २० ॥ रोगैश्च क्षयितं देहं
कालपमेतत्स्मृतं बुधैः ॥ तस्य ज्ञानं च तंत्रेऽस्मिकल्पवेदोद्यतः स्मृतः ॥ २१ ॥ धन्वंतरिस्स भगवान्प्रसिद्धोभूत्कलौ युगे ॥ यस्य दर्शनमात्रेण
रोगा नश्यंति तत्क्षणात् ॥ २२ ॥ सुश्रुतः कल्पवेदं तं धन्वत्तरिविनिर्मितम् ॥ पठित्वा च शताध्यायं सौऽश्रुतं तंत्रमाकरोत् ॥२३॥ ॥ बृहस्पति
रुवाच ॥ ॥ पुरा पंपापुरे रम्ये हेली नाम्ना द्विजोऽभवत् ॥ चतुष्षष्टिकलाभिज्ञो रविपूजनतत्परः ॥२४॥ त्यक्त्वा प्रतिग्रहं वृत्तिं कारुवृत्तिं गृहीत
वान् ॥ कृत्वा वस्त्रकलं लौहं तथा चित्रकलं पुनः ॥२५॥ धातुमूर्तिकलं चैव सर्वकारुकलं तथा ॥ पञ्चसहस्त्रमुद्राभिराक्रीणन्कारुकोऽभवत् ॥२६॥
कलएको मासमात्रे काले तेनैव निर्मितः ॥ तद्धनेन रविं देवं यज्ञैर्माघे हि सोऽर्चयत् ॥ विश्वकर्मा रविः साक्षान्माघमासे प्रकाशकः ॥२७॥ हेलिनो
बहुलैर्यज्ञैस्सन्तुष्टः प्रत्यहं प्रभुः ॥ पंपासरोवरे रम्ये निर्मितः स्तंभ उत्तमः ॥२८॥ ज्योतीरूपो महारम्यस्तत्र प्राप्तो रविः स्वयम् ॥ मध्याह्ने हेलिना
दत्तं भोजनं दैवतप्रियम् ॥२९॥ भुक्त्वा स प्रत्यहं स्वामी मासिमासि दिवाकरः ॥ त्रैलोक्यं भावयांचक्रे सर्वदेवमयो हरिः ॥३०॥ सहस्त्रायुर्द्विजो
भूत्वा त्यक्त्वा प्राणान्नविः स्वयम् ॥ भूत्वा मण्डलमध्यास्य माघमासमतोषयत् ॥ तं सूर्यं भज देवेन्द्र स ते कार्यं करिष्यति ॥ ३१ ॥ ॥ सूत
उवाच ॥ ॥ इति श्रुत्वा गुरोर्वाक्यं वासवो दैवतैस्सह॥सूर्यमाराधयामास विश्वकर्माणमुत्तमम् ॥३२॥ तदा प्रसन्नो भगवांस्त्वष्टा तुष्टिकरोजनान्[१]॥
सुरानाह वचो रम्यं शृणुध्वं सुरसत्तमाः ॥३३॥ बिल्ग्रामे वंगदेशे संभवामि निरुक्तकृत् ॥ जयदेव इति ख्यातः कवीनां हि शिरोमणिः ॥ ३४ ॥
इत्युक्त्वा भगवान्सूर्यो वंगदेशमुपाययौ ॥ गेहे कंदुकिनो जातो ब्राह्मणस्य महीतले ॥ ३५ ॥ स पंचाब्दवपुर्भूत्वा पितृमातृपरायणः ॥ द्वाद
दशाब्दं महासेवा तत्र तेन तयोः कृता ॥ ३६ ॥ मृतिमंतौ च पितरौ प्रेतकृत्येन तर्पितौ ॥ जयदेवेन तौ नाकं गयाश्राद्धे हि जग्मतुः ॥ ३७ ॥

---

१ जनानामित्यर्थः ।

जयदेवस्तदा विप्रो भूत्वा वैराग्यवान्भुवि ॥ तत्रस्थाने महारम्ये वने वासमकारयत् ॥ ३८ ॥ त्रिविंशाब्दे ततः प्राप्ते केनचिन्मधुरानना ॥
ब्राह्मणेन शुभा कन्या जगन्नाथाय चार्पिता ॥ ३९ ॥ अर्चावसाने भगवाननिरुद्धस्सनातनः ॥ दारुब्रह्ममयः साक्षादाह तं स्वेन वै वचः ॥ ४० ॥
शृणु त्वं भोः सत्यव्रत जयदेवो वपुर्मम ॥ पद्मावतीं सुतां तस्मै निवेदय ममाज्ञया ॥ ४१ ॥ इत्युक्तस्स द्विजस्तूर्णं दृष्ट्वा वैरागरूपिणम् ॥ तत्र
स्थाप्य निजां कन्यां स्वगेहाय मुदा ययौ ॥ ४२ ॥ सा तु पद्मावती कन्या मत्वा तं सुंदरं पतिम् ॥ तत्सेवां सा मुदा युक्ता चकार बहुवार्षिकम् ॥ ४३ ॥ निरुक्तं वैदिकं चांगं कृतवान्स समाधिना ॥ वर्णागमो गवेंद्रादौ सिंहे वर्णविपर्ययः ॥ षोडशादौ विकारश्च वर्णनाशः पृषोदरे ॥ ४४ ॥ वर्णविकारनाशाभ्यां धातोरतिशयेन यः ॥ योगस्तदुच्यते प्राज्ञैर्मयूरभ्रमरादिषु ॥ ४५ ॥ एवं पंचविधान्येव निरुक्तानि
स्मृतानि वै ॥ शूद्रैश्च नागवंशीयैर्भ्रंशितानि कलौ युगे ॥ ४६ ॥ जित्वा प्राकृतभाषायाः कर्तॄन्मूढान्कलिप्रियान् ॥ शुद्धं हि पाणिनिः शास्त्रं
चकार सुरहेतवे ॥ ४७ ॥ एकादा तु कलिर्धूर्तो हृदिस्थश्चौरकर्मणाम् ॥ नृपदत्तं द्विजस्यैव लुंठयित्वा धनं बहु ॥ ४८ ॥ पद्मावतीं सतीं
मत्वा त्यक्त्वा तद्वै गतो गृहम् ॥ हस्तौ पादौ द्विजस्यैव कलिश्चौरैः समाच्छिनत् ॥ ४९ ॥ तदा तु दुःखिता देवी गर्तमध्ये स्थितं पतिम् ॥
निष्कास्य बहुधालप्यापीडच हस्तेन चाहरत् ॥ ५० ॥ एकस्मिन्दिवसे राजा मृगयार्थमुपागतः ॥ अहस्तपादं च मुनिं जयदेवं ददर्श ह ॥
स पृष्टस्तेन तत्रैव कृतं केन तवेदृशम् ॥ ५१ ॥ स होवाच महाराज हस्तपादविहीनकः ॥ कर्मणाहमिह प्राप्तो न केनापि कृतं खलु ॥ ५२ ॥
इति श्रुत्वा धर्मपालो नृपतिस्तं द्विजोत्तमम् ॥ सपत्नीकं च शिबिकामारोप्य स्वगृहं ययौ ॥ ५३ ॥ तस्य दीक्षां नृपः प्राप्य धर्मशालामकारयत् ॥ कदाचिद्वैष्णवा भूता ते चौराः कलिनिर्मिताः ॥ धर्मपालगृहं प्राप्य राजानामिदमब्रुवन् ॥ ५४ ॥ वयं हि शास्त्रनिपुणास्तव गेहमुपागताः ॥
अस्माभिर्निर्मितं भोज्यं स्वयं विष्णुः शिलामयः ॥ संभुंक्ते प्रत्यहं प्रीत्या तत्पश्य नृपसत्तम ॥ ५५ ॥ इत्युक्त्वा कलिभक्तास्ते विष्णुरूपं
चतुर्भुजम् ॥ नृपाय दर्शयामासुर्भुक्तवंतं स्वमायया ॥ ५६ ॥ विस्मितो धर्मपालश्च जयदेवमुवाच ह ॥ गुरो मद्भवने प्राप्ता वैष्णवा विष्णुतत्पराः ॥
अदीदृशन्हरिं साक्षात्तस्मात्त्वं शीघ्रमाव्रज ॥५७॥ इति श्रुत्वा द्विजः प्राप्तो विस्मितोऽभूत्तथा नृपः ॥ तदा तु तं हि पाखंडा भूपमूचुर्विहस्य ते ॥
॥ ५८ ॥ असौ विप्रश्च नृपते गौडदेशे निवासिनः ॥ सूदो भक्ष्यकरस्तस्मै कदाचिद्धनलोभतः ॥ ५९ ॥ गरलं मिश्रितं भक्ष्ये तेन[1] पाखंडरू

---

१ दत्तमिति शेषः ।

पिणा ॥ ज्ञात्वा राजा तु तं विप्रं शूलमध्ये ह्यरोपयत् ॥ ६० ॥ एतस्मिन्नंतरे राजन्वयं तत्र समागताः ॥ आगस्कृतं द्विजं मत्वा दत्त्वा ज्ञानान्यनेकशः ॥ शूलात्तं हि समुत्तार्य हस्तौ पादौ नृपोऽच्छिनत् ॥ ६१ ॥ अस्माकं शिष्यभूतो हि राजास्माभिः प्रबोधितः ॥ इत्युक्तमात्रे वचने दुःखिताभूच्च दारिता ॥ ६२ ॥ चौराँस्तान्सा हि पाताले चकार सुररक्षितान् ॥ जयदेवस्तथा भूतान्दृष्ट्वा चौरान्रुरोद ह ॥ ६३ ॥ क्रंदमाने द्विजे तस्मिन्हस्तांघ्री[1] प्रकृतिं गतौ ॥ विस्मितं नृपतिं तत्र सर्वं हेतुमवर्णयत् ॥ ६४ ॥ श्रुत्वा राजा प्रसन्नात्मा जयदेवमुखोद्भवम् ॥ गीतगोविंदमेवाशु पठित्वा मोक्षमागमत् ॥ ६५ ॥ इति ते कथितं विप्र जयदेवो यथाभवत् ॥ कृष्णचैतन्यचरितं यथा जातं शृणुष्व तत् ॥ ६६ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये धन्वंतरिसुश्रुतजयदेवसमुत्पत्तिवर्णनो नाम नवमोऽध्यायः ॥ ९ ॥छ॥

॥ जीव उवाच ॥ ॥ विष्णुशर्मा पुरा कश्चिद्विप्रोभूद्वेदपारगः ॥ सर्वदेवमयं विष्णुं पूजयित्वा प्रसन्नधीः ॥१॥ अन्यैस्सुरैश्च संपूज्यो बभूव हरिपूजनात् ॥ भिक्षावृत्तिपरो नित्यं पत्नीमान्पुत्रवर्जितः ॥ २ ॥ कदाचित्तस्य गेहे वै व्रती कश्चित्समागतः ॥ द्विजपत्नीं तदैकाकीं[2] भक्तिनम्रां दरिद्रिणीम् ॥ दृष्ट्वोवाच महाभागः स स्पर्शाढ्यो[3] दयापरः ॥ ३ ॥ अनेन स्पर्शमणिना लोहधातुश्च कांचनम् ॥ भवेत्तस्मान्महासाध्वि त्रिदिनांतं गृहाण तम् ॥ ४ ॥ स्नात्वा तावत्सरय्वां चायास्यामि तेंतिकं मुदा ॥ इत्युक्त्वा स ययौ विप्रो ब्राह्मणी बहु कांचनम् ॥ कृत्वा लक्ष्मीं समाप्यासीद्विष्णुशर्मा तदागमत् ॥ ५ ॥ बहुस्वर्णयुतां पत्नीं दृष्ट्वोवाच हरिप्रियः ॥ गच्छ नारि मदाघूर्णे यत्र वै रसिको जनः ॥ ॥ ६ ॥ अहं विष्णुपरो दीनश्चौरभीतः सदैव हि ॥ मधुमत्तां कथं त्वां वै गृहीतुं भुवि च क्षमः ॥७॥ इति श्रुत्वा वचो घोरं पतिभीता पतिव्रता ॥ सस्वर्णं स्पर्शकं तस्मै दत्त्वा सेवापराभवत् ॥ ८ ॥ द्विजोऽपि घर्घरामध्ये तद्द्रव्यं बलतोऽक्षिपत् ॥ त्रिदिनान्ते च स यतिस्तत्रागत्य मुदान्वितः ॥ उवाच ब्राह्मणीं दीनां स्वर्णं किं न कृतं त्वया ॥ ९ ॥ साह भो मत्पतिश्शुद्धो गृहीत्वा स्पर्शकं रुषा ॥ घर्घरे च निचिक्षेप ततोहं वह्निपाकिनी ॥ निर्लोहो वर्तते विप्रस्ततः प्रभृति हे गुरो ॥ १० ॥ इति श्रुत्वा तु वचनं स यतिर्विस्मयान्वितः ॥ स्थित्वा दिनान्ते तं विप्रमुवाच बहु भर्त्सयन् ॥ ११ ॥ दरिद्रो भिक्षुकश्चास्ति भवान्दैवेन मोहितः ॥ देहि मे स्पर्शकं शीघ्रं नो चेत्प्राणांस्त्यजाम्यहम् ॥ १२ ॥ इत्युक्तवंतं यतिनं विष्णुशर्मा तदाब्रवीत् ॥ गच्छ त्वं घर्घराकूले तत्र वै स्पर्शकस्तव ॥१३॥ इत्युक्त्वा यतिना सार्द्धं गृहीत्वा कंटकान्बहून् ॥ यतिने दर्शयामास स्पर्शका

---

[1] जातित्वादेकवचनान्तहस्तपादयोर्द्वन्द्वः । [2] आर्षोयम् । [3] पारस इति भाषायाम् ।

निव कंटकान् ॥ १४ ॥ तदा तु स यती विप्रं नत्वा प्रोवाच नम्रधीः ॥ मया वै द्वादशाब्दांतं सम्यगाराधितः शिवः ॥ ततः प्राप्तं शुभं रत्नं तत्तु
त्वद्दर्शनेन वै ॥ १५ ॥ स्पर्शको बहुधा प्राप्तो मया लोभात्मना द्विज ॥ इत्याभाष्य शुभं ज्ञानं प्राप्तो मोक्षमवाप्तवान् ॥ १६ ॥ विष्णुशर्मा सह
स्राब्दमुषित्वा जगतीतले ॥ सूर्यमाराध्य विधिवद्विष्णोर्मोक्षमवाप्तवान्॥१७॥स द्विजो वैष्णवं तेजो धृत्वा वै मासि फाल्गुने॥त्रैलोक्यमतपत्स्वामी
देवकार्यपरायणः ॥ १८ ॥ सूत उवाच ॥ इत्युक्त्वा भगवाञ्जीवः पुनः प्राह शचीपतिम् ॥ फाल्गुने मासि तं सूर्यं समाराध्य सुखी भव ॥
॥ १९ ॥ इत्युक्तो गुरुणा देवो ध्यात्वा सर्वमयं हरिम् ॥ पूजनैर्बहुधाकारैर्देवदेवमपूजयत् ॥ २० ॥ तदा प्रसन्नो भगवान्समभूत्सूर्यमण्डलात् ॥
चतुर्भुजो हि रक्तांगो यथा यक्षस्तथैव सः ॥ पश्यतां सर्वदेवानां शक्रदेहमुपागमत् ॥ २१ ॥ तत्तेजसा तदा शक्रः स्वान्तर्लीय स्वकं वपुः ॥
अयोनिस्स द्विजो भूत्वा शची देवी तथैव सा ॥ २२ ॥ तदा तौ मिथुनीभूतौ वैष्णवाग्निप्रपीडितौ ॥ रेमाते वर्षपर्यन्तं गंगाकूले महावने ॥
॥ २३ ॥ अधाद्गर्भं तदा देवी शची तु द्विजरूपिणी ॥ भाद्रशुक्ले गुरौ वारे द्वादश्यां ब्राह्ममण्डले ॥ २४ ॥ प्रादुरासीत्स्वयं विष्णुर्धृत्वा सर्वं
कलां हरिः ॥ चतुर्भुजश्च रक्ताङ्गो रविकुंभसमप्रभः ॥ २५ ॥ तदा रुद्राश्च वसवो विश्वेदेवा मरुद्गणाः ॥ साध्याश्च भास्कराः सिद्धास्तुष्टु
वुस्तं सनातनम् ॥ २६ ॥ ॥ देवा ऊचुः ॥ ॥ कुलिशध्वजपद्मगदांकुशाभं चरणं तव नाथ महाभरणम् ॥ रमणं मुनिभिर्विधिशंभुयुतं
प्रणमाम वयं भवभीतिहरम् ॥ २७ ॥ दरचक्रगदाम्बुजमानधरः सुरशत्रुकठोरशरीरहरः ॥ सचराचरलोकभरश्चपलः खलनाशकरस्सुरकार्य
करः ॥ २८ ॥ नमस्ते शचीनंदनानन्दकारिन्महापापसन्तापदुर्लापहारिन् ॥ सुरारीन्निहत्याशु लोकाधिधारिन्स्वभक्त्याघजाताङ्गकोटि
प्रहारिन् ॥ २९ ॥ त्वया हंसरूपेण सत्यं प्रपाल्यं त्वया यज्ञरूपेण वेदः प्ररक्ष्यः ॥ स वै यज्ञरूपो भवाँल्लोकधारी शचीनन्दनः शक्रशर्मप्र
सक्तः ॥ ३० ॥ अनर्पितचरोचिरात्करुणयावतीर्णः कलौ समर्पयितुमुन्नतोज्ज्वलरसां स्वभक्तिश्रियम् ॥ हरेः पुनरसुन्दरद्युतिकदंबसन्दीपितः सदा
स्फुरतु नो हृदयकन्दरे शचीनंदनः ॥ ३१ ॥ विसर्जति नरान्भवान्करुणया प्रपाल्य क्षितौ निवेदयितुमुद्भवः परात्परं स्वकीयं पदम् ॥ कलौ
दितिजसंभवाधिव्यथाब्धिसुरमग्नगान्समुद्धर महाप्रभो कृष्णचैतन्य शचीसुत ॥ ३२ ॥ माधुर्य्यैर्मधुभिस्सुगंधवदनः स्वर्णांबुजानां वनं कारुण्या
मृतनिर्झरैरुपचितः सत्प्रेमहेमाचलः ॥ भक्तांभोधरधारिणी विजयिनी निष्कंपसत्तावली देवो नः कुलदैवतं विजयते चैतन्यकृष्णो हरिः ॥ ३३ ॥
देवारातिजनैरधर्मजनितैस्संपीडितेयं मही संकुच्याशु कलौ कलेवरमिदं बीजाय हा वर्तते ॥ त्वन्नाम्नैव सुरारयो विदलिताः पातालगाः पीडिता

म्लेच्छा धर्मपराः सुरेशनमनास्तस्मै नमो व्यापिने ॥ ३४ ॥ ॥ सूत उवाच ॥ ॥ इत्यभिष्टूय पुरुषं यज्ञेशं च शचीपतिम् ॥ बृहस्पतिमुपागम्य देवा वचनमब्रुवन् ॥ ३५ ॥ वयं रुद्रा महाभाग इमे च वसवोऽश्विनौ ॥ केन केनांशकेनैव जनिष्यामो महीतले ॥ तत्सर्वं कृपया देव वक्तुमर्हति नो भवान् ॥ ३६ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ अहं वः कथयिष्यामि शृणुध्वं सुरसत्तमाः ॥ पुरा पूर्वभवे चासीन्मृगव्याधो द्विजाधमः ॥ धनुर्बाणधरो नित्यं मार्गे विप्रविहिंसकः ॥३७॥ हत्वा द्विजान्महामूढस्तेषां यज्ञोपवीतकम् ॥ गृहीत्वा हेलया दुष्टो महाक्रोशस्तु तत्कृतः ॥ ३८ ॥ ब्राह्मणस्य च यद्द्रव्यं सुधोपममनुत्तमम् ॥ मधुरं क्षत्रियस्यव वैश्यस्यान्नसमं स्मृतम् ॥ ३९ ॥ शूद्रस्य वस्तु रुधिरमिति ज्ञात्वा द्विजाधमः ॥ स जघान त्रिवर्णांश्च ब्राह्मणान्बहुलान्खलः ॥ ४० ॥ द्विजनाशात्सुरास्सर्वे भयभीतास्समंततः ॥ परमेष्ठिनमागम्य कथांश्चक्रुश्च कारणम् ॥ ४१ ॥ श्रुत्वा च दुःखितो ब्रह्मा सप्तर्षीन्प्राह लोकगान् ॥ उद्देशं कुरु तत्रैव गत्वा तस्य द्विजोत्तम ॥ ४२ ॥ इति श्रुत्वा मरीचिस्तु वशिष्ठादिभिरन्वितः ॥ तत्र गत्वा स्थितास्सर्वे मृगव्याधस्य वै वने ॥ ४३ ॥ मृगव्याधस्तु तान्दृष्ट्वा धनुर्बाणधरो बली ॥ उवाच वचनं घोरं हनिष्येहं च वोद्य वै ॥ ४४ ॥ मरीचाद्या विहस्याहुः किमर्थं हंतुमुद्यतः ॥ कुलार्थं वात्मनोऽर्थं वा शीघ्रं वद महाबल ॥ ४५ ॥ इत्युक्तस्तान्द्विजः प्राह कुलार्थं चात्मनो हिते ॥ हन्मि युष्मान्धनैर्युक्तान्ब्राह्मणाँश्च विशेषतः ॥ ४६ ॥ श्रुत्वा तमाहुस्ते विप्रा गच्छ शीघ्रं धनुर्धर ॥ विप्रहत्याकृतं पापं भुञ्जीयात्को विचारय ॥४७॥ इति श्रुत्वा तु घोरात्मा तेषां दृष्ट्या सुनिर्मलः ॥ गत्वा वंशजनानाह भूरि पापं मयार्जितम् ॥४८॥ तत्पापकं भवद्भिश्च ग्रहणीयं धनं यथा ॥ ते तु श्रुत्वा द्विजं प्राहुर्न वयं पापभोगिनः ॥ ४९ ॥ साक्षीयं भूमिरचला साक्षी सूर्योऽयमुत्तमः ॥ इति श्रुत्वा मृगव्याधो मुनीनाह कृतांजलिः ॥ ५० ॥ यथा पापं क्षयं याति तथा मां[1]ज्ञातुमर्हथ ॥ इत्युक्तास्तेन ते प्राहुः शृणु त्वं मंत्रमुत्तमम् ॥ ५१ ॥ राम नाम हि तज्ज्ञेयं सर्वाघौघविनाशनम् ॥ यावत्त्वत्पार्श्वमायामस्तावत्त्वं जप चोत्तमम् ॥ ५२ ॥ इत्युक्त्वा ते गता विप्रास्तीर्थात्तीर्थान्तरं प्रति ॥ मरामरामरेत्येवं सहस्राब्दं जजाप ह ॥ ५३ ॥ जपप्रभावादभवद्वनमुत्पलसंकुलम् ॥ तत्स्थानमुत्पलारण्यं प्रसिद्धमभवद्भुवि ॥ ५४ ॥ ततः सप्तर्षयः प्राप्ता वल्मीकात्तं निराकृतम् ॥ दृष्ट्वा शुद्धं तदा विप्रमूचुस्ते विस्मयान्विताः ॥ ५५ ॥ वल्मीकान्निस्सृतो यस्मात्तस्माद्वाल्मीकिरुत्तमम् ॥ तव नाम भवेद्विप्र त्रिकालज्ञ महामते ॥ ५६ ॥ एवमुक्त्वा ययुर्लोकं स तु रामायणं मुनिः ॥ कल्पाष्टादशयुक्तं हि शतकोटिप्रविस्तरम् ॥५७॥ चकार

---

[1] 'त्वामौ द्विती'–इति मादेशे सवर्णदीर्घः ।

निर्मलं पद्यैः सर्वांघौघविनाशनम् ॥ तत्पश्चात्स शिवो भूत्वा तत्र वासमकारयत् ॥ ५८ ॥ अद्यापि संस्थितः स्वामी मृगव्याधः सनातनः ॥
शृणुध्वं च सुराः सर्वे तच्चरित्रं हरप्रियम् ॥ ५९ ॥ वैवस्वतेऽन्तरे प्राप्ते चाद्ये सत्ययुगे शुभे ॥ ब्रह्मागत्योत्पलारण्यं तत्र यज्ञं चकार ह ॥ ६० ॥
तदा सरस्वती देवी नदी भूत्वा समागता ॥ तद्दर्शनात्स्वयं ब्रह्मा मुखतो ब्राह्मणं शुभम् ॥ ६१ ॥ बाहुभ्यां क्षत्रियं चैव चोरुभ्यां वैश्यमुत्तमम् ॥
पद्भ्यां शूद्रं शुभाचारं जनयामास वीर्यवान् ॥ ६२ ॥ द्विजराजस्तथा सोमश्चंद्रमा नामतो द्विजः ॥ लोके सर्वातपः सूर्यः कश्यं वीर्यं हि पाति
यः ॥ ६३ ॥ कश्यपो हि द्वितीयोऽसौ मरीचिस्तु ततोऽभवत् ॥ रत्नानामाकरो यो वै स हि रत्नाकरः स्मृतः ॥ ६४॥ लोकान्धरति यो द्रव्यैः स
तु धर्मो हि नामतः ॥ गंभीरश्चास्ति सदृशः कोशो यस्य सरित्पतिः ॥ ६५ ॥ लोकान्दक्षति यः कृत्यैः स तु दक्षः प्रजापतिः ॥ ब्रह्मणोंगाच्च
ते जातास्तस्माद्वै ब्राह्मणाः स्मृताः ॥ ६६ ॥ वर्णधर्मेण ते सर्वे वर्णात्मानश्च वै क्रमात् ॥ दक्षस्य मनसो जाताः कन्याः पंचशतं ततः ॥ विष्णु
मायाप्रभावेन कलाभूताः स्थिता भुवि ॥६७॥ तदा तु भगवान्ब्रह्मा सोमायाश्विनिमण्डलम् ॥ सप्तविंशद्गणं श्रेष्ठं ददौ लोकविवृद्धये ॥६८॥ कश्य
पायादितिगणं क्षत्ररूपं त्रयोदशम् ॥ धर्माय कीर्तिप्रभृतीर्ददौ स च महामुनिः ॥ ६९ ॥ नानाविधानि सृष्टानि चासन्वैवस्वतेऽन्तरे ॥
तेषां पतिस्त्वयं दक्षोऽभूद्विधेराज्ञया भुवि ॥ ७० ॥ तत्र वासं स्वयं दक्षः कृतवान्यज्ञतत्परः ॥ सर्वे देवगणा दक्षं नमस्कृत्य चरंति हि ॥७१॥ भूत
नाथो महादेवो न ननाम कदाचन ॥ तदा क्रुद्धः स्वयं दक्षः शिवभागं न दत्तवान् ॥ ७२ ॥ मृगव्याधः शिवः क्रुद्धो वीरभद्रो बभूव ह ॥ त्रिशि
राश्च त्रिनेत्रश्च त्रिपदस्तत्र चागतः ॥ ७३ ॥ तेनैव पीडिता देवा मुनयः पितरोऽभवन् ॥ तदा वै यज्ञपुरुषो भयभीतः समंततः ॥ ७४ ॥
मृगभूतो ययौ तूर्णं दृष्ट्वा व्याधः शिवोभवत् ॥ रुद्रव्याधेन स मृगो विभिन्नाङ्गो बभूव ह ॥ ७५ ॥ तदा तु भगवान्ब्रह्मा तुष्टाव मधुरस्वरैः ॥ संतु
ष्टश्च मृगव्याधो यज्ञं पूर्णमकारयत् ॥ ७६ ॥ तुलाराशिस्थिते भानौ तं रुद्रं चन्द्रमण्डले ॥ स्थापयित्वा स्वयं ब्रह्मा सप्तविंशद्दिनात्मके ॥ प्रययौ
सप्तलोकं वै स रुद्रश्चंद्ररूपवान् ॥ ७७ ॥ इति श्रुत्वा वीरभद्रो रुद्रः संहृष्टमानसः ॥ स्वांशं देहात्समुत्पाद्य द्विजगेहमचोदयत् ॥ ७८ ॥ विप्रभैरव
दत्तस्य गेहं गत्वा स वै शिवः ॥ तत्पुत्रोऽभूत्कलौ घोरे शंकरो नाम विश्रुतः ॥७९॥ स बालश्च गुणी वेत्ता ब्रह्मचारी बभूव ह ॥ कृत्वा शंकरभाष्यं
च शैवमार्गमदर्शयत् ॥ ८० ॥ त्रिपुण्ड्रश्चाक्षमाला च मंत्रः पंचाक्षरः शुभः ॥ शैवानां मंगलकरः शंकराचार्यनिर्मितः ॥ ८१ ॥ इति श्रीभविष्ये
महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये कृष्णचैतन्यशंकराचार्यसमुत्पत्तिवर्णनं नाम दशमोऽध्यायः ॥ १० ॥

॥ ॥ बृहस्पतिरुवाच ॥ ॥ पुरा तु नैमिषारण्ये विप्रश्चाजगरोऽभवत् ॥ वेदान्तशास्त्रनिपुणो ज्ञानवाञ्छंभुपूजकः ॥ १ ॥ द्वादशाब्दान्तरे रुद्रस्तुष्टोऽभूत्पार्थिवार्चनात् ॥ तदागत्य ददौ ज्ञानं जीवन्मोक्षत्वमागतः ॥ २ ॥ संकर्षणं समाराध्य तज्ज्ञानेन द्विजोत्तमः ॥ तुष्टाव पुष्कलाभिश्च स्तुतिभिः परमेश्वरम् ॥ ३ ॥ ॥ अजगर उवाच ॥ ॥ सदैव्यं प्रधानं परं ज्योतिरूपं निराकारमव्यक्तमानन्दनित्यम् ॥ त्रिधा तत्तु जातं त्रिलिङ्गैक्यभिन्नं पुमान्सत्त्वरूपो रजोरूपनारी ॥ तयोर्यत्तु शेषं तमोरूपमेव ततश्शेषनाम्ने नमस्तेनमस्ते ॥ ४ ॥ रजश्चादिभूतो गुणस्यैव माया तथा मध्यभूतो नरस्सत्त्वरूपम् ॥ तथैवान्तभूतो नपुंस्कं तमोवत्सदैवाद्य नागेश तुभ्यं नमस्ते ॥ ५ ॥ नराधाररूपो भवान्कालकर्ता नराकर्षणस्त्वं हि संकर्षणश्च ॥ रमन्ते मुनीशास्त्वयि ब्रह्मधाम्नि नमस्तेनमस्ते पुनस्ते नमोऽस्तु ॥ नराङ्गेषु चाधारभूता शिवा या स्मृता योगनिद्रा हि शक्तिस्त्वदीया ॥ ६ ॥ ॥ जीव उवाच ॥ ॥ एवं हि संस्तुतो देवो द्विजं चाजगरं प्रभुः ॥ सायुज्यं कृतवान्स्वांगे रुद्रः सर्पो हि सोऽभवत् ॥ ७ ॥ फणासहस्रसहितो गौरांगो गौरविग्रहः ॥ क्षीराब्धौ मंदिरं यस्य बभूव च गुणाकरम् ॥ ८ ॥ तं सर्पाख्यं महारुद्रं प्रत्यागत्यात्मभूः स्वयम् ॥ कर्कराशिस्थिते सूर्ये चन्द्रे भगणमण्डले ॥ ९ ॥ तं रुद्रं स्थापयामास चंद्रमाः स तु चाभवत् ॥ इति श्रुत्वा शेषनागो रुद्रः श्रीगुरुभाषितम् ॥ १० ॥ वचनं स प्रसन्नात्मा तेज उत्पाद्य वै मुखात् ॥ विंध्याद्रौ जनयामास देवदत्तद्विजालये ॥ ११ ॥ गिरिशर्मा स वै विप्रो विजित्य विदुषां गणान् ॥ काशीपुरीं समायातः शिष्योभूच्छंकरस्य वै ॥ १२ ॥ इति ते कथितं विप्र यथा रुद्रो बभूव ह ॥ पुनः शृणु कथां विप्र यथा जीवेन भाषिताम् ॥ १३ ॥ ॥ जीव उवाच ॥ ॥ प्रयागे च पुरा ह्यासीद्ब्राह्मणो हरिसेवकः ॥ दारिद्र्यार्त्तो मन्दभाग्यो नैर्ऋतो नाम विश्रुतः ॥ १४ ॥ महाकष्टेन तस्यैव भिक्षा प्राप्ता दिनान्तके ॥ नैर्ऋतः पुत्रपत्नीको दारिद्र्यार्तो दिनेदिने ॥ १५ ॥ एकदा नारदो योगी संप्राप्तो वैष्णवप्रियः ॥ पूजितस्तेन विप्रेण विष्णुलोकमुपाययौ ॥ १६ ॥ दृष्ट्वा नारायणं देवं नमस्कृत्य पुनःपुनः ॥ वचनं प्राह नम्रात्मा सदैव भगवत्प्रियः ॥ १७ ॥ भगवन्ये सुराः सर्वे सदा त्वत्पूजने रताः ॥ तेषां भक्ताश्च ये भूमौ धनधान्यसमन्विताः[१] ॥ १८ ॥ त्वद्भक्ताश्च मया दृष्टा दारिद्र्यार्ताः सदा भुवि ॥ किमर्थं ब्रूहि मे स्वामिञ्जनार्दन नमोस्तु ते ॥ १९ ॥ इत्युक्तो नारदेनैव भगवान्भक्तवत्सलः ॥ तमाह वचनं रम्यं तच्छृणु त्वं सुरोत्तम ॥ २० ॥ मद्भक्तो भगवान्ब्रह्मा दृष्ट्वा नारायणप्रियान् ॥ जनाँश्च स्ववशीकृत्य लोककार्यं करोति हि ॥ २१ ॥ धर्मोऽधर्मस्तेनःकृतो

---

[१] सन्तीति शेषः ।

धर्मो वेदमयः स्मृतः ॥ सप्त लोकाश्च धर्मस्य निर्मितास्तेन धीमता ॥ २२ ॥ भूर्भुवः स्वो महश्चैव जनश्चैव तपस्तथा ॥ सत्यं तथैव क्रमतो
नृणां द्विगुणदं सुखम् ॥ २३ ॥ अधर्मो वेदरहितो भुवि शब्दान्यकर्तृकः ॥ ये शब्दाश्च महावाण्या दूषितास्ते हि लोकगाः ॥ २४ ॥ वेदेतर
पापमया दैत्यवृद्धिकराः सदा ॥ अधर्मः स तु विज्ञेयः सप्त लोकाश्च तस्य वै ॥ २५ ॥ भूमिगर्तेषु विधिना निर्मिताः सुखदायकाः ॥ अतलं
वितलं चैव सुतलं च तलातलम् ॥ महातलं रसा चैव पातालं चान्यधर्मजम् ॥ २६ ॥ अन्यधर्मो ह्यधर्मश्च देवास्त्वन्ये हि तेऽसुराः ॥ धर्मपक्षाः
सुरा ज्ञेया असुराश्चान्यधर्मजाः ॥ २७ ॥ तयोर्विहीनो यो धर्मो देवैर्दैत्यैश्च दूषितः ॥ विधर्मः स तु विज्ञेयस्तत्र लोका व्यथाकुलाः ॥
॥ २८ ॥ तामिस्रमन्धतामिस्रं कुम्भीपाकश्च रौरवम् ॥ महारौरवमेवापि तथामूर्तिरयस्तथा ॥ २९ ॥ इक्षुयंत्रं शाल्मलं च ह्यसिपत्रवनं
तथा ॥ ज्ञेयमित्येव रचितं विधिना चैकविंशतिः ॥ ३० ॥ ब्रह्माण्डोऽयं लोकमयः परं तस्माच्च मत्पदम् ॥ मद्भक्ता भूतले ये वै
ते गच्छंति परं पदम् ॥ ३१ ॥ देवभक्ताश्च ये लोकाः सप्त लोकान्व्रजंति ते ॥ ये तु वै तामसा लोका दैत्यपूजनतत्पराः ॥
ते गच्छंति महीलोकानतलादिमयाँस्तथा ॥ ३२ ॥ पातालाद्योजनं लक्षमधोलोकः प्रकीर्तितः ॥ विधर्मतत्परा लोकास्ते गच्छंति ह्यधोगतिम् ॥
अतो वै विधिना भ्रष्टा मद्भक्ताश्च दरिद्रगाः ॥ ३३ ॥ ये मद्भक्ताः सुरान्पूर्वं पूजयित्वा भजंति माम् ॥ लक्ष्मीवंतश्च ते ज्ञेया भुक्तिमुक्तिपरायणाः ॥
॥ ३४ ॥ प्रयागे नैर्ऋतो विप्रस्त्यक्त्वा देवान्मम प्रियान् ॥ भजत्यनन्यभावेन तस्मात्स हि दरिद्रवान् ॥ ३५ ॥ देवैर्दत्तं हि यद्द्रव्यं भोक्तव्यं
सर्वदा जनैः ॥ मया दत्तं हि यद्वस्तु ब्रह्माण्डे नास्ति नारद ॥ अतो मदाज्ञया विप्र देहि तस्मै वरं शुभम् ॥ ३६ ॥ इत्युक्तो नारदो योगी हरिणा
विश्वकारिणा ॥ द्विजपत्नी स्थिता गेहे तत्र प्राप्य वचोऽब्रवीत् ॥ ३७ ॥ वरं वरय हे साध्वि त्वया यद्वांछितं हृदि ॥ साह देहि वरं स्वामिन्भू
पराज्ञी भवाम्यहम् ॥ ३८ ॥ इत्युक्त्वा वचनं तत्र दिव्यरूपा बभूव सा ॥ आगतस्तत्र नृपतिर्गृहीत्वा गेहमाययौ ॥ ३९ ॥ सायंकाले तु संप्राप्ते
द्विजस्तत्र समागतः ॥ नारदस्तं वचः प्राह शृणु विप्र हरिप्रिय ॥ ४० ॥ वरदानाच्च ते पत्नी भूपराज्ञी हि वर्तते ॥ त्वया किं वांछितं वस्तु मत्तः
प्राप्य सुखी भव ॥ ४१ ॥ इति श्रुत्वा दैववशो वचः प्राह रुषान्वितः ॥ क्रोष्ट्री भवेच्च मत्पत्नी देहि विप्र वरं मम ॥४२॥ इत्युक्तवचनात्क्रोष्ट्री सा
बभूव द्विजप्रिया ॥ एतस्मिन्नंतरे प्राप्तस्तत्पुत्रो गुरुपूजकः ॥ ४३ ॥ श्रुत्वा तत्कारणं सर्वं नारदं स वचोऽब्रवीत् ॥ मम माता यथा स्वामिंस्तथा
शीघ्रं वराद्भवेत् ॥ ४४ ॥ एतत्रिभिर्वरैः प्राप्तं दैवमायाविमोहितैः ॥ तदा तु नारदो दुःखी नैर्ऋतं प्राह वै वचः ॥ ४५ ॥ ब्रह्माण्डोऽयं देवमयो

भवस्तस्य महेश्वरः ॥ अतो भवं भजाशु त्वं स ते कार्यं करिष्यति ॥ ४६ ॥ इत्युक्तवचनो विप्रो भवं तं पार्थिवार्चनैः ॥ तुष्टाव परया भक्त्या
वर्षमात्रं हि नैर्ऋतः ॥ ४७ ॥ तदा प्रसन्नो भगवान्महेशो भक्तवत्सलः ॥ कुबेरसदृशं दिव्यं ददौ तस्मै महद्धनम् ॥ ४८॥ तद्धनेन स वै विप्रोधर्म
कार्यं चकार ह ॥ प्रसिद्धोऽभून्महीपृष्ठे नाम्ना पुण्यजनो धनैः ॥ ४९ ॥ शिवभक्तिप्रभावेण प्राप्य द्रव्यमकंटकम् ॥ सहस्राब्दवपुर्भूत्वा त्यक्त्वा प्राणा
न्दिवं ययौ ॥ ५० ॥ वृषराशिस्थिते सूर्ये राजा चन्द्रस्य सोमवत् ॥ नैर्ऋतो नाम विख्यातो रुद्रः सर्वजनप्रियः ॥ ५१ ॥ इति श्रुत्वा नैर्ऋतस्तु
भृगुवर्यं गुरूदितम् ॥ स्वांशाद्भूतलमागम्य गिरिनालगिरौ वने ॥ ५२ ॥ योगिनः सिद्धसांख्यस्य पुत्रोऽभूद्वनवासिनः ॥ वनशर्मेति विख्यातो
वेदशास्त्रपरायणः ॥ ५३ ॥ द्वादशाब्दवपुर्भूत्वा जित्वा विद्वज्जनान्बहून् ॥ काशीमागम्य तत्त्वार्थी शंकराचार्यमुत्तमम् ॥ प्रणम्य तस्य शिष्योऽभू
द्वनशर्मा विशारदः ॥ ५४ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ वसुशर्मा द्विजः कश्चिन्माहिष्मत्यां पुराभवत् ॥ शिवव्रतपरो नित्यं पुत्रार्थी पार्थिवा
र्चकः ॥५५॥ चतुर्विंशतिवर्षाणि पूजतस्तस्य धीमतः ॥ व्यतीतानि सुरास्तत्र न प्रसन्नोऽभवच्छिवः ॥५६॥ तदा तु दुःखितो विप्रो वह्निं प्रज्वाल्य
भैरवम् ॥ जुहाव स्वांगमांसानि मुखतश्चरणान्तकम् ॥ ५७ ॥ न प्रसन्नोभवद्रुद्रस्तदा विप्रः शुचान्वितः ॥ गृहीत्वा चोत्तमं मेषं संस्कारं कृतवा
ञ्छुचिः ॥ तेन मेषेण सहितो ज्वलदग्नौ समाययौ ॥ ५८ ॥ प्रसन्नो भगवान्रुद्रस्तत्रागत्य गणैर्युतः ॥ स्वरूपं दर्शयामास शुद्धस्फटिकसुन्द
रम् ॥ वरं ब्रूहि वचः प्राह वसुशर्माणमुत्तमम् ॥ ५९ ॥ तच्छ्रुत्वा स प्रसन्नात्मा नत्वा पार्वतिवल्लभम् ॥ प्रश्रयावनतो भूत्वा वचनं प्राह शंकरम् ॥
॥ ६० ॥ देहि मे तनयं स्वामिञ्छरणागतवत्सल ॥ इत्युक्तश्शंकरस्तेन विहस्योवाच तं द्विजम् ॥ ६१ ॥ पुत्रदाता स्वयं ब्रह्मा भाग्यकर्ता परा
त्परः ॥ तुभ्यं च शतजन्मान्तं तेन पुत्रो न निर्मितः ॥ तस्मादहं सुतं स्वांशात्तव विप्र ददामि भोः ॥ ६२ ॥ इत्युक्त्वा स्वमुखात्तेजो निराकृत्य
महेश्वरः ॥ तत्पत्न्यां जनयामास सकाशाद्वसुवर्मणः ॥ ६३ ॥ दशमासान्तरे जातः सुपुत्रो मधुराननः ॥ अजस्येव पदश्चैको द्वितीयो नरवत्ततः ॥
अजैकपाद इति स प्रसिद्धोऽभून्महीतले ॥ ६४ ॥ चतुश्शताब्दवपुषि प्राप्ते तस्मिन्सुते प्रिये ॥ संप्राप्तो भगवान्मृत्युस्तदा रोगगणैर्युतः ॥ ६५ ॥
तस्य तैरभवद्युद्धमजैकचरणस्य वै ॥ ६६ ॥ वर्षमात्रेण तान्सर्वाञ्जित्वा मल्लरणोत्कटः ॥ मृत्युंजयः स वै नाम्ना प्रसिद्धोऽभून्महीतले ॥ ६७ ॥
दुःखितो भगवान्मृत्युस्तेन विप्रेण निर्जितः ॥ परमेष्ठिनमागम्य कथयामास कारणम् ॥ ६८ ॥ तदा तु भगवान्ब्रह्मा सर्वदेवगणैर्युतः ॥ कुम्भगे
द्युमणौ देवे चन्द्रमण्डलगं नृपम् ॥ तं द्विजं च चकाराशु रुद्ररूपं भयापहम् ॥ ६९ ॥ ॥ सूत उवाच ॥ ॥ इति श्रुत्वा महादेवः स विप्रश्च

तदाजपाद् ॥ पुरीं माहिष्मतीं प्राप्तः कलिशुद्धिकरः प्रभुः ॥ पुरीशर्मेति विख्यातो यतिदत्तस्य वै सुतः ॥ ७० ॥ षोडशाब्दवपुर्भूत्वा जित्वा वेद
परायणान् ॥ शंकराचार्यमागम्य तस्य शिष्यो बभूव ह ॥ इति ते कथितं विप्र यथा मृत्युंजयोभवत् ॥७१॥ इति श्रीभविष्ये महापुराणे प्रतिसर्ग
पर्वणि चतुर्युगखंडापरपर्याये कलियुगीयेतिहाससमुच्चये आनंदगिरिवनशर्मपुरीशर्मवर्णनंनामैकादशोऽध्यायः ॥११॥ ॥छ॥ ॥ सूत उवाच ॥ ॥
पुनः शृणु कथां रम्यां प्रयागे जीवभाषिताम् ॥ हिर्बुर्नाम पुरा चासीद्दानवो लोककंटकः ॥१॥ निकुंभान्वयसंभूतः शक्रतुल्यपराक्रमः ॥ सहस्राब्दं तपः
कृत्वा तापयामास वै सुरान् ॥ २ ॥ तदा लोकपतिर्ब्रह्मा लोकरक्षार्थमुद्यतः ॥ वरं ब्रूहीति वचनमुवाच दनुजेश्वरम् ॥ ३ ॥ नमस्कृत्य विधातारं
वचनं प्राह नम्रधीः ॥ यदि देयो वरः स्वामिंस्त्वया विश्वकृता विभो ॥४॥ मरणं न च मे भूयात्त्वत्कृतैश्च चराचरैः ॥ इत्युक्तस्स तथेत्युक्त्वा ब्रह्म
लोकमुपाययौ ॥ ५ ॥ दानवस्स तु रौद्रात्मा जित्वा स्वर्गनिवासिनः ॥ आहूय दानवान्दैत्यान्विवरेभ्यः प्रसन्नधीः ॥ ६ ॥ स्वर्गे निवासयामास
ते देवा भूतलीकृताः ॥ लक्षाब्दं च सुरास्सर्वे बुभुजुः परमापदः ॥ ७ ॥ एकदा नारदो धीमान्दृष्ट्वा देवांस्तथागतान् ॥ वचनं प्राह योगात्मा
भजध्वं लोकशंकरम् ॥ ८ ॥ स देवश्च महादेवो ब्रह्माण्डेशो विपत्तिहा ॥ इति श्रुत्वा तु वचनं ते देवा विस्मयान्विताः ॥ ९ ॥ पार्थिवैः पूजया
मासुर्देवदेवमुमापतिम् ॥ गतैकादशवर्षाश्च तेषां पूजनकारिणाम् ॥ १० ॥ तदा प्रसन्नो भगवान्महेशो लोकशंकरः ॥ ज्योतिर्लिंगमयो भूत्वा
लोकाँस्त्रीन्समदाहयत् ॥ ११ ॥ ये तु वै देवभक्ताश्च शेषाश्चासन्महाभये ॥ अन्ये तु दानवैस्सार्द्धं भस्मीभूता बभूविरे ॥ १२ ॥ एतस्मिन्नन्तरे
ब्रह्मा विष्णुना सह हर्षितः ॥ तुष्टाव स महारुद्रं स्तोत्रैस्सामसमुद्भवैः ॥ १३ ॥ मिथुनस्थे दिवानाथे शशिमण्डलभूपतिम् ॥ हिर्बुघ्नं च महारुद्रं
चकार सुरहेतवे ॥ १४ ॥ इति श्रुत्वा स हिर्बुघ्नो देवकार्यार्थमुद्यतः ॥ हिमालये गिरौ रम्ये पुत्रोऽभूत्साद्यकर्मणः ॥ १५ ॥ पतिरूपः कलाभिज्ञो
भारतीश इति श्रुतः ॥ स जित्वा विदुषां वृंदान्काशीनगरमागतः ॥ शंकराचार्यमागम्य शिष्योऽभूत्तेन निर्जितः ॥ १६ ॥ ॥ बृहस्पति
रुवाच ॥ ॥ मयपुत्रः स्मृतो मायी तपोघोरं चकार ह ॥ १७ ॥ पदैकेन स्थितः सूर्य्ये सहस्राब्दं प्रयत्नतः ॥ स लोकाँस्तापयामास तपसा
लोकवासिनः ॥ १८ ॥ तदा प्रसन्नो भगवान्परमेष्ठी पितामहः ॥ त्रयो ग्रामास्तत्प्रियार्थं क्रमाद्वै तेन निर्मिताः ॥ १९ ॥ सौवर्णं स्वर्गसदृशं पुरं
षोडशयोजनम् ॥ तदधो योजनान्ते च राजतं च भुवर्मयम् ॥२०॥ तदधो योजनान्ते च भूर्लोकमिव चायसम् ॥ एवं पुरनिवासिन्यो दैत्यानां
योषितो मुदा ॥ २१ ॥ शतकोटिमिता दैत्या धर्मात्मानो निवासिनः ॥ गृहीत्वा यज्ञभागं च देवतुल्या बभूविरे ॥ २२ ॥ तदा निर्बलिनो देवाः

क्षुधया पीडिताः प्रभुम् ॥ भगवन्तं महाविष्णुं तुष्टुवुः परया गिरा ॥ २३ ॥ चतुर्युगसमूहानां वर्षाणां भगवन्प्रभो ॥ अधिकारविहीनाश्च वर्तंते
स्वर्गमण्डले ॥ २४ ॥ तामसांतरमेवापि षोडशैव चतुर्युगम् ॥ व्यतीतानि महाविष्णो मायिनां दुःखं भुंजताम् ॥ २५ ॥ इति श्रुत्वा वचस्तेषां
भगवान्मधुसूदनः ॥ दृष्ट्वा संस्कृतवार्तायां दैत्यान्धर्मपरायणान् ॥२६॥ बौद्धरूपस्स्वयं जातः कलौ प्राप्ते भयानके ॥ अजिनस्य द्विजस्यैव सुतो
भूत्वा जनार्दनः ॥ २७ ॥ वेदधर्मपरान्विप्रान्मोहयामास वीर्यवान् ॥ निर्वेदाः कर्मरहितास्त्रिवर्णास्तामसान्तरे ॥ २८ ॥ षोडशे च कलौ प्राप्ते
बभूवुर्यज्ञवर्जिताः ॥ तदा दैत्या रुषाविष्टास्सर्वे त्रिपुरवासिनः ॥ २९ ॥ मनुजान्पीडयामासुर्निर्यज्ञान्वेदवर्जितान् ॥ क्षयं जग्मुर्नरास्सर्वे कल्पांते
दैत्यभक्षिताः ॥ ३० ॥ पुनस्सत्ययुगे प्राप्ते कैलासे गुह्यकालये ॥ देवैश्चाराधितः शंभुस्सर्वलोकशिवंकरः ॥ ३१ ॥ ज्योतिर्लिंगं वपुः कृत्वा तत्र
तस्थौ भयंकरः ॥ एतस्मिन्नन्तरे देवाः प्रसन्नास्तामसान्तरे ॥ ३२ ॥ भूमेस्सारं गृहीत्वा ते रथं कृत्वा विधानतः ॥ चंद्रभास्करयोस्साराच्चक्रे
कृत्वा तथैव च ॥३३॥ सुमेरोश्च तथा सारात्केतुं कृत्वा रथस्य वै ॥ ददौ शिवाय महते यानं स्यन्दनरूपि तत् ॥ ३४ ॥ तदा ब्रह्मा स्वयं प्राप्य
बभूव रथसारथिः ॥ वेदाश्च वाजिनश्चासन्देवदेवस्य वै रथे ॥ ३५ ॥ लोकालोकगिरेः सारो धनुश्चासीन्महात्मनः ॥ घोरं चाजगवं नाम प्रसिद्ध
मभवद्धनुः ॥ ३६ ॥ सज्यं चकार भगवांस्तद्धनुः कठिनं महत् ॥ भग्नीभूतमभूच्चापं देवदेवस्य वै रुषा ॥ ३७ ॥ विस्मितो भगवान्विष्णुस्सारं
स्वर्गस्य वै तदा ॥ गृहीत्वाशु धनुर्दिव्यं पिनाकं स चकार ह ॥ ३८ ॥ सज्यं जातं च रुद्रेण पुष्टिभूतं महद्धनुः ॥ तदा ब्रह्मर्षयस्तुष्टास्तुष्टुवु
र्मनसा हरम् ॥ ३९ ॥ पिनाकीति च तन्नाम्ना प्रसिद्धोभून्महेश्वरः ॥ गुणश्चापस्य वै शेषः शक्रो बाणस्तदाभवत् ॥ ४० ॥ शरपक्षौ वह्निवायू शल्यं
विष्णुः सनातनः ॥ तेन बाणेन दैत्यानां कोटिसंख्या मृता च खे ॥ ४१ ॥ त्रिपुरं दाहयामास मायिना पालितं शिवः ॥ भस्मीभूते पुरे घोरे
तदा लोकपतिर्विधिः ॥ ४२ ॥ पिनाकिनं महारुद्रं मीनराशिस्थिते रवौ ॥ शशिनो मण्डलस्यैव राजानं स चकार तम् ॥ स्वाधिकारांँस्तदा
देवा अवापुस्तामसान्तरे ॥ ४३ ॥ ॥ सूत उवाच ॥ ॥ इति श्रुत्वा पिनाकी च स्वमुखात्स्वांशमुत्तमम् ॥ ४४ ॥ समुत्पाद्य हरद्वारे हिम
सानौ चकार ह ॥ मच्छन्दो नाम तत्रैव योगी शंभुपरायणः ॥ ४५ ॥ गोरखस्य गुरुर्यो वै तन्मुखे तेज आविशत् ॥ रंभा नाम्नैव तत्रैव
स्ववेंश्या कामरूपिणी ॥ ४६ ॥ मच्छन्दं च वशीकृत्य बुभुजे स्मरविह्वला ॥ तयोस्सकाशाद्धै जातस्स पुत्रो रुचिराननः ॥ ४७ ॥
नाथशर्मेति विख्यातो विद्वाञ्च्छ्रेष्ठतरोऽभवत् ॥ स जित्वा पंडितान्भूमौ पुरीं काशीं समागतः ॥ शंकराचार्यविजितस्तस्य शिष्यो

बभूव ह ॥ ४८ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ चाक्षुषांतरसंप्राप्ते द्वादशे द्वापरे युगे ॥ ४९ ॥ क्षत्रियैस्तालजंघीयैर्ब्राह्मणा भृगुवंशजाः ॥ विना
शिताःकुरुक्षेत्रे गृहीत्वा तद्धनं बहु ॥ ५० ॥ बभुजुर्बलवंतस्ते दैत्यपक्षा महाधमाः ॥ कस्यचित्तु मुनेः पत्नी गुर्विणी च भयान्विता ॥ ५१ ॥
हिमतुंगे समागम्य तद्गर्भं मुनिसंभवम् ॥ शतवर्षं ददौ देवी तपसा ज्ञानरूपिणी ॥ ५२ ॥ मातुरूरू सुतो भित्त्वा ततो जातोमहीतले ॥
तेजसा तस्य पुत्रस्य भस्मीभूतमभूज्जगत् ॥ ५३ ॥ तदा तु सकला देवाः पुरस्कृत्य प्रजापतिम् ॥ वज्रस्थितश्च वैतालास्समाजग्मु
र्भयातुराः ॥ ५४ ॥ पितृभिर्दैवतैर्बालस्समाज्ञातो हिमाचले ॥ लोकनाशकरं तेजो जलमध्ये स चाक्षिपत् ॥ ५५ ॥ जलदेवी च वडवा भूत्वा
तत्तेज उत्तमम् ॥ पीत्वा ववाम तत्रैव पीडिता रौद्रतेजसा ॥ ५६ ॥ तदागत्य स्वयं ब्रह्मा त्रिकुटो यत्र वै गिरिः ॥ तदधः सागरे घोरे स्थापयामास
लोकपः ॥ ५७ ॥ मेषगे द्युमणौ प्राप्ते शशिमण्डलगं प्रभुम् ॥ तं रुद्रं स चकाराशु परमेष्ठी पितामहः ॥ ५८ ॥ ऊरुजातात्स्मृतो वोर्वो दहनो
लोकदाहतः ॥ वडवामुखतो जातो वाडवो नाम स प्रभुः ॥ ५९ ॥ ॥ सूत उवाच ॥ ॥ इति श्रुत्वा तु दहनो गुरुवाक्यं मनोहरम् ॥ स्वमुखा
त्तेज उत्पाद्य कुरुक्षेत्रं चकार ह ॥ ६० ॥ सारस्वतस्य विप्रस्य गृहे जातस्स वै शिवः ॥ क्षेत्रशर्मेति विख्यातो विद्वच्छ्रेष्ठो बभूव ह ॥ ६१ ॥ शंक
राचार्यमागम्य शिष्यो भूत्वा पराजितः ॥ ब्रह्मचर्यव्रती काश्यां तस्थौ शंभुपरायणः ॥ ६२ ॥ बृहस्पतिरुवाच ॥ एकार्णवे पुरा जाते नष्टे स्थावर
जंगमे ॥ शताब्दे ब्रह्मणः प्राप्तेऽव्यक्तजन्मनि लोकगे ॥ ६३ ॥ अव्यक्तं प्रकृतिर्माया पीत्वा सर्वजलं मुदा ॥ महाकाली स्वयं मूर्तिरंधकारस्वरू
पिणी ॥ ६४ ॥ एका बभूव तत्रैव प्राकृते कल्पदारुणे ॥ चतुर्युगानां कोटीनां त्रयाणां दारुणे लये ॥ ६५ ॥ षष्टिलक्षयुतानां च कालस्तत्र व्यती
तवान् ॥ तदा सा प्रकृतिर्देवी नित्यशुद्धा सनातनी ॥६६॥ स्वेच्छया च स्वरूपं स्वं महागौरमनुत्तमम् ॥ पंचवक्त्रं दशभुजं त्रिनेत्रं च दधौ शिवा ॥
॥ ६७ ॥ भालनेत्रेण सा माता सूक्ष्मतेजो ददर्श ह ॥ शून्यभूतं परं नित्यमविकारि निरंजनम् ॥ ६८ ॥ तदा दिक्षु गतं ब्रह्म स्वभुजैः प्रकृतिः
पुरा ॥ ग्रहीतुमिच्छती तत्र न समर्था बभूव वै ॥ ६९ ॥ विस्मिता प्रकृतिर्माता पंचवक्त्रैः सनातनम् ॥ तुष्टाव परया भक्त्या चिरंकालात्परात्परम् ॥
॥ ७० ॥ धातुशब्दैः प्राङ्मुखजैः प्रत्ययैर्याम्यवक्त्रजैः ॥ सुविभक्तिमयैः शब्दैर्मुखपश्चिमजैः स्थिरा ॥ ७१ ॥ तिङ्विभक्तिमयैर्नित्या मुखोत्तरमयै
र्मुदा ॥ नभोवक्त्रमयैः शब्दैर्वर्णमात्रैर्निरंजनम् ॥ ७२ ॥ सच्चिदानंदघनकं पूर्णब्रह्म सनातनम् ॥ तुतोष तत्तु सर्वज्ञं पंचवक्त्रेषु चागमत् ॥ ७३ ॥
पुरुषत्वमभूद्ब्रह्म स्वयंभूर्नाम चाभवत् ॥ अव्यक्तात्प्रकृतेर्जातोऽव्यक्तजन्मा हि स स्मृतः ॥ ७४ ॥ तस्य हेतोः स्वयं देवी वरदा लोकरूपिणी ॥

महालक्ष्मीश्च पूर्वार्द्धाज्जाता षोडशलोकिनी ॥ ७५ ॥ अष्टादशभुजास्तस्या लोकरक्षणतत्पराः ॥ दृष्ट्वा तदद्भुतं रूपं स्वयंभूर्विस्मयान्वितः ॥ ॥ ७६ ॥ प्रविश्य बहुधा भूत्वा नान्तं तस्या जगाम ह ॥ बृहत्वाद्बहुरूपत्वद्ब्रह्मा नामेति विश्रुतः ॥ ७७ ॥ श्रमितो भगवान्ब्रह्मा सत्यलोकमुपस्थितः ॥ मुखेभ्य उद्भवैर्देवो वेदैस्तुष्टाव शंकरम् ॥ ७८ ॥ चिरं कालं तदंगाद्वै नदीनदसमुद्भवः ॥ एकार्णवं तदा जातं शेते तत्र स्वयं प्रभुः ॥ ॥ ७९ ॥ सहस्रयुगपर्यंतमुषित्वाऽव्यक्तभूः स्वयम् ॥ सत्यलोकमुपागम्य पुनः सृष्टिं चकार ह ॥ ८० ॥ अनन्ताः सृष्टयश्चासन्गणरूपाः पृथक्पृथक् ॥ ताभिर्व्यक्तमभूत्सर्वं महालक्ष्मीमयं जगत् ॥ ८१ ॥ दृष्ट्वा बहुत्वं सृष्टीनां महालक्ष्मीः सनातनी ॥ विस्मिताभूच्च सर्वेशं भगवन्तमुपाययौ ॥ ॥ ८२ ॥ नत्वोवाच वचो रम्यं कृष्णमव्यक्तमंगलम् ॥ भगवन्नित्यशुद्धात्मन्नराश्चासन्महत्तराः ॥ ८३ ॥ कथं तेषां च गणना कर्तव्या च मया सदा ॥ इति श्रुत्वा वचस्तस्या द्विधाभूतश्च सोऽव्ययः ॥ ८४ ॥ पूर्वार्द्धात्स तु रक्ताङ्गः परार्द्धाद्गौररूपवान् ॥ चतुर्भुजस्स रक्तांगो गौरवर्णश्चतुर्भुजः ॥८५॥ सर्वसृष्टिगणानां च स ईशो भगवान्भवः ॥ गणेशो नाम विख्यातश्चेश्वरस्स तु विश्रुतः ॥८६॥ परश्चर्भुजो यो वै योगिध्येयो निरंजनः ॥ एकदा विधितो जातः शिवः पार्वतिवल्लभः ॥ ८७ ॥ गणेशं पूजयामास सहस्राब्दं प्रयत्नतः ॥ तदा प्रसन्नो भगवान्गणेशः शर्वपूजकः ॥ ॥ ८८ ॥ वरं वरय तं प्राह पार्वतीसहितं हरम् ॥ प्रसन्नात्मा भवः साक्षात्तुष्टाव च विनम्रधीः ॥ ८९ ॥ ॥ शिव उवाच ॥ ॥ नमो विष्णुस्वरूपाय गणेशाय परात्मने ॥ चतुर्भुजाय रक्ताय यज्ञपूर्णकराय च ॥ ९० ॥ विघ्नहंत्रे जगद्धर्त्रे सर्वानन्दप्रदायिने ॥ सिद्धीनां पतये तुभ्यं निधीनां पतये नमः ॥ ९१ ॥ प्रसन्नो भव देवेश पुत्रो भव मम प्रियः ॥ इति श्रुत्वादिपूज्यस्तु गणेशो भक्तवत्सलः ॥९२॥ पार्वत्याः सर्वदेहात्तु तेजोभूतात्समुद्भवः ॥ तदा कैलासशिखरे सर्वे देवास्सवासवाः ॥ ९३ ॥ मंगलार्थमुपाजग्मुर्देवदेवस्य मन्दिरे ॥ महोत्सवश्च तत्रासीत्सर्वलोकसुखावहः ॥ ९४ ॥ एतस्मिन्नंतरे तत्र सूर्यपुत्रः शनिः स्वयम् ॥ क्रूरदृष्टिः समायतः कालात्मा देवमण्डपे ॥ ९५ ॥ तस्य दर्शनमात्रेण स बालो विशिरा ह्यभूत् ॥ हाहाकारो महाँश्चासीत्कैलासे गुह्यकालये ॥ ९६ ॥ तच्छिरश्चंद्रलोके वै तुलासंस्थे दिवाकरे ॥ सप्तविंशद्दिनान्येव प्रकाशयति भूतले ॥ ९७ ॥ निंदितो दैवतैस्तत्र शनिर्जनभयंकरः ॥ गजस्य मस्तकं छित्त्वा दन्तैकं रागरूपि यत् ॥ ९८ ॥ तच्छिशोः कंधरे रक्तेऽरोपयत्सूर्यसंभवः ॥ गजयोन्या स्तुतो ब्रह्मा कर्कटस्य तदा शिरः ॥ ९९ ॥ समारोप्य तु तद्योनिः कर्कटो विशिरीकृतः ॥ एवं गजाननो जातो गणेशश्चेश्वरः स्वयम् ॥ ॥ १०० ॥ सूत उवाच ॥ इति श्रुत्वा गणेशस्तु गुरोर्वचनमुत्तमम् ॥ स्वमुखात्स्कंधमुत्पाद्य काश्यां जातः स चेश्वरः ॥ १०१ ॥ दैवज्ञस्य द्विज

स्यैव पुत्रो भूत्वा शुभाननः ॥ ढुंढिराजस्ततो नाम्ना प्रसिद्धोऽभून्महीतले ॥ १०२ ॥ जातकाभरणं नाम ज्योतिःशास्त्रं फलात्मकम् ॥ कृत्वा स
वेदरक्षार्थे शंकराचार्यमागमत् ॥ १०३ ॥ शिष्यो भूत्वा प्रसन्नात्मा गुरुसेवापरोऽभवत् ॥ इति ते कथितं विप्र ढुंढिराजो यथाभवत् ॥ १०४ ॥
इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये भारतीशगोरखनाथक्षेत्रशर्मढुंढिराजसमुत्पत्तिव
र्णनो नाम द्वादशोऽध्यायः ॥ १२ ॥ छ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ षोडशाब्दे च संप्राप्ते ब्रह्मणोव्यक्तजन्मनः ॥ स उषित्वा च कमले स्थितः
सृष्ट्यर्थमुद्यतः ॥ १ ॥ एतस्मिन्नन्तरे वक्त्रात्समुद्भूता च शारदा ॥ दिव्यांगं सुन्दरं तस्या दृष्ट्वा ब्रह्मा स्मरातुरः ॥२॥ बलाद्गृहीत्वा तां कन्यामुवाच
स्मरपीडितः ॥ रतिं देहि मदाघूर्णे रक्ष मां कामविह्वलम् ॥ ३ ॥ इति श्रुत्वा तु सा माता रुषा प्राह पितामहम् ॥ पंचवक्त्रोऽयमशुभो न योग्यस्तव
कन्धरे ॥ ४ ॥ चतुर्वक्त्रो वेदमयो योग्यस्सर्वेश्वरे त्वयि ॥ इत्युक्त्वान्तर्दधे माता ब्रह्मा क्रोधान्वितोऽभवत् ॥ ५ ॥ तस्य कोपाग्निना तोयं शुष्क
भूतमभूद्भुवि ॥ शांतिभूते च तत्कोपे रुद्रो जातो भयंकरः ॥ ६ ॥ भैरवो नाम विख्यातः कालात्मा सप्तवाहनः ॥ स्वनखैश्च नृसिंहाभैः क्षिप्त्वा
तत्पंचमं शिरः ॥ ७ ॥ जगर्ज बलवान्रुद्रः शंकरो लोकशंकरः ॥ भयभीतस्तदा ब्रह्मा भैरवं शरणं ययौ ॥८॥ नाथ नः पापभूतानां धियो योऽसौ
प्रचोदयात् ॥ इति श्रुत्वा स भगवान्भैरवो लोकविश्रुतः ॥ ९ ॥ ब्रह्मभूतमहं स्वामिन्वरेण्यं त्वामुपागतः ॥ सवितुस्तद्वरेण्यं यद्भर्गो देवस्य धीमहि
॥१०॥ गाढमुच्चै रुरोदाशु खात्पेतुश्चाश्रुबिन्दवः ॥ ततो वृक्षास्समुद्भूता रुद्राक्षाणां पृथक्पृथक् ॥११॥ शिवो ब्रह्मवधाद्भीतस्तत्कपालं गृहीतवान् ॥
कपाली नाम विख्यातं भैरवस्य तदा ह्यभूत ॥ १२ ॥ सर्वलोकेषु पूतानि यानि चायतनानि च ॥ तानि तान्येव गत्वाशु शुद्धो नाभूच्छिवंकरः
॥ १३ ॥ एकदा तेषु वृक्षेषु संस्थितो भगवान्हरः ॥ तदा ब्रह्मवधे दोषं त्यक्त्वा दूरमुपागतः ॥ १४ ॥ ततःप्रभृति वै शंभुर्धृत्वा रुद्राक्षमुत्तमम् ॥
पुरीं काशीं समायातः कपालस्तेन मोचितः ॥ १५ ॥ कपालमोचनं नाम तीर्थं जातमघापहम् ॥ एतस्मिन्नंतरे ब्रह्मा सर्वदेवसमन्वितः ॥ १६ ॥
समागत्य महादेवं तुष्टाव स्तुतिजैस्तवैः ॥ मकरस्थे दिवानाथे शशिनश्चेश्वरं शुभम् ॥ कपालिनं महारुद्रं चकार भगवान्विधिः ॥ १७ ॥ ॥सूत
उवाच ॥ ॥ इति श्रुत्वा गुरोर्वाक्यं कपाली भैरवः शिवः ॥ स्वमुखात्स्वांशमुत्पाद्य काश्यां जातो ह्ययोनिजः ॥ १८ ॥ कपालमोचनात्कुण्डात्स
मागम्य महीतले ॥ यतिरूपो वेदनिधिर्भैरवो नाम विश्रुतः ॥ अघोरं कठिनं मार्गं स्वशिष्यान्समचोदयत् ॥१९॥ शंकराचार्यमागम्य शिष्योभूत्वा
स भैरवः ॥ डामरं नाम वै तंत्रं मंत्रभूतं चकार ह ॥ कीलिता ये तु वै मंत्रास्तेन चोत्कीलितीकृताः ॥२०॥ ॥बृहस्पतिरुवाच ॥ ॥ मन्दोदरी

मयसुता त्रिपुराधिपतेः स्वसा ॥ त्रिपुरे तु तदा नष्टे महाविष्णुं सनातनम् ॥ भक्त्या तुष्टाव सा देवी प्रत्यहं गुप्तभाविनी॥२१॥भक्तिभावात्ततो योगं
हरौ प्राप्य महोत्तमम् ॥ विंध्याद्रिकन्धरे घोरे तत्रैवान्तरधीयत ॥२२॥ चतुर्युगं चं द्विशतं तस्या जातं समाधितः॥वैवस्वतेऽन्तरे प्राप्ते द्वादशे चैव
कृद्युगे ॥ २३ ॥ पुलस्त्यो ब्रह्मणः पुत्रो विश्रवा रोषतोभवत्॥शताब्दं च तपस्तप्त्वा विश्रवा नाम यो मुनिः ॥२४॥ सुमालिनोथ दैत्यस्य सुतां
वै कैकसीं मुदा ॥ समुद्वाह्य विधानेन पुलस्त्यस्स च विश्रवाः ॥ २५ ॥ कदलीविपिने रम्ये गन्धमादनपर्वते ॥ स रेमे च तया सार्द्धं विश्रवा
भगवानृषिः ॥ २६ ॥ रावणः कुंभकर्णश्च तयोर्जातौ हि राक्षसौ ॥ रावणो मातृभक्तश्च पितृभक्तस्ततोऽनुजः ॥ २७ ॥ सहस्राब्दं तपो घोरं चक्र
तुस्तौ वरार्थिनौ ॥ तदा प्रसन्नो भगवान्परमेष्ठी पितामहः ॥ २८ ॥ ददौ ताभ्यां वरं रम्यमजेयं देवदानवैः ॥ तौ तु लब्धवरौ क्रुद्धौ पुष्पकं
यानमुत्तमम् ॥ गृहीत्वा च बलाद्वीरौ युयुधाते परस्परम् ॥ २९ ॥ ताभ्यां विनिर्जिता देवास्त्यक्त्वा स्वर्गं सुखप्रदम् ॥ पार्थिवैः पूजयामासुः
शिवं कैलाससंस्थिताः ॥ ३० ॥ एकादशाब्दमाराध्य ते देवा गिरिजापतिम् ॥ शंकराच्च वरं प्राप्ता निर्भयाश्च तदाभवन् ॥ ३१ ॥ शिवोऽपि
च स्वपूर्वार्द्धाज्जातो वै मानसोत्तरे ॥ गिरौ यत्र स्थिता देवी गौतमस्य तनूद्भवा ॥ अञ्जना नाम विख्याता कीशकेसरिभोगिनी ॥ ३२ ॥ रौद्रं
तेजस्तदा घोरं मुखे केसरिणो ययौ ॥ स्मरातुरः कपीन्द्रस्तु बुभुजे तां शुभाननाम् ॥ ३३ ॥ एतस्मिन्नंतरे वायुः कपीन्द्रस्य तनौ गतः ॥
वांछितामंजनां शुभ्रं रमयामास वै बलात् ॥ ३४ ॥ द्वादशाब्दमतो जातं दंपत्योर्मैथुनस्थयोः ॥ तदनु भ्रूणमासाद्य वर्षमात्रं हि सादधत् ॥३५॥
पुत्रो जातस्स रागात्मा स रुद्रो वानराननः ॥ कुरूपाच्च ततो मात्रा प्रक्षिप्तोऽभूद्गिरेरधः ॥ ३६ ॥ बलादागत्य बलवान्दृष्ट्वा सूर्यमुपस्थितम् ॥
विलिख्य भगवान्रुद्रो देवस्तत्र समागतः ॥ ३७ ॥ वज्रसंताडितो वापि न तत्याज तदा रविम् ॥ भयभीतस्तदा प्रांशुस्सूर्यं त्राहीति जल्पितः ॥
॥ ३८ ॥ श्रुत्वा तदार्तवचनं रावणो लोकरावणः ॥ पुच्छे गृहीत्वा तं कीशं मुष्टियुद्धमचीकरत् ॥ ३९ ॥ तदा तु केसरिसुतो रविं त्यक्त्वा रुषा
न्वितः ॥ वर्षमात्रं महाघोरं मल्लयुद्धं चकार ह ॥ ४० ॥ श्रमितो रावणस्तत्र भयभीतस्समंततः ॥ पलायनपरो भूतः कीशरुद्रेण ताडितः ॥ ४१ ॥
एतस्मिन्नंतरे प्राप्तो विश्रवा भगवानृषिः ॥ स्तोत्रैर्वेदमयैर्देवं तुष्टाव परया गिरा ॥ ४२ ॥ प्रसन्नस्तु तदा रुद्रो रावणं लोकरावणम् ॥ त्यक्त्वा पंपा
सरस्तीरे निवासं कृतवान्बली ॥ स्थाणुभूतः स्थितस्तत्र स्थाणुर्नाम ततोऽभवत ॥ ४३ ॥ निघ्नन्तं च सुरान्मुख्यान्रावणं लोकरावणम् ॥ ४४ ॥
निहंति मुष्टिभिर्यो न हनुमानिति विश्रुतः ॥४५॥ तपसा तस्य कीशस्य प्रसन्नो भगवान्विधिः ॥ नम्रधीर्वचनं प्राह शृणु रुद्र तपोनिधे ॥ ४६ ॥

वैवस्वतेऽन्तरे प्राप्ते चाष्टाविंशत्तमे युगे ॥ त्रेतायाः पूर्वचरणे रामस्साक्षाद्भविष्यति ॥ तस्य भक्तिं च संप्राप्य कृतकृत्यो भविष्यसि ॥ ४७ ॥ इति
चोक्त्वा ददौ तस्मै चंद्रं भाद्रप्रकाशकम् ॥ रावणाय प्रियां रम्यां ददौ मन्दोदरीं विधिः ॥ ४८ ॥ नैर्ऋतस्यैव दिक्पालस्स बभूव च रावणः ॥
अल्पायुर्मरणं प्राप्तो रामेण हरिरूपिणा ॥ ४९ ॥ ॥ सूत उवाच ॥ ॥ इति श्रुत्वा स हनुमानयोनिः कदलीवने ॥ देहभूतो महीं प्राप्तो बाल
शर्मेति विश्रुतः ॥ ५० ॥ पुरीं काशीं समायातो यत्र वै मणिकर्णिका ॥ रामपक्षे बालशर्मा शिवपक्षे तु शंकरः ॥ ५१ ॥ मासमात्रं च शास्त्रार्थ
स्तयोश्चासीन्महोत्तमः ॥ शंकराचार्ययतिना बालशर्मा पराजितः ॥ ५२ ॥ शिष्यो भूत्वा च तत्रैव गुरुसेवापरोऽभवत् ॥ यश्चकार तन्त्रमन्त्रं सर्व
जातिकथामयम् ॥ ५३ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडापरपर्याये कलियुगीयेतिहाससमुच्चये अघोरपथभैरवहनुमज्जन्म
रुद्रमाहात्म्यबालशर्मसमुत्पत्तिवर्णनो नाम त्रयोदशोऽध्यायः ॥ १३ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ इदं दृश्यं यदा नासीत्सदसदात्मकं च यत्॥
तदाक्षरमयं तेजो व्याप्तरूपमचिंत्यकम् ॥१॥ न च स्थूलं न च सूक्ष्मं शीतं नोष्णं च तत्परम् ॥ आदिमध्यांतरहितं मनागाकारवर्जितम् ॥ २ ॥
योगिदृश्यं परं नित्यं शून्यभूतं परात्परम् ॥ एका वै प्रकृतिर्माया रेखा या तदधः स्मृता ॥३॥ महत्तत्त्वमयी ज्ञेया तदधश्चोर्ध्वरेखिकाः ॥ रजस्स
त्त्वतमोभूता ओमित्येवसुलक्षणम् ॥ ४ ॥ तत्सद्ब्रह्म परं ज्ञेयं यत्र प्राप्य पुनर्भवः ॥ कियता चैव कालेन तस्येच्छा समपद्यत ॥५॥ अहंकारस्ततो
जातस्ततस्तन्मात्रिकाः पराः ॥ पञ्चभूतान्यतोप्यासञ्ज्ञानविज्ञानकान्यतः ॥ ६ ॥ द्वाविंशज्जडभूतांश्च दृष्ट्वा स्वेच्छामयो विभुः ॥ द्वंद्वभूतश्च सगुणो
बुद्धिर्जीवस्समागतः ॥ ७ ॥ पूर्वार्द्धात्सगुणः सोसौ निर्गुणश्च परार्द्धतः ॥ ताभ्यां गृहीतं तत्सर्वं चैतन्यमभवत्ततः ॥ ८ ॥ सविराडितिसंज्ञो वै जीवो
जातस्सनातनः ॥ विराजो नाभितो जातं पद्मं तच्छतयोजनम् ॥९॥ पद्माच्च कुसुमं जातं योजनायाममुत्तमम् ॥ तत्पद्मकुसुमाज्जातो विरंचिः कम
लासनः ॥ १० ॥ द्विभुजस्स चतुर्वक्रो द्विपादो भगवान्विधिः ॥ ज्ञेयः सप्तवितत्यंगो महाचिंतामवाप्तवान् ॥ ११ ॥ कोऽहं कस्मात्कुत आयातः
कामे जननी को मे तातः ॥ इत्यधिचिंतय तं हृदि देवं शब्दमहत्त्वमयेन स आह ॥ १२ ॥ तपश्चैव तु कर्तव्यं संशयस्यापनुत्तये ॥ तदाकर्ण्य विधि
स्साक्षात्तपस्तेपे महत्तरम् ॥ १३ ॥ सहस्राब्दं प्रयत्नेन ध्यात्वा विष्णुं सनातनम्॥ चतुर्भुजं योगगम्यं निर्गुणं गुणविस्तरम् ॥ १४ ॥ समाधिनिष्ठो
भगवान्बभूव कमलासनः ॥ एतस्मिन्नंतरे विष्णुर्बालो भूत्वा चतुर्भुजः ॥ १५ ॥ श्यामांगो बलवान्स्त्री दिव्यभूषणभूषितः ॥ ब्रह्मणोऽङ्के हरिस्तस्थौ
यथा बालः पितुः स्वयम् ॥ १६ ॥ तदा प्रबुद्धश्च विधिस्तं दृष्ट्वा मोहमागतः ॥ वत्सवत्सेति वचनं विधिः प्राह प्रसन्नधीः ॥ १७ ॥ विहस्याह तदा

विष्णुरहं ब्रह्मन्पिता तव ॥ तयोर्विवदतोरेवं रुद्रो जातस्तमोमयः ॥१८॥ ज्योतिर्लिंगश्च भयदो योजनानंतविस्तरः ॥ हंसरूपं तदा ब्रह्मा वराहो भगवान्प्रभुः ॥ १९ ॥ शताब्दं तौ प्रयत्नेन जातौ चोर्ध्वमधः क्रमात् ॥ लज्जितौ पुनरागत्य तदा तुष्टुवतुर्मुदा ॥ २० ॥ ताभ्यां स्तुतो हरः साक्षाद्भवो नाम्ना समागतः ॥ कैलासनिलयं कृत्वा समाधिस्थो बभूव ह ॥ २१ ॥ जातं पञ्चयुगं तत्र दिव्यं रुद्रस्य योगिनः ॥ एतस्मिन्नंतरे घोरो दानवस्तारकासुरः ॥ २२ ॥ सहस्राब्दं तपः कृत्वा ब्रह्मणो वरमाप्तवान् ॥ भववीर्योद्भवः पुत्रः स ते मृत्युं करिष्यति ॥२३॥ इति मत्वा सुराञ्जित्वा महेंद्रश्च तदा भवत् ॥ ते सुराश्चैव कैलासं गत्वा रुद्रं प्रतुष्टुवुः ॥ २४ ॥ वरं ब्रूहीति वचनं सुरान्प्राह तदा शिवः ॥ ते तु श्रुत्वा प्रणम्योचुर्वचनं नम्रकन्धराः॥२५॥ भगवन्ब्रह्मणा दत्तो वरो वै तारकाय च ॥ शिववीर्योद्भवः पुत्रः स ते मृत्युर्भविष्यति ॥ अतोऽस्मान्रक्ष भगवन्विवाहं कुरु शंकर ॥ २६ ॥ स्वायंभुवेऽन्तरे पूर्वं दक्षश्चासीत्प्रजापतिः ॥ षष्टिकन्यास्ततो जातास्तासां मध्ये सती वरा ॥ २७ ॥ वर्षमात्रं भवन्तं सा पार्थिवैः समपूजयत् ॥ तस्यै त्वया वरो दत्तः सा बभूव तव प्रिया ॥ २८ ॥ तत्पित्रा या कृता निंदा भवतोऽज्ञानचक्षुषा ॥ तस्य दोषात्सती देवी तत्याज स्वं कलेवरम् ॥ २९ ॥ सतीतेजस्तदा दिव्यं हिमाद्रौ घोरमागमत् ॥ पीडितस्तेन गिरिराड् बभूव स्मरविह्वलः ॥ ३० ॥ पित्रीश्वरं स तुष्टाव कामव्याकुलचेतनः ॥ अर्यमा तु तदा तुष्टो ददौ तस्मै सुतां निजाम् ॥ मेनां मनोहरां शुद्धां स दृष्ट्वा हर्षितोऽभवत् ॥ ३१ ॥ नररूपं शुभं कृत्वा देवतुल्यं च तत्प्रियम् ॥ स रेमे च तया सार्द्धं चिरं कालं महावने ॥ ३२ ॥ गर्भो जातस्तदा रम्यो नववर्षांतमुत्तमः ॥ कन्या जाता तदा सुभ्रूगौरी गौरमयी सती ॥३३॥ जातमात्रा च सा कन्या बभूव नवहायिनी ॥ तुष्टाव शंकरं देवं भवन्तं तपसा चिरम् ॥ ३४ ॥ शताब्दं च जले मग्नाशताब्दवह्निसंस्थिता ॥ शताब्दे च स्थिता वायौ शताब्दं नभसि स्थिता॥३५॥शताब्दं च स्थिता चंद्रे शताब्दं रविमण्डले॥शताब्दं गर्भभूम्यां च स्थिता सा गिरिजा सती ॥३६॥ शताब्दं च महत्तत्वे गत्वा योगबलेन सा ॥ भवन्तं शंकरं शुद्धं तत्र दृष्ट्वा स्थिताद्य वै ॥३७॥ त्रिशताब्दमतो जातं तस्मात्त्वं पार्वतीं शिवाम् ॥ वरं देहि प्रसन्नात्मा महादेव नमोऽस्तु ते ॥ ३८ ॥ इति श्रुत्वा वचो रम्यं शंकरो लोकशंकरः ॥ देवानाह तदा वाक्यमयोग्यं वचनं हि वः ॥ ३९ ॥ मत्तो ज्येष्ठाश्च ये रुद्राः कुमारव्रतधारिणः ॥ मृगव्याधादयो मुख्या दश ज्योतिस्समुद्भवाः ॥ ४० ॥ अहं तेषामवरजो भवो नामैव योगराट् ॥ मायारूपां शुभां नारीं कथं गृह्णामि लोकदाम् ॥ ४१ ॥ नारी भगवती साक्षात्तया सर्वमिदं ततम् ॥ मातृरूपा तु सा

---

१ संप्रदाने द्वितीयार्षी ।

ज्ञेया योगिनां लोकवासिनाम् ॥४२॥ अहं योगी कथं नारीं मातरं वरितुं क्षमः॥ तस्मादहं भवदर्थे स्ववीर्यमाददाम्यहम्॥४३॥तद्वीर्यं भगवान्वह्निः प्राप्य कार्यं करिष्यति ॥ इत्युक्त्वा वह्नये देवो ददौ वीर्यमनुत्तमम् ॥ स्वयं तत्र समाधिस्थो बभूव भगवान्हरः ॥४४॥ तदा शक्रादयो देवा वह्निना सह निर्ययुः ॥ सत्यलोकं समागत्याब्रुवन्सर्वं प्रजापतिम् ॥ ४५ ॥ श्रुत्वा तत्कारणं सर्वं स्वयंभूश्चतुराननः ॥ नमस्कृत्य परं ब्रह्म कृष्णध्यानपरोऽभवत् ॥ ४६ ॥ ध्यानमार्गेण भगवान्गत्वा ब्रह्मा परं पदम् ॥ हेतुं तद्वर्णयामास यथा शंकरभाषितम् ॥ ४७ ॥ श्रुत्वा विहस्य भगवान्स्वमुखात्तेज उत्तमम् ॥समुत्पाद्य ततो जातः पुरुषो रुचिराननः ॥४८॥ ब्रह्माण्डस्य च्छविर्या वै स्थिता तस्य कलेवरे ॥ प्रद्युम्नो नाम विख्यातं तस्य जातं महात्मनः ॥ ४९ ॥ तेन सार्द्धं तदा ब्रह्मा संप्राप्य स्वं कलेवरम् ॥ ददौ तेभ्यस्स पुरुषं प्रद्युम्नं शंबरार्तिदम् ॥ ५० ॥ तेजसा तस्य देवस्य नरा नार्यस्समन्ततः॥ एकीभूतास्त्रिलोकेषु बभूवुः स्मरपीडिताः॥५१॥स्थावराः सौम्यभूता वै ते तु कामाग्निपीडिताः॥ सरिद्भिश्च लताभिश्च मिलितास्संबभूविरे ॥ ५२ ॥ ब्रह्माण्डेशः शिवः साक्षाद्रुद्रः कालाग्निसन्निभः ॥ त्रिनेत्रात्तेज[1] उत्पाद्य शमयामास तद्व्यथाम् ॥ ५३ ॥ तदा क्रुद्धः स कृष्णांगो गृहीत्वा कौसुमं धनुः ॥ दिव्यान्पंच शरान्घोरान्महादेवाय बंधवे ॥ ५४ ॥ उच्चाटनेन बाणेन गन्ताभूल्लोकशंकरः ॥ वशीकरणबाणेन नारीवश्यः शिवोऽभवत् ॥ ५५ ॥ स्तंभनेन महादेवः शिवापार्श्वे स्थिरोऽभवत् ॥ आकर्षणेन भगवाञ्छिवाकर्षणतत्परः ॥ मारणेनैव बाणेन मूर्छितोऽभून्महेश्वरः ॥ ५६ ॥ एतस्मिन्नंतरे देवी महत्तत्त्वे स्थिता शिवा ॥ मूर्छितं शिवमालोक्य तत्रैवान्तर्द्धिमागमत् ॥ ५७ ॥ तदोत्थाय महादेवो विललाप भृशं मुहुः ॥ हा प्रिये चंद्रवदने हा शिवे च घटस्तनि ॥ ५८ ॥ हा उमे सुंदराभे च पाहि मां स्मरविह्वलम् ॥ दर्शनं देहि रंभोरु दासभूतोऽस्मि सांप्रतम् ॥ ५९ ॥ एवं विलपमानं तं गिरिजा योगिनी स्वयम् ॥ समागत्य वचः प्राह नत्वा तं शंकरं प्रियम् ॥ ६० ॥ कन्याहं भगवन्देव मातृपित्रनुसारिणी ॥ तयोस्सकाशाद्भगवन्मम पाणिं गृहाण भोः ॥ ६१ ॥ तथेति मत्वा स शिवः प्रद्युम्नशरपीडितः ॥ सप्तर्षीन्प्रेषयामास ते तु गत्वा हिमाचलम्॥संबोध्य च विवाहस्य विधिं चक्रुर्मुदान्विताः ॥ ६२ ॥ ब्रह्माण्डे ये स्थिता देवास्तेषां स्वामी महेश्वरः ॥ विवाहे तस्य संप्राप्ते सर्वे देवास्समाययुः ॥ ६३ ॥ अनन्ताँश्च गणाँश्चैव सुरान्दृष्ट्वा हिमाचलः ॥ गिरिजां शरणं प्राप्य तस्थौ पर्वतराट् स्वयम् ॥ ६४ ॥ तदा तु पार्वती देवी निधीन्सिद्धीः समन्ततः ॥ चकार कोटिशस्तत्र बहुरूपा सनातनी ॥ ६५ ॥ दृष्ट्वा तद्विस्मिता देवा ब्रह्मणा सह हर्षिताः ॥ तुष्टुवुः पार्वतीं

---

[1] तृतीयनेत्रादित्यर्थः ।

देवीं नारीरत्नं सनातनीम् ॥ ६६ ॥ ॥ देवा ऊचुः ॥ ॥ उ वितर्के च मा लक्ष्मीर्बहुरूपा विदृश्यते ॥ उमा तस्माच्च ते नाम नमस्तस्यै नमोनमः ॥ ६७ ॥ कतिचिदयनान्येव ब्रह्माण्डेऽस्मिञ्छिवे तव ॥ कात्यायनी हि विज्ञेया नमस्तस्यै नमोनमः ॥ ६८ ॥ गौरवर्णाच्च वै गौरी श्यामवर्णाच्च कालिका ॥ रक्तवर्णाद्धैमवती नमस्तस्यै नमोनमः ॥ ६९ ॥ भवस्य दयिता त्वं वै भवानी रुद्रसंयुता ॥ दुर्गा त्वं योगि दुष्प्राप्या नमस्तस्यै नमोनमः ॥ ७० ॥ नान्तं जग्मु[1]र्वयं ते वै चण्डिका नाम विश्रुता ॥ अंबा त्वं मातृभूता नो नमस्तस्यै नमोनमः ॥ ॥ ७१ ॥ इति श्रुत्वा स्तवं तेषां वरदा सर्वमंगला ॥ देवानुवाच मुदिता दैत्यभीतिं हरामि वः ॥ ७२ ॥ स्तोत्रेणानेन संप्रीता भवामि जगतीतले ॥ ७३ ॥ इत्युक्त्वा शंभुसहिता कैलासं गुह्यकालयम् ॥ गुहायां मिथुनीभूय सहस्राब्दं मुमोद वै ॥ ७४ ॥ एतस्मिन्नंतरे देवा भीरुका लोकनाशनात् ॥ ब्रह्माणं च पुरस्कृत्य तुष्टुवुर्गिरिजापतिम् ॥ ७५ ॥ लज्जितौ तौ तदा तत्र पश्चात्तापं हि चक्रतुः ॥ महान्क्रोधस्तयोश्चासीत्तेन वै दुद्रुवुः सुराः ॥ ७६ ॥ प्रद्युम्नो बलवाँस्तत्र संतस्थे गौरिवाचलः ॥ रुद्रकोपाग्निना दग्धो बभूव बलवत्तरः ॥ ७७ ॥ प्रद्युम्नः स्थलरूपं च त्यक्त्वा भस्ममयं तदा ॥ सूक्ष्मदेहमुपागम्य विश्रुतोऽभूदनंगकः ॥ यथा पूर्वं तथैवासीत्कायं कृत्वा स्मरो विभुः ॥ ७८ ॥ स्थूलरूपा रतिर्देवी शताब्दं शंकरं परम् ॥ ध्यानेनाराधयामास गिरिजावल्लभं व्रतैः ॥ तदा ददौ वरं देवस्तस्यै रत्यै सनातनः ॥ ७९ ॥ रतिदेवि शृणु त्वं वै लोकानां हृत्सु जायसे ॥ यौवने वयसि प्राप्ते नृणां देहैः पतिं स्वकम् ॥ भजिष्यसि मदर्धेन प्रद्युम्नं कृष्णसंभवम् ॥ ८० ॥ स्वारोचिषान्तरः कालो वर्तते चाद्य सुप्रियः ॥ वैवस्वतेऽन्तरे प्राप्ते ह्यष्टाविंशतमे युगे ॥ द्वापरान्ते च भगवान्कृष्णः साक्षाज्जनिष्यति ॥ ८१ ॥ तदा तस्य सुतं देवं प्रद्युम्नं मेरुमूर्द्धनि ॥ भजिष्यसि सुखं रम्ये विपिने नन्दने चिरम् ॥ ८२ ॥ अन्येषु द्वापरान्तेषु स्वर्णगर्भो हि तत्पतिः ॥ जन्मवान्वर्तते भूमौ यथा कृष्णस्तथैव सः ॥ ८३ ॥ मध्याह्ने चैव संध्यायां ब्रह्मणोऽव्यक्तजन्मनः ॥ कल्पेकल्पे हरिस्साक्षात्करोति जनमंगलम् ॥ ८४ ॥ इत्युक्त्वा भगवाञ्छंभुस्तत्रैवान्तर्द्धिमागमत् ॥ राजा बभूव रुद्राणी गिरिजावल्लभो भवः॥ ८५ ॥ ॥ सूत उवाच ॥ ॥ इति श्रुत्वा भवः साक्षात्स्वमुखात्स्वांशमुत्तमम्॥ समुत्पाद्य तदा भूमौ गोदावर्यां बभूव ह ॥८६॥ आचार्यशर्मणो गेहे पुत्रो जातो भवांशकः॥रामानुजस्स वै नाम्नानुजोऽभूद्रामशर्मणः ॥ ८७ ॥ एकदा रामशर्मा वै पतंजलिमते स्थितः ॥ तीर्थात्तीर्थान्तरं प्राप्तः पुरीं काशीं शिवप्रियाम् ॥ ८८ ॥ शंकराचार्यमागम्य

---

[1] जग्मिमेत्यर्थः ।

शतशिष्यसमन्वितः ॥ शास्त्रार्थं कृतवान्रम्यं कृष्णपक्षो हरिप्रियः ॥ ८९ ॥ शंकराचार्यविजितो लज्जितो निशि भीरुकः ॥ स्वगेहं पुनरायातः
शांकरैर्वा शरैर्हतः ॥ ९० ॥ रामानुजस्तु तच्छ्रुत्वा सर्वशास्त्रविशारदः ॥ भ्रातृशिष्यैश्च सहितः पुरीं काशीं समाययौ ॥ ९१ ॥ वादो वेदान्तशास्त्रे
च तयोश्चासीन्महात्मनोः ॥ शंकरः शिवपक्षश्च कृष्णपक्षस्स वै द्विजः ॥ ९२ ॥ मासमात्रेण वेदान्ते दर्शितस्तेन वै हरिः ॥ वासुदेवस्स वै नाम
सच्चिदानंदविग्रहः ॥ ९३ ॥ वसुदेवस्स वै ज्ञेयो वसुष्वंशेन दीव्यति ॥ वसुदेवस्स वै ब्रह्मा तस्य सारो हि यः स्मृतः ॥ ९४ ॥ वासुदेवो हरिस्सा
क्षाच्छिवपूज्यः सनातनः ॥ शंकरो लज्जितस्तत्र भाष्यशास्त्रे समागतः ॥ ९५ ॥ पक्षमात्रं शिवैस्सूत्रैर्वर्णयामास वै शिवम् ॥ रामानुजेन तत्रैव
भाष्ये संदर्शितो हरिः ॥ ९६ ॥ गोविन्दो नाम विख्यातो वैय्याकरणदेवता ॥ गां परां विन्दते यस्माद्गोविन्दो नाम वै हरिः ॥ ९७ ॥ गिरीशस्तु
न गोविन्दो गिरीणामीश्वरो हि सः ॥ गोपालस्तु न वै रुद्रो गवारूढः प्रकीर्तितः ॥ ९८ ॥ ज्ञेयः पशुपतिः शंभुर्गोपतिर्नैव विश्रुतः ॥ लज्जितः
शंकराचार्यो मीमांसाशास्त्रमागतः ॥ ९९ ॥ तयोर्दशदिनं शास्त्रे विवादस्सुमहानभूत् ॥ यस्तु वै यज्ञपुरुषो रामानुजमतप्रियः ॥ १०० ॥
विच्छिन्नः शंकरेणैव मृगभूतः पराजितः ॥ आचारप्रभवो धर्मो यज्ञदेवेन निर्मितः ॥ १०१ ॥ भ्रष्टाचारस्तदा जातो यज्ञे दक्षप्रजापतेः ॥ इति
रामानुजः श्रुत्वा वचनं प्राह नम्रधीः ॥ १०२ ॥ कर्मणे जनितो यज्ञो विश्वपालनहेतवे ॥ कर्मब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम् ॥ १०३ ॥
अक्षरोऽयं शिवः साक्षाच्छब्दब्रह्मणि संस्थितः ॥ पुराणपुरुषो यज्ञो ज्ञेयोऽक्षरकरो भुवि ॥ अक्षरात्स तु वै श्रेष्ठः परमात्मा सनातनः ॥ १०४ ॥
अक्षरेण न वै तृप्ताच्तृप्तोभूद्यज्ञकर्मणि ॥ नाम्ना स यज्ञपुरुषो वेदे लोके हि विश्रुतः ॥ १०५ ॥ प्रपौत्रस्य तदा वृद्धिं दृष्ट्वा स्पर्द्धातुरः शिवः ॥ मृग
भूतश्च रुद्रोऽसौ दिव्यबाणैरतर्पयत् ॥ १०६ ॥ समर्थो यज्ञपुरुषो ज्ञात्वा गुरुमयं शिवम् ॥ पलायनपरो भूतो धर्मस्तेन महान्कृतः ॥ १०७ ॥
लज्जितः शंकराचार्यो न्यायशास्त्रे समागतः ॥ भवतीति भवो ज्ञेयो मृडतीति स वै मृडः ॥१०८॥ लोकान्भरति यो देवः स कर्ता भर्ग एव हि ॥
हरतीति हरो ज्ञेयः स रुद्रः पापरावणः ॥ १०९ ॥ स्वयं कर्ता स्वयं भर्ता स्वयं हर्ता शिवः स्वयम् ॥ शिवाद्विष्णुर्महीं यातो विष्णोर्ब्रह्मा च
पद्मभूः ॥ ११० ॥ इति श्रुत्वा तु वचनं प्राह रामानुजस्तदा ॥ धन्योऽयं भगवाञ्छंभुर्यस्यायं महिमा परः ॥ १११ ॥ सत्यंसत्यं ममाज्ञेयं कर्ता
कारयिता शिवः ॥ रामनाम परं नित्यं कथं शंभुर्जपेद्धरिम् ॥ ११२ ॥ अनंताः सृष्टयः सर्वा उद्भूता यस्य तेजसा ॥ अनंतः शेषतः शेषार मन्ते

---

१ अन्तर्भवितण्यर्थः ।

योगिनो हि तम् ॥ ११३ ॥ स च वै मत्प्रभोर्धाम सच्चिदानंदविग्रहः ॥ इति श्रुत्वा तदावाक्यं लज्जितः शंकरोऽभवत् ॥ ११४ ॥ योगशास्त्रपरो देवः कृष्णस्तेनैव दर्शितः ॥ कालात्मा भगवान्कृष्णो योगेशो योगतत्पतरः ॥ ११५ ॥ सांख्यशास्त्रे च कपिलस्तस्मै तेनैव दर्शितः ॥ कं वीर्यं पाति यो वै स कपिस्तं चैव लाति यः ॥ कपिलस्स तु विज्ञेयः कपी रुद्रः प्रकीर्तितः ॥ ११६ ॥ कपिलो भगवान्विष्णुः सर्वज्ञः सर्वरूपवान् ॥ तदा तु शंकराचार्यो लज्जितो नम्रकन्धरः ॥ ११७ ॥ शुक्लांबरधरो भूत्वा गोविन्दो नाम निर्मलम् ॥ जजाप हृदि शुद्धात्मा शिष्यो रामानुजस्य वै ॥ ११८ ॥ इति ते रुद्रमाहात्म्यं प्रसंगेनापि वर्णितम् ॥ धनवान्पुत्रवान्वाग्मी भवेद्यः शृणुयादिदम् ॥ ११९ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडापरपर्याये रुद्रमाहात्म्यवर्णनोत्तररामानुजोत्पत्तिवर्णनं नाम चतुर्दशोऽध्यायः ॥ १४ ॥ ॥ छ ॥ ॥

॥ ॥ सूत उवाच ॥ ॥ भृगुवर्य महाभाग शृणु त्वं जीववर्णितम् ॥ पवित्रं वसुमाहात्म्यं सर्ववस्तुसुखप्रदम् ॥ १ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ वैवस्वतेऽन्तरे प्राप्ते चाद्ये सत्ययुगे शुभे ॥ इल्वला तामसी शक्तिः प्रिया विश्रवसो मुनेः ॥ शिवमाराधयामास सती सा पार्थिवार्चनैः ॥ ॥ २ ॥ एतस्मिन्नंतरे जातो दीक्षितान्वयसंभवः ॥ यक्षशर्मा महाधूर्तो यक्षिणीपूजने रतः ॥ ३ ॥ तस्य मित्रस्नुषा सुभ्रू रमिता तेन पापिना ॥ तेन दोषेण विप्रोऽसौ कुष्ठभूतस्तदाभवत् ॥ ४ ॥ कुष्ठभूतं द्विजं त्यक्त्वा यक्षिणी मंत्रवत्सला ॥ शिवलोकं ययौ देवी कैलासं गुह्यकालयम् ॥५॥ क्षुधातुरो यक्षशर्मा शिवरात्रे महोत्तमे ॥ दर्शितं पूजनं तेन योषिद्द्वयश्चोपदेशतः ॥ ६ ॥ प्रभाते समनुप्राप्ते पारणां कृतवान्द्विजः ॥ मरणं प्राप्तवान्कुष्ठी तत्रैव शिवमंदिरे ॥ ७ ॥ तेन पुण्यप्रभावेन राजासीत्करणाटके ॥ राजराज इति ख्यातो मण्डलीको नृपोऽभवत् ॥ ८ ॥ शिवार्चनं मंगलदं गेहेगेहे दिनेदिने ॥ ब्राह्मणैः कारयामास राजराजो महाबलः ॥ ९ ॥ शताब्दं भूतले राज्यं कृतं तेन महात्मना ॥ राज्याधिकारं श्रेष्ठस्य सुतस्य प्रददौ नृपः ॥ ततः काशीपुरीं प्राप्य शिवं तुष्टाव पूजनैः ॥१०॥ त्रिवर्षान्ते महादेवो ज्योतिर्लिंगो बभूव ह ॥ राजराजेश्वरो नाम प्रसिद्धोऽभूच्छिवः स्वयम् ॥ ११ ॥ स नृपः पावितस्तेन त्यक्त्वा प्राणाँस्तदा स्वयम् ॥ इल्वलागर्भमागम्य पुत्रोऽभूच्छुभलक्षणः ॥ १२ ॥ जातः कुत्सितवेलायां रात्रौ घोरतमोवृते ॥ कुबेर इति तन्नाम प्रसिद्धमभवद्भुवि ॥ १३ ॥ तपसा तोषयामास स बालः परमेष्ठिनम् ॥ तस्मै ब्रह्मा तदागत्य लंकां नाम पुरीं शुभाम् ॥ सुवर्णरचितां रम्यां कारयित्वा ददौ प्रभुः ॥ १४ ॥ तिस्रः कोटयः स्मृता यक्षा लोककार्यपरायणाः ॥ तेषां स्वामी स वै चासीद्यक्षराडिति विश्रुतः ॥१५॥ किन्नरा बहुरूपाश्च तदादेशनिवासिनः ॥ बलिभिः पूजयामासुः किन्नरेशस्तदा स्वयम् ॥ १६ ॥ गुह्यका

नरभावस्था दिव्यमूल्यप्रकारिणः ॥ तेषां स्वामी स वै चासीत्कुबेरो भगवान्स्वयम् ॥ १७॥ गिरिभ्यो बहुरत्नानि गृहीत्वा लोकहेतवे ॥ रक्षोभिः
प्रेषयामास गेहेगेहे जनेजने ॥ १८ ॥ धर्मकार्यकरा ये तु नरा वेदपरायणाः ॥ तेषां कोशाश्च तेनैव पूरिता नरधर्मिणा ॥ १९ ॥ ये तु लोभपरा
धूर्ता नराः संचयकारिणः ॥ तेषां राजा स भगवान्द्रव्यदो राक्षसेश्वरः ॥ २० ॥ शवभूता नरा ये वै दाहिता वह्निकर्मणि ॥ अग्निद्वारेण तन्मांसं
भुंजते राक्षसाः सदा ॥ २१ ॥ आभिर्विभूतिभिर्युक्तं दृष्ट्वा तं रावणो बली ॥ जित्वा निष्कास्य लंकायाः स्वयं राजा बभूव ह ॥ २२ ॥ कुबेरो
दुःखितस्तत्र शंकरं दुःखनाशनम् ॥ शरण्यं शरणं प्राप्तस्तदा तु भगवान्हरः ॥ तेन मैत्री कृता रम्या कुबेरेण समं दधौ ॥ २३ ॥ अलकावती
नाम पुरी रचिता विश्वकर्मणा ॥ स तां मंगलदामाप्य कुबेरो हर्षमाप्तवान् ॥ २४ ॥ इति श्रुत्वा तदनुजो रावणो लोकरावणः ॥ कैलासं गिरिमा
गम्य नलकूबरभोगिनीम् ॥२५॥ दृष्ट्वा पुलस्त्यतनयः पस्पर्श मधुराननाम् ॥ तदा पतिव्रता देवी सुप्रभा प्राह तं रुषा ॥२६॥ स्नुषेव तव पापात्म
न्वर्तेऽहं लोकरावण ॥ कुष्ठो भवेत्तव तनौ तेन दोषेण दारुणः ॥ २७ ॥ त्वया हृतं विमानं यज्ज्येष्ठबन्धोश्च पुष्पकम् ॥ निष्फलत्वमवाप्नोतु
यथा चौरैर्हृतं धनम् ॥ २८ ॥ इति शापान्वितो वीरस्तथाभूतः सुदुःखितः ॥ शिवमाराधयामास कैलासे पार्थिवार्चनैः ॥ २९ ॥ द्वादशाब्दमतो
जातं पूजनं तस्य कुर्वतः ॥ स रुद्रो न प्रसन्नोऽभूत्तदा दुःखी स रावणः ॥ ३० ॥ जुहाव वह्नौ क्रमतः शिरांसि पुरुषादनः ॥ स्थूलदेहं च सकलं
स रुद्राय तदार्पयत् ॥ ३१ ॥ भस्मभूतस्तदा रक्षो न मृतो ब्रह्मणो वरात् ॥ पावकादुद्भवं चान्यं देहं प्राप्य मनोहरम् ॥ ३२ ॥ शिवाय वायु
रूपाय ददौ स्वांगं पुनर्बली ॥ पिशाचैर्वायुरूपैश्च भक्षितः स च रावणः ॥ ३३ ॥ न ममार वराद्घोरो वायोर्जातं कलेवरम् ॥ गृहीत्वा स च
रुद्राय नभोभूताय चार्पयत् ॥३४॥ तदा मातृगणैर्घोरैर्भक्षितोऽभूत्स रावणः॥ ब्रह्मणो वरदानेन न पञ्चत्वमवाप्तवान् ॥३५॥ नभसश्चोद्भवं देहं शून्य
भूतं स रावणः ॥ पुनः प्राप्य शिवायैव सोऽहं भूताय चार्पयत् ॥ ३६ ॥ तदा प्रसन्नो भगवान्रुद्रोऽहंकारदेवता ॥ कुबेरस्य यथा मित्रं रावणस्य
तथाभवत् ॥३७॥ एकैकेनैव शिरसा कोटिकोटिशिरोऽभवत् ॥ वज्रभूतोऽभवद्देहो देवदेवप्रसादतः ॥ एवं स रावणो घोरो बभूव वरदर्पितः ॥ ३८ ॥
देवदैत्यमनुष्याणां पन्नगानां च योषितः ॥ नवोढा रमिताश्चासन्ब्रह्मांडे तेन रक्षसा ॥ ३९ ॥ पतिव्रतामतो रम्यो वेदधर्मः सनातनः ॥ भग्नी
भूतोभवत्सर्वः सर्वलोकेषु रक्षसा ॥ ४० ॥ क्षुत्तृड्भ्यां वर्जितो नित्यं शंकरेणैव तर्पितः ॥ अन्ये सुरा विना यज्ञैः क्षुधिताः संबभूविरे ॥ ४१ ॥
ब्रह्माणं च पुरस्कृत्य क्षीराब्धौ प्राप्य दुःखिताः ॥ एकीभूय सुरास्सर्वे तुष्टुवुः परमेश्वरम् ॥ ४२ ॥ तदा प्रसन्नो भगवान्सगुणो निर्गुणो हरिः ॥

उवाच सकलान्देवान्भक्तिनम्रान्यतेन्द्रियान् ॥४३॥ कल्पाख्ये श्वेतवाराहे नेदृशः कोपि दानवः ॥ बभूव च यथैवासौ रावणो लोकरावणः ॥४४॥
पुरा मार्कंडकल्पे च निशुंभः शुंभ एव हि ॥ यथा जातौ तथा घोरौ कुंभकर्णश्च रावणः ॥ ४५ ॥ रावणा बहबश्चासन्हीदृशो नैव रावणः ॥ अहं
ब्रह्मा तथा रुद्रो यतो जातास्सनातनाः ॥ सा तु वै प्रकृतिर्माया कोटिविश्वविधायिनी ॥ ४६ ॥ देवसंकटघोरेषु समर्थो देवराट् स्वयम् ॥ शक्र
विघ्ने समुद्भूते समर्थो भगवान्हरः ॥ ४७ ॥ रुद्राणां संकटे घोरे समर्थोऽहं सदा भुवि ॥ मयि संकटसंप्राप्ते समर्थो भगवान्हरः ॥ ४८ ॥ ब्रह्मणः
परमे दुःखे समर्था प्रकृतिः परा ॥ मधुकैटभौ पुरा जातौ दानवौ लोकविश्रुतौ ॥ ४९ ॥ ताभ्यां दुःखमयो ब्रह्मा तुष्टाव जगदंबिकाम् ॥ तदा
तस्या बलेनाहं जघान मधुकैटभौ ॥ ५० ॥ अतो मदाज्ञया सर्वे विष्णुमायां सनातनीम् ॥ शरण्यां शरणं प्राप्य कुर्वंतां जगतो हितम् ॥ ५१ ॥
इति श्रुत्वा तु ते देवास्तुष्टुवुः प्रकृतिं पराम् ॥ प्रसन्ना च तदा देवी ब्रह्मज्योतिर्मयी शिवा ॥ ५२ ॥ द्विधाभूता महीं प्राप्ता सीतारामौ परापरौ ॥
त्रिलिंगजननी सीता तया तदपरं द्विधा ॥ कृतं तौ च द्विधा जातौ शब्दार्थौ रामलक्ष्मणौ ॥५३॥ शब्दमात्रसमूहानां स्वामी रामस्सनातनः ॥
अर्थमात्रसमूहानामीशः क्लीबस्स लक्ष्मणः ॥ ५४ ॥ यस्य वज्रमयं वीर्यं ब्रह्मचर्यं दृढं तथा ॥ स क्लीबश्च ततोऽन्ये वै क्लीबभूता हि वानराः ॥५५॥
परा तु प्रकृतिस्सीता तयोर्मंगलदायिनी ॥ भूमिमध्यात्समुद्भूता ह्ययोनिर्योनिकारिणी ॥५६॥ सहस्रं रामरामेति जपितं येन धीमता॥ सीतानाम्ना
च तस्यैव फलं ज्ञेयं च तत्समम् ॥ ५७ ॥ योनिभूतौ च तौ देवौ राधेयस्य गृहं गतौ ॥ इदं दृश्यं यदा नासीत्तामसी प्रकृतिस्तदा ॥ अक्षराशे
षभूता च स्वयं जाता त्रिधेच्छया ॥५८॥ पूर्वं शेषस्स वै रामो मध्ये क्लीबस्स लक्ष्मणः॥ अपरौ पूर्वतो जातौ पुंक्लीबौ च परेश्वरौ ॥ परो भागस्तु
सा देवी योगनिद्रा सनातनी ॥ ५९ ॥ अन्यकल्पेषु हे देवाः क्षीरशायी हरिः स्वयम् ॥ रामो ज्ञेयस्तथा शेषो रुद्ररूपस्स लक्ष्मणः ॥ ६० ॥
सीता भगवती लक्ष्मीर्जाता जनकनन्दिनी ॥ सुदर्शनश्च भरतो हरेः शंखस्ततोऽनुजः ॥ ६१ ॥ कल्पाख्ये श्वेतवाराहे रामो जातः परात्परः ॥
प्रद्युम्नो भरतो ज्ञेयोऽनिरुद्धः शत्रुहा प्रभुः ॥ तैश्च सर्वे विदलिता राक्षसा रावणादयः ॥ ६२ ॥ कीर्तिं स्वकीयां लोकेषु संस्थाप्य पावनीं प्रभुः ॥
पुष्पकं च कुबेराय विमानं च तदा ददौ ॥ रुद्रसंख्या सहस्राब्दं राज्यं कृत्वा परं ययौ ॥ ६३ ॥ ॥ सूत उवाच ॥ ॥ इति श्रुत्वा कुबेरस्तु
प्रथमो वसुदेवता ॥ स्वमुखात्स्वांशमुत्पाद्य वैश्ययोनौ बभूव ह ॥ ६४ ॥ धरदत्तस्य वैश्यस्य पुत्रो भूत्वा महीतले ॥ त्रिलोचनस्स वै नाम
मथुरायां बभूव ह ॥ ६५ ॥ सर्वद्रव्यव्ययं कृत्वा नानातीर्थेषु हर्षितः ॥ पुरीं काशीं समागम्य रामानंदं च वैष्णवम् ॥ नत्वा तद्दश्यमभज

च्छिष्यो भूत्वा त्रिलोचनः ॥ ६६ ॥ स्वगेहं पुनरागत्य स वैश्यश्चाज्ञया गुरोः ॥ रामभक्तिपरश्चासीत्साधुसेवापरायणः ॥ ६७ ॥ तदा तु भगवा
न्रामो दासभूतश्च तद्गृहे ॥ स्थितस्त्रयोदशे मासि सर्ववांछितदायकः ॥ ६८ ॥ मणिरत्नहिरण्यानि वासांसि विविधानि च ॥ नाना व्यंजनयो
ग्यानि ब्राह्मणेभ्यः स्वयं ददौ ॥ ६९ ॥ वैष्णवेभ्यो यतिभ्यश्च मनोवांछितदायकः ॥ ततस्त्रिलोचनं प्राह भगवान्रावणार्तिहा ॥ ७० ॥ अहं रामो
न वै दासस्तव भक्तिविमोहितः ॥ निवासं कृतवान्गेहे तव प्रियहिते रतः ॥ ७१ ॥ अद्यप्रभृति भो वैश्य वसामि हृदये तव ॥ इत्युक्त्वान्तर्हितो
देवः स वैश्यो हर्षमागतः ॥ ७२ ॥ त्यक्त्वा कलत्रं पुत्रं च प्राप्य वैराग्यमुत्कटम् ॥ उषित्वा सरयूतीरे रामध्यानपरोभवत् ॥ ७३ ॥ इति
श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये वसुमाहात्म्ये त्रिलोचनवैश्योत्पत्तिवर्णनं नाम पंचदशो
ऽध्यायः ॥ १५ ॥ छ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ स्वायंभुवेन्तरे पूर्वं ध्रुववंशसमुद्भवः ॥ राजा प्राचीनबर्हिश्च बभूव मखकारकः ॥ १ ॥ नारद
स्योपदेशेन त्यक्त्वा हिंसामयं मखम् ॥ ज्ञानवान् वैष्णवो भूत्वा दशपुत्रानजीजनत् ॥२॥ प्रचेता नाम तेषां वै जातं ते चैकरूपिणः॥पितुराज्ञां पुर
स्कृत्य जलमध्ये तपोऽर्थिनः ॥ रत्नाकरस्य सिंधोश्च मग्नभूता बभूविरे ॥ ३ ॥ तेषां तु तपसा तुष्टः स्वयंभूश्चतुराननः ॥ सप्ताब्धिषु स तान्सप्त
सुतान्संस्थाप्य लोकराट् ॥ ४ ॥ रत्नाकरेऽष्टमं पुत्रं नवमं मानसोत्तरे ॥ दशमं मेरुशाखायां सुतं कृत्वा मुमोद ह ॥ ५ ॥ अपो वहति यो लोके
स आपव इति स्मृतः ॥ द्वितीयो वरुणो नाम यादसां पतिरप्पतिः ॥ ६ ॥ ददौ पाशं तदा ब्रह्मा दैत्यबंधनहेतवे ॥ पाशी नाम ततो जातं वरुणस्य
महात्मनः ॥ ७ ॥ स तु पूर्वभवे चासीद्ब्राह्मणः शक्तिपूजकः ॥ आपवो नाम विख्यातो वारुणीपानतत्परः ॥ ८ ॥ भद्रकाल्याः प्रियो भक्तो नित्यं
पूजनतत्परः ॥ नानारक्तमयैः पुष्पैर्गुंठितां रक्तमालिकाम् ॥ ९ ॥ रक्तचंदनसंयुक्तां गृहीत्वा मंत्रसंयुतः ॥ भद्रकाल्यै निवेद्याशु नवार्णवपरोऽभवत्
॥ १० ॥ धूपैर्दीपैश्च नैवेद्यैस्तांबूलैर्ऋतुजैःफलैः ॥ पूजयित्वा महालक्ष्मीं भद्रकालीं सनातनीम् ॥११॥ तिलैः शर्करया युक्तं मधुना च हविः स्वयम् ॥
वह्निद्वारेण संहुत्य तुष्टाव जगदम्बिकाम् ॥१२ ॥ चरित्रं मध्यमं देव्या विष्णुदेवेन निर्मितम् ॥ नवार्णवेन तेनैव प्रत्यहं जाप्यतत्परः ॥ १३ ॥ एवं
वर्षत्रयं जातं तस्य पूजां प्रकुर्वतः ॥ प्रसन्नाभूत्तदा देवी वरदा सर्वमंगला ॥ वरं ब्रूहीति वचनं तमाह द्विजसत्तमम् ॥ १४ ॥ इति वाक्यं प्रियं
श्रुत्वा द्विज आपव नम्रधीः ॥ तुष्टाव दंडवद्भूत्वा भद्रकालीं सनातनीम् ॥ १५ ॥ ॥ आपव उवाच ॥ ॥ विष्णुकल्पे पुरा चासीद्दानवो
महिषासुरः ॥ कोटिकोटिसहस्रैस्तु रथैर्वाजिगजैर्युतः ॥ १६ ॥ त्रैलोक्यं स्ववशे कृत्वा महेन्द्रस्स तदाभवत् ॥ स्वारोचिषान्तरः कालो गतो

राज्यं प्रकुर्वतः ॥ १७ ॥ ततस्स भगवान्विष्णुस्सर्वदेवसमन्वितः ॥ समुत्पाद्य मुखात्तेजो ज्वालामाली बभूव ह ॥ १८ ॥ ज्योतिर्लिंगात्तदा
देवी भवती स्वेच्छया भुवि ॥ संभूय महिषं हंत्री तस्यै देव्यै नमोनमः ॥ १९ ॥ रुद्रकल्पे पुरा चासीद्रुदच्छंभुमुखाद्दिवि ॥ रावणश्च सहस्रास्यो
जातो ब्रह्मांडरावणः ॥ २० ॥ राक्षसो बलवान्घोरो लोकालोकगिरेरधः ॥ न्यवसद्देवदैत्यानां मनुष्याणां च भक्षकः ॥ षष्ठे मन्वंतरे तेन ब्रह्मांडं
राज्यसात्कृतम् ॥ २१ ॥ ततो वैवस्वते प्राप्ते त्रेताष्टाविंशके प्रभुः ॥ स जातो राघवगृहे रामस्संकर्षणः स्वयम् ॥ २२ ॥ षोडशाब्दवपुर्भूत्वा स
गतो जनकालये ॥ धनुश्चाजगवं घोरं प्रभग्नं तेन धीमता ॥ २३ ॥ तदा ब्रह्मादयो देवा ज्ञात्वा रामं सनातनम् ॥ सहस्रवदनस्यैव वर्णयामास
कारणम् ॥ २४ ॥ तच्छ्रुत्वा हंसयानं च समारुह्य स सीतया ॥ लोकालोकगिरौ प्राप्य घोरयुद्धमचीकरत ॥ २५ ॥ हंसयानपताकायां संस्थितो
हनुमान्कपिः ॥ वेदाश्च वाजिनस्तत्र नेता ब्रह्मा सनातनः ॥ २६ ॥ दिव्यवर्षमभूद्धोरः संग्रामस्तेन रक्षसा ॥ रावणस्स तदा क्रुद्धो द्विसहस्रैश्च
बाहुभिः ॥ २७ ॥ अपरौ मूर्छयित्वा तौ भ्रातरौ रामलक्ष्मणौ ॥ जगर्ज बलवान्घोरस्स च ब्रह्मांडरावणः ॥ २८ ॥ ब्रह्मणा संस्तुता माता भवती
ब्रह्मरूपिणी ॥ सीता शांतिमयी नित्या तया ब्रह्मांडरावणः ॥ विनाशितो नमस्तस्यै नमस्तस्यै नमोनमः ॥ २९ ॥ ब्रह्मकल्पे पुरा चासीत्तालजं
घान्वयोद्भवः ॥ मुरो नाम महादैत्यो ब्रह्मणो बलदर्पितः ॥ ३० ॥ ब्रह्मांडेशं महारुद्रं महेंद्रादिसमन्वितम् ॥ स बभूव पराजित्याधिकारी रौद्र
आसने ॥ ३१ ॥ देवैस्सार्द्धं महादेवो माधवं क्षीरशायिनम् ॥ गत्वा निवेदयामास स विष्णुः क्रोधसंयुतः ॥ ३२ ॥ जगाम गरुडारूढो यत्र
दैत्यो मुरः स्थितः ॥ तेन सार्द्धमभूद्युद्धं तस्य देवस्य दारुणम् ॥ ३३ ॥ सहस्राब्दमतो जातं दृष्ट्वा ब्रह्मा भयान्वितः॥ परां तु प्रकृतिं नित्यां तुष्टाव
श्लक्ष्णया गिरा ॥ ३४ ॥ प्रसन्ना सा तदा देवी कुमारी सप्तहायिनी ॥ चतुर्भुजास्त्रसहिता भूत्वा दैत्यमुवाच ह ॥ ३५ ॥ पराजितोऽयं भगवान्दै
त्यराजेन वै त्वया ॥ विजया नाम मे रम्या कैश्चिन्नाहं पराजिता ॥ ३६ ॥ उन्मीलिनी विंजुली च त्रिस्पृशा पक्षवर्द्धिनी ॥ जया जयंती विजया
वर्षेवर्षे क्रमादहम् ॥ ३७ ॥ एकादशशुभाचारा विष्णवस्तनया मम ॥ एकादशीति विख्याता वेदमध्ये सदा ह्यहम् ॥ ३८ ॥ अतो मां बलवा
ञ्जित्वा विजयां विष्णुमातरम् ॥ पाणिं गृहाण मे रम्यं सर्वपूज्यो भवान्भवेत् ॥ ३९ ॥ इति श्रुत्वा मुरो दैत्यस्तस्या रूपेण मोहितः ॥ युयुधे स
तया सार्द्धं क्षणार्द्धेन लयं गतः ॥ ४० ॥ तं मुरं निहतं दृष्ट्वानुजस्तन्नरकासुरः ॥ दैत्यमायां महाघोरां चकार सुरनाशिनीम् ॥ ४१ ॥ एकादशी
स्वयं माया हुंकारेणैव तं तदा ॥ नरकेण समं हत्वा जगर्ज जगदंबिका ॥ ४२ ॥ तयोस्तेजो महाघोरमन्नमध्येषु चागमत् ॥ दुष्टभूनमभूदन्नं नृणां

रोगभयप्रदम् ॥ ४३ ॥ दृष्ट्वा चैकादशी नाम्ना रविशुक्राबुवाच ह ॥ कुरुतां शुद्धमेवांतर्भवंतौ लोकविश्रुतौ ॥ ४४ ॥ तदाज्ञया तथा कृत्वा देव
पूज्यौ बभूवतुः ॥ एवं मातस्त्वया सर्वं कृतं तस्यै नमोनमः ॥४५॥ इति श्रुत्वा भद्रकाली स्तोत्रं दिव्यं कथामयम् ॥ आपवं प्राह सा देवी ब्राह्मणं
वेदकोविदम् ॥ ४६ ॥ प्रलये च तदा प्राप्ते नष्टे स्थावरजंगमे ॥ एकार्णवे पुरा त्वं वै मत्प्रसादात्सुखी भव ॥ ४७ ॥ स्तोत्रेणानेन सुप्रीता वरदाहं
सदा नरान्[1] ॥ इत्युक्त्वांतर्हिता देवी स विप्रो वरुणोऽभवत् ॥ ४८ ॥ ॥ सूत उवाच ॥ ॥ इति श्रुत्वा गुरोर्वाक्यं भगवान्द्वितियो[2] वसुः ॥ वरुणः
स्वमुखात्तेजो जनयामास भूतले ॥ ४९ ॥ देहल्यां स तु वै जातो धर्मभक्तस्य वै गृहे ॥ विधवा तस्य या कन्या गर्भं धत्ते हरेः स्वयम् ॥ ५० ॥
इति ज्ञात्वा धर्मभक्तो मुमुदे सुतजन्मनि ॥ नामदेव इति ख्यातः सांख्ययोगपरायणः ॥ ५१ ॥ आब्रह्मस्तंबपर्यंतं सर्वं विष्णुमयं जगत् ॥ ज्ञात्वा
दृष्ट्वा गतः काश्यां रामानंदं हरिप्रियम् ॥५२॥ नत्वा तच्छिष्यतां प्राप्य तत्र वासमकारयत् ॥ सिकंदरो म्लेच्छपतिर्देहलीराज्यमास्थितः ॥ ५३ ॥
नामदेवं समाहूय संपरीक्ष्य तदा सुखी ॥ अर्धकोटिमितं द्रव्यं ददौ तस्मै कलिप्रियः ॥५४॥ नामदेवस्तु तद्द्रव्यैर्गंगारोहणमुत्तमम् ॥ कारयामास वै
काश्यां शुभ्रं सर्वं शिलामयम् ॥ ५५ ॥ दशविप्रान्पञ्च नृपान्पञ्च वैश्याञ्छतं गवाम् ॥ पुनरुज्जीवयामास शवभूतान्स योगवान् ॥ ५६ ॥ ॥ बृह
स्पतिरुवाच ॥ ॥ विश्वानरः पुरा चासीद्ब्राह्मणो वेदकोविदः ॥ अनपत्यो विधातारं तुष्टाव बहुपूजनैः ॥ ५७ ॥ वर्षमात्रेण भगवान्परमेष्ठी
प्रजापतिः ॥ समागत्य वचः प्राह वरं ब्रूहि द्विजोत्तम ॥ ५८ ॥ इति श्रुत्वा स होवाच भगवँस्ते नमोनमः ॥ प्रकृतेश्च परः पुत्रो भूयान्मम वरात्तव ॥
॥५९॥ इति श्रुत्वा तदा ब्रह्मा विस्मितः प्राह तं द्विजम् ॥ एका वै प्रकृतिर्माया त्रिलिङ्गजननी स्वयम् ॥ ६० ॥ तया दृश्यं जगत्सर्वं समुत्पादित
मात्मना ॥ प्रकृतेश्च परो यो वै परमात्मा स चाव्ययः ॥ ६१ ॥ अबुद्धिर्बोधनिरतो ह्यश्रुतिश्च शृणोति वै ॥ अदेहः स स्पृशत्येतदचक्षुः पश्यति
स्वयम् ॥६२॥ अजिह्वोन्नं स गृह्णाति स जिघ्रति नसा विना ॥ अमुखो वेदवक्ता च कर्मकारः करं विना ॥ ६३ ॥ अपदो गच्छति ह्येतदलिंगो
नारिभोगवान् ॥ अगुह्यो हि करोत्येतां सतत्त्वां गुह्यभूतिनीम् ॥ ६४ ॥ शब्दब्रह्म स्पर्शमयं रूपब्रह्म रसात्मकम् ॥ गंधब्रह्म परं ज्ञेयं तस्मै तद्ब्रह्मणे
नमः ॥ ६५ ॥ प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ॥ विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान् ॥ ६६ ॥ एकार्थौ तौ च शब्दैकौ रूपैकौ
नित्यविग्रहौ ॥ आदिमध्यान्तरहितौ नित्यशुद्धौ सनातनौ ॥ ६७ ॥ पुंस्त्रीनपुंस्कजननी ज्ञेया सा प्रकृतिः परा ॥ पुरुषश्च कविः सूक्ष्मः

---

[1] नरेभ्यः इत्यर्थः ।
[2] ह्रस्व आर्षः ।

कूटस्थो ज्ञानवान्परः ॥ ६८ ॥ अजन्मा जन्म चाप्नोति मया जातः स जन्मवान् ॥ कथं स पुरुषो नित्यस्तव पुत्रो भविष्यति ॥ ६९ ॥ अतो
विश्वानर मुने मायाभूतो हरिः स्वयम् ॥ तव पुत्रत्वमाप्नोति वरान्मम जनार्दनः ॥ ७० ॥ इत्युक्त्वान्तर्दधे देवः पावकस्तद्वरादभूत् ॥ अष्टानां च
वसूनां च पावको हि पतिस्त्वयम् ॥ ७१ ॥ वैश्वानर इति ख्यातोऽभवत्स्वाहापतिः प्रभुः ॥ स तु पूर्वभवे देवः पुरा कल्पेऽनलोभवत् ॥ ७२ ॥
नैषधो ब्राह्मणो धीमान्यथा राजा नलस्तथा ॥ संकटायां गते भूपे दमयन्ती पतिव्रता ॥ ७३ ॥ स्वपितुर्गेहमासाद्यान्वेषयामास भूपतिम् ॥ तदा
नलो द्विजं प्राप्तो दमयंतीपतिः प्रभुः ॥ ७४ ॥ दृष्ट्वा तं मोहमापन्ना दमयंती शुभानना ॥ एतस्मिन्नंतरे तत्र वागुवाचाशरीरिणी ॥ ७५ ॥ नायं
नलस्तव पतिर्ब्राह्मणोयं सुमोहितः ॥ अनलो नाम विख्यातो देववाक्यात्स चाभवत् ॥ ७६ ॥ महासरस्वतीं देवीं तुष्टाव स तु मोहितः ॥ तस्य
पुण्यप्रभावेन विश्वानरसुतोऽभवत् ॥ ७७ ॥ ॥ सूत उवाच ॥ ॥ इति श्रुत्वा गुरोर्वाक्यं पावको भगवान्प्रभुः ॥ स्वमुखात्स्वांशमुत्पाद्य
संजातस्तु ततो वसुः ॥ ७८ ॥ रंकणो नाम विख्यातो लक्ष्मीदत्तस्य वै सुतः ॥ नगरे कांचनपुरे वैश्यजातिसमुद्भवः ॥ ७९ ॥ यंकणा नाम
तत्पत्नी बभूव च पतिव्रता ॥ सर्वद्रव्यव्ययं कृत्वा धर्मकार्येषु दंपती ॥ ८० ॥ काष्ठमानीय विक्रीय बुभुजाते परस्परम् ॥ रामानंदस्तस्य गुरू
रंकणस्य महात्मनः ॥ ८१ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडापरपर्याये कलियुगीयेतिहाससमुच्चये वसुमाहात्म्ये रंकण
वैश्योत्पत्तिवर्णनो नाम षोडशोऽध्यायः ॥ १६ ॥ ॥ छ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ दितिपुत्रौ महाघोरौ विष्णुना प्रभविष्णुना ॥ संहतौ
तु दितिर्ज्ञात्वा कश्यपं समपूजयत् ॥ १ ॥ द्वादशाब्दांतरे स्वामी कश्यपो भगवानृषिः ॥ उवाच पत्नीं स हि तां वरं ब्रूहि वरानने ॥ सा तु श्रुत्वा
नमस्कृत्य वचनं प्राह हर्षिता ॥ २ ॥ अदितिर्मम या देवी सपत्नी पुत्रसंयुता ॥ द्वादशतनयास्तस्या मम द्वौ तनयौ स्मृतौ ॥ ३ ॥ तदवर्यसुते
नैव विष्णुना सुरपालिना ॥ विनाशितौ सुतौ घोरौ ततोऽहं भृशदुःखिता ॥ ४ ॥ देहि मे तनयं स्वामिन्द्वादशादित्यनाशनम् ॥ इति श्रुत्वा
वचो घोरं दितिं प्राह सुदुःखितः ॥ ५ ॥ ब्रह्मणा निर्मितौ लोके धर्माधर्मौ परापरौ ॥ धर्मपक्षास्तु ये लोके नरास्ते ब्रह्मणः प्रियाः ॥ ६ ॥
अधर्मपक्षास्तु नरा वैरिणस्तस्य धीमतः ॥ अधर्मपक्षौ तनयौ तस्मान्मृत्युमुपागतौ ॥ ७ ॥ अतो धर्मप्रिये शुद्धं कुरु तस्मान्महाबलः ॥ भवि
ष्यति सुतो धीमाँश्चिरंजीवी तव प्रियः ॥ ८ ॥ इति श्रुत्वा दितिर्देवी कश्यपाद्गर्भमुत्तमम् ॥ संप्राप्य सा शुभाचारा बभूव व्रतधारिणी ॥ ९ ॥
तस्या गर्भगते पुत्रे महेन्द्रश्च भयान्वितः ॥ दासभूतः स्थितो गेहे स दितेराज्ञया गुरोः ॥ १० ॥ सप्तमासि स्थिते गर्भे शक्रमायाविमोहिता ॥

अशुचिश्च दितिर्देवी सुष्वाप निजमंदिरे ॥ ११ ॥ अंगुष्ठमात्रो भगवान्महेन्द्रो वज्रसंयुतः ॥ कुक्षिमध्ये समागम्य चक्रे गर्भं स सप्तधा ॥ १२ ॥
जीवभूताननतिबलान्दृष्ट्वा सप्त महारिपून् ॥ एकैकः सप्तधा तेन महेन्द्रेण तदा कृतः ॥ १३ ॥ नम्रीभूतश्च तान्दृष्ट्वा महेन्द्रस्तैः समन्वितः ॥ योनि
द्वारेण चागम्य प्रणनाम तदा दितिम् ॥ १४ ॥ प्रसन्ना सा दितिर्देवान्महेन्द्राय च तान्ददौ ॥ मरुद्गणाश्च ते सर्वे विख्याताः शक्रसेवकाः ॥१५॥
स तु पूर्वभवे जातो ब्राह्मणो लोकविश्रुतः ॥ इलो नाम स वेदज्ञो यथेलो नृपतिस्तदा ॥ १६ ॥ एकदा बलवान्राजा मनुपुत्र इलः स्वयम् ॥
एकाकी हयमारुह्य मेरोर्विपिनमाययौ ॥ १७ ॥ मेरोरधः स्थितः खण्डः स्वर्णगर्भो हरिप्रियः ॥ निवासं कृतवाँस्तत्र कृत्वा राष्ट्रं महोत्तमम् ॥
॥ १८ ॥ इलेनावृतमेवापि कृतं तत्र स्थले सुराः ॥ इलावृतमिति ख्यातः खण्डोऽभूद्विबुधप्रियः ॥ १९ ॥ भारते ये स्थिता लोका
इलावृतमुपागताः ॥ मेरुर्गिरिर्वृक्षमयो विधात्रा निर्मितो हि सः ॥ २० ॥ आरोहणं नरैस्तस्मिन्कृतं स्वर्णमयं शुभम् ॥ तमारुह्य क्रमा
ल्लोकः स्वर्गलोकमुपागतः ॥ २१ ॥ तान्दृष्ट्वा मनुजान्प्राप्तान्सदेहान्स्वर्गमण्डले ॥ विस्मिताश्च सुरास्सर्वे महेशं शरणं ययुः ॥ २२ ॥
ज्ञात्वा स भगवान्रुद्रो भवान्या सह शंकरः ॥ इलावृतवने रम्ये स रेमे च तया सह ॥ २३ ॥ एतस्मिन्नन्तरे प्राप्तो वैवस्वतसुतो महान् ॥
इलो नाम महाप्राज्ञो मृगयार्थी सदाशिवम् ॥ २४ ॥ नग्नभूतं समालोक्य नेत्रे संमील्य संस्थितः ॥ लज्जितां गिरिजां दृष्ट्वा शशाप भग
वान्हरः ॥ २५ ॥ अस्मिन्खण्डे सदा नार्यो भविष्यंति च मां विना ॥ इत्युक्त्वा वचनं तस्मिन्नार्यस्सर्वा बभूविरे ॥ २६ ॥ इला बभूव नृपतेः
कन्या जनमनोहरा ॥ बहुकालं मेरुशृंगे महत्तपमचीकरत् ॥ २७ ॥ इलासमाधिभूतायाः सप्तविंशच्चतुर्युगम् ॥ जातं तत इला कन्या त्रेतामध्ये
तु चन्द्रजम् ॥ बुधं देवं पतिं कृत्वा चंद्रवंशमजीजनत् ॥ २८ ॥ अयोध्याधिपतिः श्रीमान्यदेलावृतमागतः ॥ तस्य राज्ञी मदवती नाम्ना तुष्टाव
पार्वतीम् ॥ २९ ॥ तदा प्राप्त इलो विप्रस्तस्या रूपेण मोहितः ॥ पस्पर्श तां मदवतीं राज्ञीं कामविमोहितः ॥ ३० ॥ एतस्मिन्नंतरे तत्र वागुवा
चाशरीरिणी ॥ इलो नायं द्विजश्चायं तव रूपविमोहितः ॥ ३१ ॥ अनिलो नाम तत्रैव विख्यातोऽभूद्द्विजस्य वै ॥ कामाग्निपीडितो विप्रस्स
तुष्टाव च पावकम् ॥ ३२ ॥ छित्त्वाछित्त्वा शिरो रम्यं तस्मै जातं पुनःपुनः ॥ दत्त्वा तुष्टाव तं देवं प्रसन्नोऽभूद्धनंजयः ॥ ३३ ॥ प्राह त्वमूनपंचा
शद्विभेदाञ्जनयिष्यसि ॥ तथाहं मित्रवान्भूत्वा तत्संख्यस्तव कामदः ॥ ३४ ॥ यथा कुबेरो भगवान्षड्विंशद्वरुणप्रियः ॥ तथाहमूनपंचाशद्विभे
दस्तव वै सखा ॥३५॥ इत्युक्ते वचने तस्मिन्दितिकुक्षौ द्विजोत्तमः ॥ वायुर्नाम स वै जातः पावकस्य प्रियस्सखा ॥३६॥ ॥ सूत उवाच ॥ ॥

इति श्रुत्वा गुरोर्वाक्यं वैश्यजात्यां समुद्भवः ॥ धान्यपालस्य वै गेहे मूलगंडान्तजः सुतः ॥ पितृमातृपरित्यक्तः काश्यां विंध्यवने तदा ॥ ३७ ॥
अलिको नाम वै म्लेच्छस्तत्र स्थाने समागतः ॥ ३८ ॥ अनपत्यो वस्त्रकारी सुतं प्राप्य गृहं ययौ ॥ कबीर इति विख्यातः स पुत्रो मधुराननः ॥
॥ ३९ ॥ स सप्ताब्दवपुर्भूत्वा गोदुग्धपानतत्परः ॥ रामानंदं गुरुं मत्वा रामध्यानपरोऽभवत् ॥४०॥ स्वहस्तेनैव संस्कृत्य भोजनं हरयेऽपर्यत् ॥
तत्प्रियार्थं हरिस्साक्षात्सर्वकामप्रदोऽभवत् ॥ ४१ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ उत्तानपादतनयो ध्रुवोभूत्क्षत्रियः पुरा ॥ पितृमातृपरित्यक्तः
स बालः पंचहायनः ॥ ४२ ॥ गोवर्द्धनगिरौ प्राप्य नारदस्योपदेशतः ॥ स चक्रे भगवद्ध्यानं मासान्षट् च महाव्रती ॥ ४३ ॥ तदा प्रसन्नो
भगवान्विष्णुर्नारायणः प्रभुः ॥ खमंडले पदं तस्मै ददौ प्रीत्या नभोमयम् ॥ ४४ ॥ दृष्ट्वा तद्वदनं रम्यं मायाशक्त्या दिशो दश ॥ स्वामिनं च
ध्रुवं मत्वा भक्तिनम्रा बभूविरे ॥ ४५ ॥ ध्रुवोऽपि भगवान्साक्षात्सर्वपूज्यो बभूव ह ॥ दिक्पतिः स तु विज्ञेयो भगणानां पतिः स्वयम् ॥ ४६ ॥
नभःपतिः कालकरः शिशुमारपतिस्स वै ॥ पंचतत्त्वां[१] हि वै माया प्रकृतिस्तत्पतिः स्वयम् ॥ ४७ ॥ तस्माद्धरायां संभूतो भौमो नाम महाग्रहः ॥
जलदेव्यास्ततो जातः शुक्रो नाम महाग्रहः ॥ ४८ ॥ वह्निदेव्यां ततो जातश्चाहं तत्र महाग्रहः ॥ वासुदेव्यां ध्रुवाज्जातः केतुर्नाम महाग्रहः॥४९॥
ग्रहभूतः स्थितस्तत्र नभोदेव्यां तदुद्भवः ॥ राहुर्नाम तथा घोरो महाग्रह उपग्रहः ॥ ५० ॥ पूर्वस्यां दिशि वै तस्माज्जातश्चैरावतो गजः ॥ आग्नेय्यां
दिशि वै तस्मात्पुंडरीको गजोऽभवत् ॥ ५१ ॥ वामनः कुमुदश्चैव पुष्पदंतः क्रमाद्गजाः ॥ सार्वभौमः सुप्रतीको नभोदिक्षु तु तत्सुताः ॥५२॥
अभ्रमुः कपिला चैव पिंगलाख्या इमाः क्रमात् ॥ ताम्रकर्णी शुभ्रदंती चांगना चांजनावती ॥५३॥ भूमिदिक्षु करिण्यश्च जातास्तस्मात्तु तत्प्रियाः ॥
भगिनी च तथा माता सुता चैव स्नुषा तथा ॥ ५४ ॥ पशुयोन्युद्भवानां च नृणां ता योषितस्सदा ॥ देवयोन्युद्भवानां च नृणां पत्नी स्मृता
स्वसा ॥ ५५ ॥ मनुवंशोद्भवानां च नृणां चान्योद्भवाः स्त्रियः ॥ इति धर्मो विधात्रोक्तो मया प्रोक्तः सुरा हि वः ॥ ५६ ॥ द्विधा ध्रुवस्स विज्ञेयो
भूमेरुर्द्ध्वमधस्तथा ॥ सद्गुणः स दिवारूपो रात्रिरूपस्तमोगुणः ॥ ५७ ॥ अधोध्रुवे सदा रात्रिर्नारकास्तत्र वै स्थिताः ॥ ऊर्ध्वध्रुवे दिवा नित्यं
तपोमध्ये निशा दिवा ॥ ५८ ॥ महो जनस्तपस्सत्यं तेषु नित्यं दिनं स्मृतम् ॥ रौरवश्चांधकूपश्च तामिस्रं च तमोमयम् ॥ तेषु नित्यं स्मृता
रात्रिः कल्पमानं च कोविदैः ॥ ५९ ॥ स तु पूर्वभवे चासीद्ब्राह्मणो माधवप्रियः ॥ षष्ट्यब्दं सर्वतीर्थेषु प्रातःस्नानं चकार ह ॥ ६० ॥ तीर्थ

---

[१] पञ्चतत्त्वा माया प्रकृतिस्तत्पतिस्स स्वयमित्यर्थः ।

पुण्यात्स वै विप्रो माधवो माधवप्रियः ॥ सुनीत्यां गर्भमासाद्य ध्रुवो भूत्वा रराज ह ॥ षट्त्रिंशच्च सहस्राब्दं राज्यं कृत्वा ध्रुवोऽभवत् ॥ ६१ ॥
॥ ॥ सूत उवाच ॥ ॥ इति श्रुत्वा गुरोर्वाक्यं स ध्रुवः पंचमो वसुः ॥ गुर्जरे देश आगम्य वैश्यजात्यां समुद्भवः ॥ नरश्रीर्नाम विख्यातो
गुणवैश्यस्य वै सुतः ॥ ६२ ॥ कुसीदगुणगुप्तश्च नरश्रीः पुत्रवत्सलः ॥ त्यक्त्वा प्राणान्ययौ स्वर्गं स वैश्यतनयो ध्रुवः ॥ ६३ ॥ प्रत्यहं
स हरेः क्रीडां वृन्दावनमहोत्तमे ॥ शिवप्रसादात्प्रत्यक्षां दृष्ट्वा हर्षमवाप्तवान् ॥ ६४ ॥ यस्य पुत्रविवाहे च भगवान्भक्तवत्सलः ॥
यादवैस्सह संप्राप्तस्तस्य वांछितदायकः ॥ ६५ ॥ पुरीं काशीं समागम्य नरश्रीर्भक्तराट् स्वयम् ॥ रामानन्दस्य शिष्योऽभूद्विष्णुधर्म
विशारदः ॥ ६६ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ कदाचिद्भगवानत्रिर्गंगाकूलेऽनसूयया ॥ सार्द्धं तपो महत्कुर्वन्ब्रह्मध्यानपरोऽभवत् ॥
॥ ६७ ॥ तदा ब्रह्मा हरिश्शंभुः स्वस्ववाहनमास्थिताः ॥ वरं ब्रूहीति वचनं तमाहुस्ते सनातनाः ॥ ६८ ॥ इति श्रुत्वा वच
स्तेषां स्वयंभूतनयो मुनिः ॥ नैव किञ्चिद्वचः प्राह संस्थितः परमात्मनि ॥ ६९ ॥ तस्य भावं समालोक्य त्रयो देवाः
सनातनाः ॥ अनसूयां तस्य पत्नीं समागम्य वचोऽब्रुवन् ॥७०॥ लिंगहस्तः स्वयं रुद्रो विष्णुस्तद्रसवर्द्धनः ॥ ब्रह्मा कामब्रह्मलोपः स्थितस्तस्या
वशं गतः ॥ रतिं देहि मदाघूर्णे नो चेत्प्राणांस्त्यजाम्यहम् ॥ ७१ ॥ पतिव्रताऽनसूया च श्रुत्वा तेषां वचोऽशुभम् ॥ नैव किंचिद्वचः प्राह कोप
भीता सुरान्प्रति ॥ ७२ ॥ मोहितास्तत्र ते देवा गृहीत्वा तां बलात्तदा ॥ मैथुनाय समुद्योगं चक्रुर्मायाविमोहिताः ॥ ७३ ॥ तदा क्रुद्धा सती सा
वै तान्छशाप मुनिप्रिया ॥ मम पुत्रा भविष्यंति यूयं कामविमोहिताः ॥ ७४ ॥ महादेवस्य वै लिंगं ब्रह्मणोऽस्य महाशिरः ॥ चरणौ वासुदे
वस्य पूजनीया नरैस्सदा ॥ भविष्यंति सुरश्रेष्ठा उपहासोऽयमुत्तमः ॥ ७५ ॥ इति श्रुत्वा वचो घोरं नमस्कृत्य मुनिप्रियाम् ॥ तुष्टुवुर्भक्तिनम्राश्च
देवपाठैश्च ऋङ्मयैः ॥७६॥ अनसूया तदा प्राह भवन्तो मम पुत्रकाः ॥ भूत्वा शापं मदीयं च त्यक्त्वा तृप्तिमवाप्स्यथ ॥७७॥ इत्युक्ते वचने ब्रह्मा
चंद्रमाश्च तदा ह्यभूत् ॥ दत्तात्रेयो हरिः साक्षाद्दुर्वासा भगवान्हरः ॥ तत्पापपरिहारार्थं योगवन्तो बभूविरे ॥ ७८ ॥ एतस्मिन्नंतरे देवी प्रकृतिस्सर्व
धर्मिणी ॥ विधिं विष्णुं हरं चान्यं चक्रे सा गुणरूपिणी ॥ ७९ ॥ मन्वंतरमतो जातं तेषां योगं प्रकुर्वताम् ॥ हर्षिताश्च त्रयो देवास्समागम्य
च तान्प्रति ॥ ८० ॥ उवाच वचनं रम्यं तेषां मंगलहेतवे ॥ चन्द्रमाश्च भवेत्सोमो वसुः षष्ठः सुरप्रियः ॥ ८१ ॥ रुद्रांशश्चैव दुर्वासाः प्रत्यूषः
सप्तमो वसुः ॥ दत्तात्रेयमयो योगी प्रभासश्चाष्टमो वसुः ॥ तेषां वाक्यं समाकर्ण्य वसवस्ते त्रयोऽभवन् ॥८२॥ ॥ सूत उवाच ॥ ॥ इति श्रुत्वा

गुरोर्वाक्यं वसवो हर्षितास्त्रयः ॥ स्वांशेन भूतलं जग्मुः कलिशुद्धाय दारुणे ॥ दाक्षिणात्ये राजगृहे वैश्यजात्यां समुद्भवः ॥ ८३ ॥ पीपा नाम सुतः
सोमः सुदेवस्य तदा ह्यभूत् ॥ कृतं राज्यपदं तेन यथा भूपेन तत्पुरे ॥ ८४ ॥ रामानन्दस्य शिष्योऽभूद्द्वारकां स समागतः ॥ हरेर्मुद्रां स्वर्णमयीं
प्राप्य कृष्णात्स वै नृपः ॥ वैष्णवेभ्यो ददौ तत्र प्रेततत्त्वविनाशिनीम् ॥ ८५ ॥ प्रत्यूषश्चैव पांचाले वैश्यजात्यां समुद्भवः ॥ मार्गपालस्य तनयो
नानको नाम विश्रुतः ॥ ८६ ॥ रामानन्दं समागम्य शिष्यो भूत्वा स नानकः ॥ स वै म्लेच्छान्वशीकृत्य सूक्ष्ममार्गमदर्शयत् ॥ ८७ ॥
प्रभासो वै शांतिपुरे ब्रह्मजात्यां समुद्भवः ॥ शुक्लदत्तस्य तनयो नित्यानंद इति स्मृतः ॥ इति ते वसुमाहात्म्यं मया शौनक वर्णितम् ॥ ८८ ॥
इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये वसुमाहात्म्ये कबीरनरश्रीपीपानानकनित्यानन्दसमुत्पत्तिवर्णनं नाम सप्तदशोऽध्यायः ॥ १७ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ इत्युक्त्वा तान्सुरान्देवो भगवान्बृहतांपतिः ॥ अश्विनौ च समालोक्य
तयोर्गाथामवर्णयत् ॥ १ ॥ वैवस्वतेऽन्तरे पूर्वं विश्वकर्मा विचित्रकृत् ॥ चित्रगुप्तश्रियं दृष्ट्वा चित्रलेखाविनिर्मिताम् ॥ स्पर्द्धाभूतो महामायां तुष्टाव
बहुपूजनैः ॥ २ ॥ प्रसन्ना सा तदा देवी चित्रायां तस्य योषिति ॥ स्वांशाज्जाता स्मृता संज्ञा सर्वज्ञानकरी स्वयम् ॥ ३ ॥ षोडशाब्दे वयःप्राप्ते
संज्ञायास्तत्पिता सुखी ॥ विवाहार्थी सुरान्सर्वानाह्वयन्मेरुमूर्द्धनि ॥ ४ ॥ यक्षाधीशाश्च षड्विंशत्कुबेराद्यास्समागताः ॥ यादसां पतयः प्राप्ता
दश तत्रैव कामुकाः ॥ ५ ॥ पावका ऊनपंचाशद्वायवश्च तथा स्मृताः ॥ ध्रुवौ द्वौ च स्वयं प्राप्तौ सोमास्तत्रैव षोडश ॥६॥ त्रयोदश च प्रत्यूषाः
प्राप्ता विश्वप्ररक्षकाः ॥ षष्ट्युत्तरं च त्रिशतं प्रभासा दिनरक्षकाः ॥ ७ ॥ भवाद्याश्च तदा रुद्राः शशिमण्डलरक्षकाः ॥ आदित्याश्च स्थितास्सर्वे
संज्ञायाश्च स्वयंवरे ॥ ८ ॥ दानवा विप्रचित्त्याद्याश्चतुराशीतिराययुः ॥ प्रह्लादाद्यास्तदा दैत्या वासुक्याद्याश्च पन्नगाः ॥ ९ ॥ शेषाद्याश्च तदा
नागास्तार्क्ष्याद्या गरुडाः स्मृताः ॥ सर्वे स्वयंवरे प्राप्ता महान्कोलाहलो ह्यभूत् ॥ १० ॥ एतस्मिन्नंतरे देवी देवकन्यासमन्विता ॥ संज्ञा देवा
न्प्रति तदा प्रत्यक्षमभवद्दिवि ॥ ११ ॥ तां समालोक्य बलवान्बलिः कामविमोहितः ॥ करे गृहीत्वा प्रययौ पश्यतां सर्वधन्विनाम् ॥ १२ ॥
तदा क्रोधातुरा देवा रुरुधुर्दैत्यसत्तमम् ॥ शस्त्रास्त्रैस्तर्पयित्वा तं महद्युद्धमकारयन् ॥ १३ ॥ दानवाश्च तदा दैत्या नानावाहनसंस्थिताः ॥ देवैः
सार्द्धं महद्युद्धं तुमुलं चक्रिरे मुदा ॥ १४ ॥ दानवैश्च हता देवाः सुरैर्दैत्या विनाशिताः ॥ शवभूतैरिलावर्तेऽभूदगम्या वसुंधरा ॥ १५ ॥ पक्षमात्र
मभूद्युद्धं दिव्यं दानवदेवयोः ॥ पांचजन्यस्तथा धाता हयग्रीवश्च मित्रकः ॥ १६ ॥ अघासुरोऽर्यमा चैव बलः शक्रस्तथैव च ॥ बकासुरश्च वरुणः

शकटः प्रांशुरेव च ॥ १७ ॥ वत्सासुरो भगश्चैव विवस्वांश्च बलिः स्वयम् ॥ प्रलंबश्च तथा पूषा गर्दभः सविता युधि ॥१८॥ विश्वकर्मा मयश्चैव
कालनेमिर्हरिः स्वयम् ॥ कांक्षमाणौ च विजयं युयुधाते परस्परम् ॥ पराजिताश्च ते दैत्या युद्धं त्यक्त्वा प्रदुद्रुवुः ॥ १९ ॥ विवस्वाँश्च तदा संज्ञां
गृहीत्वा रथसंस्थिताम् ॥ विश्वकर्माणमागम्य ददौ तस्मै प्रसन्नधीः ॥ २० ॥ विवस्वंतं सुरश्रेष्ठं दृष्ट्वा संज्ञा वचोऽब्रवीत् ॥ मत्पतिश्च भवान्देवो
भवेत्कार्यकरस्सदा ॥ २१ ॥ त्वया जिताहं भगवन्बलेर्विप्रियकारिणः ॥ भ्रातृजाग्रहणे दोषो न भवेत्स कदाचन ॥ २२ ॥ वीरभुक्ता सदा नारी
स्त्रीरत्नं मुनिभिः स्मृतम् ॥ चतुर्द्धा प्रकृतिर्देवी गुणभिन्ना गुणैकिका ॥ एका सा प्रकृतिर्माता गुणसाम्यात्सनातनी ॥ २३ ॥ सत्त्वभूता च भगि
नी रजोभूता च गेहिनी ॥ तमोभूता च सा कन्या तस्यै देव्यै नमोनमः ॥ २४ ॥ बहवः पुरुषा ये वै निर्गुणाश्चैकरूपिणः ॥ चैतन्याऽज्ञानवंत
श्च लोके प्रकृतिसंभवाः ॥ २५ ॥ अलोके पापजास्सर्वे देवब्रह्मसमुद्भवाः ॥ या तु ज्ञानमयी नारी वृणेद्यं[1] पुरुषं शुभम् ॥ कोऽपि पुत्रः पिता
भ्राता स च तस्याः पतिर्भवेत् ॥ २६ ॥ स्वकीयां च सुतां ब्रह्मा विष्णुदेवः स्वमातरम् ॥ भगिनीं भगवाञ्छंभुर्गृहीत्वा श्रेष्ठतामगात् ॥ २७ ॥
इति श्रुत्वा वेदमयं वाक्यं चादितिसंभवः ॥ विवस्वान्भ्रातृजां संज्ञां गृहीत्वा श्रेष्ठवानभूत् ॥ २८ ॥ सुताः कन्यास्तयोर्जाता मनुर्वैवस्वतस्तथा ॥
यमश्च यमुना चैव दिव्यतेजोभिरन्विताः ॥ २९ ॥ तदा संज्ञा सती साक्षात्तेजोभूतं पतिं स्वकम् ॥ ज्ञात्वा छायां समुत्पाद्य तपसे वनमा
गता ॥ ३० ॥ सावर्णिश्चमनुस्तस्यां शनिश्च तपती तथा ॥ छायायां च समुद्भूताः क्रूरदृष्ट्या विवस्वतः ॥ ३१ ॥ पुत्रभेदेन तां नारीं मत्वा
मायां रुषान्वितः ॥ चकार भस्मभूतां तां विवस्वान्भगवान्रविः ॥ ३२ ॥ तदा शनिश्च सावर्णिर्विवस्वंतं रुषान्वितम् ॥ ज्ञात्वा च क्रोधताम्राक्षौ
युयुधाते परस्परम् ॥ ३३ ॥ कियता चैव कालेन भग्नभूतौ विवस्वता ॥ हिमाचले गिरौ प्राप्य तेपतुः परमं तपः ॥ ३४ ॥ त्रिवर्षान्ते च सा देवी
महाकाली समागता ॥ अर्चितं च वरं ताभ्यां ददौ तद्भक्तिवत्सला ॥३५॥ पुनस्तौ च समागम्य युयुधाते विवस्वता ॥ विवस्वान्भयभीतश्च त्यक्त्वा
युद्धं पराभवत् ॥ ३६ ॥ तत्र स्थिता प्रिया संज्ञा वडवारूपधारिणी ॥ कुरुखंडे महारम्ये तपंती तप उल्बणम् ॥ ३७ ॥ गत्वा ददर्श भगवान्संज्ञां
संबोधकारिणीम् ॥ कामातुरो हयो भूत्वा तत्र रेमे तया सह ॥ ३८ ॥ पंचवर्षान्तरे संज्ञा गर्भं तस्माद्दधौ स्वयम् ॥ तनयौ च समुद्भूतौ दिव्य
रूपपराक्रमौ ॥ ३९ ॥ पितुर्दुःखं समालोक्य जग्मतू रविमण्डलम् ॥ जित्वा बंधू दुराचारौ क्रूरदृष्ट्या तदा स्वयम् ॥ ४० ॥ बद्ध्वा तौ स्वपितुः

---

[1] वृणुयात् ।

पार्श्वं संप्राप्तौ वडवासुतौ ॥ दृष्ट्वा विवस्वान्भगवान्वैरिणौ समुपागतौ ॥ ४१ ॥ संपीड्य ताडयामास लोहदंडैर्भयानकैः ॥ पंगुभूतौ पुनस्त्यक्त्वा छायापुत्रौ दिवाकरः ॥ ४२ ॥ आश्विनेयौ समालोक्य वचनं प्राह तौ मुदा ॥ जीव ईशो यथा मित्रे नरनारायणौ यथा ॥ एकनाम्ना युवां प्रीतौ नासत्यौ च भविष्यथः ॥ ४३ ॥ सोमशक्तिरिडादेवी ज्येष्ठपत्नी भविष्यति ॥ पिंगला सूर्यशक्तिश्च लघुपत्नी भविष्यति ॥ ४४ ॥ इडापतिस्स वै नाम द्वितीयः पिंगलापतिः ॥ द्वादशस्स नृणां राशेः क्रूरदृष्टिः शनैश्चरः ॥ तस्य शान्तिकरो ज्येष्ठो भविष्यति महीतले ॥ ४५ ॥ द्वितीयश्च नृणां राशेः सावर्णिर्भ्रमकारकः ॥ तस्य शान्तिकरो भूमौ भविता पिंगलापतिः ॥ ४६ ॥ जन्मराशिस्थिता देवी तपंती तापकारिणी ॥ इडा च पिंगला तस्याः शान्तिकर्त्र्यौ भविष्यतः ॥ ४७ ॥ इति श्रुत्वा वचस्तस्य सुरवैद्यौ बभूवतुः ॥ सावर्णिश्च शनी राहुः केतुः स्वर्गप्रतापनः ॥ तेषां तु परिहारार्थौ दस्रौ चाश्विनिसंभवौ ॥ ४८ ॥ सूत उवाच ॥ इति श्रुत्वा गुरोर्वाक्यं प्रसन्नौ सुरसत्तमौ ॥ स्वांशान्महीतले जातौ शूद्रयोन्यां रवेस्सुतौ ॥ ४९ ॥ चाण्डालस्य गृहे जातश्छागहंतुरिडापतिः ॥ सधनो नाम विख्यातः पितृमातृपरायणः ॥ ५० ॥ शालिग्रामशिलातुल्यं छागमांसं विचिक्रिये ॥ कबीरं समुपागम्य शिष्यो भूत्वा रराज वै ॥ ५१ ॥ स तु सत्यनिधिः पूर्वं ब्रह्मणस्तप आस्थितः ॥ भयभीतां च गां तत्र चाण्डालाय ह्यदर्शयत् ॥ राजगेहे करस्तस्मात्सधनस्य लयं गतः ॥ ५२ ॥ चर्मकारगृहे जातो द्वितीयः पिंगलापतिः ॥ मानदासस्य तनयो रैदास इति विश्रुतः ॥ ५३ ॥ पुरीं काशीं समागम्य कबीरं रामतत्परम् ॥ जित्वा मतविवादेन शंकराचार्यमागतः ॥ ५४ ॥ तयोर्विवादो ह्यभवदहोरात्रं मतान्तरे ॥ पराजितस्स रैदासो नत्वा तं द्विजसत्तमम् ॥ रामानन्दमुपागम्य तस्य शिष्यत्वमागतः ॥ ५५ ॥ इति ते कथितं विप्र सुरांशाश्च यथाभवन् ॥ कलिशुद्धिकरी लीला तेषां मार्गप्रदर्शिनाम् ॥ ५६ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडापरपर्याये कलियुगीयेतिहाससमुच्चये अश्विनीकुमारावतारे सधनरैदाससमुत्पत्तिवर्णनं नामाऽष्टादशोऽध्यायः ॥ १८ ॥ सूत उवाच ॥ ॥ इत्युक्त्वा भगवाञ्जीवो देवमाहात्म्यमुत्तमम् ॥ स्वमुखात्स्वांशमुत्पाद्य ब्रह्मयोनौ बभूव ह ॥ १ ॥ इष्टिका नगरी रम्या गुरुदत्तस्य वै सुतः ॥ रोपणो नाम विख्यातो ब्रह्ममार्गप्रदर्शकः ॥ २ ॥ सूत्रग्रंथमयीं मालां तिलकं जलनिर्मितम् ॥ वासुदेवेति तन्मंत्रं कलौ कृत्वा जनेजने ॥ ३ ॥ कृष्णचैतन्यमागम्य कंबलं च तदाज्ञया ॥ गृहीत्वा स्वपुरीं प्राप्य कृष्णध्यानपरोभवत् ॥ ४ ॥ अतः परं शृणु मुने चरित्रं च हरेर्मुदा ॥ यच्छ्रुत्वा च कलौ घोरे जनो नैव भयं व्रजेत् ॥ ५ ॥ पंचाब्दे कृष्णचैतन्ये यज्ञांशे यज्ञकारिणि ॥ वंगदेशभवो विप्र ईश्वरः शारदाप्रियः ॥ ६ ॥

प्राप्तः शान्तिपुरे ग्रामे वाग्देवीवरदर्पितः ॥ सतां दिग्विजयं कृत्वा सर्वशास्त्रविशारदः ॥ ७ ॥ गंगाकूले स्तवं दिव्यं रचित्वा[१] सोऽपठद्विजः ॥
एतस्मिन्नंतरे तत्र यज्ञांशस्समुपागतः ॥ उवाच वचनं रम्यमीश्वरं स्तुतिकारिणम् ॥८॥ सुकृतं पूर्तमर्णं च श्रुतीनां सारमेव हि ॥ इत्युक्तं भवता
स्तोत्रे दूषणं भूषणं वद ॥९॥ तथाह चेश्वरो धीमान्दूषणं नैव दृश्यते ॥ इत्युक्त्वा प्राह भगवान्भूषणं नैव दृश्यते ॥१०॥ सुकृतं च स्मृतं धर्मः
पूर्तं चैतन्यमुच्यते ॥ अर्णं वीर्यमिति ज्ञेयं श्रुतिसारमतस्त्रयम् ॥ गंगाजले दूषणोऽयं भूषणोऽयं कलेवरे॥ ११ ॥ इति श्रुत्वा स वै भिक्षुर्विस्मितो
ऽभूच्च गीःप्रियः ॥ लज्जितं स्वजनं दृष्ट्वा शारदा सर्वमंगला ॥ विहस्येश्वरमित्याह कृष्णश्चैतन्यसंज्ञकः ॥ १२॥ इति श्रुत्वा तु तच्छिष्यः कृष्ण
मंत्रउपासकः ॥ बभूव वैष्णवश्रेष्ठः कृष्णचैतन्यसेवकः ॥ १३ ॥ ॥ सूत उवाच ॥ ॥ श्रीधरो नाम विख्यातो ब्राह्मणः शिवपूजकः ॥
पत्तने नगरे रम्ये तस्य सप्ताहमुत्तमम् ॥ १४ ॥ राज्ञा भागवतं तत्र कारितं सधनं बहु ॥ गृहीत्वा श्रीधरो विप्रो जगाम श्वशुरालये ॥ १५ ॥
तत्रोष्य मासमात्रं च स्वपत्न्या सह वै द्विजः ॥ स्वगेहमगमन्मार्गे चोराः सप्त तु तं प्रति ॥ शपथं रामदेवस्य कृत्वा सार्द्धमुपाययुः ॥ १६ ॥
समाप्ते विपिने रम्ये हत्वा ते श्रीधरं द्विजम् ॥ गोरथं सधनं तत्र सभार्यं जगृहुस्तदा ॥ १७ ॥ एतस्मिन्नंतरे रामः सच्चिदानंदविग्रहः ॥ सप्त तांश्च
शरैर्हत्वा पुनरुज्जीव्य तं द्विजम् ॥१८॥ प्रेषयामास भगवांस्तदा वृन्दावने प्रभुः ॥ तदाप्रभृति वै विप्रः श्रीधरो वैष्णवोऽभवत् ॥ १९ ॥ सप्ताब्दे
चैव यज्ञांशे गत्वा शांतिपुरीं शुभाम् ॥ ब्रह्मज्ञानमुपागम्य यज्ञांशाच्छिष्यतां गतः ॥ टीका भागवतस्यैव कृता तेन महात्मना ॥ २० ॥
॥ ॥ सूत उवाच ॥ ॥ रामशर्मा स्थितः काश्यां शंकरार्चनतत्परः ॥ शिवरात्रे द्विजो धीमानविमुक्तेश्वरस्थले ॥ एकाकी जागरन्ध्यानी
जप्त्वा पंचाक्षरं शुभम् ॥ २१ ॥ तदा प्रसन्नो भगवाञ्छंकरो लोकशंकरः ॥ वरं ब्रूहीति वचनं तमाह द्विजसत्तमम् ॥ २२ ॥ रामशर्मा शिवं नत्वा
वचनं प्राह नम्रधीः ॥ भवान्यस्य समाधिस्थो ध्याने यस्य परो भवान् ॥ २३ ॥ स देवो हृदये मह्यं वसेत्तव वरात्प्रभो ॥ इत्युक्तवचने तस्मि
न्विहस्याह महेश्वरः ॥ २४ ॥ एका वै प्रकृतिर्माया त्रिधा ब्रह्मस्वरूपिणी ॥ शून्यभूताव्ययस्यैव पुरुषस्यार्द्धतेजसम् ॥ गृहीत्वा लोकजननीं
पुंक्लीबौ सुषुवे सुतौ ॥ २५ ॥ पुमान्नारायणः साक्षाद्गौरश्चाष्टभुजैर्युतः ॥ त्रिधा बभूव भगवान्स्वेच्छया विश्वरक्षकः ॥ २६ ॥ अर्धतेजास्स वै
विष्णुर्वनमाली चतुर्भुजः ॥ क्षीरशायी स आदित्यः स्वयं सद्गुणदेवता ॥ २७ ॥ अर्धतेजा द्विधा सैव नरनारायणावृषी ॥ जिष्णुर्विष्णुः स वै

---

[१] रचयित्वा ।

ज्ञेयो पर्वते गन्धमादने ॥ २८ ॥ क्लीबः संकर्षणः साक्षाद्ब्रह्मरूपं त्रिधाभवत् ॥ पूर्वार्द्धाद्गौरशेषश्च परार्धाद्रामलक्ष्मणौ ॥ २९ ॥ गौरशेषो द्वापरान्ते बलभद्रः स वै स्वयम् ॥ रामलक्ष्मणयोर्ध्यानं बलभद्रस्य पूजनम् ॥ सदा मया च कर्तव्यं तत्प्राप्य त्वं सुखी भव ॥ ३० ॥ इत्युक्त्वान्तर्दधे देवो रामानन्दस्य चाभवत् ॥ कृष्णचैतन्यमागम्य द्वादशाब्दवयोवृतम् ॥ ३१ ॥ शिष्यो भूत्वा स्थितस्तत्र कृष्णचैतन्यपूजकः ॥ कृतं तदाज्ञया तेनाध्यात्मरामायणं शुभम् ॥ ३२ ॥ ॥ सूत उवाच ॥ ॥ जीवानन्दस्स वै विप्रो रूपानन्दसमन्वितः ॥ श्रुत्वा चैतन्यचरितं पुरीं शांतिमयीं गतः ॥ ३३ ॥ चैतन्ये षोडशाब्दे च नत्वा तं तौ समास्थितौ ॥ ऊचतुः कृष्णचैतन्यं भवता किं मतं स्मृतम् ॥ ३४ ॥ विहस्याह स चैतन्यः शाक्तोऽहं शक्तिपूजकः ॥ शैवोऽहं वै द्विजौ[1] नित्यं लोकार्थे शंकरव्रती ॥ वैष्णवोऽहं ध्यानपरो देवदेवस्य भक्तिमान् ॥ ३५ ॥ अहं भक्तिमदं पीत्वा पापपुंसो बलिं शुभम् ॥ शक्त्यै समर्प्य होमान्ते ज्ञानाग्नौ यज्ञतत्परः ॥ ३६ ॥ इति श्रुत्वा द्विजौ तौ तु तस्य शिष्यत्वमागतौ ॥ आचारमार्गमागम्य सर्वपूज्यौ बभूवतुः ॥ ३७ ॥ तदाज्ञयाषट्सन्दर्भं जीवानन्दश्चकार वै ॥ उवास तत्र मतिमान्कृष्णचैतन्यसेवकः ॥ ३८ ॥ रूपानन्दो गुरोराज्ञां पुरस्कृत्य महामुनिः ॥ कृष्णखंडं पुराणांगं चक्रे दशसहस्रकम् ॥ तत्रोष्य गुरुसेवाढ्यो राधाकृष्णप्रपूजकः ॥ ३९ ॥ ॥ सूत उवाच ॥ ॥ विष्णुस्वामी स वै विप्रो गतः शांतिपुरीं शुभाम् ॥ यज्ञांश ऊनविंशाब्दे नत्वा तं प्राह स द्विजः ॥ ॥ ४० ॥ को देवः सर्वदेवानां पूज्यो ब्रह्माण्डगोचरे ॥ इति श्रुत्वा स भगवानुवाच द्विजसत्तमम् ॥४१॥ सर्वपूज्यो महादेवो भक्तानुग्रहकारकः ॥ विष्णवीश्वरश्च रुद्रेशो ब्रह्मेशो भगवान्हरः ॥ ४२ ॥ विना तत्पूजकेनैव पदार्था निष्फला हि ते ॥ ये तु वै विष्णुभक्ताश्च शंकरार्चनतत्पराः ॥४३॥ शिवप्रसादात्सुलभा वैष्णवी भक्तिरुत्तमा ॥ वैष्णवः पुरुषो भूत्वा शंकरं लोकशङ्करम् ॥ ४४ ॥ कर्मभूम्यां समागम्य न पूजयति नारकः ॥ विष्णुस्वामीति तच्छ्रुत्वा शिष्यो भूत्वा च तद्गुणैः ॥ ४५ ॥ कृष्णमंत्रमुपासित्वा[2] स बभूव शिवार्चकः ॥ ४६ ॥ वैष्णवी संहिता तेन निर्मिता च तदाज्ञया ॥ तत्रोष्य विष्णुभक्तश्च कृष्णचैतन्यपूजकः ॥ ४७ ॥ ॥ सूत उवाच ॥ ॥ मध्वाचार्यः कृष्णपरो ज्ञात्वा यज्ञांशमुत्तमम् ॥ गत्वा शांतिपुरीं रम्यां नत्वा तं प्राह स द्विजः ॥ ४८ ॥ कृष्णोऽयं भगवान्साक्षात्तदन्ये विश्वकारकाः ॥ देवा धात्रादयो ज्ञेयास्तर्हि तत्पूजनेन किम् ॥ ४९ ॥ शक्तिमार्गपरा विप्रा वृथा हिंसामयैर्मखैः ॥ अश्वमेधादिभिर्देवान्पूजयन्ति महीतले ॥ ५० ॥ इति श्रुत्वा विहस्याह

---

[1] इदमुभयोस्सम्बोधनम् । [2] ल्यबभाव आर्षः ।

यज्ञांशश्च शचीसुतः ॥ न कृष्णो भगवान्साक्षात्तामसोऽयं च शक्तिजः ॥ ५१ ॥ चौरोऽयं सर्वभोगी च हिंसको मांसभक्षकः ॥ परस्त्रियं भजेद्यो
वै स गच्छेद्यममंदिरम् ॥ ५२ ॥ चौरो यमालयं गच्छेज्जीवहंता विशेषतः ॥ एभिश्च लक्षणैर्हीनो भगवान्प्रकृतेः परः ॥ ५३ ॥ यस्य बुद्धिः स
वै ब्रह्माऽहंकारो यस्य वै शिवः ॥ शब्दमात्रा गणेशश्च स्पर्शमात्रा यमः स्वयम् ॥ ५४ ॥ रूपमात्रा कुमारो वै रसमात्रा च यक्षराट् ॥ गन्धमात्रा
विश्वकर्मा श्रवणं भगवाञ्छनिः ॥ ५५ ॥ यस्य त्वक्स बुधो ज्ञेयश्चक्षुस्सूर्यः सनातनः ॥ यज्जित्वा भगवाञ्छुक्रो घ्राणस्तस्याश्विनीसुतौ ॥५६॥
यन्मुखं भगवाञ्जीवो यस्य हस्तस्तु देवराट् ॥ कृष्णोऽयं तस्य चरणौ लिंगं दक्षः प्रजापतिः ॥ गुदं तद्भगवान्मृत्युस्तस्मै भगवते नमः ॥५७॥
हिंसायज्ञैश्च भगवान्स च तृप्तिमवाप्नुयात् ॥ स च यज्ञपशुर्वह्नौ ब्रह्मभूयाय कल्पते ॥ तस्य मोक्षप्रभावेन महत्पुण्यमवाप्नुयात् ॥५८॥ विधिहीनो
नरः पापी हिंसायज्ञं करोति यः ॥ अंधतामिस्रनरकं तद्दोषेण वसेच्चिरम् ॥ ५९ ॥ महत्पुण्यं महत्पापं हिंसायज्ञेषु वर्तते ॥ अतस्तु भगवान्कृष्णो
हिंसायज्ञं कलौ युगे ॥ ६० ॥ समाप्य कार्तिके मासि प्रतिपच्छुक्लपक्षके ॥ अन्नकूटमयं यज्ञं स्थापयामास भूतले ॥ ६१ ॥ देवराजस्तदा क्रुद्धो
ह्यनुजं प्रति दुःखितः ॥ व्रजं संप्लावयामास तदा कृष्णः सनातनीम् ॥ प्रकृतिं स च तुष्टाव लोकमङ्गलहेतवे ॥ ६२॥ तदा सा प्रकृतिर्माता स्वपूर्वां
दिव्यविग्रहम् ॥ राधारूपं महत्कृत्वा हृदि कृष्णस्य चागता ॥ ६३ ॥ तच्छक्त्या भगवान्कृष्णो धृत्वा गोवर्धनं गिरिम् ॥ नाम्ना गिरिधरो देवः
सर्वपूज्यो बभूव ह ॥ ६४ ॥ राधाकृष्णस्स भगवान्पूर्णब्रह्म सनातनः ॥ अतः कृष्णो न भगवान्राधाकृष्णः परः प्रभुः ॥ ६५ ॥ इति श्रुत्वा वच
स्तस्य मध्वाचार्यो हरिप्रियः ॥ शिष्यो भूत्वा स्थितस्तत्र कृष्णचैतन्यपूजकः ॥ ६६ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडा
परपर्याये कलियुगीयेतिहाससमुच्चये कृष्णचैतन्ययज्ञांशशिष्यबलभद्रविष्णुस्वामिमध्वाचार्यादिवृत्तांतवर्णनं नामैकोनविंशोऽध्यायः ॥ १९ ॥
॥ ॥ सूत उवाच ॥ ॥ भट्टोजिस्स च शुद्धात्मा शिवभक्तिपरायणः ॥ कृष्णचैतन्यमागम्य नमस्कृत्य वचोऽब्रवीत् ॥ १ ॥ महादेवो गुरुः
स वै शिव आत्मा शरीरिणाम् ॥ विष्णुर्ब्रह्मा च तद्दासौ तर्हि तत्पूजनेन किम् ॥ २ ॥ इति श्रुत्वा स यज्ञांशो विंशदब्दवयोवृतः ॥ विहस्याह स
भट्टोजिं नायं शंभुर्महेश्वरः ॥ ३ ॥ समर्थो भगवाञ्छंभुः कर्ता किन्न शरीरिणाम् ॥ न भर्ता च विना विष्णुं संहर्तायं सदा शिवः ॥४॥ एकमूर्ति
स्त्रिधा जाता ब्रह्मा विष्णुर्महेश्वरः ॥ शाक्तमार्गेण भगवान्ब्रह्मा मोक्षप्रदायकः ॥ ५ ॥ विष्णुर्वैष्णवमार्गेण जीवानां मोक्षदायकः ॥ शंभुर्वै शैवमा
र्गेण मोक्षदाता शरीरिणाम् ॥ ६ ॥ शाक्तः सदाश्रमो गेही यज्ञभुक्पितृदेवगः ॥ वानप्रस्थाश्रमी यो वै वैष्णवः कन्दमूलभुक् ॥ ७ ॥ यत्याश्रमः

सदा रौद्रो निर्गुणः शुद्धविग्रहः ॥ ब्रह्मचर्याश्रमस्तेषामनुगामी महाश्रमः ॥ ८ ॥ इति श्रुत्वा गुरोर्वाक्यं शिष्यो भूत्वा स वै द्विजः ॥ तृतीयांगं च
वेदानां व्याचख्यौ पाणिनिकृतम् ॥ ९ ॥ तदाज्ञया च सिद्धान्तकौमुद्यास्स चकार ह ॥ तत्रोष्य दीक्षितो धीमान्कृष्णचैतन्यसेवकः ॥
॥ १० ॥ ॥ सूत उवाच ॥ ॥ वराहमिहिरो धीमान्स च सूर्यपरायणः ॥ द्वाविंशाब्दे च यज्ञांशे तमागत्य वचोब्रवीत् ॥ ११ ॥ सूर्योऽयं भग
वान्साक्षात्त्रयो देवा यतोऽभवन् ॥ प्रातर्ब्रह्मा च मध्याह्ने विष्णुःसायं सदाशिवः ॥ १२ ॥ अतो रवेः शुभा पूजा त्रिदेवयजनेन किम् ॥ इति श्रुत्वा
स यज्ञांशो विहस्याह शुभं वचः ॥ १३ ॥ द्विधा बभूव प्रकृतिरपरा च परा तथा ॥ नाममात्रा तथा पुष्पमात्रा तन्मात्रिका तथा ॥ १४ ॥ शब्द
मात्रा स्पर्शमात्रा रूपमात्रा रसा तथा ॥ गंधमात्रा तथा ज्ञेया परा प्रकृतिरष्टधा ॥ १५ ॥ अपरायां जीवभूता नित्यशुद्धा जगन्मयी ॥ भूमिरा
पोऽनलो वायुः खं मनोबुद्धिरेव च ॥ अहंकार इति ज्ञेया प्रकृतिश्चापराष्टधा ॥ १६ ॥ विष्णुर्ब्रह्मा महादेवो गणेशो यमराड् गुहः ॥कुबेरो विश्वकर्मा
च परा प्रकृतिदेवता ॥ १७ ॥ सुमेरुर्वरुणो वह्निर्वायुश्चैव ध्रुवस्तथा ॥ सोमो रविस्तथा शेषोऽपरा प्रकृतिदेवता ॥ १८ ॥ अतः सोमपती रुद्रो
रविः स्वामी विधिः स्वयम् ॥ शेषस्वामी हरिः साक्षान्नमस्तेभ्यो नमोनमः ॥ १९ ॥ इति श्रुत्वा तदा विप्रः शिष्यो भूत्वा च तद्गुरोः ॥ तदाज्ञया
चतुर्थांगं ज्योतिःशास्त्रं चकार ह ॥ २० ॥ वराहसंहिता नाम बृहज्जातकमेव हि ॥ क्षुद्रतंत्रांस्तथान्यान्वै कृत्वा तत्र स चावसत् ॥ २१ ॥
॥ सूत उवाच ॥ ॥ वाणीभूषण एवापि शिवभक्तिपरायणः ॥ कृष्णचैतन्यमागम्य वचः प्राह विनम्रधीः ॥ २२ ॥ विष्णुमाया जगद्धात्री
सैका प्रकृतिरुत्कृता ॥ तया जातमिदं विश्वं विश्वाद्देवसमुद्भवः ॥ २३ ॥ विश्वेदेवस्स पुरुषश्शक्तिजो बहुधाभवत् ॥ ब्रह्मा विष्णुर्हरश्चैव देवाः
प्रकृतिसंभवाः ॥ अतो भगवती पूज्या तर्हि तत्पूजनेन किम् ॥ २४ ॥ इति श्रुत्वा स यज्ञांशो विहस्याह द्विजोत्तमम् ॥ न वै भगवती
श्रेष्ठा जडरूपा गुणात्मिका ॥ २५ ॥ एका सा प्रकृतिर्माया रचितुर्जगतां क्षमा ॥ पुरुषस्य सहायेन योषितेव नरस्य च ॥ २६ ॥ देवीभागवते
शास्त्रे प्रसिद्धेयं कथा द्विज ॥ कदाचित्प्रकृतिर्देवी स्वेच्छयेदं जगत्खलु ॥ २७ ॥ निर्मितं जडभूतं तद्बहुधा बोधितं तया ॥ न
चैतन्यमभूद्विप्रा विस्मिता प्रकृतिस्तदा ॥ २८ ॥ शून्यभूतं च पुरुषं चैतन्यं समतोषयत् ॥ प्रविष्टो भगवान्देवीमायाजनितगोलके॥२९॥
स्वप्नवद्वा स्वयं जातश्चैतन्यमभवज्जगत् ॥ अतः श्रेष्ठः स भगवान्पुरुषो निर्गुणः परः ॥ ३० ॥ प्रकृत्यां स्वेच्छया जातो लिंगरूपस्तदाऽभवत् ॥
पुँल्लिंगप्रकृतौ जातः पुँल्लिंगोऽयं सनातनः॥३१॥स्त्रीलिंगप्रकृतौ जातः स्त्रीलिंगोऽयं सनातनः॥ नपुंस्कप्रकृतौ जातः क्लीबरूपः स वै प्रभुः ॥३२॥

अव्ययप्रकृतौ जातो निर्गुणोऽयमधोक्षजः ॥ नमस्तस्मै भगवते शून्यरूपाय साक्षिणे ॥ ३३ ॥ इति श्रुत्वा तु तद्वाक्यं शिष्यो भूत्वा स वै
द्विजः ॥ त्रिविंशाब्दे च यज्ञांशे तत्र वासमकारयत् ॥ ३४ ॥ छंदोग्रंथं तु वेदांगं स्वनाम्ना तेन निर्मितम् ॥ राधाकृष्णपरं नाम जप्त्वा हर्ष
मवाप्तवान् ॥ ३५ ॥ ॥ सूत उवाच ॥ ॥ धन्वंतरिर्द्विजो नाम ब्रह्मभक्तिपरायणः ॥ कृष्णचैतन्यमागम्य नत्वा वचनमब्रवीत् ॥३६॥ भवांस्तु
पुरुषः श्रेष्ठो नित्यशुद्धस्सनातनः ॥ जडभूता च तन्माया समर्थो भगवान्स्वयम् ॥३७॥ नित्योऽव्यक्तः परः सूक्ष्मस्तस्मात्प्रकृतिरुद्भवः ॥ अतः
पूज्यस्स भगवान्प्रकृत्याः पूजनेन किम् ॥ ३८ ॥ इति श्रुत्वा विहस्याह यज्ञांशस्सर्वशास्त्रगः ॥ नायं श्रेष्ठस्स पुरुषो न क्षमः प्रकृतिं विना ॥
॥ ३९ ॥ पुराणे चैव वाराहे प्रसिद्धेयं कथा शुभा ॥ कदाचित्पुरुषो नित्यो नाममात्रः स्वकेच्छया ॥ बभूव बहुधा तत्र यथा प्रेतस्तथा स्वयम्॥
॥ ४० ॥ असमर्थो विरचितुं जगन्ति पुरुषः परः ॥ तुष्टाव प्रकृतिं देवीं चिरकालं सनातनीम् ॥४१॥ तदा देवी च तं प्राप्य महत्तत्वं चकार ह॥
सोऽहंकारश्च महतो जातस्तन्मात्रिकास्ततः ॥ ४२ ॥ महाभूतान्यतोऽप्यासंस्तैः संजातमिदं जगत् ॥४३॥ अतस्सनातनौ चोभौ पुरुषात्प्रकृतिः
परा ॥ प्रकृतेः पुरुषश्चैव तस्मात्ताभ्यां नमोनमः ॥४४॥ इति धन्वंतरिः श्रुत्वा शिष्यो भूत्वा च तद्गुरोः ॥ तत्रोष्य चैव वेदांगं कल्पवेदं चकार
ह ॥ सुश्रुतादपरे चापि शिष्या धन्वंतरेः स्मृताः ॥४५॥ ॥ सूत उवाच ॥ ॥ जयदेवस्स वै विप्रो बौद्धमार्गपरायणः ॥ कृष्णचैतन्यमागम्य पञ्च
विंशवयोवृतम् ॥ नत्वोवाच वचो रम्यं स च श्रेष्ठ उषापतिः ॥४६॥ यस्य नाभेरभूत्पद्मं ब्रह्मणा सह निर्गतम् ॥ अतस्स ब्रह्मसूर्नाम सामवेदेषु गीयते॥
॥ ४७ ॥ विश्वो नारायणस्साक्षाद्यस्य केतौ समास्थितः ॥ विश्वकेतुरतो नाम न निरुद्धोऽनिरुद्धकः ॥४८॥ ब्रह्मवेला च तत्पत्नी नित्या चोषा
महोत्तमा ॥ स वै लोकहितार्थाय स्वयमर्चावतारकः ॥४९॥ इति श्रुत्वा विहस्याह यज्ञांशस्तं द्विजोत्तमम् ॥ वेदोनारायणःसाक्षात्पूजनीयो नरैः
सदा ॥५०॥ ततः कालस्ततः कर्म ततो धर्मः प्रवर्तते ॥ धर्मात्कामः समुद्भूतः कामपत्नी रतिः स्वयम् ॥५१॥ रत्यां कामात्समुद्भूतोऽनिरुद्धो
नामदेवता ॥ उषा सा तस्य भगिनी तेन सार्द्धं समुद्भवा ॥५२॥ कालो नाम स वै कृष्णो राधा तस्य सहोदरा॥ कर्मरूपः स वै ब्रह्मा निय
तिस्तत्सहोदरा ॥५३॥ धर्मरूपो महादेवः श्रद्धा तस्य सहोदरा ॥ अनिरुद्धः कथं चेशो भवतोक्तः सनातनः ॥५४॥ त्रिधा सृष्टिश्च ब्रह्माण्डे स्थूला
सूक्ष्मा च कारणा ॥ स्थूलसृष्ट्यै समुद्भूतो देवो नारायणः स्वयम् ॥ ५५ ॥ नारायणी च तच्छक्तिस्तयोर्जलसमुद्भवः ॥ जलाज्जातस्स वै शेष
स्तस्योपरि समास्थितौ ॥५६॥ सुप्ते नारायणे देवे नाभेः पंकजमुत्तमम् ॥ अनंतयोजनायाममुदभूच्च ततो विधिः ॥५७॥ विधेः स्थूलमयी सृष्टि

दैंवतिर्य्यङ्नरादिका ॥ सूक्ष्मसृष्ट्यै समुद्भूतः सोऽनिरुद्ध उषापतिः ॥ ५८ ॥ ततो वीर्यमयं तोयं जातं ब्रह्माण्डमस्तके ॥ वीर्याज्जातस्स वै
शेषस्तस्योपरि स चास्थितः ॥ ५९ ॥ तस्य नाभेस्समुद्भूतो ब्रह्मा लोकपितामहः ॥ सूक्ष्मसृष्टिस्ततो जाता यथा स्वप्नेपि दृश्यते ॥ ६० ॥ हेतु
सृष्ट्यै समुद्भूतो वेदो नारायणः स्वयम् ॥ वेदात्कालस्ततः कर्म ततो धर्मादयः स्मृताः ॥ ६१ ॥ त्वद्गुरुश्च जगन्नाथ उड्रदेशनिवासकः ॥ मया
तत्रैव गन्तव्यं सशिष्येणाद्य भो द्विजाः ॥ ६२ ॥ इति श्रुत्वा तु वचनं कृष्णचैतन्यकिंकराः ॥ स्वान्स्वाञ्छिष्यान्समाहूय तत्पश्चात्प्रययुश्च
ते ॥ ६३ ॥ शांकरा द्वादशगणा रामानुजमुपाययुः ॥ नामदेवादयस्तत्र गणास्सप्त समागताः ॥ ६४ ॥ रामानन्दं नमस्कृत्य संस्थितास्तस्य
सेवकाः ॥ रोपणश्च तदागत्य स्वशिष्यैर्बहुभिर्वृतः ॥ ६५ ॥ कृष्णचैतन्यमागम्य नमस्कृत्य स्थितः स्वयम् ॥ जगन्नाथपुरीं ते वै प्रययुर्भक्ति
तत्पराः ॥ ६६ ॥ निधयः सिद्धयस्तत्र तेषां सेवार्थमागताः ॥ सर्वे च दशसाहस्रा वैष्णवाः शैवशाक्तकैः ॥ ६७ ॥ यज्ञांशं च पुरस्कृत्य जग
न्नाथपुरीं ययुः ॥ अर्चावतारो भगवाननिरुद्ध उषापतिः ॥ ६८ ॥ तदागमनमालोक्य द्विजरूपधरो मुनिः ॥ जगन्नाथः स्वयं प्राप्तो यत्र यज्ञां
शकादयः ॥ ६९ ॥ यज्ञांशस्तं समालोक्य नत्वा वचनमब्रवीत् ॥ किं मतं भवता ज्ञातं कलौ प्राप्ते भयानके ॥ ७० ॥ तत्सर्वं कृपया ब्रूहि श्रोतु
मिच्छामि तत्त्वतः ॥ इति श्रुत्वा तु वचनं जगन्नाथो हरिः स्वयम् ॥ उवाच वचनं रम्यं लोकमंगलहेतवे ॥ ७१ ॥ मिश्रदेशोद्भवा म्लेच्छाः
काश्यपेनैव शासिताः ॥ संस्कृताः शूद्रवर्णेन ब्रह्मवर्णमुपागताः ॥ ७२ ॥ शिखासूत्रं समाधाय पठित्वा वेदमुत्तमम् ॥ यज्ञैश्च पूजयामासु
र्दैंवदेवं शचीपतिम् ॥ ७३ ॥ दुःखितो भगवानिन्द्रः श्वेतद्वीपमुपागतः ॥ स्तुत्या मां बोधयामास देवमंगलहेतवे ॥ ७४ ॥ प्रबुद्धं मां वचः
प्राह शृणु देव दयानिधे ॥ शूद्रसंस्कृतमन्नं च खादितुं न द्विजोऽर्हति ॥ ७५ ॥ तथा च शूद्रजनितैर्यज्ञैस्तृप्तिं न चाप्नुयाम् ॥ काश्यपे स्वर्गते
प्राप्ते मागधे राज्ञि शासति ॥ ७६ ॥ मम शत्रुर्बलिर्दैत्यः कलिपक्षमुपागतः ॥ निस्तेजाश्च यथाऽहं स्यां तथा वै कर्तुमुद्यतः ॥ ७७ ॥ मिश्रदेशो
द्भवे म्लेच्छे सांस्कृती तेन संस्कृता ॥ भाषा देवविनाशाय दैत्यानां वर्द्धनाय च ॥ ७८ ॥ आर्य्येषु प्राकृती भाषा दूषिता तेन वै कृता ॥
अतो मां रक्ष भगवन्भवंतं शरणागतम् ॥ ७९ ॥ इति श्रुत्वा तदाहं वै देवराजमुवाच ह ॥ भवन्तो द्वादशादित्या गन्तुमर्हंति भूतले ॥ ८० ॥
अहं लोकहितार्थाय जनिष्यामि कलौ युगे ॥ प्रवीणो निपुणोऽभिज्ञः कुशलश्च कृती सुखी ॥ ८१ ॥ निष्णातः शिक्षितश्चैव सर्वज्ञः सुगत

स्तथा ॥ प्रबुद्धश्च तथा बुद्ध आदित्याः क्रमतो [1]भवाः ॥ ८२ ॥ धाता मित्रोऽर्यमा शक्रो मेघः प्रांशुर्भगस्तथा ॥ विवस्वांश्च तथा पूषा सविता त्वाष्ट्रविष्णुकौ ॥ कीकटे देश आगत्य ते सुरा जज्ञिरे क्रमात् ॥ ८३ ॥ वेदनिन्दां पुरस्कृत्य बौद्धशास्त्रमचीकरन् ॥ तेभ्यो वेदान्समादाय मुनिभ्यः प्रददुस्सुराः ॥ ८४ ॥ वेदनिंदाप्रभावेण ते सुराः कुष्ठिनोऽभवन्॥विष्णुदेवमुपागम्य तुष्टुवुर्बौद्धरूपिणम् ॥ ८५ ॥ हार्योगबलेनैव तेषां कुष्ठमनाशयत् ॥ तद्दोषान्नग्नभूतश्च बौद्धस्स तेजसाभवत् ॥ ८६ ॥ पूर्वार्द्धान्नेमिनाथश्च परार्द्धाद्बौद्ध एव च ॥ बौद्धराज्यविनाशाय दारुपाषाणरूपवान् ॥ ८७ ॥ अहं सिंधुतटे जातो लोकमंगलहेतवे ॥ इन्द्रद्युम्नश्च नृपतिः स्वर्गलोकादुपागतः ॥ मंदिरं रचितं तेन तत्राहं समुपागतः॥८८॥ अत्र स्थितश्च यज्ञांशप्रसादमहिमा महान् ॥ सर्ववांछितदं लोके स्थापयामास मोक्षदम् ॥ ८९ ॥ वर्णधर्मश्च नैवात्र वेदधर्मस्तथा न हि ॥ व्रतं चात्र न यज्ञांशमण्डले योजनान्तरे ॥ ९० ॥ येनोक्ता यावनी भाषा येन बौद्धो विलोकितः ॥ तस्य प्राप्तं महत्पापं स्थितोऽहं तदघापहः ॥ मां विलोक्य नरः शुद्धः कलिकाले भविष्यति ॥ ९१ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये कृष्णचैतन्यचरित्रे जगन्नाथमाहात्म्यवर्णनंनाम विंशोऽध्यायः ॥ २० ॥छ॥

॥ सूत उवाच ॥ ॥ इति श्रुत्वा वचस्तस्य जगन्नाथस्य धीमतः ॥ कृष्णचैतन्य एवापि तमुवाच प्रसन्नधीः ॥ १ ॥ भगवन्प्राणिनां श्रेयो यदुक्तं भवता मुने ॥ विस्तरात्तत्कथां ब्रूहि यथा बौद्धसमुद्भवः ॥ २ ॥ ॥ ॥ जगन्नाथ उवाच ॥ ॥ सहस्राब्दे कलौ प्राप्ते कर्मभूम्यां च भारते ॥ कण्वो नाम मुनिश्रेष्ठस्संप्राप्तः कश्यपात्मजः ॥ ३ ॥ आर्यावती देवकन्या कण्वस्य दयिता प्रिया ॥ शक्राज्ञया च संप्राप्तौ दंपती शारदातटे ॥ ४ ॥ सरस्वतीं नदीरूपां कुरुक्षेत्रनिवासिनीम् ॥ चतुर्वेदमयैः स्तोत्रैः कण्वस्तुष्टाव नम्रधीः ॥ ५ ॥ वर्षमात्रान्तरे देवी प्रसन्ना समुपागता ॥ आर्यसृष्टिसमृद्धौ सा ददौ तस्मै वरं शुभम् ॥ ६ ॥ दशपुत्रास्तयोर्जाता आर्यबुद्धिकरा हि ते ॥ उपाध्यायो दीक्षितश्च पाठकः शुक्लमिश्रकौ ॥ ७ ॥ अग्निहोत्री द्विवेदी च त्रिवेदी पाण्ड एव च ॥ चतुर्वेदीति कथिता यथा नाम तथा गुणाः ॥ ८ ॥ ते वै सरस्वतीं देवीं तुष्टुवुर्नम्रकंधराः ॥ द्वादशाब्दवयोभ्यश्च तेभ्यो देवी स्वशक्तितः ॥ कृत्वा कन्या ददौ माता शारदा भक्तिवत्सला ॥९॥ उपाध्यायी दीक्षिता च पाठकी शुक्लिका क्रमात्॥ मिश्राणी च तथा ज्ञेया षष्ठी सा चग्निहोत्रिणी ॥ १० ॥ द्विवेदिनी तथा ज्ञेया चाष्टमी च त्रिवेदिनी ॥ पाण्डायनी च नवमी दशमी तुर्यवेदिनी ॥११॥ तासां च स्वपतिभ्यो वै सुताः षोडश षोडश ॥ ते तु गोत्रकरा

---

[1] पचाद्यच् । भवेयुरित्यर्थः ।

ज्ञेयास्तेषां नामानि मे शृणु ॥१२॥ कश्यपश्च भरद्वाजो विश्वामित्रोऽथ गौतमः ॥ जमदग्निर्वशिष्ठश्च वत्सो गौतम एव च ॥१३॥ पराशरस्तथा गर्गोऽत्रिर्भृगुश्चांगिरास्तथा ॥ शृंगी कात्यायनश्चैव याज्ञवल्क्यः क्रमात्सुताः॥ इति नाम्ना सुतास्सर्वे ज्ञेयाः षोडशषोडश ॥१४॥ सरस्वत्याज्ञया कण्वो मिश्रदेशमुपाययौ ॥ म्लेच्छान्संस्कृतमाभाष्य तदा दशसहस्रकान् ॥ वशीकृत्य स्वयं प्राप्तो ब्रह्मावर्ते महोत्तमे ॥१५॥ ते सर्वे तपसा देवीं तुष्टुवुश्च सरस्वतीम् ॥ पंचवर्षान्तरे देवी प्रादुर्भूता सरस्वती ॥ सपत्नीकाँश्च तान्म्लेच्छाञ्छूद्रवर्णाय चाकरोत् ॥ १६ ॥ कारुवृत्तिकरास्सर्वे बभूवुर्बहुपुत्रकाः ॥ द्विसहस्रास्तदा तेषां मध्ये वैश्या बभूविरे ॥ १७ ॥ तन्मध्ये चाचार्यपृथुर्नाम्ना कश्यपसेवकः ॥ तपसा स च तुष्टाव द्वादशाब्दं महामुनिम् ॥ १८ ॥ तदा प्रसन्नो भगवान्कण्वो देववराद्वरः ॥ तेषां चकार राजानं राजपुत्रपुरं ददौ ॥ १९ ॥ राजन्या नाम तत्पनी मागधं सुषुवे तदा ॥ तस्मै कण्वो ददौ ग्रामं पूर्वस्यां दिशि मागधम् ॥ २० ॥ स्वर्गलोकं पुनः प्राप्तः स मुनिः कश्यपात्मजः ॥ स्वर्गते काश्यपे विप्रे ते म्लेच्छाः शूद्रवर्णकाः ॥२१॥ यज्ञैस्समर्चयामासुर्देवदेवं शचीपतिम् ॥ दुःखितो भगवानिन्द्रस्सबंधुर्जगतीतले ॥२२॥ वेदानाहर्तुमिच्छन्तो ब्रह्मयोनौ बभूविरे॥ जिनो नाम द्विजः कश्चित्तत्पत्नी जयनी स्मृता ॥२३॥ कश्यपाददितेरंशाज्जातौ तौ कीकटस्थले ॥ तयोस्सकाशात्संजाता आदित्या लोकहेतवे॥ ॥२४॥ कर्मनाशानदीतीरे पुरी बोधगया स्मृता ॥ तत्रोष्य बौद्धशास्त्राढ्याश्चक्रुः शास्त्रार्थमुत्तमम् ॥२५॥ वेदाञ्छूद्रेभ्य आहृत्य विशालां प्रययुः पुरीम् ॥ समाधिस्थान्मुनीन्सर्वान्समुत्थाप्य ददुः स्वयम् ॥२६॥ गतास्सर्वे सुरास्स्वर्गे ततः प्रभृतिभूतले ॥ म्लेच्छा बभूविरे बौद्धास्तदन्ये वेदतत्पराः ॥ २७ ॥ सरस्वत्याः प्रभावेण त आर्या बहवोऽभवन् ॥ तैश्च देवपितृभ्यश्च हव्यं कव्यं समर्पितम् ॥२८॥ तृप्तिमंतः सुराश्चासंस्त आर्याणां सहस्रकाः ॥ सप्तविंशच्छते भूमौ कलौ संवत्सरे गते ॥ २९ ॥ बलिना प्रेषितो भूमौ मयः प्राप्तो महासुरः ॥ शाक्यसिंहगुरुर्गेयो बहुमायाप्रवर्तकः ॥ ३० ॥ स नाम्ना गौतमाचार्यो दैत्यपक्षविवर्द्धकः ॥ सर्वतीर्थेषु तेनैव यंत्राणि स्थापितानि वै ॥ ३१ ॥ तेषामधो गता ये तु बौद्धाश्चासन्समन्ततः ॥ शिखासूत्रविहीनाश्च बभूवुर्वर्णसंकराः ॥ ३२ ॥ दश कोट्यः स्मृता आर्या बभूवुर्बौद्धमार्गिणः ॥ पंचलक्षास्तदा शेषाः प्रययुर्गिरिमूर्द्धनि ॥ ३३ ॥ चतुर्वेदप्रभावेण राजन्या वह्निवंशजाः ॥ चत्वारिंशभवा योधास्तैश्च बौद्धास्समुज्झिताः ॥ ३४ ॥ आर्यांस्तांस्ते तु संस्कृत्य विंध्याद्रेर्दक्षिणे कृतान् ॥ तत्रैव स्थापयामासुर्वर्णरूपान्समंततः ॥ आर्यावर्तः पुण्यभूमिस्तत्रस्थाः पंचलक्षकाः ॥ ३५ ॥ ॥ सूत उवाच ॥ ॥ इति श्रुत्वा वचस्तस्य यज्ञांशो भगवान्हरिः ॥ ३६ ॥ जगन्नाथस्य शिष्योभूद्वेदमार्गपरायणः ॥ शुक्लदत्तस्य तनयो नित्यानन्दो द्विजोत्त

मः ॥ ३७ ॥ जगन्नाथपदं नत्वा शिष्यो भूत्वा रराज ह ॥ तदा प्रसन्नो भगवाननिरुद्ध उषापतिः॥३८॥अभिषेकं तयोर्भाले महत्तत्वे चकार ह ॥
महत्त्वपदवी जाता तदा प्रभृतिभूतले ॥ ३९ ॥ गुरुबंधू प्रसन्नौ तौ स्वशिष्यान्प्रोचतुर्मुदा ॥ जगन्नाथस्य वदनं पद्मनाभेरुषापतेः ॥ दृष्ट्वा यश्चात्र
संप्राप्य स वै स्वर्गमवाप्नुयात् ॥ ४० ॥ प्रसादं यश्च भुंजीयां[1]त्तस्य देवस्य सादरम् ॥ कोटिजन्म भवेद्विप्रो वेदपात्रो महाधनी ॥ ४१ ॥ मार्कंडेय
वटे कृष्णं दृष्ट्वा स्नात्वा महोदधौ ॥ इन्द्रद्युम्नसरस्येव पुनर्जन्म न विन्दते ॥ ४२ ॥ इमां गाथां शृणो[2]द्यो वै श्रद्धाभक्तिसमन्वितः ॥ यत्पुरीग
मने पुण्यं फलं तच्छीघ्रमाप्नुयात् ॥ ४३ ॥ इति यज्ञांशवचनं श्रुत्वा स ह्यवतारकः ॥ वैष्णवैश्च तथेत्युक्त्वा तत्रैवान्तरधीयत ॥ ४४ ॥ एतस्मि
न्नंतरे विप्र कलिना प्रार्थितो बलिः ॥ मयदैत्यं समाहूय वचनं प्राह दुःखितः ॥ ४५ ॥ सुकन्दरो म्लेच्छपतिः सदा मद्वर्द्धने रतः ॥ सहायं
तस्य दैत्येन्द्र कुरु शीघ्रं ममाज्ञया ॥४६॥ इति श्रुत्वा बलेर्वाक्यं शतदैत्यसमन्वितः ॥ कर्मभूम्यां मयः प्राप्तः कलविद्याविद्याविशारदः ॥ ४७ ॥
म्लेच्छजातीन्नरान्दुष्टान्रेखागणितमुत्तमम् ॥ एकविंशतिमध्यायं कलवेदमशिक्षयत् ॥४८॥ तदा कलान्विता म्लेच्छाः कलाविद्याविशारदाः॥यंत्रा
णि कारयामासुः सप्तस्वेव पुरीषु च ॥ ४९ ॥ तदधो ये गतालोकास्ते सर्वे म्लेच्छतां गताः ॥ महत्कोलाहलं जातमार्याणां शोककारिणाम् ॥
॥ ५० ॥ श्रुत्वा ते वैष्णवाः सर्वे कृष्णचैतन्य सेवकाः ॥ दिव्यमंत्रं गुरोश्चैव पठित्वा प्रययुः पुरीम् ॥ ५१ ॥ रामानन्दस्य शिष्यो वै चायोध्या
यामुपागतः ॥ कृत्वा विलोमं तं मंत्रं वैष्णवांस्तानकारयत् ॥ ५२ ॥ भाले त्रिशूलचिह्नं च श्वेतरक्तं तदाभवत् ॥ कंठे च तुलसी माला
जिह्वा राममयी कृता ॥ ५३ ॥ म्लेच्छास्ते वैष्णवाश्चासन्रामानन्दप्रभावतः ॥ संयोगिनश्च ते ज्ञेया रामानन्दमते स्थिताः ॥ ५४ ॥ आर्याश्च वै
ष्णवा मुख्या अयोध्यायां बभूविरे ॥ निंबादित्यो गतो धीमान्सशिष्यः कांचिकां पुरीम् ॥ म्लेच्छयंत्रं राजमार्गे स्थितं तत्र ददर्श ह॥५५॥विलोमं
स्वगुरोर्मंत्रं कृत्वा तत्र स चावसत् ॥ वंशपत्रसमा रेखा ललाटे कण्ठमालिका॥५६॥गोपीवल्लभमंत्रो हि मुखे तेषां रराज ह ॥ तदधो ये गता लोका
वैष्णवाश्च बभूविरे ॥५७॥ म्लेच्छाः संयोगिनो ज्ञेया आर्यास्तन्मार्गवैष्णवाः ॥ विष्णुस्वामी हरिद्वारे जगाम स्वगणैर्वृतः ॥५८॥ तत्र स्थितं महा
यंत्रं विलोमं तच्चकार ह॥तदधो ये गता लोका आसन्सर्वे च वैष्णवाः॥५९॥ऊर्ध्वपुंड्रं द्विरेखाभं तन्मध्ये बिंदुरुत्तमः॥ललाटे च स्थितस्तेषां कण्ठे
तुलसिगोलकम् ॥ ६० ॥ मुखे साधवमंत्रश्च बभूव हितदायकः ॥ मथुरायां समायातो मध्वाचार्यो हरिप्रियः ॥६१॥ राजमार्गे स्थितं यंत्रं विलोमं

---

[1] प्रयोगोऽयमार्षः । [2] शृणुयात् ।

स चकार ह ॥ तदधो ये गता लोका वैष्णवास्तस्य पक्षगाः ॥६२॥ करवीरपत्रसदृशं ललाटे तिलकं शुभम् ॥ स्थितं नासार्द्धभागांते कंठे तुलसि
मालिका ॥ राधाकृष्णशुभं नाम मुखे तेषां बभूव ह ॥६३॥ शंकराचार्य एवापि शैवमार्गपरायणः ॥ रामानुजाज्ञया प्राप्तः पुरीं काशीं गणैर्युतः
॥६४॥ कृत्वा विलोमं तद्यंत्रं शैवाश्च तदधोऽभवन् ॥ त्रिपुंड्रं च स्थितं भाले कण्ठे रुद्राक्षमालिका ॥ गोविंदमंत्रश्च मुखे तेषां तत्र बभूव ह ॥६५॥
तोताद्र्यां च संप्राप्तस्तदा रामानुजः सुखी ॥ ऊर्ध्वरेखाद्वयोर्मध्ये सूक्ष्मरेखा च पीतिका ॥ ललाटे तु तथा कण्ठे माला तुलसिका शुभा ॥६६॥
उज्जयिन्यां च संप्राप्तो वराहमिहिरो गुणी ॥ तद्यंत्रं निष्फलं कृत्वा नराञ्छैवाँश्चकार ह ॥ ६७॥ चिताभस्म स्थितं भाले कण्ठे रुद्राक्षमालिका ॥
शिवेति मंगलं नाम तेषां तत्र बभूव ह ॥ ६८ ॥ कन्याकुब्जे स्वयं प्राप्तो वाणीभूषण एव हि ॥ अर्द्धचंद्राकृतिं पुंड्रं रक्तचंदनमालिका ॥
देव्याश्च निर्मलं नाम तेषां तत्र बभूव ह ॥ ६९ ॥ धन्वंतरिः प्रयागे च गत्वा तद्यंत्रमुत्तमम् ॥ विलोमं कृतवाँस्तत्र तदधो ये गता नराः ॥ ७०॥
अर्द्धं पुंड्रं स्मृतं रक्तं सबिंदु च ललाटके ॥ रक्तचंदनजा माला कंठे तेषां बभूवह ॥७१॥ भट्टोजिः स गतो धीमानुत्पलारम्यमुत्तमम् ॥ त्रिपुंड्रं च
तथा रक्तं कंठे रुद्राक्षमालिका ॥ विश्वनाथेति तन्मंत्रं तेषां तत्र बभूव ह॥७२॥ रोपणश्चैष्टिकां प्राप्तस्तद्यंत्रं चैव निष्फलम् ॥ कृत्वा जनेजने तत्र ब्रह्म
मार्गं ददर्श ह ॥७३॥ जयदेवः स्वयं प्राप्तो द्वारकां विष्णुभक्तिमान्॥तद्यंत्रं निष्फलं यातं तदधो ये गता नराः ॥७४॥ रक्तरेखा स्थिता भाले चैका
कंठे तु मालिका॥पद्माक्षा मंत्रगोविन्दस्तत्र तेषां बभूव ह॥एवं ते वैष्णवाः शैवाः शाक्तका बहुधाऽभवन्॥७५॥ निर्गुणाः शाक्तका ज्ञेयाः सगुणा वैष्णवाः
स्मृताः॥निर्गुणाः सगुणा ये तु शैवा ज्ञेया बुधैस्तदा॥७६॥समाधिस्थास्त्रयस्त्रिंशद्देवाः पुण्या बभूविरे ॥ नित्यानन्दः शान्तिपुरे नदीहापत्तने
हरिः ॥७७॥ कबीरो मागधे देशे रैदासस्तु कालिंजरे ॥ सधनो नैमिषारण्ये समाधिस्थो बभूव ह ॥७८॥ अद्यापि संस्थितो विप्र वैष्णवानां गणो
महान्॥ यज्ञभागमहावृद्धिः संजाता मेरुमूर्द्धनि ॥७९॥ इति ते कथितं विप्र यज्ञांशचरितं शुभम्॥ यच्छ्रुत्वा च नरा नार्यो महत्पुण्यमवाप्नुयुः॥
मयाद्या निष्फला दैत्या बलिपार्श्वमुपागताः ॥ ८० ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडापरपर्याये कलियुगीयेतिहाससमुच्चये
कृष्णचैतन्यचरित्रं नामैकविंशोऽध्यायः ॥ २१ ॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ इति श्रुत्वा बलिर्दैत्यो देवानां विजयं महत् ॥ रोषणं नाम
दैत्येंद्रं समाहूय वचोऽब्रवीत् ॥ १ ॥ सुतस्तिमिरलिंगस्य सरुषो नाम विश्रुतः ॥ त्वं हि तत्र समागम्य दैत्यकार्यं महत्कुरु ॥ २ ॥ इति श्रुत्वा
स वै दैत्यो हृदि विप्रान्तरोषणः ॥ ननाश वेदमार्गस्थान्देहलीदेशमास्थितः ॥ ३ ॥ पंचवर्षं कृतं राज्यं तत्सुतो बाबरोभवत् ॥ विंशदब्दं

कृतं राज्यं होमायुस्तत्सुतोऽभवत् ॥ ४ ॥ होमायुषा मदान्धेन देवताश्च निराकृताः ॥ ते सुराः कृष्णचैतन्यं नदीहोपवने स्थितम् ॥ ५ ॥
तुष्टुवुर्बहुधा तत्र श्रुत्वा क्रुद्धो हरिः स्वयम् ॥ स्वतेजसा च तद्राज्यं विघ्नभूतं चकार ह ॥ ६ ॥ तत्सैन्यजनितैर्लोकैर्होमायुश्च निराकृतः
महाराष्ट्रैस्तदा तत्र शेषशाकः समास्थितः ॥ ७ ॥ देहलीनगरे रम्ये म्लेच्छो राज्यं चकार ह ॥ धर्मकार्यं कृतं तेन तद्राज्यं पंचहायनम् ॥ ८ ॥
ब्रह्मचारी मुकुंदश्च शंकराचार्यगोत्रजः ॥ प्रयागे च तपः कुर्वन्विंशच्छिष्यैर्युतः स्थितः ॥ ९ ॥ बाबरेण च धूर्तेन म्लेच्छराजेन देवताः ॥
भ्रंशिताः स तदा ज्ञात्वा वह्नौ देहं जुहाव वै ॥ १० ॥ तस्य शिष्या गता वह्नौ म्लेच्छनाशनहेतुना ॥ गोदुग्धे च स्थितं रोम पीत्वा स पयसा
मुनिः ॥ ११ ॥ मुकुंदस्तस्य दोषेण म्लेच्छयोनौ बभूव ह ॥ होमायुषश्च काश्मीरे संस्थितस्यैव पुत्रकः ॥ १२ ॥ जातमात्रे सुते तस्मिन्वागुवाचाशरीरिणी ॥ अकस्माच्च वरो जातः पुत्रोऽयं सर्वभाग्यवान् ॥ १३ ॥ पैशाचे दारुणे मार्गे न भूतो न भविष्यति ॥ अतः सोकबरो नाम होमायुस्तनयस्तव ॥ १४ ॥ श्रीधरः श्रीपतिः शंभुर्वरेण्यश्च मधुव्रती ॥ विमलो देववान्सोमो वर्द्धनो वर्तको रुचिः ॥ १५ ॥ मांधाता मानकारी च केशवो माधवो मधुः ॥ देवापिः सोमपाः शूरो मदनो यस्य शिष्यकाः ॥ १६ ॥ स मुकुन्दो द्विजः श्रीमान्दैवात्त्वद्गेहमागतः ॥ इत्याकाशवचः
श्रुत्वा होमायुश्च प्रसन्नधीः ॥ १७ ॥ ददौ दानं क्षुधार्तेभ्यः प्रेम्णा पुत्रपमालयत् ॥ दशाब्दे तनये जाते देहलीदेशमागतः ॥ १८ ॥ शेषशाकं पराजित्य स च राजा बभूव ह ॥ अब्दं तेन कृतं राज्यं तत्पुत्रश्च नृपोभवत् ॥ १९ ॥ संप्राप्तेऽकबरे राज्यं सप्तशिष्याश्च तत्प्रियाः ॥ पूर्वजन्मनि
ये मुख्यास्ते प्राप्ता भूपतिं प्रति ॥ २० ॥ केशवो गानसेनश्च वैजवाक्स तु माधवः ॥ म्लेच्छास्ते च स्मृतास्तत्र हरिदासो मधुस्तथा ॥ २१ ॥
मध्वाचार्यकुले जातो वैष्णवः सर्वरागवित् ॥ पूर्वजन्मनि देवापिः स च वीरबलोऽभवत् ॥ २२ ॥ ब्राह्मणः पाश्चिमात्यो वै वाग्देवीवरदर्पितः ॥
सोमपा मानसिंहश्च गौतमान्वयसंभवः ॥ २३ ॥ सेनापतिश्च नृपतेरार्यभूपशिरोमणेः ॥ सूरश्चैव द्विजो जातो दक्षिणश्चैव पंडितः ॥ २४ ॥ बिल्वमंगल एवापि नाम्ना तन्नृपतेः सखा ॥ नायिकाभेदनिपुणो वेश्यानां स च पारगः ॥ २५ ॥ मदनो ब्राह्मणो जातः पौर्वात्यः स च नर्तकः ॥
चंदलो नाम विख्यातो रहःक्रीडाविशारदः ॥२६॥ अन्यदेशे गताः शिष्यास्तेषां पूर्वास्त्रयोदश ॥ अनपस्य सुतो जातः श्रीधरः शत्रुवेदितः ॥२७॥
विख्यातस्तुलसीशर्मा पुराणनिपुणः कविः ॥ नारीशिक्षां समादाय राघवानन्दमागतः ॥ २८ ॥ शिष्यो भूत्वा स्थितः काश्यां रामानन्दमते
स्थितः ॥ श्रीपतिः स बभूवान्धो मध्वाचार्यमते स्थितः ॥ २९ ॥ सूरदास इति ज्ञेयः कृष्णलीलाकरः कविः ॥ शंभुर्वै चंद्रभट्टस्य कुले जातो

हरिप्रियः ॥ ३० ॥ रामानन्दमते संस्थो भक्तकीर्तिपरायणः ॥ वरेण्यः सोग्रभुङ्नामा रामानंदमते स्थितः ॥ ३१ ॥ ज्ञानध्यानपरो नित्यं भाषाछंदकरः कविः ॥ मधुव्रती स वै जातो कीलको नाम विश्रुतः ॥ ३२ ॥ रामलीलाकरो धीमात्रामानन्दमते स्थितः ॥ विमलश्च स वै जातः स नाम्नैव दिवाकरः ॥ ३३ ॥ सीतालीलाकरो धीमात्रामानन्दमते स्थितः ॥ देववान्केशवो जातो विष्णुस्वामिमते स्थितः ॥ ॥ ३४ ॥ कविप्रियादिरचनां कृत्वा प्रेतत्वमागतः ॥ रामज्योत्स्नामयं ग्रंथं कृत्वा स्वर्गमुपाययौ ॥ ३५ ॥ सोमो जातः स वै व्यासो निम्बादित्यमते स्थितः ॥ रहः क्रीडामयं ग्रंथं कृत्वा स्वर्गमुपाययौ ॥ ३६ ॥ वर्द्धनश्च स वै जातो नाम्ना चरणदासकः ॥ ज्ञानमालामयं कृत्वा ग्रंथं रैदासमार्गगः ॥ ३७ ॥ वर्तकः स च वै जातो रोपणस्य मते स्थितः ॥ रत्नभानुरिति ज्ञेयो भाषाकर्ता च जैमिनेः ॥ ३८ ॥ रुचिश्च रोचनो जातो मध्वाचार्यमते स्थितः ॥ नानागानमयीं लीलां कृत्वा स्वर्गमुपाययौ ॥ ३९ ॥ मांधाता भूपतिर्नाम कायस्थः स बभूव ह ॥ मध्वाचार्यो भागवतं चक्रे भाषामयं शुभम् ॥ ४० ॥ मानकारो नारिभावान्नारीदेहमुपागतः ॥ मीरानामेति विख्याता भूपतेस्तनया शुभा ॥ ४१ ॥ मा शोभा च तनौ यस्या गतिर्गजसमा किल ॥ सा मीरा च बुधैः प्रोक्ता मध्वाचार्यमते स्थिता ॥ ४२ ॥ एवं ते कथितं विप्र भाषाग्रंथप्रकारणम् ॥ प्रबंधं मंगलकरं कलिकाले भयंकरे ॥ ४३ ॥ स भूपोऽकबरो नाम कृत्वा राज्यमकंटकम् ॥ शताद्धेन च शिष्यैश्च वैकुण्ठभवनं ययौ ॥ ४४ ॥ सलोमा तनयस्तस्य कृतं राज्यं पितुः समम् ॥ खुर्दकस्तनयस्तस्य दशाब्दं च कृतं पदम् ॥ ४५ ॥ चत्वारस्तनयास्तस्य नवरंगो हि मध्यमः ॥ पितरं च तथा भ्रातॄञ्जित्वा राज्यमचीकरत् ॥ ४६ ॥ पूर्वजन्मनि दैत्योऽयमन्धको नाम विश्रुतः ॥ कर्मभूम्यां तदंशेन दैत्यराजाज्ञया ययौ ॥ ४७ ॥ तेनैव बहुधा मूर्तीर्भ्रंशिताश्च समंततः ॥ दृष्ट्वा देवास्तदागत्य कृष्णचैतन्यमब्रुवन् ॥ ४८ ॥ भगवन्दैत्यराजांशः स जातश्च महीपतिः ॥ भ्रंशयित्वा सुरान्वेदान्दैत्यपक्षं विवर्द्धते ॥ ४९ ॥ इति श्रुत्वा स यज्ञांशो नदीहोपवने स्थितः ॥ शशाप तं दुराचारं यथा वंशक्षयो भवेत् ॥ ५० ॥ राज्यमेकोनपंचाशत्कृतं तेन दुरात्मना ॥ सेवाजयो नाम नृपो देवपक्षविवर्द्धनः ॥ ५१ ॥ महाराष्ट्रद्विजस्तस्य युद्धविद्याविशारदः ॥ हत्वा तं च दुराचारं तत्पुत्राय च तत्पदम् ॥ ५२ ॥ दत्वा ययौ दाक्षिणात्ये देशे देवविवर्द्धनः ॥ आलोमा नामतनयः पंचाब्दं तत्पदं कृतम् ॥ ५३ ॥ तत्पश्चान्मरणं प्राप्तो विद्रधेन रुजा मुने ॥ विक्रमस्य गते राज्ये सप्तत्युत्तरकं शतम् ॥ ५४ ॥ ज्ञेयं सप्त दशं विप्र यदालोमा मृतिं गतः ॥ तालनस्य कुले जातो म्लेच्छः फलरुषो बली ॥ ५५ ॥ मुकलस्य कुलं हत्वा स्वयं राज्यं चकार ह ॥

दशाब्दं च कृतं राज्यं तेन भूपेन भूतले ॥ ५६ ॥ शत्रुभिर्मरणं प्राप्तो दैत्यलोकमुपागमत् ॥ महामदस्तत्तनयो विंशत्यब्दं कृतं पदम् ॥ ५७ ॥
तद्राष्ट्रे नादरो नाम दैत्यो देश उपागमत् ॥ हत्वार्यांश्च सुराञ्जित्वा देशं खुरजमाययौ ॥ ५८ ॥ महामत्स्यो हि मदस्य तनयस्तत्पितुः पदम् ॥
गृहीत्वा पंचवर्षान्तं स च राज्यं चकार ह ॥ ५९ ॥ महाराष्ट्रैर्हतो दुष्टस्तालनान्वयसंभवः ॥ देहलीनगरे राज्यं दशाब्दं माधवेन वै ॥ ६० ॥
कृतं तत्र तदा म्लेच्छ आलोमा राज्यमाप्तवान् ॥ तद्राष्ट्रे बहवो जाता राजानो निजदेशजाः ॥ ६१ ॥ ग्रामपा बहवो भूपा देशेदेशे बभूविरे ॥
मण्डलीकपदं तत्राक्षयं जातं महीतले ॥ ६२ ॥ त्रिंशदब्दमतो जातं ग्रामेग्रामे नृपेनृपे ॥ तदा तु सकला देवाः कृष्णचैतन्यमाययुः ॥ ६३ ॥ यज्ञां
शश्च हरिः साक्षाज्ज्ञात्वा दुःखं महीतले ॥ मुहूर्तं ध्यानमागम्य देवान्वचनमब्रवीत् ॥ ६४ ॥ पुरा तु राघवो धीमाञ्जित्वा रावणराक्षसम् ॥ कपी
नुज्जीवयामास सुधावर्षैस्समंततः ॥ ६५ ॥ विकटो वृजिलो जालो वरलीनो हि सिंहलः ॥ जवस्सुमात्रश्च तथा नाम्ना ते क्षुद्रवानराः ॥ ६६ ॥
रामचंद्रं वचः प्राहुर्देहि नो वांछितं प्रभो ॥ रामो दाशरथिः श्रीमाञ्ज्ञात्वा तेषां मनोरथम् ॥ ६७ ॥ देवाङ्गनोद्भवाः कन्या रावणाल्लोकराव
णात् ॥ दत्त्वा तेभ्यो हरिस्साक्षाद्वचनं प्राह हर्षितः ॥ ६८ ॥ भवन्नाम्ना च ये द्वीपा जालंधरविनिर्मिताः ॥ तेषु राज्ञो भविष्यंति भवन्तो हितका
रिणः ॥ ६९ ॥ नन्दिन्या गोश्च रुंडाद्वै जाता म्लेच्छा भयानकाः ॥ गुरुण्डा जातयस्तेषां तास्तु तेषु सदा स्थिताः ॥७०॥ जित्वा तांश्च गुरुण्डान्वै
कुरुध्वं राज्यमुत्तमम् ॥ इति श्रुत्वा हरिं नत्वा द्वीपेषु प्रययुर्मुदा ॥ ७१ ॥ विकटान्वयसंभूता गुरुण्डा वानराननाः ॥ वाणिज्यार्थमिहायाता
गौरुण्डा बौद्धमार्गिणः ॥ ७२ ॥ ईशपुत्रमते संस्थास्तेषां हृदयमुत्तमम् ॥ सत्यव्रतं कामजितमक्रोधं सूर्यतत्परम् ॥ ७३ ॥ यूयं तत्रोष्य कार्यं
च नृणां कुरुत मा चिरम्॥ इति श्रुत्वा तु ते देवाः कुर्युरार्चिकमादरात् ॥७४॥ नगर्य्यां कलिकातायां स्थापयामासुरुद्यताः ॥ विकटे पश्चिमे द्वीपे
तत्पनी विकटावती ॥ ७५ ॥ अष्टकौशलमार्गेण राजमंत्रं चकार ह ॥ तत्पतिस्तु पुलोमार्चिः कलिकातां पुरीं स्थितः ॥ ७६ ॥ विक्रमस्य गते
राज्ये शतमष्टादशं कलौ ॥ चत्वारिंशं तथाब्दं च तदा राजा बभूव ह ॥७७॥ तदन्वये सप्तनृपा गुरुण्डाश्च बभूविरे ॥ चतुष्पष्टिमितं वर्षं राज्यं कृत्वा लयं
गताः ॥७८॥ गुरुण्डे चाष्टमे भूपे प्राप्ते न्यायेन शासति ॥ कलिपक्षो बलिर्दैत्यो मुरं नाम महासुरम् ॥७९॥ आरुह्य प्रेषयामास देवदेशे महोत्तमे ॥ स
मुरो वार्डिलं भूपं वशीकृत्य हृदि स्थितः ॥ ८० ॥ आर्यधर्मविनाशाय तस्य बुद्धिं चकार ह ॥ मूर्तिसंस्थास्तदा देवा गत्वा यज्ञांशयोगिनम्॥८१॥
नमस्कृत्याब्रुवन्सर्वे यथा प्राप्तो मुरोऽसुरः ॥ ज्ञात्वा शशाप कृष्णांशो गुरुण्डान्बौद्धमार्गिणः ॥८२॥ क्षयं यास्यंति ते सर्वे ये मुरस्य वशं गताः ॥

इत्युक्ते वचने तस्मिन्गुरुंडाः कालनोदिताः ॥ ८३ ॥ स्वसैन्यैश्च क्षयं जग्मुर्वर्षमात्रान्तरे खलाः ॥ सर्वे त्रिंशत्सहस्राश्च प्रययुर्यममंदिरे ॥ ८४ ॥
वाग्दंडैस्स च भूपालो वार्डिलो नाशमाप्तवान् ॥ गुरुण्डो नवमः प्राप्तो भेकलो नाम वीर्यवान् ॥८५॥ न्यायेन कृतवान्राज्यं द्वादशाब्दं प्रयत्नतः ॥
आर्यदेशे च तद्राज्यं बभूव न्यायशासति ॥ ८६ ॥ लार्डलो नाम विख्यातो गुरुण्डो दशमोहितः ॥ द्वात्रिंशाब्दं च तद्राज्यं कृतं तेनैव धर्मिणा ॥
॥ ८७ ॥ लार्डले स्वर्गते प्राप्ते मकरंदकुलोद्भवाः ॥ आर्याः प्राप्तास्तदा मौना हिमतुंगनिवासिनः ॥ ८८ ॥ बभ्रुवर्णाः सूक्ष्मनसो वर्तुला दीर्घम
स्तकाः ॥ एवं लक्षाश्च संप्राप्ता देहल्यां बौद्धमार्गिणः ॥ ८९ ॥ आर्जिको नाम वै राजा तेषां तत्र बभूव ह ॥ तस्य पुत्रो देवकणो गंगोत्रगिरि
मूर्द्धनि ॥ ९० ॥ द्वादशाब्दं तपो घोरं तेपे राज्यविवृद्धये ॥ तदा भगवती गंगा तपसा तस्य धीमतः ॥ ९१ ॥ स्वरूपं स्वेच्छया प्राप्य ब्रह्मलोकं
जगाम ह ॥ कुबेरश्च तदागत्य दत्त्वा तस्मै महत्पदम् ॥९२॥ आर्याणां मंडलीकं च तत्रैवान्तरधीयत॥ मण्डलीको देवकर्णो बभूव जनपालकः ॥
॥ ९३ ॥ षष्ट्यब्दं च कृतं राज्यं तेन राज्ञा महीतले ॥ तदन्वयेऽष्ट भूपाश्च बभूवुर्देवपूजकाः ॥ ९४ ॥ द्विशताब्दं पदं कृत्वा स्वर्गलोकमुपाययुः ॥
एकादशश्च यो मौनः पन्नगारिरिति श्रुतः ॥ ९५ ॥ चत्वारिंशच्च वर्षाणि राज्यं कृत्वा प्रयत्नतः ॥ स्वर्गलोकं गतो राजा पन्नगैर्मरणं गतः ॥ ९६ ॥
एवं च मौनजातीयैः कृतं राज्यं महीतले ॥ ९७ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये
गुरुण्डमौनराज्यवर्णनं नाम द्वाविंशोऽध्यायः ॥ २२ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ वैक्रमे राज्यविगते चतुष्षष्ट्युत्तरं मुने ॥ द्वाविंशदब्दशतकं
भूतनन्दिस्तदा नृपः ॥ १ ॥ कुबेरयक्षकान्मौनान्धनधान्यसमन्वितान् ॥ सार्द्धलक्षान्कलैर्घोरैर्जित्वा तान्युद्धकारिणः ॥ २ ॥ किलिकलायां स्वयं
राज्यं नागवंशैश्चकार ह ॥ आग्नेय्यां दिशि विख्याता पुण्डरीकेण निर्मिता ॥ ३ ॥ पुरी किलकिला नाम तत्र राजा बभूव ह ॥ पुण्डरीकादयो
नागास्तस्मिन्राज्यं प्रशासति ॥४॥ गेहेगेहे जनैस्सर्वैः पूजनीया बभूविरे ॥ स्वाहा स्वधा वषट्कारो देवपूजा महीतले ॥ ५ ॥ त्यक्त्वा देवानुपा
गम्य संस्थिता मेरुमूर्द्धनि ॥ शक्राज्ञया कुबेरस्तु शूकधान्यं समंततः ॥ ६ ॥ यक्षैः षडंशानादाय देवेभ्यः प्रददौ प्रभुः ॥ मणिस्वर्णादिवस्तूनि
मौनराज्येषु यानि वै ॥७॥ दत्तानि तानि कोशेषु पुनर्देवश्चकार ह ॥ मंडलीकं पदं तेन सत्कृतं भूतनन्दिना ॥८॥ शतार्द्धं तु ततो राजा शिशु
नन्दिर्बभूव ह ॥ नागपूजां पुरस्कृत्य तिरस्कृत्य सुरान्भुवि ॥ ९ ॥ चकार राज्यं विंशाब्दं यशोनन्दिस्ततोऽनुजः ॥ भ्रात्रासनं स्वयं प्राप्तो नाग
पूजापरायणः ॥१०॥ पंचविंशतिवर्षाणि स च राज्यमचीकरत् ॥ ततस्तत्तनयो राजा स बभूव प्रवीरकः ॥११॥ एकादशाब्दं तद्राज्यं कर्मभूम्यां

प्रकीर्तितम् ॥ कदाचित्स च बाह्लीके सेनया सार्द्धमागतः ॥ १२ ॥ तत्र तैरभवद्युद्धं पैशाचैर्म्लेच्छदारुणैः ॥ मासमात्रान्तरे म्लेच्छा लक्षसंख्या
मृतिं गताः ॥ १३ ॥ तथा षष्टिसहस्राश्च नागभक्ता लयं गताः ॥ बादलो नाम तद्राजा रोमजस्थो महाबलः ॥ १४ ॥ यशोनंदिनमाहूय ददौ
जालवतीं सुताम् ॥ गृहीत्वा म्लेच्छराजस्य सुतां गेहमुपागतः ॥ १५ ॥ गर्भो जातस्ततस्तस्यां बभूव तनयो बली ॥ बाह्लीको नाम विख्यातो
नागपूजनतत्परः ॥ १६ ॥ तदन्वये नृपा जाता बाह्लीकाश्च त्रयोदश ॥ चतुश्शतानि वर्षाणि कृत्वा राज्यं मृतिं गताः ॥ १७ ॥ अयोमुखे च
बाह्लीके राज्यमत्र प्रशासति ॥ तदा पितृगणास्सर्वे कृष्णचैतन्यमाययुः ॥ १८ ॥ नत्वोचुर्वचनं तत्र भगवञ्छृणु मे वचः ॥ वयं पितृगणा भूपै
र्नागवंश्यैर्निराकृताः ॥१९॥ श्राद्धतर्पणकर्माणि तैर्वयं वर्द्धितास्सदा ॥ पितृवृद्धात्सोमवृद्धिस्ततो देवाश्च वर्द्धनाः ॥२०॥ देववृद्धाल्लोकवृद्धिस्तस्मा
द्ब्रह्मा प्रजापतिः ॥ ब्रह्मवृद्धात्परं हर्षं गेहेगेहे जनेजने ॥ २१ ॥ अतोऽस्मान्रक्ष भगवन्प्रजाः पाहि सनातनीः ॥ इति श्रुत्वा वचस्तेषां यज्ञांशो
भगवान्हरिः ॥ २२ ॥ पुष्यमित्रं धर्मपरमार्यवंशविवर्द्धनम् ॥२३॥ जातमात्रः स वै बालः षोडशार्द्धवयोभवत् ॥ अयोनिर्योनिभूतांस्तानयोमुख
पुरस्सरान् ॥२४॥ जित्वा देशान्निराकृत्य स्वयं राज्यं गृहीतवान् ॥ यथा शिवांशतो जातो विक्रमो नाम भूपतिः॥२५॥ शकान्गंधर्वपक्षीयाञ्जित्वा
पूज्यो बभूव ह ॥ नागपक्षांस्तथा भूपान्गोलकास्यान्भयंकरान् ॥ २६ ॥ पुष्यमित्रस्तदा जित्वा सर्वपूज्योऽभवद्भुवि ॥ सप्तविंशच्छतं वर्षं द्विसप्तत्यु
त्तरं तथा ॥ २७ ॥ राज्यं विक्रमतो जातं समाप्तिमगमत्तदा ॥ पुष्यमित्रे राज्यपदं प्राप्ते समभवत्तदा ॥ २८ ॥ शतवर्षं राज्यपदं तेन धर्मात्मना
धृतम् ॥ अयोध्या मथुरा माया काशी कांची ह्यवन्तिका ॥२९॥ पुरी द्वारावती तेन राज्ञा च पुनरुद्धृताः ॥ कुरुसूकरपद्मानि क्षेत्राणि विविधानि
च ॥३०॥ नैमिषोत्पलवृन्दानां वनक्षेत्राणि भूतले ॥ नानातीर्थानि तेनैव स्थापितानि समन्ततः ॥३१॥ तदा कलिः स गंधर्वो देवतापितृदूषकः॥
ब्राह्मणं वपुरास्थाय पुष्यमित्रमुपागमत् ॥ ३२ ॥ नत्वोवाच प्रियं वाक्यं शृणु भूप दयापर ॥ आर्यदेशे पितृगणाः पूजार्हाः श्राद्धतर्पणैः ॥ ३३ ॥
अज्ञानमिति तज्ज्ञेयं भुवि यत्पितृपूजनम् ॥ मृता ये तु नरा भूमौ पूर्वकर्मवशानुगाः ॥ ३४ ॥ भवन्ति देहवन्तस्ते चतुराशीतिलक्षधा ॥
छद्मना मयदेवेन पितृपूजा विनिर्मिता ॥३५॥ वृथा श्रमं वृथा कर्म नृणां च पितृपूजनम् ॥ इति श्रुत्वा वचो घोरं विहस्याह महीपतिः ॥ ३६ ॥
भवान्मूर्खो महामूढो न जानीषे परं फलम् ॥ भुवर्लोके न ये दृष्टाः शून्यभूताश्च भास्वराः ॥ ३७ ॥ ये तु ते वै पितृगणाः पिण्डरूपविमानगाः॥
सत्पुत्रैश्च विधानेन पिंडदानं च यत्कृतम् ॥ ३८ ॥ तद्विमानं नभोजातं सर्वानन्दप्रदायकम् ॥ अब्दमात्रं स्थितिस्तेषां पिंडपायसरूपिणा

म् ॥ ३९ ॥ गीताष्टादशकाध्यायैः सप्तशत्याश्चरित्रकैः॥पावितं यत्तु वै पिंडं त्रिशताब्दं च तत्स्थितिः ॥ ४० ॥ श्राद्धतर्पणहीना ये दृश्यंते मानवा
भुवि ॥ ते सर्वे नारका ज्ञेयाः कुलमेकोत्तरं शतम् ॥ ४१ ॥ श्राद्धकर्म महान्धर्मः श्राद्धोऽयं सर्वकारणम् ॥ इति श्रुत्वा स गंधर्वः कलीराजोऽत्र
देहिनाम् ॥ ४२ ॥ नत्वोवाच नृपश्रेष्ठं प्रसन्नवदनो हि सः ॥ सखा भव ममाशु त्वं तवाहं नृप किंकरः ॥ ४३ ॥ कलिमित्रः पुष्यमित्रो भवा
न्भुवि भवेत्सदा ॥ यथा विक्रमराजस्य वैतालस्य च वै सखा ॥ ४४ ॥ सर्वकार्यकरोऽहं वै तथा तव न संशयः ॥ इत्युक्त्वा च नृपं धीरं समा
दाय स वै कलिः ॥ ४५ ॥ सप्तद्वीपांस्तथा खंडान्नभोमार्गाननेकशः ॥ स्वपृष्ठस्थाय राज्ञे च दर्शयामास वीर्यवान् ॥ ४६ ॥ आर्यधर्मं कलौ
स्थाप्य नष्टभूतं स वै नृपः ॥ त्यक्त्वा प्राणांश्च यज्ञांशे तेजस्तस्य समागमत् ॥ ४७ ॥ आंध्रदेशोद्भवो राजा सुगदो नाम वीर्यवान् ॥ विना भूपं
च तं देशं दृष्ट्वा राज्यमचीकरत् ॥ ४८ ॥ विंशदब्दं पदं तेन कर्मभूम्यां च सत्कृतम् ॥ तदन्वये षष्टिनृपा बभूवुर्बहुमार्गिणः ॥ ४९ ॥ पुष्यमित्रगते
राज्ये दशोत्तरशतत्रयम् ॥ तस्मिन्काले लयं जग्मुश्चांध्रदेशनिवासिनः ॥ ५० ॥ शतार्द्धाब्दं ततो भूमिर्विना राज्ञा बभूव ह ॥ तदा क्षुद्रा नरा
लुब्धा लुंठिताश्चौरदारुणैः ॥ ५१ ॥ दारिद्र्यमगमन्घोरं विना स्वर्णं च भूरभूत् ॥ पुनर्देवश्च भगवान्प्रार्थितस्तानुवाच ह ॥ ५२ ॥ देशे कौशलके
जातः सूर्य्यांशाच्च महीपतिः ॥ राक्षसारिरिति ख्यातो देवमार्गपरायणः ॥ ५३ ॥ ममाज्ञया स वै राजा भविष्यति महीतले ॥ इत्युक्त्वान्तर्दधे
विष्णुर्देवलोकानुपागमत् ॥ ५४ ॥ राक्षसारिमयोध्यायां स्थापयामासुरेव तम् ॥ आंध्रराष्ट्रे च यद्द्रव्यं राक्षसैश्च समाहृतम् ॥ ५५ ॥ तद्द्रव्यं राक्ष
साञ्जित्वा ग्रामेग्रामे चकार सः ॥ तारधातोरष्टमूल्यं सुवर्णं भुवि तत्कृतम् ॥ ५६ ॥ आरधतोः शतं मूल्यं राजतं तेन वै कृतम् ॥ ताम्रधातोः
पञ्चमूल्यमारधातोश्च तत्कृतम् ॥ ५७ ॥ नागधातोः पञ्चमूल्यं भुवि तेनैव निर्मितम् ॥ ताम्रं पवित्रमधिकं नागो वंगस्तथोत्तमः ॥ ५८ ॥ लौह
धातोः शतं मूल्यं वंगोऽसौ तेन सत्कृतः ॥ शतार्द्धाब्दं महीं भुक्त्वा सूर्यलोकमुपाययौ ॥ ५९ ॥ तदन्वये षष्टिनृपा जाता वेदपरायणाः ॥ पुष्य
मित्रगते राज्ये चाब्दे सप्तशते गते ॥ ६० ॥ कौशलान्वयसंभूता भूपाः स्वर्गमुपाययुः ॥ शतार्द्धाब्दं ततो भूमिर्मण्डलीकं नृपं विना ॥ ६१ ॥
क्षुद्रभूपांश्च बुभुजे देशेदेशे च भार्गवः ॥ ततो बैदरदेशीयो नाम्ना भूपो विशारदः ॥ ६२ ॥ आर्यदेशमुपागम्य लक्षसैन्यसमन्वितः ॥ क्षुद्रभूपान्व
शीकृत्य मण्डलीको बभूव ह ॥ ६३ ॥ नानाकलैश्च कर्माणि विचित्राणि महीतले ॥ ग्रामेग्रामे नराश्चक्रुर्वर्णसंकरकारकाः ॥ ६४ ॥ ब्रह्मक्षत्रमयो
वर्णो नाममात्रेण दृश्यते ॥ वैश्यप्राया नरा आर्याः शूद्रप्रायाश्च कारिणः ॥ ६५ ॥ तद्राष्ट्रे मनुजाश्चासन्नाममात्रं सुरार्चकाः ॥ षष्टिवर्षं पदं तेन

कर्मभूम्यां च सत्कृतम् ॥ ६६ ॥ ततो नृपा महीं प्राप्ताः षट्संख्यास्तु तदन्वयाः ॥ पुष्यमित्रगते राष्ट्रे शतषोडशहायनी ॥ ६७ ॥ वैदूरा निधनं
जग्मुः कलिकाले भयानके ॥ चतुश्शतानि वर्षाणि क्षुद्ररूपा च भूरभूत् ॥ ६८ ॥ तत्पश्चान्नैषधे राष्ट्रे कालामाली नृपोऽभवत् ॥ क्षुद्रभूपान्वशी
कृत्य स्वयं राजा बभूव वै ॥ ६९ ॥ यमाभूया भुवि त्वष्ट्रा नगरी यमुनातटे ॥ निर्मिता योजनायामा कालकालेति विश्रुता ॥ ७० ॥ तत्रार्यदेश
भूपानां पूज्यो राजा स चाभवत् ॥ देवान्पितॄंस्तिरस्कृत्य प्रेतपूजां जनेजने ॥ ७१ ॥ कालमाली च कृतवान्देशनैषधसंस्थितः ॥ द्वात्रिंशद्वर्ष
राज्यं तद्बभूव जनपीडनम् ॥ ७२ ॥ तदन्वये षष्टिनृपा बभूवुः प्रेतपूजकाः ॥ शताब्दांतमभूद्राज्यं तेषां नैषधदेशिनाम् ॥७३॥ सहस्राब्दं तु तत्पश्चा
त्क्षुद्रभूपा मही ह्यभूत् ॥ सुरार्चनं वेदमार्गः श्रुतमात्रश्च दृश्यते॥७४॥ पुष्यमित्रगते राज्ये चैकत्रिंशच्छते कलौ ॥ द्वात्रिंशदुत्तरे चैव तदा देवाश्च दुःखि
ताः॥७५॥कृष्णचैतन्यमागम्य नत्वोचुर्वचनं प्रियम् ॥ भगवन्कलिकालेऽद्यवर्णाश्चत्वारिभूतले ॥७६॥ भ्रष्टाचाराः प्रेतमयाः शतार्द्धाब्दप्रजीविनः ॥
देवान्पितॄंस्तिरस्कृत्य पिशाचान्पूजयन्ति वै ॥ ७७ ॥ ग्रामेग्रामे च कुघ्नानि पूजितानि नरैर्भुवि ॥ दृश्यंतेऽस्माभिरद्यैव दुःखिताश्च नरा भृशम् ॥
॥ ७८ ॥ भूतप्रेतपिशाचाश्च डाकिनीशाकिनीगणाः ॥ स्वपूजाभिर्मदांधाश्च निंदयंति सुरान्पितॄन् ॥ ७९ ॥ अतोस्मान्दुर्बलान्विद्धि सबला
न्भूतनायकान् ॥ कृपया पाहि नः स्वामिन्छरणागतवत्सल ॥ ८० ॥ इति श्रुत्वा स यज्ञांशो नदीहोपवने स्थितः ॥ नम्रभूतान्सुरान्प्राह मागधे
तु महीपतिः ॥ ८१ ॥ पुरंजयो ब्रह्मपरस्तस्य पत्नी पुरंजनी ॥ मदाज्ञया तयोः पुत्रो भविष्यति महाबलः ॥ ८२ ॥ विश्वस्फूर्जिरिति ख्यातो ब्रह्म
मार्गपरो गुणी ॥ इत्युक्तवचने तस्मिन्गर्भं धत्ते पुरंजनी ॥ ८३ ॥ दशमासान्तरे जातो विश्वस्फूर्जिर्महाबलः ॥ जातमात्रे सुते तस्मिन्वागुवाचाश
रीरिणी ॥ ८४ ॥ पुष्यमित्रो यथा चासीद्वर्णधर्मप्रवर्तकः ॥ तथायं बालको जातो ब्रह्ममार्गपरो बली ॥ ८५ ॥ करिष्यति परो वर्णान्कलिंदयदुम
द्रकान् ॥ प्रजाश्च ब्रह्मभूयिष्ठाः स्थापयिष्यति दुर्मतीः ॥ ८६ ॥ वीर्यवान्क्षत्रमुत्साद्य पद्मवत्याः स वै पुरम् ॥ इत्याकाशवचः श्रुत्वा स नृपस्तु
पुरंजयः ॥ ८७ ॥ ददौ दानं क्षुधार्तेभ्योऽतिथिभ्यस्सपरिच्छदः ॥ अष्टौ वर्षसहस्राणि चाष्टवर्षशतानि च ॥ ८८ ॥ कर्मभूम्यां कलौ प्राप्ते व्यती
तानि तदा मुने ॥ विश्वस्फूर्जिर्नृपश्चासीन्महाबुद्धो महाबलः ॥ ८९ ॥ क्षुद्रभूपान्वशीकृत्य सर्ववर्णान्नरांस्तदा ॥ स्थापयामास वै ब्रह्मे वर्णे ब्रह्मप
रायणे ॥ ९० ॥ क्षत्रविट्च्छूद्रका वर्णाः पिशाचा वर्णसंकराः ॥ गुरुण्डाद्यास्तथा म्लेच्छा ब्राह्मणास्ते बभूविरे ॥ ९१ ॥ संध्यातर्पणदेवानां पूजा

---

१ नपुंसकत्वमार्षम् ।

दिविविधाः क्रियाः ॥ चक्रुस्ते वेदविधिना तुल्यभोजनशीलिनः ॥ ९२ ॥ षष्टिवर्षं कृतं राज्यं तेन सम्यक्कृता मुने ॥ तदन्वये नृपाश्चासन्सहस्रा
भुवि विश्रुताः ॥ ९३ ॥ अयुताब्दान्तरे जाता ब्रह्ममार्गपरायणाः ॥ तैश्च दत्तानि भागानि यज्ञमध्ये विधानतः ॥९४॥ दैत्येभ्यश्च सुरेभ्यश्च तुल्य
रूपाणि चागमन् ॥ विस्मिताश्च सुरास्सर्वे यज्ञांशं शरणं ययुः ॥ ९५ ॥ तदुक्तं कारणं ज्ञात्वा शक्रपुत्र उवाच तान् ॥ वेदो नारायणः साक्षाद्वि
वेकी हंसरूपवान् ॥ ९६ ॥ नृणां च गुणभेदेन वर्णभेदं चकार ह ॥ सद्गुणो ब्राह्मणो वर्णः क्षत्रियस्तु रजोगुणः ॥ ९७ ॥ तमोगुणस्तथा वैश्यो
गुणसाम्यात्तु शूद्रकः ॥ तृप्तिं यांति पितुर्वृन्दा ब्राह्मणैः क्षत्रियैः सुराः ॥ ९८ ॥ वैश्यैश्च यक्षरक्षांसि शूद्रैर्दैत्याश्च दानवाः ॥ एकवर्णे च चत्वारो
वर्णाः कायस्थ एव सः ॥९९॥ भूतप्रेतविशाचाद्याः कायस्थैस्तर्पितास्सदा ॥ ब्रह्मवर्णे तु वर्णाश्चस्थिताश्चत्वारि सांप्रतम् ॥१००॥ ब्रह्मशंकरवर्णोऽयं
तेभ्यः पूर्वं हि दानवाः ॥ अर्द्धतृप्ता भविष्यन्ति तत्पश्चात्स्वर्गवासिनः ॥१०१॥ अतोऽहं च कलौ घोरे युष्मदर्थे महीतले ॥ सौराष्ट्रनृपतेर्गेहं स्वां
शाद्यास्यामि भोः सुराः ॥ १०२ ॥ इत्युक्त्वा स च यज्ञांशः सोमनाथः कलैकया ॥ नाम्ना बभूव तद्गेहे सौराष्ट्रनगरीस्थितः ॥ १०३ ॥ जित्वा
भूपान्स्वयं राज्यं चकाराब्धितटे मुदा ॥ क्षत्रवर्णमयी भूमिस्तदा जाता कलौ युगे ॥१०४॥ सोमनाथः स वै यज्ञैः सुरान्सर्वानतर्पयत् ॥ शताब्दं
च कृतं राज्यं तेन देवप्रसादतः ॥ १०५ ॥ तस्य राज्यमयं संवदभवल्लोकविश्रुतम् ॥ तदन्वये सार्द्धशतं भूपाश्चासन्सुरप्रियाः ॥ १०६ ॥ अयु
ताब्दान्तरे किंचिदधिके च सुखप्रदाः ॥ कर्मभूम्यां कलौ प्राप्ते हायना अयुतत्रयम् ॥ १०७ ॥ व्यतीतं च ततो दैत्या दुःखिताः कलिमब्रुवन् ॥
पुरास्माभिः शताब्दं च तपसा वै महेश्वरः॥१०८॥ तुष्टीकृतस्तदास्मभ्यं भवान्दत्तो हितेन वै ॥ अर्धभागं वज्रमयमर्धभागं च कोमलम्॥१०९॥
तवांगं सुन्दरं देव कलेऽस्मान्रक्ष दुःखितान् ॥ इति श्रुत्वा च स कलिर्दैत्यपक्षविवर्द्धनः ॥ ११० ॥ स्वांशाज्जन्म कलौ प्राप्य गुर्जरे देशदारुणे ॥
आभीरी सिंहिका नाम सिंहमांसाशना खला ॥ १११ ॥ तस्या योनौ समागम्य राहुर्नाम स चाभवत् ॥ यथा राहुर्नभोमार्गे दारुणो हि विधुं
तुदः ॥ ११२ ॥ तथा राहुः कलेरंशो भुवि जातः सुरंतुदः ॥ जातमात्रे सुते तस्मिन्भूमिकम्पो महानभूत् ॥११३॥ विपरीता ग्रहाः सर्वे जनयंति
महद्भयम् ॥ तद्भयात्सकला देवास्त्यक्त्वा मूर्तीः समंततः ॥ ११४ ॥ महेंद्रं शरणं जग्मुः सुमेरुगिरिमूर्द्धनि ॥ तदर्थे भगवाञ्छक्रस्तुष्टाव जगदं
बिकाम् ॥११५॥ कन्यामूर्तिमयी देवी सुरान्प्राह शिवंकरी ॥ ममांगदर्शनाद्देवाः क्षुत्तृड्भ्यां च विना सदा ॥११६॥ भवध्वं च ततो यूयं मद्विलो
कनतत्पराः ॥ इति श्रुत्वा तु ते देवा हर्षिताः संबभूविरे ॥ ११७ ॥ आभीरीतनयो राहुः कृत्वा राज्यं शतं समाः ॥ त्यक्त्वा प्राणान्कलौ लीनो

बभूव मुनिसत्तम ॥ ११८ ॥ तदन्वये सार्द्धशतमयुताब्दान्तरेभवत् ॥ महामदमतं घोरं चिरकालाद्विनाशितम् ॥ ११९ ॥ तैः पुनश्चोद्धृतं भूमौ
सर्वे म्लेच्छा बभूविरे ॥ न वेदाश्च न देवाश्च न वर्णाश्च कलौ युगे ॥ १२० ॥ दृश्यन्ते न च मर्यादा कलिकाले तदन्वये ॥ द्विजशेषाः सह
स्राश्च पुनरर्बुदमूर्द्धनि ॥ १२१ ॥ द्वादशाब्दं प्रयत्नेन देवानाराधितुं क्षमाः ॥ अर्बुदाच्च समुद्भूतो राजन्यः खड्गचर्मधृक् ॥ १२२ ॥
जित्वा म्लेच्छान्दुराधर्षान्नाम्ना चार्वबली ह्यभूत् ॥ पंचयोजनमाना स भूमिरात्मविवृद्धये ॥ १२३ ॥ निर्मिता तेन शुद्धेन नाम्ना
चार्वपुरी स्मृता ॥ शनैः शनैरार्यकुलं पुनस्तत्र ववर्द्ध ह ॥ १२४ ॥ शतार्द्धाब्दं प्रयत्नेन तेन राज्यं महत्कृतम् ॥ तदन्वये
सार्द्धशतं नृपाश्चासंस्तदामुने ॥ १२५ ॥ अयुताब्दान्तरे वीरा म्लेच्छमित्राश्च संकराः ॥ म्लेच्छकन्योद्वहा वीरा नाममात्रार्य्यमा
र्गगाः ॥ १२६ ॥ तदा मलयदेशस्थैर्म्लेच्छैर्लक्षप्रमाणकैः ॥ आर्बुदार्यैः समं युद्धमभवल्लोमहर्षणम् ॥ १२७ ॥ वर्षमात्रान्तरे जित्वा मालव
स्था महाबलाः ॥ मण्डलीकपदातैश्च मुक्तमार्यैः समन्ततः ॥ १२८ ॥ चत्वारिंशत्सहस्राणि वर्षाणि जगतीतले ॥ म्लेच्छभूपाश्च शतशो बभूवुः
स्वल्पजीविनः ॥ १२९ ॥ पंचविंशत्सहस्राणि तेषां संख्या च भूभुजाम् ॥ ये तु पुण्या महीपालाः पूर्वजन्मतपोद्भवाः ॥ १३० ॥ तेषां लीला च
मुनिभिः पुराणेषु प्रकीर्तिता ॥ नानासंवत्कराः सर्वे पैशाचा धर्मदूषकाः ॥ १३१ ॥ नवत्यब्दसहस्राणि विनीतानि कलौयुगे ॥ जाता म्लेच्छ
मयी भूमिरलक्ष्मीस्तु जनेजने ॥ १३२ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापरपर्याये कलियुगीयेतिहाससमुच्चये त्रयो
विंशोऽध्यायः ॥२३॥ ॥ छ ॥ ॥ सूत उवाच ॥ ॥ ततस्ते सकला दैत्याः कलिना च पुरस्कृताः ॥ कृत्वा च जलयानानि हरिखंडमुपाययुः ॥१॥
मनुजा हरिखंडे च देवतुल्या महाबलाः ॥ अयुध्यंस्तान्महाशस्त्रैरयुताब्दप्रजीविनः ॥ २ ॥ दशवर्षान्तरे सर्वे मायायुद्धैः पराजिताः ॥ महेन्द्रं
शरणं जग्मुर्हरिखंडनिवासिनः ॥ ३ ॥ तदा तु भगवाञ्छक्रो विश्वकर्माणमब्रवीत् ॥ भ्रमिश्च नामयंत्रोऽयं संस्थितः सप्तसिंधुषु ॥ ४ ॥ त्वया
विरचितस्तात तत्प्रभावान्नरा भुवि ॥ अन्यखंडे न गच्छंति स च यंत्रस्तु मायिना ॥ ५ ॥ मयेन भ्रंशितो भ्रात्रा म्लेच्छैः सार्द्धं समन्ततः ॥
सप्तद्वीपेषु यास्यंति मनुजा मम वैरिणः ॥ ६ ॥ अतो नः पाहि मर्यादां भूमध्ये भवता कृताम् ॥ इति श्रुत्वा विश्वकर्मा दिव्ययंत्रमचीकरत् ॥७॥
तेन यंत्रप्रभावेन भ्रमितास्ते बभूविरे ॥ भ्रमियंत्रान्महावायुर्ज्जातो म्लेच्छविनाशकः ॥ ८ ॥ तद्वायोरभवत्पुत्रो वात्यो वात्यासमुद्भवः॥ दैत्ययक्षाँश्च
पैशाचाञ्जित्वा ज्ञानमयो बली ॥ ९ ॥ ब्राह्मणाः क्षत्रिया वैश्यास्त्रिवर्णास्तेन सत्कृताः ॥ बलान्म्लेच्छान्वर्णमयान्कृत्वा वात्यो महाबलः ॥ १० ॥

शतार्द्धाब्दं मण्डलीकं पदं भुवि गृहीतवान् ॥ तदन्वये सहस्राश्च नृपाश्चासन्कलौ युगे ॥ ११ ॥ वायुपक्षास्त्रिवर्णाढ्याः षोडशाब्दसहस्रके ॥
वायोर्जातः स्वयं ब्रह्मा वायोर्जातः स वै हरिः ॥ १२ ॥ वायोर्जातो महादेवः सर्वं वायुमयं जगत् ॥ विना वायुं मृताः सर्वे वायुना भुवि
जीविनः ॥ १३ ॥ इति मत्वा तु ते लोका वायुं च समतर्पयन् ॥ पुनस्तदा कलिर्घोरो दैत्यराजं बलिं प्रभुम् ॥ १४ ॥ नत्वा निवेदयामास
दुःखितोभूत्तदा बलिः ॥ वामनान्तिकमागम्य कलिमित्रेण संयुतः १५ ॥ नत्वोवाच स वै राजा देवदेवं जनार्दनम् ॥ त्वया कलिः कृतो मह्यं
प्रसन्नेन सुरोत्तम ॥ १६ ॥ वात्यैर्द्विजैःकर्मभूमेः कलिस्तु स निराकृतः ॥ एकपादो व्यतीतोऽयं किंचिदूनं कलेः प्रभोः ॥ १७ ॥ मया सम्यक्तु
वै मुक्ता भूमिर्देवेन्द्रमायया ॥ सहस्राब्दं कलौ प्राप्ते मया भुक्तं महीतलम् ॥१८॥ ततः सार्द्धं सहस्राब्दं देवैर्भुक्तं सुरस्थलम् ॥ ततः पंचशतं वर्षं
किंचिदधिकमेव च ॥ १९ ॥ मया भुक्ता कर्मभूमिः सर्वलोकस्य कारणात् ॥ ततः सार्द्धं सहस्राब्दं देवैर्भुक्तेयमुत्तमा ॥ २० ॥ ततः सार्द्धसह
स्राब्दं किंचिदूनं मया धृता ॥ सार्द्धत्रिंशत्सहस्राब्दं देवैर्दैत्यैस्तथा मही ॥ २१ ॥ भुक्ता दैत्यैः पुनर्देवैस्तथादेवैश्च दानवैः ॥ २२ ॥ त्वया दत्तो हि
मे देव कलिः कलिविनाशन ॥ नाधिकारं कृतं नाथ सत्यं सत्यप्रियक्षम ॥ २३ ॥ इति श्रुत्वा बलेर्वाक्यं भगवान्वामनो हरिः ॥ स्वांशान्मही
तले प्राप्तो दैत्पक्षविवर्धनः ॥२४॥ कामशर्मा तदा विप्रो यमुनातटसंस्थितः ॥ हरिं तुष्टाव मनसा द्वादशाब्दं प्रयत्नतः ॥ २५ ॥ तदा तु वामनः
श्रीमान्वचः प्राह द्विजोत्तमम् ॥ वरं ब्रूहि द्विजश्रेष्ठ यत्ते मनसि संस्थितम् ॥ इति श्रुत्वा कामशर्मा तुष्टाव श्लक्ष्णया गिरा ॥२६॥ कामशर्मोवाच ॥
नमो देवाय महते सर्वपूज्याय ते नमः ॥ २७ ॥ धर्मप्रियाय धर्माय देवदैत्यकराय च ॥ दैवाधीननृणां भर्त्रे कर्मकर्त्रे नमोनमः ॥ २८ ॥ दैवा
धीनाश्च ते देवा दैवोल्लंघाश्च दानवाः॥ तेषां भर्त्ता क्रमाद्धर्ता तस्मै देवाय ते नमः ॥२९॥ पुत्रो भव हरे स्वामिन्सफलं वांछितं कुरु ॥ इति श्रुत्वा
हरिः साक्षाद्वामनो बलिरक्षकः ॥ ३० ॥ स्वपूर्वार्द्धाद्देवहूत्यां तत्पत्न्यां च समुद्भवः ॥ द्विधा भूत्वा मही जातौ दिव्यांगौ दिव्यविग्रहौ ॥ ३१ ॥
भोगसिंहः केलिसिंहो देवपो दैत्यपो हरिः ॥ जित्वा वात्योद्भवान्भूपान्कल्पक्षेत्रमुपस्थितः ॥ ३२ ॥ रहः क्रीडावती नाम नगरी मयनिर्मिता ॥
तत्रोष्य बलवंतौ तौ दधतुश्च कलेर्धुरम् ॥ ३३ ॥ पत्नीयं सर्वधर्माणां सारभूता सनातनी ॥ पतिव्रतायां ये जाता नरा आर्याः सुरप्रियाः ॥ ३४॥
दूषितायां नरा जातास्ते सर्वे वर्णसंकराः ॥ इति संचिंत्य भगवान्कृत्वा काममयं वपुः ॥ ३५ ॥ दिने दिने सहस्राणि योषितो बुभुजे हरिः ॥ ताः
सर्वा गर्भमाधाय यमौ सुषुविरे मुदा ॥ ३६ ॥ नार्या तया सहोदर्या रेमिरे ते सहोदराः ॥ एवं च बहुधा सृष्टिस्तेषां जाता कलौ युगे ॥ ३७ ॥

पूर्वजातांस्त्रिवर्णांश्च भक्षयित्वा दिनेदिने ॥ कर्मभूम्यां ववृधिरे पक्षिणश्च यथा द्रुमे ॥ ३८ ॥ उभयाब्दसहस्रांते तैरन्नाः पूर्वमानवाः ॥ तदा कलेश्च
चरणो द्वितीयो भुवि चागमत् ॥ ३९ ॥ सांप्रतं वर्तते वार्ता किन्नराणां च भूतले ॥ द्विकिष्कुमात्राश्च नराः सार्द्धा दैत्यमयाः स्मृताः ॥ ४० ॥
यथा खगाः कर्महीनाश्चत्वारिंशाब्दजीविनः ॥ भूमिगाश्च तथा ते वै भेदं तेष्वेषु नैव भोः ॥ ४१ ॥ दृश्यंते चाद्य युष्माभिर्भूतले किन्नरा नराः ॥
द्वितीयचरणन्ते च भविष्यंत्येवमेव हि ॥ ४२ ॥ न विवाहो न भूपश्च नोद्यमो न हि कर्मकृत् ॥ भविता च तदा तेषां द्वितीयचरणा
न्तिके ॥४३॥ सपादलक्षाब्दमितमद्यप्रभृति भो द्विजाः ॥ भोगकेल्यन्वयोद्भूता भविष्यंति महीतले ॥४४॥ अतो मया च सहिता भवन्तो मुनि
सत्तमाः ॥ कृष्णचैतन्यमागम्य गमिष्यामस्तदाज्ञया ॥ ४५ ॥ ॥ व्यास उवाच ॥ ॥ इति श्रुत्वा तु मुनयो विशालापूर्निवासिनः ॥ भो नमस्ते
गमिष्यंति यज्ञांशं प्रति हर्षिताः ॥ ४६ ॥ नत्वा सर्वे मुनिश्रेष्ठा यज्ञांशं यज्ञरूपिणम् ॥ वचनं च वदिष्यंति देह्याज्ञां भगवन्प्रभो ॥ ४७ ॥ इंद्र
लोकं गमिष्यामो नाकमध्यं मनोहरम् ॥ इति श्रुत्वा तु यज्ञांशः सर्वशिष्यसमन्वितः ॥ ४८ ॥ तैः सर्वैः सह स्वर्लोकं गमिष्यति सुरप्रियः ॥
तदा कलिः समं दैत्यैर्भजिष्यति महीतलम् ॥ किमन्यच्छ्रोतुमिच्छा ते हृषीकोत्तम तद्वद ॥ ४९ ॥ ॥ मनुरुवाच ॥ ॥ भगवन्विस्तराद्ब्रूहि
भोगकेलिचरित्रकम् ॥ कलौ यथा भविष्यंति मनुजास्तत्तथा प्रभो ॥ ५० ॥ ॥ व्यास उवाच ॥ ॥ भोगसिंहे केलिसिंहे वामनांशसमुद्भवे ॥
॥ ५१ ॥ जित्वा दैत्यान्नरमयान्नरान्वात्योद्भवान्भुवि ॥ वामनांशमुपागम्य हर्षिताः संबभूविरे ॥५२॥ तदा तु दुःखिता देवास्त्यक्त्का मूर्त्तीः समं
ततः ॥ कृष्णचैतन्यमागम्य नत्वोचुर्नतकंधराः ॥ ५३ ॥ भगवंस्त्वत्प्रसादेन चरणं प्रथमं कलेः ॥ भुक्ता तथा मही स्वामिञ्जित्वा दैत्यप्रपूज
कान् ॥५४॥ किं कर्तव्यं च यज्ञांश नमस्ते करुणाकर इति ॥ श्रुत्वा हरिः प्राह तदा शृणुध्वं सुरसत्तमाः ॥५५॥ अहं स्वर्गं गमिष्यामि भवद्भिः
सहहर्षितः ॥ अतो यूयं सुराः सर्वे देववंशान्नरान्सदा ॥ ५६ ॥ उत्थाप्य शीघ्रमागम्य गच्छध्वं च त्रिविष्टपम् ॥ इति सूतेन कथिते मुनीन्प्रति
सुमण्डलम् ॥ ५७ ॥ देवा विमानमादाय तत्र यास्यंति भो मनः ॥ सूतादींश्च मुनीन्सर्वान्समारुह्य सुरास्तदा ॥ ५८ ॥ यज्ञांशं च गमिष्यंति
नदीहोपवने तदा ॥ अह्लादश्च तदा योगी गोरखाद्यास्तथैव च ॥ ५९ ॥ शंकराद्याश्च रुद्रांशा नृपो भर्तृहरिस्तदा ॥ अन्ये तु योगनिष्ठाश्च गमि
ष्यंति हितप्रदाः ॥ ६० ॥ तैः सार्द्धं कृष्णचैतन्यो देवलोकं गमिष्यति ॥ तदा तौ वामनांशौ च द्वितीयचरणे कलौ ॥ ६१ ॥ योगनिष्ठां समा
धाय कल्पक्षेत्रे वसिष्यतः ॥ तदैव सकला दैत्या हर्षितास्तैर्नृभिर्मुहुः ॥ ६२ ॥ विवरान्वर्द्धयिष्यंति पातालाद्यान्समंततः ॥ कलेस्तृतीयचरणे

संप्राप्ते किन्नराश्च ते ॥ ६३ ॥ शनैःशनैः क्षयं भूमौ गमिष्यंति समंततः ॥ षड्विंशाब्दसहस्रे च तृतीयचरणे गते ॥ ६४ ॥ रुद्राज्ञया भृङ्गऋषि
र्भूतपक्षो गमिष्यति ॥ सौरभी नाम तत्पत्नी जनिष्यति महाबलान् ॥ ६५ ॥ कौलकल्पान्नरान्घोरान्सर्वकिन्नरभक्षकान् ॥ षड्विंशाब्दवयस्तेषां
भविष्यति तदा कलौ ॥ ६६ ॥ शरणं वामनांशं च गमिष्यंति सकिन्नराः ॥ भोगसिंहः केलिसिंहस्तैश्च सार्द्धं महद्रणम् ॥ ६७ ॥ करिष्यति
दशाब्दं च पुनस्तैश्च पराजितौ ॥ दैत्यैः सार्द्धं च पातालं वामनांशौ गमिष्यतः ॥६८॥ भृङ्गसृष्टिर्महाघोरा भविष्यति तदा कलौ ॥ मातॄः स्वसॄः
सुतास्ते वै नराश्च पशुरूपिणः ॥ ६९ ॥ भुक्त्वा प्रीत्या च कामांधा जनिष्यंति सुतान्बहून् ॥ कलेस्तृतीयचरणे समाप्ते तास्तु सृष्टयः ॥७०॥
तिर्य्यग्योनिधरा घोराः क्षयिष्यंति कलौ युगे ॥ कलेश्चतुर्थचरणे संप्राप्ते तु तदा नराः ॥ ७१ ॥ विंशदब्दवयस्काश्च मरिष्यंति च नारकाः ॥
यथा जलमनुष्याश्च यथैव वनजा नराः ॥ ७२ ॥ कंदमूलफलाहारा भविष्यंति कलौ तदा ॥ अलोका ये तु विख्यातास्तामिस्राद्या भयानकाः
॥ ७३ ॥ ते सर्वे पूर्णमेष्यंति कर्मभूमिभवैर्नरैः ॥ यथा सत्यस्य प्रथमे चरणे सत्यलोककः ॥ ७४ ॥ द्वितीये च तपोलोको जनलोकस्तृतीयकः॥
चतुर्थे स्वर्गलोकश्च पूरितः कर्मभूमिजैः ॥ ७५ ॥ त्रेतायुगाद्यचरणे भुवर्लोकं भूवास्पदम् ॥ स्वर्गलोकं यथा तैश्च मनुजैः पूरितं स्मृतम् ॥ ७६ ॥
द्वितीये ऋषिलोकं च तृतीये ग्रहविष्टपम् ॥ चतुर्थे च भुवर्लोकं पूरितं कर्मजैर्नरैः ॥ ७७ ॥ द्वापराद्यपदे पूर्णे भवेद्वीपः स पुष्करः ॥ द्वितीये
शाल्मलः क्रौंचस्तृतीये द्वीपशेषकः ॥ ७८ ॥ जंबूद्वीपश्चतुर्थे च चरणे मुनिभिः स्मृतः ॥ कलेश्च चरणे चाद्येधश्चोर्ध्वं पूरितं जगत् ॥ ७९ ॥
द्वितीये सप्तपातालस्तृतीये भूतविष्टपम् ॥ पूरितं मनुजैस्तत्र कर्मभूमिसमुद्भवैः ॥ ८० ॥ तदाद्यनारकास्सर्वे पूर्णमेष्यंति तैर्नरैः ॥ इति ते कथितं
सर्वं यत्पृष्टोऽहं मनो त्वया ॥ ८१ ॥ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडापरपर्याये कलियुगीयेतिहाससमुच्चये चतु
र्विंशोऽध्यायः ॥ २४ ॥ ॥ छ ॥ ॥ व्यास उवाच ॥ ॥ चतुर्थचरणे जातैर्मनुजैरेकविंशतिः ॥ अजीर्णभूता नरका यास्यंति च
यमालयम् ॥ १ ॥ नमस्ते धर्मराजाय नश्च तृप्तिकराय च ॥ वचनं शृणु सर्वज्ञ नश्च जातमजीर्णकम् ॥ २ ॥ यथा भजाम
प्रकृतिं तथा कुरु सुरोत्तम ॥ इति श्रुत्वा धर्मराजश्चित्रगुप्तेन संयुतः ॥ ३ ॥ ब्रह्माणं च गमिष्यंति संध्यायां च कलौ युगे ॥
चतुरश्च यमान्दृष्ट्वा परमेष्ठी पितामहः ॥ ४ ॥ तदीरितं स्वयं ज्ञात्वा क्षीराब्धिं प्रति यास्यति ॥ पूजयित्वा जगन्नाथं देवदेवं वृषाक
पिम् ॥ ५ ॥ सांख्यशास्त्रमयैः स्तोत्रैः संस्तोष्यति परं प्रभुम् ॥ ६ ॥ जयजयजय निर्गुण गुणधारिन्नगजगजीवतत्त्वशुभकारिन् ॥

सारभूत सद्गुणमय तत्त्वैर्देवान्रचयति पाति गुणसंत्त्वैः ॥ तस्मै नमोनमो गुणराशे देववृन्दहृदि कृष्णविकाशे ॥ ७ ॥ रजोभूततत्त्वेभ्य उता
शु विरचति भुवि च नरान्स्वयमाशु ॥ पाति हन्ति यो देव उदारस्तस्य शिरसि संस्थितजगभारः ॥ पाहि नाथ नो दैत्यविनाशिन्कालजनितली
लागुणभासिन् ॥ ८ ॥ तेषामिति वचनं प्रभुः श्रुत्वा ह्यवनिमिवाशु ॥ यथा जनिष्यति स प्रभुस्तच्छृणु वै मन आशु ॥ ९ ॥ नम्रीभूतान्सुरान्वि
ष्णुर्नमोवाक्येन तान्प्रति ॥ वदिष्यति वचो रम्यं लोकमंगलहेतवे ॥ १० ॥ भोः सुराः संभलग्रामे कश्यपोऽयं जनिष्यति ॥ नाम्ना विष्णुयशाः
ख्यातो विष्णुकीर्तिस्तु तत्प्रिया ॥ ११ ॥ कृष्णलीलामयं ग्रंथं नरांस्ताञ्छ्रावयिष्यति ॥ तदा ते नन्दिनो भूत्वा चैकीभूय समंततः ॥ १२ ॥ तं
द्विजं विष्णुयशसं गृहीत्वा निगडैर्दृढैः ॥ बद्ध्वा सर्वे सपत्नीकं कारागारे दृढायसे ॥ १३ ॥ करिष्यंति महाधूर्ता नारका इव दारुणाः ॥ विष्णु
कीर्त्यां स भगवान्पूर्णो नारायणो हरिः ॥ १४ ॥ जनिष्यति महाविष्णुः सर्वलोकशिवंकरः ॥ निशीथे तमसोद्भूते मार्गकृष्णाष्टमीदिने ॥ १५ ॥
ब्रह्माण्डं मंगलं कुर्वन्सुरान्प्रादुर्भविष्यति ॥ ब्रह्मा विष्णुर्हरश्चैव गणेशो वासवो गुरुः ॥ १६ ॥ वह्निः पितृपतिः पक्षो वरुणः सविभीषणः ॥ चित्रो
वायुर्ध्रुवो विश्वे रविः सोमः कुजो बुधः ॥ १७ ॥ गुरुः शुक्रः शनी राहुः केतुस्तत्र गमिष्यति ॥ पद्यैकैकेन ते देवाः स्तोष्यंति परमेश्वरम् ॥
॥ १८ ॥ महत्तमा मूर्तिमयी तवाजा तदास्य पूर्वाज्जनितोहमादौ ॥ मया ततं विश्वमिदं सदैवं यतो,नमस्तत्पुरुषोत्तमाय ॥ १९ ॥ अजस्य याम्या
ज्जनितोहमादौ विष्णुर्महाकल्पकरोऽधिकारी ॥ स्वकीयनाम्ना तु मया ततं तद्विश्वं सदैवं च नमोनमस्ते ॥ २० ॥ अव्यक्तपाश्चात्यमुखात्सुजन्मा
शिवोऽहमादौ सुरतत्त्वकारी ॥ मया महाकल्पकरस्तृतीयात्वदाज्ञया देव नमोनमस्ते ॥ २१ ॥ प्रधानवक्रोत्तरतोहमादौ जातो गणेशः किल
कल्पकर्ता ॥ मया ततं विश्वमिदं सदैवं तस्मै नमः कारुणिकोत्तमाय ॥ २२ ॥ अजार्द्धवक्राज्जनितोऽहमादौ मरुन्महाकल्पकरो महेन्द्रः ॥ मया
ततं विश्वमिदं स्वकल्पे यदाज्ञया देव नमोनमस्ते ॥ २३ ॥ प्रधानभालाक्षिसमुद्भवोऽहं वह्नेर्महाकल्पकरो गुहाख्यः ॥ विनिर्मितं विश्वमिदं
मया तद्यदाज्ञया नाथ नमोनमस्ते ॥ २४ ॥ अजाभुजात्पूर्वगताच्च जातश्चादौ महाकल्पकरोऽहमग्निः ॥ ब्रह्माण्डमेतच्च मया ततं वै ब्रह्माण्डकल्पाय
नमोनमस्ते ॥ २५ ॥ अजाभुजाद्दक्षिणतोऽहमादौ जातो महाकल्पककरः सधर्मः ॥ मया सदेवै रचितं समग्रं लिंगाख्यकल्पाय नमोनमस्ते ॥
॥ २६ ॥ अजाभुजात्पश्चिमतोहमादौ जातो महाकल्पकरः स यज्ञः ॥ मया ततं विश्वमिदं समग्रं मत्स्याख्यकल्पाय नमोनमस्ते ॥ २७ ॥
प्रधानबाहूत्तरतोऽहमादौ जातो महाकल्पकरः प्रचेताः ॥ मया ततं नाथ तवाज्ञयेदं कर्माख्यकल्पाय नमोनमस्ते ॥ २८ ॥ ब्रह्मांडतमसो जात

स्त्वद्दासोऽहं विभीषणः ॥ मया ततं त्रिलोकं च नमस्ते मनुरूपिणे ॥ २९ ॥ ब्रह्मांडसद्गुणाज्जातश्चित्तोऽहं मनुकारकः ॥ मया ततं च त्रैलोक्यं
स्वायंभुव नमोऽस्तु ते ॥ ३० ॥ ब्रह्माण्डरजसो जातो वायुर्मन्वंतरं ततम् ॥ मया स्वारोचिषं स्वामिन्नमस्ते मनुरूपिणे ॥ ३१ ॥ ब्रह्माण्डमनसो
जातो ध्रुवोऽहं मनुकारकः ॥ मयोत्तमं च रचितं नमस्तेऽस्तु तवाज्ञया ॥ ३२ ॥ ब्रह्माण्डश्रवणाज्जातो विश्वकर्माहमीश्वरः ॥ मया ततं रैवतं च
नमो देव तवाज्ञया ॥ ३३ ॥ ब्रह्माण्डदेहतो जातस्सूर्योऽहं चाक्षुषप्रदः ॥ तवाज्ञया ततं विश्वं मनुरूपाय ते नमः ॥ ३४ ॥ ब्रह्माण्डनेत्रतो जातः
सोमोऽहं तु मया ततम् ॥ वैवस्वतान्तरं रम्यं नमस्ते मनुरूपिणे ॥ ३५ ॥ ब्रह्माण्डरसनाज्जातो मोहोहं मनुकारकः ॥ नमस्ते मनुरूपाय मया
सावर्णिकं ततम् ॥ ३६ ॥ ब्रह्माण्डघ्राणतो जातो बुधोऽहं नाथ किंकरः ॥ निर्मितं ब्रह्मसावर्णं मया तात नमोनमः ॥ ३७ ॥ ब्रह्माण्डवक्त्रतो
जातो जीवोऽहं मनुकारकः ॥ मया वै दक्षसावर्णं ततं तत्ते नमोनमः ॥ ३८ ॥ ब्राह्माण्डकरतो जातः शुक्रोहं तव किंकरः ॥ निर्मितं रुद्रसावर्णं
मया तुभ्यं नमोनमः ॥ ३९ ॥ ब्रह्माण्डपदतो जातोमन्दोऽहं नाथ तेऽनुगः ॥ ततं वै धर्मसावर्णं प्रभातेस्मै नमोनमः ॥ ४० ॥ ब्रह्माण्डलिंगतो
जातो राहुश्चाहं तव प्रियः ॥ मया भौमं कृतं नाथ नमस्ते मनुरूपिणे ॥४१॥ ब्राह्मण्डगुह्यतो जातः केतुश्चाहं तवानुगः ॥ भौतं मन्वंतरं सृष्टं तस्मै
देवाय ते नमः ॥ ४२ ॥ ॥ व्यास उवाच ॥ ॥ इति तेषां स्तवान्स्वामी श्रुत्वा देवान्वदिष्यति ॥ वरं ब्रूहीति वचनं तंतं प्रति मनुः क्रमात् ॥
॥ ४३ ॥ इति श्रुत्वा तु ते देवा बालरूपं हरिं स्वयम् ॥ नमस्कृत्य वदिष्यंति वांछितं लोकहेतवे ॥ ४४ ॥ भवान्ब्रूहि लोकानां कल्पेकल्पे
तमुद्भवम् ॥ तथा मन्वंतरे चैव श्रोतुमिच्छामहे वयम् ॥ ४५ ॥ ॥ कल्क्युवाच ॥ ॥ अष्टादश महाकल्पाः प्रकृतेश्च तनौ स्थिताः ॥ आद्यो
ब्रह्ममहाकल्पस्तत्र ब्रह्मा परः पुमान् ॥ ४६ ॥ तत्पूर्वार्द्धात्समुद्भूतास्त्रयस्त्रिंशच्च देवताः ॥ परार्द्धाद्भगवान्ब्रह्मा योगिध्येयो निरंजनः ॥
॥ ४७ ॥ तस्मिन्कल्पे तु या लीला ब्रह्मपौराणिकैः स्मृता ॥ शतकोटिप्रविस्तारो ब्रह्मपौराणिकस्य वै ॥ ४८ ॥ पुराणपुरुषस्यांते महा
कल्पः स्मृतो बुधैः ॥ ब्रह्माण्डप्रलये कल्पो युगदैवसहस्रकः ॥ ४९ ॥ कल्पाश्चष्टादशाख्यातास्तेषां नामानि मे शृणु ॥ कूर्मकल्पो मत्स्य
कल्पः श्वेतवाराहकल्पकः ॥५०॥ नृसिंहकल्पश्च तथा तथा वामनकल्पकः ॥ स्कन्दकल्पो रामकल्पः कल्पो भागवतस्तथा ॥५१॥ तथा मार्कंड
कल्पश्च तथा भाविष्यकल्पकः ॥ लिंगकल्पस्तथा ज्ञेयस्तथा ब्रह्माण्डकल्पकः ॥ ५२ ॥ अग्निकल्पो वायुकल्पः पद्मकल्पस्तथैव च ॥ शिवकल्पो
विष्णुकल्पो ब्रह्मकल्पस्तथा क्रमात् ॥ ५३ ॥ द्विसहस्रमितावर्तैरेषां कल्पो महान्स्मृतः ॥ सहस्रयुगपर्यंतं ब्रह्मांडायुः प्रकीर्तितम् ॥ ५४ ॥ यन्नाम्ना

च स्मृतः कल्पस्तस्माज्जातो विराडयम् ॥ चतुर्दशमनूनां च मध्ये कल्पः स कालवान् ॥ ५५ ॥ स्वायंभुवांतरे यद्वै जातंजातं चतुर्युगम् ॥ तस्मिं
श्चतुर्युगे सर्वे नृणामायुर्हरे शृणु ॥५६॥ लक्षाब्दं वै सत्ययुगे त्रेतायामयुताब्दकम् ॥ द्वापरे च सहस्राब्दं कलौ चायुश्शताब्दकम् ॥५७॥ स्वारोचिषेऽ
न्तरे देव जातंजातं चतुर्युगम् ॥ शृणु तत्र नृणामायुस्सत्येशीतिसहस्रकम् ॥ ५८ ॥ त्रेतायां च तदर्द्धाब्दं द्वापरे तु तदर्द्धकम् ॥ कलौ द्विक
सहस्राब्दं नृणामायुः प्रकीर्तितम् ॥ ५९ ॥ औत्तमस्यान्तरे चैव सत्ये षष्टिसहस्रकम् ॥ त्रेतायां च तदर्द्धाब्दं द्वापरे तु तदर्द्धकम् ॥६०॥ कलौ
सार्द्धसहस्राब्दं नृणामायुः प्रकीर्तितम् ॥ तामसान्तरके चैव षट्त्रिंशाब्दसहस्रकम् ॥ ६१ ॥ नृणामायुः सत्ययुगे त्रेतायां च तदर्द्धकम् ॥ द्वापरे
च तदर्द्धाब्दं कलौ वर्षसहस्रकम् ॥ ६२ ॥ रैवतान्तरके चैव सत्ये त्रिंशत्सहस्रकम् ॥ त्रेतायां च तदर्द्धाब्दं द्वापरे च तदर्द्धकम् ॥ ६३ ॥ कलौ
चाष्टशताब्दायुर्नृणां वेदैः प्रकीर्तितम् ॥ चाक्षुषान्तरके चैव सत्ये तुर्यसहस्रकम् ॥ ६४ ॥ त्रेतायां त्रिसहस्राब्दं द्वापरे द्विसहस्रकम् ॥ कलौ सहस्र
वर्षान्तं नृणामायुः प्रकीर्तितम् ॥ ६५ ॥ वैवस्वतेन्तरे चैव सत्ये तुर्यसहस्रकम् ॥ त्रेतायां त्रिशताब्दं च द्वापरे द्विशताब्दकम् ॥ ६६ ॥ कलौ
शताब्दकं प्रोक्तमायुर्वेदैस्तथा नृणाम् ॥ सावर्णिकेऽन्तरे देव नृणां विंशत्सहस्रकम् ॥ ६७ ॥ आयुः सत्ये तदर्द्धं तु त्रेतायां च प्रकीर्तितम् ॥
द्वापरे च तदर्द्धाब्दं तदर्द्धाब्दं तु वै कलौ ॥ ६८ ॥ ब्रह्मसावर्णिके चैव सत्ये दशसहस्रकम् ॥ त्रेतायां च तदर्द्धाब्दं द्वापरे तु तदर्द्धकम् ॥
॥ ६९ ॥ कलौ चैव तदर्द्धाब्दं नृणामायुः प्रकीर्तितम् ॥ दक्षसावर्णिके चैव तथाब्दायुश्चतुर्युगे ॥ ७० ॥ रुद्रसावर्णिके चैव सत्ये चाष्टसहस्रकम् ॥
त्रेतायां तदर्द्धाब्दं द्वापरे च तदर्द्धकम् ॥ ७१ ॥ कलौ तदर्द्धकं ज्ञेयं नृणामायुः पुरातने ॥ धर्मसावर्णिके चैव तथाब्दायुश्चतुर्युगे ॥ ७२ ॥ भौम
मन्वंतरे चैव सत्ये तुर्यसहस्रकम् ॥ त्रेतायां त्रिसहस्राब्दं द्वापरे च तदर्द्धकम् ॥ ७३ ॥ कलौ तदर्द्धकं ज्ञेयं नरायुश्चार्षसम्मतम् ॥ भौतमन्वंतरे
चैव सत्ये तुर्यशताब्दकम् ॥ ७४ ॥ त्रेतायां त्रिशताब्दं च द्वापरे तु तदर्द्धकम् ॥ तदर्द्धकं कलौ घोरे नृणामायुः प्रकीर्तितम् ॥ ७५ ॥ मन्वंतरे
तु यन्नाम्ना भूपाश्चासंश्चतुर्युगे ॥ तन्नाम्ना च नृपा जातास्तेषां लीलाःपृथक्पृथक् ॥ ७६ ॥ एवमन्यत्र वै ज्ञेयं युगे तुर्ये मनौ मनौ ॥ यो मनुस्तस्य
वंशाश्च दिव्यैकयुगसप्ततौ ॥ ७७ ॥ युगांते कर्मभूमेश्च लयः कल्पः स वै स्मृतः ॥ मन्वन्ते सर्वभूमेश्च प्रलयः स च कल्पकः ॥ ७८ ॥ पुराण
पुरुषस्यैव दिनान्ते प्रलयो हि यः ॥ मुख्यकल्पः स वै ज्ञेयः सर्वलोकविनाशकः ॥ ७९ ॥ षड्विंशत्कल्पसाहस्रैर्महाकल्पो हि यः स्मृतः ॥
यदा पुराणपुरुषो मेषराशौ समास्थितः ॥८०॥ तदा ब्रह्मा सुरैः सार्द्धं भूपं स्वायंभुवं गतः ॥ यदा पुराणपुरुषो मकरे च समागतः ॥८१॥ स्वायं

भुवभनोर्मध्ये वाराहोऽभूत्स वै भुवि ॥ यदा पुराणपुरुषो गतः सिंहे स्वकेच्छया ॥ ८२ ॥ स्वारोचिषमनोरन्ते नृसिंहोऽभूत्स वै भुवि ॥ यदा पुराणपुरुषो वृषराशौ समास्थितः ॥ ८३ ॥ तदौत्तममनोर्मध्ये रुद्रोऽभूत्सगणो भुवि ॥ यदा पुराणपुरुषो मीनराशौ समास्थितः ॥ ८४ ॥ तामसान्तेऽभवन्मत्स्यः स वै भुवि सनातनः ॥ यदा पुराणपुरुषो युग्मराशौ समास्थितः ॥ ८५ ॥ वैवस्वतमनोर्मध्ये कृष्णोभूद्भुवि स प्रभुः ॥ यदा पुराणपुरुषः कर्कराशौ समास्थितः ॥ ८६ ॥ रैवतान्तेऽभवत्कूर्मः स वै भुवि सनातनः ॥ यदा पुराणपुरुषः कन्याराशौ समास्थितः ॥ ८७ ॥ चाक्षुषान्ते जामदग्न्योऽभवद्रामः स वै भुवि ॥ यदा पुराणपुरुषः प्राप्तोऽलौ च स्वकेच्छया ॥ ८८ ॥ वैवस्वतमनोरादौ वामनोऽभूत्स वै भुवि ॥ यदा पुराणपुरुषस्तुलाराशौ समास्थितः ॥ ८९ ॥ वैवस्वतमनोर्मध्ये कल्की नाम्नाहमागतः ॥ यदा पुराणपुरुषः कुम्भराशौ समास्थितः ॥९०॥ सावर्णिकादौ भविता बुद्धो नाम्ना स वै भुवि ॥ यदा पुराणपुरुषो धनुराशौ समास्थितः ॥ ९१ ॥ वैवस्वतमनोर्मध्ये रामो दाशरथिर्भुवि ॥ यदा पुराणपुरुषो नक्रराशौ समास्थितः ॥ ९२ ॥ सर्वपूज्यावतारश्च न भवेद्वै कदाचन ॥ अस्मिंश्चतुर्युगे देवाः पुराणपुरुषस्य हि ॥ ९३ ॥ त्रयोऽवताराः कथितास्तथा नान्यच्चतुर्युगे ॥ त्रेतायाः प्रथमे पादे रामो दाशरथिः प्रभुः ॥ ९४ ॥ द्वापरस्य तथा कृष्णः शेषेण सह वै भुवि॥कलेश्शोषे तथाहं वै द्वात्रिंशाब्दसहस्रके ॥ ९५ ॥ अतः खंडः पवित्रोऽयं नृणां पातकनाशनः ॥ इमं चतुर्युगं खण्डं यः पठेच्छ्रावयेच्च यः ॥ ९६ ॥ जन्म प्रभृति पापानि तस्य नश्यंति नान्यथा ॥ इति वः कथितं देवा महाकल्पचरित्रकम् ॥ ९७॥ द्वितीयो यो महाकल्पो विष्णुकल्पः स वै स्मृतः ॥ तत्कथा पठिता देवा विष्णुपौराणिकैर्नरैः ॥ ९८ ॥ शतकोटिप्रविस्तारो विष्णुपौराणिकस्य वै ॥ तत्रैव च महाकल्पो विष्णोर्नाभिसमुद्भवः ॥ ॥ ९९ ॥ पूर्वार्द्धाद्भगवान्ब्रह्मा सर्वदेवसमन्वितः ॥ परार्द्धाद्भगवान्विष्णुः पुराणपुरुषः स वै ॥ १०० ॥ तृतीयो यो महाकल्पः शिवकल्पः स वै स्मृतः ॥ शिवपूर्वार्द्धतो जातो विष्णुस्तस्माद्विधिः स्वयम् ॥ १०१ ॥ शतकोटिप्रविस्तारः शिवपौराणिकैः स्मृतः ॥ चतुर्थो यो महाकल्पः पद्मकल्पः स वै स्मृतः ॥ १०२ ॥ गणेशस्तत्र भगवान्पुराणपुरुषासने ॥ गणेशादभवद्रुद्रो रुद्राद्विष्णुः सुरोत्तमः ॥ १०३ ॥ विष्णोर्नाभिसमुद्भूतः परमेष्ठी पितामहः ॥ कल्पेकल्पे क्रमादादौ देवाश्चासन्समंततः ॥१०४॥ पंचमो यो महाकल्पो वायुकल्पः स वै स्मृतः ॥ महेंद्रस्तत्र भगवान्पुराणपुरुषासने ॥ १०५ ॥ महेन्द्रादभवत्प्राप्तो महेंद्रादिंद्रियाणि च ॥ इन्द्रियेभ्यश्च तद्देवास्तेषां नामानि मे शृणु ॥१०६॥ शनिर्बुधो रविः शुक्रो विश्वकर्मा बृहस्पतिः ॥ इन्द्रो विष्णुस्तथा ब्रह्मा रुद्रः सोमः क्रमात्स्मृताः ॥१०७॥ सृष्टिकर्ता स वै ब्रह्मा लिंगेंद्रियसमुद्भवः॥सृष्टिपाता स वै विष्णुरव

तारिपदोद्भवः ॥ १०८ ॥ चतुर्विंशतितत्त्वेषु कल्पेकल्पे प्रभुर्गतः ॥ सनत्कुमारो हंसश्च वाराहो नारदस्तथा ॥ १०९ ॥ नारायणौ च कपिला
त्रेयौ यज्ञाश्वकंटकौ ॥ वृषभश्च पृथुर्मत्स्यः कूर्मो धन्वंतरिस्तथा ॥११०॥ मोहिनी च नृसिंहश्च वामनो भार्गवस्तथा ॥ रामो व्यासो बलः कृष्णो
बुद्धः कल्की स्वतत्त्वगः ॥ १११ ॥ गुह्यजन्मा महादेवः सृष्टिदैत्यविनाशकः ॥ एवं जातास्त्रयो देवा महाकल्पे च पंचमे ॥ ११२ ॥ षष्ठो यस्तु
महाकल्पो वह्निकल्पः स वै स्मृतः ॥ स्कन्दस्तत्रैव भगवान्पुराणपुरुषासने॥ ११३ ॥ पुरुषाव्ययतः स्कन्नः स्कंदस्तस्मान्महार्चिमान् ॥ सूर्य
रूपा महार्चिर्या तस्यां जातो हरिः स्वयम् ॥११४॥ वह्निरूपा महार्चिर्या तस्यां जातः पितामहः ॥ चंद्ररूपा महार्चिर्या तस्यां जातः स वै हरः ॥
॥ ११५ ॥ ऋषयो मुनयो वर्णा लोका जाताः पितामहात् ॥ आदित्या विश्ववसवस्तुषिता भास्वरानिलाः ॥ ११६ ॥ महाराजिकसाध्याश्च देवा
विष्णुसमुद्भवाः ॥ यक्षराक्षसगंधर्वाः पिशाचाः किन्नरादयः ॥ ११७ ॥ दैत्याश्च दानवा भूतास्तामसा रुद्रसंभवाः ॥ कल्पेकल्पे समुद्भूतमेवं ब्रह्मांड
गोचरे ॥ ११८ ॥ सप्तमो यो महाकल्पः स वै ब्रह्मांडकल्पकः ॥ पावकस्तत्र भगवान्पुराणपुरुषासने॥११९॥ अचिंत्यतेजसस्तस्मात्पुरुषाद्वह्निरु
द्भवः ॥ ततो जातो महाब्धिश्च तस्माज्जातं विराण्मयम् ॥ १२० ॥ रोम्णिरोम्णि ततस्तस्य ब्रह्मांडाः कोटिशोऽभवन् ॥ ब्रह्माण्डादभवद्ब्रह्मा सर्वलो
कपितामहः ॥ १२१ ॥ तस्माज्जातो विभुर्विष्णुस्तस्माज्जातो हरः स्वयम् ॥ शतकोटिप्रविस्तारो ब्रह्माण्डाख्यपुराणके ॥ १२२ ॥ त्रिनेत्रं पंचवक्त्रं
च दशबाहुर्भवस्य च ॥ अष्टादशानां कल्पानां वायुर्वै वैदिकैः स्मृतः ॥ १२३ ॥ महाकल्पेऽभवन्सर्वे द्विसहस्राः क्षयं गताः ॥ अष्टमो यो महा
कल्पो लिंगकल्पः स वै स्मृतः ॥ १२४ ॥ तत्रैव भगवान्धर्मः पुराणपुरुषासने ॥ अचिंत्याव्यक्तरूपश्च जातो धर्मः सनातनः ॥ १२५ ॥ धर्मा
त्कामः समुद्भूतः कामाल्लिंगस्त्रिधाभवत् ॥ पुँल्लिंगः क्लीबलिंगश्च स्त्रीलिंगश्च सुरोत्तम ॥ १२६ ॥ पुँल्लिंगादभवद्विष्णुः स्त्रीलिंगाच्च महेन्दिरा ॥
क्लीबलिंगात्स वै शेषस्तस्योपरि स च स्थितः ॥ १२७ ॥ त्रिभ्यस्तमोमयेभ्यश्च जातमेकार्णवं जगत् ॥ सुप्ते नारायणे देवे नाभेः पंकजमुत्तमम् ॥
॥ १२८ ॥ जातं तस्मात्स वै ब्रह्मा तस्माज्जातो विराडयम् ॥ शतकोटिप्रविस्तारैर्लिंगपौराणिकैः कथा ॥ १२९ ॥ गीता चैव विधेरग्रे तस्य सा
रोऽयमुत्तमः ॥ नवमो यो महाकल्पो मत्स्यकल्पः स वै स्मृतः ॥ १३० ॥ कुबेरस्तत्र भगवान्पुराणपुरुषासने ॥ अव्ययाच्च समुद्भूतो धूलिवृन्दो
महांस्तथा ॥१३१॥ रजोभूताच्च तस्माच्च कुबेरस्य समुद्भवः ॥ कुबेरादुद्भवन्मत्स्यो वेदमूर्तिश्च सद्गुणः ॥१३२॥ मत्स्योदरात्समुद्भूतो विष्णुर्नारा
यणो हरिः ॥ विष्णोर्नाभेः समुद्भूतो ब्रह्मा लोकपितामहः ॥ १३३ ॥ ब्रह्मणश्चोद्भवं दैवं दैवाद्देवा बभूविरे ॥ चतुर्विंशतितत्त्वानि तैर्देवैर्जनितानि

वै ॥ १३४ ॥ कल्पेकल्पे क्रमादेवं कल्पनामान्यकारयत् ॥ मत्स्यकल्पे तु मत्स्यश्च महामत्स्यात्समुद्भवः ॥ १३५ ॥ तन्मत्स्याद्भगवान्विष्णुस्ततो
ब्रह्मण उद्भवः ॥ कूर्मकल्पे महामत्स्यात्कूर्मो जातः स कच्छपः ॥१३६॥ कूर्माच्च भगवान्विष्णुस्ततो ब्रह्मा ततो विराट् ॥ श्वेतवाराहकल्पे च
वराहाद्विष्णुरुद्भवः ॥ १३७ ॥ विष्णोर्नाभेश्च स ब्रह्मा ततो जातो विराडयम् ॥ एवं सर्वे च वै कल्पा ज्ञेयाः सर्वत्र वै बुधैः ॥ १३८ ॥ दशमो
यो महाकल्पः कूर्मकल्पः स वै स्मृतः ॥ अचेतास्तत्र भगवान्पुराणपुरुषासने ॥ १३९ ॥ प्रकृतेश्च परो यो वै तुरीयोऽव्यय एव च ॥ शून्यभूता
त्ततो जातः प्रचेता भगवान्स्वयम् ॥ १४० ॥ तस्माज्जातो महानब्धिस्तत्र सुष्वाप स प्रभुः ॥ नारायण इति ख्यातः स वै जलपतिः स्वयम् ॥
॥१४१॥ तदर्द्धाच्च महाकूर्मस्ततः शेषो महानभूत् ॥ त्रिधाऽभवत्स वै शेषो भूमा शेषश्च भौमनी ॥ १४२ ॥ भूमा स वै विराड् ज्ञेयः शेषोपरि स
चास्थितः ॥ भौमनी च महालक्ष्मीः सा भूम्नो हृदि संस्थिता ॥१४३॥ भूम्नो जातः स वै ब्रह्मा सृष्टिस्थितिविनाशकः ॥ त्रिधामूर्तिः स वै ब्रह्मा
कल्पेकल्पे क्रमादयम् ॥ १४४ ॥ पटं सुषुप्तभूतं यत्पुराणपुरुषासनम् ॥ यत्र गत्वेन्द्रियाण्येव तृप्तिं प्राप्य क्षयंति वै ॥ १४५ ॥ अहंकारस्तदा
गत्य चैतन्यं मनसि स्थितम् ॥ वंचयित्वा पुनर्लोकं करोति स्वकलीलया ॥ १४६ ॥ तुरीयशक्तिर्या ज्ञेया महाकाली सनातनी ॥ महाकल्पैश्च
तैः सर्वैस्तदंगं श्रुतिभिः स्मृतम् ॥१४७॥ नमस्तस्यै महाकाल्यै मम मात्रे नमोनमः ॥ यतः पुराणपुरुषा भवंति च लियंति च ॥ १४८ ॥ दशैव
च महाकल्पा व्यतीता इह भोः सुराः ॥ सांप्रतं वर्तते यो वै महाकल्पो भविष्यकः ॥ १४९ ॥ तदुत्पत्तिं शृणुध्वं भो देवाः सर्पिगणा मम ॥
अचिन्त्यमक्षरं यत्तु तुरीयं च सदा स्थितम् ॥ १५० ॥ यद्गत्वा न निवर्तन्ते नरास्तत्रैव तत्पदम् ॥ अनेकसृष्टिरचनाः संति तस्यैव लीलया ॥
॥ १५१ ॥ तस्यान्तं न विदुर्देवाः कथं जानंति वै नराः ॥ भूतोभूतो महाकल्पो दृष्टो वेदैस्तदीरितः ॥ १५२ ॥ भाव्या ये तु महाकल्पा न वै
जानंति ते सदा ॥ त्रयस्त्रिंशन्महाकल्पाः कैश्चिद्वेदैरुदीरिताः ॥ १५३ ॥ अष्टादश महाकल्पाः पृथङ्ग् नाम्नोपवर्णिताः ॥ एकादश महाकल्पाः
कैश्चित्प्रोक्ताः पुरातनैः ॥ १५४ ॥ अतोऽहं निश्चयेनाद्य भाव्यकल्पेषु भोः सुराः ॥ वेदानां वचनं सत्यं नान्यथा च भवेत्क्वचित् ॥ १५५ ॥
तदव्ययात्समुद्भूतो राधाकृष्णः सनातनः ॥ एकीभूतं द्वयोरंगं राधाकृष्णो बुधैः स्मृतः ॥ १५६ ॥ सहस्रयुगपर्यंतं यत्तेपे परमं तपः ॥ तदा स च
द्विधा जातो राधाकृष्णः पृथक्पृथक् ॥ १५७ ॥ सहस्रयुगपर्यन्तं तेपतुस्तौ परं तपः ॥ तयोरंगात्समुद्भूता ज्योत्स्ना तत्तमनाशिनी ॥ १५८ ॥
तज्ज्योत्स्नाभिः समुद्भूतं दिव्यं वृन्दावनं शुभम् ॥ एकविंशत्प्रकृतयो योजनेयोजने स्मृताः ॥ १५९ ॥ दिव्यं वृन्दावनं जातं चतुराशीतिसंमिते ॥

क्रोशायामं महारम्यं तल्लिंगं शृणु मे प्रभो ॥ १६० ॥ इन्द्रियप्रकृतीनां च दशानां ग्रामतद्दश[1] ॥ गोकुलं वार्षभं नान्दं भांडीरं माथुरं तथा ॥
॥ १६१ ॥ व्रजं च यामुनं मान्यं श्रेयस्कं गोपिकं क्रमात् ॥ मात्राभूतदशभ्यश्च प्रकृतिभ्यः समुद्भवम् ॥१६२॥ तथा दशवनं रम्यं तेषां नामानि
मे शृणु ॥ वृन्दावनं गोपवनं बहुलावनमेव च ॥१६३॥ मधुशृंगं कुञ्जवनं वनं दधिवनं तथा ॥ रहःक्रीडावनं रम्यं वेणुपद्मवनं क्रमात् ॥१६४॥
मनसः प्रकृतेर्जातो गिरिर्गोवर्द्धनो महान् ॥ दिव्यं वृन्दावनं दृष्ट्वा परमानंदमाप सः ॥ १६५ ॥ कृष्णादुद्भवन्गोपास्तिस्रः कोट्यो गुणात्मकाः॥
श्रीदामाद्याः सात्त्विकाश्च राजसा अर्जुनादयः ॥ १६६ ॥ कंसाद्यास्तामसा जाता दिव्यलीलाप्रकारिणः ॥ राधांगादुद्भवा गोप्यस्तिस्रः कोट्य
स्तथा क्रमात् ॥ १६७ ॥ ललिताद्याः सात्त्विकाश्च कुब्जाद्या राजसास्तथा ॥ तामसाः पूतनाद्याश्च नानाहेलाचरित्रकाः ॥ १६८ ॥ सहस्रयुग
पर्य्यन्तं तेषां लीला बभूव ह ॥ ततस्तौ तान्समाहृत्य तेपतुश्च पुनस्तपः ॥ १६९ ॥ द्विधा जातः स वै कृष्णो राधा देवी तथा द्विधा ॥ सहस्र
शीर्षा पुरुषः सहस्राक्षः सहस्रपात् ॥ १७० ॥ पूर्वार्द्धात्स च वै जातः परार्द्धात्कृष्ण एव हि ॥ एकशीर्षा त्रिनेत्रा च द्विपदी द्विसहस्रिका ॥
॥ १७१ ॥ पूर्वार्द्धात्सा तु वै जाता राधा देवी परार्द्धतः ॥ पुरुषः प्रकृतिश्चोभौ तेपतुः परमं तपः ॥ १७२ ॥ सहस्रयुगपर्य्यन्तं दिव्ये वृन्दावने
शुभे ॥ तपसा ववृधाते तौ नाम्नानंतो ह्यनंतकः ॥ १७३॥ एकीभूतौ तु तत्पश्चात्संस्थितौ मैथुनेच्छया ॥ तदङ्गरोमकूपेषु ब्रह्माण्डाः कोटिशोऽभ
वन् ॥ १७४ ॥ कोट्यर्द्धयोजनायामास्ते तु सर्वे पृथक्पृथक् ॥ हृदि रोमसमुद्भूतो ब्रह्माण्डोऽयं च भोः सुराः ॥ १७५ ॥ ब्रह्माण्डादुद्भवो ब्रह्मा
पद्मपुष्पे समास्थितः ॥ स पद्मो योजनायामो भूमिमंडलसंस्थितः ॥ १७६ ॥ यतो जातं विधेः पद्मं तद्वै पद्मसरोवरम् ॥ प्रसिद्धं पुष्करक्षेत्रं तत्प
द्मसरसं सुराः ॥ १७७ ॥ विस्मितः स तदा ब्रह्मा नररूपश्चतुर्मुखः ॥ नाले नाले गतोसौ वै दिव्यं जातं शतं समाः ॥ १७८ ॥ नान्तं जगाम
पद्मस्य पुनर्ब्रह्मा स चागतः ॥ मायया मोहितस्तत्र रुरोद बहुधा तदा ॥ १७९ ॥ रोदनाद्रुद्र उत्पन्नः स च तत्क्षेमकारकः ॥ किं रोदिषि महा
भाग त्वदीशो हृदये तव ॥ १८० ॥ इति श्रुत्वा वचस्तस्य ब्रह्मा लोकपितामहः ॥ समाधिभूतो हृदये चिरं तेपे स्वकेच्छया ॥ १८१ ॥ दिव्यव
र्षशताब्दे तु प्रादुर्भूतो हरिः स्वयम् ॥ वचनं प्राह भगवान्मेघगंभीरया गिरा ॥ १८२ ॥ कर्मभूमिरियं ब्रह्मञ्जीवान्ता जीवकारिणी ॥ सहस्रयोज
नायामा विश्वस्मिन्भूमिमण्डले ॥ १८३ ॥ हिमाद्रिरुत्तरे तस्याः पूर्वेऽब्धिश्च महोदधिः ॥ रत्नाकरः पश्चिमेऽब्धिर्दक्षिणे वडवाब्धिकः ॥१८४॥

---

[1] प्रयोगोयमार्षः ।

अतः सर्वे भविष्यंति लोकाश्चोर्द्ध्वं तथा ह्यधः ॥ कर्मभूमेर्मध्यभूतः पुष्करोऽयं सनातनः ॥ १८५ ॥ मत्तो वेदान्भवान्प्राप्य करिष्यति
मखं शुभम् ॥ यज्ञाद्देवा भविष्यंति त्रिधाभूता गुणत्रयात् ॥ १८६ ॥ सिद्धा विद्याधराश्चैव चारणाः सात्त्विकास्त्रिधा ॥ गंधर्वयक्षरक्षांसि
राजसा गिरिसंस्थिताः ॥ १८७ ॥ पिशाचगुह्यका भूतास्तामसा गामिनो ह्यधः ॥ तथा स्वधामया यज्ञास्त्रिधा पितृगणा विधे ॥
॥ १८८ ॥ भविष्यंति सुरै रम्या विमानसदृशाश्च खे ॥ खेचरा गौरवर्णाश्च श्यामास्ते सात्त्विकाः स्मृताः ॥ १८९ ॥ गिरिद्वीपमया
रम्याः सरोरूपाश्च राजसाः ॥ भूचरास्ते भविष्यंति त्रिधा पितृगणा विधे ॥ १९० ॥ बिलेतलमया ये तु नारका यातनामयाः ॥ तामसा
स्ते भविष्यंति पितरोऽधोमहीतले ॥ १९१ ॥ व्ययभूताश्च ते लोका वृद्धा मध्याः क्षयाः क्रमात् ॥ इयं भूमिर्महाभागा सर्वदा च सनातनी ॥
॥ १९२ ॥ मेरुर्वै च नमेरुश्च द्वीपाश्चासंस्तथा न हि ॥ इलावर्तादिखण्डाश्च संति नैव क्वचित्क्वचित् ॥ १९३ ॥ ये तु तारामया लोका विमा
नसदृशा विधे ॥ स्वेच्छया च करिष्यंति रक्षिता यज्ञकर्मणा ॥ १९४ ॥ यज्ञो नास्ति यदा भूमौ तदा ते भगणा विधे ॥ विघ्नभूताश्चरिष्यंति
नित्यवक्रातिचारिणः ॥ १९५ ॥ कर्मभूमिश्च गौर्ज्ञेया श्रुतिरूपा जगन्मयी ॥ यस्तां पाति च भो ब्रह्मन्स गोप इति विश्रुतः ॥ १९६ ॥ गोप
शक्तिः स वै गोपो गोपीनामर्चको हरिः ॥ कोटिकोटिसहस्राश्च सर्वे गोपा हरेः कलाः ॥ १९७ ॥ तावंतश्चैव ब्रह्माण्डा गोपनाम्ना प्रकीर्तिताः ॥
कर्मभूमेस्तथोर्ध्वं च रविर्योजनलक्षकः ॥१९८॥ ततश्शशी तथामानस्ततश्चोर्ध्वं भमण्डलम् ॥ द्विलक्षयोजनगतस्ततो भौमस्तथाविधः ॥१९९॥
भौमाद्बुधस्तथा ज्ञेयो बुधाच्च बृहतांपतिः ॥ गुरोः शुक्रस्तथामानः शुक्रात्सौरिस्तथागतः ॥२००॥ शनेराहुस्तथा ज्ञेयो राहोः केतुस्तथोर्ध्वगः ॥
सप्तलक्षमितंज्ञेयं केतोः सप्तर्षिमण्डलम् ॥२०१॥ लक्षैकादशगाः सर्वे ततश्चोर्ध्वं ध्रुवास्पदम् ॥ लक्षयोजनगं चैव ततश्चोर्ध्वं महत्पदम् ॥ २०२ ॥
लक्षयोजनगं ज्ञेयं ततश्चोर्ध्वं जनास्पदम् ॥ लक्षयोजनगं ज्ञेयं तदूर्ध्वं तपसः स्थलम् ॥२०३॥ एवं च कर्मभूमेश्च तपः कोटचर्धयोजनम् ॥ कर्मभू
मेरधश्चैव पातालाः सप्त चान्तराः ॥ २०४ ॥ लक्षयोजनगा ज्ञेयास्ततश्चाधोगताश्च ये ॥ नरकाश्च क्रमाज्ज्ञेया भूमेः कोटचर्द्धयोजनाः ॥ २०५ ॥
कर्मभूमेरुत्तरे च खंडान्यष्टौ ततः परम् ॥ लवणाब्धिस्ततो द्वीपस्ततः क्षीराब्धिरेव हि ॥ ततो द्वीपस्ततः सिंधुस्ततो द्वीपस्ततोऽब्धिकः ॥२०६॥
कोटचर्द्धलक्षव्यानेन योजनेन विधे स्वयम् ॥ २०७ ॥ कर्मभूमेः स वै ज्ञेयो लोकालोको महाचलः ॥ लोकालोको दक्षिणे च पश्चिमे च स वै
गिरिः ॥२०८॥ पूर्वे च कर्मभूमेश्च लोकालोकस्तथाविधः॥ एतेषां समुदायानां ब्रह्माण्डोऽयं प्रकीर्तितः॥२०९॥त्वत्तो भविष्यति विधे कल्पपर्यन्त

मेव हि ॥ ओमित्येकाक्षरं ब्रह्म ततो विष्णुस्त्रिधाभवत्॥२१०॥अद्य विष्णुः स वै कृष्ण इह विष्णुः स वै विराट्॥इति विष्णुः स वै ज्ञेयः पुराणपु
रुषोत्तमः ॥२११॥ पुराणपुरुषो ज्ञेय आदिब्रह्मा चिरायुगः ॥ दैवे युगसहस्रे द्वेऽहोरात्रं तस्य कीर्तितम् ॥२१२॥ विष्णोस्तु रोमकूपेषु ब्रह्माण्डाः
कोटिशोऽभवन् ॥ अद्य विष्णुरहं ब्रह्मन्विग्रहा तव भूतले॥२१३॥इत्युक्त्वान्तर्दधे विष्णुर्ब्रह्मा सृष्टिमचीकरत् ॥ तेन प्रोक्तं यतो भाव्यं महाकल्पो
हि स स्मृतः ॥२१४॥ भविष्यो नाम विख्यातो द्विसहस्रभवायुषा ॥ पूर्वार्द्धश्च परार्द्धश्च पुराणपुरुषस्य हि ॥ २१५ ॥ अष्टादशसहस्राणि कल्पाः
पूर्वार्द्धके गताः ॥ परार्द्धः सांप्रतं ज्ञेयो जातं तस्य दिनद्वयम् ॥ २१६ ॥ अद्याहं कूर्मकश्चैव वाह्ने मत्स्यः प्रकीर्तितः ॥ तृतीयः श्वेतवाराहो दिवस
स्तस्य कल्पवान् ॥ २१७ ॥ तथा मध्याह्नकालो हि सांप्रतं वर्तते सुराः ॥ भाविष्याख्ये महाकल्पे कथा भाविष्यकैर्जनैः ॥ २१८ ॥ कथिता
ब्रह्मणश्चाग्रे शतकोटिप्रविस्तरैः ॥ दशलक्षणसंयुक्तं शतकोटिप्रविस्तरम् ॥ २१९ ॥ महापुराणं कथितं पुराणं पंचलक्षणम् ॥ पद्मात्रिंशत्सहस्रं
च कल्पेकल्पे प्रकीर्तितम् ॥ २२० ॥ कल्पनाम्ना पुराणं च महादेवेन निर्मितम् ॥ अष्टादशपुराणानि निर्मितानि शिवात्मना ॥ २२१ ॥ द्वाप
रान्ते च भगवान्व्यासः सत्यवतीसुतः ॥ तान्येव जनयामास लोकमङ्गलहेतवे ॥ २२२ ॥ ॥ व्यास उवाच ॥ ॥ इति कल्किवचः श्रुत्वा
ते देवा विस्मयान्विताः ॥ नमस्कृत्य गमिष्यंति स्वंस्वं धाम प्रहर्षिताः ॥ २२३ ॥ इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखण्डापर
पर्याये कलियुगीयेतिहाससमुच्चये पञ्चविंशोऽध्यायः ॥ २५ ॥ ७ ॥ ॥ व्यास उवाच ॥ ॥ तदा स भगवान्कल्किः पुराणपुरुषोद्भवः ॥
दिव्यं वाजिनमारुह्य खड्गी वर्मी च चर्मधृक् ॥ म्लेच्छांस्तान्दैत्यभूतांश्च हत्वा योगं गमिष्यति ॥ १ ॥ षोडशाब्दसहस्राणि तद्योगाग्निप्रता
पिता ॥ भस्मभूता कर्मभूमिर्निर्जीवा भविता तदा ॥ २ ॥ ततोऽनुयोगं जनितो मेघो भूत्वा लयंकरः ॥ प्रलयाग्रेण सा भूमिर्ज
लमध्ये गमिष्यति ॥ ३ ॥ तदा कलियुगो घोरो बलिपार्श्वं गमिष्यति ॥ गते कलियुगे घोरे कर्मभूमिं पुनर्हरिः ॥ कृत्वा स्थलमयीं रम्यां
यज्ञैर्देवान्यजिष्यति ॥ ४ ॥ यज्ञभागमुपादाय देवास्ते बलसंयुताः ॥ वैवस्वतं मनुं गत्वा कथयिष्यंति कारणम् ॥ ५ ॥ कल्किनो वदना
ज्जातो ब्राह्मणो वर्ण एव हि ॥ बाह्वोः क्षत्रं विशो जान्वोः शूद्रो वर्णस्तदंघ्रयोः ॥ ६ ॥ गौरो रक्तस्तथा पीतः श्यामस्ते ब्राह्मणादयः ॥
देव्याः शक्तिं समादाय जनिष्यंति सुतान्बहून् ॥ ७ ॥ एकविंशत्किष्कुमिता मनुजा धर्मरूपिणः ॥ जातिधर्ममुपादाय यजिष्यंति सुरा
न्मुदा ॥ ८ ॥ तदा वैवस्वतो धीमान्नत्वा तं कल्किनं हरिम् ॥ अयोध्यायां राजपदं करिष्यति तदाज्ञया ॥ ९ ॥ तच्छिक्षातो भवेत्पुत्रो यः स

इक्ष्वाकुरेव हि ॥ पितू राज्यं पुरस्कृत्य भूमौ दिव्यं शतं समाः ॥ दिव्यवर्षशतायुश्च त्यक्त्वा देहं गमिष्यति ॥ १० ॥ यदा तु भगवान्कल्की
ब्रह्मसत्रं करिष्यति ॥ तदा वेदाश्च चत्वारो मूर्तिमंतश्च साङ्गकाः ॥ अष्टादशपुराणैश्च तत्रायास्यंति हर्षिताः ॥ ११ ॥ स्तोष्यंति कल्किनं देवं
पुराणपुरुषांशकम् ॥ कार्त्तिके शुक्लपक्षे च नवम्यां गुरुवासरे ॥ १२ ॥ यज्ञकुण्डाच्च पुरुषो भविष्यति महोत्तमः ॥ नाम्ना सत्ययुगो ज्ञेयः सत्य
मार्गप्रदर्शकः ॥ १३ ॥ दृष्ट्वा तं पुरुषं रम्यं तदा ब्रह्मादयः सुराः ॥ तां तिथिं वर्णयिष्यंति कर्मक्षयकरीं मनोः ॥ १४ ॥ अस्यां तिथौ च मनुजो
धातृवृक्षतटे मुदा ॥ योऽर्चयिष्यति यान्देवान्देवास्ते तस्य वश्यगाः ॥ १५ ॥ अक्षया नवमी नाम युगादिनवमी हि सा ॥ लोकमंगलदात्री च
सर्वकिल्बिषनाशिनी ॥ १६ ॥ धातृमूलतले चैव मालतीं तुलसीं मुदा ॥ संस्थाप्य वेदविधिना शालग्रामं यजंति ये ॥ जीवन्मुक्ताश्च ते ज्ञेया
पितॄणां तृप्तिकारकाः १७ ॥ धातृवृक्षतले गत्वा यो वै श्राद्धं करिष्यति ॥ गयाश्राद्धसहस्रस्य लप्स्यते च फलं परम् ॥ १८ ॥ यः करोति तथा
होमं सहस्रमखसन्निभम् ॥ मृतः सन्स्वर्गमाप्नोति सकुलः सपरिच्छदः ॥१९॥ इत्युक्ते वचने तेषां कल्की देवो मुदान्वितः ॥ तथास्त्वित्येव वचनं
वदिष्यति सुरान्प्रति ॥ २० ॥ इत्युक्त्वा भगवान्कल्की पश्यतां देवरूपिणाम् ॥ तत्रैवान्तर्गतो भूत्वा सुषुप्तश्च भविष्यति ॥ २१ ॥ गते तस्मि
न्भगवति कर्मभूमिः सुदुःखिता ॥ विरहाग्निमती भूत्वा बीजांस्तान्संक्षयिष्यति ॥२२॥ तस्मिन्काले महादैत्याः पातालतलवासिनः ॥ प्रह्लादं च
पुरस्कृत्य गमिष्यंति सुरान्प्रति ॥ २३ ॥ खरोष्ट्रगृद्ध्रमहिषकाककर्कसमास्थिताः ॥ सिंहव्याघ्रवृकारूढाः शृगालश्येनवाहनाः ॥ २४ ॥ प्रासपट्टि
शखड्गांश्च भुशुंडीपरिघादिकान् ॥ गृहीत्वा वेगवन्तस्ते गर्जिष्यंति पुनः पुनः ॥ २५ ॥ तदा शक्रादयो देवास्त्रयस्त्रिंशद्गणा मुदा ॥ स्वायुधानि
गृहीत्वाशु करिष्यंति रणं महत् ॥२६॥ दिव्यवर्षमयं घोरं युद्धं तेषां भविष्यति ॥ मृतान्मृतान्रणे दैत्यान्भार्गवो जीवयिष्यति ॥२७॥ श्रमभूता
स्तथा देवास्त्यक्त्वा युद्धं समन्ततः ॥ क्षीराब्धिं च गमिष्यंति यत्र साक्षाद्धरिः स्वयम् ॥ २८ ॥ तेषां स्तुत्या स भगवान्देवमंगलहेतवे ॥
स्वपूर्वार्द्धं सरूपं च करिष्यति सनातनः ॥ २९ ॥ स च हंसो हरिः साक्षाच्छतसूर्यसमप्रभः ॥ शुक्रं प्रह्लादप्रमुखांस्तेजसा तापयिष्यति ॥
॥ ३० ॥ तदा पराजिता दैत्यास्त्यक्त्वा गां दुःखिता भृशम् ॥ वितले च गमिष्यंति महादेवेन रक्षिताः ॥ ३१ ॥ पुनस्ते सकला देवा निर्भया
निरुपद्रवाः ॥ वैवस्वतस्य तनयं चाभिषेक्ष्यंति भूपदे ॥ ३२ ॥ दिव्यवर्षशतायुश्च स इक्ष्वाकुर्भविष्यति ॥ वर्षाणां च प्रमाणेन नृणामायुश्चतुश्श

तम् ॥३३॥ इति ते कथितं सर्वं यत्पृष्टोऽहं मनो त्वया ॥ चतुर्युगानां चरितं नृपाणां च पृथक्पृथक् ॥३४॥ चतुष्पादा हि धर्मस्य ज्ञानं ध्यानं शमो
दमः ॥ आत्मज्ञानं स वै ज्ञानं ध्यानमध्यात्मचिन्तनम् ॥ मनःस्थिरत्वं च शमो दमस्त्विन्द्रियनिग्रहः॥३५॥चतुर्लक्षाब्दकान्येव द्वात्रिंशच्च सह
स्रकम् ॥ तत्संख्यया हि धर्मस्य पादश्चैकः प्रकीर्तितः॥३६॥प्राह्णमध्याह्नसायाह्नं त्रिसंध्यं च भवेत्सदा ॥ एकैकेन पदा तस्य विराजो भुवि वर्तते ॥
॥ ३७ ॥ यदा धर्मो भवेद्वृद्धस्तदायुश्चैव वर्द्धते ॥ सप्तश्लोकसहस्राणि खंडेऽस्मिन्कथितानि हि ॥ अतश्चोत्तरखंडं हि वर्णयामि मनोशृणु ॥ ३८ ॥
इति श्रीभविष्ये महापुराणे प्रतिसर्गपर्वणि चतुर्युगखंडापरपर्याये कलियुगीयेतिहाससमुच्चये षड्विंशोऽध्यायः ॥२६॥छ॥ इति चतुर्थःखण्डः ॥ ४ ॥

इति श्रीभविष्ये महापुराणे तृतीयं प्रतिसर्गपर्व चतुर्युगखण्डापरपर्यायं समाप्तम् ॥ ३ ॥

इदं पुस्तकं मुम्बय्यां श्रीकृष्णदासात्मजक्षेमराजश्रेष्ठिना
स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) मुद्रणालये मुद्रितम्।
संवत् १९६७ शके १८ ३२

॥ ❀ ॥ इति श्रीभविष्ये महापुराणे तृतीयं प्रतिसर्गपर्व समाप्तम् ॥ ❀ ॥

॥ अथ श्रीभविष्यमहापुराणे चतुर्थमुत्तरपर्व प्रारभ्यते ॥

उत्तरपर्व ४.


सूत.
शौनक.
ऋषि.
श्रीकृष्णभगवान.
धर्मराज.
पांडव.
श्रीकृष्ण.
युधिष्ठिर.

॥ ॥ श्रीगणेशाय नमः ॥ ॥ श्रीसरस्वत्यै नमः ॥ ॥ ॐ नमो भगवते वासुदेवाय ॥ ॥ कल्याणानि ददातु वो गणपतिर्यस्मिन्नतुष्टे स
ति क्षोदीयस्यपि कर्मणि प्रभवितुं ब्रह्मापि जिह्मायते ॥ भेजे यच्चरणारविन्दमसकृत्सौभाग्यभाग्योदयैस्तेनैषा जगति प्रसिद्धिमगमद्देवेन्द्रलक्ष्मी
रपि ॥ १ ॥ शश्वत्पुण्यहिरण्यगर्भरसनासिंहासनाध्यासिनी सेयं वागधिदेवता वितरतु श्रेयांसि भूयांसि वः ॥ यत्पादामलकोमलांगुलिनख
ज्योत्स्नाभिरुद्वेल्लितः शब्दब्रह्मसुधांबुधिर्बुधमनस्युच्छृंखलं खेलति ॥ २ ॥ नमस्तस्मै विश्वोदयविलयरक्षाप्रकृतये शिवाय क्लेशौघच्छिदुरपद
पद्मप्रणतये ॥ अमन्दस्वच्छन्दप्रथितपृथुलीलातनुभृते त्रिवेदीवाचामप्यपथनिजतत्त्वस्थितिकृते ॥ ३ ॥ यस्य[१] गण्डतले भाति विमला षट्प
दावली ॥ अक्षमालेव विमला स नः पायाद्गणाधिपः ॥ ४ ॥ ॐ नमो वासुदेवाय सशार्ङ्गाय सकेतवे ॥ सगदाय सचक्राय सशंखाय नमो
नमः ॥ ५ ॥ नमः शिवाय सोमाय सगणाय ससूनवे ॥ सवृषाय सशूलाय सकपालाय सेन्दवे ॥ ६ ॥ शिवं ध्यात्वा हरिं स्तुत्वा प्रणम्य परमे
ष्ठिनम् ॥ चित्रभानुं च भानुं च नत्वा ग्रन्थमुदीरयेत् ॥ ७ ॥ छत्राभिषिक्तं धर्मज्ञं धर्मपुत्रं युधिष्ठिरम् ॥ द्रष्टुमभ्यागता हृष्टा व्यासाद्याः परम
र्षयः ॥ ८ ॥ मार्कण्डेयः समाण्डव्यः शाण्डिल्यः शाकटायनः ॥ गौतमो गालवो गार्ग्यः शातातपपराशरौ ॥ ९ ॥ जामदग्न्यो भरद्वाजो भृगु
र्भागुरिरेव च ॥ उत्तंकः शंखलिखितौ शौनकः शाकटायनिः ॥ १० ॥ पुलस्त्यः पुलहो दाल्भ्यो बृहदश्वः सलोमशः ॥ नारदः पर्वतो जह्नुःपाव
सुपरावसू ॥ ११ ॥ तानृषीनागतान्दृष्ट्वा वेदवेदाङ्गपारगान् ॥ भक्तिमान्भ्रातृभिः सार्द्धं कृष्णधौम्यपुरःसरः ॥ १२ ॥ युधिष्ठिरः संप्रहृष्टः
समुत्थायाभिवाद्य च ॥ अर्घ्यमाचमनं पाद्यमासनानि स्वयं ददौ ॥ १३ ॥ उपविष्टेषु तेष्वेव तपस्विषु युधिष्ठिरः ॥ विनयावनतो[२] भूत्वा व्यासं
वचनमब्रवीत् ॥ १४ ॥ भगवंस्त्वत्प्रसादेन प्राप्तं राज्यं महन्मया ॥ विक्रम्य निहतः संख्ये सानुबन्धः सुयोधनः ॥ १५ ॥ सरोगस्य यथा
भोगः प्राप्तोऽपि न सुखावहः ॥ हत्वा ज्ञातींस्तथा राज्यं न सुखं प्रतिभाति मे ॥ १६ ॥ यत्सुखं पावनं प्रीतिर्वनमूलफलाशिनाम् ॥ प्राप्य गां
च हतारातिं न तदस्ति पितामह ॥ १७ ॥ यो नो बन्धुर्गुरुर्गोप्ता सदा शर्म च वर्म च ॥ स मया राज्यलोभेन भीष्मः पापेन घातितः ॥ १८ ॥
अविवेकमहं धास्ये मनो मे पापपङ्किलम्[३] ॥ क्षालयित्वा तव गिरा बहुदर्शितवारिणा ॥ १९ ॥ संश्रुतानि पुराणानि वेदास्सांगा मया विभो ॥
ममाद्य धर्मसर्वस्वं प्रज्ञादीपेन[४] दर्शय ॥ २० ॥ एते सधर्मगोप्तारो मुनयः समुपागताः ॥ पिबंतो नेत्रभ्रमरैर्भवतो मुखपंकजम् ॥ २१ ॥ अर्थशास्त्राणि

---

[१] 'यस्य' इत्यारभ्य–'छत्राभिषिक्तम्' इत्यतः प्राक्तनः पाठ एकस्मिन्पुस्तकेऽधिकोऽस्ति । [२] विनयप्रणतः—इ० पा० । [३] पापशंकितम्--इ० पा० । [४] ज्ञानदीपेन--इ० पा० ।

यावंति धर्मशास्त्राणि यानि वै ॥ श्रुतानि सर्वशास्त्राणि भीष्माद्भागीरथीसुतात् ॥ २२ ॥ स्वर्गं गते शान्तनवे भवान्कृष्णोऽथ यादवः ॥ सुहृत्त्वा
द्बन्धुभावाच्च नान्यः शिक्षयिता मम ॥ २३ ॥ सत्यं[1] सत्यवतीसूनुर्द्धर्मराजाय वक्ष्यति ॥ विशेषधर्मानखिलान्मुनीनामविशेषतः ॥ २४ ॥ व्यास
उवाच ॥ ॥ यदाख्येयं तदाख्यातं मया भीष्मेण तेऽनघ ॥ मार्कण्डेयेन धौम्येन लोमशेन महर्षिणा ॥ २५ ॥ धर्मज्ञो ह्यसि मेधावी गुणवान्प्रा
ज्ञसत्तमः ॥ न तेऽस्त्यविदितं किञ्चिद्धर्माधर्मविनिश्चये ॥ २६ ॥ पार्श्वस्थिते हृषीकेशे केशवे केशिसूदने ॥ कस्यचित्कथने जिह्वा तत्र संपरि
वर्तते ॥ २७ ॥ कर्ता पालयिता हर्ता जगतां यो जगन्मयः ॥ प्रत्यक्षदर्शी सर्वस्य धर्मान्[2]वक्ष्यत्यसौ तव ॥ २८ ॥ समादिश्येतिकर्तव्यं भगवा
न्बादरायणः ॥ पूजितः पाण्डुतनयैर्जगाम स्वतपोवनम् ॥ २९ ॥ स्वाभाष्य भारतविधातरि संप्रयाते ते कौतुकाकुलधियो मुनयः प्रशान्ताः ॥
किं पृच्छति क्षपितभारतलोकशोकः[3] किं वक्ष्यतीह भगवान्यदुवंशवीरः ॥ ३० ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि व्यासागमनवर्णनंनाम
प्रथमोऽध्यायः ॥ १ ॥ ॥ छ ॥ युधिष्ठिर उवाच ॥ ॥ कस्य प्रतिष्ठा निर्दिष्टा को हेतुः किं परायणम् ॥ कस्मिन्नैतल्लयं याति कस्मादु
त्पद्यते जगत् ॥ १ ॥ कति द्वीपाः समुद्राश्च कियंतो हि कुलाचलाः ॥ कियत्प्रमाणमवनेर्भुवनानि कियंति च ॥ २ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥
पौराणश्चैव विषयो यत्पृष्टोऽहं त्वयानघ ॥ श्रुतोऽनुभूतश्च मया संसारे सरता[5] चिरम् ॥ ३ ॥ अजाय विश्वरूपाय निर्गुणाय गुणात्मने ॥
नमस्तस्मै भगवते वासुदेवाय वेधसे ॥ ४ ॥ अत्र ते वर्णयिष्यामि शृणु पार्थ[4] पुरातनम् ॥ याज्ञवल्क्येन मुनिना भविष्यं भास्वतांपतिः ॥
पृष्टो यदुत्तरं प्रादादृषिभ्यस्तन्मया श्रुतम् ॥ ५ ॥ धन्यं यशस्यमायुष्यं सर्वाशुभविनाशनम् ॥ भविष्योत्तरमेतत्ते कथयामि युधिष्ठिर ॥ ६ ॥
एकात्मकं[6] त्रिदैवत्यं चतुःपंचसुलक्षणम् ॥ गुणकालादिभेदेन सदसत्संप्रदर्शितम् ॥ ७ ॥ एक एव जगद्योनिः प्रतियोनिषु संस्थितः ॥ एकधा
बहुधा चैव दृश्यते जलचन्द्रवत् ॥ ८ ॥ ब्रह्मा विष्णुर्वृषांकश्च त्रयो देवाः सतां[7] मताः ॥ नामभेदैः क्रियाभेदैर्भिद्यंते नात्मना स्वयम् ॥ ९ ॥
प्रक्रिया चानुषंगश्च उपोद्घातस्तथैव च ॥ उपसंहार इत्येतच्चतुष्पादं प्रकीर्तितम् ॥ १० ॥ सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ॥ वंशानुचरितं
चैव पुराणं पंचलक्षणम् ॥ ११ ॥ एष वक्तव्यविषयः सुमहान्प्रतिभाति मे ॥ तथाप्युद्देशतो वच्मि सर्गं प्रति तवानघ ॥ १२ ॥ महदादिविशेषान्तं
सवैरूप्यं सलक्षणम् ॥ पञ्चप्रमाणं षट्कक्षं पुरुषाधिष्ठितं जगत् ॥ १३ ॥ अव्यक्ताज्जायते बुद्धिर्महानिति च सा स्मृता ॥ अहंकारस्तु महतस्त्रि

---

[1] सेव्यः—इ० पा० । [2] धर्मतत्त्वार्थकोविदः—इ० पा० । [3] दुःखितलोकशोक—इ० पा० । [4] च वार्ष्णेय—इ० पा० । [5] चरता मया—इ०पा० । [6] सर्वात्मकम्—इ० पा० । [7] सनातनाः—इ० पा० ।

गुणः स च पठ्यते ॥ १४ ॥ तन्मात्राणि च पञ्चाहुरहङ्काराच्च सात्त्विकात्[1] ॥ जातानि तेभ्यो भूतानि भूतेभ्यः सचराचरम् ॥ १५ ॥ जलमूर्तिमये विष्णौ नष्टे स्थावरजंगमे ॥ भूतात्मकमभूदण्डं महत्तदुदकेशयम् ॥ १६ ॥ सृष्ट्या[2] शक्त्या च निर्भिन्नं तदण्डमभवद्द्विधा ॥ भूकपालमथैकं तद्द्वितीयमभवन्नभः ॥ १७ ॥ उल्बं तस्याभवन्मेरुर्जरायुः पर्वताः स्मृताः ॥ नद्यो धमन्यः सञ्जाताः क्लेदः सर्वत्रगं[3] पयः ॥ १८ ॥ योजनानां सहस्राणि षोडशाधः प्रतिष्ठित ॥ उत्सेधे चतुराशीतिर्द्वात्रिंशदूर्ध्वविस्तृतः[4]॥ भूमिपंकजविस्तीर्णा कर्णिका मेरुरुच्यते ॥ १९ ॥ आदित्यश्चादिदेवत्वात्तत्राभूत्त्रिगुणात्मकः ॥ प्रातः प्रजापतिरसौ मध्याह्ने विष्णुरिष्यते ॥ रुद्रोऽपराह्णसमये स एवैकस्त्रिधामतः ॥ २० ॥ प्रातः प्रजापतेर्जाता मुनयो नव मानवाः[5] ॥ मरीचिरत्र्यंगिरसौ पुलस्त्यः पुलहः क्रतुः ॥ भृगुर्वशिष्ठ इत्यष्टौ नारदो नवमः स्मृतः ॥ २१ ॥ नव ब्रह्माण इत्येष पुराणे निश्चयः स्मृतः ॥ अंगुष्ठाद्दक्षिणाद्दक्षः संजज्ञे कमलोद्भवात् ॥ २२ ॥ वामा प्रसूतिरुदगादंगुष्ठात्तौ च दंपती ॥ ताभ्यां जातास्तु तनया हर्यश्वास्ते विनाशिताः ॥ सृष्टिं प्रति समुद्युक्ता नारदेन महात्मना ॥२३॥ दक्षः क्षीणान्सुतान्वीक्ष्य जनयामास कन्यकाः ॥ पञ्चाशद्दश विख्याताः सत्याद्या नामभिः स्मृताः ॥ २४ ॥ ददौ स दश धर्माय कश्यपाय त्रयोदश ॥ कालस्य नयने युक्ताः सप्तविंशतिमिंदवे ॥ २५ ॥ द्वे प्रादाद्बाहुपुत्राय द्वे कृशाश्वाय चैव हि ॥ रूपयौवनशालिन्यश्चतस्रोऽरिष्टनेमिने ॥ २६ ॥ एकां भृगोर्भवायैकां प्रादात्तेभ्यश्चराचरः ॥ अभवत्पुरुषव्याघ्र भूतग्रामश्चतुर्विधः ॥ २७ ॥ वैराजमथ वैकुण्ठं कैलासमिति नामतः ॥ मेरोः शृंगत्रयं मूर्ध्नि ब्रह्मविष्णुशिवालयम् ॥ २८ ॥ प्राचीदिक्क्रमयोगेन तेषां पार्श्वे पुरः स्मृताः ॥ इन्द्रादिलोकपालानां दिव्यैः स्वर्लक्षणैर्युताः ॥ २९ ॥ हिमवान्हेमकूटश्च निषधो मेरुरेव च ॥ नीलः श्वेतस्तथा शृंगी जम्बूद्वीपे कुलाचलाः ॥ जम्बूद्वीपप्रमाणेन सहस्रगुणितं शतम् ॥ ३० ॥ भिद्यते नवधा सोऽपि वर्षभेदेन भारत ॥ जम्बूशाककुशक्रौञ्चशाल्मगोमेदपुष्कराः ॥ द्वीपाः सप्त समाख्याताः समुद्रैः सप्तभिर्वृताः ॥ ३१ ॥ क्षारक्षीरेक्षुसुरया दध्ना चैव घृतेन च ॥ स्वादूदके न च भृतैर्द्विगुणैर्द्विगुणैस्तथा ॥३२॥ भूर्लोकोऽथ भुवर्लोकः स्वर्महर्जन इत्यपि ॥ तपः सत्यश्च कथिताः पार्थ सप्त सुरालयाः ॥ ३३ ॥ महातलो भूमितलः सुतलो वितलस्ततः ॥ रसातलश्च विज्ञेयः सप्तमश्च तलातलः ॥३४॥ हिरण्याक्षप्रभृतयो दानवेन्द्रा महोरगाः॥ वसंत्येतेषु कौन्तेय सिद्धाश्च ऋषयश्च ये ॥३५॥ स्वायंभुवो मनुः पूर्वं ततः स्वारोचिषोऽभवत् ॥ उत्तमस्तामसश्चैव रैवतश्चाक्षुषेति षट् ॥३६॥ वैवस्वतोऽयमधुना वर्तते मनुरुत्तमः ॥ यस्य पुत्रैः

---

[1] साक्षिकात्–इ० पा० । [2] सृष्टशक्त्या–इ० पा० । [3] सर्वगतम्—इ० पा० । [4] मुखविस्तृतः—इ० पा० । [5] मानसाः–इ० पा० ।

प्रपौत्रैश्च विभक्तेयं वसुन्धरा ॥ ३७ ॥ आदित्या वसवो रुद्रा एकादश तथाश्विनौ ॥ उषस्त्रयः समाख्याता देव वैवस्वतेंऽतरे ॥ ३८ ॥ विप्रचित्तिहिरण्याख्यौ दैत्यदानवसत्तमौ ॥ तयोर्वंशे तु बहवो दैत्यदानवसत्तमाः ॥ ३९ ॥ पञ्चाशद्गुणितकोटियोजनानां महत्तया ॥ सप्तद्वीपसमुद्रायाः प्रमाणमवनेः स्मृतम् ॥ ४० ॥ पिण्डेन च सहस्राणि सप्ततिर्जलमध्यतः ॥ गौरिवैषा सुमहती भ्राजते न च लीयते ॥ ४१ ॥ लोकालोकः परतरः पर्वतोऽग्रमहोच्छ्रयः ॥ द्वैतमर्थं स नियतो योऽसौ रविरुचामपि ॥ ४२ ॥ नैमित्तिकः प्राकृतिकस्तथैवात्यन्तिको लयः ॥ नित्यश्चतुर्थो विज्ञेयः कालो नित्यापहारकः ॥ ४३ ॥ उत्पद्यते स्वयं यस्मात्तत्तस्मिन्नेव लीयते ॥ रक्षति च परे पुंसि भूतानामेष निश्चयः ॥ ॥ ४४ ॥ यथर्तावृतुलिङ्गानि नानारूपाणि पर्यये ॥ दृश्यंते तानि तान्येव तथा भावा युगादिषु ॥ ४५ ॥ प्रतिलीनेषु भूतेषु विबुद्धः सकलं जगत् ॥ वेदशब्देभ्य एवादौ निर्ममे स महेश्वरः ॥ ४६ ॥ हिंस्राहिंस्रे मृदुक्रूरे धर्माधर्मावृतानृते ॥ ते तं विना प्रपद्यंते पुनस्तेष्वेव कर्मसु ॥ ४७ ॥ भूर्दशगुणेन पयसा संवृता तच्च तेजसा ॥ तेजोऽनिलेन नभसा तद्गुणेनानिलो वृतः ॥ ४८ ॥ भूतादिना तथाकाशं भूतादिर्महतावृतः॥ महान्परिवृतस्तेन पुरुषेणाविनाशिना ॥४९॥ एवं विधानामण्डानां सहस्राणि शतानि च ॥ उत्पन्नानि विनष्टानि भावितानि महात्मना ॥ ५० ॥ वैकुण्ठकोष्ठगतमेतदशेषतायां ख्यातं जगत्सुरनरोरगसिद्धनद्धम् ॥ पश्यंति शुद्धमुनयो बहिरंतरे च माया चराचरगुरोरपरैव काचित् ॥ ५१ ॥ इति श्रीभविष्ये महापुराणे उत्तरे पर्वणि ब्रह्माण्डोत्पत्तिवर्णनं नाम द्वितीयोऽध्यायः ॥ २ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ कीदृशी कृष्ण सा माया विष्णोरमिततेजसः ॥ यया व्यामोहितं यच्च जगदेतच्चराचरम् ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ येन द्वीपे पुरा विष्णुरास्ते चक्रगदाधरः ॥ वासुदेवः सगरुडः सचक्रश्च श्रिया सह ॥ २ ॥ नीलोत्पलदलश्यामः कुंडलाभ्यां विभूषितः ॥ भ्राजते मुकुटोद्द्योतकेयूरवनमालया ॥ ३ ॥ तस्य द्रष्टुमथाभ्यागान्नारदो मुनिसत्तमः ॥ प्रणम्य स्तुतिभिर्देवं प्राहेदं विस्मयान्वितः ॥ ४ ॥ संशयं परिपृच्छामि भगवन्वक्तुमर्हसि ॥ का माया कीदृशी माया किंरूपा च कुतस्तथा ॥ ५ ॥ तस्या दर्शय मे रूपं मायायाः पुरुषोत्तम ॥ या च मोहयते सर्वं त्रैलोक्यं सचराचरम् ॥ ६ ॥ आब्रह्मस्तंबपर्यंतं सदेवासुरमानुषम् ॥ वैकुंठं वासुदेवं च प्रसादं कर्तुमर्हसि ॥ ७ ॥ एवमुक्तस्तु मुनिना देवदेवो जनार्दनः ॥ प्रहस्योवाच देवर्षे न कार्यं मायया त्वया ॥ ८ ॥ भूयोऽपि मोहयामास सोमग्राहेण नारदम् ॥ नारदोपि महाराज प्रोवाचेदं पुनः

---

१ ध्यानम्—इ०, ध्यातम्—इ० च पा० ।

पुनः ॥ ९ ॥ मायां दर्शय मे देव नान्यदस्ति प्रयोजनम् ॥ अथासौ विष्णुरुत्थाय श्वेतद्वीपं पुनर्ययौ ॥ १० ॥ अङ्गुल्यग्रेण संगृह्य नारदं मुनिपुङ्गवम् ॥ ततो मार्गगतश्चक्रे आत्मानं द्विजरूपिणम् ॥ ११ ॥ ऋग्वेदसदृशः साक्षाद्विष्णुर्ब्रह्मवदास्थितः ॥ वृद्धद्विजोत्तमवपुः संशयो नाल्पकोभवत् ॥ १२ ॥ शिखी कमंडलुधृतो[1] मृगचर्मोपवीतकः ॥ यज्ञशर्मेति संज्ञां च चक्रेऽसावात्मनः प्रभुः ॥ १३ ॥ कृत्वापि कुशतंत्वग्रपवित्रकृतलक्षणम् ॥ आययौ स महीपृष्ठं जम्बूद्वीपं चचार ह ॥ १४ ॥ वैदिशं नाम नगरं वेत्रवत्यास्तटे शुभम् ॥ तस्मिन्सदोद्यमपरो धनधान्यसमृद्धिमान् ॥ १५ ॥ गोमहिष्यजसंपूर्णं पाशुपाल्येन संस्थितः ॥ हलकर्मवृषासक्तो वैश्यजातिरनिंदितः ॥ १६ ॥ गृहकर्मणि तन्निष्ठः सीरभद्र इति स्मृतः ॥ तस्यांतिके हरिः साक्षान्नारदेन सहागतः ॥ १७ ॥ तेनाप्यासनसन्मानैः समर्थेन कृतादरौ ॥ प्रोक्तं केनाथ किं तुभ्यं साध्यमन्नं न साध्यते ॥ १८ ॥ न वास्मदीयं युष्माकं रोचतेन्नं ततो हरिः ॥ प्रहस्य प्रददौ तस्मै वरं द्विजवरो महत् ॥ १९ ॥ उन्नाम्य वक्रं चोवाच देवसंस्तुतया गिरा ॥ संतु ते बहवः पुत्राः क्षेत्रव्यापारबुद्धयः ॥ २० ॥ पशुपाशगृहासक्ताः शतार्द्धबलवाहनाः ॥ तेषां पुत्राश्च पौत्राश्च कृषिवृद्धिप्रवर्द्धकाः ॥ २१ ॥ त्वञ्च वृत्तिशतैर्नित्यं वर्द्धस्व स्वजनावृतः ॥ इत्युक्त्वा स जगन्नाथो वासुदेवः सनारदः ॥ २२ ॥ क्षेत्रे गोस्वामिनामानं द्विजं ददृशतुश्च तौ ॥ दरिद्रं हलकर्मार्त्तं मेथ्याद्योपस्करार्दितम् ॥ २३ ॥ भागीरथ्यास्तटे रम्ये वेणिका[2]ग्रामसन्निधौ ॥ तृणगुल्मलताच्छन्नक्षेत्रे चिंताकुलो हि सः ॥ २४ ॥ ताभ्यां संप्रार्थितो विप्रो भोज्यं प्रादाच्च किंचन ॥ सकाशं तव संप्राप्तौ दूरादतिथिधर्मिणौ ॥ २५ ॥ इत्युक्तोऽसौ द्विजश्रेष्ठो हलकर्म विधाय तत् ॥ आजगाम गृहं तूर्णं ताभ्यां सह ससंभ्रमम् ॥ २६ ॥ चक्रे चैवादरं भक्त्या स्वयमासनसत्क्रियाम् ॥ पादशौचं तथाभ्यंगं कृत्वान्नं च सुसंस्कृतम् ॥ २७ ॥ सह पत्न्या सतनयो भोज्यं भुक्तिं चकार सः ॥ भुक्तभोज्यौ च शर्वर्यां सुखं सुप्तौ निशात्यये॥२८॥ प्रयातौ ददतुः श्रेष्ठं वरं तस्मै द्विजातये ॥ मा ते भवतु गोस्वामिन्कदाचिदपि कर्षणम् ॥ २९ ॥ मा धान्यं मखसंतानं मत्प्रसादाद्द्विजोत्तम ॥ इत्युक्त्वा जग्मतुस्तूर्णं पुनः पप्रच्छ नारदः॥३०॥ किमिदं वद देवेश शापरूपो वरस्त्वया ॥ भद्र गोस्वामिने दत्तः किं च वैश्ये तथाविधः॥३१॥ इत्युक्तः प्राह देवेशः शृणु नारद मद्वचः ॥ परमार्थं प्रवक्ष्येऽहं तव संशयकर्तनम् ॥ ३२ ॥ संवत्सरेण यत्पापं मत्स्यघाती समाचरेत् ॥ तदह्नैकेन कुरुते लांगली नात्र संशयः ॥ ३३ ॥ अतोऽर्थं कृषिपाल्येन नरकं याति लांगली ॥ तदभावान्न कल्पः स्यात्तेन मोक्षो मयि ध्रुवम् ॥ ३४ ॥

---

[1] वाहिताग्न्यादिष्विति बहुव्रीहेः परानपातः । [2] वोणिका–इ० पा० ।

मयि भुक्ते प्रसन्ने वा को विशेषोऽस्य नारद ॥ यदि स्वर्गोऽथ वा मोक्षो न संपद्येत तद्वृथा ॥ ३५ ॥ इदानीं हलकालुष्यैः सीरभद्रो विचेष्टितैः ॥ बहुपा
पप्रसंगेन घोरं नरकमेष्यति ॥ ३६ ॥ सपुत्रपौत्रसंतानो हृतोर्थस्तद्गृहे मया ॥ न भुक्तं न च विश्रान्तं विश्रांतं द्विजवेश्मनि ॥ ३७ ॥ सोऽपि
द्विजो मुनिश्रेष्ठ संसारादुत्तरिष्यति ॥ इत्येवं संवदंतौ च जग्मतुर्मार्गमुत्तमम् ॥ ३८ ॥ कान्यकुब्जस्य सामीप्ये सरः श्रेष्ठमपश्यताम् ॥ हंसकारण्ड
वाकीर्णं चक्रवाकोपशोभितम् ॥ ३९ ॥ पद्मिनीजलकह्लाररक्तोत्पलसितोत्पलैः ॥ छादितं पद्मिनीपत्रैर्मत्स्यैः कूर्मैर्जलोद्भवैः ॥ ४० ॥
तटै रम्यैर्घनैर्वृक्षैः केतकीखण्डमंडितम् ॥ केतकीकुसुमामोदैर्ल्लकुचैस्तटमंडितैः ॥ ४१ ॥ दात्यूहशिखिभारुण्डचकोराद्यैश्च संकुलम् ॥ कुरवैश्चातकै
रम्यं केकाकुलनिनादितम् ॥ ४२ ॥ जलकुक्कुटसंगीतं हंससारसशोभितम् ॥ जीवंजीवकहारीतचकोरैरुपशोभितम् ॥ ४३ ॥ वशिष्ठस्य मुनेर्नाम्ना
विख्यातं श्रीमहोदयम् ॥ अस्मिन्नद्य प्रवेष्टव्यं महाजनविवेकिनाम् ॥ ४४ ॥ स्थातव्यं पुरतस्तेषां तस्मात्स्नानं समाचरेत् ॥ इत्युक्त्वा केशवः पापं
सस्नौ प्रागेव तज्जलैः[1] ॥ ४५ ॥ यत्तीर्थलोकं विख्यातं स्नात्वा तीरं समाश्रितः ॥ प्रहरे वासुदेवस्य नारदोऽपि मुदा युतः ॥ ४६ ॥ आचम्य
सस्नौ तीर्थेन क्षणात्तीर्थमवाप्य च ॥ यावदुत्तिष्ठते तोयात्स्नात्वा ऋष्टिरुदारधीः ॥ ४७ ॥ तावत्स्त्रीत्वं समापन्नो नारदः केन वर्ण्यते ॥ यस्यास्तु
विस्तृते नेत्रे वक्त्रं चन्द्रोपमं शुभम् ॥ ४८ ॥ स्मरपाशोपमौ कर्णौ कपोलौ कनकोज्ज्वलौ ॥ नासिका तिलसूनेन कामचापोपमे भ्रुवौ ॥ ४९ ॥
दशना हीरकैस्तुल्या विद्रुमाभः शुभाधरः ॥ मयूरस्य कलापेन तुल्यं कचनिबंधनम् ॥ ५० ॥ शंखरेखात्रयेणैव कंठदेशो विराजते ॥ माधवील
तया तुल्यौ मंजू तस्या भुजौ शुभौ ॥ ५१ ॥ युतौ रक्तोत्पलाभासौ पाणी रक्तनखांगुली ॥ पीनावतुंगतनुधृत्कठिनौ कलशोपमौ ॥ ५२ ॥ स्त
नावविरलौ स्निग्धौ चक्रवाकयुगोपमौ ॥ स्वल्पकं मध्यदेशं तु मुष्टिग्राह्यमसंशयम् ॥ ५३ ॥ नाभिमंडलगांभीर्यं लावण्यं केन वर्ण्यते ॥ वलित्र
येण विकृता रोमराजिर्विराजिता ॥ ५४ ॥ नयने च पुनस्तस्या मृग्या इव सुशोभने ॥ नितंबो बिंबफलको मन्मथायतनं शुभम् ॥ ५५ ॥ रंभायु
ग्मोपमावूरू स्मरबाणनिबंधनौ ॥ विपरीतरतायासखेदभारसहौ दृढौ ॥ ५६ ॥ नवकुन्दलतासारसरलं सनिबंधनम् ॥ जंघायुगं महाराज गूढगुल्फ
युगं तथा ॥ ५७ ॥ रक्तांगुलीलतातल्पनखचन्द्रकयाचितम् ॥ चरणारविंदयुगलं सरक्तं सुप्रतिष्ठितम् ॥ ५८ ॥ सैवंविधा तदा नारी सर्वलक्षणपू
जिता ॥ बभूव क्षणमात्रेण जगद्व्यामोहकारिणी ॥ ५९ ॥ क्षीरोदमथनोत्तीर्णां लक्ष्मीमन्यामिवोच्छ्रिताम् ॥ दृष्ट्वाप्यदर्शनं प्राप्तो मायया मधुसू

---

[1] तज्जले–इ० पा० ।

दनः ॥ ६० ॥ संप्राप्यते च सा कालसंग[1]राहारिणी यथा ॥ आस्त एकाकिनी मुग्धा कुर्याद्दिगवलोकनम् ॥ ६१ ॥ अथाजगाम तं देशं नाम्ना
तालध्वजो नृपः ॥ सह सैन्यैः परिवृतः पुरंदर इवामरैः ॥ ६२ ॥ गजारूढैर्हयारूढै रथारूढैर्नरोत्तमैः ॥ विमानयानयुग्मस्थैस्तथांतःपुरिकाजनैः
॥ ६३ ॥ ध्वजातपत्रकलिलैरनीकैः परिवारितः ॥ तेन सा सहसा दृष्टा नारि कमललोचना ॥ ६४ ॥ बभूव क्षणमात्रेण कंदर्पशरपीडितः ॥ केयं
कस्य कुतः प्राप्ता किं देवी वाथ मानुषी ॥ ६५ ॥ अदृष्टरूपाप्सरसा काचिद्देवी समागता ॥ अहोरूपं सुरूपाया गोचरे परितः पुमान् ॥ ६६ ॥
मुमूर्षुर्जायते मोहादनुदिग्धहतो यथा ॥ इति संचिन्त्य हृदये राजा तालध्वजोऽन्तिके ॥ ६७ ॥ उवाच नारीं मुग्धां तां शृणु मद्वचनं शुभे ॥
का त्वं कस्य कुतः प्राप्ता देशमेतं शुचिस्मिते ॥ ६८ ॥ इत्युक्ते साश्रु चार्वंगी प्राह मां विद्धचयोनिजाम् ॥ पित्रा मात्रा विहीनां च तथाद्यापि
कुमारिकाम् ॥ ६९ ॥ निराश्रयां विदित्वैनां ततो जातः स्मरार्दितः ॥ आरोप्य हयपृष्ठे तां ततो राजागतो गृहम् ॥ ७० ॥ नीत्वा विवाहयामास
शास्त्रोक्तविधिना ततः ॥ रेमे प्रासादशृंगाग्रे पर्यंके सितया तया ॥ ७१ ॥ उद्यानभव्यभूमीषु नदीनां पुलिनेषु च ॥ पर्वतानां नितंबेषु निर्झरेषु
गुहासु च ॥ ७२ ॥ पद्मखंडेषु फुल्लेषु शोभितेषु सरस्सु च ॥ प्रयागादिषु तीर्थेषु नदीनामाश्रमेषु च ॥ ७३ ॥ दिव्यावसथरम्येषु वेलाकूलेषु
पार्थिवः ॥ यावद्द्वादश वर्षाणि एकाहमपि भारत ॥७४॥ ततस्त्रयोदशे वर्षे तस्या गर्भोऽभवन्महान् ॥ एतस्मिन्गर्भसंपूर्णे जातं दीर्घमलाबुकम् ॥
॥ ७५ ॥ तद्भेदाहतकुंभेषु बीजप्रारोहणान्नराः ॥ बभूवुर्धातुशून्या वै दिव्यदेहबलोत्कटाः ॥ ७६ ॥ पंचाशत्संख्यया जाता उपसर्गादिवर्जिताः ॥
आरूढयौवनाः सर्वे सुताः संग्रामकोविदाः ॥ ७७ ॥ तेषां पुत्राश्च पौत्राश्च बभूवुः सुरसत्तमाः ॥ युयुधुः शरसंघातैश्चक्रशूलासिपट्टिशैः ॥ ७८ ॥
हयैरन्यैर्गजैरन्यैः क्रोधांधाः कौरवा इव ॥ पांडवैः सह संग्रामे युयुधुः क्षयमंजसा ॥ ७९ ॥ सपदातिगजारोहाः सांतःपुरयुगेच्छया ॥ विनेशुरब्धि
मासाद्य सिंधूनां प्रवहा इव ॥८०॥ सासिसबलविस्ताराः सदर्पाः समहोच्छ्रयाः ॥ इन्द्रलोकोपमं सर्वं कुलं नष्टं क्षणं तदा ॥८१॥ संदृश्य नारदीयैषा
विनष्टं स्वकुलं रणे ॥ रुरोद स्नेहसंयुक्तै रसैः कलुषया गिरा ॥ ८२॥ हा दैव हा[3] विधे पाप हा कृतान्त नमस्कृत ॥ दर्शयित्वा विधानं मे पुनर्नेत्रे
हृते त्वया ॥ ८३ ॥ इत्युक्त्वा स्वमुरोहस्तैर्जघान भृशदुःखिता ॥ भूमौ मूर्च्छातुरा भूत्वा पुनः प्राप्ता विचेतनम् ॥८४॥ सोऽपि राजा विषण्णोऽसौ
निर्विण्णः शोकसागरे ॥ भूमौ निपतितो दुःखाद्रुरोद भृशदुःखितः ॥८५॥ विषण्णो मंत्रिभिः सार्धं वृद्धशोकेन संयुतः ॥ एतस्मिन्नंतरे विष्णुराज

---

१ संगमाहारिणी-इ० पा० । २ सुराः-इ० पा० । ३ विधातः-इ० पा० ।

गाम द्विजैः सह ॥८६॥ द्विजवेषपरिच्छन्न उपविष्टः सुखासने ॥ ततः पुरस्सरो भूत्वा चक्रे धर्मार्थदर्शनम् ॥८७॥ किं रोदनेन बहुना युवयोः क्लेश
कारिणा ॥ श्रूयतां विष्णुमायैषा स्वप्नदृष्टधनोपमा ॥८८॥ शोभने यादृशः शोकः कृतः संसारसागरे ॥ सर्वेषामेव भूतानां परिणामोयमीदृशः ॥
॥ ८९ ॥ पुरंदरसहस्राणि चक्रवर्तिशतानि च ॥ निर्वापितानि कालेन प्रदीप इव वायुना ॥ ९० ॥ येऽपि शोषयितुं शक्ताः समुद्रं ग्राहसंकुलम्॥
कुर्युश्च करयुग्मेन चूर्णं मेरुं महीतले ॥ ९१ ॥ ऊद्धर्तुं धरणीसंज्ञां ग्रहीतुं चन्द्रभास्करौ ॥ प्रविष्टास्ते तु कालेन कृतांतवदनं तदा ॥ ९२ ॥ दुर्गं
स्त्रिकूटः परिखाः समुद्रा रक्षांसि योधा धनदाच्च वित्तम् ॥ मंत्रश्च यस्यौशनसा प्रणीतः स रावणो दैववशाद्विषण्णः ॥ ९३ ॥ संग्रामे गजतुरगस
माकुलेऽपि वादादग्नौ वा गतविवरे महोदधौ वा ॥ सर्वैर्वा सह वसतामुदीर्णकोपैर्नाभाव्यो भवति कदाचिदेव नाशः ॥ ९४ ॥ पातालमाविशतु
यातु सुरेन्द्रलोकमारोहतु क्षितिधराधिपतिं सुमेरुम् ॥ मंत्रौषधिप्रहरणैश्च करोतु रक्षां यद्भावि तद्भवति नाथ विभावितोऽस्मि ॥ ९५ ॥ रोदिति
कश्चिदथाश्रुधौताननगुरुतरशोकविह्वलः ॥ प्रविकटचरणवानपि नृत्यति कश्चिद्धर्मादिविग्रहः ॥ ९६ ॥ गायति हृदयहारि सुखनिर्भरमायतवि
स्तृताऽधरोऽधिकम् ॥ सार एष रंगोदरगतनटपटहाकाम एवायम् ॥ ९७॥ इत्येवं धर्ममुद्दिश्य विष्णुः संसारचेष्टितम् ॥ तूष्णीं बभूवानुपदं ततस्ते
द्विजपुङ्गवाः ॥ ९८ ॥ उत्तिष्ठ स्नाहि पुत्राणां प्रकुरुष्वौर्ध्वदेहिकम् ॥ मा शोकं विष्णुमायैषा विष्णुना निर्मिता स्वयम् ॥ ९९ ॥ इत्युक्त्वा चारुस
र्वांगी स बभूवाचलः पुमान् ॥ स एष सदृशाकारो नारदस्तत्क्षणेऽभवत् ॥ १०० ॥ सोऽपि राजा ददर्शाथ तं समंत्रिपुरोहितः ॥ सांतःपुरमिदं
सर्वमिन्द्रजालोपमं क्षणात् ॥ १०१ ॥ नारदं मुनिशार्दूलं जटाभारभयानकम् ॥ गौरवर्णं ज्वलंतं च ब्राह्म्या लक्ष्म्या विराजितम् ॥ १०२ ॥ शिखा
कमण्डलुधरं वीणादण्डकरं तथा ॥ ब्रह्मसूत्रेण शुभ्रेण कौपीनाच्छादनेन च ॥ पादुकाभ्यां स्थितं तीरे सरसो ब्राह्मणासने ॥ १०३ ॥ संप्रगृह्य
कराग्रेण जगामादर्शनं हरिः ॥ अम्बरेण सुरैः सार्द्धं तस्माद्देशाद्युधिष्ठिर ॥ १०४ ॥ श्वेतद्वीपमथासाद्य प्राह देवो मुनिं नृप ॥ देवर्षे यत्त्वया पृष्टं
पूर्वं मायाकथां प्रति ॥ १०५ ॥ माया ययेदृशी माया यत्स्वरूपा यदात्मिका ॥ सा ते माया मया ब्रह्मन्वैष्णवी संप्रदर्शिता ॥ १०६ ॥ एवमुक्त्वा
मुनिवरं देवदेवो जनार्दनः ॥ बभूवान्तर्हितस्सद्यो देवर्षेस्तस्त्य पश्यतः ॥ १०७ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे
मायादर्शनं नाम तृतीयोऽध्यायः ॥ ३ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ देवत्वं मानुषत्वं च तिर्यक्त्वं केन कर्मणा ॥ प्राप्नोति पुरुषः केन

गर्भवासं सुदारुणम् ॥ १ ॥ गर्भस्थश्च किमश्नाति कथमुत्पद्यते पुनः ॥ दत्तोत्थानादिकान्दोषान्कथं तरति दुस्तरान् ॥ २ ॥ बालभावे कथं पुष्टिः स्याद्युवा केन कर्मणा ॥ कुलीनः केन भवति सुरूपः सुधनः कथम् ॥ ३ ॥ कथं दारानवाप्नोति गृहं सर्वगुणैर्युतम् ॥ पंडितः पुत्रवांस्त्यागी स्यादामयविवर्जितः ॥ ४ ॥ कथं सुखेन म्रियते कथं भुंक्ते शुभाशुभम् ॥ सर्वमेवामलमते गहनं प्रतिभाति मे ॥ ५ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ शुभैर्देवत्वमाप्नोति मिश्रैर्मानुषतां व्रजेत् ॥ अशुभैः कर्मभिर्ज्जंतुस्तिर्यग्योनिषु जायते ॥ ६ ॥ प्रमाणं श्रुतिरेवात्र धर्माधर्मविनिश्चये ॥ पापं पापेन भवति पुण्यं पुण्येन कर्मणा ॥ ७ ॥ ऋतुकाले तदा भुक्तं निर्दोषं येन संस्थितम् ॥ तदा तद्वायुना स्पृष्टं स्त्रीरक्तेनैकतां व्रजेत् ॥८॥ विसर्गकाले शुक्रस्य जीवः करणसंयुतः ॥ भृत्यः प्रविशते योनिं कर्मभिः स्वैर्न्नियोजितः ॥ ९ ॥ तच्छुक्ररक्तमेकस्थमेकाहात्कललं भवेत् ॥ पञ्चरात्रेण कललं बुद्बुदाकारतां व्रजेत् ॥ १० ॥ बुद्बुदं सप्तरात्रेण मांसपेशी भवेत्ततः ॥ द्विसप्ताहाद्भवेत्पेशी रक्तमांसर्दृढांचितः ॥ ११ ॥ बीजस्येवांकुराः पेश्याः पञ्चविंशतिरात्रतः ॥ भवंति मासमात्रेण पञ्चधा जायते पुनः ॥ १२ ॥ ग्रीवा शिरश्च स्कन्धश्च पृष्ठवंशस्तथोदरम् ॥ मासद्वयेन सर्वाणि क्रमशः संभवंति च ॥ १३ ॥ त्रिभिर्मासैः प्रजायंते सद्रव्यांकुरसंधयः ॥ मासैश्चतुर्भिरंगुल्यः प्रजायंते यथाक्रमम् ॥ १४ ॥ मुखं नासा च कर्णौ च जायन्ते पञ्चमासकैः ॥ दंतपंक्तिस्तथा गुह्यं जायंते च नखाः पुनः ॥ १५ ॥ कर्णौ च रंध्रसहितौ षण्मासाभ्यंतरेण तु ॥ पायुर्मेढ्रमुपस्थश्च नाभिश्चाप्युपजायते ॥ १६ ॥ संधयो ये च गात्रेषु मासैर्जायंति सप्तभिः ॥ अङ्गप्रत्यंगसंपूर्णः शिरः केशसमन्वितः ॥ १७ ॥ विभक्तावयवः पुष्टः पुनर्मासाष्टकेन च ॥ पंचात्मकसमायुक्तः परिपक्वः स तिष्ठति ॥ १८ ॥ मातुराहारवीर्येण षड्विधेन स तिष्ठति ॥ रसेन प्रत्यहं बालो वर्धते भरतर्षभ ॥ १९ ॥ तत्तेऽहं संप्रवक्ष्यामि यथाश्रुतमरिंदम ॥ नाभिसूत्रनिबन्धेन वर्द्धते स दिनेदिने ॥ २० ॥ ततः स्मृतिं लभेज्जीवः संपूर्णेऽस्मिञ्छरीरके ॥ सुखं दुःखं विजानाति निद्रास्वप्नं पुरा कृतम् ॥ २१ ॥ मृतश्चाहं पुनर्जातो जातश्चाहं पुनर्मृतः ॥ नानायोनिसहस्राणि मया दृष्टानि तानि वै ॥ २२ ॥ अधुना जातमात्रोऽहं प्राप्तसंस्कार एव च॥एतच्छ्रेयः करिष्यामि येन गर्भे न संश्रयः ॥२३॥ गर्भस्थश्चिंतये देवमहं गर्भाद्विनिःसृतः ॥ अध्येष्ये चतुरो वेदान्संसारविनिवर्तकान् ॥ २४ ॥ एवं स गर्भदुःखेन महता परिपीडितः ॥ जीवः कर्मवशादास्ते मोक्षोपायं विचिंतयन् ॥ २५ ॥ यथा गिरिवराक्रांतः कश्चिद्दुःखेन तिष्ठति ॥ तथा जरायुणा देही दुःखे तिष्ठति चेष्टितः ॥ २६ ॥ पतितः

---

१ दंतोत्थानादिकान्–इ० पा० । २ असौ पृष्ठं तथोदरम्–इ० पा० । ३ स्नायुः–इ० पा० । ४ तत्तच्छ्रेयः–इ० पा० ।

सागरे यद्वद्दुःखैरास्ते समाकुलः ॥ गर्भोदकेन सिक्तांगस्तथास्ते व्याकुलः पुमान् ॥ २७ ॥ लोहकुंभे यथा न्यस्तः पच्यते कश्चिदग्निना ॥
तथा स पच्यते जंतुर्गर्भस्थः पीडितोदरः ॥ २८ ॥ सूचीभिरग्निवर्णाभिर्विभिन्नस्य निरंतरम् ॥ यःदुःखमुपजायेत तद्गर्भेऽष्टगुणं भवेत् ॥ २९ ॥
गर्भवासात्परो वासः कष्टो नैवास्ति कुत्रचित् ॥ देहिनां दुःखवद्राजन्सुघोरो ह्यतिसङ्कटः ॥ ३० ॥ इत्येतद्गर्भदुःखं हि प्राणिनां परिकीर्तितम् ॥
चरस्थिराणां सर्वेषात्मामगर्भानुरूपतः ॥ ३१ ॥ गर्भात्कोटिगुणं दुःखं योनियंत्रप्रपीडनात् ॥ संमूर्च्छितस्य जायेत जायमानस्य देहिनः ॥३२॥
शरवत्पीडयमानस्य यंत्रेणैव समंततः ॥ शिरसि ताडयमानस्य पापमुद्गरकेण च ॥ ३३ ॥ गर्भान्निष्क्रम्यमाणस्य प्रबलैः सूतिमारुतैः ॥ जायते
सुमहद्दुःखं परित्राणमविंदतः ॥ ३४ ॥ यंत्रेण पीडिता यद्वन्निःसाराः स्युस्तिलेक्षवः ॥ तथा शरीरं निःसारं योनियंत्रप्रपीडितम् ॥३५॥ अस्थिमज्जा
त्व[1]चामांसस्नायुबंधेन यंत्रितम् ॥ रक्तमांसमृदा युक्तं विण्मूत्रद्रवलेपनम् ॥ ३६ ॥ केशलोमतृणाच्छन्नं रोगायतनमातुरम् ॥ वदनैकमहद्द्वारं दं[2]तोष्टक
विभूषितम् ॥ ३७ ॥ ओष्ठद्वयकपाटं च दन्तजिह्वार्गलान्वितम् ॥ नाडीस्वेदप्रवाहं च कफपित्तपरिप्लुतम् ॥ ३८ ॥ जराशोकसमाविष्टं कालचक्रानले
स्थितम् ॥ कामक्रोधसमाक्रांतं व्यसनैश्चोपमर्दितम् ॥ ३९ ॥ भोगतृष्णातुरं मूढं रागद्वेषवशानुगम् ॥ संवर्तितांगप्रत्यंगं जरायुपरिवेष्टितम्
॥ ४० ॥ संकटेनाविविक्तेन योनिद्वारेण निर्गतम् ॥ विण्मूत्ररक्तसिक्तांगं पक्केशाच्च समुद्भवम् ॥ ४१ ॥ इति देहगृहं प्रोक्तं नित्यस्यानित्यमात्मनः
॥ अविशुद्धं विशुद्धस्य कर्मबंधविनिर्मितम् ॥ ४२ ॥ शुक्रशोणितसंयोगाद्देहः संजायते यतः ॥ नित्यं विण्मूत्रपूर्णश्च तेनायमशुचिः स्मृतः
॥ ४३ ॥ यथांतर्विष्ठया पूर्णः शुचिः स्यान्न बहिर्घटः ॥ यत्नतः शोध्यमानोऽपि देहोऽयमशुचिस्तथा ॥ ४४ ॥ संप्राप्यात्र पवित्राणि पंचगव्यहवींषि
च ॥ अशुचित्वं क्षणाच्चापि किमन्यद्वस्तुबिंदवः ॥ ४५ ॥ देहः संशोध्यमानोऽपि पञ्चगव्यकुशांबुभिः ॥ घृष्यमाण इवांगारो निर्मलत्वं
न गच्छति ॥ ४६ ॥ स्रोतांसि यस्य सततं प्रवहंति गिरेरिव ॥ कफमूत्रपुरीषाद्यैः स देहः शुद्ध्यते कथम् ॥ ४७ ॥ सर्वाशुचिनिधानस्य शरीरस्य
न विद्यते ॥ शुचिरेकः प्रदेशोऽपि विट्पूर्णः स्यंदते किल ॥ ४८ ॥ कायः सुगंधधूपाद्यैर्यत्नेनापि तु संस्कृतः ॥ न जहाति स्वकं भावं श्वपुच्छमिव
नामितम् ॥ ४९ ॥ यथा जात्यैव कृ[3]ष्णो हि न शुक्लः स्यादुपायतः ॥ सशोध्यमानाऽपि तथा भवेन्मूर्तिर्न निर्मला ॥ ५० ॥ जिघ्रन्नपि
स्वदुर्गंधं पश्यन्नपि मलं स्वकम् ॥ न विरज्यति लोकोऽयं पीडयन्नपि नासिकाम् ॥ ५१ ॥ अहो मोहस्य माहात्म्यं येन व्यामोहितं जगत् ॥

---

१ तुलास्तम्भम्–इ० पा० । २ गवाक्षाष्टकभूषितम्–इ० पा० । ३ कृष्णोर्णा न शुक्ला स्यादुपायतः–इ० पा० ।

जिघ्रन्पश्यन्स्वकं दोषं कायस्य न विरज्यते ॥ ५२ ॥ एवमेतच्छरीरं हि निसर्गादशुचि ध्रुवम् ॥ त्वङ्मात्रसारं निःसारं कदलीसारसंनिभम् ॥५३॥
गर्भस्थस्य स्मृतिर्यासीत्सा जातस्य प्रणश्यति ॥ संमूर्च्छितस्य दुःखेन योनियंत्रप्रपीडनात् ॥ ५४ ॥ बाह्येन वायुना चास्य मोहसंज्ञेन देहिनः॥
स्पृष्टमात्रेण घोरेण ज्वरः समुपजायते ॥ ५५ ॥ तेन ज्वरेण महता महामोहः प्रजायते ॥ संमूढस्य स्मृतिभ्रंशः शीघ्रं संजायते पुनः ॥ ५६ ॥
स्मृतिभ्रंशात्तु तस्येह पूर्वकर्मवशेन च ॥ रतिः संजायते तूर्णं जंतोस्तत्रैव जन्मनि ॥ ५७ ॥ रक्तो मूढस्य लोकोऽयमकार्ये संप्रवर्तते ॥ न चात्मानं
विजानाति न[1] परं [2]विन्दते च सः ॥ ५८ ॥ न श्रूयते परं श्रेयः सति चक्षुषि नेक्षते ॥ समे पथि शनैर्गच्छन्स्खलतीव पदेपदे ॥ ५९ ॥ सत्यां
बुद्धौ न जानाति बोध्यमानो बुधैरपि ॥ संसारे क्लिश्यते तेन रागलोभवशानुगः ॥ ६० ॥ गर्भस्मृतेरभावेन शास्त्रमुक्तं महर्षिभिः ॥ तद्दुःखमथना
र्थाय स्वर्गमोक्षप्रसाधकम् ॥ ६१ ॥ ये संत्यस्मिन्परे ज्ञाने सर्वकामार्थसाधके ॥ न कुर्वंत्यात्मनः श्रेयस्तदत्र महदद्भुतम् ॥ ६२ ॥ अव्यक्तेंद्रियवृ
त्तित्वाद्बाल्ये दुःखं महत्पुनः ॥ इच्छन्नपि न शक्नोति कर्तुं वक्तुं च सत्क्रियाम् ॥ ६३ ॥ दंतोत्थाने महद्दुःखं मौलेन व्याधिना तथा ॥ बालरोगैश्च
विविधैः पीडा बालग्रहैरपि ॥ ६४ ॥ तृड्बुभुक्षापरीतांगः [3]कश्चित्तिष्ठति रारटन् ॥ विण्मूत्रभक्षणमपि मोहाद्बालः समाचरेत् ॥ ६५ ॥
कौमारे कर्णवेधेन मातापित्रोश्च ताडनात् ॥ अक्षराध्ययनात्पुंसां दुःखं स्याद्गुरुशासनात् ॥ ६६ ॥ प्रसन्नेंद्रियवृत्तिश्च कामरागप्रपीडनात् ॥
रोगोद्धतस्य सततं कुतः सौख्यं च यौवने ॥ ६७ ॥ ईर्ष्यया च महद्दुःखं मोहाद्रक्तस्य जायते ॥ नेत्रस्य कुपितस्यैव रागो दुःखाय केवलम् ॥६८॥
न रात्रौ विंदते निद्रां कोपाग्निपरिपीडितः ॥ दिवा वापि कुतः सौख्यमर्थोपार्जनचिंतया ॥ ६९ ॥ स्त्रीष्वायासितदेहस्य ये पुंसः शुक्रबिंदवः ॥
न ते सुखाय मंतव्याः स्वेदजा इव बिंदवः ॥ ७० ॥ क्रिमिभिस्तुद्यमानस्य कुष्ठिनः कामिनस्तथा ॥ कण्डूयनाग्नितापेन यद्भवेत्स्त्रीषु तद्धि तत् ॥
॥ ७१ ॥ यादृशं विंदते सौख्यं गंडान्वयविनिर्गमे ॥ तादृशं स्त्रीषु मंतव्यं नाधिकं तासु विद्यते ॥७२॥ गंडस्य वेदना यद्वत्स्फुटितस्य निवर्तते ॥
तद्वत्स्त्रीष्वपि मंतव्यं न सौख्यं परमार्थतः ॥ ७३ ॥ विण्मूत्रस्य समुत्सर्गात्सुखं भवति यादृशम् ॥ तादृशं तेषु विज्ञेयं मूढैः कल्पितमन्यथा ॥
॥७४॥ नारीष्वशुचिभूतासु सर्वदोषाश्रयासु च ॥ नाणुमात्रकमप्येवं सुखमस्ति विचारतः ॥७५॥ सन्मानमपमानेन वियोगेन सुसंगमः ॥ यौवनं
जरया ग्रस्तं किं सौख्यमनुपद्रवम् ॥ ७६ ॥ वलीपलितखालित्यैः शिथिलीकृतविग्रहम् ॥ सर्वक्रियास्वशक्तं च जरया जर्जरीकृतम् ॥ ७७ ॥

---

[1] विदुः—इ० पा० । [2] न च देवताम्—इ० पा० । [3] क्वचित्—इ० पा० ।

स्त्रीपुंसयोर्न्नैवं रूपं तदान्योन्यं प्रियं पुरा ॥ तदेव जरया ग्रस्तमुभयोरपि न प्रियम् ॥७८॥ अपूर्ववत्स्वमात्मानं जरया परिवर्तितः ॥ यः पश्यन्नपि
रज्येत कोऽन्यस्तस्मादचेतनः ॥ ७९ ॥ जराभिभूतः पुरुषः पत्नीपुत्रादिबांधवैः ॥ अशक्तत्वाद्दुराचारैर्भृत्यैश्च परिभूयते ॥ ८० ॥ धर्ममर्थं च
कामं च मोक्षं च न जरी यतः ॥ शक्तः साधयितुं तस्माच्छरीरमिदमात्मनः ॥ ८१ ॥ वातपित्तकफादीनां वैषम्यं व्याधिरुच्यते ॥ तस्माद्व्याधि
मयं ज्ञेयं शरीरमिदमात्मनः ॥ ८२ ॥ वाताद्यव्यतिरिक्तत्वाद्व्याधीनां पञ्जरस्य च ॥ रोगैर्नानाविधैर्यानि देहदुःखान्यनेकधा ॥ तानि च स्वात्म
वेद्यानि किमन्यत्कथयाम्यहम् ॥ ८३ ॥ एकोत्तरं मृत्युशतमस्मिन्देहे प्रतिष्ठितम् ॥ तत्रैकः कालसंयुक्तः शेषाश्चागन्तवः स्मृताः ॥ ८४ ॥ ये
त्विहागंतवः प्रोक्तास्ते प्रशाम्यंति भेषजैः ॥ जपहोमप्रदानैश्च कालमृत्युर्न शाम्यति ॥ ८५ ॥ यदि चापि न मृत्युः स्याद्विषमद्यादशंकितः ॥ न
संति पुरुषे तस्मादपमृत्युविभीतयः ॥ ८६ ॥ विविधा व्याधयः शस्त्रं सर्पाद्याः प्राणिनस्तथा ॥ विषाणि जंगमाद्यानि मृत्योर्द्वाराणि देहिनाम् ॥
॥ ८७ ॥ पीडितं सर्वरोगाद्यैरपि धन्वन्तरिः स्वयम् ॥ स्वस्थीकर्तुं न शक्नोति प्राप्तमृत्युं च देहिनम् ॥ ८८ ॥ नौषधं न तपो दानं न मंत्रा न च
बांधवाः ॥ शक्नुवंति परित्रातुं नरं कालेन पीडितम् ॥ ८९ ॥ रसायनतपोजप्यैर्योगसिद्धैर्महात्मभिः ॥ कालमृत्युरपि प्राज्ञैस्तीर्यंते नालसैर्न्नरैः
॥ ९० ॥ नास्ति मृत्युसमं दुःखं नास्ति मृत्युसमं भयम् ॥ नास्ति मृत्युसमस्त्रासः सर्वेषामेव देहिनाम् ॥ ९१ ॥ सद्भार्यापुत्रमित्राणि राज्यैश्वर्यध
नानि च ॥ अबद्धानि च वैराणि मृत्युः सर्वाणि कृन्तति ॥ ९२ ॥ हे जनाः किं न पश्यध्वं सहस्रस्यापि मध्यतः ॥ जनाः शतायुषः पञ्च
भवंति न भवंति च ॥ ९३ ॥ अशीतिका विपद्यन्ते केचित्सप्ततिका नराः ॥ परमायुषं स्थितं षष्टिस्तच्चैवानिश्चितं पुनः ॥ ९४ ॥ यस्य याव
द्भवेदायुर्देहिनां पूर्वकर्मभिः ॥ तस्यार्द्धमायुषो रात्रिर्हरते मृत्युरूपिणी ॥ ९५ ॥ बालभावेन मोहेन वार्द्धक्ये जरया तथा ॥ वर्षाणां विंशतिर्याति
धर्मकामार्थवर्जिता ॥ ९६ ॥ आगंतुकैर्भयैः पुंसां व्याधिशोकैरनेकधा ॥ भक्ष्यतेऽर्द्धं च तत्रापि यच्छेषं तच्च जीवति ॥ ९७ ॥ जीवितांते च
मरणं महाघोरमवाप्नुयात् ॥ जायते [2]जन्मकोटीषु मृतः कर्मवशात्पुनः ॥ ९८ ॥ देहभेदेन यः पुंसां वियोगः कर्मसंक्षयात् ॥ मरणं
तद्विनिर्दिष्टं नान्यथा परमार्थतः ॥ ९९ ॥ महातपप्रविष्टस्य च्छिद्यमानेषु मर्मसु ॥ यद्दुःखं मरणे जंतोर्न तस्येहोपमा क्वचित् ॥ १०० ॥ हा
तात मातः कांतेति [3]रुदन्नेवं हि दुःखितः ॥ मंडूक इव सर्पेण ग्रस्यते मृत्युना जनः ॥ १०१ ॥ बांधवैः संपरिष्वक्तः प्रियैः स परिवारितः ॥

---

१ चातिवादाश्च–इ० पा० । २ योनिकोटीषु–इ० पा० । ३ क्रन्दन्–इ० पा० ।

निःश्वसन्दीर्घमुष्णं च मुखेन परिशुष्यति ॥ १०२ ॥ क्रन्दते चैव खट्वायां परिवर्तन्मुहुर्मुहुः ॥ संमूढः क्षिपतेऽत्यर्थं हस्तपादावितस्ततः ॥१०३॥
खट्वातो कांक्षते भूमिं भूमेः खट्वां पुनर्महीम् ॥ विवशस्त्यक्तलज्जश्च मूत्रविष्ठानुलेपितः ॥ १०४ ॥ याचमानश्च सलिलं शुष्ककण्ठोष्ठतालुकः ॥
चिंतयानश्च वित्तानि कस्यैतानि मृते मयि ॥ १०५ ॥ [1]पश्चावटान्खन्यमानः कालपाशेन कर्षितः ॥ म्रियते पश्यतामेव जनानां घुर्घुरस्वनः ॥
॥ १०६ ॥ जीवस्तृणजलौकेव देहाद्देहं विशेत्क्रमात् ॥ संप्राप्योत्तरकालं हि देहं त्यजति पौर्वकम् ॥ १०७ ॥ मरणात्प्रार्थनादुःखमधिकं हि विवे
किनः ॥ क्षणिकं मरणाद्दुःखमनंतं प्रार्थनाकृतम् ॥ १०८ ॥ जगतां पतिरर्थित्वाद्विष्णुर्वामनतां गतः ॥ अधिकः कोऽपरस्तस्माद्यो न या
स्यति लाघवम् ॥ १०९ ॥ ज्ञातं मयेदमधुना मतं भवति यद्गुरु ॥ न परं प्रार्थयेद्भूयस्तृष्णा लाघवकारणम् ॥ ११० ॥ आदौ दुःखं तथा
मध्ये दुःखमंते च दारुणम् ॥ निसर्गात्सर्वभूतानामिति दुःखपरंपरा ॥ १११ ॥ वर्तमानान्यतीतानि दुःखान्येतानि यानि तु ॥ नरा न भावयं
त्यज्ञा न विरज्यंति तेन ते ॥ ११२ ॥ अत्याहारान्महद्दुःखमनाहारान्महत्तमम् ॥ तुलितं जीवितं कष्टं मन्येऽप्येवं कुतः सुखम् ॥ ११३ ॥
बुभुक्षा सर्वरोगाणां व्याधिः श्रेष्ठतमः स्मृतः ॥ स चान्नौषधिलेपेन क्षणमात्रं प्रशाम्यति ॥ ११४ ॥ क्षुद्व्याधिवेदनातुल्या निःशेषबलकर्तनी ॥
तयाभिभूतो म्रियते यथान्यैर्व्याधिभिर्न हि ॥११५॥ तद्रसोपि हि कामाद्वा जिह्वाग्रे परिवर्तते ॥ तत्क्षणाद्वार्द्धकालेन कंठं प्राप्य निवर्तते ॥११६॥
इति क्षुद्व्याधितप्तानामन्नमौषधवत्स्मृतम् ॥ न तत्सुखाय मन्तव्यं परमार्थेन पंडितैः ॥ ११७ ॥ मृतोपमो यश्चेक्षेत सर्वकार्यविवर्जितः ॥ तत्रापि
च कुतः सौख्यं तमसाच्छादितात्मनः ॥ ११८ ॥ प्रबोधेऽपि कुतः सौख्यं कार्यैरुपहतात्मनः ॥ कृषिगोरक्षवाणिज्यसेवाध्वादिपरिश्रमैः ॥११९॥
प्रातर्मूत्रपुरीषाभ्यां मध्याह्ने तु बुभुक्षया ॥ तृप्ताः कामेन बाध्यन्ते जंतवोऽपि विनिद्रया ॥ १२० ॥ अर्थस्योपार्जने दुःखमर्जितस्यापि रक्षणे ॥
आये दुःखं व्यये दुःखमर्थेभ्यश्च कुतः सुखम् ॥ १२१ ॥ चौरेभ्यः सलिलादग्नेः स्वजनात्पार्थिवादपि ॥ भयमर्थवतां नित्यं मृत्योः प्राणभृता
मिव ॥ १२२ ॥ खे यातं पक्षिभिर्मांसं भक्ष्यते श्वापदैर्भुवि ॥ जले च भक्ष्यते मत्स्यैस्तथा सर्वत्र वित्तवान् ॥ १२३ ॥ विमोहयंति संपत्सु ताप
यंति विपत्तिषु ॥ खेदयंत्यर्जनाकाले [2]कदा ह्यर्थाः सुखावहाः ॥ १२४ ॥ यथार्थपतिरुद्विग्नो यश्च सर्वार्थनिःस्पृहः ॥ यतश्चार्थपतिर्दुःखी सुखी
सर्वार्थनिःस्पृहः ॥ १२५ ॥ शीतेन दुःखं हेमंते ग्रीष्मे तापेन दारुणम् ॥ वर्षासु वातवर्षाभ्यां कालेऽप्येवं कुतः सुखम् ॥ १२६ ॥ विवाहविस्तरे

---

[1] मरणात्प्राक्–कर्णनासिकामुखानि हस्तेनं चालयतीत्यवटखननापदेशः । [2] कथम्–इ० पा० ।

दुःखं तद्गर्भोद्वहने पुनः ॥ प्रसवेऽपत्यदोषैश्च दुःखं दुःखादिकर्मभिः ॥ १२७ ॥ दन्ताक्षिरोगैः पुत्रस्य हा कष्टं किं करोम्यहम् ॥ गावो नष्टाः कृषिर्भग्ना वृषाः क्वापि पलायिताः ॥ १२८ ॥ अमी प्राघूर्णकाः प्राप्ता भक्तच्छेदे च मे गृहे ॥ बालापत्या च मे भार्या कः करिष्यति रंधनम् ॥ ॥ १२९ ॥ प्रदानकाले कन्यायाः कीदृशश्च वरो भवेत् ॥ इति चिन्ताभिभूतानां कुतः सौख्यं कुटुंबिनाम् ॥ १३० ॥ कुटुंबचिंताकुलितस्य पुंसः श्रुतं च शीलं च गुणाश्च सर्वे ॥ अपक्वकुंभे निहिता इवापः प्रयांति देहेन समं विनाशम् ॥१३१॥ राज्येपि च महद्दुःखं संधिविग्रहचिंतया ॥ पुत्रादपि भयं यत्र तत्र सौख्यं हि कीदृशम् ॥१३२॥ सजातीयाद्भयः प्रायः सर्वेषामेव देहिनाम् ॥ एकद्रव्याभिलाषित्वाच्छुनामिव परस्परम् ॥ ॥ १३३ ॥ नाप्रधृष्यबलः कश्चिन्नृपः ख्यातोस्ति भूतले ॥ निखिलं यस्तिरस्कृत्य सुखं तिष्ठति निर्भयः ॥ १३४ ॥ आ जन्मनः प्रभृति दुःखमयं शरीरं कर्मात्मकं तव मया कथितं नरेन्द्र ॥ दानोपवासनियमैश्च कृतैस्तदेव सर्वोपभोग[1]सुखभाग्भवतीह पुंसाम् ॥ १३५ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे संसारदोषाख्यानं नाम चतुर्थोऽध्यायः॥ ४ ॥ छ ॥

॥ श्रीकृष्ण उवाच ॥

॥ अधोधः पतनं पुंसामधःकर्म प्रकीर्तितम् ॥ नरकार्णवघोरेषु यातना पापमुच्यते ॥ १ ॥ अधर्मभेदा विज्ञेयाश्चित्तवृत्तिप्रभेदतः ॥ स्थूलाः सूक्ष्माः सुसूक्ष्माश्च कोटिभेदैरनेकधा ॥ २ ॥ तत्र ये पापनिचयाः स्थूला नरकहेतवः ॥ ते समासेन कथ्यंते मनोवाक्कायसाधनाः ॥ ३ ॥ परस्त्रीष्वथ संकल्पश्चेतसानिष्टचिंतनम् ॥ अकार्याभिनिवेशश्च चतुर्धा कर्म मानसम्॥ ४ ॥ अनिबद्धप्रलापित्वमसत्यं चाप्रियं च यत् ॥ परापवादपैशुन्यं चतुर्धा कर्म वाचिकम् ॥ ५ ॥ अभक्ष्यभक्षणं हिंसा मिथ्या कामस्य सेवनम् ॥ परस्वानामुपादानं चतुर्द्धा कर्म कायिकम् ॥ ६ ॥ इत्येतद्द्वादशविधं कर्म प्रोक्तं ससाधनम् ॥ तेषां भेदं पुनर्वच्मि येषां फलमनंतकम् ॥ ७ ॥ ये द्विषंति [2]महादेवं संसारार्णवतारणम् ॥ समस्तपातकोपेतास्ते यान्ति नरकाग्निषु ॥८॥ ब्रह्मघ्नश्च सुरापश्च स्तेयी च गुरुतल्पगः ॥ महापातकिनश्चैते तत्संसर्गी च पंचमः ॥ ९ ॥ क्रोधाद्द्वेषाद्भयाल्लोभाद्ब्राह्मणं विशसंति ये ॥ प्राणांतिको महादोषो ब्रह्मघ्नास्ते प्रकीर्तिताः ॥१०॥ ब्राह्मणं च समाहूय याचमानमकिञ्चनम् ॥ पश्चान्नास्तीति तं ब्रूयात्स चैवं ब्रह्महा स्मृतः ॥ ११ ॥ यस्तु विद्याभिमानेन नित्यं जयति वै द्विजान् ॥ समासीनः सभामध्ये ब्रह्महा सोऽपि कीर्तितः॥१२॥ मिथ्यागुणैः स्वमात्मानं नयत्युत्कर्षणं बललात्॥गुरूणां च विरुद्धो यः स चैव ब्रह्महा स्मृतः॥१३॥क्षुत्तृट्संतप्तदेहानां द्विजानां भोक्तुमिच्छताम्॥समाचरति यो विघ्नं तमाहुर्ब्रह्मघातकम्॥१४॥

---

[1] सर्वोपभोगसुभगम्—इ० पा० ।

[2] सदा विष्णुम्—इ० पा० ।

पिशुनः सर्वलोकानां छिद्रान्वेषणतत्परः ॥ उद्वेगजननः क्रूरः स चैव ब्रह्महा स्मृतः ॥ १५ ॥ गवां तृष्णाभिभूतानां जलार्थमुपसर्पताम् ॥ समा
चरति यो विघ्नं स चैव ब्रह्महा स्मृतः ॥ १६ ॥ परदोषमभिज्ञाय नृपकर्णे करोति यः ॥ पापीयान्पिशुनः क्षुद्रः स चैव ब्रह्महा स्मृतः ॥ १७ ॥
देवद्विजगवां भूमिं पूर्वभुक्ता हरेत्तु यः ॥ प्रनष्टामपि कालेन तमाहुर्ब्रह्मघातकम् ॥ १८ ॥ द्विजवित्तापहरणे न्यायतः समुपार्जिते ॥ ब्रह्महत्या
समं ज्ञेयं[1] पातकं नात्र संशयः ॥ १९ ॥ अग्निहोत्रपरित्यागो यस्तु याज्ञिककर्मणाम् ॥ मातापितृपरित्यागः कूटसाक्ष्यं सुहृद्वधः ॥ २० ॥ गवां
मार्गे वने चाग्निं पुरे ग्रामे च दीपयेत् ॥ इति पापानि घोराणि सुरापानसमानि तु ॥ २१ ॥ हीनस्वहरणे चापि नरस्त्रीगजवाजिनाम् ॥ गोभूरज
तरत्नानामौषधीनां रजस्य च ॥ २२ ॥ चंदनागरुकर्पूरकस्तूरीखण्डवाससाम्[2] ॥ हस्ते न्यस्यापहरणं रुक्मस्तेयसमं स्मृतम् ॥ २३ ॥ कन्यानां
वरयोग्यानामदानं सदृशे वरे ॥ पुत्रमित्रकलत्रेषु गमनं भगिनीषु च ॥ २४ ॥ कुमारीसाहसं घोरमन्त्यजस्त्रीनिषेवणम् ॥ अवर्णायाश्च गमनं
गुरुतल्पसमं स्मृतम् ॥ २५ ॥ महापातकतुल्यानि पापान्युक्तानि यानि तु ॥ तानि पातकसंज्ञानि तद्वदाम्युपपातकम् ॥ २६ ॥ द्विजार्थं च
प्रतिज्ञाय न प्रयच्छति यः पुनः ॥ तस्मान्नरपते विघ्नतुल्यं तदुपपातकम् ॥ २७ ॥ द्विजद्रव्यापहरणं मर्यादाया व्यतिक्रमः ॥ अतिकोपश्च
मानश्च दांभिकत्वं कृतघ्नता ॥ २८ ॥ अत्यंतविषयासक्तिः कार्पण्यं श्रेष्ठमत्सरः ॥ परदारापहरणं साधुकन्याविदूषणम् ॥ २९ ॥ परिवित्तिः परी
वेत्ता यया च परिविद्यते ॥ तयोर्दानं च कन्यायास्तयो रेव च याजनम् ॥ ३० ॥ पुत्रमित्रकलत्राणामभावे स्वामिनस्तथा ॥ शिष्टानां चैव
संन्यासः सहजानां तपस्विनाम् ॥ ३१ ॥ भंगश्च धर्मकृत्यानां सहायानां विनाशनम् ॥ पीडामाश्रमसंस्थानान्नाचरेत्त्वल्पिकामपि ॥ ३२ ॥
स्वभृत्यपरिवर्गस्य पशुधान्यधनस्य च ॥ कुप्यधान्यपशुस्तेयमयाच्यानां च याचनम् ॥ ३३ ॥ गवां क्षत्रियवैश्यानां स्त्रीशूद्राणां विशेषतः ॥
यज्ञारामतडागानां दारापत्यस्य विक्रयः ॥ तीर्थयात्रोपवासानां व्रतायतनकर्मणाम् ॥ ३४ ॥ स्त्रीधनान्युपजीवंति स्त्रीभिरत्यंतनिर्जिताः ॥ अरक्षणं
च नारीणां मद्यपस्त्रीनिषेवणम् ॥ ३५ ॥ ऋणानामप्रदानं च धान्यवृद्ध्युपजीविनाम् ॥ निंदिताच्च धनादानमपण्यानां च विक्रयः ॥ ३६ ॥ विष
मारणमंत्राणां प्रयोगो मूलकर्मणाम् ॥ उच्चाटनाविचारश्च गरविद्वेषणक्रिया ॥ ३७ ॥ जिह्वासमुपभोगार्थं यस्यारम्भः स्वकर्मसु ॥ मूल्येनाध्यापये
यश्च मूल्येनाधीयते च ये ॥ ३८ ॥ व्रात्यता व्रतसंत्यागः सर्वाहारनिषेवणम् ॥ असद्दाराभिगमनं शुष्कतर्कावलंबनम् ॥ ३९ ॥ देवाग्निसाधु

---

[1] पापं हरणे–इ० पा० । [2] चन्दनागुरुकर्पूरकस्तूरिपट्टवाससाम्–इ० पा० ।

साध्वीनां निंदा गोब्राह्मणस्य च ॥ प्रत्यक्षं वा परोक्षं वा राज्ञां मण्डलिकामपि ॥ दुःशीला नास्तिकाः पापाः सर्वशून्यस्य वादिनः ॥ ४० ॥
पर्वकाले दिवा चैव वियोनौ पशुयोनिषु ॥ रजस्वलानां योनौ च मैथुनं च समाचरेत् ॥४१॥ स्त्रीपुत्रमित्रसंप्रीते ग्रासान्नच्छेदकाश्च ये ॥ जनस्या
प्रियवक्तारो धूर्ताः समयभेदिनः ॥४२॥ भेत्ता तडागचक्राणां संक्रमाणां रथस्य च ॥ एकपंक्तिस्थितानां च पाकभेदं करोति यः ॥४३॥ इत्येतैस्ते
नराः पापैरुपपातकिनः स्मृताः ॥ युक्तास्तदूनकैः क्षुद्रैः पापैः पापतराः स्मृताः ॥ ४४ ॥ ये गोब्राह्मणकन्यानां स्वामिमित्रतपस्विनाम् ॥ अंतरं
यांति कार्येषु ते नरा नारकाः स्मृताः ॥ ४५ ॥ परश्रिया[1] ये तप्यंते ये परद्रव्यसूचकाः ॥ परव्यापारनिरताः परस्त्रीनरदूषकाः ॥ ४६ ॥ द्विजाय
दुःखं यः कुर्यात्[2]प्रकारैर्बहुभिः सदा ॥ सेवते यो द्विजः शूद्रां सुरां जिघ्रति[3] कामतः ॥ ४७ ॥ ये पानाभिरताः क्रूरा ये च हिंसाप्रिया[4] नराः ॥
वित्तार्थं[5] ये च कुर्वंति दानयज्ञादिकां क्रियाम् ॥ ४८ ॥ गोष्ठाग्निजलरथ्यासु तरुच्छायामठेषु च ॥ त्यजंत्यमेध्यं पुरुषा आरामायतनेषु च ॥
॥ ४९ ॥ मद्यपानरता नित्यं गानवाद्यरता नराः ॥ केलीकलाभुजंगाश्च रंध्रान्वेषणतत्पराः ॥ ५० ॥ वंशेषु काशकाष्ठैश्च शुभैः शंकुभिरेव वा ॥
ये मार्गान्समुपघ्नंति परस्त्रीराहरंति च ॥ ५१ ॥ कूटशासनहर्तारः कूटकर्मक्रियारताः ॥ कूटयुद्धाश्च शस्त्रेण कूटसंव्यवहारिणः ॥ ५२ ॥
धनुषां शल्यशस्त्राणां यः कर्ता यश्च विक्रयी ॥ निर्दयोऽतीव भृत्येषु पशूनां दमकश्च यः ॥ ५३ ॥ मिथ्या प्रवदतो वाक्यमाकर्णयति यः
शनैः ॥ स्वामिमित्रगुरुद्रोही मायावी चपलः शठः ॥ ५४ ॥ ये भार्यापुत्रमित्राणि बालवृद्धकृशातुरान् ॥ भृत्यानतिथिबन्धूंश्च प्रबाधन्ते
बुभुक्षया ॥ ५५ ॥ यः स्वयं मिष्टमश्नाति विप्रायान्यत्प्रयच्छति ॥ वृथापाकः स विज्ञेयो ब्रह्मवादिषु गर्हितः ॥ ५६ ॥ नियमान्स्वयमादाय[6]
ये त्यजंत्यजितेंद्रियाः ॥ प्रव्रज्यावासिनो ये च रहस्यानां च भेदकाः ॥ ५७ ॥ ताडयंति च वेगाद्ये शपंति च मुहुर्मुहुः ॥ दुर्बलांश्च न
पुष्णंति पुनस्तान्वाहयंति च ॥ ५८ ॥ पीडयंत्यतिभारेण सक्षतान्वाहयंति च ॥ सार्द्धयामादुपरितः संयुक्तेषु च भुंजते ॥ ५९ ॥ ये भग्न
क्षतरोगार्तान्स्वगोरूपान्बुभुक्षया ॥ न पालयंति यत्नेन ते गोघ्ना नारका नराः ॥ ६० ॥ वृषाणां वृषणान्येव पापिष्ठा गालयंति ये ॥ वाह
यंति च गां वध्यां ते महानारकाः स्मृताः ॥ ६१ ॥ आश्रमं समनुप्राप्तं क्षुत्तृष्णाश्रमपीडितम् ॥ येऽतिथिं नाभिमन्यंते ते वै निरयगा
मिनः ॥ ६२ ॥ अनाथं विकलं दीनं बालं वृद्धं कृशातुरम् ॥ नानुकंपंति ये मूढास्ते यान्ति निरयार्णवम् ॥ ६३ ॥ अजाविको माहिषिकः

---

[1] परस्त्रिया ये हृष्यन्ते–इ० पा० । [2] दद्यात्–इ० पा० । [3] चाघ्राति–इ० पा० । [4] हिंसापराः–इ० पा० । [5] पंक्त्यर्थम्–इ० पा० । [6] व्रतम्–इ० पा० ।

सामुद्रो[1] वृषलीपतिः ॥ शूद्रविट्क्षत्रवृत्तिश्च नारकी स्याद्द्विजाधमः ॥ ६४ ॥ शिल्पिनः कारुका वैद्या हेमकारा नटा द्विजाः ॥ कृतकौक्षेय
संयुक्तास्तथान्ये नारकाः स्मृताः ॥ ६५ ॥ यश्चोदितमतिक्रम्य स्वेच्छया वा हरेत्करम् ॥ नरके तु स पच्येत यश्च दंडरुचिर्भवेत् ॥ ६६ ॥
उत्कोचकैरधिकृतैस्तस्करैश्च प्रपीड्यते ॥ यस्य राज्ञः प्रजा रुष्टा पच्यते नरकेषु सः ॥ ६७ ॥ ये द्विजाः प्रतिगृह्णंति नृपस्यान्यायवर्तिनः ॥
प्रयांति[2] तेपि घोराणि नरकाणि न संशयः ॥६८॥ पारदारिकचौराणां यत्पापं पार्थिवस्य तत् ॥ भवेदरक्षतस्तस्माद्धोरस्तस्य प्रतिग्रहः ॥ ६९ ॥
अचौरं चौरवत्पश्येच्चोरं वाऽचौररूपवत् ॥ अविचार्य नृपस्तस्माद्धातयन्नरकं व्रजेत् ॥ ७० ॥ घृततैलान्नपानानि मधुमांससुरासवम् ॥ गुडेक्षुक्षारशा
कानि दधिमूलफलानि च ॥ ७१ ॥ तृणं काष्ठं पुष्पपत्रमौषधं कांस्यभाजनम् ॥ उपानच्छत्रशकटमासनं शयनांबरम् ॥ ७२ ॥ ताम्रं सीसं त्रपुं
काचं शंखाद्यं च जलोद्भवम् ॥ वार्क्षं वा वैणवाद्यं वा गृहेषूपस्कराणि च ॥ ७३ ॥ ऊर्णाकार्पासकौशेयभंगपट्टोद्भवानि च ॥ स्थूलसूक्ष्माणि
वस्त्राणि ये च लोभाद्धरंति च ॥ ७४ ॥ एवमादीनि चान्यानि द्रव्याणि विविधानि च ॥ नरकाणि ध्रुवं यांति नरा वा नात्र संशयः ॥ ७५ ॥
यद्वा तद्वा परद्रव्यमपि सर्षपमात्रकम् ॥ अपहृत्य नरो याति नरकं नात्र संशयः ॥ ७६ ॥ एवमाद्यैर्नरः पापैरुत्क्रांतेः समनंतरम् ॥ शरीरं यात
नार्थाय पूर्वाकारमवाप्नुयात् ॥ ७७ ॥ यमलोकं व्रजेत्तेन शरीरेण यमाज्ञया ॥ यमदूतैर्महाघोरैर्नीयमानः सुदुःखितः ॥ ७८ ॥ तिर्यङ्मानुषदेहा
नामधर्मनिरतात्मनाम् ॥ धर्मराजः स्मृतः शास्ता सुघोरैर्विविधैर्वधैः ॥ ७९ ॥ विनयाचारयुक्तानां प्रमादात्स्खलितात्मनाम् ॥ प्रायश्चित्तै
र्गुरुः शास्ता न च तैर्दृश्यते यमः ॥ ८० ॥ पारदारिकचौराणामन्यायव्यवहारिणाम् ॥ नृपतिः शासकस्तेषां प्रच्छन्नानां च धर्मराट् ॥ ८१ ॥
तस्मात्कृतस्य पापस्य प्रायश्चित्तं समाचरेत् ॥ नाभुक्तस्यान्यथा नाशः कल्पकोटिशतैरपि ॥ ८२ ॥ यः करोति स्वयं कर्म कारयेद्वापि मोद
येत् ॥ कायेन मनसा वाचा तस्य चाधोगतिः फलम् ॥ ८३ ॥ इति संक्षेपतः प्रोक्ताः पापभेदाः ससाधनाः ॥ कथ्यंते गतयश्चित्रा नराणां पाप
कर्मणाम् ॥ ८४ ॥ वाक्कायचित्तजनितैर्बहुभेदभिन्नैः कृत्यैः शुभाशुभफलोदयहेतुभूतैः ॥ भास्वत्सुरेशभुवनं नरकाननेकान्संप्राप्नुवंति मनुजा मनु
जेंद्रचन्द्र ॥ ८५ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि पापभेदाख्यानं नाम पञ्चमोऽध्यायः ॥ ५ ॥ ॥छ॥ ॥ श्रीकृष्ण उवाच ॥ ॥
अथैभिः पातकैर्यांति यमलोकं चतुर्विधैः ॥ संत्रासजननं घोरं विवशाः सर्वदेहिनः[3] ॥ १ ॥ गर्भस्थैर्जायमानैश्च बालैस्तरुणमध्यमैः ॥ पुंस्त्री

---

[1] सामिद्धः—इ० पा० । [2] व्रजंति—इ० पा० । [3] सर्वजन्तवः—इ० पा० ।

नपुंसकैर्वृद्धैर्ज्ञातव्यं सर्वजंतुभिः ॥ २ ॥ शुभाशुभफलं तत्र देहिनां प्रविचार्यते ॥ चित्रगुप्तादिभिः सभ्यैर्मध्यस्थैः सर्वदर्शिभिः ॥ ३ ॥ न
तेऽत्र प्राणिनः संति ये न यांति यमक्षयम्[१] ॥ अवश्यं हि कृतं कर्म भोक्तव्यं तद्विधारितम् ॥ ४ ॥ तत्र ये शुभकर्माणः सौम्यचित्ता दयान्विताः ॥
ते नरा यांति सौम्येन पथा यमनिकेतनम् ॥ ५ ॥ यः प्रदद्याद्द्विजेन्द्राणामुपानत्काष्ठपादुकाम् ॥ स वराश्वेन महता सुखं याति यमालयम् ॥६॥
छत्रदानेन गच्छंति यथा छत्रेण देहिनः ॥ दिव्यवस्त्रपरीधाना यांति वस्त्रप्रदायिनः ॥ ७ ॥ शिबिकाश्वप्रदानेन ततस्तेन सुखं व्रजेत् ॥ शय्यासनप्रदानेन
सुखं यांति यमाश्रयम् ॥ ८ ॥ आरामकर्ता छायासु शीतलासु सुखं व्रजेत् ॥ यांति पुष्पकयानेन पुष्पारामप्रदायिनः ॥ ९ ॥ देवायतनकर्ता
च यतीनामाश्रमस्य च ॥ अनाथमंडपानां च क्रीडन्याति गृहोत्तमैः ॥ १० ॥ देवाग्निगुरुविप्राणां मातापित्रोश्च पूजकाः ॥ पूज्यमाना
नरा यांति कामिकेन पथा सुखम् ॥ ११ ॥ द्योतयंतो दिशः सर्वा यांति दीपप्रदायिनः ॥ प्रतिश्रयप्रदानेन सुखं यांति गृहं स्वयम् ॥ १२ ॥ सर्वकामसमृद्धेन
पथा गच्छंति गोप्रदाः ॥ ये न पापानि कुर्वंति ते तृप्ता यांति नान्यथा ॥१३॥ आर्तौषधप्रदातारः[२] सुखं यांति निराकुलाः ॥ विश्राम्यमाणा
गच्छंति गुरुशुश्रूषणे रताः॥१४॥पादशौचप्रदानेन शीतलेन पथा व्रजेत् ॥ पादाभ्यंगं च यः कुर्यादश्वपृष्ठेन स व्रजेत्॥१५॥हेमरत्नप्रदानेन
याति दुर्गाणि निस्तरन् ॥ यानवाहनदानेन नरयानेन गच्छति ॥ १६ ॥ सर्वकामसमृद्धात्मा भूमिदानेन गच्छति ॥ अन्नपानप्रदानेन पिबन्खादंश्च
गच्छति ॥ १७ ॥ इत्येवमादिभिर्दानैः सुखं यांति यमक्षयम्[३] ॥ स्वर्गेपि विपुलान्भोगान्प्राप्नुवंति[४] नरोत्तम ॥ १८ ॥ सर्वेषामेव दानानामन्नदानं
परं स्मृतम् ॥ सद्यः प्रीतिकरं दिव्यं बलबुद्धिविवर्द्धनम् ॥ १९ ॥ त्रयाणामपि लोकानां जीवितं ह्युदकं[५] स्मृतम् ॥ पवित्रममृतं दिव्यं शुद्धं
सर्वरसायनम् ॥ २० ॥ अन्नं पानं च गोवस्त्रभूशय्याच्छत्रमासनम् ॥ परलोके प्रशस्तानि दानान्यष्टौ विशेषतः ॥ २१ ॥ अन्नदानं विशेषेण धर्मराजपुरे
नराः ॥ यस्माद्यांति सुखेनैव तस्माद्धर्मं समाचरेत्[६] ॥ २२ ॥ ये पुनः क्रूरकर्माणः पापा दानविवर्जिताः ॥ ते घोरेण पथा यांति दक्षिणेन
यमालयम् ॥ २३ ॥ षडशीतिसहस्राणि योजनानामतीत्य यत् ॥ वैवस्वतपुरं ज्ञेयं नानारूपव्यवस्थितम् ॥ २४ ॥ समीपस्थमिवाभाति नराणां
शुभकर्मणाम्[७] ॥ पापानामतिदूरस्थं पथा रौद्रेण गच्छताम् ॥ २५ ॥ तीव्रकंटकयुक्तेन शर्करानिचितेन च ॥ क्षुरधारानिभैस्तीव्रैः पाषाणैर्निचि

---

[१] यमक्षयं यमगृहमित्यर्थः । [२] अन्यौषधप्रदातरः--इ० पा० । [३] यमालयम्--इ० पा० । [४] प्राप्नोति विविधान्नरः--इ० पा० । [५] कथितं पयः--इ० पा० । [६] सुखं चेरत्--इ० पा० । [७] गुरुकर्मणाम्--इ० पा० ।

तेन च ॥ २६ ॥ क्वचित्पंकेन महता दुरुत्तारैश्च खातकैः ॥ [1]लोहसूचीनिभैर्दर्भैः संछन्नेन पथा क्वचित् ॥ २७ ॥ तटप्रपातविष्टंभैः पर्वतैर्वृक्षसंकुलैः ॥ प्रतप्तांगारयुक्तेन यांति मार्गेण दुःखिताः ॥ २८ ॥ क्वचिद्विषमगर्तैश्च क्वचिल्लोष्टैः सुपिच्छिलैः ॥ प्रतप्तवालुकाभिश्च तथा तीक्ष्णैश्च शंकुभिः ॥ २९ ॥ अनेकतापैर्विततैर्व्याप्तं वंशवनं क्वचित् ॥ क्वचिद्वालुकया व्याप्तं कष्टेनैव प्रवेशनम् ॥ ३० ॥ क्वचिद[2]ुष्णांबुना व्याप्तं क्वचित्कारीषवह्निना ॥ क्वचित्सिंहैर्वृकैर्व्याप्तं दंशैः कीटैश्च दारुणैः ॥ ३१ ॥ क्वचिन्महाजलौकाभिः क्वचिच्चाजगरैः पुनः ॥ मक्षिकाभिश्च रौद्राभिः क्वचित्सर्पैर्विषोल्वणैः ॥ ३२ ॥ मत्तमातंगयूथैश्च बलोन्मत्तैः प्रमाथिभिः ॥ पंथानमुल्लिखद्भिश्च तीक्ष्णशृंगैर्महावृषैः ॥ ३३ ॥ महाविषाणैर्महिषैरुद्धैर्मत्तैश्च खादकैः ॥ [3]डाकिनीभिश्च रौद्राभिर्विकरालैश्च राक्षसैः ॥ ३४ ॥ व्याधिभिश्च महाघोरैः पीड्यमाना व्रजंति च ॥ महाधूलीविमिश्रेण महाचण्डेन वायुना ॥ ३५ ॥ महापाषाणवर्षेण हन्यमाना निराश्रयाः ॥ क्वचिद्विद्युत्[4]प्रपातेन दीर्यमाणा व्रजंति च ॥ ३६ ॥ महता बाणवर्षेण विध्यमानाश्च सर्वशः ॥ पतद्भिर्वज्रसंघातैरुल्कापातैश्च दारुणैः ॥ ३७ ॥ प्रतप्तांगारवर्षेण दह्यमाना व्रजंति च ॥ [5]तप्तेन पांशुवर्षेण पूर्यमाणा रुदंति च ॥ ३८ ॥ महामेघरवैर्घोरैर्वित्रास्यंते मुहुर्मुहुः ॥ निशितायुधवर्षेण चूर्यमाणा नरैर्वृताः ॥ महाक्षाराम्बुधाराभिः सिच्यमाना द्रवंति च ॥ ३९ ॥ महाशीतेन मरुता तीक्ष्णेन परुषेण च ॥ समंतात्पी[6]ड्यमानास्ते शुष्यंते संकुचंति च ॥ ४० ॥ इत्थं मार्गेण रौद्रेण पांथैर्विरहितेन च ॥ निरालंबेन दुर्गेण निर्जलेन समंततः ॥४१॥ अविश्रामेण महता निर्गतापाश्रयेण च ॥ तमोरूपेण कष्टेन सर्वदुःखाश्रयेण च ॥४२॥ नीयंते देहिनः सर्वे ये मूढाः [7]पापकर्मिणः ॥ यमदूतैर्महाघोरैस्तदाज्ञाकारिभिर्बलात् ॥४३॥ एकाकिनः पराधीना मित्रबंधुविवर्जिताः ॥ शोचंतः स्वानि कर्माणि रुदंतश्च मुहुर्मुहुः ॥ ४४ ॥ प्रेतभूता विवस्त्राश्च शुष्ककण्ठोष्ठतालुकाः ॥ कृशाङ्गा भीतभीताश्च दह्यमानाः [8]क्षुधाग्निना ॥ ४५ ॥ बद्धाः शृंखलया केचिदुत्तानाः पादयोर्नराः ॥ आकृष्यंते [9]घृष्यमाणा यमदूतैर्बलोत्कटैः ॥ ४६ ॥ पुनश्चाधोमुखाश्चान्ये घृष्यमाणाः सुदुःखिताः॥ केशपाशनिबद्धाश्च [10]कृष्यंते रज्जुभिर्नराः॥ ४७ ॥ ललाटे चांकुशैस्तीक्ष्णैर्भिन्नाः कृष्यंति देहिनः ॥ उत्ताना रटमानाश्च क्वचिदंगारवर्त्मना ॥ ४८ ॥ पाश्चाद्बाहुंसबद्धाश्च जठरे च प्रपीडिताः ॥ पूरिताः शृंखलाभिश्च हस्तयोश्च [11]प्रकीलिताः ॥ ४९ ॥ ग्रीवायामर्द्धचन्द्रेण क्षिप्यमाणा इतस्ततः ॥

---

[1] लोहसूचीभिरत्यंतम्–इ० पा० । [2] दुष्टांबुना–इ० पा० । [3] शाकिनीभिः–इ० पा० । [4] विद्युत्प्रतापेन दह्यमानाः–इ० पा० । [5] महता–इ० पा० । [6] म्रियमाणास्ते–इ० पा० । [7] पापकारिणः–इ० पा० । [8] क्षुधाग्निना–इ० पा० । [9] कृष्यमाणाः–इ० पा० । [10] केशपाशनिबद्धांश्च तान्याम्याः कर्षयंति च–इ० पा० । [11] प्रपीडिताः–इ० पा० ।

शिश्ने च वृषणे बद्धा नीयंते चर्मरज्जुना ॥ ५० ॥ विभिन्ना उदरे चान्ये तप्तशृंखलया नराः ॥ कृष्यंते कर्णयोश्चान्ये भिन्नाश्च चिबुकोपरि ॥
॥ ५१ ॥ छिन्नाग्रपादहस्ताश्च छिन्नकर्णौष्ठनासिकाः ॥ संछिन्नशिश्नवृषणाश्छिन्नभिन्नांगसंधयः ॥ ५२ ॥ प्रतुद्यमानाः कुंतैश्च सायकैश्च
ततस्ततः ॥ भिद्यमानाः प्रधावंति क्रन्दमाना निराश्रयाः ॥ ५३ ॥ मुद्गरैर्लोहदण्डैश्च हन्यमाना मुहुर्मुहुः ॥ कशैश्च विविधैर्घोरैर्ज्वलिता
ग्निसमप्रभैः ॥ ५४ ॥ भिंदिपालैर्विभिद्यंते स्रवंतः पूयशोणितम् ॥ मांसे क्षताश्च कृमिभिर्नीयंते विवशा नराः ॥ ५५ ॥ याचमानाश्च
सलिलमन्नं चापि बुभुक्षिताः ॥ छायां प्रार्थयमानाश्च शीतार्ता [1]बहुवायुना ॥ ५६ ॥ दानहीनाः प्रयांत्येवं यावंतो विमुखा नराः ॥
गृहीतदानपाथेयाः सुखं यांति यमालयम् ॥ ५७ ॥ एवं पथातिकष्टेन प्राप्ता यमपुरं तदा ॥ प्रज्ञापितास्तदा दूतैर्निवेश्यंते यमाग्रतः ॥ ५८ ॥
तत्र ये शुभकर्माणस्तांश्च संमानयेद्यमः ॥ स्वागतासनदानेन पाद्यार्घेण प्रियेण च ॥ ५९ ॥ धन्या यूयं महात्मान आत्मनो हितकारिणः ॥ येन
दिव्यसुखार्थाय भवद्भिः सुकृतं कृतम् ॥ ६० ॥ इदं विमानमारुह्य दिव्यस्त्रीभोगभूषितम् ॥ स्वर्गं गच्छध्वमतुलं सर्वकामसमन्वितम् ॥ ६१ ॥
ततो भुक्त्वा महाभोगानंते पुण्यस्य संक्षयात् ॥ यत्किञ्चिदल्पमशुभं पुनस्तदिह भोक्ष्यथ ॥ ६२ ॥ ते चापि धर्मराजानं नराः पुण्यानुभावतः ॥
पश्यंति सौम्यवदनं पितृभूतमिवात्मनः ॥ ६३ ॥ ये पुनः पापकर्माणस्ते पश्यंति भयानकम् ॥ पापाविशुद्धनयना विपरीतात्मबुद्धयः ॥ ६४ ॥
दंष्ट्राकरालवदनं भ्रुकुटीकुटिलेक्षणम् ॥ ऊर्ध्वकेशं महाश्मश्रुप्रस्फुरदधरोत्तरम् ॥ ६५ ॥ अष्टादशभुजं क्रुद्धं नीलांजनचयोपमम् ॥ सर्वायुधोद्यत
करं ब्रह्मदण्डेन तर्जकम् ॥ ६६ ॥ महामहिषमारूढं दीप्ताग्निसमलोचनम् ॥ रक्तमाल्याम्बरधरं महामेरुमिवोच्छ्रितम् ॥ ६७ ॥ [2]प्रलयांबुदनिर्घोषं
पिबंतमिव सागरम् ॥ ग्रसंतमिव लोकानामुद्गिरंतमिवानलम् ॥ ६८ ॥ मृत्युश्च तत्समीपस्थः कालानलसमप्रभः ॥ कालश्चांजनसंकाशः कृतांतश्च
भयानकः ॥ ६९ ॥ मारी चोग्रा महामारी कालरात्रिः सुदारुणा ॥ विविधा व्याधयः कष्टा नानारूपभयावहाः ॥ ७० ॥ शक्तिशूलांकुशधराः
पाशचक्रासिधारिणः ॥ वज्रदण्डधरा रौद्राः क्षुद्रतूणीधनुर्धराः ॥ ७१ ॥ असंख्याता महावीर्याः क्रूराश्चाञ्जनसंप्रभाः ॥ सर्वायुधोद्यतकरा यमदूता
भयानकाः ॥ ७२ ॥ अनेन परिवारेण महाघोरेण संवृतम् ॥ यमं पश्यंति पापिष्ठाश्चित्रगुप्तं च भीषणम् ॥ निर्भर्त्सयंतं चात्यन्तं यमं सदुपका
रिणम् ॥७३॥ चित्रगुप्तश्च भगवान्धर्मवाक्यैः प्रबोधयन् ॥ भोभो दुष्कृतकर्माणः परद्रव्यापहारिणः ॥ गर्विताः रूपवीर्येण परदारविमर्दकाः ॥७४॥

---

[1] च पुनःपुनः—इ० पा० । [2] अश्नन्तमिव त्रैलोक्यम्—इ० पा० ।

यत्स्वयं क्रियते कर्म तत्स्वयं भुज्यते पुनः ॥ तत्किमात्मोपघातार्थं भवद्भिर्दुष्कृतं कृतम् ॥७५॥ इदानीं किं प्रतप्यध्वं पीड्यमानाः स्वकर्मभिः ॥ भुञ्जध्वं स्वानि कर्माणि नात्र दोषोऽस्ति कस्यचित् ॥ ७६ ॥ एते च पृथिवीपालाः संप्राप्ता मत्समीपतः ॥ स्वकीयैः कर्मभिर्घोरैर्दुष्प्रज्ञा बलगर्विताः ॥ ७७ ॥ भोभो नृपा दुराचाराः प्रजाविध्वंसकारिणः अल्पकालस्य राज्यस्य कृते किं दुष्कृतं कृतम् ॥ ७८ ॥ राज्यलोभेन मोहाद्वा बलादन्यायतः प्रजाः ॥ यत्पीडिताः फलं तस्य भुंजध्वमधुना नृपाः ॥ ७९ ॥ कृतं राज्यं कलत्रं च यदर्थमशुभं कृतम् ॥ तत्सर्वं संपरित्यज्य यूयमेकाकिनः स्थिताः ॥ ८० ॥ पश्याम तद्बलं तुभ्यं[1] येन विध्वंसिताः प्रजाः ॥ यमदूतैस्ताड्यमाना अधुना कीदृशं भवेत् ॥ ८१ ॥ एवंबहुविधैर्वाक्यैरुपालब्धा यमेन ते ॥ शोचंतः स्वानि कर्माणि तूष्णीं तिष्ठंति पार्थिव ॥ ८२ ॥ इति धर्मं समादिश्य नृपाणां धर्मराट् पुनः ॥ तत्पापपंकशुद्ध्यर्थमिदं वचनमब्रवीत् ॥ ८३ ॥ भोभोश्चण्ड महाचण्ड गृहीत्वा नृपतीनिमान्[2] ॥ विशोधयध्वं पापेभ्यः[3] क्रमेण नरकाग्निषु ॥८४॥ ततः शीघ्रं समुत्थाय नृपान्संगृह्य पादयोः ॥ भ्रामयित्वातिवेगेन विक्षिप्योर्ध्वं विगृह्य[4] च ॥ ८५ ॥ सर्वप्राणेन महताःसुतप्ते तु शिलातले ॥ आस्फालयंति[5] तरसा वज्रेणेव महाद्रुमम् ॥ ८६ ॥ ततः स रक्तस्रोतोभिः स्रवते जर्जरीकृतः ॥ स निःसंज्ञस्तदा देही निश्चेष्टः संप्रजायते ॥ ८७ ॥ ततः स वायुना स्पृष्टः शनैरुज्जीवते पुनः ॥ ततः पापविशुद्ध्यर्थं क्षिप्यते नरकार्णवे ॥ ८८ ॥ अष्टाविंशतिरेवाधः क्षितेर्नरककोटयः॥ सप्तमस्य तलस्यांते घोरे तमसि संस्थिताः ॥ ८९ ॥ रौरवप्रभृतीनां च नरकाणां शतं स्मृतम् ॥ चत्वारिंशत्समधिक महानरकमंडलम् ॥ ९० ॥ येषु[6] पापाः प्रपच्यंते नराः कर्मानुरूपतः ॥ याँतनाभिर्विचित्राभिराकर्मप्रक्षयाद्भृशम् ॥ ९१ ॥ आ मलप्रक्षयाद्यद्वदग्नौ धास्यंति धातवः ॥ तथा पापक्षयात्पापाश्शोध्यंते नरकाग्निषु ॥ ९२ ॥ सुगाढहस्तया बाढं तप्तशृंखलया नराः ॥ महावृक्षाग्रशाखायां लंब्यंते यमकिंकरैः ॥ ९३ ॥ ततस्ते सर्पयंत्रेण क्षिप्ता दोल्यंति किंकरैः ॥ दोल्यंतश्चातिवेगेन निःसंज्ञा यांति योजनम् ॥ ९४ ॥ अंतरिक्षस्थितानां च लोहभारशतं ततः ॥ पादयोर्बध्यते तेषां यमदूतैर्महाबलैः ॥ ९५ ॥ तेन भारेण महता भृशमातर्दिता नराः ॥ ध्यायंतः स्वानि कर्माणि तूष्णीं तिष्ठंति विह्वलाः ॥ ९६ ॥ ज्वालाभिरग्निवर्णाभिर्लोहदंडैः सकंटकैः ॥ हन्यंते किंकरैर्घोरैः समंतात्पापकारिणः ॥ ९७ ॥ ततः क्षारेण दीप्तेन वह्नेरपि

---

[1] तुभ्यं तवेत्यर्थः–षष्ठ्यर्थे चतुर्थी । [2] बलात्—इ० पा० । [3] पापिष्ठान्–इ० पा० । [4] प्रगृह्य च–इ० पा० । [5] आस्फोटयन्ति–इ० पा० । [6] एषु–इ० पा० । [7] बुध्यंते स्वानि कर्माणि कृष्यते यम किंकरैः–इ० पा० ।

विशेषतः ॥ समंततः प्रलिप्यंते क्षतांगा जर्ज्जरीकृताः ॥ ९८ ॥ पुनर्विदार्य चांगेषु शिरसःप्रभृति क्रमात् ॥ वृन्ताकवत्प्रपच्यंते तप्ततैलकटाहके
॥ ९९ ॥ विष्ठापूर्णे ततः कूपे कृमीणां निचये ततः ॥ मेदस्त्वक्पूयपूर्णायां वाप्यां[1] क्षिप्यंति ते पुनः ॥ १०० ॥ भक्ष्यंते क्रिमिभिस्ती
क्ष्णैर्लोहतुण्डैश्च वायसैः ॥ श्वभिर्दंशैर्वृकैर्घोरै[2]र्व्याघ्रैरप्यथ वानरैः ॥ १०१ ॥ पच्यंते मांसवच्चापि [3]प्रदीप्तांगारराशिषु ॥ प्रोताः शूलेषु ती
क्ष्णेषु नराः पापेन कर्मणा ॥ १०२ ॥ तिलपिंडैरिवाक्रम्य घोरैः कर्मभिरात्मनः ॥ तिलवत्सम्प्रपीडयन्ते चक्राख्ये नरके तथा ॥ १०३ ॥
भिद्यंते चापि तल्पेषु लोहभ्राष्ट्रेष्वनेकधा ॥ तैलपूर्णकटाहेषु सुतप्तेषु पुनःपुनः ॥ १०४ ॥ बहुशः पीडयते जिह्वा याऽसत्यप्रियवादिनी ॥ संदंशेन
सुतप्तेन प्रपीडयन्ते च पादयोः ॥ १०५ ॥ मिथ्यागमप्रवक्तुश्च द्विजिह्वस्य च निर्गता ॥ जिह्वार्द्धक्रोशविस्तीर्णा हलैस्तीक्ष्णैश्च बाध्यते ॥
॥ १०६ ॥ निर्भर्त्सयंति ये क्रूरा मातरं पितरं गुरुम् ॥ तेषां वक्ष उलूकाभिर्मुखमापूर्य सेव्यते ॥१०७॥ ततः क्षारेण दीप्तेन ताम्रेण तु पुनःपुनः ॥
हतेनापूर्यतेऽत्यर्थं तप्ततैलैश्च तन्मुखम् ॥ १०८ ॥ इतस्ततः पुनर्वक्त्रं भृशमापूर्य हन्यते ॥ विष्ठाभिः कृमिभिश्चापि सुवर्णहरणैर्नरः ॥ १०९ ॥ परि
ष्वजति चात्युग्रां प्रदीप्तां लोहशाल्मलीम् ॥ हन्यते पृष्ठदेशे च पुनस्तीक्ष्णैर्महाघनैः ॥ ११० ॥ दंतुरेणातिकूटेन क्रकचेन बलीयसा ॥ शिरः
प्रभृति पादांतं घोरैः कर्मभिरात्मजैः ॥ खाद्यते स्वा[4]नि मांसानि पायते शोणितं स्वकम् ॥ १११ ॥ अन्नं पानं न दत्तं यैर्मूढैर्नाप्यनुमोदितम् ॥ इक्षु
वत्ते प्रपीडयन्ते जर्जरीकृतमस्तकाः ॥ ११२ ॥ असितालवने घोरे च्छिद्यंते खंडखंडशः॥ सूचीभिर्भिन्नसर्वांगास्तप्तशूलप्ररोपिताः ॥ संबाध्यमाना
विवशाः क्लिश्यंते न म्रियंति वै ॥ ११३ ॥ देहादुत्साद्यमांसानि भिद्यंतेऽ[5]स्थीनि मुद्गरैः ॥ दृष्टिराकृष्यते तूर्णं यमदूतैर्बलोत्कटैः ॥ ११४ ॥ निर
स्तास्ते निरुच्छ्वासास्तिष्ठंति नरके ध्रुवम् ॥ उच्छ्वसंति सदा श्वासैर्वालुकावदनावृताः ॥ ११५ ॥ रौरवे रोदमानाश्च पीड्यन्ते विविधैः शरैः ॥ महा
रौरवपीडाभिर्महतीभिस्तदंतिके ॥ ११६ ॥ पदोरास्ये गुदे चैव पार्श्वे चोरसि मस्तके ॥ निखन्यंते घनैस्तीक्ष्णैः सुतप्तैर्लोहशंकुभिः ॥ ११७ ॥
सुतप्तवालुकायां च [6]प्रलुठ्यन्ते पुनःपुनः ॥ जतुपंके भृशं तप्ते क्षिप्राः क्रन्दंति विस्तरम् ॥ ११८ ॥ तेनतेनैव रूपेण हसन्ते पारदारिकम् ॥ गाढ
मालिङ्गयते नारीं ज्वलंतीं लोहनिर्मितांम् ॥ ११९ ॥ पूर्वाकारं च पुरुषं प्रज्वलंतं समंततः ॥ दुश्चारिणीः स्त्रियो गाढमालिंगंति [7]वदंति

---

[1] द्रोण्याम्–इ० पा० । [2] व्याघ्रैश्च विरुताननैः–इ० पा० । [3] दीप्तांगारप्रदीप्तिषु–इ० पा० । [4] ह्रस्वमांसानि–इ० पा० । [5] अशिवमुद्गरैः–इ० पा० । [6] जल्पंते च–इ० पा० । [7] तदा नरम्–इ० पा० ।

च ॥ १२० ॥ किं प्रधावसि वेगेन ते न मोक्षोऽस्ति सांप्रतम् ॥ लंवितस्ते यथा भर्ता पापं भुंक्ष्व तथाधुना ॥ १२१ ॥ लोहकुम्भे तथा क्षिप्ताः सविधानैः शनैःशनैः ॥ मृद्वग्निनाथ पच्यंते स्वपापैरेव मानवाः ॥ १२२ ॥ क्वणंत्युदूखले सास्राः प्रक्षिप्यंते शिलासु च ॥ क्षिप्यंते चांधकूपेषु दश्यंते भ्रमरैर्भृशम्[1] ॥ १२३ ॥ कृमिभिर्भिन्नसर्वांगाः शतशो जर्जरीकृताः ॥ सुतीक्ष्णक्षारकूपेषु क्षिप्यंते तदनंतरम् ॥ १२४ ॥ महाज्वाले च नरके पापाः फूत्कारयंति च ॥ इतस्ततश्च धावंति दह्यमानास्तदर्चिषा ॥ १२५ ॥ पृष्ठे चानीय जंघे द्वे विन्यस्ते स्कन्धयोः स्थिते ॥ तयोर्मध्येन चाकृष्य बाहुपृष्ठेन गाढतः ॥ वद्धाः परस्परं सर्वं सुदृढं गाढरज्जुभिः ॥ १२६ ॥ पीडयंति सुसंरब्धा भ्रमरास्तीक्ष्णलोहजाः ॥ मानिनां क्रोधिनां चैव पुरा पापस्य संशयात् ॥ १२७ ॥ पापानां नरके पुंसां घृष्यते चंदनं यथा ॥ शरीराभ्यंतरगतं तरुणानां च दारुणम् ॥ १२८ ॥ पिंडबंधः स्मृतो याम्यो महाज्वालेषु यातनाः ॥ रज्जुभिर्वेष्टितांगाश्च प्रलिप्ताः कर्दमेन च ॥ करीषरूक्षवह्नौ च पच्यंते न म्रियंति च ॥ १२९ ॥ सुतीक्ष्णक्षारतोयेन शर्करासु शिलासु च ॥ आ पापसंक्षयात्पापा घृष्यंते चंदनं यथा ॥ १३० ॥ शरीराभ्यन्तरगतैः प्रभूतैः कृमिभिर्नराः ॥ भक्ष्यंते तीक्ष्णवदनैरादेहप्रक्षयाद् भृशम् ॥ १३१ ॥ कृमीणां निचये क्षिप्ताः पूतिमांसस्य राशिषु ॥ तिष्ठन्त्युद्विग्नहृदयाः पर्वताभ्यां च पीडिताः ॥ १३२ ॥ सुतप्तवज्रलेपेन शरीरमनुलिप्यते ॥ अधोमुखोर्ध्वपादाश्च[2] धृतास्तप्यंति वह्निषु ॥ १३३ ॥ वदनांते प्रविन्यस्तं सुतप्तायोमयं गुडम् ॥ ते खादंति पराधीना हन्यमानास्तु मुद्गरैः ॥ १३४ ॥ ये शिवायतनारामवापीकूपमठांगणात् ॥ अभिद्रवंति पापिष्ठा नरास्तत्र वसंति च ॥ १३५ ॥ व्यायामोद्वर्तनाभ्यंगस्नानमापानभोजनम् ॥ क्रीडनं मैथुनं द्यूतमाचरंति रमंति च ॥ १३६ ॥ ते बाधैर्विविधैर्घोरैरिक्षुयन्त्रादिपीडनैः ॥ निरयाग्निषु पच्यंते यावदाचन्द्रतारकम् ॥ १३७ ॥ ये शृण्वंति गुरोर्निंदां तेषां कर्णः प्रपूर्य्यंते ॥ अग्निवर्णैरयःकीलैस्तप्तताम्रादिभिर्द्रुतैः ॥ १३८ ॥ त्रपुसीसारकूटाद्यैः क्षारेण जतुना पुनः ॥ क्रमादापूर्यंते कर्णौ नरकेषु च यातनाः ॥ अनुक्रमेण सर्वेषु भवंत्येताः समंततः ॥ १३९ ॥ सर्वेंद्रियाणामप्येवं क्रमात्पापेन यातनाः ॥ भवंति घोराः प्रत्येकं शरीरे तत्कृतेन च ॥ १४० ॥ स्पर्शलोभेन ये मूढाः संस्पृशंति परस्त्रियम् ॥ तेषां त्वगग्निवर्णाभिः सूचीभिः पूर्यते भृशम् ॥१४१॥ ततः क्षारादिभिः सर्वैः शरीरमनुलिप्यते ॥ यातना च महाकष्टा सर्वेषु नरकेषु च ॥ १४२ ॥ गुरोः कुर्वंति भ्रुकुटिं क्रूरं चक्षुश्च ये नराः ॥ पर

---

१ तथाविधम्—इ० पा० ।   २ अधःशिरोर्ध्वपादाश्च—इ० पा० ।

दारांश्च पश्यंति लुब्धाः स्निग्धेन चक्षुषा ॥१४३॥ सूचीभिरग्निवर्णाभिस्तेषां नेत्रं प्रपूर्यंते ॥ क्षाराद्यैश्च क्रमात्सर्वैर्देहे सर्वाश्च यातनाः ॥ १४४ ॥
देवाग्निगुरुविप्राणां येऽनिवेद्य प्रभुंजते ॥ लोहकीलशतैस्तप्तैस्तज्जिह्वास्यं प्रपूर्यते ॥ १४५ ॥ ततः क्षारेण दीप्तेन तैलताम्रादिभिः क्रमात् ॥
शरीरे च महाघोराश्चित्रा नरकयातनाः ॥१४६॥ ये शिवा[1]रामपुष्पाणि लोभात्संगृह्य पाणिना ॥ जिघ्रंति मूढमनसः शिरसा धारयंति च ॥१४७॥
आपूर्यंते शिरस्तेषां सुतप्तैर्लोहशंकुभिः ॥ नासिका चातिबहुशस्ततः क्षारादिभिः पुनः ॥ १४८ ॥ ये निंदंति महात्मानमाचार्यं धर्मदेशिकम् ॥
शिवभक्तांश्च ये मूढाः शिव[2]धर्मं च शाश्वतम् ॥ १४९ ॥ तेषामुरसि कंठे च जिह्वायां दंतसंधिषु ॥ तालुकोष्ठे च नासायां मूर्ध्नि सर्वांगसं-
धिषु ॥ १५० ॥ अग्निवर्णाः सुतप्ताश्च त्रिशिखा लोहशंकवः ॥ आखन्यंते सुबहुशः स्थानेष्वेतेषु मुद्गरैः ॥ १५१ ॥ ततः क्षारेण तप्तेन ताम्रेण
त्रपुणा पुनः ॥ तप्ततैलादिभिः सर्वैरापूर्यंते समंततः ॥ १५२ ॥ क्षारताम्रादिभिर्दीप्तैर्दह्यंते बहुशः पुनः ॥ नरकेषु च सर्वेषु विचित्रा देहया-
तनाः ॥ १५३ ॥ भवंति बहुशः कष्टाः पाणिपादसमुद्भवाः ॥ शि[3]वायतनपर्यंते शिवारामे च कुत्रचित् ॥ १५४ ॥ समुत्सृजंति ये पापाः पुरीषं
मूत्रमेव वा ॥ तेषां लिंगं सवृषणं चूर्ण्यंते लोहमुद्गरैः ॥ १५५ ॥ सूचीभिरग्निवर्णाभिस्ततश्चापूर्यंते पुनः ॥ लोहदण्डश्च सुमहानग्निवर्णः सकंटकः ॥
आख न्यते गुदे तेषां यावन्मूर्ध्नि विनिर्गतः ॥१५६॥ ततः क्षारेण महता ताम्रेण त्रपुणा पुनः ॥ द्रुतेनापूर्यंते गाढं गुदं शिश्नं हि देहिनाम् ॥१५७॥
मनः सर्वेन्द्रियाणां च यस्मादुक्तं प्रवर्त्तकम् ॥ तस्मादिन्द्रियदुःखेन जायते तत्सुदुःखितम् ॥१५८॥ धने सत्यपि ये दानं न प्रयच्छंति तृष्णया ॥
अतिथिं चावमन्यंते कालप्राप्तं गृहाश्रमे ॥१५९॥ ते लोहतोरणे बद्धा हस्तपादावताडिताः ॥ विदारितांगाः शुष्यंते तिष्ठंत्यब्दशतं नराः ॥१६०॥
हस्तपादललाटेषु कीलिता लोहशंकुभिः ॥ नित्यं च नीवृतं वक्रं कीलकद्वयनाडितम् ॥ १६१ ॥ कृमिभिः प्राणिभिश्चोग्रैर्लोहदंडैश्च वायसैः ॥
उपद्रवैर्बहुविधैः सर्पैर्मुखरकैस्ततः ॥ १६२ ॥ आपीडयंते जिह्वामूले निबध्य शृंखलाः पुनः ॥ तिष्ठंति लंबमानाश्च लोहभारप्रपीडिताः ॥१६३॥
स्निग्धे च वृषणे नद्धे लोहभारद्वयं पुनः ॥ तिष्ठते लंबमानं च बहुभारचतुर्गुणम् ॥ १६४ ॥ ततः स्वमांससमुत्कृत्य तिलमात्रप्रमाणतः ॥ भोजनं
दीयते तेषां सूच्यग्रेण सशोणितम् ॥ १६५ ॥ यदा निर्मांसतां प्राप्ताः कालेन महता पुनः ॥ ततः क्षारेण दीप्तेन वपुस्तेषां प्रलिप्यते ॥ १६६ ॥
सिच्यंते वर्षधाराभिः शोष्यंते वायुना पुनः ॥ सिच्यंते तप्ततैलेन प्रतप्तेन समंततः ॥ १६७ ॥ पश्चात्ते वह्निना भूयो दूरस्थेन शनैः शनैः ॥

---

१ ये देवारामपुष्पाणि–इ० पा० । २ विष्णुधर्मं च–इ० पा० । ३ देवायतनपर्यंते देवारामे च कुत्रचित्–इ० पा० । ४ भृशम्–इ० पा० । ५ निरूप्य च गुदे तेषां यावन्मूर्ध्नि विनिर्गमः–इ०पा० ।

निःशेषयातनाभिश्च पीडयंते क्रमशः पुनः ॥ १६८ ॥ भृशं बुभुक्षया पीडा मूर्च्छयातिपिपासया ॥ अत्युष्णेनातिशीतेन पापानां समरेण
च ॥ १६९ ॥ एवमादिमहाघोरा यातनाः पापकारिणः ॥ एकैके नरके चैव शतशोथ सहस्रशः ॥ १७० ॥ प्रत्येकं यातनाश्चित्राः सर्वेषु नरकेषु
च ॥ कष्टं वर्षशतेनापि सोढुं सर्वैश्च नारके ॥१७१॥ एते च विविधैर्घोरैर्यात्यमानाश्च कर्मभिः ॥ म्रियन्ते नैव पापिष्ठा विविधाः पापकारिणः[1] ॥
॥ १७२ ॥ महाघोराभिघोराख्याः कालाग्निसदृशोपमाः ॥ श्रुतैरेतैर्महारौद्रैर्म्रियन्ते मृदुचेतसः ॥ १७३ ॥ ततस्तेनात्र कथिताः पापा गच्छंति
तान्स्वयम् ॥ पुत्रमित्रकलत्रार्थं यदा पुण्यं त्वपाकृतम् ॥ १७४ ॥ एकाकी दह्यते तेन न च पश्यति तानि सः ॥ आत्मना च कृतं पापं भोक्तव्यं
ध्रुवमात्मना ॥ १७५ ॥ तत्किमन्योपघातार्थं मूढ पापं कृतं त्वया ॥ एवं दूतैरुपालब्धास्ते पृच्छंति ततः पुनः ॥ १७६ ॥ कियंतं केन पापेन
कालमत्रायते नरः ॥ देवद्रव्यविनाशेन गुरुद्रोहादिकर्मभिः ॥ पापात्सर्वेषु पच्यंते नरकेष्वामहाक्षयात् ॥ १७७ ॥ महापातकिनश्चापि सर्वेषु
नरकेष्विह ॥ आचंद्रतारकं यावत्पीडयंते विविधैर्वधैः ॥ १७८ ॥ महापातकिनश्चान्ये नरकार्णवकोटिषु ॥ चतुर्दशसु पच्यंते कलार्धं
विविधैर्वधैः ॥ १७९ ॥ उपपातकिनश्चापि तदर्थं यांति मानवाः ॥ शेषपापैस्तदर्धं तु कालं चापि तथाविधम् ॥ १८० ॥ तस्मात्पापं न कुर्वीत
चंचले जीविते सति ॥ पापेन हि ध्रुवं यांति नरकेषु नराः स्वयम् ॥ १८१ ॥ यः करोति नरः पापं तस्यात्मा ध्रुवमप्रियः ॥ पापस्येह
फलं दुःखं तद्भोक्तव्यमिहात्मना ॥ १८२ ॥ कथं ते पापनिरता नरा रात्रिषु[2] शेरते ॥ मरणांतरिता[3] येषां नारकी तीव्रयातना ॥ १८३ ॥
एवं क्लिष्टविशुद्धाश्च सावशेषेण कर्मणा ॥ ततः क्षितिं समासाद्य जायन्ते देहिनः पुनः ॥ स्थावरा विविधाकारास्तृणगुल्मादिभेदतः ॥
॥ १८४ ॥ तत्रानुभूय दुःखानि जायंते कीटयोनिषु ॥ निष्क्रांताः कीटयोनिभ्यो जायन्ते पक्षिणस्ततः ॥ १८५ ॥ संश्लिष्टाः पक्षि
भावेन भवंति मृगजादिषु ॥ मार्गं दुःखमतिक्रम्य जायंते पशुयोनिषु ॥ १८६ ॥ क्रमाद्गोयोनिमासाद्य जायन्ते मानवाः पुनः ॥ एवं योनिषु
सर्वासु परिक्रम्य क्रमेण तु ॥ कालांतरवशाद्यांति मानुष्यमतिदुर्लभम् ॥ १८७ ॥ व्युत्क्रमेणापि मानुष्यं प्राप्यते पुण्यगोचरात् ॥ विचित्रा
गतयः प्रोक्ताः कर्मणां गुरुलाघवात् ॥ १८८ ॥ मानुष्यं यः समासाद्य स्वर्गमोक्षप्रसाधकम् ॥ द्वयोर्न साधयत्येकं स मृतस्तप्यते चिरम् ॥
॥ १८९ ॥ देवासुराणां सर्वेषां मानुष्यमतिदुर्ल्लभम् ॥ तत्संप्राप्य कथाः कुर्यान्न गच्छेन्नरकं यथा ॥ १९० ॥ स्वर्गापवर्गलाभाय यदि नास्ति

---

[1] अस्मादग्रे—"तत्रान्यायतनानां च विविधाः पापकारिणः"—इति पाठ एकस्मिन्पुस्तकेऽधिकः पृथक्तयोपलभ्यते । [2] नारीषु—इ० पा० । [3] मरणं त्वरितं येषाम्—इ० पा० ।

समुद्यतः ॥ स्वर्गस्य मूलं मानुष्यं तद्यत्नादनुपालयेत् ॥ १९१ ॥ धर्ममूलेन मानुष्यं लब्ध्वा सर्वार्थसाधकम् ॥ यदि लाभे न यत्नस्ते मूलं
रक्षस्व यत्नतः ॥ १९२ ॥ मनुष्यत्वे च विप्रत्वं यः संप्राप्यातिदुर्लभम् ॥ न करोत्यात्मनः श्रेयः कोन्यस्तस्मादचेतनः ॥ १९३ ॥ सर्वेषामेव
देशानां मध्यदेशः[1] परः स्मृतः ॥ अतः स्वर्गश्च मोक्षश्च यशः संप्राप्यते नरैः ॥ १९४ ॥ एतस्मिन्भारते पुण्ये प्राप्य मानुष्यमध्रुवम् ॥ यः कुर्या
दात्मनः श्रेयस्तेनात्मा रक्षितः स्वयम् ॥ यः कुर्यान्नात्मनः श्रेयस्तेनात्मा वंचितः स्वयम् ॥ १९५ ॥ भोगभूमिः स्मृतः स्वर्गः कर्मभूमिरियं
मता ॥ इह यत्क्रियते कर्म स्वर्गे तदुपभुज्यते ॥ १९६ ॥ यावत्स्वास्थ्यं शरीरस्य तावद्धर्मं समाचर ॥ अस्वस्थश्चातियत्नेन न किंचित्कर्तुमुत्स
हेत् ॥ १९७ ॥ अध्रुवेण शरीरेण ह्यध्रुवं यः प्रसाधयेत् ॥ ध्रुवं तस्य परिभ्रष्टमध्रुवं नष्टमेव च ॥ १९८ ॥ आयुषः खंडखंडानि निपतंति तवा
ग्रतः ॥ अहोरात्रापदेशेन किमर्थं नावबुध्यसे ॥ १९९ ॥ यदा न ज्ञायते मृत्युः कदा कस्य भविष्यति ॥ आकस्मिके हि मरणे धृतिं विंदेत
कस्तदा ॥ २०० ॥ परित्यज्य यदा सर्वमेकाकी यास्यसि ध्रुवम् ॥ न ददासि तदा कस्मात्पाथेयार्थमिदं धनम् ॥ २०१ ॥ गृहीतदानपाथेया
सुखं यांति महाध्वनि ॥ अन्यथा क्लिश्यते जंतुः पाथेयरहितः पथि ॥ २०२ ॥ येषां द्विजेन्द्रवाहित्री पूर्णभांडा तु गच्छति ॥ स्वर्गदेशस्य पुर
तस्तेषां लाभः पदेपदे ॥ २०३॥ इति ज्ञात्वा नरः पुण्यं कुर्यात्पापं विवर्जयेत् ॥ पुण्येन याति देवत्वमपुण्यान्नरकं व्रजेत् ॥ २०४ ॥ ये मनागपि
देवेशं प्रपन्नाः शरणं शिवम् ॥ तेपि घोरं न पश्यंति यमस्य वदनं नराः ॥ २०५ ॥ किं तु पापैर्महाघोरैः किंचित्कालं शिवाज्ञया ॥ भवंति प्रेत
राजानस्ततो यांति शिवालयम्[3] ॥ २०६ ॥ ये पुनः सर्वभावेन प्रतिपन्ना महेश्वरम् ॥ न ते लिप्यंति पापेन पद्मपत्रमिवांभसा ॥ २०७ ॥ तस्मा
द्विवर्धयेद्भक्तिमीश्वरे सततं बुधः ॥ तन्माहात्म्यविचारेण भवदोषविरागतः ॥ २०८ ॥ पापानि पंच परमार्थतयैव पार्थ दुःखप्रदानि सुचिरं पितृ
राजलोके ॥ अन्यानि यानि चिरकालभयानकानि वक्तुं न यांति किल तानि परिस्फुटानि ॥ २०९ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि
श्रीकृष्णयुधिष्ठिरसंवादे शुभाशुभफलनिर्देशो नाम षष्ठोऽध्यायः ॥ ६ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ यदेतत्ते समाख्यातं गंभीरं नरकार्णवम् ॥
व्रतोपवासनियमप्लवेनोत्तीर्यते सुखम् ॥ १ ॥ दुर्लभं प्राप्य मानुष्यं विद्युत्पतनचञ्चलम् ॥ तथात्मानं समादध्याद्भ्रश्यते न पुनर्यथा ॥ २ ॥ दान
व्रतमयी कीर्तिर्यस्य स्यादिह देहिनः ॥ परलोकेऽपि स तया ज्ञायते[4] ज्ञातिवर्द्धनः ॥ ३ ॥ ज्ञायते नेह नामुत्र व्रतस्वाध्यायवर्जितः ॥ पुरुषः पुरु

---

१ अयं देशः–इ० पा० । २ हरिम्–इ० पा० । ३ परां गतिम्–इ० पा० । ४ जनो यज्ञविवर्जितः–इ० पा० ।

षव्याघ्र तस्माद्व्रतपरो भवेत् ॥ ४ ॥ अत्र ते कथयिष्यामि इतिहासं पुरातनम् ॥ सिद्धेन[1] सह संवादमवंत्यां ब्राह्मणस्य हि ॥ ५ ॥ योगर्द्धिसि
द्ध्या संसिद्धः कश्चित्सिद्धो महीतलम् ॥ चचार विकृतं कृत्वा वपुः परमभीषणम् ॥ ६ ॥ निगीर्णदंतो लंबोष्ठः पिंगाक्षस्तनुमूर्द्धजः ॥ त्रुटितैक
कर्णो दुर्वणः शीर्णवस्त्रो महोदरः ॥ ७ ॥ चिपिटाक्षः[2] स्फुटितपाज्जंघाढ्यः कृशकूर्परः ॥ दिशः पश्यति संहृष्टो बभ्रामोद्भ्रांतचित्तवत् ॥ ८ ॥
मूलजालिकविप्रेण दृष्टः पृष्टश्च को भवान् ॥ कदा स्वर्गात्समायातः केन कार्येण मे वद ॥ ९ ॥ कच्चिद्दृष्टा त्वया रंभा भाभासितदिगंतरा ॥
चित्तसंमोहनकरी देवानामेकसुन्दरी ॥ १० ॥ गत्वा मद्वचनाद्वाच्या निर्वाच्या दोषदर्शिभिः ॥ आवंत्यस्त्वां कुशलिनीं पृच्छति स्म द्विजो
त्तमः ॥ ११ ॥ सिद्धः प्रसिद्धं तं विप्रं प्राहेदं विस्मयान्वितः ॥ कथं त्वयाहं विज्ञातः स्वर्गादभ्यागतः स्फुटम् ॥ १२ ॥ ब्राह्मणस्त
मथोवाच विज्ञातोऽसि मया यथा ॥ तथा तेऽहं प्रवक्ष्यामि क्षीणाघौघावधारय ॥ १३ ॥ गात्रत्रयं विरूपं स्याद्द्वितीयं वा स्वरूपतः॥ दृष्ट्वा सर्वांग
वैरूप्यं विज्ञातोऽसि ततो मया ॥ १४ ॥ दुर्लंघ्या प्रकृतिः साक्षादनुभूतकरी भवेत् ॥ प्रकृतेरन्यथाभावः सर्वथा[3] लक्ष्यते जनैः ॥ १५ ॥ विप्रस्यैवं
वचः श्रुत्वा जगामादर्शनं शनैः ॥ पुनः कैश्चिदहोरात्रैराजगाम स तां पुरीम् ॥ १६ ॥ मूलजालकविप्रेण पृष्टः प्राहामरावतीम् ॥ गतोऽहं पृष्टवां
स्तत्र रंभां विभ्रमकारिणीम् ॥ १७ ॥ शक्रस्यावसरे वृत्ते व्रजन्त्याः स्वगृहं मया ॥ त्वत्संदेशः समाख्यातः सावदत्को न वेद्मि तम् ॥१८॥ विद्यया
कलया चापि पौरुषेण व्रतेन च ॥ तपसा वा पुमान्मर्त्यो दिवि विज्ञायते चिरम् ॥ १९ ॥ ब्राह्मणस्तमथोवाच मुग्धा दग्धाग्निसंभवा ॥ न भक्षया
मि शकटं व्रतेनैतेन वेत्ति माम् ॥ २० ॥ तस्यैतद्वचनं श्रुत्वा स सिद्धः सुविशुद्धधीः ॥ प्रहस्या[4]मंत्र्य तं विप्रं जगामादर्शनं पुनः ॥ २१ ॥ कदाचिच्च
रता तेन स्वर्गमार्गं यदृच्छया ॥ दृष्ट्वा रंभां द्विजप्रोक्तं सर्वमेव निवेदितम् ॥ २२ ॥ ॥ रंभोवाच ॥ ॥ को न जानामि तं विप्रं शकटव्रतचारिणम् ॥
मूलजालैर्वर्तयंतं महाकालवनाश्रयम् ॥ २३ ॥ दर्शनादथ संभाषादुपकारात्सहासनात् ॥ चतुर्धा स्नेहनिर्बंधो नृणां संजायतेऽधिकः ॥ २४ ॥ न
दर्शनं न संभाषा कदाचित्सह तेन मे ॥ नामश्रवणमात्रेण स्नेहः संदर्शितो[5] महान् ॥ २५ ॥ इत्येवमुक्त्वा रंभोरू रंभा जंभारिणोंतिकम् ॥ विस्मयो
त्फुल्लनयना जगाम गजगामिनी ॥२६॥ गत्वा निवेदयामास स्नेहव्रतविचेष्टितम् ॥ पुरतो रुद्धहृदया ब्राह्मणस्य च धीमतः ॥ २७ ॥ शक्रः प्रोवाच
चार्वंगीं गीर्वाणहृदयंगमाम् ॥ किमानयामि तं विप्रं समीपं तव सुव्रतम् ॥ २८ ॥ दिव्यमाल्यांबरधरं दिव्यस्रगनुलेपनम् ॥ विमानवरमारोप्य

---

[1] शिवेन–इ० पा० । [2] चिपिटाक्षः स्फुटितकाखंडजाकृशकटित्याः–इत्यशुद्धः पाठः कस्मिंश्चित्पुस्तके दृश्यते । [3] सर्वैर्व्यालक्ष्यते जनैः–इ० पा० । [4] संभाष्यापूज्य–इ० पा० । [5] संवर्द्धितः–इ० पा० ।

दर्शयामास तं पुनः ॥ २९ ॥ तत्रस्थः स द्विजो भोगान्भुनक्ति सह रंभया ॥ शकटव्रतमाहात्म्यमित्येतत्ते मयोदितम् ॥ ३० ॥ राज्यश्रियं जगति
सर्वजनोपभोग्यामाप्नोति शक्र[1]शिवकेशवयोर्निवासम् ॥ नाप्राप्यमस्ति भुवने सुदृढव्रतानां तस्मात्सदा व्रतपरेण नरेण भाव्यम् ॥ ३१ ॥ इति श्रीभ
विष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे शकटव्रतमाहात्म्यकथनं नाम सप्तमोऽध्यायः ॥ ७ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ ब्रह्मेश
केशवादीनां गौर्या गणपतेस्तथा ॥ दुर्गासूर्याग्निसोमानां व्रतानि मधुसूदन ॥ १ ॥ शास्त्रांतरेषु दृष्टानि तव बुद्धिगतानि च ॥ तानि सर्वाणि मे देव
वद देवकिनन्दन ॥ २ ॥ प्रतिपत्क्रमयोगेन विहिता यस्य या तिथिः ॥ देवस्य तस्यां यत्कार्यं तदशेषेण कीर्तय ॥ ३ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥
वसंते किंशुकाशोकशोभने प्रतिपत्तिथिः ॥ शुक्ला तस्यां प्रकुर्वीत स्नानं नियमतत्परः॥ ४ ॥ नारी नरो वा राजेन्द्र संतर्प्य पितृदेवताः ॥ नद्यास्तीरे
तडागे वा गृहे वा नियतात्मवान् ॥ ५ ॥ [2]पिष्टातकेन विलिखेद्वत्सरं पुरुषाकृतिम् ॥ ततश्चन्दनचूर्णेन पुष्पधूपादिनार्चयेत् ॥६॥ दीपैश्चापि सनैवेद्यैः
पूजयेद्वत्सरं तदा ॥ मासर्तुनामभिः पश्चान्नमस्कारांतयोजितैः ॥ पूजयेद्ब्राह्मणान्विद्वान्मंत्रैर्वेदोदितैः शुभैः ॥ ७ ॥ संवत्सरोऽसि परिवत्सरोसीडा
वत्सरोऽभित्सरोऽसि उषसस्ते कल्पंतामहोरात्रास्ते कल्पंतामर्धमासस्ते कल्पतां मासास्ते कल्पंतामृतवस्ते कल्पन्तां संवत्सरस्ते कल्पताम् ॥
॥ ८ ॥ एवमभ्यर्च्य वासोभिः पश्चात्तमभिवेष्टयेत् ॥ कालोद्भवैर्मूलफलैर्नैवेद्यैर्मोदकादिभिः ॥ ९ ॥ ततस्तं प्रार्थयेत्पश्चात्पुरः स्थित्वा कृतांजलिः॥
भगवंस्त्वत्प्रसादेन वर्षं शुभदमस्तु मे ॥ १० ॥ एवमुक्त्वा यथाशक्ति दद्याद्विप्राय दक्षिणाम् ॥ ललाटपट्टे तिलकं कुर्याच्चांदनपङ्कजम् ॥११॥ ततः
प्रभृत्यनुदिनं तिलकालंकृतं मुखम् ॥ धार्यं संवत्सरं यावच्छशिनेव नभस्तलम् ॥ १२ ॥ एवं नरो वा नारी वा व्रतमेतत्समाचरेत् ॥ सदैव पुरुष
व्याघ्र भोगान्भुवि भुनक्त्यसौ ॥ १३ ॥ भूताः प्रेताः पिशाचाश्च दुर्वारा वैरिणो ग्रहाः ॥ निरर्थका भवंत्येते तिलकं वीक्ष्य तत्क्षणात् ॥ १४ ॥ पूर्व
मासीन्महीपालो नाम्ना [3]शत्रुंजयो जयी ॥ चित्रलेखेति तस्याभूद्भार्या चारित्रभूषणा ॥ १५ ॥ तया व्रतमिदं चैत्रे गृहीतं द्विजसन्निधौ ॥ संवत्सरं पूज
यित्वा [4]धृत्वा हृदि जनार्दनम् ॥१६॥ असूयुः क्षेप्तुकामो वा समागच्छति यः पुरः ॥ प्रयाति प्रियकृत्तस्या दृष्ट्वा मुखमधोमुखः॥१७॥सपत्नीदर्पाप
हरा वशीकृतमहीतला ॥ भर्तुरिष्टा प्रहृष्टा च सुखमास्ते निराकुला ॥१८॥ तावत्करेणाभिभूतो भर्ता पुत्रः सवेदनः ॥ शिरोऽर्त्या नाशं प्रयातः सुहृदां
दुःखदायकः ॥१९॥ धर्मराजपुरं प्राप्तुं सर्वभूतापहारकः॥ तस्मिन्क्षणे महाराज धर्मराजस्य किंकराः ॥२०॥ तस्य द्वारमनुप्राप्ताः प्रवेष्टुं गृहमञ्जसा ॥

---

१ शिववासवयोः–इ० पा० । २ सुपिष्टकेन–इ० पा० । ३ सत्त्वजयो जयी–इ० पा० । ४ ध्यात्वा–इ० पा० ।

शत्रुंजयं समानेतुं कालमृत्युपुरःसराः ॥२१॥ पार्श्वस्थितां चित्रलेखां तिलकालंकृताननाम् ॥ दृष्ट्वा प्रनष्टसंकल्पाः परावृत्य गताः पुनः ॥२२॥ गतेषु तेषु स नृपः पुत्रेण सह भारत ॥ नीरुजो बुभुजे भोगान्पूर्वकर्मार्जिताञ्छुभान् ॥ २३ ॥ एतद्व्रतं महाभाग कीर्तितं ते महोदयम् ॥ [1]शंकरेण समाख्यातं मम पूर्वं युधिष्ठिर ॥२४॥ एतत्त्रिलोकतिलकालकभूषणं ते ख्यातं व्रतं सकलदुःखहरं परं च ॥ इत्थं समाचरति यः स सुखं विहृत्य मर्त्यः प्रयाति पदमापदि पद्मयोनेः ॥ २५ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे तिलकव्रतकथनं नामाष्टमोऽध्यायः ॥ ८ ॥ ॥छ॥

॥ श्रीकृष्ण उवाच ॥ ॥ आश्वयुच्छुक्लपक्षस्य प्रथमेऽह्नि दिनोदये ॥ अशोकं पूजयेद्वृक्षं प्ररूढशुभपल्लवम् ॥ १ ॥ विरूढैः सप्तधान्यैश्च गुणकैर्मोदकैः शुभैः ॥ फलैः कालोद्भवैर्दिव्यैर्नारिकेरैः सदाडिमैः ॥ २ ॥ पुष्पधूपादिना तद्वत्पूजयेत्तद्दिनेऽनघ ॥ अशोकं पांडवश्रेष्ठ शोकं नाप्नोति कुत्रचित् ॥ ३ ॥ [2]पितृभ्रांतृपतिश्वश्रूश्वशुराणां तथैव च ॥ अशोक शोकशमनो भव सर्वत्र नः कुले ॥ ४ ॥ इत्युच्चार्य ततो दद्यादर्घ्यं श्रद्धासमन्वितम् ॥ पताकाभिरलंकृत्य प्रच्छाद्य शुभवाससा ॥ ५ ॥ दमयन्ती यथा स्वाहा यथा वेदवती सती ॥ तथाशोकव्रतादस्माज्जायते पतिवल्लभा ॥ ६ ॥ वने व्रजंत्या सद्धर्मः सीतया संप्रदर्शितः ॥ दृष्ट्वाऽशोकं वने पार्थ पल्लवालंकृतांबरम् ॥ ७ ॥ कृत्वा समीपे भर्तारं देवरं च तिलाक्षतैः ॥ दीपालंकृतनैवेद्यधूपसूत्रफलार्च्चनैः ॥ ८ ॥ अर्चयित्वा ह्यर्थितोऽसौ रक्ताशोको युधिष्ठिर ॥ मैथिल्या प्राञ्जलिर्भूत्वा शृण्वतो राघवस्य च ॥ ९ ॥ चिरं जीवतु मे वृद्धः श्वशुरः कोशलेश्वरः ॥ भर्ता मे देवराश्चैव जीवंतु भरतादयः ॥ कौशल्यामपि जीवन्तीं पश्येयमिति मैथिली ॥ १० ॥ ययाचे तं महाभागा द्रुमं सत्योपयाचनम् ॥ प्रदक्षिणमुपावृत्य ततस्ते प्रययुः पुनः ॥ ११ ॥ एवमन्यापि या नारी पूजयेद्भुवि तं नगम् ॥ तिलतंडुलसंमिश्रैर्यवगोधूमसर्षपैः ॥ १२ ॥ क्षमाप्य वन्दयेन्मूलं पादपं रक्तपल्लवम् ॥ मन्त्रेणानेन कौंतेय प्रणम्य स्त्री पतिव्रता ॥ १३ ॥ महावृक्ष महाशाख मकरध्वजमन्दिर ॥ प्रार्थये त्वां महाभाग वनोपवनभूषण ॥ १४ ॥ एवमाभाष्य तं वृक्षं दत्त्वा विप्राय दक्षिणाम् ॥ सखीभिः सहिता साध्वी ततः स्वभवनं व्रजेत् ॥ १५ ॥ याः शोकनाशनमशोकतरुं तरुण्यः संपूजयंति कुसुमाक्षतधूपदीपैः ॥ ताः प्राप्य सौख्यमतुलं भुवि भर्तृजातं गौरीपदं प्रमुदिताः पुनराप्नुवंति ॥ १६ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे अशोकव्रतवर्णनं नाम नवमोऽध्यायः ॥ ९ ॥ ॥ छ ॥

॥ श्रीकृष्ण उवाच ॥ ॥ ज्येष्ठे मासि सिते पक्षे प्रथमेऽह्नि दिनोदये ॥ देवोद्यानभवं हृद्यं करवीरं समर्चयेत ॥१॥

---

१ अक्रूरेग–इ० पा० । २ पितृभ्रातृपतिश्वश्रूसुतानां च तथैव च–इ० पा० ।

[1]रक्ततंतुपरीधानं गन्धधूपविलेपनैः ॥ [2]विरूढैः सप्तधान्यैश्च नारंगैर्बीजपूरकैः ॥ २ ॥ गुणकै[3]र्घटकैर्दिव्यैर्नालिकेरैः सुशोभनैः ॥ अभ्युक्ष्याक्षततो
येन मंत्रेणैवं क्षमापयेत् ॥ ३ ॥ करवीर विषावास नमस्ते भानुवल्लभ ॥ मौलिमंडनसद्रत्न नमस्ते केशवेशयोः ॥ ४ ॥ आकृष्णेन रजसा वर्त
मानो निवेशयन्नमृतं मर्त्यं च ॥ हिरण्ययेन सविता रथेनादेवो याति भुवनानि पश्यन् ॥ ५ ॥ एवं भक्त्या समभ्यर्च्य दत्त्वा विप्राय दक्षिणाम् ॥
प्रदक्षिणामथो कृत्वा ततः स्वभवनं व्रजेत् ॥ ६ ॥ एतद्व्रतं मह[4]भाग सूर्याराधनकाम्यया ॥ अनसूयया च क्षमया सावित्र्या सत्यभामया ॥ ७ ॥
दमयन्त्या सरस्वत्या गायत्र्या गंगया तथा ॥ अन्याभिरपि नारीभिर्मर्त्यलोकेऽप्यनुष्ठितम् ॥ करवीरव्रतं पार्थ सर्वसौख्यफलप्रदम् ॥ ८ ॥
संपूज्य रत्नकुसुमांचितसर्वशाखं नीलैर्दलैस्तत्ततनुं करवीरवृक्षम् ॥ भुक्त्वा मनोऽभिलषितान्भुवि भव्यभोगानंते प्रयाति भवनं भरताग्र्य भानोः॥
॥ ९ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे करवीरव्रतवर्णनं नाम दशमोऽध्यायः ॥ १० ॥ ॥ छ ॥ ॥
॥ ॥ युधिष्ठिर उवाच ॥ ॥ स्वभर्त्रा सह संबद्धमहास्नेहो यथा भवेत् ॥ कुलस्त्रीणां तदाचक्ष्व व्रतं मम सुरोत्तम ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥
यमुनायास्तटे पूर्वं मथुरास्ते पुरी शुभा ॥ तस्यां शत्रुघ्ननाम्नाभूद्राजा रामप्रतिष्ठितः ॥ २ ॥ तस्य भार्या कीर्तिमाला नाम्नासीत्प्रथिता भुवि ॥
तया प्रणम्य भगवान्वशिष्ठो मुनिपुंगवः ॥ ३ ॥ पृष्टः सुखं मुनिश्रेष्ठ कथं समुपजायते ॥ ब्रूहि मे तिलसम्बन्धकारणं व्रतमुत्तमम् ॥ ४ ॥ एवमुक्त
स्तया ज्ञानी वशिष्ठः कीर्तिमालया ॥ ध्यात्वा मुहूर्तमाचख्यौ कोकिलाव्रतमुत्तमम् ॥ ५ ॥ ॥ श्रीवशिष्ठ उवाच ॥ ॥ आषाढपूर्णिमायां
तु संध्याकाले ह्युपस्थिते ॥ संकल्पयेन्मासमेकं श्रावणे श्वःप्रभृत्यहम् ॥ ६ ॥ स्नानंःकरिष्ये नियता ब्रह्मचर्यस्थिता सती ॥ भोक्ष्यामि नक्तं
भूशय्यां करिष्ये प्राणिनां दयाम् ॥ ७ ॥ इति संकल्प्य पुरुषो नारी वा ब्राह्मणांतिके ॥ प्राप्यानुज्ञां ततः प्रातः सर्वसामग्रिसंयुतः ॥ ८ ॥ पुरुषः
प्रतिपत्कालाद्दन्तधावनपूर्वकम् ॥ नद्यां गत्वा तथा वाप्यां तडागे गिरिनिर्झरे ॥ ९ ॥ स्नानं कुर्याद्व्रती पार्थ सुगन्धामलकैस्तिलैः ॥ दिनाष्टकं
तथा पश्चात्सर्वौषध्या पुनः पृथक् ॥ १० ॥ वचयाष्टौ पुनः पिष्ट्वा शिरोरुहविमर्दनम् ॥ स्नात्वा ध्यात्वा रविं चैव ःवंदित्वा च पितॄनथ ॥ ११ ॥
[5]तर्पयित्वा तिलापिष्टैः कोकिलां पक्षिरूपिणीम् ॥ कलकण्ठीं शुभैः पुष्पैः पूजयेच्चंपकोद्भवैः ॥ १२ ॥ पत्रैर्वा धूपनैवेद्यदीपालक्तकचंदनैः ॥ तिल
तन्दुलदूर्वाग्रैः पूजयित्वा क्षमापयेत् ॥ नित्यं तिलव्रती भक्त्या मंत्रेणानेन पांडव ॥ १३ ॥ तिलसहे तिलसौख्ये तिलवर्णे तिलप्रिये ॥ सौभाग्यं

---

१ रक्तवस्त्रपरीधानम्–इ० पा० । २ विकृतैः–इ० पा० । ३ वटकैः–इ० पा० । ४ पुरा पार्थ–इ० पा० । ५ तर्पयित्वा लिखेदष्टौ कोकिलाः पक्षिरूपिणीः ॥ कलकंठीः–इ० पा० ।

द्रव्यपुत्रांश्च देहि मे कोकिले नमः ॥ १४ ॥ इत्युच्चार्य ततः पश्चाद्गृहमभ्येत्य संयतः ॥ कृत्वाहारं स्वपेत्पार्थ यावन्मासः समाप्नुते ॥१५॥ मासांते
ताम्रपात्र्यां तु कोकिलां तिलपिष्टजाम् ॥ रत्ननेत्रां स्वर्णपक्षां ब्राह्मणाय निवेदयेत् ॥ १६ ॥ वस्त्रैर्द्धनैर्गुडैर्युक्तां श्रावण्यां कुंडलेऽथ वा ॥ श्वश्रूश्च
गुरुवर्गे वा दैवज्ञे वा पुरोहिते ॥ व्यासे वा संप्रदातव्या व्रतिभिः शुभकाम्यया ॥१७॥ एवं या कुरुते नारी कोकिलाव्रतमादरात् ॥ सप्त जन्मानि
सौभाग्यं सा प्राप्नोति सुविस्तरम् ॥ १८ ॥ निःसापत्न्यं पतिं भव्यं सस्नेहं प्राप्य भूतले ॥ मृता गौरीपुरं याति विमानेनार्कवर्चसा ॥ १९ ॥
एतद्व्रतं वशिष्ठेन मुनिना कथितं पुरा ॥ तथा चानुष्ठितं पार्थ समस्तं कीर्तिमालया ॥ २० ॥ तस्याश्च सर्वं संपन्नं वशिष्ठवचनादिह ॥ पुत्रसौ
भाग्यसंमानं शत्रुघ्नस्य प्रसादजम् ॥ २१ ॥ एवं यान्यापि कौंतेय कोकिलाव्रतमादरात् ॥ करिष्यति ध्रुवं तस्याः सौभाग्यं च भविष्यति ॥२२ ॥
ये कोकिलां कलरवां कलकंठपीठां यच्छंति साज्यतिलपिष्टमयीं द्विजेभ्यः ॥ ते नंदनादिषु वनेषु विहृत्य कामं मर्त्यें समेत्य मधुरध्वनयो
भवंति ॥ २३ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे कोकिलाव्रतं नामैकादशोऽध्यायः ॥ ११ ॥ ॥ छ ॥
॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अथ पापापहं वक्ष्ये बृहद्व्रतमनुत्तमम् ॥ सुरासुरमुनीनां च दुर्लभं विधिना शृणु ॥१॥ पर्वण्याश्वयुजस्यांते पायसं घृत
संयुतम् ॥ नक्तं भुञ्जीत शुद्धात्मा ओदनं वैक्षवान्वितम् ॥ २ ॥ आचम्याथ शुचिर्भूत्वा बिल्वजं दंतधावनम् ॥ भक्षयित्वा महादेवं प्रणम्येदमुदीर
येत् ॥ ३ ॥ अहं देवव्रतमिदं कर्तुमिच्छामि शाश्वतम् ॥ तवाज्ञया महादेव यथा निर्वहते कुरु ॥४॥ इत्येवं नियमं कृत्वा यावद्वर्षाणि षोडश ॥
तिथयः प्रतिपत्पूर्वा भजिष्यामीत्यनुक्रमात् ॥ ५ ॥ ततो मार्गशिरे मासि प्रतिपद्यपरेऽहनि ॥ पृष्ट्वा गुरुं चोपवासं महादेवं स्मरन्मुहुः ॥ ६ ॥
स्नात्वा देवं समभ्यर्च्य रात्रौ प्रज्वाल्य दीपकान् ॥ यमुनां च महादेवं नत्वा पश्चान्निमंत्रयेत् ॥ ७ ॥ महादेवरतान्विप्रान्सपत्नीकान्यतव्रतान् ॥
षोडशाष्टौ तदर्धं वा एकं वा शक्त्यपेक्षया ॥ ८ ॥ आमंत्र्य स्वगृहं गत्वा महादेवं स्मरन्क्षितौ ॥ शुचिवस्त्रास्तृतायां तु निराहारो निशि
स्वपेत् ॥ ९ ॥ भास्करोदयमासाद्य स्नात्वा चादाय दीपकान् ॥ नैवेद्यं स्नपनं पुष्पं धूपं गच्छेच्छिवालये ॥१०॥ अभ्यंगयित्वा देवेशं कषायैश्च
विरूक्षयेत् ॥ स्नपयेत्पञ्चगव्येन पयसा तदनंतरम् ॥ ११ ॥ घृतेन मधुना दध्ना रसेन पयसा पुनः ॥ तिलांबुना ततः स्नाप्य स्नापयेदुष्णवा
रिणा ॥ १२ ॥ लेपयेत्सुघनं पश्चात्कर्पूरागरुचंदनैः ॥ पुष्पैः संपूज्य दातव्यं हैमं शिरसि पंकजम् ॥ १३ ॥ वस्त्रयुग्मं पताकां च पञ्चवर्णं विता
नकम् ॥ धूपं दीपं च घंटाश्च दद्याद्देवस्य शक्तितः ॥१४॥ पश्चान्निवेद्य नैवेद्यं स्तुत्वा स्वभवनं व्रजेत् ॥ सुसमिद्धं ततः कृत्वा पूजयेज्जातवेदसम् ॥१५॥

व्रतिनश्च तथाचार्य्यं भोजयेन्मिथुनानि च ॥ हेमवस्त्रादिदानेन यथाशक्ति क्षमापयेत् ॥ १६ ॥ एवं विसृज्य तान्सर्वान्सार्द्धं बंधुजनैः
स्वयम् ॥ आशयित्वा पञ्चगव्यं हृष्टो भुञ्जीत वाग्यतः ॥ १७ ॥ एवमेव विधिं कृत्वा प्रारभेताधनो धनी ॥ वित्तसामर्थ्यतश्चैव प्रतिमासं च
कृत्स्नशः ॥ १८ ॥ वित्तहीनो यथा कश्चिच्छ्रद्धया च पुनःपुनः ॥ पुष्पार्चनविधानेन सर्वमेतत्समाचरेत् ॥ १९ ॥ प्रतिमासमुपोष्यैवं प्रति
पत्कार्त्तिकावधौ ॥ पारयेत्तं हुतं पार्थ प्रारंभविधिना स्फुटम् ॥ २० ॥ द्वितीये द्वे पञ्चदश्यां कृत्वा नक्तं नराधिपः ॥ प्रतिपत्सद्वितीया चेत्त
स्यामुपवसेत्सुधीः ॥ २१ ॥ द्वितीयोपवसेच्छुक्ला ततः प्रभृति वत्सरम् ॥ प्रारंभविधिना चैवं द्वितीयामपि पारयेत् ॥ २२ ॥ उपवासद्वयं
कृत्वा तृतीयां प्रारभेत्ततः ॥ अनेन क्रमयोगेन यावद्वर्षं समाप्यते ॥ २३ ॥ कृत्वैवं षोडशे वर्षे पूर्णमास्यां समुद्यतः ॥ पूर्ववद्देवमभ्यर्च्य
कृशानुं वाभितर्प्य च ॥ २४ ॥ हेमश्रृंगीं रौप्यखुरां सघंटां कांस्यदोहनाम् ॥ महादेवाय गां दद्याद्दीक्षिताय द्विजाय वै ॥ २५ ॥ शिवभक्ति
रतान्विप्रान्विशुद्धांश्चैव षोडश ॥ वस्त्राभरणदानैश्च शक्त्या संपूजयेद्व्रती ॥ २६ ॥ ब्राह्मणांश्च यथाशक्त्या भोजयेदपरानपि ॥ अन्येषां च क्षु
धार्तानां दद्याद्दानं यथेच्छया ॥ २७ ॥ बृहत्तपोव्रतं चैव ब्रह्मघ्नाद्यघशोषणम् ॥ भूर्भुवादिषु लोकेषु भूरिभोगप्रदं नृणाम् ॥ २८ ॥ चतुर्णा
मपि वर्णानां स्वर्गसोपानवत्स्थितम ॥ न कुर्याद्यो धनं प्राप्य स मुष्टो नष्टचेतनः ॥ २९ ॥ धन्यमायुःप्रदं पुण्यं रूपसौभाग्यवर्द्धनम् ॥ स्त्रीपुंस
योश्च निर्दिष्टं व्रतमेतत्पुरातनम् ॥ ३० ॥ विधवयापि कर्तव्यं भूयोऽवैधव्यहेतवे ॥ सधवयापि कर्तव्यमवियोगाय सद्व्रतम् ॥ ३१ ॥
उपोष्य प्रतिमासं तु भुंजीत ब्राह्मणैः सह ॥ एकद्वित्रिचतुर्भिर्वा स्वशक्त्या पांडुनंदन ॥ ३२ ॥ अंते चांते सुवर्णानां प्रारंभविधिनाचरेत् ॥
पुण्यसंभारमन्विच्छन्गमयित्वा शिवालयम् ॥ ३३ ॥ व्रतविघ्ने महाराज जाते दैवात्कथंचन ॥ तावत्यस्तिथयश्चान्याः समुपोष्याः समाप्तये ॥
॥ ३४ ॥ अथ शीघ्रतरं कश्चिद्व्रतं कर्तुं समुद्यतः ॥ विधिनानेन राजेन्द्र तेन ग्राह्यं तिथिद्वयम् ॥ ३५ ॥ अंते चांते च वर्षाणां प्रारंभविधिनाच
रेत् ॥ अथारब्धे व्रते कश्चिदसमाप्ते म्रियेत चेत् ॥ ३६ ॥ सोऽपि तत्फलमाप्नोति सत्यारंभप्रभावतः ॥ वाचकाः श्रावकाश्चैव व्रतस्यास्य युधि
ष्ठिर॥भवंति पुत्रसंश्लिष्टाः शिवध्यानानुभावतः ॥३७॥ पुण्यं बृहत्तप इदं व्रतमादराद्ये कुर्वंति षोडशसमा निरताः स्वधर्मे ॥ ते भानुमंडलमभेद्यम
चिंत्यमाद्यं भित्त्वा प्रयान्ति शशिशेखरपादमूलम् ॥ ३८ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे बृहत्तपोव्रतवर्णनं
नाम द्वादशोऽध्यायः ॥ १२ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ जातिस्मरत्वं देवेश दुष्प्राप्यमिति मे मतिः ॥ तदहं ज्ञातुमिच्छामि प्राप्यते केन

कर्मणा ॥ १ ॥ वरप्रदानाद्देवानामृषीणां सेवनेन वा ॥ तीर्थस्नानेन वा देव तपोहोमव्रतेन वा ॥ २ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ चत्वारि राजन्भद्राणि समुपोष्याणि यत्नतः ॥ तत्प्रभावाद्भवेन्नूनं राजज्ञातिस्मरो नरः ॥ ३ ॥ शुभोदयः पुरा वैश्यो बभूव यमुनातटे ॥ तेन व्रतमिदं चीर्णंमृतः कालक्रमादसौ ॥ ४ ॥ संजयस्य सुतो जातः स्वर्णष्ठीवीति विश्रुतः ॥ व्रतप्रभावाज्जातिज्ञः स च चौरैर्निपातितः ॥ ५ ॥ नारदस्य प्रभावेण पुनरुज्जीव्यतेऽप्यसौ ॥ सस्मार पूर्ववृत्तांतं सकलं व्रतधर्मतः ॥६॥ ॥ युधिष्ठिर उवाच ॥ ॥ संजयस्य कथं पुत्रः स्वर्णष्ठीवीति वा कथम् ॥ दस्युभिश्च कथं नीतो मृत्युं वै जीवितः कथम् ॥ ७ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ संजयो नाम राजासीत्कुशावत्यां नराधिप ॥ देवर्षी तस्य मित्रे च सदा नारदपर्वतौ ॥ ८॥ एकदा संजयगृहं संप्राप्तौ तौ यदृच्छया ॥ स्वगतासनदानाद्यैरुपचारैरपूजयत् ॥ ९ ॥ तेषामथोपविष्टानां पूर्ववृत्तांतभाषिणौ ॥ संजयस्य सुता प्राप्ता तरुणी पितुरंतिकम् ॥ १० ॥ पर्वतः प्राह राजानं कन्येयं वरवर्णिनी ॥ गुप्तगुल्फा संहतोरूः पीनश्रोणिपयोधरा ॥ ११ ॥ पद्मपत्रेक्षणनखा पद्मकिंजल्कसप्रभा ॥ आकुञ्चितमृदुस्निग्धैः केशैरविततैर्घनैः ॥ १२ ॥ सविलासा गजगतिः सुनासा कोकिलस्वरा ॥ अहो रूपमहो धैर्यमहो लावण्यमुत्तमम् ॥१३॥ तिलपुष्पस्फुटा नासा रूपं संपरिलक्ष्यते ॥ कस्येयं भद्रिका भद्रा ममातिहृदयंगमा ॥ १४ ॥ एवं ब्रुवाणं तं विप्रं विस्मयोत्फुल्ललोचनम् ॥ स राजा प्राह कन्येयं दुहिता मम पर्वत ॥ १५ ॥ अथोवाच नृपं धीमान्नारदः क्षुभितेन्द्रियः ॥ राजन्निवेष्टुकामोऽहं कन्येयं मम दीयताम् ॥ १६ ईप्सितं तव दास्यामि वरं मर्त्येषु दुर्लभम् ॥ एवमुक्तो नारदेन प्रीतात्मा संजयस्तथा ॥ १७ ॥ कृताञ्जलिरुवाचेदं प्रहर्षोत्फुल्ललोचनः ॥ पुत्रो मे दीयतां क्षिप्रमक्षीणकनकाकरः ॥ १८ ॥ यस्य मूत्रं पुरीषं वा श्लेष्माणं क्षिपति क्षितौ ॥ जातरूपं हि तत्सर्वं सुवर्णं भवतु स्थिरम् ॥ १९ ॥ एवमस्त्विति तं राजन्नारदः प्रत्यभाषत ॥ सुवर्णष्ठीविनं[1] पुत्रं ददामि तव सुव्रत ॥ २० ॥ एवमुक्त्वा स तां कन्यां सालङ्कारां सुमध्यमाम् ॥ विवाहयामास तया नारदो हृष्टमानसः ॥२१ ॥ तत्तस्य चेष्टितं दृष्ट्वा पर्वतः क्रोधमूर्छितः ॥ उवाच नारदं रोषादीप्ताक्षः स्फुरिताधरः ॥ २२ ॥ मयेयं प्रार्थिता पूर्वं त्वया यस्माद्विवाहिता ॥ तस्मान्मया समं स्वर्गं न गंतासि कथंचन ॥ २३ ॥ दत्तस्त्वयास्य यः पुत्रो वरदानेन नारद ॥ सोऽपि चौरैरभिहतः पञ्चत्वमुपयास्यति ॥ २४ ॥ एवमुक्तः पर्वतेन नारदः प्राह दुर्म्मनाः ॥ न त्वं धर्मं विजानासि किञ्चिन्मूढोऽसि दुर्मते ॥ २५ ॥ सामान्यं सर्वभूतानां कन्या भवति सुव्रत ॥ न तस्या वरणे दुःखं पश्यंतीह बहुश्रुताः ॥ २६ ॥ न सेवितास्त्वया

---

[1] दोषम्–इ० पा०।

वृद्धास्तेन मां शपसे रुषा ॥ पणिग्रहणमंत्राणां निष्ठा स्यात्सप्तमे पदे ॥ २७ ॥ यस्मादेतदविज्ञाय शपसे मामनागसम् ॥ तस्मात्त्वमप्यहो स्वर्गं
न गंतासि मया विना ॥ २८ ॥ संजयस्य सुतः शापाद्यदि पञ्चत्वमेष्यति ॥ आनयिष्ये तथाप्येनं यमलोकान्न संशयः ॥२९॥ एवं शप्त्वा तदाऽ
न्योन्यं देवर्षी तावुभौ पुनः ॥ पूजितौ संजयेनाथ जग्मतुः स्वाश्रमं प्रति ॥ ३० ॥ अथास्य सप्तमे मासि जातः पुत्रो नृपस्य सः ॥ स्वर्णष्ठीवीत्ति
नामास्य यथार्थमकरोत्पिता ॥ ३१ ॥ जातिस्मरः स्मरवपुः सुवर्णोत्पत्तिकारणम् ॥ सर्वभूतरुतज्ञोऽभूद्भद्रव्रतफलादिह ॥ ३२ ॥ मूत्रश्लेष्मपुरी
षादि यत्किञ्चित्क्षिपति क्षितौ ॥ जायते कनकं सर्वं प्रसादान्नारदस्य च ॥३३॥ तेनासौ यजते राजा विधिवद्भूरिदक्षिणैः ॥ राजसूयादिभिर्यज्ञैर्वि
विधैर्ब्राह्मणैर्वृतः ॥३४॥ बभार भृत्याननिशं पुपोष स्वजनातिथीन् ॥ चकार देवतागारं सरश्चारामवाटिकाः ॥३५॥ जातस्नेहं तथा पुत्रं ररक्ष रक्षि
भिर्वृतः ॥ राशयः कनकस्यास्य बभूवुर्नृपतेः सुतात्॥३६॥ अथास्य दस्यवः केचिच्छ्रुत्वा तं कनकाकरम्॥धनलोलुपया जघ्नुर्दाक्षिणात्या मदोद्ध
ताः॥३७॥तस्मिन्विनष्टे तन्नष्टं वरदानसमुद्भवम् ॥ कनकं तदपश्यंतो जग्मुरन्योन्यतः क्षयम् ॥३८॥ पातितं दस्युभिः पुत्रं दृष्ट्वा राजा सुदुःखितः॥
विललापाकुलमतिः स मुमोह पपात च ॥३९॥ विलपंतं तु तं दृष्ट्वा नारदः प्राह संजयम् ॥ राजन्विषादं मा कार्षीः शृण्विमां भारतीं मम ॥४०॥
इत्युक्त्वा स समाचख्यौ चरितानि महौजसाम् ॥ विशिष्टानां नरेन्द्राणां यतीनां दक्षिणावताम् ॥ ४१ ॥ श्रुत्वा राजा नरेंद्राणां चरितानि महा
त्मनाम् ॥ विनष्टशोकः सहसा प्रकृतिस्थो बभूव सः ॥४२॥ नारदोऽपि नरेंद्रस्य मृतं पुत्रं यमालयात् ॥ आनयामास तरसा तथारूपं यथा हतम्
॥ ४३ ॥ दृष्ट्वा स्पृष्ट्वा स पुत्रं तं परितुष्टेन चेतसा ॥ व्रीडितो विस्मितश्चैव कृताञ्जलिरथाब्रवीत् ॥ ४४ ॥ किमाश्चर्यं प्रसन्नेन भवता मम नारद ॥
दत्तः पुत्रस्तथाभूतो दस्युभिर्घातितो यथा ॥ ४५ ॥ षण्मासांते पुनरसौ जीवितं सर्वमेव तत् ॥ सस्मार पूर्वं वृत्तांतं भद्राणां पारणात्किल ॥ ४६ ॥
एतत्ते सर्वमाख्यातं जातिस्मरणकारकम् ॥ व्रतं व्रताधिकं श्रेष्ठं किमन्यत्कथयामि ते ॥४७॥ ॥ श्रीकृष्ण उवाच ॥ ॥ ब्राह्मणाश्चैव शूद्राश्च कुले
महति जन्म च ॥ दाता क्षमी धनी वाग्मी रूपी स्वैर्भद्रकैर्भवेत् ॥४८॥ चत्वारि राजन्भद्राणि चतुष्पादानि तानि वै ॥ तान्येव बहुविघ्नानि दुष्प्रा
प्यान्यकृतात्मभिः ॥ ४९ ॥ मार्गशीषे तु प्रथमं द्वितीयं फाल्गुने तथा ॥ ज्येष्ठे तृतीयं राजेन्द्र ख्यातं भाद्रपदेपरम् ॥ ५० ॥ फाल्गुनामलपक्षादौ
त्रीन्मासांस्तु नराधिप ॥ तत्त्रिपुष्पमिति ख्यातं तपस्याकरणं परम् ॥ ५१ ॥ ज्येष्ठस्य शुक्लपक्षादौ त्रीन्वै मासान्युधिष्ठिर ॥ तत्त्रिराममिति ख्यातं
सत्यशौर्यप्रदायकम् ॥ ५२ ॥ शुक्ले भाद्रपदस्यादौ त्रीन्मासान्पांडुनंदन ॥ तत्त्रिरंगमिति ख्यातं बहुविद्याप्रदायकम् ॥ ५३ ॥ शुक्लमार्गशिरस्यादौ

त्रीन्मासांस्तु नराधिप ॥ तद्विष्णुपदमित्युक्तं सर्वधर्मप्रदायकम् ॥ ५४ ॥ समासेनैव चोक्तानि भद्राण्येतानि भारत ॥ कर्तव्यानि नरैः स्त्रीभिर्ब्रा
ह्मणानुमतेन वा ॥ ५५ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ विस्तरेणैव मे ब्रूहि देवदेव जगत्पते ॥ भद्राणां नियमाधानं प्रधाननियमांस्तथा ॥ ५६ ॥
॥ ॥ श्रीभगवानुवाच ॥ ॥ शृणु राजन्नवहितो भद्राणां विस्तरं परम् ॥ कथयिष्ये न कथितं कस्यचिद्यन्मया पुरा ॥५७॥ शुक्ले मार्गशिरस्यादौ
चत्वारस्तिथयो वराः ॥ द्वितीया च तृतीया च चतुर्थी पञ्चमी तथा ॥ ५८ ॥ एकभुक्तासनस्तिष्ठेत्प्रतिपद्यां जितेन्द्रियः ॥ प्रभाते तु द्वितीयायां
कृत्वा यत्करणीयकम् ॥ ५९ ॥ प्रहरत्रये समधिके गते स्नानं समाचरेत् ॥ मृद्गोमयं च संगृह्य मंत्रैरेभिर्विचक्षणः ॥ ६० ॥ अहं ते तु प्रदिश्यामि
मंत्राणां विधिमुत्तमम् ॥ येषां देयो न देयो वा तान्छृणुष्व वदामि ते ॥ ६१ ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा ये शुचयोऽमलाः ॥ तेषां मंत्राः
प्रदेया वै न तु संकीर्णधर्मिणाम् ॥ ६२ ॥ या स्त्री भर्त्रा वियुक्तापि स्वाचारैः संयुता शुभा ॥ सा च मन्त्रान्प्रगृह्णातु सभर्त्री तदनुज्ञया ॥६३॥
स्नानं नद्यां तडागे वा वाप्यां कूपे गृहेपि वा ॥ दशोत्तरं फलं ज्ञेयमधिकं हि समन्त्रकम् ॥ ६४ ॥ मृदं मंत्रेण संगृह्य सर्वांगेषु प्रलेपयेत् ॥ त्वं
मृत्स्ने वंदिता देवैः समलैर्दैत्यघातिभिः ॥ ६५ ॥ मयापि वंदिता भक्त्या मामतो विमलं कुरु ॥ ६६ ॥ इति मृन्मंत्रः ॥ एवं जपन्मृदं दत्त्वा
स्वहस्ताग्रे समंत्रकम् ॥ जलावगाहनं कुर्यात्कुण्डमालिख्य धर्मवित् ॥ सिद्धार्थकैः कृष्णतिलैर्वचासर्वौषधीः क्रमात् ॥ ६७ ॥ त्वमादिः सर्वदे
वानां जगतां च जगन्मये ॥ भूतानां वीरुधां चैव रसानां पतये नमः ॥ ६८ ॥ गंगासागरजं तोयं पौष्करं नार्मदं तथा ॥ यामुनं सांनिहत्यं च
संनिधानमिहास्तु मे ॥ ६९ ॥ इति स्नानमंत्रः ॥ शरीरालंभनं पूर्वं कृत्वा मृद्गोमयांबुभिः॥एवं स्नात्वा समाप्लुत्य आचम्य तटमास्थितः ॥७०॥
निवस्य वाससी शुभ्रे शुचिः प्रयतमानसः ॥ देवान्पितॄन्मनुष्यांश्च तर्पयेत्सुसमाधिना ॥ ७१ ॥ एवं गृहीतनियमो गृहं गच्छेच्छुचिव्रतः ॥ उप
विश्य न संजल्पेद्यावच्चन्द्रस्य दर्शनम् ॥ ७२ ॥ स्नात्वा चैव ततो नाम तृतीयादिचतुर्दिने ॥ नमः कृष्णाच्युतानंत हृषीकेशेति च क्रमात् ॥
॥ ७३ ॥ चतुर्दिने द्वितीयादौ देवमभ्यर्चयेऽच्युतम् ॥ प्रथमेह्नि स्मृता पूजा पादयोश्चक्रपाणिनः ॥ ७४ ॥ नाभिपूजा द्वितीयेह्नि कर्तव्या
विधिवन्नरैः ॥ मुरद्विषस्तृतीयेह्नि पूजां वक्षसि विन्यसेत् ॥ ७५ ॥ चतुर्थेह्नि जगद्धातुः पूजां शिरसि कल्पयेत् ॥ पुष्पैर्विलेपनैर्धूपैरर्घ्यं दद्युर्वि
भूषणैः ॥ ७६ ॥ घीवरैर्हरिनैवेद्यैर्दीपदानैश्च भक्तितः ॥ पूजयित्वा विधानेन विष्णुं विश्वेश्वरं व्रती ॥ ७७ ॥ ततो दिनावसाने तु मुहूर्ते निर्गते
सति ॥ अर्घ्यं प्रदद्यात्सोमाय भक्त्यातद्भावभावितः ॥ ७८ ॥ शशिचन्द्रशशांकेन्दुनामानि क्रमशो नरः ॥ तृतीयादिषु चन्द्रस्य संकीर्त्यार्घ्यं

निवेदयेत् ॥ ७९ ॥ स चार्घ्यो यादृशो देय ऋद्धिमद्भिरथेतरैः ॥ तत्ते सम्यक्प्रवक्ष्यामि युधिष्ठिर निबोध मे ॥ ८० ॥ चन्दनागुरुकर्पूरदधिदूर्वाक्षतादिभिः ॥ रत्नैः समुद्रजैश्चान्यैर्वज्रवैडूर्यमौक्तिकैः ॥ ८१ ॥ पुष्पैः फलैः स्वकालोत्थैः खर्जूरैर्नालिकेरकैः ॥ वस्त्राच्छादनगोवाजिभूमिहेमगजान्वितैः ॥ ८२ ॥ सत्त्वयुक्तस्य ऋद्धस्य राजन्नेष विधिः स्मृतः ॥ इतरस्य यथाशक्ति फलपुष्पाक्षतोदकैः ॥ ८३ ॥ लवणं गुडं घृतं तैलं पयःकुंभास्तिलैः सह ॥ अर्घेष्वेतानि शस्तानि शशिवृद्ध्या विवर्द्धयेत् ॥ ८४ ॥ प्रत्यहं वर्द्धयेदर्घ्यं शशिवृद्ध्या नरोत्तम ॥ एवमर्घः प्रतादव्यः शृणु मंत्रविधिक्रमम् ॥ ८५ ॥ नवोनवोसि मासांते जायमानः पुनःपुनः ॥ त्रिरग्निसमवेतो वै देवानाप्यायसे हविः ॥ ८६ ॥ गगनाङ्गणसद्दीप दुग्धाब्धिमथनोद्भव ॥ भाभासितदिगाभोग रमानुज नमोऽस्तु ते ॥ ८७ ॥ दत्त्वार्घ्यं द्विजराजाय तद्विप्राय निवेदयेत् ॥ निर्वर्त्यार्घ्यक्रममिमं ततो भुंजीत वाग्यतः ॥ ८८ ॥ भूमिं तु भाजनं कृत्वा पद्मपत्रसमास्तृताम् ॥ पालाशैर्मधुपत्रैर्वा सुरूपैर्वा शिलातले ॥ ८९ ॥ समालभ्य धरां देवीं मंत्रेणानेन मंत्रवित् ॥ त्वत्तले भोक्तुकामोऽहं देवि सर्वरसोद्भवे ॥ ९० ॥ मदनुग्रहाय सुस्वादं कुर्वन्नममृतोपमम् ॥ एवं जप्त्वा च भुक्त्वा च शाकं पाकं गुणोत्तरम् ॥ ९१ ॥ आचम्य खान्युपालभ्य स्मृत्वा सोमं स्वपेद्भुवि ॥ भोक्तव्यं तु द्वितीयायामक्षारलवणं हविः ॥ ९२ ॥ मुन्यन्नं तु तृतीयायां चतुर्थ्यां गोरसोत्तरम् ॥ घृताक्ताः सगुणाः शस्ताः पञ्चम्यां कृशरास्सदा ९३ ॥ शस्ता भद्रेषु सर्वेषु सदा श्यामाकतण्डुलाः ॥ प्रसाधिका घृतं गव्यं वन्यं फलमयाचितम् ॥ ९४ ॥ प्रातः स्नानं ततः कृत्वा संतर्प्य पितृदेवताः॥भोजयेद्ब्राह्मणान्भक्त्या दत्तदानान्विसर्जयेत ॥९५॥ भृत्यबन्धुजनैः सार्द्धं पश्चाद्भुञ्जीत कामतः ॥ एवं भद्रेषु सर्वेषु त्रिमासेषु[2] गतेषु यः ॥९६॥ करोत्येतन्नरो भक्त्या वर्षमेकममत्सरी ॥ तस्य श्रीर्विजयश्चैव नित्यं सोमः प्रसीदति ॥९७॥ एतत्करोति या कन्या शुभं प्राप्नोति सा पतिम् ॥ दुर्भगा सुभगा साध्वी भवत्यविधवा सदा ॥ ९८ ॥ राज्यार्थी लभते राज्यं धनार्थी लभते धनम् ॥ पुत्रार्थी[3] लभते पुत्रानिति प्राह प्रभाकरः ॥ ९९ ॥ योषित्कुलाकुलविवाहमनोरमाणि शय्यान्नयानशयनासनशोभितानि ॥ भद्राण्यवाप्य धनपुत्रकलत्रजानि जातिस्मरो भवति भारत भद्रकर्ता ॥ १०० ॥ इति श्री भविष्ये महापुराण उत्तर पर्वणि श्रीकृष्णयुधिष्ठिरसंवादे भद्रोपवासव्रतनिरूपणं नाम त्रयोदशोऽध्यायः ॥ १३ ॥ छ ॥ इति प्रतिपत्कल्पः समाप्तः ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ संत्यन्यास्तिथयः पार्थ द्वितीयाद्याः परिश्रुताः ॥ मासैश्चतु

---

१ भोज्याः—इ० पा० । २ प्रकाशेषु—इ० पा० । ३ अपुत्रः—इ० पा० ।

भिश्चत्वारः प्रावृट्छुक्ताः क्लमापहाः ॥ १ ॥ गोपिताश्च सदा लोके न प्रोक्ताश्च मया क्वचित् ॥ प्रकाशयामि ताः पार्थ शृणु सर्वा मया हिताः
॥ २ ॥ एका तु श्रावणे मासि अन्या भाद्रपदे तथा ॥ अपराश्वयुजे मासि चतुर्थी कीर्तिके भवेत् ॥ ३ ॥ श्रावणे कलुषा नाम प्रोष्ठपादे
च गीर्मला ॥ आश्विने प्रेतसंचारा कार्तिके च यमा स्मृता ॥४॥ ॥ युधिष्ठिर उवाच ॥ ॥ कस्मात्सा कलुषा प्रोक्ता कस्मात्सा गीर्मला मता ।
कस्मात्सा प्रेतसंचारा कस्माद्याम्या प्रकीर्तिता ॥ ५ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ पुरा वृत्रवधे वृत्ते प्राप्तराज्ये पुरंदरे ॥ ब्रह्महत्यापनोदार्थमश्वमेधे
प्रवर्तिते ॥ ६ ॥ क्रोधादिन्द्रेण वज्रेण ब्रह्महत्या निषूदिता ॥ षट्खण्डा[1] च कृता क्षिप्ता वृक्षे तोये महीतले ॥ ७ ॥ नार्यां ब्रह्महने वह्नौ संविभज्य
यथाक्रमम् ॥ तत्पापं श्रावणे व्यूढं द्वितीयायां दिनोदये ॥८॥ नारीवृक्षनदीभूमिवह्निब्रह्महनेष्वथ ॥ निर्मलीकरणं जातमतोर्थं कलुषा स्मृता ॥९॥
मधुकैटभयो रक्ते पुरा मग्नेति मेदिनी ॥ अष्टांगुला पवित्रा सा नारीणां तु रजो मलम् ॥ १० ॥ नद्यः पूरमलाः सर्वा वह्नेर्धूमशिखा मलः ॥
कलुषाणि चरंत्यस्यां तेनैषा कलुषा मता ॥ ११ ॥ गीर्गिरा भारती वाणी वाचा मेधा सरस्वती ॥ गीर्मलं वहते यस्माद्द्वितीया गीर्मला
मता ॥ १२ ॥ देवर्षिपितृधर्माणां निंदका नास्तिकाः शठाः ॥ तेषां सा वाग्मलव्यूढा द्वितीया तेन गीर्मला ॥ १३ ॥ अनध्यायेषु शास्त्राणि
पाठयंति पठंति च ॥ शाब्दिकास्तार्किकाः श्रौतास्तेषां शब्दापशब्दजाः ॥ १४ ॥ मला व्यूढा द्वितीयायामतोर्थं गीर्मला च सा ॥१४॥ प्रेतास्तु
पितरः प्रोक्तास्तेषां तस्यां तु संचरः ॥ द्वितीयायां च लोकेषु तेन सा प्रेतसंचरा ॥ १५ ॥ अग्निष्वात्ता बर्हिषद आज्यपाः सोमपास्तथा ॥ १६ ॥
पितृपितामहप्रेतसंचरात्प्रेतसंचरा ॥ १६ ॥ पुत्रैः पौत्रैश्च दौहित्रैः स्वधामंत्रैः सुपूजिताः ॥ श्राद्धदानमखैस्तृप्ता यात्यतः प्रेतसंचराः ॥ १७ ॥
कार्तिके शुक्लपक्षस्य द्वितीयायां युधिष्ठिर ॥ यमो यमुनया पूर्वं भोजितः स्वगृहे तदा ॥ १८ ॥ द्वितीयायां महोत्सर्गे नारकीयाश्च तर्पिताः ॥
पापेभ्यो विप्रमुक्तास्ते मुक्ताः सर्वे विबंधनाः ॥ भ्रामिता नर्तितास्तुष्टाः स्थिताः सर्वे यदृच्छया ॥१९॥ तेषां महोत्सवो वृत्तो यमराष्ट्रे सुखावहः ॥
ततो यमद्वितीया सा प्रोक्ता लोके युधिष्ठिर ॥ २० ॥ अस्यां निजगृहे पार्थ न भोक्तव्यमतो बुधैः ॥ स्नेहेन भगिनीहस्ताद्भोक्तव्यं
पुष्टिवर्द्धनम् ॥ २१ ॥ दानानि च प्रदेयानि भगिनीभ्यो विधानतः ॥ स्वर्णालंकारवस्त्राद्यैः पूजासत्कारभोजनैः ॥ २२ ॥ सर्वा
भगिन्यः संपूज्या अभावे प्रतिपत्तिगाः ॥ पितृव्यभगिनी हस्तात्प्रथमायां युधिष्ठिर ॥ २३ ॥ मातुलस्य सुताहस्ताद्द्वितीयायां पुनर्नृप ॥

---

[1] षड्भागा–इ० पा० ।

पितृमातृस्वसारौ ये तृतीयायां तयोः करात् ॥ २४ ॥ भोक्तव्यं सहजायाश्च भगिन्या हस्ततः परम् ॥ सर्वासु भगिनीहस्ताद्भोक्तव्यं बलवर्द्धनम् ॥
॥२५॥ धन्यं यशस्यमायुष्यं धर्मकामार्थवर्द्धनम् ॥ व्याख्यातं सकलं स्नेहात्सरहस्यं मया तव ॥२६॥ यस्यां तिथौ यमुनया यमराजदेवः सम्भो
जितो जगति सत्त्वरसौहृदेन ॥ तस्यां स्वसुः करतलादिह यो भुंनक्ति प्राप्नोति वित्तमर्थं[2] भोज्यमनुत्तमं सः ॥ २७ ॥ इति श्रीभविष्ये महापुराण
उत्तर पर्वणि श्रीकृष्णयुधिष्ठिरसंवादे यमद्वितीयाव्रतमाहात्म्यं नाम चतुर्दशोऽध्यायः ॥ १४ ॥ ॥छ॥ ॥ युधिष्ठिर उवाच ॥ ॥ भगवन्भवता
प्रोक्तं धर्मार्थादेः सुसाधनम् ॥ गार्हस्थ्यं तच्च भवति दंपत्योः प्रीयमाणयोः ॥ १ ॥ पत्नीहीनः पुमान्पत्नी भर्त्रा विरहिता तथा ॥ धर्मकामार्थसं
सिद्धी न स्यातां मधुसूदन ॥ २ ॥ तद्ब्रूहि देवदेवेश विधवा स्त्री न जायते ॥ व्रतेन येन गोविंद पत्न्याऽविरहितो नरः ॥ ३ ॥ ॥ श्रीकृष्ण
उवाच ॥ ॥ अशून्यशयनीं नाम द्वितीयां शृणु तां मम ॥ यामुपोष्य न वैधव्यं प्राप्नोति स्त्री युधिष्ठिर ॥ ४ ॥ पत्नीविमुक्तश्च नरो न कदाचि
त्प्रजायते ॥ शेते जगत्पतिर्विष्णुः स्त्रिया सार्द्धं यदा किल ॥ ५ ॥ अशून्यशयनं नाम तदा ग्राह्या च सा तिथिः ॥ उपवासेन नक्तेन तथैवाया
चितेन च ॥ ६ ॥ कृष्णपक्षे द्वितीयायां श्रावणे नृपसत्तम ॥ स्नानं नद्यां तडागे वा गृहे वा नियतात्मवान् ॥ ७ ॥ कृत्वा पितॄन्मनुष्यांश्च देवान्सं
तर्प्य भक्तिमान् ॥ स्थंडिलं चतुरस्रं तु मृन्मयं कारयेत्ततः ॥ ८ ॥ तत्रस्थं श्रीधरं श्रीशं भक्त्याभ्यर्च्य श्रिया सह ॥ नैवेद्यपुष्पधूपाद्यैः फलैः
कालोद्भवैः शुभैः ॥ ९ ॥ इममुच्चारयेन्मंत्रं प्रणम्य जगतः पतिम् ॥ श्रीवत्सधारिञ्छ्रीकांत श्रीधामञ्छ्रीपतेऽ[3]व्यय ॥ १० ॥ गार्हस्थ्यं मा प्रणाशं मे
यातु धर्मार्थकामदम् ॥ अग्नयो मा प्रणश्यंतु मा प्रणश्यन्तु देवताः ॥ पितरो मा प्रणश्यंतु मत्तो दांपत्यभेदतः ॥११॥ लक्ष्म्या वियुज्यते कृष्ण न
कदाचिद्यथा भवान् ॥ तथा कलत्रसम्बन्धो देव मा मे प्रणश्यतु ॥ १२ ॥ लक्ष्म्या न शून्यं वरद यथा ते शयनं सदा ॥ शय्या ममाप्यशून्यास्तु
तथा जन्मनिजन्मनि ॥ १३ ॥ एवं प्रसाद्य पूजां च कृत्वा लक्ष्म्या हरेस्तथा ॥ चन्द्रोदये स्नानपूर्वं पञ्चगव्येन संयुतम् ॥ विप्राय दक्षिणां दद्यात्स्व
शक्त्या फलसंयुताम् ॥ १४ ॥ अनेन विधिना राजन्यावन्मासचतुष्टयम् ॥ कृष्णपक्षे द्वितीयायां प्रागुक्तविधिमाचरेत् ॥ १५ ॥ कार्त्तिके चाथ
संप्राप्ते शय्यां श्रीकांतसंयुताम् ॥ सोपस्करां सोदकुंभां सान्नां दद्याद्द्विजातये ॥ १६ ॥ प्रतिमासं च सोमाय अर्घ्यं दद्यात्समंत्रकम् ॥ दध्यक्षतैर्मूल
फलै रत्नैः सौवर्णभाजनैः ॥ १७ ॥ गगनांगणसद्दीप दुग्धाब्धिमथनोद्भव ॥ आभासितदिगाभोग रमानुज नमोस्तु ते ॥ १८ ॥ एवं करोति यः

---

१ प्रयत्नात्—इ० पा० । २ अथ सौख्यम्—इ० पा० । ३ अच्युत—इ० पा० ।

सम्यङ्नरो मासचतुष्टयम् ॥ तस्य जन्मत्रयं यावद्गृहभङ्गो न जायते ॥ १९ ॥ अशून्यशयनश्चैव धर्मकामार्थसाधकः ॥ भवत्यव्याहतैश्वर्यः पुरुषो
नात्र संशयः ॥ २० ॥ नारी च पार्थ धर्मज्ञा व्रतमेतद्यथाविधि ॥ या करोति न सा शोच्या बन्धुवर्गस्य जायते ॥ २१ ॥ वैधव्यं दुर्भगत्वं च
भर्तृत्यागं च सत्तम ॥ प्राप्नोति जन्मत्रितयं न सा पांडुकुलोद्वह ॥ २२ ॥ एषा ह्यशून्यशयना नृपते द्वितीया ख्याता समस्तकलुषापहराऽद्वि
तीया ॥ एतां समाचरति यः पुरुषोऽथ योषित्प्राप्नोत्यसौ शयनमग्र्यमहार्हभोग्यम् ॥ २३ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्ण
युधिष्ठिरसंवादे अशून्यशयनव्रतमाहात्म्यं नाम पञ्चदशोऽध्यायः ॥ १५ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ फाल्गुनेऽप्यसिते पक्षे तृतीयायामुपो
षिता ॥ प्रातः स्थित्वा ब्रह्मचर्ये जटामुकुटशोभिता ॥ १ ॥ गोधारथगतां देवीं रुद्रध्यानपरायणाम् ॥ पूजयेद्गन्धकुसुमैर्दीपालक्तकचंदनैः ॥ केसरैर्म
धुरैर्द्रव्यैः स्वर्णमाणिक्यपूजया ॥ २ ॥ ॐ भूषिका देवभूषा च भूषिका ललिता उमा ॥ तपोवनरता गौरी सौभाग्यं मे प्रयच्छतु ॥ ३ ॥
दौर्भाग्यं मे शमयतु सुप्रसन्नमनाः सदा ॥ अवैधव्यं कुले जन्म ददात्वपरजन्मनि ॥ ४ ॥ अङ्गेङ्गे च ममोपाङ्गे पर्वेपर्वे स्थितामृतम् ॥
सुखदृष्टिस्पर्शरसं गौरी सौभाग्यं यच्छतु ॥ ५ ॥ एवमुच्चार्य मंत्रांश्च नारीज्ञानवती सती ॥ पूजयेद्ब्राह्मणोक्तैस्तु मंत्रैर्मुखसुवासिनी ॥ ६ ॥
जीरकैः कटुहुण्डैश्च लवणैर्गुडसार्पिषा ॥ हृद्यैरार्द्रैः फलैः स्वर्णैर्मनोज्ञैः पुष्पबन्धनैः ॥ ७ ॥ कुसुमैः कुंकुमैर्गन्धैः कालेयागुरुचन्दनैः ॥
सिन्दूरेणातिरक्तेन वस्त्रैर्नानाविधैः शुभैः ॥ ८ ॥ नेत्रैरनेकदेशोत्थैः पूपकैस्तिलतण्डुलैः ॥ अशोकैश्च विगुणकैर्घृतपूर्णैस्तु मोदकैः ॥ ९ ॥
इत्येवमादिनैवेद्यैः पूजयित्वा महाद्रुमम् ॥ प्रदक्षिणं ततः कृत्वा दत्त्वा विप्राय दक्षिणाम् ॥ १० ॥ एतत्करोति या पुत्री तृतीयाव्रतमुत्तमम् ॥
ततः प्राप्स्यति दुष्प्राप्यं त्रैलोक्ये श्रीधरं प्रति ॥ ११ ॥ एतद्व्रतं मया ख्यातं यास्यंति शाश्वतीः समाः ॥ व्याख्यातं कश्यपे
नादौ रुक्मिण्या व्रतमुत्तमम् ॥ १२ ॥ याश्चरिष्यंति ताः सर्वा भविष्यंति निरामयाः ॥ अङ्गप्रत्यङ्गसुभगा लोकदृष्टिमनोहराः ॥
॥ १३ ॥ स्थित्वा वर्षशतं चान्ते ततो रुद्रपुरं शुभम् ॥ यास्यंति हंसयानेन किंकिणीशब्दनादिना ॥ १४ ॥ तत्र त्वारमयिष्यंति
स्वभर्तॄन्वत्सरान्बहून् ॥ दिव्यभोगभुजो हृष्टाः सिद्ध्यष्टकसमन्विताः ॥ १५ ॥ अर्घं महार्घमणिकुंकुमकेसराढ्यं स्रग्गंधमुग्धमुखरालि
कुलोपगीतम् ॥ दत्त्वा फलाक्षतयुतं मधुपादपस्य गौरीव लोकमहिता भवतीह नारी ॥ १६ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्ण
युधिष्ठिरसंवादे मधूकतृतीयाव्रतवर्णनं नाम षोडशोऽध्यायः ॥ १६ ॥ छ ॥ युधिष्ठिर उवाच ॥ मेघपालीव्रतं कृष्ण कदाचित्क्रियते नृभिः ॥ किं

पुण्यं किमनुष्ठानं कीदृग्वल्ली स्मृता तु सा ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ आश्वयुक्कृष्णपक्षे तु तृतीयायां युधिष्ठिर ॥ मेघपाल्यै प्रदातव्यो
भक्त्या स्त्रीभिर्नृभिस्तथा ॥ २ ॥ अर्घो विरूढैर्गोधूमैः सप्तधान्यसमन्वितैः ॥ तिलतंडुलपिंडैर्वा दातव्यो धर्मलिप्सुभिः ॥ ३ ॥ तांबूलसदृशैः पर्वै
रक्ता वल्ली समंजरी ॥ वाटीषु ग्राममार्गेषु प्रोत्थिता पर्वतेऽपि च ॥४॥ मेघपाल्यां धान्यतैलगुडकुंकुमहैमनान् ॥ पदानपि च कुर्वंति जना वाणि
ज्यजीवनाः ॥ ५ ॥ पापं सत्यानृतं कृत्वा द्रव्यलुब्धाः फलान्विताः ॥ अर्घ्यं दत्त्वा मेघपाल्यै नाशयंति क्षणादिह ॥ ६ ॥ मानोन्मानैर्जन्म
मध्ये यत्पापं कुत्रचित्कृतम् ॥ सत्सर्वं नाशमायाति व्रतेनानेन पांडव ॥ ७ ॥ मेघपाली शुभे स्थाने शुभे देशे समुत्थिता ॥ पूजनीया वर
स्त्रीभिः फलैः पुष्पैस्तथाक्षतैः ॥ ८ ॥ खर्जूरैर्नालिकेरैश्च दाडिमैः करवीरकैः ॥ गंधधूपैर्दधिदीपैर्विरूढैर्धान्यसंचयैः ॥ ९ ॥ रक्तवस्त्रैः समा
च्छाद्य पिष्टातकविभूषिताम् ॥ कृत्वार्घ्यः संप्रदातव्यो मंत्रेणानेन भारत ॥ १० ॥ वेदोक्तेन द्विजो विद्वांस्तच्च तस्यै निवेदयेत् ॥ इत्येवं पूजयित्वा
तां मेघपालीं पुमांस्ततः ॥ ११ ॥ नारी वा पुरुषव्याघ्र प्राप्नोति परमां श्रियम् ॥ स्थित्वा वर्षशतं मर्त्ये सुखसौभाग्यगर्विते ॥ १२ ॥ विष्णु
लोकमवाप्नोति देहांते यानसंस्थितः ॥ कुलानि सप्त नयति स्वर्गं स्वानि रसातलात् ॥ उद्धृत्य नात्र संदेहस्त्वया कार्यो युधिष्ठिर ॥ १३ ॥ नरक
भीरुतया ददाति योऽर्घ्यं फलाद्यनुयुतं ननु मेघपालेः ॥ उन्मानकूटकपटानि कृतानि यानि पापानि हंति सवितेव तमः प्ररोहान् ॥ १४ ॥
इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे मेघपालीतृतीयाव्रतवर्णनं नाम सप्तदशोऽध्यायः ॥ १७ ॥ ॥ छ ॥ ॥ युधि
ष्ठिर उवाच ॥ स्त्रीणां संपद्यते येन मर्त्यलोके गृहं शुभम् ॥ पतिप्रेम तथात्यंतं तन्मे ब्रूहि व्रतं शुभम् ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ एकदा
पार्वतीशंभू स्थितौ मुनिसुरावृतौ ॥ कैलासशिखरे रम्ये नानाधातुविचित्रिते ॥ २ ॥ नानाद्रुमलताकीर्णे नानापुष्पोपशोभिते ॥ मुनिकिन्नर
संघुष्टे गेयनृत्यसमाकुले ॥ ३ ॥ शंकरः पार्वतीं प्राह किं त्वया सद्व्रतं कृतम् ॥ वामारूपेण मेत्यंतं प्रियासि वरवर्णिनि ॥ ४ ॥ आगच्छ जानुदेशं
तु सुप्रसन्ना तथा प्रिये ॥ ब्रूहि चावितथं सर्वं त्वया पार्वति यत्कृतम् ॥ ५ ॥ इत्युक्ता प्रणता भूत्वा गौरी प्राह शिवं शुभा ॥ तृतीयायां मया
चीर्णं पुरा रंभाव्रतं शुभम् ॥ ६ ॥ तेन मे त्वं मनोहारी भर्ता लब्धोसि शंकर ॥ ईश्वरी वाप्यहं स्त्रीणां तव देहार्द्धहारिणी ॥ ७ ॥ ॥ ईश्वर
उवाच ॥ ॥ कीदृशं तद्व्रतं भद्रे सर्वसौख्यप्रदायकम् ॥ ब्रूहि पार्वति यत्नेन यच्चीर्णं पितुरंतिके ॥ ८ ॥ ॥ गौर्युवाच ॥ पुराहं देव तिष्ठामि
कुमारी भवने पितुः ॥ हिमवद्गह्वरे रम्ये सखीगणसमावृता ॥ ९ ॥ ततोऽहं मेनया प्रोक्ता स्वपित्रा च हिमाद्रिणा ॥ पुत्रि रंभाव्रतं चार्यं वरसौभा

ग्यवर्धनम् ॥ १० ॥ येन प्रारब्धमात्रेण सर्वं संपत्स्यते तव ॥ सौभाग्यं स्त्रीगणैश्वर्यं महादेवीपदं तथा ॥ ११ ॥ एवं करोमि वै मातर्मम चोक्तं पुर
स्त्वया ॥ मनोभिलषितं येन येन प्राप्नोमि शंकरम् ॥ १२ ॥ मेनोवाच ॥ अद्य शुक्लतृतीयायां स्नात्वा नियमतत्परा ॥ कुरु पार्श्वेषु पञ्चाग्नीञ्ज्वाल
मानान्हुताशनान् ॥ १३ ॥ गार्हपत्यं दक्षिणाग्निमन्यं चाहवनीयकम् ॥ पंचमं भास्करं तेज इत्येते पंच वह्नयः ॥ १४ ॥ एतेषां मध्यतो भूत्वा
तिष्ठ पूर्वमुखा चिरम् ॥ चतुर्भुजां ध्यानपरां पद्मयोपरि संस्थिताम् ॥ १५ ॥ मृगाजिनच्छन्नकुचां जटावल्कलधारिणीम् ॥ सर्वाभरणसंयुक्तां
देवीमभिमुखीं कुरु ॥ १६ ॥ महालक्ष्मीर्महाकाली महामाया महामतिः ॥ गङ्गा च यमुना सिंधुः शतद्रुर्नर्मदा मही ॥ १७ ॥ सरस्वती वैत
रिणी सैव प्रोक्ता महासती ॥ तस्याश्च प्रेक्षणपरा भव तद्भावभासिता ॥ १८ ॥ होमं कुर्युर्यतात्मानो ब्राह्मणाः सर्वतोदिशम् ॥ देव्याः पूजा
प्रकर्तव्या पुष्पधूपादिना ततः ॥१९॥ बहुप्रकारनैवेद्यं नैवेद्यं घृतपाचितम् ॥ स्थापयेत्पुरतो देव्याः पृथक्सौभाग्यमेव च ॥ २० ॥ जीरकं कडुहुंड
श्चाप्यपूपान्कुसुमं तथा ॥ निपाचां पावनतरां लवणं शर्करां गुडम् ॥ २१ ॥ पुष्पमंडपिका कार्या गंधपुष्पाधिवासिता ॥ पद्मासनेन संतिष्ठेद्या
वत्परिणतो रविः ॥ ततः प्रणम्य रुद्राणीं मंत्रमेतमुदीरयेत् ॥ २२ ॥ वेदेषु सर्वशास्त्रेषु दिवि भूमौ धरातले ॥ दृष्टः श्रुतश्च बहुशः शंकाविरहितः
स्तवः ॥ २३ ॥ त्वं शक्तिस्त्वं स्वधा स्वाहा त्वं सावित्री सरस्वती ॥ पतिं देहि गृहं देहि वसु देहि नमोस्तु ते ॥ २४ ॥ एवं संक्षमयेद्देवीं प्रणिपत्य
पुनःपुनः ॥ देहि भक्त्या गृहं रम्यं विचित्रं बहुभूमिकम् ॥ आच्छाद्यद्वारकेदारकपोतादिविभूषितम् ॥ २५ ॥ कुडयस्तंभगवाक्षाढ्यं मणिमंडिततो
रणम् ॥ पद्मरागमहानीलवज्रवैडूर्यभूषितम् ॥ २६ ॥ गृहदानविधानेन ब्राह्मणाय यशस्विने ॥ सपत्नीकाय संपूज्य सर्वोपस्करसंयुतम् ॥ २७ ॥
सुवासिनीभ्यस्तद्देयं नैवेद्यं सूर्यसंस्थितम् ॥ निर्वर्त्य विधिनानेन तत्पश्चात्क्षमयेदघम् ॥ २८ ॥ दांपत्यानि च भोज्यानि चतुर्थ्यां मधुरै रसैः ॥
इत्युक्तमुमया चीर्णं हर रंभाव्रतं परम् ॥ २९ ॥ व्रतांतेगस्त्यमुनये दत्तं गृहवरं शुभम् ॥ लोपामुद्रा प्रिया पत्नी तस्य वेश्मनि पूजिता ॥ ३० ॥
तेन धर्मेण देव त्वं भर्ता लब्धोऽसि शंकरः ॥ अर्द्धांकेऽपि स्थिता तेन याश्चरिष्यंति योषितः ॥३१॥ कौंतेय पुरुषो वापि ख्यातं रंभाव्रतं भुवि ॥
तासां पुत्रा गृहं भोगाः कुलवृद्धिर्भविष्यति ॥ ३२ ॥ स्त्रीणां चातुर्यसौभाग्यं गार्हस्थ्यं सर्वकामिकम् ॥ बालावृद्धासुमध्यानां रूपलावण्यबृंहणम् ॥
सपत्नीदर्पदलनं वशीकरणमुत्तमम् ॥ ३३ ॥ हिमवद्विंध्ययोर्मध्ये आर्यावर्ते मनोहरे ॥ उत्पत्य शोभने वासे पूर्वोत्पन्नधने कुले ॥ ३४ ॥ मृतः शक्र
पुरं याति ततो विष्णुपुरं व्रजेत् ॥ ततः शिवपुरं याति व्यासस्य वचनं यथा ॥ ३५ ॥ यद्रंभया किल भयापहरं ततश्च गौर्या हिमाद्रिभवनस्थि

तयापि चीर्णम् ॥ तस्या व्रतं सुविकरोति रता च धर्मे ब्रह्मेशकेशवपतिं सुखदं लभेत ॥ ३६ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि
श्रीकृष्णयुधिष्ठिरसंवादे पञ्चाग्निसाधनाख्यं रंभातृतीयाव्रतं नामाष्टादशोऽध्यायः ॥ १८ ॥छ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ पार्थ भाद्रपदे मासि
शुक्लपक्षे दिनोदये ॥ तृतीयायां चतुर्थ्यां च शुद्धायां प्रतिवत्सरम् ॥ १ ॥ उपवासेन गृह्णीयाद्व्रतं नाम्ना तु गोपदम् ॥ स्नात्वा नरो वा नारी वा
पुष्पधूपविलेपनैः ॥ २ ॥ दध्यक्षतैश्च मालाभिः पिष्टकैर्वनमालया ॥ अभ्यंजयेद्गवां शृंगं खुरं पुच्छान्तमेव च ॥ ३ ॥ दद्याद्गवाह्निकं भक्त्या
तासां पूर्वापराह्णयोः ॥ अनग्निपाकं भुञ्जीत तैलक्षारविवर्जितम् ॥ ४ ॥ व्रजंतीनां गवां नित्यमायांतीनां च भारत ॥ पुरद्वारेथ वा गोष्ठे मन्त्रेणा
नेन मंत्रवित् ॥ अर्घ्यं प्रदद्याद्धृष्ट्यां वा गवां पादेषु पांडव ॥ ५ ॥ माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः ॥ प्रनुवोचं
चिकितुषे जनाय मा गामनागामदितिं वधिष्ट ॥ ६ ॥ ॥ इति गवां मंत्रः ॥ ॥ गावो मे अग्रतः सन्तु गावो मे संतु पृष्ठतः ॥ गावो मे हृदये
संतु गवां मध्ये वसाम्यहम् ॥ ७ ॥ इत्थं संपूज्य दत्त्वार्घं ततो गच्छेद्गृहाश्रमम् ॥ पंचम्यां क्रोधरहितो भुञ्जीत गोरसं दधि ॥ ८ ॥ शालिपिष्टं
फलं शाकं तिलमन्नं च शोभनम् ॥ भुक्तावसाने राजेन्द्र संयतस्तां निशां स्वपेत् ॥९॥ प्रभाते गोपदं दत्त्वा ब्राह्मणाय हिरण्मयम् ॥ क्षमयेच्च गवां
नाथं गोविंदं गरुडध्वजम् ॥ १० ॥ अर्च्यंतेऽत्र यथा गावस्तथा गोवर्धनो गिरिः ॥ प्रणम्याच्युतमुद्दिश्य शृणु यत्फलमाप्नुयात् ॥११॥ गोभक्तो
गोव्रतं कृत्वा भक्त्या शक्त्या च गोष्पदम् ॥ सौभाग्यं रूपलावण्यं प्राप्नोति पृथिवीतले ॥ १२ ॥ गोतर्णकाकुलं गेहं गोकुलं च समासतः ॥
धनधान्यसमोपेतशालीक्षुरसमृद्धिमान् ॥१३॥ संतानं पूजितं लब्ध्वा ततः स्वर्गेऽमरो भवेत् ॥ दिव्यरूपधरः स्रग्वी दिव्यालंकारभूषितः ॥१४॥
गन्धर्वैर्गीतवाद्येन सेव्यमानोऽप्सरोगणैः ॥ दिव्यं युगशतं छित्त्वा ततो विष्णुपुरं व्रजेत ॥ १५ ॥ यो गोपदव्रतमिदं कुरुते त्रिरात्रं गा वै प्रपूज
यति गोरसपूजनाच्च ॥ गोविंदमादिपुरुषं प्रणतः सवित्रामालोकमुत्तममुपैति गवां पवित्रम् ॥ १६ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तर
पर्वणि श्रीकृष्णयुधिष्ठिरसंवादे तृतीयाव्रते गोष्पदतृतीयाव्रतं नामैकोनविंशोऽध्यायः ॥ १९ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ शुक्ले भाद्र
पदस्यैव तृतीयायां समर्चयेत् ॥ सर्वधान्यैस्तां विरूढां भूतां हरितशाड्वलाम् ॥ हरकालीं देवदेवीं गौरीं शंकरवल्लभाम् ॥ १ ॥ गन्धैः पुष्पैः
फलैर्धूपैर्नैवेद्यैर्मोदकादिभिः ॥ प्रीणयित्वा समाच्छाद्य पद्मरागेन भास्वता ॥ २ ॥ घण्टावाद्यादिभिर्गीतैः शुभैर्दिव्यकथानुगैः ॥ कृत्वा जागरणं

---

१ अर्थम्—इ० पा० ।

रात्रौ प्रभाते ह्युद्गते रवौ ॥ ३ ॥ सुवासिनीभिः सा नेया मध्ये पुण्यजलाशये ॥ तस्मिन्विसर्जयेत्पार्थ हरकालीं हरिंप्रियाम् ॥४॥ ॥ युधिष्ठिर
उवाच ॥ ॥ भगवन्हरकालीति का देवी प्रोच्यते भुवि ॥ आर्द्रधान्यैः स्थिता कस्मात्पूज्यते स्त्रीजनेन सा ॥ पूजिता किं ददातीह सर्वं मेब्रूहि
केशव ॥ ५ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ सर्वपापहरां दिव्यां मत्तः शृणु कथामिमाम् ॥ आसीद्दक्षस्य दुहिता कालीनाम्नी तु कन्यका ॥ ६ ॥
वर्णेनापि च सा कृष्णा नवनीलोत्पलप्रभा ॥ सा च दत्ता त्र्यंबकाय महादेवाय शूलिने ॥७॥ विवाहिता विधानेन शंखतूर्यानुनादिना ॥ यत्कु
र्यादागतैर्देवैर्ब्राह्मणानां च निस्वनैः ॥ ८ ॥ निर्वर्तिते विवाहे तु तया सार्धं त्रिलोचनः ॥ क्रीडते विविधैर्भोगैर्मनसः प्रीतिवर्धनैः ॥ ९ ॥ अथ
देवसमानस्तु कदाचित्स वृषध्वजः ॥ आस्थानमंडपे रम्ये आस्ते विष्णुसहायवान् ॥ १० ॥ तत्रस्थश्चाह्वयामास नर्मणा त्रिपुरांतकः ॥ कालीं
नीलोत्पलश्यामां गणमातृगणावृताम् ॥ ११ ॥ एह्येहि त्वमितः कासि कृष्णांजनसमन्विते ॥ कालसुंदरि मत्पार्श्वें धवले त्वमुपाविश ॥ १२ ॥
एवमुत्क्षिप्तमनसा देवी संक्रुद्धमानसा ॥ श्वासयामास ताम्राक्षी बाष्पगद्गदया गिरा ॥ १३ ॥ रुरोद सस्वरं बाला तत्रस्था स्फुरिताधरा ॥ किं दैव
योगात्ताम्रा गौर्गौरी चेत्यभिधीयते ॥ १४ ॥ यस्मान्ममोपमा दत्ता कृष्णवर्णेन शंकर ॥ हरकालीति वाहूता देवर्षिगणसेविता ॥ १५ ॥
तस्माद्देहमिमं कृष्णं जुहोमि ज्वलितेऽनले ॥ इत्युक्त्वा वार्यमाणा तु हरकाली रुषान्विता ॥ १६ ॥ मुमोच हरितच्छायाकांतिं हरितशाद्वले ॥
चिक्षेप दोषं रागेण ज्वलिते हव्यवाहने ॥ १७ ॥ पुनः पर्वतराजस्य गृहे गौरी बभूव सा ॥ महादेवस्य देहार्द्धे स्थिता संपूज्यते सुरैः ॥ १८ ॥
एवं सा हरकालीति गौरीशस्य व्यवस्थिता ॥ पूजनीया महादेवी मंत्रेणानेन पांडव ॥ १९ ॥ हरकर्मसमुत्पन्ने हरकाये हरप्रिये ॥ मां त्राहीशस्य
मूर्तिस्थे प्रणतास्तु नमोनमः ॥ २० ॥ इत्थं संपूज्य नैवेद्यं दद्याद्विप्राय पांडव ॥ तां च प्रातर्जले रम्ये मंत्रेणैव विसर्जयेत् ॥ २१ ॥ अर्चितासि
मया भक्त्या गच्छ देवि सुरालयम् ॥ हरकाले शिवे गौरि पुनरागमनाय च ॥२२॥ एवं यः पांडवश्रेष्ठ हरकालीव्रतं चरेत् ॥ वर्षेवर्षे विधानेन
नारी नरपते शुभा ॥ २३ ॥ सा यत्फलमवाप्नोति तच्छृणुष्व नराधिप ॥ मर्त्यलोके चिरं तिष्ठेत्सर्वरोगविवर्जिता ॥ २४ ॥ सर्वभोगसमायुक्ता सौ
भाग्यबलगर्विता ॥ पुत्रपौत्रसुहृन्मित्रनप्तृदौहित्रसंकुला ॥ २५ ॥ साग्रं वर्षशतं यावद्भोगान्भुक्त्वा महीतले ॥ ततोवसाने देहस्य शिवज्ञाना
महामुने ॥ २६ ॥ चिरभद्रा महाकालनंदीश्वरविनायकाः ॥ तदाज्ञाकिंकराः सर्वे महादेवप्रसादतः ॥ २७ ॥ संपूर्णसूर्यगणसत्तविरूढशस्यां तां

वै हिमाद्रितनयां हरकालिकाख्याम् ॥ संपूज्य जागरमनुद्धतगीतवाद्यैर्यच्छंति या इह भवंति पतिप्रियास्ताः ॥ २८ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे हरकालीतृतीयाव्रतं नाम विंशोऽध्यायः ॥ २० ॥ ॥ छ ॥

॥ युधिष्ठिर उवाच ॥ अथ पृच्छामि भगवन्व्रतं द्वादशमासिकम् ॥ ललिताराधनं नाम मासमासक्रमेण वा ॥ १ ॥ कृष्ण उवाच ॥ शृणु पांडव यत्नेन यथा वृत्तं पुरातनम् ॥ शंकरस्य महादेव्याः संवादं कुरुसत्तम ॥ २ ॥ कैलासशिखरे रम्ये बहुपुष्पफलोपगे ॥ सहकारद्रुमच्छन्ने चंपकाशोकभूषिते ॥ ३ ॥ कदंबबकुलामोदवशीकृतमधुव्रते ॥ मयूररवसंघुष्टे राजहंसोपशोभिते ॥ ४ ॥ मृगर्क्षगजसिंहैश्च शाखामृगगणावृते ॥ गंधर्वयक्षदेवर्षिसिद्धकिन्नरपन्नगैः ॥ ५ ॥ तपस्विभिर्महाभागैः सेवमानं समंततः ॥ सुखासीनं महादेवं भूतसंघैः समावृतम् ॥ ६ ॥ अप्सरोभिः परिवृतमुमा नत्वाब्रवीदिदम् ॥ उमोवाच ॥ भगवन्देवदेवेश शूलपाणे वृषध्वज ॥ ७ ॥ कथयस्व महेशान तृतीयाव्रतमुत्तमम् ॥ सौभाग्यं लभते येन धनं पुत्रान्पशून्सुखम् ॥ ८ ॥ नारी स्वर्गं शुभं रूपमारोग्यं श्रियमुत्तमाम् ॥ एवमुक्तो दयितया भार्यया प्रीतिपूर्वकम् ॥ विहस्य शंकरः प्राह किं व्रतेन तव प्रिये ॥ ९ ॥ ये कामास्त्रिषु लोकेषु दिव्या भूम्यंतरिक्षजाः ॥ सर्वेंपि तेन चायत्ता वश्यस्तेहं यतः पतिः ॥ १० ॥ उमोवाच ॥ सत्यमेतत्सुरेशान त्वयि दृष्टे न दुर्लभम् ॥ किंचित्त्रिभुवनाभोगभूषणे शशिभूषणे ॥ ११ ॥ भक्त्या स्त्रियो हि मां देव प्रजपंति शुभाशुभम् ॥ विरूपाः सुलभाः काश्चिदपुत्रा बहुपुत्रकाः ॥१२॥ सुशीलास्तपसा काश्चिच्छ्वश्रुभिः पीडिता भृशम् ॥ शौचाचारसमायुक्ता न रोचन्तेथ कस्यचित् ॥ १३ ॥ एवं बहुविधैर्दुःखैः पीड्यमानास्तु दारुणैः ॥ शरणं मां प्रपन्नास्ताः कृपाविष्टा ततो ह्यहम् ॥ १४ ॥ येन ताः सुखसंभोगरूपलावण्यसंपदा ॥ पुत्रैः सौभाग्यवित्तौघैर्युक्ताः स्युः सुरसत्तम ॥ तन्मे कथय तत्त्वेन व्रतानामुत्तमं व्रतम् ॥ १५ ॥ ॥ ईश्वर उवाच ॥ ॥ माघे मासि सिते पक्षे तृतीयायां यतव्रताः[1] ॥ मुखं प्रक्षाल्य हस्तौ च पादौ चैव समाहिताः ॥ १६ ॥ उपवासस्य नियमं दंतधावनपूर्वकम् ॥ मध्याह्ने तु ततः स्नानं बिल्वैरामलकैः शुभैः ॥१७॥ स्नात्वा तीर्थजले शुभ्रे वाससी परिधाय च ॥ सुगंधैः सुमनोभिश्च प्रभूतैः कुंकुमादिभिः ॥१८॥ अर्चयंति सदा देवि त्वां भक्त्या भक्तवत्सले ॥ कर्पूराद्यैस्तथा धूपैर्नैवेद्यैः शर्करादिभिः ॥ १९ ॥ यदृच्छालाभसंपन्नैर्धूपदीपार्चनादिभिः ॥ [2]नाम्नेशानीं गृहीत्वा तु प्रतीक्षेद्घटिकां ततः ॥ २० ॥ पात्रे ताम्रमये शुद्धे जलाक्षतविमिश्रिते ॥ सहिरण्यं द्विजं कृत्वा मंत्रपूर्वं समाधिना ॥ २१ ॥ शिरसि प्रक्षिपेत्तोयं ध्यायंती मनसेप्सितम् ॥

---

[1] च तत्त्वतः—इ० पा० । [2] तदा सायं गृहीत्वा तु—इ०पा० ।

ब्रह्मावर्तात्समायाता ब्रह्मयोनेर्विनिर्गता ॥ २२ ॥ भद्रेश्वरा ततो देवी ललिता शंकरप्रिया ॥ गंगाद्वाराद्धरं प्राप्ता गङ्गाजलपवित्रिता ॥ २३ ॥
सौभाग्यारोग्यपुत्रार्थमर्थार्थं[2] हरवल्लभे[1] ॥ आयाता घटिकां भद्रे प्रतीक्षस्व नमोनमः ॥ २४ ॥ दत्त्वा हिरण्यं तत्तस्मै प्राश्नीयाच्चकु शोदकम् ॥
आचम्य प्रयतो भूत्वा भूमिस्था क्षपयेत्क्षपाम् ॥ २५ ॥ ध्यायमाना उमां देवीं हरिते यवसंस्तरे ॥ द्वितीयेह्नि ततः स्नात्वा तथैवाभ्यर्च्य
पार्वतीम् ॥ २६ ॥ यथाशक्ति द्विजान्पूज्य ततो भुञ्जीत वाग्यता ॥ एवं तु प्रथमे मासि पूजनीयासि कालिके ॥ २७ ॥ द्वितीये
पार्वतीनाम तृतीये शंकरप्रिया ॥ भवान्यथ चतुर्थे त्वं स्कंदमाताथ पञ्चमे ॥ २८ ॥ दक्षस्य दुहिता षष्ठे मैनाकी सप्तमे स्मृता ॥
[3]कात्यायन्यष्टमे मासि नवमे तु हिमाद्रिजा ॥२९॥ दशमे मासि विख्याता देवि सौभाग्यदायिनी ॥ उमा त्वेकादशे मासि गौरी तु द्वादशे परा ॥
॥३०॥ कुशोदकं पयः सर्पिर्गोमूत्रं गोमय फलम् ॥ निंबपत्रं कंटकारी गवां शृंगोदकं दधि ॥३१॥ पञ्चगव्यं तथा शाकः प्राशनानि क्रमादमी ॥
मासिमासि स्थिता ह्येवमुपवासपरायणा ॥३२॥ ददाति श्रद्धयैतानि वाचके ब्राह्मणोत्तमे ॥ कुसुंभमाज्यं लवणं जीरकं गुडमेव च ॥३३॥ दत्तैरेभिः
सूर्यस्था त्वं सूर्यस्था तुष्यसि प्रिये ॥ मासिमासि भवेन्मन्त्रो गकारो द्वादशाक्षरः ॥ ३४ ॥ ओङ्कारपूर्वको देवि नमस्कारांत ईरितः ॥ एभिस्त्वं
पूजिता मंत्रैस्तुष्यसि व्रततः प्रिये ॥ ३५ ॥ तुष्टा त्वभीप्सितान्कामान्ददासि प्रीतिपूर्वकम् ॥ समाप्ते तु व्रते तस्मिन्ब्राह्मणं वेदपारगम् ॥ ३६ ॥
सहितं भार्ययाभ्यर्च्य गंधपुष्पादिभिः शुभैः ॥ द्विजं महेश्वरं कृत्वा उमां भार्यां तथैव च ॥ ३७ ॥ अन्नं सदक्षिणं दद्यात्तथा शुक्ले च वाससी ॥
रक्तं वासोयुगं दद्यात्त्वामुद्दिश्य हरप्रिये ॥ ३८ ॥ ब्राह्मणे श्रद्धया युक्तस्तस्यां फलमिदं शृणु ॥ दशवर्षसहस्राणि लोकान्प्राप्य परापरान् ॥ ३९ ॥
मोदते भर्तृसहिता यथेंद्रेण शची तथा ॥ मानुषत्वं पुनः प्राप्य स्वेन भर्त्रा सहैव सा ॥ ४० पुण्ये कुले श्रिया युक्ता नीरोगा सुखमश्नुते ॥ सप्त
जन्मानि यावच्च नवैधव्यमवाप्नुयात् ॥४१॥ पुत्रान्भोगांस्तथा रूपं सौभाग्यारोग्यमेव च ॥ एकपत्नी तथा भर्तुः प्राणेभ्योऽप्यधिका भवेत्॥४२॥
शृणुयाद्वाच्यमानं तु भक्त्या या ललिताव्रतम् ॥ मया स्नेहेन कथितं सापि तत्फलभागिनी ॥ ४३ ॥ संपूज्य लक्षललितां ललितांगयष्टिं
गंधोदकामृतघटीं शिरसि क्षिपेद्यः॥ सा स्वर्गमेत्य ललितासु ललामभूता भूपाधिपं पतिमवाप्य भुवं भुनक्ति ॥ ४४ ॥ इति श्रीभविष्ये महापुराण
उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे ललितातृतीयाव्रतमाहात्म्यं नामैकविंशतितमोऽध्यायः ॥ २१ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ इहापि

---

१ जनवल्लभे–इ० पा० । २ मुदा–इ० पा० । ३ मृडानी चाष्टमे मासि—इ० पा० ।

योगमासाद्य भर्तृबंधुजनैः सह ॥ वद नारी नरश्रेष्ठ व्रजेद्येन शिवालयम् ॥ १ ॥ विधवा च परे लोके भूयोऽपि न वियुज्यते ॥ सुखसंदोहसौभाग्ययुक्ता भवति भामिनी ॥ २ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ उभयाचारितं यत्नाद्भववाग्गलितामृतम् ॥ लब्ध्वा हि भवतो जन्म दक्षकोपाद्रियुक्तया ॥ ३ ॥ महासौभाग्यसंदोहं दृष्ट्वा देव्या महात्मना ॥ अरुंधत्या वशिष्ठेन पृष्टेन कथितं शृणु ॥ ४ ॥ मासि मार्गशिरे प्राप्ते चंद्रवृद्धौ शुचिस्मिता ॥ द्वितीयायां समासाद्य नक्तं भुंजीत पायसम् ॥ ५ ॥ आचम्य च शुचिर्भूत्वा दंडवच्छंकरं नमेत् ॥ मुदान्विता नमस्कृत्य विज्ञाप्य परमेश्वरम् ॥ ६ ॥ औदुम्बरमृजुं गृह्य भक्षयेद्दंतधावनम् ॥ उत्तराशागतं साग्रं सत्वचं निर्व्रणं शुभम् ॥ ७ ॥ द्वितीयायां परे वाह्नि गौरीं शंभुं च पूजयेत् ॥ शालिपिष्टमये कृत्वा रूपे स्त्रीपुंसयोः शुभे ॥ पात्रे संस्थाप्य संपूज्य जागरं निशि कल्पयेत् ॥ ८ ॥ विधिवत्पूजयित्वा तु शंकरं कीर्तयन्स्वपेत् ॥ प्रभाते ते गृहीत्वा तु आचार्याय निवेदयेत् ॥ ९ ॥ भोजयेन्मृष्टमन्नाद्यं शिवभक्त्या द्विजोत्तमान् ॥ दांपत्यानि च तत्रैव शक्त्या तान्यपि भोजयेत् ॥ १० ॥ प्रतिमासं प्रकुर्वीत विधिना तेन संयता ॥ कार्तिकांते ततो मासि मार्गशीर्षे समुद्यमेत् ॥ ११ ॥ नामानि च प्रवक्ष्यामि प्रतिमासं क्रमाच्छृणु ॥ पूजाजाप्यनिमित्तं च सिद्धयर्थं चेति तस्य च ॥ १२ ॥ एवं पौषे तु संप्राप्ते गिरिशं पार्वतीं तथा ॥ समभ्यर्च्य चतुर्थ्यां तु पंचगव्यं पिबेत्सुधीः ॥ १३ ॥ एतत्पारणमुद्दिष्टं मार्गादौ मार्गगोचरम् ॥ न चान्यत्पञ्चगव्यादि पावनं परमं स्मृतम् ॥१४॥ भवं चैव भवानीं च मासि माघे प्रपूजयेत् ॥ फाल्गुने तु महादेवमुमया सहितं मतम् ॥ १५ ॥ ललितां शंकरं देवं चैत्रे संपूजयेत्ततः ॥ स्थाणुं वैशाखमासे तु लोलनेत्रायुतं यजेत् ॥ १६ ॥ ज्येष्ठे वीरेश्वरं देवमेकवीरासमन्वितम् ॥ आषाढे पशुनाथं च शक्त्या सार्द्धं त्रिलोचनम् ॥ १७ ॥ श्रीकंठं श्रावणे देवं सुतान्वितमथार्चयेत् ॥ भीमं भाद्रपदे मासि दुर्गया सहितं यजेत् ॥ ईशानं कार्त्तिके मासि शिवादेवीयुतं यजेत् ॥ १८ ॥ जप्यध्यानार्चनायैव नामान्येतानि सुव्रत ॥ स्मृतानि विधिना राजन्व्रतसिद्धिर्भवेद्ध्रुवम् ॥१९॥ प्रतिमासं तु पुष्पाणि यानि पूजासु योजयेत् ॥ तानि क्रमात्प्रवक्ष्यामि सद्यः प्रीतिकराणि वै ॥ २० ॥ आदौ नीलोत्पलं योज्यं तदभावेऽपराण्यपि ॥ पवित्राणि सुगंधीनि योजयेद्भक्तितोऽर्चने ॥ २१ ॥ करवीरं बिल्वपत्रं किंशुकं कुब्जमल्लिका ॥ पाटलाब्जकदंबं च तगरं द्रोणमालती ॥ २२ ॥ एतान्युक्तक्रमेणैव मासेषु द्वादशस्वपि ॥ भक्त्या योज्यानि राजेन्द्र शिवयोस्तुष्टिहेतवे ॥ २३ ॥ वत्सरांते वितानं च धूपोत्क्षेपं सघंटिकम् ॥ ध्वजं दीपं वस्त्रयुगं शङ्कराय निवेदयेत्॥२४॥ स्नापयित्वा च लिख्वा च सौवर्णं मूर्ध्नि पङ्कजम् ॥ पूपयुग्मं च पुरतः शालिपिष्टमयं न्यसेत् ॥ २५ ॥ नैवेद्यं शक्तितो दत्वा नत्त्वा च विधिव

च्छिवम् ॥ कुर्यान्नीराजनं शम्भोस्ततो गच्छेत्स्वकं गृहम् ॥ २६ ॥ तत्र गत्वा त्रिकोणञ्च चतुरस्रं च कारयेत् ॥ त्रिकोणे ब्राह्मणी भोज्या चतु
रस्रे द्विजोत्तमाः ॥ २७ ॥ व्रतिनो भोजयेत्पश्चाद्द्वादशैव द्विजोत्तमान् ॥ मिथुनानि च तावंति शक्त्या भक्त्या च पाण्डव ॥ २८ ॥
उमामहेश्वरं हैमं कारयित्वा सुशोभनम् ॥ मौक्तिकानि चतुःषष्टिस्तावंतोऽपि प्रवालकाः ॥ तावंति पुष्परागाणि ताम्रपात्रोपरि न्यसेत् ॥ २९ ॥
वस्त्रेण वेष्टयित्वा च गन्धैर्धूपैस्तथार्चयेत् ॥ एतत्संभारसंयुक्तमाचार्याय निवेदयेत् ॥ ३० ॥ व्रतिनां ब्राह्मणानां च दम्पतीनां च भारत ॥
दत्त्वा हिरण्यवासांसि क्षमयेत्प्रणिपत्य च ॥ ३१ ॥ चत्वारिंशत्तथाष्टौ च कुम्भांश्छत्रमुपानहौ ॥ सहिरण्याक्षतान्सर्वान्दद्यात्पुष्पोदकान्वितान् ॥
॥ ३२ ॥ दीनान्धदुःखितानां च तद्दिने वा निवारितम् ॥ कल्पयेदन्नदानं चालोचयञ्छक्तिमात्मनः ॥ ३३ ॥ न्यूनाधिकं च कर्तव्यं स्ववित्तपरि
माणतः ॥ संपूरयेत्कल्पनया वित्तशाठ्यं न कारयेत् ॥३४॥ अवियोगकरं चैतद्रूपसौभाग्यवित्तदम् ॥ आयुःपुत्रप्रदं स्वर्ग्यं शिवलोकप्रदायकम् ॥
॥ ३५ ॥ सम्यक्पुराणपतितं व्रतचर्यमेतत्तत्त्वं चराचरगुरोर्हृदयंगमायाः॥पूजां विधाय विधिवन्न वियोगमेति साध्वीस्वभर्तृसुतबन्धुजनैर्धनैश्च॥३६॥
इति श्रीभविष्ये महापुराण उत्तरपर्वणि अवियोगतृतीयाव्रतं नाम द्वाविंशतितमोऽध्यायः ॥ २२ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ केन धर्मेण
नारीणां व्रतेन नियमेन च ॥ सौभाग्यं जायतेऽतीव पुत्राश्च बहवः शुभाः ॥ १ ॥ धनं धान्यं सुवर्णं च वस्त्राणि विविधानि च ॥ अवियोगं च
सततं लभते पुत्रपौत्रयोः ॥ २ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ शृणु पार्थ प्रवक्ष्यामि व्रतानामुत्तमं व्रतम् ॥ यत्कृत्वा सुभगा नारी बह्वपत्या च
जायते ॥ ३ ॥ धनं धान्यं हिरण्यं च दासीदासादिकं बहु ॥ उत्पद्यते गृहे येन तद्व्रतं कथयामि ते ॥ ४ ॥ उमामहेश्वरं नाम अप्सरोभिः पुरा
कृतम् ॥ विद्याधरैः किन्नरैश्च ऋषिकन्याभिरेव च ॥५॥ रूपिण्या रंभया चैव सीतयाऽहल्यया तथा॥रोहिण्या दमयंत्या च तारया चानसूयया ॥
॥६॥ एताभिश्चरितं पार्थ व्रतं सर्वव्रतोत्तमम् ॥ सौभाग्यारोग्यफलदं दारिद्र्यव्याधिनाशनम् ॥ ७ ॥ मर्त्यलोके स्त्रियो याश्च दुर्भगा रूपवर्जिताः ॥
अपुत्रा निर्धनाश्चैव सर्वभोगविवर्जिताः ॥ ८ ॥ तासां हितार्थं पार्वत्या उमामहेश्वरं व्रतम् ॥ अवतारितं पुरा पार्थ न जानंत्यधमाः स्त्रियः ॥९॥
पूर्वं मार्गशिरे मासि नारी धर्मपरायणा ॥ शुक्लपक्षे तृतीयायां सोपवासा जितेन्द्रिया ॥ १० ॥ स्नात्वा संपूज्य ललितां हरकायार्धवासिनीम् ॥
पुनः प्रभातसमये स्नानं चाकृत्रिमे जले ॥ कृत्वा देवीस्तर्पयित्वा इदं वाक्यमुदीरयेत् ॥ ११ ॥ नमो नमस्ते देवेश उमादेहार्द्धधारक ॥ महा
देवि नमस्तेऽस्तु हरकायार्द्धवासिनि ॥ १२ ॥ हृदि कृत्वा शिवं देवीं जपेद्यावद्गृहं गता ॥ पूजयेद्देवमीशानं पुष्पैः कालोद्भवैस्ततः ॥ १३ ॥

वामपार्श्वे उमां देवीं दक्षिणे तु महेश्वरम् ॥ धूपं वा गुग्गुलं वापि दहेत्पश्चात्सुभाविता ॥ नैवेद्यं तु यथाशक्ति घृतपक्कं निवेदयेत् ॥ १४ ॥ कारयेद्वैश्वदेवं तु तिलाज्येन सुसंस्कृतम् ॥ पञ्चगव्यं ततः प्राश्य आत्मकायविशोधनम् ॥ १५ ॥ एवं द्वादशमासांस्तु पूजयित्वा महेश्वरम् ॥ उद्यापनं ततः कुर्यात्प्रहृष्टेनान्तरात्मना ॥ १६ ॥ शिवं रूप्यमयं कृत्वा उमां हैममयीं तथा ॥ आरूढौ वृषभे रौप्ये सर्वालंकारभूषितौ ॥ १७ ॥ चन्दनेन शिवं चर्च्य कुंकुमेन च पार्वतीम् ॥ अर्चयेत्कुसुमैः पश्चात्सुगन्धैः सुमनोहरैः ॥ १८ ॥ वेष्टयेच्छुक्लवस्त्रेण शिवं रक्तेन पार्वतीम् ॥ पश्चाद्धूपं दहेन्नारी भक्तिभावेन भाविता ॥ १९ ॥ भोजयेच्छिवभक्तांश्च ब्राह्मणान्वेदपारगान् ॥ भक्तेभ्यो दक्षिणा देया भक्त्या शाठ्यविवर्जिता ॥ २० ॥ ततः प्रदक्षिणीकृत्य इदमुच्चारयेद्बुधः ॥ उमामहेश्वरौ देवौ सर्वलोकपितामहौ ॥ व्रतेनानेन सुप्रीतौ भवेतां मम सर्वदा ॥ २१ ॥ एवमुक्त्वा जितक्रोधे ब्राह्मणे वेदपारगे ॥ व्रतं निवेदयेद्भक्त्या वाचके वा गुणान्विते ॥ २२ ॥ इदं कृत्वा व्रतं नारी महेशार्पितमानसा ॥ प्रयाति परमं स्थानं यत्र देवो महेश्वरः ॥ २३ ॥ शिवलोके वसेत्तावद्यावदिन्द्राश्चतुर्दश ॥ अप्सरोभिः परिवृता किन्नरीभिस्तथैव च ॥ २४ ॥ यदा मानुष्यमायाति जायते विमले कुले ॥ रूपयौवनसंपन्ना बहुपुत्रा पतिव्रता ॥ २५ ॥ धनधान्यसमायुक्ते सुवर्णमणिमंडिते ॥ यावज्जीवं गृहे रम्ये तिष्ठत्यव्याहतेन्द्रिया ॥ २६ ॥ वियोगं नैव सा पश्येद्भर्तृमित्रसुतादिकैः ॥ मृता शिवपुरं याति शिवगौरीप्रसादतः ॥ २७ ॥ हैमीमुमां रजतपिण्डमयं महेशं रौप्ये सुरूपवृषभे च समास्थितौ तौ ॥ सम्पूज्य रक्तसितवस्त्रयुगावगूढौ नारी भवत्यविधवा सुतसौख्ययुक्ता ॥ २८ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे उमामहेश्वरव्रतं नाम त्रयोविंशतितमोऽध्यायः ॥ २३ ॥ ॥छ॥

॥ श्रीकृष्ण उवाच ॥

॥ रंभातृतीयां वक्ष्यामि सर्वपापप्रणाशिनीम् ॥ पुत्रसौभाग्यफलदां सर्वामयनिवारिणीम् ॥ १ ॥ सर्वदुष्टहरां पुण्यां सर्वसौख्यप्रदां तथा ॥ सपत्नीदर्पदलनां तथैश्वर्यकरीं शिवाम् ॥ २ ॥ शंकरेण पुरा प्रोक्ता पार्वत्याः प्रियकाम्यया ॥ तामिमां शृणु भूपाल सर्वभूतहिताय वै ॥ ३ ॥ मार्गशीर्षे शुभे मासि तृतीयायां नराधिप ॥ शुक्लायां प्रातरुत्थाय दंतधावनपूर्वकम् ॥ उपवासस्य नियमं गृह्णीयाद्भक्तिभाविता ॥ ४ ॥ देवि संवत्सरं यावत्तृतीयायामुपोषिता ॥ प्रतिमासं करिष्यामि पारणं चापरेऽहनि ॥ तदविघ्नेन मे यातु प्रसादात्तव पार्वति ॥ ५ ॥ एवं संकल्प्य विधिवत्कौंतेय कृतनिश्चयः ॥ भक्त्या नरो वा नारी वा स्नानं कुर्यादतंद्रितः ॥६॥ नद्यां तडागे वाप्यां वा गृहे वा नियतात्मवान् ॥ पूजयेत्पार्वतीं नाम रात्रौ प्राश्य कुशोदकम् ॥ ॥ ७ ॥ प्रभाते भोजयेद्विद्वाञ्छिवभक्तान्विशेषतः ॥ हिरण्यं लवणं चैव तेषां दद्यात्तु दक्षिणाम् ॥ गौरीश्वरं यथाशक्ति भोजयेत्प्रयता सती ॥ ८ ॥

अनेन विधिना राजन्यः कुर्यान्मासि पौषके ॥ गोमूत्रं प्राशयेद्रात्रौ प्रभाते भोजयेद्द्विजान् ॥ ९ ॥ हिरण्यं जीरकं चैव स्वशक्त्या दापयेत्ततः ॥
कडुहुंडं च कनकं तेभ्यो दत्त्वा विसर्जयेत् ॥ १० ॥ वाजपेयातिरात्राभ्यां फलं प्राप्नोत्यसंशयः ॥ शक्रलोके वसेत्कल्पं ततः शिवपुरं
व्रजेत् ॥ ११ ॥ माघे मासि तृतीयायां सुदेवीं नाम पूजयेत् ॥ गोमयं प्राशयेद्रात्रौ ततश्चैकाकिनी स्वपेत् ॥ १२ ॥ प्रातः कुसुंभं कनकं दद्या
च्छक्त्या द्विजातिषु ॥ विष्णुलोके चिरं स्थित्वा प्राप्नोति शिवसाम्यताम् ॥ १३ ॥ गौरीति फाल्गुने नाम गोक्षीरं प्राशयेन्निशि ॥ प्रभाते भोज
येद्विद्वाञ्छिवभक्तान्सुवासिनीः ॥ १४ ॥ कडुहुंडं सकनकं तेभ्यो दत्त्वा विसर्जयेत् ॥ वाजपेयातिरात्राभ्यां फलं प्राप्नोत्यसंशयः ॥१५॥ चैत्रे मासि
विशालाक्षीं पूजयेद्भक्तितत्परा ॥ दधि प्राश्य स्वपेत्प्रातर्दद्याद्धेम सकुंकुमम् ॥ सौभाग्यं महदाप्नोति विशालाक्ष्याः प्रसादतः ॥ १६ ॥ वैशाखस्य
तृतीयायां श्रीमुखीं नाम पूजयेत् ॥ घृतं च प्राशयेद्रात्रौ ततश्चैकाकिनी स्वपेत् ॥ १७ ॥ शिवभक्तान्द्विजान्प्रातर्भोजयित्वा यथेप्सितम् ॥ तांबूलं
लवणं दत्त्वा प्रणिपत्य विसर्जयेत् ॥ अनेन विधिना दत्त्वा पुत्रानाप्नोति शोभनान् ॥ १८ ॥ आषाढे माधवीं नत्वा प्राश्नीयाच्च तिलोदकम् ॥
प्रभाते भोजयेद्विप्रान्दक्षिणायां गुडः स्मृतः ॥ सकांचनः शुभाँल्लोकान्प्राप्नोति हि न संशयः ॥ १९ ॥ श्रावणे तु श्रियं पूज्य पिबेद्गोशृंगजं
जलम् ॥ शिवभक्तांश्च संपूज्य दद्याद्धेमफलैः सह ॥ सवलोकेश्वरो भूत्वा सर्वकामानवाप्नुयात् ॥ २० ॥ भाद्रे चैव तृतीयायां हरतालीति पूज
येत् ॥ माहिषं च पिबेद्दुग्धं सौभाग्यमतुलं लभेत् ॥ इह लोके सुखं भुक्त्वा चांते शिवपुरं व्रजेत् ॥ २१ ॥ आश्विने तु तृतीयायां गिरिपुत्रीति
पूजयेत् ॥ संप्राश्य तण्डुलजलं प्रातर्विप्रांश्च पूजयेत् ॥२२॥ दक्षिणा चापि निर्दिष्टा कनकं च सचन्दनम् ॥ सर्वयज्ञफलं प्राप्य गौरीलोके मही
यते ॥ २३ ॥ पद्मोद्भवा कार्तिके च पञ्चगव्यं पिबेत्ततः ॥ रात्रौ प्रजागरं कुर्यात्प्रभाते भोजयेद्द्विजान् ॥ २४ ॥ सपत्नीकाञ्छुभाचारान्माल्यवस्त्र
विभूषणैः ॥ पूजयेच्छिवभक्तांश्च कुमारीश्चव भोजयेत् ॥ २५ ॥ उमामहेश्वरं हैमं समाप्ते कारयेन्नृप ॥ यथाविभवसारेण वितानं पञ्चवर्णकम् ॥
॥ २६ ॥ अशनं च शुभं दद्याच्छ्वेतच्छत्रं कमंडलुम् ॥ पादुकोपानहौ दिव्यैर्वस्त्रयुग्मैश्च पांडव ॥ २७ ॥ पीतयज्ञोपवीतैश्च दीपनेत्रैः समुज्ज्वलैः ॥
शंखशुक्तिसमोपेतैर्दर्पणैश्च सुशोभितैः ॥२८॥ उमामहेश्वरं स्थाप्य पूजयित्वा यथाविधि ॥ नानाविधैः सुगन्धैश्च पत्रैः पुष्पैः फलैस्तथा ॥ २९ ॥
घृतपक्वैश्च नैवेद्यैर्दीपमालाभिरेव च ॥ शर्करानालिकेरैश्च दाडिमैर्बीजपूरकैः ॥ ३० ॥ जीरकैर्लवणैश्चैव कुसुम्भैः कुंकुमैस्तथा ॥ सताम्रभाजनैर्दि
व्यैर्गोदकै रससंयुतैः ॥ पूजयेद्देवदेवेशं क्षमयेत्तदनंतरम् ॥ ३१ ॥ शंखवादित्रनिर्घोषैर्वेदध्वनिसमन्वितैः ॥ एवं कृते फलं यत्स्यात्तन्न शक्यं मयो

दितुम् ॥ ३२ ॥ पूर्वोक्तफलभागी स्यात्सर्वदेवैश्च पूज्यते ॥ कल्पकोटिशतं यावत्सर्वकामानवाप्नुयात् ॥ ३३ ॥ तदंते शिवसायुज्यं प्राप्नोतीह
न संशयः ॥ पुरैतद्रंभया चीर्णं तेन रंभाव्रतं स्मृतम् ॥ ३४ ॥ योऽहं सा च स्मृता गौरी या गौरी स महेश्वरः ॥ इति मत्वा महाराज शरणं व्रज
पार्वतीम् ॥ ३५॥ एषा हिमाद्रिदुहितुर्दयिता तृतीया रंभाविधानमलभद्भुवि तत्कृतेति ॥ सत्प्राशितैरुदितनामयुतामुपोष्य प्राप्नोति वांछितफलान्य
बला बहूनि ॥३६॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे रंभातृतीयाव्रतं नाम चतुर्विंशतितमोऽध्यायः ॥२४॥ ॥छ॥
॥ ॥ श्रीकृष्ण उवाच ॥ ॥ तथैवान्यत्प्रवक्ष्यामि सर्वकामफलप्रदम् ॥ सौभाग्यशयनं नाम यत्पुराणविदो विदुः ॥ १ ॥ पुरा दग्धेषु लोकेषु
भूर्भुवःस्वर्महादिषु ॥ सौभाग्यं सर्वलोकानामेकस्थमभवत्तदा ॥ २ ॥ तच्च वैकुण्ठमासाद्य विष्णोर्वक्षस्थले स्थितम् ॥ ततः कालेन महता
पुनः सर्गविधौ नृप ॥ ३ ॥ अहंकारावृते लोके प्रधानपुरुषान्विते ॥ स्पर्द्धायां च प्रवृत्तायां कमलासनकृष्णयोः ॥ ४ ॥ पिंगाकारा समुद्भूता
ज्वाला वक्षस्थली तदा ॥ तयाभितप्तस्य हरेर्वक्षसस्तद्विनिःसृतम् ॥ ५ ॥ यद्वक्षस्थलमाश्रित्य विष्णोः सौभाग्यमास्थितम् ॥ रसरूपतया ताव
त्प्राप्नोति वसुधातलम् ॥ ६ ॥ उत्क्षिप्तमन्तरिक्षस्थं ब्रह्मपुत्रेण धीमता ॥ दक्षेण पीतमात्रं तु रूपलावण्यकारणम् ॥ ७ ॥ [1]बलं तेजो महज्जातं
दक्षस्य परमेष्ठिनः ॥ शेषं यदपतद्भूमावष्टधा तदजायत ॥ ८ ॥ इक्षवस्तवराजं च निष्पावाजाजिधान्यकम् ॥ विकारवच्च गोक्षीरं कुसुम्भं
कुंकुमं तथा ॥ लवणं चाष्टमं तत्र सौभाग्याष्टकमुच्यते ॥ ९ ॥ पीतं यद्ब्रह्मपुत्रेण योगज्ञानविदा तथा ॥ दुहितास्याभवत्तस्माद्या सतीत्यभि
धीयते ॥ लोकानतीत्य लालित्याल्ललिता तेन चोच्यते ॥ १० ॥ त्रैलोक्यसुंदरीमेनामुपयेमे पिनाकधृक् ॥ त्रिविश्वसौभाग्यमयी भुक्ति
मुक्तिफलप्रदा ॥ ११ ॥ आराध्य तामुमां भक्त्या स्त्री राजन्किन्न विन्दति ॥ १२ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कथमाराधनं तस्या जग
द्धात्र्या जनार्दन ॥ यद्विधानं च तत्सर्वं जगन्नाथ वदस्व मे ॥ १३ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ वसंतमासमासाद्य तृतीयायां युधिष्ठिर ॥
शुक्लपक्षस्य पूर्वाह्णे तिलैः स्नानं समाचरेत् ॥ १४ ॥ तस्मिन्नहनि सा देवी किल विश्वात्मना सती ॥ पाणिग्रहणकैर्मन्त्रैरुद्वाह्या वरवर्णिनी ॥१५॥
तथा सहैव देवेशं तृतीयायामथार्चयेत् ॥ फलैर्नानाविधैर्धूपदीपनैवेद्यसंयुतैः ॥ १६ ॥ [2]पञ्चगव्येनानुमासं तथा गंधोदकेन च ॥ स्नपयित्वा
र्चयेद्गौरीमिन्दुशेखरसंयुताम् ॥ १७ ॥ पाटलं शंभुसहितां पादयोस्तु प्रपूजयेत् ॥ त्रियुगां शिवसंयुक्तां गुल्फयोरुभयोरपि ॥ १८ ॥ भद्रेश्वरेण

---

१ तुल्यतेज—इ० पा० । २ घृतगव्येन—इ० पा० ।

सहितां विजयां जानुनोर्युगे ॥ ईशानीं हरिकेशं च कट्यां संपूजयेद्बुधः ॥ १९ ॥ कोटनीं शूलिनं कुक्षौ मंगलां शर्वसंयुताम् ॥ उदरे पूजयेद्राजन्नुमां रुद्रं कुचद्वये ॥ २० ॥ अनंतां त्रिपुरघ्नं च पूजयेत्करसंपुटे ॥ कंठे भवं भवानीं च मुखे गौरीं हरं तथा ॥ २१ ॥ सर्वात्मना च सहितां ललितां मस्तकोपरि ॥ ओंकारपूर्वकैरेतैर्न्नमस्करांतयोजितैः ॥ पूजयेद्भक्तिसहितो गन्धमाल्यानुलेपनैः ॥ २२ ॥ एवमभ्यर्च्च्य विधिवत्सौभाग्याष्टकमग्रतः ॥ स्थापयेत्स्विन्ननिष्पावान्कुसुंभं क्षरिजीरकम् ॥ २३ ॥ तवराजेक्षुलवणं कुंकुमं च तथाष्टमम् ॥ दत्तं सौभाग्यकं यस्मात्सौभाग्याष्टकमुच्यते ॥ २४ ॥ एवं निवेद्य तत्सर्वं शिवयोः प्रीयतामिति ॥ चैत्रे शृंगोदकं [1]प्रांश्य स्वप्याद्भूमावरिंदम ॥ २५ ॥ ततः प्रातः समुत्थाय कृतप्राणजयः शुचिः ॥ संपूज्य द्विजदांपत्यं माल्यवस्त्रविभूषणैः ॥ सौभाग्याष्टकसंयुक्तं सौवर्णं चरणद्वयम् ॥ २६ ॥ [2]प्रीयंतामत्र ललिता ब्राह्मणाय निवेदयेत् ॥ एवं संवत्सरं यावत्तृतीयायां सदा नृप ॥ २७ ॥ प्राशने नाममंत्रे च विशेषोऽयं निबोध मे ॥ गोशृंगोदकमाद्ये स्याद्वैशाखे गोमयं पुनः ॥ २८ ॥ ज्येष्ठे मंदारपुष्पं च बिल्वपत्रं शुचौ स्मृतम् ॥ श्रावणे दधि संप्राश्यं नभस्ये च कुशोदकम् ॥ २९ ॥ क्षीरमाश्वयुजे तद्वत्कार्तिके पृषदाज्यकम् ॥ मृगोत्तमांगे गोमूत्रं पौषे संप्राशयेद् घृतम् ॥३०॥ माघे कृष्णतिलांस्तद्वत्पञ्चगव्यं च फाल्गुने ॥ ललिता विजया भद्रा भवानी कुमुदाश्रिता ॥३१॥ वासुदेवी तथा गौरी मङ्गला कमला सती ॥ उमा च दानकाले तु प्रीयतामिति कीर्तयेत् ॥३२॥ मल्लिकाशोककमलकदंबोत्पलमालति ॥ कुङ्मलं करवीरं च बाणमम्लानकुंकुमम् ॥ सिंदुवारं च मासेषु सर्वेषु क्रमशः स्मृतम् ॥ ३३ ॥ जपा कुसुंभकुसुमं मालती शतपत्रिका ॥ यथालाभं प्रदेयानि करवीरं च सर्वदा ॥ ३४ ॥ एवं संवत्सरं यावदुपोष्य विधिवन्नरः ॥ स्त्री नक्ते तु कुमारी वा शिवामभ्यर्च्च्य शक्तितः ॥ व्रतांते शयनं दद्यात्सर्वोपस्करसंयुतम् ॥ ३५ ॥ उमामहेश्वरं हैमं वृषभं च गवा सह ॥ स्थापयित्वा तु शयने ब्राह्मणाय निवेदयेत् ॥ ३६ ॥ अन्यान्यपि यथाशक्ति मिथुनान्यंबरादिभिः ॥ धान्यालंकरणैर्दानैरन्यैश्च धनसंचयैः ॥ वित्तशाठ्येन रहितः पूजयेद्गतविस्मयः ॥ ३७ ॥ एवं करोति यः सम्यक्सौभाग्यशयनव्रतम् ॥ सर्वान्कामानवाप्नोति पदं चानन्त्यमश्नुते ॥ ३८ ॥ सौभाग्यारोग्यरूपायुर्वस्त्रालंकारभूषणैः ॥ न वियुक्तो भवेद्राजन्वर्षायुतशतत्रयम् ॥ ३९ ॥ यस्तु द्वादश वर्षाणि सौभाग्यशयनं व्रतम् ॥ करोति सप्त चाष्टौ वा श्रीकण्ठभुवनेश्वरैः ॥ पूज्यमानो [3]भवेत्सम्यग्यावत्कल्पायुतत्रयम् ॥ ४० ॥ नारी वा कुरुते या तु कुमारी वा नरेश्वर ॥ सापि तत्फलमाप्नोति देव्यनुग्रहलालिता ॥ ४१ ॥ शृणुयादपि

---

[1] प्राप्य–इ० पा० । [2] प्रीयतां ललिता देवी–इ० पा० । [3] वसेत्स्वर्गे–इ० पा० ।

यश्चैतत्प्रदद्यादथ वा मतिम् ॥ सोऽपि विद्याधरो भूत्वा स्वर्गलोके चिरं वसेत् ॥ ४२ ॥ इदमिह मदनेन पूर्वमिष्टं चरितमिदं शशबिंदुना व्रतं वै ॥
सुरपतिधनदेशवायुसोमैश्चरितं दं क[1]रुणेन बंदिना च ॥ ४३ ॥ यानीह दत्तानि पुरा नरेंद्रैर्दानानि धर्मार्थयशस्कराणि ॥ निर्माल्यवंति प्रति
मानि तानि स नाम साधुः पुनराददानः ॥ ४४ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि सौभाग्याष्टकतृतीयाव्रतं नाम पंचविंशतितमोऽ
ध्यायः ॥ २५ ॥ ॥ छ ॥ युधिष्ठिर उवाच ॥ सौभाग्यारोग्यफलदं विपक्षक्षयकारकम् ॥ भुक्तिमुक्तिप्रदं किञ्चिद्व्रतं ब्रूहि जनार्दन ॥ १ ॥
॥ ॥ श्रीकृष्ण उवाच ॥ ॥ यदुमायै पुरा देव उवाचासुरसूदनः ॥ कथासु संप्रवृत्तासु ललिताराधनं प्रति ॥ २ ॥ तदिदानीं प्रवक्ष्यामि भुक्तिमुक्ति
फलप्रदम् ॥ नराणामथ नारीणामाराधनमनुत्तमम् ॥ ३ ॥ शृणुष्वावहितो भूत्वा सर्वपापप्रणाशनम् ॥ नभस्ये वाथ वैशाखे पुनर्मार्गशिरेऽथ
वा ॥ ४ ॥ शुक्लपक्षतृतीयायां स्नातः सद्गौरसर्षपैः ॥ गोरोचनसुगोमूत्रमुस्तागोशकृतं तथा ॥ दधिचंदनसंमिश्रं ललाटे तिलकं न्यसेत् ॥ ५ ॥
सौभाग्यारोग्यकृद्यत्स्यात्सदा च ललिताप्रियम् ॥ प्रतिपक्षं तृतीयायां बद्ध्वा वा पीतवाससी ॥ ६ ॥ धारयेदथ वा रक्तपीतानि कुसुमानि च ॥
विधवाप्यनुरक्तानि कुमारी शुक्लवाससी ॥ ७ ॥ देव्यर्चां पंचगव्येन ततः क्षीरेण केवलम् ॥ स्नपयेन्मधुना तद्वत्पुष्पगन्धोदकेन च ॥ ८ ॥ पूज
येच्छुक्लपुष्पैश्च फलैर्नानाविधैरपि ॥ धान्यकाजाजिलवणगुडक्षीरघृतादिभिः ॥ ९ ॥ शुक्लाक्षतैस्तिलैरर्च्यां ललितां यः सदार्चयेत् ॥ आपादा
द्यर्चनं कुर्याद्गौर्याः सम्यक्समासतः ॥ १० ॥ वरदायै नमः पादौ तथा गुल्फौ श्रियै नमः ॥ अशोकायै नमो जंघे भवान्यै जानुनी तथा ॥ ११ ॥
ऊरू मांगल्यकारिण्यै कामदेव्यै तथा कटिम् ॥ पद्मोद्भवायै जठरमुरः कामश्रियै नमः ॥ १२ ॥ करौ सौभाग्यवासिन्यै बाहू शशिमुखश्रियै ॥
मुखं कंदर्पवासिन्यै पार्वत्यै तु स्मितं तथा ॥ १३ ॥ गौर्य्यै नमस्तथा नासां सुनेत्रायै च लोचने ॥ तुष्ट्यै ललाटफलकं कात्यायन्यै शिरस्तथा ॥
॥ १४ ॥ नमो गौर्यै नमः सृष्ट्यै नमः कांत्यै नमः श्रियै ॥ रंभायै ललितायै च वासुदेव्यै नमोनमः ॥ १५ ॥ एवं संपूज्य विधिवदग्रतः पद्म
मालिखेत् ॥ पत्रैर्द्वादशभिर्यु[2]क्तं कुंकुमेन सकर्णिकम् ॥ १६ ॥ पूर्वेण विन्यसेद्गौरीमपर्णां च ततः परम् ॥ भवानीं दक्षिणे तद्वद्रुद्राणीं च ततः
परम् ॥ १७ ॥ विन्यसेत्पश्चिमे सौम्यां ततो मदनवासिनीम् ॥ वायव्यां पाटलावासामुत्तरेण ततो ह्युमाम् ॥ १८ ॥ लक्ष्मीं स्वाहां स्वधां तुष्टिं
मंगलां कुमुदां सतीम् ॥ रुद्राणीं मध्यतः स्थाप्य ललितां कर्णिकोपरि ॥ कुसुमैरक्षतैः शुभ्रैर्नमस्कारेण विन्यसेत् ॥ १९ ॥ गीतमंगलघोषं च

---

[1] वरुणेन—इ० पा० । [2] व्यक्तम्—इ० पा० ।

कारयित्वा सुवासिनीः ॥ पूजयेद्रक्तवासोभी रक्तमाल्यानुलेपनैः ॥ २० ॥ सिंदूरं स्नानचूर्णं च तासां शिरसि पातयेत् ॥ सिंदूरं कुंकुमं स्नानमिष्टं
सत्याः सदा यतः ॥ २१ ॥ नभस्ये पूजयेद्गौरीमुत्पलैरसितैस्तथा ॥ बन्धुजीवैराश्वयुजे कार्तिके शतपत्रकैः ॥ २२ ॥ कुन्दपुष्पैर्मार्गशिरे पौषे वै
कुंकुमेन च ॥ माघे तु पूजयेद्देवीं सिंदुवारेण भक्तितः ॥ २३ ॥ जात्या तु फाल्गुने पूज्या पार्वती पांडुनंदन ॥ चैत्रे च मल्लिकाशोकैर्वैशाखे गंध
पाटलैः ॥ २४ ॥ ज्येष्ठे कमलमंदारैराषाढे चंपकांबुजैः ॥ कदंबैरथ मालत्या श्रावणे पूजयेदुमाम् ॥ २५ ॥ गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशो
दकम् ॥ बिल्वपत्रार्कपुष्पं च गवां शृंगोदक तथा ॥ पंचगव्यं तथा बिल्वं प्राशयेत्क्रमशः सदा ॥२६॥ एतद्भाद्रपदाद्यं तु प्राशनं समुदाहृतम् ॥
प्रतिपक्षं द्वितीयायां मया प्रोक्तं वरानने ॥ २७ ॥ ब्राह्मणं ब्राह्मणीं चैव शिवं गौरीं प्रकल्प्य च ॥ भोजयित्वार्चयेद्भक्त्या वस्त्रमाल्यानुलेपनैः ॥
पुंसे पीतांबरे दत्त्वा स्त्रियै कौसुंभवाससी ॥ २८ ॥ निष्पावाजाजिलवणमिक्षुदंडं गुणान्वितम् ॥ स्त्रियै दद्यात्फलं पुंसे सुवर्णोत्पलसंयुतम् ॥
॥ २९ ॥ यथा न देवदेवेशस्त्वां परित्यज्य गच्छति ॥ तथा मां संपरित्यज्य पतिर्नान्यत्र गच्छतु ॥ ३० ॥ कुमुदा विमलानंता भवानी
वसुधा शिवा ॥ ललिता कमला गौरी सती रंभाथ पार्वती ॥ ३१ ॥ नभस्यादिषु मासेषु प्रीयतामित्युदीरयेत् ॥ व्रतांते शयनं दद्यात्सुवर्ण
कमलान्वितम् ॥ ३२ ॥ मिथुनानि चतुर्विंशत्तदर्द्धं सकृदर्च्चयेत् ॥ अष्टावष्टावथ पुनश्चातुर्मास्ये समर्चयेत् ॥ ३३ ॥ तथोपदेष्टारमपि पूजयेद्य
त्नतो गुरुम् ॥ न पूज्यते गुरुर्यत्र सर्वास्तत्राफलाः क्रियाः ॥ ३४ ॥ उक्तानंततृतीयैषा सदानंतफलप्रदा ॥ सर्वपापहरा देवी सौभाग्यारोग्य
वर्धिनी ॥ ३५ ॥ न चैनां वित्तशाठ्येन कदाचिदपि लंघयेत् ॥ नरो वा यदि वा नारी वित्तशाठ्यात्पतत्यधः ॥ ३६ ॥ गर्भिणी सूतिका
नक्तं कुमारी चाथ रोगयुक् ॥ यदा श्रद्धा तदान्येन क्रियमाणं तु कारयेत ॥ ३७ ॥ इमामनंतफलदां तृतीयां यः समाचरेत् ॥ कल्पकोटि
शतं साग्रं शिवलोके स पूज्यते ॥ ३८ ॥ वित्तहीनोऽपि कुर्वीत वर्षत्रयमुपोषणैः ॥ [1]पुष्पपत्रविधानेन सोपि तत्फलमाप्नुयात् ॥ ३९ ॥ नारी
वा कुरुते या तु कुमारी विधवा तथा ॥ साऽपि तत्फलमाप्नोति गौर्यनुग्रहभाविता ॥४०॥ इति पठति शृणोति वा य इत्थं गिरितनयाव्रतमिंदु
लोकसंस्थः ॥ मतिमपि च ददाति सोऽपि देवैरमरवधूजनकिंनरैश्च पूज्यः ॥ ४१ ॥ ॥ (इति अनंततृतीयाव्रतम्) ॥ ॥ श्रीकृष्ण उवाच ॥ ॥
अन्यामपि प्रवक्ष्यामि तृतीयां पापनाशिनीम् ॥ रसकल्याणिनीं नाम पुरा कल्पविदो विदुः ॥४२॥ माघमासे तु संप्राप्य तृतीयां शुक्लपाक्षिकीम् ॥

---

१ पुष्पमंत्रविधानेन–इ० पा० ।

प्रातर्गव्येन पयसा तिलैः स्नानं समाचरेत् ॥ ४३ ॥ स्नापयेन्मधुना देवीं तथैवेक्षुरसेन च ॥ पुनः पूजा प्रकर्तव्या जात्या वा कुंकुमेन वा ॥४४॥
दक्षिणांगानि संपूज्य ततो वामानि पूजयेत् ॥ ललितायै नमः पादौ गुल्फं तद्वदथार्चयेत् ॥ ४५ ॥ जंघे जानू तथा सत्यै तथोरश्च श्रियै नमः ॥
मदनालसायै तु कटिं मदनायै तथोदरम् ॥४६॥ स्तनौ मदनवासिन्यै कुमुदायै च कंधरम् ॥ भुजान्भुजाग्रं माधव्यै कमलायै ह्युपस्थकम् ॥४७॥
भ्रूललाटे च रुद्राण्यै शंकरायै तथालकान् ॥ मुकुटं विश्ववासिन्यै पुनःकांत्यै तथालकान् ॥४८॥ नेत्रं चक्रावधारिण्यै पुष्ट्यै च वदनं पुनः ॥ उत्कं
ठिन्यै नमः कंठमनंतायै तु कंधराम् ॥ ४९ ॥ रंभायै वामबाहुं च विशोकायै नमः परम् ॥ हृदयं मन्मथादित्यै पाटलायै नमोनमः ॥ ५० ॥
एवं संपूज्य विधिवद्द्विजदांपत्यमर्चयेत् ॥ भोजयित्वान्नदानेन मधुरेण विमत्सरः ॥ ५१ ॥ सलड्डुकं वारिकुंभं शुक्लांबरयुगं ततम् ॥ दत्त्वा सुवर्ण
कलशं गंधमाल्यैरथार्चयेत् ॥ ५२ ॥ प्रीयतामत्र कुमुदा गृह्णीयाल्लवणव्रतम् ॥ अनेन विधिना देवीं मासिमासि समर्चयेत् ॥ ५३ ॥ लवणं वर्ज
येन्माघे फाल्गुने च गुडं पुनः ॥ तवराजं तथा चैत्रे वर्ज्यं च मधु माधवे ॥ ५४ ॥ पारकं ज्येष्ठमासे तु आषाढे जीरकं तथा ॥ श्रावणे वर्जये
त्क्षीरं दधि भाद्रपदे तथा ॥ ५५ ॥ घृतमश्वयुजे तद्वद्वर्जयेद्या च मज्जिका ॥ धान्यकं मार्गशीर्षे तु पौषे वर्ज्या तु शर्करा ॥ ५६ ॥ व्रतांते करका
पूर्णा एतेषां मासिमासि च ॥ दद्याद्विकालवेलायां भक्षपात्रेण संयुतान् ॥ ५७ ॥ तंडुलान्छ्वेतवर्णांश्च संयावमधुपूरिकाः ॥ घारिका घृतपूरांश्च मंड
कान्क्षीरशाककम् ॥ ५८ ॥ दध्यन्नं षड्विधं चैव भिंडयः शाकवर्तिकाः ॥ माघादौ क्रमशो दद्यादेतानि करकोपरि ॥ ५९ ॥ कुमुदा माधवी गौरी
रंभा भद्रा जया शिवा ॥ उमा शची सती तद्वन्मंगला रतिलालसा ॥ ६० ॥ क्रमान्माघादि सर्वत्र प्रीयतामिति कीर्तयेत् ॥ चर्वंतं पंचगव्यं च
प्राशनं समुदाहृतम् ॥ ६१ ॥ उपवासी भवेन्नित्यमशक्तो दक्षिणे करे ॥ पुनर्माघे तु संप्राप्य शर्करां करकोपरि ॥ ६२ ॥ कृत्वा तु कांचनीं गोधां
पंचरत्नसमन्विताम् ॥ उमामंगुष्ठमात्रां च सुधासूत्रे कमंडलुम् ॥ ६३ ॥ तद्वद्गोमिथुनं सर्वं सुवर्णास्यं सितं परम् ॥ सवस्त्रभाजनं दत्त्वा भवानी
प्रीयतामिति ॥ ६४ ॥ अनेन विधिना यश्च रसकल्याणिनीव्रतम् ॥ कुर्यात्स सर्वपापेभ्यस्तत्क्षणादेव मुच्यते ॥ ६५ ॥ भवार्बुदसहस्रं तु न दुःखी
जायते क्वचित् ॥ अग्निष्टोमसहस्रेण यत्फलं तदवाप्नुयात् ॥ ६६ ॥ नारी वा कुरुते या तु कुमारी वा युधिष्ठिर ॥ विधवा वा वराकी वा सापि
तत्फलभागिनी ॥ सौभाग्यारोग्यसंपन्ना गौरीलोके महीयते ॥ ६७ ॥ इति पठति य इत्थं यः शृणोति प्रसंगात्सकलकलुषमुक्तः पार्वतीलोक

मेति ॥ मतिमपि च नराणां यो ददाति प्रियार्थं विपुलमतिजनानां नायकः स्यादमोघम् ॥ ६८ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे रसकल्याणिनीव्रतवर्णनं नाम षड्विंशतितमोऽध्यायः ॥ २६ ॥ छ ॥ श्रीकृष्ण उवाच ॥ ॥ तथा चान्यां प्रवक्ष्यामि तृतीयां पापनाशिनीम् ॥ लोकेषु नाम्ना विख्यातामार्द्रानंदकरीमिमाम् ॥ १ ॥ यदा शुक्लतृतीयायामाषाढर्क्षं भवेत्क्वचित् ॥ ब्रह्मर्क्षं चाथ मार्गं वा व्रतं ग्राह्यं तदा शुभम् ॥ २ ॥ दर्भगंधोदकैः स्नानं तदा सम्यक्समाचरेत् ॥ शुक्लमाल्यांबरधरः शुक्लगंधानुलेपनः ॥ ३ ॥ भवानीमर्चयेद्भक्त्या शुक्लपुष्पैः[1] सुगंधिभिः ॥ महादेवेन सहितामुपविष्टां वरासने ॥४॥ वासुदेव्यै नमः पादौ शंकराय नमो हरेः ॥ जंघे शोकविनाशिन्यायानन्दाय नमः प्रभो॥ ॥ ५ ॥ रंभायै पूजयेदूरू शिवाय च पिनाकिनः ॥ आदित्यै च कटिं पूज्या शूलिनः शूलपाणये ॥ ६ ॥ माधव्यै च तथा नाभिमथ शंभोर्भवाय वै ॥ स्तनावानंदकारिण्यै शंकरायेंदुधारिणे ॥ ७ ॥ उत्कंठिन्यै नमः कंठं नीलकंठाय वै हरेः ॥ करावुत्पलधारिण्यै रुद्राय जगतीपतेः ॥८॥ बाहुं च परिरंभिण्यै नृत्यशीलाय वै हरेः ॥ ९ ॥ देव्या मुखं विलासिन्यै वृषेशाय पुनर्विभोः ॥ स्मितं सस्मरशीलायै विश्ववक्राय[2] वै विभोः ॥ ॥ १० ॥ नेत्रं मदनवासिन्यै विश्वधाम्ने त्रिशूलिने ॥ भ्रुवौ रतिप्रियायै च तांडवेशाय वै विभोः ॥ ११ ॥ देव्यै ललाटमिंद्राण्यै हव्यवाहाय वै विभोः ॥ स्वाहायै मुकुटं देव्या विभोः पञ्चशराय वै ॥ १२ ॥ विश्वकायै विश्वमुख्यै विश्वपादकरौ शिवौ ॥ प्रसन्नवदनौ वंदे पार्वतीपरमेश्वरौ ॥ ॥ १३ ॥ एवं संपूज्य विधिवदग्रतः शिवयोः पुनः ॥ पद्मोत्पलानि च तथा नानावर्णानि कारयेत् ॥ १४ ॥ शङ्खचक्रे सकटके स्वस्तिकं वर्द्धमानकम् ॥ गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ॥ १५ ॥ शृंगोदकं बिल्वपत्रं वारि कुंभान्वितं तथा ॥ उशीरनीरं तद्वच्च यवचूर्णोदकं ततः ॥ १६ ॥ तिलोदकं च संप्राप्य स्वप्यान्मार्गशिरादिषु ॥ प्रतिपक्षद्वितीयायां प्राशनं समुदाहृतम् ॥ १७ ॥ सर्वत्र शुक्लपुष्पाणि प्रशस्तानि शिवार्चने ॥ दानकालेषु सर्वेषु मंत्रमेतमुदीरयेत् ॥ १८ ॥ गौरी मे प्रीयतां नित्यमघनाशाय मंगला ॥ सौभाग्यायास्तु ललिता भवानी[3] सर्वसिद्धये ॥ १९ ॥ संवत्सरांते लवणं गुडकुंभं समर्जितम् ॥ चन्दनं नेत्रपट्टं च सितवस्त्रयुगान्वितम् ॥ उमामहेश्वरं हैमं तद्वदिक्षुफलैर्युतम् ॥ २० ॥ प्रस्तरावरणं शय्यां सविश्रामां निवेदयेत् ॥ सपत्नीकाय विप्राय गौरी मे प्रीयतामिति ॥ २१ ॥ आर्द्रानन्दकरी नाम तृतीयैषा सनातनी ॥ यामुपोष्य नरो याति शंभोस्तत्परमं पदम् ॥ २२ ॥ इह लोके यमानंदं प्राप्नोति धनसंचयात् ॥ आयुरारोग्यसंपन्नो न

---

[1] रक्तपुष्पैः—इ० पा० । [2] विश्वचक्राय—इ० पा० । [3] शर्वाणी—इ० पा० ।

किञ्चिच्छोकमाप्नुयात् ॥ २३ ॥ नारी वा कुरुते या तु कुमारी विधवा तथा ॥ सापि तत्फलमाप्नोति देव्यनुग्रहलालिता ॥ २४ ॥ प्रतिपक्षमुपोष्यैवं मंत्रार्चनविधानतः ॥ रुद्राणीलोकमाप्नोति पुनरावृत्तिवर्जितम् ॥ २५ ॥ य इदं शृणुयान्नित्यं श्रावयेद्वापि मानवः ॥ शक्रलोके सगंधर्वैः पूज्यतेऽब्द[1]शतत्रयम ॥ २६ ॥ आनंददां सकलदुःखहरां तृतीयां या स्त्री करोति विधिवत्सधवाधवा च ॥ सा स्वे गृहे सुखशतान्यनुभूय भूयो गौरीपुरं सदयिता मुदिता प्रयाति ॥ २७ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे आर्द्रानन्दकरीतृतीयाव्रतं नाम सप्तविंशतितमोऽध्यायः ॥ २७ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ चैत्रे भाद्रपदे माघे रूपसौभाग्यपुत्रदम् ॥ तृतीयात्रयमेतन्मे कृष्ण कस्मान्न कीर्तितम् ॥ १ ॥ किमहं भक्तिरहितस्त्रयीमार्गातिगो नरः ॥ सुप्रसिद्धं जगत्येतद्गोपितं केन हेतुना ॥ २ ॥ भवान्सर्वार्थानुकूलः सर्वज्ञ इति मे मतिः ॥ श्रीकृष्ण उवाच ॥ व्रतं चैतज्जगत्ख्यातं नाख्यातं तेन ते मया ॥३॥ यद्यस्ति श्रवणे बुद्धिः श्रूयतां पाण्डुनन्दन ॥ कोऽन्यः श्रोता जगत्यस्मिन्भवता सदृशो भुवि ॥ ४ ॥ जया च विजया चैव उमायाः परिचारिके ॥ आगत्य मुनिकन्याभिः पृष्टेभीष्टफलेच्छया ॥ ५ ॥ भवत्यौ सर्वदा देव्याश्चित्तवृत्तिविदौ किल ॥ केन व्रतोपचारेण कस्मिन्नहनि पार्वती ॥ पूजिता तुष्टिमभ्येति मंत्रैः कैश्च वरानने ॥ ६ ॥ तासां तद्वचनं श्रुत्वा जया प्रोवाच सादरम् ॥ श्रूयताभिधास्यामि सर्वकामफलप्रदम् ॥ व्रतमुत्सवसंयुक्तं नरनारी मनोरमम् ॥ ७ ॥ चैत्रे सिततृतीयायां दन्तधावनपूर्वकम् ॥ उपवासस्य नियमं गृह्णीयाद्भक्तिभावितम् ॥ ८ ॥ सकुंकुमं सतांबूलं सिन्दूरं रक्तवाससी ॥ विध[2]वा सोपवासाप्यवैधव्यकरणं परम् ॥ ९ ॥ विधवा याति मार्गेण कुमारी तु यदृच्छया ॥ कुर्यादभ्यर्चनविधिं श्रूयतां मंत्रविक्रमः ॥ १० ॥ नेत्रपट्टपटीवस्त्रैर्वस्त्रमण्डपिकां शुभाम् ॥ कारयेत्कुसुमामोददिव्याभरणभूषिताम् ॥ ११ ॥ प्रवाललंबितव्राताामंतर्दिव्यवितानिकाम् ॥ विन्यस्तपूर्णकलशां सत्पीठस्थापितद्विजाम् ॥ १२ ॥ पुरतः कारयेत्कुण्डं हस्तमात्रं समेखलम् ॥ ततः स्नातानुलिप्ता च परिधाय सुवाससी ॥ १३ ॥ देवान्पितॄन्समभ्यर्च्य ततो देवीगृहं व्रजेत् ॥ नामाष्टकेन संपूज्या गौरी गोपतिवल्लभा ॥ १४ ॥ तत्कालप्रभवैः पुष्पैर्गन्धालिबकुलाकुलैः ॥ कुंकुमेन समा[3]लभ्य कर्पूरागुरुचन्दनैः ॥ १५ ॥ एवं संपूज्य विधिवत्सद्धूपेनाधिवासयेत् ॥ पार्वती ललिता गौरी गांधारी शाङ्करी शिवा ॥ उमा सती समुद्दिष्टं नामाष्टकमिदं मया ॥ १६ ॥ लड्डुकैः खण्डवेष्टैश्च गुडकैः सिंहकेसरैः ॥ सोमालकैः कोकसरैः

---

१ अब्दशतद्वयम्–इ० पा० । २ बिभृयात्सोपवासापि–इ० पा० । ३ समालक्ष्य–इ० पा० ।

खण्डखाद्यकरंबकैः ॥ १७ ॥ घृतपक्वैर्बहुविधैः सुपक्वफलकल्पितैः ॥ दृष्टिप्राणहरैर्हृद्यैर्नैवेद्यैः प्रीणयेदुमाम् ॥ १८ ॥ कंटुखंडं जीरकं च कुंकुमं लवणार्द्रकम् ॥ इक्षुदंडानैक्षवं च हरिद्रार्द्रान्पुरो न्यसेत् ॥ १९ ॥ नारिकेलानामलकान्मातुलुंगान्सदाडिमान् ॥ कूष्माण्डकर्कटीवृंतनारङ्गपनसादिकान् ॥ २० ॥ कालोद्भवानि चान्यानि फलानि विनिवेदयेत् ॥ गृहाद्युलूखलशिलाशूर्पान्प्रणतिभिः सह ॥ २१ ॥ नेत्रांजनशलाकाश्च नखरेचनकानि च ॥ दर्पणं वंशपात्राणि भवान्यै विनिवेदयेत् ॥ २२ ॥ शंखतूर्यनिनादेन गीतमङ्गलनिस्वनैः ॥ भक्त्या संपूजयेद्देवीं स्वशक्त्या शिववल्लभाम् ॥ २३ ॥ ततोऽस्तसमये भानोः कुमार्यः करकैर्नवैः ॥ स्नानं कुर्युर्मुदा युक्ताः सौभाग्यारोग्यवृद्धये ॥ २४ ॥ यामेयामे गते स्नानं देवीपूजनमेव च ॥ तैरेव नामभिर्होमस्तिलाज्येन प्रशस्यते ॥ २५ ॥ पद्मासनस्थिता साध्वी तेनैवार्द्रेण वाससा ॥ गौरीमुखेक्षणपरा तां रात्रिमतिवाहयेत् ॥ २६ ॥ काश्चिद्वाद्यंति संहृष्टाः काश्चिन्नृत्यंति हर्षिताः ॥ कथयंति कथाः काश्चिद्देव्यास्तत्र महोत्सवे ॥ २७ ॥ गीततालानुसंबद्धमनुद्धतमनाकुलम् ॥ नृत्यंति स्म पुरे देव्याः काश्चिदुल्लसितभ्रुवः ॥ २८ ॥ नृत्येन हृष्यति हरो गौरी गीतेन तुष्यति ॥ सद्भावेनाथ वा सर्वे गच्छंति परमां मुदम् ॥ २९ ॥ सुवासिनीभ्यस्तांबूलं कुंकुमं कुसुमानि च ॥ प्रदेयं जागरवत्या चान्येषामपि किंचन ॥ ३० ॥ नटैर्विटैर्भटैश्चैव तथा प्रेक्षणकोत्सवैः ॥ सखिभिः सहिता रात्रिं गायन्नृत्यन्हितां नयेत् ॥ ३१ ॥ एवं प्रभातसमये स्नात्वा संपूज्य पार्वतीम् ॥ ततो वै सा समारोहेद्वस्त्रालंकृततोरणम् ॥ ३२ ॥ तोलयेत्सा तथासीनं गुडेन लवणेन च ॥ कुंकुमेनाथ वा शक्त्या कर्पूरागरुचंदनैः ॥ ३३ ॥ पर्वतानामपिच्छेदैः केचिदिच्छंति सूरयः ॥ कुंडमंडपसंभारैर्मंत्रैस्तत्रैव शोभयेत् ॥ ३४ ॥ लवणेन सहात्मा हि तोल्यते च गुडेन वा ॥ कयापि भक्तिपरया सौभाग्यमतुलीकृतम् ॥ ३५ ॥ एवं देवीं प्रणम्यार्यां क्षमाप्य गृहमाविशेत् ॥ आमंत्र्य शास्त्रकुशलानाचारविधिपारगान् ॥ ॥ ३६ ॥ अन्नं च मधुरप्रायं भोजयित्वा सुवासिनीः ॥ स्वयं भुंजीत सहसा ज्ञातीजनबुधैः स्वकैः ॥ ३७ ॥ यच्च देव्याः पुरो दत्तं नैवेद्यादि तदिच्छया ॥ गृहं प्रतिनयेत्सर्वं विभज्याभ्रांतिमानसा ॥ ३८ ॥ ततो दद्याद्गृहस्थेभ्यः कृतकृत्या भवेत्तदा ॥ विधिर्भाद्रपदेऽप्येष सुसौन्दर्यप्रदायकः ॥ ३९ ॥ सप्तधान्यस्वरूपां च शूर्पे संपूजयेदुमाम् ॥ गोमूत्रप्राशनं ह्यत्र तेन गोमूत्रसंज्ञिता ॥ ४० ॥ माघमासतृतीयायां विशेषः श्रूयतामिति ॥ पूर्वोक्तं सकलं कृत्वा प्रभाते यवसंस्तरम् ॥ तोलयित्वा कुंदपुष्पैः पूजयेत्तत्सुतामिति ॥ ४१ ॥ एतेन कारणेनोक्ता चतुर्थी कुन्दसंज्ञया ॥ तृतीयाख्यं मयैतत्ते कथितं सर्वकारणम् ॥ जयया मुनिकन्यानां यत्पुरा समुदाहृतम् ॥ ४२ ॥ श्रीकृष्ण उवाच ॥ आसीद्विदर्भ

नगरे वेश्या सर्वांगसुंदरी ॥ तया ब्राह्मणवाक्येन सर्वमेतत्कृतं पुरा ॥ ४३ ॥ भुक्त्वा भोगान्महीपृष्ठे दत्त्वा दानं यथेप्सया ॥ ४४ ॥ कालेन सम
नुप्राप्ता मरणं मनुजेश्वर ॥ अचिन्त्या राजदुहिता सा बभूवातिशोभना ॥ अवंतिसुन्दरी नाम देवानामपि सुन्दरी ॥ ४५ ॥ यदि वक्त्रसहस्राणां
सहस्रं स्यात्कथंचन ॥ तथापि निर्वर्णयितुमशक्या सा सुलोचना ॥ ४६ ॥ चैत्रतृतीयामाहात्म्यात्सा बभूव प्रभावती ॥ मातापित्रोरतिप्रेष्ठा शिष्टा
न्यजनवल्लभा ॥ ४७ ॥ लब्धाब्धिसंभवा यद्वत्कृष्णेनाक्लिष्टकर्मणा ॥ ततः सा बुभुजे भोगान्भर्त्रा सार्द्धं मुदा सती ॥ ४८ ॥ यददाद्ब्राह्मणेभ्यः सा
भूषणं कटकादिकम् ॥ तत्प्रभावेण सा लेभे सौभाग्यं किं ततः परम् ॥ ४९ ॥ पुत्रांश्च जनयामास विष्णुशक्रपराक्रमान् ॥ सर्वास्त्रशस्त्रकुशला
न्वेदोक्तविधिपारगान् ॥ ५० ॥ एवं रूपं महत्प्राप्य सौभाग्यं पुत्रसंपदम् ॥ भर्त्रा सहैव मरणमंते प्राप्य पतिव्रता ॥ ५१ ॥ शक्रादिलोकपा
लानां भवनेषु यथाक्रमम् ॥ आक्रम्य ब्रह्मलोकं च जगाम शिवसात्मताम् ॥ ५२ ॥ एवं यान्यापि कुरुते नारी व्रतमिदं शुभम् ॥ सा रूपसौभा
ग्यसुतान्प्राप्य स्वर्गे महीयते ॥ ५३ ॥ न दुर्भगा कुले तस्याः काचिद्भवति कन्यका ॥ न दुर्विनीतश्च सुतो न भृत्योऽप्रियकृद्भवेत् ॥ ५४ ॥ न
दारिद्र्यं गृहे तस्मिन्न व्याधिरुपजायते ॥ यत्र सा रमते साध्वी ध्मातचामीकरप्रभा ॥ ५५ अन्याश्च याश्चरिष्यंति ब्राह्मणानुमते व्रतम् ॥ संपूज्य
वाचकं भक्त्या भूषणाच्छादनादिभिः ॥ ५६ ॥ ताः सर्वसुखसंपन्ना अविपन्नमनोरथाः ॥ भविष्यंति कुरुश्रेष्ठ तस्यै देवि नमोस्तु ते ॥ ५७ ॥
माघे महार्घ्यमणिमंडितपादपीठां चैत्रे विचित्रकुसुमोत्करचर्चितांगीम् ॥ शूर्पप्ररूढनवसस्यमयीं नभस्ये संपूज्य शंभुदयितां प्रभवंति नार्यः ॥
॥ ५८ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे चैत्रभाद्रपदमाघतृतीयाव्रतवर्णनं नामाष्टविंशतितमोऽध्यायः ॥ २८ ॥
॥ ॥ युधिष्ठिर उवाच ॥ ॥ शुक्लपक्षतृतीयास्तु बहवः समुदाहृताः ॥ आनन्तर्यव्रतं ब्रूहि तृतीयोभयसंयुतम् ॥ १ ॥ हिताय सर्वभूतानां ललनानां
विशेषतः ॥ नाम प्राशननैवेद्यैर्मासिमासि पृथक्पृथक् ॥ २ ॥ श्रीकृष्ण उवाच ॥ ॥ ब्रह्मविष्णुमहेशाद्यैर्यथोक्तं सुरसत्तमैः ॥ अपूर्वं सर्वमंत्राणामानं
तर्यव्रतंशृणु ॥ ३ ॥ आदौ मार्गशिरे मासि व्रतमेतत्समाचरेत् ॥ नक्तं कुर्याद्द्वितीयायां तृतीयायामुपोषिता ॥ ४ ॥ उमां देवीं समभ्यर्च्य पुष्पगंधा
दिभिः क्रमात् ॥ शर्करापुत्रिकां शक्त्या प्रणिपत्य निवेदयेत् ॥ ५ ॥ संप्राश्य दधि रात्रौ च स्वप्याद्विगतमत्सरा ॥ प्रभाते विधिवद्भक्त्या मिथुनं
भोजयेत्सुधीः ॥६॥ अश्वमेधमवाप्नोति समग्रं नात्र संशयः ॥ तथा कृष्णतृतीयायां सोपवासा जितेन्द्रिया ॥ ७ ॥ जपेत्कात्यायनीं नाम नालि
केरं निवेदयेत् ॥ स्वप्यात्प्राश्य पयो रात्रौ कामक्रोधविवर्जिता ॥ दांपत्यं सुभगं भोज्यं गोमेधफलमाप्नुयात् ॥ ८ ॥ पौषस्यादितृतीयायां सोप

वासा जितेन्द्रिया ॥ गौरीं नाम तु संपूज्य लड्डुकान्विनिवेदयेत् ॥ ९ ॥ स्वप्यात्प्राश्य घृतं रात्रौ त्यक्त्वा कामं तदग्रतः॥ प्रभाते मिथुनं भोज्यं
नरमेधफलं भवेत् ॥ १० ॥ एवं कृष्णतृतीयायां पार्वतीमिति पूजयेत् ॥ निवेदयान्नं शष्कुल्यो गोमयं प्राशयेन्निशि ॥ दांपत्यं विविधं भोज्यम
श्वमेधफलं लभेत् ॥ ११ ॥ माघस्य शुक्लपक्षे तु तृतीयायामुपोषितः ॥ सुरनायिकां च संपूज्य खण्डबिल्वं निवेदयेत् ॥ १२ ॥ ततः कुशोदकं
प्राश्य स्वप्याद्भूमौ जितेन्द्रिया ॥ प्रभाते मधुरान्नेन मिथुनं भोज्य भक्तितः ॥ क्षमाप्यांते नमस्कृत्य इति स्वर्णफलं लभेत् ॥ १३ ॥ पुनरेतत्ततो
माघे कृष्णपक्षे शुचिव्रता ॥ आर्यां नाम्ना प्रपूज्याथ खाद्यकानि निवेदयेत् ॥ १४ ॥ मधु प्राश्य स्वपेद्रात्रौ कामक्रोधविवर्जिता ॥ मिथुनं
भोजयित्वा तु वाजपेयफलं लभेत् ॥ १५ ॥ एवं वै फाल्गुने मासि सोपवासा शुचिव्रता ॥ भद्रीं नाम प्रपूज्याथ कासारं विनिवेदयेत् ॥ १६ ॥
सुप्राश्य शर्करां चाथ स्वप्याद्रात्रौ विमत्सरा ॥ प्रभाते मिथुनं भोज्यं सौत्रामणिफलं लभेत् ॥ १७ ॥ पुनः कृष्णतृतीयायां फाल्गुनस्यैव भारत॥
विशालाक्षीं समभ्यर्च्य पूरिका विनिवेदयेत् ॥ १८ ॥ सोदकांस्तंडुलान्दत्त्वा स्वप्याद्भूमौ मनस्विनी ॥ भोजयेन्मिथुनं प्रातरग्निष्टोमफलं लभेत्
॥ १९ ॥ चैत्रस्यादितृतीयायां शुचिर्भूता जितेन्द्रिया ॥ श्रियं देवीं यजेद्भक्त्या वटकान्विनिवेदयेत् ॥ २० ॥ बिल्वपत्रं ततः प्राश्य स्वप्याद्ध्यान
परायणा ॥ प्रातरुत्थाय मद्भक्त्या मिथुनं पूजयेत्सुधीः ॥ प्रणिपत्य क्षमाप्यैवं राजसूयफलं लभेत् ॥ २१ ॥ पुनः कृष्णतृतीयायां चैत्रे
सम्यगुपोषिता ॥ कालीं नाम समभ्यर्च्य पिष्टं प्राश्य स्वपेन्निशि ॥ २२ ॥ पूपकानि निवेद्याथ कुर्याद्रात्रौ प्रजागरम् ॥ मिथुनानि
च संभोज्य अतिरात्रफलं भवेत् ॥ २३ ॥ एवं वैशाखमासे तु सोपवासा जितेन्द्रिया ॥ पूजयेच्चण्डिकां देवीं मधुकानि निवेदयेत् ॥ २४ ॥
श्रीखंडं चंदनं लिप्त्वा स्वप्याद्देव्यग्रतो भुवि ॥ भोजयित्वा च दांपत्यं चांद्रायणफलं लभेत् ॥ २५ ॥ तथा कृष्णतृतीयायां सोपवासा
विमत्सरा ॥ पूजयेत्कालरात्रिं तु गन्धपुष्पैः सदीपकैः ॥ २६ ॥ सुराज्यं यावकं दत्त्वा तिलान्भुंजन्स्वपेन्निशि ॥ प्रभाते मिथुनं भोज्यम
तिकृच्छ्रफलं लभेत् ॥ २७ ॥ ज्येष्ठे सिततृतीयायां ह्युपवासकृतां वरा ॥ शुभां देवीं समभ्यर्च्य आम्राणि विनिवेदयेत् ॥ संप्राश्यामलकं
रात्रौ गौरीं ध्यात्वा सुखं स्वपेत् ॥ २८ ॥ ततः प्रातः समुत्थाय दंपती रूपशालिनौ ॥ भोजयित्वा विधानेन तीर्थयात्राफलं लभेत् ॥ २९ ॥
पुनः कृष्णतृतीयायां सोपवासा सुवासिनी ॥ स्कन्दमातेति संपूज्य इडायै विनिवेदयेत् ॥ ३० ॥ प्राशयेत्पंचगव्यञ्च स्वप्याद्देव्यग्रतस्ततः ॥
प्रभाते मिथुनं भोज्यं कन्यादानफलं लभेत् ॥ ३१ ॥ आषाढमासे संप्राप्ते पूजयेच्च यशोधनम् ॥ करंजकं च नैवेद्यं गोशृंगांभः पिबेन्निशि ॥

प्रभाते मिथुनं भोज्यं कन्यादानफलं लभेत् ॥ ३२ ॥ तथा कृष्णतृतीयायां कूष्मांडीं शक्तितो यजेत् ॥ सक्तून्गुडाज्यसंमुक्तान्पुरतो विनि
वेदयेत् ॥ ३३ ॥ कुशोदकं च संप्राश्य स्वप्याद्रात्रौ जितेन्द्रिया ॥ प्रभाते मिथुनं भोज्यं गोसहस्रफलं लभेत् ॥ ३४ ॥ श्रावणे सोपवासा च
चंडां घण्टां प्रपूजयेत् ॥ कुल्माषास्तत्र नैवेद्यं पिबेत्पुष्पोदकं पुनः ॥ ३५ ॥ प्रभाते शक्तितो दद्याद्भोजनं मिथुनस्य तु ॥ प्राप्नोत्यभयदानस्य
फलं नैवात्र संशयः ॥ ३६ ॥ तद्वत्कृष्णतृतीयायां रुद्राणीं नामभिर्यजेत् ॥ सिद्धपिंडानि दिव्यानि नैवेद्यं दापयेत्तथा ॥ ३७ ॥ पिण्याकं प्राश
यित्वा तु स्वप्याद्रात्रौ विमत्सरा ॥ संपूज्य द्विजदांपत्यमिष्टापूर्तफलं लभेत् ॥ ३८ ॥ [2]भाद्रे शुक्लतृतीयायां पूजयेत हिमाद्रिजाम् ॥ गोधूमान्नं निवे
द्यैव प्राशयेच्चन्दनं सितम् ॥ ३९ ॥ गन्धोदकं ततः प्राश्य सखीभिः सहिता स्वपेत् ॥ प्रभाते मिथुनं भोज्यं मार्गपालीशतं लभेत् ॥ ४० ॥ तद्व
त्कृष्णतृतीयायां दुर्गां देवीं समर्चयेत् ॥ दद्यात्पिष्टफलान्दिव्यान्गुडाज्यपरिपूरितान् ॥ ४१ ॥ प्राशयित्वा तु गोमूत्रं स्वप्याच्छांतेन चेतसा ॥
प्रातस्तु मिथुनं भोज्यं सदासत्रफलं लभेत् ॥४२॥ मासि चाश्वयुजे भक्त्या देवीं नारायणीं यजेत् ॥ सोपवासा खण्डपूपान्नैवेद्यं परिकल्पयेत् ॥
॥ ४३ ॥ प्राशयेच्चंदनं रक्तं स्वप्याच्च गतमत्सरा ॥ प्रभाते भोज्यं दांपत्यमग्निहोत्रफलं लभेत् ॥ ४४ ॥ तथा कृष्णतृतीयायां स्वस्ति नाम प्रपूज
येत् ॥ शाल्योदनं गुडोपेतं नैवेद्यं निर्वपेत्ततः ॥ ४५ ॥ कुसुंभबीजान्संप्राश्य त्यक्त्वा कामं स्वपेन्निशि ॥ संभोज्य मिथुनं प्रातर्गवाह्निकफलं
लभेत् ॥ ४६ ॥ कार्तिकस्य तृतीयायां स्वाहानाम्नीं प्रपूजयेत् ॥ क्षीरं खण्डघृतोपेतं नैवेद्यं दापयेच्च ताम् ॥ ४७ ॥ स्वप्याद्रात्रौ जितक्रोधा प्राश्य
कुंकुमकेशरान् ॥ प्रभाते मिथुनं भोज्यमेकभक्तफलं लभेत् ॥ ४८ ॥ तथा कृष्णतृतीयायां स्वधानाम्नीं प्रपूजयेत् ॥ मुद्गौदनं निवेद्याथ घृतं प्राश्य
स्वपेन्निशि ॥४९॥ प्रातः संभोज्य मिथुनं नक्तव्रतफलं लभेत् ॥ एवं संवत्सरं कृत्वा मुक्तपापा शुचिर्भवेत् ॥५०॥ शुक्लपक्षे तृतीयायां सोपवासा
निरामया ॥ विज्ञाय च द्रुतं भक्त्या उमां शास्त्रार्थबोधकैः ॥ ५१ ॥ मंडलं च ततो लिख्य नवनाभं वरप्रदम् ॥ सौवर्णं कारयेद्देवमुमया सहितं
प्रभुम् ॥ ५२ ॥ ताभ्यां नेत्रेषु दातव्यं मौक्तिकं नीलमेव च ॥ प्रवालमोष्ठयोर्दद्यात्कर्णयो रत्नकुण्डले ॥ ५३ ॥ उपवीतं तु देवस्य देव्या हारं तथो
रसि ॥ रक्तवस्त्रधरां देवीं सितवस्त्रं महेश्वरम् ॥ ५४ ॥ चतुःसमेन वालभ्य पुष्पैर्धूपैरथार्चयेत् ॥ मंडले पूजयित्वा च होमं कुर्यात्ततो[3]ऽगुरोः ॥५५॥
ततोऽपराजितां नाम देवीं तत्रैव पूजयेत् ॥ मृत्स्नां संप्राशयित्वा च रात्रौ कुर्यात्प्रजागरम् ॥ ५६ ॥ गीतवाद्योत्सवैर्हृद्यैर्वीणामंगलपाठकैः ॥

---

[1] संप्रपूजयेत्–इ० पा० । [2] एवं भाद्रपदस्यादौ पूजयेत्कमलालयाम्–इ० पा० । [3] ततः–इ० पा० ।

रात्रिमेवं जपेद्भक्त्या यावदुद्गच्छते रविः ॥ ५७ ॥ तूलीगंडकसंयुक्ते पर्यंकेत्यंतशोभिते ॥ उद्धृत्य मण्डलाद्देवं पर्यंकोपरि विन्यसेत् ॥ ५८ ॥
वितानध्वजमालालिकिंकिणीदर्प्पणान्वितम् ॥ पुष्पमण्डपिकाच्छन्नं धूपगुग्गुलुवासितम् ॥ ५९ ॥ तस्याग्रे भोजयेद्भक्त्या स्वशक्त्या
मिथुनानि च ॥ प्रीणयेद्भक्ष्यभोज्यैश्च पक्वान्नैर्मधुरैः शुभैः ॥ ६० ॥ ततो दत्त्वाऽक्षतान्हस्ते तांबूलं विनिवेदयेत् ॥ प्रीयतां मे
उमाकांतः पार्वत्या सहितः शिवः ॥ ६१ ॥ उच्छिष्टं शोधयित्वा तु पुनः प्रोक्ष्य समन्ततः ॥ रक्तवर्णां सुशीलां च सुरूपां
सुपयस्विनीम् ॥ ६२ ॥ शृंगाभ्यां दत्तकनकां राजतखुरसंयुताम् ॥ कांस्यदोहनकोपेतां रक्तवस्त्रावगुंठिताम् ॥ ६३ ॥ घण्टाभरणशोभाढ्यां
देवदेव्यग्रसंस्थिताम् ॥ पादुकोपानहच्छत्रभोज्यभाजनसंयुताम् ॥ त्रिधा प्रदक्षिणीकृत्य गुरोः सर्वं निवेदयेत् ॥ ६४ ॥ उमामहेश्वरं
देवमवियोगं सुरार्चितम् ॥ अव्यवच्छेदभूतं च सुप्रीतं तदिहास्तु मे ॥ ६५ ॥ प्रणम्य शिरसा भूमौ क्षमस्वेति गुरुं वदेत् ॥ एवं
समाप्यते देव्यां[1] आनंतर्यव्रतोद्यमम् ॥ यः प्रकुर्यात्पुमान्स्त्री वा तस्य पुण्यफलं शृणु ॥ ६६ ॥ गन्धर्वयक्षलोकांश्च विद्याधरमहोरगान् ॥
ऋषिसिद्धामरं ब्राह्मं विष्णुलोकं सनातनम् ॥६७॥ भुक्त्वा भोगानशेषांश्च एकविंशत्कुलान्वितः ॥ रत्नयाने समारूढो गुह्याप्सरससंवृतः ॥ ६८ ॥
देवविद्याधरैर्यक्षैर्वृतो याति शिवालयम् ॥ तत्र भुक्त्वा महाभोगान्स भुंक्ते शिववद्बहून् ॥ ६९ ॥ भुक्त्वा भोगान्यदा भूतः कदाचित्तपसः क्षयात् ॥
पृथिव्यां तु समागम्य भवेत्सकलभूमिपः ॥ ७० ॥ स्त्री वा समाचरेद्या तु महादेवी तु जायते ॥ आनंतर्यव्यवच्छिन्नान्भोगान्देवी उमा यथा ॥
त्रैलोक्यपतिरुद्रेण सा भुंक्ते सहिता तथा ॥७१॥ मनुर्देव्या यथामह्या शच्या शक्रो यथासुखम् ॥ नैरंतर्यं यथा सौख्यं सा भुंक्ते पतिना सह ॥ ७२ ॥
मुनेररुंधती यद्वद्विष्णोर्लक्ष्मीर्हृदि स्थिता ॥ तथा तयोर्महत्सौख्यं नैरंतर्यं हि जायते ॥ ७३ ॥ सावित्री ब्रह्मणो यद्वद्गंगा तोयनिधेर्यथा ॥ अव्य-
वच्छिन्नयोः प्रीतिस्तथा जन्मनिजन्मनि ॥ ७४ ॥ अथ जन्मन्यहोन्यस्मिन्व्रतमेतत्कृतं भवेत् ॥ तेनैव पतिना सार्द्धं न वियोगमुपैति
सा ॥ योजनायुतसाहस्रे सुरूपा मण्डले भवेत् ॥ अर्घाढ्या सुभगा साध्वी पुत्रपौत्रैरलंकृता ॥ ७५ ॥ एतत्तेनिखिलं प्रोक्तमानंतर्यव्रतं
मया ॥ भक्ताय सुविनीताय कथितव्यं न चान्यथा ॥ ७६ ॥ एषा विशेषविहिताभिहिता तृतीया यानंतरीत्यविधवाभिरुदीरि

---

[1] सम्यक्–इ० पा० ।

तोच्चैः ॥ एतामुपोष्य विधिवत्प्रतिपक्षयोगान्नैवांतरं सुतसुहृत्स्वजनैरुपैति ॥ ७७ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिर
संवादे अनंतरतृतीयाव्रतवर्णनं नामैकोनत्रिंशत्तमोऽध्यायः ॥ २९ ॥ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ बहुनात्र किमुक्तेन किं बह्वक्षरमालया ॥
वैशाखस्य सितामेकां तृतीयां शृणु पाण्डव ॥ १ ॥ स्नानं दानं जपो होमः स्वाध्यायः पितृतर्पणम् ॥ यदस्यां क्रियते किञ्चित्सर्वं स्यात्तदिहाक्ष
यम् ॥ २ ॥ आदौ कृतयुगस्येयं युगादिस्तेन कथ्यते ॥ सर्वपापप्रशमनी सर्वसौख्यप्रदायिनी ॥ ३ ॥ शाकले नगरे कश्चिद्धर्मनामाभवद्वणिक् ॥
प्रियंवदः सत्यरतो देवब्राह्मणपूजकः ॥ ४ ॥ तेन श्रुतं वाच्यमानं तृतीया रोहिणी पुरा ॥ यदा स्याद्बुधसंयुक्ता तदा साच महाफला ॥ ५ ॥ तस्यां
यद्दीयते किञ्चित्तत्सर्वं चाक्षयं भवेत् ॥ इति श्रुत्वा स गंगायां सन्तर्प्य पितृदेवताः ॥ ६ ॥ गृहमागत्य करकान्सान्नानुदकसंयुतान् ॥ अंबुपूर्णान्गृ
हे कुंभान्क्रमान्निःशेषतस्तदा ॥ ७ ॥ यवगोधूमचणकसक्तुदध्यौदनं तथा ॥ इक्षुक्षीरविकारांश्च सहिरण्यांश्च शक्तितः ॥ ८ ॥ शुचिः शुद्धेन
मनसा ब्राह्मणेभ्यो ददौ वणिक् ॥ भार्यया वार्यमाणोपि कुटुंबासक्तचिंतया ॥ ९ ॥ तावत्स च स्थितः सत्त्वे मत्वा सर्वं विनश्वरम् ॥ धर्मार्थकाम
शक्तस्तु कालेन बहुना ततः ॥ १० ॥ जगाम पञ्चत्वमसौ वासुदेवं स्मरन्मुहुः ॥ ततः स क्षत्रियो जातः कुशावत्यां नरेश्वरः ॥ ११ ॥ बभूव चा
क्षया तस्य समृद्धिर्धर्मनिर्जिता ॥ इयाज स महायज्ञैः समाप्तवरदक्षिणैः ॥ १२ ॥ ददौ गोभूहिरण्यादि दानान्यस्यामहर्निशम् ॥ बुभुजे कामतो
भोगान्दीनार्तांस्तर्पयञ्जनान् ॥ १३ ॥ तथाप्यक्षयमेवास्य क्षयं याति न तद्धनम् ॥ श्रद्धापूर्वं तृतीयायां यद्दत्तं विभवं विना ॥ १४ ॥ एतद्व्रतं म
याख्यातं श्रूयतामत्र यो विधिः ॥ उदकुंभान्सकरकान्स्नानसर्वरसैर्युतान् ॥ १५ ॥ ग्रैष्मिकं सर्वमेवात्र सस्यदानं प्रशस्यते ॥ छत्रोपानत्प्रदानं
च गोभूकांचनवाससाम् ॥ १६ ॥ यद्यदिष्टतमं चान्यत्तद्देयमविशंकया ॥ एतत्ते सर्वमाख्यातं किमन्यच्छ्रोतुमिच्छसि ॥ १७ ॥ अनाख्येयं
न मे किञ्चिदस्ति स्वस्त्यस्तु तेऽनघ ॥ १८ ॥ अस्यां तिथौ क्षयमुपैति हुतं न दत्तं तेनाक्षया च मुनिभिः कथिता तृतीया ॥ उद्दिश्य यत्सु
रपितॄन्क्रियते मनुष्यैस्तच्चाक्षयं भवति भारत सर्वमेव ॥ १९ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादेऽक्षय्यतृती
याव्रतवर्णनं नाम त्रिंशत्तमोऽध्यायः ॥ ३० ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ रूपसौभाग्यसुखदं नरनारीजनप्रियम् ॥ पापापहं बहुफलं
सुकरं सूपवासकम् ॥१॥ ऋद्धिवृद्धिकरं स्वर्ग्यं यशस्यं सर्वकामदम् ॥ तन्मे वद व्रतं किञ्चिद्यदि तुष्टोऽसि माधव[1] ॥२॥ ॥ श्रीकृष्ण उवाच ॥ ॥

---

[1] यादव–इ० पा० ।

शृणु पार्थ परं गुह्यं यन्मया कथितं न च ॥ पुरा तव वनस्थस्य तदद्य प्रवदाम्यहम् ॥३॥ शिवयोरतिसंहर्षाद्रक्तबिंदुश्च्युतः क्षितौ ॥ मेदिन्या स प्रयत्नेन विधृतो धृतियुक्तया ॥ ४ ॥ तस्माज्जातः कुमारोऽसौ रक्तो रक्तसमुद्भवः ॥ अंगं प्रसिद्धमेवेहांगारको वेग उच्यते ॥ ५ ॥ शिवांगाद्रभसा जातस्तेनांगारक उच्यते ॥ अगस्थोऽगांरकांतिश्च अंगप्रत्यङ्गसंभवः ॥ ६ ॥ सौभाग्यारोग्यकृद्यस्मात्तस्मादंगारकः स्मृतः ॥ भक्त्या चतुर्थ्यां नक्तेन यस्तु श्रद्धासमन्वितः ॥ ७ ॥ तं पूजयति यत्नेन नारी वाऽनन्यमानसा ॥ तस्य तुष्टः प्रयच्छेत्स यत्त्वया समुदाहृतम् ॥ रूपं सौभाग्यसंपन्नं नरनारीमनोहरम् ॥ ८ ॥ युधिष्ठिर उवाच ॥ एतंन्मे[1] वद देवेश अंगारकविधिं शुभम् ॥ सहोममंत्रसंस्थानं साधिवासविधानतः ॥ ९ ॥ श्रीकृष्ण उवाच ॥ पूर्वं तु कृतसंकल्पः स्नानं कृत्वा बहिर्जले ॥ स्नानार्थं मृत्तिकां मंत्रैर्गृह्णीयादंभसि स्थितः ॥१०॥ त्वं मृदे वंदिता पूर्वं कृष्णेनोद्धरताकिल॥ तेन मे दह पापौघं यन्मया पूर्वसंचितम् ॥ ११॥ इमं मंत्रं पठन्पार्थ आदित्याय प्रदर्शयेत् ॥ आदित्यरश्मिसंतप्तां गंगाजलकणोक्षिताम् ॥१२॥ तां मृदं शिरसि प्रार्थ्य पूर्वं दत्त्वांगसंधिषु ॥ ततः स्नानं प्रकुर्वीत मंत्रेणान्तर्जलेपुनः ॥ १३ ॥ त्वमापो योनिः सर्वेषां दैत्यदानवरक्षसाम् ॥ स्वेदजोद्भिज्जयोनीनां रसानां पतये नमः ॥१४॥ स्नातोऽहं सर्वतीर्थेषु सर्वप्रस्रवणेषु च ॥ नदीषु देवखातेषु स्नानं तेषु च मे भवेत्॥१५॥ ध्यायन्ध्वनिमिमंमंत्रं ततः स्नानं समाचरेत् ॥ ततः स्नात्वा शुचिर्भूत्वा गृहमागत्य न स्पृशेत् ॥ न जल्पेच्च न वीक्षेत कचित्पापिष्ठमेव हि ॥ १६ ॥ दूर्वाश्वत्थौ शमीं स्पृष्ट्वा मां च मंत्रेण मंत्रवित् ॥ दूर्वामप्यस्य मंत्रेण युतेन समुपस्थिताम् ॥१७॥ त्वं दूर्वेऽमृतजन्मासि सर्वदेवैश्च वंदिता ॥ वंदिता दह तत्सर्वं यन्मया दुष्कृतं कृतम् ॥१८॥ (इति दूर्वामंत्रः ॥) पवित्राणां पवित्रं त्वं काश्यपी पठ्यसे श्रुतौ॥शमी शमय तत्पापं यन्मया दुरनुष्ठितम् ॥ १९ ॥ (इति शमीमंत्रः) अश्वत्थमंगं लभते मंत्रमेतं निबोध मे ॥ अक्षिस्पंदं भुजस्पंदं दुःस्वप्नं दुर्विचिंतितम् ॥ शत्रूणां च समुत्थानमश्वत्थ शमयस्व मे ॥ २० ॥ (इत्यश्वत्थमंत्रः)गां दद्यात्तु ततो देवीं सवत्सां सप्रदक्षिणाम् ॥ समालभ्य तु मंत्रेण मंत्रमेतमुदीरयेत् ॥ २१ ॥ सर्वदेवमये देवि दैवतैस्त्वं सुपूजिता ॥ तस्मात्स्पृशामि वंदामि वंदिता पापहा भव ॥२२॥ (इति गोमंत्रः) एवं मंत्रं पठन्पार्थ भक्तिभावेन भावितः ॥ प्रदक्षिणां यः कुरुते गां दृष्ट्वा वरवर्णिनीम् ॥ २३ ॥ प्रदक्षिणीकृता तेन पृथिवी नात्र संशयः ॥ एवं मौनेन चागत्य वंद्यान्वंद्य गृहं व्रजेत् ॥ २४ ॥ प्रक्षाल्य च मृदा पादौ आहिताऽग्निगृहं विशेत् ॥ होमं तत्र प्रकुर्वीत एभिर्मंत्रैः पदैर्वरैः ॥ २५ ॥ शर्वाय शर्वपुत्राय पार्वत्या गोः सुताय च ॥

---

[1] त्वमेव वद देवेश–इ० पा० ।

कुजाय लोहितांगाय ग्रहेशांगारकाय च ॥ भूयोभूयोयमाहुत्या हुत्वाहुत्वा जुहोति वै ॥ २६ ॥ ओंकारपूर्वकैर्मंत्रैः स्वाहाकारांतयोजितैः ॥ अष्टोत्तर
शतं पार्थ अर्द्धमर्धार्धमेव च ॥२७॥ एभिर्मंत्रपदैर्भक्त्या शक्त्या वा काममेव वा ॥ समिद्भिः [१]खादिरीभिश्च घृतदुग्धैस्तिलैर्यवैः ॥२८॥ भक्ष्यैर्नाना
विधैरन्यैः शक्त्या वा मंत्रविद्वशी ॥ हुत्वाहुतीस्ततः पार्थ देवं संस्थापयेत्क्षिंतौ ॥ २९ ॥ [२]स्नपनं केचिदिच्छंति सगुडे ताम्रभाजने ॥ सौवर्णं
रक्तवर्णं च शक्त्या दारुमयं तथा ॥ ३० ॥ कृष्णागरुमयं चैव श्रीखण्डघटितं पुनः ॥ सौवर्णपात्रे रौप्ये वा अर्च्यं कुंकुमकेसरैः ॥ ३१ ॥ अन्यै
रालोहितैः पार्थ पुष्पैर्वस्त्रैः फलैः शुभैः ॥ राजन्रत्नैश्च विविधैरर्थवान्भक्तितोऽर्चयेत् ॥ ३२ ॥ यावद्धि शक्यते चित्तं वित्तवान्भक्तिभावितः ॥
तावद्धि वर्धते पुण्यं दातुः शतसहस्रिकम् ॥ ३३ ॥ किञ्चित्ताम्रमये पात्रे वंशजे मृन्मयेपि वा ॥ पूजयंति नरा [३]रक्तैः पुष्पैः कुंकुमकेशरैः ॥ ३४ ॥
(ॐ अंगारकाय नमः शिरसि ॥ ॐकुजाय नमः वदने ॥ ॐ भौमाय नमः स्कंधयोः ॥ ॐ मंगलाय नमः बाह्वोः ॥ ॐ रक्ताय नमः उरसि ॥
ॐ लोहितांगाय नमः कट्याम् ॥ ॐ आराय नमः जंघयोः ॥ ॐ [४]महीधराय नमः पादयोः ॥ एषाष्टपुष्पिका ॥ पुरुषाकृतिं कृतः पात्रे कुजं
मंत्रैः समर्चयेत् ॥ गुग्गुलं घृतसंयुक्तं कृष्णागरुसमन्वितम् ॥ धूपं सद्द्रव्यजं वापि दद्यात्तत्र समाधिना ॥ ३५ ॥ होमं कुर्वीत पूर्वोक्तैर्मंत्रैर्मंगलसं
ज्ञितैः ॥ एवं प्रणम्य देवेशं ब्राह्मणाय निवेदयेत् ॥३६॥ निष्पावकं भोजनं वा दद्याच्छक्त्या सदक्षिणम् ॥ वित्तशाठ्यं हि कुर्वाणो न मुख्यफलभा
ग्भवेत् ॥ ३७ ॥ पश्चाद्भुञ्जीत मौनेन भूमिं कृत्वा तु भाजनम् ॥ मन्त्रेणानेन चालभ्य तन्निबोध मयोदितम् ॥ ३८ ॥ सर्वौषधिरसावासे सर्वदा सर्व
दायिनि ॥ त्वत्तले भोक्तुकामोऽहं तद्भुक्तममृतं भवेत् ॥ ३९ ॥ युधिष्ठिर उवाच ॥ अंगारकेण संयुक्ता चतुर्थी नक्तभोजनैः ॥ उपोष्या कतिमात्रा
सा किमेका वद यादव ॥ ४० ॥ ॥ श्रीकृष्ण उवाच ॥ चतुर्थी च चतुर्थी च यदांगारकसंयुता ॥ उपोष्या तत्रतत्रैव प्रदेयो विधिना कुजः ॥
वित्तहीनाः प्रतीक्षंते यावद्वित्तोपलंभनम् ॥४१॥ चतुर्थ्यां च चतुर्थ्यां च विधानं शृणु पाण्डव ॥ सौवर्णपात्रे कृत्वा तु अंगारकमकृत्रिमम् ॥ दश
सौवर्णिकं मुख्यं दशार्द्धार्द्धमथापि वा ॥४२॥ विंशत्पलानि पात्राणि विंशत्यर्द्धपलानि च ॥ विंशत्कर्षाणि वा पार्थ अतो न्यूनं न कारयेत् ॥४३॥
प्रतिष्ठाप्य कुजं मंत्रैर्वस्त्रैः संपरिवेष्टितम् ॥ पुष्पमंडपिकां कृत्वा दिव्यां सद्धूपधूपिताम् ॥४४॥ [५]तत्र संपूजयेद्देवं पूर्वमंत्रैर्विधानतः ॥ भक्त्या भोज्यै
रनेकैश्च फलैरत्नैश्च सागरैः ॥ ४५ ॥ वस्त्रैः प्रावरणैर्यानैः शय्योपानद्वरासनैः ॥ [६]छत्रैः पुष्पैर्गन्धवरैः शक्त्या वित्तानुसारतः ॥ ४६ ॥ ततो

---

[१] बादरीभिः—इ० पा० । [२] स्थापनम्—इ० पा० । [३] रत्नैः—इ० पा० । [४] महीनंदनाय नमः—इ० पा० । [५] तत्रस्थमर्चयेन्मंत्रैः पुष्पधूपैर्विधानतः—इ० पा० । [६] शुभैः—इ० पा० ।

विप्रं परीक्षेत व्रतशौचसमन्वितम् ॥ वेदाध्ययनसंपन्नं शास्त्रज्ञं निरहंकृतिम् ॥ ४७ ॥ अंगारकविधिं यश्च सम्यग्जानाति शास्त्रतः॥ आह्वानविधि
मंत्रांश्च होमार्चनविसर्जनम् ॥ ४८ ॥ संपूज्य वस्त्राभरणैस्तस्मै देयः कुजोत्तमः ॥ यथा श्रुतो यथा ज्ञातस्तथा भक्त्या ह्युपोषितः ॥ ४९ ॥
वित्तसारेण तुष्य त्वं मम भौम भवोद्भव ॥ पठन्निमं मंत्रवरं ब्राह्मणाय निवेदयेत् ॥ ब्राह्मणश्चाप्यसौ विद्वान्मंत्रमेतमुदाहरेत् ॥ ५० ॥ मंगलं प्रति
गृह्णामि उभयोरस्तु मंगलम् ॥ दातृप्रतिग्राहकयोः क्षेमारोग्यं भवत्विति ॥ ५१ ॥ प्रतिग्राहकमंत्रः ॥ एवं चतुर्थे संप्राप्ते धनप्राप्तिर्न विद्यते ॥
तदा[1]मंत्रार्चनपरः पुनरेतां समाचरेत् ॥ ५२ ॥ आशरीरनिपाताद्वा यथोक्तफलभाग्भवेत् ॥ अल्पवित्तो यथा शक्त्या सर्वमेतत्समाचरेत् ॥
॥ ५३ ॥ अंगारकेण संयुक्तां वास्त्रां तिलशराविकाम् ॥ अनेन विधिना दत्त्वा यथोक्तफलभाग्भवेत् ॥ ५४ ॥ एवं चतुर्थीं यो भक्त्या कुजयुक्ता
मुपोषयेत् ॥ तस्य पुण्यफलं यच्च तन्निबोध युधिष्ठिर ॥ ५५ ॥ इह स्थित्वा चिरं कालं पुत्रपौत्रश्रिया वृतः ॥ देहावसाने दिव्यौजा दिव्यगन्धानु
लेपनः ॥ ५६ ॥ दिव्यनारीगणवृतो विमानवरमास्थितः ॥ याति देवपुरं हृष्टो देवैः सहाभिनंदितः ॥ ५७ ॥ स तत्र रमते कालं देवैः सह सुरेश
वत् ॥ चतुर्युगानि षट्त्रिंशत्ततः कालांतरे पुनः ॥ ५८ ॥ इह चागत्य राजासौ कुले महति जायते ॥ रूपवान्धनवान्वाग्मी दानशीलो दयापरः ॥
॥ ५९ ॥ नारी च रूपसंपन्ना सुभगा जातिसंयुता ॥ पुत्रपौत्रैः परिवृता भर्त्रा सह रमेच्चिरम् ॥६०॥ रमित्वा सुचिरं कालं पुनः स्वर्गगतिं लभेत् ॥
एष ते कथितो राजन्सरहस्यो विधिस्तथा ॥ दुर्लभो यो मनुष्याणां देवानां भद्रमस्तु ते ॥ ६१ ॥ अंगारकेण सहिता तु सिता चतुर्थी शस्ता सुरा
र्चनविधौ पितृपिण्डदाने ॥ तस्यां कुजं कुरुकुलोद्वह येऽर्चयंति भूमौ भवंति बहुमंगलभाजनास्ते ॥ ६२ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तर
पर्वणि श्रीकृष्णयुधिष्ठिरसंवादे चतुर्थीव्रते अंगारकचतुर्थीव्रतवर्णनं नामैकत्रिंशत्तमोऽध्यायः ॥ ३१ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ यन्न
सिद्ध्यन्ति कर्माणि प्रारब्धानि नरोत्तमैः ॥ तत्केन कारणेनैतत्पृष्टो मे ब्रूहि माधव ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ विनायकोर्थसिद्ध्यर्थं
लोकस्य विनियोजितः ॥ गणानामाधिपत्ये च रुद्रेण ब्रह्मणा तथा ॥ २ ॥ तेनोपसृष्टो यस्तस्य लक्षणानि निबोधत ॥ स्वप्नेऽवगाहतेऽत्यर्थं
जलं मुण्डांश्च पश्यति ॥ ३ ॥ काषायवाससश्चैव क्रव्यादांश्चाधिरोहति ॥ अंत्यजैर्गर्दभैरुष्ट्रैः सहैकत्रावतिष्ठते ॥ ४ ॥ व्रजमानस्तथात्मानं मन्यते
तु गतं परैः ॥ विमना विफलारंभः ससीदत्यनिमित्ततः ॥ ५ ॥ पातकी विहीनच्छायो म्लानत्वहेतुलक्षणः ॥ करभारूढमात्मानं महिषखरगं

---

[1] यन्त्रार्चनपरः—इ० पा० ।

तथा ॥६॥ यातुधानाश्रितं यानं [1]श्मशानस्यांतिकं नृप ॥ वीक्षेत कुरुशार्दूल स्वप्नांते नात्र संशयः ॥ तैलार्द्रमात्रं स्वं देहं करवीरविभूषितम् ॥७॥ तेनोपसृष्टो लभते न राज्यं राजनंदनः ॥ कुमारी न च भर्तारमपत्यं गर्भमंगना ॥ ८ ॥ आचार्यत्वं श्रोत्रियश्च न शिष्योऽध्ययनं तथा ॥ वणिग्लाभं न चाप्नोति कृषिं चैव कृषीवलः ॥ ९ ॥ स्नपनं तस्य कर्तव्यं पुण्येऽह्नि विधिपूर्वकम् ॥ गौरसर्षपकल्केन वस्त्रेणाच्छादितस्य तु ॥ १० ॥ सर्वौषधैः सर्वगन्धैर्विलिप्तशिरसस्तथा ॥ शुक्लपक्षे चतुर्थ्यां तु वारे वा धिषणस्य तु ॥ ११ ॥ पुष्ये च वीरनक्षत्रे तस्यैव पुरतो नृप ॥ भद्रासनोपविष्टस्य स्वस्तिर्वाच्या द्विजैः शुभैः ॥ १२ ॥ चत्वार ऋग्यजुः सामाथर्वणप्रवणास्ततः ॥ व्योमकेशं तु संपूज्य पार्वतीं भूमिजं तथा ॥ ॥ १३ ॥ कृष्णस्य पितरं चाथ अवतारं सितं तथा ॥ धिषणं कुंदपुत्रं च क्रोणं लक्ष्मीं च भारत ॥ विधुंतुदं बाहुलेयं नंदकस्य च धारिणम् ॥ ॥ १४ ॥ अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्ध्रदात् ॥ मृत्तिकां रोचनां रत्नं गुग्गुलुं चाप्सु निक्षिपेत् ॥ १५ ॥ यदाहृतं ह्येकवर्णैश्चतुर्भिः कलशैर्ह्रदात् ॥ चर्मण्यानडुहे रक्ते स्थाप्य भद्रासनं तथा ॥ १६ ॥ सहस्राक्षं शतधारमृषिभिः पावनं कृतम् ॥ तेन त्वामभिषिंचामि पावमान्यः पुनंतु मे ॥ १७ ॥ ॐ भगं ते वरुणो राजा भगं सूर्यो बृहस्पतिः ॥ भगमिन्द्रश्च वायुश्च भगं सप्तर्षयो ददुः ॥ १८ ॥ यत्ते केशेषु दौर्भाग्यं सीमंते यच्च मूर्द्धनि ॥ ललाटे कर्णयोरक्ष्णोरापस्तद्घ्नंतु सर्वदा ॥ १९ ॥ स्नातस्य सार्षपं तैलं स्रुवेणौदुंबरेण तु ॥ जुहुयान्मूर्ध्नि शकलान्सव्येन प्रतिगृह्य च ॥ २० ॥ मितश्च सम्मितश्चैव तथा शालकटंकटौ ॥ कूष्माण्डो राजपुत्रश्चेत्यंते स्वाहासमन्वितैः ॥ २१ ॥ नामभिर्बलिमन्त्रैश्च नमस्कारसमन्वितैः ॥ दद्याच्चतुष्पथे शूर्पे कुशानास्तीर्य सर्वतः ॥ २२ ॥ कृताकृतांस्तंडुलांश्चपललौदनमेव च ॥ मत्स्यान्ह्यपक्कांश्च तथा मांसमेतावदेव तु ॥ २३ ॥ पुष्पान्वितं सुगन्धं च सुरां च त्रिविधामपि ॥ मूलकं पूरिका पूपांस्तथैवोंडेरकस्रजः ॥ २४ ॥ दध्यन्नं पायसं चैव गुडवेष्टितमोदकम् ॥ विनायकस्य जननीमुपतिष्ठेत्ततोंबिकाम् ॥ दूर्वासर्षपपुष्पाणां दत्त्वार्घ्यं पूर्णमञ्जलिम् ॥ २५ ॥ रूपंदेहि जयं देहि भगं भवति देहि मे ॥ पुत्रान्देहि धनं देहि सर्वान्कामांश्च देहि मे ॥ ॥ २६ ॥ प्रबलं कुरु मे देवि बलविख्यातिसम्भवम् ॥ शुक्लमाल्यांबरधरः शुक्लगन्धानुलेपनः ॥ भोजयेद्ब्राह्मणान्दद्याद्वस्त्रयुग्मं

---

[1] प्रासादानुगतम्–इ० पा० ।

गुरोरपि ॥ २७ ॥ एवं विनायकं पूज्य ग्रहांश्चैव विधानतः ॥ कर्मणां फलमाप्नोति श्रियं प्राप्नोत्यनुत्तमाम् ॥ २८ ॥ आदित्यस्य सदा पूजां तिलकं स्वामिनस्तथा ॥ महागणपतेश्चैव कुर्वन्सिद्धिमवाप्नुयात् ॥ २९ ॥ वैनायकं विनयसत्त्ववतां नराणां स्नानं प्रशस्तमिह विघ्नविनाशकारि ॥ कुर्वंति ये विधिवदत्र भवंति तेषां कार्याण्यभीष्टफलदानि न संशयोऽत्र ॥ ३० ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे विनायकस्नपनचतुर्थीव्रतं नाम द्वात्रिंशत्तमोऽध्यायः ॥ ३२ ॥ ॥छ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अथा विघ्नकरं राजन्कथयामि व्रतं तव ॥ येन सम्यक्कृतेनेह न विघ्नमुपजायते ॥ १ ॥ चतुर्थ्यां[1] फाल्गुने मासि गृहीतव्यं व्रतं त्विदम् ॥ नक्ताहारेण राजेन्द्र तिलान्नं पारणं स्मृतम् ॥ २ ॥ तदेव वह्नौ होतव्यं ब्राह्मणाय च तद्भवेत् ॥ ३ ॥ शूराय वीराय गजाननाय लंबोदरायैकरदाय चैव ॥ एवं तु संपूज्य पुनश्च होमं कुर्याद्व्रती विघ्नविनाशहेतोः ॥ ४ ॥ चातुर्मास्यां व्रतं चैव कृत्वेत्थं पञ्चमे तथा ॥ सौवर्णं गजवक्त्रं तु कृत्वा विप्राय दापयेत् ॥ ५ ॥ ताम्रपात्रैः पायसभृतैश्चतुर्भिः सहितं नृप ॥ पञ्चमेन तिलैः सार्द्धं गणेशाधिष्ठितेन च ॥ ६ ॥ मृन्मयान्यपि पात्राणि वित्तहीनस्तु कारयेत् ॥ हेरंबं राजतं तद्वद्विधिनानेन दापयेत् ॥ इत्थं व्रतमिदं कृत्वा सर्वविघ्नैः प्रमुच्यते ॥ ७ ॥ हयमेधस्य विघ्ने तु संजाते सगरः पुरा ॥ एतदेव व्रतं चीर्त्वा पुनरश्वं प्रलब्धवान् ॥ ८ ॥ तथा रुद्रेण देवेन त्रिपुरं निघ्नता पुरा ॥ एतदेव कृतं यस्मात्त्रिपुरस्तेन घातितः ॥ ९ ॥ मया समुद्रं विशतां एतदेव व्रतं कृतम् ॥ तेनाद्रिद्रुमसंयुक्ता पृथिवी पुनरुद्धृता ॥ १० ॥ अन्यैरपि महीपालैरेतदेव कृतं पुरा ॥ तपोऽर्थिभिर्यज्ञसिद्ध्यै निर्विघ्नं स्यात्परंतप ॥ ११ ॥ अनेन कृतमात्रेण सर्वविघ्नैः प्रमुच्यते ॥ मृतो रुद्रपुरं याति वराहवचनं यथा ॥ १२ ॥ विघ्नानि तस्य न भवंति गृहे कदाचिद्धर्मार्थकामसुखसिद्धिविघातकानि ॥ यः सप्तमीन्दुशकलाकृतिकां तदंतं विघ्नेशमर्चयति नक्तकृती चतुर्थ्याम् ॥ १३ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे विनायकचतुर्थीव्रतं नाम त्रयस्त्रिंशतमोऽध्यायः ॥ ३३ ॥ इति चतुर्थीकल्पः समाप्तः ॥ ॥छ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ शांतिव्रतं प्रवक्ष्यामि शृणुष्वैकमनाधुना ॥ येन चीर्णेन शांतिः स्यात्सर्वदा गृहमेधिनाम् ॥ १ ॥ पञ्चम्यां शुक्लपक्षस्य कार्तिके मासि पार्थिव ॥ आरभ्य वर्षमेकं तु ह्यश्नीयादम्लवर्जितम्[2] ॥ २ ॥ नक्तं देवं च संपूज्य हरिं शेषोपरिस्थितम् ॥ अनंतायेति पादौ तु धृतराष्ट्राय वै कटिम् ॥ ३ ॥ उदरं तक्षकायेति उरः कर्कोटकाय च ॥ पद्माय कर्णौ संपूज्य महापद्माय दोर्युगम् ॥ ४ ॥

---

[1] शुक्लपक्षीयाम्–इत्यर्थः । [2] दंतवर्जितम्–इ० पा० ।

शंखपालाय वक्षस्तु कुलिकायेति वै शिरः ॥ एवं विष्णुं सर्वगतं पृथगेव प्रपूजयेत् ॥ ५ ॥ क्षीरेण स्नपनं कुर्याद्धरिमुद्दिश्य वाग्यतः ॥ तदग्रे होमयेत्क्षीरं तिलैः सह विचक्षणः ॥ ६ ॥ एवं संवत्सरस्यांते कुर्याद्ब्राह्मणभोजनम् ॥ अच्युतं कांचनं कृत्वा सुवर्णं तु विचक्षणः ॥ ७ ॥ गां सवत्सां वस्त्रयुगं कांस्यपात्रं सपायसम् ॥ हिरण्यं च यथाशक्ति ब्राह्मणायोपपादयेत् ॥ ८ ॥ एवं यः कुरुते भक्त्या व्रतमेतन्नराधिप ॥ तस्य शांतिर्भवेन्नित्यं नागानामभयं तथा ॥ ९ ॥ शेषाहिभोगशयनस्थमयोगसूतिं संपूज्य यज्ञपुरुषं पतगेंद्रनाथम् ॥ ये पूजयंति मधुरैः सितपञ्चमीषु तेषां न नागजनितं भयमभ्युपैति ॥ १० ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे शांतिव्रतं नाम चतुस्त्रिंशत्तमोऽध्यायः ॥३४॥ ॥छ॥

॥ युधिष्ठिर उवाच ॥ ॥ मधुरा भारती केन व्रतेन मधुसूदन ॥ तथैव जनसौभाग्यमतिविद्यासु कौशलम् ॥१॥ अभेदश्चापि दंपत्योस्तथा बंधुजनेन च ॥ आयुश्च विपुलं पुंसां जायते केन केशव ॥ २ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ सम्यक्पृष्टस्त्वया राजञ्छृणु सारस्वतं व्रतम् ॥ यस्य संकीर्तनादेव तुष्यतीह सरस्वती ॥ ३ ॥ योऽयं भक्तः पुमान्कुर्यादेतद्व्रतमनुत्तमम् ॥ तद्वत्सरादौ संपूज्य विप्रेण तं समाचरेत् ॥ ४ ॥ अथ चादित्यवारेण ग्रहताराबलेन च ॥ पायसं भोजयित्वा च कुर्याद्ब्राह्मणवाचनम् ॥ ५ ॥ शुक्लवस्त्राणि दद्याच्च सहिरण्यानि शक्तितः ॥ गायत्रीं पूजयेद्भक्त्या शुक्लमाल्यानुलेपनैः ॥ एभिर्मंत्रपदैः पश्चात्पूर्वं कृत्वा कृताञ्जलिः ॥ ६ ॥ यथा तु देवि भगवान्ब्रह्मा लोकपितामहः ॥ त्वां परित्यज्य नो तिष्ठेत्तथा भव वरप्रदा ॥ ७ ॥ वेदशास्त्राणि सर्वाणि नृत्यगीतादिकं च यत् ॥ वाहितं यत्त्वया देवि तथा मे संतु सिद्धयः ॥ ८ ॥ लक्ष्मीर्मेधा वरा रिष्टिर्गौरी तुष्टिः प्रभा मतिः ॥ एताभिः पाहि तनुभिरष्टाभिर्मां सरस्वति ॥ ९ ॥ एवं संपूज्य गायत्रीं वीणाक्षमणिधारिणीम् ॥ शुक्लपक्षेऽक्षतैर्भक्त्या सकमंडलुपुस्तकाम् ॥ १० ॥ मौनव्रतेन भुञ्जीत सायं प्रातश्च धर्मवित् ॥ पञ्चम्यां प्रतिपक्षे च पूजयित्वा सुवासिनीः ॥ ११ ॥ तिलैश्च तंडुलप्रस्थं घृतपात्रेण संयुतम् ॥ क्षीरं तथा हिरण्यं च गायत्री प्रीयतामिति ॥ १२ ॥ संध्यायां च ततो मौनं तद्व्रतं तु समाचरेत् ॥ नांतरा भोजनं कुर्याद्यावन्मासास्त्रयोदश ॥ १३ ॥ समाप्ते तु व्रते दद्याद्भोजनं शुक्लतंडुलैः ॥ पूर्णं सुवस्त्रयुग्मं च गां च विप्राय भोजनम् ॥ १४ ॥ देव्यै वितानं घंटां च सितनेत्रं पटान्वितम् ॥ चन्दनं वस्त्रयुग्मं च दध्यन्नं शिखरैर्युतम् ॥ १५ ॥ तथोपदेष्टारमपि भक्त्या संपूजयेद्गुरुम् ॥ वित्तशाठ्येन रहितो वस्त्रमाल्यानुलेपनैः ॥ १६ ॥ अनेन विधिना यस्तु कुर्यात्सारस्वतं व्रतम् ॥ विद्यावानर्थयुक्तश्च रक्तकंठश्च जायते ॥ १७ ॥ सरस्वत्याः प्रसादेन व्यासवत्तु कविर्भवेत् ॥ नारी वा कुरुते या तु सापि तत्फलभागिनी ॥ ब्रह्म

लोके वसेत्तावद्यावत्कल्पायुतत्रयम् ॥ १८ ॥ सारस्वतं व्रतं यस्तु शृणुयादपि यः पठेत् ॥ विद्याधरपुरे सोऽपि वसेत्कल्पायुतत्रयम् ॥ १९ ॥ संवत्सरं व्रतवरेण सरस्वतीं ये संपूजयंति जगतो जननीं जनित्रीम् ॥ विद्यावदातहृदया मधुरस्वरास्ते रूपान्विता बहुकलाकुशला भवंति ॥२०॥

इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे सारस्वतव्रतनिरूपणं नाम पंचत्रिंशत्तमोऽध्यायः ॥ ३५ ॥ ॥ छ ॥ ॥

॥ ॥ श्रीकृष्ण उवाच ॥ ॥ पंचमी दयिता राजन्नागानंदविवर्द्धनी ॥ पञ्चम्यां किल नागानां भवतीत्युत्सवो महान् ॥ १ ॥ वासुकिस्तक्षकश्चैव कालिको माणिभद्रकः॥ धृतराष्ट्रो रैवतश्च कर्कोटकधनंजयौ ॥ एते प्रयच्छंत्यभयं प्राणिनां प्राणजीविनाम् ॥ २ ॥ पञ्चम्यां स्नपयंतीह नागान्क्षीरेण ये नराः ॥ तेषां कुले प्रयच्छंति अभयं प्राणिनां सदा ॥ ३ ॥ शप्ता नागा यदा मात्रा दह्यमाना दिवानिशम् ॥ निर्वापिता गवां क्षीरैस्ततः प्रभृति वल्लभाः ॥ ४ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ मात्रा शप्ताः कथं नागाः किमुद्दिश्य च कारणम् ॥ कथं वा तस्य शापस्य विनाशोऽभूज्जनार्दन ॥ ५ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ उच्चैःश्रवाश्वराजश्च श्वेतवर्णोऽमृतोद्भवः ॥ तं दृष्ट्वा चाब्रवीत्कद्रूर्नागानां जननी स्वसाम् ॥ ॥ ६ ॥ अश्वरत्नमिदं श्वेतं पश्यपश्यामृतोद्भवम् ॥ कृष्णांश्च वीक्ष्यसे बालान्सर्वश्वेतानुताद्य वै ॥ ७ ॥ ॥ विनतोवाच ॥ ॥ सर्वश्वेतो हयवरो नायं कृष्णो न लोहितः ॥ कथं त्वं वीक्षसे कृष्णं विनतोवाच तां स्वसाम् ॥ ८ ॥ ॥ कद्रूरुवाच ॥ ॥ वीक्षेऽहमेकनयना कृष्णबालसमन्वितम् ॥ द्विनेत्रा च त्वं विनते न पश्यसि पणं कुरु ॥ ९ ॥ ॥ विनतोवाच ॥ ॥ अहं दासी भवित्री ते कृष्णकेशे प्रदर्शिते ॥ न चेद्दर्शयसे कद्रु मम दासी भविष्यसि ॥ १० ॥ एवं ते विपणं कृत्वा गते क्रोधसमन्विते ॥ सुषुप्ते प्राज्यदोषे तु कद्रूर्जिह्ममचिंतयत् ॥ ११ ॥ आहूय पुत्रान्प्रोवाच बाला भूत्वा हयोत्तमे ॥ तिष्ठध्वं विपणौ जेष्ये विनतां जयगृद्धिनीम् ॥ १२ ॥ प्रोचुस्ते जिह्मबुद्धिं तां नागाः कद्रूं विगृह्य च ॥ अधर्म एष तु महान्करिष्यामो न ते वचः ॥ अशपद्रुषिता कद्रूः पावको वः प्रधक्ष्यति ॥ १३ ॥ गते बहुतिथे काले पांडवो जनमेजयः ॥ सर्पसत्रं स कर्ता वै भूमावन्यैः सुदुष्करम् ॥१४॥ तस्मिन्सत्रे च तिग्मांशुः पावको भक्षयिष्यति ॥ एवं शप्त्वा तदा कद्रूः प्रत्युवाच न किंचन ॥१५॥ मात्रा शप्तस्तदा नागः कर्तव्यं नान्वपद्यत ॥ वासुकिर्दुःखसंतप्तः पपात भुवि मूर्च्छितः ॥ १६ ॥ वासुकिं दुःखितं दृष्ट्वा ब्रह्मा प्रोवाच सांत्वयन् ॥ मा शुचो वासुकेऽत्यर्थं शृणु मद्वचनं परम् ॥१७॥ यायावरकुले जातो जरत्कारुरिति द्विजः ॥ भविष्यति महातेजास्तस्मिन्काले तपोनिधिः ॥१८॥

---

१ मन्दमभवत्प्रसादात्कस्य माधव--इ० पा० ।

भगिनीं च जरत्कारुं तस्य त्वं प्रतिदास्यसि ॥ भविता तस्य पुत्रोऽसावस्तीक इति विश्रुतः ॥ १९ ॥ स तत्सत्रं प्रवृद्धं वै नागानां भयदं
महत् ॥ निषेधयिष्यति मुनिर्वाग्भिः संपूज्य पार्थिवम् ॥ २० ॥ तदियं भगिनी नाग रूपौदार्यगुणान्विता ॥ जरत्कारुर्जरत्कारोः प्रदेया ह्यवि
चारतः ॥ २१ ॥ यदासौ प्रार्थ्यतेऽरण्ये यत्किञ्चित्प्रवदिष्यति ॥ तत्कर्तव्यमशेषेण इच्छेच्छ्रेयस्तथात्मनः ॥ २२ ॥ पितामहवचः श्रुत्वा वासुकिः
प्रणिपत्य च ॥ तथाकरोद्यथा चोक्तं यत्नं परममास्थितः ॥ २३ ॥ तच्छ्रुत्वा पन्नगाः सर्वे प्रहर्षोत्फुल्ललोचनाः ॥ पुनर्जातमिवात्मानं मेनिरे
भुजगोत्तमाः ॥ २४ ॥ अप्लवे तु निमग्नानां घोरे यज्ञाग्निसागरे ॥ आस्तीकस्तत्र भविता प्लवभूतोऽभयप्रदः ॥ २५ ॥ श्रुत्वा स चाग्निराजानमृत्वि
जस्तदनंतरम् ॥ निवर्तयिष्यति यागं नागानां मोहनं परम् ॥ २६ ॥ पञ्चम्यां तच्च भविता ब्रह्मा प्रोवाच लेलिहान् ॥ तस्मादियं महाराज पञ्चमी
दयिता शुभा ॥ २७ ॥ नागानां हर्षजननी दत्ता वै ब्रह्मणा पुरा ॥ दत्त्वा तु भोजनं पूर्वं ब्राह्मणानां तु कामतः ॥ २८ ॥ विसृज्य नागाः प्रीयंतां ये
केचित्पृथिवीतले ॥ हिमाचले ये वसन्ति येंऽतरिक्षे दिविस्थिताः ॥ ये नदीषु महानागा ये सरःस्वभिगामिनः ॥२९॥ ये वापीषु तडागेषु तेषु सर्वेषु
वै नमः ॥३०॥ नागान्विप्रांश्च संपूज्य विसृज्य च यथार्थतः ॥ ततः पश्चाच्च भुञ्जीयात्सह भृत्यैर्नराधिप ॥३१॥ पूर्वं मधुरमश्नीयात्स्वेच्छया तदनंत
रम् ॥ एवं[1] नियमयुक्तस्य यत्फलं तन्निबोध मे ॥३२॥ मृतो नागपुरं याति पूज्यमानोऽप्सरोगणैः ॥ विमानवरमारूढो रमते कालमीप्सितम् ॥३३॥
इह चागत्य राजासौ सर्वराजवरो भवेत् ॥ सर्वरत्नसमृद्धश्च वाहनाढ्यश्च जायते ॥ ३४ ॥ पञ्चजन्मन्यसौ राजा द्वापरेद्वापरे भवेत् ॥ आधिव्या
धिविनिर्मुक्तः पत्नीपुत्रसहायवान् ॥ तस्मात्पूज्याश्च नागांश्च[3] घृतक्षीरादिना सदा ॥ ३५ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ दशंति यं नरं कृष्ण
नागाः क्रोधसमन्विताः ॥ भवेत्किं तस्य दष्टस्य विस्तराद्ब्रूहि मां हरे ॥ ३६ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ नागदष्टो नरो राजन्प्राप्य मृत्युं
व्रजत्यधः ॥ अधो गत्वा भवेत्सर्पो निर्विषो नात्र संशयः ॥ ३७ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ नागदष्टः पिता यस्य भ्राता माता सुहृत्सुतः ॥
स्वसा वा दुहिता भार्या किं कर्तव्यं वदस्व मे ॥ ३८ ॥ मोक्षाय तस्य गोविन्द दानं व्रतमुपोषितम् ॥ ब्रूहि मे यदुशार्दूल येन स्वर्गतिमाप्नुयात्॥
॥ ३९ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ उपोष्या पञ्चमी राजन्नागानां पुष्टिवर्द्धिनी ॥ वर्षमेकं तु राजेन्द्र विधानं शृणु यादृशम् ॥ ४० ॥ मासे
भाद्रपदे या तु शुक्लपक्षे महीपते ॥ सा च पुण्यतमा प्रोक्ता ग्राह्या सद्व्रतिकाम्यया ॥ ४१ ॥ ज्ञेया द्वादश वर्षांते पञ्चम्यो भरतर्षभ ॥ चतुर्थ्यामेक

---

१ इह–इ० पा० । २ एतेन व्रतमुख्येन–इ० पा० । ३ मान्याश्च–इ० पा० ।

भक्तं तु तस्यां नक्तं प्रकीर्तितम् ॥ ४२ ॥ भूरिचन्द्रमयं नागमथवा कलधौतजम् ॥ कृत्वा दारुमयं चापि उताहो मृन्मयं नृप[1] ॥ ४३ ॥ पञ्चम्यामर्चयेद्भक्त्या नागं पञ्चफणं शृणु ॥ करवीरैस्तथा पद्मैर्जातीपुष्पैः सुशोभनैः ॥ ४४ ॥ गन्धपुष्पैः सनैवेद्यैः पूज्य पन्नगसत्तमम् ॥ ब्राह्मणान्भोजयेत्पश्चाद् घृतपायसमोदकैः ॥ ४५ ॥ नारायणबलिः कार्यः सर्पदष्टस्य देहिनः ॥ दाने पिंडप्रदाने च ब्राह्मणानां च तर्पयेत् ॥ ४६ ॥ वृषोत्सर्गस्तु कर्तव्यो गते संवत्सरे नृप ॥ स्नानं कृत्वोदकं दद्यात्कृष्णोऽत्र प्रीयतामिति ॥ ४७ ॥ अनंतो वासुकिः शेषः[3] पद्मः कम्बल एव च ॥ तथा तक्षकनागश्च नागश्चाश्वतरो नृप ॥ ४८ धृतराष्ट्रः शंखपालः कालियस्तक्षकस्तथा ॥ पिंगलश्च महानागो मासिमासि प्रकीर्तिताः ॥ वत्सरांते पारणं स्यान्महाब्राह्मणभोजनम् ॥ ४९ ॥ इतिहासविदे नागः कांचनेन कृतो नृप ॥ तथार्जुनी प्रदातव्या सवत्सा कांस्यदोहना ॥ ५० ॥ एष पारणके पार्थ विधिः प्रोक्तो विचक्षणैः ॥ कृते व्रतवरे तस्मिन्सद्गतिं यांति बान्धवाः ॥ ५१ ॥ ये दन्दशूकरदनैर्दष्टाः प्राप्ता ह्यधोगतिम् ॥ वर्षमेकं चरिष्यंति भक्त्या ये व्रतमुत्तमम् ॥ दांष्ट्रिकं मोक्ष्यते तेषां शुभं स्थानमवाप्स्यति ॥ ५२ ॥ यश्चेदं शृणुयान्नित्यं पठेद्भक्त्या समन्वितः ॥ न वै कुटुम्बे नागेभ्यो भयं भवति कुत्रचित् ॥ ५३ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ तद्वद्भाद्रपदे मासि पञ्चम्यां श्रद्धयान्वितः ॥ यस्त्वालिख्य नरो नागान्कृष्णवर्णादिवर्णकैः ॥ पूजयेद्गन्धपुष्पैस्तु सर्पिर्गुग्गुलुपायसैः ॥ ५४ ॥ तस्य तुष्टिं समायांति पन्नगास्तक्षकादयः ॥ आसप्तमात्कुलात्तस्य न भयं नागतो भवेत् ॥ ५५ ॥ तस्मात्सर्वप्रयत्नेन नागान्संपूजयेद्बुधः ॥ तथा चाश्वयुजे मासि पञ्चम्यां कुरुनंदन ॥ ५६ ॥ कृत्वा कुशमयान्नागानिंद्राण्या सह पूजयेत् ॥ घृतोदकाभ्यां पयसा स्नपयित्वा विशांपते ॥ ५७ ॥ गोधूमैः पयसा स्विन्नैर्भक्ष्यैश्च विविधैस्तथा ॥ यस्त्वस्यां विविधान्नागाञ्छुचिर्भक्त्या समन्वितः ॥ ५८ ॥ पूजयेत्कुरुशार्दूल तस्य शेषादयो नृप ॥ नागाः प्रीता भवन्तीह शांतिं प्राप्नोति शोभनाम् ॥ स शांतिलोकमासाद्य मोदते शाश्वतीः समाः ॥ ५९ ॥ इत्येतत्कथितं वीर पञ्चमीव्रतमुत्तमम् ॥ तत्रायमुच्यते मंत्रः सर्वदोषनिषेधकः ॥ ६० ॥ (ॐ[5] कुरुकुल्ले हुं फट् स्वाहा) भक्तेन भक्तिसहिताः शतपञ्चमीषु ये पूजयंति भुजगान्कुसुमोपहारैः॥ तेषां गृहेष्वभयदा हि सदैव सर्पाः शश्वत्प्रमोदपरमा रुचयो भवंति ॥ ६१ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे नागपंचमीव्रतवर्णनं नाम षट्त्रिंशत्तमोऽध्यायः ॥ ३६ ॥ ॥छ॥ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कथमासाद्यते लक्ष्मीर्दुर्लभा भुवनत्रये ॥ दानेन तपसा वापि व्रतेन नियमेन वा ॥ १ ॥ जपहोमनमस्कारैः

---

१ तथा—इ० पा० । २ शुभम्—इ० पा० । ३ शंखम्—इ० पा० । ४ पठेद्वा श्रद्धयान्वितः—इ० पा० । ५ ओं वाच कुल्ले हुं फट् स्वाहा—इ० पा० । ६ सुभगोपहारैः—इ० पा० ।

संस्कारैर्वा पृथग्विधैः ॥ एतद्वद यदुश्रेष्ठ सर्ववित्त्वं मतो मम ॥ २ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ भृगोः ख्यात्यां समुत्पन्ना पूर्वं श्रीः श्रूयते शुभा ॥ वासुदेवाय सा दत्ता मुनिना मानवृद्धये ॥ ३ ॥ वासुदेवोऽपि तां प्राप्य पीनोन्नतपयोधराम् ॥ पद्मपत्रविशालाक्षीं पूर्णचन्द्रनिभाननाम् ॥ ४ ॥ भाभासितदिगाभोगां साक्षाद्भानोः प्रभामिव ॥ नितंबाडंबरवतीं मत्तमातंगगामिनीम् ॥ रेमे सह तयाः राजन्विभ्रमोद्भ्रांतचित्तया ॥ ५ ॥ सा च विष्णुं जगज्जिष्णुं पतिं त्रिजगतां पतिम् ॥ प्राप्य कृतार्थमात्मानं मेने मानयशोधना ॥ ६ ॥ हृष्टं पुष्टं जगत्सर्वमभवद्भावितं तया ॥ [1]लक्ष्म्या निरीक्षितं चैव सानंदं हि महीतलम् ॥ ७ ॥ क्षेमं सुभिक्षमारोग्यमनाक्रन्दम[2]नाकुलम् ॥ जगदासीदनुद्भ्रान्तं प्रशांतोपद्रवं तथा ॥ ८ ॥ दिवि देवा मुमुदिरे दानवा दैत्यमागताः ॥ विस्फारितफणाभोगा नागाश्चैव रसातले ॥ ९ ॥ हृदये ब्राह्मणैर्वह्नौ भुज्यते त्रिदिवैर्हविः ॥ चातुर्वर्ण्यमसंकीर्णं पाल्यते पार्थ पार्थिवैः ॥१०॥ विरोचनप्रभृतिभिर्हृष्टैवं दैत्यसत्तमैः ॥ तपस्तप्तुमथारब्धमग्निमाश्रित्य संयतैः ॥ ॥ ११ ॥ सोमसंस्थाहविःसंस्थापाकसंख्यादिभिर्मखैः ॥ सदाचारैः समारब्धमिष्टं स्वेष्टाभिलाषिभिः ॥ १२ ॥ एवं धर्मप्रधानैस्तैर्वेदवादरतात्मभिः॥ जगदासीत्समाक्रांतं विक्रमेण क्रमेण तु ॥१३॥ लक्ष्मीविलासप्रभवो देवानामभवन्मदः ॥ मदाच्छीलं च शौचं च सत्यं सद्यो व्यनीनशन् ॥ ॥ १४ ॥ सत्यशौचविहीनांस्तान्देवान्संत्यज्य चञ्चलान् ॥ जगाम दानवकुलं कुलदेवानुरागतः ॥१५॥ लक्ष्म्या भावितदेहैस्तैः पुनरुद्धतमानसैः॥ ।यवहर्तुं समारब्धमन्यायेन मदोद्धतैः ॥ १६ ॥ वयं वेदा वयं यज्ञा वयं विद्या वयं जगत् ॥ ब्रह्मविष्णुशंकराद्या वयं सर्वे दिवौकसः ॥ १७ ॥ अहंकारविमूढांस्ताञ्ज्ञात्वा दानवसत्तमान् ॥ सागरं सा विवेशाथ भ्रांतचित्ता भृगोः सुता ॥ १८ ॥ क्षीराब्धिमध्यगतया लक्ष्म्या क्षीणार्थसंचयम् ॥ निरानन्दगतश्रीकमभवद्भुवनत्रयम् ॥ १९ ॥ गतश्रीकमथात्मानं मत्वा शंबरसूदनः ॥ पप्रच्छांगिरसं विप्रं ब्रूहि किञ्चिद्धृतं मम ॥ २० ॥ येन संप्राप्यते लक्ष्मीर्लब्धा न चलते पुनः ॥ निश्चलापि सुहृन्मित्रैर्भोग्या भवति सा मुने ॥ २१ ॥ न सा श्रीत्यभिमन्तव्या कन्या सा पाल्यते गृहे ॥ परार्थं या सुहृन्मित्रभृत्यैर्नैवोपभुज्यते ॥ २२ ॥ शक्रस्यैतद्वचः श्रुत्वा बृहस्पतिरुदारधीः ॥ कथयामास संचिंत्य शुभं श्रीपञ्चमीव्रतम् ॥ २३ ॥ यत्पुरा कस्यचित्प्रोक्तं व्रतानामुत्तमं व्रतम् ॥ तदस्मै कथयामास सरहस्यमशेषतः ॥ २४ ॥ तच्छ्रुत्वा कर्तुमारब्धं सुरेशेन सुरैस्तथा ॥ दैत्यदानवगंधर्वैर्यक्षैः प्रक्षीणकल्मषैः ॥ २५ ॥ सिद्धैः प्रसिद्धचारितैर्विष्णुना प्रभविष्णुना ॥ ब्राह्मणैर्ब्रह्मतत्त्वज्ञैः

---

[1] लक्ष्यायं पालपंचम्यां सद्दृष्टे च महीतलम्–इ० पा० । [2] अनामयम्–इ० पा० ।

समर्थैः पार्थिवैः सह ॥ २६ ॥ कैश्चित्सात्त्विकभावेन राजसेनापरैरपि ॥ तामसेन तथा कैश्चित्कृतं व्रतमिदंत था ॥ २७ ॥ व्रते समाप्ते भूयिष्ठे निष्ठया परया प्रभो ॥ देवानां दानवानां च युद्धमासीदथोद्धतम् ॥ २८ ॥ निर्मथ्य भुजवीर्येण सागरं सरितां पतिम् ॥ समाहरामो ह्यमृतं हिताय त्रिदिवौकसाम् ॥ २९ ॥ इत्येवं समयं कृत्वा ममंथुर्वरुणालयम् ॥ मंथानं मंदरं कृत्वा नेत्रं कृत्वा तु वासुकिम् ॥ ३० ॥ मथ्यमानजलाज्जातश्चन्द्रः शीतांशुरुज्ज्वलः ॥ अनंतरं समुत्पन्ना लक्ष्मीः क्षीराब्धिमध्यतः ॥ ३१ ॥ तया विलोकिताः सर्वे दैत्यदानवसत्तमाः ॥ आलोक्य सा जगामाशु विष्णोर्वक्षःस्थलं शुभम् ॥ ३२ ॥ विधिना विष्णुना चीर्णं व्रतं तेनाब्धिसंभवा ॥ शरीरस्था बभूवास्य विभ्रमोद्भ्रांतलोचना ॥ ३३ ॥ किंच राजसभावेन शक्रेणैतत्कृतं यतः ॥ ततस्त्रिभुवनैश्वर्यं प्राप्तं तेन महर्द्धिकम् ॥ ३४ ॥ तमसावृतचित्तैस्तु संचीर्णं दैत्यदानवैः ॥ तेन तेषामथैश्वर्यं दृष्टनष्टमभूत्किल ॥३५॥ एवं सश्रीकमभवत्सदेवासुरमानुषम् ॥ जरच्च जगतां श्रेष्ठ व्रतस्यास्य प्रभावतः ॥ ३६ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कथमेतद्व्रतं कृष्ण क्रियते मनुजैः कदा ॥ प्रारभ्यते पार्यते च सर्वं वद यदूत्तम ॥ ३७ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ मार्गशीर्षे सिते पक्षे पंचम्यां पतगोदये ॥ उपवासस्य नियमं कुर्यादाशु सुहृद्धृदि ॥ ३८ ॥ स्वर्णरौप्यारकूटोत्था ताम्रमृत्काष्ठजाथ वा ॥ चित्रपट्टगतां देवीं लक्ष्मीं क्ष्मापाल कारयेत् ॥ ३९ ॥ पद्महस्तां पद्मवर्णां पद्मां पद्मदलेक्षणाम् ॥ दिग्गजेन्द्रैः स्नाप्यमानां कांचनैः कलशोत्तमैः ॥ ४० ॥ ततो यामत्रये जाते निम्नगायां गृहेऽथ वा ॥ स्नानं कुर्यादसंभ्रांतं शक्रवदुपचारतः ॥ ४१ ॥ देवान्पितॄंश्च संतर्प्य ततो देवगृहं व्रजेत् ॥ तत्रस्थां पूजयेद्देवीं पुष्पैस्तत्कालसंभवैः ॥ ४२ ॥ चपलायै नमः पादौ चंचलायै च जानुनी ॥ कटिं कमलवासिन्यै नाभिं ख्यात्यै नमोनमः ॥ ४३ ॥ स्तनौ मन्मथवासिन्यै ललितायै भुजद्वयम् ॥ उत्कंठितायै कण्ठं च माधव्यै मुखमण्डलम् ॥ ४४ ॥ नमः श्रियै शिरः पूज्य दद्यान्नैवेद्यमादरात् ॥ फलानि च यथालाभं विरूढान्धान्यसंचयान् ॥ ४५ ॥ ततः सुवासिनी पूज्या कुसुमैः कुंकुमेन च ॥ भोजयेन्मधुरान्नेन प्रणिपत्य विसर्जयेत् ॥ ४६ ॥ ततस्तु तंडुलप्रस्थं घृतपात्रेण संयुतम् ॥ ब्राह्मणाय प्रदातव्यं श्रीशः संप्रीयतामिति ॥ ४७ ॥ निर्वर्त्य तदशेषेण ततो भुञ्जीत वाग्यतः ॥ मासानुमासं कर्तव्यं विधिनानेन भारत ॥ ४८ ॥ श्रीर्लक्ष्मीः कमला संपदुमा नारायणी तदा ॥ पद्मा धृतिः स्थितिः पुष्टिर्ऋद्धिः सिद्धिर्यथाक्रमम् ॥ मासानुमासं राजेन्द्र प्रीयतामिति कीर्तयेत् ॥ ४९ ॥ ततश्च द्वादशे मासि संप्राप्ते पंचमे दिने ॥ वस्त्रमंडपिकां कृत्वा पुष्पगन्धाधिवासिताम् ॥ ॥ ५० ॥ शय्यायां स्थापयेल्लक्ष्मीं सर्वोपस्करसंयुताम् ॥ मौक्तिकाष्टकसंयुक्तां नेत्रपट्टावृतस्तनीम् ॥ ५१ ॥ सप्तधान्यसमोपेतां रसधातुसमन्वि

ताम् ॥ पादुकोपानहच्छत्रभाजनासनसत्कृताम् ॥ ५२ ॥ दद्यात्संपूज्य विधिवद्ब्राह्मणाय कुटुम्बिने ॥ व्यासाय वेदविदुषे यस्य वा रोचते स्वयम् ॥
सोपस्करां सवत्सां च धेनुं दत्त्वा क्षमापयेत् ॥५३॥ क्षीराब्धिमथनोद्भूते विष्णोर्वक्षःस्थलालये ॥ सर्वकामप्रदे देवि ऋद्धिं यच्छ नमोऽस्तु ते ॥५४॥
ततः सुवासिनीः पूज्य वस्त्रैराभरणैः शुभैः ॥ भोजयित्वा स्वयं पश्चाद्भुञ्जीत सह बन्धुभिः ॥ ५५ ॥ एवं यः कुरुते पार्थ भक्त्या श्रीपञ्चमीव्रतम् ॥
तस्य श्रीर्भवने भाति कुलानामेकविंशतिः ॥ ५६ ॥ नारी वा कुरुते या तु प्राप्यानुज्ञां स्वभर्तृतः ॥ सुभगा दर्शनीया च बहुपुत्रा च जायते ॥५७॥
श्रीपञ्चमीव्रतमिदं दयितं मुरारेर्भक्त्या समाचरति पूज्यभृगोस्तनूजाम् ॥ राज्यं निजं स भुवि भव्यजनोपभोगान्भुक्त्वा प्रयाति भुवनं मधुसूदन
स्य ॥५८॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे पञ्चमीव्रतकल्पे श्रीपञ्चमीव्रतनिरूपणं नाम सप्तत्रिंशत्तमोऽध्यायः ॥३७॥
इति पंचमीकल्पः समाप्तः ॥ ॥ युधिष्ठिर उवाच ॥ ॥ षष्ठीविधानमधुना कथयस्व जनार्दन ॥ सर्वव्याधिप्रशमनं सर्वकर्मफलप्रदम् ॥
॥ १ ॥ श्रुतं मया पूज्यमानो भानुः सर्वं प्रयच्छति ॥ दिवाकराराधनं मे तस्मात्कथय केशव ॥ २ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ विशोक
षष्ठीमतुलां वक्ष्यामि मनुजोत्तम ॥ यामुपोष्य नरः शोकं न कदाचिदिह जायते ॥ ३ ॥ माघे कृष्णतिलैः स्नातः पञ्चम्यां शुक्लपक्षतः[1] ॥ कृता
हारः कृशरया दंतधावनपूर्वकम् ॥ ४ ॥ उपवासव्रतं कृत्वा ब्रह्मचारी भवेन्निशि ॥ ततः प्रभाते चोत्थाय कृतस्नानस्ततः शुचिः ॥ ५ ॥ कृत्वा
तु काञ्चनं पद्ममर्कोऽयमिति पूजयेत् ॥ करवीरेण रक्तेन रक्तवस्त्रयुगेन च ॥ ६ ॥ यथा विशोकं भवनं त्वयैवादित्यसर्वदा ॥ तथा विशोकता मे
स्यात्त्वद्भक्तिर्जन्मजन्मनि ॥ ७ ॥ एवं संपूज्य षष्ठ्यां तु शक्त्या संपूजयेद्द्विजान् ॥ सुप्त्वा संप्राश्य गोमूत्रमुत्थाय कृतनिश्चयः[2] ॥ ८ ॥ संपूज्य
विप्रमंत्रेण गुडपात्रसमन्वितः ॥ सुसूक्ष्मवस्त्रयुगलं ब्राह्मणाय निवेदयेत् ॥ ९ ॥ अतैललवणं भुक्त्वा सप्तम्यां मौनसंयुतः ॥ ततः पुराणश्रवणं
कर्तव्यं भूतिमिच्छता ॥ १० ॥ अनेन विधिना सर्वमुभयोरपि पक्षयोः ॥ कुर्याद्यावत्पुनर्माघशुक्लपक्षस्य सप्तमी ॥ ११ ॥ व्रतांते कलशं दद्या
त्सुवर्णकमलान्वितम् ॥ शय्यां सोपस्करां तद्वत्कपिलां च पयस्विनीम् ॥ १२ ॥ अनेन विधिना यस्तु वित्तशाठ्यविवर्जितः ॥ विशोकषष्ठीं
कुरुते स याति परमां गतिम् ॥ १३ ॥ यावज्जन्मसहस्राणां साग्रकोटिशतं भवेत् ॥ तावन्न शोकमभ्येति रोगदौर्गत्यवर्जितः ॥ १४ ॥ यंयं प्रार्थ
यते कामं तंतं प्राप्नोति पुष्कलम् ॥ निष्कामं कुरुते यस्तु स परं ब्रह्म गच्छति ॥ १५ ॥ यः पठेच्छृणुयाद्वापि षष्ठीं शोकविनाशिनीम् ॥ सोपींद्र

---

[1] कृष्णपक्षतः–इ० पा० । [2] कृतनैत्यकः–इ० पा० ।

लोकमाप्नोति न दुःखी जायते क्वचित् ॥ १६ ॥ ये भास्करं दिनकरं करवीरपुष्पैः संपूजयंत्यभिनमंति कृतोपवासाः ॥ ते दुःखशोकरहिताः
सहिताःसुहृद्भिर्भूमौ विहृत्य रविलोकमवाप्नुवंति ॥ १७ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे विशोकषष्ठीव्रतं नामा
ष्टत्रिंशत्तमोऽध्यायः ॥३८॥ ॥छ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अन्यामपि प्रवक्ष्यामि पद्मषष्ठीं शुभां तथा ॥ यामुपोष्य नरः पापविमुक्तः स्वर्ग
भाग्भवेत् ॥ १ ॥ मार्गशीर्षे शुभे मासि पञ्चम्यां नियतव्रतः ॥ षष्ठीमुपोष्य कमलं कारयित्वा सुकाञ्चनम् ॥ २ ॥ शर्करासंयुतं दद्याद्ब्राह्मणाय
कुटुंबिने ॥ रूपं च कांचनं कृत्वा फलस्यैकस्य धर्मवित् ॥ ३ ॥ दद्यात्प्रातः कृतस्नानो भानुर्मे प्रीयतामिति ॥ भक्त्या तु विप्रान्संपूज्य सप्तम्यां
क्षीरभोजनम् ॥ ४ ॥ कृत्वा कुर्यात्फलत्यागं या च स्यात्कृष्णसप्तमी ॥ एतामुपोष्य विधिवदनेनैव क्रमेण तु ॥ ५ ॥ तद्वै हैमं फलं दत्त्वा सुवर्ण
कमलान्वितम् ॥ शर्करापात्रसंयुक्त वस्त्रमालासमन्वितम् ॥ ६ ॥ षष्ठ्योरुभयोर्महाराज यावत्संवत्सरं ततः ॥ उपोष्य दद्यात्क्रमशः सूर्यमंत्रानुदीर
येत् ॥ ७ ॥ भानुरर्को रविर्ब्रह्मा सूर्यः शुक्रो हरिः शिवः ॥ श्रीमान्विभावसुस्त्वष्टा वरुणः प्रीयतामिति ॥ ८ ॥ प्रतिमासं च सप्तम्यामेकैकं नाम
कीर्तयेत् ॥ प्रतिपक्षं फलत्यागमेतत्कुर्वन्समाचरेत् ॥ ९ ॥ व्रतांते विप्रमिथुनं पूजयेद्वस्त्रभूषणैः ॥ शर्कराकलशं दद्याद्धैमपद्मफलान्वितम् ॥ १० ॥
यथा फलकरो मासस्त्वद्भक्तानां सदा रवे ॥ तथानंतफलावाप्तिरस्तु जन्मनिजन्मनि ॥११॥ इमामनंतफलदां फलषष्ठीं करोति यः ॥ स सर्वपाप
निर्मुक्तः सूर्यलोके महीयते ॥१२॥ सुरापानादिकं किञ्चिद्यदत्रामुत्र वा कृतम् ॥ तत्सर्वं नाशमायाति सूर्यलोकं स गच्छति ॥१३॥ भूतान्भव्यांश्च
पुरुषांस्तारयेदेकविंशतिम् ॥ शृणुयाद्यः पठेद्वापि सोपि कल्याणभाग्भवेत् ॥१४॥ हैमं फलं सकमलं कलशं सितायाः षष्ठीमुपोष्य विधिवद्द्विजपुंग
वाय ॥ दद्यात्सुरासुरशिरोमणिघृष्टपादं भानुं प्रणम्य फलसिद्धिमुपैति मर्त्यः ॥१५॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणिश्रीकृष्णयुधिष्ठिरसंवादे
कमलषष्ठीव्रतं नामैकोनचत्वारिंशत्तमोऽध्यायः ॥ ३९ ॥छ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अथातः संप्रवक्ष्यामि सर्वपापप्रणाशिनीम् ॥ सर्वकामप्रदां
पुण्यां षष्ठीं मन्दारसंज्ञिताम् ॥ १ ॥ माघस्यामलपक्षे तु पञ्चम्यां लघुभुङ्नरः ॥ दंतकाष्ठं ततः कृत्वा षष्ठीमुपवसेद्बुधः ॥ विप्रान्संपूज्य विधिवन्मं
दारं प्राशयेन्निशि ॥२॥ ततः प्रभाते चोत्थाय कृतस्नानः पुनर्द्विजान् ॥ भोजयेच्छक्तितः कृत्वा मंदारकुसुमाष्टकम् ॥३॥ सौवर्णं पुरुषं तद्वत्पद्महस्तं
सुशोभनम् ॥ पद्मं कृष्णतिलैः कृत्वा ताम्रपात्रेऽष्टपत्रकम् ॥ ४ ॥ पूज्य मंदारकुसुमैर्भास्करायेति पूर्वतः ॥ नमस्कारेण तद्वच्च सूर्यायेत्यनले दले ॥
॥५॥ दक्षिणे तद्वदर्काय तथार्यम्णे च नैर्ऋते ॥ पश्चिमे वसुधात्रे च वायव्ये चण्डभानवे ॥६॥ पूष्णे ह्युत्तरतः पूज्य आनंदायेत्यतःपरम् ॥ कर्णिकायां

तु पुरुषः पूज्यः सर्वात्मनेति च ॥ ७ ॥ शुक्लवस्त्रैः समावेष्टय भक्ष्यैर्माल्यफलादिभिः ॥ एवमभ्यर्च्य तत्सर्वं दद्याद्वेदविदे पुनः ॥ भुंजीतातैललवणं
वाग्यतः प्राङ्मुखो गृही ॥ ८ ॥ अनेन विधिना सर्वं सप्तम्यां मासिमासि च ॥ कुर्यात्संवत्सरं यावद्वित्तशाठ्यविवर्जितः ॥ ९ ॥ एतदेव व्रतांते
तु निधाय कलशोपरि ॥ गोभिर्विभवतः सार्द्धं दातव्यं भूतिमिच्छता ॥ १० ॥ नमो मंदारनाथाय मंदारभवनाय च ॥ त्वं च वै तारयस्वास्मा
नस्मात्संसारकर्दमात् ॥ ११ ॥ अनेन विधिना यस्तु कुर्यान्मंदारकं व्रतम् ॥ विपाप्मा स सुखी मर्त्यः कल्पं च दिवि मोदते ॥ १२ ॥ इमा
मघौघपटलध्वांतसद्वर्तिदीपिकाम् ॥ गच्छन्प्रगृह्य संसारशर्वर्यां न स्खलेन्नरः ॥ १३ ॥ मंदारषष्ठीं विख्यातामीप्सितार्थफलप्रदाम् ॥ यः पठेच्छृ
णुयाद्वापि सोपि पापैः प्रमुच्यते ॥ १४ ॥ षष्ठीमुपोष्य तिलपङ्कजकर्णिकायां संपूज्य भास्करमहो सुरवृक्षपुष्पैः ॥ यत्प्राप्नुवंति पुरुषा न हि
तत्कदाचिद्गोभूहिरण्यतिलदाः पदमाप्नुवन्ति ॥ १५ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे मंदारषष्ठीव्रतनिरूपणंनाम
चत्वारिंशोऽध्यायः ॥ ४० ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ भद्र भाद्रपदे मासि शुक्लषष्ठ्यां युधिष्ठिर ॥ योषित्सुवेषा सुभगा सर्वलोकमनोहरा
॥ १ ॥ प्रातः स्नानं महानद्यां कृत्वा संगृह्य वालुकाम् ॥ नवे वंशमये पात्रे यायाद्गृहमतंद्रिता ॥ २ ॥ सोपवासा प्रयत्नेन देवीं तत्र प्रपूजयेत् ॥
कृत्वा वस्त्रगृहं रम्यं दीपनेत्रपटावृतम् ॥ ३ ॥ तत्र संस्थाप्य तां देवीं पुष्पैः संपूजयेन्नवैः ॥ ध्यात्वा ललितिकां गौरीं तपोवननिवासिनीम् ॥ ४ ॥
मंत्रेणानेन कुसुमैश्चंपकस्य सुशोभनैः ॥ चंपकं करवीरं च नेमालिं मालतीं तथा ॥ नीलोत्पलं केतकीं च संगृह्य तगरं तथा ॥ ५ ॥ एकैकस्य
त्वष्टशतमष्टाविंशतिरेव वा ॥ अक्षतैः कलिका ग्राह्यास्तैस्तु देवीं समर्चयेत् ॥ ६ ॥ गंगाद्वारे कुशावर्ते बिल्वके नीलपर्वते ॥ स्नात्वा कनखले
तीर्थे हरं लब्धवती व्रजेत् ॥ ७ ॥ ललितेललिते देवि सौख्यसौभाग्यदायिनि ॥ या सौभाग्यसमुत्पन्ना तस्यै देव्यै नमोनमः ॥ एवमभ्यर्च्य
विधिना नैवेद्यं पुरतो न्यसेत् ॥ ८ ॥ कूष्मांडैः कर्कटीवृंतैः कर्कोटैः कारवेल्लकैः ॥ वृंताकैरक्षतैरङ्गैर्दीपधूपाद्यलक्तकैः ॥ ९ ॥ सार्द्धं सगुडकैर्धूपैः
सोहालककरंबकैः ॥ गुडपुष्पैः कर्णवेष्टैर्मोदकैर्मुखमोदकैः ॥ १० ॥ एवमभ्यर्च्य विधिवद्रात्रौ जागरणं ततः ॥ गीतवाद्यनटच्छत्रप्रेक्षणीयैः सुशो
भनैः ॥ सखीभिः सहिता साध्वी तां रात्रीं प्रशमन्नयेत् ॥ ११ ॥ न च सम्मीलयेन्नेत्रे नारी यामचतुष्टयम् ॥ दुर्भगा दुर्गता वंध्या नेत्रसंमीलना
द्भवेत् ॥ १२ ॥ एवं जागरणं कृत्वा सप्तम्यां सरितं नयेत् ॥ गन्धपुष्पैरथाभ्यर्च्य गीतवाद्यपुरःसरम् ॥ १३ ॥ तच्च दद्याद्द्विजेंद्राय नैवद्यादि नरो
त्तम ॥ स्नात्वा गृहमुपागम्य हुत्वा वैश्वानरं क्रमात् ॥ देवान्पितॄन्मनुष्यांश्च पूजयित्वा सुवासिनीम् ॥ १४ ॥ कुमारिका भोजनीया ब्राह्मणा दश

पंच च ॥ भक्ष्यभोज्यैर्बहुविधैर्देया तेभ्यः सुदक्षिणा ॥ ललिता प्रीतियुक्ताऽस्तु इत्युक्त्वा तान्विसर्जयेत् ॥ १५ ॥ यः कश्चिदाचरेदेतद्भक्त्या ललितिकाव्रतम् ॥ नरो वा यदि वा नारी तस्य पुण्यफलं शृणु ॥ १६ ॥ तन्नास्ति मानुषे लोके तस्य यन्नोपपद्यते ॥ सुखसौभाग्यसंयुक्ता गौरीलोकमवाप्नुयात् ॥ १७ ॥ षष्ठ्यां जलांतरगता वरवंशपात्रे संगृह्य पूजयति या सिकताः क्रमेण ॥ नक्तं च जागरमनुद्धतगीतनृत्यैः कृत्वा ह्यसौ त्रिभुवने ललितेव भाति ॥१८॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे ललिताषष्ठीव्रतवर्णनं नामैकचत्वारिंशोऽध्यायः ॥४१॥

॥ ॥ श्रीकृष्ण उवाच ॥ ॥ येयं मार्गशिरे मासि षष्ठी भरतसत्तम ॥ पुण्या पापहरा धन्या शिवा शान्ता गुहप्रिया ॥ १ ॥ निहत्य तारकं षष्ठ्यां गुहस्तारकराजवत् ॥ रराज तेन दयिता कार्त्तिकेशस्य सा तिथिः ॥ स्नानदानादिकं कर्म तस्यामक्षयमुच्यते ॥२॥ यस्यां पश्यंति गांगेयं दक्षिणापथमाश्रितम् ॥ ब्रह्महत्यादिपापैस्ते मुच्यंते नात्र संशयः ॥ ३ ॥ तस्मादस्यां सोपवासः कुमारं स्वर्णसंभवम् ॥ राजतं वा महाराज मृन्मयं वापि कारयेत् ॥ ४ ॥ अपराह्ने ततः स्नात्वा समाचम्य यतव्रती ॥ पद्मासनस्थो गाङ्गेयं ध्यायंस्तिष्ठेत्समाधिना ॥ ५ ॥ ब्राह्मणस्तु ततो विद्वान्गृहीत्वा करकं नवम् ॥ पातयेत्तस्य शिरसि धारां वै दक्षिणामुखः ॥ ६ ॥ चन्द्रमण्डलभूतानां भवभूतिपवित्रिता ॥ गंगाकुमारधारेयं पतिता तव मस्तके ॥७॥ एवं स्नात्वा समभ्यर्च्य भास्करं भुवनाधिप ॥ पुष्पधूपादिना पश्चात्पूजयेत्कृत्तिकासुतम् ॥ ८ ॥ देव सेनापते स्कन्द कार्त्तिकेय भवोद्भव ॥ कुमार गुह गांगेय शक्तिहस्त नमोऽस्तु ते ॥ ९ ॥ एभिर्नामपदैः पूज्य नैवेद्यं विनिवेदयेत् ॥ फलानि दक्षिणान्नानि चन्दनं मलयोद्भवम् ॥ ॥१०॥ पार्श्वस्थौ पूजयेच्छागकुक्कुटौ स्वामिवल्लभौ ॥ सकलापं मयूरं च प्रत्यक्षां हिमजां तथा ॥११॥ कृत्तिकाकटकं पार्श्वे संपूज्य स्कन्दवल्लभम् ॥ तेनैव नामभिर्होमः कार्यः साज्यैस्तिलैस्तथा ॥ १२ ॥ एवं निर्वर्त्य विधिवत्फलमेवं युधिष्ठिर ॥ भक्षयित्वा स्वपेद्भूमौ स्वास्तृते दर्भसंस्तरे ॥ ॥ १३ ॥ नालिकेरं मातुलुंगं नारिंगं पनसं तथा ॥ जंबीरं दाडिमं द्राक्षां हृद्यान्याम्रफलानि च ॥ १४ ॥ श्रीफलामलकं तद्वत्रपुंसं कदलीफलम् ॥ क्रमेण भक्षयेद्राजन्संयतो नियतव्रती ॥ अलाभे कलकालौघफलमद्यादतंद्रितः ॥ १५ ॥ प्रत्यक्षो हेमघटितश्छागो वा कुक्कुटोऽथवा ॥ प्रातर्दद्याद्द्विजायैतत्सेनानीः प्रीयतामिति ॥ १६ ॥ सेनायां स च संभूतः क्रौञ्चारिः षण्मुखो गुहः ॥ गांगेयः कार्त्तिकेयश्च स्वामी बालग्रहाग्रणीः ॥ १७ ॥ छागप्रियश्शक्तिधरो द्वारो द्वादशमः स्मृतः ॥ प्रीयतामिति सर्वेषु क्रमान्मासेषु कीर्तयेत् ॥ १८ ॥ ब्राह्मणान्भोजयित्वादौ पश्चाद्भुञ्जीत वाग्यतः ॥ एवं संवत्सरस्यान्ते कार्त्तिके मासि शोभने ॥१९॥ कार्त्तिकेयं समभ्यर्च्य वासोभिर्भूषणैः सह ॥ गांगेयः कार्तिकेयश्च सकृदेवैवमाचरेत ॥२०॥

संवत्सरविधिं कृत्वा जपं होमपुरस्कृतम् ॥ दद्याद्विप्राय राजेन्द्र वाचकाय विशेषतः ॥२१॥ एते विप्राः स्मृता दिव्या भौमास्त्वन्ये द्विजातयः ॥
पालितेऽस्मिन्व्रते पार्थ तीर्णः स्याद्भवसागरात् ॥२२॥ एवं यःकुरुते भक्त्या नरो योषिदथापि वा ॥ स प्राप्येह शुभं कामं गच्छतीन्द्रसलोकताम् ॥
॥२३॥ सदैव पूजनीयस्तु कार्तिकेयोमहीपते ॥ कार्त्तिकेयादृते नान्यो राज्ञां पूज्यः प्रवक्ष्यते ॥२४॥ संग्रामं गच्छमानो यः पूजयेत्कृत्तिकासुतम् ॥
स सर्वं जयते वीरो यथेन्द्रो दानवान्रणे ॥२५॥ तस्मात्सर्वप्रयत्नेन पूजयेच्छंकरात्मजम् ॥ पूज्यमानस्तु सद्भक्त्या सर्वान्कामान्प्रयच्छति ॥२६॥
यस्तु षष्ठ्यां नरो नक्तं कुर्याद्भारतसत्तम ॥ सर्वपापविनिर्मुक्तो गांगेयस्य सदा व्रजेत् ॥२७॥ श्रुत्वैवं दक्षिणां मासं गत्वा श्रद्धासमन्वितः॥ पूजयेद्देवदेवेशं
स गत्वा शिवमंदिरम् ॥ २८ ॥ स्कन्दं गुहं शरवणोद्भवमादिदेवं शम्भोः सुतं सदयितं गिरिराजपुत्र्याः ॥ स्वर्गे निरर्गलसुखान्यनुभूयते
न सेनापतिर्भवति राज्यधुरंधुरोऽसौ ॥ २९ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे तारकवधकार्त्तिकेयपूजाषष्ठी
व्रतवर्णनं नाम द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ सप्तमी च यदा देव केन कालेन पूज्यते ॥ किंफला नियमः
कश्चिद्वद् देवकिनन्दन ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ शुक्लपक्षे तु सप्तम्यां यदादित्यदिनं भवेत् ॥ सप्तमी विजया नाम तत्र दत्तं महाफलम्
॥ २ ॥ स्नानं दानं जपो होम उपवासस्तथैव च ॥ सर्वं विजयसप्तम्यां महापातकनाशनम् ॥ ३ ॥ प्रदक्षिणां यः कुरुते फलैः पुष्पैर्दिवाकरम्
॥ स सर्वगुणसंपन्नं पुत्रं प्राप्नोत्यनुत्तमम् ॥ ४ ॥ प्रथमा नालिकेरैस्तु द्वितीया रक्तनागरैः ॥ तृतीया मातुलुंगैश्च चतुर्थी कदलीफलैः ॥
॥ ५ ॥ पञ्चमी वरकूष्माण्डैः षष्ठी पक्वैस्तु तैंदुकैः[1] ॥ वृन्ताकैः सप्तमी देया अष्टोत्तरशतेन च ॥ ६ ॥ मौक्तिकैः पद्मरागैश्च नीलैः कर्केतनैस्तथा ॥
गोमेदैर्वज्रवैडूर्यैः शतेनाष्टाधिकेन तु ॥ ७ ॥ अक्षोटैर्बदरैर्बिल्वैः करमर्दैः सबर्बरैः ॥ आम्राम्रातकजंबीरैर्जंबुकर्कोटिकाफलैः ॥८॥ पुष्पैर्धूपैः फलैः
पत्रैर्मोदकैर्गुणकैः शुभैः ॥ एभिर्विजयसप्तम्यां भानोः कुर्यात्प्रदक्षिणाम् ॥ ९ ॥ अन्यैः फलैश्च काम्यैश्च ऐक्षवैर्ग्रंथिवर्जितैः ॥ रवेः प्रदक्षिणा देया
फलेन फलमादिशेत् ॥ १० ॥ न विशेन्न च संजल्पेन्न च कश्चिद्वदेदपि ॥ एकचित्ततया भानुश्चिन्तनाय प्रयच्छति ॥ ११ ॥ वसोर्धारा प्रदातव्या
भानोर्गव्येन सर्पिषा ॥ चन्द्रातपत्रं बध्नीयाज्जयं किंकिणिकायुतम् ॥१२॥ कुंकुमेन समालभ्य पुष्पधूपैश्च पूजयेत् ॥ शुभं निवेद्य नैवेद्यं ततः पश्चात्क्षमापयेत्
॥१३॥ भानो भास्कर मार्तण्ड चण्डरश्मे दिवाकर ॥ आरोग्यमायुर्विजयं पुत्रं देहि नमोऽस्तु ते ॥ १४ ॥ उपवासेन नक्तेन तथैवाया

---

[1] षष्टिपक्वैस्तु तंडुलैः—इ० पा० ।

चितेन च ॥ कृता नियमयुक्तेन या त्वियं जयसप्तमी ॥ १५ ॥ रोगी विमुच्यते रोगाद्दरिद्रः श्रियमाप्नुयात् ॥ अपुत्रो लभते पुत्रं विद्या विद्या
र्थिनो भवेत् ॥ १६ ॥ शुक्लपक्षे यदा पार्थ सादित्यसप्तमी भवेत् ॥ तदा नक्तेन मुद्गाशी क्षपयेत्सप्त सप्तमीः ॥ १७ ॥ भूमौ पलाशपत्रेषु
स्नात्वा हुत्वा यथाविधि ॥ समाप्ते तु व्रते दद्यात्सौवर्णं मुद्गमिश्रितम् ॥ १८ ॥ मुद्गं श्रेष्ठाय विप्राय वाचकाय विशेषतः॥ सप्तिम्यां सप्तिसंयुक्त
आदित्येन नरोत्तम ॥ १९ ॥ उपोष्य विधिनानेन मन्त्रप्राशनपूजनैः ॥ षडक्षरेण मन्त्रेण सर्वं कार्यं विजानता ॥ २० ॥ अर्चनं वह्निकार्यं
च शतमष्टोत्तरं नरः ॥ समाप्ते तु व्रते पश्चात्सुवर्णेन घटापितम् ॥ २१ ॥ सौवर्णं भास्करं पार्थ रुक्मपात्रगतं शुभम् ॥ रक्तांबरं च काषायं
गन्धं दद्यात्सदक्षिणम् ॥ २२ ॥ मन्त्रेणानेन विप्राय कर्मसिद्ध्यै द्विजातये ॥ ॐ भास्कराय सुदेवाय नमस्तुभ्यं यशस्कर ॥ २३ ॥ ममाद्य
समीहितार्थप्रदो भव नमोनमः ॥ दानानि च प्रदेयानि गृहाणि शयनानि च ॥ २४ ॥ श्राद्धानि पितृदेवानां शाश्वतीं तृप्तिमिच्छता ॥ यात्राप्र
शस्ता यातॄणां राज्ञां च जयमिच्छताम् ॥२५॥ विजयो जायतेऽवश्यं यतीनां च नृणां तदा ॥ अतोर्थं विश्रुता लोके सदा विजयसप्तमी ॥ २६॥
एवमेषा तिथिः पार्थ इह कामप्रदा नृणाम् ॥ परत्र सुखदा सौम्या सूर्यलोकप्रदायिनी ॥ २७ ॥ दाता भोगी च चतुरो दीर्घायुर्नीरुजः सुखी ॥
इहागत्य भवेद्राजा हस्त्यश्वधनरत्नवान् ॥ २८ ॥ नारी वा कुरुते या तु सापि तत्पुण्यभागिनी ॥ भवत्यत्र न संदेहः कार्यः पार्थ त्वया क्वचित् ॥
॥ २९ ॥ स्वर्ग्या समीहितसुखार्थफलप्रदा च या मृग्यते मुनिवरैः प्रवरा तिथीनाम् ॥ सा भानुपादकमलार्चनचिंतकानां पुंसां सदैव विजया
विजयं ददाति ॥३०॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे विजयसप्तमीव्रतकथनं नाम त्रिचत्वारिंशोऽध्यायः ॥४३॥
॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अथान्यदपि ते वच्मि दानं श्रेयस्करं परम् ॥ आदित्यमंडलं नाम सर्वाशुभविनाशनम् ॥ १ ॥ यवचूर्णेन शुभ्रेण
कुर्याद्गोधूमजेन वा ॥ सुपक्वं भानुबिंबाभं गुडगव्याज्यपूरितम् ॥ २ ॥ संपूज्य भास्करं भक्त्या तदग्रे मंडलं शुभम् ॥ रक्तचन्दनजं कुर्यात्कुंकुमं
वा विशेषतः ॥ ३ ॥ मण्डलं तत्र संस्थाप्य रक्तवस्त्रैः सुपूजितम् ॥ ब्राह्मणाय प्रदातव्यं मंत्रेणानेन पांडव ॥ ४ ॥ आदित्यतेजसोत्पन्नं राजतं
विधिनिर्मितम् ॥ श्रेयसे मम विप्र त्वं प्रतिगृह्णेदमुत्तमम् ॥ ५ ॥ (इति दानमंत्रः) कामदं धनदं धर्म्यं पुत्रदं सुखदं तव ॥ आदित्यप्रीतये दत्तं
प्रतिगृह्णामि मंडलम् ॥ ६ ॥ (इति प्रतिग्रहमंत्रः) एवं दत्त्वा नरो राजन्सूर्यवद्दिवि राजते ॥ सर्वकामसमृद्धार्थो मंडलाधिपतिर्भवेत् ॥ ७ ॥
दातव्यं जयसप्तम्यां तदारभ्य दिनेदिने ॥ भास्करस्य महाराज शक्त्या भावेन भावितः ॥ ८ ॥ गोधूमचूर्णजनितं यवचूर्णजं वा आदित्य

मंडलमखण्डगुडाद्यपूर्णम् ॥ कृत्वा द्विजाय विधिवत्प्रतिपादयेद्यो भूमौ भवत्यमितमंडलमांडितोऽसौ ॥ ९ ॥ इति श्रीभविष्ये महापुराण उत्तर
पर्वणि श्रीकृष्णयुधिष्ठिरसंवादे आदित्यमंडलविधिवर्णनं नाम चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ यामुपोष्य नरः
कामान्प्राप्नोति मनसेप्सितान् ॥ तामेकां वद मे देव सप्तमीं धनसौख्यदाम् ॥ १ ॥ श्रीकृष्ण उवाच ॥ ॥ भानोर्दिने सिते पक्षे अतीते
चोत्तरायणे ॥ पुन्नामाह्वयनक्षत्रे गृह्णीयात्सप्तमीव्रतम् ॥ २ ॥ सव्रीहिकान्यवतिलान्सह माषमुद्गैर्गोधूममांसमधुमैथुनकांस्यपात्रम् ॥ अभ्यंजनांजन
शिलातलचूर्णितानि षष्ठ्यां परं परिहरेद्दहनि प्रसिद्ध्यै ॥ ३ ॥ देवान्मुनीन्पितृगणान्सजलांञ्जलीभिः संतर्प्य पूज्य गगनांगणहस्तभुक्तान् ॥
हुत्वानले तिलयवान्बहुशो घृताक्तान्भूमौ स्वपेद्धृदि निधाय हि तं सवित्रम् ॥ ४ ॥ यानि त्रयोदश जनैरिह वर्जितानि द्रव्याणि तानि परिहृत्य
परिद्विषष्ट्या ॥ संप्राश्य शुद्धचणकानिह वर्षमेकं प्राप्नोति भारत सुखं मनसेप्सितं च ॥ ५ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्ण
युधिष्ठिरसंवादे त्रयोदशवर्ज्यसप्तमीव्रतं नाम पंचचत्वारिंशोऽध्यायः ॥ ४५ ॥ ॥ छ ॥ श्रीकृष्ण उवाच ॥ ॥ लोमशो नाम विप्रर्षिर्मथुरायां
गतः पुरा ॥ सोर्चितो वसुदेवेन देवक्या च युधिष्ठिर ॥ १ ॥ उपविष्टः कथाः पुण्याः कथयित्वा मनोहराः ॥ ततः कथयितुं भूयः कथामेतां प्रच
क्रमे ॥२॥ कंसे हते मृताः पुत्राः पुत्रा जाताः पुनः पुनः ॥ मृतवत्सा देवकि त्वं पुत्रदुःखेन दुःखिता॥३॥यथा चन्द्रमुखी दीप्तिर्बभूव मृतपुत्रिका ॥
पश्चाच्चीर्णव्रता सैव बभूवाक्षतवत्सका ॥ त्वमेव देवकि तथा भविष्यसि न संशयः ॥४॥ ॥ देवक्युवाच ॥ ॥ का सा चन्द्रमुखी ब्रह्मन्बभूव बहु
पुत्रिका ॥ ५ ॥ चरितं किं व्रतवरं बहुसंततिकारकम् ॥ सतां सदर्थकरणं सौभाग्यारोग्यवर्द्धनम् ॥ ६ ॥ ॥ लोमश उवाच ॥ ॥ अयोध्यायां
पुरा राजा नहुषो नाम विश्रुतः ॥ तस्य राज्ञो महादेवी नाम्ना चन्द्रमुखी पुरा ॥ ७ ॥ पुरोहितस्य तस्यैव पत्न्यासीन्मानमानिका ॥ तयोरासी
द्दृढा प्रीतिः स्पृहणीया परस्परम् ॥ ८ ॥ अथापि तेपि मित्रिण्यौ स्नानार्थं सरयूजले ॥ प्राप्ते प्राप्ताश्च तत्रैव बह्वयश्च नगराङ्गनाः ॥ ९ ॥ स्नात्वा
तु मंडलं चक्रुः स्वपतेर्व्यक्तरूपिणः ॥ लेखयित्वा शिवं शांतमुमया सह शंकरम् ॥ १० ॥ गन्धपुष्पाक्षतैर्भक्त्या पूजयित्वा यथाविधि ॥ प्रणम्य
गंतुकामास्ताः पृष्टास्ताभ्यां नरस्त्रियः ॥ ११ ॥ ता ऊचुः शङ्करोऽस्माभिः पार्वत्या सह पूजितः ॥ स्वर्णसूत्रमयस्तंतुः शिवायात्मा निवे
दितः ॥ १२ ॥ धारामयमिदं तावद्यावत्प्राणावधारणम् ॥ तासां तु वचनं श्रुत्वा मित्रिण्यौ तेऽपि भारत ॥ १३ ॥ तस्यैव समयं तत्र बद्ध्वा
दोर्भ्यां तु दोरकैः ॥ ततस्ताः स्वगृहाञ्जग्मुः स्वसखीभिः समावृताः ॥ १४ ॥ कालेन महता यातं तस्या वै तद्व्रतं नृप ॥ चंद्रवत्याः

प्रमत्तााया विस्मृतः स तु दोरकः ॥ १५ ॥ मृता कैश्चिदहोरात्रैः सा बभूव प्लवङ्गमी ॥ मानी च कुक्कटी जाता प्रायः संनिकटंचरे ॥
॥ १६ ॥ तथैव जाते मित्रिण्यौ पूर्वजातिस्मरे तथा ॥ संभूय भूपसमयं प्राग्भूतं चक्रतुः पुनः ॥ १७ ॥ तद्दिने तत्र संप्राप्ते पुनः काले
न ते मृते ॥ तत्रैव मात्रके देशे जाते गोकुलसंयुते ॥ १८ ॥ राज्ञो जाया बभूवाथ पृथ्वीनाथस्य वा पुनः ॥ ईश्वरी नाम विख्याता
राज्ञी राजेंद्रवल्लभा ॥ १९ ॥ अग्निमीलां द्विजस्याभूद्भार्या भूषणनामिका ॥ पुरोहितस्य कालेन कुक्कुटी बहुपुत्रिणी ॥ २० ॥ जाति
स्मरा पद्महस्ता अष्टपुत्रा मृतप्रजा ॥ पुनर्निरन्तरा प्रीतिर्बभूवाथ तयोर्नृप ॥ २१ ॥ तत्रेश्वरी पुत्रमेकं प्रसूता चैव रोगिणम् ॥ नववर्षस्तु
पञ्चत्वमगात्स च युधिष्ठिर ॥ २२ ॥ ततस्तां भूषणां द्रष्टुमथैषा पुत्रदुःखिता ॥ सखीभावादतिस्नेहात्सर्वपुत्रसमन्विता ॥ अमुक्ताभरणा नित्यं
स्वभावेनैव भूषिता ॥ २३ ॥ तां दृष्ट्वा पुत्रिणीं भव्यां प्रजज्वालेश्वरी रुषा ॥ ततो गृहं प्रेष्य च तां सखीं वै तीव्रमत्सरा ॥ २४ ॥ चिन्तयामास
सा रात्र्यां तस्याः पुत्रवधं प्रति ॥ हताहताश्च तत्पुत्रा पुनर्जीवन्त्यनामयाः ॥ २५ ॥ कदाचिदाहूय सखीं भूषणां पुरतः स्थिताम् ॥ ईश्वरी प्राह
किमिदं सखि पुण्यं त्वया कृतम् ॥ २६ ॥ येन ते निहताः पुत्राः पुनर्जीवन्ति नो भयम् ॥ बहुपुत्रा जीववत्सा अमुक्ताभरणा कथम् ॥ शोभसेऽ
भ्यधिकं भद्रे विद्युत्सौदामिनीव हि ॥ २७ ॥ ॥ भूषणोवाच ॥ ॥ भद्रे भाद्रपदे मासि सप्तम्यां सलिलाशये ॥ स्नात्वा शिवं मंडलके लेख
यित्वा सहांबिकम् ॥ २८ ॥ भक्त्या संपूज्य समयं कुर्याद्बद्ध्वा करे गुणम् ॥ यावज्जीवं मया तावच्छिवस्यात्मा निवेदितः ॥ २९ ॥ इत्येवं समयं
कृत्वा ततःप्रभृति दोरकम् ॥ स्वर्णरौप्यमयं वापि करशाखासु धारयेत् ॥ ३० ॥ मंडकं वेष्टिकां दद्याच्छुक्लपक्षे द्विजे तु वा ॥ स्वयं च ता न
भोक्तव्या व्रतभंगभयात्सखि ॥ ३१ ॥ परितो मुद्रिका रौप्या सौवर्णी च युधिष्ठिर ॥ ताम्रपात्रोपरि स्थाप्य ब्राह्मणाय निवेदयेत् ॥ ३२ ॥ सोहा
लकानि कांसारं दद्याद्भुञ्जीत च स्वयम् ॥ मण्डलं सद्म वित्तं च शिवं शक्तिसमन्वितम् ॥ ३३ ॥ सम्पूज्य सखि दुष्प्राप्यं त्रैलोक्येऽपि न
विद्यते ॥ तदेवं समयः पूर्वं त्वया सह मया कृतः ॥ ३४ ॥ स मया पालितो भक्त्या ततोऽहं सुस्थिता सखि ॥ त्वया स भग्नः समयो दर्पात्त्यक्तः
शरीरयोः ॥ ३५ ॥ तेन सन्ततिविच्छिन्ना राज्येपि सति दुःखिता ॥ एष प्रभावः कथितो व्रतस्यास्य मया तव ॥ ३६ ॥ अर्द्धं तव प्रदास्यामि
तस्य धर्मस्य सुव्रते ॥ सखीभावात्प्रतीच्छ त्वं नात्र कार्या विचारणा ॥ ३७ ॥ इत्युक्त्वा प्रतिजग्राह व्रतदानफलं ततः ॥ बभूव सुप्रजाः साध्वी

---

१ अग्निमाला—इ० पा० ।

मोक्षं प्राप सुरेश्वरी ॥ ३८ ॥ व्रतस्यास्य प्रभावेण सपुत्रा त्वं च देवकि ॥ भविष्यसि त्रिलोकेशं पुत्रं च जनयिष्यसि ॥ ३९ ॥ इत्येवं कथयि
त्वास्यै लोमशो मुनिपुंगवः ॥ जगाम नभसा पार्थ मयाऽप्येतत्तवोदितम् ॥ ४० ॥ ये चरिष्यंति मनुजा व्रतमेतद्युधिष्ठिर ॥ कृकवाकुप्रसङ्गाख्यं
देवक्या चरितं शुभम् ॥ ४१ ॥ तेषां सन्ततिविच्छेदो न कदाचिद्भविष्यति ॥ स्त्रियश्च याश्चारिष्यंति व्रतमेतत्सुतप्रदम् ॥ मर्त्यलोके सुखं स्थित्वा
यास्यंति शिवमंदिरम् ॥ ४२ ॥ यः कुक्कुटीव्रतवरं प्लवगीसमेतं चक्रे चराचरगुरुं हृदये निधाय ॥ तद्व्याकरोति कलुषौघविघातरक्षां सा स्त्री
युवां भवति शोभनगीतवत्सा ॥ ४३ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे कुक्कुटीमर्कटीव्रतवर्णनं नाम षट्चत्वा
रिंशोऽध्यायः ॥ ४६ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अत ऊर्ध्वं प्रवक्ष्यामि सप्तमीकल्पमुत्तमम् ॥ माघमासात्समारभ्य शुक्लपक्षे युधिष्ठिर ॥१॥
सप्तम्यां कुरु संकल्पमहोरात्रे व्रते नृप ॥ वरुणेत्यर्चयित्वा तु ब्रह्मकूर्चं तु कारयेत् ॥ २ ॥ अष्टम्यां भोजयेद्विप्रांस्तिलपिष्टं गुडौदनम् ॥ अग्निष्टो
मस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ ३ ॥ सप्तम्यां फाल्गुने मासि सूर्यमित्यभिपूजयेत् ॥ वाजपेयस्य यज्ञस्य यथोक्तं लभते फलम् ॥ ४ ॥
सप्तम्यां चैत्रमासे तु वेदांशुमभिपूजयेत् ॥ उक्थाध्वरसमं पुण्यं नरः प्राप्नोति भक्तिमान् ॥ ५ ॥ वैशाखस्य तु सप्तम्यां धातारमभिपूजयेत् ॥
पशुबंध्वध्वरे पुण्यं सम्यक्प्राप्नोति मानवः ॥ ६ ॥ सप्तम्यां ज्येष्ठमासस्य इन्द्र इत्यभिपूजयेत् ॥ वाजपेयस्य यज्ञस्य फलं प्राप्नोति दुर्लभम्॥७॥
आषाढमासे सप्तम्यां पूजयित्वा दिवाकरम् ॥ बहुवर्णस्य यज्ञस्य फलं प्राप्नोति पुष्कलम् ॥ ८ ॥ सप्तम्यां श्रावणे मासि मातापिं नाम पूजयेत्॥
सौत्रामणिफलं सम्यक्प्राप्नोति पुरुषः शुभम् ॥ ९ ॥ रविं प्रौष्ठपदे मासे सप्तम्यामर्चयेच्छुचिः ॥ तुलापुरुषदानस्य फलं प्राप्नोति मानवः ॥
॥ १० ॥ आश्वयुक्छुक्लसप्तम्यां सवितारं प्रपूज्य च ॥ गोसहस्रप्रदानस्य फलं प्राप्नोति मानवः ॥ ११ ॥ कार्तिके शुक्लसप्तम्यां दिनेशं सप्तवाह
नम् ॥ योऽभ्यर्चयति पुण्यात्मा पौंडरीकं स विन्दति ॥ १२ ॥ भानुं मार्गसिते पक्षे पूजयित्वा विधानतः ॥ राजसूयस्य यज्ञस्य फलं दशगुणं
भजेत् ॥ १३ ॥ भास्करं पौषमासे तु पूजयित्वा यथाविधि ॥ नरमेधस्य यज्ञस्य फलं प्राप्नोति पुष्कलम् ॥ १४ ॥ तदेव कृष्णसप्तम्यां नाम
संपूजयेद्बुधः ॥ सोपवासः प्रयत्नेन वर्षमेकं युधिष्ठिर ॥ पश्चात्समाप्ते नियमे सूर्ययागं समाचरेत् ॥ १५ ॥ शुचिर्भूमौ समे देशे लेपयेद्रक्तच
न्दनैः ॥ एकहस्तं द्विहस्तं वा चतुर्हस्तमथापि वा ॥ १६ ॥ सिंदूरगैरिकाभ्यां च सूर्यमण्डलमालिखेत् ॥ रक्तपुष्पैः सपद्मैश्च धूपैः
कुन्दुरकादिभिः ॥ सम्पूज्य दद्यान्नैवेद्यं विचित्रं घृतपाचितम् ॥ १७ ॥ पुरतः स्थापयेत्कुम्भान्सहिरण्यान्नसंयुतान् ॥ अग्निकार्यं

ततः कुर्यात्समभ्युक्ष्य हुताशनम् ॥ १८ ॥ आकृष्णेनेति मंत्रेण समिद्भिश्चार्कसंभवैः ॥ तिलैराज्यगुडोपेतैर्दद्याद्दशशताहुतीः ॥ १९ ॥
ततस्तु दक्षिणा देया ब्राह्मणानां युधिष्ठिर ॥ भोजयित्वा रक्तवस्त्रैः शुक्लान्यपि पिधापयेत् ॥ २० ॥ द्वादशात्र प्रशंसंति गावो वस्त्रान्विताः शुभाः॥
छत्रोपानहयुग्मं च एकैकाय प्रदापयेत् ॥ एवं विसृज्य तान्विप्रान्स्वयं भुञ्जीत वाग्यतः ॥ २१ ॥ य एवं कुरुते पार्थ सप्तमीव्रतमुत्तमम् ॥ नीरुजो
रूपवान्वाग्ग्मी दीर्घायुश्चैव जायते ॥ २२ ॥ सप्तम्यां सोपवासस्तु भानोः पश्यंति ये मुखम् ॥ सर्वपापविनिर्मुक्ताः सूर्यलोकमवाप्नुयुः ॥ २३ ॥
व्रतमेतन्महाराज सर्वाशुभविनाशनम् ॥ सर्वदुष्टप्रशमनं शरीरारोग्यकारकम् ॥ सूर्यलोकप्रदं चांते प्राहैवं नारदो मुनिः ॥ २४ ॥ ये सप्तमीमुपव
संति सितासितां च नामाक्षरैरहिमदीधितिमर्चयंति ॥ ते सर्वरोगरहिताः सुखिनः सदैव भूत्वा रवेरनुचराः सुचिरं भवंति ॥ २५ ॥ इति श्रीभ
विष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे उभयसप्तमीव्रतवर्णनं नाम सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥
भगवन्दुर्गसंसारसागरोत्तारकारकम् ॥ किञ्चिद्व्रतं समाचक्ष्व स्वर्गारोग्यसुखप्रदम् ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ यदा तु शुक्लसप्तम्यामादि
त्यस्य दिनं भवेत् ॥ तदा सा तु महापुण्या विजया तु निगद्यते ॥२॥ प्रातर्गव्येन पयसा स्नानमस्यां समाचरेत् ॥ शुक्लांबरधरः पद्ममक्षतैः परिक
लपयेत् ॥३॥ प्राङ्मुखोष्टदलं मध्ये तद्विचित्रां च कर्णिकाम् ॥ सर्वेष्वपि दलेष्वेव विन्यसेत्पूर्वतः क्रमात् ॥४॥ पूर्वेण तपनायेति मार्तण्डायेति वै
नमः ॥ याम्ये दिवाकरायेति विधात्रे नैर्ऋतेन च ॥५॥ पश्चिमे वरुणायेति भास्करायेति वानिले ॥ सौम्ये च वरुणायेति रवयेंत्येऽष्टमे दले ॥६॥
आदावंते च तन्मध्ये नमोऽस्तु परमात्मने ॥ मंत्रैरेवं समभ्यर्च्य नमस्कारांतदीपितैः ॥७॥ शुक्लवस्त्रफलैर्भक्ष्यैर्धूपमाल्यानुलेपनैः ॥ स्थंडिले पूजये
द्भक्त्या गुडेन लवणेन च ॥८॥ ततो व्याहृतिहोमेन विभज्य द्विजपुङ्गवान् ॥ शक्तितस्तर्पयेद्भक्त्या गुडक्षीरघृतादिभिः ॥९॥ तिलपात्रं हिरण्यं च
गुरवे च निवेदयेत् ॥ एवं नियमकृत्स्नात्वा प्रातरुत्थाय मानवः ॥१०॥ कृतस्नानजपो विप्रैः सहैव घृतपायसम् ॥ भुक्त्वा च वेदविद्भिर्बैडालव्रतव
र्जितैः ॥ ११ ॥ एवं संवत्सरस्यांते कृत्वैतदखिलं नृप ॥ उद्यापयेद्यथाशक्ति भास्करं संस्मरन्हृदि ॥ १२ ॥ घृतपात्रं सकरकं सोदकुम्भं निवेद
येत् ॥ वस्त्रालंकारसंयुक्तां सुवर्णास्यां पयस्विनीम् ॥ १३ ॥ एकामपि प्रदद्याद्गां वित्तहीनो विमत्सरः ॥ वित्तशाठ्यं न कुर्वीत ततो मोहात्पत
त्यधः ॥ १४ ॥ अनेन विधिना यस्तु कुर्यात्कल्याणसप्तमीम् ॥ शृणुयाद्वा पठेद्वापि सोऽपि पापैः प्रमुच्यते ॥ १५ ॥ यश्चाष्टपत्रकमलोदरक

र्णिकायां संपूजयेत्कुसुमधूपविलेपनाद्यैः ॥ षष्ठ्याः परेहनि नवार्तिहरं दिनेशं कल्याणभाजनमसौ भवते हि जंतुः ॥ १६ ॥ इति श्रीभविष्ये
महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे कल्याणसप्तमीव्रतवर्णनं नामाष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥ ॥छ॥ ॥ श्रीकृष्ण उवाच ॥ ॥
शर्करासप्तमीं वक्ष्ये सर्वकल्मषनाशिनीम् ॥ आयुरारोग्यमैश्वर्यं ययानंतं प्रजायते ॥ १ ॥ माधवस्य सिते पक्षे सप्तम्यां श्रद्धयान्वितः ॥ प्रातः
स्नात्वा तिलैः शुद्धैः शुक्लमाल्यानुलेपनैः ॥ २ ॥ स्थंडिले पद्ममालिख्य कुंकुमेन सकर्णिकम् ॥ तस्मिन्नमः सवित्रेति गन्धपुष्पं निवेदयेत् ॥३॥
स्थापयेदुदकुंभं च शर्करापात्रसंयुतम् ॥ रक्तवस्त्रैः स्वलंकृत्य शुक्लमाल्यानुलेपनैः ॥ ४ ॥ सुवर्णाश्वसमायुक्तं मंत्रेणानेन पूजयेत् ॥ विश्वेदेवमयो
यस्माद्वेदवादीति पठ्यते[१] ॥ ५ ॥ त्वमेवामृतसर्वस्वमतः पाहि सनातन ॥ सौरसूक्तं जपंस्तिष्ठेत्पुराणश्रवणेन वा ॥ ६ ॥ अहोरात्रे गते पश्चादष्टम्यां
कृतनित्यकः ॥ सर्वं च वेदविदुषे ब्राह्मणयोपपादयेत् ॥७॥ भोजयेच्छक्तितो विप्राञ्छर्कराघृतपायसैः ॥ भुञ्जीत तैललवणं स्वयमप्यथ वाग्यतः ॥
॥ ८ ॥ अनेन विधिना सर्वं मासिमासि समाचरेत् ॥ वत्सरांते पुनर्दद्याद्ब्राह्मणाय समाहितः ॥ ९ ॥ शयनं वस्त्रसंवीतं शर्कराकलशान्वितम् ॥
सर्वोपस्करसंयुक्तं तथैकां गां पयस्विनीम् ॥ १० ॥ गृहं च शक्तितो दद्यात्समस्तोपस्करान्वितम् ॥ सहस्रेणापि निष्काणां कृत्वा दद्याच्छतेन वा
॥ ११ ॥ दशभिर्द्वित्रिभिर्निष्कैस्तदर्धेनापि भक्तितः ॥ सुवर्णाश्वः प्रदातव्यः पूर्ववन्मंत्रवाचनम् ॥ १२ ॥ वित्तशाठ्यं न कुर्वीत कुर्वन्दोषान्स
मश्नुते ॥ अमृतं पिबतो वक्त्रात्सूर्यस्यामृतबिन्दवः ॥१३॥ निपेतुरेत उत्थाय शालिमुद्गेक्षवः स्मृताः ॥ शर्करा च परं तस्मादिक्षुरसोद्भवा मता ॥१४॥
इष्टा रवेरतः पुण्या शर्करा हव्यकव्ययोः ॥ शर्करासप्तमी चैषा वाजिमेधफलप्रदा ॥ १५ ॥ सर्वे[२] ह्युपशमं यांति पुनः संततिवर्द्धिनी ॥ यः कुर्या
त्परया भक्त्या स परं ब्रह्म गच्छति ॥ १६ ॥ कल्पमेकं वसेत्स्वर्गे ततो याति परं पदम् ॥ १७ ॥ इदमनघ शृणोति यः स्मरेद्वा परिपठतीह सुरे
श्वरस्य लोके ॥ मतिमपि च ददाति यो जनानाममरवधूजनकिन्नरैः स पूज्यः ॥ १८ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्ण
युधिष्ठिरसंवादे शर्करासप्तमीव्रतवर्णनं नामैकोनपंचाशत्तमोऽध्यायः ॥ ४९ ॥ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अतःपरं प्रवक्ष्यामि तद्व
त्कमलसप्तमीम् ॥ यस्याः संकीर्तनादेव तुष्यतीह दिवाकरः ॥ १ ॥ वसंतेऽमलसप्तम्यां स्नातः सन्गौरसर्षपैः ॥ तिलपात्रे च सौवर्णं निधाय
कमलं शुभम् ॥ २ ॥ वस्त्रयुग्मवृतं कृत्वा गंधपुष्पैरथार्चयेत् ॥ नमस्ते पद्महस्ताय नमस्ते विश्वधारिणे ॥ ३ ॥ दिवाकर नमतुभ्यं प्रभाकर

---

१ मुच्यते–इ० पा० । २ विघ्ना इति शेषः ।

नमोऽस्तु ते ॥ ततो द्विकालवेलायामुदकुंभसमन्वितम् ॥ ४ ॥ विप्राय दद्यात्संपूज्य वस्त्रमाल्यविभूषणैः ॥ अहोरात्रे गते पश्चादष्टम्यां भोजये
द्विजान् ॥ ५ ॥ यथाशक्त्याथ भुञ्जीत विमांसं तैलवर्जितम् ॥ अनेन विधिना शुक्लसप्तम्यां मासिमासि च ॥ ६ ॥ सर्वं समाचरेद्भक्त्या वित्त
शाठ्यविवर्जितः ॥ व्रतांते शयनं दद्यात्सुवर्णकमलान्वितम् ॥७॥ गावं स दद्याच्छक्त्या तु सुवर्णाढ्यां पयस्विनीम्॥भाजनासनदीपादीन्दद्यादिष्टा
नुपस्करान् ॥ ८ ॥ अनेन विधिना यस्तु कुर्यात्कमलसप्तमीम् ॥ लक्ष्मीमनन्तामभ्येत्य सूर्यलोके च मोदते ॥ ९ ॥ कल्पेकल्पे तथा लोकान्सप्त
गत्वा पृथक्पृथक् ॥ अप्सरोभिः परिवृतस्ततो याति पराङ्गतिम् ॥ १० ॥ यः पश्यतीदं शृणुयान्मुहूर्तं पठेच्च भक्त्या सुमतिं ददाति ॥ सोऽप्य
त्र लक्ष्मीमचलामवाप्य गन्धर्वविद्याधरलोकमेति ॥ ११ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे कमलासप्तमीव्रत
वर्णनं नाम पंचाशत्तमोऽध्यायः ॥ ५० ॥ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अन्यामपि प्रवक्ष्यामि शोभनां शुभसप्तमीम् ॥ यामुपोष्य
नरो रोगाच्छोकदुःखात्प्रमुच्यते ॥ १ ॥ पुण्य आश्वयुजे मासि कृतस्नानः पयः शुचिः ॥ वाचयेत ततो विप्रानारभेच्छुभसप्तमीम् ॥ २ ॥ कपिलां
पूजयेद्भक्त्या गन्धमाल्यानुलेपनैः ॥ नमामि सूर्यसंभूतामशेषभुवनालयाम् ॥ ३ ॥ त्वामहं शुभकल्याणशरीरां सर्वसिद्धये ॥ अथाहृत्य तिल
प्रस्थं ताम्रपात्रेण संयुतम् ॥ ४ ॥ काञ्चनं वृषभं तद्वद्वस्त्रमाल्यगुडान्वितम् ॥ दद्याद्द्विकालवेलायामर्यमा प्रीयतामिति ॥ ५ ॥ पञ्चगव्यं च संप्रा
श्य स्वप्याद्भूमौ विमत्सरः ॥ ततः प्रभाते संजाते भक्त्या संतर्पयेद्द्विजान् ॥ ६ ॥ अनेन विधिना दद्यान्मासिमासि सदा नरः ॥ वाससी वृषभं
हैमं तद्वद्धेनोस्तु पूजनम् ॥ ७ ॥ संवत्सरांते शयनमिक्षुदण्डगुडान्वितम् ॥ सोपधानकविश्रामं भाजनासनसंयुतम् ॥ ८ ॥ ताम्रपात्रं तिलप्रस्थं
सौवर्णवृषसंयुतम् ॥ दद्याद्वेदविदे सर्वं विश्वात्मा प्रीयतामिति ॥ ९ ॥ अनेन विधिना राजन्कुर्याद्यः शुभसप्तमीम् ॥ तस्य श्रीर्विमला कीर्तिर्भ
वेज्जन्मनिजन्मनि ॥ १० ॥ अप्सरोगणगन्धर्वैः पूज्यमानः सुरालये ॥ वसेद्गणाधिपो भूत्वा यावदाभूतसंप्लवम् ॥ ११ ॥ स कल्पादवतीर्णस्तु
सप्तद्वीपाधिपो भवेत् ॥ ब्रह्महत्यासहस्रस्य भ्रूणहत्याशतस्य च ॥ १२ ॥ नाशङ्करोति पुण्येयं कृता वै शुभसप्तमी ॥ १३ ॥ इमां पठेद्यः शृणुया
न्मुहूर्तं वीक्षेत संगादपि दीयमानम् ॥ सोऽप्यत्र संबाध्य विमुक्तदेहः प्राप्नोति विद्याधरनायकत्वम् ॥[1] १४ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तर
पर्वणि श्रीकृष्णयुधिष्ठिरसंवादे शुभसप्तमीव्रतनिरूपणं नामैकपंचाशत्ततोऽध्यायः ॥ ५१ ॥ छ ॥ युधिष्ठिर उवाच ॥ ॥ किमुद्वेगाद्भवेत्कृत्यम

---

[1] आर्षम् ।

लक्ष्मीः केन हन्यते ॥ मृतवत्सादिकार्येषु दुःस्वप्ने च किमिष्यते ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ पुरा कृतानि पापानि फलंत्यत्र युधिष्ठिर॥
रोगदौर्गत्यरूपेण तथैवेष्टविघातनैः ॥ २ ॥ तद्विघाताय वक्ष्यामि सदा कल्याणसप्तमीम् ॥ सप्तमीस्नपनं नाम व्याधिपीडाविनाशनम् ॥ ३ ॥
बालानां मरणं यत्र क्षीरपानं प्रशस्यते ॥ तद्वद्वृद्धातुराणां च यौवने वापि वर्तताम् ॥४॥ शान्तये तत्र वक्ष्यामि मृतवत्सादिके च यत् ॥ एतदेवा
द्भुतोद्वेगचिंताविभ्रममानसम् ॥५॥ वराहकल्पे संप्राप्ते मनोर्वैवस्वतेंऽतरे॥कृते युगे महाराज हैहयो रूपवर्द्धनः ॥६॥ आसीन्नृपोत्तमः पूर्वं कृतवीर्यः
प्रतापवान् ॥ स सप्तद्वीपमखिलं पालयामास भूतलम् ॥७॥ यावद्वर्षसहस्राणि सप्तसप्तति भारत॥जातमात्रं च तस्याथ शुभं पुत्रशतं किल ॥८॥
यवनस्य तु शापेन विनाशमगमत्पुरा ॥ कृतवीर्यः समाराध्य सहस्रांशुं दिवाकरम् ॥९॥ उपवासव्रतैर्दिव्यैर्वेदसूक्तैश्च भारत ॥ दर्शयामास चात्मानं
कृतवीर्यस्य भानुमत् ॥१०॥ कृतवीर्येण वै पृष्टः प्रोवाचेदं बृहस्पतिः ॥ अतिक्लेशेन[1] महता पुत्रस्तव नराधिप ॥११॥ भविष्यति चिरंजीवी किं तु
कल्मषनाशनम् ॥ सप्तमीस्नपनं वाप्यां कुरु पापविनष्टये ॥ १२ ॥ जातस्य मृतवत्सायाः सप्तमे मासि भूपते ॥ गृहताराबलं लब्ध्वा कृत्वा ब्राह्मण
वाचनम् ॥१३॥ बालस्य जन्मनक्षत्रं वर्जयेत्तां तिथिं बुधः ॥ सद्वृद्धातुरगाणां तु कृतं स्यादितितेषु च ॥१४॥ गोमयेनोपलिप्तायां भूमावेकाग्रचि
तवान् ॥ तंडुलै रक्तशालेयैर्वरुणाक्षीरसंयुतम् ॥१५॥ निर्वपेत्सूर्यमुद्राभ्यां मातृभ्योपि विधानतः ॥ कीर्तयेत्सूर्यदैवत्यं सप्तार्चिषि घृताहुतीः ॥१६॥
जुहुयाद्रुद्रसूक्तेन तद्वद्रुद्राय भारत ॥ होतव्याः समिधश्चात्र तत्र वार्कपलाशजाः ॥१७॥ यवकृष्णतिलैर्होमः कर्तव्योष्टशतं पुनः ॥ हुत्वा स्नानं च
कर्तव्यं मध्ये गांगेन धीमता ॥ १८ ॥ विप्रेण वेदविदुषा विधिवद्दर्भपाणिना ॥ स्थापयित्वा चतुष्कोणे चतुष्कुंभान्प्रशोभनान् ॥ १९ ॥ पञ्चमं
च पुनर्मध्ये चाक्षतेन विभूषितम्[2] ॥ स्थापयेद्दर्पणाक्रांतं सप्तर्षिणाभिमंत्रितम् ॥ २० ॥ सौरेण तीर्थतोयेन पूर्णचन्द्रमलान्वितम्[3] ॥ सर्वान्सर्वौ
षधियुतान्पञ्चभंग[4]जलान्वितान् ॥ २१ ॥ पंचरत्नफलैर्युक्ताञ्छाखाभिरपि वेष्टितान् ॥ गजाश्वरथ्याराजद्वार्वल्मीकाद्ध्रदगोकुलात् ॥ २२ ॥ सुशु
द्धांमृदमानीय सर्वेष्वेव विनिक्षिपेत् ॥ चतुर्ष्वपि च कुंभेषु रत्नगर्भेषु मध्यमम् ॥ २३ ॥ गृहीत्वा ब्राह्मणं चात्र सौरान्मन्त्रानुदीरयेत् ॥ नारीभिः
सप्तसंख्याभी रथाङ्गाङ्गाभिरत्र च ॥ २४ ॥ भोजिताभिर्यथाशक्तिमाल्यवस्त्रविभूषणैः ॥ सविप्राभिश्च कर्तव्यं मृतवत्साभिषेचनम् ॥ २५ ॥ दीर्घा
युरस्तु बालोऽयं जीवपुत्रा च भाविनी ॥ आदित्यचन्द्रमासार्धं ग्रहनक्षत्रमण्डलम् ॥ २६ ॥ शक्रः सलोकपालो वै ब्रह्मा विष्णुर्महेश्वरः ॥ एते

---

[1] अतिक्रमेण–इ० पा० । [2] दक्षिणम्–इ० पा० । [3] कर्पूरसंयुतमित्यर्थः । [4] पंचभङ्गाः पंचपल्लवाः–इत्यर्थः ।

चान्ये च वै देवाः सदा पांतु कुमारकम् ॥ २७ ॥ माशनिर्मा स हुतभुङ्मा च बालग्रहा क्वचित् ॥ पीडां कुर्वंतु बालस्य मा मातृजनकस्य वै ॥
॥ २८ ॥ ततः शुक्लाम्बरधराः कुमारं पतिसंयुताः ॥ सप्तकं पूजयेद्भक्त्या पुष्पैर्गन्धैः फलैः शुभैः ॥ २९ ॥ काञ्चनीं च ततः कृत्वा तिलपात्रो
परि स्थिताम् ॥ प्रतिमां धर्मराजस्य गुरवे विनिवेदयेत् ॥ ३० ॥ वस्त्रकाञ्चनरत्नौघैर्भक्ष्यैः सघृतपायसैः ॥ पूजयेद्ब्राह्मणांस्तद्वद्वित्तशाठ्यं विव
र्जयेत् ॥ भुक्त्वा च गुरुणा चेयमुच्चार्या मंत्रसंततिः ॥ ३१ ॥ दीर्घायुरस्तु बालोऽयं यावद्वर्षशतं सुखी ॥ यत्किञ्चिदस्य दुरितं तत्क्षिप्तं वड
वामुखे ॥ ३२ ॥ ब्रह्मा रुद्रो विष्णुः स्कन्दो वायुः शक्रो हुताशनः ॥ रक्षंतु सर्वे दुष्टेभ्यो वरदा यांतु सर्वदा ॥३३॥ एवमादीनि चान्यानि वदतः
पूजयेद्गुरून् ॥ शक्तितः कपिलां दत्त्वा प्रणिपत्य विसर्जयेत् ॥३४॥ चरुं च पुत्रसहिता प्रणम्य रविशंकरौ ॥ हुतशेषं तदानीयादादित्याय नमोऽ
स्तु ते ॥ ३५ ॥ अयमेवाद्भुतं योगो ह्यद्भुतेषु च शस्यते ॥ कर्तुर्जन्मनि वृक्षाणां देवान्त्संपूजयेत्तदा ॥ शांत्यर्थं शुक्लसप्तम्यामेतत्कुर्वन्न सीदति
॥ ३६ ॥ पुण्यं पवित्रमायुष्यं सप्तमीस्नपनं रविः ॥ कथयित्वा नरश्रेष्ठ तत्रैवांतरधीयत ॥ ३७ ॥ स चानेन विधानेन कार्तवीर्योऽर्जुनो नृपः ॥
संवत्सराणामयुतं शशास पृथिवीमिमाम् ॥३८॥ आरोग्यं भास्करादिच्छेद्धनमिच्छेद्धुताशनात् ॥ शंकराज्ज्ञानमिच्छेत्तु गतिमिच्छेज्जनार्दनात् ॥
॥ ३९ ॥ एतन्महापातकनाशनं स्यादप्यक्षयं वेदविदः पठंति ॥ शृणोति यश्चैनमनन्यचेतास्तस्यापि सिद्धिं मुनयो वदंति ॥ ४० ॥ इति
श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे स्नपनसप्तमीव्रतवर्णनं नाम द्विपंचाशत्तमोऽध्यायः ॥५२॥ छ ॥ ॥ युधिष्ठिर उवाच ॥
अध्रुवेण शरीरेण सुपक्वेनापि किं फलम् ॥ माघस्नानविहीनेन यत्त्यक्तं यदुनन्दन ॥ १ ॥ प्रातःस्नानासमर्थानां शरीरं पश्य देहिनाम् ॥ किं
तेन वद कर्तव्यं माघे संसारभीरुणा ॥ २ ॥ कायक्लेशसहा नार्यो न भवंति यदूत्तम ॥ सौकुमार्यं शरीरस्य अचलत्वात्तथैव च ॥ ३ ॥ कथं च
ताः सुरूपाः स्युः सुभगाः सुप्रजास्तथा ॥ सुकृतस्येह पुण्यस्य सर्वमेतत्फलं यतः ॥ ४ ॥ अल्पायासेन सुमहद्येन पुण्यमवाप्यते ॥ स्त्रीभिर्माघे
मम ब्रूहि स्नानं तत्त्वं रमाधव ॥५॥ ॥ श्रीकृष्ण उवाच ॥ ॥ श्रूयतां पांडवश्रेष्ठ रहस्यमृषिभाषितम् ॥ यन्मया कस्यचिन्नोक्तमचलासप्तमीव्रतम् ॥
॥ ६ ॥ वेश्या चेन्दुमती नाम रूपौदार्यगुणान्विता ॥ आसीत्कुरुकुलश्रेष्ठ मगधस्य विलासिनी ॥ ७ ॥ तनुमध्या सुजघना पीनोन्नतपयोधरा ॥
सम्यग्विभक्तावयवा पूर्णचन्द्रनिभानना ॥ ८ ॥ सौंदर्यं सौकुमार्यं च तस्याः कामेन गीयते ॥ यस्याः संदर्शनादेव कामः कामातुरो भवेत् ॥९॥
मूर्तिः शशधरस्येव नयनानन्दकारिणी ॥ वशीकरणविद्येव सर्वलोकमनोहरा ॥ १० ॥ एकस्मिन्दिवसे प्रातः सुमुखस्थितया तया ॥ चिंतिता

हृदये राजन्त्संसारस्यानवस्थितिः ॥ ११ ॥ सन्निमज्य जगदिदं विषये कायसागरे ॥ जन्ममृत्युजराग्राहं न कश्चिदवबुद्ध्यते ॥ १२ ॥ अपाको
भूतभाण्डानां धातृशिलिपविनिर्मितम् ॥ स्वकर्मैधनसंवीतं पच्यते बालवह्निना ॥ १३ ॥ ये यांति दिवसाः पुंसां धर्मकामार्थवर्जिताः ॥ न ते
पुनरिहायांति हरभक्ता नरा यथा ॥ १४ ॥ स्नानं दानं तपो होमः स्वाध्यायः पितृतर्पणम् ॥ यस्मिन्दिने न क्रियते वृथा स दिवसो नृणाम् ॥
॥ १५ ॥ पुत्राणां दारगृहकसमासक्तं हि मानसम् ॥ वृकीवोरणमासाद्य मृत्युर्द्दाराय गच्छति ॥ १६ ॥ इत्येवं चिंतयित्वा तु वेश्या चेन्दुमती ततः॥
वशिष्ठस्याश्रमं पुण्यं जगाम गजगामिनी ॥ १७ ॥ वशिष्ठमृषिमासीनं प्रणम्य विनयात्ततः ॥ कृताञ्जलिपुटा भूत्वा इदं वचनमब्रवीत् ॥ १८ ॥
॥ इन्दुमत्युवाच ॥ दशसूनासमश्चक्री दशचक्रिसमो ध्वजः ॥ दशध्वजसमा वेश्या दशवेश्यासमो नृपः ॥१९॥ मया न दत्तं न हुतं नोपवासो व्रतं
कृतम् ॥ भक्त्या न पूजितः शम्भुः श्रितो[१] नैको धनी नरः ॥ २० ॥ सांप्रतं वर्तमानाया व्रतं किंचिद्वदस्व मे ॥ येन दुःखांबुपापौघादुत्तरामि भवा
र्णवात् ॥ २१ ॥ एतदस्याः सुबहुशः श्रुत्वा धर्मं परंतपः ॥ वशिष्ठः कथयामास महाकारुणिको मुनिः ॥ २२ ॥ ॥ वशिष्ठ उवाच ॥ ॥
माघस्य सितसप्तम्यां सर्वकामफलप्रदम् ॥ तपःसौभाग्यजननं स्नानं तव वरानने ॥२३॥ कृत्वा षष्ठ्यामेकभक्तं सप्तम्यां निश्चलं जलम् ॥ रात्र्यंते
चालयेथास्त्वं दत्त्वा शिरसि दीपकम् ॥ २४ ॥ माघस्य सितसप्तम्यामचलं चालितं मया ॥ जलामलानां सर्वेषां कृतं न चलनं तथा ॥ २५ ॥
वशिष्ठवचनं श्रुत्वा तस्मिन्नहनि भूपते ॥ सर्वं चकारेन्दुमती स्नानं दानं यथाविधि ॥ २६ ॥ त्र्यह[२]स्नानप्रभावेण भुक्त्वा भोग्यान्यथेप्सितान् ॥
इन्द्रलोकेप्सरःसंघे नायिकात्वमवाप सा ॥ २७ ॥ अचलासप्तमीस्नानं कथितं च विशांपते ॥ सर्वपापप्रशमनं सुखसौभाग्यवर्द्धनम् ॥ २८ ॥
॥ युधिष्ठिर उवाच ॥ सप्तमीस्नानमाहात्म्यं श्रुतं न च विशेषतः ॥ सांप्रतं श्रोतुमिच्छामि विधिमंत्रसमन्वितम् ॥२९॥ ॥ श्रीकृष्ण उवाच ॥ ॥
एकभक्तेन संतिष्ठेत्षष्ठ्यां संपूज्य भास्करम् ॥ सप्तम्यां तु व्रजेत्प्रातः सुगंभीरं जलाशयम् ॥ ३० ॥ सरित्संगं तडागं च देवखातमथापि वा ॥ सुखा
वगाहसलिलं दुष्टसत्त्वैरदूषितम् ॥ ३१॥ पशुभिः पक्षिभिश्चैव जलजैर्मत्स्यकच्छपैः ॥ न जलं चाल्यते यावत्तावत्स्नानं समाचरेत् ॥३२॥ नमस्ते
रुद्ररूपाय रसानां पतये नमः ॥ वरुणाय नमस्तेऽस्तु हरिवास नमोऽस्तु ते ॥ ३३ ॥ यावज्जन्म कृतं पापं मया जन्मसु सप्तसु ॥ तन्मे रोगं च
शोकं च माकरी हंतु सप्तमी ॥ ३४ ॥ जननी सर्वभूतानां सप्तमी सप्तसप्तिके ॥ सर्वव्याधिहरे देवि नमस्ते रविमंडले ॥ ३५ ॥ जलोपरितरं दीपं

---

[१] श्रितः आश्रित इत्यर्थः । [२] अहो स्नानप्रभावेण–इ० पा० ।

स्नात्वा संतर्प्य देवताः ॥ चंदनेन लिखेत्पद्ममष्टपत्रं सकर्णिकम् ॥३६॥ मध्ये शर्वं सपत्नीकं प्रणवेन तु पूजयेत् ॥ भानुं शक्रे दले पूज्य रविं
वैश्वानरे दले॥३७॥ याम्ये विवस्वान्नैर्ऋत्ये भास्करस्येति पूजयेत् ॥ पश्चिमे सविता पूज्यः पूज्योर्को वायुना जले ॥३८॥ सौम्ये सहस्रकिरणः शेषे
सर्वात्मनेति च ॥ पूज्याः प्रणवपूर्वास्तु नमस्कारांतयोजिताः ॥३९॥ पुष्पैः सुगन्धधूपैश्च वस्त्रेणाच्छाद्य भास्करम् ॥ विसर्जयेत्ततः पश्चात्स्वस्थानं
गम्यतामिति ॥ ४० ॥ ताम्रपात्रे सुविस्तीर्णे मृन्मये वा युधिष्ठिर ॥ स्थापयेत्तिलचूर्णं च सघृतं सगुडं तथा ॥ ४१ ॥ काञ्चनं तालकं कृत्वा ह्यसि
क्तस्तिलचूर्णकम् ॥ संस्थाप्य रक्तवस्त्रैस्तु पुष्पैर्धूपैस्तथार्चयेत् ॥ ४२ ॥ ततस्तं ब्राह्मणे दद्याद्दत्त्वा मंत्रेण तालकम् ॥ आदित्यस्य प्रसादेन प्रातः
स्नानफलं भजेत् ॥ ४३ ॥ दुष्टदौर्भाग्यदुःखेभ्यो मया दत्तं तु तालकम् ॥ ततस्तत्तालकं कृत्वा ब्राह्मणायोपपादयेत् ॥ ४४ ॥ सपुत्रपशुभृत्याय
मेऽर्कोयं प्रीयतामिति ॥ ततो व्रतोपदेष्टारं पूजयेद्वस्त्रगोतिलैः ॥ ४५ ॥ विप्रानन्यान्यथाशक्त्या पूजयित्वा गृहं व्रजेत् ॥ एतत्ते कथितं कार्यं
रूपसौभाग्यकारकम् ॥ ४६ ॥ अचलासप्तमीस्नानं सर्वकामफलप्रदम् ॥ ४७ ॥ इति पठति य इत्थं यः शृणोति प्रसंगात्कलिकलुषहरं वै सप्त
मीस्नानमेतत् ॥ मतिमपि नयनानां यो ददाति प्रसंगात्सुरभवनगतोऽसौ पूज्यते देवसंघैः ॥ ४८ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि
श्रीकृष्णयुधिष्ठिरसंवादेऽचलासप्तमीव्रतविधिवर्णनं नाम त्रिपंचाशत्तमोऽध्यायः ॥ ५३ ॥ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ बुधाष्टमीव्रतं
भूयो ब्रवीमि शृणु पांडव ॥ येन चीर्णेन नरकं नरः पश्यति न क्वचित् ॥ १ ॥ पुरा कृतयुगस्यादौ इलो राजा बभूव ह ॥ बहुभृत्यसुहृन्मित्रमं
त्रिभिः परिवारितः ॥ २ ॥ जगाम हिमवत्पार्श्वे महादेवेन वारितः ॥ योऽन्यः प्रविशते भूमौ सा स्त्री भवति निश्चितम् ॥ ३ ॥ स राजा मृगसं
गेन प्राविशत्तदुमावने ॥ एकाकी तुरगोपेतः क्षणात्स्त्रीत्वं जगाम ह ॥ ४ ॥ सा बभ्राम वने शून्ये पीनोन्नतमयोधरा ॥ कुतोऽहमागतेत्येवं न त्वबु
ध्यत किंचन ॥ ५ ॥ तां ददर्श बुधः सौम्यां रूपौदार्यगुणान्विताम् ॥ अष्टम्यां बुधवारेण तस्यास्तुष्टो बुधो ग्रहः ॥ ६ ॥ दधौ गर्भं तदु
दरे इलाया रूपतोषितः ॥ पुत्रमुत्पादयामास योऽसौ ख्यातः पुरूरवाः ॥ ७ ॥ चंद्रवंशकरो राजा आद्यः सर्वमहीक्षिताम् ॥ ततः प्रभृति पूज्ये
यमष्टमी बुधसंयुता ॥ ८ ॥ सर्वपापप्रशमनी सर्वोपद्रवनाशिनी ॥ अथान्यदपि ते वच्मि धर्मराज कथानकम् ॥ ९ ॥ आसीद्राजा विदे
हानां मिथिलायां स वैरिभिः ॥ संग्रामे निहतो वीरस्तस्य भार्या दरिद्रिणी ॥ १० ॥ ऊर्मिला नाम बभ्राम महीं बालकसंयुता ॥ अवंती
विषयं प्राप्ता ब्राह्मणस्य निवेशने ॥ ११ ॥ चकारोदरपूर्त्यर्थं नित्यं कंडनपेषणे ॥ हृत्वा सा स्तोकगोधूमान्ददौ बालकयोस्तदा ॥ १२ ॥

कारुण्यान्मातृवात्सल्यात्क्षुधासंपीडयमानयोः ॥ कालेन बहुना साध्वी पञ्चत्वमगमच्छुभा ॥१३॥ पुत्रस्तस्या विदेहायां गत्वा स्वपितुरासने ॥
उपविष्टः सत्त्वयोगाद्बुभुजे ग्रामनाकुलः ॥ १४ ॥ अन्विष्य धर्मराज्ञो वै सा कन्या मिथिवंशजा ॥ विवाहिता हिता भर्तुः सा महानायिकाऽ
भवत् ॥ १५ ॥ श्यामला नाम चार्वंगी प्रसिद्धा श्रूयते श्रुतौ ॥ तामुवाच वरारोहां धर्मराजः स्वयं प्रियाम् ॥ १६ ॥ वहस्व सर्वव्यापारं श्यामले
त्वं गृहे मम ॥ कुरु स्वजनभृत्यानां दानक्षेपं यथेप्सितम् ॥ १७ ॥ किं त्वेते पंजराः सप्त कीलकैरतियंत्रिताः ॥ कदाचिदपि नोद्घाट्यास्त्वया
वैदेहनंदिनि ॥ १८ ॥ एवमस्त्विति साप्युक्त्वा निजं कर्म चकार ह ॥ कदाचिद्व्याकुलीभूते धर्मराजे विदेहजा ॥ उद्घाटयित्वा प्रथमं ददर्श जननीं
स्वकाम् ॥ १९ ॥ सा पच्यमाना क्रंदंती भीषणैर्यमकिंकरैः ॥ हेलया क्षिप्यते बद्ध्वा तप्ततैले पुनःपुनः ॥ २० ॥ तथैव तालकं दत्त्वा व्रीडिता
सा मनस्विनी ॥ द्वितीये पंजरे तद्वत्सा तामेवं ददर्श ह ॥ २१ ॥ सुधावल्लिप्यमानां तां शिलातलपेष्टकेन तु ॥ तृतीयपञ्जरे तद्वत्तां ददर्श स्वमा
तरम् ॥ क्रकचैः पाट्यते मूर्ध्नि घण्टायुक्तैः करोल्बणैः ॥ २२ ॥ चतुर्थे पञ्जरे स्थाने भीषणैर्दारुणाननैः ॥ भक्ष्यमाणां श्वापदैश्च क्रंदंतीं तां पुनः
पुनः ॥ २३ ॥ पञ्चमे निहिता भूमौ कण्ठे पादेन पीडिता ॥ संदंशैर्वनघातैश्च विदीर्णा क्रियते रुषा ॥ २४ ॥ षष्ठे चेक्षुयन्त्रगतां मस्तके मुद्ग
राहताम् ॥ संपीडयमानामनिशं सुदृढामिक्षुखंडवत् ॥ २५ ॥ सप्तमे पञ्जरे चीर्णस्वनां पूतिकगंधिनीम् ॥ दृष्ट्वा तथा गतां तां तु मातरं दुःख
कर्षिता ॥ श्यामला म्लानवदना किंचिन्नोवाच भामिनी ॥ २६ ॥ अथागतं यमं प्राह सरोषा श्यामला पतिम् ॥ किं तवापहृतं राजन्मम
मात्रा सुदारुणम् ॥ येनेयं विविधैर्घातैर्बध्यते बहुधा त्वया ॥ २७ ॥ यमः प्राह प्रियां दृष्ट्वा भद्रे ह्युद्घाटितास्त्वया ॥ एते पञ्जरकाः सप्त निषिद्धा
त्वं मया पुरा ॥ २८ ॥ तव मात्रा सुतस्नेहाद्गोधूमा ये हृताः किल ॥ किं न जानासि तद्भद्रे येन रुष्टा ममोपरि ॥ २९ ॥ ब्रह्मस्वं प्रणयाद्भुक्तं
दहत्यासप्तमं कुलम् ॥ तदेव चौर्यरूपेण दहत्याचंद्रतारकम् ॥ ३० ॥ गोधूमास्त इमे भूताः कृमिरूपाः सुदारुणाः ॥ ये पुरा ब्राह्मणगृहे हृता
स्तव कृतेऽनया ॥३१॥ ॥ श्यामलोवाच ॥ ॥ जानामि तदहं सर्वं यन्मे मात्रा कृतं पुरा ॥ तथापि त्वां समासाद्य सा च जामातरं शुभम् ॥
मुच्यते कृमिराशित्वाद्यथा तदधुना कुरु ॥ ३२ ॥ तच्छुत्वा चिन्तयाविष्टश्चिरं स्थित्वा जगाद ताम् ॥ धर्मराजः सहासीनां प्रियां प्राणधनेश्व
रीम् ॥ ३३ ॥ इतश्च सप्तमेऽतीते जन्मनि ब्राह्मणी शुभा ॥ आसीस्तस्मिंस्त्वया संगात्सखीनां पर्युपासिता ॥ बुधाष्टमी सुसंपूर्णा यथोक्तफलदा
यिनी ॥ ३४ ॥ तत्फलं यद्ददास्यस्यै सत्यं कृत्वा ममाग्रतः ॥ तेन मुच्येत ते माता नरकात्पापसंकटात् ॥ ३५ ॥ तच्छुत्वा त्वरितं स्नात्वा

ददौ पुण्यं स्वकं कृतम् ॥ स्वमातुः श्यामला तुष्टा तेन मोक्षं जगाम सा ॥ ३५ ॥ ऊर्मिला रूपसंपन्ना दिव्यदेहधरा शुभा ॥ विमानवरमारूढा
दिव्यमाल्यांबरावृता ॥ ३६ ॥ भर्तुः समीपे स्वर्गस्था दृश्यतेऽद्यापि सा जनैः ॥ बुधस्य पार्श्वे नभसि मिथिराजसमीपतः ॥ विस्फुरंती महा
राजबुधाष्टम्याः प्रभावतः ॥ ३७ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ यद्येवं प्रवरा कृष्ण सा तिथिर्वै बुधाष्टमी ॥ तस्या एव विधिं ब्रूहि यदि तुष्टोसि
मेप्रभो ॥ ३८ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ शृणु पांडव यत्नेन बुधाष्टम्या विधिं शुभम् ॥ यदायदा सिताष्टम्यां बुधवारो भवेद्यदि ॥ तदातदा
च सा ग्राह्या एकभक्ताशनैर्नृभिः ॥ ३९ ॥ स्नात्वा नद्यां तु पूर्वाह्णे गृहीत्वा कलशं नवम् ॥ जलपूर्णं तु सद्द्रव्यं पूर्णपात्रसमन्वितम् ॥ ४० ॥ अष्ट
वारान्प्रकर्तव्या विधानैस्तु पृथक्पृथक् ॥ प्रथमा मोदकैः कार्या द्वितीया फेणकैस्तथा ॥ ४१ ॥ तृतीया घृतपूपैश्च चतुर्थी वटकैर्नृप ॥ पञ्चमी
शुभ्रकारैश्च षष्ठी सोहालकैस्तथा ॥४२॥ अशोकवर्तिभिः शुभ्रैः सप्तमी खंडसंयुतैः॥ अष्टमी फलपुष्पैश्च केवलाखण्डफेणिकैः ॥ एवं क्रमेण कर्तव्या
सुहृत्स्वजनबांधवैः ॥४३॥ सह कृत्वा स्थितैर्भोज्यं भोक्तव्यं स्वस्थमानसैः ॥ उपोष्याणामिदं श्रेष्ठं कथयद्भिः शनैःशनैः ॥४४॥ श्रुत्वाष्टमीबुध
स्यापि माहात्म्यं भोजनं त्यजेत् ॥ तावदेव न भोक्तव्यं कथा यावत्समाप्यते ॥ ४५ ॥ तथा भुक्त्वा बुधस्याग्रे आचम्य च पुनःपुनः ॥ विप्राय
वेदविदुषे तं ब्रुवन्प्रतिपादयेत् ॥ ४६ ॥ साक्षतं सहिरण्यं च जातरूपमयं शुभम् ॥ अर्चितं विविधैः पुष्पैर्धूपदीपैः सुगंधिभिः ॥४७॥ पीतवस्त्रैः
समाच्छन्नं बुधं सोमात्मजाकृतिम् ॥ माषकेण सुवर्णेन तदर्धार्धेन वा पुनः ॥४८॥ ॐ बुधाय नमः ॥ ॐ सोमात्मजाय नमः ॥ ॐ दुर्बुद्धिनाश
नाय नमः ॥ ॐ सुबुद्धिप्रदाय नमः ॥ ॐ ताराजाताय नमः ॥ ॐ सौम्यग्रहाय नमः ॥ ॐ सर्वसौख्यप्रदाय नमः ॥ एतेपूजामन्त्राः ॥
अष्टमी तु यदा पूर्णा तदा राजर्षिसत्तम ॥ ब्राह्मणान्भोजयेदष्टौ गां दद्याच्च सवत्सिकाम् ॥४९॥ वस्त्रालंकरणैः सर्वैर्भूषणैर्विविधैरपि ॥ सपत्नीकं
समभ्यर्च्य कर्णमात्रांगुलीयकैः ॥ मन्त्रेणानेन कौंतेय दद्यादेवं समाचरन् ॥ ५० ॥ बुधोऽयं प्रतिगृह्णातु द्रव्यस्थोऽयं बुधः स्वयम् ॥
दीयते बुधराजाय तुष्यतां च बुधो मम ॥ः५१ ॥ ॥ (इति दानमंत्रः ।) ॥ ॥ बुधः सौम्यस्तारकेयो राजपुत्र इलापतिः ॥ कुमारो द्विजरा
जस्य यः पुरूरवसः पिता ॥ ५२ ॥ ॥ (इति प्रतिग्रहणमंत्रः ।) ॥ ॥ दुर्बुद्धिबाधजनितं नाशयित्वा च मे बुधः ॥ सौख्यं च सौमनस्यं च
करोतु शशिनंदनः ॥ ५३ ॥ इत्युच्चार्य गृहीत्वा तु दद्यान्मंत्रपुरःसरम् ॥ सप्तजन्मनि राजेन्द्र जातो जातिस्मरो भवेत् ॥५४॥ धनधान्यसमायुक्तः
पुत्रपौत्रप्रवर्द्धनः ॥ दीर्घायुर्विपुलान्भोगान्भुक्त्वा चैव महीतले ॥ ५५ ॥ ततः सुतीर्थे मरणं ध्यात्वा नारायणं विभुम् ॥ मृतोऽसौ स्वर्गमाप्नोति

पुरन्दरसमो नरः ॥ ५६ ॥ वसते यावदासृष्टेः पुनराभूतसंप्लवम् ॥ एवमेतन्मया ख्यातं व्रतानामुत्तमं व्रतम् ॥ ५७ ॥ एषैवं च मयाख्याता गुह्या पार्थ बुधाष्टमी ॥ यां श्रुत्वा ब्रह्महा गोघ्नः सर्वपापैः प्रमुच्यते ॥ ५८ ॥ यश्चाष्टमीं बुधयुतां समवाप्य भक्त्या सम्पूजयेद्विधुसुतं कनपृष्ठसंस्थम् ॥ पक्कान्नपात्रसहितैः सहिरण्यवस्त्रैः पश्येदसौ यमपुरं न कदाचिदेव ॥ ५९ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे बुधाष्टमीव्रतवर्णनं नाम चतुष्पञ्चाशत्तमोऽध्यायः ॥ ५४ ॥ ॥ छ ॥

॥ युधिष्ठिर उवाच ॥ ॥ जन्माष्टमीव्रतं ब्रूहि विस्तरेण ममाच्युत ॥ कस्मिन्काले समुत्पन्नं किं पुण्यं को विधिः स्मृतः ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ हते कंसासुरे दुष्टे मथुरायां युधिष्ठिर ॥ देवकी मां परिष्वज्य कृत्वोत्संगे रुरोद ह ॥ २ ॥ तत्रैव रंगवाढेन मंचारूढजनोत्सवे ॥ मल्लयुद्धे पुरावृत्ते समेते कुकुराऽन्धके ॥ ३ ॥ स्वजनैर्बंधुभिः स्निग्धैः समं स्त्रीभिः समावृते ॥ वसुदेवोऽपि तत्रैव वात्सल्यात्प्ररुरोद ह ॥ ४ ॥ समाकृष्य परिष्वज्य पुत्रपुत्रेत्युवाच ह ॥ सगद्गदस्वरो दीनो बाष्पपर्याकुलेक्षणः ॥ ५ ॥ बलभद्रं च मां चैव परिष्वज्य मुदा पुनः ॥ अद्य मे सफलं जन्म जीवितं यत्सुजीवितम् ॥ ६ ॥ यद्गुभाभ्यां सुपुत्राभ्यां समुद्भूतः समागमः ॥ एवं वर्षेण दांपत्ये हृष्टं पुष्टं तथा ह्यभूत् ॥ ७ ॥ प्रणिपत्य जनाः सर्वे बभूवुस्ते प्रहर्षिताः ॥ एवं महोत्सवं दृष्ट्वा मामाह सकलो जनः ॥ ८ ॥ प्रसादः क्रियतां नाथ लोकस्यास्य प्रसादतः ॥ यस्मिन्दिने जगन्नाथ देवकी त्वामजीजनत् ॥ ९ ॥ तद्दिने देहि वैकुंठं कुर्मस्तेत्र नमोनमः ॥ सम्यग्भक्तिप्रपन्नानां प्रसादं कुरु केशव ॥ १० ॥ एवमुक्ते जनौघेन वसुदेवोऽतिविस्मितः ॥ विलोक्य बलभद्रं च मां च कृत्वा रुरोद ह ॥ एवमस्त्विति लोकानां कथयस्व यथा तथा ॥ ११ ॥ ततश्च पितुरादेशात्तथा जन्माष्टमीव्रतम् ॥ मथुरायां जनौघाग्रे पार्थ सम्यक्प्रकाशितम् ॥ १२ ॥ पौरजना जन्मदिनं वर्षेवर्षे ममोदितम् ॥ पुनर्जन्माष्टमीं लोके कुर्वंतु ब्राह्मणादयः ॥ क्षत्रिया वैश्यजातीयाः शूद्रा येन्येऽपि धार्मिकाः ॥ १३ ॥ सिंहराशिगते सूर्ये गगने जलदाकुले ॥ मासि भाद्रपदेऽष्टम्यां कृष्णपक्षेऽर्धरात्रके ॥ वृषराशिस्थिते चन्द्रे नक्षत्रे रोहिणीयुते ॥ १४ ॥ वसुदेवेन देवक्यामहं जातो जनाः स्वयम् ॥ एवमेतत्समाख्यातं लोके जन्माष्टमीव्रतम् ॥ १५ ॥ भगवत्पार्श्वतो राजन्बहुरूपं महोत्सवम् ॥ मथुरायास्ततः पश्चाल्लोके ख्यातिं गमिष्यति ॥ शांतिरस्तु सुखं चास्तु लोकाः सन्तु निरामयाः ॥ १६ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ तत्कीदृशं व्रतं देव लोकैः सर्वैरनुष्ठितम् ॥ जन्माष्टमीव्रतं नाम पवित्रं पुरुषोत्तम ॥ १७ ॥ येन त्वं तुष्टिमायासि लोकानां प्रभुरव्ययः ॥ एतन्मे भगवन्ब्रूहि प्रसादान्मधुसूदन ॥ १८ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ पार्थ तद्दिवसे प्राप्ते दंतधावनपूर्वकम् ॥ उपवासस्य नियमं

गृह्णीयाद्भक्तिभावितः ॥ १९ ॥ एकेनैवोपवासेन कृतेन कुरुनंदन ॥ सर्वजन्मकृतैः पापैर्मुच्यते नात्र संशयः ॥ २० ॥ उपावृत्तस्य पापेभ्यो
यस्तु वासो गुणैः सह ॥ उपवासः स विज्ञेयः सर्वभोगविवर्जितः ॥ २१ ॥ ततः स्नात्वा च मध्याह्ने नद्यादौ विमले जले ॥ देव्याः सुशोभनं
कुर्याद्देवक्याः सूतिकागृहम् ॥ २२ ॥ पद्मरागैः पत्रनेत्रैर्मंडितं चर्चितं शुभैः ॥ रम्यं तु वनमालाभी रक्षामणिविभूषितम् ॥ २३ ॥ सर्वं गोकुल
वत्कार्यं गोपीजनसमाकुलम् ॥ घण्टामर्दलसङ्गीतमाङ्गल्यकलशान्वितम् ॥ २४ ॥ यवार्धं स्वस्तिका कुडचैः शंखवादित्रसंकुलम् ॥ बद्धासुरा
लोहखड्गैः प्रियच्छागसमन्वितम् ॥ २५ ॥ धान्ये विन्यस्य मुसलं रक्षितं रक्षपालकैः ॥ षष्ठ्या देव्या च संपूर्णैर्नैवेद्यैर्विविधैः कृतैः ॥ २६ ॥
एवमादि यथाशेषं कर्तव्यं सूतिकागृहम् ॥ एतन्मध्ये प्रतिष्ठाप्या सा चाप्यष्टविधा स्मृता ॥ २७ ॥ कांचनी राजती ताम्री पैत्तली मृन्मयी
तथा ॥ दार्वी मणिमयी चैव कर्णिका लिखिताथ वा ॥ २८ ॥ सर्वलक्षणसम्पन्ना पर्यंकेचार्द्धसुप्तिका ॥ प्रतप्तकांचनाभासा मया सह तपस्विनी
॥ २९ ॥ प्रस्तुता च प्रसूता च तत्क्षणाच्च प्रहर्षिता ॥ मां चापि बालकं सुप्तं पर्यंके स्तनपायिनम् ॥ ३० ॥ श्रीवत्सवक्षसं पूर्णं नीलोत्पलदल
च्छविम् ॥ यशोदा चापि तत्रैव प्रसूता वरकन्यकाम् ॥ ३१ ॥ तत्र देवगृहं नागा यक्षविद्याधरा नराः ॥ प्रणताः पुष्पमालाग्रव्यग्रहस्ताः
सुरासुराः ॥ ३२ ॥ संचरंत इवाकाशे प्राकारैरुदितोदितैः ॥ वसुदेवोऽपि तत्रैव खड्गचर्मधरः स्थितः ॥ ३३ ॥ कश्यपो वसुदेवोयमदिति
श्चापि देवकी ॥ बलभद्रः शेषनागो यशोदादित्यजायत ॥ ३४ ॥ नन्दः प्रजापतिर्दक्षो गर्गश्चापि चतुर्मुखः ॥ एषोवतारो राजेन्द्र कंसोऽयं
कालनेमिजः ॥ ३५ ॥ तत्र कंसनियुक्ता ये दानवा विविधायुधाः ॥ ते च प्राहारिकाः सर्वे सुप्ता निद्राविमोहिताः ॥ ३६ ॥ गोधेनुकुञ्जराश्वा
स्य दानवाः शस्त्रपाणयः ॥ नृत्यंत्यप्सरसो हृष्टा गंधर्वा गीततत्पराः ॥ ३७ ॥ लेखनीयश्च तत्रैव कालियो यमुनाह्रदे ॥ रम्यमेवं विधिं कृत्वा
देवकीं नवसूतिकाम् ॥ ३८ ॥ तां [१]पार्थ पूजयेद्भक्त्या गन्धपुष्पाक्षतैः फलैः ॥ कूष्माण्डैर्नालिकेरैश्च खर्जूरैर्दाडिमीफलैः ॥ ३९ ॥ बीजपूरैः पूग
फलैर्लकुचैस्त्रपुसैस्तथा ॥ कालदेशोद्भवैर्मृष्टैः पुष्पैश्चापि युधिष्ठिर ॥ ४० ॥ ध्यात्वावतारं प्रागुक्तं मंत्रेणानेन पूजयेत् ॥ ४१ ॥ गायद्भिः किन्नराद्यैः
सततपरिवृता वेणुवीणानिनादैर्भृङ्गारादर्शकुम्भप्रमरकृतकरैः सेव्यमाना मुनीन्द्रैः ॥ पर्यंके स्वास्तृते या मुदिततरमनाः पुत्रिणी सम्यगास्ते सा
देवी देवमाता जयति सुवदना देवकी कांतरूपा ॥ ४२ ॥ पादावभ्यंजयंती श्रीर्देवक्याश्चरणांतिके ॥ निषण्णा पङ्कजे पूज्या नमो देव्यै च

---

[१] पाद्यार्घ्यैः–इ० पा० ।

मंत्रतः ॥४३॥ ॐ देवक्यै नमः ॥ ॐ वसुदेवाय नमः ॥ ॐ बलभद्राय नमः ॥ ॐ श्रीकृष्णाय नमः ॥ ॐ सुभद्रायै नमः ॥ ॐ नन्दाय नमः॥
ॐ यशोदायै नमः ॥ ॥ एवमादीनि नामानि समुच्चार्य पृथक्पृथक् ॥ पूजयेयुर्द्विजाः सर्वे स्त्रीशूद्राणाममंत्रकम् ॥ ४४॥ विध्यंतरमपीच्छंति
केचिदत्र द्विजोत्तमाः ॥ चन्द्रोदये शशाङ्काय अर्घ्यं दद्याद्धरिं स्मरेत् ॥ ४५ ॥ अनघं वामनं शौरिं वैकुंठं पुरुषोत्तमम् ॥ वासुदेवं हृषीकेशं
माधवं मधुसूदनम् ॥ ४६ ॥ वाराहं पुण्डरीकाक्षं नृसिंहं ब्राह्मणप्रियम् ॥ दामोदरं पद्मनाभं केशवं गरुडध्वजम् ॥ ४७ ॥ गोविन्दमच्युतं कृष्ण
मनंतमपराजितम् ॥ अधोक्षजं जगद्बीजं सर्गस्थित्यंतकारणम् ॥ ४८ ॥ अनादिनिधनं विष्णुं त्रैलोक्येशं त्रिविक्रमम् ॥ नारायणं चतुर्बाहुं शंख
चक्रगदाधरम् ॥ ४९ ॥ पीतांबरधरं नित्यं वनमालाविभूषितम् ॥ श्रीवत्साङ्कं जगत्सेतुं श्रीधरं श्रीपतिं हरिम् ॥ ५० ॥ योगेश्वराय योगेशभवाय
योगपतये गोविन्दाय नमोनमः ॥ (इति स्नान मंत्रः ॥) यज्ञेश्वराय यज्ञसंभवाय यज्ञपतये गोविन्दाय नमोनमः ॥ ५१ ॥ इत्यनुलेपनार्घ्याद्य
र्चनधूपमंत्रः ॥ विश्वाय विश्वेश्वराय विश्वसंभवाय विश्वपतये गोविन्दाय नमोनमः ॥ ५२ ॥ (इति नैवेद्यमंत्रः ॥) धर्मेश्वराय धर्मपतये धर्मसंभ
वाय गोविन्दाय नमोनमः ॥ ५३ ॥ (इति दीपासनमंत्रः ॥) क्षीरोदार्णवसंभूत अत्रिनेत्रसमुद्भव ॥ गृहाणार्घ्यं शशांकेन्दो रोहिण्या सहितो
मम ॥ ५४ ॥ स्थंडिले स्थापयेद्देवं सचन्द्रां रोहिणीं तथा ॥ देवकीं वसुदेवं च यशोदां नन्दमेव च ॥ ५५ ॥ बलदेवं तथा पूज्य सर्वपापैः
प्रमुच्यते ॥ अर्द्धरात्रे वसोर्द्धारां पातयेद्गुडसर्पिषा ॥५६॥ ततो वर्द्धापनं षष्ठीनामादिकरणं मम ॥ कर्तव्यं तत्क्षणाद्रात्रौ प्रभाते नवमीदिने ॥५७॥
यथा मम तथा कार्यो भगवत्या महोत्सवः ॥ ब्राह्मणान्भोजयेच्छक्त्या तेभ्यो दद्याच्च दक्षिणाम् ॥ ५८ ॥ हिरण्यं काञ्चनं गावो वासांसि कुसु
मानि च ॥ यद्यदिष्टतमं तत्तत्कृष्णो मे प्रीयतामिति ॥ ५९ ॥ यमेवं देवकी देवी वसुदेवादजीजनत् ॥ भौमस्य ब्रह्मणो गुप्त्यै तस्मै ब्रह्मात्मने
नमः ॥ ६० ॥ सुजन्मवासुदेवाय गोब्राह्मणहिताय च ॥ शान्तिरस्तु शिवं चास्तु इत्युक्त्वा तु विसर्जयेत् ॥ ६१ ॥ एवं यः कुरुते देव्या देवक्याः
सुमहोत्सवम् ॥ वर्षेवर्षे भगवतो मद्भक्तो धर्मनन्दन ॥ ६२ ॥ नरो वा यदि वा नारी यथोक्तफलमाप्नुयात् ॥ ६३ ॥ पुत्रसंतानमारोग्यं
धनधान्यादिसद्गृहम् ॥ शालीक्षुयवसंपूर्णमण्डलं सुमनोहरम् ॥ ६४ ॥ तस्मिन्राष्ट्रे प्रभुर्भुंक्ते दीर्घायुर्मनसेप्सितान् ॥ परचक्रभयं नास्ति तस्मि
न्राज्येऽपि पाण्डव ॥ ६५ ॥ पर्जन्यः कामवर्षी स्यादीतिभ्यो न भयं भवेत् ॥ यस्मिन्गृहे पांडुपुत्र क्रियते देवकीव्रतम् ॥ ६६ ॥ न तत्र मृत
निष्क्रांतिर्न गर्भपतनं तथा ॥ न च व्याधिभयं तत्र भवेदिति मतिर्मम ॥ ६७ ॥ न वैद्यजनसंयोगो न चापि कलहो गृहे ॥ संपर्केणापि यः

कश्चित्कुर्याज्जन्माष्टमीव्रतम् ॥ विष्णुलोकमवाप्नोति सोऽपि पार्थ न संशयः ॥ ६८ ॥ जन्माष्टमी जनमनोनयनाभिरामा पापापहा सपदि नंदितनंदगोपा ॥ यो देवकीं सदयितां यजती ह तस्यां पुत्रानवाप्य समुपैति पदं स विष्णोः ॥ ६९ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे जन्माष्टमीव्रतवर्णनं नाम पंचपंचाशत्तमोऽध्यायः ॥ ५५ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ शुक्ले भाद्रपदस्यैव पक्षेऽष्टम्यां युधिष्ठिर ॥ दूर्वाष्टमीव्रतं पुण्यं यः कुर्याच्छ्रद्धयान्वितः ॥ १ ॥ न तस्य क्षयमाप्नोति संतानं सप्तपौरुषम् ॥ नंदते वर्द्धते नित्यं यथा पूर्वं तथा कुलम् ॥ २ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कुत एषा समुत्पन्ना दूर्वा कस्माच्चिरायुषा ॥ कस्माच्च सा पवित्रा च लोकनाथ ब्रवीहि मे ॥ ३ ॥ ॥ श्रीकृष्ण उवाच ॥ क्षीरोदसागरे पूर्वं मथ्यमानेऽमृतार्थिना ॥ विष्णुना बाहुजंघाभ्यां यद्धृतो मन्दरो गिरिः ॥ ४ ॥ भ्रमितो वै स वेगेन रोमाण्युद्धर्षितानि वै ॥ तान्येतानि जलोर्मीभिरुत्क्षिप्तानि तदर्णवात् ॥ ५ ॥ अजायत शुभा दूर्वा रम्या हरितशाद्वला ॥ एवमेषा समुत्पन्ना दूर्वा विधुतनूरुहा ॥ ६ ॥ तस्याश्चोपरि विन्यस्तं मथितामृतमुत्तमम् ॥ देवदानवगन्धर्वैर्यक्षविद्याधरैस्तथा ॥ ७ ॥ तत्राप्यमृतकुंभस्य पेतुर्न्निष्यंदबिंदवः ॥ तैरियं स्पृष्टमात्राभूद्दूर्वा रस्याऽजराऽमरा ॥ ८ ॥ वंद्या पवित्रा देवैस्तु वंदिताभ्यर्चिता पुरा ॥ अष्टम्यां फलपुष्पैस्तु खर्जूरैर्न्नालिकेरकैः ॥ ९ ॥ द्राक्षाक्षोटकपित्थैश्च बर्बरैर्लकुचैस्तथा ॥ नारिंगैर्जंबुकैराम्रैर्बीजपूरैश्च दाडिमैः ॥ १० ॥ दध्यक्षतैः सुपुष्पैश्च धूपनैवेद्यदीपकैः ॥ मंत्रेणानेन राजेन्द्र शृणुष्वावहितेन च ॥ ११ ॥ त्वं दूर्वेऽमृतजन्मासि वंदिता च सुरासुरैः ॥ सौभाग्यं संततिं कृत्वा सर्वकार्यकरी भव ॥ १२ ॥ यथा शाखाप्रशाखाभिर्विस्तृतासि महीतले ॥ तथा ममापि संतानं देहि त्वमजरामरे ॥ १३ ॥ एवमेषा पुरा पार्थ पूजिता त्रिदशोत्तमैः ॥ तेषां पत्नीवधूभिश्च भगिनीभिस्तथैव च ॥ १४ ॥ पूजिताभ्यर्हिता वाचा गौर्या राजञ्छ्रिया तथा ॥ मर्त्यलोके वेदवत्या दमयंत्यापि सीतया ॥ १५ ॥ सुकेश्या च घृताच्या च रंभया च सुकेशया ॥ सहन्या कामकंदन्या मेनकोर्वशिकादिभिः ॥ १६ ॥ स्त्रीभिरेवार्चिता दूर्वा सौभाग्यसुखदायिनी ॥ स्नाताभिः शुचिवस्त्राभिः सखीभिः ससुहृज्जनैः ॥ १७ ॥ दत्त्वा दानानि विप्रेभ्यः फलं दत्त्वार्चयेत्प्रभोः ॥ तिलपिष्टकगोधूमसप्तधान्यानि पांडव ॥ १८ ॥ भक्षयित्वा सुहृन्मित्रसंबंधिस्वजने तथा ॥ या नार्यो विचरिष्यंति व्रतमेतत्पुरातनम् ॥ १९ ॥ दूर्वाष्टमीति विख्यातं पुण्यं संतानकारकम् ॥ ताः सर्वाः सुखसौभाग्यपुत्रपौत्रादिभिस्तथा ॥ २० ॥ मर्त्यें लोके चिरं स्थित्वा ततः स्वर्गं गताः पुनः ॥ देवैरानंदितास्तत्र भर्तृभिः सह बांधवैः ॥ २१ ॥ वसंति रममाणस्ता यावदाभूतसंप्लवम् ॥ २२ ॥ मेघावृतेंबरतले हरिते वनांते या साष्टमी शुभफला सफला नभस्ये ॥ दूर्वाफलाक्षततिलैः प्रति

पूज्य योषिद्दूर्वेव वृद्धिमुपयाति सुतैः सुहृद्भिः ॥ २३ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे दूर्वाष्टमीव्रतवर्णनं
नाम षट्पंचाशत्तमोऽध्यायः ॥ ५६ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ कृष्णाष्टमीव्रतं पार्थ शृणु पापभयापहम् ॥ धर्मसंजननं लोके रुद्रप्री
तिकरं परम् ॥ १ ॥ मासि मार्गशिरे प्राप्ते दंतधावनपूर्वकम् ॥ उपवासस्य नियमं कुर्यान्नक्तस्य वा पुनः ॥ २ ॥ अशक्तशक्तभेदेन गृहान्निष्क्रम्य
बाह्यतः ॥ कृष्णाष्टम्यां वर्षमेकं गुरुं पृष्ट्वा विचक्षणः ॥ ३ ॥ ब्रह्मचारी जितक्रोधः शिवार्चनजपे रतः ॥ ततोऽपराह्णसमये स्नात्वा नद्यां विशुद्धधीः ॥
॥ ४ ॥ शिवलिङ्गं समभ्यर्च्य सुमनोभिः सुगंधिभिः ॥ गुग्गुलुं च शुभं दग्ध्वा दद्यान्नैवेद्यमुत्तमम् ॥ ५ ॥ ततो देवस्य पुरतो होमं कुर्यात्तिलै
र्गुरुः ॥ मार्गशीर्षे शुभे मासि शंकरायेति पूजयेत् ॥ ६ ॥ गोमूत्रप्राशनं कृत्वा स्वप्याद्भूमौ ततो निशि ॥ अतिरात्रस्य यज्ञस्य फलमाप्नोति
मानवः ॥ ७ ॥ एवं पुष्येपि संपूज्य शंभुं नाम महेश्वरम् ॥ कृष्णाष्टम्यां घृतं प्राश्य वाजपेयफलं भजेत् ॥ ८ ॥ माघे माहेश्वरं नाम कृष्णाष्टम्यां
प्रपूजयेत् ॥ निशि पीत्वा गवां क्षीरं गोमेधाष्टकमाप्नुयात् ॥ ९ ॥ फाल्गुने च महादेवं संपूज्य प्राशयेत्तिलान् ॥ राजसूयस्य यज्ञस्य फलमष्टगुणं
भजेत् ॥ १० ॥ चैत्रे च स्थाणुनामानं कृष्णाष्टम्यां शिवं यजेत् ॥ यवाहारोश्वमेधस्य यज्ञस्य फलमाप्नुयात् ॥ ११ ॥ वैशाखे शिवनामानमिष्ट्वा
रात्रौ कुशोदकम् ॥ पीत्वा पुरुषमेधस्य फलं दशगुणं भजेत् ॥ १२ ॥ ज्येष्ठे पशुपतिं पूज्य गवां शृङ्गोदकं पिबेत् ॥ गवां लक्षप्रदानस्य नरः
फलमवाप्नुयात् ॥ १३ ॥ आषाढे चोग्रनामानमिष्ट्वा संप्राश्य गोमयम् ॥ वर्षाणां नियुतं साग्रं रुद्रलोके महीयते ॥१४॥ श्रावणे शर्वनामानमि
ष्ट्वार्कं निशि भक्षयेत् ॥ बहुस्वर्णस्य यज्ञस्य नरः फलमवाप्नुयात् ॥ १५ ॥ मासि भाद्रपदेऽष्टम्यां त्र्यंबकं नाम पूजयेत् ॥ बिल्वपत्रं निशि प्राश्य
अन्नदीक्षाफलं भजेत् ॥ १६ ॥ भवनामाश्विने पूज्यः प्राशयेत्तंडुलोदकम् ॥ पौण्डरीकस्य यज्ञस्य फलं शतगुणं भजेत् ॥ १७ ॥ कार्तिके
रुद्रनामानं संपूज्य प्राशयेद्दधि ॥ अग्निष्टोमस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ १८ ॥ अब्दांते भोजयेद्विप्राञ्छिवभक्तिपरायणान् ॥ पायसं मधु
संयुक्तं घृतेन समभिप्लुतम् ॥ शक्त्या हिरण्यवासांसि भक्त्या तेभ्यो निवेदयेत् ॥१९॥ सतिलाः कृष्णकलशा भक्ष्यभोज्येन संयुताः ॥ द्वादशात्र
प्रदातव्याश्छत्रोपानद्युगान्विताः ॥ निवेदयति रुद्राणां गां च कृष्णां पयस्विनीम् ॥ २० ॥ वर्षमेकं चरेदेवं नैरन्तर्य्येण यो नरः ॥ कृष्णाष्टमीव्रतं
भक्त्या तस्य पुण्यफलं शृणु ॥ २१ ॥ सर्वपापविनिर्मुक्तः सर्वैश्वर्यसमन्वितः ॥ मोदते भूपवन्नित्यं मर्त्यलोके शतं समाः ॥ २२ ॥ अनेन विधि
ना देवाः सर्वे देवत्वमागताः ॥ देवी देवीत्वमापन्ना गुहः स्कंदत्वमागतः ॥ २३ ॥ ब्रह्मा ब्रह्मत्वमापन्नो ह्यहं विष्णुत्वमागतः ॥ इन्द्रश्च देवराजत्वं

गाणपत्यं गणो गतः ॥ २४ ॥ नारी वा पुरुषो वापि कृत्वा[1] कृष्णाष्टमीव्रतम् ॥ अखंडितं महाराज पुण्यं प्राप्नोत्यनुत्तमम् ॥ २५ ॥
सूर्यकोटिप्रतीकाशैर्विमानैः सर्वकामिकैः ॥ रुद्रकन्यासमाकीर्णैर्हंससारससंयुतैः ॥ २६ ॥ नृत्यवादित्रसंयुक्तैरुत्कृष्टध्वनिनादितैः ॥ दोधूयमान
श्चामरैः स्तूयमानः सुरासुरैः ॥ २७ ॥ त्रिनेत्रः शूलपाणिश्च शिवैश्वर्यसमन्वितः ॥ आस्ते शिवपुरे तावद्यावत्कल्पेषु चाष्टकम् ॥ २८ ॥
इत्येतत्ते समाख्यातं पार्थ कृष्णाष्टमीव्रतम् ॥ यच्छ्रुत्वा [2]सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ २९ ॥ कृष्णाष्टमीव्रतमिदं शिवभावितात्मा
सत्याशनैरुदितनामयुतैरुपोष्य ॥ कृष्णान्ददाति कलशान्सतिलान्नयुक्तान्योसौ प्रयाति पदमुत्तममिन्दुमौलेः ॥ ३० ॥ इति श्रीभविष्ये
महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे कृष्णाष्टमीव्रतवर्णनं नाम सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥
ब्रह्मपुत्रो महातेजा अत्रिर्नाम महानृषिः ॥ तस्य पत्नी महाभाग अनसूया पतिव्रता ॥ १ ॥ तयोः कालेन महता जातः पुत्रो महातपाः
॥ दत्तो नाम महायोगी विष्णोरंशो महीतले ॥ २ ॥ द्वितीयो नाम लोकेस्मिन्ननघश्चेति विश्रुतः ॥ तस्य भार्या नदी नाम
बभूव सहचारिणी ॥ ३ ॥ अष्टपुत्रा जीववत्सा सर्वब्राह्मगुणैर्वृता ॥ अनयोर्विष्णुरूपेण लक्ष्मीश्चैवनदी स्मृता ॥ ४ ॥ एवं तस्य
सभार्यस्य योगाभ्यासरतस्य वा ॥ आजग्मुः शरणं देवाः शुंभदैत्येन पीडिताः ॥ ५ ॥ ब्रह्मलब्धप्रसादेन द्रुतं गत्वामरावतीम् ॥ संरुद्धां जंभदैत्येन
दिव्यवर्षशतं नृप ॥ ६ ॥ दैत्यदानवसंयोगे पातालादेत्य भारत ॥ तस्य सैन्यमसंख्येयं दैत्यदानवराक्षसैः ॥ ७ ॥ तेन निर्णाशिता देवाः
सेंद्रचंद्रमरुद्गणाः ॥ त्याजिताः स्वानि धिष्ण्यानि त्यक्त्वा जग्मुर्दिशो दश ॥ ८ ॥ अग्रतः प्रलयं यांतः सेन्द्रा देवा भयार्दिताः ॥ पृष्ठतोनुव्रजंति
स्म दैत्या जंभपुरःसराः ॥ ९ ॥ युध्यंतः शरसंघातैर्गदामुसलमुद्गरैः ॥ नर्दन्तो वृषभारूढाः केचिन्महिषवाहनाः ॥ १० ॥ शरभैर्गंडकैर्व्याघ्रैर्वानरै
रभसैर्द्रुताः ॥ मुञ्चन्तो यांति पाषाणाञ्छतघ्नीस्तोमराञ्छरान् ॥ ११ ॥ यावद्विन्ध्यगिरिं प्राप्तास्तत्तस्याश्रममण्डलम् ॥ अनघश्चानदी
चैव दांपत्यं यत्र तिष्ठति ॥ १२ ॥ तयोः समीपं संप्राप्तास्ते नराः शरणार्थिनः ॥ अनघोऽपि च तान्देवाँल्लीलयैव सवासवान् ॥ १३ ॥ अभ्यंतरे
प्रविश्याथ तिष्ठध्वं विगतज्वराः ॥ तथेति नाम ते कृत्वा सर्वे तुष्टिं समास्थिताः ॥ १४ ॥ दैत्या अपि द्रुतं प्राप्ता घ्नंतः प्रहरणैररीन् ॥ इत्यूचुरुल्बणा
घोरा गृह्णीध्वं ब्राह्मणीं मुनेः ॥ १५ ॥ द्रुतं द्रुमानाक्षिपध्वं पुष्पोपगफलोपगान् ॥ अथारोप्यानघं मूर्ध्नि दैत्या जग्मुस्तदाश्रमान् ॥ १६ ॥

---

[1] वृद्धः–इ० पा० । [2] पार्थ पापस्य–इ० पा० ।

तत्क्षणाच्चापि दैत्यानां श्रीर्बभूव शिरोगता ॥ दत्तकेनापि ते दृष्टा नष्टा ध्यानाग्निना क्षणात् ॥ निस्तेजसो बभूवुर्हिः निःश्रीका मदपंडिताः ॥१७॥
देवैरपि गृहीतास्ते दैत्याश्च हरणे रणे ॥ रुदंतो निस्तनंतश्च निश्चेष्टा ब्रह्मकंटकाः ॥१८॥ ऋष्टिभिः करणैः शूलैस्त्रिशूलैः परिघैर्घनैः ॥ एवं ते प्रलयं
जग्मुस्तत्प्रभावान्मुनेस्तदा ॥ १९ ॥ असुरा देवशस्त्रौघैर्जिता इन्द्रेण घातिताः ॥ देवा अपि स्वराष्ट्रेषु तस्थुः सर्वे यथा पुरा ॥ सुरैरपि मुनेस्तस्य
देवर्षेर्महिमाऽभवत् ॥ २० ॥ ततः स सर्वलोकानां भवाय सततोत्थितः ॥ कर्मणा मनसा वाचा शुभान्येव समाचरत् ॥ २१ ॥ काष्ठकुडयशि
लाभूत ऊर्ध्वबाहुर्महातपाः ॥ ब्रह्मोत्तरं नाम तपस्तेपे सुनियतव्रतः ॥ २२ ॥ नेत्रे ह्यनिमिषे कृत्वा भ्रुवोर्मध्ये विलोकयन् ॥ त्रीणि वर्षसहस्राणि
दिव्यानीति हि नः श्रुतम् ॥ २३ ॥ तथोर्द्ध्वरेतसस्तस्य स्थितस्यानिमिषस्य हि ॥ योगाभ्यासप्रयत्नस्य माहिष्मत्याः पतिः प्रभुः ॥ २४ ॥
एकाहाद्भुतमभ्येत्य कार्तवीर्योऽर्जुनो नृपः ॥ शुश्रूषां विनयं चक्रे दिवारात्रमतंद्रितः ॥ २५ ॥ गात्रसंवाहनं पूजां मनसा चिंतितं तथा ॥ सम्पूर्णे
नियमे वृत्ते दृढतुष्ट्या समन्वितः ॥ २६ ॥ तस्मै ददौ वरान्पुष्टांश्चतुरो भूरितेजसः ॥ पूर्वं बाहुसहस्रं तु स वव्रे प्रथमं वरम् ॥ २७ ॥ अधर्माद्धी
यमानस्य सद्भिस्तस्मान्निवारणम् ॥ धर्मेण पृथिवीं जित्वा धर्मेणैवानुपालनम् ॥ २८ ॥ संग्रामान्सुबहूञ्जित्वा हत्वा वीरान्सहस्रशः ॥ संग्रामे
युध्यमानस्य वधो मे स्याद्धरेः करात् ॥ २९ ॥ तेन दत्तेन लोकेऽस्मिन्दत्तं राज्यं महीतले ॥ कार्तवीर्याय कौंतेय योगाभ्यासः सविस्तरः ॥
चक्रवर्तिपदं चैव अष्टसिद्धिसमन्वितम् ॥ ३० ॥ तेनापि पृथिवी कृत्स्ना सप्तद्वीपा सपर्वता ॥ ससमुद्राकरवती धर्मेण विधिना जिता ॥ ३१ ॥
तस्य बाहुसहस्रं तु प्रभावात्किल धीमतः ॥ यागाद्रथो ध्वजश्चैव प्रादुर्भवति मायया ॥ ३२ ॥ दशयज्ञसहस्राणि तेषु द्वीपेषु सप्तसु ॥ निरर्ग
लानि वृत्तानि स्वयं वै तस्य पांडव ॥ ३३ ॥ सर्वे यज्ञा महाबाहो प्रसन्ना भूरिदक्षिणाः ॥ सर्वे काञ्चनवेदिक्याः सर्वे यूपैश्च काञ्चनैः ॥ ३४ ॥
सर्वदेवैर्महाभागैर्विमानस्थैरलंकृताः ॥ गंधर्वैरप्सरोभिश्च नित्यमेवोपशोभिताः ॥ ३५ ॥ तस्य यज्ञे जगुर्गाथां गंधर्वा नारदस्तथा ॥ चरितं
राजसिंहस्य महिमानं निरीक्ष्य ते ॥ ३६ ॥ न नूनं कार्तवीर्यस्य गतिं यास्यन्ति पार्थिवाः ॥ यज्ञैर्दानैस्तपोभिर्वा विक्रमेण श्रुतेन
च ॥ ३७ ॥ द्वीपेषु सप्तसु स वै खड्गचर्मशरासनी ॥ व्यचरच्छ्येनवद्यो वै दूरादारादवेक्षत ॥ ३८ ॥ अनष्टद्रव्यता चास्य न शोको न च वै
क्लमः ॥ प्रभावेण महीराजोरक्षद्धर्मेण च प्रजाः ॥ ३९ ॥ पञ्चाशीतिसहस्राणि वर्षाणां वै नराधिप ॥ समुद्रवसनायां स चक्रवर्ती
बभूव ह ॥ ४० ॥ स एव पशुपालोभूत्क्षेत्रपालः स एव च ॥ स एव वृष्ट्यां पर्जन्यो योगित्वादर्जुनोऽभवत् ॥ ४१ ॥ स वै

बाहुसहस्रेण ज्याघातकठिनत्वचा ॥ वाति रश्मिसहस्रेण क्षोभ्यमाणे महोदधौ ॥ ४२ ॥ स हि नागमनुष्यैस्तु माहिष्मत्यां महाद्युतिः ॥
कर्कोटाहेः सुताञ्जित्वा पुरि तत्र न्यवेशयत् ॥ ४३ ॥ स वै पत्नीं समुद्रस्य प्रावृट्कालेंबुजेक्षणाम् ॥ क्रीडते च मदोन्मत्तः प्रतिस्रोतश्चकार ह ॥
॥ ४४ ॥ ललितं क्रीडता तेन फलनिष्पन्दमालिनी ॥ ऊर्मीभ्रुकुटिमत्येव शंकितास्येति नर्मदा ॥ ४५ ॥ तस्य बाहुसहस्रेण क्षोभ्यमाणे महो
दधौ ॥ भवंत्यालीननिश्चेष्टाः पातालस्था महासुराः ॥ ४६ ॥ तूष्णींकृतो महाभाग लीनाहीनमहामतिः ॥ चकारोत्तुङ्गक्षुब्धोर्मिं दोःसहस्रेण
सागरम् ॥ ४७ ॥ क्रांता निश्चलमूर्द्धानो बभूवुश्च महोरगाः ॥ सायाह्ने कदलीखण्डान्निर्घातनिहता इव ॥ जिता धनुर्धराः सर्वे सुत्यक्तैः पञ्चभिः
शरैः ॥ ४८ ॥ लङ्काधिपं मोहयित्वा सबलं रावणं बलात् ॥ निर्जित्य वशमानीय माहिष्मत्यां बबंध च ॥ ४९ ॥ ततोभ्येत्य पुलस्त्यस्तु
अर्जुनं संप्रसादयन् ॥ मुमोच रक्षः पौलस्त्यं पौलस्त्येनानुगामिना ॥ तस्य बाहुसहस्रस्य बभूव ज्यातलस्वनः ॥ ५० ॥ क्षुधितेन कदाचित्स
प्रार्थितश्चित्रभानुना ॥ सप्तद्वीपां चित्रभानोः प्रादाद्भिक्षां महीमिमाम् ॥ ५१ ॥ कुंडेशयस्ततोऽद्यापि दृश्यते भगवान्हरिः ॥ निंबादित्यश्च प्रत्यक्षो
जाग्रत्संस्तस्य वेश्मनि ॥ बभूव दुहितुर्हेतोः शरदोऽद्यापि तिष्ठति ॥ ५२ ॥ स एवं गुणसंयुक्तो राजाभूदर्जुनो भुवि ॥ अनघस्य प्रसादेन योगाचा
र्यस्य पांडव ॥ ५३ ॥ तेनेयं वरलब्धेन कार्तवीर्येण योगिना ॥ प्रवर्तिता मर्त्यलोके प्रसिद्धा ह्यनघाष्टमी ॥ ५४ ॥ अघं पापं स्मृतं लोके तच्चापि
त्रिविधं भवेत् ॥ यस्मादघं नाशयति तेनासावनघा स्मृता ॥ ५५ ॥ तस्याष्टगुणमैश्वर्यं विनोदार्थं विभाव्यते ॥ अणिमा महिमा प्राप्तिः प्राकाम्ये
लघिमा तथा ॥ ५६ ॥ ईशित्वं च वशित्वं च सर्वकामावसायिता ॥ इत्यष्टौ योगसिद्धस्य सिद्धयो मोक्षलक्षणाः ॥ ५७ ॥ समुत्पन्ना दत्तकस्य
लोके प्रत्ययकारकाः ॥ यात्रासमांप्तौ संगृह्य यदघानि तथैव वा ॥ ५८ ॥ जगत्समस्तमनघं कुर्यादस्मादतोऽनघा ॥ मदंशो मद्गतप्राणो लोके
स्मिन्नृंतको[१] द्विजः ॥ ५९ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कीदृशं पुण्डरीकाक्ष स वै राजार्जुनो व्रतम् ॥ चक्रे वा त्रिषु लोकेषु कैर्मन्त्रैः समयैश्च
कैः ॥ कस्मिन्काले तिथौ कस्यामेतन्मे वद केशव ॥ ६० ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ कृष्णाष्टम्यां मार्गशीर्षे दंपती दर्भनिर्मितौ ॥ अनघं
चानघां चैव बहुपुत्रैः समन्विताम् ॥ ६१ ॥ पुरा कृतीकृतौ शांतौ भूमिभागे स्थितौ शुभौ ॥ स्नात्वैवमर्चयेत्पुष्पैः ससुगन्धैर्युधिष्ठिर ॥ ६२ ॥
ऋग्वेदोक्तऋचा विप्रो विष्णुं ध्यात्वा ममांशजम् ॥ अनघं वासुदेवेनानघां लक्ष्मीं व्रजां तनुम् ॥ प्रद्युम्नादिपुत्रवर्गं हरिवंशे यथोदितम् ॥ ६३ ॥

---

[१] वृत्तकः–इ० पा० ।

“ ॐ अतो देवा अवंतु नो यतो विष्णुर्विचक्रमे ॥ पृथिव्याः सप्तधामभिः ॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ॥ समूळ्हमस्यपां सुरे ॥ त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः ॥ अतो धर्माणि धारयन् ॥ विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे ॥ इंद्रस्य युज्यः सखा ॥ तद्विष्णोः परमं पदं सदा पश्यंति सूरयः ॥ दिवीव चक्षुराततम् ॥ तद्विप्रासो विपन्यवो जागृवांसः समिंधते ॥ विष्णोर्यत्परमं पदम्” ॥ लोकोद्भवैः फलैः कन्दैः शृंगारैर्बदरैः शुभैः ॥ वित्तैश्च धान्यैः पुष्पैश्च गंधधूपैः सदीपकैः ॥ ६४ ॥ यः पूजयेद्भक्तियुक्तः सर्वपापैः प्रमुच्यते ॥ ततो द्विजान्भोजयेच्च सुहृत्संबंधिबांधवान् ॥ ६५ ॥ व्रतावसाने गृह्णीयात्कश्चिदेको नरो व्रतम् ॥ तेषां मध्ये दृढाश्चक्रुरनघव्रतपारगाः ॥ ६६ ॥ इदं जीवनघाती चेत्सत्यं तु समयोषितम् ॥ वर्षमेकं ततः स्वेच्छा इदं तवानघव्रतम् ॥ ६७ ॥ तत्रोपेक्षणकं कार्यं नटनर्तकगायकैः ॥ प्रभाते तु नवम्यां तं तोयमध्ये विसर्जयेत् ॥ ६८ ॥ एवं यः कुरुते यात्रां वर्षेवर्षे च हर्षितः ॥ भक्तियुक्तः श्रद्धया च सर्वपापैः प्रमुच्यते ॥ ६९ ॥ कुटुंबं वर्द्धते तस्य यस्य विष्णुः प्रसीदति ॥ आरोग्यं सप्त जन्मानि ततो यांति परां गतिम् ॥ ७० ॥ एतामघौघशमनामनघाष्टमीं च कौंतेय संप्रति मया कथितां हिताय ॥ कुर्वंत्यनन्यमनसः स्वयशोभिवृद्ध्यै ऋद्धिं प्रयांति कृतवीर्यसुतानुरूपाम् ॥ ७१ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे अनघाष्टमीव्रतं नामाष्टपंचाशत्तमोऽध्यायः ॥ ५८ ॥ ॥ छ ॥ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अथान्यत्संप्रवक्ष्यामि व्रतं श्रेयस्करं परम् ॥ शिवलोकप्रदं पुण्यं विधिवन्मे निबोधताम् ॥ १ ॥ वारे सोमे सिताष्टम्यां पक्षे सोमं समर्चयेत् ॥ विधिना चन्द्रचूडालं प्राप्यमेतत्स चन्द्रकम् ॥ २ ॥ दक्षिणार्धे हरिं ध्यात्वा मध्ये तु परितः प्रभुम् ॥ पञ्चामृतादिना देवं स्थापयित्वा यतव्रती ॥ ३ ॥ चंदनेनेन्दुयुक्तेन दक्षिणार्धं विलेपयेत् ॥ हरभागं नीलरक्तं शिवस्योपरि मौक्तिकम् ॥ ४ ॥ पश्चात्पुष्पैः समभ्यर्च्य सितै रक्तैरनुत्तमैः ॥ नीराजनं पुनः कुर्यात्पंचविंशतिदीपकैः ॥ अर्थं[1] सिद्धैः शुभैर्भक्ष्यैर्नैवेद्यं विनिवेदयेत् ॥ ५ ॥ एवंकृतोपवासस्तु प्रभाते पूर्ववच्छिवम् ॥ संपूज्याज्यं तिलैर्मिश्रं जुहुयाज्जातवेदसि ॥ ६ ॥ व्रतिनो ब्राह्मणान्पश्चाद्भोजयित्वा विधानतः ॥ मिथुनानि तु संभोज्य यथाशक्त्यनुपूजयेत् ॥ ७ ॥ आवर्त्य पितरावर्च्य विधिना तेन सुव्रत ॥ संवत्सरांते कर्तव्यं यत्तत्सर्वं निबोध मे ॥ ८ ॥ प्रागुक्तविधिना पूज्या सितपीतयुगद्वयम् ॥ दद्याद्वितानकं चैव पताकां घटकीं तथा ॥ ९ ॥ धूपगंधारसी चापि दीपवृक्षं सुशोभनम् ॥ एवमादीनि योज्यानि पूर्ववद्भोज्यमाचरेत् ॥ १० ॥ चतुरस्रं त्रिकोणं

---

[1] अद्यसिद्ध्यै–इ० पा० ।

च मण्डलं कारयेत्ततः ॥ त्रिकोणे पार्वतीं ध्यायेच्चतुरस्रे महेश्वरम् ॥ ११ ॥ संकल्प्य द्विजदांपत्यं वासोभिर्भूषणैस्तथा ॥ पूजयित्वा यथाशक्त्या
कुर्यान्नीराजनं शुभैः ॥ दीपकैः पञ्चविंशद्भिर्भोजयित्वा विसर्जयेत् ॥ १२ ॥ अब्दपञ्चकमेकं वा एवं यः कुरुते नरः ॥ उभाभ्यां लोकमासाद्य
पदं यास्यत्यनामयम् ॥ १३ ॥ आ देहपतनाद्यस्तु नित्यमेतत्समाचरेत् ॥ इहैव स हरिः साक्षान्नररूपो विभाव्यते ॥ १४ ॥ न स्पृशंत्यापद
स्तस्य न दुःखी भवति क्वचित् ॥ ज्वरग्रहादिभिर्नैव पीड्यतेऽसौ कदाचन ॥ १५ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अथ वा तेन मार्गेण तामवे
हि सिताष्टमीम् ॥ संप्राप्यादित्ययोगेन प्राग्विधानेन चाभ्यसेत् ॥ १६ ॥ किं[1]तु दक्षिणतंत्रस्थं भास्करं वार्चयेद्बुधः ॥ पद्मरागेण दिव्येन सुवर्णेन
च पार्वतीम् ॥ १७ ॥ कुंकुमेन समालभ्य चन्दनेन शिवं तथा ॥ अभावे सर्वरत्नानां हेम सर्वत्र योजयेत् ॥ १८॥ रुद्रबीजं परं पूतं प्रियं रुद्रस्य
सर्वदा ॥ रक्तमाल्यांबरधरं नैवेद्यं घृतपाचितम् ॥ १९ ॥ शेषः पूर्वविधानेन कर्तव्यो विधिविस्तरः ॥ तिथौ पूर्णे च कुर्वीत गव्येनानघ पारणम् ॥
॥ २० ॥ एतत्प्राक्च विधायाब्दं पञ्चाब्दानेवमेव च ॥ कृत्वा सूर्यादिलोकेषु भुक्त्वा भोगान्व्रजेत्परम् ॥ २१ ॥ पतंगवत्प्रतापी स्याददीनश्च जन
प्रियः ॥ अस्मिन्नोगो न बाधेत धनवान्पुत्रवान्भवेत् ॥ २२ ॥ यद्यष्टमी भवति सोमयुता कदाचिदर्केण वा कुरुकुलोद्वह तामुपोष्य ॥ पूज्यो
मया सह हरं हरिणांकचिह्नं भक्त्यायुषां पदमुपैति पदं पुरारेः ॥ २३ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे सोमा
ष्टमीव्रतवर्णनं नामैकोनषष्टितमोऽध्यायः ॥ ५९ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ समुत्पन्नेषु रत्नेषु क्षीरोदमथने पुरा ॥ दैत्यानां मोहना
र्थाय योषिद्भूते जनार्दने ॥ १ ॥ बिल्वे वृक्षे क्षणं श्रांता विश्रांता कमलालया ॥ यामेवमिति वान्योन्यं युयुधुर्देवदानवाः ॥ २ ॥ जिताः सर्वे
पुरा पार्थ युद्धे कृष्णेन चक्रिणा ॥ पातालं गमिता दैत्याः सश्रीकः स्वयमाययौ ॥ ३ ॥ श्रीः समावासिता यस्माच्छ्रीवृक्षस्तु ततः स्मृतः ॥
तस्माद्भाद्रपदस्यैव शुक्लपक्षे कुरूत्तम ॥ ४ ॥ नवम्यामर्चयेद्भक्त्या ईषत्सूर्योदये नगम् ॥ श्रीवृक्षं विविधैः पुष्पैरनग्निपाचितैः फलैः ॥ ५ ॥
तिलपिष्टान्नगोधूमैर्धूपगन्धस्रगंबरैः ॥ ईषद्भानुकराताम्रताम्रीकृतनभस्तले ॥ ६ ॥ मंत्रेणानेन राजेन्द्र कृत्वा ब्राह्मणभोजनम् ॥ ततो भुञ्जीत मौनेन
तैलक्षारविवर्जितः ॥ अनग्निपाकं भूपात्रे दधिपुष्पफलैः शुभम् ॥ ७॥ एवं यः कुरुते पार्थ श्रीवृक्षस्यार्चनं नरः ॥ नारी वा दुःखशोकाभ्यां
मुच्यते नात्र संशयः ॥ ८ ॥ सप्तजन्मांतरं यावत्सुखसौभाग्यसंयुता ॥ श्रीमती फलिनी धन्या मर्त्यलोके महीयते ॥ ९ ॥ श्रीवृक्षमक्षतफलं

---

[1] किं तु लक्षणनेत्रस्थम्–इ० पा०।

वसितं नवम्यां नैवेद्यपुष्पफलवस्त्रविचित्रधान्यैः ॥ पूज्यः प्रभातसमये पुरुषोत्तमेष्टः संप्राप्नुवंति पुरुषाः पुरुषेन्द्रवन्द्याम् ॥ १० ॥ ॥ इति श्रीभ
ष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे श्रीवृक्षनवमीव्रतवर्णनं नाम षष्टितमोऽध्यायः ॥ ६० ॥ ॥छ॥ ॥ श्रीकृष्ण उवाच ॥ ॥
महिषासुरे विनिहते भगवत्या महासुरैः ॥ पूर्ववैरमनुस्मृत्य संग्रामा बहवः कृताः ॥ १ ॥ नानारूपधरा देवी अवतीर्य पुनःपुनः ॥ धर्मसंस्थापना
र्थाय निजघ्ने दैत्यसत्तमान् ॥ २ ॥ अथ रक्तासुरो नाम महिषस्य सुतो महान् ॥ आसीत्तेन तपस्तप्तं वर्षाणां नियुतानि षट् ॥ तस्मै ददौ चतु
र्वक्रो राज्यं त्रैलोक्यमण्डले ॥ ३ ॥ तेन लब्धं वरेणाथ मेलयित्वा दनोः सुतान् ॥ प्रारब्धं सह शक्रेण युद्धं गत्वाऽमरावतीम् ॥ ४ ॥ तद्दृष्ट्वा
दानवबलं सन्नद्धात्युद्धतध्वजम् ॥ युयुधे दानवैः सार्द्धं सुरैः शक्रपुरस्सरैः ॥ ५ ॥ तत्र प्रावर्तत नदी शोणितौघतरंगिणी ॥ खड्गमत्स्यगदाग्राहव
सुनंदककच्छपा ॥ वहंती पितृलोकाय सुरासुरभयानका ॥ ६ ॥ अथ रक्तासुरो रोषाद्युयुधे विबुधैः सह ॥ ते हन्यमाना विबुधा रक्ताक्षेण महारणे
॥ ७ ॥ भ्रष्टाः स्वर्गं परित्यज्य त्यक्तप्रहरणा द्रुतम् ॥ करच्छत्रां पुरीं प्राप्ता यत्रास्ते भववल्लभा ॥ ८ ॥ दुर्गा चामुण्डया सार्धं नवदुर्गासम
न्विता ॥ आद्या तावन्महालक्ष्मीर्नंदा क्षेमकरी तथा ॥ ९ ॥ शिवदूती महारुण्डा भ्रामरी चन्द्रमंगला ॥ रेवती हरसिद्धिस्तु
नवैताः परिकीर्तिताः ॥ एतासां ते स्तुतिं चक्रुस्त्रिदशाः प्रणताननाः ॥ १० ॥ अमरपतिमुकुटचुम्बितचरणांबुजसकलभुवनसुखजननी ॥ जयति
जगदीशवंदिता सकलामलनिष्कला दुर्गा ॥ ११ ॥ विकृतनखदशनभूषणरुधिरवशाच्छुरितक्षतखड्गहस्ता ॥ जयति नरमुंडमुंडितपिशित
सुराहारकृच्चण्डी ॥ १२ ॥ प्रच्छादितशिखिगणोद्धलविकटजटाबद्धचन्द्रमणिशोभा ॥ जयति दिगंबरभूषा सिद्धवटेशा महालक्ष्मीः ॥ १३ ॥
करकमलजनितशोभा पद्मासनबद्धपद्मवदना च ॥ जयति कमण्डलुहस्ता नंदा देवी नतार्तिहरा ॥ १४ ॥ दिग्वसना विकृतमुखा फेत्कारोद्दाम
पूरितदिशौघा ॥ जयति विकरालदेहा क्षेमंकरी रौद्रभावस्था ॥ १५ ॥ क्रोशितब्रह्मांडोदरसुरवरमुखरहुंकृतनिनादा ॥ जयति मदातिमिहस्ता
शिवदूती प्रथमशिवशक्तिः ॥ १६ ॥ मुक्ताट्टहासभैरवदुःसहतरचकितसकलदिक्चक्रा ॥ जयति भुजगेन्द्रमणिशोभितकर्णा महातुण्डा ॥ १७ ॥
पटुपटहमुरजमर्दलझल्लरिझङ्कारनर्तितावयवा ॥ जयति मधुव्रतरूपा दैत्यहरी भ्रामरी देवी ॥ १८ ॥ शांता प्रशांतवदना सिंहवरा ध्यानयोगत
न्निष्ठा ॥ जयति चतुर्भुजदेहा चन्द्रकला चन्द्रमण्डला देवी ॥ १९ ॥ पक्षपुटचंचुघातैः संचूर्णितविविधशत्रुसंघाता ॥ जयति शितशूल
हस्ता बहुरूपा रेवती भद्रा ॥२०॥ पर्यटति जगति हृष्टा पितृवननिलयेषु योगिनीसहिता॥जयति हरसिद्धिनाम्नी हरसिद्धिर्वंदिता सिद्धैः ॥२१॥

इति नवदुर्गासंस्तवमनुपममार्याभिरपरराट् कृत्वा ॥ इदमूचे सह देवैस्त्राह्यस्मान्सर्वभीतिभ्यः ॥ २२ ॥ पुनःपुनः प्रणम्योचुर्भवानीं सिंहवाहिनीम् ॥ अस्माकं भयभीतानां शरण्ये शरणं भव ॥ २३ ॥ देवानां तद्वचः श्रुत्वा दत्त्वा तेभ्योऽभयं ततः ॥ सिंहारूढा विनिर्गत्य दुर्गाभिः सहिता पुरा ॥ २४ ॥ युयुधे दानवैस्सार्धं महासमरदुर्दिनम् ॥ कुमारी विंशतिभुजा घनविद्युल्लतोपमा ॥ २५ ॥ तेऽपि तत्रासुराः प्राप्ताः प्रचंडा रुद्ररूपिणः ॥ सर्वे लब्धवराः शूराः सुतप्ततपसस्तथा ॥ २६ ॥ महाग्राहपराक्रांता दुष्टमायाविनष्टये ॥ अब्राह्मण्याद्धृद्यमिषा नामतश्च निजोद्यतात् ॥ २७ ॥ इन्द्रमारी असत्क्लेशः प्रलंबो नरकः सुतः ॥ कुष्ठः पुलोमा शरभः शंबरो दुंदुभिः खरः ॥ २८ ॥ इल्वलो नमुचिर्भौमो वातापि धेंनुकः कलिः ॥ मायावृतौ बलौ बन्धुर्मधुकैटभकालजित् ॥ २९ ॥ रहः पौंड्रादिदैत्येन्द्राः प्राधान्येन प्रकीर्तिताः ॥ फनगोभिर्जनाः सर्वे सन्नद्धाः स्वाग्रतो ध्वजः ॥ ३० ॥ रूपतो वर्णिताश्चैव ध्वजास्तेषां पृथक्पृथक् ॥ प्रत्यदृश्यंत राजेन्द्र ज्वलिता इव पावकाः ॥ ३१ ॥ काञ्चनाः काञ्चनापीडाः काञ्चनस्त्रगलंकृताः ॥ पताका विविधैर्वालैरुच्छ्रिता लक्षणान्विताः ॥ ३२ ॥ नील्यः पीताः सिता रक्ताः कृष्णास्त्राः पञ्चवर्णकाः ॥ तत्र पट्टपटीसौत्राः कृतबुद्बुदकर्बुराः ॥ ३३ ॥ पताकाकान्तिरनला नर्तक्य इव शोभनाः ॥ ३४ ॥ ततो हलहलारावं चक्रुस्ते दानवोत्तमाः ॥ प्रास्फालयंत पणवभेरीझर्झरगोमुखान् ॥ न्यवादयंतानकान्ये शंखाडंबरडिंडिमान् ॥ ३५ ॥ एवं ते समयुध्यंत भवानीं दैत्यदानवाः ॥ समाजघ्नुः शरैः शूलैः परिघैः शक्तितोमरैः ॥ कर्णकैरीषणैः कुन्तैः शतघ्नीकूटमुद्गरैः ॥ ३६ ॥ आहत्य मानरोषेण जज्वलुः समरेऽधिकम् ॥ सिंहारूढाद्रुतं देवी रणमध्ये प्रधाविता ॥ ३७ ॥ आच्छिद्याच्छिद्य चिह्नानि ध्वजान्नानाविधांस्तथा ॥ बलात्कारेण दैत्यानामनाथसमरे रुषा ॥ ३८ ॥ चिह्नकानि ददौ तुष्टा देवेभ्यः शीघ्रचारिणी ॥ सुरैरपि गृहीतानि जय देवीति वादिभिः ॥३९॥ अंबिका तु भृशं तुष्टा तेषां चक्रे क्षणात्क्षयम् ॥ कालरात्री दानवानां मारीव निपपात सा ॥ जीवितानि च जग्राह दैत्यानां देवनंदिनी ॥४०॥ अथ रक्तासुरं कंठे गृहीत्वापात्य भूतले ॥ देवी जघान तीक्ष्णेन त्रिशूलेन भृशं दिवि ॥ ४१ ॥ स भिन्नहृदयः पश्चाद्भूमौ तत्र प्रपोथितः ॥ तथापि देव्या निहतः पपात च ममार च ॥ ४२ ॥ देवास्तानसुराञ्जित्वा गत्वा शत्रुपुरं जितम् ॥ ददृशुस्ते रणप्रांते लंबमानान्महाध्वजान् ॥ यात्रां चक्रुः संप्रहृष्टा नवम्यां ध्वजचिह्निताम् ॥ ४३ ॥ अतोद्यापीह भूपालैर्जयलब्धीच्छयादृतैः ॥ उपोष्यते नरैर्भक्तैर्नारीभिश्चैव पांडव ॥ ४४ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कीदृग्विधानं तस्यास्तु नवम्या ब्रूहि मे प्रभो ॥ सरहस्यं समंत्रं च येन तुष्यति चंडिका ॥ ४५ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ पौषस्य शुक्लपक्षे या नवमी संपारि

श्रुता ॥ तस्यां स्नात्वा शुभैः पुष्पैरर्चनीया हरेः स्वसा ॥ ४६ ॥ कुमारी सुभगा देवी सिंहस्यन्दनगामिनी ॥ ध्वजान्नानाविधान्कृत्वा पुर
स्तस्याश्च पूजयेत् ॥ मालतीकुसुमैर्दीपैर्गन्धधूपविलेपनैः ॥ ४७ ॥ बलिभिः पशुभिर्मेध्यैः सुरामांसासृगम्बरैः ॥ दधिचन्दनचूर्णैश्च भग्नैश्चान
ग्निपाचितैः ॥ मंत्रेणानेन कौंतेय ब्रह्मणोप्यथवा ननु ॥ ४८ ॥ भद्रां भगवतीं कृष्णां विश्वस्य जगतो हिताम् ॥ संवेशिनीं संयमनीं ग्रहनक्षत्र
मालिनीम् ॥ ४९ ॥ प्रपन्नोहं शिवां रात्रीं भद्रे पारय मे व्रतम् ॥ सर्वभूतपिशाचेभ्यः सर्वसत्वसरीसृपैः ॥ देवेभ्यो मानुषेभ्यश्च भयेभ्यो रक्ष मां
सदा ॥ ५० ॥ ततश्चारोपयेद्राजा देवीनां भवने तथा ॥ भोजयेत कुमारीं च प्रणिपत्य क्षमापयेत् ॥ ५१ ॥ उपवासेन कुर्वीत एकभक्तेन वा
पुनः ॥ भक्त्या भूपालपश्चास्य भक्तिस्तस्या गरीयसी ॥ ५२ ॥ एवं ये पूजयिष्यंति ध्वजैर्भगवतीं नराः ॥ तेषां दुर्गा दुर्गमार्गे चोरव्यालाग्नि
संकटे ॥५३॥ रणे राजकुले गेहे युद्धमध्ये जले स्थिते ॥ रक्षां करोति सततं भवानी सर्वमंगला॥५४॥अस्यां बभूव विजयो नवम्यां पांडुनंदन ॥
भगवत्यास्तु तेनैषा नवमी सततं प्रिया ॥ ५५ ॥ धन्या पुण्या पापहरा सर्वोपद्रवनाशनी ॥ अनुष्ठेया प्रयत्नेन सर्वान्कामानभीप्सुभिः ॥५६॥
देव्यर्चनाहितमतिर्मनुजो नवम्यां हेमस्रजं ध्वजवरं स हि रोपयेद्यः ॥ भोगानवाप्य मनसोभिमतान्प्रकामं देहं विहाय समुपैति स वीरलो
कम् ॥ ५७ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे ध्वजनवमीव्रतवर्णनं नामैकषष्टितमोऽध्यायः ॥ ६१ ॥ छ ॥ ॥
॥ ॥ श्रीकृष्ण उवाच ॥ ॥ उल्काख्यां नवमीं राजन्कथयामि निबोध ताम् ॥ या काश्यपेन कथिता तारकस्यार्तिनाशिनी ॥१॥ अश्वयुक्छुक्लपक्षे
या नवमी लोकविश्रुता ॥ नद्यां स्नात्वा समभ्यर्च्य पितृदेवीं यथाविधि ॥ २ ॥ पश्चात्संपूजयेद्देवीं चामुण्डां भैरवप्रियाम् ॥ पुष्पैर्धूपैस्सनैवेद्यैर्मां
समत्स्यसुरासवैः ॥ ३ ॥ पूजयित्वा स्तवं कुर्यान्मन्त्रेणानेन मानवः ॥ समारोप्याञ्जलिं मूर्ध्नि जानुभ्यामवनीं गतः ॥ ४ ॥ महिषघ्नि महामाये
चामुण्डे मुण्डमालिनि ॥ द्रव्यमारोग्यविजयौ देहि देवि नमोऽस्तु ते ॥ ५ ॥ कुमारीर्भोजयेत्पश्चान्नवनीलसुकंचुकैः[1]॥ परिधानैर्भूषणैश्च भूषयित्वा
क्षमापयेत् ॥ ६ ॥ सप्त पञ्चाप्यथैकां वा चित्तवित्तानुरूपतः ॥ श्रद्धया तुष्यते देवी इति वीरानुशासनम् ॥ ७ ॥ अभ्युक्ष्य मण्डलं कृत्वा गोमयेन
शुचिस्मितः ॥ दत्तासने चोपविशेत्पात्रं च पुरतो न्यसेत् ॥ ८ ॥ ततः सुसिद्धमन्नं यत्तत्सर्वं परिवेषयेत् ॥ सघृतं पायसं चापि स्थापयेत्पात्रस
न्निधौ ॥ ९ ॥ तृणानि षष्टिमादाय चादाय धमनीं तथा ॥ प्रज्वालयेत्ततो भोज्यं यावज्ज्वलति पावकः ॥ १० ॥ प्रशांते भोजनं त्यक्त्वा समा

---

१ नवनीलकुसुंभकैः-इ० पा० ।

चम्य प्रसन्नधीः ॥ चामुंडां हृदये ध्यात्वा गृहकृत्यपरो भवेत् ॥ ११ ॥ अनेन विधिना सर्वं मासिमासि समाचरेत् ॥ ततः संवत्सरस्यांते भोजयित्वा कुमारिकाः ॥ १२ ॥ वस्त्रैराभरणैः पूज्य प्रणिपत्य क्षमापयेत् ॥ सुवर्णं शक्तितो दद्याद्गां च विप्राय शोभनाम् ॥ १३ ॥ य एवं कुरुते पार्थ पुरुषो नवमीव्रतम् ॥ न तस्य शत्रवो नार्तिः स राजा नष्टतस्करः ॥ १४ ॥ भूताः प्रेताः पिशाचा नो जनयंति भयं गृहे ॥ समुद्यतेषु शस्त्रेषु हंता तस्य न विद्यते ॥ १५ ॥ तं रक्षति सदोद्युक्ता सर्वास्वापत्सु चंडिका ॥ नरो वा यदि वा नारी व्रतमेतत्समाचरेत् ॥ उल्कावत्स सपत्नानां ज्वलन्नास्ते सदा हृदि ॥ १६ ॥ तां शुष्ककोहरमुखीं प्रकटोरुदंष्ट्रां कापालिनीं समवलंबितमुण्डमालाम् ॥ उक्तव्रतेषु पुरुषो नवमीषु चण्डीं संपूज्य कस्य हृदये न च शं करोति ॥ १७ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवाद उल्कानवमीव्रतवर्णनं नाम द्विषष्टितमोऽध्यायः ॥ ६२ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ पूर्वं कृतयुगस्यादौ भृगोर्भार्या महासती ॥ दिव्यारामाश्रमे रम्या गृहकार्यैकतत्परा ॥ १ ॥ बभूव सा भृगोर्नित्यं हृदयेप्सितकारिणी ॥ तस्यां मुनिर्महातेजा अग्निहोत्रं निधाय च ॥ २ ॥ विष्णोस्त्रासाद्दानवानां कुलत्राणसमाकुलम् ॥ मुक्त्वा युद्धस्थितं पार्श्वे समर्प्य मुनिपुङ्गवः ॥ ३ ॥ दत्त्वा निक्षेपकं सर्वं दिव्यायै सुमहातपाः ॥ जगाम हिमवत्पार्श्वे हरं तोषयितुं रहः ॥ ४ ॥ संजीवनीकृते नित्यं कणैर्धूममधोमुखः ॥ पपौ दानवराजस्य विजयाय पुरोहितः ॥ ५ ॥ आजगाम गते तस्मिन्गरुडेनाश्रितो हरिः ॥ अभ्येत्य जल्पनं चक्रे चक्रेणोत्कृत्तकंधरम् ॥ ६ ॥ गलद्रुधिरसंपन्नं लोहितार्णववसंनिभम् ॥ दृष्ट्वासुरबलं सर्वं निहतं विष्णुना तदा ॥ दिव्या संशप्तुकामाभूद्विष्णुं सास्राविलेक्षणा ॥ ७ ॥ यावन्नोच्चरते वाचं चक्रेण कृत्तकंधरम् ॥ तावन्निपातयामास शिरस्तस्याः सकुण्डलम् ॥ ८ ॥ प्राप्य संजीवनीं विद्यां यावदायात्यसौ मुनिः ॥ तावत्स दैत्यान्नापश्यत्पश्यति स्म निपातितम् ॥ ९ ॥ रोषाच्छशाप च हरिं भ्रुकुटीकुटिलाननः ॥ अवश्यभावभावित्वाद्विश्वस्य हितकारणात् ॥ १० ॥ यस्मात्त्वया हता दैत्या ब्रह्मणो मत्परिग्रहाः ॥ तस्मात्त्वं मानुषे लोके दश वारान्गमिष्यसि ॥ ११ ॥ अतोऽर्थं मानुषे लोके रक्षार्थं च महीक्षिताम् ॥ अवतारं चकाराहं भूयोभूयः पृथग्विधम् ॥ १२ ॥ पूर्वोक्तैः कारणैः पार्थ अवतीर्णं महीतले ॥ मां नरा येऽर्चयिष्यंति तेषां वासस्त्रिविष्टपे ॥ १३ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ व्रतं दशावताराख्यं कृष्ण ब्रूहि सविस्तरम् ॥ समंत्रं सरहस्यं च सर्वपापप्रणाशनम् ॥ १४ ॥ श्रीकृष्ण उवाच ॥ ॥ प्रोष्ठपदे सिते पक्षे दशम्यां नियतः

---

१ ह्यर्घम्–इ० पा० ।

शुचिः ॥ स्नात्वा जलाशये स्वच्छे पितृदेवादितर्पणम् ॥ १५ ॥ कृत्वा कुरुकुलश्रेष्ठ गृहमागत्य मानवः ॥ गृह्णीयाद्धान्यचूर्णस्य द्विहस्तप्रसृति
त्रयम् ॥ १६ ॥ क्रमेण पावयेत्तां तु पुंसंज्ञं घृतसंश्रितम् ॥ वर्षे वर्षे दिने तस्मिन्यावद्वर्षाणि वै दश ॥ १७ ॥ प्रथमे पूरिकान्वर्षे
द्वितीये घृतपूरकान् ॥ तृतीये शुक्लकांसारं चतुर्थे मोदकाञ्छुभान् ॥ १८ ॥ सोहालकान्पञ्चमेऽब्दे षष्ठेऽब्दे खण्डवेष्टकान् ॥ सप्तमेऽब्दे
कोकरसानपूपांश्च तथाष्टमे ॥ १९ ॥ नवमे कर्णवेष्टांस्तु दशमे खण्डकाञ्छुभान् ॥ दश धेनूर्दशहरे दशविप्राय दापयेत् ॥ २० ॥ क्रमेण
भक्षयित्वा च यथोक्तं भरतर्षभ ॥ अर्द्धार्द्धं पिष्टयेदेवमर्द्धार्द्धं वा द्विजातये ॥ स्वत एवार्धमश्नीयाद्गत्वा रम्ये जलाशये ॥ २१ ॥ दशावतारा
नभ्यर्च्य पुष्पधूपविलेपनैः ॥ मंत्रेणानेन मेधावी हरिमभ्युक्ष्य वारिणा ॥ २२ ॥ मत्स्यं कूर्मं वराहं च नरसिंहं त्रिविक्रमम् ॥ श्रीरामं राम
कृष्णौ च बुद्धं चैव सकल्किनम् ॥ २३ ॥ गतोऽस्मि शरणं देवं हरिं नारायणं प्रभुम् ॥ प्रणतोऽस्मि जगन्नाथं स मे विष्णुः प्रसीदतु ॥ २४ ॥
छिनत्तु वैष्णवीं मायां भक्त्या जातो जनर्दनः ॥ श्वेतद्वीपं नयस्यस्मान्समात्मनि निवेदयेत् ॥ २५ ॥ एवं यः कुरुते पार्थ विधिनानेन सुव्रत ॥
दशावतारनामाख्यं तस्य पुण्यफलं शृणु ॥ २६ ॥ श्रूयंते यास्त्विमालोच्य पुरुषाणां दशा दश ॥ ताश्छिनत्ति न संदेहः शक्रप्रहरणैर्हरिः ॥
॥ २७ ॥ संसारसागरे घोरे मज्जंतं तत्र मां हरिः ॥ श्वेतद्वीपं नयत्वाशु व्रतेनानेन तोषितः ॥ २८ ॥ किं तस्य न भवेल्लोके यस्य तुष्टो जना
र्दनः ॥ सोऽहं जनार्दनो राजन्कालरूपी धरासुतः ॥ मर्त्यलोके स्वयं पार्थ भूभारोत्तारकारणम् ॥ २९ ॥ या स्त्रीव्रतमिदं पार्थ चरिष्यति मयो
दितम् ॥ सा लक्ष्म्याऽचलया युक्ता भर्तृपुत्रसमन्विता ॥ ३० ॥ मर्त्यलोके चिरं स्थित्वा विष्णुलोके महीयते ॥ विष्णुलोकाद्रुद्रलोकं ततो याति
परं पदम् ॥ ३१ ॥ ये पूजयंति पुरुषाः पुरुषोत्तमस्य मत्स्यादिकांस्तु दशमीषु दशावतारान् ॥ मर्त्या दशस्वपि दशासु सुखं विहृत्य ते यांति
यानमधिरुह्य सुरेशलोकान् ॥ ३२ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे दशावतारचरित्रव्रतं नाम त्रिषष्टित
मोऽध्यायः ॥ ६३ ॥ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ पार्थ पार्थिववृन्दानां मुखपङ्कजसद्रवे ॥ शृणुष्वावहितो वच्मि तवाशादशमीव्रतम् ॥
॥ १ ॥ नलनामाभवत्पूर्वं निषधेषु महीपते ॥ स भ्रात्रा निर्जितो राज्ये पुष्करेणेति नः श्रुतम् ॥ २ ॥ अक्षैर्द्यूतेन राजेन्द्र निर्ययौ भार्यया सह ॥
वनं प्रतिभयं शून्यं झिल्लीकगणनादितम् ॥ ३ ॥ स गत्वा प्रत्यहोरात्रं जलमात्रेण वर्तयन् ॥ ददर्श वनमध्यस्थाञ्छकुनीन्कांचनच्छवीन् ॥ ४ ॥
ग्रहीतुमिच्छंस्तात्राजन्समाच्छाद्य स्ववाससा ॥ खमापेतुः खगास्तूर्णं गृहीत्वा वसनं शुभम् ॥५॥ आससाद समाः काश्चिद्धृतवासाः सुदुःखितः॥

दमयंतीं समाप्राप्य निद्रयापहृतां तदा ॥ दुःखादुत्सृज्य गतवान्भाग्यतः प्राग्घनेश्वरम् ॥ ६ ॥ गते तु नैषधे भैमी प्रबुद्धे वांचितानना ॥ अपश्यंती नलं वीरं वीर भीमसुता वने ॥ इतश्चेतश्च बभ्राम हाहेति रुदती मुहुः ॥ ७ ॥ दुःखशोकसमाक्रांता नलदर्शनलालसा ॥ आससाद दिनैः कैश्चित्सा चैद्यपुरमंजसा ॥ ८ ॥ उन्मत्तवत्परिवृता शिशुभिः कौतुकाकुलैः ॥ सा दृष्टा चेदिराजस्य जनन्या जनवेष्टिता ॥९॥ चन्द्रलेखेव पतिता भूमौ भासितदिङ्मुखा ॥ आरोप्य सा स्वभवनं पृष्टा का त्वं वरानने ॥ १० ॥ उवाच भैमी सव्रीडं सैरध्रीं मां निबोधताम् ॥ न धावयेयं चरणौ नोच्छिष्टं भक्षयाम्यहम् ॥ ११ ॥ यदि प्रार्थयते कश्चिद्दंड्यस्ते सांप्रतं भवेत् ॥ प्रतिज्ञयानया देवि तिष्ठेयं तव वेश्मनि ॥ एवमस्त्वनवद्यांगि राजमाताप्युवाच ताम् ॥ १२ ॥ एवंविधा तद्भवने कंचित्कालमनिंदिता ॥ उवास वसनार्द्धेन प्रवृत्तांते किल द्विजः ॥ आनयामास मुदितो दमयंतीं गृहं पितुः ॥ १३ ॥ मात्रा पित्रा समायुक्ता सुतैर्भ्रातृभिरेव च ॥ दमयंती तथाप्यास्ते दुःखं नैषधवर्जिता ॥ १४ ॥ प्रोवाच विमनाहूय व्रतं दानमथापि वा ॥ कथयध्वं यथा मे स्यादिष्टेन सह संगमः ॥ १५ ॥ तत्रेतिहासकुशलो विप्रः प्रोवाच बुद्धिमान् ॥ भद्रे त्वमाशादशमीं कुरुष्वेप्सितसिद्धिदाम् ॥ १६ ॥ चकार सर्वं तन्वंगी यत्पुराणविदा तदा ॥ ख्यातमाख्यानविदुषा दमनेन पुरोधसा ॥ १७ ॥ व्रतस्यास्य प्रभावेण दमयंत्या नरोत्तम ॥ संजातः सुखदोऽत्यर्थं भर्त्रा सह समागमः ॥ १८ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कथमाशादशम्येषा गोविन्द क्रियते कदा ॥ सर्वमेतत्समाचक्ष्व मां सर्वज्ञोसि यादव ॥ १९ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ राज्याशया राजपुत्रः कृष्यर्थं तु कृषीवलः ॥ भार्यार्थं तु वणिक्पुत्रः पुत्रार्थे गुर्विणी तथा ॥ २० ॥ धर्मार्थकामसंसिद्ध्यै लोककन्या वरार्थिनी ॥ यष्टुकामो द्विजवरो रोगी रोगापनुत्तये ॥ २१ ॥ चिरप्रवासिते कांते कालेन धृतिपंडिता ॥ एतेष्वन्येषु कर्तव्यमाशाव्रतमिदं सदा ॥ २२ ॥ यदा यस्य भवेदार्त कार्यते हि तदा व्रतम् ॥ शुक्लपक्षे दशम्यां तु स्नात्वा संपूज्य देवताः ॥२३॥ नक्तं तदाशाः संपूज्याः पुष्पालक्तकचन्दनैः ॥ गृहाङ्गणे लेखयित्वा यवैः पिष्टातकेन वा ॥ दत्त्वा घृताक्तं नैवेद्यं पुनः कार्यं निवेदयेत् ॥२४॥ आशाश्चाशाः सदा संतु विद्यंतां च मनोरथाः ॥भवतीनां प्रसादेन सदा कल्याणमस्त्विति ॥२५॥ एवं संपूज्य भुञ्जीत दत्त्वा विप्राय दक्षिणाम् ॥ अनेन क्रमयोगेन मासिमासि समाचरेत् ॥२६॥ यावन्मनोरथः पूर्णस्ततः पश्चात्समुद्यमात् ॥ मासि पूर्णे च षण्मासे वर्षे वर्षद्वये गते ॥२७॥ सौवर्णाः कारयेदाशा रौप्यपिष्टातकेन वा ॥ ज्ञातिबंधुजनैः सार्द्धं स्नातः सम्यगलंकृतः ॥२८॥ पूजयेन्मंत्रसंदर्भैरेभिर्ध्यात्वा गृहांगणे ॥ तव संनिहितः शक्रः सुरासुरनमस्कृतः ॥ पूर्वा चन्द्रेण सहिता ऐन्द्रीदिग्देवते नमः ॥ २९ ॥ अग्नेः परिग्रहादार्ये त्वमाग्नेयीति पठ्यसे ॥ तेजोमयी

परा शक्तिराग्नेयी वरदा भव ॥ ३० ॥ देवराजं समासाद्य लोकः संयमयत्यसौ ॥ तेन संयमनी यासि याम्ये कामप्रदा भव ॥ ३१ ॥ खड्गंसहातिविकृता नैर्ऋतिस्त्वमुपाभृता ॥ तेन नैर्ऋतनाम्नीत्वं कृतवान्मघवा सदा ॥ ३२ ॥ त्वय्यास्ते भवनाधारवरुणो यादसां पतिः ॥ इष्टकामार्थसिद्ध्यर्थं वारुणिप्रभवा भव ॥ ३३ ॥ अधिश्रितासि यस्मात्त्वं वायुना जगदायुना ॥ वायव्ये त्वमतः शान्तिं नित्यं यच्छ नमोनमः ॥ ३४ ॥ कुबेरवासतः सौम्या प्रख्याता त्वमथोत्तरा ॥ ऐशानी जगदीशेन शंभुना त्वमलंकृता ॥ अतस्त्वं शिवसान्निध्यं देवि देहि शिवे नमः ॥ ३५ ॥ सर्पाष्टककुलेन त्वं सेवितासि तथाप्यधः ॥ नागांगनाभिः सहिता हिता नः सर्वदा भव ॥ ३६ ॥ सप्तलोकैः परिगता सर्वदा त्वं शिवा यतः ॥ सनकाद्यैः परिवृता ब्राह्मी जिह्मानपाकुरु ॥ ३७ ॥ नक्षत्राणि च सर्वाणि ग्रहास्ताराग्रहास्तथा ॥ नक्षत्रमातरो ये च भूतप्रेतविनायकाः ॥ सर्वे ममेष्टसिद्ध्यर्थे भवंतु प्रणताः सदा ॥ ३८ ॥ एभिर्मंत्रैः समभ्यर्च्य पुष्पधूपादिना ततः ॥ वासोभिरभिसंस्थाप्य फलानि विनिवेदयेत् ॥ ३९ ॥ तत्तूर्यध्वनिघोषेण गीतमङ्गलनिःस्वनैः ॥ नृत्यंतीभिर्वरस्त्रीभिस्तां रात्रिमतिवाहयेत् ॥ ४० ॥ कुंकुमक्षोदतीव्रेण दानमानादिभिः सुखम् ॥ प्रभाते वेदविदुषे सर्वं तत्प्रतिपादयेत् ॥ ४१ ॥ अनेन विधिना सर्वं क्षमयन्प्रणिपत्य च ॥ भुञ्जीत मित्रसहितः सुहृद्बंधुजनैरपि ॥ ४२ ॥ य एवं कुरुते पार्थ दशमीव्रतमादरात् ॥ स सर्वकाममाप्नोति मनसाभीप्सितं नरः ॥ ४३ ॥ स्त्रीभिर्विशेषतः कार्यं व्रतमेतद्युधिष्ठिर ॥ लघुचित्ता यतो नार्यः सदा कामपरायणाः ॥ ४४ ॥ धन्यं यशस्यमायुष्यं सर्वकामफलप्रदम् ॥ कथितं ते महाराज मया व्रतमनुत्तमम् ॥ ४५ ॥ ये मानवा मनुजपुङ्गव कामकामाः संपूजयंति दशमीषु सदा दशाशाः ॥ तेषां विशेषनिहिता हृदये प्रकाममाशाः फलंत्यलमलं बहुनोदितेन ॥ ४६ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवाद आशादशमीव्रतं नाम चतुष्षष्टितमोऽध्यायः ॥ ६४ ॥ ॥ छ ॥

॥ युधिष्ठिर उवाच ॥ ॥ अहं त्वागस्करः पापः पृथिवीक्षयकारकः ॥ परिपृच्छामि गोविन्द त्वां नमस्कृत्य पादयोः ॥ १ ॥ गुह्याद्गुह्यतरं ब्रूहि व्रतं किंचिदनुत्तमम् ॥ तरामि येन पापौघं भीष्मद्रोणवधार्णवम् ॥ २ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ आसीत्पुरोत्तरो नाम्ना विदर्भायां कुशध्वजः ॥ सांतःपुरसुतो यश्च चक्रे राज्यमतंद्रितः ॥ ३ ॥ जघान तापसं सोऽथ प्रमादान्मृगयां गतः ॥ मृगं मत्वा महारण्ये ब्राह्मणं दैवमोहितः ॥ ४ ॥ तेन कर्मविपाकेन देहांते नरकं गतः ॥ तत्रासौ यातना घोरा अनुभूयातिपीडितः ॥ ५ ॥ तस्मादिहागतो मर्त्ये रौद्रो विषधरोऽभवत् ॥ अदशत्सोऽपि राजेन्द्र ब्राह्मणं चरणे रुषा ॥ ६ ॥ लब्ध्वा सह च पंचत्वं जगाम द्विजसंयुतः ॥ विपन्नस्तु ततः सिंहो द्वितीयेऽभूत्सुदारुणः ॥ ७ ॥ विदारितमुखो हिंस्रो नानासत्त्व

भयंकरः ॥ जघानासौ पुनः श्रेष्ठं राजन्यं मृगया गतम् ॥ ८ ॥ ततोऽपि बहुभिः शस्त्रै राजलोकैर्निपातितः ॥ पुनर्व्याघ्रो बभूवासौ तृतीयेऽपि
भवांतरे ॥ ९ ॥ तीक्ष्णपादनखाघातव्यापादितमृगान्वयः ॥ तेनापि वैश्यो निधनं नीतः किञ्चिद्दिनांतरम् ॥ १० ॥ स नीतः कृमिराशित्वं लोकैः
खातनिपातनात् ॥ संजातस्तु महानृक्षो नखराहतजंतुरुक् ॥ ११ ॥ जघान बालं चण्डालादसौ मृत्युमवाप्नुयात् ॥ पञ्चमे मकरो जातः समुद्रेऽ
तिभयंकरः ॥ १२ ॥ स्त्रियं जघान तरुणीं स्नातुकामामथागताम् ॥ प्रभाते शङ्करस्याग्रे शशाङ्कग्रहणे निशि ॥ १३ ॥ तत्रापि बडिशं दत्त्वा जनैः
प्राणैर्वियोजितः ॥ पुनः षष्ठे भवे जातः पिशाचः पिशिताशनः ॥ १४ ॥ क्रूरश्छिद्रपरः क्षुद्रो नरप्राणवियोजकः ॥ सोऽवतीर्णो नरस्यांगं कर्षया
मास कस्यचित् ॥ १५ ॥ मंत्रेणाहूय सिद्धेन वातिकेन व्यसुः कृतः ॥ सप्तमे स पुनर्जातो दुर्निरीक्ष्यवपुर्भृशम् ॥ १६ ॥ क्रूरदंष्ट्रः करालास्यो
मांसशोणितभोजनः ॥ दिग्वासा मरुभूमीषु वाशिष्ठो ब्रह्मराक्षसः ॥१७॥ स राष्ट्रं जर्जरं[1] शून्यं सर्वं चक्रे विषादिषु ॥ आक्रम्य भीमदासेन राज्ञा
राक्षसशत्रुणा ॥ १८॥ समारोप्य धनुः संख्ये ब्रह्मास्त्रेण निपातितः ॥ भूयोऽभवद्व्याघ्रसमः स्वजन्मन्यष्टमे भुवि ॥१९॥ वनेचराणां क्रुद्धाङ्गो ब्राह्म
णान्निधनं गतः ॥ ततो हस्ती च भल्लूको मातंगेन धनुष्मता ॥ २० ॥ एकादशेऽपि पाञ्चालो भवमध्येऽपि भीषणः ॥ ऊर्ध्वकेशोऽति
रक्ताक्षो जातो ह्रस्वतनुर्दृढः ॥ २१ ॥ पापो धर्मध्वजो रक्षो देवतोज्झितमाल्यधृक् ॥ स दण्डपाशिकेनैव वृक्षाग्रे ह्यवलंबितः ॥ २२ ॥ द्वादशे
स पुनर्जातः पुष्कलक्लेशभाजनः ॥ भक्ष्यलोभाद्बिलगतो व्याधेन विनिपातितः ॥ २३ ॥ तेन चासीत्कृतं पूर्वं तारकद्वादशीव्रतम् ॥
तस्य प्रभावाज्जातोऽपि दुष्टयोनौ पुनःपुनः ॥ २४ ॥ अवाप शीघ्रं पंचत्वं संसारभवसागरे ॥ पुनरेवाभवद्राजा विदर्भायां सुधार्मिकः ॥ २५ ॥
भूयश्चोपोषिता तेन तारकद्वादशी शुभा ॥ दृश्यतां व्रतमाहात्म्यं जातोजातः पुनःपुनः ॥ २६ ॥ व्रतप्रभावाद्भुवने भुक्त्वा राज्यमकण्टकम् ॥ प्राप
विष्णुपुरे स्थानं यावदाभूतसंप्लवम् ॥ २७ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कथमेतद्व्रतं कृष्ण कर्तव्यं पुरुषोत्तमैः ॥ स्त्रीभिर्वा भर्तृवाक्येन स्नान
दानजपादिकम् ॥ २८ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ मार्गशीर्षे सिते पक्षे गृहीत्वा द्वादशीव्रतम् ॥ अकृत्रिमे जले स्नानमपराह्णे समाचरेत् ॥
॥ २९ ॥ प्रणम्य भास्करायाथ कृत्वा देवार्चनं तथा ॥ होमश्च तावत्स्थातव्यो यावदस्तमितो रविः ॥ ३० ॥ ततो भुक्त्वा फलैः पुष्पैर्गन्धधूप
विलेपनैः ॥ सजलं साक्षतं कृत्वा सहिरण्यं शुभैः फलैः ॥ ३१ ॥ रम्ये ताम्रमये पात्रे जानुभ्यां धरणीं गतः ॥ पूर्वामुखः प्रदोषाग्रे मूर्ध्नि कृत्वार्घ्यं

---

[1] गौर्जरम्–इ० पा० ।

भाजनम् ॥ ३२ ॥ भूमौ तु मंडलं कृत्वा गोमयेन सतारकम् ॥ चंदनेन समालिख्य ध्रुवं हि गगनोन्मुखः ॥ ३३ ॥ सहस्रशीर्षामंत्रेण भूमौ
शक्त्या शनैः स्वयम् ॥ तारकाणां कुरुश्रेष्ठ दद्यादर्घ्यमतंद्रितः ॥३४॥ पर्युक्ष्य धूमसुत्क्षिप्य दद्याद्विप्राय दक्षिणाम् ॥ क्रमेण सर्वं निर्वर्त्य भोज्यं
भोज्यं निशागमे ॥३५॥ मार्गशीर्षे खंडखाद्यं पौषे सोहालकं तथा ॥ तिलतंडुलकं माघे गुडापूपं च फाल्गुने ॥३६॥ मोदकांश्चैत्रमासे तु वैशाखे
खंडवेष्टकम् ॥ ज्येष्ठे सक्तुभृतैः पात्रैराषाढे गुडपूरिकैः ॥ ३७ ॥ श्रावणे मधुशीर्षेण नभस्ये पायसेन च ॥ घृतपर्णैश्चाश्वयुजे कांसारैः कार्त्तिके
क्रमात् ॥ ३८ ॥ एभिर्द्वादशभिर्वर्षैर्भोजयित्वा द्विजान्स्वयम् ॥ भुञ्जीत भक्त्या राजेन्द्र पश्चाद्देवं क्षमापयेत् ॥ ३९ ॥ समाप्ते तु व्रते कृत्वा राजतं
तारकागणम् ॥ दृष्ट्वा वा पूर्वविधिना पूजयित्वा क्षमापयेत् ॥ ४० ॥ कुम्भा द्वादश दातव्याः सोदका मोदकाश्रिताः ॥ ब्राह्मण्यां परिधानं च पद्मरागः
सकुंचकः ॥ ४१ ॥ ब्राह्मणे वल्गुलल्लाटं लक्षपुष्पोपशोभितम् ॥ चालकेनोपवीतं च पुष्पं दत्त्वा क्षमापयेत् ॥ ४२ ॥ अनेन विधिना
राजन्यः करोति व्रतं नरः ॥ नारी वा भरतश्रेष्ठ भक्तिभावपुरःसरा ॥ ४३ ॥ नक्षत्रलोकं व्रजति विमानेनार्कवर्चसा ॥ अप्सरोगणगन्धर्वयक्षविद्याधरामरैः
॥ ४४ ॥ सहस्रभर्त्ता स्वर्लोके पूज्यमानो दिवाकरैः॥ वसेत्कल्पायुतं यावत्पुनर्विष्णुपुरं व्रजेत् ॥ ४५ ॥ एतद्व्रतं पुरा चीर्णं शच्या राज्ञ्या
श्रियोमया ॥ सीतया दमयंत्या च रुक्मिण्या सत्यभामया ॥ ४६ ॥ मेनया रंभया स्वर्गे उर्वश्या देवदत्तया ॥ अन्याभिरपि नारीभिः पुरुषैश्च
पृथग्विधैः ॥ ४७ ॥ चीर्णमेतद्व्रतं पार्थ सर्वपापभयापहम् ॥ ४८ ॥ जन्मांतरेष्वपि कृतानि हरत्यघानि या संदहत्यहरहः सुकृतोपयोगात् ॥ सा
द्वादशी जगति तारकनामधेया तन्नास्ति यन्न विदधाति कृता मनुष्यैः ॥ ४९ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे तारकद्वादशीव्रतं
नाम पञ्चषष्ठितमोऽध्यायः ॥ ६५ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ भगवन्ब्रूहि मे सम्यगरण्यद्वादशीव्रतम् ॥ सप्राशनं
सोपवासं सरहस्यं समन्त्रकम् ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ कौंतेय यत्पुरा चीर्णं सीतया वनसंस्थया ॥ व्रतं राघववाक्येन प्रशस्तं दोषवर्जितम्
॥ २ ॥ लोपामुद्रालये साध्व्यो मुनिपत्न्यो बहुप्रजाः ॥ भोजितास्तर्पिताः सर्वैराहारैः सर्वकामिकैः ॥ ३ ॥ पद्मिनीपत्रविस्तीर्णे सोपदंशैर्यथा
नवैः ॥ भक्ष्यैर्भोज्यैस्तथा लेह्यैश्चोष्यैश्चापि यदृच्छया ॥ ४ ॥ तामिहैकमनाः पार्थः शृणुष्वारण्यद्वादशीम् ॥ मार्गशीर्षे सिते पक्षे एकादश्यां
दिनोदये ॥ ५ ॥ स्नात्वा नरः सोपवासः कृत्वा पूजां जनार्दने ॥ गंधपुष्पाक्षतैर्धूपैर्दीपैर्जागरणैर्निशाम् ॥६॥ नीत्वा प्रभाते गत्वा च वने वेदाङ्गपारगान्
॥ भोजयित्वा फलप्रायं स्वयं भुञ्जीत वाग्यतः ॥ ७ ॥ पञ्चगव्यं प्राशयित्वा पूर्वमेवाथ तद्दिने ॥ वर्षमेकं शुभं पूर्णं पारयित्वाःयुधिष्ठिर॥८॥

श्रावणे कार्त्तिके माघे[1] चैत्रे वाथ समर्चिते ॥ सोपदंशैः पत्रशाकैस्तिलशष्कुलिकादिभिः ॥ ९ ॥ [2]अपूपैः खण्डवेष्टैश्च मरीचैः सिंहकेसरैः ॥ धूलीमुखैरमृतफलैः स्वादुकोकरसैः शुभैः ॥ १० ॥ शीतलैस्तर्पयेद्विद्वानर्कपुष्पैः सुमालकैः ॥ दधिक्षीराज्यपाणिज्यैश्चातुर्जातकरंजितैः ॥ ११ ॥ कर्पूरनखविद्धैश्च मधुरैः पनसोत्तमैः ॥ बहुवृक्षं वनं गत्वा सुस्वादुसलिलं शिवम् ॥१२॥ सुखासनोपविष्टांश्च प्रागुदङ्मुखवच्छुचीन् ॥ भोजयेद्दश च द्वौ वा मुनीनारण्यवासिनः ॥ १३ ॥ एकदंडींस्त्रिदंडींश्च गृहस्थांश्चापि सुव्रतान् ॥ ब्राह्मणीर्विविधाः सप्त एकपत्नीः पतिव्रताः ॥ १४ ॥ चार्वंग्यश्चार्चिताः स्नाताः सर्वावयमशोभनाः ॥ सुवस्त्राः कुंकुमाक्ताङ्गाः सुगंधकुसुमांचिताः ॥ १५ ॥ अंगैर्वा भोजनीयास्तास्ताश्चादित्यस्य देवताः ॥ वासुदेवजनार्दनदामोदरमधुसूदनाः ॥ १६ ॥ पद्मनाभकृष्णविष्णुगोवर्द्धनत्रिविक्रमाः ॥ श्रीधरश्च हृषीकेशः पुण्डरीकाक्ष आदिवाराहाः ॥ १७ ॥ एभिर्द्वादशभिर्मन्त्रैर्नमस्कारांतयोजितैः ॥ गंधचन्दनसंवस्त्रं धूपं दत्त्वा पृथक्पृथक् ॥ १८ ॥ भोजयित्वा शुभान्नानि दद्यात्ताभ्यः सुदक्षिणाम् ॥ प्रणम्य प्रार्थयेद्भक्त्या विष्णुर्मे प्रीयतामिति ॥ १९ ॥ ततो भुञ्जीत सहितो भृत्यैः प्रेष्यजनेन च ॥ आगताभ्यागतैर्लोकैः सुहृत्संबंधिबंधुभिः ॥ ॥ २० ॥ एवं कौंतेय कुरुते योऽरण्यद्वादशीं नरः ॥ स देहांते विमानस्थो दिव्यकन्यासमावृतः ॥ याति ज्ञातिसमायुक्तः श्वेतद्वीपं हरेः पुरम् ॥ ॥ २१ ॥ यत्र लोकाः पीतवस्त्राः श्यामदेहाश्चतुर्भुजाः ॥ शंखचक्रगदापद्मचारुहस्ताः सकौस्तुभाः ॥ २२ ॥ गरुडासनाः साभरणा मुकुटोत्कटकुंडलाः ॥ नीलोत्पलोद्दामपद्ममालयालंकृतोरसः ॥२३॥ लक्ष्मीधरा मेघवर्णाः कूर्पराङ्गदभूषणाः ॥ तिष्ठंति विष्णुसामान्ये यावदाभूतसंप्लवम् ॥ ॥ २४ ॥ तस्मादेत्य महातेजाः पृथिव्यां नृपपूजिताः ॥ मर्त्यलोके कीर्तिमंतः संभवंति नरोत्तमाः ॥ २५ ॥ ततो यांति परं स्थानं मोक्षमार्गं शिवं शुभम् ॥ यत्र गत्वा न शोचंति न संसारे भ्रमंति च ॥ २६ ॥ ये द्वादशीमुपवसंति सितामरण्यनाम्नीं वने द्विजवरानथ भोजयंति ॥ साध्व्यः स्त्रियः सुचरिताभरणाश्च तासां विष्णुः प्रसादमुपयाति ददाति मोक्षम् ॥ २७ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादेरण्यद्वादशीव्रतं नाम षट्षष्टितमोऽध्यायः ॥ ६६ ॥

॥ ६७ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ घनावृते वरे देवे वर्षाकाले ह्युपस्थिते ॥ मयूरकेकाकुलिते दर्दुरारावपूरिते ॥ १ ॥ कुलस्त्रियः प्रयच्छंति कस्यान्नं काऽत्र देवता ॥ किं व्रतं कृष्ण विख्यातमन्नं कस्यां तिथौ भवेत् ॥ २ ॥ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ प्रवृत्ते श्रावणे मासि कृष्णपक्षे ह्युपस्थिते ॥ एकादश्यां शुचिर्भूत्वा सर्वौषधिजलैः शुभैः ॥ ३ ॥ माषचूर्णेन

---

[1] मासे–इ० पा० । [2] प्रपापैः इ० पा० ।

राजेन्द्र कुर्यादिंदुरिकाशनम् ॥ मोदकांश्च तथा पंच घृतपक्कान्सुनिर्मलान् ॥ ४ ॥ नरमेकैकमुद्दिश्य ततो गत्वा जलाशयम् ॥ दुष्टयादोविरहितं
सतोयं जलजैर्युतम् ॥ ५ ॥ तस्यैव पुलिने रम्ये जुष्टान्ने गोमयादिना ॥ कृत्वा मंडलकं वृत्तं पिष्टकादिभिरर्चितम् ॥ ६ ॥ चर्चितं गंधकुसुमैर्धूप
दीपाक्षतोज्ज्वलम् ॥ तत्र चंद्रं लिखेदेव रोहिण्या सहितं विभुम् ॥ अर्चयेच्च सभार्यो वै मन्त्रेणानेन भावितः ॥७॥ सोमराज नमस्तुभ्यं रोहिण्यै
ते नमोनमः ॥ महासति महादेवि संपादय ममेप्सितम् ॥ ८ ॥ एवं संपूज्य तस्याग्रे नैवेद्यं देयमर्चितम् ॥ तत्रैव ब्राह्मणे दद्यात्सोमो मे प्रीयता
मिति ॥ प्रीयतातिति मे देवी रोहिणी सहितप्रिया ॥ ९ ॥ एवमुच्चार्य दत्त्वा च ततोंऽतर्जलमाविशेत् ॥ कंठांतं कटिमात्रं वा गुल्फांतं वा जला
शये ॥ १० ॥ ध्यायेच्च मनसा सोमं रोहिणीसहितं तदा ॥ यावत्समस्तं तद्भुक्तं भुक्त्वा चांतस्तटे स्थितः ॥ ११ ॥ नियम्य वसतां चान्ये ततो
विप्राय भोजनम् ॥ दक्षिणासहितं देयं निश्चयं वाचि कल्पयेत् ॥ भक्त्या शक्त्या यथाचित्तं यथावित्तं तथा तथा ॥ १२ ॥ यः करोति नरो
राजन्नारी वाथ कुमारिका ॥ वर्षेवर्षे विधानेन पार्थेदं रोहिणीव्रतम् ॥ १३ ॥ इह लोके चिरं स्थित्वा धनधान्यसमाकुले ॥ गृहाश्रमे शुभां लब्ध्वा
पुत्रपौत्रादिसंततिम् ॥ १४ ॥ ततः सुतीर्थे मरणं ततो ब्रह्मपुरं व्रजेत् ॥ तस्माद्विष्णुपुरं पार्थ ततो रुद्रपुरं शुभम् ॥१५॥ खे रोहिणी शशधराभि
मता हिता च किं कारणं शृणु नरेन्द्र निवेदयामि ॥ संपिष्टमाषरचितेंदुरिकाशितुं यद्भुक्तं जले गुडघृतेन फलं तदेतत् ॥१६॥ ॥ इति श्रीभविष्ये
महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे रोहिणीचन्द्रव्रतं नाम सप्तषष्टितमोध्यायः ॥ ६७ ॥ ॥छ॥ ॥ युधिष्ठिर उवाच ॥ ॥ अवियोग
व्रतं ब्रूहि मम यादवनंदन ॥ विधानं तस्य कीदृक्च किं पुण्यं काऽत्र देवता ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ शृणु पांडव यत्नेन कथ्यमानं
यथाखिलम् ॥ अवियोगव्रतं नाम व्रतानामुत्तमोत्तमम् ॥ २ ॥ प्रौष्ठपदे शुक्लपक्षे द्वादश्यां प्रातरुत्थितः ॥ यस्तु शुक्लांबरधरः स्नात्वा पूर्वं जला
शये ॥ ३ ॥ हृद्ये रम्ये सौधतटे हरिं लिख्येत मण्डले ॥ गोधूमचूर्णपिष्टेन लक्ष्मीं तत्पार्श्ववर्तिनीम् ॥ ४ ॥ तत्रैव च हरं गौरीं सावित्रीं ब्रह्मणा
सह ॥ राज्ञीसहितं च रविं त्रैलोक्योद्योतकारकम् ॥ ५ ॥ गंधैः पुष्पैश्च धूपैर्नैवेद्यैरर्चयेद्यथाशक्त्या ॥ अवियोगव्रतचारी मंत्रेणानेन राजेन्द्र ॥६॥
नारी वा पुरुषो वा अवियोगमतिं दृढां कृत्वा ॥ भक्त्या ध्यानी मौनी दांपत्यं पूजयेद्देवम् ॥ ७ ॥ सहस्रमूर्द्धा पुरुषः पद्मनाभो जनार्दनः ॥
व्यासोऽपि कपिलाचार्यो भगवान्पुरुषोत्तमः ॥८॥ नारायणो मधुलिहो विष्णुर्दामोहरो हरिः ॥ महावराहो गोविंदः केशवो गरुडध्वजः ॥ ९ ॥
श्रीधरः पुंडरीकाक्षो विश्वरूपस्त्रिविक्रमः ॥ उपेन्द्रो वामनो रामो वैकुंठो माधवो ध्रुवः ॥ १० ॥ वासुदेवो हृषीकेशः कृष्णः संकर्षणोऽच्युतः ॥

अनिरुद्धो महायोगी प्रद्युम्नो नंद एव च ॥ ११ ॥ नित्यं स मे शुभः प्रीतः सश्रीकः केशशूलिनः ॥ उमापतिर्नीलकंठः स्थाणुः शंभुर्भगाक्षिहा ॥ ॥ १२ ॥ ईशानो भैरवः शूली त्र्यंबकस्त्रिपुरांतकः ॥ कपर्दीशो महालिंगी महाकालो वृषध्वजः ॥१३॥ शिवः शर्वो महादेवो रुद्रो भूतमहेश्वरः ॥ ममास्तु सह पार्वत्या शंकरः शंकरश्चिरम् ॥ १४ ॥ ब्रह्मा शंभुः प्रभुः स्रष्टा पुष्करी प्रपितामहः ॥ हिरण्यगर्भो वेदज्ञः परमेष्ठी प्रजापतिः ॥१५॥ चतुर्मुखः सृष्टिकर्ता स्वयंभूः कमलासनः ॥ विरञ्चिः पद्मयोनिश्च ममास्तु वरदः सदा ॥१६॥ आदित्यो भास्करो भानुः सूर्योर्कः सविता रविः ॥ मार्तंडो मंडलज्येतिरग्निरश्मिर्जनेश्वरः ॥ १७ ॥ प्रभाकरः सत्तसप्तिस्तरणिः सरणिः खगः ॥ दिवाकरो दिनकरः सहस्रांशुर्मरीचिमान् ॥ १८ ॥ पद्मप्रबोधनः पूषा किरणी मेरुभूषणः ॥ निकुंभोः वर्णभो देवः सुप्रीतोऽस्तु सदा मम ॥१९॥ लक्ष्मीः श्रीः संपदा पद्मा मा विभूतिर्हरिप्रिया ॥ पार्वती ललिता गौरी उमा शंकरवल्लभा ॥ २० ॥ गायत्री प्रकृतिः सृष्टिः सावित्री वेधसो मता ॥ राज्ञी भानुमती संज्ञा नित्यभा भास्करप्रिया ॥ २१ ॥ इति पद्मनाभशंकरपितामहार्कादीन्सप्रियान्पूज्य ॥ दत्त्वादत्त्वा दानं भुक्त्वा चांते व्रजेद्वेश्म ॥ २२ ॥ द्वादश्यां चरति नरो व्रतमेतद्भक्तिभावितो लोके ॥ भवति यशोधनभागी संततिमान्विगतसंतापः ॥ २३ ॥ हरिहरहिरण्यगर्भप्रभाकराणां क्रमेण लोकेषु ॥ भुक्त्वा भोगान्विपुलानथ योगी निर्वृतो भवति ॥ २४ ॥ स्त्रीपुंसोर्यदि युग्मं पुरुषो वा यदि समाचरति कश्चित् ॥ नारी वा व्रतमेतच्चीर्त्वा यात्यालयं विष्णोः॥२५॥

इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे हरिहरहिरण्यगर्भप्रभाकराणामवियोगव्रतं नामाष्टषष्टितमोऽध्यायः ॥ ६८ ॥

॥ ॥ युधिष्ठिर उवाच ॥ ॥ अक्षौहिण्यो दशाष्टौ च मद्राज्यार्थे क्षयं गताः ॥ तेन पापेन मे चित्ते जुगुप्सातीव वर्तते ॥ १ ॥ तत्र ब्राह्मणराजन्यवैश्यशूद्रादयो हताः ॥ भीष्मद्रोणकलिंगादिकर्णशल्यसुयोधनाः ॥ २ ॥ तेषां वधेन यत्पापं तन्मे मर्माणि कृंतति ॥ पापप्रक्षालनं कश्चिद्धर्मं ब्रूहि जगत्पते ॥ ३ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ सुमहत्पुण्यजननं गोवत्सद्वादशीव्रतम् ॥ अस्ति पार्थ महाबाहो पांडवानां धुरंधर ॥ ४ ॥ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ केयं गोद्वादशी नाम विधानं तत्र कीदृशम् ॥ कथमेषा समुत्पन्ना कस्मिन्काले जनार्दन ॥ ५ ॥ एतत्सर्वं हरे ब्रूहि पाहि मां नरकार्णवात् ॥ ६ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ पुरा कृतयुगे पार्थ मुनिकोटिः समागता ॥ तपश्चचार विपुलं नामव्रतधरा गिरौ ॥७॥ हर्षेण महताविष्टा दैवदर्शनकांक्षया ॥ जंबूमार्गे महापुण्ये नामतीर्थविभूषिते ॥८॥ पारियात्रे सिद्धपात्रे रम्ये तंदुलिकाश्रमे ॥ टंटां[१]विरिति विख्याते

---

[१] टटाभिरिति—इ० पा० ।

उत्तमे शिखरे नृप ॥ ९ ॥ तापसारण्यमतुलं दिव्यकाननमंडितम् ॥ वशिष्ठशुक्रांगिरसक्रतुदक्षादिभिर्वृतम् ॥ १० ॥ वल्कलाजिनसंवीतैर्भृगोराश्र
ममंडलम् ॥ नानामृगगणैर्जुष्टं शाखामृगगणैर्युतम् ॥११॥ प्रशांतसिंहहरिणं सर्ववस्तुगतद्रुमम् ॥ गहनं निर्झरं रम्यं लतासंतानसंकुलम् ॥ १२ ॥
सिंहव्याघ्रगजैर्भिन्नं हरिणैः शबरैः शशैः ॥ वराहैरुरुभिश्चित्रैः समंताद्रुपशोभितम् ॥ १३ ॥ तपस्यता तत्र तेषां मुनीनां दर्शनार्थिनाम् ॥ व्याजं
चक्रे महीनाथ द्वादशार्धार्धलोचनः ॥ १४ ॥ बभूव ब्राह्मणो वृद्धो जरापांडुरमूर्द्धजः ॥ श्लथच्चर्मतनुः कुब्जो यष्टिपाणिः सवेपथुः ॥ उमापि चक्रे
गोरूपं शृणु तत्पार्थ यादृशम् ॥ १५ ॥ क्षीरोदतोयसंभूता याः पुरामृतमंथने ॥ पञ्च गावः शुभाः पार्थ पञ्चलोकस्य मातरः ॥ १६ ॥ नन्दा
सुभद्रा सुरभी सुशीला बहुला इति ॥ एता लोकोपकाराय देवानां तर्पणाय च ॥१७॥ जमदग्निभरद्वाजवशिष्ठासितगौतमाः ॥ जगृहुः कामदाः पञ्च
गावो दत्ताः सुरैस्ततः ॥ १८ ॥ गोमयं रोचना मूत्रं क्षीरं दधि घृतं गवाम् ॥ षडंगानि पवित्राणि संशुद्धिकरणानि च ॥ १९ ॥ गोमयादुत्थितः
श्रीमान्बिल्ववृक्षः शिवप्रियः ॥ तत्रास्ते पद्महस्ता श्रीः श्रीवृक्षस्तेन स स्मृतः ॥ बीजान्युत्पलपद्मानां पुनर्जातानि गोमयात् ॥ २० ॥ गोरोचना
च मांगल्या पवित्रा सर्वसाधिका ॥ गोमूत्राद्गुग्गुलुर्जातः सुगंधिः प्रियदर्शनः ॥ आहारः सर्वदेवानां शिवस्य च विशेषतः ॥ २१ ॥ यद्बीजं जगतः
किञ्चित्तज्ज्ञेयं क्षीरसंभवम् ॥ दध्नः सर्वाणि जातानि मङ्गलान्यर्थसिद्धये ॥ घृतादमृतमुत्पन्नं देवानां तृप्तिकारणम् ॥ २२ ॥ ब्राह्मणाश्चैव गावश्च
कुलमेकं द्विधा कृतम् ॥ एकत्र मन्त्रास्तिष्ठंति हविरन्यत्र तिष्ठति ॥२३॥ गोषु यज्ञाः प्रवर्तंते गोषु देवाः प्रतिष्ठिताः॥ गोषु वेदाः समुत्कीर्णाः सष
डंगपदक्रमाः ॥ २४ ॥ शृङ्गमूले गवां नित्यं ब्रह्मा विष्णुश्च संस्थितौ ॥ शृङ्गाग्रे सर्वतीर्थानि स्थावराणि चराणि च ॥ २५ ॥ शिवो मध्ये महा
देवः सर्वकारणकारणम् ॥ सलाटे संस्थिता गौरी नासावंशे च षण्मुखः ॥२६॥ कंबलाश्वतरौ नागौ नासापुटसमाश्रितौ॥कर्णयोरश्विनौ देवौ चक्षु
र्भ्यां शशिभास्करौ ॥ २७ ॥ दंतेषु वसवः सर्वे जिह्वायां वरुणः स्थितः ॥ सरस्वती च कुहरे यमयक्षौ च गण्डयोः ॥ २८ ॥ संध्याद्वयं तथेष्टाभ्यां
ग्रीवायां च पुरंदरः ॥ रक्षांसि ककुदे द्यौश्च पार्ष्णिकाये व्यवस्थिता ॥ २९ ॥ चतुष्पात्सकलो धर्मो नित्यं जंघासु तिष्ठति ॥ खुरमध्येषु गन्धर्वाः
खुराग्रेषु च पन्नगाः ॥ ३० ॥ खुराणां पश्चिमे भागे राक्षसाः संप्रतिष्ठिताः ॥ रुद्रा एकादश पृष्ठे वरुणः सर्वसन्धिषु ॥ ३१ ॥ श्रोणीत
टस्थाः पितरः कपोलेषु च मानवाः ॥ श्रीरपाने गवां नित्यं स्वाहालंकारमाश्रिताः ॥ ३२ ॥ आदित्या रश्मयो वालाः पिण्डीभूता व्यवस्थिताः॥
साक्षाद्गंगा च गोमूत्रे गोमये यमुना स्थिता ॥ ३३ ॥ त्रयस्त्रिंशद्देवकोटयो रोमकूपे व्यवस्थिताः ॥ उदरे पृथिवी सर्वा सशैलवनकानना ॥ ३४ ॥

चत्वारः सागराः प्रोक्ता गवां ये तु पयोधराः ॥ पर्जन्यः क्षीरधारासु मेघा बिंदुव्यवस्थिताः ॥३५॥ जठरे गार्हपत्योऽग्निर्दक्षिणाग्निर्हृदि स्थितः ॥ कण्ठे आहवनीयोऽग्निः सभ्योऽग्निस्तालुनि स्थितः ॥ ३६ ॥ अस्थिव्यवस्थिताः शैला मज्जासु ऋतवः स्थिताः ॥ ऋग्वेदोऽथर्ववेदश्च सामवेदो यजुस्तथा ॥ ३७ ॥ सुरक्तपीतकृष्णादौ गवां वर्णे व्यवस्थिताः ॥ तासां रूपमुमा स्मृत्वा सुरभीणां युधिष्ठिर ॥ ३८ ॥ संस्मृत्य तत्क्षणाद्गौरी इयेष सदृशीं तनुम् ॥ आत्मानं विदधे देवी धर्मराज शृणुष्व ताम् ॥ ३९ ॥ षडुन्नतां पञ्चनिम्नां मंडूकाक्षीं सुवालधिम् ॥ ताम्रस्तनीं रौप्यकटिं सुखुरीं सुमुखीं सिताम् ॥ ४० ॥ सुशीलां च सुतस्नेहां सुक्षीरां सुपयोधराम् ॥ गोरूपिणीमुमां स्पृष्ट्वा स्वामिनीं तां सवत्सिकाम् ॥ ४१ ॥ चर्यया प्रतरन्हृष्टो महादेवः स्वचेतसि ॥ शनैःशनैर्ययौ पार्थ विप्ररूपी महाश्रमम् ॥ ४२ ॥ दत्त्वा कुलपतेः पार्श्वे भृगोस्तां गां न्यवेदयत् ॥ तपस्विनां महातेजास्तां च सर्वेषु पांडव ॥ ४३ ॥ न्यासरूपां ददौ धेनुं रक्षित्वा तां दिनद्वयम् ॥ यावत्स्नात्वा इतस्तीर्त्वा जंबूमार्गं वियाम्यहम् ॥ ४४ ॥ रक्षिष्यामः प्रतिज्ञाते मुनिभिः सुरभीमिमाम् ॥ अन्तर्द्धिमगमद्देवः पुनर्व्याघ्रो बभूव ह ॥ ४५ ॥ वज्रचक्रनखो दर्वी ज्वलत्पिंगललोचनः ॥ जिह्वा करालवदनो जिह्वालांगूलदारुणः ॥ ४६ ॥ संप्रायादाश्रमपदं तां च धेनुं सवत्सिकाम् ॥ त्रासयामास तां देव मुनीनां दिक्ष्ववस्थितः ॥ ४७ ॥ ऋषयोऽपि समाक्रांता आर्तनादं प्रचक्रिरे ॥ हाहेत्युच्चैः केचिदूचुर्हुंहुंकारैस्तथापरे ॥ ४८ ॥ तालास्फोटान्ददुः केचिद्व्याघ्रं दृष्ट्वातिभैरवम् ॥ सापि हंभारवांश्चक्रे गौरुत्प्लुत्य सवत्सिका ॥ ४९ ॥ तस्या व्याघ्रभयार्तायाः कपिलाया युधिष्ठिर ॥ पलायंत्या शिलामध्ये क्षणं खुरचतुष्टयम् ॥५०॥ व्याघ्रवत्सकयोस्तत्र वंदितं सुरकिन्नरैः ॥ दृश्यतेऽतीव सुव्यक्तं तदद्यापि चतुष्टयम् ॥ ५१ ॥ सजलं शिवलिंगं च शम्भोस्तीर्थं तदुत्तमम् ॥ यस्संस्पृशति राजेन्द्र स गोवध्यां व्यपोहति ॥ ५२ ॥ तत्र स्नात्वा महातीर्थे जंबूमार्गे नराधिप ॥ ब्रह्महत्यादिभिः पापैर्मुच्यते नात्र संशयः ॥ ॥ ५३ ॥ ततस्ते मुनयः क्रुद्धा ब्रह्मदत्तां महास्वनाम् ॥ जघ्नुर्घंटां सुरैर्दत्तां गिरिकन्दरपूरणीम् ॥ ५४ ॥ शब्देन तेन व्याघ्रोऽपि मुक्त्वा गावं सवत्सिकाम् ॥ विप्रैस्तत्र कृतं नाम ढुण्ढागिरिरिति श्रुतिः ॥ तं प्रपश्यंति ये पार्थ ते रुद्रा नात्र संशयः ॥ ५५ ॥ अथ प्रत्यक्षतां श्रेष्ठस्तेषां देवो महेश्वरः ॥ शूलपाणिस्त्रिपुरहा कामघ्नो वृषभे स्थितः ॥ ५६ ॥ उमासहायो वरदः सस्वामी सविनायकः ॥ सनंदिः समहाकालः सश्शृङ्गी समनोहरः ॥ ५७ ॥ वीरभद्रा च चामुंडा घंटाकर्णादिभिर्वृता ॥ मातृभिर्भूतसंघातैर्यक्षराक्षसगुह्यकैः ॥ देवदानवगन्धर्वमुनिविद्याधरोरगैः ॥ ५८ ॥

प्रणम्य देवदेवाय पत्नीभिः सहितैरुमा ॥ गोरूपिणी सवत्सा च पूजिता ब्रह्मचारिभिः ॥५९॥ कार्त्तिके [1]शुक्लपक्षे तु द्वादश्यां नंदिनीव्रतम् ॥ ततः
प्रभृति राजेन्द्र अवतीर्णं महीतले ॥ ६० ॥ उत्तानपादेन तथा व्रतं चीर्णमिदं शृणु ॥ उत्तानपादनामासीत्क्षत्रियः पृथिवीपते ॥६१॥ तस्य भार्या
द्वयं चासीद्रुचिशुघ्नीति विश्रुतम् ॥ शुघ्नीजातो ध्रुवः पुत्रो वामपादधरोऽलसः ॥ ६२ ॥ रुच्याः समर्पितः शुघ्न्या ध्रुवोऽयं रक्ष्यतां सखि ॥ अहं
करिष्ये शुश्रूषां भर्तुस्तावत्सदा स्वयम् ॥ ६३ ॥ रुची रसवतीं नित्यं प्रत्यहं कुरुते गृहे ॥ अकरोद्भर्तृशुश्रूषां शुघ्नी नित्यं पतिव्रता ॥६४॥ कदा
चित्क्रोधमात्सर्यात्सापत्न्यं दर्शितं तया ॥ स्वयं रुच्या निहत्यासौ शिशुः खंडलशः कृतः ॥ ६५ ॥ तापिकायां तथा स्थाल्यां पक्वसिद्धः सुसं
स्कृतः ॥ अन्नभोजनवेलायां ददाति नृपभाजने ॥ ६६ ॥ तं वै भक्षयितुं दुष्टा सामिषं भोजनं किल ॥ अथ भोजनवेलायां वव्रे जीवित
मात्तवान् ॥ ६७ ॥ तथैव प्रहसन्बालो मातुरुत्संगजोऽभवत् ॥ तं दृष्ट्वा महदाश्चर्यं रुची पप्रच्छ विस्मिता ॥ ६८ ॥ किमेतद्ब्रूहि वृत्तांतं कस्येयं
व्युष्टिरुत्तमा ॥ किं त्वयाचरितं किञ्चिद्व्रतं दत्तं हुतं तथा ॥ ६९ ॥ सत्यंसत्यं पुनः सत्यं येन जीवति ते सुतः ॥ मयायं सप्त वारांस्तु विशल्य
शकली कृतः ॥ ७० ॥ पक्वः स्वयं कृतः स्थाल्यां व्यञ्जनैः सह भोजनैः ॥ परिविष्यमाणः स पुनः कथं जीवितमात्तवान् ॥ ७१ ॥
किं ते सिद्धा महाविद्या मृतसञ्जीवनी शुभा ॥ रत्नं मणिर्महारत्नं योगाञ्जनमहौषधम् ॥ ७२ ॥ कथयस्व महाभागे सत्यंसत्यं
भगिन्यसि ॥ एवमुक्ते रुचिस्तस्यै व्याचख्यौ वत्सगोव्रतम् ॥ ७३ ॥ कार्त्तिके चैव द्वादश्यां यथा चानुष्ठितं पुरा ॥ व्रत
स्यास्य प्रभावेण पुनर्जीवति मे सुतः ॥ ७४ ॥ वत्सो मे वत्सवेलायां मृतोऽर्थं लभते पुनः ॥ समागमश्च भवति व्रतैः प्रवसि
तैरपि ॥ ७५ ॥ यथार्थमेतद्व्याख्यातं ते च गोद्वादशीव्रतम् ॥ तवापि रुचि तत्सर्वं भविष्यति शुभं प्रियम् ॥ ७६ ॥ एवमुक्तं व्रतं
चीर्णं रुच्या पुत्राः सुखं धनम् ॥ संप्राप्ता जीवितांते च ध्रुवस्थाने निवेशिताः ॥ ७७ ॥ ब्रह्मणा सृष्टिकारेण रुचिर्भर्त्रा सहासिता ॥ दशनक्षत्रसं
युक्तो ध्रुवः सोद्यापि दृश्यते ॥ ध्रुवर्क्षे च यदा दृष्टे लोकः पापैः प्रमुच्यते ॥ ७८ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कीदृशं तद्विधानं च तन्मे
ब्रूहि जनार्दन ॥ यत्कृतं शुघ्निवचनाद्रुच्या यदुकुलोद्भव ॥ ७९ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ संप्राप्ते कार्तिके मासि शुक्लपक्षे कुरूत्तम ॥
द्वादश्यां कृतसंकल्पः स्नात्वा पुण्ये जलाशये ॥ नरो वा यदि वा नारी एकभक्तं प्रकल्पयेत् ॥८०॥ ततो मध्याह्नसमये दृष्ट्वा धेनुं सवत्सिकाम् ॥

---

[1] कृष्णपक्षे तु—इ०पा०।

सुशीलां वत्सलां श्वेतां कपिलां रक्तरूपिणीम् ॥८१॥ ब्राह्मणक्षत्रियविशां शूद्राणां स्त्रीजनेश्वर ॥ यथाक्रमेण पूज्यैनां गंधपुष्पजलाक्षतैः ॥८२॥ कुंकुमालक्तकैर्दीपैर्माषान्नवटकैः शुभैः ॥ कुसुमैर्वत्सकं चापि मंत्रेणानेन पांडव ॥८३॥ "ॐ माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः ॥ प्रनुवोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट" नमो नमः स्वाहा ॥ ८४ ॥ इत्थं संपूज्य गां पृष्ठा पश्चात्तां च क्षमापयेत् ॥ ॐ सर्वदेवमये देवि लोकानां शुभनंदिनि ॥ मातर्ममाभिलषितं सफलं कुरु नंदिनि ॥ ८५ ॥ एवमभ्यर्चयेदेकां गामेतद्धि गवाह्निकम् ॥ पर्युक्ष्य वारिणा भक्त्या प्रणम्य सुरभीं ततः ॥ ८६ ॥ तद्दिने तापिकापक्वं स्थालीपाकं च वर्जयेत् ॥ भूमौ स्वयं ब्रह्मचारी शयीत फलमाप्नुयात्॥ ८७ ॥ यावंति गात्रे रोमाणि गवां कौरवनंदन ॥ तावत्कालं स वसति गोलोके नात्र संशयः ॥ ८८ ॥ मेरोः पुर्यष्टकं रम्यमिंद्राग्नियमरक्षसाम् ॥ वरुणानिलयक्षाणां रुद्रस्य च युधिष्ठिर ॥ तासामुपरि गोलोकस्तत्र याति स गोव्रती ॥ ८९ ॥ ऊर्जे सिते द्विदशमेऽहनि गां सवत्सां याः पूजयंति कुसुमैर्वटकैश्च हृद्यैः ॥ ताः सर्वकामसुखभोगविभूतिभाजो मर्त्ये वसंति सुचिरं बहुजीववत्साः ॥ ९० ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे गोवत्सद्वादशीव्रतं नामैकोनसप्ततितमोऽध्यायः ॥ ६९ ॥ छ ॥

॥ श्रीकृष्ण उवाच ॥ ॥ शृणु पार्थ प्रवक्ष्यामि गोविन्दशयनं व्रतम् ॥ कटदानं समुत्थानं चातुर्मास्यव्रतक्रमम् ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ किं देवशयनं नाम देवस्स्वपिति चाप्यसौ ॥ देवः किमर्थं स्वपिति किंविधानं सदा वद ॥ २ ॥ के मंत्राः के च नियमा व्रतान्यथ क्रिया च का ॥ किं ग्राह्यं किं च भोक्तव्यं सुप्ते देवे जनार्दने ॥ ३ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ मिथुनस्थे सहस्रांशौ स्थापयेन्मधुसूदनम् ॥ तुलाराशिगते तस्मिन्पुनरुत्थापयेद्व्रतम् ॥ ४ ॥ अधिमासे च पतिते एष एव विधिक्रमः ॥ नान्यथा स्थापयेद्देवं न चैवोत्थापयेद्धरिम् ॥ ५ ॥ आषाढस्य सिते पक्षे एकादश्यामुपोषितः ॥ स्थापयेद्भक्तिमान्विष्णुं शंखचक्रगदाधरम् ॥ ६ ॥ पीतांबरधरं सौम्यं पर्यंके स्वास्तृते शुभे ॥ शुक्लवस्त्रसमाच्छन्ने सोपधाने युधिष्ठिर ॥ ७ ॥ इतिहासपुराणज्ञो विष्णुभक्तोपि यः पुमान् ॥ स्नापयित्वा दधिक्षीरघृतक्षौद्रजलैस्तथा ॥ ८ ॥ समालभ्य शुभैर्गंधैर्धूपैर्वस्त्रैरलंकृतम् ॥ पूजयित्वा कुंकुमाद्यैर्मंत्रेणानेन पाण्डव ॥ ९ ॥ सुप्ते त्वयि जगन्नाथ जगत्सुप्तं भवेदिदम् ॥ विबुद्धे त्वयि बुध्येत जगत्सर्वं चराचरम् ॥ १० ॥ एवं तां प्रतिमां विष्णोः स्थापयित्वा युधिष्ठिर ॥ तस्यैवाग्रे स्वयं वाचं गृह्णीयान्नियमांस्ततः ॥ ११ ॥ चतुरो वार्षिकान्मासान्देवस्योत्थापनावधि ॥ स्त्री वा नरो वा मद्भक्तो धर्मार्थं सुदृढव्रतः ॥१२॥ गृह्णीयान्नियमानेतान्दंतधावनपूर्वकम् ॥ तेषां फलानि वक्ष्यामि तत्कर्तॄणां

पृथक्पृथक् ॥ १३ ॥ मधुरस्वरो भवेद्राजा पुरुषो गुडवर्जनात् ॥ तैलस्य वर्जनात्पार्थ सुन्दरांगः प्रजायते ॥ १४ ॥ कटुतैलपरित्यागाच्छत्रुक्षयमवाप्नुयात् ॥ मधूकतैलत्यागेन सौभाग्यमतुलं भवेत् ॥ १५ ॥ पुष्पादिभोगत्यागेन स्वर्गे विद्याधरो भवेत् ॥ योगाभ्यासी भवेद्यस्तु स ब्रह्मपदमाप्नुयात् ॥ १६ ॥ कटुकाम्लतिक्तमधुरक्षारकाषायमेव च ॥ यो वर्जयेत्स वैरूप्यं दौर्गत्यं नाप्नुयात्क्वचित् ॥ १७ ॥ तांबूलवर्जनाद्भोगी रक्तकण्ठश्च जायते ॥ घृतत्यागात्सुलावण्यं सर्वसिद्धिः पुनर्भवेत् ॥ १८ ॥ फलत्यागाच्च मतिमान्बहुपुत्रश्च जायते ॥ शाकपत्राशनाद्रोगी अपक्वादोऽमलो भवेत् ॥ १९ ॥ पादाभ्यंगपरित्यागाच्छिरोभ्यंगाच्च पार्थिव ॥ दीप्तिमान् दीप्तकरणो यक्षो द्रव्यपतिर्भवेत् ॥ २० ॥ दधिदुग्धतक्रनियमाद्गोलोकं लभते नरः ॥ इन्द्रातिथित्वमाप्नोति स्थालीपाकविवर्जितात् ॥ २१ ॥ लभेत संततिं दीर्घां तापपक्वस्य भक्षणात् ॥ भूमावस्तरशायी च विष्णोरनुचरो भवेत् ॥ २२ ॥ सदा मुनिः सदा योगी मधुमांसस्य वर्जनात् ॥ निर्व्याधिर्नीरुजौजस्वी सुरामद्यविवर्जनात् ॥ ॥ २३ ॥ एवमादिपरित्यागाद्धर्मः स्याद्धर्मनन्दन ॥ एकांतरोपवासेन ब्रह्मलोके महीयते ॥ २४ ॥ धारणं नखरोमाणां गंगास्नानं दिनेदिने ॥ मौनव्रती भवेद्यस्तु तस्याज्ञाऽस्खलिता भवेत् ॥ २५ ॥ भूमौ भुंक्ते सदा यस्तु स पृथिव्याः पतिर्भवेत् ॥ नमो नारायणायेति जपतोनशनं फलम् ॥ २६ ॥ पादाभिवंदनाद्विष्णोर्लभेद्गोदानजं फलम् ॥ विष्णुपादांबुसंस्पर्शात्कृतकृत्यो भवेन्नरः ॥ २७ ॥ विष्णुदेवकुले कुर्यादुपलेपनमर्चनम् ॥ कल्पस्थायी भवेद्राजा स नरो नात्र संशयः ॥ २८ ॥ प्रदक्षिणाशतं यस्तु करोति स्तुतिपाठकः ॥ हंसयुक्तविमानेन स च विष्णुपुरं व्रजेत् ॥ २९ ॥ गीतवाद्यकरो विष्णोर्गांधर्वं लोकमाप्नुयात् ॥ नित्यं शास्त्रविनोदेन लोकान्यस्तु प्रबोधति ॥ ३० ॥ स व्यासरूपी भगवानंते विष्णुपुरं व्रजेत् ॥ पुष्पमालादिभिः पूजां कृत्वा विष्णुपुरं व्रजेत् ॥ ३१ ॥ नित्यस्नायी नरो यस्तु नरकं स न पश्यति ॥ भोजनं च जयेद्यस्तु स स्नानं पौष्करं लभेत् ॥ ३२ ॥ कृत्वा प्रेक्षणकं दिव्यं राज्यं सोऽप्सरसां लभेत् ॥ अयाचितेन प्राप्नोति वापीकूपे यथा फलम् ॥ ३३ ॥ षष्ठकालेन्नभोज्येन स्थायी स्वर्गे नरो भवेत् ॥ पर्णेषु यो नरो भुंक्ते कुरुक्षेत्रफलं लभेत् ॥३४॥ शिलायां भोजनान्नित्यं स्नानं प्रयागजं भवेत ॥ यामद्वये जलत्यागान्न रोगैः परिभूयते ॥ ३५ ॥ एवमादिव्रते पार्थ तुष्टिमायाति हेतुतः ॥ सुप्ते सति जगन्नाथे केशवे गरुडध्वजे ॥ ३६ ॥ निवर्तंते क्रियाः सर्वाश्चातुर्वर्ण्यस्य भारत ॥ विवाहव्रतबंधादिभूतसंस्कारदीक्षणम् ॥ ३७ ॥ यज्ञाश्च गृहवेशादि गोदानाच्च प्रतिष्ठितम् ॥ पूज्यानि यानि कर्माणि तानि सर्वाणि वर्जयेत् ॥ ३८ ॥ असंक्रांतं तु मासं वै दैवे पित्र्ये च वर्जयेत् ॥ मलिम्लुचमशौचं च सूर्यसंक्रांति

वर्जितम् ॥ ३९ ॥ प्राप्ते भाद्रपदे मासि एकादश्यां दिने हरेः ॥ कटदानं भवेद्विष्णोर्महापूजां प्रवर्तयेत् ॥ ४० ॥ य एतदेव शयनं तत्रेदं कारणं शृणु ॥ पुरा तपःप्रभावेन तोषयित्वा हरिं विभुम् ॥ ४१ ॥ ममापि मानयत्यङ्गं प्रार्थितो योगनिद्रया ॥ निरीक्ष्य चात्मनो देवा रुद्धं लक्ष्म्या उरःस्थलम् ॥ ४२ ॥ शंखचक्रासिमार्गाद्यैर्बाहवोप्यथ वक्षसा ॥ अधो नाभेर्विरुद्धं मे वैनतेयेन पक्षिणा ॥ ४३ ॥ मुकटेन शिरो रुद्धं कुंडलाभ्यां च कर्णकौ ॥ ततो ददावहं तुष्टो नेत्रयोः स्थानमादरात् ॥ ४४ ॥ चतुरो वार्षिकान्मासान्माऽऽश्रिता सा भविष्यति ॥ योगनिद्रापि [1]माहात्म्यं श्रुत्वा पौरातनं शुभम् ॥ ४५ ॥ चकार लोचनावासमतोऽर्थं मे युधिष्ठिर ॥ अहं च तां भावयित्वा मानयामि मनस्विनीम् ॥ ४६ ॥ योगनिद्रा महानिद्रा शेषाभिशयने स्थितः ॥ क्षीरोदधौ च विध्यग्रे धौतपादः समाहितः ॥ ४७ ॥ लक्ष्मीकरांबुजैरच्छैर्मृद्यमानपदद्वयः ॥ तस्मिन्कालेऽपि मद्भक्तो यो मासांश्चतुरः क्षिपेत् ॥ ४८ ॥ व्रतैरनेकैर्नियमैः पांडवश्रेष्ठ मानवः ॥ कल्पस्थायी विष्णुलोकं स व्रजेन्नात्र संशयः ॥ ४९ ॥ ततोऽवबुध्यते देवः श्रीमाञ्छङ्खगदाधरः ॥ कार्तिके शुक्लपक्षस्य एकादश्यां पृथक्छृणु ॥ ५० ॥ मन्त्रेणानेन राजेन्द्र देवमुत्थापयेद्द्विजः ॥ इदं विष्णुर्विचक्रमे स्वासने च तदा नृप ॥ ५१ ॥ समुत्थिते तदा विष्णौ क्रियाः सर्वाः प्रवर्तयेत् ॥ महातूर्यरवे रात्रौ भ्रामयेत्स्यंदने स्थितम् ॥५२॥ उत्थिते देवदेवेशे नगरे पार्थिवः स्वयम् ॥ दीपोद्रेककरे मार्गे नृत्यगीतजानकुले ॥ ५३ ॥ यंयं दामोदरः पश्येदुत्थितो धरणीधरः ॥ तंतं प्रदेयं राजेन्द्र सर्वं स्वर्गाय कल्पते ॥ ५४ ॥ रात्रौ प्रजागरे देवमेकादश्यां सुरालये ॥ प्रभाते विमले स्नात्वा द्वादश्यां विष्णुमर्चयेत् ॥ ५५ ॥ होमयेद्धव्यवाहं च हव्यद्रव्यैर्घृतादिभिः ॥ ततो विप्राञ्छुभान्स्नात्वा भोजयेदन्नविस्तरैः ॥ ५६ ॥ घृतदधिक्षौद्रकाद्यैर्गुडधूपैः समोदकैः ॥ यजमानोऽपि संतुष्टस्त्वरा हास्यविवर्जितः ॥ ५७ ॥ एकादश दशाष्टौ वा पंच द्वौ वा कुरूत्तम ॥ अर्चयेच्चन्दनैर्धूपैः पुष्पैर्गन्धैर्द्विजोत्तमान् ॥ ५८ ॥ श्रद्धोक्तविधिना पार्थ भोजयेद्वाग्यवान्यतीन् ॥ आचांतेभ्यस्ततो दद्यात्त्यागं यत्किञ्चिदेव हि ॥ ५९ ॥ स्ववाचा स्वमनोभीष्टपत्रपुष्पफलादिकम् ॥ चतुरो वार्षिकान्मासान्नियमो यस्य यः कृतः ॥ ६० ॥ कथयित्वा द्विजेभ्यस्तं दद्याद्भक्त्या सदक्षिणाम् ॥ दत्त्वा विसर्जयेद्विप्रांस्ततो भुञ्जीत च स्वयम् ॥ ६१ ॥ यत्त्यक्तं चतुरो मासान्प्रवृत्तिन्तस्य चाचरेत् ॥ एवं य आचरेत्पार्थ सोऽनन्तं धर्ममाप्नुयात् ॥ ६२ ॥ अवसाने तु राजेन्द्र वासुदेवपुरीं व्रजेत् ॥ यस्याविघ्नैः समाप्येत चातुर्मास्यव्रतं नृप ॥ ६३ ॥ स भवेत्कृतकृत्यस्तु न पुनर्मातृको भवेत् ॥ यो देवशयनं पार्थ मासंमासं

---

[1] तद्वाक्यम्—इ० पा०।

समाचरेत् ॥ ६४ ॥ उत्थानं चापि कृष्णस्य स हरेर्लोकमाप्नुयात् ॥ शृणोति ध्यायति स्तौति जुहोत्याख्याति यो नरः ॥ विष्णोर्भक्तिं परां पार्थ
स गच्छेद्वैष्णवं पदम् ॥ ६५ ॥ दुग्धाब्धिभोगशयने भगवाननन्तो यस्मिन्दिने स्वपिति यत्र विबुध्यते वा ॥ तस्मिन्ननन्यमनसामुपवासभाजां
पुंसां ददाति सुगतिं गरुडांगसंगी ॥ ६६ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे देवशयनोत्थापनद्वादशी
व्रतवर्णनं नाम सप्ततितमोऽध्यायः ॥ ७० ॥ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ पुरा बभूव राजर्षिरजपाल इति श्रुतः ॥ प्रार्थितः स प्रजा
भिस्तु सर्वदुःखापनुत्तये ॥ १ ॥ दुःखापनोदं कुरु भो व्याधितानां नरेश्वर ॥ एवमुक्तश्चिरं ध्यात्वा कृत्वाव्याधीन्प्रजागणान् ॥ २ ॥
पालयामास हृष्टोऽसावजपालस्ततोऽभवत् ॥ तेनैषा निर्मिता शांतिर्नाम्ना नीराजता जने ॥ ३ ॥ तस्यास्तु पांडवश्रेष्ठ लक्षणं वच्मि ते
शृणु ॥ राज्ञा पुरोहितैः सार्द्धमनुष्ठेया विधानतः ॥ ४ ॥ तस्मिन्काले बभूवाथ रावणो राक्षसेश्वरः ॥ लंकास्थितः सुरगणान्नियुनक्ति
स्वकर्मसु ॥ ५ ॥ अखण्डमण्डलं चन्द्रमातपत्रं चकार ह ॥ इन्द्रं सेनापतिं चक्रे वायुं पांसुप्रमार्जकम् ॥ ६ ॥ वरुणं बद्धकर्मस्थं
धनदं धनरक्षकम् ॥ यमं संयमनेऽरीणां युयुजे मंत्रणे मनुम् ॥ ७ ॥ मेघाश्छादन्ति नृपतिं द्रुमपुष्पादिपंक्तिषु ॥ सप्तर्षयः शांतिपरा
ब्रह्मणा सह संस्थिताः ॥ ८ ॥ यामिका मध्यकक्षायां गन्धर्वा गीततत्पराः ॥ प्रेक्षणीयेऽप्सरोवृंदं बाह्ये विद्याधरा वृताः ॥ ९ ॥
गंगाद्याः सरितः पाने गार्हपत्ये हुताशनः ॥ विश्वकर्मान्नसंस्कारे यमः शिल्पिप्रयोजने ॥१०॥ तिष्ठंति पार्थिवाः सर्वे पुरःसेवाविधायिनः ॥ दृश्यंते
भासुरै रत्नैः प्रभावंतो विभूषणैः ॥ ११ ॥ संदृश्य रावणः प्राह प्रशस्तं प्रतिहारकम् ॥ सेवां कर्तुं[1] मम स्थाने ब्रूहि[2] कोऽत्र समागतः ॥ १२ ॥
स उवाच प्रणम्याग्रे दंडपाणिर्निशाचरः ॥ एष ककुत्स्थो मांधाता धुंधुमारो नलोऽर्जुनः ॥ १३ ॥ ययातिर्नहुषो भीमो राघवोयं विदूरथः ॥ एते
चान्ये च बहवो राजान इति आसते ॥ १४ ॥ मेघाकारास्तव स्थाने नाजपाल इहागतः ॥ रावणः कुपितः प्राह शीघ्रं दूतं व्यसर्जयत् ॥१५॥
इत्युक्ते प्रहितो दूतो धूम्राक्षो नाम राक्षसः ॥ धूम्राक्ष गच्छ ब्रूहि त्वमजपालं ममाज्ञया ॥ १६ ॥ सेवां कुरु समागच्छ कबन्धो यस्य पार्थिवः ॥
अन्यथा चन्द्रहासेन त्वां करिष्ये विकंधरम् ॥ १७ ॥ रावणेनैवमुक्तस्तु धूम्राक्षो गरुडो यथा ॥ संप्राप्य तां पुरीं रम्यां तच्च राजकुलं गतः ॥
॥ १८ ॥ ददर्श यं तमेकं स अजपालमजावृतम् ॥ मुक्तकेशं मुक्तकक्षं नैकमुक्तक्रमद्वयम् ॥ १९ ॥ यष्टिस्कन्धं रेणुभृतं व्याधिभिः परिवारितम् ॥

---

[1] नारदः–इ० पा० । [2] वशम्–इ० पा० ।

निहतामित्रशार्दूलं सर्वोपद्रवनाशनम् ॥ २० ॥ मह्यामालिख्य नामानि विनिघ्नितं द्विषां गणम् ॥ स्नातं भुक्तं शुभे स्थाने कृतकृत्यं मुनिं यथा
॥ २१ ॥ दृष्ट्वा हृष्टमनाः प्राह धूम्राक्षो रावणोदितम् ॥ साक्षेपमजपालोऽपि प्रत्युक्त्वा कारणांतरम् ॥ २२ ॥ प्रेषयामास धूम्राक्षं ततः कृत्यं समा
दधे ॥ ज्वरमाकारयित्वा तु प्रोवाचेदं महीपतिः ॥ २३ ॥ गच्छ लंकाधिपस्थानमाचरस्व यथोचितम् ॥ नियुक्तस्त्वजपालेन ज्वरो राजञ्जगाम
ह ॥ २४ ॥ गत्वा च कंपयामास सगणं राक्षसेश्वरम् ॥ रावणस्तं विदित्वा तु ज्वरं परमदारुणम् ॥ २५ ॥ प्रोवाच तिष्ठतु नृपस्तेन मे न प्रयोज
नम् ॥ ततः सविज्वरो राजा बभूव धनदानुजः ॥ २६ ॥ तेनैषा निर्मिता शांतिरजपालेन धीमता ॥ सर्वरोगप्रशमनी सर्वोपद्रवनाशिनी ॥ २७ ॥
कार्तिके शुक्लपक्षस्य द्वादश्यां रजनीमुखे ॥ समुत्थिते विनिद्रे तु देवे दामोदरे तदा ॥ २८ ॥ वेद्यंते रत्नमालाभी रम्ये मालानुरंजिते ॥ जन
यित्वा नवं विष्णुं हुत्वा मंत्रैर्द्विजोत्तमैः ॥ २९ ॥ वर्द्धमानतरूत्थाभिर्दीपिकाभिर्हुताशनम् ॥ कृत्वा महाजनः सर्वैर्हरिं नीराजयेच्छनैः ॥ ३० ॥
पुष्पैरभ्यर्चितं देवं समालब्धं च चन्दनैः ॥ बदरैः कर्बुरैश्चैव त्रपुसैरिक्षुभिस्तथा ॥ ३१ ॥ गन्धैः पुष्पैरलंकारैर्वस्त्रै रत्नैश्च पूजितैः ॥ तस्यैवानु
मतां लक्ष्मीं ब्रह्माणं चंडिकां तथा॥ ३२ ॥ आदित्यं शंकरं गौरीं यक्षं गणपतिं ग्रहान् ॥ मातरं पितरं नागान्सर्वान्नीराजयेत्ततः ॥ ३३ ॥
गवां नीराजनं कुर्यान्महिष्यादेश्च मंडलम् ॥ भ्रामयेत्त्रासयेच्छर्दिं घंटावादनछादनैः ॥ ३४ ॥ ता गावः प्रस्नुता यांति स्वापीडास्तबकांगदाः ॥
सिन्दूरकृतशृंगाग्राः संभारवशवत्सकाः ॥ ३५ ॥ अनुयांति सगोपालाः कालयंतो धनानि ते ॥ छेदानुलिप्तरक्ताङ्गा रक्तपीतसितांबराः ॥ ३६ ॥
एवं कोलाहले वृत्ते गवां नीराजनोत्सवे ॥ तुरगाँल्लक्षणैर्युक्तान्द्विरदांश्च सुपूजितान् ॥ ३७ ॥ राजचिह्नानि सर्वाणि उद्धृत्य स्वगृहांगणे ॥ राजा पुरो
हितैः सार्द्धं मंत्रिभृत्यपुरःसरः ॥ ३८ ॥ सिंहासनोपविष्टश्च शंखतूर्यादिनिस्वनैः ॥ पूजयेद्गन्धकुसुमैर्वस्त्रदीपविलेपनैः ॥ ३९ ॥ ततः स्त्रीलक्षणै
र्युक्ता वेश्या वाथ कुलाङ्गना ॥ शीर्षोपरि नरेन्द्रस्य भ्रामयेद्दारुपात्रिकाम् ॥ ४० ॥ शांतिरस्तु समृद्धिश्च द्विजैश्च स्वजनेन च ॥ ततो नीराजये
त्सौम्यं हस्त्यश्वरथसंकुलम् ॥ ४१ ॥ एवमेषा महाशांतिः ख्याता नीराजने जने ॥ येषां राष्ट्रे पुरे ग्रामे क्रियते पांडुनन्दन ॥ ४२ ॥ तेषां
रोगाः क्षयं यांति सुभिक्षं वर्द्धते तदा ॥ शांतिर्नीराजनाल्लोके सर्वान्रोगान्व्यपोहति ॥ ४३ ॥ लोकानावर्द्धयित्वा तु अजपालवरो यथा ॥ एषां
रोगादिपीडासु जंतूनां हितमिच्छता ॥ ४४ ॥ वर्षेवर्षे प्रयोक्तव्या शांतिर्नीराजना इति ॥ ४५ ॥ नीराजयंति नवमेघनिभं हरिं ये गोब्राह्मणान्

थगजांश्च नरेशचिह्नान् ॥ ते सर्वरोगरहिताश्च नुता नरेन्द्रैरिंद्रप्रभा भुवि भवंत्यजपालवाक्यात् ॥ ४६ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे नीराजनद्वादशीव्रतवर्णनं नामैकसप्ततितमोऽध्यायः ॥ ७१ ॥ छ ॥

॥ युधिष्ठिर उवाच ॥ ॥ यदेतदतुलं पुण्यं व्रतानामुत्तमं व्रतम् ॥ कर्तव्यं कार्त्तिके मासि प्रयत्नाद्भीष्मपञ्चकम् ॥ १ ॥ विधानं कीदृशं तस्य फलं च यदुसत्तम ॥ कथयस्व प्रसादान्मे मुनीनां हितमिच्छताम् ॥ २ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ प्रवक्ष्यामि व्रतं पुण्यं व्रतानामुत्तमं व्रतम् ॥ यथाविधि च कर्तव्यं फलं चास्य यथोदितम् ॥ ३ ॥ मयापि भृगवे प्रोक्तं भृगुश्चोशनसे ददौ ॥ उशनापि हि विप्रेभ्यः प्रह्लादाय च धीमते ॥ ४ ॥ तेजस्विनां यथा वह्निः पवनः शीघ्रगामिनाम् ॥ विप्रो यथा च पूज्यानां दानानां काञ्चनं यथा ॥ ५ ॥ भूलोकः सर्वलोकानां तीर्थानां जाह्नवी यथा ॥ यथाश्वमेधो यज्ञानां मथुरा मुक्तिकांक्षिणाम् ॥ ६ ॥ वेदो यथैव शास्त्राणां देवानामच्युतो यथा ॥ तथा सर्वव्रतानां तु वरोक्तं भीष्मपञ्चकम् ॥ ७ ॥ दुष्करं भीष्ममित्याहुर्न शक्यं तदिहोच्यते ॥ यस्तत्करोति राजेन्द्र तेन सर्वं कृतं भवेत् ॥ ८ ॥ वशिष्ठभृगुभर्गाद्यैश्चीर्णं कृतयुगादिषु ॥ नाभागांगांबरीषाद्यैश्चीर्णं त्रेतायुगादिषु ॥ ९ ॥ सीरभद्रादिभिर्वैश्यैः शूद्रैरन्यैः कलौ युगे ॥ दिनानि पंच पूज्यानि चीर्णमेतन्महाव्रतम् ॥ १० ॥ ब्राह्मणैर्ब्रह्मचर्येण जपहोमक्रियादिभिः ॥ क्षत्रियैश्च तथा शक्त्या शौचव्रतपरायणैः ॥ ११ ॥ पराधिः परिहर्तव्यो ब्रह्मचर्येण निष्ठया ॥ मद्यं मांसं परित्यज्य मैथुनं पापभाषणम् ॥ १२ ॥ शाकाहारपरैश्चैव कृष्णार्चनपरैर्नरैः ॥ स्त्रीभिर्वा भर्तृवाक्येन कर्तव्यं सुखवर्द्धनम् ॥ १३ ॥ विधवाभिश्च कर्तव्यं पुत्रपौत्रादिवृद्धये ॥ सर्वकामसमृद्ध्यर्थं मोक्षार्थमपि पांडव ॥ १४ ॥ नित्यं स्नानेन दानेन कार्त्तिकी यावदेव तु ॥ प्रातः स्नात्वा विधानेन मध्याह्ने च तथा व्रती ॥ १५ ॥ नद्यां निर्झरगर्ते वा समालभ्य च गोमयम् ॥ यवव्रीहितिलैः सम्यक्तर्पयेच्च प्रयत्नतः ॥ १६ ॥ देवानृषीन्पितॄंश्चैव ततोन्यान्कामचारिणः ॥ स्नानं मौनं नरः कृत्वा धौतवासा दृढव्रतः ॥ १७ ॥ ततोऽनुपूजयेद्देवं सर्वपापहरं हरिम् ॥ स्नापयेच्चाच्युतं भक्त्या मधुक्षीरघृतेन च ॥ १८ ॥ तत्रैव पञ्चगव्येन गंधचंदनवारिणा ॥ चन्दनेन सुगंधेन कुंकुमेनाथ केशवम् ॥ १९ ॥ कर्पूरोशीरमिश्रेण लेपयेद्गरुडध्वजम् ॥ अर्चयेद्रुचिरैः पुष्पैर्गंधधूपसमन्वितैः ॥ २० ॥ गुग्गुलुं घृतसंयुक्तं दहेत्कृष्णाय भक्तितः ॥ दीपकं च दिवा रात्रौ दद्यात्पंचदिनानि तु ॥ २१ ॥ नैवेद्यं देवदेवस्य परमान्नं निवेदयेत् ॥ ॐ नमो वासुदेवायेति जपेदष्टोत्तरं शतम् ॥ २२ ॥ जुंहुयाच्च घृताक्तांश्च तिलव्रीहींस्ततो व्रती ॥ षडक्षरेण मंत्रेण स्वाहाकारान्वितेन च ॥ २३ ॥ उपास्य पश्चिमां संध्यां प्रणम्य गरुडध्वजम् ॥ जपित्वा पूर्ववन्मंत्रं

क्षितिशायी भवेन्नरः ॥ २४ ॥ सर्वमेतद्विधानं च कार्यं पंचदिनेषु हि ॥ संविशेत्कंबले चास्मिन्पदपूर्वं शृणुष्व मे ॥ २५ ॥ प्रथमेऽह्नि हरेः पादौ पूजयेत्कमलैर्नरः ॥ द्वितीये बिल्वपत्रेण जानुदेशं समर्चयेत् ॥ २६ ॥ पूजयेच्च तृतीयेऽह्नि नाभिं भृङ्गरसेन च ॥ मध्ये बिल्वजयाभिश्च ततः स्कंधौ प्रपूजयेत् ॥ २७ ॥ ततोऽनुपूजयेच्छीर्षं मालत्याः कुसुमैर्नवैः ॥ कार्त्तिक्यां देवदेवस्य भक्त्या तद्गतमानसः ॥ २८ ॥ अर्चयित्वा हृषीकेशमेकादश्यां समाहितः ॥ संप्राश्य गोमयं सम्यङ् मंत्रवत्समुपावसेत् ॥ २९ ॥ गोमूत्रं मंत्रवत्कृत्वा द्वादश्यां प्राशयेद्व्रती ॥ क्षीरं तत्र त्रयोदश्यां चतुर्दश्यां तथा दधि ॥ ३० ॥ संप्राश्य कायशुद्ध्यर्थं लंघयेत चतुर्दिनम् ॥ पंचमे तु दिने स्नात्वा विधिवत्पूज्य केशवम् ॥ ३१ ॥ भोजयेद्ब्राह्मणान्भक्त्या तेभ्यो दद्याच्च दक्षिणाम् ॥ तथोपदेष्टारमपि पूजयेद्वस्त्रभूषणैः ॥ ३२ ॥ ततो नक्तं समश्नीयात्पञ्चगव्यपुरःसरम् ॥ एवं समापयेत्सम्यग्यथोक्तं व्रतमुत्तमम् ॥ ३३ ॥ सर्वपापहरं पुण्यं प्रख्यातं भीष्मपञ्चकम् ॥ मद्यपो यस्त्यजेन्मद्यं जन्मनो मरणांतिकम् ॥ ३४ ॥ तद्भीष्मपञ्चकं त्यक्त्वा प्राप्नोत्यभ्यधिकं फलम् ॥ ब्रह्मचर्यं नरश्चीर्त्वा सुघोरं नैष्ठिकं व्रतम् ॥३५॥ यत्प्राप्नोति महत्पुण्यं तत्कृत्वा भीष्मपंचकम् ॥ गात्राभ्यंगं शिरोऽभ्यंगं मधु मांसं च मैथुनम् ॥ ३६ ॥ ब्रह्मलोकमवाप्नोति त्यक्त्वैकं भीष्मपञ्चकम् ॥ संवत्सरेण यत्पुण्यं कार्त्तिकेन च यद्भवेत्॥३७॥ यत्फलं कार्त्तिकेनोक्तं भवेत्तद्भीष्मपञ्चके ॥ व्रतमेतत्सुरैः सिद्धैः किन्नरैर्नागगुह्यकैः ॥३८॥ फलं समीहितं प्राप्य कृत्वाभ्यर्च्य जनार्दनम् ॥ पापस्य प्रतिमा कार्या रौद्रवक्त्रातिभीषणा ॥ ३९ ॥ खड्गहस्तातिविकृता सर्वलोकमयी नृप ॥ तिलप्रस्थोपरि स्थाप्या कृष्णवस्त्राभिवेष्टिता ॥ ४० ॥ करवीरकुसुमापीडा चलत्काञ्चनकुंडला ॥ ब्राह्मणाय प्रदातव्या कृष्णो मे प्रीयतामिति ॥ ४१ ॥ अन्येषामपि दातव्यं यत्कृत्वा वसु वांछितम् ॥ कृतकृत्यः स्थिरो भूत्वा विरक्तः संयतो भवेत् ॥ ४२ ॥ शांतचेता निराबाधः परं पदमवाप्नुयात् ॥ नीलोत्पलदलश्यामश्चतुर्दंष्ट्रश्चतुर्भुजः ॥ ४३ ॥ अष्टषष्ठैकनयनः शंकुकर्णो महास्वनः॥ जटी द्विजिह्वस्तामस्यो मृगराजतनुच्छदः ॥ ४४ ॥ चिंतनीयो महादेवो यस्य रूपं न विद्यते ॥ इदं भीष्मेण कथितं शरतल्पगतेन मे ॥ ४५ ॥ तदेव ते समाख्यातं दुष्करं भीष्मपंचकम् ॥ व्रतं च राजशार्दूल प्रवरं भीष्मपञ्चकम् ॥ ४६ ॥ यस्तस्मिंस्तोषयेद्भक्त्या तस्मै मुक्तिप्रदोऽच्युतः ॥ ब्रह्मचारी गृहस्थो वा वानप्रस्थोऽथवा यतिः ॥ ४७ ॥ प्राप्नोति वैष्णवं स्थानं सत्कृत्वा भीष्मपञ्चकम् ॥ ब्रह्महा मद्यपः स्तेयी गुरुगामी सदाकृती ॥ ४८ ॥ मुच्यते पातकात्सम्यक्कृत्वैकं भीष्मपञ्चकम् ॥ नास्माद्व्रतात्पुण्यतमं वैष्णवेभ्यो यतो

---

१ कार्यसिद्ध्यर्थम्–इ० पा० ।

व्रतम् ॥ ४९ ॥ अथास्मिंस्तोषितो विष्णुर्नृणां मुक्तिप्रदो भवेत् ॥ श्रुत्वैतत्पठ्यमानं तु पवित्रं भीष्मपंचकम् ॥ ५० ॥ मुच्यते पातकेभ्यो वा पाठ
को विष्णुलोकभाक् ॥ धन्यं पुण्यं पापहरं युधिष्ठिर महाव्रतम् ॥ ५१ ॥ यद्भीष्मपञ्चकमिति प्रथितं पृथिव्यामेकादशीप्रभृतिपञ्चदशीनिरुद्धम् ॥ अन्न
स्य भोजननिवृत्तिवशादमुष्मिन्निष्टं फलं दिशति पांडव शार्ङ्गधन्वा ॥ ५२ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे भीष्म
पंचकव्रतवर्णनं नाम द्विसप्ततितमोऽध्यायः ॥७२॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ शङ्खचक्रगदापाणे श्रीवत्स गरुडासन ॥ ब्रूहि मेम ल्लद्वादश्या
विधानं देवकीसुत ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ यदा भांडीरन्यग्रोधे वसामि यमुनातटे ॥ गोपालमध्ये गोवत्सैरष्टवर्षोस्मि लीलया ॥
॥ २ ॥ कंसासुरवधार्थाय मथुरोपवने तदा ॥ आबालो बालरूपेण गोपमल्लैर्बलोत्कटैः ॥ ३ ॥ समेत्य मल्लगोपस्य बलेन सह कानने ॥
आस्फोटयंति नृत्यंति त्रिदशे त्रिदशा इव ॥ ४ ॥ सुरभद्रो मंडलीकयोगवर्द्धनयोगदाः॥ यक्षेंद्रभद्र इत्यादि तेषां नामानि गोकुले ॥ ५ ॥ गोपीना
मपि नामानि प्राधान्येन निबोध मे ॥ गोपाली पालिका धन्या विशाखा ध्याननिष्ठिका ॥ ६ ॥ इल्वानुगन्धा सुभगा तारका दशमी तथा ॥
इत्येवमादिभिरहं सूपविष्टो वरासने ॥ ७ ॥ पूजितोऽस्मि सुरैः पुष्पैर्दधिदुग्धाक्षतैस्तथा ॥ शतानि त्रीणि षष्टिश्च मल्लानां पूजयंति माम् ॥ ८ ॥
मल्लिन्यश्च सुरामांसैरंगजागरनर्त्तनैः ॥ मल्लयुद्धैर्बहुविधैर्बाह्यैर्मल्लभटैः स्फुटैः ॥ ९ ॥ भक्ष्यैर्भोज्यैस्तथा पानैर्दधिदुग्धघृतासवैः ॥ गोदानैर्वृषदा
नैश्च श्रद्धया विप्रपूजनैः ॥ १० ॥ गोष्ठीप्रभूतैर्बंधूनां स्नेहसंभाषणैर्मिथः ॥ एवं द्वादश द्वादश्यो ग्रहीतव्या यथेच्छया ॥ ११ ॥ संबंधिभिः क्रमे
णैव मल्लानां च पृथक्पृथक् ॥ पूजयंति क्रमेणैव मासिमासि तनुं मम ॥ १२ ॥ मासादिकार्तिकांतं च भक्त्या द्वादशनामभिः ॥ पारणेपारणे दद्या
न्मल्लकानि द्विजातये ॥ १३ ॥ केशवनारायणमाधवगोविन्दविष्णुमधुसूदनत्रिविक्रमवामनश्रीधरहृषीकेशपद्मनाभदामोदराणां नमोनम इति ॥
॥ १४ ॥ गन्धैः पुष्पैस्तथा धूपैर्दीपैर्जागरणैर्निशि ॥ गीतवाद्यैश्च नृत्यैश्च मल्लक्ष्वेडांगयुद्धकैः ॥ १५ ॥ घृतदानैः क्षीरदानैः कृष्णो मे प्रीयता
मिति ॥ एवमेष विधिः प्रोक्तो मासैर्द्वादशभिर्नृप ॥ १६ ॥ द्वादशी या ममाद्यापि मनसः प्रीतिवर्द्धनी ॥ मल्लैः प्रवर्तिता यस्मादतोऽर्थं मल्लद्वादशी
॥ १७ ॥ तेषां परममल्लानां तेषां ज्ञान युधिष्ठिर ॥ गोष्ठे बभूव सुप्राज्यं गोमहिष्याद्यजाविकम् ॥ १८ ॥ मत्प्रसादाद्धर्मपुत्र बलं कीर्तिर्यशो
धनम् ॥ एवमन्येऽपि पुरुषा ह्यबला मल्लद्वादशीम् ॥ १९ ॥ ये करिष्यंति मद्भक्तास्तेषां दास्यामि हृद्गतम् ॥ आरोग्यं बलमैश्वर्यं विष्णुलोकं च
शाश्वतम् ॥ २० ॥ भांडीरपादपतले मिलितैर्महद्भिर्मल्लैरनाकुलितबाहुबलैर्बलिष्ठैः ॥ संपूजितः सपदि यत्र तिथौ ततश्च सा द्वादशी सुविदिता व्रत

मल्लसंज्ञा ॥ २१ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे मल्लद्वादशीव्रतवर्णनं नाम त्रिसप्ततितमोऽध्यायः॥ ७३ ॥ ॥छ॥ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ विदर्भाधिपतिः श्रीमानासीत्पूर्वं सुधार्मिकः ॥ दमयंत्याः पिता पूर्वं नलस्य श्वशुरो भुवि ॥ १ ॥ सत्यवादन शीलश्च प्रजापालनतत्परः ॥ क्षत्रधर्मरतः श्रीमान्संग्रामेष्वपराजितः ॥ २ ॥ तस्यापि कुर्वतो राज्यं शास्त्रदृष्टेन कर्मणा ॥ आजगाम महाभागः पुलस्त्यो ब्रह्मणः सुतः ॥ ३ ॥ सर्वज्ञाननिधिः श्रीमांस्तीर्थयात्राप्रसंगतः ॥ तमागतमथो दृष्ट्वा ब्रह्मयोनिमकल्मषम् ॥ ४ ॥ उत्थाय प्रददौ राजा स्वमासनमभीप्सितम् ॥ अर्वं पाद्यं च यत्किञ्चित्तत्तस्मै प्रददौ स्वयम् ॥ ५ ॥ राज्यं चैवात्मना सार्द्धं निवेद्य स कृतांजलिः ॥ तेन चैवाभ्यनुज्ञातो निषसाद वरासने ॥ ६ ॥ पप्रच्छ कुशलप्रश्नं तपस्यध्ययने तथा ॥ तथेति चोक्त्वा स मुनिस्तं राजानमभाषत ॥ ७ ॥ ॥ पुलस्त्य उवाच ॥ ॥ कच्चित्ते कुशलं राजन्कोशे जनपदे पुरे ॥ धर्मे च ते मतिर्नित्यं कच्चित्पार्थिव वर्तते ॥ ८ ॥ ॥ भीम उवाच ॥ ॥ सर्वत्र कुशलं ब्रह्मन्येषां कुशलमिच्छसि ॥ तव चागमनेनाहं पावितः संगवारिणा ॥ ९ ॥ एवं तौ संविदं कृत्वा संभाष्याथ परस्परम् ॥ रेमाते पूर्ववृत्तांतैः कथाभिरि[1]तरेतरम् ॥ १० ॥ ततः कथांते राजेन्द्र पुलस्त्यं जातविस्मयः ॥ पप्रच्छ सर्वलोकस्य हिताय जगतः पतिः ॥ ११ ॥ भगवन्प्राणिनः सर्वे संसारार्णवमध्यगाः ॥ दृश्यंते विविधैर्दुःखैः पीड्यमाना दिवानिशम् ॥ १२ ॥ नरके गर्भवासे च व्याधिभिर्जन्मना तथा ॥ तथा कष्टवियोगादिदुःखैर्दौर्गत्यसंभवैः ॥१३॥ लालप्यमाना बहवः परपीडोपजीविनः ॥ एवं विधान्यनेकानि दुःखानि मुनिपुङ्गव ॥१४॥ दृष्ट्वैव तानि तान्येव भृशं मे व्याधितं मनः ॥ तेषां दुःखानि भूतानां प्राणिनां भुवि मानद ॥ १५ ॥ उपकारकरं ब्रूहि ममानुग्रहकाम्यया ॥ स्वल्पायासेन भगवञ्जायते सुमहत्फलम् ॥ १६ ॥ ॥ पुलस्त्य उवाच ॥ ॥ शृणु राजन्प्रवक्ष्यामि व्रतानामुत्तमं व्रतम् ॥ यदुपोष्य न दुःखानां भाजनो जायते जनः ॥ १७ ॥ माघमासे सिते पक्षे द्वादशी पावनी स्मृता ॥ तस्यां जलार्द्रवसन उपोष्य सुखभाग्भवेत् ॥ १८ ॥ ॥ भीम उवाच ॥ ॥ कथं सा मुनिशार्दूल उपोष्या द्वादशी भवेत् ॥ विधिना केन विप्रेन्द्र तन्मे ब्रूहि यथाक्रमम् ॥ १९ ॥ ॥ पुलस्त्य उवाच ॥ ॥ शृणु राजन्नवहितो व्रतं पापप्रणाशनम् ॥ तव शुश्रूषणाद्वाच्यं ममाप्येतन्न संशयः ॥ २० ॥ अदीक्षिताय नो देया [illegible]नाशिष्याय कदाचन ॥ विष्णुभक्ताय शांताय धर्मनिष्ठाय चैव हि ॥ २१ ॥ वाच्यमेतन्महाराज भवतान्यस्य न क्वचित् ॥ ब्रह्महा गुरु

---

[1] उत्तरोत्तरम्–इ० पा० ।

घाती च बालस्त्रीघातकस्तथा ॥ २२ ॥ कृतघ्नो मित्रध्रुक्चौरः क्षुद्रो भग्नव्रतस्तथा ॥ मुच्यते पातकैः सर्वैर्व्रतेनानेन भूपते ॥ २३ ॥ शुद्धे तिथौ मुहूर्ते च मंडपं कारयेत्ततः ॥ दशहस्तप्रमाणेन दशपूर्वोत्तरे प्लवे ॥ २४ ॥ तन्मध्ये पञ्चहस्तां तु वेदिकां परिकल्पयेत् ॥ शुक्लां सुकुट्टिमां भूमिं वेद्यां कृत्वा प्रयत्नतः ॥ २५ ॥ विलिखेन्मंडलं तत्र पंचवर्णैर्विधानतः ॥ ब्राह्मणो वेदसंपन्नो विष्णुभक्तो जितेन्द्रियः ॥ २६ ॥ पञ्चविंशतितत्त्वज्ञः स्वाचाराभिरतस्तथा ॥ कुंडानि कल्पयेत्तत्र अष्टौ चत्वारि वा पुनः ॥२७॥ ब्राह्मणांस्तेषु युंजीत चातुश्चरणिकाञ्छुभान् ॥ मध्ये च मंडलस्याथ कर्णिकायां जनार्दनम् ॥ २८ ॥ प्रत्यङ्मुखं न्यसेद्देवं चतुर्बाहुमरिंदम ॥ पूजयेत्तं विधानेन शास्त्रोक्तेन विचक्षणः ॥ २९ ॥ गन्धैः पुष्पैस्तथा धूपैर्नैवेद्यैर्विविधैरपि ॥ एवं संपूज्य देवेशं ब्राह्मणैः सह देशिकः ॥ ३० ॥ न्यसेत्स्तंभद्वयं पश्चात्तिष्ठन्काष्ठसमन्वितम् ॥ देवस्याभिमुखं तत्र पीठं तु परिकल्पयेत् ॥ ३१ ॥ षट्त्रिंशदंगुलं श्रेष्ठं चतुरस्रं समंततः ॥ तत्र शिक्यं समालंब्य सुवृत्तं सुदृढं नवम् ॥ ३२ ॥ आरोपयेद्घटं तत्र यादृशं तच्छृणुष्व मे ॥ कलधौतं तथा रौप्यं ताम्रं वाप्यथ मृन्मयम् ॥ ३३ ॥ सर्वलक्षणसंयुक्तं दृढं व्यंगविवर्जितम् ॥ तत्सहस्रं शतं कुर्यादेकच्छिद्रमथापि वा ॥ ३४ ॥ कुशलत्वानुरूपेण पाशैकच्छिद्रमेव वा ॥ सन्निधाने ततः कुर्यात्सलिलं वस्त्रपावनम् ॥ ३५ ॥ होमार्थं कल्पयेच्चापि पालाश्यः समिधः शुभाः ॥ तिला घृतं तथा क्षीरं शमीपत्राणि चैव हि ॥ ३६ ॥ वेद्याः पूर्वोत्तरे भागे ग्रहपीठं प्रकल्पयेत् ॥ तत्र पूज्या ग्रहाः सर्वे ग्रहयज्ञविधानतः ॥ ३७ ॥ पूर्वस्यां दिशि शक्रस्य पूजां कुर्वीत यत्नतः ॥ दक्षिणस्यां यमस्याथ प्रतीच्यां वरुणस्य च ॥ ३८ ॥ कुबेरस्य तथोदीच्यां बलिं कुर्यात्फलाक्षतैः ॥ एवं संभृत्य संभारं शुक्लांबरधरस्तथा ॥ ३९ ॥ समालभ्य शुभैर्गंधैर्दर्भपाणिरतंद्रितः ॥ पीठमारोपयेयुस्ते यजमानं द्विजोत्तमाः ॥ ४० ॥ यजमानोऽपि देवस्य संमुखः प्रयतः शुचिः ॥ उपविश्य पठेन्मंत्रं पुराणोक्तमिदं शृणु ॥ ४१ ॥ नमस्ते देवदेवेश नमस्ते भुवनेश्वर ॥ व्रतेनानेन मां पाहि परमात्मन्नमोस्तु ते ॥ ४२ ॥ ततोदकस्य धारास्ताः प्रत्यंगेषु समन्विताः ॥ शिरसा धारयेत्तूष्णीं तद्गतेनांतरात्मना ॥ ॥ ४३ ॥ होमं कुर्युस्ततो विप्रा दिक्षु सर्वासु तत्पराः ॥ पठेयुः शांतिकाध्यायं विष्णुसंज्ञानि यानि वै ॥ ४४ ॥ वादित्रैस्ताडचमानैश्च शंखगेयस्वनैस्तथा ॥ पुण्याहजयशब्दैश्च वेदस्वनविमिश्रितैः ॥ ४५ ॥ मंगलैः स्तुतिसंयुक्तैः कारयेत्तन्महोत्सवम् ॥ देवदेवस्य चरितं केशवस्य महात्मनः ॥ ४६ ॥ हरिवंशादिकं सर्वं श्रावयेद्ब्राह्मणो वरः ॥ सौपर्णिकमथाख्यानं भारताख्यानमेव च ॥ ४७ ॥ व्याख्यानकुशलाः केचिच्छ्रावयेयु

---

१ अष्टौ चत्वारि वा पुनः–इ० पा० ।

रतंद्रिताः ॥ अनेन विधिना सर्वां तां रात्रिं प्रीतिवर्द्धिनीम् ॥ ४८ ॥ यजमानो नयेद्धीमान्यावत्सूर्योदयो भवेत् ॥ ब्राह्मणाश्चापि तां रात्रीं जुह्वतो
जातवेदसम् ॥ ४९ ॥ मंत्रैस्तु वैष्णवैर्दिव्यैः क्षपयेयुर्महीपते ॥ वासुदेवस्य शिरसि वसोर्द्धारां प्रपातयेत् ॥ ५० ॥ क्षीरेणाज्येन वा राजन्सर्वसिद्धि
प्रदायिनीम् ॥ ततः प्रभातसमये यजमानो द्विजैः सह ॥५१॥ स्नानं कुर्यान्नृपश्रेष्ठ नद्यां सरसि वा पुनः ॥ अथ वा शक्तिहीनस्तु यजमानोष्ण
वारिणा ॥ ५२ ॥ ततः शुक्लानि वस्त्राणि परिधाय यतव्रतः ॥ अर्घ्यं दत्त्वा भास्कराय सविधानं प्रसन्नधीः ॥ ५३ ॥ पुष्पैर्धूपैः सनैवेद्यैः पूजयेत्पु
रुषोत्तमम् ॥ हुत्वा हुताशनं भक्त्या दत्त्वा पूर्णाहुतिं ततः ॥ ५४ ॥ पूजयेद्ब्राह्मणान्सर्वान्होतारो यज्ञकल्पिताः ॥ शय्याभोजनगोदानैर्वस्त्रैराभरणै
स्तथा ॥ ५५ ॥ आचार्यः पूजनीयोऽत्र सर्वस्वेनापि भारत ॥ येन वा तस्य संतुष्टिर्देवतुल्यो गुरुर्यतः ॥ ५६ ॥ वित्तशाठ्यविहीनस्तु भक्तिश
क्तिसमन्वितः ॥ दीनानाथविशिष्टाश्च बंदिनश्च समागताः ॥ ५७ ॥ तेषामन्नं हिरण्यं च दद्याच्छुद्धेन चेतसा ॥ एवं संपूज्य विप्राय भोजयित्वा
यथेप्सितम् ॥ ५८ ॥ यथाविभवसारेण पश्चाद्भुंजीत वाग्यतः ॥ हविष्यमन्नं यज्ञेन हविष्याः सतिलास्तथा ॥ ५९ ॥ एवं यज्ञो महाराजंश्चोक्तस्ते
संप्रकीर्तितः ॥ पापिष्ठाः सर्वपापेभ्यो मुच्यंते नात्र संशयः ॥ ६० ॥ वाजपेयातिरात्राभ्यां ये यजंति शतं समाः ॥ सर्वे ते विष्णुयागस्य कलां
नार्हंति षोडशीम् ॥ ६१ ॥ सप्त जन्मानि सौभाग्यमायुरारोग्यसंपदः ॥ प्राप्नोति द्वादशीमेतां तामुपोष्य विधानतः ॥ ६२ ॥ मृतो विष्णुपुरं
याति विष्णुना सह मोदते ॥ चतुर्युगानि द्वात्रिंशद्विष्णुरूपधरः स्थितः ॥६३॥ रुद्रलोके तथा राजन्युगानि द्वादशैव तु ॥ ब्रह्मलोके तथा त्रीणि
सूर्यलोके युगानि च ॥ ६४ ॥ पुण्यक्षयादिहाभ्येत्य राजा भवति धार्मिकः ॥ पृथिव्यधिपतिः श्रीमान्विजितारिः प्रतापवान् ॥ ६५ ॥ व्रतमेतत्पु
रा चीर्णं सगरेण महात्मना ॥ अजेन धुंधुमारेण दिलीपेन ययातिना ॥ ६६ ॥ अन्यैश्च पृथिवीपालैः पालिताशेषभूतलैः ॥ स्त्रीभिर्वैश्यैस्तथा शूद्रै
र्धर्मकामैः सदा नृप ॥ ६७ ॥ भृग्वाद्यैर्मुनिभिः सर्वैर्ब्राह्मणैर्वेदपारगैः ॥ त्वया च पृष्टेन मया कथितं ते नराधिप ॥ ६८ ॥ अद्य
प्रभृति चैवेयं ख्यातिं यास्यति भूतले ॥ भीमाख्या द्वादशी चेति कृतकृत्या च भारत ॥ ६९ ॥ एषा पुलस्त्यमुनिना कथिता कुरुनंदन ॥
यश्चैनां कथितां ध्यात्वा कुर्याद्वा भक्तिभावतः ॥ ७० ॥ सर्वपापविनिर्मुक्तो विष्णुलोके महीयते ॥ दारिद्र्यश्चापि भोः पार्थ वित्तशाठ्यं विवर्जयेत् ॥
विष्णुभक्तेन कर्तव्या संसारभयभीरुणा ॥ ७१ ॥ भीमेन या किल पुरा समुपोषिता च रात्रौ घटस्थिरसुशीतलवारिधारा ॥ तां द्वादशीं दशमु
खारिमुखाच्छ्रुतां च सम्यग्व्रती चरति याति स विष्णुलोके ॥ ७२ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे भीमद्वा
दशीव्रतवर्णनं नाम चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ उपवासासमर्थानां सदैव पुरुषोत्तम ॥ एका या

द्वादशी पुण्या तां वदस्व ममानघ ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ मासि भाद्रपदे शुक्ला द्वादशी श्रवणान्विता ॥ सर्वकामप्रदा पुण्या चोपवासे
महाफला ॥ २ ॥ संगमे सरितां स्नात्वा द्वादश्यां समुपोषितः ॥ अयत्नात्समवाप्नोति द्वादशद्वादशीफलम् ॥ ३ ॥ बुधश्रवणद्वादश्यामेवं वै संयतो
भवेत् ॥ अतीव महती तस्यां कृतं सर्वमथाक्षयम् ॥ ४ ॥ द्वादशी श्रवणोपेता यदा भवति भारत ॥ संगमे सरितां स्नात्वा गंगादिस्नानजं
फलम् ॥ सोपवासः समाप्नोति नात्रकार्या विचारणा ॥ ५ ॥ जलपूर्णे तथां कुंभे स्थापयित्वा विचक्षणः ॥ पंचरत्नसमोपेतं सोपवीतं सुपूजि
तम् ॥ ६ ॥ तस्य स्कंधे सुघटितं स्थापयित्वा जनार्दनम् ॥ यथाशक्ति स्वर्णमयं शंखशार्ङ्गविभूषितम् ॥ ७ ॥ स्नापयित्वा विधानेन सितचंदन
चर्चितम् ॥ सितवस्त्रयुगच्छन्नं छत्रोपानद्युगान्वितम् ॥ ८ ॥ ॐ नमो वासुदेवायेति शिरः संपूजद्धरेः ॥ श्रीधराय मुखं तद्वत्कंठं कृष्णाय वै
पुनः ॥ ९ ॥ ॐ नमः श्रीमते वक्षो भुजौ सर्वास्त्रधारिणे ॥ व्यापकाय नमः कुक्षी केशवायोदरं नमः ॥ १० ॥ त्रैलोक्यजनकायेति एवं संपूजयेद्ध
रिम् ॥ सर्वाधिपतये जंघे पादौ सर्वात्मने नमः ॥ ११ ॥ अनेन विधिना राजन्पुष्पैर्धूपैः समर्चयेत् ॥ ततस्तस्याग्रतो देयं नैवेद्यं घृतपाचि
तम् ॥ १२ ॥ सोदकांश्च नवान्कुंभाञ्छक्त्या दद्याद्विचक्षणः ॥ एवं संपूज्य गोविंदं जागरं तत्र कारयेत् ॥ १३ ॥ प्रभाते विमले स्नात्वा संपूज्य
गरुडध्वजम् ॥ पुष्पधूपादिनैवेद्यैः फलैर्वस्त्रैः सुशोभनैः ॥ ततः पुष्पांजलिं बद्ध्वा मंत्रमेतमुदीरयेत् ॥ १४ ॥ नमो नमस्ते गोविन्द बुधश्रवण
संज्ञक ॥ अघौघसंक्षयं कृत्वा सर्वसौख्यप्रदो भव ॥ १५ ॥ एवं संपूज्य गोविंदं ब्राह्मणं पूजयेत्ततः ॥ अनंतरं ब्राह्मणे वै वेदवेदांतपारगे ॥
पुराणज्ञे विशेषेण विधिवत्संप्रदापयेत् ॥ १६ ॥ द्वादश्यां श्रवणे युक्ते अशेषाहस्करान्विते ॥ करकं संगमे स्नात्वा प्रीयतां मे जनार्दनः॥ १७ ॥
॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अत्राप्युदाहरंतीममितिहासं पुरातनम् ॥ महत्यरण्ये यद्वृत्तं भूमिपाल शृणुष्व तत् ॥१८॥ देशो दशार्णको नाम तस्य
भागे तु पश्चिमे ॥ अस्ति कश्चिन्मरुदेशः सर्वसत्त्वभयंकरः ॥ १९ ॥ सुतप्तसिकता भूमिर्यत्र दुष्टा महोरगाः ॥ अल्पच्छायद्रुमाकीर्णो मृतप्राणि
समाकुलः ॥ २० ॥ शमीखदिरपालाशकरीरैः पीलुभिः सह ॥ तत्र भीमा द्रुमाः पार्थ कंटकैः शबला दृढैः ॥२१॥ दग्धप्राणिगणाकीर्णा यत्र भूर्दृ
श्यते क्वचित्॥ अन्नोदकं नो लभंते राजंस्तत्र बलाहकाः ॥२२॥ कदाचिदपि दृश्यंते भ्राम्यन्तो हि विहंगमाः॥ वृक्षांतरगतैर्नित्यं शिशुभिस्तृषितैः
समम् ॥ उत्कृत्तजीविता राजन्दृश्यंते विहगोत्तमाः ॥२३॥ तृषातुराश्च सहसा मृगाः सैकतमागताः॥ सैकतेष्वेव नश्यंति जलं सैकतसेतुवत्॥२४॥
तस्मिंस्तथाविधे देशे कश्चिद्दैववशाद्वणिक् ॥ निजसार्थपरिभ्रष्टः प्रविष्टो मरुजांगले ॥ २५ ॥ पिशाचान्मलिनांस्तीक्ष्णान्निर्मांसान्भीमदर्शनान् ॥

इतस्ततः संचरतो ददर्श वणिगुत्तमः ॥ २६ ॥ बभ्रामोद्भ्रांतहृदयः क्षुत्तृषाश्रमकर्षितः ॥ क्व ग्रामः क्व जलं क्वाहं यास्यामि न बुबोध सः ॥२७॥
अथ प्रेतान्ददर्शासौ तृष्णाव्याकुलितेंद्रियान् ॥ स्नायुबद्धास्थिचरणान्प्रेक्षमाणानितस्ततः ॥ २८ ॥ प्रेतस्कंधसमारूढमेकं प्रेतं ददर्श ह ॥
अपश्यद्बहुभिः प्रेतैः समंतात्परिवारितम् ॥ २९ ॥ आगच्छन्तं तमव्यग्रं स्तुतुशब्दपुरःसरम् ॥ प्रेतस्कंधान्महीं गत्वा तस्यांतिकमुपागमत् ॥ ३० ॥
स दृष्ट्वाथ वणिक्छ्रेष्ठमिदं वचनमब्रवीत् ॥ अस्मिन्वै निर्जले देशे गमनं भवतः कथम् ॥३१॥ तमुवाच वणिग्धीमान्सार्थभ्रष्टस्य चैव मे ॥ प्रवेशो
दैवयोगेन पूर्वकर्मकृतेन तु ॥३२॥ तृष्णा मां बाधतेऽत्यर्थं क्षुद्धुनोति भृशं तथा ॥ प्राणाः कंठमनुप्राप्ता वचनं नश्यतीव मे ॥ अत्रोपायं न पश्यामि
जीवेयं येन केनचित् ॥३३॥ ॥ कृष्ण उवाच ॥ ॥ इत्येवमुक्ते प्रेतस्तं वणिजं वाक्यमब्रवीत् ॥ पुंनागमिममाश्रित्य प्रतीक्षस्व मुहूर्तकम् ॥३४॥
कृतातिथ्यो यथालाभं गमिष्यसि यथासुखम् ॥ एवमुक्तस्तथा चक्रे स वणिक्तृष्णयार्दितः ॥ ३५ ॥ मध्याह्नसमये प्राप्ते ततस्तं देशमागतः ॥
पुन्नागवृक्षात्करको वारिधारामनोरमः ॥ दध्योदनसमायुक्तो वर्धमानेन संयुतः ॥ ३६ ॥ आगते करके तस्मिन्प्रादादतिथये तदा ॥ भुक्त्वान्नं
च जलं पीत्वा वणिक्तुष्टिमुपागतः ॥ वितृष्णो विज्वरश्चैव क्षणेन समपद्यत ॥ ३७ ॥ ततस्तु प्रेतसंघस्य भोक्तुकामस्य वै ददौ ॥ ध्योद
दनं सपानीयं प्रेतास्तृप्तिं परां गताः ॥ ३८ ॥ अतिथिं तर्पयित्वा च प्रेतलोकं च सर्वशः ॥ ततः स्वयं स बुभुजे भुक्तशेषं यथासुखम् ॥ ३९ ॥
तस्य भुक्तवतश्चान्नं पानीयं च क्षयं ययौ ॥ प्रेताधिपं ततस्तृप्तो वणिग्वचनमब्रवीत् ॥ ४० ॥ आश्चर्यमेतत्परमं वनेऽस्मिन्प्रतिभाति मे ॥
अन्नपानस्य सम्प्राप्तिः परमस्य कुतस्तव ॥ ४१ ॥ स्तोकेन च तथान्नेन बिभार्षि सुबहून्पृथक् ॥ तृप्ताः परं कथं त्वेते निर्मांसा भिन्नकु
क्षयः ॥ ४२ ॥ अपरं च कथं चेह मम पापपरिक्षयः ॥ हस्तावलंबनकस्त्वं सम्प्राप्तो निर्जने वने ॥ तृप्तश्चासि कथं ग्रासमात्रेण च शुभव्रत ॥
॥ ४३ ॥ कस्त्वमस्यां सुघोरायामटव्यां तु कृतालयः ॥ तमेतं संशयं छिंधि परं कौतूहलं मम ॥ ४४ ॥ एवमुक्तः स वाणिज्या प्रेतो वचनमब्र
वीत् ॥ शृणु भद्र प्रवक्ष्यामि दुष्कृतं कर्म चात्मनः ॥ ४५ ॥ शाकले नगरे रम्ये अहमासं सुदुर्मतिः ॥ वाणिज्यासक्तितः पूर्वं कालो नीतो मया
नघ ॥ ४६ ॥ धनलोभान्मया तत्र कदाचिच्च प्रमादिना ॥ न दत्ता भिक्षवे भिक्षा तृष्णया पीडिताय च ॥ ४७ ॥ प्रतिवेशे च तत्रासीद्ब्राह्मणो
गुणवान्मम ॥ श्रवणद्वादशीयोगे मासि भाद्रपदे तथा ॥ ४८ ॥ स कदाचिन्मया सार्धं तोषां नाम नदीं ययौ ॥ तस्याश्च संगमः पुण्यो यत्रासी
च्चन्द्रभागया ॥ ४९ ॥ चंद्रभागा सोमसुता तोषा चैवार्कनंदिनी ॥ तयोः शीतोष्णसलिलसंगमः सुमनोहरः ॥ ५० ॥ तत्तीर्थवरमासाद्य प्राति

वेश्यः स च द्विजः ॥ श्रवणद्वादशीयोगे स्नातश्चैवमुपोषितः ॥ ५१ ॥ चंद्रभागातोषयोश्च वारिधान्यैर्नवैर्दृढैः ॥ दध्योदनयुतैः सार्धं सम्पूर्णैर्वर्धमा
नकैः ॥ ५२ ॥ छत्रोपानद्युगं वस्त्रं प्रतिमां विधिवद्धरेः ॥ चंद्रभागाजीवनेन दध्योदनयुतं तदा ॥ ५३ ॥ एतत्कृत्वा गृहं प्राप्तस्ततः कालेन केन
चित् ॥ पञ्चत्वमहमासाद्य नास्तिक्यात्प्रेततां गतः ॥ अस्यामटव्यां घोरायां यथा दृष्टस्त्वयानघ ॥ ५४ ॥ ब्रह्मस्वहारिणस्त्वेते पापाः प्रेतत्वमा
गताः ॥ परदाररताः केचित्स्वामिद्रोहरताः परे ॥ ५५ ॥ मित्रद्रोहरताः केचिद्देशेऽस्मिंस्तु सुदारुणे ॥ ममैते भृत्यतां याता अन्नपानकृतेन च ॥
॥५६॥ अक्षय्यो भगवान्कृष्णः परमात्मा सनातनः ॥ यद्दीयते तमुद्दिश्य अक्षय्यं तत्प्रकीर्तितम् ॥५७॥ मया विहीनाः किं त्वेते वनेऽस्मिन्भृशदा
रुणे॥पीडामनुभविष्यंति दारुणां कर्मयोनिजाम् ॥५८॥ एतेषां त्वं महाभाग ममानुग्रहकाम्यया ॥ अनेकनामगोत्राणि गृहाण लेखनेन च ॥५९॥
अस्तु कक्षागता चैव तव संपुटिका शुभा ॥ हिमवत्यां तथासाद्य तत्र त्वं लप्स्यसे निधिम् ॥ ६० ॥ गयाशीर्षे ततो गत्वा श्राद्धं कुरु महामते ॥
एकमेकमथोद्दिश्य प्रेतंप्रेतं यथासुखम् ॥ ६१ ॥ एवं सम्भाषमाणोऽसौ तप्तजांबूनदप्रभः ॥ विमानवरमारुह्य स्वर्गलोकमितो गतः ॥६२॥ स्वर्गते
प्रेतनाथे तु प्रभावात्स वणिक्पुमान् ॥ नामगोत्राणि संगृह्य प्रयातः स हिमाचलम् ॥ ६३ ॥ तत्र प्राप्य निधिं गत्वा विनिक्षिप्य स्वके गृहे ॥ धन
भागमुपादाय गयाशीर्षवटं ययौ ॥ प्रेतानां क्रमशस्तत्र चक्रे श्राद्धं दिनेदिने ॥ ६४ ॥ यस्ययस्य गयाश्राद्धं स करोति दिने वणिक् ॥ स च
तस्य सदा स्वप्ने दर्शयत्यात्मनस्तनुम् ॥ ६५ ॥ ब्रवीति च महाभाग प्रसादेन तवानघ ॥ प्रेतभावो मया त्यक्तः प्राप्तोस्मि परमां गतिम् ॥६६॥
स कृत्वा धनलोभाच्च प्रेतानां सत्कृतिं वणिक् ॥ जगाम स्वगृहं तत्र मासि भाद्रपदे तथा ॥ ६७ ॥ श्रवणद्वादशीयोगे पूजयित्वा जनार्दनम् ॥
दानं च दत्त्वा विप्रेभ्यः सोपवासो जितेन्द्रियः ॥ ६८ ॥ महानदीसंगमेषु प्रतिवर्षं युधिष्ठिर ॥ चकार विधिवद्दानं ततो दिष्टांतमागतः ॥ ६९ ॥
अवाप परमं स्थानं दुर्लभं चात्र मानवैः ॥ यत्र कामफला वृक्षा नद्यः पायसकर्दमाः ॥ शीतलामलपानीयाः पुष्करिण्यो मनोहराः ॥ ७० ॥ तं
देशमासाद्य वणिङ्ग महात्मा सुतप्तजांबूनदभूषितांगः ॥ कल्पं समग्रं सह सुन्दरीभिः स्वर्गे स रेमे मुदितः सदैव ॥ ७१ ॥ इति श्रीभविष्ये महा
पुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे श्रवणद्वादशीव्रतवर्णनं नाम पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥
द्वादश्यास्ते विधिः प्रोक्तः श्रावणे यो युधिष्ठिर ॥ सर्वपापप्रशमनः सर्वसौख्यप्रदायकः ॥ १ ॥ एकादशी यदा सा स्याच्छ्रवणेन समन्विता ॥
विजया सा तिथिः प्रोक्ता भक्तानां विजयप्रदा ॥ २ ॥ बलवानजितो दैत्यो बलिर्नामा महाबलः ॥ तेन देवगणाः सर्वे त्याजिताः सुरमंदिरम् ॥

ततो देवा महाविष्णुं गत्वा वचनमूचिरे ॥ त्वं गतिः सर्वदेवानां शीघ्रं कष्टात्समुद्धर ॥ ४ ॥ जहि दैत्यं महाबाहो बलिं बलनिषूदन ॥
श्रुत्वा विष्णुस्तदा वाक्यं देवानां करुणोदयम् ॥ ५ ॥ उवाच वाक्यं कालज्ञो देवानां हितकाम्यया ॥ जाने वैरोचनिं दैत्यं बलिं त्रैलोक्यकण्टकम्
॥ ६ ॥ तपसा भावितात्मानं शान्तं दान्तं जितेन्द्रियम् ॥ मद्भक्तं मद्गतप्राणं सत्यसन्धं महाबलम् ॥ तपसोन्तः सुबहुना काले
नास्य भविष्यति ॥ ७ ॥ यदाविनयसम्पन्नं ज्ञास्ये कालेन केनचित् ॥ समाहृत्य प्रियं तस्य तदा दास्ये दिवौकसाम् ॥ ८ ॥
अदितिर्मां प्रपन्ना वै पुत्रार्थे पुत्रलोभिनी ॥ तस्यामतिहितं देवाः करिष्ये नात्र संशयः ॥ ९ ॥ तद्देवानां हितं सर्वे चाहितं तु सुरद्विषाम् ॥
तद्गच्छध्वं निरुद्विग्नाः कालः कश्चित्प्रतीक्ष्यताम् ॥ १० ॥ एवमुक्ता गता देवाः कार्यं विष्णुरचिंतयत् ॥ सा चिन्तयित्वा सुचिरं
देव्या गर्भावतारणम् ॥ अदितिर्वरयामास वांछितं मे भविष्यति ॥ ११ ॥ अथ काले बहुतिथे गते सा गर्भिणी ह्यभूत् ॥ सुषुवे
नवमे मासि पुत्रं सा वामनं हरिम् ॥ १२ ॥ ह्रस्वपादं ह्रस्वकायं महच्छिरसमर्भकम् ॥ पाणिपादोदरकृशं स्वयं नारायणं हरिम् ॥ १३ ॥
दृष्ट्वा तु वामनं जातं यदि सा वक्तुमुद्यता ॥ निरुद्धवाक्या ह्यभवद्वक्तुं किंचिन्न पारितम् ॥ १४ ॥ एकादश्यां भाद्रपदे श्रवणेन नरोत्तम ॥ संचचाल
मही जाते वामने तु त्रिविक्रमे ॥ १५ ॥ भयं बभूव दैत्यानां देवानां तोष आभवत् ॥ जातकर्मादिकांस्तस्य संस्कारान्स्वयमेव हि ॥ १६ ॥
चकार कश्यपो धीमान्प्रजापतिरनुद्यतः ॥ आबद्धमेखलो दंडी धृत्वा यज्ञोपवीतकम् ॥ १७ ॥ कुशस्वच्छोदकधरः कमंडलुविभूषितः ॥ बलेर्बलवतो
यज्ञं जगाम बहुविस्तरम् ॥ १८ ॥ दृष्ट्वा बलिमथोवाच वामनोऽभ्येत्य तत्क्षणम् ॥ अथ चाह यज्ञपते दीयतां मम मेदिनी ॥ १९ ॥
पादत्रयप्रमाणेन पठनार्थे स्थितो ह्यसि ॥ दत्तादत्ता तव मया बलिः प्राह द्विजोत्तमम् ॥ २० ॥ ततो वर्द्धितुमारब्धो वामनोऽनंतविक्रमः ॥ पादौ
भूमौ प्रतिष्ठाप्य शिरसावृत्य रोदसी ॥ २१ ॥ ताभ्यामिंद्रादिकाँल्लोकाँल्ललाटे ब्रह्मणः पदम् ॥ न तृतीयं पदं लेभे ततो नेदुर्दिवौकसः ॥ २२ ॥
तद्दृष्ट्वा महदाश्चर्यं सिद्धा देवर्षयस्तथा ॥ साधुसाध्विति देवेशं प्रशशंसुर्मुदान्विताः ॥२३॥ ततो दैत्यगणान्सर्वाञ्जित्वा त्रिभुवनं वशी ॥ बलिमाह
ततो गच्छ सुतलं स्वबलानुगः ॥ २४ ॥ तत्र त्वमीप्सितान्भोगान्भुक्त्वा मद्बाहुपालितः ॥ अस्यैंद्रस्यावसाने तु त्वमेवेन्द्रो भविष्यसि ॥ २५ ॥
एवमुक्तो बलिः प्रायान्नमस्कृत्य नरोत्तमम् ॥ विसृज्येमं बलिं देवान्सकलान्स उवाच ह ॥ २६ ॥ स्वानि धिष्ण्यानि गच्छध्वं तिष्ठध्वं विगतज्वराः
॥ देवेनोक्ता गता देवा हृष्टाः संपूज्य वामनम् ॥ २७ ॥ देवः कृत्वा जगत्कार्यं तत्रैवांतर्द्धिमागमत् ॥ एतत्सर्वं समभवदेकादश्यां नराधिप ॥

तेनेष्टा देवदेवस्य सर्वदा विजया तिथिः ॥ २८ ॥ एषा वै फाल्गुने मासि पुष्येण सहिता नृप ॥ विजया प्रोच्यते सद्भिः कोटिकोटिगुणोत्तरा ॥२९॥
एकादश्यां सोपवासो रात्रौ संपूजयेद्धरिम् ॥ रौप्ये सौवर्णपात्रे वा दारुवंशमयेऽपि वा ॥ ३० ॥ कुंडिकां स्थापयेत्पार्श्वे छत्रं वै पादुके तथा ॥
शुभां च वैष्णवीं यष्टिं तथा सूत्रकमंडलू ॥ ३१ ॥ आच्छाद्य पात्रं वासोभिः फलैश्चापि सुशोभनैः ॥ मार्गचार्मणगन्धैश्च भक्त्या वा मृग
चर्मणा ॥ ३२ ॥ तिलाढकेन वित्ताढ्यः प्रस्थेन कुडवेन वा ॥ व्रीहिभिर्वाथ गोधूमैः फलैः शुक्लतिलैर्भवेत् ॥ ३३ ॥ पुष्पैर्गंधैर्धूपदीपैः पक्वान्नै
रर्चयेद्धरिम् ॥ नानाविधैश्च नैवेद्यैर्भक्ष्यभोज्यैर्गुडौदनैः ॥ ३४ ॥ स्वस्ववित्तानुसारेण सहिरण्यं च कारयेत् ॥ मंत्रैः शतगुणं चैव भक्त्या लक्ष
गुणोत्तरम् ॥ भक्तिमांश्च गुणोपेतं कोटिकोटिगुणोत्तरम् ॥ ३५ ॥ एभिर्मंत्रपदैस्तत्र पूजयेद्गरुडध्वजम् ॥ उपहारैर्नरश्रेष्ठ शुचिर्भूत्वा समाहितः ॥
॥ ३६ ॥ ॐ जलजोपमदेहाय जलजास्याय शंखिने ॥ जलराशिस्वरूपाय नमस्ते पुरुषोत्तम ॥ ३७ ॥ नमः कमलनाभाय नमस्ते जल
शायिने ॥ नमस्ते केशवानंत वासुदेव नमोऽस्तु ते ॥ ३८ ॥ इति स्नानमंत्रः ॥ मलयेषु समुत्पन्नं गन्धाढ्यं सुमनोहरम् ॥ मया निवेदितं तुभ्यं
गृहाण परमेश्वर ॥ ३९ ॥ इति चन्दनमंत्रः ॥ वनस्पतिसमुत्पन्नं गन्धाढ्यं सुमनोहरम् ॥ मया निवेदितं पुष्पं गृहाण पुरुषोत्तम ॥ ४० ॥ इति
पुष्पमन्त्रः ॥ नमः कमलकिंजल्कपीतनिर्मलवाससे ॥ मनोहरवपुःस्कन्धधृतचक्राय शार्ङ्गिणे ॥ ४१ ॥ इति पूजामंत्रः ॥ मत्स्यः कूर्मो वरा
हश्च नारसिंहश्च वामनः ॥ रामो रामश्च कृष्णश्च नामभिर्वामनाय ते ॥ पादाद्यैकैकांगस्य पूजनं शीर्षगं ततः ॥ ४२ ॥ इति सर्वांगपूजा ॥ धूपोऽ
यं देवदेवेश शंखचक्रगदाधर ॥ अच्युतानंत गोविन्द वासुदेव नमोऽस्तु ते ॥ ४३ ॥ इति धूपमंत्रः ॥ त्वमेव पृथिवी ज्योतिर्वायुराकाशमेव च ॥
त्वमेव ज्योतिषां ज्योतिर्दीपोऽयं प्रतिगृह्यताम् ॥ ४४ ॥ इति दीपमंत्रः ॥ अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितम् ॥ भक्ष्यभोज्यसमायुक्तं
प्रसीद परमेश्वर ॥ ४५ ॥ अन्नं प्रजापतिर्विष्णू रुद्रेंद्रशशिभास्कराः ॥ अन्नं त्वष्टा यमोऽग्निश्च पापं हरतु मेऽव्ययः ॥ ४६ ॥ इति नैवेद्यमंत्रः ॥
जगदादिर्जगद्रूपमनादिर्जगदंतकृत् ॥ जलाशयो जगद्योनिः प्रीयतां मे जनार्दनः ॥ ४७ ॥ इति प्रीणनमंत्रः ॥ अनेककर्मनिर्बंधध्वंसिनं जल
शायिनम् ॥ नतोऽस्मि मथुरावासं माधवं मधुसूदनम् ॥ ४८ ॥ नमो वामनरूपाय नमस्तेऽस्तु त्रिविक्रम ॥ नमस्ते मणिबन्धाय वासुदेव
नमोऽस्तु ते ॥ ४९ ॥ इति नमस्कारमंत्रः ॥ नमो नमस्ते गोविन्द वामनेश त्रिविक्रम ॥ ५० ॥ अघौघसंक्षयं कृत्वा सर्वकामप्रदो भव ॥५१॥

इति प्रार्थनामंत्रः ॥ सर्वगः सर्वदेवेशः श्रीधरः श्रीनिकेतनः ॥ विश्वेश्वरश्च विष्णुश्च श्रीशायी च नमोनमः ॥५२॥ इति शयनमंत्रः ।। एवं संपूज्य
यो रात्रावेकादश्यां नृपोत्तम ॥ जागरं तत्र कुर्वीत गीतवादित्रनिस्वनैः ॥ ५३ ॥ या च श्रवणसंयुक्ता द्वादशी परमा तिथिः ॥ तस्यां च संगमे
स्नात्वा सर्वपापैः प्रमुच्यते ॥ ५४ ॥ एवं संपूज्य यत्नेन प्रभाते विमले सति ॥ प्रदेयं शास्त्रविदुषे ब्राह्मणाय च मंत्रतः ॥ ५५ ॥ ब्राह्मणश्चापि
मन्त्रेण प्रतिगृह्णीत मंत्रवत् ॥ वामनोऽस्य प्रतिग्राही वामनाय नमोनमः ॥ ५६ ॥ (ॐ गुह्ये । ॐ शिरसि । ॐ पादयोः । ॐ नाभौ ॥
ॐ भुजयोः । ॐ सर्वांगे । सर्वात्मने नमः ॥) पुष्पं फलं च नैवेद्यं सर्वमेतद्यथाविधि ॥ नरो दद्यादुपोष्यैवमेकादश्यां समंत्रकम् ॥ ५७ ॥
पूर्वोक्तविधिना प्रातर्भोजनं पृषदाज्यकम् ॥ पूर्वं दत्त्वा ब्राह्मणेभ्यः पश्चाद्भुञ्जीत वाग्यतः ॥ ५८ ॥ भूयोभूयोऽपि राजेंद्र सर्वत्रैवं विधिः स्मृतः ॥
समाप्ते तु व्रते राजन्यत्पुण्यं तन्निबोध मे ॥ ५९ ॥ चतुर्युगानि राजेंद्र एकसप्ततिसंख्यया ॥ प्राप्य विष्णुपुरे राजन्क्रीडते कालमक्षयम् ॥ ६० ॥
इहागत्य भवेद्राजा प्रतिपक्षक्षयंकरः ॥ हस्त्यश्वरथपत्तीनां दाता भोक्ता विमत्सरी ॥ ६१ ॥ रूपसौभाग्यसंपन्नो दीर्घायुर्नीरुजो भवेत् ॥ पुत्रैः
परिवृतो जीवो जीवेच्च शरदः शतम् ॥ ६२ ॥ एतस्याः फलमाख्यातमेकादश्या मया तव ॥ पूर्वमेव समाख्याता द्वादशी श्रवणान्विता ॥ ६३ ॥
उपोष्यैकादशीं पश्चाद्द्वादशीमप्युपोषयेत् ॥ न चात्र विधिलोपः स्यादुभयोर्देवता हरिः ॥ ६४ ॥ (एकादशीद्वादश्योरन्यतरस्यां श्रवणयुक्तायां
श्रवणयुक्तोपवासेनैव व्रतद्वयसिद्धिः ॥ एकस्मिन्व्रते पूर्वमन्यां तिथिमुपोष्य पश्चादपारयित्वैवान्योपोष्यत इति यो विधिलोपः स एकदेवताकत्वेन
न भवतीत्यर्थः) ॥ बुधश्रवणसंयुक्ता द्वादशी संगमोदकम् ॥ दानं दध्योदनं सत्यमुपवासः परो विधिः ॥ ६५ ॥ सगरेण ककुत्स्थेन धुंधुमारे
ण गाधिना ॥ एतैश्चान्यैश्च राजेंद्र कृतं वै द्वादशीव्रतम् ॥ ६६ ॥ सा द्वादशी बुधयुता श्रवणेन साकं स्याद्वै जयाय कथिता ऋषिभिर्नभस्ये ॥
तामादरेण समुपोष्य नरोऽमरत्वं प्राप्नोति पार्थ अणिमादिगुणोपपन्नम् ॥ ६७ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे
विजयश्रवणद्वादशीव्रतवर्णनं नाम षट्सप्ततितमोऽध्यायः ॥ ७६ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ कृष्णपक्षे तु पौषस्य संप्राप्तं द्वादशीव्र
तम् ॥ पौषादिपारणं मासैः षड्भिर्ज्यैष्ठांतिकं स्मृतम् ॥ १ ॥ प्रथमं पुंडरीकाक्षं नाम कृष्णस्य गीयते ॥ द्वितीये माधवाख्यं तु विश्वरूपं तु
फाल्गुने ॥ २ ॥ पुरुषोत्तमाख्यं तु ततः पंचमेऽच्युतसंज्ञकम् ॥ षष्ठे जयेति देवेशगुह्यनाम प्रकीर्तितम् ॥ ३ ॥ पूर्वोक्तेषु च मासेषु स्नानप्राशन
योस्तिलाः ॥ आषाढादिषु मासेषु पंचगव्यमुदाहृतम् ॥४॥ स्नानं च प्राशनं चैव पंचगव्यं सदेष्यते॥पूजयेत्पुंडरीकाक्षं तैस्तैरेव च नामभिः॥५॥

प्रतिमासं च देवेश कृत्वा पूजां यथाविधि ॥ विप्राय दक्षिणां दद्याच्छ्रद्दधानश्च भक्तितः ॥ ६ ॥ पारणं चैव देवेश प्रीणनं भक्तिपूर्वकम् ॥
कुर्वीत भक्त्या गोविंदसद्भावेनार्चनं यतः ॥ ७ ॥ नक्तं भुंजीत सततं तैलक्षारविवर्जितम् ॥ एकादश्यामुपोष्यैवं द्वादश्यामथ वा दिने ॥ ८ ॥
एवं संवत्सरस्यांते यदभिप्रेतमात्मनः ॥ धनं वसु हिरण्यं च धान्यं भाजनमासनम् ॥ शय्यां वा ब्राह्मणे दद्यात्केशवः प्रतिगृह्यताम् ॥ ९ ॥ एता
मुपोष्य विधिना विष्णुप्रीतौ च तत्परः ॥ सर्वान्कामानवाप्नोति यद्यदिच्छति चेतसा ॥ ततो लोकेषु विख्यातं संप्राप्तं द्वादशीति वै ॥ १० ॥
कृताभिलषिता दृष्टा प्रारब्धा धर्मतत्परैः॥पूरयेदखिलान्कामान्संस्मृता वा दिनेदिने ॥ ११ ॥ संप्राप्तिकामुपवसंति समीहितार्था ये मानवा मनु
जपुंगव विष्णुभक्ताः ॥ तेषां समीहितफलानि ददाति शश्वद्वासः सुरेशभवने भगवत्प्रसादात् ॥ १२ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि
श्रीकृष्णयुधिष्ठिरसंवादे संप्राप्तिद्वादशीव्रतं नाम सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥छ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ तथान्यामपि ते वच्मि गोविंद
द्वादशीं शृणु ॥ तस्याः सम्यगनुष्ठानात्प्राप्नोत्यभिमतं फलम् ॥ १ ॥ पौषे मासे सिते पक्षे द्वादश्यां समुपोषितः ॥ सम्यक्संपूज्य गोविन्दनाम्ना
देवमधोक्षजम् ॥ २ ॥ धूपपुष्पोपचारैश्च नैवेद्यैश्च समाहितः ॥ गोविंदेति जपेन्नाम पुनस्तद्गतमानसः ॥ ३ ॥ विप्राय दक्षिणां दद्याद्यथाशक्त्या
नराधिप ॥ स्वयं विबुद्धस्तुलितो गोविंदेति च कीर्तयेत् ॥ ४ ॥ पाखंडिभि[1]र्विकर्मस्थैरालापांश्च विवर्जयेत् ॥ गोमूत्रं गोमयं वापि दधि क्षीरम
थापि वा ॥ ५ ॥ गोदोहतः समुद्भूतं प्राश्नीयादात्मशुद्धये ॥ द्वितीयेऽह्नि पुनः स्नानं तथैवाभ्यर्च्य केशवम् ॥ ६ ॥ तेनैव नाम्ना संपूज्य दत्त्वा
विप्राय दक्षिणाम् ॥ ततो भुञ्जीत गोदोहं संभूतेन समुद्भवम् ॥ ७ ॥ एवमेवाखिलान्मासानुपोष्य प्रयतः शुचिः ॥ दद्याद्गवाह्निकं विद्वान्प्रतिमासं
तु शक्तितः ॥ ८ ॥ पारिते च पुनर्वर्षे गोविन्दं पद्मया सह ॥ गोविन्दः प्रीतिमायातु व्रतेनानेन मे सदा ॥ ९ ॥ विशेषतः पुनर्दद्या
त्तस्मिन्नह्नि गवाह्निकम् ॥ भक्त्या परमया राजञ्छृणु यत्फलमाप्नुयात् ॥ १० ॥ स्वर्णशृंगं रौप्यखुरं गोशतैर्वृषभं वरम् ॥ इति
मासं द्विजातिभ्यो दत्त्वा यत्फलमश्नुते ॥ ११ ॥ तदाप्नोत्यखिलं सम्यग्व्रतमेतदुपोषितः ॥ तं च लोकमवाप्नोति गोविन्दो यत्र तिष्ठति ॥१२॥
गोविन्दद्वादशीमेतां समुपोष्य विधानतः ॥ विद्योतमाना दृश्यंते लोकेद्यापि शशांकवत् ॥ १३ ॥ गोविन्दमर्चयति गोरसभोजनस्तु गा वै विनो

---

[1] विकल्पस्थैः–इ० पा० ।

दयति तद्वद्गवाह्निकश्च ॥ यो द्वादशीषु कुरुराज कृतोपवासः प्राप्नोत्यसौ सुरभिलोकमपेतशोकम् ॥ १४ ॥ इति श्रीभविष्ये महापुराण उत्तर पर्वणि श्रीकृष्णयुधिष्ठिरसंवादे गोविन्दद्वादशीव्रतवर्णनं नामाष्टसप्ततितमोऽध्यायः ॥ ७८ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ उपवासव्रतानां तु वैकल्यं यन्महामते ॥ दानधर्मे कृतं यस्य विपाकं वद यादृशः ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ यज्ञानामुपवासानां व्रतानां च नरेश्वर ॥ वैकल्यात्फलवैकल्यं यादृश तच्छृणुष्व मे ॥ २ ॥ उपवासान्विना[1] खण्डं प्राप्नुवंत्येव ताञ्छृणु ॥ भ्रष्टैश्वर्या निर्द्धनाश्च वसंति पुरुषाः पुनः ॥ ३ ॥ रूपं तथोत्तरं प्राप्य व्रतवैकल्यदोषतः ॥ काणाः कुब्जाश्च षण्ढाश्च भवंत्यन्धाश्च मानवाः ॥ ४ ॥ उपवासी नरः पत्नीं नारी प्राप्य तथा पतिम् ॥ वियोगं व्रतवैकल्ये दुर्भगत्वमवाप्नुयात् ॥ ५ ॥ ये द्रव्ये सत्यदातारस्तथान्ने सत्यनग्नयः ॥ कुले वसंति दुःशीला दुष्कुलाः शीलनिश्चये ॥ ६ ॥ वस्त्रानुलेपनैर्हीना भूषणैश्चातिरूपिणः ॥ विरूपरूपाश्च तथा प्रसाधकगुणान्विताः ॥ ७ ॥ ते सर्वे व्रतवैकल्यात्फलवैकल्यमागताः ॥ तस्मात्तद्व्रतवैकल्यं यज्ञवैकल्यमेव च ॥ उपवासेन कर्तव्यं वैकल्याद्विकलं फलम् ॥८॥ ॥युधिष्ठिर उवाच ॥ ॥ कथं चिद्यदि वैकल्यमुपवासादिके भवेत् ॥ किं तत्र वद कर्तव्यमच्छिद्रं येन जायते ॥ ९ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अखंडद्वादशी ह्येषा समस्तेष्वेव कर्मसु॥ ॥१०॥ वैकल्यं प्रशमं याति शृणुष्व गदतो मम ॥ मार्गशीर्षे सिते पक्षे द्वादश्यां नियतः शुचिः ॥ कृतोपवासो देवेशं समभ्यर्च्य जनार्दनम् ॥ ११ ॥ स्नातो नारायणं ब्रूयाद्भुञ्जन्नारायणं तथा ॥ गच्छन्नारायणं देवं स्वपन्नारायणं पुनः ॥ १२ ॥ पञ्चगव्यजलस्नातो विशुद्धात्मा जितेन्द्रियः ॥ यवव्रीहिमयं पात्रं दत्त्वा विप्राय भक्तितः ॥ इदमुच्चारयेत्पश्चाद्देवस्य पुरतो हरेः ॥ १३ ॥ सप्तजन्मनि यत्किञ्चिन्मया खण्डव्रतं कृतम् ॥ भगवंस्त्वत्प्रसादेन तदखंडमिहास्तु मे ॥ १४ ॥ यथाखंडं जगत्सर्वं त्वमेव पुरुषोत्तम ॥ तथाखिलान्यखंडानि व्रतानि मम संतु वै ॥ १५ ॥ चतुर्भिरपि मासैस्तु पारणं प्रथमं स्मृतम् ॥ प्रीणनं च हरेः कुर्यात्पारिते पारणे ततः ॥ १६ ॥ चैत्रादिषु च मासेषु चतुर्गुण्यं तु पारणम् ॥ तत्रापि सक्तुपात्राणि दद्याच्छ्रद्धासमन्वितः ॥ १७ ॥ श्रावणादिषु मासेषु कार्त्तिकांतेषु पारणम् ॥ तत्रापि घृतपात्राणि दद्याद्विप्राय दक्षिणाः ॥ ॥ १८ ॥ सौवर्णं रौप्यं ताम्रं च मृन्मयं पात्रमिष्यते ॥ स्वशक्त्यपेक्षया राजन्पालाशं वापि कारयेत् ॥ १९ ॥ एवं संवत्सरस्यांते ब्राह्मणान्सजितेन्द्रियः ॥ द्वादशामन्त्र्य विप्रांश्च भोजयेद्घृतपायसैः ॥ २० ॥ वस्त्राभरणदानैश्च प्रणिपत्य क्षमापयेत् ॥ उपदेष्टारमप्यत्र पूजयेद्विधिवद्गु

---

[1] उपवासादिना राज्यं प्रापयंत्येव–इ० पा० ।

रुम् ॥ २१ ॥ एवं सम्यग्यथान्याय्यमखंडद्वादशीं नरः ॥ समुपोष्य अखंडस्य व्रतस्य फलमश्नुते ॥ २२ ॥ सप्तजन्मसु वैकल्यं यद्व्रतस्य क्वचित्कृतम् ॥ करोत्यविकलं सर्वमखंडद्वादशी तु तत् ॥ २३ ॥ तस्मादेषा प्रयत्नेन नरैः स्त्रीभिश्च सुव्रत ॥ अखंडद्वादशी सम्यगुपोष्या फलकांक्षया ॥२४ ॥ ये द्वादशीव्रतमखंडमिति प्रसिद्धं मार्गोत्तमाङ्गमधिकृत्य कृतेन येन ॥ खंडव्रतानि पुरुषैः सुकृतानि यानि संपूर्णतां समुपयान्ति हरेः प्रसादात् ॥ २५ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादेऽखंडद्वादशीव्रतवर्णनं नामैकोनाशीतितमोऽध्यायः ॥ ७९ ॥

॥ ॥ श्रीकृष्ण उवाच ॥ ॥ फाल्गुनेमलपक्षस्य एकादश्यामुपोषितः ॥ नरो वा यदि वा नारी समभ्यर्च्य जगत्पतिम् ॥ १ ॥ हरेर्नाम वदन्भक्त्या भावयुक्तो युधिष्ठिर ॥ उत्तिष्ठन्प्रस्वपंश्चैव हरिमेवानुकीर्तयेत् ॥ २ ॥ ततोन्यस्मिन्दिने प्राप्ते द्वादश्यां नियतो हरिम् ॥ स्नात्वा सम्यक्समभ्यर्च्य दत्त्वा विप्राय दक्षिणाम् ॥ ३ ॥ हरिमुद्दिश्य चैवाग्नौ घृतहोमकृतक्रियः ॥ प्रणिपत्य जगन्नाथमिति वाणीमुदीरयेत् ॥ ४ ॥ पातालसंस्थां वसुधां यां प्रसाद्य मनोरथान् ॥ अवाप वासुदेवोसौ प्रदद्यात्तु मनोरथान् ॥५॥ यमभ्यर्च्य दिवि प्राप्तः सकलांश्च मनोरथान् ॥ भ्रष्टराज्यश्च देवेन्द्रो यमभ्यर्च्य जगत्पतिम् ॥ ६ ॥ मनोरथानभिनवान्प्राप्तवांश्च मनोहरान् ॥ एवमभ्यर्च्य पूजां च निष्पाद्य च हरेस्ततः ॥ भुञ्जीत प्रयतः सम्यग्हविष्यं पांडुनन्दन ॥ ७ ॥ फाल्गुने चैत्रे वैशाखे ज्येष्ठे मासि च सत्तम ॥ चतुर्भिः पारणं मासैरेभिर्निष्पादितं भवेत् ॥ ८ ॥ रक्तपुष्पैश्च चतुरो मासान्कुर्वीत चार्चनम् ॥ दहेत्तु गुग्गुलुं प्राश्य गोशृंगक्षालनं जलम् ॥९॥ हविष्यान्नं च नैवेद्यमात्मनश्चापि भोजनम् ॥ ततश्च श्रूयतां पार्थ आषाढादौ तु या क्रिया ॥१०॥ जातीपुष्पाणि धूपश्च शस्तः सार्जरसो नृप ॥ प्राश्य दर्भोदकं चास्य शाल्यन्नं च निवेदनम् ॥११॥ स्वयं तदेव चाश्नीयाच्छेषं पूर्ववदाचरेत् ॥ कार्तिकादिषु मासेषु गोमूत्रं कायशोधनम् ॥१२॥ सुगंधिश्चेच्छया धूपं पूजा भृंगारकेन च ॥ कांसारं चात्र नैवेद्यमश्नीयात्तच्च वैस्वयम् ॥१३॥ प्रतिमासं च विप्राय दातव्या दक्षिणा तथा ॥ पारणं चेच्छया विष्णोः पारणे पावने मते ॥ १४ ॥ यथाशक्त्या यथाप्रीत्या वित्तशाठ्यं विवर्जयेत् ॥ सद्भावेनैव गोविंदः पूजितः प्रीयते यतः ॥१५॥ पारणांते यथाशक्ति स्नापितः पूजितो हरिः ॥ प्रीणितश्चेप्सितान्कामांस्तान्ददात्यव्ययान्नृप ॥१६॥ वर्षांते प्रतिमामिष्टां कारयित्वा सुशोभनाम् ॥ स्वर्णकेन यथा शक्त्या शंखशार्ङ्गविभूषिताम् ॥ १७ ॥ पुष्पवस्त्रयुगच्छन्नां ब्राह्मणाय निवेदयेत् ॥ द्वादश ब्राह्मणांस्तत्र भोजयित्वा क्षमापयेत् ॥१८॥ द्वादशात्र प्रदातव्याः कुंभाः सान्नजलाक्षताः ॥ छत्रोपानद्युगैः सार्द्धं दक्षिणाभिश्च भारत ॥ १९ ॥ एषा पुण्या पापहरा द्वादशी फलमिच्छताम् ॥ यथाभिलषितान्कामान्ददाति नृपसत्तम ॥२०॥ पूरयत्यखिलान्भक्त्या यतश्चैषां

मनोरथान् ॥ मनोरथा द्वादशीयं ततो लोकेषु विश्रुता ॥२१॥ उपोष्यैतां त्रिभुवनं लब्धमिन्द्रेण वै पुरा ॥ आदित्याश्चेप्सिताः पुत्रा धनमौशनसा तथा ॥ २२ ॥ धौम्येनाध्ययनं प्राप्तमन्यैश्चाभिमतं फलम् ॥ राजर्षिभिस्तथा विप्रैः स्त्रीविट्शूद्रैश्च भूतले ॥ २३ ॥ यंयं काममभिध्याय व्रतमेतदुपोषितम् ॥ तत्तदाप्नोत्यसंदिग्धं विष्णोराराधनोद्यतः ॥ २४ ॥ अपुत्रो लभते पुत्रम[1]धनो लभते धनम् ॥ रोगाभिभूतश्चारोग्यं कन्या प्राप्नोति सत्पतिम् ॥ २५ ॥ समागमं प्रवसनैरुपोष्यैतामवाप्यते ॥ सर्वान्कामानवाप्नोति मृतः स्वर्गे च मोदते ॥ २६ ॥ नापुत्रो नाधनो ज्येष्ठो वियोगी न च निर्गुणः ॥ उपोष्यैतद्व्रतं मर्त्यः स्त्रीशूद्रो वापि जायते ॥ २७ ॥ स्वर्गलोके सहस्राणि वर्षाणामयुतानि च ॥ भोगानभिमतान्भुक्त्वा तत्रतत्र यथेच्छया ॥ २८ ॥ इह पुण्यवतां नृणां धनिनां लघुशालिनाम् ॥ गृहे प्रजायते राजन्सर्वव्याधिविवर्जितः ॥ २९ ॥ न द्वादशीमुपवसन्ति मनोरथाख्यां नैवार्चयंति पुरुषोत्तममादिदेवम् ॥ गोब्राह्मणांश्च न नमंति न पूजयंति ये ते मनोभिलषितं कथमाप्नुवंति ॥ ३० ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे मनोरथद्वादशीव्रतवर्णनं नामाशीतितमोऽध्यायः ॥ ८० ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ अल्पायासेन भगवन्धनेनाल्पेन वा विभो ॥ पापं प्रशममायाति येन तद्वक्तुमर्हसि ॥ ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ शृणु पार्थ परां पुण्यां द्वादशीं पापनाशिनीम् ॥ यामुपोष्य परं पुण्यमाप्नुयाच्छ्रद्धयान्वितः ॥ २ ॥ माघमासे च संप्राप्ते आषाढर्क्षं भवेद्यदि ॥ मूलं वा कृष्णपक्षस्य द्वादश्यां नियतव्रतः ॥ ३ ॥ गृह्णीयात्पुण्यफलदं विधानं तस्य मे शृणु ॥ देवदेवं समभ्यर्च्य सुस्नातः प्रयतः शुचिः ॥ ४ ॥ कृष्णनाम्ना च संपूज्य एकादश्यां महामते ॥ उपोषितो द्वितीयेह्नि पुनः संपूज्य केशवम् ॥ ५ ॥ संस्तूय नाम्ना तेनैव कृष्णाख्येन पुनःपुनः ॥ दद्यात्तिलांश्च विप्राय कृष्णो मे प्रीयतामिति ॥ ६ ॥ ततश्च प्राशयेच्छस्तांस्तथा कृष्णतिलान्नृप ॥ विष्णुप्रीणनमंत्रोक्ते समाप्ते वर्षपारणे ॥ ७ ॥ कृष्णकुंभास्तिलैः सार्द्धं पक्वान्नेन च संयुताः ॥ छत्रोपानद्युगैर्वस्त्रैः सहिता अन्नगर्भिणः ॥ ब्राह्मणेभ्यः प्रदेयास्ते यथावन्माससंख्यया ॥ ८ ॥ तिलप्ररोहाज्जायंते यावत्संख्यास्तिला नृप ॥ तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ अरोगो जायते नित्यं नरो जन्मनिजन्मनि ॥ ९ ॥ अंधो न बधिरश्चैव न कुष्ठी न च कुत्सितः ॥ भवत्येतामुषित्वा तु तिलाख्यां द्वादशीं नरः ॥ १० ॥ अनेन पार्थ विधिना तिलदाता न संशयः ॥ मुच्यते पातकैः सर्वैरनायासेन मानवः ॥ ११ ॥ दानं विधिस्तथा श्राद्धं सर्वपातकशांतये ॥ नार्थः प्रभूतो नायासः शरीरे नृपसत्तम ॥ १२ ॥

---

[1] अलब्धः-इ० पा० । [2] कृतेनानेन-इ० पा० । [3] पूज्यं वा-इ० पा० ।

सर्वोपभोगनिरतोह्नि परे दशम्यां स्नानं तिलैस्तिलनिवेदनकृत्तिलाशी ॥ दत्त्वातिलान्द्विजवराय विराजकेतु संपूज्य विष्णुपदवीं समुपैति मर्त्यः ॥ १३ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे उल्कानवमीव्रतवर्णनं नामैकाशीतितमोऽध्यायः ॥ ८१ ॥ ॥छ॥

॥ ॥ युधिष्ठिर उवाच ॥ ॥ यन्न तापाय वै पुंसां भवत्यामुष्मिकं कृतम् ॥ तदपापाय भवति तदाचक्ष्व यदूत्तम ॥ १ ॥ उपवासप्रभावं वै कृष्णाराधनकांक्षिणाम् ॥ कथयेह महाबाहो नैव तृप्यामि जल्पतः ॥ २ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ श्रूयतां पार्थ यत्पृष्टाः कौतुकाद्भवता वयम् ॥ आमुष्मिकं न तापाय प्रतापाय च जायते ॥ ३ ॥ उपोषितप्रभावं च कृष्णाराधनकांक्षिणाम् ॥ कथयामि यथावृत्तं पूर्वमेव नरोत्तम ॥ ४ ॥ वैदिशं नाम नगरं प्रख्यातं नृपसत्तम ॥ तत्र वैश्योऽभवत्पूर्वं सीरभद्र इति श्रुतः ॥ ५ ॥ भार्यया मातृदुहिता पुत्रपौत्रैः समन्वितः ॥ प्रभूतभृत्यवर्गश्च बहुव्यापारकारकः ॥ ६ ॥ पुत्रपौत्रादिभरणे व्यासक्तिर्मतिरेव च ॥ परलोकं प्रति मतिस्तस्य नासीत्कदाचन ॥ ७ ॥ चकारानुदिनं सोऽथ न्यायान्यायैर्द्धनार्जनम् ॥ सर्वत्रान्यत्र निःस्नेहः पुत्रस्नेहपरिप्लुतः ॥ ८ ॥ न जुहोत्युदिते काले न ददात्यतितृष्णया ॥ बभूव चोद्यमस्तस्य पुत्रादिभरणे परः ॥ ९ ॥ नित्यनैमित्तिकानां च हानिं चक्रे स्वकर्मणा ॥ तृष्णाभिभूतो राजेन्द्र स्ववर्गभरणोज्झितः ॥ १० ॥ कालेनागच्छतासोऽथ मृतो विंध्याटवीतटे ॥ यातनादेहभृत्प्रेतो ग्रीष्मकालेभवन्नृप ॥ ११ ॥ तं ददर्श महाभागो दिव्ययानसमन्वितः ॥ वेदवेदाङ्गविद्वेषी विपीतो नाम वै द्विजः ॥ भास्करस्यांशुभिर्दीप्तैर्दहंतमतिदारुणैः ॥ १२ ॥ प्रतप्तवालुकामध्ये तृषार्तं चातिपीडितम् ॥ क्षुत्क्षामकंठं शुष्कास्यं तथोद्वृत्तविलोचनम् ॥ निष्क्रांतजिह्वमंगेषु विस्फोटैः सर्वतश्चितम् ॥ १३ ॥ निश्वासायासखेदेन विह्वलं पीडितोदरम् ॥ निजेन कर्मणा बद्धमसमर्थं प्रसर्पणे ॥ १४ ॥ तथादृशमथो दृष्ट्वा गर्दभेयो महानृषिः ॥ विपीतः प्राह राजेन्द्र कारुण्यभरितं वचः ॥ १५ ॥ जानन्नपि यथाप्राप्तं तस्यानुष्ठानजं फलम् ॥ जंतोस्तस्योपकाराय सर्वतो ह्लादयन्निव ॥ १६ ॥ ॥ विपीत उवाच ॥ ॥ अधः सूर्यांशुभिस्ततैर्बहुभिः पथि पांशुभिः ॥ उपर्यर्ककरैस्तीक्ष्णैस्तृषावातनिपीडितम् ॥ १७ ॥ अन्यस्तत्राणकैर्घोरैरविषह्यैःसुदारुणैः ॥ कथयेह यथातत्त्वमेकाकी दह्यसे कथम् ॥ १८ ॥ तस्यैतद्वचनं श्रुत्वा विपीतस्य सवेदनः ॥ वेदनार्तं उवाचेदं कृच्छ्रादुच्छ्वस्य मंदकम् ॥ १९ ॥ ॥ सीरभद्र उवाच ॥ ॥ ब्रह्मन्नालोचितं पूर्वं कथमंते भविष्यति ॥ अशाश्वते शाश्वतधीस्तेन दह्यामि दुर्मतिः ॥ २० ॥ इदं करिष्याम्यपरं त्विदं कृत्वा त्विदं पुनः ॥ इतीच्छाशतमारूढस्तेन दह्यामि दुर्मतिः ॥ २१ ॥ शीतोष्णवर्षादिभवं लोभात्सोढं मयाऽशुभम् ॥ तदेव हि न धर्मार्थं तेन दह्यामि दुर्मतिः ॥ २२ ॥

पितृदेवमनुष्याणामदत्त्वा योषिता हि ये ॥ ते गता नापि वर्तंते दह्याम्येकोऽत्र दुर्मतिः ॥२३॥ पुत्रक्षेत्रकलत्रेषु ममत्वाहृतचेतसा ॥ बह्वसाधु कृतं
कर्म तेन दह्यामि दुर्मतिः ॥ २४ ॥ मृते मयि धने तस्मिन्नन्यायोपार्जिते सदा ॥ रूपवंतोऽभिवर्तंते दह्याम्येकोत्र दुर्मतिः ॥ २५ ॥ न मया
पूजिता गेहान्निर्गता द्विजसत्तमाः ॥ स्ववर्गमिह कामेन तेन दह्याम्यहंमतिः ॥ २६ ॥ यन्मे न पूजिता देवाः कुटुंबं पोषितं परम् ॥ एकाकी तत्र
दह्यामि ये सुतास्तेऽन्यतो गताः ॥२७॥ नित्यं नैमित्तिकं कर्म पूर्वेषां चैव नो कृतम् ॥ एकाकी तेन दह्यामि गतस्ते फलभोगिनः ॥ २८॥ दाराः
पुत्राश्च भृत्याश्च पापबुद्ध्या मया भृताः ॥ एकाकी तेन दह्यामि गतास्ते फलभोगिनः॥ २९ ॥ दाराः पुत्राश्च भृत्यार्थे मया न्यायार्थसंचयः ॥
कृतस्तेनात्र दह्यामि ये भुक्तास्तेऽन्यतो गताः ॥ ३० ॥ क्षतपापं मया भुक्तमन्यैस्तत्कर्म संचितम् ॥ दह्याम्येकोऽहमत्यंतं गतास्ते फलभोगिनः ॥
॥ ३१ ॥ यन्ममत्वाभिभूतेन मया पापमुपार्जितम् ॥ न तदन्यस्य कस्यापि केवलं मम दुष्कृतम् ॥ ३२॥ अंतर्दुःखेन दग्धोऽहं बहिर्दह्यामि भावयन् ॥
तावद्दुःखं नवाभं तु पापमेकं द्विधा स्थितम् ॥ ३३ ॥ कुरु तस्मात्समुद्धारं पश्यस्यमृतसागरम् ॥ तव येनाहमाह्लादं प्राप्नुयां मुनिसत्तम ॥
॥ ३४ ॥ ॥ विपीत उवाच ॥ ॥ अल्पकालिक उद्धारे तव पश्यामि संशयम् ॥ प्रक्षीणं पापमेतावत्सुवृत्तं चास्ति ते परम् ॥ ३५ ॥ प्रतीते
दशमे जन्मन्यच्युताराधनेच्छया ॥ सुकर्मजयदा भद्रद्वादशीं समुपोषितः ॥ न च तस्याः प्रसादेन पापमत्यन्तदुर्जयम् ॥ ३६ ॥ अल्पैरहोभिः
संक्षीणमामपात्रे यथा जलम् ॥ गतं पापमयं ह्यस्याः प्रभावोऽत्यंन्तदुर्ल्लभः ॥ ३७ ॥ नाशं पापस्य कुरुते जयं सुकृतकर्मणः ॥ सकृत्कर्मप्रदा
ह्येषा ततो वै द्वादशी स्मृता ॥ ३८ ॥ यथैतद्वदतार्तेन भवता परिदेवितम् ॥ तमुवाचात्र संदेहो मम तापाय देव किम् ॥ ३९ ॥ पापमत्र
कृतं प्रेत्य भद्र तापाय जायते ॥ आह्लादाय तथा पुण्यमिह पुण्यकृतां नृणाम् ॥ ४० ॥ सीरभद्रं समाश्वास्य ययावित्थं महामुनिः ॥ सोप्यल्पे
नैव कालेन ततो मोक्षमवाप्तवान् ॥ ४१ ॥ उपवासप्रभावश्च कथितस्ते नरोत्तम ॥ येनाल्पैरेव दिवसैर्भूरि पापं क्षयं गतम् ॥ ४२ ॥ तस्मान्नरेण
पुण्याय यतितव्यं न पातकम् ॥ उपवासाश्च कर्तव्याः सदैवात्महितैषिणा ॥ ४३ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ अथैतत्कष्टपापानां विपाको
नरकस्थितैः ॥ पुरुषैर्भुज्यते शश्वत्तं मोक्षं वद सत्तम ॥ ४४ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ जयासमेताः पुरुषाः सदा सुकृतकर्मणः ॥ जया सा
द्वादशी शस्ता नृणां सुकृतकर्मणाम् ॥ ४५ ॥ फाल्गुनामलपक्षस्य एकादश्यामुपोषितः ॥ द्वादश्यां तु द्विजश्रेष्ठ पूजयेन्मधुसूदनम् ॥ ४६ ॥
एकादश्यां समुत्तिष्ठन्विष्णोर्नामानुकीर्तयन् ॥ पूजायां वासुदेवस्य भुञ्जीत सुसमाहितः ॥ ४७ ॥ कामं क्रोधं च लोभं च मदं मोहं च वर्जयेत् ॥

द्रोहादीन्वर्जयेद्दोषान्सर्वान्धनमदोद्भवान् ॥ ४८ ॥ भाययेद्विष्णुभक्तश्च संसारेऽसारतां तथा ॥ एवं भावितचित्तेन प्राणिनां हितमिच्छता ॥
॥४९॥ नमो नारायणायेति वक्तव्यं स्वपता निशि ॥ तथैव कुर्याद्द्वादश्यां नाम्ना क्षुत्पारणं नृप ॥५०॥ सौवर्णताम्रपात्राणि मृन्मयान्यपि पांडव॥
यवपात्राणि पूर्वं तु दद्यान्मासचतुष्टयम् ॥५१॥ आषाढादिद्वितीयं तु पारयेच्च महामते ॥ तत्रापि घृतपात्राणि दद्याच्छ्रद्धासमन्वितः ॥५२॥ कार्त्ति
कादिषु मासेषु माघांतेषु तथा तिलान्॥विप्राय दद्यात्पात्रं तु प्रतिमाससमुमोषितः ॥५३॥नामत्रयमशेषेण मासिमासि दिनद्वयम्॥तथैवोच्चारयन्दद्या
न्मासिमासि यवादिकम् ॥ प्रणम्य च हृषीकेशं कृतपूजः प्रसादयेत् ॥५४॥ विष्णो नमस्ते जगती प्रसोत्रे श्रीवासुदेवाय नमोनमस्ते ॥ नारायणा
ख्यः प्रणतैर्विचिंत्यः करोतु मां शाश्वतपुण्यराशिम् ॥५५॥ प्रसीद पुण्यं जयमेति विष्णो श्रीवासुदेवर्द्धिमुपैतु पुण्यम् ॥ प्रयातु वाशेषमथोविनाशं
मातेंऽघ्रिपद्मादितरत्र मे मतिः ॥५६॥ विष्णो पुण्योद्भवो मेस्तु वासुदेवास्तु मे शुभम् ॥ नारायणास्तु मे धर्मो जहि पापमशेषतः ॥५७॥ अनेक
जन्मजनितं बाल्ययौवनवार्द्धके॥पुण्यं विवृद्धिमायातु यातु पापं च संक्षयम् ॥५८॥ आकाशादिषु शब्दादौ श्रोत्रादौ महदादिषु॥प्रकृतौ पुरुषे चैव
ब्रह्मण्यपि च स प्रभुः॥५९॥यथैक एव धर्मात्मा वासुदेवो व्यवस्थितः॥ तेन सत्येन पापं मे नरकार्तिप्रदं क्षयम् ॥६०॥ प्रयातु सुकृतस्यास्तु ममानु
दिवसञ्चयः॥पापस्य हानिःपुण्यस्य वृद्धिर्मेस्तूत्तमोत्तमा॥६१॥एवमुच्चार्य विप्रायदद्याद्यत्कथितं तव॥ भुञ्जीत कृतकृत्यस्तु पारणेपारणे गते॥६२॥
पारणांते तु देवेश प्रीणनं शक्तितो नृप ॥ कुर्वीताखिलपाखण्डैरालापं च विवर्जयेत् ॥ ६३ ॥ एवं संवत्सरस्यांते कांचनीं प्रतिमां हरेः॥ पूजयित्वा
वस्त्रपुष्पैर्घृतपात्रेण संयुतैः ॥ ६४ ॥ गां सवत्सां च विप्राय दद्याच्छ्रद्धासमन्वितः ॥ विलंबितं च यत्पूर्वं देवानन्यान्भजेद्यदि ॥ ६५ ॥ तस्मिन्नह
नि दातव्यं भोजने चानिवारितम् ॥ इत्येषा कथिता पुण्या सुकृतस्य जयावहा ॥ द्वादशी नरकं पार्थ यामुपोष्य न पश्यति ॥६६॥ नाग्नयो न च
शस्त्राणि न च लोहमुखाः खगाः ॥ नारकास्तं प्रबाधन्ते मतिर्यस्य जनार्दने ॥ ६७ ॥ नामोच्चारणमात्रेण विष्णोः क्षीणाघसंचयः ॥ भवत्यघ
विनाशश्च नरके पतनं कुतः ॥ ६८ ॥ नमो नारायण हरे वासुदेवेति कीर्तयन् ॥ न याति नरकं मर्त्यः संक्षीणाशेषपातकः ॥ ६९ ॥ तस्मात्पा
खंडिसंसर्गमकुर्वन्द्वादशीमिमाम् ॥ उपोष्य पुण्योपचये न याति नरकं नरः ॥ ७० ॥ पापं क्षिणोति सुकृतस्य करोति वृद्धिं वृद्धिं प्रयच्छति
नियच्छति सर्वदोषान् ॥ यद्द्वादशीह सुकृतातिहिता च लोके कस्मान्न तामुपवसंति विमूढचित्ताः ॥ ७१ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तर
पर्वणि श्रीकृष्णयुधिष्ठिरसंवादे सुकृतद्वादशीव्रतवर्णनं नाम द्व्यशीतितमोऽध्यायः ॥ ८२ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ यदेतत्परमं गुह्यं

सर्व्ववेदेषु पठ्यते ॥ स देवः पुण्डरीकाक्षः स्वयं नारायणो हरिः ॥ १ ॥ स यज्ञैर्विविधैरिष्टैर्व्रतैश्च यदुसत्तम ॥ प्राप्यते परमो देवः सनातन कथंचन ॥ २ ॥ बहुवित्तेन भगवन्नृत्विग्भिर्वेदपारगैः ॥ प्राप्यन्ते सुसहायैश्च क्वचित्त्यक्ताः सुदुष्कराः ॥ ३ ॥ वित्तेन च विना दानं दातुं कृष्ण न शक्यते ॥ विद्यमानेऽपि न मतिः कुटुंबासक्तचेतसः ॥ ४ ॥ तस्य मोक्षः कथं कृष्ण सर्व्वथा दुर्ल्लभो हरिः ॥ अल्पायासेन लभते येन देवः सनातनः ॥ तन्मे सामान्यतो ब्रूहि सर्व्ववर्णेषु यद्भवेत् ॥५॥ ॥ श्रीकृष्ण उवाच ॥ ॥ कथयामि परं गुह्यं रहस्यं देवनिर्मितम् ॥ धरण्या यत्कृतं पूर्वं मज्जन्त्या वसुधातले ॥ ६ ॥ पृथिव्याः पार्थिव पुरा संजातः संगमोऽम्बुभिः ॥ तस्मिन्सलिलसंलग्ने मही प्रायाद्रसातलम् ॥ ७ ॥ सा भूतधात्री धरणी रसातलगता शुभा ॥ आराधयामास विभुं देवं नारायणं परम् ॥ ८ ॥ उपवासव्रतैर्देवी नियमैश्च पृथग्विधैः ॥ कालेन महता तस्याः प्रसन्नो गरुडध्वजः ॥ उज्जहार स्थितौ चेमां स्थापयामास चाच्युतः ॥ ९ ॥ प्राप्ते मार्गशिरे मासे दशम्यां नियतात्मवान् ॥ स्नात्वा देवार्चनं कृत्वा अग्निकार्यं यथाविधि ॥ १० ॥ शुचिवासाः प्रसन्नात्मा ह्यत्यल्पान्नं सुसंस्कृतम् ॥ भुक्त्वा पञ्चपदं कृत्वा पुनः शौचं च पादयोः ॥ ११ ॥ कृत्वाष्टांगुलमात्रं तु क्षीरवृक्षसमुद्भवम् ॥ भक्षयेद्दन्तकाष्ठं तु ततश्चाचम्य यत्नतः ॥ १२ ॥ स्पृष्ट्वा न्यस्यान्यकर्माणि चिरं ध्यात्वा जनार्दनम् ॥ शंखचक्रगदापाणिं पीताम्बरसमावृतम् ॥ १३ ॥ एवमुच्चारयेद्वाचं तस्मिन्काले महाद्युते ॥ एकादश्यां निराहारः स्थित्वाहमपरेहनि ॥ संभोक्ष्ये पुण्डरीकाक्ष शरणं मे भवाच्युत ॥ १४ ॥ एवमुक्त्वा ततो देव देवदेवस्य सन्निधौ ॥ जपेन्नारायणायेति रूपे तत्र विधानतः ॥ १५ ॥ ततः प्रभाते विमले नदीं गत्वा समुद्रगाम् ॥ इतरां वा तडागं वा गृहे वा नियतात्मवान् ॥ १६ ॥ आनीय मृत्तिकां शुद्धां मंत्रेणानेन मानवः ॥ धार पोषणं त्वत्तो भूतानां देवि सर्वदा ॥ तेन सत्त्वेन मां पाहि पापान्मोचय सुव्रते ॥ १७ ॥ ॥ इति मृत्तिकामन्त्रः ॥ ॥ ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवेः ॥ भवंति भूतानि सतां मृत्तिकामालभेत्पुनः ॥ १८ ॥ इत्यदित्यादर्शनमन्त्रः ॥ एवं मृदं रवेरग्रे कृत्वाथात्मानमालभेत् ॥ त्रिःकृत्वाशेषमृदया कुण्डमालिख्य वै जले ॥ १९ ॥ ततः स्नात्वा नरः सम्यक्चक्रवर्त्युपचारकः ॥ आचम्यावश्यकं कृत्वा पुनर्देवगृहं व्रजेत् ॥ २० ॥ तमाराध्य महायोगं देवं नारायणं प्रभुम् ॥ केशवाय नमः पादौ कटिं दामोदराय च ॥ २१ ॥ ऊरुयुग्मं नृसिंहाय उरः श्रीवत्सधारिणे ॥ कण्ठं कौस्तुभनाथाय वक्षः श्रीपतये तथा ॥ २२ ॥ त्रैलोक्यविजयायेति बाहू सर्वात्मने शिरः ॥ रथांगधारिणे चक्रं शंकरायेति चांबुजम् ॥ २३ ॥ गम्भीरायेति च गदामभयं शांतमूर्तये ॥ एवमभ्यर्च्च्य देवेशं देवं नारायणं प्रभुम् ॥ २४ ॥ पुनस्तस्याग्रतः कुम्भां

श्चतुरः स्थापयेद्बुधः ॥ जलपूर्णान्समाल्यांश्च सितचन्दनचर्चितान् ॥ २५ ॥ चतुर्भिस्तिलपात्रैश्च स्थगितान्रत्नसंयुतान् ॥ चत्वारस्ते समुद्रास्तु कलशाः परिकीर्तिताः ॥ २६ ॥ तेषां मध्ये तु संपीठं स्थापयेद्वस्त्रसंवृतम् ॥ तस्मिन्सौवर्णं रौप्यं वा ताम्रं वा दारवं तथा ॥ पात्रं तोयभृतं कृत्वा तस्य मध्ये ततो न्यसेत् ॥ २७ ॥ सौवर्णं मात्स्यरूपेण कृत्वा देवं जनार्दनम् ॥ वेदवेदांगसंयुक्तं श्रुतिस्मृतिविभूषितम् ॥ २८ ॥ भक्ष्यैर्बहुविधै राजन्फलैः पुष्पैश्च शोभितम् ॥ गन्धैर्धूपैर्मंत्रवरैरर्चयित्वा यथाविधि ॥ २९ ॥ रसातलगता वेदा यथा देव त्वयाहृताः ॥ मत्स्यरूपेण तद्वन्मां भवादुद्धर केशव ॥ ३० ॥ एवमुच्चार्य तस्याग्रे जागरं तत्र कारयेत् ॥ यथाविभवसारेण प्रभातेऽपि पुनःपुनः ॥ चतुर्णां ब्राह्मणानां तु चतुरो दापयेद्घटान् ॥ ३१ ॥ पूर्वं तु बह्वृचे दद्याच्छंदोगे दक्षिणं तथा ॥ यजुःशाखान्विते दद्यात्पश्चिमं घटमुत्तमम् ॥ ३२ ॥ उत्तरं कामतो दद्यादेश एव विधिक्रमात् ॥ ऋग्वेदः प्रीयतां पूर्वं सामवेदश्च दक्षिणः ॥ ३३ ॥ यजुषः पश्चिमो नाम्ना आथर्वायोत्तरं तथा ॥ पूर्णपात्रैस्तु सतिलैः स्थगितान्कारयेद्घटान् ॥ ३४ ॥ ततस्तं जलपात्रस्थं ब्राह्मणाय कुटुंबिने ॥ दद्यादेवं महाभाग ततः पश्चात्तु भोजयेत् ॥ ३५ ॥ ब्राह्मणान्पायसान्नेन ततः पश्चात्स्वयं गृही ॥ भुञ्जीत भृत्यसहितो वाग्यतः संयतेन्द्रियः ॥ ३६ ॥ अनेन विधिना यस्तु द्वादशीं क्षपयेन्नरः ॥ तस्य पुण्यफलं राजञ्छृणु सत्यवतां वर ॥ ३७ ॥ यदि वक्त्रसहस्राणि भवंति हि युगेयुगे ॥ आयुश्च ब्रह्मणस्तुल्यं भवेद्यदि महामते ॥ तदस्य फलसंख्यानं कर्तुं शक्यं न धारयेत् ॥ ३८ ॥ यः कृष्णद्वादशीमेतामनेन विधिना नृप ॥ करोति ब्रह्मलोकं स समाप्नोति न संशयः ॥ ३९ ॥ ब्रह्महत्यादिपापानि जन्मांतरकृतान्यपि ॥ अकामतः कामतो वा प्रणश्यंति न संशयः ॥ ४० ॥ तथैव पौषमासेन अमृतं मथितं सुरैः ॥ तत्र कूर्मोभवद्देवः स्वयमेव जनार्दनः ॥ ४१ ॥ तस्येयं तिथिरुद्दिष्टा हरेर्वै कूर्मरूपिणः ॥ पौषमासं समासाद्य द्वादशीं शुक्लसंयुताम् ॥ ४२ ॥ तस्यां प्राग्वत्संकल्पः प्रातःस्नानादिकाः क्रियाः ॥ निर्वर्त्याराधयेद्रात्र्यामेकादश्यां जनार्दनम् ॥ प्रीयमंत्रैर्नृपश्रेष्ठ देवदेवं जगद्गुरुम् ॥ ४३ ॥ कूर्माय पादौ प्रथमं सुपूज्य नाराणायेति कटिं हरेस्तु ॥ सङ्कर्षणायेत्युदरं विशोधेत्पुरोभवायेति च कंठपीठम् ॥ ४४ ॥ सुबाहवेत्येव भुजौ शिरश्च सर्वात्मने पांडव पूजनीयौ ॥ स्वनाममंत्रेण च शंखचक्रे गदां नमस्कारपरेण चैव ॥ ४५ ॥ एभिर्मन्त्रैः पुष्पसुगन्धधूपैर्नैवेद्यदीपैर्विविधैः फलैश्च ॥ अभ्यर्च्य देवं कलशं तदग्रे संस्थापयेन्माल्यविलेपनाद्यम् ॥ ४६ ॥ तं रत्नगर्भं सुसुगंधतोयं कृत्वा ततो हेममयं स्वशक्त्या ॥ समंदरं कूर्मतनुं सुरेशं संस्थापयेच्चात्र शुभे च पात्रे ॥४७॥ घृतैश्च पूर्णे कलशाऽग्रसंस्थं संपूजयेज्जागरनृत्यगीतैः॥ संपूज्य विप्रान्घृतपाय

सेन निवेद्य पूर्वं द्विजपुङ्गवाय ॥ निर्वर्त्य सर्वं विधिवत्ततश्च भुञ्जीत संतुष्टमनाः सभृत्यः ॥ ४८ ॥ एवं कृते कल्पयुगांतराणि स्वर्गे वसेत्सर्वसमृद्धकामः ॥४९॥ संसारचक्रं स विहाय शीघ्रमाप्नोति लोके तु हरेः पुराणे ॥ प्रयांति पापानि विनाशमाशु श्रिया युतो जायति सत्यधर्मः ॥५०॥ अनेकजन्मार्जितसंयुतानि नश्यंति पापानि नरस्य भक्त्या ॥ प्रागुक्तरूपं च फलं लभेत नारायणं वस्तुमुपैति सद्यः ॥५१॥ एवं माघे सिते पक्षे द्वादशीं धरणीधर ॥ वराहस्य शृणुष्वान्यां राजन्परमधार्मिक ॥ ५२ ॥ प्रागुक्तेन विधानेन स्नानं संकल्पमेव च ॥ कृत्वा देवं समभ्यर्च्य एकादश्यां समाहितः ॥ ५३ ॥ धूपनैवेद्यगंधैस्तु अर्चयित्वा पुनर्नरः ॥ पश्चात्तस्याग्रतः कुंभं जलपूर्णं तु विन्यसेत् ॥ ५४ ॥ वराहायेति पादौ तु माधवायेति वै कटिम् ॥ क्षेत्रज्ञायेति जठरं विश्वरूपेत्युरो हरेः ॥५५॥ पूर्वत्रायेति कंठं तु प्रजानां पतये शिरः ॥ प्रद्युम्नायेति च भुजौ दिव्यास्त्राय सुदर्शनम् ॥५६॥ अमृतोद्भवाय शंखं तु गदिने च गदां तथा ॥ एवमभ्यर्च्य मेधावी तस्मिन्कुंभेऽपि विन्यसेत् ॥५७॥ सौवर्णं रूप्यं ताम्रं वा पात्रं विभवशक्तितः ॥ सर्वबीजैस्तु संपूर्णं स्थापयित्वा विचक्षणः ॥ ५८ ॥ तत्र शक्त्या च सौवर्णं वाराहं कारयेत्ततः ॥ दंष्ट्राग्रेणोद्धरन्पृथ्वीं सपर्वतवनद्रुमाम् ॥ ५९ ॥ माधवं मधुहंतारं वाराहं रूपमास्थितम् ॥ सर्वबीजभृतैः पात्रै रत्नगर्भघटोपरि ॥ ६० ॥ स्थापयेत्परमं देवं जातरूपमयं हरिम् ॥ सितवस्त्रयुगच्छन्नं ताम्राभावे तु वैणवे ॥ ६१ ॥ स्थाप्यार्चयेद्गन्धपुष्पैर्नैवेद्यैर्विविधैः फलैः ॥ पुष्पमंडपिकां कृत्वा जागरं तत्र कारयेत् ॥ ६२ ॥ प्रादुर्भावं हरेर्दिव्यं वाचयेद्वापयेद्बुधः ॥ एवं सनियमस्यास्य प्रभाते उदिते रवौ ॥ ६३ ॥ वेदवेदाङ्गविदुषे साधुवृत्ताय धीमते ॥ विष्णुभक्ताय राजेन्द्र विशेषेण प्रदापयेत् ॥ ६४ ॥ एवं सकुंभं दत्त्वा च हरिं वाराहरूपिणम् ॥ ब्राह्मणाय भवेद्यद्वत्फलं तन्मे निशामय ॥ ६५ ॥ इह जन्मनि सौभाग्यं श्रीकान्ती पुष्टिमेव च ॥ प्राप्नोति पुरुषो राजन्यद्यदिच्छति किंचन ॥ ६६ ॥ एकाऽपि विधिनोपास्ता ददात्यमृतमुत्तमम् ॥ किं पुनर्वर्षमेकं च करोति कुरुनंदन ॥ ६७ ॥ एषा च फाल्गुने मासि शुक्लपक्षे तु द्वादशी ॥ उपोष्या पूर्वविधिना हरिमाराधयेत्सुधीः ॥ ६८ ॥ नरसिंहाय पादौ तु गोविंदायोदरं तथा ॥ कटिं विश्वसृजे पूज्य अनिरुद्धेत्युरो हरेः ॥ ६९ ॥ कंठं तु शितिकंठाय वैनतेयाय वै शिरः ॥ असुरध्वंसनायेति वक्रं तोयात्मने नमः ॥ ७० ॥ शंखमित्येव संपूज्य गंधपुष्पैः फलैस्तथा ॥ तदग्रे तु घटं स्थाप्य सितवस्त्रयुगान्वितम् ॥ ७१ ॥ तस्योपरि नृसिंहं तु सौवर्णं ताम्रभाजने ॥ हैमे च शक्तितः कृत्वा दारुवंशमयेऽपि वा ॥ ७२ ॥ रत्नगर्भमये स्थाप्य भक्त्या संपूज्य मानवः ॥ द्वादश्यां वेदविदुषे ब्राह्मणाय निवेदयेत् ॥ ७३ ॥ एषा वंध्या पापहरा द्वादशी भवते मया ॥ कथिता च प्रयत्नेन श्रुता च भवतेप्सिता ॥ ७४ ॥

एवमेनां नरव्याघ्र चैत्रे संकल्प्य द्वादशीम् ॥ उपोष्याराधयेत्पश्चाद्देवदेवं जनार्दनम् ॥ ७५ ॥ कुण्डिकां स्थापयेत्पार्श्वे छत्रिकां पादुके तथा ॥
अमलं वामनं स्थाप्य बृसीं कांसपरिच्छदाम् ॥ ७६ ॥ फलैः पुष्पैः सुगन्धैश्च प्रभाते सद्द्विजातये ॥ दापयेत्प्रीयतां विष्णुर्ह्रस्वरूपीत्युदीरयेत् ॥
॥ ७७ ॥ मासनाम्नात्र संयुक्तं प्रादुर्भावं विधानतः ॥ प्रीयतामिति सर्वत्र विधिरेवं प्रकीर्तितः ॥ ७८ ॥ अपुत्रो लभते पुत्रमधनो धनमाप्नुयात् ॥
भ्रष्टराज्यो लभेद्राज्यं मृतो विष्णुपुरं व्रजेत् ॥ ७९ ॥ क्रीडित्वा सुचिरं कालमिह मर्त्यमुपागतः ॥ चक्रवर्ती भवेद्धीमान्ययातिरिति नाहुषः॥८०॥
वैशाखेऽप्येवमेवं तु संकल्प्य विधिवन्नरः ॥ तद्वत्स्नानं मृदा तद्वत्ततो देवालयं व्रजेत् ॥ ८१ ॥ तत्राराध्य हरिं भक्त्या एभिर्मन्त्रैर्विचक्षणः ॥ जाम
दग्न्याय पादौ तु उदरं सर्वधारिणे ॥ ८२ ॥ मधुसूदनायेति कटिमुरः श्रीवत्सधारिणे ॥ क्षत्रांतकाय च भुजौ मणिकण्ठाय कण्ठकम् ॥ ८३ ॥
पूजयेन्नियतो भूत्वा सुरूपायेति वै मुखम् ॥ स्वनाम्ना शंखचक्रे च शिरो ब्रह्मांडधारिणे ॥ ८४ ॥ एवमभ्यर्च्य मेधावी प्राग्वंशस्याग्रतो घटम् ॥
विन्यस्येत्पुष्पवस्त्राढ्यं सितचन्दनचर्चितम् ॥ ८५ ॥ वैणवेऽभिनवे पात्रे स्थापयेन्मधुसूदनम् ॥ जामदग्न्येन रूपेण कृत्वा सौवर्णमग्रतः ॥ ८६ ॥
दक्षिणे परशुं हस्ते तस्य देवस्य कारयेत् ॥ सर्वगन्धैस्तु संपूज्य पुष्पैर्नानाविधैः शुभैः ॥८७॥ ततस्तस्याग्रतः कुर्याज्जागरं भक्तिमान्नरः ॥ प्रभाते
विमले सूर्ये ब्राह्मणाय निवेदयेत् ॥ ८८ ॥ एवं नियमयुक्तस्य यत्फलं तन्निबोध मे ॥ काश्यपे ब्रह्मणो लोके चोषित्वाप्सरसां गणैः ॥ स्थित्वा
भौते च सृष्टौ च चक्रवर्ती भवेद्ध्रुवम् ॥ ८९ ॥ ज्येष्ठे मासेऽप्येवमेव संकल्प्य विधिवन्नरः ॥ अर्चयेत्परमं देवं पुष्पैर्नानाविधैः शुभैः ॥९०॥ नमो
दामोदरायेति पादौ पूर्वं समर्चयेत् ॥ त्रिविक्रमायेति कटिं धृतविश्वाय चोदरम् ॥९१॥ उरः संवर्तकायेति कण्ठं संवत्सराय च ॥ सर्वास्त्रधारिणे बाहुं
स्वनाम्नाब्जरथांगके ॥ ९२ ॥ सहस्रशिरसेऽभ्यर्च्य शिरस्तस्य महात्मनः ॥ एवमभ्यर्च्य विधिवत्प्रागुक्तविधिवन्न्यसेत् ॥ ९३ ॥ प्राग्वद्वस्त्रसुगन्धैश्च
सौवर्णौ रामलक्ष्मणौ ॥ अर्चयित्वा विधानेन प्रभाते ब्राह्मणाय तौ ॥ दातव्यौ मनसा काममीहता पुरुषेण तु ॥ ९४ ॥ अपुत्रेण पुरा पृष्टो राज्ञा
दशरथेन तु ॥ पुत्रकामेन यजता वशिष्ठः परमार्चितः ॥ ९५ ॥ इदमेव विधानं तु कथयामास वै द्विजः ॥ सरहस्यं विदित्वात्र स राजा कृतवानि
दम् ॥ ९६ ॥ तस्य पुत्रः स्वयं जज्ञे रामो नाम महाबलः ॥ चतुर्द्धा सोऽव्ययो विष्णुः परितोषादजायत ॥ एतदेवं मयाख्यातं परलोके सुखप्र
दम् ॥ ९७ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ आषाढेऽप्येवमेवं तु संकल्प्य विधिना नरः ॥ अर्चयेत्परमं देवं गंधपुष्पैः समाहितः ॥ ९८ ॥ वासु
देवाय पादौ तु कटिं संकर्षणाय च ॥ प्रद्युम्नायेति जठरमनिरुद्धाय वै नमः ॥ ९९ ॥ चक्रपाणिं भुजौ कंठं मुखं भूपतये तथा ॥ स्वनाम्ना शंख

चक्रे तु पुरुषायेति वै शिरः ॥ १०० ॥ एवमभ्यर्च्य मेधावी प्राग्वत्तस्याग्रतो घटम् ॥ विन्यस्य वस्त्रसंयुक्तं तस्योपरि ततो न्यसेत् ॥ कांचनं वासुदेवेति चक्रबाहुं सनातनम् ॥ १०१ ॥ तमभ्यर्च्य विधानेन गंधपुष्पादिभिः क्रमात् ॥ प्राग्वत्तद्ब्राह्मणे दद्याद्वेदवादिनि सुव्रते ॥ १०२ ॥ एषा ह्युपोषिता राजन्विद्यां विप्रे प्रयच्छति ॥ राज्यं च भ्रष्टराज्यानामपुत्राणां सुतान्बहून् ॥१०३॥ मृतो विष्णुपुरे रम्ये क्रीडते कालमक्षयम्॥१०४॥ मन्वंतराणि षट्त्रिंशत्ततः कालात्यये पुनः ॥ इह लोके भवेद्राजा सप्तजन्मनि मानवः ॥ दाता यशःक्षमायुक्तस्ततो निर्वाणमाप्नुयात् ॥ १०५ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ एवमेवं श्रावणे तु मासि संकल्प्य द्वादशीम् ॥ अर्चयेत्परमं देवं गंधपुष्पनिवेदनैः ॥ १०६ ॥ बुधाय पादौ संपूज्य श्रीधरायेति वै कटिम् ॥ पद्मोद्भवाय जठरमुरः संवत्सराय च ॥ १०७ ॥ सुग्रीवायेति वै कण्ठं भुजौ वैचित्रबाहवे ॥ प्राग्वदस्त्राणि संपूज्य ब्राह्मणाय निवेदयेत् ॥ १०८ ॥ अनेन विधिना सर्वां द्वादशीं समुपोषितः ॥ शुद्धौदनेन तस्याभूत्स्वयं पुत्रो जनार्दनः ॥ १०९ ॥ महतीं च श्रियं प्राप्य पुत्रपौत्रसमन्वितः ॥ भुक्त्वा राज्यश्रियं सोथ गतः परमिकां गतिम् ॥ ११० ॥ एष ते विधिरुद्दिष्टः श्रावणे मासि सत्तम ॥ एकैकोपोषिताप्यस्तु राज्यमेकैव यच्छति ॥ किं पुनर्द्वादशैवात्र दद्युरैन्द्रं महत्पदम् ॥ १११ ॥ तद्वद्भाद्रपदे मासि शुक्लपक्षे तु द्वादशीम् ॥ संकल्प्य विधिना देवमर्चयेत्परमेश्वरम् ॥ ११२ ॥ नमोऽस्तु कल्किने पादौ हृषीकेशाय वै कटिम् ॥ म्लेच्छप्रध्वंसनायेति जगन्मूर्ते तथोदरम् ॥ ११३ ॥ शितिकण्ठाय कण्ठं तु खड्गपाणीति वै भुजौ ॥ शंखचक्रे स्वनाम्नात्र विश्वमूर्ते तथासितः ॥ ११४ ॥ एवमभ्यर्च्य मेधावी प्राग्वत्तस्याग्रतो घटम् ॥ विन्यस्य कल्किनं देवं सौवर्णं तत्र कारयेत् ॥ ११५ ॥ सितवस्त्रयुगच्छन्नं गंधपुष्पोपशोभितम् ॥ कृत्वा प्रभाते विप्राय प्रदेयः शास्त्रवित्तमे ॥ ॥ ११६ ॥ एवं कृते भवेद्यत्तु तन्निबोध नृपोत्तम ॥ दशावतारदानेन पूजने चैव तत्फलम् ॥ ११७ ॥ पूज्यते मत्स्यरूपेण सर्वज्ञत्वमभीप्सुभिः ॥ स्ववंशभरणायाथ कूर्मरूपी तु पूज्यते ॥ ११८ ॥ भवोदधिनिमग्नैस्तु वाराहः पूज्यते हरिः ॥ नृसिंहनवरूपेण तद्वत्पापभयान्नरः ॥ ११९ ॥ वामनं मोहनाशाय वित्तार्थे जमदग्निजम् ॥ क्रूरशत्रुविनाशाय यजेद्दाशरथिं बुधः ॥ १२० ॥ बलकृष्णौ यजेद्धीमान्पुत्रकामो न संशयः ॥ रूपकामो यजेद्बुद्धं कल्किनं शत्रुघातने ॥ सर्वां दत्त्वा विधानेन पूजां प्राप्नोति वांछितम् ॥ १२१ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ तद्वदाश्वयुजे मासि शुक्लपक्षे तु द्वादशीम् ॥ संकल्प्याभ्यर्चयेद्देवं पद्मनाभं सनातनम् ॥ १२२ ॥ पद्मनाभाय पादौ तु कटिं वै पद्मयोनये ॥ उदरं सर्वदेवाय पुष्कराक्षाय वा उरः ॥ अव्ययाय तथा शीर्षं प्राग्वदस्त्राणि पूजयेत् ॥ १२३ ॥ ततस्तस्याग्रतः कुंभं माल्यवस्त्रसमन्वितम् ॥ यथाशक्त्या

काञ्चनेन पद्मनाभेति भूषितम् ॥ १२४ ॥ रात्रौ तु जागरं कृत्वा प्रभाते विमले ततः ॥ ब्राह्मणे तत्प्रदातव्यं संसारभयभीरुणा ॥ १२५ ॥ एवं
कृते तु यत्पुण्यं तद्वक्तुं शक्यते कथम् ॥ ब्रह्महत्यादिपापानि किं तु पंचैव भारत ॥ नश्यंति कृतपुण्यस्य विष्णोर्नामानुकीर्तनात् ॥ १२६ ॥
॥ ॥ श्रीकृष्ण उवाच ॥ ॥ शृणु राजन्महाबाहो कार्तिके मासि द्वादशीम् ॥ उपोष्य विधिना येन यथास्याः प्राप्यते फलम् ॥ १२७ ॥ प्राग्वि
धानेन संकल्प्य वासुदेवं प्रपूजयेत् ॥ अनुलोमेन देवेशं पूजयित्वा विचक्षणः ॥ नमो दामोदरायेति सर्वाङ्गं पूजयेद्धरिम् ॥ १२८ ॥ एवं संपूज्य
विधिना तस्याश्च चतुरो घटान् ॥ स्थापयेद्रत्नगर्भांश्च सितचन्दनचर्चितान् ॥ १२९ ॥ स्रग्दामालंबितग्रीवान्सितवस्त्रैश्च गुण्ठितान् ॥ स्थगितां
स्ताम्रपात्रे तु तिलपूर्णैः सकांचनैः ॥ १३० ॥ चत्वारः सागरास्ते च कथिता राजसत्तम ॥ तन्मध्ये प्राग्विधानेन सौवर्णं स्थापयेद्धरिम्॥१३१॥
योगेश्वरमंगनिधिं विरक्तं पीतवाससम् ॥ तद्वद्देवं च संपूज्य जागरं तत्र कारयेत् ॥ १३२ ॥ कृत्वा तु वैष्णवं योगं यजेद्योगेश्वरं हरिम् ॥ षोडशे
वै रथांगेषु रजोभिर्बहुभिः कृते ॥ १३३ ॥ एवं कृत्वा प्रभाते तु ब्राह्मणान्पञ्च भोजयेत् ॥ चत्वारः कलशा देयाश्चतुर्णां पञ्चमस्य हि ॥ १३४ ॥
योगेश्वरं च सौवर्णं दापयेत्प्रयतः शुचिः ॥ ब्राह्मणाय समं दत्तं द्विगुणं वेदवादिने॥१३५॥ वेदवेदांगविदुषे सहस्रगुणितं भवेत् ॥ पंचमस्य रहस्यं
तु ससमं चोपपादयेत् ॥१३६॥ विधानं तस्य पंचैव दत्त्वा कोटिगुणोत्तरम् ॥ इतिहासपुराणज्ञे दत्तं चैवाक्षयं भवेत् ॥ १३७ ॥ पञ्चदत्त्वा विधा
नेन द्वादश्यां विष्णुमर्च्य च ॥ विप्राणां भोजनं दद्याद्यथाशक्त्या सदक्षिणम् ॥ दीनानाथादिकान्सर्वान्पूजयेच्छक्तितो नृप ॥१३८॥ धरणीव्रतमे
तत्तु पुरा कृत्वाप्रजापतिः ॥ प्रजां लेभे ततो मुक्तिर्ब्रह्मणा विष्णवे शुभे ॥ १३९ ॥ युवनाश्वो हि राजर्षिरनेन विधिना पुरा ॥ मान्धातारं सुतं
लेभे परं ब्रह्म च शाश्वतम् ॥ १४० ॥ तथा हैहयदायादः कृतवीर्यो नराधिपः ॥ चक्रवर्तिसुतं लेभे सहस्रार्जुनमूर्जितम् ॥१४१॥ शकुंतलाप्येवमेव
व्रतं चीर्त्वा नरोत्तमम् ॥ लेभे शाकुन्तलं पुत्रं दुष्यंतश्चक्रवर्तिनम् ॥ १४२ ॥ तथा पुराणराजानो वेदोक्ताश्चक्रवर्तिनः ॥ अनेन विधिना प्राप्ताश्च
क्रवर्तित्वमुत्तमम् ॥ १४३ ॥ धरण्या अपि पाताले मग्नयाचरितं पुरा ॥ व्रतमेतत्ततो नाम्ना धरणीव्रतमुच्यते ॥ १४४ ॥ समाप्तेऽस्मिंस्तदा देवी
हरिणा क्रोडरूपिणा ॥ उद्धृता दशनाग्रेण स्थापिता नौरिवांभसि ॥ १४५ ॥ धरणीव्रतमेतत्ते कथितं पांडुनन्दन ॥ य इदं शृणुयाद्भक्त्या यश्च
कुर्यान्नरोत्तम ॥ सर्वपापविनिर्मुक्तो विष्णुसायुज्यमाव्रजेत् ॥ १४६ ॥ चीर्णं रसातलतले गतया धरण्या तेन प्रसिद्धिमगमद्धरणीव्रतेति ॥ सद्यः

समाचरति धर्मरतिर्द्धरित्र्यामुद्धृत्य सप्त पुरुषान्स परं प्रयाति ॥ १४७ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे धरणीव्रतं नाम त्र्यशीतितमोऽध्यायः ॥ ८३ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ किमभीष्टवियोगशोकसंघाल्लघु इह समुपोषतां व्रतं वा ॥ विभवोद्भवकारि भूतलेऽस्मिन्भवति विभो भयसूदनं च पुंसाम् ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ परिपृष्टमिदं जगत्प्रियं ते विबुधानामपि दुर्ल्लभं महत्त्वात् ॥ तव भक्तिमतस्तथापि वक्ष्ये व्रतमिन्द्रासुरदानवेषु गुह्यम् ॥२॥ पुण्यमाश्वयुजे मासि विशोकद्वादशीव्रतम् ॥ दशम्यां लघुभुग्विद्वानारभेन्नियमेन तु ॥ ३ ॥ उदङ्मुखः प्राङ्मुखो वा दंतधावनपूर्वकम् ॥ एकादश्यां निराहारः सम्यगभ्यर्च्य केशवम् ॥ ४ ॥ विधिवत्त्वां समभ्यर्च्य भोक्ष्यामि अपरेऽहनि ॥ एवं नियमकृत्सुप्त्वा प्रातरुत्थाय मानवः ॥ ५ ॥ स्नानं सर्वौषधैः कुर्यात्पञ्चगव्यजलेन तु ॥ शुक्लमाल्यांबरस्तद्वत्पूजयेच्छ्रीशमुत्पलैः ॥ ६ ॥ विशोकाय नमः पादौ जंघे च वरदाय वै ॥ श्रीशाय जानुनी तद्वदूरू च जलशायिने ॥ ७ ॥ कंदर्पाय नमो गुह्ये माधवाय नमः कटिम् ॥ दामोदरायेत्युदरं पार्श्वे च विपुलाय वै ॥ ८ ॥ नाभिं च पद्मनाभाय हृदयं मन्मथाय वै ॥ श्रीधराय विभोर्वक्षः करौ मधुभिदे नमः ॥ ९ ॥ चक्रिणे नाम बाहुं च दक्षिणं गदिने नमः ॥ वैकुण्ठाय नमः कण्ठमास्यं यज्ञमुखाय वै ॥ १० ॥ नासामशोकनिधये वासुदेवाय चाक्षिणी ॥ ललाटं वामनायेति किरीटं विश्वरूपिणे ॥ ११ ॥ नमः सर्वात्मने तद्वच्छिर इत्यभिपूजयेत् ॥ एवं संपूज्य गोविंदं फलमाल्यानुलेपनैः ॥ १२ ॥ ततस्तस्याग्रतो भव्यं स्थंडिलं कारयेन्मृदा ॥ चतुरस्रं समंताच्चारत्निमात्रमुदग्भवम् ॥ १३ ॥ नदीवालुकया पूर्णं लक्ष्म्याकृतिं कृती न्यसेत् ॥ स्थंडिले सूर्यमारोप्य लक्ष्मीमित्यर्चयेद्बुधः ॥ १४ ॥ नमो देव्यै नमः शांत्यै नमो लक्ष्म्यै नमः श्रियै ॥ नमः पुष्ट्यै नमस्तुष्ट्यै नमो[१] हृष्ट्यै नमोनमः ॥ १५ ॥ विशोका दुःखनाशाय विशोका वरदास्तु मे ॥ विशोका वास्तु संतत्यै विशोका सर्वसिद्धये ॥१६॥ ततः शुक्लांबरधरो शूर्पं संवेष्ट्य पूजयेत् ॥ भक्ष्यैर्नानाविधैस्तद्वत्सुवर्णकमलेन च ॥ १७ ॥ रजनीषु च सर्वासु पिबेद्दर्भोदकं व्रती ॥ ततस्तु नृत्यगीतादि कारयेत्सर्वरात्रकम् ॥ १८ ॥ यामत्रये व्यतीते तु सुप्त्वा स्वस्थोपमानसः ॥ अभिगम्य च विप्राणां मिथुनानि सदार्चयेत् ॥ १९ ॥ शक्तितस्त्रीणि चैकं वा वस्त्रमाल्यानुलेपनैः ॥ शयनास्थानि पूज्यानि नमोऽस्तु जलशायिने ॥ २० ॥ ततस्तु गीतवाद्याद्यै रात्रौ जागरणे कृते ॥ प्रभाते विमले स्नानं कृत्वा दांपत्यमर्चयेत् ॥ २१ ॥

---

[१] हृष्टयै कृष्टयै नमोनमः—इ० पा० ।

भोजनं च यथाशक्त्या वित्तशाठ्यविवर्जितः ॥ भुक्त्वा श्रुत्वा पुराणानि तद्दिनं त्वतिवाहयेत् ॥ २२ ॥ अनेन विधिना सर्वं मासिमासि समाचरेत् ॥ व्रतांते शयनं दद्याद्गुडधेनुसमन्वितम् ॥ सोपधानकविश्राममास्तरावरणं शुभम् ॥ २३ ॥ यथा न लक्ष्मीर्देवेश त्वां परित्यज्य गच्छति ॥ तथा कुरु यथायोग्यमशोकं चास्तु मे सदा ॥२४॥ यथा देवेन रहिता न लक्ष्मीर्जायते क्वचित् ॥ तथा विशोकता मेऽस्तु भक्तिरग्र्या च केशवे ॥ ॥ २५ ॥ मंत्रेणानेन ध्यात्वा तु गुडधेनुसमन्वितम् ॥ शूर्पं च लक्ष्म्या सहितं दातव्यं भूतिमिच्छता ॥ २६ ॥ उत्पातं करवीरं च बाणमम्लानकुंडलम् ॥ केसरं सिंदुवारं च मल्लिकागंधपाटलम् ॥ कादंबैः कुंकुमैर्जात्या तथान्यैरपि पूजयेत् ॥ २७ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ गुडधेनुविधानं मे त्वमाचक्ष्व जगत्पते ॥ किंरूपा केन मंत्रेण दातव्या तदिहोच्यताम् ॥२८॥ ॥ श्रीकृष्ण उवाच ॥ ॥ गुडधेनुविधानं च यद्रूपमिह यत्फलम् ॥ तदिदानीं प्रवक्ष्यामि सर्वपापप्रणाशनम् ॥ २९ ॥ कृष्णाजिनं चतुर्हस्तं प्रागेवं विन्यसेद्भुवि ॥ गोमये[illegible]नुलिप्तायां दर्भानास्तीर्य सर्वतः ॥ ॥ ३० ॥ लब्धेन कांचनं तद्वद्वत्सं च परिकल्पयेत् ॥ प्राङ्मुखीं कल्पयेद्धेनुमुदक्पादां सवत्सिकाम् ॥ ३१ ॥ उत्तमा गुडधेनुः स्यात्सदा भारचतुष्टया ॥ वत्सं भारेण कुर्वीत द्वाभ्यां वै मध्यमा स्मृता ॥ ३२ ॥ अर्द्धभारेण वत्सः स्यात्कनिष्ठा भारकेण तु ॥ चतुर्थांशेन वत्सः स्याद्गृहवित्तानुसारतः ॥ ३३ ॥ धेनुवत्सौ कृतावेतौ सितसूक्ष्मांबरावृतौ ॥ शुक्तिकर्णाविक्षुपादौ शुक्तिमुक्ताफलेक्षणौ ॥ ३४ ॥ सितसूत्रशिरालौ तु सितकंबलकंबलौ ॥ ताम्रगल्लकपृष्ठौ तौ सितचामररोमकौ ॥ ३५ ॥ विद्रुमभ्रूयुगावेतौ नवनीतस्तनान्वितौ ॥ क्षौमपुच्छौ कांस्यदोहाविन्द्रनीलकतारकौ ॥ ॥३६॥ सुवर्णशृंगाभरणौ राजतखुरसंयुतौ ॥ नानाफलसमायुक्तौ घ्राणगंधकरंडकौ ॥ इत्येवं रचयित्वा तु धूपदीपैरथार्चयेत् ॥ ३७ ॥ या लक्ष्मीः सर्वभूतानां या च देवे व्यवस्थिता ॥ धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥ ३८ ॥ विष्णोर्वक्षसि या लक्ष्मीः स्वाहायां च विभावसौ ॥ चंद्रार्कशक्रशक्तिर्या धेनुरूपास्तु सा श्रिये ॥ ३९ ॥ चतुर्मुखस्य या लक्ष्मीर्या लक्ष्मीर्धनदस्य च ॥ या लक्ष्मीर्लोकपालानां सा धेनुर्वरदास्तु मे ॥ ॥ ४० ॥ स्वधा त्वं पितृमुख्यानां स्वाहा यज्ञभुजां पुनः ॥ सर्वपापहरे धेनो तस्माद्भूतिं प्रयच्छ मे ॥ ४१ ॥ एवमामंत्र्य तां धेनुं ब्राह्मणाय निवेदयेत् ॥ विधानमेतद्धेनूनां सर्वासामिह पठ्यते ॥ ४२ ॥ यास्तु पापविनाशिन्यः श्रूयंते दश धेनवः ॥ तासां स्वरूपं वक्ष्यामि नामानि च नराधिप ॥ ४३ ॥ प्रथमा गुडधेनुः स्याद् घृतधेनुरथापरा ॥ तिलधेनुस्तृतीया स्याच्चतुर्थी मधुधेनुका ॥ ४४ ॥ जलधेनुः पंचमी तु षष्ठी तु क्षीरसंभवा ॥ सप्तमी शर्कराधेनुर्दधिधेनुरथाष्टमी ॥ रसधेनुश्च नवमी दशमी स्यात्स्वरूपतः ॥ ४५ ॥ कुंभा स्युर्दशधेनूनामितरासां तु राशयः ॥

सुवर्णधेनुमप्यत्र केचिदिच्छंति मानवाः ॥ ४६ ॥ नवनीतेन रत्नैश्च तथाप्यन्ये महर्षयः ॥ एतदेव विधानं स्यात्त एवोपस्कराः स्मृताः ॥ ४७ ॥ मंत्रावाहनसंयुक्तां सदा पर्वणिपर्वणि ॥ यथाश्रद्धं प्रदातव्या भुक्तिमुक्तिफलप्रदा ॥ ४८ ॥ गुडधेनुप्रसंगेन सर्वास्तव मयोदिताः ॥ अशेषयज्ञफलदाः सर्वपापहराः शुभाः ॥ ४९ ॥ व्रतानामुत्तमं यत्स्याद्विशोकद्वादशीव्रतम् ॥ तदंगत्वेन चैवैषा गुडधेनुः प्रशस्यते ॥ ५० ॥ अयने विषुवे पुण्ये व्यतीपातेऽथ वा पुनः ॥ गुडधेन्वादयो देया उपरागादिपर्वसु ॥ ५१ ॥ विशोकद्वादशी चैषा सर्वपापहरा शुभा ॥ यामुपोष्य नरो याति तद्विष्णोः परमं पदम् ॥ ५२ ॥ इह लोके तु सौभाग्यमायुरारोग्यमेव च ॥ वैष्णवं पदमाप्नोति मरणे सद्गतिर्भवेत् ॥ ५३ ॥ भवार्बुदसहस्राणि दश चाष्टौ च धर्मवित् ॥ न शोकदुःखदौर्गत्यं तस्य संजायते नृप ॥ ५४ ॥ नारी वा कुरुते यातु विशोकद्वादशीमिमाम् ॥ नृत्यगीतपरा नित्यं सापि तत्फलमाप्नुयात् ॥ ५५ ॥ इति पठति य इत्थं यः शृणोतीह सम्यङ् मधुपुरनरकारेरर्चनं यश्च पश्येत् ॥ मतिमपि च जनानां यो ददातीन्द्रलोके वसति स विबुधाद्यैः पूज्यमानः सदैव ॥ ५६ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे विशोकद्वादशीव्रतं नाम चतुरशीतितमोऽध्यायः ॥ ८४ ॥ ॥ छ ॥

॥ श्रीकृष्ण उवाच ॥ ॥ शृणु भूपाल वक्ष्यामि विष्णुव्रतमनुत्तमम् ॥ विभूतिद्वादशीं नाम सर्वामरनमस्कृतम् ॥ १ ॥ कार्त्तिके वाथ वैशाखे मार्गशीर्षे च फाल्गुने ॥ आषाढे वा दशम्यां च शुक्लायां लघुभुङ्नरः ॥ २ ॥ कृत्वा सायंतनीं संध्यां गृह्णीयान्नियमं बुधः ॥ एकादश्यां निराहारः समभ्यर्च्य जनार्दनम् ॥ ३ ॥ द्वादश्यां द्विजसंयुक्तः करिष्ये भोजनं विभो ॥ तदविघ्नेन मे यातु साफल्यं मधूसूदन ॥ ४ ॥ ततः प्रभात उत्थाय कृतस्नानजपः शुचिः ॥ पूजयेत्पुण्डरीकाक्षं शुक्लमाल्यानुलेपनैः ॥ ५ ॥ भूतिदाय नमः पादौ विशोकाय च जानुनी ॥ नमः शिवायेत्यूरू च विश्वमूर्ते नमः कटिम् ॥ ६ ॥ कंदर्पाय नमो मेढ्रमादित्याय नमः करौ ॥ दामोदरायेत्युदरं वासुदेवाय च स्तनौ ॥ ७ ॥ माधवायेति हृदयं कंठं वैकुंठिने नमः ॥ श्रीधराय मुखं केशान्केशवायेति पांडव ॥ ८ ॥ पृष्ठं शार्ङ्गधरायेति श्रवणौ वरदाय वै ॥ स्वनाम्ना शंखचक्रासिगदापरशुपाणये ॥ ९ ॥ सर्वात्मने शिरो राजन्नम इत्यभिपूजयेत् ॥ दशावताररूपाणि प्रतिमासं क्रमान्नृप ॥ १० ॥ दत्तात्रेयं यथा व्यासमुत्पलेन समन्वितम् ॥ दद्यादनेन विधिना पाखंडानपि वर्जयेत् ॥ ११ ॥ समाप्यैवं यथाशक्त्या द्वादश द्वादशीर्नरः ॥ संवत्सरांते लवणपर्वतेन सह प्रभो ॥ शय्यां दद्यान्मुनिश्रेष्ठ गुरवे रससंयुताम् ॥ ॥ १२ ॥ ग्रामं च शक्तिमान्दद्यात्क्षेत्रं वा भवनान्वितम् ॥ गुरुं संपूज्य विधिवद्वस्त्रालंकारभूषणैः ॥ १३ ॥ अन्यानपि यथाशक्त्या भोजयित्वा

द्विजोत्तमान् ॥ तर्पयेद्वस्त्रगोदानैरन्यत्र धनसंचयात् ॥ १४ ॥ अल्पवित्तो यथाशक्त्या स्तोकंस्तोकं समाचरेत् ॥ यश्चातिनिःस्वः पुरुषो भक्तिमान्माधवं प्रति ॥ पुष्पार्चनविधानेन स कुर्याद्वत्सरत्रयम् ॥ १५ ॥ अनेन विधिना यस्तु विभूतिद्वादशीव्रतम् ॥ कुर्यात्स पापनिर्मुक्तः पितॄणां तारयेच्छतम् ॥ १६ ॥ जन्मनां शतसाहस्रं न शोकफलभाग्भवेत् ॥ न च व्याधिर्भवेत्तस्य न दारिद्र्यं न बन्धनम् ॥ १७ ॥ वैष्णवो वाथ शैवो वा भवेज्जन्मनिजन्मनि ॥ यावद्युगसहस्राणां शतमष्टोत्तरं भवेत् ॥ तावत्स्वर्गे वसेद्राजन्भूपतिश्च पुनर्भवेत् ॥ १८ ॥ पुरा रथंतरे कल्पे राजासीत्पुष्पवाहनः ॥ नाम्ना लोकेषु विख्यातस्तेजसा सूर्यसन्निभः ॥ १९ ॥ तपसा तस्य तुष्टेन चतुर्वक्त्रेण भारत ॥ कमलं काञ्चनं दत्तं यथाकामगतिः सदा ॥ २० ॥ समस्तभृत्यसहितः सांतःपुरपरिस्थितः ॥ द्वीपानि सुरलोकं च यथेष्टं विचरत्यसौ ॥ २१ ॥ कल्पादौ सप्तमे द्वीपे तेन पुष्करवासिनः ॥ लोके संपूजिता यस्मात्पुष्करद्वीप उच्यते ॥ २२ ॥ तदैव ब्रह्मणा दत्तं यानमस्य यतो नृप ॥ पुष्पवाहनमित्याहुस्तस्मात्तं देवदानवाः ॥ २३ ॥ नागस्य तस्यास्य जगत्त्रयेपि ब्रह्मांबुजस्थस्य तपोऽनुभावात् ॥ पत्नी च तस्याप्रतिमा नरेन्द्र नारीसहस्रैरभितोऽभिनंद्या॥२४॥ नाम्ना च लावण्यवती बभूव या पार्वतीवेष्टतमा भवस्य ॥ तस्यात्मजानामयुतं बभूव धर्मात्मनामग्र्यधनुर्द्धराणाम् ॥ २५ ॥ तदात्मनः सर्वमवेक्ष्य राजा मुहुर्मुहुर्विस्मयमाससाद ॥ सोभ्यागतं पूज्य मुनिप्रवीरं प्रचेतसं वाचमिमां बभाषे ॥ २६ ॥ कस्माद्विभूतिरमला मम मर्त्यपूज्या जाया च सर्वविजितामरसुन्दरी या ॥ भार्या त्वनल्पतपसा वसुतोषितेन दत्तं ममांबुजगृहं परमप्रसादात् ॥ २७ ॥ यस्मिन्प्रविष्टमपि कोटिशतं नृपाणां सामात्यकुंजरनराश्वघनावृतानाम् ॥ नालक्ष्य सम्बाधतया हि बाधस्तारागणैरपि सुरासुरलोकपालैः ॥ २८ ॥ तस्मात्किमन्यजननीजठरोद्भवेन धर्मादिकं कृतमशेषजनातिगं स्यात् ॥ सम्यङ्मयाथ तनयैरनया महर्षे माहार्यया तदखिलं कथय प्रचेतः ॥२९॥ तस्य तद्वचनं श्रुत्वा ध्यानेनावेक्ष्य चाखिलम् ॥ प्रचेतास्तमुवाचाथ शृणु भूप पुरातनम् ॥ ३० ॥ लुब्धकस्त्वं पुरा राजन्सर्वसत्त्वभयंकरः ॥ आसीदसाधुचरितः सुहृन्मित्रविवर्जितः ॥ ३१ ॥ यतमध्यो ह्रस्वकेशः कृष्णांगो रक्तलोचनः ॥ धनुष्पाणिर्वनगतः कृतांतकसमो भवान् ॥३२॥ अभूदनावृष्टिरतीव रौद्रा कदाचिदाहारनिमित्तरोषः ॥ पद्मान्यथादाय ततो बहूनि गतं पुरं वैदिशनामधेयम् ॥ ३३ ॥ उन्मूल्य लोभाच्च पुरं समस्तं भ्रांतं त्वयाशेषमहत्तदासीत् ॥ क्रेता न कश्चित्कमलेषु जातस्तोके भृशं क्षुत्परिपीडितश्च ॥ ३४ ॥ उपविष्टस्त्वमेकस्मिन्सभार्यो भवनांगणे ॥ अथ मंगलशब्दस्तु त्वया रात्रौ तथा श्रुतः ॥ ३५ ॥ समाप्य माघमासस्य द्वादश्यां लवणाचलम् ॥ निवेदयंती गुरवे शय्यां चोपस्करान्विताम् ॥ ३६ ॥ अलंकृत्य हृषीकेशं

सौवर्णं परमं पदम् ॥ साथ दृष्टा ततस्ताभ्यामिदं चित्तेवधारितम्॥३७॥किमेभिः कमलैः कार्यं वरं विष्णुरलंकृतः॥ इति भक्तिस्तदा जाता दांपत्यस्य
नरेश्वर ॥ ३८ ॥ तत्प्रसंगात्समभ्यर्च्य केशवं लवणाचलम् ॥ शय्या च पुष्पप्रकरैः पूजिताभूच्च सर्वदा ॥ ३९ ॥ अथानंगवती तुष्टा तयोर्होनशतत्र
यम् ॥ प्रादाद्गृहीतं ताभ्यां च न तत्सर्वावलंबनात् ॥ ४० ॥ अनंगवती च पुनस्तयोरन्नं चतुर्विधम् ॥ आनाय्योपहृतं कृत्वा भुज्यतामिति भूपते॥
॥४१॥ ताभ्यां तु तदपि त्यक्तं भोज्यावः श्वो वरानने ॥ प्रसंगाच्चोपवासेन तवाद्यास्तु सुखावहः ॥ ४२ ॥ जन्मप्रभृति पापिष्ठावावां देवि दृढव्रते ॥
सत्प्रसंगाद्धनुर्मध्ये धर्मलाभस्तु चावयोः ॥ ४३ ॥ इति जागरणं ताभ्यां प्रसंगात्तदनुष्ठितम् ॥ प्रभाते च तया दत्ता शय्या सलवणाचला ॥ ४४ ॥
ग्रामश्च गुरवे भक्त्या विप्रेभ्यो द्वादशैव हि ॥ वस्त्रालंकारयुक्तांगा गावश्च कनकांचिताः ॥ ४५ ॥ भोजनं च सुहृन्मित्रदीनांधकृपणैः समम् ॥
तच्च लुब्धकदांपत्यं पूजयित्वा विसर्जितम् ॥४६॥ भवाँस्तु लुब्धको जातः सपत्नीको नरेश्वरः ॥ पुष्पाणां प्रकरे तस्मात्केशवस्य प्रपूजनम् ॥४७॥
प्राप्तं सुदुर्लभं वीर त्वया पुष्करमन्दिरम् ॥ तस्य सर्वस्य माहात्म्यादलं न तपसा नृप ॥ ४८ ॥ यथा कामगतं दक्षं पद्मयोनिं विरिंचिना ॥ संतुष्ट
स्तस्य राजेन्द्र ब्रह्मरूपी जनार्दनः ॥ ४९ ॥ शय्यानंगवती वेश्या कोमदेशस्य सांप्रतम् ॥ पत्नी सपत्नी संजाता रत्या प्रीतिरिति श्रुता ॥ ५० ॥
लोकेष्वानंदजननी सकलामरपूजिता ॥ तदप्युत्सृज्य राजेन्द्र निर्वाणं समवाप्स्यसि ॥ ५१ ॥ इत्युक्त्वा स मुनिः सर्वं तत्रैवांतर्हितोभवत् ॥
राजा यथोक्तं च पुनः स चक्रे पुष्पवाहनः ॥ ५२ ॥ इमामाचरतो ब्रह्मन्नखण्डव्रतमाचरेत् ॥ यथाकथंचित्कालेन द्वादश द्वादशीर्मुने ॥ कर्तव्याः
शक्तितो देया विप्रेभ्यो दक्षिणा नृप ॥ ५३ ॥ इति कलुषविदारणं जनानामिति पठति शृणोति चातिभक्त्या ॥ मतिमपि च ददाति देवलोके
वसति स परःशतानि वत्सराणाम् ॥ ५४ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे विभूतिद्वादशीव्रतवर्णनं नाम
पंचाशीतितमोऽध्यायः ॥ ८५ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ श्रोतुमिच्छामि भगवन्मदनद्वादशीव्रतम् ॥ सुतानेकोनपंचाशद्येन लेभे दितिः
पुरा ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ तद्वशिष्ठादिभिः प्रोक्तमित्येका तिथिरुत्तमा ॥ विस्तरेण तदेवेदं मत्सकाशान्निबोधत ॥ २ ॥ चैत्रे मासे सिते
पक्षे द्वादश्यां नियतव्रतः ॥ स्थापयेदव्रणं कुंभं सिततंडुलपूरितम् ॥ ३ ॥ नानाफलयुतं तद्वदिक्षुदण्डसमन्वितम् ॥ सितवस्त्रयुगच्छन्नं सितचन्दन
चर्चितम् ॥ ४ ॥ नानाभक्ष्यसमोपेतं सहिरण्यं च शक्तितः ॥ ताम्रपात्रं गुडोपेतं तस्योपरि निवेदयेत् ॥ ५ ॥ तस्योपरि तथा कामं कदलीदल
संस्थितम् ॥ कुर्याच्छर्करयोपेतमिति तस्य समीपतः ॥ ६ ॥ गंधं पुष्पं तथा दद्याद्गीतं वाद्यं च कारयेत् ॥ तदलाभे कथां कुर्यात्कामकेशवयो

नरः ॥ ७ ॥ कामं नाम्ना हरेरर्चां स्नापयेद्गंधवारिणा ॥ शुक्लपुष्पाक्षततिलैरर्चयेन्मधुसूदनम् ॥ ८ ॥ कामाय पादौ संपूज्य जंघे सौभाग्यदाय
च ॥ मन्मथाय तथा मेढ्रं माधवाय कटिं नमः ॥ ९ ॥ शांतोदरायेत्युदरमनंगायेत्युरो हरेः ॥ मुखं पद्ममुखायेति बाहुं पञ्चशराय वै ॥ १० ॥
नमः सर्वात्मने मौलिमर्चयेदिति केशवम् ॥ ततः प्रभाते कुंभं च ब्राह्मणाय निवेदयेत ॥ ११ ॥ ब्राह्मणान्भोजयेद्भक्त्या स्वयं च लवणादृते ॥
भक्त्याथ दक्षिणां दद्यादिमं मंत्रमुदीरयेत् ॥ १२ ॥ प्रीयतामत्र भगवान्कामरूपी जनार्दनः ॥ हृदये सर्वभूतानां यथा वेदोऽभिधीयते ॥ १३ ॥
अनेन विधिना सर्वं मासिमासि समाचरेत् ॥ फलमामलकं प्राश्य द्वादश्यां भूतले स्वपेत् ॥ १४ ॥ ततस्त्रयोदशे मासि घृतधेनुसमन्विताम् ॥
शय्यां दद्याद्द्विजेन्द्राय सर्वोपस्करसंयुताम् ॥ १५ ॥ काञ्चनं कामदेवं च शुक्लां गां च पयस्विनीम् ॥ वासोभिर्द्विजदांपत्यं पूज्य शक्त्या विभू
षणैः ॥१६॥ होमः शुक्लतिलैः कार्यः कामनामानि कीर्तयेत् ॥ गव्येन सर्पिषा तत्र पायसेन च धर्मवित् ॥ १७ ॥ विप्रेभ्यो भोजनं दद्या द्वित्त
शाठ्यं विवर्जयेत् ॥ इक्षुदंडान्नरो दद्यात्पुष्पमालां च शक्तितः ॥ १८ ॥ यः कुर्याद्विधिनानेन मदनद्वादशीमिमाम् ॥ सर्वपापविनिर्मुक्तः
प्राप्नोति परमं पदम् ॥ १९ ॥ इह लोके वरान्पुत्रान्सौभाग्यं सुखमश्नुते ॥ कश्यपो व्रतमाहात्म्यादागत्य परया मुदा ॥ २० ॥ चकाराकर्कशां
भूयो रूपलावण्यसंयुताम् ॥ वरेण च्छन्दयामास या च वव्रे वरं वरम् ॥ पुत्रं शत्रुवधार्थाय समर्थममितौजसम् ॥ २१ ॥ प्रार्थयामि महाभाग्यं
सर्वामरनिषूदनम् ॥ कश्यपः प्राह तां भद्रे एवमस्तु सुशोभने ॥ २२ ॥ संवत्सरशतं त्वेकं गर्भो धार्यः सुखेप्सया ॥ संध्यायां नैव भोक्तव्यं
गर्भिण्या वरवर्णिनि ॥ २३ ॥ न स्थातव्यं न गंतव्यं वृक्षमूलेषु सर्वदा ॥ नोपस्करे भुवि विशेन्मुसलोलूखलादिषु ॥ २४ ॥ जलं न चावगाहेत
शून्यागारं विवर्जयेत् ॥ वर्जयेत्कलहं गेहे गात्रभंगं तथैव च ॥२५॥ मुक्तकेशी न तिष्ठेत नाशुचिः स्यात्कथंचन ॥ न शयीतोन्नतशिरा न चाप्यार्द्र
शिराः क्वचित् ॥ २६ ॥ न वस्तुहीना नोद्विग्ना नार्द्रपादा न भूतले ॥ नामंगल्यां वदेद्वाचं न च हास्यपरा भवेत् ॥ २७ ॥ कुर्याच्च गुरुशुश्रूषां
नित्यं मंगलतत्परा ॥ सर्वौषधीभिः कोष्णेन वारिणा स्नानमाचरेत् ॥ २८ ॥ कुस्त्रियो नाभिभाषेत वस्त्रवातं विवर्जयेत् ॥ मृतवत्सादिसंसर्गं
परगेहं च सुंदरि ॥ २९ ॥ न शीघ्रं मार्गमाक्रामेल्लंघयेन्न महानदीम् ॥ न च बीभत्सकं किंचिन्न च वीक्षेद्भयानकम् ॥ ३० ॥ गुरुवातुल
माहारमजीर्णं न समाचरेत् ॥ संपूर्णगर्भिण्यायामं व्यायामं वा विवर्जयेत् ॥ ३१ ॥ गर्भो रक्ष्यः सदौषध्या हृदि धार्यो न मत्सरः ॥ अनेन
विधिना साध्वि शोभनं पुत्रमाप्नुयात् ॥ ३२ ॥ अन्यथा गर्भपतनं स्तंभनं वा प्रवर्तते ॥ तस्मात्त्वमनया वृत्त्या गर्भेस्मिंश्च समाचरेः ॥

भविष्यति शुभः पुत्रः सर्वावयवसुंदरः ॥ ३३ ॥ स्वस्त्यस्तु ते गमिष्यामि तथेत्युक्तस्तया च सः ॥ पश्यतां सर्वभूतानां तत्रैवांतर्हितोभवत् ॥ ॥ ३४ ॥ ततः सा कश्यपोक्तेन विधिना समतिष्ठत ॥ अथाप पुत्रान्पंचाशदेकोनान्पांडुनंदन ॥ ३५ ॥ एवमन्यापि या नारी मदनद्वादशीमिमाम् ॥ करोति पुत्रानाप्नोति सह भर्त्रा सुखी भवेत् ॥ ३६ ॥ एकोनमर्द्धशतमाप दितिः सुतानां येन व्रतेन बलवीर्यसमन्वितानाम् ॥ मर्त्यः समाचरति पुत्रधनाभिलाषी तत्सर्वमत्र सफलं भवतीह पुंसः ॥ ३७ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे मदनद्वादशीव्रतवर्णनं नाम षडशीतमोऽध्यायः ॥ ८६ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कांतारवनदुर्गेषु सुप्रसन्नाटवीषु च ॥ समुद्रतरणे दाने संग्रामे तस्करार्दने ॥ १ ॥ कां देवतां स्मरेत्कृष्ण परित्राणकरीमिह ॥ कथं च देवः पुरुषः परित्राणं स्मृतो जनैः ॥ २ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ सर्वमंगलमागल्यां दुर्गां भगवतीमिमाम् ॥ नाप्नोति दुःखं पुरुषः संस्मरन्सर्वमङ्गलाम् ॥३॥ अलक्ष्यां लक्ष्यभूतानां संस्मरन्सर्वमंगलाम् ॥ न भयं समवाप्नोति पुरुषः पार्थ कुत्रचित् ॥ ४ ॥ यदा तां प्रतिजिज्ञासुरवंत्यामहमागतः ॥ पुरा संदीपनिः पार्थ बलेन सह भारत ॥ ५ ॥ प्राप्त विद्येन च मया प्रतिज्ञातास्य दक्षिणा ॥ दिव्यं स्तवं विदित्वा मे तेनाहं याचितः प्रभो ॥ ६ ॥ प्रभासतीर्थे पुत्रो मे गतः केनाप्यसौ हतः ॥ तमानय महाबाहो सत्यं कुरु वचो मम ॥ ७ ॥ उपाध्यायस्य वचनाद्वैवस्वतपुरे मया ॥ प्राप्तः संदीपनेः पुत्रः समानीतः क्षणादसौ ॥ ८ ॥ दक्षिणां तामुदाहृत्य प्रस्थितौ पुनरागतौ ॥ स्थानमेतत्स्वपादांकं कृत्वावां गृहमागतौ ॥९॥ ततःप्रभृति पुत्रार्थाः पूजयंति जनाः सदा ॥ मां चैव बलभद्रं च मध्यस्थां सर्वमंगलाम् ॥ १० ॥ वामे नारायणो हंस एवमेव च के भवेत् ॥ अबाधकं योर्चयते तृतीयं कुंतिनंदन ॥ ११ ॥ त्रयोदश्यां सितपक्षे मासिमासि यतव्रतः ॥ नक्तेनैवोपवासेन एकभक्तेन वा पुनः ॥ १२ ॥ गन्धपुष्पैश्च मधुभिः सीधुभिश्च सुरासवैः ॥ मृन्मयीं कांचनीं वापि कृत्वा प्रतिकृतिं तु यः ॥ १३ ॥ यक्षगन्धबलिक्षेपैः पललौदनसंसृजैः ॥ योऽभ्यर्चयति राजेन्द्र सर्वपापैः प्रमुच्यते ॥ १४ ॥ नारी वा भर्तृसहिता स्वर्गलोके महीयते ॥ १५ ॥ अंबाबिके द्विदशमेऽह्नि सिते सदैव यः पूजयेत्कुसुममांससुरोपहारैः ॥ नश्यंति तस्य भवनेष्वतिभीषणानि चौराग्निराजजनितानि भयानि सद्यः ॥ १६ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे अबाकधव्रतवर्णनं नाम सप्ताशीतमोऽध्यायः ॥ ८७ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ ब्रूहि मे यदुशार्दूल व्रतं गन्धविनाशनम् ॥ कटुतिक्ताम्लदेहोत्थदौर्भाग्यशमनं तथा ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ इमं प्रश्नं पुरा पार्थ जातूकर्ण्यो महामुनिः ॥ पृष्टो राज्ञ्या विष्णुभक्त्या कालनंदनजातया ॥ २ ॥

कथयामास संपृष्टा सूपविष्टा शृणोति सा ॥ देवी कृताञ्जलिपुटा जातूकर्ण्योंवदद्व्रतम् ॥ ३ ॥ ज्येष्ठे मासि सिते पक्षे त्रयोदश्यां युधिष्ठिर ॥ स्नात्वा पुण्यनदीतोये पूजयेच्छुभदेशजम् ॥४॥ श्वेतमंदारमर्कं वा करवीरं च रक्तकम् ॥ निंबं च सूर्यदेवस्य वल्लभं दुर्लभं तथा ॥५॥ पुष्पैर्नैवेद्यधूपाद्यैर्मंत्रेणानेन पांडव ॥ निरीक्ष्य गगने सूर्यं ध्यात्वा हृदि समुच्चरेत् ॥६॥ सूर्यं श्वेतारमंदारश्वेतार्कार्कास्यसंशयम् ॥ करवीर नमस्तुभ्यं निंबवृक्ष नमोऽस्तु ते ॥ ७ ॥ इत्थं योर्कपतेर्भक्त्या वर्षेवर्षे पृथङ् नरः ॥ मूलमंत्रेण नृश्रेष्ठ नारी वा भक्तिसंयुता ॥ तस्याः शरीरदौर्गन्ध्यं दौर्भाग्यं वा अजाविकम् ॥८॥ निंबं नवार्ककरवीरलतां सुपुष्पां याः पूजयंति कुसुमाक्षतधूपदीपैः ॥ ताः सर्वकामसुखभोगसमृद्धिभाजो दौर्भाग्यदोषरहिताः सुभगा भवंति ॥९॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे मन्दारनिम्बार्ककरवीरव्रतवर्णनं नामाष्टाशीतितमोऽध्यायः ॥ ८८ ॥छ॥

॥ ॥ युधिष्ठिर उवाच ॥ ॥ यमस्याराधनं ब्रूहि श्रीवत्स पुरुषोत्तम ॥ कथं न गम्यते कृष्ण नरकं नरकेसरिन् ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ द्वारवत्यां पुरा पार्थ स्नातोऽहं लवणाम्भसि ॥ दृष्टवान्मुनिमायांतं मुद्गलं नाम पार्थिव ॥ २ ॥ प्रज्वलंतमिवादित्यं तपसा द्योतितान्तरम् ॥ तं प्रणम्यार्घ्यसत्कारैः पप्रच्छाहं युधिष्ठिर ॥ ३ ॥ यमादर्शननामैतद्व्रतं जन्तुभयापहम् ॥ कथयामास सकलं मुद्गलो विस्मयान्वितः ॥ ४ ॥ ॥ मुद्गल उवाच ॥ ॥ अकस्मात्कृष्ण मूर्च्छा मे पतितोऽस्मि धरातले ॥ पश्यामि दंडपुरुषैर्मद्देहात्प्रज्वलन्निव ॥ ५ ॥ अंगुष्ठमात्रः पुरुषो बलदाकृष्य रोषितः ॥ बद्धो यमभटैर्गाढं नीयते वेदवादिभिः ॥ ६ ॥ क्षणात्सभायां पश्यामि यमं पिंगललोचनम् ॥ कृष्णावदातं रौद्रास्यं मृत्युं व्यधिशतान्वितम् ॥ ७ ॥ वातपित्तमहाश्लेष्मैर्मूर्तिमद्भिरुपासितम् ॥ कासशोफज्वरातंकस्फोटिकालूतमारिभिः ॥ ८ ॥ ज्वरगर्दभशीर्षादिभगंदरमलक्षयैः ॥ गंडमालाक्षिरोगैश्च मूत्रकृच्छ्ररहोव्रणैः ॥ ९ ॥ वेदनाभिः प्रमेहैश्च पिटकैर्गंडबुद्बुदैः ॥ विषूचिकागलग्राहदारिद्राभूततस्करैः ॥ १० ॥ इत्थं बहुविधै रौद्रैर्नानारूपभयंकरैः ॥ करालशस्त्रहस्तैश्च संग्रामैर्नरकैस्तथा ॥ ११ ॥ राक्षसैर्दानवैरुग्रैरुपविष्टैः पुरःस्थितैः ॥ धर्माधिकरणस्थैश्च चित्रगुप्तादिलेखकैः ॥ १२ ॥ सिंहैर्व्याघ्रैर्वराहैश्च तरक्षैश्वांनुजंतुकैः[1] ॥ वृश्चिकैर्दंशमशकैः शिवासर्पैः सडुंडुभैः ॥ १३ ॥ गृध्रैरुलूकैर्बहुभिर्मत्कुणैर्डाकिनीग्रहैः ॥ अपस्मारस्मरोन्मादवृद्धिकारेवतीग्रहैः ॥ १४ ॥ पिशाचैर्यक्षकूष्मांडैः पाशखड्गधनुर्द्धरैः ॥ मुक्तकेशैस्त्रासकरैर्भ्रुकुटीकुटिलाननैः ॥ १५ ॥ बृहत्कायैर्नारकीयैः पापिष्ठानां नियामकैः ॥ असिपत्रवनांगारैः क्षारगर्ता

---

[1] जानुंजंबुकैः—इ० पा० ।

ण्डदायकैः ॥ १६ ॥ असिभंगामिषच्छेदरुधिरस्रावकादिभिः ॥ आस्थाने संभृतो भाति यमो मृत्यूपमोपमः ॥ २७ ॥ स आह किंकरान्सर्वान्धर्मराजो जनार्दन ॥ किमयं मुनिरानीतो युष्माभिर्भ्रांतनामभिः ॥ १८ ॥ मुद्गलो नाम कौडिन्ये नगरे भीष्मकात्मजः॥ क्षत्रियोऽस्ति स आनेयः क्षीणायुस्त्यज्यतां मुनिः ॥ १९ ॥ इत्युक्तास्ते गतास्तस्मादायाताः पुनरेव ते ॥ ऊचुर्यमभटाः प्रह्वा धर्मराजं सविस्मयाः ॥ २० ॥ अस्माभिस्तत्र क्षीणायुर्न देही लक्षितो गतैः ॥ न जानीमो भानुसूनो कथंचिद्भ्रांतमानसाः ॥ २१ ॥ ॥ यमराज उवाच ॥ ॥ प्रायेण ते न दृश्यंते पुरुषैर्यमार्किकरैः ॥ कृता त्रयोदशी यैस्तु नरकार्तिविनाशिनी ॥ २२ ॥ उज्जयिन्यां प्रयागे वा भैरवे वाथ ये मृताः ॥ तिलान्नगोहिरण्यादि दत्तं यैश्च गवाह्निकम् ॥ २३ ॥ ॥ दूत उवाच ॥ ॥ कीदृशं तद्व्रतं स्वामिन्छंस नो भास्करात्मज ॥ किं तत्र वद कर्तव्यं पुरुषैस्तव तुष्टिदम् ॥ २४ ॥ ॥ यम उवाच ॥ ॥ पूर्वाह्णे मार्गशीर्षादौ वर्षमेकं निरन्तरम् ॥ त्रयोदश्यां सौम्यदिने सूर्यांगारकवर्जितः ॥ २५ ॥ मम[1] नाम्ना द्विजानष्टौ पंच चैव समाह्वयेत् ॥ वेदांतगाञ्ज्ञातिशुद्धान्छांतचित्तान्सुशोभनान् ॥ २६ ॥ वाचकश्चापि तन्मध्ये सदा भास्करवल्लभान् ॥ दिनस्य प्रथमे यामे शुचौ देशे समास्थितान् ॥ २७ ॥ अंतर्वासोवृतान्भक्तान्सोपदिष्टदिगुन्मुखान् ॥ अभ्यंगयेच्छिरोदेशात्तिलतैलेन मर्दयेत् ॥ २८ ॥ स्नापयेद्गन्धकाषायैः सुखोष्णांबुभिरेव च ॥ पृथक्पृथक्स्नापयित्वा सर्वानेव द्विजोत्तमान् ॥ २९ ॥ शूचिर्भूत्वा तथाचांतो व्रती भक्तिपरायणः ॥ स्वयं संभृत्य शुश्रुषां तेषां कृत्वा नरोत्तम ॥ ३० ॥ प्राङ्मुखानुपविष्टांश्च त्रयोदश पृथक्पृथक् ॥ भोजयेच्छालिमुद्गाद्यं गुडपूपान्सुखोचितान् ॥ ३१ ॥ सुव्यञ्जनं सुपक्वान्नं भूयोभूयो निवेदयेत् ॥ शुचिर्भूत्वा तथाचांतो ह्यर्चयेत्तिलतंडुलैः ॥३२॥ प्रस्थमात्रैरथैकैकं ताम्रपात्रसमन्वितैः ॥ सदक्षिणैः सच्छत्रैश्च जलकुम्भैः पवित्रकैः ॥३३॥ चर्मप्रावरणैः श्रेष्ठैस्तेषां दत्त्वा विसर्जयेत् ॥ मंत्रेणानेन राजेन्द्र अर्चयेत्तान्पृथक्सुधीः ॥ ब्राह्मणान्वाचकं वापि पंक्तिभेदं न कारयेत् ॥ ३४ ॥ ॐ नमः शनैश्चरो मृत्युर्दंडहस्तो विनाशकः ॥ अभावः प्रलयः सौरिर्दुःखघ्नः शमनोऽतकः ॥ ३५ ॥ लोकपालो ह्यतिक्रूरो रौद्रो घोराननः शिवः ॥ यमः प्रसन्नमानस्को दद्यान्मेऽभयदक्षिणाम् ॥ (स्वाहा) ॥ ३६ ॥ इत्युक्त्वा संप्रयच्छेच्च देयं दत्त्वा व्रती पुनः ॥ द्विजांश्चानुव्रजेत्तृप्तान्गृहांश्चार्चितचर्चितान् ॥ ३७ ॥ एवं यः पुरुषः कश्चित्सकृद्व्रतमिदं चरेत् ॥ स मृतोऽपि नरोमर्त्यो नायाति मम मंदिरम् ॥ ३८ ॥ अदृष्टो मम मायाभिर्विमानेनार्कमंडलम् ॥ स चायाति पुरीं विष्णोस्ततः शिवपुरं व्रजेत् ॥ ३९ ॥ कृतं चीर्णं व्रतं तेन मुद्गलेन ममोदितम् ॥

---

[1] यमनाम्ना–इ० पा०।

तेन नायात्यसौ लोके मम क्षत्रियपुङ्गवः ॥ ४० ॥ इति कालवचः श्रुत्वा तेऽपि दूता गतास्तु मे ॥ अहं पुनः समापन्नस्तूर्णं कालैर्विसर्जितः ॥
स्वशरीरं पुनः प्राप्य नीरोगः पुनरुत्थितः ॥ ४१ ॥ त्वां द्रष्टुमागतः प्रोक्तमेतद्वृत्तं मया तव ॥ इत्युक्त्वा मुद्गलो राजन्प्रयातः स्वगृहं प्रति ॥
॥ ४२ ॥ इदं कुरुष्व कौंतेय त्वमप्यत्र महीतले ॥ ततो यास्यस्यसंदिग्धं वंचयित्वा यमं मृतः ॥ ४३ ॥ एवं येन्येऽपि पुरुषाः स्त्रियो वापि युधि
ष्ठिर ॥ त्रयोदश्यां त्रयोदस्यां ये [1]चरिष्यंति भूतले ॥ ४४ ॥ एकभक्तेन नक्तेन उपवासेन वा पुनः ॥ यमदर्शनमाख्यातं गतं सर्वव्रतोत्तमम् ॥४५॥
सर्वपापविनिर्मुक्ता दिव्ययानं समाश्रिताः ॥ यास्यन्तीन्द्रपुरं हृष्टा अप्सरोगणसंवृताः ॥ ४६ ॥ दोधूयमानाश्चमरैः स्तूयमानाः सुरासुरैः ॥
गन्धर्वतूर्यनादेन च्छत्रपंक्तिविराजिताः ॥ ४७ ॥ अदृष्टो घोररूपास्यैर्यमदूतैर्युधिष्ठिर ॥ अनर्दितो व्याधिगणैरदृष्टो यमकिङ्करैः ॥ ४८ ॥
अदारितो महारौद्रैर्नानाप्रहरणोत्तमैः॥ यमदृष्टिपथान्मुक्ताः सर्वसौख्यसमन्विताः ॥४९॥ सर्वसौख्यसमायुक्ताः शिववत्सौम्यदर्शनाः ॥ स्वर्गे वसं
ति सुचिरं भाविताः स्वेन कर्मणा ॥ ५० ॥ स्नाप्य त्रयोदश मुनीन्घृतपायसेन संपूज्य पूज्यतिलतण्डुलवस्त्रदानैः ॥ कुर्वंति ये व्रतमिदं त्रिदशे
ह्नि पूताः पश्यंति ते यममुखं न कदाचिदेव ॥ ५१ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे यमदर्शनत्रयोदशी
व्रतवर्णनं नामैकोननवतितमोऽध्यायः ॥ ८९ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ भगवन्भूतभव्येश संसारार्णवतारक ॥ व्रतं कथय
किञ्चिन्मे रूपसौभाग्यदायकम् ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ किं कृतैर्बहुभिः पार्थ व्रतैरुन्मत्तचेष्टितैः ॥ कायक्लेशकरैः क्रूरैरसारैः फल
साधनैः ॥ २ ॥ वरमेकापि वरदा कृतानंगत्रयोदशी ॥ प्रसिद्धिं समनुप्राप्ता मर्त्ये कामप्रदायिनी ॥ ३ ॥ सौभाग्यारोग्यजयदा सर्वातंकनिवा
रिणी ॥ सर्वदुष्टोपशमनी सर्वमंगलवर्धनी ॥ ४ ॥ शृणुष्व तां महाबाहो कथयामि सविस्तरम् ॥ पुरा दग्धेन कामेन त्रिनेत्रनयनाग्निना ॥ ५ ॥
भस्मीभूतेन लोकानां संकल्पिता पुरानघ ॥ अनंगेन कथा ह्येषा तेनानंगत्रयोदशी ॥ ६ ॥ हेमंते समनुप्राप्ते मासि मार्गशिरे शुभे ॥ शुक्लपक्षे
त्रयोदश्यां सोपवासो जितेन्द्रियः ॥ ७ ॥ स्नानं नद्यां तडागे च गृहे वा नियतात्मवान् ॥ कृत्वा समभ्यर्च्य विभुं विधिना शशिशेखरम् ॥८॥
धूपदीपैः सनैवेद्यैः पुष्पैः कालोद्भवैस्तथा ॥ [2]शंभुनामान्यथोच्चार्य होमः कार्यस्तिलाक्षतैः ॥ ९ ॥ अनंगनाम्ना संपूज्य मधु प्राश्य स्वपेन्निशि ॥
नैवेद्यैर्मधुरैर्दिव्यैः सुस्वादैर्घृतपाचितैः ॥ १० ॥ धूपं सुगंधि दद्याच्च रक्तपुष्पैस्तु पूजनम् ॥ रंभातुल्या भवेत्सा तु रूपयौवनशालिनी ॥ ११ ॥

---

[1] यजिष्यन्ति–इ० पा० । [2] मधुनामान्यथोच्चार्य–इ० पा० ।

मधुवत्स्यात्समधुरः कामरूपधरस्तथा ॥ दशानामश्वमेधानां फलं प्राप्नोति मानवः ॥ १२ ॥ पुष्यमासस्य चैवोक्तं चंदनं प्राशयेन्निशि ॥ योगेश्वरं तु संपूज्य मालतीकुसुमैः शुभैः ॥ १३ ॥ नैवेद्यं घृतपूराश्च दमशान्तास्तु ताः स्त्रियः ॥ सौम्यशीतसुगन्धाढ्यचन्दनप्राशनोद्भवैः ॥ १४ ॥ राजसूयस्य यज्ञस्य फलं प्राप्नोत्यनुत्तमम् ॥ माघे नटेश्वरं नाम पूजयेत्पंकजेन तु ॥ १५ ॥ नैवेद्यं क्षीरखण्डाद्यैर्मौक्तिकं प्राशयेन्निशि ॥ बहुपुत्रा भवेत्सा तु धनं सौभाग्यमुत्तमम् ॥ १६ ॥ मुक्ताचूर्णनिभैर्नैत्रैर्यद्वा स्यात्तद्वदेव हि ॥ गौरीतुल्या भवेत्सा तु कोमलांगी प्रजायते ॥ १७ ॥ तत्र जांबूनदाभासो भवेद्दिव्यतनुर्महान् ॥ गोमेधस्य सहस्रस्य फलं प्राप्नोति मानवः ॥ १८ ॥ फाल्गुने मासि संपूज्य देवदेवं हरेश्वरम् ॥ कर्णिकारस्य पुष्पाणि नैवेद्ये बीजपूरकम्[1] ॥ १९ ॥ कंकोलं प्राशयेद्रात्रौ सौंदर्यमतुलं लभेत् ॥ चैत्रे सुरूपकं नाम पूजयेद्दमनेन तु ॥ २० ॥ नैवेद्यं धूपकं दद्याद् घृतखण्डविपाचितम् ॥ कर्पूरं प्राशयेद्रात्रौ सौभाग्यं महदाप्नुयात् ॥ २१ ॥ चन्द्रश्च चन्द्रकांतिश्च चन्द्रवर्त्यहरावृते ॥ नरमेधस्य यज्ञस्य फलं प्राप्नोति शोभनम्[2] ॥ २२ ॥ वैशाखे च महारूपं पुष्पैर्नौमालिकार्चनम् ॥ कांरबकैस्तु नैवेद्यं दातव्यं चातिशोभनम् ॥ २३ ॥ जातीफलं तु संप्राश्य जातिमाप्नोत्यनुत्तमाम् ॥ सफलास्तस्य सर्वाशा भवंति भुवि भारत ॥ २४ ॥ गोसहस्रफलं प्राप्य ब्रह्मलोके महीयते ॥ ज्येष्ठे मासे तु प्रद्युम्नं पूजयेन्मल्लिकासुमैः ॥ २५ ॥ नैवेद्यं खण्डवर्तिं च लवंगं प्राशयेन्निशि ॥ ज्येष्ठं पदमवाप्नोति तथा लक्ष्मीं जनार्दनात् ॥ २६ ॥ सर्वसौख्यसमोपेतः स्थित्वा भुवि शतं समाः ॥ वाजपेयस्य यज्ञस्य शतमष्टगुणोत्तरम् ॥ २७ ॥ आषाढे चैव संप्राप्ते उमाभर्तारमर्चयेत् ॥ पुष्पधूपादिनैवेद्यैः प्राश्नीयाच्च तिलोदकम् ॥ २८ ॥ तिलोत्तमारूपधरा सुखी स्याच्छरदः शतम् ॥ श्रावणे उमापतिं नाम तिलपुष्पैस्तु पूजयेत् ॥ ॥ २९ ॥ नैवेद्यं लड्डुकान्दद्यात्कृष्णांश्च प्राशयेत्तिलान् ॥ पौंडरीकस्य यज्ञस्य फलं प्राप्नोत्यनाकुलम् ॥ ३० ॥ तदंते राजराजः स्याच्छत्रुपक्षक्षयंकरः ॥ सद्योजातं भाद्रपदे पूज्य कुंकुमकेशरैः ॥ ३१ ॥ नैवेद्यं सोलिकां दद्यात्प्राशयेदगुरुं निशि ॥ अगुरुं प्राशयित्वा तु गुरुर्भवति भूतले ॥ ॥ ३२ ॥ पुत्रपौत्रैः परिवृतो भुक्त्वा भोगान्मनोऽनुगान् ॥ उक्तयज्ञफलं प्राप्य विष्णुलोके महीयते ॥ ३३ ॥ त्रिदशाधिपतिमश्वयुजि पूज्य सिन्दूरकव्रजैः ॥ स्वर्णादिकं तु संप्राश्य स्वर्णवर्णः प्रजायते ॥ ३४ ॥ रूपवान्सुभगो वागमी भुक्त्वा भोगान्महीतले ॥ सुवर्णकोटिदानस्य फलं प्राप्नोति मानवः ॥ ३५ ॥ विश्वेश्वरं[3] कार्त्तिके तु सर्वपुष्पैस्तु पूजयेत् ॥ दमनस्य फलं प्राश्य दमनेन पुमान्भवेत् ॥ ३६ ॥ दमनोन्मादकर्ता च सर्वस्य

---

[1] तु जबीरकम्—इ० पा०। [2] षड्गुणम्—इ० पा०। [3] विद्येश्वरम्—इ० पा०।

जगतः प्रभुः ॥ भवेद्भुजबलोपेतस्ततः शिवपुरं व्रजेत् ॥ ३७ ॥ एवं संवत्सरस्यांते पारितेऽस्मिन्व्रतोत्तमे ॥ यत्कर्तव्यं तदधुना श्रूयतां कुरुनं
दन ॥ ३८ ॥ व्रते विघ्नो यदा च स्यादशक्त्या सूतकेन वा ॥ उपोष्यमेवोपवसेत्तदा द्रुमपुरः पुनः ॥ ३९ ॥ पूर्वोक्तमेवं निर्वर्त्य सौवर्णं कारयेच्छि
वम् ॥ ताम्रपात्रे तु संस्थाप्य कलशोपरि विन्यसेत् ॥ ४० ॥ शुक्लवस्त्रेण संछाद्य पुष्पनैवेद्यपूजितम् ॥ ब्राह्मणाय प्रदातव्यं शिवभक्ताय सुव्रत ॥
॥ ४१ ॥ शक्तिमाञ्छयनं दद्याद्गां सवत्सां पयस्विनीम् ॥ छत्रोपानत्प्रदातव्यं कलशाः सोदकास्तथा ॥ ४२ ॥ शांताश्च केचिदिच्छंति शक्त्या
दद्याच्च दक्षिणाम् ॥ पञ्चामृतेन स्नानं च तस्मिन्नहनि कारयेत् ॥ ४३ ॥ देवदेवस्य राजेन्द्र पुष्पदीपान्नसंयुतम् ॥ भोजनं च यथा शक्त्या षड्रसं
मधुरोत्तरम् ॥ ४४ ॥ प्रदद्याच्छिवभक्तेभ्यो विशुद्धेनांतरात्मना ॥ एवं निर्वर्त्य विधिवत्कृतकृत्यः पुमान्भवेत् ॥ ४५ ॥ नारी वा भरतश्रेष्ठ
कुमारी वा यतव्रता ॥ पारिते तु व्रते पश्चात्कुर्याच्च सुमहोत्सवम् ॥ ४६ ॥ अनेन विधिना कुर्याद्यस्त्वनंगत्रयोदशीम् ॥ स राज्यं
निहतामित्रं कीर्तिमायुर्यशो बलम् ॥ ४७ ॥ सौभाग्यं महदाप्नोति यावज्जन्मशतं नृप ॥ ततो निर्वाणमायाति शिवलोकं च गच्छति ॥ ४८ ॥
कामेन या किल पुरा समुपोषितासीच्छुभ्रा तिथिस्त्रिदशमी सुशुभांगहेतोः ॥ तां प्राशनैरुदितनामयुतैरुपेतां कृत्वा प्रयाति परमं पदमिंदुमौलेः ॥
॥ ४९ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वण्यंगत्रयोदशीव्रतवर्णनं नाम नवतितमोऽध्यायः ॥ ९० ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥
अम्बुपूर्णतडागेषु महातोयाशयेषु च ॥ कस्यार्थं सम्प्रयच्छंति कृष्णैताः कुलयोषितः ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ मासि भाद्रपदे प्राप्ते
शुक्ले भूततिथौ नृप ॥ तडागपाल्यां दातव्यं वरुणायार्घ्यमुत्तमम् ॥ २ ॥ ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैः स्त्रीभिस्तथैव च ॥ तस्मिन्दिने भक्तिनम्रैर्दे
याद्यर्घं युधिष्ठिर ॥ ३ ॥ पुष्पैः फलैस्तथा वस्त्रैर्दीपालक्तकचन्दनैः ॥ अनग्निपाकसिद्धान्नैस्तिलतण्डुलमिश्रकैः ॥ ४ ॥ खर्जूरैर्नालिकेरैश्च बीजपूर्णार
कैस्तथा ॥ द्राक्षादाडिमपूगैश्च त्रपुसैश्चापि पूजयेत् ॥ ५ ॥ आलिख्य मण्डले देवं वरुणं वारुणीयुतम् ॥ मंत्रेणानेन राजेन्द्र पूजयेद्भक्तिभावतः ॥
॥ ६ ॥ वरुणाय नमस्तुभ्यं नमस्ते यादसांपते ॥ अपांपते नमस्तेऽस्तु रसानांपतये नमः ॥ ७ ॥ मा क्लेदं मा च दौर्गंध्यं विरस्यं मा मुखेऽस्तुमे ॥
वरुणो वारुणीभर्ता वरदोऽस्तु सदा मम (स्वाहा) ॥ ८ ॥ एवं यः पूजयेद्भक्त्या वरुणं वरुणालयम् ॥ मध्याह्ने सरसि स्नात्वा नग्निपाकी व्रती
नृप[१] ॥ ९ ॥ चातुर्वर्ण्यथ वै नारी व्रतेनानेन पांडव ॥ नैवेद्यं ब्राह्मणे देयं यन्नैवेद्ये प्रकल्पितम् ॥ १० ॥ एवं यः कुरुते पार्थ पालीव्रतमुत्तमम् ॥

---

१ मम–इ० पा० ।

तत्क्षणात्सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ ११ ॥ संरुद्धशुद्धसलिलातिबलां विशालां पालीमुपेत्य बहुभिस्तरुभिः कृतालीम् ॥ ये पूजयंति वरुणं सहितं समुद्रैस्तेषां गृहे भवति भूतिरलब्धनाशा ॥ १२ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे पालीव्रतवर्णनं नामैकनवतितमोऽध्यायः ॥ ९१ ॥ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अस्मिन्नेव दिने पार्थ शृणु ब्रह्मसभातले ॥ देवलेन पुरा गीतं देवर्षिगणसन्निधौ ॥ १ ॥ अप्सरोगणगंधर्वैर्देवैः सर्वैः समार्चितम्[1] ॥ संसारासारतां दृष्ट्वा तत्रस्थकदलीद्रुमे ॥ शुक्लपक्षे चतुर्दश्यां मासि भाद्रपदे नृप ॥ २ ॥ दत्तमर्घ्यं वरस्त्रीभिः फलैर्नानाविधैः शुभैः ॥ विरूढैः सप्तधान्यैश्च दीपालक्तकचन्दनैः ॥ ३ ॥ दधिदूर्वाक्षतैर्वस्त्रैर्नैवेद्यैर्घृतपाचितैः ॥ जातीफलैर्लवङ्गैश्च तथैलालवलीफलैः ॥ ४ ॥ कदलैः कन्दरभटैर्मोचा सात्र निगद्यते ॥ तस्मिन्नहनि दातव्यं स्त्रीभिः सर्वाभिरप्यलम् ॥ ५ ॥ मंत्रेणानेन चैवार्घ्यं शृणुष्व च नराधिप ॥ चित्या त्वं कन्दलदलैः कदले कामदायिनि ॥ शरीरारोग्यलावण्यं देहि देवि नमोऽस्तु ते ॥ ६ ॥ इत्थं यः पूजयेद्राजा पुरुषो भक्तिमान्नृप ॥ नारी वानग्निपाकांता चातुर्वर्ण्या युधिष्ठिर ॥ ७ ॥ तस्याः कुले न भवति क्वचिन्नारी कुलाटनी ॥ दुर्गता दुर्भगा वंध्या स्वैरिणी पापकारिणी ॥ ८ ॥ विलासिनी वा वृषली पुनर्भूः पुनरेतसी ॥ गणिका स्वैरिणी वोढा मूल्यकर्मकरी खला ॥ ९ ॥ भर्तृव्रतात्प्रचलिता न कदाचित्प्रजायते ॥ भवेत्सौभाग्यसौख्याढ्या पुत्रपौत्रैस्तथावृता ॥ आयुष्मती कीर्तिमती रमेद्वर्षशतैर्भुवि ॥ १० ॥ एकं रंभाव्रतं चीर्णं गायत्र्या स्वर्गसंस्थया ॥ तथा गौर्या च कैलास इन्द्राण्या नंदने वने ॥ ११ ॥ श्वेतद्वीपे तथा लक्ष्म्या राज्ञ्या च रविमंडले ॥ अरुन्धत्या दारुवने स्वाहया मेरुपर्वते ॥ १२ ॥ सीतादेव्या त्वयोध्यायां वेदवत्या हिमाचले ॥ भानुमत्या नागपुरे व्रतमेतदनुष्ठितम् ॥ १३ ॥ एतद्व्रतं पार्थिवेन्द्र मासि भाद्रपदे सिते ॥ या करोति न सा दुःखैः कदाचिदपि पीडयते ॥१४॥ संभिन्नकन्दकदलीं च मनोज्ञरूपां याः पूजयंति कुसुमाक्षतधूपदीपैः ॥ तासां गृहेषु न भवंति कदाचिदेव नार्यस्त्वनार्यचरिता विधवा विरूपाः ॥१५॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे रम्भाव्रतं नाम द्विनवतितमोऽध्यायः ॥ ९२ ॥ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ चतुर्दशी महाराज हुतभुग्दयिता शुभा ॥ नष्टस्तदा हव्यवाहः पुनरस्तित्वमाप्तवान् ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कथमग्निः पुरा नष्टो देवकार्येष्युपस्थितः ॥ केनाग्नित्वं कृतं तत्र कथं हि विदितोऽनलः ॥ एतद्वदस्व देवेश सर्वं हि विदितं तव ॥ २ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ पुरा सुरा महाराज तारकेण पराजिताः ॥

---

[1] समन्वितम्–इ० पा०।

अपृच्छन्विश्वकर्तारं तारकं को वधिष्यति ॥ ३ ॥ उवाचासौ चिरं ध्यात्वा रुद्रोमाशुक्रसम्भवः ॥ गंगास्वाहाग्नितेजोजः शिशुर्दैत्यं वधिष्यति ॥ ॥ ४ ॥ एवं श्रुत्वा गता देवा यत्र शम्भुः सहोमया ॥ प्रणम्य ते तमूचुर्हि यदुक्तं ब्रह्मणा तदा ॥ ५ ॥ प्रतिपन्नं च रुद्रेण उमया सहितेन तत ॥ प्रयत्नमकरोत्तं च य उक्तोमरसत्तमैः ॥ ६ ॥ दिव्यं वर्षशतं साग्रं गतः कालोऽथ मैथुने ॥ न चाप्युपरमस्तत्र तयोरासीत्कथञ्चन ॥ भयं च सुमहत्तेषां देवानां समजायत ॥ ७ ॥ स रुद्रसम्भवो यो वै भविष्यति महाबलः ॥ स दैत्यान्दानवगणान्वधिष्यति न संशयः ॥ ८ ॥ केन कालेन भवति रतेर्विरतिरेतयोः ॥ एतद्विचिन्त्य प्रहितौ देवैस्तत्रानिलानलौ ॥ ९ ॥ गतौ तौ चोमया दृष्टौ समस्थौ विषमस्थया ॥ शशाप च रुषा देवी देवान्गर्भविवर्जिता ॥ १० ॥ यस्मात्तैर्जनितो विघ्नो मेऽपत्यार्थे दिवौकसाम् ॥ तस्मात्ते स्वेषु दारेषु जनयिष्यन्ति न प्रजाः ॥११॥ अथोवाच तदा देवो देवान्सर्वगणाञ्छनैः॥ अग्निर्गृह्णातु वीर्यं मे संभृतं सुचिरं हि यत् ॥१२॥ एवमुक्तोऽथ रुद्रेणनष्टोऽग्निर्देवसंकुलात् ॥ न स्वस्थो न भुविस्थो वा न सूर्यस्थो न भूतले ॥१३॥ देवा अन्वेषणे यत्नमकुर्वन्नग्निदर्शने ॥ कृमिकीटपतंगाश्च अष्टौ च त्रिदिवौकसः ॥ १४ ॥ हंसाः केकाः शुका वह्निः शीघ्रं शरवणं गताः ॥ शशापाग्निर्गजा जिह्वा द्विगुणो वा भविष्यति ॥ १५ ॥ दृष्ट्वाथ विबुधाः सर्वे पक्षिणं पक्षिणां वरम्॥जीवं जीवकनामानं भोभोः सत्यं वदस्व नः॥१६॥ कच्चिद्दृष्टस्त्वया वह्निर्वनेऽस्मिन्नटता सदा॥नाभद्रं नापि भद्रं वा किञ्चिदेव वचोऽब्रवीत् ॥१७॥ भूयोभूयस्तु पृष्टोऽपि न गामुच्चारयेच्चिरम्॥ तुष्टस्तस्याब्रवीद्वह्निर्जीवंजीव वदामि ते ॥१८॥ यस्मान्न किञ्चिदुक्तं ते तस्माच्चित्रतनूरुहाः ॥ जीव जीव पुनर्जीव यावदिच्छा तथायुषः ॥ १९ ॥ द्वितीयं ते वरं दद्मो जीवंजीवक शोभनम् ॥ व्यक्ता ते मानुषी वाचा स्पष्टार्था च भविष्यति ॥ २० ॥ कश्चिद्यदि तवाधस्थाद्बुधः स्नानं करिष्यति ॥ वंध्या वा षोडशाब्दीया क्षणाद्बालो भविष्यति ॥ २१ ॥ मासं यश्च तृतीयं वै भक्षयिष्यत्यनिंदितम् ॥ अजरः सोऽमरश्चैव सर्वकालं भविष्यति ॥ २२ ॥ इदं दत्त्वा वरांस्तस्य वह्नित्वमथ आप्तवान् ॥ विबुधा अपि तत्रैव तमदृश्यंत वंशगम् ॥ २३ ॥ ऊष्मया जातकल्माषं ज्ञात्वा संहृष्टमानसः ॥ तुष्टा वंशमथोचुस्ते देवास्त्रिभुवनेश्वराः ॥ २४ ॥ ऊष्मया कल्मषीभूय ह्यग्निर्गर्भं धरिष्यति ॥ यो गृही वैणवीं यष्टिं ब्रह्मचारी च नैष्ठिकः ॥ २५ ॥ पंडाग्निपालने पुण्यं यद्दृष्टं ब्रह्मवादिभिः ॥ वदंतं कल्मषीयष्टिस्तं प्राप्नोति द्विजोत्तमम् ॥ २६ ॥ वंशस्यानुग्रहं कृत्वा देव्याहृतिमथाब्रुवन् ॥ गृह्णीत शुक्रं भद्रस्य तव पुत्रो भविष्यति ॥ २७ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ यदाग्निर्नष्टो देवानां केनाग्नित्वं तदा कृतम् ॥ भूयोऽपि केन कालेन अग्निरग्नित्वमाप्तवान् ॥ २८ ॥ ॥ कृष्ण उवाच ॥ ॥

शृणु राजन्प्रनष्टेऽग्नौ येनाग्नित्वं कदाचन ॥ यस्मिन्काले तिथौ यस्यां पुनरग्नित्वमाप्तवान् ॥ २९ ॥ उतथ्याङ्गिरसोः पूर्वमासीद्व्यतिकरो महान् ॥
अहं विद्यातपोभ्यां वै तव ज्यायाञ्छ्रुतेन च ॥ उतथ्येनैवमुक्तस्तु अङ्गिराः प्राह तं मुनिम् ॥३०॥ गच्छावो ब्रह्मसदनं मरीचिप्रमुखैर्द्विजैः ॥ उपेतं
चान्यमुनिभिर्ब्रह्मराजर्षिसत्तमैः ॥ उतथ्यः प्राहसद्ब्रह्मनृषींस्तान्स्तब्धमानसः ॥ ३१ ॥ ज्यायान्वा कतमोस्माकमिति नः कथ्यतां स्फुटम् ॥ ३२ ॥
अथोवाच मुनिर्ब्रह्मा तावुभौ क्रुद्धमानसौ ॥ आनयध्वं द्रुतं गत्वा विबुधान्भुवनेश्वरान् ॥३३॥ ततो विवादं पश्यामि भवतां तैः समेत्य च ॥ तत
स्तौ सहितौ नत्वाऽऽनिन्यतुश्च ऋषींस्तदा ॥३४॥ लोकपालान्महेंद्रादीन्सयमान्वारुणानिलान् ॥ साध्यान्मरुद्गणान्विश्वानृषीन्भृग्वग्निनारदान् ॥
॥ ३५ ॥ गंधर्वान्वित्तरक्षोघ्नात्राक्षसान्दैत्यदानवान् ॥ नायातस्तत्र तिग्मांशुः सर्वे चान्ये समागताः ॥ ३६ ॥ दृष्ट्वा तु विबुधान्सर्वान्ब्रह्मा प्रोवाच
तानृषीन् ॥ आनयध्वमितः सूर्यं साम्ना दंडेन वा पुनः ॥ ३७ ॥ एवमुक्तो गतस्तावदुतथ्यः सूर्यमंडलम् ॥ स गत्वा प्राह मार्तण्डं शीघ्रमेह्येव
संविदम् ॥ ३८ ॥ स उतथ्यमथोवाच कथं ब्रह्मन्व्रजाम्यहम् ॥ एवमुक्त्वा गतः सूर्यो भुवने मयि निर्गते ॥ ३९ ॥ एवमुक्तो मुनिः प्रायात्सर्व
देवसमागमम् ॥ आचचक्षे च यत्प्रोक्तं भास्वता तपनं प्रति ॥ ४० ॥ उवाचाङ्गिरसं ब्रह्मा शीघ्रमेनं त्वमानय ॥ स तथोक्तो गतस्तत्र यत्रासौ
तपते रविः ॥ ४१ ॥ एह्येहि भगवन्सूर्य तप्यते भवतान्वहम् ॥ एवमुक्तो गतः सूर्यो यत्र देवाः समागताः ॥ ४२ ॥ स्थित्वा मुहूर्तं प्रोवाच किं वा
कार्यमुपस्थितम् ॥ पृच्छन्तमेव मार्तंडं ब्रह्मा प्रोवाच सादरम् ॥ ४३ ॥ गच्छ शीघ्रं न दहते भुवनं यावदंगिराः ॥ लब्धप्रायं तु गोलोकं वर्तते
कृष्णपिंगलम् ॥ ४४ ॥ पाटलो हरितः शोणः श्वेतो वर्णः प्रणाशितः ॥ शाकद्वीपं कुशद्वीपं क्रौञ्चद्वीपं सपन्नगम् ॥ दग्धमङ्गिरसा सर्वं भूयोऽपि
प्रदहिष्यति ॥४५॥ यावच्च दहते सर्वं भुवनं तपसांगिराः ॥ गच्छ तावदितः शीघ्रं स्वस्थाने तप भास्कर ॥ ४६ ॥ एवमुक्तः स विभुना स्वस्थान
मधिरूढवान् ॥ विसृष्टवानंगिरसं सकाशममृताशिनाम् ॥ ४७ ॥ गत्वाङ्गिरा उवाचेदं गतः किं करवाण्यहम् ॥ देवा अंगिरसं प्राहुस्तपोराशिम
कल्मषम् ॥ ४८ ॥ संप्रशस्योचुरग्नित्वं कुरु तावन्महीतले ॥ पूर्वं यथाग्निः कृतवांस्तथा त्वमपि सत्तम ॥ ४९ ॥ यावदग्निं प्रपश्यामः क्वासौ
नष्टः क्व तिष्ठति ॥ एवमुक्तः सदेवैस्तु अग्नित्वं कृतवांस्तदा ॥ ५० ॥ देवैर्दृष्टो यथा ह्यग्निस्तत्ते सर्वं निवेदितम् ॥ देवकार्ये कृते तस्मिन्देवा वह्नि
मथाब्रुवन् ॥ ५१ ॥ अग्नेऽग्नित्वं कुरुष्व त्वमंगिरास्तु यथा पुरा ॥ एवमुक्तः सुरैर्वह्निश्चिन्तयामास दुःखितः ॥ ५२ ॥ केन मेऽपहृतं
तेजः केनाग्नित्वं कृतं त्विह ॥ दृष्ट्वाथाग्निरङ्गिरसं तेजोराशिमकल्मषम् ॥ ५३ ॥ उवाच मंच मत्स्थानं वचस्तोषकरं शृणु ॥ अहं ते तनयश्श्रेष्ठो

भविष्ये प्रथमे शुभे ॥ ५४ ॥ बृहस्पतीति नामा वै तथान्ये बहवः सुताः ॥ एवमुक्तो मुनिस्तुष्टो बहूंश्चाजनयत्सुतान् ॥ ५५ ॥ वह्निं
संजनयामास पुत्रान्पौत्रांस्तदांगिराः ॥ अवाप पुनरग्नित्वमग्निस्तस्यां तिथौ नृप ॥ ५६ ॥ सर्वमेव चतुर्दश्यां संजातं हव्यवाहनम् ॥ हव्यवाहन
देवानां भूतानां गुह्यचारितम् ॥ ५७ ॥ ततोऽष्टपतिपत्वे च रुद्रेण प्रतिपादितम् ॥ पूजितेयं तिथिर्देवैर्दिविस्थैश्च नृपैरपि ॥ ५८ ॥ पैलजाबा
लिमन्वाद्यैरन्यैश्च नहुषादिभिः ॥ विषशस्त्रहतानां च संग्रामेन्यत्र ते क्वचित् ॥ ५९ ॥ अज्ञातावृषपापैश्च व्यालैर्ये व्याप्य हिंसिताः ॥ नदीप्रवाह
पतितः समुद्रे पर्वतेऽध्वनि ॥ ६० ॥ पतिताः पर्वतेभ्यश्च तोयाग्निदहने मृताः ॥ उदध्या पातिता ये च ये के चात्महनो जनाः ॥ तेषां शस्तं
चतुर्दश्यां श्राद्धं स्वर्गसुखप्रदम् ॥ ६१ ॥ श्राद्धानि चैव दत्तानि दानानि सुलघून्यपि ॥ प्रसूनफलभोज्यानिउपतिष्ठंति तान्नरान् ॥ ६२ ॥ एवं
तिथिरियं राजन्नाग्नेयी प्रोच्यते[1] जनैः ॥ रौद्रीं च केचिदित्याहू रुद्रोग्निः स च पच्यते ॥ ६३ ॥ यस्यां मनोरथं यंयं समुद्दिश्य ह्युपोषति ॥
ददाति तस्य तद्वह्निः साग्रे संवत्सरे गते ॥ ६४ ॥ चतुर्दश्यां निराहरः समभ्यर्च्य त्रिलोचनम् ॥ पुष्पधूपादिनैवेद्यै रात्रौ जागरणान्नरः ॥ पञ्च
गव्यं निशि प्राश्य स्वप्याद्भूमौ विमत्सरः ॥ ६५ ॥ श्यामाकमथ वा भुक्त्वा तैलक्षारविवर्जितम् ॥ होमः कृष्णतिलैः कार्यः शतमष्टोत्तरं नृप ॥
॥ ६६ ॥ अग्नये हव्यवाहनाय सोमायांगिरसे नमः ॥ ततः प्रभाते विमले स्नाप्य पंचामृतैः शिवम् ॥ ६७ ॥ पूजयित्वा विधानेन होमं कृत्वा
तथैव च ॥ उदीरयेन्मन्त्रमेतं कृत्वा शिरसि चांजलिम् ॥ ६८ ॥ नमस्त्रिमूर्तये तुभ्यं नमः सूर्याग्निरूपिणे ॥ पुत्रान्यच्छ सुखं यच्छ मोक्षं यच्छ
नमोऽस्तु ते ॥ ६९ ॥ नीराजनं ततः कृत्वा पश्चाद्भुंजीत वाग्यतः ॥ एवं संवत्सरस्यांते कृत्वा सर्वं यथोदितम् ॥ ७० ॥ सौवर्णं कारयेद्देवं त्रिनेत्रं
शूलपाणिनम् ॥ वृषस्कंधगतं सौम्यं सितवस्त्रयुगान्वितम् ॥ ७१ ॥ चन्दनेनानुलिप्ताङ्गं सितमाल्योपशोभितम् ॥ स्थापयित्वा ताम्रपात्रे ब्राह्म
णाय निवेदयेत् ॥ सर्वकालिकमेतत्ते कथितं व्रतमुत्तमम् ॥ ७२ ॥ संवत्सरं समाप्तं हि व्रतस्य तु यदा भवेत् ॥ काले गते बहुतिथे तीर्थस्य शरणं
भवेत् ॥ मृतस्य देहो दिव्यस्थो दिव्यालंकारभूषितः ॥७३॥ दिव्यनारीगणवृतो विमानवरमास्थितः॥देवदेवैः समः शंभोः क्रीडति त्रिपुरे चिरम् ॥
॥ ७४ ॥ इह चागत्य कालांते जातः स च नृपो भवेत् ॥ दाता यज्वा धनी दक्षो ब्राह्मणो ब्राह्मणप्रियः ॥ ७५ ॥ श्रीमान्वाग्मी कृती धीमान्पु
त्रपौत्रसमन्वितः ॥ पत्नीगणसमायुक्तश्चिरं भद्राणि पश्यति ॥ ७६ ॥ ये दुर्लभा भुवि सुरोरगमानवानां कामा ह्यनुत्तमगुणेन युताः सदैव ॥ ताना

---

[1] बुध्यते—इ० पा० ।

प्नुवंति सितभूततिथौ सुरेशं संपूज्य सोमतिलकं विधिवन्मनुष्याः ॥ ७७ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे [1]आंग्रेयीचतुर्दशीव्रतवर्णनं नाम त्रिनवतितमोऽध्यायः ॥ ९३ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अनंतव्रतमस्त्यन्यत्सर्वपापहरं शिवम् ॥ सर्वकामप्रदं नृणां स्त्रीणां चैव युधिष्ठिर ॥ १ ॥ शुक्लपक्षे चतुर्दश्यां मासि भाद्रपदे शुभे ॥ तस्यानुष्ठानमात्रेण [2]सर्वपापैः प्रमुच्यते ॥ २ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कृष्ण कोऽयं त्वयाख्यातो ह्यनंत इति विश्रुतः ॥ किं शेषनाग आहोस्विदनंतस्तक्षकः स्मृतः ॥ ३ ॥ परमात्माथ वानंत उताहो ब्रह्म उच्यते ॥ क एषोऽनंतसंज्ञो वै तथ्यं ब्रूहि केशव ॥ ४ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अनंत इत्यहं पार्थ मम नाम निबोधय ॥ आदित्यादिषु वारेषु यः काल उपपद्यते ॥ ५ ॥ कलाकाष्ठामुहूर्तादिदिनरात्रिशरीरवान् ॥ पक्षमासर्तुवर्षादियुगकल्पव्यवस्थया ॥ ६ ॥ योऽयं कालो मयाख्यातस्तव धर्मभृतां वर ॥ सोऽहं कालोऽवतीर्णोऽत्र भुवो भारावतारणात् ॥ ७ ॥ दानवानां विनाशाय वसुदेवकुलोद्भवम् ॥ मां विद्ध्यनंतं पार्थ त्वं विष्णुं जिष्णुं हरं शिवम् ॥ ८ ॥ ब्रह्माणं भास्करं शेषं सर्वव्यापिनमीश्वरम् ॥ विश्वरूपं महात्मानं सृष्टिसंहारकारकम् ॥ ९ ॥ प्रत्ययार्थं मयाख्यातं सोऽहं पार्थ न संशयः ॥ ॥ युधिष्ठिर उवाच ॥ ॥ अनन्तव्रतमाहात्म्यविधिं वद विदां वर ॥ १० ॥ किं पुण्यं किं फलं चास्य ह्यनुष्ठानवतां नृणाम् ॥ केन वादौ पुरा चीर्णं मर्त्ये केन प्रकाशितम् ॥ ११ ॥ एवं समस्तं विस्तार्य ब्रूह्यनंतव्रतं हरे ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ आसीत्पुरा कृतयुगे सुमंतो नाम वै द्विजः ॥१२॥ वशिष्ठगोत्रे चोत्पन्नः सुरूपश्च भृगोः सुताम् ॥ दीक्षां नामोपयेमे तां वेदोक्तविधिना ततः ॥१३॥ तस्याः कालेन संजाता दुहितानंतलक्षणा ॥ शीला नाम सुशीला सा वर्धते पितृसद्मनि ॥ १४ ॥ माता च तस्याः कालेन हरदाहेन पीडिता ॥ विननाश नदीतीरे मृता स्वर्गपुरं ययौ॥१५॥सुमंतोपि ततोन्यां वै धर्मपुंसः सुतां पुनः ॥ उपयेमे विधानेन कर्कशां नाम नामतः॥१६॥दुःशीलां कर्कशां चंडीं नित्यं कलहकारिणीम् ॥ सापि शीला पितुर्गेहे गृहार्चनरता विभो ॥ १७ ॥ कुड्यस्तंभतुलाधारदेहलीतोरणादिषु ॥ चातुर्वर्णकरं वैश्यनीलपीतसितासितैः ॥१८॥ स्वस्तिकैः शंखपद्मैश्च अर्चयन्ती पुनःपुनः ॥ पित्रा दृष्टा सुमन्तेन स्त्रीचिह्ना यौवने स्थिता ॥१९॥ कस्मै देया मया शीला विचार्यैवं सुदुःखितः ॥ पिता ददौ मुनीन्द्राय कौंडिन्याय शुभे दिने ॥ २० ॥ स्मृत्युक्तशास्त्रविधिना विवाहमकरोत्तदा ॥ निवर्त्योद्वाहिकं सर्वं प्रोक्तवान्कर्कशां द्विजः ॥ २१ ॥ किञ्चिद्दायादिकं देयं जामातुः पारितोषिकम् ॥ तच्छ्रुत्वा कर्कशा क्रुद्धा प्रोद्धृत्य गृहमण्डपम्॥२२॥

---

[1] आनंदचतुर्दशीव्रतवर्णनं नाम–इ० पा० । [2] सर्वपापं प्रणश्यति–इ० पा० ।

कपाटे सुस्थिरं कृत्वा गम्यतामित्युवाच ह ॥ भोज्यावशिष्टचूर्णेन पाथेयं च चकार सा ॥२३॥ कौंडिन्योपि विवाह्यैनां पथि गच्छञ्छनैःशनैः॥ शीलां सुशीलामादाय नवोढां गोरथेन हि ॥ २४ ॥ मध्याह्ने भोज्यवेलायां समुत्तीर्य सरित्तटे ॥ ददर्श शीला सा स्त्रीणां समूहं रक्तवाससाम् ॥ ॥ २५ ॥ चतुर्दश्यामर्चयन्तं भक्त्या देवं पृथक्पृथक् ॥ उपगम्य शनैः शीला पप्रच्छ स्त्रीकदंबकम् ॥ २६ ॥ नार्यः किमेतन्मे ब्रूत किंनाम व्रतमीदृशम् ॥ ता ऊचुर्योषितः सर्वा अनन्तो नाम विश्रुतः ॥ २७ ॥ साब्रवीदहमप्येवं करिष्ये व्रतमुत्तमम् ॥ विधानं कीदृशं तत्र किं दानं कस्य पूजनम् ॥ २८ ॥ ॥ स्त्रिय ऊचुः ॥ ॥ शीले पक्वान्नप्रस्थस्य पुन्नाम्नः सुकृतस्य तु ॥ अर्द्धं विप्राय दातव्यमर्द्धमात्मनि भोजनम् ॥ २९ ॥ कर्तव्यं तु सरित्तीरे कथां श्रुत्वा हरेरिमाम् ॥ अनंतानंतमभ्यर्च्य मंडले गंधदीपकैः ॥ ३० ॥ धूपैः पुष्पैः सनैवेद्यैः पीतालक्तैश्चतुःशतैः ॥ तस्याग्रतो दृढं सूत्रं कुंकुमाक्तं सुदोरकम् ॥ ३१ ॥ चतुर्दशग्रंथियुतं [1]वामे स्त्री दक्षिणे पुमान् ॥ मंत्रेणानेन राजेन्द्र यावद्वर्षं समाप्यते ॥ ३२ ॥ अनंतसंसारमहासमुद्रे मग्नान्समभ्युद्धर वासुदेव ॥ अनंतरूपे विनियोजितात्मा ह्यनंतरूपाय नमोनमस्ते ॥ ३३ ॥ अनेन दोरकं बद्ध्वा भोक्तव्यं स्वस्थमानसैः ॥ ध्यात्वा नारायणं देवमनंतं विश्वरूपिणम् ॥ ३४ ॥ भुक्त्वा चांते व्रजेद्वेश्म हीदं प्रोक्तं व्रतं तव ॥ सापि श्रुत्वा व्रतं चक्रे शीला बद्ध्वा सुदोरकम् ॥ ३५ ॥ भर्ता तस्याः समागत्य तां ददर्श महाधनाम् ॥ पाथेयशेषं विप्राय दत्त्वा भुक्त्वा तथैव च ॥ ३६ ॥ पुनर्जगाम सा हृष्टा गोरथेन स्वमाश्रमम् ॥ भर्त्रा सहैव शनकैः प्रत्यक्षं तत्क्षणादभूत् ॥ [2]तेनानंतप्रभावेण शुभगोधनसंकुलः ॥ ३७ ॥ गृहाश्रमः श्रिया युक्तो धनधान्यसमायुतः ॥ आकुलो व्याकुलो रम्यः सर्वत्रातिथिपूजनः ॥ ३८ ॥ सापि माणिक्यकाञ्चीभिर्मुक्ताहारविभूषिता ॥ दिव्यांगवस्त्रसंछन्ना सावित्रीप्रतिमाभवत् ॥ ३९ ॥ कदाचिदुपविष्टेन दृष्टं बद्धं सुदोरकम् ॥ शीलाया हस्तमूले तु साक्षेपं त्रोटितं रुषा ॥ ४० ॥ तेन कर्मविपाकेण तस्य सा श्रीः क्षयं गता ॥ गोधनं तस्करैर्नीतं गृहं चाग्निविदाहितम् ॥ ४१ ॥ यद्यदेवागतं गेहे तत्रतत्रैव नश्यति ॥ स्वजनैः कलहो मित्रैर्वचनं न जनैस्तथा ॥ ४२ ॥ अनंताक्षेपदोषेण दारिद्र्यं पतितं गृहे ॥ न कश्चिद्वदते लोकस्तेन सार्द्धं युधिष्ठिर ॥ ४३ ॥ ततो जगाम कौंडिन्यो निर्वेदाद्वनगह्वरम् ॥ मनसा ध्यायतेनंतं कदा द्रक्ष्यामि केशवम् ॥ ४४ ॥ व्रतं निरशनं गृह्य ब्रह्मचर्यं जपन्हरिम् ॥ विह्वलः प्रययौ पार्थ अरण्यं जनवर्जितम् ॥४५॥ तत्रापश्यन्महावृक्षं फलितं पुष्पितं तथा ॥ तमपृच्छत्त्वयानंतः कच्चिद्दृष्टो महाद्रुम ॥ तद्ब्रूहि सोप्युवाचेदं नानंतं वेद्म्यहं द्विज ॥ ४६ ॥ एवं निरी

---

[1] वामे करतले न्यसेत्–इ० पा०। [2] तेनानंतव्रतेनास्य बभौ–इ० पा०।

क्षितस्तेन गां ददर्श सवत्सकाम् ॥ तृणमध्ये प्रधावन्तीमितश्चेतश्च पांडव ॥४७॥ सोब्रवीद्धेनुके ब्रूहि यद्यनंतस्त्वयेक्षितः ॥ गौरुवाचाथ कौंडिन्यं
नानंतं वेद्म्यहं विभो ॥ ४८ ॥ ततो जगामाथ वने गोवृषं शाद्वले स्थितम् ॥ दृष्ट्वा पप्रच्छ गोस्वामिन्ननंतो लक्षितस्त्वया ॥ ४९ ॥ गोवृषस्तमु
वाचाथ नानन्तो वीक्षितो मया ॥ ततो व्रजन्ददर्शाग्रे रम्यं पुष्करिणीद्वयम् ॥ ५० ॥ अन्योन्यजलकल्लोलवीचिभिः परिशोभितम् ॥ छन्नं कुमु
दकह्लारैः कुमुदोत्पलमंडितम् ॥ ५१ ॥ सेवितं भ्रमरैर्हंसैश्चक्रैः कारंडवैर्बकैः ॥ ते अपृच्छद्द्विजोनन्तो भवद्भ्यां नोपलक्षितः ॥ ५२ ॥ ऊचतुः
पुष्करिण्यौ तं नानंतं विद्महे द्विज ॥ ततो ब्रह्मन्ददर्शाग्रे गर्दभं कुञ्जरं तथा ॥ ५३ ॥ तावप्युक्तौ सुमंतेन तस्यापि विनिवेदितम् ॥
नावाभ्यां वीक्षितोनंतस्तच्छ्रुत्वा निषसाद ह ॥ ५४ ॥ तस्मिन्क्षणे मुनिवरे कौंडिन्ये ब्राह्मणोत्तमे ॥ कृपयानंतदेवोपि प्रत्यक्षः समजायत ॥
॥ ५५ ॥ वृद्धब्राह्मणरूपेण इत एहीत्युवाच तम् ॥ प्रवेशयित्वा स्वगृहं गृहीत्वा दक्षिणे करे ॥ ५६ ॥ तां पुरीं दर्शयामास दिव्यनारीनरैर्युताम् ॥
तस्यां निविष्टमात्मानं वरसिंहासने नृप ॥ ५७ ॥ पार्श्वस्थशंखचक्रासिगदागरुडशोभितम् ॥ दर्शयामास विप्राय पूर्वोक्तं विश्वरूपिणम् ॥ ५८ ॥
विभूतिभेदैश्चानन्तमनन्तं परमेश्वरम् ॥ तं दृष्ट्वा तु द्विजोनन्तमुवाच परया मुदा ॥ ५९ ॥ पापोहं पापकर्माहं पापात्मा पापसम्भवः ॥
पाहि मां पुण्डरीकाक्ष सर्वपापहरो भव ॥६०॥ अद्य मे सफलं जन्म जीवितं च सुजीवितम् ॥ चूतवृक्षो वृषः कस्तु का गौः पुष्करिणीद्वयम् ॥
गर्दभं कुञ्जरं चैव देव मे ब्रूहि तत्त्वतः ॥ ६१ ॥ ॥ अनंत उवाच ॥ ॥ चूतवृक्षो हि विप्रोसौ विद्वान्यो वेदगर्वितः ॥ विद्या[1]दानं नोपकुर्व
न्छिष्येभ्यस्तरुतां गतः ॥ ६२ ॥ सा गौर्वसुन्धरा दृष्टा निष्फला या त्वयेक्षिता ॥ स हर्षो वृषभो दृष्टो लाभार्थं यस्त्वया वृतः ॥ ६३ ॥ धर्मा
धर्मव्यवस्थानं तच्च पुष्करिणीद्वयम् ॥ खरः क्रोधस्त्वया दृष्टः कुंजरो धर्मदूषकः ॥ ब्राह्मणोसावनंतोहं गुहासंसारगह्वरे ॥ ६४ ॥ इत्युक्तं ते मया
सर्वं विप्र गच्छ पुनर्गृहम् ॥ ६५ ॥ चरानंतव्रतं तत्त्वं नव वर्षाणि पंच च ॥ ततस्तुष्टः प्रदास्यामि नक्षत्रस्थानमुत्तमम् ॥ ६६ ॥ भुक्त्वा च विपु
लान्भोगान्सर्वान्कामान्यथेप्सितान् ॥ पुत्रपौत्रैः परिवृतस्ततो मोक्षमवाप्स्यसि॥६७॥इति दत्त्वा वरं देवस्तत्रैवांतर्हितोऽभवत् ॥ कौंडिन्योप्यागतो
गेहं चचारानंतसद्व्रतम् ॥ ६८ ॥ शीलया सह धर्मात्मा भुक्त्वा भोगान्मनोरमान् ॥ अंते जगाम च स्वर्गं नक्षत्रं च पुनर्वसूम् ॥ कल्पस्थानी च
संभूतो दृश्यतेद्यापि स ज्वलन् ॥ अनंतव्रतधर्मेण सम्यक्चीर्णेन कौरव ॥ ७० ॥ एतत्ते कथितं पार्थ व्रतानामुत्तमं व्रतम् ॥ यत्कृत्वा सर्वपापेभ्यो

---

१ आसीददानाच्छात्रस्य–इ० पा० ।

मुच्यते नात्र सशयः ॥ ७१ ॥ ये च शृण्वंति सततं वाच्यमानं नरोत्तम ॥ ते सर्वे पापनिर्मुक्ता यास्यंति परमां गतिम् ॥ ७२ ॥ संसारसागर
गुहां सुसुखं विहर्तुं वांछंति ये कुरुकुलोद्भव शुद्धसत्त्वाः ॥ संपूज्य ते त्रिभुवनेशमनंतदेवं बध्नंति दक्षिणकरे वरदोरकं मे ॥ ७३ ॥ इति श्रीभविष्ये
महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादेऽअनंतचतुर्दशीव्रतवर्णनं नाम चतुर्नवतितमोऽध्यायः ॥ ९४ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥
लोके प्रसिद्धाः श्रूयंते श्रावण्यो नाम देवताः ॥ एताः काः किं च कुर्वंति धर्मं चासां ब्रवीहि मे ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ विद्यंते देवताः
पुण्याः श्रावण्यो नाम पांडव ॥ ब्रह्मणा प्रथमं सृष्टा नियोगश्च जने कृतः ॥ २ ॥ यो यद्वदति लोकेस्मिञ्छुभं वाप्यथ वाशुभम् ॥ श्रावयंति
हि तच्छीघ्रं ब्राह्मण्यः कर्मगोचरम् ॥३॥ जातास्त्रिलोके पूज्यास्तु नियमेन प्रजापते ॥ दूराच्छ्रवणविज्ञानं दूराद्दर्शनगोचरम् ॥४॥ तासामस्तीह सा
शक्तिरचिन्त्या तर्कहेतुभिः ॥ नरैस्तुष्टैश्च यत्प्रोक्तं कार्याकार्यस्य कारणात् ॥५॥ तच्छृण्वंति यतः पार्थ नैकाः श्रावणिका मताः ॥ यथा देवा यथा
दैत्या यथा विद्याधरानराः॥६॥यथा हि सिद्धगंधर्वा नागाः किंपुरुषाः खगाः॥राक्षसाश्च पिशाचाश्च देवानामष्टयोनयः॥ तथैताः पुण्यनामानो वंद्याः
श्रावणिकाः स्मृताः॥७॥ ता समुद्दिश्य कर्तव्यं व्रतं नारीनरैरिह ॥ किं तु तासां महोग्रं तु व्रतं संयमनं तदा ॥८॥ आघ्राय धूपं पक्वान्नं जलं चागन्ध
मेव च ॥ दातव्या पुनरन्यासां नारीणां भोज्यपारणा ॥९॥ अदत्त्वा यदि मृत्युः स्यादंतरालेपि पांडव ॥ तदा लग्नग्रहैर्ग्रस्ता लग्ना ह्युपरिकारटम् ॥
सफेनिलैर्मुखै रौद्रैर्म्रियंते नीचदुःखिताः ॥ १० ॥ श्रूयंते हि पुरा पार्थ पृथिव्यां नहुषो नृपः ॥ तस्य भार्या महादेवी जयश्रीर्नाम भारत ॥ ११ ॥
प्रत्यक्षरूपसंपन्ना दर्शनीयतरा शुभा ॥ पीवरोरुस्तना श्यामा मृदुकुञ्चितमूर्द्धजा ॥ १२ ॥ शब्दगद्गदसंभाषा मत्तमातंगगामिनी ॥ यथारूपा तथा
शीला सती चेष्टा महीतले ॥ १३ ॥ सा कदाचिद्गता स्नातुं गंगायां चाश्रमे मुनेः ॥ वशिष्ठस्य ददर्शाथ सतीं भार्यामरुंधतीम् ॥ १४ ॥ भोजयं
तीं मुनीनां तु पत्नीर्नानान्नभोजनैः ॥ तया च प्रणिपत्याथ पृष्टा देव्या महासती ॥ १५ ॥ पूज्यं भगवति ब्रूहि किमेतद्व्रतमुच्यते ॥ १६ ॥
॥ ॥ अरुन्धत्युवाच ॥ ॥ जयश्रिये शृणुष्व त्वं नाम्ना श्रावणिकाव्रतम्॥एतद्भर्त्रा समाख्यातं वशिष्ठेन महर्षिणा॥१७॥गूढं ब्रह्मर्षिसर्वस्वं सुपतिव्रतकं
शुभम् ॥ गच्छ वा तिष्ठ वा राज्ञि तवातिथ्यं करोम्यहम् ॥१८॥ एवमुक्ता जयश्रीस्तु भोज्ये तस्मिन्यदृच्छया ॥ बुभुजे सापि तत्रैव अरुंधत्या कृता
दरा ॥ १९ ॥ भुक्त्वाचम्य जगामाथ स्वपुरं परमेश्वरम् ॥ कालेन विस्मृतं तस्यास्तद्व्रतं तस्य भोजनम् ॥ २० ॥ ततस्तु समये पूर्णे म्रियमाणा
महासती ॥ जयश्रीर्घर्घरं गंतुं कुर्वाणा कंठगद्गदम् ॥ २१ ॥ फेनं लालाविलाद्वक्त्रादुद्गिरंती मुहुर्मुहुः ॥ स्थिता पंचदशाहानि बीभत्सा दारुणा

नना ॥ २२ ॥ ततः षोडशके प्राप्ते दिने स्वयमरुंधती ॥ प्रविश्याभ्यंतरं पूर्णं तां राज्ञीमवलोक्य च ॥ नहुषाय समाचख्यौ यदुक्तं श्रावणी व्रते ॥ २३ ॥ तच्छ्रुत्वा नहुषो राजा द्रुतं भोज्यं प्रचक्रमे ॥ यथोक्तं तदरुंधत्या यच्च यावदभीप्सितम् ॥ २४ ॥ दत्वा च करकानष्टौ तामुद्दिश्य जयश्रियम् ॥ क्षणाज्जगाम पञ्चत्वं करकाणां प्रदानतः ॥ २५ ॥ जगाम शक्रलोकं सा विमानेनार्कवर्चसा ॥ दोधूयमाना चमरैः स्तूयमाना सुरासुरैः ॥ २६ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ मार्गशीर्षादिमासेषु द्वादशस्वपि पांडव ॥ द्रव्यप्राप्तिश्च भक्तिश्च दानकाले प्रशस्यते ॥ २७ ॥ भुक्त्वा यज्ञे चतुर्दश्यामष्टम्यां वा युधिष्ठिर ॥ व्रती स्नात्वा तु पूर्वाह्णे नद्यादौ विमले जले ॥ २८ ॥ आमंत्रयेद्दशैकैका नारीर्गौरीस्वरूपिणीः ॥ यताचाराः सुवेषाश्च ब्राह्मणीर्वा स्वगोत्रजाः ॥ २९ ॥ द्वादश ब्राह्मणांस्तत्र वेदवेदांगपारगान् ॥ मंत्रज्ञानितिहासज्ञानुपशांताञ्जितेन्द्रियान् ॥ ३० ॥ सर्वं दद्याद्विधानेन पादक्षालनपूर्वकम् ॥ चंदनेन सुगन्धेन पुष्पधूपादिना तथा ॥ ३१ ॥ ग्रीवासूत्रकसिंदूरकुंकुमेन च भूषयेत् ॥ तासामग्रे प्रदातव्या वर्द्धन्यो द्वादशैव तु ॥ ३२ ॥ अच्छिद्रा जलपूर्णास्तु सुवृत्ताः सूत्रवेष्टिताः ॥ सोहालकादिभिश्छन्नाः पुष्पमालाविभूषिताः ॥ ३३ ॥ चंदनेन समालब्धाः सहिरण्याः पृथक्पृथक् ॥ तन्मध्ये वर्द्धनीं चैकां स्वके शीर्षे निवेशयेत् ॥ ३४ ॥ स्थित्वा मण्डलके मध्ये यजमानः स्वयं तदा ॥ यद्बाल्ये यच्च कौमारे वार्द्धके वापि यत्कृतम् ॥ तत्सर्वं नाशमायातु पितृदेवर्षिणां नृणाम् ॥ ३५ ॥ इमा मे समयं स्वर्णं तारयस्व भवार्णवात् ॥ अद्याहं गन्तुमिच्छामि विष्णोः पदमनुत्तमम् ॥ एवमस्त्विति ता ब्रूयुः स्त्रियः सर्वा युधिष्ठिर ॥ ३६ ॥ ततो ब्राह्मणमाहूय यजमान इदं वदेत् ॥ ब्रूहि ब्राह्मण यन्मे त्वमवं येन क्षयं व्रजेत् ॥ ३७ ॥ उत्तीर्य श्रावणं मासं समुत्तारय सांप्रतम् ॥ उत्तारयेत मंत्रेण ब्राह्मणो वर्धनीं च ताम् ॥ ३८ ॥ उपोष्य शिरसो देव्याः समुत्तीर्य रुहद्द्रुमान् ॥ कटुकं निंबवृक्षं वा ततो मधुकमारुह ॥ ततो गच्छ महादेवं श्रवणे श्रवणोत्तमे ॥ ३९ ॥ इति वर्धनिकोत्तारणमन्त्रः ॥ एवं ताः समयं प्रोच्य दत्त्वाशीर्वचनानि च ॥४०॥ तां वर्द्धनिकामेकान्ते विप्राय प्रतिपादयेत् ॥ गृहीत्वा करकान्नार्य्यो व्रजेयुः स्वेषु वेश्मसु ॥ ४१ ॥ यजमानोऽपि यातासु यथेष्टं कामामाचरेत् ॥ एवमाचरते पार्थ श्रावणीव्रतमादरात् ॥४२॥ तस्य काले तु संप्राप्ते सुखं मृत्युः प्रजायते ॥ निर्व्याधिर्नीरुजो भोगी स्थित्वास्थित्वा शतं सुखम् ॥ ४३ ॥ पुत्रपौत्रसमृद्ध्यादौ भुक्त्वा मर्त्यसुखानि च ॥ रुद्रलोकमवाप्नोति सोमलोकं स गच्छति ॥ ४४ ॥ स्त्रीणां तुल्यं स हीनोऽपि व्रती व्रतफलं व्रजेत् ॥ गौरीभोज्येषु दत्तेषु

एकादशसु यत्फलम् ॥ ४५ ॥ तदेकेनापि लभते पार्थं श्रावणिकाव्रते ॥ भक्त्या गच्छंति ते लोकान्विहृत्य सुखमादरात् ॥ ४६ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे श्रवणिकाव्रतं नाम पञ्चनवतितमोऽध्यायः ॥ ९५ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अथ नक्तोपवासस्य विधानं शृणु पांडव ॥ येन विज्ञातमात्रेण नरो मोक्षमवाप्नुयात् ॥ १ ॥ येषु तेषु च मासेषु शुक्लपक्षे चतुर्दशीम् ॥ ब्राह्मणं भोजयित्वा तु प्रारभेत ततो व्रतम् ॥ २ ॥ मासिमासि भवंति द्वावष्टम्यौ च चतुर्दशी ॥ शिवार्चनरतो भूत्वा शिवध्यानैकमानसः ॥ वसुधाभाजनं कृत्वा भुञ्जीयान्नक्तभोजनम् ॥ ३ ॥ उपवासात्परं भैक्ष्यं भैक्ष्यात्परमयाचितम् ॥ अयाचितात्परं नक्तं तस्मान्नक्तेन भोजयेत् ॥ ४ ॥ देवैश्च भुक्तं पूर्वाह्णे मध्याह्ने मुनिभिस्तथा ॥ अपराह्णे च पितृभिः सन्ध्यायां गुह्यकादिभिः ॥ ५ ॥ सर्वलोकानतिक्रम्य नक्तभोजी सदा भवेत् ॥ हविष्यभोजनं स्नानं सत्यमाहारलाघवम् ॥ ६ ॥ अग्निकार्यो ह्यधःशय्यो नक्तभोजी सदा भवेत् ॥ एवं संवत्सरस्यांते व्रतपूर्णस्य सर्पिषा ॥ पूर्णकुम्भोपरि स्थाप्य पूजयेच्च सुशोभने ॥ ७ ॥ कपिलापञ्चगव्येन स्थापयेन्मृन्मयं शिवम् ॥ फलं पुष्पं यवक्षीरं दधि दूर्वांकुरांस्तथा ॥ ८ ॥ तत्कुम्भानां जलोन्मिश्रमर्घमष्टांगमुच्यते ॥ शिरसा धारयित्वा तु जानू कृत्वा महीतले ॥ ९ ॥ महादेवाय दातव्यं गन्धपुष्पं यथाक्रमम् ॥ भक्ष्यौदनैर्बलिं कृत्वा प्रणम्य परमेश्वरीम् ॥ १० ॥ धेनुं वा दक्षिणां दद्याद्वृषं वापि धुरंधरम् ॥ श्रोत्रियाय दरिद्राय कल्पव्रतविदाय च ॥ यो ददाति शिवे भक्त्या तस्य पुण्यफलं शृणु ॥ ११ ॥ विमानमर्कप्रतिमं हंसयुक्तमलंकृतम्॥ आरूढोऽप्सरसां गीतैर्याति रुद्रालये सुखम् ॥ १२ ॥ स्थित्वा रुद्रस्य भवने वर्षकोटिशतत्रयम् ॥ इह लोके नृपश्रेष्ठ ग्रामलक्षेश्वरो भवेत् ॥ १३ ॥ यश्चाष्टमीषु च शिवासु चतुर्दशीषु नक्तं समाचरति शास्त्रविधानदृष्टम् ॥ स्वर्गांगनाकलरवाकुलितं विमानमारुह्य याति स सुखेन सुरेशलोकम् ॥ १४ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे षण्णवतितमोऽध्यायः ॥ ९६ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ शृणुष्वावहितो राजन्वक्ष्ये माहेश्वरं व्रतम् ॥ त्रिषु लोकेषु विख्यातं नाम्ना शिवचतुर्दशी ॥ १ ॥ मार्गशीर्षत्रयोदश्यां सितायामेकभुङ्नरः ॥ मासेष्वन्येषु वा राजन्पार्थ एवं न कारयेत् ॥ २ ॥ चतुर्दश्यां निराहारः समभ्यर्च्य महेश्वरम् ॥ सौवर्णं वृषभं दत्त्वा भक्ष्यामि च परेऽहनि ॥ ३ ॥ एवं नियमकृत्सुप्त्वा प्रातरुत्थाय मानवः ॥ कृतस्नानजपः पश्चादुमया सह शंकरम् ॥ पूजयेत्कुसुमैः शुक्लैर्गंधधूपानुलेपनैः ॥ ४ ॥ पादौ नमः शिवायेति शिरः सर्वात्मने नमः ॥ ललाटं तु त्रिनेत्राय नेत्राणि हरये नमः ॥ ५ ॥ मुखमिन्दुमुखायेति तथेशानाय चोदरम् ॥ पार्श्वे चानंतधर्माय ज्ञानरूपाय वै कटिम् ॥ ६ ॥ ऊरू चानन्त्य

वैराग्यं जानुनी चार्चयेद्बुधः ॥ प्रधानाय नमो जंघे गुल्फौ व्योमात्मने नमः ॥ ७ ॥ व्योमव्योमात्मरूपाय पृष्ठमभ्यर्चयेन्नरः ॥ नमः सृष्ट्यै
नमस्तुष्ट्यै पार्वतीं चापि पूजयेत् ॥ ८ ॥ ततश्च वृषभं हैममुदकुम्भसमन्वितम् ॥ शुक्लमाल्यांबरयुतं पञ्चरत्नविभूषितम् ॥ ९ ॥ भक्ष्यैर्नानाविधै
र्युक्तं ब्राह्मणाय निवेदयेत् ॥ प्रीयतां देवदेवोऽत्र सद्योजातः पिनाकधृक् ॥ १० ॥ पृषदाज्यं च संप्राश्य स्वप्याद्भूमावुदङ्मुखः ॥ पञ्चदश्यां
ततः प्रातः सर्वमेतत्समाचरेत् ॥ ११ ॥ तर्पयित्वा ततोऽन्नेन ब्राह्मणाञ्छक्तितः शुभान् ॥ सुहृत्पदातिसहितः पश्चाद्भुञ्जीत वाग्यतः ॥ १२ ॥
ततः कृष्णचतुर्दश्यामेतत्सर्वं समाचरेत् ॥ चतुर्दशीषु सर्वासु कुर्यात्पूर्ववदर्चनम् ॥ १३ ॥ ये च मासे विशेषाः स्युस्तान्निबोध क्रमादिह ॥
मार्गशीर्षादिमासेषु स्वपन्नेतानुदीरयेत् ॥ १४ ॥ शंकराय नमस्तुभ्यं नमस्ते करवीरक ॥ त्र्यंबकाय नमस्तुभ्यं महेश्वरमतः परम् ॥ १५ ॥ नम
स्तेऽस्तु महादेव स्थाणवे च ततः परम् ॥ नमः पशुपते नाथ नमस्ते शंभवे नमः ॥ १६ ॥ नमस्ते परमानंद नमः सोमार्द्धधारिणे ॥ नमो
भीमाय चोग्राय त्वामहं शरणं गतः ॥ १७ ॥ गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ॥ पंचगव्यं तथा बिल्वं यवागूक्षीरवारिजम् ॥ १८ ॥
तिलांश्च कृष्णान्विधिवत्प्राश्नीयात्समुदाहृतान् ॥ प्रतिमासं चतुर्दश्यामेकैकं प्राशनं स्मृतम् ॥ १९ ॥ मंदारैर्मालतीभिश्च तथा धत्तूरकैरपि ॥
सिंदुवारैरशोकैश्च मल्लिकाकुब्जपाटलैः ॥ २० ॥ अर्कपुष्पैः कदंबैश्च शतपत्रैस्तथोत्पलैः ॥ करवीरैश्च राजेन्द्र तथा पूज्यो महेश्वरः ॥ २१ ॥ एकै
केन चतुर्दश्यामर्चयेत्पार्वतीपतिम् ॥ पुनश्च कार्त्तिके मासि संप्राप्ते तर्पयेद्द्विजान् ॥ २२ ॥ अन्नैर्नानाविधैर्भक्ष्यैर्वस्त्रैर्माल्यैर्विभूषणैः ॥ कृत्वा नीलं
वृषोत्सर्गं श्रुत्युक्तविधिना नरः॥२३॥उमामहेश्वरं हैमं वृषभं च गवा सह॥मुक्ताफलाष्टकयुतं सितनेत्रपटावृतम्॥२४॥सर्वोपस्करयुक्तायां शय्यायां
विनिवेदयेत्॥उदकुंभयुतं तद्वच्छालितंदुलसंयुतम्॥२५॥स्थाप्य विप्राय शांताय वेदव्रतपराय च॥ज्येष्ठसामविदे देयं न च कुर्वंति ते क्वचित् ॥२६॥
अव्यंगाय च सौम्याय सदा कल्याणकारिणे ॥ सपत्नीकाय संपूज्य माल्यवस्त्रविभूषणैः ॥ न वित्तशाठ्यं कुर्वीत कुर्वंल्लोभात्पतत्यधः ॥ २७ ॥
अनेन विधिना यस्तु कुर्याच्छिवचतुर्दशीम् ॥ सोऽश्वमेधसहस्रस्य फलं प्राप्नोति मानवः ॥ २८ ॥ ब्रह्महत्यादिकं पापं यदत्रामुत्र वा कृतम् ॥
पितृभिर्मातृभिर्वापि तत्सर्वं नाशमाप्नुयात् ॥ २९ ॥ दीर्घायुरारोग्यकुलाभिवृद्धिरत्राक्षयान्यत्र चतुर्भुजत्वम् ॥ गणाधिपत्यं दिवि कल्पकोटीः
स्वर्गे उषित्वा पदमेति शंभोः ॥ ३० ॥ न बृहस्पतिरप्यत्मन्नरस्य फलमिंद्रो न पितामहोऽपि वक्तुम् ॥ न च सिद्धगणोऽप्यलं न वाहं यदि जिह्वायु

---

१ माल्यानुलेपनैः—इ० पा० ।

तकोट्यपीह वक्रे ॥ ३१ ॥ भवत्यमरवल्लभः पठति यः स्मरेद्वा सदा शृणोत्यपि विमत्सरः सकलपापनिर्मोचनीम् ॥ इमां शिवचतुर्दशीममरका
मिनीकोटयः स्तुवंति दिवि नंदिताः किमु समाचरेद्यः सदा ॥ ३२ ॥ या पार्थ नारी कुरुतेऽतिभक्त्या भर्त्तारमापृच्छ्य शुभं गुरुं वा ॥ सापि
प्रसादात्परमेश्वरस्य परं पदं याति पिनाकपाणेः ॥ ३३ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवाद शिवचतुर्दशीव्रतवर्णनं
नाम सप्तनवतितमोऽध्यायः ॥ ९७ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ तथा सर्वफलत्यागमाहात्म्यं शृणु भारत ॥ यदक्षयं परे लोके सर्वका
मफलप्रदम् ॥ १ ॥ मार्गशीर्षे शुभे मासि चतुर्दश्यां धृतव्रतः ॥ आरंभे शुक्लपक्षस्य कृत्वा ब्राह्मणवाचनम् ॥ २ ॥ अन्येष्वपि तु मासेषु अष्टम्यां
नरसत्तम ॥ सदक्षिणापायसेन शक्तितः पूजयेद्द्विजान् ॥३॥ अष्टादशानां धान्यानामन्यत्र फलमूलकम् ॥ वर्जयेदब्दमेकं तु विधिनौषधकारकम् ॥
॥ ४ ॥ ततः संवत्सरस्यांते चतुर्दश्यष्टमीषु च ॥ अशक्तश्च व्रतं कर्तुं सहसैव प्रमुच्यते ॥५॥ सौवर्णं कारयेद्रुद्रं धर्मराजं तथैव च ॥ कूष्माण्डं मातु
लुंगं च वृंताकं पनसं तथा ॥६॥ आम्राम्रातकपित्थं च कलिंगं सेर्वारुकम् ॥ श्रीफलं सवटाश्वत्थं जंबीरं कदलीफलम् ॥७॥ बदरं दाडिमं शक्त्या
कार्याण्येतानि षोडश ॥ मूलकामलकं जंबूपुष्करं करमर्दकम् ॥ ८ ॥ उदुंबरं नालिकेरं द्राक्षा च बृहतीद्वयम् ॥ कंकाली काकतुंडीरं करीरकुटजं
शमी ॥ ९ ॥ रौप्याणि कारयेच्छक्त्या फलानीमानि षोडश ॥ ताम्रं तालफलं कुर्यादगस्त्यफलमेव वा ॥ १० ॥ पिंडीरकं च खर्जूरं तथा सूरण
कंदकम् ॥ पनसं लकुचं चैव कर्कटं तिंतिडिं तथा ॥ ११ ॥ चित्रावल्लीफलं तद्वत्कूटशाल्मलिकाफलम् ॥ मधूकं कारवेल्लं च वल्लीं गुदपटोल
कम् ॥१२॥ कारयेच्छक्तितो धीमान्फलान्येतानि षोडश ॥ उदकुंभद्वयं कुर्याद्धान्योपरि सवाससम् ॥ पक्षपात्रद्वयोपेतं यमरुद्रसमन्वितम् ॥१३॥
धेन्वा सहैव शांताय विप्रायाथ कुटुंबिने ॥ सपत्नीकाय संपूज्य पुण्येहनि निवेदयेत् ॥ १४ ॥ यथा फलेषु सर्वेषु वसंत्यमरकोटयः ॥ तथा सर्वफ
लत्यागाच्छिवे भक्तिः सदास्तु मे ॥ १५ ॥ यथा शिवश्च धर्मश्च सदानन्तफलप्रदौ ॥ तद्युक्तफलदानेन तौ स्यातां मे वरप्रदौ ॥ १६ ॥ यथा
फलानां कामस्य शिवभक्तस्य सर्वदा ॥ यथानंतफलावाप्तिरस्तु जन्मनिजन्मनि ॥ १७ ॥ यथा भेदं न पश्यामि शिवविष्ण्वर्कपद्मजाम् ॥ तथा
ममास्तु विश्वात्मा शङ्करः शंकरः सदा ॥ १८ ॥ इत्युच्चार्य च तत्सर्वमलंकृत्य विभूषणैः ॥ शक्तश्चेच्छयनं दद्यात्सर्वोपस्करसंयुतम् ॥ अशक्तस्तु
फलान्येव यथोक्तानि विधानतः ॥ १९ ॥ तथोदकुंभसहितौ शिवधर्मौ च कांचनौ ॥ विप्राय दत्त्वा भुञ्जीत तैलक्षारविवर्जितम् ॥ अन्यानपि
यथा शक्त्या भोजयेद्द्विजपुङ्गवान् ॥ २० ॥ न शक्नोति विहातुं चेत्सर्वाण्यपि फलान्युत ॥ एकमेव परित्यज्य वदित्थं प्रतिपादयेत् ॥ २१ ॥

एतत्त्यागव्रतानां तु गवे वैष्णवयोगिनाम् ॥ शस्तं सर्वफलत्यागं व्रतं वेदविदो विदुः ॥ नारीभिश्च यथाशक्त्या कर्तव्यं राजसत्तम ॥ २२ ॥ नैतस्मादपरं किञ्चिदिह लोके परत्र च ॥ व्रतमस्ति मुनिश्रेष्ठ यदन्नं तत्फलप्रदम् ॥२३॥ सौवर्णरौप्यताम्रेषु यावंतः परमाणवः॥ भवंति चूर्यमाणेषु फलेषु नृपसत्तम ॥ तावद्युगसहस्राणि रुद्रलोके महीयते ॥ २४ ॥ एतत्समस्तकलुषापहरं जनानामाजीवनाय मनुजेश्वर सर्वदा स्यात् ॥ जन्मान्तरेष्वपि न पुत्रकलत्रदुःखमाप्नोति धाम स पुरंदरजुष्टमेव ॥ २५ ॥ यो वा शृणोति पुरुषोल्पधनो नरो वा यो ब्राह्मणस्तु भवनेषु च धार्मिकाणाम्॥ पापैर्विमुक्तश्च परत्र पुरं मुरारेरानंदकृत्परमुपैति नरेन्द्र सोपि ॥२६॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे फलत्यागचतुर्दशीव्रतवर्णनं नामाष्टनवतितमोऽध्यायः ॥ ९८ ॥ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ पौर्णमासी महाराज सोमस्य दयिता तिथिः ॥ पूर्णमासो भवेद्यस्यां पौर्णमासी ततः स्मृता ॥ १ ॥ पौर्णमास्यां च संजातः संग्रामो जयलक्षणः ॥ सोमस्यारिबुधैः सार्द्धं सर्वसत्त्वभयंकरम् ॥ ॥ २ ॥ तारायां चन्द्रमाः सक्तस्तस्या भर्ता बृहस्पतिः ॥ तयोरभून्महायुद्धं भार्याकृत्येषु वै पुरा ॥ ३ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ तारा कस्य सुता कस्मात्स क्रुद्धः ससुरारिहा ॥ सोमेन सह संग्रामं चक्रे चक्रगदाधर ॥ ४ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ प्रजापतेरभूत्कन्या तारा वृत्रस्य चानुजा ॥ तां बृहस्पतये प्रादात्पृथिव्यामेकसुंदरीम् ॥ ५ ॥ देवाचार्याय सा भार्या त्वनिर्देश्या तथाविधा ॥ रूपेणाभ्यां रूपवती सा निर्धूय व्यवस्थिता ॥ ६ ॥ बृहस्पतिं पर्यचरद्यथा चान्याः स्त्रियः क्वचित् ॥ तां ददर्शायतापांगीं तन्वंगीं चारुहासिनीम् ॥ ७ ॥ शीतांशुर्दर्शनादेव कामस्य वशमीयिवान् ॥ आबभाषे च मधुरं तारे एह्येहि मा चिरम् ॥ ८ ॥ इंगिताकारकुशला तारा सोमस्य चेष्टितम् ॥ बुद्ध्वा शुद्धिमथो तन्वी प्राहेदं मधुराक्षरम् ॥ ९ ॥ मुनेरंगिरसः पुत्रस्त्वं च सौम्योऽसि सोमराट् ॥ अंगिरसो मुनेर्वीर स्नुषाहमुचितं न ते ॥ सह सौम्येन यो योगस्तव सिद्धोऽद्भुतो महान् ॥ १० ॥ अंगिरास्त्वां किल पुरा ससुरासुरराक्षसैः ॥ राजत्वे स्थापयामास नैतत्स्मरसि किं विधो ॥ ११ ॥ कथमद्य निशानाथ ह्यनंगेनासि पीडितः ॥ तस्मद्ब्रवीमि सिद्धिं ते रोचये घटितं कुरु ॥ परवत्यस्मि भद्रं ते न गम्यास्मि बुधोत्तम ॥ १२ ॥ एवमुक्तस्तथा चासौ न चैतत्कृतवांस्ततः ॥ गृहीत्वाकर्षयामास सोमोऽनंगवशीकृतः ॥ १३ ॥ बृहस्पतिस्तु तां ज्ञात्वा स तं सोममगर्हयत् ॥ प्रेषयिष्यति मे भार्यां स्वयमेव ममांतिकम् ॥ १४ ॥ एवं चिरेण विज्ञाय बृहस्पतिरुदारधीः ॥ नाससाद स्वकां भार्यां रोषात्प्रस्फुरिताधरः ॥ १५ ॥ आचख्यौ सर्वमिन्द्राय सोमस्येदं विचेष्टितम् ॥ इंद्रः समाह्वयामास देवानृषिगणांस्तथा ॥ १६ ॥ न सोमो गणयामास ततोऽबुध्यत देवराट् ॥ आकार्य

त्रिदशान्सर्वानाचख्यौ चन्द्रचेष्टितम् ॥ १७ ॥ तच्छ्रुत्वा देवगंधर्वाः क्रोधान्धाः क्षुब्धमानसाः ॥ प्रगृहीतप्रहरणा रथानारुरुहुः स्वकान् ॥ १८ ॥
सोमोऽपि देवान्सोद्योगाञ्ज्ञात्वा सुकृतनिश्चयान् ॥ दैत्यदानवरक्षांसि समानीय व्यवस्थितः ॥ १९ ॥ आरुह्य च रथश्रेष्ठं युद्धायैव मनो दधे ॥
प्रवृत्तं सुमहद्युद्धं शरतोमरकंपनैः ॥ २० ॥ कौणपैः क्ष्मासुरैः शूलैर्देवदानवदारणम् ॥ स तेषां सुमहद्युद्धं दत्त्वा तारागणाधिपः ॥ बभंज
देवान्सेन्द्रांश्च हिमवृष्ट्या क्षपाकरः ॥ २१ ॥ स जित्वा देवगन्धर्वान्सोमो राजन्यसत्तम ॥ श्रिया परमया युक्तो यथा नान्यो हविर्भुजाम् ॥
॥ २२ ॥ देवाश्च निर्जितास्तेन सोमेनामिततेजसा ॥ आजग्मुः शरणं देवं शरण्यं स्वर्गवासिनाम् ॥ २३ ॥ इन्द्रः सर्वं समाचख्यौ सोमस्ये
दृग्विचेष्टितम् ॥ श्रुत्वा क्रुद्धो हृषीकेश आरुह्य गरुडं रुषा ॥ गृहीत्वा [1]चायुधं श्रेष्ठं युद्धायैव मनो दधे ॥ २४ ॥ प्रकर्तुं सुमहद्युद्धं चक्रशार्ङ्गगदा
धरः ॥ जगाम विबुधैः सार्धं सोमस्योपरि रोषितः ॥ २५ ॥ विष्णुं विदित्वा संप्राप्तं सोमो दैत्यगणैः सह ॥ युद्धाय समरामर्षी स्थितः [2]प्रध्माय
वारिजम् ॥ २६ ॥ स जित्वा देवसंघातं [3]सैंद्रं वायुपुरस्सरम् ॥ विष्णुना सह संयुक्तः शस्त्रास्त्रैरसुभोजनैः ॥ २७ ॥ यदा नासावुपरमेद्युद्धाय
सह विष्णुना ॥ तदाऽऽददे रुषा विष्णुश्चक्रं क्रोधसमन्वितः ॥ २८ ॥ अथाह ब्रह्मा देवेशमजितं विष्णुमव्ययम् ॥ योऽसौ मेघप्रपुष्टांगं यत्त्वां
वच्मि निबोध तत् ॥ २९ ॥ नास्ति वध्यं त्रिभुवने चक्रस्यास्य तवानघ ॥ सोमो द्विजाधिपत्ये च मया समभिषेचितः ॥ ३० ॥ तस्माद्वियु
ज्यते देवकार्येऽस्मिंस्तद्विधीयताम् ॥ अथाह भगवान्विष्णुः सुरब्रह्मर्षिसन्निधौ ॥ ३१ ॥ सिनीवाली कुहूर्नाम तस्यां नष्टः क्षपाकरः ॥ विन
ष्टोऽपि पुनर्जन्म प्राप्स्यतीति न संशयः ॥ ३२ ॥ राकां चानुमतिं प्राप्य वृद्धिरस्य भविष्यति ॥ आप्यायितश्च श्रुत्युक्तैः पितृपिण्डैः समं
त्रकैः ॥ ब्राह्मणैर्हव्यकव्यानि देवेभ्यः प्रापयिष्यति ॥ ३३ ॥ वृद्धिः कृष्णेन चैवास्य न च जातस्य भूयसी ॥ एवमेव विधिर्दृष्टस्तस्याप्याय
नमेव मे ॥ ३४ ॥ अमोघस्य न मोघत्वं भविष्यति कदाचन ॥ शतश्च सोमो दक्षेण स चावश्यं भविष्यति ॥ ३५ ॥ सुदर्शनस्य च प्रीति
रेवमेव भविष्यति ॥ एवमस्त्विवति देवेश यद्भवान्प्रब्रवीति वै ॥ ३६ ॥ ब्रह्मा प्रोवाच सोमं तु विनीतवदुपस्थितम् ॥ अर्पयस्व
गुरोर्भार्यां न कार्यं पुनरीदृशम् ॥ ३७ ॥ स तथोक्तः समानीय ददौ तारां बृहस्पतेः ॥ पुनरूचे शशी स्पष्टं शृण्वतां त्रिदिवौकसाम् ॥ ३८ ॥ अस्यां
गर्भो मदीयोऽयं यदपत्यं ममैव तत् ॥ बृहस्पतिरथोवाच मया गर्भः समाहितः ॥ ३९ ॥ क्षेत्रे मदीये चोत्पन्नस्तस्मात्स मम पुत्रकः ॥ उक्तं च वेद

---

१ विमलं चक्रम्–इ० पा० । २ प्रधमातवारिजः–इ० पा० । ३ विष्णुं चाभिप्रदुद्रुवे–इ० पा० ।

शास्त्रज्ञैर्ऋषिभिर्द्धर्मदर्शिभिः ॥ ४० ॥ उप्तं वाताहृतं बीजं यस्य क्षेत्रे प्ररोहति ॥ क्षेत्रिणस्तस्य तद्बीजं न बीजी फलभाग्भवेत् ॥ ४१ ॥ सम्यगुक्तं न भवता शशांकः प्राह तत्त्ववित् ॥ माता भस्त्रा पितुः पुत्रो येन जातः स एव सः ॥ इति पौराणिकाः प्राहुर्मुनयो नयचक्षुषः ॥ ४२ ॥ विवदंतौ निवार्याथ ब्रह्मा प्रोवाच तां वधूम् ॥ शनैरेकांतमानीय गर्भोयं कस्य शंस मे ॥ ४३ ॥ एवमुक्ता तु सा तारा ह्रिया नोवाच किंचन ॥ उत्ससर्ज क्षणाद्गर्भं भाभासितसुरालयम् ॥ ४४ ॥ तमुवाच ततो ब्रह्मा पुत्र कस्य सुतो भवान् ॥ सोमस्याहं सुतो ब्रह्मन्निति तथ्यं मयोदितम् ॥ ॥ ४५ ॥ बुधोऽयं विबुधाः प्राहुः सर्वज्ञानविदां वरः ॥ गृहीत्वा पुत्रकं सोमो जगाम स्वं निवेशनम् ॥ ४६ ॥ गुरुर्गृहीत्वा स्वां भार्यां जगाम भवनं शनैः ॥ सोमोऽपि तनयं लब्ध्वा हर्षव्याकुलमानसः ॥ ४७ ॥ पौर्णमासी समाख्याता प्राप्तपूर्णमनोरथा ॥ प्राप्तः पुत्रो मया ह्यस्यां लब्धश्च विजयस्तथा ॥४८॥ तस्मादेनामुपासिष्ये विधिना व्रततत्परः॥ एवमन्योऽपि पूर्णार्थः पूर्णांशः पूर्णलक्षणः ॥४९॥ यो मामक्यां तिथौ भक्त्या विधिवत्पूजयिष्यति ॥ तस्य प्रसादाभिमुखः सर्वकामप्रदो ह्यहम् ॥ ५० ॥ एवमेषा तिथिः पार्थ सोमस्य दयिता शुभा ॥ पौर्णमासी समाख्याता पूर्णो मासो भवेद्यथा ॥ ५१ ॥ तदस्यां स्रोतसि स्नात्वा संतर्प्य पितृदेवताः ॥ आलिख्य मंडले सोमं नक्षत्रैः सहितं विभुम् ॥ ५२ ॥ पूजयेत्कुसुमैर्हृद्यैर्नैवेद्यैर्घृतपाचितैः ॥ शुक्लाक्षतैः शुक्लवस्त्रैः पूजयित्वा क्षमापयेत् ॥ शाकाहरणमुन्यन्नैर्नक्तं भुञ्जीत वाग्यतः ॥ ५३ ॥ वसंतबांधव विधो शीतांशो स्वस्ति नः कुरु ॥ गगनार्णवमाणिक्य चन्द्र दाक्षायणीपते ॥ ५४ ॥ [1]पक्षेपक्षे पौर्णमास्यां विधिरेष प्रकीर्तितः ॥ कृष्णपक्षेऽपि यः कश्चिच्छ्रद्धावान्वै व्रती भवेत् ॥ ५५॥ तस्याप्येष विधिः प्रोक्तः सर्वसौख्यप्रदायकः ॥ आमावास्या तिथिरियं पितॄणां दयिता सदा ॥ अस्यां दत्तं तपस्ततं पितॄणामक्षयं भवेत् ॥ ५६ ॥ अमावास्या महाराज प्रयत्नैर्यैरुपोषिता ॥ तैरक्षय्यं भवेद्दत्तं पितृभ्यस्तीर्थमुत्तमम् ॥ ५७ ॥ यः कश्चित्कुरुते तस्मिन्पितृपिण्डोदकक्रियाम् ॥ स तारयति पुण्यात्मा[2] पुरुषानेकविंशतिम् ॥ ५८ ॥ भवेयुरक्षयास्तस्य लोकाः पितृनिषेविताः ॥ यदा तु इह कालांते तस्यात्रागमनं भवेत् ॥ ५९ ॥ ब्राह्मणः पितृभक्तश्च सर्वविद्याविशारदः ॥ एवं जन्मनि राजेन्द्र भवेद्धनसमन्वितः ॥ ६० ॥ एवं संवत्सरस्यांते हैमं कृत्वा सुशोभनम् ॥ सोमं नक्षत्रसहितं विप्राय प्रतिपादयेत् ॥ ६१ ॥ उपदेशं प्रयच्छेद्यस्तस्मै व्रतकृते नरः ॥ संपूज्य वस्त्राभरणैर्मंत्रेणेत्थं निवेदयेत् ॥ मासेमासे विधिरयं व्रतस्यास्य नराधिप ॥ ६२ ॥ यो न शक्नोति वा कर्तुं पक्षं वाथ निरंतरम् ॥ स एकामप्युपोष्यैव कुर्यादुद्यापनं

---

१ मासेमासे–इ० पा० । २ नरकात्–इ० पा० ।

सुधीः ॥ ६३ ॥ यश्चैतत्कुरुते पार्थ पौर्णमासीव्रतं नरः ॥ सर्वपापविनिर्मुक्तश्चन्द्रवद्दिवि राजते ॥ ६४ ॥ पुत्रपौत्रधनोपेतो यज्वा दाता प्रियंवदः ॥
संततिं विपुलां प्राप्य प्रयागे मरणं भजेत् ॥ ६५ ॥ ततश्चैवाक्षयाँल्लोकान्प्राप्नोति सुरसेवितान् ॥ सेव्यमानः स गन्धर्वैः स्तूयमानः सुरासुरैः ॥
आस्ते संपूर्णसर्वांगो यावत्कल्पायुतत्रयम् ॥ ६६ ॥ अभ्यर्चयंति सितपञ्चदशीषु सोमं कृष्णासु ये पितृगणं जलपिंडदानैः ॥ तेषां गृहाणि धन
धान्यसुतादिसंपत्पूर्णानि पार्थिव भवंति विधेर्विधानात् ॥ ६७ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे विजयपौर्ण
मासीव्रतवर्णनं नाम नवनवतितमोऽध्यायः ॥ ९९ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ संवत्सरे च याः काश्चित्तिथयः पुण्यलक्षणाः ॥
ता मे वद यदुश्रेष्ठ स्नाने दाने महाफलाः ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ वैशाखी कार्तिकी माघी तिथयोऽतीव पूजिताः ॥ स्नानदानविही
नैस्ता न नेयाः पांडुनन्दन ॥ २ ॥ तीर्थस्नानं तदा शस्तं दानं वित्तानुरूपतः ॥ वैशाख्यां पांडवश्रेष्ठ श्रेष्ठा द्योतनिका मता ॥ ३ ॥
कार्त्तिक्यां पुष्करारण्यं माघ्यां वाराणसी स्मृता ॥ स्नानेनोदकदानेन तारयत्यपि दुष्कृतीन् ॥४॥ कुंभान्स्वच्छांभसः पूर्णान्सहिरण्यान्नसंयुतान् ॥
वैशाख्यां ब्राह्मणो दत्त्वा न शोचति कृते व्रते ॥ ५ ॥ मधुरान्नरसैः पूर्णान्भाजनान्कनकोज्ज्वलान् ॥ गोभूहिरण्यवासांसि विधिवत्प्रतिपादयेत् ॥
॥ ६ ॥ माघ्यां मघासु च तथा संतर्प्य पितृदेवताः ॥ तिलपात्राणि देयानि तिलांश्च पललौदनम् ॥ ७ ॥ कार्पासदानमत्रैव तिलदानं च
शस्यते ॥ कंबलाजिनरत्नानि मोचकौ पापमोचकौ ॥८॥ उपानद्दानमत्रैव कथितं सर्वकामदम् ॥ यत्र[1]वा[1]तत्र वा स्नानं दानं वित्तानुरूपतः ॥९॥
कलिकालोद्भवं सर्वं शस्यते पांडुनन्दन ॥ कार्तिक्यां तु वृषोत्सर्गो विवाहः पुण्यलक्षणः ॥ कार्यं कुरुकुलश्रेष्ठ हरेर्नीराजनं तथा ॥ १० ॥ गजा
श्वरथदानं च घृतधेन्वादयस्तथा ॥ प्रदेयाः पुण्यकृद्भिश्च तास्ताः संकल्प्य देवताः ॥ ११ ॥ फलानि यानि विद्यंते सुगन्धिमधुराणि च ॥
जातीफलं च कंकोलं लवंगं लवलीफलम् ॥ १२ ॥ खर्जूरीं नालिकेरांश्च कदल्याश्च फलानि च ॥ दाडिमान्मातुलुंगांश्च कर्कोटांस्त्रपुसांस्तथा ॥
॥ १३ ॥ वृंताकान्कारवेल्लांश्च बिंबान्कूष्मांडकर्बुरान् ॥ अप्रदानेन येषां तु तिथयो यांति भारत ॥ ते व्याधिता दरिद्राश्च जायंते भुवि मानवाः ॥
॥ १४ ॥ न केवलं ब्राह्मणानां दानं सर्वस्य शस्यते ॥ भगिनीभागिनेयानां मातुलानां पितृष्वसुः ॥ दरिद्राणां च बंधूनां दानं कोटिगुणोत्त
रम् ॥ १५ ॥ मित्रं कुलीनश्चापन्नो बंधुर्दारिद्र्यदुःखितः ॥ आशयाभ्यागतो दूरात्सोतिथिः स्वर्गसंक्रमः ॥ १६ ॥ वनं प्रस्थापिते रामे ससीते

---

[1] कृत्वा बलिम्—इ० पा० ।

सहलक्ष्मणे ॥ मातामहकुलादेत्य विशुद्धेनांतरात्मना ॥ सा सर्वैः श्राविताने कैः कौशल्या भरतेन वै ॥ १७ ॥ यदा न प्रत्ययं याति कथंचित्कौशलात्मजा ॥ तदा विशुद्धभावेन तिथयः श्राविताः पुनः ॥ १८ ॥ वैशाखी कार्तिकी माघी तिथयोमरपूजिताः ॥ अप्रदानवतो यांति यस्यार्य्योंनुमते गतः ॥ १९ ॥ एतच्छ्रुत्वा तु कौशल्या सहसा प्रत्ययं गता ॥ अंकमानीय भरतं सांत्वयामास दुःखितम् ॥ २० ॥ एतत्तिर्थानां माहात्म्यमाख्यातं बहुविस्तरम् ॥ भूयस्तु किं प्रवक्ष्यामि तव राजन्महामते ॥ २१ ॥ वैशाखकार्तिकमघासहिताथ माघे या पूर्णिमा भवति पूर्णशशांकचिह्ना ॥ तस्यां जलान्नकनकांबरमातपत्रं दत्त्वा प्रयाति पुरुषः पुरुहूतलोकम् ॥ २२ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे वैशाखीकार्तिकीमाघीव्रतवर्णनं नाम शततमोऽध्यायः ॥ १०० ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ पुनर्मे ब्रूहि देवेश त्वद्भक्त्या भावितात्मनः ॥ कथ्यमानमिहेच्छामि शुभधर्मपदं महत् ॥ १ ॥ यत्राण्वपि नरैर्दत्तं जप्तं वा सुमहद्भवेत् ॥ २ ॥ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ शृणु पांडव ते वच्मि रहस्यं देवनिर्मितम् ॥ यन्मया कस्यचिन्नोक्तं सुप्रियस्यापि भारत ॥ ३ ॥ वैशाखमासस्य तु या तृतीया नवम्यसौ कार्तिकशुक्लपक्षे ॥ नभस्यमासस्य तु कृष्णपक्षे त्रयोदशीं पञ्चदशीं च माघे ॥४॥ वैशाखस्य तृतीया तु समा कृतयुतेन तु ॥ नवमी कार्तिके या तु त्रेतायुगसमागता ॥ ५ ॥ त्रयोदशी नभस्ये तु द्वापरेण समागता ॥ माघे पञ्चदशी राजन्कलिकालादिरुच्यते ॥ ६ ॥ एताश्चतस्रो राजेन्द्र युगानां प्रभवाद्यथा ॥ युगादयश्च कथ्यंते तथैताः सर्वसूरिभिः ॥ ७ ॥ उपवासस्तपो दानं जपहोमक्रियास्तथा ॥ यद्यत्तु क्रियते किंचित्सर्वं कोटिगुणं भवेत् ॥ ८ ॥ वैशाखस्य तृतीयायां श्रीसमेतं जगद्गुरुम् ॥ नारायणं पूजयेथाः पुष्पधूपविलेपनैः ॥ वस्त्रालंकारसंभारैर्नैवेद्यैर्विविधैस्तथा ॥ ९ ॥ ततस्तस्याग्रतो धेनुर्लवणस्याढकेन तु ॥ कार्या कुरुकुलश्रेष्ठ चतुर्भागेण वत्सकः ॥ १० ॥ अविचर्मोपारि स्थाप्य कल्पयित्वा विधानतः ॥ शास्त्रोक्तक्रमयोगेन ब्राह्मणायोपपादयेत् ॥ ११ ॥ श्रीधरः श्रीपतिः श्रीमाञ्छ्रीशः संप्रीयतामिति ॥ अनेन विधिना दत्त्वा धेनुं विप्राय भारत ॥ गोसहस्रं दशगुणं प्राप्नोतीह न संशयः ॥ १२ ॥ तथैव कार्तिके मासि नवम्यां नक्तभुङ्नरः ॥ स्नात्वा नदीतडागेषु देवखातेषु वा पुनः ॥ १३ ॥ उमासहायं वरदं नीलकठमथार्चयेत् ॥ पुष्पधूपादिनैवेद्यैरनिंद्यैः शंकरं शिवम् ॥ १४ ॥ धेनुं तिलमयीं दद्यात्पुराणोक्तविधानतः ॥ अष्टमूर्तिर्नीलकंठः प्रीयतामिति चिंतयेत् ॥ १५ ॥ यदत्र प्राप्यते पुण्यं पार्थ तत्केन वर्ण्यते ॥ दत्त्वा तिलमयीं धेनुं शिवलोकम

वाप्नुयात् ॥ १६ ॥ त्रयोदशी नभसि या कृष्णमस्यां समर्चयेत् ॥ पितॄन्पायसदानेन मधुना च घृतेन तु ॥ भोजयेद्ब्राह्मणान्भक्त्या वेदवेदाङ्गपा
रगान् ॥ १७ ॥ पितॄनुद्दिश्य दातव्या सवत्सा कांस्यदोहनी ॥ प्रत्यक्षा गौर्महाराज तरुणी सुपयस्विनी ॥ १८ ॥ पिता पितामहश्चैव तथैव
प्रपितामहः ॥ प्रीयंतां गोप्रदानेन इति दत्त्वा विसर्जयेत् ॥ १९ ॥ कृतेनानेन राजेन्द्र यत्पुण्यं प्राप्यते नृभिः ॥ तत्केन वर्णितुं याति वर्षकोटि
शतैरपि ॥ २० ॥ पुत्रान्पौत्रान्प्रपौत्रांश्च धनं च महदीप्सितम् ॥ इह चाप्नोति पुरुषः परत्र च शुभां गतिम् ॥ २१ ॥ पञ्चदश्यां च माघस्य
पूजयित्वा पितामहम् ॥ गायत्र्या सहितं देवं वेदवेदाङ्गभूषितम् ॥ २२ ॥ नवनीतमयीं धेनुं फलैर्नानाविधैर्युताम् ॥ सहिरण्यां सवत्सां च ब्राह्म
णाय निवेदयेत् ॥ कीर्तयेत्प्रीयतामत्र पद्मयोनिः पितामहः ॥२३॥ यत्स्वर्गे यच्च पातालेःयच्च मर्त्ये सुदुर्लभम् ॥ तदवाप्नोत्यसंदिग्धं पद्मयोनि
प्रसादतः ॥ २४ ॥ यानि चान्यानि दानानि दत्तानि सुबहून्यपि ॥ युगादिषु महाराज अक्षयानि भवंति हि ॥ २५ ॥ अल्पमल्पं हि यः कश्चि
त्प्रदद्यान्निर्द्धनोपि सन् ॥ तदक्षयं भवेत्सर्वं युगादिषु न संशयः ॥ २६ ॥ वित्तानुसारं स्वं ज्ञात्वा वित्तवान्पार्थिवोपि वा ॥ अनुसारेण वित्तस्य
असाध्येन समाधिना ॥ २७ ॥ भूर्हिरण्यं गृहं वासः शयनान्यासनानि च ॥ छत्रोपानत्सुयुग्मानि प्रदेयानि द्विजातिषु ॥ २८ ॥ एवं दत्त्वा
यथाशक्त्या भोजयित्वा द्विजानपि ॥ पश्चाद्भुञ्जीत सुमना वाग्यतः स्वजनैः सह ॥ २९ ॥ यत्किञ्चिन्मानसं पापं कायिकं वाचिकं तथा ॥
तत्सर्वं नाशमायाति युगादितिथिपूजनात् ॥ ३० ॥ उद्गीयमानो गन्धर्वैः स्तूयमानः सुरासुरैः ॥ रमते चाक्षयं कालं स्वर्गलोके न संशयः ॥३१॥
यद्दीयते किमपि कोटिगुणं तदाहुः स्नानं जपोनियममक्षयमेव सर्वम् ॥ स्यादक्षयासु युगपूर्वतिथीषु राजन्व्यासादयो मुनिवराः समुदाहरंति ॥३२॥
इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे युगादितिथिव्रतमाहात्म्यवर्णनं नामैकाधिकशततमोऽध्यायः ॥ १०१ ॥ छ ॥
॥ ॥ युधिष्ठिर उवाच ॥ ॥ स्मरयामि हृषीकेश यन्नोक्तं भवता क्वचित् ॥ तत्सावित्रीव्रतं ब्रूहि ममोपरि दयां कुरु ॥ १ ॥ ॥ श्रीकृष्ण उवा
च ॥ ॥ कथयामि कुलस्त्रीणां महाभाग्यं युधिष्ठिर ॥ यथा चीर्णं व्रतवरं सावित्र्या राजकन्यया ॥ २ ॥ आसीन्मद्रेषु धर्मात्मा सर्वभूतहिते रतः ॥
पार्थिवोश्वपतिर्नाम पौरजानपदप्रियः ॥ ३ ॥ क्षमावांश्च क्षितिपतिः सत्यवांश्च जितेन्द्रियः ॥ स सभार्यो व्रतमिदं चचार नृपतिः स्वयम् ॥ ४ ॥
सावित्रीव्रतसिद्धं तत्सर्वकामप्रदायकम् ॥ तस्य तुष्टाभवद्राजन्सावित्री ब्रह्मणः प्रिया ॥ ५ ॥ भूर्भुवःस्वरितीत्येषा साक्षान्मूर्तिमती स्थिता ॥ कमं

---

१ पितृनुद्दिश्य–इ० पा० ।

डलुधरा देवी प्रसन्नवदनेक्षणा ॥ ६ ॥ उवाच दुहिता ह्येका तव राजन्भविष्यति ॥ इत्येवमुक्त्वा सावित्री जगामादर्शनं पुनः ॥ ७ ॥ कालेन सा तथा राजन्दुहिता देवरूपिणी ॥ सावित्र्या प्रीतया दत्ता सावित्र्या जप्तया तदा ॥८॥ सावित्रीत्येव नामास्याश्चक्रुर्विप्रास्तथा पिता ॥ सा गृहवती सश्रीर्व्यवर्द्धत नृपात्मजा ॥ सावित्री सुकुमाराङ्गी यौवनस्था बभूव ह ॥ ९ ॥ तां सुमध्यां पृथुश्रोणीं प्रतिमां काञ्चनीमिव ॥ प्राप्तेव देवकन्येति दृष्ट्वा तामितरे जनाः ॥ १० ॥ सा तु पद्मपलाशाक्षी प्रज्वलंतीव तेजसा ॥ चचारसा च सावित्रीव्रतं यद्भृगुणोदितम् ॥ ११ ॥ अथोपोष्य शिरःस्नाता देवतामभिगम्य सा ॥ हुत्वाग्निं विधिवद्विप्रान्वाचयित्वेंदुपर्वणि ॥ १२ ॥ तेभ्यः सुमनसः शेषाः प्रतिगृह्य नृपात्मजा ॥ साध्वी पतिव्रताभ्येत्य देवश्रीरिव रूपिणी ॥ १३ ॥ सोभिवाद्य पितुः पादौ शेषान्पूर्वं निवेद्य च ॥ कृतांजलिर्वरारोहा नृपतेः पार्श्वतः स्थिता ॥ १४ ॥ तां दृष्ट्वा यौवनं प्राप्तां स्वच्छां तां देवरूपिणीम् ॥ उवाच राजा संमंत्र्य स्मृत्यर्थं सह मंत्रिभिः ॥१५॥ युक्तः प्रदानकालोऽस्यास्तेन कश्चिद् वृणोत्विमाम्॥ विचारयित्वा पश्यामि वरं तुल्यं महात्मनः॥१६॥देवादीनां यथा वाच्यो न लभेयं तथा कुरु ॥ बोद्धयमाना मया पुत्रि धर्मशास्त्रेषु गच्छतम् ॥ १७ ॥ पितुर्गृहे तु या कन्या रजः पश्यत्यसंस्कृता ॥ ब्रह्महत्या पितुस्तत्र सा कन्या वृषली स्मृता ॥ १८ ॥ अतोर्थं प्रेषयामीति कुरु पुत्रि स्वयंवरम् ॥ वृद्धैरमात्यैः सहिता शीघ्रं गच्छ विधारय ॥ १९ ॥ एवमस्त्विति सावित्री प्रोक्ता तस्माद्विनिर्ययौ ॥ तपोवनानि रम्याणि राजर्षीणां जगाम सा ॥ २० ॥ मान्यानामत्र वृद्धानां कृत्वा पादाभिषेचनम् ॥ ततोभिगम्य तीर्थानि सर्वाण्येवाश्रयाणि च ॥२१॥ आजगाम पुनर्वेश्म सावित्री सह मंत्रिभिः॥तत्रापश्यच्च देवर्षिं नारदं पुरतः पितुः ॥२२॥ आसीनमासने विप्रं प्रणम्य स्मितभाषिणी ॥ कथयामास तत्सर्वं यथा वृत्तं वनेऽभवत् ॥ २३ ॥ ॥ सावित्र्युवाच ॥ ॥ आसीत्साल्वेषु धर्मात्मा क्षत्रियः पृथिवीपतिः ॥ द्युमत्सेन इति ख्यातो दैवदत्तो बभूव सः ॥२४॥ ॥ नारद उवाच ॥ अहो बत महत्कृष्टं सावित्र्या नृपतेः कृतम् ॥ बाल्यभावाद्यदनया न कृतः सत्यवान्नृपः ॥ २५ ॥ सत्यं वदत्यस्य पिता सत्यं माता प्रभाषते ॥ उपेतोऽस्ति गुणैः सर्वैर्द्युमत्सेनसुतो बली ॥२६॥ एको दोषोऽस्ति नान्योऽस्य सोऽद्यप्रभृति सत्यवाक् ॥ संवत्सरेण हीनायुर्देहत्यागं करिष्यति॥२७॥नारदस्य वचः श्रुत्वा तनयां प्राह पार्थिवः॥पुत्रि सावित्रि गच्छ त्वमन्यं वरय सत्पतिम्॥संवत्सरेण सोल्पायुर्देहत्यागं करिष्यति ॥२८॥ ॥ सावित्र्युवाच ॥ ॥ सकृज्जल्पंति राजानः सकृज्जल्पंति पंडिताः ॥ सकृत्प्रदीयते कन्या त्रीण्येतानि सकृत्सकृत् ॥२९॥ दीर्घायुरथवाल्पायुः सगुणो निर्गुणोऽपि वा ॥ सकृद्वृतो मया भर्ता न द्वितीयं वृणोम्यहम् ॥३०॥ मनसा निश्चयं कृत्वा ततो वाचाऽभिधीयते ॥ क्रियते कर्मणा

पश्चात्प्रमाणं मे मनः सदा ॥३१॥ ॥ नारद उवाच ॥ ॥ यद्येतदिष्टं दुहितुस्ततः शीघ्रं विधीयताम् ॥ अविघ्नमग्रे सावित्र्याः प्रदाने दुहितुस्तव॥३२॥ एवमुक्त्वा समुत्पत्य नारदस्त्रिदिवं गतः ॥ राजा च दुहितुः सर्वं वैवाहिकमथाकरोत् ॥ शुभे मुहूर्ते पार्श्वस्थैर्ब्राह्मणैर्वेदपारगैः ॥ ३३ ॥ सावित्र्यपि वरं लब्ध्वा भर्तारं मनसेप्सितम् ॥ मुमुदेऽतीव तन्वंगी स्वर्गं प्राप्येव पुण्यकृत् ॥३४॥ एवं तत्राश्रमे तेषां वसतां प्रीतिपूर्वकम् ॥ कालस्तपस्यतां कश्चिदतिचक्राम भारत ॥३५॥ सावित्र्यास्तप्यमानायास्तिष्ठंत्याश्च दिवानिशम् ॥ नारदेन यदुक्तं तद्वाक्यं मनसि वर्तते ॥३६॥ ततः काले बहुतिथे व्यतिक्रांते कदाचन ॥ सप्रातकालो म्रियेत इति संचिंत्य भामिनी ॥ प्रोष्ठपदे सिते पक्षे द्वादश्यां रजनीमुखे ॥ ३७ ॥ गणयन्ती च सावित्री नारदोक्तं वचो हृदि ॥ व्रतं त्रिरात्रमुद्दिश्य दिवारात्रं विनाभवत् ॥ ३८ ॥ ततस्त्रिरात्रं निर्वर्त्य स्नात्वा संतर्प्य देवताः ॥ चतुर्थेऽहनि मर्तव्यमिति संचिंत्य भामिनी ॥ श्वश्रूश्वशुरयोः पादौ ववंदे चारुहासिनी ॥ ३९ ॥ अथ प्रतस्थे परशुं गृहीत्वा सत्यवान्वनम् ॥ सावित्र्यपि च भर्तारं गच्छतः पृष्ठतोऽन्वगात् ॥ ४० ॥ ततोऽवदत्स भर्ता तां पृच्छस्व श्वशुरौ निजौ ॥ तथेत्युक्त्वा हि पप्रच्छ नत्वा श्वश्रूपदानि सा ॥ ४१ ॥ श्वशुराववदतां च न गंतव्यं त्वयानघे ॥ बाले त्वं परमं भीरुः कथं गच्छसि काननम् ॥ ४२ ॥ भूयो भावेन सा प्रोचे द्रष्टव्यं काननं मया ॥ गच्छेति तां तदोचाते श्वशुरौ चारुहासिनीम् ॥ ४३ ॥ ततो गृहीत्वा तरसा फलपुष्पसमित्कुशान् ॥ यथा शुष्काणि वादाय काष्ठभारमकल्पयत् ॥ ४४ ॥ अथ पाटयतः काष्ठं जाता शिरसि वेदना ॥ व्यथा मां बाधते बाले स्वप्तुमिच्छामि सुंदरि ॥ ४५ ॥ विश्रमस्व महाबाहो सावित्री प्राह दुःखिता ॥ पश्चादुपगमिष्यामि स्वाश्रमं श्रमनाशनम् ॥ ४६ ॥ यावदुत्संगके कृत्वा शिर आस्ते महीतले ॥ तावद्ददर्श सावित्री पुरुषं कृष्णपिंगलम् ॥ किरीटिनं पीतवस्त्रं साक्षात्सूर्यमिवोदितम् ॥ ४७ ॥ तमुवाचाथ सावित्री प्रणम्य मधुपिंगलम् ॥ कस्त्वं देवोऽथ वा दैत्यो मां धर्षयितुमागतः ॥ ॥ ४८ ॥ न चाहं केनचिच्छक्या स्वधर्मादवरोपितुम् ॥ स्प्रष्टुं वा पुरुषश्रेष्ठ दीप्ता वह्निशिखा यथा ॥४९॥ ॥ यम उवाच ॥ ॥ यमः संयमनश्चास्मि सर्वलोकभयंकरः ॥ क्षीणायुरेष ते भर्ता तं नयामि पतिव्रते ॥ न शक्यः किंकरैर्नेतुमतोऽहं स्वयमागतः ॥ ५० ॥ एवमुक्त्वा सत्यवतः शरीरात्पाशसंचयैः ॥ अंगुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलात् ॥ अथ प्रयातुमारेभे पंथानं पितृसेवितम् ॥ ५१ ॥ सावित्र्यपि वरारोहा पृष्ठतोऽनुजगाम ह ॥ पतिव्रतां तथा श्रांतां तामुवाच यमस्तदा ॥ ५२ ॥ निवर्त गच्छ सावित्रि स्वगृहे त्वमिहागता ॥ एष मार्गो विशालाक्षि न केनाप्यनुगम्यते ॥ ५३ ॥ ॥ सावित्र्युवाच ॥ ॥ न श्रमो न च मे ग्लानिः कदाचिदपि जायते ॥ भर्तारमनुगच्छंति यास्तासां न श्रमादयः ॥५४॥

सतां संतो गतिर्नान्या स्त्रीणां भर्ता सदा गतिः ॥ वेदो वर्णाश्रमाणां च शिष्याणां च गतिर्गुरुः ॥ ५५ ॥ सर्वेषामेव जंतूनां स्थानमस्ति महीतलम् ॥ भर्तार एव मनुजस्त्रीणां नान्यः समाश्रयः ॥ ५६ ॥ एवमन्यैश्च विविधैर्वाक्यैर्द्धर्मार्थसंहितैः ॥ तुतोष सूर्यतनयः सावित्रीं चेदमब्रवीत् ॥ ५७ ॥ तुष्टोऽस्मि तव भद्रं ते वरं वरय भामिनि ॥ सावित्र्यपि वरान्वव्रे विनयावनतानना ॥ ५८ ॥ चक्षुःप्राप्तिस्तथा राज्यं श्वशुरस्य महात्मनः ॥ पितुः पुत्रशतं चैव पुत्राणां शतमात्मनः ॥ ५९ ॥ जीवितं च तथा भर्तुर्धर्मसिद्धिश्च शाश्वती ॥ धर्मराजो वरान्दत्त्वा प्रेषयामास तां ततः ॥ ६० ॥ अथ भर्तारमासाद्य सावित्री हृष्टमानसा ॥ जगाम साश्रमपदं सह भर्त्रा निराकुला ॥ ६१ ॥ भाद्रस्य पौर्णमास्यां तु यथा चीर्णं व्रतं त्विदम् ॥ माहात्म्यमस्य नृपते कथितं सकलं मया ॥ ६२ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कीदृशं तद्व्रतं देव सावित्र्या यदनुष्ठितम् ॥ तस्मिन्भाद्रपदे मासि सिद्धान्नं तस्य कीदृशम् ॥ ६३ ॥ का देवता व्रते तस्मिन्ब्रूहि कामं प्रति प्रभो ॥ सविस्तरं हृषीकेश ब्रूहि धर्मं सनातनम् ॥ ६४ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ श्रूयतां पांडवश्रेष्ठ सावित्रीव्रतमादरात् ॥ कथयामि कथं चीर्णं तया सत्या युधिष्ठिर ॥ ६५ ॥ त्रयोदश्यां भाद्रपदे दंतधावनपूर्वकम् ॥ त्रिरात्रं नियमः कार्य उपवासस्य भारत ॥ ६६ ॥ अशक्त्या तु त्रयोदश्यां नक्तं कुर्याज्जितेन्द्रियः ॥ अयाचितं चतुर्दश्यामुपवासेन पूर्णिमाम् ॥ ६७ ॥ नित्यं स्नात्वा महानद्यां तडागे चाथ निर्झरे ॥ विशेषः पौर्णमास्यां तु स्नानं सर्षपमृज्जलैः ॥ ६८ ॥ गृहीत्वा तिलकान्पात्रे प्रस्थमात्रं युधिष्ठिर ॥ अथ वा धान्यमादाय यवशालितिलादिकम् ॥ ६९ ॥ ततो वंशमये पात्रे वस्त्रयुग्मेन वेष्टयेत् ॥ सावित्रीप्रतिमां कृत्वा सर्वावयवशोभनाम् ॥ ७० ॥ सौवर्णीं मृन्मयीं वापि स्वशक्त्या रौप्यनिर्मिताम् ॥ रक्तवस्त्रयुगं दद्यात्सावित्र्यै ब्रह्मणे तथा ॥ ७१ ॥ सावित्रीं ब्रह्मणा सार्द्धमेवं भक्त्या प्रपूजयेत् ॥ गंधैः सुगंधिपुष्पैश्च धूपनैवेद्यदीपकैः ॥ ७२ ॥ पूर्णैः कोशातकैर्भक्ष्यैः कूष्मांडैः कर्कटीफलैः ॥ नालिकेरैश्च खर्जूरैः कपित्थैर्दाडिमीफलैः ॥ ७३ ॥ जंबूजंबीरनारंगैः कर्कटैः पनसैस्तथा ॥ जीरकैः कटुखंडैश्च गुडेन लवणेन च ॥ ७४ ॥ विरूढैः सप्तधान्यैश्च वंशपात्रे प्रकल्पितैः ॥ राजन्या सूत्रकंटैश्च शुभैः कुंकुमकेशरैः ॥ ७५ ॥ अवतारवतीत्येवं सावित्री ब्रह्मणः प्रिया ॥ तामर्चयेत मंत्रेण सावित्रीं ब्राह्मणः स्वयम् ॥ इतरेषां पुराणोक्तमंत्रोऽत्र समुदाहृतः ॥ ७६ ॥ ओँकारपूर्वके देवि वीणापुस्तकधारिणि ॥ वेदमातर्नमस्तुभ्यमवैधव्यं प्रयच्छ मे ॥ ७७ ॥ एवं संपूज्य विधिवज्जागरं कारयेत्ततः ॥ गीतवादित्रशब्देन हृष्टतारीकदंबकैः ॥ ७८ ॥ नृत्यहासैर्नयेद्रात्रिं पृष्ठतश्च कथानकैः ॥ सावित्र्याख्यानकं वापि वाचयेद्द्विजसत्तमम् ॥ यावत्प्रभातसमयं गीत्या भावरसैः

समम् ॥ ७९ ॥ ततः प्रभाते विमल उषःकाले ह्युपस्थिते ॥ ब्राह्मणे वेदविदुषि सावित्रीं विनिवेदयेत् ॥ ८० ॥ यथा सावित्रकल्पज्ञे
सावित्र्याख्यानवाचके ॥ दैवज्ञ उंच्छवृत्तौ च दरिद्रे चाग्निहोत्रिणि ॥ ८१ ॥ मंत्रेणानेन कौंतेय प्रणम्य विधिपूर्वकम् ॥ दर्भाक्षततिलै
र्मिश्रा पूर्वाशाभिमुखास्थिता ॥ सुधी विप्रवरो विप्र ॐकारस्वस्तिपूर्वके ॥ ८२ ॥ सावित्रीयं मया दत्ता सहिरण्या महासती ॥
ब्रह्मणः प्रीणनार्थाय ब्राह्मण प्रतिगृह्यताम् ॥ ८३ ॥ एवं दत्त्वा द्विजेंद्राय सावित्रीं तां युधिष्ठिर ॥ नैवेद्यादि च तत्सर्वं ब्राह्मणं स्वगृहं
नयेत् ॥ स्वयं दशपदं गच्छेत्स्ववेश्म पुनराविशेत् ॥ ८४ ॥ तत्र भुक्का हविष्यान्नं ब्राह्मणैर्बांधवैः सह ॥ विसर्जयेत्ततो विप्रान्सा
वित्री प्रीयतामिति ॥ ८५ ॥ पंचदश्यां तथा ज्येष्ठे वटके च महासती ॥ त्रिरात्रोपोषिता नारी विधिनानेन पूजयेत् ॥ ८६ ॥
सार्द्धं सत्यवता साध्वीं फलनैवेद्यदीपकैः ॥ पट्टावलंबनं कृत्वा काष्ठभारं युधिष्ठिर ॥ ८७ ॥ रात्रौ जागरणं कृत्वा नृत्यगीतपुरस्सरैः ॥ प्रभाते
विधिना पूर्वं पूर्वोक्तेन नरोत्तमः ॥ तत्सर्वं ब्राह्मणे दद्यात्प्रणिपत्य क्षमापयेत् ॥ ८८ ॥ एतत्तु ते व्रतमिदं कथितं विधिवन्मया ॥ याश्चरिष्यंति
लोकेस्मिन्पुत्रपौत्रसमन्विताः ॥ भुक्त्वा भोगांश्चिरं भूमौ यास्यंति ब्रह्मणः पदम् ॥ ८९ ॥ एतत्पुण्यं पापहरं धन्यं दुःस्वप्ननाशनम् ॥ जपतां
शृण्वतां चैव सावित्रीव्रतमादरात् ॥ ९० ॥ स्मृत्यर्थवेदजननीं सहशंभुजायां संपूजयेदिह त्रिरात्रकृतोपवासा ॥ सावित्रिवत्पितृकुलं च तथा
स्वभर्तुरुद्धारयेच्च विभुनक्ति चिरं सुखानि ॥ ९१ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे वटसावित्रीव्रतवर्णनं
नाम द्व्यधिकशततमोऽध्यायः ॥ १०२ ॥ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ पूर्वमासीत्कृतयुगे क्षत्रिणी बहुपुत्रिणी ॥ नाम्ना कलिंगभद्रेति
रूपलावण्यसंयुता ॥ १ ॥ तुंगस्तनी पद्मनेत्रा हंसनागेन्द्रगामिनी ॥ सौभाग्यगुणसंपूर्णा चंद्रबिंबनिभानना ॥ २ ॥ धनरत्नैश्च संपूर्णा मध्यदेशे
वृषस्थले ॥ राज्ञः पत्नी तु सा देवी दिलीपस्य महात्मनः ॥ कलिङ्गभद्रा ललिता महादेवी गुणान्विता ॥ ३ ॥ महाप्रसादं मन्वाना बहुमानपुर
स्सरम् ॥ ब्राह्मणेभ्यश्च दानानि प्रयच्छति महासती ॥ ४ ॥ त्यागसंभोगसौभाग्ये द्वितीया नैव तादृशी ॥ नारीणां तु नरश्रेष्ठ दिलीपस्य यथा
विधा ॥ ५ ॥ यथा च कार्त्तिके मासि गृहीतं क्षत्रयाव्रतम् ॥ षण्मासेन व्रतं यावदिदं संचिन्त्य चेतसि ॥ पारितं च तया सर्वं किंचिन्मात्रं तु
वर्तते ॥ ६ ॥ पारणेपारणे वापि पुराणज्ञे द्विजोत्तमे ॥ उद्यापनं प्रयच्छंती कालं नयति सुन्दरी ॥ ७ ॥ कदाचिदर्धरात्रे तु सुप्ता भर्त्रा सहैव
सा ॥ दष्टा सर्पेण रौद्रेण जगाम निधनं क्षणात् ॥ ८ ॥ तेन दोषेण सा बाला अजायोनौ ह्यजायत ॥ वनेचरी धर्मपरा पूर्वजातिस्मरा दृढा ॥ ९ ॥

पूर्वाभ्यासेन तेनैव गृहीतं कृत्तिकाव्रतम् ॥ व्यस्ता यूथपरिभ्रष्टा उपवासपरिस्थिता ॥ १० ॥ परक्षेत्रेण गच्छंती अजा सस्यावमर्द्दनी ॥
कार्त्तिक्यां गलके बद्धा ग्राम्यकेण चिरागता ॥ ११ ॥ दृष्टात्रिणा महाभागा पूर्वजातिस्मरेण सा ॥ कारणं बुध्य तां बुद्धा सहकालिंदभद्रिकाम् ॥
॥ १२ ॥ मोक्षिता बदरीबद्धा चरंती कृत्तिकाव्रतम् ॥ गोपालबंधनात्साध्वी अनिर्वेदपरा तु सा ॥ १३ ॥ संप्राप्य बदरीपत्रं पीत्वा पुष्करिणी
पयः ॥ ममेत्युक्त्वा ह्यसंभ्रांता पारयामास तद्व्रतम् ॥ तस्यै योगं ततो दत्त्वा जगामात्रिस्तपोवनम् ॥ १४ ॥ सापि योगेश्वरी भूत्वा निंदित्वा
जन्म चात्मनः ॥ तत्याज योगात्स्वान्प्राणान्प्रस्थिता गौतमस्य हि ॥ ऋषेर्बभूव दुहिता ह्यहल्यागर्भसुन्दरी ॥ १५ ॥ योगलक्ष्मीति नाम्ना सा
कन्या गुणगणैर्युता ॥ विद्येव दत्ता सा पित्रा शांडिल्याय महर्षये ॥ तपोधनाय दांताय नित्यं सहचरी बभौ ॥ १६ ॥ ब्राह्मलक्ष्म्या दीप्यमाना
साक्षाद्वेदस्मृतिर्यथा ॥ सरस्वती च स्वाहा च शची चारुन्धती यथा ॥ १७ ॥ गौरी राज्ञी तथा लक्ष्मीर्गायत्री चोत्तमा सती ॥ महालक्ष्मी
स्तथा राजञ्छाण्डिल्यस्य गृहे बभौ ॥ १८ ॥ पितृदेवमनुष्याणां नित्यं शुश्रूषणे रता ॥ अथ तेनात्रिणा दृष्टा पुनर्गर्भवती गृहे ॥ १९ ॥ भक्त्या
भिक्षां प्रयच्छंती ब्राह्मणानामनिंदिता ॥ योगाद्विदित्वा तामूचे भगवान्पूर्ववच्छनैः ॥ २० ॥ योगलक्ष्मि महाभागे वर्तंते कति कृत्तिकाः ॥
सापि जातिस्मरा प्राह भगवंतं महासती ॥ षड्वर्तंते महायोगिन्नेका परवशे स्थिता ॥ २१ ॥ तच्छ्रुत्वास्यै भगवता सकारुण्येन चेतसा ॥ दत्तं
व्रतं तथा मन्त्रो येन स्वर्गं जगाम सा ॥ २२ ॥ इह भुक्त्वा चिरं भोगान्पुत्रपौत्रश्रिया वृता ॥ ततः सा तत्पदं प्राप्ता पुनरावृत्तिदुर्ल्लभम् ॥ २३ ॥
॥ ॥ युधिष्ठिर उवाच ॥ ॥ कीदृशं तद्व्रतं कृष्ण मंत्रश्चापि जनार्दन ॥ विधानं कृत्तिकानां च तं च कालं वदस्व मे ॥ २४ ॥ ॥ श्रीकृष्ण
उवाच ॥ ॥ कृत्तिकासु स्वयं सोमः कृत्तिकासु बृहस्पतिः ॥ यदा स्यात्सोमवारेण सा महाकार्तिकी स्मृता ॥ २५ ॥ ईदृशी बहुभिर्वर्षैर्बहु
पुण्यैश्च लभ्यते ॥ तथा सा न वृथा नेया यदीच्छेच्छ्रेय आत्मनः ॥ २६ ॥ अन्यापि कार्तिकी पार्थ समुपोष्य विधानतः ॥ तस्या विधानं
राजेन्द्र शृणुष्वैकमना भव ॥ २७ ॥ कार्त्तिके शुक्लपक्षस्य पूर्णमास्यां दिनोदये ॥ नक्ताय नियमं कुर्याद्दन्तधावनपूर्वकम् ॥ २८ ॥ उपवासस्य
वा शक्त्या ततः स्नात्वा जलाशये ॥ कुरुक्षेत्रे प्रयागे वा पुष्करे नैमिषे तथा ॥ २९ ॥ शालग्रामे कुशावर्ते मूलस्थाने सकुन्तले ॥ गोकर्णे
वार्बुदे पुण्येऽथ वाप्यमरकंटके ॥ ३० ॥ पुरे वा नगरे वापि ग्रामे घोषेऽथ पत्तने ॥ यत्र वा तत्र वा स्नायान्नरो योषिदथापि वा ॥ देव
र्षिपितृपूजां च कृत्वा होमं युधिष्ठिर ॥ ३१ ॥ ततोऽस्तसमये प्राप्ते पात्रं गव्यस्य सर्पिषः ॥ क्षीरस्य वा सुसंपूर्णं कृत्वा गुडफलान्वितम् ॥ षट्प्र

माणं यथा व्योम्नि कृत्तिकाशकटं न्यसेत्॥ ३२ ॥ षट्कृत्तिकानां बिंबानि स्वर्णरौप्यमयानि च ॥ रत्नगर्भाणि कुर्याच्च स्वशक्त्या पाण्डुनन्दन ॥
॥ ३३ ॥ प्रथमा स्वर्णनिष्पन्ना द्वितीया रौप्यकीकृता ॥ तृतीया रत्नघटिता चतुर्थी नवनीतजा ॥ ३४ ॥ पञ्चमी कणिकान्यूना षष्ठी पिष्टमयी
कृता ॥ षट् कृत्तिकाः कृतबिंबाः कृत्वालक्तकसूत्रिकाः ॥ ३५ ॥ रत्नगर्भाः कुंकुमाक्ताः पृष्ठतः स्तबकान्विताः ॥ सिंदूरचन्दनाभ्यक्ता जातीपुष्पैः
सुपूजिताः ॥ मंत्रेणानेन राजेन्द्र द्विजाय प्रतिपादयेत् ॥ ३६ ॥ "ॐ सप्तर्षिदारा ह्यनलस्य वल्लभा या ब्रह्मणा रक्षितयेति युक्ताः ॥ तुष्टाः कुमार
स्य यथार्थमातरो ममापि सुप्रीततरा भवंतु–स्वाहा" ॥ ३७ ॥ एवमुच्चार्य विप्राय प्रदेयाः कृत्तिका नृप ॥ ब्राह्मणोपि प्रतीच्छेत मंत्रेणानेन
पांडव ॥ ३८ ॥ धर्मदाः कामकाः संतु इमा नक्षत्रमातरः ॥ कृत्तिका दुर्गसंसारात्तारयंत्वावयोः कुलम् ॥ ३९ ॥ अनेन विधिना दत्त्वा दृष्ट्वा
चैवांबरे स्थिताः ॥ विसृज्य ब्राह्मणान्भक्त्या चानुव्रज्य पदानि षट् ॥ निवर्त्य च कथार्थं तु शृणुयात्फलमाप्नुयात् ॥ ४० ॥ विमानेनार्कवर्णेन
गत्वा नक्षत्रमंडलम् ॥ दिव्येन वपुषा युक्तः स्रक्चंदनविभूषितः ॥ ४१ ॥ दिव्यनारीगणवृतः सुखं भुंक्ते ह्यनामयम् ॥ दोधूयमानश्चमरै रत्नपं
क्त्या विराजितः ॥ ४२ ॥ पारिजातकमंदारपुष्पभारोपशोभितः ॥ कृतार्थः परिपूर्णाशस्तिष्ठेदाभूतसंप्लवम् ॥ ४३ ॥ ताराः कृत्वा व्रतांते वा
गत्वा स्वर्गं सभर्तृका ॥ रमते निर्भया साध्वी सर्वभोगसमन्विता ॥ ४४ ॥ यश्चैतच्छृणुयात्पार्थ भक्तियुक्तः समाधिना ॥ नारी वा पुरुषो वापि
मुच्यते सर्वकिल्बिषैः ॥ ४५ ॥ सौवर्णरौप्यमणिगोनवनीतसिद्धाः षट् कृत्तिकाः कणिकपिष्टमयीश्च कृत्वा ॥ पात्रे निधाय कुसुमाक्षतधूपदीपैः
संपूज्य जन्मगहनं न विशंति मर्त्याः ॥ ४६ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे कार्तिक्यां कृत्तिकाव्रतवर्णनं
नाम त्र्यधिकशततमोऽध्यायः ॥ १०३ ॥ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ पञ्चदश्यां शुक्लपक्षे फाल्गुनस्य नरोत्तम ॥ पाखंडान्पतितां
श्चैव तथैवान्त्यावसायिनः ॥ १ ॥ नास्तिकान्भिन्नवृत्तांश्च पापिनो नैव चालपेत् ॥ नारायणे गतमनाः पुरुषो हि जितेन्द्रियः ॥ २ ॥ तिष्ठन्व्रज
न्प्रस्खलन्वा भुंजानोपि जनार्दनम् ॥ कीर्तयेच्च क्रियाकाले सप्तकृत्वो महीपते ॥ ३ ॥ लक्ष्म्या समन्वितं देवमर्चयेच्च जनार्दनम् ॥ संध्याद्युपरमे
चन्द्रस्वरूपं हरिमीश्वरम् ॥ रात्रौ च लक्ष्मीं संचिन्त्य सम्यगर्घेण पूजयेत् ॥ ४ ॥ श्रीनिशाकररूपस्त्वं वासुदेव जगत्पते ॥ मनोभिलषितं देव
पूरयस्व नमोनमः ॥ ५ ॥ मंत्रेणानेन दत्त्वार्घं देवदेवस्य भक्तितः ॥ नक्तं भुञ्जीत न स्वैरं तैलक्षारविवर्जितम् ॥ ६ ॥ तथैव चैत्रे वैशाखे ज्येष्ठे च
नृपसत्तम ॥ अर्चयेच्च यथाप्रोक्त मासिमासि च तद्दिने ॥ ७ ॥ निष्पादितं भवेदेकं पारणं पार्थ शक्तितः ॥ द्वितीयं चापि वक्ष्यामि पारणं ते

नरोत्तम ॥ ८ ॥ आषाढे श्रावणे मासि प्राते भाद्रपदे तथा ॥ तथैवाश्वयुजेभ्यर्च्य श्रीधरं प्रियया सह ॥ अर्घं चन्द्रमसे दत्त्वा भुञ्जीताथ यथाविधि
॥ ९ ॥ द्वितीयमेतदाख्यातं तृतीयं पारणं शृणु ॥ कार्तिकादिषु मासेषु तथैवाभ्यर्च्य केशवम् ॥ भूत्या समन्वितं दद्याच्छशांकाय तथा निशि ॥
॥ १० ॥ भुञ्जीत च यथाख्यातं तृतीयं पारणं शृणु ॥ प्रतिपूज्य ततो दद्याद्ब्राह्मणेभ्यश्च दक्षिणाम् ॥ प्रतिमासं च वक्ष्यामि प्राशनं कायशुद्धये ॥
॥ ११ ॥ चतुरः प्रथमान्मासान्पञ्चगव्यमुदाहृतम् ॥ कुशोदकं तथैवान्यदुक्तं मासचतुष्टयम् ॥ १२ ॥ सूर्यांशुतप्तं तद्वच्च जलं कायविशोधनम् ॥
गीतवाद्यादिकं रात्रौ तथा कृष्णकथां शुभाम् ॥ कारयेच्चैव देवस्य पारणेपारणे गते ॥ १३ ॥ जनार्दनं सपत्नीकमर्चयेत्प्रथमं ततः ॥ सश्रीकं
श्रीधरं तद्वत्तृतीये भूतिकेशवौ ॥ १४ ॥ प्रतिमासं तु नामानि कृष्णस्यैतानि भारत ॥ कृतोपवासः सुस्नातः पूजयित्वा जनार्दनम् ॥ उच्चारयन्नरो
याति यथालोकं यथासुखम् ॥ १५ ॥ ततो विप्राय वै दद्यादुदकुंभं सदक्षिणम् ॥ उपानद्वस्त्रयुग्मं च च्छत्रं कनकमेव च ॥ १६ ॥ यद्वै मासगतं
नाम प्रीयतामिति कीर्तयेत् ॥ केशवं मार्गशीर्षे तु पौषे नारायणं तथा ॥ १७ ॥ माधवं माघमासे तु गोविन्दमपि फाल्गुने ॥ चैत्रमासे तथा
विष्णुं वैशाखे मधुसूदनम् ॥ १८ ॥ ज्येष्ठे त्रिविक्रमो ज्ञेयस्तथाषाढे च वामनः ॥ श्रीधरः श्रावणे तद्वद्धृषीकेशेति चापरम् ॥ १९ ॥ रामो भाद्र
पदे मासि गीयते पुण्यकांक्षिभिः ॥ पद्मनाभमाश्वयुजि दामोदरमतः परम् ॥ २० ॥ कार्तिके देवदेवेशं स्तुवंस्तरति दुर्गतिम् ॥ एवं संवत्सरस्यांते
प्रतिमासे क्रमोदितम् ॥ यदि दातुं न शक्नोति दद्याच्चैवैकहेलया ॥२१॥ विशेषश्चात्र कथितश्चन्द्रं कृत्वा हिरण्मयम् ॥ पूजयित्वा फलैर्वस्त्रैर्ब्राह्मणाय नि
वेदयेत् ॥२२॥ स्तुवन्नेवं विधानेन पारणेऽभ्यर्चयेत्प्रभुम् ॥ तावंति जन्मान्यसुखं नाप्नोतीष्टवियोगजम् ॥२३॥ इहैव स्वस्थतां प्राप्य मरणे स्मरणं ततः ॥
स्थानं तु मम संप्राप्य स्वर्गलोके महीयते ॥ २४ ॥ ततो मानुष्यमासाद्य निरातंको गतज्वरः ॥ धनधान्यवति स्फीते जन्म साधुकुलेर्हति ॥२५॥
श्रीशर्वरी मधुनि हा भगवाञ्छशांकः संकल्प्य चन्दनतिलाक्षतपुष्पमिश्रम् ॥ यच्छंति येऽर्घमनया नृप पूर्णिमायां नूनं भवंति परिपूर्णमनोरथा
स्ते ॥ २६ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे पूर्णमनोरथव्रतं नाम चतुरधिकशततमोऽध्यायः ॥ १०४ ॥
॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अशोकपूर्णिमां चान्यां शृणुष्व गदतो मम ॥ यामुपोष्य नराः शोकं नाप्नुवंति कदाचन ॥ १ ॥ फाल्गुनामलप
क्षस्य पौर्णमास्यां नरोत्तम ॥ मृज्जलेन नरः स्नात्वा दत्त्वा शिरसि वै मृदम् ॥ मृत्प्राशनं ततः कृत्वा कृत्वा च स्थंडिलं मृदा ॥ २ ॥ पुष्पैः पत्रै
स्तथाभ्यर्च्य भूधरं नाम नामतः ॥ धरणीं च तथा देवीमशोकेत्यभिकीर्तयेत् ॥ ३ ॥ यथा विशोकां धरणे कृतवांस्त्वां जनार्दनः ॥ तथा मां सर्व

शोकेभ्यो मोचयाशेषधारिणि ॥४॥ यथा समस्तभूतानामाधारस्त्वं व्यवस्थिता ॥ तथा विशोकं कुरु मां सकलेच्छाविभूतिभिः ॥ ५ ॥ ध्यानमात्रे
यथा विष्णोः स्वास्थ्यं जानासि मेदिनि ॥ तथा मनः स्वस्थतां मे कुरु त्वं भूतधारिणि ॥ ६ ॥ एवं स्तुत्वा तथाभ्यर्च्य चन्द्रायार्घ्यं निवेद्य च॥
उपोषितव्यं नक्तं वा भोक्तव्यं तैलवर्जितम् ॥ ७ ॥ अनेनैव प्रकारेण चत्वारः फाल्गुनादयः ॥ उपोष्या नृपते मासाः प्रथमं पारणं स्मृतम् ॥
॥ ८ ॥ आषाढादिषु मासेषु तद्वत्स्नानं मृदंबुना ॥ तथैव प्राशनं पूजा तद्वदिंदोस्तथार्हणम् ॥ ९ ॥ चतुर्ष्वन्येषु चैवोक्तं कार्तिकादिषु पारणम्॥
पारणत्रितये चैव चातुर्मासिकमुच्यते ॥ १० ॥ विशेषपूजा दानं च तथा जागरणं निशि ॥ विशेषेणैव कर्तव्यं पारणेपारणे गते ॥ ११ ॥ प्रथमे
धरणी नाम तुभ्यं मासचतुष्टयम् ॥ द्वितीये मेदिनी वाच्या तृतीये च वसुन्धरा ॥ १२ ॥ पारणेपारणे पार्थ युग्मानेवार्चयेद्द्विजान् ॥ धरणीं देव
देवं च तत्तत्स्थानेन केशवम् ॥ १३ ॥ वस्त्राभावे च सूत्रेण पूजयेद्धरणीं तथा ॥ घृताभावे तथा क्षीरं शस्तं वा सलिलं हरेः ॥ १४ ॥ एवं संव
त्सरस्यांते गौः सवत्सा द्विजातये ॥ प्रदेया धरणी देवी वस्त्रालंकारसंयुता ॥ १५ ॥ पातालसंस्थया देव्या चीर्णमेतन्महाव्रतम् ॥ धरण्या केशव
प्रीत्यै ततः प्राप्ता समुन्नतिः ॥ १६ ॥ देवेन चोक्ता धरणी वराहवपुषा पुरा ॥ उपवासव्रतपरा समुद्धृत्य रसातलात् ॥ १७ ॥ व्रतेनानेन कल्याणि
त्वयाहं परितोषितः ॥ तस्मात्प्रसादमतुलं करोमि तव सुव्रते ॥ १८ ॥ यथैव कुरुषे भक्त्या पूजां मम सुशोभनाम् ॥ तथैव तव कल्याणि
प्रणतो यः करिष्यति ॥१९॥ व्रतमेतदुपाश्रित्य पारणं च यथाविधि ॥ सर्वबाधाविनिर्मुक्तो जन्मजन्मांतराण्यपि ॥ विशोकः सर्वकल्याणभाजनं
स्यान्न संशयः ॥ २० ॥ यथा त्वमेव वसुधे संप्राप्ता निर्वृतेः पदम् ॥ तथा स परमँल्लोके सुखं प्राप्स्यति मानवः ॥ २१ ॥ एवमेतन्महापुण्यं
सर्वपापप्रशांतिदम् ॥ विशोकाख्यं व्रतवरं तत्कुरुष्व महाव्रतम् ॥ २२ ॥ सम्यग्विशोककरणी नृपपूर्णिमा ते ख्याता मया मनुमहेन्द्रसमानकीर्ते॥
एवं करोति कुरुपुंगव यः प्रयत्नाच्छोको न तस्य भवतीह कुलेपि पुंसः ॥ २३ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे
विशोकपूर्णिमाव्रतं नाम पञ्चाधिकशततमोऽध्यायः ॥ १०५ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ सर्वकामानवाप्नोति समाराध्य जनार्दनम् ॥
प्रकारैर्बहुभिः कृष्ण यान्यानिच्छति चेतसा ॥१॥ नृणां स्त्रीणां च सर्वेषां नान्यच्छोकस्य कारणम् ॥ अपत्यादधिकं किंचिद्विद्यते ह्यत्र जन्मनि॥
॥ २ ॥ अपुत्रता महादुःखमतिदुःखं कुपुत्रता ॥ सुपुत्रः सर्वसौख्यानां हेतुभूतो मतो मम ॥ ३ ॥ धन्यास्ते ये सुतं प्राप्ताः सर्वदुःखविवर्जितम् ॥

शक्तं प्रशांतं बलिनं परां निर्वृतिमागतम् ॥४॥ स्वकर्माभिरतं नित्यं देवद्विजपरायणम् ॥ शास्त्रज्ञं सर्वधर्मज्ञं दीना[1]नाथानुकंपिनम् ॥ ५ ॥ विनिर्जि
तारिसर्वस्वं मनोहृदयनन्दनम् ॥ देवानुकूलतायुक्तं युक्तं सम्यग्गुणेन च ॥६॥ मित्रस्वजनसन्मानलब्धं निर्वाणमुत्तमम् ॥ यः प्राप्नोति सुतं तस्मा
न्नान्यो धन्यतरो भुवि ॥ ७ ॥ सोऽहमेवंविधं श्रोतुं कर्मेच्छामि महामते ॥ येनेदृग्लक्षणः पुत्रः प्राप्यते भुवि मानवैः ॥ ८ ॥ ॥ श्रीकृष्ण
उवाच ॥ ॥ एवमेतन्महाभाग पुत्रापुत्रसमुद्भवम् ॥ दुःखं प्रयात्युपशमं तनयान्नेह केनचित् ॥ ९ ॥ अत्रापि श्रूयतां वृत्तं यत्पूर्वमभवन्मुने ॥
उत्पत्तौ कार्तवीर्यस्य हैहयस्य महात्मनः ॥ १० ॥ कृतवीर्यो महीपालो हैहयो नाम वै पुरा ॥ तस्य शीलधना नाम बभूव वरवर्णिनी ॥ ११ ॥
पत्नीसहस्रप्रवरा महिषी शीलमण्डना ॥ सा त्वपुत्रा महाभागा मैत्रेयीं पर्यपृच्छत ॥ १२ ॥ गुणवत्पुत्रलाभाय कृतासनपरिग्रहम् ॥ तया
पृष्टाथ सा. सम्यङ्मैत्रेयी ब्रह्मवादिनी ॥ १३ ॥ कथयामास परमं नाम्नानन्तव्रतं महत् ॥ सर्वकामफलावाप्तिकारणं पापनाशनम् ॥
तस्याः सुपुत्रलाभाय राजपुत्र्यास्तपस्विनी ॥ १४ ॥ ॥ मैत्रेय्युवाच ॥ ॥ यो यमिच्छेन्नरः कामं नारी वा वरवर्णिनी ॥ १५ ॥ स तं
समाराध्य विभुं समाप्नोति जनार्दनात् ॥ मार्गशीर्षे मृगशिरो भीमो यस्मिन्दिनेऽभवत् ॥१६॥ तस्मिन्संप्राश्य गोमूत्रं स्नातो नियतमानसः ॥
पुष्पैर्धूपैस्तथा गन्धैरुपवासैश्च भक्तितः ॥ वामपादमनंतस्य पूजयेद्वरवर्णिनि ॥ १७ ॥ अनंतः सर्वकामानामनंतं भगवान्फलम् ॥ ददात्वनन्तं
च पुनस्तदेवान्यत्र जन्मनि ॥ १८ ॥ अनंतपुण्योपचयमनन्तं तु महाव्रतम् ॥ यथाभिलषितावाप्तिं कुरु मे पुरुषोत्तम ॥ १९ ॥ इत्युच्चार्याभिपू
ज्यैनं यथावद्विधिना नरः ॥ समाहितमना भूत्वा प्रणिपातपुरस्सरम् ॥ २० ॥ विप्राय दक्षिणां दद्यादनंतः प्रीयतामिति ॥ समुच्चार्य ततो नक्तं
भुञ्जीत तैलवर्जितम् ॥ २१ ॥ ततश्च पौषे पुष्यर्क्षे तथैव भगवत्कटिम् ॥ वामामभ्यर्च्चयेद्भक्त्या गोमूत्रप्राशनं ततः ॥२२॥ अनंतः सर्वकामाना
मिति चोच्चारयेत्पुनः ॥ भोजयेत तथा विप्रान्वाचयित्वा यथाविधि ॥२३॥ माघे मघासु तद्वच्च बाहुं देवस्य पूजयेत् ॥ स्कन्धौ च मम फाल्गुन्योः
फाल्गुने मासि भामिनि ॥ २४ ॥ चतुर्ष्वेतेषु गोमूत्रं प्राशयेन्नृपनंदिनि ॥ ब्राह्मणाय तथा दद्यात्तिलान्कनकमेव च ॥ २५ ॥ देवस्य दक्षिणं
स्कन्धं चैत्रे चित्रासु पूजयेत् ॥ तथैव प्राशनं चात्र पञ्चगव्यमुदाहृतम् ॥ विप्रे प्रवाचके दद्याद्यवान्मासचतुष्टयम् ॥ २६ ॥ वैशाखे च विशाखासु
बाहुं सम्पूज्य दक्षिणम् ॥ तथैवोक्तान्यवान्दद्यान्नक्तं कुर्याद्द्विजक्रियाम् ॥ २७ ॥ ज्येष्ठासु कटिपूजां च ज्येष्ठमासि शुभव्रते ॥ आषाढासु तथा

---

[1] दीनानाथजनाश्रयम्--इ० पा० ।

षाढे कुर्यात्पादार्चनं शुभे ॥ २८ ॥ पादद्वयं तु श्रवणे श्रावणे मासि पूजयेत् ॥ घृतं विप्राय दातव्यं प्राशनीयं यथाविधि ॥ २९ ॥ श्रावणादिषु मासेषु प्राशनं दानमेव च ॥ एतदेवं समाख्यातं देवांस्तद्वच्च पूजयेत् ॥ ३० ॥ गुह्यं प्रोष्ठपदायोगे मासि भाद्रपदेऽर्चयेत् ॥ तद्वदाश्वयुजे पूज्यं हृदयं चाश्विनीषु च ॥ ३१ ॥ कुर्यात्समाहितमनाः स्नानं प्राशनमर्चनम् ॥ अनन्तशिरसः पूजां कार्त्तिके कृत्तिकासु च ॥ ३२ ॥ यस्मिन्यस्मिन्दिने पूजा तत्रतत्र तदा दिने ॥ नामानंतस्य जप्तव्यं क्षुतप्रस्खलितादिषु ॥३३॥ घृतेनानंतमुद्दिश्य पूर्वं मासचतुष्टयम् ॥ कुर्वीत होमं चैत्रादौ शालिना कुलनंदिनि ॥ ३४ ॥ क्षीरेण श्रावणादौ च होमो मासचतुष्टयम् ॥ प्रशस्तं सर्वमासेषु हविष्यान्नेन भोजनम् ॥ ३५ ॥ एवं द्वादशभिर्मासैः पारणात्रितयं शुभे ॥ व्रतावसाने चानन्तं सौवर्णं कारयेच्छुभम् ॥ ३६ ॥ राजतं मुसलं चैव हलं पार्श्वेषु विन्यसेत् ॥ पुष्पधूपादिनैवेद्यैः पूजा कार्या यथाविधि ॥ ३७ ॥ ताम्रपीठोपरि हरेर्मन्त्रैरेभिर्यथाक्रमम् ॥ नमोऽस्त्वनंताय शिरः पादौ सर्वात्मने नमः ॥ ३८ ॥ शेषाय जानुयुगलं कामायेति कटिं नमः ॥ नमोस्तु वासुदेवाय पार्श्वं संपूजयेद्धरेः ॥ ३९ ॥ संकर्षणायेत्युदरं भुजं सर्वासुधारिणे ॥ कण्ठं श्रीकण्ठनाथाय मुखमिंदुमुखाय च ॥ ४० ॥ हलं च मुसलं चैव स्वनाम्ना पूजयेद्बुधः ॥ एवं सम्पूज्य गोविन्दं सितवस्त्रविभूषितम् ॥ ४१ ॥ छत्रोपानत्सुसंयुक्तं स्रग्दामालंकृतं तथा ॥ नक्षत्रदेवताः पूज्या नक्षत्राणि च सर्वशः ॥ ४२ ॥ सोमो नक्षत्रराजश्च मासः संवत्सरं तथा ॥ द्वादशात्र घटान्कुर्यात्सतोयांश्चान्नसंयुतान् ॥ ४३ ॥ एवं संपूज्य विधिवद्देवदेवं जनार्दनम् ॥ ब्राह्मणं पूजयित्वा च वस्त्रैराभरणैस्तथा ॥ ४४ ॥ कर्णांगुलैः पवित्रैश्च शांतं दांतं जितेन्द्रियम् ॥ पुराणज्ञं धर्मनित्यमव्यंगं सुप्रियंवदम् ॥ ४५ ॥ तस्मै देयं समस्तं तदनन्तः प्रीयतामिति ॥ अन्येषां ब्राह्मणानां च देयं शक्त्या यथेप्सितम् ॥ ४६ ॥ अनेन विधिना पार्थ व्रतं चैतत्समाप्यते ॥ पारिते च समाप्नोति सर्वानेव मनोरथान् ॥ ४७ ॥ पुत्रार्थिभिर्वित्तकामैर्भृत्यदारानभीप्सुभिः ॥ प्रार्थयद्भिश्च मर्त्यैऽस्मिन्नारोग्यफलसम्पदः ॥ ४८ ॥ एतद्व्रतं महाभागे पुण्यं स्वस्त्ययनप्रदम् ॥ अनंतव्रतसंज्ञं वै सर्वपापप्रणाशनम् ॥ ४९ ॥ तत्कुरुष्वैव देवि त्वं व्रतं शीलधने परम् ॥ वरिष्ठं सर्वलोकस्य यदि पुत्रमभीप्ससि ॥ ५० ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ इति शीलधना श्रुत्वा मैत्रेयीवचनं शुभम् ॥ चकारैतद्व्रतवरं सा विष्ण्वाहितमानसा ॥ ५१ ॥ पुत्रार्थिन्यास्ततस्तस्माद्व्रतेनानेन सुव्रत ॥ विष्णुस्तुतोष तुष्टे च विष्णौ सा सुषुवे सुतम् ॥ ५२ ॥ तस्य वै जातमात्रस्य प्रववौ चानिलः शुभम् ॥ नीरजस्कमभूद्व्योम मुदं प्रापाखिलं जगत्॥५३॥ देवदुन्दुभयो नेदुः पुष्पवृष्टिः पपात च ॥ प्रजगुर्देवगंधर्वा ननृतुश्चाप्सरोगणाः ॥५४॥ धर्मे मनः समस्तस्य पार्थ लोकस्य चाभवत् ॥ तस्य नाम

पिता चक्रे तनयस्यार्जुनेति वै ॥ ५५ ॥ कृतवीर्यसुतत्वाच्च कार्तवीर्यो बभूव सः ॥ तेनापि भगवान्विष्णुर्दत्तात्रेयस्वरूपवान् ॥ आराधितोऽतिमहता
तपसा पार्थ भूभृता ॥५६॥ तस्य तुष्टो जगन्नाथश्चक्रवर्तित्वमुत्तमम् ॥ ददौ शौर्य[1]धने चापि सकलान्यायुधानि च ॥ स[2] वव्रे च वधो देव मम त्वत्तो
भवेदिति ॥५७॥ परं तु स्मरणं ज्ञानं भीतानामार्तिनाशनम् ॥ स्मरणादुपकारित्त्वं जगतोऽस्य जगत्पते ॥५८॥ तमाह देवदेवेशः पुण्डरीकनिभे
क्षणः ॥ सर्वमेतन्महाभाग तव भूयो भविष्यति ॥ ५९ ॥ यश्च प्रभाते रात्रौ च त्वां नरः कीर्तयिष्यति ॥ नमोऽस्तु कार्तवीर्यायेत्यभिधास्यति चैव
यः ॥ तिलप्रस्थप्रदानस्य नरः पुण्यमवाप्स्यति ॥ ६० ॥ अनष्टद्रव्यता चैव तव नामानुकीर्तने ॥ भविष्यति महीपालेत्युक्त्वा तं प्रययौ हरिः ॥६१॥
स चापि वरमासाद्य प्रसन्नाद्गरुडध्वजात् ॥ पालयामास भूपालः सप्तद्वीपां वसुंधराम् ॥ ६२ ॥ तेनेष्टं विविधैर्यज्ञैः समाप्तवरदक्षिणैः ॥ जित्वा
रिवर्गमखिलं धर्मतः पालिताः प्रजाः ॥ ६३ ॥ अनंतव्रतमहात्म्यादासाद्य तनयं च तम् ॥ पितुः पुत्रोद्भवं दुःखं नासीत्स्वल्पमपि प्रभो ॥
॥ ६४ ॥ एवमेतत्समाख्यातमनंताख्यं व्रतं तव ॥ यत्कृत्वा राजपत्नी सा कार्तवीर्यमसूयत ॥ ६५ ॥ यश्चैतच्छृणुयाज्जन्म कार्तवीर्यस्य मानवः ॥
स्त्री वा दुःखमपत्योत्थं सप्तजन्मसु नाश्नुते ॥ ६६ ॥ ऐश्वर्यमप्रतिहतं परमं विवेकं पुत्रानमित्रहृदयार्तिकरान्बहूंश्च ॥ कृ[3]त्वा त्वनंत इति यद्व्रत
नामधेयं प्राप्नोत्यनंतविभवस्य विभोः प्रसादात् ॥ ६७ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवाद अनंतव्रतवर्णनं
नाम षडधिकशततमोऽध्यायः ॥ १०६ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ अप्राप्तैर्न तथा दुःखमैश्वर्याद्यैर्नरोत्तम ॥ यथा मनोरथैः स्वैः
स्वैर्नानादुःखं भवेन्नृणाम् ॥ १ ॥ यथा मनोरथैर्लब्धैर्न स्याद्दुःखभयं नृणाम् ॥ ऐश्वर्याद्विच्युतो वापि संततेर्देवलोकतः ॥ २ ॥ अभीष्टादन्यतो
वापि यदाधेन विनिष्कृतिम् ॥ प्राप्नोति पुरुषो वाथ नारी वा पुण्यसंचयात् ॥ तन्ममाचक्ष्व भगवन्येन नाभ्येति विच्युतिम् ॥ ३ ॥
॥ ॥ श्रीकृष्ण उवाच ॥ ॥ सत्यमेतन्महाभाग दुःखं प्राप्नोत्यसंशयः ॥ ४ ॥ ऐश्वर्योदयचित्तस्य बंधुवर्गसुखस्य च ॥ तदेतच्छ्रूयतां पार्थ
यथा नेष्टात्परिच्युतिः ॥ ५ ॥ स्वर्गादेर्जायते सम्यगुपवासवतां सताम् ॥ द्वादशर्क्षाणि राजेन्द्र प्रतिमासं तु यानि वै ॥ ६ ॥ तन्नाम्ना चाच्युतं
तेषु सम्यक्संपूजयेन्नृप ॥ पुष्पैर्धूपैस्तथांभोभिरभीष्टैरपरैरपि ॥ ७ ॥ आदितः कृत्तिकां कृत्वा कार्त्तिके नृपसत्तम ॥ कृशरामत्र नैवेद्यं पूर्वं मास
चतुष्टयम् ॥८॥ निवेदयेत्फाल्गुनादि संयावं च ततः परम् ॥ आषाढादिषु देवाय पायसं विनिवेदयेत् ॥ ९ ॥ तेनैवान्नेन राजेन्द्र ब्राह्मणान्भोजये

---

[1] शौर्यबले—इ० पा० । [2] स वव्रे च वरं देव मम त्राता भवेति च—इ० पा० । [3] सौभाग्यमिष्टजनलाभसुखं च लोकास्ते वै समस्तसुखदाः सुलभा भवन्ति—इ० पा०

द्बुधः ॥ पञ्चगव्यजलस्नानं तस्यैव प्राशनाच्छुचिः ॥ १० ॥ सम्यक्संपूज्य राजेन्द्र तमेव पुरुषोत्तमम् ॥ प्रणम्य प्रार्थयेद्विष्णुं शुचिः स्नातो
यथाविधि ॥११॥ नमोनमस्तेऽच्युत मे क्षयोस्तु पापस्य वृद्धिं समुपैतु पुण्यम् ॥ ऐश्वर्यवित्तादि तथाऽक्षयं मेक्षयं च मा संततिरभ्युपैतु ॥ १२ ॥
यथाच्युतस्त्वं परतः परस्मात्स ब्रह्मभूतः परतः परात्मा ॥ तथाच्युतं मे कुरु वांछितं त्वं हरस्व पापं च तथाप्रमेय ॥ १३ ॥ अच्युतानंत गोविन्द
प्रसीद यदभीप्सितम् ॥ तदक्षयममेयात्मन्कुरुष्व पुरुषोत्तम ॥ १४ ॥ एवमेवं समभ्यर्च्य प्रार्थयित्वा तथा शिवम् ॥ नैवेद्यं स्वयमश्नीयान्नक्तं
संपूजितेच्युते ॥ १५ ॥ ततः संवत्सरस्यांते [1]सुखसुप्तोत्थितेऽच्युते ॥ घृतपूर्णं ताम्रपात्रं ब्राह्मणाय निवेदयेत् ॥१६॥ शक्तितो दक्षिणां दद्यादच्युतः
प्रीयतामिति ॥ ततस्तु सप्तमे वर्षे कुर्यादुद्यापनं बुधः ॥ १७ ॥ कार्या चैवाच्युतस्यार्चा शक्त्या स्वर्णमयी नृप ॥ तदग्रे ब्राह्मणी स्थाप्या
स्थविरा सांभरायणी ॥ १८ ॥ महासती रौप्यमयी समानार्हा सदेवता ॥ ततस्तौ पूजयित्वा च माल्यवस्त्रविलेपनैः ॥ १९ ॥ मंत्रेणा
नेन राजेन्द्र प्रणिपत्य विधानतः ॥ प्रतिवर्षं च दत्तं चेत्ताम्रं पात्रं द्विजातये ॥ २० ॥ तदेवहेलया दद्यात्सहिरण्याश्वसंयुतम् ॥ गाश्च प्रदद्यात्सं
पूज्य सवत्साः कांस्यदोहनाः ॥ २१ ॥ एकां वा शक्तितो दद्याद्भक्त्या तुष्यति केशवः ॥ घटाः सत्पात्रनिर्दिष्टाः सान्नाः [2]पूर्णजलोज्ज्वलाः ॥२२॥
छत्रोपानद्युगैः सार्धमेवं दत्त्वा विसर्जयेत् ॥ शय्यां सतूलिकां दद्याद्गृहं चोपस्करैः सह ॥ २३ ॥ श्रिया च सह विष्णुं च पूजयेद्भूषयेत्प्रभुम् ॥
वस्त्रैराभरणैश्चैव प्रणिपत्य क्षमापयेत् ॥ २४ ॥ कृतेनानेन राजेन्द्र च्युतिं नाप्नोति मानवः ॥ संततेः स्वर्गवित्तादेरैश्वर्यस्य तथैव च ॥ यद्वाभिम
तमन्यच्च ततो न च्यवते नरः ॥ २५ ॥ तस्मात्सर्वप्रयत्नेन मासनक्षत्रपूजनैः ॥ यजेताक्षयकामस्तु सदैव पुरुषोत्तमम् ॥ २६ ॥ ॥ श्रीकृष्ण
उवाच ॥ ॥ अत्रापि श्रूयते काचित्सिद्धा स्वर्गे महाव्रता ॥ नारी तपोधना भूत्वा प्रख्याता सांभरायणी ॥ समस्तसंदेहहरा सदास्वर्गौ
कसां हि सा ॥ २७ ॥ कस्यचित्त्वथ कालस्य देवराजः शतक्रतुः ॥ पूर्वेन्द्रचरितं राजन्पप्रच्छेदं बृहस्पतिम् ॥ २८ ॥ पूर्वेन्द्रात्परतः
पूर्वे ये बभूवुः सुरेश्वराः ॥ तेषां चरितमिच्छामि श्रोतुमंगिरसां वर ॥ २९ ॥ एवमुक्तस्तदा तेन देवेन्द्रेणामलद्युतिः ॥ प्राह धर्मभृतां
श्रेष्ठः परमर्षिर्बृहस्पतिः ॥ ३० ॥ नाहं चिरंतनान्वेद्मि देवराज सुरेश्वरान् ॥ आत्मनः समकालीनमवेहि च सुरेश्वर ॥ ३१ ॥
ततः पप्रच्छ देवेन्द्रः कोस्माभिर्मुनिपुंगवः ॥ प्रष्टव्योऽत्र महाभाग कृतादिवसतिर्दिवि ॥ ३२ ॥ बृहस्पतिश्चिरं ध्यात्वा ततः प्राह

---

[1] सुखव्युष्टोत्थिते--इ० पा० । [2] पूर्णजलान्विताः--इ० पा० ।

शचीपतिम् ॥ तपस्विनीं महाभागां पृच्छैतां सांभरायणीम् ॥ ३३ ॥ इत्युक्तस्तेन देवेन्द्रः कौतूहलसमन्वितः ॥ ययौ यत्र महाभागा सम्यगास्ते तपस्विनी ॥ ३४ ॥ सा तौ दृष्ट्वा समायांतौ देवराजबृहस्पती ॥ सम्यगर्घ्येण संपूज्य प्रणिपत्याह सुव्रता ॥ ३५ ॥ नमोऽस्तु देवराजाय तथैवाङ्गिरसे नमः ॥ यद्वां कार्यं महाभागौ सकलं तदिहोच्यताम् ॥ ३६ ॥ यदि कर्तुं मया शक्यं तत्करिष्ये विमृश्य च ॥ ३७ ॥ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ आवामभ्यागतौ प्रष्टुं त्वामत्रातिविवेकिनीम् ॥ यच्च कार्यं महाभागे पृष्टं तत्कथयस्व नः ॥ ३८ ॥ यदि स्मरसि कल्याणि पूर्वेन्द्रचरितानि वै ॥ तदाख्याहि महाभागे देवेन्द्रस्य कुतूहलम् ॥ ३९ ॥ ॥ सांभरायण्युवाच ॥ ॥ यो वै पूर्वं सुरेंद्रस्य ततश्च प्रथमो हि यः ॥ तस्मात्पूर्वतरो यस्य तस्यापि प्रथमश्च यः ॥ ४० ॥ तेषां पूर्वतरा ये च वेद्मि तानखिलानहम् ॥ तेषां च चरितं कृत्स्नं जानाम्यंगिरसां वर ॥ ४१ ॥ मन्वंतराण्यनेकानि सृष्टीश्च त्रिदिवौकसाम् ॥ सप्तर्षीन्सुबहून्वेद्मि मनूनां च सुतान्नृपान् ॥ ४२ ॥ एवमुक्त्वा ततस्ताभ्यां सुहृष्टा[1] सांभरायणी ॥ यथावदाचष्ट तयोः पूर्वेन्द्रचरितं महत् ॥ ४३ ॥ स्वायंभुवे यस्तु मनौ मनौ स्वारोचिषे च यः ॥ उत्तमे तामसे चैव रैवते चाक्षुषे तथा ॥ ४४ ॥ ये बभूवुर्हि देवेन्द्रास्तस्य तस्य तपस्विनी ॥ तदा जगाद चरितं यथावत्सांभरायणी ॥ ४५ ॥ कथयामास चाश्चर्यं तच्चापि कथयामि ते ॥ ४६ ॥ शंकुकर्णस्तदा दैत्यो बभूवात्यंतदुर्जयः ॥ स लोकपालान्समरे विजित्य सह दैवतैः ॥ इन्द्रस्यासाद्य भवनं प्रविवेश सुनिर्भयः ॥ ४७ ॥ तं दृष्ट्वा सहसा प्राप्तं शक्रः शय्यातलेऽलुठत् ॥ जुगोप सहसात्मानं शंकुकर्णभयार्दितः[2] ॥ ४८ ॥ दानवः शक्रशयने तस्मिन्नुपविवेश ह ॥ इन्द्राण्यपि तथा भीता गता वाचस्पतेर्गृहम् ॥ ४९ ॥ अथ देवाः समाजग्मुर्भयाद्द्रष्टुं सुरद्विषम् ॥ आसीनं शक्रशयने प्रणिपातपुरस्सराः ॥ ५० ॥ वासुदेवोऽपि तत्रागात्तं द्रष्टुं देवकंटकम् ॥ दृष्ट्वा कृष्णमनुप्राप्तं दानवः प्राह हर्षितः ॥ ५१ ॥ धन्योऽहं कृतकृत्योहं[3] यस्य मे गरुडध्वजः ॥ शक्रशय्यासनस्थस्य द्रष्टुमभ्येति केशवः ॥ ५२ ॥ ततः करे समालंब्य शयनाभ्याशमानयत् ॥ चकार कंठग्रहणं बांधवस्येव हर्षितः ॥ ५३ ॥ ततः कृष्णस्तु सहसा गृह्य दोर्भ्यां शनैः शनैः ॥ पीडयामास विहसन्नदंतं भैरवान्रवान् ॥ ममार दानवेन्द्रोऽसौ बलाद्भग्नास्थिपञ्जरः ॥ ५४ ॥ निर्जगाम ततः शक्रः शय्यामूलादवाक्छिराः ॥ तुष्टाव हरिमासीनं शंखचक्रगदाधरम् ॥ ५५ ॥ एतद्दृष्टं मया शक्र वसंत्या सुरसद्मनि ॥ ५६ ॥ ततः कुतूहलपरो देवराट् तां तपस्विनीम् ॥ उवाच जानासि कथं त्वमेतान्सांभरायणि ॥ ५७ ॥ ॥ सांभरायण्युवाच ॥ ॥ सर्व एव हि देवेन्द्राः स्वर्गस्था येमरेश्वराः ॥

---

[1] सा हृष्टा—इ० पा० । [2] महाहनुः—इ० पा० । [3] कृतपुण्योऽहम्—इ० पा० ।

बभूवुरेते चरितमेतेषां वेद्मि तेन वै ॥ चरितं च मया तेषां श्रुतं दृष्टं तथैव च ॥५८॥ ॥ इन्द्र उवाच ॥ ॥ किं कृतं वद धर्मज्ञे त्वया येनेयमक्षया ॥
स्वर्लोके वसतिः प्राप्ता यथा नान्येन केनचित् ॥ ५९ ॥ अहो सर्वव्रतानां तु ह्युपोषितमथाद्भुतम् ॥ प्रधानतरमत्यंतं स्वर्गवासप्रदं मतम् ॥ ६० ॥
एवमुक्ता ततस्तेन देवेन्द्रेण तपस्विनी ॥ प्रत्युवाच महाभागा यथावत्सांभरायणी ॥ ६१ ॥ मासर्क्षे ह्यच्युतो[1] देवः प्रतिमासं सुरेश्वर ॥ यथोक्तव्र
तया सम्यक्सप्तवर्षाणि पूजितः ॥ ६२ ॥ तस्येयं कर्मणो व्युष्टिरच्युताराधनस्य मे ॥ देवलोकादभिमता देवराजपदच्युतिः ॥ ६३ ॥ स्वर्गेन्द्रवि
भवैश्वर्यं संततिं याति चाच्युतिम् ॥ नरो वाञ्छति तेनेत्थं तोषणीयस्ततः प्रभुः ॥ ६४ ॥ एतत्ते पूर्वदेवेन्द्रचरितं सकलं मया ॥ स्वर्गवासाक्ष
यत्वं च मासर्क्षाच्युतपूजनात् ॥ यथावत्कथितं देव पृच्छतस्त्रिदशेश्वर ॥ ६५ ॥ धर्मार्थकाममोक्षाश्च वाञ्छिता विबुधाधिप ॥ विष्णोराराधनाद
न्यत्परमं सिद्धिकारणम् ॥ ६६ ॥ तस्यास्तद्वचनं श्रुत्वा देवराजबृहस्पती ॥ तत्तथेत्यूचतुः साध्वीं चेरतुश्चापि तद्व्रतम् ॥ ६७ ॥ तस्मात्पार्थ
प्रयत्नेन प्रतिमासं समाहितः ॥ मासर्क्षाच्युतपूजायां भवेथास्तन्मनाः सदा ॥६८॥ ये सांभरायणिकथाचरितव्रतेस्मिन्वर्षाणि सप्त विधिना सुधि
यो नयंति ॥ ते स्वर्गलोकमभिगम्य कृताधिवासाः कल्पायुतायुतशतैरपि न च्यवंते ॥ ६९ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्ण
युधिष्ठिरसंवादे सांभरायणीव्रतवर्णनं नाम सप्ताधिकशततमोऽध्यायः ॥ १०७ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ सुरूपता मनुष्याणां
स्त्रीणां च यदुसत्तम ॥ कर्मणा जायते केन तन्ममाख्यातुमर्हसि ॥ १ ॥ सुरूपाणां सुगात्राणां सुवेषाणां तथैव च ॥ न्यूनं तथाधिकं चापि यथा
नाङ्गं प्रजायते ॥२॥ समस्तैः शोभनैरंगैर्नराः केचिद्यदूत्तम ॥ काणाः कुंब्जांश्च[2] जायंते त्रुटितश्रवणास्तथा ॥३॥ नराणां योषितां चैव समस्ताङ्ग
सुरूपता ॥ कर्मणा येन भवति तत्पूर्वं कथयामल ॥ ४ ॥ लावण्यगतिवाक्यानि सति रूपे महामते ॥ कुर्वंत्यभ्यधिकां शोभां समस्ताः परमा
गुणाः ॥ ५ ॥ वाक्यलावण्यसंस्कारविलासललिता गतिः ॥ विडंबना कुरूपाणां केवला सा हि जायते ॥ ६ ॥ रूपकारणभूताय कर्मणा प्रयतो
भवेत् ॥ तस्मात्तन्मे समाचक्ष्व कर्म यच्चारु रूपदम् ॥७॥ ॥ श्रीकृष्ण उवाच ॥ ॥ सम्यक्पृष्टं त्वया हीदमुपवासाश्रितं नृप ॥ कथयामि यथा प्रोक्तं
वशिष्ठेन महात्मना ॥ ८ ॥ वशिष्ठमृषिमासीनं सप्तर्षिप्रवरं द्विजम् ॥ पप्रच्छारुन्धती पृष्टा यदेतद्भवता वयम् ॥९॥ तस्यास्तु परिपृच्छन्त्या जगाद
मुनिसत्तमः ॥ यत्तच्छृणुष्व कौंतेय ममेदं वदतोऽखिलम् ॥ १० ॥ ॥ वशिष्ठ उवाच ॥ ॥ श्रूयतां यदहं पृष्टस्त्वयैतद्वरवर्णिनि ॥ सुरूपता नृणां

---

[1] अपि–इ० पा० । [2] खंजाश्च–इ० पा० ।

येन योषितां चोपजायते ॥ ११ ॥ अनभ्यर्च्य तु गोविंदमनाराध्य च केशवम् ॥ रूपादिका गुणाः केन प्राप्यंतेऽन्येन कर्मणा ॥ १२ ॥ तस्मा
दाराधनीयोऽग्रे विष्णुरेव यशस्विनि ॥ पारत्र्यं प्राप्तुकामेन रूपसंपत्सुतादिकम् ॥ १३ ॥ यस्तु वाञ्छति धर्मज्ञे रूपं सर्वांगसुन्दरम् ॥ नक्षत्र
पुरुषं भद्रे जितक्रोधो जितेंद्रियः ॥ १४ ॥ सुस्नातः प्रयताहारः संपूजयति योऽच्युतम् ॥ भक्त्या योषिन्नरो वापि सुरूपांगः प्रजायते ॥ १५ ॥
योषिता हि परं रूपमिच्छन्त्या जगतः पतिः ॥ स एवाराधनीयोऽग्रे नक्षत्रांगो जनार्दनः ॥ १६ ॥ ॥ अरुन्धत्युवाच ॥ ॥ नक्षत्ररूपी
भगवान्पूज्यते पुरुषोत्तमः ॥ मुने येन विधानेन तन्ममाख्यातुमर्हसि ॥ १७ ॥ ॥ वशिष्ठ उवाच ॥ ॥ चैत्रमासात्समारभ्य विष्णोः
पादाभिपूजनम् ॥ यथा कुर्वीत रूपार्थं तन्निशामय तत्त्वतः ॥ १८ ॥ नक्षत्रमेकमेकं वै स्नातः सम्यगुपोषितः ॥ नक्षत्रपुरुषस्यांगं पूजयेच्च
विचक्षणः ॥ १९ ॥ मूले पादौ तथा जंघे रोहिण्यामर्चयेच्छुभे ॥ जानुनी चाश्विनीयोगे आषाढे चोरुसंज्ञिते ॥ २० ॥ फाल्गुनीद्वितये
गुह्यं कृत्तिकासु तथा कटिम् ॥ पार्श्वे भाद्रपदा गुल्फे द्वे कुक्षी रेवतीषु च ॥ २१ ॥ अनुराधासूरः पृष्ठं धनिष्ठास्वभिपूजयेत् ॥ भुजयुग्मं विशा
खासु हस्ते चैव करद्वयम् ॥ २२ ॥ पुनर्वसावंगुलीश्च आश्लेषासु तथा नखान् ॥ ज्येष्ठायां पूजयेद्ग्रीवां श्रवणे श्रवणे तथा ॥ २३ ॥ पुष्ये मुखं
तथा स्वातौ दशनानभिपूजयेत् ॥ आस्यं शतभिषग्योगे मघायोगे च नासिकाम् ॥ २४ ॥ मृगोत्तमांगे नयने पूजयेद्भक्तितः शुभे ॥ चित्रायोगे
ललाटं च भरणीषु तथा शिरः ॥ २५ ॥ संपूजनीया विद्वद्भिरार्द्रायां च शिरोरुहाः ॥ उपोषितो नरो भद्रे स्नानमभ्यंगपूर्वकम् ॥ २६ ॥ वर्जनीयं
प्रयत्नेन रूपघ्नं तद्विनिर्दिशेत् ॥ पूजयेत्तच्च नक्षत्रं नक्षत्रस्य च दैवतम् ॥ २७ ॥ सोमं नक्षत्रराजानं स्वमन्त्रैरर्चयेद्बुधः ॥ प्रतिनक्षत्रयोगे च
भोजनीया द्विजोत्तमाः ॥ २८ ॥ नक्षत्रज्ञाय विप्राय दानं दद्याच्च शक्तितः ॥ अन्तराये समुत्पन्ने सूतकाशौचकारिते ॥ २९ ॥ उपोष्य वाचोप
विशेन्नक्षत्रमपरं पुनः ॥ एवं माघावसाने तु व्रतपारः समाप्यते ॥ ३० ॥ समाप्ते तु व्रते दद्याच्छक्त्या सोपस्करान्वितम् ॥ नक्षत्रपुरुषं हैमं पूजये
त्तत्र शक्तितः ॥ ३१ ॥ ब्राह्मणं ब्राह्मणीं चैव वस्त्रालंकारभूषणैः ॥ शय्यायां तु समासन्नं गन्धमाल्यानुलेपनैः ॥ ३२ ॥ सप्तधान्यं यथालाभं गां
सवत्सां पयस्विनीम् ॥ छत्रोपानद्युगं चैव घृतपात्रं तथैव च ॥३३॥ मंत्रेणानेन विप्राय सुशीलाय निवेदयेत् ॥ यथा न विष्णुभक्तानां वृजिनं जायते
क्वचित् ॥ तथा सुरूपतारोग्यसुखसंपदिहास्तु मे ॥ ३४ ॥ यथा न लक्ष्म्या शयनं तव शून्यं जनार्दन ॥ शय्या ममाप्यशून्यास्तु तथा जन्मनि
जन्मनि ॥ ३५ ॥ एवं निवेद्य तत्सर्वं प्रणिपत्य क्षमापयेत् ॥ शक्तिहीनस्तु गां दद्याद् घृतपात्रसमन्विताम् ॥ ३६ ॥ नक्षत्रपुरुषाख्योऽयं यथावत्क

थितस्तव ॥ पापापनोदं कुरुते सम्यक्छ्रद्धावतां सताम् ॥ ३७ ॥ अङ्गोपाङ्गानि चैवास्य पादादीनि यशस्विनि ॥ सुरूपाण्यभिजायंते सदा
जन्मान्तराणि वै ॥ ३८ ॥ गात्राणि चैव भद्राणि शरीरारोग्यमुत्तमम् ॥ संततिं मनसः प्रीतिं रूपं चातीव शोभनम् ॥ ३९ ॥ वाङ्माधुर्यं
तथा कांतिं यच्चान्यदपि वांछितम् ॥ ददाति नक्षत्रपुमान्पूजितश्च जनार्दनः ॥ ४० ॥ वशिष्ठेन यथाख्यातं सर्वं तत्ते निवेदितम् ॥ नक्षत्रपुरुषं
नाम व्रतानामुत्तमोत्तमम् ॥ ४१ ॥ हृद्बाहुजानुनयनोरुनितंबभागं दक्षैः प्रकल्प्य सुतनुं पुरुषोत्तमस्य ॥ ये पूजयंति जितकोपमनोविकाराः
कौंतेय ते ननु भवंति सुरूपदेहाः ॥ ४२ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे नक्षत्रपुरुषव्रतवर्णनं नामाष्टाधिक
शततमोऽध्यायः ॥ १०८ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ उपवासेष्वशक्तस्य तदेव फलमिच्छतः ॥ अनभ्यासेन योगाद्वा किमिष्टं
व्रतमुच्यते ॥ १ ॥ शिवस्योपरि यस्य स्याद्भक्तिः सूर्यस्य संभवेत् ॥ नक्षत्राख्यं व्रतं तेन कथं कार्यं वदस्व मे ॥ २॥ ॥ श्रीकृष्ण उवाच ॥ ॥
उपवासेष्वशक्तानां नक्तं भोजनमिष्यते ॥ अस्मिन्व्रते तदप्यत्र श्रूयतामक्षयं महत् ॥ ३ ॥ शिवनक्षत्रपुरुषं शिवभक्तिप्रदायकम् ॥ यस्मिन्न
क्षत्रयोगे तु पुराणज्ञाः प्रचक्षते ॥ ४ ॥ फाल्गुनस्यामले पक्षे यदा हस्तः प्रजायते ॥ तदा ग्राह्यं व्रतं चैव नक्तेन शिवपूजनम् ॥ ५ ॥ शिवा
येति च हस्तेन पादौ पूज्यतमौ स्मृतौ ॥ शंकराय नमो गुल्फौ[1] पूज्यौ चित्रासु पांडव ॥ ६ ॥ भीमायेति च स्वातीषु पूजयेत्पुरुषर्षभ ॥ ऊरु
द्वयं विशाखासु त्रिनेत्रायेति पूजयेत् ॥ ७ ॥ मेढ्रं चैवानुराधासु अनङ्गाङ्गहराय च ॥ कटिं ज्येष्ठासु च तथा सुरज्येष्ठेति चार्चयेत् ॥
॥ ८ ॥ दानाख्याय नमो नाभिः पूज्या मूलेन शूलिनः ॥ पूर्वोत्तराषाढयुगे पार्श्वे वै पार्वतीपतिः ॥ ९ ॥ श्रवणेन तथा कुक्षी पूज्ये कपा
लिनेति च ॥ वक्षःस्थलं धनिष्ठासु सद्योजातेति नाम च ॥ १० ॥ वामेति पूजयेत्पार्थ हृदयं शतभिषासु च ॥ पूर्वोत्तरायुगे बाहू नमः
खट्वांगधारिणे ॥ ११ ॥ पूज्यं रुद्राय च तथा रेवतीषु करद्वयम् ॥ नखः पूज्योऽश्विनीयोगे नमः खण्डेन्दुधारिणे ॥ १२ ॥ भरणीषु ततः
पृष्ठं वृषांकाय नमोऽस्तु ते ॥ कृत्तिवासाय च तथा कृत्तिकासु कृकाटिकाम् ॥ १३ ॥ वाक्पूज्या रोहिणीयोगे नमो वाचस्पतेति च ॥
मृगोत्तमांगे दशनान्भैरवायेति वै नमः ॥ १४ ॥ आर्द्रासु पूज्यावधरौ स्थाणवेति युधिष्ठिर ॥ नासा पुनर्वसौ पूज्या पूषदंतविनाशिने ॥
॥ १५ ॥ पुष्ये नेत्रत्रयं पूज्यं नमस्ते सर्वदर्शिने ॥ आश्लेषायां ललाटं च त्र्यम्बकाय नमोनमः ॥ १६ ॥ मघासु च जटाजूटं पूजयेदंधकारये ॥

---

[1] अङ्गुल्यौ—इ० पा०।

पूर्वाफाल्गुनिकायुग्मे श्रवणे सोमधारिणे ॥ १७ ॥ नमोऽस्तु पाशांकुशपद्मशूलकपालसर्पेन्दुधनुर्द्धराय ॥ गजासुरानंगधुरांधकादिविनाशमूलाय नमः शिवाय ॥ १८ ॥ शिरः सम्पूजयेद्दद्यात्ततो धूपविलेपनम् ॥ ततस्तु रात्रौ भोक्तव्यं तैलक्षारविवर्जितम् ॥ १९ ॥ शालितण्डुलकप्रस्थं घृतपात्रेण संयुतम् ॥ दद्यात्सर्वेषु नक्तेषु ब्राह्मणाय नृपोत्तम ॥ २० ॥ शक्त्यभावे न दोषः स्यादधिके चाधिकं फलम् ॥ नक्षत्रयुगले प्राप्ते नक्तयुग्मं समाचरेत् ॥ २१ ॥ सूतकाशौचदोषे तु पुनरन्यदुपोषयेत् ॥ एवं क्रमेण संप्राप्ते पारणे पांडवादिके ॥ २२ ॥ ब्राह्मणान्भोजयेद्भक्त्या गुडक्षीरघृतादिभिः॥ कांचनं कारयेद्देवमुमया सह शंकरम् ॥ २३ ॥ शय्यां सुलक्षणां कृत्वा विरुद्धग्रंथिवर्जिताम् ॥ सोपधानकविश्रामां स्वास्तरावरणां शुभाम् ॥ २४ ॥ भाजनोपानहच्छत्रचामरासनदर्पणैः ॥ भूषणैरपि संयुक्तां फलवस्त्रानुलेपनैः ॥ २५ ॥ तस्यां निधाय तं देवमलंकृत्य गुणान्वितम् ॥ कपिलां वस्त्रसंवीतां शुचिशीलां पयस्विनीम् ॥ २६ ॥ सुवर्णशृंगीं रौप्यखुरां सवत्सां कांस्यदोहनाम् ॥ दद्यान्मंत्रेण पूर्वाह्णे न कालमभिलंघयेत् ॥ २७ ॥ यथा न देवशयनं तव पर्वतजातया ॥ शून्यं वृत्त्याथ संतत्या तथा मे संतु सिद्धयः ॥ २८ ॥ यथा देव न श्रेयोऽर्थस्त्वदन्यो विद्यते क्वचित ॥ तथा मामुद्धराशेषदुःखसंसारसागरात् ॥ २९ ॥ ततः प्रदक्षिणीकृत्य प्रणिपत्य विसर्जयेत् ॥ शय्यागवादितत्सर्वं द्विजस्य[१] भवनं नयेत् ॥ ३० ॥ नैतद्धिशीलाय न दांभिकाय कुतर्कदुष्टाय विनिंदकाय ॥ प्रकाशनीयं व्रतमिन्दुमौलेर्यश्चापि लोभोपहतांतरात्मा ॥ ३१ ॥ भक्ताय दांताय गुणान्विताय प्रदेयमेतच्छिवभक्तियुक्तैः ॥ इदं महापातककृन्नराणामप्यक्षयं वेदविदो वदंति ॥ ३२ ॥ या वाथ नारी कुरुतेऽतिभक्त्या भर्तारमाश्रित्य शुभं गुरुं वा ॥ न बंधुपुत्रैर्नधनैर्वियोगमाप्नोति दुःखं न सुहृत्समुत्थम् ॥ ३३ ॥ इदं वशिष्ठेन पुराऽर्जुनेन कृतं कुबेरेण पुरंदरेण ॥ यत्कीर्तनादप्यखिलान्यघानि विघ्नं समायांति न संशयोत्र ॥ ३४ ॥ इति पठति शृणोति वा य इत्थं शिवपुरुषं पुरुहूतवल्लभः स्यात् ॥ अपि नरकगतान्पितॄनशेषाञ्छिवभवनं नयतीह यः करोति ॥ ३५ ॥ इतिश्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे शिवनक्षत्रपुरुषव्रतवर्णनं नाम नवोत्तरशततमोऽध्यायः ॥ १०९ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ यदि कर्तुं न शक्नोति व्रतं नक्षत्रपौरुषम् ॥ गृहीतं रभसा कृष्ण ह्यन्यद्वा व्रतमुत्तमम् ॥ १ ॥ संपूर्णं जायते येन यदचीर्णं पुरा स्थितम् ॥ कुरु प्रसादं गुह्यार्थमेतन्मे वक्तुमर्हसि ॥ ॥ २ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ साधुसाधु महाबाहो कुरुराज युधिष्ठिर ॥ रहस्यानां रहस्यं ते कथयामि व्रतोत्तमम् ॥ ३ ॥

---

[१] ब्राह्मणस्य गृहम्–इ० पा० ।

सम्पूर्णं नाम तच्चापि व्रतं सम्यक्फलप्रदम् ॥ यच्चीर्णं नरनारीभिर्भवेत्संपूर्णकारकम् ॥ ४ ॥ अवश्यं तच्च कर्तव्यमक्षीणफलकांक्षिभिः[1] ॥
किञ्चिद्व्यग्रं प्रमादेन यद्व्रतं व्रतिनां स्थितम् ॥ तत्संपूर्णं भवेत्सर्वं व्रतेनानेन पाण्डव ॥ ५ ॥ उपद्रवैर्बहुविधैर्मदान्मोहाच्च पार्थिव ॥
यद्व्यग्रं किञ्चिदेव स्याद्व्रतं विघ्नविनायकैः ॥ तत्संपूर्णं भवेत्पार्थ सत्यंसत्यं न संशयः ॥ ६ ॥ कांचनं रौप्यकं रूपं शिल्पिना तद्धटापयेत् ॥
भग्नव्रते तु यो देवस्तत्स्वरूपं सुनिर्मितम् ॥ ७ ॥ रूपं स्त्रीपुंसयोर्वापि प्रारब्धं यद्व्रते किल ॥ नवनिष्पादितं किञ्चिद्दैवात्सर्वं तथोत्थितम् ॥ ८ ॥
द्विभुजं पङ्कजारूढं सौम्यप्रहसिताननम् ॥ निष्पादितं शिल्पभावात्तस्मिन्नेव दिनेदिने ॥ ९ ॥ तन्मासे च पुनः प्राप्ते ब्राह्मणो विधिना गृहे ॥
स्नापयेत्पयसा दध्ना घृतक्षीररसांबुभिः ॥ १० ॥ गंधचंदनपुष्पैश्च चर्चयेत्[2]कुंकुमादिना ॥ तोयपूर्णस्य कुम्भस्य पृथ्व्यां विन्यस्य चंदनैः ॥ ११ ॥
धूपदीपाक्षतैर्वस्त्रै रत्नैरप्युपहारकैः ॥ अर्घ्यं दद्याच्च तन्नाम्ना मंत्रेणानेन पांडव ॥ १२ ॥ उपसन्नस्य दीनस्य प्रायश्चित्तकृताञ्जलेः ॥ शरणं च
प्रपन्नस्य कुरुष्वाद्य दयां प्रभो ॥ १३ ॥ परत्र भयभीतस्य भग्नखण्डव्रतस्य च ॥ कुरु प्रसादं संपूर्णं व्रतं संपूर्णमस्तु मे ॥ १४ ॥ तपश्छिद्रं
व्रतच्छिद्रं यच्छिद्रं भग्नके व्रते ॥ तव प्रसादाद्देवेश सर्वमच्छिद्रमस्तु नः ॥ स्वाहा ॥ १५ ॥ ॥ (अमुकदेवाय नमः ॥) पूर्वतो दक्षिणतः
पश्चिमत उत्तरतः ॥ विदिक्षु चोपर्य्यधस्ताद्दिक्पालेभ्यो नमोनमः ॥ १६ ॥ इदमर्घ्यमिदं पाद्यं नैवेद्यं ते नमोनमः ॥ एवं प्रोच्य ततः पादौ जानु
नी कटिशीर्षके ॥ १७ ॥ वक्षः[3]कुक्षिदृष्टिपृष्ठबाह्वंसांकशिरोरुहान् ॥ पूजयेत्तस्य देवस्य ततः पश्चात्क्षमापयेत् ॥ १८ ॥ पूजितस्त्वं यथाशक्त्या
नमस्तेऽस्तु सुरोत्तम ॥ ऐहिकामुष्मिकीं नाथ कार्यसिद्धिं दिशस्व मे ॥ १९ ॥ एवं क्षमापयित्वा तु देवरूपं विधानतः ॥ ततो द्विजस्य कौन्तेय
विधिज्ञस्योपपादयेत् ॥ २० ॥ स्थित्वा पूर्वमुखो विप्रो गृह्णीयाद्दर्भपाणिना ॥ विप्रस्य हस्ते यच्छेच्च दाता वै चोत्तरामुखः ॥ मंत्रेणानेन कौंतेय
सोपवासः प्रयत्नतः ॥ २१ ॥ इदं व्रतं मया खंडं कृतमासीत्पुरा द्विज ॥ भगवंस्त्वत्प्रसादेन संपूर्णं तदिहास्तु मे ॥ २२ ॥ ब्राह्मणोऽपि प्रतीच्छेत्तु
मंत्रेणानेन तद्व्रतम् ॥ वाक्संपूर्णं मनःपूर्णं पूर्णं कायव्रतेन ते॥संपूर्णस्य प्रसादेन भव पूर्णमनोरथः ॥२३॥ ब्राह्मणा यत्प्रभाषंते ह्यनुमोदंति देवताः ॥
सर्वदेवमया विप्रा नैतद्वचनमन्यथा ॥ २४ ॥ जलधिः क्षारतां नीतः पावकः सर्वभक्षताम् ॥ सहस्रनेत्रः शक्रोऽपि कृतो विप्रैर्महात्मभिः ॥ २५ ॥
ब्राह्मणानां तु वचनाद्ब्रह्महत्या प्रणश्यति ॥ अश्वमेधफलं साग्रं प्राप्यते नात्र संशयः ॥ २६ ॥ व्यासवाल्मीकिवचनाद्ब्राह्मणवचनाच्च गर्गगौतम

---

[1] संपूर्णफलकाङ्क्षिभिः–इ० पा० । [2] कुसुमादिना–इ० पा० । [3] चक्षुःकुक्षी–इ० पा० ।

पराशरधौम्यांगिरसवशिष्ठनारदादिमुनिवचनात्संपूर्णं भवतु ते व्रतम् ॥ २७ ॥ एवंविधविधानेन गृहीत्वा ब्राह्मणो व्रजेत् ॥ तद्दानं प्रेषयेत्स
ब्राह्मणस्य गृहे स्वयम् ॥ ततः पंच महायज्ञान्निर्वपेद्भोजनादि च ॥ २८ ॥ एवं यः कुरुते भक्त्या व्रतमेतत्सकृत्तथा ॥ तस्य संपूर्णतां याति तद्व्रतं
यत्पुरा स्थितम् ॥ २९ खंडं संपूर्णतां याति प्रसन्ने व्रतदैवते ॥ संपूर्णं च ततः कृत्वा संपूर्णांगो भवेद्व्रती ॥ ३० ॥ भोगी भव्यो लसत्कीर्तिः स्व
संपूर्णमनोरथः ॥ स्थित्वा वर्षशतं मर्त्ये ततः स्वर्गेऽमरो भवेत् ॥ ३१ ॥ यथेष्टचेष्टाचारी च ब्रह्मविष्ण्विन्द्रपूजितः ॥ स्वर्गलोके चिरं स्थित्वा
पुनर्मोक्षमवाप्नुयात् ॥ ३२ ॥ प्रायश्चित्तमिदं प्रोक्तं पुरा गर्गेण मे प्रभो ॥ गोकुले गोकुलाकीर्णे मया बाल्येऽप्युपोषितम् ॥ ३३ ॥ एवं त्वमपि
कौंतेय चर संपूर्णकं व्रतम् ॥ ३४ ॥ भग्नानि यानि मदमोहवशाद्गृहीत्वा जन्मान्तरेष्वपि नरेण समत्सरेण ॥ संपूर्णपूजनपरस्य पुरो भवंति
सर्वव्रतानि परिपूर्णफलप्रदानि ॥ ३५ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे संपूर्णव्रतवर्णनं नाम दशोत्तर
शततमोऽध्यायः ॥ ११० ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ वर्णाश्रमाणां प्रभवः पुराणेषु मया श्रुतः ॥ पण्यस्त्रीणां समाचारं श्रोतु
मिच्छामि तत्त्वतः ॥ १ ॥ का ह्यासां देवता कृष्ण किं व्रतं किमुपोषितम् ॥ केन धर्मेण चैवेताः स्वर्गमाप्स्यंत्यनुत्तमम् ॥ २ ॥ ॥ श्रीकृष्ण
उवाच ॥ मम पत्नीसहस्राणि संति पांडव षोडश ॥ रूपौदार्यगुणोपेता मन्मथायतनाः शुभाः ॥ ३ ॥ ताभिर्वसंतसमये कोकिलालिकुलाकुले ॥
पुष्पितोपवनोत्फुल्लकह्लारसरसस्तटे ॥ निर्भरापानगोष्ठीषु प्रसक्ताभिरलंकृते ॥ ४ ॥ कुरंगनयनः श्रीमान्मालतीकृतशेखरः ॥ गच्छन्समीप
मार्गेण सांबः परपुरंजयः ॥ ५ ॥ साक्षात्कन्दर्परूपेण सर्वाभरणभूषितः ॥ अनंगशरतप्ताभिः साभिलाषमवेक्षितः ॥ ६ ॥ प्रवृद्धो मन्मथस्तासां
सर्वाङ्गक्षोभदायकः ॥ निरीक्ष्य तमहं सर्वं विकारं ज्ञानचक्षुषा ॥ ७ ॥ अशपं रुषितः सर्वा हरिष्यंतीह दस्यवः ॥ मयि स्वर्गमनुप्राप्ते भवतीः
काममोहिताः ॥ ८ ॥ एतद्वाक्यमुपश्रुत्य बाष्पपर्याकुलेक्षणाः ॥ मामूचुर्वद गोविन्द कथमेतद्भविष्यति ॥ ९ ॥ भर्तारं जगतामीशं भवंतमपरा
जितम् ॥ दिव्यानुभावां च पुरीं रत्नवंति गृहाणि च ॥ १० ॥ द्वारिकावासिनः सर्वान्देवरूपान्कुमारकान् ॥ भगवन्सर्वलोकस्य कथं भोग्या
भवामहे ॥ ११ ॥ दासभावमनुप्राप्य भविष्यामः कथं पुनः ॥ को धर्मः कः समाचारः कथं वृत्तिर्भविष्यति ॥ १२ ॥ तथा लालप्यमानास्ता
बाष्पपर्याकुलेक्षणाः ॥ मया प्रोक्ता युवत्यस्ताः संतापस्त्यज्यतामयम् ॥ १३ ॥ जलक्रीडाविहारेषु पुरा सरसि मानसे ॥ भवतीनां सगर्वाणां

---

२ प्रापयेत्—इ० पा० ।

नारदोऽभ्याशमागतः ॥ १४ ॥ हुताशनसुताः सर्वा भवत्योऽप्सरसः पुरा ॥ अप्रणम्यावलेपेन परिपृष्टः स योगवित् ॥ १५ ॥ कथं नारायणोऽस्माकं भर्ता स्यादित्युपादिश ॥ तस्माद्व्रतप्रदानं च शापदानमभूत्पुरा ॥ १६ ॥ शय्याद्वयप्रदानेन मधुमाधवमासयोः ॥ सुवर्णोपस्करोत्सर्गाद्द्वादश्यां शुक्लपक्षतः ॥ भर्ता नारायणो नूनं भविष्यत्यन्यजन्मनि ॥ १७ ॥ न कृतो यत्प्रणामो मे रूपसौभाग्यमत्सरात् ॥ परं पृष्टोऽस्मि तेनाशु वियोगो वो भविष्यति ॥ चौरैरपहृताः सर्वा वेश्यात्वं समवाप्स्यथ ॥ १८ ॥ एवं नारदशापेन मच्छापेन च सांप्रतम् ॥ न कार्यः संभ्रमः कश्चिद्दासीत्वं वो भविष्यति ॥ १९ ॥ इदानीमपि यद्वक्ष्ये तच्छृणुध्वं वराननाः ॥ पुरा देवासुरे युद्धे हतेषु शतशः पुनः ॥ दानवासुरसैन्येषु राक्षसेषु ततस्ततः ॥ २० ॥ तेषां नारीसहस्राणि शतशोऽथ सहस्रशः ॥ परिणीतानि यानि स्युर्बलाद्भुक्तानि यानि वै ॥ २१ ॥ तानि सर्वाणि देवेशः प्रोवाच वदतां वरः ॥ वेश्याधर्मेण वर्तध्वमधुना नृपमंदिरे ॥ २२ ॥ भक्तिमत्यो वरारोहास्तदा देवकुलेषु च ॥ राजानः स्वामिनः स्तुत्या ब्राह्मणाश्च बहुश्रुताः ॥ २३ ॥ तेषां गृहेषु तिष्ठध्वं सूतकं चापि तत्समम् ॥ भविष्यति च सौभाग्यं सर्वासामपि शक्तितः ॥२४॥ नचैकस्मिन्रतिः कार्या पुरुषे धनवर्जिते ॥ अनुमान्यः प्रसाद्यश्च शुल्कदो देववत्सदा ॥ २५ ॥ सुरूपो वा विरूपो वा द्रव्यं तत्र प्रयोजनम् ॥ न तद्व्यतिक्रमः कार्यो ब्रह्महत्यामवाप्नुयात् ॥ न चापि मद्यपाभिश्च भाव्यं कौटिल्यबुद्धिभिः ॥२६॥ यः कश्चिच्छुल्कमादाय गृहमेष्यति वः सदा ॥ निश्छद्मनैवापहार्यं तत्सर्वं दंभवर्जितम् ॥ २७ ॥ व्यभिचारो न कर्तव्यः स्वामिना सह कर्हिचित् ॥ रूपयौवनदर्पेण धनलोभेन वा पुनः ॥२८॥ दासी भूत्वा च या काचिद्व्यभिचारं करोति च ॥ पतिना सह पापिष्ठा पापिष्ठां यात्यधोगतिम् ॥२९॥ देवतानां पितॄणां च पुण्येऽह्नि समुपस्थिते ॥ गोभूहिरण्यधान्यानि प्रदेयानि च शक्तितः॥३०॥ ब्राह्मणेभ्यो वरारोहाः कार्याणि वचनानि च ॥ यच्चाप्यन्यद्व्रतं सम्यगुपदेक्ष्यामि तत्त्वतः ॥ ३१ ॥ अविचारेण सर्वाभिरनुष्ठेयं च तत्पुनः ॥ संसारोत्तारणायालमेतद्वेदविदो विदुः ॥ ३२ ॥ यदा सूर्यदिने प्राप्ते पुष्यो वा सपुनर्वसुः ॥ भवेत्सर्वौषधिस्नानं सम्यङ्नारी समाचरेत् ॥ ३३ ॥ तदा पञ्चशरस्यापि संनिधातृत्वमेष्यति ॥ अर्चयेत्पुण्डरीकाक्षमनङ्गस्यापि कीर्तनम्॥३४॥ कामाय पादौ संपूज्य जंघे वै मोहकारिणे ॥ मेढ्रं कंदर्पनिधये कटिं प्रीतियुजे नमः ॥ ३५ ॥ नाभिं सौख्यसमुद्राय वामनाय तथोदरम् ॥ हृदयं हृदयेशाय स्तनावाह्लादकारिणे ॥ ३६ ॥ उत्कंठायेति वै कंठमास्यमानन्ददाय च ॥ वामांसं पुष्पचापाय पुष्पबाणाय दक्षिणम् ॥ ३७ ॥ नमोऽ

---

१ स्वामिना–इ० पा० ।

नन्ताय वै मौलिं विलोलायेति च ध्वजम् ॥ सर्वात्मने शिरस्तद्वद्देवदेवस्य पूजयेत्[2] ॥ ३८ ॥ नमः श्रीपतये तार्क्ष्यध्वजांकुशधराय च ॥ गदिने पीतवस्त्राय शंखिने चक्रिणे नमः॥ नमो नारायणायेति कामदेवात्मने नमः ॥३९॥ नमः शांत्यै नमः प्रीत्यै नमो रत्यै नमः श्रियै ॥ नमः पुष्ट्यै नमस्तुष्ट्यै नमः सर्वार्थदाय च ॥ ४० ॥ एवं संपूज्य गोविन्दमनंगात्मकमीश्वरम् ॥ गंधैर्माल्यैस्तथा धूपैर्नैवेद्यैश्चैव भामिनी ॥ ४१ ॥ अत्र चाहूय धर्मज्ञं ब्राह्मणं वेदपारगम् ॥ अव्यंगावयवं पूज्य गंधपुष्पादिभिस्तथा ॥ ४२ ॥ शालेयतंडुलप्रस्थं घृतपात्रेण संयुतम् ॥ तस्मै विप्राय सा दद्यान्माधवः प्रीयतामिति ॥ ४३ ॥ यथेष्टाहारभुक्तं च तमेव द्विजसत्तमम् ॥ रत्यर्थं कामदेवोऽयमिति चित्तेऽवधार्य च ॥ ४४ ॥ यद्यदिच्छति विप्रेन्द्रस्तत्तत्कुर्याद्विलासिनी ॥ सर्वभावेन चात्मानमर्पयेत्स्मितभाषिणी ॥ ४५ ॥ एवमादित्यवारेण सदा तद्व्रतमाचरेत् ॥ तंडुलप्रस्थदानं च यावन्मासांस्तु द्वादश ॥ ४६ ॥ ततस्त्रयोदशे मासि संप्राप्ते तस्य भामिनी ॥ विप्रस्योपस्करैर्युक्तां शय्यां दद्याद्विलक्षणाम् ॥ ४७ ॥ सोपधानकविश्रामां स्वास्तरावरणां शुभाम् ॥ दीपिकोपानहच्छत्रपादुकासनसंयुताम् ॥ ४८ ॥ सपत्नीकमलंकृत्य हेमसूत्राङ्गुलीयकैः ॥ सूक्ष्मवस्त्रैः सकटकैर्धूपमाल्यानुलेपनैः ॥ ४९ ॥ कामदेवं सपत्नीकं गुडकुंभोपरि स्थितम् ॥ ताम्रपात्रासनगतं हैमनेत्रपटावृतम् ॥ ५० ॥ सकांस्यभाजनोपेतमिक्षुदण्डसमन्वितम् ॥ दद्यादेतेन मंत्रेण तथैकां गां पयस्विनीम् ॥ ५१ ॥ यथांतरं न पश्यामि कामकेशवयोः सदा ॥ तथैव सर्वकामाप्तिरस्तु विष्णो सदा मम ॥ ५२ ॥ यथा न कामिनीदेहात्प्रयाति तव केशव ॥ तथापि मम देवेश शरीरस्थं पतिं कुरु ॥ तथैव काञ्चनं देवं प्रतिगृह्णन्द्विजोत्तमः ॥ ५३ ॥ "क इदं कोऽदात्कस्मा अदात्कामः कामायादात्कामो दाता कामः प्रतिग्रहीता कामँसमुद्रमाविशमैतत्त"–इति वैदिकमन्त्रमीरयेत्" ॥ कोऽदादिति पठेन्मन्त्रं ध्यायंश्चेतसि माधवम् ॥ ततः प्रदक्षिणीकृत्य विसृजेद्द्विजपुङ्गवम् ॥ शय्यासनादिकं सर्वं ब्राह्मणस्य गृहं नयेत् ॥ ५४ ॥ ततःप्रभृति योऽन्योपि रत्यर्थं गृहमागतः ॥ स सम्यक्सूर्यवारेण समं पूज्यो यथेच्छया ॥ ५५ ॥ एवमेकं द्विजं शांतं पुराणज्ञं[1] विचक्षणम् ॥ तमर्चयेत च सदा अपरं वा तदाज्ञया ॥ ५६ ॥ न प्राप्नोति तदा विघ्नं गर्भसूतकजं क्वचित् ॥ दैवं वा मानुषं वा स्यादुपरागेण वा ततः ॥ ५७ ॥ साधारनष्टपशुवद्यथाशक्त्या समापयेत् ॥ एतद्वः कथितं सर्वं वेश्याधर्ममशेषतः ॥ ५८ ॥ पुरुहूतेन यत्प्रोक्तं दानवीषु ततो मया ॥ तदिदं च व्रतं सर्वं भवतीषु प्रकाशितम् ॥ ५९ ॥ सर्वपापप्रशमनमनंतफलदायकम् ॥ कल्याणिनीनां

---

१ आचारज्ञम्–इ० पा० । २ प्रपूजयेत्–इ० पा० ।

कथितं कुरुध्वं तद्वराननाः ॥ ६० ॥ एतत्पार्थ मया पूर्वं गोपीनां तु प्रकाशितम् ॥ पुराणं धर्मसर्वस्वं वेश्याजनसुखप्रदम् ॥ ६१ ॥ करोति याशेषमखण्डमेतत्कल्याणिनी माधवलोकसंस्था ॥ सा पूजिता देवगणैरशेषैरानन्दकृत्स्थानमुपैति विष्णोः ॥ ६२ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे कामदानवेश्याव्रतवर्णनं नामैकादशोत्तरशततमोऽध्यायः ॥ १११ ॥ ॥ छ ॥ ॥ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अथातो वृंताकविधिं व्याख्यास्यामः ॥ संवत्सरं च षण्मासांस्त्रीन्मासान्वा न भक्षयेत् ॥ अथ भरण्यां मघायां वा एकरात्रोपवासं कृत्वा स्थंडिले देवानाहूय गंधधूपपुष्पनैवेद्यदीपादिना पूजयेत् ॥ दर्भपाणिर्गंधोदकेनावाहयेत् ॥ यमराजानमावाहयामि ॥ कालमावाहयामि ॥ नीलमावाहयामि ॥ चित्रगुप्तमावाहयामि ॥ वैवस्वतमावाहयामि ॥ मृत्युमावाहयामि ॥ परमेष्ठिनमावाहयामीति ॥ ततोग्निमुपसमाधाय तिलाज्ये जुहुयात् ॥ यमराजाय स्वाहा ॥ कालाय स्वाहा ॥ नीलाय स्वाहा ॥ चित्रगुप्ताय स्वाहा ॥ वैवस्वताय स्वाहा ॥ मृत्यवे स्वाहा ॥ परमेष्ठिने स्वाहेति ॥ अग्निर्मूर्धेत्याहुतीस्त्वष्टशतं हुत्वा स्विष्टकृतिं कृत्वा प्रायश्चित्तं हुत्वा ब्राह्मणः स्वयमेव करोति ॥ इतरेषामाचार्यः ॥ अथ सौवर्णं वृंताकं ब्राह्मणाय निवेदयेत् ॥ कृष्णवृषभं गां च दद्यात् ॥ कर्णवेष्टांगुलीयके च्छत्रोपानहौ कृष्णयुगं कृष्णकंबलं च दद्यात् ॥ ब्राह्मणान्भोजयित्वा आशिषो वाचयेत् ॥ पौंडरीकाश्वमेधफलमवाप्नोति ॥ सप्तकोटिसहस्राणि नाकपृष्ठे महीयते ॥ सप्तजन्मांतरं यावद्यमलोकं न पश्यतीत्याह भगवान्बौधायनः ॥ वृंताकमप्रतिहतान्तरहेमसिद्धं दद्याद्द्विजाय घृततक्रसमन्वितं यः ॥ कृत्वा व्रतं वत्सरमासमेकं याम्यं न पश्यति पुरं पुरुषः कदाचित् ॥ १ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे वृंताकव्रतविधिवर्णनं नाम द्वादशोत्तरशततमोऽध्यायः ॥ ११२ ॥ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अथातः संप्रवक्ष्यामि रहस्यं ह्येतदुत्तमम् ॥ येन लक्ष्मीनिर्वृतिस्तु पुष्टिश्चैवोपजायते ॥ १ ॥ सर्वे ग्रहाः सदा सौम्या जायंते येन पांडव ॥ आदित्यवारे हस्तेन पूर्वं गृह्य विचक्षणः ॥ २ ॥ नक्तोक्तविधिना सर्वं कुर्यात्पूजां तथा रवेः ॥ प्रत्यक्षं सप्त नक्तानि कृत्वा भक्तिपरो नरः ॥ ३ ॥ ततस्तु सप्तमे प्राप्ते कुर्याद्ब्राह्मणवाचनम् ॥ भास्करं सर्वसौवर्णं कृत्वा यत्नेन मानवः ॥ ४ ॥ ताम्रपात्रे स्थापयित्वा रक्तपुष्पैः प्रपूज्य च ॥ रक्तवस्त्रयुगच्छन्नं छत्रोपानद्युगान्वितम् ॥ ५ ॥ घृतेन स्नपनं कृत्वा लड्डुकान्विनिवेद्य च ॥ मंत्रेणानेन विदुषे ब्राह्मणायोपपादयेत् ॥ ६ ॥ आदिदेव नमस्तुभ्यं सप्तसप्ते दिवाकर ॥ त्वं रवे तारयस्वास्मानस्मात्संसारसाग

---

१ तण्डुलान्–इ० पा० ।

रात् ॥ ७ ॥ कृतेनानेन राजेन्द्र भवेदारोग्यमुत्तमम् ॥ द्रव्यसंपत्सुतप्राप्तिरिति पौराणिका विदुः ॥ ८ ॥ अविसंवादिनी चेयं शांतिपुष्टिप्रदा नृणाम् ॥ तद्वच्चित्रासु संगृह्य सोमवारं विचक्षणः ॥ ९ ॥ सप्तमे च ततः प्राप्ते दत्त्वा ब्राह्मणभोजनम् ॥ कांस्यभाजनसंस्थं वा राजतं राजतेऽथ वा ॥ १० ॥ पात्रे कृत्वा सोमराजं श्वेतवस्त्रावगुंठितम् ॥ पादुकोपानहच्छत्रभाजनासनसंयुतम् ॥ ११ ॥ दध्यन्नशिखरं दत्त्वा ब्राह्मणाय निवेदयेत् ॥ मंत्रेणानेन राजेन्द्र तं शृणुष्व वंदामि ते ॥ १२ ॥ श्रीमहादेवजावल्लीपुष्पगोक्षीरपांडुर ॥ सोम सौम्यो भवास्माकं सर्वदा ह्युत्तमोत्तम ॥ ॥ १३ ॥ एवं कृते महाराज सोमस्तुष्टिप्रदो भवेत् ॥ भवंति तुष्टेऽत्रिसुते सर्वे सानुग्रहा ग्रहाः ॥ १४ ॥ स्वात्यामंगारकं गृह्य क्षपयेन्नक्तभोजनः ॥ सप्तमे त्वथ संप्राप्ते स्थापितं ताम्रभाजने ॥ १५ ॥ रक्तवस्त्रयुगच्छन्नं कुंकुमेनानुलेपनम् ॥ नैवेद्यं हंतकारं च पूज्य धूपाक्षतादिभिः ॥ १६ ॥ मंत्रेणानेन तं दद्याद्ब्राह्मणाय कुटुंबिने ॥ कुजन्मप्रभवोऽपि त्वं मंगलः पठ्यसे बुधैः ॥ अमंगलं निहत्याशु सर्वदा यच्छ मंगलम् ॥ १७ ॥ विशाखासु बुधं गृह्य सप्त नक्तान्यथा चरेत् ॥ बुधं हेममयं कृत्वा स्थापितं कांस्यभाजने ॥ १८ ॥ शुक्लवस्त्रयुगच्छन्नं शुक्लमाल्यानुलेपनैः ॥ गुडौदनोपहारं तु ब्राह्मणाय निवेदयेत् ॥ १९ ॥ बुधः सद्बुद्धिजननो बोधदः सर्वदा नृणाम् ॥ तत्त्वामबोधं कुरु मे राजपुत्र नमोनमः ॥ २० ॥ अनुराधास्वथाचार्यं देवानां पूज्य भक्तितः ॥ पूर्वोक्तक्रमयोगेन सप्त नक्तान्यथाचरेत् ॥ २१ ॥ हैमं हेममये पात्रे स्थापयित्वा बृहस्पतिम् ॥ पीतांबरयुगच्छन्नं पीतयज्ञोपवीतिनम् ॥ २२ ॥ पादुकाच्छत्रसहितं सदंडं सकमण्डलुम् ॥ संपूज्य पुष्पनिकरैर्दीपधूपाक्षतादिभिः ॥ २३ ॥ खण्डखाद्योपहारैश्च द्विजाय प्रतिपादयेत् ॥ धर्मशास्त्रार्थशास्त्रज्ञ ज्ञानविज्ञानपारग ॥ अगाधबुद्धिगांभीर्य देवाचार्य नमोऽस्तु ते ॥ २४ ॥ शुक्रं ज्येष्ठासु संगृह्य क्षपयेन्नक्तभोजनैः ॥ पूर्वोक्तक्रमयोगेन द्विजसंतर्पणेन च ॥ २५ ॥ सप्तमे त्वथ संप्राप्ते सौवर्णं कारयेच्छुभम् ॥ रौप्ये वा वंशपात्रे वा स्थापयित्वा भृगोः सुतम् ॥ २६ ॥ संपूज्य परया भक्त्या श्वेतवस्त्रविलेपनैः ॥ अग्रे तस्य प्रदातव्यं पायसं घृतसंयुतम् ॥ २७ ॥ दद्यादनेन मंत्रेण ब्राह्मणाय विचक्षणः ॥ भार्गवो भृगुपुत्रोऽसि शुक्र क्रमविशारद ॥ २८ ॥ हत्वा ग्रहकृतान्दोषानायुरारोग्यदो भव ॥ मूलेन सूर्यतनयं गृहीत्वा भरतर्षभ ॥ २९ ॥ तस्मिन्दिने पूजनीयं ग्रहत्रितयमादरात् ॥ शनैश्चरश्च राहुश्च केतुश्चेति क्रमान्नृप ॥ ३० ॥ होमं तिलघृतैः कुर्याद्ग्रहनाम्ना तु मंत्रवित ॥ अर्कः पलाशखदिरौ ह्यपामार्गोथ पिप्पलः ॥ ३१ ॥ उदुंबरश

---

१ महामत—इ० पा० ।

मीदूर्वाकुशाश्च समिधः क्रमात् ॥ एकैकस्य त्वष्टशतमष्टाविंशतिरेव वा ॥ ३२ ॥ होतव्यं मधुसर्पिर्भ्यां दध्ना वा पायसेन वा ॥ सप्तमे त्वथ संप्राप्ते
नक्तं सूर्यसुतस्य तु ॥ ३३ ॥ ग्रहास्त्रयोऽपि कर्तव्या राजँल्लोहमयाः शुभाः ॥ व्रतांते सर्वतश्चैतान्सौवर्णान्वाथ कारयेत् ॥ ३४ ॥ कृष्णवस्त्रयुगं
दद्यादेकैकस्य क्रमान्नृप ॥ मृगनाभ्या समालभ्य कृशरान्विनिवेद्य च ॥ ३५ ॥ होमावसाने सर्वं तद्ब्राह्मणायोपपादयेत् ॥ शनैश्चर नमस्तेऽस्तु
नमोऽस्तु राहवे तथा ॥ ३६ ॥ केतवे च नमस्तुभ्यं सर्वशांतिप्रदो भव ॥ एवं कृते भवेद्यस्तु तन्निबोध नरेश्वर ॥ ३७ ॥ यदि भौमो रविसुतो
भास्करो राहुणा सह ॥ केतुश्च मूर्ध्नि तिष्ठंति सर्वे पीडाकरा ग्रहाः ॥ ३८ ॥ अनेन कृतमात्रेण सर्वे शाम्यंत्युपद्रवाः ॥ ३९ ॥ एवं यः कुरुते राज
न्सदाभक्तिसमन्वितः ॥ तस्य सानुग्रहाः सर्वे यच्छन्ति विजयं सुखम् ॥४०॥ यश्चैतच्छृणुयात्कल्पं ग्रहाणां पठतेऽपि वा ॥ तस्य सानुग्रहाः सर्वे
शांतिं यच्छंति नान्यथा ॥४१॥ शनैश्चरं राहुकेतू लोहपात्रेषु विन्यसेत् ॥ कृष्णागरुः स्मृतो धूपो दक्षिणा चात्मशक्तितः ॥४२॥ सूर्यं विधुं कुज
बुधौ गुरुशुक्रसौरीन्हस्तादिकर्क्षसहितानुदितक्रमेण॥संपूज्य हेमघटितान्द्विजपुङ्गवाय दत्त्वा पुमान्ग्रहगणेन न पीड्यतेऽत्र ॥४३॥ इति श्रीभविष्ये
महापुराण उत्तरपर्वणिश्रीकृष्णयुधिष्ठिरसंवादे ग्रहनक्षत्रव्रतवर्णनं नाम त्रयोदशोत्तरशततमोऽध्यायः ॥ ११३ ॥ छ ॥ ॥ श्रीकृष्णउवाच ॥ ॥
पुरा त्रेतायुगे पार्थ नावर्षत्पाकशासनः ॥ कथंचिदनयाद्राज्ञस्तस्य राष्ट्रे समंततः ॥ १ ॥ ततो राष्ट्रं क्षुधाविष्टं बभूवातीवदारुणम् ॥ पतंगमू
षिकाकीर्णं चौरव्यालभयाकुलम् ॥ २ ॥ तस्मिन्घोराकुले काले सपत्नीकः सबालकः ॥ कौशिकः स्वगृहं त्यक्त्वा परराष्ट्रमगाच्छनैः ॥ ३ ॥
मार्गेऽथ गच्छता तेन कौशिकेन महर्षिणा ॥ त्यक्तः स बालको ह्येको दुर्भरं च कुटुम्बकम् ॥ ४ ॥ तस्मिन्काले विशेषेण क्षीणेन्नौषधि
संचये ॥ कृत्वातिनिर्घृणं कर्म गतोऽसौ कौशिको मुनिः ॥ ५ ॥ सोऽपि बालो रुदन्दीनो दिशो वीक्ष्य स्थितः पथि ॥ उत्थाय पिप्पलस्याधः
फलान्यत्तुं प्रचक्रमे ॥ ६ ॥ कूपे जलं पपौ नित्यं तत्रैवाश्रममंडले ॥ कृत्वा सम्यक् स्थितो रौद्रं तेपे च विपुलं तपः ॥ ७ ॥ अथाजगाम भगवा
न्नारदो वेदपारगः ॥ तं दृष्ट्वा दीनवदनं क्षुधार्तं द्विजपोतकम् ॥ ८ ॥ दयया तस्य संस्कारं चक्रे मौंज्यादिबंधनम् ॥ वेदानध्यापयामास सरह
स्यपदक्रमान् ॥ ददौ च वैष्णवं मंत्रं द्वादशाक्षरमित्युत ॥ ९ ॥ वेदाभ्यासरतस्यास्य विष्णुध्यानपरस्य च ॥ प्रत्यहं पिप्पलादस्य विष्णुः प्रत्यक्षतां
ययौ ॥ १० ॥ वैनतेयसमारूढो नीलोत्पलदलच्छविः ॥ चतुर्भुजः पीतवासाः शंखचक्रगदाधरः ॥ ११ ॥ स उवाच तदा तुष्टो वरं ब्रूहि यमि
च्छसि ॥ तच्छ्रुत्वा नारदमुखं समालोक्य शिशुस्तदा ॥ नारदेनाप्यनुज्ञातो ज्ञानविद्यामयाचत ॥ १२ ॥ दत्त्वा ज्ञानं सोपदेशं योगाभ्यासं च

निर्मलम् ॥ नागारिगमनो विष्णुस्तत्रैवान्तर्हितोभवत् ॥ १३ ॥ ततो राजन्महाज्ञानी महर्षिः स शिशुस्तदा ॥ नारदं परिपप्रच्छ केनाहं पीडितो मुने ॥ १४ ॥ ग्रहेणाग्रहभूतेन बालरूपोऽपि दुःखितः ॥ न मे पिता न मे माता जीवितोस्म्यतिपीडया ॥ १५ ॥ ब्राह्मण्यं भवता दत्तं दैवान्मम द्विजोत्तम ॥ एतच्छ्रुत्वा शिशोर्वाक्यं कथयामास नारदः ॥ १६ ॥ शनैश्वरेण क्रूरेण ग्रहेण त्वं हि पीडितः ॥ पीडितश्च समस्तोऽपि देशोयं मंदचारिणा ॥ १७ ॥ तेनैतत्ते फलं प्राप्तं सैषः सौरिः शनैश्वरः ॥ प्रज्वलन्नतिदर्पेण स्फुरंतीव[1] नभस्तले ॥ १८ ॥ एवमुक्तः शिशुः क्रोधात्प्रजज्वालेव पावकः ॥ आलोक्य गगनाद्भूमौ पातयामास वै शनिम् ॥ पतमानो गिरेः शृंगाद्भग्नः खंजो बभूव ह ॥ १९ ॥ धरण्यां पतितं दृष्ट्वा भास्करात्मजमातुरम् ॥ नरीनर्ति भुजक्षेपैर्नारदो हृष्टमानसः ॥ २० ॥ हर्षाद्देवानथाहूय दर्शयामास तं शनिम् ॥ २१ ॥ अथ देवास्तथा प्राप्ता ब्रह्मरुद्रेन्द्रपावकाः ॥ शनैः संशमयासुरूचुश्चेदमृषिं च तम् ॥ २२ ॥ स्वस्ति तेऽस्तु महाभाग पिप्पलाद महामुने ॥ भद्रं तेऽत्र कृतं नाम नारदेन महर्षिणा ॥ अन्वर्थयुक्तं विप्रेन्द्र जीवितं पिप्पलादनात् ॥ २३ ॥ भगवन्पिप्पलान्यत्त्वा जीवितोऽसि यतो मुने ॥ ततश्च पिप्पलादेति ख्यातिं लोके गमिष्यसि ॥ २४ ॥ ये च त्वां पूजयिष्यंति स्नात्वा पुष्पैर्महाऋषिम् ॥२५॥ इहाश्रमे समभ्येत्य रूपेस्मिन्भक्तिभाविताः ॥ सप्तजन्मान्तरं यावत्पुत्रपौत्रानुगामिनः॥२६॥न तेषां बाधिकां[2] सत्यं ग्रहपीडा भविष्यति ॥ स्मरिष्यंतीह ये च त्वां पिप्पलादेति नामतः ॥२७॥ तेषां शनैश्वरकृता पीडा न प्रभविष्यति ॥ क्षमस्वास्य महाभाग निर्दोषोऽयं ग्रहाग्रणीः ॥ २८ ॥ चरन्वृक्षं शनैरेष शुभाशुभफलप्रदः ॥ हतसाध्या ग्रहाश्चैते न भवंति कदाचन॥२९॥बलिहोमनमस्कारैः शांतिं यच्छंति पूजिताः ॥ अतोऽर्थमस्य दिवसे स्नानमभ्यंगपूर्वकम् ॥३०॥ कार्यं देयं च विप्राणां तैलमभ्यंगहेतवे ॥ यस्तु संवत्सरं यावत्प्राप्ते शनिदिने नरः ॥३१॥ तैलं ददाति विप्राणां स्वशक्त्यान्यजनेपि च ॥ ततस्संवत्सरस्यांते प्राप्ते तस्य दिने पुनः ॥ ३२ ॥ लोहैस्संघटितं सौरिं तैलमध्ये विनिक्षिपेत् ॥ लोहभांडकमध्यस्थं कृष्णवस्त्रयुगच्छदम् ॥ ३३ ॥ कृष्णगोदक्षिणायुक्तं कृष्णकंबलशायिनम् ॥ तिलतैलेन च स्नानं कृष्णपुष्पैः सुपूजितम् ॥३४॥ कृष्णगंधैः कृष्णधूपैः कृशरान्नैस्तिलौदनैः ॥ पूजयित्वा सूर्यपुत्रं ब्राह्मणाय निवेदयेत् ॥ ३५ ॥ मंत्रेणानेन ब्रह्मर्षे शन्नोदेवीति भक्तिमान्[3] ॥ इतरेषां तु वर्णानां शृणु मन्त्रं द्विजोत्तम ॥ ३६ ॥ क्रूरावलोकनवशाद्भुवनं नाशयिष्यतियो ग्रहो रुष्टः ॥ तुष्टो धनकनकसुखं ददाति सौरिः शनैश्वरः पातु ॥ ३७ ॥ यत्पुरा नष्टराज्याय नलाय प्रददौ किल ॥ स्वप्ने सौरिर्निजं[4] मन्त्रं शृणु

---

[1] स्फुटति–इ० पा० । [2] स्थावरकृता–इ० पा० । [3] भक्तितः–इ० पा० । [4] स्वयम्–इ० पा० ।

कामफलप्रदम् ॥ ३८ ॥ क्रोडं[1] नीलाञ्जनप्रख्यं नीलवर्णसमस्रजम् ॥ छायामार्तंडसंभूतं नमस्यामि शनैश्चरम् ॥ ३९ ॥ नमोऽर्कपुत्राय शनैश्चराय
नीहारवर्णांजनमेचकाय ॥ श्रुत्वा रहस्यं भवकामदश्च फलप्रदो मे भव सूर्यपुत्र ॥ ४० ॥ नमोऽस्तु प्रेतराजाय कृष्णदेहाय वै नमः ॥ शनैश्चराय
क्रूराय शुद्धबुद्धिप्रदायिने ॥ ४१ ॥ य एभिर्नामभिः स्तौति तस्य तुष्टो भवाम्यहम्[2] ॥ मदीयं तु भयं तस्य स्वप्नेऽपि न भविष्यति ॥४२॥ एवमूचे
शनिः पूर्वमतस्तं ब्राह्मणे ददेत् ॥ एवमेतद्व्रतं विप्र ये चारिष्यंति मानवाः ॥ ४३ ॥ स्थावरेस्थावरे प्राप्ते वत्सरं यावदेव तु ॥ तेषां शानैश्चरी पीडा
देशेऽपि न भविष्यति ॥ ४४ ॥ एवमुक्त्वा सुराः सर्वे प्रतिजग्मुर्यथागतम् ॥ शनैश्चरोऽपि स्वस्थाने ग्रहांते खे प्रतिष्ठितः ॥ ४५ ॥ पिप्पलादोऽपि
ब्रह्मज्ञो ब्रह्माज्ञां प्रतिपालयन् ॥ शनैश्चरं तु संपूज्य तुष्टाव रचिताञ्जलिः ॥ ४६ ॥ कोणस्थः पिङ्गलो बभ्रुः कृष्णो रौद्रोऽन्तको यमः ॥ सौरिः
शनैश्चरो मन्दः प्रीयतां मे ग्रहोत्तमः ॥४७॥ शनैश्चरमिति स्तुत्वा पिप्पलादो महामुनिः ॥ खे प्रज्वलन्विमानस्थो दृश्यतेऽद्यापि मानवैः ॥४८॥
इदं शनैश्चराख्यानं ये श्रोष्यन्ति समाहिताः ॥ तेषां कुरुवरश्रेष्ठ शनिः पीडां न दास्यति ॥ ४९ ॥ कृष्णायसेन घटितां ग्रहराजमूर्तिं लोहे निधाय
कलशे तिलतैलपूर्णे ॥ यो ब्राह्मणाय रविजं प्रददाति भक्त्या पीडा शनैश्चरकृता न हि बाधते तम् ॥ ५० ॥ ॥ इति श्रीभविष्ये महापुराण
उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे शनैश्चरव्रतवर्णनंनामचतुर्दशोत्तरशततमोऽध्यायः ॥ ११४ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥
यदारोग्यकरं पुंसां यदनंतफलप्रदम् ॥ व्रतं तद्ब्रूहि गोविन्द सर्वपापप्रणाशनम् ॥१॥ ॥ श्रीकृष्ण उवाच ॥ ॥ यत्तद्विश्वात्मनो धाम परं ब्रह्म सनात
नम् ॥ सूर्याग्निचन्द्ररूपेण तत्त्रिधा जगति स्थितम् ॥ २ ॥ तमाराध्य पुमान्किं न प्राप्नोति कुरुनन्दन ॥ तस्मादादित्यवारेण सदा नक्ताशनो
भवेत् ॥ ३ ॥ उत्पद्यते यदा भक्तिर्भानोरुपरि शाश्वती ॥ तदारभ्य सदा कार्यं नक्तमादित्यवासरे ॥ ४ ॥ पूर्वोक्तविधिना चैव पूजयित्वा द्विजो
त्तमान् ॥ ततोऽस्तसमये भानो रक्तचन्दनपङ्कजम् ॥ ५ ॥ विलिख्य द्वादशदलं पूज्य सूर्येति पूर्वतः ॥ दिवाकरं तथाग्नेये विवस्वंतमतः
परम् ॥ ६ ॥ भगं तु नैर्ऋते देवं वरुणं पश्चिमे दले ॥ महेन्द्रं मारुतदले आदित्यं तु तथोत्तरे ॥ ७ ॥ शांतमीशानभागे तु नमस्कारेण विन्यसेत्॥
कर्णिकापूर्वपत्रे[4] तु सूर्यस्य तुरगान्न्यसेत् ॥ ८ ॥ दक्षिणे यमनामानं मार्तंडं पश्चिमे दले ॥ उत्तरेण रविं देवं कर्णिकायां तु भास्करम् ॥ ९ ॥
अर्घ्यं दद्यात्ततः पार्थ सतिलारुणचंदनम् ॥ फलाक्षतयुतं तद्वदिमं मंत्रमुदीरयेत् ॥ १० ॥ कालात्मा मर्वभूतात्मा वेदात्मा विश्वतोमुखः ॥

---

१ कोद्रम्–इ० पा० । २ भवत्यसौ–इ० पा० । ३ एवमुक्त्वा शनिर्दत्त्वा तं द्विजातिं विसर्जयेत्–इ० पा० । ४ पूर्वभागे तु–इ० पा० ।

यस्मादग्नींदुरूपस्त्वमतः पाहि प्रभाकर ॥ ११ ॥ अग्निमीले नमस्तुभ्यमिषे त्वोर्जे च भास्करे ॥ अग्न आयाहि वरद नमस्ते ज्योतिषां पते ॥ १२ ॥
अर्घ्यं दत्त्वा विसर्ज्याथ निशि तैलविवर्जितम् ॥ भुञ्जीत भावितमना भास्करं संस्मरन्मुहुः ॥ १३ ॥ प्राक्तनेऽह्नि शनौ चैव तैलाभ्यंगं विवर्जयेत् ॥
वत्सरांते कारयित्वा काञ्चनं कमलोत्तमम् ॥ १४ ॥ पुरुषं च यथाशक्त्या कारयेद्द्विभुजं तथा ॥ १५ ॥ सुवर्णशृंगीं कपिलां महार्घ्यां रौप्यखुरां
कांस्यदोहां सवत्साम् ॥ पूर्णे गुडस्योपरि ताम्रपात्रे निधाय पद्मं च ततो निदध्यात् ॥ १६ ॥ गां कल्पयित्वा पुरुषं सपद्मं दद्यादनेकव्रतनायकाय ॥
अव्यंगरूपाय जितेन्द्रियाय कुटुंबिने [१]शुद्धमनुद्धताय ॥ १७ ॥ नमोऽस्तु ऋक्सामयजुर्विधात्रे पद्मप्रबोधाय जगत्सवित्रे ॥ त्रयीमयाय त्रिगुणात्मने
च त्रिलोकनाथाय नमोनमस्ते ॥ १८ ॥ इत्यनेन विधानेन वर्षमेकं तु यो नरः ॥ नक्तमादित्यवारेण कुर्यात्स नीरुजो भवेत् ॥ १९ ॥ धनधान्यसमा
युक्तः पुत्रपौत्रसमन्वितः ॥ मर्त्ये स्थित्वा चिरं कालं सूर्यलोकमवाप्नुयात् ॥ २० ॥ कर्मसंक्षयमवाप्य पार्थिवः शोकदुःखभयरोगवर्जितः ॥ स्याद्
मित्रकुलकालसंनिभो धर्ममूर्तिरमितौजसा युतः ॥ २१ ॥ या च भर्तृगुरुदेवतत्परा वेदमूर्तिदिननक्तमाचरत् ॥ सापि लोकममरेशपूजिता याति कौ
रव रवेर्न संशयः ॥ २२ ॥ यः पठेदथ शृणोति वा नरः पश्यतीत्थमथ वानुमोदयेत् ॥ सोऽपि शक्रभवने दिवौकसैः कल्पकोटिशतमेकमीड्यते ॥
॥ २३ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवाद आदित्यदिननक्तविधिवर्णनं नाम पञ्चदशोत्तरशततमोऽध्यायः ॥
॥ ११५ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अथान्यदपि ते वच्मि संक्रांत्युद्यापने फलम् ॥ यदक्षयं परं लोके पुराणकवयो विदुः ॥ १ ॥
विषुवे अयने वापि संक्रांतिव्रतमारभेत् ॥ पूर्वेद्युरेकभक्तेन दंतधावनपूर्वकम् ॥ २ ॥ संक्रांतिवासरे प्राप्ते तिलैः स्नानं विधीयते ॥ अभिसंक्रमणं
भूमौ चन्दनेनाष्टपत्रकम् ॥ ३ ॥ पद्मं सकर्णिकं कुर्यात्तस्मिन्नावाहयेद्रविम् ॥ कर्णिकायां न्यसेत्सूर्यमादित्यं पूर्वतस्ततः ॥ ४ ॥ नमः सप्तार्चिषेऽ
ग्नेये याम्ये रुङ्मण्डलाय च ॥ नमः सवित्रे नैर्ऋत्ये वरुणं वारुणे यजेत् ॥ ५ ॥ सप्तसप्तिं च वायव्ये पूजयेद्भास्वतां पतिम् ॥ मार्तंडमुत्तरे विष्णु
मीशाने विन्यसेद्दले ॥ ६ ॥ गन्धमाल्यफलैर्भक्ष्यैः स्थंडिले पूजयेत्ततः ॥ चन्दनोदकपुष्पैस्तु दत्त्वार्घं विन्यसेद्भुवि ॥ ७ ॥ नमस्ते विश्वरूपाय
विश्वधाम्ने स्वयंभुवे ॥ नमोनमस्ते वरद ऋक्सामयजुषां पते ॥ ८ ॥ अनेन विधिना दत्त्वा भानवेऽर्घ्यं नरोत्तम ॥ द्विजाय सोदकं कुम्भं घृतपात्रं
हिरण्मयम् ॥ ९ ॥ कमलं च यथाशक्त्या कारयित्वा निवेदयेत् ॥ विधिनानेन कर्तव्यं मासि मासि नरोत्तम ॥ १० ॥ एकभक्ताशनैः पुंभिः

---

[१] सर्वमनुव्रताय–इ० पा० ।

सर्वमेतद्यथाविधि ॥ एकस्मिन्नह्नि कर्तव्यं वत्सरांतेथ वा पुनः ॥ ११ ॥ कौंतेय तस्मिन्घृतपायसेन संपूज्य वह्निं द्विजपुंगवाय ॥ कुम्भान्पुनर्द्वा
दशधेनुयुक्तान्दौर्गत्ययुक्तः कुशलामथैकाम् ॥ १२ ॥ निवेदयेद्ब्राह्मणपुङ्गवाय हैमीं च दद्यात्पृथिवीं ससस्याम् ॥ शक्त्याथ रौप्यामथ वापि
ताम्रीं पैष्टीमशक्तो वसुधां विधाय ॥ १३ ॥ सौवर्णसूर्येण समं प्रदद्यान्न वित्तशाठ्यं पुरुषोऽत्र कुर्यात् ॥ कुर्वन्नधो याति नरेन्द्रचन्द्रयावन्महेन्द्र
प्रमुखाः सुरेशाः ॥ १४ ॥ पृथ्वी च यावत्सकुलाचला च यावच्च सूर्यानिलवह्निचन्द्राः ॥ तावत्स गन्धर्वकुलैरशेषैः संपूज्यते भारत नाकपृष्ठे ॥
॥ १५ ॥ ततस्तु कर्मक्षयमाप्य सप्तद्वीपाधिपः स्यात्सुकुलप्रसूतः ॥ दिव्यैः सुखैर्युक्तवपुः सभार्यः प्रसूतपुत्रान्वयबन्धुवर्गः ॥ १६ ॥ इति पठति
शृणोति योऽतिभक्त्या विधिमखिलं रविसंक्रमेषु पुण्यम् ॥ मतिमपि च ददाति सोऽपि देवैरमरपतिप्रमुखैर्मृतस्तु पूज्यः ॥ १७ ॥ ॥ इति
श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे संक्रांत्युद्यापनवर्णनं नाम षोडशोत्तरशततमोऽध्यायः ॥ ११६ ॥ ॥ छ ॥ ॥
॥ ॥ युधिष्ठिर उवाच ॥ ॥ कृष्ण केयं जनैः सर्वैर्विष्टिर्भद्रेति चोच्यते ॥ कस्यात्मजेयं किंरूपा पूज्यते च कथं जनैः॥१॥ ॥ श्रीकृष्ण उवाच ॥ ॥
सुता मार्तंडदेवस्य छायया जनिता पुरा ॥ शनैश्चरस्य सोदर्या भगिन्यतिभयंकरी ॥ २ ॥ सा जातमात्रा भुवनं ग्रस्तुं समुपचक्रमे ॥ कृष्णा
करालवदना सितदंष्ट्रोर्ध्वमूर्द्धजा ॥ ३ ॥ निर्याति यदि कार्येण कश्चित्तस्य पुरः स्थिता ॥ विघ्नं करोति स्वपतो भुञ्जानस्य स्थितस्य वा ॥ ४ ॥
यज्ञविघ्नकरी रौद्रा समाजोत्सवनाशिनी ॥ नित्योद्वेगकरी रौद्रा विनाशयति सा जगत् ॥ ५ ॥ तां तु दुर्विनयासक्तां दृष्ट्वा देवो दिवाकरः ॥
चिंतयामास कस्यापि यच्छाम्येनां सुमध्यमाम् ॥ ६ ॥ कन्यादुर्विनयाच्चेह पिता दोषेण गृह्यते ॥ युवत्यास्तु ततो भर्ता तस्माद्भर्तृगृहं नयेत् ॥७॥
विचिंत्यैवं सुतां भद्रां यस्ययस्य प्रयच्छति ॥ ते नमंति क्षणेनैव सुरराक्षसकिन्नराः ॥ ८ ॥ मण्डपं मण्डपारम्भे भंक्त्वा भीषयते जनम् ॥ विव
स्वांश्चिन्तयाविष्टः कस्येयं प्रतिपाद्यताम् ॥ ९ ॥ विरूपा दुष्टहृदया स्वेच्छाचारविहारिणी ॥ दत्ताप्येषा न दोषाय भवतीह कथंचन ॥१०॥ वित
र्कयन्यावदेवमास्ते देवो दिवस्पतिः ॥ तावत्तया जगत्सर्वं दुष्टया समभिद्रुतम् ॥ ११ ॥ अथाजगाम सवितुः पार्श्वे ब्रह्माऽण्डसंभवः ॥ कार्यं निवे
दयामास विष्टेर्दौष्ट्यमशेषतः ॥ १२ ॥ भास्करस्तमुवाचाथ ब्रह्माणं भुवनेश्वरम् ॥ भवान्कर्ता च हर्ता च कस्मादेवं प्रभाषसे ॥ १३ ॥ एव
मुक्तस्तदा ब्रह्मा भास्करेणा[1]मितद्युतिः ॥ उवाच विष्टिमानाय्य शृणु भद्रे मयोदितम् ॥ १४ ॥ करणैः सह वर्तस्व बवबालवकौलवैः ॥

---

[1] महद्युतिः–इ० पा० ।

सप्तमेऽर्धदिने प्राप्ते यदभीष्टं कुरुष्व तत् ॥ १९ ॥ यात्राप्रवेशमांगल्यकृषिवाणिज्यकारणात् ॥ भक्षयस्वाभिमुखगान्नरानुन्मार्गगामिनः ॥ ॥ १६ ॥ उद्वेजनीयो नो हि जनो भवत्या दिवसत्रयम् ॥ पूज्या सुरासुराणां त्वं दिवसार्द्धे भविष्यसि ॥ १७ ॥ उल्लंघ्य ये प्रवर्तंते भद्रे त्वां निर्भया नराः ॥ तेषां विनाशयाशु त्वं कार्यमार्ये सुखी भव ॥ १८ ॥ एवमुक्त्वा गतो ब्रह्मा भद्रापि भुवनत्रयम् ॥ बभ्रामोद्भ्रांतहृदया भीषयन्ती सुरासुरान् ॥ १९ ॥ एवमेषा समुत्पन्ना विष्टिरिष्टविनाशिनी ॥ निवेदिता ते कौंतेय तस्मात्तां परिवर्जयेत् ॥ २० ॥ असितजलदवर्णा दीर्घनासोग्रदंष्ट्रा विपुलहनुकपाला[1] पिंडिकोद्बद्धजंघा ॥ अनलशतसहस्रं चोद्गिरंती समंतात्पतति भुवनमध्ये कार्यनाशाय विष्टिः ॥ २१ ॥ भानोः सुता केतुशताग्रजाता कृष्णा कुमूर्तिः सततं कुचेला ॥ देवैर्नियुक्ता करणार्थसंस्था विष्टिस्तु सर्वत्र विवर्जनीया[4] ॥ २२ ॥ मुखे तु घटिकाः पञ्च द्वे कंठे तु सदा स्थिते ॥ हृदि चैकादश प्रोक्ताश्चतस्रो नाभिमंडले ॥ २३ ॥ कट्यां पञ्चैव विज्ञेयास्तिस्रः पुच्छे जयावहाः ॥ मुखे कार्यविनाशाय ग्रीवायां धननाशिनी ॥ २४ ॥ हृदि प्राणहरा ज्ञेया नाभ्यां तु कलहावहा ॥ कट्यामर्थपरिभ्रंशो विष्टिपुच्छे ध्रुवो जयः ॥ २५ ॥ पृथिव्यां यानि कार्याणि शुभान्यशुभानि च ॥ तानि सर्वाणि सिद्ध्यंति विष्टिपुच्छे न संशयः ॥ २६ ॥ धन्या दधिमुखी भद्रा महामारी खरानना ॥ कालरात्रिर्महारुद्रा विष्टिश्च कुलपुत्रिका ॥ २७ ॥ भैरवी च महाकाली असुराणां क्षयंकरी ॥ द्वादशैवःतु नामानि प्रातरुत्थाय यः पठेत् ॥ २८ ॥ न च व्याधिर्भवेत्तस्य रोगी रोगात्प्रमुच्यते ॥ ग्रहाः सर्वेऽनुकूलाः स्युर्न च विघ्नादि जायते ॥ २९ ॥ रणे राजकुले द्यूते सर्वत्र विजयी भवेत् ॥ ३० ॥ यश्च पूजयते नित्यं शास्त्रोक्तविधिना नरः ॥ तस्य सर्वार्थसिद्धिस्तु भवतीह न संशयः ॥ ३१ ॥ येनोपवासविधिना व्रतेन च यशस्विनी[2] ॥ पूजिता तुष्टिमभ्येति[3] तदेव कथयामि ते ॥ ३२ ॥ यस्मिन्दिने भवेद्भद्रा तस्मिन्नहनि भारत ॥ उपवासस्य नियमं कुर्यान्नारी नरोऽथ वा ॥ ३३ ॥ यदि रात्रौ भवेद्विष्टिरेकभुक्तं दिनद्वयम् ॥ कार्यं तेनोपवासः स्यादिति पौराणिकी श्रुतिः ॥ ३४ ॥ प्रहरस्योपरि यदा स्याद्विष्टिः प्रहरत्रयम् ॥ तत्रोपवासः कर्तव्य एकभुक्तमतोऽन्यथा ॥ ३५ ॥ सर्वौषध्युदकस्नानं सुगंधामलकैरथ ॥ नद्यां तडागेऽथ गृहे स्नानं सर्वत्र शस्यते ॥ ३६ ॥ देवान्पितॄन्प्रीणयित्वा ततो दर्भमयीं शुभाम् ॥ विष्टिं कृत्वा पुष्पधूपैर्नैवेद्येन च पूजयेत् ॥ ३७ ॥ होमं कृत्वा विष्टिनामैरष्टोत्तरशतं ततः ॥ भुञ्जीत दत्त्वा विप्राय तिलान्पायसमेव च ॥ सतिलां कृशरां भुक्त्वा पश्चाद्भुञ्जीत कामतः ॥ ३८ ॥ छायासूर्यसुते देवि विष्टिरि

---

[1] विपुलहनुकपालो—इ० पा० । [2] पयस्विनी—इ० पा० । [3] पुष्टिम्—इ० पा० । [4] आर्षमेतत् ।

ष्टार्थदायिनि ॥ पूजिताऽसि यथाशक्त्या भद्रे भद्रप्रदा भव ॥ ३९ ॥ उपोष्य विधिनानेन दश सप्त यथाक्रमम् ॥ उद्यापनं ततः कुर्यात्पूर्वव
त्पूज्य भामिनीम् ॥ ४० ॥ स्थापयित्वायसे पीठे कृशरान्नं निवेद्य च ॥ परिधाप्य कृष्णयुगं स्तुत्वा मंत्रेण तां पुनः ॥ ४१ ॥ ब्राह्मणाय पुनर्द
द्याल्लोहं तैलं तिलांस्तथा ॥ कृष्णां सवत्सां गामेकां तथैकं कालकंबलम् ॥ दक्षिणां च यथाशक्त्या दत्त्वा भद्रां विसर्जयेत् ॥ ४२ ॥ य एवं कुरुते
पार्थ सम्यग्भद्राव्रतं नरः ॥ विघ्नो न जायते तस्य कार्यारंभे कदाचन ॥ ४३ ॥ राक्षसाश्च पिशाचा वा पूतनाशाकिनीग्रहाः ॥ न पीडयन्ति तं
मर्त्यं यो भद्राव्रतमाचरेत् ॥ ४४ ॥ न चैवेष्टवियोगः स्यान्न हानिस्तस्य जायते ॥ देहांते याति सदनं भास्करस्य न संशयः ॥ ४५ ॥ सूर्यात्म
जातिदयिता भगिनी शनेर्या मर्त्यें भ्रमत्यतिरथा करणक्रमेण ॥ तां कृष्णभासुरमुखीं समुपोष्य विष्टिमिष्टार्थसिद्धिमबुधोऽपि पुमानुपैति ॥ ४६॥
इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे विष्टिव्रतवर्णनं नाम सप्तदशोत्तरशततमोऽध्यायः ॥ ११७ ॥ ॥ छ ॥ ॥
॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अगस्त्यव्रतमस्त्यन्यत्सर्वपापप्रणाशनम् ॥ तच्छृणुष्व महीपाल कथ्यमानं मयानघ ॥ १ ॥ ॥ युधिष्ठिर
उवाच ॥ ॥ शृणोमि ब्रूहि मे कृष्ण देवर्षेस्तस्य चेष्टितम् ॥ जन्म चैवार्घदानं च कालमुद्गमनस्य च ॥२॥ ॥ श्रीकृष्ण उवाच ॥ ॥ मित्रश्च वरुणश्चैव
पूर्वमेतौ सुरोत्तमौ ॥ मंदरस्य समीपे तु चेरतुर्विपुलं तपः ॥ ३ ॥ तयोः संक्षोभणार्थाय वासवेन वराप्सराः ॥ उर्वशी प्रेषिता तत्र रूपौदार्यगुणा
न्विता ॥ ४ ॥ तस्याः संदर्शनादेव क्षुभितौ तौ सुरोत्तमौ ॥ विकारं मनसो बुद्ध्वा कुंभे वीर्यं ससर्जतुः ॥ ५ ॥ निमेः शापात्तत्र जातो
वशिष्ठो भगवानृषिः ॥ अनंतरमगस्त्यस्तु जातो दिव्यस्तपोधनः ॥ ६ ॥ मलयस्यैकदेशे तु वैखानसविधानतः ॥ सभार्यः संवृतो विप्रैस्तप
स्तेपे सुदुश्चरम् ॥ ७ ॥ आस्तां दैत्यौ पुरा दुष्टावादौ कृतयुगस्य तु ॥ नाम्ना इल्वलवातापी देवब्राह्मणकंटकौ ॥ ८ ॥ तयोरेकोऽभवन्मेषो द्वितीयो
भोज्यदायकः ॥ श्राद्धक्रमेण तेनैवं बहवो नाशिता द्विजाः ॥ ९ ॥ अथान्यस्मिन्दिने दैत्यो ह्यगस्त्यं संन्यमन्त्रयत् ॥ भोज्यार्थं ब्राह्मणैः
सार्द्धं भृगुगर्गकुलोद्भवैः ॥ १० ॥ अगस्त्योप्यभवच्छ्राद्धे धौरेयो रोषदर्पितः ॥ सोऽपि हत्वापचद्वह्नौ वातापिं मेषरूपिणम् ॥ ११ ॥ परि
विष्यमाणेषु तेषु स्तिमितं प्राह दानवम् ॥ अगस्त्यो भगवान्क्रुद्धः सर्वं मे दीयतामिति ॥ १२ ॥ मैषं मांसं ततः प्रादादिल्वलः कुपि
तस्तदा ॥ भक्षयित्वाऽभवत्स्वस्थो निर्विकारो महामुनिः ॥ १३ ॥ शुचिर्बभौ ततः प्राह वातापिमिल्वलः शनैः ॥ निष्क्रमस्व मुनेर्देहं भित्त्वा
कस्माद्विलंबसे ॥ १४ ॥ तच्छ्रुत्वाऽगस्त्यविप्रोऽपि उद्गारं कृतवान्गुरुम् ॥ कुतो निष्क्रमणं प्राह भक्षितः स मया पुनः ॥ १५ ॥ जीर्णोऽयं भस्म

भूतोऽयं वातापिर्ब्रह्मकंटकः ॥ इल्वलोऽपि स्फुरत्क्रोधः सोऽगस्त्येन निरीक्षितः ॥ १६ ॥ भस्मीभूतः क्षणेनैव ततः शांतं जगद्बभौ ॥ तेन वैरेण
ते दुष्टा नष्टशेषास्तु दानवाः ॥ १७ ॥ संमंत्र्य निश्चयं मेरौ ततोऽगस्त्यमुपागताः ॥ विवर्द्धयिषवस्तेजो मुनेरस्य दिवौकसः ॥ १८ ॥ तेऽगस्त्य
माहुर्ब्रह्मर्षे समुद्रं शोषयस्व वै ॥ तच्छ्रुत्वागस्त्यविप्रोऽपि आग्नेयीं धारणां दधत् ॥ १९ ॥ तया पीतः समुद्रोऽपि भ्रांतमीनोर्मिकच्छपः ॥
पीते समुद्रतोयेऽपि देवैः क्रुद्धैस्तु दानवाः ॥ २० ॥ क्षयं नीताः क्षणात्सर्वे क्रन्दमानाः पुनःपुनः ॥ क्षेमं जगत्यभूत्सर्वमगस्त्यर्षेः प्रसादतः ॥२१॥
अथ गंगानदीतोयैः संपूर्णे सागरे पुनः ॥ मंथानं मंदरं कृत्वा नेत्रं कृत्वा तु वासुकिम् ॥ २२ ॥ ममंथुः सहिताः सर्वे समुद्रं दैत्यदानवाः ॥
अथोत्थिते रत्नसंघे सोमे श्रीकौस्तुभे गजे ॥ २३ ॥ अतिलोभान्मथ्यमाने सागरे पयसां निधौ ॥ अथोत्थितं ज्वलद्रौद्रं कालकूटं महाविषम् ॥
॥ २४ ॥ येनासौ सुरसंघात आघूर्णित इवाभवत् ॥ सागरं संप्रविष्टास्ते रात्रौ रात्रौ विनिर्युयुः ॥२५॥ निर्गम्य च वधं चक्रुर्मुनीनामूर्ध्वरेतसाम् ॥
बभंजुर्यज्ञपात्राणि दिवा तोये निलिल्यिरे ॥ २६ ॥ समुद्रमध्ये न ज्ञात्वा ब्रह्मा नारायणो हरः ॥ वायुः कुबेरो वसवः सर्वे देवाः सवासवाः ॥
॥ २७ ॥ ततो मन्त्रैः शंकरेण किञ्चित्तत्रैव भक्षितम् ॥ क्षणाद्दग्धः स मंत्रोपि नीलकंठीकृतो हरः ॥ २८ ॥ ब्रह्मापि चेतनां प्राप्य अब्रह्मण्यमु
वाच ह ॥ नास्ति कश्चिज्जगत्यस्मिन्विषमापातुमीश्वर ॥ २९ ॥ अगस्त्यो दक्षिणाशायां लङ्कामूले महामुनिः ॥ तद्गच्छध्वं महाभागाः शरणं
सर्वदा ह्यसौ ॥ ३० ॥ एवमुक्त्वा गता देवा अगस्त्याश्रमदक्षिणाम् ॥ देवान्वीक्ष्य च तान्हर्षादगस्त्यो मुनिसत्तमः ॥ ३१ ॥ ध्यानं चक्रे विषं येन
हिमाद्रौ संप्रवेशितम् ॥ कंठीसूत्रं निकुंजेषु हिमपर्वतसानुषु ॥ ३२ ॥ तस्मिन्काले विषं लग्नं किञ्चिच्छेषं द्रुमादिषु ॥ उन्मत्तकरवीरार्कस्थलभूमि
जलानिले ॥ ३३ ॥ तद्विषं चूर्णितं तेन क्षणात्संकोचितं तथा ॥ हिमवातेन दुष्टेन वहमानेन पांडव ॥ ३४ ॥ मनुष्याणां तु जायंते रोगा नाना
विधा भुवि ॥ ते च मासत्रयं सार्द्धं प्रवहंति विषोल्बणाः ॥ ३५ ॥ वृषसंक्रांतिमारभ्य सिंहांते शाम्यते विषम् ॥ रोगदोषापनोदश्च भवेत्पार्थ
प्रभावतः ॥ ३६ ॥ एवं कालेन महता नीरुजे व्याधिवर्जिते ॥ जगत्यस्मिन्पुरा पार्थ घनीभूते प्रजागणे ॥ ३७ ॥ निरंतरे मर्त्यलोके ऊर्ध्वबाहु
प्रसारिणि ॥ बलवान्धूमनिर्देशान्मृत्युर्भ्राम्यति मूर्तिमान् ॥ ३८ ॥ प्रजा व्यापादयन्कालादाजगाम महामुनेः ॥ समीपं मूर्तिमान्क्रुद्धो मृत्युस्तेन
निरीक्षितः ॥ ३९ ॥ भस्मीबभूव पश्चाच्च ब्रह्मणः सुखकारणात् ॥ व्याधिवृन्दसमोपेतो मृत्युरन्यो विनिर्मितः ॥४०॥ तथान्यो दंडकारण्ये श्वेतो
नाम नृपोत्तमः ॥ स्वमांसमश्नता तेन निर्वेदात्प्रार्थितो मुनिः ॥४१॥ भगवन्सर्वमेवान्यद्दत्तं राज्यमदान्मया ॥ अन्नं जलं वा श्राद्धं वा न दत्तं पाप

बुद्धिना ॥ ४२ ॥ ततोऽगस्त्यः कारुण्या रत्नैः श्राद्धमकल्पयत् ॥ श्राद्धे निवृत्ते सहसा दिव्यदेहः श्रिया वृतः ॥ ४३ ॥ प्राप्तश्च परमं स्थानमग
स्त्यर्षेः प्रसादतः ॥ अथ विन्ध्यो महाशैलः सूर्यरोषाद्व्यवर्धत ॥ ४४ ॥ कस्मान्मेरुमिवासौ मां न करोति प्रदक्षिणम् ॥ वर्द्धमानं तु तं दृष्ट्वा
ततो देवाः सवासवाः ॥ ४५ ॥ एकीभूयाश्रमं गत्वा स्तुत्वा देवर्षिपुङ्गवम् ॥ अगस्त्यमूचुर्भगवन्सूर्यमार्गनिरोधिनम् ॥ ४६ ॥ विंध्यं निवारय
स्वैनं स्थितौ स्थापय पर्वतम् ॥ अगस्त्योपि द्रुतं गत्वा प्राहेदं विन्ध्यपर्वतम् ॥ ४७ ॥ प्रस्थितं तीर्थयात्रायां विद्धि मामचलोत्तम ॥ स्थितौ
च स्थीयतां तावद्यावदागमनं मम ॥ ४८ ॥ एवमुक्त्वा संप्रयातो नाद्यापि विनिवर्तते ॥ दृश्यते भ्राजयन्नाशां दक्षिणां गगने ज्वलन् ॥ ४९ ॥
त्रैलोक्यवंद्यचरणो लोपामुद्रासहायवान् ॥ लोपामुद्रापि तं प्राह देवर्षिं देवपूजितम् ॥ ५० ॥ तत्राश्रमस्थलिकायामृतुकाले ह्युपस्थिते ॥ भोक्तुमि
च्छामि विषयांस्त्वया सह सुखैषिणी ॥ ५१ ॥ भवेद्यदि गृहं रम्यं सर्वरत्नविभूषितम्[1] ॥ गजै रथैश्च संपूर्णं शयनैः प्रवरासनैः ॥ ५२ ॥ दुकूलपट्टने
त्रैश्च विलासैर्ललितैर्मुने ॥ त्वया सह समायोगं यास्येऽहं कुरु चिन्तितम् ॥ ५३ ॥ एतच्छ्रुत्वा मुनिर्हृष्टः प्राह्वयद्धनदं क्षणात् ॥ कारयामासभवनं
संपूर्णं रत्नराशिभिः ॥ ५४ ॥ तत्र रेमे स भगवानगस्त्यः स्वाश्रमे सुखम् ॥ तस्यैवं चेष्टितस्यर्षेः प्रयच्छार्घ्यं युधिष्ठिर ॥ ५५ ॥ आस्तिक्यबुद्ध्या
भक्त्या च धर्मं प्राप्स्यसि पांडव ॥ कन्यायामागते सूर्ये अर्वाग्वै सप्तमे दिने ॥ ५६॥ कन्यायां समनुप्राप्ते सूर्ये यः सन्निवर्तते ॥ प्रत्यूषसमये विद्वा
न्कुर्यादस्योदये निशि॥ ५७ ॥ स्नानं शुक्लतिलैस्तद्वच्छुक्लमाल्याम्बरो गृही ॥ स्थापयेदव्रणं कुंभं माल्यवस्त्रविभूषितम् ॥५८॥ पञ्चरत्नसमायुक्तं
घृतपात्रेण संयुतम् ॥ नानाभक्ष्यसमोपेतं सप्तधान्यसमन्वितम् ॥ ५९ ॥ काञ्चनं कारयित्वा तु यथाशक्त्या सुशोभनम् ॥ पुरुषाकृतिं प्रशान्तं
च जपमण्डलधारिणम् ॥६०॥ कमंडलुकरं शिष्यैर्मृगैश्च परिधारितम् ॥ मुत्युघ्नं विषहन्तारं दर्भाक्षेष्टकरं मुनिम् ॥६१॥ तस्मिन्क्रमे समालग्नं चन्द
नेन ततो न्यसेत् ॥ स्नापितं चानुलिप्तं च चन्दनेन सुगंधिना ॥६२॥ पूजितं चापि कुसुमैर्नैवेद्यैर्धूपैस्तु धूपितम् ॥ ततश्चार्घ प्रदातव्यो यैर्द्रव्यैस्तानि
मे शृणु ॥ ६३ ॥ खर्जूरैर्नालिकेरैश्च कूष्मांडैस्त्रपुषैरपि ॥ कर्कोटकारवेल्लैश्च कर्चूरैर्बीजपूरकैः ॥६४॥ वृंताकैर्दाडिमैश्चैव नारंगैः कदलीफलैः ॥ दूर्वां
कुरैः कुशैः काशैः पद्मैर्नीलोत्पलैस्तथा ॥ ६५ ॥ नानाप्रकारैर्भक्ष्यैश्च गोभिर्वस्त्रै रसैः शुभैः ॥ विरूढैः सप्तधान्यैश्च वंशपात्रे निधापितैः ॥६६॥
सौवर्णरौप्यपात्रेण ताम्रवंशमयेन च ॥ मूर्ध्नि स्थितेन नम्रेण जानुभ्यां पृथिवीतले ॥ ६७ ॥ दक्षिणाभिमुखो भूत्वा ह्यर्घ्यपाद्यादिकं च यत् ॥

---

[1] सर्वरत्नसमन्वितम्–इ० पा० ।

शीलेन चेतसा भक्त्या दद्यात्कौरवनन्दन ॥ ६८ ॥ काशपुष्पप्रतीकाश अग्निमारुतसंभव ॥ मित्रावरुणयोः पुत्र कुंभयोने नमोऽस्तु ते ॥ ६९ ॥ विंध्यवृद्धिक्षयकर मेषतोयविषापह ॥ रक्तो वल्लभदेवर्षे लंकावास नमोऽस्तु ते ॥ ७० ॥ वातापिर्भक्षितो येन समुद्राः शोषिताः पुरा ॥ लोपामुद्रापतिः श्रीमान्योऽसौ तस्मै नमोऽस्तु ते ॥ ७१ ॥ येनोदितेन पापानि प्रलयं यांति व्याधयः ॥ तस्मै नमोऽस्त्वगस्त्याय सशिष्याय सुपुत्रिणे ॥ ब्राह्मणो वेदऋचया दद्यादर्घ्यं नमोऽस्तु ते ॥ ७२ ॥ “अगस्त्यः खनमानश्च नित्यं प्राजापत्यं बलिमिच्छमानः ॥ उभौ वर्णौ वृष्ट्यनुग्रहार्थमुपोष सत्यादेष्वशिखो जगाम ॥” दत्त्वैवमर्घ्यं कौंतेय प्रतिपूज्य च पुष्पकैः ॥ विसर्जयित्वागस्त्यं तं विप्राय प्रतिपादयेत् ॥ ७३ ॥ दैवज्ञव्यासरूपाय वेदवेदांगवादिने ॥ एवं यः कुरुते भक्त्या ह्यगस्त्यप्रतिपूजनम् ॥ फलमेकं तथा धान्यं कोपं वासं परित्यजेत् ॥ ७४ ॥ संपूर्णे च ततो वर्षे पुनरन्यदुपक्रमेत् ॥ दत्त्वार्घ्यं सप्तवर्षाणि क्रमेणानेन पांडव ॥ पुमान्फलमवाप्नोति तदेकाग्रमनाः शृणु ॥ ७५ ॥ ब्राह्मणश्चतुरो वेदान्सर्वशास्त्रविशारदः ॥ क्षत्रियः पृथिवीं सर्वां प्राप्नोत्यर्णवमेखलाम् ॥७६॥ वैश्योऽप्यायुष्यमाप्नोति गोधनं चापि नंदति॥शूद्राणां धनमारोग्यं सन्मानश्चाधिको भवेत् ॥ ७७ ॥ स्त्रीणां पुत्राः प्रजायंते सौभाग्यं वृद्धिऋद्धिमत् ॥ विधवानां महापुण्यं वर्धते पांडुनन्दन ॥ ७८ ॥ कन्या भर्तारमाप्नोति व्याधेर्मुच्येत दुःखितः॥७९॥ येषु देशेष्वगस्त्यर्षेः पूजनं क्रियते जनैः ॥ तेषु देशेषु पर्जन्यः कामवर्षी प्रजायते ॥८०॥ ईतयः प्रशमं यांति नश्यंति व्याधयस्तथा ॥ पठंति ये त्वगस्त्यर्षेः ख्यानं शृण्वंति चापरे ॥ ८१ ॥ ते सर्वे पापनिर्मुक्ताश्चिरं स्थित्वा महीतले ॥ हंसयुक्तविमानेन स्वर्गं यांति नरोत्तम ॥८२॥ मर्त्यो यदीच्छति गृहं परमर्द्धियुक्तं भोगं शरीरमरुजं पशुपुत्रपुष्टिम् ॥ तत्सर्ववल्लभमुनेरुदये महार्घ्यं यच्छेन्महार्घफलवस्त्रधनैः सहान्यैः॥ ॥ ८३ ॥

इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादेऽगस्त्यार्घ्यविधिव्रतवर्णनं नामाष्टादशोत्तरशततमोऽध्यायः ॥ ११८ ॥

॥ ॥ श्रीकृष्ण उवाच ॥ ॥ पार्थ पार्थिव दिव्यस्त्रीमुखपंकजसेंदवे ॥ शृणुष्वाभिनवस्येंदोरुदयेऽर्घ्यविधिं परम् ॥ १ ॥ रविर्द्वादशभिर्भागैर्वारुरुण्यां दृश्यते यदि ॥ प्रदोषसमये पार्थ अर्घ्यं दद्यात्तदा विभोः ॥ २ ॥ द्वितीयायां सिते पक्षे संध्याकाले ह्युपस्थिते ॥ संस्थाप्याभिनवं चन्द्रं स भूम्यां दृश्यते यदि ॥ ३ ॥ गोमयं मंडलं कृत्वा चंदनेन सुशोभितम् ॥ रोहिण्या सहितं देवं कुमुदामोदसंभवम् ॥ ४ ॥ पुष्पचन्दनधूपैश्च दीपाक्षतजलैः शुभैः ॥ दूर्वांकुरै रत्नवरैर्दध्ना वस्त्रैश्च पांडुरैः ॥ ५ ॥ मंत्रेणानेन राजेन्द्र क्षत्रियः सपुरोहितः ॥ नवो नवोऽसि मासांते जायमानः पुनः पुनः ॥ आप्यायस्व समेत्वेवं सोमराज नमोनमः ॥ ६ ॥ अनेन विधिनाचार्यं सर्वकामफलप्रदम् ॥ यः प्रयच्छति कौंतेय मासिमासि समा

हितः ॥ ७ ॥ स कीर्त्या यशसा कांत्या धन्यश्च भुवि मानवः ॥ पुत्रपौत्रैः परिवृतो गोधान्यधनसंकुलः ॥ ८ ॥ स्थित्वा वर्षशतं मर्त्ये ततः
सोमपुरं व्रजेत् ॥ तत्रास्ते दिव्यवपुषा भोगान्भुञ्जन्नृपोत्तम ॥ वरस्त्रीभिः सहात्यर्थं यावदाभूतसंप्लवम् ॥ ९ ॥ धर्मं समृद्धिमतुलां यदि वाञ्छसि
त्वं मासानुमासमिह मद्वचनं कुरुष्व ॥ सोमस्य सोमकुलनंदन धूपपुष्पैरर्घं प्रयच्छ नतजानु नवोदितस्य ॥ १० ॥ इति श्रीभविष्ये महापुराण
उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादेऽभिनवचंद्रार्घ्यव्रतवर्णनं नामैकोनविंशोत्तरशततमोऽध्यायः ॥ ११९ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥
अथातः शृणु भूपाल प्रतिशुक्रप्रशांतये ॥ यात्रारंभे प्रयाणे च तथा शुक्रोदयेष्विह ॥ १ ॥ शुक्रपूजा प्रकर्तव्या तां निशामय सारतः ॥ राजते
वाऽथ सौवर्णे कांस्यपात्रेऽथ वा पुनः ॥ २ ॥ शुक्लपुष्पांबरयुते सिततंडुलपूरिते ॥ निधाय राजतं शुक्रं शुचि मुक्ताफलान्वितम् ॥ ३ ॥ सह तेन
सवत्साङ्गां ब्राह्मणाय निवेदयेत् ॥ नमस्ते सर्वदेवेश नमस्ते भृगुनन्दन ॥ कवे सर्वार्थसिद्ध्यर्थं गृहाणार्घ्यं नमोऽस्तु ते ॥४॥ दत्त्वैवमर्घ्यं कौन्तेय
प्रणिपत्य विसर्जयेत् ॥५॥ यावच्छुक्रस्य न कृता पूजा सोहालकैः शुभैः ॥ वटकैः पूरिकाभिश्च गोधूमैश्चणकैरपि ॥ तावन्न दानं दातव्यं स्त्रीभिः
कामार्थसिद्धये ॥६॥ एवं तस्योदये कुर्वन्यात्रादिषु च भारत ॥ सर्वसस्यागमं चैव सर्वान्कामानवाप्नुयात् ॥ ७ ॥ तद्वद्वाचस्पतेः पूजां प्रवक्ष्यामि
युधिष्ठिर ॥ सौवर्णपात्रे सौवर्णममरेशपुरोहितम् ॥ पीतपुष्पांबरयुतं कृत्वा स्नात्वाथ सर्षपैः ॥८॥ पालाशाश्वत्थभंगेन पञ्चगव्यजलेन च ॥ पीतांग
रागवसनं घृतहोमं तु कारयेत् ॥ ९ ॥ प्रणम्य च गवा सार्द्धं ब्राह्मणाय निवेदयेत् ॥ १० ॥ नमस्तेऽङ्गिरसां नाथ वाक्पतेथ बृहस्पते ॥ क्रूरग्रहैः
पीडितानाममृताय भवस्व नः ॥ ११ ॥ एवं सुरगुरुं पूज्य प्रणिपत्य क्षमापयेत् ॥ संक्रातावुदये चास्ते सर्वान्कामानवाप्नुयात् ॥ १२ ॥ अथ
वा मौक्तिकान्येव सुवृत्तानि बृहंति च ॥ भार्गवांगिरसौ चिंत्य तान्येव प्रतिपादयेत् ॥ १३ ॥ भक्त्या मौक्तिकदानेन दत्तेन कुरुनन्दन ॥
विरूपता दृशोः पुंसां यात्रास्वभ्युदयेषु च ॥ कुर्वन्बृहस्पतेः पूजां न कदाचित्प्रजायते ॥ १४ ॥ ये भार्गवोदयमवाप्य सवस्त्रपुष्पां कुर्वंत्यनन्य
मनसोऽङ्गिरसे च पूजाम् ॥ तेषां गृहे प्रविशतां प्रतिशुक्रजातं विघ्नं न संभवति भारत पुण्यभाजाम् ॥ १५ ॥ इति श्रीभविष्ये महापुराण उत्त
रपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे शुक्रबृहस्पत्यर्घपूजाविधानं नाम विंशत्युत्तरशततमोऽध्यायः ॥ १२० ॥ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥
शृणु भारत वक्ष्यामि पञ्चाशीतिव्रतानि च ॥ नोक्तानि यानि कस्यापि मुनिभिर्धर्मदर्शिभिः ॥ १ ॥ भविष्यमत्स्यमार्तंडपुराणेषु च वर्णितम् ॥
वाराहं चैव संगृह्य कथ्यंते तानि पांडव ॥ २ ॥ यदभीष्टं सुमित्राय शिष्याय च सुताय च ॥ न कथ्यते धर्मजातं किं तेनोदरवर्तिना ॥ ३ ॥

श्रुतिस्मृतिपुराणेभ्यो यन्मया ह्यवधारितम् ॥ तत्ते वच्मि कुरुश्रेष्ठ कस्यान्यस्योपदिश्यते ॥ ४ ॥ स्नात्वा प्रभातसंध्यायामुपगृह्य च पिप्पलम् ॥
तिलपात्राणि यो दद्यान्न स शोचेत तत्कृते ॥ ५ ॥ व्रतानामुत्तमं ह्येतत्सर्वपापप्रणाशनम् ॥ पात्रव्रतमिति ख्यातं नाख्यातं कस्यचिन्मया ॥ ६ ॥
सुशुद्धस्य सुवर्णस्य सुवर्णं यः प्रयच्छति ॥ पुण्येऽह्नि विप्रकथिते प्रीत्या पीतयुगान्वितम् ॥ ७ ॥ व्रतं वाचस्पतेरेतद्बलबुद्धिप्रदायकम् ॥ वृत्रघ्न
स्य पुराख्यातं गुरुणा सर्वकामदम् ॥ ८ ॥ लवणं कटुतिक्तं च जीरकं मरिचानि च ॥ हिंगुशुंठिसमायुक्तं सर्वं परिचयं तथा ॥ ९ ॥ चतुर्थ्या
मेकभक्ताशी सकृद्दत्त्वा कुटुंबिने ॥ मृहेषु सप्तसु सदा शिलायुक्तानि भारत ॥ १० ॥ एतच्छिलाव्रतं नाम लक्ष्मीलोकप्रदायकम् ॥ कर्तव्यमिह
यत्नेन मुखपाटवकारकम् ॥ ११ ॥ नक्तमन्नं चरित्वा तु गवा सार्द्धं कुटुंबिने ॥ हैमं चक्रं त्रिशूलं च दद्याद्विप्राय वाससी ॥ १२ ॥ प्रणम्य भक्त्या
देवेशौ प्रीयेतां शिवकेशवौ ॥ एतदेवव्रतं नाम महापातकनाशनम् ॥१३॥ कृत्वैकभुक्तं वर्षांते शक्त्या हैमवृषान्विताम् ॥ धेनुं तिलमयीं दद्यात्सर्वो
पस्करणैर्युताम् ॥ १४ ॥ एतद्रुद्रव्रतं नाम पापशोकप्रणाशनम् ॥ यः करोति पुमान्राजन्स पदं याति शांकरम् ॥ १५ ॥ सर्वौषध्युदकस्नातः
पञ्चम्यां पूज्य पंचकम् ॥ सप्तोपस्करदानं च यः करोति गृहाश्रमी ॥ १६ ॥ गृहाद्युलूखलं शूर्पः शिला स्थाली च पञ्चमी ॥ उदकुंभश्च चुल्ली च
एतेषामनुकिञ्चन ॥ १७ ॥ एतानि गृहिणां गेहे प्रस्थाप्य पुरुषोत्तमम् ॥ उपस्करोति या नारी न सीदति कदाचन ॥ १८ ॥ एतद्गृहव्रतं नाम सर्व
सौख्यप्रदायकम् ॥ अत्रिणा ह्यनसूयायाः कथितं पाण्डुनन्दन ॥ १९ ॥ यस्तु नीलोत्पलं हैमं शर्करापात्रसंयुतम् ॥ ददाति श्रद्धयोपेतो ब्राह्मणाय
कुटुंबिने ॥ २० ॥ स वैष्णवं पदं याति लीलाव्रतमिदं स्मृतम् ॥ आषाढादिचतुर्मासमभ्यंगं वर्जयेन्नरः ॥ २१ ॥ पारिते च पुनर्दद्यात्तिलतैलघटं
नवम् ॥ भोजनं पायसाज्यं च स याति भवनं हरेः ॥२२॥ लोकप्रीतिकरं चैतत्प्रीतिव्रतमिहोच्यते ॥ वर्जयित्वा मधौ यस्तु दधिक्षीरघृतैक्षवम् ॥
॥ २३ ॥ दद्याद्वस्त्रयुगं सूक्ष्मं रसपात्रैश्च संयुतम् ॥ संपूज्य विप्रमिथुनं गौरी मे प्रीयतामिति ॥ २४ ॥ एतद्गौरीव्रतं नाम भवानीलोक
दायकम् ॥ पुरुषो यस्त्रयोदश्यां कृत्वा नक्तमथो पुनः ॥ २५ ॥ संवत्सरांते तस्मिन्वा दिवसे विघ्नवर्जितम् ॥ अशोककांचनं दद्यात्सद्वस्त्रयुगसं
श्रितम् ॥ २६ ॥ विप्राय वसुसंयुक्तं प्रद्युम्नः प्रीयतामिति ॥ कल्पं विष्णुपदे स्थित्वा विशोकः स्यात्पुनर्नृप ॥ २७ ॥ एतत्कामव्रतं नाम सर्वशो
कविनाशनम् ॥ आषाढादिचतुर्मासं वर्जयेन्नखकर्तनम् ॥ २८ ॥ वृंताकभक्षणं चैव मधुसर्पिर्घटान्वितम् ॥ कार्तिक्यां तु पुनर्हैमं ब्राह्मणाय निवे
दयेत् ॥ २९ ॥ रुद्रलोकमवाप्नोति शिवव्रतमिदं स्मृतम् ॥ एवं पञ्चदशीं स्मृत्वा एकभक्तेन मानवः ॥ ३० ॥ संपूज्य पूर्णिमां देवीं लिखित्वा

चन्दनादिना ॥ ततः पञ्च घटान्पूर्णान्पयोदधिघृतेन च ॥ मधुना सितखण्डेन ब्राह्मणायोपपादयेत् ॥ ३१ ॥ मनोरथान्पूरयस्व संपूर्णान्पूर्णिमा
ह्यसि ॥ पञ्चकुम्भप्रदानेन भूतानां तुष्टिरस्तु मे ॥ द्विजानेवं नमस्कृत्य सर्वान्कामानवाप्नुयात् ॥ ३२ ॥ एतत्पंचघटं नाम व्रतं पुष्टिप्रदायकम् ॥
वर्जयेद्यस्तु पुष्पाणि हेमंतशिशिरावृतम् ॥ ३३ ॥ पुष्पत्रयं च फाल्गुन्यां कृत्वा शक्त्याथ काञ्चनम् ॥ दद्याद्द्वै कालवेलायां प्रीयेतां शिवकेशवौ ॥
॥ ३४ ॥ शिरःसौगन्ध्यजननं सदानन्दकरं नृणाम् ॥ कृत्वा परपदं याति सौगन्ध्यव्रतमुत्तमम् ॥ ३५ ॥ फाल्गुनादितृतीयायां लवणं यस्तु
वर्जयेत् ॥ समाप्ते शयनं दद्याद्गृहे चोपस्करान्वितम् ॥ ३६ ॥ संपूज्य विप्रमिथुनं भवानी प्रीयतामिति ॥ गौरीलोके वसेत्कल्पं सौभाग्यव्रतमुत्त
मम् ॥ ३७ ॥ संध्यामौनं नरः कृत्वा समाप्ते घृतकुंभदः ॥ वस्त्रयुग्मं च घंटां च ब्राह्मणाय निवेदयेत् ॥ ३८ ॥ सारस्वतं पदं याति पुनरावृत्ति
दुर्लभम् ॥ एतत्सारस्वतं नाम रूपविद्याप्रदायकम् ॥ ३९ ॥ लक्ष्मीमध्येऽथ पञ्चम्यामुपवासी भवेन्नरः ॥ समाप्ते हेमकमलं दद्याद्धेनुसमन्वितम् ॥
॥ ४० ॥ स वैष्णवं पदं याति लक्ष्मीः स्याज्जन्मजन्मनि ॥ एतल्लक्ष्मीव्रतं नाम दुःखशोकविनाशनम् ॥४१॥ या तु नारी पिबेत्तोयं जलधारां
प्रपातयेत् ॥ समाप्तघृतसंपूर्णां दद्याद्वर्द्धंतिकां नवाम् ॥ ४२ ॥ एतद्धाराव्रतं नाम सर्वरोगहरं परम् ॥ कांतिसौभाग्यजननं सपत्नीदर्पनाशनम् ॥४३॥
गौरीसमन्वितं रुद्रं लक्ष्म्या सह जनार्दनम् ॥ राज्ञीसमन्वितं सूर्यं प्रतिष्ठाप्य यथाविधि ॥ ४४ ॥ धूपाक्षेपेण सहितां सुघंटां पात्रसंयुताम् ॥ यो
ददाति द्विजेन्द्राणां पुष्पैरभ्यर्च्य पांडुरैः ॥ ४५ ॥ दक्षिणासहितां कृत्वा प्रणम्य च विसर्जयेत् ॥ एतद्देवव्रतं नाम दिव्यदेहप्रदायकम् ॥ ४६ ॥
कृत्वोपलेपनं शंभोरग्रतः केशवस्य च ॥ यावद्व्रतं समाप्यैतद्धेनुं च सजलान्विताम् ॥ ४७ ॥ जन्मायुतं स राजा स्यात्ततः शिवपुरे वसेत् ॥
एतच्छुत्वा व्रतं नाम बहुकल्याणकारकम् ॥ ४८ ॥ अश्वत्थं भास्करं गंगां प्रणम्यैव च वाग्यतः ॥ एकभुक्तं नरः कुर्यादष्ट चैकं विमत्सरः ॥ ४९ ॥
व्रतांते विप्रमिथुनं पूज्य धेनुत्रयान्वितम् ॥ वृक्षं हिरण्मयं दद्यात्सोऽश्वमेधफलं लभेत् ॥ ५० ॥ दिवि दिव्यविमानस्थः सेव्यतेऽप्सरसां गणैः ॥
एतत्कीर्तिव्रतं नाम भूतिकीर्तिफलप्रदम् ॥५१॥ घृतेन स्नपनं कृत्वा शंभोर्वा केशवस्य च ॥ ब्राह्मणो भास्करस्यापि गौर्या लंबोदरस्य वा ॥ ५२ ॥
अक्षतैस्तु समं कुर्यात्पद्मं गोमयमण्डले ॥ समाप्य हेमकमलं तिलधेनुसमन्वितम् ॥ ५३ ॥ शुद्धमष्टाङ्गुलं दद्याच्छिवलोके महीयते ॥ सामगाय
नतश्चैतत्सामव्रतमिहोच्यते ॥ ५४ ॥ नवम्यामेकभुक्तं तु कृत्वा कन्याश्च शक्तितः ॥ भोजयित्वा समादद्याद्धैमकंचुकवाससी ॥ ५५ ॥ हैमं च
सिंहं विप्राय दत्त्वा शिवपुरं व्रजेत् ॥ भवार्बुदं सुरूपश्च शत्रुभिश्चापराजितः ॥ ५६ ॥ एतद्वीरव्रतं नाम नारीणां च सुखप्रदम् ॥ यावत्समारभेद्यस्तु

पञ्चदश्यां पयोव्रतः ॥ ५७ ॥ समाप्ते श्रद्धया दद्याद्गाश्च पञ्च पयस्विनीः ॥ वासांसि च पिशंगानि जलकुंभयुतानि च ॥ ५८ ॥ स याति वैष्णवं लोकं पितॄणां तारयेच्छतम् ॥ कल्पांते राजराजः स्यात्पितृव्रतमिदं स्मृतम् ॥ ५९ ॥ तांबूलं समये नित्यं गौरीपुत्रं ददाति या ॥ पूगचूर्णसमायुक्तं नारी वा पुरुषोऽपि वा ॥ ६० ॥ वर्षस्यांते तु सौवर्णं कारयित्वा फलान्वितम् ॥ मुक्ताफलमयं चूर्णत्रितयं[1] या प्रयच्छति ॥ ६१ ॥ न सा प्राप्नोति दौर्भाग्यं न दौर्गन्ध्यं मुखस्य च ॥ एतत्पत्रव्रतं नाम सौगन्ध्यजननं परम् ॥ ६२ ॥ चैत्रादिचतुरो मासाञ्जलं कुर्यादयाचितम् ॥ ज्येष्ठाषाढे च वा मासं पक्षं वा पांडुनंदन ॥ ६३ ॥ व्रतांते मणिकं दद्यादन्नवस्त्रसमन्वितम् ॥ घृतेन सहितं तद्वत्सप्तधान्यसमन्वितम् ॥ ६४ ॥ तिलपात्रं हिरण्यं च ब्रह्मलोके महीयते ॥ कल्पांते राजराजः स्याद्वारिव्रतमिहोच्यते ॥ ६५ ॥ पञ्चामृतेन स्नपनं कृत्वा विष्णोः शिवस्य च ॥ वत्सरांते पुनर्दद्याद्धेनुं पञ्चामृतैर्युताम् ॥ ६६ ॥ विप्राय कनकं शंखं स पदं याति शांकरम् ॥ राजा भवति कल्पांते वृत्तिव्रतमिहोच्यते ॥ ६७ ॥ यो हिंसां वर्जयित्वा तु मासं संवत्सरं तथा ॥ व्रतांते हेमहरिणं कृत्वा शक्त्या विचक्षणः ॥ ६८ ॥ तद्वत्सवत्सां गां दद्यात्सोऽश्वमेधफलं लभेत् ॥ अहिंसाव्रतमित्येतत्सर्वशांतिप्रदं नृणाम् ॥ ६९ ॥ माघमास्युषसि स्नानं कृत्वा दांपत्यमर्चयेत् ॥ भोजयित्वा यथा शक्त्या माल्यवस्त्रविभूषणैः ॥ ७० ॥ सौभाग्यं महदाप्नोति शरीरारोग्यमुत्तमम् ॥ सूर्यलोके वसेत्कल्पं सूर्यव्रतमिदं स्मृतम् ॥७१॥ आषाढादिचतुर्मासं प्रातःस्नायी भवेन्नरः ॥ विप्राय भोजनं दद्यात्कार्तिक्यां गोप्रदो भवेत् ॥ ७२ ॥ घृतकुंभं ततो दत्त्वा सर्वान्कामानवाप्नुयात् ॥ वैष्णवव्रतमित्युक्तं विष्णुलोकमवाप्नुयात् ॥ ७३ ॥ अयनादयनं यावद्वर्जयेन्मधुसर्पिषी ॥ तदंते पुण्यदानानि घृतधेन्वा सहैव तु ॥ ७४ ॥ दत्त्वा शिवपदं याति दत्त्वा तु घृतपायसम् ॥ एतच्छीलव्रतं नाम शीलारोग्यफलप्रदम् ॥ ७५ ॥ संध्यादीपप्रदो यस्तु मांसं तैलं विवर्जयेत् ॥ समाप्ते दीपकं दद्याच्चक्रशूले च काञ्चने ॥ ७६ ॥ वस्त्रयुग्मं च विप्राय स तेजस्वी भवेद्दृढम् ॥ एतद्दीपव्रतं नाम सदा कांतिप्रदायकम् ॥ ७७ ॥ एकभक्तेन सप्ताहं गौरीं वा यस्तु पूजयेत् ॥ संपूज्य पार्वतीं भक्त्या गन्धपुष्पविलेपनैः ॥ ७८ ॥ ततः सुवासिनीभ्यां तु कुंकुमेन विलेपयेत् ॥ पुष्पैर्विलेपयेच्चैनां कर्पूरागरुचन्दनैः ॥ ७९ ॥ तांबूलं शोभनं दत्त्वा नारिकेलफलं तथा ॥ प्रीयतां कुमुदा देवीं प्रणिपत्य विसर्जयेत् ॥ ८० ॥ एकैकां पूजयेद्देवीं सप्ताहं यावदेव तु ॥ पुनस्तु सप्तमे पूर्णे ताः सप्तैव निमंत्रयेत् ॥ ८१ ॥ षड्रसं भोजयित्वा तु यथा शक्त्या विभूषणैः ॥ भूषयित्वा माल्यवस्त्रैः कर्णवेष्टांगुलीयकैः ॥ ८२ ॥

---

[1] तृतीयायां प्रयच्छति--इ० पा० ।

कुमुदा माधवी गौरी भवानी पार्वती उमा ॥ काली च दर्पणं हस्ते प्रत्येकं विनिवेदयेत् ॥ ८३ ॥ ब्राह्मणं पूजयित्वैकं वाच्यः संपमन्नमस्तु ते
सप्तसुन्दरकं नाम व्रतं चैतद्युधिष्ठिर ॥ ८४ ॥ करोति सुन्दरं देहं सौभाग्यं यच्छते परम् ॥ वर्जयेच्चैत्रमासे तु यस्तु गन्धानुलेपनम् ॥ ८५ ॥
शुक्तिं गंधभृतां दत्त्वा विप्राय सितवाससी ॥ शक्त्या च दक्षिणां दद्यात्सर्वान्कामान्समश्नुते ॥ ८६ ॥ वारुणं च पदं याति तदेतद्वरुणव्रतम् ॥
वैशाखमासे लवणं वर्जयित्वा यतव्रतः ॥ ८७ ॥ मासांतेऽथ ततो दद्यात्सवत्सां गां द्विजातये ॥ स्थित्वा विष्णुपदे कल्पं ततो राजा भवेदिह॥८८॥
एतत्कांतिव्रतं नाम कांतिकीर्तिप्रदायकम् ॥ ब्रह्माण्डं कांचनं कृत्वा तिलद्रोणोपरि स्थितम् ॥ ८९ ॥ त्र्यहं तिलव्रती भूत्वा वह्निं संतर्पयेद्द्विजम् ॥
संपूज्य विप्रदांपत्यं माल्यवस्त्रविभूषणैः ॥ ९० ॥ शक्तितस्त्रिपलादूर्ध्वं विश्वात्मा प्रीयतामिति ॥ पुण्येऽह्नि दद्यात्स परं ब्रह्म यात्यपुनर्भवम् ॥९१॥
एतद्ब्रह्मव्रतं नाम निर्वाणफलदं नृणाम् ॥ ९२ ॥ यश्चोभयमुखीं दद्यात्प्रभूतकनकान्विताम् ॥ दिनं पयोव्रतं तिष्ठेत्स याति परमं पदम् ॥ ९३ ॥
त्र्यहं पयोव्रतः स्थित्वा काञ्चनं कल्पपादपम् ॥ पलादूर्ध्वं यथा शक्त्या तंडुलं रूपसंयुतम् ॥ ९४ ॥ छादितं वरवासोभिः पुष्पमालाविभूषितम् ॥
दत्त्वा स्वर्गे वसेत्कल्पं कल्पव्रतमिदं स्मृतम् ॥ ९५ ॥ यस्तु वत्सतरीं भव्यां कण्ठाभरणभूषिताम् ॥ सुपर्याणां सुखस्पृष्टां खलीनालंकृता
ननाम् ॥ ९६ ॥ मोदकोदकपात्रेण तांबूलेन समन्विताम् ॥ स्थगितां स्थापयेत्पृष्ठे शृंगाग्रेषु हिमान्विताम् ॥ ९७ ॥ ईदृग्विधां व्यतीपाते
ग्रहणे चायनद्वये ॥ अयाचितेन च स्थित्वा ततो दद्याद्द्विजातये ॥ ९८ ॥ एतद्द्वारव्रतं नाम मार्गखेदविनाशनम् ॥ परलोकाद्ध्वगमने क्लांतिश्रम
हरं परम् ॥ ९९ ॥ नक्ताशी त्वष्टमीषु स्याद्वत्सरांतेऽष्टगोप्रदः ॥ पौरंदरं पदं याति सुगतिव्रतमुच्यते ॥ १०० ॥ यश्चेन्धनप्रदो राजन्हेमंतशिशिर
व्रतम् ॥ घृतधेनुं प्रयच्छेत परं ब्रह्म स गच्छति ॥१०१॥ शरीरारोग्यजननं द्युतिकांतिप्रदायकम् ॥ वैश्वानरव्रतं नाम सर्वपापप्रणाशनम् ॥१०२॥
एकादश्यां तु नक्ताशी यश्चक्रं विनिवेदयेत्[1] ॥ तद्वच्छंखं तु सौवर्णं चैत्रे चित्रासु पांडव ॥ १०३ ॥ य एतत्कुरुते भक्त्या स विष्णोः पदमाप्नु
यात् ॥ एतद्विष्णुव्रतं नाम कल्पादौ राज्यलाभकृत् ॥ १०४ ॥ पयोव्रतस्तु पञ्चम्यां व्रतांते गोयुगप्रदः ॥ लक्ष्मीलोके वसेत्कल्पमेतद्देवीव्रतं
स्मृतम् ॥ १०५ ॥ सप्तम्यां नक्तभुग्दद्यात्समाप्ते गां पयस्विनीम् ॥ सोऽर्कलोकमवाप्नोति भानुव्रतमिहोच्यते ॥ १०६ ॥ चतुर्थ्यां नक्तभुग्दद्या
दष्ट गा होमचारणम् ॥ व्रतं वैनायकं नाम सर्वविघ्नविनाशनम् ॥ १०७ ॥ महाफलानि यस्त्यक्त्वा चातुर्मासं द्विजातये ॥ हैमानि कार्त्तिके द

---

[1] विनिवेशयेत्—इ० पा० ।

द्याद्गोयुगेन समं नरः ॥ १०८ ॥ सितं वस्त्रयुगं नाम संपूर्णाद्यघटानि च ॥ एतत्फलव्रतं नाम फलावाप्तिकरं सदा ॥१०९॥ यश्चोपवासी सप्तम्यां समांते हेमपङ्कजम् ॥ धेनूश्च शक्तितो दद्यात्सवत्साः कांस्यदोहनाः ॥ ११० ॥ भक्त्या राजेन्द्र विप्राय वाचकाय निवेदयेत् ॥ एतत्सौरव्रतं नाम सूर्यलोकप्रदायकम् ॥ १११ ॥ द्वादश द्वादशीर्यस्तु नाम प्राशनसंयुतः ॥ समुपोष्य समांते तु सवस्त्राः सोदका घटाः ॥ ११२ ॥ द्वादशात्र प्रदेयाश्च सर्वकामप्रसिद्धये ॥ गोविन्दव्रतमित्येतद्गोविन्दपददायकम् ॥ ११३ ॥ कार्त्तिक्यां यो वृषोत्सर्गं कृत्वा नक्तं समाचरेत् ॥ स गोलोकमवाप्नोति वृषव्रतमिदं स्मृतम् ॥ ११४ ॥ व्रतांते गौः प्रदातव्या भोजनं शक्तितः परम् ॥ विप्राणामत्र कथितं प्राजापत्यमिदं व्रतम् ॥ ११५ ॥ चतुर्दश्यां तु नक्ताशी समांते गोयुगप्रदः ॥ शैवं पदमवाप्नोति ज्ञेयं च त्र्यंबकव्रतम् ॥ ११६ ॥ सप्तरात्रोषितोदद्याद्घृतकुंभं द्विजातये ॥ ब्रह्मव्रतमिदं प्राहुर्ब्रह्मलोकप्रदायकम्[1] ॥ ११७ ॥ मासांते च स गां दद्याद्धेनुमंते पयस्विनीम् ॥ शक्रलोके वसेत्कल्पं शक्रव्रतमिदं स्मृतम् ॥ ११८ ॥ कार्त्तिकस्य[2] सिते पक्षे चतुर्दश्यां नराधिप ॥ सोपवासः पञ्चगव्यं पिबेद्रात्रौ विचक्षणः ॥ ११९ ॥ कपिलायास्तु गोमूत्रं कृष्णाया गोमयं तथा ॥ सितधेन्वास्तथा क्षीरं रक्तायास्तु तथा दधि ॥ १२० ॥ गृहीत्वा कर्बुरायास्तु घृतमेकत्र मेलयेत् ॥ वेदोक्तमन्त्रै राजेन्द्र कुशोदकसमन्वितम् ॥ ॥१२१॥ ततः प्रभातसमये स्नात्वा संतर्प्य देवताः॥ ब्राह्मणान्वाचयित्वा तु भुञ्जीयाद्वाग्यतः शुचिः॥१२२॥ ब्रह्मकूर्चव्रतं ह्येतत्सर्वपापप्रणाशनम् ॥ यद्बाल्ये यच्च कौमारे वार्धक्ये चापि यत्कृतम् ॥ ब्रह्मकूर्चोपवासेन तत्सर्वं नश्यति क्षणात् ॥१२३॥ अनग्निपक्वमश्नाति तृतीयायां तु यो नरः ॥ गां दत्त्वा शिवमभ्येति पुनरावृत्तिवर्जितम् ॥ १२४ ॥ एतद्दषिव्रतं नाम सर्वमाङ्गल्यकारकम् ॥ हैमं पलद्वयादूर्ध्वं रथमश्वयुगान्वितम् ॥ १२५ ॥ तिलप्रस्थोपरि गतं सितमाल्ययुगान्वितम् ॥ दत्त्वा कृतोपवासस्तु दिवि कल्पशतं वसेत् ॥ तदंते राजराजः स्यादग्निव्रतमिदं स्मृतम् ॥ ॥ १२६ ॥ कृत्वा पलद्वयादूर्ध्वं शय्याभ्यां संयुतं नरः ॥ हैमं रथवरं श्रेष्ठं सर्वोपस्करसंयुतम् ॥ १२७ ॥ सत्यलोके वसेत्कल्पं सहस्रमथ भूपतिः ॥ भवेदुपोषितो दत्त्वा करिव्रतमिदं शुभम् ॥ १२८ ॥ मुखवासं परित्यज्य समांते गोप्रदो भवेत् ॥ यक्षाधिपं समाप्नोति सुमुखव्रतमुच्यते ॥ १२९ ॥ निशि कृत्वा जले वासं प्रभाते गोप्रदो भवेत् ॥ वारुणं लोकमाप्नोति वरुणव्रतमुच्यते ॥ १३० ॥ चान्द्रायणं च यः कुर्याद्धैमं चन्द्रं निवेदयेत् ॥ चन्द्रव्रतमिदं प्रोक्तं चन्द्रलोकप्रदायकम् ॥ १३१ ॥ ज्येष्ठे पञ्चतपाः सायं हेमधेनुप्रदो

---

१ विष्णुलोकप्रदायकम्–इ० पा० । २ असिते पक्षे–इ० पा० ।

दिवम् ॥ अथाष्टमीचतुर्दश्यौ रुद्रव्रतमिदं स्मृतम् ॥ १३२ ॥ अनुलेपनं यः कुर्यात्तृतीयायां शिवालये ॥ स स्वर्गं धेनुदो याति भवानी
व्रतमुच्यते ॥ १३३ ॥ माघे निश्यार्द्रवासाः स्यात्सप्तम्यां गोप्रदो भवेत ॥ दिवि कल्पं वसित्वेह राजा स्यात्तापनं व्रतम् ॥ १३४ ॥
दत्त्वा कृतोपवासस्तु दिवि कल्पशतं वसेत् ॥ तदंते राजराजः स्यादश्वव्रतमिदं स्मृतम् ॥१३५॥ तद्वत्कल्पद्वयादूर्ध्वं करिभ्यां संयुतं नरः॥ हैमं रथं
नरश्रेष्ठ सर्वोपस्करणान्वितम् ॥ १३६ ॥ त्रिरात्रोपोषितो दद्यात्फाल्गुन्यां भवनं शुभम् ॥ आदित्यलोकमाप्नोति पूजितः स सुरासुरैः ॥ १३७ ॥
सुरलोकमवाप्नोति धाम[1] व्रतसमन्वितम् ॥ त्रिसंध्यं पूंज्य[2] दांपत्यमुपवासी विभूषणैः ॥ १३८ ॥ पौर्णमास्यामवाप्नोति मोक्षमिन्दुव्रतादिह॥१३९॥
दत्त्वा[3] सितद्वितीयायामिंदोर्लवणभोजनम् ॥ कांस्यं सवस्त्रं राजेन्द्र दक्षिणासहितं तथा ॥ १४० ॥ समांते गोप्रदो याति विप्राय शिवमंदिरम् ॥
कल्पांते राजराजः स्यात्सोमव्रतमिदं स्मृतम् ॥ १४१ ॥ प्रतिपद्येकभक्ताशी समांते कपिलाप्रदः ॥ वैश्वानरपुरं याति आग्नेयव्रतमुच्यते ॥१४२॥
एकादश्यां माघमासे चतुर्दश्यष्टमीषु च ॥ एकभक्तेन योदद्याद्बालकान्यजिनानि च ॥ १४३ ॥ उपानहौ कंबलांश्च चैत्रे छत्रादिकं ततः ॥
करपत्रादिकं चापि यथा शक्त्या विचक्षणः ॥ १४४ ॥ ब्राह्मणानां महाराज सोऽश्वमेधफलं लभेत् ॥ एतत्सौख्यव्रतं नाम सर्वसौख्यप्रदायकम् ॥
॥ १४५ ॥ दशम्यामेकभक्ताशी समांते दशधेनुदः ॥ दिशश्च काञ्चनीर्दद्यान्नारी[4]रूपा युधिष्ठिर ॥१४६॥ तिलद्रोणोपरिगतो ब्रह्मांडाधिपतिर्भवेत्॥
एतद्विश्वव्रतं नाम महापातकनाशनम् ॥ १४७ ॥ संपूज्य सितसप्तम्यां भानुधान्यानि सप्त यः ॥ ददाति नक्तभुग्राजँल्लवणेन समं द्विजे ॥ १४८ ॥
स तारयति सप्ताष्टौ कुलान्यात्मानमेव च ॥ एतद्धान्य[5]व्रतं नाम धनधान्यप्रदायकम् ॥ १४९ ॥ मासोपवासी यो दद्याद्धेनुं विप्राय शोभनाम् ॥
स वैष्णवं पदं याति भीमव्रतमिदं स्मृतम्[6] ॥ १५० ॥ पक्षोपवासी यो दद्याद्विप्राय कपिलाद्वयम् ॥ स ब्रह्मलोकमाप्नोति पूजितः सुरसत्तमैः ॥
॥ १५१ ॥ दद्यात्त्रिंशत्पलादूर्ध्वं महीं कृत्वा तु कांचनीम् ॥ कुलाचलाद्रिसहितां तिलवस्त्रसमन्विताम् ॥ १५२ ॥ तिलद्रोणोपरि गतां ब्राह्मणाय
कुटुंबिने ॥ दिनं पयोव्रतस्तिष्ठेद्रुद्रलोके महीयते ॥ १५३ ॥ एतन्महीव्रतं प्रोक्तंसप्तकल्पानुवर्तकम् ॥ माघमासेऽथ चैत्रे वा गुडधेनुप्रदो भवेत् ॥
॥ १५४ ॥ गुडव्रतस्तृतीयायां सर्वोपस्करणैर्युतः ॥ गौरीलोकमवाप्नोति पूज्यतेऽप्सरसां गणैः ॥ १५५ ॥ उँमा[7]व्रतमिदं प्रोक्तं सततानन्ददायकम्॥

---

[1] धामव्रतमिदं स्मृतम्–इ० पा० । [2] पूजितं देवम्–इ० पा० । [3] कस्मिंश्चित्पुस्तके–"दत्त्वासितद्वितीयायाम्"–इत्यारभ्य "संतारयति सप्ताष्टौ कुलान्यात्मानमेव च" इत्यन्तः सार्धनवश्लोकात्मको ग्रन्थः–"कार्त्तिकादि तृतीयायां प्राश्य गोमूत्रयावकम्"–इत्येतदग्रेऽस्ति । [4] द्विजाग्न्याय–इ० पा० । [5] एतद्धानुव्रतं नाम–इ० पा० । [6] शुभम्–इ० पा० । [7] महाव्रतम्–इ० पा० ।

वत्सरं त्वेकभक्ताशी सभक्ष्यजलकुंभदः ॥ १५६ ॥ शिवलोके वसेत्कल्पं प्राप्तिव्रतमिदं स्मृतम् ॥ कार्त्तिकादितृतीयायां प्राश्य गोमूत्रयावकम् ॥
॥ १५७ ॥ गौरीलोके वसेत्कल्पं ततो राजा भवेदिह ॥ एतद्रुद्रव्रतं नाम महाकल्याणकारकम् ॥ १५८ ॥ चैत्री त्रिरात्रं नक्ताशी नद्यां स्नात्वा
ददाति यः ॥ अजाः पयस्विनीः पञ्च ब्राह्मणाय[1] कुटुंबिने ॥ १५९ ॥ न जायते पुनरसौ जीवलोके कदाचन ॥ एतद्धस्तव्रतं प्रोक्तं सर्वव्या[2]धिवि
नाशनम् ॥ १६० ॥ कन्यादानं तु यः कुर्यादुद्वाहं कारयेच्च यः ॥ एकविंशतिकुलोपेतो ब्रह्मलोकं स गच्छति ॥ १६१ ॥ कन्यादानात्परं दानं
न चास्त्यभ्यधिकं क्वचित् ॥ ये करिष्यंति नृपते तेषां लोकोऽक्षयो दिवि ॥ १६२ ॥ तिलपिष्टमयं कृत्वा गजं हेमविभूषितम् ॥ कुर्यात्कुशमयं तद्व
दारोहकसमन्वितम् ॥ १६३ ॥ नक्षत्रमालासहितं चामरापीडधारिणम् ॥ दशनाग्रबद्धनेत्ररक्तवस्त्रयुगान्वितम् ॥ १६४ ॥ ताम्रपात्र्यां कुंडकं वा
कृतं दत्त्वाग्रमोदकम् ॥ प्रदद्याद्विजदांपत्यं पूज्य माल्यविभूषणैः ॥ १६५ ॥ कंठप्रमाणमाविश्य जलं मलविवर्जितः ॥ कांतारकारिणा ह्येतत्कथितं
तु युधिष्ठिर ॥ १६६ ॥ कांतारकारिदुर्गेषु वारयत्यपि दुष्कृतीन् ॥ इह लोके परे चैव नात्र कार्या विचारणा ॥ १६७ ॥ ये कुर्वंति दिने पुण्ये
व्रतं पौरंदरं नराः ॥ तेषां पौरंदरो लोको भवेदाभूतसंप्लवम् ॥ १६८ ॥ पयोव्रतस्तु पञ्चम्यां दत्त्वा नागं द्विजातये ॥ सौवर्णं सर्पजनितं भयं तेभ्यो
न जायते ॥ १६९ ॥ सिताष्टम्यां सोपवासो वृषभं यः प्रयच्छति ॥ सितवस्त्रसमाच्छन्नं घण्टाभरणभूषितम् ॥ १७० ॥ शिवलोके वसेत्कल्पं ततो[3]
राजा भवेदिह ॥ वृषव्रतमिदं प्रोक्तं सर्वधर्मप्रदायकम् ॥१७१॥ उत्तरे त्वयने प्राप्ते घृतप्रस्थेन यो हरिम् ॥ स्नापयित्वा ब्राह्मणाय वडवां यः प्रय
च्छति ॥१७२॥ स सर्वकामसंयुक्तः पुत्रभ्रातृसम[4]न्वितः॥ सूर्यलोके वसेद्राजन्राज्ञीव्रतमिहोच्यते ॥१७३॥ सकृन्नवम्यां भक्तेन पूजयेद्विन्ध्यवासिनीम्॥
पुष्पधूपैस्ततो दद्यात्पञ्जरं शुकशोभितम् ॥१७४॥ हैमं विप्राय शांताय स वाग्मी जायते नरः ॥ एतदाग्नेयमित्युक्तं व्रतमग्निपदप्रदम् ॥ १७५ ॥
द्वादश्यां गुह्यकानां च पललैक्षवसंयुतम् ॥ विप्राय भोजनं दत्त्वा यः स याति हरेः प[5]दम् ॥ १७६ ॥ विष्कम्भादिषु योगेषु एकभुक्तरतो नरः ॥
एतदाग्नेयमित्युक्तं व्रतमग्निपदप्रदम् ॥ १७७ ॥ यो ददाति क्रमादेषु घृततैलफलैक्षवम् ॥ यवगोधूमचणकान्निष्पावाञ्छालितंडुलान् ॥ १७८ ॥
लवणं दधि दुग्धं च वस्त्रं कनकमेव च ॥ कंबलं गां वृषं छत्रमुपानद्युगलं तथा ॥ १७९ ॥ कर्पूरं कुंकुमं चैव चंदनं कुसुमानि च ॥ लोहं कनक
ताम्रं च रौप्यं चेति युधिष्ठिर ॥ १८० ॥ स्नातः स्वशक्त्या विधिवत्सर्वपापैः प्रमुच्यते ॥ न वियोगमवाप्नोति योगव्रतमिदं स्मृतम् ॥ १८१ ॥

---

[1] दरिद्राय–इ० पा० । [2] सर्वविघ्ननिवारणम्–इ० पा० । [3] विष्णुलोकं ततो व्रजेत्–इ० पा० । [4] पुत्रपौत्रसमन्वितः–इ० पा० । [5] पुरम्–इ० पा० ।

कार्तिक्यां नक्तभुग्दद्यान्मेषं मार्गशिरे वृषम् ॥ पौषमाघादिमासेषु सौवर्णीः सर्व एव हि ॥ १८२ ॥ क्रमेण राशयः सर्वा वस्त्रमाल्यैर्वि
भूषिताः[1] ॥ पौर्णमास्यां पौर्णमास्यां कौंतेय बहुदक्षिणाम्[2] ॥ १८३ ॥ एतद्राशिव्रतं नाम सर्वोपद्रवनाशनम्[3] ॥ सर्वाशापूरकं तद्वत्सोमलोकप्रदाय
कम् ॥ १८४ ॥ पञ्चाशीतिर्व्रतानां ते कथिता पांडुनंदन ॥ यां श्रुत्वा ब्रह्महा गोघ्नः पितृहा मातृहा तथा ॥ १८५ ॥ मुच्यते तत्क्षणादेव पातकैः
सोपपातकैः ॥ १८६ ॥ पंचाधिका तव मया कथिता व्रतानां राजन्नशीतिरतिसौख्यधनप्रदानाम् ॥ एतां समाचरति यः शृणुयात्पठेद्वा हस्ताग्र
लग्न इव तस्य सुरेशलोकः ॥ १८७ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे व्रतपञ्चाशीतिवर्णनं नामैकविंशत्यु
त्तरशततमोऽध्यायः ॥ १२१ ॥ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ कृतं ब्रह्मयुगं प्रोक्तं त्रेता तु क्षत्रियं युगम् ॥ वैश्यं द्वापरमित्याहुः शूद्रं
कलियुगं स्मृतम् ॥ १ ॥ कलौ राजन्मनुष्याणां शैथिल्यं स्नानकर्मणि ॥ तथापि माघव्याजेन कथयिष्यामि ते शृणु ॥ २ ॥ यस्य हस्तौ च
पादौ च वाङ्मनस्तु सुसंयतम् ॥ विद्या तपश्च कीर्तिश्च सतीर्थफलमश्नुते ॥ ३ ॥ अश्रद्दधानः पापात्मा नास्तिकोऽच्छिन्नसंशयः ॥ हेतुनिष्ठाश्च
पश्चैते न तीर्थफलभागिनः ॥४॥ प्रयागं पुष्करं प्राप्य कुरुक्षेत्रमथापि वा ॥ यत्र वा तत्र वा स्नायान्माघे नित्यमिति श्रुतिः ॥५॥ त्रिरात्रफलदा नद्यो
याः काश्चिदसमुद्रगाः ॥ समुद्रगास्तु पक्षस्य मासस्य सरितां पतिः ॥६॥ उषःसमीपे यः स्नानं संध्यायामुदिते रवौ ॥ प्राजापत्येन तत्तुल्यं महा
पातकनाशनम् ॥ ७ ॥ प्रातरुत्थाय यो विप्रः प्रातःस्नायी सदा भवेत् ॥ स सर्वपापनिर्मुक्तः परं ब्रह्माधिगच्छति ॥ ८ ॥ वृथा चोष्णोदकस्नानं
वृथा जाप्यमवैदिकम् ॥ अश्रोत्रिये वृथा श्राद्धं वृथा भुक्तमसाक्षिकम् ॥ ९ ॥ स्नानं चतुर्विधं प्रोक्तं स्नानविद्भिर्युधिष्ठिर ॥ वायव्यं वारुणं ब्राह्मं
दिव्यं चेति पृथक्छृणु ॥ १० ॥ वायव्यं गोरजःस्नानं वारुणं सागरादिषु ॥ ब्राह्मं ब्राह्मणमंत्रोक्तं दिव्यं मेघांबुभास्करम् ॥ सर्वेषामेव स्नानानां
विशिष्टं तत्र वारुणम् ॥ ११ ॥ ब्रह्मचारी गृहस्थश्च वानप्रस्थोऽथ भिक्षुकः ॥ एते सर्वे प्रशंसंति सर्वदा माघमज्जनम् ॥ १२ ॥ बालास्तरुणका
वृद्धा नरनारीनपुंसकाः ॥ स्नात्वा माघं शुभे तीर्थे प्राप्नुवंतीप्सितं[4] फलम् ॥ १३ ॥ ब्रह्मक्षत्रविशां चैव मन्त्रवत्स्नानमिष्यते ॥ तूष्णीमेव हि शूद्रस्य
स्त्रीणां च कुरुनंदन ॥ १४ ॥ माघसासे रटंत्यापः किञ्चिदभ्युदिते रवौ ॥ ब्रह्मघ्नं वा सुरापं वा कंपं तंतं पुनीमहे ॥ १५ ॥ प्रासादा यत्र सौवर्णाः
स्त्रियश्चाप्सरसोपमाः ॥ दधिकुल्यावहा यत्र नद्यः पायसकर्दमाः ॥ तत्र ते यांति मज्जंति ये माघे भास्करोदये ॥१६॥ यतिवत्पथि गच्छेत मौनी

---

१ सुपूजिताः–इ० पा० । २ फलदक्षिणाम्–इ० पा० । ३ ग्रहोपद्रवनाशनम्–इ० पा० । ४ महत्–इ० पा० ।

पैशुन्यवर्जितः ॥ यदीच्छेद्विपुलान्भोगांश्चन्द्रसूर्योपमान्गृहान् ॥ १७॥ पौषफाल्गुनयोर्मध्ये प्रातःस्नायी [1]भवेन्नरः ॥ पौर्णमास्या ह्यमावास्याः प्रारभ्य स्नानमाचरेत् ॥ १८॥ त्रिंशद्दिनानि पुण्याणि मकरस्थे दिवाकरे ॥ तत्र उत्थाय नियमं गृह्णीयाद्विधिपूर्वकम् ॥ १९ ॥ माघमासमिमं पूर्णं स्थाप्येहं देवमाधवम् ॥ तीर्थंशीतजले नित्यमिति संकल्प्य चेतसा ॥ २० ॥ अप्रावृतशरीरस्तु यः कष्टं स्नानमाचरेत् ॥ पदेपदेऽश्वमेधस्य फलं प्राप्नोति मानवः ॥ २१ ॥ तत्र स्नात्वा शुभे तीर्थे दत्त्वा शिरसि वै मृदम् ॥ वेदोक्तविधिना राजन्सूर्यस्यार्घं निवेदयेत् ॥ २२ ॥ पितॄन्संतर्प्य तत्रस्थो ह्यवतीर्य ततो जलात् ॥ इष्टदेवं नमस्कृत्य पूजयेत्पुरुषोत्तमम् ॥ २३ ॥ शङ्खचक्रधरं देवं माधवं नाम पूजयेत् ॥ वह्निं हुत्वा विधानेन ततस्त्वेकाशनो भवेत् ॥ ॥ २४ ॥ भूशय्या ब्रह्मचर्येण शक्तः स्नानं समाचरेत् ॥ अशक्तस्य [2]धनाढ्यस्य स्वेच्छा सा तत्र कथ्यते ॥ २५ ॥ अवश्यमपि कर्तव्यं माघे स्नानमिति श्रुतिः ॥ ईश्वरेण यथाकामं बलं धर्मोऽनुवर्तते ॥ २६ ॥ तिलस्नायी तिलोद्वर्ती तिलभोक्ता तिलोदकी ॥ तिलहोता च दाता च षट्तिलो नावसीदति ॥२७॥ तैलस्यामलकानां च तीर्थे देयानि नित्यशः ॥ तथा प्रज्वालयेद्वह्निं निवातार्थं द्विजन्मनाम् ॥२८॥ एवं स्नानावसाने तु भोज्यं देयमवारितम् ॥ भोजयेद्द्विजदांपत्यं भूषयेद्वस्त्रभूषणैः ॥ २९ ॥ कंबलाजिनरत्नानि वासांसि विविधानि च ॥ चोलकानि च दिव्यानि प्रच्छादनपटीस्तथा ॥ ॥ ३० ॥ उपानहौ तथा गुप्तं मोदकैः पापमोचकैः ॥ अनेन विधिना दद्यान्माधवः प्रीयतामिति ॥ ३१ ॥ अगम्यागमनस्तेयपापेभ्यश्च परिग्रहात् ॥रहस्याचरिताद्वापि मुच्यते स्नानमाचरेत् ॥ ३२ ॥ पितृभिः पितामहैः सार्द्धं तथैव प्रपितामहैः ॥ मातामातामहैः सार्द्धं वृद्धमातामहैस्तथा ॥ ३३ ॥ एकविंशकुलैः सार्द्धं भोगान्भुक्त्वा यथेप्सितान् ॥ माघमास्युषसि स्नात्वा विष्णुलोकं स गच्छति ॥ ३४ ॥ यो माघमास्युषसि सूर्य्यकराभिताम्रे स्नानं समाचरति चारुनदीप्रवाहे ॥ उद्धृत्य सप्तपुरुषान्पितृमातृतश्च स्वर्गं प्रयात्यमलदेहधरो नरोऽसौ ॥ ३५ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे माघस्नानविधिवर्णनं नाम द्वाविंशत्युत्तरशततमोऽध्यायः ॥ १२२ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ नैर्मल्यं भावशुद्धिश्च विना स्नानं न युज्यते ॥ तस्मात्कायविशुद्ध्यर्थं स्नानमादौ विधीयते ॥ १ ॥ अनुद्धृतैरुद्धृतैर्वा जलैः स्नानं समाचरेत् ॥ तीर्थं प्रकल्पयेद्विद्वान्मूलमंत्रेण मंत्रवित् ॥ २ ॥ नमो नारायणायेति मूलमन्त्र उदाहृतः ॥ दर्भपाणिस्तु विधिना स्वाचान्तः प्रयतः सुधीः ॥ ३ ॥ चतुर्हस्तसमायुक्तं चतुरस्रं समंततः ॥ प्रकल्प्या वाहयेद्गङ्गामेभिर्मंत्रैर्विचक्षणः ॥ ४ ॥ ॐ विष्णुपादप्रसूतासि वैष्णवी विष्णुदेवता॥

---

[1] सदा भवेत्–इ० पा० । [2] धनेशस्य–इ० पा० ।

पाहि नस्त्वेनसस्तस्मादाजन्ममरणांतिकात् ॥ ५ ॥ तिस्रः कोव्योऽर्द्धकोटी च तीर्थानां वायुरब्रवीत् ॥ दिवि भुव्यंतरिक्षे च तानि ते सन्तिजा
ह्नवि ॥ ६ ॥ नंदिनीत्येव ते नाम देवेषु नलिनीति च ॥ क्षमा पृथ्वी च विहगा वि[1]श्वकांया शिवा स्मृता ॥ ७ ॥ विद्याधरा सुप्रसन्ना तथा लोक
प्रसादिनी ॥ क्षेम्या तथा जाह्नवी च शांता शांतिप्रदायिनी ॥ ८ ॥ एतानि पुण्यनामानि स्नानकाले प्रकीर्तयेत् ॥ भवेत्संनिहिता तत्र गङ्गात्रिप
थगामिनी ॥ ९ ॥ सप्तवाराभिजप्तेन करसंपुटयोजितम् ॥ (३) मूर्ध्नि कुर्याञ्जलं भूप त्रिचतुःपञ्चसप्तधा ॥ १० ॥ स्नानं कुर्यान्मृदा तद्वदा मंत्र्य
च विधानतः ॥ ११ ॥ अश्वक्रांते रथक्रांते विष्णुक्रांते वसुंधरे ॥ मृत्तिके हर मे सर्वं यन्मया दुष्कृतं कृतम् ॥ १२ ॥ उद्धृतासि वराहेण कृष्णेन
शतबाहुना ॥ नमस्ते सर्वलोकानामसुधारिणि सुव्रते ॥ १३ ॥ एवं स्नात्वा ततः पश्चादाचम्य च विधानतः ॥ उत्थाय वाससी शुक्ले सूक्ष्मे तु परि
धाय वै ॥ १४ ॥ ततस्तु तर्पणं कुर्यात्त्रैलोक्याप्यायनाय तु ॥ देवा यक्षास्तथा नागा गन्धर्वाप्सरसां गणाः ॥ क्रूराः सर्वाः सुपर्णाश्च तरक्षा विहगाः
खगाः ॥ १५ ॥ ॥ विद्याधरा जलधरास्तथैवाकाशगामिनः ॥ निराधाराश्च ये जीवाः पापकर्मरताश्च ये ॥ १६ ॥ तेषामाप्यायनायैतद्दीयते सलिलं
मया ॥ कृतोपवीतो देवेभ्यो निवीती च भवेत्ततः ॥ १७ ॥ मनुष्यांस्तर्पयेद्भक्त्या ब्रह्मपुत्रानृषींस्तथा ॥ सनकश्च सनन्दश्च तृतीयश्च सनातनः ॥
॥ १८ ॥ कपिलश्चासुरिश्चैव वोढुः पञ्चशिखस्तथा ॥ सर्वे ते तृप्तिमायांतु मद्दत्तेनांबुना सदा ॥ १९ ॥ मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम् ॥
प्रचेतसं वशिष्ठं च भृगुं नारदमेव च ॥ २० ॥ देवब्रह्मऋषीन्सर्वांस्तर्पयेताक्षतोदकैः ॥ अपसव्यं ततः कृत्वा सव्यं जानु च भूतले ॥ २१ ॥ अग्नि
ष्वात्ता बर्हिषदो हविष्मंतस्तथोष्मपाः ॥ सुकलितास्तथा भौमा आज्यपाः सोमपास्तथा ॥ २२ ॥ तर्पयेच्च पितॄन्भक्त्या सतिलोदकचन्दनैः ॥
दर्भपाणिस्तु विधिवत्तर्पयेन्नामगोत्रतः ॥ २३ ॥ पित्रादीन्नामगोत्रेण तथा मातामहानपि ॥ संतर्प्य विधिवद्भक्त्या इमं मंत्रमुदीरयेत् ॥ २४ ॥
येऽबान्धवा बान्धवा वा येऽन्यजन्मनि बान्धवाः ॥ ते तृप्तिमखिला यांतु यश्चास्मत्तोऽभिवाञ्छति ॥२५॥ ततश्चाचम्य विधिवदालिखेत्पद्ममग्रतः॥
अक्षतैः सह पुष्पश्च सतिलारुणचन्दनैः ॥ २६ ॥ अर्घं दद्यात्प्रयत्नेन सूर्यनामानुकीर्तनैः ॥ नमस्ते विश्वरूपाय नमो विष्णुसखाय वै ॥ २७ ॥
सहस्ररश्मये नित्यं नमस्ते सर्वतेजसे ॥ नमस्ते सर्ववपुषे नमस्ते सर्वशक्तये ॥ २८ ॥ जगत्स्वामिन्नमस्तेऽस्तु दिव्यचंदनभूषित ॥ पद्मनाभ नम
स्तेऽस्तु कुण्डलांगदधारिणे ॥ २९ ॥ नमस्ते सर्वलोकेश सर्वासुरनमस्कृत ॥ सुकृतं दुष्कृतं चैव सम्यग्जानासि सर्वदा ॥ ३० ॥ सत्यदेव नमस्ते

---

[1] विश्वमाया—इ० पा० ।

स्तु सर्वदेव नमोऽस्तु ते ॥ दिवाकर नमस्तेऽस्तु त्रयीमय नमोऽस्तु ते ॥ ३१ ॥ एवं सूर्यं नमस्कृत्य त्रिःकृत्वा च प्रदक्षिणाम् ॥ द्विजं गां काञ्चनं स्पृष्ट्वा ततो विष्णुगृहं व्रजेत् ॥ ३२ ॥ स्नानं खलु प्रतिदिनं कथितं मुनीन्द्रैः पापापहं मलहरं सुखदं सदैव ॥ तस्मान्नदीष्वथ गृहेष्वथ वा तडागे कर्तव्यमेतदिह[1] धर्मधिया नरेण ॥ ३३ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे नित्यस्नानविधिवर्णनं नाम त्रयोविंशत्युत्तरशततमोऽध्यायः ॥ १२३ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ रुद्रस्नानविधानं मे कथयस्व जनार्दन ॥ सर्वदुष्टोपशमनं सर्वशांतिप्रदं नृणाम् ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ देवसेनापतिं स्कन्दं रुद्रपुत्रं दुरासदम् ॥ अगस्त्यो मुनिशार्दूलः सुखासीनमुवाच ह ॥ २ ॥ सर्वज्ञोऽसि कुमार त्वं प्रसादाच्छङ्करस्य वै ॥ स्नानं रुद्रविधानेन ब्रूहि कस्य कथं भवेत् ॥ ३ ॥ ॥ स्कन्द उवाच ॥ ॥ मृतप्रजा तु या नारी दुर्भगा सुतवर्जिता[2] ॥ या सुते दुहितां[3] वंध्या स्नानमासां विधीयते ॥ ४ ॥ अष्टम्यां वा चतुर्दश्यामुपवासपरायणा ॥ ऋतौ शुद्धे चतुर्थेऽह्नि प्राप्ते सूर्यदिनेऽथ वा ॥ ५ ॥ नद्योस्तु सङ्गमे कुर्यान्महानद्योर्विशेषतः ॥ शिवालयेऽथ वा गोष्ठे विविक्ते वा गृहाङ्गणे ॥ ६ ॥ आहिताग्निं द्विजं शांतं धर्मज्ञं सत्यशीलिनम् ॥ स्नानार्थं प्रार्थयेद्[4]देवं निपुणं रौद्रकर्मणि ॥ ७ ॥ ततस्तु मंडपं कुर्याच्चतुरस्रमुदग्गतम् ॥ बद्धचन्दनमालं तु गोमयेनोलेपितम् ॥ ८ ॥ तन्मध्ये श्वेत[5]रजसा संपूर्णं पद्ममालिखेत् ॥ मध्ये तस्य महादेवं स्थापयेत्कर्णिकोपरि ॥ ९ ॥ दद्याद्दलेषु शक्त्या[6]दींश्चतुर्थविधिपूर्वकम् ॥ इन्द्रादिलोकपालांश्च दलेष्वन्येषु विन्यसेत् ॥ १० ॥ देवीं विनायकं चैव स्थापयेत्तस्य पार्श्वतः ॥ दत्त्वार्घं गन्धपुष्पं च धूपदीपं गुडौदनम् ॥ ११ ॥ भक्ष्यान्नानाविधान्दद्यात्फलानि विविधानि च ॥ चतुष्कोणेषु भृंगारमश्वत्थदलभूषितम् ॥ १२ ॥ एकैकं विन्यसेद्ब्रह्मन्सर्वौषधिसमन्वितम् ॥ चतुर्दिशं मंडपस्य दद्याद्भूतबलिं ततः ॥ १३ ॥ आग्नेय्यां दिशि कर्तव्यं मंडपस्य समीपतः ॥ अग्निकार्यं शुभे कुण्डे पुष्पपत्रैरलंकृते ॥ १४ ॥ लवणं सर्षपैर्युक्तं घृतेन मधुना सह ॥ मानस्तोकेन जुहुयात्कृतहोमे नवग्रहे ॥१५॥ द्वितीयमग्निकार्यस्य कर्तारं ब्राह्मणं कुरु ॥ रुद्रजापकमाचार्यं सितचन्दनचर्चितम् ॥ १६ ॥ सितवस्त्रपरीधानं सितमालाधरं शुभम् ॥ शोभितं कंकणैः कंठचैः कर्णवेष्टांगुलीयकैः ॥ १७ ॥ मंडलस्य समीपस्थो जपेद्रुद्रान्विमत्सरः ॥ यावदेकादश गताः पुनरेव जपेत्तु तान् ॥ १८ ॥ देवमंडलवत्कार्यं द्वितीयं मंडलं शुभम् ॥ तस्य मध्ये तु सा नारी श्वेतपुष्पैरलंकृता ॥ १९ ॥ श्वेतवस्त्रैश्च संछन्ना श्वेतगंधानुलेपिता ॥ सुखासनोपविष्टायामाचार्यो रुद्रचिंतकः ॥ २० ॥ अभिषिंचेत्ततश्चै

---

[1] धर्मपरेण पुंसा–इ० पा० । [2] ऋतुवर्जिता–इ० पा० । [3] दुहितामित्यार्षम् । [4] एवं सगुणं रुद्रकर्मणि–इ० पा० । [5] श्वेतरक्तं च–इ० पा० । [6] सद्यादीनीत पाठ सद्यः प्रणव इति मांत्रिकसंज्ञा ।

नामर्कपत्रपुटांबुना ॥ चतुःषष्टिविधेनैव रुद्रेणैकादशेन तु ॥ २१ ॥ शतानि सप्तपर्णानां चतुर्भिरधिकानि तु ॥ अच्छिद्राणां मनूनां च स्नानार्थं विनियोजयेत् ॥ २२ ॥ अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्ध्रदात् ॥ वेश्यांगणाद्राजगृहाद्गोष्ठादानीय वै मृदः ॥ २३ ॥ सर्वौषधिं रोचनां च नदीतीर्थोदकानि च ॥ एतान्संक्षिप्य कलशे शिवसंज्ञे सुपूजिते ॥ २४ ॥ आपादतलकेशं च कुक्षी चैव विशेषतः ॥ सर्वांगं लेपयेन्नार्याः सुशीला काचिदङ्गना ॥ २५ ॥ रुद्राभिजप्तेन ततः स्नापयेत्कलशेन ताम् ॥ तोयपूर्णाष्टकलशैरश्वत्थदलपूरितैः ॥ २६ ॥ सर्वतोदिक्स्थितैः पश्चात्स्नापयेत्सफलाक्षतैः ॥ एवं स्नाता स्नापकाय दद्याद्गां कांचनं तथा ॥ २७ ॥ हेतुरप्यत्र निर्दिष्टा दक्षिणा गौः पयस्विनी ॥ ब्राह्मणानामथान्येषां स्वशक्त्या पांडुनंदन ॥ २८ ॥ गोवत्सकाञ्चनादीनि दत्त्वा सर्वं क्षमापयेत् ॥ कृतेनानेन राजेन्द्र रुद्रस्नानेन भागिनी ॥ २९ ॥ सुभगा सुखसंयुक्ता बहुपुत्रा च जायते ॥ सर्वेष्वपि हि मासेषु ब्राह्मणाभिमते शुभम् ॥ ३० ॥ तस्मादवश्यं कर्तव्यं पुत्रश्रीसुखमिच्छता ॥ ३१ ॥ या स्नानमाचरति रुद्रमिति प्रसिद्धं श्रद्धान्विता द्विजवरानुमताऽऽनताङ्गी ॥ दोषान्निहत्य सकलान्स्वशरीरभागाद्भर्तुः प्रिया भवति भारत जीववत्सा ॥ ३२ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे रुद्रस्नानविधिवर्णनं नाम चतुर्विंशत्युत्तरशततमोऽध्यायः ॥ १२४ ॥

॥ ॥ युधिष्ठिर उवाच ॥ ॥ चन्द्रादित्योपरागेषु यत्स्नानमभिधीयते ॥ तदहं श्रोतुमिच्छामि द्रव्यमंत्र प्रधानतः ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ यस्य राशिं समासाद्य भवेद्ग्रहणसंप्लवः ॥ तस्य स्नानं प्रवक्ष्यामि मंत्रौषधिसमन्वितम् ॥ २ ॥ चन्द्रोपरागं संप्राप्य कृत्वा ब्राह्मणवाचनम् ॥ संपूज्य चतुरो विप्रान्गन्धमाल्यानुलेपनैः ॥ ३ ॥ पूर्वमेवोपरागस्य समानीयौषधादिकम् ॥ स्थापयेच्चतुरः कुम्भानग्रतः सागरानिति ॥ ४ ॥ गजाश्वरथ्यावल्मीकसङ्गमाद्ध्रदगोकुलात् ॥ राजद्वारप्रदेशाच्च मृदमानीय प्रक्षिपेत् ॥ ५ ॥ पंचगव्यं च कुभेषु पंच रत्नानि चैव हि ॥ रोचनां पद्मशंखौ च पञ्चभङ्गसमन्वितौ ॥ ६ ॥ स्फटिकं चन्दनं श्वेतं तीर्थवारि ससर्षपम् ॥ गजदंतं कुंकुमं च तथैवोशीरगुग्गुलम् ॥ एतत्सर्वं विनिक्षिप्य कुम्भेष्वावाहयेत्सुरान् ॥ ७ ॥ सर्वे समुद्राः सरितस्तीर्थानि जलदा ह्रदाः ॥ आयांतु यजमानस्य दुरितक्षयकारकाः ॥ ८ ॥ योऽसौ वज्रधरो देव आदित्यानां प्रभुर्मतः ॥ सहस्रनयनश्चेन्द्रः पीडां मेऽत्र व्यपोहतु ॥ ९ ॥ रक्षोगणाधिपः साक्षात्प्रलयानिलसप्रभः ॥ खड्गव्यग्रोऽतिभीमश्च रक्षःपीडां व्यपोहतु ॥ १० ॥ योऽसौ बिन्दुकरो बिन्दुः पिनाकी वृषवाहनः ॥ चन्द्रोपरागपापानि स नाशयतु शङ्करः ॥ ११ ॥ त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च ॥ ब्रह्मार्कविष्णुयुक्तानि तानि पापं दहंतु वै ॥ १२ ॥ एवमामंत्रितैः कुम्भैरंभोयुक्तैर्युगान्वितैः ॥

ऋग्यजुः साममंत्रैश्च शुक्लमाल्यानुलेपनैः ॥ पूजयेद्वस्त्रगोदानैर्ब्राह्मणानिष्टदेवताः ॥ १३ ॥ एतानेव ततो मंत्रान्संलिख्य कनकान्वितान् ॥
यजमानस्य शिरसि उद्धार्यास्ते नरोत्तम ॥ १४ ॥ कलशान्द्रव्यसंयुक्तान्प्राप्ते ग्रहणपर्वणि ॥ चन्द्रग्रहे निवृत्ते तु कृतगोदानमङ्गलः ॥
॥ १५ ॥ कृतस्नानः श्वेतपट्टं ब्राह्मणाय निवेदयेत् ॥ अनेन विधिना यस्तु सग्रहं स्नानमाचरेत् ॥ १६ ॥ न तस्य ग्रहपीडा
स्यान्न च बंधुजनक्षयः ॥ परमां सिद्धिमाप्नोति पुनरावृत्तिदुर्लभाम् ॥ १७ ॥ सूर्यग्रहे सूर्यनाम सदा मंत्रेषु कीर्तयेत् ॥ द्रव्यैस्तैरेव कथितं
स्नानं कुरुकुलोद्वह ॥ १८ य इदं शृणुयान्नित्यं श्रावयेद्वापि मानवः ॥ सर्वपापविनिर्मुक्तः शक्रलोके महीयते ॥ १९ ॥ चन्द्रग्रहे नृप रविग्रहणे
जपन्मां मंत्रैरिमैः समभिमंत्र्य शुभोदकुंभात् ॥ स्नानं करोति नियमेन नरश्च यश्च पीडा न तं ग्रहकृता च पुनर्दुनोति ॥ २० ॥ इति श्रीभ
विष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे चन्द्रादित्यग्रहणस्नानविधिवर्णनं नाम पंचविंशत्युत्तरशततमोऽध्यायः ॥ १२५ ॥
॥ ॥ युधिष्ठिर उवाच ॥ ॥ गृहस्थो मरणे प्राप्ते कथं त्यजति जीवितम् ॥ एतन्मे ब्रूहि गोविन्द परं कौतूहलं हि मे ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥
नान्यदुष्कृष्टमुद्दिष्टं तज्ज्ञैरनशनात्परम् ॥ तस्याहं लक्षणं वक्ष्ये यज्जप्यं च मुमूर्षता ॥ २ यादृग्रूपश्च भगवांश्चिंतनीयो जनार्दनः ॥ आसन्नमा
त्मनः कालं ज्ञात्वा प्राज्ञो युधिष्ठिर ॥ ३ ॥ निर्धूतमलदोषश्च स्नातो नियतमानसः ॥ समभ्यर्च्य हृषीकेशं पुष्पधूपादिभिस्ततः ॥ ४ ॥ प्रणि
पातैः स्तवैः पुण्यैर्गंधैर्धूपैस्तु पूजयेत् ॥ दत्त्वा दानं च विप्रेभ्यो विकलादिभ्य एव च ॥ समर्प्य ब्राह्मणेभ्यश्च देवार्चाद्युपयोगि च ॥ ५ ॥ बंधु
पुत्रकलत्रेषु क्षेत्रधान्यधनादिषु ॥ मित्रवर्गे च राजेन्द्र ममत्वं विनिवर्तयेत् ॥ ६ ॥ मित्राण्यमित्रान्मध्यस्थान्परान्स्वांश्च पुनः पुनः ॥ अत्यर्थमप
कारेण नोपकारेण चिन्तयेत् ॥ ७ ॥ ततश्च प्रयतः कुर्यादुत्सर्गं सर्वकर्मणाम् ॥ शुभाशुभानां राजेन्द्र वाक्यं चेदमुदीरयेत् ॥ ८ ॥ परित्यजाम्यहं
भोगांस्त्यजामि सुहृदोऽखिलान् ॥ भोजनं हि मयोत्सृष्टमुत्सृष्टमनुलेपनम् ॥ ९ ॥ स्रग्भूषणादिकं गेयं दानमासनमेव च ॥ होमादयः परार्था
ये ये च नित्यक्रमागताः ॥ १० ॥ नैमित्तिकास्तथा काम्याः श्राद्धधर्मादयोज्झिताः ॥ त्यक्ताश्चाश्रमिका धर्मा वर्णधर्मास्तथोज्झिताः ॥ ११ ॥
पद्भ्यां कराभ्यां विहरन्कुर्वाणः कर्म चोद्वहन् ॥ न पापं कस्यचिन्न्याय्याः प्राणिनः संतु निर्भयाः ॥ १२ ॥ नभसि प्राणिनो ये च ये जले ये च
भूतले ॥ क्षितेर्विवरगा ये च ये च पाषाणसंपुटे ॥ १३ ॥ धान्यादिषु च वस्त्रेषु शयनेष्वासनेषु च ॥ ते स्वयं तु विबुध्यंते दत्तं तेभ्योऽभयं
मया ॥ १४ ॥ न मेऽस्ति बांधवः कश्चिद्विष्णुं मुक्त्वा जगद्गुरुम् ॥ मित्रपक्षे च मे विष्णुरधश्चोर्ध्वं तथा पुनः ॥ १५ ॥ पार्श्वतो मूर्ध्नि हृदये बाहु

भ्यां चैव चक्षुषोः ॥ श्रोत्रादिषु च सर्वेषु मम विष्णुः प्रतिष्ठितः ॥ १६ ॥ इति सर्वं समुत्सृज्य धृत्वा सर्वेशमच्युतम् ॥ वासुदेवेत्यविरतं नाम देवस्य कीर्तयेत् ॥ १७ ॥ दक्षिणाग्रेषु दर्भेषु शेते वै प्राक्छिरास्तथा ॥ उदक्छिरा वा राजेंद्र चिंतयञ्जगतः पतिम् ॥ १८ ॥ विष्णुं जिष्णुं हृषीकेशं केशवं मधुसूदनम् ॥ नारायणं नरं शौरिं वासुदेवं जनार्दनम् ॥ १९ ॥ वाराहं यज्ञपुरुषं पुंडरीकाक्षमच्युतम् ॥ वामनं श्रीधरं कृष्णं नृसिंहमपराजितम् ॥ २० ॥ पद्मनाभमजं श्रीशं दामोदरमधोक्षजम् ॥ सर्वेश्वरेश्वरं शुद्धमनंतं विश्वरूपिणम् ॥ २१ ॥ चक्रिणं गदिनं शांतं शंखिनं गरुडध्वजम् ॥ किरीटकौस्तुभधरं प्रणमाम्यहमव्ययम् ॥ २२ ॥ अहमस्मि जगन्नाथ मयि वासं कुरु द्रुतम् ॥ आवयोरंतरं मास्तु समीराकाशयोरिव ॥ २३ ॥ अयं विष्णुरयं शौरिरयं कृष्णः पुरो मम ॥ नीलोत्पलदलश्यामः पद्मपत्रायतेक्षणः ॥ २४ ॥ एष पश्यतु मामीशः पश्याम्यहमधोक्षजम् ॥ इत्थं जपेदेकमनाः स्मरन्सर्वेश्वरं हरिम् ॥ २५ ॥ आसीत सुखदुःखेषु समो मित्राहितेषु च ॥ “ ॐ नमो वासुदेवाय ” इत्येतत्सततं जपेत् ॥ २६ ॥ यथा यथा भवेत्कामस्तथा तन्नाम कीर्तयेत् ॥ ध्यायेच्च देवदेवेशं विष्णो रूपं मनोरमम् ॥ २७ ॥ प्रसन्ननेत्रभ्रूचक्रशंखचक्रगदाधरम् ॥ श्रीवक्षसं सुमनसं चतुर्वक्त्रं किरीटिनम् ॥ २८ ॥ पीतांबरधरं कृष्णं चारुकेयूरधारिणम् ॥ चिंतयेत्तु सदा रूपं मनः कृत्वैकनिश्चयम् ॥२९॥ यादृशे वा मनः स्थैर्यं रूपे बध्नाति चक्रिणः ॥ तदेव चिंतयेद्रूपं वासुदेवेति कीर्तयेत् ॥ ३० ॥ इत्थं जपन्स्मरन्नित्यं स्वरूपं परमात्मनः ॥ अप्राणपरमोदारस्तच्चित्तस्तत्परायणः ॥ ३१ ॥ सर्वपातकयुक्तोऽपि पुरुषः पुरुषर्षभ ॥ प्रयाति देवदेवेशे लयमीड्यतमेच्युते ॥ ३२ ॥ यथाग्निस्तृणजातानि दहत्यनिलसंगतः ॥ तथानशनसंकल्पः पुंसां पापमसंशयम् ॥ ३३ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ उत्क्रांतिकाले भूतानां मुह्यंति चित्तवृत्तयः ॥ जराव्याधिविहीनानां किमुत व्याधिदोषिणाम् ॥ ३४ ॥ अत्यंतवयसा दग्धो व्याधिना चोपपीडितः ॥ यदि स्थातुं न शक्नोति क्षितिस्थो दर्भसंस्तरे ॥ ३५ ॥ किमप्यन्योप्युपायोऽस्ति न वानशनकर्मणि ॥ वैकल्यं येन नाप्नोति तन्मे ब्रूहि जनार्दन ॥३६॥ त्वयोक्तं भगवन्ध्यानं तद्ब्रूहि मम तत्त्वतः ॥ ध्यानस्वरूपमखिलं कथयस्व जनार्दन ॥३७॥ ॥ श्रीकृष्ण उवाच॥ ॥ नात्र भूमिर्न च कुशाः स्वास्तराश्च न कारणम् ॥ चित्तस्यालंबनीभूतो विष्णुरेवात्रकारणम् ॥ ३८ ॥ तिष्ठन्भुञ्जन्स्वपन्गच्छंस्तथा धावन्नितस्ततः ॥ उत्क्रांतिकाले गोविन्दं संस्मरंस्तन्मयो भवेत् ॥ ३९ ॥ यं यश्चापिस्मरन्भावंत्यजत्यन्ते कलेवरम् ॥ तं तमेवैति कोन्तेय सदा तद्भावभावितः ॥४०॥ तस्मात्प्रधानमत्रोक्तं वासुदेवस्य चिन्तनम् ॥ यद्यत्पृष्टं त्वयाध्यानं तदेव कथयामि ते ॥४१॥ पुरा मे कथितं पार्थ मार्कंडेयेन धीमता ॥४२॥ राज्योपभोगशयनासनवाहनेषु स्त्रीगंधमाल्यमणिवस्त्रविभूष

णेषु ॥ इच्छाभिलाषमतिमात्रमुदेति मोहाद्ध्यानं तदात्तमिति संप्रवदंति तज्ज्ञाः ॥४३॥ संछेदनैर्दहनताडनपीडनैश्च गात्रप्रहारदमनैर्विनिकर्तनैश्च॥
यस्येह चेतसि हि याति न चानुकंपा ध्यानं तु रौद्रमिति तत्प्रवदंति तज्ज्ञाः ॥ ४४ ॥ सूत्रार्थमार्गणमहाव्रतभावनाभिर्बंधप्रमोक्षगतिरागतिहेतु
चिन्ता ॥ पञ्चेन्द्रियाद्युपशमश्च शमश्च भूतेर्ध्यानं तु धर्म्यमिति तत्प्रवदंति संतः ॥ ४५ ॥ यस्येन्द्रियाणि विषयैर्न विवर्जितानि सङ्कल्पनात्मज
विकल्पविकारयोगैः ॥ तत्वेकनिष्ठहृदयो निभृतांतरात्मा ध्यानं तु शुक्कमिति तत्प्रवदंति सिद्धाः ॥ ४६ ॥ आद्ये तिर्यगधोगतिश्च नियतं ध्याने
तु रौद्रे सदा धर्म्यें देवगतिः शुभं फलमहोशुक्के च जन्मक्षयः ॥ तस्माज्जन्मरुजापहे हिततरे संसारनिर्वाहके ध्याने शुक्लतरे रजःप्रमथने कुर्यात्प्र
यत्नं बुधः ॥ ४७ ॥ समाः सहस्राणि तु सप्त वै जले दशैकमग्नौ पवने च षोडश ॥ गवां गृहे षष्टिरशीतिराहवे अनाशने भारत चाक्षया गतिः॥
॥ ४८ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे सांभरायणीव्रतवर्णनं नाम षड्विंशत्युत्तरशततमोऽध्यायः ॥ १२६ ॥
॥ ॥ युधिष्ठिरउवाच ॥ ॥ तडागोत्सर्जने देव विधिं विधिविदां वर ॥ कथयस्व महाभाग मम देवकिनंदन ॥ १ ॥ वापीकूपोदकानाञ्च के मंत्राः
परिकीर्तिताः ॥ के ऋत्विजोत्र के यूपाः कर्तव्याः कुण्डमण्डपे ॥ २ ॥ दानं किमत्र निर्दिष्टं बलयः के प्रकीर्तिताः ॥ कस्मिन्काले कथं कुर्यादि
त्येतत्सकलं वद ॥ ३ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ साधुसाधु महाबाहो यन्मां त्वं परिपृच्छसि ॥ तडागवापीकूपानामुत्सर्गं कथयामि ते ॥
॥ ४ ॥ निष्पन्ने बद्धपालीके सर्वोद्भेदविवर्जिते ॥ सोपानपंक्तिसहिते पाषाणैः सर्वतश्चिते ॥ ५ ॥ तस्मिन्सलिलसंपूर्णे कार्तिके वा विशेषतः ॥
तडागस्य विधिः कार्यः स्थिरनक्षत्रयोगतः ॥ ६ ॥ मुनयः केचिदिच्छंति व्यतीते चोत्तरायणे ॥ न कालनियमो ह्यत्र प्रमाणं सलिलं यतः ॥७ ॥
तडागपालशीर्षें तु मंडलं कारयेच्छुभम् ॥ दशद्वादशहस्तं च चतुर्द्वारं सुविस्तृतम् ॥ ८ ॥ तोरणानि तु चत्वारि चतुर्दिक्षु विचक्षणैः ॥ अश्वत्थो
दुंबरप्लक्षवटशाखामयानि च ॥ ९ ॥ नानावर्णास्तु परितः पताकाः परिकल्पयेत् ॥ मध्ये महाध्वजः कार्यः पञ्चवर्णः सुशोभनः ॥ १० ॥ चतु
र्हस्ता भवेद्वेदी मध्ये पञ्चकराथ वा ॥ यजमानप्रमाणेन मध्ये यूपेन शोभिता ॥११॥ कदंबाश्वत्थपालाशवैकंकतमयः शुभः ॥ ब्राह्मणस्यास्य निर्दि
ष्टो यूपः श्रुतिविचक्षणैः ॥ १२ ॥ न्यग्रोधबिल्वजः प्रोक्तः क्षत्रियाणां च खादिरः ॥ वैश्यस्योदुंबरमयो मध्वर्जुनसमुद्भवः ॥ १३॥ बिभीतकोदुंब
रजः शाकशाल्मलिसंभवः ॥ शूद्रस्य यूपो निर्दिष्टः सारदारुमयोऽथ वा ॥१४॥ लोकपालाष्टकं तत्र रजसा च विलेखयेत् ॥ ब्रह्माविष्णुश्च रुद्रश्च
कमला चाम्बिका तथा ॥ १५ ॥ सावित्री सहिता कार्या पुष्पधूपैरथार्चयेत् ॥ कुर्यात्कुंडानि चत्वारि चतुर्दिक्षु विचक्षणः ॥ १६ ॥ मेखलात्रययु

क्तानि हस्तमात्राणि सर्वतः ॥ हेमालंकारिणः कार्या होतारः षोडशाष्ट वा ॥ १७ ॥ अहतांबरसंवीताः स्रक्चन्दनविभूषिताः ॥ स्थापकाश्चात्र
विहिता वेदवेदाङ्गपारगाः ॥ १८ ॥ इतिहासपुराणज्ञाः प्रियवाचोऽनसूयकाः ॥ मृन्मयानि च पात्राणि ताम्राणि स्रुक्स्रुवंतथा ॥ १९ ॥ व्यंज
नानि च कार्याणि होमार्थं समिधस्तिलाः ॥ ग्रहयज्ञविधानेन होमः कार्यो विजानता ॥ २० ॥ वेद्याधिवासितानां च सुराणां होम इष्यते ॥
वारुणैस्तु तथा मंत्रैर्होतव्यं पुष्टिवर्द्धनम् ॥ २१ ॥ इन्द्रादिलोकपालानां पूर्वादिक्रमयोगतः ॥ बलिं दद्याच्च तल्लिङ्गैर्मन्त्रैस्सर्वार्थसिद्धये ॥ २२ ॥
द्वारेषु कलशान्दद्यात्सहिरण्यान्सपल्लवान् ॥ अश्वत्थपल्लवैः कार्याः शुभाश्चन्दनमालिकाः ॥ २३ ॥ सौवर्णं कारयेत्कूर्मं ताम्रेण मकरं तथा ॥ रज
तेन तथा मत्स्यं त्रपुणा दर्दुरं तथा ॥ २४ ॥ शिशुमारजलौकाश्च रजतेनैव कारयेत् ॥ सर्वानपि यथास्थानं ताम्रपात्र्यां निधापयेत् ॥ २५ ॥
एषा प्रतिष्ठा नामेति मन्त्रेणामंत्रयेच्च तान् ॥ यूपप्रतिष्ठा कर्तव्या वेदोक्तविधिना ततः ॥ २६ ॥ कुंकुमेन समालभ्य पुष्पैर्धूपैः समर्च
येत् ॥ वस्त्रयुग्मेन संपूज्य नैवेद्यादि यथाक्रमम् ॥ २७ ॥ ततो द्विजातिप्रवरः श्रपयित्वा चरुं नवम् ॥ ततश्चाग्न्याहुतीर्दद्याद्भूर्भुवःस्वरिति
क्रमात् ॥ २८ ॥ ततश्चावाहयेद्देवं वरुणं सरितां पतिम् ॥ वादित्रघोषैर्गीतैश्च गन्धमाल्यानुलेपनैः ॥ २९ ॥ श्वेतेनैव तु वस्त्रेण शिरोवेष्टं
तु कारयेत् ॥ आदाय ताम्रपात्रीं तु ब्रह्मघोषपुरःसरः ॥ ३० ॥ अप्रमाणं जलं गत्वा वरुणाय निवेदयेत् ॥ त्वं वरुण इति मंत्रेण जल
मध्ये प्रवाहयेत् ॥ ३१ ॥ यच्चान्यद्वस्त्रबीजानि तत्सर्वं मज्जयेज्जले ॥ तारयेच्च ततो धेनुं दक्षिणाया उदग्व्रजेत् ॥ ३२ ॥ गोशिरोवेष्टनं
कुर्यात्सति वस्त्रे तु बुद्धिमान् ॥ लांगूलस्याग्रमादाय अवतीर्य ततो जलम् ॥ ३३ ॥ ज्ञातिभिः सहितः कर्ता सभार्यश्चावगाहयेत् ॥
ततोऽवतीर्य सलिलाद्दत्त्वा गां ब्राह्मणाय ताम् ॥ शक्त्या च दक्षिणां दद्याद्देवं विप्रान्विसर्जयेत् ॥ ३४ ॥ सामान्यं सर्वभूतेभ्यो मया दत्तमिदं
जलम् ॥ एवं जलाञ्जलिं क्षिप्त्वा पूजयेज्जलमातरः ॥ ३५ ॥ तोष्याः कर्मकराः सर्वे कुद्दालानि च पूजयेत् ॥ अवारितं तु दातव्यं मन्त्रपूर्वं दिन
त्रयम् ॥ ३६ ॥ एकाहं च यथाशक्त्या वित्तशाठ्यं न कारयेत् ॥ गोसहस्रं तदर्धं वा तस्यार्धमथवापि वा ॥ ३७ ॥ शतमर्धशतं वापि
पञ्चविंशतिमेव च ॥ तासामभावे गां दद्यात्सवत्सां कांस्यदोहनाम् ॥ ३८ ॥ एष राजंस्तडागस्य विधिस्ते परिकीर्तितः ॥ वापीकूपविधानं
च कथयामि तथा परम् ॥ ३९ ॥ कुण्डमंडपसंभारभूषणाच्छादनादिकम् ॥ तडागविधिवत्कुर्याद्यूपगोतरणादिकम् ॥ ४० ॥ अकालमूलान्कल
शान्वापीकोणेषु दापयेत् ॥ तीर्थोदकसमायुक्तान्सितचन्दनचर्चितान् ॥ ४१ ॥ सितवासोयुगच्छन्नान्समाल्यान्रत्नगर्भिणः ॥ श्रपयित्वा चरुं

तत्र यावन्मात्रो यथाविधि ॥ ४२ ॥ चतस्र आहुतीर्दद्याद्भूर्भुवः स्वरिति क्रमात् ॥ ग्रहहोमं प्रकुर्वीत शांतिपुष्टिविवर्द्धनम् ॥ ४३ ॥ वरुणाय
बलिं दद्याल्लोकपालेभ्य एव च ॥ वारुणानि च सूक्तानि पठेयुर्द्धिजसत्तमाः ॥ ४४ ॥ वेदीमध्ये मंडलं च पद्ममत्र प्रशस्यते ॥ तन्मध्ये पूजये
च्छंभुं ब्रह्माणं केशवं तथा ॥ ४५ ॥ मत्स्यकमठमण्डूकान्वेद्या मध्येऽधिवासयेत् ॥ मित्रमित्रोऽसि भूतानां धनदो धनकांक्षिणाम् ॥ ४६ ॥ वैद्यो
रोगाभिभूतानां शरण्यः शरणार्थिनाम् ॥ अनेनैव हि मंत्रेण वरुणाय विसर्जयेत् ॥ ४७ ॥ आदौ चावाहयेद्देवमनेनैव विशेषतः ॥ नमस्ते विश्व
गुप्ताय नमो विष्णो अपांपते ॥ ४८ ॥ सान्निध्यं कुरु देवेश समुद्रे यद्वदत्र वै ॥ ततस्तु दक्षिणा देया ब्राह्मणानां नराधिप ॥ ४९ ॥ गौः स्थाप
काय दातव्या भोजनं चानिवारितम् ॥ सर्वेषामेवदातव्यमेष पौराणिको विधिः ॥ ५० ॥ शराया आगतं तोयं सामुद्रं प्रथमं स्मृतम् ॥ निपाने
वा तडागे वा संस्थितं तद्भवेच्छुचि ॥ ५१ ॥ वापीकूपतडागे वा स्थितं तु प्रथमं जलम् ॥ अपेयं तु भवेत्सर्वं तज्जलं सूतिकासमम् ॥ ५२ ॥
समुद्रोऽपि हि कौंतेय देवयोनिरपांपतिः ॥ कुशाग्रेणापि रभसा न स्पृष्टव्यस्त्वसंस्कृतः ॥ ५३ ॥ अग्निश्चतेजो मृडयाथ देहे रेतोधाविष्णुर
मृतस्य नाभिः ॥ एवं ब्रुवन्पांडव सत्यवाक्यं ततोवगाहेत पतिं नदीनाम् ॥ ५४ ॥ वैष्णवे मासि संप्राप्ते नक्षत्रे वारुणे तथा ॥ अर्घ्यं प्रदद्याद्भक्त्या
तु तस्मिन्काले महोदधेः ॥ ५५ ॥ स्नात्वा तु विधिवन्मंत्रैः सागरे तु समाहितः ॥ फलमूलाक्षतैर्भक्ष्यैस्तथार्घ्यं संप्रकल्पयेत् ॥ ५६ ॥ अपि
जन्म सहस्रं तु यत्पापं कुरुते नरः ॥ मुच्यते सर्वपापेभ्यः स्नात्वा तु लवणांभसि ॥ ५७ ॥ विधिज्ञेन तु कर्तव्यं ब्राह्मणेन यथाविधि ॥ कर्ता
कारयिता चैव उभौ तु स्वर्गगामिनौ ॥ ५८ ॥ विधिं त्वेनमजानानो यः कुर्यादर्थमोहितः ॥ कर्ता कारयिता चैव उभौ नरकगामिनौ ॥ ५९ ॥
यो न कारयते शांतिं तडागाद्येषु कर्मसु ॥ तस्य तन्निष्फलं सर्वमुप्तं बीजमिवोषरे ॥ ६० ॥ सर्वरत्नमयं दिव्यं चन्द्रार्कसदृशप्रभम् ॥ विमानं
तेजसा युक्तमारोहेत्पुण्यकर्मकृत् ॥ ६१ ॥ कश्चित्पिबति तत्तोयं निपानस्थं ततोऽञ्जलिम् ॥ ब्राह्मणो वा यतिर्गौर्वा येन कर्ता न सीदति ॥६२॥
उत्सृष्टे कृतकृत्यस्तु सुहृत्कुर्यान्महोत्सवम् ॥ महाभोज्यं महोत्सर्गं यजमानो दिनाष्टकम् ॥ ६३ ॥ कारकाः कर्मणो वापि सूत्रधारादयो नराः ॥
इष्टापूर्तेन धर्मेण तेऽपि स्वर्गं प्रयांति हि ॥ ६४ ॥ खन्यमाने महीभागे प्राणिनो ये क्षयं गताः ॥ चित्रे वा देवकूटार्थे ते सर्वे त्रिदिवं गताः ॥
॥ ६५ ॥ धेनोस्तु रोमकूपाणि यावन्तीह नरोत्तम ॥ तावद्वर्षसहस्राणि वर्षकोटिशतानि च ॥ ६६ ॥ कोटिर्युगसहस्राणां स्वर्गे तिष्ठेत्तडागकृत् ॥

---

१ भेषजम्-इ० पा० ।

क्तानि हस्तमात्राणि सर्वतः ॥ हेमालंकारिणः कार्या होतारः षोडशाष्ट वा ॥ १७ ॥ अहतांबरसंवीताः स्रक्चन्दनविभूषिताः ॥ स्थापकाश्चात्र
विहिता वेदवेदाङ्गपारगाः ॥ १८ ॥ इतिहासपुराणज्ञाः प्रियवाचोऽनसूयकाः ॥ मृन्मयानि च पात्राणि ताम्राणि स्रुक्स्रुवंतथा ॥ १९ ॥ व्यंज
नानि च कार्याणि होमार्थं समिधस्तिलाः ॥ ग्रहयज्ञविधानेन होमः कार्यो विजानता ॥ २० ॥ वेद्याधिवासितानां च सुराणां होम इष्यते ॥
वारुणैस्तु तथा मंत्रैर्होतव्यं पुष्टिवर्द्धनम् ॥ २१ ॥ इन्द्रादिलोकपालानां पूर्वादिक्रमयोगतः ॥ बलिं दद्याच्च तल्लिङ्गैर्मन्त्रैस्सर्वार्थसिद्धये ॥ २२ ॥
द्वारेषु कलशान्दद्यात्सहिरण्यान्सपल्लवान् ॥ अश्वत्थपल्लवैः कार्याः शुभाश्चन्दनमालिकाः ॥ २३ ॥ सौवर्णं कारयेत्कूर्मं ताम्रेण मकरं तथा ॥ रज
तेन तथा मत्स्यं त्रपुणा दर्दुरं तथा ॥ २४ ॥ शिशुमारजलौकाश्च रजतेनैव कारयेत् ॥ सर्वानपि यथास्थानं ताम्रपात्र्यां निधापयेत् ॥ २५ ॥
एषा प्रतिष्ठा नामेति मन्त्रेणामंत्रयेच्च तान् ॥ यूपप्रतिष्ठा कर्तव्या वेदोक्तविधिना ततः ॥ २६ ॥ कुंकुमेन समालभ्य पुष्पैर्धूपैः समर्च
येत् ॥ वस्त्रयुग्मेन संपूज्य नैवेद्यादि यथाक्रमम् ॥ २७ ॥ ततो द्विजातिप्रवरः श्रपयित्वा चरुं नवम् ॥ ततश्चाग्न्याहुतीर्दद्याद्भूर्भुवःस्वरिति
क्रमात् ॥ २८ ॥ ततश्चावाहयेद्देवं वरुणं सरितां पतिम् ॥ वादित्रघोषैर्गीतैश्च गन्धमाल्यानुलेपनैः ॥ २९ ॥ श्वेतेनैव तु वस्त्रेण शिरोवेष्टं
तु कारयेत् ॥ आदाय ताम्रपात्रीं तु ब्रह्मघोषपुरःसरः ॥ ३० ॥ अप्रमाणं जलं गत्वा वरुणाय निवेदयेत् ॥ त्वं वरुण इति मंत्रेण जल
मध्ये प्रवाहयेत् ॥ ३१ ॥ यच्चान्यद्दस्त्रबीजानि तत्सर्वं मज्जयेज्जले ॥ तारयेच्च ततो धेनुं दक्षिणाया उदग्व्रजेत् ॥ ३२ ॥ गोशिरोवेष्टनं
कुर्यात्सति वस्त्रे तु बुद्धिमान् ॥ लांगूलस्याग्रमादाय अवतीर्य ततो जलम् ॥ ३३ ॥ ज्ञातिभिः सहितः कर्ता सभार्यश्चावगाहयेत् ॥
ततोऽवतीर्य सलिलाद्दत्त्वा गां ब्राह्मणाय ताम् ॥ शक्त्या च दक्षिणां दद्याद्देवं विप्रान्विसर्जयेत् ॥ ३४ ॥ सामान्यं सर्वभूतेभ्यो मया दत्तमिदं
जलम् ॥ एवं जलाञ्जलिं क्षिप्त्वा पूजयेज्जलमातरः ॥ ३५ ॥ तोष्याः कर्मकराः सर्वे कुद्दालानि च पूजयेत् ॥ अवारितं तु दातव्यं मन्त्रपूर्वं दिन
त्रयम् ॥ ३६ ॥ एकाहं च यथाशक्त्या वित्तशाठ्यं न कारयेत् ॥ गोसहस्रं तदर्धं वा तस्यार्धमथवापि वा ॥ ३७ ॥ शतमर्धशतं वापि
पञ्चविंशतिमेव च ॥ तासामभावे गां दद्यात्सवत्सां कांस्यदोहनाम् ॥ ३८ ॥ एष राजंस्तडागस्य विधिस्ते परिकीर्तितः ॥ वापीकूपविधानं
च कथयामि तथा परम् ॥ ३९ ॥ कुण्डमंडपसंभारभूषणाच्छादनादिकम् ॥ तडागविधिवत्कुर्याद्यूपगोतरणादिकम् ॥ ४० ॥ अकालमूलान्कल
शान्वापीकोणेषु दापयेत् ॥ तीर्थोदकसमायुक्तान्सितचन्दनचर्चितान् ॥ ४१ ॥ सितवासोयुगच्छन्नान्समाल्यान्रत्नगर्भिणः ॥ श्रपयित्वा चरुं

तत्र यावन्मात्रो यथाविधि ॥ ४२ ॥ चतस्र आहुतीर्दद्याद्भूर्भुवः स्वरिति क्रमात् ॥ ग्रहहोमं प्रकुर्वीत शांतिपुष्टिविवर्द्धनम् ॥ ४३ ॥ वरुणाय
बलिं दद्याल्लोकपालेभ्य एव च ॥ वारुणानि च सूक्तानि पठेयुर्द्विजसत्तमाः ॥ ४४ ॥ वेदीमध्ये मंडलं च पद्ममत्र प्रशस्यते ॥ तन्मध्ये पूजये
च्छंभुं ब्रह्माणं केशवं तथा ॥ ४५ ॥ मत्स्यकमठमण्डूकान्वेद्या मध्येऽधिवासयेत् ॥ मित्रमित्रोऽसि भूतानां धनदो धनकांक्षिणाम् ॥ ४६ ॥ वैद्यो
रोगाभिभूतानां शरण्यः शरणार्थिनाम् ॥ अनेनैव हि मंत्रेण वरुणाय विसर्जयेत् ॥ ४७ ॥ आदौ चावाहयेद्देवमनेनैव विशेषतः ॥ नमस्ते विश्व
गुप्ताय नमो विष्णो अपांपते ॥ ४८ ॥ सान्निध्यं कुरु देवेश समुद्रे यद्धदत्र वै ॥ ततस्तु दक्षिणा देया ब्राह्मणानां नराधिप ॥ ४९ ॥ गौः स्थाप
काय दातव्या भोजनं[1] चानिवारितम् ॥ सर्वेषामेवदातव्यमेष पौराणिको विधिः ॥ ५० ॥ शराया आगतं तोयं सामुद्रं प्रथमं स्मृतम् ॥ निपाने
वा तडागे वा संस्थितं तद्भवेच्छुचि ॥ ५१ ॥ वापीकूपतडागे वा स्थितं तु प्रथमं जलम् ॥ अपेयं तु भवेत्सर्वं तज्जलं सूतिकासमम् ॥ ५२ ॥
समुद्रोऽपि हि कौंतेय देवयोनिरपांपतिः ॥ कुशाग्रेणापि रभसा न स्पृष्टव्यस्त्वसंस्कृतः ॥ ५३ ॥ अग्निश्चतेजो मृडयाथ देहे रेतोधाविष्णुर
मृतस्य नाभिः ॥ एवं ब्रुवन्पांडव सत्यवाक्यं ततोवगाहेत पतिं नदीनाम् ॥ ५४ ॥ वैष्णवे मासि संप्राप्ते नक्षत्रे वारुणे तथा ॥ अर्घ्यं प्रदद्याद्भक्त्या
तु तस्मिन्काले महोदधेः ॥ ५५ ॥ स्नात्वा तु विधिवन्मंत्रैः सागरे तु समाहितः ॥ फलमूलाक्षतैर्भक्ष्यैस्तथार्घ्यं संप्रकल्पयेत् ॥ ५६ ॥ अपि
जन्म सहस्रं तु यत्पापं कुरुते नरः ॥ मुच्यते सर्वपापेभ्यः स्नात्वा तु लवणांभसि ॥ ५७ ॥ विधिज्ञेन तु कर्तव्यं ब्राह्मणेन यथाविधि ॥ कर्ता
कारयिता चैव उभौ तु स्वर्गगामिनौ ॥ ५८ ॥ विधिं त्वेनमजानानो यः कुर्यादर्थमोहितः ॥ कर्ता कारयिता चैव उभौ नरकगामिनौ ॥ ५९ ॥
यो न कारयते शांतिं तडागाद्येषु कर्मसु ॥ तस्य तन्निष्फलं सर्वमुप्तं बीजमिवोषरे ॥ ६० ॥ सर्वरत्नमयं दिव्यं चन्द्रार्कसदृशप्रभम् ॥ विमानं
तेजसा युक्तमारोहेत्पुण्यकर्मकृत् ॥ ६१ ॥ कश्चित्पिबति तत्तोयं निपानस्थं ततोऽञ्जलिम् ॥ ब्राह्मणो वा यतिर्गौर्वा येन कर्ता न सीदति ॥६२॥
उत्सृष्टे कृतकृत्यस्तु सुहृत्कुर्यान्महोत्सवम् ॥ महाभोज्यं महोत्सर्गं यजमानो दिनाष्टकम् ॥ ६३ ॥ कारकाः कर्मणो वापि सूत्रधारादयो नराः ॥
इष्टापूर्तेन धर्मेण तेऽपि स्वर्गं प्रयांति हि ॥ ६४ ॥ खन्यमाने महीभागे प्राणिनो ये क्षयं गताः ॥ चित्रे वा देवकूटार्थे ते सर्वे त्रिदिवं गताः ॥
॥ ६५ ॥ धेनोस्तु रोमकूपाणि यावन्तीह नरोत्तम ॥ तावद्वर्षसहस्राणि वर्षकोटिशतानि च ॥ ६६ ॥ कोटिर्युगसहस्राणां स्वर्गे तिष्ठेत्तडागकृत् ॥

---

१ भेषजम्–इ० पा० ।

चेत्तस्य पितरः केचिन्नरकं समुपागताः ॥ ६७ ॥ तांस्तु तारयते सर्वानात्मानं च महीपते ॥ आस्फोटयंति पितरो वल्गंति प्रपितामहाः ॥ ६८ ॥
अपि नः स कुले जातो यस्तडागं करिष्यति ॥ सर्वस्वेनापि कौंतेय भूमिष्ठमुदकं कुरु ॥६९॥ कुलानि तारयेत्सप्त यत्र गौर्वितृषीभवेत् ॥ एवं वर्ष
शतेनापि कृत्तिका विहरीवने॥७०॥ मासं चेतागृहे कोटिक्षणध्वंसिधनस्य हि ॥ तडागं देवभवनं वापीवृक्षोघनच्छदः॥७१॥चतुर्थकं फलं प्राप्तं कारितेऽ
स्मिंश्चतुष्टये ॥ यथा मातुः समाचष्टे पुत्रः शीलं स्वकैर्गुणैः॥७२॥तथा स्वादेन च जलं कर्तुः सर्वं शुभाशुभम्॥अतः शुभागतं द्रव्यं तडागादिषु लापयेत्
॥७३॥ धन्यस्य पांथाः संप्राप्य तडागं वृक्षमंडितम् ॥ पीत्वापः पादपतले विश्रमंति रमंति च ॥७४॥ मारुतोद्धूतवीच्यग्रैः करैः कमलमंडितम् ॥
अभ्यागताय सुधिया तडागाद्यं प्रकल्पितम् ॥ ७५ ॥ सामान्यं सर्वभूतेभ्यो येन भूमिगतं जलम् ॥ तारितं कारितं तेन सुपुत्रेण कुलद्वयम् ॥ ७६ ॥
मूर्तं स्वभावतः सिद्धमिष्टं मन्त्रप्रदर्शितम् ॥ इष्टापूर्ते कृते राजन्कृतकृत्यः पुमान्भवेत् ॥ ७७ ॥ उन्नता वा थ निम्ना वा कीर्तिर्येन प्रकाशिता ॥
तेन त्रैलोक्य चन्द्रेण जननी पार्थ पुत्रिणी ॥७८॥ त्रितयं निम्नतां नेयं त्रितयं चोन्नतिं पराम् ॥ तडागमथ यो भूमौ देव देवालयंकृती ॥७९॥
यः कारयति लोकेऽस्मिन्कीर्तिस्तस्यामला भवेत् ॥ स जीवति स एवैकः स भवेदजरामरः ॥ ८० ॥ उपेतानामपि दिवं स निबन्धविधायिनाम् ॥
आस्त एव निरातंकं तस्य कीर्तिमयं वपुः ॥ ८१ ॥ तावत्स्वर्गे स रमते यावत्कीर्तिरनश्वरा ॥ तावत्त्विलायामध्यास्ते सुकृती वैबुधं पदम् ॥ ८२ ॥
हंसास्यक्षिप्तनीलयग्रं पद्मिनीखण्डमण्डितम् ॥ पीयमानं महाग्रामैर्धन्याः पश्यंति स्वं सरः ॥ ८३ ॥ घटैरञ्जलिभिर्वक्रैर्यस्य वाटीपुटैर्जलम् ॥
पिबंति जंतवः सर्वे किमन्यत्तस्य वर्ण्यते॥ ८४ ॥ तडांग नगरोपांते धन्यस्य किल जायते ॥ उभयोरर्थसंसिद्धिर्दृष्टा कर्तुर्जनस्य च ॥ ८५ ॥ येषां
देवकुलं तत्तु निष्पद्येत सरस्तटे ॥ अभीष्टदेवतायुक्तं तेषां पार्थ किमुच्यते ॥ ८६ ॥ न भवंतीष्टिका यावद्द्रोणी वा भूमिसन्निभा ॥ स्वर्गे महीयते
तावत्कारको देववेश्मनः ॥ ८७ ॥ भोग्यस्थाने कृतः कूपः सुस्वादुसलिलस्तथा ॥ दृढरज्जुसमायुक्तः पुनात्यासप्तमं कुलम् ॥ ८८ ॥ यस्य
स्वादुजलं कूपे पिबंति सततं जनाः ॥ किं तेन न कृतं पुण्यं सर्वसत्त्वोपकारिणा ॥८९॥ यः प्रासादान्रचयति शुभान्देवतानां तडागे कीर्तिस्तस्य
भ्रमति विपुला वंशमार्गानुयाता ॥ दिव्यान्भोगान्भजति च सदा कारकश्चाप्रमेयान्भुक्त्वा सौख्यं पुनरपि च भवेच्चक्रवर्ती पृथिव्याम् ॥ ९० ॥
तेषां तडागानि बहूदकानि कूपाश्च यूपाश्च प्रतिश्रयाश्च ॥ अन्नप्रदानं मधुरा च वाणी यमस्य ते निर्वचनीभवंति ॥ ९१ ॥ ॥ इति श्रीभविष्ये
महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे वापीकूपतडागोत्सर्गविधिवर्णनं नाम सप्तविंशत्युत्तरशततमोऽध्यायः ॥ १२७ ॥ ॥ छ ॥ ॥

॥ युधिष्ठिर उवाच ॥ ॥ वृक्षारोपणमाहात्म्यं वद देवकिनन्दन ॥ उद्यापनविधिं चैव सरहस्यं समासतः ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ वरं
भूमिरुहाः पञ्च नगकाष्ठरुहा दश ॥ पत्रैः पुष्पैः फलैर्मूलैः कुर्वंति पितृतर्पणम् ॥ २ ॥ बहुभिर्मृतकिज्ञातैः पुत्रैर्धर्मार्थवर्जितैः ॥ वरमेकं पथितरुर्यत्र
विश्रमते जनः ॥३॥ प्राणिनः प्रीणयंति स्म च्छायावल्कलपल्लवैः ॥ घनच्छदाः सुतरवः पुष्पैर्देवान्फलैः पितॄन् ॥४॥ पुष्पपत्रफलच्छायामूलव
ल्कलदारुभिः ॥ धन्या महीरुहा येषां विफला यांति नार्थिनः ॥ ५ ॥ पुत्राः संवत्सरस्यांते श्राद्धं कुर्वंति वा नवा ॥ प्रत्यहं पादपाः पुष्टिं
श्रेयोऽर्थं जनयंति हि ॥ ६ ॥ न तत्करोत्यग्निहोत्रं सुखं यद्योषितः सुतः ॥ यत्करोति घनच्छायः पादपः पथि रोपितः ॥ ७ ॥ सच्छाया च
सपुष्पा च सफला वृक्षवाटिका ॥ कुलयोषेव भवति भर्तृलोकद्वयानुगा ॥ ८ ॥ अशोकफलावकरा तिलकालंकृतानना ॥ सर्वोपभोग
वेश्येव वाटिका रसिका सदा ॥ ९ ॥ सदा स तीर्थीभवति सदा दानं प्रयच्छति ॥ सदा यज्ञं स यजते यो रोपयति पादपम् ॥
॥ १० ॥ अश्वत्थमेकं पिचुमंदमेकं न्यग्रोधमेकं दश चिञ्चिणीकान् ॥ कपित्थबिल्वामलकीत्रयं च पञ्चाम्रवापी नरकं न पश्येत् ॥ ११ ॥
पुष्पोपगंधाढ्यफलोपगन्धं यः पादपं स्पर्शयते द्विजाय ॥ स स्त्रीसमृद्धं बहुरत्नपूर्णं लभेद्विमानप्रतिमं गृहं वै ॥ १२ ॥ प्रतिश्रयाश्रान्त
समाश्रयत्वात्समीहितं तत्र फलं बुभुक्षोः ॥ अपत्यमेकं परलोकहेतोर्विमृश्यतां किं तरवो न रोपिताः ॥ १३ ॥ न खानिताः पुष्करिण्यो रोपि
ता न महीरुहाः ॥ मातुर्यौवनचौरेण तेन जातेन किं कृतम् ॥ १४ ॥ छायामन्यस्य कुर्वंति तिष्ठंति स्वयमातपे ॥ फलंति च परार्थेषु न स्वार्थेषु
महाद्रुमाः ॥ १५ ॥ अतः परं प्रवक्ष्यामि वृक्षस्योद्यापने विधिम् ॥ सर्वपापप्रशमनं सर्वकीर्तिविवर्द्धनम् ॥ १६ ॥ अपुत्रया पुरा पार्थ पार्वत्या
मन्दराचले ॥ अशोकः शोकशमनः पुत्रत्वे परिकल्पितः ॥ १७ ॥ जातकर्मादिकास्तस्य याः क्रियाः किल बुद्धिमन् ॥ चरकात्रिपुराणोक्तास्ताः
शृणुष्व युधिष्ठिर ॥ १८ ॥ ततो मूले घनदलो वल्गुच्छायांगपल्लवः ॥ शीतवातातपसहः संस्कार्यस्तरुणस्तरुः ॥ १९ ॥ स्त्रीनामकंटकीकुब्ज कीटवृ
श्चिककोटरः ॥ नोद्याप्यः पादपः पार्थ शिष्टानां यो न संमतः ॥ २० ॥ आलवाले सुविहिते शुभे बद्धचतुष्किके ॥ शोधयित्वा तमुद्देशं सुगुप्तं कार
येत्ततः ॥ २१ ॥ सदैवोद्यापनं पार्थ पादपानां प्रशस्यते ॥ शुभेऽह्नि विप्रकथिते ग्रहनक्षत्रसंयुते ॥ २२ ॥ पताकालंकृतं वृक्षं पूर्वेद्युरधिवासयेत् ॥
रक्तवस्त्रैः समाच्छाद्य रक्तसूत्रेण वेष्टयेत् ॥२३॥ पिष्टातकेनावकिरेत्सर्वौषध्या च पादपम् ॥ स्थापयेत्पूर्णकलशांश्चतुर्दिक्षु विचक्षणः ॥ २४ ॥ पल्लवा
लंकृतमुखान्सितचन्दनचर्चितान् ॥ सितवासोयुगच्छन्नान्सकलान्रत्नगर्भिणः ॥ २५ ॥ पताकालंकृताः सर्वे कार्यास्तत्सन्निधौ द्रुमाः ॥ मूलवि

न्यस्तकलशा रक्तसूत्रावगुण्ठिताः ॥ २६ ॥ रक्तपीतसिताच्छादैश्चर्चिताः सुमनोहरैः ॥ कलधौतमयान्यत्र फलानि दश पंच वा ॥ २७ ॥ ताम्र
पात्र्यां सबीजानि सरत्नान्यधिवासयेत् ॥ तूर्यमङ्गलघोषेण चतुर्दिक्षु क्षिपेद्बलिम् ॥ २८ ॥ इन्द्रादिलोकपालेभ्यो भूतेभ्यो मंत्रविद्गुरुः ॥ ततः
प्रभाते विमले कुंडं कृत्वा समेखलम् ॥ २९ ॥ ग्रहयज्ञविधानेन शांतिकर्म समारभेत् ॥ सुवर्णालंकृतान्कृत्वा ब्राह्मणान्वेदपारगान् ॥ ३० ॥ चतु
रोऽष्टौ यथाशक्त्या वासोभिरभिपूजयेत् ॥ तिलाज्येन च होमः स्यात्तुष्टिपुष्टिकरः सदा ॥ ३१ ॥ मातरं स्थापयित्वाग्रे पूजयेत्कुसुमाक्षतैः ॥
श्रपयित्वा चरुं सम्यक्पायसाद्यपरिप्लुतम् ॥ ३२ ॥ होमादौ जातकर्मादि गोदानं यावदेव तु ॥ पादपं स्नापयित्वा तु समंत्रैस्तीर्थवारिभिः॥३३॥
जातकं नामकरणमन्नप्राशनमेव च ॥ सुवर्णसूच्या कुर्वीत कर्णवेधं विधानवित् ॥ ३४ ॥ जातरूपक्षुरेणात्र चूडाकार्या यथाक्रमम् ॥ बध्नीया
न्मेखलां मौञ्जीं वासश्च परिधापयेत् ॥ ३५ ॥ यजमानस्ततः स्नातः शुक्लांबरधरः शुचिः ॥ पुष्पाञ्जलिः समभ्येत्य मंत्रमेतमुदीरयेत् ॥ ३६ ॥ ये
शाखिनः शिखरिणां शिरसा विभूषा ये नन्दनादिषु वनेषु कृतप्रतिष्ठाः ॥ ये कामदाः सुरनरोरगकिन्नराणां ते मे नतस्य दुरितार्तिहरा भवंतु
॥ ३७ ॥ एतैर्द्विजैर्विधिवरप्रहुतो हुताशः पश्यत्यसावहिमदीधितिरंबरस्थः ॥ त्वं वृक्ष पुत्रपरिकल्पनया वृतोऽसि कार्यं सदैव भवता मम पुत्रका
र्यम् ॥ ३८ ॥ इत्येवमुक्त्वा तं वृक्षं लालयित्वा पुनःपुनः ॥ घृतपात्रे स्ववदनं दृष्ट्वाशिषमुदीरयेत् ॥ ३९ ॥ अङ्गादङ्गात्संभवसि हृदयादभिजा
यसे ॥ आत्मा वै पुत्रनामासि स जीव शरदः शतम् ॥ ४० ॥ ब्राह्मणानां ततो देया दक्षिणा हृष्टमानसैः ॥ स्थापकाय शुभां धेनुं दत्त्वा कुर्यान्म
होत्सवम् ॥ ४१ ॥ दीनानाथजनानां च भोजनं चानिवारितम् ॥ इतरेषां प्रदातव्यं संतुष्टेन सुरासवम् ॥ ४२ ॥ ज्ञातिबन्धुजनैः सार्द्धं स्वयं
भुञ्जीत कामतः ॥ प्रेष्याः कर्मकराः सर्वे पूजनीयाः स्वशक्तितः ॥ ४३ ॥ य एवं कुरुते पार्थ वृक्षाणां महदुत्सवम् ॥ सर्वकामानवाप्नोति इहलोके
परत्र च ॥ ४४ ॥ पुत्रैर्विना शुभगतिर्न भवेन्नराणां दुष्पुत्रकैरिति तथोभयलोकनाशः ॥ एतद्विचार्य सुधिया परिपाल्य वृक्षान्पुत्राः पुराणविधिना
परिकल्पनीयाः ॥ ४५ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे वृक्षोद्यापनविधिवर्णनं नामाष्टाविंशत्युत्तरशततमोऽ
ध्यायः ॥ १२८ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ ये मानवास्त्रिदशमूर्तिनिकेतनानि कुर्वंति साधुजनदृष्टिमनोहराणि ॥ तेषां मृतेऽथ परमा
र्थमये शरीरे लोके परिभ्रमति कीर्तिमयं शरीरम् ॥ १ ॥ यः कारयेद्धारसिताभ्रगौरमुत्तुंगसौधधवलायतनं सुराणाम् ॥ चंद्रावदातभवने दिवि लब्ध
सौख्यो राज्यश्रियं स भुवि बोधयुतामुपैति ॥ २ ॥ ये कारयंति सुरसद्मसु देवतानामर्चाः सुवर्णरजतायसशैलताम्राः ॥ सामंतमौलिमणिरश्मिस

मर्चितास्ते सिंहासनेऽङ्गदकिरीटभृतोऽवभांति ॥ ३ ॥ ये मेरुमौलिसुरसंघकृताभिषेकाः पञ्चामृतैः सुरवरानभिषेचयंति ॥ ते दिव्यकल्पमभिधार्य
सुरेश्वरत्वं राज्याभिषेकमतुलं पुनराप्नुवंति ॥ ४ ॥ ये शैलराजमलयोद्भवचंदनेन सत्कुंकुमेन च सुराननुलेपयंति ॥ ते दिव्यगन्धपटवाससुगंधि
देहा नंदंति नंदनवनेषु सहाप्सरोभिः ॥ ५ ॥ गंधाढ्यजातिकमलोत्पलदिव्यपुष्पैर्देवान्नवैरनुदिनं ननु येऽर्चयंति ॥ पुष्पोत्तमैर्नरपतित्वमवाप्य
तेऽपि यास्यंति कुंदधवलामचिरेण सिद्धिम् ॥ ६ ॥ आमोदिभिर्हिमतुरुष्कसुगन्धधूपैर्ये मानवाः सुरवरानपि धूपयंति ॥ कर्पूरधारनिभगन्धवरा
भिरामे स्वर्गे विमानवति ते भवने रमंते ॥ ७ ॥ दोधूयते कनकदंडविराजितैश्च सच्चामरैर्धवलकुण्डलसुन्दरीभिः ॥ दिव्यांबरस्रगनुलेपनभूषि
ताङ्गं कृत्वा सुरेशभवनांबरवस्त्रपूजाम् ॥८॥ देदीप्यते दिनकरोज्ज्वलपद्मरागरत्नप्रभाच्छुरितहेममये:विमाने ॥ दिव्यांगनापरिवृतो नयनाभिरामः
प्रज्वाल्य दीपममलं भवने सुराणाम् ॥ ९ ॥ यो जागरं सुरवराभिमतो ददाति चैत्रोत्सवादिदिवसेष्वपि तूर्यनादैः ॥ वीणासुवेणुमधुरस्वरभाषि
णीभिः संगीयते च स कृशोदरकिन्नरीभिः ॥ १० ॥ कुर्वंति ये सदुपलेनधातुरागसंमार्जनं सुरवरायतनेऽनुरक्ताः ॥ मुक्ताकलापमपि कांचनभक्ति
चित्रैर्वैडूर्यकुट्टिमतले दिवि ते वसंति ॥ ११ ॥ दद्याच्च यः परमभक्तियुतः सुराणां घण्टावितानवरचामरमातपत्रम् ॥ केयूरहारमणिकुण्डलभूषि
तोसौ रत्नाधिपो वसति भूतलचक्रवर्ती ॥ १२ ॥ अभ्यर्चयेत्प्रतिवचः कुसुमैर्विचित्रैर्देवाधिदेवपरिसंस्तुतपादपद्मान् ॥ भक्त्या प्रहृष्टमनसः प्रणमंति
देवांस्ते भूर्भुवः स्वर्महिमाप्तफला भवंति ॥ १३ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे नामैकोनत्रिंशदुत्तरशतत
मोऽध्यायः ॥ १२९ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ भगवन्केन तपसा व्रतेन नियमेन:वा ॥ दानेत केन वा लोके प्रोज्ज्वलत्वं प्रजायते
॥ १ ॥ [1]अतितेजो महद्दीप्तं दीप्तांशुकिरणोज्ज्वलम् ॥ शरीरं जायते येन तन्मे वक्तुमथार्हसि ॥ २ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ मथुरायां पुरा पार्थ
पिङ्गलो नाम तापसः ॥ आगतः स च मे पत्न्या जाम्बवत्या प्रपूजितः ॥ ३ ॥ पृष्टश्च प्रश्नमेवैतं स चावोचद्यथातथम् ॥ तयापि मे समाख्यातं
तत्सर्वं ते वदाम्यहम् ॥ ४ ॥ यदायदा नृपश्रेष्ठ पुण्यकालः प्रपद्यते ॥ संक्रांतौ सूर्यग्रहणे चन्द्रपर्वणि वैधृतौ ॥ ५ ॥ उत्तरे त्वयने प्राप्ते दक्षिणे
विषुवे तथा ॥ एकादश्यां शुक्लपक्षे चतुर्दश्यां दिनक्षये ॥ ६ ॥ सप्तम्यामथ वाष्टम्यां स्नात्वा व्रतपरो नरः ॥ नारी वा भूमिदेवेभ्यः
प्रयच्छेत्प्रयतांगणे ॥ घृतकुंभेन दीपेन प्रज्वलंतं प्रदीपकम् ॥ ७ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ भूमिदेवा इति प्रोक्तं यत्त्वया मधुसूदन ॥

---

[1] अतितीव्रं महद्दिव्यम्–इ० पा० ।

किमेतत्कौतुकं मेऽस्ति संशयं छेत्तुमर्हसि ॥ ८ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ पुरा कृतयुगस्यादौ त्रिशंकुर्नाम पार्थिवः ॥ स स्वर्गं गन्तुकामोऽ
भूच्छरीरेण नरोत्तम ॥ ततश्चण्डालतां नीतो वशिष्ठेन महात्मना ॥ ९ ॥ त्रिशंकुः सर्वमाचख्यौ विश्वामित्राय धीमते ॥ सोऽपि मन्युवशाद्यज्ञं
चकाराहूय देवताः ॥ १० ॥ न ता हविः प्रत्यगृह्णंस्ततः क्रुद्धः कुशात्मजः ॥ विश्वामित्रस्तु कोपेन चकारान्यान्सुरोत्तमान् ॥ ११ ॥ शृंगाटका
न्नालिकेरान्पचनानानजौडकान् ॥ मेधारथदवार्ताकतारिकूष्माण्डकोद्रवान् ॥ १२ ॥ उष्ट्रान्मनुजदेवांश्च क्रोधान्मुनिरवासृजत् ॥ चकारान्यान्सप्त
ऋषीन्प्रतिमासं सुरोत्तमान् ॥ १३ ॥ ततः शक्रः समागम्य विश्वामित्रं प्रसाद्य वै ॥ सृष्टिं निवारयामास ये सृष्टास्ते तथापि च ॥ १४ ॥ मर्त्य
लोके च ते सर्वे देवा देवकुलेष्वथ ॥ मंत्रैर्निबद्धाः पिण्डीषु स्थिता मूर्तिभृतो यथा ॥१५॥ ब्रह्मा विष्णुस्तथा रुद्रो ये चान्ये देवतागणाः ॥ लोका
नामुपकाराय मर्त्यलोकमुपागताः ॥ १६ ॥ प्रतिमासु स्थिताः शश्वद्भोगान्भुञ्जंति शाश्वतान् ॥ वरप्रदाश्च भक्तानामिति ते गुह्यमीरितम् ॥ १७ ॥
तेभ्यः पुरस्ताद्दातव्यो दीप्यमानः प्रदीपकः ॥ सूर्याय रक्तवस्त्रेण पूर्णवर्तिं घृतैर्युताम् ॥ चतुःप्रस्थैः प्रज्वलन्तीं मंत्रेणानेन दापयेत् ॥ १८ ॥ "तद्वि
ष्णोः परमं पदं सदा पश्यंति सूरयः ॥ दिवीव चक्षुराततम्" ॥ १९ ॥ पीतवस्त्रेण कृष्णाय श्वेतवस्त्रेण शूलिने ॥ कौसुंभवस्त्रेणाढ्येन गौरीमुद्दिश्य
दापयेत् ॥२०॥ लाक्षारक्तेन दुर्गायै पूर्णवर्तिं प्रबोधयेत् ॥ नीलवस्त्रेण कामाय गणनाथाय खादिरैः ॥२१॥ नागेभ्यः कृष्णवस्त्रेण ग्रहेभ्य इषिका
युधाम् ॥ देवांगनापितृभ्यस्तु पितृवर्तिं प्रबोधयेत् ॥२२॥ विशेषं शृणु सूर्याय पूर्णवर्तिर्निगद्यते ॥ शिवायेश्वरवर्तीति भोगवर्तिर्जनार्दने ॥ २३ ॥
पद्मवर्तिर्विरिंचाय गौर्य्यै सौभाग्यवर्तिका ॥ नागेभ्यो नागवर्तीति ग्रहवर्तिर्युधिष्ठिर ॥ २४ ॥ नेत्रपट्टेन मधुना घृतेन मधुकुंडके ॥ अर्चिते चर्चिते
चैव ललितायै प्रबोधयेत् ॥ २५ ॥ मंत्रेणानेन राजेन्द्र तन्निशामय वैदिकम् ॥ २६ ॥ "अग्ने त्वां काम्यया गिरा तुभ्यं ता गिरसस्तु विश्वाः ॥
सुक्षितयः पृथक्पृथक् ॥ २७ ॥ अग्ने कामाय जेगिरे अग्निप्रियेषु धामसु ॥ कामो भूतस्य भव्यस्य सम्राडेको विराजति ताभ्यां नाम स्वाहा" ॥
॥ २८ ॥ एवमेतेन विधिना यः प्रयच्छति दीपकम् ॥ विस्तीर्णे विपुले पात्रे घृतकुम्भे नियोजितम् ॥ २९ ॥ यांति ते ब्रह्मसदनं विमानेनार्कव
र्चसा ॥ तिष्ठंति द्योतमानास्ते यावदाभूतसंप्लवम् ॥ ३० ॥ सदीपे तु यथा देशे चक्षूंषि बलवन्ति हि ॥ तथा दीपस्य दातारो भवंति सफलेक्षणाः
॥ ३१ ॥ यथैवोर्ध्वं गतिर्नित्यं राजन्दीपशिखासु वै ॥ दीपदातुस्तथैवोर्ध्वं गतिर्भवति शोभना ॥ ३२ ॥ घृतेन दीपो दातव्यो राजंस्तैलेन वा
पुनः ॥ वसामज्जादिभिर्देयो न तु दीपः कथञ्चन ॥ ३३ ॥ दीपस्तैलेन कर्तव्यो न तु कर्म विजानता ॥ निर्वापणं च दीपस्य हिंसनं च विगर्हि

तम् ॥ ३४ ॥ यः कुर्यात्कर्मणा तेन स्यादसौ पुष्पितेक्षणः ॥ दीपहर्ता भवत्यंधः काणो निर्वापको भवेत् ॥ ३५ ॥ पद्मसूत्रोद्भवां वर्तिं गंधतैलेन दीपिताम् ॥ विरोगः सुभगश्चैव दत्त्वा भवति मानवः ॥ ३६ ॥ प्रज्वाल्य देवदेवस्य कर्पूरेण तु दीपकम् ॥ अश्वमेधमवाप्नोति कुलं चैवसमुद्धरेत् ॥ ३७ ॥ एतन्मयोक्तं तव दीपदानफलं समग्रं कुरुवंशचन्द्र ॥ श्रुत्वा यथावत्सततं हि देया दीपास्त्वया विप्रसुरालयेषु ॥ ३८ ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनम् ॥ दीपदानाल्ललितया यदवाप्तं पुराऽनघ ॥ ३९ ॥ आसीच्चित्ररथो नाम विदर्भेषु महीपतिः ॥ तस्य पुत्रशतं राज्ञो जज्ञे पञ्चदशोत्तरम् ॥ ४० ॥ एकैव कन्या तस्यासील्ललितानाम नामतः ॥ सर्वलक्षणसम्पन्ना रूपेणाप्रतिमा भुवि ॥ ४१ ॥ तां ददौ काशिराजाय चार्वंगीं चारुधर्मणे ॥ शतान्यन्यानि भार्याणां त्रीण्यासंश्चारुधर्मणः ॥ ४२ ॥ तासां मध्येऽग्रमहिषी ललिता साप्यथाभवत् ॥ ४३ ॥ विष्णोरायतने सा तु सहस्रं परिदीपकान् ॥ प्रज्वालयन्त्यनुदिनं दिवारात्रमनिर्वृतम् ॥ ४४ ॥ तामिस्रमाश्वयुक्पक्षं शुक्लपक्षं च कार्त्तिकम् ॥ तस्याः प्रज्वलितो दीप उच्चस्थानकृतः शुभः ॥ ४५ ॥ तस्मिन्काले तथा नित्यं ब्राह्मणावसथे च सा ॥ व्यग्रा भवति सायाह्ने दीपप्रेषणतत्परा ॥ ४६ ॥ चतुष्पथेषु रथ्यासु देवतायतनेषु च ॥ चैत्यवृक्षेषु गोष्ठेषु पर्वतानां च मूर्द्धसु ॥ ४७ ॥ पुलिनेषु नदीनां च कूपमूलेषु पांडव ॥ तां सपत्न्योऽथ संगम्य पप्रच्छुरिदमादृताः ॥ ४८ ॥ ललिते वद भद्रं ते ललितं वचनं तथा ॥ न तथा बलिपुष्पेषु न तथा द्विजपूजने ॥ ४९ ॥ भवत्याः सुमहान्यत्नो दीपप्रज्वालने यथा ॥ तदेतत्कथयास्माकं ललिते कौतुकं परम् ॥ ५० ॥ मन्यामहे त्वयावश्यं दीपदानफलं श्रुतम् ॥ ॥ ललितोवाच ॥ ॥ नाहं मत्सरिणी भद्रा न च रागादिदूषिता ॥ ५१ ॥ एकपत्याश्रिताः साध्व्यो भवत्यो मम मानदाः ॥ अपृथग्धर्मचरणाः शृण्वन्तु गदितं मम ॥ ५२ ॥ मयैतद्दीपदानस्य यथेष्टं भुज्यते फलम् ॥ हिरण्यदयिता भार्या शैलराजसुता वरा ॥ ५३ ॥ उमादेवीति मद्रेषु देविका सा सरिद्वरा ॥ नराणामनुकम्पार्थं ब्रह्मणा ह्यवतारिता ॥ श्रुता किं भवतीभिः सा देविका पापनाशिनी ॥ ५४ ॥ तस्यां स्नात्वा सकृन्नद्यां गाणपत्यमवाप्नुयात् ॥ तस्यामथ नृसिंहाख्यं तीर्थं कल्मषनाशनम् ॥ हरिणा नृसिंहवपुषा यत्र स्नानं कृतं पुरा ॥ ५५ ॥ सौवीरराजस्य पुरा मैत्रेयोभूत्पुरोहितः ॥ तेन चायतनं विष्णोः कारितं देविकातटे ॥ ५६ ॥ अहन्यहनि शुश्रूषां पुष्पधूपानुलेपनैः ॥ दीपदानादिभिश्चैव चक्रे तत्र स वै द्विजः ॥ ५७ ॥ कार्त्तिक्यां दीपकस्तत्र प्रदत्तस्तेन चैकदा ॥ आसीन्निर्वाणभूयिष्ठो देवार्चासु रतो निशि ॥ ५८ ॥

---

१ कृपया—इ० पा० ।

देवतायतनेऽवात्सं तत्राहमपि मूषिका ॥ प्रदीपवर्तिहरणे कृतबुद्धिर्वरानना: ॥ ५९ ॥ गृहीताथ मया वर्तिर्वृकदंशो ररास च ॥ नष्टा चाहं ततस्तस्य मार्जारस्य भयातुरा ॥ ६० ॥ वक्रप्रांतेन पश्यंत्या स दीपः प्रेरितो मया ॥ जज्वाल पूर्ववद्दीप्त्या तस्मिन्नायतने पुनः ॥ ६१ ॥ मृताहं च पुनर्जाता वैदर्भे राजकन्यका ॥ जातिस्मरा महीपस्य महिषी चारुधर्मणः ॥ ६२ ॥ एष प्रभावो दीपस्य कार्त्तिके मासि शोभनः ॥ दत्तस्यायतने विष्णोर्यस्येयं व्युष्टिरुत्तमा ॥ ६३ ॥ असंकल्पितमध्यस्य प्रेरणं यन्मया कृतम् ॥ केशवे बालदीपस्य तस्येदं भुज्यते फलम् ॥ ६४ ॥ एतस्मात्कारणाद्दीपानहमेतानहर्निशम् ॥ प्रयच्छामि हरेर्गेहे जातमस्य महाफलम् ॥ ६५ ॥ एवमुक्त्वा सपत्नीः सा दीपदानपरायणा ॥ बभूव देवदेवस्य केशवस्य गृहे सदा ॥ ६६ ॥ ततः कालेन महता सह राज्ञा महात्मना ॥ विष्णुलोकमनुप्राप्ता पंचत्वं प्राप्य मानदा ॥ ६७ ॥ तं लोकमासाद्य नृपेण सार्द्धं सा राजपत्नी कमलाभनेत्रा ॥ रेमे महीपाल मुदा समेता दीपप्रदानात्सकलार्तिहीना ॥ ६८ ॥ दीपप्रदानमपि पुण्यतरं वदंति विप्राग्निगोसुरकुलैकगृहांगणेषु ॥ तद्दानदीप्तवपुषाथ पथोंधकारे गच्छन्नरः पतति न स्खलते कदाचित् ॥ ६९ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे दीपदानविधिवर्णनं नाम त्रिंशदुत्तरशततमोऽध्यायः ॥ १३० ॥ ॥ छ ॥

॥ श्रीकृष्ण उवाच ॥

॥ कार्त्तिक्यामथ वा माघ्यामयमेव युधिष्ठिर ॥ १ ॥ चैत्र्यामथ तृतीयायां वैशाख्यां द्वादशेऽह्नि वा ॥ खंडनीलं शंखपादं सपौंड्रं धौतपुष्पकम् ॥ २ ॥ गोभिश्चतुर्भिः सहितं सृजेच्चैव विधिं शृणु ॥ यदुवाच पुरा गर्गो गोकुलेऽनघ पांडव ॥ ३ ॥ तत्तेहं च प्रवक्ष्यामि विधिं गर्गप्रचोदितम् ॥ मातरं स्थापयित्वाग्रे पूजयेत्कुसुमाक्षतैः ॥ ४ ॥ मातृश्राद्धं ततः कुर्यात्सदाभ्युदयकारकम् ॥ अकालमूलं कलशमश्वत्थदलशोभितम् ॥ ५ ॥ तत्रविद्वाञ्जपित्वा तु स्थापयेद्रुद्रदेवताम् ॥ सुसमिद्धं ततः कृत्वा वह्निमंत्रपुरःसरम् ॥ ६ ॥ अथैनं जुहुयात्षड्भिः पृथगाहुतिसंज्ञितैः ॥ पौष्यामंत्रैस्ततः पश्चाद्धुत्वा वह्निं यथाविधि ॥ ७ ॥ एकवर्णं द्विवर्णं वा रोहितं श्वेतमेव वा ॥ जीवद्वत्सपयस्विन्याः पुत्रं सर्वांगसुन्दरम् ॥ ८ ॥ चतस्रो वत्सतर्यश्च ताभिः सार्धमलंकृतम् ॥ तासां कर्णे जपेद्विप्रः पतिं वो बलिनं शुभम् ॥ ९ ॥ समितास्तेन सहिताः क्रीडध्वं हृष्टमानसाः ॥ ततो वामे त्रिशूलं च दक्षिणे चक्रमालिखेत् ॥ १० ॥ अंकितं शंखचक्राभ्यां वर्षितं कुसुमादिना ॥ पुष्पमालाकृतग्रीवं सितवस्त्रैश्च च्छादितम् ॥ ११ ॥ विमुंचेद्वत्सकाभिश्च नीलाभिर्बलिनं वृषम् ॥ देवालये गोकुले वा नदीनां संगमेऽथ वा ॥ १२ ॥ इत्युक्तं गर्गमुनिना विधानं वृषमोक्षणे ॥ स्वेच्छाविहारिणं दृप्तं

गर्जंतं सुन्दरं गवाम् ॥ १३ ॥ ककुद्मिनं पतिंया धन्‍ ये विमुञ्चन्ति गोवृषम् ॥ फलं च[1] तस्य वक्ष्यामि ब्रुवतो मे निबोध तत् ॥ १४ ॥
वृषोत्सर्गं पुनात्येव दशातीतान्दशापरान् ॥ यत्किंचित्स्पृशते तोयं समुत्तीर्य जलान्महीम् ॥ १५ ॥ वृषोत्सृष्टं पितृणां तु तदक्षयमुदाहृतम् ॥
यैश्च यैश्च स्पृशेत्तोयं लांगूलादिभिरंततः ॥ १६ ॥ सर्वं तदक्षयं तस्य पितृणां नात्र संशयः ॥ शृंगैः खुरैर्वा यद्भूमिमुल्लिखत्यनिशं वृषः ॥ १७ ॥
मधुकुल्याः पितुस्तस्य अक्षयास्ता भवंति वै ॥ सहस्रतलमात्रेण तडागो न यथाश्रुति ॥ १८ ॥ पितृणां या भवेत्तृप्तिस्तां वृषस्त्वतिरिच्यते ॥
यो ददाति तिलैर्मिश्रांस्तिलान्वा श्राद्धकर्मणि ॥ मधु वा नीलखंडं वा अक्षयं सर्वमेव तत् ॥ १९ ॥ एष्टव्या बहवः पुत्रायद्येकोऽपि गयां
व्रजेत् ॥ यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत् ॥ २० ॥ न करोति वृषोत्सर्गं सुतीर्थे वा जलाञ्जलिम् ॥ न प्रयच्छति यः पुत्रः पितुरुच्चार
एव सः ॥ २१ ॥ यद्भूमिमालिखति शृङ्गखुरैः प्रहृष्टो यद्वा करोति प्रतिमल्लवृषान्निरीक्ष्य ॥ खण्डं समस्तमपि तस्य विवाहकर्तुः संतोषमावहति
शक्रसभागतस्य ॥ २२ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे वृषोत्सर्गविधिवर्णनं नामैकत्रिंशदुत्तरशततमोऽ
ध्यायः ॥ १३१ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ किमर्थं फाल्गुनस्यांते पौर्णमास्यां जनार्दन ॥ उत्सवो जायते लोके ग्रामेग्रामे पुरे
पुरे ॥ १ ॥ किमर्थं शिशवस्तस्यां गेहेगेहेऽतिवादिनः ॥ होलिका दीप्यते कस्मात्फाल्गुनांते किमुच्यते ॥ २ ॥ अडाडेति च का
संज्ञा शीतोष्णेति किमुच्यते ॥ को ह्यस्यां पूज्यते देवः केनेयमवतारिता ॥ किमस्यां क्रियते कृष्ण एतद्विस्तरतो वद ॥ ३ ॥
॥ ॥ श्रीकृष्ण उवाच ॥ ॥ आसीत्कृतयुगे पार्थ रघुर्नाम नराधिपः ॥ शूरः सर्वगुणोपतः प्रियवादी बहुश्रुतः ॥ ४ ॥ स सर्वां पृथिवीं
जित्वा वशीकृत्य नराधिपान् ॥ धर्मतः पालयामास प्रजाः पुत्रानिवौरसान् ॥ ५ ॥ न दुर्भिक्षं न च व्याधिर्नाकालमरणं तथा[2] ॥
नाधर्मरुचयः पौरास्तस्मिन्[3]छांसति पार्थिव ॥ ६ ॥ तस्यैवं शासतो राज्यं क्षात्रधर्मरतस्य वै ॥ पौराः सर्वे समागम्य पाहिपाहीत्यथाब्रुवन् ॥ ७ ॥
॥ पौरा ऊचुः ॥ अस्माकं हि गृहे काचिड्ढौंढा नामेति राक्षसी ॥ दिवा रात्रौ समागम्य बालान्पीडयते बलात् ॥८॥ रक्षया कंडकेनापि भेषजैर्वा न
राधिप ॥ मंत्रज्ञैः परमाचार्यैः सा नियंतुं न शक्यते ॥ ९ ॥ पौराणां वचनं श्रुत्वा रघुर्विस्मयमागतः ॥ विस्मयाविष्टहृदयः पुरोहितमथा
ब्रवीत् ॥ १० ॥ ॥ रघुरुवाच ॥ ॥ ढौंढेति राक्षसी केयं किं[4]प्रभावा द्विजोत्तम ॥ कथमेषा नियंतव्या मया दुष्कृतकारिणी ॥ ११ ॥ रक्षण[illegible]

---

[1] वृषस्य–इ० पा० । [2] नृणाम्–इ० पा० । [3] वसति–इ० पा० । [4] प्रख्याता–इ० पा० ।

च्यते राजा पृथिवीपालनात्पतिः ॥ अरक्षमाणः पृथिवीं राजा भवति किल्बिषी ॥ १२ ॥ वशिष्ठ उवाच ॥ शृणु राजन्परं गुह्यं यन्नाख्यातं मया
क्वचित् ॥ ढौंढा नामेति विख्याता राक्षसी मालिनः सुता ॥ १३ ॥ तया चाराधितः शंभुरुग्रेण[1] तपसा पुरा ॥ प्रीतस्तामाह भगवान्वरं वरय
सुव्रते ॥ १४ ॥ यत्ते मनोऽभिलषितं तद्ददाम्यविचारितम् ॥ ढौंढा प्राह महादेवं यदि तुष्टः स्वयं मम ॥ १५ ॥ न च वध्यां सुरादीनां मनुजानां
च शंकर ॥ मां कुरु त्वं त्रिलोकेश शस्त्रास्त्राणां तथैव च ॥ १६ ॥ शीतोष्णवर्षासमये दिवा रात्रौ बहिर्गृहे ॥ अभयं सर्वदा मे स्यात्त्वत्प्रसादा
न्महेश्वर ॥ १७ ॥ शंकर उवाच ॥ एवमस्त्वित्यथोक्त्वा तां पुनः प्रोवाच शूलभृत् ॥ उन्मत्तेभ्यः शिशुभ्यश्च भयं ते संभविष्यति ॥ ऋतावृतौ
महाभागे मा व्यथां हृदये कृथाः ॥ १८ ॥ एवं दत्वा वरं तस्यै भगवान्भगनेत्रहा ॥ स्वप्ने लब्धो यथार्थार्थस्तत्रैवांतर्हितो भवत् ॥ १९ ॥ एवं
लब्धवरा सा तु राक्षसी कामरूपिणी ॥ नित्यं पीडयते बालान्संस्मृत्य हरभाषितम् ॥२०॥ अडाडयेति गृह्णाति सिद्धमंत्रं कुटुंबिनी ॥ गृहेषु तेन
सा लोके ह्यडाडेत्यभिधीयते ॥ २१ ॥ एतत्ते सर्वमाख्यातं ढौंढायाश्चरितं मया ॥ सांप्रतं कथयिष्यामि येनोपायेन हन्यते ॥२२॥ अद्य पञ्चदशी
शुक्ला फाल्गुनस्य नराधिप ॥ शीतकालो विनिष्क्रांतः प्रातर्ग्रीष्मो भविष्यति ॥ २३ ॥ अभयप्रदानं लोकानां दीयतां पुरुषोत्तम ॥ यथाद्याशं
किता लोका रमंति च हसंति च ॥ २४ ॥ दारुजानि च खंडानि गृहीत्वा समरोत्सुकाः ॥ योधा इव विनिर्यांतु शिशवः संप्रहर्षिताः ॥ २५ ॥
संचयं शुष्ककाष्ठानामुपलानां च कारयेत् ॥ तत्राग्निं विधिवद्धुत्वा रक्षोघ्नैर्मन्त्रविस्तरैः ॥ २६ ॥ ततः किलकिलाशब्दैस्तालशब्दैर्मनोहरैः ॥
तमग्निं त्रिः परिक्रम्य गायंतु च हसंतु च ॥ जल्पंतु[2] स्वेच्छया लोका निःशंका यस्य यन्मतम् ॥ २७ ॥ तेन शब्देन सा पापा होमेन च निरा
कृता ॥ अदृष्टघातैर्डिंभानां राक्षसी क्षयमेष्यति ॥२८॥ श्रीकृष्ण उवाच ॥ तस्यर्षेर्वचनं श्रुत्वा स नृपः पांडुनंदन॥ सर्वं चकार विधिवदुक्तं तेन च
धीमता ॥२९॥ गता सा राक्षसी नाशं तेन चोग्रेण कर्मणा ॥ ततः प्रभृति लोकेऽस्मिन्नडाडा ख्यातिमागता॥३०॥ सर्वदुष्टापहो होमः सर्वरोगोप
शांतिदः ॥ क्रियतेऽस्यां द्विजैः पार्थ तेन सा होलिका मता ॥ ३१ ॥ सर्वसारातिविश्वेयं पूर्वमासीद्युधिष्ठिर ॥ सारत्वात्फल्गुरित्येषा परमानंददा
यिनी ॥ ३२ ॥ अस्यां निशागमे पार्थ संरक्ष्याः शिशवो गृहे ॥ गोमयेनोपसंलिप्ते सचतुष्के गृहांगणे ॥ ३३ ॥ आकारयेच्छिशुप्रायान्खड्गव्यग्र
करान्नरान् ॥ ते काष्ठखण्डैः संस्पृश्य गीतैर्हास्यकरैः शिशून् ॥ रक्षंति तेषां दातव्यं गुडं पक्वान्नमेव च ॥३४॥ एवं ढौंढितमात्रस्य स दोषःप्रशमं

---

[1] रौद्रेण--इ० पा० । [2] वल्गन्तु--इ० पा० ।

व्रजेत् ॥ बालानां रक्षणं कार्यं तस्मात्तस्मिन्निशागमे ॥ ३५ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ प्रभाते किञ्जनैर्देव कर्तव्यं सुखमीप्सुभिः ॥ प्रवृत्ते माधवे मासि प्रतिपद्भास्करोदये ॥ ३६ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ कृत्वा चावश्यकार्याणि संतर्प्य पितृदेवताः ॥ वंदयेद्धोलिकाभूतिं सर्वदुष्टोपशांतये ॥ ३७ ॥ मंडिते चार्चिते चैव उपलिप्ते गृहाजिरे ॥ चतुष्कं कारयेच्छ्रेष्ठं वर्णकैश्चाक्षतैः शुभैः ॥ ३८ ॥ तन्मध्ये स्थापयेत्पीठं शुक्लवस्त्रोत्तरच्छदम् ॥ अग्रतः पूर्णकलशं स्थापयेत्पल्लवैर्युतम् ॥ ३९ ॥ साक्षतं सहिरण्यं च सितचन्दनचर्चितम् ॥ कलशस्याग्रतो देया उपानहवरांशुकाः॥४०॥ आसने चोपविष्टस्य ब्रह्मघोषेण भारत ॥ [1]चर्चयेच्चन्दनं नारी अव्यंगांगा सुलक्षणा ॥ ४१ ॥ पद्मरागोत्तरपटा श्रेष्ठांशुकविभूषिता ॥ वसुधारां शिरोग्रे च दधिदूर्वाक्षतान्विताम् ॥ ४२ ॥ [2]चर्चापयित्वा श्रीखंडमायुरारोग्यवृद्धये ॥ पश्चाच्च प्राशयेद्विद्वांश्चूतपुष्पं सचंदनम् ॥ ४३ ॥ मनोभवस्य सा पूजा ऋषिभिः संप्रदर्शिता ॥ ये पिबंति वसंतादौ चूतपुष्पं सचन्दनम् ॥ ४४ ॥ सत्यं हृदिस्थकामस्य तत्पूर्तिर्जायतेऽञ्जसा ॥ अनंतरं द्विजेन्द्राणां सूतमागधबंदिनाम् ॥ ४५ ॥ दद्याद्दानं यथा शक्त्या कामो मे प्रीयतामिति ॥ ततो भोजनवेलायां शृतं यत्प्राक्तनेऽहनि ॥ ४६ ॥ प्राश्नीयात्प्रथमं चान्नं ततो भुञ्जीत कामतः ॥ य एवं कुरुते पार्थ शास्त्रोक्तं फाल्गुनोत्सवम् ॥ ४७ ॥ अनायासेन सिध्यंति तस्य सर्वे मनोरथाः ॥ आधयो व्याधयश्चैव यांति नाशं न संशयः ॥४८॥ पुत्रपौत्रसमायुक्तः सुखं तिष्ठति मानवः ॥ ४९ ॥ पुण्या पवित्रा जयदा सर्वविघ्नविनाशिनी ॥ एषा ते कथिता पार्थ तिथीनामुत्तमा तिथिः ॥ ५० ॥ वृत्ते तुषारसमये सितपञ्चदश्यां प्रातर्वसन्तसमये समुपस्थिते च ॥ संप्राश्य चूतकुसुमं सह चन्दनेन सत्यं हि पार्थ पुरुषः स सुखी [3]समास्ते ॥ ५१ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे फाल्गुनपूर्णिमोत्सववर्णनं नाम द्वात्रिंशदुत्तरशततमोऽध्यायः ॥ १३२ ॥ छ ॥

॥ युधिष्ठिर उवाच ॥ ॥ संत्यज्यालिकुलालीढकुसुमानि मृदून्यपि ॥ दमनेन कथं लोकैः पूज्यंते नाकनायकाः ॥ १ ॥ दोलांदोलनमाहात्म्यं रथयात्रामहोत्सवम् ॥ कथयस्वामलं प्राज्ञ यादवांभोजभास्कर ॥ २ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ पार्थार्थिजनसद्वृक्ष क्षांतिधाम धरापते ॥ यदेतद्भवता पृष्टं तच्छृणुष्व वदामि ते ॥ ३ ॥ पुरा सुराणामावासे मंदरे चारुकंदरे ॥ गन्धाधारी कुलालीढो जातो दमनकस्तरुः ॥ ४ ॥ तस्य गंधमनाघ्रेयमाघ्राय सुरयोषितः ॥ मदनोन्मादवशगा गायंति च हसंति च ॥५॥ ऋषयो नियमांस्त्यक्त्वा प्राद्रवंत गृहान्प्रति ॥ न वेदाध्ययने ध्याने रविस्तेषां बभूव ह ॥६॥ अपराधाद्विघटितं यद्बभूव प्रिये परम् ॥

---

[1] वर्द्धयेत्सदने नारी–इ० पा० । [2] वर्द्धापयित्वा–इ० पा० । [3] समस्ते–इ० पा० । ते त्वया समस्तुल्य इत्यर्थः ।

मानसं मानिनीनां तु पुनर्गंधेन संधितम् ॥ ७ ॥ गंधेनाकुलितं लोकं दृष्ट्वा ब्रह्मा तमब्रवीत् ॥ शमनिर्मितया वाचा रोषात्प्रस्फुरिताधरः ॥ ८ ॥
॥ ॥ ब्रह्मोवाच ॥ ॥ जातस्त्वं लोकदमनान्नूनं दमनको मया ॥ जगद्धा घूर्णसे कस्मात्कर्म नैतत्तवोचितम् ॥ ९ ॥ यत्संतस्त्वनुमन्यंते सर्वा
तिशयवर्जितम् ॥ तत्सेवेत नरः कर्म यत्रोद्वेगो न धीमताम् ॥ १० ॥ एकस्याप्यपकारं यः करोति स नराधमः ॥ बहूनामपकाराय संप्रवृत्तः
किमुच्यते ॥ ११ ॥ दृष्टार्थबाधकं कर्म न कर्तव्यं कथंचन ॥ अदृष्टं प्रति संदेहः सोऽस्माभिरनुमीयते ॥ १२ ॥ ततः स्वयं प्रभजति
दैवे पित्र्ये च कर्मणि ॥ भोगार्थे च त्रिभुवननिरादेयो भविष्यति ॥ १३ ॥ ॥ दमनक उवाच ॥ ॥ पुरुषादेवमारब्धं न क्रोधान्नार्थकार
णात् ॥ स्वभाव एष मे ब्रह्मंस्त्वया सृष्टः पुरा विभो ॥ १४ ॥ या यस्य जंतोः प्रकृतिः शुभा वा यदि वेतरा ॥ स तस्यामेव रमते दुष्कृते सुकृते
तथा ॥ १५ ॥ तत्स्वभावप्रवृत्तस्य यदि शापस्त्वया मम ॥ प्रदत्तः किं करोम्येतन्न कृत्यमपराध्यति ॥ १६ ॥ युक्तियुक्तं वचः श्रुत्वा दमनेन समी
रितम् ॥ प्रीतात्मा पद्मजः प्राह करोमि तव सत्प्रियम् ॥ १७ ॥ वसंते सहकारोत्थमंजरीपिंजरे जने ॥ पुष्पिताशोकशोभाढ्ये वने पुंस्कोकिला
कुले ॥ १८ ॥ तस्मिन्काले सुरेशानां शिरांस्याक्रम्य लीलया ॥ स्थास्यसि त्वं दिनं चैकं यद्यस्य विहितं हितम् ॥ १९ ॥ ये त्वामारोपयिष्यंति
दानमानपुरस्सराः ॥ सुराणां ते भविष्यंति सदैव सुखिनो नराः ॥ २० ॥ सर्वदैव शिवस्येष्टा पुण्या पापभयापहा ॥ प्रसिद्धिं यास्यति मधौ
दमनाख्या चतुर्दशी ॥ २१ ॥ एवमुक्त्वा ययौ ब्रह्मा दमनो मंदरे गिरौ ॥ उवास वासिताशेषभुवनो गंधसम्पदा ॥ २२ ॥ दिव्ये गिरौ गिरिसु
तादयिताधिवासे रत्नांशुकच्छुरितकाञ्चनभूमिभागे ॥ शापं वरं च हृदये विनिवेश्य शंभोस्तत्रास्थितो दमनको दमितांतरात्मा ॥ २३ ॥
॥ ॥ श्रीकृष्ण उवाच ॥ ॥ धर्मराज निबोधेदमांदोलकमहोत्सवम् ॥ प्रवृत्तनरनारीकं पञ्चमोच्चारसुन्दरम् ॥२४॥ सानंदं नंदनवने आर्द्रया सहितो
यथा ॥ विस्मयस्मेरनयनो बभ्रामोद्भ्रांतसौरभः ॥ २५ ॥ उन्मादयन्वने पुण्ये विद्याधरगणान्बहून् ॥ वसंततौ नृत्यमानान्सुरासुरशतार्चितः ॥
॥ २६ ॥ संतानपारिजातोत्थां बद्ध्वा स माधवीलताम् ॥ कश्चिदांदोलनं चक्रे समालिंग्य घनस्तनीम् ॥ २७ ॥ गीतमांदोलकारूढस्तद्गायंत्यमर
स्त्रियः ॥ येन चोत्पादयंति स्म मन्मथस्यापि मन्मथम् ॥ २८ ॥ तं दृष्ट्वाष्टापदनिभा भवानी प्राह शंकरम् ॥ कौतुकं मे समुत्पन्नं पश्येमाः
शंकर प्रभो ॥ २९ ॥ आंदोलकं मम कृते कारयस्व स्वलंकृतम् ॥ त्वया सहांदोलयेयं यथा चैते त्रिलोचन ॥३०॥ तद्गौरीवचनं रम्यं श्रुत्वा गोवृ

---

१ आलोचनम्–इ० पा० ।

षभध्वजः ॥ सद्दोलां कारयामास समाहूय महासुरान् ॥३१॥ स्तंभद्वयं रोपयित्वा इष्टापूर्तमयं दृढम् ॥ सत्यं चैवोपरिततं श्रेष्ठं काष्ठमकल्पयत् ॥
॥३२॥ वासुकिं दंडकस्थाने बद्ध्वा तांतवसप्रभम् ॥ तत्फणामंतरापीठं कृतवा[१]न्मणिमंडितम् ॥ ३३ ॥ कृमिकार्पासकौशेयवस्त्रैः संवेष्टितं नवैः ॥
स्रग्दामालंबितप्रांतमणिमौक्तिकशेखरम् ॥३४॥ रचयित्वा विचित्रां तां दोलां चैलाजिनोत्तराम् ॥ स सिद्धां सिद्धगुरवे गौरवेण न्यवेदयत् ॥३५॥
तत्रारूढस्तु यावत्स सौम्यसोमविभूषणः ॥ मंदरं दोलयामास पार्श्वस्थैः पार्षदैः सह ॥३६॥ वामपार्श्वे तु विजया दक्षिणेन जया भवेत् ॥ चाम
राक्रांतबाहू ते तेनाश्लिष्टे न्यवीजताम् ॥ ३७ ॥ आंदोलयंत्या पार्वत्या सहितं स गदाक्षरम् ॥ येन देवासुरस्त्रैणमासीदानंदनिर्भरम् ॥ ३८ ॥
जगुर्गंधर्वपतयो ननृतुश्चाप्सरोगणाः ॥ उच्छलत्तालवाद्यानि वादयंति स्म चारणाः ॥ ३९ ॥ चेलुः कुलाचलाः सर्वे चुक्षुभुः सप्त सागराः ॥ वबु
र्वाताः सनिर्घाता देवे दोलां समास्थिते ॥ ४० ॥ आलोक्य व्याकुलं लोकं देवाः शक्रपुरोगमाः ॥ उपेत्य प्रणिपत्योचुः सर्वपापहरं परम् ॥ ४१ ॥
उपारमस्व भगवन्भवतः क्रीडयानया ॥ जगद्व्यापद्यते देवे चलितः सागरश्च यत् ॥ ४२ ॥ गीर्वाणगीर्भिः संहृष्टः शंकरो लोकशंकरः ॥ समुत्प
पात दोलातः प्रहर्षोत्फुल्ललोचनः ॥ ४३ ॥ उवाच वचनं पार्थ सुरसार्थस्य पश्यतः ॥ सानुकंपं सुललितं विस्फुटार्थपदाक्षरम् ॥ ४४ ॥ श्रीमहा
देव उवाच ॥ अद्य प्रभृति ये दोलाक्रीडां पुष्करिणीतटे ॥ वसंते कारयिष्यंति मंडिते त्रिदशांगणे ॥ ४५ ॥ नेत्रपट्टापटच्छन्नां पद्मरागविभूषि
ताम् ॥ आतपत्रेण संयुक्तां विन्यस्तकनकांडकाम् ॥ ४६ ॥ विचित्राभरणाभाभिराभासितदिगंतराम् ॥ तारकाशांतचित्रांगपुष्पमालामनोर
माम् ॥ ४७ ॥ मालां विद्याधराक्रांतां प्रांतरोपितदर्पणाम् ॥ छत्रचामरसंछन्नां यथा शक्त्याप्यलंकृताम् ॥ ४८ ॥ अग्निकार्यं ततः कृत्वा क्षिप्त्वा
चैव दिशां बलिम् ॥ तस्यामारोपयेद्देवमिष्टहृष्टजनावृतः ॥ ४९ ॥ मूलमंत्रेण देवानां प्रोक्तं दोलाधिरोहणम् ॥ पार्श्वस्थो ब्राह्मणो विद्वान्पठेद्वा
मंत्रमुत्तमम् ॥ ५० ॥ गंभीरांतरनिर्घोषैर्ललनानां च निस्वनैः ॥ स्तुतिमंगलशब्दैश्च पुष्पधूपाधिवासिताम् ॥ ५१ ॥ एतस्मिन्नन्तरे नारीं
दोहनाय निकुट्टकाम् ॥ प्रवेशयेत्कुंकुमाढ्यां क्रीडावर्णप्रियैः सह ॥ ५२ ॥ सुवर्णशृंगिणा प्रोक्तं स्मितदंतांशुकर्बुरम् ॥ लगमानं जलं चांगे कस्य
न स्यात्सुखप्रदम् ॥ ५३ ॥ जलसंक्लिन्नवसनो रशनादाममंडितः ॥ कम्बुग्रीवोल्लसन्सर्वो बभूव गणिकागणः ॥ ५४ ॥ कुंकुमक्षोदतांबूलपुष्प
मालाकुलो जनः ॥ तां विहाय जलक्रीडां नान्यस्यां विदधे मनः ॥ ५५ ॥ पीतशीतजलाघातताडितोऽपि जनः सुखम् ॥ मन्यते नियतः कोपि

---

[१] माणिमौक्तिकम्–इ० पा० ।

प्रभावोऽयमनंगजः ॥ ५६ ॥ एवं ये तु गमिष्यंति नरा वर्त्मतया गतम् ॥ नीरुजस्ते भविष्यंति सुखिताः शरदां शतम् ॥ ५७ ॥ पुत्रपौत्रसमा
युक्ता धनधान्यसमायुताः ॥ विहृत्य सुखसंपत्तौ ततो यास्यंति मत्पुरम् ॥ ५८ ॥ प्राप्ते वसंतसमये सुरसत्तमानामान्दोलनं सुरवराननुकुर्वते ये ॥
ते प्राप्नुवंति भुवि जन्मतरोः फलानि दुःखार्णवात्कुलशतान्यपि तारयंति ॥ ५९ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठि
रसंवादे आन्दोलकविधिवर्णनं नाम त्रयस्त्रिंशदुत्तरशततमोऽध्यायः ॥ १३३ ॥ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ रथयात्राविधानं ते कथ
यामि युधिष्ठिर ॥ स्थिरो भूत्वा निबोधेदं त्वं हि मूर्तविदां वरः ॥ १ ॥ चैत्रे त्रिनेत्रसंभूतमलयाख्यमहागिरौ ॥ प्रवहत्पवनध्वानप्रेंखोलितलता
चये ॥ २ ॥ एतस्मिन्नेव काले तु भ्रममाणो यदृच्छया ॥ नारदः शारदाकांताच्छिवलोके समाययौ ॥ ३ ॥ दृष्ट्वापूर्वं शिवं शांतं सुरेशैः सर्वतो
वृतम् ॥ प्रणम्योपाविशद्विप्रः पुरतः केशवेशयोः ॥ ४ ॥ तमुपासीनमालक्ष्य भगवान्भगनेत्रहा ॥ पप्रच्छाच्छादितमनाः कुतश्चागम्यते
पुनः ॥ ५ ॥ ॥ श्रीनारद उवाच ॥ ॥ शिव कामं च तं विद्धि दग्धं मा विबुधोत्तम ॥ वसंतो नाम कोऽप्येष कामस्य दयितः
सखा ॥ ६ ॥ मलयानिलयुक्तेन तेन विश्वं वशीकृतम् ॥ सहकारकरीन्द्रस्थं कृत्वा कोकिलडिंडिमम् ॥ ७ ॥ घोषयामास विजयं
मन्मथस्य पुरेपुरे ॥ शशांकशेखरः कोऽयं कोयं शंखगदाधरः ॥ ८ ॥ कोयं च डिम्बो वा ब्रह्मा कामस्त्रिजगतां प्रभुः ॥ प्रायः क्रीडारति
र्लोको वसंतवचनात्पुनः ॥ ९ ॥ ऊर्ध्वबाहुस्तु नर्नर्ति तालदत्तपदक्रमः ॥ व्यवसायं न गच्छंति ये संहृत्य वनांतरम् ॥ १० ॥ गायंतश्च परी
हृष्टास्ते चाप्यायांति यांति च ॥ गोप्यसीमांतरगताः क्षेत्रस्थानस्य रक्षिणः ॥ ११ ॥ तेऽपि गायंति नृत्यंति हसंति स्मरतारकाः ॥ करस्य
ताडनेऽत्यर्थं मुरजो घुर्घरायते ॥ १२ ॥ विटं पश्यंति कुलटाः प्रारब्धोचितपण्डिताः ॥ सुमनांसि सुसंगीतनृत्यवाद्यसुवादितम् ॥ १३ ॥ एव
मेतत्त्रिलोकेऽस्मिन्निति व्यवसितो जनः ॥ ललल्लम्बस्तनीं दृष्ट्वा जरा योषापि नृत्यति ॥ १४ ॥ वसंतस्य प्रभावोऽयं कोऽप्यपूर्वो विजृंभते ॥
सरांस्यद्भुतपद्मानि प्रफुल्लाः पुष्पवाटिकाः ॥ १५ ॥ वृक्षाः पक्षिशताकीर्णा विजिघ्राणमुखाः सुराः ॥ विकंपवसनावालः पवनस्त्रिगुणात्मकः ॥१६॥
कृतः प्रत्यक्षसुमहान्वसंतो न जगत्त्रये ॥ अवजल्पमुखा बाला वृद्धास्तु विकलद्विजाः ॥ १७ ॥ उभावपि प्रतप्येते पश्येदं कामचेष्टितम् ॥ पक्षिणां
पक्षनिक्षेपैर्नद्यस्तुंगतरंगकैः ॥ १८ ॥ पादपाः पल्लवशतैर्नृत्यंते च प्रहर्षिणः ॥ एतच्छ्रुत्वा तु वचनं नारदस्येन्दुशेखरः ॥ १९ ॥ कौतुकाकु
लितः शीघ्रमारुरोह रथं स्वकम् ॥ रथेन काञ्चनांगेन पतत्त्रिवरकेतनः ॥ २० ॥ प्रययौ पुण्डरीकाक्षः शंखचक्रगदाधरः ॥ पारावतप्रती

काशं चतुर्वेदमयं रथम् ॥ २१ ॥ आस्थाय प्रययौ हृष्टो ब्रह्मा ब्राह्मणसंस्तुतः ॥ मुनिभिश्चाप्सरोभिश्च यक्षरक्षोमहोरगैः ॥ २२ ॥ वृतो
रथेन प्रययौ भास्करो वारितस्करः ॥ शैलजोरुपताकेन रथेनादित्यवर्चसा ॥ २३ ॥ कात्यायनी प्रचलिता पञ्चवक्रेण केतुना ॥
लंबोदरः करशतगृहीतकनकोत्पलः ॥ २४ ॥ प्रयातः स्वरथारूढः कृतकर्णकुलाकुलः ॥ एवं देवः परिवृतो भगवान्गोवृषध्वजः ॥ २५ ॥ रथा
रूढैरमूढात्मा मर्त्यलोकमवातरत् ॥ यावत्पश्यति देवेशस्तावत्सर्वं तदक्षरम् ॥ २६ ॥ नारदेन यथैवोक्तस्तावत्सर्वं तदक्षरम् ॥ नारदेन यथैवोक्तं
जगदानन्दनिर्भरम् ॥ २७ ॥ देवैः सार्द्धं पशुपतिर्यावत्पश्यति विस्मितः ॥ तावत्तस्यैव हि गणाः परं[1]ब्रह्मसमंजसम् ॥ २८ ॥ गायंति केचित्सो
त्कंठं लुंठंत्यन्ये प्रहर्षिताः ॥ वादयंत्यपरे तुष्टा जहसुः केचिदुल्बणम् ॥ २९ ॥ वादयंत्यन्यथा वाद्यं गायंत्यन्येन्यथा गणाः ॥ अन्येन्यथा
प्रनृत्यंति चित्रं चैत्रस्य चेष्टितम् ॥ ३० ॥ नीलोत्पलाभनयनैर्विलसत्प्रांततारकैः ॥ क्रीडारतिभिरारब्धमालापैश्च सुरैरपि ॥ ३१ ॥ सुराणां
क्षोभमालक्ष्य भगवान्गोवृषध्वजः ॥ चिन्तयामास सुमहान्कार्ययोगो ह्युपस्थितः ॥ ३२ ॥ अनर्थमुत्थितं तद्वत्तद्विघाताय ये जनाः ॥ नयंते
येऽतिमूर्खत्वादापदोऽभिभवंति तान् ॥ ३३ ॥ वसंतः स्वामिभक्तत्वान्मान्यपुष्पाकरं यदा ॥ उन्मादाढ्यजनो रक्ष्यः कार्यं कार्यद्वयं मम ॥ ३४ ॥
संचिंत्यैवं समानाय्य वसंतं प्राह शंकरः ॥ समानीतो मासमेकं स्थातव्यं भवता त्विह ॥ ३५ ॥ सितपक्षः सहायोऽयं सर्वभूतसुखप्रदः ॥ भवत्य
तिमहानन्दो विशेषेण दिवौकसाम् ॥ ३६ ॥ यो यथा रथमारूढः समायातः समीक्षितुम् ॥ वर्षेवर्षे स तेनैव संस्थानेनागमिष्यति ॥ ३७ ॥
कारयिष्यन्ति ये मर्त्या रथयात्रामहोत्सवम् ॥ ते दिव्यभोगभोक्तारो भविष्यन्ति निरामयाः ॥ ३८ ॥ एवमाभाष्य भगवान्वसंतं च ततः सुरैः ॥
संस्तुतोऽथ नतश्चापि स्वस्थानमगमत्ततः ॥ ३९ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ रथः किमात्मकः कार्यः कार्या यात्रा कथं भवेत् ॥ आरोपयेत्कथं
देवान्रथे वद जगत्पते ॥ ४० ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ सुविचित्रं चित्रतनुं श्रेष्ठकाष्ठमयं रथम् ॥ सुदृढाक्षं दृढाबंधं सुचक्ररथकूबरम् ॥ ४१ ॥
अथ वा वंशविहितं नेत्रपट्टपटावृतम् ॥ तारकाशतचित्रांशं पुष्पमालाविभूषितम् ॥ ४२ ॥ सितगोयुगसंयुक्तं पञ्चबाणपताकिनम् ॥ छत्रचामरशो
भाढ्यं स्थापयेद्भवनाङ्गणे ॥ ४३ ॥ वैश्वदेवं ततः कुर्याद्गृहयज्ञविधानतः ॥ चतुश्चरणकैर्मंत्रैर्विप्र शान्तिकपौष्टिकैः ॥ ४४ ॥ आरोपयेद्रथे देवं
मूलमंत्रेण मंत्रवित् ॥ वेदोक्तैरथपौराणैर्गंधधूपाधिवासिते ॥ ४५ ॥ रथे तिष्ठन्नयति वाजिनः पुरो यत्रयत्र कामयते सुषारथिः ॥ अभीषूणां

---

[1] प्रारब्धमसमञ्जसम्–इ० पा० ।

महिमानं पनायत मनुः पश्चादनुयच्छन्ति रश्मयः ॥ ४६ ॥ शंखदुदुभिनिर्घोषैः काहलानां च निःस्वनैः ॥ हस्तदीपैः प्रज्वलितैस्तालकोलाह
लेन च ॥ ४७ ॥ दोषासुखेन रमितं प्रेषणीयपुरःसरम् ॥ महतोत्सवभारेण भ्रामयेत्परितो रथम् ॥ ४८ ॥ तांबूलानि रथे दद्यात्पुष्पमालायुतानि
च ॥ रथवोढॄंप्रदद्यात्तु प्रेक्षकेभ्योऽप्यवारितम् ॥ ४९ ॥ यस्ययस्य गृहेऽभ्येति प्रेरितो रथिना रथः ॥ तस्यतस्य भवेत्पूज्यः पुष्पधूपाक्षतादिभिः ॥
॥ ५० ॥ इतरोऽपि भवेत्पूज्यः संप्राप्ते गृहिणां गृहे ॥ किं पुनर्जगतां भर्ता सर्वलोकमहेश्वरः ॥ ५१ ॥ कदाचिदक्षभङ्गः स्याद्ध्वजभंगोऽथ वा भवेत्॥
भज्येत वा युगमध्ये नहनं त्रुट्यते यदि ॥ ५२ ॥ ब्राह्मणांस्तत्र संपूज्य होमः कार्यो विजानता ॥ तिलैराज्येन पयसा येन संपद्यते सुखम् ॥
॥ ५३ ॥ प्रेरणीप्रेक्षणीयैश्च भ्रामयित्वा रथोत्तमम् ॥ स्थापयेन्नगरस्यांतस्तत्र कुर्यान्महोत्सवम् ॥ ५४ ॥ दोलाग्राहैश्चक्रदोलाभ्रमैर्डमरकैस्तथा ॥
विद्याधरीणां चरितमितराभिः प्रकाश्यते ॥ ५५ ॥ एवं यः कुरुते पार्थ सुखदं तु रथोत्सवम् ॥ तथैव पूजयेत्पार्थ उपवासपरो नरः ॥ ५६ ॥
सर्वव्याधिविहीनश्च सुखी स्याच्छरदां शतम् ॥ यः कारयित्वा सौवर्णं रौप्यं वा रथमुत्तमम् ॥ ५७ ॥ वर्णकैश्चित्रितं दिव्यं दारुजं वा सुशोभनम् ॥
स्वहस्तरचितं यश्च भास्कराय निवेदयेत् ॥ ५८ ॥ स मर्त्यलोके सुचिरात्सुखानि च समश्नुते ॥ पूर्वोक्तविधिना भानुं भ्रामयित्वा रथे स्थितम् ॥
॥ ५९ ॥ स्थापयेत्सर्वभागे तु गेयं वाद्यपुरःसरम् ॥ दक्षिणे तु दिशो भागे द्वितीयेऽह्नि नयेद्रथम् ॥ ६० ॥ तत्रापि जागरं कुर्याद्वाद्यगीतसुमं
गलैः ॥ अपरायां तृतीयेऽह्नि स्थापयेद्रथमुत्तमम् ॥ ६१ ॥ प्रेक्षणीयविनोदेन तां रात्रिमतिवाहयेत् ॥ स्थापयेदुत्तरस्यां तु चतुर्थे दिवसे रथम् ॥
॥:६२ ॥ महायात्रां प्रकुर्वीत तत्राप्यद्भुतचेष्टितम् ॥ पंचमे दिवसे प्राप्ते नगरांतस्थितं रविम् ॥ ६३ ॥ पूजयित्वा विधानेन षष्ठेऽह्नि भवनं नयेत् ॥
रथयात्राप्रसंगेन कथिता रथसप्तमी ॥ ६४ ॥ सर्वपापहरा पुण्या किञ्चिंदन्यन्निबोध[१] मे ॥ गौरी पूज्या तृतीयायां चतुर्थ्यां विघ्ननायकः
॥ ६५ ॥ पञ्चम्यां पंकजकरां पूजयेद्वा सरस्वतीम् ॥ षष्ठ्यां शक्तिधरं स्कन्दं सप्तम्यां तु दिवाकरम् ॥ ६६ ॥ अष्टम्यां च चतुर्दश्यां सम्पूज्यः
शशिशेखरः ॥ नवम्यां पूजयेच्चण्डीं चामुण्डां मुण्डमालिनीम् ॥ ६७ ॥ दशम्यामृषयः शांताः सर्वे व्यासपुरस्सराः ॥ एकादश्यां
चक्रपाणिं द्वादश्यां वा समर्चयेत् ॥ ६८ ॥ त्रयोदश्यां त्रिनेत्रोत्थवह्निना शांतविग्रहम् ॥ साधारणी तु सर्वेषां पौर्णमासी तिथिः स्मृता ॥ ६९ ॥
आंदोलके मदनके रथयात्रासु चैव हि ॥ व्युत्क्रमेणापि कर्तव्या तिथीनां कार्यगौरवात् ॥ यात्रा वासंतिकी चेयं चित्तस्वास्थ्यकरी परा ॥ ७० ॥

---

[१] किंचिदन्यन्न विद्यते—इ० पा० ।

सम्यक्सुधाधवलिते भवने सुराणामंतस्सुवस्त्रमणिमौक्तिकदानचित्रे ॥ तांबूलकक्रमुकवारविलासिनीभिर्यात्रां विधाय भवतीह स भारतेशः ॥ ॥ ७१ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे दमनकांदोलकरथयात्रामहोत्सववर्णनं नाम चतुस्त्रिंशदुत्तरशततमोऽध्यायः ॥ १३४ ॥ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ गौरीं विवाह्य जग्राह हरः पाशुपतं व्रतम् ॥ उमापतिः पशुपतिर्ध्यानासक्तो बभूव ह ॥ १ ॥ ब्रह्मादिभिः समामंत्र्य विबुधैः पुत्रलब्धये ॥ गौर्या मनोभिलषितपूरणाय प्रहर्षितैः ॥ २ ॥ प्रहितः क्षोभणार्थाय समर्थ इति मन्मथः॥ ततो मारः स्मरः कामोप्याजगाम तमाश्रमम् ॥ ३ ॥ रतिप्रीतिमदोन्मादवसंतश्रीसहायवान् ॥ निधानवारुणीदर्पश्रृंगारैः परिवारितः ॥ ४ ॥ आम्राशोकवनोत्तंसो मालतीकृतशेखरः ॥ वीणामृदंगसंगीतकोकिलाश्रृंगदूतकः ॥५॥ झल्लरीवाद्यसंघुष्टभांडागारिकलेखकः ॥ पानमत्ताङ्गनारूढो हिन्दोलाश्चर्यमंत्रिमान् ॥ ६ ॥ दक्षिणानिलगंधाढ्यः कटाक्षेक्षितवर्षवान् ॥ महाराजाधिराजो वा स्मरः प्राप्तो हरांतिकम् ॥ ७ ॥ स पुष्पचापमाकृष्यमदनोन्मादनं शरम् ॥ चिक्षेप त्रिपुरघ्नाय समाधेर्भंगहेतवे ॥ ८ ॥ बुद्ध्वा तं तस्य संकल्पं रुद्रः क्रोधाज्ज्वलन्रुषा ॥ ललाटाद्वह्निमसृजत्तृतीयनयनाद्धरः ॥ ९ ॥ कामो विलोकितस्तेन भस्मीभूतश्च तत्क्षणात् ॥ दग्धं दृष्ट्वा स्मरं शोकाद्रतिप्रीती स्थिते सदा ॥ १० ॥ करुणं विलपंत्यौ ते सर्वमन्यद्दिशं गतम् ॥ ततः शोकार्तहृदया गौरी रुद्रमुवाच ह ॥ ११ ॥ भगवन्नस्मदर्थे तं कामं निर्दग्धवानसि ॥ तेनैते पश्य नार्यौ ते कामस्य रुदितः कथम् ॥ १२ ॥ कुरु प्रसादं देवेश रतिप्रीत्यै वृषध्वज ॥ संजीवय स्मरं शंभो मूर्तिमंतं पुनः कुरु ॥ १३ ॥ तच्छ्रुत्वा तु महादेवो हृष्टः प्रोवाच पार्वतीम् ॥ उपप्लुतं जगत्सर्वं मन्मथेन शरीरिणा ॥ १४ ॥ मया दग्धस्य कामस्य पुनरागमनं कुतः ॥ किं तु ते मानयन्वाक्यं करोमि सफलं प्रिये ॥ १५ ॥ अस्मिन्वसंतसमये शुक्लपक्षे त्रयोदशी ॥ अस्यां मनोभवो देवि भविष्यति शरीरवान् ॥ १६ ॥ एतेन बीजभूतेन जगद्धर्णिष्यतेऽखिलम् ॥ एवं वरमिमं दत्त्वा मन्मथाय युधिष्ठिर ॥१७॥ जगाम हिमवच्छृंगं कैलासं पार्वतीप्रियः ॥ तदेतत्[1]सर्वमाख्यातं स्मरस्य चरितं नृप ॥ १८ ॥ पूजाविधानमपरं कथयामि शृणुष्व तत् ॥ अस्यां स्नात्वा त्रयोदश्यामशोकाख्यं नगं लिखेत् ॥ १९ ॥ सिन्दूररजनितैरंगैरतिप्रीतिसमन्वितम् ॥ कामदेवं वसंतं च वाजिवक्त्रं झषध्वजम् ॥ २० ॥ सौवर्णं वा महाराज वार्क्षं चित्रमथापि वा ॥ लीलाविलासगमनं गर्वितं साप्सरोगणम् ॥२१॥ गन्धर्वगीतवादित्रप्रेक्षणीयसमाकुलम् ॥ नंद्यावर्तिरतिक्रीडाप्रीतिविद्याधरैर्युतम् ॥२२॥ मध्याह्ने भोजयेद्भक्त्या भक्ष्यैर्धूपैः स्रगंबरैः॥

---

[1] ते समाख्यातम्–इ० पा० ।

मंत्रेणानेन कौंतेय नरो नार्या समन्वितः ॥ २३ ॥ नमो वामाय कामाय देवदेवाय मूर्तये ॥ ब्रह्मविष्णुशिवेन्द्राणां मनःक्षोभकराय वै ॥ २४ ॥ कृत्वैवमर्चयित्वा तु देवदेवं मनोभवम् ॥ ततस्तस्याग्रतो देया मोदका मुखमोदकाः ॥ २५ ॥ नानाप्रकारान्भक्ष्यांश्च कामो मे प्रीयतामिति ॥ ततो विसर्जयेद्विप्रान्दत्त्वा युग्मं सदक्षिणम् ॥ २६ ॥ स्वपतिं पूजयेन्नारी वस्त्रमालाविभूषणैः ॥ कामोऽयमिति संचिंत्य प्रहृष्टेनांतरात्मना ॥२७॥ मन्मथायतने तस्मिन्यजमानः सुहृद्वृतः ॥ रात्रौ जागरणं कुर्यात्सुखरात्रिर्यथा भवेत् ॥ २८ ॥ कर्पूरकुंकुमक्षोदगंधतांबूलसर्जनैः ॥ नानाप्रकारैर्भक्ष्यैश्च कुर्याद्रात्रौ महोत्सवम् ॥ २९ ॥ दीपप्रज्वालनैर्नृत्यैः प्रेक्षणैः प्रेक्षणोत्सवैः ॥ एवं यः कुरुते पार्थ वर्षेवर्षे महोत्सवम् ॥ ३० ॥ वसंतसमये प्राप्ते हृष्टस्तुष्टो नृपः पुरे ॥ तस्य संवत्सरं यावल्लोको रोगैर्विमुच्यते ॥ ३१ ॥ सुभिक्षं क्षेममारोग्यं यशः श्रीः सौख्यमुत्तमम् ॥ कामवर्षी च पर्जन्यस्तस्मिन्राष्ट्रे प्रजायते ॥ ३२ ॥ तुष्यते तु भृशं देवो द्वादशार्द्धार्द्धलोचनः ॥ तथा कामश्च विष्णुश्च वसंतश्च प्रजापतिः ॥ ३३ ॥ चन्द्रसूर्यादिका सर्वे ग्रहा ब्रह्मर्षयस्तथा ॥ सर्वेऽपि तस्य तुष्यंति यक्षगंधर्वदानवाः ॥ ३४ ॥ असुरा यातुधानाश्च सुपर्णाः पंतगा[1] नगाः ॥ तुष्टाः प्रयच्छंति सुखं तस्य कर्तुर्न संशयः ॥ ३५ ॥ चैत्रोत्सवे सकललोकमनोनिवासं कामं वसंतमलयाद्रिमरुत्सहायम् ॥ रत्या सहार्च्य पुरुषः प्रवरा च योषित्सौभाग्यरूपसुतसौख्ययुता सदा स्यात् ॥ ३६ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे मदनमहोत्सववर्णनं नाम पञ्चत्रिंशदुत्तरशततमोऽध्यायः ॥ १३५ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ भूतमातेति संहृष्टे ग्रामेग्रामे पुरेपुरे ॥ गायन्नृत्यन्हसँल्लोकः सर्वतः परिधावति ॥ १ ॥ उन्मत्तवत्प्रलपति क्षितौ पतति मत्तवत् ॥ क्रुद्धवद्धावति पुरान्मत्तवत्कर्षते बहिः ॥ २ ॥ मुखांगभंगान्कुरुते लोके वातगृहीतवत् ॥ भूतवद्भस्मगात्रं तु कर्दमानवगाहते ॥ ३ ॥ किमेष शास्त्रनिर्दिष्टो मार्गः किमुत लौकिकः ॥ मुह्यते मे मनः कृष्ण त्वं तु वक्तुमिहार्हसि ॥ ४ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ शृणु पार्थ प्रवक्ष्यामि यत्ते किञ्चिन्मनोगतम् ॥ आस्तिकः श्रद्दधानश्च भवतीति मतिर्मम ॥ ५ ॥ पार्वत्या सहितः पार्थ मन्दरे चारुकन्दरे ॥ क्रीडन्नास्ते मुदा युक्तो दिव्यक्रीडनकैर्हरः ॥ ६ ॥ हंसोन्नतगतिं चारुकुम्भभ्राजिकुचद्वयम् ॥ सिञ्जत्सद्रशनां हृष्टां दृष्ट्वा गौरीं जगद्गुरुः ॥ ७ ॥ दग्धकामोऽपि च हरः संदीप्तमदनोऽभवत् ॥ निःसृतां कामयामास महार्हशयने शिवः ॥ ८ ॥ रतस्थयोस्तयोर्जातं दिव्यं वर्षशतं यदा ॥ तदा देवीसमुच्छ्रायनिरोधान्निर्गता बहिः॥९॥

---

[1] पन्नगाः–इ० पा० ।

मूत्रोदकात्समुत्तस्थौ नारी निर्दारितोदरा ॥ कृष्णा करालवदना पिंगाक्षा मुक्तमूर्द्धजा ॥ १० ॥ कपालमालाभरणा बद्धपिंडोर्ध्वपिंडिका ॥
खट्वाङ्गकं कालधरा मुद्राङ्कितकरा शिवा ॥ ११ ॥ व्याघ्रचर्मांबरधरा रणत्किंकिणिमेखला ॥ डमड्डमड्डमरुका फूत्कारापूरितांबरा ॥ १२ ॥
तस्याः पार्श्वानुजाश्चान्या गीतवाद्यलयानुगाः ॥ उत्तालतालमबला नृत्यंति च हसंति च ॥ १३ ॥ कपालखट्वाङ्गधरा गजचर्मावगुण्ठिताः ॥
तथैव शंकराज्जातस्तद्रूपाभरणः पुमान् ॥ १४ ॥ अनुगम्यमानो बहुभिर्भूतैरतिभयंकरैः ॥ सिंहशार्दूलवदनै रदनोल्लिखितांबरैः ॥ १५ ॥
एकीभूतैः क्षणेनैव तौ भवानीभवोद्भवौ ॥ दृष्ट्वा हृष्टमना देवः प्राह देवीं सुविस्मिताम् ॥ १६ ॥ कल्याणि पश्य पश्यैतौ मत्त्वदङ्गसमुद्भवौ ॥
बीभत्साद्भुतशृंगारवरायुधविधारिणौ ॥ १७ ॥ भ्रातृभांडौ यथा देवि तद्वदेतौ मतौ मम ॥ नृनार्योरंतरं किञ्चित्साद्दश्यात्प्रतिभासयेत् ॥ १८ ॥
भ्रातृभांडा भूतमाता तथैवोदकसेविका ॥ संज्ञात्रयं तयोः कृत्वा ततः प्रादाद्वरं हरः ॥ १९ ॥ भुक्त्वाहोंपगतां चैतां जरत्तरुतले स्थिताम् ॥ सेव
यिष्यंति ये भक्त्या जलसंपूर्णकंडुकैः ॥ २० ॥ चन्दनेन समालभ्य पुष्पधूपैरथार्च्य ताम् ॥ भोजयेत्क्षिप्रया चैव कृशरापूपपायसैः ॥ २१ ॥
य एवं कुरुते देवि भक्तिभावेन भावितः ॥ स पुत्रपशुवृद्धिं च शरीरारोग्यमाप्नुयात् ॥ २२ ॥ न शाकिन्यो गृहे तस्य न पिशाचा न राक्षसाः ॥
पीडां कुर्वंति शिशवो यांति वृद्धिं निरामयाः ॥ २३ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कदा पूजा प्रकर्तव्या भूतमातुः सुखार्थिभिः ॥ पुरुषैः पुरुषव्या
घ्र यत्तन्मे वक्तुमर्हसि ॥ २४ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ सर्वत्रैषा भगवती बालानां हितकारिणी ॥ नामभेदैःक्रियाभेदैः कालभेदैश्च पूज्यते
॥ २५ ॥ प्रतिपत्प्रभृति ज्येष्ठे यावत्पंचदशी तिथिः ॥ तावत्पूजा प्रकर्तव्या प्रेरणैःप्रेक्षणीयकैः ॥ २६ ॥ विकर्मफलनिर्देशः पांडवानां विडंबनम्॥
प्रदृश्यंते हास्यपरैर्नरैरद्भुतचेष्टितैः ॥ २७ ॥ विश्वास्य धनलोभेन संध्यायां निहतः पथि ॥ आरोहणं च शूलाग्रे न पश्यंतं हि पश्यति ॥ २८ ॥
दृष्टो भवद्भिः संहृष्टः परपारावमर्शकः ॥ छित्त्वा स्वहस्तैर्यद्दत्तो विभुना मुख्यमोदकः ॥ २९ ॥ शीर्णसूक्ष्मेण पत्रेण बाला मालानुमोदिताः ॥
मुष्कभुग्रासभारूढो मुखं कृत्वा च पश्चिमे ॥ ३० ॥ हे जनाः किं न पश्यध्वं स्वामिद्रोहकरं परम् ॥ करपत्रैर्विदार्यं तमुच्छलच्छोणितच्छटम्॥ ३१॥
चरैः किलासैः संप्राप्तः सर्वोद्विगकरः परम् ॥ दंडप्रहाराभिहतो नीयते दंडपाशिकैः ॥ ३२ ॥ प्रेक्षकैर्वेष्टितः स्तेनो रटत्येष विमंडितः ॥ संयम्य
नीयतेयं तु मूर्खैःक्रौर्याविलेक्षणः ॥ ३३ ॥ सितकेशं सितश्मश्रु सितांबरधरं द्विजम् ॥ वटचेष्टाचपेटाभिर्हन्यमानं न पश्यत ॥ ३४ ॥ गृहान्निष्क
म्यतां रंडा वृद्धो भूत्वाप्यसौ स्त्रियाः ॥ स्वस्या असौ न कुरुते मूढो भरणपोषणम् ॥ ३५ ॥ भैरवाभरणोत्ताला व्यालयज्ञोपवीतिनः ॥ प्रदत्त्वा

ताण्डवपदान्पश्यध्वं ध्वांतदीपकान् ॥ ३६ ॥ निर्वेदकोऽस्य हृदये न किंचिदपि तिष्ठति ॥ गृहीतं यदनेनेदं बालेनापि महाव्रतम् ॥ ३७ ॥
रक्तढक्काककृष्णांगं शबरं किं न पश्यत ॥ तरुकोटरांतरगतांश्छित्वा च शुकशावकान् ॥ ३८ ॥ बहुभिः कोष्ठकीकृत्य शरौघैः शकलीकृतम् ॥
विमुक्तढक्काहंकारसुप्रहारं निरीक्षत ॥ ३९ ॥ इमां कृष्णार्द्धवदनां गृहीतां सिंदुरार्चिताम् ॥ विमुक्तकेशां नृत्यंतीं पश्यध्वं योगिनीमिव ॥ ४० ॥
गंभीरतूर्यध्वनिना प्रबुद्धां वृत्ततांडवाम् ॥ एवं प्रेक्षणकं कृत्वा नयेत्वृक्षतले च ताम् ॥४१॥ एवं कृते न दारिद्र्यं न च दुःखं भवेन्नृणाम् ॥ ४२ ॥
इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे भूतमात्रुत्सववर्णनं नाम षटत्रिंशदुत्तरशततमोऽध्यायः ॥ १३६ ॥ ॥ छ ॥ ॥
॥ श्रीकृष्ण उवाच ॥ ॥ अथातः संप्रवक्ष्यामि बलिरक्षाविधिं नृप ॥ तं शृण्वेकाग्रमनसा समासाद्वदितं मया ॥ १ ॥ पुरा देवासुरे युद्धे दानवा
सुरनिर्जिताः ॥ शुक्रं बलिं पुरः कृत्वा ययुः शुक्र उवाच तम् ॥२॥ ॥ शुक्र उवाच ॥ ॥ न विषादस्त्वया कार्यः कार्याणां गतिरीदृशी ॥ दैवाद्भवंति
भूतानां काले जयपराजयाः ॥ ३ ॥ संधानं सह शक्रेण क्रियतामयनद्वयम् ॥ अजेयः सर्वशत्रूणां कृतः शच्या शचीपतिः॥ ४ ॥ रक्षाबंधप्रभावेन
दानवेन्द्रो जितो महान् ॥ वर्षमेकं प्रतीक्षस्व ततः श्रयो भविष्यति ॥ ५ ॥ भार्गवेणैवमुक्तास्ते दानवा विगतज्वराः ॥ तस्थुः कालं प्रती
क्षन्तो यथोक्तं गुरुणा तथा ॥६॥ एष प्रभावो रक्षायाः कथितस्ते युधिष्ठिर ॥ जयदः सुखदश्चैव पुत्रारोग्यधनप्रदः ॥७॥ ॥ युधिष्ठिर उवाच ॥ ॥
क्रियते केन विधिना रक्षाबंधः सुरोत्तम ॥ कस्यां तिथौ कदा देव एतन्मे वक्तुमर्हसि ॥ ८ ॥ यथा यथा हि भगवान्विचित्राणि प्रभाषते ॥ तथा
तथा न मे तृप्तिर्बह्वर्थाः शृण्वतः कथाः ॥ ९ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ घनावृतेऽम्बरे पार्थ शाद्वले धरणीतले ॥ संप्राप्ते श्रावणे चैव पौर्णमा
स्यां दिनोदये ॥ १० ॥ स्नानं कुर्वीत मतिमाञ्श्रुतिस्मृतिविधानतः ॥ ततो देवान्पितॄंश्चैव तर्पयेत्परमांभसा ॥ ११ ॥ उपाकर्मादिवेदोक्तमृषीणां
चैव तर्पणम् ॥ कुर्युश्च ब्राह्मणाः श्राद्धं देवमुद्दिश्य शक्तितः ॥ १२ ॥ शूद्राणां मंत्रसहितं स्नानं दानं च शस्यते ॥ १३ ॥ ततोपराह्णसमये रक्षापोट
लिकाः शुभाः ॥ कारयेच्चाक्षतैः शस्तैः सिद्धार्थैर्हेमभूषिताः ॥ १४ ॥ वस्त्रैर्विचित्रैः कार्पासैः क्षौमैर्वा मलवर्जितैः ॥ विचित्रतरैर्ग्रथिताः स्थापयेद्भा
जनोपरि ॥ १५ ॥ कार्या गृहस्य रक्षा गोमयरहितैः सुवृत्तकुंडूकैः ॥ दूर्वावर्णकसहितैः सकलदुष्कृतोपशांतये ॥ १६ ॥ उपलिप्तगृहमध्ये चतु
ष्कोपरि न्यसेच्छुभं पीठम् ॥ तत्रोपविशेद्राजा सामात्यः सपुरोहितः ससुहृत् ॥ १७ ॥ वेश्याजनेनसहितो मंगलशब्दैः सुहसितैश्चिह्नैः ॥ रक्षाबंधः
कार्यः शांतिध्वनिना नरेन्द्रस्य ॥ १८ ॥ देवद्विजातिशस्ता सुम्नीरर्घ्यैः समर्चयेत्प्रथमम् ॥ तदनुपुरोधा नृपतिं रक्षां बध्नीत मंत्रेण ॥ १९ ॥ येन

बद्धो बलीराजा दानवेन्द्रो महाबलः ॥ तेन त्वामभिबध्नामि रक्षे मा चल मा चल ॥२०॥ ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्चान्यैश्च मानवैः ॥ कर्तव्योर
क्षिकाबन्धो द्विजान्संपूज्य भक्तितः ॥ २१ ॥ अनेन विधिना यस्तु रक्षिकाबंधमाचरेत् ॥ स सर्वदोषरहितः सुखी संवत्सरं भवेत् ॥ २२ ॥ यः
श्रावणे स्रवति शीतजले नरेन्द्र रक्षाविधानविधिमाचरते मनुष्यः ॥ आस्ते सुखेन परमेण स सर्वमेकः पुत्रप्रपौत्रसहितः ससुहृद्वृतश्च ॥ २३ ॥
इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे श्रावणपूर्णिमारक्षाबन्धनविधिवर्णनं नाम सप्तत्रिंशदुत्तरशततमोऽध्यायः॥ १३७ ॥
॥ ॥ श्रीकृष्ण उवाच ॥ ॥ पुण्या महानवम्यस्ति तिथीनां प्रवरा तिथिः ॥ सानुष्ठेया सुरैः सर्वैः प्रजापालैर्विशेषतः ॥ १ ॥ भवानु
त्थापयेत्पार्थ संवत्सरसुखाय वै ॥ भूतप्रेतपिशाचानां प्रीत्यर्थं चोत्सवाय वा ॥ २ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कस्मात्कालात्प्रवृत्तेयं नवमी
महशब्दयुक् ॥ किमादावुपपन्नोऽस्ति भगवन्नवमीविधिः ॥ ३ ॥ यशोदागर्भसंभूतेरुत यात्रा प्रवर्तते ॥ उताहो पूर्वमेवासीत्कृतत्रेतायुगादिषु ॥४॥
यदस्यां प्राणिनः केचिन्मन्यंते घातयंति च ॥ हतानां प्राणिनां तेषां का गतिः पारलौकिकी ॥ ५ ॥ स्वयं घ्नतां घातयतामनुमोदयतां तथा ॥
एतन्मे संशयं पूर्वं वक्तुमर्हसि केशव ॥ ६ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ पार्थ या परमा शक्तिरनंता लोकविश्रुता ॥ आद्या सर्वगता शुद्धा भाव
गम्या मनोहरा ॥ ७ ॥ आद्याष्टमी कलाकाली द्वितीया सर्वमंगला ॥ माया कात्यायनी दुर्गा चामुंडा शंकरप्रिया ॥ ८ ॥ ध्यायंति यां योगरतां
सा देवी परमेश्वरी ॥ रूपभेदैर्नामभेदैर्भवानी पूज्यते शिवा ॥ ९ ॥ अष्टम्यां तु नवम्यां तु देवदानवराक्षसैः ॥ गंधर्वैरुरगैर्यक्षैः पूज्यते किन्नरै
र्नरैः ॥ १० ॥ अन्येष्वपि युगेष्वादौ सृष्टेः पूर्वं प्रदर्शिता ॥ पूज्यतेयं पुरा देवी तेभ्यः पूर्वतरैः शुभैः ॥ ११ ॥ आश्वयुक्छुक्लपक्षे च याष्टमी मूल
संयुता ॥ सा महानवमी नाम त्रैलोक्येऽपि सुदुर्लभा ॥ १२ ॥ कन्यागते सवितारि शुक्लपक्षेऽष्टमी तु या ॥ मूलनक्षत्रसंयुक्ता सा महानवमी
स्मृता ॥ १३ ॥ अष्टम्यां च नवम्यां च जगन्मातरमम्बिकाम् ॥ पूजयित्वाऽऽश्विने मासि विशोको जयति द्विषः ॥ १४ ॥ संतर्जयंती हुंकारैः
खड्गादिभिरहर्निशम् ॥ नवम्यां पूजिता देवी ददातिनवमं फलम् ॥ १५ ॥ सा पुण्या सा पवित्रा च सा धर्मसुखदायिनी ॥ तस्मात्सदा पूजनीया
चामुंडामुंडमालिनी ॥ १६ ॥ तस्यां यद्युपयुज्यंते प्राणिनो महिषादयः ॥ सर्वे ते स्वर्गतिं यांति घ्नतां पापं न विद्यते ॥ १७ ॥ न तथा बलिदा
नेन पुष्पधूपविलेपनैः ॥ यथा संतुष्यते लोके महिषैर्विंध्यवासिनी ॥ १८ ॥ उद्दिश्य दुर्गां हन्यंते विधानाद्येऽत्र जंतवः ॥ स्वर्गं ते यांति कौंतेय
घातयंतोऽपि भक्तितः ॥ १९ ॥ भवानीप्राङ्गणे प्राणा येषां याता युधिष्ठिर ॥ तेषां स्वर्गे ध्रुवं वासो वरास्तेऽप्सरसां प्रियाः ॥ २० ॥ मन्वन्तरेषु

सर्वेषु कल्पेषु कुरुनंदन ॥ तेषु सर्वेषु चैवासीन्नवमीयं पुरार्चिता ॥ २१ ॥ प्रसिद्धानादिनिधनावर्षेवर्षे युधिष्ठिर ॥ भूयोभूयोऽवतारैश्च भवानी पूज्य
तेसुरैः ॥ २२ ॥ अवतीर्णा भुवि सदा नित्यं दैत्यनिबार्हिणी ॥ स्वर्गपातालमर्त्येषु करोति स्थितिपालनम् ॥ २३ ॥ पुनश्चैषा महादेवी यशोदा
गर्भसंभवा ॥ कंसासुरस्योत्तमाङ्गे पादं दत्त्वा गतायुषः ॥ २४ ॥ ततः प्रभृतिलोकेषु यशोदानंददायिनीम् ॥ विंध्याचले स्थापयित्वा पुनः
पूजा प्रवर्तिता ॥ २५ ॥ पूर्वप्रवृद्धोऽपि पुनर्भगिन्या महिमा कृतः ॥ भुवि सर्वोपकाराय सर्वोपद्रवशांतये ॥ २६ ॥ एवं विंध्योपवासिन्या
नवरात्रोपवासिनः ॥ एकरात्रेण नक्तेन स्वशक्त्याऽयाचितेन वा ॥ २७ ॥ यजनैर्याजनैर्देवाः स्थानेस्थाने पुरेपुरे ॥ गृहेगृहे भक्तिपरै
र्ग्रामेग्रामे वनेवने ॥ २८ ॥ स्नातैः प्रमुदितैर्हृष्टैर्ब्राह्मणैः क्षत्रियैर्नृपैः ॥ वैश्यैः शूद्रैर्भक्तिचित्रैर्म्लेंच्छैरन्यैश्च मानवैः ॥ २९ ॥ स्त्रीभिश्च
कुरुशार्दूल तद्विधानमिदं शृणु ॥ जयाभिलाषी नृपतिः प्रतिपत्प्रभृतिक्रमात् ॥ ३० ॥ लोहाभिहारिकं कर्म कारयेद्यावदष्टमि ॥ प्रागुदक्प्रवणे
देशे पताकाभिरलंकृतम् ॥ ३१ ॥ मण्डपं कारयेद्दिव्यं नवसप्तकरं वरम् ॥ आग्नेय्यां कारयेत्कुण्डं हस्तमात्रं सुशोभनम् ॥ ३२ ॥ मेखलात्रयसं
युक्तं योन्यश्वत्थदलाभया ॥ राजचिह्नानि सर्वाणि शस्त्राण्यस्त्राणि यानि च ॥ ३३ ॥ आनीय मण्डपे तानि सर्वाण्येवाधिवासयेत् ॥ ततस्तु
ब्राह्मणः स्नातः शुक्लांबरधरः शुचिः ॥ ३४ ॥ ॐकारपूर्वकैर्मन्त्रैस्तल्लिंगैर्जुहुयाद् घृतम् ॥ लोहनामाभवत्पूर्वं दानवस्तु महाबलः ॥ ३५ ॥ स देवैः
समरे क्रुद्धैर्बहुधा शकलीकृतः ॥ तदंगसम्भवं लोहं यत्सर्वं दृश्यते क्षितौ ॥ ३६ ॥ शस्त्रास्त्रमन्त्रैर्होतव्यं पायसं घृतसंयुतम् ॥ हुतशेषं तुरंगाणां
गजानामुपहारयेत् ॥ ३७ ॥ लोहाभिहारिकं कर्म तेनैतदृषिभिः स्मृतम् ॥ बद्धप्रतिशरव्यं च गजाश्वसमलंकृतम् ॥ ३८ ॥ भ्रामयेन्नगरे नित्यं नंदि
घोषपुरस्सरम् ॥ प्रत्यहं नृपतिः स्नात्वा संपूज्य पितृदेवताः ॥ ३९ ॥ पूजयेद्राजचिह्नानि फलमाल्यानुलेपनैः ॥ हुतशेषं प्रदातव्यमौपनायनिके
द्विजे ॥ ४० ॥ तस्याभिहरणाद्राज्ञो विजयः समुदाहृतः ॥ पूजामंत्रान्प्रवक्ष्यामि पुराणोक्तानहं तव ॥ ४१ ॥ यैः पूजिताः प्रयच्छन्ति कीर्तिमायु
र्यशोबलम् ॥ यथांबुदश्छादयति शिवायेमां वसुन्धराम् ॥ ४२ ॥ तथाच्छादय राजानं विजयारोग्यवृद्धये ॥ (इति छत्रमन्त्रः) ॥ गन्धर्व
कुलजातस्त्वं माभूयाः कुलदूषकः ॥ ४३ ॥ ब्रह्मणः सत्यवाक्येन सोमस्य वरुणस्य च ॥ प्रभावाच्च हुताशस्य वर्द्धस्व त्वं तुरंगम ॥ ४४ ॥
तेजसा चैव सूर्यस्य मुनीनां तपसा यथा ॥ रुद्रस्य ब्रह्मचर्येण पवनस्य बलेन च ॥ ४५ ॥ स्मर त्वं राजपुत्रोऽसि कौस्तुभं च मणिं स्मर ॥ यां
गतिं ब्रह्महा गच्छेत्पितृहा मातृहा तथा ॥ ४६ ॥ भूम्यर्थेनृतवादी च क्षत्रियश्च पराङ्मुखः ॥ सूर्याचन्द्रमसौ वायुः पावकश्च न यत्र वै ॥ ४७ ॥

व्रजेच्च तां गतिं क्षिप्रं तच्च पापं भवेत्किल ॥ विकृतिं[1] यदि गच्छेस्त्वं युद्धेध्वनि तुरंगम ॥ रिपून्विजित्य समरे सह भर्त्रा सुखी भव ॥ ४८ ॥
॥ ॥ (इत्यश्वमंत्रः)॥ ॥ शक्रकेतो महावीर्य सुपर्णस्त्वय्युपस्थितः ॥ पतत्रिराड्वैनतेयस्तथा नारायणध्वजः ॥ ४९ ॥ काश्यपेयोऽमृतो ज्ञेयो
नागारिर्विष्णुवाहनः ॥ अप्रमेयो दुराधर्षो देवशत्रुनिषूदनः ॥ ५० ॥ गरुत्मान्मारुतगतिस्त्वयि सन्निहितः स्थितः ॥ शस्त्रवर्मायुधान्योधान्रक्षा
स्मांश्च रिपून्दह ॥ ५१ ॥ ॥ (इति ध्वजमंत्रः)॥ ॥ कुमुदैरावणौ पद्मः पुष्पदंतोऽथ वामनः ॥ सुप्रतीकोञ्जनो नील एतेऽष्टौ देवयोनयः ॥
॥ ५२ ॥ एतेषां पुत्रपौत्राश्च बलान्यष्टौ समाश्रिताः ॥ भद्रो मन्द्रो मृगश्चैव गजः संकीर्ण एव च ॥ वनेवने प्रसूतास्ते करियोनिं महागजाः॥५३॥
पांतु त्वां वसवो रुद्रा आदित्याः समरुद्गणाः ॥ भर्तारं रक्ष नागेन्द्र समयं प्रतिपालयन् ॥ ५४ ॥ अवाप्नुहि जयं युद्धे गमने स्वस्ति नो व्रज ॥
श्रीस्ते सोमाद्बलं विष्णोस्तेजः सूर्याज्जवोनिलात् ॥ स्थैर्यं मेरोर्जयं रुद्राद्यशो देवात्पुरंदरात् ॥ ५५ ॥ युद्धे रक्षंतु नागास्त्वां दिशश्च सह दैवतैः ॥
अश्विनौ सह गंधर्वैः पांतु त्वां सर्वतः सदा ॥ ५६ ॥ (इति हस्तिमंत्रः ॥) हुतभुग्वसवो रुद्रा वायुः सोमो महर्षयः ॥ नागकिन्नरगन्धर्वयक्ष
भूतगणाग्रहाः ॥ ५७ ॥ प्रमथाश्च सहादित्यैर्भूतेशोमातृभिः सह ॥ शक्रसेनापतिः स्कन्दो वरुणश्चाश्रितास्त्वयि ॥ ५८ ॥ प्रदहंतु रिपून्सर्वान्राजा
विजयमृच्छतु ॥ यानि प्रयुक्तान्यरिभिर्दूषणानि समंततः ॥ ५९ ॥ एतानि परशत्रूणां हतानि तव तेजसा ॥ कालनेमिवधे युद्धे युद्धे त्रिपुर
घातने ॥ ६० ॥ हिरण्यकशिपोर्युद्धे युद्धे देवासुरे तथा ॥ शोभितासि तथैवाद्य शोभमानास्तु भूपतेः ॥ ६१ ॥ नीलां श्वेतामिमां दृष्ट्वा नश्यं
त्वद्य नृपारयः ॥ व्याधिभिर्विविधैर्घोरैः शस्त्रैश्च युधि निर्जिताः ॥ ६२ ॥ सद्यः स्वस्था भवंति स्म त्वद्धातेनापमार्जिताः ॥ ६३ ॥ पूतना रेवती
नाम्ना कालरात्रीति या स्मृता ॥ दहंत्वाशु रिपून्सर्वान्पताके त्वांमुपागताः[2] ॥ ६४ ॥ (इति पताकामन्त्रः ॥) असिश्च रिपुहा खड्गस्तीक्ष्ण
कर्मा दुरासदः ॥ श्रीगर्भो विजयश्चैव धर्मधारस्तथैव च ॥ ६५ ॥ इत्यष्टौ तव नामानि स्वयमुक्तानि वेधसा ॥ नक्षत्रं कृत्तिका तुभ्यं गुरुर्देवो
महेश्वरः ॥ ६६ ॥ हिरण्यं च शरीरं ते धाता देवो जनार्दनः ॥ पिता पितामहो देवस्त्वं मां पालय सर्वदा ॥ ६७ ॥ (इति खड्गमन्त्रः ॥)
शर्मप्रदस्त्वं समरे वर्म सर्वायसो ह्यसि ॥ रक्ष मां रक्षणीयोऽहं तव वर्मन्नमोऽस्तु ते ॥ ६८ ॥ (इति वर्ममन्त्रः ॥) ॥ दुन्दुभे
त्वं सपत्नानां घोषाद्धृदयकम्पन ॥ भव भूमिप सैन्यानां तथा विजयवर्द्धनः ॥ ६९ ॥ यथा जीमूतघोषेण हृष्यंति वरवारणाः ॥

---

[1] किंकृतिम्—इ० पा० । [2] त्वय्युपाश्रिताः—इ० पा० ।

तथास्तु तव शब्देन हर्षोऽस्माकं मुदावहः ॥७०॥ यथा जीमूतशब्देन स्त्रीणां त्रासोऽभिजायते ॥ तथा च तव शब्देन त्रस्यंत्वस्मद्द्विषो रणे॥७१॥
(इति दुंदुभिमंत्रः ॥) सर्वायुध महामात्र सर्वदेवारिसूदन ॥ चाप मां सर्वदा रक्ष साकं सायकसत्तमैः ॥ ७२ ॥ (इति चापमन्त्रः॥) पुण्यस्त्वं
शङ्ख पुष्पाणां मङ्गलानां च मङ्गलम् ॥ विष्णुना विधृतो नित्यं मनःशांतिप्रदो भव ॥ ७३ ॥ (इति शङ्खमन्त्रः ॥) शशांककरसंकाश हिम
डिंडीरपांडुर ॥ प्रोत्सारयाशु दुरितं चामरामरवल्लभ ॥ ७४ ॥ (इति चामरमंत्रः ॥) सर्वायुधानां प्रथमा निर्मिताऽसि पिनाकिना ॥ शूलायुधा
द्विनिष्कृष्य कृत्वा मुष्टिपरिग्रहम् ॥ ७५ ॥ चंडिकायाः प्रदत्तासि सर्वदुष्टनिबर्हिणि ॥ तथा विस्तारिता चासि देवानां प्रतिपादिता ॥ ७६ ॥
सर्वं सत्त्वांगभूतासि सर्वाशुभनिवारिणि ॥ छुरिके रक्ष मां नित्यं शान्तिं यच्छ नमोऽस्तु ते ॥ ७७ ॥ (इतिच्छूरिकामंत्रः ॥) प्रोत्सारणाय
दुष्टानां साधुसंग्रहणाय च ॥ ब्रह्मणा निर्मितश्चासि व्यवहारप्रसिद्धये ॥७८॥ यशो देहि सुखं देहि जयदो भव भूपतेः ॥ ताडयाशु रिपून्सर्वान्हेमदंड
नमोस्तु ते ॥ ७९ ॥ (इति कनकदण्डमन्त्रः ॥) विजयो जयदो जेता रिपुघाती प्रियंकरः ॥ दुःखहा धर्मदः शांतः सर्वारिष्टविनाशनः ॥८०॥
एतेऽष्टौ संनिधौ यस्मात्तव सिंहा महाबलाः॥ तेन सिंहासनेति त्वं विप्रैर्वेदेषु गीयसे ॥८१॥ त्वयि स्थितः शिवः साक्षात्त्वयि शक्रःसुरेश्वरः॥ त्वयि
स्थितो हरिर्देवस्त्वदर्थं तप्यते तपः ॥ ८२ ॥ नमस्ते सर्वतो भद्र भद्रदो भव भूपतेः ॥ त्रैलोक्यजयसर्वस्व सिंहासन नमोऽस्तु ते ॥ ८३ ॥ (इति
सिंहासनमंत्रः ॥) लोहाभिहारिकं कर्म कृत्वेदं मंत्रपूर्वकम्॥फलनैवेद्यकुसुमैर्धूपदीपविलेपनैः ॥८४॥ अष्टम्यां धावनं कृत्वा पूर्वाह्णे स्नानमाचरेत्॥
॥ ८५ ॥ (अथ गद्यम्) दुर्गां कांचनमूर्तिं रौप्यां वा पैत्तलीं वार्क्षीं चैत्रीं ताम्रीं वाधिभवतः कृत्वा दारुविचित्रतोरणविन्यस्तां शोभने स्थाने
पुरतो विन्यस्तहृष्टां विचित्रगृहमध्यगां स्नातां कुंकुमचंदनगंधैश्चतुःसमैश्चीरपट्टैश्चर्चितगात्रां देवीं कुसुमैरभ्यर्च्य तां बहुभिः पुष्यमाणकीर्तिस्तैर्द्वि
जनैर्जनितपरितोषैर्दिवान्वितो नरेंद्रः स्वयंप्रयच्छेत्पुरोहितैः सार्धं बिल्वपत्रेणार्चनेन मंत्रेणानेन भगवत्यै ॥ (इति गद्यं सम्पूर्णं) ॥ जयंती मंगला
काली भद्रकाली कपालिनी ॥ दुर्गा शिवा क्षमा धात्री स्वाहा स्वधा नमोस्तु ते ॥ ८६ ॥ अमृतोद्भवः श्रीवृक्षो महादेवीप्रियः सदा ॥ बिल्व
पत्रं प्रयच्छामि पवित्रं ते सुरेश्वरि ॥ ८७ ॥ दुर्गा संपूजनीया च [1]तद्दिनाद्द्रोणपुष्पया ॥ सा चाभीष्टा सुरेशान्यास्तथा रूढव्रणायुतः ॥८८॥ ततः
खड्गं नमस्कृत्य शत्रूणां मानमर्दनम् ॥ इच्छेत्स्वविजयं राज्यं सुभिक्षं चात्मनो नृप ॥ ८९ ॥ [2]पुनः पुनः प्रणम्याथ ध्यायेच्चहृदये शिवाम् ॥

---

[1] द्विजेन्द्रेणसुशिष्यया--इ० पा० । [2] प्रणम्यादौ चिन्तयते शिवां महिषमर्दिनीम् ॥ कुमारीं तोषयन्तीं च खण्डचन्द्रयुतां शुभाम्--इ० पा० ।

महिषघ्नीं बहुभुजां कुमारीं सिंहवाहिनीम् ॥ ९० ॥ दानवांस्तर्जयंतीं च खड्गोद्धतकरां शुभाम् ॥ घंटाक्षस्रग्धरां [1]दुर्गां रणारंभे व्यवस्थिताम् ॥ ९१ ॥ ततो जयजयाकारैः स्तवं कुर्यादिमं ततः ॥ ९२ ॥ सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ॥ शरण्ये त्र्यंबके गौरि नारायणि नमोऽस्तु ते ॥ ९३ ॥ कुंकुमेन समालब्धे चन्दनेन विलेपिते ॥ बिल्वपत्रकृतामाले दुर्गेऽहं शरणं गतः ॥९४॥ कृत्वैवमर्च्चां कौरव्य अष्टम्यां जागरं निशि ॥ नटनर्तनगीतैश्च कारयेत्तु महोत्सवम् ॥९५॥ एवं हृष्टैर्निशां नीत्वा प्रभाते चारुणोदये ॥ पातयेन्महिषान्मेषानग्रतो नतकन्धरान् ॥९६॥ शतं चापि शतार्धं वा तदर्द्धं वा यथेच्छया ॥ सुरासवभृतैः कुंभैस्तर्पयेत्परमेश्वरीम् ॥ ९७ ॥ कापालिकेभ्यस्तद्देयं दासीदासजनैस्तथा ॥ विभज्य सर्वं कौंतेय सुहृत्संबंधिबंधुषु ॥९८॥ ततोपराह्णसमये नवम्यां स्यंदने स्थिताम् ॥ भवानीं भ्रामयेद्राष्ट्रे स्वयं राजा ससैन्यवान् ॥९९॥ सहस्रैः पुरुषैर्वापि रथयुक्तैः सुशिक्षितैः ॥ शनैः शनैरधिकया दीप्त्या प्रज्वलदीपकैः ॥१००॥ आकृष्टखड्गैर्वीरैश्च धातुरक्तैर्गजैस्तथा ॥ नदद्भिः[2]शंखपटहैर्नृत्यद्भिर्वारयौवतैः ॥ अलंकृताभिर्नारीभिर्बालकैः सुविभूषितैः ॥१०१॥ भूतेभ्यस्तु बलिं दद्यान्मंत्रेणानेन सामिषम् ॥ सरक्तं सजलं सान्नं गन्धपुष्पाक्षतैर्युतम् ॥१०२॥ त्रींस्त्रीन्वारांस्त्रिशूलेन दिग्विदिक्षु क्षिपेद्बलिम् ॥ बलिं गृह्णन्त्विमं देवा आदित्या वसवस्तथा ॥ १०३ ॥ मरुतोऽथाश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः ॥ असुरा यातुधानाश्च मातरश्च पिशाचकाः ॥ १०४ शाकिन्यो यक्षवेताला योगिन्यः पूतनाः शिवाः ॥ जृंभकाः सिद्धगन्धर्वा व्याला विद्याधरा धराः ॥१०५॥ दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः ॥ जगतां शांतिकर्तारो ब्रह्माद्याश्च महर्षयः ॥१०६॥ सविघ्नं मम पापं ते शाम्यंतु परिपन्थिनः ॥ सौम्या भवंतु तृप्ताश्च भूताः प्रेताः सुखावहाः ॥१०७॥ इत्येवं भ्रामयेद्राष्ट्रे दुर्गां देवीं रथे स्थिताम् ॥ नरयानेन वा पार्थ ततोऽविघ्नं समापयेत् ॥१०८॥ अथोत्पन्नेषु विघ्नेषु भूतशांतिं समाचरेत् ॥ येन विघ्ना न जायंते यात्रा संपूर्णतां व्रजेत् ॥१०९॥ एवं ये कुर्वंते यात्रां राजानोऽन्येऽपि मानवाः ॥ महानवम्यां नंदायां पुत्रका हृष्टमानसाः ॥११०॥ ते सर्वे पापनिर्मुक्ता यांति भागवतीं पुरीम् ॥१११॥ न तेषां शावकोनाग्निर्न चौरा न विनायकाः ॥ विघ्नं कुर्वन्ति राजेन्द्र येषां तुष्टा महेश्वरी ॥ ११२ ॥ नीरुजः सुखिनो भोगभोक्तारो भयवर्जिताः ॥ भवंति भक्ताः पुरुषाः भगवत्याः किमुच्यते ॥ ११३ ॥ इत्येष ते समाख्यातो दुर्गादेव्या महोत्सवः ॥ पठतां शृण्वतां चैव सर्वाशुभविनाशनः ॥ ११४ ॥ शूलाग्रभिन्नमहिषासुरपृष्ठविष्टामृत्खातखड्गरुचिरांगदबाहुदण्डाम् ॥ अभ्यर्च्य पंचवदनानुगतां नवम्यां दुर्गां सुदुर्गगहनानि तरंति

---

[1] उग्राम्–इ० पा० । [2] बाला विद्याधरा नराः–इ० पा० ।

मर्त्याः ॥ ११९ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे महानवमीव्रतवर्णनं नामाष्टत्रिंशदुत्तरशततमोऽध्यायः॥१३८॥
॥ ॥ श्रीकृष्ण उवाच ॥ ॥ पुरा देवासुरे युद्धे ब्रह्माद्यैरमरैर्नृप ॥ विजयार्थं महेन्द्रस्य ध्वजयष्टिः प्रतिष्ठिता ॥ १ ॥ मेरोरुपरि संस्थाप्य
सिद्धविद्याधरोरगैः ॥ सा देवी ह्यर्चिता नित्यं भूषणैर्भूषिता स्वकैः ॥ २ ॥ स्वच्छत्रघंटापिटकैः किंकिणीबद्धबुद्बुदैः ॥ तां दृष्ट्वा दानवा नष्टा
भयादेव रणे हताः ॥ गता रसातलं दैत्या देवाश्चापि दिवि स्थिताः ॥ ३ ॥ ततः प्रभृति तां दिव्यामिंद्रयष्टिं यजंति ते ॥ देवाः सर्वे गणाः
सर्वे हृष्टास्तुष्टायुधिष्ठिर ॥ ४ ॥ अतः स्वर्गं गतो राजा भूरिपुण्यवशाद्वसुः ॥ इन्द्रलोके महाभागो वसुदेवैः सुपूजितः ॥ ५ ॥ तस्मै दत्ता महे
न्द्रेण वसुयष्टिः प्रगृह्यताम् ॥ पूजयित्वा महाभाग सर्वदैत्यापनुत्तये ॥ ६ ॥ अवतार्य वर्षासमये सर्वैर्नृपतिभिः सह ॥ मह्यां संपूजयामास चक्रे
चेन्द्रमहं वसुः ॥ ७॥ महेन मघवा प्रीतो ददौ पुण्यं वसोर्वरम् ॥ ८ ॥ येषु देशेषु मनुजा भक्तिभावपुरःसराः ॥ पूजयिष्यंति वर्षान्ते मया दत्तं
महाध्वजम् ॥ ९ ॥ तेषु देशेषु मुदिताः प्रजा रोगविवर्जिताः ॥ प्रभूतान्ना धर्मयुक्ता वृषमेधा महोत्सवाः ॥ १० ॥ भविष्यंति सुवेषाश्च सुभाषाश्च
सुभूषणाः ॥ ११ ॥ श्रुत्वैतद्वचनं राजा वसुर्वसुमतां वरः ॥ विशेषेण ततश्चक्रे वर्षेवर्षे महोत्सवम् ॥ १२ ॥ श्रवणे स्थापयेद्यष्टिं स्नानवस्त्रैः प्रपू
जिताम् ॥ दैर्घ्येण विंशतिकरां सारदारुमयीं शुभाम् ॥ १३ ॥ इन्द्रस्थाने पुरोदिष्टे इन्द्रमातृकसंज्ञके ॥ तस्मिन्यष्टिं नृपो भोक्ता स्वयं यत्नेन
योजयेत् ॥ १४ ॥ वस्त्रैर्विचित्रैः संवीतां पिटिकालंकृतां तथा ॥ पिटिकानां महाराज क्रमं च कथयामि ते ॥ १५ ॥ प्रथमं लोकपालाख्यं चतु
रस्रं सकर्णिकम् ॥ यमेन्द्रधनदैर्युक्तं वरुणेन समं ततः ॥ १६ ॥ वृत्तं खंडास्रकं रम्यं द्वितीयं रक्तचूर्णितम् ॥ तृतीयं श्वेतकं [1]चित्रमष्टास्रं पिटकं
[2]शुभम् ॥ १७ ॥ चतुर्थमिन्द्रगोपालवृत्तं [3]मातृसमावृतम् ॥ पञ्चमं चाष्टकोणं तु शुक्लं [4]धातुविचित्रितम् ॥ १८ ॥ कृष्णकर्णिकया षष्ठं वृत्तं बुद्बुद
शोभितम् ॥ सप्तमं चाष्टकोणं तु शुक्लं विद्याधरैर्युतम् ॥ १९ ॥ अष्टमं पिटकं वृत्तं वरत्रासूत्रवेष्टितम् ॥ नवग्रहयुतं दीप्तं नवमं च सचंडिकम् ॥
॥ २० ॥ ब्रह्मविष्णवीशसहितं दशमं शिवसंस्थितम् ॥ कृष्णमेकादशं वृत्तं यमयुक्तं युधिष्ठिर ॥ २१ ॥ छात्रं द्वादशमं शुक्लं [5]ध्वजदीर्घं त्रयोद
शम् ॥ सकुशं पुष्पस्रग्दामघंटाचामरचर्चितम् ॥ २२ ॥ बन्धयित्वा चन्द्रपादे रज्जुभिः स्थूणिकां नरैः ॥ शनैरुत्थापयेत्पार्थ हुत्वा वैश्वानरं
द्विजान् ॥ २३ ॥ दक्षिणाभिश्च संपूज्य गुडपायसपूपकैः ॥ कुर्यान्महोत्सवं राजा दिनानि नव सप्त वा ॥ २४ ॥ प्रेक्षणीयैर्महादानैर्नटैर्गीतैः

---

[1] ततः—इ० पा० । [2] स्मृतम्—इ० पा० । [3] मातृसमन्वितम्—इ० पा० । [4] धातुविवर्जितम्—इ० पा० । [5] वज्रदीर्घं त्रयोदशम्—इ० पा० ।

कथानकैः ॥ चक्रदोलाधरोत्सर्गैः कर्कैटैर्मल्लयोधनैः ॥ २५ ॥ वेश्यांगनानरैर्हृष्टैर्द्यूतक्रीडामहोत्सवैः ॥ कर्पूरवस्त्रदानैश्च संमानैश्च परस्परम् ॥ २६ ॥
रात्रौ प्रजागरः कार्यो रक्षणाय प्रयत्नतः ॥ काकोलूककपोतानां येन पातो न विद्यते ॥ २७ ॥ काकाद्भवति दुर्भिक्षं कौशिकान्म्रियते नृपः ॥
कपोताच्च प्रजानाशस्ततो रक्षेत्सदोद्यतः ॥ २८ ॥ शैथिल्याद्गिरिभिच्छक्रः प्रमादान्नीयते यदि ॥ तस्मिन्देशे समुत्थानमिन्द्रकेतोर्न कारयेत् ॥
॥ २९ ॥ यावत्तु नीयते स्थानादन्यस्मादैंद्रतो ध्वजः ॥ ३० ॥ इंद्रध्वजसमुत्थानं प्रमादान्न कृतं यदि ॥ ततो द्वादशमे वर्षे कर्तव्यं नांतरे
पुनः ॥ ३१ ॥ कथंचिद्यदि विघ्नः स्याद्विपाकं मे निबोध वै ॥ छत्रभंगे च्छत्रभंगो ध्वजे राष्ट्रं विनश्यति ॥ ३२ ॥ मस्तके मन्त्रविच्छेदो मुखे
मुख्यबलक्षयः ॥ बाहुदंडे वदेत्पीडां जठरे जाठरं भयम् ॥ ३३ ॥ वरत्रायां मित्रनाशः स्थूणिकासु पदातयः ॥ क्षयं गच्छंति राजेन्द्र तस्माद्य
त्नात्पुरंदरम् ॥ ३४ ॥ उत्थाप्य पूजयेद्भक्त्या दिवारात्रमतंद्रितः ॥ प्रमादात्पतिते भग्ने गते चेन्द्रध्वजे द्विधा ॥ ३५ ॥ सौवर्णं रौप्यकं कृत्वा
पूर्णमुत्थापयेद्ध्वजम् ॥ शांतिकं पौष्टिकं कृत्वा द्विजेभ्योन्नं प्रदापयेत् ॥ ३६ ॥ त्रपुसैः कर्कटीभिश्च नालिकेरैः कपित्थकैः ॥ बीजपूरैः
सनारंगैर्[5]भक्ष्यान्नैर्विविधैस्तथा ॥ ३७ ॥ नैवेद्यादिभिरभ्यर्च्य मंत्रेणानेन तोषयेत् ॥ वज्रहस्त सुरारिघ्न बहुनेत्र पुरंदर ॥ क्षेमार्थं
सर्वलोकस्य पूजेयं प्रतिगृह्यताम् ॥ ३८ ॥ श्रवणाद्भरणीं यावत्पूजां कृत्वा विधानतः ॥ रात्रौ विसर्जयेच्छक्रं मंत्रेणानेन पांडव ॥ ३९ ॥ सार्द्धं
सुरासुरगणैः पुरंदरशतक्रतो ॥ उपहारं गृहीत्वैनं महेन्द्रध्वज गम्यताम् ॥ ४० ॥ एवं यः कुरुते यात्रामिन्द्रकेतोर्युधिष्ठिर ॥ पर्जन्यः कामवर्षी
स्यात्तस्मिन्राष्ट्रे न संशयः ॥ ४१ ॥ ईतयो न प्रवर्तंते तस्मान्मृत्युकृतं भयम् ॥ विजित्य शत्रून्समरे वशे कृत्वामहीतलम् ॥ भुक्त्वाराज्यं चिरंका
लमिन्द्रलोकेमहीयते ॥४२॥ राष्ट्रे पुरे च नगरे सुरराजकेतोर्यत्रोत्सवो नृपजनैः क्रियते समेत्य॥ दुष्टोपसर्गजनितं परचक्रजं वा तस्मिन्भयं भवति
पार्थ न किञ्चिदेव ॥ ४३ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे महेन्द्रध्वजमहोत्सववर्णनं नामैकोनचत्वारिंशदुत्तरश
ततमोऽध्यायः ॥ १३९ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ पुरा वामनरूपेण याचयित्वा धरामिमाम् ॥ बलियज्ञे हरिः सर्वं क्रांतवान्विक्रमैस्त्रिभिः ॥
॥ १ ॥ इन्द्राय दत्तवान्राज्यं बलिं पातालवासिनम् ॥ [1]कृत्वा दैत्यपतेर्वासमहोरात्रं पुनर्नृप ॥ २ ॥ एकमेव हि भोगार्थं बलिराज्येतिचिह्नितम् ॥
सरहस्यं तदेतत्ते कथयामि नरोत्तम ॥ ३ ॥ कार्त्तिके कृष्णपक्षस्य पञ्चदश्यां निशागमे ॥ यथेष्टचेष्टा दैत्यानां राज्यं तेषां महीतले ॥ ४ ॥ ॥ युधि

---

[5] पक्वान्नैः—इ० पा० । [1] कृत्वा दैत्यपतेर्दत्तमहोरात्रं पदं नृप—इ० पा० ।

ष्ठिर उवाच ॥ ॥ निश्शेषेण हृषीकेश कौमुदीं ब्रूहि मे प्रभो ॥ किमर्थं दीयते दानं तस्यां का देवता भवेत् ॥ ५ ॥ किंस्वित्तस्यै भवेद्देयं केभ्यो देयं जनार्दन ॥ प्रहर्षः कोऽत्र निर्दिष्टः क्रीडा कात्र प्रकीर्तिता ॥ ६ ॥ श्रीकृष्ण उवाच ॥ ॥ कार्त्तिके कृष्णपक्षे च चतुर्दश्यां दिनोदये ॥ अवश्यमेव कर्तव्यं स्नानं नरकभीरुभिः ॥ ७ ॥ अपामार्गपल्लवान्वा भ्रामयेन्मस्तकोपरि ॥ सीतालोष्टसमायुक्तसकंटकदलान्वितान् ॥ ८ ॥ हर पापमपामार्ग भ्राम्यमाणं पुनःपुनः ॥ आपदं किल्बिषं चापि ममापहर सर्वशः ॥ अपामार्ग नमस्तेस्तु शरीरं मम शोधय ॥ ९ ॥ (इत्यपमार्गभ्रमण मन्त्रः) ततश्च तर्पणं कार्यं धर्मराजस्य नामभिः ॥ यमाय धर्मराजाय मृत्यवे चांतकाय च ॥ वैवस्वताय कालाय सर्वभूतक्षयाय च ॥१०॥ नरकाय प्रदातव्यो दीपः संपूज्य देवताः ॥ ततः प्रदोषसमये दीपान्दद्यान्मनोरमान् ॥ ११ ॥ ब्रह्मविष्णुशिवादीनां भवनेषु मठेषु च ॥ कूटागारेषु चैत्येषु सभासु च नदीषु च ॥ १२ ॥ प्राकारोद्यानवापीषु प्रतोलीनिष्कुटेषु च ॥ सिद्धार्हद्बुद्धचामुंडाभैरवायतनेषु च ॥ मंदुरासु विविक्तासु हस्तिशालासु चैव हि ॥ १३ ॥ एवं प्रभातसमयेऽमावास्यायां नराधिप ॥ स्नात्वा देवान्पितॄन्भक्त्या संपूज्याथ प्रणम्य च ॥ १४ ॥ कृत्वा तु पार्वणं श्राद्धं दधिक्षीरघृतादिभिः ॥ भोज्यैर्नानाविधैर्विप्रान्भोजयित्वा क्षमाप्य च ॥ १५ ॥ ततोऽपराह्णसमये घोषयेन्नगरे नृपः ॥ अद्य राज्यं बलेर्लोका यथेष्टं मोद्यतामिति ॥ १६ ॥ लोकश्चापि परे हृष्येत्सुधाधवलिताजिरे ॥ वृक्षचन्दनमालाढ्यैश्चर्चिते च गृहेगृहे ॥ १७ ॥ द्यूतपानरतोहृष्टनरनारीमनोहरे ॥ नृत्यवादित्रसंघुष्टे सम्प्रज्वलितदीपके ॥ १८ ॥ अन्योन्यप्रीतिसंहृष्टदत्तलाभेन वै जने ॥ तांबूलहृष्टवदने कुङ्कुमक्षोदचर्चिते ॥ १९ ॥ दुकूलपट्टनेपथ्ये स्वर्णमाणिक्यभूषिते ॥ अद्भुतोद्भटशृंगारप्रदर्शितकुतूहले ॥ २० ॥ युवतीजनसंकीर्णवस्त्रोज्ज्वलविहारिणि ॥ दीपमालाकुले रम्ये विध्वस्तध्वांतसञ्चये ॥ प्रदोषे दोषरहिते शस्तदोषागमे शुभे ॥ २१ ॥ शशिपूर्णमुखाभिश्च कन्याभिः क्षिप्ततण्डुलम् ॥ नीराजनं प्रकर्तव्यं वृक्षशाखासु दीपकैः ॥ २२ ॥ भ्राम्यमाणो नतो मूर्ध्नि मनुजानां जनाधिपः ॥ वृक्षशाखांतदीपानां निरस्ताद्दर्शनाद्व्रजेत् ॥ नीराजनं तु तेनेह प्रोच्यते विजयप्रदम् ॥ २३ ॥ तस्माज्जनेन कर्तव्यं रक्षोदोषभयापहम् ॥ यात्राविहारसञ्चारे जयजीवेति वादिना ॥ २४ ॥ क्षुद्रोपसर्गरहिते राजचौरभयोज्झिते ॥ मित्रस्वजनसम्बन्धिसुहृत्प्रेमानुरंजिते ॥ २५ ॥ ततोऽर्द्धरात्रसमये स्वयं राजा व्रजेत्पुरम् ॥ अवलोकयितुं रम्यं पद्भ्यामेव शनैःशनैः ॥ २६ ॥ महता तूर्यघोषेण ज्वलद्भिर्हस्तदीपकैः ॥

कृतशोभां पुरीं पश्येत्कृतरक्षां स्वकैर्नरैः ॥ २७ ॥ तं दृष्ट्वा महदाश्चर्यमृद्धिं चैवात्मनः [1]शुभाम् ॥ बलिराज्यप्रमोदं च ततः स्वगृहमाव्रजेत् ॥ २८ ॥
एवं गते निशार्धे तु जने निद्रार्द्धलोचने ॥ तावन्नगरनारीभिः शूर्पडिंडिमवादनैः ॥ निष्काम्यते प्रहृष्टाभिरलक्ष्मीः स्वगृहांगणात् ॥ २९ ॥
ततः प्रबुद्धे सकले जने जातमहोत्सवे ॥ माल्यदीपकहस्ते च स्नेहनिर्भरलोचने ॥ ३० ॥ वेश्या विलासिनी सार्धं स्वस्ति मंगलकारिणी ॥
गृहाद्गृहं व्रजन्ती च पादाभ्यंगप्रदायिनी ॥ ३१ ॥ पिष्टकोद्वर्तनपरे गुरुशुश्रूषणाकुले ॥ द्विजाभिवादनपरे सुखराज्याभिवीक्षणे ॥ ३२ ॥
सुवासिनीभ्यो दाने च दीयमाने यदृच्छया ॥ यथाप्रभातसमये राजार्हमानयेज्जनम् ॥ ३३ ॥ सद्भावेनैव सन्तोष्या देवाः सत्पुरुषा द्विजाः ॥
इतरे चान्नपानेन वाक्प्रदानेन पंडिताः ॥ ३४ ॥ वस्त्रैस्तांबूलदानैश्च पुष्पकर्पूरकुंकुमैः ॥ भक्ष्यैरुच्चावचैर्भोज्यैरन्तःपुरविलासिनीः ॥ ३५ ॥ ग्रामै
र्विषयदानैश्च सामंतनृपतीन्धनैः ॥ पदातीनङ्गसंलग्नान्ग्रैवेयकटकैः स्वकान् ॥ ३६ ॥ स्वयं राजा तोषयेत्स जनान्भृत्यान्पृथक्पृथक् ॥
यथार्हं तोषयित्वा तु ततो मल्लनटान्भटान् ॥३७॥ वृषभान्महिषांश्चैव युध्यमानान्परैः सह ॥ गजानश्वांश्च योधांश्च पदातीन्समलंकृतान् ॥३८॥
मंचारूढः स्वयं पश्येन्नटनर्तकचारणान् ॥ क्रुद्धापयेदानयेच्च गोमहिष्यादिकं ततः ॥ ३९ ॥ दिष्ट्या कार्यं पयोज्योतिरुक्तिप्रत्युक्तिका वदेत् ॥
ततोपराह्णसमये पूर्वस्यां दिशि भारत ॥ ४० ॥ मार्गपालीं प्रबध्नीयात्तुंगस्तंभेऽथ पादपे ॥ कुशकाशमयीं दिव्यां संभवे बहुभिर्वृताम् ॥ ४१ ॥
पूजयित्वा गजान्वाजीन्सार्धे यामत्रये गते ॥ गावो वृषाः समहिषा मंडिता घंटिकोत्कटाः ॥ ४२ ॥ कृते होमे द्विजेन्द्रैस्तु [2]गृह्णीयान्मार्गपालि
काम् ॥ राष्ट्रभोज्येन धाराभिः सहस्रेण शतेन वा ॥४३॥ स्वशक्त्यपेक्षया वापि गृह्णीयाद्ग्रामभोजनैः ॥ मातुः कुलं पितृकुलमात्मानं सहबंधुभिः
॥ ४४ ॥ संतारयेत्स सकलं मार्गपालीं ददाति यः ॥ नीराजनं च तत्रैव कार्यं राज्ञे जयप्रदम् ॥४५॥ मार्गपालीतलेनेत्थं हया गावो गजा वृषाः ॥
राजानो राजपुत्राश्च ब्राह्मणाः शूद्रजातयः ॥ ४६ ॥ मार्गपालीं समुल्लंघ्य नीरुजः स्यात्सुखी सदा ॥ कृत्वैतत्सर्वमेवेह रात्रौ दैत्यपतेर्बलेः ॥
॥ ४७ ॥ पूजां कुर्यान्नरः साक्षाद्भूमौ मंडलके कृते ॥ बलिमालिख्य दैत्येन्द्रं वर्णकैः पंचरंगकैः ॥ ४८ ॥ सर्वाभरणसंपूर्णं विंध्यावल्या सहासि
तम् ॥ कूष्मांडबाणजंघोरुमुरदानवसंवृतम् ॥ ४९ ॥ संपूर्णहृष्टवदनं किरीटोत्कटकुण्डलम् ॥ द्विभुजं दैत्यराजानं कारयित्वा नृपः स्वयम् ॥५०॥
गृहस्य मध्ये शालायां विशालायां ततोऽर्चयेत् ॥ भ्रातृमंत्रिजनैः सार्द्धं संतुष्टो बंदिभिः स्तुतः ॥ ५१ ॥ कमलैः कुमुदैः पुष्पैः कह्लारै रक्तको

---

[1] प्रभाम्–इ० पा० । [2] प्रयत्नात्–इ० पा० ।

त्पलैः ॥ गन्धधूपान्ननैवेद्यैरक्षतैर्गुडपूपकैः ॥५२॥ मद्यमांससुरालेह्यदीपवर्त्युपहारकैः ॥ मंत्रेणानेन राजेन्द्र समंत्री सपुरोहितः ॥ ५३ ॥ बलिराज नमस्तुभ्यं विरोचनसुत प्रभो ॥ भविष्येन्द्रसुराराते पूजेयं प्रतिगृह्यताम् ॥ ५४ ॥ एवं पूजां नृपः कृत्वा रात्रौ जागरणं ततः ॥ कारयेत्प्रेक्षणीयादिनटक्षत्रकथानकैः ॥ ५५ ॥ लोकश्चापि गृहस्यांते शय्यायां शुक्लतंडुलैः ॥ संस्थाप्य बलिराजानं फलैः पुष्पैश्च पूजयेत् ॥ ५६ ॥ बलिमुद्दिश्य दीयंते दानानि कुरुनन्दन ॥ यानि तान्यक्षयाण्याहुर्मयैवं संप्रदर्शितम् ॥ ५७ ॥ यदस्यां दीयते दानं स्वल्पं वा यदि वा बहु ॥ तदक्षयं भवेत्सर्वं विष्णोः प्रीतिकरं परम् ॥ ५८ ॥ विष्णुना वसुधा लब्धा प्रीतेन बलये पुनः ॥ उपकारकरो दत्तश्चासुराणां महोत्सवः ॥ ५९ ॥ ततः प्रभृति राजेन्द्र प्रवृत्ता कौमुदी पुनः ॥ सर्वोपद्रवविद्रावि सर्वविघ्नविनाशिनी ॥६०॥ लोकशोकहरी काम्या धनपुष्टिसुखावहा ॥ कुशब्देन मही ज्ञेया मुदी हर्षे ततः परम् ॥ ६१ ॥ धातुज्ञैर्नैगमज्ञैश्च तेनैषा कौमुदी स्मृता ॥ कौ मोदन्ते जना यस्यां नानाभावैः परस्पराः ॥ ६२ ॥ हृष्टास्तुष्टाः सुखायत्तास्तेनैषा कौमुदी स्मृता ॥ कुमुदानि बलेर्यस्माद्दीयन्तेऽस्यां युधिष्ठिर ॥ ६३ ॥ अर्थार्थं पार्थ भूमौ च तेनैषा कौमुदी स्मृता ॥ एकमेव महोरात्रं वर्षे वर्षे विशांपते ॥ ६४ ॥ दत्तं दानवराजस्य आदर्शमिव भूतले ॥ यः करोति नृपो राष्ट्रे तस्य व्याधिभयं कुतः ॥ ६५ ॥ कुत ईतिभयं तत्र नास्ति मृत्युकृतं भयम् ॥ सुभिक्षं क्षेममारोग्यं सर्वसम्पद उत्तमाः ॥ ६६ ॥ नीरुजश्च जनाः सर्वे सर्वोपद्रववर्जिताः ॥ कौमुदीकरणाद्राजन्भवतीह महीतले ॥ ६७ ॥ यो यादृशेन भावेन तिष्ठत्यस्यां युधिष्ठिर ॥ हर्षदैन्यादिरूपेण तस्य वर्षं प्रयाति हि ॥ ६८ ॥ रुदिते रोदिति वर्षं हृष्टो वर्षं प्रहृष्यति ॥ भुक्तौ भोक्ता भवेद्वर्षं स्वस्थः स्वस्थो भवेदिति ॥ ६९ ॥ तस्मात्प्रहृष्टैस्तुष्टैश्च कर्तव्या कौमुदी नरैः ॥ वैष्णवी दानवी चेयं तिथिः पैत्री युधिष्ठिर ॥ ७० ॥ उपशमितमेघनादं प्रज्वलितदशाननं रमितरामम् ॥ रामायणमिव सुभगं दीपदिनं हरतु वो दुरितम् ॥ ७१ ॥ कूष्माण्डादानरम्यं कुवलयखण्डैश्च धातुकाभद्रम् ॥ शरदिव हरिगतनिद्रं दीपदिनं हरतु वो दुरितम् ॥७२॥ दीपोत्सवे जनितसर्वजनप्रमोदां कुर्वंति ये सुमनसो बलिराजपूजाम् ॥ दानोपभोगसुखवृद्धिशताकुलानां हर्षेण वर्षमिह पार्थिव याति तेषाम् ॥७३॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे दीपालिकोत्सववर्णनं नाम चत्वारिंशदुत्तरशततमोऽध्यायः ॥ १४० ॥छ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कथयस्व महाभाग सर्वज्ञो ह्यसि यादव ॥ सर्वकामाप्तये कृत्यं कथं शांतिकपौष्टिकम् ॥१॥ ॥ श्रीकृष्ण उवाच ॥ ॥ श्रीकामः शान्तिकामो वा ग्रहयज्ञं समारभेत् ॥ दृष्ट्यायुःपुष्टिकामो वा तथैवाभिचरन्पुनः ॥ २ ॥ सर्वशास्त्राण्यनुक्रम्य संक्षिप्य ग्रन्थविस्तरम् ॥ ग्रहशांतिं प्रवक्ष्यामि पुराणश्रुतिभाषि

ताम् ॥३॥ पुण्येऽह्नि विप्रकथिते कृत्वा ब्राह्मणवाचनम् ॥ ग्रहान्ग्रहाधिदेवांश्च स्थाप्य होमं समारभेत् ॥ ४ ॥ ग्रहयज्ञस्त्रिधा प्रोक्तः पुराणश्रुतिकोविदैः ॥ प्रथमोऽयुतहोमः स्याल्लक्षहोमस्ततः परम् ॥ ५ ॥ तृतीयः कोटिहोमस्तु सर्वकामफलप्रदः ॥ अयुतेनाहुतीनां च नवग्रहमखः स्मृतः ॥६॥ तस्य तावद्विधिं वक्ष्ये पुराणश्रुतिभाषितम् ॥ गर्तस्योत्तरपूर्वेण वितस्तिद्वयविस्तृताम् ॥ ७ ॥ कुर्याद्विधानतो वेदिं वितस्त्युच्छ्रयसंयुताम् ॥ संस्थापनाय देवानां चतुरस्रामुदक्प्लवाम् ॥ ८ ॥ अग्निप्रणयनं कृत्वा तस्यामावाहयेत्सुरान् ॥ देवानां तत्र संस्थाप्या विंशतिर्द्वादशाधिका ॥ ९ ॥ सूर्यः सोमो महीपुत्रो बुधो जीवः सितोर्कजः ॥ राहुः केतुरिति प्रोक्ता ग्रहा लोकहितावहाः ॥ १० ॥ ताम्रकात्स्फटिकाद्रक्तचन्दनात्स्वर्णजावुभौ ॥ रजतादायसाच्चैव ग्रहाः कार्याः क्रमादमी ॥ ११ ॥ मध्ये तु भास्करं विद्याल्लोहितं दक्षिणेन तु ॥ उत्तरेण गुरुं विद्याद्बुधं पूर्वोत्तरेण तु ॥ १२ ॥ पूर्वेण भार्गवं विद्यात्सोमं दक्षिणपूर्वके ॥ पश्चिमोत्तरतः केतुं स्थापयेच्छुक्लतंडुलैः ॥ १३ ॥ राजामात्यान्महाराज तंडुलैः स्थापयेदथ ॥ भास्करस्येश्वरं विद्यादुमां च शशिनस्तथा ॥ १४ ॥ स्कन्दमङ्गारकस्यापि बुधस्य च तथा हरिम् ॥ ब्रह्माणं च गुरोर्विद्याच्छुक्रस्यापि शचीपतिम् ॥ ॥ १५ ॥ शनैश्चरस्य तु यमं राहोः कालं तथैव च ॥ केतोस्तु चित्रगुप्तं तु सर्वेषामेव देवताः ॥ १६ ॥ अग्निरापः क्षितिर्विष्णुरिन्द्रः सौवर्णदेवताः ॥ प्रजापतिश्च सूर्यश्च ब्रह्मा प्रत्यधिदेवताः ॥१७॥ विनायकं तथा दुर्गां वायुमाकाशमेव च ॥ सावित्रीं च तथा लक्ष्मीमुमां च सहभर्तृकाम् ॥ ॥ १८ ॥ आवाहयेद्व्याहृतिभिस्तथैवाश्विकुमारकौ ॥ संस्मरेद्रक्तमादित्यमंगारकसमन्वितम् ॥ १९ ॥ सोमशुक्रौ यथाश्वेतौ बुधजीवौ च पिङ्गलौ ॥ मंदराहू तथा कृष्णौ धूम्रं केतुगुणं विदुः ॥ २० ॥ ग्रहवर्णानि देयानि वासांसि कुसुमानि च ॥ गंधाश्च बलयश्चैव धूपा गुग्गुलपूर्वकाः ॥ ॥ २१ ॥ गुडौदनं रवेर्दद्यात्सोमाय घृतपायसम् ॥ अंगारकाय संयावं बुधाय क्षीरषष्टिकम् ॥ २२ ॥ दध्यन्नं गुरवे दद्याच्छुक्राय तु घृतौदनम् ॥ शनैश्चराय कृशरं मेषमांसं तु राहवे ॥ २३ ॥ चित्रौदनं केतवे च सर्वान्भक्ष्यैरथार्चयेत् ॥ प्रागुत्तरेण तस्माच्च दध्यक्षतविभूषितम् ॥ २४ ॥ चूतपल्लवसंपन्नं फलवस्त्रयुगान्वितम् ॥ पञ्चरत्नसमायुक्तं पञ्चभंगयुतं तथा ॥ २५ ॥ स्थापयेदव्रणं कुंभं वरुणं तत्र विन्यसेत् ॥ गंगाद्याः सरितः सर्वाः समुद्राश्च सरांसि च ॥ २६ ॥ गजाश्वरथ्यावल्मीकात्संगमाद्ध्रदगोकुलात् ॥ मृदमानीय राजेन्द्र सर्वौषधिजलान्विताम् ॥ २७ ॥ स्नानार्थं विन्यसेत्तत्र यजमानस्य धर्मवित् ॥ सर्वे समुद्राः सरितः सरः प्रस्रवणानि च ॥ २८ ॥ आयांतु यजमानस्य दुरितक्षयकारकाः ॥ एवमावाहयित्वा तान्सर्वान्नृपतिसत्तम ॥ २९ ॥ होमं समारभेत्सर्पिर्यवव्रीहितिलादिना ॥ अर्कः पलाशखदिरौ ह्यपामार्गोऽथ पिप्पलः ॥ ३० ॥ उदुंबर

शमीदूर्वाकुशाश्च समिधः क्रमात् ॥ एकैकस्य चाष्टशतमष्टाविंशति वा पुनः ॥ ३१ ॥ होतव्या मधुसर्पिर्भ्यां दध्ना वा पायसेन वा ॥ प्रादे
शमात्रा ऋजवो विशाखा विफलाः शुभाः ॥ ३२ ॥ कल्प्यंते समिधः प्राज्ञैः सर्वकर्मसु सर्वदा ॥ देवानामपि सर्वेषामुपांशुपरमार्थवित् ॥ ३३ ॥
स्वेन स्वेनैव मंत्रेण होतव्याः समिधः पृथक् ॥ आकृष्णेन इमं देवा अग्निर्मूर्द्धा दिवः क्रमात् ॥ ३४ ॥ उद्बुध्यस्वेति बोध्यश्च यथासंख्यमुदाहृताः ॥
बृहस्पते अतियदस्तथैवान्नात्परिस्रुतः ॥ ३५ ॥ शन्नोदेवीति च कयां केतुं कृण्वन्नितीति च ॥ होतव्यं यद्वदाज्यं चरुं भक्ष्याणि वा पुनः ॥ ३६ ॥
मंत्रैर्दशाहुतीर्दत्त्वा होमो व्याहृतिभिस्ततः ॥ उदङ्मुखाः प्राङ्मुखाश्च कुर्युर्ब्राह्मणपुंगवाः ॥ ३७ ॥ मंत्रवंतस्तु कर्तव्याश्चरवः प्रतिदैवतम् ॥ अपो
राजेति रुद्रस्य बलिहोमं समारभेत् ॥ ३८ ॥ आपो हिष्टेत्युमायास्तु श्येनेति स्वामिनस्तथा ॥ विष्णोरिदं विष्णुरिति स्वमिच्छेति स्वयंभुवः ॥
॥ ३९ ॥ इन्द्रादिदेवतानां तु इन्द्राय जुहुयात्पुनः ॥ नवा यमस्यायं गौश्चेत्येवं होमः प्रकीर्तितः ॥ ४० ॥ कालस्य ब्रह्मजज्ञानमिति मंत्रः प्रश
स्यते ॥ चित्रगुप्तस्य वा जात पौराणिकाविदुर्बुधाः ॥ ४१ ॥ "अग्निं दूतंवृणीमहे" इति वह्नेरुदाहृतः ॥ इंद्रं यमं वरुणमित्ययं मंत्रः प्रकीर्तितः ॥
॥ ४२ ॥ भूमेः पृथिव्यंतरिक्षमिति वेदेषु पठ्यते ॥ "सहस्रशीर्षा पुरुष" इति विष्णोरुदाहृतः ॥ ४३ ॥ वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ॥
ब्रह्मणा सहितः शेषो दिक्पालाः पांतु ते सदा ॥ ४४ ॥ कीर्तिर्लक्ष्मीर्धृतिर्मेधाः पुष्टिः श्रद्धा क्रिया मतिः ॥ बुद्धिर्लज्जा शांतिपुष्टी कांतिस्तुष्टिश्च
मातरः ॥४५॥ एतास्त्वामभिषिंचंतु धर्मपत्न्यः समागताः ॥ आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः ॥४६॥ ग्रहास्त्वामभिषिंचंतु राहुः केतुश्च
तार्पिताः ॥ देवदानवगंधर्वा यक्षराक्षसपन्नगाः ॥ ४७ ॥ ऋषयो मनवो गावो देवमातर एव च ॥ देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः ॥
॥ ४८ ॥ अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च ॥ औषधानि च रत्नानि कालस्यावयवाश्च ये ॥ ४९ ॥ सरितः सागराः शैलास्तीर्थानि जलदा
नदाः ॥ एते त्वामभिषिंचंतु सर्वकामार्थसिद्धये ॥ ५० ॥ ततः शुक्लांबरधरः शुक्लगन्धानुलेपनः ॥ सर्वगन्धसमायुक्तः स्नातः श्रद्धासमन्वितः ॥५१॥
यजमानः सपत्नीकान्सिद्धिदांस्तान्समाहितान् ॥ दक्षिणाभिः प्रयत्नेन पूजयेद्गतविस्मयः ॥ ५२ ॥ सूर्याय कपिलां धेनुं दद्याच्छंखं तथेन्दवे ॥
रक्तं धुरंधरं दद्याद्भौमाय ककुदाधिकम् ॥ ५३ ॥ बुधाय जातरूपं च गुरवे पीतवाससी ॥ श्वेताश्वं दैत्यगुरवे कृष्णांगामर्कसूनवे ॥ ५४ ॥ आयसं
राहवे दद्यात्केतवे च्छागमुत्तमम् ॥ सुवर्णेन समा कार्या यजमानेन दक्षिणा ॥ ५५ ॥ सर्वेषामथवा दद्याद्गुरुर्वा येन तुष्यति ॥ सुमंत्रेण प्रदातव्याः
सर्वाः सर्वार्थदक्षिणाः ॥ ५६ ॥ कपिले सर्वदेवानां पूजनीयासि रोहिणी ॥ तीर्थदेवमयी यस्मादतः शांतिं प्रयच्छ मे ॥ ५७ ॥ पुण्यस्त्वं शंख

पुण्यानां मङ्गलानां च मंगलम् ॥ विष्णुना विधृतो नित्यमतः शांतिं प्रयच्छ मे ॥ ५८ ॥ धर्म त्वं वृषरूपेण जगदानन्दकारकः ॥ अष्टमूर्तेरधि
ष्ठानमतः शांतिं प्रयच्छ मे ॥ ५९ ॥ हिरण्यगर्भगर्भस्थं हेम बीजं विभावसोः ॥ अनन्तपुण्यफलदमतः शांतिं प्रयच्छ मे ॥ ६० ॥ पीतवस्त्रयुगं
दद्याद्वासुदेवस्य वल्लभम् ॥ प्रदानात्तस्य मे विष्णुरतः शांतिं प्रयच्छतु ॥ ६१ ॥ कपिलस्त्वश्वरूपेण यस्मादमृतसम्भवः ॥ चन्द्रार्कवाहनो
नित्यमतः शांतिं प्रयच्छ मे ॥ ६२ ॥ यस्मात्त्वं पृथिवी सर्वा धेनो वै कृष्णसंज्ञिता ॥ सर्वपापहरा नित्यमतः शांतिं प्रयच्छ मे ॥ ६३ ॥ यस्मा
दायस कर्माणि तवाधीनानि सर्वदा ॥ लांगलान्यायुधादीनि तस्माच्छांतिं प्रयच्छ मे ॥ ६४ ॥ यस्मात्त्वं छाग यज्ञानामंगत्वेन व्यवस्थितः ॥
योनिर्विभावसोर्नित्यमतः शांतिं प्रयच्छ मे ॥ ६५ ॥ गवामंगेषु तिष्ठंति भुवनानि चतुर्दश ॥ यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र च ॥
॥ ६६ ॥ यस्मादशून्यं शयनं केशवस्य शिवस्य च ॥ शय्या ममाप्यशून्यास्तु तथा जन्मनि जन्मनि ॥ ६७ ॥ यथा रत्नेषु सर्वेषु सर्वे देवा व्यव
स्थिताः ॥ तथा शांतिं प्रयच्छंतु रत्नदानेन मे सुराः ॥ ६८ ॥ यथा भूमिप्रदानस्य कलां नार्हंति षोडशीम् ॥ दानान्यन्यानि मे शांतिं भूमि
दानाद्भवत्यपि ॥ ६९ ॥ एवं संपूजयेद्भक्त्या वित्तशाठ्यविवर्जितः ॥ वस्त्रकाञ्चनरत्नौघैर्माल्यगंधानुलेपनैः ॥ ७० ॥ ग्रहस्वरूपमतुलं कथ्यमानं
निबोध मे ॥ भक्तिभावप्रपन्नस्य कथ्यमानं विराजते ॥ पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः ॥ सप्ताश्वः सप्तरज्जुश्च द्विभुजः स्यात्सदा रविः ॥
॥ ७१ ॥ श्वेतः श्वेतांबरधरो दशाश्वः श्वेतभूषणः ॥ गदापाणिर्द्विबाहुश्च कर्तव्यो वरदः शशी ॥ ७२ ॥ रक्तमाल्यांबरधरः कर्णिकारसमद्युतिः ॥
खड्गचर्मगदापाणिर्विधेयो भूमिनंदनः ॥ ७३ ॥ पीतमाल्यांबरधरः पीतगंधानुलेपनः ॥ कांचने च रथे दिव्ये शोभमानो बुधः सदा ॥ ७४ ॥
देवदैत्यगुरू तद्वत्पीतश्वेतौ चतुर्भुजौ ॥ दंडिनौ वरदौ कार्यौ साक्षसूत्रकमंडलू ॥ ७५ ॥ इन्द्रनीलद्युतिः शूली वरदो गृध्रवाहनः ॥ बाणबाणा
सनधरः कर्तव्योऽर्कसुतः सदा ॥ ७६ ॥ शार्दूलवदनः खड्गी वर्मी शूली वरप्रदः ॥ नीलसिंहासनस्थश्च राहुरत्र प्रशस्यते ॥ ७७ ॥ धूम्रा द्विबाहवः
सर्वे गदिनो विकृताननाः ॥ गृध्रासनरता नित्यं केतवः स्युर्वरप्रदाः ॥ ७८ ॥ सर्वे किरीटिनः कार्या ग्रहा लोकहितावहाः ॥ स्वांगुलेनोच्छ्रिताः
सर्वे शतमष्टोत्तरं तदा ॥ ७९ ॥ ग्रहस्वरूपमेतत्ते व्याख्यातं पांडुनन्दन ॥ एतज्ज्ञात्वा प्रयत्नेन पूजा कार्या विचक्षणैः ॥ ८० ॥ विधिना ग्रहपूजां
योनेन त्वारभते नरः ॥ सर्वान्कामानवाप्नोति प्रेत्य स्वर्गे महीयते ॥ ८१ ॥ यस्तु पीडाकरो नित्यं माल्यवित्तस्य वा ग्रहः ॥ तं तु यत्नेन संपूज्य
शेषानप्यर्चयेद्बुधः ॥ ८२ ॥ ग्रहा गावो नरेन्द्राश्च ब्राह्मणाश्च विशेषतः ॥ पूजिताः पूजयंत्येते निर्दहंत्यवमानिताः ॥ ८३ ॥ तस्मान्न दक्षिणाहीनं

कर्तव्यं भूतिमिच्छता ॥ संपूर्णायां दक्षिणायां यस्मादेकोऽपि तुष्यति ॥ ८४ ॥ सदैवाऽयुतहोमोऽयं नवग्रहमखः स्मृतः ॥ ८५ ॥ विवाहोत्सवय
ज्ञेषु प्रतिष्ठादिषु कर्मसु ॥ निर्विघ्नार्थं महाराज तथोद्वेगाद्भुतेषु च ॥ ८६ ॥ कथितोऽयुतहोमोऽयं लक्षहोममतः शृणु ॥ सर्वकामाप्तये यस्माल्लक्ष
होमं विदुर्बुधाः ॥ ८७ ॥ पितॄणां वल्लभो यस्माद्भुक्तिमुक्तिफलप्रदः ॥ ग्रहताराबलं लब्ध्वा कृत्वा ब्राह्मणवाचनम् ॥ ८८ ॥ गृह
स्योत्तरपूर्वेण मण्डपं कारयेद्बुधः ॥ रुद्रायतनभूमौ वा चतुरस्रमुदङ्मुखम् ॥ ८९ ॥ दशहस्तमथाष्टौ वा हस्तान्कुर्याद्विधानतः ॥
प्रागुदक्प्रवणां भूमिं कारयेद्यत्नतो नरः ॥ ९० ॥ प्रागुत्तरं समासाद्य प्रदेशं मंडपस्य तु ॥ शोभनं कारयेत्कुण्डं यथावल्लक्षणान्वितम् ॥ ९१ ॥
मानहीनं चाप्रशस्तमनेकभयदं भवेत् ॥ यस्मात्तस्मात्सुसंपूर्णं शांतिकुंडं विधीयते ॥ ९२ ॥ अस्माद्दशगुणः प्रोक्तो लक्षहोमे स्वयंभुवा ॥ आहु
तिभिः प्रयत्नेन दक्षिणाभिस्तथैव च ॥ ९३ ॥ द्विहस्तविस्तृतं तद्वच्चतुर्हस्तायतं पुनः ॥ लक्षहोमे भवेत्कुण्डं योनिवक्त्रं त्रिमेखलम् ॥ ९४ ॥
संस्थापनाय देवानां वप्रत्रयसमावृतम् ॥ द्विरंगुलोच्छ्रितो वप्रः प्रथमः समुदाहृतः ॥ ९५ ॥ अंगुलोच्छ्रयसंयुक्तं वप्रद्वयमथोपरि ॥ द्व्यङ्गुलस्तत्र
विस्तारः सर्वेषां कथ्यते बुधैः ॥ ९६ ॥ दशांगुलोच्छ्रिता भित्तिः स्थंडिलस्य तथोपरि ॥ तस्मिन्नावाहयेद्देवान्पूर्ववत्पुष्पतण्डुलैः ॥ ९७ ॥
आदित्याभिमुखाः सर्वाः स्थाप्याः प्रत्यधिदेवताः ॥ स्थापनीया मुनिश्रेष्ठा नांतरेण पराङ्मुखाः ॥ ९८ ॥ गरुत्मानधिकस्तत्र संपूज्यः श्रियमि
च्छता ॥ समपीनशरीरस्तु वाहनं परमेष्ठिनः ॥९९॥ विषपापहरो नित्यमतः शांतिं प्रयच्छ मे ॥ पूर्ववत्कुंभमामंत्र्य तद्वद्धोमं समाचरेत् ॥१००॥
सहस्राणां शतं हुत्वा समित्संख्यादिकं पुनः ॥ औदुम्बरीमथार्द्रां च वक्रकोटरवर्जिताम् ॥ १०१ ॥ बाहुमात्रां स्रुचं कृत्वा ततः स्तंभद्वयोपरि ॥
घृतधारां तथा सम्यगग्नेरुपरि पातयेत् ॥१०२॥ पाठयेत्सूक्तमाग्नेयं वैष्णवं रौद्रमैंदवम् ॥ महावैश्वानरं साम ज्येष्ठसाम च पाठयेत्[1] ॥१०३॥ स्नानं
तु यजमानस्य पूर्ववन्मन्त्रवाचनम् ॥ दातव्या यजमानेन पूर्ववद्दक्षिणा पृथक् ॥ १०४ ॥ कामक्रोधविहीनेन ऋत्विग्भ्यः शांतचेतसः ॥ नवग्रह
मखे विप्राश्चत्वारो वेदवेदिनः ॥ १०५ ॥ अथ वा ऋत्विजौ शांतौ द्वावेव त्वतिकोविदौ ॥ कार्यावयुतहोमे तु न प्रसज्येत विस्तरे ॥ १०६ ॥
तद्वच्च दश चाष्टौ वा लक्षहोमेऽपि ऋत्विजः॥ कर्तव्याः शक्तितस्तद्वच्चत्वारो वा विमत्सराः ॥१०७॥ नवग्रहमखे सर्वं लक्षहोमे दशोत्तरम् ॥ दद्याच्च
पांडवश्रेष्ठ भूषणान्यपि शक्तितः ॥ १०८ ॥ शयनानि च वस्त्राणि हैमानि कटकानि च ॥ कर्णांगुलीपवित्राणि भक्तिमान्[2]प्रतिपादयेत् ॥१०९॥

---

[1] श्रावयेत्–इ० पा० । [2] शक्तिमान्–इ० पा० ।

न कुर्याद्दक्षिणाहीनं वित्तशाठ्येन मानवः ॥ अददल्लोभमोहाभ्यां कुलक्षयमवाप्नुयात् ॥ ११० ॥ अन्नदानं यथा शक्त्या दातव्यं भूतिमिच्छता ॥ अन्नहीनं व्रतं यस्माद्दुर्भिक्षफलदं भवेत् ॥ १११ ॥ राष्ट्रं हन्यादंगहीनो मंत्रहीनस्तु ऋत्विजः ॥ अदक्षिणो यजमानं नास्ति यज्ञसमो रिपुः ॥ ११२ ॥ न चाप्यल्पधनः कुर्याल्लक्षहोमं नरः क्वचित् ॥ तस्मात्पीडाकरो नित्यं य[1] एव भवति ग्रहः ॥ ११३ ॥ तमेव पूजयेद्भक्त्या द्वौ वा त्रीन्वा यथाविधि ॥ एकमप्यर्चयेद्भक्त्या ब्राह्मणं वेद पारगम् ॥ ११४ ॥ [2]दक्षिणाभिः प्रयत्नेन बहून्वा बहुवित्तवान् ॥ लक्षहोमस्तु कर्तव्यो यदि वित्तं गृहे गृहे ॥ ११५ ॥ [3]यतः सर्वानवाप्नोति कुर्वन्कामान्विधानतः ॥ पूज्यते शिवलोके च वस्वादित्यमरुद्गणैः ॥ ११६ ॥ यावत्कल्पशतान्यष्टावथ मोक्षमवाप्नुयात्॥सकामो यस्त्विमं कुर्याल्लक्षहोमं यथाविधि ॥११७॥ स तं काममवाप्नोति पदं चानंत्यमश्नुते॥ पुत्रार्थी लभते पुत्रं धनार्थी लभते धनम् ॥११८॥ भार्यार्थी शोभनां भार्यां कुमारी च शुभं पतिम् ॥ भ्रष्टराज्यस्तथा राज्यं श्रीकामः श्रियमाप्नुयात् ॥ ११९ ॥ यं यं प्रार्थयते कामं तं तमाप्नोति पुष्कलम् ॥ निष्कामः कुरुते यस्तु परं ब्रह्म स गच्छति ॥ १२० ॥ शांतिं नवग्रहमयीं दुरितोपशांतिं राजन्करोति बहुना विधिवद्द्विजेन्द्रैः ॥ क्षेमं सुभिक्षमतुलं कुलवृद्धिसंपत्तत्रास्ति यत्र कुरुते बत लक्षहोमम् ॥१२१॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे नवग्रहलक्षहोमविधिवर्णनं नामैकचत्वारिंशदुत्तरशततमोऽध्यायः॥१४१॥ ॥छ॥ श्रीकृष्ण उवाच ॥ ॥ राजा संवरणः पूर्वं प्रतिष्ठाने पुरोत्तमे ॥ बभूव स महाभागः शास्त्रार्थकुशलो बली ॥१॥ ब्रह्मण्यः पितृभक्तश्च देवब्राह्मणपूजकः ॥ तस्याथ कुर्वतो राज्यं सम्यक्पालयतः प्रजाः ॥२॥ आजगाम महायोगी सनको ब्रह्मणः सुतः॥दत्त्वा तस्यासनं राजा प्रणम्य शिरसा तथा ॥३॥ पूजयित्वार्घ्यपाद्याद्यैरात्मानं विनिवेद्य च ॥ इतिहासपुराणोक्ताश्चकार विविधाः कथाः ॥४॥ राजर्षीणां पुराणां च चरितानि यथार्थवित् ॥ ततः कथांतरे राजा कार्यं मनसि संस्थितम् ॥५॥ हिताय पृथिवीशानां जगतश्चात्मनस्तथा ॥ पप्रच्छ विनयोपेतो योगाचार्यं महामतिः ॥ ६ ॥ ॥ संवरण उवाच ॥ ॥ भगवन्महदुत्पातसंभवे भूप्रकंपने ॥ निर्घाते पांशुवर्षे च गृहभंगे तथैव च ॥ ७ ॥ जन्मनक्षत्रपीडासु अनावृष्टिभयेषु च ॥ ज्वरेषु ग्रहपीडासु दुर्भिक्षे [4]राष्ट्रविग्रहे ॥ ॥ ८ ॥ व्याधीनां संभवे जाते शरीरे चातिपीडिते ॥ क्लेशे महति चोत्पन्ने किंकर्तव्यं [5]नरोत्तमैः ॥ ९ ॥ स्वर्गस्य साधनं यच्च कीर्तिदं धनदं तथा ॥ प्रब्रूहि मे द्विजश्रेष्ठ तथारोग्यप्रदं नृणाम् ॥ १० ॥ ॥ सनत्कुमार उवाच ॥ ॥ शृणुराजन्प्रवक्ष्यामि शांतिकर्म

---

[1] भवति ग्रहपूजने—इ० पा० । [2] दयाधर्मपरो नित्यं क्षमावान्बहुवित्तवान्—इ० पा० । [3] पातकं समवाप्नोति यत्कुर्वन्नविधानतः—इ० पा० । [4] राजविप्लवे—इ० पा० । [5] नृपोत्तमैः—इ० पा० ।

ह्यनुत्तमम् ॥ कोटिहोमाख्यमतुलं सर्वकामफलप्रदम् ॥ ११ ॥ ब्रह्महत्यादिपापानि येन नश्यंति तत्क्षणात् ॥ उत्पाताः प्रशमं यांति
महत्संपद्यते सुखम् ॥ १२ ॥ विधानं तस्य वक्ष्यामि शृणुष्वैकमना भव ॥ देवागारे[1] नदीतीरे वने वा भवनेऽपि वा ॥ १३ ॥
पर्वते वापि कुर्वीत य इच्छेत्क्षेममात्मनः ॥ शुभनक्षत्रयोगे च वारे पूर्वगुणान्विते ॥ १४ ॥ यजमानस्यानुकूल्ये कोटिहोमं समाचरेत्[2] ॥
पूजयित्वा प्रयत्नेन ब्राह्मणं वेदपारगम् ॥ १५ ॥ वस्त्रैर्विभूषणैश्चैव गंधमाल्यानुलेपनैः ॥ प्रणम्य विधिवत्तस्मै आत्मानं विनिवेदयेत् ॥ १६ ॥
त्वं नो गतिः पिता माता त्वं गतिस्त्वं परायणः ॥ त्वत्प्रसादेन विप्रर्षे सर्वं मे स्यान्मनोगतम् ॥ १७ ॥ आपद्विमोक्षाय च मे कुरु यज्ञम
नुत्तमम् ॥ कोटिहोमार्थमतुलं शांत्यर्थं सार्वकामिकम् ॥ १८ ॥ पुरोहितस्ततः प्राज्ञः शुक्लांबरधरः शुचिः ॥ ब्राह्मणैर्वेद[3]संवृत्तैः पुण्यैर्युक्तः समा
हितैः ॥ १९ ॥ भूमिभागे समे शुद्धे प्रागुदक्प्रवणे तथा ॥ पुण्याहं वाचयेत्पूर्वं कृत्वा विप्रान्सुपूजितान् ॥ २० ॥ ततस्तु महितै[4]र्विप्रः सूत्रयेन्मण्डपं
शुभम् ॥ उत्तमं शतहस्तं तु तदर्धेन तु मध्यमम् ॥ जघन्यं तु तदर्द्धेन शक्तिकालाद्यपेक्षया ॥२१॥ मध्ये तु मण्डपस्यापि कुंडं कुर्याद्विचक्षणः ॥
अ[5]ष्टहस्तप्रमाणेन आयामेन तथैव च ॥ २२ ॥ मेखलात्रितयं तस्य द्वादशांगुलविस्तृतम् ॥ तत्प्रमाणां तथा योनिं कुर्वीत सुसमाहितः ॥ २३ ॥
कुंडस्य पूर्वभागे तु वेदिं कुर्याद्विचक्षणः ॥ चतुर्हस्तां समां चैव हस्तमात्रोच्छ्रितः नृप ॥ २४ ॥ स्थानं तत्सर्वभूता[6]नां कुर्याद्यत्नेन बुद्धि
मान् ॥ २५ ॥ उदलिप्य ततो भूमिं मंडपस्य समीपतः ॥ विन्यसेत्कलशांस्तत्र जलपूर्णांश्चतुर्दश ॥ २६ ॥ अश्वत्थप्लक्षचूताद्यैः पल्लवैरुपशोभि
तान् ॥ वितानमुपरिष्टाच्च मंडपस्य प्रकल्पयेत् ॥ २७ ॥ स्थापयेद्दिक्षु सर्वासु तोरणानि विचक्षणः ॥ एवं संभृतसंभारैः पुरोधाः सुसमा
हितः ॥ २८ ॥ पुण्याहजयघोषेण होमकर्म संमारभेत्[7] ॥ स्थापयित्वा सुरान्वेद्यां वक्ष्यमाणानरिंदम ॥ २९ ॥ ब्राह्मणं पूर्वभागे तु मध्ये देवं
जनार्दनम् ॥ पश्चिमे तु तथा रुद्रं वसूनुत्तरतस्तथा ॥ ३० ॥ ऐशान्यां च ग्रहान्सर्वानाग्नेय्यां मरुतस्तथा ॥ वायुं सौम्यां तथैशान्यां लोकपाला
न्क्रमेण तु ॥ ३१ ॥ एवं संस्थाप्य विबुधान्यथास्थानं नृपोत्तम ॥ पूजयेद्विधिवद्वस्त्रगन्धमाल्यानुलेपनैः ॥ ३२ ॥ वेदोक्तमंत्रैस्तल्लिङ्गैः पुराणोक्तैः
पृथक्पृथक् ॥ ॥ आदित्या वसवो रुद्रा लोकपालास्तथा ग्रहाः ॥ ३३ ॥ ब्रह्मा जनार्दनश्चैव शूलपाणिर्भर्गाक्षिहा ॥ अत्र संनिहिताः सर्वे भवंतु

---

[1] देवागारे च भवने तीर्थे वा शिवसंनिधौ–इ० पा० । [2] समारभेत्–इ० पा० । [3] सर्वतः पुण्यैः संयुक्तः सुसमाहितैः–इ० पा० । [4] प्रहितैः–इ०पा० । [5] चतुर्हस्तप्रमाणेन–इ० पाठस्त्वशुद्धः । कुण्डसिद्धिग्रन्थे–''ककुद्भिर्वा कोटौ नृपकरमपि प्राहुरपरे''–इत्युक्तेः कोटिहोमेऽष्टकरपरिमितकुण्डस्योदितत्वात् । [6] सर्वदेवानाम्–इ० पा० । [7] समाचरेत्–इ० पा० । [8] महेश्वरः–इ० पा० ।

सुखभागिनः ॥ ३४ ॥ पूजां गृह्णंतु सर्वेत्र मया भक्त्योपपादिताम् ॥ कुर्वंतु च शुभं सर्वे यज्ञकर्म समाहिताः ॥ ३५ ॥ एवं संपूजयित्वा तान्देवा
न्यत्नेन शुद्धधीः॥ नैवेद्यैर्विविधैर्भक्ष्यैः फलैः पत्रैस्तथैव[1] च ॥ ३६ ॥ ततस्तु तैर्द्विजैः सार्द्धं कुंडस्य विधिपूर्वकम् ॥ कुर्यात्संस्कारकरणं यथोक्तं वेद
चिन्तकैः ॥ ३७ ॥ ततः समाह्वयेद्[2]वह्निं नाम्ना ख्यातं घृतार्चिषम् ॥ नियोजयेद्द्विजांस्तत्र शतसंख्यान्नृपोत्तम ॥ अलाभे तु बहूनां च यथालाभं
नियोजयेत् ॥ ३८ ॥ विद्यावृद्धान्वयोवृद्धान्गृहस्थान्संयतेन्द्रियान्॥ स्वकर्मनियताञ्ज्ञानशीलाञ्छान्तान्द्विजोत्तमान् ॥ ३९ ॥ चिंतयेत्तत्र देवेशं
पंचास्यं नृप पावकम् ॥ मुखानि तस्य चत्वारि सप्त जिह्वाश्च पार्थिव ॥ ४० ॥ एकजिह्वमथैकं तु तत्स्मृतं सर्वकामदम् ॥ धूमायमानेन वृथा
होतव्यं ज्वलिते नले ॥ ४१ ॥ ऋग्भिः पूर्वामुखैर्होमो यजुर्भिश्चोत्तरामुखैः॥ सामभिः पश्चिमे कार्योऽथर्वभिर्दक्षिणामुखैः ॥ ४२ ॥ आघारावाज्य
भागौ तु पूर्वं हुत्वा[3] विचक्षणः ॥ परितोथ परिस्तीर्णे कल्पिते च तथासने ॥ ४३ ॥ ब्रह्माणं पूर्वमप्येतत्सर्वं पश्चात्समाचरेत् ॥ होमो व्याहृति
भिश्चैव सर्वस्तत्र विधीयते ॥ ४४ ॥ प्रणवादिभिस्तल्लिंगैः स्वाहाकारांतयोजितैः॥ जुहुयात्सर्वदेवानां वेद्यां ये चोपकल्पिताः ॥४५॥ एवं प्रकल्पये
द्यज्ञं कोटिहोमाख्यमुत्तमम् ॥ तिलाः कृष्णा घृताभ्यक्ताः किञ्चिद्यवसमन्विताः ॥ ४६ ॥ होतव्याः कोटिहोमे तु समिधश्च पलाशजाः ॥ पूर्णे
पूर्णे सहस्रे तु दद्यात्पूर्णाहुतिं शुभाम् ॥ पञ्चमे तन्मुखे राजन्सर्वकामार्थसिद्धये ॥ ४७॥ पूर्णाहुत्यः समाख्याताः कोटिहोमे नराधिप ॥ सहस्राणि
नृपश्रेष्ठ दश शास्त्रविशारदैः ॥ ४८ ॥ प्रारंभदिनमारभ्य ब्राह्मणैर्ब्रह्मवादिभिः[4] ॥ भाव्यं सयजमानैस्तु अथवा सपुरोहितैः ॥ ४९ ॥ क्रोधलोभा
दयो दोषा वर्जनीयाः प्रयत्नतः ॥ यजमानेन राजेन्द्र सर्वान्कामानभीप्सता ॥ ५० ॥ ॥ संवरण उवाच ॥ ॥ बहुत्वात्कर्मणो ब्रह्मन्कोटि
होमः सुदुष्करः ॥ कालेन महता चैव शक्यः प्राप्तुं कथंचन ॥ ५१ ॥ नियमाद्ब्रह्मचर्याद्वा दुष्करो हीति मे मतिः ॥ निरोधोऽत्र ब्राह्मणानां
भूशय्यादिषु दुष्करः ॥५२॥ कार्याद्गुरुतया यस्मात्पर्वकालाद्यपेक्षया ॥ एतद्विज्ञायते ब्रह्मन्यदि शास्त्रेषु कथ्यते ॥ कोटिहोमस्य संक्षेपं वद मे ब्रह्म
संभव ॥ ५३ ॥ ॥ सनत्कुमार उवाच ॥ ॥ शताननो दशमुखो द्विमुखैकमुखस्तथा ॥ चतुर्विधो महाराज कोटिहोमो विधीयते ॥ ५४ ॥
कार्यस्य गुरुतां ज्ञात्वा नैवं कुर्यादपर्वणि ॥ यथा संक्षेपतः कार्यः कोटिहोमस्तथा शृणु ॥ ५५ ॥ कृत्वा कुंडशतं दिव्यं यथोक्तं हस्त
संमितम् ॥ एकैकस्मिंस्ततः कुंडे शतं विप्रान्नियोजयेत् ॥ ५६ ॥ सद्यःपक्षे तु विप्राणां सहस्रं परिकीर्तितम् ॥ एकस्थानप्रणीतेग्नौ सर्वतः

---

१ चैव सुशोभनैः–इ० पा० । २ प्रज्वालयेत्–इ० पा० । ३ कृत्वा–इ० पा० । ४ ब्रह्मचारिभिः–इ० पा० । ५ नैष्कर्म्यमथ कर्मणः–इ० पा० ।

परिभाविते ॥ ५७ ॥ होमं कुर्युर्द्विजाः सर्वे कुण्डे कुण्डे यथोदितम् ॥ यथा कुंडबहुत्वेऽपि राजसूये महाक्रतौ ॥ ५८ ॥ न च वह्निबहुत्वं स्यात्तत्र यज्ञे विधीयते ॥ तथा कुंडशतेऽप्यत्र घृतार्चिषि वितानिते ॥ ५९ ॥ एक एव भवेद्यज्ञः कोटिहोमो न संशयः ॥ एवं यत्क्रियते क्षिप्रं व्याकुलैः कार्यगौरवात् ॥ शताननः सविज्ञेयः कोटिहोमो न संशयः ॥ ६० ॥ स्वल्पैरहोभिः कार्यः स्याद्वर्षाकालादिकेऽपिवा ॥ तदा दशगुणः कार्यः कोटिहोमो विजानता ॥ ६१ ॥ विप्राणां द्वे शते तत्र [1]सुविभज्य नियोजयेत् ॥ तेऽपि विज्ञानशीलाः स्युर्व्रतवंतो जितेन्द्रियाः ॥ ६२ ॥ भूप कुंडद्वयं कृत्वा विभज्य च विभावसुम् ॥ होमं कुर्युर्द्विजा भूयः संस्कृत्य विधिपूर्वकम् ॥ ६३ ॥ शतं तत्र नियोज्यं स्याद्विप्राणां प्रविभज्य वै ॥ मासे वाथ द्विमासे वा यथाकाले ह्युपस्थिते ॥ ६४ ॥ एवं च द्विमुखं कार्यः कोटिहोमो विचक्षणैः ॥ ६५ ॥ यदा तु स्वेच्छया यज्ञं यजमानः समापयेत् ॥ कालेन बहुधा राजंस्तदा चैकमुखो भवेत् ॥ ६६ ॥ एककुंडस्थितो वह्निरेकचित्तैः समाहितैः ॥ यथालाभस्थितैर्विप्रैर्ज्ञानशीलैर्विचक्षणैः ॥६७॥ न संख्यानियमश्चात्र ब्राह्मणानां नरोत्तम ॥ न कालनियमश्चैव स्वेच्छायज्ञः स उच्यते ॥ ६८ ॥ आवृत्त्या सर्वकामस्य चातुर्मास्यानुकर्मवत् ॥ तदप्रसक्तौ कर्तव्यो यज्ञोऽयं सार्वकालिकः ॥ ६९ ॥ अयमेकमुखो राजन्कालेन बहुना भवेत् ॥ बहुविघ्नश्च कालेन तस्मात्संक्षेपमाचरेत् ॥ ७० ॥ यतो हि चित्तवित्ताद्यमायुश्चैवास्थिरं सदा ॥ अतः संक्षेपतः कार्यं धर्मकार्यं प्रशस्यते ॥ ७१ ॥ ततः समाप्ते यज्ञे तु कारयेत्सुमहोत्सवम् ॥ शंखतूर्यनिनादेन ब्रह्मघोषस्वनेन च ॥ ७२ ॥ ततस्तु दीक्षयेद्विन्प्रान्होतॄंश्च श्रद्धयान्वितः ॥ निष्कैश्च कंकणैश्चैव कुण्डलैर्विविधैर्नृप ॥ ७३ ॥ गोशतं चैव दातव्यमश्वानां च शतं तदा ॥ सहस्रं च सुवर्णस्य सर्वेषामपि दापयेत् ॥ ७४ ॥ ग्रामैर्गजै रथैरश्वैः पूजयेच्च पुरोहितम् ॥ दीनान्धकृपणान्सर्वान्वस्त्राद्यैश्चापि पूजयेत् ॥ ७५ ॥ ततश्चावभृथं स्नायात्तैर्घटैः पूर्वकल्पितैः ॥ लक्षहोमोक्तमंत्रेण सदा विजयकारिणा ॥ ७६ ॥ एवं समापयेद्यस्तु कोटिहोममखं शुभम् ॥ तस्यारोग्यं वित्तपुत्रराष्ट्रवृद्धिस्तथैव च ॥ ७७ ॥ सर्वपापक्षयश्चैव जायते नृपसत्तम ॥ अनावृष्टिभयं चैव उत्पातभयमेव च ॥ ७८ ॥ दुर्भिक्षं ग्रहपीडा च प्रशमं याति भूतले ॥ एतत्पुण्यं पापहरं सर्वकामफलप्रदम् ॥ सनत्कुमारमुनिना पार्थिवाय निवेदितम् ॥ ७९ ॥ सर्वोपसर्गशमनं भवने वने वा ये कारयन्ति मनुजा नृपकोटिहोमम् ॥ भोगानवाप्य मनसो

---

[1] सुविभाज्यवियोजयेत्–इ० पा० ।

भिमतान्प्रकामं ते यांति शक्रसदनं सुविशुद्धसत्त्वाः ॥ ८० ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे कोटिहोमविधिवर्णनं नाम द्विचत्वारिंशदुत्तरशततमोऽध्यायः ॥ १४२ ॥ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ महाशांतिं प्रवक्ष्यामि महादेवेन भाषिताम् ॥ पार्थिवानां हितार्थाय महादुस्तरतारिणीम् ॥ १ ॥ नृपाभिषेके सा कार्या यात्राकाले नृपस्य तु ॥ दुःस्वप्ने दुर्निमित्ते च[2] ग्रहवैगुण्यसंभवे ॥ ॥ २ ॥ विद्युदुल्कानिपाते च जन्मर्क्षे ग्रहदैवते ॥ केतूदयेऽथ संजाते निर्घाते क्षितिकम्पने ॥ ३ ॥ प्रसूतौ मूलगण्डान्ते यमलस्य तु संभवे ॥ छत्राणां च[1] ध्वजानां च स्वस्थानात्पतने भुवि ॥ काकोलूककपोतानां प्रवेशे वेश्मनस्तथा ॥ ४ ॥ क्रूरग्रहाणां वक्रत्वे जन्मादिषु विशेषतः ॥ जन्मनि द्वादशे चैव चतुर्थे वाष्टमे तथा ॥ ५ ॥ यदा स्युर्गुरुमन्दाऽऽराः सूर्यश्चैव विशेषतः ॥ युद्धे ग्रहाणां सर्वेषां सूर्यशीतांशुकीलके ॥ ६ ॥ वस्त्रायुधगवाश्वेषु मणिकेशविनाशने ॥ यद्यग्रे परिदृश्येत रात्राविंद्रधनुस्तथा ॥ ७ ॥ वेश्मनश्च तुलाभंगे गर्भेष्वश्वतरीषु च ॥ रवीन्द्वोरुपरागेषु महाशांतिः प्रशस्यते ॥ ८ ॥ सर्वाणि दुर्निमित्तानि प्रशमं यान्ति सर्वथा ॥ तां कुर्युर्ब्राह्मणाः पंच कुलशीलसमन्विताः ॥ ९ ॥ चतुर्वेदास्त्रिवेदाश्च द्विवेदाश्चापि पांडव ॥ आथर्वणा विशेषेण बह्वृचा यजुसंयुताः ॥ १० ॥ शुचयः श्रुतसंपन्ना जपहोमपरायणाः ॥ कृच्छ्रपाराकनक्ताद्यैः कृतकायविशोधनाः ॥ ११ ॥ पूर्वमाराध्य मंत्रैस्तु प्रारभेत क्रियां ततः ॥ दशद्वादशहस्तं वा मंडपं कारयेच्छुभम् ॥ १२ ॥ तन्मध्ये वेदिकां कुर्याच्चतुर्हस्तप्रमाणतः ॥ आग्नेय्यां कारयेत्कुंडं हस्तमात्रं सुशोभनम् ॥ १३ ॥ मेखलात्रयसंयुक्तं योन्या चापि विभूषितम् ॥ बद्धचन्दनमालं च तोरणालंकृतं तथा ॥ १४ ॥ गोमयेनोपलिप्ते च मंडपे तु द्विजातयः ॥ शुक्लाम्बरधराः स्नाताः शुक्लमाल्यानुलेपनाः ॥ १५ ॥ ततश्च पञ्च कलशांस्तस्यां वेद्यां नियोजयेत् ॥ आग्नेयादिषु कोणेषु पञ्चमं मध्यतस्तथा ॥ १६ ॥ अष्टास्त्रालंकृते पद्मे चूतपल्लवशोभिते ॥ ब्रह्मकूर्चविधानेन पंचगव्यं तु कारयेत् ॥ १७ ॥ औषधीः पञ्चरत्नानि रोचनां चन्दनं तथा ॥ सिद्धार्थकाञ्छमीदूर्वाः कुशान्व्रीहियवांस्तथा ॥ १८ ॥ अपामार्गं फलवतीं न्यग्रोधोदुंबरौ तथा ॥ प्लक्षाश्वत्थकपित्थांश्च प्रियंगुचूतपल्लवान् ॥ १९ ॥ हस्तिदंतमृदं चैव कोणकुम्भेषु निक्षिपेत् ॥ पुण्यतीर्थोदकान्नं च धान्यं गव्यं च मध्यमे ॥ २० ॥ कूर्चं वाचमितीदं च वह्निकुम्भाभिमन्त्रणम् ॥ आशुः शिशानोमन्त्रेण मन्त्रणं वायुगोचरे॥ ॥ २१ ॥ ईशावास्यं चतुर्थस्य कुम्भस्य चाभिमंत्रणम् ॥ मध्यमे जपितव्यास्तु रुद्रकुम्भे भवोद्भवाः ॥२२॥ गंधपुष्पाक्षतैर्वस्त्रैर्नैवेद्यैर्घृतपाचितैः॥

---

[1] चामराणां च–इ० पा० । [2] सूर्यस्य–इ० पा० ।

फलैश्च नारिकेलाद्यैर्दीपकैः कुंभपूजनम् ॥ २३ ॥ स्वस्तिवाचनकं चैव कारयेत्तदनंतरम् ॥ क्रमेणानेन शनकैरग्निकार्यं प्रयोजयेत् ॥ २४ ॥ अग्निं दूतमिति ह्यग्निं पूर्वमेव निधापयेत् ॥ हिरण्यगर्भः समिति ब्रह्मासननियोजनम् ॥ २५ ॥ कपोतसुप्रणीतेन मंत्रेण विनिशेषयेत् ॥ कृत्वा चावरणं वह्नेराज्यसंस्कारमेव च ॥ २६ ॥ अथ चासादयेद्द्रव्यं यथावत्सप्रयोजनम्[1] ॥ ततःपुरुषसूक्तेन पायसश्रपणं भवेत् ॥ २७ ॥ अभिचार्यार्थ संसिद्धं तथा संस्थापयेद्भुवि ॥ अष्टादशप्रमाणेध्मान्दद्यादथ शमीमयान् ॥ २८ ॥ पालाशीः समिधः सप्त तथा सप्तेति दापयेत् ॥ आघारावाज्यभागौ तु हुत्वा पूर्वक्रमेण तु ॥ २९ ॥ जुहुयादाहुतीः सप्त जातवेदस इत्यृचा ॥ स्थालीपाकस्य जुहुयात्पुनर्वै जातवेदसा ॥ ३० ॥ तरत्समंदीसूक्तेन चतस्रो जुहुयात्ततः[2] ॥ यमायेति च सप्तान्याः स्वाहांता जुहुयात्ततः ॥ ३१ ॥ इदं विष्णुस्ततः सप्त जुहुयादाहुतीर्नृप ॥ नक्षत्रेभ्यस्ततः स्वाहा सप्तविंशद थाहुतीः ॥ ३२ ॥ यत्कर्मणैति जुहुयात्ततः स्विष्टकृतं पुनः ॥ ग्रहहोमस्ततः कार्यस्तिलैराज्यपरिप्लुतैः ॥ ३३ ॥ प्रायश्चित्तं ततो हुत्वा होमकर्म समापयेत् ॥ ततस्तु तूर्यनिर्घोषैःकाहलाशंखनिःस्वनैः ॥ ३४ ॥ यजमानस्य कर्तव्यो ह्यभिषेको[3] द्विजोत्तमैः ॥ काश्मर्यवृक्षसंभूते भद्रे भद्रासने स्थितम् ॥ ३५ ॥ वेदिमध्यगतं कृत्वा दुर्निमित्तप्रशांतये ॥ पंचभिःकलशैः पूर्णैर्मंत्रैरेभिर्यथाक्रमम् ॥ ३६ ॥ सहस्राक्षेण प्रथमं ततश्चैव शतायुषा ॥ सजोषसा च इन्द्रेति विश्वानीत्यृग्भिरेव च ॥ ३७ ॥ ऋतमस्त्विवति च ततः स्नापयेयुः समाहिताः ॥ ततो दिशां बलिं दद्याद्विचित्रान्नसमायुतम् ॥ ३८ ॥ नमोस्तु सर्वभूतेभ्य इति मन्त्रमुदाहरन् ॥ स्नातस्य ब्राह्मणाः सर्वे पठेयुःशांतिमुत्तमाम् ॥ ३९ ॥ शांतितोयेन धारां च पातयित्वा संमंततः[4] ॥ पुण्याहवाचनं कृत्वा शांतिकर्म समापयेत् ॥ ४० ॥ क्षितिं हिरण्यं वासांसि शयनान्यासनानि च ॥ विप्रेभ्यो दक्षिणां दद्याद्यथा शक्त्या विमत्सरः ॥ ४१ ॥ दीनानाथविशिष्टेभ्यः श्रोत्रियेभ्यश्च[5] दापयेत् ॥ भोजनं शोभनं दत्त्वा ततः सर्वं प्रसिद्ध्यति ॥ ४२ ॥ आयुश्च लभते दीर्घं शत्रून्विजयते क्षणात् ॥ दुर्गाणि चास्य सिद्ध्यन्ति पुत्रांश्च लभते शुभान् ॥ ४३ ॥ यथाशस्त्रप्रहाराणां कवचं वारणं भवेत् ॥ तथा दैवोपघातानां शान्तिर्भवति वारणम् ॥ ४४ ॥ अहिंसकस्य दांतस्य धर्मार्जितधनस्य च ॥ दयादाक्षिण्ययुक्तस्य[6] सर्वे सानुग्रहा ग्रहाः॥ ४५ ॥ अर्थान्समर्थयतिवर्द्धयते च धर्मं कामं प्रसाधयति तस्य पिनष्टि पापम् ॥ यः कारयेत्सकलदोषहरीं समर्थां शांतिं प्रशांतहृदयः पुरुषः सदैव ॥ ॥ ४६ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे महाशांतिविधिवर्णनं नाम त्रिचत्वारिंशदुत्तरशततमोऽध्यायः ॥१४३॥

---

[1] येन यत्सप्रयोजनम्–इ० पा० । [2] पुनः–इ० पा० । [3] शुभैर्जलैः–इ० पा० । [4] समाहिताः–इ० पा० । [5] दद्याच्चैव युधिष्ठिर–इ० पा० । [6] दयामाणिक्ययुक्तस्य—इ० पा० ।

॥ ॥ युधिष्ठिर उवाच ॥ ॥ शांतिं कथय देवेश गणनाथस्य मे विभो ॥ यां कृत्वा सर्वदुर्गाणि तरते मानवोऽखिलः ॥ १ ॥ ॥
॥ ॥ श्रीकृष्ण उवाच ॥ ॥ शांतिं वक्ष्यामि राजेन्द्र गणनाथप्रियां पराम् ॥ यस्या आचरणेनैव सर्वारिष्टक्षयो भवेत् ॥ २ ॥ विनायकं
कर्मविघ्नसिद्ध्यर्थं विनिबोधत ॥ स्वप्नेऽवगाहतेऽत्यर्थं जलं मुंडांश्च पश्यति ॥ ३ ॥ काषायवाससश्चैव क्रव्यादानधिरोहति ॥ अपमूर्धैः शवै
रुद्रैः सहैकत्र च तिष्ठति ॥ ४ ॥ व्रजन्नपि तथात्मानं मन्यतेनुगतं परैः ॥ विमना विफलारंभः संसीदत्यनिमित्ततः ॥ ५ ॥ तेनोपसृष्टो
लभते न राज्यं राजनंदनः ॥ कुमारी न च भर्तारमपत्यं गर्भिणी तथा ॥ ६ ॥ आचार्यत्वं श्रोत्रियश्च न शिष्योऽध्यापनं तथा ॥ वणि
ग्लाभं न चाप्नोति न कृषिं च कृषीवलः ॥ ७ ॥ स्नपनं तस्य कर्तव्यं पुण्येऽह्नि विधिपूर्वकम् ॥ गौरसर्षपकल्केन साज्येनोत्सादितस्य तु ॥ ८ ॥
सुगन्धकुंकुमालिप्तशरीरशिरसस्तथा ॥ भद्रासनोपविष्टस्य स्वस्ति वाच्य द्विजाञ्छुभान् ॥ ९ ॥ अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्ध्रदात् ॥
मृत्तिकां रोचनां गंधान्गुग्गुलं चाप्सु निक्षिपेत् ॥ १० ॥ यदा हृता ह्येकवर्णैर्मनुभिः कलशैर्ह्रदात् ॥ चर्मण्यानडुहे रक्ते स्थाप्य भद्रासनं तथा ॥
॥११॥ सहस्राक्षं शतधारमृषिणा वचनं कृतम् ॥ ते नत्वामभिषिंचामि पावमान्यः पुनंतु ते ॥१२॥ भगं ते वरुणो राजा भगं सूर्यो बृहस्पति :॥
भगमिन्द्रश्च वायुश्च भगं सप्तर्षयो ददुः ॥ १३ ॥ यत्ते केशेषु दौर्भाग्यं सीमंते यच्च मूर्द्धनि ॥ ललाटे कर्णयोरक्ष्णोरापस्तद्घ्नन्तु ते सदा ॥ १४ ॥
स्नातस्य सार्षपं तैलं स्रुवेणौदुम्बरेण च ॥ जुहुयान्मूर्द्धनि कुशान्सव्येन परिगृह्य च ॥ १५ ॥ मितश्च संमितश्चैव तथा सालकटंकटौ ॥ कूष्मांडो
राजपुत्रश्च अंते स्वाहासमन्वितैः ॥ १६ ॥ नामभिर्बलिमंत्रैश्च नमस्कारसमन्वितैः ॥ दद्याच्चतुष्पथे शूर्पे कुशानास्तीर्य सर्वशः ॥ १७ ॥ कृता
कृतांस्तंडुलांश्च पललौदनमेव च ॥ मत्स्यान्पक्वांस्तथैवामान्मांसमेतावदेवतु ॥ १८ ॥ पुष्पं चित्रं सुगन्धं च सुरां च त्रिविधामपि ॥ मूलकं पूरि
कापूपं तथैवोंडेरकस्रजम् ॥ १९ ॥ दूर्वां सर्वप्रपुष्पाणां दत्त्वार्घ्यं पूर्णमंडलाम् ॥ विनायकस्य जननीमुपतिष्ठेत्ततोंऽबिकाम् ॥ २० ॥ रूपं देहि
यशो देहि भगं भवति देहि मे ॥ पुत्रान्देहि धनं देहि सर्वकामांश्चदेहि मे ॥ २१ ॥ ततः शुक्लांबरधरः शुक्लमाल्यानुलेपनः ॥ भोजयेद्ब्राह्मणा
न्दद्याद्वस्त्रयुग्मं गुरोरपि ॥ २२ ॥ एवं विनायकं पूज्य ग्रहांश्चैव विधानतः ॥ कर्मणां फलमाप्नोति श्रियमाप्नोति चोत्तमाम् ॥ २३ ॥ आदित्यस्य
तथा पूजां तिलकं स्वामिनस्तथा ॥ महागणपतेश्चैव कुर्वन्सिद्धिमवाप्नुयात् ॥ २४ ॥ श्वेतार्कस्य तु यो मूले महागणपतिः कृतः ॥ सर्वलक्षणसं
पूर्णः सोऽपि सिद्धिकरः स्मृतः ॥ २५ ॥ संजप्यते शुचौ देशे विघ्नं नात्र हि देहिनः ॥ परमं पूजयेन्नित्यं गन्धमाल्यस्रगादिभिः ॥ २६ ॥ क्षीण

भाग्योऽपि पुरुषः पूजितश्च नरेश्वरः ॥ सर्वसिद्धिमवाप्नोति जयी भवतिं सर्वदा ॥ २७ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे गणनाथशांतिवर्णनं नाम चतुश्चत्वारिंशदुत्तरशततमोऽध्यायः ॥ १४४ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अग्निहोत्रे सुखासीनं गर्गः पृच्छति कौशिकम् ॥ बंधने संनिरोधेंग व्याधीनां संप्रपीडने ॥ १ ॥ कथं मोक्षो भवेत्तस्य साध्यासाध्यं ब्रवीहि मे ॥ गर्गेण कौशिकः पृष्ट इदं वचनमब्रवीत् ॥२॥ आधाने जन्मनक्षत्रे नैधनप्रत्ययेषु च ॥ व्याधिरुत्पद्यते यस्य क्लेशाय मरणाय च ॥३॥ कृत्तिकासु यदा कश्चिद्व्याधिं संप्रतिपद्यते ॥ नवरात्रं भवेत्पीडा त्रिरात्रं रोहिणीषु च ॥४॥ मृगशीर्षे पञ्चरात्रमार्द्रा प्राणवियोजिनी ॥ पुनर्वसौ च पुष्ये च सप्तरात्रं विधीयते ॥ ॥ ५ ॥ नवरात्रं तथाश्लेषा श्मशानांतं मघासु च ॥ द्वौ मासौ फाल्गुनी चैव उत्तरासु त्रिपक्षकम् ॥ ६ ॥ हस्ते च तनु दृश्येत चित्रायां त्वर्द्धमासकम् ॥७॥ मासद्वयं तथा स्वातौ विशाखा विंशतिर्दिनाः ॥ मैत्रे चैव दशाहं तु ज्येष्ठा चैवार्द्धमासिका ॥८॥ मूलेन जायते मोक्षश्चाषाढासु त्रिपञ्चकम् ॥ उत्तरादिनविंशत्या द्वौ मासौ श्रवणेन तु ॥ ९ ॥ धनिष्ठायामर्द्धमासं वारुणे तु दशाहकैः ॥ नव भाद्रपदाऋक्ष उत्तरासु त्रिपंचकम् ॥ १० ॥ रेवती दशरात्रं तु अहोरात्रं तथाश्विनी ॥ प्राणैर्वियोजयेन्नित्यं गर्ग नास्त्यत्र संशयः ॥ ११ ॥ कौशिकेन समादिष्टो नक्षत्रव्याधिसंभवः ॥ दैवज्ञेनापि ज्ञातव्यं नक्षत्रमथ जन्मना ॥ १२ ॥ क्षीरवृक्षस्य समिधो जुहुयादश्वदैवते ॥ तिलान्मधुप्लुतान्याम्ये यवमेवाग्निदैवते ॥ १३ ॥ प्राजापत्ये तु जुहुयाद्रोग्यबीजकरं बकम् ॥ सौम्ये प्रियंगवो रौद्रे सर्प्पिर्मांससमन्वितम् ॥ १४ ॥ आदित्ये च प्रयत्नेन घृताक्ताः सिततंडुलाः ॥ पयसा सर्पिषा साकं बृहस्पत्यधिदैवते ॥ १५ ॥ ग्राम्योषधैर्वटपत्रैः सर्पिः सर्पाधिदैवते ॥ होमः प्रोक्तः प्रियंगूनां नक्षत्रे यामदैवते ॥ १६ ॥ सावित्रे दधिहोमोत्र त्वाष्ट्रे चित्रौदनं हविः ॥ १७ ॥ यवान्सहाज्येन हुनेद्रौद्रेऽग्नौ तु पयोदनम् ॥ मैत्रेणाथ तु मंत्रेण मैत्रे कटकमिश्रितम् ॥ १८ ॥ नैर्ऋत्ये तिलहोमः स्याद्व्यक्ते च हुताशने ॥ अब्दैवत्ये शालिबीजैर्वैश्वदेवं तु कारयेत् ॥ १९ ॥ रक्ताश्वतंडुलाश्चैव होतव्या विष्णुदैवते ॥ वारुणे पारिजातानां पुष्पाणां होम इष्यते ॥ २० ॥ अजैकपादे नक्षत्रे प्राजापत्ये न तत्समम् ॥ आहिर्बुध्न्ये तु नक्षत्रे वैश्वदेवं तु कारयेत् ॥ २१ ॥ रक्ताश्च तण्डुलाश्चैव होतव्या विष्णुदैवते ॥ पौषे फलान्यखंडानि जुहुयादष्टोत्तरं शतम् ॥ २२ ॥ सावित्री होममेकं तु ब्रह्माभिहितवान्पुरा ॥ सर्वज्वरप्रशमनं सद्यो ज्वरहरं परम् ॥ २३ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे नक्षत्रहोमविधिवर्णनं नाम पंचचत्वारिंशदुत्तरशततमोऽध्यायः ॥ १४५ ॥ ॥ छ ॥ ॥ श्रीवसिष्ठ उवाच ॥ ॥ अथान्यदपि ते वच्मि व्रतं राजन्महाफलम् ॥ अपराधशतं

येन क्षयं याति शृणुष्व तत् ॥ १ ॥ ॥ इक्ष्वाकुरुवाच ॥ ॥ किं व्रतं तन्ममाचक्ष्व कोऽपराधस्तु तं वद ॥ कः पूज्यते च वै तस्मिन्कदा वा क्रियते नरैः ॥ २ ॥ ॥ श्रीवसिष्ठ उवाच ॥ शृणु राजन्महाबाहो अपराधशतव्रतम् ॥ येनानुष्ठितमात्रेण काममोक्षौ लभेत ना ॥ ३ ॥ प्रायश्चित्तान्यशेषाणि सर्वपापापनुत्तये ॥ कृतान्यप्यकृतानि स्युरिति होवाच पद्मजः ॥ ४ ॥ पापं गुरुतरं चापि दह्यते तूलराशिवत् ॥ अपराधशतं राजञ्छृणुष्व गदतो मम ॥ ५ ॥ न करोति नरो मोहाद्व्रतमेतद्दिने दिने ॥ अनाश्रमित्वं प्रथमोऽनग्निता व्रतहीनता ॥ ६ ॥ अदातृत्वमशौचं च निर्दयत्वं स्पृहालुता ॥ अक्षांतिर्जनपीडा च मायित्वमप्यमंगलम् ॥ ७ ॥ क्षतव्रतत्वं नास्तिक्यं वेदनिंदा कठोरता ॥ असत्यता हिंसकत्वं स्तैन्यमिन्द्रियविप्लवः ॥ ८ ॥ मनसोऽनिग्रहश्चैव क्रोध ईर्ष्याथ मत्सरः ॥ दंभः शाठ्यं च धौर्त्यं च कटुकोक्तिः प्रमादता ॥ ९ ॥ भार्यामातृसुतादीनां त्यागश्चापूज्य पूजनम् ॥ श्राद्धहानिर्जपत्यागः पंचयज्ञविवर्जनम् ॥ १० ॥ संध्यातर्पणहोमानां हानिरग्नेः प्रणाशनम् ॥ अनृतौ मैथुनं पार्थ पर्वण्यपि च मैथुनम् ॥ ११ ॥ पैशुन्यं परदारेषु दानं वेश्याभिगामिता ॥ अपात्रदानं चाल्पं च मूलिकाकुलिभक्षणम् ॥ १२ ॥ अंत्यजागमनं मातृत्यागः पितृविवर्जनम् ॥ पित्रोरभक्तिर्वादश्च पुराणस्मृतिवर्जनम् ॥ १३ ॥ अभक्ष्यभोजनं चापि पतिद्रोहोऽविचारता ॥ कृषिकर्मक्रियावाहं भार्यासंग्रहकारिता ॥ १४ ॥ इंद्रियाजयमायित्वं विद्याविस्मरणं तथा ॥ शास्त्रत्याग ऋणं चित्रकर्म चानंगधावनम् ॥ १५ ॥ भार्यापुत्रसुतादीनां विक्रयः पशुमैथुनम् ॥ इन्धनार्थं द्रुमच्छेदो बिले वार्यादिपूरणम् ॥ १६ ॥ तडागागमने वृत्तं विद्याविक्रयकारिता ॥ वृत्तिलोपो महीपाल याचकत्वं कुमित्रता ॥ १७ ॥ स्त्रीवधो गोवधश्चैव पौरोहित्यं सुहृद्वधः ॥ भ्रूणहत्या परान्नं च शूद्रान्नस्य निषेवणम् ॥ १८ ॥ शूद्रस्य चाग्निकर्मत्वमविधित्वं कुपुत्रता ॥ विद्वद्वचो याचकत्वं हि वाचाटत्वं प्रतिग्रहः ॥ १९ ॥ श्रौतसंस्कारहीनत्वमार्तत्राणविवर्जनम् ॥ ब्रह्महत्यासुरापानं रुक्मस्तैन्यमतः परम् ॥ २० ॥ गुरुदाराभिगामित्वं संयोगश्चापि तैः सह ॥ अपराधशतं त्वेतत्कथितं ते मयानघ ॥ २१ ॥ अन्येऽपि विविधाः संति प्रोक्ताः प्राधान्यतस्त्वमी ॥ यदि वक्त्रसहस्राणि वक्त्रे जिह्वाशतानि च ॥ २२ ॥ तथाप्येते न शक्यंते वक्तुं यस्मादनंतकाः ॥ अपराधसहस्राणि लक्षकोटिशतानि च ॥ २३ ॥ नश्यंति तत्क्षणान्नूनं सत्येशस्यानुपूजनात् ॥ पूज्यते भगवानत्र व्रतकृत्ये पराजिते ॥ २४ ॥ ध्वजे सत्ये स्थितश्चायं लक्ष्म्या सह जगत्पतिः ॥ वामदेवस्ततः पूर्वं नृसिंहो दक्षिणे स्थितः ॥ २५ ॥ कपिलः पश्चिमास्येतु वाराहश्चोत्तरे स्थितः ॥ ऊर्ध्ववक्त्रोऽच्युतो ज्ञेय एतद्वै ब्रह्मपंचकम् ॥ २६ ॥ तं सत्येशं स्थितं राजन्पूजयेच्च सदैव हि ॥

क्षीरोदयार्धचन्द्रस्थपद्मकर्णिकसंस्थितम् ॥ २७ ॥ पद्मकौमोदकीशंखचक्रायुधविधारणम् ॥ वामे चाधस्तथा दक्षे ऊर्ध्वे पश्चादधो नृप ॥ २८ ॥
पादाधस्ताद्विनिष्क्रांता गंगा पूता सदा नृभिः ॥ शक्त्यष्टकं तथा चान्यत्तन्नामानि च मे शृणु ॥ २९ ॥ जया च विजया चैव जयंती पापना
शिनी ॥ उन्मीलनी वंजुली च त्रिस्पृशाथ विवर्द्धना ॥३०॥ एताभिः शक्तिभिर्युक्तं लोकदिक्पालवर्जितम् ॥ शुक्लांबरधरं सोम्यं प्रहृष्टवदनं शित्रम् ॥
॥ ३१ ॥ सर्वाभरणशोभाढ्यं भुक्तिमुक्तिप्रदं हरिम् ॥ पूजयेच्च प्रयत्नेन विधिना येन तं शृणु ॥ ३२ ॥ मार्गशीर्षादिमासेषु द्वादशस्वपि सर्वदा ॥
द्वादश्यामप्यमायां वा अष्टम्यां च सितासिते ॥ ३३ ॥ कृतोपवासः शुद्धात्मा कुर्याद्व्रतमतंद्रितः ॥ पक्षयोरुभयोरेवं पूजयेऽहं जनार्दनम् ॥ ३४ ॥
एवं तु नियमं कृत्वा दंतधावनपूर्वकम् ॥ गच्छेत्ततस्तडागे वा पुष्करिण्यां गृहेऽपि वा ॥ ३५ ॥ स्नात्वा तु नैत्यकं कर्म कृत्वा नैमित्तिकं ततः ॥
कुर्यात्सर्वं प्रयत्नेन यथावदनुपूर्वशः ॥ ३६ ॥ सौवर्णं कारयेद्देवं पूर्वोक्तं सत्यरूपिणम् ॥ शक्त्यष्टकयुतं लक्ष्म्या युक्तं पद्मासनस्थया ॥ ३७ ॥
सुवर्णपलमानेन कार्यमेतत्सविस्तरम् ॥ दुग्धकुंभोपरिष्टात्तु स्वर्णपद्मं प्रकल्पयेत् ॥ ३८ ॥ तत्कर्णिकागतं देवं शक्तिवृन्दसमन्वितम् ॥ पूजयेद्वि
धिवत्पश्चाद्गुरुमंत्रप्रचोदितः ॥ ३९ ॥ शुद्धशुक्लाम्बरधरो मंत्रसंभारसंस्थितः ॥ देवक्षीरसमुद्रेऽस्मिन्वृत्ते चन्द्रे च पुष्करे ॥ तत्र त्वं सत्यया सार्द्धं
सत्येश भव सन्निधौ ॥ ४० ॥ ॐ क्षीरसागरकल्लोले स्नाहि पापनिषूदन ॥ अनेन भूतभव्येन दत्तेन जलबिन्दुना ॥ ४१ ॥ हरस्व सर्वं दुरितं मम
नाथ जनार्दन ॥ वस्त्रदानेन शुभ्रेण सत्येश कुरु मे शुभम् ॥ ४२ ॥ यज्ञे योगे तथा सांख्ये पवित्रस्त्वं सदोच्यसे ॥ यज्ञोपवीतदानेन कुरु मां
सर्वपावनम् ॥ ४३ ॥ विलिप्तं कर्मणा सर्वं सत्यं सत्यं न केनचित् ॥ मम चन्दनलिप्तांगः सर्वलेपापहो भव ॥ ४४ ॥ सत्यनाथ नमस्तुभ्यं
मूर्तामूर्तस्वरूपिणे ॥ वासुदेव नृसिंहाख्य कपिलादिव्यभूधर ॥ ४५ ॥ वाराहाच्युत यज्ञेश लक्ष्मीकांत नृपेश्वर ॥ पशुं पुत्रं च मे देहि पापशत्रो
निरंजन ॥ ४६ ॥ संकर्षण महावीर्य सर्वेशामितविक्रम ॥ अनिरुद्धेन्द्र गोविन्द धृतचक्र नमोऽस्तु ते ॥ ४७ ॥ (इति पूजामंत्रः) कृष्णकृष्ण
प्रभो रामराम कृष्ण विभो हरे ॥ त्राहि मां सर्वदुःखेभ्यो रमया सह माधव ॥ ४८ ॥ पूजा चेयं मया दत्ता पितामहजगद्गुरो ॥ गृहाण जग
दीशान नारायण नमोऽस्तु ते ॥ ४९ ॥ धनं गुप्तं महीपाल सर्वपापापनुत्तये ॥ एकस्यैवतु विप्रस्य यावद्वर्षं समर्पयेत् ॥ ५० ॥ दानं दद्यान्म
हाराज ह्यशक्तौ तदभावतः ॥ पक्षेपक्षे प्रकर्तव्यं व्रतमेतन्महत्तरम् ॥ ५१ ॥ संवत्सरे ततः पूर्णे कुर्यादुद्यापनं बुधः ॥ पूर्ववत्पूजयेदेवं बहुसंभारवि
स्तरैः ॥ ५२ ॥ अनुज्ञां प्रार्थयेद्विप्रान्पापध्वंसो ममास्तु वै ॥ पापध्वंसोऽस्तु सततं तवेति च द्विजो वदेत् ॥ ५३ ॥ ततः सर्वं ब्राह्मणाय समर्प्य

च क्षमापयेत् ॥ अस्मिन्व्रते कृते राजन्भवेद्बहुफलोदयः ॥ ५४ ॥ यत्फलं सर्ववेदेषु सर्वतीर्थेषु यत्फलम् ॥ तत्फलं कोटिगुणितं व्रतस्यास्य
निषेवणात् ॥ ५५ ॥ इह लोके धनं धान्यं पुत्रमित्रसुखादिकम् ॥ प्राप्नोति पुरुषः सम्यग्विद्यारोग्यकलायुधम् ॥ ५६ ॥ धर्ममर्थं च कामं च
मोक्षं च नृपसत्तम ॥ लभते नात्र संदेहो ब्रह्मणो वचनं यथा ॥ ५७ ॥ यः पठेच्छृणुयाद्वापि सर्वपापैः प्रमुच्यते ॥ यः कुर्यात्पुनरेतद्धि सोऽन
न्तफलभाग्भवेत् ॥ ५८ ॥ अशक्तस्तु तथा शक्तो वित्तशाठ्यविवर्जितः ॥ व्रतं कुर्वन्नरो भक्त्या लभते शाश्वतं पदम् ॥ ५९ ॥ कृते वै क्रियमाणे
तु कर्ता फलमवाप्नुयात् ॥ अपराधशताघौघं व्रतेनानेन नाशयेत् ॥ ६० ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे
अपराधशतव्रतवर्णनं नाम षट्चत्वारिंशदुत्तरशततमोऽध्यायः ॥ १४६ ॥ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ श्वेतद्वीपे सुखासीनं देवदेवं
जगत्प्रभुम् ॥ वासुदेवं जगन्नाथं स्थितिसंयमकारकम् ॥ १ ॥ परावराणां स्रष्टारं पुराणं परमव्ययम् ॥ आदिदेवं जगन्नाथं जगतः कारणात्म
कम् ॥ २ ॥ प्रणिपत्य महादेवं चराचरगुरुं हरिम् ॥ लक्ष्मीः प्रोवाच राजेन्द्र पादसंवाहने स्थिता ॥ ३ ॥ भगवन्देवदेवेश भक्तानामनुकम्पक ॥
प्रष्टव्यं किञ्चिदिच्छामि प्रष्टुं प्रश्नविदां वर ॥ ४ ॥ प्रकुरुष्व महाभाग दयां कृत्वा ममोपरि ॥ व्रतं किञ्चित्कथय मे रूपसौभाग्यदायकम् ॥ ५ ॥
उत्तमं सर्ववर्णानां व्रतानामपि चोत्तमम् ॥ कृतेन येन देवेश सर्वतीर्थफलं भवेत् ॥ ६ ॥ ॥ विष्णुरुवाच ॥ ॥ गृहस्थश्चाश्रमाणां च वर्णानां
ब्राह्मणो यथा ॥ यथा नदीषु सर्वासु जाह्नवी लोकविश्रुता ॥ ७ ॥ ह्रदानामुदधिः श्रेष्ठो देवानां विष्णुरुत्तमः ॥ स्त्रीणां देवी यथा लक्ष्मीस्तथेदं
व्रतमुत्तमम् ॥ ८ ॥ न गङ्गा न कुरुक्षेत्रं न काशी न च पुष्करम् ॥ पावनानि महाभागे यथेदं व्रतमुत्तमम् ॥ ९ ॥ गौर्या देव्या कृतं पूर्वं शंकरेण
महात्मना ॥ रामेण सीतया सार्द्धं राज्यं प्राप्य कृतं पुरा ॥ १० ॥ दमयन्तीवियोगेन नलेन तु तथा कृतम् ॥ कृष्णया सहितैः पार्थ पांडवैर्वन
वासिभिः ॥ ११ ॥ कृतमेतद्व्रतं भद्रे स्वर्गमोक्षप्रदायकम् ॥ रंभया मेनया वापि पौलोम्या सत्यभामया ॥ १२ ॥ शांडिल्या चाप्यरुन्धत्या
उर्वश्या देवदत्तया ॥ कृतं व्रतमिदं भद्रं सौभाग्यसुखकाम्यया ॥ १३ ॥ पाताले नागकन्याभिः कृतमेतत्सुशोभनम् ॥ गायत्र्या च सरस्वत्या
सावित्र्या ब्रह्मभार्यया ॥ १४ ॥ अन्याभिः सर्वनारीभिः सर्वकामफलेप्सुभिः ॥ तस्मात्तेऽहं प्रवक्ष्यामि सर्वपापप्रणाशनम् ॥ १५ ॥ वसुप्रीतिकरं
रम्यं व्रतानां परमं शृणु ॥ ब्रह्महा मुच्यते पापात्सुरापो वसुहारकः ॥ १६ ॥ गुरुभार्याभिगामी च ह्येतेषां संगमी च यः ॥ मानकूटं तुलाकूटं
कन्यावृत्तिर्गवां व्रती ॥ १७ ॥ अगम्यागमनो यस्तु मांसाशी वृषलीपतिः ॥ कुण्डाग्निभोजी यस्तु स्याद्भूमिहर्ता तथैव च ॥ १८ ॥ एभिः सर्वैर्म

हापापैर्मुच्यते नात्र संशयः ॥ एभिः स्यान्नरनारीभिः कर्तव्यं व्रतमुत्तमम् ॥१९॥ अतस्तेऽहं विधिं वक्ष्ये विधानमवधारय ॥ काञ्चनाख्या पुरीनाम
व्रतं त्रैलोक्यविश्रुतम् ॥ २० ॥ यः करोति नरो देवि नारी वा भक्तिसंयुता ॥ तस्य पुत्राश्च पौत्राश्च जायते विपुलं धनम् ॥ २१ ॥ तस्मिन्मासे च
कर्तव्यं व्रतमेतच्च सुन्दरि ॥ तस्मिन्मासे च कर्तव्या काञ्चनाख्या पुरी शुभा ॥ २२ ॥ शुक्लकृष्णतृतीयायामेकादश्यां च पूर्णिमा ॥ संक्रांतिर्वा
महाभागे कुहूर्वा चाष्टमी तिथिः ॥ २३ ॥ पर्वस्वन्येषु सर्वेषु दातव्या काञ्चनी पुरी ॥ व्रती स्नात्वा तु पूर्वाह्णे नद्यादौ विमले जले ॥ २४ ॥
मृत्तिकालंभनं कार्यं मंत्रेणानेन सुव्रते ॥ उद्धृतासि यथापूर्वं विष्णुना क्रोडरूपिणा ॥२५॥ लोकानामुपकारार्थं वन्दनात्सिद्धिकामदा ॥ तस्मात्त्वं
वंदिता पापं हर मेऽनेकजन्मजम् ॥ २६ ॥ (इति मृत्तिकामंत्रः ॥) ॥ आपस्तु विश्वयोनिर्हि विष्णुना निर्मिताः स्वयम् ॥ सान्निध्यं तीर्थसहितं
कर्तव्यं मम सांप्रतम् ॥ २७ ॥ (इत्यम्मंत्रः ॥) ॥ अनेन विधिना स्नात्वा यजमानः समाहितः ॥ गृहमागम्य शुद्धात्मा नालपन्पिशुनांस्त्व
रात् ॥ २८ ॥ पाखंडिनो विकर्मस्थान्धूर्तांश्च कितवाञ्छठान् ॥ प्रक्षाल्य पाणिवदनं कुर्यात्त्वाचमनं ततः ॥ २९ ॥ उपवासस्य नियमं कुर्यान्न
क्तस्य वा पुनः ॥ शंखप्रवरमादाय हेमयुक्तं जलैर्भृतम् ॥ ३० ॥ द्वादशाक्षरमंत्रेण तज्जलं चाभिमंत्रयेत् ॥ पिबेत्तोऽयं गृहे गत्वा हरिरित्यक्षरं
जपेत् ॥ ३१ ॥ शमीवृक्षमया वेदी चतुःस्तंभसमन्विता ॥ चतुर्हस्तप्रमाणेन कार्य्या चैव सुशोभना ॥ ३२ ॥ वस्त्रेणावेष्टिताः स्तम्भावितानवर
मण्डिताः ॥ पुष्पमालान्विताः कार्या दिव्यधूपाधिवासिताः ॥ ३३ ॥ मध्ये तु मंडलं कार्यं पद्माख्यं वर्णकैः शुभैः ॥ येन दृष्टेन देवेशि सर्वपाप
क्षयो भवेत् ॥ मंडलस्य तु मध्ये वै भद्रपीठं सुशोभनम् ॥ ३४ ॥ आसनं तत्र विन्यस्य कोमलं वस्त्रवेष्टितम् ॥ तस्योपरि न्यसेद्देवं लक्ष्म्या युक्तं
जनार्दनम् ॥ ३५ ॥ अग्रे तु कलशः कार्यो जलपूर्णः सुशोभनः ॥ क्षीरसागरनामा स कल्पितव्यः प्रयत्नतः ॥ ३६ ॥ पञ्चरत्नसमायुक्तं वस्त्रेणावे
ष्टयेद्धनम् ॥ कुम्भं प्रपूर्णमुदकैस्तस्योपरि न्यसेद्बुधः ॥ ३७ ॥ तस्योपरिष्टात्संस्थाप्य कांचनाख्यां पुरीं शुभाम् ॥ चतुष्पला ह्युत्तमा स्याद्द्विपला
मध्यमा स्मृता ॥ ३८ ॥ सामान्यैकपला कार्या कलशैस्तु समन्विता ॥ मोदकान्स्थापयेद्दिव्यान्समंतात्सुंदराकृतीन् ॥ ३९ ॥ तदग्रे कदलीस्त
म्भैस्तोरणं परिकल्पयेत् ॥ चातुश्चरणिकांस्तत्र विप्रानावाह्य सुंदरि ॥ ४० ॥ प्रतिष्ठां कारयेत्तस्य वेदमन्त्रैः सुशोभनैः ॥ तस्या मध्ये न्यसे
द्विष्णुं हैमं लक्ष्म्या समन्वितम् ॥ ४१ ॥ नेत्रे रत्नमये कार्ये दशना वज्रभूषिताः ॥ मुक्ताफलमयं तस्य भूषणं परिकल्पयेत् ॥ ४२ ॥ अंगं
स्वर्णमयं कार्यं शंखचक्रगदायुधम् ॥ पञ्चामृतेन देवेशं स्नाप्य नारायणं विभुम् ॥ ४३ ॥ तमेव गंधपुष्पाद्यैर्मंत्रमुच्चार्य पूजयेत् ॥ ब्राह्मणो

वैदिकैर्मन्त्रैः पूजयेन्मधुसूदनम् ॥ ४४ ॥ शेषा वर्णाः पुराणोक्तैस्ताञ्छृणुष्व मम प्रिये ॥ वासुदेवाय पादौ तु गुल्फौ संकर्षणाय च ॥ ४५ ॥
त्रैलोक्यजनकायेति जानुनी पूजयेद्धरेः ॥ त्रैलोक्यनाथाय गुह्ये ज्ञानमयाय वै कटिम् ॥ ४६ ॥ दामोदरायेत्युदरं हृदयं विश्वरूपिणे ॥ नित्यं
हि पूजयेद्देवि उरः श्रीवत्सधारिणे ॥ ४७ ॥ कण्ठं कौस्तुभनाथाय आस्यं यज्ञमुखाय च ॥ दैत्यांतकारिणे बाहू स्वै[1]र्नामैरायुधानि च ॥ ४८ ॥
शिरः सर्वात्मने देवि देवदेवस्य पूजयेत् ॥ श्रियं प्रपूजयेद्देवीं देव्या मंत्रैः पृथग्विधैः ॥ ४९ ॥ इन्द्रादिलोकपालानां पूजा कार्या यथाक्रमम् ॥
नवग्रहाणां होमश्च कर्तव्यो विघ्ननाशनः ॥५०॥ पूजा गणपतेः कार्या तथा होमो विधानतः ॥ अग्रे नैवेद्यमतुलं दापयेद्घृतपाचितम् ॥ ५१ ॥
पायसं घृतपूरांश्च मोदकान्पूरिकास्तथा ॥ सोहालिकादिनैवेद्यं फेणिकाः शर्करास्तथा ॥ ५२ ॥ देशकालोद्भवान्येव फलानि विनिवेदयेत् ॥ दीपा
न्दश दिशो दद्यात्पार्थिवान्रक्तवर्तिकान् ॥५३॥ एतेन तु विशालाक्षि मूलमन्त्रेण दापयेत् ॥ पुष्पमालान्वितान्कृत्वा चंदनेन विभूषितान् ॥५४॥
अभिमंत्र्य प्रयत्नेन विष्णुस्तवकवाचकैः ॥ सहस्रशीर्षादिभिर्मंत्रैर्जपद्भिर्ब्राह्मणोत्तमैः ॥ ५५ ॥ षोडशाथ सपत्नीकान्पूजयेच्च यथाविधि ॥ भूषयेच्च
शुभैर्वस्त्रैस्तथालंकारणादिभिः ॥ ५६ ॥ विष्णुं मत्वा द्विजः पूज्यो लक्ष्मीं मत्वा च ब्राह्मणीम् ॥ छत्रं चोपानहौ चैव अंगुल्याभरणं तथा ॥५७॥
फलानि सप्त धान्यानि भोजनं च यदीप्सितम् ॥ दातव्यं च सभार्याय कृष्णो मे प्रीयतामिति ॥ ५८ ॥ शय्यां सोपस्करां चैव वस्त्रेणाच्छाद्य
यत्नतः ॥ तथा प्रकल्पयेद्वित्तशक्त्या च सुंदरी यथा ॥ ५९ ॥ व्रते पूर्णे च गौर्देया सर्वोपस्करसंयुता ॥ पुरीं घटापयेत्पूर्वं वस्त्रेणाच्छाद्य यत्नतः ॥
यथा कुर्यात्प्रयासेन यथा कर्ता न पश्यति ॥ ६० ॥ दीपांस्तु दीपितांस्तत्र आनयेद्यज्ञमण्डपम् ॥ श्वेतवस्त्रेण नेत्रे तु यजमानस्य च प्रिये॥६१॥
श्रुतवाञ्छास्त्रवित्प्राज्ञः कृतसर्वाघसंक्षयः ॥ आबध्य नेत्रे सुप्राज्ञे आचार्यस्तमिदं वदेत् ॥६२॥ सर्वकामप्रदां पश्य कांचनाख्यां पुरीमिमाम्॥ वरव
स्त्रयुतां रम्यां दुःखदौर्भाग्यनाशिनीम् ॥ ६३ ॥ एवमुक्तो महाभाग पटमुन्मुच्य नेत्रयोः ॥ पुष्पाञ्जलिं गुरौ क्षिप्त्वा स पश्येत्तां पुरीं शुभाम्॥६४॥
दृष्ट्वा तां नगरीं देवि यजमानः समाहितः ॥ सौवर्णं पात्रमादाय रौप्यं ताम्रमथापि वा ॥ ६५ ॥ अथ वा शंखमादाय पात्रालाभे तु सुन्दरि ॥
पञ्चरत्नं क्षिपेत्पात्रे जलं गाङ्गं तथा फलम् ॥ ६६ ॥ सिद्धार्थमक्षताः पूर्वं रोचना दधि वा पुनः ॥ ततश्चार्घ्यं प्रदातव्यं कृष्णाय प्रभविष्णवे
॥ ६७ ॥ लक्ष्मीनारायणौ देवौ सर्वकामफलप्रदौ ॥ रुक्मपुर्याः प्रदानेन यच्छेतां वांछितं मम ॥ ६८ ॥ नारायण हृषीकेश ज्ञानज्ञेय निरंजन॥

---

[1] आर्षमेतत् ।

लक्ष्मीकांत जगन्नाथ गृहाणार्घ्यं नमोस्तु ते ॥६९॥ (इत्यर्घमंत्रः) ॥ एवमर्घ्यं ततो दत्त्वा विष्णवे प्रभविष्णवे॥देव्यास्त्वर्घ्यं प्रदातव्यं भक्तियुक्ते
न चेतसा॥७०॥जानुभ्यामवनिं गत्वा मंत्रमेतमुदीरयेत् ॥ ब्रह्मणा पूजिता देवी विष्णुना शंकरेण च ॥७१॥ पार्वत्या पूजिता लक्ष्मीः स्कंदवैश्रव
णेन च॥मया च पूजिता देवि धर्मस्य विजिगीषया ॥७२॥ सौभाग्यं देहि मे पुत्रान्धनं पौत्रांश्च पूजितान् ॥ गृहाणार्घ्यं मया दत्तं देवि सौख्यं प्रय
च्छमे ॥७३॥ य एवं पुरतो दत्त्वा पूर्वोक्तविधिना तव ॥ रात्रौ जागरणं कुर्याद्भक्तियुक्तेन चेतसा ॥७४॥ गीतनृत्यविनोदेन उपाख्यानैश्चवैष्णवैः॥
येन केन विनोदेन निद्रा नैव प्रजायते ॥७५॥ उन्निद्रो जागृयाद्यस्तु शतयज्ञफलं लभेत् ॥ प्रभाते विमले स्नात्वा संपूज्य पितृदेवताः ॥७६॥
ब्राह्मणांश्च सपत्नीकान्परिधाप्यानुभोजयेत् ॥ दक्षिणाश्च यथाशक्त्या प्रदाय च क्षमापयेत् ॥ ७७ ॥ दीनांधबधिरान्पंगून्सर्वांस्तान्परितोषयेत् ॥
पश्चात्पारणकं कार्यमुपवासी भवेद्यदि ॥ ७८ ॥ मधुरं पयसा युक्तं सुहृद्भिर्बांधवैः सह ॥ एवमेतद्व्रतं कार्यमेकादश्यां शुचिस्मिते ॥ ७९ ॥ शुक्ला
यामथ कृष्णायां तृतीयायां तथा तिथौ॥संक्रांतिवासरे वापि व्यतीपाते च वैधृतौ ॥८०॥ यदा वा जायते वित्तं चित्तं च वरवर्णिनि ॥ गौरानीय
प्रदातव्या कृष्णो मे प्रीयतामिति ॥ ८१ ॥ एवं कृते च यत्पुण्यं तन्न शक्यं निवेदितुम् ॥ अपि वर्षसहस्रेण कुललक्षशतैरपि ॥ ८२ ॥ कल्पको
टिसहस्राणि कल्पकोटिशतानि च॥ब्रह्मलोकं समासाद्य ब्रह्मणा प्रतिमोद्यते ॥ ८३ ॥ ब्रह्मलोकाद्रुद्रलोकं तत्परं विष्णुसंनिधौ ॥ इन्द्रादिलोकपा
लानां व्रती लोकमवाप्नुयात् ॥ ८४ ॥ ततो भुक्त्वा शुचिः श्रीमान्भोगांस्त्रैलोक्यसुंदरि ॥ चक्रवर्ती भवेद्भूमौ ब्रह्मण्यो वैष्णवस्तथा ॥८५॥ य इदं
शृणुयान्नित्यं वाच्यमानं समंततः ॥ कुलसप्तकमुद्धृत्य वैष्णवं लोकमाप्नुयात् ॥८६॥ त्वयाकांचनपुर्याख्यं व्रतमेतत्कृतं पुरा ॥ तेन पुण्येन लब्धो
ऽहं भर्ता त्रैलोक्यपूजितः ॥ ८७ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीलक्ष्मीविष्णुसंवादे कांचनपुरीव्रतवर्णनं नामसप्तचत्वारिंशदुत्तर
शततमोऽध्यायः ॥ १४७ ॥ छ ॥ (अथ कन्यादानम्) ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ ब्रह्मदेयां तु यः कन्यामलंकृत्य प्रयच्छति ॥ सप्तपूर्वान्भवि
ष्यांश्च स्वकुले सप्त मानवान् ॥१॥ तेन कन्याप्रदानेन स तारयत्यसंशयम् ॥ लोकानाप्नोति च तथा दक्षस्यैव प्रजापतेः॥२॥प्राजापत्येन विधिना
आत्मानं च समुद्धरेत्॥महत्पुण्यमवाप्नोति स्वर्गलोकं च गच्छति ॥३॥ भूगवाश्वप्रदानानि गजदानं तथैव च ॥ दत्त्वा तु वर्णहीनाय घोरे तमसि
मज्जति ॥४॥ बहुवर्षसहस्राणि पुरीषं काकमश्नुते॥शुल्केन दत्त्वा कन्यां च घोरं नरकमाप्नुयात् ॥५॥ बहून्यब्दसहस्राणि तथा अशुचिभुङ्नरः॥
सवर्णां च सवर्णेभ्यो दद्यात्कन्यां यथाविधि ॥६॥ दत्त्वा चाधिकवर्णाय द्विगुणं निर्गुणं तथा ॥ द्विजपुत्रमनाथं वा संस्कुर्याद्यश्च कर्मभिः ॥७॥

चूडोपनयाद्यैश्च सोऽश्वमेधफलं लभेत् ॥ अनाथां कन्यकां दत्त्वा नाकलोके महीयते ॥ ८ ॥ कन्यया सह दत्तं च सुवर्णं वह्निमूलकम् ॥ सकलं द्विगुणं तस्य फलमुक्तं पुरातनैः ॥ ९ ॥ कन्यादानादवाप्नोति दक्षलोकं नरोत्तम ॥ विष्णुपूजासमं पुण्यं तत्कन्यापूजया भवेत् ॥ १० ॥ विमानमारुह्य मनोभिरामं सुराङ्गनागीतविलासहृद्यम् ॥ प्राप्नोति लोकं त्रिदशोत्तमानां कन्याप्रदानान्न विचारणेति ॥ ११ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे कन्याप्रदानवर्णनं नामाष्टचत्वारिंशदुत्तरशततमोऽध्यायः ॥ १४८ ॥ ॥ छ ॥ ॥ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ ब्राह्मणा दैवतं भूमौ ब्राह्मणा दिवि दैवतम् ॥ ब्राह्मणेभ्यः परं नास्ति नास्ति भूतं जगत्त्रये ॥ १ ॥ अदेवं दैवतं कुर्युः कुर्युर्देवमदैवतम् ॥ ब्राह्मणा हि महाभागाः पूज्यंते सततं द्विजाः ॥२॥ ब्राह्मणेभ्यः समुत्पन्ना देवाः पूर्वमिति स्मृतिः ॥ ब्राह्मणेभ्यो जगत्सर्वं तस्मात्पूज्यतमा द्विजाः ॥ ३ ॥ येषामश्नंति वक्रेण देवताः पितरस्तथा ॥ ऋषयश्च तथा नागाः किं भूतमधिकंततः ॥ ४ ॥ यदैव मनुजो भक्त्या ब्राह्मणेभ्यः प्रयच्छति ॥ तदैवाप्नोति धर्मज्ञ बहुजन्मनि जन्मनि ॥ ५ ॥ तालवृंतानिलेनैव श्रांतसंवाहनेन च ॥ उत्सादनेन गात्राणां तथा व्यंजनकर्मणा ॥ ६ ॥ पादशौचप्रदानेन पादयोः सेचनेन च ॥ परिचर्यं यथा काममेकेनैव द्विजोत्तम ॥ ७ ॥ अनिच्छापि समाप्नोति स्वर्गलोकं च शाश्वतम् ॥ ब्राह्मणानां शुभं कृत्वा नाकलोके महीयते ॥ ८ ॥ यद्ब्राह्मणास्तुष्टिमन्तो वदंति प्रत्यक्षदेवेषु परोक्षदेवाः ॥ तद्वै शुभं तस्य नरस्य नूनं भवेदतस्तान्सततं निषेवेत् ॥ ९ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे ब्राह्मणशुश्रूषाविधिवर्णनं नामैकोनपचाशदुत्तरशततमोऽध्यायः ॥ १४९ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ युष्मद्वाक्यामृतमिदं ह्यहंशृण्वञ्जनार्दन ॥ न तृप्तिमधिगच्छामि जातं कौतूहलं हि मे ॥ १ ॥ गोपतिः किल गोविन्दस्त्रिषु लोकेषु विश्रुतः ॥ गोवृषस्य प्रदानेन त्रैलोक्यमभिनंदति ॥ २ ॥ तस्माद्गोवृषकल्पस्य विधानं कथयाच्युत ॥ ३ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ वृषदानफलं पुण्यं शृणुष्व कथयामि ते ॥ पवित्रं पावनं चैव सर्वदानोत्तमं तथा ॥ ४ ॥ दशधेनुसमोनड्वानेकश्चैव धुरंधरः ॥ दशधेनुप्रदानाद्धि स एवैको विशिष्यते ॥ ५ ॥ वोढा च चारुपृष्ठांगो ह्यरोगः पांडुनंदन ॥ युवा भद्रः सुशीलश्च सर्वदोषविवर्जितः ॥ ६ ॥ धुरंधरः स्थापयते एक एव कुलं महत् ॥ त्राता भवति संसारान्नात्र कार्या विचारणा ॥ ७ ॥ अलंकृत्य वृषं शांतं पुण्येह्नि समुपस्थिते ॥ रौप्यलाङ्गूलसंयुक्तं ब्राह्मणाय निवेदयेत् ॥ ८ ॥ मंत्रेणानेन राजेन्द्र तं शृणुष्व वदामि ते ॥ धर्मस्त्वं वृषरूपेण जगदानंदकारक ॥ ९ ॥ अष्टमूर्तेरधिष्ठानमतः पाहि सनातन ॥ दत्त्वैवं दक्षिणायुक्तं प्रणिपत्य विसर्जयेत् ॥ १० ॥ सप्तजन्मकृतं पापं वाङ्मनः

कायकर्मजम् ॥ तत्सर्वं विलयं याति गोदानसुकृतेन च ॥ ११ ॥ यानं वृषभसंयुक्तं दीप्यमानं सुशोभितम् ॥ आरुह्य कामगं दिव्यं स्वर्लोक
मधिरोहति ॥ १२ ॥ यावंति तस्य रोमाणि गोवृषस्य महीपते ॥ तावद्वर्षसहस्राणि गवां लोके महीयते ॥ १३ ॥ गोलोकादवतीर्णस्तु इहलोके
द्विजोत्तमः ॥ यज्ञयाजी महातेजाः सर्वब्राह्मणपूजितः ॥ १४ ॥ तवोक्तं वै महाराज कस्य देयो वृषोत्तमः ॥ तदप्यहं ते वक्ष्यामि पात्रं त्राणपदं
नृणाम् ॥ १५ ॥ येषां सदा वै श्रुतिपूर्णकर्णा जितेन्द्रियाः प्राणिवधे निवृत्ताः ॥ प्रतिग्रहे संकुचिता गृहस्थास्ते ब्राह्मणास्तारयितुं समर्थाः ॥१६॥
गात्रे दृढं भारसहं सुपुष्टं सुश्रृङ्गिणं सर्वगुणोपपन्नम् ॥ दत्त्वर्षभं गोदशकेन तुल्यं सत्यं भवंति भुवि तत्फलभागिनस्ते ॥ १७ ॥ इति श्रीभविष्ये
महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादेवृषदानविधिवर्णनं नाम पंचाशदुत्तरशततमोऽध्यायः ॥ १५० ॥ ॥ छ ॥ ॥ (अथ विविधदा
दानि) ॥ ॥ युधिष्ठिर उवाच ॥ ॥ श्रुतः पुराणविषयस्त्वत्प्रसादान्मयाच्युत ॥ संसारासारतां ज्ञात्वा श्रुतश्च व्रतविस्तरः ॥ १ ॥ भूयश्च श्रोतु
मिच्छामि दानमाहात्म्यमुत्तमम् ॥ किं दीयते कदा कृष्ण केनोपायेन शंस मे ॥ २ ॥ नहि दानात्परतरमन्यदस्तीति मे मतिः ॥ धनं धनवतां
किञ्चिदहार्यं राजतस्करैः ॥ ३ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अनिश्चितं निधानं यदप्रयुक्तं च वर्द्धते ॥ अनीतं याति चाध्वानं धनं विप्रकरा
र्पितम् ॥ ४ ॥ किं कायेन सुपुष्टेन बलिना चिरजीविना ॥ यन्नसत्त्वोपकाराय तज्जीवितमनर्थकम् ॥ ५ ॥ ग्रासादर्द्धमपि ग्रास
मर्थिभ्यः किंन दीयते ॥ इच्छानुरूपो विभवः कदा कस्य भविष्यति ॥ ६ ॥ एकस्मिन्नप्यतिक्रांते दिने दानविवर्जिते ॥ दस्युभिर्मु
षितश्चैव दिवारात्रौ[1] च शोचति ॥ ७ ॥ यस्य त्रिवर्गशून्यानि[2] दिनान्यायांति यांति च ॥ सलोहकारभस्त्रेव श्वसन्नपि न जीवति ॥ ८ ॥ यैर्न
दत्तं न च हुतं न तीर्थे मरणं कृतम् ॥ हिरण्यमन्नमुदकं ब्राह्मणेभ्यो न चार्पितम् ॥ ९ ॥ दीना निरशना रूक्षाः कपालाङ्कितपाणयः ॥ ते
दृश्यंते महाराज जायमानाः पुनः पुनः ॥ १० ॥ आयासशतलब्धस्य प्राणेभ्योपि गरीयसः ॥ गतिरेकैव वित्तस्य दानमन्या विपत्तयः ॥ ११ ॥
नोपभोगैः क्षयं यांति न प्रदानैः समृद्धयः ॥ पूर्वार्जितानामन्यत्र[3] सुकृतानां परिक्षयात् ॥ १२ ॥ अदृष्टपरतत्त्वोपि पात्रेभ्यो विसृजेद्धनम् ॥
यस्मान्मृतस्य तन्नास्ति तस्मात्सांशयिकं वरम् ॥ १३ ॥ दानानि[4] बहुरूपाणि कथयामि तवानघ ॥ व्यासवाल्मीकिमन्वाद्यैः कथितानि पुरा
मम ॥ १४ ॥ किञ्चिद्दत्तं[5] यत्क्रियते पूज्यते च त्रिलोचनः ॥ दीयते यच्च विप्रेभ्य एतज्जन्मतरोः फलम् ॥ १५ ॥ ॥ युधिष्ठिर उवाच ॥ ॥

---

[1] मुक्तमाक्रन्दितुं चिरम्–इ० पा० । [2] त्रिवर्गशून्यस्य–इ० पा० । [3] धनस्योत्पत्तिकरणे–इ० पा० । [4] दानमेव प्रकर्तव्यम्–इ० पा० । [5] हुतम्–इ० पा० ।

ब्राह्मणप्रीणनार्थाय केशवस्य शिवस्य च ॥ यानि दानानि देयानि तान्याचक्ष्व यदूत्तम ॥१६॥ येन चैव विधानेन दानं पुण्यसुखावहम्[1] ॥ ऐहिकामुष्मिकावाप्तिं करोति नहि हन्यते ॥ १७ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ त्रीण्याहुरतिदानानि गावः पृथ्वी सरस्वती ॥ आसप्तमं पुनंत्येते दोहवाहनवेदनैः ॥ १८ ॥ गोदानमादौ वक्ष्यामि प्रत्यक्षक्रमयोगतः ॥ येन[2] चैव विधानेन अन्यूनाधिकविस्तरम् ॥ १९ ॥ ॥ युधिष्ठिर उवाच ॥ देयाः किंलक्षणा गावः काश्च राजन्विवर्जिताः ॥ कीदृशाय प्रदातव्या न देयाः कीदृशाय वै ॥२०॥ ॥ श्रीकृष्ण उवाच ॥ ॥ तरुणी रूपसंपन्ना सुशीला च पयस्विनी ॥ न्यायार्जिता सवत्सा च प्रदेया श्रोत्रियाय गौः ॥ २१ ॥ वृद्धा सरोगा हीनांगी वंध्या दुष्टा मृतप्रजा ॥ दूरस्थाऽन्यायलब्धा च देया गौर्न कथंचन ॥ २२ ॥ सा दत्तैव हरेत्पापं श्रोत्रियायाहिताग्नये ॥ अतिथिप्रियाय दांताय धेनुं दद्याद्गुणाधिके ॥२३॥ अकुलीनाय मूर्खाय लुब्धाय पिशुनाय च ॥ हव्यकव्यव्यपेताय न देया गौः कथंचन ॥ २४ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ पुण्यं दिनमथासाद्य स्नात्वातर्प्य पितॄंस्तथा ॥ घृतक्षीराभिषेकं च कृत्वा विष्णोः शिवस्य च ॥ २५ ॥ समभ्यर्च्य यथान्यायं पुष्पादिभिरनुक्रमात् ॥ उदङ्मुखीं प्राङ्मुखीं वा गृष्टिं कृत्वा पयस्विनीम् ॥ २६ ॥ सवत्सां वस्त्रसंवीतां सितयज्ञोपवीतिनीम् ॥ स्वर्णशृङ्गीं रौप्यखुरां कांस्यदोहनकान्विताम् ॥ २७ ॥ शक्तितो दक्षिणायुक्तां ब्राह्मणाय निवेदयेत् ॥ पुच्छे कृष्णाजिनं देयं गां पुच्छे करिणं करे ॥ २८ ॥ अश्वं सदा सुकर्गे वा दासीं शिरसि दापयेत् ॥ गावो ममाग्रतः संतु गावो मे संतु पृष्ठतः ॥ २९ ॥ गावो मे हृदये संतु गवां मध्ये वसाम्यहम् ॥ प्रदक्षिणां ततः कृत्वा धेनुं द्विजवराय ताम् ॥ ३० ॥ इमां च प्रतिगृह्णीष्व धेनुर्दत्ता मया तव ॥ एवमुच्चार्य तं विप्रं देवेशं परिकल्पयेत् ॥ ३१ ॥ अनुव्रजेच्च गच्छंतं[3] पदान्यष्टौ नराधिप ॥ अनेन विधिना धेनुं यो विप्राय प्रयच्छति ॥ ३२ ॥ सर्वकामसमृद्धात्मा स्वर्गलोकं स गच्छति ॥ सप्त पूर्वान्सप्त परानात्मानं चैव मानवः ॥३३॥ सप्त जन्मकृतात्पापान्मोचयत्यवनीपते॥पदे पदेऽश्वमेधस्य गोशतस्य च मानवः ॥३४॥ फलमाप्नोति राजेन्द्र दक्षायैवं जगौ हरिः ॥ सर्वकामप्रदा सा स्यात्सर्वकालेषु पार्थिव ॥३५॥ भवत्यसौ पापहरा यावदिंद्राश्चतुर्दश[4] ॥ सर्वेषामेव पापानां कृतानामपि जानता ॥३६॥ प्रायश्चित्तमिदं प्रोक्तमनुतापोपबृंहितम् ॥ सर्वेषामेव दानानामेकजन्मानुगं[5] फलम् ॥ ३७ ॥ ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्चान्यैश्च मानवैः ॥ लोकाः कामगमाः[6] प्राप्ता दत्त्वैतद्विधिना नृप ॥ ३८ ॥ गोभ्योधिकं जगति नापरमस्तिकिञ्चिद्दानं[7] पवित्रमिति शास्त्रविदो वदंति ॥ तत्संपदः सुरसदश्च

---

१ पुंसः–इ० पा० । २ तेन–इ० पा० । ३ अग्रे गच्छेच्च गच्छन्तम्–इ० पा० । ४ जन्म चतुर्दश–इ० पा० । ५ देवानामेतज्जन्मांतरं फलम्–इ० पा० । ६ कामदुघाः–इ० पा० । ७ पुण्यम्–इ० पा० ।

समीहमानैर्देयाः सदैव विधिना द्विजपुंगवाय ॥ ३९ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे प्रत्यक्षधेनुदानव्रत
विधिवर्णनं नामैकपंचाशदुत्तरशततमोऽध्यायः ॥ १५१ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अथातः संप्रवक्ष्यामि धेनूनां कल्पना नृप ॥
विशेषविधिना याश्च देयाः कामानभीप्सुभिः ॥ १ ॥ कामं यद्दीयते दानं समग्रं तत्सुखावहम् ॥ असमग्रं तु दोषाय भवतीह परत्र च ॥ २ ॥
तस्मान्न दक्षिणाहीनं विधानविकलं तथा ॥ देयं दानं महाराज समग्रफलकाम्यया ॥ ३ ॥ अन्यथा दीयमानं तदहंकाराय केवलम् ॥ प्रत्यक्षं
चार्थहानिः स्यान्न वा तत्फलदं भवेत् ॥ ४ ॥ तिलधेनुं प्रवक्ष्यामि शृणु पार्थिवसत्तम ॥ वाराहेण पुरा प्रोक्तां महापातकनाशिनीम् ॥ ५ ॥
यां दत्त्वा ब्रह्महा गोघ्नः पितृहा गुरुतल्पगः ॥ अगारदाही गरदः सर्वपापरतोपि[1] वा ॥ ६ ॥ महापातकयुक्तश्च संयुक्तश्चोपपातकैः ॥ मुच्यते
ह्यखिलैः पापैः स्वर्गलोकं च[2] गच्छति ॥ ७ ॥ अनुलिप्ते महीपृष्ठे कृष्णाजिनसमावृते[3] ॥ धेनुं तिलमयीं कृत्वा दर्भानास्तीर्य सर्वतः
॥ ८ ॥ तिलाः श्वेतास्तिलाः कृष्णास्तिला गोमूत्रवर्णकाः[4] ॥ तिलानां च विचित्राणां धेनुं सर्वां च कारयेत् ॥ ९ ॥ द्रोणस्य
वत्सकं कुर्याच्चतुराढकिकां च गाम् ॥ स्वर्णशृंगीं रौप्यखुरां गन्धवर्णवतीं तथा ॥ १० ॥ कार्या शर्करया जिह्वा गुडेनास्यं च
कम्बलः ॥ इक्षुपादां ताम्रपृष्ठीं शुक्तिमुक्ताफलेक्षणाम्[5] ॥ ११ ॥ प्रशस्तपत्रश्रवणां फलदंतवतीं शुभाम् ॥ स्रग्दामपुच्छां कुर्वीत नव
नीतस्तनान्विताम् ॥ १२ ॥ सितवस्त्रशिरालम्बां सितसर्षपरोमिकाम् ॥ फलैर्मनोहरैरन्नैर्मणिमुक्ताफलान्विताम् ॥ १३ ॥ ईदृक्संस्थानसम्पन्नां
कृत्वा श्रद्धासमन्वितः ॥ कांस्योपदोहनां दद्यात्पर्वकाले[6] समागते ॥ १४ ॥ या लक्ष्मीः सर्वभूतानां या वै देवेष्ववस्थिता ॥ धेनुरूपेण सा
देवी मम पापं व्यपोहतु ॥ १५ ॥ ततः प्रदक्षिणां कृत्वा पूजयित्वा प्रणम्य च ॥ सदक्षिणा मया तुभ्यं दत्तेत्युक्त्वा विसर्जयेत् ॥ १६ ॥ अनेन
विधिना दत्त्वा तिलधेनुं नराधिप ॥ सर्वपापविनिर्मुक्तो परं ब्रह्माधिगच्छति ॥ १७ ॥ यश्च गृह्णाति विधिवद्दीयमानां प्रमोदते ॥ दीयमानां
प्रशंसंति ये च संहृष्टमानसाः ॥ १८ ॥ तेपि दोषविनिर्मुक्ता[7] ब्रह्मलोकं व्रजंति ते ॥ प्रशांताय सुशीलाय वेदैर्व्रतरताय[8] च ॥ १९ ॥ धेनुं तिल
मयीं दत्त्वा न शोचति कृताकृते ॥ त्रिरात्रं यस्तिलाहारस्तिलधेनुप्रदो भवेत् ॥ २० ॥ एकाहमथ वा राजन्न युंच्छेदन्तरात्मना[9] ॥ दानाद्विशुद्धिः

---

[1] सर्वपापकरोऽपि वा–इ० पा० । [2] सः–इ० पा० । [3] वस्त्राजिनसमावृते–इ० पा० । [4] गोमूत्रसंभवाः–इ० पा० । [5] शुचिमुक्ताफलेक्षणाम्–इ० पा० । [6] पर्वकालं समीक्ष्य च–इ० पा० । [7] अशेषशोकनिर्मुक्ताः प्रयान्ति परमां गतिम्–इ० पा० । [8] वेदव्रतधराय च–इ० पा० । [9] न युच्छेन्न प्रमाद्येदित्यर्थः । 'युच्छ' प्रमादे धातुः ।

पापस्य तस्य पुण्यवतो नृप ॥ २१ ॥ चान्द्रायणादभ्यधिकं कथितं तिलभक्षणम् ॥ बालत्वे चैव यत्पापं यौवने वार्द्धके तथा ॥ २२ ॥ वाचा कृतं
तु मनसा कर्मणा यच्च संचितम् ॥ उदकष्ठीवने चैव नग्नस्नानेन यद्भवेत् ॥ २३ ॥ मुशलेनोद्यते नापि लंबिते ब्राह्मणे तथा ॥ वृषलीगमने चैव
गुरुदाराभिगामिनि ॥ २४ ॥ सुरापानेन यत्पापमभक्ष्यस्य च भक्षणात् ॥ तत्सर्वं विलयं याति तिलधेनुप्रदायिनाम् ॥ २५ ॥ यममार्गे महाघोरे
नदी वैतरणी स्मृता ॥ वालुकायाः स्थलं चैव पच्यंते यत्र पापिनः ॥ २६ ॥ यत्र लोहमुखाः काका यत्र श्वानो भयावहाः ॥ निकृत्य पापिनां
मांसं भक्षयंति बुभुक्षिताः ॥ २७ ॥ असिपत्रवनं चैव लोहकंटकशाल्मलीम् ॥ एतान्सर्वानतिक्रम्य ततो यमपुरं व्रजेत् ॥ २८ ॥ विमाने कांचने
दिव्ये मणिरत्नविभूषिते ॥ तत्रारुह्य नरश्रेष्ठो गच्छते परमाङ्गतिम् ॥ २९ ॥ गुणहीने न दातव्या न दातव्या धनेश्वरे ॥ कुण्डे गोले च लुब्धे च न
च देया कदापि सा ॥ ३० ॥ एका एकस्य दातव्या मुनिभिः कथितं पुरा ॥ अरण्ये नैमिषे पार्थ नारदेन निवेदितम् ॥ ३१ ॥ तत्तेहं संप्रवक्ष्यामि
सम्यक्फलसहस्रदम् ॥ इदं पुण्यं पवित्रं च माङ्गल्यं कीर्तिवर्धनम् ॥ ३२ ॥ विप्राणां श्रावयेच्छ्राद्धे अनन्तफलमश्नुते ॥ बहुभ्यो न प्रदेयानि गौर्गृहं
शयनं स्त्रियः ॥ ३३ ॥ विभज्यमानान्येतानि दातारं पातयंत्यधः ॥ सा तु विक्रयमापन्ना दहत्यासप्तमं कुलम् ॥ ३४ ॥ अस्या दानप्रभावेन
विमानं सर्वकामिकम् ॥ समारुह्य नरो याति यत्र देवो हरिः स्वयम् ॥ ३५ ॥ एषा चैव प्रदातव्या प्रयतेनान्तरात्मना ॥ पौर्णमास्यां च माघस्य
कार्तिक्यां चैव भारत ॥ ३६ ॥ चन्द्रसूर्योपरागे तु विषुवे अयने तथा ॥ षडशीतिमुखे चैव व्यतीपाते तु सर्वदा ॥ ३७ ॥ वैशाख्यां मार्गशीर्ष्यां
वा गजच्छायासु चैव हि ॥ एषा ते कथिता पार्थ तिलधेनुर्मयानघ ॥ ३८ ॥ यावंति धेनो रोमाणि गात्रेषु नृपपुङ्गव ॥ तावद्वर्षसहस्राणि तदा स्वर्गे
महीयते ॥ ३९ ॥ यश्च गृह्णाति विधिवद्दीयमानां च पश्यति ॥ अनुमोदयते चैव ते सर्वे स्वर्गगामिनः ॥ ४० ॥ धेनुं धनाधिपतयो मगधोद्भवेन
मानेन ये तिलमयीं चतुराढकेन ॥ कृत्वा यथोक्तरचनां कृतचारुवत्सां यच्छंति ते भुवि भवंति विमुक्तपापाः ॥४१॥ प्रतिगृह्णामि देवि त्वां कुटुं
बभरणाय च ॥ कामं देया दयास्मभ्यं धेनो त्वं सर्वदा ह्यसि ॥ ४२ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे तिल
धेनुदानव्रतविधिवर्णनं नाम द्विपंचाशदुत्तरशततमोऽध्यायः ॥ १५२ ॥ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ जलधेनुं प्रवक्ष्यामि प्रीयते दत्तया
यया ॥ देवदेवो हृषीकेशः [1]पूजितः सर्वभावनः ॥ १ ॥ जलकुंभं नरव्याघ्र स्थापयित्वा सुपूजितम् ॥ रत्नगर्भं तु तं कृत्वा ग्राम्यैर्धान्यै समन्वि

---

[1] सर्वेशः–इ० पा० ।

तम् ॥ २ ॥ सितवस्त्रयुगच्छन्नं दूर्वापल्लवशोभितम् ॥ कुष्ठमांसीपुरोशीरवालकामलकीयुतम्[1] ॥ ३ ॥ प्रियङ्गुपत्रसहितं सितयज्ञोपवीतिनम् ॥ सोपानत्कं च सच्छत्रं दर्भविष्टरसंस्थितम् ॥ ४ ॥ चतुर्भिः संयुतं रौप्यं तिलपात्रैश्चतुर्दिशम् ॥ स्थगितं दधिपात्रेण घृतक्षौद्रवता मुखम् ॥ ॥ ५ ॥ सवत्सां च प्रतिष्ठाप्य गोमयेनोपशोभिताम् ॥ स्रग्दामपुच्छीं कुर्वीत ताम्रदोहनकान्विताम् ॥ ६ ॥ ततः समभ्यर्च्य विभुं वासुदेवं सनातनम् ॥ पुष्पधूपोपहारैश्च यथाविभवमात्मनः ॥ ७ ॥ संकल्प्य जलधेनुं च कुंभं तमभिमंत्र्य च ॥ विष्णोर्वक्षसि या लक्ष्मीः स्वाहा या च विभावसोः ॥ सोमशक्रार्कशक्तिर्या धेनुरूपेण सास्तु मे ॥ ८ ॥ एवमामंत्र्य विधिवत्सफलां वत्सकान्विताम् ॥ भक्त्या संपूज्य गोविंदं जलशायिनमच्युतम् ॥ ९ ॥ सितवस्त्रधरः[2]शांतो वीतरागो विमत्सरः ॥ दद्याद्विप्राय राजेन्द्र प्रीत्यर्थं जलशायिनः ॥ १० ॥ शेषपर्यंकशयनः श्रीमाञ्छार्ङ्गविभूषितः ॥ जलशायी जगद्योनिः प्रीयतां मम केशवः ॥ ११ ॥ इत्युच्चार्य जगन्नाथं विप्राय प्रतिपाद्य ताम् ॥ तद्दिनं गोव्रतस्तिष्ठेच्छ्रद्धया परया युतः ॥ १२ ॥ अनेन विधिना दत्त्वा जलधेनुं जनाधिप ॥ सर्वभोगानवाप्नोति ये दिव्या ये च मानुषाः ॥ १३ ॥ शरीरारोग्यमतुलं प्रशमः सर्वकालिकः ॥ नृणां भवंति दत्तायां सर्वे कामा न संशयः ॥ १४ ॥ अत्रापि श्रूयते भूप मुद्गलेन महात्मना ॥ जातिस्मरेण यद्गीतमिहाभ्येत्य पुराकिल ॥ १५ ॥ स मुद्गलः पुरा विप्रो यमलोकगतो मुनिः ॥ ददर्श यातनानेकाः पापकर्मकृतां नृणाम् ॥ १६ ॥ दीप्ताग्नितीक्ष्णयन्त्रस्थाः क्राथतैलमयास्तथा ॥ उष्णक्षारनदीपाता भैरवाः पुरुषर्षभ ॥ १७ ॥ व्रणक्षारनिपातोथ कुम्भीपाकमहालयाः ॥ ता दृष्ट्वा यातना विप्रश्चकार परमां कृपाम् ॥ १८ ॥ आह्लादं ते तदा जग्मुः पापास्तदनुकंपया ॥ तं दृष्ट्वा नारकाः केचित्स्थित्वा तदवलोकिनः ॥ १९ ॥ तदवस्थं विलोक्याथ मुनिर्नारकमण्डलम् ॥ धर्मराजं स पप्रच्छ तेषां प्रशमकारणम् ॥ २० ॥ तस्मै चाचष्ट राजेन्द्र तदा वैवस्वतो यमः ॥ आह्लादहेतुमधिकं नारकाणां नरोत्तम ॥ २१ ॥ दानानुभावात्सर्वेषां नारकाणां द्विजोत्तम ॥ संप्रवृत्तोऽयमाह्लादः कारणं तच्छृणुष्व मे ॥ २२ ॥ त्वयाभ्यर्च्य जगन्नाथं सर्वेशं जलशायिनम् ॥ जलधेनुः पुरा दत्ता विधिवद्द्विजपुङ्गव ॥ २३ ॥ तस्मात्वज्जन्मनोऽतीते तृतीये द्विजजन्मनि ॥ तस्य दानस्य ते व्युष्टिरियमाह्लाददायिनी[3] ॥ २४ ॥ ये त्वां पश्यंति शृण्वंति ये च ध्यायंति मानवाः ॥ शृणोषि यांश्च विप्रेन्द्र यांश्च ध्यायसि पश्यसि ॥२५॥ निवृत्तिः परमा तेषां सर्वाह्लादप्रदायिनी ॥ सद्यो भवति माऽत्र त्वं द्विजाते कुरु विस्मयम् ॥ २६ ॥ आह्लादहेतुजननं

---

[1] कुष्ठमांसीपुरोशीरनालकैर्बिल्वसंयुतम्—इ० पा० । [2] सितवस्त्रेण संवीतो वीतरागः–इ०, सितवस्त्रेण संवीतम्–इ० पा० । [3] व्युष्टिः फलमित्यर्थः ।

नास्तिविप्रेन्द्र तादृशम् ॥ जलधेनुर्यथा नृणां जन्मान्येकोनविंशतिम् ॥२७॥ न दोषो न ज्वरो नार्तिर्न क्लमो द्विज जायते ॥ अपि जन्मसहस्रेऽपि जलधेनुप्रदायिनाम् ॥ २८ ॥ स त्वं गच्छ गृहीत्वार्घमस्मतो द्विजसत्तम ॥ येषां समाश्रयः कृष्णे न नियम्या हि ते मया ॥ २९ ॥ कृष्णस्तु पूजितो यैस्तु[1] ये कृष्णार्थमुपोषिताः ॥ यैश्च[2] नित्यं स्मृतः कृष्णो न ते मद्विषयोपगाः ॥ ३० ॥ नमः कृष्णाच्युतानंत वासुदेवेत्युदीरितम् ॥ यैर्भावभावितैर्विप्र न ते मद्विषयोपगाः ॥३१॥ दानं ददद्भिर्यैरुरुक्रमच्युतः प्रीयतामिति ॥ श्रद्धापुरःसरैर्विप्र न ते मद्विषयोपगाः ॥ ३२ ॥ स एव नाथः सर्वस्य तन्नियोगकरा वयम् ॥ जनसंयमनश्चाहमस्मत्संयमनो हरिः ॥ ३३ ॥ इत्थं निशम्य वचनं यमस्य वदतोऽखिलम् ॥ ऊचुस्ते नारकाः सर्वे वह्निशस्त्रार्कभीरवः ॥३४॥ नमः कृष्णाय हरये विष्णवे जिष्णवे नमः ॥ हृषीकेशाय केशाय जगद्धात्रेऽच्युताय च ॥ ३५ ॥ नमः पङ्कजनेत्राय नमः पङ्कजनाभये ॥ जनार्दनाय श्रीशाय श्रीभर्त्रे पीतवाससे ॥ ३६ ॥ गोविंदाय नमो नित्यं नमश्चोदधिशायिने[3] ॥ नमः कमलनेत्राय नृसिंहाय निनादिने ॥ ३७ ॥ शार्ङ्गिणे शितखड्गाय शंखचक्रगदाभृते ॥ नमो वामनरूपाय क्रांतलोकत्रयाय च ॥ ३८ ॥ वराहरूपाय तथा नमो यज्ञाङ्गधारिणे ॥ व्याप्ताशेषदिगंतायानंताय[4] परमात्मने ॥३९॥ वासुदेव नमस्तुभ्यं नमः कैटभसूदिने ॥ केशवाय नमो राम[5] नमस्तेस्तु महीधर ॥४०॥ नमोऽस्तु वासुदेवाय ह्येवमुच्चारिते च तैः ॥ शस्त्राणि कुंठतां जग्मुरनलश्चापि शीततां[6] ॥ ४१ ॥ समभज्यंत वस्त्राणि समुत्पेतुरयोमुखाः ॥ संशुष्काः क्षारसरितः पतितः शाल्मलिद्रुमः ॥ ४२ ॥ प्रकाशस्तमसो जज्ञे नरकाद्भानुभिः सह ॥ ववौ च युंजन्पवनोऽप्यसिपत्रवने ततः ॥ ४३ ॥ निरुत्साहा जडधियो बभूवुर्यमकिंकराः ॥ जातागङ्गाम्बुवाहिन्यःपूयशौणितनिम्नगाः ॥४४॥ दिव्यः सुगंधिः पवनो मनःप्रीतिकरस्तथा ॥ वेणुवीणास्वनयुताः शब्दाश्चान्समनोरमाः ॥ ४५ ॥ तं तादृशमथालक्ष्य तदा वैवस्वतो यमः ॥ क्षीणपापत्रयांस्तांस्तु पाद्यार्घ्यैः समपूजयत् ॥ ४६ ॥ पूजयित्वा च तानाह कृष्णाय स कृतांजलिः ॥ समाहितमतिर्भूत्वा धर्मराजो नरेश्वर ॥ ४७ ॥ विष्णो देव जगद्धातर्जनार्दन जगत्पते ॥ प्रणामं येऽपि कुर्वन्ति तेषामपि नमोनमः ॥ ४८ ॥ अच्युतायाप्रमेयाय मायावामनरूपिणे ॥ प्रणामं येऽपि कुर्वन्ति तेषामपि नमो नमः ॥ ४९ ॥ नमस्ते वासुदेवाय धीमते पुण्यकीर्तये ॥ प्रणामं ये च कुर्वंति तेषामपि नमो नमः ॥ ५० ॥ तस्य यज्ञवराहस्य विष्णोरमिततेजसः ॥ ५१ ॥ एवं स्तुत्वा हृषीकेशं धर्मराजस्य पश्यतः ॥ विमानवरमारुह्य नारकास्त्रिदिवं ययुः ॥ ५२ ॥ मुद्गलोऽपि महाबुद्धिर्दृष्ट्वैतदखिलं नृप ॥ जातिस्मरो

---

[1] यैः कृष्णार्थमुपोषितम्–इ० पा०। [2] यस्तु–इ० पा०। [3] उदकशायिने–इ० पा०। [4] शांताय–इ० पा०। [5] व्यापिन्नमस्तेऽस्तु महीभृते–इ० पा०। [6] शीतलः–इ० पा०।

भवद्विप्रः कण्वगोत्रे महामुनिः ॥५३॥ संस्मृत्य यमवाक्यानि विष्णोर्माहात्म्यमेव च॥जलधेनोस्तु माहात्म्यं संस्मृत्येदमगायत ॥५४॥ अहोसुदुस्तरा विष्णोर्मायेयमतिगह्वरी ॥ यया मोहितचित्तस्तु न वेत्ति परमेश्वरम् ॥५५॥ जीवो गच्छति कीटत्वं यूकामत्कुणयोनिताम् ॥ तस्माद्द्रुमलतादीनां योनिं तस्माच्च पक्षिणाम् ॥ ५६ ॥ ततश्च पशुतां प्राप्य नरत्वमभिवांछति ॥ ततो मनुष्यतां प्राप्य नरो योनिं कृतात्मनाम् ॥ तां प्राप्य च श्रियं परां नरो मायाविमोहितः ॥५७॥ दुस्तरापि सुसाध्या सा माया कृष्णस्य मोहिनी ॥ विद्यते सा मनोन्यस्ता [1]मुधैव मधुसूदने ॥५८॥ अवाप्यैवं च गार्हस्थ्यमवाप्यैवं च तत्परम् ॥ छिनत्ति वैष्णवीं मायां केशवार्पितमानसः ॥ ५९ ॥ अविरोधेन विषयान्भुञ्जन्विष्णुं समाश्रयेत् ॥ भुक्का नरस्तरत्येनां विष्णोर्मायां सुदुस्तराम् ॥ ६० ॥ ईदृग्बहुफला भक्तिः सर्वधातरि केशवे ॥ मायया तस्य देवस्य तां न कुर्वंति मोहिताः ॥ ॥ ६१ ॥ मुधैवोक्तं सुधापानं मुधा तद्धि विचेष्टितम् ॥ मुधैव जन्म तन्नष्टं यत्र नाराधितो हरिः ॥ ६२ ॥ आराधितो हि यः पुंसामैहिकामुष्मिकं फलम् ॥ ददाति भगवान्देवः कस्तं न प्रतिपूजयेत् ॥ ६३ ॥ संवत्सरास्तथा मासा विफला दिवसाश्च ते ॥ नराणां विषयांधानां यैस्तु नाराधितो हरिः ॥ ६४ ॥ यो न वित्तर्द्धिविभवैर्न वासोभिर्न भूषणैः ॥ तुष्यते हृदयेनैव कस्तमीशं न पूजयेत् ॥ ६५ ॥ जलधेनोस्तु माहात्म्यं निशम्येदृग्विधं नराः ॥ नात्र यच्छंति तेषां वै विवेकः कुत्र तिष्ठति ॥ ६६ ॥ कर्मभूमौ हि मानुष्यं जन्मनामयुतैरपि ॥ स्वर्गापवर्गफलदं कदाचित्प्राप्यते नरैः ॥ ६७ ॥ संप्राप्य च न यैर्विष्णुस्तोषितो जलधेनुना ॥ ते जना भ्रष्टजन्मानो वंचितास्तस्य मायया ॥ ६८ ॥ ऊर्ध्वबाहुर्विरौम्येष दृष्टलोकद्वयोऽस्मि भोः ॥ आराधयध्वं गोविन्दं जलधेनुं प्रयच्छत ॥ ६९ ॥ दुःसहो नारको वह्निरविषह्या च यातना ॥ ज्ञातं मयैतदालंब्य कृष्णं भवति निश्चलः ॥ ७० ॥ आदेशिको देशिको हि यममार्गे सुदुस्तरे ॥ विचिन्त्य तत्सत्यमेतन्मनः कृष्णे निवेश्यताम् ॥ ७१ ॥ इष्टेन किं क्रतुशतेन सुदुष्करेण क्लेशाधिकेन सुकृतैर्नियमैर्व्रतैश्च ॥ दत्ता द्विजाय पितृराजगृहं गतस्य ह्येकाऽपि गौर्जलमयी सुखमातनोति ॥७२॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे जलधेनुदानव्रतविधिवर्णनं नाम त्रिपंचाशदुत्तरशततमोऽध्यायः ॥ १५३ ॥ छ ॥

॥ ॥ श्रीकृष्ण उवाच ॥ ॥ घृतधेनुं प्रवक्ष्यामि तां शृणुष्व नरोत्तम ॥ दीयते येन विधिना यादृग्रूपां च कारयेत् ॥ १ ॥ [2]गव्यस्य सर्पिषः कुम्भान्गंधमाल्यविभूषितान् ॥ कांस्योपदोहसंयुक्तान्सितवस्त्रावगुण्ठितान् ॥ २ ॥ इक्षुयष्टिमयाः पादाः खुरा रौप्यमयास्तथा ॥ सौवर्णे चाक्षिणी [3]कार्ये

---

१ तत्रैव–इ० पा० । २ गव्यस्य सर्पिषः कुम्भं गन्धमाल्यविभूषितम् । कांस्योपधानसंयुक्तं सितवस्त्रावगुंठितम्–इ० पा० । ३ कुर्यात्–इ० पा० ।

श्रृंगे चागुरुकाष्ठके ॥ ३ ॥ सप्तधान्यमये पार्श्वे पटोर्णेन च कम्बलम् ॥ कुर्यात्तुरुष्ककर्पूरैर्घ्राणं फलमयान्स्तनान् ॥ ४ ॥ तद्वच्छर्करया
जिह्वां गुडक्षीरमयं मुखम् ॥ क्षौमसूत्रेण लांगूलं रोमाणि सितसर्षपैः ॥ ५ ॥ ताम्रपात्रमयं पृष्ठं कुर्याच्छ्रद्धासमन्वितः ॥ ईदृग्रूपां तु संकल्प्य
घृतधेनुं नराधिप ॥ ६ ॥ तद्वत्कल्पनया धेनोर्वत्सं च परिकल्पयेत् ॥ मंत्रेणानेन राजेन्द्र तां समभ्यर्च्य बुद्धिमान् ॥ ७ ॥ आज्यं तेजः समुद्दि
ष्टमाज्यं पापहरं परम् ॥ आज्यं सुराणामाहारः सर्वमाज्ये प्रतिष्ठितम् ॥ ८ ॥ त्वं चैवाज्यमयी देवि कल्पितासि मया किल[1] ॥ सर्वपापापनोदाय
सुखाय भव भामिनि ॥ ९ ॥ तं च विप्रं महाभाग मनसैव घृतार्चिषा ॥ कल्पयित्वा ततस्तस्मै प्रयतः प्रतिपादयेत् ॥ १० ॥ दक्षिणासहिता
धेनुः कल्पिताज्यमयी शुभा ॥ एतां ममोपकाराय गृहाण त्वं द्विजोत्तम ॥११॥ इत्युदाहृत्य विप्राय तां गां तु प्रतिपादयेत् ॥ दत्त्वैकरात्रं स्थित्वा
च घृताहारो यतव्रतः ॥ १२ ॥ अनेन च विधानेन नवनीतमयी शुभा ॥ दातव्या नृपते धेनुर्न्यूनाधिकविवर्जिता[2] ॥ १३ ॥ शृणु पार्थ महाबाहो[3]
प्रदानफलमुत्तमम् ॥ घृतक्षीरमहानद्यो यत्र पायसकर्दमाः ॥ १४ ॥ घृतधेनुप्रदा यांति तत्र कामैः सुपूरिताः[4] ॥ पितुरूर्ध्वं च ये सप्त पुरुषास्तस्य
येऽप्यधः ॥ १५ ॥ तांस्तेषु नृप लोकेषु स नयत्यस्तकल्मषान्[5] ॥ सकामानामियं व्युष्टिः कथिता नृपसत्तम ॥ १६ ॥ निष्किल्बिषं पदं यांति
निष्कामा घृतधेनुदाः ॥ घृतमग्निर्घृतं सोमस्तन्मयाः सर्वदेवताः ॥ १७ ॥ घृतं प्रयच्छतां भीता भवंत्यखिलदेवताः ॥ १८ ॥ मायाजलं सुतकल
त्रमहोर्मिमालं लोभोग्रनक्रविषमं बहुपुण्यभाजः ॥ लग्ना निमग्नवपुषो घृतधेनुपुच्छे संसारसागरमपारमहो तरंति ॥ १९ ॥ ॥ इति श्रीभविष्ये
महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे घृतधेनुदानव्रतविधिवर्णनं नाम चतुष्पंचाशदुत्तरशततमोऽध्यायः ॥ १५४ ॥ ॥ छ ॥ ॥
॥ ॥ युधिष्ठिर उवाच ॥ ॥ कृष्णकृष्ण महाबाहो सर्वशास्त्रविशारद ॥ कथयस्वेह दानानामुत्तमं यत्प्रकीर्तितम् ॥ १ ॥ येन
दत्तेन दानानि सर्वाण्येव भवंत्युत ॥ सर्वकामसमृद्धिश्च सर्वपापक्षयो भवेत् ॥ २ ॥ प्रायश्चित्तविशुद्धिश्च तन्मे कथय सुव्रत ॥ श्रीकृष्ण उवाच ॥
शृणु राजन्प्रवक्ष्यामि दानानामुत्तमोत्तमम् ॥ ३ ॥ ख्यातं लवणधेन्वाख्यं सर्वकामप्रदं नृणाम् ॥ यां दत्त्वा ब्रह्महा गोघ्नः पितृहा गुरुतल्पगः ॥
॥ ४ ॥ विश्वासघाती क्रूरात्मा सर्वपापरतोऽपि वा ॥ मुच्यते नात्र संदेहः शिवलोकं स गच्छति ॥ ५ ॥ सुभगो धनसंपन्नो दीर्घायुरपराजितः ॥
जायते पुरुषो लोके सर्वकामसमन्वितः ॥ ६ ॥ विधिं वक्ष्यामि राजेन्द्र लवणस्येह कल्पनम् ॥ गोमयेनोपलिप्तेन दर्भसंस्तरसंस्थितम् ॥ ७ ॥

---

[1] शुभे–इ० पा० । [2] अतुलाऽधिकवर्जिताम्–इ० पा० । [3] महाभाग–इ० पा० । [4] प्रपूजिताः–इ०, प्रपूरिताः–इ० च पा० । [5] अपकल्मषम्–इ० पा० ।

आविकं चर्म विन्यस्य पूर्वाशाभिमुखं स्थितम् ॥ वस्त्रेणाच्छादितं कृत्वा धेनुं कुर्वीत बुद्धिमान् ॥ ८ ॥ आढकेनैव कुर्वीत बहुवित्तोऽल्पवित्तवान् ॥ स्वर्णशृङ्गीं रौप्यखुरामिक्षुपादां फलस्तनीम्[1] ॥ ९ ॥ कार्या शर्करया जिह्वा गन्धघ्राणवती तथा ॥ समुद्रोदरजे शुक्ती कर्णौ तस्याः प्रकल्पयेत् ॥ १० ॥ कंबलं पट्टसूत्रेण ग्रीवायां घण्टिकां तथा ॥ शृंगे चन्दनकाष्ठाभ्यां मौक्तिके चाक्षिणी उभे ॥ ११ ॥ कपोलौ सक्तुपिण्डाभ्यां यवानास्ये प्रदापयेत् ॥ तिलान्पार्श्वे प्रकुर्वीत गोधूमाश्चैव भक्तितः ॥१२॥ एवं वै सप्तधान्यानि यथालाभं प्रकल्पयेत् ॥ पृष्ठे वै ताम्रपात्रं तु अपाने गुडपिंडिकाम् ॥१३॥ लांगूले कंबलं दद्याद्द्राक्षां[2] क्षीरप्रदेशतः ॥ योनिप्रदेशे च मधु सर्ववस्तुफलान्वितम् ॥१४॥ एवं सम्यक्परिस्थाप्य रसरस्यमयीं च गाम् ॥ स्थापयेद्वत्समेकं च चतुर्भागेन मानवः ॥ १५ ॥ एवं धेनुं समभ्यर्च्य माल्यवस्त्रविभूषणैः ॥ स्नात्वा देवार्चनं कृत्वा ब्राह्मणानभिपूज्य च ॥ कृत्वा प्रदक्षिणां गां तु पुत्रभार्यासमन्वितः ॥ १६ ॥ ब्राह्मणाय सुशीलाय वृत्तयुक्ताय वै नृप ॥ दद्यात्पर्वसु सर्वेषु मन्त्रपूर्वं सुभक्तितः॥१७॥ लवणे वै रसाः सर्वे लवणे सर्वदेवताः ॥ सर्वदेवमये देवि लवणाख्ये नमोऽस्तु ते ॥ १८ ॥ एवमुच्चार्य मंत्रां ते विप्राय प्रतिपादयेत् ॥ सम्यक्प्रदक्षिणां कृत्वा दक्षिणासहितां नृप ॥ १९ ॥ प्रदक्षिणा मही तेन कृता भवति भारत ॥ सर्वदानानि दत्तानि सर्वक्रतुफलानि च ॥ २० ॥ सर्वे रसाः सर्वमन्न सर्वं च सचराचरम् ॥ सौभाग्यं परमाबुद्धिरारोग्यं सर्वसंपदः ॥ २१ ॥ भवति दत्त्वा नृणां तु रसधेनुं न संशयः ॥ स्वर्गे च नियतावासो यावदाभूतसंप्लवम् ॥ २२ ॥ पर्णौर्णकंबलगलां लवणाढकेन कृत्वा फलस्तनवतीमपि लावणाख्याम् ॥ दत्त्वा द्विजाय विधिवद्रसधेनुमेनां लोकं गवां सकलसौख्ययुतो विशोत्सः ॥ २३ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे लवणधेनुदानव्रतविधिवर्णनं नाम पंचपंचाशदुत्तरशततमोऽध्यायः ॥ १५५ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अतः परं प्रवक्ष्यामि राजन्काञ्चनधेनुकाम् ॥ यां दत्त्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ १ ॥ सुरापो ब्रह्महा गोघ्नो भीरुर्भग्नव्रतोऽपि वा ॥ गुरुघाती स्वसृगामी परदाररतश्च यः ॥ २ ॥ मुच्यते पातकैः सर्वैर्दत्त्वा काञ्चनधेनुकाम् ॥ संशुद्धस्य सुवर्णस्य पंचाशत्पलिकां शुभाम् ॥ ३ ॥ अर्द्धेन[3] वा प्रकुर्वीत शक्त्या वा नृपसत्तम ॥ उखां पश्चिमभागे तु हृष्टकुक्षिपयोधराम् ॥ ४ ॥ विभक्ताङ्गीं सुजघनां सुमनोहरकर्णिकाम् ॥ सर्वरत्नविचित्राङ्गीं कारयेत्कपिलां शुभाम् ॥ ५ ॥ चतुर्थेन तु भागेन वत्सं तस्याः प्रकल्पयेत् ॥ रौप्यघंटां च दत्त्वा तु कौशेयपरिवारिताम् ॥ ६ ॥ ताम्रशृंगीं तथा कुर्याद्वैडूर्यमयकंबलाम् ॥ मुक्ताफलमये

---

[1] घृतस्तनीम्–इ० पा० । [2] रसं क्षारप्रदेशतः–इ० पा० । [3] तदर्धेन–इ० पा० ।

नेत्रे वैद्रुमी रसना तथा ॥ ७ ॥ कृष्णाजिने गुडप्रस्थं तत्रस्थां कारयेच्छुभाम् ॥ कुंभाष्टकसमोपेतां नाना फलसमन्विताम् ॥ ८ ॥ तथाष्टादश
धान्यातपत्रोपानद्युगान्विताम् ॥ भाजनं वसनं चैव ताम्रदोहनकं तथा ॥ ९ ॥ दीपकान्नादिलवणशर्कराधान्यकान्विताम् ॥ प्रदद्याद्ब्राह्मणं
पूज्य वस्त्रैराभरणैः शुभैः ॥ १० ॥ स्नातः प्रदक्षिणीकृत्य धेनुं सर्वाङ्गसंयुताम् ॥ गुडधेनूक्तमंत्रैश्च आवाह्य प्रतिपूज्य च ॥ ११ ॥ [१]त्वं
सर्वदेवगणमन्दिरभूषणासि विश्वेश्वरत्रिपथगोदधिपर्वतानाम् ॥ श्रद्धाम्बुतीक्ष्णशकलीकृतपातकौघः प्राप्नोति निर्वृतिमतीव परां नमामि ॥१२॥
लोके यथेप्सितफलार्थविधायिनीं त्वामासाद्य को हि भयभाग्यवतीह मर्त्यः ॥ संसारदुःखशमनाय यतस्त्वकामास्त्वां कामधेनुमिति वेदविदो
वदंति ॥ १३ ॥ एवमामन्त्र्य तां धेनुं विप्राय प्रतिपादयेत् ॥ सदक्षिणोपस्करां च प्रणिपत्य क्षमापयेत् ॥ १४ ॥ दानकाले तु ये देवास्ती
र्थानि मनवस्तथा ॥ शरीरे निवसंत्यस्यास्ताञ्छृणुष्व नराधिप ॥ १५ ॥ नेत्रयोः सूर्यशशिनौ जिह्वायां तु सरस्वती ॥ दंतेषु मरुतो
देवाः कर्णयोश्च तथाश्विनौ ॥ १६ ॥ शृंगाग्रगौ सदा चास्या देवौ रुद्रपितामहौ ॥ गंधर्वाप्सरसश्चैव ककुद्देशं प्रतिष्ठिताः ॥ कुक्षौ समुद्राश्च
त्वारो योनौ त्रिपथगामिनी ॥ १७ ॥ ऋषयो रोमकूपेषु अपाने वसुधा स्थिता ॥ अन्त्रेषु नागा विज्ञेयाः पर्वताश्चास्थिषु[२] स्थिताः ॥
॥ १८ ॥ धर्मकामार्थ मोक्षास्तु पादेषु परिसंस्थिताः ॥ हुंकारे च चतुर्वेदाः [३]कंठे रुद्राः प्रतिष्ठिताः ॥ १९ ॥ पृष्ठभागे स्थितो
मेरुर्विष्णुः सर्वशरीरगः ॥ एवं सर्वमयी देवी पावनी विश्वरूपिणी[४] ॥ २० ॥ काञ्चनेन कृता धेनुः सर्वदेवमयी स्मृता ॥ यो दद्या
त्तादृशीं धेनुं सर्वदानप्रदो हि सः ॥ २१ ॥ कर्मभूमौ हि मर्त्यानां दानमेतत्सुदुर्लभम् ॥ तस्माद्देयमिदं शक्त्या[५] सर्वकल्मषनाशनम् ॥२२॥ पावनं
तारणं चैव कीर्तिदं शांतिदं तथा ॥ वर्षकोटिशतं साग्रं स्वर्गलोके गतोनरः ॥ २३ ॥ नारी वा पूज्यते देवैर्विमानवरमास्थिता ॥ गंधर्वैर्गीयमान
स्तु पुष्पैर्मालाविभूषितैः ॥ २४ ॥ सर्वाभरणसंपन्नः सर्वद्वंद्व[६]विवर्जितः ॥ स्वर्गे स्थित्वा चिरं कालं ततो मर्त्येभिजायते ॥ २५ ॥ आधि व्याधि
विनिर्मुक्तो रूपवान्प्रियदर्शनः ॥ एवं नरो वा नारी वा दत्त्वा दानमिदं भुवि ॥ सर्वान्कामानवाप्नोति जायमानः पुनः पुनः ॥ २६ ॥ आमन्त्र्य

---

[१] त्वं सर्वदेवगणमन्दिरसंघभूता–इ०, त्वं सर्वदेवगणमन्दिरशोभितासि–इ० च पा०। [२] अस्थिसंधिषु–इ० पा०। [३] पुच्छे रुद्रो व्यवस्थितः–इ० पा०। [४] विश्वधारिणी–इ० पा०। [५] भक्त्या—इ० पा०। [६] सर्वगंधविवर्जितः—इ० पा०। 'गंधो गन्धक आमोदे लेशे संबंधगर्वयोः' इति विश्वः।

साधुकुलशीलगुणान्विताय विप्राय यः कनकधेनुमिमां प्रदद्यात् ॥ प्राप्नोति सिद्धमुनिकिन्नरदेवजुष्टं कन्याशतैः परिवृतं पदमिन्दुमौलेः ॥२७॥

इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे सुवर्णधेनुदानव्रतविधिवर्णनं नाम षट्पंचाशदुत्तरशततमोऽध्यायः ॥ १५६ ॥

॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अथातः संप्रवक्ष्यामि दानमन्यत्सुदुर्लभम् ॥ रत्नधेन्विविति विख्यातं गोलोकफलदं नृणाम् ॥ १ ॥ पुण्यं दिनमथासाद्य गोमयेनोपलेपनम् ॥ कृत्वा भूमौ महाराज तत्र धेनुं प्रकल्पयेत् ॥ २ ॥ धेनुं रत्नमयीं कुर्यात्तत्तत्संकल्पपूर्विकाम् ॥ स्थापयेत्पद्मरागाणामेकाशीतिं मुखे बुधः ॥ ३ ॥ पुष्परागशतं धेनोः पादयोः परिकल्पयेत् ॥ ललाटे हेमतिलकं मुक्ताफलशतं दृशोः ॥ ४ ॥ भ्रूयुगे विद्रुमशतं शुक्तीकर्णद्वये स्मृते ॥ काञ्चनानि च शृङ्गाणि शिरोवज्रशतात्मकम् ॥ ५ ॥ ग्रीवायां नेत्रपुटके गोमेदकशतं तथा ॥ इन्द्रनीलशतं पृष्ठे वैदूर्यशतंपार्श्वके ॥ ६ ॥ स्फाटिकैरुदरं कार्यं सौगन्धिकशतं कटौ ॥ खुरा हेममयाः कार्याः पुच्छं मुक्तावलीमयम् ॥ ७ ॥ सूर्यकान्तेन्दुकान्तौ च घ्राणेकर्पूरचन्दनैः ॥ कुंकुमेन च रोमाणि रौप्यं नाभिं च कारयेत् ॥ ८ ॥ गारुत्मतशतं तद्वदपाने परिकल्पयेत् ॥ तथान्यानि च रत्नानि स्थापयेत्सर्वसंधिषु ॥ ९ ॥ कुर्याच्छर्करया जिह्वां गोमयं च गुडात्मकम् ॥ गोमूत्रमाज्येन तथा दधिदुग्धस्वरूपतः ॥ १० ॥ पुच्छाग्रे चामरं दद्यात्स्तनयोस्ताम्रदोहनम् ॥ कारयेदेवमेवं तु चतुर्थांशेन वत्सकम् ॥ ११ ॥ नानाफलानि पार्श्वेषु कृत्वा पूजां प्रयत्नतः ॥ गुडधेनुवदावाह्य इदं चोदाहरेत्ततः ॥ १२ ॥ त्वां सर्वदेवगणवासमिति[1] स्तुवंति रुद्रेन्द्रचन्द्रकमलासनवासुदेवाः ॥ तस्मात्समस्तभुवनत्रयदेहयुक्ता मां पाहि देवि भवसागर[2]मग्नमाशु ॥ १३ ॥ एवमामन्त्र्य तां धेनुं विप्राय प्रतिपादयेत् ॥ संपूज्य वस्त्राभरणैर्विधिज्ञं वेदपारगम् ॥ १४ ॥ ततश्च दक्षिणां दत्त्वा प्रणिपत्यक्षमापयेत् ॥ एवं यः कुरुते पार्थ तस्य पुण्यफलं शृणु ॥ १५ ॥ कल्पकोटिशतं साग्रं शिवलोके सुखं[3] वसेत् ॥ ततः काले बहुतिथे राजराजो भवेदिह ॥ १६ ॥ सर्वकामसमृद्धश्च शत्रुपक्षक्षयंकरः ॥ १७ ॥ इति सकलविधिज्ञो रत्नधेनुप्रदानं वितरति स विमानं प्राप्य देदीप्यमानम् ॥ सकलकलुषमुक्तो बंधुभिः पुत्रपौत्रैः स हि मदनसरूपः स्थानमभ्येति शंभोः ॥ १८ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे रत्नधेनुदानव्रतविधिवर्णनं नाम सप्तपंचाशदुत्तरशततमोऽध्यायः ॥ १५७ ॥ छ ॥

॥ युधिष्ठिर उवाच ॥ ॥ प्रसूयमाना दातव्या धेनुर्ब्राह्मणपुङ्गवे ॥ विधिना केन धर्मज्ञ[4] दाने तस्याश्च किं फलम् ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ प्रसूयमानातिपुण्यैः प्राप्यते गौर्नृपोत्तम ॥ प्राप्नु

---

[1] त्वां सर्वदेवगणधामनिधिं विरिंचिरुद्रेन्द्रविष्णुकमलासनवासुदेवाः--इ० पा० । [2] भवसागरपीडयमानम्--इ० पा० । [3] सुखी भवेत्--इ० पा० । [4] कर्मज्ञ--इ० पा० ।

वंति नराः केचित्पुण्यसंभारविस्तराः ॥२ ॥ यावत्पादौ योनिगतौ शिरश्चैव प्रदृश्यते ॥ तावद्गौः पृथिवी ज्ञेया यावद्गर्भं न मुंचति ॥ ३ ॥
गौर्यावद्विमुखी चैव यदा भवति भारत ॥ तदासौ पृथिवी ज्ञेया सशैलवनकानना ॥ ४ ॥ दत्त्वोभयमुखीं राजन्यत्पुण्यं प्राप्यते नृभिः ॥ न तद्व
र्णयितुं याति मुखेनैकेन केनचित् ॥ ५ ॥ किमिष्टैर्बहुभिर्यज्ञैर्दानैर्दत्तैश्च सत्तम ॥ प्रसूयमानां गामेकां देहि किं बहुना तव ॥ ६ ॥ एकैव पाति
नरकात्सुखमेकैव कारयेत् ॥ एकापि द्विमुखी दत्ता गौर्गौर्भवति भारत ॥ ७ ॥ स्वर्णशृंगीं रौप्यखुरां [1]मुक्तालाङ्गूलभूषिताम् ॥ कांस्योपदोहनां
राजन्नलंकृत्य द्विजोत्तमे ॥ प्रसूयमानां गां दत्त्वा महत्पुण्यफलं लभेत् ॥ ८ ॥ यावंति धेनुरोमाणि वत्सस्यापि नराधिप ॥ तावद्वर्षसहस्राणि
स्वर्गलोके महीयते ॥ ९ ॥ पितॄन्पितामहांश्चैव तथैव प्रपितामहान् ॥ समुद्धरत्यसंदिग्धं नरकाद्भूरिदक्षिणः ॥ १० ॥ घृतक्षीरवहा नद्यो
दधिपायसकर्दमाः ॥ तत्र ते यांति यत्रास्ति द्रुमश्चेप्सितकामदः ॥ ११ ॥ यो ददाति सुवर्णेन बहुना सह भाविनीम् ॥ गोलोकः सुलभस्तस्य
ब्रह्मलोकश्च पार्थिव ॥ १२ ॥ न देया दुर्बला राजन्धेनुर्नैवाल्पदक्षिणा ॥ काम्योऽयं विधिरुद्दिष्टः फलदो विधिना कृतः ॥ १३ ॥
स्त्रियश्च तं चंद्रसमानवक्त्राः प्रतप्तजांबूनदतुल्यवर्णाः ॥ महानितंबास्तनुवृत्तमध्याः सेवंत्यजस्रं नलिनाभनेत्राः ॥ १४ ॥ इति श्रीभविष्ये
महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवाद उभयमुखीगोदानव्रतविधिवर्णनं नामाष्टपंचाशदुत्तरशततमोऽध्यायः ॥ १५८ ॥ ॥ छ ॥ ॥
॥ ॥ युधिष्ठिर उवाच ॥ ॥ गोसहस्रविधानं च कथयस्व जनार्दन ॥ कस्मिन्काले प्रदातव्यं कथं देयं च तद्भवेत् ॥ १ ॥ ॥ श्रीकृष्ण
उवाच ॥ ॥ गावः पवित्रा लोकानां गाव एव परायणम् ॥ ब्रह्मणा सृजता लोकान्वृत्तिहेतोः प्रजेश्वर ॥ गावः प्रथमतः सृष्टास्त्रैलोक्य
हितकाम्यया ॥ २ ॥ यासां मूत्रपुरीषेण देवतायतनान्यपि ॥ शुचीनि समजायंत किंभूतमधिकं ततः ॥ ३ ॥ मूलं यज्ञस्य काम्य
स्य सर्वदेवमयाः शुभाः ॥ गोमये वसते लक्ष्मीः पर्याप्तं तन्निदर्शनम् ॥ ४ ॥ ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधा कृतम् ॥ एकत्र
मंत्रास्तिष्ठन्ति हविरन्यत्र तिष्ठति ॥ ५ ॥ यासां पुत्रैर्धृता लोका धारिताः सर्वदेवताः ॥ तासां दानविधानं च शृणु तत्पृथिवीपते ॥ ६ ॥
एकाऽपि गौर्गुणोपेता कृत्स्नं तारयते कुलम् ॥ सुरूपा शीलसंपन्ना युवतिः सुपयस्विनी ॥ ७ ॥ सुवत्सा सुदुहा चैव पापरोगविवर्जिता ॥ विधि
वत्तादृशा दत्ता कृत्स्नं तारयते कुलम् ॥ ८ ॥ किं पुनर्दश यो दद्याच्छतं वा विधिपूर्वकम् ॥ सहस्रं तु पुनर्दद्यात्तस्य वै किमिहोच्यते ॥ ९ ॥

---

१ रक्तलांगूलभूषिताम्—इ० पा० ।

गोसहस्रं पुरा दत्तं नहुषेण महीभृता ॥ स गतो ब्रह्मणः स्थानं ययातिश्च महामतिः ॥ १० ॥ गंगातीरे महद्दत्तमदित्या पुत्रकाम्यया ॥ लेभे पुत्रं त्रिलोकेशं नारायणमकल्मषम् ॥ ११ ॥ श्रूयंते पितृभिर्गीता गाथास्ताः शृणु भूपते ॥ १२ ॥ यदि कश्चित्कुलेऽस्माकं गोसहस्रं प्रदापयेत् ॥ यास्यामः परमां सिद्धिं कारितां पुण्यकर्मणा ॥ १३ ॥ दुहिता वा कुले काचिद्गोसहस्रप्रदायिनी ॥ सोपानः सुगतिर्दत्तो भविष्यति न संशयः ॥ ॥ १४ ॥ अतः परं प्रवक्ष्यामि यज्ञं वै सर्वकामिकम् ॥ गोसहस्रं तदा दद्याच्छास्त्रोक्तविधिवन्नरः ॥ १५ ॥ तीर्थे गोष्ठे गृहे वापि मंडपं कारयेच्छुभम् ॥ दशद्वादशहस्तं वा चतुर्वक्रं सतोरणम् ॥ १६ ॥ तन्मध्ये कारयेद्वेदिं चतुर्हस्तामनूपमाम् ॥ हस्तमात्रप्रमाणेन हस्तेन समलंकृताम् ॥ १७ ॥ पूर्वोत्तरेऽथदिग्भागे ग्रहवेदिं प्रकल्पयेत् ॥ ग्रहयज्ञविधानेन ग्रहांस्तत्र क्रमाद्यजेत् ॥ १८ ॥ ब्रह्मा विष्णुश्च रुद्रश्च पूज्याः प्रथममेव हि ॥ ऋत्विजः परिकर्तव्या षोडशाष्टौ च शोभनाः ॥ १९ ॥ चत्वारो वा महाराज उपाध्यायश्च पंचमः ॥ सर्वाभरणसंपन्नाः कर्णवेष्टांगुलीयकैः ॥ २० ॥ शोभितास्छत्रसंपन्नास्ताम्रपात्रद्वयान्विताः ॥ ग्रहयज्ञोक्तविधिना होमं हव्यं समाचरेत् ॥ २१ ॥ वेद्याः पूर्वोत्तरे भागे शिवकुंडं नियोजयेत् ॥ कुंभद्वयं च द्वारेषु पंचरत्नं सपल्लवम् ॥ २२ ॥ कार्यं कुरुकुलश्रेष्ठ ततो होमं समारभेत् ॥ लोकपालबलिं दद्यात्तुलापुरुषदानवत् ॥ २३ ॥ गोसहस्राद्विनिष्कृष्य सवत्सं दशकं गवाम् ॥ गोसहस्राद्बहिष्कुर्याद्वस्त्रमाल्यविभूषणम् ॥ अंतः प्रवेश्य दशकं वस्त्रैर्माल्यैश्च पूजयेत् ॥ २४ ॥ सुवर्णघंटिकायुक्तं ताम्रदोहनकान्वितम् ॥ सुवर्णतिलकोपेतं खुरै रौप्यैरलंकृतैः ॥ हेमरत्नमयैः शृंगैश्चामरैश्चोपशोभितम् ॥ २५ ॥ मुनयः केचिदिच्छन्ति कांचनं नंदिकेश्वरम् ॥ लवणद्रोणशिखरे भक्त्या तमपि कारयेत् ॥ २६ ॥ एका प्रत्यक्षऋषभे केषांचिद्दानमिष्यते ॥ ग्रहान्सुरांश्च संपूज्य माल्यवस्त्रफलाक्षतैः ॥ २७ ॥ पताकाभिरलंकृत्य देवतायतनानि च ॥ गोशतेऽपि दशांशेन सर्वमेतत्प्रकल्पयेत् ॥ २८ ॥ यदि सर्वा न विद्यन्ते गावः सर्वगुणोत्तमाः॥ दशकं पूज्य यत्नेन इतरः परिकल्पयेत् ॥ २९ ॥ पुष्पकालमथो वाद्यगीतमंगलनिस्वनैः ॥ सर्वौषध्युदकस्नातः स्नपितो द्विजपुंगवैः ॥ इममुच्चारयेन्मंत्रं गृहीतकुसुमांजलिः ॥ ३० ॥ नमो वो विश्वमूर्तिभ्यो विश्वमातृभ्य एव च ॥ लोकाधिवासिनीभ्यस्तु रोहिणीभ्यो नमोनमः ॥ ३१ ॥ गवामंगेषु तिष्ठन्ति भुवनान्येकविंशतिः ॥ ब्रह्मादयस्तथा देवा रोहिण्यः पांतु मातरः ॥ ३२ ॥ गावो ममाग्रतः संतु गावो मे संतु पृष्ठतः ॥ गावो मे सर्वतः संतु गवां मध्ये वसाम्यहम् ॥ ३३ ॥ यस्मात्त्वं वृषरूपेण धर्मश्चैव सनानतः ॥ अष्टमूर्त्तेरधिष्ठानमतः पाहि सनातनः ॥ ॥३४॥ इत्यामन्त्र्य ततो दद्याद्गुरवे नंदिकेश्वरम् ॥ सर्वोपस्करणोपेतं गोयुतं च विशेषतः ॥ ३५ ॥ गवां शतमथैकैकं तदर्धं चापि विंशतिः ॥ दश

पञ्चशतं दद्याद्बहुभ्यस्तदनुज्ञया ॥ ३६ ॥ नैका बहुभ्यो दातव्या दाता दोषकरो भवेत् ॥ बह्वयस्त्वेकस्य दातव्याः श्रीमदारोग्यवृद्धये ॥ ३७ ॥ पयोव्रतस्ततस्तिष्ठेदेकाहं गोसहस्रदः ॥ तथैव ब्रह्मचारी स्याद्य इच्छेद्विपुलां श्रियम् ॥ ३८ ॥ न देया दुर्बला धेनुर्नाल्पक्षीरा न रोगिणी ॥ न जीर्णा जीर्णवस्त्रा वा नापत्यगतचेतना ॥ ३९ ॥ अनेन विधिना यस्तु गोसहस्रप्रदो भवेत् ॥ सर्वपापविनिर्मुक्तः सिद्धचारणसेवितः ॥ ॥ ४० ॥ विमानेनार्कवर्णेन किंकिणीजालमालिना ॥ सर्वेषां लोकपालानां लोके संपूज्यते सुरैः ॥ ४१ ॥ सप्तावरान्सप्त परान्सप्त चैव परावरान् ॥ पुरुषानुद्धरेद्दत्त्वा गोसहस्रं विधानतः ॥ ४२ ॥ स्वर्गलोकाच्च्युतो वाथ नारी वा सत्परायणाा ॥ सप्त जन्मानि राज्ञी स्यात्स्तूयमाना पुनःपुनः ॥ ४३ ॥ न त्वेवेदं दानमात्रं प्रशस्तं पात्रं कालो गोविशेषो विधिश्च ॥ तस्मादेताः सर्वभूषासमेताः पात्रे काले क्षीरवत्यो विधानात् ॥ ४४ ॥ एकापि गौर्बहुगुणा गुणिने प्रदत्ता दातुः कुलं त्रिपुरुषं विधिवत्पुनाति ॥ यः श्रद्धया वितरतीह गवां सहस्रं शक्यं फलं न नृप तेऽस्य मयाभिधातुम् ॥ ४५ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे गोसहस्रप्रदानविधिव्रतवर्णनं नामैकोनषष्ट्युत्तरशततमोऽध्यायः ॥ १५९ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ युष्मद्वाक्यामृतमिदं शृण्वानोहं जनार्दन ॥ न तृप्तिमधिगच्छामि जातं कौतूहलं हि मे ॥ १ ॥ गोपतिः किल गोविन्दांस्त्रिषु लोकेषु विश्रुतः ॥ गोवृषस्य प्रदानेन त्रैलोक्यमभिनंदति ॥ २ ॥ तद्गोवृषभदानस्य फलं मे कथयाच्युत ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ वृषदानफलं पुण्यं[1] शृणुष्व कथयामि ते ॥ ३ ॥ पवित्रं पावनं चैव सर्वदानोत्तमोत्तमम् ॥ दशधेनुसमोऽनड्वानेकश्चैकधुरंधरः ॥ दशधेनुप्रदानाद्धि स एवैको विशिष्यते ॥ ४ ॥ यो हृष्टश्चातिपुष्टांगो ह्यरोगः[2] पांडुनन्दन ॥ युवा भद्रः सुशीलश्च सर्वदोषविवर्जितः ॥ ५ ॥ धुरंधरः स्थापयते एक एव कुलं महत् ॥ त्राता भवति संसारे नात्र कार्या विचारणा ॥६॥ अलंकृत्य वृषं शांतं पुण्यकाल उपस्थिते ॥ रौप्यलांगूलसंयुक्तं ब्राह्मणाय निवेदयेत् ॥ ७ ॥ मंत्रेणानेन राजेन्द्र तं शृणुष्व वदामि ते ॥ ८ ॥ धर्मस्त्वं वृषरूपेण जगदानन्दकारकः ॥ अष्टमूर्तेरधिष्ठानमं[3]तः पाहि सनातन ॥ ९ ॥ दत्त्वैवं दक्षिणायुक्तं प्रणिपत्य विसर्जयेत् ॥ सप्तजन्मकृतं पापं वाङ्मनः कायकर्मणाम् ॥ तत्सर्वं विलयं याति गोदानसुकृतेन च ॥ १० ॥ यानं वृषभसंयुक्तं दीप्यमानं सुशो[4]भनम् ॥ आरुह्य कामगं दिव्यं स्वर्लोकमधिरोहति ॥ ११ ॥ यावंति तस्य रोमाणि गोवृषस्य महीपते ॥ तावद्वर्षसहस्राणि गवां लोके महीयते ॥१२॥ गोलोकादवतीर्णस्तु इह लोके द्विजो भवेत् ॥

---

१ दिव्यम्–इ० पा० । २ अरोषः–इ० पा० । ३ ततः–इ० पा० । ४ सुशोभितम्–इ० पा० ।

यज्ञयाजी महातेजाः सर्वब्राह्मणपूजितः ॥ १३ ॥ यथोक्तं ते महाराज कस्य देयो वृषोत्तमः ॥ तदहं[1] ते प्रवक्ष्यामि पात्रं त्राणपदं नृणाम् ॥ १४ ॥
ये क्षांतदांताः श्रुतिपूर्णकर्णा जितेंद्रियाः प्राणिवधान्निवृत्ताः ॥ प्रतिग्रहे संकुचिता गृहस्थास्ते ब्राह्मणास्तारयितुं समर्थाः ॥ १५ ॥ ऊर्जस्विनं भर
सहं दृढकंधरं[2] च यच्छंति ये वृषमशेषगुणोपपन्नम् ॥ दत्तेन यद्भवति गोदशकेन पुण्यं सत्यं भवंति भुवि तत्फलभागिनस्ते ॥ १६ ॥ इति श्रीभ
विष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे वृषभदानव्रतवर्णनं नाम षष्ट्युत्तरशततमोऽध्यायः ॥ १६० ॥ छ ॥ ॥ युधिष्ठिर
उवाच ॥ ॥ कपिलादानमाहात्म्यं कथयस्व जगत्पते ॥ पुण्यं यत्सर्वदानानां सर्वपातकनाशनम् ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥
तत्तेऽहं संप्रवक्ष्यामि विनताश्वेन यत्पुरा ॥ कथितं कपिलादानं तच्छृणुष्व महामते ॥ २ ॥ ॥ विनताश्व उवाच ॥ ॥ अतः परं महाराजो
भयमुख्याः समासतः ॥ विधानं यद्वराहेण धरण्यै कथितं पुरा ॥ ३ ॥ तदहं संप्रवक्ष्यामि नवपुण्यफलं च यत् ॥ ॥ धरण्युवाच ॥ ॥
यत्त्वया कपिला नाम पूर्वमुत्पादिता प्रभो ॥ ४ ॥ होमधेनुः सदा पुण्या धेनुर्यज्ञावतारभूः ॥ सा कथं ब्राह्मणेभ्यो हि देया कस्मिन्दिनेऽपि च ॥
॥ ५ ॥ कीदृशाय च विप्राय दातव्या पुण्यलक्षणा ॥ कति वा कपिलाः प्रोक्ताः स्वयमेव स्वयंभुवा ॥ ६ ॥ तासां प्रयत्नाद्दानेन किं पुण्यं स्याच्च
माधव ॥ एतदिच्छाम्यहं श्रोतुं विस्तरान्मधुसूदन ॥ ७ ॥ ॥ वराह उवाच ॥ ॥ शृणुष्व भद्रे तत्त्वेन पवित्रं पापनाशनम् ॥ कृत्वा यत्सर्वपापे
भ्यो मुच्यते नात्र संशयः ॥ ८ ॥ कपिला अग्निहोत्रार्थं यज्ञार्थे च वरानने ॥ उद्धृत्य सर्वतेजांसि ब्रह्मणा निर्मिता पुरा ॥ ९ ॥ पवित्राणां पवि
त्रं च मङ्गलानां च मंगलम् ॥ पुण्यानां परमं पुण्यं कपिला च वरानने ॥ १० ॥ तपसस्तप एवाग्र्यं व्रतानामुत्तमं व्रतं ॥ दानानामुत्तमं
दानं विधिना ह्येतदक्षयम् ॥ ११ ॥ पृथिव्यां यानि तीर्थानि गुह्यान्यायतनानि च ॥ पवित्राणि च पुण्यानि सर्वलोके वसुन्धरे ॥ १२ ॥
होतव्यान्यग्निहोत्राणि सायं प्रातर्द्विजातिभिः ॥ कपिलाया घृतेनेह दध्ना क्षीरेण वा पुनः ॥ १३ ॥ यजंते येऽग्निहोत्राणि अन्नैश्च विविधैः सदा ॥
पूजयन्त्यतिथींश्चैव परां भक्तिमुपागताः ॥ १४ ॥ तेषां त्वादित्यवर्णैश्च विमानैर्जायते गतिः ॥ सूर्यमण्डलमध्ये च ब्रह्मणा निर्मिता पुरा ॥ १५ ॥
कपिलायाः शिरो ग्रीवां सर्वं तीर्थानि भामिनि ॥ पितामहनियोगाच्च निवसंति हि नित्यशः ॥ १६ ॥ प्रातरुत्थाय यो मर्त्यः कपिला
गलमस्तकात् ॥ च्युतं तु भक्त्या पानीयं शिरसा धारयेन्नरः ॥ १७ ॥ स तेन पुण्येनोपेतस्तत्क्षणाद्धतकिल्बिषः ॥ त्रिंशद्वर्षकृतं पापं दहत्य

---

[1] तदप्यहं ते वक्ष्यामि—इ० पा० । [2] दृढबन्धनम्—इ० पा० ।

ग्निरिवेन्धनम् ॥ १८ ॥ कल्य उत्थाय यो मर्त्यः कुर्यात्तासां प्रदक्षिणम् ॥ प्रदक्षिणीकृता तेन पृथिवी स्याद्वसुन्धरे ॥ १९ ॥ प्रदक्षिणायां चैकायां कृतायां च वसुन्धरे ॥ दशवर्षकृतं पापं नश्यते नात्र संशयः ॥ २० ॥ कपिलायास्तु मूत्रेण स्नायाद्वै यः शुचिव्रतः ॥ स गङ्गाद्येषु तीर्थेषु स्नातो भवति मानवः ॥ २१ ॥ येन स्नानेन चैकेन भवमुक्तो भवेन्नरः ॥ यावजीवकृतात्पापात्तत्क्षणादेव मुच्यते ॥ २२ ॥ गोसहस्रं च यो दद्यादेकां वा कपिलां नरः ॥ सममेतत्पुरा प्राह ब्रह्मलोके पितामहः ॥ २३ ॥ यश्चैकां कपिलां हन्यान्नरो रज्जुकरो यदि ॥ गोसहस्रं हतं तेन भवतीह न संशयः ॥ २४ ॥ गवां स्थितिं कल्पयेत घृतं गव्यं न दूषयेत् ॥ यावद्धि वर्द्धते गव्यं तावत्पापैस्तु पूयते ॥ २५ ॥ गवां कंडूयनं श्रेष्ठं तथा च प्रतिपालनम् ॥ तुल्यं गोघृतदानस्य भयरोगादिपालनम् ॥ २६ ॥ तृणादिभक्षणार्थं च गवां दद्याद्वरादिकम् ॥ स्वर्गवासफलं दिव्यं लभते मानवोत्तमः ॥ २७ ॥ दशेह कपिलाः प्रोक्ताः स्वयमेव स्वयंभुवा ॥ यो दद्याच्छ्रोत्रियस्यैव स्वर्गं गत्वा स मानवः ॥ ॥ २८ ॥ विमानैर्विविधैर्दिव्यैर्दिव्यकन्याभिरर्चितः ॥ सेव्यमानस्तु गंधर्वैर्दीप्यमाना यथाग्नयः ॥ २९ ॥ सुवर्णकपिला पूर्वा द्वितीया गौरपिङ्गला ॥ आशा चैव तृतीया स्यादग्निज्वाला चतुर्थिका ॥ ३० ॥ पंचमी जुहुवर्णा स्यात्षष्ठी तु घृतपिङ्गला ॥ सप्तमी श्वेतपिङ्गा स्यादष्टमी क्षीरपिङ्गला ॥ ३१ ॥ नवमी पाटला ज्ञेया दशमी पुष्पपिङ्गला ॥ एता दश समाख्याताः कपिलाश्च वसुंधरे ॥ ३२ ॥ सर्वा ह्येता महाभागास्तारयंति न संशयः ॥ संगमेषु प्रशस्ताश्च सर्वपापप्रणाशनाः ॥ ३३ ॥ एवमेतास्तु कपिलाः पापघ्न्यश्च वसुन्धरे ॥ आशा चैव तु या प्रोक्ता अग्निगर्भानलप्रभा ॥३४॥ अग्निज्वालोज्ज्वलैः शृंगैः प्रदीप्तांगारलोचना ॥ अग्निपुष्पा अग्निलोमा तथान्या चानलप्रभा ॥३५॥ तामाग्नेय्यां सदा दद्याद्ब्राह्मणायेतरैः सदा ॥ गृहीत्वा कपिलां शूद्रः कामतस्तत्पयः पिबेत् ॥३६॥ पतितश्च भवेन्नित्यं चंडालसदृशः पुमान् ॥ तस्मान्न प्रतिगृह्णीयाच्छबलां गां कथंचन ॥३७॥ द्वारांते परिहर्तव्या कपिला गौर्द्विजेतरैः ॥ लोकेषु ते मूढतमाः कपिलाक्षीरभोजनाः ॥३८॥ असंभाष्याश्च पतिताः शूद्रास्ते पापकर्मिणः ॥ पिबंति यावत्कपिलां तावत्तेषां पितामहाः ॥ अमेध्यं भुञ्जतेऽतस्तां नोपजीवेद्द्विजेतरः ॥ ३९ ॥ तासां घृतं च क्षीरं वा नवनीतमथापि वा ॥ उपजीवंति ये शूद्रास्ते प्रयांति यमालयम् ॥४०॥ कपिलाजीविनः शूद्राः सर्वे गच्छंति रौरवम् ॥ रौरवे भुञ्जते दुःखं वर्षकोटिशतोषिताः ॥४१॥ ततो विमुक्ताः कालेन जायंते श्वानयोनिषु ॥ श्वानयोनेर्विमुक्तास्ते विष्ठायां कृमियोनिगाः ॥४२॥ विष्ठास्वेव च पापिष्ठा दुर्गं

धेषु च नित्यशः॥ भूयोऽपि जायमानास्ते तत्रोत्तारो न विद्यते ॥४३॥ ब्राह्मणश्चैव यो देवि कुर्यात्तेषां[1]प्रतिग्रहम् ॥ ततः प्रभृत्यमेध्यायां पितरस्तस्य
शेरते ॥ ४४ ॥ तं विप्रं नानुभाषेत नचाप्येकासने विशेत् ॥ स नित्यं वर्जनीयो वै दूरात्तु ब्राह्मणाधमः ॥४५॥ यस्तेन सह भाषेत प्रायश्चित्ती भवे
द्विजः॥ एकस्य गोप्रदानस्य सहस्रांशो न पूर्यते ॥४६॥ किमन्यैर्बहुभिर्दानैः कोटिसंख्यातविस्तरैः॥४७॥ श्रोत्रियाय दरिद्राय सुवृत्तायाहिताग्नये ॥
दत्त्वैकां कपिलां धेनुं सर्वपापैः प्रमुच्यते ॥४८॥ मासे प्रसविनीं धेनुं दानार्थी प्रतिपालयेत् ॥ आत्मार्थे न प्रपाल्या हि सदा नरकभीरुभिः ॥४९॥
कपिलाऽर्धप्रसूता च दातव्या हि द्विजन्मने ॥ जायमानस्य वत्सस्य मुखं योन्यां प्रदृश्यते ॥ ५० ॥ तावत्सा पृथिवी ज्ञेया यावद्गर्भं न मुंचति ॥
॥ ५१ ॥ धेनोर्यावंति रोमाणि सवत्साया वसुन्धरे ॥ भूम्यां तु पांसवो यावद्यावन्नक्षत्रतारकाः ॥ ५२ ॥ तावद्वर्षसहस्राणि ब्रह्मेशादिभिरर्चितः ॥
ब्रह्मलोके निवसति यश्चैककपिलाप्रदः ॥ ५३ ॥ सुवर्णशृङ्गीं यः कृत्वा खुरैरौप्यैःसमर्चिताम् ॥ ब्राह्मणस्य करे दत्त्वा सुवर्णं रौप्यमेव च ॥ ५४ ॥
कपिलायास्तदा पुत्रं ब्राह्मणस्य करे न्यसेत् ॥ उदकं च करे दत्त्वा वाचयेत स्वशक्तितः ॥ ५५ ॥ सुवर्णैस्तु चतुर्भिश्च त्रिभिर्द्वाभ्यामथापि वा ॥
एकहीना न दातव्या यदीच्छेच्छुभमात्मनः ॥ ५६ ॥ स समुद्रवनोपेता सशैलवनकानना ॥ रत्नपूर्णा भवेद्दत्ता पृथिवी नात्र संशयः ॥ ५७ ॥
पृथिवीदानतुल्येन दानेनैतेन वै नरः ॥ तारितो याति पितृभिर्वैष्णवं यत्पदं परम् ॥ ५८ ॥ ब्रह्मस्वहरणो गोघ्नो भ्रूणहा ब्रह्मघातकः ॥ पापकृ
च्चोभयमुखीं दद्यात्सत्कनकान्विताम् ॥ तद्दिनं च पयोभोजी संयतश्चातिवाहयेत् ॥ ५९ ॥ गोमयेनोपलिप्याथ मण्डलं विधिपूर्वकम् ॥ स्वशाखो
क्तेन मंत्रेण होमयेत्तु विचक्षणः ॥ ६० ॥ व्याहृत्या होमयेत्पूर्वं पंचवारुणकं तथा ॥ इरावती धेनुमती देवस्य त्वेति वा पुनः ॥ ६१ ॥ स्योना
पृथिवि मंत्रेण गौर्वत्ससहिता नवा ॥ निकामफलदा धेनुः सा स्यात्सुरभिनंदिनी ॥ ६२ ॥ या ते सरस्वती देवी विष्णुना च तथा मही ॥
गौरीविष्णुपदं चोक्का शांतिकर्मणि वाचयेत् ॥ ६३ ॥ यावद्वत्सस्य द्वौ पादौ शिरश्चैव प्रदृश्यते ॥ तावद्वै पृथिवी ज्ञेया यावद्गर्भं न मुञ्चति ॥
तस्मिन्काले प्रदातव्या ब्राह्मणाय वसुंधरे ॥ ६४ ॥ सुवर्णशृंगीं रौप्यखुरां कांस्यदोहां सताम्रकाम् ॥ सवस्त्रघंटाभरणां गंधपुष्पैरलंकृताम् ॥
वस्त्राक्षतैः समभ्यर्च्य ब्राह्मणाय समर्पयेत् ॥ ६५ ॥ सुवर्णस्य सहस्रेण तदर्धेनापि भामिनि ॥ तस्याप्यर्धेन शक्त्याऽथ तस्याप्यर्द्धेन वा पुनः ॥
॥ ६६ ॥ यथा शक्त्या प्रदातव्या वित्तशाठ्यविवर्जितैः ॥ करे दत्त्वा सुवर्णं च अथवा रूप्यमेव च ॥ ६७ ॥ गृहाणेमां महाधेनुं भव भ्राता ममाशु

---

[1] शूद्राणां गोव्यतिरिक्तधान्यद्रव्यादिप्रतिग्रहमित्यर्थः ।

वै ॥ सर्वं पापक्षयं कृत्वा सदा स्वस्तिकरो भव ॥६८॥ इरावती धेनुमती जाह्नवी तदनन्तरम् ॥ प्रतिदास्यामि ते धेनुं कुटुम्बार्थें विशेषतः ॥६९॥ भवतात्स्वस्ति मे नित्यं सुखं चानुत्तमं तथा ॥ दत्ता तु पृथिवी देवी त्वयेयं प्रतिगृह्यताम् ॥७०॥ कोऽदादिति च वै मंत्रो जपितव्यो द्विजेन च ॥ विसृज्य ब्राह्मणं सोऽपि तां धेनुं स्वगृहं नयेत् ॥ ७१ ॥ एवं प्रसूयमानां गां यो ददाति वसुन्धरे ॥ सा समुद्रवनोपेता सशैलवनकानना ॥ रत्नपूर्णा भवेद्दत्ता पृथिवी नात्र संशयः ॥ ७२ ॥ प्रतप्तजांबूनदतुल्यवर्णां महानितंबां तनुवृत्तमध्याम् ॥ अर्द्धप्रसूतां द्विमुखीं सुशीलां सेवन्त्यजस्रं कपिलां हि देवाः ॥ ७३ ॥ प्रातरुत्थाय यो भक्त्या धेनुकल्पं नरो भुवि ॥ जितेन्द्रियः शुचिर्भूत्वा पठेद्भक्त्या समन्वितः ॥ ७४ ॥ त्रिकालं पठते यस्तु पापं वर्षशतोद्भवम् ॥ नश्यत्येकक्षणादेव वायुना पांसवो यथा ॥ ७५ ॥ श्राद्धकाले पठेद्यस्तु इदं पावनमुत्तमम् ॥ तस्यान्नं संस्कृतं तद्वै पितरोऽश्नंति धीमतः ॥ ७६ ॥ अमावास्यां च यो विद्वान्द्विजानामग्रतः पठेत् ॥ पितरस्तस्य तुष्यंति वर्षाणां शतमेव च ॥ ७७ ॥ यश्चैतच्छृणुयात्पुण्यं तद्गतेनांतरात्मना ॥ संवत्सरकृतात्पापात्तत्क्षणादेव मुच्यते ॥ ७८ ॥ इदं रहस्यं राजेन्द्र वराहमुखनिर्गतम् ॥ धरण्यै कथितं पूर्वं सर्वपापप्रणाशनम् ॥ ७९ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे कपिलादानमाहात्म्यवर्णनं नामैकषष्ट्युत्तरशततमोऽध्यायः ॥ १६१ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ महिषीदानमाहात्म्यं कथयामि युधिष्ठिर ॥ [1]पुण्यं पापविनाशं च आयुष्यं सर्वकामदम् ॥ १ ॥ चन्द्रसूर्यग्रहे पुण्ये कार्त्तिक्यामयने तथा ॥ शुक्लपक्षे चतुर्दश्यां सूर्यसंक्रांतिवासरे ॥ २ ॥ यदा वा जायते चित्तं वित्तं च कुरुनन्दन ॥ तदैव देया महिषी संसारभयभीरुणा ॥ ३ ॥ सुपयोधरशोभाढ्या सुशृंगी सुखुरा तथा ॥ प्रथमप्रसूता तरुणी सुशीला दोषवर्जिता ॥ ४ ॥ सुवर्णशृङ्गतिलका घंटाभरणभूषिता ॥ रक्तवस्त्रावृता रम्या कांस्यदोहनकान्विता ॥ ५ ॥ पिण्याकपिटिकोपेता सहिरण्या च शक्तितः ॥ सप्तधान्ययुता देया ब्राह्मणे वेदपारगे ॥ ६ ॥ पुराणपाठके तद्वज्ज्योतिःशास्त्रविदे तथा ॥ देया न वेदरहिते न च कुव्रतिने क्वचित् ॥ ७ ॥ द्रव्यैरेभिः समायुक्तां पुण्येऽह्नि विधिपूर्वकम् ॥ दद्यान्मंत्रेण राजेन्द्र पुराणपठितेन तु ॥ ८ ॥ इन्द्रादिलोकपालानां या राजमहिषी शुभा ॥ महिषीदानमाहात्म्यात्सास्तु मे सर्वकामदा ॥ ९ ॥ धर्मराजस्य साहाय्ये यस्याः पुत्रः प्रतिष्ठितः ॥ महिषासुरस्य जननी या सास्तु वरदा मम [2]॥१०॥ (इति दानमंत्रः) दद्यात्प्रदक्षिणीकृत्य ब्राह्मणे तां पयस्विनीम् ॥ प्रतिग्रहः स्मृतस्तस्याः पृष्ठदेशे स्वयंभुवा ॥ ११ ॥ एवं दत्त्वा विधानेन ब्राह्मण

---

[1] पुण्यं पवित्रमायुष्यं सर्वकामफलप्रदम्–इ० पा० । [2] च–इ० पा० ।

स्य गृहं नयेत् ॥ वस्त्रैराभरणैः पूज्य भक्त्या च कुरुनन्दन ॥ १२ ॥ संपादिता मया तुभ्यं संतुष्टो मे भव द्विज ॥ १३ ॥ अनेन विधिना
दत्त्वा महिषीं द्विजपुङ्गवे ॥ सर्वान्कामानवाप्नोति इह लोके परत्र च ॥ १४ ॥ या सा ददाति महिषीं सा राजमहिषी भवेत् ॥ महाराजः पुमा
न्राजन्व्यासस्य वचनं यथा ॥ १५ ॥ यज्ञयाजी भवेद्विप्रः क्षत्रियो विजयी भवेत् ॥ भवेद्वैश्यस्तु धनवाञ्छूद्रः सर्वार्थैसंयुतः[1] ॥ १६ ॥ तस्मान्नरेण
दातव्या महिषी विभवे सति ॥ पुत्रपौत्रप्रपौत्रार्थमात्मनः शुभमिच्छता ॥ १७ ॥ दशधेनुसमां राजन्महिषीं नारदोऽब्रवीत् ॥ विंशतिगोसमां
व्यासः सर्वदानोत्तमं रविः ॥ १८ ॥ सगरेण ककुत्स्थेन धुंधुमारेण गाधिना ॥ दत्ताः संपूज्य विप्रेभ्यो महिष्यः सर्वकामदाः ॥ १९ ॥ महिषी
दानमाहात्म्यं यः शृणोति सदा नरः ॥ स सर्वपापनिर्मुक्तः शिवलोके महीयते ॥ २० ॥ दुग्धाधिकां हि महिषीं जलमेघवर्णां संपुष्टपट्टकवतीं
जंघनाभिरामाम्[2] ॥ दत्त्वा सुवर्णतिलकां द्विजपुंगवाय लोकद्वयं विजयते किमु तत्र चित्रम् ॥ २१ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि
श्रीकृष्णयुधिष्ठिरसंवादे महिषीदानव्रतविधिवर्णनं नाम द्विषष्ट्युत्तरशततमोऽध्यायः ॥ १६२ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ शृणु
पार्थ परं दानं सर्वकिल्बिषनाशनम् ॥ यद्दत्त्वा त्रिविधं पापं सद्यो विलयमृच्छति ॥ १ ॥ सुवर्णरोमां सौवर्णीं प्रत्यक्षं वा सुशोभ
नाम् ॥ सुवर्णतिलकोपेतां सर्वालंकारभूषिताम् ॥ २ ॥ कौशेयपरिधानां च दिव्यचंदनभूषिताम् ॥ दिव्यपुष्पोपहारां च सर्वधातुरसैर्युताम् ॥
सप्तधान्यसमायुक्तां फलपुष्पवतीं तथा ॥ ३ ॥ शतेन कारयेत्तां च सुवर्णस्य प्रयत्नतः ॥ यथा शक्त्याथ वा कुर्याद्वित्तशाठ्यं न कारयेत्
॥ ४ ॥ अयने विषुवे चैव ग्रहणे शशिसूर्ययोः ॥ दुःस्वप्नदर्शने[3] चैव जन्मर्क्षे पितृसंक्षये ॥ ५ ॥ यदा वा जायते वित्तं चित्तं
श्रद्धासमन्वितम् ॥ तदैव दानकालः स्याद्यतोऽनित्यं हि जीवितम् ॥ ६ ॥ दद्यात्तीर्थे गृहे वापि यत्र वा रमते मनः ॥ ७ ॥ तत्र
संस्थाप्य देवेशमुमया सह शंकरम् ॥ ब्रह्माणं सह गायत्र्या सश्रीकं श्रीधरं तथा ॥ ८ ॥ रत्या सह तथानंगं लोकपालान्ग्रहानपि ॥
संपूज्य च विधानेन गंधपुष्पनिवेदनैः ॥ ९ ॥ तदग्रे कारयेद्धोमं तिलाज्येन महीपते ॥ अलंकृत्य द्विजं शांतं वासोभिः प्रतिपूज्य च ॥ १० ॥
तल्लिङ्गमंत्रैर्होमश्च कर्तव्यो ज्वलितेऽनले ॥ ततस्तां तिलकुंभस्थां लवणान्तमुपस्थिताम् ॥ ११ ॥ पूजयित्वा विधानेन मन्त्रमेतमुदीरयेत् ॥

---

[1] तु बहुपुत्रवान्–इ० पा० । [2] नयनाभिरामाम्–इ० पा० । [3] दुःस्वप्ने पुत्रजनने–इ० पा० ।

रोमत्वङ्मांसमज्जाद्यैः सर्वोपकरणैः सदा ॥ जगतः संप्रवृद्धासि[1] त्वामतः प्रार्थये स्थिताम् ॥ १२ ॥ वाङ्मनःकायजनितं यत्किञ्चिन्मम दुष्कृतम् ॥ तत्सर्वं विलयं यातु तव दानात्प्रसेवितम् ॥ १३ ॥ एवमुच्चार्य तां दद्याद्ब्राह्मणाय कुटुंबिने ॥ नाभिभाषेत तं दत्त्वा मुखं च नावलोकयेत् ॥ ॥ १४ ॥ दुष्टप्रतिग्रहहतो विप्रो भवति पातकी[2] ॥ १५ ॥ नो दद्याद्दक्षिणाहीनां दातव्या सा विधानतः ॥ दक्षिणाविधिना हीना दुःखशोकावहा भवेत् ॥ १६ ॥ पुरा दत्तमिदं दानं गौर्या शंकरकाम्यया[3] ॥ तेन शंभुः पतिर्लब्धः सर्वदेवनमस्कृतः ॥ १७ ॥ इन्द्राण्या स्वर्णरोमाणां शतं दत्तं विधानतः ॥ सर्वदेवपतिं प्राप्य पतिं साद्यापि मोदते ॥ १८ ॥ नलेन दत्तमेतद्धि राज्यं कृत्वा[4] दिवं गतः ॥ रुक्मिण्याहं पतिर्लब्धः सौभाग्यमतुलं तथा ॥ १९ ॥ दानस्यास्य प्रभावेण पुत्रा बहुबलान्विताः ॥ अपुत्रो लभते पुत्रमधनो लभते धनम् ॥२०॥ दत्त्वा दानं शुभां कांतिं विपुलां च तथा श्रियम् ॥ य इमं शृणुयान्नित्यं दानकल्पमनुत्तमम् ॥ अहोरात्रकृतात्पापान्मुच्यते नात्र संशयः ॥२१ ॥ मेषी विशेषकलुषापहरातिशस्तादाने सदैव रसधातुयुता सधान्या ॥ तामादरेण कुरुनन्दन देहि दत्त्वा येनास्तपापतिमिरः सवितेव भासि ॥ २२ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादेऽविदानव्रतविधिवर्णनं नाम त्रिषष्ट्युत्तरशततमोऽध्यायः ॥ १६३ ॥ ॥छ॥

॥ श्रीकृष्ण उवाच ॥ ॥ भूमिदानमतो वक्ष्ये सर्वपापप्रणाशनम् ॥ ये प्रयच्छंति विप्रेभ्यो भूमिदानं सदक्षिणम् ॥ १ ॥ श्रोत्रियाय दरिद्राय अग्निहोत्ररताय च ॥ स सर्वकामतृप्तात्मा सर्वरत्नैर्विभूषितः ॥ २ ॥ सर्वपापविनिर्मुक्तो दीप्यमानो रविर्यथा ॥ बालसूर्यप्रभाभासैर्वादित्रध्वजशोभितैः ॥३॥ विमानैर्भास्वरैर्दिव्यैर्विष्णुलोकं स गच्छति ॥ ४ ॥ तत्र दिव्यांगनाभिश्च सेव्यमानो यथासुखम् ॥ कामगः कामरूपी च क्रीडत्यानंदमक्षयम् ॥ ५ ॥ यावद्धारयते[5] लोकान्भूरंकुरसमुद्भवा ॥ तावद्भूमिप्रदः कामं विष्णुलोके महीयते ॥ ६ ॥ नहि भूमिप्रदानाद्धै दानमन्यद्विशिष्यते ॥ दिशो दशानुगृह्णाति हर्ता ता दश हंति च ॥ ७ ॥ दानान्यन्यानि क्षीयंते कालेन पुरुषर्षभ ॥ भूमिप्रदानपुण्यस्य क्षयो नैवोपपद्यते ॥ ८ ॥ सर्वपापानि क्षीयंते कालयोगक्रमेण तु ॥ भूमिहर्तुश्च राजेंद्र दुःखस्यांतो न विद्यते ॥ ९ ॥ ब्राह्मणाय सुशीलाय[6] भूमिं दत्त्वा तु यो नरः ॥ न हि तामुपजीवेद्यः स महत्पुण्यमाप्नुयात्[7] ॥ १० ॥ हलकृष्टां[8] महीं कृत्वा सबीजां सस्यमालिनीम् ॥ यावत्सूर्यकृतालोकस्तावत्स्वर्गे महीयते ॥ ११ ॥ धनं धान्यं

---

[1] संप्रवृत्तासि–इ० पा० । [2] किल्बिषी–इ० पा० । [3] दक्षगृहस्थया–इ० पा० । [4] विधानतः–इ० पाठो युक्तः । [5] यावद्धारयते लोको भूमिं कुरुकुलोद्भव–इ० पा० । [6] सुकृष्टां तु–इ० पा० । [7] फलम्–इ० पा० । [8] फालकृष्टाम्–इ० पा० ।

हिरण्यं च रत्नान्याभरणानि च ॥ सर्वदानानि राजेंद्र ददाति वसुधां ददत् ॥ १२ ॥ सागरान्सरितः शैलान्समानि विषमाणि च ॥ सर्वगंधर
सान्स्नेहान्ददाति वसुधां ददत् ॥ १३ ॥ ओषधीः क्षीरसंपन्ना ना[1]नापुष्पफलोपगाः ॥ कमलोत्पलखंडांश्च ददाति वसुधां ददत् ॥ १४ ॥ अग्नि
ष्टोमादिभिर्यज्ञैर्ये यजंति सदक्षिणैः ॥ प्राप्नुवंति च तत्पुण्यं भूमिदानाद्यदाप्यते ॥ १५ ॥ श्रोत्रियाय महीं दत्त्वा ये [2]हरंति न मानवाः ॥ तावत्तेषां
भवेत्स्वर्गो यावल्लोकाः प्रतिष्ठिताः ॥ १६ ॥ सस्यपूर्णां महीं यस्तु श्रोत्रियाय प्रयच्छति ॥ पितरस्तस्य तुष्यंति यावदाभूतसंप्लवम् ॥ १७ ॥
यत्किंचित्कुरुते पापं पुरुषो वृत्तिकर्शितः ॥ अपि गोचर्ममात्रेण भूमिदानेन शुध्यति ॥ १८ ॥ सुवर्णानां सहस्रेण यत्पुण्यं समुदाहृतम् ॥ भूमि
गोचर्ममात्रेण तत्फलं प्रा[3]प्नुयान्नरः ॥ १९ ॥ कपिलानां सहस्रेभ्यो यद्दत्तेऽन्नं नरोत्तम ॥ भूमिगोचर्ममात्रेण तत्फलं लभते नरः ॥ २० ॥ मध्य
मस्य मनुष्यस्य व्यासेन परिसंख्यया ॥ त्रिंशद्दंडांश्च गोचर्म दत्त्वा स्वर्गे महीयते ॥ २१ ॥ बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ॥ यस्य
यस्य यदा भूमिस्तस्यतस्य तदा फलम् ॥ २२ ॥ किंकरा मृत्युदंडाश्च असिपत्रवनादयः ॥ घोराश्च वारुणाः पाशा नोपसर्पंति भूमिदम् ॥ २३ ॥
निरया रौरवाद्याश्च कुंभीपाकः सुदुःसहः ॥ तथा च यातनाः कष्टा नोपसर्पंति भूमिदम् ॥ २४ ॥ चित्रगुप्तश्च कालश्च कृतांतो मृत्युरेव च ॥
यमश्चापि स्वयं राजा संपूजयति भूमिदम् ॥ २५ ॥ रुद्रः प्रजापतिः [4]शक्रो देवासुरगणास्तथा ॥ अहं च परमप्रीत्या पूजयामीह भूमिदम् ॥ २६ ॥
षट्कर्मकृत्सुवृत्ताय कृशाय च प्रियार्थिने ॥ भूमिर्देया नरव्याघ्र सन्निधिश्चाक्षयो भवेत् ॥ २७ ॥ सीदमानकुटुंबाय श्रोत्रियायाहिताग्नये ॥ वृत्त
स्थाय दरिद्राय भूमिर्देया नरेश्वर ॥ २८ ॥ यथा जनित्री क्षीरेण पुत्रं संवर्द्धयेत्सदा ॥ तथा भूमिप्रदं भूमिः सर्वकामैस्तु तर्पति ॥ २९ ॥
यथा गौर्भरते वत्सं क्षीरेण क्षीरमुत्सृजेत् ॥ तथा सर्वरसोपेता भूमिर्भरति भूमिदम् ॥ ३० ॥ यथा बीजानि रोहंति जलसिक्तानि भूतले ॥ तथा
कामाः प्ररोहंति भूमिदस्य दिनेदिने ॥ ३१ ॥ यथोदयन्सहस्रांशुस्तमः सर्वं व्यपोहति ॥ तथा भूमिप्रदानं तु सर्वपापं व्यपोहति ॥ ३२ ॥ पर
दत्तां तु यो भूमिमुपहिंसेत्कदाचन ॥ स बद्धो वारुणैः पाशैः क्षिप्यते पूयशोणिते ॥ ३३ ॥ स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ॥ स नरो
नरके घोरे क्लिश्यत्याप्रलयांतिकम् ॥ ३४ ॥ रुदतां वृत्तिना[5]शेन ये पतंत्यश्रुबिंदवः ॥ तावद्वर्षसहस्राणि नरके पच्यते तु सः ॥ ३५ ॥ ब्राह्मणानां
[6]हृते क्षेत्रे हर्तुस्त्रिपुरुषं कुलम् ॥ दत्त्वा भूमिं तु विप्राय उपहिंसेद्यदा पुनः ॥ अधोमुखश्च दुष्टात्मा कुंभीपाके स पच्यते ॥३६॥ दिव्यवर्षसहस्रांते

---

[1] नगान्पुष्पफलोपगान्—इ० पा० । [2] न हिंसंति—इ० पा० । [3] लभते हि सः—इ० पा० । [4] शुक्रः—इ० पा० । [5] वृत्तिलोपेन—इ० पा० । [6] हरेत्क्षेत्रं हन्यात्—इ० पा० ।

कुंभीपाकादिभिनिः सृतः ॥ इह लोके भवेच्छा वै स[१]प्त जन्मानि पार्थिव॥३७॥स्वदत्तां परदत्तां वा यत्नाद्रक्षेद्युधिष्ठिर ॥ महीं महीभृतां श्रेष्ठदानाच्छ्रेयोनुपालनम् ॥ ३८ ॥ तोयहीनेष्वरण्येषु शुष्ककोटरवासिनः ॥ कृष्णाहयोभिजायंते नरा ब्रह्मस्वहारिणः ॥३९॥ एवं दत्त्वा महीं राजन्प्रहृष्टेनांतरात्मना ॥ सर्वान्कामानवाप्नोति मनसा चिंतितान्नरः ॥ ४० ॥ भूमिदानात्परं नास्ति सुखं वामुष्मिकं महत् ॥ न चापि भूमिहरणादन्यत्पातकमुच्यते ॥ ४१ ॥ यच्छंति ये द्विजवराय महीं सु[३]कृष्टां ते यांति शक्रसदनं सुविशुद्धदेहाः ॥ ये लोपयंत्यतिबलादर्थं कामलोभात्ते रौरवातिगहनान्न समुत्तरंति ॥ ४२ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे भूमिदानमाहात्म्यवर्णनंनाम चतुःषष्ट्युत्तरशततमोऽध्यायः ॥ १६४ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ भूमिदानं क्षत्रियाणां नान्येषामुपपद्यते ॥ ते ह्युपार्जयितुं शक्ता दातुं पालयितुं य[५]था ॥ १ ॥ भूमिदानसमं किंचि[६]दन्यत्कथय यादव ॥ संप्राप्तवित्तैर्यच्छक्यं संसारभयभीरुभिः ॥ २ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ सौवर्णीं विधिवत्कृत्वा साद्रिद्रुमवतीं शुभाम् ॥ महीं प्रयच्छ विप्राणां तत्तुल्या सा निगद्यते ॥ ३ ॥ शृणुष्वैकमना भूत्वा महादानं नरोत्तम ॥ सविधानं प्रवक्ष्यामि फलं य[७]त्नेन यद्भवेत् ॥ ४ ॥ चंद्रसूर्योपरागे च जन्मर्क्षे विषुवे तथा ॥ युगादिषु च दातव्यमयने च[८] विधानतः ॥ ५ ॥ अन्येष्वपि च कालेषु प्रशस्ते धनसंचये ॥ पापक्षयाय दातव्यं यशोऽर्थे वा नरैर्भुवि ॥ ६ ॥ हेम्नः पलशतेनोक्ता तदर्धेनापि शक्तितः ॥ कुर्यात्पंचपलादूर्ध्वमसमर्थोऽपि भक्ति[९]मान् ॥ ७ ॥ कारयेत्पृथिवीं हैमीं जंबुद्वीपानुकारिणीम् ॥ मर्यादापर्वतवतीं मध्ये मेरुसमन्विताम् ॥ ८ ॥ लोकपालाष्टकोपेतां ब्रह्मविश्वेशसंयुताम् ॥ नानापर्वतपूर्णां च रत्नाभरणभूषिताम् ॥ ९ ॥ सर्वसस्यविचित्रांगीं सर्वगंधाधिवासिताम् ॥ ईदृशीं तु महीं कृत्वा कारयेन्मंडपं ततः ॥ १० ॥ दशद्वादशहस्तं च [१०]चतुर्वक्त्रं सतोरणम् ॥ मध्ये च वेदिकां कुर्या[११]द्धस्तां प्रमाणतः ॥ ॥११॥ ऐशान्यां सुरसंस्थानमाग्नेय्यां कुंडमेव च ॥ पताकाभिरलंकृत्य देवतायतनान्यथ ॥ १२ ॥ लोकपाला ग्रहाश्चैव पूज्या माल्यविलेपनैः ॥ होमं कुर्युर्द्विजाः शांताश्चातुश्चरणिकाः शुभाः ॥ १३ ॥ सालंकाराः सवस्त्राश्च माल्यचंदनभूषिताः ॥ अग्निसंस्थापनं तत्र कृत्वा पूर्वं ततो महीम् ॥ १४ ॥ आनयेयुर्द्विजा राजन्ब्रह्मघोषपुरःसरम् ॥ शंखतूर्यनिनादैश्च गेयमंगलनिस्वनैः ॥ १५ ॥ तिलैः प्रच्छादितां वेदिं कृत्वा तत्राधि

---

[१] सप्तजन्म पुनःपुनः–इ० पा० । [२] परम्–इ० पा० । [३] स्वकृष्टाम्–इ० सुमृष्टाम्–इ० च पा० । [४] अपि–इ० पा० । [५] तथा–इ० पा० । [६] दानम्–इ० पा० । [७] दत्तं च–इ० पा० । [८] वा–इ० पा० । [९] शक्तितः–इ० पा० । [१०] वा–इ० पा० । [११] चतुर्हस्ताम् ।

वासयेत् ॥ अथाष्टादशधान्यानि रसांश्च लवणादिकान् ॥ १६ ॥ तथाष्टौ पूर्णकलशान्समंतात्स्थापयेच्छुभान् ॥ वितानकं च कौशेयं फलानि
विविधानि च ॥ १७ ॥ अंशुकानि विचित्राणि श्रीखंडं[1]शकलानि च ॥ इत्येवं रचयित्वा तामधिवासनपूर्वकम् ॥ १८ ॥ ततो होमावसानेषु
निष्पन्ने सर्वशांतिके ॥ शुक्लमाल्यांबरधरो यजमानः स्वयं ततः ॥ १९ ॥ कृत्वा प्रदक्षिणं पृथ्वीं गृहीत्वा कुसुमांजलिम् ॥ पुण्यकालमथासाद्य
मंत्रानेतानुदीरयेत्[2] ॥ २० ॥ नमस्ते सर्वदेवानां त्वमेव भवनं यतः ॥ धात्री त्वमसि भूतानामतः पाहि वसुंधरे ॥ २१ ॥ वसु धारयसे
यस्मात्सर्वसौख्यप्रदायकम् ॥ वसुंधरा ततो जाता तस्मात्पाहि भयादलम् ॥ २२ ॥ चतुर्मुखोऽपि नो गच्छेद्यस्मादंतं तवाचले ॥
अनंतायै नमस्[3]तुभ्यं पाहि संसार[4]कर्दमात् ॥ २३ ॥ त्वमेव लक्ष्मीर्गोविंदे शिवे गौरीति संस्थिता ॥ गायत्री ब्रह्मणः पार्श्वे ज्योत्स्ना
चंद्रे रवौ प्रभा ॥ २४ ॥ बुद्धिर्बृहस्पतौ ख्याता मेधा मुनिषु संस्थिता ॥ विश्वं प्राप्य स्थिता यस्मात्ततो विश्वंभरा मता ॥ २५ ॥
धृतिः क्षितिः क्षमा क्षोणी पृथिवी वसुधा मही ॥ एताभिर्मूर्तिभिः पाहि देवि संसारसागरात् ॥ २६ ॥ एवमुच्चार्य[5] तां देवीं ब्राह्मणेभ्यो निवेद
येत् ॥ धरार्द्धं वा चतुर्भागं गुरवे प्रतिपादयेत् ॥ २७ ॥ अनेन विधिना यस्तु दद्याद्देवीं धरां बुधः ॥ पुण्यकाले च संप्राप्ते स पदं याति वैष्णवम् ॥
॥ २८ ॥ यदि कर्तुं न श[6]क्नोति पुण्येह्नि बहुविस्तरम् ॥ संस्थाप्य शोभने स्थाने महीमेव प्रदापयेत् ॥ २९ ॥ विमानेनार्कवर्णेन किंकिणीजाल
मालिना ॥ नारायणपुरं गत्वा कल्पत्रयमथावसेत् ॥ ३० ॥ क्षीणपुण्य इहाभ्येत्य राजा भवति धार्मिकः ॥ विजयी शत्रुदमनो बहु[7]भृत्यपरिच्छदः
॥ ३१ ॥ श[8]तकोट्यधिपः शूरश्चक्रवर्ती महाबलः ॥ सप्त जन्मानि दानस्य माहात्म्याद्राज्यमाप्नुयात् ॥ ३२ ॥ द्वीपाविकर्षविषमां विधिवद्विधाय
हैमीं महीं सुरमहीमिव विन्ध्यमध्याम् ॥ लोकेशशंभुशिवकेशवसंयुतां च प्रायच्छ पार्थ तव[9] किं बहुनोदितेन ॥ ३३ ॥ इति श्रीभविष्ये महापुराण
उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे पृथिवीदानविधिवर्णनं नाम पंचषष्ट्युत्तरशततमोऽध्यायः ॥ १६५ ॥ ॥ छ ॥ . ॥ श्रीकृष्ण उवाच ॥ ॥
अतः परं प्रवक्ष्यामि दानमत्यद्भुतं तव ॥ येन दत्तेन राजेन्द्र सर्वदानप्रदो भवेत् ॥ १ ॥ सर्वपापप्रशमनं सर्वसौख्यप्रदायकम् ॥ प्रयुक्तं हलपं
क्त्या च सर्वदानफलप्रदम् ॥ २ ॥ पंक्तिर्दशहला प्रोक्ता हलं स्याच्चु चतुर्गवम् ॥ सार[10]दारुमयान्याहुर्हलानि दश पंडिताः ॥३॥ सौवर्णपट्टसंनद्धर

---

[1] श्रीखण्डशकटानि च–इ० पा० । [2] उदाहरेत्–इ० पा० । [3] तस्मात्–इ० पा० । [4] संसारसागरात्–इ० पा० । [5] संधार्य–इ० पा० । [6] पुण्यैश्च–इ० पा० । [7] बहुवित्तपरिच्छदः–इ०, बहुवृत्तपरिच्छदः–इ० च पा० । [8] शतकोशाधिपः–इ० पा० । [9] परम्–इ० पा० । [10] सारदारुमयान्कृत्वा हलान्दश विचक्षणः–इ० पा० ।

त्नवंति शुभानि च ॥ यूनश्च बलिनो भव्यान्व्यंगहीनान्स्वलंकृतान् ॥ ४ ॥ वस्त्रकांचनपुष्पैश्च चंदनैर्दिग्धमस्तकान् ॥ अभग्नान्योजयेत्तेषु लांगलेषु वृषाञ्छुभान् ॥ ५ ॥ योक्त्राणि युग[१]लग्नानि सवृषाणि च कारयेत् ॥ प्रतोदकीलकाबंधसर्वोपकरणान्विताम् ॥ ६ ॥ एवं विधहलैः कुर्यात्संयुक्तां हलपंक्तिकाम् ॥ कर्कटं खेटकं चापि ग्रामं वा सस्यमालिनम् ॥ ७ ॥ निवर्तनशतं वापि तदर्द्धं वा प्रकल्पयेत् ॥ एवंविधां पर्वकाले दद्यात्प्रयतमानसः ॥ ८ ॥ कार्तिक्यां चाथ वैशाख्यामुत्तरे वाऽयने तथा ॥ जन्मर्क्षे ग्रहणे वापि विषुवे वा प्रदापयेत् ॥ ९ ॥ ब्राह्मणान्वेदसंपन्नान्व्यंगहीनानलंकृतां[२]न् ॥ श्रोत्रियांश्च विनीतांश्च हलसंख्यान्निमंत्रयेत् ॥ १० ॥ दशहस्तप्रमाणेन मंडपं कारयेबुधः ॥ पू[३]र्वे द्विकुंडमेकं वा हस्तमात्रं सुशोभनम् ॥ ११ ॥ तत्र व्याहृतिभिर्होमं कुर्युस्ते द्विजसत्तमाः ॥ पर्जन्यादित्यरुद्रेभ्यः पायसेन यजेद्बुधः ॥ १२ ॥ पालाश्यः समिधस्तत्र ह्याज्यं कृष्णास्तिलास्तथा ॥ अधिवास्य च तां पंक्तिं धा[४]न्यमध्यगतां शुभाम् ॥ १३ ॥ ततः सर्वसमीपे तु स्नातः शुक्लांबरः शुचिः ॥ हलपंक्तिं योजयित्वा यजमानः समाहितः ॥ १४ ॥ तूर्यशंखनिनादैश्च ब्रह्मघोषैः सुपुष्कलैः ॥ इममुच्चारयेन्मंत्रं गृहीतकुसुमांजलिः ॥ १५ ॥ यस्माद्देवगणाः सर्वे हले तिष्ठंति सर्वदा ॥ वृषस्कंधे संनिहितास्तस्माद्भक्तिः शिवेस्तु मे ॥ १६ ॥ यस्माच्च भूमिदा[५]नस्य कलां नार्हंति षोडशीम् ॥ दानान्यन्यानि मे भक्तिर्धर्मे चास्तु दृढा सदा ॥ १७ ॥ एवमुक्ते ततः पंक्तिं प्रेरयेयुर्द्विजोत्तमाः ॥ बीजानि सर्वरत्नानि सुवर्णं रजतं तथा ॥ १८ ॥ स्वयं पश्चाद्धले लग्नो विप्रहस्तेषु निर्वपेत् ॥ यायान्निवर्तनं यावत्ततस्तु विरमेद्बुधः ॥ १९ ॥ प्रदक्षिणं ततः कृत्वा विप्राणां प्रतिपाद्य च ॥ सदक्षिणां विधानेन प्रणिपत्य विसर्जयेत् ॥ २० ॥ अनेन विधिना यस्तु दानमेतत्प्रयच्छति ॥ एकविंशत्कुलोपेतः स्वर्गलोके महीयते ॥ २१ ॥ सप्तजन्मसु दारिद्र्यंदौर्भाग्यं व्याधयस्तथा ॥ न पश्यति च भूमेस्तु तथैवाधिपतिर्भवेत् ॥ २२ ॥ दृष्ट्वा तद्दीयमानं तु दानमेतद्युधिष्ठिर ॥ आजन्मनः कृतात्पापान्मुच्यते नात्र संशयः ॥२३॥ दानमेतत्प्रदत्तं हि दिलीपेन ययातिना ॥ शिविना निमिना चैव भरतेन च धीमता ॥ २४ ॥ तेऽद्यापि दिवि मोदंते दानस्यास्य प्रभावतः ॥ तस्मात्सर्वप्रयत्नेन दानमेतन्नृपोत्तम ॥ २५ ॥ दातव्यं भक्तियुक्तेन स्त्रिया वा पुरुषेण वा ॥ यदि पंक्तिर्न विद्येत पंच वा चतुरोऽथ वा ॥ २६ ॥ एकमप्युक्तविधिना हलं देयं विचक्षणैः ॥ २७ ॥ ये संति लांगलमुखोत्थरजोविकारा यावंति तद्गतधुरंधर रोमकाणि ॥ तावंति शंकरपुरे त्रियुगानि तिष्ठेत्पंक्तिप्रदानमिह यत्कुरुते मनुष्यः ॥ २८ ॥ युक्तां वृषैरतिबलैर्हलपंक्तिमेतां पुण्येह्नि भक्तिसहितान्द्विज

---

१ धृपलग्नानि–इ० पा० । २ स्वलंकृतान्–इ० पा० । ३ कारयेत्कुण्डम्–इ० पा० । ४ धनमध्यगतां शुभाम्–इ० पा० । ५ कृषिदानस्य–इ० पा० ।

पुंगवेभ्यः ॥ यच्छंति ये सुकृतिनो वसुधासमेतां ते भूभुजो भुं[1]वमुपेत्य भवंति भव्याः ॥ २९ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्ण
युधिष्ठिरसंवादे हलपंक्तिदानविधिवर्णनं नाम षट्षष्ट्युत्तरशततमोऽध्यायः॥१६६॥ ॥छ॥ ॥ युधिष्ठिर उवाच ॥ ॥ तन्मे कथय देवेश येन दत्तेन
मानवः॥बहुपुत्रो बहुधनो बहुभृत्यश्च जायते ॥१॥ ॥ श्रीकृष्ण उवाच ॥ ॥ पुरा भारत वंशेऽस्मिन्राजासीद्धव्यवाहनः॥ पितृपैतामहं तेन प्राप्तं राज्यमकंटकम् ॥२॥
न तस्य राज्ये विध्वंसो न वैरिजनितं भयम् ॥ शरीरोत्थमहाव्याधिर्नचैवांतरदायकः ॥३॥ तस्यैवं कुर्वतो राज्यं पूर्वकर्मार्जिताशुभात् ॥
नास्ति भृत्यो भारसहः सर्वराज्यधुरंधरः ॥४॥ न पुत्रः प्रियकृत्कश्चिन्न मंत्री मधुराक्षरः ॥ न मित्रं कार्यकरणे समर्थो न सुहृत्तथा[3] ॥ ५ ॥
न भोज्यसमये प्राप्ते भोजनं सार्वकामिकम् ॥ न पूगफलसंयुक्तं तां[2]बूलं वसनं नच ॥ ६ ॥ न धनं जनसंबन्धकारको रत्नसंचयः ॥ तस्यैवं कुर्वतो
राज्यमव्यां[4]हतमचेष्टितम् ॥ ७ ॥ अथैकस्मिन्दिने विप्रः पिप्पलादोऽतिविश्रुतः ॥ आजगाम महायोगी राज्ञः पार्श्वं महाद्युतिः ॥ ८ ॥ तमागतं
मुनिं दृष्ट्वा राजपत्[5]नी शुभावती ॥ पाद्यार्घ्यासनदानेन सर्वथा तमपूजयत् ॥ ९ ॥ ततः कथां ते कस्मिंश्चित्तमुवाच शुभावती ॥ भगवन्राज्यमेतन्नः
सर्वबाधाविवर्जितम् ॥ १० ॥ कस्मान्नभृत्याः पुत्रा वा मंत्रिमित्रादिकं द्विज ॥ भोगावाप्तिर्न च तथा सर्व[6]लोकातिशायिनी ॥ ११ ॥ ॥ पिप्पलाद उवाच ॥
॥ यद्येन पूर्वविहितं तदसौ[7] प्राप्नुते फलम् ॥ कर्मभूमिरियं राज्ञि नातः शोचितुमर्हसि ॥ १२ ॥ न तत्कुर्वंति राजानो न दायाद
न शत्रवः ॥ न बांधवा न मित्राणि यद्येन न पुरा कृतम् ॥ १३ ॥ तस्माद्भवद्भिर्यद्दत्तं प्राप्तं तद्राज्यमुत्तमम् ॥ भृत्यमित्रादिसंबंधो न दत्तः
प्राप्यते कुतः ॥ १४ ॥ ॥ शुं[8]भावत्युवाच ॥ ॥ इदानीमेव विप्रर्षे कस्मात्तन्नोपदिश्यते ॥ येन मे बहवः पुत्रा धनं भृत्या भवंति वै ॥ १५ ॥
मंत्रो वा सिद्धयोगो वा व्रतं दानमुपोषितम् ॥ कथयस्वामलमते येन संपद्यते सु[9]खम् ॥ १६ ॥ ततः स कथयामास पिप्पलादो द्विजोत्तमः ॥
आपाकाख्यं महादानं सर्वसंपत्प्रदायकम् ॥ १७ ॥ श्रद्धया कुरुशार्दूल नारी वाप्यथ वा पुमान् ॥ येन दत्तेन भाग्यानां बहूनां भाजनं
भवेत् ॥ १८ ॥ तच्छ्रुत्वा स ददौ राजाऽऽपाकाख्यं दानमुत्तमम् ॥ लेभे पुत्रान्पशून्भृत्यान्मंत्रिमित्रसुहृज्जनान्॥ १९ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥
आपाकाख्यं महादानं कथयामि युधिष्ठिर ॥ दत्तेन येन कामानां पुमान्भवति भाजनम् ॥ २० ॥ ग्रहताराबलं लब्ध्वा भार्ग[10]वं पूजयेच्छुभम् ॥

---

[1] भुवि भवंति समेत्य भव्याः–इ० पा० । [2] तांबूलसेवनम्–इ० पा० । [3] तथा–इ० पा० । [4] अव्याहतविचेष्टितम्–इ० पा० । [5] राज्ञोराज्ञी–इ० पा० । [6] हि–इ० पा० । [7] असौ–इ० पा० । [8] भानुमत्युवाच–इ० पा० । [9] मुने–इ० पा० । [10] कुलालमित्यर्थः ।

वासोभिर्भूषणैश्चैव पुष्पैरगरुचंदनैः ॥ २१ ॥ कुर्यात्तथैव सम्मानं यथा तुष्टोऽभिजायते ॥ कुरुष्व त्वं मे भांडानि गुरूणि च लघूनि च ॥ २२ ॥ मणिकादीनि शुभ्राणि स्थाल्यश्च सुमनोहराः ॥ घटकाः करकाश्चैव गलंत्यः कुंडलानि च ॥ २३ ॥ शरावादीनि पात्राणि भांडमुच्चावचं बहु ॥ संपादय महाभाग विश्वकर्मा त्वमेव हि ॥ २४ ॥ भार्गवोऽपि प्रयत्नेन नानाभांडान्वितं शुभम् ॥ आपाकं कल्पयेद्दिव्यं विधिदृष्टेन कर्मणा ॥२५॥ सहस्रमेकं भांडानां स्थापयित्वा विचक्षणः ॥ संध्याकाले ज्वलित्वा[1] तु दद्याच्चापि हुताशनम् ॥ २६ ॥ रात्रौ जागरणं कुर्याद्गीतमङ्गलनिस्वनैः ॥ ततः प्रभाते विमले ज्ञात्वा निर्वापितं शनैः[2] ॥ २७ ॥ रक्तवस्त्रैः समाच्छाद्य[3] पुष्पमालाभिरर्चयेत् ॥ यजमानस्ततः स्नात्वा शुक्लांबरधरः शुचिः ॥ ॥ २८ ॥ हेमरौप्याणि भांडानि ताम्रलोहमयानि च ॥ परितः स्थापयित्वा च स्वशक्त्या तानि षोडश ॥ २९ ॥ पूजयित्वा प्रयत्नेन कृत्वा चारु प्रदक्षिणाम् ॥ ब्राह्मणान्पूजयित्वा च भार्गवं पूज्य यत्नतः ॥ ३० ॥ नार्यश्चाविधवास्तत्र समानीय प्रपूज्य च ॥ प्रदक्षिणं ततः कृत्वा मंत्रेणानेन पूजयेत् ॥ ३१ ॥ आपाकब्रह्मरूपोसि भांडानीमानि जंतवः ॥ प्रदानात्ते प्रजापुष्टिः[4] स्वर्गश्चास्तु ममाक्षयः[5] ॥ ३२ ॥ भांडरूपाणि यान्यत्र कल्पितानि मया किल ॥ भूत्वा सत्पात्ररूपाणि उपतिष्ठंतु तानि मे ॥ ३३ ॥ इति दानमंत्रः ॥ या च यद्भांडमादत्ते तस्यैतद्दापयेत्ततः ॥ स्वेच्छया चैव गृह्णातु न निवार्यास्तु काश्चन ॥ ३४ ॥ अनेन विधिना यस्तु दानमेतत्प्रयच्छति ॥ विश्वकर्मा भवेत्तुष्टस्तस्य जन्मत्रयं नृप ॥ ३५ ॥ नारी च दत्त्वासौभाग्यमतुलं प्रतिपद्यते ॥ गृहं सर्वगुणोपेतं[6] भृत्यमित्रजनैर्वृतम् ॥ ३६ ॥ [7]अवियोगं सदा भर्त्रा रूपं चानुत्तमं लभेत् ॥ भूदानमेतन्निर्दिष्टं प्रकारेण तवानघ ॥ भिद्यतेबहुभिर्भेदैर्[8]भूमिरेषा नरेश्वर ॥ ३७ ॥ निष्पाद्य भांडनिचयोच्चतरं प्रयत्नादापाकदानमिह या कुरुते वरस्त्री[9] ॥ सा पुत्रपौत्रपशुवृद्धिसुखानि भुक्त्वा प्रेत्य स्वभर्तृसहिता सुखिनी सदास्ते ॥ ३८ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवाद आपाकदानविधिवर्णनं नाम सप्तषष्ट्युत्तरशततमोऽध्यायः ॥ १६७ ॥ ॥ छ ॥ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ सर्वशास्त्रार्थतत्त्वज्ञ ज्ञानविज्ञानपारग ॥ गृहदानस्य माहात्म्यं विधिं वद[10] विदांवर ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ न गार्हस्थ्यात्परो धर्मो नास्ति दानं गृहात्परम् ॥ नानृतादधिकं पापं न पूज्यो ब्राह्मणात्परः ॥ २ ॥ धनधान्यसमायुक्तं कलत्रापत्यसंकुलम् ॥ ३ ॥

---

[1] जपित्वातु–इ०, स्वपित्वा तु–इ० च पा० । [2] स्वनैः–इ० पा० । [3] समासाद्य–इ० पा० । [4] तेजसापुष्टिः–इ० पा० । [5] तथा सदा–इ० पा० । [6] सर्वजनोपेतं भृत्यमंत्रिजनैर्वृतम् । [7] अवियोगं च पत्युर्वा रूपं चानुत्तमं लघु–इ० पा० । [8] चेह विविधैः–इ० पा० । [9] च साध्वी–इ० पा० । [10] विधिविदांवर–इ० पा० ।

गोगजाश्वगणाकीर्णं गृहं स्वर्गाद्विशिष्यते ॥ यथामातरमाश्रित्य सर्वे जीवंति जंतवः ॥ ४ ॥ एवं गृहस्थमाश्रित्य वर्तयंती[2]तराश्रमाः ॥ धर्मश्चार्थश्च
कामश्च मित्राणि प्रथितं यशः ॥ ५ ॥ प्राप्तकामैर्नरैः पार्थ सदा सेव्यो गृहाश्रमः[3] ॥ न गृहेण विना धर्मो नार्थकामौ सुखं न च ॥ ६ ॥ न लोक
पंक्तिर्न यशः प्राप्यते त्रिदशैरपि ॥ न तत्स्वर्गे नापवर्गे नतत्केनोपमीयते ॥ ७ ॥ प्रसार्य पादौ यद्रात्रौ स्वगृहे स्वपतां सुखम् ॥ दिनानि नास्य
गण्यंते नैनमाहुर्महाशनम् ॥ ८ ॥ अपि शाकं पचानस्य स्वगृहे परमं सुखम् ॥ इति मत्वा महाराज कारयित्वा सुशोभनम् ॥ ९ ॥ [4]भवनं ब्राह्मणे
देयं [5]भव्यभूतिमभीप्सता ॥ कारयित्वा दृढस्तंभं [6]शुभपक्वेष्टकामयम् ॥ १० ॥ शुभं कमठपृष्ठाभं भाभासितदिगंतरम् ॥ सुधानुलिप्तं गुप्तं च सुख
शालाविराजितम् ॥ ११ ॥ [7]दद्यादनंतफलदं शैववैष्णवयोगिनाम् ॥ प्रतिश्रये तु विस्तीर्णे कारिते सजले घने ॥ १२ ॥ दीनानाथजलार्थाय कृतं
किं नकृतं भवेत् ॥ कारयित्वा गृहान्पश्चाद्दत्त्विशुद्धार्कसंख्यया ॥ १३ ॥ कुड्यस्तंभगवाक्षाढ्यान्विचित्रान्बहुभूमिकान् ॥ सप्राकारप्रतोलीकान्कपा
टार्गलयंत्रितान् ॥ १४ ॥ सुधाधवलितान्रम्यान्विस्तीर्णांगणवाटिकान् ॥ प्रवेशनिर्गमयुतान्समासन्नजलाशयान् ॥ १५ ॥ लोहोपस्करसंपूर्णांस्ता
म्रोपस्करसंयुतान् ॥ स्वर्णोपस्करशोभाढ्यान्[8]रौप्योपस्करसंकुलान् ॥ १६ ॥ रत्नोपस्करसंयुक्तान्कांस्योपस्करमंडितान् ॥ आरकूटत्रपुसीसदा
नोपस्करवर्जितान् ॥ १७ ॥ [9]वंशोपस्करसकीर्णान्काष्ठोपस्कर बृंहितान् ॥ मृन्मयोपस्कराकीर्णान्वस्त्रोपकरणान्वितान् ॥ १८ ॥ धर्मो
[10]पस्करसंभारशणवल्कलराजितान् ॥ राजितांस्तृणपाषाणैः [11]सर्वोपस्करभूषितान् ॥ १९ ॥ सप्तधातुमयं भांडं यत्तद्रत्नसमुद्भवम् ॥ चर्मकाष्ठं[12]महा
भांडं नववस्तुमयं तथा ॥ २० ॥ गोमहिष्यश्ववृषभप्रेष्यवेश्यागणान्वितान् ॥ क्षेत्रारामजलासन्नान्काम्यान्हर्म्यवराञ्छुभान् ॥ २१ ॥ संपूर्णान्सं[13]
र्वधान्यैस्तु घृततैलगुडादिभिः ॥ तिलतंदुलशालीक्षुमुद्गगोधूमसर्षपैः ॥ २२ ॥ निष्पावाढक्यचणककुलत्थाणुमसूरकैः ॥ कंगुमाषयवाद्याढ्या
ञ्छाकवृंताकपूरितान् ॥ २३ ॥ लवणार्द्रकखर्जूरद्राक्षाजीरकधान्यकैः ॥ हिंगुकुंकुमकर्पूरस्नानद्रव्यैः सचंदनैः ॥ २४ ॥ धूपोपस्करपर्युततूलीगण्डो
पधानकैः ॥ [14]चुल्लीच्छेदनमंथानभद्रासनकगुच्छकैः ॥ २५ ॥ [15]पिठरोलूखलस्थालीशूर्पदर्पणपत्रकैः ॥ मुशलासिकृपाणीषुदंडकोदंडमुद्गरैः ॥ २६ ॥

---

१ आसाद्य—इ० पा० । २ वर्तयन्ते तथाश्रमाः—इ० पा० । ३ गृहाश्रमी—इ० पा० । ४ गृहं सुब्राह्मणे—इ० पा० । ५ भार्यां भूमिमभीप्सिता—इ० पा० । ६ पक्वेष्टकामयं नवम्—इ० पा० । ७ दानं तत्फलदम्—इ० पा० । ८ रौप्योस्करमंडितान्—इ० पा० । ९ वंशोपस्करसंपूर्णान्काष्ठोपस्करसंहितान्—इ० पा० । १० धर्मोपस्करसंयुक्तान्—इ० पा० । ११ सुवर्णोपस्करान्वितान्—इ० पा० । १२ चर्यकाष्ठमहीभारं दत्त वस्त्रमयं तथा—इ० पा० । १३ सप्तधान्यैस्तु—इ० पा० । १४ चुल्लीच्छेदनमन्थानभद्रासनकुकुच्छकैः—इ० पा० । १५ पिठरोलूखलस्थालीशूर्पदर्पणपन्नगैः—इ० पा० ।

गृहाटवाटकादर्वींदृषल्लोष्टकहस्तकैः ॥ चात्रकांशुकलोहादिदीप्तमंथनिकादिभिः ॥२७॥ कंडणी पेषणी चुल्ली उदकुम्भी प्रमार्जनी ॥ मंजूषाकोष्ठका
संदीकंबलैस्तंतुरांकवैः ॥ २८ ॥ इत्येवमादिभिः पूर्णान्गृहान्दद्याद्द्विजातिषु ॥ कर्तुश्चंद्रबलोपेते स्थिरनक्षत्रसंयुते ॥ २९ ॥ शुभेऽह्नि विप्रकथिते
दानकालः प्रशस्यते ॥ एवं संभृतसंभारो यजमानः स्वयं द्विजान् ॥ ३० ॥ कुलशीलसमायुक्तान्गृहसंख्यान्निमंत्रयेत् ॥ अधीतवेदाञ्छास्त्रज्ञान्पुरा
णस्मृतिपारगान् ॥ ३१ ॥ गृहस्थधर्मनिरताञ्छांतान्दांताञ्जितेंद्रियान् ॥ अलंकृत्य सपत्नीकान्वासोभिरथ पूजयेत् ॥ ३२ ॥ सुगंधिस्रग्धरा
न्कृत्वा शांतिकर्मणि योजयेत् ॥ गृहांगणे कारयित्वा कुंडमेकं समेखलम् ॥ ३३ ॥ ग्रहयज्ञः प्रकर्तव्यस्तुष्टिपुष्टिकरः सदा ॥ राक्षोघ्नानि च
सूक्तानि पठेयुर्ब्राह्मणास्ततः ॥ ३४ ॥ वास्तुपूजा प्रकर्तव्या दिक्षु भूतबलिं क्षिपेत् ॥ ततः[1] पुण्याहघोषेण ब्राह्मणांस्तेषु वेश्मसु ॥ ३५॥ प्रवेशयित्वा
शय्यासु सभार्यानुपवेशयेत् ॥ यजमानस्ततः प्राज्ञः शुक्लांबरधरः शुचिः ॥ ३६ ॥ यद्यस्य विहितं पूर्वं तत्तस्य प्रतिपादयेत् ॥ इदं गृहं गृहाण
त्वं सर्वोपस्करसंयुतम् ॥ ३७ ॥ तव विप्र प्रसादेन ममास्त्वभिमतं फलम् ॥ एवमेकैकशो दत्त्वा[2] प्रणिपत्य क्षमापयेत् ॥ ३८ ॥
स्वस्तीति ब्राह्मणैर्वाच्यं कोदादिति च पूजितैः ॥ गृहोपकरणैस्तुल्या दक्षिणा भवनं विना ॥ ३९ ॥ उपदेष्टारमापृच्छेत्तन्मूलत्वा
न्महर्षयः ॥ स्वयं तान्पूजयित्वा तु ततः स्वभवनं व्रजेत् ॥ ४० ॥ दद्यादनेन विधिना गृहमेकं बहूनपि ॥ न संख्यानियमः
कार्यः शक्तिरत्र नियामिका ॥ ४१ ॥ शीतवातातपहरं दत्त्वा तृणकुटीरकम् ॥ इष्टान्कामानवाप्नोति प्रेत्य स्वर्गे महीयते ॥ ४२ ॥
किं पुनर्बहुनोक्तेन सर्वोपस्करभूषिताम् ॥ अत्यंतसुखलुब्धेन दत्त्वा ब्रह्मपुरीं प्रियाम् ॥ ४३ ॥ गोभूहिरण्यदानानि यमाः सनियमास्तथा ॥ गृहदा
नस्य कौंतेय कलां नार्हंति षोडशीम् ॥ ४४ ॥ यः कारयेत्सुदृढहर्म्यवतीं महार्हां[3] सत्सेवितां द्विजपुरीं सुजनोपभोग्याम् ॥ दिव्याप्सरोभिरभि
नंदितचित्तवृत्तिः प्राप्नोत्यसावनवमं पदमिंदुमौलेः ॥ ४५ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे गृहदानविधिवर्णनं
नामाष्टषष्ट्युत्तरशततमोऽध्यायः ॥ १६८ ॥ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अन्नदानस्य माहात्म्यं कथयामि [5]तवानघ ॥ यत्प्रोक्तमृ
षिभिः पूर्वं तदिहैकमनाः शृणु ॥ १ ॥ ददस्वान्नं ददस्वान्नं ददस्वान्नं युधिष्ठिर ॥ सद्यस्तुष्टिकरं लोके किं दत्तेन परेण[4] ते ॥२॥ रामेण दशरथिना
वनस्थेन निजानुजः ॥ निर्वेदाद्यत्पुरा प्रोक्तस्तदहं प्रब्रवीमि ते ॥ ३ ॥ पृथिव्यामन्नपूर्णायां वयमन्नस्य कांक्षिणः ॥ सौमित्रे नूनमस्माभिर्न ब्राह्म

---

[1] स्वस्तीति ब्राह्मणैर्वाच्यम्–इ० पा० । [2] दद्यात्–इ० पा० । [3] महार्घाम्–इ० पा० । [4] अपरेण–इ० पा० । [5] तच्चापि कथयामि ते–इ० पा० ।

णमुखे हुतम् ॥ ४ ॥ यदुच्यते कर्मबीजं तस्यावश्यं फलं नरैः ॥ प्राप्यते लक्ष्मणास्माभिर्नान्नं विप्रमुखे हुतम् ॥ ५ ॥ यन्न प्राप्यं तदप्राप्यं विद्यया पौरुषेण वा ॥ सत्यो लोकप्रवादोऽयं नादत्तमुपतिष्ठति ॥ ६ ॥ भक्षोपयोगादन्नस्य दानं [1]श्रेयस्करं परम् ॥ ७ ॥ प्रकारांतरभोज्यानि [2]दानान्यन्यानि भारत ॥ अन्नमेव परं दानं सत्यवाक्यं परं पदम् ॥ ८ ॥ बुद्धिश्चार्थात्परो लोभः सन्तोषः परमं सुखम् ॥ स्नातानामनुलिप्तानां भूषितानां च भूषणैः ॥ ९ ॥ न सुखं न च सन्तोषो भवेदन्नादृते नृणाम् ॥ श्वेतो नाम महीपालः सार्वभौमोऽभवत्पुरा ॥ १० ॥ तेनेष्टं बहुभिर्यज्ञैः [3]संग्रामा बहवो जिताः ॥ दानानि च प्रदत्तानि धर्मतः पालिता मही ॥ ११ ॥ भुक्ता भोगाः सुविपुलाः शत्रूणां मूर्धनि स्थितम् ॥ वानप्रस्थेन विधिना त्यक्त्वा राजश्रियं नृप ॥ १२ ॥ स्वर्गं जगाम भुक्त्वा तु पूज्यमानो मरुद्गणैः ॥ विमानमर्कप्रतिमं प्रतिपेदे मुदा युतः ॥ १३ ॥ तत्रास्ते रममाणोऽसौ साकं विद्याधरैः सुखम् ॥ प्रसिद्धैः स्तूयते सिद्धैः सेव्यतेऽप्सरसां गणैः ॥ १४ ॥ गंधर्वैर्गीयते हृष्टैः शक्रेणाप्य[4]नुगम्यते ॥ दिव्यमाल्यांबरधरो दिव्याभरणभूषितः ॥ १५ ॥ स च नित्यं वितानाग्र्यादवतीर्य महीतलम् ॥ स्वमांसान्यत्ति कौंतेय पूर्वं त्यक्त्वा कलेवरम् ॥ १६ ॥ तच्छरीरं तथैवास्ते रक्षितं पूर्वकर्मभिः ॥ स कदाचित्सुरेशानं ब्रह्माणं समुपस्थितः ॥ १७ ॥ प्रणम्य प्रांजलिर्भूत्वा निर्वेदादिदमब्रवीत् ॥ भगवंस्त्वत्प्रसादेन प्राप्तं स्वर्गसुखं मया ॥ १८ ॥ सर्वेषामपि संपूज्यः सुराणां सुरपुंगव ॥ किं तु क्षुद्बाधतेऽत्यर्थं स्वर्गस्थस्यापि मे प्रभो ॥ १९ ॥ यया मांसान्यहं स्वस्य भक्षययाम्यशनं विना ॥ ॥ ब्रह्मोवाच ॥ ॥ श्वेताभिजनसंपन्न श्वेत शृणु वचो मम ॥ २० ॥ त्वयाधीतं हुतं दत्तं गुरवः परितोषिताः ॥ नाशनं भवता दत्तं यद्द्विजेभ्यो नराधिप ॥ २१ ॥ अनन्नदानस्य फलं त्वयेदमुपभुज्यते ॥ तर्ह्यन्नदानतो नान्यच्छरीरारोग्यकारकम् ॥ ॥ २२ ॥ नान्यदन्नादृते पुंसां किञ्चित्सञ्जीवनौषधम् ॥ महीं गत्वा महाराज कुरुष्व वचनं मम ॥ २३ ॥ तपःस्वाध्यायसंपन्ने शास्त्रज्ञे संजितेन्द्रिये ॥ येन [5]संपद्यते तृप्तिरक्षया क्ष्मापते तव ॥ २४ ॥ विरिंचेर्वचनाद्गत्वा त्वरायुक्तो महीतलम् ॥ अगस्त्यं भोजयामास भक्त्या भरतसत्तम ॥ ॥ २५ ॥ भोजयित्वा ततः प्रादाद्दक्षिणां क्षीणकल्मषः ॥ एकावलिं स्वकात्कण्ठात्समुत्तार्य समुज्ज्वलाम् ॥ २६ ॥ ततो दुन्दुभिघोषेण पूजितः सुरसत्तमैः ॥ श्वेतस्तृप्तो गतः स्वर्गं दत्त्वान्नं दक्षिणायुतम् ॥ २७ ॥ पौलस्त्ये निहते पश्चाद्देवदानवसंकटे ॥ रामायैकावलिं प्रादादगस्त्यः परया मुदा ॥ २८ ॥ एतदन्नस्य माहात्म्यं कथयाम्यपरं च ते ॥ नचान्नादपरं किञ्चित्सत्यं तव मयोदितम् ॥ २९ ॥ अन्नं वै [6]प्राणिनां प्राणा अन्न

---

[1] श्रेयःफलम्–इ० पा० । [2] नानाविधानि–इ० पा० । [3] संग्रामात्–इ० पा० । [4] अनुगीयते–इ० पा० । [5] जायते–इ० पा० । [6] प्राणिनः–इ० पा० ।

मोजो बलं सुखम् ॥ एतस्मात्कारणात्सद्भिरन्नदः प्राणदः स्मृतः ॥ ३० ॥ सुदूरादाशया यस्य गृहं प्राप्ता बुभुक्षिताः ॥ तृप्ताः प्रतिनिवर्तंते कोऽन्य
स्तत्सदृशः पुमान् ॥३१॥ दीक्षितः कपिला सत्री राजा भिक्षुर्महोदधिः ॥ दृष्टमात्रा पुनंत्येते तस्मात्पश्यंति नित्यशः ॥ ३२ ॥ एकस्याप्यतिथे
रन्नं यः प्रदातुमशक्तिमान् ॥ तस्याऽऽरम्भैः परिक्लेशैर्वसतः किं फलं गृहे ॥ ३३ ॥ शक्यते दुष्करेऽप्यर्थे चिररात्राय जीवितुम् ॥ नत्वाहारविही
नेन शक्यं वर्तयितुं चिरम् ॥ ३४ ॥ भुक्त्वा गृहे गृहस्थस्य मैथुनं यश्च सेवते ॥ यस्यान्नं तस्य ते पुत्रा इति प्राहुर्मनीषिणः ॥ ३५ ॥ दुष्कृतं
हि मनुष्याणामन्नमाश्रित्य तिष्ठति ॥ यो यस्यान्नं समश्नाति स तस्याश्नाति दुष्कृतम् ॥ ३६ ॥ वनस्पतिगते सोमे परान्नं यस्तु भुंजति ॥ तस्य
मासकृतं पुण्यं दातारमुपगच्छति ॥ ३७ ॥ कस्मान्न दीयते नित्यं कस्मादन्नं न दीयते ॥ यस्येदृशी फलावाप्तिः कथिता पूर्वसूरिभिः ॥ ३८ ॥
भिक्षां वा पुष्कलां वापि हंतकारं द्विजातये ॥ भोजनं वा यथालाभमदत्त्वाश्नाति किल्बिषम् ॥ ३९ ॥ येनायुतं सहस्रं वा भोजितं स्याद्द्विजन्म
नाम् ॥ तेन ब्रह्मगृहासन्नं नूनं बद्धं कुटीरकम् ॥ ४० ॥ वाराणस्यां पुरा पार्थ वणिगापणजीवनः ॥ धनेश्वर इति ख्यातो देवब्राह्मणपूजकः ॥ ४१ ॥
तस्यापणैकदेशे तु मुक्त्वांडं पांडुरच्छवि ॥ ससर्प सर्पस्तद्देशाद्वणिग्दृष्ट्वा विशंकितः ॥ ४२ ॥ तदंडं वणिजा तेन दृष्टं कारुण्यबुद्धिना ॥ ततः
प्रभृत्यनुदिनं ररक्ष च पुपोष च ॥ ४३ ॥ निर्जगाम दिनैः कैश्चिद्भित्त्वांडं सर्पपोतकः ॥ तं वणिक्क्षीरपानाद्यैरुपचारैरवर्धयत् ॥ ४४ ॥
लिलिहे घृतभांडानि जिघ्रे च गंधसंचयान् ॥ लुलोठ पांसुप्रकरे चचार वारिमध्यगः ॥ ४५ ॥ वणिजा रक्ष्यमाणः स स्नेहाच्चाहरहः पुनः ॥
जगाम सुमहान्कालोऽभवदेष भयंकरः ॥ ४६ ॥ अथैकस्मिन्दिने गंगां गतः स्नातुं त्रिलोकगाम् ॥ वणिगापणे पण्यविदं स्थापयित्वा सुतं
मतम् ॥ ४७ ॥ [1]व्यवहर्तुं समारब्धं वणिक्पुत्रेण धीमता ॥ ददाति प्रतिगृह्णाति घृततैलयवैक्षवम् ॥ ४८ ॥ व्यवहाराकुलतया पादयोरंतरेण सः ॥
सर्पश्चचाल चापल्याद्वणिग्विक्षेपमभ्यगात् ॥ ४९ ॥ जानन्नपि तद्वृत्तांतं निदाने नियतेर्वशात् ॥ त्रासात्संतर्जयामास [2]बलेन पदचारिणम् ॥
॥ ५० ॥ स महीतः समुत्थाय मूर्द्धानम[3]वरुह्य च ॥ उवाच [4]दारुणतरं वचनं पन्नगाधमः ॥ ५१ ॥ शरणागतं पोषितं च तव पित्रा प्रियंकरम् ॥
कस्मान्मां हंसि दुष्टात्मन्कथं जीवन्विमोक्ष्यसे ॥ ५२ ॥ अनंतरं कलकलः संजातो [5]रोदतां नृणाम् ॥ धनेश्वरसुतो दष्टः सर्पेणापि भृशाकुलः ॥
॥ ५३ ॥ अच्युतानंत गोविंद कृष्णकृष्णेत्युदीरयन् ॥ धनेश्वरोप्यनुप्राप्तः प्रोवाचाकुलया गिरा ॥ ५४ ॥ किं कृतं मम पुत्रेण तव पन्नग विप्रि

---

१ व्यवहारः समारब्धः—इ० पा० । २ फलेन फलभोजिनम्—इ० पा० । ३ अधिगच्छति—इ० पा० । ४ दारुणतमं स्वामिनम्—इ० पा० । ५ रोषणः—इ० पा० ।

यम् ॥ यदयं भवता मूर्ध्नि स्वभोगेनाभिवेष्टितः ॥ ५५ ॥ मूर्खं मित्रं सुसंबंधं हीनजातिजनो हि यः ॥ यः करोत्यबुधोंगारान्स स्वहस्तेन[1] कर्षति ॥
॥ ५६ ॥ तमुवाच च सर्पोऽसौ बाष्पगद्गदया गिरा ॥ निरपराधो भवतः पुत्रेणाहं समाहतः ॥ ५७ ॥ तदहं पश्यतस्तेऽद्य दशाम्येनं[2] नराधिप ॥
यथा न भूयो भूतानां भवेदस्मात्क्वचिद्भयम् ॥ ५८ ॥ ॥ धनेश्वर उवाच ॥ ॥ उपकारं व्रतं भक्त्या स्नेहपाशो न यस्य च ॥ सतां मार्गमपाक्रम्य
प्रयातः केन वार्यते ॥ ५९ ॥ क्षणमात्रं प्रतीक्षस्व यावदेव शिशुर्मम ॥ और्ध्वदेहिककर्माणि करोति स्वयमात्मनः ॥ ६० ॥ एवमुक्त्वा गृहं गत्वा
यतीनां ब्रह्मचारिणाम् ॥ सहस्रं भोजयामास घृतपायसभोजनैः ॥ ६१ ॥ समुत्थाय ततः सर्वे ब्राह्मणा हृष्टमानसाः ॥ वणिक्पुत्रस्योत्तमांगे चिक्षिपुः
कुसुमाक्षतान् ॥ ६२ ॥ वणिक्पुत्र चिरं जीव नश्यंतु तव शत्रवः ॥ अभीष्टफलसंसिद्धिरस्तु ते ब्राह्मणाज्ञया ॥ ६३ ॥ ततः स[3] दुष्टप्रकृतिर्विप्र
वाग्वज्रताडितः ॥ पन्नगो नगसंकाशः पपात च ममार च ॥ ६४ ॥ विपन्नं पन्नगं दृष्ट्वा त्रस्तचक्षुर्धनेश्वरः ॥ आः किमेतदिति प्रोच्य विषादमगम
त्परम् ॥ ६५ ॥ पोषितोऽयं मया बालः पालितो लालितस्तथा ॥ ममापचारात्[4]पंचत्वमापन्नः पवनाशनः ॥ ६६ ॥ उपकारिषु यः साधुः साधुत्वे
तस्य को गुणः ॥ अपकारिषु यः साधुः स साधुः सद्भिरिष्यते ॥ ६७ ॥ इत्येवमवधार्या[5]सौ दुःखसंततमानसः ॥ बुभुजे नाकुलतया न च सुष्वाप
तां निशाम् ॥ ६८ ॥ ततः प्रभाते गंगायां स्नात्वा संतर्प्य देवताः ॥ सहस्रं भोजयामास पुनरेव द्विजन्मनाम् ॥ ६९ ॥ तैर्भुक्तैरिष्टसंसिद्धैर्ब्राह्मणै
रनुमोदितः ॥ वणिक्प्राह ममाभीष्टं संजीवत्वेष पन्नगः ॥ ७० ॥ ततो द्विजवरोन्मुक्तैरंबुभिः परिषिंचितः ॥ उदतिष्ठदहीनांगः सहसा हि महाकुलः ॥
॥ ७१ ॥ प्रहर्षमतुलं लेभे दृष्ट्वा तं पुरतः स्थितम् ॥ प्रत्यग्रावयवं दृष्ट्वासृ[6]क्किणीपरिलेलिहम् ॥ ७२ ॥ साधुवादो महाञ्जातः प्रशशंसुर्धनेश्वरम् ॥
पुरीनिवासिनः सर्वे विस्मयोत्फुल्ललोचनाः ॥७३॥ सहस्रभोज्यमाहात्म्यं कथितं ते युधिष्ठिर ॥ सम्यक्छ्रद्धाप्रयुक्तस्य किमन्यत्कथयामि ते ॥७५॥
यच्छंति येऽनुदिवसं द्विजपुंगवानामन्नं विशुद्धमनसो भृशमागतानाम् ॥ मर्त्यैं विहृत्य सुचिरं ससुहृज्जनास्ते प्रेत्य प्र[7]यांति भवनं मुदिता मुरारेः॥७७॥
इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे अ[8]न्नदानमाहात्म्यवर्णनं नामैकोनसप्तत्युत्तरशततमोऽध्यायः ॥ १६९ ॥ छ ॥
॥ युधिष्ठिर उवाच ॥ ॥ अन्नदानप्रसंगेन ममापि स्मृतिमागतम् ॥ तत्तेऽहं संप्रवक्ष्यामि श्रुतं दृष्टं च यन्मया ॥ १ ॥ अक्षद्यूतेन भगवन्धनं

---

[1] स्वहस्तेनापि कर्षति–इ० पा० । [2] दत्त्वा–इ० पा० । [3] सुहृष्टप्रकृतिः–इ० पा० । [4] अपकारात्—इ० पा० । [5] संप्रधार्य–इ० पा० । [6] किंकिणीपरिलेलिहम्—इ० पा० । [7] प्रेत्येह–इ० पा० ।
[8] सदाव्रतवर्णनंनाम–इ० पा० ।

राज्यं च नो हृतम् ॥ आहूय निष्कृतिप्राज्ञैः कितवैरक्षकोविदैः ॥२॥ वनं प्रस्थापिताः सर्वे वल्कलाजिनवाससः ॥ द्रौपद्या सहिताः कृष्ण कर्णदुर्योधनादिभिः ॥ ३ ॥
ज्ञात्वा वनगतानस्मान्ब्राह्मणाः संजितेंद्रियाः ॥ द्रष्टुमभ्याययुः सर्वे पौराश्चाप्यनुजग्मिरे ॥ ४ ॥ अस्मान्स्नेहात्क्लिश्यमानान्दृष्ट्वा ब्राह्मणसत्तमाः ॥
पौरान्कर्मकरांश्चैव निर्वेदादिदमब्रुवन् ॥ ५ ॥ जीवतो यस्य जीवंति विप्रा मित्राणि बांधवाः ॥ जीवनं[1] तस्य सफलमात्मार्थे को न जीवति ॥ ६ ॥
अभ्यागतं सुहृद्वर्गं कुटुंबमपहाय च ॥ जीवन्नपि मृतः पापः केवलं स्वोदरंभरिः ॥ ७ ॥ इत्येवमवधार्याहं तानृषीन्पुनरब्रुवम् ॥
भवंतः सर्व एवात्र त्रिकालज्ञा महर्षयः ॥ ८ ॥ समागता मत्प्रियार्थं ज्ञानविज्ञानपारगाः ॥ ब्रूत कंचिदुपायं मे भवंतोभिजनं[2] प्रति ॥
॥ ९ ॥ भवद्भिः सहिताः सर्वे भृत्यैर्भ्रातृभिरेवच ॥ निर्गच्छेयं[3] वने शून्ये द्वादशेमाः समा यथा ॥१०॥ मामुवाचाथ[4] मैत्रेयः शृणु कौंतेय मद्वचः ॥
पूर्ववृत्तं प्रवक्ष्यामि दृष्टं दिव्येन चक्षुषा ॥ ११ ॥ आसीत्तपोवने काचिद्ब्राह्मणी ब्रह्मचारिणी ॥ दुर्भगा दुर्गता[5] दुःखादाराधयति सा द्विजान् ॥
॥ १२ ॥ शौचेन तुष्टा मुनयः प्रश्रयेण दमेन च ॥ प्रोचुर्वद विशालाक्षि किं कुर्मस्तव सुव्रते ॥ १३ ॥ सा तानुवाच किं तन्मे व्रतं दानमथापि
वा ॥ कथयध्वं भवेयं[6] वै येन श्रीसुखभागिनी ॥ १४ ॥ आधारभूता भूतानां बह्वपत्या पतिप्रिया ॥ स्पृहणीया त्रिजगतां त्रिवर्गफलभागिनी ॥
॥ १५ ॥ वसिष्ठस्तामुवाचाथ शृणुष्व कथयामि ते ॥ दानं मानकरं[7] पुंसां सर्वकामप्रदायकम् ॥ १६ ॥ कृत्वा ताम्रमयीं स्थालीं पलानां पञ्चभिः
शतैः ॥ अशक्तस्तु तदर्द्धेन चतुर्थांशेन वा पुनः ॥ १७ ॥ सर्वशक्तिविहीनस्तु मृन्मयीमपि[8] कारयेत् ॥ सुगंभीरोदरदरीदृढदण्डकुटुंबकाम् ॥
॥ १८ ॥ मुद्गतंदुलनिष्पन्नसुस्विन्नक्षिप्रपूरिताम् ॥ उपदंशोदकयुतां घृतपात्रसमन्विताम् ॥ १९ ॥ धौतपार्श्वां धौतकर्णां चर्चितां चन्दनेन च ॥
स्थाप्य मंडलके वस्त्रैः पुष्पधूपैरथार्चयेत् ॥२०॥ आदित्येऽहनि संक्रांतौ चतुर्दश्यष्टमीषु वा ॥ एकादश्यां तृतीयायां विप्राय प्रतिपादयेत् ॥ २१ ॥
ज्वलज्ज्वलनपार्श्वस्थैस्तंडुलैः सजलैरपि ॥ न भवेद्भोज्यसंसिद्धिर्भूतानां पिठरीं विना ॥ २२ ॥ त्वं सिद्धिः सिद्धिकामानां त्वं पुष्टिः पुष्टिमिच्छताम् ॥
अतस्त्वां प्रणमाम्याशु सत्यं कुरु वचो मम ॥ २३ ॥ ज्ञातिबंधुसुहृद्वर्गे विप्रे प्रेष्यजने तथा ॥ अभुक्तवति नाश्नीयात्तथा भव वरप्रदा ॥
॥२४॥ इत्युच्चार्य प्रदातव्या हंडिका द्विजपुंगवे ॥ तुष्टिपुष्टिप्रदा पुंसां सर्वान्कामानभीप्सता ॥ २५ ॥ वसिष्ठवचनं श्रुत्वा सा चकार तथैव तु ॥

---

[1] सफलं जीवितं तस्य–इ० पा० । [2] भोजनम्–इ० पा० । [3] निर्दहेयम्–इ०, निगूहेयम्––इ० पा० । [4] अत्र–“मैत्रेय उवाच–शृणु कौंतेय मद्वाक्यमवधानेन यत्नतः”–इति पाठो दृश्यते–स च मूलस्थपाठेनैव गतार्थः । [5] दुर्गतिग्रस्ता देवतार्चनतत्परा–इ० पा० । [6] पुरा दृष्टं व्रत दानमथापि वा–इ० पा० । [7] मानप्रदम्–इ० पा० । [8] वाऽपि–इ० पा० ।

प्रादात्स्थालीं ब्राह्मणाय बहूनां बहुदक्षिणाम् ॥ २६ ॥ सा चैषा द्रौपदी पार्थ भवद्भार्याऽभवत्प्रिया ॥ तेन दानप्रभावेण भविताऽशून्यपाणिका ॥
॥ २७ ॥ एषा सती शची स्वाहा सावित्री भूररुंधती ॥ श्रीरेषा यत्र वसति न किंचित्तत्र दुर्लभम् ॥ २८ ॥ अनया या भृता स्थाली तया सर्व
मिदं जगत् ॥ भोजयिष्यसि कौंतेय किमतो ब्राह्मणा अमी ॥ २९ ॥ [1]मैत्रेयात्तदुपश्रुत्य तत्र संहृष्टमानसः ॥ पूर्वं भोजितवानस्मि बहुविप्रजना
न्वने ॥ ३० ॥ अन्नदानप्रसंगेन स्थालीदानमिदं मया ॥ कथितं पुण्डरीकाक्ष क्षंतव्यमनसूयया ॥ ३१ ॥ स्थालीं विशालवदनां च सतंडुलां च
यच्छंति ये मधुरशुल्बमयीं द्विजेभ्यः ॥ तेषां सुहृत्स्वजनविप्रजनेन भोज्यं संभुज्यमानमपि कृष्ण न याति नाशम् ॥३२॥ इति श्रीभविष्ये महा
पुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे स्थालीदानविधिवर्णनं नामसप्तत्युत्तरशततमोऽध्यायः ॥ १७० ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥
दासीदानमहं तेऽद्य प्रवक्ष्याम्यरिसूदन ॥ भक्त्या स्नेहाच्च भवतो यन्नोक्तं केनचित्क्वचित् ॥ १ ॥ चतुर्णामाश्रमाणां हि गृहस्थः श्रेष्ठ उच्यते ॥
गृहस्थाच्च गृहं श्रेष्ठं गृहाच्छ्रेष्ठा वराः स्त्रियः ॥ २ ॥ [2]पूर्णेंदुबिंबवदनाः पीनोन्नतपयोधराः ॥ तद्गृहं यत्र दृश्यंते योषितः शीलमंडनाः ॥ ३ ॥
जामयो यत्र पूज्यंते रमन्ते तत्र देवताः ॥ यत्रैतास्तु न पूज्यंते विनंक्ष्यत्याशु तद्गृहम् ॥ ४ ॥ जामयो यानि गेहानि शपंत्यप्रतिपूजिताः ॥
तानि कृत्याहतानीव सद्यो यांति पराभवम् ॥ ५ ॥ अमृतस्येव कुण्डानि सुखानामिवराशयः ॥ रतेरिव निधानानि योषितः केन निर्मिताः ॥
॥ ६ ॥ श्यामा मंथरगामिन्यः पीनोन्नतपयोधराः ॥ महिष्यो वरनार्यश्च न भवंति गृहेगृहे ॥ ७ ॥ अहिरण्यमदासीकमल्पान्नाज्यमगोरसम् ॥ गृहं
कृपणवृत्तीनां नरकस्यापरो विधिः ॥ ८ ॥ अदण्डपाशिकं ग्राममदासीकं च यद्गृहम् ॥ अनाज्यं भोजनं यच्च वृथा तदिति मे मतिः ॥९॥ विभवाभ
रणा दास्यो यद्गृहं समुपासते॥ तत्रास्ते पंकजकरा लक्ष्मीः क्षीरोदवासिनी ॥१०॥ न यत्रास्ति गृहे शौचं न सुखं व्यवहारजम्॥ यत्र वा नास्तिदा
स्येका तत्सदैवानवस्थितम् ॥११॥ यत्र कर्मकरी नास्ति सर्वकर्मकरी सदा ॥ न तच्छतं किंकराणां करोति शुभतामपि ॥१२॥ यदेका कुरुते दासी
गृहस्थेन भृता हि सा ॥ बहुलोकाकुलो ग्रामो दासीदासाकुलं गृहम् ॥१३॥ बुद्धिर्धर्माकुला यस्य तस्य चेतः किमाकुलम्॥ यत्र भार्यागृहे दक्षा दास्य
कर्मण्यनुव्रताः ॥१४॥ भृत्याः सदोद्यमपरास्त्रिवर्गस्तत्र [3]दृश्यते॥यद्यदिष्टतमं लोकेतत्तद्देयमिति श्रुतिः ॥१५॥ एतद्विचार्य हृदये देया दासी द्विजातये ॥
स्थिरनक्षत्रसंयुक्ते [4]सोमे सौम्यग्रहान्विते ॥१६॥ दानकालं प्रशंसंति संतः पर्वणि वा पुनः ॥ अलंकृत्य यथाशक्त्यावासोभिर्भूषणैस्तथा ॥१७॥ ब्राह्म

---

[1] मैत्रेयादुपश्रुत्याहमेतद्वृत्तान्तमुत्तमम् ॥ सर्वान्भोजितवानस्मि–इ० पा० । [2] हिमांशुबिम्बवदनाः–इ० पा० । [3] तिष्ठति–इ० पा० । [4] शोभने शशलांछने–इ० पा० ।

णाय प्रदातव्या मंत्रेणानेन कौरव[1] ॥ इयं दासी मया तुभ्यं भगवन्प्रतिपादिता ॥ १८ ॥ कर्मोपयोज्या भोज्या वा यथेष्टं भद्रमस्तु[2] ते ॥ दत्त्वा क्षमापयेत्पश्चाद्ब्राह्मणं कांचनेन तम् ॥१९॥ अनुव्रज्य गृहद्वारं यावत्पश्चाद्विसर्जयेत् ॥ अनेन विधिना दद्यादंकयित्वा सुरालये॥२०॥ मखे चापि महाराज प्रसिद्धे वा प्रतिश्रये ॥ सर्वकर्मकरीं दत्त्वा तरुणीं रूपशालिनीम् ॥२१॥ प्राप्यते यत्फलं पुंभिः पार्थ तत्केन वर्ण्यते ॥ २२ ॥ दासीं समीक्ष्य बहुशो गृहकर्मदक्षां यो ब्रह्मणाय कुलशीलवते ददाति ॥ विद्याधराधिपशतैरपि पूजितोऽसौ लोकं त्रिलोकरमयाप्सरसां प्रयाति ॥ २३ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे दासीदानविधिवर्णनं नामैकसप्तत्युत्तरशततमोऽध्यायः ॥ १७१ ॥ छ॥

॥ युधिष्ठिर उवाच ॥ ॥ प्रपादानस्य माहात्म्यं वद देवकिनंदन ॥ कथं देया कदा देया दाने तस्याश्च[3] किं फलम् ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अतीते फाल्गुने मासि प्राप्ते चैत्रे महोत्सवे ॥ पुण्येऽह्नि विप्रकथिते ग्रहचंद्रबलान्विते ॥ २ ॥ मंडपं कारयेद्विद्वान्घनच्छायं मनोरमम् ॥ पुरस्य मध्ये पथि वा कांतारे तोयवर्जिते ॥ ३ ॥ देवतायतने वापि चैत्यवृक्षतलेऽपि[4] वा ॥ सुशीतलं च रम्यं च विचित्रासनसंयुतम् ॥ ४ ॥ कारयेन्मंडपं भव्यं शीतवातसहं[5] दृढम् ॥ तन्मध्ये स्थापयेद्भक्त्या मणीन्कुंभांश्च शोभनान् ॥ ५ ॥ अकालमूलान्करकान्वस्त्रैरावेष्टितानथ ॥ ब्राह्मणः शीलसंपन्नो वृत्तिं[6] दत्त्वा यथोचिताम् ॥ ६ ॥ प्रपापालः प्रकर्तव्यो[7] बहुपुत्रपरिच्छदः ॥ पानीयपानेनाश्रांतान्यः कारयति मानवान् ॥७॥ एवंविधां प्रपां कृत्वा शुभेऽह्नि विधिपूर्वकम् ॥ यथा शक्त्या नरश्रेष्ठ प्रारंभे भोजयेद्द्विजान् ॥ ८ ॥ ततश्चोत्सर्जयेद्विप्रान्मंत्रेणानेन मानवः ॥ प्रपेयं सर्वसामान्या भूतेभ्यः प्रतिपादिता[8] ॥ ९ ॥ अस्याः प्रदानात्पितरस्तृप्यंतु च पितामहाः ॥ अनिवार्यं ततो देयं जलं मासचतुष्टयम् ॥ १० ॥ त्रिपक्षं वा महाराज जीवानां[10] जीवनं परम् ॥ गंधाढ्यं सुरसं शीतं शोभने भाजने स्थितम् ॥ ११ ॥ प्रदद्यादप्रतिहतं मुखं चानवलोकयन्[11] ॥ प्रत्यहं कारयेत्तस्यां शक्तितो द्विजभोजनम् ॥ १२ ॥ अनेन विधिना यस्तु ग्रीष्मोष्मशोषनाशनम् ॥ पानीयमुत्तमं दद्यात्तस्य पुण्यफलं शृणु ॥ १३ ॥ सर्वतीर्थेषु यत्पुण्यं सर्वदानेषु यत्फलम् ॥ तत्पुण्यफलमाप्नोति सर्वदेवैः सुपूजितः ॥ १४ ॥ पूर्णचंद्रप्रतीकाशं[12] विमानं सोधिरुह्य च ॥ याति देवेन्द्रनगरे पूज्यमानोऽप्सरोगणैः ॥ १५ ॥ विंशत्कोटचो हि वर्षाणां यक्षगन्धर्वसेवितः ॥ पुण्यक्षयादिहागत्य चतुर्वेदी द्विजो भवेत् ॥ १६ ॥ ततः परं

---

१ गौरिव—इ० पा० । २ अश्नुते—इ० पा० । ३ :कस्याः—इ० पा० । ४ अथ वा—इ, तथा—इ० पा० । ५ शीतवातमहम्—इति पाठे शीतवाताभ्यां मह उत्सवो यस्मिंस्तमित्यर्थः । ६ भृतिम्—इ० पा० । ७ तु कर्तव्यः—इ० पा० । ८ प्रतिपादये—इ०, प्रतिपादयेत्—इ० च पा० । ९ प्रतिपादयेत्—इ० पा० । १० जीविनाम्—इ० पा० । ११ वा न विलोकयेत्—इ० पा० । १२ स्वर्णकुंभप्रतीकाशम्—इ०पा० ।

पदं याति पुनरावृत्तिदुर्लभम् ॥ प्रपादानासमर्थेन विशेषाद्धर्ममीप्सता ॥ १७ ॥ प्रत्यहं धर्मघटकः कर्पटावेष्टिताननः ॥ ब्राह्मणस्य गृहे नेयः शीतामलजलः शुचिः ॥ १८ ॥ तस्यैवोद्यापनं कार्यं मासिमासि नरोत्तम ॥ मंडकावेष्टिकाभिश्च पक्वान्नैः सार्वकामिकैः ॥ १९ ॥ उद्दिश्य शंकरं विष्णुं ब्रह्माणं कुरुनन्दन ॥ सलिलं प्रोक्षयित्वा तु मंत्रेणानेन मानवः ॥ २० ॥ एष धर्मघटो[1] दत्तो ब्रह्मविष्णुशिवात्मकः ॥ अस्य प्रदानात्सफला मम संतु मनोरथाः ॥ २१ ॥ (इति धर्मघटदानमंत्रः) अनेन विधिना यस्तु धर्मकुंभं प्रयच्छति ॥ प्रपादानफलं सोऽपि प्राप्नोतीह न संशयः ॥ २२ ॥ धर्मकुंभप्रदानेऽपि यद्यशक्तः पुमान्भवेत् ॥ तेनाश्वत्थतरोर्मूलं सेच्यं नित्यं[2] जितात्मना ॥ २३ ॥ अश्वत्थरूपी भगवान्प्रीयतां मे जनार्दनः ॥ इत्युच्चार्य नमस्कृत्य प्रत्यहं पापनाशनम् ॥२४॥ यः करोति तरोर्मूले सेकं मासचतुष्टयम् ॥ सोपि तत्फलमाप्नोति श्रुतिरेषा सनातनी ॥२५॥ सुस्वादुशीतसलिला क्लमनाशिनी च प्रांते पुरस्य पथि पांथसमाजभूमौ ॥ यस्य प्रपा भवति सर्वजनोपभोग्या धर्मोत्तरः स खलु जीवति जीवलोके ॥२६॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे प्रपादानविधिवर्णनं नाम द्विसप्तत्युत्तरशततमोऽध्यायः॥ ॥१७२॥ युधिष्ठिर उवाच ॥ ॥ अग्नीष्टिका कथं देया शिशिरे शीतभीरुभिः ॥ सर्वसत्त्वोपकाराय करुणीकृतमानसैः॥१॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अग्नीष्टिकामहं पार्थ कथयामि निबोध ताम् ॥ यथा येन विधानेन सर्वसत्वसुखप्रदाम् ॥ २ ॥ आदौ मार्गशिरे मासि शोभने दिवसे शुभाम् ॥ अग्नीष्टिकां कारयित्वा[3] सुखासनवतीं शुभाम्[4] ॥ ३ ॥ देवांगणे पथे गेहे विस्तीर्णे चत्वरेथ वा ॥ उभयोः संध्ययोः कृत्वा संशुष्कं काष्ठसंचयम् ॥ ४ ॥ ततः प्रज्वालयेदग्निं हुत्वा व्याहृतिभिः क्रमात् ॥ अनेन विधिना हुत्वा प्रत्यहं ज्वालयेत्ततः ॥ ५ ॥ यदि कश्चित्क्षुधार्थी स्याद्भोज्यं तस्मै[5] प्रकल्पयेत् ॥ सुखासीनो जनस्तत्र विशीतो विज्वरस्तथा ॥ ६ ॥ यः करोति कथाः पार्थ न ताः शक्या मयोदितुम् ॥ राजवार्ता जनवार्ता यदिकश्चिन्निजेच्छया ॥ ७ ॥ वदेल्लोकः सुखासीनो न केनापि निवार्यते ॥ अनेन विधिना यस्तु दद्यादग्नीष्टिकां नरः ॥ ८ ॥ तस्य पुण्यफलं राजन्कथ्यमानं निबोध मे ॥ विमाने चार्कसंकाशे समारूढो महाधने ॥ ९ ॥ षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च ॥ हर्षितोऽत्यंतसुखितो ब्रह्मलोके महीयते ॥ १० ॥ इह लोकेवतीर्णश्च चतुर्वेदो द्विजो भवेत् ॥ नीरुजः सत्रयाजी च अग्निवत्तेजसान्वितः ॥ ११ ॥ चैत्येसुरांगणसभावसथे

---

[1] ब्रह्मघटः-इ० पा० । [2] मासचतुष्टयम्-इ० पा० । [3] कारयेत्तु-इ० पा० । [4] ददाम्-इ० पा० । [5] तस्य-इ० पा० ।

सुभव्यां येऽग्नीष्टिकां प्रचुरकाष्टवतीं प्रदद्युः ॥ हेमंतशैशिरऋतौ सुखदा जनानां कायाग्निदीपनमलं पुनराप्नुवंति ॥ १२ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे अग्नीष्टिकादानविधिवर्णनं नाम त्रिसप्तत्युत्तरशततमोऽध्यायः ॥१७३॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ बहुप्रदानं गोदानं त्वत्तो विद्वञ्छ्रुतं मया ॥ भूमिदानस्य माहात्म्यं विधिश्चैवावधारितः ॥ १ ॥ सांप्रतं यदुशार्दूल विद्यादानस्य यो विधिः ॥ तमहं श्रोतुमिच्छामि कथयस्व जनार्दन ॥ २ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ विद्यादानविधिं वक्ष्ये याथातथ्येन तेऽधुना ॥ यथादेयं फलं यच्च दत्तेन कुरुनंदन ॥ ३ ॥ शुभेऽह्नि विप्रकथिते गोमयेन सुशोभनम् ॥ कारयेन्मंडलं[1] दिव्यं चतुरस्रं समंततः ॥ ४ ॥ पुष्पप्रकरसंछन्नं स्वस्तिकादिविभूषितम् ॥ पुस्तकं तत्र संस्थाप्य गंधपुष्पैः समर्च्चयेत् ॥ ५ ॥ सौवर्णी लेखनी कार्या रौप्यं च मषिभाजनम् ॥ लेखकं पूजयित्वा तु आरंभं[2] कारयेत्सुधीः ॥ ६ ॥ विनीतश्चाप्रमत्तश्च ततः प्रभृति लेखकः ॥ मात्रानुस्वारसंयुक्तं पदच्छेद[3]समन्वितम् ॥ ७ ॥ समानि समशीर्षाणि वर्तुलानि घनानि च ॥ लेखयेदक्षराणीह तद्गतेनांतरात्मना ॥ ८ ॥ निष्पादयित्वा तच्छास्त्रं शैवं वाप्यथ वैष्णवम् ॥ निष्पादिते ततः पूज्यो लेखको वस्त्रभूषणैः ॥ ९ ॥ संपूजयित्वा तच्छास्त्रं देयं गुणवते तदा[4] ॥ शास्त्रसद्भावविदुषे वाचके च प्रियंवदे ॥ १० ॥ वस्त्रयुग्मेन संवीतं पुस्तकं प्रतिपादयेत् ॥ सामन्यं सर्वलोकानां स्थापयेदथ वा मठे ॥ ११ ॥ अनेन विधिना दत्त्वा यत्फलं प्राप्नुयान्नरः ॥ तदहं ते प्रवक्ष्यामि युधिष्ठिर निबोध तत् ॥ १२ ॥ यत्पुण्यं तीर्थयात्रायां यत्पुण्यं यज्वनां[5] तथा ॥ तत्पुण्यं कोटिगुणितं विद्यादानाल्लभेन्नरः ॥ १३ ॥ कपिलानां सहस्रेण सम्यग्दत्तेन यत्फलम् ॥ तत्फलं समवाप्नोति पुस्तकस्य[6] प्रदायकः ॥ १४ ॥ पुराणं भारतं वापि रामायणमथापि वा ॥ दत्त्वा यत्फलमाप्नोति पार्थ तत्केन वर्ण्यते ॥ १५ ॥ प्रातरुत्थाय यः शिष्यानध्यापयति यत्नतः[7] ॥ वेदं शास्त्रं नृत्यगीतं कस्तेन सदृशः कृती ॥ १६ ॥ उपाध्यायस्य यो वृत्तिं दत्त्वाऽध्यापयते जनः ॥ किं न दत्तं भवेत्तेन धर्मकामार्थदर्शिना ॥ १७ ॥ छात्राणां भोजनाभ्यंगं वस्त्रं भिक्षामथापि वा ॥ दत्त्वा प्राप्नोति पुरुषः[8] सर्वकामान्न संशयः ॥ १८ ॥ विवेको जीवितं दीर्घं धर्मकामार्थसंपदः ॥ सर्वं तेन भवेद्दत्तं छात्राणां पोषणे कृते ॥ १९ ॥ शास्त्रं शस्त्रकलाशिल्पं यो यदिच्छेदुपार्जितुम् ॥ तस्योपकारकरणे पार्थ कार्यं सदा मनः ॥ २० ॥ वाजपेयसहस्रस्य सम्यगिष्टस्य यत्फलम् ॥ तत्फलं

---

[1] मण्डपम्–इ० पा० । [2] विप्रमाकारयेत् इ० पा० । [3] पदबन्धसमन्वितम्–इ० पा० । [4] सदा–इ० पा० । [5] यज्ञयाजिनाम्–इ० पा० । [6] पुस्तकैकप्रदायकः–इ० पा० । [7] पंक्तितः–इ० पा० । [8] जनम्–इ० पा० ।

समवाप्नोति विद्यादानान्न संशयः ॥ २१ ॥ शिवालये विष्णुगृहे सूर्यस्य भवनेऽथ वा ॥ यः कारयति धर्मात्मा सदा पुस्तकवाचनम् ॥ २२ ॥
गोभूहिरण्यवासांसि शयनान्यासनानि च ॥ प्रत्यहं तेन दत्तानि भवंति भर[1]तर्षभ ॥ २३ ॥ धर्माधर्मं न जानाति विद्य[2]या रहितः पुमान् ॥
तस्मात्सदैव धर्मात्मा विद्यादानरतो भवेत् ॥ २४ ॥ त्रैलोक्यं चतुरो वर्णाश्चत्वारश्चाश्रमाः पृथक् ॥ ब्रह्माद्या देवताः सर्वा विद्यादाने प्रति
ष्ठिताः ॥ २५ ॥ चतुर्युगानि राजेंद्र एकसप्ततिसंख्यया ॥ कल्पं विष्णुपुरे तिष्ठेत्पूज्यमानः सुरोत्तमैः ॥ २६ ॥ क्षितिं वोपे[4]त्य कालांते
राजा भवति धार्मिकः ॥ हस्त्यश्वरथदानाढ्यो दाता भोक्ता विमत्सरी ॥ २७ ॥ रूपसौभाग्यसंपन्नो दीर्घायुर्नीरुजो भवेत् ॥ पुत्रैः पौत्रैः
परिवृतो जीवेच्च शरदां शतम् ॥ २८ ॥ दानं विशेषफलदं जग[6]तीह नान्याद्विद्यां विहाय वदनाब्जकृताधिवासाम् ॥ [7]गोभूहिरण्यगज
वाजिरथादिसर्वं तां यच्छतां किमिह पार्थ भवेन्न दत्तम् ॥ २९ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे
विद्यादानविधिवर्णनं नाम चतुःसप्तत्युत्तरशततमोऽध्यायः ॥ १७४ ॥ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ पुरा प्रियव्रतो राजा पुत्रः
स्वायंभुवस्य तु ॥ पालयामास वसुधां प्रजापतिरिवापरः ॥ १ ॥ त्रिंशद्वर्षसहस्राणि पालयित्वा महीमिमाम् ॥ सप्तद्वीपान्विभज्यासौ पुत्रेभ्यः
प्रददौ विभुः ॥ २ ॥ राज्ये निक्षिप्य तनयान्सप्तद्वीपेषु सप्त सः ॥ विषयानुपसंहृत्य जगाम तपसे वनम् ॥ ३ ॥ तपोवनगतं श्रुत्वा राजानं
परमद्युतिम् ॥ समाजग्मुर्महात्मान ऋषयस्तं दि[8]दृक्षवः ॥ ४ ॥ तानागतानृषीन्दृष्ट्वा तपोनिर्धूतकल्मषान् ॥ पूजयामास मेधावी विधिदृष्टेन
कर्मणा ॥ ५ ॥ पाद्यार्घ्याचमनीयेन प्रियप्रश्नोत्तरेण च ॥ अथ तेषूपविष्टेषु ब्राह्मणेषु महात्मसु ॥ ६ ॥ आजगाम महातेजाः पुलस्त्यो
ब्रह्मणः सुतः ॥ दीप्यमानो महातेजा द्वितीय इव भ[9]स्करः ॥ ७ ॥ तं दृष्ट्वा मुनयः सर्वे स च राजा महारथः ॥ उत्तस्थुर्विस्मिताः सर्वे प्रोत्फुल्लन
यनास्ततः ॥ ८ ॥ कृत्वा तु संविदं तेन यथायोग्यं विधानतः ॥ विष्टरं च ददुस्तस्मै पाद्यार्घ्याचमनादिकम् ॥ ९ ॥ ततस्तु मुनयः सर्वे समा
सीना यथासुखम् ॥ चक्रुः कथा मुदायुक्ता वेदोक्तविविधाश्रयाः ॥ १० ॥ ततः कथांते कस्मिंश्चिन्मुनयस्ते सराजकाः ॥ पप्रच्छुर्ब्रह्मतनयं लोकानां
हितकाम्यया ॥ ११ ॥ ॥ ऋषय ऊचुः ॥ ॥ भगवन्केन दानेन व्रतेन नियमेन वा ॥ प्राप्यते सद्गतिः पुंभिः स्त्रीभिश्च मुनिसत्तम ॥ १२ ॥

---

[1] पुरुषर्षभ--इ० पा० । [2] विद्याविरहितः--इ० पा० । [3] सुरैर्नरैः--इ० पा० । [4] वाऽऽगत्य--इ० पा० । [5] शरदः--इ० पा० । [6] भवांते--इ० पा० । [7] गोभूहिरण्यतिलवस्त्रगजाश्वमध्ये विद्याप्रदां किमिह पार्थ भवेन्न वेद--इ० पा० । [8] तद्दिदृक्षया--इ० पा० । [9] पावकः--इ० पा० ।

इच्छामः श्रोतुमेतत्ते राजा चायं यतव्रतः ॥ ॥ पुलस्त्य उवाच ॥ ॥ शृणुध्वं मुनयः सर्वे रहस्यं पापनाशनम् ॥ १३ ॥ उत्तमं सर्व
दानानां संमवायं[1] वदामि वः ॥ यद्दत्त्वा ब्रह्महा गोघ्नः पितृघ्नो गुरुतल्पगः ॥ १४ ॥ कृतघ्नः कूटसाक्षी च मुच्यते पातकान्नरः ॥ सद्यो दिव्य
तनुश्चैव जायते स्त्री तथैव च ॥ १५ ॥ कृच्छ्रचांद्रायणाद्यैश्च तुलापुरुषसंज्ञितैः ॥ व्रतैश्च पाचयेद्देहमाकांक्षन्ब्रह्मणः[2] पदम् ॥ १६ ॥ कृच्छ्रचांद्रा
यणादीनि व्रतानि मुनिसत्तमाः ॥ ब्राह्मणानां वनस्थानां भिक्षो रंडाजनस्य च ॥ १७ ॥ कायक्लेशेन सिध्यंति गृहस्थेषु न तानि वै ॥ महाध
नाश्च ये लोका राजानो[3] रत्नभागिनः ॥ १८ ॥ न तेषां कृच्छ्रसाध्योऽपि क्वचिद्धर्मः प्रशस्यते ॥ यदेतद्द्रविणं नाम प्राणाश्चैते बहिश्चराः ॥ १९ ॥
तस्माद्बहिश्चरैः प्राणैरात्मा[4] योज्यः सदा बुधैः ॥ द्रव्याणामुत्तमं लोके कांचनं सार्वकामिकम् ॥ २० ॥ अपत्यं सुरमुख्यस्य ज्येष्ठं चैवं[5] विभा
वसोः ॥ तेन सार्द्धं य आत्मानं तोलयेत्प्रयतो बुधैः ॥ २१ ॥ विधूय सर्वपापानि सद्यो दिव्यतनुर्भवेत् ॥ एतत्पुलस्त्यमुनिना ऋषीणां पार्थि
वस्व च ॥ २२ ॥ समाख्यातं नृपश्रेष्ठ तेभ्यश्च तन्मया श्रुतम् ॥ ॥ युधिष्ठिर उवाच ॥ ॥ तुलापुरुषदानस्य विधानं परमेश्वर[6] ॥ २३ ॥:कथ
यस्व महाभाग मम भक्त्यानुकंपया[7] ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ शृणुष्वावहितो राजन्विधानं गदतो मम ॥ २४ ॥ तुलापुरुषसंज्ञस्य[8] दान
स्येह नृपोत्तम ॥ व्यतीपातेऽयने चैव कार्तिक्यां विषुवे तथा ॥ २५ ॥ चन्द्रसूर्यग्रहे यद्वा[9] माघ्यां वा नृपसत्तम ॥ जन्मर्क्षे ग्रहपीडासु तथा दुःस्व
प्रदर्शने ॥ २६ ॥ यदा वा जायते वित्तं तदा देयमिदं भवेत् ॥ अनित्यं जीवितं यस्माद्वपुश्चातीवचञ्चलम् ॥ २७ ॥ केशेषु च गृहीतः सन्मृत्युना
धर्ममाचरेत् ॥ तस्माद्यदैव जायेत श्रद्धा दानं प्रति प्रभो ॥ २८ ॥ तदैव दानकालः स्यात्कारणं हि यतो मम ॥ तीर्थे वायतने गोष्ठेष्वथ[10] वा भव
नांगणे ॥ मण्डपं कारयेद्विद्वांश्चतुर्भद्रानेनं[11] बुधः ॥ २९ ॥ आर्द्रशाखान्वितं दिव्यं प्रागुदक्प्रवणं दृढम् ॥ षोडशारत्निमात्रं च पताकाभिरलंकृ
तम् ॥ ३० ॥ तन्मध्ये कारयेद्वेदिं हस्तमात्रोच्छ्रितां[12] शुभाम् ॥ चतुरस्रां समंताच्च सप्तहस्तां सुशोभनाम् ॥ ३१ ॥ तस्या मध्ये तुलां दिव्यां स्थाप
येद्विधिपूर्वकम् ॥ हस्तद्वयं च निखनेच्चतुर्हस्तोच्छ्रितां बुधः ॥३२॥ स्तंभद्वयं महाराज स्थापयेत्सुदृढं नवम् ॥ चंदनः खदिरो बिल्वः शाकश्चैवेंगुद
स्तथा ॥३३॥ तिंदुको देवदारुश्च श्रीपर्णश्चाष्टमः स्मृतः ॥३४॥ इत्यष्टौ वृक्षजातीयाः स्तंभास्ते परिकीर्तिताः ॥ अन्यश्चापि भवेद्वृक्षः सारज्ञो याज्ञिक

---

[1] संविधानम्–इ० पा० । [2] यापयेत्–इ० पा० । [3] यजमानोऽपि रत्नभाक्–इ० पा० । [4] आत्मा शोध्यः सदा बुधैः–इ०, मना योज्यं सदा बुधैःइ० च पा० । [5] तनु–इ०, तद्धि–इ० पा० । [6] पुरुषोत्तम–इ० पा० । [7] भक्त्या–इ० पा० । [8] तुलापुरुषदानस्य उत्तमस्य–इ० पा० । [9] वाथ–इ० पा० । [10] घोषेषु–इ० पा० । [11] चतुर्भद्रासनम्–इ० पा० । [12] हस्तमात्रोच्छ्र्याम्–इ० पा० ।

स्तथा ॥३५॥ सुनिश्चलं ततः कृत्वा तिर्यक्काष्ठमथोपरि ॥ न्यसेत्तद्वृक्षजातीयं चतुर्हस्तं प्रमाणतः ॥३६॥ समानजातिं तु तुलां तन्मध्ये योजयेद्दृढम् ॥
षण्णवत्यंगुला दिव्या समग्रा लोहपाशिका ॥ ३७ ॥ कृष्णलोहमयौ तस्यां[1] कर्णौ चापि प्रकल्पयेत् ॥ तुलापुरुषसंज्ञस्तु मध्ये कार्यः पुमान्भ
वेत् ॥ ३८ ॥ एवंविधां तुलां कृत्वा नानारत्नैर्विभूषिताम् ॥ चंदनेनानुलिप्तांगीं वस्त्रालंकारविग्रहाम् ॥ ३९ ॥ स्तंभौ च वस्त्रसंयुक्तौ पुष्पमालाव
लंबिनौ ॥ चंदनेनानुलिप्तांगौ नानारत्नैरलंकृतौ ॥ ४० ॥ कुण्डानि चात्र चत्वारि योनियुक्तानि कारयेत् ॥ हस्तमात्रप्रमाणानि मेखलात्रयवंति
च ॥ ४१ ॥ पूर्वोत्तरे हस्तमिता[2] वेदिः कार्या सुशोभना ॥ लोकपालग्रहाणां च पूजा तत्र विधीयते ॥ ४२ ॥ अर्चार्चनं[3] च तत्रैव विरिंच्यच्युतयो
र्नृप ॥ शंकरस्य भवेत्कार्यं माल्यवस्त्रफलाक्षतैः ॥ ४३ ॥ तोरणानि च कार्याणि[4] क्षीरवृक्षोद्भवानि च ॥ चतुर्द्वारेषु संस्थाप्याः कुम्भाः स्रक्पल्ल
वाननाः ॥ ४४ ॥ पंचरत्नसमायुक्ताः सप्तधान्योपरिस्थिताः ॥ ऋग्वेदपाठकौ द्वौ च पूर्वकुण्डे नियोजयेत् ॥ ४५ ॥ यजुर्वेदविदौ याम्ये पश्चिमे
सामवेदिनौ ॥ अथर्वणावुत्तरतो नवमो धर्मदेशकः ॥४६॥ अत्रैव केचिदिच्छंति ऋषयः षोडशर्त्विजः ॥ ताम्रपात्रद्वयं देयमेकैकस्मै तथासनम् ॥
॥४७॥ होमद्रव्याणि सर्वाणि तिलाज्यं समिधस्तथा ॥ स्रुवाः स्रुचश्च शस्त्राणि विष्टरः कुसुमानि च ॥४८॥ लोकपालाः सुवर्णास्तु पताकाःपरितः
शुभाः ॥ महाध्वजं च बध्नीयात्पंचवर्णं वितानकम् ॥ ४९ ॥ एतत्सर्वं समाहृत्य पुण्येऽहनि विचक्षणः ॥ वर्द्धकिर्ब्राह्मणैः सार्द्धं सर्वशिल्पविशा
रदः ॥ ५० ॥ संपूर्णं यजमानाय दर्शयेद्यज्ञमंडपम्[5] ॥ यजमानस्ततः प्राज्ञः शुक्लांबरधरः शुचिः ॥ ५१ ॥ शंखतूर्यनिनादेन वेदध्वनिरवेण च ॥
प्रक्षिपेल्लोकपालानामेभिर्मंत्रैः शुभैर्बलिम् ॥ ५२ ॥ एह्येहि सर्वामरसिद्धसाध्यैरभिष्टुतो वज्रधरामरेश[6] ॥ संवीज्यमानोप्सरसां गणेन रक्षाध्वरं नो
भगवन्नमस्ते ॥ ५३ ॥ (ॐ इन्द्राय नमः) ॥ एह्येहि सर्वामरहव्यवाह मुनिप्रवीरैरभिहृष्टमानसः ॥ तेजोवता लोकगणेन सार्द्धं ममाध्वरं रक्ष कवे
नमस्ते ॥५४॥ (ॐ अग्नये नमः ॥) एह्येहि वैवस्वतधर्मराज सर्वामरैरर्चितदिव्यमूर्ते ॥ शुभाशुभानंदकृतामधीशरक्षाध्वरं मे भगवन्नमस्ते ॥५५॥
(ॐ यमाय नमः) ॥ एह्येहि रक्षोगणनायकस्त्वं विशालवेतालपिशाचसंघैः ॥ ममाध्वरं पाहि पिशाचनाथ लोकेश्वरस्त्वं भगवन्नमस्ते ॥ ५६ ॥
(ॐ निर्ऋतये नमः ॥) एह्येहि यादोगणवारिधीनां गणेन पर्जन्यसहाप्सरोभिः[7] ॥ विद्याधरेन्द्रामरगीयमान पाहि त्वमस्मान्भगवन्नमस्ते ॥ ५७ ॥

---

[1] दिव्यौ॰इ॰ पा॰ । [2] हस्तमात्रा–इ॰ पुस्तकद्वये पा॰ । [3] अर्घार्चनम्–इ॰ पा॰ । [4] दिव्यानि–इ॰ पा॰ । [5] यज्ञमण्डलम्–इ॰ पा॰ । [6] अप्रमेय–इ॰ पा॰ । [7] सदाप्सरोभिः–इ॰ पा॰ ।

(ॐ वरुणाय नमः ॥ एह्येहि यज्ञे मम रक्षणाय मृगाधिरूढः सह सिद्धसंघैः ॥ प्राणाधिपः कालकवेः[1] सहायो गृहाण पूजां भगवन्नमस्ते ॥ ५८ ॥
(ॐ वायवेय नमः) एह्येहि[2] यज्ञेश्वर यज्ञरक्षां विधत्स्व नक्षत्रगणेन सार्द्धम् ॥ सर्वौषधीभिः पितृभिः सहैव गृहाण पूजां भगवन्नमस्ते ॥ ५९ ॥
(ॐ सोमाय नमः ॥) एह्येहि विश्वेश्वर विश्वमूर्ते त्रिशूलखट्वाङ्गधरेण सार्द्धम् ॥ लोकेन भूतेश्वर यज्ञसिद्ध्यै गृहाण पूजां भगवन्नमस्ते ॥ ६० ॥
(ईशानाय नमः ॥) एह्येहि पातालधराधरेन्द्र नागांगनाकिन्नरगीयमान ॥ यक्षोरगेन्द्रामरलोकसंघैरनंत[3] रक्षाध्वरमस्मदीयम् ॥६१॥ (ॐ अनं
ताय नमः) एह्येहि विश्वाधिपते मुनींद्र लोकेश[4] सार्द्धं पितृदेवताभिः ॥ विशाध्वरांतः सततं शिवाय पितामहस्त्वं सततं नमस्ते ॥ ६२ ॥
(ॐ ब्रह्मणे नमः) त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च ॥ ब्रह्मविष्णुशिवैः सार्द्धं रक्षां कुर्वंतु तानि मे ॥ ६३ ॥ देवदानवगन्धर्वा यक्ष
राक्षसपन्नगाः ॥ ऋषयो मनवो गावो देवमातर एव च ॥६४॥ सर्वे ममान्वरे[5] रक्षां प्रकुर्वंतु मुदान्विताः ॥ इत्यावाह्य सुरान्दद्याद्दत्विग्भ्यः कण्ठ
भूषणम् ॥ ६५ ॥ कुंडलानि च हैमानि सूत्राणि कटकानि च ॥ तथांगुलिपवित्राणि वासांसि कुसुमानि च ॥ ६६ ॥ द्विगुणं गुरवे दद्याद्भूषणा
च्छादनादिकम् ॥ आघारावाज्यभागौ तु पूर्वं हुत्वा विचक्षणः ॥ ६७ ॥ प्रणवादिस्वनाम्ना च स्वाहांतो होम उच्यते ॥ होमः सुराणां कर्तव्यो ये
चैवात्र प्रतिष्ठिताः ॥ ६८ ॥ ग्रहाणां लोकपालानां शिवकेशवयोस्तथा ॥ वनस्पतिभ्यो ब्रह्मणे होमः कार्यो यथेच्छया ॥ ६९ ॥ ततो मंगलश
ब्देन स्थापितो वेदमंगलैः[7] ॥ त्रिःप्रदक्षिणमावृत्य गृहीतकुसुमांजलिः ॥ ७० ॥ शुक्लमाल्यांबरो[8] भूत्वा तां तुलामभिमंत्रयेत् ॥ नमस्ते सर्वदेवानां
शक्तिस्त्वं सत्यं[9]मास्थिता ॥ ७१ ॥ साक्षिभूता जगद्धात्रि निर्मिता विश्वयोनिना ॥ एकतः सर्वसत्यानि[10] तथानृतशतानि च ॥ ७२ ॥ धर्माधर्मभृतां[11]
मध्ये स्थापितासि जगद्धिते ॥ त्वं तुले सर्वभूतानां[12] प्रमाणमिह कीर्तिता ॥ ७३ ॥ मां तोलयंती संसारादुद्धरात्र नमोस्तुते ॥ योऽसौ तत्त्वा
धिपो देवः पुरुषः पंचविंशकः ॥ ७४ ॥ स एकोऽधिष्ठितो देवि त्वयि तस्मान्नमो नमः ॥ नमो नमस्ते गोविंद तुलापुरुषसंज्ञक ॥ ७५ ॥
त्वं हरे तारयस्वास्मानस्मात्संसारसागरात्[13] ॥ पुण्यकालमथासाद्य कृत्वैवमधिवासनम् ॥ ७६ ॥ प्रणम्य परया भक्त्या तां तुलामारुहेद्बुधः ॥

---

[1] कालविधेः सहायः—इ० पा० । [2] एह्येहि यज्ञेश्वर शूलपाणे ईशान चापासिधर प्रवीर ॥ वृषाधिरूढः सगणः सहायो ममाध्वरं पाहि नमोनमस्ते—इ० पा० । अत्रापि 'यज्ञेश्वर' इत्यस्य स्थाने पुस्तकांतरे 'सर्वेश्वर' इति पाठ उपलभ्यते । [3] रक्षोनगेंद्रामरलोकसार्द्धम्—इ० पा० । [4] लोकेन—इ० पा० । [5] सर्वे मरवाश्च मे—इ० पा० । [6] द्विजोत्तमः—इ० पा० । [7] दैवमंगलैः—इ०, वेदपुंगवैः—इ० च पा० । [8] शुक्लमाल्यधरो भूत्वा—इ० पा० । [9] सर्वम्—इ० पा० । [10] सर्वसत्त्वानि—इ० पा० । [11] धर्माधर्मकृताम्—इ० पा० । [12] सर्वदेवानाम्—इ० पा० । [13] संसारकर्दमात्—इ० पा० ।

स सङ्गचर्मकवची सर्वाभरणभूषितः ॥ ७७ ॥ धर्मराजमथादाय[1] हैमसूर्येण संयुतम् ॥ कराभ्यां बद्धमुष्टिभ्यामास्ते पश्यन्हरेर्मुखम् ॥ ७८ ॥ वामे यमं तथा गृह्य दक्षिणे च रविं तथा ॥ ततोऽपरे तुलाभागे न्यसेयुर्द्विजपुंगवाः ॥ साम्यादभ्यधिकं यावत्कांचनं चातिनिर्मलम् ॥ ७९ ॥ पुष्टिकामस्तु कुर्वीत भूमिसंस्थं नरेश्वर ॥ क्षणमात्रं ततः स्थित्वा पुनरेतदुदीरयेत् ॥ ८० ॥ नमस्ते सर्वभूतानां साक्षिभूते सनातने ॥ पितामहेन देवि त्वं निर्मिता परमेष्ठिना ॥ ८१ ॥ त्वयोद्धृतं[2] जगत्सर्वं सहस्थावरजंगमम् ॥ सर्वभूतात्मभूतस्थे नमस्ते विश्वधारिणि ॥ ८२ ॥ ततोऽवतीर्य गुरवे सर्वमर्द्धं निवेदयेत् ॥ ऋत्विग्भ्योऽपरमर्द्धं च दद्यादुदकपूर्वकम् ॥ ८३ ॥ प्राप्य तेषामनुज्ञां वा तथान्येभ्योऽपि दापयेत् ॥ दीनानाथविशिष्टादीन्पूजयेद्ब्राह्मणैः सह ॥ ८४ ॥ न चिरं धारयेद्गेहे हेमसंप्रोक्षितं[3] बुधः ॥ तिष्ठद्भयावहं यस्मात्कष्टं[4]व्याधिकरं भवेत् ॥ ८५ ॥ शीघ्रं परस्वीकरणाच्छ्रियं प्राप्नोत्यनुत्तमाम् ॥ अनेनैव विधानेन केचिद्रौप्यमयं तथा ॥ ८६ ॥ कर्पूरेण तथेच्छंति केचिद्ब्राह्मणपुंगवाः तथासिततृतीयायां नार्यः सौभाग्यं[5]वर्धिताः ॥ ८७ ॥ कुंकुमेन प्रयच्छंति लवणेन गुडेन च ॥ तत्र मंत्रा न होमो वा एवमेव प्रदापयेत् ॥ ८८ ॥ विधिनानेन यो दद्याद्दानमेतत्समाहितः ॥ तस्य पुण्यफलं राजञ्छृणुष्व गदतो मम ॥ ८९ ॥ विमानवरमास्थाय नारी वा पुरुषोऽपि वा ॥ अप्सरोगणसंकीर्णं गंधर्वनगरोपमम् ॥ ९० ॥ नानावृक्षाकुलं रम्यं नानागंधाधिवासितम् ॥ अनेकरत्नविद्धांगं मुक्तादामावलंबितम् ॥ ९१ ॥ शयनासनसंकीर्णं पताकाभिरलंकृतम् ॥ घंटाशतरवोद्घुष्टं चामरव्यजनान्वितम् ॥ ९२ ॥ सर्वर्तु[7]सुखदं रम्यं सर्वदुःखविवर्जितम् ॥ इत्थं विमानमारुह्य गच्छेत्सूर्यसलोकताम् ॥ ९३ ॥ रमित्वा तत्र राजेंद्र कल्पमेकं निरामयः[9] ॥ विष्णुलोके तथा कल्पं शिवलोके[10] तथैव च ॥ ९४ ॥ विश्वेषां चैव देवानां देवराज पुरे तथा ॥ पुरे चै[11] धर्मराजस्य वरुणस्य तथैव च ॥ ९५ ॥ धनदस्य पुरे स्थित्वा कल्पकोटिशतं नरः ॥ पुनर्मानुषमभ्येत्य[12] राजा भवति धार्मिकः ॥ ९६ ॥ यज्वा[13]दानपतिर्धीमाञ्छत्रुपक्षक्षयंकरः ॥ यश्चैतच्छृणुयाद्भक्त्या महादानानुकीर्तनम् ॥ ९७ ॥ सोऽपि मुच्येत पापेन त्रिविधेन न संशयः ॥ ९८ ॥ ब्रह्मेशकेशवपरोऽस्ति न पूजनीयो नैवाश्वमेधसदृशः क्रतुरस्ति कश्चित् ॥ गंगासमं त्रिभुवनेऽपि न तीर्थमस्ति दानं तुला

---

[1] समादाय–इ० पा० । [2] धृतम्–इ० पा० । [3] समस्तं प्रोक्षितं बुधः–इ० पा० । [4] क्षोभव्याधिकरं भवेत्–इ०पा० । [5] सौभाग्यदर्शिता:–इ० पा० । [6] अनेकरत्नवद्धांगम्–इ० पा० । [7] सर्वदासुखदम्—इ० पा० । [8] गमित्वा—इ० पा० । [9] निरामयम्–इ० पा० । [10] वसूनां भवनेऽप्यथ–इ० पा० । [11] वै–इ० पा० । [12] अप्येत्य–इ० पा० । [13] यज्ञदानपतिर्धीमान्–इ० पा० ।

पुरुषतुल्यमिहास्ति नान्यत् ॥ ९९ ॥ इति श्रीभविष्ये[1] महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे तुलापुरुषदानविधिवर्णनं नाम पंचसप्तत्युत्तरशततमोऽध्यायः ॥ १७५ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ भगवन्सर्वभूतेश[2] सर्वभूतनमस्कृत ॥ अनुग्रहाय लोकानां कथयस्व[3] ममापरम् ॥ १ ॥ त्वत्तुल्यो जायते येन आयुषा यशसा[4] श्रिया ॥ तन्मे कथय देवेश दानं व्रतमथापि वा ॥ २ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ शृणु राजन्प्रवक्ष्यामि तव लोकहितेच्छया ॥ येनोपायेन जायंते मत्तुल्या मानवा भुवि ॥ ३ ॥ न व्रतैर्नोपवासैश्च[5] न तीर्थगमनैरपि ॥ महापथा[6]दिमरणैर्न यज्ञैर्न श्रुतेन च ॥ ४ ॥ प्राप्यते मम लोकोऽयं दुष्प्राप्यस्त्रिदशैरपि ॥ पार्थस्नेहान्महाभाग प्रवक्ष्यामि हितं तव ॥ ५ ॥ गोब्राह्मणार्थे मरणं प्राप्तं येन सुमेधसा ॥ प्रयागेऽनशनं वापि पूजितो[7] वाथ शंकरः ॥ ६ ॥ प्रयाति ब्रह्मसालोक्यं[8] श्रुतिरेषा सनातनी ॥ येन मत्समतां याति तत्ते वक्ष्याम्यतः परम् ॥ ७ ॥ दानं हिरण्यगर्भाख्यं कथ्यमानं निबोध[9] मे ॥ अग्नेरपत्यं प्रथमं सुवर्णमिह पठ्यते[10] ॥ ८ ॥ पवित्रं सर्वभूतानां[11] पावनं परमं महत् ॥ पर्यायनाम तस्योक्तं हिरण्यं सार्वलौकिकम्[12] ॥ ९ ॥ तदपां गर्भमाविश्य पुनर्जातं तु भूतले ॥ यश्च तद्ब्राह्मणे दद्यान्मत्तुल्यो जायते हि सः ॥ १० ॥ ॥ युधिष्ठिर उवाच ॥ ॥ विधानं तस्य देवेश कथयस्व सनातन ॥ यत्प्रमाणं यथा[13]चैतद्दातव्यं परमेश्वर ॥ ११ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ पर्वकाले[14] प्रदातव्यं दानमेतन्महामते ॥ अयने विषुवे चैव ग्रहणे शशिसूर्ययोः ॥ १२ ॥ व्यतीपातेऽथ कार्तिक्यां जन्मर्क्षे वा नरोत्तम ॥ दुःस्वप्नदर्शने चैव ग्रहपीडासु चैवहि ॥ १३ ॥ प्रयागे नैमिषे चैव कुरुक्षेत्रे तथार्बुदे ॥ गंगायां यमुनायां च सिंधुसागरसंगमे ॥ १४ ॥ पुण्यनद्यश्च दानेस्मिन्प्रशस्ताः स्युर्न संशयः ॥ यत्र वा रोचते राजन्गृहे देवकुलेऽथवा ॥ १५ ॥ आरामे वा तडागे वा शुचौ देशे विधानतः ॥ तत्र भूशोधनं कुर्यात्प्रागुदक्प्रवणं शुभम् ॥ १६ ॥ हस्ताद्दशकर्तव्यं मंडपं तु सुशोभनम् ॥ स्तंभैर्मनोहरैर्युक्तमार्द्रशाखाभिरन्वितम् ॥ १७ ॥ तन्मध्ये वेदिकां कुर्यात्पंचहस्तामलंकृताम् ॥ वितानमुपरिष्टाच्च पुष्पमालावलंबितम् ॥ १८ ॥ हिरण्यगर्भं तन्मध्ये प्रथमेहनि कल्पयेत् ॥ तस्य प्रमाणं वक्ष्यामि रूपं वै स्थंडिलोद्भवम् ॥ १९ ॥

---

[1] इति श्रीभविष्ये आदित्यवारकल्पे- इ० पा० । [2] सर्वलोकेश सर्वलोकनमस्कृत—इ० पा० । [3] कथय त्वं ममाग्रतः–इ० पा० । [4] वपुषा–इ० पा० । [5] तु–इ० पा० । [6] महातीर्थादिमरणैः–इ० पा० । [7] पूज्यते–इ० पा० । [8] सब्रह्मलोकम्–इ० पा० । [9] मया शृणु—इ० पा० । [10] पश्यति–इत्यशुद्धः इ० पा० । [11] सर्वधातूनाम्–इ०पा० । [12] सार्वकामिकम्–इ०पा० । [13] च दातव्यंकथ्यताम्–इ० पा० । [14] सर्वकाले–इ० पा० ।

शिल्पिनं पूजयेत्पूर्वं वासोभिर्भूषणैस्तथा ॥ ब्राह्मणान्वाचयेत्पश्चात्ततः कर्म[१]समारभेत् ॥ २० ॥ सुवर्णेन सुशुद्धेन[२] शक्तितः कारयेद्बुधः ॥ अंगु
लानि चतुःषष्टिर्दैर्घ्यं च परिकीर्तितम्[३] ॥ २१ ॥ त्रिभागहीनं वदने मूले तस्यार्द्धविस्तरम् ॥ वर्तुलं कर्णिकाकारं चारुग्रंथिविवर्जितम् ॥ २२ ॥
पिधानमुपरिष्टाच्च कर्तव्यं चांगुलाधिकम्[४] ॥ अस्त्राणि[५] दश कुर्वीत नालं सूर्यं च कांचनम् ॥ २३ ॥ दात्रं सपट्टिकं चैव सर्वोपस्करणान्वितम्[६] ॥
सूचीक्षुरश्च हैमानि तत्सर्वं परिकल्पयेत् ॥ २४ ॥ पार्श्वतः स्थापयेत्तस्य हेमदंडकमंडलू ॥ छत्रिकापादुकायुग्मं वज्रवैडूर्यमंडितम् ॥ २५ ॥ एवं
लक्षणसंयुक्तं कृत्वा गर्भं विचक्षणः ॥ ब्रह्मघोषेण महता शंखतूर्यरवेण च ॥ २६ ॥ हस्तिना शकटेनाथ राजन्ब्रह्मरथेन वा ॥ आनयेन्मंडपं कृत्वा
प्रदक्षिणमतंद्रितः ॥ २७ ॥ तिलद्रोणोपरिगतं वेदीमध्येऽधिवासयेत् ॥ समालभ्य पुनः सर्वं कुंकुमेन सुगंधिना ॥ २८ ॥ कौशेयवाससी शुभ्रे
ततस्तं परिधापयेत् ॥ समंतात्पुष्पमालाभिः पूजयेद्भक्तितः सुधीः ॥२९॥ धूपैः सुधूपितं[७] कृत्वा मंत्रमेतमुदीरयेत् ॥ भूर्लोकप्रमुखालोकास्तत्र गर्भे
व्यवस्थिताः ॥ ३० ॥ ब्रह्मादयस्तथा देवा नमस्ते भुवनोद्भव ॥ नमस्ते भुवनाधार नमस्ते[८] भुवनेश्वर ॥ ३१ ॥ नमो हिरण्यगर्भाय गर्भे यस्य
पितामहः ॥ एवं संपूजयित्वा तु तां[९] रात्रिमधिवासयेत् ॥ ३२ ॥ वेद्याश्चतुर्दिशं चैव कुंडानि परिकल्पयेत् ॥ चत्वारि चतुरस्राणि तेषु होमो
विधीयते ॥ ३३ ॥ चतुश्चारणिकास्तत्र ब्राह्मणा मंत्रपारगाः ॥ होमं कुर्युर्जितात्मानो[१०] मौनिनः सर्व एवते ॥३४॥ सर्वाभरणसंपन्नाः सर्वे चाहत
वाससः ॥ ताम्रपात्रद्वयोपेता गंधपुष्पादिपूजिताः ॥ ३५ ॥ वेद्याः पूर्वोत्तरे भागे ग्रहवेदिं प्रकल्पयेत् ॥ तत्र ग्रहांल्लोकपालान्ब्रह्मविष्णुमहेश्वरान् ॥
॥ ३६ ॥ पूजयेत्स्वर्णघटितान्पुष्पधूपविलेपनैः[११] ॥ पताकाभिरलंकृत्य मंडपं तोरणैस्तथा ॥ ३७ ॥ कुंभद्वयं च द्वारेषु स्थापयेद्रत्नसंयुतम् ॥
तुलापुरुषमंत्रैश्च लोकपालबलिं क्षिपेत् ॥ ३८ ॥ पालाश्यः समिधस्तत्र प्रशस्ता होमकर्मणि[१२] ॥ चरुश्चैवेन्द्रदैवत्यस्तिला गव्यं घृतं तथा ॥३९॥
स्वलिंगैर्होमयेत्पूर्वं मंत्रैर्व्याहृतिभिः पुमान् ॥ अयुते द्वे च होमस्य संख्यामाहुर्मनीषिणः ॥ ४० ॥ यजमानस्ततः स्नात्वा शक्लांबरधरः शुचिः॥
भक्त्या हिरण्यगर्भं च पर्वकाले समर्चयेत् ॥ ४१ ॥ नमो हिरण्यगर्भाय विश्वगर्भाय[१३] वै नमः ॥ चराचरस्य जगतो गृहभूताय ते नमः ॥ ४२ ॥
मात्राहं जनितः पूर्वं मर्त्यधर्मासुरोत्तम ॥ त्वद्गर्भसंभवादद्य दिव्यदेहो भवाम्यहम् ॥ ४३ ॥ इत्युच्चार्य स्वयंभक्त्या कृत्वा चैव प्रदक्षिणाम् ॥ क्षीरा

---

१ यज्ञम्—इ० पा० । २ सुसिद्धेन–इ० पा० । ३ परिकल्पयेत्–इ० पा० । ४ द्व्यंगुलाधिकम्—इ०, द्व्यंगुलाधिकम्–इ० च पा० । ५ अन्त्राणि—इ० पा० । ६ सर्वोपकरणानि च–इ० पा० । ७ संपूजितं राजन्–इ० पा० । ८ समस्तभुवनेश्वर—इ० पा० । ९ रात्रौ तमधिवासयेत्—इ० पा० । १० यतात्मानः–इ० पा० । ११ पुष्पवस्त्रानुलेपनैः–इ० पा० । १२ यज्ञकर्मणि–इ० पा० । १३ ब्रह्मगर्भाय–इ० पा० ।

ज्यदधिसंपूर्णं तद्गर्भं प्रविशेद्बुधः ॥ ४४ ॥ सौवर्णं धर्मराजं तु सव्ये कृत्वा करे ततः ॥ भास्करं दक्षिणे चै[1]व मुष्टिं बद्ध्वा प्रयत्नतः ॥ ४५ ॥
जान्वोरंतरतश्चैव शिरः कृत्वा समाहितः ॥ उच्छ्वासपंचकं तिष्ठेच्चेतसा चिंतयञ्छिवम् ॥ ४६ ॥ गर्भाधानं पुंसवनंसीमंतोन्नयनं तथा ॥ कुर्युर्हिर
ण्यगर्भस्य ततस्ते द्विजपुंगवाः ॥ ४७ ॥ जातकर्मादिकाः कुर्युः क्रियाः षोडश चापराः ॥ तत उत्थाय निःसृत्य पुनः कुर्यात्प्रदक्षिणाम् ॥ ४८ ॥
तावन्मुखं न पश्येत कस्यचिन्नृपसत्तम ॥ सौवर्णां [2]पृथिवी यावन्नदृष्टा स्पष्ट[3]चक्षुषा ॥ ४९ ॥ ततः स्नानं प्रकुर्वीत ब्रह्मघोषपुरःसरम् ॥ अष्टौ
द्विजाः सुवर्णांगा सौवर्णैः कलशैः शुभैः ॥ ५० ॥ रौप्यैरौ[4]दुंबरैर्वापि मृण्मयैर्वा सुशोभनैः ॥ दध्यक्षतविचित्रांगैराम्रपल्लवशोभितैः ॥ ५१ ॥ पुष्पै
रावेष्टितग्रीवैरव्रणैः कलशै[5]र्दृढैः ॥ चतुष्कमध्ये संस्थाप्य पीठमव्रणमुत्तमम् ॥ ५२ ॥ तत्र स्थाप्य महाभाग यजमानं द्विजोत्तमाः ॥ देवस्य
त्वेति मंत्रेण कुर्युरस्याभिषेचनम् ॥ ५३ ॥ अद्य जातस्येतेऽ[6]ङ्गानि अभिषेक्ष्यामहे वयम् ॥ दिव्येनानेन वपुषा चिरंजीव[7]सुखी भव ॥ ५४ ॥
एवं कृताभिषेकस्तु यजमानः समाहितः ॥ दद्याद्धिरण्यगर्भं तं सोदकेनैव पाणिना ॥ ५५ ॥ तान्संपूज्य च भावेन बहुभ्यो वा तदाज्ञया ॥ यज्ञो
पकरणं सर्वं गुरवे विनिवेदयेत् ॥ ५६ ॥ पादुकोपानहौ चैव च्छत्रचामरभाजनम् ॥ अन्येषां चैव विप्राणां ये च तत्र सभासदः ॥ ५७ ॥ तेषां चैव
प्रदातव्यं दानं चात्र विशेषतः ॥ दीनांधकृपणानां च दातव्यं सार्वकामिकम् ॥ ५८ ॥ अन्नसत्रं च कर्तव्यं यावद्दानपरिग्रहः ॥ अनेन विधिना
यस्तु दानमेतत्प्रयच्छति ॥ ५९ ॥ स कुलं तारयेत्सर्वं देवलोकं स गच्छति ॥ विमानवरमारुह्य पञ्चयोजनविस्तृतम् ॥ ६० ॥ वापीकूपतडागाद्यैर्ज
लस्थानैरलंकृतम् ॥ उद्यानशतसंस्थानं पद्माकरनिषेवितम् ॥ ६१ ॥ प्रासादशतसंकीर्णं वरस्त्रीशतसेवितम् ॥ वीणावेणुमृदंगानां शब्दैरापूरितं
महत् ॥ ६२ ॥ भूमयो यत्र राजेन्द्र दिव्या मणिमयाः शुभाः ॥ वेदिकाभिर्विचित्राभिः शोभितं भास्करप्रभम् ॥ ६३ ॥ धृतं स्तम्भसहस्रेण सुकृतं
विश्वकर्मणा ॥ पताकाभिर्विचित्राभिर्वज्रैश्च समलंकृतम् ॥ ६४ ॥ तदारुह्य विमानाग्र्यं विद्याधरगणैर्युतम् ॥ स याति लोकं शक्रस्य शक्रेण सह
मोदते ॥ ६५ ॥ मन्वन्तरशते जाते कर्मभूमौ प्रजायते ॥ जंबूद्वीपमशेषं तु[8] भुंक्ते दिव्यपराक्रमः ॥ ६६ ॥ धार्मिकः सत्यशीलश्च ब्रह्मण्यो गुरुव
त्सलः ॥ दश जन्मान्यसौ राजा जायते रो[9]गवर्जितः ॥ ६७ ॥ यस्त्विदं शृणुयाद्भक्त्या रहस्यं पापनाशनम् ॥ सोऽपि वर्षशतं साग्रं सुरलोके मही

---

[1] भागे–इ० पा० । [2] सूर्यकिरणसंपर्कादापीतवर्णा पृथिवी सौवर्णा–सुवर्णमयी च । [3] स्पष्टचेतसा–इ० पा० । [4] ताम्रमयैरित्यर्थः । [5] गौरवर्णैर्नवैर्दृढैः–इ० पा० । [6] मूर्ध्नि–इ० पा० । [7] चिरञ्जीवी–इ० पा० । [8] च–इ० पा० । [9] पापवर्जितः–इ० पा० ।

यते ॥ ६८ ॥ गर्भं हिरण्यरचितं विधिवत्प्रविश्य संस्कारसंस्कृततनुः पुनरेवतस्मात् ॥ निःसृत्य[1] तद्विजवराय निवेद्य भक्त्या मार्तण्डवद्दिवि विरा
जति दिव्यदेहः ॥ ६९ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे हिरण्यगर्भदानविधिवर्णनं नाम षट्सप्तत्युत्तरशतत
मोऽध्यायः ॥ १७६ ॥ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अगस्त्येन पुरा गीतो दानानां विधिरुत्तमः ॥ शृणु त्वं राजशार्दूल कथ्य
मानं मयाधुना ॥ १ ॥ येन दत्तेन राजेन्द्र सर्वं पापं व्यपोहति ॥ मानसं वाचिकं वापि कायिकं च सुदुस्तरम् ॥ २ ॥ मंगल्यं मंगलं पुण्यं
सर्वदानेषु चोत्तमम् ॥ धन्यं यशस्यमायुष्यं परलोकभयापहम्[2] ॥ ब्रह्मांडं कांचनं कृत्वा सर्वलक्षणसंयुतम् ॥ ३ ॥ देवासुरमनुष्यैश्च गन्धर्वोरगरा
क्षसैः ॥ संयुक्तं च नदीभिश्च समुद्रैः पर्वतैस्तथा ॥ विमानशतकोटीभिर्भूषितं चाप्सरोवरैः[3] ॥ ४ ॥ दिग्गजाष्टकसंयुक्तं मध्यस्थितचतुर्मुखम् ॥
शिवाच्युतार्कशिखरमुमालक्ष्मीसमन्वितम् ॥ ५ ॥ तस्यांगे कल्पयेद्राजन्भुवनानि चतुर्दश ॥ वितस्तेरंगुलशतं यावदायामविस्तरम् ॥ ६ ॥
कुर्याद्विंशत्पलादूर्ध्वमासहस्राच्च भक्तितः ॥ शकलद्वयसंयुक्तं पुटाकारं सुसंहितम् ॥ ७ ॥ शिल्पिना विहितं यस्माद्ब्रह्मांडं सर्वकामदम् ॥
अयने विषुवे चैव चंद्रादित्यग्रहे तथा ॥ ८ ॥ अन्येष्वपि तु कालेषु श्रद्धावित्तसमन्वितः ॥ पुष्पमंडपिकां कृत्वा तत्र संस्थापयेद्बुधः ॥ ९ ॥
तिलद्रोणोपरिगतं कुंकुमक्षोदचर्चितम् ॥ वासो युग्मेन संछाद्य पुष्पगन्धाधिवासितम् ॥ १० ॥ तस्य दिक्षु च सर्वासु पूर्णकुम्भांश्च विन्यसेत् ॥
अष्टादशैव धान्यानि द्रोणमात्राण्यथाहरेत् ॥ ११ ॥ गृहे वा मंडपे वापि स्थापयेत्तद्विचक्षणः ॥ पादुकोपानहच्छत्रभाजनासनदर्पणैः ॥ १२ ॥
संयुक्तं कारयेत्तत्र पयस्विन्या तथैव च ॥ कारयेत्कुण्डमेकं तु हस्तमात्रं विधानतः ॥ १३ ॥ चतुश्चारणिकास्तत्र होमं कुर्युर्द्विजोत्तमाः ॥
सर्वाभरणसम्पन्नाः सुस्नाताहतवाससः ॥ १४ ॥ प्रचरेयुर्द्विजास्तत्र उपाध्यायसमन्विताः ॥ तथा पुरोहितश्चैव राज्ञा षष्ठो विधीयते ॥ १५ ॥
इतरेषां तु पञ्चैव कुर्युर्यज्ञमतंद्रिताः ॥ ग्रहयज्ञविधानेन ग्रहाणां यज्ञ इष्यते[4] ॥ १६ ॥ ब्रह्मविष्णुशिवानां च तन्नाम्ना[5] जुहुयात्तिलान् ॥
अयुतं होमयेत्पश्चान्[6]महाव्याहृतिभिर्नृप ॥ १७ ॥ रुद्रजापस्तु कर्तव्यस्तस्यैवानंतरं द्विजैः ॥ ततः सर्वसमाप्तौ तु स्नात्वा शुक्लांबरः
शुचिः ॥ १८ ॥ ब्रह्मांडं पूजयेद्भक्त्या गृहीतकुसुमांजलिः ॥ नमो जगत्प्रतिष्ठाय विश्वधाम्ने नमोऽस्तु ते ॥ १९ ॥ वाङ्मयांत
निमग्नाय ब्रह्मांड शुभकृद्भव ॥ ब्रह्मांडोदरवर्तीनि यानि सत्त्वानि कानिचित् ॥ २० ॥ तानि सर्वाणि मे तुष्टिं प्रयच्छंत्[7]वतुलां सदा ॥ ब्रह्मा

---

[1] निर्गत्य—इ० पा० । [2] परलोकभयावहम्—इ० पाठे परलोकः शत्रुजनो बोध्यः । [3] चप्सरोवरैः—इ०पा० । [4] उच्यते—इ० पा० । [5] तत्राज्यम्—इ०पा० । [6] महाव्याधिहतिर्भवेत्—इ०पा० । [7] आत्मना—इ० पा० ।

विष्णुश्च रुद्रश्च लोकपालास्तथा ग्रहाः ॥ २१ ॥ नक्षत्राणि तथा नागा ऋषयो मरुतस्तथा ॥ सर्वे भवंतु संतुष्टाः[1] सप्तजन्मांतराणि मे ॥ २२ ॥
इत्युच्चार्य ततो दद्याद्ब्रह्मांडं सर्वकामदम् ॥ सदक्षिणं च तं कृत्वा वसु संपादयेद्द्विजान्[2] ॥२३॥ अनेन विधिना दत्त्वा यत्पुण्यं स्यान्नरोत्तम ॥ तत्तेऽहं
संप्रवक्ष्यामि शृणुष्व गदतो[3] मम ॥ २४ ॥ आसीदादियुगे राजा सुद्युम्नो[4] नाम भारत ॥ नागायुतबलः श्रीमान्बहुभृत्यपरिच्छदः ॥ २५ ॥
त्रिंशद्वर्षसहस्राणि[5] कृत्वा राज्यमकंटकम् ॥ ततः संस्थाप्य तनयं राजा राज्ये वनं ययौ ॥ २६ ॥ प्रविश्य च वनं घोरं तपस्तीव्रं चचार ह ॥
अध्यात्मगतितत्त्वज्ञः कर्मकांडं विसृज्य च ॥ २७ ॥ कालेन महता राजा दिष्टांतमगमत्पुरा ॥ दिव्यं विमानमारुह्य नाना वाद्यरवाकुलम्[6] ॥२८॥
अतीत्य शक्रलोकादीन्ब्रह्मलोकमितो गतः ॥ तस्यासनं दिदेशाथ ब्रह्मासुरगणैर्वृतः[7] ॥ २९ ॥ दिव्यं कनकचित्रांगं रत्नालंकृतविग्रहम् ॥ एवं लोक
वरे तस्मिन्नममाणो नृपोत्तम ॥ ३० ॥ आस्ते चानुदिनं सोऽथ दिव्यभोगविवर्जितः ॥ वसतस्तस्य राज्ञस्तु शरीरं परितप्यते ॥ ३१ ॥ बुभुक्षया
नरश्रेष्ठ तथात्यंतपिपासया ॥ स पीड्यमानो ब्रह्माणं कृतांजलिरभाषत ॥ ३२ ॥ भगवन्ब्रह्मलोकोऽयं सर्वदोषविवर्जितः ॥ अत्र स्थितं च मां
देव क्षुत्तृष्णा च प्रबाधते ॥ ३३ ॥ केन कर्म विपाकेन क्षुधा मे नापसर्पति ॥ ब्रह्मलोके गतस्यापि संशयं छेत्तुमर्हसि ॥३४॥ ॥ ब्रह्मोवाच[8] ॥ ॥
त्वया हि कुर्वता राज्यं पुष्टान्यंगानि पार्थिव ॥ नैव दत्तं तु बहुलमात्मवादरतेन वै ॥ ३५ ॥ दानं बंधात्मकं मत्वा तस्माद्दत्तं त्वया न हि ॥
ज्ञानाद्ब्रह्मपदं प्राप्तमदानात्क्षुत्प्रबाधते ॥ ३६ ॥ ॥ राजोवाच ॥ ॥ भगवंस्तृषापनुत्तिः स्यात्कथं मे परमेश्वर ॥ उपदेशप्रदानेन प्रसादं कर्तु
मर्हसि ॥ ३७ ॥ ॥ ब्रह्मोवाच ॥ ॥ भूयो गत्वा महीं राजन्ब्रह्मांडं सार्वकामिकम् ॥ प्रयच्छ द्विजमुख्यानां[9] तेन तृप्तिमवाप्स्यसि ॥ ३८ ॥
इत्युक्तः सम्यगागत्य मर्त्यलोकं[10] महीपतिः ॥ ब्रह्मांडं तु विधानेन ब्राह्मणेभ्यः प्रदत्तवान् ॥ ३९ ॥ स जगाम पुनः स्वर्गं लेभे तृप्तिं च शाश्वतीम् ॥
एतत्ते सर्वमाख्यातं महादानस्य यत्फलम् ॥ ४० ॥ ब्रह्मांडं यः प्रयच्छेत तेन दत्तं चराचरम् ॥ सप्तावरान्सप्त परान्सप्त चैव परावरान् ॥ ४१ ॥
तारयेत्कुलजान्दत्त्वा भविष्यांश्च न संशयः ॥ मन्वंतराणि षट्त्रिंशद्ब्रह्मलोके महीयते ॥ ४२ ॥ पुनर्मानुष्यमभ्येत्य[11] धार्मिको जायते कुले ॥
न दारिद्र्यं न च व्याधिं वियोगं नैव[12] पश्यति ॥ ४३ ॥ नारी वा पुरुषो वापि दानस्यास्य प्रभावतः ॥ यश्चैतच्छृणुयाद्भक्त्या भक्तानां श्रावयेच्च

---

१ सुप्रीताः–इ० पा० । २ दिक्संख्यान्वाचयेद्द्विजान्–इ० पा० । ३ वदतो मम–इ० पा० । ४ प्रद्युम्नो नाम वीर्यवान्–इ० पा० । ५ विंशद्वर्षसहस्राणि–इ० पा० । ६ विद्याधराकुलम्–इ० पा० ।
७ सह–इ० पा० । ८ कृष्ण उवाच–इ०, विष्णुरुवाच–इ० पा० । ९ द्विजमुख्याय–इ० पा० । १० ब्रह्मलोकात्–इ०पा० । ११ आसाद्य–इ० पा० । १२ न वै विपत्–इ० पा० ।

यः ॥ ४४ ॥ सोऽपि सद्गतिमाप्नोति किं पुनर्यः प्रयच्छति ॥ ४५ ॥ ब्रह्मांडखंडयुगलं सकुलाचलं च दिग्भागसागरसरोवरसिद्धजुष्टम् ॥ दिक्सं
ख्यया गुणवतां द्विजसत्तमानां दत्त्वा पुमान्पदमुपैति पितामहस्य ॥ ४६ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे ब्रह्मांड
दानविधिवर्णनं नाम सप्तसप्तत्युत्तरशततमोऽध्यायः ॥ १७७ ॥ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ भगवाञ्छंकरः पूर्वं कृतोद्वाहो[१]मया
सह ॥ रममाणस्तया सार्द्धं बहुवर्षगणान्स्थितः ॥ १ ॥ ततः सुरगणाः सर्वे परं त्रासमुपागताः ॥ तयोरपत्यस्य भयात्तमेव शरणं गताः ॥ २ ॥
वैश्वानरमुखा देवा [२]महादेवं त्रिलोचनम् ॥ प्रसन्नश्चाभवत्तेषां विबुधानां त्रिलोचनः ॥ ३ ॥ ॥ ईश्वर उवाच ॥ ॥ किं भीतास्त्रिदशाः सर्वे कं
वरं च ददामि वः ॥ मयि प्रसन्ने विबुधा दुर्लभं हि न किंचन ॥ ४ ॥ ॥ देवा ऊचुः ॥ ॥ भगवंस्तव संयोगात्पार्वत्या सह शंकर ॥ मोघो
भवतु देवेश भीताः स्म तनयस्य ते ॥५ ॥ अनपत्यश्च देवेश भव भूतपते सदा ॥ अशक्ताः स्म वयं सर्वे भवदोजो विधारणे ॥ ६ ॥ ॥ श्रीभ
गवानुवाच ॥ ॥ अतः प्रभृत्यहं देवा ऊर्ध्वरेता व्यवस्थितः ॥ स्थाणुवच्च स्थितश्चास्मि नाम चैतद्भविष्यति ॥ ७ ॥ ततः क्रुद्धा उमा तेषां देवा
नां वाक्यमब्रवीत् ॥ वितथं पुत्रजं सौख्यं भवद्भिर्मे कृतं सुराः ॥ ८ ॥ यस्मात्तस्माद्भवंतोऽपि न पुत्राञ्जनयिष्यथ ॥ ततः प्रभृति वै देवाः प्रसूयंते
न भूपते ॥ ९ ॥ दत्त्वा शापं ततो देवी देवानामाह शंकरम् ॥ पुत्रजन्म मया प्राप्तं न तावज्जगतः पते ॥ १० ॥ अपुत्रस्य गतिर्नास्ति इतीयं
श्रूयते श्रुतिः ॥ तदादिश महाभाग लोकद्वयहितं प्रभो ॥ ११ ॥ ॥ भगवानुवाच ॥ ॥ अपुत्रः पुरुषो यश्च नारी वा पर्वतात्मजे ॥ सौवर्ण
स्तेन दातव्यः कल्पवृक्षो गुणान्वितः ॥ १२ ॥ कृत्रिमं वापि गृह्णीयाद्वृक्षं वा स्थावरादिकम् ॥ जातपुत्रोऽथ वा पुत्रः पुत्रत्वे परिकल्पयेत् ॥ १३ ॥
तेन पुत्रवतां लोका देवि तस्य न संशयः ॥ कल्पवृक्षस्तु कर्तव्यः शुद्धकांचनसंभवः ॥ १४ ॥ बहुशाखः सुवर्णांगोप्यनेककुसुमान्वितः ॥ महास्कं
धस्वरूपश्च रत्नालंकृतविग्रहः ॥ १५ ॥ फलानि तस्य दिव्यानि सौवर्णानि प्रकल्पयेत् ॥ कुर्याविंशत्पलादूर्द्ध्वं शक्त्या वा नृप सत्तम ॥ १६ ॥
दानमेतत्प्रदातव्यं राजतं चैवमुत्तमम् ॥ प्रवालांकुरसंछन्नं मुक्तादामावलंबितम् ॥ १७ ॥ चतुष्कोणेषु कुर्वीत चतुरः कांचनद्रुमान् ॥
सुवर्णस्य प्रमाणं च कथयामि वरानने ॥ १८ ॥ सहस्रेण तदर्द्धेन तस्याप्यर्द्धेन वा पुनः ॥ नद्यास्तीरे गृहे [४]वापि देवतायतने तथा ॥ १९ ॥
प्रागुदक्प्रवणे देशे मंडपं तत्र कारयेत् ॥ दशहस्तप्रमाणेन दशहस्ताश्च वेदिकाः ॥ २० ॥ हस्तमात्रप्रमाणेन कुंडमेकं सुशोभनम् ॥

---

[१] संधिरार्षः कृतोद्वाहः उमया सहेति पदच्छेदः । यद्वा—कृतोद्वाहया उमया सहेति योजनानुसंधेया । [२] देवदेवम्—इ० पा० । [३] प्रजाम्—इ० पा० । [४] पार्थ—इ० पा० ।

आग्नेय्यां कारयेद्राजन्मेखलामुपलेपनम् ॥ २१ ॥ तत्र वै ब्राह्मणा योज्या ऋग्यजुःसामपाठकाः[1] ॥ उपदेष्टा च तत्रैव तृतीयः[2] पंचमोऽथ वा ॥
॥ २२ ॥ सर्वाभरणसंपन्नास्ताम्रपत्रद्वयान्विताः ॥ अनुलिप्ताश्चंदनेन वस्त्रमाल्यादिभूषिताः ॥ २३ ॥ गुडप्रस्थोपरिष्टाच्च स्थापयेत्कल्पपादपम् ॥
ब्रह्मविष्णुशिवोपेतं पंचशाखं सभास्करम् ॥ २४ ॥ कामदेवमधस्ताच्च संकलत्रं[3] प्रयोजयेत् ॥ संतानं सह गायत्र्या पूर्वतो लवणोपरि ॥ २५ ॥
मंदारं दक्षिणे पार्श्वे श्रिया सह तथा घृते[4] ॥ पश्चिमे पारिजातं तु उमया सह पादपम् ॥ २६ ॥ सुरभीसंयुतं तद्वत्तिलेषु हरिचंदनम् ॥ कौशेयव
स्त्रसंयुक्तानिक्षुमाल्यफलान्वितान् ॥ २७ ॥ तथाष्टौ पूर्णकलशान्समंतात्परिकल्पयेत् ॥ अग्निप्रणयनं कृत्वा अधिवास्य च पादपान् ॥ २८ ॥
धान्यानि चैव सर्वाणि समंतात्परिकल्पयेत् ॥ नाना भक्ष्याणि नैवेद्यं सर्वं तत्र नियोजयेत् ॥ २९ ॥ दीपमाला विचित्राश्च ज्वालयेत समंततः ॥
मंत्रेण योजयित्वा ता मयोक्तेन वरानने ॥ ३० ॥ कामदस्त्वं हि देवानां कामवृक्षस्ततः स्मृतः ॥ मया संपूजितो भक्त्या पूरयस्व मनोरथान् ॥
॥ ३१ ॥ एवं संपूज्य विधिना जागरं तत्र कारयेत् ॥ शंखवादित्रनिर्घोषैर्वेदध्वनिविमिश्रितैः ॥ ३२ ॥ होमं च ब्राह्मणाः कुर्युर्मद्गतेनांतरात्मना ॥
आघारावाज्यभागौ तु पूर्वं हुत्वा विचक्षणः ॥ ३३ ॥ तल्लिंगैः स्थापितान्देवान्होमेनाप्याययेत्ततः ॥ महाव्याहृतिभिश्चैव होमं कुर्युस्ततः परम् ॥
॥ ३४ ॥ अयुतेन भवेत्सिद्धिर्यज्ञस्य वरवर्णिनि ॥ ततः प्रभाते चोत्थाय स्नात्वा शुक्लांबरः शुचिः ॥ ३५ ॥ दद्यात्पर्वसमीपे तु कल्पवृक्षं सद
क्षिणम् ॥ त्रिःप्रदक्षिणमावृत्य मंत्रमेतमुदीरयेत् ॥ ३६ ॥ नमस्ते कल्पवृक्षाय विततार्थप्रदाय च ॥ विश्वंभराय देवाय नमस्ते विश्वमूर्तये ॥
॥ ३७ ॥ यस्मात्त्वमेव विश्वात्मा ब्रह्मस्थाणुदिवाकराः ॥ मूर्तामूर्तपरं बीजमतः पाहि सनातन ॥३८॥ एवमामन्त्र्य तं दृष्ट्वा गुरवे कल्पपादपम् ॥
चतुर्भ्यश्चापि ऋत्विग्भ्यः सामंतादीन्प्रकल्पयेत् ॥ ३९ ॥ अनेन विधिना यस्तु दानमेतत्प्रयच्छति ॥ तस्य पुण्यफलं देवि शृणुष्व गदतो मम ॥
॥ ४० ॥ विमानवरमारुह्य सूर्यतेजःसमप्रभम् ॥ अप्सरोगणसंकीर्णं किंकिणीजालमालितम्[5] ॥ ४१ ॥ याति लोकं सुरेशस्य सर्वबाधाविवर्जि
तम् ॥ पुनः कर्मक्षितावेत्य जायते श्रोत्रिये कुले ॥ ४२ ॥ यज्वा शूरोऽपि विद्वांश्च नरो भवति धार्मिकः ॥ पुनरंते प्राप्नुयाद्वै लोकं देवस्य
शार्ङ्गिणः ॥ ४३ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे कल्पवृक्षदानविधिवर्णनं नामाष्टसप्तत्युत्तरशतत
मोऽध्यायः ॥ १७८ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ भगवन्सर्वभूतेश सर्वलोकनमस्कृत ॥ अनुग्रहाय लोकानां कथयस्व ममापरम् ॥ १ ॥

---

[1] ऋग्यजुः सामयाजकाः—इ० पा० । [2] द्वितीयः—इ० पा० । [3] संकल्पेन—इ० पा० । [4] वृते—इ० पा० । [5] किंकिणीजालमंडितम्—इ० पा० ।

निष्पापो जायते येन आयुषा यशसा श्रिया ॥ तन्मे कथय देवेश दानं व्रतमथापि वा ॥ २ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ शृणु
राजन्प्रवक्ष्यामि तव[1] लोकहितेप्सया ॥ येनोपायेन जायंते सभाग्या मानवा भुवि ॥ ३ ॥ न व्रतैर्नोपवासैश्च न तीर्थगमनैरपि ॥ महापथादिमर
णैर्न यज्ञैर्न श्रुतेन च ॥ ४ ॥ प्राप्यते मम लोकोऽयं दुष्प्राप्यस्त्रिदशैरपि ॥ पार्थ स्नेहान्महाभाग प्रवक्ष्यामि हितं तव ॥ ५ ॥ वक्ष्ये कल्पलता
दानं शोभनं विधिपूर्वकम् ॥ सर्वं पूर्वविधानं च तत्र तन्त्रे प्रकल्पयेत् ॥ ६ ॥ दिक्पालेभ्यो बलिं तत्र क्षिपेद्वै विधिपूर्वकम् ॥ आघारावाज्यभागौ
तु पूर्वं हुत्वा विचक्षणः ॥ ७ ॥ ततो ग्रहमखं कुर्याद्धोमं व्याहृतिभिस्ततः ॥ अयुतेनैव होमस्य समाप्तिरिह कथ्यते ॥ ८ ॥ ततः सर्वसमीपे तु
स्नातः शुक्लांबरः शुचिः ॥ पुष्पधूपैरथाभ्यर्च्य वासोभिः सफलाक्षतैः ॥ ततः प्रदक्षिणीकृत्य मंत्रानेतानुदीरयेत् ॥ ९ ॥ नमो नमः पापविनाशि
नीभ्यो ब्रह्मांडलोकेश्वरपालनीभ्यः ॥ आशाशताधिक्यफलप्रदाभ्यो दिग्भ्यस्तथा कल्पलतावधूभ्यः ॥ १० ॥ या यस्य शक्तिः परमा प्रदिष्टा
वेदे पुराणे सुरसत्तमस्य ॥ तां पूजयामीह परेण साम्ना सा मे शुभं यच्छतु तां नतोऽस्मि ॥ ११ ॥ एवमुच्चार्य ताः सर्वा ब्राह्मणेभ्यो निवेदयेत् ॥
दशाशाः परया भक्त्या तास्ताः संकल्प्य चेतसि ॥ १२ ॥ ततः क्षमापयेद्विप्रान्प्रणिपत्य सदक्षिणान् ॥ अनेन विधिना यस्तु दानमेतत्प्रयच्छति
॥ १३ ॥ तस्य पुण्यफलं[2] राजन्कथ्यमानं निबोध मे ॥ इह लोके स विजयी धनवान्पुत्रवान्भवेत् ॥ १४ ॥ मृतो लोकाधिपपुरे प्रतिमन्वंतरं
वसेत् ॥ महाशक्तिवृतः पश्चादेत्यं[3] राजन्रसातलम् ॥ १५ ॥ जितसर्वमहीपालश्चक्रवर्ती भवेद्भुवि ॥ या च नारी महाराज दानमेतत्प्रयच्छति ॥ १६ ॥
सा चक्रवर्तिनं पुत्रं सूते शक्तिसमन्वितम् ॥ यश्च पश्येद्दीयमानं दत्तं यश्चानुमोदते[4] ॥ १७ ॥ शृणोति वाच्यमानं च सोपि प्रेत्य[5] विमुच्यते ॥ १८ ॥
याः शक्रवह्नियमनैर्ऋतपाशहस्ता वातेंदुराजशिवकेशवशंभुशक्त्यः ॥ ता वै प्रपूज्य दशकल्पलता द्विजेभ्यो देहि त्रिलोकविजये यदि तेऽस्ति
बुद्धिः ॥ १९ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे कल्पलतादानविधिवर्णनं नामैकोनाशीत्युत्तरशततमोऽ
ध्यायः ॥ १७९ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ भगवन्क्षत्रियैः शूरैः स्ववीर्योपात्तसंचयैः ॥ कानि दानानि देयानि पवित्राणि शुभानि
च ॥ १ ॥ अन्यैर्वा पुरुषैः कृष्ण अधर्मभयभीरुभिः ॥ ग्रहपीडाभिसंतप्तैर्दुःस्वप्नाद्युपतापितैः ॥ २ ॥ इह लोके परे चैव विहितं सर्वकामदम् ॥
विशेषविहितं दानं कथयस्व महामते ॥ ३ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ शृणु भूपाल भद्रं ते दानधर्ममनुत्तमम् ॥ विशेषेण महीपानां हिताय

---

[1] तावत्–इ० पा० । [2] मुख्यफलम्–इ० पा० । [3] सुरलोके वसत्यसौ ॥ पश्चादेव महाराज चक्रवर्ती धराधिपः–इ० पा० । [4] अनुमोदयेत्–इ० पा० । [5] पापैः–इ० पा० ।

च न संशयः ॥ ४ ॥ दानानि बहुरूपाणि नानाशास्त्रोदितानि च ॥ गोदानादीनि राजेन्द्र प्रधानानि न संशयः ॥ ५ ॥ किं तु प्रधानमेकं[1] ते
दानं वक्ष्यामि भारत ॥ वैरोचनाय यत्सर्वं शुक्रः प्रोवाच भा[2]रत ॥ ६ ॥ ॥ शुक्र उवाच ॥ ॥ शृणु दैत्यपते दानं सर्वपापप्रणाशनम् ॥
आधयो व्याधयश्चैव ग्रहपीडाः सुदारुणाः ॥ ७ ॥ येन दत्तेन नश्यंति पुण्यमाप्नोति चोत्तमम् ॥ कार्त्तिक्यामयने चैव ग्रहणे शशिसूर्ययोः ॥
॥ ८ ॥ दानमेतत्प्रदातव्यं विषुवे सूर्यसंक्रमे ॥ पुण्यं दिनमथासाद्य जितक्रोधो जितेंद्रियः ॥ ९ ॥ संस्थाप्य दारुजं दिव्यं हेमपट्टैरलंकृतम् ॥ रथं
सुचक्राक्षधरं युगयोक्रसमन्वितम् ॥ १० ॥ सुवर्णध्वजसंयुक्तं सि[3]तासितपताकिनम् ॥ पुष्पप्रकरसंकीर्णे प्रागुदक्प्रवणे शुभे ॥ ११ ॥ नद्या[4]स्तीरेऽथ
वा गोष्ठे विचित्रे वा गृहांगणे ॥ रथस्य पूर्वभागे तु कृत्वा वेदीमनुत्तमाम् ॥ १२ ॥ पुराणवेदविद्यावान्विनयाचारसंयुतः ॥ तस्यां संस्थाप
येद्देवान्ब्रह्मादीन्कथयामि ते ॥ १३ ॥ मध्ये ब्रह्मा प्रतिष्ठाप्यः पूजयेत्प्रणवेन तम् ॥ विष्णुरुत्तरतः स्थाप्यः पौरुषेण तमर्चयेत् ॥ १४ ॥ सूक्तेन
रुद्रं रौद्रेण दक्षिणस्यां समर्चयेत् ॥ ग्रहान्सूर्यमुखांश्चैव विधिवत्पूजयेत्तथा ॥ पुष्पैर्गंधैः फलैर्भक्ष्यैर्दीपमालाभिरेव च ॥ १५ ॥ पूजयेद्गंधकुसुमैः
श्वेतवस्त्रैः सचंदनैः ॥ शंखभेरीमृदंगानां शब्दैः सर्वत्रगामिभिः ॥ १६ ॥ ब्रह्मघोषविमिश्रैश्च कारयेत महोत्सवम् ॥ कुंडं कृत्वा विधानेन हस्त
मात्रप्रमाणतः ॥ १७ ॥ आग्नेय्यां दिशि राजेंद्र ब्राह्मणांस्तत्र पूजयेत् ॥ चतुश्चारणिकान्विप्रान्पूजितान्ब्रह्मभूषणैः ॥ १८ ॥ चतुरोष्टौ महाराज
गुरुरेकोऽथवा भवेत् ॥ होमोपकरणं सर्वं मेलयित्वा तिलान्घृतम् ॥ १९ ॥ अग्निकार्यं ततः कुर्याद्यथावद्विधिपूर्वकम् ॥ आघारावाज्यभागौ तु
हुत्वा प्राग्वच्च तौ ततः ॥ २० ॥ विष्णवे शितिकण्ठाय मंत्रैः पूर्वोदितैः शुभैः ॥ ग्रहयज्ञोदितैश्चैवं ग्रहाणां होम इष्यते ॥ २१ ॥ एवं यज्ञविधिं
कृत्वा यजमानो द्विजैः सह ॥ योजयेत रथे दांतौ गजौ लक्षणसंयुतौ ॥ २२ ॥ विचित्रतनुसंवीतौ शुभकक्षौ सुघंटिकौ ॥ हेमपट्टैः सुतिलकैः
शोभितौ शंखचामरैः ॥ २३ ॥ दिव्यमुक्तापरिच्छन्नौ दिव्यांकुश[6]समन्वितौ ॥ महामात्रान्वितौ चैव सर्वाभरणभूषितौ ॥ २४ ॥ एवं विधिं ततः
कृत्वा रथं तं सगजं नरः ॥ आरोपयेत्ततस्तस्मिन्ब्राह्मणं शंसितव्रतम् ॥ २५ ॥ भूषितं कण्ठकटकैः कर्णवेष्टांगुलीयकैः ॥ आगुप्तचोलकच्छत्र
वस्त्रायुधसमन्वितम् ॥ २६ ॥ बद्धतूणिं धनुष्पाणिं बहुचर्मविभूषितम् ॥ खड्गधेनुकया नद्धं हारालंकृतविग्रहम् ॥ २७ ॥ यजमानस्ततः प्राज्ञः
शुक्लांबरधरः शुचिः ॥ रथं प्रदक्षिणीकृत्य गृहीतकुसुमांजलिः ॥ २८ ॥ इममुच्चारयेन्मन्त्रं सर्वपापप्रणाशनम् ॥ कुमुदैरावणौ पद्मः पुष्पदंतोऽथ

---

१ च–इ० पा० । २ भार्गवः–इ० पा० । ३ सितासितपिनाकिनम्–इ० पा० । ४ नद्यास्तीर्थे गवां गोष्ठे–इ० पा० । ५ सर्वैः–इ० पा० । ६ दिव्यांशुकसमन्वितौ–इ० पा० ।

वामनः ॥ सुप्रतीकोंजनः सार्वभौमोऽष्टौ देवयोनयः ॥ २९ ॥ तेषां वंशप्रसूतौ तु बलरूपसमन्वितौ ॥ तद्युक्तरथदानेन मम स्यातां वरप्रदौ ॥३०॥
रथोऽयं यज्ञपुरुषो ब्राह्मणोत्र शिवः स्वयम् ॥ ममेभरथदानेन प्रीयेतां शिवकेशवौ ॥३१॥ इत्युच्चार्य [1]महाभाग पूजयित्वा पुनःपुनः ॥ आरोपयेत्तत
स्तस्मिन्ब्राह्मणं शंसितव्रतम् ॥३२॥ स्वदारनिरतं शांतं वेदवेदांगपारगम् ॥ पश्चाग्न्यभिमतं चैव अव्यंगं व्याधिवर्जितम् ॥ ३३ ॥ पुनः प्रदक्षिणी
कृत्य रथस्थं द्विजसत्तमम् ॥ आद्वारमनुगच्छेच्च प्रणिपत्य गृहं विशेत् ॥ ३४ ॥ ततो यज्ञावसाने तु दीनांधादीञ्जडान्कृशान् ॥ पूजयेद्विविधैर्दानैर्व
स्त्रगोदानभोजनैः ॥३५॥ अनेनैव विधानेन संकल्प्य रथमुत्तमम्॥ कुण्डमंडपसंभारभूषणाच्छादनादिकम् ॥३६॥ तदेव होमद्रव्यं च होममंत्रास्त
एव हि ॥ विशेषोऽश्वरथे राजन्कथ्यमानो निबोध्यताम् ॥३७॥ हयौ लक्षणसंयुक्तौ खलीनालंकृताननौ ॥ विचित्रवस्तु[2]संवीतौ कण्ठाभरणभूषितौ॥
॥ ३८ ॥ सुप्रग्रहयुतौ योज्यौ दाता तस्मिन्रथोत्तमे ॥ तं प्रदक्षिणमावृत्त्यमंत्रमेतमुदीरयेत् ॥ ३९ ॥ नमोस्तु ते वेदतुरंगमाय त्रयीमयाय
त्रिगुणात्मकाय ॥ सुदुर्गमार्गे सुखपानपात्रे नमोऽस्तु ते वाजिधराय नित्यम् ॥ ४० ॥ रथोऽयं सविता साक्षाद्वेदाश्वामी तुरंगमाः ॥ अरुणो
ब्राह्मणश्चायं प्रयच्छंतु सुखं मम ॥ ४१ ॥ इत्युच्चार्य ततस्तस्मिन्रथे ब्राह्मणसत्तमम् ॥ आरोपयेद्गृहाद्द्वारं यावदेतमनुव्रजेत् ॥ ४२ ॥ अनेन विधिना
यस्तु दद्याद्वाजिरथं बुधः ॥ तस्माद्वाहरथं राज्यं तस्य पुण्यफलं शृणु ॥ ४३ ॥ सर्वपापविनिर्मुक्तः सर्वामयविवर्जितः ॥ मन्वंतरशतं यावत्सर्व
भोगसमन्वितः ॥ ४४ ॥ अप्सरोगणसंकीर्णे विमाने सूर्यवर्चसे ॥ दिव्यभोगान्वितः श्रीमान्[3]कामचारी वसेद्दिवि ॥ ४५ ॥ पुण्यक्षयादिहाभ्येत्य
[4]राजा भवति धार्मिकः ॥ पुत्रपौत्रान्वित[5]श्चैव चिरंजीवी प्रियातिथिः ॥४६॥ गजेनैकेन निर्दिष्टः कश्चिद्गजरथो नृप ॥ एकेनाश्वेनाश्वरथः कथ्यते
वेदवादिभिः ॥ ४७ ॥ दानमंत्रास्त एवोक्ताः फलं तत्र निगद्यते ॥ ४८ ॥ यच्छंति ये रथवरं सुधुराक्षचक्रं विक्रांतवारणयुतं तुरगान्वितं वा ॥
सोपस्करं कनकपट्टविचित्रितांगं ते स्यंदनेन सुरराजपुरं प्रयांति ॥ ४९ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे गजरथा
श्वरथदानविधिवर्णनं नामाशीत्युत्तरशततमोऽध्यायः ॥१८०॥ ॥छ॥ ॥ युधिष्ठिर उवाच ॥ ॥ दानान्यन्यानि मे कृष्ण कथयस्व यदूत्तम ॥
मंगल्यानि पवित्राणि सर्वपापहराणि च ॥ १ ॥ संसारसागरोत्तारहेतुभूतोऽसि माधव ॥ धर्माधर्मपरिज्ञाने त्वदन्यो नेह कश्चन ॥२॥ ॥ श्रीकृष्ण
उवाच ॥ ॥ दानानि बहुरूपाणि कथितानि मया तव ॥ पुनरेव प्रवक्ष्यामि यद्यस्ति तव कौतुकम् ॥ ३ ॥ कथितानि मया तुभ्यं कथयि

---

[1] महाभागे इति संदिग्धः संवादः । [2] विचित्रवस्त्रसंवीतौ–इ० पा० । [3] कल्पचारी–इ० पा० । [4] परः–इ० पा० । [5] श्रीमान्–इ० पा० ।

ष्यामि यानि च ॥ महतार्थेन सिध्यंति प्रयच्छंति महत्फलम् ॥ ४ ॥ काम्यो दानविधिः पार्थ क्रियमाणः प्रयत्नतः[1] ॥ फलाय मुनिभिः
प्रोक्तो विपरीतो भयाय च ॥ ५ ॥ ज्ञेयं निष्कशतं सर्वदानेषु विधिरुत्तमः ॥ मध्यमस्तु तदर्द्धेन तदर्द्धेनावरः स्मृतः ॥ ६ ॥ एवं वृक्षरथेंद्राणां
धेनोः कृष्णाजिनस्य च ॥ अशक्तस्यापि कृष्टोऽयं[2] पंचसौवर्णिको विधिः ॥ ७ ॥ अतोऽप्यूनेन यो दद्यान्महादानं नराधिप ॥ प्रतिग्रह्णाति वा
तस्य दुःखशोकावहं भवेत् ॥ ८ ॥ आदौ तावत्प्रवक्ष्यामि कालाख्यं पुरुषं[3] तव ॥ सप्तसागरदानं च महाभूतघटन्तथा ॥ ९ ॥ अर्घ्यप्रदानमत्रोक्त
मात्मप्रतिकृतिस्तथा ॥ सुवर्णाश्वः स्मृतः षष्ठः सुवर्णाश्वरथोऽपरः ॥ १० ॥ सर्वदानोत्तमं राजन्कृष्णाजिनमथाष्टमम् ॥ विश्वचक्रं च नवमं हैमो
गजरथस्तथा ॥ ११ ॥ एतत्ते दानदशकं वेद्मि पार्थिवसत्तम ॥ देहि दापय सद्बुद्धिं दाने नृपनरोत्तम ॥ १२ ॥ दानादृते नोपकारो विद्यते धनि
नोऽपरः ॥ दीयमानो हि नापैति भूय एवाभिवर्धते ॥ १३ ॥ कूप उल्लिख्यमानोऽपि भवत्येव बहूदकः ॥ पुण्यं दिनमथासाद्य भूमिभागे समे
शुभे ॥ १४ ॥ चतुर्थ्यां वा चतुर्दश्यां विष्ट्यां वा पांडुनंदन ॥ पुमान्कृष्णतिलैः कार्यो रौप्यदंतः सुवर्णदृक् ॥ १५ ॥ खड्गोद्यतकरो दीर्णो जपा
कुसुमकुंडलः[4] ॥ रक्तांबरधरः स्रग्वी शंखमालाविभूषितः ॥ १६ ॥ तीक्ष्णासिपत्रधनुषा विस्फारितकटीतटः ॥ उपानद्युगयुक्तो हि कृष्णकंबल[5]
पार्श्वगः ॥ १७ ॥ गृहीतमांसपिंडश्च वामे करतले तथा ॥ एवं विधं नरं कृत्वा गृहीतकुसुमांजलिः ॥ १८ ॥ संपूज्य गंधकुसुमैर्नैवेद्यं विनिवेद्य
च ॥ तिलाज्यं जुहुयात्तत्र त्र्यंबकेति च मंत्रतः ॥ १९ ॥ स्वगृह्योक्तविधानेन शतमष्टोत्तरं यजेत् ॥ यजमानः प्रसन्नात्मा इमं[6] मंत्रमुदीरयेत् ॥ २० ॥
सर्वं[7] कलयसे यस्मात्कालस्त्वं तेन भण्यसे ॥ ब्रह्मविष्णुशिवादीनां त्वमसाध्योऽसि सुव्रत ॥ २१ ॥ पूजितस्त्वं मया भक्त्या प्रार्थितश्च[8] तथा[9]
सुखम् ॥ यदुच्यते तव विभो तत्कुरुष्व नमोनमः ॥ २२ ॥ एवं संपूजयित्वा[10] तं ब्राह्मणाय निवेदयेत् ॥ ब्रह्माणं[11] प्रथमं पूज्य वासोभिर्भूषणै
स्तथा ॥ २३ ॥ दक्षिणां शक्तितो दद्यात्प्रणिपत्य[12] विसर्जयेत् ॥ अनेन विधिना यस्तु दानमेतत्प्रयच्छति ॥ २४ ॥ नापमृत्युभयं तस्य न च
व्याधिकृतं भयम् ॥ भवत्यव्याहतैश्वर्यः सर्वबाधाविवर्जितः ॥ २५ ॥ देहांते सूर्यभवनं भित्त्वा याति परं पदम् ॥ पुण्यक्षयादिहाभ्येत्य राजा
भवति धार्मिकः ॥ संतत्या च श्रिया युक्तः पुत्रपौत्रसमन्वितः ॥ २६ ॥ संपूज्य कालपुरुषं विधिवद्द्विजाय दत्त्वा शुभाशुभफलोदयहेतुभूतः ॥

---

[1] यथार्थतः—इ० पा० । [2] कष्टोऽयम्–इ० पा० । [3] पुरुषोत्तमम्–इ० पा० । [4] मंडपः–इ० पा० । [5] कृष्णम्–इ० पा० । [6] इदं वचनमब्रवीत्–इ० पा० । [7] सकालनियमे यस्मात्कालस्त्वं तेन गण्यते–इ० पा० । [8] प्रापितश्च–इ० पा० । [9] यथा–इ० पा० । [10] तु—इ० पा० । [11] ब्राह्मणम्–इ० पा० । [12] दत्त्वा–इ० पा० ।

रोगांतरे सकलदोषमये च देही नो वध्यभावमुपगच्छति तत्प्रभावात् ॥ २७ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे कालपुरुषदानविधिवर्णनं नामैकाशीत्युत्तरशततमोऽध्यायः ॥ १८१ ॥ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अथातः संप्रवक्ष्यामि [1]पार्थदानमनुत्तमम् ॥ सप्तसागरकं नाम सर्वपापप्रणाशनम् ॥ १ ॥ पुण्यं दिनमथासाद्य युगादिग्रहणादिकम् ॥ कारयेत्सप्तकुण्डानि कांचनानि विचक्षणः ॥ २ ॥ प्रादेशमात्राणितथारत्निमात्राणि वा पुनः ॥ कुर्यात्सप्तशतादूर्ध्वमासहस्राच्च शक्तितः ॥ ३ ॥ संस्थाप्यानि च सर्वाणि कृष्णाजिनतिलोपरि ॥ प्रथमं पूरयेत्कुडं लवणेन विचक्षणः ॥ ४ ॥ द्वितीयं पयसा तद्वत्तृतीयं सर्पिषा पुनः ॥ चतुर्थं तु गुडेनैव दध्ना पंचममेव च ॥ ५ ॥ षष्ठं शर्करया तद्वत्सप्तमं तीर्थवारिणा ॥ स्थापयेल्लवणस्यांते [2]ब्रह्माणं कांचनं शुभम् ॥ ६ ॥ केशवं क्षीरमध्ये तु घृतमध्ये महेश्वरम् ॥ भास्करं गुडमध्ये तु दधिमध्ये सुराधिपम् ॥ ७ ॥ शर्करायां न्यसेल्लक्ष्मीं जलमध्ये तु पार्वतीम् ॥ सर्वेषु सर्वरत्नानि [3]धान्यानि च समंततः ॥ ८ ॥ स्थापयेत्पुरुषश्रेष्ठ यथालाभं यथासुखम् ॥ ततः पर्वसमीपे तु स्नातः शुक्लांबरो गृही ॥ ९ ॥ त्रिःप्रदक्षिणमावृत्य मंत्रानेतानुदीरयेत् ॥ नमो वः सर्वसिंधूनामाधारेभ्यः सनातनाः ॥ १० ॥ जंतूनां प्राणदेभ्यश्च समुद्रेभ्यो नमोनमः ॥ पूर्णाः सर्वे भवंतो वै क्षारक्षीरघृतैक्षवैः ॥ ११ ॥ दध्ना शर्करया तद्वत्तीर्थवारिभिरेव च ॥ तस्मादघौघविध्वंसं कुरुध्वं मम मानदाः ॥ १२ ॥ अलक्ष्मीः प्रशमं यातु लक्ष्मीश्चास्तु गृहे मम ॥ एवमुच्चार्य तान्दद्याद्ब्राह्मणेभ्यो युधिष्ठिर ॥ १३ ॥ एकमेवमथाभ्यर्च्य पुष्पवस्त्रविलेपनैः ॥ बहूनामेतदु[5]द्दिष्टं दानमेकस्य वा पुनः ॥ १४ ॥ देयं वा सर्व सामान्यं क्रियाविप्रानुरूपतः ॥ दानं सप्तसमुद्राख्यं यः प्रयच्छति पार्थिव ॥ १५ ॥ तस्य गृहान्न चलति लक्ष्मीर्यावत्कुलाष्टकम् ॥ पूज्यमानः सुरगणैः सिद्धविद्याधरोरगैः ॥ १६ ॥ देवलोकान्न च्यवते सप्तमन्वंतराण्यसौ ॥ ततश्च वेदसंस्कारात्परं ब्रह्माधिगच्छति ॥ १७ ॥ इति ददाति रसामरसंयुतान्छुचिरविस्मयदानिह सागरान् ॥ अनलकांचनरत्नमयानसौ पदमुपैति हरे [6]रमया वृतम् ॥ ॥ १८ ॥ दानं प्रधानतरमेतदतीव विप्रे प्रोक्तं युधिष्ठिर समाधिधिया विचिंत्य ॥ हैमान्विधाय जलधीन्वितर स्वशक्त्या प्राप्नोषि येन सरसानि समीहितानि ॥ १९ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे सप्तसागरदानविधिवर्णनं नाम द्व्यशीत्युत्तरशततमोऽध्यायः ॥ १८२ ॥ ॥छ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अथातः संप्रवक्ष्यामि दानमन्यत्त[7]वोत्तमम् ॥ महाभूतघटं नाम महापातकनाशनम् ॥ १ ॥

---

[1] सर्वदानम्–इ० पा० । [2] ब्रह्मणा–इ० पा० । [3] देयानि–इ० पा० । [4] सर्वसमीपेतु–इ० पा० । [5] एतदिष्टं वै दानमेतदुदीरयेत्–इ० पा० । [6] अमरावृतम्–इ० पा० । [7] नरोत्तम–इ० पा० ।

पुण्यां तिथिं समासाद्य स्वनुलिप्ते गृहांगणे ॥ कारयेत्कांचनं कुंभं[1] महारत्नान्वितं पुनः ॥ २ ॥ प्रादेशादंगुलशतं यावत्कुर्यात्प्रमाणतः ॥ शक्त्या पंचपलादूर्ध्वमाशताच्च नरोत्तम ॥ ३ ॥ क्षीराज्यपूरितं कृत्वा कल्पवृक्षसमन्वितम् ॥ पद्मासनगतास्तत्र ब्रह्मविष्णुमहेश्वराः ॥ ४ ॥ लोकपाला महेन्द्राश्च स्ववाहनसमास्थिताः ॥ ऋग्वेदः साक्षसूत्रश्च यजुर्वेदः सपंकजः ॥ ५ ॥ वीणाधारी सामवेदो ह्यथर्वा स्रक्स्रुभान्वितः ॥ पुराणवेदो वरदः साक्षसूत्रकमंडलुः ॥ ६ ॥ सप्तधान्यानि पुरतः स्थापयेच्छक्तितो बुधः ॥ पादुकोपानहश्छत्रं चामराण्यासनायुधान् ॥ ७ ॥ एवं प्रकल्प्य विधिवन्महाभूतघटं नरः ॥ गुडसारोपरिगतं माल्यवस्त्रैरथार्चयेत् ॥ ८ ॥ अथ पर्वसमीपे तु स्नात्वा नियतमानसः ॥ त्रिः प्रदक्षिणमावृत्य मंत्रमेतमुदीरयेत् ॥ ९ ॥ यस्मान्न किंचिदप्यस्ति महाभूतैर्विना कृतम् ॥ महाभूतमयश्चायं तस्माच्छांतिं ददातु मे ॥ १० ॥ अत्र सन्निहिता देवाः स्थापिता विश्वकर्मणा ॥ ते मे शांतिं प्रयच्छंतु भक्तिभावेन पूजिताः ॥ ११ ॥ इत्येवं पूजयित्वा तु महाभूतघटं नरः ॥ ब्राह्मणं पूजयित्वा तु भूषणाच्छादनादिभिः ॥ १२ ॥ महाभूतघटं दद्यात्पर्वकाले यतव्रतः[2] ॥ पुनः प्रदक्षिणीकृत्य ब्राह्मणं तं क्षमापयेत् ॥ १३ ॥ अनेन विधिना यश्च दानमेतत्प्रयच्छति ॥ एकविंशत्कुलोपेतः शिवलोके प्रयात्यसौ ॥ १४ ॥ पुण्यक्षयादिहाभ्येत्य राजा भवति धार्मिकः ॥ अजेयः शत्रुसंघातैर्महाबलपराक्रमः ॥ १५ ॥ क्षत्रधर्मरतो विद्वान्देवब्राह्मणपूजकः ॥१६॥ अष्टापदोत्तमघटं विमलं विधाय ब्रह्मेश[3]केशवयुतं सहलोकपालैः ॥ क्षीराज्यपूर्णविवरं प्रणिपत्य भक्त्या विप्राय देहि तव दानशतैः किमन्यैः ॥१७॥ इति श्रीभविष्येमहापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे महाभूतघटदानविधिवर्णनं नाम त्र्यशीत्युत्तरशततमोऽध्यायः ॥ १८३ ॥ ॥छ॥ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ शय्यादानं प्रवक्ष्यामि तव पांडु[4]कुलोद्वह ॥ यद्दत्त्वा सु[5]खभागी स्यादिह लोके परत्र च ॥ १ ॥ शय्यादानं प्रयच्छंति सर्वदैव द्वि[6]जोत्तमाः ॥ अनित्यं जीवितं यस्मात्कोन्[7]यः पश्चात्प्रदास्यति ॥ २ ॥ तावत्सबंधुः सपिता यावज्जीवति भारत ॥ मृतो मृत इति ज्ञात्वा क्षणात्स्नेहो निवर्तते ॥ ३ ॥ त[8]स्मात्स्वयं प्रदातव्यं शय्याभोज्यजलादिकम् ॥ आत्मैव ह्यात्मनो बन्धुरिति संचिंत्य चेतसि ॥ ४ ॥ आत्मैव यो हि नात्मानं दानभोगैः समर्चयेत् ॥ कोऽन्यो हिततरस्तस्मात्कः पश्चात्पूजयिष्यति ॥ ५ ॥ तस्माच्छय्यां समासाद्य सारदारुमयीं दृढाम् ॥ दंतपत्रचितां रम्यां हिमपट्टैरलंकृताम् ॥ ६ ॥

---

[1] दिव्यम्–इ० पा० । [2] प्रयत्नतः–इ० पा० । [3] ब्रह्मेन्द्रकेशवयुतम्–इ० पा० । [4] पांडुकुलोद्भव–इ० पा० । [5] सर्वभागी–इ०, सुतभोगी–इ० च पा० । [6] नृपोत्तम–इ० पा० । [7] दान कोन्यः प्रदास्यति–इ० पा० । [8] यस्मात्तस्मात्प्रदातव्यं शय्याभोज्यतिलादिकम्–इ० पा० ।

हंसतूलीप्रतिच्छन्नां सुभगांसोपधानिकाम् ॥ प्रच्छादनपटीयुक्तां गंधधूपाधिवासिताम् ॥ ७ ॥ तस्यां संस्थापयेद्धैमं हरिं लक्ष्मीसमन्वि
तम् ॥ उच्छीर्षके धृतं चैव कलशं परिकल्पयेत् ॥ ८ ॥ विज्ञेयं पांडव सदा सनिद्राकल्पकं बुधैः ॥ तांबूलं कुंकुमक्षोदकर्पूरागरु
चंदनम् ॥ ९ ॥ दीपकोपानहच्छत्रचामरासनभोजनम् ॥ पार्श्वेषु स्थापयेच्छक्त्या सप्तधान्यानि चैव हि ॥ १० ॥ शयनस्थस्य भवति यद
न्यदुपकारकम् ॥ भृंगारकाद्यपुष्पाणि पंचवर्णवितानकम् ॥ ११ ॥ शय्यामेवंविधां कृत्वा ब्राह्मणायोपदापयेत् ॥ सपत्नीकाय संपूज्य पुण्येऽह्नि
विधिपूर्वकम् ॥ १२ ॥ नमस्ते सर्वदेवेश शय्यादानं कृतं मया ॥ देहि तस्माच्छांतिफलं नमस्ते पुरुषोत्तम ॥ १३ ॥ यथा न कृष्ण शयनं शून्यं
सागरजातया ॥ शय्या ममाप्यशून्यास्तु तथा जन्मनिजन्मनि ॥ १४ ॥ दत्त्वैवं तल्पममलं प्रणिपत्य विसर्जयेत् ॥ एकादशाहेऽपि तथा विधि
रेष प्रकीर्तितः ॥ १५ ॥ ददाति यदि धर्मार्थं मानवो बांधवे मृते ॥ विशेषं चात्र राजेंद्र कथ्यमानं [1]निबोध मे ॥ १६ ॥ तेनोपभुक्तं यद्वस्तु किंचि
त्पूर्वं गृहे सता ॥ तद्गात्रलग्नं च तथा वस्त्रवाहनभाजनम् ॥ १७ ॥ [2]यदिष्टं च तथास्यासीत्तत्सर्वं परिकल्पयेत् ॥ स एव पुरुषो हैमस्तस्यांतं स्थाप
येत्तथा ॥ १८ ॥ पूजयित्वा प्रदातव्यो मृतशय्या यथोदिता ॥ स्वर्गे पुरंदरगृहे सूर्यपुत्रालयेथ वा ॥ १९ ॥ सुखं वसत्यसौ जंतुः शय्यादानप्र
भावतः ॥ पीडयंति न तं याम्याः पुरुषा भीषणाननाः ॥ २० ॥ न घर्मेण न शीतेन बाध्यते स नरः क्वचित् ॥ अपि पापसमायुक्तः स्वर्गलोके
महीयते ॥ २१ ॥ विमानवरमारूढः सेव्यमानोप्सरोगणैः ॥ आभूतसंप्लवं यावत्तिष्ठेत्पातकवर्जितः ॥ २२ ॥ शय्याप्रदानममलं तव पांडुपुत्र संकी
र्तितं [3]सकलसौख्यांनिधानमेतत् ॥ तयो ददाति विधिवत्स्वयमेव नाके तल्पे विकल्परहितः स विभाति सत्यम् ॥ २३ ॥ इति श्रीभविष्ये महापु
राण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे शय्यादानविधिवर्णनं नाम चतुरशीत्युत्तरशततमोऽध्यायः ॥ १८४ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥
आत्मप्रतिकृतिर्नाम यथोक्तं कस्यचित्पुरा ॥ तत्तेऽहं संप्रवक्ष्यामि दानं मानविवर्धनम् ॥ १ ॥ दानकालः सदा तस्य मुनिभिः परिकीर्तितः ॥
पुण्यैःपुण्यदिनं पार्थ प्राप्यते जीवितैर्न च ॥ २ ॥ लोहजां प्रकृतिं भव्यां कारयित्वात्मनो नृप ॥ अभीष्टवाहनगतामिष्टालंकारसंयुताम् ॥ ३ ॥
अभीष्टलोकसहितां सर्वोपस्करसंयुताम् ॥ ततः पट्टपटीवस्त्रैश्छादितां रत्नभूषिताम् ॥ ४ ॥ कुंकुमेनानुलिप्तांगीं कर्पूरागुरुवासिताम् ॥ स्त्री चेद्द
दाति शयने शयितां कारयेत्स्वयम् ॥ ५ ॥ यद्यदिष्टतमं किंचित्तत्सर्वं पार्श्वतो न्यसेत् ॥ उपकारकरं स्त्रीणां स्वशरीरे च यद्भवेत् ॥ ६ ॥ तत्सर्वं

---

१ निशामय–इ० पा० । २ यद्यादिष्टं च तयासीत्–इ० पा० । ३ सकलसौख्यनिधानभूतम्–इ० पा० ।

स्थापयेत्पार्श्वे स्वयं संचिंत्य चेतसि ॥ एतत्सर्वं मेलयित्वा स्वेस्वे स्थाने निधाय च ॥ ७ ॥ पूजयित्वा लोकपालान्गृहान्देवीं विनायकम् ॥ तत शुक्लांबरः स्नात्वा गृहीतकुसुमांजलिः ॥ ८ ॥ इममुच्चारयेन्मंत्रं विप्रस्य पुरतो बुधः[1] ॥ आत्मनः प्रतिमा चेयं सर्वोपकरणैर्युता ॥ ९ ॥ सर्वरत्न[2]समायुक्ता तव विप्र निवेदिता ॥ आत्मा शंभुः शिवः शौरिः शक्रः सुरगणैर्वृतः ॥ १० ॥ तस्मादात्मप्रदानेन ममात्मा सुप्रसीदतु ॥ इत्युच्चार्य ततो दद्याद्ब्राह्मणाय युधिष्ठिर ॥ ११ ॥ ब्राह्मणश्चापि गृह्णीयात्कोदादिति च कीर्तयन् ॥ ततः प्रदक्षिणीकृत्य प्रणिपत्य विसर्जयेत् ॥ १२ ॥ विधिनानेन राजेन्द्र दानमेतत्प्रयच्छति ॥ यः पुमानथ वा नारी शृणुयत्फलमाप्नुयात् ॥ १३ ॥ साग्रं वर्षशतं दिव्यं स्वर्गलोके सुरैर्वृतः ॥ अभीष्टफलदानेन ह्यभीष्टफलभाग्भवेत् ॥ १४ ॥ यत्रैवोत्पद्यते जंतुः प्राप्ते कर्मक्षये पुनः ॥ तत्रैव सर्वकामानां फलभाग्भवते नृपः ॥ १५ ॥ इष्टबंधुजनैः सार्द्धं न वियोगं कदाचन ॥ प्राप्नोति पुरुषो राजन्स्वर्गे चानंत्यमश्नुते ॥ १६ ॥ यश्चात्मनः प्रतिकृतिं वरवाहनस्थां हैमीं विधाय धनधान्यसमाकुलां च ॥ सोपस्करं द्विजवराय ददाति भक्त्या चंद्रार्कवत्स दिवि भाति हि राजराजः ॥ १७ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवाद आत्मप्रतिकृतिदानविधिवर्णनं नाम पञ्चाशीत्युत्तरशततमोऽध्यायः ॥ १८५ ॥ ॥ छ ॥

॥ ॥ श्रीकृष्ण उवाच ॥ ॥ सांप्रतं संप्रवक्ष्यामि हिरण्याश्वविधिं परम् ॥ यस्य प्रसादात्पुरुषः शाश्वतं फलमश्नुते ॥ १ ॥ पुण्यं दिनमथासाद्य पात्रं वापि गुणाधिकम् ॥ शक्तितस्त्रिपलादूर्ध्वमाशताच्च नरोत्तम ॥ २ ॥ खलीनालंकृतमुखं कारयेद्धेमवाजिनम् ॥ मुखरं सोन्नतस्कंधं दृढजानुं सवालधिम् ॥ ३ ॥ स्थापयेद्वेदिमध्ये तु कृष्णाजिनतिलोपरि ॥ कौशेयवस्त्रसंवीतं कुंकुमेन विलेपितम् ॥ ४ ॥ संपूज्य कुसुमैः श्वेतैश्चणकान्विनिवेद्य च ॥ ततः पर्वसमीपे तु गृहीतकुसुमांजलिः ॥ ५ ॥ इममुच्चारयेन्मंत्रं पुराणोक्तं यतव्रतः ॥ नमस्ते[3] सर्वदेवेश वेदाहरणलंपट ॥ ६ ॥ वाजिरूपेण मामस्मात्पाहि संसारसागरात् ॥ त्वमेव सप्तधा भूत्वा छंदोरूपेण भास्करम्[4] ॥ ७ ॥ यस्माद्धारयसे[5] लोकानतः पाहि सनातन ॥ एवमुच्चार्य तं राजन्विप्राय प्रतिपादयेत् ॥ ८ ॥ प्रदक्षिणं ततः कृत्वा प्रणिपत्य विसर्जयेत् ॥ अनेन विधिना राजन्हिरण्याश्वमलंकृतम् ॥ ९ ॥ दत्त्वा पापक्षयाद्धानो[6]र्लोकमाप्नोति शाश्वतम् ॥ तस्मिन्नहनि भुंजीत तैलक्षारविवर्जितम् ॥ १० ॥ पुराणश्रवणं तद्वत्कारयेद्भोज[7]

---

[1] बुधैः–इ० पा० । [2] सर्वसंपत्समायुक्ता–इ० पा० । [3] त्वया जितं जगत्सर्वं त्वत्खुरक्रांतिता मही ॥ वाजिरूप नमस्तुभ्यं पाहि संसारसागरात्–इ० पा० । [4] वर्तसे–इ० पा० । [5] भावयसे–इ० पा० । [6] अभ्येति–इ० पा० । [7] राजन्कारयेन्नियतात्मना–इ० पा० ।

नादनु ॥ ११ ॥ इत्थं हिरण्याश्वविधिं करोति यः सुपुण्यमासाद्य दिनं नरेंद्र ॥ विमुक्तपापः स पुरं मुरारेः प्राप्नोति सिद्धैरभिपूजितं[1] यत् ॥ १२ ॥
इति पठति य इत्थं हैमवाजिप्रदानं सकलकलुषमुक्तः सोऽश्वयुक्तेन भूपः ॥ कनकमयविमानेनार्कलोकं प्रयातस्त्रिदशपतिवधूभिः पूज्यते हर्म्यभो
गैः ॥ १३ ॥ यो वा शृणोति पुरुषोऽप्यथ वा स्मरेद्वा हैमाश्वदानमभिनंदति दीयमानम् ॥ सोऽपि प्रयाति हतकल्मषशुद्धदेहः स्थानं पुरंदरमहे
श्वरलोकजुष्टम् ॥ १४ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे हिरण्याश्वदानविधिवर्णनं नाम षडशीत्युत्तरशतत
मोऽध्यायः ॥ १८६ ॥ छ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अथातः संप्रवक्ष्यामि तव पांडुकुलोद्वह ॥ पुण्यं हेमरथं नाम महापातकनाशनम् ॥ १ ॥
पुण्येऽह्नि विप्रकथिते स्वनुलिप्ते गृहांगणे ॥ कृष्णाजिनतिलान्कृत्वा कांचनं स्थापयेद्रथम् ॥ २ ॥ चतुरस्रं महाभाग चतुश्चक्रं सकूबरम् ॥ ब्रह्मा
णमग्रतः कृत्वा गृहीतप्रग्रहं शुभम् ॥ ३ ॥ इंद्रनीलेन कुंभेन ध्वजरूपेण संयुतम् ॥ लोकपालाष्टकोपेतं पद्मरागदलान्वितम् ॥ ४ ॥ चत्वारः
पूर्णकलशा धान्यान्यष्टादशैव तु ॥ कौशेयवस्त्रसंवीतमुपरिष्टाद्वितानकम् ॥ ५ ॥ मध्ये तु फलसंयुक्तं पुरुषेण समन्वितम् ॥ योगयुक्तः पुमान्का
र्यस्तं च तत्राधिवासयेत् ॥ ६ ॥ एवंविधं पूजयित्वा माल्यगंधानुलेपनैः ॥ चक्ररक्षावुभौ तस्य कार्यौ विश्वकुमारकौ ॥ ७ ॥ पुण्यं कालं ततः
प्राप्य स्नातः संपूज्य देवताः ॥ त्रिःप्रदक्षिणमावृत्य गृहीतकुसुमांजलिः ॥ ८ ॥ शुक्लमाल्यांबरधर इमं मंत्रमुदीरयेत् ॥ ९ ॥ नमोनमः पापविनाश
नाय विश्वात्मने देवतुरंगमाय[2] ॥ धाम्नामधीशाय भवाभवाय रथस्य दानान्मम देहि शांतिम् ॥ १० ॥ वस्वष्टकादित्यमरुद्गणानां त्वमेव धाता परमं
निधानम् ॥ यतस्ततो मे हृदयं प्रयातु धर्मैकतानत्वमघौघनाशात् ॥ ११ ॥ इति तुरगरथप्रदानमेतद्भवभयसूदनमत्र यः करोति ॥ सकलुषपट
लैर्विमुक्तदेहः परममुपैति पदं पिनाकपाणेः ॥ १२ ॥ देदीप्यमानवपुषा च जितप्रभावमाक्रम्य मंडलमखंडलचंडभानोः[3] ॥ सिद्धांगनानयनयुग्मनि
पीयमानवक्त्रांबुजेंऽबुजभवेन चिरं सहास्ते ॥ १३ ॥ इति पठति शृणोति वा य एतत्कनकतुरंगरथप्रदानमस्मिन् ॥ न स नरकपुरं व्रजेत्कदा
चिन्नरकरिपोर्भवनं प्रयाति भूयः ॥ १४ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे हिरण्याश्वरथदानविधिवर्णनं
नाम सप्ताशीत्युत्तरशततमोऽध्यायः ॥ १८७ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ कृष्णाजिनप्रदानस्य विधिकालं ममानघ ॥ ब्राह्मणं च
समाचक्ष्व तत्र मे संशयो महान् ॥ १ ॥ श्रीकृष्ण उवाच ॥ ॥ युगादिषूपरागेषु संक्रातौ दिनसंक्षये ॥ माघ्यां वा ग्रहपीडासु दुःस्वप्नाद्भुतद[4]

---

[1] अभिपूजितात्मा—इ० पा० । [2] वेदतुरंगमाय—इ० पा० । [3] अखंडलदंडभानोः—इ०, अखंडलतुल्यभानोः—इ० पा० । [4] दुःखदुःस्वप्नदर्शने—इ० पा० ।

र्शने ॥ २ ॥ देयमेतन्महादानं द्रव्यमात्रागमे तथा ॥ आहिताग्निर्द्विजो यश्च वेदवेदांगपारगः ॥ ३ ॥ पुराणाभिरतो दक्षो देयं तस्मै च पार्थिव ॥ यथा येन विधानेन तन्मे निगदतः शृणु ॥ ४ ॥ गोमयेनोपलिप्ते तु शुचौ देशे नराधिप ॥ आदावेव समास्तीर्य शोभितं वस्त्रमाविकम् ॥ ५ ॥ कर्तव्यं रुक्मशृंगं तद्रौप्यदंतं तथैव च ॥ मुक्तादाम्ना तु लांगूलं तिलच्छन्नं तथैव च ॥ ६ ॥ तिलैः कृत्वा शिरो[1] राजन्वाससाच्छादयेद्बुधः ॥ सुवर्णेनाभितः कुर्यादलंकुर्याद्विशेषतः ॥ ७ ॥ पुष्पैर्गंधैः फलैश्चैव नैवेद्येन च पूजयेत् ॥ रत्नैरेवं यथा शक्त्या तस्य दिक्षु च विन्यसेत् ॥ ॥ ८ ॥ कांस्यपात्राणि चत्वारि तेषु दद्याद्यथाक्रमम् ॥ घृतं क्षीरं दधि क्षौद्रमेवं दत्त्वा यथाविधि ॥ ९ ॥ ततः सर्वसमीपे तु मंत्रमेतमुदीरयेत् ॥ कृष्णः कृष्णमलो देव कृष्णाजिनवरस्तथा ॥ १० ॥ त्वद्दानापास्तपापस्य प्रीयतां मे नमोनमः ॥ त्रयस्त्रिंशत्सुराणां च आधारे त्वं व्यवस्थितः ॥ ११ ॥ कृष्णोऽसि मूर्तिमान्साक्षात्कृष्णाजिन नमोऽस्तु ते ॥ एवं प्रदक्षिणीकृत्य प्रणिपत्य पुनः पुनः ॥ १२ ॥ तत्प्रतिग्राहकं विप्रं वेदवेदांगपारगम् ॥ स्नातं वस्त्रयुगाच्छन्नं[2] स्वशक्त्या वाप्यलंकृतम् ॥ १३ ॥ प्रतिग्रहश्च तस्योक्तः पुच्छ देशे स्वयंभुवा ॥ प्रतिग्रहप्रदग्धस्य विप्रस्य च स भारत ॥ १४ ॥ न पश्येद्वदनं पश्चान्न चैनमभिभाषयेत् ॥ अनेन विधिना दत्त्वा यथावत्कृष्णमार्गणम् ॥ १५ ॥ समग्रं भूमिदानस्य फलं प्राप्नोति मानवः ॥ कृष्णाजिनतिलान्कृत्वा हिरण्यं मधुसर्पिषी ॥ १६ ॥ ये प्रयच्छंति विप्राय न[3] ते शोच्या भवंति वै ॥ सर्वाँल्लोकांश्चरंत्येव कामचारा वियद्गताः ॥ १७ ॥ आभूतसंप्लवं यावत्स्वर्गं प्राप्ता न संशयः ॥ कृष्णाजिनसमं दानं न चास्ति भुवनत्रये ॥ १८ ॥ प्रतिग्रहोपि पापीयानिति वेदविदो विदुः ॥ अवस्थात्रितये यच्च त्रिधा यत्समुपार्जितम् ॥ १९ ॥ तत्सर्वं नाशमायाति दत्त्वा कृष्णाजिनं क्षणात् ॥ २० ॥ कृष्णेक्षणं कृष्णमृगस्य चर्म दत्त्वा द्विजेंद्राय समाहितात्मा ॥ यथोक्तमेतन्मरणं न शोचेत्प्राप्नोत्यभीष्टं मनसः फलं यत् ॥ २१ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे कृष्णाजिनदानविधिव्रतवर्णनं नामाष्टाशीत्युत्तरशततमोऽध्यायः ॥ १८८ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ कथयिष्ये महाराज हेमहस्तिरथं तव ॥ यस्य प्रदानाद्[4] भवनं वैष्णवं याति मानवः ॥ १ ॥ पर्वकालं समासाद्य संक्रांतौ ग्रहणेऽपि वा ॥ कुर्याद्देवरथाकारं रथं मणिविभूषितम् ॥ २ ॥ वलभीभिर्विचित्राभिश्चतुश्चक्रसमन्वितम् ॥ चतुर्भिर्हेममातंगैर्युक्तं हेमविभूषितम् ॥ ३ ॥ ध्वजे च गरुडं कुर्यात्कूबराग्रे विनायकम् ॥ लोकपालाष्टकोपेतं ब्रह्मार्कशिवसंयुतम् ॥ ४ ॥

---

१ सुशिखरम्–इ० पा० । २ वस्त्रपरिच्छन्नम्–इ० पा० । ३ ते च स्वर्गमवाप्नुयुः–इ० पा० । ४ प्रसादात्–इ० पा० ।

मध्ये नारायणोपेतं लक्ष्मीपुष्टिसमन्वितम् ॥ कृष्णाजिनतिलद्रोणं कृत्वा तं स्थापयेद्रथम् ॥ ५ ॥ नानाफलसमायुक्तमुपरिष्टाद्वितानकम् ॥ कौशे
यवस्त्रसंवीतमम्लानकुसुमार्चितम् ॥ ६ ॥ कुर्यात्पंचपलादूर्ध्वमाशताच्च नरोत्तम ॥ ततः स्नात्वा समभ्यर्च्य पितॄन्देवान्यथाविधि ॥ ७ ॥ त्रिःप्रद
क्षिणमावृत्य [1]गृहीतकुसुमांजलिः ॥ इममुच्चारयेन्मंत्रं सर्वसौख्यप्रदायकम् ॥ ८ ॥ नमोनमः [2]शंकरपद्मजार्कलोकेशविद्याधरवासुदेवैः ॥ त्वं सेव्यसे
वेदपुराणयज्ञैस्तेजो हि नः स्यंदन पाहि तस्मात् ॥ ९ ॥ यत्तत्पदं [3]परमंगुह्यतमं पुराणमानंदहेतुगणरूपविमुक्तबन्धाः ॥ योगैकमानसदृशो मुनयः
समाधौ पश्यंति तत्त्वमसि नाथ रथेति [4]रूढः ॥ १० ॥ यस्मात्त्वमेव भवसागरसंप्लुतानामानंदभांडचितमध्यगपानपात्रम् ॥ तस्मादघौघशम
नेन कुरु प्रसादं चामीकरेभरथ माधव संप्रदानात् ॥ ११ ॥ इत्थं प्रणम्य कनकेभरथप्रदानं यः कारयेत्सकलपापविमुक्तदेहः ॥ विद्याधरामरमुनीं
द्रगणाभिजुष्टं प्राप्नोत्यसौ पदमतींद्रियमिंदुमौलेः ॥ १२ ॥ कृतदुरितवितानातुष्टिसद्वह्निपालव्यतिकरकृतदेहोद्वेगभानोऽपि बंधून् ॥ नयति च
पितृपौत्रान्रौरवादप्यशेषात्कृतगजरथदानः शाश्वतं सद्म विष्णोः ॥ १३ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे
हेमहस्तिरथदानविधिवर्णनं नामैकोननवत्युत्तरशततमोऽध्यायः ॥ १८९ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ पुनरेव प्रवक्ष्यामि दानमत्यद्भुतं
तव ॥ विश्वचक्रमिति ख्यातं सर्वपापविनाशनम् ॥ १ ॥ तपनीयस्य शुद्धस्य विशुद्धात्माथ कारयेत् ॥ श्रेष्ठं पलसहस्रेण तदर्द्धेन तु मध्यमम् ॥
॥२॥ तस्याप्यर्द्धं कनिष्ठं स्याद्विश्वचक्रमुदाहृतम् ॥ तथा विंशत्पलादूर्ध्वमशक्तोऽपि निवेदयेत् ॥ ३ ॥ षोडशारं ततश्चक्रं भ्रमन्नेम्यष्टकावृतम् ॥
नाभिपद्मे स्थितं विष्णुं योगारूढं चतुर्भुजम् ॥ ४ ॥ शंखचक्रेऽस्य पार्श्वस्थे देव्यष्टकसमावृतम् ॥ द्वितीयावरणे तद्वत्पूर्वतो जलशायिनम् ॥ ५ ॥
अत्रिर्भृगुर्वशिष्ठश्च ब्रह्मा कश्यप एव च ॥ मत्स्यः कूर्मो वराहश्च नारसिंहोथ वामनः ॥६॥ रामो रामश्च कृष्णश्च बुद्धः कल्की च ते दश ॥ तृतीया
वरणे गौरी मनुभिर्वसुभिर्युता ॥ ७ ॥ चतुर्थे द्वादशादित्या वेदाश्चत्वार एव च ॥ पञ्चमे पञ्च भूतानि रुद्राश्चैकादशैव तु ॥८॥ लोकपालाष्टकं षष्ठे
दिङ्मातंगास्तथैव च ॥ सप्तमेऽस्त्राणि सर्वाणि मंगलानि च कारयेत् ॥ ९ ॥ अन्तरांतरतो देवान्विन्यसेदष्टमे पुनः ॥ दशहस्तं ततः कृत्वा पता
कातोरणान्वितम् ॥ १० ॥ मंडपं कुण्डमेकं च कारयेद्वस्त्रसंयुतम् ॥ चतुर्हस्ता भवेद्वेदी मध्ये तस्यास्ततो न्यसेत् ॥ ११ ॥ कृष्णाजिनोपरिगतं
विश्वचक्रं विधानतः ॥ तथाष्टादशधान्यानि रसाश्च लवणादयः ॥ १२ ॥ पूर्णकुम्भाष्टकं तद्वद्वस्त्रमाल्यविभूषितम् ॥ फलानि दापयेत्पार्श्वे पञ्चवर्ण

---

[1] गृहीत्वा कुसुमांजलिम्—इ० पा० । [2] शंकरलोकपाललोकेशविद्याधरवासुदेवैः—इ० पा० । [3] पुण्यतमं मुरारेः—इ० पा० । [4] मूढः—इ० पा० ।

वितानकम् ॥ १३ ॥ अधिवास्य ततश्चक्रं पश्चाद्धोमं समाचरेत् ॥ चातुश्चरणिकांस्तत्र ब्राह्मणांश्चतुरोथ वा ॥१४॥ होमं कुर्युर्जितात्मानो वस्त्राभ
रणभूषिताः ॥ होमद्रव्यसमोपेताः स्रुक्स्रुवैस्ताम्रभाजनैः ॥ १५ ॥ चक्रप्रतिष्ठितानां तु सुराणां होम इष्यते ॥ तल्लिंगैर्जुहुयान्मंत्रैः सर्वोपद्रवशां
तये ॥ १६ ॥ ततो मंगलशब्देन स्नातः शुक्लांबरो गृही ॥ होमाधिवासनांते तु गृहीतकुसुमांजलिः ॥ १७ ॥ इममुच्चारयन्मंत्रं कृत्वा तत्रिः प्रदक्षि
णम् ॥ नमो विश्वंभरायेति विश्वचक्रात्मने नमः ॥ परमानंदरूपी त्वं पाहि नः पापकर्दमात् ॥ १८ ॥ तेजोमयमिदं यस्मात्सदा पश्यंति सूरयः॥
हृदि तत्र गुणातीतं विश्वचक्रं नमाम्यहम् ॥ १९ ॥ वासुदेवे स्थितं चक्रं तस्य मध्ये तु माधवः ॥ अन्योन्याधाररूपेण प्रणमामि स्थिताविह ॥
॥ २० ॥ विश्वचक्रमिदं यस्मात्सर्वपापहरं हरेः ॥ आयुधं चाधिवासश्च तस्माच्छान्ति ददातु मे ॥ २१ ॥ इत्यामंत्र्य च यो दद्याद्विश्वचक्रं विम
त्सरः ॥ विमुक्तः सर्वपापेभ्यो विष्णुलोके महीयते ॥ २२ ॥ वैकुण्ठलोकमासाद्य चतुर्बाहुनरावृतम् ॥ सेव्यतेऽप्सरसां संघैस्तिष्ठेत्कल्पशतत्र
यम् ॥ २३ ॥ प्रणमेद्वाथ यः कृत्वा विश्वचक्रं दिनेदिने ॥ तस्यायुर्वर्द्धते दीर्घं[१] लक्ष्मीस्तु विपुला भवेत् ॥ २४ ॥ तस्माच्चक्रं सदा कार्यं धार्यं च
स्वगृहे नरैः ॥ कांचनं वाथ रौप्यं वा तदभावेऽथ ताम्रजम्[२] ॥ २५ ॥ इति सकलजगत्सुराधिवासं वितरति यस्तपनीयषोडशारम् ॥ हरिभुवनगतः
स सिद्धसंघैश्चिरमधिगम्य नमस्यतेऽप्सरोभिः ॥ २६ ॥ अथ सुदर्शनतां प्रयाति शत्रोर्मदनसुदर्शनतां च कामिनीभ्यः ॥ स सुदर्शनकेशवानुरूपः
कनकसुदर्शनदानदग्धपापः ॥ २७ ॥ कृतगुरुदुरितोऽपि षोडशारप्रवितरणात्प्रवराकृतिर्मुरारेः॥ अभिभवति भवोद्भवानि भित्त्वा भवमभितो भवने
भवानि भूयः ॥ २८ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे विश्वचक्रदानविधिवर्णनं नाम नवत्युत्तरशततमो
ऽध्यायः ॥१९०॥ ॥छ॥ ॥ युधिष्ठिर उवाच ॥ ॥ प्रतिष्ठा शाश्वती केन दानेन मधुसूदन ॥ इह लोके परे चैव कीर्तिरत्यद्भुता तथा ॥१॥ सद्गतिं
च तथा यांति सर्वे पितृपितामहाः ॥ संततिश्चाक्षया लोके विभवश्चापि पुष्कलः ॥२॥ स्थापनात्सर्वदेवानां कथं स्याद्यदुनंदन ॥ तदाचक्ष्व महा
भाग दानेन नियमेन वा ॥ ३ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ साधु पृष्टं त्वया राजँल्लोकानामुपकारकम् ॥ शृणुष्वैकमना भूत्वा गुह्यं परममुत्तमम् ॥
॥४॥ भुवनानां समासेन प्रतिष्ठां कथयामि ते ॥ देवासुरास्तथा नागा गंधर्वा यक्षराक्षसाः ॥५॥ प्रेताः पिशाचा भूताश्च स्थापिताः स्युर्न संशयः॥
कारकस्यानुकूले तु मुहूर्ते विजये शुभे ॥६॥ पुण्ये तिथौ शिवक्षेत्रे दिने सौम्यग्रहान्विते ॥ सप्त हस्तं पटं कृत्वा चतुरस्रं सुसंहतम् ॥७॥ अभिन्नांगं

---

१ नित्यम्—इ० पा० । २:ताम्रकम्—इ० पा० ।

दृढं शुद्धं[1] शुद्धस्फटिकवर्चसम् ॥ तस्मिन्सर्वाणि राजेंद्र भुवनानि च लेखयेत् ॥ ८॥ चातुर्वर्ण्यकमानीय विचित्रं चित्रकर्मणि ॥ युवानं व्याधि
रहितं भव्यं चित्रकरं शुभम् ॥ ९ ॥ संपूजयित्वा यत्नेन दिव्यवासोविभूषणैः ॥ तस्मिन्कर्मणि युंजीत पठ्यमानैर्द्विजोत्तमैः ॥ १० ॥ शंखभेरीनि
नादैश्च गीतमंगलनिस्वनैः ॥ पुण्याहजयघोषैश्च ब्राह्मणान्[2]पूजयेत्ततः ॥ ११ ॥ आचार्यमपि संपूज्यवासोभिर्भूषणैस्तथा ॥ प्रारंभं कारयेद्राजन्पटे
तस्मिन्यथोदितम् ॥ १२ ॥ मध्ये च लेखयेद्राजञ्जंबूद्वीपं[3] सविस्तरम् ॥ तस्य मध्ये स्थितो मेरुर्मेरोरुपरि देवताः ॥१३॥ दिशासु लोकपालानां
पुरोऽष्टौ सुरसंयुताः ॥ सप्तद्वीपवती पृथ्वी सप्त चैव कुलाचलाः ॥ १४ ॥ सागराः सप्त चात्रैव नद्यो ह्रदाः सरांसि च ॥ पातालाः सप्त चात्रैव
सप्त स्वर्गविभूतयः ॥ १५ ॥ ब्रह्मविष्णुशिवादीनां भुवनानि यथाक्रमम् ॥ ध्रुवमार्गस्तथादित्यो ग्रहतारागणैर्युतः ॥ १६ ॥ देवदानवगन्धर्वा यक्ष
राक्षसपन्नगाः ॥ ऋषयो मुनयो गावो देवमातर एव च ॥१७॥ सुपर्णाद्याश्च विहगा नागाश्चैरावतादयः ॥ दिग्गजाष्टकमत्रैव लेखयेन्मदमंडितम् ॥
॥ १८ ॥ एवंविधं पटं राजन्कारयित्वा सुशोभनम् ॥ दशोत्तरेण पयसा एतत्सर्वसमावृतम् ॥ १९ ॥ तत्तेजसा वृतं भूयो महतोग्रेण सर्वतः ॥
तेजस्तद्वायुना वायुराकाशेन समावृतः ॥ २० ॥ भूतादिना तथाकाशं भूतादिर्महता तथा ॥ अव्यक्तेन महांश्चैव व्याप्तो वै शुद्धिलक्षणः ॥ २१ ॥
अव्यक्तं तमसा व्याप्तं तमश्च रजसा तथा ॥ रजः सत्त्वेन संव्याप्तं त्रिधा प्रकृतिरुच्यते ॥ २२ ॥ एवमावरणोपेतं ब्रह्मांडमखिलं नृप ॥
पुरुषेणावृतं सर्वं सबाह्याभ्यंतरं तथा ॥ २३ ॥ एतत्सर्वं पटस्थं तु कृत्वा चित्रमयं सुधीः ॥ कार्तिक्यामयने चैव विषुवे ग्रहणेऽपि
वा ॥ २४ ॥ पूजयेद्येन विधिना तत्समासेन मे शृणु ॥ पुरतो मंडपं तस्य विचित्रं कारयेद्बुधः ॥ २५ ॥ तत्र कुण्डानि चत्वारि
चतुरस्राणि कारयेत् ॥ द्वौद्वौ नियोजयेत्तेषु ब्राह्मणौ वेदपारगौ ॥ २६ ॥ यज्ञोपकरणोपेतौ वस्त्राभरणभूषितौ ॥ होमं कुर्युर्जितात्मानो
मौनिनः सर्व एव ते ॥ २७ ॥ पटे स्थितानां देवानां [4]मंत्रैरोंकारपूर्वकैः ॥ यजमानस्ततः स्नातः सर्वालंकारभूषितः ॥ २८ ॥ आचा
र्येणसमं कुर्यात्पूजामग्रे पटस्य तु ॥ पुष्पैर्वस्त्रैः समभ्यर्च्य मंत्रमेतमुदीरयेत् ॥ २९ ॥ ब्रह्मांडोदरवर्तीनि भुवनानि चतुर्दश ॥ तानि
संनिहितान्यत्र पूजितानि भवंतु मे ॥ ३० ॥ ब्रह्मा विष्णुस्तथा रुद्रो ह्यादित्या वसवस्तथा ॥ पूजिताः सुप्रतिष्ठाश्च भवंतु सततं मम[5] ॥ ३१ ॥
एवं पटं तं संपूज्य कृत्वा चैव प्रदक्षिणम् ॥ भक्ष्यान्नानाविधांश्चैव नैवेद्यं तत्र दापयेत् ॥ ३२ ॥ शंखतूर्यनिनादैश्च जागरं कारयेत्ततः ॥ ब्रह्मघोषै

---

१ सूत्रं शंखस्फटिकवर्चसम्—इ० पा० । २ पूज्य यत्नतः—इ० पा० । ३ सुविस्तरम्—इ० पा० । ४ मेरोः—इ० पा० । ५ मम सर्वदा—इ० पा० ।

र्विचित्रैश्च गीतमंगलनिस्वनैः ॥ ३३ ॥ पुनः प्रभाते विमले स्नात्वा शुचिरलंकृतः ॥ पूर्वोक्तविधिनानेन पुनः संपूज्य तं पटम् ॥ ३४ ॥
ऋत्विक्पूजां ततः कृत्वा गोशतेन विचक्षणः ॥ अथवा गोयुगं[१] दद्यादेकैकस्यात्यलंकृतम् ॥ ३५ ॥ उपानहौ तथा छत्रं गृहोपकरणानि च ॥ यद्य
दिष्टतमं किंचित्सर्वं दद्याद्विचक्षणः ॥ ३६ ॥ ततः प्रकल्पयेद्यानं नागयुक्तमलंकृतम् ॥ अलाभे वाजिसंयुक्तं पताकाध्वजशालिनम् ॥३७॥ सहस्रं
दक्षिणां दत्त्वा ततस्त्वारोपयेत्पटम्[२] ॥ ब्राह्मणं वा रथेनाथ नयेद्देवालयं बुधः ॥ ३८ ॥ तत्रस्थं स्थापयेन्नीत्वा गन्धैः पुष्पैश्च धूपयेत् ॥ तत्रापि
दद्यान्नैवेद्यं कुर्याच्चापि महोत्सवम् ॥ ३९ ॥ यस्मिन्नायतने तस्य प्रतिष्ठा क्रियते नृप ॥ पूजा तत्रापि महती कर्तव्या भूतिमिच्छता ॥ ४० ॥
चंद्रातपत्रं घण्टां च ध्वजाद्यं दापयेत्सुधीः ॥ यथाशक्त्या च राजेन्द्र गुरुं गौरवयंत्रितः ॥ ४१ ॥ अभ्यर्च्य दक्षिणाभिश्च ब्राह्मणांश्च विसर्जयेत् ॥
दीनांधकृपणानां च भोजनं चाप्यवारितम् ॥ ४२ ॥ तस्मिन्नहनि दातव्यं मित्रस्वजनबंधुषु ॥ अनेन विधिना यस्तु श्रद्दधानो जितेन्द्रियः ॥
॥ ४३ ॥ कुर्यान्नरो वा नारी वा प्रतिष्ठां सार्वलौकिकीम् ॥ स्थापितं तु भवेत्तेन त्रैलोक्यं सचराचरम् ॥ ४४ ॥ कुलं च तारितं तेन सत्पुत्रेण
युधिष्ठिर ॥ यावच्च देवतागारे पटस्तिष्ठति पूजितः ॥ ४५ ॥ तावदस्या[३]क्षया कीर्तिस्त्रैलोक्ये संप्रसर्पति[४] ॥ दानेन कीर्तिर्यावंति मर्त्यलोकेषु
गीयते ॥ ४६ ॥ तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ गन्धर्वैर्गीयमानस्तु अप्सरोगणसेवितः ॥ ४७ ॥ वसेद्धृष्टमनाः स्वर्गे यावदिंद्रा[५]श्चतु
र्दश ॥ पुण्यक्षयादिहाभ्येत्य राजा भवति धार्मिकः ॥ ४८ ॥ पुत्रपौत्रान्वितः श्रीमान्दीर्घायुरतिधार्मिकः ॥ दश जन्मानि राजेन्द्र जायमानः
पुनः पुनः ॥ ४९ ॥ श्रूयते च पुरा राजा रजिर्नाम महाबलः ॥ चक्रवर्ती दृढमतिर्जितारिर्विजितेंद्रियः ॥ ५० ॥ मही येन पुरा दत्ता देवराजस्य
संगरे ॥ जित्वा दैत्यबलं सर्वं दत्तवांस्त्रिदिवं पुनः ॥ ५१ ॥ महेन्द्राय महाभाग सर्वं निहतकंटकम् ॥ स कदाचित्सभामध्ये यावदास्ते मही
पतिः ॥ ५२ ॥ तावत्तत्राजगामाथ पुलस्त्यो ब्रह्मणः सुतः ॥ शिष्यैः परिवृतः श्रीमान्वेदवेदांगपारगैः ॥ ५३ ॥ दत्तार्घस्तु तदा तेन उपविष्टो
वरासने ॥ शुशुभे परया लक्ष्म्या पितामह इवापरः ॥ ५४ ॥ अथ तं पूजयित्वाग्रे मधुपर्केण पार्थिवः ॥ पप्रच्छ विनयोपेतः कथामात्मोद्भवां
नृपः ॥ ५५ ॥ भगवन्केन दानेन तपसा नियमेन वा ॥ श्रीरियं मम धर्मज्ञ तेजश्चाव्याहतं भुवि ॥ ५६ ॥ बलं पुष्टिं धनं धान्यं पुत्रपौत्रं तथो
त्तमम् ॥ एतन्मे सर्वमाचक्ष्व सर्वज्ञोऽसि द्विजोत्तम ॥ ५७ ॥ ॥ पुलस्त्य उवाच ॥ ॥ शृणु राजन्कथामेतामात्मीयां सुमनोहराम् ॥ कथ्य

---

[१] गोयुतम्–इ० पा० । [२] संस्थापयेत्पटम्–इ० पा० । [३] तस्य–इ० पा० । [४] प्रतिसर्पति–इ० पा० । [५] वर्षसहस्राणीत्यग्रिमेणाप्यत्राप्याहृतेमान्वयः ।

मानां मया सम्यक्सप्तमे तव जन्मनि ॥ ५८ ॥ कथेयमभिनिर्वृत्ता शृणुष्वैश्वर्यवर्द्धिनीम् ॥ आसीस्त्वं वैश्यजातीयो वाराणस्यां नरोत्तम ॥ ५९ ॥ बहुभृत्यपरीवारो धनधान्यसमन्वितः ॥ धार्मिकः सत्यनिरतो वणिग्धर्मरतः सदा ॥ ६० ॥ तत्र त्वया श्रुता धर्मा धर्माख्यानगतेन वै ॥ दानाश्रया बहुविधा व्रतानि विविधानि च ॥ ६१ ॥ प्रसंगेन कदाचिच्च प्रतिष्ठा भौवनी त्वया ॥ श्रुता राजेन्द्र विधिवत्कृता च बहुपुण्यदा ॥ ६२ ॥ फलेन तेन जातोऽसि सप्त जन्मानि भूपतिः ॥ कीर्तिस्ते प्रथिता लोके बलं चापि महत्तव ॥ ६३ ॥ अपराण्यपि जन्मानि सप्त राजा भविष्यसि ॥ पश्चाद्योगिकुले भूत्वा निर्वाणं समवाप्स्यसि ॥ ६४ ॥ एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि ॥ नारी वा पुरुषो वापि प्रतिष्ठां भौवनीं तु यः ॥ ६५ ॥ प्रकरोति विधानेन कृतकृत्यो भवेद्बुधः[1] ॥ इत्युक्त्वा स मुनिस्तत्र राजानं शंसितव्रतः ॥६६॥ ययावदर्शनं तत्र सूर्यवैश्वानरोपमः ॥ ६७ ॥ धर्मं विवर्द्धयति कीर्तिशतानि धत्ते कामं प्रसाधयति पापमपाकरोति ॥ ख्याता मयेयमधुना तव दाननिष्ठातन्नास्तियन्नकुरुतेभुवनप्रतिष्ठा ॥६८॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे भुवनप्रतिष्ठावर्णनं नामैकनवत्युत्तरशततमोऽध्यायः ॥ १९१ ॥

॥ ॥ युधिष्ठिर उवाच ॥ ॥ श्रुतो दानविधिः सर्वः प्रसादात्ते रमाधव ॥ नक्षत्रदानस्येदानीं दानकल्पं प्रचक्ष्व मे ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥ अत्राप्युदाहरंतीममितिहासं पुरातनम् ॥ देवक्याश्चैव संवादं देवर्षेर्नारदस्य च ॥ २ ॥ द्वारकामनुसंप्राप्तं नारदं देवदर्शनम् ॥ पप्रच्छेदं तथा प्रश्नं देवकी धर्मदर्शिनी ॥ ३ ॥ तस्याः संपृच्छमानाया देवर्षिर्नारदस्ततः[2] ॥ आचष्ट विधिवत्सर्वं यत्तच्छृणु विशांपते ॥ ४ ॥ नक्षत्रयोगं वक्ष्यामि सर्वपातकनाशनम् ॥ कृत्तिकासु महाभाग पायसेन ससर्पिषा ॥ ५ ॥ संतर्प्य ब्राह्मणान्साधूँल्लोकान्प्राप्नोत्यनुत्तमान् ॥ रोहिण्यां पांडवश्रेष्ठ मांसैरन्नेन सर्पिषा ॥ ६ ॥ संतर्प्य ब्राह्मणान्साधूँल्लोकान्प्राप्नोत्यनुत्तमान् ॥ पयोऽन्नदानं दातव्यमानृण्यार्थं द्विजातये ॥ ७ ॥ दोग्ध्रीं सवत्सां तु नरो नक्षत्रे सोमदैवते[3] ॥ दत्त्वा दिव्यविमानस्थः स्वर्गं प्राप्नोत्यनुत्तमम् ॥ ८ ॥ आर्द्रायां कृशरां[4] दत्त्वा तिलमिश्रां समाहितः ॥ नरस्तरति दुर्गाणि सर्वाण्येव नरोत्तम ॥ ९ ॥ पूपान्पुनर्वसौ दत्त्वा घृतपूर्णान्सुपाचितान् ॥ यशस्वी रूपसंपन्नः सज्जनो[5] जायते कुले ॥ १० ॥ पुष्ये तु कांचनं दत्त्वा कृतं वाकृतमेव वा ॥ अनालोकेषु लोकेषु सोमवत्स विराजते ॥११॥ आश्लेषासु तथारौप्यं यः सुरूपं प्रयच्छति ॥ सर्वभयविनिर्मुक्तः शास्त्रवानभिजायते ॥ १२ ॥ मघासु तिलपूर्णानि वर्धमानानि मानवः ॥ प्रदाय पशुमांश्चैव पुत्रवांश्च प्रजायते ॥१३॥ फाल्गुनीपूर्वसमये वडवां द्विज

---

१ भुवि–इ० पा० । २ तथा–इ० पा० । ३ मृगशीर्षे–इत्यर्थः । ४ शर्कराम्–इ० पा० । ५ ब्रह्मण्यः–इ० प्र० ।

पुंगवे ॥ दत्त्वा पुण्यकृतांल्लोकान्प्राप्नोति सुरसेवितान् ॥ १४ ॥ उत्तराफाल्गुनीयोगे दत्त्वा सौवर्णपंकजम् ॥ सूर्यलोकमवाप्नोति सर्वबाधाविवर्जितः ॥ १५ ॥ हस्ते तु हस्तिनं दत्त्वा कांचनं शक्तितः कृतम् ॥ यात्यसौ शक्रसदनं वरवारणधूर्गतः ॥ १६ ॥ चित्रासु वृषभं दत्त्वा पुण्यानां पुण्यमुत्तमम् ॥ चरत्यप्सरसां लोके मोदते नंदने वने ॥ १७ ॥ स्वातीषु च धनं दत्त्वा यदभीष्टमिहात्मनः ॥ प्राप्नोति च शुभांल्लोकानिह लोके महद्यशः ॥ १८ ॥ विशाखासु महाराज धुरंधरविभूषितम् ॥ सोपस्करं च शकटं सधान्यं वस्त्रसंवृतम् ॥ १९ ॥ दत्त्वा प्रीणाति स पितुः प्रेत्य चानन्त्यमश्नुते ॥ न च दुर्गाण्यवाप्नोति रौरवादीनि मानवः ॥ २० ॥ दत्त्वा यथेष्टं विप्रेभ्यो गतिमिष्टां स गच्छति ॥ कम्बलान्यनुराधर्क्षे दत्त्वा प्रावरणानि च ॥ २१ ॥ स्वर्गे वर्षशतं साग्रमास्ते सुरगणैर्वृतः ॥ कालशाकं च विप्रेभ्यो दत्त्वा मर्त्यः समूलकम् ॥ २२ ॥ ज्येष्ठानुज्येष्ठतामेति गतिमिष्टां च गच्छति ॥ मूले मूलफलं दत्त्वा ब्राह्मणेभ्यः समाहितः ॥ २३ ॥ पितॄन्प्रीणयते सर्वान्गतिं प्राप्नोत्यनुत्तमाम् ॥ अथ पूर्वास्वषाढासु दधिपात्राणि मानवः ॥ २४ ॥ कुलवृत्तोपसम्पन्ने ब्राह्मणे वेदपारगे ॥ प्रदाय जायते प्रेत्य कुले च बहुभोगवान् ॥ २५ ॥ पुत्रपौत्रैः परिवृतः पशुमान्धनवांस्तथा ॥ उदमंथं ससर्पिष्कं प्रभूतमधुफाणितम् ॥ २६ ॥ दत्त्वोत्तरास्वषाढासु सर्वान्कामानवाप्नुयात् ॥ दुग्धं त्वभिजितो भागे दत्त्वा घृतमधुप्लुतम् ॥ २७ ॥ धर्मनित्यो मनीषिभ्यः स्वर्गे वसति पुण्यभाक् ॥ श्रवणे पुस्तकं श्रेष्ठं प्रददातीह यो नरः ॥ २८ ॥ स्वेच्छया याति यानेन सर्वांल्लोकान्नसंशयः ॥ गोयुगं च धनिष्ठासु दत्त्वा विप्राय मानवः ॥ २९ ॥ सर्वत्र मानमाप्नोति यत्र यत्रेह जायते ॥ तथा शतभिषायोगे दत्त्वा सागरु चंदनम् ॥ ३० ॥ प्राप्नोत्यप्सरसां लोके प्रेत्य गंधांश्च शोभनान् ॥ पूर्वभाद्रपदायोगे राजमाषान्प्रदापयेत् ॥ ३१ ॥ सर्वभक्षफलोपेतः स वै प्रेत्य सुखी भवेत् ॥ रत्नमुत्तरयोगे तु सुवस्त्रं यः प्रयच्छति ॥३२॥ पितॄन्प्रीणाति सकलान्प्रेत्यचानंत्यमश्नुते ॥ कांस्योपदोहनां धेनुं रेवत्यां यः प्रयच्छति ॥ ३३ ॥ स प्रेत्य कामानादाय दातारमुपगच्छति ॥ रथमश्वसमायुक्तं दत्त्वाश्विन्यां नरोत्तम ॥ ३४ ॥ हस्त्यश्वरथसंपूर्णे वर्चस्वी जायते कुले ॥ भरणीषु द्विजातिभ्यस्तिलधेनुं प्रदाय वै ॥ ३५ ॥ गावः प्रभूताः प्राप्नोति नरः प्रेत्य यशस्तथा ॥ इत्येष दक्षिणोद्देशः प्रोक्तो नक्षत्रयोगतः ॥ ३६ ॥ देवक्यै नारदेनैव मया च कथितस्तव ॥ सर्वपापप्रशमनः सर्वोपद्रवनाशनः ॥ ३७ ॥ न चात्र कालनियमो नक्षत्रप्रक्रमस्तथा ॥ वित्तं श्रद्धा च राजेन्द्र कारणं चात्र कथ्यते ॥ ३८ ॥ यद्यच्च ते भगवता कमलोद्भवस्य पुत्रेण दानमुदितं प्रसमीक्ष्य वेदान् ॥

---

१ विन्दति–इ० पा० ।

तद्यो ददाति विभवे सति साधुवृत्ते किं तेन पार्थ न कृतं भवतीह लोके ॥ ३९ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे नक्षत्रदानविधिवर्णनंनाम द्विनवत्युत्तरशततमोऽध्यायः ॥ १९२ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ तिथिदानमिदानीं ते कथयामि युधिष्ठिर ॥ सर्वपापप्रशमनं सर्वविघ्नविनाशनम् ॥१॥ मानसं वाचिकं चापि कर्मजं यदघं भवेत् ॥ सर्वं[1] प्रशममायाति दानेनानेन पांडव ॥२॥ श्रावणे कार्तिके चैत्रे[2] वैशाखे फाल्गुने तथा ॥ सितपक्षात्प्रभृत्येव दातव्यं पुण्यवर्द्धनम् ॥ ३ ॥ वित्तं श्रद्धासहायश्च पात्रप्राप्तिस्तथैव च ॥ दानकालः सदैवेह कथितस्तत्त्वदर्शिभिः ॥ ४ ॥ तीर्थे देवालये[3] गोष्ठे गृहे वानियतात्मवान्[4] ॥ यद्ददाति[5] नरश्रेष्ठस्तदानंत्याय कल्पते ॥५॥ प्रतिपत्सु द्विजान्पूज्यान्पूजयित्वा प्रजापतिम्॥सौवर्णमरविन्दं च कारयित्वाष्टपत्रकम् ॥ ६ ॥ कृत्वा चौदुम्बरे पात्रे सुगन्धघृतपूरिते ॥ पुष्पैर्धूपैः पूजयित्वा विप्राय प्रतिपादयेत् ॥७॥ अनेन विधिना दत्त्वा कमलं कमलालयम् ॥ ईप्सिताँल्लभते कामान्निष्कामो ब्रह्मसात्म्यताम्[6] ॥८॥ वह्निं पूज्य द्वितीयायां भूर्भुवःस्वरिति क्रमात् ॥ तिलाज्येन शतं हुत्वा दत्त्वा पूर्णाहुतिं ततः ॥९॥ वैश्वानरं तु सौवर्णं स्थापयेत्ताम्रभाजने ॥ गुडाज्यपूरिते राजंस्तोयपूर्णघटोपरि ॥१०॥ पूजयित्वा वस्त्रमाल्यैर्भक्ष्यभोज्यैरनेकधा ॥ ततस्तं ब्राह्मणे दद्याद्वह्निर्मे प्रीयतामिति ॥११॥ यावज्जीवकृतात्पापान्मुच्यते नात्र संशयः ॥ मृतो वह्निपुरं याति प्राहेदं नारदो मुनिः ॥१२॥ तृतीयायां महाराज राधां स्वर्णमयीं शुभाम् ॥ स्थापयित्वा ताम्रपात्रे लवणोपरि विन्यसेत् ॥१३॥ जीरकं कटुकं चैव गुडं पार्ष्वेषु दापयेत् ॥ रक्तवस्त्रयुगच्छन्नां कुंकुमेन विभूषिताम् ॥ १४ ॥ पुष्पधूपैः सनैवेद्यैः पूजयित्वा द्विजातये ॥ दत्त्वा यत्फलमाप्नोति पार्थ तत्केन वर्ण्यते ॥ १५ ॥ प्रासादा यत्र सौवर्णा नद्यः पायसकर्दमाः॥ गन्धर्वाप्सरसो यत्र तत्र ते यांति मानवाः ॥१६॥ स्वर्गादिहैत्य संसारे सुरूपः सुभगो भवेत् ॥ दाता भोक्ता बहुधनः पुत्रपौत्रसमन्वितः ॥ १७ ॥ नारी वा तद्गुणैर्युक्ता[7] भवतीह न संशयः ॥ चतुर्थ्यां वारणं हैमं पलार्द्धार्द्धं[8] सुशोभनम् ॥ १८ ॥ कारयित्वांकुशयुतं तिलद्रोणोपरि न्यसेत् ॥ वस्त्रैः पुष्पैः पूजयित्वा नैवेद्यं विनिवेद्य च ॥ १९ ॥ ततस्तु ब्राह्मणे दद्याद्गणेशः प्रीयतामिति ॥ कार्यारंभेषु सर्वेषु तस्य विघ्नं न जायते ॥ २० ॥ वारणाः सप्त जन्मानि भवंति मदविह्वलाः ॥ वारणेन्द्रसमारूढस्त्रैलोक्यविजयी भवेत् ॥ २१ ॥ पंचम्यां पन्नगं चैव स्वर्णेनैकेन कारयेत् ॥ क्षीराज्यपत्रमध्यस्थं पूजयित्वा[9] प्रदापयेत् ॥ २२ ॥ द्विजं

---

१ सर्वः–इ० पा० । २ मासे–इ० पा० । ३ चायतने–इ० पा० । ४ नियतात्मना–इ० पा० । ५ यो ददाति नरश्रेष्ठ दानं च न्यायकल्पितम्–इ० पा० । ६ ब्रह्म शाश्वतम्–इ० पा० । ७ बहुशो युक्ता–इ० पा० । ८ पलार्द्धार्द्धम्–इ० पा० । ९ पूज्य विप्राय दापयेत्–इ० पा० ।

संपूज्य वासोभिः प्रणिपत्य क्षमापयेत ॥ इह लोके परे चैव दानमेतत्सुखावहम् ॥ २३ ॥ नागोपद्रवविद्रावि सर्वदुष्टनिबर्हणम् ॥ प्रायश्चित्तं तथा
प्रोक्तं नागदष्टस्य शंभुना ॥ २४ ॥ षष्ठ्यां शक्तिसमोपेतं कुमारं शिखिवाहनम् ॥ कारयित्वा यथाशक्त्या हेममालाविभूषितम् ॥ २५ ॥ तंडुले
नाथ शिखरे वासोभिः पूज्य शक्तितः ॥ षष्ठ्यां स्कंदं यथाशक्ति कृत्वा स्कंदं हिरण्मयम् ॥ २६ ॥ पूजयित्वा गंधपुष्पधूपैर्नैवेद्यतस्तथा ॥ नम
स्कृत्य ततो दद्याद्ब्राह्मणाय कुटुंबिने ॥ २७ ॥ इह भूतिं परां प्राप्य प्रेत्य स्वर्गे महीयते ॥ शूद्रो ब्राह्मणतामेति ब्राह्मणो ब्रह्मलोकताम् ॥ २८ ॥
सप्तम्यां भास्करं पूज्य ब्राह्मणानश्वमुत्तमम् ॥ दद्यादलंकृतग्रीवं सपर्याणं सदक्षिणम् ॥ २९ ॥ सूर्यलोकमवाप्नोति सूर्येण सह मोदते ॥ गंधर्वास्तु
ष्टिमायांति दत्तेऽश्वे समलंकृते ॥ ३० ॥ अष्टम्यां वृषभं श्वेतमव्यंगांगं धुरंधरम् ॥ सितवस्त्रयुगच्छन्नं घंटाभरणभूषितम् ॥ ३१ ॥ दद्यात्प्रणम्य
विप्राय प्रीयतां वृषभध्वजः ॥ प्रदक्षिणं ततः कृत्वा आद्वारांतमनुव्रजेत् ॥ ३२ ॥ दानेनानेन नृपते शिवलोको न दुर्लभः ॥ वृषस्कंधे प्रतिष्ठंति
भुवनानि चतुर्दश ॥ ३३ ॥ तस्माद्वृषभदानेन दत्ता भवति भारती ॥ नवम्यां कांचनं सिंहं कारयित्वा स्वशक्तितः ॥ ३४ ॥ मुक्ताफलाष्टकयुतं
नीलवस्त्रावगुण्ठितम् ॥ दद्याद्देवीमनुस्मृत्य दुष्टदैत्यनिबर्हणीम् ॥ ३५ ॥ द्विजातिप्रवरायेत्थं सर्वान्कामान्समश्नुते ॥ कांतारवनदुर्गेषु चौरै[1]र्व्याला
कुले पथि ॥ ३६ ॥ हिंसकास्तं न हिंसंति दानस्यास्य प्रभावतः ॥ मृतो देवीपुरं याति पूज्यमानः सुरासुरैः ॥ ३७ ॥ पुण्यक्षयादिहाभ्येत्य राजा
भवति धार्मिकः ॥ दशम्यां नृपशार्दूल दशाशाः स्वर्णनिर्मिताः ॥ ३८ ॥ लवणे च गुडे क्षीरे निष्पावेषु तिलेषु च ॥ गव्यत्रये तंदुलेषु माषाणा
मुपरि स्थिताः ॥ ३९ ॥ संपूज्य वस्त्रपुष्पाद्यैर्द्विजाय प्रतिपादयेत् ॥ अनेन विधिना यस्तु पुमान्स्त्री वाथ वा पुनः ॥ ४० ॥ निर्वापयति राजेंद्र
तस्य पुण्यफलं शृणु ॥ इह लोके भूपतिः स्यात्प्रेत्य स्वर्गे महीयते ॥४१॥ सकलास्तस्य सर्वाशा याः काश्चिन्मनसेच्छिताः ॥ ततः स्वर्गादिहाभ्येत्य
कुले महति जायते ॥ ४२ ॥ एकादश्यां गरुत्मंतं कारयित्वा हिरण्मयम् ॥ यथाशक्त्या ताम्रपात्रे घृतस्योपरि पूजितम्[2] ॥ ४३ ॥ पंचाम्यभिरते
विप्रे पुराणज्ञे विशेषतः ॥ दत्त्वा किं बहुनोक्तेन विष्णुलोके महीयते ॥ ४४ ॥ गां वृषं महिषीं हेम सप्तधान्यान्यजाविकम् ॥ वडवां गुडरसान्स
र्वांस्तथा बहुफलद्रुमान् ॥ ४५ ॥ पुष्पाणि च विचित्राणि गंधांश्चोच्चावचान्बहून् ॥ यथाशक्त्या मेलयित्वा वस्त्रैराच्छादयेन्नवैः ॥ ४६ ॥ द्वादश्यां
द्वादशैतानि ब्राह्मणेभ्यो निवेदयेत् ॥ एकस्य वा महाराज यत्फलं तन्निशामय ॥ ४७ ॥ इह कीर्तिं परां प्राप्य भुक्त्वा भोगा

---

[1] घोरव्यालाकुले पथि–इ० पा० । [2] पूरितम्–इ० पा० ।

न्यथेप्सितान् ॥ ततो विष्णुपुरं याति सेव्यमानोऽप्सरोगणैः ॥ ४८ ॥ कर्मक्षयादिहाभ्येत्य राजा भवति धार्मिकः ॥ यज्ञयाजी
दानपतिर्जीवेच्च शरदां शतम् ॥ ४९ ॥ स्नापयेद्ब्राह्मणांश्चात्र त्रयोदश्यां त्रयोदश ॥ तानाच्छाद्य[1] नवैर्वस्त्रैर्गंधपुष्पैरथार्चयेत् ॥
॥ ५० ॥ भोजयीत सुमिष्टान्नं दक्षिणां विनिवेदयेत् ॥ यथाशक्त्या हेमखण्डान्धर्मात्मा प्रीयतामिति ॥ ५१ ॥ धर्मराजाय
कालाय चित्रगुप्ताय दंडिने ॥ मृत्यवे क्षयरूपाय अंतकाय यमाय च ॥ ५२ ॥ प्रेतनाथाय रौद्राय तथा वैवस्वताय च ॥
महिषस्थाय देवाय नामानीह त्रयोदश ॥ ५३ ॥ उच्चार्य श्रद्धया युक्तः प्रणिपत्य विसर्जयेत् ॥ यः करोति महाराज पूजामेतां मनोरमाम् ॥५४॥
यमाय स सुखं मर्त्ये स्थित्वा व्याधिविवर्जितः ॥ यममार्गं गतः पश्चाद्दुःखं नाप्नोत्यसौ पुमान् ॥ ५५ ॥ न पश्यति प्रेतमुखं पितृलोकं स
गच्छति ॥ पुण्यक्षयादिहाभ्येत्य ससुखी नीरुजो[2] भवेत् ॥ ५६ ॥ महिषं सुशुभं कुंभं चतुर्दश्यां पयोभृतम् ॥ तं कर्षकेण संयुक्तं हेम्नः सद्वस्त्रसं
युतम् ॥ ५७ ॥ घंटाभरणशोभाढ्यं वृषभेण समन्वितम् ॥ यो दद्याच्छिवभक्ताय ब्राह्मणाय कुटुंबिने ॥ ५८ ॥ वृषं दत्त्वा नरश्रेष्ठ शिवलोके मही
यते ॥ तत्र स्थित्वा चिरं कालं क्रमादेत्य महीतलम् ॥ ५९ ॥ आरोग्यधनसंयुक्ते कुले महति जायते ॥ सर्वकामसमृद्ध्यर्थं यावज्जन्मशतत्रयम् ॥
॥ ६० ॥ पौर्णमास्यां वृषोत्सर्गं कारयित्वा विधानतः ॥ चंद्रं रजतनिष्पन्नं फलेनैकेन शोभनम् ॥ ६१ ॥ पूजयेद्गंधकुसुमैर्नैवेद्यं विनिवेद्य च ॥
दद्याद्विप्राय [3]संकल्प्य वासोलंकारभूषणैः ॥ ६२ ॥ मंत्रेणानेन राजेन्द्र तन्निबोध यथोदितम् ॥ क्षीरोदार्णवसंभूतत्रैलोक्यांगणदीपक ॥ ६३ ॥ उमा
पतेः शिरोरत्नशिवं यच्छ नमोनमः ॥ दानेनानेन नृपते भ्राजते चंद्रवद्दिवि ॥ ६४ ॥ अप्सरोभिः परिवृतो यावदाभूतसंप्लवम् ॥६५॥ दानान्यमूनि
विधिवत्प्रयतिक्रमेण यच्छंति ये द्विजवराय विशुद्धसत्त्वाः ॥ ते ब्रह्मविष्णुभुवनेषु सुखं विहृत्य यांत्येकतां सह शिवेन न संशयो मे ॥ ६६ ॥
इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे तिथिदानस्वर्णनं नाम त्रिनवत्युत्तरशततमोऽध्यायः ॥ १९३ ॥ छ ॥
॥ ॥ श्रीकृष्ण उवाच ॥ ॥ आदिवाराहदानं ते कथयामि युधिष्ठिर ॥ धरण्यै यत्पुरा:प्रोक्तं वराहवपुषा मया ॥ १ ॥ पुण्यं पवित्रमायुष्यं सर्व
दानोत्तमोत्तमम् ॥ महापापादिदोषघ्नं पूजितं धर्मसत्तमैः ॥ २ ॥ देयं संक्रमणे भानोर्ग्रहणे द्वादशीष्वथ ॥ यज्ञोत्सवविवाहेषु दुःस्वप्नाद्भुतदर्शने ॥ ३ ॥
यदा च जायते वित्तं चित्तं श्रद्धासमन्वितम् ॥ तदैव दानकालः स्याद्ध्रुवं जीवितं यतः ॥ ४ ॥ कुरुक्षेत्रादितीर्थेषु गंगाद्यासु नदीषु च ॥ पुरेषु[4] च

---

[1] आवाह्य—इ० पा० । [2] मनुजः—इ० पा० । [3] संयुक्तम्—इ० पा० । [4] कुशरेषु—इ० पा० ।

पवित्रेषु अरण्येषु वनेषु च ॥ ५ ॥ गोष्ठे देवालये वापि रथे वा स्वगृहांगणे ॥ देयं पुराणविधिना ब्राह्मणाय कुटुंबिने ॥ ६ ॥ कुशैरास्तीर्य तां पार्थ प्रणवाक्षरमंत्रितैः ॥ उपरिष्टात्तिलैस्तेषां वराहं परिकल्पयेत् ॥ ७ ॥ द्रौणैश्चतुर्भिः संपूर्णं तदर्धेनाथ वा पुनः ॥ आढकेनाथ कुर्वीत वित्तशाठ्यं न कारयेत् ॥ ८ ॥ सुवर्णेन मुखं कार्यं भुजौ चक्रगदान्वितौ ॥ राजतीं कारयेद्दंष्ट्रां पद्मरागविभूषिताम् ॥ ९ ॥ शंखं च स्थापयेत्पार्श्वे वनमालां हिरण्मयीम् ॥ पुष्पैर्वा कारयेद्विद्वान्पादौ रूप्यमयौ तथा ॥ १० ॥ दंष्ट्राग्रलग्नवसुधां सौवर्णीं कारयेच्छुभाम् ॥ सर्वधान्यरसोपेतां वस्त्रालंकृतविग्रहाम् ॥ ११ ॥ प्रच्छाद्य वस्त्रैर्देवेशं वराहं सर्वकामदम् ॥ रोमराजिं कुशैः कृत्वा गंधपुष्पैरथार्चयेत् ॥ १२ ॥ नवग्रहमखः कार्यो होमश्चात्र तिलैः स्मृतः ॥ एवं संस्थाप्य विधिवत्ततः स्तोत्रमुदीरयेत् ॥ १३ ॥ वराहेश प्रदुष्टानि सर्वपापफलानि च ॥ मर्द्दमर्द्द महादंष्ट्र भास्वत्कनककुंडल ॥ १४ ॥ शंखचक्रासिहस्ताय हिरण्याक्षांतकाय च ॥ दंष्ट्रोद्धृतधराभृते त्रयीमूर्तिमते नमः ॥ १५ ॥ इत्युच्चार्य नमस्कृत्य प्रदक्षिणमनुव्रजेत् ॥ ततस्तं ब्राह्मणे दद्याद्वस्त्रालंकारभूषितम् ॥ ॥ १६ ॥ प्ररिग्रहस्तु तस्योक्तः पादयोः परमर्षिभिः ॥ अनेन विधिना दत्त्वा प्रणिपत्य क्षमापयेत् ॥ १७ ॥ एवं दत्त्वा महीनाथ वराहं सर्वकामदम् ॥ यत्फलं समवाप्नोति पार्थ तत्केन वर्ण्यते ॥ १८ ॥ सर्वदानेषु यत्पुण्यं सर्वक्रतुषु यत्फलम् ॥ तत्फलं समवाप्नोति दत्त्वा देवं जनार्दनम् ॥ १९ ॥ यथा शक्त्या समुद्धृता वराहेण वसुंधरा ॥ यथा कुलं समुद्धृत्य विष्णुलोके महीयते ॥ २० ॥ ब्राह्मणक्षत्रियविशां स्त्रीणां शूद्रजनस्य च ॥ एतत्साधारणं दानं शैववैष्णवयोगिनाम् ॥ २१ ॥ विप्राय वेदविदुषे नृवराहरूपं दत्त्वा तिलामलसुवर्णमयं सवस्त्रम् ॥ उद्धृत्य पूर्वपुरुषान्सकलत्रमित्रः प्राप्नोति सिद्धभुवनं सुरसिद्धजुष्टम् ॥ २२ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे वराहदानविधिवर्णनं नाम चतुर्नवत्युत्तरशततमोऽध्यायः ॥ १९४ ॥ छ ॥

॥ युधिष्ठिर उवाच ॥ ॥ भगवञ्छ्रोतुमिच्छामि दानमाहात्म्यमुत्तमम् ॥ यदक्षयं परे लोके देवर्षिगणपूजितम् ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ रुद्रेण यत्पुरा प्रोक्तं नारदाय महात्मने ॥ मत्स्येन मनवे तद्वत्तच्छृणुष्व कुरूद्वह ॥ २ ॥ मेरोः प्रदानं वक्ष्यामि दशधा पुनरेव ते ॥ यत्प्रदातोत्तराँल्लोकान्प्राप्नोति सुरपूजितान् ॥ ३ ॥ पुराणेषु च वेदेषु यज्ञेष्वध्ययनेषु च ॥ नतत्फलमधीतेषु कृतेष्विह यदश्नुते ॥ ४ ॥ तस्माद्विधानं वक्ष्यामि पर्वतानामनुक्रमात् ॥ प्रथमो धान्यशैलः स्याद्द्वितीयो लवणाचलः ॥ ५ ॥ गुडाचलस्तृतीयस्तु चतुर्थो हेमपर्वतः ॥

पञ्चमस्तिलशैलः स्यात्षष्ठः कार्पासपर्वतः ॥ ६ ॥ सप्तमो घृतशैलश्च रस[1]शैलस्तथाष्टमः ॥ राजतो नवमस्तद्वद्दशमः शर्कराचलः ॥
॥ ७ ॥ वक्ष्ये विधानमेतेषां यथावदनुपूर्वशः ॥ अयने विषुवे पुण्ये व्यतीपाते दिनक्षये ॥ ८ ॥ शुक्लपक्षे तृतीयायामुपरागे शशिक्षये ॥
विवाहोत्सवयज्ञे वा द्वादश्यामथ वा पुनः ॥ ९ ॥ शुक्लायां पञ्चदश्यां वा पुण्यर्क्षे वा प्रधा[2]नतः ॥ धान्यशैलादयो देया यथाशास्त्रं विजा
नता ॥ १० ॥ तीर्थे वायतने वापि गोष्ठे वा संगमेऽपि वा ॥ मंडपं कारयेद्भक्त्या चतुरस्रमुदङ्मुखम् ॥ ११ ॥ प्रागुदक्प्रवणं तत्र प्राङ्मुखं
वा विधानतः ॥ गोमयेनानुलिप्तायां भूमावास्तीर्य वा कुशान् ॥ १२ ॥ तन्मध्ये पर्वतं कुर्याद्विष्कम्भपर्वतान्वितम् ॥ धान्यद्रोणसहस्रेण
भवेद्गिरिरिहोत्तमः ॥ १३ ॥ मध्यमः पंचशतिकः कनिष्ठः स्यात्त्रिभिः शतैः ॥ १४ ॥ मेरुर्महाव्रीहिमयस्तु मध्यसुवर्णवृक्षत्रयसंयुतः स्यात् ॥
संपूर्णमुक्ताफलवज्रयुक्तो याम्ये नु[3]गोमेदकपुष्परागैः ॥१५॥ यः स्यां[4]च्च गारुत्मतनीलरत्नैः सौम्येन वैडूर्यसरोजरागैः ॥ श्रीखंडखण्डैरभितः प्रवाल
लतान्वितः शुद्धशिलातलः स्यात् ॥१६॥ ब्रह्माथ विष्णुर्भगवान्पुरारिर्दिवाकरोऽप्यत्र हिरण्मयः स्यात् ॥ तथैकदेशोद्धतकन्धरस्तु घृतोदकप्रस्र
वणाश्च दिक्षु ॥ १७ ॥ शुक्लांबरोऽन्यश्च सुराचलः स्यात्पूर्वेण कृष्णानि च दक्षिणेन ॥ वासांसि पश्चा[5]दथ केसराणि रक्तानि चैवोत्तरतो दलानि
॥ १८ ॥ रौप्यामहेंद्रप्रमुखास्तथाष्टौ संस्थापयेल्लोकपतीन्क्रमेण ॥ नानाफलाली च समंततः स्यान्मनोरमामाल्यविलेपनाढ्या ॥ १९ ॥ वितान
कञ्चोपरि पञ्चवर्णमम्लानपुष्पाभरणं सितं वा ॥ इत्थं निवेश्यामरशैलमप्युन्मनास्तु विष्कम्भगणान्क्रमेण ॥ २० ॥ तुरीयभागेन चतुर्दिशं च
संस्थापयेत्पुष्पविलेपनाढ्यान् ॥ पूर्वेण मन्दरमनेकफलोपयुक्तं यत्रोल्लसत्कनकभद्रकदंबचिह्नम् ॥ २१ ॥ कामेन कांचनमयेन विराजमान
माकारयेत्कुसुमवस्त्रविलेपनाढ्यम् ॥ क्षीरारुणोदसरसाथ तथा वनेन रौप्येण शक्तिघटितेन विराजमानम् ॥२२॥ याम्येन गंधमदनोत्र निवेशनीयो
गोधूमसंचयमयः कलधौतजो वा ॥ हैमेन पक्षिपतिना धृतमानसेन तेनाद्यमेव सकलं किलसंयुतः स्यात् ॥ २३ ॥ पश्चात्तिलाचलमनेकसुगन्ध
पुष्पसौवर्णपिप्पलहिरण्मयहंसयुक्तम् ॥ आकारयेद्रजतपुष्पवनेन तद्वद्वस्त्रान्वितं दधिशतोदसरस्तथाग्रे ॥ २४ ॥ संस्थाप्य तं विपुलशैलमथोत्तरेण
शैलं सुपार्श्वमपि माषमयं सुव[6]प्रम् ॥ पुष्पैश्च हेमवटपादपशेषरत्नमाकारयेत्कनकधेनुविराजमानम् ॥ २५ ॥ माक्षीकभद्रकरसावचयेन तद्वद्रौ
प्येण भास्वररसैश्च युतं विधाय ॥ होमश्चतुर्भिरथ वेदपुराणविद्भिर्दान्तैरनिंद्य वरिताकृतिभिर्द्विजेन्द्रैः ॥ २६ ॥ पूर्वेण हस्तमुखमत्र विधाय कुंडं कार्यं

---

[1] रत्नशैलः–इ० पा० । [2] विधानतः–इ० पा० । [3] तु–इ० पा० । [4] पश्चाच्च–इ० पा० । [5] पार्श्वात्–इ० पा० । [6] सुवस्त्रम् इ०, सुविप्रम्–इ० च पा० ।

स्तिलैरथ घृतेन समित्कुशैश्च ॥ रात्रौ च जागरमनुद्धतगीततूर्यैरावाहनं च कथयामि शिलोच्चयानाम् ॥ २७ ॥ त्वं सर्वदेवगणधामनिधे च विघ्न
मस्मद्गृहेष्वमरपर्वतनाशयाशु ॥ क्षेमं विधत्स्व कुरु शांतिमनुत्तमां नः संपूजितः परमभक्तिमतः प्रदेहि ॥ २८ ॥ त्वमेव भगवानीशो ब्रह्मा
विष्णुर्दिवाकरः ॥ मूर्तामूर्तपरं बीजमतः पाहि सनातन ॥ २९ ॥ यस्मात्त्वं [१]लोकपालानां विश्वमूर्तेश्च मंदिरम् ॥ केशवार्कवसूनां च तस्मा
च्छांतिं प्रयच्छ मे ॥ ३० ॥ यस्मादशून्यममरैर्गंधर्वैश्च शिरस्तव ॥ तस्मान्मामुद्धराशेषदुःखसंसारसागरात् ॥ ३१ ॥ एवमभ्यर्च्य तं मेरुं
मन्दरं चापि पूजयेत् ॥ यस्माच्चैत्ररथेनाथ भद्राश्ववरिषेण च ॥ ३२ ॥ शोभसे मन्दरक्षिप्रमतस्तुष्टिकरो भव ॥ यस्माच्चूडामणिर्जंबूद्वीपे त्वं गन्ध
मादनः ॥ ३३ ॥ गन्धर्वैरप्सरोभिश्च गीयमानं यशोऽस्तु मे ॥ यस्मात्त्वं केतुमालेन वैभ्राजेन वनेन च ॥ ३४ ॥ हिरण्मयपाषाणस्तस्मा
च्छांतिं प्रयच्छ मे ॥ उत्तरैः कुरुभिर्यस्मात्सावित्रेण वनेन च ॥ ३५ ॥ सुपार्श्व राजसे नित्यमतः श्रीरक्षयास्तु मे ॥ एवमामंत्र्य तान्सर्वान्प्रभाते
विमले पुनः ॥ ३६ ॥ स्नात्वा तु गुरवे दद्यान्मध्यमं पर्वतोत्तमम् ॥ शेषांश्च पंच तान्दद्यादृत्विग्भ्यः क्रमशो नृप ॥ ३७ ॥ गावो देयाश्चतुस्त्रिंश
दथवा दश भारत ॥ शक्तितः सप्त वाष्टौवा एवं दद्यादशक्तिमान् ॥ ३८ ॥ एकापि गुरवे देया कपिला सुपयस्विनी ॥ पर्वतानामशेषाणामेष
एव विधिः स्मृतः ॥ ३९ ॥ यं[२] एव पूजने मंत्रास्त एवोपस्करे तथा ॥ ग्रहाणां लोकपालानां ब्रह्मादीनामगैः सह ॥ ४० ॥
स्वमंत्रेणैव सर्वेषु होमः शैलेषु शस्यते ॥ उपवासी भवेन्नित्यमशक्तौ नक्तमिष्यते ॥ ४१ ॥ विधानं सर्वशैलानां क्रमशः शृणु भारत ॥ दान
कालेषु ये मन्त्राः पर्वतेषु च यत्फलम् ॥ ४२ ॥ अन्नं ब्रह्म यतः प्रोक्तमन्ने प्राणाः प्रतिष्ठिताः ॥ अन्नाद्भवंति भूतानि जगदन्नेन वर्द्धते ॥ ४३ ॥ अन्न
मेव यतो लक्ष्मीरन्नमेव जनार्दनः ॥ धान्यपर्वतरूपेण पाहि तस्मान्नगोत्तम ॥ ४४ ॥ अनेन विधिना यस्तु दद्याद्धान्यमयं गिरिम् ॥ मन्वन्तर
शतं साग्रं देवलोके महीयते ॥ ४५ ॥ अप्सरोगणगंधर्वैराकीर्णेन विराजता ॥ विमानेन दिवः पृष्ठे स याति ऋषिसेवितः ॥ ४६ ॥ पुण्यक्षये राज
राज्यमाप्नोतीह न संशयः ॥ ४७ ॥ धान्याचलं कनकवृक्षविराजमानं विष्कंभपर्वतयुतं सुरसिद्धजुष्टम् ॥ यच्छंति ये सुमतयः प्रणिपत्य विप्रांस्ते
प्राप्नुवंति परमेष्ठिपदाब्जयुग्मम् ॥ ४८ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे धान्यपर्वतदानविधिवर्णनं नाम
पंचनवत्युत्तरशततमोऽध्यायः॥ ॥ १९५ ॥ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अथातः संप्रवक्ष्यामि लवणाचलमुत्तमम् ॥ यत्प्रदानान्नरो

---

[१] ते–इ० पा० । [२] ते–इ० पा० ।

लोकमाप्नोति शिवसंयुतम् ॥१॥ उत्तमः षोडशद्रोणः कर्तव्यो लवणाचलः॥ मध्यमः स्यात्तदर्धेन तदर्द्धेनाधमः स्मृतः ॥२॥ वित्तहीनो यथाशक्त्या
द्रोणादर्धं तु कारयेत् ॥ चतुर्थांशेन विषयान्पर्वतान्कारयेत्पृथक् ॥३॥ विधानं पूर्ववत्कुर्याद्ब्रह्मादीनां च सर्वदा[1] ॥ तद्वद्धेमतरून्सर्वांल्लोकपालनिवेशनम्
॥४॥ शिरांसि कामदेवादींस्तद्वत्तत्र निवेशयेत् ॥ कुर्याज्जागरमत्रापि दानमंत्रान्निबोध मे ॥५॥ सौभाग्यरससंभूतो यतोऽयं लवणोरसः ॥ दानात्म
कत्वेन च मां पाहि पापान्नगोत्तम ॥ ६ ॥ तस्मादन्नरसाः सर्वे नोत्कृष्टा लवणं विना ॥ प्रियं च शिवयोर्नित्यं तस्माच्छांतिप्रदोभव ॥७॥ विष्णुदेह
समुद्भूतं यस्मादारोग्यवर्धनम् ॥ यस्मात्पर्वतरूपेण पाहि संसारसागरात् ॥ ८ ॥ अनेन विधिना यस्तु दद्याल्लवणपर्वतम् ॥ उमालोके वसेत्कल्पं
ततो याति परां गतिम् ॥ ९ ॥ पुण्यक्षयादिहाभ्येत्य राजा भवति धार्मिकः ॥ पुत्रपौत्रैः परिवृतो जीवेच्च शरदां शतम् ॥ १० ॥ कुर्वंति ये लवण
पर्वतसंप्रदानं संप्राप्नुवंति दिवि ते सुमहद्विमानम् ॥ तत्राप्सरोगणसुरासुरसेव्यमानास्तिष्ठंति हृष्टमनसो दिवि वृद्धमानाः ॥ ११ ॥ ॥
इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे लवणपर्वतदानविधिवर्णनं नाम षण्णवत्युत्तरशततमोऽध्यायः ॥ १९६ ॥ छ ॥
॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अतः परं प्रवक्ष्यामि गुडपर्वतमुत्तमम् ॥ यत्प्रदानान्नरः स्वर्गं प्राप्नोति सुरपूजितम् ॥ १ ॥ उत्तमो दशभिर्भारैः[2]
मध्यमः पंचभिस्तथा ॥ त्रिभिर्भारैः कनिष्ठः स्यात्तदर्द्धेनाल्पको मतः ॥ २ ॥ तद्वदामंत्रणं पूजां हेमवृक्षसुरार्चनम् ॥ विष्कंभपर्वतांस्तत्र
सरांसि वनदेवताः ॥ ३ ॥ होमं जागरणं तद्वल्लोकपालाधिवासनम् ॥ धान्यपर्वतवत्कुर्यादिमं मंत्रमुदीरयेत् ॥ ४ ॥ यथा देवेषु विश्वात्मा प्रवरो
यं जनार्दनः[3] ॥ सामवेदस्तु वेदानां महादेवस्तु योगिनाम् ॥ ५ ॥ प्रणवः सर्वमंत्राणां नारीणां पार्वती यथा ॥ तथा रसानां प्रवरः सदा चेक्षुरसो
मतः ॥ ६ ॥ मम तस्मात्परां लक्ष्मीं प्रयच्छ गुडपर्वत ॥ सुरासुराणां सर्वेषां नागयक्षर्क्षयंत्रिणाम् ॥ ७ ॥ विनाशश्चापि पार्वत्यास्तस्मान्मां
पाहि सर्वदा ॥ अनेन विधिना यस्तु दद्याद्गुडमयं गिरिम् ॥ ८ ॥ संपूज्यमानो गंधर्वैर्गौरीलोके महीयते ॥ पुनः कल्पशतांते तु सप्तद्वीपाधि
पो भवेत् ॥ ९ ॥ आयुरारोग्यसंपन्नः शत्रुभिश्चापराजितः ॥ आसीद्राज्ञी महाभागा सुलभा नाम सुव्रता ॥ १० ॥ मरुत्तस्य प्रिया भार्या रूप
यौवनशालिनी ॥ तस्य भार्या शतान्यासन्सप्त राज्ञो महात्मनः ॥ ११ ॥ ता दास्य इव वाक्यानि कुर्युस्तस्याः सदैव हि ॥ मुखावलोकनकरो
राजा तस्य च सा प्रिया ॥ १२ ॥ अथ कालेन महता दुर्वासा ऋषिसत्तमः ॥ आजगाम तदभ्याशं भ्रममाणो यदृच्छया ॥ १३ ॥ तस्याथ

---

१ सर्वशः–इ० पा० । २ अष्टशतीभारैः–इ० पा० । ३ नरोत्तमः–इ० पा० ।

सत्क्रियां कृत्त्वा दत्त्वा चार्घं यथाविधि ॥ पप्रच्छ सुलभा विप्रं दुर्वाससमकल्मषम् ॥ १४ ॥ ॥ सुलभोवाच ॥ ॥ केन पुण्येन भगवन्मम राजा प्रियंकरः ॥ मुखावलोकनपरो वशे तिष्ठति सर्वदा ॥ १५ ॥ ॥ सपत्न्यश्च मम ब्रह्मन्सदा प्रियहिते रताः ॥ एतदाचक्ष्व भगवन्परं कौतूहलं मम ॥१६॥ ॥ दुर्वासा उवाच ॥ ॥ शृणुष्वावहिता सुभ्रूरात्मवृत्तं पुरातनम् ॥ जानामि सर्वं सुभगे तव वृत्तमशेषतः ॥ १७ ॥ त्वमासीर्वैश्य महिषी गिरिव्रजपुरे पुरा ॥ धार्मिका सत्यशीला च पतिव्रतपरायणा ॥ १८ ॥ तत्र श्रुतस्त्वया वत्से ब्राह्मणानां समीपतः ॥ पुरा दानविधिः कृत्स्नः स्थितया पतिसंनिधौ ॥ १९ ॥ विशेषतस्तत्र विप्रैः कथितो गुडपर्वतः ॥ दत्तश्चापि त्वया पुत्रि संभृत्य विधिवत्तदा ॥ २० ॥ तस्य दानस्य माहात्म्यात्त्वया भुक्तं वरानने ॥ राज्यं जन्मानि चत्वारि निःसपत्नमनाकुलम् ॥ २१ ॥ अन्यानि सप्त जन्मानि तव राज्यं भविष्यति ॥ सौभाग्यमतुलं चैव रूपमारोग्यमेव च ॥ २२ ॥ भूतं चैवमवश्यं च गुडपर्वतदानजम् ॥ कथा तव वरारोहे यास्ये त्वं भव पुत्रिणी ॥ २३ ॥ तस्माद्देयमिदं दानं फलमुत्तममिच्छता ॥ गतिं च शाश्वतीं लेभे सौभाग्यं रूपमेव च ॥ २४ ॥ दानमेतत्प्रशंसंति स्त्रीणां राजन्विशेषतः ॥ पूर्वोक्तं च फलं प्राप्य कृतकृत्योऽभिजायते ॥ २५ ॥ कृष्णेष्टसुंदरदरीस्रवणाकुलेन गंधर्वसिद्धवनिताशतसेवितेन ॥ दत्तेन भारत विधानवता सदैव गौरी प्रसादमुपयाति गुडाचलेन ॥ २६ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे गुडाचलदानविधिवर्णनं नाम सप्तनवत्युत्तरशततमोऽध्यायः ॥ १९७ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अथ पापहरं वक्ष्ये सुवर्णाचलमुत्तमम् ॥ यस्य प्रसादाद्भवनं वैरिंच्यं याति मानवः ॥ १ ॥ उत्तमः पलसाहस्रो मध्यमः पञ्चभिः शतैः ॥ तदर्द्धेनावरस्तद्वदल्पवित्तोऽपि शक्तितः ॥ ॥ २ ॥ दद्यादेकपलादूर्ध्वं यथाशक्त्या विचक्षणः ॥ धान्यपर्वतवत्सर्वं विदध्यान्नृपसत्तम ॥ ३ ॥ विष्कंभशैलांस्तद्वच्च कृत्वा मंत्रमुदीरयेत् ॥ नमस्ते ब्रह्मबीजाय ब्रह्मगर्भाय वै नमः ॥ ४ ॥ यस्मादनंतफलदस्तस्मात्पाहि शिलोच्चय ॥ यस्मादग्नेरपत्यं त्वं यस्मादुल्ब जगत्पतेः ॥ ५ ॥ हेमपर्वतरूपेण तस्मात्पाहि नगोत्तम ॥ अनेन विधिना यस्तुदद्यात्कनकपर्वतम् ॥ ६ ॥ स याति परमं स्थानं यत्र देवो महेश्वरः ॥ तत्र वर्षशतं तिष्ठेत्ततो याति परां गतिम् ॥ ७ ॥ हेमाचलात्परं दानं नचान्यद्विद्यते क्वचित् ॥ ८ ॥ हैमं महींद्रमणिशृंगशतैरुपेतं लोकाधिपाष्टकयुतं सहितं

---

१ दिवस्पतिः—इ० पा० ।

मुनीन्द्रैः ॥ यः शक्तिमान्वितरतीह गणेशलोके कल्पं कुमारवदसौ कुरुपुंगवाऽऽस्ते ॥ ९ ॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे हेमाचलदानविधिवर्णनं नामाष्टनवत्युत्तरशततमोऽध्यायः ॥ १९८ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अ[1]तः परं प्रवक्ष्यामि तिलशैलं विधानतः ॥ यत्प्रदानान्नरो याति विष्णुलोकमनुत्तमम् ॥ १ ॥ तिलाः पवित्रमतुलं पवित्राणां च पा[2]वनम् ॥ विष्णुदेहसमुद्भूतास्तस्मादुत्तमतां गताः ॥ २ ॥ मधुकैटभनामानावास्तां दितिसुतौ पुरा ॥ मधुना सह तत्राभूद्युद्धं विष्णोरनारतम् ॥ ३ ॥ सहस्रं किल वर्षाणां न व्यजीवत दानवः ॥ तत्र स्वेदो महानासीत्क्रुद्धस्याथ गदाभृतः ॥ ४ ॥ पतितश्च धरापृष्ठे कणशो लवशस्तथा ॥ समुत्तस्थुस्तिला माषाः कुशाश्च कुरुनंदन ॥ ५ ॥ हतश्च हरिणा युद्धे स मधुर्बलिनां वरः ॥ मेदसा तस्य वसुधा रंजिता सकला तदा ॥ ६ ॥ मेदिनीति ततः संज्ञामवापाचलधारिणी ॥ हतेऽथ दैत्यप्रवरे देवास्तोषं परं ययुः ॥ ७ ॥ स्तुतिभिश्च परं स्तुत्वा ऊचुस्त्रिदशपुंगव[3]म् ॥ ॥ देवा ऊचुः ॥ ॥ त्वया धृतं जगद्देव त्वया सृष्टं तथैव च ॥ ८ ॥ त्वयीश लीयते सर्वं त्वय्येव मधुसूदन ॥ तस्मात्त्व[4]दंगतो जातास्तिलाः संतु जगद्धिताः ॥ ९ ॥ पालयंतु च देवेश हव्यकव्यानि सर्वदा ॥ दैवे पित्र्ये च सततं नियोज्यास्तत्परैर्नरैः ॥ १० ॥ नहि दैत्याः पिशाचा वा विघ्नं कुर्वंति भारत ॥ तिला यत्रोपयुज्यंते एतच्छीघ्रं विधीयताम् ॥ ११ ॥ श्रुत्वा सुराणां तद्वाक्यं विष्णुस्तानिदमब्रवीत् ॥ तिला भवन्तु रक्षार्थं त्रयाणां जगतामपि ॥ १२ ॥ शुक्लपक्षे तु देवानां संप्रदद्यात्तिलोदकम् ॥ कृष्णपक्षे पितॄणां च स्नात्वा श्र[5]द्धासमन्वितः ॥ १३ ॥ तिलैः सप्ताष्टभिर्वापि समर्पितजलांजलिः ॥ तस्य देवाः सपितरस्तृप्ता यच्छंति शोभनम् ॥ १४ ॥ श्वकाकोपहतं यच्च पतितादिभिरेव च ॥ तिलैरभ्युक्षितं सर्वं पवित्रं स्यान्नसंशयः ॥ १५ ॥ एतैर्भूतैस्तिलैर्यस्तु कृत्वा पर्वतमुत्तमम् ॥ प्रदद्याद्द्विजमुख्याय दानं तस्याक्षयं भवेत् ॥ १६ ॥ उत्तमो दशभिर्द्रोणैर्मध्यमः पंचभिर्मतः ॥ त्रिभिः कनिष्ठो राजेन्द्र तिलशैलः प्रकीर्तितः ॥ १७ ॥ पूर्ववच्चापरं सर्वं विष्कंभपर्वतादिकम् ॥ दानमन्त्रं प्रवक्ष्यामि यथावन्नृ[6]पसत्तम ॥ १८ ॥ यस्मान्मधुवधे विष्णो[7]र्देहस्वेदसमुद्भवाः ॥ तिलाः कु[8]शाश्च माषाश्च तस्माच्छं नो भवंत्विह ॥ १९ ॥ हव्ये कव्ये च यस्माच्च तिलैरेवाभिमंत्र[9]णम् ॥ भवादुद्धर शैलेंद्र तिलाचलनमोऽस्तु ते ॥ २० ॥ इत्यामंत्र्य च यो दद्यात्तिलाचलमनुत्तमम् ॥ स वैष्णवं पदं याति पुनरावृत्तिदुर्ल

---

[1] अथापरम्—इ० पा० । [2] पावनाः—इ० पा० । [3] त्रिदशपुंगवाः—इ० पा० । [4] भगवतः—इ० पा० । [5] शुद्धिसमन्वितः—इ० पा० । [6] च नरोत्तम—इ० पा० । [7] काले विष्णोर्देहसमुद्भवाः—इ० पा० । [8] मुद्गाश्च—इ० पा० । [9] अभिरक्षणैः—इ० पा० ।

भम् ॥ २१ ॥ दीर्घायुष्ट्वमवाप्नोति इह लोके परत्र च ॥ पितृभिर्देवगन्धर्वैः पूज्यमानो दिवं व्रजेत् ॥ २२ ॥ पुण्यक्षयादिहा[1]भ्येत्य राजा भवति धार्मिकः ॥ नारी वा तस्य पत्नी स्याद्रूप[2]सौभाग्यसंयुता ॥ २३ ॥ दक्षा कुलोद्भवा चैव पुत्रपौत्रसमन्विता ॥ विधानमिदमाकर्ण्य विधिना[3] श्रद्धयान्वितः ॥ २४ ॥ कपिलादानपुण्यस्य समं फलमवाप्नुयात् ॥ २५ ॥ दानं तिलाचलसमं यदि चान्यदस्ति तद्ब्रूत शास्त्रनिचयं प्रविचार्य बुद्ध्या ॥ यैर्वर्जिता पितृक्रिया न च होमकर्म तेषां प्रदानमिह किं न करोति शर्म ॥ २६ ॥ ॥

इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे तिलाचलदानविधिवर्णनं नामैकोनद्विशततमोऽध्यायः ॥ १९९ ॥ ॥छ॥ ॥

॥ श्रीकृष्ण उवाच ॥ ॥ अतः परं प्रवक्ष्यामि कार्पासाचलमुत्तमम् ॥ परमं सर्वदानानां प्रियं सर्वदिवौकसाम् ॥ १ ॥ देशकालौ समासाद्य धनं श्रद्धां च यत्नतः ॥ देयमेतन्महादानं कुलोद्धर[4]णहेतवे ॥ २ ॥ पूर्वोक्तेन विधानेन कृत्वा सर्वमशेषतः ॥ पर्वतं कल्पयेत्तत्र कार्पासेन विधानतः ॥ ३ ॥ विंशद्भारस्तु कर्तव्य उत्तमः पर्वतो बुधैः ॥ दशभिर्मध्यमः प्रोक्तो जघन्यः पंचभिर्मतः ॥ ४ ॥ भारेणाल्पधनो दद्याद्वित्तशाठ्यविवर्जितः ॥ धान्यपर्वतवत्सर्वमासाद्य नृपपुगव ॥ ५ ॥ तद्वज्जागरणं कुर्यात्तद्वच्चैवाधिवासनम् ॥ प्रभातायां तु शर्वर्यामिमं मन्त्रमुदीरयेत् ॥ ६ ॥ त्वमेवावरणंयस्माल्लोकानामिह सर्वदा ॥ कार्पासाचलनस्तस्मादघौघध्वंसनो भव ॥ ७ ॥ इति कार्पासशैलेन्द्रं यो दद्यात्पर्वसंनिधौ ॥ रुद्रलोके वसेत्कल्पं ततो राजा भवेदिह ॥ ८ ॥ रूपवान्सुभगो वाग्मी श्रीमानतुलविक्रमः ॥ पञ्चजन्मानि नारी वा जायते नात्र संशयः ॥ ९ ॥ कार्पासपर्वतमयो जगदेकबंधुर्यस्मान्नतेन रहितो वरवस्त्रयोगः ॥ तस्मादघौघशमनाय सुखाय नित्यं देयो नरेण नरनाथविमत्सरेण ॥ १० ॥

इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे कार्पासाचलदानविधिवर्णनं नाम द्विशततमोऽध्यायः ॥ २०० ॥ ॥छ॥

॥ ॥ श्रीकृष्ण उवाच ॥ ॥ अथातः संप्रवक्ष्यामि घृताचलमनुत्तमम् ॥ तेजोऽमृतमयं दिव्यं महापातकनाशनम् ॥ १ ॥ पंचाशद्घृतकुम्भानामुत्तमःस्याद्घृताचलः ॥ मध्यमस्तु तदर्धेन तदर्द्धेनावरः स्मृतः ॥ २ ॥ अल्पवित्तस्तु कुर्वीत यथा शक्त्या विधानतः ॥ विष्कंभपर्वतांस्तद्वच्चतुर्भागेन कल्पयेत् ॥ ३ ॥ शालेयतंदुलानां च कुभांश्च परिविन्यसेत् ॥ कारयेत्संहतानुच्चान्यथा शोभं विधानतः ॥ ४ ॥ वेष्टयेच्छुक्लवासोभिरिक्षुदंडफलादिकैः ॥ धान्यपर्वतवच्छेषं विधानमिह पठ्यते ॥ ५ ॥ अधिवासनपूर्वं च तद्वद्धोमंसुरार्चनम् ॥ प्रभातायां तु शर्वयां गुरवे विनि

---

१ आगत्य—इ० पा०। सौभाग्यसंयुता—इ० पा०। ३ निर्धनः—इ० पा०। ४ प्रियं सर्वदिवौकसाम्—इ० पा०।

वेदयेत् ॥६॥ विष्कंभपर्वतांस्तद्वदृत्विग्भ्यः शांतमानसः ॥ मंत्रेणानेन कौंतेय त[१]च्छृणुष्व वदामि ते ॥७॥ संयोगाद्घृतमुत्पन्नं यस्मादमृततेजसे ॥
तस्माद्घृताचलश्चास्मात्प्रीयतां मम शंकरः ॥ ८ ॥ तस्मात्तेजोमयं ब्रह्म घृते नित्यं व्यवस्थितम् ॥ घृतपर्वतरूपेण तस्मान्नः पाहि भूधर ॥ ९ ॥
अनेन विधिना दद्याद्घृताचलमनुत्तमम् ॥ [२]महापातकयुक्तोऽपि लोकमायाति शांकरम् ॥ १० ॥ हंससारससंयुक्ते किंकिणीजालमालिते ॥
विमाने अप्सरोभिश्च सिद्धविद्याधरैर्वृतः ॥ ११ ॥ विहरेत्पितृभिः सार्द्धं यावदाभूतसंप्लवम् ॥ १२ ॥ आज्याचलं प्रचलकुंडलसुन्दरीभिः संसे
व्यमानमिह ये वितरंति मर्त्याः ॥ स्वर्गं सुरेंद्रभवनं भवसंनिधिं वा स्नेहानुबंधमचलं भवतीति सर्वम् ॥ १३ ॥ इति श्रीभविष्ये महापुराण
उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे घृताचलदानविधिवर्णनं नामैकाधिकद्विशततमोऽध्यायः ॥ २०१ ॥ ॥ छ ॥ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥
अथातः संप्रवक्ष्यामि रत्नाचलमनुत्तमम् ॥ यत्प्रदानान्नरो याति लोकान्सप्तर्षिसेवितान् ॥ १ ॥ मुक्ताफलसहस्रेण पर्वतः स्यादनुत्तमः ॥ मध्यमः
पञ्चशतिकस्त्रिशतेनावरः स्मृतः ॥ २ ॥ अल्पवित्तस्तु कुर्वीत मुक्ताफलशतेन च ॥ चतुर्थांशेन विष्कंभपर्वताः स्युः समंततः ॥ ३ ॥ पूर्वेणव
ज्रगोमेदैर्दक्षिणेनेंद्रनीलकैः ॥ पुष्परागयुतः कार्यो विद्वद्भिर्गंधमादनः ॥ ४ ॥ वैडूर्यविद्रुमैः पश्चात्सावित्रो विपुलाचलः ॥ पद्मरागं ससौवर्णमुत्तरे
णापि विन्यसेत् ॥ ५ ॥ धान्यपर्वतवच्छेषमत्रा[३]पि परिकल्पयेत् ॥ तद्वदावाहनं कृत्वा वृक्षान्देवांश्च कांचनाम् ॥ ६ ॥ पूजयेत्पु[४]ष्पनैवेद्यैः प्रभाते
तु विसर्जनम् ॥ पूर्ववद्गुरुऋत्विग्भ्यां इमान्मंत्रानुदीरयेत् ॥७॥ यथा देवगणाः सर्वे सर्वरत्नेष्ववस्थिताः ॥ त्वं च रत्नमयो नित्यमतः पाहि महा
चल ॥ ८ ॥ यस्माद्रत्नप्रदानेन तु[५]ष्टिमेति जनार्दनः ॥ पूजारत्नप्रदानेन तस्मान्नः पाहि सर्वदा ॥ ९ ॥ अनेन विधिना यस्तु दद्याद्रत्नमयं
गिरिम् ॥ स याति वैष्णवं लोकममरेश्वरपूजितम् ॥ १० ॥ यावत्कल्पशतं साग्रमुषित्वेह नराधिप ॥ रू[६]पारोग्यगुणोपेतः सप्तद्वीपाधिपो भवेत् ॥
॥ ११ ॥ ब्रह्महत्यादिकं किंचिदत्र चामुत्र वा कृतम् ॥ तत्सर्वं नाशमायाति गिरिर्वज्रहतो यथा ॥ १२ ॥ मुक्तामयं कनकविद्रूमभक्तिचित्रं चंच
न्महामणिमरीचिचयोपपन्नम् ॥ रत्नाचलं द्विजवराय निवेदयित्वा भास्वत्प्रभामभिभवेत्सुरलोकलोके ॥ १३ ॥ इति श्रीभविष्ये महापुराण
उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे रत्नाचलदानविधिवर्णनं नाम द्व्यधिकद्विशततमोऽध्यायः ॥ २०२ ॥ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥

---

[१] शृणुष्वाद्य वदामि ते—इ० पा० । [२] ब्रह्मपातकयुक्तोऽपि—इ० पा० । [३] अन्नादिः—इ० पा० । [४] पुष्पगंधाद्यैः—इ०, पुष्पधूपाद्यैः—इ० च पा० । [५] तुष्टिं प्रकुरुते हरिः—इ० पा० ।
[६] रूपारोग्यकुलोपेतः—इ० पा० ।

अतः परं प्रवक्ष्यामि रौप्याचलमनुत्तमम् ॥ यत्प्रदानान्नरो याति सोमलोकं नरोत्तम ॥ १ ॥ सहस्रेण पलानां तु उत्तमो रजताचलः ॥ पंचभिर्म
ध्यमः प्रोक्तस्तदर्द्धेनावरः स्मृतः॥२॥अशक्तो विंशतेरूर्ध्वं कारयेद्भक्तितः सदा ॥ विष्कंभपर्वतांस्तद्वत्तुरीयांशेन कल्पयेत् ॥३॥ पूर्ववद्राजतान्कुर्या
न्मंदरादीन्विधानतः ॥ कलधौतमयांस्तद्वल्लोकेशान्कारयेन्नृप ॥४॥ ब्रह्मविष्णुशिवादींश्च नितंबोऽत्र हिरण्मयः ॥ राजतं स्याद्यदन्येषां सर्वं तदिह
कांचनम् ॥ ५ ॥ शेषं च पूर्ववत्कृत्वा होमजागरणादिकम् ॥ दद्यात्तद्वत्प्रभाते तु गुरवे रौप्यपर्वतम् ॥ ६ ॥ विष्कंभशैलानृत्विग्भ्यः पूजयेच्च विभू
षणैः ॥ इमं मंत्रं पठन्दद्याद्दर्भपाणिर्विमत्सरः ॥ ७ ॥ पितॄणां वल्लभं यस्माच्छर्मदं शंकरस्य च ॥ रजतं पाहि तस्मान्नो घोरात्संसारसागरात् ॥८॥
इत्थं निवेश्य यो दद्याद्रजताचलमुत्तमम् ॥ गवामयुतदानस्य फलं प्राप्नोति मानवः ॥ ९ ॥ सोमलोके सगंधर्वकिंनराप्सरसां[1] गणैः ॥ पूज्यमानो
वसेद्विद्वान्यावदाभूतसंप्लवम् ॥ १० ॥ राजेश[2] राजतगिरिं कनकोपलालीच्छन्नं प्रसन्नसलिलैः सहितं सरोभिः ॥ यच्छंति ये सुकृतिनो विरजो वि
शोकं गच्छंति ते गतमला नृप सोमलोकम् ॥११॥ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे रौप्याचलदानविधिवर्णनं
नाम त्र्यधिकद्विशततमोऽध्यायः ॥ २०३ ॥ ॥ छ ॥ श्रीकृष्ण उवाच ॥ ॥ अथातः संप्रवक्ष्यामि शर्कराचलमुत्तमम्[3] ॥ यस्य प्रदानाद्विष्णव
र्करुद्रास्तुष्यंति सर्वदा ॥ १ ॥ अष्टभिः शर्कराभारैरुत्तमः स्यान्महाचलः ॥ चतुर्भिर्मध्यमः प्रोक्तो भाराभ्यामधमः स्मृतः ॥ २ ॥ भारेणैवार्द्ध
भारेण कुर्याद्यश्चाल्पवित्तवान् ॥ विष्कंभपर्वतान्कुर्यात्तुरीयांशेन मानवः ॥ ३ ॥ धान्यपर्वतवत्सर्वमासाद्य रससंयुतम् ॥ मेरोरुपरितस्तद्वत्स्थाप्य
हैमतरुत्रयम् ॥ ४ ॥ मंदारः पारिजातश्च तृतीयः कल्पपादपः॥एतद्वृक्षत्रयं मूर्ध्नि सर्वेष्वपि निधापयेत् ॥५॥ हरिचंदनसंतानौ पूर्वपश्चिमभागयोः ॥
निवेश्यौ सर्वशैलेषु विशेषाच्छर्कराचले ॥ ६ ॥ मंदरे कामदेवं तु कदंबस्य तले न्यसेत् ॥ जंबूवृक्षतले कार्यो गरुन्मान्गंधमादने ॥७॥ प्राङ्मुखो
हेममूर्तिश्च हंसः स्याद्विपुलाचले ॥ हैमी श्रेयोर्थिभिः कार्या सुरभिर्दक्षिणामुखी ॥ ८ ॥ धान्यपर्वतवत्सर्वमावाहनमखादिकम् ॥ कृत्वाथ गुरवे
दद्यान्मध्यमं पर्वतोत्तमम्[4] ॥ ९ ॥ ऋत्विग्भ्यश्चतुरः शैलानिमान्मंत्रानुदीरयेत् ॥ सौभाग्यामृतसारोऽयं परमः शर्करायुतः ॥ १० ॥ यस्मादानं
दकारी त्वं भव शैलेंद्र सर्वदा ॥ अमृतं पिबतां ये तु निष्पेतुर्भुवि शीकराः ॥ ११ ॥ देवानां तत्समुत्थोऽसि पाहि नः शर्कराचल ॥ मनोभवधनु
र्मध्यादुद्भूता शर्करा यतः ॥ १२ ॥ तन्मयोऽसि महाशैल पाहि संसारसागरात् ॥ यो दद्याच्छर्कराशैलमनेन विधिना नरः ॥ १३ ॥ सर्वपाप

---

[1] तु—इ० पा० । [2] नागेश—इ० पा० । [3] शर्कराशैलम्—इ० पा० । [4] पुरुषोत्तम—इ० पा० ।

विनिर्मुक्तः स[1] याति शिवमंदिरम् ॥ चंद्रादिसार्चिसंकाशमधिरुह्यानुजीविभिः ॥ १४ ॥ सहैव यानमातिष्ठेत्स तु विष्णुपदे दिवि ॥ ततः कल्प
शतांते तु सप्तद्वीपाधिपो भवेत् ॥ १५ ॥ आयुरारोग्यसंपन्नो यावज्जन्मायुतत्रयम् ॥ भोजनं शक्तितो दद्यात्सर्वशैलेष्वमत्सरः ॥ स्वयं वा क्षार
लवणमश्नीयात्तदनुज्ञया ॥ १६ ॥ पर्वतोपस्करं सर्वं प्रापयेद्ब्राह्मणालयम् ॥ आसीत्पुरा ब्रह्मकल्पे धर्ममूर्तिर्नराधिपः ॥ १७ ॥ सुहृच्छक्रस्य
निहता येन दैत्याः सहस्रशः ॥ सोमसूर्यादयो यस्य तेजसा विगतप्रभाः ॥ १८ ॥ भवंति शतशो येन राजानोऽपि पराजिताः ॥ यथेच्छारूप
धारी च मनुष्योऽप्यपवारितः ॥ १९ ॥ तस्य भानुमती नाम भार्या त्रैलोक्यसुंदरी ॥ लक्ष्मीरिव च रूपेण निर्जितामरसुंदरी ॥ २० ॥ राज्ञस्त
स्याग्रमहिषी प्राणेभ्योऽपि गरीयसी ॥ दशनारीसहस्राणां मध्ये श्रीरिव राजते ॥ २१ ॥ नृपकोटिसहस्रेण न कदाचित्प्रमुच्यते ॥ स कदाचि
त्स्थानगतं पप्रच्छ स्वं पुरोहितम्[2] ॥ २२ ॥ विस्मयाविष्टहृदयो वसिष्ठमृषिसत्तमम् ॥ भगवन्केन धर्मेण मम लक्ष्मीरनुत्तमा ॥ २३ ॥ कस्माच्च
विपुलं तेजो मच्छरीरे सदोत्तमम् ॥ २४ ॥ ॥ वशिष्ठ उवाच ॥ पुरा लीलावती नाम वेश्या शिवपरायणा ॥ तया दत्तश्चतुर्दश्यां गुरवे लवणा
चलः ॥ २५ ॥ हेमवृक्षामरैः सार्द्धं यथावद्विधिपूर्वकः ॥ शूद्रः सुवर्णकारस्तु नाम्ना शौंडोभवत्तदा ॥ २६ ॥ भृत्यो लीलावतीगेहे तेन हैमा
विनिर्मिताः ॥ तरवोऽमरमुख्याश्च श्रद्धायुक्तेन पार्थिव ॥ २७ ॥ अतिरूपेण संपन्नान्घटयित्वा ततो हृदि ॥ धर्मकार्यमतिं ज्ञात्वा नागृहीत
कथंचन ॥ २८ ॥ उज्ज्वालितास्तु तत्पत्न्या सौवर्णामरपादपाः ॥ लीलावती गृहे पार्श्वे परिचर्यां च पार्थिव ॥ २९ ॥ कृतं ताभ्यां प्रहर्षेण
द्विजशुश्रूषणादिकम् ॥ सा तु लीलावती वेश्या कालेन महता नृप ॥ ३० ॥ सर्वपापविनिर्मुक्ता जगाम शिवमंदिरम् ॥ योऽसौ सुवर्णकारश्च
दरिद्रोऽप्यति सत्त्ववान् ॥ ३१ ॥ न मूल्यमादाद्वेश्यातः स भवानिह सांप्रतम् ॥ सप्तद्वीपपतिर्जातः सूर्यायुतसमप्रभः ॥ ३२ ॥ यया सुवर्ण
रचितास्तरवो हेमदेवताः ॥ सम्यगुज्ज्वलिताः पत्नी सेयं भानुमती तव ॥ ३३ ॥ उज्ज्वालनादुज्ज्वलरूपमस्याः सुजातमस्मिन्भुवना
धिपत्यम् ॥ तस्मात्कृतं तत्परिकर्म रात्रावनुद्धताभ्यां लवणाचलस्य ॥ ३४ ॥ तस्माच्चलोकेष्वपराजितस्त्वमारोग्यसौभाग्ययुता च लक्ष्मीः ॥
तस्मात्त्वमप्यत्र विधानपूर्वं धान्याचलादीन्दशधा कुरुष्व ॥ ३५ ॥ तथेति सम्पूज्य च धर्ममूर्तिं वचो वशिष्ठस्य ददौ स सर्वान् ॥ धान्या
चलादीन्क्रमशः पुरारेर्लोकं जगामामरपूज्यमानः ॥ ३६ ॥ यश्चाधनः पश्यति दीयमानं मेरोः प्रदानमिह धर्मपरो मनुष्यः ॥ शृणोति

---

१ प्रयाति–इ० पा० । २ पुरोधसम्–इ० पा० ।

भक्त्या परयाऽप्रमादी विकल्मषः सोऽपि दिवं प्रयाति ॥ ३७ ॥ दुःस्वप्नं प्रशममुपैति पठ्यमाने शैलेन्द्रे भवभयभेदने नराणाम् ॥ यः कुर्यात्कि
मु नृपपुंगवेह सम्यक्छांतात्मा हरिहरपुरमेति जंतुः ॥ ३८ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे शर्कराचलदानविधि
वर्णनं नाम चतुरधिकद्विशततमोऽध्यायः ॥ २०४ ॥ ॥ छ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ प्रतिपत्क्रमयोगेन तिथीनां विस्तरः श्रुतः ॥
सरहस्यः समंत्रश्च प्रारंभोद्यापनैः सह ॥ १ ॥ नवग्रहमखात्[1]सर्वं होमकर्मावधारितम् ॥ स्नानक्रमश्च विदितो विज्ञाताश्चोत्सवा मया ॥ २ ॥ दान
धर्मस्त्वशेषेण श्रुतः सर्वार्थदर्शितः ॥ तडागोत्सर्जनविधिर्विदितः पादपोत्सवः ॥ ३ ॥ एवं गतं मम मनो मुह्यते मधुसूदन ॥ व्रतं कथयता कृष्ण
तास्ताः संश्रित्य देवताः ॥ ४ ॥ देवानां देवकीपुत्र नानात्वं संप्रदर्शितम् ॥ तिथि[2]क्रमान्कथयता पूजामन्त्रोधिवासनम् ॥ ५ ॥ व्यासाद्यैर्मुनिभिः
सर्वैर्ध्यानयोगपरायणैः ॥ एक एवात्र निर्दिष्टो देवः[3] सर्वगतोऽव्ययः ॥ ६ ॥ वर्णाश्रमाचारधर्मः कस्मान्नात्र प्रदर्शितः ॥ एते महर्षयस्तुष्टाः श्रोतु
कामा भवद्वचः ॥ ७ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ व्रतदानैकलेशोयं कथितस्तव पार्थिव ॥ विशेषतश्च शक्नोति वक्तुं यदि सरस्वती ॥ ८ ॥
सर्वस्तरति दुर्गाणि सर्वो भद्राणि पश्यति ॥ वर्णाश्रमाणां सामान्य इति [4]धर्मः प्रकीर्तितः ॥ ९ ॥ कथितोऽयं व्रतत्वोहो देवानुद्दिश्य यो मया ॥
परमार्थः स एवोक्तो देवस्तमुपधारय ॥ १० ॥ यो ब्रह्मा स हरिः प्रोक्तो यो हरिः स महेश्वरः ॥ महेश्वरः स्मृतः सूर्यः सूर्यः पावक उच्यते ॥
॥ ११ ॥ पावकः कार्तिकेयोसौ कार्तिकेयो विनायकः ॥ गौरी लक्ष्मीश्च सावित्री शक्तिभेदाः प्रकीर्तिताः ॥ १२ ॥ देवं देवीं समुद्दिश्य यः
करोति व्रतं नरः ॥ न भेदस्तत्र [5]मंतव्यः शिवशक्तिमयं जगत् ॥ १३ ॥ बहुप्रकारा वसुधा भेदाः साम्यनिलांभसाम् ॥ परमार्थतश्चिंत्यमानो न
भेदः प्रतिभासते ॥ १४ ॥ कश्चिद्देवं समाश्रित्य करोति किमपि व्रतम् ॥ त्रयीधर्मानुगं पार्थ एकं तत्रापि कारणम् ॥ १५ ॥ यश्चैव ते मया
ख्यातो व्रतदानविधिः परः ॥ सफलः स तु विज्ञेयः सदाचारवतां सताम् ॥ १६ ॥ आचारहीनं न पुनंति वेदा यद्यप्यधीताः सह षड्भिरङ्गैः ॥
छंदांस्येनं मृत्युकाले त्यजंति नीडं शकुन्ता इव जातपक्षाः ॥ १७ ॥ कपालस्थं यथा तोयं श्वहतौ वा यथा पयः ॥ दुष्टं स्यात्स्थानदोषेण वृत्तं[6]
हीने तथा शुभम् ॥ १८ ॥ वृत्तं यत्नेन संरक्षेद्वित्तमेति प्रयाति च ॥ अहीनो वित्ततो हीनो वृत्ततस्तु हतो हतः ॥ १९ ॥ एवमाचारधर्मस्य मूलं
राजन्कुलस्य च ॥ आचाराद्धि च्युतो जंतुर्नकुलीनो न धार्मिकः ॥ २० ॥ किं कुलेनोपदिष्टेन विपुलेन दुरात्मनाम् ॥ कृमयः किं न जायंते कुसु

---

[1] पूर्वम्——इ० पा० । [2] क्रमयता—इ० पा० । [3] विष्णुः—इ०पा० । [4] धर्माः सनातनाः—इ० पा० । [5] धतव्यः—इ० पा० । [6] वृत्ततस्तु मनोहरः—इ० पा० ।

मेषु सुगंधिषु ॥ २१ ॥ हीनजातिप्रसूतोपि शौचाचारसमन्वितः ॥ सर्वधर्मार्थकुशलः सकुलीनः [1]संतां वरः ॥ २२ ॥ न कुलं कुलमित्याहुराचारः कुलमुच्यते ॥ आचारकुशलो राजन्निह चामुत्र नंदते ॥ २३ ॥ ॥ युधिष्ठिर उवाच ॥ ॥ सदाचारमहं कृष्ण श्रोतुमिच्छामि शाश्वतम् ॥ सर्वं धर्ममयः कोऽत्र सदाचारः प्रकीर्तितः ॥ २४ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ आचारप्रभवो धर्मः संतश्चाचारलक्षणाः ॥ साधूनां च यथा वृत्तं स सदाचार उच्यते ॥ २५ ॥ तस्मात्कुर्यादिहाचारं य इच्छेद्[2]भूतिमात्मनः ॥ [3]अपि पापशरीरस्य आचारो हंत्यलक्षणम् ॥ २६ ॥ अदृष्टमश्रुतं वेदं पुरुषं धर्मचारिणम् ॥ स्वानि कर्माणि कुर्वाणं तं जनं कुरुते प्रियम् ॥ २७ ॥ ये नास्तिका नैष्ठिकाश्च गुरुशास्त्रातिलंघिनः ॥ अधर्मज्ञा दुराचारास्ते भवंति गतायुषः ॥ २८ ॥ सर्वलक्षणहीनोपि यः सदाचारवान्नरः ॥ श्रद्दधानोनसूयश्च सर्वान्कामानवाप्नुयात् ॥ २९ ॥ ब्राह्मे मुहूर्ते बुध्येत धर्मार्थावनुचिन्तयेत् ॥ ब्राह्मणानलगो सूर्यान्नमेहेत कदाचन ॥ ३० ॥ उदङ्मुखो दिवारात्रावुत्सर्गं दक्षिणामुखः ॥ उत्थायाचम्य तिष्ठेत पूर्वां संध्यां समाहितः ॥ ३१ ॥ एवमेवोत्तरां संध्यां समुपासीत वाग्यतः ॥ नेक्षेतादित्यमुद्यन्तं नास्तं यांतं कदाचन ॥ ३२ ॥ ऋषयो दीर्घतपसा दीर्घमायुरवाप्नुयुः ॥ उपासते येन पूर्वां द्विजाः संध्यां न पश्चिमाम् ॥ ३३ ॥ सर्वांस्तान्धार्मिको राजा शूद्रकर्मणि योजयेत् ॥ आबाधासु यथाकामं कुर्यान्मूत्रपुरीषयोः ॥ ३४ ॥ शिरसा प्रावृतेनैव समास्तीर्य तृणैर्महीम् ॥ ग्रामावसथतीर्थानां क्षेत्राणां चैव वर्त्मनि ॥ ३५ ॥ न मूत्रमधितिष्ठेत न कृष्टे न च गोव्रजे ॥ अन्तर्जलादावसथाद्वल्मीकान्मूषकस्थलात् ॥ ३६ ॥ कृतशौचावशिष्टाश्च वर्जयेत्पञ्च वै मृदः ॥ देवार्चनादिकार्याणि तथा गुर्वभिवादनम् ॥ ३७ ॥ कुर्वीत सम्यगाचम्य तद्वदन्नभुजि क्रियाम् ॥ अफेनशब्दगंधाभिरद्भिरच्छाभिरादरात् ॥ ॥ ३८ ॥ आचामेत्प्रयतः सम्यक्प्राङ्मुखो दङ्मुखोऽपि वा ॥ त्रिवर्गसाधनं यच्च [4]सदा कार्यं विपश्चिता ॥ ३९ ॥ तत्सांनिध्ये गृहस्थस्य सिद्धिरत्र परत्र च ॥ पादेन कार्यं पारत्र्यं पादं कुर्याच्च संचये ॥ ४० ॥ अर्धेनाहारचरणनित्यनैमित्तिकांतकम् ॥ अर्थस्योपार्जने यत्नः सदा कार्यो विपश्चितैः ॥ ४१ ॥ तत्संसिद्धौ हि सिद्ध्यन्ति [5]धर्मकामादयो नृप ॥ केशप्रसाधनादर्शदर्शनं दंतधावनम् ॥ ४२ ॥ पूर्वाह्ण एव कार्याणि देवतानां च पूजनम् ॥ दूरादावसथान्मूत्रं दूरात्पादावसेचनम् ॥ ४३ ॥ उच्छिष्टोत्सर्जनं दूरात्सदा कार्यं हितैषिणा ॥ लोष्टमर्दी तृणच्छेदी नखखादी च यो नरः ॥ ४४ ॥ नित्योच्छिष्टः संकरकृन्नेहायुर्विंदते महत् ॥ नग्नां परस्त्रियं नेक्षेन्नपश्येदात्मनः शकृत् ॥ ४५ ॥ उदक्यादर्शनस्पर्शं कुर्यात्संभाषणं

---

[1] शताद्वरः–इ० पा० । [2] श्रेय आत्मनः–इ० पा० । [3] अशरीरस्य धर्मस्य आचारो हंत्यलक्षणम्–इ० पा० । [4] कर्तव्यं गृहमेधिना–इ० पा० । [5] कर्मकर्मादयः–इ० पा० ।

न च ॥ नाप्सु मूत्रं पुरीषं वा मैथुनं वा समा[१]चरेत् ॥ ४६ ॥ नाधितिष्ठेच्छकृन्मूत्रे केशभस्मकपालिकान् ॥ तुषांगारास्थिशीर्णानि रज्जुवस्त्रादि
कानि च ॥ ४७ ॥ धारिणो न नमेद्विद्वान्नासनं चापि दापयेत् ॥ ब्राह्मणान्प्रणमेद्विद्वानासनं चापि दापयेत् ॥ ४८ ॥ कृतांजलिरुपासीत गच्छंतं
पृष्ठतोन्वियात् ॥ न चासीतासने भिन्ने भिन्नं कांस्यं च वर्जयेत् ॥ ४९ ॥ नामुक्तकेशैर्भोक्तव्यं न नग्नः स्नानमाचरेत् ॥ स्वप्तव्यं नैव नग्नेन न चो
च्छिष्टस्तु संविशेत् ॥ ५० ॥ उच्छिष्टो न स्पृशेच्छीर्षं सर्वे प्राणास्तदाश्रयाः ॥ केशग्रहान्प्रहारांश्च शिरस्येतानि वर्जयेत् ॥ ५१ ॥ नान्यत्र पुत्र
शिष्याभ्यां शिफया ताडनं स्मृतम् ॥ न[२] पाणिभ्यां संहताभ्यां कंडूयेदात्मनः शिरः ॥ ५२ ॥ न चाभीक्ष्णं शिरःस्नानं कार्यं निष्कारणं नरैः ॥
अप्रशस्तं निशि स्नानं राहोरन्यत्र दर्शनात् ॥ ५३ ॥ न भुक्तोत्तरकालं च न गम्भीरजलाशये ॥ शिरःस्नानं तु तैलेन नांगं किंचिदुपस्पृशेत् ॥
॥ ५४ ॥ तिलपिष्टं च नाश्नीयात्तथास्यायुर्न हीयते ॥ दुष्कृतं न गुरोर्ब्रूयात्क्रुद्धं चैनं प्रसादयेत् ॥५५॥ परीवादं न शृणुयादन्येषामपि जल्पताम् ॥
सदानुपहतस्तिष्ठेत्प्रशस्ताश्च तथौषधीः ॥ ५६ ॥ गारुडानि च रत्नानि बिभृयात्प्रयतो नरः ॥ सुस्निग्धामलकेशश्चसुगन्धिश्चारुवेषधृक् ॥५७॥
सिताः सुमनसो हृद्या बिभृयाच्च नरः सदा॥किंचित्परस्वं न हरेन्नाल्पमप्यप्रियं वदेत्॥५८॥ प्रियं च नानृतं ब्रूयान्नान्यदोषानुदीरयेत् ॥ नान्याश्रितं
तथा वैरं रोचयेत्पुरुषेश्वरः॥५९॥ न दुष्टयानमारोहेत्कूलच्छायां न संश्रयेत् ॥ विद्विष्टपतितोन्मत्तबहुवैरादिसंकरैः ॥६०॥ बंधकीबंधकीभर्तृक्षुद्रानृत
कथैःसह ॥ तथातिव्ययशीलैश्च परिवादरतैः शठैः ॥६१॥ बुधो मैत्रीं न कुर्वीत नैकः पंथानमाश्रयेत् ॥ नावगाहेज्जलौघस्य वेगमग्रे नरेश्वर॥६२॥
प्रदीप्तं वेश्म न विशेन्नारोहेच्छिखरं तरोः ॥ न हुंकुर्याच्छवं चैव शवगन्धो हि सोमजः ॥ ६३ ॥ न कुर्याद्दन्तसंघर्षं न कुर्याज्ज्वलनासिकाम् ॥
नासंस्पृष्टमुखो ब्रूयाच्छ्वासकासौ च वर्जयेत् ॥ ६४ ॥ नोच्चैर्हसेत्सशब्दं[३] च न मुञ्चेत्पवनं बुधः ॥ नखान्न वादयेच्छिंद्यान्न नखैश्च महीं लिखेत् ॥
॥ ६५ ॥ न श्मश्रु भक्षयेच्चैव न लोष्टानि च मर्दयेत् ॥ पादेन नाक्रमेत्पादं न पूज्याभिमुखं नयेत् ॥६६॥ नोच्चासने समासीत गुरोरग्रे कदाचन ॥
तस्मात्सदाचारपरो भवेत्कामचरो न हि ॥ ६७ ॥ लोकद्वये शुभं प्रेप्सुः प्रेत्य स्वर्गे महीयते ॥ चतुष्पथं चैत्यतरुं श्मशानोपवनानि च ॥ ६८ ॥
दुष्टस्त्रीसंनिकर्षं च वर्जयेन्निशि सर्वदा ॥ ग्रीष्मवर्षासु चच्छत्री मौनी रात्रौ वनेषु च ॥ ६९ ॥ केशास्थिकण्टकामेध्यबलिभस्मतुषांस्तथा ॥
स्नानार्द्रां धरणीं चैव दूरतः परिवर्जयेत्॥७०॥पंथा देयो ब्राह्मणेभ्यो राजभ्यः स्त्रीभ्य एव च ॥ विद्याधिकस्य गुर्विण्या भारार्तस्य महीयसः॥७१॥

---

[१] समारभेत्—इ० पा० । [२] न संहताभ्यां हस्तभ्यां कंडूयादात्मनः शिरः—इ० पा० । [३] सनादं च—इ० पा० ।

मूकांधबधिराणां च मत्तस्योन्मत्तकस्य च ॥ उपानद्वस्त्रमाल्यं च धृतमन्यैर्न धारयेत् ॥ ७२ ॥ न हीदृशमनायुष्यं लोके किञ्चन विद्यते ॥ यादृशं
पुरुषस्येह परदारोपसेवनम् ॥७३॥ न चेर्ष्या स्त्रीषु कर्तव्या दारा रक्ष्याः प्रयत्नतः ॥ अनायुष्या भवेदीर्ष्या तस्मात्तां परिवर्जयेत् ॥ ७४ ॥ मूर्खो
न्मत्तव्यसनिनो विरूपान्मानिनस्तथा ॥ हीनांगानधिकांगांश्च विद्याहीनांश्च नाक्षिपेत् ॥ ७५ ॥ पानीयस्य क्रिया नक्तं तथैव दधिसक्तवः ॥
वर्जनीया महाराज निशीथे भोजनक्रियाः ॥ ७६ ॥ नोर्ध्वजानुश्चिरं तिष्ठेन्न रहस्यपरो भवेत् ॥ तद्वन्नोपविशेत्प्राज्ञः पादेनाक्रम्य वासनम् ॥७७॥
न चातिरक्तवासाः स्याच्चित्रासितधरोऽपि वा ॥ न च कुर्याद्विपर्यासं वाससो न विभूषणे ॥ ७८ ॥ स्त्रीं कृशां नावजानीयाद्दीर्घमायुर्जिजीविषुः ॥
ब्राह्मणं क्षत्रियं सर्वं सर्वे ह्याशीविषोपमाः ॥७९॥ हन्यादाशीविषः क्रुद्धो यावत्स्पृशति दंष्ट्रया ॥ क्षत्रियोऽपि दहेत्क्रुद्धो यावत्पश्यति तेजसा॥८०॥
ब्राह्मणः सकुलं हन्याद्ध्याने नावेक्षितेन च ॥ नातिकल्यं नातिसायं न च मध्यं दिने तथा॥८१॥ नाज्ञातैः सह गंतव्यं नैकेन बहुभिः सह ॥ नारुं
तुदः स्यान्न परोक्षवादी न सही नतः ॥ ८२ ॥ रोहते चाग्निना दग्धं वनं परशुना हतम् ॥ वचो दुरुक्तबीभत्सं न संरोहति चाशतम् ॥ ८३ ॥
नास्तिक्यं वेदनिंदां च देवतानां च कुत्सनम् ॥ द्वेषस्तंभादिमानस्य क्लैब्यं च परिवर्जयेत् ॥ ८४ ॥ न ब्राह्मणं परिवदेन्न नक्षत्राणि दर्शयेत् ॥
तिथिं पक्षस्य न ब्रूयाद्ययास्यायुर्न रिष्यते ॥ ८५ ॥ तेजो निष्ठीव्य वासश्च परिधायाचमेद्बुधः ॥ जितामित्रो नृपो यश्च बलवान्कर्मतत्परः ॥८६ ॥
तत्र नित्यं वसेत्प्राज्ञः कृतकृत्यः पतौ सुखम् ॥ पौराः सुसंहता यत्र सततन्यायवर्तिनः ॥ ८७ ॥ यत्र स्त्रियोऽमत्सरिण्यस्तत्र वासः सुखोदयः ॥
यस्मिन्कृषीवला राष्ट्रे प्रायशो नातिभाषिणः ॥ ८८ ॥ यत्रौषधान्यशेषाणि वसेत्तत्र विचक्षणः ॥ तत्र राजन्न वस्तव्यं यत्रैतत्त्रितयं सदा ॥ ८९ ॥
जिगीषुः पूर्ववैरं च जनश्च विरतोत्सवः ॥ तत्र राजन्न वस्तव्यं यत्र नास्ति चतुष्टयम् ॥ ९० ॥ ऋणप्रदाता वैद्यश्च श्रोत्रियः सजला नदी ॥ अव
लोक्यो न चादर्शो मलिनो बुद्धिमत्तरैः ॥ ९१ ॥ न च रात्रौ महाराज दीर्घराज्यमभीप्सता ॥ हेमकारगृहे चान्नमश्नीयान्न च विश्वसेत्॥ ९२ ॥
न च मित्रं प्रकुर्वीत हेमकारं कदाचन ॥ भिन्नभांडं च खट्वां च कुक्कुरं कुक्कटं तथा ॥९३॥ अप्रशस्तानि चत्वारि ये च वृक्षाः सकंटकाः ॥ भिन्न
भांडे बलिः प्रायः खट्वायां चेह निश्चयः ॥ ९४ ॥ नाश्नंति पितरस्तस्य यत्र कुक्कुरकुक्कटौ ॥ वृक्षमूले पिशाचानां सर्वेषामेव संस्थितिः ॥ ९५ ॥
अतस्तेषां तले भुंजन्नश्नुते पूयशोणितम् ॥ असंस्कृतान्नभुङ्मूत्रं बालादिप्रभवं स्वयम् ॥ ९६ ॥ सुवासिनीं गुर्विणीं च वृद्धां बालातुरांस्तथा ॥
भोजयेत्संस्कृतान्नेन प्रथमं चरमं गृही ॥ ९७ ॥ अघं स केवलं भुंक्ते बद्धगोवाहनादिकम् ॥ यो भुंक्ते च बहिर्ज्येष्ठप्रेक्षतामप्रदाय च ॥ ९८ ॥

वैश्वदेवं ततः कुर्याद्यावदाहुतयः क्रमात् ॥ प्रथमां ब्रह्मणे दद्यात्प्रजानां पतये ततः ॥ ९९ ॥ तृतीयां चैव गुह्येभ्यः कश्यपाय तथा पराम् ॥ तत
श्चानुमते दद्याद्दत्त्वा गृहबलिं ततः ॥ १०० ॥ पूर्वाख्यातं मया यत्ते नित्यकर्मक्रियाविधौ ॥ दद्यादथ धरित्रीणां दद्यात्तु मणिकत्रयम् ॥ १०१ ॥
प्राच्यादिक्रमयोगेन इंद्रादीनां बलिं क्षिपेत् ॥ ब्रह्मणे चान्तरिक्षाय सूर्याय च यथाक्रमम् ॥१०२॥ विश्वेभ्यश्चैवदेवेभ्यो विश्वभूतेभ्य एव च ॥ कृत्वा
पसव्यं वायव्यं यक्ष्मैतत्ते निवेदयेत् ॥१०३॥ ततश्चाग्रं समुद्धृत्य हंतकारोकपल्पितम् ॥ यथाविधि यथान्यायं ब्राह्मणायोपपादयेत् ॥१०४॥ दत्त्वा
विधिभ्यो देवेभ्यो गुरुभ्यः सुश्रुताय च ॥ पुण्यगंधांबरधरो माल्यधारी नरेश्वर ॥ १०५ ॥ नैकवस्त्रधरोऽश्नीयान्नार्द्रपादो महीपते ॥ विशुद्धव
दनः प्रीतो भुंजीत न विदिङ्मुखः ॥ १०६ ॥ प्राङ्मुखोदङ्मुखो वापि न चैवान्यमना नरः ॥ कुत्सितेन हतं चैव जुगुप्सावदसंस्कृतम् ॥१०७॥
दत्त्वा तु भुंक्ते शिष्टेभ्यःक्षुधितेभ्यस्तथा गृही ॥ प्रशस्तशुद्धपात्रेषु भुञ्जीताकुपितो नृप ॥ १०८ ॥ नासंदीसंस्थिते पात्रे नादेशे च नरेश्वर ॥ ना
काले नातिसंकीर्णे दत्त्वाग्रं च नरो मही ॥ १०९ ॥ अश्नीयात्तन्मयो भूत्वा पूर्वं तु मधुरं रसम् ॥ लवणोग्रौततः पश्चात्कटुतीक्ष्णादिकं ततः ॥
॥ ११० ॥ मार्दवं पुरुषोश्नन्वै मध्ये च कठिनाशनम् ॥ अंते पुनर्द्रवाशी च नरो रोगेण मुच्यते ॥१११॥ दिवाधानासु वसति रात्रौ च दधिस
क्तुषु ॥ अलक्ष्मीः कोविदारेषु सर्वदैव कृतालया ॥ ११२ ॥ अनिंद्यं भक्षयेन्नित्यं वाग्यतोऽन्नमकुत्सयन् ॥ भुक्त्वा सम्यग्यथाचम्य प्राङ्मुखोदङ्
मुखोऽपि वा ॥ ११३ ॥ यथावत्पुनराचामेत्पाणी प्रक्षाल्य यत्नतः ॥ अभीष्टदेवतानां च कुर्वीत स्मरणं नरः ॥ ११४ ॥ प्राणापानसमानानामुदा
नव्यानयोस्तथा ॥ अन्नं पुष्टिकरं चास्तु ममाद्याव्याहतं सुखम् ॥ ११५ ॥ अगस्तिरग्निर्वडवानलश्च भुक्तं प्रपान्नं जरयत्वशेषम् ॥ सुखं च मे तत्प
रिणामसंभवं यच्छत्वरोगं खलु वासुदेवः ॥ ११६ ॥ इत्युच्चार्य स्वहस्तेन परिमार्ज्यं तथोदरम् ॥ अनायासप्रदायीति कुर्यात्कर्माण्यतंद्रितः॥ ११७॥
संध्यायां पथिकः कश्चित्समागच्छति भारत ॥ पादशौचासनैः प्रह्वः स्वागतोक्त्या च पूजयेत् ॥ ११८ ॥ ततश्चान्नप्रदानेन शयनेन च पार्थिव ॥
दिवा तिथौ च विमुखो यदेकं पातकं भवेत् ॥११९॥ तदेवाष्टगुणं पुंसां सूर्ये हंसमुखे गते ॥ गच्छेच्छय्यामस्फुटितामपि दारुमयीं नृप ॥ १२० ॥
नाविशालां न वा भग्नां नासमां मलिनां न च ॥ न च जंतुमयीं शय्यां समातिष्ठेदनापदि ॥ १२१ ॥ प्राच्यां दिशि शिरः शस्तं याम्यायामपि
भूपते ॥ सदैव स्वपतां पुंसां विपरीतं तु रोगदम् ॥ १२२ ॥ ऋतावुपगमः शस्तः सपत्न्यां ह्यवनीपते॥पुण्यर्क्षे च शुभे काले पुत्रा युग्मासु रात्रिषु
॥ १२३ ॥ न चास्नातां स्त्रियं गच्छेद्गर्भिणीं न रजस्वलाम् ॥ नानिष्टां वै न कुपितां नाशस्तां न च रोगिणीम् ॥ १२४ ॥ नादक्षिणां नान्यकामां

नाकामां नान्ययोषितम् ॥ सुक्षामामत्यभुक्तां च स्वयं चैभिर्गुणैर्युतः ॥१२५॥ स्नातः सुगन्धधृग्धृष्टो न श्रांतः क्षुधितोऽपि वा ॥ सकामः सानु
रागश्च व्यवायं पुरुषो व्रजेत् ॥ १२६ ॥ चतुर्दश्यां तथाष्टम्यां पंचदश्यां च पर्वसु ॥ तैलाभ्यंगं तथा भोगान्योषितश्च विवर्जयेत् ॥ १२७ ॥ क्षुर
कर्मणि चांते च स्त्रीसंभोगे च भारत ॥ स्नायीत चैलवान्प्रातः कटभूमिमुपेत्य[1] च ॥ १२८ ॥ गुरोः पतिव्रतानां च तथा यज्ञतपस्विनाम् ॥ परि
वादं न कुर्वीत परिहासेऽपि भारत ॥ १२९ ॥ युगपज्जलमग्निं च बिभृयान्न विचक्षणः ॥ गुरुं देवान्प्रति तथा न च पादौ प्रसारयेत् ॥ १३० ॥
नाचक्षीत धयंतीं गां जलं नांजलिना पिबेत् ॥ वातातपौ न सेवेत अनुतापं च वर्जयेत् ॥१३१॥ दासं शपेन्न वै क्रुद्धः सर्वबन्धूनमत्सरी ॥ भीता
श्वासनकृत्साधुः स्वर्गस्तस्याव्ययं फलम् ॥ १३२ ॥ नोर्ध्वं तु पत्तनद्वारं निरीक्ष्य पर्यटेन्नरः॥ युगमात्रं महीपृष्ठे नरो गच्छेद्विलोकयन् ॥ १३३ ॥
शेषाहे त्वपि शेषांश्च वश्यात्मा यो निरस्यति ॥ तस्य धर्मार्थकामानां हानिर्नाल्पापि जायते ॥ १३४ ॥ वृथा मांसं न खादेत पृष्ठमांसं तथैव च ॥
आक्रोशं च विवादं च पैशुन्यं च विवर्जयेत् ॥ १३५ ॥ संयावं कृशरं मांसं शष्कुलीपायसं तथा ॥ आत्मार्थे न प्रकर्तव्यं देवतानां प्रकल्पयेत् ॥
॥ १३६ ॥ अजाश्च नावकर्षेत ता बहिर्धारयंति च ॥ रक्तमाल्यं न धार्यं स्याच्छुक्लं धार्यं तु पंडितैः ॥ १३७ ॥ वर्जयित्वात्र कमलं तथा कुव
लयं विभो ॥ रक्तं शिरसि धार्यं च तथा पानेयमित्यपि ॥ १३८ ॥ कांचनीयापि या माला सा न दुष्यति कर्हिचित् ॥ अन्यदेव भवेद्वासः शय
नीये नरोत्तम ॥ १३९ ॥ अन्यदर्चासु देवानामन्यद्धार्यं सभासु च ॥ पिप्पलं च वटं चैव शीर्णश्लेष्मांतकं तथा ॥ १४० ॥ उदुंबरं न खादेत
भवार्थी पुरुषोत्तमः ॥ पतितैश्च कथांते च च्छेदनं च विवर्जयेत् ॥ १४१ ॥ पतितः स्यान्नरो राजन्पतितैस्तु सहाचरन् ॥ वृद्धो ज्ञातिस्तथा मित्रं
दरिद्रो यो भवेदिह ॥ १४२ ॥ गृहे वा संस्थापितास्ते गृहवृद्धिमभीप्सता ॥ गृहे पारावता धन्याः शुकाश्च सहसारिकाः॥ १४३ ॥ भवंत्येते तथा
पापास्तथा वै तिलपायिकाः ॥ आजोक्षा चंदनं वीणा आदर्शो मधुसर्पिषी ॥ १४४ ॥ जलाग्नी चैव बिभृयाद्गृहे नित्यमिति स्थितिः॥ धनुर्वेदे च
सततं यत्नः कार्यो नराधिप ॥ १४५ ॥ हस्तिपृष्ठेऽश्वपृष्ठे च रथचर्यासु चैव हि ॥ यत्नवान्भव राजेन्द्र नयवान्सुखमेधते ॥ १४६ ॥ प्रजापालन
युक्तश्च न क्षांतिं लभते नृप ॥ यज्ञशास्त्रं च विज्ञाय शब्दशास्त्रं च भारत ॥ १४७ ॥ गांधर्वशास्त्रं विज्ञेयं कला ज्ञेयाश्च भारत ॥ पुराणमिति
हासं च तथाख्यानानि यानि च ॥ १४८ ॥ एष ते लक्षणोद्देश आचारस्य प्रकीर्तितः ॥ शेषाश्च वेद्या वृद्धेभ्यः प्रत्याहार्या नराधिप ॥ १४९ ॥

---

[1] कष्टभूमिम्–इ० पा० ।

आचारो भूतिजनन आचारः कीर्तिवर्धनः ॥ आचाराद्वर्धते ह्यायुराचारो हंत्यलक्षणम् ॥ १५० ॥ आगमानां हि सर्वेषामाचारः श्रेष्ठ उच्यते ॥ आचारः परमो धर्म आचाराद्वर्धते धनम् ॥ १५१ ॥ पुण्यं यशस्यमायुष्यं स्वर्ग्यं स्वस्त्ययनं महत् ॥ सर्ववर्णानुकंपार्थं मयैतत्समुदाहृतम् ॥ ॥ १५२ ॥ आचार एव नरपुंगव सेव्यमानो धर्मार्थकामफलदो भवतीह पुंसाम् ॥ तस्मात्सदैव विदुषावहितेन राजञ्छास्त्रोदितो ह्यनुदिनं परिपालनीयः ॥ १५३ ॥ इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे सदाचारधर्मवर्णनं नाम पञ्चाधिकद्विशततमोऽध्यायः ॥ २०५ ॥ छ ॥ ॥ नारद उवाच ॥ ॥ दीर्घायुरारोग्यकुलादिवृद्धियुक्तः पुमान्येन गुणान्वितः स्यात् ॥ मुहुर्मुहुर्जन्मनि येन सम्यग्व्रतं मम ब्रूहि तदिंदुमौलेः ॥ १ ॥ ॥ श्रीभगवानुवाच ॥ ॥ त्वया पृष्टमिदं सम्यगमुत्राक्षयकारकम् ॥ रहस्यं ते प्रवक्ष्यामि यत्पुराणविदो विदुः ॥ २ ॥ रोहिणीचन्द्रशयनं नाम व्रतमिहोत्तमम् ॥ तस्मिन्नारायणस्यार्चामर्चयेदिंदुनामभिः ॥ ३ ॥ यदा सोमदिनयुक्ता भवेत्पंचदशी क्वचित् ॥ अथ वा ब्रह्मनक्षत्रं पौर्णमास्यां प्रजायते ॥ ४ ॥ तदा स्नानं नरः कुर्यात्पंचगव्यं च सर्षपैः ॥ आप्यायस्वेतिं च जपेद्विद्वानष्टशतं पुनः ॥ ॥ ५ ॥ शूद्रोऽपि परया भक्त्या पाखंडालापवर्जितः ॥ सोमाय वरदायाथ विष्णवे च नमोनमः ॥ ६ ॥ कृतजप्यः स्वभवनमागत्य मधुसूदनम् ॥ पूजयेत्फलपुष्पैश्च सोमनामानि कीर्तयेत् ॥ ७ ॥ सोमाय शांताय नमोऽस्तु पादावनंतनाम्ने ह्यनुजानु जंघे ॥ ऊरुद्वयं चापि वृकोदराय संपूजयेन्मेढ्रमनंगबाहवे ॥ ८ ॥ नमोनमः कामसुखप्रदाय कटिः शशांकस्य समर्चनीया ॥ तथोदरं चाप्यमृतोदराय नाभिः सुपूज्या विधिलोचनाय ॥ ९ ॥ नमोऽस्तु चन्द्राय मुखं प्रपूज्य हनुर्द्विजानामधिपाय पूज्या ॥ आस्यं नमश्चंद्रमसेभिपूज्यमोष्ठौ कुमुत्खंडवनप्रियाय ॥ १० ॥ नासा च नाथाय वनौषधीनां ह्यानंन्ददायाथ पुनर्भ्रुवोश्च ॥ नेत्रद्वयं नीलकुमुत्प्रियाय चेंदीवरश्यामकराय चोरः ॥ ११ ॥ नमः समस्ताध्वरवंदिताय कर्णद्वयं दैत्यनिषूदनाय ॥ ललाटमिंदोरुदधिप्रियाय केशाः सुषुम्णाधिपतेः प्रपूज्याः ॥ १२ ॥ शिरः शशांकाय नमोऽसुरारेर्विश्वेश्वरायेति नमः किरीटम् ॥ पद्मप्रिये रोहिणि नाम लक्ष्मि सौभाग्यसौख्यामृततारकायै ॥ १३ ॥ देवीं च संपूज्य सुगन्धधूपैर्नैवेद्यपुष्पादिभिरिंदुपत्नीम् ॥ प्रपूज्य भूमौ पुनरुत्थितेन स्नात्वा च विप्राय हविष्ययुक्तः ॥ १४ ॥ देयः प्रभाते स हिरण्यवारिकुंभो मनःपापविनाशनाय ॥ संप्राश्य गोमूत्रममांसमन्नमक्षारमष्टावथ विंशतिं च ॥ १५ ॥ ग्रासान्पयः सर्पियुतानुपोष्य भुक्त्वेतिहासं शृणुयान्मुहूर्तम् ॥ कदंबनीलोत्पलकेतकानि जाती सरोजं शतपत्रिका च ॥ १६ ॥ अम्लानकुब्जानथ सिंदुवारपुष्पं पुनर्नारद मल्लिकायाः ॥ मुक्तं च विष्णोः करवीरपुष्पं श्रीचंपकं चंद्रमसश्च देयम् ॥ १७ ॥

श्रावणादिषु मासेषु क्रमादेतानि सर्वदा ॥ यस्मिन्मासे व्रतादिः स्यात्पुष्पैरभ्यर्चयेद्धरिम् ॥ १८ ॥ एकसंवत्सरं यावदुपोष्य विधिवन्नरः ॥ व्रतांते
शयनं दद्यादर्पणोंपस्करान्वितम् ॥ १९ ॥ रोहिणीचंद्रमिथुनं कारयित्वा तु कांचनम् ॥ चंद्रः षडंगुलः कार्यो रोहिणी चतुरंगुला ॥ २० ॥ मुक्ता
फलाष्टकयुतं सितनेत्रपटावृतम् ॥ क्षीरकुंभोपरि पुनः कांस्यपात्राक्षतान्वितम् ॥ २१ ॥ दद्यान्मंत्रेण पूर्वाह्णे शालीक्षुफलसंयुतम् ॥ श्वेतामथ सुव
र्णास्यां रौप्यखुरसमन्विताम् ॥ २२ ॥ सवस्त्रभाजनां धेनुं तथा शंखं च शोभनम् ॥ भूषणैर्द्विजदांपत्यमलंकृत्य गुणान्वितम् ॥ २३ ॥ चंद्रोऽयं
द्विजरूपेण सभार्य इति कल्पयेत् ॥ यथा न रोहिणी कृष्ण शयनं त्यज्य गच्छति ॥ २४ ॥ सोमरूपस्य ते तद्वन्ममाभेदोऽस्तु मूर्तिभिः ॥ यथा
त्वमेव सर्वेषां परमानंदमुक्तिदः ॥ २५ ॥ भुक्तिर्मुक्तिस्तथा भक्तिस्त्वयि [1]यज्ञेऽस्तु मे दृढा ॥ इति संसारभीतस्य मुक्तिकामस्य चानघ ॥ २६ ॥
रूपारोग्यायुषामेतद्विधायकमनुत्तमम् ॥ इदमेव पितॄणां च सर्वदा वल्लभं मुने ॥ २७ ॥ त्रैलोक्याधिपतिर्भूत्वा शतकल्पशतत्रयम् ॥ चंद्रलोकम
वाप्नोति पुनरावृत्तिदुर्लभम् ॥ २८ ॥ नारी वा रोहिणी चंद्रशयनं वा समाचरेत् ॥ साऽपि तत्फलमाप्नोति पुनरावृत्तिदुर्लभम् ॥ २९ ॥
इति पठति शृणोति वा य इत्थं मधुमथनार्चनमिंदुकीर्तनेन ॥ मतिमपि च ददाति सोऽपि शौरेर्भवनगतः परिपूज्यतेऽमरौघैः ॥ ३० ॥ ॥
इति श्रीभविष्ये महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे नारदमहेश्वरसंवादे रोहिणीचंद्रशयनव्रतविधिवर्णनं नाम षडधिकद्विशत
तमोऽध्यायः ॥ २०६ ॥ छ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥ व्रतं दानमथो राजंस्तव धर्माः प्रकाशिताः ॥ [2]धर्ममूलं यतश्चेदं तस्माद्धर्मपरो
भव ॥ १ ॥ जानताऽपि मया पार्थ कामार्थौ न प्रकाशितौ ॥ यतः स्वयं प्रवृत्तोत्र लोकः किमनुवर्ण्यते ॥ २ ॥ कामिनो वर्णयन्कामाँल्लोभं लुब्ध
स्य वर्णयन् ॥ नरः किं फलमाप्नोति कूपेंऽधमिव पातयन् ॥ ३ ॥ भविष्योत्तरमेतत्ते कथितं पांडुनंदन ॥ सदाचारवतां पुंसां व्रतदानसमु
च्चयः ॥४॥ यद्दृष्टमितिहासेषु पुराणेषु च भारत ॥ [3]वेदवेदांगसंबद्धं तत्सर्वमिह दर्शितम् ॥५॥ लोकवेदविरुद्धं यत्कथ्यते मनुजोत्तम ॥ न तत्रास्था
प्रकर्तव्या विप्रलापो हि स स्मृतः ॥ ६ ॥ अतिस्नेहेन भवतो ममैतत्[4]संमुदाहृतम् ॥ ऋषीणां पुरतः पार्थ कुंठा भवति भारती ॥ ७ ॥ नैतत्प्रकाश
नीयं हि दांभिकाय शठाय वा ॥ नास्तिकायान्यमनसे [5]कुतर्कोपहताय च ॥ ८ ॥ साधु वृत्ताय दांताय सत्यार्जवरताय च ॥ एतदाख्यायमानं हि
[6]शुभांमुत्पादयेद्गतिम् ॥९॥ सामान्यमेतत्सुरसत्तमानां वर्णाश्रमाणां च नरेंद्रचन्द्र ॥ ख्यातं भविष्योत्तरनामधेयं मया पुराणं तव सौहृदेन ॥१०॥

---

[1] बंधे–इ० पा० । [2] मया विचार्य तत्रैव–इ० पा० । [3] वेदवेदांतसंबद्धम्–इ० पा० । [4] संप्रदार्शितम्–इ० पा० । [5] कुकर्मविहिताय च–इ० पा० । [6] परामुत्पादयेद्गतिम्–इ० पा० ।

धर्मः स्वयं पार्थ भवानिह त्वं धर्मार्थविद्दृष्टपरावरश्च ॥ पृष्टोऽस्म्यतो धर्ममहं च वच्मि श्रद्धेयमेतत्सुतरां जनस्य ॥ ११ ॥ यास्याम्यहं द्वारवतीं पुनश्च यज्ञं समेष्यामि महोत्सवे च ॥ कालस्य सर्वं हि वशे विदित्वा नैवानुतापो भवतात्र कार्यः ॥ १२ ॥ इत्युक्तवान्यातुकामः प्रहृष्टः संपूजितः पांडुसुतैर्महात्मा ॥ पृष्ट्वा सुहृज्ज्ञातिजनं हि सर्वं जगाम विप्रान्प्रणिपत्य कृष्णः ॥ १३ ॥ यद्याज्ञवल्क्यमुनिना भगवान्वशिष्ठः पृष्टः किलोत्तरमुवाच बहुप्रकारम् ॥ कृष्णेन पांडुतनयस्य च यत्प्रदिष्टं व्यासेन तत्कृतमहो मुनिपुंगवेन ॥ १४ ॥ जयति पराशरसूनुः सत्यवतीहृदयनंदनो व्यासः ॥ यस्यास्यकमलगलितं वाङ्मधुपुण्यं जगत्पिबति ॥१५॥ इति श्रीभविष्ये[1] महापुराण उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे समाप्तिवर्णनं श्रीकृष्णस्य द्वारकां प्रति गमनवर्णनं नाम सप्ताधिकद्विशततमोऽध्यायः ॥ २०७ ॥ ॥ ॥ छ ॥ ॥ (अथ वृत्तांताः[2] ॥) व्यासानुगमनं पूर्वं ब्रह्मांडस्य समुद्भवः ॥ माया च वैष्णवी यस्मात्संसारे दोषकीर्तनम् ॥ १ ॥ पापभेदस्ततस्तस्माच्छुभाशुभविनिर्णयः ॥ शंकटव्रतमाहात्म्यं[3] तिलकव्रतकीर्तनम् ॥ २ ॥ अशोककरवीराख्यं व्रतं तस्माच्च कोकिलम् ॥ बृहत्तपोव्रतं नाम रुद्रोपोषणमेव च ॥ ३ ॥ द्वितीयाव्रतमाहात्म्यमशून्य[4]शयनं तथा ॥ कामाख्या तु तृतीया च मेघपालीव्रतं[5] तथा ॥ ४ ॥ पंचाग्निसाधना रम्या तृतीयाव्रतमुत्तमम् ॥ त्रिरात्रं गोष्पदं नाम हरकालीव्रतं तथा ॥ ५ ॥ ललिताख्या तृतीया च योगाख्या च तथापरा ॥ उमामहेश्वरं नाम तथा रंभातृतीयकम् ॥ ६ ॥ सौभाग्याख्या तृतीया च आर्द्रानंदकरी तथा ॥ चैत्रे भाद्रपदे मावे तृतीयाव्रतमुच्यते ॥ ७ ॥ अनंतरी तृतीया च गणशांतिव्रतं तथा ॥ सारस्वतव्रतं नाम पंचमीव्रतमुच्यते ॥ ८ ॥ तथा श्रीपंचमी नाम षष्ठी शोकप्रणाशिनी ॥ फलषष्ठी च मंदारषष्ठीव्रतमथोच्यते ॥ ९ ॥ ललिताव्रतषष्ठी च षष्ठी कार्तिकसंज्ञिता ॥ महत्तपः सप्तमी च विभूषा[6] सप्तमी तथा ॥ १० ॥ आदित्यमंडपविधिस्त्रयोदशीति सप्तमी ॥ कुक्कवाकुप्लवङ्गा च तथैवाभयसप्तमी ॥ ११ ॥ कल्याँण[7]सप्तमी नाम शर्करासप्तमीव्रतम् ॥ सप्तमी कमला[8]ख्या च तथान्या शुभसप्तमी ॥ १२ ॥ स्नपनव्रतसप्तम्यौः तथैवाचलसप्तमी ॥ बुधाष्टमीव्रतं नाम तथा जन्माष्टमीव्रतम् ॥ १३ ॥ दूर्वाकृष्णाष्टमी प्रोक्ता अनयां[9]व्रतमष्टमी ॥ अष्टम्यर्काष्टमी चाथ श्रीवृक्षनवमीव्रतम् ॥ ॥ १४ ॥ ध्वजाख्या नवमी चैव उल्काख्या नवमी तथा ॥ दशावतारव्रतकं तथाशादशमीव्रतम् ॥ १५ ॥ रोहिणींद्रहरिशंभुब्रह्मसूर्यावियोगकम् ॥

---

१ भविष्यम्–इ० पा० । २ अष्टमीवृत्तान्ताः–इति–पुस्तकद्वये पाठः । ३ संकटव्रतमाहात्म्यम्–इ० पा० । ४ अनंग्यं शयनं तथा–इ० पा० । ५ मेषपाली व्रतं तथा–इ० पा० । ६ विभूयासप्तमीतथा–इ० पा० । ७ कल्पनासप्तमी–इ० पा० । ८ वामलाख्या च–इ० पा० । ९ जनयाव्रतम्–इ० पा० ।

गोवत्सद्वादशी नाम व्रतमुक्तं ततः परम् ॥ १६ ॥ नीराजनद्वादशी च भीष्मपंचकमेव च ॥ मल्लिकाख्या द्वादशी च भीमा द्वादशिकोत्तमा ॥
॥ १७ ॥ श्रवणद्वादशी नाम संप्राप्तिद्वादशीव्रतम् ॥ गोविन्दद्वादशी नाम व्रतमुक्तं ततः परम् ॥१८॥ अखंडद्वादशी नाम तिलद्वादश्यतः परम् ॥
सुकृतद्वादशी नाम धरणीव्रतमेव च ॥ १९ ॥ विशोकद्वादशी नाम विभूतिद्वादशीव्रतम् ॥ पुष्यर्क्षद्वादशी चैव द्वादशी श्रवणर्क्षगा ॥ २० ॥
अनंगद्वादशी चैव अङ्कपादव्रतं तथा ॥ निम्बार्ककरवीराथ यमा दर्शत्रयोदशी ॥ अनंगद्वादशी चापि पालिरम्भाव्रते तथा ॥ २१ ॥ चतुर्दशीव्रतं
प्रोक्तं ततोऽनन्तचतुर्दशी ॥ श्रावणी[1]व्रतनक्तं च चतुर्दश्यष्टमीदिने ॥ २२ ॥ व्रतं शिवचतुर्दश्यां फलत्यागचतुर्दशी ॥ वैशाखी कार्तिकी माघीव्रत
मेतदनंतरन् ॥ २३ ॥ कार्तिक्यां कृत्तिकायोगे कृत्तिकाव्रतमीरितम् ॥ फाल्गुने पूर्णिमायां तु व्रतं पूर्णमनोरथम् ॥ २४ ॥ अशोकपूर्णिमा नाम
अनंतव्रतमेव च ॥ व्रतं हि सांभरायिण्यं नक्षत्रपुरुषव्रतम् ॥ २५ ॥ शिवनक्षत्रपुरुषं संपूर्णं येन मुच्यते ॥ कामदानव्रतं नाम वृन्ताकविधिरेव च
॥ २६ ॥ आदित्यस्य दिने नक्तं संक्रात्युद्यापने फलम् ॥ भद्रा[2]व्रतमगस्त्यार्घो नवचन्द्रार्कमेव च ॥ २७ ॥ अर्घः शुक्रबृहस्पत्योः पंचाशीति
व्रतानि च ॥ माघस्नानं नित्यस्नानं रुद्रस्नानविधिस्तथा ॥ २८ ॥ चंद्रार्कग्रहणे स्नानं विधिश्चान्नाशने तथा ॥ वापीकूपतडागानामुत्सर्गो
वृक्षयाजनम् ॥ २९ ॥ देवपूजादीपदानवृषोत्सर्गविधिस्तथा ॥ फाल्गुन्युत्सवकं नाम तथान्यः सदनोत्सवः ॥ ३० ॥ भूतमाता च श्रावण्यां रक्षा
बंधविधिस्तथा ॥ विधिस्तथा नवम्यास्तु तथा चन्द्रमहोत्सवः ॥ ३१ ॥ दीपालिकायां तु होमो लक्षहोमविधिस्तथा ॥ कोटिहोमो महाशीतिर्ग
णनाथस्य शांतिका ॥ ३२ ॥ तथा नक्षत्रहोमोथ गोदानविधिरेव च ॥ गुडधेनुघृतधेनुतिलधेनुव्रतं तथा ॥ ३३ ॥ जलधेनुविधिः प्रोक्तो लवण
स्य तथा परा ॥ धेनुः कार्या समं ज्ञात्वा नवनीतस्य चापरा ॥ सुवर्णधेनुश्च तथा देवकार्यं चिकीर्षुभिः ॥ ३४ ॥ इति श्रीभविष्ये महापुराण
उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे संक्षिप्तानुक्रमणिकाकथनं नामाष्टोत्तरद्विशततमोऽध्यायः ॥ २०८ ॥ ॥ छ ॥ ॥ ॥

इति चतुर्थमुत्तरपर्व ॥ ४ ॥

समाप्तोऽयं भविष्यपुराणग्रन्थः ।

---

[1] आवनीव्रतनक्तं च–इ० पा० । [2] भद्राशतम्–इ० पा० ।

इदं पुस्तकं मुम्बय्यां श्रीकृष्णदासात्मजक्षेमराजश्रेष्ठिना
स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) मुद्रणालये मुद्रितम् ।
संवत् १९६७ शके १८ ३२.

विक्रेयपुस्तकानि-(महापुराणग्रन्थाः ।)

नाम	की. रु. आ.
पद्मपुराण—संपूर्ण ५५००० ग्रन्थ छः खण्डोंमें शुद्धतापूर्वक, कईएक व्रतादिमाहात्म्य, तीर्थमाहात्म्य, शिवविष्णु महिमा, रुद्राक्ष तुलसी माहात्म्यादि सृष्टिखण्ड, भूमिखण्ड, स्वर्गखण्ड, ब्रह्मखंड पातालखण्ड, उत्तरखण्ड क्रियायोगखण्डमें सांगोपांग वर्णन है। यह ग्रन्थ वैष्णवोंके अत्यन्त उपयोगी है	१५–०
श्रीमद्भागवत—श्रीधरीटीका और टिप्पणीसह. ग्लेज कागज ...	१०–०
श्रीमद्भागवत—भावार्थदीपिकाप्रकाश टीका—यह टीका श्रीधरी टीकापर बहुतही उत्तम लगाती है। ग्रन्थ संख्या १२५००० सवालक्ष है. औरभी कई टीकाओंका सार इसमें आगया है	२१–०
श्रीमद्भागवत एकादशस्कन्धः—श्रीधरीटीकया सन्दर्भ—विश्वनाथी—दीपिकादीपनादिपर्यायोपेतवंशीधरीयतद्भावार्थदीपिकाप्रकाशटीकया चोपेतः	२–८
श्रीमद्भागवत—सचूर्णिका मोटे अक्षर उत्तम कागज सप्ताह बांचनेवालोंको परमोपयोगी है ... ... ग्लेज	७–०
” तथा देशी कागज	६–०
श्रीमद्भागवत—नवीन सुबोधिनीटीका समेत पढनेवालों व सप्ताह बाँचनेवालोंको परमोपयोगी है. इसमें प्रत्येक श्लोकके अन्वय और अन्वयानुसार पर्यायशब्द होनेसे यह ग्रंथ नवीन साधारण विद्यार्थियोंसे वृद्ध महापंडितोंतक सर्व सज्जन विद्वज्जनोंको परमादरणीय हुआ है. श्रीभगवद्भक्तोंको सरल सुबोधव्याख्या सहित श्रीमद्भागवत संग्रह करनेकी इच्छा केवल इस सुबोधिनीटीकासमेत श्रीमद्भागवतसेही पूर्ण हो सकती है. अवश्य इस ग्रंथको संग्रह करके विद्यार्थियोंको पढाओ. सप्ताह बाँचो और तत्त्वज्ञानको संपादन करके अनायाससे मुक्ति फलका लाभ लेओ. इससे सरल और सुबोधव्याख्या अन्यत्र कहीं हुई नहीं है. मूल्य बहुतही अल्प रखा है	१२–०
श्रीमद्भागवत—मूल (गुटका) रेशमी जिल्द बँधीहुई नित्यपाठकरनेयोग्य	१–८
श्रीमद्भागवत—भाषाटीका माहात्म्य और शंकासमाधानसह अत्युत्तम जिसमें ५०० दृष्टांत कथाके सिवाय हैं, नई छपी है ग्लेज कागज	१२–०
” तथा देशी कागज	११–०

नाम	की. रु. आ.
श्रीमद्भागवत–मूलश्लोक और आनन्दाम्बुनिधि पद्यभाषाटीकासमेत (रीवाँधीश महाराज रघुराजसिंहदेवजूकृत)	१५–०
श्रीमद्भागवत–दशमस्कन्ध मात्र भाषाटीका दृष्टान्त सहित ...	४–०
श्रीमद्भागवताद्यपद्यव्याख्याशतक–(जन्माद्यस्य श्लोकके सौअर्थ)	२–०
भागवतलीला कल्पद्रुम–श्रीमद्भागवतके सब चारित्र (जन्माद्यस्य इस श्लोकसे)	१–४
दशमस्कन्ध–श्रीधरीटीकासमेत	३–०
श्रीमद्भागवतमाहात्म्य–सटीक संस्कृत	०–१०
श्रीमद्भागवत–भाषाटीकासह भक्तिमाहात्म्य और गोकर्णोत्पत्ति विप्रमोक्ष भागवत श्रवण विधि इत्यादि है	०–२
नारदपुराण–सम्पूर्ण इस ग्रन्थमें पुराण वर्णन आश्रमादि धर्म गंगामाहात्म्य धर्माख्यान धर्मकथन धर्मशास्त्र निर्देश वामनावतार वर्णन बृहदुपाख्यान कृष्णमंत्रवर्णन अष्टादशपुराणसार पुराण महिमादि पूर्वभागमें है. उत्तरभागमें एकादशी द्वादश्यादिव्रत मोहिनीदर्शन मातृसन्मान कार्तिकमाहात्म्य माघमाहात्म्य गंगामाहात्म्य गयामाहात्म्य काशीमाहात्म्य पुरुषोत्तममाहात्म्य प्रयागमाहात्म्य कुरुक्षेत्रमाहात्म्य हरिद्वारमाहात्म्य बद्रीमाहात्म्य कामाक्षिमाहात्म्य प्रभासक्षेत्रमाहात्म्य पुष्करमाहात्म्य गौतमाश्रममाहात्म्य गोकर्णमाहात्म्य सेतुमाहात्म्य नर्मदातीर्थमाहात्म्य अवंतिकामाहात्म्य मथुरामाहात्म्य वृन्दावनमाहात्म्य इत्यादि २४००० मूल मात्र है	७–०
शिवपुराण–बडा–२४०००मूलमात्र–इसमें विद्येश्वर संहिता २००० रुद्रसंहिता १०५३०शतरुद्रसंहिता२१६०कोटिरुद्रसंहिता२२४० उमासंहिता १८४० कैलाससंहिता १२५० और वायवीयसंहिता ४००० है. बहुत परिश्रमसे यह अलभ्यग्रंथ मिला है. और बहुत विद्वानोंकी संमतिसे शुद्धकर छापागया है. मूल मात्र ...	७–०
शिवपुराण–उपरोक्त पं० ज्वालाप्रसाद मिश्रकृत भाषाटीकासमेत ...	१६–०
शिवपुराणमाहात्म्य–मूल	०–३
ब्रह्मपुराण–संपूर्ण मूल संस्कृत...	५–०
ब्रह्मांडपुराण–संपूर्ण	५–०
आदिपुराणमूल–सम्पूर्णपुराणोंका सार यह आदिपुराण व्यासदेवने २९ अध्यायोंमें वर्णन कियाहै । इसमें सूत और शौनकमुनिके समागमके समय शौनकने सन्ध्याकालका तथा कलियुगके दोषोंका ऐसा विचित्र रूप दर्शायाहै कि पढते २ मन मुग्ध होजाताहै । कृष्णभगवान्के जन्मसे लेकर उनकी अनेक लीला रामवतारकी चर्चा	

नाम	की. रु. आ.
तथा वैष्णवोंकी उपयोगी अनेक चित्ताकर्षक कथा इसमें लिखीहुईहैं ।	०—१२
अग्निपुराण—इसमें शास्त्रकलाओंका संक्षेप वर्णन सर्वदेवताओंकी प्रतिष्ठा लक्षकोटि आदि होम शिल्पशास्त्र, राजधर्म, राजनीति युद्धरचना भारतसार, रामायणसार, ईश्वरावतार, सर्वतिथिवारनक्षत्रादि व्रत षट्प्रयोग, गन्धर्ववेद, भरतशास्त्र, काव्य नाटकभेद, स्त्रीशिक्षा रत्नादिपरीक्षा, वेदशास्त्रादि बहुतसे विषयोंका अपूर्व वर्णन है	४—०
ब्रह्मवैवर्त्तपुराण—संपूर्ण चारोंखण्ड—जिसमें कृष्णजन्मखण्ड, प्रकृतिखण्ड, गणेशखण्ड, और ब्रह्मखण्ड इसमें श्रीकृष्णजीके अपूर्व चारित्र कथास्तोत्रादि और नारदादिकी उत्पत्ति गंगोपाख्यान सावित्र्युपाख्यान लक्ष्मीकी उत्पत्ति मनसादेवीउपाख्यानादि वर्णित हैं.	७—०
ब्रह्मवैवर्त्तपुराण—प्रकृतिखण्ड गणेशखण्ड और ब्रह्मखण्ड	३॥—०
ब्रह्मवैवर्त्तपुराण—कृष्णजन्मखण्ड श्रीकृष्णचरित्र अपूर्व वर्णित है....	३॥—०
मार्कंडेयपुराण—सप्तशती शान्तनवीटीकासह इसमें मार्कंडेय और जैमिनिका सत्संग और संवाद अप्सराओंपर दुर्वासामुनिका शाप कंकके मारेजानेपर विद्युतरूप राक्षसका माराजाना । पक्षियोंके जन्म और चारित्र और देवीजीका महात्म्य संयुक्त है	४—०
मार्कंडेयपुराण—पं॰ कन्हैयालाल मिश्रकृत भाषाटीकासमेत	६—०.
मत्स्यपुराण—जगत्की रचनाकेहेतु और मत्स्यावतार धारण करनेका कारण प्रलय होनेका कालपूर्वक वर्णन ब्रह्माके चारमुख होनेका कारण और दानवगन्धर्वकी उत्पत्ति सूर्यवंश चंद्रवंशका वर्णन इत्यादि अपूर्व कथाहैं	५—०
वायुपुराण—इसमें अनेक विषय संयुक्त देवादि सृष्टिवर्णन मन्वन्तरादि चतुर्युगाख्यान पृथुवंशकीर्तन श्राद्धक्रिया वर्णन और गयामाहात्म्यादि बहुतसे विषय हैं	५—०
वाराहपुराण—धर्म अर्थ काम मोक्षादि सिद्धहोनेके लिये इतिहास संयुक्त कथाओंका वर्णन है	४—०
ब्रह्मोत्तरखण्ड मूल—स्कंदपुराणोक्त, शिवभक्तका अपूर्व इतिहास और शिव कवचादि हैं	०—१०

संपूर्ण पुस्तकोंका "बड़ासूचीपत्र" अलग है मंगाकर देखिये.

पुस्तकोंके मिलनेका ठिकाना—खेमराज श्रीकृष्णदास, "श्रीवेङ्कटेश्वर" स्टीम्–यन्त्रालय, खेतवाडी—बंबई.

अत्रेयमभ्यर्थना।

अत्रास्माकं मुद्रणालये ऋग्वेदादयो वेदा उपनिषदो वेदान्तग्रंथा महाभारतादीतिहासाः श्रीमद्भागवतादिमहापुराणोपपुराणानि धर्मशास्त्र-कर्मकाण्ड-व्याकरण-न्याय-योग-सांख्य-मीमांसादिशास्त्रीयग्रन्थाः काव्य-नाटक-चम्पू-प्रभृतयो ग्रन्थाः सहस्रनामाद्यनेकस्तोत्रग्रन्थाश्च विविधभाषाग्रन्थाश्च सीसकोत्तममहल्लकाक्षरैर्मनोहरं मुद्रिता आसते योग्यमूल्येन विक्रय्याः सन्ति तांश्च ग्राहका यथापुस्तकसूचीपत्रं मूल्यप्रेषणेन प्राप्नुयुः।

अधिकमस्मदीयसूचीपुस्तकानां भिन्नभिन्नविषयाणां प्रापणेन "श्रीवेङ्कटेश्वरसमाचार" पत्रिकाप्रापणारा च ज्ञेयमिति शम्।

खेमराज श्रीकृष्णदास-"श्रीवेङ्कटेश्वर" स्टीम्-मुद्रणालयाध्यक्ष-मुंबई.

॥ ❋ ॥ इति श्रीभविष्यमहापुराणं समाप्तम् ॥ ❋ ॥

```
[OrderDescription]
,CREATED=19.12.19 12:05
,TRANSFERRED=2019/12/19 at 12:21:53
,PAGES=143
,TYPE=STD
,NAME=S0002366
,Book Name=123456
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
```

```
FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
```

```
FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
```

```
FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
```

```
FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
```

```
FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
```

```
FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,
```